॥ श्रीमत्सटिप्पणतात्पर्यचंद्रिकाप्रारंभः ॥

ता. चं. १

SGDF
Sri Gurgeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ **प्रकाशः** ॥ समस्तगुणसंपूर्णंसर्वदोषविवर्जितं ॥ ज्ञानिप्रियतमंवंदे मुक्तिदंकमलापतिं ॥ १ ॥ शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः ॥ पूर्णप्रज्ञपदांभोजपांसवःपांतुनःसदा ॥ २ ॥ विधूतदुर्मतध्वांतोविशदीकृतप द्धतिः ॥ यःसज्जनानुज्जहारजयतीर्थरविंभजे ॥ ३ ॥ पदवाक्यप्रमाणज्ञान्संप्रदायार्थकोविदान् ॥ व्यासतीर्थमुनीन्सेवेदुर्वादिफणिपक्षिपान् ॥ ४ ॥ अस्मद्देशिकपादानांप्रणम्यचरणांबुजं ॥ तात्पर्यचंद्रिकाव्याख्यांविधास्यामियथामति ॥ ५ ॥ तत्वप्रकाशिकाव्याख्याव्याजेनाधिसू त्रंप्रवर्तमानेषुग्रंथेषु दुर्गमार्थान्सुगमान्विधित्सुर्व्यासतीर्थमुनिः प्रारिप्सितग्रंथपरिसमाप्त्याद्यर्थं अध्यायचतुष्टयोक्तगुणविशिष्टदेवतानतिरूपं

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ अस्पृष्टदोषगंधायकल्याणगुणसिंधवे ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ **गुरुराजीयं** ॥ सकलसुगुणपात्रंसर्वदोषैकजैत्रंसुमतिसुगतिदात्रंसुष्टुसज्ज्ञाननेत्रं । निखिलज निजनित्रंनित्यदुष्टैकनेत्रंनवनवसुचरित्रंनौमिलक्ष्मीकलत्रं ॥ १ ॥ शुभगुणगणगात्रंशुद्धविज्ञाननेत्रंश्रुतिविततचरित्रंश्रांततापातपत्रं । श्रमजलधिवहित्रंशांतिमंतःपवित्रं श्रयतविबुधमित्रंशक्तियोगींद्रपौत्रं ॥ २ ॥ विद्याख्यरत्नप्रभवायबुद्धौविद्योतमानायसुबृंहिताय । शुद्धायनित्यंमुनिसेवितायमध्वाद्भुतांभोनिधयेनमोस्तु ॥ ३ ॥ श्रीमद्या ससुशास्त्रदुग्ध(शुद्ध)जलधिंमध्वोक्तसत्तर्कदुस्तर्काख्यामरदानवाभृतमतिश्रेष्ठाहिहृद्भृता । आलोड्याखिलतत्वभासकमहारत्नानिचाप्तोत्सुधांसोयंयोगिमहेंद्रसन्निभ जयार्याख्योभवेन्मेमुदे ॥ ४ ॥ वेदव्यासमतापगापतिवरंश्रीमज्जयप्रोक्तिसत्सर्पावेष्टितमध्वसन्मुनिवरग्रंथागवर्येणयः । संलोड्याखिलसंनयामृतवरंतत्वादिसद्दीपिका सत्तात्पर्यसुचंद्रिकातरुवरंयस्तर्कसत्तांडवं ॥ ५ ॥ निष्कास्याद्भुतखंडनत्रयमुखव्याख्यानरत्नोच्चयंदृष्ट्वाकुत्सितयुक्त्यरातिपिहितांश्रीव्यासती(र्थाभिधः)र्थोबुधः । स्वो क्तिरक्षितुमत्रयःप्रतिपदंसम्यग्विशेषार्पकोविद्याधीशसुतीर्थसद्गुरुवरःकिंनावतीर्णःसहि ॥ ६ ॥ विद्याधीशंचंद्रिकाब्धिविक्रीडनविचक्षणं । विद्यागुरुंकुलगुरुंनौमितं

SGDF
Sri Gargeshwari Digital Foundation

प्र० मंगलंविदधाति ॥ **अस्पृष्टेति** ॥ असंबद्धदोषलेशायेतिद्वितीयाध्यायार्थः । "गंधोगंधकआमोदेसंबंधेलेशगर्वयो"रित्यभिधानात् । यंदोषलेशोपिनस्पृशतितस्माइतियावत् । बहुव्रीहेर्दोषगंधपदांतत्वेनकेवलगंधपदांतत्वाभावात् "अल्पाख्यायां"मितीत्वंनभवति । कल्याणानांगुणानांधर्माणांसिंधुरिवसिंधुराश्रयइत्याद्याध्यायार्थः । सत्त्वादीनांश्रुत्यादौगुणत्वप्रसिद्धेः मतांतरेदुःखादीनांगुणत्वोक्तेश्चतद्व्युदासाय कल्याणेति ॥ आद्यार्थस्यादौवाच्यत्वेपिद्वितीयार्थस्याद्यार्थहेतुत्वादादावुक्तिः । कल्याणधर्मत्वोपपादकत्वाद्वा । सदोषत्वेतस्यायोगात् । विघ्नादिदोषनिवृत्तेरादावपेक्षितत्वाद्वा । "तंयथायथोपासते"इत्यादेः । भक्तेभ्योभक्त्युपलक्षितवैराग्यश्रवणमननादिसाधनवद्भ्यः मुक्तिदायिनइत्यनेन तृतीयचतुर्थार्थोक्तिः । नमोनमइत्यादराद्द्विरुक्तिः । (एतद्योगात्)"नमःस्वस्ती"त्यादिनाचतुर्थी । एवंविधश्चनारायणइतिसूचयति ॥ **शेष**

नमोनमोभक्तमुक्तिदायिनेशेषशायिने ॥ १ ॥

गु० मेजगद्गुरुं ॥ ७ ॥ निशम्यसकलंशास्त्रंविद्याधीशाज्जगद्गुरोः । चंद्रिकायाःप्रकाशोयंकेशवेनप्रकाश्यते ॥ ८ ॥ ग्रंथादौमंगळमाचरति ॥ **अस्पृष्टेति** ॥ अध्यायचतुष्टयप्रतिपाद्यगुणविशिष्टतयापरदेवतास्तूयते । तत्र अस्पृष्टेतिद्वितीयाध्यायार्थः । अस्पृष्टोसंबद्धोदोषगंधोदोषलेशोयेनसतथोक्तस्तस्मै । अस्पृष्टदोषायेत्यनुक्त्वा अस्पृष्टदोषगंधायेतिगंधपदोपादानंतुएतद्व्याख्येयचिंतासंतापलेपोद्भवमृतिमुखराशेषदोषातिदूरमितिविशेषणगतातिदूरमितिपदाभिप्रायेण । कल्याणानांगुणानांधर्माणांसिंधुरिवसिंधुःआश्रयइतिआद्याध्यायार्थः । "सज्ज्ञानसुखशक्तिभिःपयोनिधिरिवे"ति "ज्ञानेनसूर्यइवे"ति "निखिलपूर्णगुणैरर्णःसमुद्रइवे"तिच तत्रतत्रटीकाकारैस्तृतीयासमासाश्रयणादत्रापिकल्याणगुणैःसिंधुःसमुद्रइवेति । "तृतीये"तियोगविभागात्तृतीयातत्पुरुषइतिवा । कल्याणत्वेनगुणविशेषणंतु वीर्यादिदेहमित्यत्रत्यादिशब्दसंग्राह्यतावच्छेदकधर्मसूचनार्थं । यद्यपि अध्यायद्वयार्थकथनरूपटीकाग्रंथक्रमानुरोधेनकल्याणगुणसिंधवइत्याद्याध्यायार्थोक्त्यनंतरमस्पृष्टदोषगं

SGDF
Sri Gargeshwari Digital Foundation

प्र० **शायिनइति** ॥ १ ॥ प्रतिपाद्यदेवतांनत्वासूत्रकर्तुःकृपादृष्टिमात्मन्याशास्ते ॥ **शमयन्निति** ॥ कृष्णमेघःवेदव्यासाख्यमेघः पुष्णातु ज्ञान भक्त्यादिभिः भवसंतापशांतिविशिष्टस्वरूपानंदानुभवलक्षणरमणदानेनवा पुष्टंकरोतु । तस्यमेघत्वोपपादनं विशेषणद्वयेन । इष्टदेवतात्वाद्व सुदेवसुतःकृष्णोपिग्राह्यः ॥ २ ॥ भाष्यकर्तुरादिगुरोःपादरेणुभ्यःकामांतरंयाचते ॥ **श्रीमदिति** ॥ कथंतेषांपवित्रीकरणशक्ततेत्यतउक्तं ॥ **पापेति** ॥ भजकानामितिशेषः ॥ ३ ॥ प्राचीनटीकाकर्तृन्नमति ॥ **शारदेति** ॥ सरस्वत्यावासभूतंवदनाख्यशरत्कालसंबंधिपंकजंयेषां

शमयन्भवसंतापंरमयन्साधुचातकान् ॥ कृष्णमेघःकृपादृष्टिवृष्ट्यापुष्णातुमामपि ॥ २ ॥ श्रीमदानंदतीर्थार्य

पादपंकजरेणवः ॥ पवित्रयंतुमांनित्यंपापपाटनपंडिताः ॥ ३ ॥ शारदावासवदनशारदांबुरुहान्मुहुः ॥

गु० धायेतिद्वितीयाध्यायार्थोक्तिरुचिता नतुव्यत्यासेन । तथापिदुःखनिवृत्त्यनंतरमेवानंदादिगुणावाप्तिलक्षणोमोक्षइतिफलक्रममनुसृत्य तत्साधनोपासनविषययोर्निर्दोषत्वकल्याणगुणत्वयोःपौर्वापर्यमुचितमितिभावेनायंव्यत्यासइतिज्ञेयं । यद्वा द्वितीयाध्यायार्थभूतापिभगवन्निर्दोषता विघ्नरूपदोषनिर्हरणायमुमुक्षुणाप्रथममनुसंधेयेतिभावेनटीकाक्रमपरित्यागेनक्रमांतराश्रयणमिदमितिज्ञातव्यं । भक्तेतितृतीयाध्यायार्थसूचनं । भक्तिशब्दस्यतदुपलक्षितवैराग्यादिसमस्तसाधनपरत्वात् । अत्रच सर्वसाधनाधिकत्वसूचनायभक्तेरेवस्वशब्देनग्रहणं । मुक्तिदायिनइतिफलाध्यायार्थकथनं । ततश्चभक्तेभ्योभक्त्युपलक्षितवैराग्यादिसमस्तसाधनवद्भ्यश्चतुर्विधमोक्षदायिनइत्युक्तंभवति ॥ शेषशायिनइतिपरदेवतायाःशेषरूपमंचस्थत्वकथनेनतादृशस्यपरमात्मनःपरमानंदमग्नत्वात्तत्प्रार्थनमविलंबेनापेक्षिताशेषपुरुषार्थसाधनमितिसूचितंभवति ॥ १ ॥ मीमांसाशास्त्रकर्तुर्वासिष्ठकृष्णस्य स्वेष्टदेवतायायादवकृष्णस्यच स्वात्मनिकृपादृष्टिवृष्टिपुष्टिमाशास्ते ॥ **शमयन्निति** ॥ कृष्णस्यमेघत्वोपपादनायविशेषणद्वयमिदं ॥ **साधुचातकानिति** ॥ भगवत्पक्षेसाधवएवचातकाःतान्रमयन्निति कालमेघपक्षेचातकान्साधुरमयन्नितियोजना ॥ २ ॥ भाष्यकर्तृन्प्रार्थयते ॥ **श्रीमदिति** ॥ तेषांपवित्रीकरणशक्तिमुपपादयितुमुक्तं ॥ **पापेति** ॥ पंडिताः कुशलाः ॥ ३ ॥ आदिटीकाकर्तृन्नमति ॥ **शारदेति** ॥ शारदायाःसर

SGDF
Sri Gargeshwari Digital Foundation

प्र० तान् । एतदुपपादयति ॥ **सर्वेति** ॥ गुरुत्वाद्बहुवचनं ॥ ४ ॥ व्याख्येयग्रंथकर्तुर्हृद्यावासंप्रार्थयते ॥ **मिथ्येति** ॥ तस्यतरणित्वोपपादकमेतत् ॥ ५ ॥ यतःस्वस्य पारमहंस्यं तस्यगुरोः हृद्यावासमर्थयते ॥ **कंसेति** ॥ कंसध्वंसी कृष्णः । तस्यपदाख्यांबुजानुरक्तः । परमहंसाश्रमीत्यर्थः ॥ ६ ॥ स्वस्यविद्योपदेष्टृन्नमति ॥ **पदेति** ॥ इदंतुगुरुत्वेशक्त्युपपादकं । पदं शब्दशास्त्रं । वाक्यं मीमांसायुग्मं । प्रमाणं तर्कशास्त्रं । बहुवचनंप्राग्वत् ॥ ७ ॥ एवं मंगलनिचयमारचय्यशिष्यमनस्समाधानार्थं चिकीर्षितंप्रतिजानीते ॥ **श्रीमदिति** ॥ तत्वप्रदीप

पद्मनाभमुनीन्वंदेसर्वशास्त्रविशारदान् ॥ ४ ॥ मिथ्यासिद्धांतदुर्ध्वांतविध्वंसनविचक्षणः ॥
जयतीर्थाख्यतरणिर्भासतांनो(मे)हृदंबरे ॥ ५ ॥ कंसध्वंसिपदांभोजसंसक्तोहंसपुंगवः ॥
ब्रह्मण्यगुरुराजाख्योवर्ततांममानसे ॥ ६ ॥ पदवाक्यप्रमाणाब्धिविक्रीडनविशारदान् ॥
लक्ष्मीनारायणमुनीन्वंदेविद्यागुरून्मम ॥ ७ ॥ श्रीमद्भाष्यस्यटीकायाजयतीर्थार्यनिर्मिता ॥

गु० स्वत्याःआवासोयस्मिन्तच्छारदावासं तच्चतद्वदनंचशारदावासवदनं । तदेवशारदांबुरुहं शरत्कालसंबंधिपंकजंयेषांतानित्यर्थः । तस्यैवोपपादनं ॥ **सर्वेति** ॥ गुरुत्वात्बहुवचनं ॥ ४ ॥ व्याख्येयग्रंथकर्तुर्हृद्यावासंप्रार्थयते ॥ **मिथ्येति** ॥ एतच्चटीकाकर्तुस्तरणित्वोपपादनार्थंविशेषणं ॥ ५ ॥ आश्रमगुरोर्हृद्यावासंप्रार्थयते ॥ **कंसेति** ॥ कंसध्वंसीश्रीकृष्णः तस्यपादाख्यांबुजानुरक्तः । हंसपुंगवः चतुर्थाश्रमीत्यर्थः ॥ ६ ॥ विद्यागुरून्प्रणमति ॥ **पदेति** ॥ अत्रपदार्थज्ञानोपायभूतं पद्यतेशब्दार्थोनेनेतिव्युत्पत्त्या व्याकरणं पदं । वाक्यार्थज्ञानोपायन्यायसमर्पकं प्रमेयमीमांसाशास्त्रं वाक्यं । उद्देशलक्षणविभागपरीक्षाभिःप्रमाणस्वरूपनिर्धारकं प्रमाणमीमांसाशास्त्रं प्रमाणमितिविवेकः ॥ ७ ॥ टीकायाव्याख्येयत्वप्रयोजकंनिर्दोषत्वगंभीरत्वादिकंदर्शयन्नेवचिकीर्षितंनिर्दिशति ॥ **श्रीमद्भाष्यस्येति** ॥ ॥ ३ ॥

प्र० भ्रांतिंनिरस्यति ॥ **जयतीर्थेति** ॥ या जयतीर्थार्यनिर्मिता तामिमामित्यन्वयः । व्याख्यानेहेतुमाह ॥ **गंभीरेति** ॥ गांभीर्यं गहनार्थत्वं । निर्मलत्वंचासंगतार्थवर्णनादिशून्यत्वं ॥ ८ ॥ स्वप्रवृत्तेःफलांतरमाह ॥ **सूत्रइति** ॥ निरुपपदसूत्रशब्दस्यब्रह्मसूत्रएवमुख्यत्वात्सूत्रइत्यवादि । एवंभाष्यइत्यपि । अनुभाष्ये अनुव्याख्याने । चशब्दादणुभाष्येच ॥ **टीकास्विति** ॥ त्रिविक्रमपंडिताचार्यकृतातत्त्वप्रदीपाख्या अनुव्याख्यानटीकान्यायसुधा पद्मनाभाचार्यकृतासन्न्यायरत्नावलिश्च न्यायविवरणटीकाच तत्वप्रकाशिकाचेत्येतासुटीकास्वित्यर्थः ॥ ९ ॥ स्वप्रवृत्तेरन्यच्चफलमाह ॥ **प्रतिसूत्रमिति** ॥ स्वपरपक्षयोर्यथाक्रमंघटनाघटने । विदांकुर्वंतु जानंतु । यद्यपिस्वस्येदमित्यर्थेणिकृते स्वशब्दस्यद्वारादिषुपाठेन "द्वारादीनांचे"तिसूत्रेण वकारात्पूर्वमैजागमेनौकारेसति सौवेतिभाव्यं । तथापि स्वस्मैहितमित्यर्थे "प्राक्क्रीताच्छ"इतिच्छप्रत्यये स्वीयेतिसाध्वितिज्ञेयं । चतुर्थस्यद्वितीयपादे "गहादिभ्यश्चे"त्यत्र दुर्घटवृत्तौतथैवोक्तेः ॥ १० ॥ ननुभाष्यव्याख्यानार्थंप्रवृत्तस्यभगव

गंभीरानिर्मलाचेमांव्याकरिष्येयथामति ॥ ८ ॥ सूत्रेभाष्येनुभाष्येचसन्न्यायविवृतौतथा । टीकासुचयदस्पष्टं
तच्चस्पष्टीकरिष्यते ॥ ९ ॥ प्रतिसूत्रंप्रकाश्येतेघटनाघटनेमया ॥ स्वीयान्यपक्षयोःसम्यग्विदांकुर्वंतुसूरयः ॥ १० ॥

गु० तत्वप्रदीपभ्रांतिंवारयति ॥ **जयतीर्थार्यनिर्मितेति** ॥ याजयतीर्थार्यनिर्मिता इमामित्यन्वयः । स्वप्रवृत्तेःप्रयोजनमाह ॥ **सूत्रइति** ॥ चशब्दोणुभाष्यसंग्रहार्थः । टीकासु भाष्यानुव्याख्यानसन्न्यायविवृतिटीकासुतत्वप्रदीपसन्न्यायरत्नावलितत्वप्रकाशिकान्यायसुधासु । यद्यप्यभूततद्भावार्थकच्विप्रयोगादेवास्पष्टत्वलाभादस्पष्टमितिपृथगस्पष्टत्वकथनमनर्थकं । तथापिविशिष्टवाचकानांशब्दानांविशेषणवाचकपदसंनिधानेविशेष्यमात्रपरत्वस्यबहुषुस्थलेषुदृष्टत्वाद्वैयर्थ्यमितिज्ञेयं ।

SCDF
Sri Gargeshwari Digital Foundation

प्र० तोजयतीर्थमुनेःसैवकार्या किमाद्यपद्येन। मंगळाचरणस्यापि“अथाविद्ये”ति भाष्यव्याख्यारंभे मांगलिकस्याथेत्यस्यप्रयोक्ष्यमाणतयासिद्ध त्वादित्यतआह ॥ **ग्रंथादाविति** ॥ तस्यतुकृत्यंवक्ष्यतइतिभावः । (मंगळमारचय्य)ग्रंथेनिबध्नातीत्यर्थः । मंगळपदोपादानेन तस्यप्रारिप्सि

ग्रंथादौमंगळमाचरति ॥ शुद्धेति ॥

गु० स्वीयान्येत्यत्रस्वीयश्चान्यश्चस्वीयान्यौ अन्यत्वंचप्रकृतात्स्वीयादित्यवधेयं ॥ **ग्रंथादौमंगळमाचरतीति** ॥ नन्वयंमंगलोपनिबंधएव तत्कथंमंगलाचारत्वोक्तिः। नचमंगलोपनिबंधनस्य नमस्कारांगतया स्वातंत्र्येणवा समास्यननुकूलत्वादयुक्तत्वमितिवाच्यं । समास्यननुकूलस्यापिशिष्यशिक्षार्थतयायुक्तत्वात् । तथाहि नहि ग्रंथोव्यसनितयाक्रियते किंतु“यावत्कीर्तिर्मनुष्याणांपुण्यलोकेषुगीयते । तावद्वर्षसहस्राणिपुण्यलोकेमहीयते”इतिसत्कीर्त्यनुवृत्तये । नचाप्रचरतातेनसत्कीर्तिरनु वर्तयितुंशक्या । नचाशिक्षिताःशिष्यामंगलंकुर्युः । नचतेषांमंगलाकरणेग्रंथाध्ययनाध्यापनेभवतः । कदाचित्कस्यचिदंतराविघ्नानुत्पादेपिबहुलविघ्नोत्पादात् । तथाचाहुः“श्रेयांसिबहुविघ्नानी”ति । तस्मात्ग्रंथारंभेमंगलाचरणविषयाशिष्यशिक्षैवयुक्ता । वक्ष्यतिचग्रंथकारः“नमस्काराधिकार्यादिग्रथनसूचनेशिष्यशिक्षार्थ” मिति ॥ तत्कथंशिष्यशिक्षार्थस्यमंगलोपनिबंधस्यमंगलाचारत्वकथनमितिचेत् अत्रस्वामिनः यद्यप्येवंशिष्यशिक्षार्थतानमस्कारोपनिबंधस्यसंभवति तथापिनसैवप्र योजनं । मंगलांतरइवइष्टसिद्ध्यर्थिनांशिष्याणांकर्तव्यत्वबुद्धिसंभवात् । नखल्वन्यन्मंगलंकृतंग्रंथकारैर्ग्रंथादौनिबध्यते । ततश्चप्रचरद्ग्रंथेषुसहस्रशोनमस्कारोपिनि बंधनेनशिष्यशिक्षायाःसंभावितत्वेप्युत्तरोत्तरेषांग्रंथकाराणांनमस्कारोपनिबंधदर्शनादवगच्छामोयत्प्रणामवाचकनमःशब्दादिवत्तदनुमापकलिपेरपिविघ्नानुत्पादोद्देशेनै वकरणं । उल्लिखंत्यपिकेचिद्विघ्नोमाभूदिति । कृतेपिमंगलांतरेविघ्नहेतुबलीयस्त्वसंभावनायांमंगलप्राचुर्यार्थंनमस्कारकरणवत्कृतेपिनमस्कारेतदुपनिबंधरूपमंगलां तरानुष्ठानमप्युपपन्नमेव । तथाचटीकायां“शिष्यशिक्षार्थ”मित्यानुषंगिकप्रयोजननिर्देशः । अन्यार्थमपिकृतस्यलोकेऽन्यार्थत्वदर्शनात् । तद्यथाशाल्यर्थंकुल्याःप्रणीयं

SGDF Sri Gargeshwari Digital Foundation

प्र० तपरिसमाप्त्यादिहेतुत्वात्तदनुष्ठानस्य शिष्टाचारपरंपराप्राप्तत्वेनावश्यकत्वंसूचितं। ग्रंथादावित्युक्त्याच मंगलस्यग्रंथांगत्वंच। भाष्यव्याख्या नरूपंचेदं अतोनानुपयुक्तकथनमित्याह ॥ **इदंचेति** ॥ यद्वाब्रह्मवंदइत्यनेनैवमंगलस्यचीर्णत्वात्किंविशेषणैःकृत्यमित्याशंक्य व्याख्येयपद्यगत विशेषणकृत्यानीवात्रापिध्येयानीत्याह ॥ **इदंचेति** ॥ वक्ष्यमाणाध्यायार्थसूचकत्वेनेत्यर्थः । आदिपदेननारायणशब्दान्वाख्यानपरत्ववत्तत्प र्यायब्रह्मशब्दान्वाव्याख्यानपरत्वसूचकत्वेन तस्यैववंद्यत्वोपपादकत्वेनचेतिग्राह्यं । यद्वा अधिकार्यादिचतुष्टयसूचकत्वेनेत्यर्थः । "तथाह्यादि सूत्रेभगवत"इत्याद्यपद्यव्याख्यासर्वाप्यत्रयथायोगमनुसंधेयेतिभावः । आद्यार्थस्य"गुणैःसर्वैरुदीर्ण"मित्यस्यविवरणं शुद्धेत्यादि ॥ तत्र यदि

इदंचपद्यंभाष्यस्याद्यश्लोकविवरणरूपत्वात्तद्वदेववक्ष्यमाणादिसूचकत्वेनव्याख्येयं ।

गु० तेताभ्यश्चपानीयंपीयतइतिसर्वमनवद्यं। वस्तुतस्तु त्रिविधस्यापिनमस्कारस्यसैद्धांतिकत्वात्सर्वेष्वपिग्रंथेष्वादौनमःशब्दादिप्रयोगोवाचिकनमस्कारएव। नत्वसौमं गलोपनिबंधः । अन्यथाकागतिः"अस्पृष्टदोषगंधाये"त्यादिस्तुतिरूपशब्देषु । नहिसोपिस्तुतिरूपमंगलोपनिबंधः । स्तुतिरूपशब्दाप्रतिपादकत्वात् । किंतूत्कर्षप्र तिपादकशब्दत्वेनतेषामेवस्तुतित्वं । तस्मादेवंजातीयकेषुसर्वग्रंथेषुगुणप्रधानभावेननतिस्तुतिरूपमंगलाचरणमेव । शिष्यशिक्षात्वानुषंगिक्येवपूर्ववत् । तादृशलि पिरचनयानमःशब्दादिरूपनमस्कारज्ञानेनंतस्याःसंभवात् । ननुब्रह्मवंदइत्यनेनैवमंगलस्यचीर्णत्वात्किंविशेषणैःकृत्यमित्याशंक्य"नारायणंगुणै"रितिव्याख्येयपद्यगत विशेषणकृत्यानामेवात्रापितत्कृत्यत्वान्नानुपपत्तिरित्याह ॥ **इदंचेति** ॥ **आद्यश्लोकविवरणरूपत्वादिति** ॥ विवरणंचभाष्याद्यश्लोकस्योगुणशब्दोनतार्किकोक्तदुः खादिपरः किंत्वानंदादिपरः । दोषशब्दोपिनरागद्वेषमोहपरःकिंतुचिंतादिपरः । ज्ञेयशब्दोपिनज्ञेयत्वमात्रपरः घटादिसाधारण्यात् किंतुश्रोतव्यत्वादिचतुष्टयपरः । गम्यशब्दोपिनसुक्तप्राप्यत्वमात्रपरः किंतुवेदसमधिगम्यत्वपरोपीतिद्रष्टव्यं ॥ **वक्ष्यमाणादीति** ॥ वक्ष्यमाणं गुणपूर्णत्वनिर्दोषत्वादि । आदिपदेननम्यत्वप्रयो

SGDF
Sri Gargeshwari Digital Foundation

प्र० शुद्धत्वंदुःखासंभिन्नत्वं तदा चिंतादिदोषदूरमित्यनेनगतार्थमतआह ॥ **आनंदादेरिति** ॥ द्वितीयार्थस्य "दोषवर्जित" मित्यस्यविवृतिश्चिंतेति ॥ तत्र चिंतासंतापाभ्यांलेपःसंगइतिभ्रांतिंनिराह ॥ **लेपइति** ॥ तृतीयार्थस्य "ज्ञेय" मित्यस्यविवृतिःसद्भिरित्यादि ॥ तत्र श्रुत्याश्रवणेनजाता यामतिःतयानियतं तद्विषयएवनियमितं यद्ध्यान मालोचनात्मकंमननं तज्जनितनिरंतरानुस्मृतिरूपज्ञानलक्षणध्यानादितिभ्रांतिं निराह ॥ **श्रुतिमतीइति** ॥ **योगउपायइति** ॥ "योगःसन्नहनोपाये" त्यभिधानादितिभावः । नन्वमलंनिर्दोषमित्यर्थश्चेच्चिंतेत्यादिनागतार्थमत

आनंदादेःशुद्धत्वं(नाम)सांतत्वसातिशयत्वादिराहित्यं । लेपः पुण्यपापसंबंधः ।
श्रुतिमती श्रवणमनने । नियतध्यानं स्वयोग्योपासनं ।

गु० जकेष्टत्वादिपरिग्रहः । तस्यापिशुद्धानंदेत्यादिनासूचितत्वादित्यपिद्रष्टव्यं ॥ **आनंदादेःशुद्धत्वंसांतत्वसातिशयत्वादिराहित्यमिति** ॥ यद्यप्यत्र आनंदादिरूपोदेहोयस्यासावानंदादिदेहः । शुद्धश्चासावानंदादिदेहश्चेतिशुद्धत्वंनतावद्ब्रह्मणोविशेषणं । तस्यदोषातिदूरमित्यनेनैवोक्तत्वात् । नापिशुद्धः आनंदादिरूपोदेहोयस्येतिदेहस्यविशेषणं । देहस्यानंदरूपत्वेनैवशुद्धत्वसिद्धेः । तथापि शुद्धः आनंदादिर्देहोयस्येति आनंदादेर्गुणस्यविशेषणमुरुत्वादिवत् । तत्रापिशुद्धत्वंनदुःखाद्यमिश्रत्वं तस्यदोषातिदूरमित्यनेनैवसिद्धेः । किंतुसांतत्वादिराहित्यमेव । उरुत्वादिविशेषणेनज्ञानादेःसर्वविषयत्वादिलाभेपिसांतत्वादिराहित्यालाभात्तल्लाभायशुद्धत्वस्यानंदादिसर्वविशेषणत्वाश्रयणमितिद्रष्टव्यं । ननुचिंतासंतापलेपेत्यत्र चिंतासंतापराहित्योक्त्यैवदोषातिदूरमित्यत्रैवतत्संबंधाभावस्यसिद्धत्वाल्लेपपदमनर्थकमित्यतो भवेदेवंयद्यत्रलेपश्चिंतासंतापाभ्यांसंबंधरूपोविवक्षितःस्यात् नचैवं किंतुपुण्यपापादिसंबंधरूपंदोषांतरमेवसइत्यतोनतदानर्थक्यमितिभावेनाह ॥ **लेपःपुण्यपापसंबंधइति** ॥ **श्रुतिमती श्रवणमननेइति** ॥ श्रुतिमतिशब्दौनप्रसिद्धवेदबुद्धिपरौ किंतुश्रवणमननपरौ । तेनध्यानशब्दवत्साधनाध्यायाथसूचकत्वमनयोरपियुक्तमि

प्र० आह ॥ **अमलमिति** ॥ मायारूपमलरहितं । "निर्विशेषंपरंब्रह्म" त्याद्युक्त्या परमतेमायिनएवमंदोपास्यत्वात् । यद्वानविद्यतेमलंसंसाराख्यंयस्मादित्यर्थः । मुमुक्षूपास्यमितिपर्यवसितव्याख्यानं । संसारनिवर्तकस्यैवतदुपास्यत्वादितिभावः । ननुग्रंथादाववश्यकार्यस्यमंगलस्यकृतत्वात्किंद्वितीयपद्येन । यदि "श्रेयांसिबहुविघ्नानी" तिमंगलांतरस्यकार्यता तदा "व्यासोभवतुमेभूत्यै" इत्येतावतापूर्तेर्नविशेषणकृत्यमित्यतआह

ज्ञानं साक्षात्कारः । सएवयोगउपायः । अमलं मुमुक्षूपास्यं । नतुपरमतइवमुकुंदाभिधंमंदोपास्यं ।

गु० तिभावः । ननुध्यानस्येवश्रवणमननयोरप्यवश्यानुष्ठेयत्वात्तदर्थकनियतपदानर्थक्यमित्यतोनध्यानस्यनियतत्वमवश्यानुष्ठेयत्वं येनश्रवणादिसाधारण्यंस्यात् । किंनामस्वयोग्यत्वं तच्चध्यानासाधारणं ध्यानस्येवश्रवणादेःशक्यत्वेप्ययोग्यत्वप्रयुक्तनिषेधाभावादितिभावेनाह ॥ **नियतध्यानंस्वयोग्योपासनमिति** ॥ **ज्ञानं साक्षात्कारइति** ॥ नतुपरोक्षज्ञानं । तस्यध्यानजनकत्वेनतदजन्यत्वादितिभावः । योगशब्दस्यसंबंधार्थत्वेवैयर्थ्यभियाऽर्थांतरमाह ॥ **सएवयोगउपायइति** ॥ तथाचगम्यत्वेपिन ज्ञेयत्वंब्रह्मणोंगीकार्यं । कर्मादिनापितत्प्राप्तेःश्रुतत्वादित्याशंकानिरासार्थमुपायांतरनिरासकंतदावश्यकमितिभावः । अमलमित्यस्यनिर्दोषार्थत्वे "दोषातिदूरमित्यनेनपौनरुक्त्यमित्यतःप्रकारांतरेणव्याचष्टे ॥ **अमलं मुमुक्षूपास्यमिति** ॥ विशेषणप्रयोजनमाह ॥ **नत्विति** ॥ वंद्यत्वप्रयोजकविशिष्टत्वलाभायब्रह्मपदं । गुणवत्त्वेदोषवत्त्वमपिस्यादित्यतोऽमलमितितदुपपादनं । मुकुंदाभिधमितिमोक्षदत्वोक्त्यावंद्यत्वनिमित्तेष्टत्वसमर्थनं । वेदांतवेद्यमितितन्निमित्ताधिकृतत्वकथनं । विशेषणचतुष्टयविवरणरूपाणिचापराणिविशेषणानि । विश्वस्योदयमातनोतीत्यादाविव । तथाहि । ब्रह्मशब्दोक्तविशिष्टत्वविवरणं शुद्धेति ॥ तत्रोपपादकामलत्वविवरणं चिंतेति । अत्रमुखरशब्दःस्वार्थिकरप्रत्ययांतएवाभिमतः । नतुमत्वर्थीयरप्रत्ययांतः । तथासतिवाचालार्थत्वापत्त्यातत्प्रमुखत्वालाभप्रसंगात् । वेदांतवेद्यमित्युक्ताधिकृतत्वविवरणं सद्भिर्वैराग्यभक्तीत्यादि । धर्मादिषूभयमित्युक्तत्वात् । गुणवृद्धीइत्यादिवत् वैराग्यभक्तीत्यस्यसाधुत्वं । मुकुंदाभिधमित्युक्तेष्टत्वविवरणंगम्यमि

SGDF Sri Gargeshwari Digital Foundation

तात्पर्य-

॥ ६ ॥

प्र० ॥ व्याचिख्यासितेति ॥ एतेनसूत्रप्रामाण्यसूचनं विशेषणकृत्यमित्युक्तंभवति। व्याचिख्यासितेत्युक्त्या तत्सूचनमपिनानुपयुक्तमित्याह ॥ ब्रह्मपरेति ॥ ब्रह्मसूत्रेत्यत्रतंत्रेणब्रह्मणोविष्णोःसंबंधि यद्ब्रह्मश्रुतिजातं तस्ययानिसूत्राणिन्यायनिबंधनात्मकवाक्यानीत्युक्तंभवति । यद्वा

व्याचिख्यासितभाष्यमूलसूत्रप्रामाण्यंसूचयन्मंगळांतरमाचरति ॥ याञ्चेति॥ अत्र यतउदैद्धिर्येंदिरे त्यादिनावक्त्रानुकूल्यं निर्जरैरित्यादिनाश्रोत्रानुकूल्यंयाञ्चेत्यादिनाप्रसंगानुकूल्यंचदर्शयता "वक्तृश्रो तृप्रसक्तीनांयदाप्तिरनुकूलते"त्यनुव्याख्यानोक्ता आप्तिमूलता सूत्राणांसूचिता । ब्रह्मसूत्रपदेन ब्रह्मपरश्रुतिव्याख्यानरूपत्वाच्छ्रुतिमूलत्वं न्यायव्युत्पादकत्वाद्युक्तिमूलत्वंचसूचितं ।

गु० तिविशेषणमात्रमर्थवदित्यपियोजनाद्रष्टव्येतिगुरवः ॥ सूत्रप्रामाण्यंसूचयन्निति ॥ मूलिप्रामाण्यस्यमूलप्रामाण्याधीनत्वादितिभावः ॥ अशक्तत्वादेवजित त्वामिति ॥ नतुशक्तौसत्यामपिदीपालोकादेःसौरालोकादाविवतत्संकोचादित्यर्थः । स्वांतेतिश्लोकेनिर्दोषमित्येतत् मध्यदीपिकान्यायेनपूर्वत्रोत्तरत्रचहेतुप्रदर्शनपरं । जितसिंधुराजमित्यत्रहेतुमाह ॥ अमितमिति ॥ मूलेनिकृंतनमिति ॥ नचेदंयुक्तं कृतीच्छेदनइत्यस्यइदित्त्वाभावेन"इदितोनुम्धातो"रित्यनेननुमोप्रसंगात् । विनिकृंततीत्यत्रतु"शेमुचादीना"मितिभविष्यति । निकर्तनइतितुवक्तव्यं । अस्मात्ल्युटि तस्यानादेशे तस्यार्धधातुकतयातस्मिन्परतोलघूपधगुणे रपरत्वेच उक्त रूपनिष्पत्तिसंभवात् । "नखनिकृंतनेनसर्वंकार्ष्णायसंविज्ञातंस्यात्"इत्यादौतुच्छांदसत्वान्नुम्भविष्यति । तथाचनिकृंतनइत्यपशब्दइतिचेत् न । "इदितोनुम्धा तो"रित्यत्रधातोरितियोगविभागाश्रयणस्याकरेस्थितत्वेनानिदित्त्वेप्यस्यतेनात्रनुम्संभवात् । नचयोगविभागोनशक्योंगीकर्तुं तथासतिधातुमात्रान्नुम्प्राप्त्याऽतिप्रसं गापातात् । ततश्चयोगविभागे"शेमुदाचीना"मितिशेग्रहणस्यधातोरित्यत्रसिंहावलोकितन्यायेनापेक्षणान्नप्रकृतेनुम्सिद्धिरितिवाच्यं । योगविभागस्येष्टसिद्ध्यर्थत्वमा

चंद्रिका.

प्र. प्र.

१ । १

॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मणःश्रुतिजातस्यसूत्रं तन्निर्णायकन्यायनिबंधनात्मकशास्त्रमित्यर्थः । श्रुतिजातस्यब्रह्मपरत्वंचवास्तवमभिप्रेत्येतिध्येयं । न्यायेतिसूत्रेत्युक्तिलब्धोर्थः । ननु भाष्यव्याख्यानेतत्कर्तृप्रसादस्यावश्यकतया तत्प्रणामस्यकार्यत्वेपि नविशेषणकृत्यमित्यतआह ॥ **भाष्यस्येति** ॥ ध्वांतशब्दिताज्ञाननिवर्तकत्वतापत्रयोन्मूलकत्वरूपंफलवत्त्वं गांभीर्यमापाततोप्रतीयमानहृदयत्वं । आदिपदेनामितशब्दितबह्वर्थत्वग्रहः ॥ **प्रणमतीति** ॥ यद्यपिप्रपद्यइतिप्रपत्तिरेवश्रुता । तथापिनमनादिनैवसाभवतीतितथोक्तं । धातूनामनेकार्थत्वमुपेत्यवाएवमुक्तं । ध्वांतनिवर्तकत्वाद्य

भाष्यस्यव्याख्येयत्वप्रयोजकंसफलत्वगंभीरत्वादि दर्शयन्भाष्यकृतंप्रणमति ॥

गु० त्रेणानतिप्रसंगसंभवे“शेमुचादीना”मित्यतःशेग्रहणानुवृत्तेस्तदर्थतयाऽनपेक्षितत्वेननुम्संभवादितिगुरवः ॥ **मूलेकृपालवइति** ॥ यद्यपिकृपेरालुच्प्रत्ययोनविहितः“स्पृहिगृही”त्यादिनास्पृह्यादिभ्यएवतत्स्मरणात् । तथापिस्पृह्यादिभ्योलुश्मात्रविधानेनैवस्पृहयालुरित्यादिरूपसिद्धावालुज्विधानसामर्थ्यात्कृपेरपितत्सिद्धिः । नचालुज्विधौ“अयामंताल्वाय्येत्न्विष्णुष्वि”तिणेरयादेशात्तत्सिद्धावपिलुश्विधौकथंस्पृहयालुरितिरूपसिद्धिरितिवाच्यं । स्पृहेर्लुशितस्यशित्वेन“तिङ्शित्सार्वधातुक”मितिसार्वधातुकतया“कर्तरिशबि”तिशपि“सार्वधातुकार्धधातुकयो”रितिगुणे अयादेशे “अतोदीर्घोयञी”तिदीर्घतायांचसत्यां स्पृहयालुरितिरूपसिद्धेरप्रत्यूहत्वात् । सत्यप्येवंलुश्विधानमात्रेणापिविवक्षितसिद्धावालुच्करणमन्यत्रापियथास्यादित्यस्यार्थस्यज्ञापकं । तथाच तद्बलात्कृपेरालुचिकृपालुशब्दनिष्पत्तिरप्रत्यूहैव । अतएवकौमुद्यां“हरेकृपालोनःपाही”त्युक्तं । ननुचनलुश्विधौविवक्षितसिद्धिः । लुश्विधौलकारस्येत्संज्ञाप्रसंगात् । स्पृहयालुरितिदीर्घानुपपत्तेश्च । तिङीत्यनुवृत्त्यातिङियञिपरतएव “अतोदीर्घोयञी”त्यनेनदीर्घविधानात् । श्रद्धालुश्चनसिध्येत् । श्रत्पूर्वाद्धाधातोर्लुशिशपि तस्यजुहोत्यादित्वाच्छ्लुभावे “श्लाविति द्विर्भावे”“ह्रस्व”इति ह्रस्वत्वेच“श्नाभ्यस्तयोरात”इत्यालोपेचश्रद्दधलुरितिप्रसंगात् । अतोलुश्विधौस्पृहयालुरित्यादिविवक्षितरूपासिद्धिप्रसक्त्यातत्सिद्ध्यर्थमेवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० विशेषेकथंजितत्वमतआह ॥ **वैकर्तनेति** ॥ **स्वांतेति** ॥ भाष्यस्यतुशक्तत्वाद्विशेषइतिभावः । उभयत्रादिपदेनचंद्रचंद्रिकायास्तापत्रयोन्मूलनेअशक्तत्वात्समुद्रस्यचामितत्वाभावादितिग्राह्यं । यद्वा काकोलूकवत्परस्परंयुद्धलब्धजयाभावात्कथंतेनजितत्वंतेषामित्यतआह ॥ **वैकर्तनेति** ॥ एवकारेणलौकिकंजयंप्रत्याह । वाचोविशुद्धिसिद्ध्यर्थमित्यत्र बाचःकर्तुरश्रवणाद्गुरोरित्यस्यैवात्राप्यन्वयेगुरोर्वाचोविशुद्धिसिद्ध्यर्थंगुरोर्गिरःमिथःसंगम्यंते इत्यस्यायोगाद्गिरांसंगतत्वासंगतत्वाभ्यांसंगतिकरणासंभवाच्चेत्याशंक्य दृष्टांतांशंस्फुटीकुर्वन्नपेक्षितपूर्वोत्तरार्धंद्वेधाव्या

[१।३]स्वांतेति ॥ वैकर्तनांशुव्रजादेःस्वांतध्वांतनिकृंतनादावशक्तत्वादेवभाष्येणजितत्वं ।

गु० लुच्करणसार्थक्यान्नतदन्यथानुपपत्त्याऽन्यत्राप्यालुच्प्रत्ययविधायकत्वमस्येतिचेत् उच्यते लुश्विधावपियादित्वादित्संज्ञाभावोपपत्तेः। यकारश्चलुप्तनिर्दिष्टःक्रियते। प्रयोजनाभावाद्धातत्संज्ञाभावः । नह्यत्रलित्स्वरप्रत्ययस्वरयोर्विशेषोस्ति । उभयत्र "एकादेशउदात्तेनोदात्त"इत्युदात्तस्वरस्यभावात् । नापिस्पृहयालुरितिदीर्घानुपपत्तिरितिद्वितीयोदोषः । "अतोदीर्घोयञी"त्यत्र"तुरुस्तुशम्यमःसार्वधातुक"इत्यतःसार्वधातुकग्रहणस्यैवानुवृत्त्यातिङ्ग्रहणाननुवृत्तेः । नाप्यन्योदोषः । अनेकार्थत्वाद्धातूनामत्रविषयेदधात्यर्थेवर्तमानस्यघेटोभविष्यति । नचशिदाश्रयोशितीत्यात्वप्रतिषेधात्तदनुपपत्तिः । एवंतर्हिश्रद्धा आ श्रद्धेत्याकारप्रश्लेषादात्वंभविष्यति । अथवा दधातेरेव "संज्ञापूर्वकोविधिरनित्य"इतिनद्विर्वचनंप्रवर्तिष्यते । ततश्चलुश्विधिनैवोपपत्तावेवमपिज्ञानार्थमालुज्विधीयते । एतत्ज्ञापयतियत्रालुचैवरूपसिद्धिस्ततोप्ययंभवतीतिकृपेरप्यालुच्प्रत्ययइति । यद्यपि"संज्ञापूर्वकोविधिरनित्य"इत्येतद्भाष्येनोक्तं तथापिप्रयोगबाहुल्यादुक्तं । एतदेवाभिप्रेत्योक्तं गीताभाष्यटीकायां"व्याकरणांतरादवगंतव्य"इति । व्याकरणस्य"स्पृहिगृही"त्यादेरांतरंलुशमभिधायआलुचूकरणसामर्थ्यंतस्मादित्यर्थः । केचित्तुदयालवइत्येवात्र पाठः अतोनोक्तशंकासमाधानयोरवसरइत्याहुः ॥ **मूलेरथ्याद्भिरिति** ॥ यदत्ररथ्यापामिरितिप्रामोति रथ्याद्भिरित्यपशब्दइतिकेनचिदुक्तं तदसत् । समासां

प्र० चष्टे ॥ **गंगासंगेनेति** ॥ **रथ्याद्भिरिति** ॥ "द्वित्रिभ्यांपादन्मूर्धस्वि"तिनिर्देशाज्ज्ञापकात् "ऋक्पूरब्धूःपथामानक्ष"इतिसमासांतोऽनित्य

गंगासंगेनयथारथ्याद्भिर्नैर्मल्यंलभ्यते तथामदीयायावाचो विशुद्धिसिद्ध्यर्थं
गुरोर्गिरोमदीययावाचा संगम्यंते व्याख्यानव्याख्येयभावेनसंबध्यंतइत्यर्थः ।

गु० तद्विधेरनित्यत्वेनतदप्रसंगात् । तदनित्यत्वंचशोभनाआपोयस्मिन्सरसीतिस्वप्इत्यादौ"ऋक्पूरब्धूःपथामानक्ष"इतिसमासांताकारस्याभावादेवावसीयते। सतिहि समांतस्यनित्यत्वेतत्रापिसमासांताकारप्रसंगेस्वपमितिप्रसंगात् । तथाचोक्तंप्रसादकृता"ऋक्पूरब्धूःपथामानक्ष"इतिसमासांतस्तुनभवति । तस्यानित्यत्वा"दिति । अथनपूजनादितिनिषेधादेवतत्रसमासांताकाराप्रसक्तेर्नतस्यानित्यतायामिदंज्ञापकं । अतएव अनित्यत्वादितिप्राचोक्तःपरिहारःप्रामादिकएवास्थेयइतिचेत्सत्यं । तथापिबह्वप्बह्वपीबह्वांपीत्यादौकाशिकोदाहृतेसमासांताकारस्यानिवारणात् । तत्रापूजनार्थतया"नपूजनादि"तिनिषेधाप्रसंगात् । ततश्चसमासांतविधेरनित्यत्वादेवतदभावइतिवक्तव्यं । उक्तंचशेषीकृता"समासांतविधेरनित्यत्वान्नसकृत"इति । तथा"स्फिगपूतवीणांजोध्वकुक्षिसीरनामनामचे"त्यध्वग्रहणं । तद्धिअपादध्वनःअपादित्यनुवर्तमानेअपादुत्तरस्याध्वशब्दस्यांतोदात्तत्वंयथास्यादितिक्रियते । यदिचनित्यःसमासांतःस्यात् तदा"उपसर्गादध्वन"इतिटचिकृते चित्त्वादंतोदात्तत्वंसिद्धमित्यध्वग्रहणंनकुर्यात् । कृतंचातोज्ञापकमस्तीयंपरिभाषासमासांतविधिरनित्यइति । तथाभाष्ये"द्वित्रिभ्यांपादन्मूर्धसुबहुव्रीहा"विति सूत्रे अकृतसमासांतस्यमूर्धशब्दस्योपादानंलिंगं । अनित्योहिसमासांतोयथास्यादिति । पादन्निति"पादस्यलोपोहस्त्यादिभ्यः""वयसिदंतस्यदतृ"इतिसमासांतोनिर्दिष्टस्तथामूर्धशब्दोपि"द्वित्रिभ्यांषमूर्ध्न"इतिसमासांते मूर्धेष्वितिनिर्दिष्टःस्यात् । तथाचाकृतः । सचसमासांतविधेरनित्यत्वंज्ञापयति । तेनद्विमूर्धात्रिमूर्धेत्युदात्तत्वंभवति । तस्मात्समासांतविधेरनित्यत्वेपितन्नित्यत्वभ्रममात्रमूलकमेवपरस्यरथ्यापामिरितिरूपप्रसंजनमितिदिक् । टीकायांवाचइत्येतत् सन्निधानाद्गुरोर्वाक्परमितिभाति । तच्चायुक्तं । तस्याःस्वतःशुद्धत्वेनतद्विशुद्ध्यर्थत्वस्यायोगादित्यतस्तत् योग्यतयाटीकाकृद्वाक्यपरमित्याह ॥ **मदीयायावाचइति** ॥ अत्रमदीययावाचेत्यपिपूरणीयंभवतीत्यप

SGDF Sri Gargeshwari Digital Foundation

प्र० इतिभावः ॥ यद्वेति ॥ मदीययावाचेत्यनुकर्षः । अस्मिन्पक्षेवाचोगीर्भिःसंगतिरार्थिकीतिनदृष्टांतानानुगुण्यं । नन्वथाविद्येत्यत्राथशब्दोन मंगलार्थः । तस्यकृतत्वात् । नाप्यानंतर्यार्थः । कस्याप्यर्थस्यपूर्वभाष्येअप्रकृतत्वात् । भाष्यकृतनमनस्यटीकाकृतव्याख्याप्रतिज्ञानंतर्यायोगात् । नाप्यारंभार्थः । आरभ्यतइत्यनुक्त्वापि आरब्धेइदमनेनारब्धमितिज्ञातुंशक्यत्वात् । व्याकुर्वेइत्युक्त्यैवव्याख्याप्रारभ्यतइत्यस्यलाभाच्च । प्रश्नाद्यर्थत्वशंकानवकाशाच्च व्यर्थइत्यतआह ॥ अथाविद्येतीति ॥ यद्यपिप्रतिग्रंथव्याख्यानमारभ्यतइत्यनुक्त्वापि तस्मिन्नारब्धेऽनेनप्रतिग्रंथव्याख्यारब्धेतिज्ञातुंशक्यं तथापिशिष्यमनस्समाधानार्थं प्रतिग्रंथव्याख्यानमारभ्यतइतिवक्तुं अथशब्दःप्रायोजीतिध्येयं ।

यद्वा गुरोर्गिरः परस्परंसंगम्यंते संबद्धतयाप्रकाश्यंतइत्यर्थः ॥ अथाविद्येति ॥ प्रतिग्रंथव्याख्याप्रारंभार्थोथशब्दः ॥

गु० रितोषादाह ॥ यद्वेति ॥ "अथाविद्यापटले"तिटीकायामथशब्दोनमंगलार्थः । मंगलानामनुष्ठितत्वात् । नाप्यानंतर्यार्थः । आचार्यकर्तृकनमस्कारादिग्रथनस्य टीकाकारीयव्याख्यानप्रतिज्ञानादानंतर्यासंभवात् नापिभाष्यव्याख्याप्रारंभार्थः । "शुद्धे"त्यादिनैवतस्यारंभात् । यदाह"भाष्यस्याद्यश्लोकविवरणरूपत्वा"दिति ॥ नापिप्रतीकग्रहणपूर्वकव्याख्यानप्रारंभार्थः । "व्याकुर्वे"इत्यनेनैवतत्सिद्धेः । नचगंगासंगेनेत्यनेनव्यवधानात्पुनःप्रतिज्ञानमावश्यकं । तस्यतच्छेषतयाव्यवधायकत्वाभावात् । "व्याकुर्व"इतिलडभिप्रेतवर्तमानसामीप्यस्याबाधाच्च । तस्मादनर्थकोथशब्दइत्यतः "अथयदसंदिग्धमप्रयोजनंचनतत्प्रेक्षावत्प्रतिपित्सागोचर"इति सांकरभाष्यावतारिकारूपभामतिग्रंथस्थाथशब्दस्यप्रतिग्रंथव्याख्याप्रारंभार्थत्वेनकल्पतरौव्याख्यानदर्शनादत्रापिप्रतिग्रंथव्याख्या...रंभार्थोथशब्दइत्याह ॥ प्रतिग्रंथेति ॥ यद्यपिप्रतिग्रंथव्याख्याप्रारभ्यतइत्यनुक्त्वापितस्मिन्नारब्धेऽनेनप्रतिग्रंथव्याख्याप्रारब्धेत्यवगंतुंशक्यं तथापिश्रोतृणांश्रद्धेयत्वप्रतिपत्त्यर्थंतदुक्तिः । दृश्यंते

SGDF
Sri Gargeshwari Digital Foundation

प्र० ननु भाष्यस्याखिलफलसाधनतासिद्धिःकथंनमस्कारमात्रात्स्यादित्यतआह ॥ **समंगलस्येति** ॥ अतःशब्देनोक्तत्वात् कथंसूचनमित्यतआह ॥ **भगवतइति** ॥ ननु भाष्येआदौवक्ष्यमाणार्थकथनस्यश्रोतृबुद्ध्यानुकूल्यरूपफलवत्त्वेपि नारायणशब्दव्याख्यानस्यनकिंचित्फलमत

[१।११]फलसाधनतासिद्ध्यर्थमिति ॥ समंगलस्यैवसफलत्वादितिभावः ॥ भगवतःप्रसत्त्यां[१।१३]पुरुषार्थोभवती तिसूचितइति ॥ भगवत्प्रसादस्यमोक्षहेतुत्वे अतश्शब्देनसंक्षिप्योक्तइत्यर्थः ॥ विशिष्टगुणा[२।७]नप्याचष्ट इति ॥ नारायणशब्दस्यविशिष्टगुणवाचकत्वप्रदर्शनंच तस्यब्रह्मशब्दसमानार्थकत्वात् । शास्त्रार्थवाच

गु० हितदर्थमेवलोकेप्याप्ताःकिंचिदहंवदिष्यामीत्युक्त्वापिहितमुपदिशंतीतिभावः। ग्रथनस्य "नमस्काराधिकार्यादिग्रथनसूचनेशिष्यशिक्षार्थ"मित्युत्तरग्रंथेशिष्यशिक्षार्थतायावक्ष्यमाणत्वेनफलसाधनतासिद्ध्यादिफलकत्वाभावात्कैवल्याद्यखिलफलसाधनतासिद्ध्यर्थत्वोक्त्यनुपपत्तिरित्यतआह ॥ **समंगलस्यैवेति** ॥ नन्वतःशब्देनभगवत्प्रसादस्यमोक्षहेतुतायाःवचनवृत्त्याप्रतिपादनादार्थिकत्वप्रतिपादकटीकास्थसूचितपदानुपपत्तिरित्यतस्तदभिप्रायमाह ॥ **संक्षिप्योक्तइति** ॥ संक्षिप्योक्तिरेवात्रसूचनमित्यभिप्रेतमितिभावः । ननुभाष्येआदौवक्ष्यमाणार्थकथनस्यश्रोतृबुद्ध्यानुकूल्यरूपफलवत्वादुपपत्तावपि नारायणशब्दान्वाख्यानस्यनिष्प्रयोजनत्वान्नतदुपपत्तिरित्यतस्तत्प्रयोजनमाह ॥ **नारायणशब्दस्यविशिष्टगुणवाचकत्वप्रदर्शनंचेति** ॥ सर्वगुणोदीर्णत्वनिर्दोषत्वज्ञेयत्वगम्यत्वरूपविशिष्टगुणवाचकत्वप्रदर्शनंचेत्यर्थः । एतच्च "नारायणएवशास्त्रार्थइतिदर्शयितु"मित्युत्तरेणसंबध्यते । कथंविशिष्टगुणवाचकत्वप्रदर्शनेननारायणस्यशास्त्रार्थतासिद्धिरित्यतउक्तं ॥ **ब्रह्मशब्दसमानार्थत्वादिति** ॥ तथाचनारायणशब्दस्यविशिष्टगुणवाचकत्वेनतद्वाचकब्रह्मशब्दसमानार्थत्वात् ब्रह्मणश्चशास्त्रार्थत्वात् नारायणस्यापिशास्त्रार्थत्वेनाधिकृतत्वाद्युक्तंनम्यत्वमितिभावः । ननुचगुणोदीर्णत्वमात्रस्यनारायणशब्दार्थत्वकथनेनापितदर्थकब्रह्मशब्दसमानार्थत्वासिद्धिसंभवाद्गुणचतुष्टयाभिधायकत्वप्रदर्शनम

SGDF
Sri Gargeshwari Digital Foundation

प्र० आह ॥ **विशिष्टेति** ॥ नरीयतेऽनेनेत्यत्रडप्रत्ययेकृते नरमितिस्यात् नारमितिकथं अतआह ॥ **नरीयतइतीति** ॥ औणादिकेडप्रत्यये टिलोपेच नरमितिभवति अत:"प्रज्ञादिभ्यश्चे"ति स्वार्थिकेऽण्प्रत्यये "तद्धितेष्वचामादे"रित्यादिवृद्धौ "यस्येतिचे"त्यकारलोपे वक्ष्यमाणरी

कत्वाच्चनारायणएवशास्त्रार्थइतिदर्शयितुं ॥ नरीयतइति ॥ नञुपपदात् रीङ्क्षयइत्यस्मा द्धातोः करणेडप्रत्यये प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययेचकृते नारमितिरूपसिद्धिरितिद्रष्टव्यं ।

गु० नुपयुक्तमेवापन्नमित्यतउक्तं ॥ **शास्त्रार्थवाचकत्वाच्चेति** ॥ तथाचगुणचतुष्टयस्याध्यायचतुष्टयप्रतिपाद्यत्वान्नारायणशब्दस्यगुणचतुष्टयाभिधायकत्वान्नारायणस्यशास्त्रार्थत्वसिद्धिरितिभावः । यद्वाब्रह्मशब्दसमानार्थत्वान्नारायणशब्दस्य ब्रह्मणःशास्त्रप्रतिपाद्यत्वान्नारायणस्यशास्त्रप्रतिपाद्यत्वमित्युक्तौपरंपराभवतीत्यपरितोषादाह ॥ **शास्त्रार्थेति** ॥ शास्त्रार्थभूतंगुणोदीर्णत्वनिर्दोषत्वादिप्रतिपादकत्वेनारायणशब्दस्यदर्शितेसाक्षान्नारायणएवशास्त्रप्रतिपाद्यइतिसिद्ध्यतीतिभावः । अत्रदर्शयितुमित्यतःपरंअतोयुक्तंब्रह्ममीमांसाशास्त्रव्याख्यानावसरेतन्नमनमितिशेषोबोध्यः । तेनब्रह्ममीमांसाशास्त्रेब्रह्मणएवाधिकृतत्वेननम्यत्वात्तत्परित्यागेननारायणवंदनं नयुक्तमितिचोद्यानवकाशइतिध्येयं ॥ **नञुपपदादिति** ॥ डप्रकरणे"अन्येष्वपिदृश्यत"इत्यपिशब्दस्यप्रागुक्तोपपदकर्तृकारकादिसर्वोपाधिव्यभिचारार्थत्वादितिभावः । नन्वेवंनरीयतेऽनेनेति करणेडप्रत्यये डित्वाट्टिलोपे नरमित्येवस्यात् नारमितितुकथमित्यतआह ॥ **प्रज्ञादित्वादिति** ॥ "प्रज्ञाश्रद्धार्चाभ्योण"इतिसूत्रेप्रज्ञास्यास्तीत्यर्थेमत्वर्थीयणप्रत्ययविधानेनप्राज्ञइतिरूपोपपादनेपि"प्रज्ञादिभ्यश्चे"तिसूत्रेप्रजानातीतिप्रज्ञःसएवप्राज्ञइतिस्वार्थेऽण्प्रत्ययविधानात्प्रज्ञादित्वान्नरशब्दस्य नरमेवनारमितिस्वार्थेऽण्प्रत्ययेकृते"तद्धितेष्वचामादे"रित्यादिवृद्धौ"यस्येतिचे"त्यकारलोपेनारमितिरूपसिद्धिरितिभावः । ज्ञानस्यबंधनिवृत्त्यर्थत्वेनमोक्षसुखाति

प्र० त्यानलोपाभावेच नारमितिसिद्धमित्यर्थः । अरमणंरमणाभावइतिभ्रांतिंनिराह ॥ **अरमणमिति** ॥ नारमित्यनेनकथंनिर्दोषवेदोत्पन्नत्वस्य लाभइत्यतआह ॥ **निर्दोषेति** ॥ नविद्यंतेअराःदोषाःनिरर्थकत्वादयोयस्यसोयंनारोवेदः ततोऽणि यस्येतिलोपेनारमितिसिद्धं । संबंधश्चजन्यजनकभावइतिभावः । ननु नारशब्दात् "वृद्धिर्यस्याचामादिस्तद्वृद्ध"मितिवृद्धसंज्ञायां"वृद्धाच्छ"इतिच्छप्रत्यये नारीयमितिभाव्यं कथं नारमिति । सत्यं । "वानामधेयस्यवृद्धसंज्ञे"तिवा"ओर्गुणः"इत्यत्रगुणग्रहणेनज्ञापनात्संज्ञापूर्वकोविधिरनित्यइतिवा नारमितिसाधु । अत एवतृतीयस्य द्वितीयेपादे"स्पृहिगृहिपतिदयी"तिसूत्रे श्रद्धालुरित्यत्रश्लावितिद्विर्वचनमाशंक्य संज्ञापूर्वकोविधिरनित्यइतिद्विर्वचनंनेत्युक्तं

अरमणंदुःखं ॥ निर्दोषवेदोत्पन्नत्वादिति [२।१] ॥ निर्दोषवेदवाचका न्नारशब्दात्तस्येदमित्यणिकृते नारशब्दो वेदजन्यज्ञानवाचीतिभावः ॥

गु० शयार्थत्वाभावादरमणशब्दोनसुखाभावार्थइत्याह ॥ **अरमणंदुःखमिति** ॥ कथंनारशब्देनवेदजन्यज्ञानस्यलाभः येनतस्यतद्वाचित्वंस्यादित्यतआह ॥ **निर्दोषेति** ॥ नविद्यंतेअरादोषायस्यासौनारोवेदः ततोवेदवाचकान्नारशब्दान्नारस्येदंनारमित्यर्थेऽणिकृते"यस्येतिचे"त्यकारलोपेनारमितिरूपसिद्धिः । "तस्येद"मितिसूत्रेणसंबंधसामान्येऽणोविहितत्वेपियोग्यत्वात्सामान्यस्यविशेषेपर्यवसानमभिप्रेत्यतज्जन्येत्युक्तं । नचनारशब्दात्"वृद्धिर्यस्याचामादिस्तद्वृद्ध"मितिवृद्धसंज्ञायां"वृद्धाच्छ"इतिच्छप्रत्ययेनारीयमितिभवितव्यं । तत्कथमणूप्रत्ययाश्रयणेननारमितिरूपंसिध्येदितिवाच्यं । "वानामधेयस्ये"तिवृद्धसंज्ञायाःवैकल्पिकत्वेननारीयंनारमितिरूपद्वयस्याप्युपपन्नत्वात् "ओर्गुण"इत्यत्रगुणग्रहणेनसंज्ञापूर्वकस्यविधेरनित्यत्वज्ञापनाच्चतदुपपत्तिः । अतएव"स्पृहिगृही"तिसूत्रेश्रद्धालुरित्यत्रश्लावितिद्वि

SGDF Sri Gargeshwari Digital Foundation

प्र० मंजर्यां । ननु अरायणोनेत्यादिव्युत्पत्तौ नञोनलोपे नुटिचसति अनरायणेतिभाव्यमित्याशंक्योक्तंमूले नगनाकादिवदिति । तत्राक्षिपति ॥ नन्विति ॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्ये"तिसूत्रेण नाकशब्दस्य "नगोप्राणिष्वन्यतरस्या"

नगंनाकादि(शब्द)वदिति ॥ ननु नभ्राण्नपादित्यादिसूत्राभ्यांनाकनगशब्दयोर्नलोपाभावउक्तः

गु० र्वचनमाशंक्यसंज्ञापूर्वकोविधिरनित्यइतिद्विर्वचनंनेत्युक्तंपदमंजर्यामितिध्येयं ॥ **नभ्राण्नपादित्यादिसूत्राभ्यामिति** ॥ अत्रनभ्राण्नपादित्येकदेशेनसमग्रसूत्रोपलक्षणात् आदिशब्देन"नगोप्राणिष्वन्यतरस्या"मित्यस्यसंग्रहात् सूत्राभ्यामित्युक्तं । ततश्च"नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्ये"तिसूत्रेणनाकशब्दे"नगोप्राणिष्वन्यतरस्या"मितिसूत्रेण नगशब्दे नलोपाभावोनिपात्यतइत्यर्थः । आदिपदेनप्रभृत्यर्थकेनशिष्टसंपूर्णसूत्रपरिग्रहः । केवलसूत्रपदेनच"नगोप्राणिष्वन्यतरस्या"मितिसूत्रपरिग्रहः । तथाच"नभ्राण्नपादित्यादिसूत्राभ्या"मित्युक्तमुपपन्नमित्यप्याहुः ॥ **कथंतद्दृष्टांतीकरणमिति** ॥ यद्यप्युदाहृतसूत्राभ्यामिहनलोपाभावस्यानुक्तत्वादेवतद्दृष्टांतीकरणमुपपद्यते । प्रत्युततत्सूत्रेणेहनलोपाभावोक्तौ अत्रनभ्राण्नपादित्यादिनानलोपाभावः इत्येववक्तुंशक्यत्वात् येनसूत्रेणनलोपाभावोविधीयतेतस्यैकस्यैवोदाहरणसंभवाच्चनगनाकादिशब्दवदितिदृष्टांतीकरणमेवानुपपन्नंप्रसज्यते । किंचयदिनलोपाभावएवदृष्टांतः तर्हिनाकादिशब्दवदित्येतावतैवपूर्तेर्वैकल्पिकनलोपाभाववन्नगशब्दोदाहरणंव्यर्थं नभ्राडित्यस्यैवदृष्टांतत्वसंभवे नाकशब्दोदाहरणंचव्यर्थं । तस्मादलाक्षणिकडप्रत्ययप्रदर्शनार्थंनगशब्दस्य नित्यनलोपाभावस्यतत्प्रयुक्तनुडभावस्यनारमणंयेनेत्यादिव्युत्पत्तेश्चप्रदर्शनायनाकशब्दस्य अराश्रयोनभवतीतिप्रदर्शनायादिशब्देननासत्यादिशब्दस्यचग्रहणमित्यंगीकार्यं । तथाचोदाहृतसूत्राभ्यामत्रडप्रत्ययनलोपाभावानुक्तावपियथाकथंचिड्डप्रत्ययनलोपाभावादिव्युत्पादनायनगनाकादिशब्दवदितिदृष्टांतीकरणंयुक्तमेव । तथाचोक्तंन्यासेरूढिशब्दाएतेयथाकथंचिद्व्युत्पाद्याइति । तथापिडप्रत्ययेसाधकस्योभयत्रसाम्येनतस्यदृष्टांतत्वसंभवेपिनलोपाभाव ॥ १० ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० मितिसूत्रेण नगशब्दस्यनलोपाभावोनिपातितइत्यर्थः । नगनाकादौयथासौत्रत्वात्साधुत्वमेवमिहापिसौत्रत्वादेवसमाधानमितिटीकाशय इत्यभिप्रेत्यसौत्रत्वप्रकारंदर्शयति ॥ **मैवमित्यादिना** ॥ स्त्रीशब्दात्हिताद्यर्थेतद्धिते"स्त्रीपुंसाभ्यांनञ्स्नञौभवनादि"तिनञ्प्रत्यये स्त्री नञ्

नारायणशब्देतुनेतिकथंतदृष्टांतीकरणमितिचेन्मैवं । स्त्रैणार्थइत्यत्र "स्त्रीपुंसाभ्या"मित्यादिनावि हितस्यनञो नलोपाभावार्थं "नलोपोनञ"इतिसूत्रे"रात्रेःकृतिविभाषे"त्यतोऽनुवृत्तायाविभाषाया

गु० साधकसूत्रद्वयस्येहाप्रवृत्त्यासाधकांतरस्याभावेनकथंचिदपिनलोपाभावस्यव्युत्पादयितुमशक्यतयाकथंतदृष्टांतीकरणमित्यत्रतात्पर्यमित्यवधेयं । अत्रनभ्राडित्यादिषुनारायणशब्दोप्युपसंख्येयइतिसुधोक्तरीत्यासमाधानेसत्येवस्वयंसमाधानांतरमाह ॥ **मैवमिति** ॥ **स्त्रैणार्थइत्यत्रेति** ॥ स्त्रियाअयंस्त्रैणः"स्त्रीपुंसाभ्यांनञ्स्नञौभवना"दित्यत्र"धान्यानांभवनेक्षेत्रेखञि"तिवक्ष्यमाणभवनसंशब्दात्प्राग्येऽर्थास्तेषुस्त्रीशब्दान्नञोविहितत्वात् तस्येदमित्यर्थस्यततःप्राचीनत्वात् । स्त्रीशब्दादिदमर्थेनञ्प्रत्यये ञित्त्वादादिवृद्धौ णत्वेच स्त्रैणशब्दनिष्पत्तिः । ततःसचासावर्थश्चेत्यर्थशब्देनसमासेस्त्रैणार्थइतिभवति । अत्र"नलोपोनञ"इत्येतत्प्रसक्त्यर्थमर्थपदंगृहीतं । अन्यथा"नलोपोनञ"इतिसूत्रे"अलुगुत्तरपद"इत्यतउत्तरपदइत्यस्यानुवृत्तेरुत्तरपदस्यापरत्वादेवनलोपाप्रसक्त्याविभाषाकथनानौचित्यप्रसंगादितिभावः । तर्हिअनश्वइत्यादावपिरूपद्वयंप्राप्नोतीत्यतआह ॥ **व्यवस्थितेति** ॥ क्वचिन्नित्यंस्यात्क्वचिन्नैवस्यादितिव्यवस्थितेत्यर्थः । "नलोपाभावाद्युपपत्ते"रित्यादिपदेनतत्रयुक्तनुडभावपरिग्रहः । नचैवंसति"नलोपोनञ"इत्यत्रनञइतिसानुबंधग्रहणमनर्थकमापद्यते । तथाहि । पामनपुत्रइत्यादौनलोपाभावार्थंसानुबंधग्रहणमितिवाच्यं । पामास्यास्तीतिपामनः"लोमादिपामादिपिच्छादिभ्यःशनेलच"इतिपामशब्दात्मत्वर्थीयोनप्रत्ययः । तस्यपुत्रशब्देनषष्ठीसमासः विभाषानुवृत्तौ तस्याःव्यवस्थितत्वेच ततएवपामनपुत्रइत्यत्रापिनलोपाभावोपपत्तौ किंसानुबंधग्रहणेन । नचविभाषाननुवृत्तौस्त्रैणपुत्रःस्त्रैणार्थइत्यत्रनलोपाभावोनस्यात् । सानुबंधकत्वस्यापितत्रसत्वात् ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० इतिस्थिते ञित्वादादिवृद्धौ णत्वेच स्त्रैणइतिरूपं ततोर्थशब्देनसमासेस्त्रैणार्थइतिभवति । तत्रनलोपोनञइतिनलोपेकार्ये णत्वस्यासिद्धतया नलोपे"तस्मान्नुडची"तिनुटिकृते रूयायनर्थइतिप्राप्नोति । तत्र"रात्रेःकृतिविभाषे"त्यव्यवहितपूर्वसूत्राद्विभाषापदमनुवृत्त्य नञोनलोपोभवति विभाषयेतिषष्ठेतृतीयपादेव्याख्यातं । तर्हिअनश्वइत्यादावपिरूपद्वयंप्राप्नोति अतःक्वचिन्नित्यंस्यात् क्वचिन्नैवस्यात् इतिव्यवस्थितविकल्पइति

व्यवस्थितविभाषात्वस्यन्यासएवोक्तत्वेन नारायणइत्यत्रापि नलोपाभावाद्युपपत्तेः ।

गु० अतोविभाषानुवृत्तिरावश्यकीतिवाच्यं ॥ प्रत्ययञित्त्वेहि"अचोञ्णिती"तिवृद्धिर्विहिता । तथा"ञ्नित्यादिर्नित्य"मित्याद्युदात्तत्वंचतन्निमित्ततयाप्रत्ययञित्त्वस्य चरितार्थत्वान्निपातञित्त्वस्याचरितार्थत्वाच्चरितार्थाचरितार्थयोश्चाचरितार्थस्यैवग्राह्यत्वात् "नलोपोनञ"इत्यत्राचरितार्थसानुबंधकनिपातस्यैवग्रहणेनस्त्रैणार्थइत्यादौ नलोपाभावोपपत्तेः । यद्वापूर्वपदत्वेननञोविशेषणान्नभवतिनलोपः । उत्तरशब्दस्यसंबंधिशब्दत्वेनपूर्वपदभूतस्यनञएव"नलोपोनञ"इत्यत्रग्रहणादितिन्यासए वोक्तत्वात् । स्त्रैणपुत्रइत्यादौतुननञःपूर्वपदत्वं । स्त्रैणइत्येतावत्येवपूर्वपदत्वस्यपर्याप्तत्वेननञ्मात्रेपूर्वपदत्वापर्याप्तेः । अतोनभवतिस्त्रैणार्थइत्यादौनलोपः । नचैवं सानुबंधकग्रहणमनर्थकमापद्यते । अपूर्वपदत्वादेवपामनपुत्रइत्यादौनलोपाभावसंभवात् । नहितत्रनकारमात्रेपूर्वपदत्वपर्याप्तिः । किंतुपामनइत्यस्मिन्नितीतिकथं तत्प्रसक्तिरितिवाच्यं । नैकधेत्यादौनलोपाभावसिद्ध्यर्थत्वोपपत्तेः । तत्रनकारस्यपूर्वपदत्वपर्याप्त्यधिकरणत्वेनपूर्वपदत्वविशेषणेननलोपाभावासिद्धेः । व्यवस्थितवि भाषाश्रयणेचततएवनैकधेत्यादावपिनलोपाभावसिद्ध्युपपत्तेरनर्थकंसानुबंधग्रहणमापद्यते । तस्मात्व्यवस्थितविभाषाश्रयणस्यायुक्तत्वात्कथंतेननारायणशब्देनलोपा भावसिद्धिः । नञःपूर्वपदत्वपर्याप्त्यधिकरणत्वेननलोपप्राप्तिर्वज्रलेपत्वात् । तत्कथमेतत्समाधानमित्यतोन्यासएवोक्तत्वादित्युक्तं । नात्रगुणदोषचिंतयाप्रयोजनं । न्यासस्यापिवृत्तिव्याख्यानत्वात्तदुक्तरीत्याप्यस्मदभिलषितसिद्धेः । संमतंचैतत्ग्रंथकारस्य । अन्यथाव्यवस्थितविभाषाश्रयणान्नलोपाभावोपपत्तेरित्येवब्रूयात् । नतुन्या

प्र० वृत्तिव्याख्यानेन्यासएवोक्तं । नास्माभिर्यतितव्यमित्यर्थः । आदिपदेननुडभावग्रहः । ननुविभाषापदानुवृत्तौ नभ्राण्नपादित्यादिसूत्रंव्यर्थं । तत्राप्युक्तरीत्यासमाधानसंभवात् । प्रपंचनस्यागतिकगतित्वात् । परिगणनत्वे प्राप्तःसएवदोषः । अतोज्ञायतेनात्रतदनुवृत्तिरस्तीत्यनुशये नाह ॥ **यद्वेति** ॥ अस्मिन्पक्षेनभ्राडित्यादितु नञ्स्वरार्थं नञ्समासइतिभावः । मंजर्यांतु नञ्प्रत्ययस्य नलोपमाशंक्य प्रत्ययञित्त्वस्य वृद्धिस्वरयोश्चरितार्थत्वात् निपातञित्त्वस्याचरितार्थत्वात् निपातस्यैवनञो"नलोपोनञ"इतिसूत्रेग्रहणं नप्रत्ययनञः इत्येकंसमाधिमुक्त्वा उत्तरपदाधिकारवशात्पूर्वपदस्यनञइत्याक्षेपात्प्रत्ययनञोपूर्वपदत्वान्ननलोपइत्युक्तं । तन्मतेविभाषापदाननुवृत्तेस्तदनुरोधेनवाऽह ॥ **यद्वेति** ॥

यद्वा नसमासोस्तु ।

गु० सएवोक्तत्वादितीत्यवधेयं । यद्वाएतदस्वरसादेवाह ॥ **यद्वेति** ॥ "अमानोनाःप्रतिषेध"इतिवचनात्प्रतिषेधार्थकस्यनशब्दस्यनैकधेत्यादाविव"सुप्सुपे"त्यने नसमासइतिभावः । ततश्चोक्तरीत्या"नलोपोनञ"इत्यत्रसानुबंधकग्रहणसिद्धेर्नसमासाश्रयणेनतेननलोपप्राप्तिरिति । अत्रवदंति नात्रप्रतिषेधार्थकनसमासाश्रयणमुचितं "नञोविरुद्धार्थवाचित्वात् नञोभावार्थत्वा"दित्यादिटीकाविरुद्धत्वात् । तस्मात्प्रौढिवादएवायं । अतएवास्त्वित्युक्तमिति । किंचैवंनगनाकादिशब्दवदितिदृष्टांती करणमनर्थकमापद्यते । एतत्पक्षेनलोपाप्राप्तेस्तदनपेक्षणादिति । तदसत् । टीकायाआद्यपक्षानुसारेणप्रवृत्तत्वेनतदविरोधात् । दृष्टांतीकरणस्यचालाक्षणिकऽप्रत्य यप्रदर्शनार्थत्वेनसार्थक्यादितिसंक्षेपः । ननुनारायनमितिवक्तव्यं । नारायणमितिणत्वंतुतत्प्रापकाभावादयुक्तं । नच"रषाभ्यांनोणःसमानपद"इत्येतदेवतत्प्राप कमितिवाच्यं । निमित्तस्यरेफस्यनिमित्तिनोनकारस्यचसमानपदस्थत्वएवतेनणत्वविधानेनप्रकृतेचतयोरसमानपदस्थतयातेनणत्वाप्राप्तेः । नचैकपद्यमैकस्वर्यमेक विभक्तिकत्वंचसमासप्रयोजनमितिवदद्भिर्वैयाकरणैःसमासस्यैकपदत्वांगीकारान्नारायणपदस्यापिपदद्वयसमासरूपत्वेनसमानपदत्वसंभवाद्युक्तैवानेनणत्वप्राप्तिरिति

SGDF Sri Gargeshwari Digital Foundation

प्र० ''अमानोना:प्रतिषेध''इतिनिषेधार्थकनशब्देनसुप्सुपेतिसमासः । तथाचनत्वभावान्ननलोपः । अतएवकौमुद्यांनैकधेत्यादौनसमासइत्युक्तमितिभावः । समासस्थलेसत्यप्यैकपद्ये''रषाभ्यांनोणःसमानपदे''इत्यत्रविवक्षितस्यसमानमेवपदं नतुपूर्वोत्तरपदव्यवहारभागित्येवंरूपस्य समानपदत्वस्याभावात्कथंणत्वमित्यतःसुधोक्तमाह ॥ अत्रेति ॥ ननु ''नपुंसकेभावेक्त''इति नपुंसकइत्यनुवर्तमाने''ल्युट्च''''करणाधि

अत्र''पूर्वपदात्संज्ञायामग''इतिणत्वं

गु० वाच्यं । तत्रअखंडपदत्वरूपैकपदत्वस्यैवसमानपदतयाविवक्षितत्वेनसमासरूपैकपदस्यव्यावर्तितत्वेनासमानपदत्वानिवारणात् । नचात्रज्ञापकाभावइतिवाच्यं । सौत्रसमानग्रहणस्यैवतत्रज्ञापकत्वात् । तदुक्तं । पदइत्येतावतैवसामर्थ्यादेकपदत्वेलब्धेपिसमानग्रहणंयत्समानमेवपदंनकदाचिद्भिन्नं तत्रैव यथास्यादित्येवमर्थं । तेनाखंडपदएवभवतिनसमासपदइति । तथाचदुर्नामरामनामेत्यादाविवाखंडपदत्वाभावान्नारायणपदे नतेनणत्वसंभवइत्यतोत्रसुधोक्तंणत्वप्रापकमुदाहरति ॥ अत्रेति ॥ पूर्वपदस्थान्निमित्तादुत्तरस्यगकारानंतरितस्यनकारस्यणकारआदेशोभवतिसंज्ञाविषयइतिसूत्रार्थः । तथाच असमानपदत्वेपिशूर्पणखेत्यादाविवणत्वंयुक्तमितिभावः । ननु''यदनांतमकर्तरी''तिकर्तृव्यतिरिक्तकारकेयदनप्रत्ययांतं तत्तृतीये नपुंसकलिंगे इत्यमरकोशेऽनप्रत्ययांतस्यनपुंसकतायानियमितत्वात् साध्यते अनेनेतिसाधनमित्यादौसाधनमित्यादिशब्दानांनित्यनपुंसकतायाएवोपलंभादत्राप्ययनशब्दस्याधिकरणसाधनत्वान्नपुंसकतैवयुक्ता । नच''करणाधिकरणयोश्चे''त्यत्र''नपुंसकेभावेक्त''इत्यतोभावग्रहणाननुवृत्त्या''संनियोगशिष्टानांसहवाप्रवृत्तिःसहवानिवृत्ति''रितिपरिभाषयानपुंसकइत्यंशस्यापिनिवृत्तेर्विशेष्यनिघ्नतयालिंगत्रयेपिकरणाधिकरणादौल्युडनुशासनसंभवान्ननपुंसकत्वनियमइतिवाच्यं । तथासतिसाधनादिशब्दानांनियतलिंगत्वाभावप्रसंगात् ''यदनांतमकर्तरी''त्यस्यविशेषवि

SGDF Sri Gargeshwari Digital Foundation

प्र० करणयोश्चे"तिल्युटोविधानेन नारायणमितिनपुंसकलिंगेनभाव्यमित्यतआह ॥ **ल्युटइति** ॥ ल्युटष्टित्करणंहि‘‘टिड्ढाण’’ञित्यादिनाङी
बर्थे । यदिल्युडंतस्यक्लीबत्वमेव तर्हिस्त्रीत्वाभावात् तन्निमित्तकङीबर्थेटित्करणमनर्थकं । तेनज्ञायते लिंगांतरमस्तीति सामान्यतोज्ञापनात्पुँल्लिंग
तोपपत्तिरित्यर्थः । अधिकरणइतिप्रकृताभिप्रायेण । अतएवमहाभाष्ये ‘‘भूवादयोधातव’’इत्यत्र ‘‘कोसावनुमानोनामे’’तिकरणेपुँल्लिंगप्र
योगः । यद्यपिवृत्तौ‘‘करणाधिकरणयो’’रितिसूत्रे नपुंसकइत्यस्यानुवृत्तेरनुक्तेः इध्मप्रव्रश्चनइत्युदाहरणेपुँल्लिंगोक्तेश्च नपुंसकइतिनानुवर्ततइत्ये
वसुवचं । तथापि तदननुवृत्तिरेवटित्करणेनज्ञाप्यतेइत्येवमुक्तमित्यदोषः । वृत्तिकारस्यापीदमेवबीजमित्युक्तंभवति । भाष्येगुरुदेवतासमुच्चा
यकचशब्दसत्त्वादपीत्यस्यवैयर्थ्यंनिरसितुं टीकायां ‘‘स्वस्यगुरुदेवताभेद’’इत्याद्युक्तं । तत्रयद्यपीत्यादेरन्वयाभावात्प्रकारार्थकेतिशब्देनान्वय
माह ॥ **पृथगिति** ॥ नमस्कारस्यविघ्नोत्सारणार्थं अधिकारादिसूचनस्यप्रवृत्त्यर्थं कार्यतया फलस्यस्पष्टत्वात् फलोक्तिरयुक्तेत्यतआह ॥

ल्युटष्टित्करणसामर्थ्येनायनशब्दोधिकरणेत्रिलिंगइतिपुँल्लिंगत्वंचद्रष्टव्यं । पृथङ्नतिरितीत्यत्रेतिशब्दस्य‘‘इत्यरुचिंसूचयती’’ति

गु० षयकत्वाच्चपरिभाषायाअनित्यतामाश्रित्यकरणाधिकरणयोश्चेत्यत्रनपुंसकइत्यनुवृत्तेरावश्यकत्वात् । तथाचनारायणइतिपुल्लिंगानुपपत्तिरेवेत्यतआह ॥ **ल्युटइति** ॥
नचसामर्थ्याश्रयणंनिर्बीजं । करणं करणी प्रमाणं प्रमाणीत्याद्यभियुक्तप्रयोगाणामेवतत्रबीजत्वात् । अतएव‘‘टिड्ढाणञ्’’इतिसूत्रेलटोप्यनुबंधकत्वात् टिद्ग्रहणेन
ग्रहणेनिरस्ते तर्हिततएवल्युटोप्यग्रहणंप्रसज्येतेत्याशंकिते लटष्टित्वस्यटेरेत्वेनचरितार्थत्वात् ल्युटष्टित्वस्याचरितार्थत्वात्तद्ग्रहणेटित्ववैयर्थ्यापत्त्याङीबर्थमेवटित्क
रणसामर्थ्यं । इदंचबाहुलकमनाश्रित्यसमाधानं । तदाश्रयणेतु‘‘कृत्यल्युटोबहुल’’मितिबाहुलकादेवत्रिलिंगतासिद्धिरितिसर्वमनवद्यं । ‘‘पृथङ्नतिरिती’’त्यत्रत्य
स्येतिशब्दस्यवैयर्थ्यमन्वयोपदर्शनेनपरिहरति ॥ **पृथगिति** ॥ ननुनमस्कारग्रथनंव्यर्थं । नचविघ्नाभावार्थंतत् । नमस्कारादिमात्रेणैवतत्सिद्ध्याग्रथनस्यातदर्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० विघ्नाभावस्येति ॥ तत्कार्यं अधिकारादिसूचनंकार्यं । तत्स्मरणेनैव अधिकारादिस्मरणेनैव । स्मरणस्यान्यथापिसंभवादितिभावः । "अनन्यार्थतयाव्याख्येय"मित्यत्र स्वप्रयोजनार्थतयाव्याख्येयमितिभाति तदयुक्तं व्याख्यानस्यान्यार्थत्वादित्यतोर्थमाह ॥ **प्रातीतिकेति ॥**

पूर्वेणान्वयः । विघ्नाभावस्यनमस्कारेणैवसिद्धेर्ग्रथनंव्यर्थं एवमधिकार्यादिसूचनस्यप्रवृत्त्यंगतयावक्तव्यत्वेपि(कर्तव्यत्वेपि)नमहाफलार्थंतत्कार्यं तत्स्मरणेनैवफलसिद्धेरित्यतआह ॥ [२।१५]नमस्काराधिकार्यादिग्रथनसूचनेइति ॥ [२।१७]अनन्यार्थतयेति ॥ प्रातीतिकार्थांतरपरंनभवतीत्यनेनप्रकारेणेत्यर्थः ॥

गु० त्वात् । एवमधिकारादिसूचनमपिव्यर्थमेव । नचमहाफलार्थंतत् । अधिकारादिस्मरणेनैवतत्सिद्ध्यातदर्थमधिकारादिसूचनस्यानावश्यकत्वादितिशंकते ॥ **विघ्नाभावस्येति** ॥ नन्वधिकारिसूचनविषयेकथंवैयर्थ्यशंका । अधिकारादिसूचनस्यशिष्यप्रवृत्तिहेतुत्वेनार्थवत्त्वसंभवादित्यतआह ॥ **अधिकार्यादिसूचनस्येति** ॥ नचाधिकारादिसूचनस्यमहाफलार्थत्वानुक्तेःकथंतदाक्षेपइतिवाच्यं । तथासतिग्रथनस्यविघ्नाभावार्थतायाअपिटीकायामनुक्त्यातदाक्षेपस्याप्यनौचित्यप्रसंगात् । नचपूर्वग्रंथात्तदलाभेपिसंभावितत्वात्तदाशंक्यनिराकरणमितिवाच्यं । प्रकृतेपिसाम्यात् । टीकायांतुमहाफलसाधनस्मरणविषयत्वादधिकारादेःप्राधान्यं ततश्चावश्यसूचनीयत्वमित्येवाभिमतं । नतुसूचनस्यकर्तव्यतायांप्रवृत्त्यंगत्ववत्स्मरणस्यमहाफलार्थत्वरूपहेत्वंतरपरत्वमपि ॥ वैयधिकरण्यप्रसंगात् । वस्तुतस्तु"तत्स्मरणस्यमहाफलहेतुत्वाच्चे"तिटीकास्वारस्यानुसारेणसूचनस्यस्मरणद्वारामहाफलार्थत्वोक्तेर्नकिंचिदेतत् । ततश्चस्मरणसूचनयोःसाध्यसाधनभावानवगत्याशंकेयं । परिहारेतयोःसाध्यसाधनभावस्यस्पष्टत्वादेवतदनुपपादनमित्यवधेयं । "अनन्यार्थतयाव्याख्येय"मितिटीकायांस्वप्रयोजनतयाव्याख्येयं नतुपरप्रयोजनतयेति भाति । तदयुक्तं । व्याख्यानस्यपरप्रयोजनतयापरप्रयोजनत्वनिषेधानुपपत्तेरित्यतोर्थमाह ॥ **प्रातीतिकार्थांतरपरंनभवतीति** ॥ अत्युपादेयत्वाभावादनन्यार्थ

प्र० अनेनप्रकारेणेतितृतीयार्थः । प्रायःपदव्यावर्त्यस्यदुर्गमत्वादाह ॥ **अप्रमाणत्वादिनेति** ॥ अथेतिभाष्येऽथशब्दस्यमंगळाद्यर्थकत्वायोगादानंतर्यार्थत्वेचातिशयाभावेनवैयर्थ्यमित्यतआह ॥ **अथेत्यस्येति** ॥ अतएवप्रमेयदीपिकायां"व्यासोऽवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारे"

[२।१७]प्रायस्तदेवोपादेयमिति ॥ अप्रमाणत्वादिनानिश्चितस्यापिख्यात्याद्यर्थंव्याख्यानदर्शनात्प्रायइत्युक्तं । "अथेष्टानिष्टे"तिभाष्येऽथेत्यस्यावतारानंतरमेव नतुपरोपदेशमपेक्ष्य येन स्वतःसार्वज्ञंनस्यादित्यर्थः ।

गु० तयानव्याख्येयानीतिसाधनेअप्रयोजकत्वमाशंक्यव्यापकाभावेन व्याप्याभावसाधनत्वान्नतदित्यभिप्रेत्य अनन्यार्थतयाव्याख्येयत्वात्युपादेयत्वयोर्व्याप्यव्यापकभावोपदर्शनपरे"यदुपादेय"मितिग्रंथे अत्युपादेयत्वाभावेननिश्चितेपिख्यात्याद्यर्थंव्याख्यायमानेव्यभिचारपरिहारायानन्यार्थतयेतिव्याप्यकोटौविशेषणं । अतएवव्यापकाभावेनव्याप्याभावानुमानेपितदर्थवदित्याशयवानन्यार्थतयेत्येतत्तत्परिहारोपयुक्ततयाव्याचष्टे ॥ **प्रातीतिकार्थांतरपरंनभवतीत्यनेनप्रकारेणेति** ॥ अनेन "अनन्यार्थतये"तिप्रकारेतृतीयेत्युक्तंभवति । "यच्चप्रमाणत्वेसतीष्टसाधनतावबोधकंप्रायस्तदेवोपादेय"मितिटीकायांप्रायउपादेयत्वस्यप्रमाणत्वेसतीष्टसाधनतावबोधकत्वव्याप्यतालाभात् प्रमाणत्वेसतीष्टसाधनतावबोधकत्वाभावान्नप्रायउपादेयमितिफलितेऽनुमाने प्रायःपदव्यावर्त्यस्यदुर्गमत्वात्तद्वैयर्थ्यमाशंक्यपरिहरति ॥ **अप्रमाणत्वादिनेति** ॥ यदुपादेयंतत्प्रमाणत्वेसतीष्टसाधनावबोधकमित्येवोक्तौ ख्यात्यर्थंव्याख्यायमाने अप्रमाणत्वादिनानिश्चिते उपादेयत्वसत्त्वेपि प्रमाणत्वेसतीष्टसाधनतावबोधकत्वाभावाद्व्यभिचारःस्यात् । तद्वारणायप्रायइत्युक्तं । तदर्थश्च अतीति । ततश्च अत्युपादेयत्वस्यैवव्याप्यत्वेनख्यात्याद्यर्थंव्याख्यायमाने यादृशतादृशोपादेयत्वसत्त्वेप्यत्युपादेयत्वाभावान्नतत्रव्यभिचारः । अतएवतत्रव्यतिरेकानुमानेप्युक्तव्यभिचारपरिहारात्प्रायइत्युक्तं । तस्यात्यर्थत्वंच ब्रह्मसूत्राणांअत्युपादेयत्वादित्युत्तरटीकानुसारेणज्ञातुंशक्यमितिप्रायइत्यस्योक्तव्यभिचारपरिहारकत्वानुपपादनंनदोषायेतिज्ञातव्यं ॥ **नतुपरोपदेशमपेक्ष्येति** ॥ तथाच

SGDF Sri Gargeshwari Digital Foundation

प्र० तिभाष्यगतस्यतत‍श्चेत्यस्यावतारानंतरमेवेत्यर्थउक्तइतिभावः । एतेन"अथ अनंतरमेवे"तितत्वप्रदीपवाक्यंविवृतंभवति। वेदमुत्सन्नमित्या देरन्वयाभावा(ना)दाह ॥ **वेदमुत्सन्नमित्यादेरित्यस्येति** ॥ अवांतरवेदादीत्यस्यदुर्गमार्थत्वाद्बोधार्थमाह ॥ **स्वतएवेति** ॥ तदल्पाक्षरत्व मित्यत्रविवक्षितार्थासिद्धिरेवाल्पाक्षरत्वमितिभाति तच्चायुक्तमितिविवक्षितपूरणेनार्थमाह ॥ **यावदिति** ॥ यदिबहुशाखानिर्णायकत्वंविश्व

वेदमुत्सन्नमित्यादेरित्यस्य इत्यर्थइतिवक्ष्यमाणेनान्वयः ॥ अवांतरवेदादिविभागे[३।२३]कथनमिति ॥ स्वतएवऋङ्गिगदा दिरूपादेकैकस्मान्महावेदादुद्धृतस्यावांतरस्यऋगादिवेदस्यचतुर्विंशत्यादिशाखाभेदेन आदिपदेन शाखानांचोपशाखाभेदे नविभागकथनमित्यर्थः । यद्वा महावेदस्यावांतरवेदत्वेन आदिपदेनचतुर्विंशत्यादित्वेनचविभागकथनमित्यर्थः ॥ त[३।१]दल्पा क्षरत्वमिति ॥ यावदक्षरतांविनाविवक्षितार्थासिद्धिः तदर्थप्रतिपादनायततोधिकाक्षरानुपादानमल्पाक्षरत्वमित्यर्थः ॥

गु० "वेदमधीत्यस्नाया"दित्यत्रेवनानंतर्यमात्रमत्रविवक्षितं। तस्यस्वतःसिद्धत्वात् । किंतु"सिद्धेसत्यारंभोनियमार्थ"इतिन्यायादव्यवहितानंतर्यमेवविवक्षितमितिनत दर्थकभाष्यस्थाथशब्दवैयर्थ्यमितिभावः। व्यवहितत्वादन्वयंदर्शयति॥ **वेदमुत्सन्नमित्यादेरित्यस्य इत्यर्थइतिवक्ष्यमाणेनान्वयइति** ॥ अवांतरवेदादीत्येत दुर्गमार्थत्वाद्व्याचष्टे ॥ **स्वतएवेति** ॥ व्यासावतारमनपेक्ष्यनारायणरूपेणपरमात्मनाविभक्तादुपवेदाख्यादित्यर्थः । भाष्येशाखानामुपशाखाभेदस्याकथितत्वाट्टी कायांतत्परादिशब्दोनयुक्तइत्यरुच्याप्रकारांतरेणतद्व्याचष्टे ॥ **यद्वेति** ॥ **यावदक्षरतामिति** ॥ अत्रतदर्थप्रतिपादनायेतिविशेषणाट्टीकायांतदल्पाक्षरत्वमित्यत्रत च्छब्देनबुद्धिस्थमेवपरामृश्यते कंठोक्तस्यपरामर्शायोगादित्युक्तंभवति । सुधायांतु"श्रुत्याऽर्थाद्वायोर्थःप्रतीयतेतदप्रतिपादनमल्पाक्षरत्वमित्युक्तं । तदप्यनेनटीकै कवाक्यतयायोजितंभवति । विवक्षितार्थासिद्धिःश्रुत्याअर्थाद्वेति तत्प्रतिपादनायतदधिकानुपादानमेवतदप्रतिपादनमिति । तेनश्रुत्याऽर्थाद्वाप्रतीयमानस्यस्वेनैवश्रु

SGDF
Sri Gargeshwari Digital Foundation

प्र० तोमुखत्वं तर्हिशब्दान्वाख्यानपरेमहाव्याकरणसूत्रेदैवमीमांसासूत्रादौचाव्याप्तिरित्यतआह ॥ **सव्याकरणेति** ॥ अल्पाक्षरमित्यनेनैवव्य र्थाक्षरादिराहित्यस्यलाभादस्तोभमितिव्यर्थमित्यतोभिप्रायमाह ॥ **अर्थेति** ॥ कारणांतरसंभवादित्यस्य''मुख्यस्यनिर्विशेषेणे''त्यनेनकथमुत्त रमित्यतउत्तरार्धेनतल्लब्धमित्याह ॥ **मुख्यस्येतीति** ॥ **वेदस्येति** ॥ अस्यार्थस्यवेदोक्तत्वाभावेतद्विदामेतदुक्तेरयोगाद्वेदस्यप्रमाणीकृतत्वादि

[३।१०] बहुशाखानिर्णायकत्वमिति ॥ सव्याकरणसूत्रादेरपिबहुशाखागतपदार्थनिर्णायकत्वान्नाव्याप्तिरितिज्ञेयं ॥ [३।११] व्यर्था क्षरादिराहित्यमिति ॥ अर्थाप्रतिपादकत्वेपिसाम्निस्तोभाक्षराणांऋगक्षराव्याप्तगानभागपरिपूरणायेव प्रयोज नांतरायाक्षराप्रयोगइत्यर्थः ॥ [३।१७] कारणांतरसंभवादित्यतआहेति ॥ ''मुख्यस्ये''तिमूलग्रंथे मुख्यस्यनिर्विशेषणश ब्दवाच्यत्वे ''इतिवेदविदःप्राहु''रित्यनेन वेदस्यवृद्धव्यवहारस्यच प्रमाणीकृतत्वात्तेनशंकायाःपरिहारइतिभावः ॥

गु० त्याऽर्थाद्वाप्रतिपादनात्तदप्रतिपादनोक्तिर्व्याहतेतिसुधायांशंकानवकाशः । सूत्रगतविवक्षितार्थप्रत्यायकश्रुत्यतिरिक्तश्रुत्याअप्रतिपादनस्यैवविवक्षितत्वादितिभा वः ॥ पर्यायेषुचलाघवगौरवचिंताभावाभिप्रायेणचैतल्लक्षणं । अन्यथाआनंदमयइत्यादावपिसुखमयइतिकमयइतिवावक्तुंशक्यत्वेनाल्पाक्षरत्वाभावापत्तेरित्यवधेयं । अत्रटीकायांविश्वतोमुखत्वमेवसूत्रलक्षणतयाऽभिमतं । अन्यत्तुस्वरूपकथनमात्रं । अतएवेहटीकायांविश्वतोमुखत्वस्यैवाव्याप्त्यादिशंकापरिहारःकृतइत्यवधेयं ॥ **अर्था प्रतिपादकत्वेपीति** ॥ तेननस्वरवर्णसाधारण्येनसमन्वयोक्तिविरोधः ॥ **इत्यतआहेतीति** ॥ एतादृशीशंकाकथमनेनपरिहृतेत्यर्थः ॥ **कर्तरीति** ॥ कर्तृकर्मणोः कृतीतिकर्तरिषष्ठीतिभावः । करणेकर्तृत्वोपचाराभिप्रायेणेदं । शब्दस्यकरणत्वेनकर्तृत्वाभावात् । यद्वाअवांतरव्यापारवतएवकारणस्यकरणत्वात्प्रधानक्रियांप्रति करणस्यापिस्वव्यापारंप्रतिकर्तृत्वस्यापिसत्वात्तदभिप्रायेणायंग्रंथः । नचव्याख्यानस्यपश्चात्तनत्वनियमात्कथंजैमिन्यादिसूत्राण्यप्राक्तनब्रह्मसूत्रव्याख्यानानिस्युरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्युक्तं । शब्दजातस्येतिषष्ठ्यंतेनकथमस्यार्थस्यलाभइत्यतआह ॥ **शब्दजातस्येतीति** ॥ "कर्तृकर्मणोःकृती"तिकर्तरिषष्ठीतिभावः । शब्दानांकरणत्वेप्यवांतरव्यापारापेक्षयाकर्तृत्वमितिध्येयं । "तत्रादिसूत्रस्येदंसंगत्यादी"त्यत्रेदंशब्देनपरोदीरितसंगत्यादिकमयुक्तमितिटीकायां सूचितं । तद्विवरितुंप्रतिजानीते ॥ **परोक्तइति** ॥ इदंतुशिष्यमनःसमाधानाय । उत्तरार्धेनदूषणानांपरमाप्तोक्तिमूलत्वेनबलवत्तामाह । तत्र"हनुशब्दोज्ञानवाची"तिस्मृतेर्हनुर्ज्ञानं । "भूमनिंदाप्रशंसासुभवंतिमतुबादयः । संसर्गेस्तिविवक्षायांनित्ययोगेतिशायने ॥ १ ॥" इत्युक्तेर्भूमार्थेमतुप् । पूर्णबोधइत्यर्थः । यद्वा तस्यहनुमदैक्यात्तथोक्तिः । संज्ञापूर्वकविधेरनित्यत्वाद्धनुशब्दे "शरादीनांचे"तिनदीर्घः "संज्ञाया"मितिसूत्रेणमतुपोमकारस्ययवादित्वादित्युक्तंधातुवृत्तौ । चोवधारणे । सूचितमेवेत्यन्वयः । भाष्येति अनुभाष्यादिकंचग्राह्यं । भाष्ये अधिकरणशरीरस्यास्पष्टत्वात्तद्विवरणपरयोर्वाचस्पत्यविवरणयोःस्पष्टत्वेनादौवाचस्पत्योक्तमधिकरणप्रकारंदूषयितुमनुवदति । तत्र दूष्येषुमध्य

शब्दसमूहैःक्रियमाणइति ॥ **शब्दजातस्येतिषष्ठी कर्तरि नतुकर्मणीत्यर्थः ।**
परोक्तेदूष्यएवांशोमितैःशब्दैरनूद्यते । दूषणं चापिहनुमद्भाष्यसूचितमुच्यते ।

गु० तिवाच्यं । मंत्रब्राह्मणवद्व्याख्यातृबुद्धिविवक्षयापश्चात्तनत्वसंभवात् । "व्यासचित्तस्थितावकाशादवच्छिन्नानिकानिचित् । अन्येव्यवहरंत्येतान्यूरीकृत्यगृहादिव"दितितन्मूलभूतानादिव्यासज्ञानविषयैकदेशविषयव्यासोपदेशजनितज्ञानमूलत्वाद्वातेषांब्रह्मसूत्रव्याख्यानरूपत्वमितिद्रष्टव्यं । "भाष्यसूचित"मित्यत्रभाष्यपदंभाष्यानुव्याख्यानादिसूत्रसंबंधिसमस्तग्रंथपरं । नतुभाष्यमात्रपरं । प्रसिद्धेषुकुभाष्योक्तेष्वधिकरणेषुसत्सुतद्विरुद्धंस्वीयमधिकरणंबुद्धिस्थंनभवतीत्यतोऽनुवादपूर्वकं ॥ १५ ॥

प्र० इति ॥ **प्रत्यगात्मनएवेति** ॥ अतिरिक्तब्रह्मसत्त्वेमानाभावादितिभावः ॥ **नविषयत्वमिति** ॥ नहिस्फीतालोकमध्यमध्यासीनंकश्चिज्जिज्ञासतइतिभावः । नाविवक्षितार्थत्वंवेदांतानामाशंकितुंशक्यं । स्वाध्यायोध्येतव्यइत्यध्ययनविधेर्दृष्टार्थत्वेन तेनसर्वस्यवेदस्यफलवदर्थावबोधनपरत्वापादनस्य "अथातोधर्मजिज्ञासे"त्यत्रनिर्णीतत्वादतआह ॥ **अध्ययनेत्यादि** ॥ अविवक्षितार्थत्वेध्ययनंव्यर्थमित्यतआह ॥ **जप**

तत्रभामत्युक्तमधिकरणं । प्रत्यगात्मनएवब्रह्मत्वात्तस्यचाहमितिप्रकाशमानत्वेनासंदिग्धत्वान्नविषयत्वं । नाप्यविद्यानिवृत्तिःप्रयोजनं । उक्तरीत्याऽऽत्मनिभासमानेपितदनिवृत्तेः । नचवाच्यमहंप्रत्ययःस्थूलोहंकर्ताभोक्तादुःखीतिगृह्णाति तद्विपरीतश्चवेदांतप्रतिपाद्यःसंदिग्धइतिविषयादिसिद्धिरिति । वेदांतानामध्ययनविध्यापादितप्रयोजनवदर्थावबोधानामपि प्रबलाहंप्रत्ययबाधितत्वेन जपमात्रोपयोगित्वेनाविवक्षितार्थत्वादुपचरितार्थत्वाद्वा ।

गु० तानिनिराकर्तुमुत्तरोग्रंथः । तत्रभामत्युक्तमधिकरणशरीरंदर्शयति ॥ **तत्रेति** ॥ तत्र दूष्येषुमध्ये ॥ **प्रत्यगात्मनएवेति** ॥ तदतिरिक्तब्रह्मसत्त्वेमानाभावादितिभावः ॥ **नविषयत्वमिति** ॥ स्फीतालोकमध्यवर्तिनोघटस्यजिज्ञास्यत्वादर्शनादितिभावः । ननुनाविक्षितार्थत्वंवेदांतानांशंकितुंशक्यं । अध्ययनविधेर्दृष्टार्थत्वेन सर्ववेदस्यार्थज्ञानपर्यंततायाःसिद्धत्वादित्यतउक्तं ॥ **अध्ययनविधीति** ॥ नन्वर्थज्ञानस्यसुखदुःखाभावेतरत्वान्नपुरुषार्थत्वमित्यतउक्तं । "प्रयोजनव"दित्यर्थावबोधविशेषणं । नन्वविवक्षितार्थत्वेवेदांतानांतदध्ययनवैयर्थ्यमित्यतउक्तं ॥ **जपमात्रोपयोगितयेति** ॥ ननुच उपक्रमादिलिंगैर्निर्णीततात्पर्यत्वाद्वेदांतानां नाविवक्षितार्थत्वंयुक्तमित्यतआह ॥ **उपचरितार्थत्वाद्वेति** ॥ प्रत्यक्षविपरीतार्थप्रतिपादनकल्पनेप्रमाणाभावादुपक्रमादेस्तात्पर्यमात्रनिश्चायकत्वेनार्थेतथात्वानि

SGDF

गु० श्चायकत्वादितिभावः । प्रमाणलक्षणेप्रथमपादेप्रथमाधिकरणेचिंतितं ‘‘अथातोधर्मजिज्ञासा । चोदनालक्षणोर्थोधर्म’’इत्यारभ्य‘‘अन्वाहार्येचदर्शना’’दित्येतदंतं
शास्त्रमस्यविषयः । तत्रैतन्मतद्वयं । अध्ययनविधिरक्षरग्रहणमात्रपर्यवसायीतिकेचित् । अपरेतु अर्थज्ञानरूपदृष्टप्रयोजनायेदमध्ययनंविधीयते । अर्थज्ञानंच
विचारमंतरेणनसंभवति । ततोविधिर्विचारशास्त्रस्यप्रयोजकइति । अत्रविचारशास्त्रमनारंभणीयमारंभणीयंवेतिचिंता । तदर्थं अधीत्यस्नातव्यंवाधर्मजिज्ञासयागु
रुगृहेऽवस्थातव्यंवेति । तदर्थमपि स्वाध्यायाध्ययनविधिरदृष्टार्थमध्ययनंविधत्तेउतदृष्टार्थमिति । यद्यदृष्टार्थंस्वाध्यायाध्ययनंविधीयते ततस्तन्मात्रेणैवशास्त्रसमाप्तेः
‘‘अधीत्यस्नाया’’दितिवचनबलेनसमावर्तितव्यं । अवैधश्चायंविचारोनारंभणीयः । यदिचअक्षरग्रहणपरंपरोपजायमानवाक्यार्थज्ञानायाध्ययनंविधीयतेततस्तस्य
विचारमंतरेणासंभवादध्ययनविधिनैवार्थाद्विचारोविहितइतिविचारयितव्योधर्मइतिविचारशास्त्रमारंभणीयं । तत्रविनापिविधिनाज्ञानलाभान्नहितदर्थता । कल्प्य
स्तुविधिसामर्थ्यात्स्वर्गोविश्वजिदादिवत् । तथाहि । अदृष्टार्थएवायमध्ययनविधिर्नदृष्टार्थः । विनैवविधिनाऽध्ययनस्यार्थज्ञानहेतुतायालोकसिद्धत्वेनविध्यनपेक्षि
ततयाऽपूर्वविधित्वानुपपत्तेः । नचावघातविधिवन्नियमार्थता । लिखितपाठादिनाऽर्थज्ञानसंभवेगुरुपूर्वकाध्ययनेनैवएतत्कुर्यादितितत्संभवादितिवाच्यं । अवघा
तोहिदर्शाद्यपूर्वेनियम्यते अवघातनिष्पन्नैरेवतंडुलैरपूर्वंसिध्यतीति । नतंडुलस्वरूपे । विनाप्यवघातंतंडुलस्वरूपसिद्धेर्मानांतरगृहीतत्वेनतद्विरोधात् । नचेह
तथा । विनाप्यध्ययनंलिखितपाठादिनापिज्ञानदर्शनेनतत्स्वरूपेनियमासंभवात् । नचतद्वदवघातस्यदर्शाद्यपूर्वइवक्रत्वपूर्वेनियमोस्तु अधीतैरेववेदैरवगतानिकर्मा
णिफलदानीतितत्संभवादितिवाच्यं । अनारभ्याधीततयाअध्ययनस्याक्रत्वर्थत्वात् । नाप्यध्ययनस्यक्रत्वर्थत्वेश्रुत्यादिकंमानमस्ति । तस्माद्दृष्टार्थत्वेऽपूर्वनियमना
संभवान्नदृष्टार्थत्वं । किंच‘‘अधीत्यस्नाया’’दित्यध्ययनस्नानयोर्नैरंतर्यंबोधयंतीस्मृतिरंतराऽर्थज्ञानसंपादनायासंविरुणद्धि । ततोपूर्वद्वारास्वर्गार्थमध्ययनंविधीयतइ
तिविचारस्यवैधत्वाभावाद्विचारशास्त्रमनारंभणीयं । उच्यते । ‘‘लभ्यमानेफलेदृष्टेनादृष्टपरिकल्पना । विधेश्चनियमार्थत्वान्नानर्थक्यंभविष्यती’’ति । यदुक्तंज्ञा
नस्वरूपेक्रत्वपूर्वेवाननियमःसंभवतीति तदनुमन्यामहे । किंतुयोयमग्निहोत्रादिष्वधीतवेदानांत्रैवर्णिकानामेवाधिकारोनानधीतवेदानांशूद्राणामित्यधिकारनियमः

॥ १६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० मात्रेति ॥ क्रियासमभिहारेण पौनःपुन्येन । ज्ञानानंदादिस्वरूपमात्मतत्वमभिदधानानि । अतएवतत्रतात्पर्यवत्त्वेनविद्यमानानीत्यर्थः ।

तथाचवेदांतविचारोनारब्धव्यइतिपूर्वपक्षः । सिद्धांतस्तु । वेदांतवाक्यैर्ज्ञानानंदैकरसाद्वितीयोदासीनस्वभावआत्मोपक्रमादिभिःप्रतिपाद्यते । नचक्रियासमभिहारेणेदृगात्मतत्वमभिदधतितत्पराणिसंति

गु० सप्रयोजनमध्ययनविधेः । तथाहि । असत्यध्ययनविधावग्निहोत्रादिशास्त्राणिविद्वांसमलभमानान्यविद्वांसमेवाधिकृत्यविद्यामंतरेणानुष्ठानासंभवाद्विद्यामाक्षिपंत्यविशेषाच्चतुरोवर्णानधिकुर्युः । सतिह्यध्ययनविधौत्रैवर्णिकानामेवविदुषामधिकारोभवति नतुरीयस्य । तथाहि । वसंतेब्राह्मणमुपनयीतेत्यादौद्वितीयानिर्देशादुपनयनसंस्कारकर्मत्वं । संस्कृताश्चत्रैवर्णिकाःकिमस्माभिःकर्तव्यमित्यपेक्षंते । शेषस्यपरार्थत्वात् । तदाश्रयत्वात्तेषां । तत्संनिधौचाध्ययनमनिर्दिष्टकर्तृकंविधीयमानंकर्तारमपेक्षते । तत्राकांक्षासन्निधियोग्यत्वैरेवंज्ञाप्यते त्रैवर्णिकैरेवोपनीतैरध्ययनेनाक्षरग्रहणादिपरंपरयाऽर्थज्ञानंकर्तव्यमिति । एवंचफलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनांगं । अध्ययनमपिदृष्टफलज्ञानार्थं । अर्थज्ञानंत्वनुष्ठानौपयिकत्वात्प्रसिद्धफलमेवेतिसर्वेषांफलवत्त्वं । एवंचत्रैवर्णिकेषुविद्वत्सुलब्धेषुनचतुर्थस्यविद्यामाक्षिपंत्यग्निहोत्रादीनि । किंतुत्रैवर्णिकानेवविदुषोधिकुर्वंति । ततोऽग्निहोत्रादिकर्मानुष्ठानौपयिकार्थज्ञानावसानमध्ययनमध्ययनविधिनाविधीयतइतिविचारमंतरेणार्थज्ञानानुपपत्तेरध्ययनविधिरेवविचारमाक्षिपत्स्मार्तमध्ययनसमावर्तनयोर्नैरंतर्यंबाधतइतिसिद्धं ॥ अध्ययनानंतरंवैधोविचारःकर्तव्यइतिविचारशास्त्रमारंभणीयमिति ॥ **उपक्रमादिभिरिति** ॥ आदिपदेनपरामर्शोपसंहारयोःपरिग्रहः । परामर्शोनाममध्येनिर्देशोबोध्यः ॥ **क्रियासमभिहारेणेति** ॥ क्रियासमभिहारःपौनःपुन्यं । तेन ज्ञानानंदादिस्वरूपमात्रमात्मतत्वमभिदधानानि अतएवतत्रतात्पर्यवत्त्वेनविद्यमानानिसंतीत्यर्थः ॥ **उपचरितार्थानीतिवक्तुमिति** ॥ अभ्यासेहिभूयस्त्वमर्थस्यभवति । यथा । अहोदर्शनीयाअहोदर्शनीयेति । नन्यूनत्वंनाल्पत्वमपीतिभावः । ननुतथाप्यहंप्रत्ययबाधितत्वादुपचरितार्थत्वंवेदांतानामास्थेयमित्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रत्यक्षबाधायुक्तमित्यतआह ॥ प्रत्यक्षंत्विति ॥ शुक्तिरजतादौव्यभिचारदर्शनादितिभावः । बाधकत्वेहेतु निर्दोषेणेति ॥ तत्रहेतु रपौरुषेयेणेति ॥ नन्वत्र''शुद्धोनभाती''त्यादिनासिद्धांतांशस्यैवाग्रेदूष्यत्वेनतावन्मात्रमेवानुवदनीयं । नतुपूर्वपक्षोपि । तथात्वे''परोक्ते दूष्यएवांश''इतिप्रतिज्ञाव्याकोपइतिचेन्न । सिद्धांतस्यपूर्वपक्षसापेक्षत्वेनतदननुवादेसिद्धांतमात्रानुवादायोगात् । यद्वा सिद्धांतेदूषितेपूर्वप

युक्तमुपचरितार्थानीतिवक्तुं । प्रत्यक्षंतु संभावितदोषमपौरुषेयेणनिर्दोषेणाग
मेनबाध्यते । तेनवेदांतवेद्यःशुद्धोहंप्रत्ययेनभातीतिविषयादिसिद्धिरिति ।

गु० आह ॥ प्रत्यक्षंत्विति ॥ प्रत्यक्षस्यबाध्यत्वोपपादनायसंभावितदोषमित्युक्तं । पौरुषेयतयासंभावितेत्यर्थः । आगमस्यबाधकत्वोपपादनायनिर्दोषेणेति ॥ तत्रहे तुरपौरुषेयेणेति ॥ ननुयजमानःप्रस्तरइत्यादेरिववेदांतानामपिप्रबलाहंप्रत्ययबाधितत्वादुपचरितार्थत्वेशंकितेकथंसिद्धांतेवेदांतानामेवप्रत्यक्षबाधकत्वाभिधानं । वेदांतवाक्येष्विवयजमानप्रस्तरादिवाक्येप्यपूर्वतादितात्पर्यलिंगसद्भावेनतस्यापियजमानप्रस्तरभेदग्राहकप्रत्यक्षबाधकत्वापातादितिचेन्न । स्थूलोहमित्यादिपरोदाहृ तप्रत्यक्षस्यनाहंस्थूलइत्यादिप्रत्यक्षेणैवबाधिततयातत्सजातीयस्यकर्ताभोक्तासुखीत्यादिप्रत्यक्षस्यापिदोषशंकाकलंकिततयावेदांतानांतद्बाधकत्वोपपत्तावपिप्रस्तरयजमा नभेदग्राहकप्रत्यक्षेकुत्रापिप्रत्यक्षेणबाधादृष्टयाऽऽगममात्रेणप्रत्यक्षबाधायोगात् । ''यजमानंसुवर्गंलोकंगमयतियदेतैःप्रस्तरंप्रहरती''तिवाक्यशेषपर्यालोचनयापितत्रो पचारस्यैवावगमात् । वेदांतवत्तात्पर्यलिंगाभावाच्चयुक्तःप्रत्यक्षेणतद्बाधइत्येवंवैषम्यस्यात्रसिद्धांतेभिप्रेतत्वात् । अतएवस्थूलोहमित्यादित्वेनैवोपन्यासःकृतइतिध्येयं ॥ विषयादिसिद्धिरितीति ॥ तथाचाहंप्रत्ययेसत्यपिविषयज्ञानाभावात् नफलानुपलंभबाधइति विषयसिद्ध्यैवफलमपिसिध्यतीत्यर्थः । यद्यपिपरोक्तेदूष्यएवांश इतिप्रतिज्ञानुरोधेनसिद्धांतमात्रमेवानुवदनीयं । शुद्धोनभातीत्युत्तरग्रंथेनसिद्धांतांशस्यैवदूष्यत्वात् । तथापिसिद्धांतस्यपूर्वपक्षसापेक्षत्वेनतदननुवादेसिद्धांतमात्रा

प्र० क्षोपिदूषितप्रायइत्यभिप्रेत्यतदनुवादः । ''निर्विशेषेस्वयंभातेकिमज्ञानावृतंभवे''दित्यनुव्याख्यानंहृदिकृत्वानूदितंदूषयति ॥ तन्नेति ॥ चतुर्विधोप्यभासमानोंशआत्मभिन्नोऽभिन्नोवा । आद्ये सत्योमिथ्यावेतिविकल्पान्हृदिनिधाय क्रमेणनिरस्यति ॥ आत्मभिन्नइति ॥ यद्य प्यात्मस्वरूपे अभासमानोंशःकइतिविकल्पितेष्वात्मभिन्नत्वकल्पोनावकल्पते तथापितत्राप्यस्तिदूषणमित्यभिप्रेत्येदं । अभासमानस्यच नात्मस्वरूपत्वमितियुक्तिसूचनायवेतिध्येयं । ननुभेदोन्योन्याभावः । अभेदोपिभेदाभावएवेतिचतुर्णामभावरूपत्वेनात्मभिन्नानामपिस त्यत्वेनकापिहानिः । भावद्वैतस्यैवाद्वैतविरोधित्वात् । उक्तंच''अभावरूपाधर्मानाद्वैतंनिघ्नंति''इति । अतआह ॥ अभावद्वैतंत्विति ॥ यद्वा भेदा

तन्न । तथाहि । शुद्धोनभातीतिकोर्थः । किमात्मस्वरूपेकिंचिद्भातिकिंचिन्नभा
तीति । किंवात्मस्वरूपमेवनभातीति यद्वाऽनात्मापिभातीति । आद्येऽभासमा
नोंशः शरीरादिभ्योभेदोवा कर्तृत्वभोक्तृत्वाद्यभावोवा ब्रह्मात्माभेदोवा द्विती
यमात्राभावोवा । आत्मभिन्नःसत्यश्चेदपसिद्धांतः । अभावद्वैतंत्वन्यत्रनिरस्तं ।

गु० नुवादयोगात्पूर्वपक्षांशोप्यनूदितोनतुतस्यापिदूषणीयत्वाभिप्रायेणेतिध्येयं । तथाहीति । द्वितीयाभावादिविशिष्टोहिशुद्धपदार्थस्तत्रविशेषणभाननिषेधाभिप्रायेण आद्यःकल्पः । विशेष्यभूतात्मभाननिषेधाभिप्रायेणद्वितीयःकल्पः । शुद्धोनभातिकिंतुअशुद्धोपीत्यभिप्रायेणतृतीयःकल्पइति । अभासमानांशःआत्मनोभिन्नोभिन्नोवा आद्येसत्योमिथ्यावेतिविकल्पंमनसिनिधायक्रमेणदूषयति ॥ आत्मभिन्नइति ॥ ननुचाभावरूपाधर्मानाद्वैतंनिघ्नंतीतिमंडनोक्तेरभावद्वैतंस्वीकृतं शरीरादिभ्योभे दादेश्चअभावरूपत्वात्कथंतस्यआत्मभिन्नस्यसत्वे अपसिद्धांतइत्यतआह ॥ अभावद्वैतंत्विति ॥ अन्यत्र न्यायामृते अंशित्वहेतुभंगे अभावेअभावत्वादेस्तदाश्रये

SGDF Sri Gurgeshwari Digital Foundation

प्र० भेदयोर्भावत्वेप्यतिरिक्तकल्पद्वयविषयकशंकासमाधानार्थमिदमितिध्येयं । अन्यत्रेति । न्यायामृतेअंशित्वादिहेतुभंगे । उपलक्षणमेतत् । एतावतावेदतन्मीमांसयोःद्वितीयाभावादिपरत्वमेवस्यात् नत्वखंडात्मपरत्वमितिआत्मविद्यात्वभंगःस्यात् । तथाचाथातोद्वितीयाभावादि जिज्ञासेत्येवसूत्रविन्यासःस्यात् । नतुब्रह्मजिज्ञासेतीत्यपिध्येयं । द्वितीयंनिराह ॥ **मिथ्येति** ॥ आत्मभिन्नोद्वितीयाभावादिर्मिथ्याचेदि त्यर्थः । अन्यथाअतत्वावेदकंशास्त्रंप्रसज्येतेतिभावः । अभेदपक्षस्त्वात्मस्वरूपमेवनभातीतिद्वितीयपक्षेंतर्भूतः । तथाचतत्रस्वप्रकाशत्वेनाभा

मिथ्याचेन्नतत्वावेदकशास्त्रवेद्यः । आत्ममात्रत्वेतुद्वितीयपक्षांतर्भावः । तथापिकल्पितेनभेदेना गृहीतइवभातीतिचेन्न । तत्वतोगृह्यमाणेधिष्ठानेभेदकल्पनायाअगृहीतत्वारोपस्यचायोगात् ।

गु० चाभावाश्रयत्वादेर्भावस्यावश्यकत्वात् भावस्यसत्यत्वादित्यादिनानिरस्तमित्यर्थः । अस्तुमिथ्याभूतस्यापिभेदादेःशास्त्रवेद्यत्वमित्यतउक्तं ॥ **तत्वावेदकेति** ॥ तथा सतिशास्त्रस्यातत्वावेदकत्वंस्यात् शास्त्रंच अतत्वावेदकंचेतिविप्रतिषिद्धमितिभावः ॥ **द्वितीयपक्षांतर्भावइति** ॥ तथाचतद्दूषणेनैवदुष्टत्वमितिभावः । अथाभास मानांशस्यआत्ममात्रत्वेपिनद्वितीयपक्षांतर्भावप्रसक्तिः आत्मनोभानांगीकारात् ॥ नचैवंभासमानात्ममात्रत्वात् अभासमानत्वव्याघातइतिवाच्यं । भासमानात्म नोऽभासमानांशस्यचकल्पितभेदादात्मभानेनवस्तुतोगृहीतत्वेपि अगृहीतत्वारोपसंभवेनाभासमानत्वोक्तेरुपपन्नतयानतत्पक्षेवक्ष्यमाणदूषणग्रस्तत्वमितिभावेनशंकते ॥ **तथापीति** ॥ **तत्वतइति** ॥ अधिष्ठानज्ञानस्यैवभ्रमविरोधितयातस्मिन्सत्यपिभेदभ्रमस्यतन्निमित्तकागृहीतारोपस्यवाभ्युपगमेनिवर्तकांतरस्याभावात्तदनिवृत्ति प्रसंगादितिभावः । यदुक्तमभासमानोंशआत्मातिरिक्तश्चेत्सत्योमिथ्यावेति । तत्रमिथ्याभूतइतिब्रूमः । नचैवंतद्विशिष्टात्मबोधकवेदांतानांअतत्वावेदकत्वप्रसंगइ तिवाच्यं । तदुपलक्षितात्मनःसत्यत्वात् । तथाचभेदाभावादेर्मिथ्यात्वांगीकृतेर्नापसिद्धांतः । तदुपलक्षितात्मनःसत्यस्यैवशास्त्रप्रतिपाद्यत्वात्नातत्वावेदकत्वमपी

SGDF
Sri Gargeshwari Digital Foundation

प्र० नायोगादितिवक्ष्यमाणएवदोषोत्रापिप्रसरतीतिभावेनाह ॥ **आत्ममात्रत्वेत्विति** ॥ ननुद्वितीयाभावादिरात्माभिन्नएव । नचोक्तदोषः । भातस्यापितस्याविद्यकभेदेनाभातत्वारोपसंभवादितिशंकते ॥ **तथापीति** ॥ आत्ममात्रत्वेनगृहीतत्वेपीत्यर्थः । अधिष्ठानेआत्मनीत्यर्थः ॥ **भेदेति** ॥ आत्मना द्वितीयाभावादेरित्यर्थः । तन्मूलाज्ञानासंभवादितिभावः । द्वितीयाभावादिरात्मातिरिक्तोमिथ्येतिपक्षेउक्तदोषोद्धार माशंक्यनिरस्यति ॥ **नचेति** ॥ यद्यप्येषाशंकामिथ्याचेदितिग्रंथानंतरमेवकार्यातथाप्यात्ममात्रंनशास्त्रवेद्यंयेनद्वितीयपक्षोक्तदोषःस्यादित्यभे दपक्षोक्तदोषपरिहारार्थापिभवतीतिनदोषः । आत्मन्येवतात्पर्यमुपलक्षणएववेतिविकल्पंक्रमेणनिरस्यति ॥ **स्वप्रकाशत्वेनेति** ॥ आत्मस्वरूप मेवनभातीतिद्वितीयंनिराह ॥ **अतएवनद्वितीयइति** ॥ तथाचनविषयत्वमितिभावः । भानाभानयोरुक्तदोषद्वयपरिहारमनूद्यातिदेशेनदू

नचमिथ्याभूतेनापितेनोपलक्षितआत्माशास्त्रवेद्यःसचसत्यइतिवाच्यं । स्वप्रकाशत्वेननित्यसिद्धात्माव बोधनार्थमुपलक्षणोक्त्ययोगात् । उपलक्षणएवतात्पर्येचाप्रामाण्यापातात् । अतएवनद्वितीयः । तस्य स्वप्रकाशत्वेनाभानायोगात् । स्वप्रकाशस्याप्यविद्यावशादभानेऽविद्यादेर्दुःखादेश्चप्रकाशोनस्यात् । तस्य

गु० तिशंकते ॥ **नचमिथ्याभूतेति** ॥ स्थूलतारकादेश्चंद्रादिस्वरूपज्ञापकतयैवआत्मस्वरूपज्ञापनार्थमेवभेदाभावादेर्वेदांतेषुप्रतिपादनेनतत्प्रतिपादनस्यापिआत्म स्वरूपएवतात्पर्यान्नातत्वावेदकत्वमितिअभिमतं किंवोपलक्षणीभूतभेदाभावादावेवतात्पर्यमितिविकल्प्य आद्यंनिराकरोति ॥ **स्वप्रकाशत्वेनेति** ॥ नांत्यइत्याह ॥ **उपलक्षणएवेति** ॥ आत्मस्वरूपमेवनभवतीतिद्वितीयंनिराकरोति ॥ **अतएवनद्वितीयइति** ॥ अतएवेत्युक्तमेवप्रथयति ॥ **तस्येति** ॥ तथाचनतस्यविषय

SGDF Sri Gargeshwari Digital Foundation

प्र० षयति ॥ **एतेनेति** ॥ नकोपिदोषइत्युक्तमेवविशदयति ॥ **स्फुरत्त्वादिति** ॥ एतेनेत्युक्तमेवन्यवहितत्वाद्विशदयति ॥ **स्फुरतीति** ॥ ननु शुद्धचितोभानेप्यविद्यावृतत्वेनविषयतायुज्यते । तस्याअज्ञानसाधकत्वेनतदनिवर्तकत्वात् । अंतःकरणवृत्तेस्तन्निवार्तिकायाअद्याप्यभावात् ।

चैतन्यप्रकाशाधीनप्रकाशत्वोपगमात् । एतेनस्वप्रकाशत्वात्स्फुरतिचैतन्यमविद्यावृतत्वाच्चनस्फुरति । नचविरोधः । स्फुरणस्यतात्विकत्वादस्फुरणस्यचातात्विकत्वात् । एवंचनकोपिदोषः । स्फुरत्त्वादज्ञानादिसाधकत्वस्यास्फुरत्त्वाद्विषयत्वस्यचसंभवादितिनिरस्तं । स्फुरत्यस्फुरणारोपायोगस्योक्तत्वात् । नचस्वरूपचितःप्रकाशेपितस्याअज्ञानविरोधित्वात्विरोधिन्याश्चवृत्तेरभावेनाविद्यावृतत्वात्संदिग्धत्वमितियुक्तं ।

गु० त्वमितिभावः । चैतन्यभानाभानपक्षयोरुक्तदोषपरिहारमाशंक्यअतिदेशेनदूषयति ॥ **एतेनेति** ॥ नकोपिदोषइत्युक्तमेवविशदयति ॥ **स्फुरत्त्वादिति** ॥ एतेनेत्युक्तमेवविशदयति ॥ **स्फुरतीति** ॥ **उक्तत्वादिति** ॥ तत्वतोगृह्यमाणइत्यादिनाउक्तप्रायत्वादित्यर्थः । ननुशुद्धचितोभानेपिअविद्यावृतत्वेनतस्यविषयत्वमुपपद्यतएव तस्याअज्ञानसाधकत्वेनतदनिवर्तकत्वात्तन्निवर्तिकायावृत्तेश्चइदानीमसत्त्वात् । नचैकविषयकत्वाविशेषात् वृत्तिचितोःकथमज्ञानविरोधित्वाविरोधित्वविभागइतिवाच्यं । घटविषयकत्वाविशेषेपिसौरालोकज्ञानयोस्तमोविरोधित्वाविरोधित्वदर्शनेनएकविषयत्वेपिवृत्तिचितोस्तदुपपत्तेरित्याशंक्यनिषेधति ॥ **नचेति** ॥ तद्वेद्येचिद्वेद्ये । तथाचनात्मन्यज्ञानावृतत्वमितिभावः । नचदुःखादिकमपिवृत्तिप्रतिबिंबितचिद्वेद्यमितिवाच्यं । तथासतिवृत्त्यभावदशायांतदप्रकाशेनघटादिवत्तस्यज्ञातैकसत्त्वाभावापातादितिभावः । वृत्तेरेवअज्ञानविरोधित्वंवदन्प्रष्टव्यः किंपरोक्षवृत्तिरेवाज्ञानिविरोधितयाअभिमताकिंवापरोक्षवृत्तिः द्वितीयेपिअपरोक्षवृत्ति ॥ १९ ॥

प्र० एकविषयकयोर्वृत्तिचितोरज्ञानविरोधित्वाविरोधित्वेघटविषयकयोःसौरालोकज्ञानयोस्तमोविरोधित्वाविरोधित्वेइवयुक्तेइत्याशंक्यनिराह ॥ **नचेति** ॥ तद्वेद्ये चिद्वेद्ये । तथाचनात्मन्यावृतत्वमितिभावः । नचसुखाद्यपिवृत्तिप्रतिबिंबितचितावेद्यंनकेवलया । केवलातुनाज्ञानविरोधिनीतिवाच्यं । सुखादेर्ज्ञातैकसत्त्वाभावापातादितिभावः । किंचवृत्तिसामान्यस्याज्ञानविरोधित्वमुतवृत्तिविशेषस्य । आद्येपिकिंपरोक्षवृत्तेरुतापरोक्षवृत्तेः । नाद्यः । त्वन्मतेनित्यातींद्रियेपरोक्षवृत्तौसत्यामप्यज्ञानानिवृत्तेः । द्वितीयेत्वासविषयासेदानीमप्यस्तीत्याह ॥ **त्वन्मतइति** ॥ नचघटावच्छिन्नचैतन्यविषयावृत्तिरज्ञानविषयचिदविषयासतीतदज्ञानाविरोधिनीतिवाच्यं । दंडीचैत्रइतिवृत्त्याचैत्राज्ञानानिवृत्त्यापातात् ।

स्वरूपचितोऽज्ञानाविरोधित्वेतद्वेद्येदुःखादावज्ञानप्रसंगात् । त्वन्मतेअयंघटइत्याद्यपरोक्षवृत्तेरपिघटाद्यवच्छिन्नचिद्विषयत्वाच्च ।

गु० मात्रंउततद्विशेषः । नाद्यः । तथासतिनित्यातींद्रियेपिपरोक्षवृत्त्यातन्निवृत्तिप्रसंगेनअभिव्यक्तापरोक्षैकरसचैतन्यसंबंधेनतदापरोक्ष्यापातादित्यभिप्रेत्यद्वितीयेआद्यं दूषयति ॥ **त्वन्मतइति** ॥ तथाचविरोधिन्यावृत्तेःसत्त्वात्नाविद्यावृतत्वंब्रह्मणइत्यर्थः । नन्वयंघटइत्यपरोक्षवृत्त्याघटविषयिण्याघटाज्ञाननिवृत्तावपिचैतन्याविषयत्वात्कथंतयाब्रह्माज्ञाननिवृत्त्यापादनमित्यतउक्तं ॥ **घटावच्छिन्नचिद्विषयादिति** ॥ ननुनापरोक्षवृत्तिमात्रंअज्ञानविरोधितयाइष्यते । किंतुतद्विशेषएव ॥ नचैवमुक्तदोषावकाशः । अयंघटइत्यादिरूपवृत्तेरपरोक्षवृत्तित्वेपिश्रवणादिजनितसंस्कारसंस्कृतांतःकरणवृत्तित्वाभावेनचैतन्याज्ञानानिवर्तकत्वादितिद्वितीयमाशंक्य

SGDF Sri Gargeshwari Digital Foundation

प्र० द्वितीयंनिरस्यति ॥ **श्रवणादीति** ॥ अन्वयव्यतिरेकपूर्वसत्यत्वमाह ॥ **मिथ्येति** ॥ तददर्शनात् तादृशवृत्तिनाश्यत्वादर्शनात् । उपलक्ष णंचेदं । भ्रमकालीनापरोक्षज्ञानानधिकविषयज्ञानेनकारणांतरजन्येनाप्यज्ञाननिवृत्तावतिप्रसंगात् । अनधिकविषयेश्रवणादिवैयर्थ्याच्चेत्यपि ध्येयं ॥ **सत्यइति** ॥ अधिष्ठानसमानसत्ताकइत्यर्थः । सत्यत्वं अधिष्ठानसमसत्त्वं । तृतीयेंगुलिद्वयवदात्मानात्मानावेकज्ञानेभासेतेउतता दात्म्येनेतिविकल्पौहृदिकृत्वाक्रमेणनिराह ॥ **अनात्मनइति** ॥ आत्मनोभानेपिशास्त्रविषयत्वंसंजाघटीतीत्याशंकामुक्तातिदेशेनानूद्यनिर स्यति ॥ **एतेनेति** ॥ शास्त्रगम्यात्मनोनिश्चितत्वेनेत्यर्थः । तद्रूपेण षड्जत्वादिनारूपेण । तेन श्रोत्रेण । तद्भावाभिव्यक्तिः ब्रह्मभावाभि

श्रवणादिजनितसंस्कारसहितांतःकरणवृत्तिनाश्यत्वेचमिथ्यारूप्यादौतददर्शनात्सत्येभ्रमरादिध्याननिवर्त्यकीट त्वादौचतद्दर्शनादज्ञानस्यसत्यत्वंस्यात् । नतृतीयः । अनात्मनोधिकस्यभानेप्यात्मनोसंदिग्धत्वेनाविषयत्व तादवस्थ्यात् । अधिष्ठानेतत्वतःस्फुरत्यनात्मारोपायोगाच्च । एतेनयथाषड्जादयोगांधर्वशास्त्राभ्यासात्प्रागपि

गु० निराकरोति ॥ **श्रवणादीति** ॥ प्रसंगांगव्यतिरेकव्याप्त्युपपादनंमिथ्येति । तददर्शनात् । विशिष्टवृत्तिनाश्यत्वादर्शनात् । अन्वयव्याप्त्युपपादनंसत्यइति । अनात्मापिभातीतितृतीयेपिकिमात्मवत्अनात्मनोपिस्वातंत्र्येण अहंप्रत्ययेभानमभिमतंकिंवातत्तादात्म्येनेतिविकल्पद्वयंमनसिनिधाय आद्यंदूषयति ॥ **आत्मन इति** ॥ द्वितीयंप्रत्याह ॥ **अधिष्ठानइति** ॥ अन्यथातदनुवृत्तिप्रसंगादितिभावः । आत्मनोऽभानेपिशास्त्रविषयत्वमुपपन्नमित्याशंकामुक्तातिदेशेनपरिहरति ॥ **एतेनेति** ॥ षट्जादयइत्यादिपदेननिषादऋषभगांधारमध्यमधैवतपरिग्रहः ॥ **तद्रूपेणेति** ॥ षट्जत्वादिरूपेणेत्यर्थः । यद्यपिगांधर्वशास्त्राभ्यासरहितैरपिसूक्ष्म

SGDF Sri Gargeshwari Digital Foundation

प्र० व्यक्तिः । दृष्टांतवैषम्यमाह ॥ **तत्रेति** ॥ ननुघटेनिश्चितेपितज्ज्ञानेप्रामाण्यसंदेहाद्घटेपियथासः तथात्रापीत्याशंकांनिरस्यति ॥ **एतेनैवेति** ॥ जातिविशेषाभावेनैवेत्यर्थः । एवंचाहंप्रत्ययेशुद्धोनभातीत्येतदयुक्तमितिस्थितं । यदप्यवादि प्रत्यक्षंसंभावितदोषमपौरुषेयेणागमेनबाध्यतइति तदपिनेतिभावेन "यजमानप्रस्तरत्वंयथानार्थःश्रुतेर्भवेत् । ब्रह्मत्वमपिजीवस्यप्रत्यक्षस्याविशेषत"इत्यनुव्याख्यानसूचितदूषणेननिर

स्फुरंतस्तद्रूपेणानुल्लिखितानश्रोत्रेणव्यज्यंते व्यज्यंतेतुशास्त्रवासितेनतेन एवंवेदांतवाक्यजन्यब्रह्मैक्याकारवासनावासितांतःकरणेनतद्भावाभिव्यक्तिर्नप्रागितिभामत्युक्तंनिरस्तं । तत्रप्रागस्फुरतःपश्चाच्चस्फुरतः षड्जत्वादिजातिभेदस्यैवप्रकृतेतस्याभावात् । एतेनैवतत्त्वमसीतिवाक्याद्यद्यप्यात्मनोब्रह्मत्वंज्ञातंतथापिवादिविप्रतिपत्त्यासंशयात्तत्रजिज्ञासेतिभामत्युक्तंनिरस्तं । चिन्मात्रेधर्मिणिनिश्चितेतन्मात्रैक्येसंशयायोगात् ।

गु० मतिभिःश्रूयमाणाःस्वराःकिंचित्परस्परवैलक्षण्येना नुभूयंतेतदेवचषट्जत्वादिकमितितैस्तदवगम्यतएव षड्जादिशब्दविशेषवाच्यत्वं परंनज्ञायतेतथापियेस्थूलमतयःस्वरानाकर्णयंतोपिसमवर्णपरिणामान्केशांदीनिवपरस्परविविक्ततयाऽवगंतुंनप्रभवंति तेषामपिगांधर्वशास्त्रपरिचयेसतिक्रमेणविविक्तोल्लेखोदृश्यतेसएवोदाहरणमत्रेतिद्रष्टव्यं । तेन श्रोत्रेण ॥ **तद्भावाभिव्यक्तिरिति** ॥ ब्रह्मभावाभिव्यक्तिरित्यर्थः । ननुधर्मधर्मिणोरैक्यस्यसिद्धांतत्वात् कथंधर्मिभानेपिषड्जत्वादिधर्माणामभानमित्यतउक्तं ॥ **जातिभेदस्येति** ॥ जातिविशेषस्येत्यर्थः । नवयंषड्जत्वादिधर्माःधर्मिणोनिर्विशेषाभिन्नाइत्याचक्ष्महे किंतर्हिसविशेषाभिन्नाएवेति । तथाचभेदकार्यकारिविशेषशक्त्याउपपन्नंतेषांप्रागभानमितिभावः । ततश्चदृष्टांतदार्ष्टांतिकयोर्वैषम्यमितिहृदयं । ननुनिश्चितेप्यर्थेतज्ज्ञानप्रामाण्यसंदेहादर्थे

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यति ॥ **युक्तंचेति** ॥ किंचेतिचार्थः ॥ **यजमानइति** ॥ आद्यस्यचतुर्थेतत्सिद्धिपेटिकायां"यजमानःप्रस्तरः यजमानोवाएककपालः"इत्यत्राभेदस्यबाधात्प्रस्तरादिशब्दलक्षितेस्रुग्धारणादौकार्येयजमानलक्षणगुणोविधीयतइतिप्राप्तेयजमानस्यप्रस्तरवत्सूक्तवाकेनप्रहरणादेककपालवच्चसर्वहुतकरणात्सर्वतंत्रपरिलोपापातात्यजमानकार्यकरत्वंप्रस्तरेप्यस्तीतिसिंहश्चैत्रइतिवद्गौण्यावृत्त्यायमभेदव्यपदेशइत्युक्तं । तद्वदिहाप्युपचरितार्थत्वमिति ॥ **त्वयापीति** ॥ सर्वज्ञत्वाल्पज्ञत्वविशिष्टयोरभेदस्यबाधेनचिन्मात्रलक्षणायाअंगीकारादितिभावः ॥ "अतोधिकारिविषयफ

युक्तंचापौरुषेयस्याप्यागमस्यशंकिततात्पर्यभ्रमरूपदोषस्ययजमानःप्रस्तरइत्यादेरिवप्रत्यक्षविरोधेनप्रतीतार्थप्रच्यावनं । उक्ताचत्वयापितत्त्वमसिवाक्येप्रत्यक्षाविरोधायलक्षणा ।

गु० संदेहदर्शनादिहापितथास्यादित्याशंक्यनिरस्यति ॥ **एतेनेति** ॥ तन्मात्रैक्येचिन्मात्रैक्ये । एवंपरोक्तमहंप्रत्ययेशुद्धाभानंनिरस्यतदुक्तंपौरुषेयतयासंभावितदोषस्यप्रत्यक्षस्यअपौरुषेयतयानिर्दोषेणागमेनबाधंनिरस्यति ॥ **युक्तंचेति । यजमानःप्रस्तरइत्यादेरिवेति** ॥ प्रथमस्यचतुर्थेत्रयोदशाधिकरणेचिंतितं । तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिंगसमवायाः । इदमाम्नायतेयजमानःप्रस्तरोयजमानएककपालइत्यादिकिंनामधेयंप्रस्तरशब्दोयजमानस्ययजमानशब्दोवाप्रस्तरस्येतिकिंवागुणविधिरुतार्थवादइति तत्रैकमपरस्यनामधेयं प्रस्तरशब्दोवायजमानस्ययजमानशब्दोवाप्रस्तरस्यउद्भिदायागेनेत्यादाविवसामानाधिकरण्यादित्येकःपूर्वपक्षः । गुणविधिरित्यपरःपूर्वपक्षः । गुणविधिपक्षेप्रथमलूनबर्हिर्मुष्टिविशेषत्वरूपप्रस्तरत्वस्ययजमाने यष्टृत्वरूपयजमानत्वस्यवाप्रस्तरेविधातुमशक्यतयातत्कार्येगुणविधानेवाच्येतत्रापिप्रस्तरस्याचेतनत्वेनयजमानकार्यजपादिकर्तृत्वानुपपत्त्यायजमानकार्येप्रस्तररूपगुणविध्यनुपपत्तावपिप्रस्तरेजुहूंसादयतीत्यादेःप्रस्तरकार्यतयाऽव

गु० धारितस्रुग्धारणादौयजमानस्यशक्ततयाप्रस्तरकार्येयजमानरूपगुणविध्यंगीकारेनानुपपत्तिः । नचायमर्थवादएवास्त्वितिवाच्यं । अर्थांतरवचनेनार्थांतरस्यस्तुत्ययोगात् । नचावयवद्वाराअष्टाकपालवचनेनद्वादशकपालस्येवइहाप्यन्यतरवचनेनान्यतरस्तुतिरुपपन्नेतिवाच्यं । अष्टाकपालद्वादशकपालयोरिवप्रकृतेअंशांशिभावाभावेनावयवद्वारास्तुत्यनुपपत्तेः क्षिप्रत्वादिधर्मवत्कस्यचिदुत्कर्षस्याप्रतीत्यावायुर्वैक्षेपिष्ठादेवतेत्यादिवत्स्तुतिरूपत्वस्याप्ययोगाच्च । तस्मान्नामधेयगुणविध्योरन्यतरत्वमितिप्राप्ते ब्रूमः । गोमहिषयोरिवात्यंतभिन्नार्थत्वेनप्रसिद्धेःउभयानुगतप्रवृत्तिनिमित्ताभावादनेकशक्तिकल्पनाप्रसंगाच्च नतावदेकस्येतरनामधेयतोपपद्यते । नापिगुणविधिरितिद्वितीयः । प्रस्तरकार्यस्रुग्धारणादौयजमानरूपगुणविधावंतर्वेद्यांप्रस्तरवत्यजमानेपिस्रुगाद्यासादनापातेन"दक्षिणतोब्रह्मयजमानावासाते"इत्यादिवाक्यप्रमापितयजमानकार्यविलोपापत्तेः । सूक्तवाकेन"प्रस्तरंप्रहरती"तिविहितहोमरूपकार्येपियजमानस्यहविर्भिर्न्प्रस्तरवद्विधानाद्यजमानेप्रहृतेसर्वकर्मविलोपापत्तेश्च । एककपालकार्येयजमानरूपगुणविध्यंगीकारे"एककपालंसर्वहुतंकरोती"तिशास्त्रादेककपालवद्यजमानस्यापिसर्वहुतकरणात्त्याप्रयोगपरिसमाप्त्यभावप्रसंगाच्च । तस्मादुत्तरंबर्हिषाप्रस्तरंसादयति एककपालंसर्वहुतंकरोतीतिविध्यंतरैकवाक्यतयातत्स्तावकत्वादर्थवादत्वमेववाच्यं । नचोभयानुगतप्रवृत्तिनिमित्ताभावेनपरशब्दस्यपरत्रप्रयोगायोगात् यजमानप्रस्तरयोस्तादात्म्यस्यप्रत्यक्षविरुद्धत्वाच्चकथंस्तावकत्वसामानाधिकरण्येइतिवाच्यं । सिंहोदेवदत्तइत्यादौहिसिंहगुणशौर्यादियुक्तदेवदत्तस्यसिंहपदेनेवयजमानगुणयागसाधनत्वयुक्तप्रस्तरस्ययजमानपदेनस्तुत्युपपत्तेः । नचगुणेऽशक्तत्वान्नतदभिधायकत्वं । ततश्चाशब्दत्वान्नशाब्दप्रस्तरान्वयोयुक्तइतिवाच्यं । बोधकत्वमात्रांगीकारेणशक्त्यातदभिधायकत्वानंगीकारात् । नचाशक्तत्वेबोधकत्वासंभवः । लक्षितलक्षणारूपगौण्यैवतद्बोधकत्वात् । यजमानशब्दोहिस्वार्थंयजमानंशक्त्याप्रतिपादयति । सचाभिहितःस्वसमवेतकार्यकरत्वसंबंधाद्बोधयति । तच्चप्रस्तरेप्यस्तीतिप्रस्तरावबोधोयजमानपदेनेतिस्तावकत्वोपपत्तेरर्थवादत्वमेवेति । नकेवलंनिर्दोषतयाप्रबलस्यापिवाक्यस्यप्रत्यक्षबाधेनाविवक्षितार्थत्वदर्शनमात्रेणतदापादयामः किंनामपरेणापितथास्वीकारादित्याह ॥ **उक्ताचेति** ॥ ननुनप्रत्यक्षविरोधात्तत्त्वंपदयोर्लक्षणोच्यते किंतर्हिकिंचिज्ज्ञत्वसर्वज्ञत्वयोरैक्यासंभवेनतद्विशिष्टयोरैक्यासंभवेना

SGDF Sri Gargeshwari Digital Foundation

प्र० लयोगादिवर्जितं । अनंतदोषदुष्टंचहेयंमायामतंशुभै"रित्यनुव्याख्यानंहृदिकृत्वोपसंहरति ॥ **तस्मादिति** ॥ **अन्यस्यचेति** ॥ "पूर्वसिद्धतमसोहिपश्चिमोनाश्रयोभवतिनापिगोचर"इतिविवरणोक्तेरितिभावः ॥ **अज्ञानासंभवादिति** ॥ आवरणभूताज्ञानस्याक्रियमाणेनव्याप्तत्वाद्व्यापकासंभवेव्याप्यासंभवादितिभावः । त्रयाणांनिरासेसंबंधोपिनिरस्तप्रायएवेतितन्नोक्तं । उक्तंच "योगःशशनृशृंगयो"रिति । विवरणमतमप्युक्तातिदेशेननिराह ॥ **एतेनेति** ॥ आत्मभिन्नःसत्यश्चेदपसिद्धांतइत्यादिदूषणजातेनेत्यर्थः । तथाहि । ब्रह्मैक्यंहिविषय

तस्मात्परमतेस्वरूपमात्रस्यस्वप्रकाशत्वेननित्यसिद्धत्वादन्यस्यचाज्ञानकल्पितत्वे नाज्ञानविषयत्वायोगेनाज्ञानासंभवादज्ञातोविषयोऽज्ञाननिवृत्तिःफलमज्ञानी चाधिकारीनयुक्तइतिशास्त्रमनारंभणीयमेवेतिभामतीमतंतावदयुक्तं । एतेन

गु० न्वयानुपपत्त्यैवेतिचेत् अत्राहुः । विशिष्टैक्यरूपान्वयाभावस्यापिप्रत्यक्षेणैवज्ञातत्वात् । नचशुद्धैक्येतात्पर्यात्तदन्यथानुपपत्त्यालक्षणेतिवाच्यं । उपक्रमादिलिंगानांतत्त्वंपदार्थयोरैक्यमात्रएवतात्पर्यग्राहकत्वेनोपपत्तेः । नचविशेषणैक्यानुपपत्तिप्रतिसंधानसहकृतमुपक्रमादिकंशुद्धैक्येतात्पर्यग्राहकमितिवाच्यं । एवंवदतात्वयैवप्रत्यक्षविरोधेनलक्षणांगीकृतास्यात् तादृशानुपपत्तिप्रतिसंधानस्यप्रत्यक्षरूपत्वादिति । दोषांतरंसूचयन्नेवप्रकृतमुपसंहरति ॥ **तस्मादिति** ॥ **स्वरूपमात्रस्येति** ॥ चैतन्यस्वरूपमात्रस्येत्यर्थः ॥ **नित्यसिद्धत्वादिति** ॥ सिद्धप्रकाशविलोपासिद्धप्रकाशानुत्पत्त्यादिरूपावरणकृत्यस्यतस्मिन्ननिरूपणान्नतस्याज्ञानविषयत्वमितिभावः ॥ **अन्यस्यचेति** ॥ अन्योन्याश्रयापत्तेरितिभावः ॥ **अज्ञानासंभवादिति** ॥ अत्राज्ञानमितिप्रतीत्याऽज्ञानस्यसविषयत्वनियमसिद्धेर्व्यापकीभूतसविषयत्वव्या

SGDF Sri Gargeshwari Digital Foundation

प्र० इतिसिद्धांत्यभिमतं । तच्चात्मस्वरूपमुतभिन्नं । आद्येतस्यस्वप्रकाशत्वेनशास्त्रवैयर्थ्यं । नचभेदभ्रमनिरासार्थंशास्त्रं । अधिष्ठानाप्रकाशंविनाभेदभ्रमस्यैवायोगात् । स्वरूपेप्रकाशमानेप्यज्ञानविरोधिवृत्त्यभावाद्भ्रमइतित्वयुक्तं । तद्वेद्येदुःखादावज्ञानप्रसंगात् । द्वितीयेसत्यत्वेऽपसिद्धांतः । अभावत्वेप्यभावद्वैतस्यान्यत्रनिरासात् । मिथ्यात्वेतुनतत्वावेदकशास्त्रवेद्यतेत्यादि ॥ **प्रत्यगिति** ॥ जीवब्रह्मैक्यमित्यर्थः । विश्वकर्तृत्वसर्वज्ञत्वादेर्ब्रह्मधर्मस्यासर्वकर्तृत्वाल्पज्ञत्वादेर्जीवधर्मस्यसत्यत्वादित्यर्थः । यद्वाकर्तृत्वभोक्तृत्वदुःखित्वादिजीवधर्मस्यब्रह्मधर्मविरुद्धस्यसत्यत्वादित्यर्थः । तन्निवृत्तिः कर्तृत्वभोक्तृत्वादिबंधनिवृत्तिः ॥ **ज्ञानस्येति** ॥ यद्विषयकंहिज्ञानंतद्विषयकमज्ञानमेवसाक्षान्निवर्तयति । यदिचकर्तृत्वादिकमज्ञानकार्यंतदातद्द्वारातन्निवर्तकंस्यात् । नहितत्तथेत्यर्थः । सत्यस्य अज्ञानाकार्यस्येतिव्याख्येयं । मिथ्यैव आविद्यकएवेत्यर्थः । तथाचकर्तृत्वादिविरुद्धधर्माणांमिथ्यात्वेनैक्यस्यविषयत्वमज्ञानकार्यत्वेनचज्ञानान्निवृत्तियोगेनकर्तृत्वादिबंधनिवृत्तिःफलमितिभावः ॥

नप्रत्यग्ब्रह्मैक्यंविषयः। कर्तृत्वादेर्विरुद्धधर्मस्यसत्यत्वेनैक्यायोगात् । नापितन्निवृत्तिःप्रयोजनं । ज्ञानस्याज्ञानमात्रनिवर्तकत्वेनसत्यस्यज्ञानान्निवृत्त्ययोगादितिप्राप्ते सत्यं कर्तृत्वभोक्तृत्वादिप्रपंचस्यसत्यत्वेविषयादिर्नसिध्यतीति । प्रपंचस्तुमिथ्यैव ।

गु० वृत्त्यातद्व्याप्याज्ञानत्वस्याप्यसंभवादित्यर्थः ॥ **प्रत्यगिति** ॥ जीवब्रह्मैक्यमित्यर्थः ॥ **ऐक्यायोगादिति** ॥ पारमार्थिकविरुद्धधर्माधिकरणयोरैक्येजलानलयोरपितत्प्रसंगादितिभावः ॥ **तन्निवृत्तिरिति** ॥ कर्तृत्वादिरूपबंधनिवृत्तिरित्यर्थः ॥ **ज्ञानस्येति** ॥ यतोज्ञानमज्ञानस्यैवनिवर्तकमितिव्याप्तेरितिभावः ॥ **प्रपंच**

SGDF
Sri Gargeshwari Digital Foundation

प्र० **अतएवेति** ॥ यतःकर्तृत्वादेर्मिथ्यात्वेविषयादिसिद्धिरतइत्यर्थः । अन्यथा"अस्मत्प्रत्ययगोचरेविषयिणिचिदात्मके युष्मत्प्रत्ययगोचरस्यतद्धर्माणांचाध्यास"इत्यारभ्य"मिथ्याप्रत्ययरूपःकर्तृत्वभोक्तृत्वप्रवर्तनःसर्वलोकप्रत्यक्ष"इत्यंतंभाष्यंव्यर्थमेवस्यादितिभावः । यदुक्तं विषयादिसिद्ध्यर्थमध्यासवर्णनंभाष्यइतितदप्ययुक्तमितिभावेन"बंधमिथ्यात्वंनैवमुक्तिरपेक्षत"इत्यनुव्याख्यानंहृदिकृत्वादूषणांतरमाह ॥ **कर्तृत्वादीति** ॥ **विशिष्टस्येति** ॥ मिथ्याभेदेगृहीतेपीत्यन्वयः । मिथ्यात्वेहेतुः **अतत्वावेदकेनेति** । तत्रहेतुः **संभावितेति** ॥ नकेवलंविशिष्टाभेदेबाधकाभावः प्रयोजनंचास्तीत्याह ॥ **तत्त्वंपदेति** ॥ युक्तंचविशिष्टैक्यमेवेत्याह ॥ **तल्लक्षितइति** ॥ तत्त्वंपदलक्षितइ

अतएवभाष्येऽध्यासवर्णनमितिविवरणाभिप्रेतमधिकरणमपिनिरस्तं । कर्तृत्वादिविशिष्टस्य संभावितदोषेणातत्वावेदकेनप्रत्यक्षानुमानादिनामिथ्याभेदेगृहीतेपितात्विकाभेदेमानांतरविरोधाभावेनतत्त्वंपदमुख्यार्थत्वायतल्लक्षितेचिन्मात्रेऽभेदाप्रसक्त्यातत्त्वमसिवाक्यावैयर्थ्यायचविशिष्टस्यैवनिर्दोषयाश्रुत्यातात्विकाभेदबोधनसंभवेनविषयार्थमध्यासस्यावक्तव्यत्वात् ।

गु० **स्त्विति** ॥ तथाकर्तृत्वादिरूपप्रपंचस्यमिथ्यात्वादैक्यस्याविषयत्वं मिथ्यात्वेनाज्ञानकार्यत्वात् ज्ञानेनतन्निवृत्त्याप्रयोजनंचसिद्धमित्यर्थः ॥ **अतएवेति** ॥ कर्तृत्वभोक्तृत्वादिरूपप्रपंचस्यसत्यत्वेविषयाद्यसंभवादेवेत्यर्थः ॥ **संभावितदोषेणेति** ॥ अत्रप्रत्यक्षादेर्मिथ्याभेदग्राहकत्वेअतत्वावेदकत्वंहेतुः तत्रचसंभावितदोषत्वमितिज्ञेयं । नकेवलंविशिष्टाभेदेबाधकाभावः प्रयोजनांतरंचास्तीत्याह ॥ **तत्त्वंपदेति** ॥ युक्तंचविशिष्टैक्यमेवेत्याह ॥ **तल्लक्षितइति** ॥ तत्त्वंपदल

॥ २३ ॥

प्र० त्यर्थः । यत्रहिभेदःप्रसक्तस्तत्रैवतन्निषेधरूपाभेदोबोधनीयः । नहिचिन्मात्रेभेदःप्रसक्तः । येनतत्राभेदबोधनंसार्थकं । किंतु विशिष्टएवेति । विशिष्टस्य कर्तृत्वादिविशिष्टस्य । विशिष्टाभेदेबाधकंशंकते ॥ **नचेति** ॥ तथाचतत्वावेदकप्रत्यक्षादिमानविरोधइतिभावः ॥ **अस्येति** ॥ सदातनविरुद्धधर्मवत्त्वात्तात्विकभेदवंतौजीवपरावित्यनुमानस्येत्यर्थः । "तत्परत्वात्परत्वाच्चे"तित्वयैवोक्तेरितिभावः । तदुक्तिः अध्यासोक्तिः ॥ **सेत्विति** ॥ "सेतुंदृष्ट्वासमुद्रस्यब्रह्महत्यांव्यपोहती"त्यादिस्मृतेरितिभावः । पापस्यसेत्वज्ञानकार्यत्वेहितज्ज्ञानमज्ञाननिवृत्तिद्वारातन्निवर्तकंस्यात् । नचतत्तथा । तथाचतद्वदेवात्राप्यज्ञानाकार्यस्यविरुद्धधर्मस्यज्ञानेननिवृत्तिसंभवान्नतदर्थंतस्यमिथ्यात्ववर्णनमित्यर्थः । ननुसेतुदर्शनस्यापिनसाक्षात्पापनिवर्तकत्वं किंतुस्वजन्यादृष्टद्वारा । साक्षान्निवर्तकत्वेपिनज्ञानत्वेनकिंतुविहितक्रियात्वेन ।

नचविरुद्धधर्मस्यसदासत्त्वेभेदस्तात्विकएवस्यादितिवाच्यं । अस्याप्यनुमानस्यश्रुतिविरुद्धत्वेनातात्विकविषयत्वात् । नापिप्रयोजनार्थंतदुक्तिः । सेत्वज्ञानाकार्यस्यापिपापस्यसेतुज्ञानान्निवृत्तेः ।

गु० क्षितइत्यर्थः । यत्रहिभेदःप्रसक्तस्तत्रैवहितन्निषेधरूपोऽभेदोबोधनीयः । नहिचिन्मात्रेभेदःप्रसक्तः चिच्चिन्नेत्यनवभासात् । येनतत्राभेदबोधनंसार्थकंस्यादितिभावः ॥ **विशिष्टस्यैवेति** ॥ कर्तृत्वादिविशिष्टस्यैवेत्यर्थः ॥ **नचेति** ॥ तथाचतत्रावेदकप्रत्यक्षादिप्रमाणविरोधइतिभावः ॥ **अस्येति** ॥ सदातनविरुद्धधर्मवत्त्वात्तात्विकभेदवंतौजीवपरावित्यनुमानस्येत्यर्थः ॥ **तदुक्तिरिति** ॥ अध्यासोक्तिरित्यर्थः ॥ **सेत्विति** ॥ "सेतुंदृष्ट्वासमुद्रस्यब्रह्महत्यांव्यपोहती"त्यादिस्मरणादितिभावः । पापस्यसेत्वज्ञानकार्यत्वेहितज्ज्ञानस्यतदज्ञाननिवृत्तिद्वारातन्निवर्तकत्वंस्यात् । नचतदस्ति । तथाचतद्वदेवात्राप्यज्ञानाकार्यस्यापिविरुद्धधर्म

SGDF Sri Gargeshwari Digital Foundation

प्र० ज्ञानत्वेनज्ञाननिवर्त्यत्वज्ञानस्यैव । अतःकर्तृत्वादेराविद्यकत्वांयाध्यासवर्णनंयुक्तमित्यतआह ॥ **विस्तृतमिति** ॥ न्यायामृतेज्ञाननिवर्त्यत्वान्यथानुपपत्तिभंगइत्यर्थः । रामानुजीयमतमप्यनूद्यनिराचष्टे ॥ **केचित्त्विति** ॥ वृद्धव्यवहारादन्येनशब्दानामादौव्युत्पत्त्यभावाद्वृद्धेनचगामानयेतिवाक्येप्रयुक्ते प्रयोज्यवृद्धेनचगव्यानीतायांपार्श्वस्थोबालोस्यगवानयनप्रवृत्तिर्ज्ञानपूर्वा प्रवृत्तित्वात् मत्प्रवृत्तिवत् । ज्ञानंतु सहेतुकमित्यन्यस्यहेतोरदर्शनाद्वाक्यमेवहेतुत्वेनगृहीत्वापश्चादावापोद्वापक्रमेणकार्यएवशब्दानांव्युत्पत्तिंप्रत्येतीतिकार्यएववाक्यानांप्रामाण्यं ।

विस्तृतंचैतदन्यत्र। तस्मान्नविवरणमतमपियुक्तं । केचित्तुवृद्धव्यवहारेणकार्यएवशब्दानांव्युत्पन्नतयासिद्धेब्रह्मणिवेदांतानामप्रामाण्याद्विचारोनारंभणीयइतिप्राप्ते अंबातातादीनंगुल्यानिर्दिश्यांबातातादिशब्देषुप्रयुक्तेषुबालानांतेषुतच्छब्दानांप्रथमव्युत्पत्तिदर्शनात्ब्रह्मणिवेदांतानां

गु० स्वज्ञानेननिवृत्तिसंभवान्नतदर्थंतस्यमिथ्यात्ववर्णनमित्यर्थः । ननुसेत्वादिज्ञानस्यादृष्टद्वारेणतन्निवर्तकत्वान्नसाक्षात्तन्निवर्तकत्वं । तत्त्वेपिवानज्ञानत्वेनतत् । किंतु विहितक्रियात्वेन । ब्रह्मज्ञानंचनतादृशमितिदृष्टांतदार्ष्टांतिकवैषम्यमितिचेत्समंप्रकृतेपीत्याह ॥ **विस्तृतमिति** ॥ अन्यत्र न्यायामृतेज्ञाननिवर्त्यत्वान्यथानुपपत्तिभंगइत्यर्थः । यद्वाननुसेतुदर्शनमात्रंननिवर्तकं । सेतुस्थानामपितत्प्रसंगात् । किंतुदूरगमनादिविशिष्टमेवेतिचेदिहापिनब्रह्मज्ञानमात्रंनिवर्तकं । भाषाप्रबंधजन्येनअनधीतवेदांतजन्येनअधीतवेदांतजन्येनाप्यसंभावनाविपरीतभावनाप्रबलारब्धकर्मादिनाप्रतिबद्धेनापितन्निवृत्तिप्रसक्तेः । किंतुनियमाधीतवेदांतश्रवणादिनियमविशिष्टमेवेतिसाम्यमेवेत्याह ॥ **विस्तृतमिति** ॥ रामानुजीयंमतमनूद्यदूषयति ॥ **केचित्त्विति** ॥ वृद्धव्यवहारस्यकार्यप्रतिपत्तिनिबंधनतयाकार्यमात्रनि

SGDF Sri Gargeshwari Digital Foundation

प्र० ब्रह्मतुसिद्धरूपमितिसिद्धेव्युत्पत्त्यभावेनवेदांतानब्रह्मबोधयितुंशक्ताइत्यप्रमाणं । अतस्तदर्थनिर्णयात्मकमिदंशास्त्रंनारंभणीयमितिपूर्वपक्षस्याशयः । सिद्धांतस्यतु नैवंबालानांप्रथमंकार्येव्युत्पत्तिग्रहः । एतावदनुसंधानाशक्तत्वात् । किंतुसिद्धएव । तथाहि । मातापित्रादीनंगुल्यानिर्दिश्य इयंतेअंबाअयंतेतातइत्यंबादिशब्देषुकेनचिदाप्तेनप्रयुक्तेषुसत्सु तत्रैषांशब्दानांव्युत्पत्तिमवधारयंति । नहिनिखिललोकविदितशब्दार्थसंबंधावधारणप्रकारापनोदोयुज्यते । अतोब्रह्मणिसिद्धरूपेपिबोधमापादयितुंशक्तावेदांताइतिविचारशास्त्रमिदमारभ्यमेव । उक्तंच "कार्येव्युत्पत्तिराद्यानियतिरितिगिरस्तत्पराएवसर्वानान्यावेदेपिरीतिस्ततउपनिषदामूषरप्रायतैव । नातस्तद्वेद्यमीमांसनमुचितमितिप्रत्यव

प्रामाण्यसंभवात्तद्विचारआरब्धव्यइतिसिद्धांतइत्याहुः । तत्रब्रूमः ।

गु० छत्वेनताद्दशव्यवहारदर्शनजन्यतयाप्रत्याय्यप्रत्यायकभावलक्षणसंबंधग्रहणलक्षणव्युत्पत्तेरपिकार्यमात्रविषयतयाकार्यमात्रव्युत्पत्त्यपेक्षशब्दस्यकार्यप्रतिपादकत्वसंभवेपिपरिनिष्पन्नेब्रह्मणिशब्दानामव्युत्पन्नत्वेनतद्बोधकत्वानुपपत्त्यावेदांतानांब्रह्मणिप्रामाण्यासंभवेनानुग्राह्यप्रमाणविरहाद्वेदांतविचारस्याकर्तव्यतयावेदार्थनिर्णायकन्यायग्रथनात्मकंशास्त्रमनारंभणीयमितिपूर्वपक्षाभिप्रायः । छोटिकावादनादिनाअव्युत्पन्नमभिमुखीकृत्यअंबातातादीनंगुल्याप्रदर्श्यइयंतेअंबाअयंतेपिताइतिकेनचिदाप्तेनप्रयुक्तेषुसत्सु अंबादिपदार्थानांवर्तमानत्वेनप्रतिसंबंधिनांप्रत्यक्षत्वोपपत्तेरिष्टसाधनत्वेनजिज्ञासायाःसंभवादंबातातादिशब्दानामंबातातादिषुप्राथमिकव्युत्पत्तिदर्शनात्सिद्धएवशब्दानांव्युत्पन्नत्वेनतत्सापेक्षवेदांतानांपरिनिष्पन्नेपिप्रामाण्यसंभवादनुग्राह्यप्रमाणसद्भावेनवेदांतविचारस्यकर्तव्यत्वाच्छास्त्रमारंभणीयमितिसिद्धांताशयः

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्थीयमानेसिद्धेव्युत्पत्तिमाद्यांबहुमुखमवयन्ब्रह्मजिज्ञास्यमाहे”ति । कर्मविचारानंतरंततएवहेतोर्ब्रह्मविचारःकर्तव्यइतितदीयभाष्यंहृदिकृत्वाह ॥ अथेति ॥ अत्र “एतत्सर्वंतर्कशास्त्रेब्रह्मतर्केहिविस्तरात् । उक्तं”इत्यादिनाऽनुव्याख्यानेकार्येव्युत्पत्तिनिरासेनसिद्धेव्युत्पत्तेरतद्शब्दार्थत्वेनोक्तत्वात् । सुधायामपिपूर्वपक्षेकार्येव्युत्पत्तेरुक्तत्वाद्वक्ष्यमाणंदूषणंनलगतीत्यतउक्तमितिहितवसूत्रार्थइति । तथाचतद्रीत्यावक्ष्यमाणंदूषणमितिध्येयं ॥ नचात्रेति ॥ यदिकर्मविचाराद्याक्षेपेणपूर्वपक्षःक्रियेततदैवैतद्घटेत नान्यथेतिभावः । सूत्रपदानिरस्योप्यगत्याक्रियतइत्यतआह ॥ नचेति ॥ कोयंनियमइत्यतउक्तमवतारिकेति । अन्यथाऽसंगतिःस्यादितिभावः ॥ संभवइति ॥ अस्मद्रीत्येतिभावः । ननुयथाभवन्मतेजीवभेदकगुणपूर्तिवाचिब्रह्मपदप्रयोगाद्विषयसिद्धिस्तथामन्मतेपिसिद्धब्रह्मवाचकब्रह्मपदप्रयोगात्सिद्धेव्युत्पत्तिर्ज्ञायतइत्यत

अथकर्मविचारानंतरमतःकर्मणांविचारितत्वादेवब्रह्मविचारःकर्तव्यइतिहितवसूत्रार्थः । नचात्राथशब्दादिना कार्येव्युत्पत्तिनिरासःप्रतीयते । नचसौत्रपदनिरस्यैर्हेतुभिःसूत्रावतारिकारूपपूर्वपक्षसंभवेहेत्वंतरेणसयुक्तः ।

गु० ॥ तवसूत्रार्थइति ॥ “कर्मविचारानंतरंततएवहेतोर्ब्रह्मविचारःकर्तव्यइतिअथातइत्युक्तं”इतितद्भाष्योक्तेरितिभावः । ननुअथशब्दादिनाकार्येव्युत्पत्तिनिरासाप्रतीतावपिभवत्वेवंपूर्वपक्षइत्यतआह ॥ नचसौत्रपदेति ॥ सौत्रपदनिरस्यहेतुभिरेवपूर्वपक्षस्यकर्तव्यत्वेसूत्रावतारिकारूपेतिहेतुगर्भविशेषणं । अन्यथासूत्रावतारिकात्वानुपपत्तेः ॥ संभवइति ॥ अस्मद्रीत्यतिशेषः ॥ हेत्वंतरेणेति ॥ सौत्रपदानुक्तहेतुनिरस्यहेत्वंतरेणेत्यर्थः । ननुचसौत्रपदोक्तहेतुनिवर्त्यहेतुनैवपूर्वपक्षःकर्तव्यइतिननियमः । तत्सूचितहेतुनिरस्यहेतुनापिपूर्वपक्षाणांबहुलमुपलंभात् । प्रकृतेचसिद्धेव्युत्पत्तेःसौत्रपदेनानुक्तावपिसूचितत्वमस्त्येव । सूत्रेसिद्धार्थपर

प्र० आह ॥ नचेति ॥ ब्रह्मशब्दस्यविजिज्ञासस्वेतिलोड्वाच्यकार्यान्वितब्रह्मपरत्वेनसिद्धेव्युत्पत्तेरलाभात्सूत्रेचश्रुत्यनुसरणायकर्तव्यपदाध्याहाराच्च । यद्यत्रलिङादिविधिप्रत्ययरहितंब्रह्मपदोपेतंविषयवाक्यंस्यात्सूत्रेचकर्तव्यपदाध्याहारोनस्यात्तदासासूच्येत । नह्येवमितिभावः । ननुकार्येव्युत्पत्त्यनिरासेसिद्धेब्रह्मणिप्रामाण्यायोगात्तन्निरासकस्यान्यस्याभावाद्भवद्भिरप्यस्मिन्नेवसूत्रेतन्निरासादगत्यात्रैवंपूर्वःपक्षःकृतइत्यतआह ॥ किंचेति ॥ विंशतिलक्षणमिति ॥ लक्षणशब्दोध्यायपर्यायः । पूर्वतंत्रेद्वादशलक्षणानि । दैवीमीमांसायांचत्वारि ।

नचविधिवाक्यस्थस्यास्यब्रह्मशब्दस्यस्वप्रधानेसिद्धेव्युत्पत्तिरद्यापिसिद्धा । येनतत्प्रयोगात्सासूच्येत । किंच “अथातोधर्मजिज्ञासे”त्यादि“अनावृत्तिःशब्दा”दित्यंतंविंशतिलक्षणमेकंशास्त्रमितिवदतात्वया चतुर्लक्षणीदेवमीमांसा द्वादशलक्षण्याःकर्ममीमांसायाउत्तरा ब्रह्ममीमांसायास्तुपूर्वेतिस्वीकृतत्वेन सिद्धेव्युत्पत्त्यभावेसिद्धरूपदेवमीमांसानुपपत्तेस्तस्यास्तत्रैवसिद्धत्वात्पुनरिहसिद्धेव्युत्पत्त्यभावेनपूर्वपक्षोनयुक्तः । अतएवसिद्धांतोप्ययुक्तः ।

गु० ब्रह्मशब्दप्रयोगादित्यतआह ॥ नचेति ॥ ब्रह्मशब्दस्यस्वप्रधानेसिद्धेव्युत्पत्त्यभावेहेतुमाह ॥ विधिवाक्यस्थस्येति ॥ तद्विजिज्ञासस्वेतिश्रुतौलोड्वाच्यान्वितब्रह्मपरत्वात्सूत्रेचश्रुत्यनुसारेणाध्याहृतकर्तव्यपदोक्तकार्यान्वितब्रह्मपरत्वाद्ब्रह्मशब्दस्यनसिद्धपरत्वमितिभावः । ननुकार्येव्युत्पत्तेरनिराकरणेसिद्धेब्रह्मणिप्रामाण्यायोगात्तन्निरासकस्यान्यस्याभावादगत्याऽत्रैवंपूर्वपक्षःकृतइत्यतआह ॥ किंचेति ॥ विंशतिलक्षणमिति ॥ लक्षणशब्दोध्यायपरः । तस्याः सिद्धेव्युत्पत्तेः । तत्रैवदेवमीमांसायामेव ॥ पुनरिति ॥ विशेषहेत्वनुक्तेर्नतदाक्षेपोपिसंभवति । सूचनंतूभयत्राप्यविशिष्टमेवेतिभावः । नन्वतश्शब्दादिनाऽबोधनेपिसिद्धेव्युत्पत्तेर्हेतु

SGDF Sri Gargeshwari Digital Foundation

प्र० उत्तरस्यांचत्वारिचेत्यर्थः । अतएवेत्युक्तंहेतुंविशदयति ॥ **त्वद्रीत्येति** ॥ अगतिंपरिहरति ॥ **विचारेति** ॥ हेत्वर्थेन हेतुबोधकेन ॥ **संभवइति** ॥ वक्ष्यमाणदिशेतिभावः । तत्र विचारकर्तव्यतायां । त्वन्मतेकर्मविचारस्यैवब्रह्मविचारंप्रतिहेतुत्वोक्त्यासिद्धेव्युत्पत्तेर्हेतुत्वस्यातश्शब्देनाबोधनादितिभावः । यत्कश्चिदाह “परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायात् नास्त्यकृतःकृतेन तद्विज्ञानार्थंसगुरुमेवाभिगच्छे”दितिमुंडकवाक्यमुदाहृत्य इदंशास्त्रमारंभणीयंनवा । तदर्थंब्रह्मज्ञानायतद्विचारांगभूतगुरूपसत्तिंपरीक्ष्यलोकानित्यादिवाक्यंविधातुंशक्नोतिनवा । तदर्थंब्रह्मविचारार्हंनेतिसंदेहे “अयमात्माब्रह्मे”त्यादिश्रुत्याजीवस्यैवब्रह्मत्वात्तस्यचाहंधीसिद्धत्वेनासंदिग्धतयाविचारानर्हत्वात् । नचेयंश्रुतिरहंधीसिद्धेनविशिष्टेनाभेदंनबोधयति किंतुचिन्मात्रेण तच्चेदानीमावृतत्वात्संदिग्धमितिवाच्यं श्रुतावयमितिप्रत्यक्षसिद्धंविशिष्टमेवपरामृश्यब्रह्मतोपदेशात् । “मुष्टिलोपात्तुसंख्याल्लोपस्तद्गुणत्वात्स्या”दितिदाशमिकाधिकरणन्यायेनप्राथमिकेदंशब्दस्वारस्यानुरोधेनचरमब्रह्मशब्दस्यदेहबृंहणादिनाकथंचित्तस्मिन्नेवनेयत्वात् । नच“ध्यायतीवे”त्यादिश्रुतेःकर्तृत्वादिकंमिथ्येतियुक्तं । प्रत्यक्षविरोधेनश्रुतेःपारतंत्र्यमात्रपरत्वात् । अस्तुवाचिन्मात्रैक्यं । तथापितस्यनिर्विशेषत्वेनशब्देनप्रतिपादनासंभवान्नतदयमात्मेत्यादिवाक्यबोध्यं । किंतुविशिष्टैक्यमेव । तच्चासंदिग्धं । ब्रह्मणोजीवान्यत्वेपितस्यसाकल्येनज्ञानासंभवात् । एकदेशज्ञानंजातमपिनमोक्षहेतुःस्यादतोब्रह्मणोऽविचार्यत्वाद्गुरूपसत्तिमिदंवाक्यंनविदधातीतिशास्त्रमेतन्नारंभणीयमितिप्राप्ते । त्रिषुधामसुयद्भोज्यंभोक्ताभोग्यश्च

त्वद्रीत्यासिद्धेव्युत्पत्तेरतश्शब्दादिनाऽबोधनात् । विचारकर्तव्यताहेत्वर्थेनातश्शब्देनोक्तस्या ॥ २६ ॥

गु० त्वमस्त्वित्यतआह ॥ **विचारेति** ॥ अथशब्दादिनासूचितस्येति ॥ मोक्षस्येतिशेषः । अथशब्दस्यमुमुक्षानंतर्यार्थत्वादितिभावः । तत्र विचारकर्तव्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० यद्भवेत् । तेभ्योविलक्षणस्साक्षीचिन्मात्रोहंसदाशिवः । ज्ञाज्ञौचद्वावजावीशानीशा"वित्यादिश्रुतिभिर्भेदंस्याप्यावेदनेनद्विविधवाक्यदर्श
नेनसंदिग्धत्वसंभवाद्विचारार्हंब्रह्मेतिशास्त्रमारंभणीयमितिसिद्धांतइति । यथोक्तं "आत्माब्रह्मेत्यधीतःस्फुरतिसतुसदानिर्विशेषःसचेत्स्यात्त
स्यातीतस्यबुद्धेःसरणिमिहनयैःकापरिच्छेदवार्ते" त्यादि । तन्न । यद्वतन्यायैस्सूत्रनिबद्धैर्यद्वाक्यार्थोनिर्णीयतेतस्यैवोदाहरणत्वयोग्यतया
परीक्ष्येतिवाक्यस्यातथात्वेनानुदाहरणत्वात् । नह्यथातोब्रह्मजिज्ञासेतिसूत्रेपरीक्ष्येतिवाक्यगततद्वाक्यार्थनिर्णायकन्यायनिबंधनमस्ति ।
नवाऽत्रसूत्रेस्थित्वासर्वतीर्थकरैरेतद्वाक्यार्थोनिर्णीयते । यदपिक्लेशेनास्यवाक्यस्यजिज्ञासासूत्रेणैकार्थतांव्युत्पाद्योदाहरणत्वकथनंतदपिन ।
साक्षाज्जिज्ञासापदाद्युपेतस्यैवोदाहरणत्वसंभवेक्लेशायोगात् । समानार्थत्वमात्रेणोदाहरणत्वायोगाच्च । निर्णेयार्थकस्यैवोदाहरणत्वात् । पूर्व
पक्षोप्ययुक्तः । अयमात्माब्रह्मेत्यादौब्रह्मत्वंयादृशतादृशंनिरंकुशंवा । नाद्यः । ब्रह्मैक्यासिद्धेः । नद्वितीयः । प्रत्यक्षबाधात् । नहिमा
यावादिमतइवप्रत्यक्षमतत्वावेदकमितिपूर्वपक्षिणोमतं । तस्यबलवत्त्वेनध्यायतीवेत्यादेरन्यार्थवर्णनात् । अयमात्मेत्यभेदवाक्यंपश्यतः
पूर्वपक्षिणस्तद्भेदावेदकवाक्यादावान्ध्यस्यायुक्तत्वेनसर्वसामंजस्यायचंद्रिकोक्तदिशाऽद्वैतिरीत्येत्युक्तस्यैवानुसरणीयत्वाच्च । किंचजीवस्याहं
धीसिद्धत्वेपिदेहादिविविक्तत्वादिनासंदिग्धत्वात्तेनरूपेणजिज्ञासासंभवेनशास्त्रानारंभासिद्धेश्च । अन्यथात्वन्मतेप्यग्रेजीवविचारोनस्यात् ।

थशब्दादिनासूचितस्यचतत्रहेतुत्वसंभवे तद्विपरीतायाःसिद्धेर्व्युत्पत्तेस्तत्रहेतुत्वायोगात् ।

गु० तायां । संभवे वक्ष्यमाणरीत्येतिशेषः ॥ **तद्विपरीतायाइति** ॥ तन्मतेअतश्शब्देनकर्मविचारस्यैवब्रह्मविचारंप्रतिहेतुतायाउक्तत्वेनसिद्धेर्व्युत्पत्तेर्हेतुत्वस्याप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० यदप्यस्तुवेत्यादिनाचिन्मात्रैक्यमंगीकृत्यायमात्मेत्यादिवाक्याबोध्यत्ववर्णनंतदप्यचारु । तस्यतादृशागमवाक्यंविनांगीकारायोगेनागमेन तदप्रतिपादनोक्तेर्व्याहतत्वात् । यापिब्रह्मणोजीवान्यत्वमुपेत्ययथावत्तस्यापरिच्छेद्यत्वोक्तिःसाप्ययुक्ता । सूत्रेतस्यासमाधानात् । ब्रह्मणः साकल्येनापरिच्छेद्यत्वादिरूपमहामहिमत्वबोधकवचनसहस्रबलेनागत्यातस्ययथायोग्यमेकदेशपरिज्ञानस्यैवमुक्तिहेतुत्वस्यकल्प्यत्वात् । सिद्धांतोप्ययुक्तः । त्वदुक्तसंदेहोपपादकन्यायस्यसूत्रेकेनापिपदेनाप्राप्तेरित्याद्यूह्यं । ननुटीकाव्याख्यार्थप्रवृत्तस्यादावेवकिंपरमतनिरासेनेत्यतस्तदुपयोगंदर्शयंष्टीकामवतारयति ॥ **तदेवमित्यादिना** ॥ आदिसूत्रस्येतिपदंहित्वाइदंशब्दप्रतीकग्रहणंतुमतांतरीयाधिकरणमयुक्तमितिग्रंथकर्तुर्हृदयमितिज्ञापनाय । अस्यसूत्रस्यसमन्वयाद्यशेषविचारहेतुत्वात्कथमध्यायाद्यसंगतिरित्याक्षिप्यसंगतिशब्दस्यार्थद्वयमभिप्रेत्य

तदेवंमतांतरीयमधिकरणमयुक्तमितिहृदिनिधायस्वमतेनाधिकरणमारचयति ॥ [३।२६] तत्रेदमित्यादिना ॥ [४।१] अध्यायपादसंगतिस्त्विति ॥ यद्यप्येतदधिकरणाभावे शास्त्रस्येवतदेकदेशयोरध्यायपादयोरप्यारंभासंभवः तथापिसिद्धेशास्त्रारंभेपुनरध्यायाद्यारंभाक्षेपस्यानेनासमाधानाच्छास्त्रेणेव

गु० तिपादनादितिभावः । टीकाव्याख्यानंप्रतिज्ञायपरमतखंडनंकथंनासंगतमित्यतस्तस्योपयोगमाह ॥ **तदेवमिति** ॥ **हृदिनिधायेति** ॥ अन्यथासंगत्यादीत्येव वक्तव्यतयाइदंसंगत्यादीतिनब्रूयादितिभावः ॥ **तथापिसिद्धेशास्त्रारंभइत्यादि** ॥ अत्रब्रह्मजिज्ञासायाःकर्तव्यतासमर्थनादस्तिशास्त्रादिसंगतिरितिपूर्वटीकास्थेन ब्रह्मजिज्ञासाशब्देनोक्तस्यविचारस्याकारद्वयमस्ति प्रारिप्सितशास्त्रेवर्तिष्यमाणत्वेनविचारकर्तव्यतासाधकाद्यसूत्रसापेक्षत्वंतद्धिजिज्ञासस्वेतिब्रह्मविचारविधायकवा

प्र० समाधत्ते ॥ **यद्यपीत्यादिना** ॥ **औपोद्घातिकीति** ॥ अनेनटीकायांशास्त्रसंगतिरित्यस्यशास्त्रेणैवौपोद्घातिकीत्यर्थउक्तः । ननुविचारकर्तव्यतासमर्थनेनशास्त्रारंभसिद्धावपिसमन्वयाध्यायोनारंभणीयइतिशंकायाःजीवभेदकगुणपूर्तिवाचिब्रह्मशब्देनसमाधानमस्ति । अन्यथा गुणपूर्त्यर्थकसमन्वयानारंभःस्यात् । तथाचकथमध्यायासंगतिरितिचेन्न । तथासत्युक्तरीत्याऽविरोधाध्यायारंभप्रयोजकत्वस्यापिसत्त्वेनततोव्यावृत्तस्याद्याध्यायेनसंगत्यंतरस्याभावात्पादचतुष्टयद्वारैवाध्यायचतुष्टयारंभप्रयोजकत्वेनतदात्मकशास्त्रारंभप्रयोजकत्वादस्यचनशास्त्रसंगत्यतिरिक्ताध्यायसंगतिरस्तीतिसुधानुसारेणसंगतिपदमन्यथाव्याचष्टे ॥ **यद्वेति** ॥ **न्यायेति** ॥ अधिकारिप्रयोजनविषयसत्त्वरूपन्यायव्युत्पादकत्वादित्यर्थः ॥ **यथोक्तमिति** ॥ सुधायामाद्यस्यतृतीयेपादेउक्तमित्यर्थः । अत्रांतर्भावसंगतिष्टीकाभिमतेत्यत्रोपष्टंभक

नताभ्यामौपोद्घातिकीसंगतिरित्यर्थः । यद्वा यथातद्धिजिज्ञासस्वेत्यादिब्रह्मविचारविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वाद्ब्रह्मविचाररूपेणशास्त्रेणांतर्भावलक्षणासंगतिः नतथाध्यायपादाभ्यां । समन्वयतद्विशेषाप्रतिपादकत्वादित्यर्थः । यथोक्तं । संगतिस्तावद्द्विविधा । अंतर्भावलक्षणा

गु० क्यार्थनिर्णायकतयाब्रह्मविचारत्वंचेति । अत्राद्याकारविवक्षायांटीकास्थःसंगतिशब्दउपोद्घातपरः। "अन्यथाशास्त्रस्यानारंभणीयत्वप्रसंगा"दितिटीकाप्युपोद्घातोपपादिका । द्वितीयाकारविवक्षायांतुसंगतिशब्दोंतर्भावपरः । अन्यथेत्यादिटीकाप्यधिकरणप्रयोजनोक्तिपरा । तत्राद्यपक्षविवक्षयाशास्त्रेणेवनताभ्यामौपोद्घातिकी संगतिरित्युक्तं । द्वितीयपक्षविवक्षयातुयथाशास्त्रेणांतर्भावलक्षणासंगतिर्नतथाध्यायपादाभ्यामित्युक्तमितिध्येयं ॥ **यथोक्तमिति** ॥ आद्यस्यतृतीये"अधिकार

SGDF
Sri Gargeshwari Digital Foundation

प्र० माह ॥ अतएवोक्तमिति ॥ अतएवास्येति ॥ जिज्ञासाविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादेवेत्यर्थः । टीकास्थतुशब्द सूचितंपरमतदूषणंव्यनक्ति ॥ एतेनेति ॥ औपोद्घातिकीसंगतिर्नेत्यर्थकथनेनेत्यर्थः । एतच्छब्दार्थंव्यनक्ति ॥ द्वितीयाध्यायत इति ॥ एतेनैवेति ॥ औपोद्घातिकीअंतर्भावलक्षणावासंगतिर्नेत्यर्थकथनेनेत्यर्थः ॥ स्वार्थइति ॥ श्रोतव्यादिवाक्यस्यब्रह्मज्ञानायवेदांत विचारःकर्तव्यइतिविचारकर्तव्यतारूपस्वार्थप्रतिपादकत्वरूपसमन्वयस्येत्यर्थः । स्वार्थेसमन्वयेनसमन्वयाध्यायसंगतिरितिपक्षमतिप्रसंगेनदू

आनंतर्यलक्षणाचेति । अतएवोक्तंसुधायां"अतएवास्यसूत्रस्यनशास्त्रबहिर्भाव"इति । एते नप्रथमसूत्रस्यसमन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसंगतयइतिकल्पतरू क्तंनिरस्तं । द्वितीयाध्यायतोव्यावृत्तस्यशास्त्रसंगत्यतिरिक्तस्यप्रथमाध्यायादिनासंगतिविशेष स्यानुक्तत्वेनाध्यायपादपीठत्वमात्रस्यन्याय्यत्वात् । एतेनैव श्रोतव्यादिवाक्यानांस्वार्थेसम

गु० श्वतद्वानि"रित्येतद्व्याख्यानावसरेसुधायामुक्तमित्यर्थः ॥ आनंतर्यलक्षणाचेतीति ॥ उपोद्घातादिकंतुतद्विशेषइतिभावः । अंतर्भावसंगतेष्टीकाभिमतत्वे उपष्टंभकमाह ॥ अतएवेति ॥ अतएवास्येति ॥ तद्विजिज्ञासस्वेतिब्रह्मविचारविधायकवाक्यार्थनिर्णायकतयाब्रह्मविचाररूपत्वादेवेत्यर्थः । टीकास्थतु शब्दसूचितंपरमतदूषणंप्रकटयति ॥ एतेनेति ॥ औपोद्घातिकीसंगतिर्नेत्यर्थकथनेनेत्यर्थः । एतेनेत्युक्तंव्यनक्ति ॥ द्वितीयाध्यायतइति ॥ शास्त्रसंगत्य तिरिक्तस्येति ॥ शास्त्रसंगतिरूपैवेयमध्यायादिसंगतिः । नतुविशेषाकारेणेयमध्यायादिसंगतिरितिभावः । यद्वेतिव्याख्यानंविवरणमतनिरासार्थमित्यभिप्रेत्यतद नूद्यदूषयति ॥ एतेनैवेति ॥ स्वार्थइति ॥ श्रोतव्यादिवाक्यानांब्रह्मज्ञानायवेदांतविचारकर्तव्यतारूपार्थप्रतिपादकत्वरूपसमन्वयस्येत्यर्थः । श्रोतव्यादिवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० षयित्वा ब्रह्मणिवेदांतसमन्वयस्यनिमित्तत्वादितीममंशमपिदूषयति ॥ **विचारेति** ॥ एवमपिपादसंगतिर्नोक्तेत्याह ॥ **पादेति** ॥ आद्या धिकरणस्याध्यायाद्यसंगतिमंगीकृत्यानंदमयाधिकरणमारभ्येत्येतत्सुधाविरुद्धमितिभावेनाक्षिपति ॥ **नन्विति** ॥ **तत्रेति** ॥ समन्वयाधिकरणेध्यायांतर्भावरूपसंगतेःसत्त्वादित्यर्थः । नन्वीक्षत्यधिकरणेब्रह्मणोऽवाच्यत्वात्कथंतत्रशास्त्रयोनित्वमितिचोद्यमेवनिरस्तं । अतएवसू

न्वयस्यतद्वारेणविचार्यमाणवेदांतवाक्यानामपिब्रह्मणिसमन्वयस्यचनिमित्तत्वादाद्यंसूत्रंसमन्वयेनसंगतमितिविवरणोक्तंनिरस्तं । तत्तद्वाक्यस्यस्वार्थेसमन्वयप्रतिपादनमात्रेणसमन्वयाध्यायसंगतौ तृतीयाध्यायादेरपिसमन्वयसंगतिप्रसंगात् । विचारकर्तव्यताप्रतिपादनेनब्रह्मणिसमन्वयनिमित्तत्वस्येवाविरोधादिनिमित्तत्वस्यापिसत्त्वेनद्वितीयादितोव्यावृत्तस्यप्रथमेनसंगतिविशेषस्यासिद्धेश्च । पादसंगत्यनुक्तेश्च । ननुतथाप्यानंदमयाधिकरणमारभ्येतिकथं । समन्वयसूत्रे साक्षात्समन्वयोक्तेः"समन्वयसूत्रेणाध्यायशेषस्यप्रपंच्यप्रपंचकभावसंगति"रितिसुधाग्रंथाच्चतत्राध्यायसंगतेःसत्त्वात् ।

गु० क्यानांस्वार्थेसमन्वयेनसमन्वयाध्यायसंगतिपक्षंतावन्निराकरोति ॥ **तत्तद्वाक्यस्येति** ॥ ब्रह्मणिवेदांतसमन्वयस्यनिमित्तत्वादित्युक्तमप्यंशंनिरस्यति ॥ **विचारेति** ॥ अविरोधादिनिमित्तत्वस्यापीति । विचारकर्तव्यतायाअसमर्थनेअविरोधाध्यायस्याप्यप्रवृत्तेरितिभावः । ननुमास्तुद्वितीयादिव्यावृत्तसंगतिलाभः । तत्साधारण्येनैवप्रथमाध्यायसंगतिरस्त्वित्यतआह ॥ **पादेति** ॥ तथासत्यविशेषात्कल्पतरुवत्पादसंगतेरपिवक्तव्यतयातामनभिधायास्याएवविशेषतोवचनेकरणाभावाद्द्वितीयादिव्यावृत्तसंगत्यभिप्रायेवाच्येउक्तदोषतादवस्थ्यमितिभावः । "अध्यायपादसंगतिस्त्वानंदमयाधिकरणमारभ्यैवगवेषणीये"त्यानंदमयाधिकरणप्राक्तनानामधिकरणानामध्यायाद्यसंगतिवर्णनंसुधाविरुद्धत्वादनुपपन्नमित्याक्षिपति ॥ **नन्विति** ॥ **तत्रेति** ॥ समन्वयसूत्रइत्यर्थः ॥ **तस्याइति** ॥ अध्यायांतर्भावरूपसंगतेरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्रेअशब्दमवाच्यंनेत्येवोक्तमित्याशंक्यनिरस्यति ॥ **नचेति** ॥ कारणत्वादिनेतिप्रकारेतृतीया । अनेनप्रकारेणशास्त्रजन्यप्रमागोचरत्वेत्यर्थः ॥ **तदभावइति** ॥ शब्दगोचरत्वाभावइत्यर्थः ॥ **शास्त्रयोनित्वइति** ॥ शास्त्रजन्यप्रमाविषयत्वेसाध्येसमन्वयादित्यनेनोपक्रमादिप्रमाणकशक्तितात्पर्यलक्षणसंबंधादितिसिद्धवदुपन्यस्तइत्यर्थः । इदंतुसुधोक्तंसूत्रार्थमभिप्रेत्येतिध्येयं । प्रपंच्यप्रपंचकभावकथनसुधावाक्यंतुहेतु

ईक्षत्यधिकरणेसमन्वयासाधारणहेतुवाच्यत्वसमर्थनेनतस्मिन्नपितस्याःसत्त्वात् । नचेक्षतौवचनवृत्त्याजगत्कारणत्वादिनाशास्त्रैकजन्यप्रमागोचरत्वरूपशास्त्रयोनित्वे अवाच्यत्वरूपंबाधकमेवोद्धृतं नतुसमन्वयेहेतुरुक्त इतिवाच्यं । "तदभावेकुतोन्वय"इत्यनुव्याख्यानेवाच्यत्वस्यसमन्वयहेतुत्वेनोक्तत्वादिति । उच्यते । वैदिकशब्दानांब्रह्मण्युपक्रमादिलिंगप्रमाणकःशक्तितात्पर्यलक्षणःसंबंधःसमन्वयः । सचनसमन्वयसूत्रव्युत्पाद्यः । तत्रतत्प्रमाणस्यानुक्तेः । किंतुव्युत्पादयिष्यमाणः सशास्त्रयोनित्वेहेतुत्वेनसिद्धवदुपन्यस्तः । ईक्षतावाच्यत्व

गु० त्यर्थः ॥ **बाधकमेवोद्धृतमिति** ॥ सूत्रेअशब्दंनेत्युक्तत्वात् । अन्यथावाच्यमित्यवक्ष्यदितिभावः । तदभावे शब्दगोचरत्वाभावे । तत्र समन्वयसूत्रे । तत्प्रमाणस्य उपक्रमादिरूपस्यशक्तितात्पर्यलक्षणसंबंधप्रमाणस्य । किंत्वित्यस्यहेतुत्वेनोपन्यस्तइत्युत्तरेणसंबंधः । कथमसिद्धस्यहेतुत्वेनोपन्यासइत्यतोसिद्धस्यापिसिद्धत्वविवक्षयेतिभावेनोक्तंसिद्धवदिति । अव्युत्पादितस्यकथंसिद्धत्वविवक्षापियेनतद्विवक्षयाहेतुत्वेनोपन्यासःसंगच्छेतेत्यतोनव्युत्पादितत्वमेवतद्विवक्षायांप्रयोजकं किंनामव्युत्पादयिष्यमाणत्वमपि । (तेन)तदिहसमन्वयस्यप्रागव्युत्पादितत्वेपिव्युत्पादयिष्यमाणत्वात्तत्प्रयुक्तसिद्धत्वविवक्षायाअप्रत्यूहत्वाद्युक्तस्तद्विवक्षयाहेतुत्वेनोपन्यासइत्याशयेनोक्तं ॥ **व्युत्पादयिष्यमाणइति** ॥ सुधाकारैरुक्तःप्रपंच्यप्रपंचकभावोपिसमन्वयसूत्रेहेतुत्वेनोपन्यस्तसमन्वयविवरणाभिप्रायकोद्रष्टव्यः

प्र० विवरणाभिप्रायमितिभावः ॥ **असंभवाशंकेति** ॥ वाच्यत्वंसमन्वयसंभावकमेवोक्तं । नतूपक्रमादिभिःसव्युत्पादितः । नापितत्रोपक्रमादिहेतुर्निरूपितः । तदभावेकुतोन्वयइत्यनुव्याख्यानंतुकुतोन्वयसंभावनेत्येवंपरं । अतएवेक्षतौपूर्वपक्षटीकायां "तच्चवाच्यत्वएवसंभवती"तिसंभवशब्दप्रयोगइतिभावः । यद्यप्यध्यायसंगतिरेवपूर्वपक्षिता तथापियथानपादेनसंगतिस्तथाध्यायेनापीतिदृष्टांततयाऽध्यायपादाभ्यामितितदुक्तिः । उत्तरप्रस्थानानुरोधात्परिहारांतरमाह ॥ **यद्वेति** ॥ **पंचाधिकरणीति** ॥ "द्विगो"रितिङीप् । उक्तार्थेटीकासंम

प्रयुक्तासमन्वयासंभवाशंकैवनिरस्ता समन्वयस्तुनव्युत्पादितइतिनतयोरध्यायपादाभ्यामंतर्भावलक्षणासंगतिः । यद्वा आनंदमयाधिकरणमारभ्यसंगतिद्वयं । ततोर्वाक्समन्वयेक्षत्योः पादमात्रेणसंगत्यभावः । अन्येषुत्वध्यायेनापीतिसंगत्योरभावःपंचाधिकरणीसाधारणः ।

गु० ॥ **असंभवाशंकेति** ॥ वाच्यत्वंसमन्वयसंभावकतयैवोक्तं । नतुहेतुत्वेन । तदभावेकुतोन्वयइत्यनुव्याख्यानंतुकुतोन्वयसंभावनेत्येवंपरतयायोज्यं । अतएवपूर्वपक्षटीकायां त द्वाच्यत्वएवसंभवतीतिसंभवशब्दप्रयोगइतिध्येयं । ननुईक्षत्यधिकरणेनांतर्भावलक्षणसंगत्यभात्रेपिसमन्वयहेतुभूतवाच्यत्वसाधकत्वादौपोद्घातिकीसंगतिरस्त्येवेतिसंगतिमात्रनिषेधिकाटीकानुपपन्नेत्यरुच्याह ॥ **यद्वेति** ॥ यद्वा ननुसमन्वयेसाधकानांबाधकाभावानांचात्रैवचनादत्रचतदभावात्पादविशेषानंतर्भावेपिसमन्वयसूत्रेसाक्षात्समन्वयोपयोगितत्प्रतिज्ञायाःकृतत्वात् ईक्षत्यधिकरणेचसाक्षात्साधकवत्तत्सिद्ध्युपयोगिबाधकोद्धारस्यकृतत्वात्समन्वयाध्यायांतर्भावोवक्तव्य एव । नचप्रतिज्ञाबाधकोद्धारयोर्वक्ष्यमाणसाधकयुक्तिसापेक्षत्वेनतदनपेक्षसाधकत्वाभावान्नसमन्वयसाधकांतर्भावइतिवाच्यं । तथासतिएतत्प्रतिज्ञाबाधकोद्धारा

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिमाह ॥ **अतएवेति** ॥ यतोद्वैरूप्यंपंचस्वधिकरणेष्वतएवेत्यर्थः । यद्यध्यायपादसंगतीइतिद्विवचनप्रयोगःस्यात्तदापंचस्वधिकरणेषुं ते न
स्तइतिधीस्स्यात् । संगतिरित्युक्तौतुततोर्वाक्त्रिपूभयसंगत्यभावः द्वयोःपादमात्रसंगत्यभावइतिज्ञातुंशक्यतइतिसंगतिद्वयसमुदायाभिप्रायेणै
कवचनंप्रयुक्तमित्यर्थः । ननुपीठत्वंनामाधारत्वं । नहिपंचाधिकरण्याअध्यायपादाधारतास्तीत्यतःपीठवत्पीठमितिभावेनतदुपपादयति
॥ **पंचाधिकरण्याइति** ॥ यद्वा पंचाधिकरण्याअध्यायाद्यनंतर्भावेतदादौनिवेशोनयुक्तइत्याशंकानिरासायप्रवृत्तोयंग्रंथइत्यभिप्रेत्यव्याचष्टे
॥ **पंचाधिकरण्याइति** ॥ **वक्ष्यमाणेति** ॥ प्रत्यधिकरणंवक्ष्यमाणरीत्याईक्षत्यधिकरणस्यादिभागेवक्ष्यमाणरीत्यावायुक्तक्रमत्वादित्यर्थः ।

अतएवाध्यायपादसंगतिरितिसमुदायैकवचनंप्रयुक्तमिति ॥ ४१२ अध्यायपादपीठत्वादिति ॥ पंचाधिकरण्याः
समन्वयविशेषाप्रतिपादकत्वादध्यायाद्यंतर्भावासंभवेपिविचारकर्तव्यतायाःप्रथमंप्रतिपाद्यत्वाद्वक्ष्यमाणक्रमेण

गु० नुपजीवनेनवक्ष्यमाणहेतूनामपिसमन्वयासाधकत्वेनोत्तरसूत्रसंदर्भस्यापितत्रानंतर्भावापातादित्यरुचेराह ॥ **यद्वेति** ॥ **पंचाधिकरणीति** ॥ द्विगोरित्यनेनङी
पियस्येतिचेत्यकारलोपेपंचाधिकरणीशब्दनिष्पत्तिरितिभावः । उक्तार्थस्यटीकाकृत्संमततांदर्शयति ॥ **अतएवेति** ॥ यतस्ततोर्वाक्तनाधिकरणपंचकेसमन्वयेक्ष
त्योःपादमात्रेणसंगत्यभावोऽन्येषुत्रिष्वध्यायेनापीतिवैरूप्यं अतएवेत्यर्थः ॥ **समुदायैकवचनमिति** ॥ अन्यथानाधिकरणश्रुतिसंगतीइतिवदध्यायपादसंगती
इतिद्विवचनमेवब्रूयादितिभावः । नन्वध्यायाद्यनाधारत्वात्पंचाधिकरण्याःकथमध्यायादिपीठत्वमित्यतःपीठवत्पीठमितिगौणीमाश्रित्यतदुपपादयति ॥ **पंचाधिक
रण्याइति** ॥ उत्तराधिकरणसंगतेःसत्त्वात्कथंतन्निषेधइत्यतआह ॥ **पूर्वाधिकरणेति** ॥ **श्रुतिमूलत्वातिरिक्तेति** ॥ इहटीकायांपूर्वाधिकरणतद्विषयवाक्यसं

॥ ३० ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० उत्तराधिकरणेनतयोःसत्त्वात्कथंनस्तइत्यतआह ॥ **पूर्वेति** ॥ एतस्यस्पष्टत्वाट्टीकायामेतदुक्तिरयुक्तेत्याशंक्यपरमतप्रतिक्षेपस्तत्फलमिति भावेनाह ॥ **एतेनेति** ॥ संगत्यभावकथनेनेत्यर्थः । स्वाध्यायोध्येतव्यइत्यस्यदृष्टार्थत्वेनस्वाध्यायाध्ययनेनफलवदर्थावबोधंभावयेदित्यर्थ स्यपूर्वतंत्रेनिर्णीतत्वेनवेदांतानामपिस्वाध्यायशब्दवाच्यत्वेनवेदांताध्ययनेनफलवदर्थावबोधंभावयेदित्यर्थपर्यवसानादर्थज्ञानंचविनाविचारंनसं भवतीतिविचाराक्षेपादित्यर्थः ॥ **विशेषतइति** ॥ कीदृशार्थावबोधःसंपाद्यइतिसंदिह्यमानैरित्यर्थः । शिष्यमनस्समाधानायाधिकरण रचनाप्रकारमाह ॥ **संदेहेति** ॥ संदेहस्ययद्बीजंकारणंतदेवपूर्वंयस्यतस्येत्यर्थः । शास्त्रादिसंगतिफलादिःपूर्वशब्दार्थः । आदिपदाद्भाष्ये ।

चतुरधिकरण्याबद्धक्रमत्वात्तदनंतरमेवसमन्वयेआकांक्षोदयात्तदाकांक्षोत्थापकतयासमन्वयाध्यायस्य तदादिनामपादस्यचादौनिवेशोयुक्तइत्यर्थः ॥ नाधिकरणं[413]श्रुतिसंगतीइति ॥ पूर्वाधिकरणतद्विषयवाक्याभ्यांसंगतीनेत्यर्थः । एतेनाध्ययनविधिनासामान्यतःप्रयोजनवदर्थावबोधपरतांनीतैर्विशेषतश्चसंदिह्यमानैर्वेदांतैर्विचाराकांक्षैराक्षेपादस्याधिकरणस्यश्रुतिसंगतिरितिकल्पतरूक्तंनिरस्तं । श्रुतिमूलत्वातिरिक्तायाःश्रुतिसंगतेरनुक्तत्वादिति । संदेहबीजपूर्वस्यटीकादावेवकीर्तनात् । अस्माभिःपूर्वपक्षश्चसिद्धांतश्चविविच्यते ।

गु० गत्यभावस्यैवोक्तत्वेनतत्रास्याप्रतिपक्षत्वादितिभावः । अधिकरणांगतयापूर्वपक्षसिद्धांतयोरिवावश्यंविवेचनीयस्यविषयादेरविवेचनेनप्रसक्तांन्यूनत्वशंकांतन्निमित्तोक्त्यापरिहरन्नेवपूर्वपक्षादिविवेचनंप्रतिजानीते ॥ **संदेहेति** ॥ पूर्वशब्देनविषयादिपरिग्रहः । विषयादेरित्यनुक्त्वासंदेहबीजपूर्वस्येतिवचनंविषयादिपंचकांतर्गतं संदेहबीजमेवनप्रयोजनं । तस्याधिकरणफलत्वेनतदवयवत्वाभावादितिज्ञापनार्थं । यत्तुन्यायामृतेअखंडार्थत्वभंगेपरमतेविषयादिपंचकाभावादितिप्रतिज्ञातविष

SGDF Sri Gargeshwari Digital Foundation

प्र० ननुव्याख्यार्थप्रवृत्तस्यकिमनेनेत्यतआह ॥ उपन्यासेति ॥ तत्रहेतुमाह ॥ पूर्वपक्षेति ॥ अत्रेति ॥ एतदधिकरणइत्यर्थः । शास्त्रमित्यंतं
विषयः । अत्रसर्वत्रपूर्वोक्ता पूर्वपक्षकोटिः । पश्चात्तनी सिद्धांतकोटिरित्यवसेयं । यद्यपिटीकायां जिज्ञासा विषयइत्येवोक्तं नतुशास्त्रमिति
तथापिसुधायांकिमिदमारंभणीयंनवेतिशास्त्रंविषयतयास्वीकृत्य तादर्थ्येनजिज्ञासाकर्तव्यानवेत्युक्तत्वाट्टीकायामपिप्रारिप्सिततयाचित्तसंगत
शास्त्रेप्रवर्तनीयेत्यनेनप्रथमतःशास्त्रएवकर्तव्यत्वादिकोटिकसंदेहस्यसूचितत्वात् पूर्वपक्षोपसंहारेचातोनब्रह्मजिज्ञासाकर्तव्येतिनैतच्छास्त्रमारंभ
णीयमितिजिज्ञासायाअकर्तव्यत्वस्यशास्त्रानारंभहेतुत्वोक्त्याशास्त्रानारंभोपसंहाराच्चैवमुक्तं । जिज्ञासायाःसाक्षाद्विषयत्वोक्तिस्तुटीकायां सूत्रेत

उपन्यासमुखेनैवटीकार्थोपिनिरूप्यते । पूर्वपक्षादिमेयानामविक्षिप्तत्वसिद्धये ॥ अत्र
वेदार्थनिर्णायकन्यायग्रथनात्मकमिदंशास्त्रमनारंभणीयमुतारंभणीयमितिचिंता ।

गु० याद्यभावोपपादनावसरे अत्रापिचसमन्वयाधिकरणेपरमतनिरासावसरेप्रयोजनाभावप्रतिपादनं तत्तुप्रयोजनस्यविषयादिपंचकांतर्भावइत्येकदेशिमतमाश्रित्यकृतं ।
अतएवतंत्रचूडामण्यादिषु उक्तरूपमेकदेशिमतं प्रयोजनस्याधिकरणफलतयातदंगत्वाभावादितियुक्त्याप्रदूष्य संदेहबीजंपंचकांतर्गतमितिमुख्यंमतमुपन्यस्तमितिद्रष्ट
व्यं । टीकादावित्यादिपदेनभाष्यपरिग्रहः । उपन्यासमुखेनैवटीकार्थस्यकथनेहेतुमाह ॥ **पूर्वपक्षेति** ॥ एवंटीकोक्ता संगतिःसमर्थिता । अधुनानैतच्छास्त्रमारं
भणीयमितिपूर्वपक्षोपसंहारटीकासूचितां सुधायांकिमिदंशास्त्रमारंभणीयंनवेतिकंठोक्तांमूलचिंतामाह ॥ **अत्राधिकरणे वेदार्थनिर्णायकेत्यादि** ॥ वेदत्वोपहितः
सर्वोपीहविचार्यः । नतुपरमतइवोपनिषद्भागएवेतिभावेनवेदार्थेत्युक्तं । यद्यप्ययंसंशयोनपरस्यभवितुंयुक्तः परेणशास्त्रस्याद्याप्यनुपलब्धेः । अनुपलब्धेचधर्मिणिसंशया
नुदयात् । नापिसूत्रकर्तुः । तस्यविशेषनिर्णयात् । अन्यथानिर्णायकसूत्रप्रणयनानुपपत्तेः । तथापिशास्त्रनिष्पत्त्यनंतरंयदीदंशास्त्रंपरेणोपलभ्येततदाविशेषस्मृतिम

प्र० स्याएवप्राधान्येनोपादानात् । सूत्रेचश्रुत्यनुसारात्सैवोपात्ता । भाष्येचतस्याएवकर्तव्यत्वसमर्थनाच्चेति । इदं प्रारिप्सिततयाचित्तसंगतं । वे
दार्थेत्यादितुवक्ष्यमाणनिर्विषयत्वरूपहेतुविशदीकरणायेतिध्येयं । पूर्वपक्षादिप्रमेयस्यनिष्कृष्टतयाहृद्यारोहायतदर्थचिंताआह ॥ **तदर्थमिति** ॥
यद्यप्ययंसंदेहोनग्रंथकर्तुः । सर्वज्ञत्वात्तस्य । नापिपरस्य । शास्त्रस्यैवानाकलनात् । तथापिशास्त्रनिर्वृत्त्यनंतरंतद्दृष्ट्वापरःसंदिहीतेतितदी
यसंदेहप्रदर्शनमेतदितिसुधायामेवोक्तं । विचारविधेः तद्विजिज्ञासस्वेत्यादिविधेरित्यर्थः । विषयादीत्यादिपदेनफलाधिकारसंबंधाग्राह्याः ॥
विषयभूतंब्रह्मेति ॥ विचारविधौब्रह्मपदश्रवणान्निर्धारणोक्तिः । पूर्वपूर्वकोटिद्वयंप्रत्युत्तरोत्तरकोटिद्वयस्यहेतुत्वमाह ॥ **यदीति** ॥ ननुत
दर्थविषयभूतंब्रह्मेत्यत्र तदर्थंप्रयोजनभूतोमोक्षश्चकिंकर्मसाध्यउतज्ञानसाध्यः । यदिकर्मसाध्यस्तदाज्ञानहेतुविचारोनकर्तव्यः । यदिज्ञानसा
ध्यस्तदाविचारःकर्तव्यइति सापिकुतोनोपदर्शितेतिचेत् विषयचिंतोक्त्यैवसोक्तप्रायेतिवास्पष्टत्वाद्वा विद्यैवत्वित्यादावग्रेतद्विचारस्यसेत्स्यमानत्वा

तदर्थंन्यायानुसंधानरूपविचारोनकर्तव्यउतकर्तव्यइति । तदर्थंविचारविधेर्विषयादिकंनसंभवत्युतसंभव
तीति । तदर्थंविषयभूतंब्रह्मकिंप्रत्यगर्थभूतजीवएवउततदन्यदिति । यदिब्रह्मप्रत्यगर्थएवतदातस्यनि
श्चितत्वेनविषयाद्यसंभवाच्छास्त्रमनारंभणीयमितिपूर्वपक्षेफलफलिभावः । यदितुब्रह्मप्रत्यगर्थादन्यत्तदा
प्रत्यगर्थस्यजीवस्यनिश्चितत्वेपिब्रह्मणोविषयत्वसंभवाच्छास्त्रमारंभणीयमितिसिद्धांतेफलफलिभावः ।

गु० ताएवंसंदिह्येतेतिसूत्रकर्तुरेवस्वस्मिन्परकीयसंशयाहरणोपपत्तेरित्यन्यत्रविस्तरः । उपक्रमेटीकोक्तातुतदर्थचिंतेत्याह ॥ **तदर्थमिति** ॥ संदेहटीकास्थोजिज्ञासा
शब्दोभामतीमतइवनेच्छापरः । किंतुविचारपरइतिदर्शयितुंविचारपदं । विचारोपिविवरणमतइवनश्रवणंकिंतुमननमित्याशयेनोक्तं ॥ **न्यायानुसंधानरूपेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वा सानोक्ता । यद्वा यथाकर्मसाध्यत्वेविचारोऽव्यर्थ:तथाज्ञानसाध्यत्वेपि वक्ष्यमाणरीत्याज्ञानेसत्यपितदभावात्सानोक्तेति । वस्तुतस्तुब्रह्मपद
व्यावर्त्यपूर्वपक्षेऽत:पदव्यावृत्त्यौपयिकत्वात्सानवाच्यैवेति । पूर्वपूर्वस्योत्तरोत्तरफलत्वंव्यंजयन्पूर्वपक्षटीकांविवरितुमाह ॥ **पूर्वपक्षस्त्विति** ॥
निर्विषयत्वादीति ॥ विषयप्रयोजनाधिकारिसंबंधशून्यत्वरूपेभ्यष्टीकोक्तेभ्यश्चतुर्भ्योहेतुभ्यइत्यर्थ: । तत्राद्यहेतुमुपपादयितुंविषयभूतंब्रह्म
जीवाद्भिन्नमभिन्नंवेतिविकल्पौहृदिकृत्वाद्यंनिरस्यति ॥ **तत्रेति** ॥ मानाभावमुपपादयितुंप्रत्यक्षानुमानयोस्तत्राप्रवृत्ते:प्रवर्तमानोवेदश्चकर्म

**एवमुत्तरत्रापिफलफलिभावऊह्यः । यत्रत्वस्पष्टस्तत्रवक्ष्यते । पूर्वपक्षस्तु । नशास्त्रमारंभ
णीयं । न्यायानुसंधानात्मकविचाररूपजिज्ञासायाएवाकर्तव्यत्वात् । तदकर्तव्यत्वंचनि
र्विषयत्वादिहेतुभ्यः । तत्रतावद्विषयत्वेनाभिमतंब्रह्मनजीवचैतन्याद्भिन्नं मानाभावात् ।**

गु० टीकायांपूर्वंनिर्दिष्टत्वात्कर्तव्यत्वंपूर्वपक्षइतिमंदाशंकांनिरस्यति ॥ **नकर्तव्यउतकर्तव्यइति** ॥ पूर्वपक्षस्त्वित्यनेननकर्तव्येतिपूर्व:पक्षइतिवाक्यं पूर्वपक्षस्तुनक
र्तव्येतीतियोजितंभवति । टीकोक्तमधिकार्यादिचतुष्टयशून्यत्वंनसमुदितंहेतुः एकैकस्याव्यभिचारात् । किंतुप्रत्येकमित्याह ॥ **हेतुभ्यइति** ॥ अधिकारिणः
प्राधान्येपिनिरधिकारिकत्वादेर्निर्विषयत्वाधीनत्वस्यवक्ष्यमाणत्वात्पूर्वपक्षन्यायविवरणोक्तत्वाच्चनिर्विषयत्वादीत्युक्तं । सूत्रेप्रथममथशब्देनाधिकारस्यसूचनाट्टी
कायामधिकार्यादीत्यधिकारिणःप्रथमंग्रहणमितिगुरवः । नतावद्ब्रह्मविषयइतिटीकायांब्रह्मात्रह्मणोर्मध्येब्रह्मतावन्नविषयइत्यर्थोभाति नचासावुपपद्यते उत्तरत्रअब्र
ह्मणोविषयत्वानिरासादित्यतआह ॥ **तत्रतावदिति** ॥ तत्र विषयप्रयोजनयोर्मध्ये त्रिषयस्तावन्नयुक्तइत्येवटीकार्थः । ब्रह्मशब्दस्तुब्रह्मणएवविषयत्वेनाभि
मतत्वादितिभावः । जीवव्यतिरिक्तेश्वराभावादितिन्यायविवरणोक्तहेतुसाधनाय टीकोक्तःप्रमाणाभावोसिद्धः प्रत्यक्षानुमानयोस्तत्राप्रवृत्तावपिमीमांस्यस्यवेदस्यैवप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० कांडोब्रह्मकाडइतिद्विविधइतिहृदिनिधायाद्यंनिराह ॥ **कर्मकांडस्येति** ॥ द्वितीयेत्वाह ॥ **वेदांतैरिति** ॥ अद्वैतिरीत्येति प्रतिपादनाक्लेशा योक्तं । अनेन“प्रमाणाभावेने”त्यादिटीकाविवृता । यद्यप्यत्रकृत्स्नस्यापिवेदस्यकार्यपरत्वान्नजीवातिरिक्तब्रह्मणिमानमित्यपिवक्तुंशक्यं । सुधायांतथैवोक्तेः । तथापिसौत्रब्रह्मपदेनजीवभेदकपरेणव्यावर्त्यपूर्वपक्षस्यावश्यकतयैवमुक्तं । सुधायांतथाप्रवृत्तेर्गतिर्वक्ष्यते । ननूपक्रमादिभिर्वेदांतानामखंडप्रत्यगात्मपरत्वसमर्थनपरस्यकस्यचिच्छास्त्रस्यानंगीकारेतत्सिद्धिरेवनस्यात् । तदंगीकारेतुतादृशंशास्त्रमंगीकृत्यविषयाभावेनपुनस्तस्यानारंभणीयत्वेनपूर्वपक्षोव्याहतइतिचेत् मैवं तादृशशास्त्रानंगीकारेपिवेदांतानामुपक्रमादिभिर्वस्तुतआपाततोजातांजीवचैतन्यमात्रपरत्व

कर्मकांडस्यकर्मपरत्वात् । वेदांतैश्चोपक्रमादिभिरद्वैतिरीत्याऽखंडप्रत्यगात्ममात्रप्रत्यायनात् । तस्यचाहमितिस्वप्रकाशतयाभासमानत्वात् ।

गु० माणत्वसंभवादित्यतःवेदोपिकिंकर्मकांडरूपोवातत्रप्रमाणमुतब्रह्मकांडरूपोवेतिविकल्पंमनसिनिधायक्रमेणदूषयति ॥ **कर्मकांडस्येत्यादिना** ॥ कथंभूयसांवाक्यानांनिर्विशेषैकात्मबोधकत्वंसंगच्छतइत्यतउक्तं ॥ **अद्वैतिरीत्येति** ॥ युक्त्यसहमपिपरैःसिद्धांतितत्वादस्माभिःपूर्वपक्षितं । नहिपरेषांसिद्धांतोस्मत्पूर्वपक्षत्वमपिनार्हतीत्यर्थः । जीवस्यचेतिटीकायांजीवशब्दोनतद्वाच्यविशिष्टपरः तस्यास्वप्रकाशत्वात् किंतुतल्लक्ष्यचिन्मात्रपरइतिदर्शयितुंप्रकृतात्ममात्रपरामर्शकस्तस्येति तच्छब्दः । टीकायामसंदिग्धत्वादितिहेतुर्ब्रह्मजीवाभिन्नमितिद्वितीयपक्षसिद्धवत्करणेनैवोक्तः विपर्यस्तत्वादिविरोधिभासमानत्वस्योपलक्षकश्चेतिदर्शयितुंद्वितीयपक्षदूषणपराजीवस्येतियाटीकातद्व्याख्यानरूपेतस्यचेतिवाक्यएवभासमानत्वादित्युक्तं । ननुटीकोक्तंशुद्धचितःप्रकाशमानत्वमयुक्तं । तस्याःस्वप्रकाशत्वेप्यविद्यावृतत्वादित्यतआह ॥ **अहमितिभासमानत्वादिति** ॥ अहमर्थस्यचिदचित्संवलनात्मकत्वात्तद्भानेचिदपिभाति । अन्यथातदधीनमचितोपिभानंनस्यादिति

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रतीतिमुपेत्यपूर्वपक्षसंभवेनव्याघाताप्रसक्तेः । जीवस्यचेत्यादेरर्थस्तस्यचेति । प्रत्यगात्मनइत्यर्थः । तथाचासंदिग्धत्वान्नशास्त्रवेद्यतेति भावः । एतेनाभिन्नमितिद्वितीयोनिरस्तः। ननुतस्यभानेपिततोन्यदेवजडंवेद्यंस्यादित्यतआह ॥ अन्यस्यचेति ॥ अन्यथाशास्त्रस्यातत्त्वावेदक त्वेनाप्रामाण्यंस्यादितिभावः । यत्त्वहमित्यात्मनिभासमानेपिवेदांतवेद्यंशुद्धंनभातीतिमूर्खप्रलपनं तन्न । अहंप्रत्ययेशुद्धोनभातीतिकोर्थइत्यादि नाभामतीमतनिरासप्रस्तावएवास्यनिरासात् । यदपिस्वप्रकाशस्याप्यविद्यावशान्नभानमिति यच्चस्वप्रकाशत्वात्स्फुरतीत्यादिचोद्यं तदपितत्रो क्तरीत्यैवनिरसनीयं । अतएवास्यपूर्वप्रपंचः । एतेनाक्षस्यबलवत्त्वात्तद्बाधितावेदांता नाखंडचैतन्यंवेदयितुमलमितिनिरस्तं । अद्वैतिरीत्येत्यु क्तत्वात्तन्मतेतस्यदुर्बलत्वात् । यत्तुसिद्धांतिमतेब्रह्मतर्कस्यमीमांसांगत्वात्तत्रचाक्षप्राबल्यंसिद्धमितिमूर्खप्रलपनंतदप्यनेनैवनिरस्तं । अद्वैति मतेतदभावात्तदाच्छादनेनापिपूर्वपक्षसंभवाच्च । अतएवतत्सिद्धप्रामाण्याच्छादनेनपूर्वपक्षोग्रेस्फुटः । अत्र यद्यहंधीविरुद्धंशुद्धप्रत्यगात्मानंबो धयेयुर्वेदांतास्तर्हिबाधितार्थानविचार्याइत्यपिपूर्वपक्षयितुंशक्यं । अतएवसुधायां“नन्वहंकर्ताभोक्तादोषसंसर्गीचाहंप्रत्ययेप्रकाशते तद्विपरीतस्तु श्रुतिप्रतिपादितःप्रतिपत्तव्योतोजिज्ञासेतिचेदेवंतर्हि जरद्गवादिवाक्यवत्पावकशैत्यानुमानवच्चप्रतीतिविरोधेनश्रुतिजिज्ञासयोराभासतापात”इ त्युक्तं । तथाचबाधितार्थत्वेननिर्विषयत्वंसूपपादं । शुद्धोनभातीतिकोर्थइत्याद्यनुसंधानेनासंदिग्धत्वोपपादनक्लेशोपिनास्ति । अक्षप्राबल्यंचा

अन्यस्यचसत्यस्याभावात् ।

गु० भावः । एतेनअहमिऽत्युत्तरटीका त्रापिहेतुत्वेनयोजितेतिज्ञातव्यं । ननुस्वरूपेणप्रतीयमानोप्यात्माअद्वितीयत्वादिनासंदिग्धोस्तीत्यतआह ॥ **अन्यस्यचस त्यस्याभावादिति** ॥ अनेनटीकास्थसत्यरूपवस्तुवाचिनोर्थशब्दस्यतात्पर्यमुक्तमितिज्ञेयं । स्वप्रकाशत्वाभावोपिद्वेधा । प्रकाशस्यैवाभावेनपरप्रकाश्यत्वेनवा ।

प्र० नुकूलितंभवति। तथाप्यद्वैतिरीत्याप्रवृत्तन्यायविवरणानुसारिटीकानुसारेणैवमुक्तं । सुधायास्तुकथमपिनविचारआरंभणीयइत्यभिप्रायः । “नचात्मनःस्वप्रकाशत्वेविवदितव्य”मित्यादिटीकांविवृणोति ॥ **आत्मनश्चेति** ॥ **तार्किकेति** ॥ अनेन“नचायंमानस”इत्यादिस्तार्किकम तनिरासपरइत्युक्तंभवति । प्राभाकरेत्येतत् नचस्वप्रकाशसंविदाश्रयतयेत्यस्यविवरणं । तस्यापीत्यादेरर्थस्तस्यापीति। ज्ञानांतरान्वेषणेनेति शेषः । कस्यचिदित्यादेर्युक्तिंवदन्नर्थमाह ॥ **कस्यचिदिति** ॥ जिज्ञासायामेवेतिशंकाग्रंथंविवृणोति ॥ **नचेति** ॥ **नसर्वत्रेति** ॥ धर्मिज्ञा

आत्मनश्चास्वप्रकाशत्वेतत्प्रकाशःकिंतार्किकरीत्यामानसानुभवेनकिंवाप्रा
भाकररीत्यास्वप्रकाशसंविदाश्रयतया । नाद्यः । तस्यापिपरप्रकाश्यत्वे
नानवस्थानात् । कस्यचिदनुभवस्यस्वप्रकाशत्वेचलाघवादात्मनएवतद
स्तु। नचज्ञानंजिज्ञासितग्राह्यं । जिज्ञासाचनसर्वत्रेतिनानवस्थेतिवाच्यं ।

गु० तत्राद्योऽहमित्यनुभवादितिटीकानुवादरूपेणतत्प्रकाशस्यसिद्धवत्करणेननिरस्तः । द्वितीयदूषणपरांनचायंमानसइत्यादिटीकांविकल्पमुखेनव्याख्याति ॥ **किंता र्किकरीत्येत्यादिना** ॥ टीकोक्तंज्ञायमानत्वंपरप्रकाश्यत्वमेव । अन्यथाऽनवस्थायोगादित्याह ॥ **परप्रकाश्यत्वेनेति** ॥ अस्तुआत्मनएवतदितिटीकायांहे त्वनुक्तिमाशंक्य एवेत्यनेनज्ञानांतरं तस्मिन्स्वप्रकाशत्वंचेतिकल्पनात्क्लृप्तेआत्मनिस्वप्रकाशत्वमात्रकल्पनंलघ्विति हेतुःसूचितइत्याह ॥ **लाघवादिति** ॥ जिज्ञा सायामेवेतिटीकोक्ताशंकानयुक्ता । जिज्ञासायाअपिसार्वत्रिकत्वेऽनवस्थातादवस्थ्यादित्याशंक्य एवेत्यनेनतस्याअसार्वत्रिकत्वंसूचितमित्याह ॥ **जिज्ञासाचनस**

SGDF
Sri Gargeshwari Digital Foundation

प्र० नाद्यभावादिनेतिभावः। अनुभवविरोधादितिहेतुवाक्यंविवृणोति ॥ **ज्ञानस्येति** ॥ घटज्ञानानंतरंघटज्ञानंज्ञास्यामीतीच्छायाअभावेपिघट महंजानामीत्यनुभवादित्यर्थः । अनुभवेविवदमानंप्रतिबाधकमाह ॥ **अन्यथेति** ॥ जिज्ञासितग्राह्यत्वइत्यर्थः । जिज्ञासाहिज्ञानेच्छा साय द्विषयिणीतज्ज्ञानसाध्या । धर्मिज्ञानसाध्यत्वात्तस्याः । धर्मिचेहज्ञानमेव । तथाचधर्मिभूतज्ञानस्यज्ञानेसतिजिज्ञासा तच्चज्ञानंजिज्ञासापूर्वं साचज्ञानपूर्वेतिपूर्वपूर्वजिज्ञासाज्ञानव्यक्तिपरंपरयात्वदभिमतजिज्ञासितग्राह्यत्वमपिनस्यादितिमूलक्षतेरनवस्थेत्यर्थः । ज्ञानसाध्यत्वानुभवादि त्युक्त्याऽनवस्थानिरासायज्ञानपूर्वकत्वानंगीकारेनुभवविरोधादित्यपिटीकागतहेतुवाक्यार्थउक्तोभवति । अर्थांतरमपिवक्तुमुक्तदोषपरिहारायशं कामुट्टंकयति ॥ **नचेति** ॥ **नज्ञानधर्मिकेति** ॥ तथाचनज्ञानजिज्ञासाव्यक्तिपरंपरयानवस्थेतिभावः । आत्मादिधर्मिकजिज्ञासायाश्चात्मा

ज्ञानस्यसुखदुःखादिवज्जिज्ञासाभावेप्यनुभवात् । अन्यथाजिज्ञासायाःज्ञानाख्यधर्मिज्ञानसाध्यत्वानुभवा दनवस्थास्यात् । नच जिज्ञासानज्ञानधर्मिका किंतु अहंज्ञानीनवाघटोज्ञातोनवेत्यात्मादिधर्मिकैवेतिवाच्यं ।

गु० **वेत्रेति** ॥ **ज्ञानस्यसुखदुःखादिवदित्यादि** ॥ अत्रजिज्ञासाभावेप्यनुभवादित्यनेन अनुभवविरोधादिति टीका जिज्ञासाभावेपिज्ञानानुभवविरोधादिति धर्मि ज्ञानसाध्यत्वानुभवादित्यनेन जिज्ञासायाधर्मिज्ञानसाध्यत्वानुभवविरोधादिति तादृशजिज्ञासायाअननुभवादित्यनेन अहंज्ञानीनवेत्यादिजिज्ञासाभावानुभवविरो धादितिंत्रेधाव्याख्याताभवति । अनवस्थास्यादित्यनेनत्वनुभवांतरान्वेषणेनवस्थानादितिपूर्वटीकातोनवस्थानादित्यस्यानुभवविरोधादित्यत्रानुषंगोदर्शितइतिज्ञा तव्यं ॥ **अन्यथेति** ॥ ज्ञानस्यजिज्ञासितग्राह्यत्वेज्ञानरूपधर्मिणोज्ञानेनज्ञानविषयकजिज्ञासा तस्यांचसत्यांधर्मिभूतज्ञानस्यज्ञानं अत्रव्यक्तिद्वयांगीकारेअन्योन्या श्रयः । त्रयांगीकृतौचक्रकं । परंपरांगीकारेअनवस्थेतिद्रष्टव्यं ॥ **नचजिज्ञासानज्ञानधर्मिकेति** ॥ यद्यप्यत्रापिविशेषणीभूतज्ञानस्यज्ञानमावश्यकं । विशिष्ट

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिज्ञानपूर्वकत्वेप्यात्मादिज्ञानस्यजिज्ञासापूर्वकत्वाभावान्नानवस्था । ज्ञानवत्तस्यजिज्ञासितग्राह्यत्वाभावादितिभावः । अत्रयद्यपिअहंज्ञानीतिजिज्ञासे घटोज्ञातइतिजिज्ञासे इत्येवात्मादिधर्मिकजिज्ञासाभिनयोयुक्तः । नतुसंशयाभिनयः । तथापियद्धर्मिकःसंशयस्तद्धर्मिकैवजिज्ञासायुक्तेतियुक्तिंसूचयितुंसंशयप्रदर्शनमित्यदोषः । नवेतीत्यनंतरंसंशयवज्जि(याज्जि)ज्ञासापिआत्मादिधर्मिकैवेतियोज्यं ॥ **अननुभवादिति** ॥ अनेन इत्थंनानुभवः किंत्वन्यथैवेत्येवमुक्तावनुभवविरोधइतिटीकार्थउक्तोभवति । नहीतिवाक्यस्यप्रकृतोपयोगादर्शनाच्छंकापूर्वंतद्वाक्यंविवृणोति ॥ **नन्विति** ॥ नचस्वप्रकाशेत्यादिविवृणोति ॥ **नद्वितीयइति** ॥ औत्तरिकेत्यादिविवृणोति ॥ **सुषुप्ताविति** ॥ **ज्ञानाभावादिति** ॥

ताद्दशजिज्ञासायाअननुभवात् । ननुनज्ञानमात्रमजिज्ञासितग्राह्यं येनानवस्था नापिजिज्ञासितग्राह्यं येनानुभवविरोधः । किंतुकिंचिज्ज्ञानंकदापिनज्ञायतएवेतिनकोपिदोषइतिचेन्न । कदाप्यज्ञायमानज्ञानस्यासत्त्वापातात् । न द्वितीयः । सुषुप्तावात्मातिरिक्तज्ञानाभावादात्मानुभवाभावेनैतावंतंकालंसुखंसुप्तोस्मीत्यौत्तरिकानुस्मृत्यनुपपत्तेः ।

गु० ज्ञानेविशेषणज्ञानहेतुतायाअन्वयव्यतिरेकाभ्यांप्राप्तत्वात् । तच्चज्ञानस्यजिज्ञासितग्राह्यत्वाज्जिज्ञासायामेवसंभवति । जिज्ञासाचतद्विषयकज्ञानसाध्येत्यन्योन्याश्रयादिस्यादेव । तथापिधर्मिज्ञानपरंपराप्रयुक्तानवस्थापरिहाराभिप्रायेणेयंशंकेतिध्येयं । वस्तुतोविशिष्टज्ञानेविशेषणज्ञानकारणतायाअन्यत्रनिरस्तत्वान्नतत्परंपरयाप्यनवस्थेतिबोध्यं । नह्यज्ञायमानेतिटीकानुपपन्ना जिज्ञासिताजिज्ञासितग्राह्यत्वपक्षयोरनवस्थानुभवविरोधाभ्यांदूषितत्वात्पक्षांतरस्याभावेनशंकानुदयादित्यतआह ॥ **ननुनज्ञानमात्रमित्यादि** ॥ नकिंचिन्मानमितिटीकोक्तःपरिहारोनयुक्तः कदाप्यज्ञायमानज्ञानस्यपरंप्रतीष्टत्वादित्यतआह ॥ **असत्त्वापातादिति** ॥ औत्तरिकानुस्मृतीत्यादिटीकायांप्रकृतोपयोगित्वात्सुषुप्तावात्मानुभवाभावप्रसंगादितिवक्तव्येसौषुप्तिकानुभवाभावप्रसंगादितिसामान्योक्तिःकिमर्थेत्याशंक्यकालाद्यनु

SGDF
Sri Gargeshwari Digital Foundation

प्र० मनसउपरतत्वादितिभावः । संविदात्मकत्वाच्चेतिवाक्यंयुक्तिंसूचयन्विवृणोति ॥ **किंचेति** ॥ **अन्यथानुपपत्त्येति** ॥ आत्मातिरिक्तज्ञाना भावादितिभावः । यथाटीकंवर्णयित्वासुधावाक्याभिप्रायंवक्तुंकल्पांतरमाह ॥ **अस्तुवेति** ॥ तर्हिटीकाविरोधइत्यतआह ॥ **टीकायांत्विति**॥ "जीवव्यतिरिक्तेश्वराभावात्तस्यस्वप्रकाशत्वान्नजिज्ञास्यते"तिन्यायविवरणानुसारेणेत्यर्थः । वस्तुस्थितीति न्यायविवरणेपितथोक्तेरभिप्रा योक्तिः । अस्तुवेत्यस्यमूलमाह ॥ **अतएवेति** ॥ अनेनपूर्वोत्तरप्रस्थानाविरोधउक्तोभवति । प्रकारांतरेणविचारकर्तव्यत्वमाशंक्यनिरस्यति

किंचात्मनऔत्तरिकानुस्मृत्यन्यथानुपपत्त्यासंविद्रूपत्वान्नसंविदाश्रयत्वं । अस्तुवातार्किकादिरीत्याऽहमर्थप्रका शः तथापिप्रत्यगात्मनोसंदिग्धत्वादविषयता । टीकायांतुन्यायविवरणानुसारेणवस्तुस्थितिप्रदर्शनायस्वप्रकाश तोक्ता । अतएवसुधायांस्वप्रकाशतयावास्वप्रकाशज्ञानाश्रयतयावामानसप्रत्यक्षवेद्यतयावासिद्धत्वेनेत्युक्तं ।

गु० भवाभावरूपानिर्थांतरापादनार्थमित्याह ॥ **एतावंतंकालमित्यादिना** ॥ संविदात्मकत्वाच्चेतिटीकोक्तहेतुसाधकत्वेनाप्यौत्तरिकानुस्मृतीत्यादिटीकांयोजयति ॥ **किंचात्मनइत्यादि** ॥ नन्वत्रटीकायांपूर्वपक्षेपरप्रकाश्यत्वनिषेधात्सुधायांतुतदंगीकारात् टीकाद्वयस्यपरस्परंविरोधइत्याशंक्य अत्रवस्तुस्थितिप्रदर्शनपरन्याय विवरणानुसारेणात्यंतासंदिग्धत्वोपपादकत्वात्स्वप्रकाशतोक्ता । सुधायांतुयत्किंचित्प्रकाशमात्रेणपूर्वपक्षनिर्वाहात्किंस्वप्रकाशतोपपादनक्लेशेन । न्यायविवरणेस्व प्रकाशपदंतुशास्त्रंविनापिप्रकाशपरं । अतोनविरोधइत्यभिप्रायेणाह ॥ **अस्तुवेति** ॥ प्रकारांतरेणविचारस्यकर्तव्यत्वंपरिहरति ॥ **एतेनेति** ॥ अत्रप्रमाणाश्रयणे नप्रवृत्तत्वाच्छंकायाअधिकत्वमितिज्ञेयं । नहिप्रकाशमानेर्थेइतिटीकाभिप्रेतांयुक्तिमेतच्छब्दार्थतयाऽतिदिशति । ननुजीवस्यासंदिग्धत्वेपिदेहादिविविक्तत्वेनवि

प्र० ॥ **एतेनेति** ॥ एतेन विषयाभावेन । एतच्छब्दार्थंव्यनक्ति ॥ **धर्मवदिति** ॥ ननुजीवस्यासंदिग्धत्वेपिदेहादिविविक्तत्वेनविचार्यतास्या देव । अतएवसुधायां जन्मादिसूत्रेजीवस्यस्वरूपतःप्रसिद्धत्वेपिदेहादिविविक्तत्वेननप्रसिद्धिरित्युक्तमित्याशंकांनिरस्यति ॥ **एतेनैवेति** ॥ अद्वैतिरीत्येत्युक्तत्वेनेत्यर्थः ॥ **उत्तरत्रेति** ॥ "ज्ञोतएवे"त्यादौद्वितीये ॥ **सत्यत्वाभावादिति** ॥ अन्यथाअतत्वावेदकंशास्त्रंस्यादितिभावः । जन्मादिसूत्रेचनाद्वैतिरीत्यापूर्वपक्षइतिसुधाशयइतिभावः । ननुकुतएवं"जीवस्यस्वरूपत"इत्यादिसुधानुसारादत्रापिजीवविचारोनाक्षेप्यः । किंतुजीवस्यकथंचिद्विचार्यत्वेपिसिद्धांत्यभिमतजीवान्यब्रह्मविचारोनसंभवति । तस्यैवाभावादित्येवात्रपूर्वपक्षोस्तु । अतएवसुधायामाद्यसूत्रे "ईश्वरविषयाजिज्ञासाभविष्यतीतिचेन्न । तस्यैवाभावा"दित्युक्तमित्याशंकामुट्टंक्यनिरस्यति ॥ **केचित्त्विति** ॥ न्यायविवरणेतस्यस्वप्रका

एतेनकर्मकांडस्येवब्रह्मकांडस्याप्यर्थनिर्णयायविचारआवश्यकइतिनिरस्तं । धर्मवद्ब्रह्मकांडार्थस्यात्मनःपरप्रकाश्यत्वा भावात् । एतेनैवजीवचैतन्यस्वरूपस्यासंदिग्धत्वेपिदेहादिभिन्नत्वानंदाद्यात्मकत्वादिनासंदिग्धत्वाद्विषयता । अन्य थासिद्धान्तेप्युत्तरत्रजीवविचारोनयुक्तःस्यादितिनिरस्तं । सिद्धांतइवपूर्वपक्षेजीवचैतन्यातिरिक्तस्यदेहादिभिन्नत्वादेःस त्यत्वाभावात् । केचित्तुजीवस्याकारांतरेणसंदिग्धतयाविचारसंभवेपिसिद्धांत्यभिमतजीवान्यब्रह्मविचाराक्षेपइत्याहुः ।

गु० चार्यतास्यादेव । अतएवसुधायांजन्मादिसूत्रेजीवस्यस्वरूपतःसिद्धत्वेपिदेहादिविविक्ततयानसिद्धिरित्युक्तमित्याशंकांनिरस्यति ॥ **एतेनैवेति** ॥ अन्यथा जीवस्यदेहादिभिन्नत्वानंदाद्यात्मकत्वेनाप्यसंदिग्धत्वे ॥ **उत्तरत्रेति** ॥ ज्ञोतएवेत्यादावित्यर्थः ॥ **सत्यत्वाभावादिति** ॥ तथाचतत्प्रतिपादकस्यातत्वावेदकत्वापा तादितिभावः । स्वोत्प्रेक्षितंपक्षांतरमाशंक्यनिराकरोति ॥ **केचित्त्विति** ॥ जीवस्याकारांतरेणविषयत्वांगीकारेतदविषयत्वोपपादकस्वप्रकाशत्वोपपादकन्याय

SGDF Sri Gargeshwari Digital Foundation

प्र० शत्वान्नजिज्ञास्यतेत्युक्त्याजीवस्यसर्वथाऽविचार्यत्वोक्तेरितिभावः । तथाचन्यायविवरणानुसारिटीकायांनतथावर्णनंयुक्तमिति । न्यायविवरणमपितथैवकथंचिद्योज्यतामित्यतआह ॥ **तावतेति** ॥ जीवान्यब्रह्मविचाराक्षेपमात्रेणेत्यर्थः । अतएवसुधायामादिसूत्रेजीवविचारोपि प्रत्याख्यायीतिभावः । नन्वेवंवेदांतानांसिद्धचैतन्यमात्रपरत्वेप्रागुक्तरीत्याज्ञातज्ञापकत्वेनाप्रामाण्यंस्यात् । नचतद्युक्तं । अपौरुषेयत्वेनादोषत्वात् । अतोतिरिक्तब्रह्मपरत्वमकामेनापिवाच्यमितितद्विषयकत्वेनविचारआरंभणीयइत्याशंक्यवैदिकदृष्टांतेनतदुपपादयति ॥ **सिद्धेति** ॥ **वायुक्षेपिष्ठादिवाक्यवदिति** ॥ "वायुर्वैक्षेपिष्ठादेवतावायुमेवस्वेनभागधेयेनोपधावतिसएवैनंभूतिंगमयती"त्याद्यर्थवादवाक्यस्यक्षिप्रगामी वायुःस्वोचितेनभागेनतोषितोभागप्रदायैश्वर्यंप्रयच्छतीतिमानांतरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वंयथा तद्वदित्यर्थः । अतएवाद्येध्याये

तन्न । न्यायविवरणविरोधात् । तावताशास्त्रानारंभासिद्धेश्च ।
सिद्धचैतन्यमात्रबोधनेश्रुतेरनुवादकत्वेचवायुक्षेपिष्ठादिवाक्यवत्

गु० विवरणविरोधःस्यादित्याह ॥ **न्यायविवरणविरोधादिति** ॥ न्यायविवरणमप्युक्ताभिप्रायेणकथंचिद्योज्यमितिवदंतंप्रतिबाधकांतरमाह ॥ **तावतेति** ॥ सर्वथानिर्विषयत्वस्यैवशास्त्रानारंभप्रयोजकत्वात्त्वत्पक्षेचजीवस्यैवविचार्यत्वसंभवेनसर्वथानिर्विषयत्वाभावेनशास्त्रानारंभासिद्धेरितिभावः । ननुवेदांतानांसिद्धचैतन्यमात्रबोधकत्वेऽनुवादत्वेनवैयर्थ्यंस्यात् । नचतद्युक्तं । अपौरुषेयत्वेनादोषतयानिश्चितप्रामाण्यस्यायोगात् । अतोविशिष्टार्थत्वमवश्यंकल्पनीयं । ततश्चवेदस्यैवजीवव्यतिरिक्तेश्वरसद्भावेप्रमाणत्वेनातिरिक्तब्रह्मविषयत्वसंभवेनविचारस्यारंभणीयत्वभंविष्यतीत्यतआह ॥ **सिद्धेति** ॥ **वायुक्षेपिष्ठादिवाक्यवदिति** ॥ "वायु

SGDF Sri Gargeshwari Digital Foundation

प्र० "आम्नायस्यक्रियार्थत्वा"दितिद्वितीयपादीयाद्याधिकरणेऽर्थवादानांभारतादिवद्भूतान्वाख्यानमात्रपर्यवसितानामक्रियार्थत्वेनाप्रामाण्यमाशंक्यचेतनप्रवर्तनारूपस्यविधेःप्रवृत्तिप्रतिबंधकालस्यादिव्यावर्तनेनप्रवर्तनाशक्त्युत्तंभनायापेक्षितस्यप्राशस्त्यस्यलक्षणयासमर्पणेनविध्येकवाक्यतयाप्रामाण्यमित्युक्तमितिभावः । ननुवायुक्षेपिष्ठादिवाक्यस्यलक्षितेतात्पर्यविषयीभूतेप्राशस्त्येर्थे नमानांतरावगतिरितिनतत्परत्वेनुवादकत्वं । वेदांतानांतात्पर्यविषयस्यशुद्धस्यस्वप्रकाशतयासिद्धत्वेनतत्परत्वेनुवादकत्वमेवेतिदृष्टांतोविषमइतिचेन्न । वायुक्षेपिष्ठत्वांशस्यैवदृष्टांतत्वेनाभिमतत्वात् । अतएवारुच्याविद्वदित्युदाहरणांतरं । अतएव "अग्नयेपवमानायाष्टाकपालंनिर्वपे"दित्यत्राग्नेःपवमानत्वरूपगुणवदत्रवायोःक्षेपिष्ठत्वरूपगुणविधानंकिंनस्यादित्याशंकाव्यावर्तनायविध्युद्देशबहिर्भावप्रदर्शनरूपन्यायस्यतद्बहिर्भावेपि "एतमेवसंतंवायवेनियुत्वतआलभेते"ति

गु० वैक्षेपिष्ठादेवतावायुमेवस्वेनभागधेयेनोपधावति सएवैनंभूतिंगमयति" इत्याद्यर्थवादवाक्यस्य क्षिप्रगामीवायुःस्वोचितेनभागेनतोषितोभागप्रदायऐश्वर्यंप्रयच्छतीतिमानांतरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वंयथा तद्वदित्यर्थः । अतएवप्रमाणलक्षणे अर्थवादचरणे "आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानांतस्मादनित्यमुच्यते" इतिप्रथमाधिकरणे विधिभावनातदंशत्रयातिरिक्तार्थानां वायुर्वैक्षेपिष्ठादेवतेत्येवमादीनामर्थवादपदानां किं "वायव्यंश्वेतमालभेतभूतिकामः" इत्यादिविध्युद्देशे नैकवाक्यतयाधर्मप्रामाण्यमुतनेतिचिंतायां "चोदनालक्षणोर्थोधर्मः । तस्यज्ञानमुपदेशः । तद्भूतानांक्रियार्थेनसमाम्नायः" इत्युपक्रममध्ये परामर्शोपसंहारैःसर्वस्याप्याम्नायस्यक्रियार्थत्वावधारणात् भारतादिवद्भूतान्वाख्यानमात्रपर्यवसितानामर्थवादानां करणेतिकर्तव्यताविशिष्टभावनामात्रविधानचरितार्थेनविध्युद्देशेनसहपरस्परंनैराकांक्ष्यादेकवाक्यत्वासंभवेनाक्रियार्थत्वादप्रामाण्यमितिपूर्वपक्षंप्रापय्य अध्ययनविधिवशात्कृत्स्नस्यवेदस्यप्रयोजनवदर्थपर्यवसानेनार्थवादानांप्रयोजनाकांक्षायाः विधेरपिचेतनप्रवर्तनारूपस्यप्रवृत्तिप्रतिबंधकाऽऽलस्यादिव्यावर्तनेनप्रवर्तनाशक्त्युत्तंभनायप्राशस्त्यापेक्षायाश्चसत्त्वादर्थवादानांलक्षणयाप्राशस्त्यसमर्पणेनविध्येकवाक्यतया

SGDF
Sri Gargeshwari Digital Foundation

प्र० वद्वाक्यांतरेणदेवतागुणविधानंकिंनस्यादित्याशंकापनुत्तयेविधायकाख्याताश्रवणरूपन्यायस्यापेक्षणान्न्यायप्राप्तत्वादित्युक्तं ॥ **विद्वदिति** ॥
"यएवंविद्वान्पौर्णमासींयजतेयएवंविद्वानमावास्यांयजते" इतिवाक्ययोर्विद्वत्पदयुक्तत्वेनविद्वद्वाक्यशब्दितयोर्दर्शपूर्णमासशब्दितप्रकृताग्नेयादि
त्रिकद्वयानुवादकत्वंयथा तथेत्यर्थः । तथाहि । द्वितीयेध्याये "प्रकरणंतुपौर्णमास्यांरूपावचनादितिद्वितीयपादीयतृतीयाधिकरणे । यएवंविद्वा
नितिवाक्यद्वयमुदाहृत्य किंपौर्णमास्यमावास्याशब्दितापूर्वकर्मद्वयविधायकं किंवा "यदाग्नेयोष्टाकपालोमावास्यायांचपौर्णमास्यांचाच्युतोभवति
अग्नीषोमीयमेकादशकपालंपौर्णमासेप्रायच्छत् । उपांशुयाजमंतरायजति । ऐंद्रंदध्यमावास्यायां । ऐंद्रंपयोमावास्याया" मिति प्रकृतस्याग्ने
यादित्रिकद्वयस्यानुवादकमितिसंशये "सर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्य" मितिवाचनिकस्यध्रौवाज्यस्यद्रव्यस्य "वार्त्रघ्नीपौर्णमास्यामनू
च्येते वृधन्वतीअमावास्याया" मितिवाक्याभ्यांपौर्णमास्यमावास्यासंज्ञकयोःकर्मणोर्वार्त्रघ्न्यादिशब्दितानां "अग्निर्वृत्राणिजंघन" दित्यादिमंत्राणां

द्विद्वद्वाक्यवच्चन्यायप्राप्तत्वात्सह्यं ।

गु० प्रामाण्यमितिसिद्धांतितं । यद्यपि वायुर्वैक्षेपिष्ठादेवतेत्यर्थवादवाक्यलक्षिततयातत्तात्पर्यविषयीभूतप्राशस्त्यस्यमानांतरानवगतत्वान्नतेषांतत्रानुवादकत्वं तथापि तद्वा
रभूतस्यवायोःक्षेपिष्ठत्वस्यलौकिकप्रमाणावगततयामुखतोऽनुवादकत्वाभिप्रायेणानुवादकत्वोक्तिः । अतएवविद्वद्वाक्यवदित्युदाहरणांतरं । अतएवच "अग्नयेपवमाना
याष्टाकपालंपुरोडाशंनिर्वपे" दित्यत्राग्नेःपवमानत्वरूपगुणविधिवद्वायोःक्षेपिष्ठत्वरूपस्यगुणस्यविधानंकिंनस्यादित्याशंकानिवर्तनाय विध्युद्देशबहिर्भावप्रदर्शनरूपस्यन्याय
स्यतद्बहिर्भावेपि "एतमेवसंतंवायवेनियुत्वतआलभेत" इतिवद्वाक्यांतरेणदेवतागुणविधानंकिंनस्यादित्याशंकाव्यावर्तनाय विधायकाख्याताश्रवणरूपन्यायस्यचापेक्षणा ॥ ३७ ॥
न्न्यायप्राप्तत्वादित्युक्तं ॥ **विद्वदिति** ॥ "यएवंविद्वान्पौर्णमासींयजतेयएवंविद्वानमावास्यांयजत" इतिवाक्ययोर्विद्वत्पदयुक्तत्वेनविद्वद्वाक्यशब्दितयोर्दर्शपूर्णमासश

प्र० विधानान्मांत्रवर्णिक्यादेवतायाश्चलाभादनुवादत्वेवैयर्थ्यादपूर्वकर्मद्वयविधायकमित्याशंक्य कथंचिद्द्रव्यलाभेपिवार्त्रघ्न्यादिवाक्यद्वयस्याज्य
भागयोर्लिंगक्रमाभ्यांपर्वद्वयेप्यव्यवस्थयाप्राप्तानांमंत्राणांव्यवस्थार्थत्वेनमंत्रवर्णादेवतायाअलाभात् "दर्शपूर्णमासाभ्यांस्वर्गकामोयजेते" तिफल
वाक्यगतयोर्दर्शपूर्णमासपदयोःप्रसिद्धार्थत्वसंपादनेनप्रकृताग्नेयादित्रिकद्वयानुवादकस्यसफलत्वात्समुदायद्वयानुवादइतिसिद्धांतितं । तत्रयथादे
वताभावादिन्यायप्राप्तमनुवादत्वं तथावेदांतानामन्यस्यसत्यस्याभावादित्यादिन्यायप्राप्तमनुवादत्वंसह्यमित्यर्थः । यत्तुवायुक्षेपिष्ठादिवाक्यस्यवि
द्वद्वाक्यस्यचानुवादकत्वेपि विध्यपेक्षितप्राशस्त्यसमर्पणेनाद्यस्य फलवाक्यगतदर्शपूर्णमासपदप्रसिद्धार्थत्वसंपादनेनद्वितीयस्यफलवत्त्वान्नवै
यर्थ्यं । वेदांतानांशुद्धचैतन्यमात्रबोधनेनानुवादकत्वेतुतेननकिंचित्फलमितिवैषम्यकथनं तन्न । वेदांताध्ययनस्यादृष्टार्थत्वेनार्थाप्रतिपादनेफला
भावकथनस्यानुचितत्वात् । अन्यथोत्कर्षसमजात्युत्तरत्वापत्तेः । अतएवतदध्ययनंजपार्थमित्यग्रेस्पष्टं । दृष्टेसत्यदृष्टायोगाद्वायुक्षेपिष्ठादौप्रा
गु० न्द्वाच्यप्रकृताग्नेयादित्रिकद्वयानुवादकत्वंयथातथेत्यर्थः । भेदलक्षणे "प्रकरणंतुपौर्णमास्यांरूपावचना" दितिद्वितीयपादीयचतुर्थाधिकरणे दर्शपौर्णमासप्रकरणस्थं
यएवंविद्वानितिवाक्यद्वयंकिमपूर्वकर्मद्वयविधायकं किंवाप्रकृतस्याग्नेयादित्रिकद्वयस्यानुवादकमितिसंशये अभ्यासाधिकरणन्यायेनविधिपुनश्श्रुत्याऽपूर्वकर्मद्वयविधा
यकं । नचरूपालाभःशंकनीयः । "सर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्य" मितिवचनविहितस्यध्रौवाज्यद्रव्यस्य "वार्त्रघ्नीपौर्णमास्यामनूच्येतेवृधन्वतीअमावा
स्याया" मितिवाक्याभ्यांपौर्णमास्यमावास्यासंज्ञकयोरनयोःकर्मणोर्मंत्रविधानान्मांत्रवर्णिक्यादेवतायाश्चलाभात् । नचमंत्राणांलिंगक्रमाभ्यामाज्यभागयोर्विधाना
न्नात्रविनियोगःसंभवतीतिवाच्यं । वाचनिकविनियोगसंभवेलिंगक्रमाभ्यामाज्यभागयोर्विनियोगासंभवात् । त्रिकद्वयानुवादकत्वपक्षेतुवाक्यद्वयमप्यनर्थकंस्यात् ।
तस्मादपूर्वकर्मद्वयविधायकमितिपूर्वपक्षेप्राप्ते कथंचिद्द्रव्यलाभेपिदेवतायाअलाभान्नास्यापूर्वकर्मद्वयविधायकत्वं । नचमंत्रवर्णात्तल्लाभः । वार्त्रघ्नीइत्यादिवाक्यद्वय
स्य आज्यभागयोर्लिंगक्रमाभ्यांपर्वद्वयेप्यव्यवस्थयाप्राप्तमंत्रव्यवस्थार्थत्वेनलाघवाल्लिंगक्रमयोरबाधेनोपपत्तौतद्बाधायोगात् । नचानुवादवैयर्थ्यं । फलवाक्यगतयो

प्र० शस्त्यादिफलमुक्तमिति । एतेन प्रमाणशिखामणीनांवेदांतानांसिद्धबोधकत्वंसह्यंचेत्तदापौरुषेयस्यास्यशास्त्रस्यसुतरांतत्सह्यमितिनिर्विषयत्वे नानारंभणीयत्वमयुक्तमितिमूर्खप्रलापोनिरस्तः । तत्रैवात्रापिकस्यचिज्ज्ञातार्थज्ञापकस्यपौरुषेयस्यप्रेक्षावदुपादेयस्यादर्शनात् । अतएवश्रुतेरि त्युक्तं । किंचश्रुतेस्तथात्वेपिपौरुषेयस्यनतद्युक्तं । उक्तंचसुधायां "प्रीत्यामोक्षपरत्वाच्चतात्पर्यंनैवदूषणे । तद्विरोधेनमानत्व"मित्यनुव्याख्या व्याख्यावसरे "पुरुषोहिपरप्रयोजनेनप्रयुक्तोवाक्यमुच्चारयंस्तदीयहिताहितप्राप्तिपरिहारानुगुणार्थमेववदेत् । तद्विरुद्धंतुवदन्ननवधेयवचनः स्यात् । अपौरुषेयंतुस्वभावादेवार्थंप्रतिपादयति प्रत्यक्षादिवदेवे"ति । "शक्तिश्चैवान्वितेस्वार्थे"इत्येतद्व्याख्यावसरेचोक्तं"पुरुषदोषोयं यज्ज्ञा तज्ज्ञापनायशब्दोच्चारण"मित्यादि । वस्तुतस्तुन्यायनिबंधनात्मकत्वाच्छास्त्रस्य संदिग्धएवन्यायप्रवृत्तेरसंदिग्धेतत्फलाभावान्नेदमारंभणीयमित्यु क्तौनकोपिदोषः । किंच "आत्माब्रह्मेत्यधीतःस्फुरतिसतुसदे"त्यादिवदतात्वयाप्यक्षागमयोरेकविषयत्वमुपेत्यैवविचारशास्त्रस्यनिर्विषयत्वेनाना रंभस्यपूर्वपक्षितत्वेनस्वव्याहतत्वाच्चेति । नन्वध्ययनविधिनाकृत्स्नस्यवेदस्यार्थज्ञानपर्यंतत्वस्यव्यवस्थापनात् वेदांतेष्वर्थज्ञानस्यान्यतोलाभाद

गु० दर्शपौर्णमासपदयोःप्रसिद्धार्थत्वसंपादनेनसफलत्वात् । तत्संपादनस्यचफलं आग्नेयादीनांषण्णांप्राधान्यंसमिदादीनांचतदंगत्वं । तस्माद्विद्वद्वाक्यंसमुदायानुवाद कमेवेतिसिद्धांतः । अत्रचदेवताभावादिन्यायप्राप्तत्वाद्विद्वद्वाक्यस्ययथानुवादकत्वं तथावेदांतानामन्यस्यसत्यस्याभावादित्याद्युपदर्शितन्यायप्राप्तत्वादनुवादकत्वंस ह्यमित्यर्थः । अत्र मीमांसकमते अर्थवादस्यपदत्वात्तंप्रतिवाक्यस्यानुवादकत्वेनार्थवादवाक्यंदृष्टांतःसंभवतीति वाक्यस्यानुवादकत्वेदृष्टांततयाविद्वद्वाक्यवदिति दृष्टांतांतरमुपन्यस्तमितिगुरवः । नन्वर्थवादविद्वद्वाक्ययोःसफलानुवादकत्वादनुवादकत्वस्यतत्रदूषणत्वासंभवेपि प्रकृतेनिष्फलानुवादकत्वादनुवादकत्वंदूषणमित्यत

SGDF Sri Gargeshwari Digital Foundation

प्र० ध्ययनंव्यर्थमित्यतआह ॥ **वेदांतेति** ॥ दृष्टस्यायोगाज्जपद्वाराऽदृष्टमेवफलमितिभावः । अपौरुषेयतयाप्राप्तप्रामाण्यानांकथमेवंज्ञातज्ञाप कत्वेनाविचार्यत्वमित्यतःपूर्वपक्षप्रमेयंदृष्टांतपूर्वमुपपादयन्नुपसंहरति ॥ **एवंचेति** ॥ विषयाभावेसतीत्यर्थः ॥ **अपौरुषेयत्वेपीति** ॥ तर्क पादांत्याधिकरणन्यायेनेतिभावः । अक्रियार्थत्वेन धर्माधर्माबोधकत्वेन ॥ **भाट्टमतइति** ॥ दर्शितःपूर्वपक्षः ॥ **प्राभाकरमतेचेति** ॥ चोदनाप्रामाण्यनिरूपणस्याध्यायार्थतयासर्वेष्वधिकरणेषुतदप्रामाण्यपर्यंताःपूर्वपक्षाइतिविध्येकवाक्यतामुपेत्य यस्माद्वायुःक्षेपिष्ठादेवतातस्माद्वा यव्यश्वेतालंभःकार्यइतिहेतुसमर्पकतयान्वयाद्धेतुसापेक्षत्वेनचोदनानामप्रामाण्यमित्यर्थः । चोदनानां विधिवाक्यानां ॥ **अनुमानेति** ॥ कार्यत्वाद्यनुमानेत्यर्थः ॥ **ईक्षत्यधिकरणइति** ॥ “सदेवसोम्येदमग्रआसी”दित्यादिवाक्यप्रतीतंजगत्कारणंब्रह्मोतप्रधानमितिसंदेहे बहुस्या

वेदांताध्ययनंजपार्थमस्तु । एवंचयथाऽर्थवादाधिकरणेऽपौरुषेयत्वेप्यर्थवादानामक्रियार्थत्वेनविध्येकवा क्यत्वाभावादानर्थक्यमितिभाट्टमतेपूर्वःपक्षः प्राभाकरमतेचार्थवादानांविध्येकवाक्यत्वेपिहेतुसमर्पकत्वा द्धेतुसापेक्षत्वेनचोदनानामप्रामाण्यमितिपूर्वःपक्षः यथावापरमतेशास्त्रयोनिसूत्रेकारणवाक्यमनुमानप्राप्त कारणानुवादीति ईक्षत्यधिकरणेचसांख्यस्मृतिप्राप्तकारणानुवादीतिपूर्वःपक्षः तथेहापिस्वतःसिद्धप्रत्यगा त्मानुवादकावेदांतानविचार्याइतिपूर्वःपक्षः । यद्वाप्रमाणभूतवेदांतवाक्यगतिर्नपूर्वपक्षिणावाच्या ।

गु० आह ॥ **वेदांताध्ययनंत्विति** ॥ तथाचास्यापिसफलानुवादत्वमितिभावः । नन्वध्ययनस्यजपार्थत्वेनसफलत्वेप्यपौरुषेयत्वेनप्रमाणस्यवेदांतस्यकथमर्थासंस्पर्शइत्या शंक्याऽपौरुषेयत्वेपिनिमित्तांतरादर्थासंस्पर्शेनपूर्वपक्षेदृष्टांतचतुष्टयमाह ॥ **एवंचेत्यादिना** ॥ तत्रप्राभाकरोक्तावाद्यौदृष्टांतावर्थासंस्पर्शमात्रे । अद्वैत्युक्तावंत्यौतुप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० मितिबहुभावश्रवणात्प्रधानमेव । तथाचसांख्यस्मृतिसिद्धजगत्कारणानुवादीनिकारणवाक्यानीतिपूर्वपक्षोयथेत्यर्थः । यत्तुवेदांतानांचैतन्यज्ञापकत्वेपिप्रामाण्यमंगीकृत्यविचारशास्त्रस्यचैतन्यविषयत्वेज्ञातज्ञापकत्वेनाप्रामाण्यवादो गुरुनतिविषयस्यशिष्यनत्यविषयत्ववादमनुकरोतीतिकस्यचित्प्रलपनं । तत्तुच्छं । अनुक्तोपालंभात् । नहिवेदांतानांचैतन्यबोधकत्वेप्यनधिगतार्थत्वेनप्रामाण्यमुपेत्य विचारशास्त्रस्याधिगतार्थत्वेनाप्रामाण्यमुक्तं । किंतुवेदांतानांतद्विचारशास्त्रस्यचशुद्धबोधकत्वे निश्चितार्थतयार्थज्ञानायप्रेक्षावदनुपादेयत्वमेव । अतएवस्वतःसिद्धप्रत्यगात्मानुवादकावेदांतानविचार्याइत्युक्तं । वस्तुतस्तुवेदांतानामगत्याचैतन्यबोधकत्वेनयाथार्थ्यरूपप्रामाण्यसंभवेपिस्वार्थस्यनिश्चिततयातत्रसंदेहविपर्ययोरभावेन तन्निरासकविचारशास्त्रानपेक्षणाद्विचारशास्त्रमिदंनकर्तव्यमितियुक्तःपंथाः ॥ **तदाच्छादनेनेति** ॥ नच "नचतदाच्छादनेने"त्यग्रेतनग्रंथविरोधइतिवाच्यं । तत्रोक्तबाधकस्यात्राभावात् । स्पष्टतायैतयोर्भेदमाह ॥ **अत्रचेति** ॥ ननुसुधायां"आगमस्तुकार्यनिष्ठोननिष्पन्नस्वरूपमीश्वरंशक्नोत्यवगमयितु"मित्यादिना वेदस्यकृत्स्नस्यकार्यपरत्वान्नेश्वरेमानमित्युक्तत्वेनप्राभाकररीत्यापूर्वपक्षउक्तः । "प्रमाणाभावेने"ति

तदाच्छादनेनतत्प्रवृत्तेः । किंतुप्रमेयस्यब्रह्मणोऽद्वैतिरीत्यास्वप्रकाशप्रत्यगात्माभेदान्नविचार्यतेतिप्रमेयाश्रयणेनैवपूर्वपक्षः । अत्रचाद्येपक्षेप्रमाणभूतवेदविचाररूपेणापिविचारस्याकर्तव्यताभिप्रेता । द्वितीयेतुप्रमेयभूतब्रह्मविचाररूपेणैव । ॥ ३९ ॥

गु० स्तुतेऽनुवादकत्वेनार्थासंस्पर्शो इतिज्ञेयं । न्यायविवरणेप्रमाणाभावस्यहेतुत्वानुक्तेस्तत्स्वारस्यायपक्षांतरमाह ॥ **यद्वेति** ॥ टीकायांप्रमाणाभावोक्तिस्तु तदाच्छादना

प्र० टीकायांस्वोक्तोहेतुरप्येवंरूपेणविवृतइतिभाति । अत्रतूच्यतेचिन्मात्रपरत्वादित्यद्वैतिरीत्येति । तद्विरुद्धं । एवंचवेदांतानामननुवादकत्वंचानुकूलितंभवतीत्याशंकांसुधावाक्यतात्पर्यापरिज्ञानविजृंभितां बाधकोक्तिपूर्वमभिप्रायकथनेननिरस्यति ॥ **केचित्त्विति** ॥ **स्वप्रकाशत्वेति** ॥ तन्मतेवृत्तेरेवस्वप्रकाशत्वेनात्मनस्तदभावादितिभावः । ननुतत्रस्वप्रकाशत्वंवास्तवाभिप्रायेणोक्तंनतुतन्मतत्वेन । अतएव सुधायां"स्वप्रकाशसंविदाश्रयतयावे"त्युक्तं । नतुतत्रैवभारइत्याशंक्यबाधकांतरमाह ॥ **जीवस्येति** ॥ यदिप्राभाकररीत्यापूर्वपक्षस्तर्हितन्मतेऽद्वैतिमतइवदेहादि

केचित्तुवेदमात्रस्यकार्यपरत्वान्नजीवादन्यद्ब्रह्मास्ति । जीवस्त्वसंदिग्धइतिपूर्वपक्षइत्याहुः । तन्न । प्राभाकररीत्यापूर्वपक्षकरणेन्यायविवरणेआत्मनःस्वप्रकाशत्वोक्त्ययोगात् । जीवस्यदेहादिभिन्नत्वेनविचार्यत्वसंभवेनशास्त्रानारंभासिद्धेश्च ।

गु० भिप्रायेणेतिभावः । न्यायप्राप्तत्वादनुवादकत्वंचसह्यमित्युक्तं । तत्रानुवादकत्वेनैवपूर्वपक्षसंभवमाशंक्यपरिहरति ॥ **केचित्त्वित्यादिना** ॥ यद्वा ननुवेदांतानांचिन्मात्रपरत्वाभावेपि पूर्वपक्षसंभवात्कुतोव्यर्थानुवादेनअप्रामाण्येनवातद्वतिश्चिंतनीयेत्यतआह ॥ **केचित्त्वित्यादिना** ॥ अत्रप्रष्टव्यं । किमयंप्राभाकररीत्यापूर्वपक्षः उतान्यरीत्येति । नाद्यइत्याह ॥ **प्राभाकरेति** ॥ जीवव्यतिरिक्तब्रह्माभावसाधकस्यकार्यमात्रपरत्वस्यैवजीवस्याप्यविचार्यत्वसाधकत्वसंभवात् । तस्यचस्वप्रकाशत्वादिति जीवस्याविषयत्वप्रतिपादकन्यायविवरणविरोधापातादित्यर्थः । यद्वा प्राभाकरेणस्वप्रकाशज्ञानाश्रयतयैवजीवस्यस्वप्रकाशांगीकारात्तद्रीत्यापूर्वपक्षे न्यायविवरणेपिस्वप्रकाशज्ञानाश्रयत्वमेवतदविषयतायांहेतुत्वेनवक्तव्यं नतुस्वप्रकाशत्वं । तस्यप्राभाकरेणानभ्युपगमादित्यभिप्रायेणाह ॥ **आत्मनइति** ॥ द्वितीयंनिराचष्टे ॥ **जीवस्येति** ॥ नचैवंभवत्पूर्वपक्षस्याप्यनुपपत्तिः । तत्रापिदेहादिभिन्नत्वानंदाद्यात्मकत्वादिनाजीवस्यविचार्यत्वसंभवादितिवाच्यं । अस्माभिरद्वैतिरीत्यापूर्वपक्षकरणेन

SGDF

प्र० भिन्नत्वादेर्मिथ्यात्वाभावेन जीवस्यासंदिग्धत्वेपि देहादिभिन्नत्वस्यसत्यस्यविषयस्यसंभवेन निर्विषयत्वेनशास्त्रानारंभोनसिद्धःस्यादितिभावः। ननु सुधायां"नन्वात्मा शरीराद्यतिरिक्तोऽहमित्यसंदिग्धाविपर्यस्तसाक्षिप्रतीत्यैवनिश्चितइतिचेदेवंतर्हि ततएव नजिज्ञास्य"इत्युक्त्या देहादिभिन्नत्वस्यापिनिश्चितत्वेन तेनाप्यविचार्यत्वाच्छास्त्रानारंभसिद्धिरितिचेन्न । प्राभाकरमतेतथानंगीकारात् । वास्तवाभिप्रायेणवा देहादिविविक्तत्वेनात्मनोज्ञानाज्ञानाभ्यामविचार्यत्वमितिभावेनवा सुधोपपत्तेः । अतएव सुधायांजन्मादिसूत्रे "जीवस्यस्वरूपतःप्रसिद्धत्वेपि देहादितोतिविविक्ततयानप्रसिद्धि"रिति तेनरूपेणसंदिग्धत्वोक्तिःस्पष्टेतिभावः । आनंदाद्यात्मकत्वाणुत्वमहत्त्वादिनाविचार्यत्वसंभवाच्च । एवंबा

सुधायांत्वनुव्याख्यानेसिद्धेव्युत्पत्त्यादेरतच्छब्दार्थत्वेनोक्तत्वात्तद्व्यावर्त्यपूर्वपक्षेकार्येव्युत्पत्तिरुक्ता ।

गु० तेनचदेहादिभिन्नत्वादेर्मिथ्यात्वाभ्युपगमेन तेनरूपेणजीवस्यविचारविषयतायांशास्त्रस्यातत्त्वावेदकत्वप्रसंगेन तेनरूपेणजीवस्यविचारविषयत्वासंभवेनशास्त्रानारंभोपपत्तेः । त्वयाचप्राभाकररीत्यापूर्वपक्षंकुर्वता देहादिभिन्नत्वादेःसत्यतांगीकाराच्चेनरूपेणविचारविषयत्वसंभवेन शास्त्रानारंभासिद्धिरितिवैषम्यं । नचमयाप्यद्वैतिरीत्यैवपूर्वपक्षकरणान्नोक्तदोषइतिशंक्यं । तथात्वे वेदमात्रस्यकार्यपरत्वादितित्वदुक्तिव्याघातात् । अद्वैतिनातस्यानभ्युपगमात् । नच जीवव्यतिरिक्तंब्रह्मनास्तीत्यत्रैव कार्यपरत्वरूपप्राभाकररीतिर्मयाऽऽश्रीयते नतुसर्वांशेपीतिनोक्तदोषइतिवाच्यं । तथात्वेऽनुवादकत्वमंगीकृत्याद्वैतिरीत्यैवपूर्वपक्षसंभवे स्वप्रकाशत्वांशेऽद्वैतिरीतिःकार्यपरत्वेप्राभाकररीतिरित्यर्धजरतीयानुपपत्तेरितिभावः । नचैवंसति सुधायामपिकार्यपरत्वेनपूर्वपक्षोक्तिरनुपपन्नास्यात् । जीवस्यस्वप्रकाशत्वप्रतिपादकन्यायविवरणविरोधात् । जीवस्यदेहादिभिन्नत्वेनविषयत्वसंभवेनशास्त्रानारंभासिद्धेश्चेत्याद्युक्तदोषाणांतत्रापिसाम्यात् । तस्मादर्धजरतीयंभवतामप्यापन्नमित्यतआह ॥ सुधायांत्विति ॥ ॥ ४० ॥

SGDF. Sri Gargeshwari Digital Foundation

प्र० धकमुक्त्वासुधाकृतमाह ॥ **सुधायांत्विति** ॥ सैवरीतिरत्राप्याश्रीयतामित्यतआह ॥ **इहत्विति** ॥ अद्वैतिरीत्या अभेदएवब्रह्मशब्दव्या वर्त्यइतिभावः । ननु यद्यद्वैतिरीत्यापूर्वपक्षस्तर्हि नानुवादकत्वंवेदांतानां । पूर्वंशुद्धगोचरांतःकरणवृत्तेरभावात् । स्वप्रकाशत्वेपि स्वरूपज्ञान विषयत्वस्यकर्तृकर्मत्वविरोधेनानंगीकाराज्ज्ञातज्ञापकत्वाभावात् । अन्यथा भामतीमते जिज्ञासाधिकरणसिद्धांतानुन्मेषःस्यात् । तथाचान नुवादकत्वंवेदांतानामभ्युपेत्यैवपूर्वपक्षोवाच्यइत्युत्तानदृशांचोद्यमुट्टंक्य बाधकोक्त्यानिरस्यति ॥ **अन्येत्विति** ॥ स्वतःसिद्धत्वेपि । स्वरूप ज्ञानविषयत्वेपीत्यर्थः ॥ **तत्सिद्धीति** ॥ स्वरूपसिद्धीत्यर्थः ॥ **ततएवेति** ॥ आत्मनोऽज्ञातत्वादेवेत्यर्थः । ननुतन्मतेऽवेद्यत्वंस्वप्रकाशत्व

इहतुटीकायांन्यायविवरणोक्तब्रह्मशब्दव्यावर्त्यपूर्वपक्षउच्यतइतिनेहसावक्तव्या । अन्येतुआत्मनः स्वतःसिद्धत्वेपिप्रमाणतःसिद्ध्यभावा(त्सिद्ध्यविषय)त्तत्सिद्ध्यविषयत्वाद्ज्ञातप्रत्यायकानांवेदांतानांना नुवादकतेत्याहुः । तदपिन । ततएवात्मनोविषयत्वस्यापिसंभवेननिर्विषयत्वपूर्वपक्षायोगात् ।

गु० अद्वैतिरीत्यापूर्वपक्षेपिनानुवादकत्वमितिकेचित् । तन्मतंनिरसितुमनुवदति ॥ **अन्येत्विति** ॥ अत्रस्वतस्सिद्धत्वंस्वतस्सिद्धिरूपत्वं । नचैवं स्वरूपसिद्धि विषयत्वस्यस्वतःसिद्धत्वेपीत्यनेनोक्तत्वात् सिद्ध्यविषयत्वादित्यनेनविरोधः । स्वविषयप्रकाशत्वस्यैवस्वतःसिद्धिशब्दार्थत्वादितिवाच्यं । अवेद्यत्वंस्वप्रकाशत्वमि तिमतेनास्याभिधानादितिद्रष्टव्यं ॥ **प्रमाणतइति** ॥ तथाचप्रमाणसिद्धार्थबोधकत्वमनुवादकत्वं तच्चनवेदांतानां । स्वतस्सिद्धार्थबोधकत्वेपिप्रमाणतःसिद्धार्थ बोधकत्वाभावादितिभावः । सिद्धेरेवानुवादकत्वेतंत्रत्वात्प्रमाणतइतिविशेषणेगौरवमित्यपरितोषादाह ॥ **सिद्ध्यविषयत्वाद्वेति** ॥ तथाचसिद्धिविषयार्थबोध कत्वमनुवादकत्वं । वेदांतानांचस्वतस्सिद्धिरूपार्थबोधकत्वेपिसिद्धिविषयार्थबोधकत्वाभावान्नानुवादकत्वमित्यर्थः ॥ **ततएवेति** ॥ सिद्धिविषयत्वाभावादेवे

SGDF
Sri Gargeshwari Digital Foundation

प्र० मित्यंगीकाराच्छ्रुतितन्मीमांसयोर्निर्विषयत्वंयुज्यते । अतएवोत्तरत्र“यत्सत्यंनैवतद्वेद्यंयद्वेद्यंतच्चनैवसत् । इतितेसमयस्तत्रकुत्रार्थेशास्त्रमान
ते”तिभवतामेववचनं । अतएव मायावादखंडनटीकायामवेद्यत्वंस्वप्रकाशत्वमित्यंगीकाराद्वेदांतानांवैयर्थ्यमित्युक्तं । तथाच चैतन्यादन्य
स्यासत्यत्वाच्चैतन्यस्यचसत्यस्यावेद्यत्वान्निर्विषयत्वेन वेदांतानामविचार्यतया नेदंशास्त्रमारंभणीयमित्येवपूर्वःपक्षःसाधीयानितिचेन्न । टीका
यामात्मनःस्वप्रकाशत्वेनासंदिग्धत्वोपपादनविरोधात् । अवेद्यत्वे चैतन्यमवेद्यमित्यादिव्यवहारस्य स्वक्रियाविरोधेनायोगाच्च । कथंतर्ह्यनु
वादकत्वसमर्थनमितिचेत् । अयमाशयः । यदुक्तंस्वतःसिद्धत्वेपिप्रमाणवृत्त्यभावादिति तन्न । अनुवादकत्वेहिज्ञातमात्रज्ञापकत्वंतंत्रं ।
नतुसजातीयप्रमाणेन । तथाच स्वरूपज्ञानविषयत्वेनसिद्धशुद्धपरत्वेनुवादकत्वंस्यादेव । अन्यथा वायुक्षेपिष्ठादीनामनुवादकत्वंनस्यात् ।
परमतेशास्त्रयोन्यधिकरणपूर्वपक्षायोगापाताच्च । यदपितत्सिद्ध्यविषयत्वादिति तदपिन । मामहंजानामीत्यनुभवविरोधात् । अन्यस्यच
मिथ्यात्वेनतद्विषयत्वेभ्रांतित्वापत्तेः मुक्तौतदभावेनतद्विषयत्वायोगाच्च स्वरूपविषयत्वावश्यंभावात् । अन्यथा स्वरूपचितोज्ञानत्वस्यदुर्घट
त्वात् । विस्तृतंचैतज्जडत्वहेतुभंगे । ननुतर्हि नेयमद्वैतिरीतिः । तन्मतेस्वरूपचितःस्वविषयत्वानंगीकारात् । तथाचकथमद्वैतिरीत्येत्युक्ति
रितिचेत् । अत्राहुः । नसर्वांशेऽद्वैतिरीतिरितितस्याभिप्रायः । किंतु वेदांतानांचिन्मात्रपरत्वएव । अतएवपूर्वग्रंथकृतातथैवोक्तं । स्वप्रका
शसिद्धत्वोक्तिस्तु सिद्धांतदिशावा न्यायप्राप्ततयावास्तवाभिप्रायेणवा युक्ता । अतएव सुधायांत्रेधापिसिद्धत्वमुक्तं । अतएवचोत्तरत्र श्रव
णविधेर्विचारविधित्वमद्वैत्यभिमतंप्रत्याख्याय मननविधेर्विचारविधित्वमुपेत्यगतिर्वक्ष्यते । अन्यथा श्रवणविधेरेवसावक्तव्यास्यात् । ननुचै ॥ ४१ ॥
वंप्राभाकररीत्यावेदस्यकार्यपरत्वमुपेत्य स्वप्रकाशत्वोक्तेर्वास्तवत्वादिभाववर्णनंक्रियतां । एवंचसुधाचानुकूलिताभवति । अननुवादकत्वंचानु

प्र० गृहीतंभवति । तथाच कृत्स्नस्यवेदस्यकार्यपरत्वेन जीवान्यब्रह्मणिमानाभावाज्जीवचैतन्यस्यचसिद्धांतिदिशा वस्तुतोन्यायतोवास्वप्रकाशत्वा
न्नजिज्ञास्यतेतिपूर्वपक्षोयुक्तइतिचेन्न । एतावताऽतःशब्दव्यावर्त्यपूर्वपक्षलाभेपि ब्रह्मशब्दव्यावर्त्यपूर्वपक्षालाभात् । कार्यपरत्वनिरासस्यब्रह्म
शब्देनालाभात् । नच जीवान्यब्रह्मानंगीकाराद्ब्रह्मशब्दव्यावर्त्योपिपूर्वपक्षःसेत्स्यतीतिवाच्यं । एवंतर्हि जीवस्यदेहादिभिन्नत्वेनविचार्यत्वसं
भवेन शास्त्रानारंभासिद्धेरित्युक्तत्वादिति । यद्वा परैरपि व्यवहारनिर्वाहकत्वंशुद्धचितोंगीकृतं । तद्व्यवहारहेतुत्वमेवतद्विषयत्वमितिवा
“चित्सुखेनतत्स्वभावस्यापिस्फुरणस्यतद्विषयत्वमित्युक्तत्वेने”त्यादिना न्यायामृते स्वप्रकाशत्वभंगादौ स्वविषयत्वस्यचितोपिचित्सुखमतत्वे
नोक्ततया तद्रीत्यातद्विषयत्वमितिवापूर्वपक्ष्याशयः । यथोक्तंभावप्रकाशिकायांग्रंथकृतैव“अनतिरेकेस्वप्रकाशत्वादात्मनस्सिद्धसाधनता”इत्ये
तद्व्याख्यावसरे“यद्यपिपरैस्स्वग्रंथेषु स्वप्रकाशात्ममात्रस्यस्वतस्सिद्धिसंभवेने”ति“स्वतस्सिद्धतायामपितदुपपत्ते”रिति “विज्ञानमेवस्वप्रकाश
स्वभावंप्रकाशत”इति “स्वभावभेदादेवचस्वात्मनिव्यवहारंकुर्या”दितिचतत्रतत्रवदद्भिस्स्वप्रकाशस्यात्मनः स्वकर्मत्वाभावेपि स्वजन्यव्यवहार
विषयत्वयोग्यत्वलक्षणास्वतस्सिद्धिरिष्यते । तादृशात्माभिन्नाद्वैतंबोधयतःशास्त्रस्यसिद्धसाधनत्वंपररीत्यैववक्तुंशक्य”मित्यादि । तथाचैवंनि
ष्कर्षः । अद्वैतिरीत्यावेदांतानामखंडप्रत्यगात्मपरत्वं प्रत्यगात्मनश्चस्वप्रकाशसिद्धत्वंसिद्धांत्यभिमताद्यभिप्रायेणेति निर्विषयत्वादितिहेतुर्युक्तए
वेति । निष्प्रयोजनत्वादितिहेतुमादिपदोक्तंसमर्थयते ॥ नापीति ॥ अभ्युदयस्यकर्मादिलघूपायसाध्यत्वान्मोक्षएवजिज्ञासाफलत्वेनवाच्यः ।

नापिजिज्ञासायाःप्रयोजनमस्ति । प्रत्यग्रूपेब्रह्मण्यहमितिज्ञायमानेपि मोक्षानुपलंभात् ।

गु० त्यर्थः । अयंभावः । ज्ञानस्याज्ञानविरोधित्वेतद्विषयकत्वस्यैवतंत्रत्वात् ब्रह्मणःसिद्धिविषयत्वाभावेतदज्ञाननिवृत्त्यसंभवेनसंदिग्धत्वेनतस्यैवविषयत्वोपपत्त्या पूर्वपक्षा

SGDF

प्र० सचनसाक्षात्तत्फलं । श्रुतत्यागाश्रुतकल्पनापत्तेः । किंतुज्ञानद्वारा । तस्मिंश्चज्ञानेसत्यपीदानींमोक्षानुपलंभान्नजिज्ञासाफलमित्यर्थः । एतेन "नचजिज्ञासाया"इत्यादिटीकाविवृता । विषयाद्यभावादितिहेतुरुत्तरसाध्यद्वयेप्यन्वेति । तेन विषयेत्यादिटीकाविवृता । एवं जिज्ञासाया निर्विषयत्वादिनाऽकर्तव्यत्वमुक्त्वा सुधावाक्यंविवरितुं तद्विधीनांगतिद्वयंवक्तुमाक्षिपति ॥ नन्विति ॥ परैःश्रवणविधेर्विचारविधित्वमंगीकृतं । तद्रीत्यावा श्रवणादिरूपाजिज्ञासाकर्तव्येति सिद्धांतटीकातात्पर्यापरिज्ञानिनोवा शंकेतितदुदाहृतं । ननु यथा प्रमाणभूतवेदांत वाक्यगतिमनुक्त्वा तदाच्छादनेनपूर्वपक्षःतथेहाप्यस्तु । अतएवटीकायांतस्यगत्यनुक्तिरित्याशंक्यनिरस्यति ॥ **नचेति** ॥ न्यायोविषयादिः । अत्रेव प्रमाणभूतवेदांतवाक्याच्छादनेबाधकाभावादितिभावः । एतेन विचारविधेराच्छादनस्यनिरासात्प्रमाणभूतवेदांतवाक्यप्रा

विषयाद्यभावादेवनाधिकारी । नापिसंबंधः । ननुकथंतर्हिश्रोतव्यइतिविचारविधानं । नचतदाच्छादनेनपूर्वपक्षः । विचारविधिवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादस्याधिकरणस्य तदाच्छादनायोगादितिचेन्न ।

गु० नुदयभिया ब्रह्मणःसिद्धिविषयत्वेऽवश्यमंगीकार्येऽनुवादकत्वंतदवस्थमेवेतियुक्तमुक्तं अनुवादकत्वंन्यायप्राप्तत्वात्सह्यमिति ॥ **नापीति** ॥ अनेन टीकायां"नचजिज्ञासायाःप्रयोजनं"इत्यत्रचशब्दोप्यर्थइत्युक्तंभवति । ब्रह्मणःसिद्धत्वोपपादनार्थंप्रत्यग्रूपइति । एवंपूर्वटीकांतात्पर्यतोव्याख्याय इदानींटीकोक्तपूर्वपक्षस्यानुत्थानमाशंक्यनिरस्यति ॥ **ननुकथमिति** ॥ ननु श्रवणस्यविचाररूपत्वाभावेन श्रोतव्यइत्यस्यश्रवणविधित्वेनविचारविधित्वाभावात् कथंविचारविधायकत्वेन श्रोतव्य

SGDF Sri Gargeshwari Digital Foundation

प्र० माण्याच्छादनमपिनयुक्तमिति कस्यचिन्मूर्खस्यप्रलपनंदूरीकृतंबोद्धव्यं ॥ **वक्ष्यमाणेति** ॥ जिज्ञासापदार्थनिरूपणप्रस्तावइतिभावः । ननु"मंतव्यःसोन्वेष्टव्यःसविजिज्ञासितव्य"इत्यादौ"तव्यत्तव्यानीयर"इति विधौस्मृततव्यप्रत्ययांतस्य तथा "आत्मन्येवात्मानंपश्ये"दित्यादि लिङंतस्य"तद्विजिज्ञासस्वे"ति"तमेवैकंजानथे"त्यादिलोडंतस्यच विधायकत्वसंभवादित्याशंक्य तव्यप्रत्ययांतस्यगतिंतावदाह ॥ **मंतव्य इति** ॥ इत्यादेरितिषष्ठ्यंतस्य मध्यस्थतयेत्यनेनान्वयः । ब्रह्मपरत्वेनप्रसिद्धबृहदारण्यकच्छांदोग्याद्युपनिषन्मध्यगतत्वेनवा तत्तदवांतरप्रकरणगतब्रह्मपरवाक्यगतत्वेनवा बाधकेन तव्यप्रत्ययस्यविधिशक्तिप्रतिबंधात् "अर्हेकृत्यतृचश्चे"त्यर्हार्थेकृत्यप्रत्ययस्यविधानात् "कृत्याः"प्राङ्ण्वुलइतिकृत्यसंज्ञकस्यतव्यस्यार्हार्थत्वसंभवात् । तत्रदृष्टांतो **विष्णुरिति** ॥ द्वितीयाध्यायेद्वितीयपादे "पौर्णमासीवदुपांशुयाजःस्या"दितिचतुर्थेधिकरणे "जामिवाएतद्यज्ञस्यक्रियतेयदन्वंचौपुरोडाशावुपांशुयाजमंतरायजति । विष्णुरुपांशुयष्टव्योऽजामित्वाय । प्रजापतिरुपांशुयष्टव्योऽजामित्वाय । अग्नीषोमावुपांशुयष्टव्यावजामित्वाये"तिदर्शपूर्णमासयोःश्रुतंवाक्यमुदाहृत्य"उपांशुयाजमंतरायजती"त्ययंकिं"विष्णुरुपांशुयष्टव्य"इत्यादिवाक्यविहितयागत्रयसमुदायानुवादः उतस्वातंत्र्येणयागविधिरितिसंशये देवतायाअलाभेनयागविधित्वायोगात्तव्यप्रत्ययांतविष्ण्वादिवाक्यविहितयागत्रयसमुदायानुवादइतिप्राप्ते आग्नेयाग्नीषोमीयपुरोडाशद्वयनैरंतर्यकृतस्यजामितादोषस्यवाक्योपक्रमेउप

वक्ष्यमाणरीत्या श्रवणस्य विचाररूपत्वाभावात् । मंतव्यःसोन्वेष्टव्यइत्यादेश्च ब्रह्मपरतयाऽभिप्रेत वाक्यमध्यस्थतया विष्णुरुपांशुयष्टव्यइत्यादिवत्कृत्यप्रत्ययस्यार्हार्थत्वेनाप्युपपत्तेरविधायकत्वात् ।

गु० इतिवाक्योदाहरणमत्रेतिचेत् न । पूर्वपक्षित्वेनसंप्रतिपन्नेनाद्वैतिनाविचारस्यैवश्रवणरूपत्वांगीकारेणतन्मतानुसारेणैवतद्वाक्यस्यविचारविधायकत्वशंकनेनादोषात् ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्यासात् पुरोडाशयोरंतरालेकिंचिद्विधास्यतइत्यवगमात् आग्नेयाग्नीषोमीयपुरोडाशयाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमी
ययाज्यानुवाक्यायुगलानांशाखाभेदेनाम्नानात्क्रमविनियुक्तमंत्रवशेनदेवतायालाभादंतराशब्दघटितमेववाक्यंविधायकं । अजामित्वप्रशंसाच
तत्रैवावकल्पते । विष्णवादिवाक्यंतु जामितादोषोपक्रमतन्निर्हरणांतैकवाक्यमध्यस्थतया विधित्वेप्रतीतैकवाक्यताभंगप्रसंगादर्थवादः । त
व्यप्रत्ययस्त्वर्हार्थइतिसिद्धांतितं । तद्वदत्राप्युपक्रमोपसंहारैकरूप्यावगतैकवाक्यतानिर्वाहायार्हार्थो नविधिस्तव्यप्रत्ययइतिभावः । ननु त
व्यस्यार्हार्थेपिस्मरणात्तदंतमविधायकमस्तु । लिङाद्यंतंतुस्यादेवविधिरित्याशंक्यनिरस्यति ॥ **नापीति** ॥ पश्येदित्यत्रप्रकृतिभागस्यज्ञानं
विजिज्ञासस्वेत्यत्रच सन्प्रत्ययस्यचेच्छा मुख्योर्थः । "धातोःकर्मणःसमानकर्तृकादिच्छायांवे" तिसन्विधानादितिभावः । ननु मुख्यार्थाभ्यां
ज्ञानेच्छाभ्यांविचारंलक्षयित्वातद्विधिरभ्युपगम्यतामित्यतआह ॥ **विधौचेति** ॥ अतएवशबरस्वामिना "नविधौपरःशब्दार्थ"इत्युक्तमिति
भावः ॥ **ब्रह्मपरतयेति** ॥ ब्रह्मतात्पर्यकत्वेनेत्यर्थः ॥ **यदभिघारयेदिति** ॥ दशमे"पूर्वैश्चतुल्यकालत्वा"दित्यष्टमपादीयपंचमाधिकरणे
त्र्यंबकनामकपुरोडाशानधिकृत्य "अभिघार्यानाभिघार्याइतिमीमांसंतोयदभिघारयेद्रुद्रायास्येपशून्निदध्याद्यन्नाभिघारयेन्नरुद्रायास्येपशून्निद
ध्यात् । अथोखल्वाहुरभिघार्याएवे"तिचातुर्मास्येषुश्रुतंवचनमुदाहृत्य किमभिघारणानभिघारणयोर्विकल्पः उताभिघारणमेवेतिसंशये अ
भिघारणस्यविधेयत्वेविवादाभावादुपक्रमे अभिघार्याइतिविधिः । यदभिघारयेदितिविध्यन्वयानर्हनिंदाश्रवणाच्चनाभिघार्याइतिप्रतिषेधः ।

नापि"आत्मन्येवात्मानंपश्ये"दिति"तद्विजिज्ञासस्वे"तिवाविधिः । मुख्यार्थयोर्ज्ञानेच्छयोरविधेयत्वात् । विधौचलक्षणा ॥ ४३ ॥
याअन्याय्यत्वात् । अनयोरपि ब्रह्मपरतया"यदभिघारयेद्रुद्रायास्येपशून्निदध्या"दित्यादिवल्लिङोविधिशक्तिप्रतिबंधाच्च ।

प्र० अतस्तयोर्विकल्पः । सतिचैवं प्रयोगदशायामन्यतरपरिग्रहायापतंतीमीमांसा मीमांसंतइत्यनूद्यतइतिप्राप्ते मीमांसावरुद्धत्वेनाद्योभिघार्या
इत्येषनविधिः । अंत्यस्त्वनन्यपरत्वाद्विधिः । आद्यवाक्यंतुतच्छेषत्वादर्थवादः । तत्समभिव्याहारात् । यदभिघारयेदितिनिंदाश्रवणमप्यभि
घार्याएवेत्यस्यविधेःशेषत्वात्तत्रार्थवादः । एवमिदमभिघारणंप्रशस्तं यत्संतमपिदोषमविगणय्य कर्तव्यमित्येवंनिंदायाअपिप्रशस्ततरत्वज्ञा
पनार्थत्वात् । तस्मादभिघारणमेव नविकल्पइतिसिद्धांतितं । अत्राभिघारयेदितिलिङो विधिशक्तिरभिघारणविधौप्राशस्त्यसमर्पणपरत्वेन
यथाप्रतिबध्यते तथा पश्येदित्यादिलिङोपि विधिशक्तिर्ब्रह्मपरत्वेनप्रतिबध्यतइत्यर्थः । ननु तस्माद्ब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेदि
त्यादौ श्रवणंलब्ध्वा बाल्येनमननेन तिष्ठासेत्स्थातुमिच्छेत् मननंकुर्यादित्यस्तिविचारविधिरित्यतआह ॥ **एतेनेति** ॥ ब्रह्मपरतयाविधि
शक्तिप्रतिबंधादित्युक्तत्वेनेत्यर्थः । विचारविधित्वेनशंकार्हस्यसर्वस्यापिवाक्यस्यसाधारणंदूषणमाह ॥ **विचारस्येति** ॥ गांधर्वादिविचारस्य
षड्जादिज्ञानहेतुत्वदर्शनादितिभावः ॥ **विधीति** ॥ अप्राप्तएवविध्यपेक्षेतिभावः । नन्वपूर्वविधेरयोगेपि यथा"व्रीहीनवहंती"त्यादौ नखवि

एतेन"तस्माद्ब्राह्मणःपांडित्य"मित्यादेरपि विचारविधित्वंनिरस्तं ।
विचारस्य ज्ञानहेतुतायाअन्वयव्यतिरेकप्राप्तत्वेन विध्यनपेक्षणाच्च ।

गु० **एतेनतस्माद्ब्राह्मणइत्यादि** ॥ अत्रात्मन्येवात्मानंपश्येत् तद्विजिज्ञासस्वेत्यादाविवज्ञानेच्छयोर्विधानाभावेन तत्प्रयुक्तदोषस्याभावात् विचारश्चलक्षणांविनांगी
क्रियतइति तत्प्रयुक्तस्य विधौलक्षणायाअन्याय्यत्वस्यचाभावादभ्यधिकाशंकेयमितिध्येयं । तर्हिकथमतिदेशइतिचेत् न । प्रतीतैकवाक्यताभंगरूपपूर्वोक्तबाधकस्यात्रापि
समानत्वेनातिदेशोपपत्तेरितिभावः । साधारणदोषमप्याह ॥ **विचारस्येति** ॥ "विधिरत्यंतमप्राप्तौ"इतिवचनात् ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादेरिवापूर्वविधि

SGDF
Sri Gargeshwari Digital Foundation

प्र० दलनादिसाधनांतरप्रयुक्तपाक्षिकत्वनिवृत्तिफलकनियमविधिः । यथावा "अश्वाभिधानीमादत्त"इत्यादावन्यनिवृत्तिफलकपरिसंख्याविधिः । तथाविचारेणैवब्रह्मज्ञानंसंपादयेदितिनियमादिविधिःस्यादित्यतआह ॥ **नियमेति** ॥ सत्यं यदितत्रेवब्रह्मज्ञाने विचारवत्साधनांतरमपि स्यात् । नचतदस्ति । रूपादिहीनस्यात्मनःप्रत्यक्षाद्यविषयतयाशब्दैकगम्यत्वादित्यर्थः । नन्वपूर्वसाधनेषुव्रीहिषु नखविदलनादेरप्राप्तावपि व्रीहिमात्रेतत्प्राप्त्या व्रीहीनवहंतीतियथानियमस्तथा निर्विशेषात्मनिमानांतराप्राप्तावप्यात्ममात्रेतत्प्राप्त्या नियमइतिचेन्न । व्रीहीनित्यत्र व्रीहिशब्दोपूर्वीयद्रव्यपरः । नतुव्रीहिपरः । अन्यथा यवेष्ववघातऔपदेशिकोनस्यात् । नीवारेषुच व्रीहिरूपद्वाराभावेनातिदिष्टोपिबाध्येतेति नवमेस्थापितत्वेनापूर्वीयद्रव्यएवनखविदलनादिप्राप्तेर्वाच्यत्वात् । किंच व्रीहिसामान्यइवापूर्वीयेष्वपिव्रीहिषु नियमादृष्टाजनकस्यापिनखविदलनस्यसंभवोस्ति । इहच निर्विशेषसविशेषरूपविशिष्टद्वयानुगतेविशेषाभावादिद्वारावेदांतवेद्येचिन्मात्रे मानांतरप्राप्तिर्नेतिकथंनियमादिविधिः । तदेतदुक्तं ॥ **शब्दैकगम्यतयेति** ॥ ननुच यथा मंत्रार्थज्ञानस्यतन्मूलककल्पसूत्रात्मीयग्रहणकवाक्यादिप्राप्त्या पक्षेऽप्राप्तमंत्रसाध्यत्वंनियम्यते "मंत्रैरेवस्मृतिःसाध्ये"ति । तथा वेदांतमूलकस्त्रीशूद्रसाधारणस्मृतिपुराणादिप्राप्त्या पक्षेऽप्राप्तविचारपरिपूरणार्थोनियमइति चेन्न । विनाविचारंस्वातंत्र्येणस्मृतिपुराणादिनातज्ज्ञानासिद्ध्या साधनांतरत्वासिद्धेर्ननियमविधिः । तदेतदाह ॥ **साधनांतरेति** ॥ एतेनश्रुत्या

नियमपरिसंख्ययोश्च आत्मनःशब्दैकगम्यतया साधनांतरप्राप्त्यभावेनायोगात् । ॥ ४४ ॥

गु० त्वासंभवेपि व्रीहीनवहंतीत्यादेरिवनियमविधिर्वा पंचपंचनखाभक्ष्याः इमामगृभ्णन्रशनामृतस्येत्यादेरिव परिसंख्याविधिर्वा किंनस्यादित्यतआह ॥ **नियमेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० द्विचारस्यापातप्रतीतब्रह्मतदन्यज्ञानसाधनत्वेप्राप्ते“इत्यश्वाभिधानीमादत्त”इतिवदेकस्योभयसंबंधप्राप्तावन्यसंबंधनिवृत्तिफलकपरिसंख्ये तिनिरस्तं । श्रुत्यादिनाऽऽपाततोन्यप्रतीतावपि श्रुत्यादिविचारस्यान्यज्ञानसाधनत्वाप्राप्तेरित्यलमियता । ननु“उपरिहिदेवेभ्योधारयती”त्या देरधोधारणस्तुतिपरतयाप्रतीयमानस्यापिविधिपरत्वंयथा तथा तद्विजिज्ञासस्वेत्यादेर्ब्रह्मपरतयाप्रतीयमानस्यापि तदस्त्वित्याशंकांनिरस्यति ॥ **एतेनेति** ॥ ब्रह्मपरत्वकथनेनज्ञानहेतुतयाविचारप्राप्तिकथनेनचेत्यर्थः । तृतीयेध्याये “विधिस्तुधारणेऽपूर्वत्वा”दितिचतुर्थपादीयपंचमाधिक रणे“अधस्तात्समिधंधारयन्ननुद्रवेदुपरिहिदेवेभ्योधारयती”ति मृताग्निहोत्रेश्रुतंवाक्यमुदाहृत्य उपरिहिदेवेभ्यइति किंजीवदग्निहोत्रेउपरिधार णविधिरुतानुवादइतिसंदेहे सर्वमभ्यर्हितंद्रव्यंप्रच्छाद्यैवदेशांतरंनेतव्यमित्याच्छादनस्याचारप्राप्तत्वाद्धविर्गोर्हपत्यादाहवनीयंनीयमानमा च्छादनमपेक्षतइति तत्रोच्यमानमुपरिसमिद्धारणंदृष्टार्थतालाभादाच्छादनार्थंविज्ञासतइत्यधस्ताद्धारणस्यस्तुत्यर्थतयानुवादइतिप्राप्ते“स्रुग्दंडेन समिधमुपसंगृह्य”तिश्रवणाद्दंडप्रदेशेधार्यमाणयासमिधा हविःप्रच्छादनायोगात्तद्धारणस्यादृष्टार्थत्वेनार्थवशादप्राप्तमुपरिधारणमत्रविधीयतइ तिसिद्धांतितं । एतच्छब्दार्थंद्वेधाविवृणोति ॥ **प्रकृतस्येति** ॥ उपरिहीतिवाक्यस्यान्यपरतयाप्रतीतावपि नवस्तुतोन्यपरत्वं । विचारवाक्य स्यतु वस्तुतोब्रह्मपरत्वेनवैषम्यादित्यर्थः । ननु स्वाध्यायोध्येतव्यइत्यध्ययनविधेः स्वाध्यायाध्ययनेनफलवदर्थज्ञानंभावयेदित्यर्थज्ञानपर्यंत

एतेनान्यपरतयाप्रतीतस्यापि“उपरिहिदेवेभ्योधारयती”त्यादेरिव तद्विजिज्ञासस्वेत्यादेरपि विधित्वमस्त्विवतिनिरस्तं । प्रकृतस्य त्वन्मतेवस्तुतोन्यपरत्वात् । तद्वत्प्रकृतेऽप्राप्तेरभावाच्च ।

गु० पाक्षिकप्राप्तस्यविधिर्नियमविधिः नित्यप्राप्तेनिषेध्यानिषेध्ययोःसाधारण्येविधिःपरिसंख्याविधिरित्यर्थः ॥ **वस्तुतोन्यपरत्वादिति** ॥ “उपरिहिदेवेभ्य”इत्यस्यचा

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वस्यनिर्णीतत्वात्स्वाध्यायस्यार्थज्ञानकरणत्वंविचारमंतरा नसंभवतीत्याक्षेपाद्विचारस्यावश्यकतेत्याशंक्य विवरणाभिमतं परिहारमाह ॥ **नापीति** ॥ **स्वमतइति** ॥ अद्वैतिमते "स्वाध्यायस्यतथात्वेनहिसमाचारेधिकाराच्चे" तिसूत्रे तदीयभाष्ये तस्यनित्यत्वोक्तेरितिभावः । एवं विचारवाक्यानामभ्युपेत्यमानत्वं गतिरुक्ता । अधुना सौत्रातश्शब्देनवेदप्रामाण्यस्यापिसूचनात्तदनुरोधेनाप्रामाण्येनैवपूर्वपक्षमाह॥**यद्वेति**॥ षष्ठे "द्रव्याणांकर्मसंयोगेगुणत्वेनाभिसंबंध" इत्याद्यपादीयाद्याधिकरणे "स्वर्गकामोयजेते" त्यादिषु फलभोक्तृत्वरूपाधिकारोस्त्युतनेतिविशये प्रत्ययोक्तभावनायाभाव्याकांक्षायामेकपदश्रुत्या धात्वर्थस्यभाव्यत्वेनान्वये पदांतरोपात्तस्वर्गस्य वाक्यप्रमाणकान्वयायोगात् । लोकप्रयोगात्स्वर्गशब्दितस्यचंदनादेः क्रियासाधनत्वोपपत्तेः । साधनेचार्जनप्राप्तकामानुवादसंभवाच्च यागएवभाव्यो नफलमिति फलाभावादप्रमाणमेवमादीतिप्राप्ते । पदश्रुतेरपिप्रबलया प्रत्ययश्रुत्या भावनायाविध्युपरोधात्तस्यच चेतनप्रवर्तनारूपस्य पुमर्थभाव्यतांविनानुपपत्तेः । फलेच कामनास्वारस्यात्स्वर्गशब्दस्यप्रीतिवचनत्वेन चंदनादिषुगौणत्वादत्रतद्ग्रहणेमानाभावाच्च स्वर्गएवभाव्यो नयागइत्यस्त्यधिकारइतिसिद्धांतितं ।

नाप्यध्ययनविधेरर्थज्ञानपर्यंततया तदाक्षिप्तोविचारइतियुक्तं। स्वमते तस्यनित्यत्वेनार्थज्ञापनपर्यंतत्वायोगात् । यद्वा स्वर्गकामाधिकरणपूर्वपक्षेविश्वजिदधिकरणपूर्वपक्षेच फलाभावेन नियोज्याभावेनच "स्वर्गकामोयजेत विश्वजितायजेते" त्यादिवाक्यमिव उक्तरीत्या विषयाद्यभावेनोपपत्तिविरोधात्तद्विजिज्ञासस्वेत्यादिकमप्रमाणं ।

गु० न्यपरतयाप्रतीतिमात्रं नतुवस्तुतोन्यपरत्वं तद्विजिज्ञासस्वेत्यादेश्चवस्तुतोन्यपरत्वमितिवैषम्यमितिभावः। श्रोतव्यइत्यादिवाक्यानांप्रत्येकंकिंजपार्थत्वाद्युक्तिक्लेशेन वेदांतानामिवतेषामप्यप्रामाण्यमेवपूर्वपक्षोस्त्वित्याह ॥ **यद्वास्वर्गकामेत्यादिना** ॥ **फलाभावेनेति** ॥ भट्टमतेन । नियोज्याभावेनेति । प्राभाकरमतेनेतिध्येयं

प्र० तथा चतुर्थे "चोदनायांफलाश्रुतेःकर्ममात्रंप्रतीयेत नह्यशब्दंप्रतीयत" इतितृतीयपादीयपंचमाधिकरणे "विश्वजितायजेते" त्यादिषु फलमस्ति नेतिसंशये फलस्याश्रवणाद्यागभाव्यताप्रतिपादनेनवाक्यस्यपूर्णतयाध्याहारानपेक्षणाच्च नास्तिफलमिति पुरुषप्रवृत्त्ययोगेन विध्यानर्थक्यादप्रमाणमेवमादीतिप्राप्ते चेतनप्रवर्तनात्मकविध्यवरुद्धायांभावनायामपुमर्थस्ययागस्यान्वयायोगात्तदंशेवाक्यस्यसाकांक्षत्वात्तत्पूरणाय फलपदाध्याहारादस्ति विश्वजिदादीनांफलमितिसिद्धांतितं । अत्रोभयत्रापि यथाऽप्रामाण्यपर्यवसायीपूर्वःपक्षः । तथा तद्विजिज्ञासस्वेत्यादावपीत्यर्थः । भट्टमते स्वर्गकामशब्दस्यफलसमर्पकता प्राभाकरमते नियोज्यपुरुषसमर्पकतेत्युभयाभिप्रायेण फलाभावेननियोज्याभावेनचेत्युक्तं । विचारवाक्यानां गतिद्वयस्यटीकायामनुक्तेः कथमेवमित्यतआह ॥ **अतएवेति** ॥ उक्तमितिगतिद्वयविशेषणं । अस्माभिरितिशेषः । वाक्यानांप्रामाण्येपि लिङादीनामविधायकत्वमप्रामाण्यमेववेत्युक्तंगतिद्वयमित्यर्थः । सुधावाक्यस्यायमाशयः । विचारवाक्यगतलिङादीनां चंद्रिकोक्तदिशाविधिशक्तिप्रतिबंधेनाविधायकत्वादितिवा तत्रवक्ष्यमाणदिशा विषयाद्यभावेनाप्रामाण्येनाप्युपपत्तेरितिवेति । अतएवतत्र पूर्वपक्षोपसंहारे "तदेवंविषयाद्यनुबंधविधुरत्वान्नजिज्ञासाकर्तव्या तद्विधयोपिनप्रमाणमित्युक्तमितिभावः । यद्वा श्रुत्यर्थस्येतिवाक्योपादानमुपलक्षणं तद्विधयोपिनप्रमाणमित्यपिवाक्यंग्राह्यं । तथाचाद्यवाक्येनाद्यागतिः उपसंहारवाक्येन द्वितीयागतिरुक्ताभवतीतिभावः । यद्वा

अतएवोक्तं विचारविधायकवाक्यानांगतिद्वयमभ्युपेत्य सुधायां तद्विजिज्ञासस्वेतिश्रुत्यर्थस्याद्याप्यनिर्णीतत्वेनेत्युक्तं ।

गु० ॥ **गतिद्वयमभ्युपेत्येति** ॥ सुधायांजिज्ञासाकर्तव्यानवेतिसंशयोक्त्यवसरे श्रुत्यर्थस्याद्याप्यनिर्णीतत्वेनेत्युक्तत्वात्पूर्वपक्षावसरे गतिद्वयेनाविधायकत्वनिश्चयएवविवक्षितइतिभावः । विचारविधिवाक्यानांनित्यविधितया अदृष्टार्थत्वेनाप्रामाण्येनवा पूर्वपक्षस्तथोक्त्यवष्टंभेन नकार्यः । तस्याअन्यपरत्वादिति केचिन्मतमुपन्यस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० अंत्यानुसारादाद्यस्यार्थद्वयमाद्यानुसारादंत्यस्यार्थद्वयं प्रामाण्यपक्षे तद्विधयो नप्रमाणं नविचारविधायकाइत्यर्थइतिभावः । यद्यपि "विनाविचारंश्रुत्यर्थस्ये"त्याद्येवसुधावाक्यं तथापि "ननुतद्विजिज्ञासस्वे"तिशंकाग्रंथे सैवश्रुतिरुपात्तेतिप्रकृतत्वाद्बुद्धिसौकर्याय तद्विजिज्ञासस्वेतिश्रुत्यर्थस्येत्याद्यनुवादःकृतइतिनदोषः । ननु सुधावाक्यस्यनायंभावः वक्ष्यमाणदिशाविषयाद्यभावेनाप्रामाण्येनाप्युपपत्त्या श्रुत्यर्थोननिर्णीतइति । किंतर्हि जीवविचारविधायकत्वेनाप्युपपत्त्या ब्रह्मविचारविधायकत्वेनानिर्णीतइत्येव । उपसंहारवाक्यमपि ब्रह्मविचारविधायकंनेत्यभिप्रायं । अतएव सुधायांजन्माधिकरणे तथैवस्पष्टंविभावयिष्यतीत्युत्तानदृशांभ्रममुट्टंक्यनिरस्यति ॥ **केचित्त्विति** ॥ उक्तमेव पुनःस्मारयति ॥ **जीवस्येति** ॥ अत्रटीकोक्तंपूर्वपक्षप्रमेयं न्यायविवरणानुसारीत्याह ॥ **तदेतदिति** ॥ संग्रहस्तु जीवान्यब्रह्मणोऽभावात्तस्यचस्वप्रभत्वतः । तज्ज्ञानान्मुक्त्यभावाच्चजिज्ञासानावकल्पते । तथाहीत्याद्यल्पगुणत्वेनानुभवादित्यंतटीकां न्यायविवरणविवरणपरांव्या

केचित्तु तद्विजिज्ञासस्वेत्यादिकं जीवात्मनोविचारविधायकं नतुब्रह्मणइति सुधाभिप्रायइत्याहुः । तन्न । जीवस्यासंदिग्धत्वप्रतिपादकन्यायविवरणविरोधस्य विचारमात्राक्षेपकपूर्वपक्षानानुगुण्यस्यचोक्तत्वात् । तदेतदभिप्रेत्योक्तं न्यायविवरणे "जीवव्यतिरिक्तेश्वराभावात्तस्यचस्वप्रकाशत्वान्नजिज्ञास्यते"ति । एवंप्राप्ते सिद्धांतितंभगवतासूत्रकारेण ॥ अथातोब्रह्मजिज्ञासेति ॥ सिद्धांतसंक्षेपस्तु । ॥ ४६ ॥

गु० निराकरोति ॥ **केचित्त्विति** ॥ एवंपूर्वपक्षमुज्जीव्य अधिकरणशरीरस्यसुग्रहत्वाय पूर्वपक्षसंदृब्धतयासिद्धांतंवक्तुं सौत्राथशब्दादिव्याख्यानरूपांटीकामुल्लंघ्य सि

SGDF Sri Gargeshwari Digital Foundation

प्र० ख्यातुं पूर्वपक्षोपमर्दकंसिद्धांतप्रमेयंसंगृह्णाति ॥ **जिज्ञास्यमिति** ॥ यद्यपिब्रह्मशब्दःपूर्णतामात्रवाची तथापि योग्यतयागुणानामन्वयः ॥ **अपूर्णत्वेनेति** ॥ गुणैरितिसंबंधः । साध्यहेत्वोरप्रतीतेः कुत्रत्येनब्रह्मशब्देनेत्यप्यप्रतीतेर्भिन्नत्वोक्तेरुपयोगाद्दष्टेश्च कारिकांव्याचष्टे ॥ **जिज्ञास्यमेवेति** ॥ श्रुत्युक्तापिजिज्ञासा नकार्या । असंदिग्धत्वेनाविषयत्वादित्युक्तमित्यतआह ॥ **श्रौतेति** ॥ अयमर्थः । ब्रह्मशब्दो गुणपूर्ति निमित्तकःसन् तद्योग्यमपूर्ववस्तुबोधयन् जीवापूर्णत्वानुभवसाहित्येन जीवाद्भिन्नमेवबोधयतियदा तदानीमेवापूर्णत्वेनजीवंगृह्णन्ननुभवो ब्रह्मपदोक्ताद्गुणपूर्णाद्वस्तुनोभिन्नमेवगृह्णाति । “शास्त्रगम्यपरेशानाद्भेदःस्वात्मनईयते । अनुभूतिविरोधेनकथमेकत्वमुच्यते” इति द्वितीयेनुव्या

जिज्ञास्यब्रह्मशब्देन गुणपूर्त्यभिधायिना। अपूर्णत्वेनानुभूताज्जीवाद्भिन्नंप्रतीयते । १ । जिज्ञास्यमेवब्रह्म । तद्विजिज्ञासस्वतद्ब्रह्मेत्यादिश्रुतेः । श्रौतब्रह्मशब्दोक्तयागुणपूर्त्याऽल्पगुणत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेनसंदिग्धत्वाच्च ।

गु० द्धांतोक्तिरूपायाः । तद्ब्रह्मपदप्रयोगेणपरास्तमित्यादिटीकायानिष्ठामाह ॥ **जिज्ञास्यंब्रह्मशब्देनेत्यादिना** ॥ अत्र जिज्ञास्यमित्यनेन श्रुतिसिद्धेन जिज्ञास्यजिज्ञासुभावेनापिभेदइति सौत्रजिज्ञासाशब्देनसूचितमितिदर्शितं । ब्रह्मशब्देनेत्यनेन ब्रह्मेतिशब्दइति ब्रह्मणोवाचकःशब्दइति चार्थद्वयस्यविवक्षितत्वात् “आत्मावा अरेद्रष्टव्यः” इत्यादिवाक्यस्थात्मशब्दैरपि गुणपूर्तिसिद्धिरितिदर्शितं । नकेवलंजीवस्य गुणापूर्त्या भेदः । किंतु देशापूर्त्यापीतिभावेन सामान्यतोपूर्णत्वेनेत्युक्तं । ननु भेदसिद्ध्यर्थं ब्रह्मणोगुणपूर्तिरिव सूत्रकृता जीवस्याल्पगुणतापि वक्तव्येत्याशंक्यानुभवसिद्धत्वान्नवक्तव्येतिभावेनानुभूतादित्युक्तं । पूर्तिभेदयोःश्रुत्यर्थाभ्यांब्रह्मशब्दार्थत्वान्नानेकार्थतापीतिभावेन पूर्त्यभिधायिनेति भिन्नंप्रतीयतेइतिचोक्तमितिज्ञेयं । तद्ब्रह्मेति जिज्ञास्येब्रह्मशब्दश्रवणादितिटीकया नकेवलंविचारस्यकर्तव्यत्वेऽसंदिग्धत्वरूपंबाधकमुद्धृतं किंतु तद्विजिज्ञासस्वेति साधकंचोक्तमितिदर्शयितुं श्रुतेस्संदिग्धत्वाच्चेत्युक्तं । टीकोक्तः परमार्थतोऽब्रह्मत्वप्रसंगः श्रुत्युक्तमपिब्रह्मत्वमध्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० ख्यानोक्तेः । एवंच श्रुतिसाक्षिभ्यांभेदेसिद्धे तदुपजीविनो जीवेशौभिन्नौ विरुद्धधर्मकत्वाज्जलानलवदित्यनुमानस्यापिसंभवात्प्रत्यक्षानुमान शब्दरूपप्रमाणत्रितयेनभेदावगतेः जीवस्यस्वप्रकाशत्वेनसिद्धत्वेपि तद्भिन्नस्यब्रह्मणस्तदभावेनागुणत्वाष्टगुणत्वादिना वादिविप्रतिपत्त्यासंदिग्धत्वाज्जिज्ञास्यमेवब्रह्मेति । ननु गुणपूर्त्यादिविरुद्धधर्मस्यमिथ्यात्वात्तेनमिथ्याभेदसिद्धावपि वास्तवाभेदाप्रतिबंधान्नविषयत्वंब्रह्मणइत्याशंकानिवृत्त्यैप्राप्ता“नचब्रह्मणिगुणाध्यासः”इत्यादिटीका । तदभिप्रायंसंगृह्णाति ॥ **निर्दोषेति** ॥ एतच्च श्रुतिसाक्षिणोर्विशेषणं । एतच्चानादित्वेनध्येयं । श्रुतिः ब्रह्मपदरूपा । ब्रह्मजीवयोरित्युक्त्या टीकोपलक्षणमित्युक्तंभवति । टीकायां“अथकस्मादुच्यत”इतिश्रुतिमुदाहृत्य गुणपूर्णत्वंब्रह्मशब्दार्थइत्युक्तं । सुधायामवयवशक्त्या । तद्विरुध्यतइत्याशंक्य द्वयमप्यभिप्रेतमित्याह ॥ **नकेवलमिति** ॥ बृहिवृद्धावितिधातोः“बृंहेर्नम्नलोपश्चे”तिमनिन्प्रत्ययेऽमागमेनलोपेचब्रह्मेतिरूपं । वृद्धिश्चदेशकालाभ्यामिवगुणतोपिग्राह्या । संकोचकाभावादित्यर्थः ॥

निर्दोषश्रुतिसाक्षिभ्यां प्रमितेब्रह्मजीवयोः । गुणपूर्त्यल्पगुणते मिथ्येतिचनयुज्यते । १ । नकेवलमथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणाइतिश्रुत्या गुणपूर्तिर्ब्रह्मशब्दार्थः । किंतु ब्रह्मशब्दावयवशक्त्यापि । अपरिच्छेदेहि तस्यावयवशक्तिःपरस्यापिसंमता । गुणापरिच्छेदोपिचापरिच्छेदएव । नच संकोचेहेतुरस्ति ।

गु० स्तमितिवदंतंप्रतीष्टएवेतिशंका“निर्दोषश्रुतिसाक्षिभ्या”मितिश्लोकस्थायाःश्रुतेःनिर्दोषतोक्त्याऽपास्ता । तर्हि जीवेअल्पगुणत्वमध्यस्तमस्तीतिशंकातु न्यायविवरणटीकयोरनुभवपदसूचितस्यसाक्षिनिर्दोषत्वस्योक्त्याऽपास्तेतिद्रष्टव्यं । टीकोक्तो गुणापरिच्छेदस्यब्रह्मशब्दार्थत्वाभावेश्रुतिविरोधः क्लृप्तावयवशक्तित्यागप्रसंगस्याप्युपलक्षकइत्याह ॥ **नकेवलमित्यादिना** ॥ वक्ष्यतेचैतदित्यनेनपूर्वोक्तंसिद्धांतसंक्षेपत्वमुपपादितमितिद्रष्टव्यं । देशाद्यपरिच्छेदेनेतिटीकायां जीवाणुत्वस्येत्युत्तरवाक्यानुसा

प्र० **अन्यथेति** ॥ संकोचकाभावेपिगुणापरिच्छेदस्यत्यागइत्यर्थः । ननु देशकालाभ्यामिव वस्तुतोपरिच्छेदएवापरिच्छेदशब्दार्थो नतु गुणापरिच्छेदइत्यतआह ॥ **वक्ष्यतइति** ॥ तर्हि“देशापरिच्छेदेनचजीवभेदसिद्धे”रितिटीकाविरोधइत्यतआह ॥ **टीकायांत्विति** ॥ अत्र यत्केनचित्प्रलपितं सर्वेषांवेदांतानांनिर्विशेषचैतन्यरूपेब्रह्मणितात्पर्यमाश्रित्यकृतस्यपूर्वपक्षस्यनिरासाय सर्ववेदांतप्रतिभटत्वेनप्रयुक्तोयंब्रह्मशब्दो गुणपूर्तिनिमित्तःसन्नपि सर्वानपिवेदांतानुपक्रमादिदृढन्यायनिर्णीताद्वैततात्पर्यात्प्रच्यावयितुंकथंशक्नुयात् । प्रत्युत स्वयमेवतद्गुणभूतत्वात्तदनुगुणमेवाद्वैतवाद्यभिमतत्रिविधपरिच्छेदराहित्यरूपमर्थमवलंबेत । अतएव “नस्थानतोपी”तिसूत्रे सुधायां“सकलश्रुतिस्मृतीतिहासपुराणानांपरमेश्वरस्याशेषदोषदूरत्वेमहातात्पर्यात्“कार्यकारणबद्धौता”वित्यादिवाक्यं भगवतोदोषित्वेमानंने”त्युक्तमिति । तदयुक्तं । सकलवेदस्यविचारविधायकवाक्यानुगुण्येनैवार्थस्यवाच्यतया सर्वस्यतदधीनत्वेन राजा(दिवद)ध्ययनविधिवत्तस्यप्राधान्येन तद्गततयाविध्युद्देशगततया चश्रुतिरूपत्वाच्च ब्रह्मपदस्यबलवत्त्वात् । श्रुतेश्चाद्वैतबोधकवाक्येभ्यस्तदनुगुणोपक्रमादिलिंगेभ्यश्चप्राबल्यस्य“श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपरदौर्बल्यमर्थविप्रकर्षा”दितिपूर्वतंत्रसूत्रे“शब्दादेवप्रमित”इतिब्रह्मसूत्रेच वक्ष्यमाणदिशासिद्धत्वात् एकस्यापिब्रह्मपद

अन्यथा कालमात्रापरिच्छेदस्तदर्थःस्यात् । वक्ष्यतेचैतत्सौत्रब्रह्मशब्दव्याख्यानावसरे । टीकायांतु देशमात्रापरिच्छेदार्थत्वेपि तावतैवाणोर्जीवाद्भेदसिद्धेस्तदुपेत्योक्तं ।

गु० रेणदेशमात्रापरिच्छेदएवहेतुर्विवक्षितः । आदिपदंतु जीवाद्भेदमात्रार्थंकिमसंमतगुणापरिच्छेदोक्त्या संमतदेशाद्यपरिच्छेदेपिदेशाद्यपरिच्छेदएवहेतुरितिदर्शयितुमित्याह ॥ **देशमात्रेति** ॥ सिद्धांते तद्विजिज्ञासस्वेतिवाक्यस्थस्वपक्षसाधकब्रह्मशब्दोपेतत्वेनप्रथममुदाहरणस्यकृतत्वेपि पूर्वपक्षिकृततन्निराकरणक्रमानुसारेणैवतत्स

SGDF
Sri Gangadharan Digital Foundation

प्र० स्यधर्मिसमर्पकतयोपजीव्यत्वाच्च । उक्तंचविष्णुतत्वनिर्णये । "द्विविधंबलवत्त्वंचबहुत्वाच्चस्वभावतः । तयोःस्वभावोबलवानुपजीव्यादिकश्च स" इति । वस्त्वभेदोत्रब्रह्मशब्दार्थइत्यस्याग्रेनिरसिष्यमाणत्वेननिरवकाशत्वाच्च । अद्वैतवाक्यानांतदनुगुणोपक्रमादीनांच सावकाशत्वंचान्यत्रन्यायामृतादौस्पष्टं । किंच विचारविधायकनानावाक्येषु ॐब्रह्मात्मनारायणादियौगिकशब्दानांसहस्रशःसत्त्वेन ब्रह्मपदस्यतादृशानेकश्रुतिसध्रीचीनत्वाच्च । एकैकस्यापिशब्दस्य"नारायणंमहाज्ञेयं-नारायणोसौपरमोविचिंत्यः-तद्विजिज्ञासस्वतद्ब्रह्म-तपसाब्रह्मविजिज्ञासस्वे"त्यादिविचारविधायकनानावाक्येषु बहुशःश्रवणेन प्रत्येकंबाहुल्याच्च । नह्येकस्मिन्सूत्रे एकमेवोदाहरणं । विश्वतोमुखत्वभंगप्रसंगात् । वक्ष्यतिच इतियुक्त्यंतरसूचकत्वादिति । अपिच गुणपूर्त्यर्थकेनब्रह्मपदेनविषयसिद्धिंवदतासूत्रकृता श्रुत्यनुभवानुमानानांभेदप्रमापकत्वस्यप्रागुक्तदिशोक्तत्वाच्च । प्रत्यक्षानुभवस्यचनवचनसहस्रमपिबाधकमित्यन्यत्रविस्तरइति यत्किंचिदेतदित्यास्तांविस्तरः । विस्तरस्तु गुरुपादकृतकंटकोद्धारे द्रष्टव्यः । एतेन विषयाद्यभावेनोपपत्तिविरोधात्तद्विजिज्ञासस्वेत्यादिकमप्रमाणमितिप्रागुक्तंनिरस्तं । विषयसिद्धेरुक्तत्वात्तदुक्त्यैवफलाधिकारिसंबंधानांसत्त्वलाभाच्चेति । ननु प्रामाण्येपि तव्यादेरविधायकत्वमुक्तमित्यतस्तदुद्धरति ॥ **नचमंतव्यइत्यादेरिति** ॥ जामिवाएतद्यज्ञस्य

नच मंतव्यइत्यादेर्विष्णुरुपांशुयष्टव्यइत्यादिवदविधित्वमितिवाच्यं । तत्र जामितादोषोपक्रमतन्निर्हरणांतैकवाक्यमध्यस्थानांविष्ण्वादिवाक्यानांविधित्वे प्रतीतैकवाक्यताभंगादेरिव प्रकृते बाधकस्याभावात् । ॥ ४८ ॥

गु० मर्थनंकर्तव्यमितिभावेन तत्र श्रोतव्यइत्यस्यविचारविधायकत्वेनानभिप्रेतत्वात्तस्यविचारविधायकत्वमसमर्थ्यैव मंतव्यइत्यादेस्तत्समर्थयितुंशंकते ॥ **नचमंतव्य इति** ॥ **मध्यस्थानामिति** ॥ यद्यपिराणकोदाहृते जामिवाएतद्यज्ञस्यक्रियतेयदन्वंचौपुरोडाशावुपाँशुयाजमंतरायजत्यजामित्वायाथोमिथुनत्वायेतितैत्तरीयशाखा

SGDF Sri Gargeshwari Digital Foundation

प्र० क्रियतइत्यादिवाक्ये जामितादोषोपक्रमादग्नीषोमावुपांशुयष्टव्यावित्यंतेन जामितादोषनिर्हरणस्योपसंहाराच्च । तदंतमेकंवाक्यमितिनिर्णीतत्वेन मध्येविष्णवादिवाक्यानांविधायकत्वे प्रतीतैकवाक्यताभज्येत । नह्येवंप्रकृतेबाधकमस्तीतिभावः ॥ **अन्यथेति** ॥ बाधकाभावेप्यहार्थत्वे । नन्वत्रापि सर्वस्यब्रह्मपरतयाप्रतीतैकवाक्यताभंगएवबाधकइत्यतो दृष्टांतपूर्वमेकवाक्यतामाह ॥ **प्रयाजादीति** ॥ तृतीये ''असंयुक्तंप्रकरणादितिकर्तव्यतार्थितत्वा''दिति तृतीयपादीयचतुर्थाधिकरणे दर्शपूर्णमासयोःश्रुतानांसमिदादिपंचप्रयाजानां परस्पराकांक्षादिरूपेणप्रकरणेनविनियोगोस्त्युत नेतिविशये स्वर्गकामस्य दर्शपूर्णमासौकर्तव्यावित्यर्थपर्यवसानान्निरपेक्षंप्रधानवाक्यं । समिधोयजतीत्यादेःफलाकांक्षायामपि''सस्वर्गःस्या''दितिन्यायेन तल्लाभान्नैराकांक्ष्यान्नप्रकरणेनविनियोगइतिप्राप्ते यदि दर्शपूर्णमासौकर्तव्याविितिवाक्यार्थःस्यात्तदा यागक्रियायानिर्ज्ञातप्रकारत्वात्स्यान्नैराकांक्ष्यं । दर्शपूर्णमासाभ्यांस्वर्गःकार्यइतिहिवाक्यार्थः । तत्र नज्ञायते केनप्रकारेणताभ्यांस्वर्गःकार्यइति । तेनास्तीतिकर्तव्यताकांक्षा । प्रयाजादेस्तु फलाकांक्षास्पष्टैवेति साकांक्षयोःसंनिहितयोरप्रत्यक्षैकवाक्यत्वमात्रकल्पनं फलांतरकल्पनाल्ल

अन्यथा''स्वाध्यायोध्येतव्य''इत्यत्राप्यर्हार्थत्वप्रसंगात् । प्रयाजादिवाक्यस्य स्वयमवांतरवाक्यतयाविधायकस्यापि पुनर्दर्शपूर्णमासादिवाक्येनवाक्यैकवाक्यतावत्प्रकृतेपिपृथग्विधायकस्यापि ब्रह्मपरवाक्येनवाक्यैकवाक्यतोपपत्तेश्च ।

गु० गते उपांशुयाजवाक्ये मध्येविष्णवादयोनपठ्यंते तथापि भाष्यकाररीत्यात्रोदाहृतेवाक्येपिविष्णवादयोमध्येपठ्यंतएवेतितथोक्तमितिनकोपिदोषइतिध्येयं ॥ **अन्यथेति** ॥ बाधकाभावेपिविधायकत्वानंगीकारइत्यर्थः । ननुमंतव्यइत्यादेरपिपूर्वोत्तरब्रह्मवाक्यमध्यस्थतया विधायकत्वेप्रतीतैकवाक्यताभंगएवबाधकइत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० धीयः। अतःप्रकरणेन समिदादीनांविनियोगइतिसिद्धांतितं। अत्र यथा प्रधानवाक्यैकवाक्यताअंगवाक्यानां विधायकत्वाविरोधिनी तथा ब्रह्मपरवाक्यैकवाक्यतापिनविचारविधित्वविरोधिनीत्यर्थः । मोक्षहेतुब्रह्मोत्कर्षज्ञानायप्रवृत्तानामखिलवेदांतानांविचारापेक्षणात् विचारविधिवाक्यैश्च ब्रह्मज्ञानोद्देशेनतत्करणवेदानुग्राहकतयाविचारविधानाद्ब्रह्मपरवाक्यैकवाक्यत्वंद्रष्टव्यं । यदपि लिङादेरविधायकत्वमुक्तं तदप्युद्धरति ॥ **यदभिघारयेदिति** ॥ व्याख्यातप्रायमेतत् ॥ **यस्योभयमिति** ॥ द्वितीये"विधिमंत्रयोरैक्यार्थ्यमैकशब्द्यादि"त्याद्यपादीयसप्तमाधिकरणे"यस्योभयंहविरार्तिमार्च्छेदैन्द्रंपञ्चशरावमोदनंनिर्वपे"दित्यादिषु निमित्तप्रतिपादनेनाख्यातांतरैकवाक्यतामागतेष्वाख्यातेषु विधायकत्वमस्त्युतनेतिसंदेहे प्रसिद्धविधायकाख्यातैकरूप्याद्विधायकत्वमितिप्राप्ते निमित्तत्वावगमकेनयच्छब्देनविधिशक्तिप्रतिबंधान्नविधायकमितिसिद्धांतितं। अत्रोभयत्र यथा मीमांसंते यस्य इतिच विधिशक्तिप्रतिबंधनपरशब्दश्रवणंदृश्यते न तथा तद्विजिज्ञासस्वेत्यादावित्यर्थः । यद्यप्यग्नीदग्नीन्विहरेत्यादावविवाभिमुखानभिमुखसाधारणविधिविरुद्धस्वभावेनाभिमुखमात्रविषयेणामंत्रणेन विधिशक्तिप्रतिबंधोज्ञायते तथापि क्रतुप्रयोगमध्यपातिषुप्रैषेष्वेवप्रतिबंधकत्वं । प्रकृतेतु यतोवेत्यादिपुराकल्पस्वरूपार्थवादेन विध्युन्नयनान्नकश्चित्प्रतिबंधइति

यदभिघारयेदित्यादौ"अभिघार्यास्त्रैयंबकानाभिघार्याइतिमीमांसंत"इति मीमांसासमभिव्याहारेणेव"यस्योभयंहविरार्तिमार्च्छे"दित्यादौ निमित्तत्वाभिधायकयच्छब्दादिनेवच तद्विजिज्ञासस्वेत्यादौ केनचिद्विधिशक्तिप्रतिबंधाभावाच्च । आत्मन्येवात्मानंपश्येदित्यादावपि ॥ ४९ ॥

प्र० भावः ॥ **दर्शनस्येति** ॥ "पत्न्यवेक्षितमाज्यंभवति । विदुषाकर्मकर्तव्यं । तस्मात्पश्येतनित्यशः"इत्यादौ ज्ञानविधिदर्शनान्नप्रागुक्तदोषः। समर्थितंचैतन्न्यायामृतेतृतीयपरिच्छेदइतिभावः ॥ **लक्षितस्येति** ॥ ननु विधौनलक्षणेत्युक्तमित्यतआह ॥ **सतीति** ॥ अतएव सोमेन यजेतेत्यादौ सोमेनयागं यागेनस्वर्गंकुर्यादितिवैयधिकरण्येनान्वये उद्देश्यत्वोपादेयत्वानुवाद्यत्व विधेयत्वप्रधानत्वगुणत्वरूपविरुद्धत्रिकद्वयापत्तिरूपबाधकेन सोमवतायागेनेतिसामानाधिकरण्येनान्वयाय मत्वर्थलक्षणायाअंगीकृतत्वात् अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्यविध्यविधिसाधारण्याच्च शाबरवचनस्याप्यनुवादकमुख्यार्थत्वाय विधौलक्षणा नन्याय्येत्येवंपरत्वादितिभावः । यदप्यध्ययनविधेर्नित्यत्वेनविचारानापेक्षकत्वं विचारस्यज्ञानहेतुत्वप्राप्त्या विध्यनपेक्षत्वमुक्तं तद्द्वयमप्युद्धरति ॥ **अध्ययनविधेरिति** ॥ न्यायामृतेतृतीयपरिच्छेदे उक्तत्वादित्यर्थः । विस्तरभयान्नास्माभिरपिलिख्यतइति तत्रैवानुसंधेयं । उक्तंसिद्धांतटीकाप्रमेयंन्यायविवरणमूलमित्याह ॥ **तदेतदिति** ॥ व्याख्यातप्रायमेतत् । एवं सूत्राभिप्रेतंसिद्धांतंसमर्थ्येदानींसूत्रावयवभूतान्योंकारादीनिपंचपदानिव्याचिकीर्षुरोंकारंतावद्व्याकर्तुं

दर्शनस्य लक्षितस्यविचारस्यवा विधिसंभवाच्च । सतिबाधके विधावपि लक्षणायाःस्वीकृतत्वाच्च । अध्ययनविधेरपि विचाराक्षेपकताया विचारविधेरपूर्वविधित्वादेश्च अन्यत्रोक्तत्वाच्चेति । तदेतदभिप्रेत्योक्तं न्यायविवरणे "तद्विजिज्ञासस्वतद्ब्रह्मेति ब्रह्मशब्देन पूर्णगुणत्वोक्तेर्नानुभवसिद्धाल्पगुणजीवाभेद"इति ।

गु० **प्रयाजादिवाक्यस्येति** ॥ **विधिशक्तीति** ॥ एकवाक्यताभंगस्यनिरस्तत्वादितिभावः ॥ **अन्यत्रेति** ॥ न्यायामृतेतृतीयपरिच्छेदइत्यर्थः। एवमधिकरणशरीरंनिर्णीतं । अधुना यद्यपिपूर्वमुल्लंघितटीकाव्याख्येया तथापि अनुव्याख्यानसुधयोः सूत्रस्याथशब्दादप्योंकारआद्यावयवइत्युक्त्वा तस्यचव्याख्यातत्वात्तत्रानुपपत्ति

SGDF Sri Gargeshwari Digital Foundation

प्र० तस्यादित्वेसंमतिंवदन् सुधाशयंस्फुटीचिकीर्षुस्तद्ग्रंथमाक्षेप्तुमनुवदति ॥ **नन्वित्यादिना** ॥ **सुधायांचेति** ॥ “सर्वत्रानुगतत्वेनपृथगोंक्रियतेखिलै”रित्येतद्व्याख्यावसरइतिभावः । सुधावाक्यानांविक्षिप्तानां संग्रहेण क्वचिच्छब्दतःक्वचिदर्थतोनुवादोयं । अवयवत्वेयुक्त्यंतरमाह ॥ **ओंकारार्थस्येति** ॥ नन्ववयवत्वे अथशब्दवत्संहिततयानिर्देशःस्यादित्यतआह ॥ **असंहिततयेति** ॥ विश्लिष्टतयेत्यर्थः । अंगस्येतिपाणिनिसूत्रवदितिभावः ॥ **सूर्यायेति** ॥ नवमे“प्रकृतौयथोत्पत्तिवचनमर्थाना”मितितृतीयपादाद्याधिकरणे दर्शपूर्णमासयोःश्रुतो“ऽग्नयेजुष्टंनिर्वपामी”तिमंत्रः“सौर्यंचरुंनिर्वपे”दिति विकृतौ चोदकप्राप्तः । तत्राग्निपदस्थानेसूर्यपदप्रक्षेपेणोहितव्यमुतनेतिसंदेहे यथावस्थितस्वरूपस्यैव मंत्रस्य चोदकेनप्रापितत्वादग्निपदेनैंद्रीवत् गुणवृत्त्या सूर्यप्रकाशनसंभवान्नोहइतिप्राप्ते प्रकृतावग्निशब्दो नस्वरूपविवक्षयाम्नातः । अदृष्टार्थ

नन्वत्रानुव्याख्याने“तत्रताराथमूलत्व”मित्योंकारस्यसूत्रादित्वमुक्त्वा“ओतत्ववाचीह्योंकार” इति स व्याख्यातः । सुधायांच “स्रवत्यनोंकृतंब्रह्मपरस्ताच्चविशीर्यतइतिश्रुतिबलात्प्रतिसूत्रं ब्रह्मविद्यात्वादाद्यंतयोरोंकारस्योहःकार्यः । नचोह्यमानंवाक्यात्पृथक् । मंत्रेष्वप्यूह्यमानस्यतदनवयवत्वप्रसंगात् । ओंकारार्थस्य प्रथमसूत्रवाक्यार्थेसमन्वयेनावयवत्वनिश्चयाच्च । असंहिततयानिर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थ”इत्युक्तं। तत्कथं। सूर्यायेत्यूहंप्रति अग्नयइत्यादेरिव प्रकृतेस्थानिनोऽभावात्। ॥ ५० ॥

गु० माशंक्यपरिहर्तुंतदुक्तमनुवदति ॥ **नन्वत्रानुव्याख्यानइति** ॥ व्याख्यातत्वमात्रं नावयवत्वनिश्चायकं अतथाभूतानांभर्गादिशब्दानामपिव्याख्यातत्वात् । अ

SGDF Sri Gargeshwari Digital Foundation

प्र० त्वापत्तेः। किंतुदेवतापदविवक्षया। दृष्टार्थतालाभात्। अतस्तेनैवरूपेणविकृतौचोदकेनप्रापणादग्निपदस्यवैकृतदेवतापरत्वाभावात्तदुद्धारेण सूर्यपदप्रक्षेपेणचोहितव्योमंत्रः। ऐंद्रीतु स्वरूपेणगार्हपत्येविनियुक्तेतिवैषम्यमितिसिद्धांतितं। तत्र यथा सौर्येयागेसूर्यपदस्य चोदकेनप्राप्ते देवस्यत्वेतिमंत्रेऽग्नयइतिपदंस्थानिरूपंविद्यते नतथा प्रतिसूत्रमोंकारोहस्यस्थान्यस्तीत्यर्थः। इत्यादेरित्यादिपदेन नीवाराणामित्यूहंप्रतिव्रीहीणां मेदसुमनस्यमानइतिमंत्रे व्रीहीणामित्यस्येवेतिग्राह्यं ॥ **यथोक्तमिति** ॥ तंत्रवार्तिकइतिभावः। प्राकृतः प्रकृतियागीयोयःपदार्थः व्रीह्यग्निलक्षणद्रव्यदेवतारूपः तस्यस्थानेपतितं यत्पदार्थांतरं विकृतियागसंबंधि नीवारसूर्यलक्षणद्रव्यदेवतारूपं तस्ययत्कार्यं प्राकृतकार्यतुल्यं तदर्थंविकृतोयःप्रयोगः सूर्यायेत्यादिरूपः सऊहइत्युच्यते। कुतः ऊह्यमानतया ऊहविषयत्वादित्यर्थः ॥ **संयज्ञपतिरिति** ॥ द्वितीये"व्यवायान्नानुषज्येत"इत्याद्यपादीयांतिमाधिकरणे"संतेप्राणोवायुनागच्छतां संयजत्रैरंगानि संयज्ञपतिराशिषे"तिमंत्रेषु गच्छतामित्यस्य संयजत्रैरंगानीत्यत्रवचनभेदादननुषंगे संयज्ञपतिराशिषेत्यत्रापि किंतस्यैवानुषंग उताध्याहारइतिसंदेहे बुद्धिविपरिवृत्तेरनुषंगइतिप्राप्ते संय

यथोक्तं"प्राकृतस्थानपतितपदार्थांतरकार्यतः। ऊहःप्रयोगोविकृतऊह्यमानतयोदित"इति ॥ १ ॥ नचोहशब्देनाध्याहारोलक्ष्यतइतिवाच्यं। "संयज्ञपतिराशिषा इषेत्वे"त्यादाविवसाकांक्षत्वाभावात्। किंच मंत्रेष्वप्यूह्यमानस्यतदनवयवत्वमिष्टमेव।

गु० न्यथातेषामपिसूत्रावयवत्वंस्यादित्यतउक्तं ॥ **सूत्रादित्वमुक्त्वेति** ॥ **संयज्ञपतिरिति** ॥ संयज्ञपतिराशिषेत्यत्र संतेवायुर्वातेनगच्छतामिति पूर्वत्रश्रुतस्य एकवचनांतस्य गच्छतामित्यस्यस्वान्वयायोग्यत्वेन संयजत्रैरंगानीति मध्येश्रुतेनबहुवचनांतेन व्यवहिततयाऽनुषंगासंभवेनाध्याहाराच्छ्रुताध्याहारः। इषेत्वेत्यत्रतु छे

SGDF
Sri Gargeshwari Digital Foundation

प्र० जत्रैरंगानीत्यत्रासंबंधेन बुद्धिविपरिवृत्तिभंगादनुषंगायोगे साकांक्षत्वादध्याहारइतिसिद्धांतितं । तथा तत्रैवाद्यपादे "समेषुवाक्यभेदःस्या" दितिषोडशेधिकरणे इषेत्वेत्यादिषु किमेकमंत्रत्वमुतमंत्रभेदइतिसंशये अनुष्ठेयार्थाप्रकाशनात् अदृष्टार्थत्वेचानेकादृष्टकल्पनापत्तेर्मंत्रैक्यमि तिप्राप्ते "इषेत्वेतिच्छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टी"त्यादिना शाखाच्छेदनादिषुकरणत्वेनविनियोगादर्थप्रकाशनरूपक्रियानिर्वर्तनेनैव करणत्वस्य निर्वाह्यत्वेन च्छेदनादिकंप्रतिसाकांक्षत्वाच्छिनद्मीत्याद्यध्याहारेणवाक्यंपूरणीयमिति मंत्रभेदइतिसिद्धांतितं । तत्रोभयत्रापि क्रियापदाश्रव णात्तदाकांक्षायामध्याहारःस्वीकृतः । नैवंसूत्रेष्वाकांक्षेत्यध्याहारोनयुक्तइत्यर्थः ॥ **ऊहेत्यादि** ॥ उक्तऊहः । प्रवरःत्र्यार्षेयादिः । नामधेयंदेव दत्तादि ॥ **द्वितीयइति** ॥ द्वितीयाद्यपादे । अनाम्नातेष्वमंत्रत्वमाम्नातेषुहिविभागःस्यादिति दशमाधिकरणे ऊहप्रवरनामधेयानांमंत्रत्वम स्त्युतनेतिसंशये मंत्रैकवाक्यत्वेनतन्मध्यनिवेशान्मंत्रकार्यकरत्वाच्च मंत्रत्वमितिप्राप्ते रथघोषेणमाहेंद्रस्तोत्रमुपाकरोतीत्यादौ रथघोषादेरमंत्र त्वेपि मंत्रकार्यकरत्वेनानैकांत्यान्मंत्रत्वस्याध्येतृप्रसिद्ध्यधीनत्वात्तस्याश्चाध्ययनकालेसमाम्नातविषयत्वेन मंत्रैकवाक्यतायाअप्रयोजकत्वादमंत्र त्वमितिसिद्धांतितत्वादित्यर्थः । यद्यप्यत्रोह्यमानस्यमंत्रैकवाक्यतया तदवयवत्वमुपेत्यैव तदपराधस्य "यद्दक्तोयज्ञभ्रेषमागच्छेद्यद्यजुष्टोयज्ञभ्रे षमागच्छे"दित्यादिमंत्रवैकल्यप्रायश्चित्तानापादकत्वसिद्ध्यर्थममंत्रत्वंव्यवस्थापितं सुधायांतु तदनवयवत्वमेवापादितं नत्वमंत्रत्वमपीति नेष्टापादनंयुक्तं । तथाप्यमंत्रत्वेन तदनवयवत्वंसुधावाक्याभिप्रेतमितिशंकितुर्हृदयमितिध्येयं । यदप्युक्तं "ओंकारार्थस्यप्रथमसूत्रवाक्यार्थे

ऊहप्रवरनामधेयानाममंत्रत्वस्यद्वितीयेसिद्धांतितत्वात् । ॥ ५१ ॥

गु० दनेमंत्रस्यविनियोगादश्रुतस्यैवच्छिनद्मीत्यस्याध्याहारादश्रुताध्याहारः । अत्राद्योऽनुषंगमात्रेदृष्टांतः । द्वितीयस्तु प्रस्तुतेअश्रुताध्याहारे द्वयमपिक्रियायांसाकांक्षं ।

प्र० समन्वयेने"त्यादि तदपिनेत्याह ॥ **अपिचेति** ॥ अधिकारानंतरंफलवत्त्वाद्ब्रह्मविचारःकार्यइतिवाक्यार्थेओतत्वस्यान्वयाप्रतीतेरित्यर्थः । ननु वाक्यार्थेप्रतियोगिसमर्पकत्वेनान्वयायोगेपि ओतंयद्ब्रह्म तद्विचारइति ब्रह्मविशेषणत्वंस्यादित्यतआह ॥ **ब्रह्मणःशब्दतइति** ॥ उपस र्जनस्य जिज्ञासाविशेषणस्य । यदि ॐब्रह्मजिज्ञासेतिसमस्तंस्याद्यदिवा ब्रह्मणोजिज्ञासेति ब्रह्मपदंव्यस्तंस्यात् तदा ओतत्वस्यकथंचिद्ब्रह्म पदार्थान्वयःस्यात् नचैवमस्तीतिभावः । यदपि स्ववत्यनोंकृतमित्यादि तदपिविरुध्यतइत्याह ॥ **अपिचेति** ॥ यच्चोक्तं "असंहिततयानि र्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थइति तन्नेत्याह ॥ **किंचेति** ॥ **ङ्याप्प्रातिपदिकादित्यादेरिति** ॥ व्याकरणेतुर्याध्याये "स्वौजसमौट् शस्टाभ्यांभिसि"त्याद्युत्तरसूत्रेऽनुवृत्तस्य ङ्याप्प्रातिपदिकादित्यस्य ङ्यंतादाबंतात्प्रातिपदिकाच्च स्वादयःप्रत्ययाभवंतीत्यर्थोयथादृश्यतइत्यर्थः ॥ **अच्छिद्रेणेति** ॥ द्वितीयाद्यपादे "सर्वेषु" इत्युपांत्याधिकरणे "चित्पतिस्त्वापुनातु वाक्पतिस्त्वापुनातु देवस्त्वासवितापुनातु" इतिमंत्रत्र

अपिच ओतत्वस्यनवाक्यार्थेन्वयः । ब्रह्मणःशब्दतउपसर्जनस्य पदांतरोपात्तौतत्वान्वयानुपपत्तेः । अपिचार्थप्रतीत्यर्थत्वे आदावेवप्रयोगेणचरितार्थत्वादंतेप्रयोगवैयर्थ्यं । किंच ओंकारस्योत्तरत्रानु षंगे अनुषक्तस्य "ङ्याप्प्रातिपदिका"दित्यादेः अच्छिद्रेणपवित्रेणेत्यादेः तनूर्वर्षिष्ठेत्यादेश्च तत्र तत्रार्थान्वयदर्शनात्प्रकृतेप्योंकारार्थस्य जन्मादिसूत्रेष्वन्वयोवाच्यः । सचाशक्यइति । उच्यते ।

गु० जिज्ञासासूत्रंतु ओंकारेनिराकांक्षमितिभावः ॥ **ङ्याप्प्रातिपदिकादिति** ॥ अत्राद्योनुषंगः । स्वरितेनाधिकारइतिपरिभाषासापेक्षोऽनुषंगमात्रेदृष्टांतः । अंत्यौतु तन्निरपेक्षौ । तत्राप्युत्तरस्यशब्दस्यपूर्वत्रानुषंगरूपोद्वितीयोनिरपेक्षानुषंगमात्रे । तृतीयस्तु प्रस्तुतेनिरपेक्षे निरपेक्षेपूर्वस्योत्तरत्रानुषंगे इतिज्ञेयं ॥ **सचाशक्यइति** ॥

SGDF Sri Gangadharan Digital Foundation

प्र० यानंतरमाम्नातः। “अच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः”इत्ययंशेषः किंपूर्वयोरनुषज्यते किंवापरस्यैवशेषइतिसंशये शेषस्यानंतरसंबंधमात्रेणनैराकांक्ष्यात्पूर्वयोश्च स्वतएवाकांक्षाविरहान्नानुषंगइतिप्राप्ते पुनातुशब्दैकवाक्यतापन्नस्याच्छिद्रादेस्तत्करणद्वारेण पवनक्रियाप्रकाशनार्थत्वात् तस्याएव पूर्वमंत्राभ्यामपिप्रकाश्यत्वात् प्रधानवशेनानुकर्षस्यन्याय्यत्वादनुषंगइतिसिद्धांतितं । तथा तत्रैव“अनुषंगोवाक्यसमाप्तिः सर्वेषुतुल्ययोगित्वात्”इतिसप्तदशेधिकरणे“यातेअग्नेऽयाशया तनूर्वर्षिष्ठागह्वरेष्ठोग्रंवचोअपावधींत्वेषंवचोअपावधींस्वाहा । यातेअग्नेरजाशयायातेअग्नेहराशये”तिज्योतिष्टोमेश्रुतं मंत्रत्रयमुदाहृत्य तत्रोत्तरयोर्लौकिकःशेषोध्याहार्यः किंवा पूर्वमंत्रानंतरपठितस्तनूर्वर्षिष्ठेत्यादिरनुषंजनीयइतिसंशये समाम्नायेनपूर्वत्रैवनिबद्धस्यशेषस्यान्यत्रनयनायोगात्सकृदाम्नातस्यसर्वार्थत्वानुपपत्तेरानंतर्यदेशविशेषाभ्यांविशेषग्रहणेनपूर्वशेषत्वावसायादनुषंगायोगे लौकिकस्यक्वाप्यनिबद्धत्वेनसर्वार्थत्वादध्याहारइतिप्राप्ते सर्वानंतर्येणसकृत्पठितुमशक्यो बुद्धिविपरिवृत्तिमात्रेणसाकांक्षैःसर्वैःसंबंधसिद्धेः पुनःपुनरनाम्नातोयंशेषः सर्वार्थेनैवाम्नातइत्यवगमादनुषंगो नलौकिकस्याध्याहारइतिसिद्धांतितं । अत्र यथा “अच्छिद्रेणपवित्रेणे”त्यादेःपूर्वत्रानुषक्तस्य“चित्पतिस्त्वापुना”त्विति पवनक्रियायांपवित्ररूपकरणसमर्पकतया तनूर्वर्षिष्ठेत्यादेश्च पश्चादनुषक्तस्यरजाशयाहराशयाशब्दितयोःरजतमयत्वहिरण्मयत्वविशेषणयोः तनूलक्षणविशेष्यार्पकतयान्वयोदृष्टः तथा“जन्माद्यस्ये”त्यादिसूत्रेष्वोंकारस्या

गु० अयंभावः। प्रातिपदिकादित्यत्रास्यशेषस्य स्वौजसमौडित्यादेःशेषिणश्चाकांक्षा। अच्छिद्रेणपवित्रेणवसोःसूर्यस्येत्यत्र अस्यशेषस्यैवक्रियायामाकांक्षा। चित्पतिस्त्वापुनात्वितिशेषिणोनिराकांक्षत्वात् । अपावधींस्वाहेतिस्वाहांतपूर्वमंत्रान्वितस्यविशेष्यसमर्पकस्य याशयेतिविशेषणांतरान्वितस्य शेषिणएवाकांक्षा । तनूरितिशेषस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्वयोवाच्यइत्यर्थः । एवं पूर्ववाद्युक्तान् षडपिदोषानुद्दिधीर्षुर्यत्तावदुक्तं प्राकृतस्थानिनोभावान्नोहत्वमिति तदुद्धरति ॥ **नात्रोहेति** ॥ अ ग्नयेजुष्टमित्यादौ सूर्यायजुष्टमित्यादिर्मंत्रोहः । यद्योन्यांतदुत्तरयोर्गायतीतिकवतीषु रथंतरंगायतीत्यादिषु प्रकृतिग्रंथे योनावाम्नातानांसाम्ना मुत्तरादिषु तत्तदानुगुण्येनान्यथागानं सामोहः । व्रीहिषुश्रुतानामवहननादीनां वैकृतेषुनीवारादिष्वौचित्येनानुष्ठानं संस्कारोहइत्येतेषांनिर्दे शके "मंत्रसामसंस्कारोह"इत्यादौ मीमांसकव्यवहारे ऊह्यतइतिव्युत्पत्त्या यथा प्रयोगविकारपरऊहशब्दो नतथाप्रकृते ऊहवितर्कइत्य स्माद्धावेघञि लघूपधत्वाभावेनगुणाभावेचोहइतिसिद्धेरध्याहारपरइत्यर्थः । वार्तिककृत्संमतिमाह ॥ **अतएवेति** ॥ यदत्रोक्तं साकांक्षत्व

नात्रोहशब्दो मंत्रसामसंस्कारोहइत्यादाविव कर्मव्युत्पत्त्या विकारपरः । किंतु "अध्याहारस्तर्कऊह"इतिप्रसिद्धेर्भावव्युत्पत्त्याऽध्याहारवाचकः । अतएव टुप्टी कायांनवमे "ऊहोनामतर्कणा साचैकरूपा मंत्रसामसंस्कारेषुक्रियमाणे" त्यादिना तर्कएवमुख्यऊहः । तद्विषयत्वान्मंत्रादेरन्यथात्वमप्यूहइत्युक्तं ।

गु० निराकांक्षत्वात् । प्रकृतेतु जिज्ञासासूत्रान्वितस्यओंकाररूपशेषस्य जन्मादिसूत्ररूपशेषिणश्चनिराकांक्षत्वेनार्थान्वयोशक्यइति । अध्याहारापरपर्यायतर्कस्यैवमुख्यो हत्वंटुप्वार्तिककारस्यापिसंमतमित्याह ॥ **अतएवेति** ॥ त्रिविधश्चोहइत्येतदयुक्तं । कथं । ऊहोनामतर्कणा । साचैकरूपा मंत्रसामसंस्कारेषुक्रियमाणा । सैवसा । नतस्याःकश्चिद्विशेषः । सामग्रहणानर्थक्यंचमंत्रग्रहणेनसंस्कारग्रहणेनचोक्तत्वात् । अत्रवर्णयन्ति । नैववयमूहभेदंप्रतिजानीमः । किंतुविषयमस्यनिरूप

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावादध्याहारे नमानमिति तत्राह ॥ **तत्रचेति** ॥ अध्याहारइत्यर्थः । ॐकारानुच्चारणेनिंदाश्रवणात्तदन्यथानुपपत्त्या तदुच्चारणविधेरुन्न यनादाकांक्षायाअभावेपि विधिबलादध्याहारइतिभावः । नन्वेवमदृष्टार्थतैवस्यान्नार्थप्रत्यायकत्वं । तथाच सुधाविरोधइत्याशंकामुपक्षिप्यनि रस्यति ॥ **यद्यपीति** ॥ **दृष्टस्येति** ॥ ॐकारादोतत्वरूपार्थप्रत्ययदर्शनादितिभावः ॥ **अपेक्षितस्येति** ॥ किंतुॐमित्येतदक्षरमित्यादिवक्ष्य माणदिशेतिभावः ॥ **स्विष्टकृदिति** ॥ चतुर्थे"आश्रयिष्वविशेषेणभावोर्थःप्रतीयेत"इत्याद्यपादीयसप्तमाधिकरणे स्विष्टकृदुत्तमप्रयाजपशुपु रोडाशादीनांदृष्टार्थत्वमेवोतादृष्टार्थत्वमपीतिविशये प्रकृतदेवतास्मरणेन द्रव्यप्रतिपत्त्याचदृष्टार्थतालाभादेकेनप्रयोजनेन नैराकांक्ष्यान्नादृ ष्टार्थत्वकल्पनावकाशइतिप्राप्ते । मंत्रप्रक्षेपांशयोर्दृष्टार्थत्वेपि त्यागांशस्यदृष्टप्रयोजनाभावाददृष्टार्थत्वमावश्यकमित्यंशभेदेनोभयार्थत्वमितिसि द्धांतितंतद्वदोंकारोच्चारणस्यापि श्रुतिबलात्सामर्थ्याच्चोभयार्थत्वमित्यर्थः । ननु स्विष्टकृदादौप्रक्षेपत्यागाद्यवच्छेदकभेदेनोभयार्थत्वंदृष्टं । नैव मोंकारोच्चारणेवच्छेदकभेदःसंभवति । येनोभयार्थत्वंस्यात् । किंच यत्रादृष्टार्थत्वंकल्प्यं तत्रदृष्टार्थत्वेसंभवतिनादृष्टार्थत्वमिष्यते । यथा स्वाध्यायोध्येतव्यइत्यादौ । यत्र मानांतरवशाददृष्टार्थत्वमावश्यकं तत्रसंभवदपेक्षितमपिनदृष्टार्थत्वमाद्रियते । यथा स्तौतिशंसतीत्यादौ ।

तत्रच स्रवत्यनोंकृतमितिश्रुतिरेवमानं । यद्यप्यत्र स्रवणविशरणपरिहाररूपादृष्टफलार्थत्वंश्रुतं तथापि दृष्टस्यापेक्षितस्यार्थप्रत्ययस्यापिफलत्वसंभवान्नतत्त्यागः । एवंच स्विष्टकृदादिवदोंकारोच्चारणमुभयार्थं । ॥ ५३ ॥

गु० यामः एषुत्रिषुवक्ष्यमाणेषुसंभवतीति । तस्माद्विषयभेदःप्रदर्श्यतेनतुरूपभेदइत्यंतवाक्यसंग्रहायक्रियमाणेत्यादिनेत्यादिपदमितिद्रष्टव्यं ॥ ननुस्विष्टकृद्यागस्यमंत्रपाठ हविःप्रक्षेपत्यागरूपांशत्रयवत्त्वेनतत्रमंत्रपाठहविःप्रक्षेपयोर्द्रव्यदेवतासंस्कारकत्वेन त्यागस्यचादृष्टार्थत्वेनेत्यंशभेदेनैवदृष्टादृष्टार्थत्वेनविरोधाभावेपि प्रकृते एकस्यैवोंका

प्र० अतएव द्वितीयाद्यपादे "स्तुतशस्त्रयोस्तुसंस्कारोयाज्यावद्देवताभिधानत्वा" दितिषष्ठेधिकरणे तथैवोक्तं । तथाच प्रकृते स्रवत्यनोंकृतमितिश्रु त्याऽदृष्टार्थत्वेआवश्यके प्रत्यायनार्थत्वानवकाशः । अतःकथमोंकारोच्चारणस्योभयार्थत्वमितिचेदुच्यते । स्तौतिशंसतीत्यादौ देवताप्रकाशन रूपदृष्टप्रयोजनस्वीकारे गुणसंबंधाभिधानलक्षणस्तुतिरूपंविहन्यतइति श्रुतिबाधःस्यात् । अतस्तद्बलाददृष्टार्थत्वंत्यक्तं । उक्तंच"सत्यंदृष्टार्थ तायुक्ताश्रुतिश्चेन्नविरुध्यते । देवतास्मरणार्थत्वेस्तुतिरूपंविहन्यत"इति । प्रकृतेतु दृष्टार्थत्वाभ्युपगमे नकाचिच्छ्रुतिर्बाध्यतइति । नच साम र्थ्यस्यदौर्बल्यमितियुक्तं । नहि सूत्रेष्वाद्यंतयोरोंकारमुच्चारयेदिति प्रत्यक्षोविधिरस्ति येनदौर्बल्यंसामर्थ्यस्यस्यात् । किंत्वनुच्चारणेनिंदाश्रवणा न्यथानुपपत्त्योंकारोच्चारणविधिरुन्नेयः । सामर्थ्यंतुप्रत्यक्षं । अतः श्रुतिसामर्थ्ययोस्तुल्यबलत्वादविरोधाच्चोभयार्थत्वं । स्विष्टकृदाद्युदाहरणं तूभयार्थत्वसंभवमात्रइति नकोपिदोषः । यच्चोक्तमर्थप्रतीत्यर्थत्वे अंतेप्रयोगवैयर्थ्यमिति तत्राह ॥ **अतएवेति** ॥ अदृष्टार्थमावश्यकत्वादेवे त्यर्थः । यदप्योंकारस्योत्तरत्रानुषंगइत्यादि तदुद्धरति ॥ **नापीति** ॥ नन्वादौदृष्टार्थत्वेनोच्चरितस्य द्वितीयादावदृष्टार्थत्वेवैरूप्यंस्यादित्याशं क्याह ॥ **नचेति** ॥ **मंत्राणामिति** ॥ प्रथमे"तदर्थशास्त्रा"दितिद्वितीयपादीयांतिमाधिकरणे क्रत्वंगभूतानांमंत्राणां किमर्थप्रकाशनं दृष्ट

अतएवनांतेप्रयोगवैयर्थ्यं । नाप्युत्तरसूत्रे ओंकारार्थस्यानन्वयदोषः । तत्र दृष्टासंभ वेनकेवलादृष्टार्थत्वोपपत्तेः । नचैकस्यैकत्रोच्चारणेदृष्टार्थेअन्यत्रापितथात्वनियमः । मंत्राणांप्रयोगकाले उच्चारणस्यदृष्टार्थत्वेपि जपकालेतस्यादृष्टार्थत्वदर्शनात् ।

गु० रस्यदृष्टादृष्टार्थत्वे तद्वदंशभेदाभावाद्विरोधएवेत्यरुचेराह ॥ **मंत्राणामिति** ॥ नच एवमपिवैषम्यं । तत्रविरोधपरिहारकस्यकालभेदस्येव प्रकृतेकस्यापितस्याभावादि

SGDF
Sri Gurgeshwari Digital Foundation

प्र० द्वारमुतादृष्टद्वारमितिसंशये । उपाय.तरेणापि प्रयोगवेलायामर्थप्रकाशनसंभवात्तादर्थ्ये मंत्राण.नित्यवदाम्नानानर्थक्यापत्तेः । मंत्रप्रत्या यनाददृष्टकल्पनायामुच्चारणएवैतत्कल्पनौचित्यात् पुरुषव्यापारगोचरत्वेनतत्रैवफलाकांक्षायाःसत्त्वाददृष्टार्थामंत्राइतिप्राप्ते मंत्रोच्चारणादनु ष्ठेयस्मरणं तत्स्मरणात्प्रयोगः तस्मात्फलमित्येवं दृष्टप्रयोजनलाभान्नादृष्टकल्पनावसरः । यस्तु मंत्रेणैवस्मर्तव्यमितिनियमस्तस्य नदृष्टंकिं चित्फलमित्यदृष्टंकल्प्यते । उच्चारणस्यतु दृष्टमेवफलं । जपादौविनियुक्तानांमंत्राणामर्थप्रत्यायनानपेक्षतयाऽदृष्टार्थमुच्चारणमस्त्वितिसिद्धां तितं । अत्र यथा कर्मणिविनियुक्तानांमंत्राणामुच्चारणस्य तदनुष्ठानकालेदृष्टार्थत्वं "त्रिभिरनश्नन्पारायणैःपूतोभवती"त्यादिनापारायणादिषु नियुक्तानांतेषामेवोच्चारणस्यादृष्टार्थत्वं एवमोंकारोच्चारणस्यापि श्रुतिबलाददृष्टार्थत्वमित्यर्थः ॥ **अन्वेनंमातेति** ॥ मंत्राधिकरणएव ऊहइति गुणसूत्रेणाग्नीषोमीयाच्चोदकेनपशुगणंप्राप्ते "अन्वेनंमातामन्यतामनुपितानुभ्राते"त्यध्रिगुप्रैषगतमात्रादिपदानामूहप्रतिषेधपरमेकवचनांतंमात्रा दिपदं नबहुवचनांतरूपवृद्धिमाप्नुयादित्यर्थकं "नमातावर्धत"इतिवचनमन्यत्रोहास्तित्वावगमकतया मंत्राणामर्थविवक्षायांलिंगमुपन्यस्तं । अत्र यथा पशुगणे मात्रादिपदानामेकवचनांतानामसमवेतार्थतयोच्चारणमदृष्टार्थमेवैकस्मिन्पशौदृष्टार्थमित्येकस्यैव प्रयोगभेदेनोभयार्थत्वं तथा प्रकृतेपीत्यर्थः । अत्र यत्कश्चिदाह । पशुगणे मात्रादिपदानामेकवचनांतानामसमवेतार्थत्वे स्यात्तदुच्चारणमदृष्टार्थं । नत्वेतदस्ति । ते षांपशुपरेणैनमितिशब्देनसहान्वयाभावात् । किंत्वनुमन्यतामित्यनेनान्वयः । सच तत्तत्प्रतिसंबंधित्वाभिप्रायेण "येमानवाविगतरागपराप (व)रज्ञा नारायणंसुरगुरुंसततंस्मरंति । ध्यानेनतेनहतकिल्बिषचेतनास्ते मातुःपयोधररसंनपुनःपिबंती"तिश्लोकइवैकवचनांतत्वेप्यविरुद्धः । ॥ ५४ ॥

अन्वेनंमातेत्यादावेकवचनस्यैकपशुकेदृष्टार्थत्वेपि बहुपशुकेऽदृष्टार्थत्वदर्शनाच्च ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० अतोर्थसमवायान्नतदुच्चारणमदृष्टार्थं । नमातावर्धतइतिवचनं न्यायप्राप्तानूहानुवादमात्रं नप्राप्तोहप्रतिषेधार्थं । उक्तंच राणके"एक मात्रादिसंबंधेपशुभेदेपिमात्रादिशब्दोहस्यानाशंक्यत्वान्मात्रादिभेदेप्येकपशुसंबंधाभावात्संबंधिभेदादेवतद्भेदसिद्धेर्न्यायादेवानूहावगते"रिति । अतो वचनबलादप्यदृष्टार्थत्वासंभवात्कथमयंदृष्टांतइति । तत्रब्रूमः । साक्षात्पशुपरेदंशब्दान्वयाभावेपि बहुत्वेनावगततत्कर्मिकायामनुमति क्रियायामेकस्यमात्रादेरन्वयासंभवात्तदन्वयघटनाय बहुवचनांतत्वेनतेषांपदानामूहावश्यंभावात् । मातुःपयोधररसमित्यादिकंतु गौणतया प्युपपन्नं । नेहतदाश्रयणेप्रमाणमस्ति । एवंचात्र वचनबलादेवानूहोंगीकार्यः । तस्मादेकवचनांतानांतेषामुच्चारणं पशुगणेऽदृष्टार्थमित्यकामे नाप्याश्रयणीयमिति नादृष्टार्थानुपपत्तिरिति । राणकोक्तिस्त्वभ्युपगमवादादिनाकथंचिन्नेया । ननु बभ्रपशुके अन्वेनान्मातरोमन्यंतामिति बहुवचनांततयोहेसति नादृष्टार्थत्वमित्यतआह ॥ **नमातेति** ॥ एकवचनांतो मातेतिशब्दो मातरइतिबहुवचनांततया नवर्धतइतिश्रुत्यर्थः । अतएव महाभाष्ये"बहुगणवतुडतिसंख्ये"त्यत्र संज्ञार्थकोपिसंख्याशब्दः "ष्णांताष"डित्यत्रानुषक्तःसंज्ञिपरइत्युक्तं । अतओंकारस्योभयार्थ त्वंयुक्तमिति । यच्चोक्तमूह्यमानस्यतदनवयवत्वमिष्टमेवेति तदुद्धरति ॥ **अध्याह्रियमाणस्येति** ॥ वाक्यार्थप्रतीतिरूपैककार्यकारित्वाभा वोवाऽदृष्टरूपैककार्यकारित्वाभावोवेत्यर्थः । अन्यथा संयज्ञपतिराशिषेत्यादावध्याहृतस्यगच्छतामित्यस्य तेनसहैककार्यकारित्वंनस्यादिति भावः । एतेन मंत्रेषूह्यमानस्य संयज्ञपतिरित्यादावध्याह्रियमाणस्य तदनवयवत्वप्रसंगात् तेनसहैककार्यकारित्वाभावप्रसंगादितिसुधावाक्यार्थ

"नमातावर्धत"इतिश्रुत्या मात्रादिशब्देऊहनिषेधात् । अध्याह्रियमाण स्यापादितममंत्रावयवत्वंच मंत्रेणसहैककार्यकारित्वाभावइतिनेष्टापत्तिः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० उक्तोभवति । यद्यपि सुधायां मंत्रानवयवत्वमात्रमापादितं नामंत्रत्वमितीष्टापादनंसुपरिहरं तथाप्यापादनस्यामंत्रत्वपर्यंतत्वेपिनानुपपत्ति रिति प्रौढ्यापरिहारांतरमवोचदितिध्येयं । यदप्यवादि ओतत्वस्यनवाक्यार्थेन्वयइत्यादि तदयुक्तमित्याह ॥ **जिज्ञासेति** ॥ तृतीये "आनर्थ क्यात्तदंगे"ष्वित्याद्यपादीयाष्टमाधिकरणे"सप्तदशारत्निर्वाजपेयस्ययूप"इत्यत्रारत्निसाप्तदश्यं किमूर्ध्वपात्रद्वारा वाजपेयांगमुत यूपद्वारा पशु यागांगमितिसंशये अव्यवधानात्प्रधानत्वात्प्रकरणानुग्रहाच्च वाजपेयस्यांगं । परिमाणस्यसाक्षात्कर्मण्यनन्वयेपि तत्साधनीभूतोर्ध्वपात्रद्वा रातन्निर्वाहः । यूपशब्दोपिसादृश्यादूर्ध्वपात्रमात्रपरइतिप्राप्ते देवदत्तस्य नप्तेतिवत्परंपरासंबंधेपि षष्ठ्युपपत्त्या वाजपेयशब्देनपशुयागल क्षणानाश्रयणेपि वाजपेयस्ययूपइतिव्यपदेशसंभवात् श्रुतिसंभवे यूपशब्दे ऊर्ध्वपात्रमात्रलक्षणायाअन्याय्यत्वाच्च श्रुत्यनुग्रहायाव्यवहितसं बंधादित्रयमनादृत्य यूपद्वारापश्वंगत्वमेवांगीकर्तुंयुक्तमितिसिद्धांतितं । अत्र यथाऽरत्निसाप्तदश्यस्यप्रधानभूतवाजपेयांगत्वेनप्रतीयमानस्यापि तत्रान्वयासंभवात्तदुपसर्जनीभूतेपशुयागेन्वयः एवमोतत्वस्यापि जिज्ञासाविशेषणतयाप्रतीतस्यापि तत्रान्वयायोगेन तदुपसर्जनब्रह्मान्व यइत्यर्थः । नन्वयंन्यायोंगांगिभावविषयतया द्वितीयेरेवत्यधिकरणेभिहितइतिचेत् अत्रापि विशेषणस्यविशेष्यभूतजिज्ञासांगतया तदंगभूत

जिज्ञासान्विततयाप्रथमंप्रतीतस्यौतत्वस्यतत्रासंभवेन

गु० तिवाच्यं । ब्रह्मशब्दान्वितत्वदशायांदृष्टार्थत्वस्य तदनन्वितत्वदशायामदृष्टार्थत्वस्यचांगीकारेणविरोधादितिभावः ॥ **ब्रह्मान्वयसंभवाच्चेति** ॥ नन्वेवमुभयोरपि पूर्णत्वार्थत्वात्पूर्णंपूर्णमित्युक्तौपौनरुक्त्यमितिचेन्न । एकस्यसंज्ञात्वस्यान्यस्यचपूर्णार्थत्वस्यांगीकारेणापौनरुक्त्यात् । तथाचोक्तमृग्भाष्यटीकायां । परि॒यिदिं॒द्र॒रोदसी॒उ॒भे

प्र० ब्रह्मण्यन्वयादंगत्वस्यतदुपकारकत्वरूपत्वादितिभावः । अतएवार्थवादेत्याद्युदाहरणांतरमित्येके ॥ **अर्थवादेति** ॥ प्रत्ययोपात्तायांभावनायां करणत्वेनोपसर्जनीभूतेयागे प्रशस्तोयागइतिविशेषणत्वेनान्वयदर्शनाच्चेत्यर्थः ॥ **दंडीप्रैषानिति** ॥ मैत्रावरुणोदंडीभूत्वा मंत्रविशेषाननुवदे दित्यर्थः । अत्रदंडमैत्रावरुणसंबंधस्य प्रैषानुवचनसंबंधस्यचप्रतीयमानस्य"क्रीतेसोमे मैत्रावरुणायदंडंप्रायच्छति मैत्रावरुणःप्रेष्यतिचानु चाहे"तिवाक्याभ्यांप्राप्तत्वेनाविधेयत्वात् स्थित्वोच्चैरनवानंप्रैषानुवचनंकुर्वतोमैत्रावरुणस्यावलंबनापेक्षायां मैत्रावरुणार्थत्वेनावगतस्यदंडस्य त दुपकारद्वाराऽपेक्षायाःसत्वाच्च"लोहितोष्णीषाऋत्विजःप्रचरंती"त्यत्रेव प्रकृत्यर्थत्वेनोपसर्जनीभूतेदंडे प्रैषानुवचनसंबंधित्वेनविध्यन्वयदर्शना च्चेत्यर्थः । विशेषणपरत्वं विधेरितिशेषः ॥ **गुणपूर्तिवाचकोंकारादीति** ॥ "ओतत्ववाचीह्योंकारो वक्त्यसौतद्गुणोतता"मित्यनुव्याख्यान

"सप्तदशारत्निर्वाजपेयस्ययूप"इत्यादाविवांगावतारन्यायेनतदुपसर्जनब्रह्मान्वयसंभवाच्च । अर्थवादार्थ(स्य)प्राश स्त्यस्य यजेतेत्यत्रोपसर्जनीभूतयागविशेषणत्वदर्शनाच्च । दंडीप्रैषानन्वाहेत्यादौ दंडस्योपसर्जनस्यविध्यन्वयदर्श नाच्च । उक्तंचवार्तिके"विशेषणपरत्वंचदंडीत्यादिषुदर्शित"मिति । नच ब्रह्मशब्देनैवविषयसूचनादोंकारवैयर्थ्यं । नकेवलं जिज्ञास्ये तद्विजिज्ञासस्वतद्ब्रह्मेत्यादौ ब्रह्मपदश्रवणात्तस्यजीवाद्भिन्नत्वेनजिज्ञास्यता । किंतु"ओ मित्यक्षरमुद्गीथमुपासीते"त्यादौ जीवेष्वसंभावितगुणपूर्तिवाचकोंकारादिश्रवणादपीति युक्त्यंतरसूचकत्वात् ।

गु० अ॒र्भु॒भोजी॒र्म॑हि॒ना वि॒श्वतं॑स्सी॒मिति ऋग्व्याख्यानावसरे एकइंद्रशब्दःसंज्ञा द्वितीयःपरमैश्वर्यवचनइति ॥ **वाजपेयस्ययूपइत्यादाविवेति** ॥ अत्रयूपउपसर्जनस्या

SGDF

प्र० रीत्येतिभावः । आदिपदोपादानेन ओंकारउपलक्षणं नारायणादिपदादपीत्यपिसूचयति । नन्वोंकारस्यगुणपूर्तिवाचित्वे कथंब्रह्मपदेनान्वयः । तस्यापिगुणपूर्तिवाचित्वेन गुणपूर्णंगुणपूर्णमित्यनन्वयादितिचेन्न । “आत्मेतितूपगच्छंतिग्राहयंतिचे”त्यत्रात्मशब्दस्याऽऽवृत्तिमाश्रित्य एकस्ययौगिकत्वमपरस्यरूढत्वमुपेत्य आत्माविष्णुरात्मास्वामीत्यर्थस्य सुधायांचतुर्थाद्यपादे उक्ततया तद्वदिहाप्योंब्रह्मशब्दयोरेकस्ययौगिकत्वमपरस्यरूढत्वमाश्रित्य ओं गुणपूर्णस्य ब्रह्मणोविष्णोः जिज्ञासेत्युक्तौ दोषाभावात् । नच द्वयोर्यौगिकत्वोक्तिविरोधो द्वाभ्यांविषयलाभोक्तिविरोधश्चेतिवाच्यं । द्वयोर्विष्णौयोगरूढत्वेनैकैकस्ययोगांशंरूढ्यंशमुपादायान्वयोक्त्युपपत्तेः । ननुच सूत्रे ब्रह्मपदवदोंपदेन जिज्ञासायां कर्मकारकार्पणेह्येवंयुक्त्यंतरंसूचितंस्यान्नान्यथेतिचेन्न । अन्योन्यविशेषणविशेष्यभावेनोंब्रह्मपदयोर्जिज्ञासायां कर्मकारकार्पणेनापि विशिष्टे जिज्ञास्यतान्वयेनैतत्सूचनोपपत्तेः । इतियुक्त्यंतरेत्युपलक्षणं । “ओतत्ववाचीह्योंकारोवक्त्यसौतद्गुणोततां । सएवब्रह्मशब्दार्थोनारायणपदोदितः । सएवभर्गशब्दार्थोव्याहृतीनांचभूमतः । भावनाच्चैवसुत्वाच्चसोयंपुरुषइत्यपि । सएवसर्ववेदार्थोजिज्ञास्योयंविधीयते”इत्यनुव्याख्यानोक्तरीत्या व्याहृतिगायत्रीपुरुषसूक्तद्वारावा “तद्यथासर्वाणिपर्णानिशंकुनासंतृण्णान्येवमोंकारेणैवसर्वावाक्संतृण्णे”त्यादिश्रुत्या सुधोक्तरीत्यासाक्षादेववा मीमांसानुग्राह्यसर्ववेदरूपप्रमाणोक्त्यर्थत्वादित्यपिग्राह्यं । नन्वेवं“नारायणोसौपरमोविचिंत्य”इत्यादौश्रुतनारायणपदंहित्वा ॐकारप्रयोगेकिंबीजमित्यतआह ॥ **अदृष्टार्थमिति** ॥ नैवंनारायणादिशब्दइतिभावः । यदपि सुधायामखिलैर्वेदपाठकैरित्यादिना दृष्टांत

अदृष्टार्थमादाववश्यंप्रयोक्तव्यत्वाच्च । ॥ ५६ ॥

गु० न्यान्वयेदृष्टांतः । यागः शब्दतउपसर्जनस्यान्वये दंडस्तु प्रस्तुतेशब्दतउपसर्जनस्यप्रातिपदिकार्थस्यान्वयइतिद्रष्टव्यं । सन्न्यायरत्नावलीमतमुपपादयितुमनुवदति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० स्यसाध्यविकलतेत्यंतेनाध्ययनोपक्रमेउच्चार्यमाणस्योंकारस्यतदवयवत्वमुक्तं तदयुक्तंभाति। अध्ययनोपक्रमविरतिवैचित्र्येण तत्तत्स्थानपरित्यागेनान्यान्यस्थानेऽखिलैःपठ्यमानस्यतस्य वेदवाक्यानवयवतायाःसुप्रसिद्धत्वात् । अन्यथा अध्ययनोपक्रमवैचित्र्येपि“ओमितिब्रह्मे”त्यादिवन्नियतस्थानतयापाठप्रसंगइत्यतआह ॥ **यत्त्विति** ॥ ओंकारार्थस्यौतत्वादेरधीयमानमंत्रार्थेऽन्वयानुसंधानद्वारैवेत्यर्थः । यद्वा“ओमिति ब्राह्मणःप्रवक्ष्यन्नाहे”त्यत्रतैत्तिरीये“एवंस्वाध्यायकृच्चाहे”तिभाष्योक्तदिशार्थानुसंधानद्वारैवेत्यर्थः । एवं सुधोक्तमवयवत्वंसमर्थ्य प्राचीनानुव्याख्यानटीकाशयमाह ॥ **सन्न्यायरत्नावल्यांत्विति** ॥ तुशब्दसूचितं सुधातोविशेषमाह ॥ **ओंकारस्त्विति** ॥ पृथगोंक्रियतेइत्यस्यार्थः पृथगुच्चारितोवेदितव्यइति । ननु सूत्रानवयवत्वे ओतत्ववाचीह्योंकारइत्योंकारार्थोक्तिरसंगतेत्यतआह ॥ **तत्रेति** ॥ एतन्मतइत्यर्थः । वेदव्याख्येयोह्योंकारःप्रसिद्धः । ओंकारेणैवसर्वावाक्संतृण्णेत्यादेः । तस्यच योयंगुणौतत्वरूपोर्थः तस्य वाचकोनारायणशब्दः । तदर्थस्य सर्व

यत्त्वध्ययनोपक्रमादावुच्चार्यमाणस्याप्योंकारस्यतदवयवत्वंसुधायामेवोक्तं तदपि तदुच्चारणस्यार्थानुसंधानद्वारैवांगत्वमभिप्रेत्य । सन्न्यायरत्नावल्यांतु “ओंकारस्तुपृथगुच्चारितोवेदितव्यः । नाथशब्दवत्सूत्रोपनिबद्ध”इति सूत्रात्तत्वार्थक्यमेवोक्तं । तत्रानुव्याख्याने ओतत्ववाचीत्यादिनातदर्थकथनं सर्ववेदव्याख्येयोंकारार्थवाचकश्रीनारायणपदवाच्यस्यसर्ववेदार्थत्वाच्छास्त्रविषयत्वमित्यभिप्रेत्य । नतुसूत्रार्थतया ।

गु० **सन्न्यायरत्नेति** ॥ नन्वेवमनुव्याख्याने तत्रताराथमूलत्वमित्यादिनासूत्रावयवत्वोक्तेःकागतिरित्यतउक्तं ॥ **सर्ववेदव्याख्येयेति** ॥ अनेन ताराथौ मूले व्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेदार्थत्वान्नारायणस्यैव शास्त्रविषयत्वमितिभावेनेत्यर्थः ॥ **अन्यथेति** ॥ सूत्रावयवस्यैवार्थकथने । ननुतर्हि वचनद्वयस्यप्रामाण्यादेकस्यैवा वयवत्वानवयवत्वेकथंस्यातां । नच व्रीहियववद्विकल्पः । वस्तुनिविकल्पायोगात् । नच“विप्रतिषेधेपरं”इतिपरस्यप्राबल्यं । पूर्वस्यापिनुटो नुमचिरतृज्वद्भावेभ्यःप्राबल्यदर्शनादित्याशंक्य भिन्नविषयतयानविरोधइत्याह ॥ **यद्वेति** ॥ अयमर्थः । यथाह्यष्टाक्षरादावेकओंकारस्तदवयवः अन्यौचद्वावदृष्टार्थौ एवमाद्यसूत्रेप्येकस्तदवयवः अन्यौचाद्यंतयोरदृष्टार्थाविति त्रयओंकाराः । तत्राद्यस्यादृष्टार्थस्यतदनवयवत्वं अन्यस्य त्वोतत्वरूपार्थावबोधनेनतदवयवत्वमिति । अत्रादृष्टार्थकोंकारसत्त्वेमानमाह ॥ **स्रवतीति** ॥ दृष्टार्थकतत्सत्त्वेमानमाह ॥ **ओंकारश्चेति** ॥

अन्यथा भर्गादिपदानामपिसूत्रावयवत्वंस्यात् । सएवभर्गशब्दार्थइति तदर्थस्यापिकथनादितिभावः । यद्वा मास्तु“स्रवत्यनोंकृत”मित्यनेन साधारणोंकारस्याद्यसूत्रावयवता । तथापि “ओंकारश्चाथशब्द श्चतस्मात्प्राथमिकौक्रमात् । तद्वेतुत्वंवदंश्चापितृतीयोतउदाहृतः । अतश्चपूर्वमुच्चार्याःसर्वएतेसतांमताः” इति भाष्योदाहृतस्मृत्याऽथातश्शब्दतुल्यतयाऽऽद्यसूत्रावयवतायाउक्तत्वादनुव्याख्याने तत्रताराथमू लत्वमित्यथशब्दतुल्यतयोंकारस्याऽऽद्यसूत्रावयवत्वोक्तिर्युक्ता । एवंच सन्न्यायरत्नावली स्रवतीत्यादि श्रुतिप्रापितसाधारणोंकारविषया। सुधातु ओंकारश्चेत्यादिस्मृतिप्रापितासाधारणोंकारविषयेतिद्रष्टव्यं ।

गु० ख्येयतयायस्येतिताराथमूलं तद्भावस्ताराथमूलत्वमित्यनुव्याख्यानंव्याख्यातं । अस्मिन्पक्षे सुधासन्न्यायरत्नावल्योर्विरोधइत्यरुच्याह ॥ **यद्वेति** ॥ नन्वस्मिन्पक्षेसु

प्र० ननु श्रुतिप्रापितोंकारस्यस्मृतिविषयत्वसंभवान्नोंकारद्वयंकल्प्यमितिभावेनैकविषयत्वेप्यविरोधमाह ॥ **यद्वेति** ॥ पृथगुच्चारितो वेदि तव्यइत्यस्य सर्वसूत्रेषूहनीयः नत्वेतत्सूत्रमात्रसंबद्धइत्यर्थः । नत्वेतत्सूत्रेऽन्वयप्रतियोगिसमर्पकोनेत्यर्थः । एवंचानुव्याख्याने ओतत्वरू पार्थोक्तिरपिसंगच्छतइतिभावः । ननु“अथातश्शब्दपूर्वाणिसूत्राणिनिखिलान्यपी”तिभाष्योदाहृतस्मृतावथातःशब्दयोरेवप्राथम्यंसिद्धवत्कृ त्य“कश्चार्थश्चतयोर्विद्व”न्नित्यादिना तयोरेवप्रश्नपरिहारयोःप्रवृत्तेः“सूत्रेषुतुमहाप्राज्ञास्तावेवादौप्रयुंजत”इत्यवधारणेनोंकारव्यवच्छेदपूर्वतयो रेवादित्वोपसंहाराच्च कथमोंकारस्यादित्वमुपेत्यानुव्याख्यानेव्याख्यातमितिचेन्न । उपक्रमादिना तयोःसूत्रावयवत्वस्यैवसिद्ध्या ओंकारस्या व्यवच्छेदादोंकारस्यमांगलिकत्वादिनाऽऽदित्वं“ओंकारश्चाथशब्दश्च सिसृक्षोःपरमाद्विष्णोः स्रवत्यनोंकृतंब्रह्मे”त्याद्यनेकमानसिद्धमिति नि श्चिन्वता अथातश्शब्दमात्रविषयकप्रश्नेकृते तत्रैवपरिहारइत्युपपत्तेः । अतएव टीकायां मंगलोक्त्यादेःशब्दांतरेणसंभवादित्युक्तं । तावेवा दावित्युपसंहारस्यावधारणस्यापि ब्रह्मशब्दादिव्यवच्छेदकत्वोपपत्तेः । ब्रह्मशब्दाद्यपेक्षयातावेवेति तावादौप्रयुंजतएवेतिवा भिन्नक्रमेणाप्यु पपत्तेः । विरोधाधिकरणन्यायेनोक्तश्रुतिविरोधेन तावेवेत्युपसंहारस्योक्तार्थानुसरणावश्यंभावाच्च । ओंकारव्यवच्छेदभ्रांतिनिरासायैव सि सृक्षोरितिस्मृत्याकारस्यमुख्यादित्वमथातःशब्दयोरमुख्यादित्वंचाभिधाय अतश्चपूर्वमुच्चार्याइति पूर्वोच्चारणविधानाच्च । ननुच ओंकारस्य

यद्वा सन्न्यायरत्नावल्युक्तंपृथक्त्वमूह्यमानत्वं नतु वाक्येऽनन्वयइत्यविरोधइत्यादि द्रष्टव्यं ।

गु० धायां ओंकारश्चाथशब्दश्चेत्यादिस्मृत्युदाहरणमकृत्वा स्रवत्यनोंकृतमितिस्मृत्युदाहरणमसंगतं ओंकारद्वयकल्पनेगौरवंचेत्यरुचेराह ॥ **यद्वेति** ॥ तथाच सुधायाः सन्न्यायरत्नावलीव्याख्यानरूपत्वान्नविरोधइतिभावः । एवमोंकारस्यानुव्याख्यानोक्तंसूत्रावयवत्वंसमर्थितं । इदानीमथशब्दाभिधेयोक्तिपरमानंतर्यार्थश्चेतिभाष्यंव्यर्थे

SGDF Foundation

प्र० सूत्रावयवत्वेसूत्रव्याख्यार्थप्रवृत्तोभगवान्भाष्यकारः किमित्योंकारंहित्वाऽथादिपदान्येवव्याचख्याविति चेदत्राहुः । उत्तरप्रस्थानेव्याकरिष्यमाणत्वादिहत्यक्तं । अतएवेहानुक्तमपिवर्णकांतरंसूत्राणांतत्रोच्यतइतिवा ओंकारार्थस्यच्छांदोग्याद्युपनिषद्भाष्योदाहृतवचनैर्व्याख्यातत्वान्नेहव्याख्यायतइतिवेति । यद्वा पूर्वपक्षप्रापकाधिकार्याद्यभावरूपहेतुचतुष्टयनिरासस्याथादिपदैरेवकरणात्तेषामेवेहव्याख्यानं । तावतएवोपयोगात् । ओंकारस्यत्वदृष्टार्थतयाऽवश्यकस्य दृष्टार्थोपिसंभवतीत्यभिप्रेत्यानुव्याख्यानेव्याख्यानमिति । अथशब्दादिवैलक्षण्यज्ञापनायेहाव्याख्यानमित्यप्याहुः । यदत्र केनचित्प्रलपितं ओंकारस्यादित्वे सूत्रावयवत्वे गुणपूर्त्यर्थत्वे स्ववत्यनोंकृतंब्रह्मेत्यत्रब्रह्मपदेनसूत्रग्रहणेच माननेत्यादि तत्सर्वस्यखंडनं गुरुपादकृतन्यायमौक्तिकमालायांद्रष्टव्यं । एवमोंकारव्याख्यानंसमर्थ्य अधिकारानंतर्यार्थोयमथशब्दइत्यथशब्दव्याख्यानंसमर्थयितुमाक्षिपति ॥ **नन्विति** ॥ "मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोअथे"त्यभिधानात् प्रतिवचनाभावेन"अथभगवंतंब्रूते"त्यादाविव प्रश्नार्थत्वायोगेपि कार्त्स्न्येनब्रह्मविचारकरणस्यबाधेनतदर्थकत्वायोगेपि मंगलस्य वक्ष्यमाणदिशा वाच्यार्थत्वाभावेप्यारंभार्थत्वं किंनस्यादित्यर्थः । आदिपदादथयोगानुशासनमित्यादेर्ग्रहणं । एवमाक्षिप्तस्यस्वयंसमाधानंकरिष्यन्यदत्राद्वैतिनांपरिहारभाष्यं "तत्राथशब्दआनंतर्यार्थःपरिगृह्यते । नाधिकारार्थः । ब्रह्मजिज्ञासायाअनधिकार्यत्वात् । मंगलस्यचवाक्यार्थेसमन्वयाभावादर्थांतरप्रयुक्तएवह्यथशब्दःश्रुत्यामंगलप्रयोजनोभवति । पूर्वप्रकृतापेक्षायाश्च फलतआनंतर्याव्यतिरेका"दित्यंतंभाष्यं क्रमेणदूषयितुमनधिकार्यत्वादित्युक्तंतावद्दूषयितुम

ननु प्रतिवचनाद्यभावेनप्रश्नाद्यर्थत्वासंभवेपि"अथशब्दानुशासन"मित्यादाविवारंभरूपाधिकारार्थोऽथशब्दःकस्मान्नस्यात् । ॥ ५८ ॥

गु० अभिधेयांतरप्रसक्तेस्तत्रानुपपत्तेश्चाभावादित्याशंक्य तत्रप्रसक्तिं तत्रपरोक्तानुपपत्तिनिरासपूर्वकमनुपपत्तिमाह ॥ **ननुप्रतिवचनादीति** ॥ जिज्ञासाप्रारंभएवाथश

SGDF Sri Gargeshwari Digital Foundation

प्र० नुवदति ॥ अत्रेति ॥ इच्छायाइति ॥ जिज्ञासापदमुख्यार्थभूतज्ञानेच्छायाइत्यर्थः । अतएव भामत्यांलक्षितविचारारंभार्थत्वमथशब्दस्य भविष्यतीतिमत्वा''नचस्वार्थपरत्वस्योपपत्तौसत्यामन्यार्थकल्पना युक्ते''ति तल्लक्षकत्वमेवनिरस्तं । अवतारितंच कल्पतरौतथैवेति । परभाष्यस्याभिप्रायांतरमाशंकते ॥ नन्विति ॥ सत्यमेवं तथापि मन्मतएवेदंयुज्यते नतुत्वन्मतइतिभावेन तन्मतंदूषयितुं किं मुमुक्षुरधिकारी मोक्षःफलं उतब्रह्मज्ञानकामोधिकारी ब्रह्मज्ञानंच फलं अथापरोक्षज्ञानकामोधिकारी ब्रह्मापरोक्षज्ञानंच फलं यद्वा अप्रतिबद्धब्रह्मापरोक्षज्ञानकामोधिकारी तादृशज्ञानंच फलं अथवा ब्रह्मेतरानवच्छिन्नब्रह्मापरोक्षज्ञानकामोधिकारी तादृशज्ञानंच फलमिति पंचपक्षान्हृदिनि

अत्र परेषांभाष्यं''ब्रह्मजिज्ञासायाअनधिकार्यत्वा''दिति । तन्न । इच्छायाआरभ्यत्वासंभवेपि विवरणरीत्या जिज्ञासाशब्दस्यविचारलक्षकत्वे तस्यारभ्यत्वसंभवात् । ननु आनंतर्याभिधानमुखेन शास्त्रीयस्याधिकारिणोन्यायतःसमर्पणाभावे विचारोनिरधिकारिकोऽननुष्ठेयःस्यादित्यधिकारितद्विशेषणप्रयोजनलाभायानंतर्यार्थतेतिचेत् ।

गु० ब्दार्थःकिंनस्यादितिवदन्प्रष्टव्यः इच्छायाःप्रारंभोनामकर्तव्यता उतप्रतिपाद्यता नाद्यइत्याह ॥ जिज्ञासायाइति ॥ इच्छायाविषयसौंदर्यलभ्यत्वेनाकर्तव्यत्वादित्यर्थः । नद्वितीयइत्याह ॥ जिज्ञासायाइति ॥ पूर्वपक्षसिद्धांताभ्यामिच्छाप्रतिपादनस्यप्रत्यधिकरणमदृष्टेरित्यर्थः । इच्छायाआरभ्यत्वासंभवेपीत्येतदप्येवमेवव्याख्येयं ॥ आरभ्यत्वसंभवादिति ॥ विचारस्योत्तरत्रशास्त्रेणप्रतिपाद्यमानत्वात्तत्रारंभस्याथशब्दार्थत्वोपपत्तेरितिभावः । नन्वानंतर्यार्थत्वेपि कथमधिकारिविशेषणप्रयोजनलाभइत्यतउक्तं आनंतर्याभिधानमुखेनेति ॥ आनंतर्येऽथशब्देनोक्ते योग्यतयातत्प्रतियोगित्वेनाधिकारलाभोनान्यथेत्यर्थः । न्यायतः सूत्रतः ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० धायाद्यंतावद्दूषयति ॥ **नतावदिति** ॥ ज्ञानहेतुत्वेनविचारस्यलोकतोवगमेपि मोक्षोद्देशेनविचारविधावपूर्वविधित्वमेवस्यात्। नचेष्टापत्तिः। त्वया नियमविधित्वांगीकारादितिभावः। मोक्षःफलमित्यंशंनिरस्य मुमुक्षुरधिकारीत्यंशंनिरस्यति ॥ **मुमुक्षोरिति** ॥ विचारस्य ज्ञानद्वारे णैवमोक्षहेतुत्वादितिभावः। द्वितीयंनिरस्यति ॥ **नापीति** ॥ **अध्ययनेति** ॥ स्वाध्यायोध्येतव्यइत्यस्य ज्ञानकामाधिकारिकत्वे ज्योतिष्टो मादिवत्काम्यतैवस्यात्। इष्यतेचनित्यत्वं। अतोज्ञानकामाधिकारिकत्वं ययायुक्त्यानिरस्यते तयैवविचारविधावपि तदधिकारिकत्वस्यनि

नतावद्विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी मोक्षश्चफलमितियुक्तं। विचारोमोक्षसाधनतयानप्राप्तइतितद्विधेरपूर्ववि धित्वापातात्। मुमुक्षोरपि ज्ञानकामनां विनाविचारेऽप्रवृत्तेः। त्वन्मतेच वक्ष्यमाणरीत्या ज्ञानकामनानुपपत्तेश्च। नापि विचारविधौ ज्ञानकामोऽधिकारी ज्ञानंचफलमितियुक्तं। अध्ययनविधेर्ज्ञानकामाधिकारंनिषेधतात्वया

गु० **नतावदिति** ॥ तथाचाधिकारितद्विशेषणप्रयोजनलाभायांगीकृतमप्यानंतर्यार्थत्वंपरस्यव्यर्थमेव। वक्ष्यमाणरीत्याऽधिकारितद्विशेषणयोरेवासंभवेनाथशब्देनतत्सू चनासंभवादित्यर्थः ॥ **अपूर्वविधित्वापातादिति** ॥ तथाचविचारविधिर्नियमविधिरितिसिद्धांतभंगइतिभावः ॥ **वक्ष्यमाणेति** ॥ ज्ञातेवाज्ञानेकामनाऽज्ञातेवे त्यादिवक्ष्यमाणरीत्येत्यर्थः। ननु नविचारविधौमोक्षकामस्याधिकारित्वंमोक्षस्यचप्रयोजनत्वमंगीकुर्मः येनविचारस्यमोक्षसाधनतायाअप्राप्तत्वेनतद्विधेरपूर्वविधित्वाप त्त्यापसिद्धांतःस्यात्। किंतु ज्ञानकामोधिकारी ज्ञानंचप्रयोजनमित्येवांगीकुर्मः। तत्रच विचारस्यज्ञानहेतुतायाअन्वयव्यतिरेकाभ्यामेवप्राप्तत्वेन नापूर्वविधित्वमिति नापसिद्धांतइत्यतआह ॥ **नापीति** ॥ अध्ययनविधेर्ज्ञानकामाधिकारिकत्वनिषेधकत्वदुक्तयुक्त्यैव विचारविधेरपिज्ञानकामाधिकारिकत्वस्यनिषेद्धुंशक्यत्वान्नतत्काम स्याधिकारित्वं ज्ञानस्यचप्रयोजनत्वमित्याह ॥ **अध्ययनविधेरिति** ॥ नन्वध्ययनविधौज्ञानकामनायाअधिकारिविशेषणत्वासंभवेपि विचारविधावधिकारिविशेष

प्र० रासादित्यर्थः। तामेवयुक्तिमाह ॥ **अज्ञातइति** ॥ कामनायांधर्मिभूतज्ञानस्याज्ञाने कारणीभूतधर्मिज्ञानाभावात्कामनायाअयोगः। धर्मि भूतज्ञानस्यचज्ञाने विषयमगृहीत्वा तदवच्छिन्नज्ञानग्रहणायोगाज्ज्ञानज्ञानेन विषयभूतधर्म्यादेरपिग्रहणात्सिद्धे इच्छाविरहेण धर्मिज्ञानादौ नकामनासंभवतीत्यर्थः। उक्तदोषपरिजिहीर्षया तृतीयचतुर्थौशंकते ॥ **नन्विति** ॥ यदा परोक्षज्ञानेनज्ञातंब्रह्म तदा तदवच्छिन्नापरोक्ष ज्ञानेकामना यदात्वपरोक्षज्ञानेनज्ञातं तदातदवच्छिन्नाप्रतिबद्धापरोक्षज्ञानेकामना। एवंच धर्मिभूतज्ञानज्ञानस्य परोक्षत्वेऽपरोक्षत्वेवा नक

ऽज्ञातेज्ञानेकामनायोगात्ज्ञानज्ञानेच तदवच्छेदकविषयस्यापिज्ञातत्वात्पुनस्तज्ज्ञानेकामनायोगादितियुक्त्या ज्ञानकामनानिषेधात्। ननु परोक्षज्ञानेकामनाऽयोगेपि परोक्षेण। प्रतिबद्धापरोक्षेणवाज्ञानेनज्ञातब्रह्माव च्छिन्नेअपरोक्षज्ञाने अप्रतिबद्धापरोक्षज्ञानेवा कामना श्रवणरूपविचारविध्यधिकारिविशेषणमितिचेन्न।

गु० णत्वंसंभवत्येव। नचज्ञानकामनायास्त्वयानिषिद्धत्वात्कथंतदंगीकारइतिवाच्यं। मयापरोक्षज्ञानकामनायाएवनिषिद्धत्वात्। नचपरोक्षज्ञानकामनानिषेधेतन्न्यायेना परोक्षज्ञानकामनापिदूषयितुंशक्येतिवाच्यं। ज्ञातएवापरोक्षज्ञानेकामनांगीकारात्। नचज्ञानावच्छेदकत्वेनविषयस्यापिज्ञातत्वात्पुनःकामनानुपपत्तिरेवेतिवाच्यं। अ परोक्षज्ञानस्यपरोक्षतोज्ञातस्यैवकामनाविषयत्वांगीकारेणपरोक्षज्ञानावच्छेदकब्रह्मणोपिपरोक्षतएवज्ञानप्राप्त्यातदापरोक्ष्याभावात्। यद्वा अप्रतिबद्धापरोक्षज्ञानकामना याअधिकारिविशेषणत्वमप्रतिबद्धापरोक्षज्ञानस्यैवचप्रयोजनत्वमभ्युपगच्छामः। नच धर्मिज्ञानाभावेनाज्ञाते अप्रतिबद्धापरोक्षज्ञानेकामनायाअयोगात्तज्ज्ञानेचतद वच्छेदकविषयस्यापिज्ञातत्वात्पुनःकामनानुपपत्तिरेवेतिवाच्यं। प्रतिबद्धापरोक्षज्ञानेनैवज्ञाते अप्रतिबद्धापरोक्षज्ञाने कामनांगीकारात्तदवच्छेदकविषयस्य प्रतिबद्धापरो क्षज्ञानप्राप्तावप्यप्रतिबद्धापरोक्षज्ञानस्यासिद्ध्या तत्कामनोपपत्तेरिति पूर्वोक्तदोषपरिजिहीर्षयातृतीयचतुर्थौशंकते ॥ **नन्विति** ॥ यदा परोक्षज्ञानेनज्ञातं तदातदव

SGDF Sri Gurgeshwari Digital Foundation

प्र० श्चिद्दोषइतिभावः । श्रवणरूपेति परस्रीत्या । एतच्च श्रवणसाध्यस्येत्यादिवक्ष्यमाणदूषणसौकर्याय । पक्षद्वयमप्येकेनदोषेणनिराह ॥ **इच्छायाइति** ॥ कामनायाइच्छात्वादितिभावः । एवंचेच्छाविषयकमपरोक्षज्ञानंस्वविषयमिच्छांगृह्णत् इच्छाविषयंज्ञानंतदवच्छेदकंब्रह्मचाविषयीकृत्यनेच्छांविषयीकर्तुमलमिति इच्छाविषयापरोक्षज्ञानस्यैवब्रह्मापरोक्षज्ञानतया स्वविषयेऽप्रतिबद्धत्वेनब्रह्मविषयकाप्रतिबद्धापरोक्षतयाचेच्छासमसमयवर्तिनोविचारसाध्यत्वानुपपत्तेरित्यर्थः । नकेवलंपरोक्षज्ञानस्येत्यपेरर्थः । पंचमंकल्पमाशंक्यदोषमाह ॥ **अन्येति** ॥ तथाच नोक्तदोषइतिभावः ॥ **तादृशेति** ॥ अत्रापिनपूर्वोक्तोदोषःपततीतिभावः । नन्वस्तुतर्हिब्रह्मान्यानवच्छिन्नपरोक्षज्ञानकामोधिकारीतादृशपरोक्षज्ञानंफलमितिचेन्न । अध्ययनविधावप्येतादृशार्थज्ञानकामाधिकारिकत्वसंभवेतत्खंडनानुपपत्तेः । अध्ययनविधेर्नित्यत्वायोगाच्चेतिभावः । अन्यानवच्छिन्नब्रह्मापरोक्षेकामनातादृशाप्रतिबद्धापरोक्षेवाकामनाश्रवणरूपविचारविध्यधिकारिविशेषणमित्यत्रदोषांतरमाह ॥ **किंचेति** ॥

इच्छायाअपरोक्षत्वात्तदवच्छेदकज्ञानावच्छेदकविषयस्याप्यपरोक्षत्वादिच्छासमकालवृत्त्यपरोक्षज्ञानस्यविचारसाध्यत्वानुपपत्तेः । अन्यानवच्छेदेनापरोक्षज्ञानस्यविचारसाध्यत्वेचतादृशपरोक्षज्ञानेकामना तस्यविचारसाध्यत्वंचास्तु । किंचश्रवणसाध्यस्यपरोक्षज्ञानस्यप्रतिबद्धा

गु० च्छिन्नापरोक्षज्ञानेकामना । यदात्वपरोक्षज्ञानेनज्ञातं तदा तदवच्छिन्नाप्रतिबद्धापरोक्षज्ञानेकामना । एवंच धर्मिभूतज्ञानस्यपरोक्षत्वे अपरोक्षत्वेवा नकश्चिद्दोषइति योजना ॥ **इच्छायाइति** ॥ ब्रह्मापरोक्षतो जानीयामित्येवंरूपेच्छायाइत्यर्थः । ज्ञानस्यापिवस्तुतोपरोक्षत्वेपि भट्टमतेज्ञाततानुमेयत्वात् परेण व्यवहारेभट्टनयइत्यंगीकुर्वता ज्ञानस्याऽऽपरोक्ष्यानभ्युपगमात् इच्छायाआपरोक्ष्यस्यसर्वाविवादात् प्रकृतज्ञानपरित्यागेनेच्छाग्रहणमेवकृतमितिज्ञेयं । प्रतिबद्धेत्यादिनोक्तंदूषयति ॥ ॥ ६० ॥
अन्यानवच्छेदेनेति ॥ **तादृशेति** ॥ अन्यानवच्छिन्नेत्यर्थः । पक्षद्वयमसाधारणदूषणेनदूषयित्वा साधारणदोषेणापिदूषयति ॥ **किंचेति** ॥ ननु श्रवणसाध्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० तस्मात् श्रवणादित्यर्थः । तदधीनायाः परोक्षब्रह्मज्ञानाधीनाया अवच्छेदकस्यब्रह्मणोऽज्ञानेतदवच्छिन्नापरोक्षज्ञानादौकामनायोगादिति भावः । ननुश्रवणात्प्रागापातधीदशायांतादृशंज्ञानमस्तीत्याशंक्यनिरस्यति ॥ **नचेति** ॥ तादृशंज्ञानंनिश्चयरूपमुतसंदेहरूपमितिविकल्पौ हृदिनिधायाद्यआह ॥ **तस्यामिति** ॥ आपातदशायामित्यर्थः । तदेवोपपादयति ॥ **नहीति** ॥ द्वितीयेत्वाह ॥ **संदेहेति** ॥ तदुपपादयति ॥ **निश्चितइति** ॥ तस्यां निश्चितकामनायां । किंचयदिपरोक्षज्ञानकामनांनिषिध्यापरोक्षज्ञानएवकामनोच्येततर्हिधर्ममीमांसायांनको

परोक्षज्ञानस्यवातस्मात्प्रागसत्त्वेनतदधीनायाअपरोक्षज्ञानादौकामनायाःश्रवणविध्यधिकारिविशेषणत्वायोगः । नचकामनाहेतुपरोक्षज्ञानादिकंश्रवणात्प्रागापातप्रतीतिदशायामेवसिद्धमितिवाच्यं । तस्यांदशायांनिश्चयरूपस्यतस्याभावात् । नहिवेदांतवेद्यंसर्वंपरोक्षज्ञानादिनानिश्चित्यापरोक्षाद्यर्थंमीमांसायांप्रवर्तते । संदेहरूपस्यचतस्यतस्यांदशायांभावेपिसंदेहेनज्ञातब्रह्मावच्छिन्नपरोक्षनिश्चयएवकामनोपपत्तिः । निश्चितेनिश्चयकामनायाअदर्शनेन तस्यांनिश्चयविषयविषयकसंदेहस्यैवहेतुत्वात् ।

गु० परोक्षज्ञानस्यप्रतिबद्धापरोक्षज्ञानस्यवा श्रवणात्प्रागसत्त्वेपि विचारात्प्राक्सत्त्वंसंभवत्येव । श्रवणस्यविचाररूपत्वाभावात् । तथाच तदधीनायाअपरोक्षज्ञानकामनाया विचारविध्यधिकारिविशेषणत्वंभविष्यतीति नोक्तदोषइतिचेन्न । स्यादेतत् यद्येवंश्रवणविचारयोर्भेदःपरेणाभ्युपगतःस्यात् । नैतदस्ति । यतः श्रवणमेवविचारइत्येव हिपरेणाभ्युपगम्यते । अतएव पूर्वं श्रवणरूपविचारविध्यधिकारिविशेषणमित्युक्तं । तथाच नकाप्यनुपपत्तिरितिभावः । श्रवणात्प्रागापातप्रतीतिदशायांसिद्धंपरोक्षज्ञानादिकं किंनिश्चयरूपंवा संदेहरूपंवा । नाद्यइत्याह ॥ **तस्यांदशायामिति** ॥ निश्चयस्य साधकबाधकभावाभावसाध्यत्वेन तत्सत्त्वे तस्यैवविचारत्वापत्त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० पिप्रवर्तेत । धर्मापरोक्षज्ञानकामनायोगात् । नच“ज्ञात्वाकर्मसमाचरे”दितिज्ञानोत्तरकर्मविधायकेनविधिना विचारंविनावेदार्थज्ञाना संभवाद्विचारस्यकर्तव्यत्वंबोधितमिति ततएवतत्रप्रवृत्तिर्नतुधर्मज्ञानकामनाधीनेतिवाच्यं । एवमपितज्ज्ञानकामनाआवश्यकीतिभावेनाह ॥ **किंचेति** ॥ अवच्छिन्नज्ञानकामनायामवच्छेदकज्ञानस्यावश्यकतयापरोक्षेणावच्छेदकेनिश्चितेपरोक्षएवकामनायुक्तेत्याशंकांदोषांतरेणनिर

किंचत्वत्पक्षे धर्मविचारस्योत्तरक्रतुविधिप्रयुक्तत्वेपि तज्ज्ञानकामनाहीनस्यविचारेऽप्रवृत्तेः धर्मादौचाप रोक्षज्ञानकामनानुपपत्तेः परोक्षज्ञानेचत्वयाकाम नानंगीकारात् धर्मादिविचारेनप्रवृत्तिःस्यात् ।

गु० तदभावेच साधकबाधकभावाभावेनसंशयस्यन्यायप्राप्तत्वेन निश्चयरूपस्यतस्यासंभवादितिभावः । अतएव तस्यांदशायामित्युक्तं । नद्वितीयइत्याह ॥ **संदेहरूप स्येति** ॥ किंचपरोक्षज्ञानेकामनानंगीकारेऽध्ययनविधेरर्थज्ञानार्थत्वाभावेनादृष्टार्थत्वापत्त्या धर्मविचारस्याध्ययनप्रयुक्तत्वाभावादकर्तव्यत्वंस्यादित्याह ॥ **किंचेति** ॥ नन्वध्ययनस्यादृष्टार्थत्वेन धर्मविचारस्यतत्प्रयुक्तत्वाभावेपि नाकर्तव्यत्वं । उत्तरविधिवाक्यैस्तावज्ज्योतिष्टोमादेःस्वर्गादिसाधनत्वंप्रतिपाद्यते । तथाचाननुष्ठिता नांस्वर्गादिसाधनत्वानुपपत्त्यातदनुष्ठानमावश्यकं । तच्चज्ञानाभावे नसंभवति । ज्ञानंचविचारमंतराऽनुपपन्नंतमाक्षिपतीति धर्मविचारस्यकर्तव्यत्वसिद्धिरित्यत आह ॥ **उत्तरेति** ॥ ज्योतिष्टोमेनेत्यादेरुत्तरविधित्वंच स्वाध्यायोऽध्येतव्यइत्यध्ययनविध्यपेक्षयाज्ञेयं । ननु नहिवेदांतवेद्यंसर्वमित्युक्तमयुक्तं बाधकाभावेनतथा नियमसंभवात् । तथाच परोक्षनिश्चयेनज्ञातब्रह्मावच्छिन्नेऽपरोक्षज्ञानेकामनायाःसंभवेपि निश्चयज्ञातधर्मावच्छिन्नपरोक्षज्ञानकामनैवनिषिध्यतइत्यतआह ॥

प्र० स्यति ॥ **किंचेति** ॥ नचेष्टापत्तिः । अनुभवविरोधादितिभावः । कथंतर्हिकामनेत्यतआह ॥ **तस्मादिति** ॥ कामनायाःकाम्यमानज्ञान विषयविषयकनिश्चयपूर्वकत्वायोगादित्यर्थः । तांप्रति विशेषज्ञानकामनांप्रति । तदेव सामान्यज्ञानमेव । तदुल्लंघने दर्शनातिक्रमणे । सा अवच्छेदकज्ञानस्यहेतुता । विवरणमतदूषणमुपसंहरति ॥ **तस्मादिति** ॥ उक्तदूषणगणादित्यर्थः ॥ **ज्ञानइति** ॥ **परोक्षेऽपरोक्षेवेत्यर्थः** ॥ **मोक्षइति** ॥ ज्ञानकामनापूर्वकत्वान्मोक्षकामनायाइतिभावः ॥ **विचारेति** ॥ यावद्विचारेनप्रवर्ततेतावद्विचारसाध्यपरोक्षादिनिश्चयाभावा

किंचसंदिग्धस्थाण्वादिविशेषापरोक्षज्ञानकामनातद्विशेषपरोक्षधीपूर्विकास्यात् । तस्मात्सामान्य तोज्ञातेविशेषज्ञानकामनायादर्शनात्तांप्रतितदेवहेतुः । अवच्छिन्नज्ञानेअवच्छेदकज्ञानस्यहेतुतापि हिदर्शनादेवेतितदुल्लंघनेसापिनस्यात् । तस्मात्परोक्षज्ञानेकामनांनिषेधतःपरस्यमतेज्ञानेमोक्षेवावि चारप्रवृत्तिपर्यंतकामनाऽयोगात्तत्कामस्याधिकारिणस्तस्यफलस्यचसूचनंनानंतर्यार्थेनाप्यथशब्देन ।

गु० किंचेति ॥ ननु ज्ञानकामस्यवामोक्षकामस्यवाऽधिकारित्वस्य मोक्षस्यज्ञानस्यवाप्रयोजनत्वस्य भवत्सिद्धांतेंगीकारात्तन्निराकरणेऽपसिद्धांतइत्याशंकामुपसंहारव्याजेन परिहरति ॥ **तस्मादिति** ॥ ननु विशेषज्ञाने ज्ञातेवाकामनाऽज्ञातेवा । नाद्यः । ज्ञानावच्छेदकत्वेनविशेषाणामपिज्ञातत्वेनकामनानुपपत्तेः । नद्वितीयः । धर्मिज्ञानाभावे नाज्ञातेज्ञानेकामनायोगादितिचेन्न । विशेषाणामपिसामान्यतोज्ञानांगीकारेणतदुपपत्तेः । तथादर्शनात् । अन्यथा ज्ञानस्यज्ञातत्वेपि विषयस्यानवगतत्वस्यैववक्तुंशक्यत्वेन ज्ञातएवज्ञानेकामनोपपत्तेः । तत्रावच्छिन्नज्ञानेऽवच्छेदकज्ञानस्यहेतुत्वस्यापि दर्शनबलेनैवकल्प्यत्वेनैकत्रदर्शनोल्लंघने इतरत्रापितदापत्तेरित्याह ॥ **अवच्छिन्नज्ञा नइति** ॥ प्रकृताथशब्दार्थविचारासंगतिमाशंक्य पूर्वप्रकृतमुपसंहरति ॥ **तस्मादिति** ॥ **विचारप्रवृत्तिपर्यंतेति** ॥ मोक्षमात्रकामनायाःसत्त्वेपि ज्ञानकामनां

SGDF Foundation

तात्पर्य- प्र० त्तदधीनायाअपरोक्षज्ञानकामनायाअयोगादित्यर्थः। तथाचविचारेप्रवृत्त्यनंतरंपरोक्षादिनिश्चयस्तस्मिन्सत्यपरोक्षादौकामनयाप्रवृत्तिरित्य चंद्रिका.
॥ ६२ ॥ न्योन्याश्रयःसूचितोभवति। तत्कामस्य ज्ञानादिकामस्य। तस्य ज्ञानादेः। तथाचनाधिकारादिसूचनायानंतर्यार्थत्वमथशब्दस्येत्यधिकारार्थत्व
मेवविवरणमतेयुक्तमिति। भामतीमतेप्यधिकारार्थत्वंयुक्तमित्याह ॥ भामतीति ॥ तन्मतेह्येवमर्थः। ब्रह्मजिज्ञासा ब्रह्मज्ञानेच्छा भवितुं प्र. प्र.
युक्तेतिश्रौतोर्थः। ज्ञानेच्छाहिसंदिग्धेविषयेनिश्चयायभवति निश्चयश्चविचारसाध्यइतिविचारकर्तव्यत्वमार्थिकोर्थइति। तथाचविचारःकर्त १।१
व्यइतिवदारभ्यतइत्यन्वयःसंभवतीत्यर्थः। भामत्यामदृष्टेराह ॥ यथोक्तमिति ॥ कर्तव्यपदवैषम्यमाशंक्यहेत्वभावेननिरस्यति ॥ नचेति ॥
नकेवलंनियामकाभावः दृश्यतेचतथान्वयइत्याह ॥ सौर्यमिति ॥ द्वितीये"संस्कारश्चाप्रकरणेऽकर्मशब्दत्वा"दितितृतीयपादीयपंचमाधि
करणे"सौर्यचरुंनिर्वपेद्ब्रह्मवर्चसकाम"इत्यत्रदार्शपौर्णमासिकेनिर्वापेचरुगुणविधिःकिंवानिर्वापरूपकर्मांतरविधिरुतयागविधिरितिसंदेहे गौर
वान्नकर्मांतरविधिः। अश्रुतत्वान्नयागविधिः। असतियागेदेवतासंबंधायोगात्सौर्यमितितेजोदेवत्यत्वादाग्नेयस्यानुवादः। चरुशब्दःस्थालीव
चनः। स्थाल्यांनिर्वपेदित्यर्थः। ब्रह्मवर्चसकामइति। सर्वाकाम्यवाक्यप्राप्तफलानुवादः। अतोदार्शपौर्णमासिकेनिर्वापेचरुगुणविधिरिति

भामतीरीत्याजिज्ञासाशब्दस्येच्छावाचकत्वेप्यार्थिकार्थेनविचारेणाध्याहृतस्यकर्तव्यपदस्येवश्रुतस्याधिकारार्थाथ
शब्दस्याप्यन्वयोस्तु। यथोक्तंकल्पतरौ"आर्थिकेचास्मिन्नर्थेकर्तव्यपदाध्याहार"इति। नचार्थिकार्थेनाध्याहृतस्यै
वान्वयोनतुश्रुतस्येत्यत्रनियामकमस्ति "सौर्यचरुंनिर्वपेद्ब्रह्मवर्चसकाम"इत्यादौद्रव्यदेवतासंबंधाक्षिप्तेनयागेन ॥ ६२ ॥

गु० तरिततदविनाभूतविचारेप्रवृत्तेरसंभवेन विचारसाध्यज्ञानसाध्योमोक्षोमेभूयादिति विशिष्टकामनाऽसंभवादित्यर्थः ॥ **भामतीरीत्येति** ॥ अनेनेच्छायाआरभ्यत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्राप्ते नित्यवच्छ्रुतस्यफलपदस्यपाक्षिकानुवादत्वानर्थक्ययोरयोगात्फलविशिष्टंकर्मांतरंयावदुक्तंविधीयतइत्याद्याशंकानिरासपूर्वकंद्वितीयशं
कामुत्थाप्यनिर्वापेदेवतान्वयायोगेनतत्पदवैयर्थ्यप्रसंगाद्द्रव्यदेवतासंबंधानुमितोयागोविधीयते निर्वपतिस्तुतत्रचोदकप्राप्तानुवादइतिसिद्धां
तितं । अत्रयथानिर्वपेदितिश्रुतस्यविधिप्रत्ययस्यसौर्यमितिद्रव्यदेवतासंबंधाक्षिप्तेनयागेनान्वयस्तथाप्रकृतेपीत्यर्थः ॥ **यदाग्नेयइति** ॥ "यदा
ग्नेयोष्टाकपालोमावास्यायांपौर्णमास्यांचाच्युतोभवती"त्यत्र भावयितुर्व्यापारंविनास्वयमेवभावनायोगाद्भवतीत्युक्तभवनेनप्रयोजककर्तृव्यापार
भूतभावनायाआक्षेपात्तयाचभवतीतिलेट्प्रत्ययरूपविधेरन्वयदर्शनादित्यर्थः । अत्राह । आक्षिप्तेनश्रुतस्यान्वये नसौर्यवाक्यमुदाहरणं ।
तत्राक्षिप्तस्ययागस्यभावनाविशेषणत्वेनाक्षिप्तविधिविधेयत्वावश्यंभावाच्छ्रुतविध्यन्वयानभ्युपगमाद्विशिष्टविधिस्थलेप्रत्ययार्थतयाश्रुतस्यविधेस्त
दर्थभूतायांसकलविशेषणविशिष्टायांभावनायामेवान्वयेविशेषणानितदाक्षिप्तैर्विधिभिर्विधीयंतइतिवार्तिककारमतानुवर्तिनांपंथाः । अतएवा
नेकेषामर्थानांविधिसंस्पर्शावश्यंभावेपिविशिष्टविधिस्थलेनवाक्यभेदः । प्राप्ताकर्मानुवादेनगुणविधानस्थलेऽनेकगुणश्रवणेश्रुतस्यविधेरेकत्रसं
क्रांतौजातायामर्थापत्तिपरिक्षयेणेतरविध्याक्षेपानुन्मेषात्तत्रापिश्रुतस्यविधेर्व्यापारस्यवाच्यतयावाक्यभेदइतिव्यवस्थासंगच्छते । एवंचसकल
स्यभावनाविशेषणस्याक्षिप्तविधिविधेयत्वनियमान्नश्रुतस्याक्षिप्तेनसहान्वयेसौर्यवाक्यमुदाहरणं । अधिकरणंत्वाक्षिप्तविधिविधेयत्वाभिप्राय
मस्तु । यदपियदाग्नेयइत्यादितदपिन । भवत्युक्तभवनाक्षिप्तभावनायाःविध्यन्वयानर्हत्वात् । प्रयोजककर्तृव्यापारेहिप्रयोज्यकर्तुर्भाव्यत्वनि
यमेनभवनकर्तुराग्नेयाष्टाकपालशब्दाभ्यामुक्तस्यपुरोडाशस्यद्रव्यदेवतासंबंधाक्षिप्तस्ययागस्यवाऽपुमर्थस्यैवतस्यांभावनायामन्वयोवाच्यः । न

"यदाग्नेयोष्टाकपालोभवती"त्यादौभवनाक्षिप्तभावनयाचविधिप्रत्ययान्वयदर्शनाच्च ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ह्यपुमर्थभाव्यकाभावनाविधामन्वयमर्हति । चेतनप्रवर्तनात्मकस्यविधेःपुमर्थभाव्यकभावनान्वयापेक्षितत्वादिति । उच्यते । श्रुतस्यैवविधेर्विशेषणेष्ववश्यंव्यापारोवाच्यः । तेषामाक्षिप्तविधिविधेयत्वेआक्षेपेणविशेषणविधौसिद्धेविशिष्टविधिसिद्धिः तत्सिद्धौचविशेषणविध्याक्षेपसिद्धिरित्यन्योन्याश्रयापत्तिरितिभामत्युक्तेस्तद्रीत्याऽऽग्नेयोदाहरणस्ययुक्तत्वात् । पश्चात्कल्प्यस्यापिविशेषणविधेःप्राक्प्रवृत्तत्वेनाकल्प्यत्वान्नेतरेतराश्रयापत्तिरितिपौर्णमास्यधिकरणराणकोक्तरीत्याऽऽक्षिप्तविधिविधेयत्वेपिनदोषः । यागेनविध्यन्वयदर्शनादित्यस्यविधिप्रत्ययार्थभूतप्रवर्तनारूपविध्यन्वयदर्शनादितिनार्थः किंतुतदर्थभूतायांभावनायांविध्यविरुद्धायामवच्छेदकत्वेनान्वयदर्शनादित्यर्थः । अंगीकृतश्चायमन्वयःसौर्येवाक्ये । तत्रहिप्रत्ययार्थभूतायाभावनायाधात्वर्थानवच्छेदेविध्यन्वयायोगात्तदर्थमवच्छेदकधात्वर्थाकांक्षायांसमानपदोपात्तस्यनिर्वापस्यान्वये तत्रदेवतान्वयायोगेनतत्पदवैयर्थ्यापत्तेस्तत्सार्थकत्वायद्रव्यदेवतासंबंधाक्षिप्तोयागस्तत्रावच्छेदकत्वेनान्वीयते ततश्चतद्विशिष्टाभावनाश्रुतेनविधिनाविधिनाविधीयते । तदाक्षिप्तेनविधिनायागोविधीयतइति । यदपियदाग्नेयोदाहरणकरणेदूषणंतन्नकृत्स्नस्वाध्यायप्रयोजनपर्यवसानापादकाध्ययनविधिप्रसादलब्धफलभावनाक्षिप्तयागभावनायाभवतीतिपंचमलकाररूपविधिप्रत्ययार्थभूतप्रवर्तनात्मकविध्यन्वयदर्शनादित्यर्थादितिदिक् ॥ **तस्मादिति** ॥ परोक्तपरिहारासंभवादित्यर्थः । स्वयंसमाधत्ते ॥ **उच्यतइत्यादिना** ॥ **अधिकार्यादीति** ॥ आनंतर्यार्थएवतत्सूचना

तस्मादधिकारार्थएवाथशब्दोस्त्विति । उच्यते । आरभ्यतइत्यनुक्त्वाप्यारब्धेइदमनेनारब्धमितिज्ञातुंशक्यत्वादधिकार्याद्यसूचनापाताच्चनारंभार्थः । ॥ ६३ ॥

गु० संभवेपीति पूर्वमभ्युपगम्योक्तमितिज्ञेयं ॥ **अधिकार्याद्यसूचनापातादिति** ॥ आनंतर्याभिधानमुखेनशास्त्रीयस्याधिकारिणोन्यायतःसमर्पणाभावे विचारोनिरधि

प्र० दितिभावः । एतेन "त्वामस्मिवच्मिविदुषांसमवायोत्रतिष्ठति । आत्मीयांमतिमास्थायस्थितिमत्रविधेहितत्" [काव्यप्रकाशे ४ उल्लासे] इत्यादौ प्रतिज्ञापूर्ववचनदर्शनेनोच्यमानस्यावश्यंकर्तव्यत्वमभिव्यनक्तीत्यालंकारिकरीत्यात्रप्रारंभवचनंप्रारंभोपयुक्ताधिकार्यादिसद्भावमभिव्यनक्तीति प्रारंभार्थत्वेप्यथशब्दोर्थवानितिकेनचिदुक्तंनिरस्तं । आनंतर्याभिधानमुखेनविशिष्याधिकार्यादिलाभेसतिसामान्यतस्तल्लाभोक्त्ययोगात् । "आनंतर्येधिकारस्ये"तिस्मृतिविरोधाच्चेति । कथंतर्हिमहाभाष्येआरंभार्थत्वमथशब्दस्योक्तमतआह ॥ **अथशब्देति** ॥ **अंगांतरेति** ॥ शिक्षाकल्पादितः ॥ **अगत्येति** ॥ तद्वाच्यार्थांतराभावेनेत्यर्थः । नन्वारंभार्थत्वासंभवेपिमंगळार्थकत्वंस्यादित्याशंक्यनिरस्यति ॥ **मंगळेति**॥ अयुक्तमित्यन्वयः । प्रयोगप्रत्ययाभ्यांहिशब्दार्थयोःसंबंधः । नचाथशब्दोच्चारणेशक्त्यालक्षणयावामंगलंप्रतीयते । येनतत्प्रत्यायकत्वमथशब्दस्यस्यादित्यर्थः ॥ **तस्मादिति** ॥ "ॐकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा । कंठंभित्त्वाविनिर्यातौतस्मान्मांगलिकावुभा" वितिस्मृतौप्रयोजनार्थकठक्प्रत्ययांतप्रयोगेणमंगलफलकत्वोक्तेरित्यर्थः । स्वयंसमाधायान्योक्तंनिरस्यति ॥ **अन्येषामिति** ॥ भाष्योक्तसमन्वयाभावेव्या

अथशब्दानुशासनमित्यादौतुव्याकरणेऽगांतरव्यावृत्तस्याधिकारिविशेषणस्याभावेनतदानंतर्यार्थत्वासंभवान्मंगळप्रयोजनकोथशब्दोऽगत्याऽऽरंभार्थः । मंगळप्रत्यायकत्वंत्वथशब्दस्याथेत्यनेनमंगळस्याप्रतीतेरधिकार्याद्यसूचनापातात् "तस्मान्मांगलिकावुभौ" इतिस्मृतावोंकाराथशब्दयोर्मंगलफलकत्वोक्तेश्चायुक्तं । अन्येषांभाष्येतु "मंगलस्यचवाक्यार्थेसमन्वयाभावा" दित्युक्तं ।

गु० कारिकोऽननुष्ठेयःस्यादित्यर्थः ॥ **अंगांतरव्यावृत्तस्येति** ॥ अंगांतरव्यावृत्ताथशब्दग्रहणप्रयोजकविशेषस्येत्यर्थः । अथापिस्यान्मंगळार्थएवायमथशब्दइत्यतआह ॥ **मंगळेति** ॥ **अन्योन्याश्रयादिति** ॥ ननुमंगळस्याथशब्दवाच्यत्वलक्ष्यत्वयोरभावेनापदार्थत्वान्नवाक्यार्थेसमन्वयइत्येवविवक्षितत्वान्नान्योन्याश्रयइतिचेन्न ।

SGDF Foundation

प्र० ख्यातृद्वयोक्तंहेतुद्वयमपिक्रमेणनिराह ॥ **अपदार्थत्वेति** ॥ भाष्येहिमंगलस्यापदार्थत्वंसाध्यंकृत्वावाक्यार्थेसमन्वयाभावोहेतूकृतः । भामत्यांतुसमन्वयाभावंसाध्यंकृत्वाऽपदार्थत्वंहेतूकृतं । तथाचहेतुसिद्धौसाध्यसिद्धिःसाध्यसिद्धौहेतुसिद्धिरित्यन्योन्याश्रयइत्यर्थः ॥ **नापीति** ॥ विवरणोक्तोहेतुरित्यन्वयः ॥ **कर्त्राद्यंतरेति** ॥ "शांतोदांत"इत्यादिश्रुत्याशमादिमतोधिकारिणोब्रह्मणश्चकर्मणःसत्त्वादित्यर्थः ॥ **अर्थवादत्वेति** ॥ तस्यवैयर्थ्यादितिभावः ॥ **सधूमइति** ॥ सधूमत्वादित्यर्थः ॥ **ईक्षतेरिति** ॥ प्रधानंनजगत्कारणं अशब्दंहितत् कारणवाक्याप्रतिपाद्यत्वादित्यर्थोक्तेरितिभावः ॥ **अन्वयेति** ॥ जिज्ञासाकर्तव्यत्वेहेतुसमर्पकत्वेनमंगलस्यान्वयसंभवादथशब्दार्थत्वंमंगलस्यस्यादेवेति । वाक्यार्थेसमन्वयाभावादितिभाष्योक्तोहेतुरप्रसिद्धइतिभावः । अतएवभामत्यांमंगलहेतुत्वात्प्रत्यहंब्रह्मजिज्ञासेतिसूत्रार्थःसंपद्यतइत्युक्तं । प्रकृ

तन्न । अपदार्थत्वहेतौसमन्वयाभावेभामत्यां"पदार्थएवहिवाक्यार्थेसमन्वीयते । सचवाच्योलक्ष्योवा । नचेहमंगलमथशब्दस्यवाच्यंलक्ष्यंवे"त्युक्तस्यापदार्थत्वस्यहेतुत्वेन्योन्याश्रयापातात् । नापि"नतावज्जिज्ञासायामंगलंकर्त्रादिभावेनवैयधिकरण्येनान्वेति । कर्त्रादिभावे मानाभावात् । कर्त्राद्यंतरभावाच्च । नापिसामानाधिकरण्येन । जिज्ञासामंगळमित्यर्थवादत्वप्रसंगा"दितिविवरणोक्तोहेतुः । सधूमोगिरिः साग्निकइतिवत्"ईक्षतेर्नाशब्द"मित्यत्रत्वत्पक्षेऽशब्दमितिवच्चमंगलत्वात्कर्तव्येतिहेतुत्वेनान्वयोपपत्तेः ।

गु० वाक्यार्थेसमन्वयाभावादितिहेतुपरत्वेनभाष्योक्त्यस्वारस्यादितिभावः ॥ **कर्त्रादिभावेनेति** ॥ कर्तृत्वादिनेत्यर्थः । एवमुत्तरत्रापिद्रष्टव्यं । ननु जिज्ञासायाःक्रियारूपत्वात् क्रियायाश्चकर्त्रादिसापेक्षत्वात् प्रकृतेचकर्त्राद्यंतराभावेनक्रियात्वान्यथानुपपत्त्यैवमंगळस्यैवकर्त्रादित्वंकल्पनीयमितिकथंमानाभावइत्यतआह ॥ **कर्त्राद्यंतरेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तापेक्षार्थत्वंवाप्रकृतादर्थादर्थांतरपरत्वंवाथशब्दस्यकिंनस्यादित्याशंक्यस्वयंसमाधास्यन्परोक्तंसमाधिमनूद्यनिरस्यति ॥ **यदपीत्यादिना** ॥ तस्येत्यस्यभामत्यनुसारेणयद्यर्थइत्यन्वयः । एवंहिभामत्यांव्याख्यातं"अयमथशब्दोविनैवानंतर्यार्थत्वंपूर्वप्रकृतापेक्षार्थोभविष्यति । यथाशब्दोनित्योथानित्यइत्यादौपूर्वप्रकृतंशब्दइतिपदमपेक्ष्यप्रथमपक्षोपन्यासपूर्वकंपक्षांतरोपन्यासेपूर्वप्रकृतापेक्षोथशब्दइत्याशंकानिरासकमिदंभाष्य"मित्यवतार्य नवयमानंतर्यार्थतांव्यसनितयारोचयामहे । किंतुब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये । साचपूर्वप्रकृतापेक्षत्वेप्यथशब्दस्य सिद्ध्यतीतिव्यर्थआनंतर्यार्थत्वावधारणाग्रहोस्माकमिति ॥ **तर्हीति** ॥ आनंतर्यार्थत्वाग्रहाभावइत्यर्थः । पूर्वप्रकृतापेक्षोवाऽऽनंतर्यार्थोवेत्येवोक्तिस्स्यादितिभावः । नन्वतएवारुच्याभामत्यां "परमार्थतस्तुकल्पांतरोपन्यासेपूर्वप्रकृतापेक्षा । नचेहकल्पांतरोपन्यासइतिपारिशेष्यादा

एतेनब्रह्मजिज्ञासायांमंगळत्वंप्रसिद्धतरत्वान्नैववक्तव्यमितिनिरस्तं । प्रसिद्धस्यैवहेतूकर्तव्यत्वात् । यदपि"पूर्वप्रकृतापेक्षायाश्चफलतआनंतर्याव्यतिरेका"दितिपरेषांभाष्यंतस्यभामत्यनुसारेणाथशब्दस्यपूर्वप्रकृतापेक्षार्थत्वाशंकानिरासायानंतर्यार्थइवपूर्वप्रकृतापेक्षार्थत्वेपिजिज्ञासाहेतुभूतस्यपूर्वप्रकृतस्यलाभात् फलाभेदाद्व्यर्थआनंतर्यार्थत्वाग्रहोस्माकमितियद्यर्थः तर्हिभाष्ये"आनंतर्यार्थः"इत्युक्त्ययुक्तिः ।

गु० तथाचान्यथैवोपपत्त्यानान्यथानुपपत्तिर्मानमितिभावः । आकांक्षाभावान्नकर्त्रादिभावेनान्वयइत्यभिप्रेत्यवाह ॥ **कर्त्राद्यंतरेति** ॥ **जिज्ञासामंगळमितीति** ॥ जिज्ञासामंगळमितिप्रशंसापरतयार्थवादत्वप्रसंगादित्यर्थः । नचार्थवादतास्येयं । सूत्रस्यवाक्यार्थनिर्णयापेक्षितन्यायसूचकत्वादित्यर्थः । विवरणोक्तहेतुरित्यस्य नापी

SGDF
Sri Gargeshwari Digital Foundation

प्र० नंतर्यार्थएवयुक्त"इत्युक्तमित्यतआह ॥ **सूत्रइति** ॥ **अशक्यशंकमिति** ॥ अनेनैतच्छंकानिरासायप्रवृत्तोभाष्यकारस्तद्भाष्यव्याख्यार्थंप्रवृत्तोभवांश्चात्यंतानभिज्ञइत्युक्तंभवति । किंचाथशब्दस्यपूर्वप्रकृतापेक्षार्थत्वस्यकाप्यभावात्प्रकृतेतच्छंकात्यंतानुचितेत्यभिप्रेत्याह ॥ **किंचकिंनित्यइति** ॥ सा पूर्वप्रकृतापेक्षा किंतुपूर्वप्रकृतादर्थादर्थांतरत्वमितिभावः । कुतएवमित्यतआह ॥ **अन्यथेति** ॥ आदिपदात् आहोस्वित् यद्वा इत्यादिग्रहः ॥ **नापीति** ॥ पूर्वप्रकृतादर्थादर्थांतरत्वाशंकानिरासायविवरणोक्तोभिप्रायइत्यन्वयः । प्रकृतादर्थांतरत्वंहियस्मात्कस्माच्चित्प्रकृतानुपयुक्तादर्थांतरपरत्वंवोतविचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणरूपात्प्रकृताद्वेतिविकल्प्याद्येव्यर्थमित्युत्तरं । तस्यावचनेनापि

सूत्रेकल्पांतरानुपन्यासेनपूर्वप्रकृतापेक्षार्थत्वमशक्यशंकंच । किंचकिंनित्यःशब्दोथानित्यइत्यादिकल्पांतरोपन्यासेपिसामानाधिकरण्यार्थमनुषक्तस्यधर्मिणोऽनित्यइत्यत्रापेक्षायामपिनसाथशब्दार्थः । अन्यथा उतानित्यइत्यादावुतादेरपिपूर्वप्रकृतापेक्षार्थत्वंस्यात् । नापिप्रकृतादर्थादर्थांतरत्वाशंकानिरासाय । अर्थांतरत्वंहियतःकुतश्चित्प्रकृताच्चेद्व्यर्थं पुष्कलकारणाच्चे

गु० तिपूर्वेणान्वयः ॥ **सूत्रेकल्पांतरानुपन्यासेनेति** ॥ किंनित्यःशब्दःअथानित्यइत्यादावनित्यइत्यादेरिवाथातोब्रह्मजिज्ञासेतिसूत्रेउत्तरत्रकल्पांतरानुपन्यासात् अतोब्रह्मजिज्ञासेत्यादिशब्दैरप्रतीतेः कल्पांतराभावेचतत्संबंधिन्याःप्रकृतापेक्षायाएवायोगादित्यर्थः । एवंभामत्यभिहितंभाष्याभिप्रायंप्रदूष्यविवरणोक्तमपिदूषयितुमाह ॥ **नापीति** ॥ प्रकृतादर्थादर्थांतरपरत्वशंकानिरासायेतिशंकाग्रंथस्यायमर्थः । नानंतर्यमथशब्दार्थः । प्रकृतादर्थादर्थांतरस्यापितदर्थत्वात् । नचतस्यतदर्थत्वेमानाभावः । यत्रार्थांतरेऽभिहितेर्थांतरविवक्षयाब्रवीतिअथैवंमन्यसइति तत्रार्थांतरत्वविवक्षयाप्यथशब्दःकिंनस्यादिति ॥ **अर्थांतरत्वंहीति** ॥ यत्किंचित्पूर्वप्रकृतंप्रकृ

प्र० सिद्धत्वादितिभावः । द्वितीयेत्वाह ॥ **आनंतर्याभिधानमिति** ॥ पूर्वप्रकृतस्यकारणत्वंह्यथशब्दस्यानंतर्यार्थत्वेसत्येवलभ्यते । आनंतर्यस्यकारणानंतर्येमुख्यत्वेनानंतर्यप्रतियोगिनःप्रकृतस्यकारणत्वलाभादितिभावः । ननुप्रकृतादर्थादर्थांतरत्वस्यापिवक्तव्यत्वादावृत्तिःस्यादित्यतआह ॥ **आनंतर्याभिधानेचेति** ॥ एतदनंतरमिदमित्युक्त्यैवार्थांतरत्वस्यलाभात्पूर्वापरभावस्यार्थभेदप्रयुक्तत्वादित्यर्थः । आनंतर्यार्थत्वेऽथशब्दस्योक्तेयथानंतर्यप्रतियोगिनःप्रकृतस्यकारणत्वलाभस्तथाप्रकृतादर्थादर्थांतरपरत्वेपियतःकुतश्चित्प्रकृतादर्थादर्थांतरपरत्वेप्रकृतानुपयोगेनवैयर्थ्यादेवविचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणादेवार्थांतरत्वस्यप्राप्त्याप्रकृतस्यहेतुत्वंलभ्यतइतितदर्थंनानंतर्यार्थत्वाग्रहःकार्यइत्याह ॥ **आनंतर्याभिधानेपीति** ॥ अयंचनिर्वाहस्त्वापितुल्यइत्याह ॥ **अन्यथेति** ॥ एवमवचनइत्यर्थः । आनंतर्यमपिद्वेधा । यस्मात्कस्माच्चित्

दानंतर्याभिधानंविनाकारणत्वासिद्धिः । आनंतर्याभिधानेचप्रकृतादर्थादर्थांतरत्वस्यांतर्णीततयासिद्धिरितिविवरणोक्तोभिप्रायः । आनंतर्यानभिधानेपिवैयर्थ्यपरिहारार्थमेवप्रकृतस्यहेतुत्वसिद्धेः । अन्यथाआनंतर्यार्थत्वेपितत्प्रतियोगिनोहेतुत्वासिद्धिः ।

गु० तशब्दार्थः किंवाकार्यान्नियतप्राक्क्षणवृत्तितयाप्रकृतप्रकृतशब्दार्थइतिविकल्पार्थः ॥ **व्यर्थमिति** ॥ अथशब्दस्यतदर्थत्वमितिशेषः । तावतापितस्यहेतुत्वाभावादितिभावः ॥ **आनंतर्याभिधानमिति** ॥ नियतप्राक्क्षणवर्तीदमितिज्ञानंतदास्यात्यदातदनंतरंनियमेनार्थांतरमुत्पद्यते । तथाचावश्यापेक्षितमानंतर्यमथशब्देनाभिधीयतां । अर्थांतरस्यचार्थात्सिद्धिरितिनतद्ग्रहणंयुक्तमितिभावः ॥ **अंतर्णीततयेति** ॥ स्वस्यस्वानंतर्यासंभवेनानंतर्यधर्मिप्रतियोगिनोर्भेदसिद्धिरितिभावः । विवरणोक्तोभिप्रायइत्यस्यनापीतिपूर्वेणान्वयः ॥ **अन्यथेति** ॥ अथशब्दस्यानंतर्यार्थत्वेपिनपुष्कलकारणानंतर्यंसिध्यति । पुष्कलकारणानंतर्यस्याथशब्दादप्रतीतेरिति

SGDF Sri Gargeshwari Digital Foundation

प्र० विचारकर्तव्यतोपयुक्तकारणकलापाद्वा । तत्राद्यस्यवैयर्थ्यमेवोत्तरं । सर्वस्यापिलोकस्यकिंचित्करणानंतरमेवकस्यचित्करणस्यस्वभावसिद्धत्वात् । अतोवैयर्थ्यपरिहारार्थमेवद्वितीयमेष्टव्यमित्याशयः । ननुनास्माकमेवंनिर्वाहः । साक्षादेवहेतुत्वलाभात् । कारणानंतर्यंहिमुख्यानंतर्यं । कार्येकारणानंतर्यस्याव्यभिचारित्वात् । विजातीयेनाव्यवहितत्वाच्च । तथाचमुख्यामुख्ययोर्मुख्येकार्यसंप्रत्ययइतिन्यायेनानंतर्यवदन्नथशब्दोमुख्यंकारणानंतर्यमेववदतीत्यानंतर्यार्थकेनैवाथशब्देनप्रकृतस्यहेतुत्वंलभ्यतइतिशंकते ॥ नन्विति ॥ सत्यमव्यवहितमानंतर्यंमुख्यानंतर्यमिति । तद्यदिकार्यकारणयोरेवस्यात्तदास्यादेवंत्वदुक्तं । नचैवं । चैत्रोगतोथमैत्रआगतइत्यादावकारणकार्ययोश्चैत्रगमनमैत्रागमनयोरप्यव्यवहितानंतर्यदर्शनेनमुख्यमानंतर्यंवदन्नप्ययमथशब्दोनकारणानंतर्यंवक्तुंशक्नोतीतिभावेनपरिहरति ॥ अव्यवधेरिति ॥ अकारणाच्चैत्रगमनात्तदकार्येमैत्रागमनादौयदानंतर्यंतत्राप्यव्यवधानस्यसंभवादित्यर्थः । अतएव"हलोनंतराःसंयोगः"इत्यादौअनंतराअव्यवहिताइत्यव्यवहितानंतर्यंहलामाहेतिभावः ॥ अमुख्यत्वेति ॥ यद्यव्यभिचारित्वमव्यवधानवन्मुख्यत्वेहेतुस्तर्हिव्यवहितानंतर्येयथाऽमुख्यत्वाभिमान

ननुकारणादानंतर्यंमुख्यमव्यवधेरव्यभिचाराच्चेतितदेवाथशब्दवाच्यमितिचेन्न । अव्यवधेरकारणादानंतर्येपिसंभवात् । अव्यभिचारित्वंतुनमुख्यत्वेहेतुः । चैत्रोगतोनंतरमेवमैत्रआगत इत्यादावमुख्यत्वाभिमानाभावात् । अनन्यथासिद्धनियतानंतरभावित्वादिरूपेकार्यलक्षणादौ

गु० भावः ॥ ननुकारणादानंतर्यमिति ॥ पुष्कलकारणात्फलस्यानंतर्यमित्यर्थः । सामग्रीक्षणादुत्तरक्षणेकार्यस्यावश्यंभावनियमान्नकालव्यवहितत्वंव्यभिचरितत्वंच । अहेतुफलयोस्त्वानंतर्यंकदाचिद्व्यभिचरतिकदाचिद्व्यवधीयतेचेतिगौणमेवस्यात् । तथाचहेतुफलयोरेवानंतर्यस्यमुख्यत्वात्तदेवाथशब्देनोत्सर्गतःप्रतीयते । गौणमुख्य

SGDF Sri Gargeshwari Digital Foundation

प्र० स्तथाचैत्रोगतइत्यादौस्यादित्यर्थः ॥ **नियतपदेति** ॥ अव्यभिचरितानंतर्यरूपमुख्यानंतर्यस्यैवग्रहणसंभवेनानियतानंतर्यवतिरासभादाव तिव्याप्त्यभावादितिभावः । नचेष्टापत्तिः । सर्वतांत्रिकविरोधादितिभावः । किंचयद्येवमपिकारणानंतर्यंमुख्यमित्युच्येततर्ह्यर्थांतरत्वमपिन यतःकुतश्चित्प्रकृतान्मुख्यं किंत्वर्थांतरंप्रतिकारणभूतात्प्रकृतादेवेतिसाक्षादेवप्रकृतस्यहेतुत्वंसुवचमित्याह ॥ **कारणस्येति** ॥ तथाचपूर्वप्रकृ तादर्थादर्थांतरपरत्वेप्यथशब्दस्यानंतर्यार्थत्वंविनैवपूर्वप्रकृतस्यविचारकर्तव्यतायांहेतुत्वंलभ्यतइतिभावः । यदप्यानंतर्याभिधानेऽर्थांतरत्वस्यां तर्णीततयासिद्धिरितितदपिसममित्याह ॥ **पूर्वेति** ॥ कथंतर्हिप्रकृतादर्थादर्थांतरपरत्वस्यनिरासइत्यतस्त्रिभिर्हेतुभिस्तमाह ॥ **तस्मादिति** ॥

नियतपदानर्थक्यप्रसंगाच्च । कारणस्यप्रकृतत्वंमुख्यमित्यपिसुवचत्वाच्च । पूर्वप्रकृतादर्थांतरत्वाभि धानेप्यानंतर्यार्थस्यांतर्णीततयासिद्धेश्च । तस्मादस्यैवादिसूत्रत्वेनपूर्वप्रकृतार्थसांकर्यशंकानुदयात्

गु० योर्मुख्येसंप्रत्ययादितिभावः ॥ **नियतपदानर्थक्यप्रसंगादिति** ॥ आनंतर्यशब्दस्यकारणानंतर्यएवमुख्यत्वेनातिव्याप्तेरेवाभावात् । अमुख्यार्थमादायलक्षणस्या तिव्याप्तिमाशंक्यतत्परिहारेपदांतरोपादानस्यचासांप्रदायिकत्वान्नियतपदवैयर्थ्यमितिभावः । किंचप्रकृतादर्थादर्थांतरपरत्वंप्रदूष्यानंतर्यार्थवर्णनमयुक्तं । व्यर्थत्वात् । नचतस्यहेतुत्वलाभार्थमानंतर्यार्थत्वग्रहः । आनंतर्यार्थत्वेपितस्यहेतुत्वालाभात् । नचकारणानंतर्यमेवमुख्यमितितल्लाभइतिवाच्यं । तथासतिकारणस्यप्रकृतत्वंमुख्यमित्य पिवक्तुंशक्यत्वेनप्रकृतत्वोक्त्यैवतस्यहेतुत्वलाभेनार्थांतरत्वस्यैवसंभवादित्याह ॥ **कारणस्यप्रकृतत्वमिति** ॥ तथाचानंतर्याभिधानेपिप्रकृतादर्थादर्थांतरपरत्वमात्रोक्त्या कारणत्वसिद्धेर्व्यर्थआनंतर्यार्थत्वग्रहइतिभावः । यद्यानंतर्याभिधानेप्रकृतादर्थादर्थांतरत्वस्यांतर्णीततयासिद्धेर्नार्थांतरत्वं तर्हि प्रकृतेतस्यपूर्वत्वोक्त्यैवतदपेक्षयार्थांतरस्यत दानंतर्यलाभः तदभावेप्रकृतस्यपूर्वत्वायोगादित्यानंतर्यस्याप्यंतर्णीतत्वेनसिद्धत्वान्नतदर्थत्वमित्याह ॥ **पूर्वप्रकृतादिति** ॥ नन्वेवं भवतामपिपक्षे अथशब्दस्यप्रकृतादर्था

SGDF
Sri Gargeshwari Digital Foundation

प्र० परोक्तपरिहारस्यायोगादित्यर्थः ॥ **अधिकार्यादीति** ॥ आनंतर्यएवतत्सूचनादितिभावः । एवं‘‘अधिकारानंतर्यार्थश्चे’’तिभाष्येआनंतर्यार्थ इत्यंशंसमर्थ्योधिकारेत्यंशमपिसमर्थयितुंप्रसक्तंप्रतिक्षिपति ॥ **एवमिति** ॥ मात्रपदेनशमादिव्युदासः ॥ **शांतइति** ॥ ‘‘तस्मादेवंविच्छांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्ये’’दितिश्रुतौशांतादिर्भूत्वापरमात्मानंस्वस्थितंविद्यादितिशमादीनांब्रह्मज्ञानशेषतोक्तेरिति भावः ॥ **कर्मविचारादिति** ॥ आनंतर्यमित्यस्यानुषंगः । तदनंतरं कर्मविचारानंतरं ॥ **श्रुतीति** ॥ पूर्वतंत्रेपंचमेआद्यपादेश्रुत्यादीनि क्रमेणषट्प्रमाणानिनिरूपितानि । तथाहि । ‘‘श्रुतिलक्षणमानुपूर्व्यंतत्प्रमाणत्वात्’’इत्याद्यनये‘‘हृदयस्याग्रेवद्यति अथजिह्वायाः अथवक्षसः । वेदंकृत्वावेदिंकरोति । अध्वर्युर्गृहपतिंदीक्षयित्वाब्रह्माणंदीक्षयती’’त्यादावथादिश्रुतिर्हृदयावदानाद्यानंतर्येमानमित्युक्तं । तथा‘‘अर्थाच्चे’’तिद्वि

‘‘आनंतर्येऽधिकारस्ये’’तिभाष्योदाहृतस्मृतिविरोधादधिकार्याद्यसूचनप्रसंगाच्च नप्रकृतादर्थादर्थांतरमथशब्दस्यार्थः । एवमानंतर्यार्थत्वेस्थितेनतावत्तदानंतर्यमध्ययनमात्रात् । ‘‘शांतोदांत’’इत्यादिश्रुतिविरोधात् । नापिकर्मविचारात् । तदनंतरंब्रह्मजिज्ञासेत्यत्रक्रमेश्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिक्रमाणांतत्प्रमाणानामन्यतमस्याभावात् ।

गु० दर्थांतरपरत्वस्यैवसंभवेनतत्परित्यागेनानंतर्यार्थत्वोक्तेर्भाष्यकारीयायाअयुक्तत्वापत्त्यातदर्थत्वंनिराकर्तव्यं । तच्चममापिसममित्याशंकामुपसंहारव्याजेनपरिहरति ॥ **तस्मादिति** ॥ एवमथशब्दस्यारंभाद्यर्थत्वंनिरस्यानंतर्यार्थत्वंस्थापयित्वा तदानंतर्यंनपरोक्ताध्ययनादिभ्यःकिंतुभाष्यकृदुक्ताधिकारादेवेतिवक्तुमाह ॥ **एवमिति** ॥ ॥ ६७ ॥

प्र० तीयनये‘‘अग्निहोत्रंजुहोति यवागूंपचती’’त्यादावग्निहोत्रस्ययवागूसाध्यत्वेनयवागूपाकानंतरमेवाग्निहोत्रकरणेसामर्थ्यंशब्दितमर्थरूपंमानमुक्तं । तथा‘‘क्रमेणवानियम्येतक्रत्वेकत्वेतद्गुणत्वा’’दितिचतुर्थनये‘‘समिधोयजति तनूनपातंयजति इडोयजति बर्हिर्यजति स्वाहाकारंयजती’’त्यादौपाठक्रमएवानुष्ठानक्रमेमानमित्युक्तं । तथा‘‘स्थानाच्चोत्पत्तिसंयोगा’’दितिषष्ठनयेज्योतिष्टोमविकृतिभूतेसाद्यस्कनामकेयागविशेषे‘‘सहपशूनालभत’’इतिश्रुत्यासहानुष्ठेयस्याग्नीषोमीयसवनीयानुबंध्यरूपपशुत्रयस्यमध्येपूर्वंसवनीयस्यानुष्ठाने‘‘आश्विनंग्रहंगृहीत्वासवनीयंपशुमुपाकरोती’’त्युत्पत्तिवाक्यावगताश्विनग्रहणसामीप्यरूपस्थानंप्रमाणमुक्तं । तथा ‘‘मुख्यक्रमेणवांगानांतदर्थत्वा’’दितिसप्तमेनये‘‘सारस्वतौभवत’’इति विहिते‘‘पुमांस्त्रिये’’त्येकशेषेणसरस्वतीदेवताकसरस्वद्देवताककर्मद्वयनिर्वापाद्यनुष्ठानेप्रधानक्रमापरपर्यायोमुख्यक्रमोमानमुक्तं । तथा‘‘प्रवृत्त्यातुल्यकालानांगुणानांतदुपक्रमा’’दितिपंचमनये‘‘सप्तदशप्राजापत्यान्पशूनालभते’’इतिवाक्येविहितसप्तदशपशुद्रव्यकसप्तदशयागांगपश्वंगतयाविहितेषुप्रोक्षणोपाकरणपर्यग्निकरणादिधर्मेषुसप्तदशपशुद्रव्येप्रथममत्रपशौप्रोक्षणमनंतरमत्रेतिविशेषेमानाभावेनेच्छयैवकचित्पशावादौ प्रोक्षणेनुष्ठितेप्रथमप्रवृत्तप्रोक्षणानुरोधेनतत्रैवोपाकरणाद्यनुष्ठानेनियामकःप्रोक्षणप्रवृत्तिक्रमइत्युक्तं । तेषुनैकमपिकर्मविचारानंतरंब्रह्मविचार इत्यत्रास्तीत्यर्थः । विस्तरस्तुगुरुपादकृतन्यायमौक्तिकमालायांध्येयः ॥ **विस्तृतमिति** ॥ तर्कतांडवादाविति भावः । अतोधिकारानंतर्यमे

विस्तृतंचैतदन्यत्र । नापिपरेषांभाष्योक्तात्‘‘नित्यानित्यवस्तुविवेकइहामुत्रार्थभोगविरागःशमदमादिसंपत्तिर्मुमुक्षुत्वंचे’’तिसाधनचतुष्टयसंपद्रूपादधिकारात् । तथाहि ।

गु० ॥ **तथाहीति** ॥ अत्रधर्मविशिष्टधर्मिनिर्णयाभिप्रायेणप्रथमःकल्पः धर्ममात्रनिर्णयाभिप्रायेणद्वितीयः एकधर्मविशिष्टधर्मिनिर्णयेसत्यन्यधर्ममात्रनिर्णया

SGDF Sri Gargeshwari Digital Foundation

प्र० वाथशब्दार्थइतिस्थितं । तत्राधिकारोपि“भक्तिमान्परमेविष्णा”वित्यादिभाष्यकारोक्तएवनान्यइतिसमर्थयितुंपरोक्तमनूद्यदूषयति ॥ **ना**
पीति ॥ भाष्योक्तादधिकारादित्यन्वयः । आनंतर्यमित्यनुषंगः । नित्यानित्यविवेकंतावद्दूषयितुंभामत्यनुसारेणत्रेधाविकल्पयति ॥ **नित्येति** ॥
विचारेति ॥ तेनापिब्रह्मैकमेवनित्यमितिज्ञानस्यैवसंपाद्यत्वादितिभावः । ननुविचारोनोक्तज्ञानार्थः । किंत्विदंनिर्गुणमिदंसगुणमितिविवेका
र्थोऽखंडेब्रह्मणिसमन्वयार्थोवा भेदभ्रमनिवृत्त्याद्यर्थोवेत्याशंक्यनिराह ॥ **नचेति** ॥ तदर्थस्येति । सगुणनिर्गुणविवेकादिर्हिब्रह्मैकमेवसत्य

नित्यानित्यवस्तुविवेकोनामकिंब्रह्मैवनित्यमन्यदनित्यमितिविवेकः किंवात्मानात्म
समुदायेनित्यत्वानित्यत्वेस्तोधर्मौ तयोश्चधर्मिभ्यांभवितव्यमितिनिश्चयः । यद्वा
ऽनित्यस्यसंसारस्यकिंचिदधिष्ठानमस्तीतिनिश्चयोनतुब्रह्मेति । नाद्यः । ज्ञातव्यस्य
प्रागेवज्ञाततयाविचारवैफल्यात् । नचसगुणनिर्गुणविवेकाखंडसमन्वयाद्यर्थंशा
स्त्रमितियुक्तं । भामत्यांनित्यानित्यशब्दयोःसत्यानृतपरत्वेनोक्ततयाब्रह्मैवसत्यम
न्यदनृतमितिविवेकस्यप्रागेवसिद्धौतदर्थस्यसगुणनिर्गुणविवेकादेरप्यनपेक्षितत्वात् ।

गु० भिप्रायेणतृतीयइतिपरप्रातिकूल्यौत्कव्यानुरोधेनविकल्पक्रमइतिध्येयं । सगुणनिर्गुणविवेकार्थंवाअखंडेसमन्वयार्थंवान्यार्थंवाशास्त्रमितिसंकीर्णोक्तंपक्षत्रयंसाधारण

SGDF
Sri Gargeshwari Digital Foundation

प्र० मितिज्ञानाय । तद्यदि विचारात्प्रागेवसिद्धंतदातदर्थकसगुणनिर्गुणविवेकाद्यर्थविचारोऽव्यर्थइत्यर्थः । तदुपपादयति ॥ **नहीति** ॥ विचारो हितात्पर्यावधारणाय । तच्चज्ञेयनिश्चयाय । ज्ञेयंचब्रह्मैकमेवसत्यमन्यन्मिथ्येत्येतदेव । तच्चप्रागेवज्ञातमितिविचारोऽव्यर्थइति । ननुभेदास त्यत्वमभेदसत्यत्वंचज्ञेयं । तच्चप्राङ्ज्ञातमित्यतआह ॥ **जीवेति** ॥ तदभेदस्य जीवब्रह्माभेदस्य ॥ **तन्मात्रेणेति** ॥ यद्यन्यदनित्यंब्रह्मैक मेवनित्यमितिनिश्चिनुयात्तदाह्यन्यपरित्यागेनब्रह्मविचारेप्रवृत्तिर्युज्यते । यदातुनित्यत्वानित्यत्वरूपंधर्मद्वयमस्तितदाश्रयौचद्वावितिनिश्चयमा त्रंतदाकथमात्मविचारेप्रवृत्तिः । किंतुकिंवानित्यत्वाद्यधिष्ठानमितिसंदिहानोनकापिप्रवर्तेतेतिभावः । किंचभामतीमतेविवेकस्यविरागहेतुतो क्तेरुक्तविवेकवतःपुंसःपशुपुत्राद्यैहिकभोगेस्वर्गाद्यामुष्मिकभोगेचकथंविरागःस्यादित्याह ॥ **ऐहिकेति** ॥ तत्रविरागस्यतदनित्यताज्ञानसाध्य त्वादितिभावः ॥ **शास्त्रवैयर्थ्यादिति** ॥ विचारशास्त्रमप्यसत्यसंसाराधिष्ठानस्यसत्यस्यब्रह्मणोनब्रह्मत्वप्रकारकज्ञानजनकं । अखंडार्थत्व

नहिश्रुतितात्पर्यधीःस्वरूपेणापेक्षिता । किंतुज्ञेयनिश्चायकतया । नचोक्तादन्यन्मुमुक्षुज्ञेयमस्ति । जीवब्रह्मभे दस्यापिब्रह्मातिरिक्ततयातन्मिथ्यात्वस्य तदभेदस्यापिब्रह्ममात्रतयातत्सत्त्वस्यापितेनैवनिश्चितत्वाच्च । नद्वि तीयः । तन्मात्रेणानात्मप्रहाणेनात्मविचारेप्रवृत्त्ययोगात् । ऐहिकामुष्मिकभोगविरागायोगाच्च । नांत्यः । ब्रह्मशब्दार्थत्वादेःप्रकारस्याज्ञानेपिवस्तुतोब्रह्मणोऽनात्माधिष्ठानस्यशास्त्रवेद्यस्यज्ञातत्वेनशास्त्रवैयर्थ्यात् ।

गु० दोषेणनिराकृत्य द्वितीयमसाधारणदोषेणापिदूषयति ॥ **नहीति** ॥ तृतीयमसाधारणदोषेणदूषयति ॥ **नचेति** ॥ ननुचजीवब्रह्मभेदस्यमिथ्यात्वंवाजीवब्रह्माभेदस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० हानेः । किंत्वधिष्ठानमात्रज्ञानजनकं । तच्चज्ञानंशास्त्रात्प्रागेवास्तीतिव्यर्थंशास्त्रमित्यर्थः ॥ **नचेति** ॥ एतन्मतेचानात्मप्रहाणेनात्मविचारेप्र वृत्तिरैहिकादिभोगविरागश्चयुज्यतइतिभावः ॥ **प्रतिपन्नेति** ॥ "प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्यमिथ्यात्वस्ये"तिविवरणोक्तेस्तादृ शस्यचासत्यत्वापत्त्याशशशृंगादेरिवध्वंसायोगादितिभावः ॥ **अन्योन्याश्रयादिति** ॥ अबाध्यत्वंहिबाध्यत्वाभावः बाध्यत्वंचाबाध्यत्वाभा

नच विवरणरीत्यानित्यानित्यशब्दौध्वंसप्रतियोग्यप्रतियोगिपरौ । ततश्चब्रह्मज्ञान फलंस्थायि कर्मादिफलंत्वस्थायीतिविवेकोनित्यानित्यविवेकइतियुक्तं । प्रतिपन्नोपा धावत्यंताभावप्रतियोगित्वरूपबाध्यत्ववतोऽनात्मनोध्वंसप्रतियोगित्वायोगात् । पा रमार्थिकत्वाकारेणात्यंताभावःस्वरूपेणतुध्वंसइतिचेन्न । पारमार्थिकत्वस्याबाध्यत्व रूपत्वेनान्योन्याश्रयात् । तथात्यंताभावप्रतियोगित्वस्यनिराकारेब्रह्मण्यपिसंभवाच्च ।

गु० सत्यत्वंवामुमुक्षुज्ञेयंतिष्ठत्वेवेति कथंमुमुक्षुज्ञेयमन्यन्नास्तीत्युच्यतइत्यतआह ॥ **जीवब्रह्मभेदस्यापीति** ॥ **प्रतिपन्नोपाधाविति** ॥ यदत्यंताभावप्रतियोगि नतद्ध्वंसप्रतियोगि यद्ध्वंसप्रतियोगि नदत्यंताभावप्रतियोगीतिव्याप्तेर्विद्यमानत्वेन कर्मादिफलस्यापिनित्यत्वमेवांगीकर्तव्यमिति ब्रह्मज्ञानफलंनित्यं कर्मादिज्ञानफल मनित्यमितिविवेकोनित्यानित्यविवेकोनेत्यर्थः । ननुस्वरूपेणात्यंताभावप्रतियोगित्वेस्वरूपेणध्वंसप्रतियोगित्वस्यविरुद्धत्वेपि तेनरूपेणात्यंताभावप्रतियोगित्वस्यानंगीका रात् स्वरूपेणध्वंसप्रतियोगित्वसंभवेनोक्तनित्यानित्यवस्तुविवेकोपपत्तिरित्यभिप्रायेणशंकते ॥ **पारमार्थिकत्वाकारेणेति** ॥ **तथेति** ॥ पारमार्थिकत्वेनेत्यर्थः ॥

प्र० वइत्यन्योन्याश्रयादित्यर्थः ॥ **तथेति** ॥ पारमार्थिकत्वाकारेणेत्यर्थः ॥ **अतात्विकइति** ॥ तथाचकर्मादिफलस्यत्वयाऽतात्विकत्वेनांगीकृ तस्यननित्यत्वमितिभावः । ननु"भूयश्चांतेविश्वमायानिवृत्ति"रितिनिवृत्तिवाक्यस्य"नेहनाने"त्यत्यंताभाववाक्यस्यचसत्त्वादेवद्वयमप्यंगीक्रि यतइतिचेत्तर्हिवचनांतरमप्यनुसर्तव्यमितिभावेनाह ॥ **गौरिति** ॥ अविद्याआद्यंतवतीनेत्यर्थः । अश्वत्थः संसारः ॥ **निवृत्तिरिति** ॥

अतात्विकेरूप्यादावनित्यत्वाव्यवहाराच्च । "गौरनाद्यनंतवती एषोश्वत्थःस नातन"इत्यादिश्रुत्यनुसारायमोक्षेप्यतात्विकीअनुवृत्तिर्निवृत्तिस्तुतात्विकी ।

गु० निराकारइति ॥ तथाच ब्रह्मणोपिस्वरूपेणध्वंसप्रतियोगित्वोपपत्त्यापारमार्थिकत्वाकारेणात्यंताभावप्रतियोगित्वाविरोधे ब्रह्मज्ञानफलवत्कर्मादिफलस्यनित्यत्वाप त्त्यातद्वद्ब्रह्मज्ञानफलस्यवाऽनित्यत्वापत्त्या ब्रह्मज्ञानफलंनित्यंकर्मादिज्ञानफलमनित्यमितिविवेकानुपपत्तिरेवेतिभावः ॥ **अतात्विकइति** ॥ तथाचपारमार्थिकत्वेनात्यंता भावप्रतियोगित्वेनवाच्यमितिपुनरुक्तविवेकानुपपत्तिरित्यर्थः । यद्वातात्विकब्रह्मान्यस्यातात्विकरूप्यादेरनित्यत्वाभावान्नब्रह्मान्यत्सर्वमनित्यमितिविवेकानुपपत्तिरि त्यर्थः । ननुच मिथ्यात्वस्यापिप्रमाणसिद्धत्वात् "तद्यथास्यांततःक्षीयतएवे"त्यादिप्रमाणैर्निवृत्तेरपिसिद्धत्वात्तदुभयान्यथानुपपत्त्या पारमार्थिकाकारेणात्यंताभावप्रतियो गित्वं स्वरूपेणतद्ध्वंसइत्यवश्यमंगीकार्यमिति ब्रह्मज्ञानफलंनित्यंकर्मादिज्ञानफलमनित्यमितिविवेकोयुक्तएवेत्यतआह ॥ **गौरिति** ॥ विद्येतेआद्यंतौयस्याअसावाद्यंत वती । न आद्यंतवती अनाद्यंतवती । इदमुक्तंभवति यद्युभयविधप्रमाणानुसारेणस्वरूपेणनिवृत्तिःपारमार्थिकत्वाकारेणात्यंताभावप्रतियोगित्वंचेदमंगीक्रियते तर्हि मुक्तौनिवृत्तिरनुवृत्तिश्चेत्यप्यंगीकार्यं । श्रुत्योरविशेषात् । श्रुत्यवैशेष्येतच्छ्रुत्यनादरणेकर्मफलक्षयश्रुतेरप्यनादरणापत्त्योक्तविवेकानुपपत्तिरेवेति । नचविरोधः ।

SGDF Sri Gangeshwar Digital Foundation

प्र० तद्बोधकश्रुत्यनुसारायेतिभावः ॥ **मुक्तेरिति** ॥ बंधदशायामतात्विकानुवृत्तौसत्यामपिनतात्विकनिवृत्तिरितिविशेषइत्यर्थः ॥ **भ्रमत्वइति** ॥ यदिब्रह्मज्ञानफलंनित्यमन्यफलमनित्यमितिज्ञानंभ्रमस्तर्हिब्रह्मज्ञानफलंननित्यंस्यादितिकथंतद्विचारेप्रवर्तेत । इदंनित्यमिदमनित्यमितिभेदज्ञानस्यप्रमात्वेतद्विषयस्यसत्यत्वनियमेनभेदस्तात्विकःस्यादित्यर्थः । उपलक्षणमेतत् । तद्व्याप्तोधर्मोवासत्यःस्यादित्यपिग्राह्यं । एवंविवेकभाष्यंम तद्व्याख्यानुरोधेननिरस्येहामुत्रार्थभोगविरागइतिभाष्यंनिराह ॥ **नापीति** ॥ नन्वात्मस्वरूपात्सुखाद्वैषयिकसुखस्याभेदेपिकल्पितभेदाद्विरागोपप

मुक्तेर्बंधाद्वैषम्यंतुतात्विकनिवृत्तिमत्तामात्रेणेत्यापाताच्च । किंचविवेकोभेदस्यतद्व्याप्तस्यवा ज्ञानं तस्यचभ्रमत्वेब्रह्मविचारोननित्यफलकःस्यात् । प्रमात्वेतुभेदःसत्यस्स्यात् । तस्मात्परम तेननित्यानित्यवस्तुविवेकोयुक्तः । नापीहामुत्रार्थभोगविरागः । विवरणेविषयैरपिनित्यमात्म स्वरूपसुखमेवाभिव्यज्यते नतुजन्यंसुखमस्तीत्युक्तत्वेनवैषयिकसुखेपिविरागायोगात् ।

गु० निवृत्तेस्तात्विकत्वेनानुवृत्तेश्चातात्विकत्वेनाविरोधात् । तदेतदाह ॥ **अतात्विकीत्यादि** ॥ नन्वेवंतात्विकातात्विकनिवृत्त्यनुवृत्त्योर्बंधमोक्षयोःसाधारण्यान्मुक्तेर्बंधाद्विशेषोनस्यादित्यतआह ॥ **मुक्तेरिति** ॥ बंधदशायांतात्विकनिवृत्तिर्नेतिभावः ॥ **किंचेति** ॥ प्रमात्वपक्षस्याद्वैतिनांगीकर्तुमशक्यत्वात्भ्रमत्वेवाच्ये विपरीतएवोक्तविवेकःस्यादित्यर्थः ॥ **तस्मादिति** ॥ पारमार्थिकत्वेनेतिविशेषणे उक्तरीत्याब्रह्मणोपितदापत्त्याऽत्यंताभावप्रतियोगित्वमात्रस्यैववक्तव्यत्वेन तादृशस्यचध्वंसप्रतियोगित्वासंभवेन ब्रह्मज्ञानफलवत्कर्मज्ञानफलस्यापिनित्यत्वेन ब्रह्मज्ञानफलंस्थायि कर्मफलंत्वस्थायीतिविवेकानुपपत्तिरेवेतिभावः । नन्वाश्रयाभेदेनोभयाभावविरोधः। ॥ ७० ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० त्तिरित्यतआह ॥ **मोक्षइति** ॥ स्वरूपसुखरूपेमोक्षेइत्यर्थः । अधिष्ठानाध्यस्तयोरुभयाभावोपलंभान्नव्याहतिरित्यतआह ॥ **दृश्यतइति** ॥ यद्वा अध्यस्तरूप्येसत्यामपीच्छायांतद्भेदहीनेशुक्तिशकलेरागादर्शनेनतद्वन्मोक्षेरागवतोपिभोगेविरागोयुज्यतेइत्यतस्तत्रापिभेदाभावोसिद्धइत्याह ॥ **दृश्यतेचेति** ॥ एवमुक्तरीत्यामोक्षइत्यादिविवरणदूषणतयैवयोज्यं । यद्वास्वरूपसुखमेववैषयिकमितिविवरणमतेदोषमुक्त्वायेतुविषयैरंतःकरणवृत्तिरूपंसुखंदुःखमिवाताात्विकमेवोत्पद्यतइत्यंगीकुर्वतेतत्पक्षेपिदोषमाह ॥ **मोक्षइति** ॥ अविद्यानिवृत्त्यादिरूपेमोक्षइत्यर्थः । विरागायोगेहेतुमाह ॥ **तत्वतइति** ॥ मोक्षाद्भोगस्याविद्यकभेदसत्त्वेपितात्विकभेदस्यमिथ्यावादिनानंगीकारादित्यर्थः । वह्नावयंनवह्निःकिंतुगुंजापुंजइतिमिथ्याभेदसत्त्वेपितात्विकभेदाभावेनदाहस्यैवदृष्टेरितिभावः । नन्वग्नौतात्विकभेदाभावेपितात्विकस्याग्न्यभेदस्यसत्त्वाद्दाहोयुक्तः । मोक्षस्यतुतात्विकस्याातात्विकेनवैषयिकसुखेनतत्वतोऽभेदायोगान्मोक्षएवरागोनभोगेसंभवतीतिशंकते ॥ **तत्वतइति** ॥ ननूभयाभावस्यव्याहत्याभेदाभेदयोरन्यतरेणभाव्यमित्येतत्तात्विकधर्मिविषयं सुखंत्वतात्विकमतोनदोषइत्यतआह ॥ **दृश्यतइति** ॥ **लौकिकेति** ॥ शुक्तिसत्तासमानसत्ताकोव्यावहारिकइत्यर्थः । तथाचतद्वदेवमोक्षसत्तासमानसत्ताकमोक्षगततात्विकभेदप्रतियोगित्वंवैषयिकसुखस्यैष्टव्यं । तच्चत्वयास

मोक्षेरागवतस्तत्वतस्ततोभेदहीनेभोगेविरागायोगाच्च । तत्वतस्तद्भेदहीनत्वेपितद
भेदहीनत्वमात्रेणविरागइतिचेन्न । उभयाभावस्यव्याहतत्वात् । दृश्यतेचापारमा
र्थिकस्यापिरूप्यस्यनेदंरूप्यमितिशुक्तिधर्मिकलौकिकपारमार्थिकभेदप्रतियोगित्वं ।

गु० अन्यथावंध्यासुतस्यशामत्वाभावेगौरवप्राप्तेरुभयाभावस्यविरुद्धत्वेनासंभवादित्यतआह ॥ **दृश्यतेचेति** ॥ **विपरीतेति** ॥ ममविनाशोमास्त्वितिविपरीतेच्छायाएव

SGDF
Sri Gargeshwari Digital Foundation

प्र० दद्वैतभंगभियानेष्यतइतितदभेदस्यैवापत्त्याविरागायोगोयुक्तइतिभावः । यद्वासुखेनविरागःकिंतुभोगएवेत्यतआहमोक्षइतीत्यवतार्यविवरणदूषणपरतयैवयोज्योमोक्षइत्यादिग्रंथः । एवंपरमतेविरागानुपपत्तिमुक्त्वान्यदपिभाष्योक्तंनिराह ॥ **शमेति** ॥ ननु"शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्ये"दित्येकश्रुत्युपात्तत्वमेवसंग्राहकधर्मइतिचेन्न । पश्येदित्यात्मज्ञानस्यापिग्रहणापत्तेः । नचात्मज्ञानांगतयोपात्तत्वंविवक्षितं तच्चभूत्वेत्यनेनशमादिपंचकस्यैवेतिवाच्यं । उपरतोविषयालंबुद्धिमानित्यनेनविरागस्यसमाहितोयथावस्तुतत्वज्ञानीत्यनेननित्यानित्यविवेकस्यचप्राप्यातयोःपार्थक्यायोगादितिभावः । अतएवतितिक्षाद्यनुगतस्येत्याद्याह । कथंतर्हिभाष्ये"शमादिसंयुक्तोमध्यमःसमुदाहृत"इतिआदिशब्दइतिचेन्न । श्रुत्युक्तशमादिसर्वाशयेनोपपत्तेः । नह्यत्रनित्यानित्यविवेकादिपृथगुपादायादिशब्दःप्रयुक्तोस्ति । "आब्रह्मस्तंबपर्यंत"मित्यादिनावैराग्यस्यपृथगुक्तिस्तुवैराग्यप्राचुर्येणोक्त्योत्तमाधिकार्युक्त्यर्थेत्युपपत्तेः । तथाशान्तादिश्रुत्यानित्यानित्यविवेकस्यस्पष्टमप्रतीतेर्वैराग्यहेतुत्वालाभाच्च । सारासारविवेकादौ"परीक्ष्यलोका"नितिश्रुत्यंतरोदाहरणंभाष्येयुक्तं । कथंतर्हि"एवंभूतैःप्रमाणैःपदार्थानांनित्यानित्यत्वादिकंनिश्चित्यविषयेषुविरक्तस्यशमादिसंपत्तिमत"इत्यादिप्रमाणपद्धत्यादिप्रकरणेतत्रतत्रविवेकादिकंपृथगुक्त्वापिशमदमादीत्यादिशब्दोक्तिरितिचेन्न । हेतुहेतुमद्भावाभिव्यक्त्यर्थतयावापरप्रसिद्ध्यास्पष्टार्थतयावा"शमदमाद्युपेतःस्या"दित्यत्र"शांतोभवेद्दांतोभवेदनुकूलोभवेदाचा

शमदमादिसंपत्तिरित्यत्रचादिशब्दोनयुक्तः । तेनतितिक्षादेरेवग्रहणंनतुविवेकादेरितिनियमहेतोस्तितिक्षाद्यनुगतस्यविवेकादिव्यावृत्तस्यचोपसंग्राहकधर्मस्याभावात् ।

प्र० र्यंपरिचरे"दितिभाष्योदाहृतश्रुत्यंतरोपात्तधर्माभिप्रायेणवोपपत्तेरितिदिक् । भाष्योक्तमन्यदपिनिराह ॥ **मुमुक्षाचेति** ॥ ननुनात्ममात्रंमोक्षः । येनोक्तदोषः । किंत्वखंडाकारवेदांतजन्यचरमवृत्त्युपलक्षितएव । सचपूर्वंनसिद्धइतीच्छायुक्तेत्यतआह ॥ **वृत्तीति** ॥ तथाचनेच्छोपपत्तिरितिभावः । ननुनात्ममात्रंमोक्षः किंत्वविद्यानिवृत्तिलक्षणःपंचमप्रकारआत्मान्यः । अतोनसदद्वैतभंगः । उक्तंच"नसन्नासन्नसदसन्नानिर्वाच्यश्चतत्क्षय"इतीतिचेन्न । चतुर्थप्रकारस्यैवायोगेनपंचमप्रकारस्याप्ययोगात् । यदप्यविद्यानिवृत्तिरूपोमोक्षआत्मान्यःसत्यएव । नचाद्वैतभंगः । अभावद्वैतस्यांगीकारात् । अतोमोक्षेच्छायुक्तेतितदप्यभावद्वैतस्यन्यायामृतेनिरासान्निरस्तं । विस्तरस्तुचतुर्थपरिच्छेदेबोध्यइतिभावः । एतन्मतसाधारण्येनदोषांतरमाह ॥ **किंचेति** ॥ अहमर्थस्यमुक्तिःस्यादितीच्छावाउताहमर्थविशेष्यभूतस्यचिन्मात्रस्यमुक्तिस्स्यादितीच्छावेत्यर्थः ॥ **मुक्त्यनन्वयादिति** ॥ अहमर्थस्यानात्मत्वेनतद्विलयस्यैवमोक्षत्वादितिभावः ॥ **अनिष्टेति** ॥ चिन्मात्रंमुक्तंस्यादितीच्छाद्यहमर्थस्यवाच्या । चिन्मात्रस्येच्छायोगात् । तथाचान्यगतफलेच्छयान्यस्यश्रवणादौप्रवृत्त्ययोगेननतथेच्छासंभवतीत्यहमर्थार्जितज्ञानस्याकाम्यमानचिन्मात्रमुक्तिफलकत्वेनिच्छाविषयफलकत्वंस्यादित्यर्थः । ननुजातेष्ट्यादौपुत्रगतपूतत्वोद्देशेनपितुःप्रवृत्तिवद्भविष्यतीत्यतस्तद्वैल

मुमुक्षाचनपरपक्षेयुक्ता । मोक्षस्यनित्यसिद्धात्ममात्रत्वेनतत्रेच्छायोगात् । वृत्त्युपलक्षितस्याप्यात्मनोवृत्तौपश्चादिवपूर्वमपिसत्त्वाच्च । किंचकिमहंमुक्तःस्यामितीच्छामुमुक्षा चिन्मात्रंमुक्तंस्यादितिवा । नाद्यः । त्वन्मतेऽहमर्थस्यमुक्त्यनन्वयात् । नांत्यः । जातेष्ट्यधिकारिणःपितुःपुत्रस्यस्वार्थत्वात्पुत्रःपूतादिःस्यादितीच्छावत्प्रकृतेचिन्मात्रस्येच्छाश्रयाहमर्थार्थत्वाभावेनतादृशेच्छायाअदर्शनेनविपरीतेच्छायाएवचदर्शनेनज्ञानस्यानिष्टफलत्वापातात् ।

SGDF Sri Gangadhar Digital Foundation

तात्पर्य- चंद्रिका.

॥ ७२ ॥ प्र. प्र. १ । १

प्र० क्षण्यमाह ॥ **जातेष्टीति** ॥ चतुर्थस्यतृतीयपादे "फलसंयोगस्त्वचोदितेनस्यादशेषभूतत्वा" दितिसप्तदशेधिकरणे "वैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रेजात" इतिविधायश्रुते "यस्मिन्जातएतामिष्टिंनिर्वपतिपूतएवतेजस्व्यन्नादइंद्रियावीपशुमान्भवती" तिफलवाक्येकिंपूतत्वादिकमिष्टिकर्तुः पितुःफलमुतपुत्रस्येतिविशयेऽन्यफलेकर्मण्यन्यस्यप्रवर्तनायोगात्पितुरेवप्रवर्त्यत्वेनविधिविरोधात् "अग्नीनादधीते" त्याधानवाक्यगतात्मनेपदेनाग्निसाध्यकर्मफलानामाधातृगामित्वनियमात्पितुरेवफलमितिप्राप्तेयस्मिन्जातेनिर्वपतिसपूतोभवतीतिस्पष्टंपुत्रगामित्वावगमात्पुत्रफलमपिपितुरभिलषितमेवेतिविधेरात्मनेपदस्यचाविरोधात्पुत्रस्यैवफलमितिसिद्धांतितं । अत्रपुत्रस्यपितुरुपकारकत्वेनपित्रर्थत्वात्पुत्रगतपूतत्वादीच्छापितुर्यथासंभवतिनतथाप्रकृते । चिन्मात्रस्याहमर्थोपकारकत्वाभावेनाहमर्थार्थत्वाभावाच्चिन्मात्रगतमुक्तीच्छानाहमर्थस्ययुक्तेत्यर्थः । किंचचिन्मात्रंमुक्तंस्यादितीच्छायाअननुभवेनाहंमुक्तःस्यामितीच्छायाएवानुभूयमानत्वेनाकाम्यमानफलत्वंस्यादित्याह ॥ **तादृशेति** ॥ एवंसाधनचतुष्टयंभाष्यकारीयंपृथङ्गिरस्यप्रकारांतरेणापिनिरसितुंमतद्वयानुरोधेनविकल्पयति ॥ **किंचकिमिति** ॥ **मुमुक्षानंतर्यमेवेति** ॥ तथाच "अथशब्देनयथोक्तसाधनसंपत्त्यानंतर्यमुपदिश्यते" इतितदीयभाष्यविरोधइतिभावः । मुमुक्षानंतर्योक्तौतद्धेत्वानंतर्यमपिलभ्यतइत्यतआह ॥

किंचकिंभामतीरीत्यासाधनचतुष्टयेपूर्वपूर्वस्यउत्तरोत्तरहेतुत्वेनमुमुक्षैवाधिकारिविशेषणमन्यत्तद्धेतुभूतं किंवाविवरणैकदेशोक्तरीत्यामुमुक्षावद्विवेकादिरप्यधिकारिविशेषणं । आद्येमुमुक्षानंतर्यमेवाथशब्दार्थःस्यान्नचतुष्टयानंतर्यं । ॥ ७२ ॥

गु० दर्शनेनेत्यर्थः । अधिकारिविशेषणहेतुस्तद्विशेषणंनभवतीत्यत्रव्याप्तौदृष्टांतमाह ॥ **नहियागइति** ॥ **यथाशास्त्रमिति** ॥ तथाचान्वयव्यतिरेकपक्षोक्तदोषान्नो

SGDF
Sri Gargeshwari Digital Foundation

प्र०अन्यथेति ॥ तथाचभाष्येआनंतर्यप्रतियोगित्वेनसाधनचतुष्टयोक्तिरयुक्तेतिभावः॥**सामर्थ्यादेरिति**॥अर्थीसमर्थोविद्वानधिक्रियतइतिन्यायेनसामर्थ्यादौसतिकर्माद्यनुष्ठानमन्यथानेत्यन्वयव्यतिरेकाभ्यामर्थित्वादेरधिकारिविशेषणत्वंयथा एवंसाधनचतुष्टयस्याप्यधिकारिविशेषणत्वंगम्यंकिमित्यर्थः ॥ **गृहदाहादेरिति** ॥ "यस्यगृहान्दहत्यग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपे"दितिक्षामवत्यामिष्टौगृहदाहोनिमित्तमधिकारिविशेषणंयथाशास्त्रादवगम्यतेतथामुमुक्षावद्विवेकादिरप्यधिकारिविशेषणंकिंशास्त्राद्गम्यमित्यर्थः ॥ **मुमुक्षामात्रेणेति** ॥ तथाचव्यतिरेकव्यभिचारान्नशमादेरधिकारिविशेषणत्वमितिभावः ॥ **सविचारइति** ॥ मुमुक्षामात्रवत्कृतः ॥ **विवेकाभावेनेति** ॥ तथाचनित्यानित्यविवेकस्यनाधिकारिविशेषणत्वमितिभावः । नचतदभावेवैराग्यादिकमेवनेतिवाच्यं । तद्धेतुत्वस्यत्वयानंगीकारादितिभावः ॥ **श्रुतीति** ॥ तृतीये"लिंगक्रमसमाख्यानात्काम्ययुक्तंसमाम्नान"मितिद्वितीयपादीयसप्तमेधिकरणेकाम्ययाज्यानुवाक्याकांडमितिसमाख्यातेमंत्रकांडेसमा

अन्यथाविवेकहेत्वानंतर्यमपितदर्थःस्यात् । अंत्येपितत्किंसामर्थ्यादेरिवान्वयव्यतिरेकाभ्यांगम्यंकिंवागृहदाहादेरिवशास्त्रात् । नाद्यः । शमाद्यभावेपिमुमुक्षामात्रेणविचारदर्शनात् । ननुसविचारःशूद्रयागवन्नफलपर्यंतस्तत्पर्यंतस्तुशमाद्यभावेनास्तीतिचेन्न । तथापिविरागशमदमादिमुमुक्षासुसतीषुविवेकाभावेनफलपर्यंतविचाराभावादर्शनात् । नांत्यः । श्रुत्याद्यवगतशेषत्वस्यापिमंत्रस्यवस्तुसामर्थ्यापरपर्यायलिंगेनानुष्ठेयप्रकाशनद्वारैवशेषत्ववदारुण्यादेरेकहायन्यादिद्रव्यावच्छेदद्वारेणैवक्रयशेषत्ववच्चविवेकादेरपिवैराग्यादिद्वारैवविचारहेतुत्वस्यन्याय्यत्वात् ।

ता. चं. १३ गु०क्तश्रुतिविरोधोवाऽस्मदभिमतप्रमाणाभावोवानेतिभावः । विवेकादेरित्यत्रादिशब्देनवैराग्यग्रहणं । वैराग्यादिहेतुत्वमित्यत्रविष्णुपादैकसंश्रयत्वपरिग्रहः । इतिहास

SGDF
Sri Gargeshwari Digital Foundation

प्र०न्नातानां“इंद्राग्नीरोचनादिव”इत्यादीनांमंत्राणांकिंलिंगेनसर्वत्रविनियोग:किंवाक्रमसमाख्याभ्यांकाम्येष्टिकांडमितिसमाख्यातेष्टिकांडेक्रमेणाम्नातास्विष्टिष्विवितिसंशयेश्रुतिवदर्थप्रकाशनसामर्थ्यरूपलिंगस्यापिप्रमाणांतरानपेक्षस्यैवविनियोजकत्वात्क्रमसमाख्याभ्यांबलवत्त्वाच्चतद्बाधेनार्थवशेनसर्वत्रविनियोगइतिप्राप्तेमंत्रप्रकाश्यानामिंद्रादीनांकर्मणोन्यत्रापिप्रतीतेस्तत्स्वरूपमात्रप्रकाशनेनमंत्राणांफलाप्राप्तेस्तत्प्राप्तयेकर्मसंबंधापादकंप्रमाणांतरमपेक्ष्यद्वारविशेषेलिंगविशेषस्यविनियोजकत्वमितिक्रमसमाख्यानुसारेणकाम्येष्टिष्वेवविनियोगइतिसिद्धांतितं । तथातत्रैव“अर्थैकत्वेद्रव्यगुणयोरैककर्म्यान्नियमस्स्या”दित्याद्यपादीयषष्ठेधिकरणेज्योतिष्टोमेश्रुतं “अरुणयापिंगाक्ष्यैकहायन्यासोमंक्रीणाती”तिवाक्यमुदाहृत्यकिमारुण्यंवाक्यभेदाश्रयणेनप्राकरणिकसर्वद्रव्येषुनिविशतेकिंवाक्रयेणसंबंध्यैकहायन्यांनिविशतइतिसंशयेतृतीययाकरणत्वावगमादमूर्तस्यगुणस्यक्रयाविनिर्वर्तनाशक्ते:क्रयसंबंधायोगाद्वाक्यभेदेनप्राकरणिकसर्वद्रव्येनिवेशइतिप्राप्तेगुणस्यसाक्षात्क्रयानिर्वर्तकत्वायोगेपिसाधनीभूतद्रव्यावच्छेदद्वारातत्संभवान्नवाक्यभेदोन्याय्यइत्येकहायन्यामेवनिवेशइतिसिद्धांतितं । अत्रलैंगिकविनियोगस्यसामान्यसंबंधघटकप्रमाणांतरसापेक्षतयाश्रुतिप्रकरणादिनासिद्धेतस्मिन्लिंगेनानुष्ठेयविशेषप्रकाशनद्वारायथामंत्राणांकर्मशेषत्वं यथावातृतीयाश्रुत्याऽवगतक्रयशेषत्वस्याप्यारुण्यादे:क्रयसाधनैकहायनीद्रव्यावच्छेदद्वारेणतच्छेषत्वं तथाविवेकादेर्विचारहेतुत्वश्रवणेपिवैराग्यादिद्वारैवविचारहेतुत्वंन्याय्यं । विवेकादेर्वैराग्यजननएवसामर्थ्यादितिभाव: । विचारविधिवाक्यएवविवेकादे:साक्षाद्धेतुत्वावगमेपिपारंपर्यन्याय्यमितिवक्तुंद्वितीयदृष्टांत: । नकेवलमिदंन्यायप्राप्तंश्रुतंचेत्याह ॥ **परीक्ष्येति** ॥ “परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमाया”दित्यत्रलोकान्विष्णुलोकेतरान्कर्मापादितानसा

“परीक्ष्यलोका”नितिश्रुतिसिद्धत्वाच्च

प्र० राननित्यतयापरीक्ष्यवैराग्यंप्राप्नुयादितिश्रुत्याविवेकस्यहेतुत्वलाभात् । समानकर्तृकयो:पूर्वकालेक्त्वाप्रत्ययस्मरणादितिभाव: । ननुपरंपरयापिविशेषणत्वलाभात्कथमयोगइत्यतआह ॥ **मुमुक्षावदिति** ॥ नसाक्षादितिभाव: । तद्धेतुभूतं कामनाहेतुभूतं । अयंचदोषस्त्वापिसमइत्यतआह । **अस्माकमिति** ॥ परीक्ष्येतिश्रुतेर्विवेकस्यवैराग्यादिहेतुत्वमित्यर्थ: । वक्ष्यमाणदिशानिदिध्यासनांगत्वमेवेतिभ्रमनिरासायाह ॥ **शमादेस्त्विति** ॥ **नित्यानित्येति** ॥ आदिपदाच्छमादिग्रह: ॥ **अन्योन्याश्रयादिति** ॥ ब्रह्मज्ञानफलंनित्यमन्यफलमनित्यमितिविवेकोविचारशास्त्रसंपाद्यइतिकृत्वाविवेकेसत्यधिकारसंपत्त्याशास्त्रेप्रवृत्तिस्तत्प्रवृत्त्यनंतरंचविवेकसंपत्तिरित्यन्योन्याश्रयादित्यर्थ: ॥ **शास्त्रांतरादिति** ॥ सिद्ध्यतीतिशेष: । येननान्योन्याश्रयइतिभाव: । विवेकइत्येववक्तव्येब्रह्मज्ञानेत्यादिनातद्विवरणंतद्विरोधस्फोरणाय । अतएवाह ॥ **तत्रोक्तेति** ॥ **नापीति** ॥ विवेकइत्यनुषंग: । निरस्यति ॥ **विचारादिति** ॥ तथाचविचारेप्रवृत्त्यनंतरंतेनेतिहासाद्यर्थनिर्णयेततोवि

मुमुक्षावदधिकारिविशेषणत्वायोगात् । नहियागेस्वर्गकामनावत्तद्धेतुभूतमप्यधिकारिविशेषणं । अस्माकंतुमतेयथाशास्त्रं विवेकादेरधिकारिविशेषणवैराग्यादिहेतुत्वं शमादेस्त्वधिकारिविशेषणत्वमितिविशेषणानांचतुष्ट्वमितिपरोक्तंनयुक्तं । केचित्तुनित्यानित्यवस्तुविवेकादीनिनब्रह्ममीमांसाधिकारिविशेषणानि । तेषांतत्साध्यत्वेनान्योन्याश्रयात् । नचब्रह्मज्ञानफलमेवनित्यमन्यदनित्यमितिविवेकोवैशेषिकादिशास्त्रांतरात् । प्रथममेवाध्ययनविधिवश्यतयापुरुषस्यशास्त्रांतरानवकाशात् । तत्रोक्तनित्यानित्यविवेकस्यवेदांतविरुद्धत्वाच्च । नापीतिहासपुराणादिना । विचारात्प्राकृतेनतदनिश्चयात् ।

SGDF

प्र० वेकसिद्धिस्तत्सिद्ध्यनंतरंचविचारेप्रवृत्तिरित्यन्योन्याश्रयएवेत्यर्थः ॥ **अन्यथेति** ॥ विचारंविनैवापाततोविवेकसिद्धावित्यर्थः । शमादेरपि विचारांगत्वंप्रागादिपदेननिरस्तमपिस्पष्टंनिरस्यति ॥ **शमेति** ॥ यद्वाप्रागधिकारिविशेषणत्वंनिरस्तं । तदेवकुतइत्यतोनंगत्वादितिभावेनांगत्वं निरस्यति ॥ **शमेति** ॥ **शास्त्रजन्येति** ॥ विचारजन्येत्यर्थः ॥ **शमेति** ॥ शमदमाद्युपेतःस्यात्तथापितु"तद्विधेस्तदंगतयातेषामवश्यानुष्ठेयत्वा"दितिसूत्रेतृतीयेविधानादित्यर्थः । तथाचशास्त्रेप्रवृत्त्यनंतरंशमादिविधिदृष्ट्यातत्संपादनंतत्संपत्त्यनंतरंशास्त्रेप्रवृत्तिरित्यन्योन्याश्रयइति भावः । श्रद्धया आस्तिक्यबुद्ध्या । न्यायेनेत्यादितृतीयांतानांविवेकसिद्धेरित्यन्वयः । धर्मादीनांपरमसुखत्वाभावेहेतुद्वयमनित्यत्वादित्यादि । तथाचसयुक्तिकत्वान्निश्चायकत्वमस्येतिभावः । संसारेपरिवर्ततामितिवाक्यशेषः । अकृतोनित्यपुमर्थोमोक्षःकृतेनकर्मणानसिद्ध्यतीत्यर्थः ।

अन्यथाब्रह्मनिश्चयोपितेनैवस्यात् । शमदमादीनितुनिदिध्यासनांगानि । "तस्मादेवंविच्छांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्ये"दितिश्रुतावेवंविच्छब्देनशास्त्रजन्यज्ञानमनूद्यपश्येदिति निदिध्यासनांगतयातेषांविधानात् । नतुविचारांगानि । इहैवविचारशास्त्रे"शमदमाद्युपेतःस्या"दित्यत्रतद्विधानादित्याहुः । तन्न । "यत्त्वादौश्रद्धयासिद्धंपुनर्न्यायेनसाधित"मितिन्यायेन"अनित्यत्वात्सदुःखत्वान्नधर्माद्याःपरंसुखं । मोक्षएवपरानंदः"इत्यादीतिहासादिनावा"नास्त्यकृतःकृतेने"त्यादिश्रुतितआपाततोवाश्रुतिमूलहितैषिपित्रादिवाक्येनवाश्रवणेनवामननात्मकविचारात्प्रागपिश्रद्धामात्रेणनित्यानित्यविवेक

गु० पुराणादिनेत्यत्रादिपदेनश्रुतिमूलहितैषिपित्रादिवाक्यश्रवणानांसंग्रहः ॥ **यत्त्वादाविति** ॥ अस्मिन्पक्षेब्रह्मविचारवैयर्थ्यमितिपरोक्तदोषपरिहारायपुनर्न्यायेनेति

SGDF
Sri Gargeshwari Digital Foundation

प्र० ननुविनाविचारंश्रुत्यर्थोननिर्णीतइत्यतउक्तमापाततइति। वाक्येऽप्रामाण्यव्युदासायोक्तंश्रुतीति। श्रवणेन औपदेशिकवाक्यार्थग्रहणरूपेण ॥ **सिद्धेरिति** ॥ तथाचनान्योन्याश्रयइतिभावः ॥ **अपशूद्रमिति** ॥ "अपपरिबहिरंचवः पंचम्ये"त्यव्ययीभावः। "शुगस्यतदनादरश्रवणा"दितिनयेशूद्रस्याधिकारनिषेधादितिभावः ॥ **अधिकारइति** ॥ अधिकारज्ञानमित्यर्थः। अतउक्तैवरीतिरुपेयेतिभावः। ननुनब्रह्मज्ञानंनित्यफलमितिनिश्चित्यात्रप्रवर्तते। येनोक्तदोषः। किंतुप्रायेणनित्यफलंभवितुमर्हतीत्युत्कटकोटिकसंशयादेवेत्याशंक्यमोक्षोपिनित्योभवितुमर्हतीत्येवंरूपादेवज्ञानादत्रापिप्रवृत्तिःस्यादित्याह ॥ **फलेति** ॥ **भिन्नेति** ॥ कर्मणामनित्यफलत्वनिश्चयेननित्यपुमर्थिनःततोनिवृत्तावपियासिद्धेः।

अन्यथात्वन्मतेप्यपशूद्रमधिकारेज्ञातेऽशूद्रस्यैतच्छास्त्रविचारेप्रवृत्तिःप्रवृत्तौचैतच्छास्त्रेणापशूद्रमधिकारइत्यन्योन्याश्रयःस्यात्। तथाऽध्ययनविधावप्यधीतेस्वाध्याये"अष्टवर्षंब्राह्मण"मित्यादिवाक्येनाष्टवर्षत्वादेरधिकारिविशेषणत्वज्ञानं तज्ज्ञानेचाध्ययनेप्रवृत्तिरित्यन्योन्याश्रयःस्यात्। तथाब्रह्मज्ञानस्यानंतस्थिरफलत्वनिश्चयेतदर्थिनोब्रह्मविचारेनिश्शंकप्रवृत्तिः विचारेणचतन्निश्चयइत्यन्योन्याश्रयःस्यात्। फलज्ञानंसंभावनात्मकंचेद्विवेकोपितथास्तु। यद्यपित्वन्मतेपूर्वप्रवृत्तेनकर्मविचारेणकर्मणामल्पास्थिरफलत्वंनिश्चितंतथापिनतन्निश्चयएवनित्यफलार्थिनोब्रह्मविचारेप्रवृत्तिहेतुः। भिन्नविषयत्वात्।

गु० न्यायांशोप्युदाहृतः ॥ **अन्यथेति** ॥ उक्तप्रकारैःपरिहारानादरेणअधिकारिविशेषणानांशास्त्रसाध्यत्वमात्रेणोक्तान्योन्याश्रयइत्यर्थः। शास्त्रसाध्यस्यशास्त्रप्रवर्तकत्वंनेत्येवोक्तावन्योन्याश्रयेव्याप्त्यंगीकारेआद्यस्तर्कः। तत्रव्याप्तिभंगश्च। अधिकारिविशेषणत्वेनविशेषणेत्वाह ॥ **तथेति** ॥ ब्रह्मविचाराधिकारिविशेषणत्वेत्वाह ॥ **तथेति** ॥ शमादीनांश्रवणांगत्वंकिंबाधकसद्भावान्नांगीक्रियते साधकाभावाद्वा। नाद्यः। तदभावात्। नचश्रमादेर्निदिध्यासनांगत्वप्रतिपादकैवंविच्छांतोदांतउ

SGDF
Sri Gargeshwari Digital Foundation

प्र० वद्ब्रह्मज्ञानस्यननित्यफलंनिश्चितंतावद्ब्रह्मविचारेप्रवृत्तिर्नयुक्तेत्यर्थः ॥ **अतिप्रसंगाच्चेति** ॥ वात्स्यायनादावपिप्रवृत्तिप्रसंगात् । कृषेर्धान्यफलत्वनिश्चयेनज्योतिष्टोमादौस्वर्गार्थिनःप्रवृत्तिप्रसंगादित्यर्थः ॥ **निश्चयसहितइति** ॥ अतोभिन्नविषयत्वमितिभावः । अन्यस्य कर्मणः । तस्य ब्रह्मज्ञानस्य । तत्र ब्रह्मज्ञानजनकविचारे । एतदुक्तंभवति । ब्रह्मज्ञानस्यानंतस्थिरफलत्वसंदेहेनब्रह्मविचारेसशंकप्रवृत्तौसंभवंत्यामपिननिश्शंकप्रवृत्तिः । तस्याश्चतथाविधफलहेतुत्वनिश्चयसाध्यत्वात् । तस्यचविचारमंतरेणासिद्धेरन्योन्याश्रयोदुर्वारइत्युक्तैवरीतिराश्रयणीयेति । एवंनित्यानित्यवस्तुविवेकस्यब्रह्मविद्याधिकारिविशेषणत्वंसमर्थ्यशमादेरपितत्त्वंसमर्थयते ॥ **एवंविदितीति** ॥ यथाह्येकस्यैवदध्यादेर्वचनात्क्रत्वर्थत्वंपुरुषार्थत्वंचतद्वदितिभावः ॥ **परीक्ष्येति** ॥ कर्मोपादितान्विष्णुलोकेतरान्लोकानसारानऩित्यतयानिश्चित्यब्राह्मणोवैराग्यंसंपाद

अतिप्रसंगाच्च । नापिकर्मणामल्पास्थिरफलत्वनिश्चयसहितोब्रह्मज्ञानस्यापाततोनंतस्थिरफलसंदेहस्तद्धेतुः । अन्यस्यानुपायत्वनिश्चयेनततोनिवृत्तिमात्रसिद्धावपितस्योपायत्वानिश्चयेतदुपेयार्थिनस्तत्रनिश्शंकमप्रवृत्तेः । एवंविदितिवाक्येनशमादीनांनिदिध्यासनांगत्वेपि"प्रशांतचित्तायशमान्विताय—प्रोवाचतांतत्वतोब्रह्मविद्या"मित्यादिवाक्यावगतंश्रवणांगत्वंचनविरुद्धं । किंच"परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन तद्विज्ञानार्थंसगुरुमेवाभिगच्छे"दित्यादौविवेकादीनांश्रवणांगोपसत्तेःपूर्वभावश्रुतेःकथं ॥ ७५ ॥

गु० परतोभवेदितिश्रुतिरेवबाधिकेतिवाच्यं । तस्याः शमादेर्निदिध्यासनांगत्वमात्रसाधकत्वेनान्यांगत्वनिषेधकत्वाभावादित्याह ॥ **एवंविदिति** ॥ नद्वितीयइत्याह ॥ **प्रशांतेति** ॥ एवंश्रवणांगत्वंप्रसाध्य तदनंगीकारेबाधकमाह ॥ **किंचेति** ॥ नन्वेवंविचारवैयर्थ्यं । तत्फलस्यज्ञातत्वात् । तस्माच्छ्रुतमप्यंगत्वंविचारवैयर्थ्या

प्र० येत् यतोऽकृतोमोक्षःकृतेनकर्मणानसिद्ध्यति किंतुज्ञानेन तस्माद्विज्ञानार्थंगुरुमुपगच्छेदित्यर्थः ॥ **श्रवणेति** ॥ विचारानंतरभावित्वमितिवाच्येप्येवमुक्तिस्तस्यश्रवणांगत्वमप्यस्तीतिवक्तुं । ननुविवेकादेर्विचारात्प्राक्सिद्धत्वेनविचारोनर्थकइत्यतआह ॥ **नचेति** ॥ वासुदेवमहामहिमादेरपिवर्णनादितिभावः । प्रतिवचनाद्यभावेपीत्यादिनाप्रतिपादितमर्थमुपसंहरन्भाष्यारूढंकरोति ॥ **तस्मादिति** ॥ प्रारंभाद्यर्थकत्वासंभवादित्यर्थः । एवमथशब्दार्थसमर्थ्य"यतोनारायणप्रसादमृतेनमोक्ष"इत्यंताथशब्दार्थप्रपंचनपरभाष्यटीकाक्षराणिदुर्घटार्थानियोजयति ॥ **टीकायामिति** ॥ तत्परतयेतिक्वाचित्कपाठस्यलेखकदोषत्वंमन्वानआह ॥ **तत्फलतयेति** ॥ योगरूढिगौणलक्षणाभेदभिन्नमुख्यामुख्यवृत्तिव्यतिरेकेणतात्पर्यवृत्त्यभावस्यकर्मनिर्णयादौसमर्थितत्वेनशब्दवृत्तिविषयस्यैवतात्पर्यवृत्तिविषयतयामंगळस्यपूर्वोक्तरीत्याशब्दार्थत्वाभावे

श्रवणानंतरभावित्वं । नचनित्यानित्यविवेकमात्रंविचारफलं येनतद्वैयर्थ्यंस्यात् । तस्मादथशब्दस्याधिकारानंतर्यमेवार्थः तदर्थत्वंचस्वमतएवयुक्तं नतुपरमतइत्यभिप्रेत्याहभाष्यकारः॥ अधिकारानंतर्यार्थश्चेति ॥ टीकायांतत्फलतयेतिपाठःसाधुः । नतुतत्परतयेति । विघ्नोत्सारणासाधारणकारणरूपस्यविष्णुस्मरणाथशब्दोच्चारणादेर्मंगळस्याशब्दार्थत्वेनतत्परत्वायोगात् ।

गु० न्नांगीकार्यमित्यतआह ॥ **नचेति** ॥ **अशब्दार्थत्वेनेति** ॥ अथेत्युक्तेअथशब्दोच्चारणत्वप्रकारकस्यविष्णुस्मरणत्वप्रकारकस्यबोधस्याजननेनतस्याथशब्दवाच्यत्वाभावेनेत्यर्थः ॥ **अकारेति** ॥ "अइतिब्रह्मे"तिश्रुतिमभिप्रेत्यैतदुक्तमिति न"तथौप्राणात्मकौप्रोक्ता"वित्यादिविरोधः । तस्य प्रशस्तरूपमंगळात्मकस्यविष्णोः । इह ग्रंथे । विघ्नोत्सारणासाधारणकारणत्वस्यग्रंथारंभेप्रस्तुतत्वेन प्रशस्तरूपमंगळात्मकस्याप्रस्तुतत्वादित्यर्थः । ननुसाधारणस्यापिविष्णोर्मंगळादिनिष्ठस्यविघ्नोत्सार

SGDF

प्र० नाथशब्दस्यतत्परताऽसंभवादित्यर्थः । ननु“अकारः—परब्रह्माभिधायकः”इतिभाष्योदाहृतस्मृतेरकारस्यविष्णुवाचित्वात्तस्यच“मंगळा नांचमंगळ”मितिस्मृत्यापरममंगळरूपत्वात्तत्परतयेतिपाठउपपद्यतइत्यतआह ॥ **प्रशस्तेति** ॥ नन्वेवंसिसृक्षोरितिभाष्यावतारिकायांमंगळोक्त्यादेरित्ययुक्तं । तत्रमंगलस्योक्तिरभिधानंतस्यशब्दांतरेणापिसंभवादित्यर्थप्रतीतेरित्यतआह ॥ **मंगळोक्त्यादेरिति** ॥ **इतिपाठेपीति** ॥ तत् मंगळं परं मुख्यंफलं यस्य तत्त्वेनेत्यर्थउक्तोभवति । भाष्येउदाहरिष्यमाणप्रमाणानुसारान्मंगलार्थइतिभाष्यंद्वेधाव्याचष्टे ॥ **एवंचेति** ॥

प्रशस्तरूपमंगळात्मकस्यब्रह्मणोथशब्दावयवाकारार्थत्वेपितस्येहाप्रस्तुतत्वात्“तस्याभिधेयमर्थमाहे”त्युत्तरग्रंथाननुगुणत्वात् । मंगळप्रयोजनकइतिसुधाग्रंथविरोधाच्च । मंगळोक्त्यादेरितिटीकायाअपिविघ्ननिवर्तकशब्दोच्चारणादेरित्येवार्थः । अन्यथा“शंखवीणावेणुध्वनिवच्छ्रुतितोमांगलिकत्वा”दितिसुधाविरोधात् । तत्परतयेतिपाठेप्ययमेवार्थोनुसंधेयः । एवंचाथशब्दोमंगलार्थइतिभाष्यस्याथशब्दोविघ्नोत्सारणासाधारणकारणात्मका

गु० णासाधारणकारणत्वस्यापिसत्त्वात्कथंतस्याप्रस्तुतत्वं । तथाचतत्परतयेतिपाठोपियुक्तएवेत्यतआह ॥ **तस्याभिधेयमिति** ॥ नतावतापितस्याभिधेयत्वनिषेधः विशेषविधेःशेषनिषेधनांतरीयकत्वंच विष्णावेवाथशब्दार्थत्वप्रतिपादकअःइत्यादिश्रुतिविरोधादयुक्तमित्यतआह ॥ **मंगळप्रयोजनकइतीति** ॥ ननुतत्परतयेति पाठःसाधुः टीकायामेवोत्तरत्राथशब्दस्यमंगळप्रतिपादकतायावक्ष्यमाणत्वादित्यतआह ॥ **मंगळोक्त्यादेरितिटीकायाअपीति** ॥ नन्वेवंतत्परतयेत्यपिमूलकोशेषुपाठोदृश्यते तस्यकागतिरित्यतआह ॥ **तत्परतयेतिपाठेपीति** ॥ **अयमेवेति** ॥ परशब्दउद्देश्यपरइतिभावः । नन्वेवंभाष्येउत्तरत्रब्रह्मणोथशब्दार्थत्वस्यवक्ष्यमाणत्वात्तद्विरोधइत्यतः सुधादेरनुष्ठेयमंगळाभिप्रायकत्वात् भाष्यस्यचाननुष्ठेयमंगळपरत्वात्नविरोधइतिभावेनाह ॥ **एवंचेति** ॥ सुधायांतुप्रसिद्धलौकिकमंग

SGDF Sri Gargeshwari Digital Foundation

प्र० मंगलस्यफलत्वेसतीत्यर्थः ॥ **अनुष्ठेयेति** ॥ अथशब्देनजायमानविष्णुस्मृत्यादेःकृतिसाध्यत्वादितिभाव: ॥ **अननुष्ठेयेति** ॥ विष्णोरकृतिसाध्यत्वादितिभावः । विष्णुवाचित्वोक्तिश्चमंगलफलकत्वोपपादनायेतिध्येयं । उक्तंचतत्वप्रदीपे "अथशब्दःश्रवणकीर्तनाभ्यांमंगलफलः । विष्णोःपरममंगलस्यवाचकत्वेनातिप्रियत्वा"दिति । एतेनक्वचित्तत्परतयेतिपाठस्यमंगलरूपविष्णुपरतयेतिअर्थः क्वचित्तत्फलतयेतिपाठस्यमंगलफलकतयेत्यर्थउक्तोभवतीतिकेचिदाहुः । एतेनयत्तुकेनचिदुक्तंभाष्येमंगलार्थोधिकारानंतर्यार्थश्चेतिचशब्दोनुपपन्नः । तुल्यार्थेहिसमुच्चयः । यथागोशब्दःसास्नावदर्थोजलार्थश्चेति । नचेहमंगलंवाच्यं । येनचकारोपपत्तिः । मंगलफलकआनंतर्यवाचकइत्येतावतएवसामंजस्यादिति तन्निरस्तं । मंगलरूपविष्ण्वर्थकत्वस्यापिवर्णनात् । सकृच्छ्रुतस्याप्यथशब्दस्यतंत्रावृत्त्येकशेषाणामन्यतमाश्रयणेनार्थद्वयोपपत्तेः । नकेवलंमंगलफलकःकिंत्वानंतर्यवाचकश्चेतिचशब्दोपपत्तेश्चेति । आद्यतृतीययोराक्षिपतीत्यनुक्त्वाद्वितीयेतथोक्तौकोहेतुरतआह ॥ **अवश्येति** ॥

नुष्ठेयविष्णुस्मरणाथशब्दोच्चारणरूपमंगलप्रयोजनकःप्रशस्तरूपाननुष्ठेयरूपविष्ण्वभिधायकश्चेत्यर्थद्वयंद्रष्टव्यं ॥ द्वितीयमाक्षिपतीति ॥ अवश्यवक्तव्यार्थत्वार्थाधिक्ययोस्तदभावयोश्चलोकेशब्दांतरेषुदर्शनादथशब्देतत्संदेहेनप्रश्नमात्रमाद्यतृतीययोः । द्वितीयेतुस्वरूपाधिक्यस्यशब्दांतरेष्वदर्शनादथशब्देतदाक्षेपइतिभावः ।

गु० लस्यैवाथशब्दवाच्यत्वमभिप्रेतमितिभावः । एवंच "तथौप्राणात्मकौप्रोक्ता"वित्यादिप्रमाणार्थस्यापि "अथशब्दोमंगलार्थ" इतिभाष्येण "परस्यब्रह्मणोविष्णोःप्रसादा"दितिप्रमाणार्थस्यापि "अतःशब्दोहेत्वर्थ" इतिभाष्येणसंग्रहइत्यप्युक्तंभवति । शब्दांतरस्यस्वरूपोत्तमत्वादर्शनादित्युक्त्या अवश्यवक्तव्यार्थत्वार्थाधिक्ययोर्दर्शनादितिसूचितं तत्स्पष्टयति ॥ **अवश्यवक्तव्यार्थत्वेति** ॥ अयंभावः । प्रश्नस्यसंदेहमूलत्वेन संदेहस्यचकोटिद्वयप्रसिद्ध्यादिमूलकत्वेन शब्दांतरेऽवश्यवक्तव्यार्थत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० "कथमुत्तमते"तिभाष्यस्थकथंशब्दस्याक्षेपार्थत्वेनव्याख्यानात् "तृतीयेपृच्छती"तिकस्यार्थइतिनज्ञायतेअतआह ॥ कथंशब्दमिति ॥ "सिसृक्षो"रितिभाष्यव्याख्यानावसरे "यत्स्वजातौप्रथमंहरेर्निस्सरतितत्तत्रोत्तममितिन्यायोनुसंधेय"इत्युक्तं । तत्रैवमेवव्याप्त्यनुसंधानविधानेभिप्रायमाह ॥ इतिन्यायइतीति ॥ "तद्धेतुत्वंवदंश्चापितृतीयोतउदाहृत"इतिभाष्येऽतश्चतृतीयोपिप्राथमिकइतिटीकोक्ताशेषार्थाप्रतीतेराह ॥ अतइत्यस्येति ॥ यद्यप्यतइत्यस्यातःशब्दपरत्वंहेतुपरत्वंचेतिसकृदावृत्तिरेवभाति तथापियतस्तृतीयतयोदाहृतइत्यत्रउत्तमइत्यत्रचविशेष्याकांक्षायामतश्शब्दपरस्यातइत्यस्यान्वयादसकृदावृत्तिमित्युक्तं ॥ वचनेति ॥ एकवचनांतत्वेनेत्यर्थः । महतोमहत्त्वगुणयुक्तादितिभ्रांतिं

कथंशब्दमाक्षेपपरतयाव्याख्यायप्रश्नपरतयापिव्याचष्टे ॥ तृतीयेपिपृच्छंतीति[४।२०] ॥ इतिन्यायइति[४।२५] ॥ सामान्यव्याप्तिरेवानुसंधेया । यथादेवेषुचतुर्मुखइतिदृष्टांतसंभवात् । नतुयःशब्दइतिविशेषव्याप्तिः । दृष्टांताभावादितिभावः । अतइत्यस्यातःशब्दपरत्वंहेतुपरत्वमसकृदावृत्तिंतृतीयउदाहृतइत्यनयोरावृत्तिं प्राथमिकावित्यस्यवचनव्यत्ययेनानुषंगंचाभिप्रेत्यव्याचष्टे ॥ अतश्चतृतीयतयेति[४।२६] ॥ महतश्चतुर्मुखादिति[५।३] ॥

गु० र्थाधिक्ययोस्तदभावयोश्चदर्शनेनकोटिप्रसिद्धिसत्वेन तन्मूलकसंदेहसंभवेनतन्मूलकप्रश्नसंभवेपि स्वरूपोत्तमत्वतदभावयोरदृष्टत्वेनकोट्यप्रसिद्ध्यासंदेहासंभवेन तन्मूलकप्रश्नस्यासंभवेनद्वितीयेआक्षेपः प्रथमतृतीययोःप्रश्नमात्रमिति । मूलेकथमित्यस्यैकस्यैवशब्दस्यश्रवणात्तस्यचद्वितीयमाक्षिपतीत्यादिनाऽवतारितत्वात् तृतीयेपृच्छतीत्यवतार्यंनप्रतीयते । नचतदेवपुनरपिव्याख्यायतइतिवाच्यं । व्याख्यानांतरज्ञापकाथशब्दादेरभावादित्यतः तदुपपादयति ॥ कथंशब्दमिति ॥ ननुयत्स्वजातौप्रथमंनिस्सरतितत्तत्रोत्तममितिसामान्यव्याप्तिरेवानुसंधेयेतिटीकायामुक्तं । तत्कुतः । विशेषव्याप्तेरेवसंभवात् । नचविशेषव्याप्तौदृष्टांताभावः । आगमगम्य

प्र० निरस्यति ॥ महत्तत्वेति ॥ यद्यपि "आन्महतःसमानाधिकरणजातीययो"रितिस्मृतेर्महातत्वेतिवाच्यं तथापिप्रमेयदीपिकायां "महतआदितिस्थानिनःपूर्वमुद्देशेकार्येआन्महतइतिनिर्देशाद्वा जातीयसमानाधिकरणयोरित्यल्पाच्तरस्यपूर्वमुद्देशेकार्येव्यत्यासेननिर्देशाद्वाज्ञापकादात्त्वमनित्य"मित्युक्ततयावा द्वितीयेचक्षिङःख्याञ्इत्यत्रसंज्ञाच्छंदसोर्बहुलमितिवचनाद्वा महत्तत्वेतिसाधु । तथैवसुधोक्तेः । वाच्यवाचकभावस्यस्फुटमप्रतीतेराह ॥ विदामघवन्नित्यादिकेति ॥ परमैश्वर्यादिसंपन्नमहार्थप्रतिपादकत्वेनमहच्छब्दितेंद्रादिनामास्यामस्तीतिमहानाम्नीसंज्ञिताविदामघवन्नित्यादिकाऋक्अयंलोकशब्दाभ्यामभिधीयमानविष्णुवाचिकेतिभावेनायंवैलोकःप्रथममहानाम्नीत्यादिब्राह्मणंप्रवृत्तमित्यर्थः। सच्छूद्रस्यमोक्षहेतुज्ञानावश्यंभावेनब्रह्मविद्याधिकारित्वात्कथमरुचिरित्यतआह ॥ सच्छूद्रस्येति ॥ देहांतरे विप्रदेहे । कथमध्ययनेनवि

महत्तत्त्वाभिमानिनश्चतुर्मुखादित्यर्थः ॥ अयंवैलोकःप्रथमामहानाम्नीति[५।३] ॥ विदामघवन्नित्यादिकाऋक्पृथिवीलोकस्थविष्णुवाचिकेत्यर्थः ॥ अरुच्येति[५।६] ॥ सच्छूद्रस्यदेहांतरेवैदिकब्रह्मविद्याधिकारेपिनैतद्देहेऽधिकारः । देहांतरेधिकारश्चनेदानींप्रवृत्त्युपयोगी(वृत्त्युपयोगी)त्यरुच्येत्यर्थः ॥ अध्ययनबललब्धापीति ॥

गु० व्याप्तौदृष्टांतानपेक्षणात् । सामान्यव्याप्त्यभिधावपितदभावाच्चेत्यतस्तद्वाक्यंव्याचष्टे ॥ सामान्यव्याप्तिरेवेति ॥ महत्तत्वाभिमानिनइति ॥ नचात्रमहच्छब्दःपूज्यत्वार्थकःकिंनस्यादितिवाच्यं । तत्वप्रकरणविरोधात् । तत्वोत्पत्त्यसिद्ध्यापाताच्चेतिभावः ॥ नैतद्देहइति ॥ अनेनप्रायिकत्वादित्यत्राधिकारस्येतिशेषउक्तो

SGDF Sri Gangadhar Digital Foundation

तात्पर्य- **प्र०** ष्णुभक्तेर्लाभइत्यतआह ॥ **अवैष्णवस्येति** ॥ भक्तिपूर्वकाध्ययनमुपलक्षणमित्याह ॥ **शमादिकमिति** ॥ आकांक्षितंपूरयति ॥ **पूर्वपूर्व** चंद्रिका.
॥ ७८ ॥ **स्मिन्निति** ॥ निष्कर्षति ॥ **ततश्चेति** ॥ एवमथशब्दव्याख्यानपरभाष्यटीकाभिप्रायंतदक्षरयोजनांचस्फुटीकृत्यातःशब्दार्थविवरणपरभा प्र. प्र.

"अवैष्णवस्यवेदेपिह्यधिकारोनविद्यत"इत्यादेरित्यर्थः ॥ अन्यायाध्ययनेति ॥ अभक्तानधिका रिकृतत्वमन्यायत्वं ॥ भक्तिपूर्वकाध्ययन(वत्त्व)मिति ॥ शमादिकमप्यत्रविवक्षितं ॥ उत्तरोक्ता १ । १
प्राचुर्येणेति ॥ पूर्वपूर्वस्मिन्निितिशेषः । ततश्चायमर्थः समानाधिकरणानांवेदाध्ययनशमादिविष्णु पादैकसंश्रयत्वादीनांमध्येयस्यशमादिविष्णुपादैकसंश्रयत्वादिकेअप्रचुरे अध्ययनंतुप्रचुरंसोधमः । यस्यविष्णुपादसंश्रयत्वादिकमेवाप्रचुरमध्ययनशमादिकेतुप्रचुरेसमध्यमः । यस्यतुविष्णुपादैकसंश्रय त्वादिकंप्रचुरमध्ययनशमादिकेत्वप्रचुरेसउत्तमइति ॥ यतोनारायणप्रसादमृतेनमोक्षइत्यादि ॥

गु० भवति। उत्तरोक्तस्यशमादेरुत्तरस्मिन्मध्यमादौप्राचुर्यसत्त्वादाह ॥ **पूर्वपूर्वस्मिन्निति** ॥ अधमनिष्ठाध्ययनापेक्षयामध्यमादावध्ययनादेःप्राचुर्यात्कथंतस्यतत्राप्राचु र्यमित्यतआह ॥ **ततश्चेति** ॥ एतेनपूर्वस्मिन्नधमेउत्तरोक्तयोःपूर्वस्मिन्मध्यमेउत्तरोक्तस्योत्तरस्मिन्नुत्तमेचोक्तयोःपूर्वोक्तयोःअप्राचुर्यमिति उत्तरोक्तात्पूर्वोक्तयोरप्राचु र्यमितिवातंत्रेणयोजनोक्ताभवति । अत्रोत्तरोक्तेतिग्रंथस्वारस्येनास्यार्थस्याभिधानादधमोत्तमयोस्तत्रोक्तमात्रप्राचुर्येपिसंगृहीताद्यप्राचुर्येणमध्यमेनुसंगृहीतोक्तयोःप्राचुर्ये णानुत्कृष्टस्याप्राचुर्येणवचनमुपपन्नमितिद्रष्टव्यं । एवमथशब्दस्यपरोक्तार्थनिरासेनभाष्यकृदुक्तोर्थःसाधितः । इदानींस्वीयेऽतःशब्दव्याख्यानेनुपपत्तिमाशंक्यपरिहरति ॥ ७८ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ष्याभिप्रायंस्पष्टयितुमाक्षिपति ॥ **नन्विति** ॥ इदं मोक्षसाधनप्रसादसाधनज्ञानहेतुत्वं । तदेवव्यनक्ति ॥ **अधिकारीति** ॥ अधिकारिविशेषणेच्छाविषयत्वेनेत्यर्थः । ज्ञानसाध्यत्वमादिपदार्थः ॥ **प्रातिपदिकेनेति** ॥ एतच्छब्दात्परपंचम्यास्तसिलादेशे"एँतदोश्"इतिप्रकृतिभागस्यैतच्छब्दस्याशादेशेअतइतिरूपं । तथाचप्रकृतपरामर्शकैतच्छब्दादेशेनाकारेणप्रकृतमुद्दिश्यतस्यतसिलाहेतुत्वमुच्यते । नचप्रसादस्यमोक्षसाधनत्वं ज्ञानस्यप्रसादसाधनत्वंचप्रकृतं । येनहेतुत्वमभिदध्यादित्यर्थः ॥ **विभक्त्येति** ॥ विभक्त्यादेशेनतसिलेत्यर्थः । उक्तशंकायाःसप्रधापरिहारमाह ॥ **यमित्यादिना** ॥ यमात्माप्रसन्नस्सन्वृणुतेतेनैवप्राप्यइतिश्रुत्या"नतादृशीप्रीति"रितिश्रुत्या"द्रष्टव्यःश्रोतव्य"इतिश्रुत्याचप्रसादादिगतमोक्षादिहेतुत्वस्यशब्दतःप्रकृतत्वसंभवादित्यन्वयः । बुद्धिस्थस्यहिपरामर्शः । बुद्धिस्थत्वंचश्रुत्युक्तत्वात्संभवतीतिभावः । यद्वाअध्याहारेणशब्दतःप्रकृतत्वसंभवादित्येवान्वयः । अध्याहारस्यनिरंकुशत्वाद्वैपरीत्येनाध्याहारःकिंनस्यादित्यतउक्तमित्यादिश्रुत्येति । तथाचश्रुत्याअध्याहारेणेतिअध्याहारेश्रुतिर्मूलमित्याशयेनव्यधिकरणेतृतीये । अध्याहारमूलभूतामर्थापत्तिंचाह ॥ **प्रयोजनेति** ॥ यद्वाशंकान्ति

ननुप्रकृतस्यहेतुत्ववाचकेनातःशब्देनकथमिदंलभ्यं । अधिकारिविशेषणत्वेनमोक्षस्यप्रकृतत्वेपितंप्रतिनारायणप्रसादस्यसाधनत्वादेरप्रकृतत्वेनतस्यातइत्यत्रप्रातिपदिकेनपरामर्शासंभवेनतस्यविचारकर्तव्यतायांहेतुत्वस्यविभक्त्योक्त्ययोगात् । मैवं । यमेवैषवृणुतइत्यादिश्रुत्याप्रयोजनाभावप्रयुक्तानारंभणीयत्वशंकानिरासहेतोरन्यस्याभावात् ।

गु० ॥ **नन्विति** ॥ **विभक्त्योक्त्ययोगादिति** ॥ प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थाभिधायकत्वादितिभावः ॥ **प्रयोजनाभावप्रयुक्तेति** ॥ विषयाभावप्रयुक्तप्रयोजनाभा

* अयंतुपाठोनकौमुद्यांदृश्यते । किंतुकाशिकायां ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० रासहेतोरन्यस्याभावादित्येतत्कुतइत्यतइत्यादिश्रुत्येत्यन्वेति। तथाचार्थापत्तिरेकैवाध्याहारेबीजमितिध्येयं। तत्रश्रौतंदृष्टांतमाह ॥स्रुवेणेति॥ आद्ये "अर्थाद्वाकल्पनैकदेशत्वा" दितिचतुर्थपादीयांतिमाधिकरणे "स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यति" इत्युदाहृत्यद्रवद्रव्येष्वाज्यादिषुसंहतेषुमांसादिषुपुरोडाशादिषुचकिमविशेषेणविनियोगःकिंवायथासामर्थ्यमितिविशये विशेषाश्रवणादनियमेप्राप्ते अशक्यार्थेविध्ययोगादवश्यंविधायकशक्तिःसहकारिणीत्युपेयत्वाच्छक्तिसहायोविधिरेवयथासामर्थ्यंविधेयंव्यवस्थापयतीतिद्रवद्रव्यादिषुस्रुवादीनांविनियोगइति सिद्धांतितं । तत्रयथासामर्थ्यानुसारेणविनियोगेसिद्धेस्रुवेणद्रवद्रव्यमवद्यतीत्याद्यध्याहारेणवाक्यंपूर्यतेतथेहापियमेवेत्यादिश्रुत्युक्तशंकानिरासहेतोरन्यस्याभावान्मोक्षहेतुप्रसादजनकज्ञानकारणत्वस्यैवोक्तशंकानिरसनसमर्थतयासएवभाष्योक्ताध्याहारेणपूर्यतइत्यर्थः । उक्तंचसुधायां "जिज्ञासोत्थज्ञानजात्तत्प्रसादादेवमुच्यते" इत्यत्र "यद्यपिनसूत्राक्षरेभ्योभगवत्प्रसादोलभ्यते । तथाप्यन्यथानुपपत्त्यांगीकरणीय" इति । अन्यथानुपपत्त्याऽध्याहारइत्यत्रभाष्योदाहृतंवचनंसंवादयति ॥ अतएवेति ॥ यस्माद्यतइत्यादिवाक्याध्याहारंविनाविचारकर्तव्यत्वरूपार्था

स्रुवेणावद्यतीत्यादौद्रवद्रव्यमितिवद्यतइत्यादिभाष्योक्ताध्याहारेणशब्दतःप्रकृतत्वसंभवात् । अतएव "यत्रानवसर" इतिश्लोकोयतइत्याद्यध्याहारसमर्थनपरतयापिव्याख्येयः । यद्वाजन्मादिसूत्रेप्रामाणिकत्वाज्जगतइदंशब्देनपरामर्शवदत्रापिप्रसादादेर्मोक्षहेतुत्वादेःप्रामाणिकत्वादेतच्छब्देनपरामर्शः ।

॥ ७९ ॥

गु० वशंकायाःविषयसमर्पकब्रह्मशब्देननिरासेपि एवंसत्यपिविषयइत्यादिवक्ष्यमाणस्वतंत्रप्रयोजनाभावप्रयुक्तानारंभणीयत्वशंकानिरासहेतोरतःशब्दान्यसौत्रपदस्यतत्सू

प्र० नुपपत्त्यायतइत्यध्याहारोतएवेत्यर्थः। नकेवलंकर्तव्यपदाध्याहारसमर्थनपरतयेत्यपेरर्थः। अतएवतत्रवाक्यंवेत्युक्तिरितिभावः। श्लोकार्थस्तुटीकायांस्पष्टः। प्रामाणिकत्वात् प्रमाणेनबुद्धौसन्निहितत्वात्। इदंशब्देन अस्येत्यनेन । ननुतत्रास्येत्येतत्प्रामाणिकत्वान्नजगत्परामर्शकं । किंतु "यतोवाइमानिभूतानी" तिविषयवाक्यगतस्यजगद्वाचिनइमानीत्यस्यविपरिणामेननिर्देशः । नचतत्रजीवंतीतिश्रवणाद्भूतपदस्यचेतनमात्रपरत्वेनकृत्स्नजगत्तत्रनप्राप्तमितिवाच्यं। भूतशब्दस्यसर्वचेतनपरत्वेतदभिमन्यमानमहदादिजडस्यापिप्राप्तेः । तेनविनातेषांजन्माद्युक्तेः । अन्यथाकृत्स्नहेतुत्वस्यश्रुतावप्राप्तौतद्व्याख्यारूपसूत्रेअस्येत्यनेनकृत्स्नलाभायोगाच्चेतिचेन्न । इमानीत्यनेनापिप्रामाणिकत्वादेवजगत्परामर्शस्यवाच्यतयासूत्रेपिसएवन्यायोनुसर्तव्यइतितात्पर्यात्। अतएवसुधायां "अस्य प्रत्यक्षादिप्रमाणसिद्धतयाप्रकृतस्यसमस्तप्रपंचस्ये" त्युक्तं । ज्ञानप्रसादहेतुत्वेक्रमेणआदिपदद्वयग्राह्ये । प्रामाणिकत्वेप्यप्रकृतस्यकथंपरामर्शइत्यतआह ॥ बुद्धीति ॥ प्रमाणमेवबुद्धौसन्निधापकमितिभावः । किंतत्प्रमाणमित्याशंकामुक्तार्थेभाष्यसंवाददर्शनेननिरस्यति ॥ अतएवेति ॥ बुद्धिस्थपरामर्शकत्वादेवेत्यर्थः । प्रमाणार्थस्तुटीकायांस्पष्टः । एवंभाष्यपर्यालोचनयालब्धंसमाधिद्वयमुक्तं । तत्रापियतइत्याद्यंतरंगभाष्यलब्धमादावुक्तं । उक्तार्थस्यप्रामाणिकत्वोक्तिपरबहिरंगभाष्यलब्धं

बुद्धिसंनिधानमेवहिप्रकृतत्वं। अतएव "तमेवंविद्वा" नित्यादिनातस्यप्रामाणिकतादर्शिताभाष्ये । यद्वा

गु० चितयुक्तेर्वाभावात्अतःशब्दस्यैवापेक्षितश्रौतस्याध्याहार्यत्वादितिभावः। अत्रशब्दतःप्रकृतत्वस्यबुद्धिप्रकृतत्वापेक्षयावहिरंगत्वात्प्रथमतस्तस्य अनंतरंतुबुद्धिप्रकृतत्व

SGDF Sri Gargeshwari Digital Foundation

प्र० पश्चात् । इदानींबहिरंगतःप्राप्त्यातदाह ॥ **एतत्सूत्रेति** ॥ **मोक्षप्रयोजनकत्वमिति** ॥ प्रसादद्वारेतिशेषः । ''यस्यप्रसादात्परमार्तिरूपा
दस्मात्संसारान्मुच्यतेनापरेणे''तिपूर्वार्धेनतत्प्राप्तेः । यद्यप्यत्र''तद्विजिज्ञासस्वे''तिश्रुतिरेवोदाहृता तथापिसूत्रस्यानेकशाखानिर्णायकत्वान्ना
नाशाखागतविचारविधायकबहुवाक्यव्याख्यारूपत्वादेवमुक्तं । एकस्योदाहरणंतूपलक्षणतयेतिभावः ॥ **प्रकृतस्येति** ॥ बुद्धौसन्निहितस्ये
त्यर्थः । ततोपिबहिरंगात्तत्प्राप्तिमाह ॥ **अनुव्याख्यानेति** ॥ ''कार्यताचनकाचित्स्या''दित्यादिनावेदस्यकार्यपरत्वादिकंनिरस्यसिद्धेव्युत्प
त्त्यादिसमर्थनेनब्रह्मपरत्वंसमर्थ्य ''एतत्सर्वंतर्कशास्त्रेब्रह्मतर्केहिविस्तरात् । उक्तंविद्यात्पृथक्त्वात्तुसंक्षेपेणात्रसूचितं''इत्यादिनाब्रह्मतर्केसिद्धम
तइतिपरामृश्यतइत्युक्तं । तद्वज्ज्ञानप्रसादद्वारामोक्षप्रयोजनकत्वंविचारस्यतत्रैवसिद्धमित्यतइतिपरामर्शोपपत्तिरित्यर्थः । ग्रंथांतरोक्तस्यग्रंथां
तरेकथंपरामर्शोतिप्रसंगादित्यतउक्तं ॥ **मीमांसांगेति** ॥ तदंगत्वंच ''प्रमाणन्यायसच्छिक्षाक्रियतेतर्कशास्त्रतः । मानन्यायैस्तुतत्सिद्धेर्मीमां
सामेयशोधन''मित्यनुव्याख्यानोक्तरीत्याध्येयं । तस्यचसूत्रकृतैवकृतत्वात्तत्रोक्तस्यातइतिपरामर्शोयुक्तइतिभावः । इदानीमंतरंगभूतसूत्रादेव

एतत्सूत्रनिर्णेतव्येन''नारायणोसौपरमोविचिंत्योमुमुक्षुभिःकर्मपाशा''दित्यादिविचारविधिवाक्येनोपस्थापितत्वा द्विचारस्यमोक्षप्रयोजनकत्वमतःशब्दार्थः । व्याख्येयेप्रकृतस्यव्याख्यानेऽतइतिपरामर्शसंभवात् । यद्वाअनु व्याख्यानोक्तरीत्यामीमांसांगभूतब्रह्मतर्केप्रकृतत्वात्सिद्धेव्युत्पत्त्यादिकमिवविचारस्यमोक्षहेतुत्वमतःशब्दार्थः ।

गु० स्वोक्तिः । प्रामाणिकत्वेनबुद्धिस्थत्वस्यप्रमाणाकांक्षस्यप्रथमसूत्रनिर्णेयविचारविधिवाक्योपस्थितत्वापेक्षयाबहिरंगत्वात्तदनंतरंतस्योक्तिः किरणीभूतविचारविधिवाक्य प्रकृतत्वापेक्षयामीमांसांगएवप्रकृतत्वस्यमुख्यत्वात्तदनंतरंतस्योक्तिः अंगप्रकृतत्वापेक्षयाअंगिप्रकृतत्वंमुख्यमित्यभिप्रायेणतदनंतरंतस्योक्तिः उत्तरसूत्रप्रकृतत्वापेक्षया ॥ ८० ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० प्रकृतत्वमाह ॥ **यद्वाजन्मादीति** ॥ **वक्ष्यमाणत्वादिति** ॥ मोचकत्वेनविष्णुर्जिज्ञास्यश्चेद्बंधकत्वेनाजिज्ञास्योपिस्यादितिप्राप्तेऽप्रसन्नस्यबंधकत्वंप्रसादहेतोर्जिज्ञासायाःकर्तव्यत्वानुकूलमेवनतुप्रतिकूलमितिवर्णकांतरस्यमोक्षदत्वाज्जिज्ञास्यमित्यनुव्याख्यानरीत्यावक्ष्यमाणत्वादित्यर्थः ॥ **अथैषइति** ॥ ‘‘अथैषज्योतिरथैषविश्वज्योतिःअथैषसर्वज्योति’’रित्युक्त्वा‘‘एतेनसहस्रदक्षिणेनयजेते’’त्युच्यते । तत्रैषज्योतिरित्येतच्छब्दोवक्ष्यमाणसहस्रदक्षिणाकयागपरामर्शकोयथातथेत्यर्थः । अतएवद्वितीयस्यद्वितीये‘‘संज्ञाचोत्पत्तिसंयोगा’’दित्यष्टमेधिकरणेअथैषज्योतिरित्याद्युदाहृत्यकिंप्रकृतज्योतिष्टोमएवज्योतिरादिशब्दैरुच्यतेअथकर्मांतरमितिसंदिह्यैतच्छब्दस्यप्रकृतगामित्वाज्ज्योतिष्टोमएवतैःशब्दैरुच्यतेइतिप्राप्तेएतच्छब्दस्यवक्ष्यमाणपरतयाप्युपपत्त्यासंज्ञाभेदात्कर्मांतराण्येवंनामकानीतिसिद्धांतितमितिभावः ॥ **अतःशब्देति** ॥ अतःशब्दप्रातिपदिकार्थत्वोपपत्तिरित्यर्थः । भिन्नसूत्रादप्यंतरंगेणाथशब्देनप्रकृतत्वमाह ॥ **यद्वामुमुक्षेति** ॥ एवंचेच्छाविषयत्वेनलब्धंमोक्षफलत्वंप्रातिपदिकेनपरामृश्यविभक्त्याहेतुत्वोक्तौयमेवैषइत्यादिभाष्योक्तश्रुत्यादिबलाज्ज्ञानजन्यप्रसादद्वारैवतत्सेत्स्यति । यथायागस्यस्वर्गहेतुत्वंश्रुतमपूर्वद्वारा

यद्वाजन्मादिसूत्रेब्रह्मणोविचारसाध्यज्ञानजन्यप्रसादद्वारामोक्षदत्वस्यवक्ष्यमाणत्वात्‘‘अथैषज्योति’’रित्यादौवक्ष्यमाणेप्येतच्छब्ददर्शनाद्भगवतउक्तद्वारेणमोक्षदत्वस्यातःशब्दार्थत्वोपपत्तिः । यद्वामुमुक्षारूपाधिकारानंतरंविचारःकर्तव्यइत्यथब्रह्मजिज्ञासापदाभ्यामुक्तेविचारविध्यधिकारिविशेषणेच्छाविषयत्वेनलब्धंमोक्षस्यप्रयोजनत्वमतइतिहेतूक्रियते ।

गु० ऽस्मिन्सूत्रएवार्थतोलब्धत्वात्तदनंतरंतस्योक्तिः अर्थतोलब्धत्वापेक्षयासाक्षादथशब्देनैवोपस्थापितत्वस्यमुख्यत्वात्तदंतेतदुक्तिरितिपूर्वापेक्षयोत्तरोत्तरस्यांतरंगत्वाभिप्रायेणपक्षभेदइतिध्येयं ॥ **लब्धंमोक्षप्रयोजनत्वमिति** ॥ विचारस्यमोक्षफलकत्वेलब्धे साक्षादसंभवेनार्थापत्तिसिद्धप्रसादादेरप्यतःशब्देनहेतुत्वोक्तिसंभवान्नास्यप

SGDF
Sri Gargeshwari Digital Foundation

प्र० यथावा“व्रीहिभिर्यजेते”तिश्रुतंकारणत्वंप्रोक्षणावघातादिद्वारानिर्वाह्यतेतद्वत् । आद्यपक्षेसर्वस्यसामर्थ्यलभ्यत्वमुक्तं । अत्रतुज्ञानप्रसादयोरेवेतिभावइतिबोध्यं । **उक्तंचसुधाया** “अधिकारिविशेषणत्वेनप्रकृतोमोक्षःसंबध्यत”इति । तत्वप्रदीपेचोक्तं निश्शेषदुःखनिवृत्तिःपरमसुखावाप्तिश्चेच्छाविषयत्वेनसदाहृदिकृताअतइत्युच्यतइति ॥ **नचात्रेति** ॥ बहुपक्षेषुमध्ये । यद्वासूत्रइत्यर्थः ॥ **अधिकार्यादेरिति** ॥ अधिकारिविषयप्रयोजनानांत्रयाणामपिमंदमध्योत्तमत्वेनेत्यादिभाष्योक्तप्रमाणेनसिद्धत्वादतोजिज्ञासेत्येवसूत्रणीयंस्यादितिभावः । बुद्धिस्थस्यप्रवृत्त्यंगत्वमित्यन्वयः । तत्रापि विषयप्रयोजनयोरपि ॥ **नासिद्धत्वनियमइति** ॥ धर्मस्यासिद्धस्यब्रह्मणःसिद्धस्यविषयत्वदृष्टेरितिभावः । यद्यप्येषाशंकातदनंतरमेवकर्तव्यातथापियथाधिकारिविशेषणेच्छाविषयत्वेनमोक्षस्यप्रयोजनत्वंलब्धंतथाब्रह्मज्ञानफलंनित्यमन्यफलमनित्यमित्येवंभूतनित्यानित्यवस्तुविवेकरूपाधिकारविशेषणविषयत्वेनब्रह्माख्यविषयस्याप्युपस्थापितत्वादतइतिपरामर्शेपृथक्ब्रह्मपदंनोपाददीतेतिशंकायाअपिनिरासात् । तथासप्तमेपिश्रवणविषयतयाब्रह्मणोथशब्देनोपस्थापनेनैवंविधशंकायास्तत्राप्युदयेनतन्निरासार्थत्वाच्चात्रकृता । अतएवां

नचात्रद्वितीयपक्षेऽधिकार्यादेरप्यतश्शब्देनैवपरामर्शसंभवादथशब्दादिवैयर्थ्यं । शमादेरधिकारिविशेषणस्यसिद्धस्यप्रवृत्त्यंगत्वं प्रयोजनादेस्त्वसिद्धस्यापिबुद्धिस्थस्यतत्रापि विषयस्यनासिद्धत्वनियमः प्रयोजनस्यतुतन्नियमइत्यादिविशेषज्ञापनार्थंपृथक्सूचनात् । ॥ ८१ ॥

गु० क्षस्यप्रकृतासंगतिरिति ॥ **नचात्रेति** ॥ यद्यपिद्वितीयपक्षानुपपत्तिशंकातत्परिहारौतत्रैवसंगतौ तथापितेनैवन्यायेनषष्ठेप्यनुपपत्तिशंकापरिहारौ तदेवमितिवक्ष्यमाण

प्र० त्योपांत्ययोर्मध्यएवैतच्छंकासमाधानमित्याहुः । इत्यादिविशेषेत्यादिपदेनस्वरूपाधिक्यमंगलार्थकत्वविषयवाक्यविशेषसूचनादिविशेषपरिग्रहः । यद्वा“तदेवंस्वर्गादिसाधन”इत्यादिनाथादिपदानांभिन्नभिन्नशंकानिरासकत्वरूपोवक्ष्यमाणोविशेषोग्राह्यः । अतइत्यनेनैवहेतुवाचिनात्रयाणांग्रहणेसिद्धानामेवहेतुत्वमितिसर्वेषांसिद्धत्वमसिद्धत्वमेववाज्ञायेतेतिभावः । प्रसादादेःसर्वस्यापिसाक्षादथशब्देनलाभप्रकारमाह ॥ **यद्वेति** ॥ जिज्ञासैवश्रवणमितिमतेतस्याधिकारिविशेषणत्वायोगात्तत्स्वरूपमुक्तमुपनिषद्भाष्यादीत्यादिना । सिद्धार्थेतिमननाद्येदोक्तिः । श्रवणविषयाणामनेकेषामथशब्देनोपस्थापितत्वादतइतिपरामर्शस्स्यादित्यतउक्तं ॥ **हेतुत्वयोग्यत्वाच्चेति** ॥ नेतरत्तद्योग्यमित्याशयः । एवंभाष्योक्तंज्ञानजन्यप्रसादद्वारामोक्षप्रयोजनकत्वरूपमतःशब्दार्थंसप्तधासमर्थ्याधुना“सूत्रेभाष्येऽनुभाष्येचे”तिप्रतिज्ञातार्थसिद्धयेऽनुव्याख्यानोक्तंफलसाधकहेतुविषयसाधकहेतुद्वयपरामर्शपरत्वमप्यनुव्याख्यानएवविक्षिप्यसमर्थितंसंगृह्यस्पष्टीकरोति ॥ **अनुव्याख्यानेत्वित्यादिनामतांतरमुक्तमित्यंतेन** ॥ अतः असत्यत्वेबाधकात्सत्यत्वाद्वेत्यर्थः । तदर्थं विष्णुप्रसादार्थं । अत्र आद्यसूत्रे । प्रत्यक्षादिवदागमस्यप्रामा

यद्वाउपनिषद्भाष्यादिरूपसिद्धार्थकथनात्मकोपदेशाधीनवाक्यार्थग्रहणात्मकस्यश्रवणस्यमननरूपजिज्ञासाधिकारिविशेषणत्वाच्छ्रवणविषयस्यमोक्षप्रसादादिसाध्यसाधनभावस्याथशब्दोपस्थापितत्वाद्धेतुत्वयोग्यत्वाच्चातइतिपरामर्शइति । अनुव्याख्यानेतु“अतोयथार्थबंधस्यविनाविष्णुप्रसादतः । अनिवृत्तेस्तदर्थंहिजिज्ञासात्रविधीयते । प्रत्यक्षवच्चप्रामाण्यंस्वतएवागमस्यहि । व्युत्पत्तिःप्रथमातस्माद्वर्तमानेऽगतेततः” । इत्यादिनाबंधस्यमिथ्यात्वात्तन्निवृत्तेः

गु० न्यायेज्ञेयावितिसूचयितुंषष्ठानंतरंतदुक्तिरितिज्ञेयं । भाष्यानुव्याख्यानयोरर्थसांकर्यशंकानिरासार्थंभेदमाह ॥ **अनुव्याख्यानेत्विति** ॥ अनुव्याख्यानेइत्युक्त्वा

SGDF Sri Gargeshwari Digital Foundation

प्र० ण्यंस्वतएव । संशयविपर्ययाजनकत्वेसतिज्ञानजनकत्वादेवेत्यर्थः । तस्मात्वर्तमानार्थव्युत्पत्तेःकारणत्वादनागताद्यर्थव्युत्पत्तेःकार्यत्वात् । वर्तमाने सिद्धेव्युत्पत्तिःप्रथमा । ततः पश्चात् । अगते अनागतेव्युत्पत्तिरित्यर्थः । त्रीण्यपिवचनानिभिन्नभिन्नस्थानानि । अतोनान्योन्यमसंगतिर्दोषाय । यद्यपिव्युत्पत्तिरितिवाक्यंपूर्वं प्रत्यक्षवच्चेतिपश्चात्तनं तथापिवक्ष्यमाणदिशोपपादनसौकर्यायव्यत्यासेनोपन्यासइतिनदोषः । इत्यादिनेत्यस्य अतःशब्देनोक्तं अतःशब्देनैवसूचिता इत्युक्त्वा इत्यन्वयः । आद्यश्लोकस्याभिप्रायवर्णनंबंधस्येत्यादि । उत्तरार्धयोर्विवरणंविषयसिद्धीत्यादि । शब्दस्यनप्रामाण्यमितिशंकानिरासःप्रत्यक्षवच्चेत्यनेनोपपादितः । व्युत्पत्तिरित्यनेनसिद्धार्थेप्रामाण्यंनेतिशंकानिरासइतिविवेकः ॥ **प्रसादनैरपेक्ष्यादिति** ॥ शुक्तिरूप्यादिनिवृत्तौतथोपलंभादितिभावः । नकेवलंप्रयोजनमित्यपेरर्थः । सत्यस्यापिनिवर्त्यत्वमादिपदार्थः । विषयसिद्धिहेतुयुक्तिषुगुणपूर्तिवेदप्रामाण्यसिद्धार्थबोधकत्वादिरूपासुमध्येयाब्रह्मपदसूचितातदतिरिक्तायुक्तिरतःशब्देनैवसू

प्रसादनैरपेक्ष्यान्नभगवत्प्रसादार्थाजिज्ञासामुमुक्षुणाकर्तव्येत्यादिशंकानिरासायप्रयोजनसाधकंजगत्सत्यत्वादिकमप्यतःशब्देनोक्तं । विषयसिद्धिहेतुयुक्तिष्वपिस्वप्रकाशप्रत्यगर्थाभिन्नत्वान्नविषयत्वमितिप्रमेयेआरोपिताकारशंकानिरासकृद्याब्रह्मपदसूचितायुक्तिस्तदतिरिक्ताशब्दस्यनप्रामाण्यंप्रामाण्येपिसिद्धार्थेनप्रामाण्यमित्यादिकाप्रमाणारोपिताकारशंकानिरासकृद्युक्तिरप्यतःशब्देनैवसूचिता । ॥ ८२ ॥

गु० इतिमतांतरमुक्तमितिसंबंधः । अनुव्याख्यानोक्तशब्दार्थविशेषमाह अनुव्याख्यानेत्वितीतिवा । ननुविषयाभावेनैवप्रयोजनादित्रितयस्यपूर्वपक्षितत्वात्सिद्धांतेब्रह्मश

SGDF
Sri Gargeshwari Digital Foundation

प्र० चितेत्यन्वयः । संक्षिप्योक्तेत्यर्थः। तदतिरिक्तेयुक्त्यानब्रह्मपदवैयर्थ्यमितिभावः । एतेनसिद्धार्थेव्युत्पत्त्याप्रामाण्योपपादकानुव्याख्यानावतारिकासुधायां "एवंमीमांसाप्रयोजनसमर्थनार्थत्वेनातःशब्दंद्वेधाव्याख्यायविषयसमर्थनपरतयापिव्याख्याती"त्युक्तत्वादतश्शब्देनैवविषयसिद्धेर्ब्रह्मेतिव्यर्थमितिशंकानिरस्ता । ननुपक्षद्वयेप्यप्रकृतस्यकथमतइतिपरामर्शइत्यतोनुव्याख्यानएवविक्षिप्योक्तंत्रेधासमाधानंदर्शयितुमेकंतावदाह ॥ **अपेक्षितेति** ॥ यद्यपीदमतोयथार्थबंधस्येतिश्लोकाभिप्रायंकथयतासुधाकृतैव "सेयमाशंकाऽतःशब्देनापेक्षितार्थसाधकहेतुसूचकेन निराकृते"त्यनेनोक्तं। तथापितदुक्तमेवानुव्याख्यानोक्तंमत्वैतदुक्तं । समाध्यंतरेअप्याह ॥ **यतइत्यादिना** ॥ नन्वनुभवसिद्धस्यापिकथंपरामर्शः ग्रंथतोप्रकृतत्वादित्यतोभिप्रायमाह ॥ **बुद्धाविति** ॥ बंधसत्यत्वादिकमिति सर्वमित्यस्यार्थः । एतेन "वेदप्रामाण्यादिक"मितिसुधास्थादिपदस्यबंधसत्यत्वादिकमप्यर्थउक्तोभवति । अतः ब्रह्मतर्केप्रकृतत्वात् । इत्यादिनेत्यस्योक्तमित्यन्वयः । अन्यत्रप्रकृतस्यान्यत्रकथंपरामर्शइत्यत उक्तंमीमांसांगेति । एककर्तृत्वाच्चतत्रत्यस्यात्रपरामर्शोयुक्तइतिभावेनोक्तंसूत्रकृत्कृतइति । तन्निर्णीतेति प्रमाणन्यायसच्छिक्षेतिश्लोकार्थोक्तिः ।

अपेक्षितार्थहेतुसूचकत्वादतःशब्दस्येत्युक्त्वा "यतोनुभवतःसर्वंसिद्धमेतदतोपिचे"त्यादिनाबुद्धौविपरिवर्तमानंहिसाक्षात्प्रकृतंग्रंथोक्तत्वंतुतल्लिंगंबंधसत्यत्वादिकंचानुभवसिद्धत्वात्प्रकृतमितिमतांतरमुक्त्वा "अतस्तदर्थसंक्षेपादतइत्यभ्यसूचय"दित्यादिनामीमांसांगभूतब्रह्मतर्काख्यतर्कशास्त्रेसूत्रकृत्कृतेप्रकृतोजिज्ञासाकर्तव्यत्वोपयोगीयुक्तिकलापोतःशब्दार्थः । तर्कशास्त्रस्यमीमांसांगत्वंचतन्निर्णीतस्वरूपसंख्याबलाबलादिभिःप्रमाणैरिहप्रमेयशोधनादितिमतांतरमुक्तं ।

गु० ब्देनविषयेसाधितेअन्यत्रितयंसेत्स्यतीति किमधिकार्यादिसाधकेनाथशब्दादिनेत्याशंक्य ब्रह्मशब्दनिवर्त्याधिकारिप्रयोजनशंका अथशब्दातःशब्दनिवर्त्यात्विन्येतिन

SGDF
Sri Gargeshwari Digital Foundation

प्र० तदेवमतश्शब्दार्थप्रस्थानद्वयोक्तंसमर्थ्येदानीमथब्रह्मशब्दार्थविविक्तत्वेनातःशब्दार्थंनिष्कर्ष्टुमथादेरप्यर्थंवदन्‌"भक्तिमान्परमेविष्णौ कर्मणा त्वधमःप्रोक्त"इत्यादिभाष्यस्योत्सूत्रत्वभ्रमनिरासायाथातःशब्दरूढत्वंटीकोक्तंस्फोरयन्नुपसंहरति ॥ **तदेवमित्यादिना** ॥ यद्वेहपूर्वपक्षेविषया भावादेवनाधिकार्यादीत्युक्ततयाविषयोपपादकब्रह्मपदेनैवाधिकार्यादिसिद्धेर्ब्रह्मजिज्ञासेत्येवपूर्त्याथातःपदयोर्वैयर्थ्यमित्यतोभिन्नभिन्नशंकानिरा सकत्वात्सार्थक्यमितिभावेनाथादिपदव्यावर्त्यशंकापूर्वंतत्तदर्थंनिष्कृष्याह ॥ **तदेवमित्यादिना** ॥ तत्कामः स्वर्गादिकामः ॥ **त्रैवर्णिकेति** ॥ उभयत्रकर्मब्रह्मतंत्रगतापशूद्रनयन्यायेनेतिभावः । ब्रह्मातःशब्दाभ्यामथशब्दस्यागतार्थत्वायोक्तं ॥ **सत्यपिविषयेफलेचेति** ॥ **राजत्वा दिरिवेति** ॥ यथा"राजाराजसूयेनयजेते"त्यत्रराजेतिवचनाद्राजत्वंतत्राधिकारिविशेषणं यथावा"ब्राह्मणोवाजपेयेनयजेते"त्यत्रब्राह्मणत्वंतथा "भक्तिमान्परमेविष्णा"वित्यादिवचनाच्छांत्यादिरपितद्विशेषणमितिभावः । एतेनभक्तिमान्परमइत्यादिभाष्यंनोत्सूत्रितमित्युक्तंभवति । एते नैवशमादिकंनाधिकारिविशेषणमितिमन्यमानाःस्मृतिसूत्रविरोधान्निरस्ताः ॥ **अतश्शब्दब्रह्मशब्दाभ्यामिति** ॥ यथायोगमन्वयः । ते

तदेवंस्वर्गादिसाधनेज्योतिष्टोमादौयथातत्कामस्त्रैवर्णिकोधिकारीतथाविचारस्यसत्यपिविषयेफलेचमुमुक्षुःत्रैवर्णिकोधि कारीनतुशांत्यादिकमपितद्विशेषणमितिशंकाराजसूयादौराजत्वादिरिववचनाच्छांत्यादिरपितद्विशेषणमितिसूचयताथ शब्देनपरिहृता । विषयप्रयोजनयोरभावान्निरधिकारित्वमितिशंकातुतत्समर्पकाभ्यामतश्शब्दब्रह्मशब्दाभ्यांनिराकृता ।

॥ ८३ ॥

गु० वैयर्थ्यमित्याह॥**तदेवमिति**॥ननुशांत्यादिकमित्यत्रापिसिद्धांत्यभिमताधिकाराभावाज्जिज्ञासाक्षेपएवपूर्वपक्षेभिप्रेतः॥**अतश्शब्दब्रह्मशब्दाभ्यामिति**॥अतश्शब्द

प्र० नाथशब्देनैवनिरधिकारिकत्वशंकानिरासात्तयोर्वैयर्थ्यमितिनिरस्तं । अतएवेहब्रह्मपदव्यावर्त्यपूर्वपक्षस्यैवप्रपंचनादेवमेवनिरधिकारिकत्वशं कापूर्वमुक्ता । नन्वतश्शब्दस्याधिकारिविशेषणत्वेनप्रकृतमोक्षार्थकत्वेपिसप्रयोजनकत्वेनविचारकर्तव्यत्वेसंभवतिप्रसादाद्यर्थपरत्ववर्णनमयु क्तमित्यतआह ॥ **एवमिति** ॥ नकेवलंनिष्प्रयोजनत्वाशंकानिरासकत्वमतश्शब्दस्यकिंतुवक्ष्यमाणशंकाद्वयनिरासकत्वमपीतिसमुच्चयार्थएवं शब्दः । यद्वाअतश्शब्दब्रह्मशब्दाभ्यामितिद्वयोःप्रत्येकमेवान्वयः । तत्रद्वयोर्यथाक्रमंप्रमाणप्रमेययोरारोपितान्यथाकारशंकानिवर्तनेनविषय समर्पकत्वस्योक्तदिशास्फुटत्वेनतदनुक्त्वानिष्प्रयोजनत्वशंकाचज्ञानादेःकर्मजन्यत्वादिप्रयुक्तैका आत्मज्ञानेसत्यपितदनुपलंभकृतान्या तद्द्वयो रपिक्रमान्निवर्तनेनद्वयमपिप्रयोजनार्पकमित्येतद्व्यनक्ति ॥ **एवमिति** ॥ **नसाक्षादिति** ॥ तमेवमितिज्ञानस्यैवमोक्षहेतुत्वश्रुतेः । ज्ञानजन नएवसामर्थ्याच्चेतिभावः । कर्मणासिद्धेरित्यस्य इतिशंकेत्यनेनान्वयः ॥ **नसाक्षादिति** ॥ "यस्यप्रसादात्"इत्यादिश्रुत्याप्रसादस्यैवतद्धेतुत्व श्रवणात्‌"नहरिंविना । ज्ञानस्वभावतोपिस्यान्मुक्तिःकस्यापिहिक्वचित्"इत्याद्यनुव्याख्यानोक्तदिशास्वतोसामर्थ्याच्चेतिभावः । प्रसादंविना ज्ञानादेवमोक्षइत्यत्रयुक्तिंचाह ॥ **ज्ञानेनेति** ॥ अज्ञाननिवृत्तेरेवमोक्षत्वात् । नहिदीपस्यान्धकारनिवृत्तावन्यापेक्षेतिपरैरंगीकारादितिभावः

एवंसत्यपिविषयेजिज्ञासानसाक्षान्मोक्षहेतुः । नापिज्ञानद्वारा । "कर्मणाज्ञानमातनोती" त्यादिश्रु त्याकर्मणापिसिद्धेः । किंचज्ञानमपि न साक्षान्मोक्षहेतुः । नापिभगवत्प्रसादद्वारा । तस्य "तत्कर्महरि तोषंय"दित्यादिनाकर्मणापिसिद्धेः । ज्ञानेनाज्ञाननिवृत्तौप्रसादस्यानपेक्षितत्वाच्चेतिशंका अतःशब्देन

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ प्रसादादेरिति ॥ प्रसादज्ञानयोर्मोक्षप्रसादहेतुत्वमित्यर्थः । तथा "श्रवणंमननंचैव कर्मणात्वधमःप्रोक्त" इत्यादिभाष्योक्तदिशाकर्मणोंतः करणशुद्धिद्वारापरंपरयैवज्ञानहेतुत्वंकर्मादिजन्यप्रसादादेर्मोक्षेतरहेतुत्वंचसूचयता इत्यप्यर्थः । तेनकर्मणेत्यादिकंभाष्यंनोत्सूत्रमितिध्येयं ॥ **ब्रह्मपदेनैवेति ॥** अतोनातश्शब्दारूढत्वप्रतिपादनक्लेशइतिभावः । अतएवपूर्वंब्रह्मपदव्यावर्त्यपूर्वपक्षप्रपंचनेनिष्प्रयोजनत्वशंकैवमेवोक्तेति भावः । नन्विदंसूत्रमनर्थकंविषयस्यपूर्वद्विकेअधिकारफलयोरुत्तरद्विकेप्रतिपादनेनततएवतज्ज्ञानसंभवादितिचोद्यमनूद्यावद्यति ॥ **यद्यपीति ॥** ननुयथाशास्त्रप्रवर्तकमिदंसूत्रंतथैतत्सूत्रप्रवर्तकेनाप्यन्येनभाव्यं । अन्यथैतत्सूत्रंविनापिशास्त्रेप्रवृत्तिप्रसंगइत्याशंकांसदृष्टांतंनिराह ॥ **अध्ययनेति ॥** यथा "स्वाध्यायोध्येतव्य" इतिवाक्यंसर्ववेदाध्ययनप्रवर्तकंसत्स्वाध्ययनेपिप्रवर्तयतिस्वाध्यायाध्ययनत्वादेव तथाविषयादिसत्त्वाच्छास्त्रमारभ्यमित्युक्तेस्यापिप्रागुक्तरीत्याशास्त्रांतर्गतत्वादारंभःसिध्यतीत्यर्थः । नन्वथापिश्रवणस्यविचाराधिकारिविशेषणत्वात्सिद्धार्थबोध

प्रसादादेर्मोक्षादिहेतुत्वंसूचयतापरिहृता । अहमितिब्रह्मणिज्ञायमानेपिमोक्षानुपलंभान्निःप्रयोजनत्वमितिशंकातुविषयसूचकेनब्रह्मपदेनैवनिरस्तेतिद्रष्टव्यं । यद्यपिविषयादिकंसमन्वयाध्यायादौ वक्ष्यते । तथापिशास्त्रेणविषयादिकंनिश्चित्यशास्त्रेप्रवृत्तावन्योन्याश्रयादादौतत्सूचनीयं । अध्ययनविधिवाक्यवदेतत्सूत्रस्यापिशास्त्रांतर्गतस्यशास्त्रारंभप्रतिपादकेनस्वेनैवारंभसिद्धेर्नानवस्था ।

गु० ब्रह्मशब्दाभ्यामेवनिराकृतत्वेननतदर्थमथशब्दोयेनवैयर्थ्यमितिभावः । सूत्रवैयर्थ्यंपरिहरति ॥ **यद्यपीति ॥** नन्वेवंप्रथमसूत्रारंभसिद्ध्यर्थमपिसूत्रांतराद्यन्वेषणीय

SGDF Sri Gargeshwari Digital Foundation

प्र० कोपनिषद्भाष्यादिनैवविषयादिज्ञानसंभवेनान्योन्याश्रयाभावादिदंसूत्रंव्यर्थमित्याशंकामनूद्यप्रत्याह ॥ **यद्यपीति** ॥ आपाततः विनैवविचारमित्यर्थः । एवंनिष्कृष्यातश्शब्दार्थोक्तेरुपयोगमाह ॥ **एवंचेति** ॥ एवंहितन्मतं अथशब्दस्तावदानंतर्याभिधानमुखेनहेतुतयैवपूर्ववृत्तमवगमयति । आनंतर्यमात्रस्यविफलत्वादिति । तथाचाथशब्देनैवप्रकृतस्यहेतुत्वसिद्धेरतश्शब्दस्यपुनरुक्ततेत्यर्थः । नन्वथशब्दलब्धस्यहेतुत्वमार्थिकमितिचेत्सत्यं । तथाप्यार्थिकेतात्पर्यात् । तस्यैवचवाक्यार्थेन्वयात् । पूर्वतंत्रेप्येवंव्याख्यातमितिचेत्किमतः । नहिपरांगंदग्धमितिस्वांगदाहदुःखंनिवर्ततइतिभावः । तदेवव्यनक्ति ॥ **अधिकारीति** ॥ एतेन ''अथशब्दोहिजिज्ञासाजनकमधिकारिस्थंधर्ममनधिकारिकत्वशंकानिरासायानुवदति । अतश्शब्देनतुप्रयोजनसिद्ध्यंगभूतंन्यायकलापंसूत्रकारःस्वयमाचष्टइतिकुतःपौनरुक्त्य''मितिसुधावाक्यंविवृतंभवति । सप्रयोजनत्वादेरित्यनेनविषयप्रयोजनसिद्ध्यंगभूतमितिसुधास्थमुपलक्षणमित्युक्तंभवति । यद्वासुधावाक्यमनुव्याख्यानानुसारि ।

यद्यपिविषयादिकमागमादेवापाततःप्रतीतं तथापिपूर्वपक्षोक्तन्यायेनतदभावशंकायांन्यायेनैतत्प्रतिपादयितुंसूत्रं । एवंचाथशब्दलब्धहेतुत्वस्यैवातश्शब्देनोक्त्याभास्करस्येवनास्माकंपौनरुक्त्यं । अधिकारिविशेषणस्यशमादेर्विचारकारकत्वस्याथशब्देनलाभेपिसप्रयोजनत्वादेर्विचारकर्तव्यताप्रमाणस्यातश्शब्देनोक्तेः ।

गु० मित्यनवस्थास्यादित्यतआह ॥ **अध्ययनविधिवाक्यवदिति** ॥ तथापिविषयादिसिद्धिरागमादेवभविष्यतीतिव्यर्थमेतदित्यतआह ॥ **यद्यपीति** ॥ एवंचाथातःशब्दौव्याख्याय परेषामथातःशब्दयोरैकार्थ्येनपौनरुक्त्यमिवनस्वमतेपौनरुक्त्यमित्याह ॥ **एवंचेति** ॥ ननुकथंनपौनरुक्त्यंस्वेनाप्यथशब्दोपस्थापितयुक्तिकलापस्यातश्शब्दार्थत्वेनोक्तत्वादित्यतआह ॥ **अधिकारिविशेषणस्येति** ॥ ननु सप्रयोजनत्वादिकथनंव्यर्थं जिज्ञासानुपयोगित्वादित्यतउक्तं विचारकर्तव्यताप्रमाण

SGDF
Sri Gargeshwari Digital Foundation

प्र० इदंभाष्यटीकाद्यनुसारि । अतएवपूर्वमवादि अनुव्याख्यानेप्रयोजनसाधकमप्यतश्शब्देनोक्तमिति । परोक्तमतश्शब्दार्थंनिराह ॥ भामत्यांत्विति ॥ अतइतीति ॥ अतइत्यत्रप्रातिपदिकेनेत्यर्थः । तर्हिसर्वेवे(दांता)दाअतश्शब्देनपरामृश्येरन्नित्यतआह ॥ योग्यत्वादिति ॥ अतश्शब्दोक्तहेतुत्वान्वयेशक्तत्वादित्यर्थः । ''तद्यथेहकर्मचितोलोकःक्षीयतेएवमेवामुत्रपुण्यचितोलोकःक्षीयत''इत्यादिःकर्मणोऽनित्यफलकत्वबोधकः''ब्रह्मविदाप्नोतिपर''मित्यादिर्ब्रह्मज्ञानस्यनित्यफलत्वबोधकः ॥ एवंचेति ॥ यद्यपीदंभामत्यांनस्पष्टं । तथापिकल्पतरावुक्तत्वादेवमुक्तं ॥ तत्स्वरूपेति ॥ जिज्ञासांप्रतिवैराग्यादिरूपसाधनकलापस्वरूपालाभपरिहारइत्यर्थः । अन्यथा अनुकूलवेदनीयेलौकिके ''यन्नदुःखेनसंभिन्न''मित्यादेर्दुःखासंभिन्नेआमुष्मिकेचसुखेनविरज्येतेतिवैराग्यादिस्वरूपंदुर्लभंस्यात् । अक्षय्यवाक्यान्नित्यत्वज्ञानेनविवेकोपिनस्यादि

भामत्यांतु ब्रह्मशब्देनतत्प्रमाणंवेदउपस्थापितोतइतिपरामृश्यते । सचयोग्यत्वात्तद्यथेहेत्यादिः । तथाचब्रह्मज्ञानकर्मणोर्नित्यानित्यफलत्वप्रतिपादकादागमादिहामुत्रफलभोगविरागादि ततश्चब्रह्मजिज्ञासा । एवंचनातश्शब्देन जिज्ञासांप्रतिसाधनकलापस्यहेतुतोच्यते । येनपौनरुक्त्यं । किंतुतत्स्वरूपालाभपरिहारोभिधीयतइत्युक्तं । तन्न ।

गु० स्येति । एवंस्वीयमतःशब्दव्याख्यानंसमर्थ्य परकीयतद्याख्यानमनूद्यदूषयति ॥ भामत्यांत्विति ॥ तत्प्रमाणमिति ॥ ब्रह्मणिप्रमाणमित्यर्थः । ब्रह्मशब्दस्यवेदवाचकत्वेनतेनतदुपस्थापनमितिभावः । तर्हिसकलवेदांताःपरामृश्येरन्नेत्याह ॥ योग्यत्वादिति ॥ अतःशब्दोक्तहेतुत्वसमर्थनयोग्यत्वादित्यर्थः । ननुतद्यथेहेत्यस्योपस्थानंकुतइत्यतआह ॥ सचयोग्यत्वादिति ॥ ततश्चेति ॥ विरागादेरित्यर्थः ॥ किंत्विति ॥ तस्यशमादेर्यत्स्वरूपंतस्यालाभः असिद्धिरित्यर्थः ॥ विरागादिसाधनान्वयायोगादिति ॥ विरागादिमज्जिज्ञासासाधनंतदन्वयायोग्यत्वादित्यर्थः । तथाचप्रधानसाध्येनस्वारसिकाकांक्षायाःसत्वेनतेनैवातःशब्दस्या

प्र० तिभावः ॥ हेतोरिति ॥ अतोब्रह्मजिज्ञासेत्यत्रातश्शब्दार्थस्यहेतोर्जिज्ञासाकर्तव्यत्वरूपप्रधानसाध्यान्वयः तस्मादनित्यःशब्दइत्यादाविवस्पष्टंप्रतीयतइतिप्रतीतस्यास्मदुक्तरीत्यायोग्यस्यसाक्षात्प्रधानसाध्यान्वयस्यत्यागेनजिज्ञासासाधनीभूतवैराग्यादिरूपाप्रधानसाध्यान्वयोनयुक्तइत्यर्थः । यद्यपितन्मतेयथाश्रुतेकर्तव्यपदाध्याहाराभावाज्जिज्ञासाकर्तव्येतिनार्थः । तथापिजिज्ञासाज्ञानेच्छाभवितुंयुक्तेतिश्रौतार्थेसत्यर्थाद्विचारकर्तव्यत्वंप्राप्तमित्येवमुक्तं । नन्वन्यस्याप्रकृतत्वादथशब्दार्थानंतर्यप्रतियोगिनोवैराग्यादेरेवातइतिहेतुत्वोक्तौपौनरुक्त्यापत्तेर्ब्रह्मपदोपस्थापितप्रमाणस्यैवयोग्यस्याथपदोपस्थापितवैराग्यादौहेतुत्वमुच्यतइतिचेन्न । अन्यस्यप्रकृतत्वस्यप्रागेवबहुधाप्रतिपादितत्वात् । दोषांतरंचाह ॥ अथशब्दार्थेति ॥ उपसर्जनस्य आनंतर्यविशेषणस्य । ननुवैराग्यादेस्स्वरूपालाभेसाधनाभावेनजिज्ञासायोगादेवमुक्तमित्यतआह ॥ अथशब्देति ॥ आनंतर्यप्रतियोगित्वेनोपस्थापितेत्यर्थः ॥ संभवइति ॥ अतएवभगवताभाष्येऽथपदव्याख्यावसरएव''आब्रह्मस्तंबपर्यंत''मिति ''परीक्ष्यलोका''नित्यादिप्रमाणमुक्तमितिभावः ॥ परंपरयेति ॥ ब्रह्मोपस्थितिद्वाराप्रमाणस्योपस्थापनादितिभावः । यदपियोग्यत्वात्तद्यथे

हेतोर्विचारकर्तव्यत्वादिरूपसाध्यान्वयत्यागेनविरागादिसाधनान्वयायोगात् । अथशब्दार्थानंतर्योपसर्जनस्यविरागस्यातश्शब्दोक्तहेत्वन्वयायोग्यत्वाच्च । अथशब्दोपस्थापितविरागेणैवस्वजनकस्यतद्यथेत्यादेर्वाक्यस्यसाक्षादेवोपस्थापनसंभवेब्रह्मशब्देनपरंपरयोपस्थापनोक्त्ययुक्तेश्च ।

गु० न्वयो नतुविरागादिसाधनेन । तेनस्वारसिकाकांक्षाभावादितिभावः ॥ अथशब्दार्थेति ॥ तथाचान्यविशेषणत्वेनोपस्थितस्यनान्यविशेषणान्वयेयोग्यत्वमितिभावः ॥ परंपरयेति ॥ ब्रह्मशब्देनतत्प्रमाणवेदोपस्थापनं तेनचतज्ज्ञानसाधनवैराग्यसाधनवाक्योपस्थापनं तेनविरागसिद्धिरित्येवंपरंपरयोपस्थापनोक्त्ययोगादित्यर्थः ।

SGDF
Sri Gurgaon Digital Foundation

प्र० त्यादिरित्युक्तंतदपिनेत्याह ॥ **विरागेति** ॥ नित्यानित्यवस्तुविवेकइत्यादिभाष्यव्याख्यायांनित्यःप्रत्यगात्मेत्यादिनातथैवत्वयोक्तत्वादितिभावः ॥ **विवरणेत्विति** ॥ अथशब्दार्थानंतर्यप्रतियोगिनोवैराग्यादिसाधनचतुष्टयस्यैवातइतिहेतुत्वमुच्यते । अथ साधनकलापानंतरं अतः साधनकलापादिति । नचकारणादानंतर्यस्याव्यवधेरभिचाराच्चमुख्यत्वेनतेनैववैराग्यादेर्हेतुत्वलाभात्पुनरुक्तिरितिवाच्यं । अक्षय्यवाक्येनकर्मजन्यसुखस्यनित्यत्वावगमेनब्रह्मज्ञानफलंनित्यमन्यफलमनित्यमितिविवेकस्यतद्धेतुकवैराग्यादेश्चायोगेनविवेकादिसाधनकलापस्यनविचारहेतुत्वमित्य

विरागहेतुत्वेनत्वदभिप्रेतसत्यानृतविवेके नेहनानेत्यादेरेवहेतुतयावक्तव्यत्वेनतद्यथेत्याद्युक्त्ययुक्तेश्च । विवरणेतु अथशब्दगृहीतायाएवसाधनकलापस्यब्रह्मविचारहेतुतायाः "अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृत"मित्यादिनाऽपवादशंकायांप्राप्तायांतन्निराकरणंपुनरथशब्दोक्तहेतुत्वाभिधायिनातश्शब्देनक्रियतइत्युक्तं । तदपिन ।

गु० किंच नेहनानेतिवाक्यमेवत्वयोदाहर्तव्यं । तस्यैवविरागहेतुसत्यानृतविवेकहेतुत्वेनत्वदभिमतत्वात् । नतुतद्यथेहेत्यादीत्याह ॥ **विरागहेतुत्वेनेति** ॥ विवरणोक्तपौनरुक्त्यपरिहारंदूषयितुमनुवदति ॥ **विवरणेत्विति** ॥ अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिश्रुत्या कर्मणामप्यनंतस्थिरफलकत्वोक्त्याकर्मणामल्पास्थिरफलकत्वं ब्रह्मज्ञानस्यस्थिरफलकत्वमित्येवंरूपजिज्ञासाहेतुभूतनित्यानित्यविवेकादेरभावान्नविचारःकर्तव्यइतिभावः ॥ **अपवादशंकायामिति** ॥ चातुर्मास्यादिकमेवकर्तव्यं तेनैवमोक्षप्राप्तिर्भविष्यति किंब्रह्मजिज्ञासयाइत्यपवादशंकायामित्यर्थः ॥ **अतश्शब्देनेति** ॥ उक्तस्यैवपुनःशब्दांतरेणोक्तौदार्ढ्येनशंकानिराकरणंभवतीतिभावः । अत्रवक्तव्यं किमथशब्देनोक्तमेवातःशब्देनोच्यते ततोधिकंकिंचित् । नाद्यइत्याह ॥ **अथशब्दोक्तेति** ॥ ननूक्तस्यैवहेतुत्वस्यपदांतरेणकथनेदा

SGDF
Sri Gargeshwari Digital Foundation

प्र० पवादशंकानिरासार्थत्वेनापौनरुक्त्यात् । दृश्यंतेचापवादनिरासार्थाअपि"मृडमृदे"त्यादिविधयइतिदूष्यांशस्यार्थः ॥ **इतिदिगिति** ॥ अयं भावः । विचारकर्तव्यत्वरूपप्रधानसाध्येऽपेक्षितसप्रयोजनत्वादिस्वतंत्रहेतुसमर्पणपरत्वसंभवेआनंतर्योपसर्जनस्यहेतुतयाप्राप्तस्यातश्शब्देनहे तुत्वोक्तेरयुक्तत्वात् अथशब्दोपस्थापितवैराग्यादिनैवस्वजनकस्यकृतकत्वरूपोपपत्त्युपबृंहितत्वेनप्रबलस्य"तद्यथेहकर्मचितोलोकःक्षीयत"इ त्यादिवाक्यस्योपस्थापनेनततएवापवादशंकानिरासस्संभवाच्च जिज्ञासाकर्तव्यतायामपेक्षितहेतोरवश्योपन्यसनीयस्यसप्रयोजनत्वादेरनुप न्यासेजिज्ञासाकर्तव्यत्वासिद्धेश्च अयंचदोषःप्राचीनमतेपिबोध्यः । नचमतद्वयेपिजिज्ञासापदेनैवप्रयोजनादेर्विचारकर्तव्यताहेतोर्लाभइति वाच्यं । निरसिष्यमाणत्वात् । हेतुपरेणातःपदेनैवफलादेर्हेतोःकथनस्यौचित्याच्चेत्यादिध्येयमिति ॥ **कालपरइति** ॥ अनंतरकालपरइत्यर्थः ।

अथशब्दोक्तानधिकाभिधायिनाऽपवादशंकानिरासेऽथश
ब्देनैवतन्निरासप्रसंगात् । हेतुत्वसाधकहेतोःकथनएवाप
वादशंकानिरासः नतूक्तस्यैवहेतुत्वस्यपदांतरेणकथनइति
दिक् । केचित्तु अथशब्दोजिज्ञासाविशेषणीभूतकालपरः ।

गु० र्थ्यहेतुत्वेनशंकानिराकरणमित्युक्तमतआह ॥ **हेतुत्वसाधकेति** ॥ वैराग्यादेर्जिज्ञासाहेतुत्वसाधकहेतोरित्यर्थः । द्वितीयंदूषयति ॥ **दिगिति** ॥ भिन्नार्थत्वेचते नैवपौनरुक्त्यासंभवे अपवादशंकानिराकरणमनर्थकंस्यादितिभावः । रामानुजमतंदूषयितुमनुवदति ॥ **केचित्त्विति** ॥ ननुब्रह्मजिज्ञासाकर्तव्यत्वमात्रस्यसाध्यत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० तदेवाह ॥ **नहीति** ॥ **सार्थकमिति** ॥ अथशब्दोक्तादधिकस्यैवातश्शब्देनोक्तेरितिभावः । उक्तंच"अधीतसांगसशिरस्के"त्यादिभाष्यव्याख्यावसरेश्रुतप्रकाशे"नकर्तव्यतामात्रंसाध्यधर्मः । अपित्वानंतर्यविशिष्टंकर्तव्यत्व"मिति । तथा"कर्मविचारानंतरंचब्रह्मविचारस्यकर्तव्यत्वे कर्मणामल्पास्थिरफलत्वनिर्णयसहितानंतस्थिरफलतापातप्रतीतिरित्ययंविशिष्टोहेतु"रितिच । अत्रअतःशब्दोक्तोयोविशिष्टोहेतुस्तदानंतर्यमथ शब्देनोच्यते उत"कर्मविचारानंतरंततएवहेतोर्ब्रह्मविचारःकर्तव्य"इतिभाष्यानुसारात्कर्मविचारानंतर्यमितिविकल्पौहृदिनिधायाद्येपौनरुक्त्यंतदवस्थमेवेत्याह ॥ **अथशब्दस्येति** ॥ तस्याः उक्तप्रतीतेः । ननुनवैयर्थ्यंअथशब्देनोक्तप्रतीत्यानंतर्यार्थेकेनहेतुत्वलाभेपितस्योक्तदिशा

नहिब्रह्मविचारस्यकर्तव्यतामात्रंसाध्यं किंतुधर्मजिज्ञासानंतर्यविशिष्टं। अतश्शब्दस्यतुतस्मिन्विशिष्टेसाध्येकर्मणामल्पास्थिरफलत्वनिर्णयसहितोब्रह्मज्ञानस्यानंतस्थिरफलतापातप्रतीतिरूपोविशिष्टोहेतुरर्थः। ततश्चसार्थकंपदद्वयमित्याहुः । तदपिन। अथशब्दस्योक्तप्रतीत्यानंतर्यार्थत्वेऽकारणानंतर्योक्तेर्वैयर्थ्येनाथशब्देनैवतस्याःहेतुत्वलाभादतःशब्दवैयर्थ्यात्।

गु० त्कालपरत्वेऽथशब्दवैयर्थ्यंस्यादित्यतआह ॥ **नहीति** ॥ **किंत्विति** ॥ धर्मविचारवतएवब्रह्मविचारेधिकारित्वात्तदानंतर्यार्थत्वमथशब्दस्येतिभावः ॥ **अतश्शब्दस्यत्विति** ॥ ननुकर्मणामप्यनंतस्थिरफलत्वात्तद्विचारएवस्यात्किंब्रह्मविचारेणेत्यतउक्तंकर्मणामिति । ननुकर्मणामिवब्रह्मज्ञानफलस्याप्यल्पास्थिरफलत्वात्किंतद्विचारेणेत्यतउक्तं ब्रह्मेति । हेतुसिद्ध्यर्थमाह ॥ **आपातेति** ॥ आपातप्रतीतिः श्रुत्येतिशेषः । तद्रूपइत्यर्थः । अत्रवक्तव्यं धर्मजिज्ञासानंतर्यमथशब्दार्थःकुत इति । नचधर्मविचारवतएवब्रह्मविचारेऽधिकारित्वात्तदर्थत्वमथशब्दस्येतिवाच्यं । आदौधर्मविचारःकर्तव्यःपश्चाद्ब्रह्मविचारइतिक्रमे श्रुत्यादिरूपक्रमप्रमाणाभावात्। अथकर्मणामल्पास्थिरफलत्वप्रतीत्यर्थंधर्मविचारआदौकर्तव्यइतिचेत् एवंसतिकर्मणामल्पास्थिरफलकत्वप्रतीत्यानंतर्यमेवाथशब्दार्थउक्तःस्यात् । एवंचसतिदूषणमाह ॥

प्र० ऽसिद्धिशंकायामतश्शब्देनतत्परिहारात् । अतएवश्रुतप्रकाशेएतदेवाशंक्य"अथशब्दाक्षिप्तहेत्वसिद्धिशंकापरिहारार्थत्वादतश्शब्दस्ये"ति समाहितमितिचेन्न । "अथशब्दोक्तानधिकाभिधायिने"त्यादिनापूर्वग्रंथेनैवतस्याःनिरासादितिभावः । द्वितीयेदोषमाह ॥ **अथशब्दस्येति** ॥ **त्वन्मतस्येति** ॥ "अतश्शब्दोवृत्तस्यहेतुभावे"इतिभाष्ये"प्रकृतपरामार्शिनैतच्छब्देने"त्यादिनाश्रुतप्रकाशेचतथोक्तेरितिभावः । यदपिधर्मविचारानंतर्यविशिष्टब्रह्मविचारकर्तव्यत्वंसाध्यमितितदपिनेत्याह ॥ **किंचेति** ॥ ननुविशिष्टाकर्तव्यत्वमेवपूर्वपक्ष्यतइत्यतआह ॥ **नहीति** ॥

अथशब्दस्यान्यानंतर्यार्थत्वेतुनोक्तप्रतीतिहेतुत्ववाचकत्वमतश्शब्दस्य । प्रकृतस्यहेतुत्वार्थोतश्शब्दइत्यस्यत्वन्मतस्यभंगात् । किंचसिद्धेव्युत्पत्त्यभावाद्विचाराकर्तव्यत्वेत्वद्रीत्यापूर्वपक्षितेब्रह्मविचारकर्तव्यतामात्रंसिद्धांतयितव्यं। नतूक्तानंतर्यविशिष्टं। नहिसिद्धेव्युत्पत्त्यभावेऽन्यदापिविचारस्यकर्तव्यता सिध्यति । तदेवं अथशब्देनाधिकारमतइत्यमुनाफलं । ब्रह्मशब्देनविषयंसूचयामाससूत्रकृत् । १ ।

गु० **अथशब्दस्येति** ॥ ननुअधिकारानंतर्यमथशब्दार्थोस्त्वित्यतआह ॥ **अथशब्दस्यान्यानंतर्यार्थत्वेत्विति** ॥ उक्तप्रतीतेः कर्मणामल्पास्थिरफलत्वप्रतीतेः हेतुत्वं विचारकर्तव्यत्वइतिशेषः । कुतोनहेतुत्ववाचकत्वमतःशब्दस्येत्यतआह ॥ **प्रकृतस्येति** ॥ धर्मजिज्ञासानंतर्यविशिष्टब्रह्मविचारकर्तव्यत्वंसाध्यमित्यत्रदूषणांतरमाह ॥ **किंचेति** ॥ ननुधर्मविचारात्प्रागपिब्रह्मविचारकर्तव्यत्वप्रतीतिःस्यात् । तदर्थमेवंसाध्यंक्रियतइत्यतआह ॥ **नहीति** ॥ अन्यदापि धर्मविचारात्प्रागपि । उक्तमर्थंकारिकारूढंकरोति ॥ **तदेवमिति** ॥ अतःशब्दब्रह्मशब्दयोर्विशेषतःफलविषयसूचकत्वोक्तिःप्राधान्याभिप्रायेण । अन्यथा प्रागतश्शब्दस्यविषयसिद्धिहेतुयुक्तिसूचकत्वेनविषयसूचकत्वस्योक्तत्वाद्ब्रह्मशब्दस्यनिष्प्रयोजनत्वशंकास्यात् । प्राधान्येनफलसूचकत्वस्योक्तत्वान्नतद्विरोधःस्यादितिबोध्यं । ननु पदद्वयेनवि

SGDF

प्र० स्वयंब्रह्मात:पदाभ्यांविषयफलसिद्धिमुक्त्वाजिज्ञासापदेनतल्लाभंनिराह ॥ **भामत्यांत्विति** ॥ निश्चितेज्ञानेच्छारूपजिज्ञासायोगाज्जिज्ञासापदोपादानेनजिज्ञास्यंब्रह्मसंदिग्धमितिसूचनात्तद्विषय: काम्यमानस्यचफलत्वेनजिज्ञासेत्यत्रप्रत्ययार्थभूतेच्छाविषयभूतंप्रकृत्यर्थरूपंज्ञानंप्रधानप्रयोजनमित्यर्थः ॥ **नहीति** ॥ नचसर्वजनीनाहमनुभवसिद्धआत्मासंदिग्धोवासप्रयोजनोवायेनजिज्ञास्य:सन्विचारंप्रयुंजीतेतित्वदीयपूर्वपक्षोपसंहारेजिज्ञासाक्षेपपूर्वविचारस्याक्षिप्तत्वादितिभाव: ॥ **नचेति** ॥ ज्ञानेच्छायांसिद्धायांविषयप्रयोजनसिद्धि: तत्सिद्धौचतत्सिद्धिरित्यन्योन्याश्रयादितिभाव: ॥ **प्रयोजनमिति** ॥ अवांतरप्रयोजनं । नतुभामतीमतइवमुख्यमित्यर्थः ॥ **सूचितइति** ॥ जिज्ञासापदेनेत्य

भामत्यांतु निश्चितेजिज्ञासायोगात्संदिग्धत्वेनब्रह्मैवविषयः । ज्ञानमेवेच्छाविषयत्वेनप्रयोजनमितिजिज्ञासापदेनैवविषयप्रयोजनेसूचितेइत्युक्तं । तन्न । नहिपूर्वपक्षिणाब्रह्मज्ञानेइच्छामंगीकृत्यतद्विचारआक्षिप्तः । किंतुविषयाद्यभावेनेच्छैवनोदेतुंयुक्तेत्याक्षिप्तं । नचतंप्रतीच्छायाविषयादिसाधनंयुक्तं । विवरणेतुअथशब्देनाधिकारी जिज्ञासापदेनेच्छाविषयत्वेनब्रह्मज्ञानंप्रयोजनं अर्थादधिकारिविशेषणंमोक्षोब्रह्मज्ञानफलं विषयश्चसूचितइत्युक्तं । तदपिन । त्वन्मतेजिज्ञासापदस्यविचारलक्षकत्वेनेच्छापरत्वस्याभावात् ।

गु० षयप्रयोजनसूचनमयुक्तं एकेनजिज्ञासापदेनैवोभयसूचनसंभवेनपदद्वयेनतत्सूचनस्यगौरवकरत्वादितिभामत्यामुक्तत्वादित्यतस्तन्मतंदूषयितुमनुवदति ॥ **भामत्यांत्विति** ॥ पूर्वपक्षिणाइच्छयाएवानंगीकृतत्वात्तद्विषयत्वेनविषयादिसाधनमयुक्तमित्याह ॥ **नहीति** ॥ विवरणमतंदूषयितुमनुवदति ॥ **विवरणेत्विति** ॥ ब्रह्म

SGDF Sri Gargeshwari Digital Foundation

प्र० न्वयः । मोक्षफलंत्वथशब्देन ॥ नहीति ॥ विषंबुभुक्षतइत्येतच्छत्रुगृहभोजननिषेधस्यलक्षकमितिनविषभोजनेच्छापरं । कूलंपिपतिषतीत्ये तत्कूलपतनमाशंक्यतइत्येतत्परं । नतुपतनेच्छापरं । "आशंकायांसन्वक्तव्य" इतिकात्यायनस्मरणात् । तथाचतत्रोभयत्रान्यार्थपरत्वाद्विष भक्षणादेरिष्टत्वंनास्ति । तद्वज्ज्ञानमपिनेष्टमितिनप्रयोजनस्यतेनलाभइतिभावः ॥ **पूर्वपक्षिणेति** ॥ तथाचान्योन्याश्रयइतिभावः ॥ **उक्त त्वाच्चेति** ॥ तदीयाथशब्दार्थखंडनप्रस्तावे । "नतावद्विचारविधौमुमुक्षुरधिकारी" त्यादिनेतिभावः ॥ **निरासाच्चेति** ॥ "मुमुक्षाचनपर पक्षेयुक्ते" त्यादिनेतिभावः । यदपिजिज्ञासापदेनविषयसूचनमितितदपिनेत्याह ॥ **विषयेति** ॥ यदसंदिग्धंजीवादिततोन्यस्येश्वरादेःसूचनं विनानशक्यं । तच्चब्रह्मपदेनैवेतिभावः । अयंदोषोभामतीमतेपिध्येयः । ननुजिज्ञासापदोपादानसामर्थ्यादेवतत्प्रयोजकसंशयादिलाभाद्वि

नहिविषंबुभुक्षतेकूलंपिपतिषतीत्यनेनविषभक्षणादेरिष्टत्वसिद्धिः । प्रतीतस्यापिमुख्यार्थस्य त्यक्तत्वात् । पूर्वपक्षिणेच्छानंगीकाराच्च । त्वन्मतेज्ञानेच्छाऽसंभवस्योक्तत्वाच्च । मुमुक्षा याअधिकारिविशेषणत्वनिरासाच्च । विषयसूचनंत्वसंदिग्धादन्यसूचनंविनानशक्यं ।

गु० ज्ञानफलंमोक्षइत्यर्थः । ननुसन्प्रत्ययस्येच्छापरत्वात्जिज्ञासापदस्येच्छापरत्वमित्यतआह ॥ **नहीति** ॥ ननुजिज्ञासापदस्यज्ञानेच्छारूपोमुख्यार्थःप्रथमप्रतीतः । तथाचतद्विषयत्वेनविषयादिलाभइत्यतआह ॥ **प्रतीतस्यापीति** ॥ **पूर्वपक्षिणेति** ॥ तथाचेच्छाविषयत्वेनविषयादिसाधनमयुक्तमितिभावः ॥ **त्वन्मतइति** ॥ नतावद्विचारविधौकामइत्यनेनेतिशेषः । जिज्ञासापदेनविषयसूचनमयुक्तमित्याह ॥ **विषयेति** ॥ असंदिग्धात्पदार्थादन्योर्थःतत्सूचनंविनेत्यर्थः । ननु ब्रह्मशब्दे

SGDF
Sri Gargeshwari Digital Foundation

प्र० षयादिसिद्धिर्भवति । अन्यथातद्वैयर्थ्यमित्यतआह ॥ **अन्यथेति** ॥ जिज्ञासापदसामर्थ्यादेवतत्सूचनइत्यर्थः । शास्त्रारंभप्रयोजकविषयादिसूचकमाद्यसूत्रंहित्वैवजन्मादिसूत्रमारभ्यशास्त्रआरब्धेसतियद्यत्रविषयादिकंनस्यात्तदाप्रेक्षावान्सूत्रकारोनारभेत आरभतेचातोत्रास्तिविषयादीत्यारंभसामर्थ्यादेववा तथाजिज्ञासायाविषयाद्यभावेकर्तव्यतोक्त्ययोगात्तत्सामर्थ्यादेववेत्यर्थः । उपलक्षणमेतत् । ''ईक्षतेर्नाशब्दं आनंदमयोभ्यासा''दित्यादौसाध्यनिर्देशसामर्थ्यादेवतत्प्रयोजकलाभादीक्षतेरभ्यासादितिहेतूपन्यासोव्यर्थइत्यपिध्येयं । भामतीमतेआक्षिप्तविचारकर्तव्यतासामर्थ्याभिप्रायेणवाक्यंयोज्यं । इतिशब्दोतश्शब्दव्याख्यासमाप्तौ । एवमोमथातश्शब्दान्सम्यग्व्याख्यायद्वयोरपव्याख्यांचप्रत्याख्यायक्रमप्राप्तस्यब्रह्मशब्दस्यपरोक्तमर्थंनिरसितुंभगवत्पादोक्तमर्थमाह ॥ **ब्रह्मशब्दश्चेति** ॥ ''ब्रह्मशब्देनपूर्णगुणत्वोक्ते''रितिन्यायविवरणोक्तेरितिभावः । यद्यपिदेशकालापरिच्छेदोपिब्रह्मपदार्थः तथापितत्राविवादाद्वागुणपूर्त्युक्त्यैवतस्यापिगुणस्यलाभाद्वा''देशतःकालतश्चैवे''त्युपसंहारात्उपलक्षणत्वाद्वानदोषः ॥ **अखंडस्येति** ॥ ''अस्तितावद्ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभाव''मित्यादिपरभाष्यादौवर्णनादितिभावः ।

अन्यथाशास्त्रारंभसामर्थ्यादेववाकर्तव्यतोक्तिसामर्थ्यादेववातत्प्रयोजकविषयादिसूचनसंभवाज्जिज्ञासापदादिनातत्सूचनोक्त्ययुक्तिरिति । ब्रह्मशब्दश्च''अथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणा''इत्यादिश्रुतिबलाद्गुणपूर्त्यर्थः । परपक्षेऽखंडस्यब्रह्मपदलक्ष्यस्यैवजिज्ञास्यत्वा

गु० नविषयंसूचयामासेत्ययुक्तं ब्रह्मशब्दस्यगुणपूर्त्यर्थत्वाभावेनविषयसूचनासंभवादित्यतआह ॥ **ब्रह्मशब्दश्चेति** ॥ ब्रह्मशब्दोपिस्वमतएवस्वरसोनतुपरमतइत्याह ॥

प्र० लक्ष्यत्वेहेतुरखंडत्वं । तच्चमुख्यार्थत्यागे । यद्यप्यत्रब्रह्मशब्दस्यशिवादिपरत्वंप्रच्याव्यविष्णुपरत्वमपिसमर्थनीयंतथापिभाष्यानुभाष्यादौभगवत्पादैरेवबहुप्रमाणैःसमर्थितत्वान्नेहतत्रपराक्रांतं । यद्वानिरंकुशगुणपूर्त्यर्थत्वोक्त्यैवभाष्याद्युदाहृतश्रुतिस्मृतिशतैरतादृशशिवादिप्रहाणेनतादृशविष्णुपरत्वसिद्धेरेवमुक्तं । यद्वागुणपूर्त्यर्थत्वोक्तिमात्रेणजीवाद्भेदसिद्ध्याविषयसिद्धेस्तदेवोक्तं । यद्वालक्षणसूत्रएवतस्यव्युत्पाद्यत्वाच्चभाष्यादौतदुक्तिःशिष्यहितायेत्याद्यूह्यं ॥ **श्रुतीति** ॥ ''तद्विजिज्ञासस्वतद्ब्रह्मे''तिश्रुतिस्थस्येत्यर्थः । एवंब्रह्मपदास्वारस्यमुक्त्वायद्ब्रह्मपदस्यदेशकालवस्तुपरिच्छेदलक्षणत्रिविधपरिच्छेदाभावरूपमहत्त्वमर्थइत्युक्तंतदपिनेत्याह ॥ **यच्चेति** ॥ यद्वानब्रह्मशब्दमुख्यार्थत्यागः । अखंडचैतन्यस्यैवब्रह्मशब्दस्वरसार्थत्वादित्यतस्तदनूद्यैवनिराह ॥ **यच्चेति** ॥ **तेनैवेति** ॥ उक्तरूपमहत्त्वार्थेनब्रह्मपदेनैवेत्यर्थः । अन्यथातद्रूपविकलत्वेननिरंकुशमहत्त्वासिद्धेः । नचेष्टापत्तिः । ब्रह्मणिजगद्व्यावृत्त्यभिलापादितिभावः ॥ **वैषम्यमिति** ॥ तात्विकेनाभेदाभावएवमहत्त्वासिद्धि

च्छ्रुतिसूत्रस्थब्रह्मपदस्यैवमुख्यार्थत्यागः । यच्चपरैर्ब्रह्मणोजीवाद्भेदेतद्रूपविकलत्वेनाल्पत्वंस्यादितिनिरंकुशमहत्त्वासिद्धेस्त्रिविधपरिच्छेदाभावरूपमहत्त्वार्थेनब्रह्मपदेनैवजीवाभेदसिद्धिरित्युक्तं । तन्न । तेनैवघटाद्यभेदप्रसंगात् । जीवस्वरूपस्यतात्विकत्वाद्घटादेश्चातथात्वाद्वैषम्यमितिचेन्न ।

गु० **ब्रह्मशब्दश्चेति** ॥ परोक्तांब्रह्मशब्देनैवजीवाभेदसिद्धिमनूद्यदूषयति ॥ **यच्चपरैरिति** ॥ **तद्रूपविकलत्वेनेति** ॥ जीवापरिच्छेदविकलत्वेनेत्यर्थः ॥ **तेनैवेति** ॥ ब्रह्मणोघटादिभ्योभेदेघटापरिच्छेदविकलत्वेनेत्यर्थः । अन्यथानिरंकुशमहत्त्वंनस्यादितिभावः ॥ **वैषम्यमिति** ॥ तथाचघटाभेदाभावेप्यल्पत्वाभावेननिरंकुशमहत्त्वसिद्धेर्घटाद्यभेदसाधकस्तर्कोऽन्यथासिद्धः । जीवाभेदसाधकस्त्वनन्यथासिद्धः । तात्विकप्रतियोगिकाभेदाभावस्यैवाल्पत्वप्रयोजकत्वादितिभावः । तात्विकप्रतियोगिका

SGDF
Sri Gargeshwari Digital Foundation

प्र० रितिभावः।वैषम्यमप्रयोजकमित्याह ॥ देशेति ॥ यथागगनादावताविकदेशकालाभ्यामपरिच्छेदस्यसत्त्वेनमहत्त्वंतथाघटादौतदपरिच्छे
दस्याभावेनाल्पत्वंदृष्टं तद्वदताविकादपिघटादेरभेदरूपस्यापरिच्छेदस्यब्रह्मण्यभावेनिरंकुशमहत्त्वासिद्ध्यालपत्वंस्यादित्यर्थः॥ ताविकस्येति॥
सप्रकारकज्ञानाबाध्यस्येत्यर्थः । यद्येवंविधमपिघटाद्यपरिच्छेदंसर्वंखल्विदंब्रह्मेतिश्रुतेर्वैयात्यात्कश्चिदंगीकुर्यात्तदाह ॥ स्वतुल्येति ॥ ननुदे
शादेर्घटसमसत्ताकत्वाद्देशाद्यपरिच्छेदाभावेतस्यालपत्वंयुक्तं । नतुब्रह्मणि । तस्यघटादेश्चभिन्नसत्ताकत्वाज्जीवब्रह्मणोश्चसमसत्ताकत्वेनमहत्त्व

देशकालयोरताविकत्वेपिगगनादाविवघटादौताविकस्यवास्वतुल्यसद्रूपस्यवादेशाद्यपरिच्छेदस्याभावेनाल्पत्ववदभेदस्या परिच्छेदरूपत्वेवस्तुनोघटादेरतात्त्विकत्वेपिब्रह्मणितात्त्विकस्यस्वतुल्यसद्रूपस्यवावस्त्वपरिच्छेदस्याभावेनाल्पत्वप्रसंगात् ।

गु० भेदाभावस्याल्पत्वेप्रयोजकत्वे देशादेरताविकत्वेनाताविकदेशाद्यभेदाभावस्यगगनादौसत्त्वेनतस्याप्यल्पत्वापत्त्या ताविकप्रतियोगिकाभेदाभावस्याल्पत्वप्रयोजक
त्वासंभवेन स्वतुल्यसद्रूपस्यापरिच्छेदस्यैवमहत्त्वे तदभावस्यैवाल्पत्वे प्रयोजकत्वेनवक्तव्यतया तत्रचस्वतुल्यसद्रूपप्रदेशाद्यपरिच्छेदस्यगगनादाविवघटादावभावेन तस्या
ल्पत्ववत्ब्रह्मणिस्वतुल्यसद्रूपस्यघटाद्यपरिच्छेदस्याभावेल्पत्वापत्त्याघटाद्यभेदोऽवश्यमंगीकार्यएवेत्याह ॥ देशकालयोरिति ॥ ननु भवत्पक्षेघटाद्यपरिच्छेदाभावेपिब्र
ह्मणोल्पत्वाभावाद्यास्यभावः अन्यथानेनैवन्यायेनघटाद्यभेदापातइतिशिष्यशंकानिरासायोक्तमभेदस्यापरिच्छेदरूपत्वइति । ब्रह्मण्यपिघटाद्यारोपस्यसत्वात्ताविकस्येत्युक्तं । स्वमतेनपरंप्रतिव्याप्त्यभावशंकापरिहारायोक्तंस्वतुल्यसद्रूपस्येति । उभयरीत्यागगनादाविवेत्युत्तरार्धंअत्रदृष्टांतत्वेनोक्तं । घटाद्यभेदाभावेप्रसक्तस्या
ल्पत्वस्यपरिहारोद्वेधा । अभेदस्यापरिच्छेदत्वेघटाद्यभेदांगीकारेण अभेदस्यापरिच्छेदत्वत्यागेनवेति । घटादिभेदांगीकारइवजीवभेदेप्यल्पत्वाप्रसक्तेर्नोक्तजीवाभेदसि ॥ ९० ॥
द्धिरितिविपर्ययेपर्यवसानंद्रष्टव्यं । तथाचस्वतुल्यसद्रूपस्यघटाद्यपरिच्छेदस्याभावेनतद्रूपविकलत्वेस्याल्पत्वंस्यादेवेतिभावः । ननु स्वतुल्यसद्रूपस्याऽपरिच्छेदस्याभावोना

SGDF Sri Gargeshwari Digital Foundation

प्र० सिद्धौजीवापरिच्छेदएवव्वक्तव्योनतुघटाद्यपरिच्छेदइत्याशंक्याह ॥ **नचेति** ॥ परिच्छेदकस्य घटादिनिष्ठपरिच्छेदनिरूपकस्य ॥ **घटतुल्येति** ॥ द्वयोर्व्यावहारिकत्वादितिभावः । घटादेरित्यनंतरंदेशाद्यपरिच्छेदाभावइतियोज्यं ॥ **नवस्तुतोल्पतेति** ॥ नवस्त्वभेदाभावकृतमल्पत्वमित्यर्थः ॥ **ब्रह्मतुल्येति** ॥ द्वयोस्तात्विकत्वादितिभावः । वस्तुतोल्पतेत्युक्तार्थे । स्वतुल्यसद्रूपनिरूपितापरिच्छेदएवमहत्त्वप्रयोजकोनतुभिन्नसत्ताकनिरूपितइत्ययंकल्पोनयुक्तोन्वयव्यतिरेकव्यभिचारादितिभावेनाह ॥ **तत्वतइति** ॥ स्वभिन्नसत्ताकनिरूपितापरिच्छेदस्यमहत्त्वाप्रयोजकत्वोक्तेरितिभावः । घटाद्यनात्मके घटाद्यपरिच्छेदरहिते । स्वतुल्यसद्रूपवस्त्वपरिच्छेदस्यमहत्त्वप्रयोजकत्वेतत्रात्पत्वबुद्धि

नचपरिच्छेदकस्यदेशादेर्घटतुल्यसद्रूपत्वाद्धटादेर्देशतोल्पता । ब्रह्मणितुपरिच्छेदकस्यघटादेर्वस्तुनःस्वतुल्यसद्रूपत्वाभावात्तदभेदाभावेपिनवस्तुतोल्पता । जीवस्यतुब्रह्मतुल्यसद्रूपत्वात्तदभेदाभावेवस्तुतोल्पतास्यादितिवाच्यं । तत्वतःसद्रूपेब्रह्मणि

गु० ल्पत्वहेतुः । येनघटादेःस्वतुल्यसद्रूपस्यदेशाद्यपरिच्छेदस्याभावेनाल्पत्ववत्ब्रह्मणोपिस्वतुल्यसद्रूपस्यघटाद्यपरिच्छेदस्याभावेनाल्पत्वंस्यात् । नचैवं । किंतुस्वतुल्यसद्रूपप्रतियोगिकपरिच्छेदाभावस्यैवतत्रप्रयोजकत्वं । तथाच घटादौस्वतुल्यसद्रूपदेशादिप्रतियोगिकपरिच्छेदस्यसत्त्वेनघटादेरल्पत्वेपि घटादेर्ब्रह्मतुल्यसद्रूपत्वाभावेनतत्कृतपरिच्छेदसत्त्वेपिब्रह्मणोनाल्पत्वं । जीवस्यतुब्रह्मतुल्यसद्रूपत्वात्तत्कृतपरिच्छेदेऽल्पत्वंस्यादितिजीवाभेदाभावेऽल्पत्वप्राप्तावपि घटाद्यपरिच्छेदाभावेपिनाल्पत्वमितिभावेनाह ॥ **नचेति** ॥ तथाचघटादेरल्पत्वेस्वतुल्यसद्रूपदेशाद्यपरिच्छेदाभावस्यप्रयोजकत्वात् स्वतुल्यसद्रूपस्यघटाद्यपरिच्छेदस्याभावेपिनब्रह्मणोल्पत्वापत्तिरितिभावः । घटादेर्ब्रह्मतुल्यसद्रूपत्वाभावेनतत्कृतपरिच्छेदेपितस्यस्वतुल्यसद्रूपत्वाभावमात्रेणाल्पत्वानापादकत्वे ब्रह्मणिदेशादिपरिच्छेदेपितस्यब्रह्मतुल्यसद्रूपत्वाभावमात्रेणैवाल्पत्वाभावसंभवेनब्रह्मणोपिदेशादिपरिच्छेदोपिस्यादित्याह ॥ **तत्वतइति** ॥ स्वतुल्यसद्रूपत्वरूपविशेषाभावात्विशिष्टाभावइत्यर्थः । किंचगगनादेःस्वतुल्यसद्रूपघटादिपरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यात् । नचैवमस्ति । अतस्तद्वज्जीवानात्मकेपिब्रह्मण्यल्पत्वबुद्ध्यभावोपपत्तिरितिभावः । ननुगगनादौदेशकालापरिच्छेदमात्रेणमहत्त्वबुद्धिर्युक्तेत्यतस्तुल्यंब्रह्मण्यपीतिभावेनतदुपपादयति ॥ **अन्यथेति** ॥ स्वतुल्यसद्रूपवस्त्वपरिच्छेदाभावेनाल्पत्वइत्यर्थः ॥ **भेदेति** ॥ घटादिपरिच्छेदमात्रेणेत्यर्थः । इयताग्रन्थेनपरिच्छेदकस्यस्वतुल्यसद्रूपत्वमल्पत्वप्रयोजकमित्याशंक्यनिरस्तं । इदानींपरिच्छेदस्यस्वतुल्यसद्रूपत्वम

**व्यवहारतःसद्रूपदेशादिनापरिच्छेदेपिमहत्त्वसिद्धिप्रसंगात् । स्व
तुल्यसद्रूपघटाद्यनात्मकेपिगगनादावल्पत्वबुद्ध्यभावाच्च । अन्य
थाकालापरिच्छिन्नेपिपरमाण्वादौदेशपरिच्छेदेनाल्पत्वबुद्धिवदु
भयापरिच्छिन्नेपिगगनादौभेदमात्रेणपरिच्छिन्नत्वबुद्धिःस्यात् ।**

गु० च्छेदस्यैवसत्त्वेनाल्पत्वंस्यादित्याह ॥ **स्वतुल्यसद्रूपेति** ॥ अनेनपरिच्छेदकस्यघटादेर्वस्तुनःस्वतुल्यसद्रूपत्वेपितदपरिच्छेदाभावेपिगगनादेरनल्पत्ववत् ब्रह्मणोपिजीवस्यस्वतुल्यसद्रूपत्वेपितदपरिच्छेदाभावेप्यल्पत्वाप्रसंगात्जीवाभेदासिद्धिः । अन्यथागगनादेर्घटाद्यभेदोप्येवंस्यादित्युक्तंभवति ॥ **अल्पत्वबुद्ध्यभावादिति** ॥ अन्यथाल्पत्वंस्यादित्यर्थः । तदेवोपपादयति ॥ **अन्यथेति** ॥ देशाद्यपरिच्छेदेपिस्वतुल्यसद्रूपवस्त्वपरिच्छेदाभावमात्रेणब्रह्मणोल्पत्वइत्यर्थः । तस्मात्स्वतुल्यसद्रूपप्रतियोगिकापरिच्छेदाभावस्याल्पत्वप्रयोजकत्वासंभवेनस्वतुल्यसद्रूपस्यापरिच्छेदस्याभावएवाल्पत्वप्रयोजकइतिजीवाभेदवद्घटाभेदस्याप्यभावेऽल्पत्वंस्यादितिभावः । ननुतथापिघटाद्यपरिच्छेदेपिनाल्पत्वं स्वतुल्यसद्रूपस्यपरिच्छेदस्यैवाल्पत्वप्रयोजकत्वात् । घटादौस्वतुल्यसद्रूपस्यदेशादिपरिच्छेदस्यैवाल्पत्वप्रयोजकत्वात् ब्रह्मणश्चघटादि

॥ ९१ ॥

प्र० ल्पत्वप्रयोजकमित्याशंकामुद्धाटयन्निरस्यति ॥ **नन्विति** ॥ **नस्वतुल्यसद्रूपइति** ॥ तात्विकस्यकस्यापिधर्मस्यब्रह्मण्यभावादितिभावः । स्वतुल्यसद्रूपभेदस्याल्पत्वेतादृशभेदाभावोमहत्त्वमित्युक्तंस्यात् । तथाचजीवाभेदोनसिध्यतीत्याह ॥ **तथात्वइति** ॥ नचजीवात्तादृशभेदाभावएवाभेदइतिवाच्यं । घटादेरपितादृशभेदाभावेनघटाद्यभेदापातादितिभावः । वैपरीत्यमपिसुवचमित्याह ॥ **गगनादाविति** ॥ तथास्वतुल्यसद्रूपः । ननुगगनादावपितादृशदेशादिपरिच्छेदाभावेनैवमहत्त्वंनतुतादृशापरिच्छेदेन येनब्रह्मणितादृशस्यघटाद्यपरिच्छेदस्याभावेन

**ननुघटादौस्वतुल्यसद्रूपदेशादिपरिच्छेदोल्पत्वंब्रह्मणिघटादिप्रतियोगिकोभेदरूपोवस्तुपरि
च्छेदोनस्वतुल्यसद्रूपइतिनाल्पत्वमितिचेन्मैवं । तथात्वेघटादिवज्जीवादपिस्वतुल्यसद्रूपभे
दाभावमात्रेणमहत्त्वसिद्ध्याजीवाभेदासिद्धेः । गगनादौस्वतुल्यसद्रूपोदेशाद्यपरिच्छेदो
महत्त्वं । नचब्रह्मणिघटादिप्रतियोगिकोऽभेदरूपोपरिच्छेदस्तथेतिमहत्त्वहानिप्रसंगाच्च ।**

गु० परिच्छेदेपितस्यस्वतुल्यसद्रूपत्वाभावेनतस्मिन्सत्यपिनाल्पत्वमितिशंकते ॥ **नन्विति** ॥ यद्यप्यत्रापि तत्वतःसद्रूपेब्रह्मणिव्यवहारतःसद्रूपदेशादिनापरिच्छेदेपिमहत्त्वप्रसंगात् स्वतुल्यसद्रूपघटाद्यनात्मकेपिगगनादावल्पत्वबुद्ध्यभावाच्चेति पूर्वपक्षिणोक्तदूषणमवशिष्टमेव तथापितन्निराकरणस्यैवमुख्यप्रयोजनत्वाभावात्परमप्रमेयमेवदूषयति ॥ **मैवमिति** ॥ घटादौस्वतुल्यसद्रूपस्यपरिच्छेदस्यैवाल्पत्वेनदृष्टत्वात् ब्रह्मणितदभावेनाल्पत्वाभावेगगनादौस्वतुल्यसद्रूपापरिच्छेदस्यैवमहत्वरूपत्वेनदृष्टत्वात् ब्रह्मणस्तदभावान्महत्वंनस्यादेवेत्याह ॥ **गगनादाविति** ॥ तथाचस्वतुल्यसद्रूपस्यपरिच्छेदस्याल्पत्वप्रयोजकत्वे घटादिवज्जीवादपिस्वतुल्यसद्रूपपरिच्छेदाभावमात्रेणमहत्वसिद्ध्या जीवाभेदासिद्ध्यापत्त्या जीवाभेदमभिलषतःस्वतुल्यसद्रूपस्यजीवापरिच्छेदस्याभावेऽल्पत्वापत्त्या जीवाभेदवत्स्वतुल्यसद्रूपस्यघटाद्यपरिच्छेदस्याभावेऽ

SGDF Sri Gargeshwari Digital Foundation

प्र० महत्त्वहानिःस्यादित्याशंक्यैवमपिब्रह्मणिताद्दशस्यघटादिपरिच्छेदस्याभावाभावेनमहत्त्वहानिरवर्जनीयेतिभावेनाह ॥ किंचेति ॥ यद्वाताद्दशापरिच्छेदोमहत्त्वमित्यापाद्यदूषितं । इदानींताद्दशापरिच्छेदोल्पत्वमितिपरोक्तरीत्यैवमहत्त्वहानिरितिभावेनताद्दशपरिच्छेदंब्रह्मण्युपपादयति ॥ किंचेति ॥ अपरिच्छेदस्य घटाद्यपरिच्छेदस्य । अभावे ब्रह्मणीतिशेषः ॥ ताद्दशेति ॥ ब्रह्मतुल्यसद्रूपेत्यर्थः । तथाचाल्पत्वंस्यादितिशेषः । विरुद्धयोरेकस्याताात्विकेऽन्यस्यतात्विकत्वनियमादितिभावः । ननुप्रतियोगिनोघटादेरतात्विकत्वात्तत्परिच्छेदापरिच्छेदयोर्द्वयोरप्यतात्विकत्वमेव । विरुद्धयोरितिन्यायस्तुतात्विकप्रतियोगिस्थलएवेत्याशंक्य सर्वत्रदर्शनान्नसंकोचोन्यायस्येतिभावेनाह ॥ तात्विकस्येति ॥ अप्रातिभासिकस्य । सप्रकारकज्ञानाबाध्यस्येतिवा । शुक्तिशकलस्येतिशेषः । वस्तुतोजीवाद्भेदेनब्रह्मण्यपरिच्छिन्नत्वमित्येतदुपसंहारव्याजेनाह ॥ तस्मादिति ॥ यस्माद्भेदस्यपरिच्छेदत्वेघटादितोभेदेनब्रह्मणःपरिच्छिन्नत्वंप्रसज्यते यस्माच्चपरिच्छेदकस्यघटादेःस्वतुल्यसद्रूपत्वाभा

किंचस्वतुल्यसद्रूपस्यापरिच्छेदस्याभावेताद्दशपरिच्छेदःस्यादेव । तात्विकस्याताात्विकादपिस्वतुल्यसद्रूपभेदस्यनेदंरूप्यमितिदर्शनात् । तस्माद्ब्रह्मणोजगतोव्यावृत्तिमपरिच्छिन्नतांचाभिलषताभेदस्यपरिच्छेदतैवत्याज्या । परिच्छिन्नाद्भेदेऽपरिच्छेदस्यैवसिद्धेः ।

गु० ल्पत्वप्रसंगेनघटाभेदोप्यंगीकार्यएवेतियुक्तमुक्तं । ननुस्वतुल्यसद्रूपस्यापरिच्छेदस्याभावेऽल्पत्वापादानंनिर्निबंधनमित्याशंक्य परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनाव्याप्तिमभिप्रेत्यविरुद्धत्वमेवव्यनक्ति ॥ किंचेति ॥ अल्पत्वंचपरिच्छेदस्तद्व्याप्तंवेत्यभिप्रायः । प्रतियोगिनोतात्विकत्वादेवनस्वतुल्यसद्रूपवस्तुप्रतियोगिकःपरिच्छेदइत्यतआह ॥ तात्विकस्येति ॥ तेनैवघटाद्यभेदप्रसंगादित्यस्यविपर्ययेपर्यवसानमाह ॥ तस्मादिति ॥ जीवाभेदसाधकपरोक्ततर्कस्यान्यथासिद्धिमहा

SGDF Sri Gargeshwari Digital Foundation

प्र० वेनवापरिच्छेदस्यस्वतुल्यसद्रूपत्वाभावेनवातत्परिहर्तुंशक्यतेतस्मादित्यर्थः। एवंबाधकोपदर्शनेनवस्तुभेदोनमहत्त्वभंजकोयेनतत्सिद्धयेजीवा भेदोभ्युपेयःस्यादित्युक्तं इदानींसत्यप्यनेकात्मकत्वेमहत्त्वबुद्धेरदृष्टेरसत्यपितस्मिन्तस्यादर्शनाद्व्यभिचारेणनवस्त्वभेदोमहत्त्वमित्याह॥ **किंचेति**॥ अल्पदेशादधिकदेशइतिबहुव्रीहिः । अल्पदेशावस्थितात्र्यणुकादितोधिकदेशावच्छिन्नेघटादावित्यर्थः । गुणो ज्ञानादिलक्षणः । पुंसीति शेषः ॥ **अनेकेति** ॥ अनेकभाषाभिन्नतत्समुदायरूपराश्यादावित्यर्थः । नन्ववयवप्राचुर्याप्राचुर्यवतोर्घटकपालयोर्महत्त्वाल्पत्वेदृष्टेइत्यतस्त त्राप्यन्यदेवप्रयोजकमित्याह ॥ **अवयवेति** ॥ अनेकाल्पावयवत्वेहेतू निबिडेति विरलेति । अस्तुवादेशकालापरिच्छेदवद्वस्त्वपरिच्छेदोमह त्त्वंतथापिसोयमपरिच्छेदःकिंब्रह्मणोभिन्नउतभिन्नः भिन्नत्वेपितात्विकोतात्विकोवेतिविकल्पान्हृदिकृत्वाक्रमेणप्रत्याह ॥ **किंचेति** ॥ वस्त्वप

किंचनिरंकुशमहत्त्वार्थंब्रह्मणःसर्वात्मकत्वे अल्पदेशादधिकदेशेऽल्पगुणादधिकगुणेचमहत्त्वबुद्धिवदेकात्मकाङ्गग नादितोऽनेकात्मकराश्यादौमहत्त्वबुद्धिस्स्यात् । अवयवानेकत्वेपिपरिमाणोत्कर्षादिनैवमहत्त्वं । निबिडानेकाव यवायःपिंडादपिविरलाल्पावयवेतूलराश्यादौमहत्त्वबुद्धेः । किंचापरिच्छेदस्यब्रह्मानन्यत्वेबृंहतिधात्वर्थस्यभावेपि

गु० ॥ **परिच्छिन्नादिति** ॥ एवंतर्हिनिरंकुशमहत्त्वसिद्धयेगुणोत्कर्षोपिनांगीकार्योऽविशेषादित्यतआह ॥ **किंचेति** ॥ ननु गुणोत्कर्षादिवत्स्वल्पावयवारब्धघटाद्यपे क्षयाऽनेकावयवारब्धेपिघटेमहत्त्वबुद्धेर्दृष्टत्वादनेकात्मकत्वस्यापितत्रनिमित्तत्वमित्यतआह ॥ **अवयवानेकत्वेपीति** ॥ तथाचात्राप्यधिकदेशत्वमेवतन्निमित्तमि तिभावः । अवयवानेकत्वस्यैवतन्निमित्तत्वेबाधकमाह ॥ **निबिडेति** ॥ ननु तन्निरूपितमहत्त्वस्यवास्तवत्वे ननिरूपकस्यमहत्त्वमावश्यकं । तदभावस्यैवात्रनिमित्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० रिच्छेदस्येत्यर्थः ॥ **प्रत्ययार्थाभावेनेति** ॥ बृहिवृद्धावित्यस्मात् “बृंहेरन्नलोपश्चे”तिमनिन्प्रत्ययेनलोपेऽमागमेयणिचब्रह्मेतिवृद्धिशब्दिता परिच्छेदवदुच्यते । वृद्धिशब्दितापरिच्छेदरूपत्वेपिवृद्धिमत्त्वरूपमपरिच्छिन्नत्वंनस्यादित्यर्थः । सुतरां असंशयं । अपरिच्छिन्नत्वासिद्धिरित्यन्वयः । तत्रहेतुस्तद्रूपेति । स्वतुल्यसद्रूपापरिच्छेदाख्यवस्त्वभेदशून्यत्वादित्यर्थः । ब्रह्मशब्दादभेदसिद्धिरित्युपन्यासोविरुद्धइत्याह ॥ **किंचेति** ॥ सद्वितीयत्वेकथमपरिच्छिन्नत्वमित्यतस्तदुपपादयति ॥ **देशादीति** ॥ येनद्वितीयाभावेसत्येवापरिच्छिन्नत्वंब्रह्मणःस्यादितिभावः । तत्रहेतुर्घटादेरिति । वस्तुतोघटादेस्त्वन्मतेऽभावेनतदपरिच्छेदोब्रह्मणस्स्यादित्यर्थः । नचेष्टापत्तिः । घटादिव्यावृत्त्यभिलापादितिभावः । यद्वाघटादेरपिब्रह्मणइवदेशाद्यपरिच्छिन्नत्वप्रसंगादित्यर्थः । तदपरिच्छेदेतदभावोनहेतुःघटादौव्यभिचारादित्युक्तं । अप्रयोजकश्चेत्याह ॥

प्रत्ययार्थाभावेनापरिच्छिन्नत्वासिद्धिः । अन्यत्वेपितात्विकत्वेसुतरा ।
तद्रूपविकलत्वात् । अतात्विकत्वेतत्वतःपरिच्छिन्नत्वापत्तिः । किंचवस्तु
तोल्पेसत्येवतन्निरूपितमहत्त्वस्यवास्तवत्वमितिब्रह्मशब्देनैवसद्वितीयत्वं ।
देशाद्यपरिच्छेदेपिनदेशादेर्वस्तुतोऽभावोहेतुः । घटादेरपितत्प्रसंगात् ।

॥ ९३ ॥

गु० त्वादित्यतआह ॥ **देशाद्यपरिच्छेदेपीति** ॥ **घटादेरपीति** ॥ तत्प्रसंगात् देशाद्यपरिच्छेदप्रसंगात् । देशादेरवास्तवत्वातिरिक्तस्यतत्प्रयोजकस्यानंगीकारादि

प्र० **देशादेरिति** ॥ तसिद्धेः अपरिच्छिन्नत्वसिद्धेः । अतिप्रसंगश्चेत्याह ॥ **बौद्धेति** ॥ विज्ञानवादिमतेविज्ञानव्यतिरेकेणकालादिजगतोभावेनकालाद्यपरिच्छेदःस्यात् । नचेष्टापत्तिः । क्षणिकत्वोपगमादित्यर्थः । अतोद्वितीयसत्त्वेपिब्रह्मणोपरिच्छिन्नत्वंयुक्तमित्यर्थः । यद्वा देशाद्यपरिच्छेदंब्रह्मपदार्थंब्रुवाणैर्ब्रह्मपदेनैवदेशकालरूपद्वितीयसत्त्वमुपेतमित्याह ॥ **देशादीत्यादिना** ॥ वस्तुतस्तुदेशाद्यपरिच्छेदेदेशाद्यभावोनहेतुःकिंतुतस्मिन्सत्येवतदपरिच्छेदः । तथापरिच्छिन्नेजीवादौसत्येवतदपेक्षयाऽपरिच्छिन्नत्वंयुज्यतइतिभावेनदृष्टांतमुपपादयति ॥ **देशादीत्यादिना** ॥ व्याख्यानंप्राग्वत् । तस्मादित्यस्यश्लोकेनान्वयः । चापिशब्दाःप्रत्येकमभिसंबध्यंते । त्रिभिःपूर्णतेत्युक्तैवकारव्यावर्त्यमाह ॥ **नत्विति** ॥ **तदुक्तमिति** ॥ गीतातात्पर्येद्वितीये । कथमस्मात्तल्लाभइत्यतआह ॥ **त्रिविधेति** ॥ विष्लृव्याप्तावित्यस्यक्नुप्रत्ययेरूपं विष्णुरिति । व्याप्तिश्चत्रेधाभवति । देशतइतिवचनादितिभावः । यद्यप्ययंशिवादिव्यावृत्त्यर्थत्वेनोपात्तस्तद्रूपविशेष्यपरः । तथैवभाष्येप्रतिपादनात् । तथापिविशेष्यंवदन्नुक्तत्रिविधपूर्त्यभिधानपूर्वमेवतद्वदति । सर्वशब्दानांयोगपूर्वमेवभगवतिवृत्तेरित्येवमुक्तं । एतेनावश्यवक्तव्यंजीवभेदकंविषयसिद्ध्यंगंगुणपूर्णत्वंब्रह्मपदार्थत्वेनानुक्त्वाविष्ण्वर्थत्वमनुपयुक्तमुच्यतइतिभाष्येऽनौचित्यचोद्यंनिरस्तं । विष्ण्वर्थकत्वेनतल्ला

देशादेःसत्त्वेपितत्परिच्छेदाभावमात्रेणापितत्सिद्धेश्च । बौद्धाभिमतक्षणिकविज्ञानादेरपिवस्तुतःकालाद्यभावेनापरिच्छिन्नत्वप्रसंगाच्च । तस्मात् देशतःकालतश्चैवगुणतश्चापिपूर्णता । ब्रह्मतानतुभेदस्यराहित्यंब्रह्मतेष्यते । १ । तदुक्तं “देशतःकालतश्चैवगुणतश्चत्रिधातति”रिति । तदेतदभिप्रेत्योक्तंभाष्ये “ब्रह्मशब्दश्चविष्णावेवे”ति । त्रिविधपूर्तिवाचकोहिविष्णुशब्दः ।

गु० तिभावः । नन्वेवंवस्तुतस्तदभावस्याप्रयोजकत्वे ब्रह्मणिदेशापरिच्छेदोपिनस्यात् । देशादेःसत्त्वादित्यतआह ॥ **देशादेरिति** ॥ घटादेरपितत्प्रसंगादित्युक्तंविशद

SGDF Sri Gargeshwari Digital Foundation

प्र० भात् । न्यायविवरणेब्रह्मशब्देनगुणपूर्णत्वोक्तेरुक्तत्वाच्च । विष्णवर्थकत्वंतुशिष्यहितायवागुणपूर्तियोग्यत्वायवेतिनानुपयुक्तं । एतेनब्रह्मपदस्याभेदार्थकत्वान्नाभेदपूर्वपक्षोनेननिरस्यतइतिकस्यचित्प्रलापोऽपोढः । उक्तरीत्याऽभेदार्थकत्वाभावात् । यदपिब्रह्मशब्दस्योक्तत्रिविधपरिच्छेदराहित्यार्थकत्वमुपेत्यशिवपरत्वप्रलपनंतदपिभाष्याद्युदाहृतप्रमाणजालैर्निरस्तंध्येयं । "पत्युरसामंजस्या"दितिसूत्रकृताकंठतःशिवस्यापूर्णत्वदोषवत्त्वयोरुक्तत्वाच्च । तस्यचानुव्याख्यानेबहुप्रमाणोदाहरणेनप्रपंचनाच्च । विस्तरस्तुगुरुपादकृतन्यायमौक्तिकमालातोनुसंधेयः । क्रमप्राप्तंब्रह्मजिज्ञासेत्यत्रसमासशोधनंकर्तुपराभिमतमनूद्यनिरस्यति ॥ **अत्रपरैर्मायावादिभिरिति** ॥ निराकृतेत्यन्वयः । यद्यपिसिद्धांतेपिकर्मणिषष्ठ्यासमासः । नात्रकिंचित्परोक्तंविरोधिनिरसनीयमस्ति तथापितादृशसमासःसिद्धांतएवयुक्तोनतुपरमतइतितद्भाष्यकारानौचित्यप्रदर्शनार्थस्वभावोपन्यासः ॥ **नचतुर्थीति** ॥ वृत्तिकारैर्ब्रह्मणेजिज्ञासेतिचतुर्थीसमासउक्तः । सनसंभवति । "तादर्थ्यसमासेप्रकृतिविकृतिग्रहणंकर्तव्य"मितिकात्यायनवचनेनयूपदार्वादिष्वेवप्रकृतिविकारभूतेषुचतुर्थीसमासनियमादितिभावः । षष्ठीचकर्मणीत्युक्तंव्यनक्ति ॥ **कर्मणिषष्ठ्याहीति** ॥ प्रतीतौविशेषणत्वेनसंबंधितयेत्यर्थः । एतदुक्तंभवति । जिज्ञासेत्यत्रेच्छायाअनुबंधिज्ञानं । ज्ञानस्यज्ञेयंब्रह्म । नखलुज्ञानंज्ञे

अत्रपरैः ब्रह्मणोजिज्ञासेतिषष्ठीसमासः । नचतुर्थीसमासः । षष्ठीचकर्मणि । नतुशेषे । कर्मणिषष्ठ्याहिप्रतीत्यनुबंधितयाजिज्ञासापेक्षितकर्मणःसाक्षाल्लाभः । शेषषष्ठ्यांतु

गु० यति ॥ **बौद्धाभिमतस्येति** ॥ परोक्ताकर्मणिषष्ठ्यपितन्मतेनयुक्तेत्यनुवादपूर्वकमाह ॥ **अत्रपरैरिति** ॥ **प्रतीत्यनुबंधितयेति** ॥ प्रतिपत्तौविशेषणत्वेनानुबध्यतइत्यनुबंधः । स्वरूपेणनिरूपितांयांजिज्ञासायांपश्चात्संबंधिन्यपेक्षा । ब्रह्म ज्ञानद्वाराजिज्ञासास्वरूपनिरूपकमिति प्रथमोदिताकांक्षावशेन ब्रह्म जिज्ञासयाकर्मत्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० यंविनानिरूप्यते। नचजिज्ञासाज्ञानंविनेतिप्रतीत्यनुबंधित्वात्प्रथमंजिज्ञासाकर्मैवापेक्षतेनतुसंबंधिमात्रमिति ॥ सामान्येति ॥ संबंधसामान्यस्यविशेषनिष्ठत्वात्प्रसक्तनिषेधेनजिज्ञासाकर्मत्वलाभइतिकुसृष्टिरित्यर्थः। यद्यपिपरपक्षेषष्ठया:कर्मत्वार्थकत्वस्यैवनिरस्यत्वेनतदेवानुवदनीयं। नतुशेषेषष्ठीनिरासप्रकारोपि। तस्यादूषणात्। तथापितस्यसिद्धांतेपिप्रतिपिपादयिषितत्वेनतदनुवादइत्यदोषः ॥ विचारेति ॥ विचारस्यस्वविषयविषयकज्ञानजनकत्वेनस्वजन्यज्ञानस्यसकलकारकशक्तिविधुरब्रह्मकर्मकत्वायोगेनतस्यापितत्कर्मकत्वायोगात्। ननुकारकशक्तिविधुरस्यापिशास्त्रजन्यापरोक्षवृत्तिव्याप्यत्वेनकर्मत्वव्यपदेशइत्यतआह ॥ अपरोक्षेति ॥ फलेति ॥ वृत्त्युपहितचैतन्येत्यर्थः। घटादौदर्शनादितिभावः। तथाचब्रह्मणःफलव्याप्यत्वरूपव्यापकस्याभावेनापरोक्षवृत्तिव्याप्यत्वमपितस्यनसंभवतीत्यर्थः। फलव्याप्यत्वंतुकर्तृकर्मविरोधान्नांगीक्रियतइतिभावः। गांधर्वशास्त्रविचारात्षड्जादिसाक्षात्कारदृष्टेर्ब्रह्मविचारात्तदपरोक्षवृत्तिर्जायतइत्यपरोक्षवृत्तिव्याप्यस्येत्युक्तं। ननुसिद्धांतेपिकःसमासः। नतावत्कर्मधारयः। ब्रह्मजिज्ञासयोरैक्यायोगेनवैयधिकरण्येनतदयोगात्। नापिद्वितीयातत्पुरुषः। श्रितादिभिरेवत

सामान्यद्वारेणेतिकुसृष्टिः। शेषषष्ठीपक्षेतद्धिजिज्ञास्यस्वेतिसाक्षाज्जिज्ञासाकर्मत्वप्रतिपादकश्रुत्यननुगमश्चेतिशेषषष्ठीनिराकृता। तदयुक्तं। परपक्षेविचारजन्यज्ञानाकर्मणोब्रह्मणोविचारकर्मत्वायोगात्। अपरोक्षवृत्तिव्याप्यस्यफलव्याप्यत्वनियमाच्च।

गु० नसंबध्यते। नतुसंबंधिमात्रतयेत्यर्थः। ननुविचारजन्यज्ञानकर्मत्वस्यब्रह्मण्यभ्युपगमात्कर्मणिषष्ठ्युपपत्तिः। नचैवंदृश्यत्वापत्त्यामिथ्यात्वापत्तिरितिवाच्यं। फलव्याप्यत्वरूपदृश्यत्वस्यैवतद्व्याप्यत्वांगीकारेणब्रह्मणस्तदापादनानुपपत्तेरित्यतआह ॥ अपरोक्षेति ॥ वृत्तिव्याप्यत्वमात्रस्यातीतादिसाधारण्ये तस्यापिफलव्याप्यत्वेविष

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यविधानात् । कृद्योगेद्वितीयायोगाच्च । नापितृतीयातत्पुरुषः । ब्रह्मणोविषयत्वाप्राप्तेः । अतएवनपंचमीसमासोपि । नापिवृत्तिकाररीत्या चतुर्थीसमासः । प्रकृतिविकारभावएवतादर्थ्यसमासस्यनियमितत्वात् । नापिसप्तमीसमासः । आधारसामान्यशक्तायास्तस्याविषयत्वरूप विशेषार्थकत्वेप्रतिपत्तिगौरवात् । सर्वत्र"सप्तमी"त्यादियोगविभागाश्रयणापाताच्च । षष्ठीसमासपक्षेपिनकर्मणिषष्ठ्यासमासआश्रयितुंयुक्तः । तथात्वेहिब्रह्मस्वरूपमेवजिज्ञासायांकर्मतयान्वेतीतिब्रह्मजिज्ञासैवप्रतिज्ञाता नतुप्रमाणादिजिज्ञासेत्यग्रेतेषांविचारोनयुक्तःस्यात् । शेषषष्ठ्याश्रयणेतुसंबंधमात्रंशेषइतिसाक्षात्पारंपर्येणचब्रह्मतत्प्रमाणादिजिज्ञासायाःब्रह्मसंबंधित्वात्सर्वजिज्ञासाप्रतिज्ञाताभवति । तथाच"कर्मणिषष्ठीपरिग्रहायजिज्ञास्योयंविधीयतइत्युक्त"मितिसुधावाक्यानुपपत्तिरित्याशंक्यकर्मणिषष्ठीसमासंसमर्थयते ॥ **स्वपक्षइति** ॥ ब्रह्मजिज्ञासायांप्रतिज्ञातायांलक्षणप्रमाणादिजिज्ञासामंतरेणतस्याअभावात्प्रधानब्रह्मजिज्ञासयैवार्थात्प्रमाणादिजिज्ञासापिलभ्यतइतिभावः । अतएवपरिकरयुक्तस्येतिपरिकरपदप्रयोगः । उक्तंचसुधायां"तस्याविनाप्यभिधानेनलाभा"दित्यादि । ननुयदिषष्ठीकर्मणिनशेषेतर्हि"कर्मणिचे"तिकर्मणिषष्ठ्यास्समासप्रतिषेधात्कथंसमासइतिचेन्न । "उभयप्राप्तौकर्मणी"त्यनेनविहितायास्तेननिषेधात् । इहचकर्मणएवोपादानंनतुकर्तुरित्युभयप्राप्त्यभावात् । यद्यथशब्दादधिकारित्वलाभात्कथंचित्कर्तृप्राप्तिंमन्यसेतर्हि"अकाकारयोःप्रयोगेनेतिवक्तव्य"मित्यकारप्रत्ययांतप्रयोगे"उभयप्राप्तौ"

स्वपक्षेकर्मणिषष्ठ्यामपिप्रमाणसाधनप्रयोजनादिपरिकरयुक्तस्यैवब्रह्मणोजिज्ञासाकर्मत्वान्नप्रमाणादिविचारस्याप्रतिज्ञातताप्रसंगः ।

गु० याप्रोक्षंस्यादित्यतउक्तम**परोक्षेति** ॥ स्वपक्षेकर्मणिषष्ठीमुपपादयति॥ **स्वपक्षइति** ॥ **कृद्योगलक्षणाचेति** ॥ जिज्ञासापदस्यचाकारप्रत्ययांतत्वात्कृद्योगः ।

प्र० वितिषष्ठ्यादिनिषेधादिहतेननषष्ठीत्यवेहि । अतएवतत्रमंजर्यांधर्मजिज्ञासादेवदत्तस्येत्युदाहृतं । जिज्ञासाशब्दस्याप्रत्ययादितिविहिताकारप्रत्ययांतस्यकृदंततया"कर्तृकर्मणोःकृतीत्ये"वषष्ठी । नन्वेवमपि"प्रतिपदविधानाषष्ठीनसमस्यत"इतिनिषेधात्सर्पिषोज्ञानमित्यादाविवेहापिषष्ठीसमासोनस्यादित्यतआह ॥ **कृद्योगेति** ॥ "कर्तृकर्मणोःकृती"त्यनेनविहितेत्यर्थः । प्रतिप्रसवः अपवादापवादः ॥ **नायंविषयइति** ॥ "ज्ञोऽविदर्थस्यकरण"इतिविहिताषष्ठीसर्पिषोज्ञानमित्यत्रेतिभावः । एवंसमासार्थंनिरूप्यक्रमप्राप्तजिज्ञासापदार्थंनिरूपयति ॥ **युक्त्यनुसंधानेति**॥ भगवतिशक्तितात्पर्यावधारणरूपसमन्वयादावुपक्रमादिरूपयुक्त्यनुसंधानात्मकेत्यर्थः । टीकायामेवमनुक्तेराह ॥ **सुधायामिति** ॥ अत्रजिज्ञासाशब्देनतस्यैवग्रहणेयुक्तिंचाह ॥ **न्यायेति** ॥ **मात्रेणेति** ॥ नतुश्रवणस्यापिकर्तव्यतोक्तेत्यर्थः । येनश्रवणमपिजिज्ञासापदेनात्रग्राह्यं

कृद्योगलक्षणाचषष्ठीसमस्यतइतिप्रतिप्रसवात्प्रतिपदविधानाषष्ठीनसमस्यतइत्यस्यनिषेधस्यनायंविषयइति । युक्त्यनुसंधानात्मकोमननापरनामकोविचारोजिज्ञासा । सुधायां"जिज्ञासानामयुक्त्यनुसंधानात्मकविचारापरपर्यायंमनन"मित्युक्तत्वात् । न्यायनिबंधनात्मकशास्त्रारंभणीयत्वस्यन्यायानुसंधानकर्तव्यतोक्तिमात्रेणसिद्धेश्च ।

गु० यस्तु"कर्मणिचे"तिकर्मणिषष्ठ्याःसमासप्रतिषेधः स"उभयप्राप्तौकर्मणी"तियाकर्तृकर्मणोरपिसामर्थ्यादुभयप्राप्तौकर्मण्येवेतिनियमिताषष्ठी तद्विषयः । यथा आश्चर्योगवांदोहोऽगोपेनेति । एवंह्याश्चर्यंव्यज्यते । प्राप्त्यभावात् । कर्तृकर्मणोःकृत्येवषष्ठीतेनब्रह्मजिज्ञासेत्युपपन्नःसमासः । ननुसुधायांविचारापरपर्यायमननस्यैवजिज्ञासाशब्दार्थत्वेनोक्तत्वात्तद्विरोधइत्यतःसुधाटीकयोर्विरोधंपरिहरति ॥ **युक्त्यनुसंधानात्मकइति** ॥ ननु न श्रवणादिरूपाजिज्ञासेतिटीकायामतद्गुणसंविज्ञानबहुव्री

SGDF Sri Gargeshwari Digital Foundation

प्र० स्यादितिभावः । तदेवाह ॥ नहीति ॥ विचारःश्रवणमितिंपरमतव्यावृत्त्यर्थमौपदेशिकेति । उपनिषद्भाष्यादिरूपोपदेशजातद्वाक्यार्थग्रहणेत्यर्थः ॥ उक्तेति ॥ न्यायनिबंधनात्मकरूपेत्यर्थः । न्यायानुसंधानस्यतन्निबंधनात्मकशास्त्रंविनायोगेनतत्कर्तव्यत्वमेवतदारंभणीयत्वंप्रयोजयतिनतुवाक्यार्थग्रहणंतस्यव्याख्यानादिरूपोपदेशापेक्षत्वादितिभावः । यद्यपिवक्ष्यमाणदिशाश्रवणकर्तव्यत्वमपिशास्त्रारंभप्रयोजकंतथापिपरंपरयातथात्वेपिनसाक्षादितिभावः । श्रवणकर्तव्यत्वंनशास्त्रारंभप्रयोजकमित्यत्रसुधासंमतिपूर्वकंहेतुमाह ॥ श्रवणजमिति ॥ टीकाविरोधइत्यतस्तद्वाक्यस्यचतुर्धासमाधिमाह ॥ श्रवणादीति ॥ तस्यगुणस्यान्यपदार्थविचारंप्रत्युपसर्जनीभूतस्यश्रवणस्यान्यपदार्थेसंविज्ञानंयस्मिन्बहुव्रीहौनास्तिसोयमतद्गुणसंविज्ञानबहुव्रीहिः । तथाचश्रवणस्यत्यागेनान्यपदार्थोविचारएवजिज्ञासापदार्थउक्तइत्यर्थः । अस्मिन्पक्षेश्रवणपूर्वकत्वंमननस्यद्योतयितुमेवंनिर्देशइतिभावः । उपात्तस्याविवक्षायांज्ञापकमाह ॥ अतएवेति ॥ तत्प्रयोगात् सन्नंतप्रयोगादित्यर्थः ॥

नह्यौपदेशिकवाक्यार्थग्रहणलक्षणश्रवणस्यकर्तव्यता उक्तरूपशास्त्रस्यारंभणीयत्वेहेतुः । “श्रवणजंज्ञानंपूर्ववृत्त”मितिसुधायांमीमांसातस्तस्यपूर्ववृत्तत्वेनोक्ततयाशास्त्रस्यारंभणीयत्वंविनापितत्कर्तव्यतासिद्धेः । “श्रवणादिरूपाजिज्ञासाकार्ये”तिटीकायांत्वतद्गुणसंविज्ञानबहुव्रीहिणाविचारएवोक्तः । अतएव“विचारेपितत्प्रयोगा”दित्युत्तरग्रंथः । ॥ ९६ ॥

गु० हिणाविचारमात्रस्यैवजिज्ञासाशब्दार्थत्वमभिप्रेतं तज्ज्ञापकाभावात् । नचविचारेपितत्प्रयोगादित्युत्तरग्रंथएवतत्रमानमितिवाच्यं । तस्येच्छाव्यतिरिक्तेप्यर्थेसन्नंतश

SGDF Sri Gargeshwari Digital Foundation

प्र० यद्वेति ॥ अस्मिन्पक्षेटीकायांश्रवणादीतिश्रवणादेरितिचद्विःश्रवणशब्दप्रयोगस्वारस्यमादिपदोपात्तमनननिदिध्यासनयोःस्वारस्यं विचारेपि तत्प्रयोगादितिटीकाचविचारार्थकत्वप्रदर्शनमुखेनछत्रिन्यायेनश्रवणनिदिध्यासनयोर्लक्षकतयात्रितयार्थत्वाभिप्रायेणोपपन्नेत्याशयः । जिज्ञासाशब्दस्यत्रितयार्थत्वेनत्रिषुकर्तव्यत्वान्वयेपिविचारकार्यत्वमेवशास्त्रारंभहेतुर्नत्वितरकार्यत्वमपीत्यर्थः । ननुविषयाद्यभावेनमननाकर्तव्यत्वपूर्वपक्षोक्तौतुल्यन्यायतयाश्रवणादेरपितथात्वप्राप्त्याकथंदृष्टांतत्वमित्यतआह ॥ अथवेति ॥ तदंगेत्यकर्तव्यत्वेहेतुः । तदंगत्वंचन्यायामृते तृतीयपरिच्छेदेसाधितमितिभावः । परंपरया मननकर्तव्यताद्वारा । आरंभणीयत्वे शास्त्रस्येतिशेषः । श्रवणकर्तव्यत्वस्याप्यारंभहेतुत्वमाह ॥ तथेति ॥ यद्वेति ॥ नह्यापाततएवैवंरूपंज्ञानंभवतीतिभावः ॥ हेतुरिति ॥ परंपरयेत्यन्वयः । ननुयथाकथंचित्रितयकर्तव्यत्व

यद्वायथाश्रवणनिदिध्यासनेविहितत्वान्मुमुक्षुणाकार्येतथामननमपीतिदृष्टांततयातयोरुपादानं । नतुशास्त्रारंभहेतुतया । अथवानिदिध्यासनस्याकर्तव्यत्वेतदंगमननस्यापितथात्वात्परंपरयानिदिध्यासनकर्तव्यताआरंभणीयत्वेहेतुः । तथाप्रतिवाक्यार्थमयंवाक्यार्थोयुक्तअन्योवेतिसंशयादिनिरासकविचारशास्त्रव्युत्पाद्यन्यायावतारांगसंदेहकारणस्ययत्नसाध्यस्यप्रतिवाक्यमयमस्यवाक्यस्यार्थइत्येवंरूपस्यश्रवणजज्ञानस्याभावेशास्त्रारंभासिद्धेस्तत्कर्तव्यताप्यारंभणीयत्वेहेतुरेवेत्यारंभसिद्ध्यर्थमेवत्रितयकर्तव्य

गु० ब्दप्रयोगादित्येवंपरत्वेनाप्युपपन्नत्वादित्यरुच्यापक्षांतरमाह ॥ यद्वेति ॥ अत्रापिदृष्टांतत्वज्ञापकंटीकायांकिमपिनास्तीत्यरुचेराह ॥ अथवेति ॥ तदंगेतिहेतुगर्भविशेषणं । तथाचदर्शपूर्णमासयोरकर्तव्यत्वेप्रयाजादेरकर्तव्यत्ववत्अंगिभूतस्यनिदिध्यासनस्याकर्तव्यत्वेमननस्याकर्तव्यत्वमितिभावः ॥ तथेति ॥ संशयादिनिरासकोयोविचारशास्त्रव्युत्पाद्योन्यायः तदवतारेंगभूतोयःसंदेहः तत्कारणस्येत्यर्थः । तथाचश्रवणजज्ञानाभावे धर्मिज्ञानाभावेनतत्साध्यसंदेहासंभवेनन्यायावता

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्याभिमतत्वे"सर्ववेदांतप्रत्ययंचोदनाद्यविशेषा"दितितृतीयतृतीयपादाद्याधिकरणेद्वयोरेवकर्तव्यत्वोक्त्यनुवादोविरुध्येतेत्यतआह ॥ **यस्त्वि ति** ॥ टीकोक्तत्रितयार्थत्वंसाधयति ॥ **नचेति** ॥ **इच्छार्थइति** ॥ ज्ञानांशस्यानुपयोगात्प्रत्ययार्थएवोक्तः ॥ **दोषाभावादिति** ॥ श्रवणादित्रित यलक्षकत्वेबाधकाभावादितिभावः ॥ **छत्रिवदिति** ॥ यथाछत्र्यच्छत्रिसमुदायेछत्रिसाहचर्याच्छत्रिणोगच्छंतीतिलक्षणयाछत्रिशब्दः तथाविचारेशक्तस्यतत्सहपठितयोर्लक्षणोपपत्तेरितिभावः । सुधायांपक्षद्वयस्याप्युक्तेः इतिपक्षइतिपक्षपदप्रयोगः । एतेनविचारेपीतिटीकावा क्यंविचारशब्दस्योपलक्षणतयाश्रवणादेरसन्वाच्यत्वेपिलक्षणयाश्रवणादौप्रयोगसंभवादिति विचारेप्रयोगवशात्तत्रशक्तस्यापि छत्रिवल्लक्षणया श्रवणादौप्रयोगसंभवादितिचद्वेधायोज्यमित्युक्तंभवति । कथंतर्हिप्रस्थानद्वयस्यविरोधपरिहारः । अत्रत्रितयस्यापिविवक्षितत्वोक्तेरित्यतःसर्व

तोक्ता । यस्तुसर्वशाखाधिकरणेटीकायांश्रवणमननेकर्तव्येइतिप्रथमसूत्रेउक्तमित्यनुवादःसतदुत्तराधिकरणेनिदिध्यासनस्य विचारयिष्यमाणत्वात्तत्रतयोरेवविचार्यत्वात्तदुपयोगितयैकदेशानुवादः । नतुप्रथमसूत्रेतन्मात्रोक्त्या । अतएवोपासना नामब्रह्मजिज्ञासेतितित्रिविधोपासनायाजिज्ञासात्वंतत्रैवोक्तं । नचैकस्यजिज्ञासाशब्दस्यश्रवणाद्यनेकार्थत्वायोगः । इच्छार्थो जिज्ञासाशब्दोविचारलक्षकइतिपक्षेदोषाभावात् । मननरूपविचाराभिधायकइतिपक्षेश्रवणादौछत्रिवल्लक्षणोपपत्तेः ।

गु० रासंभवेन तद्ग्रथनात्मकशास्त्रस्यानारंभणीयत्वंस्यादितिभावः । ननु त्रितयकर्तव्यत्वस्यप्रथमसूत्रार्थत्वे सर्वशाखाधिकरणीयटीकाविरोधः । तत्रश्रवणमननयोरेवक र्तव्यत्वस्यप्रथमसूत्रार्थत्वेनोक्तत्वादित्यतआह ॥ **यस्त्विति** ॥ **तत्रतयोरेवेति** ॥ श्रवणमननयोरित्यर्थः । स्वोक्ताभिप्रायेउत्तरग्रंथसंमतिमाह ॥ **अतएवेति** ॥ त्रितयकर्तव्यत्वस्यप्रथमसूत्रार्थत्वंयतोतएवेत्यर्थः ॥ **छत्रिवदिति** ॥ छत्रिपदस्यछत्र्यच्छत्रिसमुदायेलक्षणावत् जिज्ञासाशब्दस्यमननार्थत्वाज्जिज्ञासाशब्दस्यमन

॥ ९७ ॥

प्र० शाखाधिकरणटीकानुसारेणाभिप्रायांतरंवर्णयन्नुक्तपक्षत्रयेपिप्रस्थानद्वयविरोधंसुधाशयवर्णनेनपरिहरति ॥ **यद्वेति** ॥ साक्षात् निदिध्यास नेन । प्रमाणद्वारा श्रवणमननाभ्यां । तत्प्रावण्यं भगवदेकनिष्ठता ॥ **अन्यत्रेति** ॥ न्यायामृतेतृतीयपरिच्छेदइत्यर्थः । तथाचजिज्ञासा शब्दस्यविचारमात्रार्थकत्वंप्रागुक्तंयुक्तमितिभावः । जिज्ञासाशब्दस्यविचारेशक्तिंसाधयितुंपरोक्तंप्रतिक्षेपायानुवदति ॥ **यत्त्विति** ॥ प्रयो

यद्वेहटीकायांजिज्ञासाविचारशब्दाभ्यांसाक्षात्प्रमाणद्वारावाचित्तस्यतत्प्रावण्यरूपाश्रवणादित्रयानुगतोपा सनाविवक्षिता । नतुसुधायामिवमननमितियुक्ताटीका । सुधायांतुसतिमननकर्तव्यत्वेइतराकर्तव्यत्वेनशा स्त्रानारंभाभावात्तत्कर्तव्यतैवारंभेहेतुरितिमननमेवजिज्ञासात्वेनोक्तमितिमननविधिमूलमेवेदंसूत्रं । समा नविषयत्वात् । नतुविवरणमतइवश्रवणविधिमूलं । विस्तृतंचैतदन्यत्र । यत्तुपंचपादीविवरणयोरुक्तं । अवयवशक्त्याज्ञानेच्छावाचिनोजिज्ञासाशब्दस्यविचारेलक्षणयाप्रयोगप्रत्यययोरुपपत्तौनशक्त्यंतरकल्पनं ।

गु० नार्थकस्यश्रवणमनननिदिध्यासनसमूहेलक्षणेतिभावः । छत्रिवल्लक्षणायामरुच्याह ॥ **यद्वेति** ॥ तथाच साक्षात्परंपरयाचित्तस्यतत्प्रावण्यरूपस्यश्रवणमनननिदि ध्यासनत्रितयानुगतत्वान्नैकवाक्यतानुपपत्तिरितिभावः । नन्वेवंतर्हि सुधाविरोधइत्यतआह ॥ **सुधायांत्विति** ॥ ननु श्रवणविधिमूलमेवेदंसूत्रमस्तु । नचसमा नविषयत्वाभावान्मूलमूलिभावोनुपपन्नइत्युक्तमितिवाच्यं । अद्वितीयेब्रह्मणिवेदांतानांशक्तितात्पर्यावधारणंश्रवणं । तच्चोपक्रमोपसंहारादितात्पर्यलिंगविचाराधीन मिति विचारविधायकश्रवणविध्योरेकविषयत्वसंभवादित्यतआह ॥ **विस्तृतंचैतदिति** ॥ न्यायामृतेतृतीयपरिच्छेदेश्रवणविधेर्विवरणोक्तविचारविधायकत्वभंगइ त्यर्थः । परोक्तजिज्ञासाशब्दस्यविचारेलक्षणादिकं"नचश्रवणादेरसन्वाच्यते"तिटीकाविरुद्धत्वादनूद्यदूषयति ॥ **यत्त्विति** ॥ **शक्त्यंतरकल्पनमिति** ॥ अवयव

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- ॥ ९८ ॥

प्र० गप्रत्ययान्यथानुपपत्त्याहिशक्तिकल्पनं । तौचान्यथोपपन्नावित्यर्थः । प्रयोगप्रत्ययाभ्यामन्यदेवशक्तिकल्पकंकिंनस्यादित्यतआह ॥ अनन्यथेति ॥ यतस्तत्ररूढइष्यतेपरीक्षकैरतस्तन्नेत्यन्वयः । लौकिकाइच्छामज्ञात्वैव व्यवधानंविनैव । विचारंविजानतेहियस्मात्तेनेत्यर्थः । मंटपादीनां मंटपादिशब्दानां । श्लोकंव्याचष्टे ॥ तथाहीति ॥ मानविचारणइत्यस्मात् "मान्बधदान्शान्भ्योदीर्घश्चाभ्यासस्य" तिस्वार्थएवसनोविधानादिच्छाप्रतीतिंविनाविचारःप्रतीयतइतिमीमांसाशब्दादिवेत्युक्तं । अतएववृत्तौमानेर्जिज्ञासायांसन्नित्युक्तमितिभावः । एतेनानन्यधीपूर्वकविचारप्रतीतिरूपानन्यथासिद्धकार्यशक्तिकल्पकंवदतातादृशकार्यांतराभावादितिहेतोरसिद्धिरुक्तेतिध्येयं । नियमेनविचारेजिज्ञासापदप्रयोगोनन्यथासिद्धंकार्यंशक्तिकल्पकमित्यभिप्रेत्यतद्व्यतिरेकमुखेनोपपादयति ॥ अन्यथेति ॥ लक्षणयाविचारप्रतीतावभिमतायामित्यर्थः । धर्मबुभुत्साब्रह्मबुभुत्सेत्युक्तावपिबोधेच्छांतर्णीतविचारलक्षणासंभवेपिनियमेनजिज्ञासापदंनप्रयुज्येत । प्रयुज्यतेचसर्वविशिष्टैरतस्तत्ररूढइति

अनन्यथासिद्धकार्यांतराभावादितिजिज्ञासाशब्दोविचारेलाक्षणिकोनतुरूढइति । तन्न । यतः जिज्ञासाशब्दतोहीच्छामज्ञात्वैवविजानते । विचारंलौकिकास्तेनतत्रायंरूढइष्यते । अन्यथामंटपादीनांगृहादौस्यान्नरूढता । गंगाशब्दात्तुतीरादितद्धीपूर्वंप्रकाश्यते । तथाहि । जिज्ञासाशब्दान्मीमांसाशब्दादिवेच्छाप्रतीत्यभावेपिविचारःप्रतीयते । अन्यथाबुभुत्सापदादपिविलंबेनतद्धीसंभवान्नियमेनविचारेजिज्ञासापदंनप्रयुज्येत ।

गु० शक्त्यतिरिक्तसमुदायशक्तिरूपशक्त्यंतरकल्पनमित्यर्थः । जिज्ञासाशब्दस्यविचारेशक्तिः किंप्रयोगप्रत्ययार्थेवाक्यार्थांतरार्थंवा । नाद्यइत्याह ॥ विचारइति ॥ नद्वितीयइत्याह ॥ अनन्यथासिद्धेति ॥ जिज्ञासाशब्दादिच्छाप्रतीतौसत्यामेवानुपपत्तिप्रतिसंधानपूर्वविचारःप्रतीयतइतिकृत्वालक्षणास्वीक्रियते एवमेवना ।

SGDF Sri Gargeshwari Digital Foundation

प्र० भावः । एतेनझडितिप्रत्ययनियतप्रयोगयोरन्यथानुपपत्तिवर्णनेनप्रयोगप्रत्ययसामान्यस्यान्यथोपपत्तिवर्णनंनप्रकृतोपयुक्तमित्युक्तंभवति । अविलंबेनविचारप्रतीतिःपरस्यापिसंमतेत्याह ॥ **स्वीकृतश्चेति** ॥ ज्ञानेच्छाधीदशायामेवज्ञानहेतुत्वेनविचारस्यापिप्रतीतेर्नेच्छाज्ञानानंतरंतद्धी रित्यर्थः ॥ **ज्ञानविषयेति** ॥ इच्छेत्यनुषंगः । एवंसतिनविधौपरःशब्दार्थइत्येतदप्यनुकूलितंभवतीत्याह ॥ **एवंचेति** ॥ तत्ररूढत्वेसती त्यर्थः । द्वितीयश्लोकंव्याचष्टे ॥ **अन्यथेति** ॥ आदिपदार्थमाह ॥ **प्रवीणेति** ॥ मंटपशब्दोमंडंपिबतीतिव्युत्पत्त्यामंडपानकर्तरिमुख्य स्सन्तदधिष्ठितत्वरूपतत्संबंधात्गृहविशेषेलाक्षणिकस्यान्नतुरूढः तथाप्रवीणशब्दःप्रकृष्टवीणावतिमुख्यस्सन्प्रकृष्टवीणावादनसमर्थगतप्रौढत्व रूपगुणयोगान्निपुणेगौणस्यान्नतुरूढः । तथाकुशलशब्दोपिकुशान्लुनातीतिकुशच्छेत्तरिमुख्यस्सन्तद्गतवैदग्ध्यरूपगुणयोगान्निपुणेगौणोनतु

स्वीकृतश्चत्वयापि“विचारसाध्यज्ञानेच्छाजिज्ञासाशब्दान्नप्रतीयते। नोपदेशमात्रसाध्यज्ञानविषये”
तिवदताविचारप्रतीतेरिच्छाप्रतीतिपूर्वकत्वाभावः। एवंचतद्विजिज्ञासस्वेत्यादावस्मिंश्चसूत्रेविधौन
लक्षणा । अन्यथालोकेमंटपशब्दस्यमंडपानकर्तृत्वरूपयौगिकार्थसंबंधाद्गृहविशेषे प्रवीणकुशला
दिशब्दानांचप्रकृष्टवीणावदादिगतप्रागल्भ्यरूपगुणयोगादेवनिपुणे वाजिशब्दस्यचवाजशब्दवा

गु० नाद्यइत्याह॥ **जिज्ञासाशब्दादिति** ॥ **स्वीकृतश्चेति** ॥ एतच्चस्वयमेवविवरिष्यति किंचेत्यादिना । आदिशब्दंविवृण्वन्नेवद्वितीयनिराकरणपरत्वेनद्वितीयकारि कांव्याचष्टे ॥ **अन्यथेति** ॥ अत्रापिमंटपशब्दस्यमंडपानकर्तृत्वरूपयोगेनगृहस्वामिनि वृत्तिः तत्संबंधाद्गृहादौप्रवृत्तिरितिलक्षणास्यादितिभावः । इष्टापत्तिंपरिहरति

SGDF
Sri Gargeshwari Digital Foundation

प्र० रूढःस्यादित्यर्थः । वीणावदितिमतुप् नतुवतिः ॥ **अन्नवदिति** ॥ अन्नवान्पुरुषस्तत्संबंधादित्यर्थः ॥ **वेदेचेति** ॥ षष्ठे“अपरिमाणेशिष्टस्यसंख्याप्रतिषेधस्तच्छ्रुतित्वा”दितिसप्तमपादीयदशमाधिकरणेआधानेश्रुतं “एकादेयाद्वेदेयेषट्देया:शतंदेयंसहस्रंदेयमपरिमितंदेय”मितिवाक्यमुदाहृत्यापरिमितंदेयमितिकिंपूर्वोक्तैकादिपरिमाणनिषेधउतायमपिसंख्यांतरविधिरितिसंशये अपरिमितशब्दस्यावयवशक्त्यापरिमाणशून्यवाचित्वात्तस्यचदानायोगात्प्रकृतपरिमाणमनूद्यतस्यप्रतिषेध:क्रियतइतिप्राप्तेअवयवशक्तेर्बलीयस्यासमुदायशक्त्यातस्यस्वार्थवाचकत्वात्सुज्ञातपरिमाणेष्वपिबहुत्वमात्रेणापरिमितशब्दप्रयोगदृष्ट्यातस्यालब्धासकत्वादयमपिसन्निहितसहस्राधिकसंख्यांतरविधिरितिसिद्धांतितं । अत्रानेकत्वगुणयोगनिमित्तंगौणत्वमनादृत्यरूढ्याश्रयणंकृतं । तन्नस्यादित्यर्थः । इष्टापत्तिमाशंक्याह ॥ **उक्ताचेति** ॥ **यौगिकार्थेति** ॥ तथाचप्रतीतिविरोधइतिभावः । उत्तरार्धंव्याख्यातुंशंकामुत्थापयति ॥ **नचैवमिति** ॥ ज्ञानेच्छायांयौगिकस्यविचारेरूढत्वमित्यर्थः । आद्येचतुर्थपादे“वैश्वदेवेविकल्पइतिचे”दितिदशमेऽधिकरणेचिंतितं । चातुर्मास्येषुवैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यकर्मसमुदायेषुपर्वश

च्यान्नवत्संबंधादेवाश्वजातौप्रयोगसंभवाद्रूढिर्नस्यात् । वेदेचापरिमितंदेयमित्याधानप्रकरणेश्रुतस्यापरिमितशब्दस्यपरिमितान्यरूपमुख्यार्थनिष्ठानेकत्वगुणयोगादेवबहुत्ववतिप्रयोगसंभवाद्रूढिर्नस्यात् । उक्ताचरूढिःषष्ठे नचप्रवीणादिशब्दइष्टापत्तिः । यौगिकार्थप्रतीत्यभावेपिनैपुण्यप्रतीतेः । नचैवंवैश्वदेवेनयजेतेत्यादौवैश्वदेवीमामिक्षामितिवाक्यविहितयागेयौगिकस्यवैश्वदेवशब्दस्यवैश्वदेवावैश्वदेवसमुदाये

गु० ॥ **उक्ताचेति** ॥ गंगाशब्दात्तुतीरादीतिकारिकांशमवतारयति ॥ **नचैवमिति** ॥ नन्वेवंविचारस्यापीच्छाप्रतीतिपूर्वकप्रतीतिकत्वेलाक्षणिकत्वंस्यादित्यतआह ॥

प्र० ब्दितेषुमध्येवैश्वदेवपर्वणिश्रूयते“आग्नेयमष्टाकपालंनिर्वपतिसोम्यंचरुंसावित्रंद्वादशकपालंसारस्वतंचरुंपौष्णंचरुंमारुतंसप्तकपालंवैश्वदेवीमामिक्षांद्यावापृथिव्यमेककपाल”मिति । तत्सन्निधावाम्नातं“वैश्वदेवेनयजेते”ति । तत्रकिंयजेतेत्यनूदितानांप्रकृताग्नेयादियागानांवैश्वदेवशब्दोविश्वदेवाख्यदेवतारूपगुणविधिपरःकिंवातेषामेवनामधेयमितिसंशयेनामत्वेतस्याविधेयत्वाद्विधेयांतराभावाच्चवाक्यमिदमनर्थकंस्यादतोदेवताविधिः“आनर्थक्यप्रतिहतानांविपरीतंबलाबल”मित्युत्पत्तिशिष्टाभिरप्यग्न्यादिदेवताभिर्विश्वेदेवताविकल्प्यंतइतिप्राप्तेवैश्वदेवशब्दस्यछत्रिन्यायेनलक्षणयायजेतेत्यनूदितप्रकृताग्नेयादिवैश्वदेवावैश्वदेवयागसमुदायनामत्वेपि“प्राचीनप्रवणेवैश्वदेवेनयजेते”त्यादिषुवैश्वदेवशब्देनाग्नेयादियागसमुदायग्रहणोपपत्त्याप्राचीनप्रवणसंबंधसिद्धेर्नानर्थक्यं । अन्यथामिक्षायागस्यैवप्राचीनप्रवणसंबंधःस्यात् । तस्मान्नामधेयमितिसिद्धांतइति । अत्रैकत्रयौगिकस्यान्यत्रलक्षणादृष्टा । सानस्यादितिशंकार्थः । यद्यपिवैश्वदेवशब्दस्य“यद्विश्वेदेवाःसमयजंततद्वैश्वदेवस्यवैश्वदेवत्व”मितिवाक्यशेषाद्विश्वदेवयष्टृकत्वगुणयोगेनयौगिकत्वमपिसिद्धांतेदर्शितं तथापिलाक्षणिकत्वपक्षस्याप्युक्तेरेवमुक्तं । यद्वातदीयदेवताधिकरणेदेवतानांकर्मानधिकारोक्तेस्तद्विरुद्धादर्थवादलब्धयोगापेक्षयाऽऽमिक्षायागविधिमुखलब्धलक्षणैवज्यायसीतिसिद्धांतिनोभिमतमितिभावेनैवमुक्तिः । वेदेदोषमाशंक्यलोकेचाशंकते ॥ **गंगेति** ॥ **मुख्यार्थेति** ॥ आमिक्षायागप्रवाहादिरूपमुख्यार्थधीपूर्वमेवेतरस्याग्नेयादियागतीरा

गंगापदादेश्वतीरादौलक्षणानस्यात् । किंतुरूढिरेवस्यादितिवाच्यं । तत्रमुख्यार्थप्रतीतिपूर्वकमेवेतरप्रतीतेः । प्रकृतेचतदभावादित्युक्तत्वात् । किंचत्वन्मतेज्ञानसामान्येच्छायाः

गु० **प्रकृतेचेति** ॥ जिज्ञासाशब्दान्मीमांसाशब्दादिवेच्छाप्रतीत्यभावेपिविचारःप्रतीयतइत्युक्तत्वादितिभावः । जिज्ञासाशब्दस्यावयवशक्त्यतिरिक्तशक्त्यंतरकल्पना

॥ ९९ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० देःप्रतीतेरित्यर्थः । एतेनतद्धीपूर्वमितिचतुर्थपादोव्याख्यातः । प्रकृते जिज्ञासाशब्दे । क्वापीति । प्रागुक्तरीत्येतिभावः ॥ **अवयवश क्तीति** ॥ ज्ञानसामान्येच्छायामेवतस्यशक्तेरितिभावः ॥ **एतेनेति** ॥ ज्ञानसामान्येच्छायाअभावेनापरोक्षेच्छायामवयवशक्त्यभावेनचे त्यर्थः । इच्छया ज्ञानेच्छया ॥ **तस्मादिति** ॥ व्याकरणविरोधस्तुसमाधास्यतइतिभावः । रूढ्येतिसिद्धांतदिशा । लक्षणयेतिविवरण रीत्या ॥ **नापीति** ॥ भामतीरीत्येतिभावः ॥ **विचारात्मकमिति** ॥ "विचारात्मकंज्ञानमेवतात्पर्यतोविधीयत"इति । अत्रतर्करूपज्ञानं

क्वाप्यभावादपरोक्षेच्छायांचजिज्ञासाशब्दस्यावयवशक्त्यभावात्समुदायशक्तेःकल्प्यत्वाविशेषेविचारेसमुदायशक्ति रपरोक्षेच्छायांचलक्षणेत्येवकिंनस्यात् । एतेनजिज्ञासाशब्दवाच्ययेच्छयाक्षिप्तोविचारइहविधीयतइतिविवरणाभि प्रेतंमतांतरंनिरस्तं । विचाराक्षेपस्यभामतीनिरासावसरेनिराकरिष्यमाणत्वाच्च । तस्माज्जिज्ञासाशब्दोविचारे रूढएव । केचित्तुजिज्ञासाशब्दोरूढ्यालक्षणयावाविचारंनार्पयति । नाप्यर्थादाक्षिपति । किंत्विच्छार्थएव । त थापीच्छायाःविषयवैलक्षण्याधीनत्वेनाविधेयत्वादिच्छांप्रतिकर्मीभूतमिष्यमाणंविचारात्मकंतर्करूपंज्ञानंविधेयं ।

गु० मेवांगीकृत्यपरिहारःकृतः । इदानींस्वीकृतश्चेत्यादिनासूचितकल्पनाभावमेवाह ॥ **किंचत्वन्मतइति** ॥ जिज्ञासाशब्दस्यज्ञानसामान्येच्छायांशक्तिः अपरोक्षेच्छा यांवा । नाद्यइत्याह ॥ **ज्ञानेति** ॥ द्वितीयंदूषयति ॥ **अपरोक्षेति** ॥ नन्वनन्यलभ्येहिशक्तिःकल्पनीया जिज्ञासापदादाक्षेपेणैवलाभसंभवान्नानन्यलभ्यत्वमित्ये तद्विवरणमतमतिदेशेनदूषयति ॥ **एतेनेति** ॥ इच्छाप्रतीत्यभावेपिजिज्ञासाशब्दाद्विचारप्रतीत्युपपादनेनेत्यर्थः । रामानुजमतंदूषयितुमनुवदति ॥ **केचित्त्विति** ॥ यद्यप्यत्रभामतीमतदूषणानंतरंकेषांचित्पक्षोदूषणीयः । तथैवनियतत्वात् । तथापीच्छायाअविधेयत्वादितिटीकानिवर्त्यक्रमानुसारेणैवमुक्तमितिध्येयं । नन्विच्छा

SGDF Sri Gargeshwari Digital Foundation

प्र० विधेयं तर्कानुगृहीतवाक्यजन्यप्रमितिरूपज्ञानंतुफलत्वान्नविधेय''मितिचश्रुतप्रकाशोक्तशंकासमाधीअनुवदति ॥ **यद्यपीति** ॥ तस्य भोजनस्य ॥ **अप्राप्तयोरिति** ॥ नियमेनाप्राप्तयोरित्यर्थः ॥ **स्नानेति** ॥ स्नात्वैवभुंजीतप्राङ्मुखएवभुंजीतेतिस्नानप्राङ्मुखत्वयोर्नियमइत्यर्थः । उक्तंच''स्नानप्राङ्मुखत्वनियमयोरेवविधेस्तात्पर्य''मिति । दृष्टांतवैषम्योपपादनपूर्वविध्ययोग्यत्वेनदूषयति ॥ **स्नानेति** ॥ प्राधान्यज्ञापककामपदादेरभावादितिभावः । अंगीकृतंचप्राधान्यंश्रीभाष्ये''इच्छायाइष्यमाणप्रधानत्वादिष्यमाणंज्ञानमिहविधीयते''इति ॥ **तद्विरोधिनीति** ॥ प्राधान्यविरोधिनीत्यर्थः । यद्यपिप्राधान्यविरोधिगुणत्वं नतुविधेयत्वं । तस्यानुवाद्यत्वविरोधित्वात् । तथापिप्राधान्यस्यानुवाद्यत्वेनगुणत्वस्यविधेयत्वेनसामानाधिकरण्यनियमेनप्राधान्यविधेयत्वयोर्भिन्नाधिकरणतानियमात्विरोधिनीत्युक्तं । ननुप्रवर्तनात्मा विधिरिष्टेपुरु

यद्यपिजिज्ञासाकर्तव्येतिप्रत्ययार्थभूतेच्छायाःकर्तव्यत्वंभाति नतुज्ञानस्य तथापि ''स्नात्वाभुंजीत प्राङ्मुखोभुंजीते''त्यत्रभुजिधातोर्विधिप्रत्ययांतत्वेनभोजनस्यकर्तव्यत्वेप्रतीतेपितस्यरागतःप्राप्तत्वेनाप्राप्तयोःस्नानप्राङ्मुखत्वयोर्विधेस्तात्पर्यं। नचैतावताभुजिधातोःस्नानेरूढिःलक्षणावाआक्षेपकतावास्ति । एवमिहापीच्छायाःअविधेयत्वाद्विचारात्मकंज्ञानंविधेयंनतुजिज्ञासाशब्दस्यविचारेरूढ्यादिरित्याहुः। तन्न। स्नानादिकंहिप्राधान्येनाप्रतीतत्वाद्विधातुंयुक्तं । इहतुज्ञानमिच्छांप्रतिकर्मतयाप्राधान्येनप्रतीतमितिकथंतद्विरोधिनीविधेयता ।

गु० याअविधेयत्वात्तदर्थत्वेजिज्ञासापदवैयर्थ्यमित्यतआह ॥ **तथापीति** ॥ ज्ञानमात्रस्यविधेयत्वासंभवादाह ॥ **तर्करूपामिति** ॥ तर्करूपमित्युत्तरत्रदूषणार्थमनूदितं । विचारात्मकमित्यनेनैवाविधेयत्वशंकापरिहारात् ॥ **तद्विरोधिनीति** ॥ विधेयत्वस्यगुणत्वव्याप्यत्वेनप्राधान्यविरोधित्वमितिभावः । ननुप्राधान्येनसहविधेयत्वस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० षंप्रवर्तयति । ज्ञानंचेष्टमितिसत्यपिप्राधान्येतदेवविधेयमित्यतोतिप्रसंगमाह ॥ **नहीति** ॥ ''फलांशेभावनायास्तुप्रत्ययोनविधायक''इति भाट्टोक्तेरितिभावः । अतएवचतुर्थाध्यायाद्यपादे ''यस्मिन्प्रीतिःपुरुषस्यतल्लिप्सार्थलक्षणाविभक्तत्वा''दितिद्वितीयेधिकरणेद्वितीयेवर्णकेफलांशे विधिव्यापारोस्त्युतनेतिसंशयेविधेयभावनाविशेषणत्वात्करणादिवत्फलांशोपिविधीयतइतिप्राप्तेरागतस्तत्रप्रवृत्तिसिद्धेर्नफलांशोविधीयतइत्युक्तं। ननुयजेतस्वर्गकामइत्यत्रेष्टसाधनंमानांतराप्राप्तंसन्निहितंचधात्वर्थंपरित्यज्यविप्रकृष्टरागप्राप्तस्वर्गविधानंनयुज्यते । इहतुसन्निहितत्वादिष्टत्वाच्च युज्यतइतिभावेनाह ॥ **किंचेति** ॥ यत्रहिगुणःकारकत्वमापद्यतेसआश्रयः । यथा''दध्नेंद्रियकामस्यजुहुयादित्यत्रदधिरूपगुणस्यधात्वर्थोहोमः। दध्नाहोमनिर्वृत्तिद्वारेंद्रियनिष्पत्तेः । तथाचप्राङ्मुखत्वादिकमपिभोजनरूपक्रियानिर्वृत्तिद्वाराऽऽयुष्यादिफलंजनयतीतिनिर्वर्त्यक्रियारूपाश्रय मनुवदितुंभुजिधातुःसार्थकः । इहतुज्ञानेनेच्छानिर्वृत्तिद्वाराकस्यचिदजननेनाश्रयत्वायोगेनतदनुवादानुपपत्तेर्ब्रह्मज्ञानमितिसूत्रविन्यासः स्यात् । तद्विजानीहीतिश्रुतिविन्यासःस्यात् । नतुसन्नंतत्वेनेत्यर्थः । एतेन''गुप्तिज्किद्भ्यःस''न्नित्यत्रसन्नितियोगविभागमाश्रित्यजिज्ञासाशब्दे सनःस्वार्थिकत्ववर्णनंप्रत्युक्तं । ब्रह्मज्ञानमित्येतावतापूर्त्यासनोव्यर्थत्वात् । योगविभागस्यक्लिष्टत्वाच्च । यदपिप्रमाजनकवाक्यानुग्राहकतर्क

नहिस्वर्गकामपदेनेच्छाविषयतयाप्रतीतःस्वर्गोविधेयः । किंचप्राङ्मुखोभुंजीतेत्यादौविधेयप्राङ्मुखादेराश्रयमर्पयितुंभु जिधातुःसार्थकः । प्रकृतेतुविधेयज्ञानंप्रतीच्छायाआश्रयत्वाद्यभावात्तद्विजिज्ञासस्वेतिश्रुतौसूत्रेचसन्प्रत्ययोव्यर्थः ।

गु० विरोधःकिमेवमेववा उतयत्प्रतिप्राधान्यंतत्प्रत्येवविधेयत्वंविरुद्धं । नाद्यः । तथात्वेदर्शपूर्णमासयागस्यापिप्राधान्येनविधेयत्वानुपपत्तेः । नद्वितीयः । यागस्यसोमंप्र तिप्राधान्येपिफलंप्रत्यप्राधान्येनविधेयत्ववत् प्रकृतेज्ञानस्येच्छांप्रतिप्राधान्येपिमोक्षरूपफलंप्रत्यप्राधान्याद्विधेयत्वंसंभवतीत्यतआह ॥ **किंचेति** ॥ ननुज्ञानमात्रस्यपुंतं

प्र० रूपंज्ञानंविधेयमित्युक्तंतदपिनेत्याह ॥ **किंचेति** ॥ **प्रमितिरूपेति** ॥ इतिकर्तव्यताभूततर्कानुगृहीतवेदांतवाक्यजन्यप्रमारूपमीम.साफल विषयत्वस्येत्यर्थः । उपलक्षणमेतत् । ज्ञानसामान्येशक्तस्यजानातेस्तर्कज्ञानरूपविशेषपरत्वस्यानुचितत्वादित्यपिध्येयं । तर्करूपज्ञानस्यविधेय तोक्तिश्चायुक्तेत्याह ॥ **किंचेति** ॥ श्रवणविधिमूलत्वात्सूत्रस्यश्रोतव्यइत्यादिवाक्यवदित्युक्तं । ननुजिज्ञासामात्रप्राप्तावपिकर्मविचारानंतर्य विशिष्टंनप्राप्तमित्यतआह ॥ **कथंचिदिति** ॥ जिज्ञासाशब्दतोहीच्छामित्यादिनोक्तंटीकारूढंकरोति ॥ **तदेतदिति** ॥ अतद्गुणसंविज्ञान

किंचजानातेःप्रमितौस्वारस्यात्सन्वाच्यायाइच्छायाश्चप्रमितिरूपफलविषयत्वस्यस्वरसत्वान्नसन्नंतजानातेस्तर्क रूपज्ञानपरता । किंचत्वत्पक्षेविचारकर्तव्यतायामानांतरप्राप्तत्वाच्छ्रोतव्यइत्यादिवाक्यवत्सूत्रमप्यनुवादक मेवस्यादितिकथंविधायकतोक्तिः। कथंचिदप्राप्तिसंपादनेतुश्रोतव्यइत्यादिरपिविधिःस्यात् । तस्माज्जिज्ञासाश ब्दस्येच्छार्थत्वेविध्यसंभवात्तद्विध्यर्थंसरूढ्याविचारपरः । तदेतदाह ॥ [६।१४] नचैंश्रवणादेरसन्वाच्यतेति ॥

गु० त्रत्वाभावेनाविधेयत्वेपितर्करूपज्ञानंपुंतंत्रत्वाद्विधेयं । तथाचेष्यमाणतर्करूपज्ञानोपस्थापकत्वान्नसन्प्रत्ययवैयर्थ्यमित्यतआह ॥ **सन्नंतजानातेरिति** ॥ नचजाना तेस्तर्कपरतायुक्ता । यतोयंजानातिःसन्नंतइत्यर्थः । ननुजानातेःप्रमितौस्वरसत्वेपि इच्छायाःप्रमितिरूपफलविषयत्वस्वारस्येपि फलीभूतज्ञानस्यविधातुमशक्यत्वात्स न्नंतजानातेस्तर्करूपज्ञानपरत्वमावश्यकमित्यतआह ॥ **किंचेति** ॥ **मानांतरप्राप्तत्वादिति** ॥ सतिविचारेज्ञानमन्यथानेत्यन्वयव्यतिरेकरूपमानांतरप्राप्तत्वादि त्यर्थः । तथापिमोक्षसाधनज्ञानसाधनरूपविशिष्टालौकिकवस्तुविचारप्रतिपादनस्याप्राप्तत्वात्सूत्रस्यविधायकत्वंस्यादित्यतआह ॥ **कथंचिदिति** ॥ जिज्ञासाशब्दस्यवि चारेरूढिप्रतिपादनमुपसंहरति ॥ **तस्मादिति** ॥ ननु टीकायांश्रवणादौसन्नंतपदलक्ष्यत्वेनैवजिज्ञासाशब्दप्रयोगोविवक्षितः । अन्यथा इच्छारूपमुख्यार्थानुपपत्ति

SGDF

प्र० बहुव्रीहिणाविचारस्यासन्वाच्यता सन्नंतजिज्ञासापदवाच्यत्वाभावइत्यर्थः । ननुनानेनवाक्येनजिज्ञासाशब्दस्यतत्रशक्तताभिप्रायोवगंतुंश
क्यते विचारस्यसन्नंतावाच्यत्वेपिलक्षणयाविचारेपिजिज्ञासितमित्यादिप्रयोगवदुपपत्तेरित्युत्तरवाक्यार्थसंभवात् । अतएवेच्छायाअविधेय
त्वादितिमुख्यार्थेविध्यनुपपत्तिर्लक्षणाबीजमाहेत्याशंक्य नेदंलक्षणाबीजोपपादनार्थंप्रवृत्तंयेनपूर्वतनंपरिहारवाक्यंलक्षणाभिप्रायेणवर्ण्येतेतिभावे
नप्रकारातरेणावतारयति ॥ **नन्विति** ॥ सुधाविरोधमाशंक्याह ॥ **सुधायांत्विति** ॥ एवंचतद्वाक्यद्वयंस्वपरमतत्वेनयोज्यमित्युक्तंभवति ।
तथाचनविरोधइत्याशयः । नन्वेवंयोजनायांनज्ञापकमस्ति । अतएवप्रमेयदीपिकायां “माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणी”तिवाक्यभाष्य
व्याख्यावसरे“ज्ञानेच्छापूर्वकोविचारोलक्ष्यत”इतिविचारेलक्षणाकंठोक्तेत्यतआह ॥ **यद्वेति** ॥ **अत्रापीति** ॥ टीकायामपीत्यर्थः ॥

नन्विच्छायामपिजिज्ञासापदप्रयोगादिच्छात्रजिज्ञासाशब्दार्थःकिंनस्यादित्यत्राह ॥ इच्छायाअविधेयत्वादिति ॥
सुधायांतुज्ञानेच्छांतर्णीतोविचारोजिज्ञासापदेनलक्ष्यतइतिपरमतमुक्त्वा यदिचजिज्ञासाशब्दोमीमांसाशब्दवद्विचार
एवोपसंख्यायतइतिस्वमतमुक्तं यद्वासुधायांपक्षद्वयेपिजिज्ञासाशब्दस्यविचारपरत्वाविशेषादन्यतरनिर्धारणस्याप्रयो
जनत्वात्पक्षद्वयोक्तिः। तदनुसारेणात्राप्यसन्वाच्यत्वेपिलक्षणयाविचारेपितत्प्रयोगान्मुख्यार्थस्यचेच्छायाअविधेयत्वा

गु० कथनपरया“इच्छायाअविधेयत्वा”दित्युत्तरटीकयाविरोधइत्यतस्तद्वाक्यमन्यथाव्याचष्टे ॥ **नन्विच्छायामपीति** ॥ नन्वेवंटीकायांविचारेरूढत्वमेवयद्यभिप्रेतं
तर्हि सुधाविरोधःस्यात् । तत्रज्ञानेच्छांतर्णीतोविचारोलक्ष्यतइत्युक्तत्वादित्यतआह ॥ **सुधायांत्विति** ॥ **उपसंख्यायतइति** ॥ “मान्बधदान्शान्भ्योदी
र्घश्चे”त्यत्रमीमांसाशब्दोयथावर्तते तथाजिज्ञासाशब्दोपितत्रद्रष्टव्यः । ननुमूलव्याख्यानावसरेपरोक्तिरनवसरपराहतेत्यस्वरसादाह ॥ **यद्वेति** ॥ तर्ह्येतट्टीकाविरो
धइत्यतआह ॥ **तदनुसारेणेति** ॥ सुधानुसारेणेत्यर्थः । ननुजिज्ञासाशब्दस्यविचारेरूढिर्लक्षणावानस्वीकर्तव्या । आक्षेपादेवतल्लाभइतिभामतीमतंदूषयितुमनु

SGDF
Sri Gargeshwari Digital Foundation

प्र० इत्यपीति ॥ लक्षणापरयापीत्यर्थः । लक्षणयाविचारोत्रकिंनस्यादित्यतआह ॥ नचेति ॥ तत्सूचनाप्रकारःप्रागेवोक्तः । कल्पतरूक्तंसूत्रार्थनिष्कर्षमनुवदति ॥ एवंचेति ॥ विचारस्यार्थिकताप्रकारंकल्पतरूक्तमेवाह ॥ ज्ञातुमिति ॥ इच्छामुखेनेतिभामत्युक्तमनुवदति ॥ इच्छानिमित्तेनेति ॥ इच्छारूपनिमित्तेनेत्यर्थः ॥ रूढेरिति ॥ तथाचविचारार्थकत्वेपिनस्वार्थपरित्यागइतिभावः । तर्हि "धातोःकर्मणःसमानकर्तृका

दित्यपियोज्यं । भामत्यांतुनजिज्ञासानामविचारः । इच्छायांसन्विधानात् । नचशास्त्रप्रवृत्त्यंगविषयप्रयोजनसूचनेनस्वार्थपरत्वोपपत्तेर्विचारेलक्षणायुक्ता । एवंचमुमुक्षानंतरंब्रह्मजिज्ञासाभवितुंयुक्तेत्येवश्रौतोर्थः । विचारस्त्वार्थिकोर्थः । ज्ञातुमिच्छाहिसंदिग्धेविषयेनिर्णयायभवति । निर्णयश्चविचारसाध्यइतीच्छानिमित्तेनविचाराक्षेपात् । आर्थिकेचास्मिन्नर्थेकर्तव्यपदाध्याहारादित्युक्तं । तदपिन । विचारेरूढेरुक्तत्वात् ।

गु० दति ॥ भामत्यांत्विति ॥ जिज्ञासाशब्दस्यविचारे योगो लक्षणा रूढिर्वा । नाद्यइत्याह ॥ इच्छायामिति ॥ "धातोःसमानकर्तृकादिच्छायांवे"तिसूत्रादित्यर्थः । नद्वितीयइत्याह ॥ नचेति ॥ ननुस्वार्थपरत्वेवैयर्थ्यमित्यतउक्तं ॥ शास्त्रप्रवृत्त्यंगेति ॥ कल्पकाभावात्तृतीयोपिनेत्याशयः । ननु प्रवर्तकेसूत्रेऽवश्यमध्याहर्तव्यकर्तव्यपदान्वयार्थयुक्ताविचारेलक्षणेत्यतआह ॥ एवंचेत्यादिना ॥ इच्छानिमित्तेनेति ॥ इच्छालक्षणनिमित्तेननैमित्तिकविचाराक्षेपइतिभावः । इच्छामुखेनेतिपाठपक्षेइच्छोपदर्शनमुखेनेत्यर्थः । नन्वाक्षिप्तस्यविचारस्यकेनान्वयइत्यतआह ॥ आर्थिकेचेति ॥ ननुरूढिपक्षेपीच्छायांसन्विधायकव्याकरणविरोध

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिच्छायांवे"तीच्छार्थकसन्विधायकव्याकरणस्मृतिविरोधइत्यतआह ॥ **व्याकरणस्येति** ॥ घटंजिज्ञासतेघटंबुभुत्सतइत्यादाविच्छार्थकत्वेन सनःसावकाशत्वादत्रचेच्छाबोधंविनैवविचारबोधेनार्थविसंवादस्यप्रागेवदर्शितत्वात् । ब्रह्मजिज्ञासाधर्मजिज्ञासेत्यादौसाधुत्वमात्रपरत्वंव्याकरणस्येत्यर्थः । यदपिएवंचेत्यादिनाश्रौतार्थवर्णनंतदपिनेत्याह ॥ **भवतीत्यादीति** ॥ यदपिशास्त्रप्रवृत्त्यंगेत्यादितदपिनेतिप्रागुक्तंस्मारयति ॥ **विषयादीति** ॥ यदपिविचारस्स्वार्थिकोर्थइत्यादितदपिनेत्याह ॥ **किंचेति** ॥ यदपीच्छयाविचाराक्षेपइतिप्रागुक्तंतदपिनेत्याह ॥ **कथंचेति** ॥

व्याकरणस्यचसाधुत्वमात्रपरत्वात् । उक्तंहि "यत्रार्थस्यविसंवादःप्रत्यक्षेणोपलभ्यते । स्वरसंस्कारमात्रार्था तत्रव्याकरणस्मृति"रिति । भवतीत्याद्यध्याहारस्यस्वतःसिद्धत्वेप्यनुवादत्वप्रसंगात् । तद्विजिज्ञासस्वेतिश्रुत्यनुसारिणाचसूत्रेणेच्छायाअविधेयत्वेनलक्षणयापिविचारस्यविधेयत्वात् । विषयाद्यभावादिच्छाभाववदंतं प्रतीच्छयाविषयादिसूचनोक्त्ययुक्तेश्च । किंचैवंसतितावन्मात्रेणनैराकांक्ष्यान्नार्थिकविचारकर्तव्यतापरता युक्ता । शास्त्रारंभवत्तस्यफलत्वेनैवसिद्धेः । कथंचविचारंविनेच्छायाअनुपपत्तिः । येनविचाराक्षेपकता ।

गु० इत्यतआह ॥ **व्याकरणस्यचेति** ॥ किंच विचारेलक्षणावश्यमंगीकर्तव्या । अन्यथा अध्याहृतकर्तव्यपदान्वयानुपपत्तेः । नचतदध्याहारएवमास्त्वितिवाच्यं । तथासतिवाक्यस्यसाकांक्षत्वेनापूर्णत्वापत्त्यातस्यावश्यकत्वात् । नन्वस्तिभवत्योःसर्वत्रसंबंधेननसूत्रस्यसाकांक्षत्वमित्युक्तमितिचेत्तत्राह ॥ **भवतीत्याद्यध्याहारस्येति** ॥ किंच जिज्ञासाशब्दस्यविचारलक्षकत्वमावश्यकं । तद्विजिज्ञासस्वेतिश्रुताविच्छायाअविधेयत्वाज्जिज्ञासाशब्दस्यविचारपरत्वस्यैववक्तव्यत्वेन तदनुसारिसूत्रेपितस्यैवविधेयतयावक्तव्यत्वात् । अन्यथाश्रुतिसूत्रयोर्भिन्नविषयत्वंस्यादितिभावेनाह ॥ **तद्विजिज्ञासस्वेतीति** ॥ ननुशास्त्रप्रवृत्त्यंगविषयप्रयोजनसूचनेनैवजिज्ञासाशब्दस्यस्वार्थभूतेच्छापरत्वोपपत्तौकिमर्थंविचारेलक्षणेत्यतआह ॥ **विषयाद्यभावादिति** ॥ इच्छयाविचारआक्षिप्यतइत्येतद्दूषयति ॥ **कथंचेति** ॥ ननु

प्र० इच्छायाविचारसाध्यज्ञानगोचरत्वेनतंप्रतिकारणत्वेनकार्यरूपविचारंविनानुपपत्त्यातदाक्षेपउतसामग्रीत्वेन । आद्यआह ॥ **नहीति** ॥ केवलंदंडेसत्यपिघटानुदयादितिभावः ॥ **द्वितीयआह** ॥ **नचेच्छेति** ॥ भामतिमतनिरासंटीकारूढंकरोति ॥ **तदेतदिति** ॥ एतेनधर्मविचारानंतरंशिवाराधनरूपधर्मानुष्ठानविशुद्धचित्तस्यविवेकादिसंपत्त्याब्रह्मज्ञानेच्छाभवतीतिश्रौतोर्थः । तदिष्यमाणंब्रह्मज्ञानंविचारमंतरेण नभवतीतितत्स्वरूपप्रमाणादिविचारस्तदाक्षिप्तोर्थइतिशिवार्कमणिदीपिकोक्तंनिरस्तमितिध्येयं । विस्तरस्तुन्यायमौक्तिकमालायांध्येयः ॥ **एतेनेति** ॥ भामतीमतदूषणेनेत्यर्थः ॥ **इच्छापरत्वेपीति** ॥ जिज्ञासाशब्दस्येतिशेषः । अधिकारिणांब्रह्मज्ञानेच्छाभवतीत्यवांतरवाक्यं । यस्मादित्यादिमहावाक्यप्रदर्शनं । अतएव मुख्यार्थस्यापिसत्त्वादेव ॥ **वृत्तिद्वयेति** ॥ नन्ववांतरवाक्येविषयादिसूचनार्थंमुख्यवृत्तिरपि

नहिकारणस्यकार्यंविनानुपपत्तिः । नचेच्छाविचारसामग्री । फलेच्छायांसत्यामपिसाधनाननुष्ठानदर्शनात् । तस्माद्भामत्युक्तमयुक्तं । तदेतदाह ॥ [६।१४] भवतीत्यादिकथनस्यवैयर्थ्यादित्यादिना ॥ एतेनकौमुद्यांयस्मादधिकारिणांब्रह्मज्ञानेच्छासंपन्नातस्माद्ब्रह्मविचारःकर्तव्यइत्यवांतरवाक्येश्रुत्येच्छापरत्वेपिमहावाक्येलक्षणयाविचारपरइत्युभयपरोजिज्ञासाशब्दः । अतएवविचारेलाक्षणिकोपिविषयादिसूचकइतियदुक्तंतदपिनिरस्तं । युगपद्वृत्तिद्वयप्रसंगात् ।

गु० इच्छायाविचारसामग्रीत्वात्तदभावेविचारानुपपत्तिरित्यतआह ॥ **नचेति** ॥ स्वोक्तंटीकारूढंकरोति ॥ **तदेतदिति** ॥ ननु जिज्ञासापदस्यरूढलाक्षणिकार्थमात्रस्वीकरणमयुक्तं । यौगिकार्थस्यापिसंभवात् । नचयौगिकार्थस्यलाक्षणिकेनानान्वयइतिवाच्यं । अवांतरमहावाक्यविवक्षयाऽन्वयोपपत्तेरितिकौमुद्युक्तंदूषयितुमनुवदति ॥ **एतेनेति** ॥ श्रुत्या अवयवशक्त्येत्यर्थः ॥ **अतएवेति** ॥ इच्छापरत्वादेवेत्यर्थः । ननु मण्युक्तरीत्यायुगपद्वृत्तिद्वयविरोधोनदूषणं । किंच विषयादिसिद्ध्यन्य

SGDF Sri Gangeshwari Digital Foundation

प्र० जिज्ञासाशब्दोमहावाक्यआवर्तमानोलाक्षणिकोपिनदुष्यतीत्यनुशयेनाह ॥ **उक्तेति** ॥ यद्वाअगत्यागंगायांमीनघोषावित्यादाविववृत्तिद्वयम पिसह्यमित्यतआह ॥ **उक्तेति** ॥ अस्माभिरितिशेषः ॥ **अध्याहारेति** ॥ यस्मादित्यध्याहारेत्यर्थः । एवंसूत्रावयवपदानामर्थःसविस्तरंनि रूपितः । सूत्रतात्पर्यंचनिरूपितं । तत्रकेचिदाहुः । “अथातोधर्मजिज्ञासे”त्यनेनसकलवेदार्थविचारस्योक्तत्वाद्धर्मपदस्यवेदार्थोपलक्षकत्वाद्ब्र ह्मज्ञानस्यचोदनालक्षणत्वेन “चोदनालक्षणोर्थोधर्म” इतिधर्मरूपत्वाच्चसर्ववेदस्यतत्रविचारितत्वान्नेदमारंभणीयमिति । अस्याःशंकायाःस्वमतेनप रिहारंचिकीर्षुःपरोक्तंनिरस्यति ॥ **यत्तुपरैरिति** ॥ कार्यनिष्ठः कर्मपरः ॥ **वस्तुतत्वेति** ॥ तात्विकवस्तुरूपब्रह्मपरइत्यर्थः ॥ **सविशेषेति** ॥

उक्तरीत्याविषयफलयोरन्यथैवसूचनसंभवेनजिज्ञासाशब्दस्येच्छापरत्वेमानाभावाच्च । अध्याहारसापेक्षावां तरवाक्यभेदादिकल्पनानुपपत्तेश्च । तस्माज्जिज्ञासाशब्दोविचारपरः । नेच्छापरइति । यत्तुपरैरस्यशा स्त्रस्यपूर्वतंत्रेणगतार्थत्वमाशंक्यतत्रकार्यनिष्ठोवेदभागोविचारितः । इहतुवस्तुतत्वनिष्ठोविचार्यतइत्यगतार्थ त्वमुक्तं । तन्न । इहातत्वभूतोपास्यसविशेषब्रह्मविचारस्यउपासनापादेतद्विधिविचारस्यचायोगात् ।

गु० थानुपपत्त्या इच्छापरत्वमावश्यकमित्यतआह ॥ **उक्तरीत्येति** ॥ ननुजिज्ञासाशब्दस्येच्छापरत्वमवश्यंस्वीकर्तव्यं । बाधकाभावात् । नचानन्वयः । अवांतरवा क्यादिविवक्षयान्वयोपपत्तेरित्यतआह ॥ **अध्याहारेति** ॥ तथाचाध्याहारस्यैवबाधकत्वान्नेयंकल्पनायुक्तेतिभावः । ननुपूर्वमीमांसयागतार्थत्वान्नब्रह्ममीमांसाऽऽ रब्धव्येत्यतः परोक्तगतार्थत्वपरिहारंदूषयितुमनुवदति ॥ **यदिति** ॥ **गतार्थत्वमिति** ॥ सर्वस्यापिवेदस्यकर्मपरत्वेनकर्ममीमांसायामेवविचारितत्वेनब्रह्ममीमां सावैयर्थ्यमितिभावः ॥ **तद्विधिविचारस्येति** ॥ सविशेषब्रह्मोपासनाविधिविचारस्येत्यर्थः । ननूपासनायामोक्षसाधनत्वात्तद्विचारइहक्रियतइत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० आद्येंतरधिकरणाद्यौद्वितीयपादेचसविशेषब्रह्मणोतात्विकस्यविचारादित्यर्थः । ननुफलसाधनत्वादियुक्तब्रह्मणोविचारस्यप्रतिज्ञातत्वात्तद्विचारो युक्तइत्याशंक्याह ॥ **नचेति** ॥ ननूपासनायामनोवृत्तित्वेनविद्यानिभत्वादिहविचारोयुक्तइत्यतआह ॥ **त्वन्मतेहीति** ॥ **अनित्येति** ॥ तथाचनित्यफलसाधनविचारेतस्यानिवेशइतिभावः ॥ **अतत्वेति** ॥ नामादौब्रह्मत्वादेरतात्विकत्वादितिभावः । ननूपासनावाक्यस्यतत्कर्त व्यतामात्रपरत्वेनस्वार्थपरत्वाभावान्नैवमितिचेन्न । तत्कर्तव्यतायाअपितथात्वात् । नहितत्वनिष्ठवाक्यविचारेतेषांविचारोयुक्तइतिभावः ॥ **उद्गीथेति** ॥ "ॐमित्येतदक्षरमुद्गीथमुपासीते"त्यादीनांसामभक्तित्वादितिभावः । तदर्थत्वात् ज्ञानार्थत्वात् । "कर्मणाज्ञानमातनोती"त्या

नचोपासनामन्मतइवत्वन्मतेमोक्षसाधनं येनफलसाधनादियुक्तब्रह्मविचारप्रतिज्ञानात्तद्विचारःसंगच्छेत । त्वन्मतेह्युपास नायामानसत्वेनविद्यासाम्येप्यनित्यफलत्वाद्धेयत्वाच्चतद्वाक्यानामतत्वावेदकत्वादुद्गीथाद्युपासनानांकर्माश्रितत्वाच्च"समु द्रंमनसाध्यायीते"त्यादिवाक्यविहितसमुद्रध्यानादिवत्कर्मकांडएवोपासनायाविचारोयुक्तः । निर्विशेषज्ञानार्थत्वादुपास नायाइहविचारेचयागादिनित्यकर्मणामपितदर्थत्वान्मानससंकल्परूपतयोपासनावद्विद्यासाम्याच्चतद्विचारोपीहैवस्यात् ।

गु० **नचेति**॥ ननूपासनायावस्तुतत्वविषयासाकंमानसत्वेनसाम्यान्नतद्विचारस्यात्रासंगतिरित्यतआह ॥**त्वन्मतेहीति**॥ **विद्यासाम्येपीति**॥ज्ञानत्वेनरूपेणसाम्येपी त्यर्थः । तथाचज्ञानत्वसाम्यादिहविचारश्चेत्तर्ह्यनित्यफलत्वहेयत्वातत्वावेदकवेद्यत्वादिरूपेणकर्मसाम्यात्तत्रैवविचारःकर्तव्यइतिभावः । ननूपासनायानिर्विशेषज्ञानार्थत्वा दिहविचारइत्यतआह ॥ **निर्विशेषेति** ॥ ननु यागादिकर्मणासुपासनायाश्चनिर्विशेषज्ञानार्थत्वाविशेषेप्युपासनाविचारोत्रसंगतः । उपासनायामानसत्वेनविद्यासाम्यात् । कर्मणांचविद्यासाम्याभावान्नतद्विचारस्यात्रसंगतिरित्यतआह ॥ **मानससंकल्पतयेति** ॥ यागस्यदेवतामुद्दिश्यद्रव्यत्यागरूपत्वात् त्यागस्यमानससंकल्पविशेषरू

SGDF
Sri Gargeshwari Digital Foundation

प्र० देरितिभावः । कथंतर्हिगतार्थतानिरासइत्यतःस्वयमाह ॥ **तस्मादिति** ॥ "शब्दजातस्यसर्वस्ययत्प्रमाणश्चनिर्णय"इतिस्मृतेरितिभावः । उक्तंचसुधायामेवमेवसमाधानं"सएवसर्ववेदार्थ"इत्यादिव्याख्यावसरे । ननुचयदिब्रह्मप्रसिद्धंनजिज्ञासितव्यमथाप्रसिद्धंतर्हिनजिज्ञासितुंशक्यमित्याशंक्यजिज्ञासाधर्मिणितदुपयुक्तसामान्यप्र(तिपत्ति)सिद्धिविशेषविप्रतिपत्तीस्वमतेनदर्शयिष्यन्परोक्तेअनूद्यनिरस्यति ॥ **यदपीति** ॥ देहमात्रंचैतन्यविशिष्टमहमर्थइतिचार्वाकाः । इंद्रियाण्येवेत्यपरे । मनएवेत्यन्ये । शून्यमेवेत्येके । ब्रह्मैवेतिकश्चित् । एवंबहूनांनानात्वेनविप्रतिपत्तेरित्यर्थः ॥ **तद्व्यधिकरणमिति** ॥ अहमर्थेत्वंपदार्थेसामान्यप्रतिपत्तिविशेषविप्रतिपत्त्योःसत्त्वेपिजिज्ञास्यब्रह्मणितत्पदार्थेतयोरप्रदर्शनादितिभावः । नन्वतएवपरभाष्ये"आत्माचब्रह्मे"त्युक्तमित्याशंकते ॥ **प्रत्यगर्थएवेति** ॥ उक्तंचभामत्यां"तत्पदार्थस्यशब्दतस्त्वंपदार्थ

तस्मात्सर्वस्यापिवेदस्यब्रह्मपरत्वात्सर्वोपीहैवविचार्यः । कर्मदेवमीमांसयोर्वेदैकदेशावांतरतात्पर्यविषयकर्मदेवताविचारइति । यदपिपरैर्ब्रह्मणोजिज्ञास्यत्वार्थमेवप्रत्यगर्थेहमस्मीतिप्रत्यक्त्वरूपेणसामान्येनप्रतिपत्तिः । चार्वाकादीनामहमर्थेदेहेंद्रियमनःशून्यब्रह्मत्वादिविप्रतिपत्तेःविशेषविप्रतिपत्तिश्चेत्युक्तं । तद्व्यधिकरणं । प्रत्यगर्थएवब्रह्मेतिचे

गु० पत्वेनकर्मणामपिमानसत्वेनविद्यासाम्यात् तेषामप्यत्रविचार्यत्वापत्तिरितिभावः। स्वमतेगतार्थत्वंपरिहरति ॥ **तस्मादिति** ॥ तथाचपूर्वमीमांसादौसर्ववेदविचाराभावान्नगतार्थत्वमितिभावः । सर्वस्याप्यत्रविचार्यत्वेकर्ममीमांसादेर्वैयर्थ्यमित्यतआह ॥ **कर्मेति** ॥ तथाचतयोर्महातात्पर्यविषयब्रह्मविचाराकरणान्नानयोर्गतार्थत्वमितिभावः । ननु विचारेसामान्यविप्रतिपत्तिर्विशेषविप्रतिपत्तिश्चकारणं । प्रकृतेतदभावात्कथंब्रह्मणोजिज्ञास्यत्वमित्यतःपरोक्तंसामान्यप्रतिपत्त्यादिकंदूषयितुमनुवदति ॥ **यदपिपरैरिति** ॥ **तद्व्यधिकरणमिति** ॥ सामान्यप्रतिपत्त्यादेर्जिज्ञास्यत्वसमानाधिकरणस्यैवदृष्टत्वेनजिज्ञास्यब्रह्मण्येवतयोर्वक्तव्यत्वेन प्रत्यगर्थेतदुपपादन

॥ १०५ ॥

प्र० स्यप्रत्यक्षतःप्रसिद्धेस्त्वंपदार्थस्यतत्पदार्थब्रह्मभावावगम"इति । प्रत्यगर्थस्यब्रह्माभेदोयद्यपिसौत्रब्रह्मपदेनैवनिरस्तः । तथाप्यंगीकृत्यदूषयति ॥ **अस्त्विति** ॥ तत्त्वंपदार्थयोस्तत्त्वमसीत्यनेनाभेदावगमोहित्रेधा । तत्पदार्थबिंबभूतंब्रह्मोद्दिश्यत्वंपदार्थप्रत्यगर्थाभेदविधानेनवात्वंपदार्थमुद्दिश्यतत्पदार्थाभेदविधानेनवोभयत्रविरुद्धांशत्यागेनैक्यमात्रविधानेनवा । तत्राद्येजिज्ञासाधर्मीतत्पदार्थोब्रह्मैव । तस्यप्रत्यगभिन्नत्वेनजिज्ञासाब्रह्मजिज्ञासा । द्वितीयेप्रत्यगर्थोजिज्ञासाधर्मी । तस्यब्रह्मत्वेनजिज्ञासाब्रह्मजिज्ञासा । तृतीयेबिंबमेवजिज्ञासाधर्मिविशेष्यमेकमितितज्जिज्ञासाब्रह्मजिज्ञासेतिपक्षत्रयंहृदिनिधायाद्यंनिरस्यति ॥ **तथापीति** ॥ अभेदांगीकारेपि वैयधिकरण्यमेवेत्यर्थः । तयोः सामान्यप्रसिद्धिवि

दस्तुतावत् । तथापिनतावद्बिंबंब्रह्मजिज्ञासाधर्मि । प्रतिबिंबेतुसामान्यप्रतिपत्त्यादीतियुक्तं । प्रतिबिंबमात्रेविप्रतिपत्त्याबिंबेजिज्ञासाऽदर्शनेनब्रह्मोद्दिश्यप्रत्यगर्थाभेदादिविधानायब्रह्मण्येवतयोर्वक्तव्यत्वात् ।

गु० स्वव्यधिकरणत्वादित्यर्थः । ननु नवैयधिकरण्यं । प्रत्यगर्थस्यैवब्रह्मत्वादित्याशयेनशंकते ॥ **प्रत्यगर्थएवेति** ॥ **अस्तुतावदिति** ॥ वैयधिकरण्यपरिहारइतिशेषः । प्रत्यगर्थएवब्रह्मेतिवदतःकोऽभिप्रायः । ब्रह्मणएवजिज्ञासाधर्मित्वेपि ब्रह्मप्रत्यगर्थयोर्बिंबप्रतिबिंबभावेनैक्यात्प्रत्यगर्थेसामान्यप्रतिपत्त्यादिकंनव्यधिकरणमितिवा उतप्रत्यगर्थस्यैवजिज्ञासाधर्मित्वेनसामान्यप्रतिपत्त्यादेश्चतत्रैवसत्त्वेननवैयधिकरण्यमिति अथवाचिन्मात्रेविप्रतिपत्तिःब्रह्मणएवजिज्ञासाधर्मित्वमितिवा चिन्मात्रेविप्रतिपत्त्याचिन्मात्रमेवजिज्ञासाधर्मीतिवा जिज्ञासाधर्मिणिब्रह्मण्येवप्रतीचोन्यन्नवेतिविप्रतिपत्त्यानवैयधिकरण्यमितिवा । नाद्यइत्याह ॥ **नतावदिति** ॥ **प्रतिबिंबमात्रइति** ॥ बिंबभूतब्रह्माभिन्नत्वेनाज्ञातइत्यर्थः । अयंभावः । प्रत्यगर्थनिष्ठविप्रतिपत्त्यादेर्ब्रह्मणोजिज्ञास्यत्वोपयुक्तत्वंतदास्यात् यदिब्रह्मणःप्रत्यगर्थाभेदोज्ञायेत । अन्यथाऽतिप्रसंगात् । तज्ज्ञापनंचतज्जिज्ञासापूर्वमेव । जिज्ञासाचविप्रतिपत्त्यादिपूर्विका । तथाचतादृशजिज्ञासोपयुक्तविप्रतिपत्त्यादिकंब्रह्मण्येववाच्यमिति । नह्वि

SGDF Sri Gangadharan Digital Foundation

प्र० शेषविप्रतिपत्त्योः । द्वितीयमनूद्यनिरस्यति ॥ नापीति ॥ प्रतीचः प्रत्यक्चैतन्यस्य । जिज्ञासाधर्मित्वेननिश्चितत्वात्पुरोवृत्तिजिज्ञासाधर्मजिज्ञासेत्यादिवत्प्रत्यग्जिज्ञासेत्येवसूत्रंस्यान्नतुब्रह्मजिज्ञासेति । ब्रह्मत्वप्रकारस्यानिश्चितत्वादित्यर्थः ॥ श्रुतेति ॥ प्रकारार्थस्यब्रह्मपदस्यहानिःस्यादित्यर्थः । किंचास्मिन्पक्षेप्रत्यगर्थंविशिष्टमुद्दिश्यविशिष्टब्रह्माभेदोविधेयः । नचैवंयुक्तं । चिन्मात्रैक्यांगीकारादित्याह ॥ विरुद्धेति ॥ तस्य प्रत्यगर्थस्य । तथाचप्रत्यगर्थेविशेष्यभूतंचिन्मात्रमेवोद्देश्यमितितत्रैवसामान्यप्रसिद्ध्यादिदर्शनीयंनतुविशिष्टइतितत्रतत्प्रदर्शनंव्यधिक

नापिदेहत्वादिनाविप्रतिपन्नःप्रतिबिंबःप्रत्यगर्थएवजिज्ञासाधर्मी प्रतीचोब्रह्मत्वेनजिज्ञासाचब्रह्मजिज्ञासेतियुक्तं । लोकेनिश्चितेनधर्मिणेवानिश्चितेनप्रकारेणविशिष्यविचारपदाप्रयोगेणसूत्रेऽश्रुतप्रत्यक्पदकल्पनापातात् । धर्मजिज्ञासेत्यादाविवश्रुतस्यब्रह्मपदस्यकस्यकथंविचारइतिप्रथमाकांक्षितप्रधानधर्मिपरत्वसंभवेतत्त्यागेनतद्विपरीतप्रकारपरत्वायोगेनश्रुतहानापाताच्च । विरुद्धांशत्यागेनमुखमात्रस्येवचिन्मात्रस्यैवाभेदस्वीकारेणविशिष्टयोर्बिंबप्रतिबिंबयोरभेदाभावेनब्रह्माभेदविधानायतस्योद्देश्यत्वासंभवाच्च ।

गु० तीयइत्याह ॥ नापीति ॥ देहत्वादिनेति ॥ आदिशब्देनेंद्रियत्वादिकंग्राह्यं । ननु प्रत्यगर्थस्यजिज्ञासाधर्मित्वेब्रह्मजिज्ञासेत्यनुपपन्नं । तत्रब्रह्मणोजिज्ञासाधर्मित्वस्यप्रतीतेरित्यतआह ॥ प्रतीचइति ॥ तथाचब्रह्मशब्दोब्रह्मत्वरूपप्रकारपरोनतुधर्मिपरइतिभावः । एवंतर्हि लोकेपुरोवर्तिविचारःकर्तव्यइतिनिश्चितधर्मिपुरस्कारेणविचारपदप्रयोगादनिश्चितप्रकारपुरस्कारेणविचारपदप्रयोगाभावेनब्रह्मत्वरूपप्रकारस्यनिश्चितत्वेनप्रत्यक्जिज्ञासेतिसूत्रंस्यान्नतुब्रह्मजिज्ञासेति । तथाश्रुतकल्पनंस्यादित्याह ॥ लोकइति ॥ नकेवलमश्रुतकल्पनंश्रुतहानमपीत्याह ॥ धर्मेति ॥ ननु जीवस्यब्रह्मत्वाज्जीवमुद्दिश्यतस्यब्रह्माभेदोबोध्यते । नचसिद्धत्वात्तद्बोधनमयु

SGDF
Sri Gargeshwari Digital Foundation

प्र० रणमितिभावः । अयंदोषआद्यपक्षेपिसमः । तत्रापिविशिष्टस्यब्रह्मणउद्देश्यत्वासंभवस्यवक्तुंशक्यत्वात् । तथाचब्रह्माभेदेत्युपलक्षणं । प्रत्यग भेदविधानायेत्यपिग्राह्यं । तस्येत्यस्यब्रह्मणइत्यर्थः । तथाचतच्छब्देनतस्यप्रसिद्ध्युपदर्शनंव्यधिकरणमित्यपिध्येयं । एवंद्वितीयेपक्षेब्रह्मपदा स्वारस्यमुक्त्वाद्वितीयसूत्रास्वारस्यमाह ॥ **किंचेति** ॥ जिज्ञास्येऽतदाकारारोपनिवृत्त्यर्थेलक्षणंप्रत्यगर्थेश्चजिज्ञास्यइतितत्राब्रह्मत्वारोपनिवृत्तये प्रत्यग्ब्रह्मेतिलक्षणसूत्रंस्यात् । नतुजन्मादिकारणत्वेनब्रह्मलक्षणीयं । तस्यव्यधिकरणत्वादित्यर्थः । ननुप्रत्यगर्थस्यैववस्तुतोब्रह्मत्वाद्ब्रह्मलक्ष णोक्त्याप्रतीच्यतदाकारनिवृत्तिर्ज्ञायतइत्याशंक्यवैयधिकरण्यमेवदृष्टांतेनाह ॥ **नहीति** ॥ तथाचप्रतीचिप्रत्यगर्थेऽहंत्वादिनाज्ञायमानेदेहेंद्रि याद्यात्मकत्वारोपोजगत्कारणंब्रह्मेत्याद्युक्त्यानिवर्तते । किंतुप्रत्यक्ब्रह्मेत्युक्त्येतिभावः । तेन जिज्ञासुना ॥ **ब्रह्मणीति** ॥ प्रत्यगसाधारण

किंचधर्मिण्यतदारोपनिवृत्त्यर्थत्वाल्लक्षणस्योत्तरसूत्रेप्रत्यगर्थएवब्रह्मत्वेनलक्षणीयंस्यात् । नहिवस्तुतःपुरुषेइ दंत्वादिनाज्ञायमानेस्थाणुत्वाद्यारोपःकरचरणादिमान्पुरुषइतिपुरुषलक्षणोक्त्यानिवर्तते । किंत्वयंपुरुषइत्या द्युक्त्या । नचजिज्ञासुनाप्रतीचोब्रह्मत्वंनिश्चितं । येनब्रह्मणिलक्षितेप्रतीचिब्रह्मलक्षणविरोध्याकारोमिथ्येति ज्ञायेत । नापिलक्षणंप्रतीचोसाधारणधर्मतयातेननिश्चितं । येनब्रह्मणितत्कथनमुखेनब्रह्माभेदोज्ञाप्येत ।

गु० क्तमितिवाच्यं । जीवत्वोपलक्षितचिन्मात्राभेदस्यासिद्धत्वादित्यतआह ॥ **किंचेति** ॥ ननुप्रत्यगर्थस्यब्रह्मत्वाद्ब्रह्मलक्षणेउक्तेजीवेधर्मिण्यारोपितातदाकारनिवृत्तिर्भ विष्यतीत्यतआह ॥ **नहीति** ॥ ननुपुरुषस्यनिर्णीतत्वेलक्षणोक्तौसत्यामभेदारोपनिवृत्तिवत् प्रकृतेपिब्रह्मलक्षणोक्त्यातदारोपनिवृत्तिर्भविष्यतीत्यतआह ॥ **नचेति** ॥ ननुब्रह्मलक्षणकथनसुखेनब्रह्माभेदज्ञानार्थंलक्षणंकथ्यतइत्यतआह ॥ **नापीति** ॥ नकेवलंब्रह्मलक्षणंजीवेनोपपद्यते । अपितुत्वयापिब्रह्मलक्षणंजीवेनिषिद्धमित्याह

SGDF
Sri Gargeshwari Digital Foundation

प्र० धर्मतयाज्ञातस्यब्रह्मणिकथनेप्रत्यग्ब्रह्मणोरैक्यंज्ञाप्येतेतिभावः । प्रत्यगसाधारणधर्मत्वेनानिश्चितत्वेहेतुमाह ॥ **त्वत्पक्षेपीति** ॥ एवंद्वितीय पक्षंनिरस्येदानींतत्त्वंपदलक्ष्यचिन्मात्रैक्यमितितृतीयंनिराह ॥ **अतएवेति** ॥ चिन्मात्रएवविप्रतिपत्त्यातत्रैक्यविधानंयुक्तमितिभावः ॥ **बिंबंब्रह्मेति** ॥ तथाचब्रह्मजिज्ञासेतिव्यपदेशोलक्षणसूत्रंचयुज्यतइतिभावः । सामानाधिकरण्यायाह ॥ **चिन्मात्रमेवेति** ॥ अतएवेत्युक्तं वैयधिकरण्यंव्यनक्ति ॥ **विशेष्येति** ॥ **विशिष्टस्येति** ॥ तस्यमिथ्यात्वादितिभावः । निर्विशेषज्ञानार्थत्वेनविशिष्टविचारस्त्वंतरधिकरणे निरसिष्यतइतिभावः ॥ **चिन्मात्रइति** ॥ तदीयभाष्येत्वंपदार्थेविशिष्टेहमर्थएव"देहमात्रंचैतन्यविशिष्टमात्मेतिप्राकृताजना"इत्यादिनाविप्रतिपत्त्युक्तेः । तत्पदार्थेचविशिष्टएव "अस्तितद्व्यतिरिक्तईश्वरस्सर्वज्ञःसर्वशक्तिरितिकेचि" दित्यादिनाविप्रतिपत्त्युक्तेःचिन्मात्रेभावादित्यर्थः ।

त्वत्पक्षेपि "शारीरश्चोभयेपिहिभेदेनैनमधीयते । प्राणभृच्च । अधिकंतुभेदनिर्देशा"दित्यादौज न्मादिसूत्रोक्तलक्षणस्यजीवेनिषेधात् । अतएवोभयानुगतचिन्मात्रेतत्वंपदलक्ष्येविप्रतिपत्तिःजि ज्ञासाधर्मितुबिंबंब्रह्मचिन्मात्रमेवेतिप्रत्युक्तं । विशेष्यमात्रेविप्रतिपत्त्याविशिष्टधर्मिकविचारा दर्शनात् । विशिष्टस्यमुमुक्षुभिरविचार्यत्वाच्च । चिन्मात्रेदेहत्वादिविप्रतिपत्तेरभावाच्च । सौत्र

गु० ॥ **त्वत्पक्षेपीति** ॥ नतृतीयचतुर्थावित्याह ॥ **अतएवेति** ॥ **तत्त्वंपदलक्ष्यइति** ॥ प्रत्यगर्थएवविप्रतिपत्त्यादेस्सत्त्वेनतदलक्ष्येतदभावादित्यर्थः । अतएवेति परामृष्टंहेतुमाह ॥ **विशेष्यमात्रइति** ॥ चिन्मात्रंधर्मीत्युक्तंदूषयति ॥ **चिन्मात्रइति** ॥ तस्यदेहादिभिन्नत्वादेर्निर्णीतत्वात्तद्विचारवैयर्थ्यमितिभावः ॥ **सौत्र** ॥ १०७ ॥

प्र० एतेनचिन्मात्रमेवजिज्ञासाधर्मीतिपक्षोपिप्रत्युक्तोध्येयः ॥ **ब्रह्मशब्देति** ॥ चिन्मात्रमेवब्रह्मेत्यंगीकारेणबिंबेविशिष्टेजिज्ञासाधर्मिणिब्रह्मश ब्दोनस्वरसइत्यर्थः । ननु"अस्तितावद्ब्रह्मनित्यशुद्धे"त्यादिपरभाष्ये भामत्यामागमादापाततोब्रह्मणिसामान्यप्रसिद्ध्युक्तेः"अस्तितद्व्यतिरिक्त" इत्यादिभाष्यव्याख्यावसरेच"तत्पदार्थेविप्रतिपत्तिमाहे"त्यवतारिकापूर्वंजीवादिभिन्नत्वेनविप्रतिपत्त्युक्तेर्जिज्ञासाधर्मिणिब्रह्मण्येवसामान्यप्रसि द्धिविशेषविप्रतिपत्तीस्तइतिनकोपिदोषइत्याशंक्यनिराह ॥ **अथेति** ॥ नवैयधिकरण्यमित्युपलक्षणं । ब्रह्मजिज्ञासेतिव्यपदेशश्चयुक्तइतिध्येयं ॥ **तर्हीति** ॥ नन्विहसूत्रेप्रतीचिदेहत्वादिविप्रतिपत्तिर्नायुक्ता । तस्याजिज्ञासाधर्मिब्रह्मणिविप्रतिपत्तिसूचनएवतात्पर्यात् । उक्तंचभामत्यां "त्वंपदार्थविप्रतिपत्तिद्वारातत्पदार्थेविप्रतिपत्तिंसूचयित्वे"ति । तथाचनदोषइतिचेदयमाशयः । जीवभेदाभेदविप्रतिपत्तौत्वन्मतेब्रह्मविचार परेद्वितीयसूत्रेजीवाभेदस्यैववाच्यत्वेनभेदकलक्षणोक्तिरयुक्तेतितत्कथनंव्यधिकरणं । अतएवोक्तमुत्तरसूत्रइत्यादि । किंचब्रह्मणिसामान्यप्र सिद्धिःकिंविशिष्टेउतनिर्विशेषे । नाद्यः । तस्यप्रत्यगभेदाभावेनोद्देश्यत्वाभावात्तदुद्दिश्यजीवाभेदविधानायोगात् । मुमुक्षुभिरजिज्ञास्यत्वाच्च ।

ब्रह्मशब्दास्वारस्याच्च । अथजिज्ञासाधर्मिणिब्रह्मण्येवप्रतीचोन्यन्नवेतिविप्रतिपत्तेर्नवैयधि करण्यं । तर्हिभवदीयभाष्येइहसूत्रेप्रतीचिदेहत्वादिविप्रतिपत्त्युक्तिः । उत्तरसूत्रेजीवाद्भेदक स्यलक्षणस्योक्तिश्चायुक्ता । एतेनभास्करीयंजगत्कारणेप्रधानत्वादिविप्रतिपत्तिप्रदर्शनंनिरस्तं ।

गु० **ब्रह्मशब्देति** ॥ ब्रह्मशब्दस्यविशिष्टपरत्वेनचिन्मात्रपरत्वेऽस्वारस्यमित्यर्थः । नापिपंचमइत्याह ॥ **अथेति** ॥ **आद्यसूत्रेकारणेति** ॥ लोकेनिश्चितेनधर्मिणेवानि

SGDF Sri Gargeshwari Digital Foundation

प्र० भाष्येनित्यशुद्धबुद्धमुक्तस्वभावमित्यनौपाधिकेब्रह्मणिप्रसिद्धिप्रदर्शनायुक्तेश्च । नद्वितीयः । तत्रविप्रतिपत्त्यभावात् । त्वयापिविशिष्टएव तत्प्र दर्शनाच्च । "सर्वज्ञंसर्वशक्तिसमन्वित"मितिविशिष्टेप्रसिद्ध्युक्त्ययुक्तेश्च । तस्यावेद्यत्वेनशब्दात्प्रतीत्ययोगाच्च । एतेनवेदादेवापाततोब्रह्मसवि शेषंकचिन्निर्विशेषंचप्रतीतमितिविरुद्धवाक्यद्वयाद्विप्रतिपत्तिः । अतएवभाष्येद्विविधब्रह्मरूपप्रदर्शनमितिनिरस्तं । भाष्येकेचिदितिवादिवि प्रतिपत्त्युक्त्ययोगादिति । एतेनैतदधिकरणांतर्गतं"एतेनैतदपिपरास्त"मित्यादिना"नैवंसूत्रकारआहेत्यल"मित्यंतंसामान्यप्रसिद्ध्यादिप्रदर्शक परभाष्यखंडनपरंसुधावाक्यंविवृतंभवति ॥ **आद्यसूत्रइति** ॥ कारणजिज्ञासेत्येवस्यात्द्वितीयसूत्रेपिजिज्ञास्यस्यकारणस्यैवलक्षणंस्यात्नतुब्र ह्मणइत्यर्थः । विप्रतिपत्त्यभावाच्चिन्मात्रेनजिज्ञासेत्युक्तं इदानींसामान्यज्ञानविशेषज्ञानाभ्यांजिज्ञासा नचतेनिर्धर्मिकेस्तइत्याह ॥ **किंचेति** ॥ विशेषेणाज्ञातमित्यन्वयः ॥ **इदमित्थमिति** ॥ इदमितिसामान्यज्ञानमित्थमितिविशेषज्ञानंवदताज्ञानंसामान्यतइत्यादिसूचितमितिभावः ।

आद्यसूत्रेकारणपदस्योत्तरसूत्रेतल्लक्षणस्यचकर्तव्यत्वप्रसंगात् । किंचज्ञातंसामान्यतोऽज्ञातंविशेषेणविचार्यते । ज्ञाताज्ञातविभागस्तुनिर्विशेषेनयुज्यते । उक्तंचानुव्याख्याने"इदमित्थमितिज्ञानंजिज्ञासायाःप्रयोजन"मिति ।

गु० श्रितेनप्रकारेणविशिष्यविचारपदाप्रयोगेणसूत्रे अश्रुतकारणपदकल्पकापातात् ॥ **उत्तरसूत्रइति** ॥ धर्मिण्यतदारोपनिवृत्त्यर्थत्वाल्लक्षणस्योत्तरसूत्रेकारणमेवब्रह्मत्वे नलक्षणीयंस्यादित्यर्थः । तथाचब्रह्मलक्षणकथनमसंगतमितिभावः । किंचसामान्यतोज्ञातस्यविशेषतोऽज्ञातस्यविषयत्वेनत्वन्मतेसामान्यविशेषभावाभावान्नतस्यजिज्ञा स्यतेत्याह ॥ **किंचेति** ॥ नचजिज्ञासायानिर्विशेषज्ञानसाधनत्वाज्जिज्ञासाऽऽवश्यकीतिवाच्यं । तत्तच्छब्दसमन्वयेनगुणविशेषलाभेनविशेषज्ञानस्यैवसाधनत्वं

SGDF Sri Gargeshwari Digital Foundation

प्र० एवंपरमतेजिज्ञासोपयुक्तसामान्यप्रसिद्ध्यादिनिरस्यस्वमतेनतदाह ॥ **तस्मादिति** ॥ **आपातेति** ॥ विचारात्प्रागेवसिद्धार्थबोधकोपनिषद्भाष्यादिनाप्रतीतइत्यर्थः ॥ **तदुक्तमिति** ॥ ईक्षत्यधिकरणइतिध्येयं । गुणार्णवमित्युक्त्यासगुणत्वादिविप्रतिपत्तिः । वासुदेवमित्युक्त्याशिवत्वादिविप्रतिपत्तिःसूचिता । एवंपदांतरैरपिद्रष्टव्यं । दुर्गमानिकानिचिद्वाक्यानिव्यनक्ति ॥ **टीकाशेषाक्षरार्थस्त्विवति** ॥ व्याख्या

तस्माद्वेदांतादिनाऽऽपातप्रतीतेब्रह्मणिसगुणनिर्गु
णाल्पगुणत्वादिनाविप्रतिपत्तेर्जिज्ञास्यत्वमिति ।
तदुक्तमनुव्याख्याने "तस्माच्छास्त्रेणजिज्ञास्यम
स्मदीयंगुणार्णवं । वासुदेवाख्यमद्वंद्वंपरंब्रह्माखि
लोत्तम"मिति ॥ १ ॥ टीकाशेषाक्षरार्थस्तु

गु० नतुविशेषज्ञानस्येत्यत्रानुव्याख्यानसंमतिमाह ॥ **उक्तंचेति** ॥ ननुपरोक्तसामान्यप्रतिपत्तिविशेषप्रतिपत्त्योर्दूषितत्वेनतयोरभावात्प्रयोजकाभावेनभवन्मतेकथंविचारारंभइत्यतउपसंहारव्याजेनतेदर्शयति ॥ **तस्मादिति** ॥ अत्रानुव्याख्यानसंमतिमाह ॥ **तदुक्तमिति** ॥ श्रुतिस्थानृतशब्दस्यमिथ्यात्वमर्थःप्रतीयते तद्वारणाय

SGDF
Sri Gargeshwari Digital Foundation

प्र० तावशिष्टाशेषेत्यर्थः । शेषाक्षरार्थइतिवा ॥ **नामानीति** ॥ विश्वेत्यस्यार्थानुवादःसर्वाणीति ॥ ⚘ ॥ इतिश्रीमद्राघवेंद्रतीर्थपूज्यपादविर-
चितेतात्पर्यचंद्रिकाप्रकाशेजिज्ञासाधिकरणंसंपूर्ण ॥ १ ॥

नामानिसर्वाणीतिश्रुतावनृतस्येत्यनेनऋतशब्दवाच्याद्विष्णोरन्यद्विवक्षितमित्याह ॥ **विष्णिंर्वतरस्येति** ॥ लँक्ष्म्याब्रह्मादीनांस्वाधीनत्वोक्तेरिति ॥ अस्यसूक्तस्यांभ्रणीदेवताकत्वादंभ्रण्याश्चलक्ष्मीमूर्तित्वादि तिभावः ॥ **हरिवंशेत्रयेति** ॥ हरिवंशेभागत्रयंविवक्षितं ॥ **नटनंवंचनंवेति** ॥ विद्यमानाकाराच्छाद नेनाविद्यमानाकारांतरप्रदर्शनंनटनं । वंचनंत्वविद्यमानकथनं । क्वाप्यविद्यमानंलिंगमूलान्वेषणादिकंअ तथ्यं । विष्ण्वादौविद्यमानंरुद्रादिनिष्ठतयोच्यमानंस्वातंत्र्यादिकंवितथ्यं । शिष्टंसुगमं ॥ इतिश्रीमद्ब्रह्म ण्यतीर्थपूज्यपादशिष्यश्रीमद्व्यासतीर्थमुनिविरचितायांतात्पर्यचंद्रिकायांजिज्ञासाधिकरणंसंपूर्णं ॥ १ ॥

गु० टीकायामनृतस्यविष्णिवतरस्येतिव्याख्यातं तत्कथंशब्दलभ्यमित्यतआह ॥ **नामानीति** ॥ **ऋतशब्देति** ॥ ''ऋगताविति धातोस्तुपूर्वावगतवत्सदा । स्थितेर्ब्रह्म र्तमित्युक्तमनृतंपरिणामत'' इतिवचनादितिभावः । ननु ब्रह्मादीनांलक्ष्म्यधीनत्वंकुतः सूक्तद्रष्टृदेवताधीनत्वमेवकिंनस्यादित्यतआह ॥ **अस्येति** ॥ **भागत्रयमिति** ॥ खिलाखिलपारिजातविवक्षयेत्यर्थः । नटनवंचनशब्दितेअतथ्यवितथ्येत्वर्थनिष्ठेइतिभेदइतिद्रष्टव्यं ॥ ⚘ ॥ इतिश्रीमद्गुरुराजीयेतात्पर्यचंद्रिकाभावदीपेजिज्ञासा धिकरणंसंपूर्णं ॥ १ ॥ ॥ १०९ ॥

प्र० ॐ **जन्माद्यस्ययतः** ॐ ॥ पूर्वाधिकरणेनसंगतिप्रयोजनेसूचयन्नधिकरणप्रमेयंसंगृह्णाति ॥ **जिज्ञासेति** ॥ श्लोकस्यद्विरूपतांव्यनक्ति ॥ **पूर्वोक्तेति** ॥ यावज्जीवभेदकंनोच्यतेतावदत्रश्रुतौरूढित्यागेबाधकाभावेनब्रह्मपदाद्योगासिद्ध्यागुणपूर्त्यसिद्धेर्नजिज्ञासायुक्तेतिपूर्वपक्षेतदाक्षेपा त्संगतिः । गुणपूर्तिप्रसिद्धिद्वाराजिज्ञासासिद्धिःफलमित्यर्थः । यद्यपिब्रह्मपदलब्धंगुणपूर्णत्वमेवभेदकं तथापिविश्वकर्तृत्वरूपधर्मेणसमस्तव स्तुव्यावृत्ततयाऽवगतएवब्रह्मणिपूर्णगुणत्वंसिध्यतीतितदुपपादकतयैतदुक्तिः । अतएवगुणपूर्तिप्रसिद्धयइत्युक्तं । उक्तंचसुधायां ''अनेनलक्षणे नलक्षितेब्रह्मणिसमस्तगुणपूर्णत्वंप्रधानलक्षणंसिध्यती''ति । एतेन''श्रुत्यादिसंगतिस्त्वि''तिसंगतिटीकाविवृता । संगत्यंतरमप्यत्रानुसंधेयमि

ॐजन्माद्यस्ययतःॐ ॥ जिज्ञासाकारणीभूतगुण
पूर्तिप्रसिद्धये । जीवादिभेदकंविष्णोर्विश्वकर्तृत्वमु
च्यते॥ पूर्वोक्तजिज्ञासाक्षेपेणेहपूर्वपक्षोत्थानात्पूर्वा
धिकरणेनाक्षेपिकीसंगतिः चिंतायाःसफलत्वंच ।

गु० **ॐजन्माद्यस्ययतःॐ** ॥ पूर्वाधिकरणसंगतत्वेनैतदधिकरणप्रतिपाद्यमाह ॥ **जिज्ञासेति** ॥ तथापिकासंगतिरुक्तेतिनप्रतीयतेअतआह ॥ **पूर्वोक्तेति** ॥ ननुय द्यस्याधिकरणस्यपूर्वाधिकरणेनतदुक्तजिज्ञासाक्षेपेणपूर्वपक्षोत्थानेनाक्षेपकीसंगतिःसूच्यते तदासुधाविरोधःस्यात् तत्रभिन्नायाएवसंगतेरुक्तत्वादित्यतःसुधोक्तस्यप्रका

SGDF Sri Gargeshwari Digital Foundation

प्र० तिभावेनाह ॥ **सुधायांत्विति** ॥ **प्रकारांतरेणेति** ॥ तेनसुधाविरोधःप्रत्युक्तः ॥ **इतिवाक्यस्थमिति** ॥ सुधायाक्वचिदपिविष्णुपरत्वानंगीकारेणपूर्वपक्षप्रवृत्तावपीहटीकायांतदेवेत्यादिवाक्यांतरस्थब्रह्मशब्दस्यविष्णुपरत्वमुपेत्यैतद्वाक्यस्थस्यविष्णुपरत्वाक्षेपइतिद्योतयितुमितिवाक्यस्थंब्रह्मविषयइत्युक्तं ॥ **किंजीवइति** ॥ जात्यादेरिहायोग्यतापराहतत्वादितिभावः । यदिजीवेनेतुंशक्यंतदायौगिकार्थविष्णुग्रहणेहेतोरभावाद्रूढार्थोजीवएवेतिपूर्वपक्षेफलफलिभावः यदितुजीवेनेतुमशक्यंतदारूढ्यर्थत्यागेनयौगिकार्थग्रहणेहेतुरस्तीतिविष्णुरेवेतिसिद्धांतेफल

सुधायांतु आद्यसूत्रेसाधनादिसहितंब्रह्मविचार्यमित्युक्तं । तत्रसाधनफलयोर्ब्रह्मज्ञानसाधनंब्रह्मज्ञानफलमितिब्रह्मोपहितत्वेनतज्ज्ञानाधीनज्ञानत्वात् ब्रह्मणश्चसाधनादिज्ञानाधीनज्ञानत्वाभावादभ्यर्हितत्वाच्चादौतज्जिज्ञासैवप्राप्ता । साचलक्षणप्रमाणाभ्यां । तत्रापिलक्षणविशिष्टेप्रमाणाकांक्षेतिलक्षणस्यप्राथम्यमितिप्रकारांतरेणाधिकरणसंगतिरुक्ता । अत्र "तद्विजिज्ञासस्वतद्ब्रह्मे"तिवाक्यस्थंब्रह्म किंजीवउतविष्णुरिति चिंता । तदर्थंब्रह्मशब्दस्यरूढ्यर्थजीवत्यागेनयौगिकार्थविष्णुग्रहणेहेतुर्नास्त्युतास्तीति । तदर्थंविध्युद्देशस्थब्रह्मशब्दस्वारस्याय "यतोवे"त्यादिपूर्ववाक्यंकिंजीवेकथंचिन्नेतुंशक्यमुताशक्यमिति । पूर्वपक्षस्तु

गु० रांतरत्वात्प्रकारांतरस्यप्रकारांतरादूषकत्वान्नविरोधइत्यभिप्रायेणसुधोक्तंप्रकारांतरमाह ॥ **सुधायांत्विति** ॥ **तत्रसाधनफलयोरिति** ॥ अननुसंहितोपाधेरुपहितप्रत्ययायोगादितिभावः ॥ **प्रकारांतरेणेति** ॥ अनेनप्रपंच्यप्रपंचकभावलक्षणासंगतिरुक्ताभवति । "किंविष्णुरुतजीव"इतिसंदेहटीकायांपूर्वनिर्दिष्टत्वाद्विष्णुरितिपूर्वपक्षइतिमंदाशंकांनिरस्यति ॥ **किंजीवइति** ॥ टीकाकृतात्वभ्यर्हितत्वात्प्रथमंविष्णुरितिकोटिर्निर्दिष्टेतिद्रष्टव्यं ॥ **इत्यभिधानादिति** ॥ अनेन "बृहजातिजी

SGDF Sri Gargeshwari Digital Foundation

प्र० फलिभावःस्पष्टइतिभावः । एतेनविषयसंशयटीकापिविवृता । पूर्वपक्षटीकांव्यनक्ति ॥ **जीवएवेति** ॥ "बृहजातिजीवकमलासनशब्दराशिष्वि"त्यभिधानादित्यर्थः । धातोःक्रियार्थकत्वेपि"गडिवदनैकदेश"इत्यादिवत्क्रियोपलक्षणत्वेनबृहतेर्जात्याद्यर्थत्वंयुक्तमितिध्येयं । तत्रयोगेनैवप्रवृत्तेरित्येतद्व्याचष्टे ॥ **विष्णौत्विति** ॥ रूढियोगयोश्चेतिवाक्यंहेतुदृष्टांतोक्त्याव्यनक्ति ॥ **रूढेश्चेति** ॥ वाक्यात्पदश्रुतेरिवेतिभावः । षष्ठे"वचनाद्रथकारस्याधान"मित्याद्यपादीयोपांत्याधिकरणे वर्षासुरथकारोग्नीनादधीतेत्यत्रब्राह्मणादीनामेवरथकरणेनिमित्तेवर्षाकालविधिरुतरथकारसंज्ञस्यावांतरवर्णस्याधानांतरविधिरितिसंशये त्रैवर्णिकानांवैदुष्यस्यस्वतोलाभात्कालमात्रविधौचलाघवात्तेषामेवकालविधिर्नाविदुषोऽवांतरवर्णस्यविशिष्टाधानविधिरितिप्राप्ते अवयवार्थपर्यालोचनसापेक्षयौगिकप्रसिद्ध्यपेक्षयातन्निरपेक्षतयासमुदायप्रसिद्धेर्बलीयस्त्वाद्वचनबलादविदुषोप्यधिकारप्रतीतेरविघातादवांतरवर्णस्यायमाधानांतरविधिरितिसिद्धांतितं । अत्ररूढिबलीयस्त्वस्यव्युत्पादितत्वाद्ब्रह्मपदेपिसैवग्रा

जीवएवेदंब्रह्म । "बृहजातिजीवे"त्यभिधानाद्ब्रह्मशब्दस्यतत्ररूढेः । विष्णौतुयौगिकत्वात् ।
रूढेश्चावयवार्थनिरपेक्षायास्तत्सापेक्षयोगाद्बलीयस्त्वस्य रथकारादिशब्देषुस्थितत्वात् ।

गु० वकमलासने''तिब्रह्मशब्दस्यजीवेरूढत्वादितिटीकायाममभिधानादितिशेषःपूरणीयइत्युक्तंभवति । विष्णौयौगिकत्वेपिप्रकृतेब्रह्मशब्देनविष्णुरेवग्राह्यःकिंनस्यादित्याशंकानिरासायप्रवृत्ता"रूढियोगयोश्चरूढेरेवबलवत्त्वा"दितिटीका । तत्ररूढेर्योगापेक्षयाप्राबल्येकिंनिमित्तं कश्चात्रदृष्टांतइतिशंकापरिहारायनिमित्तंदृष्टांतंचदर्शयन्नेवरूढियोगयोश्चेत्यादिटीकांव्याचष्टे ॥ **रूढेश्चेति** ॥ अवयवार्थनिरपेक्षायाइतितत्रनिमित्तकथनं । रथकारादिष्वितिदृष्टांतप्रदर्शनं । नन्वेवंरूढेरेवयोगापेक्षयाप्राबल्येप्रोक्षण्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० ह्येत्यर्थः । नन्वेवमाद्येचतुर्थपादे“प्रोक्षणीष्वर्थसंयोगा”दित्यष्टमेधिकरणेरूढितोपियोगस्यबलवत्त्वोक्तिरयुक्तेत्यतआह ॥ **प्रोक्षण्यादीति** ॥ “प्रोक्षणीरासादये”त्यादौप्रोक्षणीशब्दःसंस्कारनिमित्तकःकिंवाजातिनिमित्तकउतयौगिकइतिसंशये संस्कृतास्वप्सुशास्त्रज्ञानांप्रयोगात्संस्कारनिमित्तत्वंप्राप्तमपोह्य बर्हिराज्यादिशब्दवदसंस्कृतास्वपिक्वचित्प्रयोगाज्जात्यव्यभिचाराज्जातिनिमित्तताप्राप्ता । नचयौगिकत्वंयुक्तं । समुदायप्रतीतेर्बलीयस्त्वादितिप्राप्ते लब्धात्मिकायाएवरूढेर्योगाद्बलीयस्त्वं । अश्वकर्णादिशब्देषुवृक्षादाववयवार्थासंभवएवतस्याआत्मलाभः । अवयवार्थसत्त्वेतुतन्मात्रेणोपपत्तावदृष्टसमुदायशक्तिकल्पनायोगात् । प्रकृतेचाप्सुप्रकृष्टोक्षणहेतुत्वरूपावयवार्थसत्त्वेनरूढ्यनुन्मेषाद्यौगिकःप्रोक्षणीशब्दइतिसिद्धांतितं । अत्राक्लृप्तरूढितःक्लृप्तयोगस्यबलवत्त्वोक्तावपिप्रकृतेनैवमितिभावः । उक्तंच “रूढिर्लब्धात्मिकायोगंबाधतेनत्वलब्धिका । तत्रैवचात्मलाभोस्यायत्रनावयवार्थते”ति । जीवेरूढत्वादितिटीकोक्तंहेतुंसाधयति ॥ **नचेति** ॥ बृहज्जातीत्यभिधानंतुयोगेनाप्युपपन्नं । एवंचविष्णौक्लृप्तयोगेनाक्लृप्तरूढिर्बाधिष्यतइतिभावः । जीवेंगीक्रियमाणोयोगार्थःकिंगुणपूर्तिरुतान्यइतिविकल्पौहृदिकृत्वाऽऽद्यआह

प्रोक्षण्यादिशब्देषुतुक्लृप्तोयोगः । अक्लृप्तारूढिः ।

नचजीवेपियोगांगीकाराद्रूढिरक्लृप्तेतिवाच्यं ।

गु० दिशब्दस्यापिरूढार्थत्वापत्त्यातस्ययौगिकार्थत्वप्रतिपादकाधिकरणविरोधइत्यतआह ॥ **प्रोक्षण्यादीति** ॥ क्लृप्ताक्लृप्तयोःक्लृप्तेकार्यसंप्रत्ययइतिन्यायादितिभावः । योगेनैवेत्येवकारस्यतत्रैवयोगेनेतिभिन्नक्रममंगीकृत्यजीवेयोगोनिराकृतष्टीकाकृतेतितन्निवर्त्याशंकामाह ॥ **नचेति** ॥ यौगिकोर्थःकिंगुणपूर्तिर्वाऽन्योवा । आद्येसकिंजीवे ॥ १११ ॥

प्र० ॥ **यौगिकार्थस्येति** ॥ तस्याल्पगुणत्वेनैवसिद्धेरितिभावः । अंत्यआह ॥ **गुणपूर्तितइति** ॥ देशाद्यपरिच्छेदरूपस्येत्यर्थः । अतोजीवेरूढिःक्लृप्तेतिप्रोक्षणीशब्दवैषम्यमितिभावः । “यद्यपिब्रह्मशब्दोविष्णौवर्तते तथापितत्रतस्ययोगेनैवप्रवृत्ते”रितिटीकागतैवकारस्यव्यावर्त्यशंकापूर्वंतात्पर्यमाह ॥ **नचजिज्ञास्यइति** ॥ विष्णावित्यर्थः ॥ **असिद्धेरिति** ॥ तथाचजीवाद्भेदोनसिद्ध्येत् । बृहंतोहीतिश्रुतिविरोधाच्चेतिभावः ॥ **नचेति** ॥ योगयुक्तारूढिरित्यर्थः । तथाचगुणपूर्तिलाभःकेवलरूढ्यपेक्षयाप्राबल्यंचेतिभावः । रूढिवद्योगस्याप्रामाणिकत्वेकल्प्यत्वाविशेषाद्रूढिरेवकल्प्येतेत्यतउक्तं श्रुत्यनुसारिक्लृप्तेति । उक्तंचमीमांसकैः । “भवेतांयदिवृक्षस्यवाजिकर्णौकथंचन । अक्लृप्तांसमुदायस्यकःशक्तिंजातुकल्पये”दिति । ननुतदेवेतिश्रुतौकवीनांमतेतदेवपरंब्रह्मेत्याहुरितिरूढिरुक्तेत्यतआह ॥ **तदेवेति** ॥ तर्हिपंकजादौयोगरूढिर्नस्या

यौगिकार्थस्यगुणपूर्तेर्जीवेऽसंभवात् । संभवेवाजिज्ञास्यत्वेनाभिमतस्यजीवाद्भेदासिद्धेः । गुणपूर्तितोन्यस्ययौगिकार्थत्वेतु जिज्ञास्यस्यापिगुणपूर्त्यसिद्धिः । नचजिज्ञास्येपिरूढिः । तथात्वे गुणपूर्त्यसिद्धेः । नचयोगरूढिः । “बृहंतोह्यस्मिन्गुणा” इतिश्रुत्यनुसारिक्लृप्तावयवशक्त्यैवोपपत्तौसमुदायशक्तौमानाभावात् । “तदेवब्रह्मपरमंकवीना” मित्यादेःकेवलयोगेनाप्युपपत्तेः ।

गु० नसंभवत्युतसंभवतीति । नाद्यइत्याह ॥ **यौगिकार्थस्येति** ॥ नद्वितीयइत्याह ॥ **संभवेवेति** ॥ नाद्यद्वितीयइत्याह ॥ **गुणपूर्तितोन्यस्येति** ॥ यथास्थितमेवकारसंबंधमभिप्रेत्यतन्निवर्त्याशंकामाह ॥ **नचेति** ॥ योगेनेत्यस्यकेवलयोगेनेत्यर्थमभिप्रेत्यतन्निवर्त्यमाह ॥ **नचेति** ॥ किंचयोगमात्रेऽतिप्रसक्तएवरूढ्यंगीका

SGDF
Sri Gargeshwari Digital Foundation

प्र० दित्यतआह ॥ नचेति ॥ तत्रपंकजनिकर्तृत्वस्यभेकादावपिसत्त्वेनैकांततस्तेनपद्मप्रतीत्ययोगाद्रूढिरंगीकृता । नचैवंप्रकृतेयोगोतिप्रसक्तः येनरूढिरपिस्यादित्यर्थः । एवंटीकोक्तोविष्णौयौगिकत्वहेतुःसमर्थितोभवति । यद्यपीत्यादिवाक्यंव्यनक्ति ॥ तथाचेति ॥ नतत्परतेति ॥ वक्ष्यमाणदिशाबाधकाभावादितिभावः । ननुसुधायांकापिब्रह्मशब्दोविष्णुपरोनेत्युक्तेःकथमेवमित्यतआह ॥ अतएवेति ॥ तथाप्रवृत्ताव प्यत्रटीकायांकचिद्विष्णुपरत्वमुपेत्यैवप्रवृत्तेर्नदोषइतिभावः । एतेनकचिद्ब्रह्मशब्दस्ययोगेनापिविष्णुपरत्वेशाखांतराधिकरणन्यायेनप्रत्यभिज्ञा नात्तद्ब्रह्मेत्यत्रापिविष्णुपरत्वंस्यादितिनिरस्तं । “यमंतस्समुद्र” इतिपूर्ववाक्योक्तसमुद्रशायित्वरूपलिंगस्येवेहबाधकस्याभावादितिभावः । अत्र यद्यपि“नचजीवेपी”त्यादिग्रंथस्य“ब्रह्मशब्दस्यतत्ररूढे”रित्युक्तहेत्वसिद्धिपरिहारार्थत्वात्तदानंतर्यं तथा“नचजिज्ञास्येपी”त्यादेश्च“विष्णौयौ गिकत्वा”दित्युक्तहेत्वसिद्धिनिरासार्थत्वात्तदानंतर्यं तथा“रूढेश्चे”त्यस्यैतदानंतर्यंचोचितं । हेत्वोःसिद्ध्यनंतरमेवप्राबल्यादिजिज्ञासोदयात् । तथापिप्रोक्षण्यादिशब्दवैषम्यकथनाय“नचजीवेपी”त्यस्ययथान्यासेयुक्तेतत्संबद्धत्वात्“नचजिज्ञास्येपीत्यस्यापिपश्चाद्भावइतिनदोषः । बाध

नचपंकजादाविवयोगोतिप्रसक्तः । येनयोगरूढिः । अन्यत्रगुणपूर्तेरनंगीकारात् । अतएवटीकायां “योगेनैवे”त्येवकारः । तथाच“तदेवब्रह्मपरम”मित्यादौरूढिबाधकसमुद्रशायित्वादिलिंगाद्विष्णुपर त्वेपितद्विजिज्ञासस्वेत्यत्रनतत्परता । अतएवटीकायां“यद्यपिब्रह्मशब्दोविष्णौप्रवर्तत”इत्युक्तं । ॥ ११२ ॥

गु० रस्यपंकजादिशब्देदृष्टत्वात्प्रकृतेचयोगमात्रस्यानतिप्रसक्ततयारूढ्यंगीकारोनयुक्तइत्याह ॥ नचेति ॥ नचात्रतादृशंबाधकमस्तीत्यनेनपूर्वपक्षेबाधकंनास्तीत्युक्तंटी

SGDF Sri Gargeshwari Digital Foundation

प्र० काभावान्नात्रब्रह्मपरतेत्ययुक्तमितिशंकते ॥ **नन्वत्रापीत्यादिनापूर्वपक्षादित्यंतेन** ॥ "तद्विजिज्ञासस्वे"त्यादिश्रुतावपीत्यर्थः । "तस्यच स्वप्रकाशत्वेनासंदिग्धत्वादजिज्ञास्यते"तिटीकांहृदिकृत्वाशंकते ॥ **नचास्येति** ॥ तद्विजिज्ञासस्वेतिवाक्यस्येत्यर्थः ॥ **जिज्ञास्यत्वमिति** ॥ ब्रह्मशब्दार्थस्येतिशेषः । तथाचनेदंबाधकमितिशंकाभिप्रायः ॥ **अन्योन्याश्रयादिति** ॥ सिद्धेजीवपरत्वेजिज्ञास्यत्वासिद्धिः जिज्ञास्यत्वासिद्धौबाधकाभावेनरूढ्याजीवपरत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । एतेन टीकायामस्यासंदिग्धजीवपरत्वमुपेत्याजिज्ञास्यत्वोक्तिरयुक्ता । प्रत्युततद्विजिज्ञासस्वेत्युक्तजिज्ञास्यत्वेनजीवपरत्वस्यत्यागएवयुक्तः । जीवस्यसंदिग्धत्ववर्णनंवाकार्यमितिशंकितुर्हृदयमितिध्येयं । सुधानुरोधेनटीकाशयंवर्णयन्संदिग्धत्वोपवर्णनेनजिज्ञास्यत्वसंभवमाशंकते ॥ **नचेति** ॥ इतिवाच्यमित्यन्वयः ॥ **कथंचिदिति** ॥ देहादिविविक्तत्वे

नन्वत्रापिजिज्ञास्यत्वमेवबाधकं । नचास्यासंदिग्धजीवपरतयाजिज्ञास्यत्वमेवासिद्धमितिवाच्यं । अन्योन्याश्रयात् । नचजीवस्यापिदेहादन्यतयासंदिग्धत्वेनजिज्ञास्यत्वं टीकायांपूर्वपक्षेजीवस्याजिज्ञास्यत्वोक्तिस्तुब्रह्मवदतिगहनत्वंनेत्यभिप्रेत्य । अतएवसुधायांपूर्वपक्षे"देहादितोविविक्ततयानप्रसिद्ध"इतिजिज्ञासाप्रयोजकमप्रसिद्धत्वमुक्तं । ततश्चजिज्ञास्यत्वस्यजीवेपिसंभवान्नतज्जीवपरत्वेबाधकमितिवाच्यं । कथंचिज्जिज्ञासासंभवेनतदाक्षेपेणपूर्वपक्षानुदयादितिचेन्न ।

गु० कायां । तदयुक्तं । बाधकाभावस्यासिद्धत्वादित्यतस्तद्ध्वर्त्किंजिज्ञास्यत्वंवाकारणत्वंवेतिविकल्पंमनसिनिधायक्रमेणदूषयति ॥ **नन्वित्यादिना** ॥ **नचास्येति** ॥ तथाचेदंवाक्यंब्रह्मशब्दार्थस्यनजिज्ञास्यत्वप्रतिपादकं । असंदिग्धजीवपरत्वादित्यर्थः ॥ **अन्योन्याश्रयादिति** ॥ अस्यवाक्यस्याऽसंदिग्धजीवपरत्वेसिद्धेजिज्ञास्यत्वपरत्वासिद्धिर्जिज्ञास्यत्वपरत्वासिद्धौचासंदिग्धपरत्वसिद्धिरित्यन्योन्याश्रयइत्यर्थः ॥ **अतएवेति** ॥ देहान्यतयासंदिग्धत्वादेवेत्यर्थः ॥ **कथंचिदिति** ॥ तथाचात्र

SGDF
Sri Gurgeshwar Digital Foundation

प्र० नेत्यर्थः । तथाच रूढ्याजीवपरत्वंवदतापूर्ववादिनाताद्दशपूर्वपक्षोदयार्थंतस्यजिज्ञासानर्हत्वायटीकोक्तदिशाऽसंदिग्धत्वमवश्यंवाच्यमिति श्रुतजिज्ञास्यत्वंरूढित्यागेबाधकंस्यादेव । सुधारीत्याटीकास्थाजिज्ञास्यत्वोक्तेरर्थांतरवर्णनमसमंजसमितिभावः । एवंबाधकशंकाव्याजेनटीकयोर्विरोधोप्युद्धाटितः । सुधायामिवटीकायामपिजीवस्योक्तविधयासंदिग्धत्वेनजिज्ञास्यत्वसंभवेपिसिद्धांत्यभिमतविशिष्टजिज्ञासायाएवाक्षेप्यत्वेनजिज्ञासाक्षेपेणपूर्वपक्षोदयोनविरुद्धः टीकाद्वयाविरोधश्चेतिभावेनजिज्ञास्यत्वस्यबाधकत्वंपरिहरति ॥ **विशिष्टेति** ॥ "भक्तिमान्परमेविष्णा" वित्युक्तविशेषणविशिष्टेत्यर्थः । अथादिशब्दोक्तान्येतानिजिज्ञासाविशेषणानि । प्रागुक्तानाक्षेपादफलेयंचिंतेत्यतउक्तं **पूर्वसूत्रोक्तेति** ॥ तथाचटीकाद्वयेपिजीवस्यजिज्ञास्यत्वांगीकारेण"तद्विजिज्ञासस्वे"त्यस्यजीवपरत्वेजिज्ञास्यत्वंनबाधकं । टीकायामजिज्ञास्य

विशिष्टाधिकारिकमोक्षफलकजीवान्यधर्मिकपूर्णगुणत्वप्रकारकपूर्वसूत्रोक्तजिज्ञासाक्षेपेणैवटीकाद्वयेपिपूर्वपक्षप्रवृत्तेः ।

गु० जिज्ञासाक्षेपेणपूर्वपक्षस्योक्तत्वान्नजिज्ञास्यत्वंजीवस्येतिजिज्ञास्यत्वमेवबाधकमितिभावः । सुधातुजिज्ञासाप्रयोजकाप्रसिद्धत्वपरान । किंत्वप्रसिद्धत्वमात्रपरा । अन्यथायाद्दशताद्दशाप्रसिद्धत्वस्यसर्वत्रसुलभत्वेनसर्वजिज्ञास्यत्वापत्तेरितिभावः ॥ **विशिष्टाधिकारिकेति** ॥ तथाचविशिष्टाधिकारिकत्वादिप्रकारकजिज्ञासाक्षेपेणपूर्वपक्षस्यप्रवृत्तत्वात् एताद्दशजिज्ञास्यत्वस्यात्रवाक्येऽप्रतीयमानत्वात् प्रतीयमानस्यचसिद्धांत्यनभिप्रेतत्वात् नजिज्ञास्यत्वंब्रह्मशब्देनजीवग्रहणेबाधकमितिभावः । नन्वेवंजीवस्यजिज्ञास्यत्वमभ्युपगम्यसिद्धांत्यभिमतोक्तविशेषणकजिज्ञासाक्षेपे जीवस्यसर्वथानिर्विषयत्वप्रतिपादकस्वप्रकाशत्वादितिटीकाविरोधःस्यात् । तावताशास्त्रानारंभश्च

प्र० त्वोक्तिस्तुप्रागुक्ताभिप्राया । टीकयोरविरोधश्चेतिध्येयं । "तस्यचस्वप्रकाशत्वेने"त्यादिटीकास्वारस्यानुसारात्कल्पांतरमाह ॥ **यद्वेति** ॥ **पूर्वपक्षापत्त्येति** ॥ यथाहिपूर्वाधिकरणेजीवस्यासंदिग्धत्वेनजिज्ञासामात्राक्षेपः । तथाब्रह्मशब्दस्यरूढ्याजीवपरत्वात्तस्यचासंदिग्धत्वाज्जिज्ञासानयुक्तेतिपूर्वपक्षापत्त्येत्यर्थः । ननुपूर्वत्रहिजीवान्यद्ब्रह्माक्षिप्यजीवान्यसर्वासत्यत्वंचोपेत्यजीवस्यचासंदिग्धत्वमुक्त्वाऽजिज्ञास्यत्वंपूर्वपक्षितं । नचेहतथा । "तदेवेत्यादौयोगेनविष्णुपरत्वमुपेत्य"तद्विजिज्ञासस्वे"त्यत्रैवरूढ्याजीवपरत्वशंकनात् । नचेहजीवादन्यद्देहादिभिन्नत्वमसत्यं । जीवपराभेदानंगीकारात् । येनान्यस्यजिज्ञासानर्हतयाजीवस्यचस्वप्रकाशसिद्धतयाऽजिज्ञास्यत्वेनपूर्वपक्षःक्रियेतेतिचेदयमाशयः । देहभिन्नत्वस्यजीवान्यस्यसत्यतयाजिज्ञासार्हत्वेपि "जातमात्रामृगागावोहस्तिनःपक्षिणोझषाः । भयाभयस्वभोगादौकारणानिविजानते"इत्यनुव्याख्यानाद्युक्तदिशातस्यापिचैतन्यवत्सिद्धतयासंदेहाभावेनाजिज्ञास्यत्वमिति । नन्वेवं कथंतर्हिसुधायांतेनरूपेणसंदिग्धत्वोक्तिरितिचेदुच्यते । स्फुटतरविवेकाभावेन "नैषांममाहमितिधीःश्वसृगालभक्ष्ये"इत्यादिव्यपदेशवदतिप्रसिद्धत्वाभावेनदेहादिभिन्नत्वेनसंदिग्धत्वमुपेत्यपूर्वपक्षःकृतः । अतएवतत्र "देहादितोविविक्ततयानातिप्रसिद्ध"इत्यतिशब्दप्रयोगः । वक्ष्यतिच"देहाद्यन्यतयाजीवस्यजिज्ञास्यत्वमंगीकृत्यापी"त्यपिपदेनाभ्युपगमवादोयमिति । ननुतर्हिविचारविधेःकागतिरित्यतोवा अस्मिन्पक्षेजिज्ञास्यत्वबाधकाज्जीवपरत्वमेवत्यज्यतामित्यतोवा

यद्वा इहटीकायांपूर्वपक्षेपूर्वाधिकरणपूर्वपक्षापत्त्या

गु० नस्यात् । सर्वथाविषयशून्यत्वएवहिसस्यादित्यतआह ॥ **यद्वेति** ॥ इहटीकायांपूर्वपक्षेऽजिज्ञास्यत्वेनैवपूर्वपक्षइत्यन्वयः । ननुकथमजिज्ञास्यत्वेनपूर्वपक्षइत्यतउक्तं **पूर्वाधिकरणेति** ॥ पूर्वाधिकरणेयःस्वप्रकाशत्वेनासंदिग्धत्वान्नजीवस्यजिज्ञास्यत्वमितिपूर्वःपक्षस्तस्यात्राप्यापत्त्या ताद्दशपूर्वःपक्षोत्राप्याप्नोतियतोतोऽजिज्ञास्यत्वेनपू

SGDF
Sri Gargeshwari Digital Foundation

प्र० ऽऽ६ ॥ **तद्विजिज्ञासस्वेति** ॥ अप्रामाण्येनवा प्रामाण्येपिब्रह्मपरवाक्यमध्यस्थतयालोडादेर्विधिशक्तिप्रतिबंधेनविचाराविधायकत्वेनवा ब्रह्मशब्दार्थस्याजिज्ञास्यत्वेपिजीवपरत्वेश्रुतेरुपपत्तेरित्यर्थः । अतोनजिज्ञास्यत्वंजीवपरत्वेबाधकं । तस्यैवासिद्धेः । अन्योन्याश्रयोपिप्रागुक्तो नास्ति । अन्यथैवजिज्ञासासिद्धेरुक्तत्वादितिभावः । सुधापक्षेतुजिज्ञास्यत्वस्यबाधकताशंकैवनास्ति जीवेतस्यांगीकारादितिभावेनाह ॥ **सुधायांत्विति** ॥ अपिपदेनाभ्युपगमवादसूचनात्टीकाविरोधःपरिहृतोभवति ॥ **सिद्धांतीति** ॥ विशिष्टाधिकारिकेत्याद्युक्तविशेषणयुक्तेत्यर्थः । जिज्ञास्यत्वंनबाधकमि(त्याद्यु)त्युक्त्वासिद्धांत्यभिमतंजगत्कारणत्वमपिनबाधकमित्याह ॥ **नचेति** ॥ **अदृष्टद्वारेति** ॥ न्यायमतरीत्यासर्वस्यापिजीवोपभोग्यत्वेनजीवादृष्टनिमित्तत्वाददृष्टद्वाराजगतिजीवस्यहेतुत्वं । एकजीवमतरीत्यासर्वस्यजीवकल्पितत्वेनतत्कल्पकत्वेनवातत्रहेतु

तद्विजिज्ञासस्वेत्यस्यापिपूर्वाधिकरणपूर्वपक्षन्यायेनाजिज्ञास्यत्वेप्युपपत्तेरजिज्ञास्यत्वेनैवपूर्वपक्षः । सुधायांतुदेहाद्यन्यतयाजीवस्यजिज्ञासामंगीकृत्यापिसिद्धांत्यभिप्रेतजिज्ञासाक्षिप्तेतिद्रष्टव्यं । नचजीवपरत्वेयतोवेत्यादिपूर्ववाक्योक्तकारणत्वमेवबाधकं । विध्युद्देशगतब्रह्मपदस्वारस्यायजीवस्याप्यदृष्टद्वारावाजगतोजीवकल्पितत्वेनवातत्रहेतुत्वोपपत्तेः ।

गु० र्वपक्षःसुकरइत्यर्थः । ननुतर्हितद्विजिज्ञासस्वेतिजिज्ञासाविधायकवाक्यस्यकागतिरित्यतआह ॥ **तद्विजिज्ञासस्वेत्यस्यापीति** ॥ तथाचपूर्वाधिकरणेयथातद्विजिज्ञासस्वेत्यादेरजिज्ञास्यत्वेनोपपत्तिःकृता तथात्राप्युपपत्तेःकर्तुंशक्यत्वादित्यर्थः । नन्विहटीकायामजिज्ञास्यत्वेनपूर्वपक्षकरणेसुधाविरोधइत्यतआह ॥ **सुधायांत्विति** ॥ एतट्टीकायांजीवस्यदेहादितोन्यत्वेनजिज्ञास्यत्वस्याविवक्षितत्वान्नसुधाविरोधइतिभावः ॥ **विध्युद्देशगतेति** ॥ नचसर्वकारणत्वरूपबाधकाद्ब्रह्मशब्दस्यैवजीवपरत्वंत्याज्यमितिवाच्यं । ब्रह्मपदस्यविध्युद्देशगतत्वेनप्रधानत्वात्तत्स्वारस्यानुरोधेनकारणत्वस्यैवयथाकथंचिन्नेयत्वादितिभावः । अदृष्टद्वारावाकल्पकत्वेनवाजीवस्यकारणत्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वमित्यर्थः । अन्यथाविध्युद्देशस्यप्रधानत्वात्तद्गतब्रह्मशब्दस्यरूढार्थत्यागलक्षणास्वारस्यंस्यादित्यर्थः । ननु टीकापक्षेतुतद्विजिज्ञासस्वेत्यस्यविचारविधित्वंनेतिपूर्ववाक्यएवोक्तं । अन्यथाजिज्ञास्यत्वस्यैवजीवपरत्वेबाधतापत्तेः । तथाचकथंविध्युद्देशगतेति । सत्यं सिद्धांतिनाविचारविधित्वमंगीकृतमितितंप्रतिपूर्वपक्षिणेत्थमापादनाददोषः । विध्युद्देशपदेनोपसंहारोविवक्षितइत्येके । ननु अदृष्टद्वाराहेतुत्वेप्यत्रश्रुतंसाक्षाद्धेतुत्वंनजीवस्येत्यतआह ॥ **इमानीति** ॥ प्रत्यक्षार्थनिर्देशकत्वादिदमइतिभावः । एतेन''जिज्ञास्यत्वमेवबाधक''मित्यादिनाग्रंथेन । ''नचरूढित्यागेनयोगांगीकारोयुक्तः । बाधकंविनामुख्यार्थत्यागायोगात् । नचात्रतादृशंबाधकमस्ती''तिटीकावाक्यंविवृतंभवति । अत्रब्रह्मशब्दोजीवपरइत्यत्रसुधास्थादिपदोपात्तश्रुतिमाह ॥ **अतएवेति** ॥ आदिपदेन''यआत्मासोन्वेष्टव्य''इत्यादिसुधोक्तवाक्यग्रहः । लक्षणमितिमत्वा''आत्मावा''इत्युदाहृतं । तेन''तद्विजिज्ञासस्व यआत्मा''इत्यनयोरेवतत्रोपादानात्''बंधमोक्षावपिह्यासुश्रुतिषूक्ताहरेस्सदे''तिबहुवचनंकथमितिनचिंत्यमितिभावः । सुधायांतद्वाक्यस्याप्युदाहरणस्यफलंचोक्तंभवति । अन्यथात्रविष्णुविचारविधिस्तत्रजीवविचारविधिरितिविचारविधेर्ना

इमानीत्यनेनजीवकर्तृककार्यजातस्यैवनिर्देशोपपत्तेश्च । अतएव ''आ
त्माद्रष्टव्य''इत्यादौजिज्ञासाविधायकवाक्ये जीवेप्रसिद्धात्मपदप्रयोगः ।

गु० जातादिपदानांमुख्यार्थत्यागापत्तिरित्यस्वरसाद्दोषांतरमाह ॥ **इमानीति** ॥ तद्विजिज्ञासस्वतद्ब्रह्मेतिवाक्यस्थब्रह्मपदस्यजीवपरत्वेसमाख्यामाह ॥ **अतएवेति** ॥ ब्रह्मशब्दस्यजीवपरत्वादेवेत्यर्थः । यद्वा ''आत्मावाअरेद्रष्टव्य''इत्यादिजिज्ञासावाक्येजीवेप्रसिद्धात्मशब्दप्रयोगेणतत्रजीवस्यैवजिज्ञास्यत्वेसिद्धेतत्समाख्यानेनतद्विजिज्ञासस्वेत्यत्रापिजीवस्यैवजिज्ञास्यत्वेसिद्धेकारणवाक्यंयथाकथंचिज्जीवपरत्वेनव्याख्येयमित्याह ॥ **अतएवेति** ॥ युज्यतइतिशेषः । अग्निमत्त्वादेवधूमवानितिवज्ज्ञा

SGDF
Sri Gargeshwari Digital Foundation

प्र० नार्थत्वंप्रसज्येत । अद्याप्यात्मशब्दस्यविष्णुनिष्ठतायाअनिर्णयादितिभावः । ननुजीवइवजातिकमलासनादावपिरूढेर्जीवएवेतिकथंनिर्णयोत आह ॥ अतएवचेति ॥ आत्मपदप्रयोगादेवेत्यर्थः । एवंपूर्ववादीस्वपक्षेसाधकमुक्त्वाबाधकंचोद्धृत्यसिद्धांतेसाधकाभावमुक्तप्रायंमत्वाबाधक माह ॥ ब्रह्मणइति ॥ "निष्कलंनिष्क्रिय"मितिश्रुतेर्निष्क्रियस्यकथंकृतिमत्त्वरूपकर्तृत्वमित्यर्थः । "निर्विकारोक्षरःशुद्ध"इत्यादेर्निर्विकार स्यकथंपरिणामलक्षणविकारवत्त्वरूपोपादानत्वमित्यर्थः । ननु"आनंदमयोभ्यासा"दित्यत्रानंदमयादेर्विष्णुत्वेब्रह्मशब्दस्यहेतूकरणाद्विष्णुप रत्वंसिद्धं । अन्यथातत्रहेतोरसिद्ध्यापत्तेः । अतएवपादांत्यप्राणाधिकरणपूर्वपक्षचंद्रिकायां "उक्तंचानंदमयाधिकरणेब्रह्मशब्दस्यविष्णौमुख्य त्व"मित्युक्तं । तथाचकथंब्रह्मशब्दोजीवइतिपूर्वःपक्षः । तथा"सर्वत्रप्रसिद्धोपदेशा"दित्यत्रापिविष्णौप्रसिद्धस्यब्रह्मशब्दस्योपदेशादितिहेतूकर णात्प्रसिद्धपदप्रयोगाच्चसिद्धंतस्यविष्ण्वर्थत्वं । अतएवसिद्धांतेद्युभ्वाद्यधिकरणेहेतूकृतात्मशब्दस्यविष्ण्वर्थत्वंसिद्धमि"त्यात्मावारेद्रष्टव्य"इत्यत्रात्म शब्दोद्युभ्वाद्यधिकरणन्यायेनविष्णुपरइतिग्रंथकारोवक्ष्यति । नचतस्यवक्ष्यमाणत्वेनततःपूर्वंविष्ण्वर्थत्वासिद्धेरेवंपूर्वपक्षोदयइतिवाच्यं ।

अतएवचनजात्यादिकमिहब्रह्मशब्दार्थः । ब्रह्मणोनिष्क्रियत्वेनकर्तृत्वस्यनि र्विकारत्वेनोपादानत्वस्यचासंभवेन कारणत्वस्यब्रह्मपक्षएवबाधकत्वाच्चेति ।

गु० तव्यं ॥ अतएवेति ॥ आत्माद्रष्टव्यइतिजिज्ञासाविधायकवाक्येजीवेप्रसिद्धात्मपदप्रयोगात्तद्ब्रह्मेत्यत्रब्रह्मशब्दस्यजात्यादिपरत्वेतद्विरोधापत्तेरेवेत्यर्थः । तद्ब्रह्मेति वाक्येब्रह्मशब्दस्यजीवपरत्वेकारणत्वंबाधकंनभवतीत्युपपाद्य विष्णुपरत्वएवतद्बाधकमितिभावेन कारणत्वंकिंकर्तृत्वंवोपादानत्वंवेतिविकल्प्यक्रमेणदूषयति ॥ ब्रह्मण इति ॥ आद्येनिष्क्रियत्वेनेतिहेतुः । निर्विकारत्वेनेतिद्वितीयेहेतुः । ब्रह्मशब्दस्यविष्णौयोगमेवाश्रित्यजीवेरूढिमाश्रित्यरूढिबाधकसद्भावाद्यौगिकार्थपरत्वमेवेत्यभ्यु ॥ ११५ ॥

प्र० ज्योतिरधिकरणपूर्वपक्षचंद्रिकायां"यद्यपिवैश्वानरोजायमानइत्यग्निसूक्तेवैश्वानरश्रुतिर्जायमानत्वलिंगंचास्ति । तथापिविष्णौश्रुतेःसावकाश तायावैश्वानराधिकरणे लिंगस्यसावकाशतायाद्युभ्वाद्यधिकरणेकंठोक्तत्वान्नताभ्यांपूर्वपक्षित"मितिवक्ष्यमाणत्वेनोत्तरत्रसिद्धत्वेपीहपूर्वपक्षानुद यादितिचेदत्रकेचित् । योगरूढिभ्यांतस्यविष्णुपरत्वमिहैवसिद्धंतत्रहेतूक्रियते । नतुतत्रैवसिद्धं । चंद्रिकावाक्यंतुभाष्येबहुवाक्योदाहरणात्त दभिप्रायेणनेयमित्याहुः । अन्यत्रयोगेनविष्णुपरत्वेपीहवाक्येरूढौबाधकाभावेनरूढोजीवएवेतिपूर्वपक्षोदयइतिगुरुपादाः । एतेन यत्केन चित्प्रलपितंजीवेदेहबृंहकत्वादिनायोगेनब्रह्मशब्दस्योपपत्तौरूढौमानाभावः । बृहजातीत्यादित्वप्रसिद्धं । किंच"ब्रह्मशब्दःपरेविष्णा"वित्या दिस्मृतौ "स्याच्चैकस्यब्रह्मशब्दवत् परंजैमिनिर्मुख्यत्वा"दित्यादिसूत्रेचपरब्रह्मशब्दस्यविष्णौमुख्यत्वंसिद्धमितिकथंजीवइतिपूर्वपक्षइति तन्नि रस्तं । विष्णौपुष्कलयोगेनमुख्यत्वमन्यत्रतदभावेनामुख्यत्वमितिसिद्धावपीहलोकरूढ्याजीवपरत्वेबाधकाभावादितिशंकनात् । एतच्छंका याःकचिदवश्यंनिराकार्यत्वाच्च । रूढाववांतरभेदस्यतत्प्राबल्यस्यचाद्याप्यसिद्धेश्च । यदपियोगेनोपपत्तौरूढौमानंनेति तन्न । यौगिकार्थस्यगुण पूर्तेर्जीवेऽसंभवादित्युक्तत्वात् । देहबृंहकत्वादिर्योगार्थइत्यत्रमानाभावाच्च । सर्वज्ञतमेनोदाहृतस्यचिरंतनव्याकरणसिद्धाभिधानस्यार्वाचीने नापलपितुमनुचितत्वाच्चयत्किंचिदेतत् । एतेननिरवकाशलिंगेनसावकाशश्रुतिबाधस्यांतरधिकरणेवक्ष्यमाणत्वान्निरवकाशकारणत्वलिंगेनसा वकाशब्रह्मश्रुतेर्बाधसंभवात्तेनगतार्थमिदं । सावकाशश्रुत्यानिरवकाशलिंगबाधायोगेनपूर्वपक्षानुदयश्चेतिनिरस्तं । तादृशन्यायस्यतदधिकर णव्युत्पाद्यत्वेपीहतमेवन्यायंसिद्धवत्कृत्यकारणत्वरूपलिंगस्यनिरवकाशतामात्रप्रतिपादनेनागतार्थत्वात्पूर्वपक्षेलिंगस्यनिरवकाशतानभ्युपगमे नश्रुतेर्विष्ण्युद्देशगतत्वेनोपसंहारगतत्वेनवाप्राबल्येनपूर्वपक्षोदयात् । ननुचैवमाकाशाधिकरणादाविवेहाप्यन्यइतिप्राप्तेनिरवकाशकारणत्वालिं

SGDF Sri Gargeshwari Digital Foundation

प्र० गेनब्रह्मशब्दस्यब्रह्मपरत्वस्थापनेनब्रह्मशब्दसमन्वयस्यसत्त्वात्पंचाधिकरण्याःसमन्वयाध्यायासंगतिरित्युक्तंविरुध्यतइतिचेन्न । जिज्ञासा समर्थनद्वाराशास्त्रारंभएवतात्पर्येणतत्समन्वयएवातात्पर्यात् । तत्समन्वयफलस्यगुणपूर्तिलाभस्य"तदेवपरम"मित्यादिश्रुत्यंतरएवसिद्धेरित्या दूह्यं । संग्रहस्तु निर्बाधरूढेर्जीवोत्रब्रह्मविष्णुर्नयौगिकः । योगाद्रूढेर्बलीयस्त्वंरथकारनयेस्थितं । जगत्कारणत्वादिरूपाद्बाधकादेवरूढार्थत्या गेनविष्णुपरत्वंब्रह्मशब्दस्येतिभावेनसिद्धांतमाह ॥ **सिद्धांतस्त्विवति** ॥ भाष्योक्तश्रुतिभिर्विष्णुमात्रगात्कारणत्वतः । बाधकाद्रूढिबाधेनवि ष्णुर्ब्रह्माभिधःश्रुतइतिसंग्रहः ॥ **यइतीति** ॥ यद्यपि"यउत्रिधातुपृथिवी"मित्यत्ररक्षकत्वं"चतुर्भिस्साक"मित्यत्रनियामकत्वंश्रुतं नतुकार णत्वं । तथापिजनकस्यैवरक्षकत्वादिकमित्युत्सर्गेइतिरक्षकत्वाद्युक्त्यैवकारणत्वंलब्धमितिवा"योनःपिताजनिते"त्यादिश्रुतौ"उत्पत्तिस्थितिसं हारा"इत्यादिस्मृतौचसाक्षात्कारणत्वस्योक्तेर्वैवमुक्तं । श्रुत्यर्थस्तुटीकायांस्पष्टः । एतेनकिंजन्मादिकंलक्षणमुततत्कारणत्वं । नाद्यः । तस्यप्र पंचधर्मत्वात् । नांत्यः । तस्याप्रसिद्धत्वादितिनिरस्तं । श्रुत्यादिषुप्रसिद्धस्यकारणत्वस्यलक्षणत्वादिति । ननुजीवेपिजगत्कारणत्वंयुक्तमित्यु क्तमतआह ॥ **अदृष्टेति** ॥ साक्षाज्जन्यएवजातादिपदप्रयोगादितिभावः । यदभिस्वेच्छयासम्यग्विशंतीत्यनेनोक्तमुक्तप्राप्यत्वस्यानुपपत्तेरि

सिद्धांतस्तु । विष्णुरेवजिज्ञास्यंब्रह्म । "य"इत्यादिभाष्योक्तश्रुतिभिर्विष्ण्वेकनिष्ठस्यकारणत्वस्यजिज्ञा स्येयतोवेत्यादिनाश्रवणात् । तस्यचजीवेनुपपत्त्यारूढेरपिबाधात् । अदृष्टद्वारावाकल्पकत्वेनवाजीवकार णत्वेजातादिपदानांमुख्यार्थत्यागापत्तेः । "अभिसंविशंती"तिपदोक्तमुक्तप्राप्यत्वस्यचसर्वथानुपपत्तेः । ॥ ११६ ॥

गु० पेत्य परोक्तंजीवेकारणत्वस्यसावकाशत्वेनरूढ्यबाधकत्वंतस्यविष्ण्वेकनिष्ठत्वसमर्थनेननिराकुर्वन्सिद्धांतमाह ॥ **सिद्धांतस्त्विवति** ॥ ब्रह्मशब्दस्यजीवपरत्वेयतो

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यर्थः । कारणत्वादिलिंगजातस्यपक्षनिष्ठतामाह ॥ **यतइतीति** ॥ यद्वाकेषांचिन्मतेवक्ष्यमाणदिशाविशेषणभेदेविशेष्यभेदमाशंक्याह ॥ **यतइतीति** ॥ यत्त्विमानीत्यनेनजीवकर्तृककार्यजातस्यैवनिर्देशइत्युक्तंतन्नेत्याह ॥ **इमानीति** ॥ कतिपयकर्तृत्वमपिजीवस्यनेत्याह ॥ **जीवेति** ॥ स्वतंत्रकर्तृतायाइत्यर्थः । तेन"कर्ताशास्त्रार्थवत्त्वा"दित्यनेननविरोधः । युक्तिपादे "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति"रित्यधिकरणगतसूत्रेषु"एतेनशिष्टाअपरिग्रहाअपिव्याख्याता"इतितत्पूर्वाधिकरणांतिमसूत्रेच समयपादेच "अन्यथानुमितौचज्ञशक्तिवियोगा"दित्यत्रचनिराकरिष्यमाणत्वादित्यर्थः । सूत्राणामर्थस्तुभाष्यादौस्पष्टः । वक्ष्यतेचात्रापीतिनात्रलिख्यते । उक्तंचानुव्याख्याने "नहिजन्मादिहेतुत्वंजीवस्यजगतोभवेत् । हिताक्रियादिदोषंचवक्ष्यत्येवस्वयंप्रभु"रिति । एतेन"अतोब्रह्मशब्दस्ये"त्यादिटीकाव्याख्याता । ब्रह्मशब्दस्यविष्णुपरत्वंसमर्थ्यप्रागुक्तात्मशब्दस्यापितदाह ॥ **जिज्ञास्यइति** ॥ "आत्मावाअरेद्रष्टव्यः यआत्मापहतपाप्माविजरोविमृत्युर्विशोकोविजि

"यतइति येनेति यदिति तद्ब्रह्मे"तिचप्रतीतकारणैक्यस्यचबाधकाभावात्। इमानीतिसर्वनाम्नश्चसंकोचकाभावात्। जीवकर्तृतायाश्च"इतरव्यपदेशा"दित्यादिसूत्रेषुनिराकरिष्यमाणत्वात्। जिज्ञास्येश्रुतस्यचात्मशब्दस्य"आत्मानारायणःपर"इत्यादिश्रुत्या

गु० वेत्यादिपूर्ववाक्योक्तकारणत्वानुपपत्तिः । नचेमानीत्यस्यजीवकर्तृककार्यजातपरामर्शकत्वान्नानुपपत्तिरितिवाच्यं । बाधकाभावेनसंकोचासंभवादित्याह॥**इमानीति**॥ अन्यथासर्वनामत्वमेवनस्यादितिभावः । एतावताजीवेयत्किंचित्कार्यकर्तृत्वमंगीकृत्यबाधकाभावेनसंकोचानुपपत्त्यायतोवेत्यादिपूर्ववाक्योक्तकारणत्वंतद्ब्रह्मेतिवाक्यस्थब्रह्मशब्दस्यजीवपरत्वेबाधकमित्युक्तं इदानींयत्किंचित्कार्यकर्तृत्वमपिजीवेऽनुपपन्नमित्याह ॥ **जीवेति** ॥ आत्माद्रष्टव्यइत्यादौजिज्ञासाविधिवाक्येजीवेप्रसिद्धात्मपदप्रयोगेणतद्ब्रह्मेतिवाक्यस्थंब्रह्मजीवएवेतियदुक्तंतत्रदृष्टांतएवासंप्रतिपन्नइतिभावेनाह ॥ **जिज्ञास्यइति** ॥ किंचान्वेषणवाक्यस्थात्मशब्दोनजीवपरः तत्राप

SGDF
Sri Gargeshwari Digital Foundation

प्र० घत्सोपिपासः सत्यकामः सत्यसंकल्पः सोन्वेष्टव्य"इत्याद्यनेकवाक्यस्थस्येत्यर्थः । अतएवजिज्ञास्येश्रुतस्येतिसामान्येनोक्तिः । "नारायणपरो ज्योतिरात्मानारायणःपर"इतितैत्तिरीयश्रुतिः ॥ **द्युभ्वादीति** ॥ "द्युभ्वाद्यायतनंस्वशब्दा"दित्यत्रात्मशब्दादितिवक्तव्येस्वशब्दादित्युक्ति स्तुस्वस्यविष्णोश्शब्दइत्यपिविग्रहाश्रयणेन"तमेवैकंजानथआत्मान"मित्यात्मशब्दस्यविष्ण्वेकनिष्ठत्वख्यापनायेतिवक्ष्यते । तथाचात्मशब्दात् द्युभ्वाद्यायतनंविष्णुरित्युक्तन्यायेनेत्यर्थः । "जानथआत्मान"मितिजिज्ञास्यत्वेनश्रुतात्मनोविष्णुत्वं"अमृतस्यैषसेतु"रित्युत्तरवाक्यस्थमुक्तोप सृप्यत्वलिंगाधीनमितिन्यायेनेत्युक्तं ॥ **न्याय्यत्वादिति** ॥ एकत्रनिर्णीतशास्त्रार्थोन्यत्रापीतिन्यायप्राप्तत्वादित्यर्थः । अन्यथाजिज्ञासावाक्या नांनानाधर्मिकजिज्ञासाविधायकत्वप्रसंगइतिभावः । यआत्मेतिवाक्यगतात्मशब्दस्यजीवपरत्वेबाधकमप्याह ॥ **अन्वेषणेति** ॥ शंकायाम पीत्यभ्युपगमवादः । तेषामपिजीवेस्वतोऽभावात् । यद्वक्ष्यतिदहरनये"अशनायादिकानन्येतत्प्रसादात्तरंतिही"ति ॥ **सत्यकामत्वादीना मिति** ॥ "सत्यकामःपरोनास्ती"त्याद्युक्तेरितिभावः । उक्तंचतत्रटीकायां "अपहतपाप्मत्वादीनांकथंचिदन्यत्रवृत्तावपिनकथंचिदन्यत्रसत्य कामत्वादीत्याशयेनाह । सत्यकामइती"ति । एतेनजन्मादिकारणत्वमुपलक्षणंजिज्ञासाविधिवाक्येषुयत्रयत्रजीवपरत्वेयद्बाधकमस्तिसत्यका मत्वादिकं"ओमित्येतदक्षरमुद्गीथमुपासीते"त्यादावुद्गीथत्वादिकं तत्सर्वंग्राह्यमितिसूचयता"सृष्टिःस्थितिश्चसंहारोनियतिर्ज्ञानमावृतिः । बंध

द्युभ्वाद्यधिकरणन्यायेनब्रह्मशब्दवद्विष्णुपरतायाएवन्याय्यत्वात् । अन्वेषणविधिवाक्योक्तापह तपाप्मत्वादीनांचजीवेशुद्धरूपाभिप्रायेणसंभवशंकायामपि सत्यकामत्वादीनांसर्वथानुपपत्तेः । ॥ ११७ ॥

गु० हतपाप्मत्वादीनामुक्तत्वात् । नचशुद्धाभिप्रायेणतेसंभवंतीतिवाच्यं । तथापिसत्यकामत्वादयःसर्वथानोपपद्यंतइत्याह ॥ **अन्वेषणविधिवाक्येति** ॥ कारणत्वं

प्र० मोक्षावपी"त्यनुव्याख्यानदिशा सुधायांसृष्ट्यादीनामेवबाधकत्वेनोपपादनमुपलक्षणं । आत्मशब्देपिविष्णुपरत्वमुक्तदिशोपपाद्यमित्युक्तंभ वति । उक्तंचसुधायां "नचैकमेवसर्वत्रजिज्ञासाविधायकश्रुतिषुलक्षणंश्रूयत"इत्यादि । एवंरूढित्यागेहेतुभूतंपरपक्षेबाधकंस्वपक्षेसाधकंचस मर्थ्यप्रागुक्तबाधकमुद्धरति ॥ **निष्क्रियत्वश्रुतेश्चेति** ॥ अक्लिष्टकारित्वादिनोपपत्तेश्चेत्यन्वयः । उक्तंचसुधायां"भेदेनैवतुमुख्यार्थसंभव" इत्यस्यव्याख्यावसरे"आगमस्याक्लिष्टकारित्वाद्यर्थतयासावकाशत्वा"दिति । केऽनायासेनकर्मकर्तर्यकर्तेतिप्रयोगः । वेदेपि"अपशवोवाअन्ये गोअश्वेभ्य"इत्यत्रगवाश्वान्यपशुषुप्राशस्त्याभावेनापशवइतिप्रयोगः । उक्तंचाद्ये"तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिंगसमवाया"दितितत्सि द्धिपेटिकायां । तथाचनिष्क्रियमितिप्रयाससाध्यक्रियानिषेधोनसामान्यक्रियानिषेधइत्यर्थः । वक्ष्यतेचद्वितीये"असद्व्यपदेशान्नेतिचेन्नधर्मा

निष्क्रियत्वश्रुतेश्च "सहिकर्तेति सत्यकर्मेति सइदंसर्वमसृजतेति स इमाँल्लोकानसृजतेति नामरूपेव्याकरो"दित्यादिकर्तृत्वश्रुतिबलात्

प्र० तरेणवाक्यशेषात्"इतिसूत्रे"नासदासी"दितिवाक्येकारणासत्त्वमुच्यतइत्याशंक्यस्वातंत्र्यादिधर्मांतरेणनिषेधोनस्वरूपेणेति । ननुतत्रमानां तरबाधात्प्राशस्त्यस्वातंत्र्यादिधर्मांतरनिषेधोनस्वरूपेण । नचात्रबाधकमस्तीत्यतआह ॥ **सहीति** ॥ "अथवेशांतान्पुष्करिण्यस्स्रवंत्यस्सृज तेसहिकर्ते"तिबृहदारण्यकश्रुतिः । "सत्यकर्मामहात्मे"ति । तदनन्यत्वनयभाष्योक्तश्रुतिः । "सतपोतप्यतसतपस्तप्त्वाइदंसर्वमसृजते"ति तैत्तिरीयश्रुतिः । "सऐक्षतलोकान्नुसृजाइतिसइमाँल्लोकानसृजते"त्यैतरेयश्रुतिः । "नामरूपेव्याकरो"दितिशब्दार्थात्मकप्रपंचकर्तृत्वार्थकछां दोग्यश्रुतिः । आदिशब्दा"त्सविश्वकृत्सहिसर्वस्यकर्ता कर्तारमीशंपुरुषंब्रह्मयोनि"मित्यादेर्ग्रहः । ननुश्रुतित्वाविशेषेकर्तृत्वश्रुतेरेवान्यार्थता

SGDF Sri Gargeshwari Digital Foundation

प्र० किंनस्यादितिचेन्न । कर्तृत्वश्रुतीनांबहुत्वेनबहुबाधस्यान्याय्यत्वात् । निषेधरूपतयानिष्क्रियत्वश्रुतिःप्रबलेतिचेत् नहिंस्यादितिनिषेधवाक्याद पियागीयहिंसावाक्यस्यबलवत्त्वदर्शनादिति । विस्तृतंचैतन्न्यायामृते । अतएवाह ॥ **बलादिति** ॥ किंचव्याख्यानतोविशेषप्रतिपत्तिरि तिन्यायेनव्याख्यानरूपविशेषवचनाच्चैवमेवेत्याह ॥ **अकर्मेति** ॥ "अकर्माक्लिष्टकारित्वान्नित्यत्वादजएवचे"तिदशमतात्पर्योदाहृतब्रह्मतर्के स्मृत्यनुसारेणेत्यर्थः । सर्वेषांपंचम्यंतानांविष्णुरेवजिज्ञास्यंब्रह्मेतिपूर्वसाध्येनान्वयः । कारणत्वपरंपूर्ववाक्यंप्रकारांतरेणजीवेसावकाशमितिशं कते ॥ **नचेति** ॥ **यादृशमिति** ॥ पराधीनमल्पंचेत्यर्थः ॥ **शास्त्रस्थावेति** ॥ आद्येतृतीयपादे "तेष्वदर्शनाद्विरोधस्यसमाविप्रतिपत्तिः

"अकर्माऽक्लिष्टकारित्वा"दित्यादिस्मृत्यनुसारेणाक्लिष्टकारित्वादिनोपपत्तेश्च । नचयतइत्यादेःकारणानुवादे नजिज्ञासाविधायकत्वादनुवादेचयथाप्राप्तितात्पर्यान्मानांतरेणास्मदादेर्यादृशंकारणत्वंप्राप्तंतत्परमेवेदंवाक्यमि तियुक्तं । अस्यानुवादकत्वेपि"शास्त्रस्थावातन्निमित्तत्वा"दितिन्यायेनभाष्योक्तश्रुतिप्राप्तकारणपरत्वात् ।

गु० ब्रह्मपक्षएवबाधकमित्युक्तंपरिहरति ॥ **निष्क्रियत्वश्रुतिरिति** ॥ **शास्त्रस्थावातन्निमित्तत्वादितीति** ॥ अस्यसूत्रस्यायमर्थः शास्त्रस्थपदंनयथाश्रुतभाष्यपक्षइ ववाक्यशेषरूपशास्त्रस्येत्येतदर्थकमात्रांतमस्मिन्पक्षे । किंतुविसर्गांतं । शास्त्रेविधिनिषेधरूपेयेतिष्ठंति तत्प्रधानाः तत्प्रतिपादितधर्माधर्मव्यवहारिणइतियावत् तेषां याप्रतिपत्तिः सैवादरणीयास्यात् । तद्विषयएवार्थोमुख्यइत्यर्थः । तन्निमित्तकत्वान्मुख्यार्थनिमित्तकत्वाद्धर्माधर्मसिद्धेः । यद्वा अयमेवतस्यशब्दस्यमुख्योर्थइति सिद्धेः । तन्निमित्तत्वात् अदृष्टार्थव्यवहाररूपशास्त्रस्यप्रसिद्धिनिमित्तकत्वात्प्रतिपादकत्वमात्रप्रसिद्धेःपरमन्यलोकव्यवहारनिमित्तकत्वादिति । एवंब्रह्मशब्दस्यजीवेरूढिं परमात्मनिचयोगमाश्रित्य रूढिपक्षेयतोवेत्यादिपूर्ववाक्योक्तकारणत्वस्यैवबाधकत्वेनरूढार्थग्रहणासंभवात्विष्णुरूपयौगिकार्थत्वमेवतद्ब्रह्मेतिब्रह्मशब्दस्येत्युपपादितं । ॥ ११८ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० स्या''दितिपंचमेधिकरणे''यवमयश्चरुर्भवती''त्यत्रयवशब्दः किंदीर्घशूकपरउतप्रियंगुपरइतिसंशये उभयत्रप्रयोगदर्शनादुभयपरस्तुल्यबलव त्त्वाच्चविकल्पइतिप्राप्ते एकत्रमुख्यत्वेऽन्यत्रगौणत्वेनाप्युपपत्तौनोभयत्रशक्तिकल्पनायुक्ता। नचनियामकाभावः। ''यत्रा(दा)न्याओषधयोम्ला यंतेअथैतेमोदमानाइवोत्तिष्ठंती''तिवाक्यशेषानुगुणशिष्टप्रयोगस्यदीर्घशूकविषयकस्यतदननुगुणप्रियंगुविषयम्लेच्छप्रयोगापेक्षयाबलवत्त्वेनत त्रैवशक्तिकल्पनात्दीर्घशूकएवयवशब्दार्थइतिसिद्धांतितं। शास्त्रस्थाः शास्त्रीयव्यवहाराएवग्राह्याःशास्त्रे। तन्मूलत्वाच्छ्रौतव्यवहाराणामि तिशास्त्रस्थाइतिसिद्धांतसूत्रस्यार्थः। अत्रयथायवादिशब्दानांवाक्यशेषानुगुणार्थपरत्वंतथायइत्यादिभाष्योक्तश्रुतिप्राप्तकारणपरत्वमेवन्याय्यं नप्रत्यक्षादिप्राप्तास्सदादिकारणपरत्वमित्यर्थः। इदंचशाबरभाष्यादौवाक्यशेषमुदाहृत्यार्थस्यनिर्णीतत्वादेवमुक्तं। यदातुसंदिग्धेतुवाक्यशेषा दित्यनेनगतार्थत्वभियातन्मूलकार्यप्रसिद्ध्यानार्यप्रसिद्धिबाधेनार्थनिर्णयः तदाश्रुतिप्राप्तेत्यस्यश्रुतिमूलविद्वत्प्रसिद्धिप्राप्तकारणपरत्वादित्यर्थः। तेनविद्वद्रूढेश्चेत्याद्यग्रेतनवाक्याविरोधः। एतेनयदत्रकेनचित्प्रलपितंस्वप्नमानोरथिकपदार्थानांसत्यतयाहिरण्यगर्भादिजीवस्यस्वप्नादिभूगो ळमहार्णवादिसर्वस्रष्टृत्वादिसंभवेनयतोवेत्यादिवाक्यंतदनुवादकत्वेनाप्युपपन्नमिति तन्निरस्तं। यतोवेत्यनेनवक्तृश्रोतृसाधारणस्थूलजगत्स्रष्टृ त्वस्यैवानुवाद्यत्वात्। सर्वनाम्नःसंकोचकाभावादित्युक्तत्वान्नस्वप्नमनोरथादावसंकुचितसर्वस्रष्टृत्वंजीवस्यशंकार्हं। परकीयस्वप्नपदार्थेऽन्यस्या कर्तृत्वात्। ''संध्येसृष्टिराहही''त्यादिनास्वाप्नादिपदार्थेष्वपीश्वरस्यैवकर्तृत्वोक्तेश्च। ''इतरव्यपदेशा''दित्यादिसूत्रेषुजीवस्यस्वतंत्रकर्तृतायानि षिद्धत्वादित्युक्तत्वाच्च। असंकुचितस्वतंत्रश्रुतिप्रसिद्धमुख्यस्रष्टृत्वस्ययतोवेत्यनुवादसंभवेतत्त्यागायोगाच्च। यदप्येकेनापिब्रह्मशब्देनकारणत्वा द्यनेकलिंगस्यगौणत्ववर्णनंयुक्तं। पूर्वाधिकरणेएकेनापिब्रह्मशब्देनानेकवेदांतवाक्यानांबाधस्यसिद्धांतेभाषितत्वादिति तत्तुच्छं। एकेनसाव

SGDF
Sri Gargeshwari Digital Foundation

प्र० काशेनानेकनिरवकाशलिंगबाधायोगात् । पूर्वाधिकरणेत्वनेकस्यापिबाधेनसिद्धांतोत्थितिप्रकारस्तत्रैवप्रपंचितोस्माभिः । यच्चोक्तंयतोवेत्यादि वाक्योक्तकारणत्वस्यजीवेऽसंभवेनब्रह्मशब्दार्थत्वत्यागेअन्नमयादिकोशस्थानिरुद्धादिरूपेष्वपिब्रह्मशब्दार्थत्वत्यागःस्यात् । ''एतन्नानावतारा णांनिधानंबीजमव्यय''मित्यादिस्मृत्यामूलरूपस्यैवजगत्कारणत्वेनावताररूपेषुतदभावात् । रूपाणांसविशेषाभिन्नत्वेपितत्तद्व्यापाराणांव्यवस्थि तत्वेन''अन्नाद्वैप्रजाःप्रजायंत''इत्यादिनानूद्यमानजगत्कर्तृत्वस्यकोशस्थानिरुद्धादिरूपेष्वसंभवादिति तत्स्वरूपभूतानादिमिथ्याज्ञानाविर्भा वविजृंभितमित्युपेक्षणीयं । सर्वरूपाणांसर्वगुणयुक्तत्वेप्यनभिव्यक्तिमात्रेणतत्तद्व्यापाराणांव्यवस्थांगीकारात् । ''अहंसर्वस्यप्रभवोमत्तःसर्वं प्रवर्तत''इत्यादिस्मृतेः । ''नस्थानतोपिपरस्योभयलिंगंसर्वत्रही''त्यादौसर्वरूपाणांनिर्दोषाशेषसद्गुणत्वस्यसूत्रकृतैवप्रतिपादितत्वादिति । यद पिमूलरूपाभेदेनकोशस्थरूपेषुकारणत्वसंभवाज्जीवस्यापितदभेदेनकारणत्वादिकंकथंचिद्योज्यमिति तदप्रमाणकमनेकमानविरुद्धं''भोक्त्रापत्ते'' रितिसूत्रकृतैवपूर्वपक्षितमित्यास्तामस्तकणबुसोत्पवनायासइति । एवंजीवेरूढित्यागेबाधकंयौगिकार्थविष्णुग्रहणेसाधकंकारणत्वादिविष्णुल क्षणंसूत्रयताब्रह्मशब्दस्यविष्णौविद्वद्रूढिःसूचिता । ''विद्वद्रूढिर्वैदिकास्यात्सायोगादेवलभ्यत''इत्युक्तेः । तांपूर्वनयेभाष्यादौप्रसंगादुक्तमिह पूर्वपक्षिणाऽऽक्षिप्तांसमर्थयते ॥ **किंचेति** ॥ एतेनसूत्रेकारणत्वस्यैवलोकप्रसिद्धिबाधकत्वस्योक्तत्वेनविद्वत्प्रसिद्धेस्तद्बाधकत्वस्यानुक्तत्वाद्विद्व

किंच कवीनांमते ''तदेवपरमंब्रह्मेत्याहु''रितिश्रुतौविष्णौविद्वद्रूढिरुक्ता । ॥ ११९ ॥

गु० इदानींविष्णावपिरूढएवायंब्रह्मशब्दइत्यभिप्रायेणरूढिपक्षेगुणपूर्त्यसिद्धियोगानतिप्रसंगादिकंपरोक्तंबाधकंपरिहरति ॥**किंचेति**॥ नन्वेतावताकथंरूढिसिद्धिः । नच

प्र० द्रूढ्यादिसमर्थनेनतयालोकप्रसिद्धिबाधोक्तेःसूत्रानानुगुण्यमितिकस्यचित्प्रलपनंप्रत्युक्तं । योगार्थोपादानोक्त्यैवसूत्रेतत्सूचनात् । अतएवेह टीकायां''यद्यपिविष्णौब्रह्मशब्दोविद्वद्रूढियुक्तः । तथाप्यभ्युपगम्योक्तिरिय''मितिग्रंथेनविद्वद्रूढ्युक्त्यैवाज्ञरूढिबाधेवक्तव्येसूत्रेकारणत्वाद्यु क्त्यातद्बाधोक्तिर्विष्णौरूढ्यभावाभ्युपगमवादेनेत्युक्तं । विद्वद्रूढ्युक्त्यैवसूत्रेलोकरूढिबाधोक्तौजिज्ञासाहेतुभूतगुणपूर्तिसिद्धिर्नस्यादित्यभ्युप गमवादप्रयोजनंध्येयं । यद्वा''सविष्णुराहहि तंब्रह्मेत्याचक्षते''इतिप्रयोगबाहुल्यरूपरूढेर्देवमीमांसांतिमसूत्रेभिहितत्वादिहतद्व्युत्पादनं । तथाचसूत्रकृदभिप्रेतत्वात्तद्वर्णनमिहनानुचितमितिध्येयं । ''तदेवे''तितच्छब्देनविष्णुरेवपरामृश्यतइत्यस्य''यमंतःसमुद्र''इत्यादिभाष्ये''अं भस्यपारइत्युक्तोनारायणपदोदित''इत्यादिपूर्वनयांतिमानुव्याख्यानादौचसिद्धत्वाद्रूढिव्युत्पादनांशस्यास्पष्टत्वात्परमपदोक्तमुख्यत्वान्यथानुप पत्त्यातद्ब्रह्मशब्दस्यरूढिंसिसाधयिषुःपारम्यंब्रह्मत्वएवान्वेतिनान्यत्रेतितावत्साधयति ॥ **नहीति** ॥ तथाचब्रह्मशब्दार्थत्वेनैवपरमत्वमिति भावः । ततःकिमित्यतआह ॥ **नचेति** ॥ ततोपिकिमितिचेद्रूढिंविनापरमपदोक्तमुख्यत्वानुपपत्तेःरूढिस्सिद्धेतिवक्ष्यमाणेनसंबंधः । तत्र

नहिचैत्रःपरमधार्मिकइत्युक्तेधार्मिकत्वादन्येनाकारेणपरमत्वंभाति । नचस्वस्यामुख्यत्वे मुख्यांतरेवासतिस्वस्यपरमत्वं । नचैवंगुणपूर्त्यलाभः । बृहंतोहीतिश्रुत्यायोगस्यापिसत्त्वात् ।

गु० परमंब्रह्मेत्युक्त्याविद्वद्रूढिसिद्धिः । परमत्वस्यप्रकारांतरेणापिसंभवादित्यतआह ॥ **नहिचैत्रइति** ॥ तत्रयथाधार्मिकत्वेनैवपरमत्वंतथात्रापिब्रह्मत्वेनैवपरमत्व मितिभावः । नन्वस्तुब्रह्मत्वेनैवपरमत्वं कथंतावतारूढिरित्यतआह ॥ **नचस्वस्येति** ॥ ननुयोगस्यातिप्रसक्तत्वेहिरूढिःस्वीकर्तव्यापंकजादिवत् । नचात्रयोगोति

SGDF Sri Gurgubhari Digital Foundation

तात्पर्य- प्र० बाधकमाशंक्यनिरस्यति ॥ नचैवमिति ॥ रूढत्वइत्यर्थः । योगस्यानतिप्रसंगाद्रूढिर्व्यर्थेत्युक्तमित्यतआह ॥ पंकजादाविति ॥ एवंबाध चंद्रिका.
॥ १२० ॥ कंनिरस्यप्रकृतमाह ॥ रूढिमिति ॥ रूढिरुक्तेतिपूर्वेणपंचम्याअन्वयः ॥ तावतैवेति ॥ मुख्यत्वेनैवविष्णुपरत्वसिद्धेरित्यर्थः । उक्तंचसु
धायां“सिद्धत्वाद्ब्रह्मशब्दस्यविष्णौस्पष्टतयाश्रुता”वित्येतद्व्याख्यावसरे“मुख्यामुख्ययोर्हिमुख्यार्थस्तावद्ग्राह्यः । शक्तिवशात्तस्यैवादौबुद्धौसन्नि प्र. प्र.
धाना”दित्यादि । एवमर्थापत्त्यारूढिसिद्धिमुक्त्वाकंठतस्तामाह ॥ प्रयोगेति ॥ समुदायशक्तौमानमाह ॥ प्रयोगप्राचुर्येणेति ॥ तेन २ ।
पंकजपदेन । साप्रतीतिरिहापितुल्येत्याह ॥ तर्हीति ॥ “प्रयोगमात्रबाहुल्यंरूढिरित्यभिधीयत”इत्यनुव्याख्यानानुसारेणप्राचीनपक्षः ।

पंकजादौरूढेरनतिप्रसंगेपिप्रमितत्वाद्योगवत्प्रकृतेयोगस्यानतिप्रसंगेपितदेवेतिश्रुत्यारूढेरपिसत्त्वाच्च । रूढिंविनापरमपदो क्तमुख्यत्वानुपपत्तेः । उपपत्तौवातावतैवप्रकृतसिद्धेश्च । प्रयोगबाहुल्यरूपरूढेराहुरित्यनेनोक्तत्वाच्च । ननुनप्रयोगबाहु ल्यंरूढिः किंतुसमुदायशक्तिः । पंकजादेरपिपद्मत्वजात्यंशेसमुदायशक्तिरेव । प्रयोगप्राचुर्येणझडितितेनजातिप्रतीते रितिचेत्तर्हीहापिभाष्येवक्ष्यमाणश्रौतस्मार्तप्रयोगप्राचुर्येणविदुषांब्रह्मशब्देनविष्णुव्यक्तिप्रतीतेस्तत्रतस्यसमुदायशक्तिरस्तु ।

गु०प्रसक्तइत्यतआह॥**पंकजादाविति**॥ तथाचरूढेःप्रमितत्वाद्रूढिःस्वीक्रियते । अन्यथापंकजादिपदेपियोगोनस्वीक्रियेतेतिभावः । ननु“तदेवब्रह्मपरमंकवीना”मित्या देःकेवलयोगेनाप्युपपन्नत्वात्कथंरूढिज्ञापकत्वमित्यतआह ॥ **रूढिंविनेति** ॥ **उपपत्तौवेति** ॥ परमपदोक्तमुख्यत्वोपपत्तौवेत्यर्थः ॥ **तावतैवेति** ॥ योगमात्रेणैवेत्यर्थः । प्रकृतसिद्धेःजिज्ञास्यस्यब्रह्मत्वसिद्धेः । अनेनपरमपदोक्तमुख्यत्वानुपपत्तिःप्रमाणत्वेनोदिता । तत्रप्रमाणांतरंचाह ॥**प्रयोगेति** ॥ अस्तुविष्णौब्रह्मशब्दस्यविद्वद्रूढिर्जीवेचरू ॥ १२० ॥
ढिमात्रं तथापिरूढजीवरूपार्थत्वमेवब्रह्मशब्दस्यास्तु कुतोविष्णुपरत्वमित्यतोरूढिमात्राद्विद्वद्रूढेर्बलवत्त्वाद्विष्णुरूपार्थत्वमेवांगीकार्यं नतुजीवपरत्वमित्यभिप्रायेणतत्रदृष्टां

SGDF
Sri Gargeshwari Digital Foundation

प्र० अयंतु“बहुलातिप्रयोगतः। रूढमित्येवसाध्यंस्या”दित्यनुव्याख्यानानुसारेण। अत्रप्रयोगप्राचुर्येणसमुदायशक्तिरूपरूढिसाधनात्। अस्मिन्पक्षेश्रुतावाहुरित्येतत्प्रयोगप्राचुर्यप्रदर्शनपरं। तेनशक्तिःकल्प्येतिभावः। यद्यपिनसमुदायशक्तीरूढिः। एकाक्षरप्रत्ययादौसमुदायाभावात्। किंत्वखंडशक्तिः। उक्तंचतर्कतांडवे“अखंडशक्त्याप्रतिपादकत्वंरूढि”रिति। तथापिप्रयोगबाहुल्यातिरिक्तशक्तावेवतात्पर्यं। यद्वा पररीत्या तुष्यतुदुर्जनइत्यभिधानमेतत्। एतेन भगवतिविद्वद्रूढ्येत्यादिपूर्वाधिकरणटीकावाक्यंविवृतंभवति। “विद्वदविद्वद्रूढ्योर्विद्वद्रूढेरेवमुख्यत्वा”दितितत्रत्यटीकावाक्यंविवृण्वानोस्तुविद्वद्रूढिस्ततश्चकिमित्यतआह ॥ **विद्वद्रूढेश्चेति** ॥ बलीयस्त्वादित्यन्वयः। तस्यापिविष्णुरेवब्रह्मेतिपूर्वसाध्येनान्वयः। तत्रवैदिकलौकिकौदृष्टांतावाह ॥ **यवादीति** ॥ उक्तमधिकरणशरीरंप्राक्। यवादिशब्दानांप्रियंग्वादिष्वनार्यप्रसिद्धौसत्यामपितांबाधित्वाऽऽर्यप्रसिद्धिबलेनदीर्घशूकाद्यर्थत्वमुक्तमित्यार्यप्रसिद्धेर्बलीयस्त्वंयथेत्यर्थः। तत्सिद्धांतेवाक्यशेषार्यप्रसिद्ध्योर्द्वयोरप्युक्तत्वात् भाष्योक्तश्रुतिप्राप्तेत्यत्रचतदुदाहरणंनविरुद्धमितिध्येयं। बालानां अज्ञानां। अयंचाज्ञरूढेर्दौर्बल्येदृष्टांतः। ननुक्वचिदनार्यप्रसिद्धोप्यर्थोवेदे

विद्वद्रूढेश्च यवादिशब्दानांप्रियंग्वादिषुम्लेच्छप्रसिद्धितोपिदीर्घशूकेष्वार्यप्रसिद्धेरिवबालानांचित्रलिखितसिंहेसिंहप्रसिद्धिवद्दुर्बलातोऽविद्वद्रूढितोबलीयस्त्वात् ।

गु० तंदर्शयन्नाह ॥ **विद्वद्रूढेश्चेति** ॥ विद्वद्रूढेर्बलवत्त्वेयवादीतिदृष्टांतः। अविद्वद्रूढेर्दुर्बलत्वेबालानामितिदृष्टांतइतिद्रष्टव्यं। ननुयदिरूढ्यपेक्षयाविद्वद्रूढेर्बलवत्त्वंतर्हि

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्राह्यइत्युक्तमित्यतआह ॥ **पिकादीति** ॥ आद्येतृतीयपादे "चोदितंतुप्रतीयेताविरोधात्प्रमाणेने" तिषष्ठेधिकरणे आर्यप्रसिद्धिहीनानांपिकनेमसततामरसादिशब्दानांकिंनिरुक्तादिवशेनार्थकल्पनमुतम्लेच्छप्रसिद्ध्यनुरोधेनकोकिलाद्यर्थत्वमितिसंशये म्लेच्छेषुपदानामर्थानांचप्रायशोविप्लुतिदर्शनान्नतत्प्रसिद्धिर्मानं । अतोनिरुक्तादिद्वारार्थकल्पनमितिप्राप्ते श्रुतौप्रयोगात्पदानितावदविप्लुतानि । नचतेषामार्यप्रसिद्धःकश्चिदर्थोस्ति । यत्रमुख्यानिभूत्वाम्लेच्छेषुगौणानिविप्लुतिंगच्छेयुः । तस्मान्म्लेच्छप्रसिद्धएवार्थोसीषामितिसिद्धांतितं । प्रकृतेचार्यप्रसिद्धिशब्दितविद्वद्रूढिविरोधोस्तीतिभावः । ननुसत्यप्यार्यप्रसिद्धिविरोधेम्लेच्छप्रसिद्धेःक्वचिद्बलवत्त्वमुक्तमित्यतआह ॥ **राजशब्दस्येति** ॥ द्वितीयेतृतीयपादे "अवेष्टौयज्ञसंयोगात्क्रतुप्रधानमुच्यत" इतिद्वितीयेधिकरणेराजसूयप्रकरणे "आग्नेयमष्टाकपालंनिर्वपतिहिरण्यंदक्षिणे" तिविहितामवेष्टिनामिकामिष्टिंप्रकृत्यश्रुतं "यदिब्राह्मणोयजेतबार्हस्पत्यंमध्येनिधायाहुं*तिमाहुतिंहुत्वातमभिघारयेत् । यदिराजन्यऐंद्रं । यदिवैश्योवैश्वदेव" मि

पिकादिशब्दानांचार्यप्रसिद्ध्यविरोधएवम्लेच्छप्रसिद्धितःकोकिलाद्यर्थत्व
मुक्तंपिकनेमाधिकरणे । राजशब्दस्यपालनादिकर्तर्यार्याणांप्रयोगेपि

गु० पिकादिशब्दानांम्लेच्छादिप्रसिद्ध्यनुसारेणकोकिलाद्यर्थत्वमेवेत्यर्थप्रतिपादकपिकनेमाधिकरणविरोधःस्यादित्यतआह ॥ **पिकादिशब्दानामिति** ॥ **राजासइति** ॥ राजशब्दोसे असमासेयकमुत्पादयति । राज्ञोभावःकर्मवाराज्यं । असइतिकिं । आधिराज्यं । ब्राह्मणादित्वात्ष्यञ् । यद्यपितत्रराजशब्दःपठ्यतेतथाप्ययमेवासइतिप्रतिषेधोज्ञापयति अस्त्यत्रराजशब्देतदंतविधिरिति । अपरआह ब्राह्मणादेराकृतिगणत्वादेवतदंतात्ष्यञ्सिद्धेराजशब्दस्यतत्रपाठेयकासहसमावेशार्थइति । तथा ॥ १२१ ॥

* अत्रैकमाहुतिपदंजैमिनीयन्यायमालायांनोपलभ्यते ।

प्र० तिवाक्यमुदाहृत्य ब्राह्मणादीनामवेष्टिनामकेष्टौप्राप्तानांमध्येनिधानविशेषंप्रतिनिमित्तार्थानिवचनानि अप्राप्तानांप्रापकाणिवेतिसंशये "राजाराजसूयेने" तिश्रुतस्यराजशब्दस्यानार्यप्रसिद्ध्याक्षत्रियत्वनिमित्तत्वेनरूढत्वावगमेपितत्प्रसिद्धेरप्रामाण्यादार्यावर्तप्रसिद्ध्याचततोबलीयस्याजनपदरक्षणरूपराज्यकर्तृत्वनिमित्तत्वावगमेनवर्णत्रयसाधारणत्वादवेष्टौप्राप्तानांनिमित्तार्थानिवचनानीतिप्राप्ते "राजानमभिषेचये" दित्यभिषेकविधौराज्ययोगात्प्रागेवक्षत्रियएवप्रयोगाद्रूढएवराजशब्दः । किंचपाणिनिरपि "तस्यकर्मणी" त्यधिकृत्य "पुरोहितादिभ्योयगि" तिराजशब्दाद्यक्प्रत्ययेनराज्यशब्दनिष्पत्तिंब्रुवन्रूढमेवमन्यते । अन्यथान्योन्याश्रयापत्तेः । नचपाणिनिस्मृतिरप्रमाणं । अनार्यप्रसिद्धेर्मूलत्वसंभवात् । अतोभियुक्तस्मृत्यासंभवद्गौणभ्रांत्यादिमूलस्यार्यावर्तप्रयोगस्यबाधादभियुक्तस्मृत्यनुगृहीतानार्यद्राविडप्रसिद्ध्याराजशब्दोरूढ्याक्षत्रियवचनइतिब्राह्मणादाववेष्टौप्राप्त्यभावादप्राप्तप्रापकाणिवचनानीतिसिद्धांतितं । तथाचार्यप्रसिद्धेर्बलवत्त्वमित्यस्यनविरोधइतिभावः ॥ **राजाऽसइति** ॥ पंच

"राजाऽस" इत्यार्यवरपाणिनिस्मृत्यनुगृहीतत्वात्क्षत्रियजातिविषयाम्लेच्छप्रसिद्धिरेवग्राह्येत्युक्तमवेष्टिनये ।

गु० चावेष्ट्यधिकरणेशाबरभाष्येउक्तं तस्यकर्मणिष्यञिति । तदंतादाकृतिगणत्वादेवष्यञ्सिद्धिः । अथराजन्शब्दपरिगणनंकिमर्थं यकासहसमावेशार्थइति कोर्थः । केवलाद्भावपिभवतइति । अतएवकेवलाद्भाष्येषञुक्तिरितिभावः । "पत्यंतपुरोहितादिभ्योयगि" तिसूत्रस्थपुरोहितादिगणपठितं राजासइत्येतत् । ननुपाणिनीयं पृथक्सूत्रं । अतएवकाशिकायां "पत्यंतपुरोहितादिभ्योय" गितिसूत्रंव्याख्यायसैनापत्यंपौरोहित्यमित्याद्युदाहृत्यचपुरोहितादिगणपाठमध्यएवराजासइत्येतत्पठितं । राजशब्देनतदंतविधिरितिचोक्तं मंजर्यामपि । एवंचब्राह्मणादिपाठस्यसमासेचरितार्थत्वादसमासेयोगेभवतीतिस्वमतमुक्त्वा अपरआह ब्राह्मणादेराकृतिगणत्वात्तदंतात्ष्यञ्सिद्धेराजशब्दस्यात्रपाठोयकासहसमावेशार्थइति । तथाचावेष्ट्यधिकरणेशाबरभाष्येउक्तं तस्यकर्मणिषञितिमतांतरमुक्तं । सिद्धांतकौमुदीकारस्तु इदमेवगणमध्य

SGDF Sri Gangadharan Digital Foundation

प्र० मस्यप्रथमे "पत्यंतपुरोहितादिभ्योय" गितिसूत्रं ।तस्यार्थः । पत्यंतात्प्रातिपदिकात्पुरोहितादिभ्यश्चप्रातिपदिकेभ्योभावकर्मणोरर्थेयक्प्रत्ययो भवति । सैनापत्यंपौरोहित्यमिति । तत्रपुरोहितादिगणपाठे "राजाऽस" इतिपठितं । तस्यायमर्थः । सइतिसमासस्यसंज्ञा । राजा राजन् शब्दः । असे असमासेयकमुत्पादयतिभावकर्मणोरिति । राज्ञोभावःकर्मवाराज्यं । समासेत्वाधिराज्यं । ब्राह्मणादित्वात्ष्यञेवेति । अवेष्टिनये अवेष्ट्यधिकरणे ॥ **नचात्रेति** ॥ ब्रह्मशब्दइत्यर्थः । "ब्रह्माणिजीवाःसर्वेपी" तिवचनंत्वमुख्यवृत्त्याप्युपपन्नमितिभावः ॥ **प्रत्युतेति** ॥

नचात्राविद्वद्रूढिःस्मृत्यनुगृहीता । प्रत्युततदेवेतिश्रौतावधारणविरुद्धा ।

गु० पठितंगृहीत्वाराजन्शब्दोसमासेयकंलभतइत्यर्थः। राज्ञोभावःकर्मवाराज्यं। समासेतुब्राह्मणादित्वात्ष्यञ् । आधिराज्यमितिव्याचख्यौ । तट्टीकायांतुयद्यपिब्राह्मणादिषुराजन्शब्दःकेवलःपठ्यते तथाप्ययमेवसइतिप्रतिषेधोज्ञापयति अस्त्यत्रराजन्शब्देनतदंतविधिरिति । एवंचब्राह्मणादिपाठस्यसमासेचरितार्थत्वादसमासेविशेषविहितोयगेवभवतीति । अतएवावेष्टिनयेराज्ञोभावःकर्मवाराज्यं ब्राह्मणादित्वात्ष्यञ्इतिशाबरभाष्यंभट्टपादैर्दूषितं । केचित्तुभाष्यंसमर्थयमानाइत्थमाहुः ब्राह्मणादेराकृतिगणत्वात्तदंतादेवष्यञ्सिद्धेराजन्शब्दस्यतत्रपाठो यकासहसमावेशार्थइति । तच्चहरदत्तमाधवाभ्यामेकीयमतत्वेनोपनिबद्धमित्युक्तं । कौमुदीटीकायांविश्वकर्मीयायामपि "राजश्वशुराद्य" दितिसूत्रेणराज्ञोजातौयत् राजन्यःक्षत्रियइत्यत्र । ननुजनपदरक्षणात्मकराज्ययोगाद्राजाभवति । सचाक्षत्रियोपिसंभाव्यतइति राज्ञोजातावित्यत्रक्षत्रियजातिरितिकथमुक्तमितिचेन्न । स्वतंत्रोराजशब्दःक्षत्रियवचनोनराज्ययोगमपेक्षते । राज्ञोभावःकर्मवाराज्यमिति कात्रविनिगमनेतिचेत्तस्यकर्मणीत्यत्र "पत्यंतपुरोहितादिभ्योय" गितिस्मरणस्यनियामकत्वादित्युक्तं । ननुस्वतोदुर्बलायाअपिम्लेच्छप्रसिद्धेःस्मृत्यनुगृहीतत्वेनाविद्वद्रूढ्याब्रह्मशब्दस्यजीवपरत्वमेवभवत्वित्यतआह ॥ **नचात्रेति** ॥ नकेवलंतदननुगृहीतेत्येतावत् किंतुतद्विरुद्धाचेत्याह ॥ **प्रत्युतेति** ॥ ननुविद्वदविद्वद्रूढ्योःकथंतारतम्यंवृत्तौतारतम्यस्यक्काप्यदृष्टत्वादित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० उक्तंच "तदेवब्रह्मपरममितिसावधृतिर्जगौ। यतोतोब्रह्मशब्दस्यतत्रैवनियतत्वत" इत्यानंदमयनयानुव्याख्याने। नचैवमपिनामधेयपादे "बर्हिराज्ययोरसंस्कारेशब्दलाभादतच्छब्द" इतिसप्तमाधिकरणेबर्हिराज्यशब्दयोःसंस्कृततृणविशेषाज्ययोर्याज्ञिकार्यप्रसिद्धौसत्यामपितांबाधित्वाऽनार्यप्रसिद्ध्यातृणाज्यसामान्यपरत्वमंगीकृतमितिवाच्यं। संस्कृतमात्रेआर्यप्रयोगेपितृणाज्यगतजातिंविनातत्राप्रयोगेणजातिनिमित्तत्वस्यार्याणामपिसंमतत्वादसंस्कृतेयाज्ञिकाप्रयोगस्यप्रयोजनाभावेनोपपत्त्याऽनार्यप्रसिद्धेरार्यप्रसिद्ध्यविरोधात्। उक्तंचशास्त्रदीपिकायां "नचशास्त्रस्थसर्वलोकविरोधः। तत्रापिजातेरनपगमादित्युक्त" मित्यादि। अतएवग्रंथकारैरपिपिकनेमाधिकरणतात्पर्योक्त्यैवतत्तात्पर्यमुक्तप्रायमितित्यक्तमितिध्येयं। ननुरूढित्वाविशेषेपिकथमेकस्याःप्राबल्यमित्याशंकांदृष्टांतोक्तिपूर्वंहेतुंवदन्निरस्यति ॥ **अमुख्यत्वेति** ॥ यद्यपीदं "समाकर्षा"

अमुख्यत्वाविशेषेपिगौणलक्षणावृत्त्योःप्राभाकरमतेगौण्यामतांतरेलक्षणायाज्यायस्त्ववत् लक्षणात्वाविशेषेपि

गु० **अमुख्यत्वेति** ॥ **गौण्याइत्यादि** ॥ गौण्यांसादृश्यांतर्गणिकभेदेसत्यपिसादृश्यत्वेनरूपेणानुगतेतात्पर्यमित्येकार्थघटादिशब्दादिवत्तात्पर्यविषयेद्रागधीः। लक्षणायांतुक्वचित्संबंधेक्वचित्तद्धारापूतत्वेक्वचिच्छीलत्वादावितिवैरूप्यान्नानार्थकाक्षादिशब्दादिवविलंबेनतद्धीरितिगौण्यपेक्षयालक्षणायाजघन्यत्वमितिभावः। गौण्यांसादृश्यंसर्वत्रविशेषणं लक्षणायांसंबंधस्तुक्वचिदेवेतिलक्षणाजघन्येत्यप्याहुः। ननुगौणलक्षणयोर्भेदात्तत्रतारतम्येपिकथमेकस्यांवृत्तौतारतम्यमित्यतोदृष्टांतांतरमाह ॥ **लक्षणेति** ॥ **मतांतरइति** ॥ भट्टमतेगौण्याःलक्षितलक्षणात्वात्तदपेक्षयालक्षणामात्रस्यज्यायस्त्वमितिभावः। नन्वेवंलक्षणायाअमुख्यवृत्तित्वादमुख्यवृत्तौतारतम्येपिविद्वदविद्वद्रूढ्योर्मुख्यवृत्तित्वात्कथंतारतम्यमित्यपरितोषाद्दृष्टांतांतरमाह ॥ **मुख्यत्वेति** ॥ तथापिरूढावेवतारतम्यंनोपलब्धमित्यतोदृष्टांतांतरमाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० दित्यधिकरणव्युत्पाद्यं तथापिशिष्यहितायवक्ष्यमाणमेवेहोच्यते । नत्वेतदधिकरणप्रमेयतया । तथाचवक्ष्यतितत्रैवग्रंथकारइतिध्येयं । मतां
तरे तर्कादिमते ॥ **प्रोद्गातृणामिति** ॥ तृतीयस्यपंचमेपादे“उद्गातृचमसमेकस्यश्रुतिसंयोगा”दित्यष्टमाधिकरणे“ग्रैतुहोतुश्चमसःप्रब्रह्मणःप्रो
द्गातृणांप्रयजमानस्यप्रैतुसदस्याना”मितिमंत्रमुदाहृत्यचिंतितं । प्रोद्गातृणामितिश्रुतंचमससमुद्गातैकोभक्षयेदुतसर्वेऽथसुब्रह्मण्यादन्येसामगायि
नोयद्वातत्सहिताश्चत्वारइतिसंशये उद्गातैकोभक्षयेत् । प्रातिपदिकार्थविरोधिनोबहुवचनार्थस्यबहुत्वस्याविवक्षितत्वादित्याद्यंपक्षमुक्त्वा लक्ष
णयार्थवत्त्वसंभवेऽविवक्षायोगात्प्राकरणिकसर्वपुरुषेष्वविशेषाल्लक्षणेतिषोडशर्त्विजांभक्षणमितिद्वितीयमुत्थाप्य श्रुत्यर्थसंभवेलक्षणायोगादुद्गा
यंतीत्यवयवप्रसिद्ध्यागानकारिणामपसुब्रह्मण्यानांत्रयाणांच्छंदोगानांभक्षणमितितृतीयमुपन्यस्य उत्पूर्वस्यगायतेःसमुदायप्रसिद्धिरूपरूढ्याद्वि

“प्रोद्गातृणा”मित्यत्रबहिरंगषोडशर्त्विग्लक्षणातोंतरंगप्रस्तोत्रादिचतुष्टयलक्षणायाज्यायस्त्ववत् लक्षणामात्रा
न्निरूढलक्षणायाज्यायस्त्ववत् मुख्यत्वाविशेषेपियोगाद्रूढेर्ज्यायस्त्ववत् गवादिशब्दानामनेकार्थेषुरूढत्वेपिप्रक

प्र० तीयसामभक्तिविषयत्वेनोद्गातुरेवतद्गातृत्वेनयोगेनत्रयाणामप्राप्त्याबहुवचनानुपपत्तेर्लक्षणायाआवश्यकत्वेनोद्गातृप्रवचनसंबंधावांतरसा
म्यात्ससुब्रह्मण्यानांच्छंदोगानांचतुर्णामपिभक्षणमितिचतुर्थःपक्षःस्थापितोभाष्ये । अत्रयथाबहिरंगसर्वषोडशऋत्विग्लक्षणातोंतरंगप्रस्तोतृप्रोद्गा
तृप्रतिहर्तृसुब्रह्मण्यरूपचतुष्टयलक्षणायाज्यायस्त्वंतद्वदित्यर्थः । अत्रयद्यपिवार्तिककारश्चतुर्थमपिपक्षंनिरस्यैकस्तोत्रसंबंधस्यसदसिसन्निधानस्यभ
क्षणव्यापारस्यचततोप्यंतरंगावांतरसामान्यस्यानुरोधेनप्रस्तोत्रादिषुत्रिष्वेवलक्षणेत्यपसुब्रह्मण्यानांत्रयाणामेवभक्षणमितिपंचमंपक्षंसिद्धांतित
वान् । तथापिभाष्येचतुर्थस्यस्थापितत्वात्प्राभाकरैरंगीकाराच्चचतुष्टयेत्यवोचदितिध्येयं । यद्वानचतुष्टयेतात्पर्यं । किंत्वंतरंगलक्षणायामेवेति

प्र० नदोषः ॥ **निरूढेति** ॥ शीघ्रमर्थोपस्थापकत्वादितिभावः । रूढेरित्यत्राप्ययमेवहेतुरितिभावः ॥ **अनेकार्थेष्विति** ॥ “स्वर्गेषुपशुवा”गि
त्यादिष्वित्यर्थः ॥ **असंभावितेति** ॥ बलीयस्त्वेहेतूक्तिः । समाख्याबलाच्चब्रह्मशब्दार्थोविष्णुरित्याह ॥ **नारायणइति** ॥ “यस्यप्रसादा
त्परमार्तिरूपादस्मात्संसारान्मुच्यतेनापरेण । नारायणोसौपरमोविचिंत्योमुमुक्षुभिःकर्मपाशादमुष्मा”दितिपैंगिश्रुतिः । “नारायणंमहाज्ञे
यंविश्वात्मानंपरायण”मितितैत्तिरीयश्रुतिः । अत्रापिपंचम्यंतानांविष्णुरेवब्रह्मेत्यन्वयः । जिज्ञासासूत्रेविचारविधायकनानावाक्यानामुदाह
रणत्वेप्यविप्रतिपन्नवाक्यत्यागेनविप्रतिपन्नवाक्येषुकारणत्वादितत्तद्वाक्यस्थविष्णुलक्षणप्रदर्शनमुखेनतत्तद्विध्युद्देशगतब्रह्मात्मादिशब्दस्यविष्णु
परत्वसमर्थनार्थमस्यलक्षणसूत्रस्यप्रवृत्तत्वात्“नारायणोसा”वित्यादिश्रुतेश्चविष्णौनिरूढश्रुतिलिंगाद्युपेततयाविष्णवर्थकत्वेननिर्णीतत्वाद्भवत्यत्र
समाख्येतिभावः । एतेनविध्युद्देशगतब्रह्मपदस्वारस्यानुरोधात्“यतोवे”तिपूर्ववाक्यस्यासंकुचितकारणत्वाद्युपेततयाब्रह्मपरत्वेपिपूर्वोत्तरभाग
योरविरोधायजीवपरयोरभेदएवस्वीक्रियतां । त्वन्मतेजीवब्रह्मणोर्विरुद्धधर्मवतोरप्यभेदबोधनेलौकिकविरोधदृष्टेरकिंचित्करत्वादीश्वरस्याचिं
त्याद्भुतमहिम्नैवनिरवयवत्वैकदेशकर्तृत्वयोरिवशुष्कतर्कागोचरत्वेनसर्वविरोधसमाधानसंभवादितिकस्यचित्प्रलपनंप्रत्युक्तं । विष्णुग्रहणेमहा

रणोपपदाद्यभावेसास्नादिमद्व्यक्तेरेवप्रतीतिवच्चरूढित्वाविशेषेपिविद्वद्रूढेरेवासंभाविताज्ञानमूलायाबलीयस्त्वोप
पत्तेश्च । “नारायणोसौपरमोविचिंत्यः नारायणंमहाज्ञेय”मित्यादिश्रुतौजिज्ञास्येनारायणशब्दश्रवणाच्चेति ।

गु० **गवादिशब्दानामिति** ॥ यथा दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिभूलक्षणेषुनवस्वर्थेषुशक्त्यविशेषेपि गोशब्दात्सास्नादिमदाकृतौप्रयोगबाहुल्यादेवप्रथमप्रती
तिरितिभावः । रूढ्यपेक्षयाविद्वद्रूढेरेवप्राबल्येकिंनिमित्तमित्यतउक्तमसंभावितेत्यादि । किंचासंदिग्धजिज्ञासावाक्येजिज्ञास्येविष्णुवाचिनारायणशब्दप्रयोगात्तत्समाख्या

SGDF

प्र० योगविद्वद्रूढिभ्यांपरममुख्यार्थस्यैवलाभेनविध्युद्देशास्वारस्याभावात् । जीवत्यागेश्रांतेरेवत्यागेनश्रुत्यर्थाबाधाच्च । वक्ष्यतिचाभिमानिनयेयु क्तिविरोधेनमृदादिशब्दैरभिमानिग्रहणेमुख्यार्थस्यैवग्रहणेनश्रुत्यर्थाबाधादित्यादि । जीवपराभेदस्याप्रामाणिकत्वानेकमानविरुद्धत्वयोरन्यत्रवि स्तृतत्वाच्च । प्रामाणिकस्यैवाचिंत्यशक्त्याघटनांगीकारात् । अल्पशक्तिजीवाभेदेचाचिंत्यशक्तेरेवहानिप्रसंगेनतयाऽभेदकृतविरोधसमाधानस्य कफोणिगुडायितत्वात् । ‘‘नारायणोसा’’वित्यादिसमाख्याश्रुतौस्पष्टंभेदादेःप्रतिपादनाच्चयत्किंचिदेतत् । यदपीश्वरेऽचिंत्यशक्त्यैवशुष्कतर्का गोचरत्वेनसर्वविरोधमपह्नुवानस्तस्यजीवाभेदतर्कागोचरत्वादिकथंविस्मरसीत्यादिवल्गनंतदपिप्रत्युक्तं । तस्याप्रामाणिकत्वात् । अल्पशक्ति जीवाभेदेमहैश्वर्यस्यैवहानेरित्यादेस्तत्रतत्रबहुधाप्रतिपादितत्वात् । तत्सर्वमनाकलयतोविरुद्धंचाकलयतआत्मीयदोषंसर्वज्ञतमग्रंथकर्तर्यारोपय तस्तवमहापातकिनःप्रतिवचनानर्हत्वादुपेक्षैवकार्येत्यास्तांतावत् । एवंटीकातात्पर्यमुक्त्वा‘‘टीकासुचयदस्पष्ट’’मितिप्रतिज्ञामनुसरन्सुधाता त्पर्यप्रतीतानुपपत्तिनिरासेनानूद्याह ॥ **सुधायांत्विति** ॥ जीवपरइत्यनेन‘‘प्रसिद्धार्थपर’’इत्यत्रार्थशब्दोजीवमात्रार्थइत्युक्तंभवति । शक्ता

सुधायांतु ब्रह्मशब्दःकिंप्रसिद्धजीवपरउतार्थांतरपरइतिसंदिह्य अंत्येतस्यार्थस्य तद्वा चितायाः तत्रतात्पर्यस्यचकल्प्यत्वाद्गौरवं । आद्येतुलाघवं । जीवस्याकल्प्यत्वात् । बृह जातिजीवेत्यभिधानाच्छक्तेरपिक्लृप्तत्वादबाधेनतात्पर्यस्यापिसिद्धत्वादितिपूर्वपक्षितं ।

गु० नादत्रापिब्रह्मशब्देनविष्णुरेवाभिप्रेतइत्याह ॥ **नारायणोसाविति** ॥ सुधायाःपूर्वोत्तरविरोधमाशंक्यपरिहरति ॥ **सुधायामिति** ॥ अथेत्यर्थांतरपरत्वे । तस्य अर्थांतरस्य । तत्र सुधायां । अत्रेव टीकायामिव।नन्वेवंसुधाभिप्रायोवर्णयितुंनशक्यते । तथात्वेनहिब्रह्मशब्दोगुणपूर्तिवाचीत्येतावतेत्याद्युत्तरग्रंथविरोधापत्तेः । तदनुसारेण

SGDF Sri Gargeshwari Digital Foundation

प्र० वभिधानादितिहेतुः । एवमनूदितस्यपूर्वपक्षस्याशयमाह ॥ तत्रेति ॥ सुधायामित्यर्थः । अत्रेव टीकायामिवेत्यर्थः ॥ सर्वत्रेति ॥ विष्णुपरत्वंनेतिविवक्षितमित्यन्वयः । किमर्थमेवमित्यतोनुपपत्तिंस्वयमेवाह ॥ अन्यथेति ॥ यद्येवंतर्हि "नहिब्रह्मशब्द" इत्यादिवाक्यमयुक्तं । तत्रगुणपूर्तिवाचितयाक्वचिद्विष्णुपरत्वमंगीकृत्यजिज्ञासावाक्यएवतदाक्षिप्यतइतिप्रतीतेः । अतआह ॥ तत्रत्यं सुधागतमिति । वाक्यंत्वित्यन्वयः । तत्रैवंवाक्यक्रमः । "तत्रसंदेहः । तद्ब्रह्मेत्ययंत्रह्मशब्दःकिंप्रसिद्धार्थपरउतार्थांतरपरइति । नहिब्रह्मशब्दोगुणपूर्तिवाचीत्येतावता सर्वत्रतत्परोभवति । शक्तितात्पर्ययोरन्यत्रापिसत्त्वा"दिति ॥ नवेति ॥ अर्थांतरवाचीवेत्यर्थः ॥ विवक्षितेति ॥ पूर्वपक्षेविवक्षितस्यजीवरूपार्थस्यसिद्धांतेविवक्षितस्यब्रह्मरूपार्थस्यासिद्धेरित्यर्थः । परिहर्तुं प्रवृत्तमित्यन्वयः । अतएव उक्ततात्पर्यकत्वादेवेत्यर्थः । नन्वेवं "गुणपूर्तिवा

तत्रात्रेवतद्ब्रह्मेतिवाक्यएवब्रह्मशब्दस्यनविष्णुपरत्वमितिनविवक्षितं । किंतुसर्वत्र । अन्यथासिद्धांतिनंप्रत्यर्थादेःक ल्प्यत्वोक्तिरयुक्तास्यात् । तत्रत्यं "नहिब्रह्मशब्दोगुणपूर्तिवाचीत्येतावतासर्वत्रतत्परोभवती" तिवाक्यंतुतत्पूर्वपक्षेक्व चिद्गुणपूर्तिवाचितांगीकारेणनप्रवृत्तं । किंतुब्रह्मशब्दोगुणपूर्तिवाचीनवेत्येवसंदिह्यतांकिंतात्पर्यसंदेहेनेतिशंकायांवा चकत्वेसिद्धेपितात्पर्यासिद्ध्याविवक्षितार्थासिद्धेर्नैत्थंसंदेहः किंतुतात्पर्यसंदेहएवदर्शनीयइतिपरिहर्तुं । अतएवैतद्वाक्य संदेहावसरएवकृतं । "तद्ब्रह्मेत्ययंब्रह्मशब्द" इतिविशिष्यसंशयधर्मिनिर्देशस्तुपूर्वोक्तजिज्ञासाक्षेपेणसंगतिंदर्शयितुं ।

गु० क्वचिद्ब्रह्मशब्दस्यविष्णुपरत्वेपिजिज्ञासावाक्येब्रह्मशब्दस्यजीवपरत्वमित्येवसुधाभिप्रायप्रतीतेरित्यतस्तदन्यथासिद्धमित्याह ॥ तत्रत्यमिति ॥ ब्रह्मशब्दस्यक्वचिदपि

SGDF
Sri Gargeshwari Digital Foundation

प्र० चीत्येतावतातत्परोभवती"त्येतावतैवपूर्तौ "सर्वत्रे"तित्र्यर्थमितिचेद्वाचकत्वेनक्वचिद्वाच्येतात्पर्यप्रसिद्धावपिसर्वत्रवाच्येवाचकस्यतात्पर्यावश्यकत्वाभावेनप्रकृतेब्रह्मशब्दस्यपूर्वपक्ष्याद्यभिप्रेतार्थवाचकत्वसिद्धावपितात्पर्यासिद्ध्यातात्पर्यसंदेहस्यैवदर्शनीयत्वादित्याशयात् ॥ **अत्रेवेति** ॥ टीकायामिवेत्यर्थः । अतःसर्वत्रब्रह्मपदस्यविष्णुपरत्वाक्षेपेणैवपूर्वपक्षइतिस्थितं । तत्रानूदितेपूर्वपक्षेऽनुपपत्तिमाशंक्याह ॥ **नचेति** ॥ सत्यं लक्षणयापितात्पर्यंभवतीति तथापिसिद्धांतिनातथांगीकर्तुमशक्यत्वादेवमुक्तमित्यर्थः ॥ **गुणपूर्तेरिति** ॥ अर्थेसतितत्रशक्तिःशब्दस्य गुणपूर्तिरूपार्थेऽसंभावनयाऽसतिकथंतत्रशक्तिरित्यर्थः । एवंपूर्वपक्षाशयोक्त्यानुपपत्तिंनिरस्यदृष्टांतोक्तिपूर्वंसिद्धांताशयमाह ॥ **सिद्धांतस्त्विति** ॥ **वाक्यशेषादिति** ॥ जीवेऽसंभावितकारणत्वबोधकादितिभावः । अलौकिकार्थोविष्णुरितिहृदयं । पूर्वंब्रह्मशब्दस्यगुणपूर्तिवाचित्वमेवने

नत्वत्रेवक्वचिद्ब्रह्मशब्दस्यविष्णुवाचित्वांगीकारेणपूर्वपक्षइतिदर्शयितुं । नचशक्त्यभावेपिलक्षणादिनातात्पर्यसंभवात्सिद्धांतिनंप्रतिशक्तेःकल्प्यत्वोक्तिरयुक्तेतिवाच्यं । लक्ष्येर्थेयोगासंभवेनतदधीनगुणपूर्त्यसिद्धेःसिद्धांतिनालक्षणादेर्वक्तुमशक्यत्वात् । नचावयवशक्तेःक्लृप्तत्वेनकल्प्यत्वोक्त्ययुक्तिः । गुणपूर्तेरेवाभावेनतत्रबृहतेःशक्त्यक्लृप्तेरिति । सिद्धांतस्तु । "यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं । अभिलाषोपनीतंच(तत्सुखंस्वःप)सुखंस्वर्गपदास्पद"मितिश्रुतेःस्वर्गशब्दस्यचंदनादिरूपप्रसिद्धार्थत्यागेनाप्रसिद्धार्थपरत्ववद्ब्रह्मशब्दस्यापि"यतोवे"त्यादिवाक्यशेषाप्रसिद्धार्थत्यागेनालौकिकार्थपरत्वोपपत्तिरिति । ॥ १२५ ॥

गु० विष्ण्वर्थकत्वंनास्तीतिसुधाभिप्रायवर्णनेबाधकांतरमपिपरिहरति ॥ **तद्ब्रह्मेति** ॥ सिद्धांतसुधांदृष्टांतेनोपपादयति ॥ **सिद्धांतस्त्विति** ॥ ननुब्रह्मशब्दस्यार्थांतरंक

प्र० त्याशयेनसुधाप्रवृत्तेत्युक्तं अधुनागुणपूर्तिवाचित्वमुपेत्यप्रवृत्तेत्याह ॥ **यद्वेति** ॥ **अतएवेति** ॥ सामान्यतःप्रवृत्तस्यन्यायविवरणस्याभिप्रायद्वयसंभवात्तद्वर्णनमुभयत्रकृतमितिभावः । तृतीयाध्यायेतृतीयपादस्यादौ "कर्तव्याब्रह्मजिज्ञासेत्युक्तेकिमितिसंशये । अतइत्युदितेप्यस्यविशेषानुक्तितःपुनः । सृष्टिबंधनमोक्षादिकर्तृत्वस्यश्रुतत्वतः । यतोमोक्षादिदातासावतोजिज्ञास्यएववः । इत्याहतत्परंब्रह्मव्यासाख्यंज्ञानरश्मिमत् । येनैवबंधमोक्षःस्यात्सचजिज्ञासयागतः । सुप्रसन्नोभवेदीशोजिज्ञासातोस्यमुक्तिदे"त्यनुव्याख्यानाभिप्रेतंवर्णकांतरमस्यसूत्रस्यतत्रास्फु

यद्वाऽलौकिकविशेष्यपरत्वेगौरवात्प्रसिद्धविशेष्यपरत्वेतुलाघवात्तदनुसारेणजीवेषुसंभवद्गुणपूर्तिरेवप्रवृत्तिनिमित्तंनतुसिद्धांत्यभिप्रेतगुणपूर्तौतात्पर्यमितिप्राप्ते कारणत्वेनैवबाधकेनालौकिकविशेष्यपरत्वंततश्चसंकोचकाभावात्सर्वगुणपूर्तिरेवनिमित्तमितिसिद्धांतइतिसुधाभिप्रायः । अतएवन्यायविवरणेअत्रोक्तंसुधोक्तंचाधिकरणशरीरमभिप्रेत्य"नजीवएवायंब्रह्मशब्दः । यतोवाइमानिभूतानिजायंतइत्यादिनाजन्मादिकारणत्वस्यैवब्रह्मलक्षणत्वोक्ते"रित्युक्तं ।

गु० ल्प्यमित्युक्तमयुक्तं । तस्यजगत्कारणंकिंचिदस्तीत्याविपालगोपालमनुभवसिद्धत्वात् । तथाचतदर्थत्वेसुधाभिप्रायवर्णनमयुक्तमित्यस्वरसादाह ॥ **यद्वेति** ॥ **संकोचाभावादिति** ॥ अलौकिकविशेष्यपरत्वेगौरवरूपसंकोचाभावादित्यर्थः । नन्वथकस्मादुच्यतेब्रह्मेतिबृहंतोह्यस्मिन्गुणाइतिश्रुत्यागुणपूर्तेःप्रमितत्वात्कथंगुणपूर्तेरेवाभावेनेत्युक्तमित्यतआह ॥ **संभवद्गुणपूर्तिरेवेति** ॥ ननुसुधायामनुव्याख्यानव्याख्यारूपायांकथमनुव्याख्यानोक्तपूर्वोत्तरपक्षविपरीतपूर्वोत्तरपक्षाभिधानं । व्या

SGDF Sri Gangadhara Digital Foundation

प्र० टत्वाद्व्यनक्ति ॥ अनुव्याख्यानेत्विति ॥ तदुपपाद्यतइत्युक्तमित्यन्वयः । मोक्षदत्वादित्यादिकं "कर्तव्ये" त्यादिश्लोकतात्पर्यानुवादः । तत्कथमित्यादिकंतु "सृष्टिबंधने" त्यादेस्तात्पर्यानुवादः । उक्तंचसुधायां "यतोमोक्षादिदातासावतोवोयुष्माकंमुमुक्षूणांजिज्ञास्यएवेत्येतमर्थंजन्मादिसूत्रेणाहेत्यर्थः" इति । विष्णोरबंधकत्वंहित्रेधा । जीवस्याबद्धत्वेनवा स्वबद्धत्वेनवा जीवेशाभ्यामन्यबद्धत्वेनवा । तत्राद्यौनिराह ॥ जीवस्येति ॥ दुःखित्वादिदृष्टेरबद्धत्वायोगात् दुःखाद्यापत्त्यावाऽऽसाश्रयापत्त्यावास्वबद्धत्वायोगादित्यर्थः । तृतीयेप्यन्यश्चेतनोचेतनोवा द्वयमपीशाधीनमुतानधीनमितिहृदिकृत्वाक्रमेणनिराह ॥ अन्यस्येति ॥ "येनैवबंधमोक्षःस्या" दितिश्लोकतात्पर्यमाह ॥ अप्रसन्नस्येति ॥

अनुव्याख्यानेतु मोक्षदत्वाद्ब्रह्मजिज्ञास्यमित्युक्तंप्रथमसूत्रे । तत्कथमितिशंकायामनेनसूत्रेणतदुपपाद्यतइत्युक्तं । तत्रायंभावः । मोचकत्वेनविष्णुर्जिज्ञास्यश्चेद्बंधकत्वेनाजिज्ञास्योपिस्यात् । नचायंनबंधकः । जीवस्याबद्धत्वस्वबद्धत्वयोरयोगेनान्यबद्धत्वेवाच्ये अन्यस्यचेतनस्याचेतनस्यचेश्वराधीनत्वेपुनरीश्वरस्यबंधकत्वेनाजिज्ञास्यता । अनधीनत्वेस्वानधीनकृताद्बंधान्मोचकत्वंनेश्वरस्येतिनजिज्ञास्यत्वमितिप्राप्ते अप्रसन्नस्यबंधकत्वंप्रसादहेतोर्जिज्ञासायाःकर्तव्यत्वानुकूलमेव नतुप्रतिकूलं ।

गु० ख्यानव्याख्येययोर्विरोधापत्तेरित्यतआह ॥ अनुव्याख्यानेत्विति ॥ कर्तव्याब्रह्मजिज्ञासेत्युपासनापादीयानुव्याख्यानइत्यर्थः । तथाचवर्णकांतरत्वान्नव्याख्यानव्याख्येययोर्विरोधइतिभावः । प्रथमसूत्रोक्तंमोक्षदत्वेनजिज्ञास्यत्वंद्वितीयेनोपपाद्यतइत्यनुव्याख्यानेउक्तं तत्रतेनकथंतदुपपादनंकृतमित्यतआह ॥ तत्रायंभावइति॥ ॥ १२६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तर्हिमोक्षोस्ययतइतिसूत्रविन्यासःस्यादित्यतआह ॥ **सूत्रइति** ॥ भाष्येऽस्पष्टत्वाद्धामत्युक्तमधिकरणशरीरमनुवदति ॥ **अत्रपरैरिति** ॥ अत्रयतोवेत्यादिवाक्यंब्रह्मलक्षयत्युतनेतिकल्पतरूक्तःसंशयोध्येयः । दृश्यमानंजगदेवलक्षणंब्रह्मणउतनित्यत्वादिस्तद्धर्मः । आद्यआह ॥ **न तावदिति** ॥ तस्य जगतः । द्वितीयमाशंक्याह ॥ **नापीति** ॥ प्रसिद्धंहिलक्षणंभवति नात्यंताप्रसिद्धमितिभावः । नजगद्ब्रह्मलक्षणं किंतुतत्प्रतिकारणत्वमितिलक्षणमुपपादयति ॥ **माभूदिति** ॥ तदात्मतया ज्ञानानंदादिवत्तदैक्येन । भेदमुपेत्याह ॥ **तद्धर्मतयेति** ॥ **तदुत्पत्त्यादित्विति** ॥ जगत्तदुत्पन्नत्वेनस्वकारणंब्रह्मलक्षयतिज्ञापयतीतिकारणत्वंतुभवतिलक्षणमितिभावः । व्रज्यायाः गतेरित्यर्थः ।

सूत्रेसृष्ट्यादिहेतुत्वोक्तिस्तुमोचकत्वसंभावनार्थेतिसिद्धांतइति । अत्रपरैर्नतावदुपलभ्यमानंजगदेवब्रह्मलक्षणं । तस्यानित्याशुद्धपरिच्छिन्नादिरूपस्यतद्विरुद्धब्रह्मलक्षणत्वानुपपत्तेः । नापिनित्यत्वकारणत्वादिर्ब्रह्मधर्मः । तस्यानुपलब्धेरितिप्राप्ते माभूदनुभूयमानंजगत्तद्धर्मतयातदात्मतयावालक्षणं । तदुत्पत्त्यादितुभविष्यति । देशांतरप्राप्तिरिवसवितुर्व्रज्यायाइतिसिद्धांतितं । तन्न ।

गु० विशेषानुक्तितइत्यनुव्याख्यानांशेस्वारस्यंनिधायेदंवर्णकांतरमेवेतिनसुधाविसंवादःशंकनीयइतिभावः॥ **तस्यानुपलब्धेरिति** ॥ कारणवाक्यइतिशेषः॥ **अनुभूयमानमिति** ॥ जगत्तदात्मतयालक्षणंमाभून्नित्यत्वादिकंतुतद्धर्मतयेत्यन्वयः ॥ **तदुत्पत्त्यादित्विति** ॥ लक्षणमितिशेषः । ननुजगन्निष्ठस्योत्पत्त्यादेःकथंब्रह्मलक्षणत्वमित्यतआह ॥ **देशांतरप्राप्तिरिवेति** ॥ व्रज्यायाः गतेरित्यर्थः । तथाचव्रज्यानिष्ठायादेशांतरनिष्ठायाअपिदेशांतरप्राप्तेर्व्रज्यालक्षणत्ववत्प्रकृतेपिजगदुत्पत्तेर्ब्रह्मलक्षणत्वोपपत्तिरित्यर्थः । यद्वातदुत्पत्त्यादीतितदुत्पत्तिकरणत्वंलक्षणमित्यर्थः । देशांतरप्राप्तिस्तत्कारणत्वं । ननुदेशांतरप्राप्तिकारणत्वस्यसवितर्यपिविद्यमानत्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० “व्रजयजोर्भावेक्यप्” । सूत्रानानुगुण्येनपूर्वपक्षंतावन्निराह ॥ **जिज्ञास्यस्येति** ॥ लक्षणंनामसजातीयविजातीयव्यावर्तकं । सूत्रेतदुक्तिरितरव्यावृत्त्यर्था । तथाचयथाऽश्वादिविवेकेनगोरज्ञानेतज्ज्ञानायसास्नादिमत्त्वंलक्षणमुच्यते तथाब्रह्मणोजीवप्रधानाद्यविवेकेनजीवादावपिब्रह्मत्वबुद्धौप्रसक्तायांतद्व्यावृत्त्यर्थंलक्षणमितितन्निरस्यस्यसूत्रावतारिकारूपस्यपूर्वपक्षस्याव्यावृत्तिरूपस्यैववाच्यत्वात्सूत्राननुगुणःपूर्वपक्षइत्यर्थः । तादृशपूर्वपक्षोशक्यइत्येतन्निराह ॥ **अस्मद्रीत्येति** ॥ अयुक्तश्चपूर्वपक्षइत्याह ॥ **अनित्येति** ॥ गुणेंद्रियकादिरूपस्येत्यादिपदार्थः । पृथिवीत्वादेर्नित्यादिरूपस्यानित्यादिरूपपृथिवीलक्षणत्वदर्शनादित्यादिपदार्थः । तद्वद्विरुद्धधर्मकमपिजगद्ब्रह्मलक्षणंस्यादितिभावः । सिद्धांतोप्ययुक्तइत्याह ॥ **जगतइति** ॥ **आत्मविरुद्धेति** ॥ अनित्यत्वपरिच्छिन्नत्वरूपत्वादितिभावः । अत्रयद्यपिजगद्गतमुत्पत्त्यादिकंलक्षणंचेत्सूत्रे

जिज्ञास्यस्येतरव्यावृत्त्यर्थंलक्षणसूत्रेऽस्मद्रीत्याऽव्यावृत्तिपूर्वपक्षस्यैवोचितत्वात् । अनित्यादिरूपस्यशब्दादेर्नित्यादिरूपाकाशादिलक्षणत्वदर्शनाच्च । जगतइवकारणत्वस्याप्यनात्मतयाऽऽत्मविरुद्धस्वभावत्वाच्च ।

गु० नातिव्याप्तत्वात्कथंव्रज्यालक्षणत्वमितिचेन्न । देशांतरप्राप्त्यसाधारणत्वस्यविवक्षितत्वेनतस्यचव्रज्यायामेवसत्त्वेनातिव्याप्त्यभावात् । सवितुःसमवायिकारणत्वेनसाधारणत्वादितिभावः । कारणत्वंब्रह्मलक्षणंन । ब्रह्मविरुद्धस्वभावत्वात् जगद्वत् । नचहेतुरसिद्धः । कारणत्वस्यानात्मत्वेनात्मस्वरूपविरुद्धत्वात् । नचाप्रयोजकता । जगतोपितल्लक्षणत्वापातादित्यभिप्रायेणाह ॥ ****जगतइवेति** ॥ किंचजगतएवलक्षणत्वमस्तु । नचतद्विरुद्धस्वभावस्यकथंतल्लक्षणत्वमितिवाच्यं । शब्दस्यानित्यत्वेननित्यभूतगगनविरुद्धस्वभावत्वेपिगगनलक्षणत्वदर्शनादित्याह ॥ **शब्दादेरिति** ॥ किंच उत्पत्तिर्जगन्निष्ठाकथंब्रह्मलक्षणंस्यात् । नचदेशांतरप्राप्तेःसूर्यगत्यनि

* जगतइवेतीत्यारभ्यजिज्ञास्यत्वेनेतीतिपर्यंतंमूलवाक्यानांपौर्वापर्येणप्रतीकधरणंतुस्वाभिप्रेतशंकासमाधानक्रमानुसारेण ॥

प्र० यतइतिपदमयुक्तं । नहियतश्चैत्रजन्मसमैत्रइत्युक्तेचैत्रनिष्ठंजन्ममैत्रलक्षणंभवतीतिकेषांचित्पक्षेवक्ष्यमाणोदोषइहापितुल्यः तथापिकल्पतरावुत्पत्त्यादीत्यस्यकारणपरत्वेनव्याख्यानात्प्रकारांतरेणदूषणमुक्तं । एवंसिद्धांतेपूर्वसूत्रासांगत्यंचाह ॥ **जिज्ञास्यत्वेनेति** ॥ **जन्मोक्तीति** ॥ नह्यधिष्ठानादध्यस्तंजायतइत्युच्यतइतिभावः । यदत्रकश्चिदाह लक्षणस्योद्देशपूर्वकत्वादिहचोद्देशाभावान्नलक्षणसूत्रमिदमिति तन्न । ब्रह्मजिज्ञासेतिपूर्वसूत्रएवतस्योद्देशात् । नचतत्षष्ठ्यंतत्वाज्जिज्ञासायांकर्मार्पकतयानलक्षणेउद्देश्यसमर्पकमितिवाच्यं । “प्रमाणप्रमेये”त्यादिगौतमसूत्रेषष्ठ्यंतनिर्दिष्टानामप्युद्देश्यत्वदर्शनात् । नाममात्रेणेतिमात्रपदेनलक्षणस्यैवव्यवच्छेद्यत्वात् । अतएव “प्रथमोद्दिष्टस्यप्रमाणस्यलक्षणमाहे”त्यादितदीयोक्तिः । प्रमाणलक्षणटीकायामपि “प्रमाणानामित्युद्देशेसिद्धेप्रमाणसामान्यलक्षणमाहे”त्युक्तिः । सूत्रेयतइत्युक्तेस्तद्ब्रह्मेत्यवश्यमनुषंजनीयत्वाच्चनकोपिदोषः । यथाश्रुतंरामानुजभाष्यमेवानुवदति ॥ **केचित्त्वित्यादिना** ॥ यतोवेत्यादिवाक्याद्ब्रह्मलक्षणतःप्रति

जिज्ञास्यत्वेनाद्यसूत्रेप्रकृतस्यनिर्विशेषब्रह्मणोभ्रमाधिष्ठानत्वेनाकारणत्वाच्च । अधिष्ठानत्वस्यैवविवक्षायांतु श्रुतिसूत्रयोर्जन्मोक्त्ययोगात् । देशांतरप्राप्तेःसूर्यगत्यनुमापकत्वेपितल्लक्षणत्वाभावाच्च । नचात्रसूत्रेयतोवेत्यादिश्रुतौवा उत्पत्त्यादिकमद्वितीयेब्रह्मणिलिंगत्वेनोच्यतइतित्वयापिस्वीकृतं । केचित्तु

गु० छायाअपितल्लक्षणत्ववत्प्रकृतेपिब्रह्मानिष्ठायाअप्युत्पत्त्यादेर्ब्रह्मलक्षणत्वोपपत्तिरितिवाच्यं । दृष्टांतस्यैवासंप्रतिपन्नत्वादित्याह ॥ **देशांतरेति** ॥ तदुत्पत्त्यादीत्यत्रोत्पत्त्यादिकमेवलक्षणत्वेनाभिप्रेतं तत्कारणत्वंवेतिकल्प्यपक्षद्वयंदूषयति ॥ **जिज्ञास्यस्येति** ॥ द्वितीयपक्षेदूषणांतरमाह ॥ **जिज्ञास्यत्वेनेति** ॥ नन्वत्राप्यधिष्ठानत्वमेवविवक्षितंनकारणत्वमित्यतआह ॥ **अधिष्ठानत्वस्यैवेति** ॥ श्रुतिसूत्रयोः जायंते जन्मेतिपदद्वयेनकारणत्वमेवप्रतीयतेनाधिष्ठानत्वमितिभावः । अस्तुतर्हि

SGDF Sri Gangadhara Digital Foundation

प्र० पत्तुंशक्यतेनवेतिसंशयोत्रद्रष्टव्यः । जन्मस्थितिप्रळयाः विशेषणत्वेनलक्षयंत्युतोपलक्षणत्वेन । नाद्यइत्याह ॥ **नतावदिति** ॥ विशेषणंहि स्वेतरसर्वधर्मव्यावर्तकं । उक्तंचद्वितीयस्यतृतीयपादाद्यनये"विशेषणंव्यवच्छेत्तृविशेष्यव्यापिचोच्यते"इति । तथाचजन्मादीनामैकाधिकरण्यायोगेनब्रह्मविशेषणान्येतानिब्रह्मणोनानात्वमापादयेयुरित्यर्थः । ननुचैत्रःश्यामोयुवालोहिताक्षःसमानपरिमाणइत्यत्रविशेषणबहुत्वेप्येकएवचैत्रःप्रतीयते एवमत्राप्येकमेवब्रह्मभवतीत्यतआह ॥ **चैत्रइति** ॥ **मानांतरेति** ॥ प्रत्यक्षेणैक्यप्रतीतेरेकस्मिन्नपितत्रानेकविशेषणानामुपसंहारः । अन्यथातत्राप्यनेकत्वमपरिहार्यं । अत्रत्वेभिरेवलक्षणैर्लिलक्षयिषितत्वेनब्रह्मणःप्रमाणांतरेणैक्यंनावगतमितिव्यावर्तकभेदेनब्रह्मबहुत्वमवर्जनीयमितिभावः ॥ **खंडइति** ॥ गोपदैक्येपिखंडत्वादिव्यावर्तकभेदेगोव्यक्तिबहुत्वप्रतीतिरिवात्रापिजायंतेजीवंतिप्रयंतीत्यादिव्याव

नतावज्जन्मादयोविशेषणत्वेनलक्षयंति । विशेषणस्यस्वाश्रये सर्वविशेषधर्मव्यावर्तकत्वेनैकस्मिन्ननेकविशेषणायोगेनानेकविशेषणाश्रयस्यब्रह्मणोनेकत्वप्रसंगात् । चैत्रःश्यामोयुवालोहिताक्ष इत्यादौतुमानांतरवशादैक्यं । नचात्रापिब्रह्मशब्दैक्यात्ब्रह्मैक्यं । खंडोमुंडःपूर्णश्रृंगोगौरित्युक्ते अज्ञातगोव्यक्तेःपुंसो गोव्यक्तिबहुत्वस्येवात्रापिब्रह्मव्यक्तिबहुत्वप्रतीतिप्रसंगात् । ॥ १२८ ॥

गु० कारणत्वस्यानुमापकत्वमेवेत्यतआह ॥ **नचात्रेति** ॥ जन्मादयःकिंविशेषणत्वेनलक्षणमुतोपलक्ष्यत्वेन । नाद्यइत्याह ॥ **विशेषणस्येति** ॥ नन्वेवंचैत्रःश्यामो

SGDF Sri Gargeshwari Digital Foundation

प्र० र्तकभेदेनब्रह्मव्यक्तिबहुत्वप्रतीतिःस्यादित्यर्थः । द्वितीयंनिराह ॥ **नापीति** ॥ उपलक्षणानामेकेनाकारेणप्रतिपन्नस्यकेनचिदाकारांतरेणप्रतिपत्तिहेतुत्वंदृष्टं यत्रायंकासारःसदेवदत्तकेदारइत्यादिषु । तथाचतद्वत्प्रकृतेआकारांतरंनप्रतीतमितिनोपलक्षणत्वमितिभावः ॥ **स्वविरोधीति** ॥ स्वविरोध्यनेकविशेषणत्वंहिभेदमापादयति । खंडतादयोहिविरोधादेवगोव्यक्तिभेदमापादयंति । जन्मादीनांकालभेदेनाविरोधादेकविशेषणत्वंयुक्तमिति ॥ **पूर्णत्वस्येति** ॥ तथाचयत्पूर्णंतज्जन्मादिकारणमित्युपलक्षणत्वंजन्मादेर्युक्तमितिभावः ॥ **उक्तत्वादिति** ॥ "जिज्ञास्य

नाप्युपलक्षणतया । उपलक्ष्याकारांतराप्रतीतेः । तस्माज्जन्मादिवाक्यंनब्रह्मलक्षयितुं शक्तमितिप्राप्ते । अस्तुतावद्विशेषणत्वं । नचब्रह्मणोनेकत्वप्रसंगः । विशेषणानांस्वविरोधिधर्मव्यावर्तकत्वात् । जन्मादीनांतुकालभेदेनाविरोधात् । उपलक्षणत्वंवास्तु । बृहत्यर्थस्यपूर्णत्वस्योपलक्ष्यत्वादितिसिद्धांतयंति । तन्न । पूर्वपक्षानौचित्यस्योक्तत्वात् ।

गु० युवेत्यादावप्येकस्यानेकविशेषणाश्रयत्वेनभेदःस्यादित्यतआह ॥ **चैत्रइति** ॥ द्वितीयंदूषयति ॥ **नापीति** ॥ **उपलक्ष्याकारेति** ॥ उपलक्ष्यतावच्छेदकधर्माप्रतीतेरित्यर्थः । यद्वा उपलक्षणानामेकेनाकारेणप्रतिपन्नस्यकेनचिदाकारांतरेणप्रतिपत्तिहेतुत्वंहिदृष्टंयत्रायंकासारःसदेवदत्तकेदारइत्यादिषु । नचताद्दशाकारःप्रतीयतइतिभावः । इदंतुतदीयभाष्यएवस्पष्टं ॥ **विशेषणानामिति** ॥ तथाचविरुद्धविशेषणाश्रयस्यैवानेकत्वं । प्रकृतेतुजन्मादिकंनविरुद्धमितिभावः ॥ **पूर्वपक्षेति** ॥ जिज्ञास्यस्येतरव्यावृत्त्यर्थेलक्षणसूत्रेऽस्मद्रीत्याऽव्यावृत्त्यैवपूर्वपक्षस्योचितत्वेनैताद्दशपूर्वपक्षस्यानुचितत्वादित्यर्थः । किंचजन्मादयइत्यत्रजन्मादिशब्देनकार्यगतमुत्प

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्वेतरव्यावृत्त्यर्थलक्षणसूत्र''इत्यादिनोक्तत्वादित्यर्थः । प्रकारांतरेणपूर्वपक्षंनिराह ॥ **किंचेति** ॥ कार्यगतोत्पत्त्यादिकंब्रह्मलक्षणमुततत्कारणत्वंब्रह्मगतमेवतल्लक्षणमितिविकल्प्याद्यआह ॥ **कार्येति** ॥ **आशंकेति** ॥ अयुक्तेतियोज्यं । यतइतिपदायोगमुपपादयति ॥ **नहीति** ॥ द्वितीयमनूद्यनिराह ॥ **कारणेति** ॥ ब्रह्मगतानामित्यर्थः । यदपिसिद्धांतेकालभेदेनजन्मादीनामविरोधापादनंतदपितदीयभाष्योदाहृतस्मृतिविरोधादयुक्तमित्याह ॥ **सिद्धांतइति** ॥ ''शक्तयःसर्वभावानामचिंत्यज्ञानगोचराः । यतोतोब्रह्मणस्तास्तुसर्गाद्याभावशक्तय''इतिस्मृति

किंचजन्माद्यस्यइत्यत्रजन्मादिशब्देनकार्यावस्थागतोत्पत्त्यादिविवक्षायांतद्धेदेनतदनाश्रयब्रह्मभेदाशंकासूत्रेयतइतिपदंचायुक्तं । नहियतश्चैत्रजन्मसमैत्रइत्युक्तेचैत्रनिष्ठजन्ममैत्रलक्षणंभवति । किंतुमैत्रगतंकारणत्वं । कारणगतानां''यतोयेने''तिश्रौतपंचम्याद्युक्तानांजन्मादिकारणत्वानांविवक्षायामपित्वन्मतेसृष्ट्यादिकारणत्वानामेकस्मिन्नेवोपादानेदर्शनान्नभेदाशंकायुक्ता । सिद्धांतेकालभेदेनाविरोधोक्तिश्चायुक्ता । लयादिकाले''सर्गाद्याभावशक्तय''इत्यादिस्मृतिसिद्धायाःसामर्थ्यरूपायाःसृष्ट्यादिकारणतायाःसत्त्वात् । यादवप्रकाशीयेतु''तद्विजिज्ञासस्वे''तिवाक्येसांख्याभिमतप्रधानस्यापिब्रह्मशब्दार्थत्वाजिज्ञास्यत्वमितिशंकानिरासायजन्मादिसूत्रमित्युक्तं ।

गु० त्यादिकंलक्षणत्वेनोच्यते उतकारणगतानिजन्मादिकारणत्वादीनि । नाद्यइत्याह ॥ **किंचेति** ॥ तदनाश्रयेतिहेतुगर्भविशेषणं । सूत्रेयतइतिपदानर्थक्यमुपपादयति ॥ **नहीति** ॥ **लयादिकालइति** ॥ सृष्ट्यादिकारणतायाःशक्तिरूपत्वादितिभावः । लाघवायसूत्रकृताजन्मादीतिनपुंसकनिर्देशःकृतः तदुपपादनायसमाहारमाह ॥ **उत्पत्तिस्थितिभंगमिति** ॥ जन्मआदिर्ययोःस्थितिभंगयोस्तौजन्मादीत्यन्यपदार्थोयदिविशेषरूपेणविवक्ष्यते तर्हिजन्मादीअस्येतिनिर्देशेगौरवंस्यात् । ॥ १२९ ॥

प्र० सिद्धायाइत्यर्थः । अचिंत्यज्ञानगोचराः अतर्क्यप्रमितिसिद्धाः । सर्गाद्याः सर्गादिगोचराः । भावशक्तयः वस्तुशक्तयः । ब्रह्मणोवस्तुशक्तयइतिनिर्देशोब्रह्मतादात्म्यमितिवत् । यद्वाब्रह्मणोभावशक्तयोवस्तुशक्तयः ब्रह्मणोवस्तुत्वप्रयुक्ताःनिरुपाधिकाःशक्तयइत्यर्थः । यद्वाभावशब्दःस्वभावपरः । स्वाभाविक्यःशक्तयइत्यर्थः । इतिश्रुतप्रकाशेव्याख्यातत्वेनस्वाभाविक्याःसर्वदासत्त्वादितिभावः । एतेनयत्कश्चिदाह''यतोवे''त्यादिवाक्योक्तंजन्मादिकंब्रह्मलक्षणंभवितुमर्हतिनवेतिसंशयेतस्यजगन्निष्ठत्वेनब्रह्मासंबद्धत्वात्''सदेवसोम्य आनंदाद्ध्येव विज्ञानाद्ध्येवे''त्यादिवाक्यांतरेषुसदानंदादेरपिजन्मादिहेतुत्वोक्त्या इदमित्थमितिशृंगग्राहिकयालक्ष्यनिर्धारणाशक्तत्वाच्चनलक्षणंभवितुमर्हतीतिप्राप्ते तदसंबद्धस्यापिचंद्रस्यशाखाग्रवत्ताटस्थ्येनजन्मादिकंलक्षणंभवितुमर्हति । सदादिशब्दानांत्वकथंचिद्ब्रह्मशब्दितेशिवएवपर्यवसानादित्यादिसिद्धांतइतितन्निरस्तं । पूर्वसूत्रे''परीक्ष्यलोका''नित्यादिवाक्यमुदाहृतस्तत्वेहान्योदाहरणस्यानुचितत्वेनयज्ज्ञानार्थंगुरूपसत्तिस्तद्ब्रह्मैवेवलक्षणसूत्रत्वौचित्यात् । अत्रेवपूर्वत्रापिब्रह्मजिज्ञासापदघटितसूत्रानुगुण्येनतद्घटितस्यास्यैवोदाहरणत्वेतत्रैवश्रुतंजन्मादिकंलक्षणंनवेतिचिंतायाःसंगतत्वाच्च । सूत्रेयतइतिकारणत्वस्याप्युक्त्याजन्मादिमात्रेचिंतायाअयुक्तत्वाच्च । किंचसूत्रेलक्षणत्वोपपादकन्यायस्यानुक्त्यालक्षणीभूतजन्मादिकारणत्वमात्रस्यैवोक्त्या एवंविधपूर्वपक्षस्यसूत्रानानुगुण्याच्च । अस्मद्रीत्याब्रह्मणितदसिद्धिपूर्वपक्षस्यैवसूत्रानुगुण्याच्च । लक्ष्यासंबद्धस्यमुख्यलक्षणत्वाभावेनसूत्रस्यगौणार्थत्वापाताच्च । ताटस्थ्यस्याग्रेनिरसिष्यमाणत्वाच्चेत्याद्यूह्यं । यदपिसकलकारणवाक्यस्थसदानंदादिशब्दानांशिवएवपर्यवसानमितिवल्गनंतद्भाष्याद्युदाहृतानेकमानविरुद्धत्वात्''पत्युरसामंजस्या''दितिसूत्रकृतानिरसिष्यमाणत्वेनाज्ञत्वपारतंत्र्याद्यनेकन्यायविरुद्धत्वाच्चापेशलं । विस्तरस्तुगुरुपादकृतपरतत्वप्रकाशिकादौध्येयइति । प्रधानस्यैवजिज्ञास्यत्वशंकानिरासकमुतजीवस्यापीतिविकल्प्याद्यंनिराह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० **तत्रेति** ॥ कुतइत्यतःपूर्वोत्तरपक्षन्यायस्यजीवेपिसाम्यादित्याह ॥ **जीवस्यापीति** ॥ द्वितीयमभ्युपगच्छति ॥ **जीवेति** ॥ **सूत्रस्येति** ॥ ''यआत्मे''तिजिज्ञास्येजीवासाधारणात्मपदाज्जात्यादेरिवनप्रधानस्यापिसंदेहनिविष्टत्वमितिहृदयं । यद्वान्यायविवरणटीकायां''यद्वाजीवएवेतिजात्यादेरप्युपलक्षणं । एवशब्दस्तुभगवंतंव्यावर्तयती''त्यादिनाजीवजात्यादेरपिव्यावर्त्यतयापूर्वपक्षस्याप्युक्त्यातदनुरोधेनपक्षांतरमभिप्रेत्यैवमुक्तिरितिध्येयं । पराभिमतंसूत्रार्थमपिनिरस्यति ॥ **यच्चोक्तमिति** ॥ श्रुत्यनुसारादितितात्पर्यानुवादः । उक्तंचतद्भाष्ये''जन्मस्थितिभंगंसमासार्थ''इति''यतोवेत्यादिवाक्येजन्मस्थितिप्रलयानांक्रमदर्शना''दितिच ॥ **चतुर्णामिति** ॥ अभिसंविशंतीत्यनेनमोक्षोक्तेरितिभावः ॥ **तमेवेति** ॥ तस्याप्यत्रविषयत्वादुदाहृतं । तथापीत्यभ्युपगमवादः । यदपितद्गुणसंविज्ञानबहुव्रीहिमाश्रित्यजगतोजन्मांगीकरणंतदपिव्याह

तत्रनतावत्प्रधानस्यैवजिज्ञास्यत्वशंकानिरासकंसूत्रं । जीवस्यापिब्रह्मशब्दार्थत्वेनजिज्ञास्यत्वशंकायाःकारणत्वाभावेनतन्निरासस्यचसंभवात् । जीवप्रधानादीनांजिज्ञास्यत्वशंकानिरासार्थत्वंतुसूत्रस्यास्माकमिष्टं । यच्चोक्तंपरैर्जन्मादीत्यत्रोत्पत्तिस्थितिभंगमेवोच्यतेनत्वन्यत् । यतोवेत्यादिश्रुत्यनुसारादिति । तन्न । ''यतोवे''त्यत्रचतुर्णां''तमेवैकंजानथे''त्यादौ''यस्मिन्द्यौ''रितिस्थित्यादीनामेकैकस्यैवश्रवणात् । नचाभिसंविशंतीत्येतत्प्रलयपरं । प्रयंतीत्यनेनपौनरुक्त्यापत्त्यातस्यमोक्षपरत्वात् । नचप्रयंतीत्यनेनसुषुप्तौब्रह्मप्राप्तिरुच्यते । तथापिचतुष्ट्वापरिहारात् । ॥ १३० ॥

गु० तन्माभूदितिसामान्यविवक्षयानपुंसकप्रयोगःकृतःसूत्रकृता । अत्रनपुंसकैकवचनप्रयोगार्हत्वात्समाहारोत्राभिप्रेतइतिभावः । यतोवेत्यादिश्रुत्यनुसाराद्वात्रितयमुच्यतेश्रुत्यंतरानुसाराद्वा । नाद्यइत्याह ॥ **यतोवेत्यत्रेति** ॥ द्वितीयंदूषयति ॥ **तमेवैकमिति** ॥अत्र अमृतस्यैषसेतुरितिमुक्तप्राप्यत्वस्योक्तावप्युत्तरवाक्योक्तत्वेन

SGDF Sri Gargeshwari Digital Foundation

प्र० तमित्याह ॥ **जगतइति** ॥ तथाचस्थितिभंगावेवोपेयावितिभावः ॥ **उक्तत्वाच्चेति** ॥ जिज्ञासाधिकरणेविवरणाभिमतनित्यानित्यवस्तुविवेकखंडनग्रंथइतिभावः । तस्मात् श्रुत्यनुसारादित्यर्थः । एतेनकेषांचित्पक्षोपिनिरस्तः । यथोक्तंश्रीभाष्ये''जन्मादीतिसृष्टिस्थितिप्रलय''मिति । एतेनैवाद्यस्यचतुर्मुखस्यजन्मयतइतिमतं आदिपदेनस्थितिमात्रंगृह्यतइतिमतंचनिरस्तं । सर्वस्यश्रुत्यननुसारात् । एतेन''अन्येतुजन्मादीतितद्गुणसंविज्ञानबहुव्रीहिमुपादायसृष्टिस्थितिभंगंसमासार्थइतिव्याकुर्वत''इत्यादिसुधावाक्यंविवृतंभवति । तत्रानुदाहृतत्वात्ताएवश्रुतीराह ॥ **यतोवेत्यादिना** ॥ **यआत्मानमिति** ॥ आत्मानं जीवंतदभिमानिचतुर्मुखंवेत्यर्थः । नन्वत्रविचारविधेरश्रवणान्नेदंविषयवाक्यं । तद्विधिवाक्यस्थलक्षणानामेवेहसूत्रेसंग्रहात् । उक्तंचसुधायां''नचैकमेवसर्वत्रजिज्ञासाविधायकश्रुतिषुलक्षणंश्रूयते । किंत्वासुब्रह्म

जगतोजन्मांगीकारेऽनित्यत्वापत्त्यामिथ्यात्वासिद्धेरुक्तत्वाच्च । तस्मात्सृष्ट्याद्यष्टकमेव
जन्मादिपदार्थः । ''यतोवे''त्यत्रसृष्टिस्थितिप्रलयमोक्षाणां''यआत्मानमंतरोयमयति

गु० विषयवाक्येऽनुक्तत्वात्तदभिप्रायेणैकैकस्येत्युक्तिरितिज्ञेयं ॥ **जगतोजन्मांगीकारइति** ॥ यद्यपिजगतोजन्मांगीकारमात्रेणमिथ्यात्वासिद्धिःशक्योपपादना । ध्वंसप्रतियोगित्ववत्प्रागभावप्रतियोगित्वस्याप्यत्यंताभावप्रतियोगित्वविरोधित्वात् । तथापिपूर्वंसविस्तरमुपपादितत्वेनतत्स्मारणार्थंभंगांगीकारेमिथ्यात्वासिद्धेर्वक्तव्यत्वात् भंगमात्रोपादानेचप्रथमातिक्रमेकारणाभावात् जन्मस्थित्यंगीकारेतद्दूषणाभावप्रतीतेः स्थितिमात्रोपादानेचपूर्वोक्तस्मरणायोगात्त्रितयोपादानेपिसाक्षात्तद्प्रतीतेरेकैकस्यैवमिथ्यात्वप्रतिकूलताभावप्रतीतेश्च भंगशब्देनचरमांतःकरणवृत्त्याप्रपंचनिवृत्तिरविवक्षितेतिशंकास्पदत्वाच्चसाक्षाद्भंगमनुक्त्वाजन्मांगीकारेणानित्यत्वापादनमितिज्ञेयं । ननुयतोवेत्यादिश्रुत्युक्तत्वाच्चतुष्टयमेवास्तुनत्वन्यत् । तत्रप्रमाणाभावादित्यतआह ॥ **यतोवेत्यत्रेति** ॥ अष्टकस्यप्रामाणिकत्वेपिसूत्रकारेणाष्टकंविवक्षितमि

SGDF
Sri Gargeshwari Digital Foundation

प्र० जिज्ञासांविधात्रीषुश्रुतिषुक्कचित्सृष्टिःक्कचित्स्थितिरित्यष्टकंजिज्ञास्याद्धरेर्विश्वस्योक्तमित्यनेकलक्षणोक्त्युपयोग" इति । अत्रापिचाग्रेविचारविधायकनानावाक्येत्यादिवक्ष्यति । तथाचकथमेतदुदाहरणं । उच्यते । लक्षणसूत्रेश्रुतिवाक्यप्रसिद्धलक्षणस्यसंग्रहोनविधिवाक्यस्थस्येतिनिर्बंधः । अतएवतत्वप्रदीपे "विवेशभूतानिचंराचराणीत्यर्थान्नियमन" मित्यादिनाताद्दशवाक्यान्येवोदाहृतानि । उदाहृतंसुधावाक्यादिकंतुसंभाविताभिप्रायं । यद्वाअंतर्यामिब्राह्मणोपक्रमे "योवैतत्काप्यसूत्रंविद्यात्तंचांतर्यामिणमितिसब्रह्मवित्सलोकवि" दित्याद्यर्थवादात्तज्जिज्ञासाविधेरुन्नयनाद्विचारविधिवाक्यमेवैतदितिनदोषः ॥ **त्वमिति** ॥ यतोबंधादिदाताऽतोनोस्माकंमतः विचारितइत्ययमप्यत्रविषयइतिभावः । इयंचश्रुतिगीतातात्पर्योदाहृतश्रुतिरितिध्येयं ॥ **स्कांदइति** ॥ "उत्पत्तिस्थितिसंहारा" इतिस्मृत्येतिभावः । नन्वन्येषामपिभावविकाराणांत्रिष्वेवांतर्भावइतिपरभाष्येंतर्भावोक्तेर्नियत्यादीनांजन्मस्थितिभंगोपेतत्वेनतेनैवगृहीतेर्नपृथग्वाच्यतेत्याशंक्याह ॥ **नचेति** ॥ नियतिस्वरूपोक्तिःस्वस्वव्या

त्वंभुक्तिदोबंधदोतोमतोनस्त्वंज्ञानदोऽज्ञानदश्चासिविष्णो" इत्यादौनियमनादीनामप्युक्तेः । सूत्रकृतैवस्कांदेऽष्टकर्तृत्वस्यलक्षणत्वेनोक्तेश्च । नचनियत्यादीनांजन्मादावंतर्भावः । स्वस्वव्यापारेषुप्रवृत्त्यादिरूपाणांनियत्यादीनांविनाशादेरिवजन्मादिमत्त्वेपिजन्मादिभ्योभेदानुभवात् ।

गु० त्यत्रसूत्रकारीयंज्ञापकमाह ॥ **सूत्रकृतैवेति** ॥ नन्वेकस्याऽपरत्रांतर्भावेनाष्टककर्तृत्वमेवनसंभवतीत्याशंक्यनिराकरोति ॥ **नचेति** ॥ जन्मपदार्थनियतिपदार्थयोरैक्याज्जन्मनोनपृथक्करणंनियतेरित्युच्यते उतनियतेरपिजन्मसद्भावाज्जन्मग्रहणेनैवतस्याअपिप्राप्तत्वादितिवा । नाद्यः । स्वस्वव्यापारेषुप्रवृत्त्यादिरूपत्वेपदार्थैक्याभावात् । नद्वितीयः । नियत्यादेर्जन्मादिमत्त्वेपिविनाशवद्भेदस्यानुभूयमानत्वादित्याह ॥ **स्वस्वव्यापारेष्विति** ॥ विनाशादेरित्यनेनान्यथाप्रागभावध्वंसरूपोत्पत्तेर्ध्वं

॥ १३१ ॥

प्र० पारेषुप्रवृत्तिरिति । ज्ञानाज्ञानेतुव्यक्ते । सुखदुःखानुभवोबंधः । नित्यानंदानुभवोमोक्षइतिध्येयं । यथाविनाशस्यजन्मस्थितिमत्त्वेपिताभ्यांभंगस्यपार्थक्यं यथावास्थितेर्जन्मभंगवत्त्वेपिताभ्यांपार्थक्यं तथानियत्यादीनांतत्रितयवत्त्वेपितेभ्योपिभेदानुभवादित्यर्थः । मोक्षस्यभंगाभेदमाशंक्याह ॥ **मोक्षस्येति** ॥ तथाचभंगेनैवोत्पत्तेरपिग्रहणंस्यादितिभावः ॥ **उत्पद्यमानस्येति** ॥ तथाचतद्ध्वंसोभंगपदार्थोन्योवाच्यइतिभावः ॥ **बद्धस्येति** ॥ बद्धस्यविशिष्टस्यपदार्थांतरत्वेनतद्ध्वंसोप्यतिरिक्तोनाशपदार्थइतिवा बद्धपदंधर्मिसामान्यपरंतद्ध्वंसोनाशपदार्थोन्योवाच्यइतिवाभिप्रायः । भावरूपोप्यावश्यकइत्याह ॥ **मोक्षस्येति** ॥ अनिष्टनिवृत्तेःपुमर्थत्वेपीष्टप्राप्तेरेवमुख्यपुरुषार्थत्वमितिभावः ।

मोक्षस्यबंधध्वंसत्वेचोत्पत्तिरपिप्रागभावनिवृत्तिःस्यात् । ननूत्पत्तिःप्रागभावस्यध्वंसोनतूत्पद्यमानस्येतिचेत्तर्हिमोक्षोपिबंधस्यध्वंसोनतुबद्धस्य । मोक्षस्यपरमपुरुषार्थतयापृथग्वाच्यत्वाच्च ।

गु० सोत्पत्तिरूपविनाशस्यवापृथग्ग्रहणंनस्यादितिसूचयति । यद्वा तर्ह्युत्पत्तिकारणत्वेउक्तेध्वंसस्याप्युत्पत्तिमत्त्वेनध्वंसकारणत्वस्यापिलब्धत्वेनतस्यापिपृथगवक्तव्यतयात्रितयकर्तृत्वंत्वत्पक्षेप्यनुपपन्नं । नचतत्रावांतरविशेषेणपृथगुक्तिः । तर्हिप्रकृतेपिसमानमितिभावेनप्रतिबंद्यासमाधत्ते ॥ **स्वस्वेति** ॥ ननुसंहारकारणत्वेमोक्षकारणत्वमेवलब्धं । मोक्षस्यबंधध्वंसरूपत्वात् । तथाचपृथक्कृतदभिधानमयुक्तमित्याशंक्यतर्हिध्वंसकारणत्वेऽभिहितेउत्पत्तेरपिप्रागभावनिवृत्तिरूपत्वेनध्वंसत्वेनोत्पत्तिकारणत्वस्यापिलब्धत्वेनत्रितयकारणत्वमपिनस्यादित्याह ॥**मोक्षस्येति**॥ उत्पद्यमानस्य उत्पत्तिविषयप्रागभावान्मुच्यमानस्य । प्रागभावप्रतियोगिनइतियावत् । नतुबद्धस्य बंधान्मुच्यमानस्य । बंधनिरूपकस्येतियावत् । एवंप्रतिबंद्यामोक्षकर्तृत्वमप्यवश्यंपृथग्वाच्यमित्युपपाद्यप्रतिबंद्यामुत्तरत्वंमन्यमानंप्रतिपृथङ्मोक्षकारणत्वाभिधानेवास्तवंप्रकारमाह ॥ **मोक्षस्येति** ॥ **परमेति** ॥ जिज्ञासाहेतुत्वादित्यर्थः । ननुतथाप्यज्ञानकारणत्वंनपृथग्वाच्यं । अज्ञानस्यबंधरूपत्वेनबंधकारणत्वोक्त्यैवाज्ञानकारणत्वस्या

SGDF Sri Gargeshwari Digital Foundation

प्र० अज्ञानबंधयोर्भेदमाह ॥ **अज्ञानंत्विति** ॥ **तथापीति** ॥ जन्मादीनामष्टानांभेदेसिद्धेपीत्यर्थः । यथास्येत्यनेनजगतःपरामर्शस्तथापंचधर्मानपिपरामृश्यास्यजन्मादित्रयंभवतीत्युक्तेजगत्कारणंब्रह्मयथासिध्यतितथानियत्यादिकारणंसिध्यतीत्यर्थः ॥ **अस्येत्यनेनेति** ॥ अत्रास्येतिधार्मिनिर्देशकं जन्मादीतिधर्मनिर्देशकं तत्रनियमनादीनांधर्माणांधार्मिनिर्देशकेनैवग्रहणेजन्मादित्रयसंबंधोजगतोनियमनादीनांचसिध्यति । तथापिजगतोनियमनादिधर्माणांचसंबंधोनोक्तःस्यात् । अतोधर्मनिर्देशकेनतेषांग्रहणेतुजगत्संबंधोजन्मादित्रयस्येवनियत्यादीनामपिसिध्यती

अज्ञानंतुनबंधः । किंतुबंधकं । ननुतथापिनियमनज्ञानादीनस्येत्यनेनविवक्षित्वातेषामुत्पत्त्यादिकेजन्मादिपदेनोक्तेनियमनादीन्प्रतिजगत्प्रतीवब्रह्मकारणंसिद्ध्यति । किंजन्मादीत्यत्रतद्ग्रहणेनेतिचेन्न । अस्येत्यनेननिर्दिष्टधर्मिभूतजगत्संबंधार्थधर्माणांनियमनादीनांधर्मनिर्देशकेनजन्मादिपदेनैवग्राह्यत्वात् । नचेत्परमतेस्येत्यनेनभंगंविवक्षित्वा

गु० पिलब्धत्वादित्यतआह ॥ **अज्ञानंत्विति** ॥ यद्यपिसुधायांस्वप्नाधिकरणेअविद्यादेरेवसंसारत्वादित्यादिनाबंधत्वमुक्तं तथाप्यत्रदुःखमेवसाक्षाद्बंधइत्यभिप्रेत्येदमुक्तं । ननुतथापिजन्मादीत्यत्रादिपदेननियमनादिग्रहणमयुक्तं । नचतथात्वेनियमनादीन्प्रतिब्रह्मकारणंनसिध्येदितिवाच्यं । अस्येत्यनेननियमनादेरपिपरामर्शेनतान्प्रत्यपिब्रह्मकारणतासिद्धेरित्याशयेनशंकते ॥ **ननुतथापीति** ॥ जगतोधर्मित्वान्नियमनादीनांचधर्मत्वाद्धर्मधर्मिणोःसंबंधज्ञापनार्थंजन्मादिपदेनतद्ग्रहणमावश्यकमितिपरिहरति ॥ **अस्येत्यनेनेति** ॥ विपक्षेबाधकमाह ॥ **नचेदिति** ॥ धर्मत्वेन घटंप्रतीतिशेषः । धर्मितया रूपत्वंप्रतीतिशेषः ॥ **अस्येत्यनेनेति** ॥ अस्यजगतोजन्मादियतोभवतीत्युक्तत्वा त्तदंतर्गततयाज्ञानादेर्ग्रहणेतत्संबंधिनियम्यत्वादेरपितत्कार्यत्वंसिध्यतीतिभावः । ननुसृष्ट्याद्यष्टकस्यलक्ष्म्यादावभावेनाष्टकर्तृ

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्येवंग्राह्यमित्यर्थः ॥ **तस्येति** ॥ अस्येत्युक्तस्येत्यर्थः । स्थितावप्ययंप्रसंगोबोध्यः ।भंगमात्रेतदुक्तिस्तुसौत्रादिपदेनस्थितेरवश्यंग्राह्यत्वाद्यथा न्यासमुपेत्य । वस्तुतस्तुजन्मास्ययतइतिसूत्रन्यासेलाघवमिष्टसिद्धिश्चेतीदमेवादिपदोच्चारणंज्ञापकंधर्मिनिर्देशकेनास्येत्यनेननियत्यादिधर्माणा मग्रहणइतियथोक्तएवार्थःसूत्रकृदभिमतइतिध्येयं । ननुजन्मादित्रयस्यकृत्स्नजगत्संबंधाद्धर्मनिर्देशकेनतस्यैवग्रहणंयुक्तं । नतुज्ञानादीनां । तेषांचेतनमात्रसंबंधित्वादितिचेत्तत्संबंधार्थमपिजन्मादीत्यनेनैवग्राह्यत्वात् । तन्मतेप्यनादिजीवब्रह्मविभागादौजन्मादेरयोगात् । अस्येत्य नेनजन्ममात्रविवक्षायांकृत्स्नस्थितिकारणत्वासिद्धेः । सर्वनाम्नःसंकोचापत्तेश्चेतिभावः । जन्मादीत्यनेनसर्वधर्माणांग्रहणमित्यत्रापिबाधक माशंकते ॥ **नन्वेवमिति** ॥ नियत्यादीनांजगत्संबंधलाभेपीत्यर्थः । ज्ञानादिचतुर्णांचनियमेनजन्मादिसंबंधाबोधनादितिभावः ॥ **रूपादे रिति** ॥ रूपत्वादिकंप्रतिधर्मीरूपरसादिर्घटादिकंप्रतिधर्मश्चेत्यर्थः । उक्तरीतिस्त्वयापिवाच्येत्याह ॥ **अन्यथेति** ॥ ननुजन्मादित्रयमात्र

तस्योत्पत्त्यादिकेजन्मादिपदेनोक्तेभंगस्यब्रह्मकारणंसिध्यति । किंजन्मादीत्यत्रभंगग्रहणेनेतिस्यात् । नन्वेवमपिचेतनादि संबंधिज्ञानादेर्ब्रह्मकार्यत्वेसिद्धेपिज्ञानादिसंबंधिनियमादेर्ब्रह्मकारणंनसिध्यतीतिचेन्न । योयस्यधर्मःसतदाश्रितइत्युक्तेध र्मित्वेसतिधर्मस्यरूपादेर्यथाधर्मत्वेनयइत्यनेनधर्मितयायस्येत्यनेनचग्रहणं तथाज्ञानादीनामष्टकांतर्गतत्वाज्जन्मादीत्यनेन गृहीतानामपिनियम्यत्वादिनारूपेणास्येत्यनेनापिग्रहणात् । अन्यथातवापिभंगसंबंधिजन्मादिकारणंब्रह्मनसिध्येत् ।

गु० त्वस्यसर्वसाधारण्याभावात्क्वचित्सृष्टिकर्तृत्वंक्वचिन्मोक्षसाधनत्वमित्यादिकल्पनायामननुगमोदोषइत्यतःसमासव्यासयोगतइत्यत्रोक्तमभ्युपेत्यदृष्टांतेनोपपादयति ॥

प्र० विवक्षायांविश्वसंबंधिजन्मादिहेतुत्वमेकमनुगतंलभ्यते । अन्यथाक्वचिज्जन्मादिहेतुत्वंक्वचिज्ज्ञानादिहेतुत्वमित्यननुगतंस्यादित्यतआह ॥ नित्येति ॥ षष्ठेतृतीयपादे"सर्वशक्तौप्रवृत्तिःस्यात्तथाभूतोपदेशा"दित्याद्याधिकरणे"यावज्जीवमग्निहोत्रंजुहोति यावज्जीवंदर्शपूर्णमासाभ्यां यजेते"त्यादौकिंसर्वांगोपसंहारशक्तानामेवाधिकार उतयस्तुयावंतिशक्तोत्युपसंहर्तुंतावद्भिरुपेतंप्रधानंकुर्वन्नधिक्रियेतेतिसंदेहे अग्निहोत्रेणभावयेदित्युक्ते कथंभावयेदितिकथंभावाकांक्षायांसर्वांगानांसमुच्चयेनग्रहणात्सर्वांगोपेतस्यैवप्रधानस्यफलवत्त्वेननांगहीनस्यतत्राधिकारइतिप्राप्ते यावच्छब्दोपबद्धंहिजीवनंधातुसंबंधविहितेनणमुल्प्रत्ययेनसंबंधांतराभावात्निमित्तत्वेनयागानुरक्तांभावनांप्रत्यवगम्यते । निमित्तस्यचैतद्रूपंयत्तस्मिन्सतिनैमित्तिकमवश्यंकार्यमित्यतःप्रधानानुरक्ताभावना स्ववाक्यश्रुतनिमित्तवशप्राप्तावश्यकत्वानुरोधेनयथासंभवमंगानिगृह्णाति । तावतैवशास्त्रवशात्फलसिद्धिरितियथाशक्तिप्रयोगेणैवाधिकारइतिसिद्धांतितं । तथाचतत्रयथायत्रयावच्छक्यंतत्रतन्मात्रांगोपेततातथात्रापीत्यर्थः । यद्येवमनुगमस्तर्हिजन्मादीत्यत्राष्टकग्रहणमिवान्येषांचेतनधर्माणांसुखदुःखेच्छाद्वेषादीनामचेतनधर्माणांवृद्धिपरिमाणापक्षयादीनांविवक्षायामप्युक्तदिशानुगमसंभवात्कुतोनग्रहणमित्याशंक्यत्रेधासमाधिमाह ॥ यद्यपीत्यादिना अष्टकोक्तिरित्यंतेन ॥ सुखादीनामंतःकरणधर्मत्वे

नित्यकर्मणियस्यपुंसोयावदंगोपसंहारेशक्तिस्तत्प्रयोगेतावदंगोपेततेवब्रह्मण्यपियस्यवस्तुनःसृष्ट्याद्यष्टकेयावत्संभवतितावद्धेतुतानुगतैव। यद्यपिचेतनस्थानिसुखदुःखादीन्यचेतनस्थानिवृध्द्यादीन्यपिसंतितथापिविचारविधायकनानावाक्यपरामर्शेनस्कांदेसूत्रकृतैवाष्टककर्तृत्वस्यैवलक्षणत्वेनोक्तत्वादत्रापितस्यैवविवक्षणीयत्वान्नदोषः ।

गु० नित्यकर्मणीति ॥ नन्वष्टकर्तृत्वमात्राभिधानमयुक्तं। नचविचारविधायकवाक्योक्तत्वादेषांग्रहणं । अन्वेषणवाक्येसत्यकामत्वादीनामपिविद्यमानत्वेनतेषामपि

प्र० पिधनीतिवत्तत्स्वामित्वाच्चेतनस्थानीत्युक्तं। सूत्रकृतोपिनिमित्तोक्तिर्विचारविधायकेति । यद्यप्यन्वेषणादिवाक्येष्वपहतपाप्मत्वसत्यकामत्वादिधर्माःश्रुतास्तथापितेषांब्रह्मपदोक्तगुणग्रहणेनगृहीतेस्तदुपपादकत्वमष्टानामेवेत्युक्तमितिध्येयं । अवश्यंज्ञेयत्वान्मोक्षशास्त्रेएतदेवविवक्षितंनान्यदित्याह ॥ यद्वेति ॥ उक्तंचेति ॥ तात्पर्यनिर्णयाद्याध्यायइत्यर्थः । ल्युटष्टित्करणेनत्रिलिंगत्वस्यज्ञापितत्वाद्बंधनानितिसाधु । अष्टानामेवप्रकृतोपयोगादन्येषांतदभावादग्रहणमितिभावेनाह ॥ अथवेति ॥ अयोगादिति ॥ अन्यबद्धत्वादेर्निरासादितिभावः । तयोः मोक्षबंधदत्वयोः ॥ त्रितयेति ॥ बंधज्ञानाज्ञानत्रितयेत्यर्थः । यद्वोक्तदिशाजन्मस्थितिभंगानांबंधमोक्षयोःज्ञानाज्ञानयोश्चैकैकसमुदायत्वंविवक्षित्वा

यद्वा सर्वैर्मुमुक्षुभिर्विशिष्याष्टककर्तृत्वस्येवान्यकर्तृत्वस्यज्ञेयत्वनियमाभावान्नान्यदिहादिशब्दार्थः । उक्तंच "सृष्टिरक्षाहृतिज्ञाननियमाज्ञानबंधनान् । मोक्षंचविष्णुतश्चैवज्ञात्वामुक्तिर्नचान्यथे"ति । अथवा विषयोपपादकगुणपूर्तिप्रसिद्ध्येजीवाद्भेदकेप्रसिद्धेजन्मादित्रितयहेतुत्वेभिहितेपि प्रयोजनसिद्ध्येमोक्षदत्वस्यापि वक्तव्यत्वात्तस्यचबंधकत्वंविनायोगात्तयोश्चतद्धेतुज्ञानाज्ञानदत्वंविनानुपपत्तेस्त्रितयहेतुत्वस्यापिवक्तव्यत्वात्

गु० ग्रहणप्रसंगादित्यपरितोषात्परिहारांतरमाह ॥ यद्वेति ॥ अथवा ननुसूत्रकृतोपिविशिष्याष्टककर्तृत्वस्यैवोक्तौकिंनिमित्तमित्यतआह ॥ यद्वेति ॥ मुमुक्षुभिः विधीयमानविचाराधिकारादिभिः । विशिष्टाधिकारिणांनियमसत्त्वात्सर्वैरित्युक्तं । नन्वष्टककर्तृत्वस्येवावतारानवतारपंचभेदादेरपिअवतारान्हरेर्ज्ञात्वेत्यादिनामुमुक्षुभिरवश्यंज्ञेयत्वस्योक्तत्वात्तदनुक्त्वाप्रकृतेऽष्टककर्तृत्वस्योक्तौकिंनिमित्तमित्यस्वरसादाह ॥ अथवेति ॥ तथाचप्रकृतोपयुक्तत्वादेषामेवग्रहणंयुक्तमितिभावः ॥ तयोश्चेति ॥ बंधमोक्षयोरित्यर्थः ॥ त्रितयहेतुत्वस्यापीति ॥ ज्ञानाज्ञानबंधरूपत्रितयहेतुत्वस्यापीत्यर्थः । नन्वत्रस्वारसिक्याआकांक्षायाअभावादुत्थापिताकांक्षायाश्चातिप्रसंगा

SGDF Sri Gargeshwari Digital Foundation

प्र० तत्रितयहेतुत्वस्यापीत्युपसंहारः । नियतेरुपयोगमाह ॥ **पुनश्चेति** ॥ अत्राद्यःपरिहारोभाष्योक्तस्कांदस्मृत्यासूचितः । द्वितीयस्तु "सृष्टिरक्षे"तिस्मृत्या । तृतीयस्तु"यतोमोक्षादिदातासावतोजिज्ञास्यएवव"इत्यनेन"नर्तेत्वत्क्रियतेकिंचिदित्यादेर्नहरिंविना । ज्ञानस्वभावतोपिस्यान्मुक्तिःकस्यापिहिक्कचि"दित्यादिनाचानुव्याख्यानेनसूचितइत्याहुः । नन्वेकलक्षणोक्तावपीष्टसिद्धेर्नानेकोक्तिरर्थवतीत्यतआह॥**यथाचेति**॥ परमतइतिभावः ॥ **संभवतिचेति** ॥ जन्ममात्रोक्तौजगज्जन्मोपयुक्तानांकेषांचिद्गुणानांलाभेपिस्थित्युपयुक्तगुणालाभात्सापिग्राह्या । तथासंहर्तृत्वमोचकत्वादिप्रयोजकधर्माणांलाभायस्रष्टृत्वादीनांस्वस्वप्रयोजकानेकगुणाक्षेपकत्वंतेषांग्रहणएवसिध्यतिनान्यथा । नहिचैत्रोरूपद्रष्टेत्यु

पुनश्च दीपस्तमइवज्ञानंबंधकाज्ञानंस्वभावादेवहंतिकिमीश्वरेणेतिशंकायां दीपज्ञानादिस्वभावोपिभगवन्नियत इतिवाच्यत्वात्प्रकृतोपयोगितयाष्टकोक्तिः । यथाचस्रष्टृत्वादावेकैकस्यैवलक्षणत्वोपपत्तावपित्रितयोक्तिःस्थितिहेतुरन्यइतिशंकानिरासार्थंवाऽनेकलक्षणसूचनार्थंवा तथाष्टकोक्तिरपितदर्थमस्तु । नचोपादानत्वायत्रितयोक्तिः । सृष्टिलयाभ्यामेवतत्सिद्धेः । संभवतिचगुणपूर्तावनेकोपपादकोपन्यासः । तस्मादष्टकमेवजन्मादिशब्दार्थः ।

गु० न्वाष्टककर्तृत्वस्यावश्यवक्तव्यतेत्याशंक्य तथात्वेत्रितयहेतुत्वमपिनवक्तव्यं । तत्रापिस्वारसिक्याआकांक्षायाअभावात् । तदभावेप्युत्थापिताकांक्षयात्रितयहेतुत्वस्यावश्यवक्तव्यत्वेप्रकृतेपिसाम्यमित्याह ॥ **यथाचेति** ॥ ननुनस्थितिहेतुरन्यइतिशंकानिरासायत्रितयोक्तिरित्युच्यते येनतादृशोत्थापिताकांक्षायाअन्यत्रापिसाम्याद्‌ष्टकोक्तिरप्यावश्यकीस्यात् । किंनामोपादानत्वसिद्ध्यर्थमेवत्रितयोक्तिरित्याशंकते ॥ **नचोपादानत्वायेति** ॥ **सृष्टिलयाभ्यामेवेति** ॥ तथाचस्थितिकर्तृत्वोक्तेरुपादानार्थत्वाभावेनतत्रोत्थापिताकांक्षायाएववक्तव्यत्वात्तदंशेसाम्यमेवेतिभावः । अनेकलक्षणसूचनार्थंवेत्युक्तमुपपादयति ॥ **संभवतिचेति** ॥ अथवाएवं

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्केचक्षुष्मत्तेवश्रोत्रादिमत्तासिध्यति। तथाचतत्रसर्वेंद्रियवत्त्वप्रतिपादनायतत्तदाक्षेपकरूपज्ञानशब्दज्ञानादिकंसर्वमुपपादकमुपादेयं। तद्व त्सर्वगुणपूर्त्यर्थमनेकोपपादकोक्तिर्युक्तेतिभावः। एतेन यदाहकश्चित् जन्मादिकारणत्ववद्गुणपूर्तेरपिविष्णौश्रुतत्वान्नतत्रोपपादकापेक्षा। अ न्यथातत्राप्येवमित्यनवस्थापत्तेर्नेदंसूत्रमारभ्यं। जन्मादिहेतुत्वस्यापिसत्यकामत्वादिवद्गुणतयाब्रह्मपदोक्तगुणपदेनग्रहणेनतस्यद्वैरूप्यापाताच्च। किंचोपपाद्योपपादकयोर्द्वयोरपिश्रुत्यैकसमधिगम्ययोस्तज्जन्यनिर्णयदशायांनोपपादकापेक्षा। आपातदशायांद्वयोरप्यनिर्णायकत्वंवैपरीत्यस्य वापत्तिरिति तन्न। ब्रह्मपदश्रुत्यापूर्वप्रतीतस्यगुणपूर्णत्वस्यासंभावनयाऽसत्त्वशंकायां वाक्यप्रमाणेनानंतरधीस्थेनजन्मादिहेतुत्वेनोपपादनेदो षाभावात्। अन्यथामीमांसानारंभापत्तेः। श्रौतेश्रौतस्योपपादकत्वाद्धेतुत्वेनगुणपूर्त्युपपादनस्यैवतयातदुपपादनस्याशक्यशंकत्वाच्च। "परा स्यशक्ति"रितिश्रुतौपरत्वस्यस्वाभाविकत्वादिना"नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते अविनाशित्वा"दित्यादिश्रुतौदृष्टेरभ्रांतित्वस्याविनाशित्वेनो पपादनदर्शनाच्च। सामान्याकारेणोपपाद्यकोटिनिविष्टस्यापिस्वाध्यायाध्ययनविध्यादिवद्विशेषाकारेणोपपादकत्वाविरोधाच्च। अस्यां दशायां तदन्यस्यैवगुणपदेनग्रहणोपपत्तेश्च। "कर्तृत्वात्सगुणंब्रह्मे"तिभागवतेसूत्रकृतैवस्पष्टमुपपादकत्वोक्तेश्चेति। "सृष्टिस्स्थितिश्चसं हारोनियतिर्ज्ञानमावृति"रित्यनुव्याख्याने असमासनिर्देशेनसूचितंजन्मादीनांप्रत्येकलक्षणत्वंसाधयितुंपरोक्तंनिराह॥ केचित्त्विति॥

केचित्तु यतोवेत्यादिश्रुतौप्रतिवाक्यंतद्ब्रह्मेत्यनुक्तेरनेकलक्षणवैयर्थ्याच्चजन्मादि
हेतुत्वसमुदायएकंलक्षणं। अतएवसूत्रेजन्मादीत्येकवचनमित्याहुः। तन्न।

गु० प्रतिबंधाअनेकलक्षणोपपादनमितिप्रतिपादितं। वास्तवंपरिहारंचाह॥ **संभवतिचेति**॥ **किंचिदस्तीति**॥ येनतद्व्यावर्त्यंस्यादितिभावः॥ **उपलक्षकमिति**॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्यावर्त्याभावादिति ॥ अतएवतद्भाष्ये "जगद्वाचित्वा" दित्यत्र "यस्यचैतत्कर्मसवेदितव्य" इतिवेद्यस्यब्रह्मत्वेसाध्येजगज्जनकत्वस्य "अक्षर
मंबरांतधृते" रित्यत्राक्षरस्यब्रह्मत्वेऽबरांतधारकत्वरूपस्थितिहेतुत्वस्य "अत्ताचराचरे" त्यत्रादनकर्तुर्ब्रह्मत्वेसंहर्तृत्वस्यहेतुत्वेनोपन्यासइतिभावः ।
एवमपिपूर्णत्वासिद्धिरित्याह ॥ **त्रितयेति** ॥ **स्वीकृतमिति** ॥ ब्रह्मशब्दैक्याद्ब्रह्मैक्यमितिवदतास्वीकृतमित्यर्थः । सत्यज्ञानादिशब्दार्था
नामतिव्याप्तिशून्यत्वात्पृथग्लक्षणत्वमितिज्ञापनायतद्भाष्योक्तमेवतेषांस्वरूपमनुवदति ॥ **निरुपाधिकेति** ॥ एवंविधसत्यत्वंनामांतरभजनार्हा
वस्थांतरयोगित्वेननिरुपाधिकसत्त्वरहितयोर्जीवजडयोर्नास्तीतिभावः ॥ **नित्येति** ॥ अनेनज्ञानशून्यस्यजडस्यसंकुचितज्ञानस्यसंसारिणःकदा

**व्यावर्त्याभावात् । नहिसर्वजगज्जन्मकारणंस्थित्याद्यकारणंचकिंचिदस्ति । ननुजन्मादिहेतुत्वंनिरतिशयबृहत्त्वस्योपल
क्षकं । नचतदुपलक्षणमेकेनैवयुक्तं । जन्ममात्रोक्तौस्थित्याद्युपयोगिज्ञानाद्यभावेननिरतिशयबृहत्त्वासिद्धेः । अतःसमु
दायोक्तिरितिचेन्न । त्रितयोक्तावपिमोचकत्वोपयोगिशक्त्याद्यलाभात् । उपलक्षणस्योपलक्ष्योपपादकत्वानियमाच्च ।
उक्तशंकानिरासार्थमेवानेकलक्षणोक्तिसंभवाच्च । प्रतिवाक्यंतद्ब्रह्मेत्यनुक्तिस्तुब्रह्मव्यक्तिभेदशंकानिरासार्थमितित्व
यापिस्वीकृतं । अन्यथासत्यज्ञानादिवाक्येपिप्रतिपदंब्रह्मपदाश्रवणान्निरुपाधिकसत्तायोगित्वनित्यासंकुचितज्ञानत्वा**

गु० ज्ञापकमित्यर्थः ॥ **त्रितयोक्तावपीति** ॥ तथाचनिरतिशयबृहत्त्वासिद्धिस्तदवस्थेतिभावः ॥ **उपलक्षणस्येति** ॥ उपलक्षणस्यकाकादेर्गृहोपपादकत्वाभावात् ।
तेनविनानुपपद्यमानस्यैवतदुपपादकत्वादितिभावः ॥ **उक्तशंकेति** ॥ त्रितयहेतुत्वोक्तावपिनिरतिशयमहत्त्वासिद्धिरितिशंकानिरासार्थमेवानेकलक्षणोपादानमिति

प्र० चिदसंकुचितज्ञानस्यमुक्तस्यचव्यवच्छेदान्नातिव्याप्तिरस्येतिभावः ॥ **अपरिच्छिन्नेति** ॥ अनेनाल्पगुणाःसर्वेव्यावृत्ताइतिभावः । तत्रप्रत्येकं
ब्रह्मपदावृत्ताविहापितद्ब्रह्मेत्यस्यावृत्तिरस्तु । आवृत्तौब्रह्मानेकत्वशंकातत्रापितुल्येति । यदपिजन्मादीत्येकवचनादेकलक्षणत्वधीरितितदप्यन्वय
व्यतिरेकव्यभिचारान्नेत्याह ॥ **सौत्रेति** ॥ विशेषणत्वेव्यतिरेकव्यभिचारोक्तिर्यत्रेति । उपलक्षणत्वेतदुक्तिर्हलोनंतराइति । यद्वालौकिकवै
दिकव्यभिचारस्थलेएते । एवमग्रेपिज्ञेयं । "हल" इत्यत्र "उभेअभ्यस्त" मित्यादौचैकवचनांतत्वाभावेपि ग्लानं ददते इत्यादौसंयोगाभ्यस्त
संज्ञेप्रतिसमुदायस्यैवसंज्ञित्वंदृष्टं । अन्यथाप्रत्येकंसंज्ञित्वेनिर्यातमित्यादावपिधातुयकारस्यसंयोगसंज्ञाप्रसंगेन "संयोगादेरातोधातोर्यण्वत"
इतिनिष्ठानत्वंस्यात् । विस्तृतंचैतन्महाभाष्यइतिभावः । सत्यप्येकवचनेएकलक्षणत्वाभावादन्वयव्यभिचारइतिभावेनाह ॥ **यस्येति** ॥
छत्रचामरादेःप्रत्येकंलक्षणत्वं तथा "अजाद्यत" इत्यत्रटाप्प्रत्ययविधिंप्रत्यजादिगणस्याकारांतस्यच । अजा एडकेत्यादौसर्वेत्यादौचप्रत्येकंनि
मित्तत्वंदृष्टं । अन्यथायस्यछत्रादयःसराजेतिअजाद्यन्ध्यष्टाबितिनिर्देशःस्यादित्यर्थः । आदिपदेन "अदेङ्गुण" इत्यादौप्रत्येकंसंज्ञादर्शनादिति
ग्राह्यं । ननुसास्नादौप्रत्येकमतिव्याप्तेर्बाधकात्समुदायेलक्षणत्वं तथासंयोगसंज्ञापिनिर्यातमित्यादावतिप्रसंगादन्वर्थसंज्ञाविज्ञानाच्चसमुदायेवर्तते ।

**ऽपरिच्छिन्नगुणत्वरूपाणांसत्यत्वज्ञानत्वानंतत्वात्मकानांस्वरूपलक्षणानामपिप्रत्येकंलक्षणत्वंनस्यात् । सौत्रैक
वचनादपिनसमुदायस्यलक्षणता । यत्रसास्नादयःसागौः "हलोनंतराःसंयोग" इत्यादौबहुवचनेपिसमुदायेलक्ष
णत्वसंयोगसंज्ञादेःयस्यछत्रादिकंसराजा "अजाद्यतष्टाप्" इत्यादावेकवचनत्वेपिप्रत्येकंलक्षणत्वादेर्दर्शनाच्च ।**

गु० भावः । ननुतर्हिप्रतिवाक्यंतद्ब्रह्मेत्यनुक्तिःकिमर्थमित्यतआह ॥ **प्रतिवाक्यमिति** ॥ ननुतर्हिसूत्रेएकवचनंनघटतइत्यतआह ॥ **सौत्रैकवचनादपीति** ॥ ननु

SGDF Sri Gargeshwari Digital Foundation

प्र० उक्तंचवृद्धिसूत्रकैयटे "संयोगसंज्ञात्वन्वर्थत्वात्समुदायेप्रवर्तत" इति । तथाप्रत्येकमभ्यस्तसंज्ञायांन्यनिजानीत्यत्र "अभ्यस्तानामादि" रितिप्रत्येकमाद्युदात्तत्वप्रसंगबाधकादुभेग्रहणबलाच्चसमुदायेप्रवर्तते छत्रादिकमतिव्याप्त्यादिशून्यत्वात्प्रत्येकमेवलक्षणं "अजाद्यत" इत्यत्रसर्वेत्यादौलक्ष्येअकारांतादपिटाप्प्रत्ययदर्शनात्अजादेरकारांतत्वाव्यभिचारेणतद्विशेषणत्वायोगाच्चप्रत्येकंनिमित्तत्वं । नचबाधकायत्तोव्यभिचारो दोषावहः । उक्तंचाचार्यैः "व्यभिचार्यपवादेनमानमेवभविष्यती" तिचेत्तर्हीहापिवाव्यावर्त्याभावाद्बाधकात्प्रत्येकमेवलक्षणमस्तु । अतएव त्वयापि "जगद्वाचित्वा" दित्यादौप्रत्येकमेवहेतूक्तमितिभावः । ननुगर्गाःशतंदंड्यंतामित्यत्रापराधकर्तृषुगर्गेषुशतनिष्कदंडनंनप्रत्येकंकिंतुसमुदायेदृष्टं । अतएव "प्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणां । अप्रधानेदुहादीनांण्यंतेकर्तुश्चकर्मण" इतिवचनाद्गर्गाणामप्राधान्येनदंड्यंतामितिलकाराभिहितत्वात्प्रथमा । शतस्यचप्राधान्यादनभिहितत्वेनद्वितीया । विवृतंचैतद्वृद्धिसूत्रादौतत्रतत्रमहाभाष्ये "समुदायेवाक्यपरिसमाप्तिः । तद्यथागर्गाःशतंदंड्यंतामिति । अर्थिनश्चराजानोहिरण्येनभवंति । नचप्रत्येकंदंडयंती" ति । तथाचतद्वदिहापिसमुदायेलक्षणत्वमित्यतआह ॥ गर्गाइति ॥ अत्रवाक्यशब्दःप्रयोजकव्यापाररूपवाक्यार्थोक्तिद्वारातत्फलभूतप्रयोज्यव्यापाररूपभोजनलक्षकः । तथाचवाक्यार्थफलस्यभोजनस्यान्नादनादिरूपत्वेनतृप्तिफलत्वेनचप्रतिविप्रंपरिसमाप्तिदर्शनादित्यर्थः । उक्तंचकैयटे "वाक्यशब्देनवाक्यार्थफलमुच्यते"

गर्गाःशतंदंड्यंतामित्यादौसमुदायइवविप्राभोज्यं तामित्यादौप्रत्येकमपिवाक्यसमाप्तेर्दर्शनाच्च । ॥ १३६ ॥

गु० गर्गाःशतंदंड्यंतामित्यादौदर्शनादेवसमुदायेवाक्यपरिसमाप्तिः एकवचनंतुनतद्धेतुत्वेनोच्यतेयेनव्यभिचारःस्यादित्यतआह ॥गर्गाइति॥ जन्मादिकारणत्वस्यस्वरूप

SGDF Sri Gargeshwari Digital Foundation

प्र० इत्यादि । समुदायलक्षणत्वस्यैकवचनेनाज्ञापितत्वादयुक्तत्वाच्चप्रत्येकलक्षणत्वंन्याय्यमित्युपसंहरति ॥ **तस्मादिति** ॥ "जन्माद्यस्येतिते नतद्विष्णोरेवस्वलक्षण"मित्यनुव्याख्यानोक्तंस्वरूपलक्षणत्वंसमर्थयितुमद्वैत्युक्ततटस्थत्वमनूद्यनिराह ॥ **यच्चेति** ॥ यथाचंद्रस्यशाखाग्रंतट स्थलक्षणंप्रकृष्टप्रकाशत्वंस्वरूपलक्षणंतद्वदितिभावः । अत्रयद्यपितटस्थलक्षणमेवानुवदनीयंनस्वरूपलक्षणं । तस्यानुमतत्वादविरोधित्वेनादू ष्यत्वाच्च । तथापितटस्थलक्षणंतत्रातिव्याप्तमितिवक्तुंवातल्लक्षणमत्रास्तीतितद्वदिदमपिस्वरूपलक्षणमितिवक्तुंवाविभागएवायमयुक्तइतिवक्तुंवे तिध्येयं । केतेस्वरूपतटस्थलक्षणे लक्ष्यगतागतेवा सत्यासत्येवा यावत्स्वबोध्यव्यावृत्तिभाव्यभाविनीवा यावल्लक्ष्यभाव्यभाविनीवा लक्ष्यां तर्गतानंतर्गतेवा निरुपाधिकसोपाधिकरूपेवा स्वतोव्यावर्तकव्यावर्तकांतरोपस्थापकरूपेवा विशेषणोपलक्षणरूपेवेत्यष्टधाविकल्प्याद्यंनिराह ॥ **तत्रेति** ॥ षष्ठ्यंतानांसत्त्वेनेत्यनेनान्वयः ॥ **कारणेति** ॥ दोषसंस्कारेंद्रियसंप्रयोगरूपकारणत्रितयेत्यर्थः ॥ **आनंदादेरिति** ॥ तस्य ब्रह्मैक्येनतदनिष्ठत्वादितिभावः । एतेनतटस्थलक्षणलक्षणस्यलक्ष्यागतत्वस्यस्वरूपलक्षणेआनंदादावतिव्याप्तिः । कारणत्वादावसंभवश्चोक्त

तस्माज्जन्मादिहेतुत्वंप्रत्येकंलक्षणमिति । यच्चोक्तंपरैर्जन्मादिकारणत्वंतटस्थलक्षणं आनंदादिरेवस्वरूपलक्षणमि ति । तत्रनतावल्लक्ष्यगतागतेस्वरूपतटस्थलक्षणेइतियुक्तं । काकादेर्गृहेकारणत्वस्यचब्रह्मणि अध्यासतटस्थलक्षण स्यकारणत्रितयजन्यत्वस्यचाध्यासे सत्त्वेनस्वरूपलक्षणत्वापातात् । आनंदादेःस्वरूपलक्षणत्वाभावप्रसंगाच्च ।

गु० लक्षणत्वंव्यवस्थापयितुंपरोक्ततटस्थलक्षणत्वंदूषयितुमनुवदति ॥ **यच्चोक्तमिति** ॥ **आनंदादेरिति** ॥ स्वरूपत्वेनलक्ष्यांतर्गतत्वादित्यर्थः । सत्यासत्येइत्य त्रसत्यशब्देनाकल्पितत्वमसत्यशब्देनकल्पितत्वंवक्तव्यं । किंयत्रक्वचित्कल्पितत्वंतटस्थत्वमुतलक्ष्येकल्पितत्वंवा । नाद्यः । आनंदादेरनात्मनिकल्पितत्वेनतटस्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० इतिध्येयं । द्वितीयंनिराह ॥ **एतेनेति** ॥ लक्ष्येअनध्यस्ताध्यस्तरूपेइत्यर्थः ॥ **काकादेरिति** ॥ तत्रतटस्थलक्षणमव्याप्तमित्युक्तंभवति । यदुक्तंब्रह्मणिकारणत्वस्यसत्त्वेनेत्यादि तन्न । मायावच्छिन्नंब्रह्मकारणमितिपक्षेकारणत्वस्यमायाविशिष्टगतत्वेनशुद्धगतत्वाभावादित्याशंक्य निरस्यति ॥ **नन्विति** ॥ आदिपदेनातिव्याप्तिः । शुद्धस्यैवजिज्ञास्यब्रह्मतयालक्ष्यत्वेनालक्ष्येविशिष्टेगतत्वात् । उपलक्षणमेतत् । मायाब्रह्मणीसूत्रद्वयमिवरज्जौकारणमितिपक्षेकारणत्वस्यब्रह्मणिसत्त्वेनस्वरूपलक्षणत्वापत्तिः । मायायामतिव्याप्तिः । मायैवतुकारणं ब्रह्मत्वधिष्ठानमितिपक्षेऽसंभवोतिव्याप्तिश्चेत्यपिबोध्यं । स्वरूपलक्षणस्यैवलक्ष्यस्थत्वनियमोनतटस्थस्येत्यतआह ॥ **नचेति** ॥ असंभवादिनालक्षणत्वस्यैवा

एतेनसत्यासत्येस्वरूपतटस्थलक्षणेइतिनिरस्तं । काकादेरध्यासतटस्थलक्षणस्यचगृहादावकल्पितत्वात् । ननुकारणतापिविशिष्टे नतुशुद्धइतिचेन्न । शुद्धेऽसतोसंभवादिप्रसंगेनतल्लक्षणत्वायोगात् । नचलक्षणत्वस्यैवाभावेतद्विशेषतटस्थलक्षणत्वंयुक्तं ।

गु० त्वापत्त्यास्वरूपत्वंनस्यात् । नद्वितीयः । लक्ष्यगतत्वस्यस्वरूपलक्षणत्वेकारणत्वस्यब्रह्मणिसत्त्वेनतस्यापिस्वरूपलक्षणत्वंस्यादित्युक्तामतिव्याप्तिंपरिहर्तुमाशंकते ॥ **नन्विति** ॥ असंभवादीत्यत्रादिपदेनातिव्याप्तिर्ग्राह्या । कारणताविशिष्टेवर्ततइत्युक्तत्वादितिभावः । कारणत्वात्तत्स्वरूपलक्षणत्वमंगीकृत्यशुद्धेऽसत्वात्तटस्थत्वमित्यभिप्रायः । किंवातदनंगीकृत्यशुद्धेतदभावमात्राभिप्रायः । नाद्यद्वितीयावित्याह ॥ **असंभवादिप्रसंगेनेति** ॥ आदिशब्देनेतरभेदसाधनेस्वरूपासिद्धिपरामर्शइत्यप्याहुः । आद्येआदिपदोक्ताऽव्याप्तिर्द्वितीयेऽसंभवइतिविवेकः । ननुलक्ष्येऽसत्त्वेनासंभवादिप्रसंगेनतस्यस्वरूपलक्षणत्वाभावेपितटस्थलक्षणत्वंकिंनस्यादित्यतआह ॥ **नचेति** ॥ ननुलक्ष्यानंतर्गतस्यापिकारणत्वस्यतल्लक्षणत्वंस्यादेव चंद्रारुंधत्याद्यगतस्यापिशाखाग्रस्थूलतारकादेश्चंद्रारुंधत्यादिलक्षणत्वदर्शनादित्यतोदृष्टांतएवविषम ॥ १३७ ॥

प्र० भावइत्यर्थः । कथंतर्हिलक्ष्यानिष्ठमपिशाखादिकंचंद्रादितटस्थलक्षणमित्यतआह ॥ **शाखेति** ॥ नन्विहापितद्ब्रह्मेतिवक्तुंयतोवेत्यनेनकारणत्वमुच्यते नतुलक्षणत्वेनेत्यतआह ॥ **प्रकृतेत्विति** ॥ "किंलक्षणंपुनस्तद्ब्रह्मेत्यतआहे"तित्वदीयभाष्येलक्षणत्वोक्तिविरोधात् त्वदभिमतेब्रह्मणिब्रह्मपदशक्तेरभावेनतद्बोधायतदुक्त्ययोगाच्चेतिभावः । किंचतस्यशुद्धस्यबोधनमपिचंद्रादेरिवप्रत्यक्षेणाथशब्देन । आद्येदोषमाह ॥**शब्दैकेति**॥ उपलक्षणमेतत् । प्रत्यक्षेणतद्बोधनेशाखादेरिवप्रत्यक्षस्यैवकस्यचिज्ज्ञापकस्यवाच्यत्वेनतादृशकारणत्वोक्त्ययोगादित्यपिबोध्यं । द्वितीयेपियतोवेत्यादिनाशब्देनशुद्धब्रह्मबोधंकृत्वातद्ब्रह्मेतिवक्तुंकारणत्वमत्रोच्यते अथवाक्यांतरेण । आद्येपियतोवेत्यादिनासर्वेणशब्दसमुदायेनतद्बोधउतयतइत्यनेनैवेतिविकल्पान्हृदिकृत्वाऽऽद्यमनूद्यनिराह ॥ **नचेति** ॥ **अभिधयेति** ॥ यतइत्यादिपदगताभिधयेत्यर्थः । तस्यापिलक्ष्यत्वेमुख्यस्यान्यस्याभावेनमुख्यार्थसंबंधाभावाद्वचनवृत्त्याकारणत्वप्रतीतेश्चेतिभावः ॥ **तन्मुखेनेति** ॥ शाखामुखेनचंद्रबोधनवदितिभावः ॥

शाखाग्रस्थूलताराादिकंतुनचंद्रारुंधत्यादिलक्षणत्वेनोच्यते । किंतुचंद्रादिव्यक्तिंप्रदर्श्यसचंद्रइत्यादिकंवक्तुं । प्रकृतेतुनतथा । शब्दैकगम्यशुद्धरूपस्यमानांतरायोग्यत्वात् । नचयतोवेत्यादिवाक्यमेवाभिधयाकारणत्वमुपस्थाप्यपुनस्तन्मुखेन

गु० इत्याह ॥ **शाखाग्रेति** ॥ ननुजगत्कारणत्वमपिनब्रह्मलक्षणत्वेनोच्यते ब्रह्मव्यक्तिंप्रदर्श्यतद्ब्रह्मेत्यादिवक्तुमेवेतिनोक्तदोषइत्यतआह ॥ **प्रकृतेत्विति** ॥ तत्रचंद्रज्ञानंप्रतिकारणीभूतप्रत्यक्षादेरिवप्रकृतेब्रह्मज्ञानंप्रतिकारणाभावादित्यर्थः । ननुप्रकृतेपिप्रत्यक्षमनुमानंवाब्रह्मज्ञानसाधनंभवत्वित्यतआह ॥ **शब्दैकगम्येति** ॥ अन्यथाऔपनिषदःपुरुषइतिश्रुतिविरोधःस्यादितिभावः । यत्स्वरूपोपस्थापकंतत्तटस्थं । कारणत्वादेश्चतादृशत्वात्स्वरूपलक्षणत्वंभविष्यतीत्याशंक्यनिराकरोति ॥ **नचेति** ॥ ननुसत्यज्ञानादिवाक्येनशुद्धसिद्धावपिकारणवाक्यवैयर्थ्यंकुतइत्यतोदृष्टांतदर्शनपूर्वकंतद्दर्शयति ॥ **नहीति** ॥ किंचजगत्कारणत्वंनवक्तव्यं । प्रयो

SGDF Foundation

प्र० लक्षणयेति॥ मुख्यवृत्त्यैवंविधस्याप्रतीतेरितिभावः। वृत्तिद्वयेत्युपलक्षणं। लक्षणायाःपदवृत्तित्वेनवाक्यस्यलक्षकत्वायोगात्। "अर्धमंतर्वेदी" त्यादौवाक्येलक्षकत्वस्याखंडार्थत्वभंगेनिरासात्। विरम्यव्यापारायोगाच्चेत्यपिध्येयं। ननु यथागंगायांघोषइत्यत्रगंगापदंशक्त्याप्रवाहमुपस्थाप्य तीरमुपस्थापयति यथावावायुक्षेपिष्ठाद्यर्थवादःस्वार्थंशक्त्योपस्थाप्यप्राशस्त्यंलक्षयति तद्वदत्रापीतिचेद्भ्रांतोसि। नहितत्रशब्दएववृत्तिद्वयेनद्वयमप्युपस्थापयति। किंतुलक्षणयातीरादिकमेव। प्रत्येतातुशब्दतात्पर्यमजानन्पूर्वंप्रवाहादिप्रतीत्यातत्रानुपपत्तिमन्वानस्तीरादिप्रत्येतीत्येव। नचैवंप्रकृते। जन्मादिसूत्रेकारणत्वस्यश्रुत्यर्थत्वेनैवकीर्तनादितिभावः॥ **केवलेति** ॥ नचमुख्यार्थसंबंधार्थंतदुक्तिः। शुद्धस्यासंगत्वेनतीरेपूरसंबंधस्येवशुद्धेकारणत्वसंबंधाभावेनतदनपेक्षणादितिभावः। द्वितीयंनिराह ॥ **एतेनेति** ॥ तृतीयंप्रत्याह ॥ **सत्येति** ॥ उभाभ्यामपिब्रह्मसिद्धिरस्त्वितिचेत्किंसाक्षादुतपरंपरया। आद्यआह ॥ **कारणेति** ॥ अंत्यआह ॥ **नचेति** ॥ कारणत्वस्य स्वरूपलक्षणस्यज्ञानेऽभिधाने

लक्षणयाकारणत्वरहितमानंदैकरसंशुद्धंबोधयतीतियुक्तं। सकृत्प्रयुक्तेवृत्तिद्वयायोगात्। केवललक्षणयैवशुद्धबोधनसंभवेनाभिधयाकारणत्वोपस्थापनवैयर्थ्याच्च। एतेनयतइत्यनेनैवपदेन शुद्धप्रतीतिरितिनिरस्तं। शुद्धरूपस्यतेनैवसिद्धत्वेनशेषवैयर्थ्यात्। सत्यज्ञानादिवाक्यांतरेणशुद्धसिद्धौतुकारणवाक्यवैयर्थ्यं। नहिप्रकृष्टप्रकाशश्चंद्रइत्युक्त्वाशाखाग्रमपिदर्शयंति। नवाप्रकृष्ट

गु० जनाभावात्। नचब्रह्मज्ञानमेवप्रयोजनं। कारणत्वस्यतज्ज्ञानानुपायत्वादित्यनुमाने यद्यज्ज्ञानानुपायंतत्तदर्थंनवक्तव्यमितिसामान्यव्याप्तिंमनसिनिधायतत्रदृष्टांतं दर्शयति ॥ **नवेति** ॥ यद्वानुशाखादिवत्स्वरूपलक्षणबोधनार्थमेवतटस्थलक्षणमुच्यते। नतुतदनंतरं येनवैयर्थ्यंस्यादित्यतआह ॥ **नवेति** ॥ हेत्वसिद्धिंपरि

SGDF Sri Gargeshwari Digital Foundation

प्र० वानुपयोगात्तदुक्तिर्व्यर्थेत्यर्थः। तृतीयमाशंक्यप्रत्याह ॥ **नापीति** ॥ स्वबोध्यव्यावृत्तिर्यावत्पर्यंतंलक्ष्येस्तितावत्तत्रवर्तमानंस्वरूपं । तावद वर्तमानंतटस्थं । अस्तिचेदंप्रकृष्टप्रकाशत्वेकाकादौचेतिभावः ॥ **व्यावर्तकांतरेति** ॥ सत्यत्वादेर्लक्ष्याभेदेतटस्थत्वाभावादस्यैवस्वरूपलक्षण त्वमितिभावः ॥ **अध्यासेति** ॥ कारणत्रितयजन्यत्वस्ययावद्व्यावृत्तिसत्त्वादितिभावः । चतुर्थंनिराचष्टे ॥ **अतएवेति** ॥ उक्तातिव्याप्ते रित्यर्थः ॥ **अनवस्थानाच्चेति** ॥ लक्षणंहिलक्ष्यस्यालक्ष्याद्व्यावर्तकंसत्स्वयंयावल्लक्ष्येस्तितावल्लक्ष्यमलक्ष्याद्व्यावर्तयति । स्वस्यैवाभावेकथ

प्रकाशत्वादिर्ज्ञानानुपायमन्यदेवोक्त्वाप्रकृष्टप्रकाशश्चंद्रइतिवदंति । नचजगत्कारणंब्रह्मेत्यनुक्त्वाऽऽनंदो ब्रह्मेतिवक्तुमशक्यं । नापियावत्स्वप्रत्याय्यव्यावृत्तिभाव्यभाविनीस्वरूपतटस्थलक्षणे । त्वन्मतेयावद्व्यावृत्ति भाविव्यावर्तकांतराभावेनास्यैवयावद्व्यावृत्तिभावित्वावश्यंभावात् । अध्यासतटस्थलक्षणेऽतिव्याप्तेश्च । अतएवनयावल्लक्ष्यभाव्यभाविनीस्वरूपतटस्थलक्षणे । अलक्ष्यव्यावर्तकस्याभावेलक्ष्यस्यानवस्थानाच्च ।

गु० हरति ॥ **नचेति** ॥ **नापियावदिति** ॥ स्वेनप्रत्याय्याज्ज्ञाप्यायाव्यावृत्तिस्तत्पर्यंतविद्यमानंयत्तत्स्वरूपलक्षणं यच्चज्ञाप्यव्यावृत्तिपर्यंतंनविद्यतेतत्तटस्थमित्यर्थः ॥ **अस्यैवेति** ॥ कारणत्वस्यैवेत्यर्थः । नचानंदएवव्यावर्तकः । तस्यस्वरूपमात्रत्वेनव्यावर्तकत्वाभावात् । स्वमतइवविशेषस्यपरेणानंगीकृतत्वादितिभावः ॥ **अध्यासेति** ॥ कारणत्रितयजन्यत्वरूपेऽध्यासतटस्थलक्षणेस्वप्रत्याय्यव्यावृत्तिभावित्वेनस्वरूपत्वाभावेनतत्रातिव्याप्तेरित्यर्थः ॥ **अतएवेति** ॥ अध्यासतटस्थलक्ष णेकारणत्रितयजन्यत्वेयावल्लक्ष्यभावित्वेनस्वरूपत्वाभावेनातिव्याप्तेरेवेत्यर्थः । भोगायतनत्वादेस्तुस्वभावादन्यदशायांव्यावर्तकांतरसद्भावादेवास्वरूपलक्षणत्वमंगीक्रि यतइतिबोध्यं । किंचलक्षणस्ययावल्लक्ष्यभावित्वंलक्ष्यसत्तादशायांलक्षणस्यासत्त्वमितिवक्तव्यं । तच्चायुक्तं । लक्षणासत्त्वेतस्यलक्ष्यत्वाभावात् । तदानीमलक्ष्याद्व्याव

SGDF
Sri Gargeshwari Digital Foundation

प्र० मितरव्यावृत्तस्वरूपंसल्लक्ष्यमवतिष्ठेत । अतोलक्षणंचेद्यावल्लक्ष्यभाव्येववाच्यमितिकारणत्वस्यातथात्वेलक्षणत्वमेवनेतितटस्थत्वंदूरापेतं । अतोयावल्लक्ष्यभावित्वंतस्योपेयमितिभावः । ननुसृष्ट्याद्यभावकालेऽसत्कारणत्वंकथंस्वरूपलक्षणंस्यादित्यतआह ॥ **नवेति** ॥ तद्दशायांब्रह्मत्व स्यैवाभावादितिभावः । अंगीकृत्येदमुक्तं । वस्तुतस्तुकारणंतादृगेवनेत्याह ॥ **ईशानइति** ॥ मांडूके "प्रपंचोपशमंशिवमद्वैतंचतुर्थमन्यंत" इतिपूर्ववाक्येप्रपंचोपशमशब्देनसर्वानिष्टनिवृत्तिकारणत्वमुक्त्वा तत्रैवार्थे"निवृत्तेःसर्वदुःखानामीशानःप्रभुरव्यय"इत्यादिमंत्रस्योक्ततयाऽव्य यपदेनकारणत्वानपगमस्योक्तेर्निवृत्तेःसर्वदुःखानामित्यस्यान्वयायकारणमितिपदस्यावश्यमध्याहार्यत्वात् । प्रभुपदस्यवाकारणत्वार्थत्वादिति भावः । उक्तंचभगवत्पादैः "सर्वदुःखानांनिवृत्तेःकारणभूतस्तुरीयोदेव"इति । तथाचसर्वदुःखानांनिवृत्तेःकारणमीशानाममुक्तानामनश्वे ष्टकः । अनितेःपचाद्यच् । अद्वैतः द्वैतशब्दितमिथ्याज्ञाननिवर्तकः । सर्वभावानां सर्वजीवानां । देवः प्राप्यः । गत्यर्थत्वाद्दिवः । इति मंत्रपदानामर्थोध्येयः । ब्रह्मत्वेनपरांगीकृततुरीयपरत्वदर्शनायाद्वैतइत्यादिशेषोक्तिः । "तुरीयंतत्सर्वदृक्सदे"तिकारणत्वाविनाभूतसार्वज्ञस्य

नह्यक्षीराद्यावर्तकहीनंक्षीरं । नवाक्षीरदशायामसन्माधुर्यविशेषोनक्षीरस्यस्व रूपलक्षणं । "ईशानःप्रभुरव्ययः अद्वैतःसर्वभावानांदेवस्तुर्योविभुःस्मृतः

गु० र्तकाभावात् । एवंचसर्वस्यापिलक्षणस्ययावल्लक्ष्यभावित्वमेवेतिकथमयंविभागइत्याह ॥ **लक्ष्येति** ॥ ननुनायंनियमोयदलक्ष्याद्यावर्तकसत्वएवलक्ष्यता तदभावेत्व लक्ष्यतेति । तथाचयावल्लक्ष्यभाव्यभावित्वाभ्यांभेदःसंभवत्येवेत्यतोऽलक्ष्याद्यावर्तकाभावेपिलक्ष्यत्वांगीकारेऽतिप्रसंगमाह ॥ **नहीति** ॥ अत्रेशानत्वस्याव्ययत्वो ॥ १३९ ॥

प्र० ताटस्थ्येनांगीकृतस्यसदातनत्वोक्तेरितिभावः । नचाव्ययत्वंसदातनत्वंचस्वरूपापेक्षयेतिवाच्यं । स्वरूपतथात्वस्यधर्मिग्राहकादिमानसिद्ध त्वेनतदुक्तेर्वैयर्थ्यात् । श्रुतधर्मविशिष्टत्वेनतथात्वस्यसंभवेतत्त्यागेहेत्वभावाच्च । पंचमंनिराह ॥ **नापीति** ॥ आनंदकारणत्वयोःस्वरूपांतर्गता नंतर्गतत्वात्स्वरूपतटस्थत्वेयुक्तेइतिभावः । अंतर्गतपदार्थंद्वेधाविकल्प्यक्रमेणनिराह ॥ **अंतर्गतेति** ॥ तन्नस्यात् स्वरूपलक्षणत्वंनस्यादि त्यर्थः । स्वरूपत्वेलक्षणत्वमेवायुक्तमित्याह ॥ **प्रसिद्धस्येति** ॥ सिद्धांतेतुसविशेषत्वेननलक्ष्यमात्रत्वमितिभावेनाह ॥ **कारणत्वइति** ॥

तुरीयंतत्सर्वदृक्सदे"त्यादिश्रुत्याकारणत्वादेरपियावल्लक्ष्यभावित्वाच्च । नापिलक्ष्यां तर्गतानंतर्गतेस्वरूपतटस्थे । अंतर्गतपदेनलक्ष्यैकदेशोक्तौलक्ष्यस्याखंडत्वहानेः । अभे दोक्तौतुप्रकृष्टप्रकाशत्वादेश्चंद्रस्वरूपलक्षणत्वेनस्वीकृतस्यापितन्नस्यात् । त्वयालक्ष णवाक्यस्याखंडार्थत्वायप्रकृष्टत्वादेश्चंद्रप्रातिपदिकार्थाद्बहिर्भावस्योक्तत्वात् । प्रसि द्धस्यासाधारणधर्मस्यलक्षणत्वेनाप्रसिद्धस्यधर्मिणश्चलक्ष्यतयालक्षणस्यलक्ष्यमात्रत्वा नुपपत्तेश्च । कारणत्वेलक्ष्यमात्रत्वरूपस्वरूपलक्षणत्वस्यममाप्यनभिलषितत्वाच्च ।

गु० त्त्याकारणत्वस्ययावल्लक्ष्यभावित्वमुक्तं ॥ **तन्नस्यादिति** ॥ स्वरूपलक्षणत्वंनस्यादित्यर्थः । तदेवविशदयति ॥ **त्वयेति** ॥ ननुप्रसिद्ध्यप्रसिद्ध्योर्विरोधादेवन कारणत्वंस्वरूपलक्षणमित्यतआह ॥ **कारणत्वइति** ॥ लक्ष्याभिन्नत्वंनस्वरूपत्वं । तथात्वेआनंदत्वादेःस्वरूपलक्षणत्वाभावापातात् । तस्यधर्मत्वेनधर्मस्यात्यंत

SGDF Sri Gangadhar Digital Foundation

प्र० आनंदत्वादेरिति ॥ तथाचतस्यापिताटस्थ्यंस्यादितिभावः ॥ तर्हीति ॥ ननु आनंदस्यधर्मतयालक्षणत्वंयुक्तं । नतुकारणस्य । धर्मित्वा दितिचेन्न । आनंदस्यलक्ष्याभेदेधर्मत्वाभावात् । कारणस्यशक्तिरूपतयाधर्मत्वाच्चेतिभावः ॥ सोपाधिकत्वेनेति ॥ अनन्यथासिद्धत्वादिघ टितरूपत्वाच्छक्तेरपिविषयनिरूप्यत्वाच्चेत्यर्थः । शुद्धइतिजात्यभावेहेतुगर्भं । तस्य आनंदस्येत्यर्थः । विवरणोक्तंज्ञानस्यस्वरूपलक्षणत्वमपो हितुंसोपाधिकत्वमाह ॥ एवमिति ॥ तदेवव्यनक्ति ॥ भोजनस्येति ॥ तथासत्यत्वादिकमप्यात्यंतिकनिषेधाप्रतियोगित्वादिरूपतयासो पाधिकमेवेत्यपिध्येयं । ननुनित्यज्ञानस्यनज्ञात्रादिसापेक्षत्वमितिचेत्तर्हिवेदवाचोपिवक्तृसापेक्षतानस्यात् । विस्तृतंचैतज्जडत्वहेतुभंगइतिभावः

आनंदत्वादेरपिधर्मत्वाच्च। आनंदोलक्षणमितिचेत्तर्हिजगत्कारणंलक्षणमस्तु। कारणस्यसोपाधिकत्वेननिरुपाधिकस्वरूपत्वाभावेआनंदस्यापितन्नस्यात् । त्वन्मते शुद्धेआनंदत्वजातेरभावेनानुकूलवेदनरूपस्यवापरमप्रेमास्पदस्यवादुःखविरोधोप लक्षितस्वरूपस्यवातस्यसोपाधिकत्वात् । एवंज्ञानमप्यर्थप्रकाशात्मकत्वेनसोपा धिकमेव । भोजनस्यभोक्तृभोज्यसापेक्षत्ववज्ज्ञानस्यज्ञातृज्ञेयसापेक्षत्वात् । एतेन

गु० धर्म्यभिन्नत्वाभावादित्याह ॥ आनंदत्वादेरिति ॥ यद्वा ननुकारणत्वस्यधर्मत्वान्नस्वरूपत्वमित्याह ॥ आनंदत्वादेरपीति ॥ आनंदस्यैवलक्षणत्वंभविष्यती त्यतआह ॥ त्वन्मतइति ॥ शुद्धइतिहेतुगर्भं ॥ आनंदत्वजातेरभावेनेति ॥ अन्यथाऽखंडत्वहानिःस्यादितिभावः । दुःखविरोधितेतिपररीत्योक्तं । ज्ञानस्य

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **विषयेति** ॥ तथाचनसोपाधिकंज्ञानमितिभावः ॥ **शक्तीति** ॥ तर्हिसैवलक्षणंनज्ञानमितिभावः । अस्त्वित्यतआह ॥ **विषयेति** ॥ अर्थप्रकाशनशक्तिरितिविषयनिरूप्यत्वेनशक्तेरपिसोपाधिकत्वादित्यर्थः । किंस्वरूपावेदकप्रकाशत्वंस्वरूपव्यवहारयोग्यत्वंवा नद्वयमपीत्याह ॥ **स्वरूपस्येति** ॥ षष्ठंनिराह ॥ **एतेनेति** ॥ ज्ञानानंदयोःसोपाधिकत्वकथनेनेत्यर्थः । दोषांतरमाह ॥ **प्रकृष्टेति** ॥ सप्तममनूद्यनिर

यदुक्तंविवरणेविषयानवच्छिन्नमादित्यादिप्रकाशवदर्थप्रकाशनसमर्थंज्ञानंस्वरूपलक्षणमिति तन्निरस्तं । सामर्थ्यस्यशक्तिरूपत्वात् । विषयनिरूप्यत्वाच्च । जगज्जननादिसामर्थ्यस्यैवस्वरूपलक्षणत्वोपपत्तेश्च । स्वरूपप्रकाशत्वंनान्योपाधिकमितिचेन्न । स्वरूपस्यस्वावेद्यत्वात् । (स्व)व्यवहारयोग्यतायाश्चव्यवहारोपाधिकत्वात् । एतेननिरुपाधिकसोपाधिकेस्वरूपतटस्थेइतिनिरस्तं । प्रकृष्टप्रकाशत्वादेर्निकृष्टादिनिरूप्यतया मिथ्यार्थावभासत्वस्यापिमिथ्यार्थनिरूप्यतया तयोश्चंद्राध्यासस्वरूपलक्षणत्वाभावापाताच्च ।

गु० सोपाधिकत्वेननिरुपाधिकब्रह्मस्वरूपत्वंनस्यादित्युक्तं । तत्रविवरणोक्तंसमाधानमनूद्यदूषयति ॥ **एतेनेति** ॥ **शक्तिरूपत्वादिति** ॥ शक्तेश्चसोपाधिकत्वादानंदादिवच्छुद्धाभेदानभ्युपगमादितिभावः । अर्थप्रकाशनसमर्थज्ञानस्यस्वरूपत्वंनयुज्यते तस्यार्थनिरूप्यत्वादित्याह ॥ **विषयेति** ॥ स्वरूपप्रकाशत्वंनामस्वविषयप्रकाशत्वंवास्वव्यवहाराजननयोग्यत्वंवा । नाद्यइत्याह ॥ **स्वरूपस्येति** ॥ अन्यथाकर्तृकर्मविरोधापत्तेरितिभावः । नांत्यइत्याह ॥ **स्वेति** ॥ **एतेनेति** ॥ उक्तरीत्याऽऽनंदादेःसोपाधिकत्वेनाव्याप्त्यापत्त्याकारणादेर्निरुपाधिकत्वेनतत्रातिव्याप्त्यापत्त्याचेत्यर्थः । प्रकृष्टप्रकाशत्वादेरित्यत्रादिपदेनाध्यासस्वरूपलक्षणस्यमिथ्यार्थाव

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यति ॥ **एतेनेति** ॥ **त्वन्मतइति** ॥ तथाचकारणत्वंस्वरूपलक्षणंस्यादितिभावः ॥ **प्रागेवेति** ॥ कारणत्वज्ञानात्प्रागित्यर्थः । विशेषणादिस्वरूपंविवेचयन्नष्टमंनिराह ॥ **एतेनेति** ॥ ज्ञेयत्वाज्ञेयत्वयोर्हेतुमाशंक्याह ॥ **सुखेति** ॥ व्यावृत्तिपदंज्ञानपरं । यद्वा"विज्ञानमानंदं

एतेन स्वयंव्यावर्तकंस्वरूपलक्षणं । व्यावर्तकोपस्थापकंतुतटस्थं । काकादिर्हिव्यावर्तकंसंस्थानाद्युपस्थापयतीति निरस्तं । त्वन्मतेकारणत्वेनोपस्थाप्यव्यावर्तकांतराभावात् । स्वरूपमात्रस्यचजिज्ञासाधर्मित्वेनप्रागेवोपस्थितेः । एतेनैव कार्यान्वयिरूपंविशेषणंस्वरूपलक्षणं । तदनन्वयिरूपोपलक्षणंतटस्थं । आनंदत्वादिकंहितद्विजिज्ञासस्वेतिवाक्यविहितजिज्ञासारूपकार्यान्वयि । तस्यमुमुक्षुज्ञेयत्वात् । नतुकारणतेतिनिरस्तं । इतरव्यावृत्त्यर्थमानंदत्वादेरिवकारणत्वस्यापिजिज्ञास्यत्वात् । अन्यथासमन्वयाविरोधाध्याययोस्तद्युत्पादनंनस्यात् । नचब्रह्मण्यानंदत्वादेःकारणत्वादेश्चारोपितत्वेऽविशिष्टेपिदुःखव्यावृत्तिरेवज्ञेयानत्वकारणव्यावृत्तिरित्यत्रहेतुरस्ति ।

गु० भासत्वस्यपरिग्रहः । निकृष्टत्वादीत्यत्रादिपदेनमिथ्यार्थस्यपरिग्रहः । कारणत्वेनकिंस्वरूपमात्रत्वंवोपस्थाप्यं तदतिरिक्तंवा । नद्वितीयइत्याह ॥ **व्यावर्तकेति** ॥ नाद्यइत्याह ॥ **स्वरूपमात्रस्येति** ॥ ब्रह्मस्वरूपाज्ञाने धर्मिज्ञानाभावेनतन्मूलकसंशयासंभवेनतन्मूलकजिज्ञासायाएवासंभवेन जिज्ञासाप्रयोजकीभूतसंशयकारणीभूतधर्मिज्ञानत्वेनब्रह्मज्ञानस्यपूर्वमेवसिद्धत्वेन तस्याप्युपस्थाप्यत्वानुपपत्तेरितिभावः । स्वरूपमात्रस्यव्यावर्तकत्वाभावाच्चेत्यपिबोध्यं ॥ **कार्येति** ॥ कार्यान्वयवद्रूपंयद्विशेषणंतत्स्वरूपलक्षणं तदनन्वयिरूपंयदुपलक्षणंतत्तटस्थमित्यर्थः ॥ **अन्यथेति** ॥ कारणत्वस्याजिज्ञास्यत्वइत्यर्थः । नन्वानंदोब्रह्मेतिव्यजानादित्यादिश्रु

॥ १४१ ॥

प्र० ब्रह्मे"तिसामानाधिकरण्येनब्रह्मणिसुखस्वरूपत्वादसुखव्यावृत्तिःसिध्यति नतुकारणत्वेनाकारणव्यावृत्तिः । येनतज्ज्ञानार्थंकारणत्वंज्ञातव्यंस्यादित्यतआह ॥ **सुखेति** ॥ ब्रह्मणीतिशेषः ॥ **देवस्येति** ॥ मांडूके"भोगार्थंसृष्टिरित्यन्य"इतिपूर्वप्रकृतसृष्टिमयमितिपरामृश्य एषः इच्छारूपःसर्गः देवस्यस्वभावइत्युक्तेरितिभावः । इषुइच्छायामितिधातोर्भावेएषइतिरूपं । उपलक्षणत्वमंगीकृत्याप्याह ॥ **किंचेति** ॥ **ज्ञेयमिति** ॥ ब्रह्मणिप्रकारतयेतिभावः । "सृष्टिरक्षे"त्यादिप्रागुक्तस्मृतेरितिभावः ॥ **तस्मादिति** ॥ स्वरूपलक्षणमेवेत्यन्वयः । गुणपूर्तेरेवस्वरूपलक्षणत्वेकिंकारणत्वेनेत्यतउक्तमुपपादकमिति ॥ तत्प्रकारःप्रागुक्तः । तर्हितेनैवालंकिंगुणपूर्त्येतिचेन्न । ब्रह्मशब्दार्थतयातस्याएवा

सुखस्वभावत्वादसुखव्यावृत्तौकारणस्वभावत्वादकारणव्यावृत्तिरस्तु । "देवस्यैषस्वभावोय" मित्यादिश्रुतेः । किंच जन्महेतुत्वेनैवोपलक्षणेनोपलक्ष्यज्ञानसिद्धेःस्थितिहेतुत्वाद्युपलक्षणांतरवैयर्थ्यं । अस्मन्मतेतुजन्महेतुत्ववत्स्थितिहेतुत्वमपिमुमुक्षुणाज्ञेयं । नत्वन्यज्ञानोपक्षीणं । तस्माद्ब्रह्मशब्दार्थगुणपूर्तिरूपस्वरूपलक्षणोपपादकं"शक्तयःसर्वभावानामचिंत्यज्ञानगोचराः ।

गु० त्याऽऽनंदादेर्ब्रह्मस्वरूपत्वेनासुखव्यावृत्तावपि कारणत्वस्यतत्स्वरूपत्वेप्रमाणाभावात्कारणत्वस्यनब्रह्मस्वभावत्वं ततश्चनाकारणव्यावृत्तिरित्यतस्तत्रप्रमाणमाह ॥ **देवस्यैषइति** ॥ ननुभवन्मतेपिवैयर्थ्यंतुल्यमेवेत्यतआह ॥ **अस्मन्मतइति** ॥ ननुकारणत्वस्यगुणपूर्तिरूपस्वरूपलक्षणोपपादकत्वमयुक्तं शक्तिसामर्थ्यापरपर्यायशब्दवाच्येतस्मिन्मानाभावादित्यतआह ॥ **इत्यादिवचनासिद्धमिति** ॥ नचैतद्वचनंप्रतिबंधकाभावपरतयाऽन्यथासिद्धमितिवाच्यं । यतःसर्वभावानांबीजादिसर्व

SGDF Sri Gargeshwari Digital Foundation

प्र० दौवाच्यत्वादितिभावः। सामर्थ्यरूपत्वेहेतुरित्यादिवचनेति॥ तदर्थःप्रागुक्तः। किंतत्रतंद्बोधकमित्यतउक्तं **यतइति** ॥ "जनिकर्तुःप्रकृति"रितिविहितयायतइतिपंचम्या"कर्तृकरणयोस्तृतीये"तिकर्तरिविहितयायेनेतितृतीययाकर्तृशक्तिरुच्यतइतिध्येयं। जन्मादिकारणत्वंनाम जगज्जननपालनसंहारनियमनादिशक्तिरित्युक्तयाफलोपधानस्याविवक्षितत्वात्पालनसंहरणादेरेकदाविरोधइतिप्रत्युक्तं। इदंकृत्स्नजननादिकमभिप्रेत्य। अन्यथाफलोपधानमपिसार्वकालिकमस्तीतिध्येयं। दाहशक्तेर्यावल्लक्ष्यभावित्वंप्रत्यक्षसिद्धमित्यतोत्रापिश्रुतिसिद्धमित्याह ॥ **एषनित्यइति** ॥ काण्वश्रुतौषष्ठेचतुर्थब्राह्मणेपूर्वंभगवतोमहिमानमुक्त्वा"तदेतदृचाभ्युक्त"मित्युदाहृते"एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्धतेनोकनीया"नितिमंत्रेमहिम्नोनित्यत्वोक्तेः। तथा"परास्यशक्तिर्विविधैवश्रूयत"इतिसाक्षाच्छक्तेःस्वाभाविकत्वश्रुतेरित्यर्थः। ज्ञानबलक्रियेतिसमाहारद्वंद्वः। "सनपुंसक"मितिक्लीबंतत्वंनाश्रितं। यद्वाज्ञानबलाभ्यांसहिताक्रियाज्ञानबलक्रियेति। आदिपदात् "परेतियांप्राहुरजस्रशक्ति"मित्यादेर्ग्रहः। "निर्गुणत्वंचतेनैवनिषिद्धंप्रभुणास्वय"मित्यनुव्याख्यानंहृदिकृत्वाब्रह्मणोनिर्धर्मकत्वमंगीकुर्वतांलक्षणसूत्रारंभोऽयुक्तइ

यतोतोब्रह्मणस्तास्तुसर्गाद्याभावशक्तय"इत्यादिवचनसिद्धं"यतो येने"त्यादिकारकशक्तिवाचिपंचम्याद्युक्तजगज्जन्मादिसामर्थ्यमपिपरमानंदादिवद्यावल्लक्ष्यभाविरूपस्वरूपलक्षणमेव। वह्नेर्दाहशक्तिवत्। "एषनित्योमहिमा

गु० पदार्थानामचिंत्याःज्ञानगोचराःचिंताविषयाःप्रत्यक्षरूपज्ञानाऽविषयाश्च अतःब्रह्मणोपिताःजगत्सर्जनादिविषयाःभावशक्तयः। अचिंत्यज्ञानगोचराइत्यपिपाठः। तत्रनञउभयत्रान्वयः। एकत्रान्वयेपिज्ञानगोचराइत्यस्यदिव्यदृष्टिगोचराइत्यर्थः। नन्वत्रकारणत्ववाचकंकिमस्तीत्यतआह ॥ **यतइति** ॥ ननुतथापिस्वरूपातिरिक्तशक्तिसद्भावेकिंमानमित्यतआह ॥ **एषनित्यइति** ॥ नचानयाश्रुत्याकथंस्वरूपातिरिक्तशक्तिलाभइतिवाच्यं। ब्रह्मणइतिषष्ठ्यास्वरूपातिरिक्तशक्तिसिद्धेर्नस्वरूपे

SGDF Sri Gargeshwari Digital Foundation

प्र० त्याह ॥ **किंचेति** ॥ "अतोजीवैक्यमपिसनिराचक्रेजगद्गुरु"रित्यनुव्याख्यानंहृदिकृत्वा इतोपिनलक्षणसूत्रंयुक्तमित्याह ॥ **किंच स्वरूपं वेति** ॥ यत्तुसुधायां"एतत्सूत्रारंभोजीवैक्यवादिनास्यात्कथंचिद्यदीदंतटस्थंस्यात् । स्वरूपलक्षणमेवेतिचोपपादित"मितितटस्थव्यावर्तकत्व मुक्तं तत्त्वभ्युपेत्यवादेन । अतएवोत्तरत्र"ननुतटस्थेनापिजगत्कारणत्वेनब्रह्मणोजीवैक्यंनिर्गुणत्वंचविरुध्यत"इत्यादिनातस्यव्यावर्तकत्वमुप पाद्यतइतिभावः । "नचमिथ्यागुणत्वंस्यादनिर्वाच्यस्यदूषणा"दित्यनुव्याख्यानंहृदिनिधायाह ॥ **नचमिथ्येति** ॥ येनलक्षणसूत्रारंभः

स्वाभाविकीज्ञानबलक्रियाचे"त्यादिश्रुतेः । किंच । असाधारणधर्मोहिलक्षणंपरिकीर्त्यते ।
तच्चनिर्धर्मकब्रह्मवादिनांयुज्यतेकथं ॥ १ ॥ किंच स्वरूपंवातटस्थंवालक्षणंभेदकंमतं ।
सजातीयाद्विजातीयात्तच्चाद्वैतिमतेकथं ॥ २ ॥ नचमिथ्याभेदसिद्ध्यैमिथ्यालक्षणकीर्तनं ।

गु० णान्यथासिद्धिरितिभावः । नन्वेवमपिसहकारिपरत्वेनापिचरितार्थत्वान्नानयाश्रुत्याशक्तिलाभइत्यतआह ॥ **स्वाभाविकीति** ॥ तथाच नतस्यकार्यंकरणंचविद्यत इतिसहकारिनिषेधात्स्वाभाविकीत्युक्त्याचनागंतुकसहकार्याद्यादायान्यथासिद्धिरितिभावः । एतच्चतर्कतांडवेशक्तावर्थापत्तिपंचकनिरूपणग्रंथेस्पष्टं । यद्वा ननुसाम र्थ्यस्यस्वरूपत्वस्यादृष्टत्वात्कथंजगज्जन्मादिसामर्थ्यस्यब्रह्मस्वरूपत्वमित्यतस्तत्रदृष्टांतमाह ॥ **वह्नेरिति** ॥ ननुपरमानंदादेःस्वरूपत्वस्यप्रमाणेनसिद्धत्वात्तस्यस्वरूपल क्षणत्वेपिकारणत्वस्यतत्स्वरूपत्वेप्रमाणाभावात्कथंस्वाभाविकत्वमित्यतआह ॥ **एषइति** ॥ अनेननित्यत्वमात्रसिद्धावपिनस्वरूपत्वमित्यतःस्वरूपत्वेपिप्रमाणमाह ॥ **स्वाभाविकीति** ॥ निर्धर्मिकब्रह्मवादिनस्तवमतेअसाधारणधर्मरूपलक्षणकथनमयुक्तंचेत्याह ॥ **किंचेति** ॥ **शास्त्रेष्विति** ॥ यतोवेत्यादिष्वित्यर्थः । अन्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यात् । मिथ्यार्थकस्याप्रामाण्यादितिभावः । "अनिर्वाच्यस्यदूषणा"दित्युपलक्षणमित्युक्तंभवति । यदुक्तंलक्षणमात्रंसजातीयविजातीयभेदकमितितत्रसत्यत्वादिकमेवतथानकारणत्वमितियच्छ्रीभाष्यमतंतदनूद्यनिरस्यति ॥ **केचित्त्विति** ॥ तन्मतेसत्यत्वादिस्वरूपंप्रागेवोक्तं । यथाभाष्यमनूद्यतत्रचोद्यपरिहारौश्रुतप्रकाशोक्तावनुवदति ॥ **नचेति** ॥ कारणत्वेनेतरव्यावृत्तावपिनेतरवैजात्यंसिध्यति । तत्तुसत्यत्वादि

मुमुक्षुंतत्वजिज्ञासुंप्रतिशास्त्रेषुशोभते ॥ ३ ॥ नचकारणत्वेश्रुतेरतात्पर्यान्नाप्रामाण्यं । तात्पर्यनिर्णायकैःसूत्रैःप्रत्यधिकरणंसदेवेत्यादिवाक्यंनप्रधानादिकारणत्वपरंकिंतुब्रह्मकारणत्वपरमित्युक्तेरिति । केचित्तु यतोवेत्यादिवाक्येनप्रतिपन्नजन्मादिकारणत्वस्यब्रह्मणःसकलेतरव्यावृत्तंस्वरूपंसत्यज्ञानादिवाक्येनाभिधीयते । नचकारणत्वेनैवलक्षणेनस्वेतरसर्वव्यावृत्तिसिद्धेः किंसत्यादिवाक्येनेतिशंक्यं । यथाहिघटस्यसंस्थानविशेषादिनास्वेतरसर्वव्यावृत्तत्वेपिगंधवत्त्वात्पृथिवीजातीयत्वं । एवंब्रह्मणोजगत्कारणत्वेनस्वेतरव्यावृत्तत्वेपिजीवजडजातीयत्वमितिशंकायां यथाऽबादेर्गंधाभावादपृथिवीत्वं तथाब्रह्मणोपिसोपाधिकसत्त्वादेरभावान्नजीवजडजा

गु० थाशास्त्रस्यातत्वावेदकत्वेनाप्रामाण्यापातादित्यर्थः । ननुतत्रतात्पर्याभावान्नाप्रामाण्यमितिशंकते ॥ **नचेति** ॥ सूत्रैरित्युक्तेरित्यन्वयः । ननुयद्व्यावर्तकंतदेववैजात्यसंपादकमित्यनुपपन्नं । व्याप्त्यभावात् । अबादिगतसंस्थानविशेषस्यपृथिव्यादिव्यावर्तकत्वेपितद्वैजात्यसंपादकत्वाभावादित्यतआह ॥ **अबादेरपीति** ॥ तथाच

प्र० नैवेतिफलितार्थः । तत्रकारणत्वेनैवेतरव्यावृत्तिवद्वैजात्यमपिसिध्यतीतिवक्तुंदृष्टांतद्वयस्याप्युपपादनंविषयमित्याह ॥ **संस्थानेति** ॥ **योगादेवेति** ॥ नतुगंधाभावादित्यर्थः । यद्यतोव्यावर्तकंतत्ततोवैजात्यापादकमित्येतत्संस्थानविशेषेप्रदर्श्ययद्यतोवैजात्यासंपादकंतत्ततोव्यावर्तकमपिनेत्येतदपितत्रैवव्युत्पादयति ॥ **यस्मात्त्विति** ॥ अनेनपराभिमतार्थेदृष्टांतखंडनव्याजेनयद्यतोव्यावर्तकंतत्ततोवैजात्यकरमितिस्वाभिमत

तीयत्वमितिदर्शयितुंनिरुपाधिकसत्यत्वादिलक्षणोक्तेरित्याहुः । तन्न । संस्थानविशेषोहिघटंपटादिभ्यएवव्यावर्तयति । नतुपृथिवीमात्रात् । घटस्यापिपृथिवीत्वात् । एवंचसंस्थानादिकंयेभ्यःपटादिभ्योव्यावर्तयतितद्विजातीयत्वमपितेनैवसिद्धं । अबादेरपिपृथिवीमात्रव्यावर्तकाप्त्वादियोगादेवहिपृथिवीवैजात्यं । यस्मात्तुपृथिवीजातीयात्संस्थानादिनावैजात्यंनसिध्यतितस्माद्व्यावर्तकत्वमपिसंस्थानादेर्नास्ति ।

गु० अप्त्वादिजातेरेवव्यावर्तकत्वात्तस्याएवसिद्धिंप्रत्यपिप्रयोजकत्वसंभवात्संस्थानविशेषस्यव्यावर्तकत्वान्नव्यभिचारइतियद्व्यावर्तकंतद्वैजात्यसंपादकंभवत्येव यद्वैजात्यसंपादकंन तद्व्यावर्तकमपिनभवतीतिभावः । एतेनयथाहिघटस्यसंस्थानविशेषादिनास्वेतरव्यावृत्तत्वेपिगंधवत्त्वात्पृथिवीजातीयत्वमितिदृष्टांतकथनमपिनिरस्तं । येनैवसंस्थानविशेषेणघटस्यस्वेतरव्यावृत्तिसिद्धिस्तेनैवतद्वैजात्यस्यनिषिद्धत्वात । यदुक्तंसत्यज्ञानादिरूपाधिकलक्षणेनजीवादिवैजात्यंसिध्यतीतितत्रवैजात्यंनामतदंतर्भावायो

SGDF Sri Gurgaon Digital Foundation

प्र० व्याप्तिंदृष्टांतस्थतयोपपाद्यदार्ष्टांतिकेयोजयति ॥ प्रकृतेत्त्विति ॥ तदेतदिति ॥ मतद्वयनिराकरणमपीत्यर्थः । अस्येति । अस्यसर्वस्यापि विश्वस्योद्भवादिहेतुत्वंब्रह्मणःस्वलक्षणमेवेतिसूत्रकारोभागवतेदशमस्कंधेऽष्टसप्ततितमेऽध्याये"यत्तत्परंज्योतिरनन्यदद्वय"मित्यादिनास्पष्टमेव कृष्णध्यानव्याजेनाब्रवीदित्यर्थः । इतिशब्दस्यान्वयाप्रतीतेराह ॥ भेदकेति ॥ उत्तरत्रेति ॥ अधिकरणांतरेपीत्यर्थः । अवीविपदित्येत त्पर्यवर्तयदितिव्याख्यातं । तत्राप्रसिद्धेःतत्वप्रदीपोक्तंधातुंपठति ॥ विपरिवर्तनइति ॥ विपइत्यस्माद्धातोर्णिचि"णिश्रिद्रुस्रुभ्य"इतिच ङि"चङी"तिद्विर्वचने"दीर्घोलघो"रित्यभ्यासदीर्घत्वेअडागमादौचसतिरूपमित्यर्थः । एकोनपंचाशत्त्वप्रसिद्धेःकथंपंचाशत्त्वमित्यतआह ॥

प्रकृतेतुकारणत्वंजीवादिभ्योब्रह्मव्यावर्तयतीतिकथंतेनाकारणैभ्योजीवादिभ्योवैजात्यंतदंतर्भावायोग्यत्वादिरूपंनसिध्ये त् । तदनिष्ठजातियोगित्वंतुसत्यज्ञानत्वादिनालक्षणांतरेणापिनसिध्यति । कारणत्ववन्निरुपाधिकसत्यत्वादेरप्यजाति रूपत्वात् । तस्मात्सत्यज्ञानत्वादिवत्कारणत्वमपिस्वेतरसर्वव्यावर्तकमिति । तदेतदभिप्रेत्योक्तमनुव्याख्याने"अस्यो द्भवादिहेतुत्वंसाक्षादेवस्वलक्षणं । कृष्णध्यानच्छलेनैवस्वयंभागवतेब्रवी"दिति । टीकाक्षरार्थस्तु । भेदकाभावेनजिज्ञा स्यतानसंभवतीतीत्यत्रत्यस्येतिशब्दस्येतिश्रुत्यादिसंगतिरितिपूर्वेणान्वयः । एवमुत्तरत्रापिद्रष्टव्यं ॥ [१]पर्यवर्तयदिति॥ विपरिवर्तनइतिधातोरितिभावः ॥ पंचा[२]शन्मरुतइति ॥ एकोनपंचाशन्मरुतांमुख्यवायुनासहपंचाशत्त्वादितिभावः ॥ ए[३]कादशादित्याइति ॥ आदित्यानांद्वादशत्वेपिविष्णुव्यतिरिक्तानांनियम्यानामेकादशत्वादियमुक्तिः । ॥ १४४ ॥

गु० ग्यत्वंवातदनिष्ठजातियोगित्वंवा । आद्यंदूषयति ॥ प्रकृतेत्विति ॥ द्वितीयंदूषयति ॥ तदनिष्ठजातियोगित्वंत्विति ॥ ननुसत्यज्ञानादिलक्षणकथनेनतद

SGDF Sri Gargeshwari Digital Foundations

प्र० एकोनेति ॥ चतुर्भिःसाकमितिश्रुतेरर्थांतरमपिबोध्यमितिभावेनाह ॥ **तत्वप्रदीपेत्विति** ॥ भगवन्निष्ठव्यापारस्यान्याधीनत्वप्रतीतेराह ॥ **सृष्टीति** ॥ ७ ॥ **इतिजन्माधिकरणंसंपूर्णं** ॥ २ ॥

तत्वप्रदीपेतु"आदित्यावसवोरुद्रामरुतश्चाश्विनावपि । बृहस्पतिश्चकामश्च(मनु) मुनिर्दक्षोविनायकः । भृगुश्चैवानिरुद्धश्चधर्मोनिर्ऋतिरेवच । कुबेरसहितादेवा नवतिःसंप्रकीर्तिताः । अनंतोगरुडोवायुश्चत्वारोब्रह्मणासहे"तिवचनानुसारेणे यंश्रुतिःप्रकारांतरेणव्याख्याता । सृष्टिस्थितीत्यादिभाष्येप्रयोजकव्यापारवा चिनासृष्ट्यादिशब्देनप्रयोज्यव्यापारोजन्मादिर्लक्ष्यते । लक्षणाप्रयोजनंब्रह्मणः स्रष्टृत्वादिकमेवनतूपादानत्वमितिप्रदर्शनं ॥ ७ ॥ **जन्माधिकरणंसंपूर्णं** ॥ २ ॥

गु० निष्ठसत्यत्वादिजातियोगित्वंसिध्यतीत्यतआह ॥ **कारणत्वादिवदिति** ॥ धातोः धातुव्याख्यानादित्यर्थः ॥ **तत्वप्रदीपेत्विति** ॥ अत्रयद्यपिद्विनवतिसंख्याकादेवाःप्रतीयंतेतथापिअनंतोगरुडोवायुरितिवाय्वोःपृथग्ग्रहणेनमरुत्सुवायुपरित्यागेनाश्विनोरेकत्वविवक्षयाचनवतित्वंद्रष्टव्यं । अथवामुनिरित्यपिबहुपाठदर्शनाद्दक्षविशेषणत्वेनमनुपरित्यागेनेत्यप्याहुः ॥ ७ ॥ **जन्माधिकरणंसंपूर्णं** ॥ ७ ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐशास्त्रयोनित्वात्ॐ ॥ संगतिफलेआह ॥ **उक्तस्येति** ॥ पूर्वोक्तमुपजीव्यास्यप्रवृत्तेरुपजीव्योपजीवकभावरूपावा एतस्मिन्सतिपूर्वप्रमेयसिद्धेर्हेतुहेतुमद्भावरूपावा पूर्वोक्तमतिव्याप्तमित्याक्षिप्यसमाधीयतइत्याक्षेपकीवेत्यर्थः । अतिव्याप्तिनिरासश्चफलमित्युक्तंभवति । अतिव्याप्तिप्रकारश्चवक्ष्यतइतिभावः । इयंचटीकाया"मन्यनिष्ठत्वनिरासा"दित्युक्त्यासूचिता सुधायांकंठोक्ताच । यत्तुन्यायविवरणटीकाया "मतिव्यापकमित्यापातत: वस्तुतस्तुजीवविशेषेसंभवान्नालौकिकंकल्पयितुमल"मित्यादिनाविष्णवाख्यधर्म्यपलापेनपूर्वपक्षकरणंतत्तुपक्षांतरमभिप्रेत्येतिध्येयं । अतएवतत्रपूर्वतनग्रंथे "साधारणंलक्षण"मित्यतिव्याप्तिरेवप्रदर्शितेतिध्येयं । नन्वत्रकारणत्वंविष्णोरेवनान्यत्रेत्यत्रसूत्रेन किमपिप्रमाणमुच्यतइतिचेन्न । जगत्कारणेऽनुमानंवादुरागमोवानमानं किंतुशास्त्रशब्दिता:सदागमाएवमानमित्युक्तौविष्णुरेवजगत्कारणं नशिवादिरित्यतिव्याप्तिनिरास:फलिष्यतीतितात्पर्यात् । तथाचजगत्कारणेशास्त्ररूपंप्रमाणमुच्यतइत्यर्थः । स्मृत्यधिकरणेन द्वितीयाध्यायाद्याधिकरणेनेत्यर्थः । संदेहभेदाद्वातद्बीजभेदाद्वानिरसनीयभेदाद्वापूर्वोत्तरपक्षन्यायभेदाद्वाऽपौनरुक्त्यमाशंक्याद्यंनिराह ॥ **नचेति** ॥ इह

॥ ॐशास्त्रयोनित्वात्ॐ ॥ ३ ॥ उक्तस्यलक्षणस्यातिव्याप्तिनिरासायप्रमाणमुच्यतइत्यनंतरसंगतिः । नन्वेत"त्स्मृत्यनवकाशदोषे"तिस्मृत्यधिकरणेनपुनरुक्तं । तत्रेवात्रापिसांख्यपाशुपतादिदुरागमानामपिनिरासात् । नचेहकर्तृत्वादिकंविष्णोरन्यस्यवेतिसंदेहः तत्रतुविष्णोःकर्तृत्वादिकंयुक्तमयुक्तंवेति ततोभेदइतिवाच्यं । ॥ १४५ ॥

गु० ॥ ॐशास्त्रयोनित्वात्ॐ ॥ **संगतिरिति** ॥ आक्षेपिकींत्यर्थः ॥ **एतदिति** ॥ अधिकरणमित्यर्थः । नन्वत्रानुमानेनलक्षणस्याप्यतिव्याप्तिमाशंक्यनिराक्रि

प्र० तत्रटीकायांतथैवसंदेहोक्तेरितिभावः । एवमग्रेपिध्येयं ॥ **एकेनेति** ॥ विष्णोरेवेदंलक्षणमित्यत्रत्येनैकेनसिद्धांतेनातिव्याप्त्यसंभवफलकपूर्वपक्षप्रापकसंदेहद्वयस्यापिनिरासंभवादित्यर्थः ॥ **अतिप्रसंगादिति** ॥ पूर्वनयेपिब्रह्मशब्दोक्तोजीवोविष्णुर्वेतिवद्विष्णौयुक्तोनवेत्यादिसंदेहसंभवादित्यर्थः । युक्तिपादत्वात्तत्रयुक्तिविरोधःपरिह्रियतइत्यतआह ॥ **नचेति** ॥ स्मृतौशिवादेःकारणत्वोक्तेरित्यादिरूपायायुक्तेरत्रेवतत्रापिनिरासादितिभावः । द्वितीयंप्रत्याह ॥ **एतेनेति** ॥ **पूर्वन्यायेति** ॥ पूर्वत्रकारणत्वस्यविष्णावुक्तत्वादितिभावः ॥ **प्रसिद्धेरपीति** ॥

एकेनैवसिद्धांतेनसंदेहद्वयनिरासात् । संदेहप्रकारभेदमात्रेणचाधिकरणभेदेऽतिप्रसंगात् । नचस्मृत्यनंतर्गतयुक्तिविरोधपरिहारःतत्राप्यस्ति । एतेन तत्रसमयविगानंसंदेहबीजं अत्रतुपूर्वन्यायप्रसिद्धीइतिनिरस्तं । प्रसिद्धेरपिसमयमूलत्वात् ।

गु० यते तत्रागमेन तथाचकथंतयोःपौनरुक्त्यमित्यतआह ॥ **तत्रेवेति** ॥ संदेहप्रकारभेदेनाधिकरणभेदइत्यतआह ॥ **संदेहेति** ॥ एवंजिज्ञासाधिकरणेपिब्रह्मजिज्ञास्यंनवा ब्रह्मजिज्ञासाकर्तव्यानवेतिसंदेहप्रकारभेदस्यवक्तुंशक्यत्वेनजिज्ञासाधिकरणान्यपिअनेकानिस्युरित्यतिप्रसंगादित्यर्थः । ननुऋगादिशास्त्रैकसमधिगम्यत्वात्कारणत्वस्य तदन्यदुरागमानांनकारणत्वेप्रामाण्यमित्येतदधिकरणसिद्धांतेन दुरागमादिनारुद्रादेःकारणत्वमित्येतदधिकरणीयसंदेहनिरासेपि कारणत्वंयुक्तमयुक्तंवेतिसंदेहनिरासाभावात्कथमेकेनैवसिद्धांतेनसंदेहद्वयनिरासइत्यतः स्यादेतदेवंयदितत्रस्मृत्यनंतर्गतयुक्तिविरोधःपरिहृतःस्यात् । नचैवं तासामपियुक्तीनांस्मृत्युक्तत्वेस्मृतीनामप्रामाण्येतदुक्तयुक्तीनामप्रामाण्यात्स्मृतीनामप्रामाण्यप्रतिपादकेनानेनयुक्तःसंदेहद्वयनिरासइत्याह ॥ **नचस्मृत्यनंतर्गतेति** ॥ ननुसंदेहबीजभेदाद्भेदइत्यतआह ॥ **एतेनेति** ॥ **प्रसिद्धेरिति** ॥ तथाचतस्यनभेदकत्वमितिभावः । तद्वागमानांकंठतोनिरासार्थंस्मृत्यधिकरणवदनुमानस्यकंठतोनिरासायाधिकरणांतर

SGDF Shri Gangadhar Digital Foundation

प्र० अत्रापितदेवबीजमितिभावः । तृतीयेपिनिरसनीयःकिमागमएवोतानुमानसमुच्चितोथानुमानमात्रं । नाद्यः । आगमस्यात्रापिनिरासादित्युक्तत्वात् । तत्रविशेषमाशंक्याह ॥ नचेति ॥ दुरागमानामित्यर्थः । कारणेशास्त्रंप्रमाणमित्युक्त्यार्थाद्दुरागमानांनिरासःकृतःस्यात् । तत्रतुप्रबलवैष्णवस्मृतीनांनिरवकाशतोक्त्या“इतरेषांचानुपलब्धे”रित्यनेनविसंवादोक्त्याचकंठतोनिरासइतिभावः ॥ कंठतइति ॥ इहत्वर्थादितिभावः । “कामाच्चे”ति“तर्काप्रतिष्ठानादि”त्यत्रचतर्कस्याप्रामाण्यंकंठतउच्यतइतिकारणेअधिकरणांतरेतिचोक्तं । तर्ह्यस्तुद्वितीयमित्याशंक्यनिरस्यति ॥ नचेति ॥ तृतीयस्त्वग्रेनिरसिष्यते । “शैवाद्यागमसंप्राप्तदृष्टगेनफलेनतु । तद्वाक्योपनयान्यच्चप्रमाणत्वेनुमीयते । ईशवाक्यत्वतइतिचेत्तद्व्यभिचारिणा । अप्रामाण्यानुमाचस्या”दित्यत्रत्यमनुव्याख्यानं“आप्तैःप्रत्यक्षतोदृष्टे”त्यादितत्रत्यंचहृदिकृत्वाचतुर्थमाशंक्यनिराह ॥ नचेति ॥ तथाचविसंवादविप्रलंभमूलत्वादिरूपन्यायभेदाद्भेदइतिभावः । ननुतर्हिविसंवादस्तत्रव्युत्पाद्योत्रतुविप्रलंभमूलत्वं । तावतापिन्यायभेदाद्भेदोस्तु । अतएवात्रभाष्यं । “अतोन्योग्रंथविस्तारोनैवशास्त्रंकुवर्त्मत”दित्यादीत्याशंक्यनिराह ॥ नचेति ॥ संवादे

नचात्रागमानामर्थान्निरासः । तत्रतुकंठतइत्येतावतैवापौनरुक्त्यं । अनुमानस्यापिकारणेप्रामाण्यस्यकंठतोनिषेधायाधिकरणांतरारंभप्रसंगात् । नचेहानुमानस्यापिनिरासान्नगतार्थतेतिवाच्यं । आगमांशेगतार्थत्वात् । अनेनाधिकरणेनतस्यगतार्थत्वापरिहाराच्च । नचात्रदृष्टफलेषुसंवादेनप्रामाण्येप्राप्तेदृष्टफलेष्वेवविसंवादेनाप्रामाण्यमितिसिद्धांतः । ॥ १४६ ॥

गु० मपिक्रियेतेत्याह ॥ अनुमानस्यापीति ॥ आगमांशइति ॥ तेनास्येतिशेषः ॥ अनेनेति ॥ स्मृत्यधिकरणापेक्षयाधिकविषयत्वेनतेनास्यपौनरुक्त्याभावेपि

SGDF Sri Gangeshwar Digital Foundation

प्र० नप्रामाण्यमितिप्राप्तेविसंवादेनाप्रामाण्यमित्येतदत्रैवानुव्याख्यानेप्रतीयतेतत्रत्वाप्तैरितिपूर्वपक्षानुव्याख्याने"इतिचेद्यद्यशेषज्ञारुद्राद्याहरिपूर्वकाः। किंनाशेषविद्"इतिसिद्धांतानुव्याख्यानेचविचार्यमाणेसर्वज्ञत्वात्प्रामाण्यंबलवद्विरोधादप्रामाण्यमित्येवप्रतीयतइतिनविनिमयादपौनरुक्त्यमित्यर्थः । तथाचन्यायभेदोसिद्धइतिभावः । ननु"अनुमानतोन्येनकल्पनीया"इत्यत्रत्यभाष्यानुरोधादनुमानमेवेहनिरस्यतेइतिप्रागुक्ततृतीयमाशंक्याह ॥ **नचेति** ॥ **सौत्रेति** ॥ अनुमानस्यदुरागमानांचनिरासायशास्त्रपदं । तस्याशास्त्रमात्रव्युदासकत्वादितिभावः । चतु

तत्रतुसर्वज्ञत्वादिनाप्रसिद्धप्रणीतत्वात्प्रामाण्येप्राप्तेप्रबलस्मृत्यादिविरोधाद्विप्रलंभमूलमप्रामाण्यमितिसिद्धांतइतिवाच्यं । "इतरेषांचानुपलब्धे"रितिसूत्रेणविसंवादस्यतत्रैवोक्तेः । नचोक्तसिद्धांतयोर्विनिमयादपौनरुक्त्यं । अनुव्याख्यानविरोधात् । अत्रह्यनुव्याख्यानं "शैवाद्यागमसंप्राप्तदृष्टगेनफलेनतु"इति तत्रतु"आप्तैःप्रत्यक्षतोदृष्ट्वा"इति । नचेहानुमानमात्रनिरासादगतार्थतेतिवाच्यं । सौत्रशास्त्रपदेनदुरागमानामपिनिरासात् । अस्मिन्नधिकरणेऽनुव्याख्याने "तर्हिपाशुपतादिशास्त्रेणरुद्रादेःकारणत्वंस्या"दित्यादिटीकायांचागमावष्टंभेनापिपूर्वपक्षयित्वातन्निरासाच्चेति ।

गु० एतदपेक्षयातस्याधिकविषयत्वाभावेनैतेनाधिकरणेनतस्यपौनरुक्त्यंस्यादित्यर्थः ॥ **विनिमयादिति** ॥ स्मृत्यधिकरणेदृष्टफलेषुसंवादेनप्रामाण्येप्राप्तेदृष्टफलेष्वेवविसंवादप्रदर्शनेनाप्रामाण्यमितिसिद्धांतः । शास्त्रयोनित्वाधिकरणेसर्वज्ञत्वादिनाप्रसिद्धप्रणीतत्वात्प्रामाण्यमितिप्राप्तेप्रबलस्मृत्याविरोधात्विप्रलंभमूलकमप्रामाण्यमितिसिद्धांतइतिविनिमयादित्यर्थः । ननुसौत्रशास्त्रपदेनानुमानमेवविवक्ष्यतइत्यतआह ॥ **अस्मिन्निति** ॥ अन्यथाटीकानुव्याख्यानविरोधःस्यादितिभावः । अधिकरणद्वयेपिसिद्धांतभेदान्नपौनरुक्त्यमित्याह ॥ **उच्यतइति** ॥ अधिकरणसिद्धांतहेतुभेदइत्यत्रज्ञापकमाह ॥ **अतएवेति** ॥ सिद्धांतहेतुभेदोयतोतएवेत्यर्थः । ननुतर्हिश्रु

SGDF
Sri Gargeshwari Digital Foundation

प्र० र्धासमाधास्यन् पूर्वोत्तरपक्षप्रापकहेतुभेदाद्भेदइतित्रेधासमाधातुमादौसूत्रपदसूचितसमाधीनाह ॥ **तत्रेति** ॥ स्मृत्यधिकरणइत्यर्थः । आदिपदेनबौद्धार्हतादि । पंचरात्रादीतिपुराणभारतादिग्राह्यं । "स्मृत्यनुमानाभ्या"मितिभाष्येऽनुमानपदंस्मृतेः अनुव्याख्यानेचागमपदमनुमानस्योपलक्षणमितिभावः ॥ **श्रुत्यादीति** ॥ श्रुतिस्मृतिरूपेणेत्यर्थः । शास्त्रपदस्योभयार्थत्वात् । अतएवभाष्ये"ऋग्यजुःसामाथर्वाश्चभारतं पंचरात्रक"मित्यादिनास्मृतयश्चोपात्ताइतिभावः ॥ **गुणेति** ॥ आप्तोक्तत्वगुणहीनायाइत्यर्थः । अतएवपिपीलिकालिपिनिभायाइति । वक्ष्यतेचानुव्याख्याने"आप्तैःप्रत्यक्षतोदृष्ट्वाप्रोक्तमर्थंकथंश्रुतिः । पिपीलिकालिपिनिभावारयेत्सर्वगाहित"इति । तथाच "दुर्बलस्यप्रमाणस्य

उच्यते। तत्रपाशुपतादिस्मृत्यापूर्वपक्षेपंचरात्रादिस्मृत्यासिद्धांतः। अत्रतुस्मृत्यनुमानाभ्यांपूर्वपक्षेश्रुत्यादिरूपेणशास्त्रेण । अतएवतत्रसूत्रेनान्यस्मृतीतिस्मृतिशब्दः । अत्रतुशास्त्रशब्दः । नचतर्हीहश्रुत्यादिनासिद्धांतितेपुनस्तत्रस्मृतिमात्रेणपूर्वपक्षानुदयइतिशंक्यं । गुणहीनायाःपिपीलिकालिपिनिभायाःश्रुतेर्गुणवत्यापाशुपतादिस्मृत्याविरोधेनान्यपरत्वेवाच्ये श्रुतिमूलपंचरात्रादिस्मृतेरप्यन्यपरत्वं पाशुपतादेस्तुशिवादिप्रत्यक्षमूलत्वमितितत्रपूर्वपक्षेप्राप्ते तिष्ठंतुतावच्छ्रुतयः

गु० तेःप्रबलत्वात्स्मृतेश्चदुर्बलत्वात्प्रबलप्रमाणेनसिद्धांतितेदुर्बलप्रमाणेनपूर्वपक्षोनोदेतीत्याशंक्यनिषेधति ॥ **नचतर्हीति** ॥ उपलक्षणमेतत् सिद्धांतेपिस्मृत्यादेःसत्त्वेन पाशुपतादिमात्रेणनपूर्वपक्षइत्यपिद्रष्टव्यं । ननुपाशुपतादिस्मृत्यादेरपिश्रुतिमूलत्वादन्यपरत्वंस्यादतआह ॥ **पाशुपतादेस्त्विति** ॥ ननुश्रुतिपरित्यागेनस्मृतिभिः सिद्धांतकरणे"पिपीलिकालिपिनिभे"त्यादिपूर्वपक्ष्युक्तंसिद्धांतिनोनुमतमितिस्यादित्यतआह ॥ **तिष्ठंत्विति** ॥ स्मृतिमात्रेणयदाऽभिमतार्थसिद्धिस्तदाकिंमुवक्तव्यंश्रु

प्र० बलवानाश्रयोयदा। तदापिविपरीतत्वंशिष्टाकोपेयथोदितं"इतिन्यायेनस्मृतेरपिबाधकत्वमितिभावः। ननुसमन्वयनयेपाशुपतादिस्मृत्यानवेदस्यार्थनिर्णयोपितूपक्रमादिभिरेवेतिनिर्णीतत्वात्कथंस्मृत्याश्रुतेरन्यार्थत्ववर्णनेनपूर्वपक्षइतिचेन्न । स्मृतेःप्रत्यक्षमूलत्वेनप्रबलतयातद्विरोधेननिर्मूलश्रुतिप्रामाण्यायोगात्स्मृत्यनुसारेणश्रौतोपक्रमादिकंनेयं । वक्ष्यतेचतत्रैवमेवेत्याशयात् ॥ **यद्वेति** ॥ अस्मिन्पक्षेभाष्यंनोपलक्षणत्वेनव्याख्येयमितिभावः ॥ **यत्त्विति** ॥ तथाचतदधिकरणप्रमेयमेवेहदर्शितं । नत्वेतदधिकरणार्थत्वेनेत्युक्तंभवति । कथमनेनशिष्यहिततेत्यतो दृष्टांतोपपादनेनेत्याह ॥ **तदिति** ॥ शास्त्रपदेनानुमानदुरागमयोरप्रामाण्यंभाति । अनुमानमात्राप्रामाण्येशब्दयोनित्वादित्येवब्रूयात् । तत्रचदुरागमाप्रामाण्यंस्मृत्यधिकरणसिद्धमिहशास्त्रपदेनसूच्यमानंसिद्धंसाध्यतयोपकल्प्यतइत्यनुमानाप्रामाण्येदृष्टांतत्वेनोपयुज्यते । तदनुप

विष्ण्वादिप्रत्यक्षमूलाभिःपंचरात्रादिस्मृतिभिर्विवक्षितार्थसिद्धेरितिसिद्धांतोपपत्तेः । यद्वा' अत्रानुमानेनपूर्वपक्षेतदयोग्यत्वेनसिद्धांतः । तत्रतुशैवाद्यागमेनपूर्वपक्षेतदप्रामाण्येनसिद्धांतइतिभेदः । अतएवात्रा"नुमानत"इतिभाष्यं तत्रतु"तेषांवचनविरोध"इति । यत्त्वनुव्याख्यानेस्मृत्यधिकरणप्रमेयमिहशिष्यहितायव्यवहृतं तदत्रशास्त्रपदेनानुमानस्यजगत्कारणतायामप्रामाण्येदृष्टांतीकृतस्यदुरागमस्याप्रामाण्यमुपपादयितुं ।

गु० तिभिरितितावच्छब्दार्थः। ननुशास्त्रयोनित्वाधिकरणेस्मृत्यनुमानाभ्यांपूर्वपक्षइत्युक्तमयुक्तं । तथासति"अनुमानतोन्येनकल्पनीया"इतिभाष्येण"अनुमानेनरुद्रादेरपिकारणतासाधनसौलभ्यात्"इतिटीकयाचविरोधःस्यात् । तदनुसारेणात्रानुमानमात्रनिरासकत्वस्यैवप्रतीयमानत्वादित्यस्वरसादाह ॥ **यद्वेति** ॥ तर्हिदुरागमप्रा

SGDF

प्र० पादनेचोक्तोर्थोनशिष्यहृद्यारोहतइतितद्वर्णनंशिष्यहितकरमितिभावः । अनेनसौत्रशास्त्रपदप्रयोगस्यापिगतिरुक्तांभवति ॥ **अनेनैवेति** ॥ दृष्टांताभिप्रायेणेत्यर्थः ॥ **भाष्यइति** ॥ "ऋग्यजुःसामाथर्वाश्चे"तिभाष्यइत्यर्थः । यत्तुसुधायामागमानुमानाभ्यांपूर्वपक्षकरणंतत्तुपक्षांतरमभिप्रेत्येतिभावः । अस्मिन्पक्षेभाष्यानुभाष्यावतारिकाप्येवमेवदातव्येतिभावः । इदानीं"पाशुपतादिशास्त्रेणरुद्रादेःकारणत्वंस्या"दितिटीकावाक्यस्य सुधायांच"पूर्वपक्षमारचयतिशैवादी"त्युपक्रमस्य"एवमागमादनुमानाच्चान्येषांजगज्जन्मादिकारणत्व"मित्युपसंहारादेश्चस्वारस्यानुरोधेनपक्षांतरमाह ॥ **अथवेति** ॥ **अन्यत्रेति** ॥ दृष्टफलइत्यर्थः । कारणत्वेमानंनेतिपदच्छेदः । उभयत्रसुधायांतथोपलंभेपिटीका

अनेनैवाभिप्रायेणात्रभाष्ये ऋगादिकंशास्त्रंनतुशैवादिकमित्युक्तं । अथवातत्रदृष्टफलेषुसंवादादिनाप्रामाण्येप्राप्तेऽतिहेयत्वव्युत्पादनायदृष्टफलेष्वेवबहुलंविसंवादादिनाऽप्रामाण्यं क्वचित्क्वचित्संवादस्तुकाकतालीयइत्यागममात्रासाधारणन्यायव्युत्पादनं । इहतुदृष्टफलेष्वंगीकृत्यप्रामाण्यमन्यत्रप्रामाण्यंचेत्कारणत्वेपिप्रामाण्यमितिप्राप्ते"नावेदवि"दित्यादिश्रुतेः

गु० माण्यव्युत्पादनपरत्र्मेतदधिकरणस्थमनुव्याख्यानमयुक्तमित्यतआह ॥ **यत्त्विति** ॥ **अनेनैवेति** ॥ अनुमानस्यजगत्कारणतायामप्रामाण्येदृष्टांतीकृतदुरागमाप्रामाण्योपपादनाभिप्रायेणैवेत्यर्थः । नन्वेतदयुक्तं । तथासत्येतदधिकरणीयभाष्यटीकानुव्याख्यानसुधाविरोधः । तत्रदुरागमनिरासकत्वस्यस्पष्टंप्रतीयमानत्वात् । अन्यथातुगौणत्वापत्तेः । किंच अनुमानमात्रनिरासेशास्त्रागम्यत्वादित्येववक्तव्यं । एकपदास्वारस्यंचटीकायांस्यात् । अपिच शास्त्रपदेनानुमानवद्दुरागमस्यापिनिरासप्रतीतेर्नानुमानमात्रनिरासपरंसूत्रमित्यस्वरसादाह ॥ **अथवेति** ॥ तथाचसाधारणाऽसाधारणन्यायभेदव्युत्पादकत्वादधिकरणद्वयस्यनपौनरुक्त्यमितिभावः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० यामनुपलंभादाह ॥ **अतएवेति** ॥ शास्त्रैकेत्येकपदेनानुमानदुरागमयोर्व्यावर्त्यत्वादितिभावः । अस्मिन्पक्षेप्रत्यक्षस्यापिव्यावर्त्यत्वप्रतीताव पितस्यजगत्कारणेऽप्रसक्तेर्नतेनेहपूर्वपक्षःकृतः । एवंचदुरागममात्रनिरासकोन्यायस्तत्र अत्रतुदुरागमानुमाननिरासकइतिन्यायभेदाद्भेदइ त्युक्तंभवति । फलभेदाद्भेदमाह ॥ **यद्वेति** ॥ **नचरुद्रादौसममिति** ॥ साधारणमित्यर्थः । तत्राद्यतृतीयचतुर्थेषुस्मृत्यनुमानाभ्यांपूर्वप क्षोभिप्रेतइतिटीकाद्वयस्वारस्यं भाष्यानुव्याख्यानयोरुपलक्षणत्वकल्पनमेकं द्वितीयेतुनोपलक्षकत्वकल्पनमितिभाष्यस्थानुमानपदस्वारस्यमि तिज्ञेयं । नन्वंत्यपक्षे तत्रत्येनसिद्धांतेन विष्णौकारणत्वसत्त्वमात्रापादकेनात्रत्यपूर्वपक्षानिरासेपि अत्रत्येनतत्रत्यपूर्वपक्षनिरासस्संभवात्किंतेने

कारणत्वेनमानमित्यनुमानागमसाधारणन्यायव्युत्पादनं । अतएवात्र“कारणत्वस्यशास्त्रैकगम्यत्वा”दितिटीका । तत्रतु“अवैदिकस्मृतीनामप्रमाणत्वा”दिति । यद्वा अत्रविष्णोरन्येषांचकारणत्वमितिसमुच्चयेनलक्षणस्यातिव्या प्त्यापूर्वपक्षे विष्णोरेवेत्यवधारणेनसिद्धांतः । तत्रतुविष्णोःकारणत्वंनेत्यसंभवेनपूर्वपक्षेऽस्तीतिसिद्धांतः । अतए वात्रटीकायां “विष्णोरिवान्यस्याप्यस्तिनवे”तिसंदेहः । “कारणत्वस्यभगवदेकनिष्ठत्वाभावा”दितिपूर्वपक्षोपसं हारश्च । तत्रतु“युक्तंनवे”त्येवसंदेहः । “नविष्णोःकारणत्वंसिध्यती”तिपूर्वपक्षोपसंहारश्च । सुधाप्यत्र “अतिव्या प्तिमाशंक्ये”ति तत्रतु“शिवप्रभृतीनामेवकारणत्व”मिति । न्यायविवरणंचात्र“नचरुद्रादौसममेतल्लक्षण”मिति ।

गु० स्मृत्यधिकरणे आगममात्रसाधारणन्यायव्युत्पादनं अत्रपुनरनुमानागमसाधारणन्यायव्युत्पादनमितिप्रमाणद्वारकप्रमेयभेदेनाधिकरणयोर्भेदउक्तः । इदानींसाक्षात्प्र मेयभेदेनैवभेदमुपपादयितुमाह ॥ **यद्वेति** ॥ ननुससमुच्चयेनलक्षणस्यातिव्याप्त्यापूर्वपक्षकरणमयुक्तं पूर्वपक्षिणाशैवाद्यागमप्रामाण्यांगीकारेणतत्रविष्णोःकारणत्वनिषे

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिचेन्न । तेनकारणत्वसत्त्वप्रसिद्धावेवविष्णोरेवान्यस्यापिवेतिविचारावसरात् । भावार्थनयेनस्वर्गकामनयस्येवानेनतस्यावैयर्थ्यात् । दुरागमस्याप्तोक्तत्वेनाप्रामाण्यासंभवात्प्रामाण्येवाच्येवेदप्रामाण्यापेक्षयागमप्रामाण्यस्यबलवत्तयापूर्वपक्षेतन्निरासार्थत्वेनचसार्थक्यादिति ॥ **यद्यपीति** ॥ पाशुपताद्यागमानांपरमाप्तसर्वज्ञपशुपत्यादिप्रणीतत्वेनप्रमाणत्वात्तत्ररुद्रादेरेवकारणत्वोक्तेःनविष्णोःकारणत्वमितिवा प्रागुक्तन्यायविवरणटीकोक्तरीत्यावापूर्वपक्षयितुंशक्यतइत्यर्थः ॥ **वक्ष्यमाणेइति** ॥ ''नविलक्षणत्वा''दित्यत्रस्वतःप्रामाण्यं''तत्तुसमन्वया''दित्यादौ विष्णुपरत्वंचवक्ष्यमाणमुपेत्येत्यर्थः । समबलतां पाशुपतादिनाश्रुत्यागमयोः ॥ **तत्तत्कालेति** ॥ यथा ''सर्वेभ्यःकामेभ्योदर्शपूर्णमासा''वित्यत्रसर्वशब्दोयोग्यसर्वकामपरस्तथेतिभावः । संकोचापत्तेराह ॥ **सर्वेति** ॥ **त्वन्मतइति** ॥ असंकुचितसर्वस्रष्टृत्ववादिमतइत्यर्थः । लङो

यद्यप्यागमप्रामाण्यवादिनेहाप्यसंभवोवक्तुंशक्यः । तथापिवक्ष्यमाणेश्रुतेःस्वतःप्रामाण्यविष्णुपरत्वेसमबलतांचोपेत्यकालादिभेदेनाविरुद्धंद्वयोःकर्तृत्वं श्रुत्यादौ''सइदंसर्वमसृजते''तिविष्णवादेःसर्वकारणत्वोक्तिस्तुतत्तत्कालसृज्याभिप्राया सर्वस्रष्टृत्वयोग्यताभिप्रायावा । त्वन्मतेप्यागामिन्यसृजतेत्यादिनिर्देशायोगात् ।

गु० धेनासंभवस्यैववक्तुंशक्यत्वादित्यभिप्रायेणशंकते ॥ **यद्यपीति** ॥ ''वक्ष्यमाणेश्रुतेःस्वतःप्रामाण्यविष्णुपरत्वे''इतिद्वितीयाद्विवचनं । वक्ष्यमाणंयच्छ्रुतेःस्वतःप्रामाण्यंतच्चाभ्युपेत्येतिसंबंधः । तथाचपूर्वपक्षिणाश्रुतिप्रामाण्यांगीकाराद्देशकालव्यवस्थयाऽविरोधसंभवाच्चातिव्याप्त्यापूर्वपक्षोयुक्तइतिभावः । ननुद्वयोःकर्तृत्वेविष्णोःसर्वकारणत्वप्रतिपादकश्रुतिविरोधइत्यतआह ॥ **श्रुत्यादाविति** ॥ नन्वेवंसर्वशब्दस्यसंकोचःस्यादित्यतआह ॥ **सर्वेति** ॥ नकेवलंमयैवसर्वशब्दगतिर्वक्तव्या । किंतु त्वयापि । अन्यथाऽऽगामिसर्जनस्याकृतत्वादसृजतेतिभूतनिर्देशोनस्यादित्याह ॥ **त्वन्मतेपीति** ॥ ननुरुद्रस्यकर्तृत्वेतन्निषेधकश्रुतिविरोधः विष्णोःकर्तृत्वेचतन्नि

प्र० भूतार्थत्वादितिभावः ॥ **यथोदितेत्यादि** ॥ द्वितीये''नामरूपविशेषनिंदाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखांतरेकर्मभेदःस्या''दित्यंतिमाधिकरणे अनेकशाखास्वाम्नातमग्निहोत्रादिकंभिन्नमभिन्नंवेतिविशये नामरूपादिभेदात्''प्रातःप्रातरनृतंतेवदंतिपुरोदयाज्जुह्वतियेग्निहोत्रं । दिवाकीर्त्यमदिवाकीर्तयंतःसूर्योज्योतिर्नतदाज्योतिरेषा''मिति''यथाऽतिथयेप्रद्रुतायाशून्यंहरेयुस्तादृक्तद्यदुदितेजुहोतीतिचशाखाभेदेनोदितानुदितहोमनिंदाश्रवणाच्चभिन्नमितिप्राप्ते एकस्यांविहितस्यकर्मणःशाखांतरेपुरुषांतरंप्रतिविधिसंभवान्निंदायाश्च नहिनिंदाऽनिंद्यंनिंदितुंप्रवर्तते । अपितुविधेयंस्तोतुमितितत्तच्छाखाविहितकर्मस्तुतिपरत्वेनोपपत्तेर्नकर्मभेदइतिसिद्धांतितं''एकत्वेपिपराणी''तिसिद्धांतसूत्रे । तथाचतत्रयथेतरनिंदातत्तद्विधेयस्तुतिपरातथेहापीत्यर्थः । तथाचपूर्वसूत्रेऽस्येत्यस्यविष्णुसृज्यप्रपंचमात्रपरतायावाच्यत्वेनकतिपयपदार्थमात्रकर्तृत्वस्यशिवादावपिसत्त्वाल्लक्षणमतिव्याप्तमितिवा वक्ष्यमाणदिशासर्वकर्तृत्वेऽसंभवइतिवापूर्वपक्ष्याशयइतिभावः । एतेन''तर्हिपाशुपतादिशास्त्रेणरुद्रादेःकारणत्वंस्या''दितिटीका आगमावष्टंभपूर्वपक्षसुधाचैवमेववर्णनीयेत्युक्तंभवति । यदत्राहकश्चित्''सदेवसोम्ये''त्यादिकारण

श्रुतौशिवस्यागमेचविष्णोःकारणतानिषेधस्तुयथोदितहोमादिनिंदाऽनुदितहोमादिस्तुतिपरा ।

गु० षेधकशैवाद्यागमविरोधइत्यतआह ॥ **श्रुतावित्यादि** ॥ अत्रश्रुतौशिवस्यागमेचविष्णोःकारणत्वनिषेधस्तुविष्ण्वादेःकारणताविधिपरइतिसंबंधः । तत्रविष्ण्वादेरित्यत्रादिपदेनरुद्रादेःपरिग्रहः । तथाचश्रुतौशिवस्यकारणतानिषेधोविष्णोःकारणताविधिपरः आगमेविष्णोःकारणतानिषेधस्तुरुद्रस्यकारणताविधिपरइतियोजना । नन्वन्यनिषेधस्यान्यविधिपरत्वमदृष्टंकथंकल्पनीयमित्यतआह ॥ **यथेति** ॥ अत्रप्रथमादिशब्देनानुदितहोमनिंदापरिग्रहः । द्वितीयेनोदितहोमादिस्तुतिसंग्रहः ।

SGDF
Sri Gurgeshwari Digital Foundation

प्र० वाक्यस्थावधारणेनकर्त्रंतरव्यवच्छेदात् ''एकमेवाद्वितीयं द्यावाभूमीजनयन्देवएक'' इत्यादावेकत्वोक्त्यानानाकर्तृकत्वस्यजगतोनिषेधान्नका
लादिभेदेनानेककर्तृत्वपूर्वपक्षोयुक्तइति तन्न । तस्यश्रौतविष्णुकारणतामात्रपरत्वेनवा तत्कर्तृकसृष्टिदशायांकर्त्रंतरनिरासपरत्वेनवोपपत्तेः । अ
न्यथानिरवकाशस्मृतिप्रामाण्यविरोधादिति ॥ श्रुतीति ॥ श्रुतिसमानार्थकत्वात्तत्परिगृहीतत्वं । श्रुतौहि ''नब्रह्मानचशंकर'' इति ''नावेद
वि'' दित्यादिनाशिवादिकारणत्वंतच्छास्त्रप्रामाण्यंचनिरस्यतइतिभावः । इदंचस्मृतित्वाविशेषात्कथमनयाशैवस्मृतेरप्रामाण्यमितिशंकापनो
दायप्राबल्यार्थं । ननु वेदस्यतुल्यबलतांमन्वानःकथंतदनुगृहीतस्मृतेःप्राबल्यमुपेयादितिचेदनेकत्वप्रयुक्तप्राबल्येतात्पर्यात् । यद्वा अस्याः

तथाविष्ण्वादेःकारणताविधिपरइतिप्राप्ते प्रमाणत्वे
नांगीकृतश्रुतिपरिगृहीतया ''ऋग्यजु'' रित्यादिभा
ष्योदाहृतयास्मृत्यैवदुरागमाप्रामाण्यमितिसिद्धांतः ।

प्र० स्मृतेरप्रामाण्यशंकापनोदाय ''इतिहासपुराणःपंचमोवेदानांवेद'' इतिपंचमवेदत्वेनश्रुतिपरिगृहीतत्वमुक्तं । तथाचतुल्यबलत्वेपितदुक्तार्थस्य
ग्राह्यत्वात्तत्रचदुरागमाप्रामाण्यस्योक्तत्वान्नतेनरुद्रादेःकारणत्वमितिभावः । ननुनहिनिंदेतिन्यायात्प्रागुक्तदिशास्यापिवचनस्यऋगादिप्रामाण्य
विधिपरत्वंनत्वागमाप्रामाण्यपरत्वमितिचेन्न । कल्पकाभावात् । उदितहोमादौतुद्वयोरपिविहितत्वेनैकस्यापिबाधायोगात्तथाकल्पनं । नचा
गमप्रामाण्यमेवकल्पकंतस्यहेतुदर्शनादितिजैमिनिसूत्रोक्तन्यायेनविप्रलंभमूलत्वेनाप्युपपत्तेः । नचैतद्वचनवदागमःश्रुत्यनुगृहीतः । प्रत्युतत

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्विरुद्धः । एतदप्याह ॥ **श्रुतिपरिगृहीतयेति** ॥ एवमागमाप्रामाण्येनसिद्धांतेकथंतत्रतेनपूर्वपक्षइत्यतआह ॥ **तत्रत्विति** ॥ अत्रोक्तमागमाप्रामाण्यमयुक्तं । आप्तोक्तत्वादितितत्प्रामाण्यमुपेत्यतत्प्रामाण्यस्यबलवत्त्वेनपूर्वपक्षइत्यर्थः ॥ **दोषाभावेति** ॥ श्रुत्यादेःप्रामाण्यस्येतियोज्यं । स्मृतेः ऋग्यजुरित्यादिस्मृतेः । यद्वापंचरात्रादिस्मृतेश्चेत्यर्थः । तथाचागमानुसारेणश्रुत्यादेर्नयनेरुद्रादेरेककारणत्वंप्राप्तंनविष्णोरित्यसंभवोलक्षण

तत्रतुस्वप्रयोजकगुणप्रयुक्तस्यप्रामाण्यस्यमुख्यत्वादप्रामाण्य प्रयोजकदोषाभावप्रयुक्तस्यतुजघन्यत्वादागमविरोधेश्रुतेस्त द्गृहीतस्मृतेश्चनस्वार्थपरत्वं किंतुविस्पष्टागमानुसारेणास्पष्ट श्रुत्यादिर्नेयमितिप्राप्ते प्रामाण्यस्यस्वतस्त्वेनसिद्धांतः ।

गु० ततश्चयथोदितहोमनिंदायाअनुदितहोमस्तुतौतात्पर्यमनुदितहोमनिंदायाउदितहोमस्तुतौतात्पर्यंतथेत्यर्थः ॥ **स्वप्रयोजकेत्यादि** ॥ स्वंप्रामाण्यं तत्प्रयोजकीभूतोयोगुणः तत्प्रयुक्तस्येत्यर्थः । अप्रामाण्यंप्रतिप्रयोजकीभूतोयोदोषः तस्ययोअभावः तत्प्रयुक्तंयत्प्रामाण्यं तस्यामुख्यत्वात् । श्रुतिप्रामाण्यस्यस्वविरोध्यप्रामाण्यप्रयोजकदोषाभावप्रयुक्तत्वादमुख्यत्वमितियावत् । अत्राद्यःपक्षःसूत्रानुसारेण''शैवाद्यागमसंप्राप्ते''त्यनुव्याख्यानानुसारेण एतत्सूत्रसिद्धांतभाष्यतट्टीकानुसारेणच । द्वितीयस्तुभाष्यमात्रानुसारेण । तृतीयः''इतरेषांचानुपलब्धेः शैवाद्यागमसंप्राप्ते''तिसूत्रानुव्याख्यानतट्टीकानुसारेण । तत्रप्रथमपक्षेगतार्थतापरिहारोमूलएवस्पष्टः । द्वितीयादौतुतन्न्यायेनैवाभ्यधिकाशंकायाःप्रवृत्तेरगतार्थत्वंद्रष्टव्यं । चतुर्थस्तुटीकानुसारेणेतिद्रष्टव्यं । तृतीयपक्षेतेनास्यागतार्थत्वेप्यनेनतद्गतार्थंभवेदेवतन्न्यायभेद

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्येतिपूर्वपक्ष्याशयइतिभावः । अस्तुवोभयोरतिव्याप्तिनिरासकत्वंवाऽसंभवनिरासकत्वंवा । सर्वथाद्वयमपिसार्थकमित्याह ॥ **किंचेति** ॥ प्रस्तावाय प्रारंभाय । शास्त्रस्यब्रह्मणिप्रमाणत्वेनाप्रतिज्ञाने उपक्रमादिभिर्ब्रह्मपरत्वमुत्तरसूत्रेप्रतिज्ञाय प्रतिवाक्यंतत्परत्वव्युत्पादनमग्रेतनमसंगतंस्यादितिभावः । एवंचन्यायविवरणटीकायामिहातिव्याप्त्यसंभवाभ्यांपूर्वपक्षकरणंयुक्तमितिभावः । ननुआगममूलकातिव्याप्त्यसंभवफलपूर्वपक्षद्वयनिरासायाधिकरणद्वयवदनुमानमूलकतद्द्वयफलकपूर्वपक्षद्वयनिरासायाप्यधिकरणद्वयंस्यादित्यतआह॥**अनुमानस्यत्विति**॥ अतएवन्यायविवरणटीकायामागमानुमानमूलातिव्याप्तिपक्षमुक्त्वा“यद्वा सहमानेनानुमानेनवर्ततइतिसमं । तथाचातिव्यापकमित्यापातत:” इत्यादिनाऽनुमानमूलकासंभवपूर्वपक्षोपीहैवोक्तइतिभावः । यद्वाप्रागुक्तद्वितीयपक्षेऽनुमानस्यकारणेस्वातंत्र्येणप्रामाण्यशंकानिरासलाभेपिपक्षांतरेष्वलाभेनतस्यापिपृथक्प्रमाणत्वात्क्वचिज्जगत्कारणेप्रामाण्यमाशंक्यपृथङ्निरसनीयमित्यतआह ॥ **अनुमानस्यत्विति** ॥ नन्वेवमपिसां

किंचास्यसमन्वयप्रस्तावायोक्तलक्षणेब्रह्मणिप्रमाणप्रतिज्ञार्थत्वेनस्वपक्षसाधकोपन्यासपरत्वात्तस्यचसमन्वयोपपादकाविरोधव्युत्पादनायबाधकोद्धारपरत्वाद्द्वयमर्थवत् । अनुमानस्यत्वतिदुर्बलत्वान्नपृथङ्निरासः ।

गु० मात्रेणनिरस्तस्यपुनर्निरासायोगादित्यतआह ॥ **किंचेति** ॥ यद्वापक्षचतुष्टयेप्यभ्यधिकाशंकायाःप्रवृत्तेर्नगतार्थत्वमित्युक्तं प्रकारांतरेणापिगतार्थतांपरिहरति ॥ **किंचेति** ॥ यद्वेत्युक्तावस्यापिपूर्वोक्तपक्षचतुष्टयपक्षसमत्वप्रतीतिःस्यादित्यतःकिंचेत्युक्तं । यद्वापक्षचतुष्टयस्यसूत्राद्यारूढत्वादस्यचतदारूढत्वेनस्पष्टमप्रतीतेस्तदपेक्षयावैलक्षण्यद्योतनाययद्वेत्यनुक्त्वाकिंचेतिवैलक्षण्यप्रयोगः । एतदभावेतस्योक्तौविरोधशंकासमाधानरूपस्यानुत्थानादेतदनंतरंचतस्योपमर्देनैवपूर्वपक्षोत्थानादुभयोःसार्थक्यमितिभावः । नन्वेवमनुमानस्यापिकारणेप्रामाण्यस्यकंठतोनिराकरणार्थमप्यधिकरणांतरमारंभणीयंस्यादित्यतआह ॥ **अनुमानस्येति** ॥ अधिकरणांतरेणापि

प्र० ख्याधिकरणेसांख्यस्मृतेः पाशुपताधिकरणेपाशुपतस्मृतेः“उत्पत्त्यसंभवा”दित्यत्रशाक्तेयागमस्यप्रामाण्यनिरासात्पौनरुक्त्यमित्यतआह ॥ **रचनेति** ॥ नन्वेवमपि“श्रुतेस्तुशब्दमूलत्वा”दित्यत्रतर्काप्रामाण्योक्तेस्तेनगतार्थमिदं । अत्रागमस्यापिनिरासेप्यनुमानांशेगतत्वापरिहारात् । अनेनतस्यगतार्थत्वाच्चेत्यतआह ॥ **एवमिति** ॥ श्रुतेस्त्वित्यत्राप्यनेनपौनरुक्त्याशंकात्रतर्कस्यसाधकत्वनिरासस्तत्रबाधकत्वनिरासइतिसमाधेयेत्यर्थः । अतएवतत्रभाष्यं “शब्दमूलत्वाच्चनयुक्तिविरोध”इति । वक्ष्यतेचग्रंथकृतापि“शास्त्रयोनौब्रह्मण्यसाधकस्यापितर्कस्यबाधकत्वा”दित्यादि । यद्वाअधिकरणांतरेष्वपिगतार्थत्वाशंकासमाधानेऊहनीयेइत्याह ॥ **एवमिति** ॥ प्रदर्शितश्चपूर्वत्रतत्प्रकारः । उत्तरत्रापियथास्थानंतत्रतत्रदर्शयिष्यामः । “तज्जगज्जन्मादिकारणत्वंविषय”इत्यादिटीकांव्याचष्टे ॥ **अत्रेत्यादिना** ॥ **अयोग्यमिति** ॥ अनुमानादिविषयत्वस्येत्यनुषंगः । यदितद्योग्यंतदावक्ष्यमाणदिशारुद्रादेरपि यद्ययोग्यंतदाविष्णोरेवेतिफलफलिभावःस्पष्टइतिभावः । सूत्रेऽनुमानाद्ययोग्यत्वे“नावेदवि”दित्यादिमानानुक्तेर्जगत्कारणंशास्त्रयोग्यमित्येवोक्तेः टीकादावनुमानाद्ययोग्यत्वेमानाभावादित्याद्यनुक्त्वाऽऽनुमानिकत्वस्यैवहेतूकृत

“रचनानुपपत्तेश्चनानुमानं पत्युरसामंजस्या”दित्यादौतुप्रधानस्याचेतनत्वाच्छिवादेश्चजननादिदोषवत्त्वान्नकर्तृत्वयोग्यतेतिवक्ष्यते । नतुतत्तदागमाप्रामाण्यमितिनतेनापिपुनरुक्तिः । एवमन्यत्रापियथासंभवंपौनरुक्त्याशंकासमाधेया । अत्रजगत्कारणत्वंकिमन्यस्यापिकिंवाविष्णोरेवेतिचिंता । तदर्थंकारणत्वंकिमनुमानादिविषयत्वयोग्यमुतायोग्यमिति ।

गु० पौनरुक्त्यंन्यायवैषम्यप्रदर्शनमुखेनपरिहरति ॥ **रचनेति** ॥ तथापि“इतरव्यपदेशा”दित्यादौपौनरुक्त्यमित्यतआह ॥ **एवमिति** ॥ नन्वेवमपिसमयपादेसमयनिरासात्तेनगतार्थत्वंस्यादित्यतोवाह ॥ **एवमिति** ॥ तथापिप्रपंच्यप्रपंचकभावांगीकारान्नगतार्थत्वमितिभावः । अतिव्याप्त्यापूर्वपक्षेचिंताप्रकारमाह ॥ **अत्रेति** ॥

SGDF Sri Gurgeshwari Digital Foundation

प्र० त्वाचिंताद्वयमेवोक्तंनत्वयोग्यत्वेमानमस्त्युतनेत्यादिचिंतापि । एवमग्रेपि ॥ **उक्तइति** ॥ तथापिवक्ष्यमाणेइत्यादिनेतिभावः ॥ **अनुमानेनेति** ॥ क्षित्यादिकंसकर्तृकंकार्यत्वाद्घटवदित्याद्यनुमानेनेत्यर्थः ॥ **अतिप्रसंगादिति** ॥ "वस्तुत्वात्तुरगःशृंगी"त्यादिवक्ष्यमाणदिशेतिभावः ॥ **व्याघातादिति** ॥ अतिप्रसंगादित्यनुमानंप्रमाणंचेत्तर्ह्यनुमानप्रामाण्यमुपेत्यतन्निषेधेस्वक्रियाविरोधात् । अप्रमाणंचेदनुमानाप्रामाण्यव्याघातात् विघातादित्यर्थः । नियतविषयत्वमेवनियामकमित्यतआह ॥ **नहीति** ॥ उपमानंहिवाच्यवाचकसंबंधएवमानं । नान्यत्र ।

आगमावष्टंभेनपूर्वपक्षःपौनरुक्त्यनिरासंसमयएवोक्तः । अनुमानावष्टंभेनपूर्वपक्षस्तु अनुमानेनरुद्रादीनामपिकारणतासिद्धेरतिव्याप्तिः । नचानुमानमप्रमाणमतिप्रसंगादितियुक्तं । व्याघातात् । न चान्यत्रप्रमाणमपिजगत्कारणे नप्रमाणं । नियामकाभावात् । नह्युपमानादिवदनुमानंनियतविषयं ।

गु० नन्वेवमग्रेऽनुमानावष्टंभेनपूर्वपक्षएवविवृत्तो नत्वागमावष्टंभेन तथाचन्यूनतेत्यतआह ॥ **आगमेति** ॥ कालादिभेदेनाविरुद्धंद्वयोःकारणत्वमित्यादिनोक्तः ॥ **नचानुमानमिति** ॥ "सर्वत्रशक्यतेकर्तुमागमंहिविनानुमे"त्यादेरित्यर्थः ॥ **व्याघातादिति** ॥ अनुमानमप्रमाणमतिप्रसंगादित्यनुमानं मानंनवा । आद्येऽनुमानप्रामाण्यस्यांगीकृतत्वेनानुमानंप्रमाणंनेत्युच्यमानेव्याघातः । द्वितीयेपूर्वानुमानप्रामाण्यस्यांगीकृतत्वादनुमानंनप्रमाणमितिव्याहतमित्यर्थः । ननु नानुमानस्याप्रामाण्यमुच्यते येनव्याघातः किंतुविषयविशेषेतन्नप्रमाणमित्युच्यतइत्याशंक्यतन्निषेधति ॥ **नचेति** ॥ ननूपमानस्यसंकेतमात्रग्राहकत्वेननियतविषयत्ववदनुमानस्यापिनियतविषयत्वान्नानुमानंजगत्कारणत्वेमानमित्यतआह ॥ **नहीति** ॥ ननुक्षित्यादिकंसकर्तृकंकार्यत्वादित्यनुमानेनरुद्रादिनिष्ठकर्तृत्वसिद्धेर्लक्षणमतिव्या

SGDF Sri Gargeshwari Digital Foundation

प्र० नह्येवमनुमानमित्यर्थः। अनुमानादुपमानादेर्भेदमुपेत्यैवमुक्तिः। सुधोक्तानुमानेष्वनुपपत्तिमाशंक्याह ॥ **यद्यपीति** ॥ विमतंकर्म प्रयत्ना धारजं कर्मत्वात्संमतवदित्यादितत्रोक्तान्यनुमानान्यादिपदार्थः । प्रसिद्ध्याशिवादिःस्यादित्यतआह ॥ **लोकेति** ॥ **स्वप्रामाण्येति** ॥ ''नैषातर्केण नावेदविन्मनुत''इत्यादिश्रुतिर्विष्णुकर्तृत्वेऽनुमानप्रामाण्यंनिषेधतीतितदुक्तेविष्णुकर्तृत्वेनपर्यवस्यति । किंत्वागमंसहायीकृत्य शिवकर्तृत्वंसाधयति । यतोवेत्यादिवाक्यंचविष्णुकर्तृत्वमाहेतिरुद्रादावतिव्याप्तिरित्यर्थः । एतेन''इत्याद्यनुमानैर्विश्वोदयस्थितिलयकर्तरिसामान्यतःसिद्धे अस्मदादीनांतदसंभवाच्छिवएवपरिशेषात्कर्तासिध्यती''तिसुधायामसंभवादित्यस्यास्मदादीत्यादिपदोक्तविष्णवाख्येश्रुत्युक्तेकर्तरिपर्यवसानासंभवादित्यर्थउक्तोभवति । सुधायांपरिशेषादितिव्यतिरेक्युपलक्षणमितिभावेनव्यतिरेकिप्रकारमाह ॥ **यद्वेति** ॥ सुधायां

यद्यपिकार्यत्वाद्यनुमानात्कर्तृमात्रंसिध्यतिनतुशिवादिःकर्तेति । कर्तृमात्रंचविष्णोःकर्तृत्वाविरोधि । लोकप्रसिद्ध्यादेरुभयत्रतुल्यत्वात् । तथाप्यनुमानंस्वप्रामाण्यनिषेधकश्रुत्युक्तेकर्तरिनपर्यवस्यति । किंत्वागमोक्तेकर्तरीत्यतिव्याप्तिः । यद्वाशिवोजगज्जन्मादिकर्तासर्वज्ञत्वादित्यादिव्यतिरेकिणाततत्सिद्धिः ।

गु० क्षमित्ययुक्तं । तस्यसामान्यतःकर्तृत्वमात्रसाधकत्वेनरुद्रादिनिष्ठकर्तृत्वासाधकत्वात् । कर्तृत्वमात्रस्यविष्णुकर्तृत्वाविरोधित्वादित्यभिप्रायेणशंकते ॥ **यद्यपीति** ॥ ननुशिवकर्तृत्वस्यलोकप्रसिद्धत्वात्तत्रानुमानपर्यवसानमित्यतआह ॥ **लोकेति** ॥ परिहरति ॥ **तथापीति** ॥ ननु श्रुतेरनुमानप्रामाण्यनिषेधकत्वं किंसर्वानुमानप्रामाण्यनिषेधकत्वमथवास्वविरुद्धानुमानप्रामाण्यनिषेधकत्वं । नाद्यः । तथात्वेमीमांसावैयर्थ्यप्रसंगात् । नद्वितीयः । तस्यपाशुपतागमेष्वपिविद्यमानत्वात् । तथाचकथंतदुक्तेकर्तर्यनुमानपर्यवसानमित्यरुचेराह ॥ **यद्वेति** ॥ अनुमितेर्व्यापकतावच्छेदकविषयत्वमात्रनियमात्कथमनुमानेकर्तृविशेषसिद्धिः । तस्याचेतनत्वेन

SGDF
Sri Gargeshwari Digital Foundation

प्र० "विचित्रकार्यानुगुणःसार्वज्ञादिमानेवसिध्यती"त्यादिनाकर्तृत्वेनसार्वज्ञसाधनंपरिशेषपक्षएवेतिभावेनाह ॥ **सर्वज्ञत्वादिकंचेति** ॥ शैवागमसिद्धमित्यर्थः । आगमप्रामाण्यंच"शैवाद्यागमे"त्यादेर्व्याख्यावसरेसुधोक्तिदिशेवेत्याशयः । "अनुमानाच्चे"तिसुधावाक्यस्यागममूलानुमानाच्चेत्यर्थः । एवंसुधोक्तकार्यत्वाद्यनुमानस्यद्वेधाभिप्रायमुक्त्वासामान्यानुमानमेवातिव्याप्तिफलकंकर्तृभेदसाधकमितिस्वयमेवाह ॥ **यद्वेति** ॥ यद्वा सुधास्थमुपलक्षणंमत्वाऽऽगमसहायानुमानमूलकमेकंपक्षमुक्त्वा केवलानुमानमूलकपक्षद्वयमाह ॥ **यद्वेति** ॥ अतएवटी

सर्वज्ञत्वादिकंचागमसिद्धमित्यागमसहायेनानुमानेनेहपूर्वपक्षः । यद्वामहाकल्पत्वंकल्पत्वव्याप्यधर्मेण

गु० विरोधाविरोधचिंतायाअयोगात् । तदर्थमागमानुसरणेचानुमानमात्रेणपूर्वपक्षइत्युक्तिविरोधइत्यतोवाह ॥ **यद्वेति** ॥ यद्वा असंभवपर्यवसायिनंपूर्वपक्षमुक्त्वाऽतिव्याप्तिपर्यवसायिनंपूर्वपक्षमाह ॥ **यद्वेति** ॥ एवंस्मृत्यनुमानाभ्यांपूर्वपक्षमुक्त्वाऽनुमानमात्रेणापिपूर्वपक्षमाह ॥ **यद्वेति** ॥ ननुसर्वज्ञत्वहेतुरसिद्धः । नचपाशुपताद्यागमेनैवतत्सिद्धिरितिवाच्यं । सिद्धांतिनातस्यप्रामाण्यानंगीकारात् । अन्यथाशिवत्वस्यसिद्धत्वात्तन्निषेधानुपपत्तिरित्यनुशयाद्वाह ॥ **यद्वेति** ॥ **महाकल्पत्वमिति** ॥ कल्पत्वव्याप्योयोधर्मःमहाकल्पत्वरूपः यत्रमहाकल्पत्वंतत्रकल्पत्वमितिनियमात् तेनस्वाश्रयसमानजातीयः स्वस्यमहाकल्पत्वस्ययोयमाश्रयःमहाकल्पः तत्समानजातीयंयन्महाकल्पांतरंतद्वृत्तियदादिकार्यं तस्ययःकर्ता तद्भिन्नःकर्तायस्य एवंभूतंयदादिकार्यं तद्वान्महाकल्पः तद्वृत्तिभवितुमर्हतीत्यर्थः । अत्रचाद्यविशेषणाभावे अवांतरकल्पसमानजातीयावांतरकल्पवृत्त्यादिकार्याणांभिन्नकर्तृकत्वस्यसिद्धांतेपिस्वीकारात्सिद्धसाधनंस्यात् । तदर्थमाद्यंविशेषणं । अत्राद्यविशेषणाभावेमहाकल्पत्वाश्रयीभूतमहाकल्पेनसहकल्पत्वरूपधर्मेणसमानजातीयोयोवांतरकल्पः तद्वृत्त्यादिकार्यकर्तृस्वायंभुवमनुभिन्नकर्तृकादिकार्यवन्महाकल्पवृत्तित्वेनसाध्योपपत्त्या

प्र० कायां"अनुमानेनरुद्रादेरपिकारणतासाधनसौलभ्या"दितिसामान्येनोक्तं । न्यायविवरणटीकायामपि"रीत्यंतरेणानुमानमपिरुद्रादेर्जगत्कारणत्व"इत्युक्तिरितिभावः । कल्पत्वव्याप्यधर्मेण महाकल्पत्वरूपधर्मेण स्वाश्रयसमानजातीयः महाकल्पत्वाश्रयजातीयोन्योमहाकल्पः तद्वृत्तियदादिकार्यं तत्कर्तृभिन्नःकर्तायस्य तादृशादिकार्यवद्वृत्ति तत्रविद्यमानमित्यर्थः । अयंमहाकल्पोन्यमहाकल्पनिष्ठादिकर्तृभिन्नादिकर्तृमानितिनिष्कृष्टार्थः । महाकल्पइत्येवपक्षकरणेमहाकल्पत्वावच्छिन्नस्यसर्वस्यपक्षतापत्त्यासमानजातीयेत्याद्ययुक्तिः । एकस्यपक्षत्वार्थमयमितिविशेषणेनियामकाभावाद्धर्मएवपक्षीकृतः । स्वाश्रयसमानजातीयादेरेवोक्तौकल्पत्वेनसजातीयस्यावांतरकल्पस्यापिग्रहणापत्त्या महाकल्पावांतरकल्पयोःकर्तृभेदस्यांगीकारेणसिद्धसाधनता । अतउक्तंकल्पत्वव्याप्येति । कल्पवृत्तीत्यादेरेवोक्तौसएवदोषः । अतःपूर्वविशेषणं । कल्पवृत्तिकार्येत्याद्युक्तावावांतरकार्यकर्तृकुलालादिभिन्नादिकार्यकर्तृमत्त्वस्यमहाकल्पेप्यंगीकारादादिकार्येत्युक्तं । एतदर्थमेवपश्चादादीतिविशेषणं । आ

स्वाश्रयसमानजातीयकल्पवृत्त्यादिकार्यकर्तृभि
न्नकर्तृकादिकार्यवद्वृत्ति । कल्पत्वव्याप्यत्वात् ।

गु० महाकल्पावांतरकल्पयोःकर्तृभेदस्यचसिद्धांतिनांगीकृतत्वेनमहाकल्पभेदेनैवकर्तृभेदस्यचासिद्धेरर्थांतरतावास्यात् । तत्परिहारार्थमाद्यंविशेषणं । तथाचकल्पत्वेनमहाकल्पावांतरकल्पयोःसमानजातीयत्वेपिकल्पत्वव्याप्यधर्मेणसमानजातीयत्वस्यविवक्षितत्वात् कल्पत्वस्यकल्पत्वव्याप्यत्वाभावाद्व्याप्यव्यापकभावस्यभेदसापेक्षत्वात्कल्पत्वव्याप्यधर्मोमहाकल्पत्वमवांतरकल्पत्वंच तत्रपक्षे कल्पत्वव्याप्येनमहाकल्परूपधर्मेणमहाकल्पत्वाश्रयीभूतमहाकल्पसमानजातीयमहाकल्पभेदेनकर्तृभेदसिद्धिः ।

SGDF
Sri Gurugeshwari Digital Foundation

प्र० दिकार्यकर्तृकेत्युक्तौकर्त्रैक्येनोपपत्तेर्भिन्नेत्युक्तिः ॥ **अवांतरेति** ॥ कल्पत्वव्याप्येनावांतरकल्पत्वेनसाध्यंबोध्यं । तत्रकर्तृभेदःसिद्धइतिभावः ॥ **एवमिति** ॥ कर्तृपदद्वयस्थानेपातृपदद्वयप्रक्षेपेणपालकभेदः संहर्तृपदद्वयप्रक्षेपेणसंहर्तृभेदःसिद्धइत्यर्थः । कर्त्रादिनानात्वंकल्पभेदेनप्रसाध्यैकस्मिन्नपिकल्पेकर्त्रपेक्षयासंहर्तान्यइत्याह ॥ **तथेति** ॥ स्रष्टृनिष्ठंनेत्येवोक्तौघटस्यस्रष्टैवयदिसंहर्तातदातत्रव्यभिचारःस्यादतएकेत्युक्तं **स्रष्टृसंहर्त्रोरिति** ॥ नस्रष्टैवसंहर्ताकिंत्वन्योपीत्येवंभेदसिद्धिरित्यर्थः । एकस्मिन्नपिकल्पेकर्तृभेदंसाधयति ॥ **तथामहीति** ॥ प्रासादप्राकारारामपरिखादिष्वनेककर्तृतादर्शनाद्दृष्टांतः । एवंनानाकर्त्रादिसिद्धावप्यन्यस्यकृत्स्नकर्तृत्वाप्राप्त्यातिव्याप्तिप्रकारस्यास्फुटत्वादाह ॥ **एवंचेति** ॥

अवांतरकल्पत्ववत् । एवंमहाकल्पभेदेनकर्तृभेदवत्पालकादिभेदोप्यनुमेयः । तथा जगत्संहर्तृत्वंजगत्स्रष्ट्रेकनिष्ठं । संहारशक्तित्वात् । घटसंहारशक्तिवदितिस्रष्टृसंहर्त्रो र्भेदसिद्धिः । तथा महीमहीधरादिनानाकर्तृकं । विचित्रकार्यत्वात् । प्रासादादिवत् । एवंचसर्वजगज्जन्मादिकर्तृत्वंलक्षणंचेदसंभवः कतिपयकर्तृत्वंचेदतिव्याप्तिः ।

गु० दृष्टांतेचकल्पत्वव्याप्यावांतरकल्पत्वरूपधर्मेणसमानजातीयावांतरवैवस्वतमनुकल्पवृत्त्यादिकार्यकर्तृभिन्नस्वायंभुवमनुकर्तृकादिकार्यवत्स्वायंभुवकल्पवृत्तित्वेनसाध्यपर्यवसानंद्रष्टव्यं ॥ **एवमिति** ॥ कर्तृपदस्थानेपालकसंहर्तृपदप्रक्षेपेणेत्यर्थः । ततश्चैवंप्रयोगः । महाकल्पत्वं कल्पत्वव्याप्यधर्मेणस्वाश्रयसमानजातीयकल्पवृत्त्यादिकार्यपालकभिन्नपालककादिकार्यवद्वृत्ति कल्पत्वव्याप्यधर्मत्वात् अवांतरकल्पत्ववदिति । एवंचानुमानेनमहाकल्पभेदेनपालकभेदसिद्धिरितिभावः । कार्यत्वाद्यनुमा

SGDF
Sri Gurgeshwar Digital Foundation

प्र० पक्षभेदेनातिव्याप्तिमुक्त्वाकेवलातिव्याप्तिलाभप्रकारमाह ॥ यद्वेति ॥ आदिपदात्पालनादिशक्तिः । फलोपधानस्यानेकेष्वसंभवाच्छक्तिः पक्षीकृता । स्वमात्रवृत्तिर्योधर्मस्तादृशशक्तित्वमेव तेनसमानजातीयाशक्तिःसैव तदाश्रयोविष्णुः तद्भिन्नमाश्रितेत्यर्थः । यद्वातादृशधर्मेणसमानजातीयापुरुषांतरनिष्ठाशक्तिः । तदाश्रयशिवादिभिन्नविष्ण्वाश्रितेत्यर्थः । सर्वजगन्निर्मातृत्वंविष्णोरितरत्रापिवर्ततइतिफलितार्थः । शक्त्याश्रयेत्याद्युक्तौतादृशकुलालभिन्नविष्ण्वाश्रितत्वस्यसिद्धत्वाद्विशेषणं । स्वसमानेत्याद्युक्तावपिशक्तित्वेनसाजात्यमादायप्रागुक्तदोषः । अतःस्वमात्रेति ॥ घटेति ॥ घटत्वावच्छिन्नघटनिर्मातृणामनेकत्वादितिभावः । विशिष्याह ॥ जगत्कर्तृत्वमिति ॥ सर्वजगज्जननसामर्थ्यमि

यद्वासर्वजगन्निर्माणादिशक्तिःस्वमात्रवृत्तिधर्मेणस्वसमानजातीयशक्त्याश्रयभिन्नाश्रिता । निर्माणादिशक्तित्वात् । घटनिर्माणादिशक्तिवत् । जगत्कर्तृत्वंविष्णिवतरवृत्ति । कर्तृत्वव्याप्यत्वात् । घटकर्तृत्ववत् । इत्याद्यनुमानैरनेकेषांसर्वजन्मादिकर्तृणांसाधकैर्विष्णिवतरसर्वजगत्कर्तृसिद्धावितरेषांप्रसिद्धशिवाद्य(द)न्यत्वेगौरवादतिव्याप्तिः ।

प्र० त्यर्थः । एवंसत्यतिव्याप्तिप्रकारमाह ॥ इत्यादीति ॥ सर्वजगत्पालनसामर्थ्यरूपंपालकत्वं विष्णिवतरवृत्ति पालकत्वव्याप्यत्वात् गोपालकत्वादिवदित्यादिरादिपदार्थः । विष्णिवतरेसर्वजगत्कर्तोरःतत्सिद्धावित्यर्थः । शिवाद्यन्यत्वे शिवहिरण्यगर्भाद्यन्यत्वइत्यर्थः । शिवादन्यत्वे गौरवादितिशैवाः हिरण्यगर्भादन्यत्वेगौरवादितिहैरण्यगर्भाइत्येवंतत्तद्वादिरीत्येतिबोध्यं । शिवादन्यत्वइतिपाठेउपलक्षणंबोध्यं । तेनरुद्रादीनामितिनोपक्रमविरोधः ॥ अतिव्याप्तिरिति ॥ सर्वजगन्निर्माणेत्याद्युक्तानुमानैरितरकर्तृत्वमात्रसिद्धावपियतोवेत्यादिश्रुतिप्राप्तविष्णुकर्तृत्वस्यनिवारणेतेषामशक्तत्वादपवादशंकांतराभावाच्च जगज्जननादिसामर्थ्यस्यप्राग्लक्षणत्वेनोक्ततयाऽनेकेषांकृत्स्नजगज्जननादिफलोपधानविरो

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- चंद्रिका.

प्र० धेपितत्सामर्थ्यस्यसार्वकालिकस्याप्यविरोधात्कृत्स्नजगज्जननादिसामर्थ्यस्यश्रुत्यादिभिर्विष्णाविवोक्तानुमानैर्हैरण्यगर्भादावपिप्राप्त्यालक्ष्या
१ ५५ ॥ लक्ष्यवृत्तित्वेनातिव्याप्तिरित्यर्थः । पूर्वंसुधोक्तंकार्यत्वाद्यनुमानंकर्तृसामान्यपरंसत्परिशेषादिसहकृतंतद्विशेषपरमित्युक्तं । इदानींकेवलंतदेव
कर्तृविशेषसाधकमित्याह ॥ **यद्वेति** ॥ ज्ञानचिकीर्षाकृतिमज्जन्यमितिसाध्यमभिप्रेत्याह ॥ **नित्येति** ॥ नित्यत्वंपक्षधर्मताबललभ्यंत्रयाणां प्र. प्र.
विशेषणं । ननुकार्यत्वंकृतिमात्रमाक्षिपति नतुज्ञानेच्छेइत्यतआह ॥ **नित्यप्रयत्नेति** ॥ त्वया सिद्धांतिना । विष्णोरनंतगुणत्वादितिभावः । ३ ।
एतेना"स्मदादीनांतदसंभवा"दितिसुधावाक्यस्यास्मदादीत्यादिपदोक्तविष्णोस्तदसंभवाज्ज्ञानेच्छाप्रयत्नादिमात्रत्वरूपकर्तृत्वासंभवादित्यप्यर्थ
उक्तोभवति । तावताशिवःकुतइत्यतआह ॥ **संहर्तृत्वादिनानिमित्तेनेति** ॥ रोदयतिसर्वानितिरुद्रइतिसंहर्तृत्वलाभइतिभावः । आदिप
दाज्जगज्जननपालनादिनाभवशंकरादिशब्दोदितइतिग्राह्यं । इदंचटीकागतरुद्रपदार्थवर्णनमितिबोध्यं ॥ **अतिव्याप्तिरिति** ॥ प्रागुक्ताशयो
ध्येयः । एवंजगज्जननादिनाविरिंचादिशब्दोदितेतस्मिन्नेवातिव्याप्तिरित्यादिरूपेणहैरण्यगर्भादीनामपिप्रत्यवस्थानंध्येयमितिभावः । इयताग्रं
थेना"नुमानेने"त्यादिटीकाविवृता । "नचोदाहृते"त्यादिटीकांविवृणोति ॥ **नचेति** ॥ "एकोदाधारेति नतेमहित्वं योनःपिताजनिता

**यद्वाकार्यत्वाद्यनुमानेननित्यज्ञानेच्छाप्रयत्नमात्रवतोनित्यप्रयत्नमात्रवतोवाकर्तुःसिद्धेः त्वयाचतस्यविष्णुत्वानंगीकारा
त्संहर्तृत्वादिनारुद्रादिशब्दोदितेतस्मिन्नेवातिव्याप्तिः । नचविष्णोरन्यस्यकारणत्वनिषेधकोदाहृतश्रुतिविरोधः ।** ॥ १५५ ॥

गु० नस्यापिकेवलस्यकेवलस्यशिवादेःजगत्कर्तृत्वेप्रामाण्यमित्याह ॥ **यद्वेति** ॥ "नचोदाहृतश्रुतिविरोध"इतिटीकांव्याख्याति ॥ **नचेति** ॥ धर्मब्रह्मादिवस्तुनोऽनुमा

प्र० एकएवे"त्यादिश्रुतिविरोधइत्यर्थः ॥ **कारणत्वविधीति** ॥ उदितहोमादिनिंदावन्नहिनिंदानिंद्यमितिन्यायेनेतिभावः । अनेन युक्तिविरु
द्धार्थे शिवादिकारणतानिषेधे तात्पर्यायोगादितिटीकार्थउक्तोभवति ॥ **केवलेति** ॥ महाकल्पत्वमित्यादिपक्षत्रयोक्तेरितिभावः । एतेन
ज्ञानेच्छाप्रयत्नादिमात्रवतोविष्णुत्वाभाववच्छिवादित्वमपिनयुक्तं । तस्यापिशैवाद्यागमेनानंतगुणत्वात् । उक्तंचसुधायां "शिवस्यजगज्जन्मा
दिकारणत्वसार्वज्ञसर्वशक्तित्वाद्यशेषगुणपूर्णत्वंनिरवद्यत्वंचप्रतिपादयंती"ति । तन्निरस्तं । आगममनादृत्यकेवलानुमानेनैवपूर्वपक्षात् । इय

**तासामुक्तयुक्तिविरोधेनविष्णोःकारणत्वविधिपरत्वादितिकेवला
नुमानेनैवपूर्वपक्षइति । तदेतदभिप्रेत्योक्तंटीकायां"मनुमानेन
रुद्रादेरपिकारणते"त्यादि । सिद्धांतस्तु । चक्षुरादियथाऽश
क्तंरसगंधादिवस्तुषु । अनुमापितथाऽशक्ताधर्मब्रह्मादिवस्तुषु ।**

प्र० ताक्कृतंप्रतिपादनंकस्यव्याख्यानमित्यतआह ॥ **तदेतदिति** ॥ आगमसहायानुमानेनकेवलानुमानेनचकृतंपूर्वपक्षद्वयमित्यर्थः । संग्रहस्तु ।
आगमादनुमानाद्वाकर्तृत्वंविष्णुभिन्नगं । अतिव्याप्तमतोनैतद्विष्णोरेवस्वलक्षणमिति । अनुमानावलंबिपूर्वपक्षनिरासकं"यदिकारणमानुमा
निकंस्या"दित्यादिसिद्धांतटीकाप्रमेयंसंगृह्णाति ॥ **चक्षुरादीति** ॥ अशक्तमितिच्छेदः । यथाधर्मादावशक्तातथाब्रह्मणीतिधर्मादेर्दृष्टांतत्वे
नोक्तिः । तस्यचोदनैकप्रमाणकत्वं"चोदनालक्षणोर्थोधर्म"इतिजैमिनिसूत्रसिद्धमितिभावः । स्वातंत्र्येणाशक्तेत्यर्थः । तेननमीमांसान्या

SGDF

प्र० घातः । प्रागुक्तानुमानानिटीकादावेवनिरस्तानीतिभावेनतद्वाक्यानिपठति ॥ **नहीति** ॥ **श्रुतीति** ॥ अयोग्यत्वोक्त्यातत्रप्रवर्तमानान।बाधितत्वादितिभावः । आदिपदेनव्याप्त्यादिशून्यत्वसोपाधिकत्वादिग्रहः । श्रुतेर्नित्यनिर्दोषत्वेनस्वतःप्रामाण्येनच"प्राबल्यमागमस्यैवजात्यातेषुत्रिषुस्मृत"मितिवचनसिद्धंप्राबल्यमितिभावः । कथमतिप्रसंगइत्यतआह ॥ **अनुव्याख्यानेचेति** ॥ खमाकाशं । चित्रिणीवंध्या । षष्ठोरसःसोत्तरः । सप्तमरसोपेतइत्यर्थः । रसत्वात्पूर्वरसवत् । रसमात्रस्यपक्षत्वेपूर्वरसमादायसिद्धसाधनता । अतःषष्ठइति । ननुवस्तुत्वं घटादौव्यभिचारीतिचेन्न । तस्यापिपक्षत्वात् । नचप्रत्यक्षादिबाधः । क्षित्यादिकर्तुरपिसाम्यात् । सचायोग्यश्चेच्छृंगमपितथास्तु । शृंगं महत्त्वेसत्युद्भूतरूपवच्चेत्कर्तापिकुलालादिरिवतादृग्देहवानितिकथमयोग्यः । अदेहोसाविति चेच्छृंगमपिरूपहीनंस्यात् । शृंगंरूपवदेवेतिचेत्कर्तापिदेहवानेवेतिभावः । एवमन्यान्यपिसमर्थनीयानि ॥ **अन्यत्रेति** ॥ तत्वनिर्णयतर्कतांडवादावित्यर्थः । नावेदविदित्यादिश्रुत्यर्थष्टीकायांस्पष्टः ॥ **नानुमानमिति** ॥ तथाचातिव्याप्त्यभावाद्विष्णोरेवेदंलक्षणंसिद्धमितिभावः । यदत्रकश्चिदाह त्वन्मतेअनुमानस्यस्वतोजग

"नहिधर्मादिनिश्चयोनुमानेने"तिटीकयैवमहाकल्पत्वमित्याद्यनुमानेषुश्रुतिबाधादेः"शशादीनांविषाणित्वादौचकर्तुशक्यत्वा"दितिटीकायांचातिप्रसंगस्योक्तत्वात् अनुव्याख्यानेच"वस्तुत्वात्तुरगःशृंगीपुष्पवत्खंसुतैर्युता । चित्रिणीचरसःषष्ठोरसत्वात्सोत्तरोभवे"दित्यतिप्रसंगस्यप्रपंचितत्वादन्यत्रकार्यत्वादिहेतूनांसप्रपंचंनिरासात्"नावेदवि"दित्यादिश्रुत्याजगत्कारणेनुमानप्रामाण्यनिषेधाच्चनानुमानंजगत्कारणेप्रमाणमिति । ॥ १५६ ॥

गु० नायोग्यत्वेव्याप्तिपक्षधर्मतोपेतपूर्वोक्तानुमानानांकागतिरित्यतआह ॥ **नहीति** ॥ अतिप्रसंगस्य आभाससाम्यस्येत्यर्थः ॥ **अन्यत्रेति** ॥ "नानुमानंपरेशितुः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० त्कर्त्रसाधकत्वेपितात्पर्यलिंगत्वाच्छ्रुतेरेकएवार्थइतिनियमाभावाच्च उक्तनानाकर्तृसाधकानुमानानुरोधेनसृष्टिवाक्यानांरुद्रादिनानाकर्त्रर्थ कत्वोपपत्तौ नानुमाननिरासोयुक्तः । शब्दानांव्यवस्थितैकार्थकत्वमौत्सर्गिकं वक्तृविवक्षाविनियोगाद्यपवादसत्त्वेनेकार्थत्वमितिसर्वतांत्रिकमर्यादामुल्लंघ्य स्वकल्पितानेकार्थत्वसिद्ध्यै स्वेच्छयैवश्रुतिषुयोगरूढ्यादिभिरनेकार्थत्वमुपगच्छतोवसंतादिवाक्यइवान्यथापदविभागादिनासर्वत्रानेकार्थत्वमनिवार्यमितिस्यादेवानेकस्रष्टृपरत्वंसृष्टिवाक्यानामिति । तन्न । प्रत्यक्षाद्यमूलानामनुमानानामदृष्टार्थासाधकत्वे तात्पर्यधीहेतुत्वस्यापिदूरापास्तत्वात् । टीकाद्युक्तरीत्याश्रुतिबाधितानांतद्विरुद्धार्थानांतात्पर्यलिंगत्वस्याशक्यशंकत्वाच्च । "शुष्कतर्केतुवर्जयेत् तस्मात्सानपगाश्रुतेः कामाच्चे"त्यादिस्मृतिसूत्रैःशुष्कतर्काणांतात्पर्यालिंगत्वस्योक्तत्वाच्च । "श्रुतिस्मृतिसहायंय"दित्यादिस्मृत्याचप्रमाणांतरमूलकयुक्तेरेवतल्लिंगत्वोक्तेः । उक्तंचटीकायां "सत्यमस्त्येवानुमानस्यौपनिषदपदार्थनिश्चायकत्वंश्रुत्यादिसहकारियुक्तस्य । नतुनियतप्रामाण्यंस्वातंत्र्येणदृष्टार्थनिश्चायकत्वं । तादृशंचप्रकृत"मितीति । नचैतान्यनुमानानिश्रुत्यादिपरिगृहीतानि । प्रत्युतै"कमेवाद्वितीयं एकोदाधारे"त्यादिश्रुतिस्मृतिविरुद्धानि । तादृशैस्तर्कैःश्रुतितात्पर्यकल्पयतःतवैवेयंशोभानतुपरीक्षकाणां । यत्तुश्रुतेरेकार्थत्वनियमाभावादित्यादि तन्न । प्रमाणवशेन क्वचिदनेकार्थत्वेसर्वत्रतथात्वापादकाभावात् । मानवशेनानेकार्थत्वस्य"ज्योतिरुपक्रमा"दित्यत्रवक्ष्यमाणदिशासर्वतांत्रिकसिद्धत्वात् । अपूर्वपदविभागस्यापितत्रोक्तमानपूर्वकत्वात् । नहिसृष्ट्यादिवाक्यानामनेककर्त्रर्थत्वेप्रमाणमस्ति । प्रत्युतै"कमेवाद्वितीयं द्यावाभूमीजनयन्देवएकः एकोदाधार योनःपिताजनिता एकएवनब्रह्मानचशंकरः एकःपुरस्ताद्यइदंबभूव तस्मात्सहरिरेकराट् स्रष्टापातातथैवात्तानिखिलस्यैकएव"त्वित्यादिश्रुतिस्मृतिविरोधः । सर्वेषांस्वातंत्र्यास्वातंत्र्ययोरन्योन्यनियमनायोगेनैकमत्यायोगाज्जगत्सृष्ट्यादिप्रतिहतिरित्यादियुक्तिविरो

SGDF
Sri Gargeshwari Digital Foundation

प्र० धश्च । हरेरन्येषांपारतंत्र्याद्यनेकदोषयुक्तताया:कर्तृत्वादिविरोधिन्या:पत्युरादिनयोक्तानेकमानसिद्धत्वाच्च । यत्तु कर्त्रैक्यश्रुतिरेकैकस्यैवक र्तुर्बहुस्यामित्यादिश्रुतिप्रसक्तानेकभवननिरासेनाप्यर्थवतीतिनानेककर्तृविरोधिनी । अतएवत्वयापिनिष्प्रपंचब्रह्मापलापव्यसनिना“नेहनाने” त्यादिश्रुतिर्विष्ण्ववयवगुणकर्मरूपभेदशंकावारणेनार्थवतीत्युक्तमिति तदपिन । “एकमेवाद्वितीयं जनिता एकएवे”त्यादिसावधारणश्रुत्युक्त कारणैकत्वस्य स्वाश्रयप्रतियोगिकभेदासमानाधिकरणरूपतयातद्विरोधेनानेककर्तृसिद्धेरेवायोगेनैकैकस्यानेकभवनशंकानुदयात् । नेहनाने त्यादौन्यायामृताद्युक्तरीत्यागुणकर्मादिभेदस्यप्राकरणिकप्रसक्तिवत्“एकोदाधारे”त्यादावेकैकस्यबहुभवनप्रसक्तेरभावाच्च । कर्तुर्बहुभवनस्य “यदेकमव्यक्तमनंतरूप”मित्यादिश्रुत्युक्तत्वेनतन्निरासायोगाच्च । “नब्रह्मानचशंकर: अन्योल्पस्यवानवे”तिविशिष्यकर्त्रंतरनिषेधाच्च । अतएव“आत्मेत्येवोपासीते”त्यादिविधौतत्तदधिकारिविशेषंप्रतितत्तद्योग्यगुणप्रतीतिवत् सृष्टिवाक्येपिशैववैष्णवाद्यधिकारिविशेषंप्रतिशिवा दिनानास्रष्टृधीरस्त्विवतिनिरस्तं । आत्मनितत्तद्योग्यगुणानांसत्त्ववन्नानास्रष्टृसत्त्वाभावात् । तत्तदीयानादिमिथ्याज्ञानवासनयातवान्यस्यापि शिवादिषुस्रष्टृत्वप्रतीतावपितस्यानेकमानविरोधेनभ्रांतित्वकल्पनावश्यंभावाच्च । तत्तत्पुरुषंप्रतिशिवएवजगत्कर्तानान्यइत्यादिबोधने पुरुषभे देनानुष्ठानवद्वस्तुस्वरूपभेदायोगेनाप्रामाण्यापाताच्च । ननुत्वन्मतेपुराणेषुरामकृष्णादिरूपभेदोक्तेर्लौकिकभ्रांतिसिद्धभेदानुवादित्ववत्तत्तदना दिसमयसिद्धशिवादिकर्त्रैक्यानुवादित्वेनापिकर्त्रैक्यश्रुतिर्युक्तेतिनकर्तृनानात्वविरोधिनी । नचैवंतत्रेवकर्त्रैक्यश्रुतावप्यसदर्थत्वप्रसंगइति वाच्यं । त्वन्मतेयस्ययावद्दर्शनेयोग्यता तंप्रतितावंतमेवसातिशयंब्रह्मानंदैकदेशं निरतिशयतयाभूमब्रह्मादिशब्दोवक्तीत्यभ्युपगमवत् शैव वैष्णवादीन्प्रतिविरुद्धनानाकर्तृबोधकत्वंसृष्टिवाक्येप्युपगम्यतामितिचेत् सम्यक्तवमूर्धानमध्यारोहदुन्मादः । यदविद्यमानान्यप्रामाण्यक ॥ १५७ ॥

प्र० राणिपूर्वोत्तरानुसंधानहीनान्येवबहुलमभाषथाः । सातिशयंनिरतिशयत्वेनभूमादिशब्दोवक्तीत्यस्यैवासत्त्वादित्यलमियता । अन्यदपितद्दु र्भाषणनिराकरणंगुरुपादकृतकंटकोद्धारादौबोध्यं । “शास्त्रंयोनि:प्रमाणमस्ये”तिभाष्योक्तंबहुव्रीहिंसमर्थयितुंपरोक्तंदूषयति ॥ **अत्रेति** ॥ समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानबहुव्रीह्यपेक्षयातत्पुरुषस्यतदत्यागेनोत्तरपदार्थप्रधानस्यबलवत्त्वादितिभावः । अत्रेदमधिकरणशरीर “मस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेद”इत्यादिवाक्यंब्रह्मणोवेदकर्तृत्वेनसर्वज्ञत्वंनसाधयतिउतसाधयतीतिसंशयेब्रह्मणोवेदकर्तृत्वेवेद स्यसापेक्षत्वेनाप्रामाण्यप्रसंगान्नसाधयतीतिप्राप्तेसाधयत्येवेतिसिद्धांतः । तथाहि । कर्तृमत्त्वेनवेदस्यसापेक्षत्वं किंपुरुषनिर्वर्त्यत्वमात्रादभिन वानुपूर्वीरचनाद्वा मानांतरोपलब्धार्थविषयरचनाद्वा कतिपयकालविरतसर्वसंप्रदायस्यवेदस्यैकपुरुषनिस्सरणाद्वा । नाद्यः । तवापिसंमत त्वात् । नित्यानांविभूनांवर्णानांकालतोदेशतोवापौर्वापर्यायोगेनाभिव्यक्तिधर्मानुपूर्व्या:कृतत्वात् । द्वितीयेक्रमान्यत्वंवाविसदृशक्रमत्वंवा । नाद्यः । अध्यापकोच्चरितानुपूर्वीसदृशानुपूर्व्याएवमाणवकेनानुकरणेनतवापिसंमतत्वात् । नद्वितीयः । मयाप्यनंगीकारात् । अतएवनतृ तीयः । चतुर्थस्तूपेयते । नचैतावतासापेक्षत्वमस्तीति । तदेतदधिकरणशरीरमग्रेनिरसिष्यत:सूत्रार्थंतावन्निरसितुमयमनुवादः । तत्रैवव क्ष्यमाणत्वेपिवक्ष्यमाणसूत्रार्थदूषणस्यसुज्ञानायात्रैवाधिकरणशरीरमवोचाम । शिष्याणांधर्मशासनाच्छास्त्रमितिभामत्युक्तयोगंहृदिकृत्वाह

आगमाश्रयपूर्वपक्षनिरासस्तुपौनरुक्त्यपरिहारावसरएवविवृतः । अत्रपरेषांभाष्येशास्त्रस्ययोनिरितिविग्रहमाश्रित्य

गु० शक्तंविज्ञापन”इत्याद्यनुव्याख्यानादावित्यर्थः । अन्यत्र विष्णुतत्वनिर्णयादावित्यप्याहुः ॥ **आगमाश्रयेति** ॥ प्रमाणत्वेनांगीकृतश्रुतिपरिगृहीतयेत्यनेनेतिशेषः । ननुभाष्येशास्त्रंयोनिर्यस्येतिबहुव्रीहिराश्रितः । तत्रसमासप्राबल्यात्तत्पुरुषएवकिंनस्यात् । परैरपितस्यस्वीकृतत्वादित्यत:परोक्तंविग्रहंदूषयितुमनुवदति ॥ **अत्रपरेषां**

SGDF Sri Gangadharan Digital Foundation

प्र० ॥ **ऋगिति** ॥ पूर्वासंगतिंनिराह ॥ **पूर्वेति** ॥ विचित्रजगत्कृतिःसार्वज्ञंविनानयुक्तेत्यर्थादाक्षिप्तंसार्वज्ञमिहसमर्थ्यतइत्यर्थः । एवमपिपूर्वा संगतिरित्याह ॥ **लक्षणेति** ॥ लक्षणप्रमाणाभ्यांवस्तुसिद्ध्यालक्षणानंतरंतद्विशिष्टेप्रमाणंजिज्ञासितमितिमद्रीत्यातथैववाच्यमित्यर्थः । सत्यं प्रमाणंजिज्ञासितमिति तथापिसार्वज्ञमपिसमर्थनीयं । अन्यथाप्रागुक्तकारणत्वस्यैवासिद्धेः । नह्यल्पज्ञस्यैवंविधविश्वनिर्माणंशक्यमितिचेत् किंकारणत्वेनाक्षिप्तंसार्वज्ञंकिंजिज्ञासितशुद्धस्योतविशिष्टस्येश्वरस्य । नाद्यइत्याह ॥ **त्वदभिमतेति** ॥ शुद्धस्यकारणत्वंनामोपादानत्वं । तच्चनपरिणामित्वं । निर्विकारश्रुतिव्याकोपात् । किंतुविवर्ताधिष्ठानत्वं । नचैतत्सार्वज्ञाक्षेपकमित्यर्थः । भावसाधनःकर्मसाधनश्चभ्रमशब्दः ।

"ऋगादिकारणत्वंब्रह्मणइहोच्यते । पूर्वसूत्रेऽर्थलब्धस्यसार्वज्ञस्यस्फोरणा
र्थमित्युक्तं । तन्न । लक्षणानंतरमवश्यापेक्षितप्रमाणपरत्वसंभवेऽन्यप
रत्वायोगात् । त्वदभिमतभ्रमाधिष्ठानत्वरूपकारणत्वेनसार्वज्ञालाभाच्च ।

गु० **भाष्यइति** ॥ नन्वत्रऋगादिकारणत्ववचनंप्रकृतानुपयुक्तमित्यतआह ॥ **पूर्वसूत्रइति** ॥ **लक्षणानंतरमिति** ॥ लक्षणप्रमाणाभ्यांवस्तुसिद्धिरितिन्यायादिति भावः ॥ **अवश्यापेक्षितेति** ॥ शकंध्वादेराकृतिगणत्वादाङ्पूर्वकोत्तरपदेनपररूपं । "कृत्यलुटोबहुल"मितिबाहुलकाद्वाकृत्यपरकत्वाभावेप्यवश्यमोंत्यलोपोद्र ष्टव्यः । तेन "लुंपेदवश्यमःकृत्ये"इत्युक्तत्वात्प्रकृतेकृत्यप्रत्ययपरकत्वाभावात्कथमितिचोद्यानवकाशः । किंचब्रह्मणउपादानत्वंहित्वयोच्यते । तद्धितत्राधिष्ठान त्वरूपंकारणत्वमेव । तथाचतेनकथंसार्वज्ञसिद्धिः । एवंचार्थलब्धस्यसार्वज्ञस्यस्फोरणार्थमित्येतदप्ययुक्तमित्याह ॥ **त्वदभिमतेति** ॥ ननुकारणत्वंनभ्रमाधिष्ठा

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वितीयआह ॥ **पूर्वेति** ॥ त्वद्भाष्येहि“जन्मस्थितिभंगंयतःसर्वज्ञात्सर्वशक्तेःकारणाद्भवती”त्युक्तयासर्वशक्तेरप्युपक्षिप्तत्वात् । भामत्यांच “परिमितज्ञानशक्तिभिर्ज्ञातुंकर्तुंवाऽशक्यत्वा”दित्युक्तेरितिभावः । एतेन “तत्रार्थलब्धशक्त्याद्यस्फुटीकृत्यसार्वज्ञमात्रस्फुटीकरणेविशेषकारणाभावा”दितिटीकार्थउक्तः । तत्राथजगत्कारणत्वंप्रधानादिव्युदासेन ब्रह्मण्येवसाधयितुंहेतुत्वेनोक्तंसार्वज्ञंशास्त्रयोनित्वेनसाध्यतइतिचेन्न । असिद्धिप्रसंगात् । “नहिब्रह्मणोजगत्कारणत्वमनंगीकुर्वाणोवेदकारणत्वमंगीकरोती”तिसुधोक्तेशंकोत्तरेआह ॥ **सांख्येति** ॥ सार्वज्ञस्यापिचेतनत्वार्थत्वादितिभावः । असिद्धीति सुधास्थमुपलक्षणंबोध्यं ॥ **अयोगाच्चेति** ॥ असिद्धिप्रसंगादितिभावः । “आगमेनसाध्यतइतिचेत्तर्हिजगत्कारणत्वमेवतेनकिंनसाध्यत”इतिसुधांविवृणोति ॥ **श्रुत्येति** ॥ “अस्यमहत”इत्यादिश्रुत्येत्यर्थः । उपलक्षणमेतत् । ईक्षत्यधि

पूर्वसूत्रेऽर्थलब्धसर्वशक्त्यादित्यागेनसार्वज्ञस्यैवस्फोरणेनिमित्ताभावाच्च । सांख्याभिमताचेतनकारणतायाश्चचेतनत्वमात्रेणनिषेधसंभवात् । सांख्यानंगीकृतेनशास्त्रयोनित्वेनसार्वज्ञस्यसाधनायोगाच्च । श्रुत्याशास्त्रयोनित्वं तेनसार्वज्ञंप्रसाध्य तेनप्रधानस्यकारणतानिषेधाद्वरंश्रुत्यैवतन्निषेधः ।

गु० नत्वं येनसार्वज्ञलाभः किंतूपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपंकर्तृत्वमेवविवक्ष्यते तथाचकथंनसार्वज्ञलाभइत्यतआह ॥ **पूर्वसूत्रइति** ॥ तथाचयथाज्ञानाद्यभावेकर्तृत्वानुपपत्तिस्तथाशक्त्याद्यभावेपिकर्तृत्वंनसंभवतीतितदप्यर्थलब्धमितिभावः । नन्वस्तुसर्वशक्त्यादेरर्थतोलाभः तथापिसांख्याभिमताचेतनकारणत्वनिषेधार्थसार्वज्ञमुपपाद्यतइत्यतआह ॥ **सांख्येति** ॥ चेतनत्वसमर्थनार्थमेवसार्वज्ञमुपपाद्यतइत्यतआह ॥ **श्रुत्येति** ॥ तथाचैवंपरंपराकल्पनायांकल्पनागौरवमि

SGDF
Sri Gargeshwari Digital Foundation

प्र० करणेनजन्माधिकरणस्यगतार्थत्वंचसुधोक्तंज्ञेयं । "अनंतजगन्निर्माणोक्त्याऽस्फुटीभूते"त्यादिटीकार्थमाह ॥ **जगन्निर्माणेनेति** ॥ यथाश्रुतंभाष्यंनिरस्यव्याख्यातृमतमनूद्यनिराह ॥ **अत्रेति** ॥ **हेत्वंतरमिति** ॥ तथाचपौनरुक्त्यमितिभावः । उक्तंचभामत्यादौ "नकेवलंजगद्योनित्वादस्यभगवतःसर्वज्ञता । शास्त्रयोनित्वादित्यपिबोद्धव्ये"त्यादि । कथमनेनसार्वज्ञलाभइत्यतःकल्पतरूक्तमनुमानप्रकारमनुवदति ॥ **वेदइति** ॥ स्वस्य वेदस्य यावान्विषयः तावद्विषयकज्ञानवता ततोधिकविषयज्ञानवताच प्रणीतइतिसाध्यार्थः । प्रमाणवाक्यत्वादितिहे

जगन्निर्माणेनास्फुटीकृतस्यसार्वज्ञस्यतदेकदेशशास्त्रनिर्माणेनस्फुटीकरणायोगाच्च । अत्रभामतीविवरणयोः"जगत्कारणत्वेनसिद्धेसार्वज्ञेशास्त्रयोनित्वंहेत्वंतरमुच्यते । वेदःस्वविषयादधिकविषयकज्ञानवत्प्रणीतः । वाक्यप्रमाणत्वात् ।

गु० तिभावः । किंचपूर्वसूत्रेणैवसार्वज्ञस्यस्फुटीकृतत्वादेतदधिकरणंव्यर्थमित्याह ॥ **जगदिति** ॥ तथाचैवंसमासकरणमयुक्तमितिभावः । ननुनेदंसूत्रंव्यर्थंपूर्वसूत्रोक्तजगत्कारणत्वेनसिद्धेसार्वज्ञेहेत्वंतराभिधायकत्वादितिभामतीविवरणयोरुक्तंदूषयितुमनुवदति ॥ **अत्रेति** ॥ कथमनेनहेत्वंतरमुच्यतइत्यतस्तद्दर्शयति ॥ **वेदइति** ॥ अत्रवेदोविज्ञानवत्प्रणीतइत्युक्तेनसर्वज्ञप्रणीततासिद्धिः तदर्थंस्वविषयादितिविशेषणं । नचवेदस्यस्वविषयादधिकतरविषयविज्ञानवत्प्रणीतत्वंबाधितमितिशंक्यं । इक्षुक्षीरगुडादीनांमाधुर्यवैशेष्यस्याभिधानाविषयीकृतत्वेपिप्रमाणांतरविषयत्वंदृष्टं । ततश्चवेदस्यस्वविषयादधिकतरविषयज्ञानवत्प्रणीतत्वंसंभवतीत्यर्थः । वाक्यप्रमाणत्वात् प्रमाणवाक्यत्वादित्यर्थः । प्रत्यक्षंव्यावर्तयति वाक्येति । अनाप्तोक्तिंव्यावर्तयति प्रमाणत्वादिति । अत्रस्वविषयादधिकज्ञानवत्प्रणीतत्वमात्रंनसाध्यं । तथात्वेयावत्स्वविषयज्ञानत्वंप्रणेतरिनसिध्येत् । नचाधिकज्ञानवत्त्वोक्त्यातत्सिद्धिरितिवाच्यं । अधिकशब्देनस्वविषयस्यैवगृहीतत्वेनतेनतदलाभात् । किंतुयावत्स्व

प्र० त्वर्थः । यद्यपितत्र ब्रह्म वेदविषयादधिकविषयज्ञं । तत्कर्तृत्वात् । योयद्वाक्यप्रमाणकर्तासतद्विषयादधिकविषयज्ञोयथापाणिनिरित्येवोक्तं । नतुवेदपक्षकं । सुधायामपितथैवोदाहरणोपनयनिगमनानुवादात् । तथाप्यर्थाभेदाद्बोधसौकर्यायैवमुक्तं । यद्वायत्तस्यानुमानांतरं । अयंघटः एतदन्यासर्ववित्कर्तृकत्वानधिकरणैतदन्यावेदत्वानधिकरणसकर्तृकान्यः घटत्वात् घटांतरवदिति । तस्यापिसंग्रहायोभयानुमानतात्पर्यलब्धमिदमितिनदोषः । हेतोःसर्वविषयकवेदरूपपक्षधर्मताबलात्सार्वज्ञलाभइतिभावः ॥ **एकार्थेति** ॥ गौरस्त्यक्षमस्तीत्यादिवाक्यस्येत्यर्थः । साध्याभावात्तत्रव्यभिचारइतिभावः । अबाधितेतिप्रमाणवाक्यत्वरूपहेतुसद्भावार्थमुक्तं । ननुयावान्स्वतात्पर्यविषयस्तज्ज्ञानवताततोधिकज्ञानवताचप्रणीतइतिसाध्यार्थोविवक्षितः । उक्तस्थलेचैकार्थस्यैवतात्पर्यविषयतयातज्ज्ञानवत्प्रणीतत्वस्यसत्त्वान्नव्यभिचारइतिशंकते

पाणिन्यादिशास्त्रव"दित्युक्तं । तन्न । एकार्थमात्रज्ञेनप्रयुक्तस्यानेकार्थस्यशब्दस्याबाधितानेकार्थबोधकत्वदर्शनात् ।

गु० विषयादधिकज्ञानवत्प्रणीतत्वमेवसाध्यमितिवाच्यं । तथाचव्यभिचारइत्याह ॥ **एकार्थमात्रेति** ॥ अयमर्थः । एकार्थमात्रज्ञेनप्रयुक्तेवाक्येव्यभिचारः । तादृशवाक्यस्यप्रमाणवाक्यत्वेनहेतोस्तत्रसद्भावात् । स्वशब्देनैकार्थमात्रज्ञप्रयुक्तंवाक्यं तस्येयेविषयाअनेकेऽर्थाः तदपेक्षयायेऽधिकविषयाः एकार्थमात्रज्ञप्रणीतवाक्याप्रतिपाद्यत्वेसतिप्रमाणांतरवेद्याः । तेषांयज्ज्ञानंतद्वत्प्रणीतत्वंसाध्यंचतत्रनास्ति । तस्यैकार्थमात्रज्ञत्वेनयावत्तद्वाक्यार्थज्ञानाभावेनोक्तसाध्यस्यतत्राभावादिति । ननुस्वविषयादधिकविषयज्ञानवत्प्रणीतत्वमात्रंनसाध्यं । किंतुस्वतात्पर्यविषयादधिकविषयज्ञानवत्प्रणीतत्वमेव । तच्चैकार्थमात्रज्ञप्रयुक्तवाक्येतिष्ठत्येव । स्वशब्देनैका

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **नन्विति** ॥ एवंतर्ह्यर्थवादानांप्राशस्त्यएवतात्पर्यात्संसर्गेतात्पर्याभावात्तज्ज्ञानंब्रह्मणोनस्यात् । तथाचसार्वज्ञ्यासिद्धिरित्याह ॥ **तर्हीति** ॥ अन्यथानुपपत्त्यातज्ज्ञानसिद्धिःपदार्थज्ञानवदित्यतआह ॥ **पदार्थेति** ॥ ननुसंसर्गज्ञानाभावे आनुपूर्वीविशेषविशिष्टतयापदप्रयोगोनयुक्त इतिचेन्न । त्वयार्थमुपलभ्यरचितत्वस्यानंगीकारात् । बहुकालविरतानुपूर्वीविशेषस्यादिकालउच्चारणमात्रमित्यंगीकारेण तत्रसंसर्गज्ञानस्या

**नन्वन्योर्थोनतात्पर्यविषयइतिचेत्तर्हिप्राशस्त्यपरार्थवादप्रतीतवायुक्षेपिष्ठादिसं
सर्गज्ञंब्रह्मनस्यात् । पदार्थज्ञानंविनापदप्रयोगायोगेपिसंसर्गज्ञानासिद्धेः ।**

गु० र्थमात्रज्ञप्रयुक्तंवाक्यं । तद्वाक्याप्रतिपाद्यत्वेसत्यनुभवादिरूपप्रमाणांतरवेद्योर्थः । तज्ज्ञानवत्प्रणीतत्वस्यतत्रसद्भावात् । तथाचनव्यभिचारइतिशंकते ॥ **नन्विति** ॥ तर्हिब्रह्मणोवायुक्षेपिष्ठादिवाक्यसंसर्गज्ञानंनस्यात् । तत्संसर्गस्यवायुक्षेपिष्ठादिवाक्यतात्पर्याविषयत्वात् । अर्थवादानांलक्षणयाप्राशस्त्यप्रतिपादकत्वेनतत्रैवतात्पर्ये णसंसर्गेऽतात्पर्यात् । नचसंसर्गस्यतात्पर्यविषयीभूतार्थापेक्षयाधिकविषयत्वेनतज्ज्ञत्वंब्रह्मणःकिंनस्यादितिवाच्यं । अधिकविषयशब्देनतद्वाक्याप्रतिपाद्यत्वेसत्यनुभ वादिप्रमाणांतरवेद्यत्वस्यैवविवक्षणेन वायुक्षेपिष्ठादिसंसर्गस्य"वायुर्वैक्षेपिष्ठादेवता"इत्याद्यर्थवादवाक्यप्रतिपाद्यत्वेनतदप्रतिपाद्यत्वाभावेनानुभवादिप्रमाणांतरवेद्यत्वेना धिकविषयत्वाभावेन तेनापिरूपेणब्रह्मणःसंसर्गज्ञानस्यवक्तुमशक्यत्वादित्याह ॥ **तर्हीति** ॥ ननुचपदप्रयोगान्यथानुपपत्त्यैवब्रह्मणोवायुक्षेपिष्ठादिवाक्यसंसर्गज्ञत्वंभ विष्यति । पदार्थज्ञानपूर्वकत्वात्पदप्रयोगस्य । पदार्थज्ञानाभावेपदप्रयोगायोगादित्यतआह ॥ **पदार्थज्ञानंविनेति** ॥ पदप्रयोगेणपदार्थज्ञानमेवानुपपन्नं । ननु संसर्गज्ञानं । तस्यवायुक्षेपिष्ठादिपदार्थत्वाभावादित्यर्थः । ननु शुकादेःपदार्थज्ञानाभावेपिपदश्रवणमात्रेणपदप्रयोगदर्शनात्कथमेतत् । अन्यथावाक्यप्रयोगान्यथा नुपपत्त्यावाक्यार्थज्ञानमपिसिध्येदितिचेन्न । पदानांपदार्थज्ञानाभावेस्वतंत्रप्रयोगानुपपत्तेः । संसर्गज्ञानासिद्धेरिति पदस्यविभक्त्यंतत्वात्विभक्तेश्चप्रातिपदिकसंज्ञापेक्ष

SGDF Sri Gargeshwari Digital Foundation

प्र० नुपयोगात् । तात्पर्यविषयेतिविवक्षायांसार्वज्ञासिद्धिंप्रकारांतरेणाह ॥ **किंचेति** ॥ **प्रत्यक्षेति** ॥ अप्राप्तेशास्त्रमर्थवदितिभावः ॥ **गंगेति** ॥ सप्रयोजनस्यैवशास्त्रार्थत्वादितिभावः । एवंस्वविषयादधिकविषयकज्ञानवदित्यंशपर्यालोचनयासार्वज्ञासिद्धिमुक्त्वेदानींप्रणीतत्वपर्यालोचने नापि"किंचेदंशास्त्रे"त्यादिटीकाद्युक्तदिशातदसिद्धिमाह ॥ **अपिचेति** ॥ एतेनशास्त्रयोनित्वमर्थमुपलभ्यरचयितृत्वंचेदसिद्धिः । उच्चारयि

मानांतरप्राप्तेसंसर्गेऽवांतरतात्पर्यस्याप्यभावात् । किंचवेदस्यातत्वेतात्पर्येप्रामाण्यायोगात्तत्वेचिन्मात्रेतात्पर्याद्ब्रह्मापि तन्मात्रज्ञंस्यात् । किंचप्रत्यक्षादिसिद्धस्यघटादेर्निष्प्रयोजनस्यगंगावालुकेयत्तादेश्चशास्त्राविषयत्वात्तज्ज्ञंब्रह्मनस्यात् । अपिचनतावदर्थमुपलभ्यरचयितृत्वंप्रणेतृत्वं । पौरुषेयत्वापातात् । नाप्यध्यापकवदुच्चारयितृत्वमात्रं । तेनसार्वज्ञासिद्धेः ।

गु० त्वात्तस्याश्चार्थज्ञानसापेक्षत्वादितिबोध्यं । स्यादेतदेवं यदिसंसर्गेसर्वथातात्पर्याभावंब्रूमः । प्राशस्त्येमुख्यतात्पर्यसद्भावेपिसंसर्गेऽवांतरतात्पर्यस्याभ्युपगमात् । तथाचब्रह्मणःसंसर्गज्ञत्वंस्यादेवेत्यतआह ॥ **मानांतरेति** ॥ मानांतरेतिहेतुगर्भविशेषणं । अन्यथा सिद्धार्थबोधकत्वेनवाक्यस्यानुपादेयत्वंनस्यादितिभावः । नन्वर्थवादार्थभूतःसंसर्गोमानांतरप्राप्तइतिननियमः । तदप्राप्तसंसर्गस्यापिसंभवात् । किंचयेनरूपेणसंसर्गस्यमानांतरप्राप्तत्वंतदन्येनरूपेणतात्पर्यसंभवान्नसार्वज्ञालाभइत्यतआह ॥ **किंचेति** ॥ संसर्गस्यातत्वत्वादितिभावः ॥ **तत्वइति** ॥ एवंचचिन्मात्रंचिन्मात्रज्ञमित्युक्तंस्यात् । तथाचावेद्यत्वासंभवस्सार्वज्ञालाभश्चेतिभावः ॥ **ब्रह्मापीति** ॥ स्वशब्देनवेदः तत्तात्पर्यविषयोब्रह्म तदपेक्षयाऽधिकज्ञानवद्ब्रह्म तत्प्रणीतत्वेवेदस्यसिद्धेपिब्रह्मणोनसार्वज्ञंसेत्स्यति । ब्रह्मणोब्रह्ममात्रज्ञत्वेनसार्वज्ञालाभादितिभावः । नन्वस्तिसंसर्गेतात्पर्यं । नचश्रुतितात्पर्यविषयत्वेसत्यत्वंस्यादितिवाच्यं । महातात्पर्यविषयस्यैवसत्यत्वेनावांतरतात्पर्यविषयस्यसंसर्गस्यसत्यत्वानापातादित्यतआह ॥ **किंचेति** ॥ "अतोर्थांतरमुक्तानुपयुक्त"मितिटीकायां केवलंशास्त्रयोनित्वंसार्वज्ञेऽनुपयुक्तमित्येवनाभिप्रेतं किंतु

SGDF
Sri Gargeshwari Digital Foundation

प्र० तृत्वंचेदप्रयोजकमित्युक्तंभवति । टीकाद्युक्तमुपलक्षणमितिभावेनशास्त्रयोनित्वंसार्वज्ञ्ञेविरुद्धंचेत्याह ॥ **किंचेति** ॥ **असार्वज्ञमिति** ॥ विशेषादर्शनजन्यत्वाद्भ्रमस्येतिभावः । एवेतिसाध्याभावव्याप्तत्वमाह ॥ **अदृष्टस्येति** ॥ मृत्पिंडेऽदृष्टस्यजलाहरणसामर्थ्यस्यघटादौदर्शना दितिभावः । वेदोपादानत्वेनब्रह्मणःसर्वप्रकाशशक्तिमत्त्वरूपंसार्वज्ञंचेदंधकारोपादानत्वादसार्वज्ञमपिस्यात् । एवंचत्वदुक्तिर्व्याहतेतिभावेनाह ॥ **किंचेति** ॥ **दाहादीति** ॥ तथाचब्रह्मणोविभुत्वेनसर्वदाहप्रसंगइतिभावः । उपादानत्वस्यत्वन्मतेऽधिष्ठानत्वरूपत्वात्तत्रचनैवमुक्तिर्युक्ते

किंचस्वव्यतिरिक्तोपदेश्यपुरुषगोचरस्यभ्रमस्यभ्रांतिसिद्धशरीरादेश्चाभावेउच्चारणायोगात्तस्यचासार्वज्ञंविनाऽसंभवाच्छास्त्र योनित्वमसार्वज्ञएवहेतुः । विवरणेतु "यथादीपगताप्रकाशनशक्तिस्तदुपादानेवह्नौतथावेदगतासर्वप्रकाशनशक्तिस्तदुपादाने ब्रह्मणि । कार्योपादानयोरेकशक्तित्वादित्युक्तं । तन्न । कारणेऽदृष्टस्यापिशक्तिविशेषस्यकार्येदर्शनात् । किंचत्वन्मतेंऽधका रदहनादेरपिब्रह्मोपादानकत्वात्तद्गताप्रकाशनदाहादिशक्तिमद्ब्रह्मस्यात् । अविद्यापिशास्त्रोपादानमितिसापिसर्वज्ञास्यात् ।

गु० सार्वज्ञाद्यभावसाधकंचेत्यभिप्रायेणतद्वाक्यव्याख्यानपूर्वकंतदुक्तांयुक्तिमाह ॥ **किंचेति** ॥ **तस्यचेति** ॥ भ्रमादेरित्यर्थः । ननु नैतत्सूत्रवैयर्थ्यं । प्रकारांतरे णसार्वज्ञसाधकत्वात् । तत्रहिशास्त्रोपादानत्वंब्रह्मणउच्यते । उपादानोपादेययोरेकशक्तिमत्वात्उपादेयगतसर्वप्रकाशनशक्तेर्ब्रह्मनिष्ठत्वात्सार्वज्ञलाभइतिविवरणमतं दूषयितुमनुवदति ॥ **कारणइति** ॥ ननुकार्यगतसर्वप्रकाशनशक्तेःकारणनिष्ठत्वाभावेतस्याकस्मिकत्वंस्यादतःकारणनिष्ठत्वमावश्यकमेवेतिसार्वज्ञंलभ्यतएवेत्यतआह ॥ **किंचेति** ॥ यदिवेदगतासर्वप्रकाशनशक्तिर्ब्रह्मण्यंगीक्रियतेकार्यकारणयोरेकशक्तित्वात् तर्हिकार्यकारणयोरेकशक्तित्वादेवाविद्याया अपिसर्वज्ञत्वमंगीकार्यंस्यात् । तत्कार्यभूतशास्त्रस्यसर्वप्रकाशकत्वात् । अन्यथाब्रह्मणोपितन्नस्यादित्याह ॥ **अविद्यापीति** ॥ नन्वविद्यायाअचेतनत्वाद्वेदोपादानत्वेपिनसार्वज्ञं । ब्रह्मणश्चेतनत्वा

प्र० त्वाह ॥ **किंचेति** ॥ एतेन "रज्जौभुजंगवद्ब्रह्मण्यारोपितोवेदइतिचे" दितिसुधावाक्यात्पूर्वं परिणामपक्षदूषणमपियोज्यमित्युक्तंभवति । "कथंचैवंसतिसार्वज्ञसिद्धि" रित्यादिसुधावाक्यंहृदिकृत्वाह ॥ **एतेनेति** ॥ तदेवाह ॥ **अविद्येति** ॥ विवरणमतेपिशास्त्रयोनित्वंसार्वज्ञेवि

किंचपरिणामिपरिणामयोरेकशक्तित्वेपिकथमधिष्ठानाध्यस्तयोस्तत् । एते नाधिष्ठानस्यब्रह्मणोविज्ञानशक्तिविवर्तरूपंशास्त्रमितिनिरस्तं । अविद्याका शादेरपितद्विवर्तत्वेनशास्त्रवत्सर्वप्रकाशकत्वापातात् । रज्ज्वामपिभयकं पादिशक्तेर्ब्रह्मण्यप्यावरणविक्षेपादिशक्तेःप्रसंगाच्च । बाह्यागमानामपि

गु० त्सार्वज्ञलाभइत्यतआह ॥ **किंचेति** ॥ अत्रहिब्रह्मणःशास्त्रंप्रतिकारणत्वंनपरिणामित्वंनिर्विकारत्वात् । किंत्वारोपाधिष्ठानत्वं । तथाचशास्त्रारोपाधिष्ठानत्वेपिनब्रह्म णःसर्वज्ञत्वं । अन्यथाशुक्तेरजतारोपाधिष्ठानत्वेनशुक्तिरजतयोरप्येकशक्तित्वंस्यादित्यतिप्रसंगादितिभावः ॥ **एतेनेति** ॥ तथाचसार्वज्ञलाभइतिभावः । एतेनेत्य तिदिष्टंदूषणमाह ॥ **अविद्याकाशादेरिति** ॥ नच ब्रह्मणिशक्तिद्वयमंगीक्रियते । तत्रविज्ञानशक्तिविवर्तरूपंशास्त्रं सच्छक्तिविवर्तरूपमविद्याकाशादीतिनाका शादेःसर्वप्रकाशत्वापातइतिवाच्यं । निर्विशेषत्वांगीकारेणशक्तिद्वयकल्पनेप्रमाणाभावादितिभावः । अध्यस्तगतशक्तेरधिष्ठानगतत्वेऽतिप्रसंगमाह ॥ **रज्ज्वामपीति** ॥ किंच यदिब्रह्मणोवेदोपादानत्वेनवेदार्थज्ञत्वात्सर्वज्ञतासिद्धिः तर्हिबौद्धागमानामपिब्रह्मोपादानकत्वात्तदर्थज्ञत्वेभ्रांतत्वंस्यादित्याह ॥ **बाह्यागमानामपीति** ॥ ननु बाह्यागमार्थज्ञत्वेपिब्रह्मणोनभ्रांतत्वं । विधिरूपतयातदर्थज्ञत्वेहिभ्रांतत्वंस्यात् । किंतुनिषेध्यरूपतयातदर्थज्ञत्वं । तथाचनभ्रांतत्वप्रसंगः । किंचभ्रांतिकल्पितजगद्धे

SGDF Sri Gargeshwari Digital Foundation

प्र० रुद्धमित्याह ॥ ब्रह्मेति ॥ प्रकारांतरेणविरुद्धत्वमुपपादयन्‘‘किंचवेदेज्ञानकारणशक्ति’’रित्यादिसुधोक्तमाह ॥ अपिचेति ॥ ‘‘जगत्कारणत्वेनसर्वज्ञत्वंनसिद्ध्यति । वेदाकर्तृत्वादित्याशंक्येदमुक्तमितिचे’’दित्यादिसुधावाक्यंविवृण्वान:पक्षांतरमाशंकते ॥ नन्विति ॥ तथाच नोक्तदोषइतिभावः ॥ यावदिति ॥ ‘‘यावद्विकारंतुविभागोलोकव’’दितिवियदधिकरणगुणसूत्रे विक्रियमाणंसर्वंकार्यंविभागः विभक्त

ब्रह्मविवर्ततयातदर्थज्ञत्वेब्रह्मणोभ्रांतत्वप्रसंगाच्च । अपिचत्वयाकार्योपादानयोरेकशक्तित्वस्योक्तत्वाद्वेदःस्वयमज्ञएवजीवान्प्रतिप्रकाशकइतिब्रह्मापितथास्यात् । तथाचसार्वज्ञार्थयत्नेऽत्यंताज्ञत्वमेवापन्नं । किंचजन्मादिकारणत्वेनैवोपलक्षणेनोपलक्ष्यस्वरूपसिद्धेःकिंनिर्विशेषत्वप्रतिकूलसार्वज्ञस्फोरणादिना । ननुतर्हिंपूर्वसूत्रोक्तसर्वकारणत्वाक्षेपेतत्समाधानार्थमिदमस्तु । उक्तंहिकल्पतरौ‘‘अथवावेदनित्यत्वाद्ब्रह्मणोविश्वयोनिता । नेतिशंकामपाकर्तुंशास्त्रयोनित्वमुच्यत’’इतीतिचेन्न । अस्यश्रुतीनांपरस्परविरोधपरिहारेण‘‘यावद्विकार’’मित्यादिसूत्रोक्तै

गु० त्वेपियथानभ्रांतत्वंतथाबाह्यागमार्थज्ञत्वेपिनभ्रांतत्वमित्यतआह ॥ अपिचेति ॥ तथास्यादिति ॥ स्वयमज्ञमेवजीवान्प्रतिप्रकाशकमितिस्यात् । ननुवेदस्याचेतनत्वादज्ञत्वेनप्रकाशकत्वेपिब्रह्मणश्चेतनत्वात्ज्ञत्वेनैवप्रकाशकत्वमित्यतआह ॥ किंचेति ॥ तथाचसूत्रवैयर्थ्यंतदवस्थमितिभावः । ननुनसूत्रवैयर्थ्यं । तस्य सार्वज्ञासाधकत्वेपिपूर्वसूत्रोक्तजगज्जन्मादिकारणत्वंकिंसर्वकारणत्वंकतिपयकारणत्वंवा नाद्यः वेदस्यनित्यत्वेनसर्वकारणत्वासंभवात् नांत्यः तथात्वेलक्षणस्यातिव्याप्तिरितिपूर्वाक्षेपेतत्समाधानार्थप्रवृत्तत्वादित्याशंकते ॥ नन्विति ॥ अस्येति ॥ तथाचात्रासंगतमेतदधिकरणमितिभावः । ननुदेवताधिकरणवत्प्रासंगिकमेतदि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वात् । भिन्नत्वात् । लोकवत् घटवदितित्वन्मतेव्याख्यातत्वादितिभावः । आदिपदेन "आकाशस्यब्रह्मकार्यत्वाभावेतद्व्यतिरेकापत्त्यैकविज्ञानेनसर्वविज्ञानप्रतिज्ञाहानिः । प्रतिज्ञाहि "यथासोम्यैकेनमृत्पिंडेने"त्यादिशब्दैरव्यतिरेकाभिप्राया" इत्यादिना "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य" इत्यादिसूत्रोक्तप्रतिज्ञाहान्यादिहेतवोग्राह्याः ॥ **वियत्वादइति** ॥ अन्यथावियदादावप्येवमाशंकायामत्रैवतन्निरासःस्यादितिभावः । अत्रयत्केनचिदुक्तंतदग्रेनिरसिष्यते । उपलक्षणमेतत् । "वेदकर्तृत्वेसूत्रेप्रमाणानुक्तेःशास्त्रयोनित्वादितिप्रतिज्ञामात्रत्वप्रसंगा"दितिसुधोक्तमपिध्येयं । सुधोक्तमुपलक्षणमितिमत्वादोषांतरमाह ॥ **किंचेति** ॥ **असिद्धिरिति** ॥ तथाचकथंतेनोक्तशंकानिरासइतिभावः । तत्सिद्ध्यां

भिन्नत्वादिसाधारणहेतुभिर्ब्रह्मेतरसर्वानित्यत्वप्रतिपादकेवि
यत्वादेववक्तव्यत्वात् । किंचाध्यापकेपिपूर्वपूर्वसदृशानुपूर्वी
रचयितृत्वस्यभावादभिनवानुपूर्वीरचयितृत्वादेश्चब्रह्मण्यप्य
भावादध्यापकादधिकस्यशास्त्रयोनित्वस्यब्रह्मण्यसिद्धिः ।

गु० त्यतआह ॥ **किंचाध्यापकेपीति** ॥ अध्यापकादधिकस्यशास्त्रयोनित्वस्यासिद्धिरित्येतदसिद्धमितिशंकते ॥ **नन्विति** ॥ अत्राप्यकस्मान्निस्सरणंनसमर्थनीयं । तस्यजन्मादिसूत्रेऽनुक्तत्वात् । तत्रहि अस्येत्यनेनघटादौप्रसिद्धंकर्तृत्वंयथाकाशादावुच्यते तथालोकसिद्धंप्रमाणवाक्यंप्रतियत्कर्तृत्वंतस्यैववक्तव्यत्वादित्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तोक्तमाशंक्यनिराह ॥ **नन्विति** ॥ एवंसूत्रार्थंनिरस्यतदधिकरणशरीरमपिनिराह ॥ **एतेनेति** ॥ "लक्षणानंतरमवश्यापेक्षिते"त्यादिनो क्तदूषणजातेनेत्यर्थः । विस्तृतंप्राकृतदधिकरणशरीरमस्माभिः । सिद्धांतमनुवदति ॥ **साधयतीति** ॥ "अस्यमहत"इत्यादिवाक्यंवेदकर्तृ त्वेनसर्वज्ञत्वमनुमानविधयासाधयतीत्यर्थः । रामानुजमतंनिराह ॥ **केचित्त्विति** ॥ यतोवेत्यादिवाक्यंकिंब्रह्मणिप्रमाणमुतनेत्यादिश्रुतप्रका

ननुबहुकालविरतसंप्रदायस्यवेदस्यसर्गादावकस्मान्निस्सरणंब्रह्मण्यधिकमितिचेन्न । जन्मादिसूत्रेऽस्येत्यनेनशास्त्रस्यापिविव क्षायांघटादिकंप्रतिप्रसिद्धकर्तृत्वस्याकाशादीन्प्रतीवलौकिकप्रमाणवाक्यंप्रतिप्रसिद्धकर्तृत्वस्यशास्त्रंप्रतिवक्तव्यतयानिस्सरणाव धित्वस्यानुक्तत्वेनेहतत्समर्थनायोगात् । एतेनैव"अस्यमहत"इत्यादिवेदवाक्यंब्रह्मणोवेदकर्तृत्वेनसर्वज्ञत्वंनसाधयति वेद स्यसापेक्षत्वप्रसंगादितिपूर्वपक्षे साधयति अर्थमुपलभ्यरचयितृत्वस्याभावात् । उच्चारयितृत्वमात्रस्यचसापेक्षत्वानापादक त्वादितिपरेषामधिकरणमपास्तं । "अस्यमहत"इत्यादेरनुमानरूपत्वाभावाच्च । केचित्तु जगत्कारणंनवेदवाक्यप्रतिपाद्यं ।

गु० **जन्मादीति** ॥ **निस्सारणेति** ॥ निस्सारणविषयेऽवधित्वस्य ॥ **एतेनैवेति** ॥ उच्चारयितृत्वंनपूर्वसदृशानुपूर्वीरचयितृत्वं । अध्यापकसाधारण्यात् । नाप्य भिनवानुपूर्वीरचयितृत्वं । ब्रह्मण्यप्यभावात् । नापिबहुकालविरतसंप्रदायस्यवेदस्यसर्गादावकस्मान्निस्सारणावधित्वं । तस्यपूर्वमनुक्तत्वेनप्रकृतासंगतत्वादित्युपपा दनेनेत्यर्थः ॥ **वेदस्येति** ॥ अस्येत्यनेनब्रह्मसर्वज्ञंवेदकर्तृत्वादितिहिसार्वज्ञ्यंसाधनीयं । तत्रकर्तृत्वंनामार्थमुपलभ्यरचितत्वं । एवंचार्थोपलंभापेक्षास्यादितिसापे क्षत्वंस्यादित्यर्थः । किंचसत्यनुमानरूपत्वेएवंपूर्वपक्षयित्वासिद्धांतयितव्यं । तदेवनेत्याह ॥ **अस्यमहतइति** ॥ अस्त्वनुमानेनसिद्धिः तथापिवेदवाक्यप्रतिपा ॥ १६३ ॥

प्र० शिकोक्तसंशयोध्येयः ॥ **अनुमानेनेति** ॥ कार्यत्वाद्यनुमानेनेत्यर्थः । अप्राप्तएवशास्त्रमर्थवदितिभावः ॥ **दुष्टत्वेनेति** ॥ जीवानामेववि चित्रज्ञानशक्तिमतांप्रत्येकंकृत्स्नजगन्निर्मातृत्वासंभवेपिप्रासादादिकर्तॄणामिवैकदेशनिर्माणेनमिलित्वाकृत्स्नजगन्निर्मातृत्वोपपत्त्यादिनादुष्टत्वेने त्यर्थः ॥ **यथोक्तमिति** ॥ श्रुतप्रकाशइतिशेषः ॥ **असिद्धेरिति** ॥ अन्यथास्वर्गकामोयजेतेत्यादेरनुवादकत्वंस्यात् । स्वर्गांशेऽनुवादादि

अनुमानेनसिद्धेः । तथाचवाक्यानामनुमानप्राप्तानुवादित्वेनाविचार्यत्वमितिप्राप्ते अत्यंतातींद्रियत्वेनप्रत्यक्षाद्य विषयत्वात् कार्यत्वाद्यनुमानानांदुष्टत्वेनेश्वरासाधकत्वाच्च वेदांतवेद्यत्वमित्यननुवादकानां वेदांतानांविचार्यत्वमि तिसिद्धांतइत्याहुः। तत्रब्रूमः । "यतोवे"त्यादिवाक्यंप्रसिद्धार्थयच्छब्दयोगाद्वाक्यांतरसिद्धकारणत्वानुवादेनतस्यल क्षणत्वविधायकमितिहितेमतं । यथोक्तं "यच्छब्दयोगात्कारणत्वमनूद्यत"इति"ब्रह्मलक्षणत्वमेवास्यवाक्यस्यविधे य"मितिच । एवंचकारणत्वस्याऽऽनुमानिकत्वेपितदनुवादेनलक्षणत्वविधायकस्य"यतोवे"त्यादेरनुवादकत्वासिद्धे स्तत्सिद्ध्यर्थंकारणत्वस्यब्रह्मलक्षणत्वमानुमानिकमितिपूर्वपक्षयितव्यं तदेवचशास्त्रयोनीतिसिद्धांतयितव्यंस्यात् ।

गु० द्यत्वंकुतोनेत्यतआह ॥ **तथाचेति** ॥ अकार्यस्यैवविचार्यत्वादितिभावः । अत्रकिंप्रत्यक्षसिद्धव्याप्तिकेनविमतमीश्वरकर्तृकंकार्यत्वादित्येवंरूपानुमानेनजगत्कारण सिद्धिः उतईश्वरोजगत्कर्ताइतिप्रत्यक्षसिद्धपक्षकेन यद्वाकार्यत्वाद्यनुमानेन नोभयमित्याह ॥ **अत्यंतातींद्रियेति** ॥ प्रत्यक्षमादि मूलंयस्यप्रत्यक्षसिद्धपक्षकं तत्सिद्ध व्याप्तिकंवा तदविषयत्वादित्यर्थः । तृतीयंप्रत्याह ॥ **कार्यत्वादीति** ॥ एवंविधाधिकरणवचनंसिद्धांतविरुद्धमित्याशयेनतत्सिद्धांतंदर्शयति ॥ **यतोवेत्या दिना** ॥ **तत्सिद्ध्यर्थमिति** ॥ अनुवादकत्वसिद्ध्यर्थमित्यर्थः । ननुकारणत्वस्यब्रह्मलक्षणत्वमानुमानिकमित्यत्रैवोक्तस्यपूर्वपक्षस्यतात्पर्यमित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तिभावः । अस्तुवाकथंचित्कारणवाक्यानामनुवादकत्वंतथापिनविचाराक्षेपोयुक्तइत्याह ॥ **किंचेति** ॥ **विचारइति** ॥ जीवोवाब्रह्मवेत्यादिविचारइत्यर्थः । नचतत्रविचारप्रसक्तिरेवनेतिवाच्यं । दहराधिकरणेसत्यकामवाक्यस्य अंतराधिकरणेहिरण्यश्मश्रुवाक्यस्यत्वन्मतेविचारयिष्यमाणत्वात् । नचकारणत्ववत्सत्यकामत्वादिकमप्यानुमानिकमितिपूर्वःपक्षः । त्वयाकारणत्वएवपूर्वपक्षितत्वात् । कारणत्वेकार्यत्ववत्सत्यकामत्वादिव्याप्यलिंगाभावाच्चेतिभावः ॥ **नचजिज्ञासेति** ॥ तथात्वेअंतराद्यधिकरणायोगादितिभावः । ननुजन्मादिसूत्रेकारणवाक्यमात्रविचारसाधनादत्रापितन्मात्रमाक्षिप्यसमाधीयतइत्यतआह ॥ **किंचेति** ॥ "अथवाययथोक्तमृग्वेदादिशास्त्रंयोनिःकारणंप्रमाणंयस्यब्र

किंच कारणवाक्यस्यानुवादकत्वेपि"सत्यकामःसत्यसंकल्पः हिरण्यश्मश्रुर्हिरण्यनख"इत्यादीनामकारणवाक्यानांविचारःपूर्वपक्षेपिसेत्स्यत्येव । नचजिज्ञासासूत्रेकारणवाक्यस्यैवविचारःप्रतिज्ञातः । येनेहपूर्वपक्षेसआक्षिप्येत । किंचास्यसूत्रस्यजन्मादिसूत्रस्यचकारणमात्रविचारसाधकत्वेकारणाकारणवाक्यविचारसाधकाद्यचतुर्थसूत्रमध्यस्थत्वमयुक्तं ।

गु० **किंचेति** ॥ किमत्रसर्ववाक्यविचारआक्षिप्यतेउतकारणवाक्यविचारएव । नाद्यइत्याह ॥ **कारणवाक्यस्येति** ॥ सत्यसंकल्पत्वहिरण्यश्मश्रुत्वादेरन्यतोप्राप्तत्वादितिभावः । द्वितीयंप्रत्याह ॥ **नचेति** ॥ ननुजिज्ञासासूत्रेसर्ववाक्यविचारस्यप्रतिज्ञातत्वात्तदंतर्गतवाक्यविचारएवाक्षिप्यतइत्यतआह ॥ **किंचेति** ॥ **एतेनेति** ॥ अद्वैतिनांवर्णकांतरंनिरस्तमित्यन्वयः । आनुमानता अनुमानसिद्धता । तस्यानिरासेनेत्यर्थः । आगमोपदर्शनार्थं आगमसिद्धत्वोपदर्शनार्थं । अनुमानेनापिकारणताब्रह्म

SGDF Sri Gargeshwari Digital Foundation

प्र० ह्मण''इत्यपिपरभाष्योक्तंनिराह ॥ **एतेनेति** ॥ अतिव्याप्त्यादिरूपफलाभावेनेत्यर्थः । तदेवव्यनक्ति ॥ **प्रमेयइति** ॥ आनुमानिकत्वेवे
दांतानामनुवादकत्वेनाविचार्यत्वंप्राप्तंतन्निरसितुमिदमित्यनुशयेनाह ॥ **किंचेति** ॥ परस्यशुद्धएवशास्त्रयोनित्वांगीकारेपिविशिष्टकल्पोप
न्यासःसंभावितत्वेनवा विशिष्टएवशास्त्रयोनित्वंत्वयापिवाच्यं । तस्यैवाध्यायचतुष्टयार्थत्वात् । नतुशुद्धइतियुक्तिसूचनार्थंवेतिध्येयं । अतए
वविशिष्टेशुद्धेवाशास्त्रंप्रमाणमित्येववक्तव्येतस्यप्रपंचः । पंचमेत्युपहासः ॥ **वक्तुमिति** ॥ सूत्रकृतेतिशेषः ॥ **पूर्वोत्तरेति** ॥ अस्यसूत्रस्ये

**एतेनैवाद्वैतिनां शास्त्रं योनिः ज्ञप्तिकारणमस्येतिविग्रहाश्रयणेनपूर्वोक्तलक्षणस्यानुमानतोपमर्दनेनागमोपदर्श
नार्थमिदमधिकरणमितिवर्णकांतरंनिरस्तं । प्रमेयेविशेषाभावेप्रमाणेविवादायोगात् । किंचाद्यसूत्रेब्रह्मशब्दे
नबृहत्त्वादिधर्मवत्तया द्वितीयसूत्रेचकारणत्वादिधर्मवत्तयोक्ते उत्तरत्रापि''ईक्षतेर्नाशब्दं अंतस्तद्धर्मोपदेशात्
आकाशस्तल्लिंगा''दित्यादावीक्षितृत्वादिभिस्तैस्तैरसाधारणधर्मैःकारणत्वादिविशिष्टतयातत्तद्वाक्यार्थत्वेनवक्ष्य
माणेब्रह्मणिशास्त्रंप्रमाणं किंवाबृहत्त्वकारणत्वादिधर्मरहितेपंचमाध्यायसिद्धेत्वदभिप्रेतेशून्यब्रह्मणि । नाद्यः ।
तस्याताविकत्वात् । नचतत्वजिज्ञासुंप्रत्यादितएवशास्त्रस्यातत्वावेदकत्वंवक्तुंयुक्तं । अंत्येतुपूर्वोत्तराविरोधाय**

गु० णएवसिध्यत्यन्यस्सवा । नाद्यइत्याह ॥ **प्रमेयइति** ॥ तथाचब्रह्मकारणतासिद्धिर्यथागमेन एवमनुमानेनापिभवतीति प्रमेयेविशेषाभावादनुमानंनिराकृत्यागमोप
दर्शनमयुक्तमित्यर्थः । नद्वितीयः । एवंह्यतिव्याप्त्यापूर्वपक्षेआगमेनसिद्धांतइत्युक्तंस्यात् । तथाचास्मन्मतप्रवेशएवस्यादितिभावः ॥ **पूर्वोत्तरेति** ॥ अथातोब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० दाह् यतोवेत्यादिवाक्यमनुमानप्राप्तकारणानुवादित्वादमानमितिप्राप्ते शास्त्रप्रामाण्यादेवजगज्जन्मादिकारणंब्रह्म नत्वनुमानप्रामाण्यादितिव्यवस्थापयितुमिदंसूत्रं । तदर्थश्च योनिपदस्यज्ञप्तिहेत्वर्थकत्वेपिषष्ठीतत्पुरुषोनबहुव्रीहिः । समासप्राबल्यात् । शास्त्रस्ययोनित्वंशास्त्रयोनित्वं तस्माच्छास्त्रस्यप्रामाण्यात् जगज्जन्मादिलक्षणंब्रह्मभवतीति । तथाशास्त्रस्ययोनित्वाद्वेदस्यकर्तृत्वात्सर्वज्ञंब्रह्मेत्यद्वैत्युक्तंवर्णकांतरमप्यत्रग्राह्यमिति । तन्न । सौत्रशास्त्रपदेनदुरागमस्यापिनिरासप्रतीत्याऽनुमानमात्रनिरासस्यसौत्रशास्त्रपदविरुद्धत्वात् । सूत्रेतत्पुरुषाश्रयणेपक्षधर्मतायाअलाभेन काकस्यकार्ष्ण्याद्धवलःप्रासादइतिवद्वैयधिकरण्यापत्त्यातदर्थंबहुव्रीहेरवश्यमाश्रयणीयत्वात् । योनित्वशब्दस्यगुणवाचित्वेनतेन"पूरणगुणे"त्यादिसूत्रेणषष्ठीसमासनिषेधाच्च । गत्यंतरेसति"संज्ञाप्रमाणत्वा"दित्यादिज्ञापकेनसमाधानस्यक्लिष्टत्वाच्च । जगत्कारणत्वरूपप्रकृतसाध्येनान्वयसंभवेजन्मादिलक्षणंब्रह्मेतिसाध्याध्याहारायोगाच्च । किंचानुमानंयतोवेत्यादिवाक्योक्तमेवकर्तारमनुमापयतिततोन्यंवा । आद्येविरोधोनेतीयंचिंताव्यर्था । तस्यश्रुत्यनुग्राहकत्वेनदार्ढ्यहेतुत्वात् । नांत्यः । अनुवादकत्वाप्राप्त्याश्रुत्यप्रामाण्यायोगेनग्रंथकृदुक्तरीत्याऽतिव्याप्त्यादिनापूर्वपक्षस्यौचित्याच्च । "आप्तैकस्तुजनार्दनः दत्तंदुर्वाससंसोममाप्तेशब्रह्मसंभवान् आप्तब्रह्मादयःशब्दास्तमृतेविष्णुमव्ययं । नसंभवंति स्वातंत्र्यात्स्वइतिप्रोक्तआप्तायंचातततत्वतः आतततत्वाच्चमातृत्वादाप्तेतिपरमोहरिः" इत्यादिश्रुतिस्मृतिभिराप्तभूरितिचतुर्मुखजनकेविष्णौप्रसिद्धाप्तघटित"नावेदवि"दित्यादिश्रुतेःशिवस्यशास्त्रैकगम्यत्वेउदाहरणत्वायोगेनसिद्धांतस्यानुदयाच्च । उक्तंचानुव्याख्याने"विष्णावेवाप्तशब्दस्यरूढत्वान्नशिवादिकान् । श्रुतिर्वक्ती"ति"सर्वोत्कर्षेदेवदेवस्यविष्णोः ततोवेदास्तत्पराःसर्वएवे"त्यादिश्रुतिभिः"नारायणपरावेदाः वेदैश्चसर्वैरहमेववेद्यः वेदेरामायणेचैव योमामेवमसंमूढोजानातिपुरुषोत्तमं । ससर्ववित् मुख्यंचसर्ववेदानांतात्पर्यंश्रीपतेःपरं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० उत्कर्षेत्विति सर्वज्ञंसर्वकर्तारंनारायणमनामयं। सर्वोत्तमंज्ञापयंतिमहातात्पर्यमत्रहि । सर्वेषामेववेदाना"मित्यादिस्मृतिभिः"ऋगाद्याभारतंचैवे"त्युपक्रम्य"ज्ञेयएतैःसदायुक्तैः केवलागमविज्ञेय"इतिपठितयास्पष्टस्मृत्याच प्रत्यधिकरणंभाष्योक्तश्रुत्यादिभिर्विष्ण्वेकनिष्ठश्रुतिलिंगादिन्यायैश्चविरुद्धत्वाच्च"ईशानःसर्वविद्याना"मित्यादावीशानादिनाम्नः"शब्दादेवे"तिसूत्रोक्तरीत्या"योदेवानांनामधा"इतिश्रुत्या"अजस्यनाभावि"तिपद्मनाभत्वलिंगोपेतयाविष्णुपरत्वोपपत्तेरितिदिक् । अद्वैत्युक्तवर्णकांतरांगीकरणंतुग्रंथकृदुक्तानेकदूषणपराहतं । यदत्रकल्पतरूक्तकल्पे"आनुषंगिकार्थत्वान्नपृथक्संगत्यपेक्षेतिवियत्पादेनिवेशइतिदूषणमसंगत"मितिभाषणं तन्न । सूत्रार्थत्वेनैववर्ण्यमानस्यानुषंगिकत्वाभावादिति । पंचरात्राधिक्योक्तौकथंवेदपंचरात्रयोरैक्यलाभइत्यतआह ॥ **ऐक्येति** ॥ **निर्धारणेति** ॥ "ज्ञानेष्वेतेषुराजेंद्रसर्वेष्वेतद्विशिष्यते"इत्यत्रैतेष्वितिनिर्धारणार्थकसप्तम्यंतैतच्छब्दपरामृष्टानांमध्यएवाकिंचिदेतच्छब्देनपरामृश्य"विशिष्यत"इत्यतिशयितत्वेनवाच्यतया पंचरात्रस्यपृथक्प्रागनिर्देशेनवेदारण्यपदेनाप्यग्रहणेनिर्धारणार्थकसप्तम्ययोगइत्यर्थः । ननुसांख्याद्यैक्यबुद्ध्यासांख्यादिपदेनैवपंचरात्रविवक्षाऽस्त्वि

केषांचित्पक्षेव्यवहिताद्यसूत्रोक्तविचारकर्तव्यतयान्वयात् । टीकाक्षरार्थस्तु ॥ ऐक्याभि[१२५]प्रायाभावेपंचरात्राधिक्यकथनमिति ॥ वेदारण्यकशब्देनपंचरात्रस्याविवक्षायां "एतेष्वेतद्विशिष्यत"इतिनिर्धारणायोगः । पंचरात्रस्यप्रागनिर्देशात् ।

गु० त्वादितिवाच्यं । अप्रकृतस्यैवाधिक्यकथनसंभवात् । सांख्याद्यैक्याभिप्रायेणपदांतरेणापिपरामर्शसंभवादित्यतोव्याचष्टे ॥ **वेदारण्यकशब्देनेत्यादिना** ॥ सांख्यादौपंचरात्रस्यप्रविष्टत्वान्निर्धारणंभविष्यतीत्यतआह ॥ **पंचरात्रस्येति** ॥ ननुपंचरात्रस्यसांख्याद्यैक्यात्सांख्यादिशब्देनतस्यविवक्षितत्वेनप्रकृतत्वान्निर्धारणंभवि

SGDF
Sri Gargeshwari Digital Foundation

प्र० पिप्राबल्यमितिभाति । बहुव्रीहौलक्षणाया:तर्कतांडवेनिरासादतोन्यथाप्राबल्यमुपपादयति ॥ **समस्यमानेति** ॥ उत्तरपदार्थप्रधानत्वात्त त्पुरुषस्येतिभावः ॥ ७ ॥ **शास्त्रयोनित्वाधिकरणंसंपूर्णं** ॥ ३ ॥

॥ ॐतत्तुसमन्वयात्ॐ ॥ संगतिफलेआह ॥ **शास्त्रेति** ॥ इतियत्पूर्वाधिकरणफलंतस्याक्षेपादाक्षेपिकीसंगतिः । इयंसुधोक्ता । अन्यामपिस्वयमाह ॥ **पूर्वेति** ॥ पूर्वमुपजीव्यास्यप्रवृत्तेरुपजीव्योपजीवकभावरूपेत्यर्थः । अतिव्याप्तिनिरासएवात्रापिफलमित्युक्तंभवति । पूर्वेत्रात्रचफलैक्येपिप्रापकभेदादधिकरणभेदइतिबोध्यं । संगतिटीकाव्याख्यातप्रायेतिमत्वा"तत्कारणत्वेने"त्यादिविषयसंशयटीकांव्यनक्ति ॥

समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानाद्बहुव्रीहेस्तत्पुरुषस्यतदत्यागेनोत्तरपदार्थप्रधानस्य प्राबल्यमितिभावः ॥ ७ ॥ **शास्त्रयोनित्वाधिकरणंसंपूर्णं** ॥ ३ ॥

॥ ॐतत्तुसमन्वयात्ॐ ॥ शास्त्रयोनित्वेनकारणत्वस्यनातिव्याप्तिरितिपूर्वाधिकरणफलाक्षेपाद्वा पूर्वाधिकरणसिद्धंकारणस्यशास्त्रयोनित्वंविष्णोरन्यस्यवेतिविशेषविचाराद्वाऽनंतरसंगतिः ।

गु० यस्येतिबहुव्रीहिरित्युक्तं । तदाक्षिसंटीकायां"समासप्राबल्या"दित्यादिना । तत्रसमासप्राबल्यंकथमितिनप्रतीयते । अतआह ॥ **समस्यमानेति** ॥ ७ ॥ **शास्त्रयोनित्वाधिकरणंसंपूर्णं** ॥ ३ ॥

॥ ॐतत्तुसमन्वयात्ॐ ॥ अनंतरसंगतिंदर्शयति ॥ **शास्त्रयोनित्वेनेति** ॥ पूर्वपक्षोपसंहारटीकानुसारेणाद्यासंगतिः संदेहटीकानुसारेणद्वितीयेतिबोध्यं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० अत्रेत्यादिना ॥ शास्त्रयोनित्वं शास्त्रतात्पर्यविषयत्वं । कारणत्वेनेतिशेषः ॥ **शैवेति** ॥ शैवहैरण्यगर्भसांख्यसौरशाक्तेयपंचरात्राद्यागमेनेत्यर्थः । अतएववक्ष्यति "नचैवंपंचरात्रादिनाविष्णावपी"त्यादि । अतएवशास्त्रपदस्यवेदतदनुसारिपरस्यप्रस्तुतत्वेपितदनुसारिणोनिर्णायकत्वेनपृथक्करणाय"वेदतात्पर्ये"तिवेदपदोक्तिः । तेनशैवादिनावेदतात्पर्यनिश्चयेन्यस्यैवकारणत्वावगमादन्यस्यापीत्याद्यचिंतायामपिपदायोगइतिनिरस्तं । पंचरात्रादिनाविष्णोरपिप्राप्तेः । यद्युपक्रमादीनांबलाबलव्यवस्थानसंभवति तदातैस्तात्पर्यानिश्चयाच्छैवपंचरात्रादिनैवतन्निश्चयादन्यस्यापीतिपूर्वपक्षेफलं । यदातुसंभवतितदातैरेवतात्पर्यनिर्णयाद्विष्णोरेवेतिसिद्धांतेफलमितिबोध्यं । इयंचिंतापरंपरान्यायविवरणमूलकपूर्वपक्षोपयुक्ता । भाष्योक्तपूर्वपक्षोपयुक्तातु आद्यचिंतानंतरं तदर्थंकिंवेदस्यापातप्रतीतएवार्थउतपूर्वापरविमर्शजन्यधीसिद्धः । तदर्थमापातप्रतीतार्थत्यागेवेदार्थोबाधितोभवत्युतनेत्येवंध्येया । नचैवंद्वयोर्निरस्यत्वेऽधिकरणभेदः । उपक्रमादिलिंगकस्तात्पर्यनिर्णयइतिसिद्धांतन्यायेनैकेनानेकेषांनिरासेपितद्भेदाधीनाधिकरणभेदस्येहानाशंक्यत्वात् । अतएवनिराकार्यभेदाद्भेदइतिकस्यचिदुक्तिरपास्ता । इदंचसुधाकारमतेबोध्यं । टीकाकृन्मतेतु प्रतीतिसमुच्चितस्यैवागमस्यप्रापकतयाविशिष्टस्यैकस्यैवनिरस्यतयानभेदशंकापीतिध्येयं । एतन्मतेशैवाद्यागमादिनेत्यत्रापातप्रतीतिविशिष्टेनेत्यर्थः । पूर्वाक्षेपपूर्वन्यायविवरणोक्तपूर्वपक्षमारचयति ॥ **कारणत्वस्येति** ॥ एतेन"रुद्रादीनामपी"त्यादि

अत्रशास्त्रयोनित्वंकिमन्यस्यापिकिंवाविष्णोरेवेतिचिंता । तदर्थंवेदतात्पर्यनिश्चयःकिंशैवागमादिनाकिंवोपक्रमादिनेति । तदर्थमुपक्रमादेर्बलाबलव्यवस्थानसंभवत्युतसंभवतीति । पूर्वपक्षस्तु । कारणत्वस्यशास्त्रयोनित्वेप्यतिव्याप्तिःशैवाद्यागमा

गु० फलाक्षेपात्संगतिरित्युक्तं । तत्राक्षेपंदर्शयंश्चिंताप्रकारमाह ॥ **अत्रेति** ॥ फलाक्षेपमुपपादयति ॥ **पूर्वपक्षस्त्विति** ॥ **कारणत्वस्येति** ॥ रुद्रस्यापिशास्त्रेकारण

SGDF
Sri Gargeshwari Digital Foundation

प्र० टीकाव्याख्याता । शैवादेरप्रामाण्यमाशंक्याह ॥ **वेदव्याख्यानेति** ॥ तथाचवक्ष्यति“प्रमाणभूते”त्यादि ॥ **मानांतरेति** ॥ “नहिरुद्रादे”रित्यादिनावक्ष्यमाणदिशेतिभावः ॥ **तदुक्तमिति** ॥ “व्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणंभवतीतिन्यायः“लण्णि”त्यत्रसूत्रेणित्करणेनज्ञापित”इत्युक्तंमहाभाष्ये । इत्यादिशास्त्रमित्यादिपदात्“हिरण्यगर्भःसमवर्तताग्रे”इत्यादिशास्त्रंग्राह्यं । शिवस्य शिवादेरित्यर्थः । एतेन“शैवाद्यागमादित्यादिनापाशुपतशास्त्रेषुरुद्रादिर्जगत्कारणत्वेनवेदादिवेद्यइतिनिगदितत्वा”दितिटीकाव्याख्याता । अप्रामाण्यमाशंक्य

द्वेदव्याख्यानरूपा(द्वेदजप्रतीत्यनुगुणा)न्मानांतराविरुद्धाद्रुद्रादेःकारणत्वेवेदतात्पर्यनिश्च यात् । काव्यादिव्याख्यानादिवकाव्यस्य । तदुक्तं “व्याख्यानतोविशेषप्रतिपत्ति”रिति । उक्तंह्यागमेषु “ज्ञात्वाशिवंशांतिमत्यंतमेतीत्यादिशास्त्रंशिवस्यमोक्षदत्वादिपर”मिति ।

गु० त्वस्यप्रतिपादनादितिभावः । ननुशास्त्रेणरुद्रस्यकारणत्वेप्रतिपादितेपिशास्त्रस्यरुद्रकारणत्वेतात्पर्याभावान्नातिव्याप्तिरित्यतआह ॥ **शैवाद्यागमादिति** ॥ अत्रशैवाद्यागमाद्रुद्रादेःकारणत्वेवेदतात्पर्यनिश्चयादित्यन्वयः । शैवाद्यागमादेःशास्त्रतात्पर्यनिश्चायकत्वंकिंतेनासंबंधात् तद्विरुद्धत्वाद्वा मानांतरविरोधाद्वेतिविकल्प्य क्रमेणदूषयति ॥ **वेदव्याख्यानरूपादित्यादिना** ॥ **मानांतरेति** ॥ नचविष्णुकर्तृत्वप्रतिपादकमानांतरविरुद्धत्वात्कथंतद्विरुद्धत्वमितिवाच्यं । शैवाद्यागमविरोधेनतस्यस्वार्थेतात्पर्याभावाद्देशकालव्यवस्थयोभयकारणत्वस्यवक्ष्यमाणत्वेनतद्विरोधाभावाच्चेतिभावः । अप्रयोजकतांपरिहरति ॥ **काव्यादीति** ॥ हेत्वसिद्धिंपरिहरति ॥ **उक्तंहीति** ॥ अथवाकालादीत्यनेनव्याप्तिमुपपाद्याऽप्रयोजकतांपरिहरति ॥ **उक्तंहीति** ॥ विशेषप्रतिपत्तिः तात्पर्यार्थप्रतिपत्तिरित्यर्थः । व्याख्यान

प्र० प्रागुक्तव्याख्यानपदतात्पर्यंविवृणोति ॥ **नचेति** ॥ यद्यपिटीकायां“नचतस्याप्रामाण्येनासाधकत्व”मित्यादिनाऽऽगमाप्रामाण्यमाशंक्यप्रतीतिसाहित्येनप्रामाण्यमुपपादितं तथापिसुधायां “नशास्त्रतात्पर्यावगतावापातप्रतीतिर्वाव्याख्यातृवचनंवालिंग”मितिद्वयोःस्वतंत्रहेतुत्वोक्तेस्तत्समर्थनाय प्रतीतिनैरपेक्ष्येणप्रामाण्योपपादनमित्यदोषः । ननुकारणत्ववत्तात्पर्यमपि “सर्वेवेदा”इत्यादिशास्त्रगम्यं । अतोनान्येषामपिप्रसक्तिरित्यतआह ॥ **नचेति** ॥ **आत्माश्रयादिति** ॥ तात्पर्यज्ञानस्यशास्त्रार्थज्ञानेहेतुत्वात्तस्यचशास्त्रजन्यत्वेतात्पर्यस्यापिशास्त्रार्थतापत्त्याशास्त्रार्थज्ञानेशास्त्रार्थज्ञानंहेतुरितिस्यादित्यर्थः । ननुसर्वशास्त्रतात्पर्यनिश्चयः “सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमी”त्युपक्रम्य“तद्विष्णोःपरमंपद”मित्युक्तेर्विष्णावेवसर्ववेदतात्पर्यमनेनावगम्यते । एतद्वाक्यतात्पर्य

नचप्रमाणभूतव्याख्येयप्रतीत्यनुसारिव्याख्यानप्रामाण्येमानांतराविरोधंविनाहेत्वंतरापेक्षास्ति । नचकारणत्वमिवशास्त्रतात्पर्यमपिशास्त्रगम्यं । आत्माश्रयात् । येनशैवागमादिःतात्पर्यानिश्चायकःस्यात् ।

गु० स्याप्रामाण्यंद्वेधा । व्याख्येयाप्रामाण्येनवाप्रमाणांतरविरोधेनवा । तत्रप्रकृते नव्याख्येयाप्रामाण्यं । वेदस्यप्रमाणत्वात् । नद्वितीयः । तदभावादित्याह ॥ **नचेति** ॥ ननुकारणस्येवशास्त्रतात्पर्यस्यापिशास्त्रैकसमधिगम्यत्वेनशैवाद्यागमानांचशास्त्रत्वेनशास्त्रतात्पर्यनिश्चायकत्वमित्यतआह ॥ **नचेति** ॥ यद्वाऽन्यथानुपपत्त्याचशैवाद्यागमस्यैवतात्पर्यनिश्चायकत्वमावश्यकमित्यभिप्रेत्याह ॥ **नचेति** ॥ तथाहि । तात्पर्यनिश्चायकंकिंशास्त्रंकिंवोपक्रमादिकं । आद्येपिस्वतात्पर्यनिश्चायकंस्वयमेववास्वाध्यायोध्येतव्यइत्यादिवत्सर्वेवेदाइतिसाधारणमेववा । नाद्यइत्याह ॥ **आत्माश्रयादिति** ॥ अनिश्चिततात्पर्यकस्यशास्त्रस्यतात्पर्यनिश्चायकत्वायोगान्निश्चित

SGDF Sri Gargeshwari Digital Foundation

प्र० त्वन्येनास्तु । नैतावताऽऽत्माश्रयइत्यतस्तात्पर्यस्यशास्त्रगम्यत्वमुपेत्याह ॥ **सर्वेवेदाइति** ॥ शिवे शिवादौ । विष्णोःपरमंपदंप्राप्यंशिवादि रूपमित्येवंरूपतयातस्यार्थइतिभावः । ‘‘यथाच‘‘वेदैश्चसर्वैरहमेववेद्य’’इत्यादिशास्त्रबलाद्वेदादिकंविष्णोःप्रतिपादकमिष्यत’’इतिन्यायविवरण टीकांहृदिकृत्वाह ॥ **नचैवमिति** ॥ **अवधारणेति** ॥ विष्णोरेवजगत्कारणत्वेनशास्त्रयोनित्वमित्यवधारणासिद्धेरित्यर्थः । एतच्चसौत्राव धारणार्थतुशब्दव्यावर्त्यमितिबोध्यं । एवंसौत्रान्वयपदव्यावर्त्ययोर्व्याख्यानप्रतीतिमूलयोर्मध्येव्याख्यानमूलंपूर्वपक्षंप्रपंच्य प्रतीतिमूलमग्रेप्र पंचयिष्यन्संशब्दव्यावर्त्य‘‘मुपक्रमादीनामपिक्वचित्तात्पर्यव्यभिचारदर्शनात्कथंलिंगत्व’’मितिसंक्षिप्यसुधोक्तंप्रपंचयति ॥ **उपक्रमादित्विति**॥ येनविष्णोरेवतन्निश्चयापत्तिरितिभावः । तदेवप्रपंचयति ॥ **अश्वेति** ॥ ‘‘प्रजापतिर्वरुणायाश्वमनयत् सस्वांदेवतामाच्छ्र्त् सपर्यदीर्यत सएतंवारुणंचतुष्कपालमपश्यत् तन्निरवपत् ततोवैसवरुणपाशादमुच्यते’’त्युपक्रमेप्रजापतिर्वरुणायेतिदातृत्वेनोक्तःप्रजापतिः स्वांदेवतां

सर्वेवेदायत्पदमामनंतीत्यादिश्रुतिरपिशिवेवेदतात्पर्यमित्येवंपरतयाऽऽगमैरेवव्याख्याता । न चैवंपंचरात्रादिनाविष्णावपितात्प र्यनिश्चयापत्तिः । तथापिसिद्धांत्यभिप्रेतावधारणासिद्धेः । उपक्रमादितुनतात्पर्यनिश्चायकं । अश्वप्रतिग्रहेष्टिरुपक्रमाद्दातुरुप

गु० तात्पर्यकस्यैवशास्त्रस्यतात्पर्यनिश्चायकत्वंवाच्यं । तथाचशास्त्रतात्पर्यनिश्चयार्थंशास्त्रतात्पर्यनिश्चयापेक्षायामात्माश्रयइतिभावः । नद्वितीयइत्याह ॥ **सर्वइति** ॥ ननुपंचरात्रादिनाविष्णुकारणत्वेवेदतात्पर्यनिश्चयात्कथंरुद्रकारणत्वेवेदतात्पर्यनिश्चयइत्याशंक्यपरिहरति ॥ **नचेति** ॥ **अवधारणेति** ॥ विष्णुरेवकारणत्वादिनाशा स्त्रवेद्यइत्यवधारणासिद्धेरित्यर्थः । ननूपक्रमादेस्तात्पर्यनिश्चायकत्वेनोपक्रमादिनाचतात्पर्यविचारेक्रियमाणेविष्णोरेवकारणत्वेसर्वशास्त्रतात्पर्यंप्रतिपाद्यतइतिकथंरुद्रादेः कारणत्वेशास्त्रतात्पर्यमित्यतः स्यादेतदेवं यद्युपक्रमादेर्निर्णायकत्वंस्यात्तदेवनास्तीत्याह ॥ **उपक्रमादीति** ॥ ननुतत्रैकेनापरबाधःकिंनस्यादित्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० वरुणग्रहरूपामार्च्छत् । प्रजापतिरश्वंदत्वाजलोदरव्याधिमाप्नोदित्यर्थः । सप्रजापतिःपर्यदीर्यतेत्यादिनादातुरिष्टिःप्रतीयते । "यावतोश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्वपे"दित्युपसंहारेस्पष्टंप्रतिग्रहीतुरिष्टिरितिप्रतीयतइत्यर्थः । नन्वन्योन्यविरोधे एकेनान्यबाधोस्त्वित्यतआह ॥ **परस्परेति** ॥ तुल्यबलयोर्बाध्यबाधकभावायोगादितिभावः । उपक्रमस्यप्राबल्यमाशंक्यनिराह ॥ **नचेति** ॥ तदोपसंहारकृतविरोधानुपस्थितेरितिभावः । अधिकरणशरीरमग्रेवक्ष्यामः ॥ **अपच्छेदादाविति** ॥ षष्ठे"पूर्वापर्येपूर्वदौर्बल्यंप्रकृतिव"दितिपंचमपादीयाष्टादशाधिकरणेचिंतितं । ज्योतिष्टोमे "यदिप्रतिहर्तापच्छिद्यात्सर्ववेदसंदद्यात् । यद्युद्गातापच्छिद्याददक्षिणंतंयज्ञमिष्ट्वातेनपुनर्यजेत तत्रतद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्या"दित्यपच्छेदद्वयेप्रायश्चित्तद्वयंश्रुतं । अस्यायमर्थः । प्रातःसवनेबहिष्पवमानेनस्तोष्यमाणाऋत्विजःशालायाबहिःप्रसर्पंति । तदैकस्यपृष्ठतोन्यइत्येवंपिपीलिकापङ्क्त्याकारेणगंतव्यं । तत्रपुरोगंतुःकच्छंगृहीत्वैवपृष्ठतोन्योगच्छेत् । एवंसतियदिदैवात्प्रतिहर्तास्वगृहीतंकच्छंमुंचेत्तदातस्मिन्नेवप्रयोगेसर्वस्वंदद्यात् । यद्युद्गातामुंचेत्तदादक्षिणामदत्वाप्रक्रांतयज्ञंसमाप्यपुनस्तेनयक्ष्यन्पूर्वयदीरितंद्रव्यंतद्दद्या

संहारात्प्रतिग्रहीतुरितिप्रसंगात् । परस्परविरोधेमानांतरविरोधंविनैकेनान्यस्यबाधस्त्वयुक्तः । द्वयोरपिशास्त्रैकदेशत्वेनतुल्यत्वात् । नचानुपसंजातविरोधित्वेनपूर्वस्योपक्रमस्यबलीयस्त्वेनोपसंहारस्यास्वारस्यं । अपच्छेदादौपरबलीयस्त्वस्यापिस्वीकारात् ।

गु० **परस्परेति** ॥ ननूपक्रमस्योपसंहारापेक्षयाप्रबलत्वात्तेनोपसंहारबाधःकिंनस्यादित्यतआह ॥ **द्वयोरपीति** ॥ तथाचबाधकत्वप्रयोजकस्याधिकबलत्वस्याभावान्नैकेनापरबाधइतिभावः । ननूपक्रमएवास्तूपसंहारबाधकः । अनुपसंजातविरोधित्वेनबलवत्तयाबाधकत्वसंभवादित्याशंक्यनिषेधति ॥ **नचेति** ॥ **इतरास्वारस्यमिति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिति । तत्रानुपूर्व्येणद्वयोरपच्छेदेकिंपूर्वोत्पन्ननिमित्तंप्रायश्चित्तंकार्यमुतविकल्पोथोत्तरनिमित्तमितिसंशये पूर्वनिमित्तमसंजातविरोधिनि विंन्नमवगम्यतइतितद्बलीयस्त्वंविकल्पोवा । द्वयोरपिप्रामाण्यादितिप्राप्ते नात्रपूर्वेणोत्तरस्यज्ञानस्योत्पत्तिःशक्यतेविरोद्धुं । प्रत्यक्षवाक्येनतदुत्पद्यतएव । तच्चजायमानंस्वविरुद्धंपूर्वज्ञानंबाधमानमेवोत्पद्यते । तेनैवोत्पन्नमपिपूर्वज्ञानंमिथ्याभवति । बाधितत्वात् । अतःपरप्राबल्याद्युत्तरनिमित्तमेवप्रायश्चित्तंकार्यमितिसिद्धांतइति । आदिपदेन"संदिग्धेतुवाक्यशेषा"दित्यादिग्रहः ॥ **वेदोपक्रमेति** ॥ तृतीये"श्रुतेर्जाताधिकारःस्या"दितितृतीयपादीयाद्याधिकरणे"प्रजापतिरकामयतप्रजाःसृजेयेति । सतपोतप्यत । तस्मात्तेपानात्त्रयोदेवाअसृज्यंत । अग्निर्वायुरादित्यस्तेतपोतप्यंत । तेभ्यस्तेपानेभ्यस्त्रयोवेदाअसृज्यंत । अग्नेर्ऋग्वेदोवायोर्यजुर्वेदआदित्यात्सामवेद"इत्युपक्रम्यज्योतिष्टोमप्रकरणेश्रुतं"उच्चैर्ऋचाक्रियते उच्चैःसाम्ना उपांशुयजुषे"तिवाक्यमुदाहृत्य किमुच्चैष्ट्वादयोमंत्रधर्माःकिंवावेदधर्माइतिसंशये विधिवाक्येमंत्रवाचिनामृगादिशब्दानांप्रयोगान्मंत्रधर्माउच्चैष्ट्वादयः तथाचयजुर्वेदोत्पन्नाअध्वर्युणाप्रयुज्यमानाअप्यृचउच्चैरेवोच्चरितव्याइतिप्राप्ते असंजातविरोधित्वेन प्रबलमुपक्रममनुसृत्यतद्वशेनोपसंहारस्थनेतव्यत्वादुपक्रमगतवेदपदानुसारेणविध्युद्देशगतानामप्यृगादिशब्दानांवेदपरत्वेसति ऋचोपियजुर्वेदोत्पन्नाउपांशुपठनीयाइतिसिद्धांतितं । नन्वेवंशैवादिभिरपितात्पर्यनिश्चयोनस्यात् । अनिश्चिततात्पर्याणांतेषांवेदतात्पर्यानिश्चायकत्वात् । तत्ता

नचोपसंहारस्यव्याख्यानरूपतयाबलीयस्त्वेनेतरास्वारस्यं । वेदोपक्रमाद्यधिकरणेषूपक्रमबलीयस्त्वस्याप्युक्तेः । ॥ १७१ ॥

गु० उपक्रमस्वारस्यमित्यर्थः । नन्वनिश्चिततात्पर्यस्यशैवाद्यागमादेस्तात्पर्यानिश्चायकत्वेनतत्रतात्पर्यनिश्चयस्यावश्यकत्वात् तस्यचोपक्रमादिभिर्विनाप्रकारांतरेणासंभवाच्चै

प्र० त्पर्यनिश्चयस्यचशैवादिभिरेवजननेआत्माश्रयापत्त्योपक्रमादेरेवतत्रानुसर्तव्यत्वात् । तेषांचोक्तदिशाबलाबलव्यवस्थाऽयोगादित्यतआह ॥ **पौरुषेयेति** ॥ वेदेचवक्तुरभावादितिभावः ॥ **समिधोयजतीति** ॥ द्वितीयस्यद्वितीयेपादे"एकस्यैवपुनःश्रुतिरविशेषादनर्थकंहिस्या"दितिद्वितीयेधिकरणे"समिधोयजतितनूनपातंयजती"त्यादिपंचकृत्वोभ्यस्तंयजतिपदंधात्वर्थावच्छिन्नामेकांभावनांवक्त्युतप्रत्यभ्यासंभावनाभेदमितिसंशये प्रकृतिप्रत्यययोःपुनःपुनःश्रवणात्सन्निधिकृतप्रत्यभिज्ञावशाच्छब्दाभेदेऽर्थभेदस्यालीकत्वात्सएवयागःसैवचभावनैकैवेतिप्राप्ते अप्रवृत्तप्रवर्तनात्मकविधिविरोधापत्त्यापुनःश्रवणरूपाभ्यासाद्यागभावनयोर्भेदइतिसिद्धांतितं । अभ्यासस्यतात्पर्यधीहेतुत्वेयागभावनारूपकर्म

पौरुषेयवाक्येतुविवक्षानुसारेणान्यन्नेयं । अभ्यासोपिनतात्पर्यधीहेतुः । असकृदुक्तेर्वैयर्थ्यात् । अन्यथासमिधोयजतीत्यादावभ्यासात्कर्मभेदोनस्यात् ।

गु० रेववक्तव्यत्वात् तत्रानुपपत्तिपरिहारस्यापियथाकथंचित्कर्तव्यत्वात्तैरेवतात्पर्यनिश्चयोस्तु । अन्यथागौरवापत्तेरित्यतआह ॥ **पौरुषेयवाक्येत्विति** ॥ विवक्षानुसारेणेतिहेतुगर्भं । तथाचपौरुषेयवाक्येवक्तृविवक्षायाःसत्त्वादेकानुसारेणान्यन्नेतुंशक्यते । प्रकृतेतुवेदस्यापौरुषेयत्वेनवक्तृविवक्षायाअसंभवान्नैकानुसारेणापरंनेतुंशक्यमित्यर्थः । ननुमास्तूपक्रमोपसंहारयोस्तात्पर्यनिश्चायकत्वं तथाप्यभ्यासस्यतात्पर्यनिश्चायकत्वंस्यादित्यतआह ॥ **अभ्यासोपीति** ॥ अथवाअभ्यासलक्षणकथनबीजयुक्तिमाह ॥ **अभ्यासइति** ॥ **असकृदुक्तेरिति** ॥ वैयर्थ्यात् निष्प्रयोजनत्वादित्यर्थः । ननुनिष्प्रयोजनत्वमसिद्धं । तात्पर्यनिश्चयस्यैवप्रयोजनस्यसद्भावादित्यतआह ॥ **अन्यथेति** ॥ असकृदुक्तेस्तात्पर्यनिश्चायकत्वेसमिधोयजतीत्यादावप्यसकृदुक्तेस्तात्पर्यनिश्चायकत्वापत्त्यावैयर्थ्याभावेनतदन्यथानुपपत्त्याकर्मभेदोनस्या

SGDF
Sri Gargeshastri Digital Foundation

प्र० भेदोनस्यादित्यर्थः ॥ **पौनरुक्त्यंचेति** ॥ अन्यथेत्यनुकर्षः । वक्ष्यमाणदूषणसौकर्यायापूर्वतास्वरूपंविवृण्वंस्तदहेतुत्वमाह ॥ **मानांतरेति** ॥ बहुव्रीहिः स्मृतिगृहीतार्थायाधर्माधर्मादिबोधकश्रुतेः अनुमानगृहीतार्थायाःसार्वज्ञश्रुतेः प्रत्यक्षगृहीतार्थायाविश्वसत्यत्वादिश्रुतेरित्यर्थः । स्वार्थइतिशेषः । फलवत्त्वरूपफलस्यापितन्नेत्याह ॥ **फलमपीति** ॥ नित्यनैमित्तिककर्मबोधकानामित्यर्थः । अफले फलरहितेकर्मणीत्यर्थः । सिद्धेतात्पर्येतद्बलात्स्वर्गादिरूपफलकल्पना फलवत्त्वेनचतात्पर्यकल्पनेत्यन्योन्याश्रयादित्यर्थः ॥ **एवमिति** ॥ नतात्पर्यधीहेतुरित्यनुकर्षः

पौनरुक्त्यंचनक्वापिदोषःस्यात् । मानांतराग्राह्यार्थत्वरूपाऽपूर्वतापिनतात्पर्यधीहेतुः । श्रुतिमूलस्मृत्या सर्वज्ञत्वादिसाधकसर्वकर्तृत्वाद्यनुमानेन जगत्सत्यत्वजीवेशभेदादिग्राहिप्रत्यक्षेणच गृहीतार्थायाःश्रुतेरतात्पर्यप्रसंगात् । फलमपिनतात्पर्यधीहेतुः । अश्रुतफलानांनित्यादिवाक्यानामतात्पर्यापातात् । अफलेश्रुतितात्पर्यानुपपत्त्याचफलकल्पनेन्योन्याश्रयात् । एवमर्थवादोपि ।

गु० दित्यर्थः ॥ **पौनरुक्त्यंचेति** ॥ तत्रापितात्पर्यनिश्चायकत्वस्यवक्तुंशक्यत्वादित्यर्थः ॥ **मानांतरेति** ॥ सर्वदाशब्दार्थकथनमेतत् ॥ **श्रुतेरतात्पर्येति** ॥ "यः सर्वज्ञ"इत्यादिश्रुतेःसार्वज्ञे"विश्वंसत्य"मित्यादिश्रुतेर्विश्वसत्यत्वे"द्वासुपर्णे"त्यादेर्जीवभेदादौतात्पर्यंनस्यादित्यर्थः । अस्तुतर्हिफलस्यतात्पर्यनिश्चायकत्वमतआह ॥ **फलमपीति** ॥ **नित्यादिवाक्यानामिति** ॥ अहरहःसंध्यामुपासीतेत्यादीनामित्यर्थः । आदिपदेननैमित्तिकवाक्यग्रहणं । ननुनित्यादिवाक्येष्वपिश्रुतितात्पर्यान्यथानुपपत्त्याफलंकल्प्यतइत्यतआह ॥ **अफलइति** ॥ **अन्योन्याश्रयादिति** ॥ फलेसिद्धेतात्पर्यज्ञापकस्यविद्यमानत्वाच्छ्रुतितात्पर्यसिद्धिः श्रुतितात्पर्येसिद्धे निष्फलेतदसंभवेनफलसिद्धिरित्यन्योन्याश्रयापातादित्यर्थः । तथाप्यर्थवादएवतात्पर्यधीहेतुर्भविष्यतीत्यतआह ॥ **एवमिति** ॥ एवमित्यतिदिष्टंदूषणमाह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **दृष्टेरिति** ॥ तथाचव्यभिचारान्नहेतुरित्यर्थः ॥ **सापेक्षत्वेनेति** ॥ श्रुतेर्युक्तिसापेक्षत्वेनेत्यर्थः ॥ **अनपेक्षत्वरूपेति** ॥ उक्तंचतर्कपादे जैमिन्याचार्यैः“औत्पत्तिकस्तुशब्दस्यार्थेनसंबंधस्तस्यज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेतत्प्रमाणंबादरायणस्यानपेक्षत्वा”दितीतिभावः ॥ **अतएवेति** ॥ आद्ये“हेतुर्वास्यादर्थवत्त्वोपपत्तिभ्या”मितिद्वितीयपादेतृतीयेधिकरणे“शूर्पेणजुहोति तेनह्यन्नंक्रियत” इत्युदाहृत्य शूर्पेणहोमे कर्तव्येऽन्नकरणत्वंहेतुरुतार्थवादइतिसंशये लक्षणयाहिप्राशस्त्यपरत्वमतोन्नकरणत्वंहेतुरितिप्राप्ते वेदेनोच्यमानस्यशूर्पहोमसाधनत्वस्यहेतुसापेक्षत्वेवेदस्याप्रामाण्यापत्तेःप्ररोचनार्थमर्थवादस्यापेक्षितत्वात्“तेनह्यन्नंक्रियते”इत्ययमर्थवादइतिसिद्धांतितं ॥ **अप्रामाण्येति** ॥ तेनहीति वाक्यसमर्पितहेतुसापेक्षत्वेनशूर्पेणेतिविध्युद्देशस्याप्रामाण्यप्रसंगात्तस्यहेतुसमर्पकत्वत्यागइतिवा तेनहीत्यस्यैवहेतुत्वोपपादकव्याप्त्यादिबोधकमानांतरसापेक्षत्वापातेनवातत्त्यागइत्यर्थः । एवंसमन्वयपदाभ्यांव्यावर्त्यंन्यायविवरणोक्तंपूर्वपक्षमुपसंहरति ॥ **तस्मादिति** ॥ बलाबलानिरू

लोकेवेदेचार्थवादहीनानामपितात्पर्यदृष्टेः । उपपत्तिरपिश्रुत्युक्तावानुक्तावा । नद्वयमपि । सापेक्षत्वे नानपेक्षत्वरूपप्रामाण्यहानेः । अतएव“तेनह्यन्नंक्रियत”इत्यादिहेतुवन्निगदार्थवादस्यहेतुसमर्पकत्वेऽप्रामाण्यप्रसंगात्तत्त्यागः । तस्मान्नोपक्रमादिनातात्पर्यनिश्चयः । किंतुसर्वज्ञप्रणीतागमादेव ।

गु० **लोकइति** ॥ **अतएवेति** ॥ श्रुत्युक्तायाअनुक्तायावोपपत्तेस्तात्पर्यनिश्चायकत्वेतत्सापेक्षत्वेनानपेक्षत्वलक्षणप्रामाण्यहानेरेवेत्यर्थः । न्यायविवरणेआदिपदेनप्रतीतेरप्युक्तत्वाद्भाष्येप्रतीत्याशास्त्रस्याप्युपलक्षणातदुभयानुसारेणप्रवृत्तटीकानुसारेणपूर्वपक्षमुक्त्वा सुधायां“नशास्त्रतात्पर्यावगतावापातप्रतीतिर्वाव्याख्यातृवचनंवालिंग”मि

SGDF
Sri Gargeshwari Digital Foundation

प्र० पणाद्व्यभिचाराच्छ्रुत्यप्रामाण्यापाताच्चेत्यर्थः । वेदजन्यापातप्रतीतिमूलंभाष्योक्तमन्वयपदव्यावर्त्यंपूर्वपक्षांतरमाह ॥ **यद्वेति** ॥ शास्त्रात् "ज्ञात्वाशिवं हिरण्यगर्भ"इत्यादिवेदरूपात् । रुद्रादिकारणत्वं । शास्त्रतात्पर्यविषयरूपशास्त्रयोनि । शास्त्रजन्यप्रतीतिविषयत्वात् । विष्णुकारणत्ववदितिप्रयोगोबोध्यः । ननुप्रतीतेस्तात्पर्यविषयाविषयकतयाभ्रांतित्वेनाप्युपपत्त्याकथंतेन तत्साधनमित्यतस्तदविनाभूतत्वंतस्याह ॥ **तत्रेति** ॥ रुद्रादिकारणत्वइत्यर्थः । यद्यपिटीकायामापातप्रतीतिरेवपूर्वपक्षमूलत्वेनोक्ता नतस्यास्तात्पर्यार्थविषयकत्वमपि तथापिसुधाभिप्रेतस्वतंत्रसाधनत्वनिर्वाहायतदप्यत्रोच्यतइत्यदोषः । वाक्यजन्यप्रतीतेर्हिवाक्यतात्पर्यार्थविषयकत्वमौत्सर्गिकं । क्वचित्तुबाधकादपोद्यते । इहचतद्बाधकंवेदरूपशास्त्रादन्यत् शिवादिर्नजगत्कर्ता । जननपारतंत्र्यादिदोषित्वाच्चैत्रवदित्यनुमानंवाविष्णुकारणत्वादिबोधकं"नतेविष्ण"वित्यादिशास्त्रंवा आद्यंतुनबाधकमित्याह ॥ **नहीति** ॥ तदेवाह ॥ **नैषेति** ॥ एषाजगत्कारणविषयामतिस्तर्केणानेयाऽपनेयाचनभवती

यद्वाशास्त्राद्रुद्रादेःकारणतातावद्भाति । तत्रशास्त्रतात्पर्यंचाबाधितप्रतीत्यानिश्चीयते । नहिरुद्रादेःकारणत्वेशास्त्रादन्यद्बाधकमस्ति । नैषातर्केणेत्यादिश्रुत्याकारणतायामशास्त्रस्यसाधकतायाइवबाधकतायाअप्यभावात् ।

गु० त्युभयोरपिप्रत्येकंपूर्वपक्षप्रापकत्वेनोक्तत्वात्तदनुसारेणापातप्रतीतिमात्रस्यापिपूर्वपक्षप्रापकत्वमाह ॥ **यद्वेति** ॥ यद्वा अस्मिन्पक्षे"अज्ञानांप्रतीयमानमपी"तिभाष्यस्य"नशास्त्रतात्पर्यावगतावापातप्रतीतिर्वाव्याख्यातृवचनंवालिंग"मित्युभयोःसमकक्षत्वप्रतिपादकसुधायाश्चास्वारस्यंमनसिनिधायतदनुसारेणपूर्वपक्षमाह ॥ **यद्वेति** ॥ नचाबाधितप्रतीत्येत्ययुक्तं । बाधस्यैवप्रतीयमानत्वादितिवाच्यं । बाधकंहिभवच्छास्त्रंवातदतिरिक्तंवा । नांत्यइत्याह ॥ **नहीति** ॥ तत्रहेतुर्नैषातर्के ॥ १७३ ॥

प्र० तिसाधकबाधकत्वयोरपिनिरासादितिभावः । अशास्त्रस्य शास्त्रादन्यस्यानुमानादेः । द्वितीयंनिराह ॥ **नापीति** ॥ **वैपरीत्यस्येति** ॥ "एकएवरुद्रोनद्वितीयायतस्थे"इत्यादेःशिवादिकारणत्वसाधकस्यविष्णुकारणत्वनिषेधकस्यशास्त्रस्यसत्त्वात् तच्छास्त्रंविष्णुकारणत्वेबाधकमिति वैपरीत्यस्यापिसंभवादित्यर्थः । तथाचवाक्यद्वयंप्रागुक्तदिशातत्तत्कारणत्वपरमितिभावः । नन्वेवमपिपूर्वपक्षेविष्णुकारणत्वानिरासात्कथमिष्टसिद्धिरित्यतआह ॥ **पूर्ववादिनइति** ॥ नन्वेवमन्योन्यंकारणत्वसाधकबाधकशास्त्रस्यकागतिरित्यतआह ॥ **कालादीति** ॥ सर्वमसृजतेतिविष्ण्वादेःसर्वकारणत्वोक्तिःतत्तत्कालसृज्याभिप्रायासर्वस्रष्टृत्वयोग्यताभिप्रायावेतिभावः । ननुविष्णुकारणत्वदशायांतद्बोधकशास्त्रस्यप्रामाण्येपिरुद्रकारणत्वबोधकस्यप्रामाण्यानापत्त्याबाधस्यावश्यकत्वेसर्वथैवबाधमुपेत्यविष्णोरेवकारणत्वमुपेयतामित्यतआह ॥ **अवाधेति** ॥

नापिविष्णोःकारणत्वसाधकंरुद्रादेःकारणत्वनिषेधकंवाशास्त्रंबाधकं । वैपरीत्यस्यापिसंभवात् । पूर्ववादिनश्चसिद्धांत्यभिमतविष्ण्वेकनिष्ठत्वनिश्चयविघटनेनकृतार्थत्वात् । कालादिभेदेनविष्णोःकारणत्वस्यरुद्रादेःतदभावस्यचोपपत्तेश्च । अबाधोपपत्तौचबाधस्यान्याय्यत्वात् ।

गु० णेति । "आपनेया"इत्यस्यानेयाउत्पाद्याऽपनेयानिराकार्याचनेत्यर्थद्वयमभिप्रेत्याह ॥ **साधकतायाइवेति** ॥ नाद्यइत्याह ॥ **नापीति** ॥ **वैपरीत्यस्येति** ॥ तस्यविष्णुपरत्वउपक्रमादेर्दूषितत्वेनप्रतीतेरेवानुसर्तव्यत्वात्तत्रैवशैवशास्त्रस्यबाधकत्वप्रसंगादित्यर्थः । व्यवस्थोक्तौतुममापितुल्यमितिभावः । एवंसतीष्टसिद्धिमाशंक्याह ॥ **पूर्वेति** ॥ नन्वेवमुभयोरेकदैवकारणत्वेविरोधइत्यतआह ॥ **कालादिभेदेनेति** ॥ यद्वा किंच नोभयमप्यप्रमाणं व्यवस्थांगीकारादित्याह ॥ **कालादीति** ॥ नन्वेकेनापरबाधएवकिंनस्यादित्यतआह ॥ **अबाधेति** ॥ ननुयस्मिन्कालेरुद्रस्यकारणत्वंतस्मिन्कालेविष्णोर्नेतिपक्षेबाधःस्यादित्यतआह ॥ **पक्षइति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० बाधस्य आत्यंतिकबाधस्य । मीमांसकैरनभ्युपेतत्वादित्यर्थः ॥ षोडशीति ॥ दशमे“शिष्टिप्रतिषेधःस्या”दित्यष्टमपादीयतृतीयाधिकरणे अतिरात्रनामकेज्योतिष्टोमसंस्थाविशेषे“अतिरात्रेषोडशिनंगृह्णाती”तिविधायश्रुते“नातिरात्रेषोडशिनंगृह्णाती”तिवाक्ये नञ्पर्युदासोर्थवादो वाप्रतिषेधोवेतिसंशये“यजतिषुयेयजामहंकरोतिनानूयाजे”ष्वित्यत्रानूयाजभिन्नेष्वितिवन्नञ्पर्युदासः “नतौपशौकरोतिनसोमेअध्वरे”इत्य त्रसोमेयथानाज्यभागौतथापशावपीति नसोमइतिवदर्थवादोवेतिप्राप्ते अतिरात्रभिन्नइतिपर्युदासेप्रागुक्तविधेर्निर्विषयत्वापत्तेःषोडशिनिषेधेनषो डशिनएवस्तुतौव्याघातेनार्थवादत्वायोगादन्यशेषत्वाभावाच्च तदुभयासंभवात्प्रतिषेधएवायं अगत्याग्रहणाग्रहणयोर्विकल्पः । प्रतिषेधार्थव त्त्वायाकरणेपिक्रतुसिद्धिरस्तीतिकल्प्यते विध्यर्थवत्त्वायचानुष्ठानेफलभूयस्त्वमित्युभयोपपत्तिरितिसिद्धांतितं । अत्रयथाविहितप्रतिषिद्धत्व रूपन्यायप्राप्तत्वात्पक्षेबाधःसह्यः तथाविष्णुतदितरयोःकारणत्वबोधकशास्त्रद्वयप्रामाण्यरूपन्यायप्राप्तत्वात्पक्षेबाधःसह्यइत्यर्थः । प्रागुक्तप्र योगेव्याप्तिमुपपाद्यविपक्षेबाधकमाह ॥ यदिचेति ॥ पूर्वपक्षद्वयेपिटीकादावस्फुटत्वात्फलमाह ॥ एवंचेति ॥ विष्णुस्स्वयमेवकारणं तथा

पक्षेबाधस्यचषोडशिग्रहणाग्रहणयोरिवन्यायप्राप्तत्वात् । यदिचपौरुषेयेणपूर्वा परपरामर्शेनशब्दस्वरसप्रतीतत्यागः तदापुरुषोत्प्रेक्षयाऽपौरुषेयःशब्दोबाध्ये त । एवंचविष्णोरेवकारणत्वेसर्वैःकारणवाक्यैःप्रतिपाद्यत्वस्यहेतुत्वेऽसिद्धिः । ॥ १७४ ॥

गु० उपक्रमादीनामेवतात्पर्यनिश्चायकत्वमित्यत्रदूषणांतरमाह ॥ यदिचेति ॥ एतावताफलितंदूषणमाह ॥ एवंचेति ॥ आद्यपूर्वपक्षस्सभाष्येऽनुक्तत्वाद्भाष्यकारान

SGDF Sri Gargeshwari Digital Foundation

प्र० शास्त्रयोनित्वादितिप्रागुक्तहेतावन्यस्यापिकारणत्वेनैकदेशबोध्यत्वादसिद्धिरित्यर्थः ॥ **व्यभिचारइति** ॥ रुद्रादावपिकारणत्वेनकतिपयशास्त्रबोध्यत्वरूपहेतुसत्त्वात्स्वयमेवकारणमितिसाध्यंनेतिव्यभिचारइतिभावः । तथाचान्यस्यापिकारणत्वंप्राप्तमितिपूर्ववदतिव्याप्तिरितिपूर्वाधिकरणफलाक्षेपइतिभावः । एतेन“पाशुपताद्युक्तिप्रतीतिभ्यामन्येषामपिकारणत्वेनशास्त्रयोनित्वेजगत्कारणत्वंनविष्णोरेवलक्षण”मितिटीकाव्याख्याता । पंचरात्राद्युक्तिप्रतीतिभ्यांविष्णोःकारणत्वेनशास्त्रयोनित्ववदित्यप्यादौयोज्यमित्युक्तंभवति । भाष्येअदर्शनात्पूर्वपक्षद्वयमूलमाह ॥ **अत्रचेति** ॥ टीकारीत्यैकएवकुतोनोक्तइत्यतस्तत्रस्पष्टांसिद्धांतसुधासंमतिमाह ॥ **अतएवेति** ॥ वाशब्दात्पूर्वपक्षोज्ञाप्यइतिभावः । टीकायामेवंनदृश्यतइत्यतःपक्षांतरमेतदितिभावेनतत्रभाष्याद्यानुकूल्यंदर्शयंष्टीकोक्तपक्षमाह ॥ **अत्रतुटीकायामिति** ॥ न्यायविवरणटीका

कतिपयप्रतिपाद्यत्वस्यहेतुत्वेतुव्यभिचारइति । अत्रचाद्यपूर्वपक्षो“नचपाशुपतशास्त्रोदितत्वादिशास्त्रप्रतिपाद्यत्वेकारण”मितिन्यायविवरणोक्तः । द्वितीयस्तु“अज्ञानांप्रतीयमान”मितिभाष्योक्तः । अतएवसुधायां “नशास्त्रतात्पर्यावगतावापातप्रतीतिर्वाव्याख्यातृवचनंवालिंग”मित्युक्तं । अत्रतुटीकायां न्यायविवरणे

गु० भिप्रेतोयंपूर्वपक्षइत्यतआह ॥ **अत्रचेति** ॥ तथाचभाष्येऽनुक्तत्वेपिन्यायविवरणउक्तत्वान्नाभाष्यकारानभिप्रेतइतिभावः । द्वितीयपूर्वपक्षेनकेवलंभाष्यंनियामकं किंतुसुधापीत्याह ॥ **अतएवेति** ॥ सुधायामुभयोरपिसमप्रधानभावेनोक्तत्वादितिभावः । एवंसुधोक्तंपूर्वपक्षद्वयमुपपाद्य“पाशुपताद्युक्तिप्रतीतिभ्या”मितिटीकाविरोधपरिहारायतस्याअभिप्रायमाह ॥ **अत्रत्विति** ॥ व्याख्यानेनवेदतात्पर्यनिश्चयइत्युक्तं । तत्रप्रष्टव्यं । व्याख्यानस्यापितात्पर्यनिर्णयःकिंव्याख्यानांतरेणोतो

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्युपलक्ष्यते । अन्वीयंतेशक्तितात्पर्यगोचरेणसंबध्यंते तथाज्ञायंतइतियावत् । वाक्यान्येतेनोपक्रमादिलिंगसमुदायेनेतिसौत्रयौगिकान्वयपदेनोपक्रमादीनामेवतात्पर्यधीहेतुत्वंनतुव्याख्यानप्रतीत्योरित्युक्तं । तत्रहेतुंवदन्पूर्वपक्षद्वयंक्रमेणनिराह ॥ व्याख्यात्रिति ॥ आपातजेतिच ॥ उपक्रमादेरुपजीव्यत्वाद्व्याख्यानस्यतदुपजीवकत्वात् तथा आपातप्रतीतार्थस्यपूर्वापरविरुद्धत्वादुपक्रमादिपरामृष्टस्याविरुद्धत्वादुप

आदिपदेनप्रतीतेरप्युक्तत्वाद्भाष्येप्रतीत्यापाशुपतादिशास्त्रस्याप्युपलक्षणात्प्रतीतिसध्रीचीनागमेनैकए वद्दढःपूर्वपक्षोदर्शितः । सिद्धांतस्तु । व्याख्यातृवचनानांयौर्लिंगैस्तात्पर्यनिश्चयः । उपक्रमाद्यैस्तैरेव श्रुतितात्पर्यनिर्णयः । आपातजप्रत्ययाश्चपरस्परविरोधिनः । अविरुद्धाप्रतीतिस्तुपूर्वापरविमर्शजा ॥

गु० पक्रमादिना । नाद्यः । अनवस्थापातात् । नद्वितीयः । एवंहितद्धेतोरेवेतिन्यायेनसिद्धांतयति ॥ **सिद्धांतस्त्विति** ॥ ननुनोपक्रमादीनांतात्पर्यनिश्चायकत्वं । तेषांविरुद्धप्रतीतिजनकत्वादित्यतआह ॥ **आपातजेति** ॥ यद्वाद्वितीयंपूर्वपक्षंप्रत्याह ॥ **आपातजेति** ॥ तथाचापाततोर्थप्रत्ययस्यपरस्परविरुद्धत्वेनपूर्वोत्तरपरामर्शेनसावकाशत्वनिरवकाशत्वादिनाविचारितोपक्रमादेर्जातायाःप्रतीतेर्विरुद्धत्वाभावाद्युक्तंतात्पर्यनिर्णायकत्वमितिभावः । यद्वानोपक्रमादिनाव्याख्यातृवचनतात्पर्यनिश्चयः । प्रतीतिमात्रेणैवतात्पर्यनिर्णयोपपत्तेरितिचेत् । अत्रवक्तव्यं । किमापातजप्रतीतिमात्रंतात्पर्यनिश्चायकमविरुद्धाप्रतीतिर्वा । नाद्यइत्याह ॥ **आपातजेति**॥ नद्वितीयइत्याह ॥ **अविरुद्धेति** ॥ तथाचाविरुद्धप्रतीतेरुपक्रमादिसापेक्षत्वान्नोपक्रमादिकंविनातात्पर्यनिश्चयइतिभावः । ननुव्याख्यातृवचनतात्पर्यनिश्चयार्थमुपक्रमाद्यपेक्षायदिस्यात्तदातेनैववेदतात्पर्यनिश्चयोपपत्तौव्याख्यातृवचनमनर्थकंस्यात् । नचैवं । अनिश्चिततात्पर्यकस्यैवव्याख्यातृवचनस्यवेदतात्पर्यनिश्चायकत्वांगी ॥ १७५ ॥

प्र० क्रमादेरेवतात्पर्यधीहेतुत्वंनतुव्याख्यानप्रतीत्योरित्युक्तंभवति । तदुपजीव्यत्वंव्यंजयन्नाद्यंश्लोकंव्याचष्टे ॥ **अनिश्चितेति** ॥ आगमादेवागमतात्पर्यनिश्चये आत्माश्रयादितिभावः । लोके पौरुषेयवाक्ये । ननूपक्रमादिनाऽऽगमतात्पर्यनिर्णयेपिमानांतराविरुद्धापातप्रतीतेवेदार्थेंते नैवतात्पर्यधीरस्त्वित्यतआह ॥ **नहीति** ॥ निश्चीयतइतिशेषः । अन्यथा तादृशेपितात्पर्यनिर्णये ॥ **वाक्यद्वयेति** ॥ विष्णुतदितरकारणत्वबोधकवाक्यद्वये उपपत्तिविरोधइत्यर्थः । यदुक्तमुपक्रमादिभिरागमतात्पर्यनिश्चयइतितदाक्षिप्यनिराह ॥ **नचेति** ॥ **नष्टेपीति** ॥

अनिश्चिततात्पर्यस्यागमस्यशास्त्रतात्पर्यानिश्चायकत्वादुपक्रमादिभिरागमतात्पर्यनिश्चये वेदेपितैरेवलोकेक्तृसैस्तन्निश्चयोस्तु । नहिमानांतराविरुद्धापातधीविषयेप्युपक्रमाद्यननुगुणेव्याख्यानेनापितात्पर्यं । अन्यथापरेणापिकालादिभेदेनवाक्यद्वयविरोधोनपरिहार्यःस्यात् । नचलोकेवक्तुपदेशेनवातन्मूलव्याख्यानेनवातात्पर्यधीर्नतूपक्रमादिनेतिशंक्यं । वक्तरितात्पर्यमनुपदिश्यनष्टेपितात्पर्यधीदर्शनात् ।

गु० कारादित्यतआह ॥ **अनिश्चितेति** ॥ अन्यथाऽनिश्चिततात्पर्यकस्यापिवेदस्यार्थनिश्चायकत्वोपपत्तौतात्पर्यनिश्चयार्थंव्याख्यानमप्यनपेक्षंस्यादितिभावः । ननुनोपक्रमादिनातात्पर्यनिश्चयः । मानांतराविरुद्धापातप्रतीतेर्थेव्याख्यानेनतात्पर्यनिश्चयसंभवादित्यतआह ॥ **नहीति** ॥ तथाचसत्यपिव्याख्याने उपक्रमाद्यानुगुण्याभावेतात्पर्यनिश्चयाभावाद्व्याख्यानाभावेप्युपक्रमाद्यानुगुण्यसत्त्वेनतन्निश्चयादन्वयतोव्यतिरेकतश्चव्यभिचारान्नव्याख्यानस्यतात्पर्यनिश्चायकत्वं किंतूपक्रमादेरेवेतिभावः । व्याख्यानेनोपक्रमादेरन्यथासिद्धेस्त्यागइत्यतोवाह ॥ **नहीति** ॥ **अन्यथेति** ॥ मानांतराविरुद्धापातधीविषयेउपक्रमाद्यननुगुणेव्याख्यानेनतात्पर्यनिश्चयांगीकार इत्यर्थः । ननुव्यभिचारेणयथाव्याख्यानस्यतात्पर्यनिश्चायकत्वाभावः तथोपक्रमाद्यानुगुण्याभावेपिवक्तुपदेशेनवावक्तुपदेशमूलकव्याख्यानेनवातात्पर्यनिश्चयेनव्यभि

SGDF Sri Gargeshwari Digital Foundation

प्र० तत्रद्वयोरप्यभावेनव्यभिचारादुपक्रमादेरेवाव्यभिचारादुक्तमुपजीव्यत्वंयुक्तमितिभावः । उक्तंचसुधायां "अतउपजीव्यत्वादुपक्रमादीनामेवतात्पर्यलिंगत्व"मिति । द्वितीयश्लोकआपातप्रतीतत्यागेविमर्शप्रतीतग्रहणेविरोधाविरोधौहेतूउक्तौ । तत्रप्रागुक्तदोषमुद्धरति॥यत्त्विति॥ आपाततइति ॥ गहनतात्पर्यार्थस्यान्विष्यमाणत्वान्नशब्दबाधइत्यर्थः । प्रतीतस्यवेदार्थस्यत्यागात्कथंनतद्बाधइत्यतआह ॥ एवंचेति ॥ तात्पर्यार्थोपादानेसतीत्यर्थः । गहनतात्पर्यार्थस्यैववेदार्थत्वंनत्वनीदृशस्येत्यत्रकोहेतुरितिभावेनकुतइतिप्रश्नेयथेक्षुनिपीडनेनलब्धस्येक्षुरसत्वंदृष्टंनत्वनीदृशस्यतथेतिभावेनदृष्टांततावदाह ॥ नहीति ॥ ननुतत्रकठिनत्वात्पीडनापेक्षानत्विहेत्यतोस्यापिदुर्बोधत्वादिनाकाठिन्यंहेतुमाह ॥

यत्तूक्तमापातप्रतीतत्यागेशब्दएवबाधितःस्यादिति तन्न । आपाततोभ्रमप्राप्तमर्थंहित्वाविमर्शतः । गहनश्रुतितात्पर्यविषयोन्विष्यतेयतः ॥ एवंचापातप्रतीतत्यागेपुरुषेभ्रांतिरेवत्यक्ताभवति । नवेदार्थः । कुतः । नहीक्षुलेहनेनैवज्ञातइक्षुरसोभवेत् । नचेक्षुदंडंनिष्पीड्यलब्धोनेक्षुरसोभवेत् ॥

गु० चारान्नोपक्रमादीनामपितात्पर्यनिश्चायकत्वमिति । अत्रप्रष्टव्यं । आपातप्रतीतार्थत्यागेवाशब्दबाधःसर्वथात्यागेवा । नाद्यइत्याह ॥ आपाततइति ॥ तथाचापातभ्रमप्राप्तपरित्यागेशब्दबाधस्याभावान्नायंबाधइतिभावः । नद्वितीयइत्याह ॥ गहनइति ॥ तथाचसर्वथार्थत्यागाभावान्नशब्दबाधइतिभावः । नन्वापातप्रतीतत्यागेशब्दोबाधितएवस्यात् । आपातप्रतीतस्यस्वरसप्राप्तत्वात् । तथाचनपूर्वोत्तरपरामर्शसिद्धार्थोग्राह्यइत्याक्षिपति ॥ कुतइति ॥ नन्वापातप्रतीतार्थत्यागएववेदार्थत्यागइत्याक्षिपति ॥ कुतइति ॥ उत्तरमाह ॥ नहीति ॥ ननुवेदार्थस्यसुबोधत्वात्तदर्थज्ञानायनोपक्रमापेक्षेत्यतआह ॥ नहीति ॥ वेदस्यसुबोधार्थत्वंकिंस्व ॥ १७६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० नह्यनंतेति ॥ स्वरूपपदार्थवाक्यार्थानांदुर्ग्रहत्वादित्यर्थः ॥ **अन्यइति** ॥ महावाक्यैकदेशभूतेनांगवाक्येनप्रधानवाक्येनचतत्तत्कर्तव्यतारूपःशास्त्रार्थैकदेशःप्रतीयते प्रधानेसर्वांगोपसंहारेकर्तव्येंगवाक्यैर्वाक्यैकवाक्यतामुपगतेनपरिपूर्णेनप्रधानवाक्येनसांगप्रधानकर्तव्यतारूपोन्यःपरिपूर्णःशास्त्रार्थःप्रतीयते इतिपूर्वापरपर्यालोचनावशात्प्रथमोत्पन्नप्रतीतेरन्यांप्रतीतिंशब्दःकरोतीतितदभियुक्तोक्तार्थइव निगमन्यायादिसमस्तवेदांगोपसंहारेसतिपरिपूर्णार्थःप्रतीयतइत्यपितस्यार्थःप्रतीयतइत्युक्तार्थेसंमतिरियमितिवदंति ॥ **एतेनेति** ॥ आपातप्रतीतादेःपूर्वापरविरुद्धत्वादिनेत्यर्थः । एवंश्लोकद्वयव्याख्यानेनपूर्वपक्षद्वयंनिरस्येदानीं “उपक्रमादितुनतात्पर्यनिश्चायक”मितिपूर्ववाद्युक्तंनिरसितुंसौत्र

नह्यनंतशाखात्मकत्वात्स्वरूपेणैवापरिच्छेद्यो नानानिगमनिरुक्तव्याकरणादिनाविनादुर्बोधपदार्थो नानान्यायकलापंचविनादुरधिगमवाक्यार्थश्चवेदःसुबोधार्थः । तदुक्तंवार्तिके“अन्यएवैकदेशेनशास्त्रस्यार्थःप्रतीयते । अन्यश्चपरिपूर्णेनसमस्तांगोपसंहृतौ ॥ पौर्वापर्यपरामृष्टःशब्दोन्यांकुरुतेमतिं”इति ॥ एतेनपुराणादेरप्यापातप्रतीतार्थवदंतोनिरस्ताः ।

गु० रूपेणाल्पत्वादुतान्यानपेक्ष्येणसुबोधार्थत्वाद्यद्वातादृशवाक्यार्थत्वात् । नाद्यइत्याह ॥ **अनंतेति** ॥ द्वितीयंप्रत्याह ॥ **नानेति** ॥ तृतीयंनिराह ॥**नानान्यायेति**॥ पूर्वोत्तरपरामर्शेनविचारितोयःसएववेदार्थइत्यत्र भट्टवार्तिकसंमतमाह ॥ **तदुक्तमिति** ॥ अयमर्थः । महावाक्यैकदेशभूतेनांगवाक्येनप्रधानवाक्येनचतत्तत्कर्तव्यतारूपशास्त्रार्थैकदेशःप्रतीयते । प्रधानेसर्वांगोपसंहारेकर्तव्येअंगवाक्यैर्वाक्यैकवाक्यतामुपगतेनपरिपूर्णेनप्रधानवाक्येनसांगप्रधानकर्तव्यतारूपोन्यःपरिपूर्णःशास्त्रार्थःप्रतीयते । पूर्वापरपर्यालोचनयाप्रथमोत्पन्नप्रतीतितोन्यांप्रतीतिंशब्दःकरोतिचेति । नन्वथापिनोपक्रमादिनावेदतात्पर्यनिश्चयः । पुराणादिनापितन्निश्चयोपपत्तेरित्यतआह ॥ **एतेनेति** ॥ आपातप्रतीतेर्विरुद्धायास्तात्पर्यनिश्चायकत्वाभावेनाविरुद्धप्रतीतेश्चोपक्रमादिसापेक्षत्वेनोपक्रमादेरावश्यकत्वकथनेनेत्यर्थः । ननूपक्रमा

SGDF
Sri Gargeshwari Digital Foundation

प्र० संशब्दोक्तसम्यक्त्वंविवृणोति ॥ **उपक्रमादयोपीति** ॥ उक्तंचसुधायां"नोपक्रमादिमात्रंलिंगंयेनव्यभिचारःकिंतुसम्यक्प्रविचारलक्षणावांतरव्यापारोपेताएवे"त्यादि तात्पर्यधीरेवव्यर्थेत्यतआह ॥ **तात्पर्येति** ॥ तात्पर्यज्ञानस्यशाब्दज्ञानानियामकत्वेहिनानार्थेश्लिष्टेचविनिगमकाभावेनार्थविशेषधीर्नस्यात् । यष्टीःप्रवेशयेत्यादावन्वयानुपपत्त्यभावेनलक्षणाचनस्यादितिभावः ॥ **प्रतिबंधेति** ॥ संशयादिरूपेत्यर्थः ।

उपक्रमादयोपिसावकाशत्वनिरवकाशत्वादिनाऽऽलोचिताःतात्पर्यप्र
मापकाः । तात्पर्यज्ञानंचसाक्षात्प्रतिबंधनिरासेनवाशाब्दधीहेतुः ।

गु० दीनांपरस्परविरोधेनाप्रामाण्यात्कथंतेषांतात्पर्यनिश्चायकत्वमित्यतआह ॥ **उपक्रमादयोपीति** ॥ आलोचितानांनभ्रमजनकत्वमित्यभिप्रायेणप्रमापकाइत्युक्तं । आदिपदेनस्वभावप्राबल्यदौर्बल्यपरिग्रहः । तथाचयत्रविरोधस्तत्रसावकाशत्वनिरवकाशत्वादिनाविचारेकृतेसतिनिरवकाशेनप्रबलेनसावकाशस्यबाधेनतात्पर्यप्रमाभवतीतिभावः । नन्वस्तूपक्रमादीनांतात्पर्यनिर्णायकत्वं तथापितात्पर्यज्ञानस्यक्वोपयोगइत्यतआह ॥ **तात्पर्यज्ञानंचेति** ॥ यद्वावेदस्योपक्रमादिसापेक्षत्वेप्राभाकररीत्याहेतुसापेक्षत्वेननिरपेक्षत्वलक्षणप्रामाण्यहानिरित्यतआह ॥ **तात्पर्यज्ञानंचेति** ॥ चशब्दोऽवधारणे । एवंचोपक्रमादेस्तात्पर्यनिश्चायकत्वेनशाब्दधीहेतुत्वाभावान्नप्राभाकररीत्याहेतुसापेक्षत्वेनाप्रामाण्यंवेदस्येत्यर्थः । आपातजशाब्दबोधस्यतात्पर्यधीहेतुत्वेपीदमित्थमेवेत्यस्येहविवक्षितत्वान्नपरस्पराश्रयत्वमितिभावः । यद्वाप्रसंगादाह ॥ **तात्पर्यज्ञानंचेति** ॥ तात्पर्यज्ञानफलकथनस्यप्रकृतानुपयुक्तत्वात् ॥ **साक्षादिति** ॥ तात्पर्यज्ञानेसतिशाब्दबोधोऽन्यथानेत्यन्वयव्यतिरेकाभ्यामित्यर्थः । ननुक्वचित्तात्पर्यज्ञानाभावेशाब्दबोधस्यजायमानत्वात्कथंतस्यशाब्दधीहेतुत्वमतआह ॥ **प्रतिबंधेति** ॥ यद्वा ननुनतात्पर्यज्ञानंशाब्दधीहेतुः । अन्योन्याश्रयात् । सतिहितात्पर्यज्ञानेशाब्दज्ञानकारणसद्भावाच्छाब्दज्ञानं शाब्दज्ञानेचसतितात्पर्यनिश्चयइति । तत्कथंतात्पर्यज्ञानंशाब्दज्ञानेहेतुरित्यस्वरसादाह ॥

प्र० तदर्थमुपक्रमाद्यालोचनमावश्यकमितिभावः । तात्पर्यंचतत्प्रमितिशेषत्वमितितर्कतांडवेस्पष्टं । अश्रुतफलानामित्यादिनाप्रागुक्तंव्यभिचारमुद्धर्तुमाह ॥ **उपक्रमादीनिचेति** ॥ यथाशेषशेषिभावेश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याअन्योन्यनैरपेक्ष्येणप्रमाणं तथोपक्रमाद्योपिप्रत्येकंतात्पर्येप्रमाणानीति क्वचित्फलाद्यश्रवणेप्यन्यस्यसत्त्वात्तात्पर्यधीस्तत्रापिस्यादेवेतिभावः । यद्यपिलिंगस्यश्रुत्याद्यन्यतमसापेक्षत्वेनैवप्रा

उपक्रमादीनिचशेषत्वादौश्रुतिलिंगादीनीवतात्पर्येप्रत्येकंप्रमाणानीत्येकैकस्याननुगमेपिनदोषः ।

गु० **प्रतिबंधेति** ॥ ननुनोपक्रमादीनांतात्पर्यंनिश्चायकत्वं । क्वचिदुपक्रमसद्भावेप्युपसंहारस्याभावात् । तत्सद्भावेपिवाऽभ्यासादेरभावादित्यतः नोपक्रमादीनांससानांमिलित्वातात्पर्यनिश्चायकत्वं किंतुश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांप्रत्येकंशेषत्वादौप्रमाणत्ववत्प्रत्येकमेवेत्यतोनाननुगमइत्याह ॥ **उपक्रमादीनिचेति** ॥ ननुतात्पर्यज्ञानत्वरूपानुगतकार्यतावच्छेदकावच्छिन्नंप्रत्युपक्रमत्वादेरननुगतत्वेनानुगतकारणतावच्छेदकावच्छिन्नत्वाभावान्नोपक्रमादेःकारणत्वमित्यतोवाह ॥ **उपक्रमादीनिचेति** ॥ तृणारणिमणिन्यायेनवैजात्यमितिभावः ॥ **शेषत्वादाविति** ॥ पदांतरनिरपेक्षःशब्दःश्रुतिः । वस्तुसामर्थ्यंलिंगं । यथाबर्हिर्देवसदनंदामीतिमंत्रस्यबर्हिर्लवनप्रकाशनसामर्थ्येतेनबर्हिर्लवनेतस्यविनियोगः । पदसंघातोवाक्यं । यथा"यजेतस्वर्गकाम"इति । तेनयागस्यस्वर्गशेषता । नह्यत्रयागस्यशेषत्वेतृतीयाश्रुतिः स्वर्गस्यशेषित्वेद्वितीयाश्रुतिर्वास्ति । किंतुसमभिव्याहारादेवसाधनतायाःप्रतीतेः । इतिकर्तव्यताकांक्षाप्रकरणं । तेनप्रयाजादेर्दर्शपूर्णमासशेषता । तुल्यप्रदेशत्वंस्थानं । तेन"अग्नेरहंदेवयज्ययान्नादोभूयासं । अग्नीषोमयोरहंदेवयज्ययावृत्रहाभूयास"मित्यनुमंत्रणमंत्रयोर्लिंगावगताग्नेयाग्नीषोमीययागशेषभावयोर्मध्येसमाम्नातस्य"दब्धिरस्यदब्धोभूयास"मितिमंत्रस्याग्नेयाग्नीषोमयोर्मध्येविहितोपांशुयाजंप्रतिशेषता । समाख्यानामयौगिकीसंज्ञा । यथाहोतृचमसइति होतुश्चमसलक्षणशेषता । ननुयत्रैकस्मिन्नर्थउपक्रमादिसप्तकमस्ति तत्रैकेनतात्पर्यनिर्णयस्यजातत्वादन्येषांनतात्पर्यनिश्चायकत्वं । सिद्धेःप्रतिबंधकत्वादित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० माण्यमुक्तं ''लिंगक्रमसमाम्नाना'' दितिकाम्येष्ट्यधिकरणे । विस्तृतमेतदाद्यसूत्रेकाम्येष्ट्यधिकरणं । तथापियत्रैकांतिकंकारणत्वंतत्रलिंगादपि तादर्थ्ये । यथार्थज्ञानस्यानुष्ठानोपयोगित्वं यथाचात्मज्ञानस्यसांपरायफलककर्मोपयोगित्वमितिभावेनेयमुक्तिरितिध्येयं । प्रागुक्तारुणाधिकरणेश्रुतिविनियोगः प्रागुक्तमंत्रस्तुवाधिकरणयोर्लिंगविनियोगः प्रागुक्तवेदोपक्रमाधिकरणेवाक्यविनियोगः तत्रैवपादे''असंयुक्तंप्रकरणा''दितिचतुर्थेधिकरणेप्रकरणेन तत्रैव''क्रमश्चदेशसामान्या''दितिपंचमेधिकरणेस्थानेन ''आख्याचैवंतदर्थत्वा''दितिषष्ठेधिकरणेसमाख्ययाविनियोगोध्येयः । विस्तरस्तुगुरुपादकृतन्यायाध्वदीपिकायांध्येयः । एकस्मिंस्तात्पर्यरूपेर्थेकिमनेकलिंगैःकृत्यमित्यतआह ॥ **नहीति** ॥ भिन्नवाक्यस्थैर्लिंगैरित्यर्थः । धूमालोकादिनावह्निसाधनदर्शनादितिभावः । एकत्रवाक्येउपक्रमाद्यनेकलिंगमेलनेसत्येकेनार्थनिश्चयेकिमन्यैरित्यतआह ॥ **नहीतीत्येके** ॥ उपक्रमादिसप्तकस्यसाधारण्येनतात्पर्यधीहेतुत्वमुक्त्वाप्रत्येकंतत्सिषाधयिषुरुपक्रमोपसंहारयोर्वक्तव्यविशेषाभावादभ्यासस्यप्रागुक्तदोषमुद्धरंस्तद्धीहेतुत्वमाह ॥ **दुरधिगमइति** ॥ यदुक्तंपौनरुक्त्यंनकचिद्दोषःस्यादितितदुद्धरति ॥ **यत्रेति** ॥ ''सत्यंसत्यंपुनः

नह्येकमनेकलिंगैर्नसाध्यते । दुरधिगमेऽसंभाविते़ऽर्थेतात्पर्याभावाशंकानिरासार्थमसकृदुक्तिश्चार्थवती । यत्रशपथरूपत्वंवा

गु० **नह्येकमिति** ॥ सिषाधयिषयान्येषांसाधकत्वमितिभावः । अभ्यासोनतात्पर्यनिश्चायकः । असकृदुक्तेवैयर्थ्यादित्युक्तं । तत्रवैयर्थ्यमेवासिद्धं । तात्पर्याभावशंकानिरासरूपप्रयोजनसद्भावादित्याह ॥ **दुरधिगमेति** ॥ तात्पर्यशंकोपपादनार्थंदुरधिगमेऽसंभावितइतिविशेषणं । नकेवलमेकोक्तिरर्थवतीचार्थः । नन्वेवंपौनरुक्त्यं क्वापिदोषोनस्यात् । सर्वत्रापितात्पर्याभावशंकानिरासकत्वस्यवक्तुंशक्यत्वादित्यतआह ॥ **यत्रेति** ॥ नन्वसकृदुक्तेस्तात्पर्यनिश्चायकत्वंनसंभवति । तथात्वेसमिधो

SGDF
Sri Gargeshwari Digital Foundation

प्र० सत्यं सत्यंभिदासत्यंभिदे"त्यादाविवेत्यर्थः ॥ प्रकृतेति॥ "सर्वधर्मोपपत्तेश्चे"त्यादाविवेत्यर्थः। तत्रहिप्रकृतसर्वगुणपूर्णत्वोपयोगियुक्त्यविरोधमुक्त्वागुणपूर्णत्वस्यनिगमनात् ॥ अधिकेति ॥ "अर्भकौकस्त्वा"दित्यत्रशंकितस्यैव"अल्पश्रुते"रित्यत्रपुनःशंका अंशस्यापिव्याप्तत्वंवक्तुं यथातथेत्यर्थः। आदिपदात्"व्याख्याताव्याख्याता"इत्यादाविवप्रागुक्तप्रमेयावधारणरूपंप्रयोजनंयत्रनास्तीत्यादिगृह्यते । यदपिसमिधोयजतीत्यादावभ्यासात्कर्मभेदोनस्यादित्युक्तंतत्राह ॥ समिधइति ॥ एकप्रकारेति ॥ "एकप्रकारासकृदुक्तिरभ्यास"इतिटीकोक्तेरितिभावः। तथाचतस्यतत्रव्यभिचारोनेतिभावः। नचतत्रापियजत्यंशेतादृग्रूप्यमस्तीतिवाच्यं । एकदेशमात्रेणतथात्वस्यातिप्रसंगित्वादितिभावः। कथं तत्रकर्मभेदइत्यतआह ॥ पंचेति ॥ "तिस्रआहुतीर्जुहोति सप्तदशप्राजापत्यान्पशूनालभते"इत्यादाविवसंख्ययावा "अथैषज्योतिरित्यादा

प्रकृतोपयोगिप्रमेयांतरकथनेनपुनस्तदुपसंहाररूपत्वंवाधिकविवक्षादिकंवानास्ति केवलंज्ञातज्ञापकतातत्रपौनरुक्त्यंदोषः । "समिधोयजतीडोयजती"त्यादावसकृदुक्तेर्भिन्नप्रकारत्वेनैकप्रकारासकृदुक्तिरूपतात्पर्यलिंगाभ्यासाभावात् पंचप्रयाजाइतिसंख्याभेदस्यसमिदादिनामभेदस्यचसत्त्वाच्चा.

गु० यजतीत्यादावप्यसकृदुक्तेर्वैयर्थ्यापत्त्यातदन्यथानुपपत्त्याकर्मभेदसिद्धिर्नस्यादित्यतआह ॥ समिधोयजतीति ॥ समित्त्वेट्त्वादिभिन्नप्रकारत्वेनेत्यर्थः ॥ तात्पर्यलिंगाभ्यासेति ॥ तात्पर्यलिंगभूतोयोभ्यासःतदभावादित्यर्थः। अयंभावः । अभ्यासस्यतात्पर्यनिश्चायकत्वंसंभवति । नचैवंसमिधोयजतीत्यादौतत्प्रसंगः । तत्रैकप्रकारासकृदुक्तिरूपाभ्यासाभावात्। तादृशस्यैवतात्पर्यनिश्चायकत्वात्। तत्रविद्यमानस्याविशेषपुनःश्रवणस्यतात्पर्यानिश्चायकत्वात् । तथाचैकप्रकारासकृदुक्तिरूपाभ्यासस्यतात्पर्यनिश्चायकत्वेसमिधोयजतीत्यादावविशेषपुनःश्रवणरूपासकृदुक्तिवैयर्थ्यान्यथानुपपत्त्याकर्मभेदःसंभवतीतिनैतदभ्यासस्यतात्पर्यनिश्चायकत्वेबाध

SGDF
Sri Gargeshwari Digital Foundation

प्र० विवसमिदादिनामभेदेनवाकर्मभेदेभ्युच्चयत्वेन“एकस्यैवपुनःश्रुतिरविशेषा”दितिसूत्रेऽभ्यासेनकर्मभेदउक्तइत्यर्थः । ननुकुतएवमभ्यासद्वै विध्यं । मीमांसकोक्ताभ्यासएवास्तु । तस्यसिद्धार्थएवतात्पर्यधीहेतुत्वंनसाध्यार्थेवाक्यइत्येवोच्यतामित्यतआह ॥ **यत्रत्विति** ॥ अभ्यासा

ऽविशेषपुनःश्रुतिरूपाभ्यासात्कर्मभेदः । यत्रत्वसकृदुक्तिरेकप्रकारा

गु० कमिति ॥ **अविशेषपुनःश्रुतिरूपाभ्यासादिति** ॥ अविशेषक्रियापदाभ्यासादित्यर्थः । नचानंदमयाधिकरणउक्ताभ्यासाभावेपितात्पर्यवत्समिधइत्यादावपि किंनस्यादितिवाच्यं । तत्रापिब्रह्मशब्दमात्रस्यैवहेतुत्वात् । अभ्यासशब्दस्यचोपलक्षितेषुभागासिद्धिवारणेनोपलक्ष्यत्वज्ञापनार्थत्वात् । ननुनसंख्याभेदस्यकर्मभेदप्रयोजकत्वं । एकादशप्रयाजाइत्यादावेकादशत्वसंख्यायाआवृत्त्यैवोपपत्तिवत्प्रकृतेपिपंचत्वसंख्यायाआवृत्त्यैवोपपत्तेः । नापिनामभेदात्कर्मभेदः । एकस्थानेऽनेकनामवत्त्वसंभवेनततःकर्मभेदासंभवात् । तथाचकथमनयोःकर्मभेदप्रयोजकत्वमितिचेन्मैवं । संख्याभेदस्यकर्मभेदप्रयोजकत्वमवश्यमंगीकर्तव्यं । अन्यथा“सप्तदशप्राजापत्यान्पशूनालभते तिस्रआहुतीर्जुहोती”त्यादौसप्तदशत्वादेरप्यावृत्त्यैवोपपत्तौसप्तदशपश्वालंभनंनस्यात् । नचैकादशप्रयाजाइत्यत्रकथमितिवाच्यं । तत्रपंचभिर्वाक्यैःपंचप्रयाजाविधानेनैकादशत्वविधायकत्वाभावेनागत्यावृत्तिपरत्वांगीकारात् । नामभेदस्यापिकर्मभेदप्रयोजकत्वमावश्यकं । एकस्यानेकनामकथनवैयर्थ्यात् । अथैषज्योतिरित्यादौनामभेदेनकर्मभेदस्यस्वीकृतत्वाच्च । ननुचाविशेषपुनःश्रुतिरूपाभ्यासस्यैवतात्पर्यनिश्चायकत्वमंगीकर्तव्यं । नचैवंसमिधोयजतीत्यादावपितादृशाभ्याससद्भावेनतत्राभ्यासस्यतात्पर्यनिश्चायकत्वापत्त्याकर्मभेदोनसिद्ध्येदितिवाच्यं । सिद्धार्थएववाक्येतादृशाभ्यासस्यतात्पर्यनिश्चायकत्वेनसाध्यार्थवाक्येतात्पर्यनिश्चायकत्वाभावेनकर्मभेदोपपत्तेः । एवंचकिमेकप्रकारासकृदुक्तिरूपाभ्यासस्यतात्पर्यनिश्चायकत्वकल्पनयेत्यतआह ॥ **यत्रत्विति** ॥ उक्तंचबाधकं पंचप्रयाजाइज्यंतइ ॥ १७९ ॥

प्र० त्तात्पर्यधीरित्यन्वयः ॥ **उक्तंचेति** ॥ शपथरूपत्वादिकंसंख्याभेदादिकंवेत्यर्थः । अहोइत्यादिलौकिकंवाक्यं । प्रागुक्तदोषास्पृष्टतयाअपूर्वतां निर्वक्ति ॥ **अपूर्वतात्विति** ॥ **स्वेति** ॥ यस्यवाक्यस्यापूर्वतोच्यतेतद्वाक्यंस्वशब्देनगृह्यते । स्वानुपजीविनेत्यस्यव्यावर्त्यंस्वयमेवाह ॥ **वेदार्थस्येति** ॥ एतेनप्रागुक्तदोषोनिरस्तोभवति । स्वबोधनीयेत्यादिपदकृत्यमाह ॥ **वेदार्थस्येति** ॥ एतेनधर्मित्वेनवाप्रतियोगित्वेनवाग्रा

उक्तंचबाधकंनास्ति तत्राभ्यासात्“अहोदर्शनीयाअहोदर्शनीया”इत्यादिसिद्धार्थवाक्यइव“एह्येहिफुल्लांबुजपत्रनेत्र बध्यतांबध्यतांबाल”इत्यादिसाध्यार्थवाक्येपितात्पर्यधीर्दृष्टैव । अपूर्वतातुस्वबोधनीयपुरुषगताज्ञानादिविरोधिनास्वानुपजीविमानांतरेणाग्राह्यार्थत्वं । वेदार्थस्यधर्माधर्मादेरीश्वरसार्वज्ञादेश्चस्वोपजीविनास्मृतिवाक्येनसर्वकर्तृत्वाद्यनुमानेनचग्राह्यत्वेपि तयोर्वेदोपजीवित्वाद्वेदस्यापूर्वता । वेदार्थस्यवेदानुपजीवीश्वरप्रत्यक्षग्रा

गु० तिसंख्याभेदसमिदादिनामभेदरूपबाधकमित्यर्थः । दर्शनीया सुंदरी । यच्चोक्तंमानांतराग्राह्यार्थत्वरूपाऽपूर्वतापिनतात्पर्यधीहेतुः । श्रुतिमूलस्मृत्या सर्वज्ञत्वादिसाधकसर्वकर्तृत्वाद्यनुमानेन जगत्सत्यत्वजीवेश्वरभेदादिग्राहकप्रत्यक्षेणच गृहीतार्थायाःश्रुतेरतात्पर्यप्रसंगादिति । तत्परिहर्तुमपूर्वतायालक्षणंतावदाह ॥ **अपूर्वतात्विति** ॥ अत्रचस्वशब्दद्वयंसमभिव्याहृतपरं । तदनुसारेणमानांतरेत्यस्यार्थऊह्यः । स्वेनबोधनीयोयःपुरुषः तद्गतंयदज्ञानादि आदिशब्देनभ्रमसंशयपरिग्रहः । तद्विरोधिना स्वंनोपजीवतीतिस्वानुपजीवि एवंभूतंयन्मानांतरं तेनग्राह्योर्थोयस्य तस्यभावस्तत्वमित्यर्थः । स्वानुपजीविनेत्यस्यकृत्यमाह ॥ **वेदार्थस्येति** ॥ स्वबोधनीयपुरुषगताज्ञानादिविरोधिनेत्यस्यकृत्यमाह ॥ **वेदार्थस्येति** ॥ ननुस्वबोधनीयेतिविशेषणंव्यर्थं । अज्ञानादिविरोधिनास्वानुपजीविनामानांतरेणाग्राह्यार्थत्वमित्येतावतैवपूर्णत्वात् । नचेश्वरप्रत्यक्षस्याप्यज्ञानादिविरोधित्वेनवेदानुपजीविमानांतरत्वेनचतेनग्राह्यार्थत्वस्यैववेदेविद्यमानत्वेनापूर्वत्वाभावापत्त्यातदर्थंस्वबोधनीये

SGDF Sri Gargeshwari Digital Foundation

प्र० ह्येश्वरांशेवेदोपजीव्यास्मदादिगतप्रत्यक्षादिनाग्राह्यजीवेशभेदार्थकस्यवेदस्यापूर्वतोक्ताभवति । उक्तंचैतद्वेदादिश्रुतेरनुवादकत्वभंगे । अगृहीतेत्यनुक्त्वाऽग्राह्यार्थत्वमित्युक्तेःफलमाह ॥ **प्रत्यक्षेति** ॥ उक्तापूर्वत्वंमीमांसकसंमतमित्याह ॥ **अतएवेति** ॥ चतुर्थेद्वितीयपादे "संस्कारे

ह्यत्वेपीश्वरस्यवेदबोधनीयत्वाभावाद्वेदबोधनीयास्मदादिगताज्ञानंप्रतिचेश्वरज्ञानस्याविरोधित्वाद्वेदस्यापूर्वता । प्रत्यक्षग्राह्येर्थेप्राक्प्रवृत्तस्यशब्दस्यतदगृहीतार्थत्वेपितद्ग्राह्यार्थत्वादपूर्वत्वाभावः । अतएवावघातादे

गु० तिविशेषणंसार्थकमेवेतिवाच्यं । ईश्वरप्रत्यक्षस्याज्ञानविरोधित्वस्यैवासंभवात् । तथाहि । ईश्वरप्रत्यक्षंकिंस्वाज्ञानविरोधिवास्यादन्यदीयाज्ञानविरोधिवास्यात् । नाद्यः । ईश्वरस्याज्ञानाभावेनतद्विरोधित्वासंभवात् । नांत्यः । तथासतिविरोधिभूतेश्वरज्ञानस्यसर्वदासत्त्वेनतद्विरोध्यज्ञानमस्मदादीनांकदापिनस्यात् । तस्मात्कथमज्ञानविरोधित्वमितिचेदुच्यते । ईश्वरज्ञानस्यस्वाज्ञानविरोधित्वस्यैवांगीकारात् । नचस्वस्याज्ञानस्यैवाभावात्कथंविरोधित्वमितिवाच्यं । अज्ञानस्याभावेनज्ञानस्यतन्निवर्तकत्वासंभवेप्यज्ञानेनसहानवस्थानविरोधस्यविद्यमानत्वेनदोषाभावात् नचैवंदत्तेपिस्वबोधनीयपदेपूर्वोक्तदोषस्तदवस्थः । स्वशब्देनवेदाः तद्बोधनीयाःपुरुषाअस्मदादयः तदज्ञानविरोधीश्वरप्रत्यक्षं अस्मदज्ञानस्यास्मन्मात्रनिष्ठत्वेनेश्वरज्ञानस्यतत्राभावेनसहानवस्थानलक्षणविरोधसद्भावात् । स्ववेदवाक्यं तदनुपजीविमानांतरमीश्वरप्रत्यक्षं तद्ग्राह्यार्थत्वस्यैववेदविद्यमानत्वादितिवाच्यं । एकत्रप्राप्तियोग्ययोरेवसहानवस्थानलक्षणविरोधः । अन्यथामेरुमंदरयोरपिसहानवस्थानलक्षणविरोधःस्यात् । नचेश्वरप्रत्यक्षास्मदज्ञानयोरेकत्रप्राप्तियोग्यतास्ति । येनसहानवस्थानलक्षणोविरोधःस्यात् । तथाचेश्वरप्रत्यक्षस्यास्मदज्ञानविरोधित्वाभावान्नपूर्वदोषइति । अन्येषांविशेषणानांकृत्यमाकरएवोक्तं । ननुप्रमाणांतरागृहीतार्थत्वमात्रोक्तावप्यबाधादग्राह्यार्थत्वंनवाच्यमित्यतआह ॥ **प्रत्यक्षग्राह्येर्थइति** ॥ नन्वेवंसर्वेषामनुवादकत्वेनसंप्रतिपन्नस्य"अग्निर्हिमस्यभेषज"मितिवाक्यस्याप्यपूर्वविधित्वापत्तिः । तद्वाक्यस्यानुपजीविप्रत्यक्षगृहीतार्थग्राहित्वादित्यतआह प्रत्यक्षग्राह्येर्थइति । तथाचविवक्षित

SGDF Sri Gargeshwari Digital Foundation

प्र० चतत्प्रधानत्वा"दित्येकादशेधिकरणे"व्रीहीनवहंती"त्ययंकिंविधिरुतानुवादइतिसंशये पुरोडाशप्रकृतित्वेन"व्रीहिभि"रितिवाक्येव्रीहिविधानाद्वैतुष्यार्थमर्थाक्षिप्तावहननानुवादइतिप्राप्ते वैतुष्ये नखविदलनादिसाधनांतरस्यापिसंभवान्ननियमेनावहननाक्षेपोऽतोप्राप्तांशपरिपूरणेननियमार्थोविधिरितिसिद्धांतितं ॥ **मानांतरेति** ॥ अन्वयव्यतिरेकसध्रीचीनप्रत्यक्षेत्यर्थः ॥ **नियमेति** ॥ अवघातेनैवव्रीहींस्तुषविमुक्तान्कुर्यान्नान्येनेत्येवंरूपनियमेत्यर्थः ॥ **इमामिति** ॥ आद्येमंत्राधिकरणे"परिसंख्ये"तिगुणसूत्रविषयतया"इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते"इत्युदाहृत्यरशनाग्रहणप्रकाशनसामर्थ्यरूपलिंगेनाश्वरशनाग्रहणेमंत्रस्यनियतप्राप्तिसत्त्वेनापूर्वनियमविध्योरसंभवेनलिंगाविशेषाद्गर्दभ

वैतुष्यसाधनतायावेदानुपजीविमानांतरग्राह्यत्वेन"व्रीहीनवहंती"त्यादेरपूर्वविधित्वासंभवान्नियमविधित्वमाश्रितं । अतएवच"इमामगृभ्णन्रशनामृतस्ये"त्यादेःस्वरूपसिद्ध्यादौस्वानुपजीविनामंथरगामिनामंत्रसामर्थ्यरूपेणलिंगेन

गु० लक्षणाभावान्नातिप्रसंगइतिभावः । ननुप्रत्यक्षग्राह्येर्थेप्राक्प्रवृत्तस्यशब्दस्यतदगृहीतार्थस्यतत्रार्थेऽपूर्वत्वमेवास्तु । किंतद्व्यवच्छेदायाग्राह्यार्थत्वविवक्षयेत्यतोमानांतरागृहीतार्थत्वविवक्षणेनियमविध्यसंभवरूपंपरिसंख्याविध्यसंभवरूपंचबाधकंमनसिनिधायाह ॥ **अतएवेति** ॥ अथवातत्रैवोपष्टंभकमाह ॥ **अतएवेति** ॥ मानांतराग्राह्यार्थत्वस्यावश्यंविवक्षणीयत्वादेवेत्यर्थः । तदगृहीतार्थत्वविवक्षायांतुव्रीहीनवहंतीत्यादेरप्युक्तविधापूर्वतावत्त्वेनापूर्वविधित्वंस्यादितिभावः । मानांतराग्राह्यार्थत्वविवक्षायांविपक्षबाधकप्रदर्शनमुखेनोपष्टंभकांतरंचाह ॥ **अतएवेति** ॥ मानांतराग्राह्यार्थत्वस्यविवक्षितत्वादेवेत्यर्थः । स्वानुपजीविना"इमामगृभ्णन्रशनामृतस्ये"त्येतद्वाक्यानुपजीविनेत्यर्थः । लिंगेनगृहीतार्थत्वाभावमुपपादयितुंमंथरगामिनेतिहेतुगर्भंविशेषणं ॥ **स्वरूपसिद्ध्यादाविति** ॥ सामर्थ्यस्यशक्तिरूपतया

SGDF
Sri Gargeshwari Digital Foundation

प्र० रशनाग्रहणेपिप्राप्तिप्रसक्तौतन्निवर्तनरूपपरिसंख्याविधिरित्युक्तं । गृहीतार्थत्वाभावेहेतुर्मंथरेति । श्रुतिकल्पनाद्वारालिंगस्यविनियोजकत्वे नविलंबितत्वात्ततःप्रागेवब्राह्मणंप्रवर्ततइतिभावः ॥ **यएवंविद्वानिति** ॥ विद्वद्वाक्यद्वयस्याग्नेयादित्रिकद्विकानुवादत्वमाद्यसूत्रेविवृतं । अत

गृहीतार्थत्वाभावेपिग्राह्यार्थत्वेनापूर्वविधित्वासंभवात्परिसंख्यात्वमुक्तं । “य एवंविद्वा”नित्याद्यनुवादस्यस्वानुपजीविनापुरोवादरूपेणाग्नेयादिवाक्येना

गु० स्वरूपसिद्धौस्वार्थसिद्धौवेत्यर्थः । एवमुक्तविधापूर्वतायाअभावेप्यपूर्वविधित्वासंभवात्क्वचिन्नियमविधित्वंक्वचित्परिसंख्याविधित्वंमीमांसकैरंगीकृतमितिसदृष्टांतमुपपादितं । इदानीमुक्तविधापूर्वतायाअभावेपिविधिमात्रत्वाभावेदृष्टांतमाह ॥ **यएवंविद्वानित्यादि** ॥ यद्वाननुप्रत्यक्षग्राह्येर्थेप्राक्प्रवृत्तस्यशब्दस्यतत्रार्थेऽपूर्वत्वपरिहारायापिनाग्राह्यार्थत्वंविवक्षणीयं । अग्रहीष्यमाणार्थत्वविवक्षयापितत्संभवात् । अतएवव्रीहीनवहंतीत्यादेर्मानांतरागृहीतार्थत्वेपिग्रहीष्यमाणार्थत्वाभावेनापूर्वविधित्वासंभवान्नियमपरिसंख्याविधित्वांगीकारः । तथाचाग्राह्यत्वविवक्षानुपपन्नेत्यतआह ॥ **यएवंविद्वानित्याद्यनुवादस्येति** ॥ तथाचमानांतराग्रहीष्यमाणार्थत्वविवक्षायामपियएवंविद्वानित्याद्यनुवादस्यपुरोवादपूर्वकत्वेनतादृशमानांतरगृहीतार्थत्वेपिग्रहीष्यमाणार्थत्वाभावेनोक्तलक्षणस्यतत्रापिसत्त्वाद्यएवंविद्वानित्याद्यनुवादस्याप्यपूर्वत्वंस्यात् तत्परिहारार्थमग्राह्यत्वस्यावश्यंविवक्षणीयत्वात् । तत्रचाग्रहीष्यमाणार्थत्वेप्यग्राह्यार्थत्वाभावान्नापूर्वत्वप्रसंगइतिभावः । नन्वेवं“दध्नाजुहोती”त्यस्यापूर्वविधित्वंनस्यात् । “दध्नाजुहोती”त्येतद्वाक्यबोधनीयपुरुषगताज्ञानविरोधिना एतद्वाक्यानुपजीविना “अग्निहोत्रंजुहोती”त्येतद्वाक्येन ग्राह्योयोहोमरूपोर्थस्तद्ग्राहकत्वस्यैवविद्यमानत्वादित्यतः होमांशेमानांतरग्राह्यार्थत्वस्यविद्यमानत्वेपितत्रापूर्वत्वस्यैवाभावात् दध्याद्यंशेचापूर्वविधित्वसत्त्वेपितत्रमानांतरेण“अग्निहोत्रं ॥ १८१ ॥

प्र० एवेतिपदमिहोत्तरत्रचानुवर्तनीयं । अग्राह्यार्थत्वाभावोपपादनायागृहीतार्थत्वाभावादित्युक्तं । गृहीतार्थत्वादित्येवक्वचित्पाठः ॥ **गुणविधेरिति** ॥ दधिरूपगुणविधेरित्यर्थः । द्वितीये“आघाराग्निहोत्रमरूपत्वा”दितिद्वितीयपादीयपंचमाधिकरणे“दध्नाजुहोति ऊर्ध्वमाघारयती”त्यादिकंकिंगुणविशिष्टकर्मविधिरुतगुणमात्रविधिरितिसंशये“अग्निहोत्रंजुहोती”त्यादौद्रव्यदेवताख्यरूपापरिज्ञानेनकर्मविध्ययोगाद्दध्यादिवाक्यैस्तदनुवादेनगुणविध्यसंभवाद्गुणविशिष्टकर्मविधिरितिप्राप्ते दध्यादिवाक्योक्तदध्यादिद्रव्यस्य“अग्निर्ज्योति”रितिमांत्रवर्णिकदेवतायाश्चपरिज्ञानेनाग्निहोत्रवाक्येकर्मविधिसंभवात्तद्विहितकर्मानुवादेनगुणविधिरयमितिसिद्धांतितं ॥ **स्वानुपजीविनेति** ॥ तस्यस्वतंत्रविधित्वादितिभावः । एवंचोक्तमपूर्वतालक्षणंदध्यादौनाव्याप्तंहोमेनातिव्याप्तमितिभावः ॥ **एवंदेवतेति** ॥ आद्येतुर्यपादे“तद्गुणास्तुविधेरन्नविभागाद्विधानार्थेनचेदन्येनशिष्टा”इतिषष्ठेधिकरणे “यदाग्नेयोष्टाकपालोमावास्यायांपौर्णमास्यांचाच्युतोभवती”त्युदाहृत्यकिमाग्नेयशब्दःकर्मनामकिंवा

ऽगृहीतार्थत्वाभावा(नगृहीतार्थत्वा)दपूर्वार्थत्वाभावः । “दध्नाजुहोती”त्यादेश्चगुणविधेःस्वानुपजीविना “अग्निहोत्रंजुहोती”त्यादिनाग्राह्यार्थत्वान्नहोमांशेऽपूर्वता । किंतुतदग्राह्यदध्यादौ । एवंदेवतासहित

गु० जुहोती”त्यादिनादध्यादेरविधानेनतदग्राह्यार्थत्वमस्त्येव । तथाचयदंशेऽपूर्वतानतदंशेमानांतरग्राह्यार्थता । यदंशेमानांतरग्राह्यार्थतानतत्रापूर्वतेत्यभिप्रायेणाह ॥ **दध्नाजुहोतीत्यादि** ॥ अथवा अंशविवक्षायाआवश्यकत्वेनियामकमाह ॥ **दध्नेति** ॥ ननुतथापीदंलक्षणमयुक्तं । तथासतिदेवतासहितकर्मविधायकब्राह्मणस्यापूर्वत्वंनस्यात् । स्वं ब्राह्मणवाक्यं तद्बोधनीयाःपुरुषाअस्मदादयः तद्गतंयदज्ञानादि तद्विरोधि स्वं ब्राह्मणं तदनुपजीविनाशाखांतरस्थेनमंत्रेणग्राह्योयोदेवतादिरूपोर्थः तद्ग्राह्यार्थकत्वस्यैवविद्यमानत्वादित्यतआह ॥ **एवमिति** ॥ **उपजीव्यत्वादिति** ॥ अत्रदेवताश्रयकर्मसमर्पकत्वादुपजीव्यत्वंबोध्यं । तथाचब्राह्म

SGDF

प्र० ग्न्याख्यगुणविधिरितिसंशये द्रव्यदेवतारूपानेकगुणविधौवाक्यभेदादष्टाकपालद्रव्यकमाग्नेयनामकंकर्ममात्रंविधीयतइतिप्राप्ते द्रव्यलाभेपि देवतायाअलाभादाग्नेयशब्देनैवदेवताविधेया । विशिष्टकर्मविधानाच्चार्थापत्त्यानेकेषामपिगुणानांविधिसिद्ध्यावाक्यभेदाभावाद्गुणविधिरिति सिद्धांतितं । उपजीव्यत्वोपपादनायस्वविहितेकर्मणिदेवतार्पकमित्युक्तं । अष्टाकपालोभवतीत्यत्रपुरुषव्यापारानुक्त्यानुष्ठानाय मंत्राकांक्षाविरहात् सत्यामपितस्यांपुरोडाशमात्रविषयस्यव्यापारस्यदेवतावाचिमंत्रसंबंधायोग्यत्वात्तत्संबंधायोक्तदिशाद्रव्यदेवतासंबंधेनकर्मणिस्वेनविहिते देवतार्थकोमंत्रःपश्चादन्वेतीतितंप्रत्यस्योपजीव्यत्वमित्यर्थः ॥ **समानेति** ॥ ऐंद्राग्नमेकादशकपालमित्यादिकाम्येष्ट्यंगभूतं"उभावामिंद्राग्नी" इत्यादिसमानशाखास्थंमंत्रंप्रति । तथा आग्नेयेष्ट्यंगभूतं"अग्निर्मूर्धादिवःककु"दित्यादिशाखांतरस्थंमंत्रंप्रतीत्यर्थः ॥ **देवतागुणादाविति** ॥

कर्मविधायकस्यब्राह्मणवाक्यस्यस्वविहितेकर्मणिदेवतार्पकंसमानशाखास्थंशाखांतरस्थंवामंत्रंप्रत्युपजीव्यत्वाद्देवतांशेप्यपूर्वता । मंत्रस्यतुतदंशेनापूर्वता । किंतुब्राह्मणाप्राप्तदेवतागुणादौ ।

गु० णवाक्यस्यशाखांतरस्थमंत्रग्राह्यदेवताद्यर्थग्राहकत्वेपितस्यमंत्रस्यब्राह्मणवाक्यमुपजीव्यप्रवृत्तत्वेनस्वानुपजीवित्वाभावादपूर्वतासंभवत्येवेत्यर्थः ॥ **मंत्रस्येति** ॥ ब्राह्मणवाक्यस्यदेवताद्यर्थप्रकाशकसंत्राश्रयकर्मसमर्पकत्वेनमंत्रंप्रत्युपजीवित्ववन्मंत्रस्यब्राह्मणवाक्यंप्रत्युपजीवित्वाभावेनमंत्रानुपजीविब्राह्मणवाक्यग्राह्यदेवताद्यर्थकत्वस्यैवविद्यमानत्वेनतदंशेनापूर्वत्वमितिभावः । तर्ह्येतच्छाखास्थःशाखांतरस्थोवामंत्रःकिमविधायकएवेत्यभिप्रायेणपृच्छति ॥ **किंत्विति** ॥ उत्तरमाह ॥ **ब्राह्मणाप्राप्तेति** ॥ देवतागुणादौ देवतानिष्ठश्रैष्ठ्यादिगुणादौ । मंत्रानुपजीविब्राह्मणवाक्याग्राह्यगुणादावपूर्वतेत्यर्थः । नन्वेककर्मविधायकभिन्नभिन्नशाखास्थवाक्ययोःकथमपूर्वता । तयोःपरस्परगृहीतार्थग्राहकत्वस्यैवविद्यमानत्वेनमानांतराग्राह्यार्थत्वाभावादित्यतःकिंयत्रैकस्मिन्वाक्येसांगकर्माभिधानमितरत्रतदभावस्तत्रेद

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिवोमूर्धत्वककुत्पतित्वादिरूपगुणादावित्यर्थः । स्थलांतरेप्युक्तरूपापूर्वतातदभावौदर्शयति ॥ **भिन्नशाखेति** ॥ स्वीकारादित्यंतेन । "भूयस्त्वेनोभयश्रुतिः" इतितृतीयाध्यायतृतीयपादस्थतृतीयाधिकरणार्थोपन्यासः । तत्रह्येवमुक्तं । यजुर्वेदेसामवेदेचसमाम्नातेज्योतिष्टोमेकिंवेदनिमित्तःस्वरोग्राह्यइतिविशये अविशेषादनियमेप्राप्ते यजुर्वेदेद्रव्यदेवतयोःश्रवणेननिष्कृष्टकर्मस्वरूपज्ञानसंभवादितिकर्तव्यताभूयस्त्वदर्शनाच्चतत्रैवविधिरित्यवसीयते । वेदांतरेतुस्तोत्रादिगुणविधानार्थंनामयुक्तंक्रियामात्रंश्रूयतइतिविध्यवगतिसमाप्त्यसंभवात्तत्रानुवादः । अतोयजुर्वेदेनासौक्रियतइतिज्योतिष्टोमस्योपांशुस्वरत्वमितिसिद्धांतितं । यद्यपीदमधिकरणंवेदद्वयोक्तकर्मविधायकविषयमित्युक्तं तथापिन्यायसाम्याद्भिन्नशाखास्थयोरित्युक्तं । वार्तिकमतेनाह ॥ **द्रव्यदेवतेति** ॥ भाष्यमतेनाह ॥ **इतिकर्तव्यतेति** ॥ इतिकर्तव्यताविधायकस्यस्वोद्देश्य

भिन्नशाखास्थयोश्चैककर्मविधायकयोर्वाक्ययोर्मध्येयत्रवाक्येद्रव्यदेवताख्ययागरूपंवा इतिकर्तव्यताभूयस्त्वंवा तत्रैवकर्मविधिः । इतरस्यतुतदनुवादेनेतिकर्तव्यताविधायकत्वमितिस्वीकारात् । इतिकर्तव्यताविधायकस्य

गु० मापादनमुत यत्रवाक्यद्वयेपिसाम्यमेवतत्रेवेतिविकल्प्याद्यआह ॥ **भिन्नेति** ॥ तथाचयस्मिन्वाक्येद्रव्यदेवताख्ययागरूपंवा इतिकर्तव्यताभूयस्त्वंवास्तितदेववाक्यंविधायकं । तस्यचकर्मांशेस्वोपजीविमानांतरग्राह्यार्थत्वेपिस्वानुपजीविमानांतरग्राह्यार्थत्वाभावादपूर्वतासंभवति । यत्रतुदेवताद्रव्याख्ययागरूपादिकंनास्ति तस्यचानुपजीविद्रव्यदेवताख्ययागरूपवाक्यगृहीतार्थकत्वात्कर्मांशेनापूर्वतेत्यर्थः ॥ **इतिकर्तव्यतांशइति** ॥ तत्रचस्वानुपजीविमानांतराग्राह्यार्थत्वाभावादितिभावः । ननुयत्रशाखाद्वयस्थेवाक्यद्वयेपिद्रव्यदेवतायागरूपंवा इतिकर्तव्यताभूयस्त्वंवासममेव तत्रवाक्यद्वयस्यापूर्वत्वंनस्यात् । वाक्यद्वयस्यापिपरस्परमुपजीव्योपजीवकभावाभावेन

SGDF
Sri Gargeshwari Digital Foundation

प्र० शेषिस्वरूपकर्मविधायकवाक्योपजीवित्वात्प्राप्तस्यैवोद्देश्यत्वान्नकर्मांशेऽपूर्वता । अंगांशेह्यतथाभूतत्वादपूर्वतेत्यर्थः । कर्मविधिलिंगसाम्येतु कर्मेतिकर्तव्यतांशयोरुभयोरप्यपूर्वतामेवमतभेदेनाह ॥ **यदीति** ॥ तत्रमीमांसकमतेअपूर्वतापिव्यवस्थितेत्यन्वयः । अध्येतव्यत्वनियमवदध्ये तव्यत्वनियमाभावादितिव्यतिरेकदृष्टांतः ॥**सत्रिभिरिति** ॥ "सःसर्वांगोपेतयागस्त्रिभिर्वेदैर्विधीयत" इत्यापस्तंबसूत्रादित्यर्थः । अनुपदेशेनेति

कर्मविधायकोपजीवित्वान्नकर्मांशेऽपूर्वता । किंत्वितिकर्तव्यतांशे । यदिशाखाद्वयस्थेवाक्यद्वयेपिद्रव्यदेवताख्यरूपंवेतिकर्त व्यतासाम्यंवा तत्रमीमांसकमते एकस्मिन्यजुरादिरूपेवेदेआध्वर्यवौद्गात्रादिसर्वकर्मानुपदेशेन "सत्रिभिर्विधीयत" इतिवचना त्त्रयींविनासर्वांगोपेतकर्मानवगतेर्वेदत्रयस्याध्येतव्यत्वनियमवदेकैकस्यांतैत्तिरीयादिरूपायांशाखायांसर्वाध्वर्यवादिकर्मोपदेशेन

गु० स्वानुपजीविमानांतरग्राह्यार्थस्यैव विद्यमानत्वादितिद्वितीयंदूषयति ॥ **यदीति** ॥ तत्रमीमांसकमतेतत्तच्छाखाध्यायिनंप्रतितत्तद्वाक्यस्यव्यवस्थयाबोधकत्वादपूर्व तापिव्यवस्थितैवेत्यन्वयः । ननुवेदत्रयाध्ययनवत्सर्वशाखाध्ययनमपिनियमेनकर्तव्यं । अन्यथैकस्यांशाखायांसर्वकर्मानुपदेशेनसांगकर्मनिर्वाहाभावात्तदनुष्ठानंनस्यादित्य तआह ॥ **एकस्मिन्निति** ॥ नियमेनवेदत्रयाध्ययनेहेतुः कर्मानवगतेरिति । तत्रहेतुद्वयंयजुरादिरूपेवेदइत्यादि । शाखाध्ययननियमाभावेहेतुस्तैत्तिरीयादीति । ननुवेदत्रयाध्ययनस्यावश्यकत्ववच्छाखात्रयाध्ययनस्यावश्यकत्वात्कथंतच्छाखाध्यायित्वेनापूर्वतेतिचेन्न । वेदत्रयाध्ययनाभावेसांगकर्मणएवासंभवेनवेदत्रयाध्ययन स्यावश्यकत्वाच्छाखात्रयाध्ययनाभावेपिसांगकर्मणःकर्तुंशक्यत्वात्तत्तच्छाखाध्यायित्वेनापूर्वतोपपत्तेः । नचवेदत्रयाध्ययनाभावेसांगकर्मासंभववच्छाखात्रयाध्ययना भावेसांगकर्मासंभवेनशाखांतरस्याप्यध्येतव्यत्वमावश्यकमितिवाच्यं । एकैकस्मिन्वेदआध्वर्यवादिसर्वकर्मानुपदेशेनवेदत्रयाध्ययनाभावेसांगकर्मानुष्ठानासंभवेपि एकैक स्यांशाखायांसर्वकर्मोपदेशेनशाखात्रयाध्ययनाभावेकर्मानुष्ठानासंभवाभावान्नकश्चिद्दोषः । ननूक्तरीत्यामीमांसकमतेशाखांतरस्याध्येतव्यत्वनियमाभावेनतन्मतेऽपूर्व

प्र० वचनादितिच कर्मानवगतौहेतुद्वयं । साचाध्ययननियमेहेतुः । सर्वाध्वर्यवादीत्यध्ययननियमाभावेहेतुः ॥ **तृतीयइति** ॥ तृतीयाध्या येतृतीयपादीयाद्याधिकरणे "स्वाध्यायस्यतथात्वेनही" त्यादिगुणसूत्रेवक्ष्यमाणत्वादित्यर्थः । सर्वशाखाध्ययनशक्तान्प्रत्यनयावातयावेत्यव्यव स्थितविकल्पेनविधायकमित्यर्थः । तत्रदृष्टांतद्वयंमीमांसकेति । यथाविधिलिंगसाम्यवतिवेदद्वयस्थवाक्यद्वये यथावासमानशाखास्थेषु "एक हायन्याक्रीणाति वाससाक्रीणाति हिरण्येने" त्यादिषुसर्वत्रगुणश्रवणादुत्पत्तिशिष्टप्राबल्येनानूद्यविधानायोगात्सर्वेषामुत्पादकत्वावश्यंभावा

काण्वादिशाखांतरस्याध्येतव्यत्वनियमाभावात्तत्तच्छाखाध्यायिनंप्रतितत्तद्वाक्यस्यव्यवस्थायाबोधकत्वा दपूर्वतापिव्यवस्थितैव । अस्मन्मतेतु शाखाभेदोशक्तविषयइतितृतीयेवक्ष्यमाणत्वाच्छक्तान्प्रतिमीमां सकमतेवेदद्वयस्थवाक्यद्वयवच्छाखाद्वयस्थवाक्यद्वयेपिक्रयवाक्यवदव्यवस्थितविकल्पेनविधायकत्वं ।

गु० तायाव्यवस्थितत्वसंभवेपि भवन्मतेकथं । "सर्ववेदांतप्रत्ययंचोदनाद्यविशेषा" दितिसर्वशाखाधिकरणेसर्वशाखाध्ययनस्यविवक्षितत्वेनानेकशाखाध्ययनापत्त्यातत्त च्छाखाध्यायित्वाभावेनतेनरूपेणापूर्वताया असंभवादित्यतआह ॥ **अस्मन्मतइति** ॥ शक्तान्प्रत्यव्यवस्थितविकल्पेनविधायकत्वमित्यन्वयः । किंचिद्विधायकंकिं चिदविधायकमित्यव्यवस्थितविकल्पेनविधायकत्वमित्यर्थः । नन्वव्यवस्थितविकल्पेनविधायकत्वंकुत्राप्यनुपलब्धंप्रकृतएवकथमंगीकार्यमित्यतःतत्रमीमांसकसंप्रति पन्नंदृष्टांतमाह ॥ **मीमांसकमतेवेदद्वयस्थवाक्यद्वयवदिति** ॥ किंबहुना एकस्यामपिशाखायामव्यवस्थितविकल्पेनविधायकत्वंयदातदाशाखाभेदेतद्भविष्यतीतिकिं वक्तव्यमित्यभिप्रायेणतत्रापिसंप्रतिपन्नंदृष्टांतमाह ॥ **क्रयवाक्यवदिति** ॥ नन्वेवंस्मृतीनांजगत्सत्यत्वेश्वरसार्वज्ञ्यादावपूर्वत्वंनस्यात् । तासांस्वानुपजीविवेदरूपप्रमाणां

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्व्यवस्थयाविधायकत्वमित्यर्थः । उक्तंचद्वादशे''क्रयणेषुतुविकल्प''इतिचतुर्थपादेतृतीयेपूर्वपक्षसूत्रे । एतच्चाग्रेस्पष्टयिष्यामः ॥ **अशक्तानिति** ॥ सर्वशाखाध्ययनाशक्तानित्यर्थः ॥ **अतएवेति** ॥ स्वबोधनीयपुरुषगताज्ञानविरोधिनेत्युक्तत्वादेवेत्यर्थः । स्मृतीनांतादृशवेदग्राह्यार्थत्वेप्यपूर्वतेत्यन्वयः । कुतइत्यतोवेदस्यस्मृत्यनुपजीवित्वेपिस्मृतिबोधनीयास्मदादिगताज्ञानविरोधित्वाभावादितिभावेनाह ॥ **वेदइति** ॥ अस्पष्टंविक्षिप्यचोक्तस्येतिहेतुगर्भविशेषणद्वयं । यथास्मृतिभिर्ग्राह्यत्वंतथावेदेनग्राह्यत्वाभावादित्यर्थः । उक्तंचाद्येध्यायेधर्मस्यशब्दमूलत्वादितिस्मृत्यधिकरणेस्मृतिप्रामाण्यमेवमेवेतिभावः । सव्यंहिपूर्वमनुष्याआंजतेतस्मादपिवध्यंप्रपन्नंनप्रतिप्रयच्छंतीत्यादौपरप्रकरणगतवाक्यशेषस्यसिद्धवन्नि

अशक्तान्प्रतितुव्यवस्थितविकल्पेनविधायकत्वमित्यपूर्वतापिव्यवस्थितैव । अतएवस्मृतीनांस्वानुपजीविवेदग्राह्यार्थत्वेपिवेदेनानाशाखास्वस्पष्टंविक्षिप्योक्तस्यस्मृतिभिरिववेदेनस्मृतिबोधनीयैरस्मदादिभिरग्राह्यत्वादपूर्वता । अपूर्वत्वाभावेपिवा

गु० तग्राह्यजगत्सत्यत्वादिरूपार्थग्राहकत्वादित्यतः नात्रस्वानुपजीविमानांतराग्राह्यार्थत्वमात्रमपूर्वत्वं किंतुस्वबोधनीयपुरुषगताज्ञानादिविरोधित्वविशिष्टं । वेदस्यचस्मृतिबोधनीयपुरुषगताज्ञानविरोधित्वाभावान्नदोषइतिभावेनाह ॥ **अतएवेति** ॥ अपूर्वतालक्षणेस्वबोधनीयपुरुषगताज्ञानविरोधित्वरूपविशेषणप्रक्षेपादेवेत्यर्थः ॥ अथवा शक्ताशक्तपुरुषभेदेनापूर्वतायाव्यवस्थितत्वादित्यर्थः । तथाचयथाशाखाद्वयस्थवाक्यद्वयेपुरुषभेदेनापूर्वताव्यवस्थिता तथास्मृतीनामपिवेदार्थग्रहणशक्तान्प्रत्यपूर्वताऽभावेपितद्ग्रहणशक्तानस्मदादीन्प्रत्यपूर्वताव्यवस्थितैवेतिभावः । तर्कस्याप्रयोजकत्वमाह ॥ **अपूर्वत्वाभावेपीति** ॥ नन्वेवं''विश्वंसत्य''मित्यादि

SGDF Sri Gargeshwari Digital Foundation

प्र० देशान्यथानुपपत्तिकल्प्यविधिमूलत्वद्योतनार्थमस्पष्टमित्युक्तं ॥ **सप्रयोजनेति** ॥ अस्मदादिबोधोपयोगित्वादितिभावः ॥ **विद्वदिति** ॥ फलवाक्यापेक्षितसमुदायद्वयार्पकत्वेनविद्वद्वाक्यस्ययथासप्रयोजनत्वंतथेत्यर्थः ॥ **अनुवाद्यपरतेति** ॥ फलवत्त्वस्यतात्पर्यलिंगत्वादनुवादे तात्पर्येनहीयतइत्यर्थः । यदप्युक्तंप्रत्यक्षेणचगृहीतार्थायाःश्रुतेरतात्पर्यप्रसंगादितितत्राह ॥ **एवमिति** ॥ प्रत्यक्षस्यघटादौसत्त्वबोधकत्वेपिस्व र्गनरकाद्यतींद्रियेषुसत्त्वाविषयकतयातदंशेस्वबोधनीयपुरुषगताज्ञानविरोधित्वाभावात् घटाद्यैंद्रियकांशेसत्त्वग्रहणेपिवादिविप्रतिपत्त्याऽप्रा माण्यशंकाकलंकितत्वेनानिश्चायकतयास्वबोधनीयपुंगतसंशयविपर्ययाविरोधितयाकृत्स्नसत्त्वनिश्चायकवाक्यानुवादकतानापादकत्वात्तस्या

सप्रयोजनत्वात्स्मृतीनांविद्वद्वाक्यवदनुवाद्यपरता । एवंवादिविप्रतिपत्तिजन्यातत्वावेदकत्वशंकाक लंकितेनासर्वविषयेणप्रत्यक्षेण"विश्वंसत्य"मित्यादिवाक्येनेवजगत्सत्यत्वाप्राप्तेस्तद्वाक्यस्यापूर्वता ।

गु० वाक्यानांजगत्सत्यत्वादौनतात्पर्यं । तज्ज्ञापकापूर्वतायाअभावात् । तथाहि । स्वं विश्वंसत्यमित्यादिवाक्यं तद्बोधनीयाअस्मदादयःपुरुषाः तद्गताज्ञानविरोधित्वं विश्वंसत्यमित्यादिवाक्यं तदनुपजीविमानांतरंजगत्सत्यत्वग्राहिप्रत्यक्षं तद्ग्राह्यजगत्सत्यत्वग्राहकत्वस्यैवसत्त्वेनतदग्राह्यार्थत्वाभावादित्यतो बाह्यप्रत्यक्षस्यदोषशंका कलंकितत्वेनजगत्सत्यत्वाग्राहकत्वेनतदग्राह्यार्थत्वस्यविद्यमानत्वेनापूर्वत्वसंभवात्सत्यत्वादौतात्पर्यंसंभवतीत्याह ॥ **एवमिति** ॥ ननुमास्तुबाह्यप्रत्यक्षस्यदोषशंका कलंकितस्यजगत्सत्यत्वग्राहकत्वं । साक्षिणस्तुजगत्सत्यत्वग्राहकतासंभवत्येव । तस्यनिर्दोषतानियमात् । एवंचसाक्षिप्रत्यक्षग्राह्यसत्यत्वादिग्राहकत्वेन"विश्वंसत्य" मित्यादिवाक्यानामपूर्वतानसंभवत्येवेतिचेन्न । सर्वस्यापिज्ञाततयैवसाक्षिवेद्यत्वेनसाक्षात्साक्षिग्राह्यसुखादिमात्रस्यश्रुत्याऽग्रहणादितिज्ञेयं । यद्वैतदस्वरसादाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अपूर्वतेत्यर्थः । विस्तृतमेतदन्यत्रमिथ्यात्वहेतूनामागमबाधोक्तिप्रस्तावे । अधिकारिविशेषंप्रत्याह ॥ **तदभावेपिवेति** ॥ तत्रापूर्वतायास्तात्पर्यलिंगत्वाभावेपिफलवत्त्वंतल्लिंगंसेत्स्यतीतिभावः । टीकायां“प्रमाणांतरासिद्धताऽपूर्वते”त्येवोक्त्याकथमेतल्लभ्यतइत्यतआह ॥ **तदेतदिति** ॥ अन्यत्र प्रमाणलक्षणटीकायामित्यर्थः ॥ **अत्रापीति** ॥ प्रमाणांतरासिद्धतेत्यत्रस्वबोधनीयेत्यादिविशेषणंप्रमाणांतरेत्यस्यबोध्यमित्यर्थः । फलस्वरूपस्य“फलवत्त्वंफल”मितिटीकायांव्यक्तत्वात्तदनुक्त्वा“स्तुतिर्निंदापरकृतिःपुराकल्पोऽर्थवाद”इतिटीकांव्याचष्टे ॥ **स्तुताविति** ॥ “जनकोहवैदेहआसांचक्रे”इत्यादिपरकृतिः । “त्रयोहोद्गीथेकुशलाबभूवु”रित्यादिपुराकल्पः । एकधर्मोपाधिकत्वसंभवेनानाशक्तिकल्पन

तदभावेपिवासप्रयोजनत्वात्तात्पर्यं। तदेतदभिप्रेत्यान्यत्रटीकाकारैःप्राचुर्येण“मानांतराप्राप्तिरपूर्वते”त्युक्तं। अत्रापिटीकायामेतदेवाभिप्रेतं। स्तुतौनिंदायामेककर्तृकोपाख्यानरूपपरकृतौबहुकृतोपाख्यानरूपपुराकल्पेचार्थवादशब्दोक्षादिशब्दवन्नानार्थः।

गु० **तदभावेपिवेति** ॥ **अन्यत्रेति** ॥ प्रमाणलक्षणादावित्यर्थः । ननुतर्ह्यत्र“मानांतराप्राप्तिरपूर्वते”त्युक्तत्वादेतट्टीकाविरोधइत्यतआह ॥ **अत्रापीति** ॥ ननुस्तु त्यादीनामनेकेषांकथमर्थवादशब्दवाच्यत्वं । चतुर्ष्वनुगमकोपाधेरभावादित्यतआह ॥ **स्तुतावित्यादि** ॥ इदंचांगीकृत्योक्तं । वस्तुतस्त्वनुगमकप्रमाणमस्तीत्याह ॥ **मंत्रशब्दवदिति** ॥ यद्वा“स्तुतिर्निंदापरकृतिः पुराकल्पादिरूपोऽर्थवाद”इतिटीकायांस्तुत्यादिसमुदायस्यार्थवादत्वंप्रतीयते तच्चानुपपन्नं तथात्वेयत्रैकैकंतत्रार्थवादत्वाभावापातादित्यतःप्रत्येकमेवैषामर्थवादत्वमित्याह ॥ **स्तुतावित्यादि** ॥ प्रवृत्तिनिमित्तैक्याभावादितिभावः । अत्रटीकायामादिशब्देनद्विकर्तृकोपाख्यानरूपपुराकल्पविशेषस्यपरामर्शः । पुराकल्पशब्देनसामान्यपरेणापिबहुकर्तृकोपाख्यानरूपपुराकल्पविशेषएवविवक्षितः । उभयोश्चानेककर्तृकोपाख्यानत्वरूपेणैवानुगमइतिविवक्षितत्वान्नादिपदवैयर्थ्यं । वस्तुतस्त्वेककर्तृकोपाख्यानबहुकर्तृकोपाख्यानाभ्यांकर्तृनिर्देशपूर्वकोपाख्यानरूपार्थवादस्यलाभेपि

प्र० मन्याय्यमित्यतउक्तं मंत्रशब्दवदिति। यद्यपिद्वितीयस्याद्यपादे“तच्चोदकेषुमंत्राख्ये”त्यष्टमेधिकरणे अनुष्ठानोपयोग्यर्थस्मारकत्वंमंत्रलक्षणमुक्तं तथापितद्भाष्यवार्तिकयोस्तस्याभियुक्तप्रसिद्ध्युपलक्षणत्वमुपपादितमित्येवमुक्तं । अतएवशास्त्रदीपिकायां“यत्राभियुक्तानांमंत्रप्रसिद्धिःसमंत्र”इत्युक्तमितिभावः । तथाचयत्राभियुक्तानामर्थवादप्रसिद्धिःसोर्थवादइत्युक्तंभवति । अभियुक्तप्रदर्शितोपाधिस्वीकारसंभवेस्वमनीषितोपाध्यंतरान्वेषणमयुक्तमित्यतआह ॥ **विधीति** ॥ उक्तंह्यापस्तंबसूत्रे“विधिशेषोर्थवादोनिंदाप्रशंसापरकृतिःपुराकल्पश्चे”ति । “युक्तिरुपपत्ति”रितिटीका“उपपत्तिर्व्याप्यं । निर्दोषत्वेनविशेषणान्नासिद्धावतिव्याप्ति”रित्यादिनातर्कतांडवेव्याख्यातप्रायेतिनेहसाविवृता । “प्रकरणादिरुपक्रमस्तदंतउपसंहारः”इतिन्यायकल्पलतिकायांटीकाकारैरुक्ततयेहटीकायामनुक्तत्वाद्वक्तव्यविशेषाभावाच्चतयोःस्वरूपमिहनोक्तमितिबोध्यं । एवमुपक्रमादीनांस्वरूपोक्तिपरटीकांव्याख्यायेदानींतेषांबलाबलोक्तिपरटीकांव्याचिख्यासुः“उपसंहारस्यव्याख्यानरूपत्वेनतद्धि

मंत्रशब्दवदभियुक्तप्रयोगरूपैकोपाधिकोवाविधिशेषत्वरूपैकोपाधिकोवेतिद्रष्टव्यं ।

गु० कर्तृनिर्देशरहितोपाख्यानरूपार्थवादविशेषलाभायादिशब्दइतिद्रष्टव्यं । संभवत्येकार्थत्वेऽनेकार्थत्वमन्याय्यमित्यरुचिंमनसिनिधायाह ॥ **मंत्रशब्दवदिति** ॥ तथाचयत्राभियुक्तैरर्थवादशब्दःप्रयुज्यते ससर्वोप्यर्थवादशब्दार्थः । एवंचाभियुक्तप्रयोगरूपोपाधिपुरस्कारेणचतुर्ष्वप्यर्थवादशब्दप्रयोगइतिध्येयं । नचार्थवादशब्दप्रयोगेसत्यभियुक्तप्रयोगविषयत्वमभियुक्तप्रयोगविषयत्वेसत्यर्थवादशब्दप्रयोगइतीतरेतराश्रयत्वमितिवाच्यं । पूर्वपूर्वाभियुक्तप्रयोगविषयत्वेनोत्तरोत्तरप्रयोगोपपत्तेरितिभावः । ननुयत्रोपक्रमोपसंहारयोःपरस्परविरोधस्तत्रोभयोरप्यप्रामाण्यात्कथंतत्रतात्पर्यनिर्णयः । नचतत्रोपसंहारेणतात्पर्यनिर्णयइतिवाच्यं । उपक्रमस्यानुपसंजातविरोधित्वेनोपसंहारापेक्षयाप्रबलत्वात् । नचतर्ह्यस्तुतेनैवनिर्णयइतिवाच्यं । अपच्छेदादावुपसंहारबलीयस्त्वस्याप्याश्रयणात् । तथाचकथंतयोर्निर्णायकत्वमतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० रोध्युपक्रमाप्रामाण्यापत्तेस्तस्यततोपिप्राबल्य"मितिटीका व्याचष्टे ॥ **तत्रचेति** ॥ प्रकरणभेदेविरोधायोगादेकेत्युक्तं। प्रथमेन उपक्रमेण। चरमस्य उपसंहारस्य। तद्विषयस्य उपक्रांतार्थविषयस्य। प्रथमव्याख्यानरूपतायादर्शनादित्यनेनव्याख्यानरूपत्वंहेतुरुक्तोभवति। आत्यंतिकविरोधेऽप्रामाण्यप्रसंगात्प्रथमस्वारस्यविरोधिनइत्युक्तं। आपातप्रतीतार्थविरोधिनइत्यर्थः ॥ **लोकइति** ॥ प्रथमप्रयुक्तगोशब्दस्यचरमानुरोधेनतद्विशेषबलीवर्दार्थत्वनिश्चयादित्यर्थः ॥ **वेदेचेति** ॥ आद्ये"संदिग्धेषुवाक्यशेषा"दितिचतुर्थपादीयोपांत्याधिकरणे"अक्ताःशर्कराउपदधाति तेजोवैघृत"मित्युदाहृत्य किंघृततैलादिनायेनकेनचिदंजनंकिंवाघृतेनैवेतिविशये अप्राप्तविषयत्वादुपक्रमस्थत्वात्प्राधान्याच्चविधेर्बलीयस्त्वान्नलक्षणयाऽक्तशब्दस्यघृतपरत्वंयुक्तं। अर्थवादस्यतूपसर्जनत्वादुपसंहारस्थत्वात्प्राप्तविषयत्वाच्चदुर्बलत्वेनलक्षणासहिष्णुत्वाद्घृतशब्दएवांजनसाधनद्रव्यमात्रपरइतियेनकेनचिदंजनमितिप्राप्ते विधिबोधितस्यसामान्यस्यसर्वविशेषेषुकात्स्न्र्येनोपस्थानात् विरोधाभावात्सा

तत्रचैकप्रकरणे प्रथमेनार्थेधीस्थे चरमस्यतद्विषयस्यप्रथमस्वारस्यविरोधिनोप्यवैयर्थ्यायप्रथमव्याख्यानरूपतायाःलोकेगामानयबलीवर्दमानयेत्यादौ वेदेचवासःपरिधत्तेयत्क्षौममित्यादौदर्शनात्

गु० ॥ **तत्रचेति** ॥ तत्रोपक्रमादुपसंहारस्यप्राबल्यमित्यन्वयः। तत्र उपक्रमोपसंहारयोरित्यर्थः। प्राबल्येहेतुरुपसंहारस्योपक्रमव्याख्यानरूपत्वं ॥ **प्रथमेनेति** ॥ उपक्रमेणेत्यर्थः। ननुभिन्नविषयत्वात्कथंतस्यव्याख्यानरूपत्वमित्यतउक्तं ॥ **तद्विषयस्येति** ॥ उपक्रमविषयकस्येत्यर्थः। ननुनोपसंहारस्योपक्रमव्याख्यानरूपत्वं। उपक्रमस्वारस्यविरोधित्वादित्यतउक्तं ॥ **प्रथमस्वारस्यविरोधिनोपीति** ॥ तथाचवैयर्थ्यपरिहारान्यथानुपपत्त्याव्याख्यानरूपत्वमाश्रयणीयमितिभावः। ननूपसंहारस्यव्याख्यानरूपत्वंक्वदृष्टमित्यतोलोकेवेदेचदृष्टमित्याह ॥ **लोकइत्यादिना** ॥ बलीवर्दमानयेत्युपसंहारेणगामानयेत्युपक्रमस्थगोशब्दस्यबलीवर्दपरत्वं यत्क्षौममित्यु

SGDF Sri Gargeshwari Digital Foundation

प्र० मान्यस्यव्यवहारायोगेनविशेषोपादानावश्यंभावात्यस्मिन्कस्मिंश्चिद्विशेषेउपादातव्ये सन्निहितत्यागेहेत्वभावाद्धृतेनैवांजनमितिसिद्धांतितं। अत्रत्येनन्यायेनचरमश्रुतस्यक्षौमशब्दस्यप्रथमश्रुतवासःशब्दस्वारस्यविरोधिनोप्यवैयर्थ्यायव्याख्यानरूपतायादर्शनादित्यर्थः । आदिपदेनाक्ताः शर्कराइतिवाक्यंगृह्यते । मृत्तिकासहिताःक्षुद्रपाषाणाःशर्कराःस्थापयतीत्यर्थः.। ततश्चकिमित्यतआह ॥ **व्याख्यानेति** ॥ तर्हिशैवादिव्याख्यानांतरेणवेदोनेतव्यःस्यादित्यतउक्तं **निश्चितेति** ॥ ''यातेअग्नेऽयाशयातनूर्वर्षिष्ठागह्वरेष्ठोग्रंवचोपावधींत्वेषंवचोअपावधींस्वाहेत्युपसन्मंत्रेण व्याख्येयमुग्रंवचस्त्वेषंवच''इत्येतदुभयं''अशनायापिपासेहवाउग्रंवचएनश्चवैरहत्यंचत्वेषंवच''इतिनिश्चितप्रामाण्यव्याख्यानरूपब्राह्मणानुरोधेनाशनायापिपासादिपरत्वेनयथानीयते यथैतरेये''तत्सत्य''मित्युक्तस्यसत्यशब्दस्यसदित्यादिव्याख्यानानुरोधेनवायुब्रह्मसूर्यरूपदेवतात्रयपरत्वंनीयते तथाप्रकृतेपीत्यर्थः । यद्यपि''सएषभगवान्विष्णुःसत्यमित्यभिधीयते''इतिसत्यशब्दोविष्ण्वर्थकोव्याख्यातस्तद्भाष्ये । तथापि''देवतात्रयमन्यच्चपृथक्सत्यमितीर्यते''इत्यर्थांतरस्याप्युक्तत्वादेवमुक्तमितिबोध्यं । आदिपदेन''तदेतन्मूर्तं यदन्यद्वायोश्चांतरिक्षाच्चे''ति''अथामूर्तं

निश्चितप्रामाण्यव्याख्यानानुसारेणचव्याख्येयस्य''अशनापिपासेहवाउग्रंवचः''इत्यादिब्राह्मणानुसारेण''उग्रंवचोपावधी''मित्यादिमंत्रस्येव''सदितिप्राणस्तीत्यन्नंयमित्यसावादित्य''इत्याद्यनुसारेणचसत्यमित्यादेरिवचनेयत्वात्

गु० पसंहारेणवासःपरिधत्तइत्युपक्रमस्थवासःशब्दस्यक्षौमपरत्वंदृष्टमित्यर्थः । अस्तूपसंहारपरस्योपक्रमव्याख्यानरूपत्वं ततःकिमित्यतआह ॥ **व्याख्यानेति** ॥ व्याख्यानानुसारेणव्याख्येयस्यनेयत्वादितिभावः । ननुतर्हिपाशुपतादिरूपव्याख्यानानुसारेणवेदस्यापिनेयत्वंस्यादतउक्तं **निश्चितेति** ॥ तस्यचाप्रामाण्यान्नतदनुसारेणवेदोनेयइतिभावः । व्याख्यानानुसारित्वंव्याख्येयस्यक्वदृष्टमित्यतआह ॥ **अशनेति** ॥ किंचपूर्वस्मिन्विरोधिनिजाग्रतिविरोधिनउत्तरस्यसमुत्थानंप्राबल्यंविनानसिध्यति ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० वायुश्चांतरिक्षंचे"त्यादिकाण्वश्रुत्यादिस्थंगृह्यते। किंचपूर्वस्मिन्विरोधिनिजाग्रतितद्बाधित्वोत्तरस्योत्थानायोगात्तद्बाधेनैवोत्थानमित्यपच्छेद नयोक्तन्यायेनप्राबल्यमकामेनाप्येष्टव्यमित्याह ॥ **तथेति** ॥ तत्रोदाहरणमाह ॥ **यथेति** ॥ **उपसंहारस्येति** ॥ प्राबल्यमित्यनुषंगः । तृतीयेआद्यपादे"प्रथमेऽश्रवणादितिपंचमेधिकरणे"तस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धांजुह्वती"त्युपक्रम्य"इतितुपंचम्यामाहुतावापःपुरुषवचसोभवं ती"तिवाजसनेयेऽष्टमेश्रुतेवाक्ये"श्रद्धांजुह्वती"त्युत्क्रांतस्यश्रद्धयेष्टवतःश्रद्धासहितस्यैवव्याख्येप्रथमाग्नौहोमश्रवणाद्भूतानांनसहगमनमितिप्राप्ते उपसंहारेऽब्बुपलक्षितोजीवःपुरुषशब्दवाच्योभवतीत्यपांजीवेनसहगतिश्रवणात्तदनुरोधेनोपक्रमस्थश्रद्धाशब्दस्याजहल्लक्षणयाश्रद्धयाद्भिश्चयुक्तो जीवोर्थइत्यवश्यंवाच्यत्वाद्भूतानांसहगतिरस्तीतिसिद्धांतितं । तदेतदाह ॥ **तत्रहीति** ॥ नन्वेवंसत्युपक्रमप्राबल्यसाधकप्रागुदाहृताधिकर णविरोधइत्याशंक्याह ॥ **नचैवमिति** ॥ उपसंहारप्राबल्यइत्यर्थः। उक्तमधिकरणंप्राक्॥ **अभ्यासादिति**॥ अतएवसूत्रे"वेदोवाप्रायदर्शना"

तथा पूर्वाबाधउत्तरस्यानुत्थानाच्चोपक्रमादुपसंहारस्यप्राबल्यं यथा"प्रथमेऽश्रवणादितिचेन्नताएवह्युपपत्ते"रित्यत्र "श्रद्धांजुह्वती"त्युपक्रमात्"इतितुपंचम्यामाहुतावापः"इत्युपसंहारस्य। तत्रह्यप्शब्दानुसारेणश्रद्धाशब्दस्यलक्षणाव क्ष्यते। नचैवंवेदोपक्रमाधिकरणविरोधः। नहितत्र"उच्चैर्ऋचाक्रियत"इत्युपसंहारस्थऋगादिशब्द"स्त्रयोवेदा"इत्यु पक्रमस्थवेदशब्दमात्राद्वेदेलाक्षणिकः। किंतु"अग्नेर्ऋग्वेदोवायोर्यजुर्वेदआदित्यात्सामवेद"इतिवेदशब्दाभ्यासात् । ॥ १८७ ॥

गु० तथाचविरोधिन्युपक्रमेधीस्थउत्थितउपसंहारउपक्रमंबाधते । अन्यथोत्थानमेवनस्यादित्याह ॥ **तथापूर्वबाधइति**॥ स्वमतेनोदाहरणमाह ॥ **यथेति** ॥ नन्व त्रोपसंहारानुसारेणोपक्रमबाधश्चेद्वेदोपक्रमाधिकरणविरोधः। तत्रोपक्रमानुसारेणोपसंहारस्यव्याख्यातत्वादित्याशंक्यनिषेधति ॥ **नचैवामिति** ॥ नोपक्रमानुसारेणो

प्र० दितिप्रायपदप्रयोगइतिभावः। एतेनशाबरभाष्यादिरूपंजैमिनिसूत्रव्याख्यानंव्यासमतविरुद्धत्वादपव्याख्यानमित्युक्तंभवति॥ **नापीति**॥ तृतीयस्यचतुर्थपादे"अचोदितंचकर्मभेदा"दित्येकादशेधिकरणे"प्रजापतिर्वरुणाये"तिवाक्यमुदाहृत्य वेदोपक्रमाधिकरणइवपूर्वोत्तरपक्षावु क्त्वा उपक्रमानुरोधेनदातुरिष्टिरितिव्यवस्थापितत्वादितिभावः । तंत्रसारे मीमांसकग्रंथे । दातुरिष्टिरितिस्वीकारोनोपक्रमप्राबल्यात् । किंतु"दोषात्त्विष्टिर्लौकिकेस्याच्छास्त्राद्धिवैदिकेनदोषःस्या"दितिपूर्वाधिकरणे इयमिष्टिर्वैदिककर्मांगंनस्वतंत्रेतिव्यवस्थापनादंगप्रधानयोरेकक र्तृत्वनियमेनकर्तुर्दातुरेवेयमिष्टिरितिसिध्यतीति वैदिककर्मांगत्ववशादेवेत्युक्तत्वान्नविरोधइत्यर्थः । तैत्तिरीयशाखायामुपक्रमस्यसत्त्वात्कथमे तदित्यतउक्तं **मैत्रायणीयेति**। तत्रदात्रुपक्रमंविनैवास्यपाठात्। अन्यथातत्रदातुरितिनसिद्ध्येदित्यर्थः । अंगत्ववशादित्युपलक्षणं । यदि दातुरिष्टिस्तदाऽश्वदानयुक्तपौंडरीकयागानुप्रवेशात्फलांतरंनकल्प्यं। प्रतिग्रहीतुश्चेत्तस्यफलांतरंकल्प्यमितिगौरवाच्चेत्यपिध्येयं ॥ **शास्त्रेति** ॥

नाप्यश्वप्रतिग्रहेष्टिनयविरोधः। तंत्रसारे"मैत्रायणीयशाखायांदात्रुपक्रमतोप्यृते। कर्मांगत्ववशादेवदा तुरिष्टिःप्रतीयत"इत्युपक्रमंविनैवदातुरिष्टिरित्युक्तत्वात्। शास्त्रदीपिकायामपि"सालिंगादार्त्विजेस्या" दितिसूत्रानुसाराद्भाष्यकारांतरैः"तत्राप्युपसंहारानुरोधात्प्रतिग्रहेदातुरेवेष्टिरित्युक्त"मित्युक्तत्वात्।

गु० पसंहारस्थऋक्पदस्यवेदपरत्वं किंतुवेदशब्दाभ्यासादित्याह ॥ **नहीति** ॥ उपसंहारापेक्षयावेदशब्दाभ्यासस्यप्राबल्यादितिभावः। ननुतथाप्यश्वप्रतिग्रहेष्टिनयवि रोधः। तत्रोपक्रमानुसारेणप्रतिगृह्णीयादित्यस्यग्राहयेदितिव्याख्यातत्वादित्याशंक्यनिषेधति ॥ **नापीति** ॥ तंत्रसारेउपक्रमंविनैवदातुरिष्टिरित्युक्तत्वादित्यन्वयः । कुतइत्यतउक्तं **मैत्रायणीयशाखायामित्यादि** ॥ तथाचनोपक्रमानुसारेणोपसंहारव्याख्यानंतत्रेतिभावः । अन्यत्राप्युक्तमस्तीत्याह ॥ **शास्त्रेति** ॥ शास्त्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० उक्तत्वान्नविरोधइत्यन्वयः । अयमर्थः । तत्रयथाभाष्यमेतदधिकरणमुपन्यस्योपक्रमाधिकरणेनगतार्थत्वमाशंक्य ऋगादिशब्दावेदेपिबहुलं दृष्टप्रयोगाः गृह्णातिस्तुदातृव्यापारेनक्वचिद्दृष्टप्रयोगः तेनासौनोपक्रमानुसारेणदातृव्यापारपरत्वेनव्याख्यातुंशक्यइतिविशेषाशंकानिरासार्थत्वेनागतार्थत्वमुपपाद्य वस्तुगतिमभिप्रेत्येदमुक्तं । नात्राधिकरणस्यावकाशः । अथापिभाष्यकारांतरैः“सालिंगादार्त्विजेस्या”दितिगुणसूत्रे सा इष्टिः लिंगात् उपसंहारप्राबल्यरूपात् आर्त्विजे ऋग्व्यापाररूपेप्रतिग्रहनिमित्तेस्यादित्यर्थस्वारस्यमनुरुध्यप्रतिग्रहीतुरिष्टिराश्रिता । तदसहिष्णुर्भाष्यकारःप्रौढिवादेनतेनैवसूत्रेणदातुरिष्टिरितिवक्तुमधिकरणांतरंचकार । “अचोदितंचेति सालिंगादितिचसूत्रद्वयं दोषात्त्विष्टिरितिपूर्वाधिकरणएवयोज्यमित्युक्त्वा”दिति ॥ **याज्ञिकैरिति** ॥ आद्येतृतीयपादे“प्रयोगशास्त्रमितिचे”दितिकल्पसूत्राधिकरणोक्तरीत्याप्रबलन्यायविरोधेयाज्ञिकाभ्युपगमस्यानादरणीयत्वेपि अत्रतादृशविरोधाभावान्नतदनादरोयुक्तइतिभावः ॥ **प्राभाकरैरिति** ॥ पौंडरीकोनामैकादशरात्रोअहीनविशेषः । तत्र“अयुतंदक्षिणाअश्वसहस्रमेकादश”मित्यश्वदानंविहितं । नतत्प्रकरणेइयमिष्टिराम्नाता । तैत्तिरीयाणांकाम्येष्टिकांडेतदाम्नानात् । अतोदातुरितिसिद्धांतसिद्ध्यर्थं पौंडरीकेश्रूयतइतिकृत्वाचिंतयेदमधिकरणंप्रवर्तितं । वस्तुतस्तुप्रतिग्रहीतुरेवेतिस्वी

याज्ञिकैरपितथैवस्वीकृतत्वात् । प्राभाकरैरपि“पौंडरीकेश्रूयतइतिकृत्वाचिंतेयं । अन्यथादातुरिष्टिरितिसिद्धांतासिद्धे”रितिवदद्भिर्वस्तुतःप्रतिग्रहीतुरिष्टिरितिस्वीकृतत्वाच्च ।

गु० दीपिकायामित्युक्तत्वादित्यन्वयः । किमुक्तमित्यतः **सालिंगेत्यादि** ॥ नन्वनुष्ठानविरोधइत्यतआह ॥ **याज्ञिकैरपीति** ॥ ननुतथापिप्राभाकरैरन्यथोक्त

SGDF Sri Gargeshwari Digital Foundation

प्र० कृतत्वान्नविरोधइत्यर्थः ॥ **तदुक्तमिति** ॥ “प्रथमेऽश्रवणा”दित्यत्रेत्यर्थः । अन्यत्र तर्कतांडवेद्वितीयपरिच्छेदे । अत्राधुनिकोक्तोपक्रमपराक्रमखंडनंतुगुरुपादोक्तोपसंहारविजयादनुसंधेयं । एवमुपक्रमादुपसंहारस्यप्राबल्योक्तिपरटीकांव्याख्यायताभ्यामभ्यासस्यप्राबल्योक्तिपरां“एकत्रोक्तादपिबहुलोक्तेःप्राबल्या”दित्यादिटीकांविवृणोति ॥ **एवमिति** ॥ आदिपदेनोपक्रमः । एकप्रकारेत्यस्येहानुपयोगादनुक्तिः ॥ **यथेति** ॥ “आनंदमयोभ्यासा”दित्यत्रतैत्तिरीये“अन्योंतरआत्माऽऽनंदमय”इतिश्रुतानंदमयादिःकिंजीवादिरुतब्रह्मेतिसंशये आनंदमयादि

तदुक्तंन्यायविवरणे“उपक्रमप्रामाण्यार्थमेवोपसंहारानुसारित्वमंगीकर्तव्यं । व्याख्यानस्यपश्चात्तनत्वनियमा”दिति । विस्तृतंचैतदन्यत्र । एवमुपसंहारादिरूपसकृदुक्तितोऽसकृदुक्तिरूपाभ्यासस्यप्राबल्यं । बहुबाधस्यान्याय्यत्वात् । यथाऽऽनंदमयाधिकरणे “तस्यैषएवशारीरआत्मा यःपूर्वस्ये”तिजीवप्रापकोपसंहाराद्ब्रह्मशब्दाभ्यासस्य ।

गु० त्वात्तद्विरोधइत्यतआह ॥ **प्राभाकरैरपीति** ॥ ननूपक्रमापेक्षयोपसंहारस्याचार्यैरनुक्तंप्राबल्यंकुतउपपाद्यतइत्यतआह ॥ **तदुक्तमिति** ॥ नन्वेवंयदिवेदोपक्रमाधिकरणेऽभ्यासादेवऋगादिपदानांवेदपरत्वनिश्चयस्तर्हि“विशयेप्रायदर्शना”दितिजैमिनिसूत्रविरोधइत्यतआह ॥ **विस्तृतंचैतदन्यत्रेति** ॥ एवंच“विशयेप्रायदर्शनात् प्रायेवचनाच्चे”त्यादाविवात्रापिसूत्रस्थप्रायशब्दस्यबाहुल्यमर्थोस्तु नतुवेदप्रायेवेदोपक्रमइतिशाबरभाष्योक्तरीत्याक्लिष्टकल्पनयाप्राथम्यंप्रायशब्दार्थ”इत्यादिरूपेणोपसंहारविजयेविस्तृतमित्यर्थः । एवमुपसंहारस्योपक्रमापेक्षयाप्राबल्यमुपपाद्योपसंहारापेक्षयाऽभ्यासस्यप्राबल्यमुपपादयति ॥ **एवमुपसंहारेति** ॥ तत्रहेतु

तर्कताण्डवे III २१३

SGDF. Sri Gargeshwari Digital Foundation

प्र० जींवादिरेव । विकारार्थकमयट्श्रवणात् । तस्यचविकाराभिमानिजीवादावेवसंभवात् । नचसविकारइवप्राचुर्येपिदृष्टइतिवाच्यं । तथापी
ह‘‘तस्यैषएवशारीरआत्मे’’तिशरीरशरीरिभावरूपजीवप्रापकलिंगोपेतोपसंहारेणविकारार्थतायाएवन्याय्यत्वादितिप्राप्ते ब्रह्मशब्दाभ्यासाद्वि
ष्णुरितिसिद्धांतितत्वादितिभावः । एतेनमयटएवजीवप्रापकत्वात्तस्यचब्रह्मशब्दाभ्यासात्प्राचुर्यार्थत्वं । नतूपसंहारबाधस्तत्रेतिनिरस्तं । सु
धायांमयटःसावकाशत्वमाशंक्यशरीरित्वकथनोपसंहारेणोज्जीवनात् । एवंगायत्रीनयेगायत्रीवेत्युपक्रमात्‘‘यद्वैतद्ब्रह्मैतामेवब्रह्मोपनिषद’’मि
तिब्रह्मशब्दाभ्यासस्यप्राबल्यंबोध्यं । तदुक्तं‘‘बाहुल्याच्छ्रुतिलिंगयो’’रित्यनुव्याख्याने ॥ **संमतमिति** ॥ एवंचनास्माभिरत्रात्यंतंयतितव्य
मितिभावः । अश्वप्रतिग्रहेष्टिनयेप्रतिग्रहीतुरिष्टिपक्षे वरुणायेतिचतुर्थ्याःपंचम्यर्थत्वात् । अनयदितिनयतेःप्रतिग्रहार्थत्वात् । स्वांदेवतामि
त्यत्रप्राधान्यनिर्दिष्टवरुणपरामर्शित्वेनदेवतापदस्याविवक्षितार्थत्वाद्बहुबाधःस्यात् दातुरिष्टिपक्षेतुप्रतिगृह्णातिमात्रस्यदानार्थत्वादल्पबाधइतिवा
पंचदशरात्रेसत्रेप्रथमेहन्यग्निष्टुन्नामकेनामातिदेशेनैकाहाग्निष्टुद्धर्मभूतासुब्रह्मण्याग्नेयीप्राप्तातस्याअल्पविषयायाश्चतुर्दशाहस्सुचोदकेनप्राप्तायाऐं
द्र्याबहुविषययाबाधइतिद्वादशेद्वितीयपादे‘‘विप्रतिषिद्धधर्माणांसमवाये भूयसांस्यात्स्वधर्मत्व’’मित्यत्रोक्तदिशावा भूयोनुग्रहायाल्पबाधंवदता
मित्यर्थः । ‘‘एकत्रबहुवारोक्तादपिमुख्यस्यप्राबल्या’’दित्यादिटीकांविवृण्वानोऽभ्यासादप्यपूर्वतायाःप्राबल्यंहेतूदाहरणोक्त्याव्यनक्ति ॥

संमतंचैतन्मीमांसकानामपिभूयसामनुग्रहायाल्पबाधंवदतां ।

गु० माह ॥ **बहुबाधस्येति** ॥ स्वमतेनोदाहरणंदर्शयति ॥ **यथेति** ॥ सकृदुक्त्यपेक्षयाऽसकृदुक्तेःप्राबल्यंमीमांसकानामपिसंमतमित्याह ॥ **संमतमिति** ॥ अभ्या

प्र० **एवमसकृदिति** ॥ प्राप्तार्थत्यागेहेतुःसंभवदनेकार्थस्येति । कुतस्तत्त्यागेनापूर्वार्थकल्पनमित्यतआह ॥ **अवैयर्थ्यायेति** ॥ अन्यथार्थांतरेसं
भवतिप्राप्तार्थबोधनेवैयर्थ्यमितिभावः । नचतात्पर्यद्योतकत्वादवैयर्थ्यं । तस्यागतिकगतित्वात् । अतएवसंभवदनेकार्थस्येत्युक्तं । यत्रतुसर्वथा
र्थांतरंनसंभवतितत्रतात्पर्यलिंगत्वं । यथानंदमयप्रकरणेब्रह्मशब्दाभ्यासस्येतिभावः । अपूर्वतायाः प्राबल्यमित्यनुकर्षः । जीवपक्षेप्राप्तार्थ
कत्वंव्यनक्ति ॥ **तत्रहीति** ॥ यद्यपियुक्तिपादे इतरेत्यत्रजीवःस्वतंत्रकर्तानेतिसंशये जीवाद्भवंतीतिश्रुत्याघटादौकर्तृत्वानुभवेनचसंवादिन्या
जीवःकर्ताचेतनत्वात्सिद्धांत्यभ्युपेतेश्वरवदितियुक्त्या जीवःकर्ता ईश्वरस्त्वयोग्यश्चेत्कदाचिदपिप्रत्यक्षोनस्यात् । योग्यश्चेत्सदासर्वत्रसत्त्वेनस
दाप्रत्यक्षःस्यादित्यप्रामाणिकइतितस्यतन्निष्ठमहदादिकर्तृत्वस्यचकल्पनेगौरवान्नसकर्तेतिप्राप्ते जीवेकर्तृत्वमात्रस्येष्टत्वात्स्वतंत्रकर्तृत्वेहिताकरणा

**एवमसकृदावृत्तस्याप्येकस्यपदस्यवाक्यस्यवासंभवदनेकार्थस्य स्वारसिकप्राप्तार्थत्यागेनावैयर्थ्या
याप्राप्तार्थपरतायाआवश्यकत्वादभ्यासादप्यपूर्वतायाःप्राबल्यं । यथा‘‘इतरव्यपदेशाद्धिताक
रणादिदोषप्रसक्ति’’रित्यत्र‘‘जीवाद्भवंतिभूतानिजीवेतिष्ठंत्यचंचलाः । जीवेतुलयमृच्छंती’’तिजी
वशब्दाभ्यासाद्ब्रह्मपरत्वेऽपूर्वतायाः । तत्रहिप्रत्यक्षानुगृहीतश्रुत्यापूर्वपक्षः । उक्तंचैतरेयभाष्ये‘‘त
दस्यप्रथमंजन्म तदस्यद्वितीयंजन्म तदस्यतृतीयंजन्मे’’तिजीवेप्रसिद्धजन्मशब्दाभ्यासेप्यपूर्वतया**

गु० सापेक्षयाऽपूर्वतायाःप्राबल्यंसमर्थयते ॥ **एवमसकृदावृत्तस्यापीति** ॥ प्राप्तार्थत्यागेहेतुः **संभवदनेकार्थस्येति** ॥ एकार्थत्वेतुतदर्थत्यागेनिरर्थकत्वंस्यादिति
भावः । अपूर्वतायाआवश्यकत्वेहेतुरवैयर्थ्यायेति ॥ अनेकार्थस्यवाक्यस्यप्राप्तार्थग्रहणेवैयर्थ्यंस्यात्तत्परिहारार्थमप्राप्तार्थत्वमित्यर्थः । जीवाद्भवंतीतिश्रुतेर्जीवपरत्वे

SGDF Sri Gargeshwari Digital Foundation

प्र० देरयोगान्नजीवःस्वतःकर्ता ईश्वरस्तुपिशाचादिवदाविर्भावतिरोभावशक्त्योक्तदोषास्पृष्टइतिप्रागुक्तश्रुतिसमन्वयेनकर्तैव । जीवस्यस्वतःकर्तृत्वानुभवोभ्रमः । श्रुतिस्त्वीश्वरपरा । युक्तिरप्रयोजिकेतिसिद्धांतयिष्यमाणत्वात्तदुभयसंवादियुक्त्यैवतत्रपूर्वपक्षोनश्रुत्या । अन्यथाश्रुतिविरोधनिरासपादेनिवेशापत्तेः । अतएवतत्रसूत्रे"व्यपदेशा"दिति"उपसंहारदर्शना"दिति श्रुतिप्रत्यक्षयोः"अश्मादिवच्चे"तिचशब्देनयुक्तेश्चप्रापकत्वेनोक्तिः । तथापियुक्तिमात्रस्यवराकतयातत्प्राबल्यायतयोर्मूलत्वस्यावश्यकत्वेनतत्प्राधान्यादेवमुक्तिरित्यदोषः । अतएवतत्रटीकायामेवमेवपूर्वपक्षःप्रदर्शितइतिभावः ॥ **ब्रह्मप्रादुर्भावविषयत्वमिति** ॥ जन्मशब्दस्येतिशेषः । द्वितीयप्रघट्टके"पुरुषेहवाअयमादितोगर्भोभवती"तिपंचमेध्यायेऽन्नेनसहपितृदेहंप्रविष्टस्यरेतोद्वारामातृदेहप्राप्तिःप्रथमंजन्म भूमौजनिर्द्वितीयंजन्म पितुःप्रेतस्यदेहांतरप्राप्तिस्तृतीयंजन्मेत्युक्त्या प्रसिद्धजीवस्यैवपुरुषस्त्रीद्वाराजन्मप्रतीतावपि"अयंनारायणोदेवःपुरुषेप्रथमंविशे"दित्युपक्रम्य"स्त्रियांसिंचतितस्यैवस्थानांतरगतेःप्रभोः । प्रथमंजन्मविष्णोस्त"दिति"पृथिव्यांजन्मपुत्रस्यद्वितीयंविष्णुजन्मही"ति"पितुरन्यत्रजननंतृतीयंजन्मतद्धरेः । अंतर्यामितयैवहिसर्वजीवेषुसंस्थितं"इतिचजीवस्थविष्णुप्रादुर्भावपरतयाभाष्येव्याख्यातं । तत्त्वभ्यासादप्यपूर्वतायाःप्राबल्यमित्यभिप्रेत्येत्यर्थः । उक्तंचतत्वप्रदीपे । "अभ्यासोपूर्वताबलेननीयते । ज्ञानादिफलवत्त्वात्तस्याः । यथातदस्यप्रथमंजन्म तदस्यद्वितीयंजन्म तदस्यतृतीयंजन्मेत्यभ्यासोजी

ब्रह्मप्रादुर्भावविषयत्वं ।

गु० प्राप्तार्थत्वमुपपादयति ॥ **तत्रहीति** ॥ मीमांसकानामपिसंमतंचैतदित्याह ॥ **संमतमिति** ॥ अपूर्वतापेक्षयाफलस्यप्राबल्यमुपपादयति ॥ **एवमिति** ॥ अपूर्व

SGDF Sri Gargeshwari Digital Foundation

प्र० वग:प्रतीतोंतर्यामिविषयोभवती”ति ॥ **संमतंचेति** ॥ प्रागुक्ताघाराग्निहोत्राधिकरणेजुहोत्याघारयतीतिपदयोरभ्यासेसत्यपि तदनादरेणा प्राप्तेदध्यादिरूपे आर्जवसांतत्यादिरूपेचगुणेतात्पर्यंवदंति । तथाप्रागुक्तार्थवादनयेप्राप्तार्थानांवायुर्क्षेपिष्ठादिवाक्यानामप्राप्तार्थविध्यनुसरणं वदंतीतितेषांसंमतमित्यर्थः । “फलस्योद्देश्यत्वादुपक्रमादिभ्यःप्राबल्य”मितिटीकांविवृण्वानोपूर्वताताःफलस्यप्राबल्यंहेतूदाहरणोक्त्याव्यनक्ति ॥ **एवमिति** ॥ सर्वस्य वेदादावुच्यमानस्यसर्वस्येत्यर्थः ॥ **लोकइति** ॥ काकस्याष्टौदंताइत्यादाविवेत्यर्थः ॥ **प्राप्तेपीति** ॥ प्रेमास्पदपुत्रो

संमतंचैतन्मीमांसकानामपि“दध्नाजुहोति पयसाजुहोति ऋजुमाघारयति संततमाघारयती”त्यादौजुहो त्यादेरावृत्तावप्यप्राप्तदध्यादावेवतात्पर्यं तथाप्राप्तार्थार्थवादानामप्राप्तार्थविध्यनुसरणंचवदतां । एवं फलार्थत्वात्सर्वस्यलोकेप्यप्राप्तेपिनिष्फलेतात्पर्यादर्शनात् प्राप्तेपिसफलेतात्पर्यदर्शनाच्चापूर्वतातोपिफलस्य प्राबल्यं । यथा“असंभवस्तुसतोनुपपत्ते”रित्यत्र“असद्वाइदमग्रआसीत् ततोवैसदजायते”यस्मात्सतोब्र ह्मणोसतःसकाशादुत्पत्तिरूपदोषप्रतिपादकादपूर्वतायुक्ताद्वाक्यात्“सदेवसोम्येदमग्रआसी”दितिब्रह्मणो

प्र० दंतादावित्यर्थः । फलस्य फलवत्त्वरूपफलस्य ॥ **यथेति** ॥ द्वितीयस्यतृतीयेपादे“असंभवस्त्वि”तिसूत्रे सदेवेत्यादिश्रुतिःकिंब्रह्मणोजगत्कार णत्वेमानंनवेतिसंशये “असद्वा”इत्यादितदुत्पत्तिश्रुतिविरोधादमानं । नहिजन्मादिदोषवतोसदादेरिव जगत्कारणत्वंबोधितुमलमियंश्रुति रितिप्राप्ते स्वतंत्रस्यजन्मायोगादसतःकारणत्वादृष्टेश्च“एतेनसर्वेव्याख्याता”इत्यत्रोक्तन्यायेनासच्छब्दस्यब्रह्मपरतया“सद्वावप्राण”इतिश्रुत्यास च्छब्दस्यचवायुपरतया वायोरेवेश्वरादुत्पत्तिपरा“असद्वा”इतिश्रुतिरिति तदविरोधात्सदेवेत्यादिश्रुतिर्ब्रह्मकारणत्वेमानमितिसिद्धांतयिष्यते ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्र "असद्वा" इतिश्रुतेरर्थांतरकल्पनेऽपूर्वतायाअपिफलस्यप्राबल्यमेवनिमित्तमित्यर्थः ॥ **अनुत्पत्तीति** ॥ इदमग्रे अस्यप्रपंचस्याग्रे प्रलयेसन्नामकंब्रह्मासीदित्युक्त्यातस्यानादित्वप्रतीतेरितिभावः ॥ **वाक्यस्येति** ॥ प्राबल्यमित्यनुषंगः । सफलस्येत्युक्त्याब्रह्मणोगुणोक्तिपरस्यफलवत्त्वंदोषोक्तिपरस्यतद्राहित्यंचोक्तं । तद्द्वयंसंवादोक्त्याव्यनक्ति ॥ **उक्तंहीति** ॥ जन्माधिकरणइत्यर्थः । "तेषांदुःखप्रहाणायश्रुतिरेषाप्रवर्तते । यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते" इतिश्रुत्याब्रह्मप्रीत्युत्पादनद्वारामोक्षसाधकत्वाद्वेदस्यब्रह्मदूषणेतात्पर्यंनैवास्ति । तथात्वेजीवानांब्रह्मणिदोषज्ञानापातेनतेषुब्रह्मणोप्रीतिरेवस्यात् । लोकेतथादर्शनात् । तथाचजीवान्प्रतिमोक्षफलकत्वंवेदस्यनस्यात् । किंतु "सर्वेषा

ऽनुत्पत्तिप्रतिपादकस्यसफलस्यवाक्यस्य । उक्तंह्यनुव्याख्याने "प्रीत्यामोक्षफलत्वाच्चतात्पर्यंनैव दूषण" इति । उक्तंचविष्णुतत्वनिर्णये "घातयंतिहिराजानोराजाहमितिवदंतं । ददतिचसर्वमभिप्रेतंगुणोत्कर्षंवदत" इत्यादिनाऽपूर्वतायुक्तादप्यभेदवाक्यात्सफलभेदवाक्यस्यप्राबल्यं ।

प्र० मपिवाक्यानांमहातात्पर्यमत्रही" त्युत्तरार्धोक्तदिशागुणोत्कर्षएवतात्पर्यं । तज्ज्ञानस्यब्रह्मप्रीतिद्वारामोक्षरूपफलवत्त्वादितितद्द्वयंतत्रोक्तमित्यर्थः । एतत्स्पष्टमन्यत्रोक्तमित्याह ॥ **उक्तंचेति** ॥ प्राबल्यमित्यन्वयः । नतात्पर्यगत्यैतल्लब्धमितिचार्थः । पाटलीपुत्राद्यधिपतयोभद्रसेनादयोराजानःपाटलीपुत्रस्याधिपतिरिदानीमहमेवेतिवदंतमतदर्हंघातयंतोदृश्यंते । तेनतेषांतत्राप्रीतिरनुमीयतइतिमानांतराप्राप्ताभेदवाक्यस्याफलत्वंविपरीतफलत्वंचोक्तं । ददतिचराजानइतिगुणोत्कर्षवाक्यस्यफलवत्त्वमुक्तं । शेषविवक्षयावदतइतिषष्ठी । वदतःप्रतीतिद्वितीयावा ।

॥ १९१ ॥

प्र० यद्यपितत्रपूर्वंभेदाभेदवाक्यजातयोरभेदवाक्यानामपूर्वत्वेनप्राबल्येशंकिते अपूर्वेपिप्रमाणाविरुद्धएवार्थेतात्पर्यंनतुप्रमाणविरुद्धेऽभेदेइत्युक्त्वा "अतःसर्वप्रमाणविरुद्धत्वान्नाभेदेतात्पर्यंवाक्यस्ये" त्युपसंहृत्य तर्हिसर्ववाक्यानामेकस्यविषयस्याभावादेकवाक्यतानस्यादित्याशंक्य "विष्णोःसर्वोत्तमत्वएवमहातात्पर्यंसर्वागमाना" मितिप्रतिज्ञाय तत्रेतिहासश्रुतिपुराणवाक्यान्युदाहृत्ययुक्तंचविष्णोस्सर्वोत्कर्षेमहातात्पर्यंसर्वागमाना" मित्यादिनोक्तार्थस्यविष्णुप्रीतिद्वारामोक्षहेतूत्कर्षज्ञानजनकत्वात्तत्रतात्पर्यमितियुक्तिसिद्धत्वोपपादनार्थोयंग्रंथःप्रवर्ततइतिभाति । टीकायांतत्रतथैवोक्तेः । नतुसफलत्वाद्भेदवाक्यानामभेदवाक्यात्प्राबल्यंव्युत्पादयितुं । तथाप्युक्तयुक्त्योक्तार्थेतात्पर्यंसाधयितुंभेदाभेदोक्त्योःफलवत्त्वाफलवत्त्वोक्त्यैतदभिप्रेतमितिज्ञायतइत्येवमुक्तमितिबोध्यं । तत्वप्रदीपेतु "अफलादपूर्वात्सुपूर्वेपिफलवतितात्पर्यंस्यात् किमुतापूर्वे । यथास्नेहपूर्वेणमनसायन्नःस्मरसिकेशव । अपत्यमिवकूर्माणांतेनजीवामहेवयमित्यादा" वित्युक्तं ॥ **संमतमिति** ॥ तृतीयस्यतृतीयेपादे "असंयुक्तंप्रकरणादितिकर्तव्यतार्थत्वा" दितिचतुर्थाधिकरणे समिदादिप्रयाजवाक्यदर्शपूर्णमासवाक्ययोरपूर्वतायांसत्यामपि निष्फलस्यसमिदादेःफल

संमतंचैतन्मीमांसकानामपि अंगप्रधानवाक्ययोरपूर्वतायांसत्यामपिनिष्फलस्यसफलांगत्वंतथानिष्फलांगवाक्येफलवत्प्रधानवाक्यानुसरणं । तथा

गु० तापेक्षयाफलस्यप्राबल्यमाचार्यानुक्तंकुतःसमर्थ्यतइत्यतआह ॥ **उक्तंहीति** ॥ एतत्परेषामपिसंमतमित्याह ॥ **संमतमिति** ॥ निष्फलस्य प्रयाजादेः । सफलांगत्वं सफलदर्शपूर्णमासांगत्वं ॥ **प्रधानवाक्यानुसरणमिति** ॥ प्रधानवाक्यान्वितस्वार्थप्रतिपादकत्वमित्यर्थः । पूर्वमर्थयोरंगांगिभावउक्तः इदानींवाक्ययो

SGDF
Sri Gargeshwari Digital Foundation

प्र० वद्दर्शपूर्णमासांगत्वं समिद्वाक्यस्यवाक्यैकवाक्यतयाप्रधानवाक्यानुसरणंचवदतामित्यर्थः ॥ **सौर्यचरुमिति** ॥ अयमर्थः । विधिस्तावदुत्पत्तिविनियोगाधिकारप्रयोगभेदाच्चतुर्विधः । अप्राप्तप्रापकउत्पत्तिविधिः । उत्पन्नस्यफलसाधनत्वंफलवदुपकारकत्वंवाबोधयन्विनियोगविधिः । फलसाधनेकर्मणिपुंसःस्वामित्वबोधकोधिकारविधिः । अनुष्ठापकःप्रयोगविधिरिति । तत्र"एकंद्वयंत्रयंचैवक्वचिच्चापिचतुष्टय"मित्युक्तरीत्याक्वचित्किंचिदुपेयते । "सौर्यचरु"मित्यादौचतुष्टयं । "ज्योतिष्टोमेनस्वर्गकामोयजेते"त्यत्रत्रितयं । उत्पत्तेः"सोमेनयजेते"त्यनेनैवसिद्धेः । "समिधोयजती"त्यादौद्वयं । प्रयोगाधिकारयोःप्रधानवाक्यसिद्धत्वात् । "अग्निहोत्रंजुहोती"त्यत्रोत्पत्तिमात्रपरत्वं । अन्येषां "अग्निहोत्रंजुहुयात्स्वर्गकाम"इतिवाक्यसिद्धत्वात् । एवंचप्रकृतेसौर्यवाक्यस्येवाग्निहोत्रंजुहुयात्स्वर्गकामइत्यस्यैवोत्पत्त्यादिचतुष्टयपरत्वसंभवेसतितस्यत्रितयपरत्वमुपेत्याग्निहोत्रंजुहोतीतिकामपदरहितस्यवाक्यस्यकामपदोपेतवाक्यापेक्षितोत्पत्तिमात्रपरत्वंतत्प्रख्याधिकरणे आघाराधिकरणादौचतत्रतत्रवदतामिति । "करणाकरणयोरिष्टानिष्टकथनादिरूपे"त्यादिटीकांविवृण्वानोहेतूदाहरणोक्त्याफलादर्थवादस्यप्राबल्यं

"सौर्यचरुंनिर्वपेद्ब्रह्मवर्चसकामः"इत्यादेरिव"अग्निहोत्रंजुहुयात्स्वर्गकाम"इत्यस्यैवोत्पत्त्यादिपरत्वसंभवे"अग्निहोत्रंजुहोती"त्यस्यकर्मांतरविधिपरत्वेऽपूर्वतायांसंभवंत्यामपिफलाभावप्रसंगेनाधिकारवाक्यबोधितफलयुक्तकर्मोत्पत्तिमात्रपरत्वंचवदतां । ॥ १९२ ॥

गु० रितिभेदः ॥ **उत्पत्त्यादिपरत्वमिति** ॥ आदिपदेनाधिकारनियोगफलानांग्रहणं ॥ **अधिकारवाक्येति** ॥ अधिकारवाक्येनाग्निहोत्रंजुहुयादित्यनेनबाधितं

SGDF Sri Gargeshwari Digital Foundation

प्र० व्यनक्ति ॥एवंफलेति॥ आदिपदेनपूर्वैरिदमनुष्ठितमित्याचारकथनंगृह्यते ॥इत्यत्रेति॥ पश्वादिफलादित्याद्यर्थवादस्यप्राबल्यमित्यन्वयः । आद्येचतुर्थपादे''समाकर्षा''दितिनये पूर्वमुक्तन्यायैःसर्वशब्दानांब्रह्मणि''कल्पनोपदेशा''दित्युक्तदिशान्यत्रचमुख्यत्वेसिद्धे तत्किमुभयत्रतुल्यमुतान्यत्रहीनमितिविशये अन्यत्रहीनत्वेमुख्यत्वायोगेनप्रसिद्ध्यभावापातात्तुल्यमितिप्राप्ते रूढियोगयोर्गौणलक्षणयोस्तारतम्यमिव मुख्यवृत्तावपितत्संभवेनसाक्षाद्भगवदेकवाचिनामन्यत्रसमाकृष्यव्यवहारायसंकेतितत्वेनहीनत्वात् प्रसिद्धेश्चाज्ञानमूलत्वात् नतुल्यंमुख्यत्वमितिसिद्धांतितं । तत्रान्यत्रकर्मदेवतादौसमाकृष्यव्यवहारोव्यर्थः । तज्ज्ञानस्यमुमुक्षोरनुपयोगादितिशंकायां''उत्क्रमिष्यत''इतिगुणसूत्रेणोत्क्रमिष्यतोमुमुक्षोरेवंज्ञानहेतुतयाकर्मणोवश्यंभावादित्यंतःकरणशुद्धिद्वाराकर्मादेरपिज्ञानहेतुत्वात्तत्रसमाकृष्यव्यवहारोयुक्तइत्युक्तं । तत्तुपशुस्वर्गादिफलवत्त्वेनकर्मणांश्रवणेपि''कर्मणाज्ञानमातनोती''त्यादिस्तुतिनिंदारूपार्थवादपर्यालोचनयामुक्तिहेतुज्ञानार्थत्वावगमात्फलादप्यर्थवादस्यप्राबल्यमभिप्रेत्येत्यर्थः ॥ **कर्मणेति** ॥ ज्ञानद्वारामुक्तिहेतुत्वेइदंवाक्यं ॥ **अथेति** ॥ ज्ञानद्वाराअमृतफलकत्वादित्यर्थः । इयंचतृतीये''भाक्तंवा

एवंफलमात्रात्करणाकरणयोरिष्टानिष्टकथनादिरूपार्थवादस्यप्राबल्यं । यथा''उत्क्रमिष्यतएवंभावादित्यौडुलोमि''रित्यत्रकाम्यकर्मसुश्रुतात्पश्वादिफलात्''कर्मणाज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानिकर्माणि

गु० यत्फलं तेनयुक्तंयत्कर्म तदुत्पत्तिमात्रपरत्वमित्यर्थः । फलापेक्षयार्थवादस्यप्राबल्यमाह ॥ **एवमिति** ॥ करणाकरणयोरितिहेतुगर्भविशेषणं । अत्रोदाहरणमाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० नात्मवित्त्वा''दित्यत्रभाष्योदाहृतश्रुतिः ॥ **प्लवाइति** ॥ आथर्वणे''तान्याचरथनियतंसत्यकामा''इतिपूर्ववाक्येसत्यनामकब्रह्मज्ञानकामाःक र्माण्याचरथेत्युक्त्वा अन्यथाचरणेनिंदोच्यतेप्लवाह्येतइति । एते ब्रह्मप्रीत्यनुद्देशेनान्योद्देशेनानुष्ठिताः यज्ञाः अदृढप्लवाइति । ''सोकामयत भूयसायज्ञेनभूयोयजेयेति यज्ञेनयज्ञमयजंते''त्यादिपरकृतिपुराकल्परूपोप्युदाहार्यः । भूयो विष्णुं नाकं मोक्षं यज्ञं विष्णुमित्यर्थः । अर्थ वादेनफलबाधप्रकारंव्यनक्ति ॥ **नहीति** ॥ इत्यादिगीतानुसारेणेत्यर्थः ॥ **सर्वापेक्षेति** ॥ तृतीयस्यचतुर्थेपादे''स्तुतयेनुमतिर्वे''तिचतुर्थे धिकरणे ज्ञानिनःसदसत्प्रवृत्तौविशेषोस्तिनवेतिसंशये''सब्राह्मणःकेनस्याद्येनस्यात्तेनेदृशएवस्या''दितिश्रुत्याज्ञानिनःसदसत्प्रवृत्तावविशेषोक्तेर्न विशेषइतिप्राप्ते ज्ञानिनोपीतरवद्विशेषोस्त्येव । श्रुतिस्तुज्ञानिनःस्तुत्यर्थेतिसिद्धांतितं । तत्रास्तुज्ञानिनःसत्प्रवृत्त्याविशेषोमोक्षाख्यएव नतुत त्राधिक्यमित्याशंकायां सर्वधर्मापेक्षाज्ञानोत्पत्तावेव । ''तमेतंविविदिषंतियज्ञेनदानेने''त्यादिश्रुतेः । निष्पन्नेचज्ञानेज्ञानिकृतंकर्मज्ञानजन्य मोक्षस्वरूपएवनपर्यवस्यतीति''सर्वापेक्षे''तिगुणसूत्रेणकर्मणांचज्ञानहेतुत्वोक्त्यातन्न्यायेनज्ञानसाधनरूपेणैवकर्तव्यतेत्यर्थः । पश्वादिफलश्रुति

प्लवाह्येतेअदृढाद्यज्ञरूपाः''इत्याद्यर्थवादस्य । नहिकर्मणांप्लवाइत्यादिनानिंदितकाम्यरू पेणकर्तव्यता । किंतु ''कर्मण्येवाधिकारस्तेमाफलेषुकदाचने''त्याद्यनुसारेण''सर्वापेक्षाच यज्ञादिश्रुते''रितिवक्ष्यमाणन्यायेन''कर्मणाज्ञान''मित्यादिनास्तुतज्ञानसाधनरूपेणैव ।

गु० **यथेति** ॥ कर्मणांज्ञानफलत्वप्रतिपादकार्थवादवाक्येनपश्वादिफलप्रतिपादकवाक्यस्याबाधात्कथंसार्थवादवाक्यस्यततःप्राबल्यमित्यतआह ॥**नहीति**॥ कर्तव्यता प्रेक्षावत्कर्तव्यता । तर्हिकिमकर्तव्यत्वमेवकर्मणामितिशंकते ॥ **किंत्विति** ॥ उत्तरमाह ॥ **ज्ञानसाधनरूपेणेति** ॥ कर्तव्यतेतिपूर्वेणान्वयः । नन्वेवंस्वर्गका

प्र० स्तुरोचनार्थतयानेयेतिभावः । तत्वप्रदीपेतु अर्थवादवत्यश्रुतफलेश्रुतफलादपितात्पर्यंस्यात् । यथा''श्रयंतेस्मिञ्छ्रियोयएवमेतच्छिरसःशिर स्त्वंवेदे''त्यादौश्रुतफलादपिशिरस्त्ववेदनादश्रुतफलेप्राणसंवादाद्यर्थवादवतिप्राणोत्कर्षवेदनेतात्पर्यमवसीयतइति ॥ **संमतंचेति** ॥ तृतीयस्यच तुर्थेपादे''विधिर्वास्यादपूर्वत्वा''दितितृतीयेधिकरणे ''निवीतंमनुष्याणांप्राचीनावीतंपितृणामुपवीतंदेवानामुपव्ययतेदेवलक्ष्यमेवतत्कुरुत''इति दर्शपूर्णमासप्रकरणेश्रुतंवाक्यमुदाहृत्योपव्ययतइतिकिंविधिरुतानुवादइतिसंशये''नित्योदकीनित्ययज्ञोपवीती''तिस्मृतिप्राप्तत्वादनुवादइतिप्राप्ते स्मृतितःपुरुषार्थतयाप्राप्तावपिक्रत्वर्थत्वेनाप्राप्तत्वात्तादर्थ्येनायंविधिरितिसिद्धांतितं । तत्रयद्यपि''अजिनंवासोवादक्षिणतउपवीयदक्षिणंबाहु मुद्धरतेवधत्तेसव्यमितियज्ञोपवीत''मित्युक्तलक्षणयज्ञोपवीतानुष्ठानादपिहारवदुरोलंबनरूपनिवीतानुष्ठानेसौकर्यलाभान्नित्यप्रयोजनत्वेननिवी तवाक्यंविधिः उपवीतवाक्यंतत्रार्थवादइतिवक्तुंयुक्तं । तथापिउपवीतवाक्यस्यार्थवादत्वे तत्र''देवलक्ष्यमेवतत्कुरुते''इत्यर्थवादानन्वयापत्त्या तदन्वयायतत्रैवविधिमाश्रित्य निवीतवाक्यस्यैवतदर्थवादत्वंवदंतीति तेषांफलादप्यर्थवादस्यप्राबल्यंसंमतमित्यर्थः । ''उपपत्तेःसर्वमूलत्वेन

संमतंचैतन्मीमांसकानामपिनिवीतवाक्यस्यानुष्ठानसौकर्यवत्त्वेनसप्रयोजन त्वेपि''देवलक्ष्यमेवतत्कुरुत''इतिसार्थवादकोपवीतवाक्यानुसारंवदतां ।

गु० मोयजेतेतिफलकामनाविशिष्टकर्मणएवविधिविहितत्वात्तद्विरोधःस्यादित्यतउक्तं **कर्मण्येवाधिकारइत्यादि** ॥ तथाचनफलकामनाविशिष्टकर्मणिविधिः । किंतु कर्ममात्रविधिरिति ज्ञानसाधनत्वेनकर्तव्यतासिद्धिरितिभावः । एतदपिमीमांसकसंमतमित्याह ॥ **संमतंचैतदिति** ॥ अर्थवादस्यफलमात्रात्प्राबल्यमित्यर्थः ।

SGDF

प्र० सर्वत:प्राबल्य"मितिटीकांविवृण्वानोर्थवादादुपपत्तेःप्राबल्यंहेतूदाहरणोक्त्योपपादयति ॥ **एवमिति** ॥ **अदर्शनादिति** ॥ तत्त्वमसीत्यादेरद्वैतादौ । दर्शनात् द्वैतवाक्यानांद्वैतादौ । यद्वालोकेतथादर्शनादित्यर्थः । एतेनोपपत्तेःसर्वमूलत्वादितिटीकांशोनूद्यसार्थवादस्येत्यादिनोपपादितोभवति ॥ **यथेति** ॥ द्वितीयस्यतृतीयपादे"पृथ"गितिचतुर्दशाधिकरणे जीवःपरमात्मनोभिद्यतेनवेतिसंदेहे"येनाश्रुतंश्रुतंभवती"त्याद्यर्थवादादिषड्विधतात्पर्यलिंगोपेतात्तत्वमसीत्याद्यभेदवाक्यान्नभिद्यतइतिप्राप्ते पूर्णत्वादिविरुद्धधर्मवत्त्वरूपयुक्त्युपेतभेदश्रुतेर्भिद्यतएव । ऐक्यश्रुतिस्तु परमात्मगुणसदृशज्ञानानंदादिगुणरूपत्वात्सिंहश्चैत्रइतिवद्गौण्यावृत्त्योपपद्यतइतिसिद्धांतितत्वादितिभावः ॥ **भेदश्रुतेरिति** ॥ प्राबल्यमित्यन्वयः । अतएव उपपत्तियुक्तायाःप्राबल्यादेवेत्यर्थः । ननु"तर्काप्रतिष्ठाना"दित्यादिनोपपत्तेर्दूषितत्वेनकथंतस्याःप्राबल्योक्तिरित्यतःस्वतंत्रायादुर्बलत्वेपिश्रुतिसहकारिण्यास्तुप्राबल्यमेवेतिभावेनाह ॥ **उक्तंचेति** ॥ नकेवलंतात्पर्यगत्यालभ्यतइत्यर्थः । युक्तिपादेनविलक्षणत्वादित्यधिकरणेयुक्तेःश्रुतिसाहाय्येनप्राबल्यमुक्तमित्यर्थः । यथेक्षतेरितिनये"यतोवाचोनिवर्तंत"इतिश्रुतितः"सर्वेवेदा"इत्यादिश्रुतिसहा

एवंसार्थवादस्याप्यनुपपन्नेर्थेतात्पर्यादर्शनादुपपन्नेचतद्दर्शनादुपपत्तेःसर्वमूलत्वादर्थवादादपिप्राबल्यं । यथा"पृथगुपदेशा"दित्यत्रसार्थवादाभेदश्रुतितो"भिन्नोचिंत्यःपरमोजीवसंघात्पूर्णःपरोजीवसंघोह्यपूर्णः"इतिसोपपत्तिकभेदश्रुतेः । अतएवतत्रभाष्यं"सोपपत्तिककौशिकश्रुते"रिति । उक्तंचानुव्याख्याने"युक्तोऽयुक्तश्चयत्रार्थआगमस्यप्रतीयते । स्यात्तत्रयुक्तएवार्थ"इति । ॥ १९४ ॥

गु० अर्थवादादप्युपपत्तेःप्राबल्यमाह ॥ **एवमिति** ॥ तत्रहेतुरुपपत्तेःसर्वमूलत्वादिति ॥ तत्रोदाहरणमाह ॥ **यथापृथगिति** ॥ **संमतंचैतदिति** ॥ अर्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० येक्षर्णीयत्वयुक्तेः प्राबल्यं । तत्वप्रदीपेत्वर्थवादोप्युपपत्तिबलेननीयते । यथाप्राणगःप्रतीतःसर्वोत्तमत्वार्थवादस्तदसंभाव्यधर्मैरंतर्यामिविषयो भवति । यथाचेंद्राग्न्यादिगःप्रतीतःसर्वोत्तमत्वार्थवादस्तस्मिन्नेवप्रकरणेऽन्यत्रवातेषांहीनत्ववचनाद्युपपत्त्याविष्णुपरोवसीयतइति ॥ **संमतमिति** ॥ प्रागुक्ते "अर्थाद्वाकल्पनैकदेशत्वा" दितिस्रुवाधिकरणे "स्रुवेणावद्यती" त्यत्रविधेरपिसामर्थ्यरूपोपपत्त्यनुवर्तनंवदतांतेनन्यायेनार्थवादानांतदनुवर्तनंसंमतमित्यर्थः । यदत्रोक्तमुपपत्तिसापेक्षत्वेऽनपेक्षत्वरूपप्रामाण्यहानिरिति तदुद्धरति ॥ **नचेति** ॥ तस्मिन् तात्पर्ये ॥ **अर्थनिर्णयायेति** ॥ वेदार्थस्यचशास्त्रैकयोनित्वेनतत्रप्रमाणांतरापेक्षानास्तीतिभावः । पूर्ववाद्युक्तदृष्टांतंनिराह ॥ **हेतुवदिति** ॥ अधिक

संमतंचैतन्मीमांसकानामपि "नह्यशंकनीयमर्थंविधिरपिविदधाती" तिवदतां । नचतात्पर्यनिर्णयायश्रुत्युक्तायाअनुक्तायावोपपत्तेरपेक्षायामनपेक्षत्वरूपप्रामाण्यहानिः । किंतुनिर्णीतेतस्मिन्नर्थनिर्णयायतदपेक्षायां । अन्यथातात्पर्यनिश्चयायविचारमपेक्षमाणोवेदोप्रमाणंस्यात् । हेतुवन्निगदाधिकरणे "तेनह्यन्नंक्रियत" इत्यत्राप्रामाण्यापत्त्याहेतुत्वत्यागोनतावद्भाट्टरीत्या । नापिप्राभाकरेविवरणरीत्या ।

गु० वादापेक्षयोपपत्तेःप्राबल्यमित्यर्थः ॥ **विधिरपीति** ॥ किमुतैकवाक्यतापन्नस्तदुपजीव्यर्थवादोनुपपन्नार्थंनतात्पर्येणगोचरयतीत्यर्थः । उपपत्त्यपेक्षायामनपेक्षत्वलक्षणप्रामाण्यहानिरितिपूर्वपक्ष्युक्तंपरिहरति ॥ **नचेति** ॥ तथाचपूर्वमीमांसाव्यर्थैवस्यादितिभावः । निर्णीतेतात्पर्येऽर्थनिर्णयायतदपेक्षानास्तीतिभावः । ननुतर्हितात्पर्यनिर्णयार्थमुपपत्त्यपेक्षायांहेतुवन्निगदाधिकरणविरोधः । तत्रहेतुसापेक्षत्वेनाप्रामाण्येप्रसक्तेऽप्रामाण्यापत्तिभयेनहेतुसापेक्षत्वंपरित्यज्यप्रामाण्येनसिद्धांतकरणादित्यतआह ॥ **हेतुवदिति** ॥ अप्रामाण्यापत्त्याहेतुत्वत्यागःकिंभट्टमतरीत्याप्राभाकररीत्यावा । तत्रापिविवरणरीत्यावानिबंधनरीत्यावा । नाद्यइत्याह ॥ **नतावदिति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० रणंप्रागुक्तं ॥**तन्मतइति**॥ भट्टमतेविवरणकारमतेचेत्यर्थः । यथाचैतत्तथोक्तंप्राक् । विकल्पादीति बाधसमुच्चयौवादिपदार्थः॥**नापीति**॥ हेतुत्वेनान्वयत्यागःकिंकुत्रापितथान्वयस्यानंगीकाराद्वा वेदोक्तेहेत्वाकांक्षाविरहाद्वा हेतुत्वोपपादकव्याप्त्यादिबोधकमानांतरापेक्षतयावा । आद्येऽसिद्धोहेतुरित्याह ॥ **नहीति** ॥ "चतुर्जुह्वांगृह्णाति । प्रयाजेभ्यस्तत् । अष्टावुपभृति । प्रयाजानूयाजेभ्यस्तत् । चतुर्ध्रुवायां । सर्वेस्मैवाएतद्यज्ञायगृह्यते । यद्ध्रुवायामाज्य"मित्यत्रश्रुतं"नह्यत्रानूयाजाइज्यंत"इति । अत्रहिशब्दस्यहेत्वर्थत्वमंगीकृत्यानुयाजाभावस्याष्टगृहीता

तन्मतेतेनह्यन्नंक्रियतइत्यादेःप्रामाण्यमुपेत्यहेतुपरत्वमित्येवपूर्वपक्षकरणात् सिद्धांतेचदर्वीपिठरादि नाऽऽनुमानिकेनप्रत्यक्षस्यशूर्पस्यविकल्पादिप्रसंगाच्छूर्पस्यहोमसाधनतायामन्नकरणत्वस्यहेतुत्वत्या गोनत्वप्रामाण्यापत्तिभयात् । नापिनिबंधनरीत्या"नह्यत्रानूयाजाइज्यंत"इत्यादौयत्रयत्रानुयाजा भावस्तत्रतत्राष्टगृहीताभावइतिव्याप्तेःसत्त्वेनानुयाजाभावस्याष्टगृहीताभावेहेतुत्वेनान्वयोपगमात् ।

गु० द्वितीयआद्यंदूषयति ॥ **नापीति** ॥ **तन्मतइति** ॥ भट्टमतेप्राभाकरेविवरणमतइत्यर्थः ॥ **सिद्धांतेचेति** ॥ तत्रहेतुत्वत्यागोहि शूर्पेणहोमःकर्तव्यः अन्नकरणत्वादित्युक्ते अन्नकरणत्वहेतुनैवदर्वीपिठरादेरपिहोमसाधनत्वप्राप्तावेकदैवतैर्होमकरणासंभवेनविकल्पःस्यात् । सचाष्टदोषदुष्टइतिहेतोरेव । नत्वप्रामाण्यप्राप्तिभया दित्यर्थः । द्वितीयेद्वितीयंदूषयति ॥ **नापिनिबंधनरीत्येति** ॥ तद्रीतेरेवायुक्तत्वादितिसंबंधः । तत्रहेतुर्**मानांतरेति** ॥ श्रुत्यतिरिक्तमानांतरानपेक्षत्वोपपत्तेः । अप्रामाण्याभावादितिशेषः । किमत्रहेतुत्वत्यागो हेतुत्वेनान्वयस्यक्वचिदप्यनाश्रितत्वादुतहेतावाकांक्षाभावाद्यद्वाहेतुत्वोपपादकव्याप्त्यादिग्राहकमानांतराभावात् । नाद्यइत्याह ॥ **नहीति** ॥ अत्रहि"चतुर्जुह्वांगृह्णाति । प्रयाजेभ्यस्तत् । अष्टावुपभृति । प्रयाजानूयाजेभ्यस्तत् । चतुर्ध्रुवायां । सर्वस्मैवाएतद्यज्ञायगृह्यते । यद्ध्रुवायामाज्य"मिति । तत्रश्रूयते । "नह्यत्रानूयाजाइज्यंत"इति । अत्रहिशब्देनानुयाजाभावस्याष्टगृहीताभावेहेतुत्वमुच्यते । यत्रयत्रानुयाजाभावस्तत्रतत्राष्ट

प्र० भावेहेतुत्वान्वयोपगमादित्यर्थः । द्वितीयआह ॥ **रक्तपटेति** ॥ स्वारसिकाकांक्षाभावेपिपटोभवतिरक्तइत्यादौक्रियान्वयेननिराकांक्षस्यपटपदस्यरक्तपदेनान्वयायकीदृशःसइत्याकांक्षोत्थापनवदिष्टसाधनताबोधनेननिराकांक्षस्यविधेरर्थवादान्वयाय तदर्पितस्तुतावाकांक्षोत्थापनस्योक्तत्वेनात्रापितथासंभवादित्यर्थः । तृतीयेप्यसिद्धोहेतुरित्याह ॥ **हेतुत्वेति** ॥ यथाह्यलौकिकसुखरूपस्वर्गसाधनतयायागे"यजेतस्वर्गकाम" इत्यादिनाबोधितेप्यलौकिकतयासुखस्यैतच्छरीरावच्छेदेनाजननाद्देहांतरेमानाभावादयुक्तमित्याशंक्यायमेवशब्दोदेहांतराक्षेपकइत्युक्तं तथात्रापिहेतुपरशब्देनव्याप्त्याद्याक्षेपादित्यर्थः । तदीयाधिकरणांतरविरोधंचनिरस्यति ॥ **एतेनेति** ॥ हेतुत्वेन यतोवायुःक्षिप्रगामिनीदेवताक्षिप्र

रक्तपटन्यायेनचस्तुताविवहेतावप्याकांक्षोत्थापनात् । हेतुत्वोपपादकव्याप्त्यादेश्चालौकिकसुखरूपस्वर्गोपपादकदेहादेरिवशब्देनैवाक्षेपान्मानांतरानपेक्षत्वोपपत्तेस्तद्रीतेरेवायुक्तत्वात् । एतेनार्थवादाधिकरणेनिबंधनेविवरणेच"वायुर्वैक्षेपिष्ठे"त्याद्यर्थवादानांहेतुत्वेनान्वयादप्रामाण्येप्राप्तेसिद्धांतेप्रामाण्यायहेतुत्वत्यागोक्तेस्तद्विरोधइतिनिरस्तं ।

गु० गृहीताभावइतिव्याप्तेर्विद्यमानत्वेनहेतुत्वेनान्वयस्यात्रैवाश्रितत्वादित्यर्थः । द्वितीयंप्रत्याह ॥ **रक्तपटेति** ॥ तथाच हेतावुत्थिताकांक्षायाअभावेपि रक्तपटदर्शनेन पटोभवतीत्युक्तेकीदृशोभवतीत्युत्थापिताकांक्षवत् अर्थवादस्तुतावाकांक्षोत्थापनवदुत्थापिताकांक्षासंभवादित्यर्थः । तृतीयंप्रत्याह ॥ **हेतुत्वेति** ॥ अत्रहेतुत्वमुक्तं तच्चव्याप्त्यादिकंविनानसंभवतीतिव्याप्तेरप्यनेनैवाक्षेपइत्यर्थः । अत्रदृष्टांतोऽ**लौकिकेति** ॥ यथाशब्देनयागसाध्यालौकिकसुखरूपस्वर्गेबोधिते शरीराभावात्सुखभोगःकथमित्याशंकायांशरीरस्यापिशब्देनाक्षेपस्तथेत्यर्थः । तथाचाप्रामाण्यभियाहेतुत्वत्यागाभावान्नहेतुवन्निगदाधिकरणविरोधइतिभावः ॥ **एतेनेति** ॥ निबंधनरी

SGDF
Sri Gargeshwari Digital Foundation

प्र० फलदात्री अतोवायव्यश्वेतालंभःकार्यइत्यादिरूपहेत्वर्थकत्वेन । एतेनेत्युक्तंव्यनक्ति ॥ **तात्पर्येति** ॥ एवमुपक्रमादीनांपरबलीयस्त्वोक्तिपर टीकांव्याख्याय "अत्रश्रुत्यादिषट्कंचग्राह्य" मितिटीकायांश्रुत्यादेरपितात्पर्यलिंगतयात्रग्राह्यत्वेनोक्तत्वात्तत्राप्येवमेवबलीयस्त्वमितिभ्रमंवारयन्नु पसंहरति ॥ **तस्मादिति** ॥ **श्रुत्यादौत्विति** ॥ एतच्च "शब्दादेवप्रमित" इत्यत्रोपपादयिष्यतइतिभावः ॥ **तदुक्तमिति** ॥ तृतीयस्यचतु र्थेपादे । ब्रह्मतर्केतथानिर्णयादित्यर्थः । ऐकरूप्यमप्यत्रग्राह्यमितिभावेनतस्यलिंगत्वमुपपादयति ॥ **यत्रेति** ॥ भाष्योक्तप्रमाणेपितदभिप्रेत

तात्पर्यनिर्णयायहेत्वपेक्षायामप्रामाण्यानापत्तेः । अर्थनिर्णयायतदपेक्षायास्त्वन्मतेप्यभावात् । तस्मादु पक्रमादौपरबलीयस्त्वं श्रुत्यादौतुपूर्वबलीयस्त्वं । तदुक्तमनुव्याख्याने "उपक्रमादिलिंगानांबलीयोह्युत्तरो त्तरं । श्रुत्यादौपूर्वपूर्वंचब्रह्मतर्कविनिर्णया" दिति । यत्रैकस्यार्थस्योपक्रममात्रमुपसंहारमात्रंवातत्रतन्मा त्रादुपक्रांतादिमात्रेर्थेतात्पर्यं । यत्रतूभयंतत्रतदविरोधलक्षणैकरूप्यादुभयानुगुणेतात्पर्यं । अतएवप्रमा णलक्षणेभगवत्पादैः "उपक्रमोपसंहारतदैकरूप्याभ्यासापूर्वताफलार्थवादाश्चे" तितदैकरूप्यंपृथगुक्तं ।

गु० तेरयुक्तत्वकथनेनेत्यर्थः । तात्पर्यनिर्णयायतदपेक्षायांवाऽप्रामाण्यमर्थनिश्चयायतदपेक्षायांवा । नाद्यइत्याह ॥ **तात्पर्येति** ॥ अन्यथाविचारसापेक्षवेदस्याप्रामाण्या पातादितिभावः । नद्वितीयइत्याह ॥ **अर्थनिर्णयेति** ॥ प्राबल्योपपादनमुपसंहरति ॥ **तस्मादिति** ॥ नन्वैकरूप्यंकिमवश्यवक्तव्यंवाऽवश्यावक्तव्यंवा । आद्ये तेनापितात्पर्यनिश्चयात्तदपिवक्तव्यंस्यात् । अंत्येप्रमाणलक्षणादावप्यैकरूप्योक्तिरयुक्तेत्यतआह ॥ **यत्रेति** ॥ ऐकरूप्यशब्दार्थकथनं । **तदविरोधलक्षणेति** ॥ उपक्रमोपसंहारयोरविरोधेनैकार्थप्रतिपादकत्वलक्षणैकरूप्यादित्यर्थः ॥ **अतएवेति** ॥ यतऐक्यरूपस्यतात्पर्यनिर्णायकत्वंततएवेत्यर्थः । ननुतर्ह्यत्रभाष्यऐकरूप्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० मित्याह ॥ अत्रत्विति ॥ "उपक्रमोपसंहारावभ्यासोपूर्वताफलं । अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णय" इतिभाष्योक्तवाक्यइत्यर्थः । टीकायामनुक्तेर्गतिमाह ॥ टीकायामिति ॥ अन्यत्र न्यायकल्पलतायामित्यर्थः ॥ यद्वेति ॥ बलाबलयोः प्राबल्यदौर्बल्ययोः । निरूप्य

अत्रतूपक्रमोपसंहारावित्यत्रप्रत्येकविवक्षयाविशकलितौद्वाविवसमुदायविवक्षयातदैकरूप्यमपिविवक्षितं ।
अत्रटीकायांतदैकरूप्यस्यपृथगनुक्तिस्त्वन्यत्रोक्तत्वात् । यद्वात्रोपक्रमादेर्बलाबलयोर्निरूप्यमाणत्वात्
यत्रैकैकंतत्रसन्निपातस्यैवाभावात् यत्रचैकस्मिन्वाक्यएकस्मिन्नर्थउभयसन्निपातस्तत्रविरोधस्यैवाभावात्

गु० स्याविवक्षितत्वान्न्यूनतेत्यतआह ॥ अत्रत्विति ॥ तथापिटीकायांपृथगनुक्तत्वान्न्यूनतातदवस्थेत्यतआह ॥ अत्रेति ॥ अन्यत्रेति ॥ प्रमाणलक्षणइत्यर्थः । नन्वन्यत्रोक्तत्वेप्यत्रतात्पर्यनिर्णायकत्वेनोपक्रमादिवचनावसरऐकरूप्यमप्यवश्यंवक्तव्यमेव । तस्मादत्रानुक्त्यातदावश्यकमेवनेतिप्रतीयते । तथाचप्रमाणलक्षणादौतदुक्तिरयुक्तेत्यस्वरसादाह ॥ यद्वेति ॥ नन्वैकरूप्यस्यान्यत्रोक्तत्वेनान्यत्रानुक्तिश्चेदुपक्रमादीनामप्यन्यत्रोक्तत्वेनसर्वेषामपितेषामनुक्तिर्वातेष्वन्यतमानुक्तिर्वास्यात् । किंचप्रकरणस्यशास्त्रैकदेशत्वेनैकदेशानुक्तावप्यस्यशास्त्रत्वेनैकदेशानुक्तिरयुक्तेत्यतोवाह ॥ यद्वेति ॥ यद्वानन्वावश्यकत्वेतदैकरूप्यमत्रापिवक्तव्यं अन्यथाअन्यत्रापिनवक्तव्यं । किंचात्रैवमीमांसायांतदंगभूतलिंगानांसूत्रेभाष्येचोक्तत्वाट्टीकायामप्यवश्यंवक्तव्यं । अन्यत्रत्वंतर्भावमात्रस्यैवकथनान्नावश्यकमित्यतआह ॥ यद्वेति ॥ तात्पर्यज्ञापकलिंगमात्रनिरूपणावसरेह्यैकरूप्यंनिरूपणीयं । नह्यत्रतात्पर्यनिर्णायकंलिंगमात्रंनिरूप्यते । किंतुतेषांबलाबलं । अतऐकरूप्यंनोक्तमित्याह ॥ उपक्रमादेरिति ॥ नन्वैकरूप्यस्यापिबलवत्त्वात्तदपिपृथग्वक्तव्यमितिचेदत्रप्रष्टव्यं । किमैकरूप्यस्यकुत्रनिवेशइति । किंयत्रवाक्यउपक्रमादिकमेकैकंतत्रनिवेश उतयत्रैकस्मिन्नर्थउभयसन्निपातस्तत्र यद्वाविरुद्धार्थकवाक्यद्वयएकत्रोपक्रमोन्यत्रोपसंहारस्तत्र अथवैकस्मिन्महावाक्यएकत्रवाक्यउपक्रमोन्यत्रोपसंहारस्तत्र । नाद्यइत्याह ॥ यत्रैकैकमिति ॥ तथाचसन्निपाताभावेकयोरैक्यंस्यादितिभावः । नद्वितीयइत्याह ॥ यत्रचेति ॥ तथाच सतिविरोधऐकरूप्येणाविरोधेनतात्पर्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० माणत्वात्संभावितपक्षचतुष्टयमध्येपक्षत्रयेबलाबलोक्त्यप्रसक्तेः"यत्रचैकस्मिन्महावाक्य"इत्युक्तपक्षएवतत्प्रसक्तेस्तत्रोपसंहारानुरोधेनोपक्रमस्यनयने ऐकरूप्यस्याप्युक्तत्वात्पृथगनुक्तिरित्यर्थः । अत्र भाष्यादावित्यर्थः । अन्यत्रोक्तेर्गतिमाह ॥ **प्रमाणेति** ॥ ऐकरूप्यस्यतात्पर्यलिंगत्व

यत्रचविरुद्धार्थवाक्ययोरेकत्रोपक्रमोवाक्यांतरेचोपसंहारस्तत्रबलाबल
योरभावात् । यत्रचैकस्मिन्महावाक्येभिन्नयोरर्थयोरुभयसन्निपातस्त
त्रोपसंहारानुसारेणैकरूप्यात्तात्पर्यनिश्चयेनोपसंहारप्राबल्योक्तावर्थात्त
दैकरूप्यस्याप्युक्तत्वादत्रपृथगनुक्तिः । प्रमाणलक्षणेतूपक्रममात्रादिक
मपिक्वचिदुपक्रांतादौतात्पर्यनिर्णायकमितिनिदर्शयितुंपृथगुक्तिः ।

गु० निर्णेयं सएवनेतिनतत्रतत्समावेशइतिभावः । नतृतीयइत्याह ॥ **यत्रचविरुद्धार्थेति** ॥ **तत्रेति** ॥ तथाचनतत्रापिसमावेशः बलाबलनिरूपणस्यप्रकृतत्वादितिभावः । चतुर्थंप्रत्याह ॥ **यत्रचैकस्मिन्निति** ॥ तथाचोपसंहारप्राबल्यानुसारेणोपक्रमेनीतऐकरूप्यमप्युक्तमेवेतिनतत्पृथग्वक्तव्यमितिभावः । नचैवमुपक्रमोपसंहारोक्तावर्थादैकरूप्योक्तिवदैकरूप्योक्तावुपक्रमोपसंहारयोरप्युक्तिसंभवात्तदेववक्तव्यं नोपक्रमोपसंहारावितिवाच्यं । तथात्वेह्युपक्रमोपसंहारयोःप्रत्येकंतात्पर्यलिंगत्वंनज्ञायेत । किंत्वैकरूप्यमेवेतिस्यात् । उपक्रमोपसंहारावितिस्मृत्यननुसारित्वंचस्यादितिभावः । नन्वर्थादैकरूप्यलाभेप्रमाणलक्षणऐकरूप्यस्यकथंपृथगुक्तिरित्यतउपक्रमवत्तस्यापितात्पर्यनिश्चायकत्वादित्याह ॥ **प्रमाणलक्षणेत्विति** ॥ ननूपसंहारस्यप्राबल्यउक्तेर्यादैकरूप्योक्तिश्चेदुपसंहारापेक्षयैकरूप्यस्यप्राबल्यंनस्या

प्र० मुक्त्वोपसंहाराद्बलीयस्त्वंहेतूक्त्याह ॥ **उपसंहारेति** ॥ बह्वनुग्रहन्यायमाश्रित्याह ॥ **यद्वेति** ॥ तद्यथा"ज्योतिर्दर्शना"दित्यत्र"अयंपुरुषःस्वयंज्योति"रित्युपसंहारस्थस्वयंशब्दानुसारात्"आत्मैवास्यज्योति"रितिप्रक्रमस्थात्मशब्दस्यजीवस्वरूपार्थत्वप्राप्तावपि"विष्णुरेवज्योति"रित्यादिश्रुत्याविष्ण्वेकनिष्ठज्योतिश्शब्दस्य"हृद्यंतर्ज्योति"रित्यात्मप्रश्नोत्तरोपक्रमे"सुप्त"इति"अत्रायंपुरुषःस्वयंज्योति"रित्युपसंहारेचश्रुतत्वेनतयोरैकरूप्यात्तद्वाक्यंविष्णुपरमितिनिर्णेष्यते । यथावाप्रागुक्तदिशाजीवोपसंहारोपेतानंदमयादिप्रकरणजातस्यब्रह्मप्रश्नोत्तरोपक्रमेण "अस्माल्लोकात्प्रेत्यआनंदमयमात्मानमुपसंक्रम्ये"त्यादिमुक्तगम्यत्वोपसंहारेणावगतोभयैकरूप्येणनिर्णीतब्रह्मतात्पर्यकाद्भृगुवल्लीवाक्याद्ब्रह्मपरत्वमित्याद्यूहनी

उपसंहारमात्रयुक्तस्यचोभयैकरूप्यवद्वाक्यानुरोधेनास्वारस्यादुपसंहारादैकरूप्यस्यबलवत्त्वं । यद्वो
पक्रमस्वारस्यादुपसंहारस्वारस्यस्यबलीयस्त्ववदुपसंहारमात्रस्वारस्यादुभयस्वारस्यस्यबलीयस्त्वं ।

गु० दित्यतआह ॥ **उपसंहारमात्रयुक्तस्येति** ॥ ननूपसंहारापेक्षयैकरूप्यस्यप्राबल्येहेतुर्नोक्तः । तत्कथंप्राबल्यसिद्धिरित्यत आह ॥ **यद्वेति** ॥ भूमाधिकरणेप्राणशब्दस्योपक्रमगतस्यद्वितीययोजनायांमुख्यप्राणपरत्वस्याप्यपरित्यागात्तदनुरोधेनवाऽऽह ॥ **यद्वेति** ॥ ननूपक्रमोपसंहारतदैकरूप्यानांपृथग्गणनेउपसंहाराभ्यासैकरूप्यस्य अभ्यासापूर्वैकरूप्यस्यचपृथग्गणनंकार्यं । अविशेषादितिचेन्न । उपक्रमोपसंहारयोरर्थतोप्यैकरूप्यवदन्यैकरूप्येतात्पर्यतऐकरूप्येसत्यप्यर्थतोप्यैकरूप्यस्याभावेनान्यस्यागणनात् । यद्वोपक्रमोपसंहारयोरैकरूप्याभावएकस्मिन्नपिवाक्येविच्छेदवज्जीवाद्भवंतीत्यादौतदभावेनवाक्यविच्छेदाभावान्नतत्पृथग्गण्यते । अभ्यासस्यासकृदुक्तत्वस्यशब्दधर्मत्वादपूर्वताफलार्थवादोपपत्तीनामर्थधर्मत्वाच्छब्दैकरूप्यसंभवाद्यधिकरणयोरैकरूप्यासंभवान्नतत्पृथगुक्तं । "उपक्रमादीनामुपपत्तित्वेपिब्राह्मणपरिव्राजकन्यायेनपृथगुक्ति"रितिटीकायामुक्तं । तत्रदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । तत्रब्राह्मणापेक्षयापरिव्राजकेविशेषद्योतनादिरूपप्रयोजनसद्भावेनपृथगुक्ति

SGDF
Sri Gargeshwari Digital Foundation

प्र० यं। ननूपक्रमादीनांशब्दरूपतयाकथंलिंगत्वं। तथात्वेचोपपत्तेःपृथगुक्तिर्नस्यादित्यतः"एतत्सर्वंवाक्यतात्पर्यार्थनिर्णयेलिंगंभवती"तिटीकां विवृण्वानोन्यायकल्पलतोक्तंलिंगत्वप्रकारमाह ॥ एतच्चेति ॥ स्वार्थे अवांतरवाक्यार्थरूपे । उपसंहारादिविरुद्धोपक्रमार्थे"द्वयाम्यग्नि"मि त्यादावुपक्रमस्यव्यभिचारवारणायाबाधेसतीति । "उपक्रमादीनामुपपत्तित्वेपिब्राह्मणपरिव्राजकन्यायेनपृथगुक्ति"रितिटीकांविवृण्वानउप क्रमादिभ्यउपपत्तेर्विशेषमाह ॥ उपपत्तिस्त्विति ॥ स्वार्थे स्वव्यापकीभूतेर्थे । तथाचोपक्रमादेरेकत्रोपपत्तिरूपत्वात्ततउपपत्तेर्भेदेनोक्ति रित्यर्थः। एवमुपक्रमादीनांपरबलीयस्त्वोपपादनस्योपयोगोक्त्यर्थं"विरोधेतुदुर्बले"त्यादिटीकाप्रवृत्ता। तांविवृणोति ॥ तत्रेति ॥ एतच्चप्रा गुदाहरणेनदर्शितमितिभावः। "साम्येनिरवकाशेने"त्यादिटीकांव्याचष्टे ॥ उपक्रमादीति ॥ उपक्रमोपसंहारादिषुमध्येद्वयस्ययथाकथं

एतच्चोपक्रमादिकंस्वार्थेशब्दात्मकमपि इदमेतत्परमबाधेसत्येतदुपक्रमत्वादित्यादिरूपेणमहावा क्यतात्पर्येलिंगंच। उपपत्तिस्तुस्वार्थेपिलिंगरूपा। तात्पर्येपि। अयंतात्पर्यविषयःउपपन्नत्वादिति लिंगरूपेतिपृथगुक्ता। तत्रविरोधेदुर्बलंबाध्यं। उपक्रमादिद्वयस्यसमस्यविरोधेसावकाशंबाध्यं।

गु० संभवेपिप्रकृतउपक्रमादीनामुपपत्त्यपेक्षयाविशेषाभावादित्यतोवैषम्यंपरिहर्तुमुपक्रमादीनामुपपत्त्यपेक्षयाविशेषमाह ॥ एतच्चेति ॥ इतिपृथगुक्तेति ॥ उपपत्ति शब्देनोपक्रमादिकमगृहीत्वैवोपक्रमादिशब्देनोपक्रमादिकं उपपत्तिशब्देनोपपत्तिर्गृहीता। नतूपपत्तिशब्देनसर्वमित्युपपत्तिःपृथगुक्तेतिभावः। ननूपक्रमादिप्राबल्यव्यु त्पादनमयुक्तं। दुर्बलस्यापिप्रमाणत्वेनप्रबलविरोधेतात्पर्यनिर्णयासंभवेनानिर्णयतादवस्थ्यादित्यतआह ॥ तत्रेति ॥ बाध्यत्वंनामार्थांतरपरत्वमेव। नतुसर्वथा बाधः। तथाचप्रबलविरोधेनदुर्बलस्यनेयत्वान्नानिर्णयइतिभावः। ननुयत्रसमयोरुपक्रमयोरुपसंहारयोर्वाविरोधस्तत्रकथंनिर्णयइत्यतआह ॥ उपक्रमादिद्वयस्येति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० चित्समतयाप्रतीतस्यपरस्परंविरोधेनिरवकाशेनसावकाशंबाध्यमित्यर्थः। यथाऽत्ताधिकरणे''अदितेरदितित्व''मित्युपसंहाराददितिप्रतीतावपि''नैवेहकिंचने''तिनिरवकाशोपक्रमेण चरमस्यापिसावकाशस्यबाधेनविष्णुपरत्वं । यथावाद्युभ्वादिनये''प्रकरणा''दितिगुणसूत्रेचरमस्यापि''जुष्टंयदापश्यत्यन्यमीश''मितिसावकाशस्येशशब्दस्य''द्वेविद्येवेदितव्ये''इतिनिरवकाशातपरविद्याविषयवस्तूपक्रमाद्बाधेन प्रकरणस्यविष्णुपरत्वमित्याद्यूह्यं । तथांतराधिकरणे''सोहमस्मिसएवाहमस्मी''त्यभ्यासादग्निपरत्वप्रतीतावपि''कंब्रह्मे''तिनिरवकाशोपक्रमेण विष्णुपरत्वं ''सुखविशिष्टे''तिगुणसूत्रेणोच्यते । तथा''श्रुतोपनिष''दितिगुणसूत्रे''अस्मद्विद्याआत्मविद्ये''तिविद्याशब्दाभ्यासेनाग्निपरत्वप्रतीतावपि''स एनान्ब्रह्मगमयती''त्युपसंहारेणनिरवकाशेनविष्णुपरत्वमित्यादिबोध्यं । यद्वोपक्रमादीनांश्रुत्यादिभिस्सहयथायोगंसमतयाप्रतीतस्यद्वयस्यविरोधेसावकाशंबाध्यमिति । यथाभूमनये ''प्राणोवाआशायाभूया''नित्युपक्रमेणसह''विष्णुर्वैदेवेभ्योभूयांस्तस्माद्भूयान्नामे''तिसाभ्यासत्वेनसमतयाप्रतीतायाःसमाख्यायाःनिरवकाशत्वेनसावकाशप्राणोपक्रमस्यबाधः । यथावाऽनुकृतिनये ''नतत्रसूर्योभाती''त्यादेःसूर्याद्यप्रकाश्यत्वबोधकोपसंहारस्यतत्त्वेनप्रबलस्य''कथंनुतद्विजानीया''मितिपूर्ववाक्यस्थतच्छब्दस्य''परमंसुख''मितिप्रकृतज्ञानिसुखपरामर्शिनःश्रुतित्वेनप्रबलस्यसाम्येप्युपसंहारेणनिरवकाशेनतदितिसर्वनामश्रुतेःस्वारस्यभंगउक्तः । उक्तंच''बलवानुपसंहारस्तद्दृश्यातदितिश्रुतिः । कथंपश्येत्तद्विरुद्धपूर्ववाक्यावबोधित''मित्याद्यूह्यं । केचित्तूपक्रमादीत्यस्य यत्रवाक्येउपक्रमद्वयस्योपसंहारादिद्वयस्यवासमस्यविरोधेसावकाशंबाध्यमित्यर्थः । यथा''प्राणोब्रह्मकंब्रह्मखंब्रह्मे''तिप्राणब्रह्मणोरुपक्रमेपिश्रुतिलिंगादिना निरवकाशब्रह्मोपक्रमेणप्राणस्यनप्रकरणप्रतिपाद्यत्वमित्यादिध्येयमित्या

गु० ननुसावकाशनिरवकाशभावेनैवरूपेणवैषम्यापत्त्यासाम्यमेवानुपपन्नं तत्कथं''साम्येनिरवकाशेनसावकाशंबाध्यत''इतिटीकायामुक्तमित्यतोवाह ॥ उपक्रमादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वुः । "स्वभावदुर्बलेने"त्यादिटीकांव्याचष्टे ॥ **उपजीवकत्वादिनेति** ॥ यथांतरधिकरणादौस्वभावप्रबलायाइंद्रादिश्रुतेर्लिंगतयास्वभावदु
र्बलेनापिसमुद्रांतस्थत्वलिंगेननिरवकाशेनबाधइतिभावः । "एवमेकेने"त्यादिटीकांव्याचष्टे ॥ **एवमिति** ॥ यथा"शब्दादेवप्रमित"इत्यत्र
वायुप्रापकाणांप्राणव्यवस्थापकत्वमध्यमत्वसर्वदेवोपास्यत्वलिंगानांसावकाशानामेकेननिरवकाशेनवामनशब्देनबाधः यथावा"कंपना"दित्यत्र
कंपकत्वेनैकेनलिंगेनानेकवज्रश्रुत्युद्यतत्वलिंगयोर्बाधइतिभावः । "ननुसावकाशत्वे"त्यादिटीकांव्याचष्टे ॥ **सावकाशत्वंचेति** ॥ सावका

**उपजीवकत्वादिनास्वभावदुर्बलेनापिनिरवकाशेनोपजीव्यत्वादिनास्वभावप्रबलस्यापिसावकाशस्यबाधः । एवमेकेननि
रवकाशेनसावकाशानेकबाधः । सावकाशत्वंचनलक्षणादिनाऽर्थांतरपरताकल्पनार्हत्वं । येनोपक्रमादेर्दुर्बलस्यापिप्र
माणत्वेनसावकाशत्वनियमात्तदेवबाध्यत्वेतंत्रं नतुस्वभावदुर्बलत्वंनामास्तीतिस्यात् । किंतुस्वतएवार्थांतरवाचित्वं ।**

गु० **द्वयस्येति** ॥ तथाचोपक्रमद्वयस्याप्युपक्रमत्वेनरूपेणोपसंहारद्वयस्योपसंहारत्वेनरूपेणसाम्येपि सावकाशनिरवकाशरूपेणबाध्यबाधकभावउपपन्नइतिभावः । "स्व
भावदुर्बलेने"त्यादिटीकानुपपन्ना । स्वभावदुर्बलस्यनिरवकाशत्वायोगात् । निरवकाशत्वेस्वभावदुर्बलत्वायोगात् । एवंस्वभावप्रबलस्यसावकाशत्वमनुपपन्नं । सावका
शत्वेवास्वभावप्रबलत्वमनुपपन्नमित्यतोव्याख्याति ॥ **उपजीवकत्वादिनेति** ॥ तथाचनिरवकाशस्याप्युपजीवकत्वेनरूपेणस्वभावदौर्बल्यं सावकाशस्याप्युपजी
व्यत्वेनरूपेणस्वभावप्राबल्यमुपपद्यतइत्यर्थः । "एवमेकेनानेकेषांबाध"इतिटीका । तत्रैकेनसावकाशेनानेकेषांनिरवकाशानांबाधइतिभाति । तच्चायुक्तं । सावका
शस्यनिरवकाशबाधकत्वासंभवात् । अतोव्याचष्टे ॥ **एवमिति** ॥ ननुसावकाशत्वस्यस्वभावदुर्बलत्वस्यचैकत्वात्सावकाशत्वमेवबाध्यत्वेतंत्रमस्तु । निरवकाश
विरोधेनलक्षणयार्थांतरपरत्वस्यैवसावकाशशब्दार्थत्वात् । तथाचनातिरिक्तस्वभावदुर्बलत्वमपीत्यतआह ॥ **सावकाशत्वंचेति** ॥ तस्यप्रबलविरोधत्वेस

प्र० शत्वनियमात् अर्थांतरपरताकल्पननियमादित्यर्थः । "स्वभावप्रबलेनदुर्बलस्यबाधनेर्थांतरकल्पन"मितिटीकावाक्यंविवृण्वंस्तदुपलक्षणमि
तिभावेनाह ॥ **यथाचेति** ॥ **एवंविधेति** ॥ स्वतएवार्थांतरवाचित्वरूपेत्यर्थः । भेदग्राहिणास्वभावप्रबलेनसाक्षिणाविरोधे"अहंब्रह्मास्मी"
त्यादेरुपजीवकत्वेनदुर्बलस्यांतर्यामिपरत्वकल्पनमुदाहरणमितिभावः ॥ **एवमिति** ॥ आकाशाधिकरणेस्वभावप्रबलाकाशश्रुतेर्निरवकाशब
लवल्लिंगविरोधेनार्थांतरकल्पनादितिभावः । "अत्रश्रुत्यादिषट्कंचग्राह्य"मितिटीकार्थमाह ॥ **इयंचेति** ॥ एतदपि"शब्दादेवे"त्यत्रोपपाद

**यथाचैवंविधसावकाशत्वशून्यस्यापिस्वभावदुर्बलस्यस्वभावबलवद्विरोधेर्थांतरकल्पना एवंस्वभावप्रबलस्यनिरवका
शत्वनियमाभावोप्यूह्यः । इयंचबाधव्यवस्थानकेवलमुपक्रमादौ । किंतुश्रुतिलिंगादौचद्रष्टव्या । श्रुत्यादिकमपि
श्रुत्याद्यविरुद्धेलिंगादौप्रामाण्यादिहग्राह्यमिति । (श्रुत्यादिक्रमेपिश्रुत्याद्यविरुद्धेलिंगादौप्रामाण्यादिग्राह्यमिति ।)**

गु० तिलक्षणयाअर्थांतरपरताकल्पनारूपत्वेनलक्षणादिनाविनैवक्लृप्तार्थांतरपरस्वरूपसावकाशत्वापेक्षयाभिन्नत्वेनस्वभावदुर्बलत्वंपृथग्वक्तव्यमितितदुभयंबाध्यत्वेतंत्रमि
तिभावः । अस्तुस्वभावदुर्बलस्यसावकाशाद्भेदः । तथापि यत्स्वभावप्रबलंतन्निरवकाशमेवेतिनियमान्निरवकाशे नस्वभावदुर्बलेनापिस्वभावप्रबलस्यसावकाशस्यबाधक
थनमयुक्तमित्यतआह ॥ **यथाचेति** ॥ तथाचस्वतएवार्थांतरवाचित्वरूपस्यसावकाशत्वस्यस्वभावप्रबलेपिसत्त्ववत्स्वभावदुर्बलेपिस्वार्थत्यागेप्रकारांतरेणाघटमानत्व
रूपनिरवकाशत्वसत्त्वेनतेनप्रबलस्यापिबाधोपपत्तेर्नटीकोक्तिरयुक्तेतिभावः । उक्तन्यायमन्यत्रातिदिशति ॥ **इयंचेति** ॥ कथमर्थलिंगानांतात्पर्यलिंगेषुग्रहणमित्य
तोवाह ॥ **इयंचेति** ॥ तथाच अत्र उक्तव्यवस्थायां इति टीकास्थात्रेतिशब्दोव्याख्यातइतिज्ञेयं । श्रुत्यादिषट्कंचात्रग्राह्यमितिटीकायांतद्ग्रहणेप्रयोजनानुक्तेस्त
द्ग्रहणंव्यर्थमित्यतोवाह ॥ **इयंचेति** ॥ श्रुत्यादिकमपिग्राह्यमितिप्रथममन्वयः । तत्रहेतुमाह ॥ **श्रुत्याद्यविरुद्धइति** ॥ क्रमेपीतिपाठःसाधुः । एवंचोपपत्तेः

SGDF
Sri Gargeshwari Digital Foundation

प्र० यिष्यतइतिभावः । "सूत्रंयोजयती"त्यादिटीकार्थंनिष्कृष्याह ॥ **सूत्राक्षरार्थस्त्विति** ॥ **ब्रह्मैवेति** ॥ तुरेवार्थः । पूर्वसूत्राच्छास्त्रयोनिप

सूत्राक्षरार्थस्तु । तत्तुब्रह्मैवशास्त्रयोनिसावकाशत्वनिरवकाशत्वादिनाविचारितस्वरूपसम्यक्त्वयुक्तादन्वीयतेनेनेत्यन्वयशब्दवाच्यादुपपत्त्यादोर्लिंगादिति ।

गु० सर्वमूलत्ववच्छ्रुत्यादावपिश्रुतेर्लिंगमूलत्वमुक्तमितिज्ञेयं । अत्रटीकायां"अन्यथावाक्याप्रामाण्यापत्ते"रितिवाक्यस्यस्वभावदुर्बलप्रबलयोःसावकाशत्वनिरवकाशत्व नियमांगीकारेणोभयोरपिनिरवकाशत्वांगीकारेसावकाशत्वांगीकारेवापरस्यसत्प्रतिपक्षत्वेनवाक्यतात्पर्यनिर्णयानुपपत्त्योभयोरपिबाधेनवाक्यतात्पर्यासिद्ध्यावाक्यार्थद्वैरूप्यापत्त्यावैरूप्यापत्त्यावावाक्याप्रामाण्यापत्तेरित्यर्थः । ननुस्वभावदुर्बलेनस्वभावप्रबलस्यनबाधः । नचातएवोपजीवकत्वादिनास्वभावदुर्बलेनापिनिरवकाशेनोपजीव्यत्वादिनास्वभावप्रबलस्यसावकाशस्यबाधइत्युक्तमितिवाच्यं । निरवकाशत्वांगीकारेतस्यस्वभावदुर्बलत्वासंभवात् । निरवकाशत्वस्यस्वभावप्राबल्यरूपत्वात् । "तयोःस्वभावोबलवानुपजीव्यादिकश्चस"इत्यादौमूलग्रंथे"आदिशब्देननिरवकाशत्वंग्राह्य"मितिटीकायांचोपजीव्यत्ववन्निरवकाशत्वस्यापिस्वभावत्वोक्तेः । अन्यथातद्विरोधइतिचेत् अत्राहुः । ननिरवकाशत्वस्यस्वभावप्रबलत्वसिद्धिः । बहुत्वप्रयुक्तप्राबल्यस्ययावताप्राबल्येनबाधः तस्यसर्वस्यापिस्वभावप्राबल्यरूपत्वविवक्षयोपजीव्यत्वप्रयुक्तप्राबल्यस्येवनिरवकाशत्वप्रयुक्तप्राबलस्यापितद्बाधकत्वात्स्वभावप्रबलत्वोक्तिर्युज्यते । नचबहुत्वप्राबल्यपरिपंथित्वेनोपजीव्यत्वादेरेकीकृत्योक्तिर्व्यर्थेतिवाच्यं । द्विविधंबलवत्त्वंचेत्युक्तद्वैविध्योपपादनार्थंतथाविवक्षायाःआवश्यकत्वात् । अन्यथात्रैविध्यापातेनद्वैविध्यकथनमनुपपन्नंस्यात् । तथाचोदाहृतवाक्यादेरन्यथासिद्धत्वात्स्वभावदुर्बलस्यापिनिरवकाशत्वोक्तेर्नविरोधइति । ननु"तत्तुसमन्वया"दित्यत्रतच्छब्दस्यपक्षपरामर्शकत्वेसाध्याभावात्साध्यपरामर्शेचपक्षाभावादनन्वयः । समन्वयशब्दस्यतत्परत्वरूपसंबंधार्थत्वात् ब्रह्म शास्त्रतात्पर्यविषयः तात्पर्यरूपसंबंधादिति साध्याविशेषःस्यादित्यतःसूत्राक्षरार्थमाह ॥ **सूत्राक्षरार्थस्त्विति** ॥ तथा चतच्छब्दोव्यवहितजन्मादिसूत्रोक्तलक्षणलक्षितब्रह्मस्वरूपपक्षपरामर्शकोऽव्यवहितशास्त्रयोनिसूत्रोक्तशास्त्रयोनित्वरूपसाध्यपरामर्शकश्चेत्युभयलाभसंभवान्नानन्वयः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० दमनुवर्ततइतिभावः । शास्त्रतात्पर्यविषयइत्यर्थः । उत्तराधिकरणसंगत्यर्थमर्थांतरमप्यत्रानुसंधेयमितिभावेनाह ॥ **सुधायांत्विति** ॥ **सर्वेति** ॥ अनेनसंशब्दस्यकात्स्न्र्यमुख्यत्वोभयार्थस्यावृत्तिस्तस्यशास्त्रपदेनान्वयपदेनचान्वयइतिसूचितं । यत्त्वत्र एवंशोधितोपक्रमादिनावेदस्य विष्णौतात्पर्यमिव शैवाद्यागमेनवातदुपदर्शितोपक्रमादिनावाशिवादावपितात्पर्यमस्तु । त्वन्मतेश्रुतेरनेकार्थसहिष्णुत्वादित्यादिकस्यचिद्दुर्भाषणं तत्तुविष्णूत्कर्षएवमहातात्पर्यमित्येवंरूपानेकश्रुतिस्मृतियुक्तिविरुद्धत्वादेकवाक्यताभंगप्रसंगाच्चापेशलं । विस्तरस्तुगुरुपादकृतकंटकोद्धारेबोध्यः । शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयंब्रह्मभूतमभिदधतांवेदांतानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेरित्यादिभामत्युक्तमनुवदति ॥ **सिद्धेति** ॥ **सापेक्षत्वेति** ॥ सिद्धार्थत्वेचप्रत्यक्षादिभिःसमानविषयतयालौकिकवाक्यवत्तदर्थानुवादकत्वेनप्रत्यक्षादिसापेक्षत्वेनाप्रामाण्य

सुधायांतुनकेवलमुपपत्त्यादिकंसमन्वयशब्दार्थः । किंतुतद्धेतुकशास्त्रजन्यप्रमागोचरत्वरूपशास्त्रयोनित्वेहेतुभूतःसर्वशास्त्रस्यसम्यग्वचनवृत्त्यातत्परत्वरूपसंबंधोपीत्युक्तं । अत्रपरैर्वेदांताब्रह्मणिनप्रमाणं सिद्धवस्तुबोधनेप्रवृत्त्याद्यभावेनफलाभावात्सापेक्षत्वप्रसंगाच्चेतिप्राप्ते

गु० तुशब्दएवार्थःपक्षेणान्वेति । समन्वयशब्दस्तूपपत्त्यादिरूपतात्पर्यलिंगपरइतिसाध्याविशिष्टंचनेतिभावः । ननुतर्हिसुधायांतत्परत्वरूपसंबंधस्यहेतूकरणात्तत्रसाध्यावैशिष्ट्यंस्यादित्यतआह ॥ **सुधायांत्विति** ॥ तथाचहेतुसाध्ययोर्भेदान्नतत्रापिसाध्याविशेषइतिभावः । परोक्ताधिकरणरचनायाःस्वोक्ताधिकरणरचनयासाम्यप्रतीतिनिरासार्थंतामनूद्यदूषयति ॥ **अत्रपरैरिति** ॥ **सापेक्षत्वप्रसंगाच्चेति** ॥ प्रमाणांतरजन्यज्ञप्तिविषयत्वं तादृशार्थबोधनेप्रमाणांतरापेक्षायांसापेक्षत्वमितिभावः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रसंगादित्यर्थः । प्राप्तब्रह्मैक्यप्राप्तिःकल्पितानर्थहानिश्चसिद्धब्रह्मबोधनेफलमितितयोःफलत्वंलोकरीत्याभामत्युक्तमक्षरशोनुवदति ॥ **द्विविधमिति** ॥ अहीनं अत्यक्तं विद्यमानमितियावत् । जिहासति त्यक्तुमिच्छति ॥ **वलयितेति** ॥ वलयितोवेष्टितश्चरणोयेनासौवलयितचरणः । "वेष्टितंस्याद्वलयित"मित्यमरः । हीनं त्यक्तं आरोपितमितियावत् । यत्तुसापेक्षत्वप्रसंगादिति तन्नेत्याह ॥ **सिद्धस्येति** ॥ परिनिष्ठितस्येत्यर्थः । परैः सिद्धांतयित्वा इत्युक्तमित्यन्वयः । पूर्वपक्षोद्विविधः । फलाभावादप्रामाण्यमित्येकः । सापेक्षतापत्त्याऽप्रामाण्यमि

"द्विविधंहीप्सितं । किंचिदप्राप्तं । यथाग्रामादि । किंचिच्चप्राप्तमपिविभ्रमवशादप्राप्तमित्यवगतं । यथाकंठमण्यादिकं । एवंजिहासितंद्विविधं । किंचिदहीनंजिहासति । यथावलयितचरणंफणिनं । किंचिच्चहीनमेव । यथाचरणाभरणनूपुरेआरोपितंफणिनं । तत्रब्रह्मात्मैक्यज्ञानात्प्राप्तब्रह्मप्राप्तिःकल्पितत्वेननित्यहीनसंसारहानिश्चसंभवतीतिफलवत्त्वं । सिद्धस्यापिब्रह्मणोमानांतरागोचरत्वान्नसापेक्षत्वंचे"तिसिद्धांतयित्वा"समन्वयश्चलक्षणयाऽखंडार्थपरत्वं । ततश्चतद्ब्रह्म शास्त्रप्रतिपाद्यं समन्वयादितिसूत्रार्थ"इत्युक्तं । तत्रपूर्वपक्षोनिर्दलः ।

गु० नप्रवृत्तिनिवृत्त्योःफलत्वं किंत्वनिष्टनिवृत्तीष्टप्राप्त्योरेवफलत्वं तयोश्चप्रकृतेसद्भावान्नफलाभावइतिभावेनेष्टानिष्टयोर्विभागमाह ॥ **द्विविधंहीत्यादिना** ॥ अहीनं विद्यमानं ॥ **सिद्धस्यापीति** ॥ तथाचनप्रमाणांतरजन्यज्ञप्तिविषयत्वंसिद्धत्वं किंतुस्वतएवनिष्पन्नत्वमितिभावः । अस्त्वेवमधिकरणरचना तथापिसूत्रार्थःकथमित्यतआह ॥ **समन्वयश्चेति** ॥ **समन्वयादिति** ॥ लक्षणयाऽखंडार्थत्वपरवेदतात्पर्यविषयत्वादित्यर्थः ॥ **आद्यसूत्रएवेति** ॥ "निश्चितेजिज्ञासायोगात्संदि

प्र० त्यपरः । अत्राद्यंनिराह ॥ **निष्प्रयोजनत्वेति** ॥ जिज्ञासाशब्दस्यमुख्यवृत्त्याज्ञानेच्छापरत्वमुपेत्य"ज्ञातुमिच्छाहिसंदिग्धेविषयेनिर्णयाय भवती"तिविषयप्रयोजनसूचनस्याभ्युपगमादितिभावः । द्वितीयंनिराह ॥ **लौकिकेति** ॥ संकेतग्रहणादिसापेक्षत्वेनसिद्धार्थकवक्तस्याप्यप्रामाण्यंस्यादित्यर्थः । पौरुषेयस्यवक्तृज्ञानपूर्वकत्वेनतत्सापेक्षत्वात्पौरुषेयत्वमेवप्रयोजकं । नतुसिद्धार्थपरत्वं । व्यभिचारात् । वेदेचत

निष्प्रयोजनत्वशंकायास्त्वन्मतेआद्यसूत्रएवजिज्ञासाशब्देनपरिहृतत्वात् । लौकिकार्थपरवाक्येपिसापेक्षत्वदर्शनेनपौरुषेयत्वस्यैवसापेक्षत्वप्रयोजकत्वाच्च । सिद्धांतोप्ययुक्तः । तथाहि ।

गु० ग्धत्वेनब्रह्मैवविषयो ज्ञानमेवेच्छाविषयत्वेनप्रयोजनमिति जिज्ञासापदेनैवविषयप्रयोजनेसूचिते"इतिभामत्यां"अथशब्देनाधिकारीजिज्ञासापदेनेच्छाविषयत्वेनब्रह्मज्ञानंप्रयोजनमर्थादधिकारिविशेषणंमोक्षोब्रह्मज्ञानफलंविषयश्चसूचित"इत्यादिविवरणेतथोक्तत्वादित्यर्थः । किंचप्रमाणांतरसिद्धत्वेपिनसापेक्षत्वं । पौरुषेयत्वस्यैवप्रयोजकत्वादित्याह ॥ **लौकिकेति** ॥ सिद्धार्थबोधकत्वेसापेक्षत्वापादनमयुक्तं । स्वाभावव्याप्याभावप्रतियोगिनएवस्वप्रयोजकत्वस्यधूमप्रयोजकेवन्ह्यादौदृष्टत्वात् । प्रयोजकाभावेनप्रयोज्याभावस्यापादनीयत्वात् । प्रकृतेचतदभावात् व्याप्यैनैवव्यापकस्यापादनीयत्वात्प्रकृतेचसिद्धबोधकत्वेनिरपेक्षत्वेबाधकाभावोनाप्रयोजकतया व्याप्तेरेवाभावात् सामग्र्याःकार्यप्रयोजकत्वात्सामग्र्याकार्यापादनवत्प्रयोजकेनप्रयोज्यस्यापादनीयत्वेपरिशेषाद्वाच्ये लौकिककार्यपरवाक्येऽसत्यपिसिद्धबोधकत्वेसापेक्षत्वदर्शनेनतदप्रयोजकत्वान्नप्रयोजकेनप्रयोज्यस्यापादनमपियुक्तमितिभावः । ननुवेदस्यसिद्धार्थबोधकत्वेमानांतरावगतार्थवाक्यरचनायाएवापत्त्याऽपौरुषेयत्वाभावस्यैवापाद्यमानत्वात्कथंपूर्वपक्षस्यनिर्दलत्वमितिचेन्न । सिद्धार्थबोधकत्वाभावेपिलौकिककार्यपरवाक्येपौरुषेयत्वस्यदर्शनेनसिद्धार्थबोधकत्वेऽस्यापिपौरुषेयत्वापादनासंभवाद्विपक्षेबाधकशून्यत्वेनाप्रयोजकतयाधूमेनवह्नेरिवसिद्धार्थबोधकत्वेनपौरुषेयत्वापादनस्यायुक्तत्वादितिभावः । ननुनिष्फलत्वेनपूर्वपक्षितेफलवत्त्वंसिद्धांतितं । तथा

SGDF Sri Gargeshwari Digital Foundation

प्र० न्नास्ति । अतएवभामत्यां ''किंपुंवाक्यानांसापेक्षताकिंभूतार्थत्वेनाहोस्वित्पौरुषेयत्वेने'' त्यादिनाद्यंदूषयित्वाद्वितीयएवस्थापितइतिभावः । ''निर्विशेषेस्वयंभाते सर्वधर्मोज्झितस्यास्ये''त्याद्यनुव्याख्यानंहृदिकृत्वाह ॥ **स्वप्रभत्वादिति** ॥ स्वप्रकाशत्वादित्यर्थः । ननु अवाच्यस्यापि लक्षणयाश्रुतिगोचरतास्यादितिचेन्न । सर्वथावाच्यत्वहीनस्यलक्ष्यत्वमपिनेत्युत्तराधिकरणेवक्ष्यमाणत्वादितिभावः । चिन्मात्रस्यस्वप्रभत्वेपि धर्मांतरेणसंदेहःस्यादित्यतआह ॥ **निर्विशेषइति** ॥ श्रुतिसमन्वयरूपफलायोगमुक्त्वातत्फलकमीमांसारंभोप्ययुक्तइत्याह ॥ **एवमिति** ॥

स्वप्रभत्वादसंदिग्धेऽवाच्यत्वाच्छ्रुत्यगोचरे । निर्विशेषेचचिन्मात्रेकथंश्रुतिसमन्वयः । एवंसंदिग्धस्यैवविषयत्वात् सामान्यज्ञानविशेषाज्ञाननिबंधनस्यचसंदेहस्यनिर्विशेषेऽसंभवात् पूर्वपक्षसिद्धांतयोश्चसंदेहकोट्यन्यतरकोट्यवलंबित्वात् फलस्यचैककोटिनिर्णयाधीनत्वात् निर्विशेषात्मनिविषयसंशयपूर्वपक्षसिद्धांतप्रयोजनाख्यपंचकरूपाधिकरणासंभवोद्रष्टव्यः ।

गु० चफलवत्त्वमेवादौदूषणीयं । सूत्रार्थदूषणमादावयुक्तमित्यतःपरोक्तसिद्धांतस्यसूत्रानारूढत्वमयुक्तत्वंचवक्तुंसूत्रार्थंदूषयति ॥ **तथाहीति** ॥ एवंहिपरोक्तमनुमानं ब्रह्म शास्त्रप्रतिपाद्यंसमन्वयादिति । अत्रलक्षणयावेदतात्पर्यविषयत्वादितिहेत्वर्थोभिप्रेतः । सचायुक्तः । अपूर्वार्थेवेदतात्पर्यंवक्तव्यं । ब्रह्मणःस्वप्रकाशत्वेनासंदिग्धत्वान्नतत्रवेदतात्पर्यंयुक्तमित्याह ॥ **स्वप्रभत्वादिति** ॥ ननुस्वप्रकाशत्वेनस्वरूपतःसिद्धत्वेपिविशेषतःसंदिग्धत्वाद्युक्तंतत्रशास्त्रतात्पर्यमित्यतउक्तं॥**निर्विशेषइति**॥ तथाचविशेषाभावाद्विशेषतःसंदिग्धत्वंनयुक्तमितिभावः । ननुतर्हिमास्तुशक्त्यावेदतात्पर्यविषयत्वं लक्षणयातुभविष्यतीत्यतआह ॥ **अवाच्यत्वादिति** ॥ तथाचोत्तराधिकरणेवाच्यत्वलक्ष्यत्वयोःप्रयोज्यप्रयोजकभावस्यवक्ष्यमाणत्वाद्वाच्यत्वाभावेलक्ष्यत्वस्यैवाभावेनलक्षणयापिवेदतात्पर्यविषयत्वासंभवेनहेत्वसिद्धिस्तदवस्थेतिभावः । किंचत्वयानिर्विशेषत्वांगीकारेणाधिकरणारंभप्रयोजकविषयादिपंचकासंभवेनाधिकरणारंभोनयुक्तइतिभावेनाह ॥ **एवमिति** ॥ नन्वत्रवेदांतानामेवविषयत्वात्प्रा

SGDF Sri Gargeshwari Digital Foundation

प्र० चिन्मात्रेसमन्वयइत्यस्यैतत्सूत्रार्थत्वेपूर्वोत्तरासंगतिश्चस्यादितिभावेनाह ॥ **अपिचेति** ॥ परभाष्येहि“किंतद्ब्रह्मप्रसिद्धमप्रसिद्धंवे”त्यादि नाशंकित्वा“सर्वोह्यात्मास्तित्वंप्रत्येति । ननाहमस्मीति । यदिहिनात्मास्तित्वप्रसिद्धिःस्यात्सर्वोहिलोकोनाहमस्मीतिप्रतीया”दित्यादिनाजिज्ञासोपयुक्ततयाऽहमर्थेप्रसिद्धिःप्रतिपादितेत्यर्थः । द्वितीयेचजन्मादिसूत्रे“अस्यजगतोजन्मस्थितिभंगंयतःसर्वज्ञात्सर्वशक्तेःकारणाद्भवतितद्ब्रह्मे”तिपरभाष्योक्तेरीश्वरस्यविशिष्टस्यजन्मादिहेतुत्वमहमर्थेऽविद्यमानंलक्षणत्वेनोक्तमित्यर्थः ॥ **तस्मिन्नेवेति** ॥ निर्विशेषएवेत्यर्थः । अंतरित्यादौ“अंतस्तद्धर्मे”त्यादावित्यर्थः । कदर्थिते कुत्सितार्थतयाकृते । “कोःकत्तत्पुरुषेची”तिकदादेशः । यदपिप्राप्तप्राप्तिःकंठमण्यादिवत्फल

अपिच । आद्यसूत्रेऽहमर्थेहिप्रसिद्धिःप्रतिपादिता । जिज्ञासार्थेद्वितीयेहिजगज्जन्मादिहेतुता ॥ १ ॥ अविद्यमानाऽहमर्थेलक्षणत्वेनकीर्तिता । ईश्वरस्यतृतीयेतुनिर्विशेषप्रमाणता ॥ २ ॥ शास्त्रस्योक्ताचतुर्थेचतस्मिन्नेवसमन्वयः । प्रतिज्ञातोंतरित्यादौसविशेषंतुकथ्यते ॥ ३ ॥ ब्रह्मेतिमायिनांपक्षस्तत्रकिंकेनसंगतं । तत्वविद्वेषमात्रेणश्रुतिसूत्रेकदर्थिते ॥४॥

गु० माण्याप्रामाण्येएवकोटी । एवंचान्यतरकोव्यवलंबिपूर्वपक्षसिद्धांतयोःसंभवेनान्यतरकोटिनिर्णयाधीनफलस्यापिसंभवेनाधिकरणारंभप्रयोजकपंचकसंभवेनाधिकरणारंभसंभवात्कथमेतदितिचेन्न । वेदांतानामेवविषयत्वेसिद्धांतेब्रह्मणःशास्त्रविषयत्वसमर्थनमसंगतंस्यात् । तथाचब्रह्मैवविषयः शास्त्रप्रतिपाद्यत्वतदप्रतिपाद्यत्वेएवकोटी । एवंचसंदेहान्यतरकोव्यवलंबिपूर्वपक्षसिद्धांतौशास्त्रप्रतिपाद्यत्वनिर्णयाधीनंफलंवक्तव्यं । निर्विशेषत्वांगीकारात्किमपीदंनसंभवतीत्यधिकरणानारंभसंभवस्तदवस्थएवेति भावः । नकेवलमधिकरणानारंभोपितुपूर्वोत्तरासंगतंचैतदित्याह ॥ **अपिचेति** ॥ तथाचयत्रैवसामान्यप्रतिपत्तिःविशेषाप्रतिपत्तिस्तस्यैवलक्षणंवक्तव्यं । तत्रैवचप्रमाणंवक्तव्यं । समन्वयश्चप्रतिज्ञातव्यः । उपपादनंचतत्रैवकर्तव्यं । नचैवंप्रतिपादनंक्रियतइत्यसंगतिरितिभावः । कंठमणिदृष्टांतेनप्राप्तप्राप्तिःनित्यहीनसंसारनिवृ

SGDF
Sri Gargeshwari Digital Foundation

प्र० मितितदपिविषममित्याह ॥ **किंचेति** ॥ तदुपपादयति ॥ **नहीत्यादिना** ॥ अस्तुतर्हिप्रकृतेप्येवमित्यतआह ॥ **नचेति** ॥ सप्रयोजनता ब्रह्मात्म्यैक्यबोधकवेदांतानामितिशेषः । सूत्रार्थमपिदूषयति ॥ **किंचेति** ॥ **तदुक्तमिति** ॥ लाक्षणिकत्वेसंशब्दार्थयुक्तान्वयायोगइत्येत दीक्षत्यधिकरणानुव्याख्यानउक्तमित्यर्थः । अतएवतत्रनिराकृतत्वादिहटीकादौनतन्निरासेपराक्रांतं । शिष्यहितायतदस्माभिरत्रैवप्रपंचितमि

किंच कंठमण्युपदेशस्यप्राप्तमणिप्राप्तिर्नफलं । किंतुप्राप्तिज्ञानजन्यसुखस्य । वस्तुतःप्रागप्राप्तस्यप्राप्तिः मण्यप्राप्तिभ्रमादिजन्यस्यदुःखस्यवस्तुतःप्रागनिवृत्तस्यनिवृत्तिर्वाफलं । एवंचरणाभरणमिदंनसर्पइत्युपदेशस्यापिननित्यनिवृत्तसर्पनिवृत्तिः फलं । किंत्वाभरणत्वज्ञानजन्यसुखस्यवस्तुतःप्रागप्राप्तस्यप्राप्तिः सर्पभ्रमजन्यदुःखस्यवस्तुतःप्रागनिवृत्तस्यनिवृत्तिर्वा । नह्युपदेशेनमणिःप्राप्तःसर्पोनिवृत्तइत्यनुभवः । किंतुप्राप्तिर्जाताभ्रमोनिवृत्तइति । नचप्रकृतेप्राप्तस्वरूपसुखादन्यत्प्राप्यंसुखं नित्यनिवृत्ताविद्याभ्रमदुःखादेरन्यन्निवर्त्यंवास्ति । येनसप्रयोजनतास्यात् । किंचपूर्ववादिनाफलाभावादिनातात्पर्येआक्षिप्ते सिद्धांतसूत्रेफलादिकंतात्पर्येचानुपपाद्यप्रामाण्येतात्पर्येहेतूकर्तुमयुक्तं । लक्षणायाअमुख्यत्वेनसौत्रसंशब्दार्थत्वायोगश्च । तदुक्तमनुव्याख्याने "कथंचलक्षणावादीब्रूयाद्ब्रह्मसमन्वयं । योसौशब्दस्यमुख्यार्थस्तत्रैवस्यात्समन्वय"इति ।

गु० त्तिश्चफलमित्युक्तं । तद्दूषयति ॥ **किंचेति** ॥ ननुमणिप्राप्तिःसर्पनिवृत्तिरेवफलंकिंनस्यादित्यतआह ॥ **नहीति** ॥ ननुदृष्टांतइवप्रकृतेपिसुखप्राप्त्यादिकंफलंकिंनस्यादित्यतआह ॥ **नचेति** ॥ किंचफलाभावआक्षिप्तेसिद्धांतसूत्रेफलादिकमेवोपपादनीयं । नचतदुपपाद्यते । अतोऽधिकरणमेतदयुक्तमित्याह ॥ **किंचेति** ॥ ॥ २०३ ॥

प्र० तिभावः । रामानुजमतंनिराह ॥ **केचित्त्विति** ॥ **फलदर्शनादिति** ॥ पुत्रजन्मश्रवणजनितसुखस्यफलत्वादितिभावः ॥ **शास्त्रयोनित्वमिति** ॥ आद्यसूत्रात्षष्ठ्यंतंब्रह्मपदमनुवर्त्ययोज्यमितिभावः । एवंतर्ह्यस्याधिकरणद्वयव्यवधानंनस्यादित्याह ॥ **तन्नेति** ॥ **तदुपपादकेति** ॥ सर्ववाक्यविचारोपपादकेतिहेतुगर्भविशेषणं ॥ **त्वन्मतइति** ॥ एतच्चपूर्वाधिकरणद्वयेस्पष्टं । सूत्रार्थमपिनिराचिकीर्षुःसमन्वयशब्दार्थंदूषयति ॥ **किंचेति** ॥ **सैवेति** ॥ अत्रहेतुत्वेनोक्तस्यैवसमन्वयाध्यायउपपादयिष्यमाणत्वादितिभावः । तच्छब्दस्यशास्त्रयोनित्वप

केचित्तुफलाभावापातात्सिद्धपरत्वंनेतिप्राप्ते पुत्रस्तेजातइत्यादौसिद्धपरत्वेपिफलदर्शनान्नदोषइतिसिद्धांतयित्वा "समन्वयश्चपुरुषार्थस्यब्रह्मणोभिधेयत्वेनसंबंधः । तथाचतच्छास्त्रयोनित्वंसमन्वया"दितिसूत्रार्थइत्याहुः । तन्न । फलसद्भावेनसिद्धपरसर्ववाक्यविचारोपपादकस्यास्यसिद्धेव्युत्पत्तिप्रतिपादनेन तदुपपादकाद्यसूत्रानंतर्यस्यैवयुक्तत्वात् । त्वन्मतेहिजन्मादिशास्त्रयोनिसूत्रेकारणवाक्यस्यैवविचारोपपादके । किंच समन्वयाध्यायेयातात्पर्यलिंगैर्ब्रह्मपरतोपपादयिष्यतेसैवेहसूत्रेसमन्वयशब्देननिर्देष्टव्या ।

गु० **लक्षणायाइति** ॥ वचनवृत्तिविषयस्यैवमुख्यत्वादितिभावः ॥ **अस्येति** ॥ समन्वयाधिकरणस्येत्यर्थः ॥ **तदुपपादकेति** ॥ सिद्धपरसर्ववाक्यविचारोपपादकेत्यर्थः । ननुजन्मादिशास्त्रयोनित्वसूत्रयोरपिवाक्यविचारोपपादकत्वान्मध्येऽनयोर्निवेशइत्यतआह ॥ **त्वन्मतइति** ॥ तथाचास्यसर्ववाक्यविचारोपपादकत्वादाद्यानंतर्यस्यादेवेतिभावः । नन्वस्यसर्ववाक्यविचारात्मकत्वात्तयोश्चकतिपयवाक्यविचारोपपादकत्वात्सूचीकटाहन्यायेनास्यत्रितयानंतर्यमित्यतआह ॥ **किंचेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० रत्नमयुक्तमित्याह ॥ यद्यपीति ॥ विधेयेति ॥ आनंदमयस्तद्ब्रह्मअंतस्तदित्यादिरूपेणेत्यर्थः ॥ अध्याहार्यइति ॥ तथाचानेकाध्याहार दोषःस्यादित्यर्थः । उपलक्षणमेतत् । समासनिर्दिष्टब्रह्मपदानुषंगश्चेतिध्येयं । चतुस्सूत्र्याइति "द्विगो" रितिङीप् । आद्येधिकरणेसिद्धेर्थेव्युत्पत्त्यभावात्वेदांतानांसिद्धेब्रह्मणिनप्रामाण्यमितिनतद्विचारारंभइत्युक्तं । द्वितीयेजन्मादिकंविशेषणतयाब्रह्मप्रत्याययत्युतोपलक्षणतया । नोभयथापि । अतस्तत्प्रतिपत्तेर्दुस्थतयानकारणवाक्यविचारारंभइति । तृतीयेजगत्कारणत्वस्याऽऽनुमानिकतयावेदांतानांतदनुवादित्वेननविचारारंभइति । अत्रतुसिद्धब्रह्मबोधकानांवेदांतानामफलत्वान्नविचारारंभइत्युक्तमित्यर्थः । एतानि चोद्यानि । सूत्रकारइतिशेषः ॥ ब्रह्मणइति ॥ स्वरूपसाधनफलजिज्ञासायाब्रह्मविचारत्वात्साधनफलविचाराध्यायद्वयइव स्वरूपविचारस्यलक्षणप्रमाणाभ्यांविनाऽयोगात्तद्विचा

यद्यपीहसूत्रेमन्मतेशास्त्रयोनीत्यनुषंजनीयं । त्वन्मतेतुन । तथापिमन्मतेतच्छब्देनप्रकृतब्रह्मपरामर्शात्तस्यानंदमयादिष्वनुषक्तस्याऽऽध्यायसमाप्तिविधेयसमर्पकतयान्वयः । त्वन्मतेतुशास्त्रयोनित्वपरामर्शादुत्तरसूत्रेषुब्रह्मशब्दोध्याहार्यःस्यात् । यच्चोक्तंचतुस्सूत्र्याःशास्त्रारंभसाधकत्वादुपोद्घातत्वं । यथोक्तं "व्युत्पत्त्यभावःप्रतिपत्तिदौस्थ्यमन्येनसिद्धत्वमथाफलत्वं । एतानिवैसूत्रचतुष्टयेनानारंभमूलानिनिराचकारे" ति । तदपिन । जन्मादिसूत्रेलक्षणोक्त्या शास्त्रयोनिसूत्रादौचप्रमाणाद्युक्त्या ब्रह्मणोविचार्यमाणत्वेनोपोद्घातत्वायोगात् । टीकाक्षरार्थस्तु ।

गु० अन्यथाध्यायशेषेणप्रपंच्यप्रपंचकभावोनस्यादितिभावः । सौत्रतच्छब्दस्यपक्षमात्रपरामर्शकत्वमित्यभिप्रेत्याह ॥ यद्यपीति ॥ परोक्तंचतुस्सूत्र्याउपोद्घातत्वंदूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ व्युत्पत्त्यभावइति ॥ कार्यएवशब्दानांव्युत्पत्तेःसिद्धेब्रह्मणिव्युत्पत्त्यसंभवंप्रथमेन नब्रह्मलक्षयितुंशक्यतइतिलक्षणाभावेनब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० रेणब्रह्मणोविचार्यमाणत्वादित्यर्थः ॥ यदत्रकश्चिदुपक्रमादिनाशिवएववेदांततात्पर्यावधारणमत्रप्रतिज्ञायतइत्याह तत्तुपूर्वाधिकरणोदाहृत वचनैः प्रत्यधिकरणंभाष्योक्तश्रुत्यादिभिः विष्णुपरोपक्रमादितात्पर्यलिंगैः विष्णावेवतात्पर्यावधारणोपपादनेन "मांविधत्तेऽभिधत्तेमा"मित्या दिस्मृत्याचविरुद्धत्वादपेशलंबोध्यं । एकत्रबहुवारोक्तादपिमुख्यस्यप्राबल्यादित्यत्रमुख्यपदार्थमाह ॥ **मुख्यस्येतीति** ॥ "एवंभूतायाअस्याः श्रुतेरित्यभिप्रायमहमेववेदे"त्यत्रव्यवहितान्वयप्रदर्शनेनाभिप्रायइतिहृदयशब्दार्थइतिसूचयन्नाह ॥ **भगवद्वाक्यइति** ॥ अनेनाहंशब्दार्थो भगवानित्युक्तंभवति ॥ ७ ॥ **समन्वयाधिकरणंसंपूर्णं** ॥ ४ ॥ ७ ॥

[११।२२] मुख्यस्येति । अप्राप्तस्येत्यर्थः । भगवद्वाक्ये इत्यहमित्यत्रत्यस्येतिशब्दस्यहृदयमित्यने नान्वयइत्याह । [१२।७] इत्यभिप्रायमिति ॥ ७ ॥ समन्वयाधिकरणंसंपूर्णं ॥ ४ ॥ ७ ॥

गु० प्रतिपत्त्यभावंद्वितीयेन अनुमानेनसिद्धत्वंतृतीयेन फलाभावंशास्त्रानारंभणीयत्वप्रतिपादकंचतुर्थेनसूत्रेणनिराचकारेत्यर्थः ॥ ७ ॥ **इतिसमन्वयाधिकरणंसंपूर्णं** ॥ ४ ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐईक्षतेर्नाशब्दंॐ ॥ पूर्वाधिकरणेहिपरमतेऽधिकरणानामसांगत्यमुक्तं । नैवंसिद्धांते । सर्वेषांबद्धक्रमत्वादितिभावेनतेषांसंगतिंस्मार यन्नेवास्यानंतरसंगतिमाह ॥ आद्यसूत्रइति ॥ यद्वानन्वेतदधिकरणंव्यर्थंवाच्यत्वसमर्थनस्यानुपयोगात् समन्वयस्यलक्षणयाप्युपपत्तेरित्य तः"जन्माद्यस्येतिसूत्रेणगुणसर्वस्वसिद्धये । ब्रह्मणोलक्षणंप्रोक्तंशास्त्रमूलंयतस्ततः । अन्वयःसर्वशब्दानांगुणसर्वस्ववेदक"इत्यानंदमयनयानु

॥ ॐईक्षतेर्नाशब्दंॐ ॥ आद्यसूत्रेब्रह्मशब्देनजीवादिव्यावर्तकगुणपूर्तिलक्षणत्वेनसूचयित्वा द्वितीयेतस्यगुणपूर्तिवाचितासिद्धयेजीवपरतानिरासायकारणतांजिज्ञास्यब्रह्मलक्षणत्वेनोक्त्वा

गु० ॥ ॐईक्षतेर्नाशब्दंॐ ॥ संशब्दार्थस्यवाच्यत्वस्यकात्स्र्न्यस्यचेहाक्षिप्यसमाधानादित्येतावतैवसामंजस्ये आदितआरभ्यसूत्रचतुष्टयार्थकथनमनर्थकमित्यतःसंश ब्दार्थकथनार्थत्वेनवाच्यत्वस्यकात्स्र्न्यस्यत्रर्णनमयुक्तं । प्रकृतानुपयुक्तत्वात् । नचकथंप्रकृतानुपयुक्तमितिवाच्यं । आदिसूत्रेब्रह्मजिज्ञासाकर्तव्येत्युक्तेकिंलक्षणकंब्रह्मे त्याकांक्षायांद्वितीयसूत्रेणजन्मादिकारणत्वंलक्षणमुक्तं । तृतीयेप्रमाणाकांक्षायांकारणत्वएवशास्त्रंप्रमाणीकृतं । चतुर्थेसमन्वयःप्रतिज्ञातः । तथाचयथाकथंचित्प्रमा णवाक्यानांब्रह्मपरत्वसिद्धिमात्रेणकारणत्वरूपलक्षणस्यातिव्याप्त्यभावेनवाच्यत्वकात्स्र्न्ययोःकथनस्यव्यर्थत्वात् । नचानंतगुणपूर्णत्वोपपादनार्थंवाच्यत्वस्यकात्स्र्न्यस्यच संशब्दार्थत्वेनवर्णनमितिवाच्यं । तस्यादिसूत्रेमुखतोनुक्तत्वेनतदुपपादनस्यायुक्तत्वादित्याशंकानिरासायातिविस्मरणशीलानांमंदानांसूत्रचतुष्टयप्रमेयस्यबुद्ध्यारोहार्थंच पूर्वोक्तसूत्रचतुष्टयार्थानुवादपूर्वकंसंगतिमाह ॥ आद्यसूत्रइत्यादिना ॥ तथाचपूर्तेर्मुखतोनुक्तत्वेपिब्रह्मशब्देनसूचितत्वात्तदुपपादनार्थंवाच्यत्वकात्स्र्न्ययोःसंशब्दा र्थत्वोपपादनायपूर्वाधिकरणसंगत्युक्तिरितिभावः । नन्वनंतगुणपूर्णत्वस्यलक्षणत्वेद्वितीयसूत्रेजन्मादिकारणत्वरूपलक्षणकथनमनर्थकंस्यादित्यतआह॥द्वितीयइति॥ ॥ २०५ ॥ तस्य ब्रह्मशब्दस्य । सिद्धेःप्रयोजनमाह ॥ जीवेति ॥ तथाचब्रह्मशब्दार्थभूतगुणपूर्णत्वोपपादनार्थत्वान्नतत्कथनमनर्थकमितिभावः । तर्हितृतीयसूत्रउभयत्रापि

प्र० व्याख्यांहृदिकृत्वासंगतिमाह ॥ आद्येति ॥ क्त्वाप्रत्ययांतानामुक्तायामित्यनेनान्वयः । वचनवृत्त्यासर्वशास्त्रेतिसंशब्दस्यसुधारीत्यानु वादः । एतेन"वचनवृत्त्यासकलशास्त्रप्रतिपाद्यंब्रह्मेत्युक्तं । तदाक्षिप्यसमाधातुमिदमधिकरणं"मितिसुधाविवृता । पूर्वेणास्याक्षेपिकीसंगति

तृतीयेपूर्तिकारणतयोरतिव्याप्तिपरिहारायतत्रशास्त्रंप्रमाणीकृत्य चतुर्थेतयोर्विष्ण्वेकनिष्ठत्वायशास्त्रस्यान्यपरतांनिषि ध्य सर्वशास्त्रस्थसर्वशब्दप्रवृत्तिनिमित्तसर्वगुणपूर्तिसिद्धयेवचनवृत्त्यासर्वशास्त्रतात्पर्यविषयतायांचोक्तायां संशब्दार्थस्य वाच्यत्वस्यकात्स्र्न्यस्यचेहाक्षिप्यसमाधानादनंतरसंगतिः । संगत्यादिटीकापिसमन्वयसूत्रसंगत्यादिपरत्वेनयोज्या ।

गु० शास्त्रंप्रमाणीकर्तव्यं कारणत्वमात्रएवतस्यप्रमाणीकरणमयुक्तमित्यतआह ॥ तृतीयइति ॥ एवंचगुणपूर्तावपिशास्त्रस्यप्रमाणीकृतत्वान्नदोषः ॥ तयोरिति ॥ जगत्कारणत्वानंतगुणपूर्णत्वयोरित्यर्थः । विष्ण्वेकनिष्ठत्वंनामविष्ण्वितरानिष्ठत्वेसतिविष्णुनिष्ठत्वं । तत्रविष्ण्वितरानिष्ठत्वसिद्ध्यर्थमाह ॥ शास्त्रस्येति ॥ विष्णु निष्ठत्वसिद्ध्यर्थमाह ॥ सर्वशास्त्रस्थेत्यादि ॥ लक्षणयाशास्त्रतात्पर्यविषयत्वेकथंगुणपूर्णत्वसिद्धिरित्यतउक्तं वचनवृत्त्येति ॥ वचनवृत्तिश्चमहायोगविद्वद्रू ढिरूपाविवक्षिता । नरूढिमात्रं । एवंचगुणपूर्णत्वसिद्धिरितिभावः । चशब्दस्तुनिषिध्येत्यनेनसमुच्चयार्थः । ननुसमन्वयसूत्राक्षेपेणसंगतिकथनमयुक्तं । टीकायाम धिकरणत्रयेणसंगतिकथनात् । समन्वयसूत्रेणगतिसूत्रस्यटीकायांसंगतेरनुक्तत्वाच्चेत्यतआह ॥ संगत्यादीति ॥ आदिपदेनशास्त्रयोनित्वंविषयइतिविषयसंशयटी कापिग्राह्या । एवंचसंगतिटीका समन्वयसूत्रसंगतिपरत्वेनयोज्या । संशयटीकासमन्वयसूत्रार्थविषयकसंशयपरत्वेनयोज्येत्यर्थः । तच्चाधुनैवोपपादितं । नचतर्ह्य धिकरणत्रयार्थानुवादोऽयुक्तइतिवाच्यं । पूर्वाधिकरणोक्तार्थेनसंगतिकथनार्थंतथोक्तत्वादितिभावः । यद्वा ननुसमन्वयसूत्रस्थसंशब्दार्थभूतवाच्यत्वस्यकात्स्र्न्यस्यचा त्रसमर्थनादवांतरसंगतिरित्ययुक्तं । टीकायामत्र"जगज्जन्मादिकारणत्वेनब्रह्मैवशास्त्रस्यमुख्यार्थइत्यभिहितं । उपक्रमादिनानिर्णीतस्यमुख्यार्थत्वात् । तच्चवाच्यत्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० रित्युक्तंभवति । अर्थद्वयसमर्थनार्थत्वेकथमधिकरणैक्यमित्यतआह ॥ **अतएवेति** ॥ द्वयोःसंशब्दार्थत्वादेवेत्यर्थः । उक्तंचसुधायां "आक्षेपद्वयसमाधानस्यपूर्वसूत्रस्थसंशब्दार्थसमर्थनमेकमेवप्रयोजनमिति ॥ **अन्यथेति** ॥ अधिकरणभेदःस्यादित्यन्वयः । सुधायामिहनयेगतिसूत्रव्यावर्त्यचोद्यमात्रस्यैवोक्त्यातत्परिहारानुक्तेस्तदनुवादपूर्वंतत्परिहारंविशदयन्सूत्राणामर्थभेदंव्यनक्ति ॥ **गतिसूत्रस्येति** ॥ एवंपरत्वादित्यन्वयः । उपक्रमादिभिरेववेदार्थोनिर्णेयइत्युक्तत्वादधीतवेदेषुतैस्तन्निर्णयसंभवेपि तेषामानंत्येनसर्वाध्ययनायोगेनान्यत्रशिवादिकमपिकारणत्वेनप्रतिपाद्यतामितिवा वक्ष्यमाणदिशावाऽन्यथात्वेशंकितइत्यर्थः । टीकायांगतिसामान्यात्सर्वेवेदाइतिश्रुतौसामान्यकथनादित्यर्थउक्तः ।

अतएवगतिसामान्यादित्यस्यसंशब्दार्थसमर्थनरूपतयैक्यादेतदधिकरणांतर्भावः । अन्यथागतिसूत्रस्य"अनंतावैवेदा" इतिश्रुतेर्वेदानामनंतत्वेनशाखांतरेऽन्यथात्वेशंकिते

गु० एवसंभवती"त्यादिनावाच्यत्वमात्रसाधकत्वाभिधानादित्यतआह ॥ **संगत्यादिटीकापीति** ॥ तथाचटीकायांवाच्यत्वोक्तिरुपलक्षणं । कात्स्र्न्यमपितत्रग्राह्यमितिभावः । टीकायामुपक्रमादीत्यादिपदेश्रुत्यादिकंचग्राह्यं । विषंभुङ्क्ष्वेत्यादेरुपक्रमादिनिर्णीतस्यापिमुख्यवृत्त्यविषयत्वात् । गंगायांघोषइत्यादौश्रुत्यादिप्रतीतस्यापितात्पर्यागोचरत्वात् । विशिष्टसंशब्दार्थभूतमुख्यत्वस्योपक्रमादिश्रुत्यादिसाध्यत्वादितिबोध्यं । वस्तुतस्तु मुख्यवृत्त्याशास्त्रयोनित्वंविषयइतिटीकायांशास्त्रयोन्यधिकरणसंगतत्वेनप्रतीयते । नतुकंठतःसमन्वयसंगतत्वेन । अतःसंगत्यादिटीकापिसमन्वयसूत्रसंगत्यादिपरत्वेनयोज्येत्युक्तं । नन्वीक्षतिगतिसूत्रयोरेकाधिकरणत्वमयुक्तं । वाच्यत्वसर्वशास्त्रप्रतिपाद्यत्वरूपभिन्नप्रमेयप्रतिपादकत्वात् । प्रमेयभेदेचाधिकरणभेदस्यावश्यकत्वादित्यतआह ॥ **अतएवेति** ॥ अत्रसंशब्दार्थभूतवाच्यत्वकात्स्र्न्ययोःसमर्थनादेवेत्यर्थः । अतएवेत्यस्यविवरणंसंशब्दार्थेति । तथाचभिन्नप्रमेयप्रतिपादकत्वेपिसंशब्दार्थसमर्थनरूपोपाध्यैक्यादेकत्वमितिभावः ॥ **अन्यथेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सुधायांतु "अन्योप्यल्पमतिः शाखाचतुष्पंचगतंवसु । जानन्ननुमितत्वेनब्रूयात्तस्यप्रसादत" इतितार्तीयानुव्याख्यानानुरोधेनगतिसामान्यानुमानादित्यर्थउक्तः । तत्रटीकार्थमाह ॥ **सर्वेवेदाइति** ॥ सुधोक्तमाह ॥ **प्रसिद्धेति** ॥ सूत्रकृन्निर्णीतप्रसिद्धशाखेत्यर्थः । शाखात्वेनहेतुना विप्रतिपन्नशाखांतरस्यापिविष्णुकारणत्वादिपरतानुमानादित्यर्थः । यद्वानुमानस्यदार्ढ्याय "इतिश्रुत्ये" त्युक्तं । तथाचसुधोक्तार्थस्यैवायमनुवाद इतिबोध्यं । विप्रतिपन्नशाखांतरस्याप्रामाण्येनाप्युपपत्त्याऽप्रयोजकंशाखात्वमित्यतआह ॥ **शाखांतरस्येति** ॥ **नैतदिति** ॥ विप्रतिपन्नशाखाविरोधःप्रसिद्धशाखानामित्यर्थः । नकेवलंसंशब्दार्थस्यैकत्वाद्गतिसूत्रस्यात्रांतर्गतिः । किंतुसत्वादिगुणहीनस्यैवेक्षणीयत्वेनवाच्यत्वमित्यर्थसाधकानामात्मशब्दतज्ज्ञानिमोक्षोपदेशहेयत्वावचनानामन्यथासिद्धिशंकानिरासार्थत्वादपीत्याह ॥ **युक्ताचेति** ॥ यद्वानन्वेवंश्रुतीनांवि

"सर्वेवेदायुक्तय" इतिश्रुत्याप्रसिद्धशाखादृष्टांतेनान्यत्रापितदनुमानात् शाखांतरस्यापि प्रमाणत्वाच्च नैतच्छाखाविरोधइत्येवंपरत्वात् सूत्रांतराणांतुवाच्यत्वसाधकत्वादधिकरणभेदःस्यात् । युक्ताच शाखांतरेसत्त्वादिगुणयुक्तेप्यात्मशब्दोमुख्यतयोच्यतां ।

गु० संशब्दार्थसमर्थनरूपत्वेसत्यप्यैक्यानंगीकारइत्यर्थः । ननुप्रसिद्धशाखाविरोधेनशाखांतरस्याप्रामाण्यमेवकिंनस्यादित्यतआह ॥ **शाखांतरस्यापीति** ॥ नन्वीक्षतिगतिसूत्रयोर्वाच्यत्वसर्वशास्त्रप्रतिपाद्यस्वरूपभिन्नार्थप्रतिपादकत्वेपिसंशब्दार्थसमर्थनरूपोपाध्यैक्यमात्रेणैकाधिकरणत्वे समन्वयरूपैकार्थप्रतिपादकत्वेनाद्याध्यायस्थानांसर्वेषामधिकरणानामैक्यंस्यात् । नचवाच्यत्वसाधकहेतूपयुक्तप्रमेयप्रतिपादकत्वेनैकाधिकरणत्वमितिवाच्यं । तस्यब्रह्मकारणवाक्यानांपरस्परविरोधप्रतिपादकत्वेनतदुपयोगिप्रमेयप्रतिपादकत्वाभावात् । किंचास्तुनिवेशः । तथाप्यादावंतेवानिवेशेनचरितार्थत्वान्मध्येनिवेशेबीजाभावइत्यतआह ॥ **युक्ताचेति** ॥ गतिसामा

SGDF
Sri Gargeshwari Digital Foundation

प्र० रोधनिरासपरत्वेद्वितीयेनिवेशःस्यादित्यतआह ॥ **युक्ताचेति** ॥ **इतिशंकानिरासकस्येति** ॥ तथाचवाच्यत्वसमर्थनस्यैवमुख्यफलत्वाद न्यस्यानुषंगिकत्वाद्गौणश्चेदित्यादेर्वाच्यत्वहेत्वीक्षणीयत्वसाधकत्वेनात्रांतर्गतिरिव गतिसूत्रस्याप्यात्मशब्दादिहेतुसाधकत्वेनपरंपरयावाच्यत्वसा धकत्वादत्रांतर्गतिर्युक्तेत्यर्थः । टीकादौत्वानुषंगिकार्थस्यव्यवधानेनदुर्गमत्वात्तन्मात्रार्थस्यैवव्यक्तीकरणं नतुवाच्यत्वसमर्थनपरत्वरूपार्थस्येति

तज्ज्ञानान्मोक्षादिश्चोच्यतां । अतश्चनात्मशब्दादिनानिर्गुणस्येक्षणमितिशंका निरासकस्यगतिसामान्यस्य ब्रह्मकारणतादिरूपेर्थांतरेपिश्रुतीनांनान्योन्यं विरोधइतिसूचकत्वेपि समन्वयहेतुवाच्यत्वसाधकेक्षत्यधिकरणांतर्गतिः ।

गु० न्यसूत्रस्येक्षत्यधिकरणांतर्गतिर्युक्तेत्यन्वयः । तथाचास्यांशाखायामात्मशब्दस्यनिर्गुणपरत्वमस्तु । तज्ज्ञानान्मोक्षोप्यस्तु । एवंचनात्मशब्देननिर्गुणस्येक्षणमितिशं कानिरासकत्वेनवाच्यत्वहेतूपयोगिप्रमेयप्रतिपादकत्वेनैकाधिकरणत्वस्यमध्येनिवेशस्यचयुक्तत्वमितिभावः । ननुतथापिगतिसामान्यादितिसूत्रस्यैतदधिकरणांतर्भावो नयुज्यते । एकार्थप्रतिपादकत्वाभावात् । नचसंशब्दार्थकथनत्वेनास्यैतदधिकरणांतर्भावःसंभवतीतिवाच्यं । संशब्दस्यैकार्थत्वाभावेनक्कचिद्वाच्यत्वस्यक्कचिच्चकातरूर्ये स्यप्रतिपादनेनैकार्थप्रतिपादकत्वाभावात् । यथाकथंचिदेकार्थत्वेचसर्वेषामधिकरणानामैक्यंस्यात् । सर्वत्रयथाकथंचिदेकार्थत्वस्यसंभवादित्यस्वरसादाह ॥ **युक्ता चेति** ॥ ननुतथाप्येकशक्यतावच्छेदकाभावेनसंशब्दस्यसादिशब्दवन्नानार्थत्वात्परस्परासंसृष्टयोर्वाच्यत्वकातरूर्ययोःप्रतिपादनेऽर्थैकत्वनिबंधनैकवाक्यत्वाभावात्कथ मेकाधिकरणत्वं । समन्वयसूत्रस्थसंशब्दाक्षेपसमाधानेनोभयोरपिसमन्वयसूत्रेणैवसंगतिलाभादेकाधिकरणाक्षेपसमाधानमात्रेणैकाधिकरणत्वे अंतस्थाकाशाद्यधिकर णानामप्येकानंदमयाक्षेपसमाधानेनैकाधिकरण्यप्रसंगादित्यतोवाह ॥ **युक्ताचेति** ॥ वाच्यत्वसाधकहेतूपपादकत्वेनैकाधिकरणत्वेभाष्यविरोधइत्यतआह ॥ ॥ २०७ ॥

प्र० भावः ॥ **अतएवेति** ॥ प्रधानानुषंगिकयोर्द्वयोरप्यर्थयोरनुमतत्वादेवेत्यर्थः । अतएवतत्वप्रदीपे "नचसगुणंनिर्गुणंचद्विविधंब्रह्मवेदेषुप्रति पाद्यतइत्याहनचकासुचिदिती"ति । वाच्यत्वसाधनपरतयैवभाष्यंव्याख्यातमितिभावः । भाष्यस्यापितथाव्याख्यानेकिंबीजमित्यतआह ॥ **सूत्रेति** ॥ "गतिसामान्यादितिसूत्रंनब्रह्मणोवाच्यत्वसमर्थनार्थ"मितिसुधावाक्यंत्वितरसूत्रवत्तन्मात्रसमर्थनार्थत्वनिषेधपरमितिभावः । "तन्मुख्यतःशास्त्रयोनित्वंविषय"इत्यादिविषयसंशयटीकांव्याचष्टे ॥ **अत्रेति** ॥ **समन्वयइति** ॥ वचनवृत्त्याशास्त्रतात्पर्यवत्त्वरूपइत्यर्थः ।

अतएवभाष्यकृतागतिसूत्रं "नचकासुचिच्छाखास्वन्यथोच्यत" इतिसामान्यपरतयैवव्याख्यातं । सूत्रकृताचवाच्यत्वसाधकात् "श्रुतत्वाच्चे"त्यस्मात्प्रागेवतन्निवेशितं । अत्रब्रह्मणिसमन्वयो

गु० **अतएवेति** ॥ समन्वयहेतुवाच्यत्वसाधकेक्षणीयत्वोपपादकात्मशब्दाद्युपपादकत्वादेवेत्यर्थः ॥ **सामान्यपरतयैवेति** ॥ सर्वशाखास्वात्मशब्दस्यनिर्गुणत्वादिप्र तिपादकत्वपरतया कारणत्वादिप्रतिपादकत्वश्रुतीनामविरोधपरतयाचेत्यर्थः । संगत्यनुसारेणचिंतामाह ॥ **अत्रेति** ॥ नचसमन्वयोनयुक्तइत्यादौनिषेधकोटेरादित्वे नसगुणोनिर्गुणोवेत्यत्रविधिकोटेरादित्वेनकथनमितिवैषम्यंकिंनिबंधनं । निषेधकोटेर्विधिकोटिज्ञानाधीनत्वेनविधिकोटेरेवप्रथमंवक्तव्यत्वेनप्रथमतोनिषेधकोटिकथ नायोगाच्चेतिवाच्यं । कोटेःप्रथमंवक्तव्यत्वेपूर्वपक्षकोटित्वस्यैवतंत्रत्वेननिषेधकोटिविधिकोटित्वस्यातंत्रत्वात् । तथाचनिषेधकोटिर्विधिकोटिर्वापूर्वपक्षकोटिश्चेत्साआ दित्वेनवक्तव्येतिवैषम्यमितिभावः ॥ **समन्वयइति** ॥ मुख्यतोवचनवृत्त्यासर्वशास्त्रस्यतत्परत्वमित्यर्थः । अवाच्यत्वासिद्धिपरिहाराययतोवाचइत्यादिश्रुत्युदाहरणं ।

SGDF Sri Gurgeshwari Digital Foundation

प्र० आद्यसूत्रस्थप्रतिज्ञांशसूचितचिंताआह ॥ **नयुक्तइत्यादिना** ॥ **शुद्धमिति** ॥ सत्त्वादिगुणहीनमित्यर्थः ॥ **श्रुतिरिति** ॥ "यतोवाचो निवर्तंत"इत्यादिरूपेत्यर्थः ॥ **अप्रसिद्धत्वेति** ॥ "अप्रसिद्धेरवाच्यंत"दित्याद्यनुसारात् । तथाचसावकाशेतिभावः । हेत्वंशसूचितचिंते आह ॥ **तदर्थंवाच्यत्वेति** ॥ गौणश्चेदितिसूत्रसूचितचिंतामाह ॥ **तदर्थंतमेवेति** ॥ अत्रविवृतिस्तस्यसर्वतोविलक्षणत्वप्रदर्शनार्थेतितत्व प्रदीपोक्तिः । "विवृतावपिसर्गःस्यात्संहितायांचयत्रहि । समानोत्तमहीनत्वमुच्यतेवस्तुनोंजसे"त्यैतरेयभाष्योक्तेः ॥ **सगुणइति** ॥ सत्वा दिगुणबद्धोजीवइत्यर्थः । यद्वासुधातत्वप्रदीपयोरुक्तदिशामायाशबलोवा । तन्निष्ठस्येत्यादिसूत्रसूचितेआह ॥ **तदर्थमात्मेति** ॥ गौणात्मनि **नयुक्तोयुक्तोवेतिचिंता । तदर्थंशुद्धंब्रह्मावाच्यंवाच्यंवेति । तदर्थमवाच्यत्वश्रुतिर्वाच्यत्वाभावाभिप्रायोताप्रसिद्धत्वाभावा भिप्रायेति । तदर्थंवाच्यत्वाभावाभिप्रायत्वेबाधकंनास्त्युतास्तीति । तदर्थंशुद्धंब्रह्मानीक्षणीयमुतेक्षणीयमिति । तदर्थं"तमे वैकंजानथआत्मानं आत्मन्येवात्मानंपश्ये"दित्यादावीक्षणीयत्वेनश्रुतआत्मासगुणोनिर्गुणोवेति । तदर्थमात्मशब्दःकिंगौ णात्मनिमुख्यःकिंवानिर्गुणएवेति । तदर्थं"यस्यानुवित्त"इत्यादिश्रुत्युक्तमात्मनिष्ठस्यमोक्षोपदेशादिकंगौणात्मनियुक्तमुतनेति ।**

प्र० जीवेमायाशबलेवा ॥ **यस्येति** ॥ "यस्यानुवित्तःप्रतिबुद्धआत्मे"त्यत्र यस्य येनपुंसा प्रतिबुद्धः सर्वज्ञोभगवान् अनुवित्तो ज्ञातः तस्यलो कःसउलोकएवेतिविष्णुलोकएवोपासकस्येत्युच्यतइतिभावः । आदिपदाद्धेयत्वावचनादिकंग्राह्यं । यद्यप्यत्रमुख्यत्वस्येवकातरूर्यस्यापिसंशब्दा र्थत्वाद्वाच्यत्वावाच्यत्वकोटिकचिंताप्रदर्शनवत्सर्वसमन्वयोयुक्तोनवा । तदर्थंशाखांतरमन्यपरमुततदपिब्रह्मपरमित्यादिचिंतापिगतिसूत्रसू चितात्रप्रदर्शनीया । अतएवसुधायामपरआहेत्यादिनागतिसूत्रव्यावर्त्यपूर्वपक्षोपिदर्शितः । तथापिगतिसूत्रपूर्वोत्तरपक्षयोःप्राक्तनग्रंथेसंग्रहेण

SGDF Sri Gargeshwari Digital Foundation

प्र० स्पष्टमुक्तत्वाद्वाच्यत्वोपयुक्तैवचिंताप्रदर्शितेति । फलफलिभावस्यास्फुटत्वात्स्वप्रतिज्ञानुरोधेनतमाह ॥ यदीति ॥ नयुक्तमिति ॥ मोक्षोपदेशादिकंगौणासनीत्यनुषंगः । गुणबद्धात्मज्ञानाद्गुणनिवृत्तिरूपमोक्षायोगादितिभावः । नब्रह्मणइत्यादिटीकांव्याचष्टे ॥ नब्रह्मणीति ॥ ननुश्रुतीनामीक्षणीयत्वरूपबाधकवशादप्रसिद्धत्वाभिप्रायेणसंकोचस्स्यादितिभावेनेक्षणीयत्वस्यावाच्यत्वेबाधकत्वंव्यक्तीकुर्वञ्शंकते ॥ नन्विति ॥ औपनिषदत्वात् उपनिषदेकगम्यत्वात् । शास्त्रयोनिनयोक्तन्यायेनेतिभावः । शुद्धंवाच्यमीक्षणीयत्वा(द्घटा)द्धर्मादिवदित्युक्तंभवति ।

यदिमोक्षोपदेशादिकंगौणात्मनियुक्तंतदाऽऽत्मशब्दस्यगौणात्मनिमुख्यत्वेबाधकाभावात्"तमेवैक"मित्यादावीक्षणीयत्वेनोक्तोगौणएवेत्यवाच्यत्वबाधकमीक्षणीयत्वंननिर्गुणस्येतिनतस्यवाच्यत्वसिद्धिरितिपूर्वपक्षेफलं । यदितुनयुक्तंतदाऽऽत्मशब्दस्यगौणात्मनिमुख्यत्वेबाधकसद्भावा"त्तमेवैक"मित्यादावुक्तमवाच्यत्वबाधकमीक्षणीयत्वंनिर्गुणस्यैवेतितस्यवाच्यत्वसिद्धिरितिसिद्धांतेफलं ॥ पूर्वपक्षस्तु ॥ नब्रह्मणिसमन्वयोयुक्तः । "यतोवाचोनिवर्तंत" इत्यादिश्रुतिभिस्तस्यावाच्यत्वात् । ननु "पुरिशयंपुरुषमीक्षत"इतिब्रह्मणईक्षणीयत्वंश्रुतं । तच्चनशब्देतरेण । ब्रह्मणऔपनिषदत्वात् । शब्देनेक्षणंचवाच्यत्वंविना नयुक्तमिति

गु० अवाच्यत्वरूपहेत्वसिद्धिमाशंकते ॥ नन्विति ॥ नचतर्हिश्रुतेःकागतिरितिवाच्यं । तस्यार्थांतरपरत्वोपपत्तेरितिभावः । ननुसर्वथाब्रह्मणोऽदृश्यत्वेतद्विषयकज्ञानाभावान्मोक्षोनस्यात् । नचगौणात्मज्ञानादेवमोक्षइतिवाच्यं । तस्यातत्वेनतद्विषयकज्ञानस्यातत्वज्ञानत्वेनमोक्षसाधनत्वाभावात् । सर्वथाप्यदृश्यत्वेयत्तदित्यादिनिर्दे

SGDF
Sri Gargeshwari Digital Foundation

प्र० गौणश्चेदितिसूत्रस्थशंकांशसूचितंपरिहारमाह ॥ **नेति** ॥ आत्मशब्दादिश्चजीवएवमुख्यः । अद्यापिसभगवतिमुख्यइत्यनुक्तेरितिभावः । "औपनिषदत्वंतुलक्षणयापिसंभवन्नवाच्यतामपेक्षत" इतिसुधोक्तं "अवचनेनैवप्रोवाचे" तिभाष्योक्तश्रुत्याऽऽपातप्राप्तंपरिहारांतरमाह ॥ **अस्तुवेति** ॥ तथाचवाच्यत्वईक्षणीयत्वमप्रयोजकमितिभावः । "सर्वशब्दावाच्यस्यलक्षणाऽयुक्ते" रितिसिद्धांतभाष्योक्तंबाधकमाशंक्यप्रतिबंद्योत्तरमाह ॥ **नन्विति** ॥ टीकोक्तंलक्षणाऽयोगप्रकारमाह ॥ **तथाहीति** ॥ तथाच "यश्चोभयोःसमोदोष" इतिन्यायेननाहंपर्यनुयोज्यः । तथाचप्रतिकूलतर्कहतिरितिभावः । ईक्षणीयत्वस्यवाच्यत्वसाधकस्यावाच्यत्वेबाधकस्यसत्त्वादवाच्यत्वश्रुतेरप्रसिद्ध्यभिप्रायकत्वेनसंकोचइति

चेन्न । तत्रेक्षणीयत्वेनोक्तोहिसगुणआत्मा । सचवाच्यएव । यश्चावाच्यःशुद्धोनतस्येक्षणीयत्वं । "यत्तद्द्रेश्य"मित्यादिश्रुतिभिस्तस्यादृश्यत्वात् । अस्तुवाशुद्धस्येक्षणीयत्वं । तथापिनवाच्यत्वसिद्धिः । लक्षणयाशब्दबोध्यत्वात् । नन्ववाच्यत्वेलक्षणापिनस्यात् । सर्वशब्दावाच्यस्यलक्षणायोगात् । तथाहि । किमस्यशब्दस्यलक्ष्यमितिप्रश्नेऽवाच्येलक्षकंपदांतरमेवप्रयोक्तव्यं । तत्रापिकिमस्यलक्ष्यमितिप्रश्नापर्यवसानादनवस्थेतिचेन्न । वाचकपदप्रयोगेपिकिमस्यवाच्यमितिप्रश्नापर्यवसानेनानवस्थापातादिति ॥

गु० शायोगाच्चेत्यरुचेराह ॥ **अस्तुवेति** ॥ ननुसर्वथाऽवाच्यत्वमभिप्रेतमुतकेनचिच्छब्देन । द्वितीयेनावाच्यत्वोपपत्तिः । आद्यमुत्थापयति ॥ **नन्विति** ॥ ननुलक्षणायांवाच्यत्वंकथमुपयोगीत्यतआह ॥ **तथाहीति** ॥ अनवस्थाभियालक्षणापरित्यागेनवाच्यत्वांगीकरणमयुक्तं । अनवस्थादोषस्यवाच्यत्वेपितुल्यत्वादित्याशयेन समाधत्ते ॥ **वाचकपदप्रयोगेपीति** ॥ उपलक्षणमेतत् । किमत्रलक्ष्यमितिप्रश्नस्यासार्वत्रिकत्वेनप्रश्नाकरणेपदांतरप्रयोगस्यानावश्यकत्वाच्चेत्यपिद्रष्टव्यं । अत्रकिं

प्र० सिद्धांतयिष्यन् तस्यव्यधिकरणासिद्धिंपरिहरन्पक्षनिष्ठतामाह ॥ **सिद्धांतस्त्वित्यादिना** ॥ **ज्ञेयत्वमिति** ॥ एतेनसौत्रेक्षणंनापरोक्षपरमित्युक्तंभवति । सूत्रे "गौणश्चेन्नात्मशब्दात्" इत्यादिगुणसूत्रेषु । "तमेवैकंजानथआत्मानमन्यावाचोविमुंचथ । अमृतस्यैषसेतु" रित्येकत्रैवश्र्यमाणैरात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनैरितिवा भाष्योक्तदिशा "आत्मन्येवात्मानंपश्ये" दित्यत्रात्मशब्दः "यस्यानुवित्त" इत्यत्रतन्निष्ठमोक्षोपदेशः "तमेवैक" मित्यत्रहेयत्वावचनमित्येवमात्मशब्दादिभिरितिवार्थः । अत्रयद्यप्यात्मशब्दएवेक्षणीयस्यशुद्धत्वसाधकः । मोक्षोपदेशादित्वात्मशब्दस्यगौणात्मपरत्वेनान्यथासिद्धिशंकानिरासार्थं । टीकायांतथैवोक्तेर्वक्ष्यमाणत्वाच्चात्रापि । तथापितत्वप्रदीपदिशासाक्षादपिमोक्षोपदेशादेरात्मशब्दवत्तत्रहेतुत्वंयोजयितुंशक्यमितिवर्णकांतरमभिप्रेत्यवा परंपरयापितद्धेतुत्वमस्तीतिवैवमुक्तं । आत्मशब्देविवादेपिमोक्षोपदेशस्यशुद्धत्वेहेतुत्वमविप्रतिपन्नमित्याह ॥ **त्वयेति** ॥ अवाच्यत्वंब्रुवतेत्यर्थः । हेतोरसिद्धिंनिरस्यप्रागस्तुवेत्यादिनाऽप्रयोजकत्वमाशंकितंतदनूद्यविपक्षेऽनवस्थारूपतर्कपराहत्याहेतूच्छित्तिरेवबाधिकेतिनाप्रयोजकत्वमितिभावेन "किंतदित्यनवस्थितिः" इत्यनुव्याख्यानसुधोक्तानव

सिद्धांतस्तु ॥ नतावच्छुद्धस्यात्मनोज्ञेयत्वमेवनेतियुक्तं । सूत्रआत्मशब्दतन्निष्ठमोक्षोपदेशादिभिर्ज्ञेयस्यशुद्धत्वोपपादनात् । त्वयापिशुद्धात्मज्ञानेनैवमोक्षइतिस्वीकृतत्वाच्च ।

गु० शुद्धस्यात्मनोज्ञयत्वमेवनेतिपूर्वपक्षिणोऽभिप्रायो लक्षणयाज्ञेयत्वमितिवा । आद्यंदूषयति ॥ **नतावदिति** ॥ सूत्रेज्ञेयस्यशुद्धत्वोपपादनादित्यन्वयः । कैर्हेतुभिरित्यत उक्तमात्मशब्देति । किंचशुद्धस्यज्ञेयत्वाभावेविशिष्टस्यतद्वक्तव्यं तस्यमिथ्यात्वेनतज्ज्ञानस्यमोक्षहेतुत्वासंभवेनशुद्धस्यैवज्ञेयत्वंवक्तव्यमित्याह ॥ **त्वयापीति** ॥ द्वि

SGDF Sri Gangamata Digital Foundation

प्र० स्थाप्रकारमुपपादयति ॥ **नापीति** ॥ **वाच्येति** ॥ "मुख्यार्थबाधेतद्योगेरूढितोथप्रयोजनात् । लक्षणे"तिकाव्यप्रकाशिकाद्युक्तेरितिभावः । ततःकिमितिचेत्तथाज्ञानंकिंमानांतरेणोतस्वप्रकाशतयाऽथलक्षकशब्दांतरेणवेतिविकल्प्याद्यंनिराह ॥ **औपनिषदस्यचेति** ॥ द्वितीयंनिराह ॥ **स्वेति** ॥ तृतीयेऽनवस्थामाह ॥ **अवाच्येचेति** ॥ "अवाच्यस्यलक्षणायांकिंलक्ष्यमितिप्रश्नापर्यवसाना"दित्यादिटीकायामनवस्थाया

नापितस्यज्ञेयत्वेपिलक्षणयैवतदितियुक्तं । वाच्यसंबद्धतयाज्ञातस्यैवलक्ष्यत्वात् औपनिषदस्यचाशब्देनाज्ञानात् स्वप्रकाशतयानित्यसिद्धौचशास्त्रवैयर्थ्यात् अवाच्येचशब्दस्यलक्षकस्यैववक्तव्यत्वात्तत्रापिवाच्यसंबंधितयाज्ञानस्यापेक्षितत्वात्तदर्थलक्षकांतरप्रयोगेऽनवस्थानात् ।

गु० तीयंदूषयति ॥ **नापीति** ॥ वाच्यत्वाभावेलक्षणैवनस्यादितिभावः। ननुलक्ष्यत्वेवाच्यत्वंकथमुपयोगीत्यतआह ॥ **वाच्यसंबंधितयेति** ॥ लक्ष्यत्वेवाच्यसंबंधितयाज्ञानस्यतंत्रत्वेनब्रह्मणोलक्ष्यत्वांगीकारेवाच्यसंबंधितयातज्ज्ञानंवक्तव्यं । तद्धिशब्देतरेणवाशब्देनवा । नाद्यइत्याह ॥ **औपनिषदस्यचेति** ॥ ननुमास्तुशब्देतरेणशब्देनवातस्यसिद्धिः । नचतर्ह्यसिद्धिरेवतस्यस्यादितिवाच्यं । स्वप्रकाशत्वेननित्यसिद्धत्वादित्यतआह ॥ **स्वप्रकाशतयेति** ॥ नन्वस्तुतर्हिशब्देनतज्ज्ञानमितिचेच्छब्देनतज्ज्ञानंहिवचनवृत्त्याभवेत्लक्षणयावा । आद्येमदिष्टसिद्धिः । द्वितीयंप्रत्याह ॥ **अवाच्येचेति** ॥ अस्त्ववाच्येलक्षकशब्दप्रयोगः । ततःकिमित्यतआह ॥ **तत्रापीति** ॥ लक्षकशब्दप्रयोगेपीत्यर्थः । नन्वेवंपूर्वमनुपस्थितस्यलक्षणयाबोधासंभवेनलक्षणयाब्रह्मोपस्थितिंवदतातत्कारणीभूतार्थप्रतीतेराव ॥ २१० ॥
श्यकत्वेनतस्याश्चशब्देनैववक्तव्यतयातेनापिशक्त्याऽसंभवेनलक्षणयैवतत्प्रतीतेर्वक्तव्यतयातस्या अपिपूर्वमुपस्थित्यभावेऽसंभवेनानवस्थास्यादितिप्रतीतिमूलकानवस्थाया

SGDF Sri Gargeshwari Digital Foundation

प्र० अस्फुटत्वादाह ॥ **टीकायामपीति** ॥ "वाच्यत्वेपिसंबंधग्रहणायपूर्वसिद्धेरपेक्षितत्वेनानवस्थितिरितिचेन्न । अभिमान्यधिकरणेवक्तव्यत्वा"दितिसुधांविवृण्वानःप्रागुक्तप्रतिबंदींनिरसितुमनवस्थांव्यंजयन्ननुवदति ॥ **नचेति** ॥ "शास्त्रोक्तवस्तुनश्चैवव्युत्पत्तिःशास्त्रलिंगत"इत्यभिमानिनयानुव्याख्यानसुधोक्तमाह ॥ **यौगिकानामिति** ॥ तत्रयथाहिछंदोधीतइत्यनयोःपदयोर्गृहीतशक्तिकयोरर्थेसंसृष्टरूपवाक्यार्थमर्यादयोपस्थितेश्रोत्रियपदंनिपात्यतइतिपंचमेद्वितीयपादे"श्रोत्रियंश्छंदोधीत"इतिसूत्रेणपाणिनिराह । तथाब्रह्मादिपदस्यापियौगिकत्वेनकॢप्तावयव

टीकायामपीयमेवानवस्थाविवक्षिता । नचवाचकशब्दस्यापिगृहीतसंबंधस्यैवबोधकत्वात् संबंधज्ञानस्यचसंबंधिज्ञानाधीनत्वात् संबंधिनश्चब्रह्मणऔपनिषदत्वाच्छब्दांतरेणैवतद्बोधइत्यनवस्थास्यादितिशंक्यं । यौगिकानांपदानांवाक्यतुल्यतयासंगतिग्रहणानपेक्षत्वात् । यथोक्तं"श्रोत्रियंश्छंदोधीते । वाक्यार्थेपदप्रयोग"इति ।

गु० उक्तौटीकायांप्रश्नमूलकानवस्थायाउक्तत्वात्तद्विरोधइत्यतआह ॥ **टीकायामपीति** ॥ **इयमेवेति** ॥ प्रतीतिमूलैवेत्यर्थः । अन्यथाप्रश्नस्यासंगतत्वंस्यादितिभावः । ननुलक्ष्यत्वांगीकारइववाच्यत्वांगीकारेप्यनवस्थादोषस्यतुल्यत्वान्नतदंगीकरणंयुक्तमित्याशंकते ॥ **नचेति** ॥ स्वरूपेणज्ञातमात्रशब्दादर्थबोधभावेनान्वयव्यतिरेकाभ्यांगृहीतसंगतिकस्यैवार्थबोधकत्वादितिभावः । अस्तुगृहीतसंगतिकस्यैवबोधकत्वं ततःकिमित्यतआह ॥ **संबंधज्ञानस्यचेति** ॥ अस्तुतर्हिशब्देतरेणसंबंधिज्ञानमित्यतआह ॥ **संबंधिनश्चेति** ॥ **यौगिकानामिति** ॥ प्रकृतिप्रत्यययोरन्यत्रसंगतेर्गृहीतत्वेनचित्रगुशब्दादिवत्संसर्गविशेषविशिष्टरूपेणैवब्रह्मविष्णुनारायणादिशब्दैरपूर्वार्थप्रतीतिसंभवादितिभावः । नचपरेणापिब्रह्मप्रतीतेःसंसर्गमर्यादयांगीकारेणानवस्थापरिहर्तुंशक्या । ब्रह्मणोखंडत्वहानिभयेनसंसर्गसंसृष्टान्यतरत्वानभ्युपगमादिति । नन्वेवमनवस्थापरिहारे औपनिषदेक्षणीयत्वान्यथानुपपत्त्याब्रह्मणोवाच्यत्वसिद्धिर्नस्यात् । वाक्यस्यशक्त्यभावेपिवाक्यार्थबोधकत्ववद्यौगिकपदाना

SGDF
Sri Gargeshwari Digital Foundation

प्र० शक्त्याऽपूर्वार्थबोधसंभवेनान्यानपेक्षणादित्यर्थः। "अधीत" इत्यंतंसूत्रं "वाक्यार्थ" इत्यादिवृत्तिवाक्यं। नन्वीक्षणविषयत्वेपिशुद्धस्यनतत्कर्मकारकत्वं। सर्वकारकशक्तिविधुरत्वात्तस्य। कर्मत्वंचवाच्यत्वव्याप्तमित्याशंक्याह ॥ नचेति ॥ एवमियताग्रंथेनसूत्रेकंठोक्तामीक्षणीयत्वयुक्तिविपक्षेऽनवस्थारूपबाधकतर्कोक्त्या तस्याःप्रतिबंदीरूपतर्काप्रतिहत्युक्त्याचाप्रयोजकत्वनिरासेनासिद्धिनिरासेनचसमर्थ्य इदानीमवाच्य

नचशुद्धात्मनोवृत्तिव्याप्यत्वमेव नत्वीक्षणकर्मत्वमितिवाच्यं। वृत्तिव्याप्यत्वेनैववाच्यत्वसिद्धेः।

गु० मप्यर्थबोधकत्वोपपत्त्येक्षणीयत्वस्यार्थापत्तित्वासंभवात्। अन्यथायोगिरोगिणोरपिपीनत्वेनरात्रिभोजनकल्पनापत्तेरितिचेन्न। पदानांसर्वथानन्वितेकेवलेस्वार्थेशक्तौशतमप्यंधानांनपश्यतीतिन्यायेन संसर्गस्यपदसहस्रेणाप्यबोधापत्तेः संसर्गजिज्ञापयिषयावाक्यप्रयोगायोगेन प्रयोज्यप्रयोजकयोर्मौनमौढ्यापत्त्याऽन्वितेस्वार्थेशक्तेरावश्यकत्वात्। तत्रापिविशेषतोन्यान्वितेशक्तौपदांतरवैयर्थ्यापत्त्यासामान्यतोयोग्येतरान्वितस्वार्थएवशक्तेःसिद्धत्वात् वाक्यतुल्येयौगिकादिशब्देपि पदस्थानीयप्रकृतिप्रत्ययाद्यवयवशक्तिग्रहणसमयात्प्रागेवोपनिषद्वेद्यस्यापिब्रह्मणोवाक्यतावच्छेदकावच्छिन्नतयान्यतोज्ञानाभावात्संबंधिज्ञानविशेषापेक्षसमुदायशक्तिज्ञानासंभवेपि सामान्यलक्षणप्रत्यासत्त्यावासादृश्येनवाऽवयवार्थप्रतीत्यैवतदवच्छेदकसंसर्गरूपतयाप्रतीतत्वात् प्रकृतिप्रत्ययसमभिव्याहारवशेनविशेषतएकैकावयवाप्रतीतस्यापितत्प्रतीतिसंभवेपि तस्याएवप्रतीतेर्विशेषज्ञानेसापेक्षसमुदायशक्तिग्रहणनिरपेक्षायाःसामान्यतोप्यवयवार्थसंसर्गरूपेब्रह्मणिसिद्धेरविघातात्। रूढिसिद्धेस्तुश्रुत्यादिमानांतरेणापिसंभवात्। लाक्षणिकपदस्यतुयौगिकस्यापिशक्यसंबंधितयालक्ष्यतावच्छेदकत्वेनचलक्ष्योपस्थितिंविनालक्षणयातदुपस्थापकत्वस्यक्काप्यदर्शनान्नपरमतेऽनवस्थापरिहारोपायः। वाक्यार्थेपदप्रयोगःक्वदृष्टइत्यतआह ॥ यथोक्तमिति ॥ छंदोधीतेइतिवाक्यार्थेश्रोत्रियन्निति पदप्रयोगइत्यर्थः। ननु नब्रह्मणोवाच्यत्वं। ईक्षणकर्मत्वरूपेक्षणीयत्वानंगीकारात्। वृत्तिव्याप्यत्वस्यैवांगीकारादित्याशंक्यनिषेधति ॥ नचेति ॥ वृत्तिव्याप्यत्वंहिवृत्तिविषयत्वं। तत्रौपनिषदत्वाच्छब्देतरजन्यवृत्तिविष

प्र० पदपर्यायसौत्राशब्दपदसूचितां "पदंचनिर्गुणइतिकथंगौणंवदिष्यती" त्यनुव्याख्यानोक्तांयुक्तिमाह ॥ किंचेति ॥ नवाच्यमिति ॥ व्याहतेरितिभावः। तथाचावाच्यादिपदानांवाच्यांतराभावाच्छुद्धमेववाच्यंस्यात्। सर्वथावाच्यहीनस्यलक्षणयाशुद्धबोधकत्वायोगात्। अन्यथाघटादिशब्दोपिस्वार्थलक्षकःस्यादितिभावः। ननुनिर्गुणादिशब्दानांगुणाभावादिविशिष्टंवाच्यं। तच्चनशुद्धंब्रह्म। तस्यगुणाभावाद्युपलक्षितत्वादितिचेत्तर्हिगुणाभावोपलक्षितशब्दवाच्यत्वमनिवार्यमितिभावेनाह ॥ विस्तृतमिति ॥ न्यायामृतेऽवाच्यत्वभंगइत्यर्थः। एवंस्वाभिमतंवाच्यत्वंसमर्थ्यपराभिमतंप्रमाणंसावकाशमित्याह ॥ अवाच्यत्वेति ॥ यतोवाचइत्यादिश्रुतिरित्यर्थः। एतेनेक्षणीयत्वेनवाच्यत्वसाधनंश्रुतिबाधितमितिनिरस्तं। श्रुतेःसाकल्येनागोचरत्वरूपाप्रसिद्धत्वाभिप्रायकत्वस्य "अप्रसिद्धेरवाच्यंत" दित्यादिस्मृत्यैवोक्तत्वादितिभावः। कुतएवंश्रुतेःसंकोचइतिचेन्न। निरवकाशेक्षणीयत्वयुक्तेः स्मृत्यैवतथाव्याख्यानाच्चेतिब्रूमः। "यतइत्यादिकैर्वेदन्। अवाच्यत्वंकथंब्रूयान्मू

किंचनिर्गुणावाच्यादिपदानांसगुणंनवाच्यमितिशुद्धस्यैवतद्वाच्यत्वसिद्धिः। विस्तृतंचैतदन्यत्र। अवाच्यत्वाज्ञेयत्वादिश्रुतिस्त्वप्रसिद्धत्वाभिप्रायेतिभाष्यएवोक्तं।

गु० यत्वासंभवेनशब्दजन्यवृत्तिविषयत्वमेववक्तव्यं। तद्भिनलक्षणया। अनवस्थानात्। किंतुवचनवृत्त्यैव। एवंचवाच्यत्वसिद्धिरप्रत्यूहेत्याह ॥ वृत्तिव्याप्यत्वेनैवेति ॥ ननु निर्गुणादिशब्दानांगुणाभावादिविशिष्टंवाच्यं। तच्चनब्रह्म। तस्यविशेषाभावाद्युपलक्षितत्वादित्यतआह ॥ विस्तृतंचैतदिति ॥ "एवंतर्हिविशेषाभावोपलक्षितशब्दवाच्यत्वमनिवार्य" मित्यादिनान्यायामृतेऽवाच्यत्वभंगेविस्तृतमित्यर्थः। तर्ह्यवाच्यत्वादिश्रुतेःकागतिरित्यतआह ॥ अवाच्यत्वेति ॥ नन्वश

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- प्र० कोहमितिवत्सुधी"रित्यनुव्याख्यानेनसौत्राशब्दपदेनचसूचितंव्याघातरूपंबाधकमप्याह ॥ **अन्यथेति** ॥ वाच्यत्वसामान्यनिषेधइत्यर्थः। चंद्रिका.
॥ २१२ ॥ "अशब्दमस्पर्शमरूपमव्यय"मित्यादिश्रुतावशब्दमित्यादिशब्दवाच्यतापिनिषिध्यतेनवेतिविकल्प्याद्यआह ॥ **अशब्दमिति** ॥ अंत्यआह
॥ **नेति** ॥ ननुश्रुतेर्युक्तिबाधमात्रेणकथंसंकोचइत्यतःसावकाशत्वाद्बाधोयुक्तइतिभावेनदृष्टांतोक्त्योपपादयन्नुपसंहरति ॥ **तस्मादिति** ॥ प्र. प्र.
नचैतदिति ॥ अर्थवादाधिकरणे"शास्त्रदृष्टविरोधा"दितिपूर्वपक्षगुणसूत्रेदृष्टविरोधस्योदाहरणं"नचैतद्विद्मोब्राह्मणाःस्मोवयमब्राह्मणा"इति। ५
तत्रनचैतद्विद्मइतिब्राह्मण्यस्याज्ञानं ब्राह्मणावाऽब्राह्मणावेतिसंदेहः अब्राह्मणाएवेतिविपर्ययश्चप्रतीयते । तत्रयथाब्राह्मण्याज्ञानादेः"रूयपरा
धात्कर्तुश्चपुत्रदर्शन"मितिसिद्धांतगुणसूत्रेणदुर्ज्ञानत्वाभिप्रायउच्यते । तथेहाप्राप्यमनसासहवाचोनिवर्ततइत्यादिश्रुतेर्दुर्ज्ञानत्वदुर्वचत्वाद्यभि
प्रायत्वमित्यर्थः। ननुतत्रस्त्रीणांप्रायोपराधदर्शनात्"ब्राह्मण्यांब्राह्मणाज्जात"इत्यादिस्मृतेर्ब्राह्मणपितृसंबंधस्यदुर्ज्ञानत्वेनब्राह्मण्यस्यदुर्ज्ञानत्वेपीह

अन्यथा"अशब्द"मित्यादिश्रुतावशब्दमित्यादिशब्दवाच्यतापिनिषिध्यतेचेद्गंगाशब्दावाच्यस्यगं गात्वाभाववदशब्दशब्दावाच्यस्याशब्दत्वाभावःस्यात्। ननिषिध्यतेचेदशब्दमित्यादिशब्दवाच्य त्वंस्यात्। तस्मात्"नचैतद्विद्मोवयंब्राह्मणा"इत्यादाविवेहाप्यज्ञानादिवचनंदुर्ज्ञानत्वाद्यभिप्रायं।

गु० ब्दमित्यादिश्रुत्यासर्वशब्दावाच्यत्वस्यस्वरसतःप्रतीतेस्तत्त्यागेनाप्रसिद्धत्वाभिप्रायवर्णनमयुक्तमित्यतआह ॥ **अन्यथेति** ॥ अवाच्यत्वश्रुतेरप्रसिद्धत्वाभिप्रायत्वानंगी
कारइत्यर्थः। अत्रसकलशब्दांतर्गताशब्दशब्दवाच्यत्वंनिषिध्यतेनवा। आद्यआह ॥ **अशब्दमित्यादीति** ॥ द्वितीयआह ॥ **ननिषिध्यतेचेदिति** ॥ एवं ॥ २१२ ॥
चाशब्दशब्दवाच्यत्वनिषेधानिषेधाभ्यांवाच्यत्वमेवापद्यतइतिव्याघातइतिभावः। ननु श्रुत्यादिनापूर्वपक्षितेश्रुतिस्मृतिभिरेवसूत्रेवाच्यत्वसाधनमुचितं नन्यायमात्रेण।

SGDF
Sri Gargeshwari Digital Foundation

प्र० कुतोदुर्ज्ञानत्वमित्यत:संवादव्याजेनहेतुमाह ॥ **तदुक्तमिति** ॥ अद्भुतत्वात् आश्चर्यतमत्वादित्यर्थः । कथमाश्चर्यतमत्वं । अनंतगुणपूर्णत्वात् । ऊदे स्पष्टमुवाचेत्यर्थः । "भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवद" इत्यात्मनेपदं । इत:परंसूत्रक्रमस्त्वित्यंतमुत्तरोग्रंथस्सूत्राक्षराणांस्वारस्योक्तिपर: । तत्राद्ये "ईक्षतेर्नाशब्द"मितीक्षणीयत्वयुक्त्यावाच्यत्वंप्रसाध्य यतइत्यादिश्रुतेरप्रसिद्धत्वाभिप्रायत्वमुक्तं । तत्र"सर्वेवेदा"इतिन्यायविवरणटीकायां"ननूपपत्ति:कथंश्रुतिबाधनायाल"मित्याशंक्य"यद्यपिकेवलानुमानंनश्रुतितोबलवत् तथापिश्रुतिसहितस्यकेवलश्रुतितोबलवत्त्वाद्युक्तंतेनश्रुतिबाधन"मित्युक्तं । अत्रापिटीकायामेवमेवाशंक्य"श्रुतिस्मृतीचाहे"त्युक्तं । तथासतिसूत्रेशब्दान्नाशब्दमित्युक्ति:स्यान्नत्वीक्षणोक्तिर्युक्तेत्याशंक्यसमाधत्ते ॥ **यद्यपीति** ॥ आमनंतीतिकाठकश्रुति: । मुख्यत्वमाङोर्थइतिभाव: । आचक्षतइतिब्रह्मवल्लीस्थवाक्येप्येवंध्येयं । आहुरितितैत्तिरीयश्रुतौव्यक्तवागर्थकब्रूञ्धातोर्लेटि"ब्रुव:पंचानामादितआहोब्रुव" इत्याहादेशविधानेनवचनवृत्त्या

तदुक्तमनुव्याख्याने"अद्भुतत्वादवाच्यंतदतर्क्यांज्ञेयमेवच । अनंतगुणपूर्णत्वादित्यूदेपैंगिनांश्रुति"रिति । यद्यपिवाच्यत्वे"सर्वेवेदायत्पदमामनंति अथकस्मादुच्यतेब्रह्मेति तत्सत्यमित्याचक्षते यमिंद्रमाहुर्वरुणंयमाहुः इत्याचक्षतएतमेवसंतं तस्मादुच्यतेपरंब्रह्मे"त्यादिकाश्रुतिः

गु० नचवाच्यत्वेश्रुत्यादिकमेवनास्तीतिवाच्यं । तथात्वेह्यवाच्यत्वसाधकश्रुत्यपेक्षयान्यायमात्रस्यातिदुर्बलत्वेनतेनसिद्धांतायोगादित्याशंक्यनिराकरोति ॥ **यद्यपीत्यादिना** ॥ आमनंतीत्यत्राङावाच्यत्वसिद्धिरितिभाव: ॥ **तथापीति** ॥ तथाचवाच्यत्वसाधकश्रुतेर्न्यायानुगृहीतत्वेनप्रबलत्वात्तद्विरोधेनावाच्यत्वश्रुतेरर्थांतरपरत्ववर्णनमेवयुक्तमितिभाव: । अत्रन्यायोपोद्बलितश्रुतेरेववाच्यत्वसाधकत्वमित्यभिप्रायेणसूत्रेन्यायकथनं । नतुन्यायमात्रस्यसाधकत्वमित्यभिप्रायइतिद्रष्टव्यं । अत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० वदंतीत्येवार्थइतिभावः। इत्याचक्षतइत्यैतरेयेयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतर्चिनइत्याचक्षतएतमेवसंतंप्रवृत्तिनिमित्तवत्तयासंतमित्यर्थः ॥ **वचसामिति** ॥ "कार्याणांकारणंपूर्वंवचसांवाच्यमुत्तमं । योगानांपरमांसिद्धिंपरमंतेपदंविदु"रितिचतुर्थपादीयानुव्याख्यानोक्ता । "परमात्मेतिचाप्युक्त"इतिगीता ॥ **न्यायएवेति** ॥ तथाचन्यायानुगृहीतयाप्रबलयावाच्यत्वश्रुत्याऽवाच्यत्वश्रुतेर्बाधइतिभावः । तथाचेक्षतेरित्यस्येक्षतिरूपन्यायानुगृहीतयाश्रुत्यावाच्यत्वस्योक्तत्वादित्युक्तंभवति । वाच्यत्वश्रुतीनामन्यथासिद्धिमाशंक्यनिराह ॥ **नचेति** ॥ **अन्योन्येति** ॥ अवाच्यत्वसिद्धौलक्षणयावाच्यत्वश्रुतेश्चिन्मात्रपरत्वसिद्धिः तत्सिद्धौचावाच्यत्वेबाधकाभावादवाच्यत्वसिद्धिरित्यन्योन्याश्रयादि

"वचसांवाच्यमुत्तमं । परमात्मेतिचाप्युक्तोदेहेस्मिन्पुरुषःपरः"इत्यादिकास्मृतिश्चास्ति । तथाप्यवाच्यत्वेपिश्रुतेःसत्वाद्वाच्यत्वश्रुतिर्विशिष्टविषयानतुशुद्धविषयेतिशंकोदयाच्च । नश्रुत्यादिमात्रेणवाच्यत्वनिश्चयइति सूत्रेप्रसिद्धश्रुत्यनुग्राहकन्यायएवोक्तः । अतएववाच्यत्वस्यश्रुतत्वादित्यर्थस्येक्षतिसूत्रएवविवक्षितत्वात् "श्रुतत्वाच्चे"तिसूत्रंतत्परतयाभाष्येनव्याख्यातं । नच"तस्मादुच्यतेपरंब्रह्मे"त्यादिश्रुतिर्लक्षणयाब्रह्ममात्रपरेतिनतयावाच्यत्वसिद्धिरितिशंक्यं ।

गु० भाष्यकारीयंज्ञापकमाह ॥ **अतएवेति** ॥ न्यायोपोद्बलितश्रुतेर्वाच्यत्वसाधकत्वादेवेत्यर्थः। ननु वाच्यत्वसाधकश्रुतेरेवाभावात्कथंवाच्यत्वसिद्धिः । नच"तस्मादुच्यत"इतिश्रुतिरेवतत्रमानमितिवाच्यं । तस्याः लक्षणयाब्रह्मस्वरूपमात्रपरत्वेनतदसाधकत्वादित्याशंक्यनिराकरोति ॥ **नचेति** ॥ **अन्योन्याश्रयादिति** ॥ तस्मादुच्यतेपरंब्रह्मेत्यादिश्रुतेर्लक्षणयास्वरूपमात्रपरत्वेसिद्धेतयाश्रुत्यावाच्यत्वाभावसिद्धिः वाच्यत्वाभावेसिद्धेचलक्षणयास्वरूपमात्रपरत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः।

प्र० त्यर्थः ॥ **अनुभवादीति** ॥ ब्रह्मविषयेक्षणश्रुतिस्मृतिविरुद्धमित्यर्थः । आदिपदात्प्रागुक्तश्रुतयः ॥ **अनुभवस्येति** ॥ ब्रह्मविषयेक्षणस्येत्यर्थः । एतेनन्यायविवरणोक्तयुक्तिःसूत्रारूढेत्युक्तंभवति । "गौणश्चेन्नात्मशब्दा"दितिद्वितीये"अशब्द"मित्याद्यनुरोधाद्गौणंचेदितिस्यादित्यतआह ॥ **अत्राद्येति** ॥ अनुषक्तेन पूर्वस्मादनुवृत्तेन ॥ **सामानाधिकरण्यायेति** ॥ उपलक्षणमेतत् । "अशब्दमस्पर्श"मितिश्रुत्यनुसर

अन्योन्याश्रयात् । "यतोवाच"इत्यादेरपिलक्षणयास्वरूपमात्रपरत्वेनतयाप्यवाच्यत्वासिद्ध्यापत्तेश्च । तस्मादनुभवादिविरुद्धंसर्वशब्दावाच्यत्वं । तदुक्तंन्यायविवरणे "सर्वेवेदायत्पदमामनंतीत्यादिश्रुतिसहितानुभवस्यबलवत्त्वा"दिति । अत्राद्यसूत्रेऽनुषक्तेनतदित्यनेनसामानाधिकरण्यायाशब्दमितिनपुंसकत्वेपि द्वितीयसूत्रे"आत्मन्येवात्मानंपश्ये"दित्यादावात्मानगौणआत्मशब्दादित्यात्मशब्दसामानाधिकरण्यायगौणश्चेदितिपुँल्लिंगनिर्देशः । प्रत्युतपरस्यैव"ईक्षतेरिति

गु० किंचयतोवाचइत्यादिकंकिंविशिष्टार्थकंकिंवाखंडार्थकं । नाद्यः । सर्वेषांवेदांतानामखंडार्थत्वाभावापातात् । नद्वितीयः । स्वरूपमात्रपरत्वेनाविरोधित्वादित्याह ॥ **यतोवाचइति** ॥ ननु यतोवाचइत्यादिश्रुत्यंतरेणवाच्यत्वसिद्धेःपश्चाल्लक्षणयाब्रह्मपरत्वंतस्माउच्यतइतिनान्योन्याश्रयइत्यतोवाह ॥ **यतोवाचइत्यादेरिति** ॥ **अनुभवादिविरुद्धमिति** ॥ अनुभवशब्देनमहतांप्रत्यक्षमादिशब्देनश्रुत्यादिकंग्राह्यं । वचसांवाच्यमुत्तममिति तद्वचनादेवेतिभावः । अनुमितिर्वात्रानुभवशब्देनग्राह्येतिद्रष्टव्यं । किंचतत्पक्षेगौणइतिपुँल्लिंगंकिंपूर्वसूत्रानुसारेणोतविषयवाक्यानुसारेण । नाद्यः । पूर्वसूत्रईक्षणस्यनपुंसकलिंगेनप्रकृतत्वेनतदनुसारेणगौणइतिपुँल्लिंगानुपपत्तेः । नापिविषयवाक्यानुसारेण । सईक्षांचक्रइतिईक्षणस्यस्त्रीलिंगेनविषयवाक्येप्रकृतत्वेनपुँल्लिंगानुपपत्तेरित्यभिप्रायेण । तर्हिभवन्मतेप्यस्मिन्सूत्रेपुँल्लिंगानुपपत्तिः । पूर्वसूत्रेचाशब्दमितिनपुंसकलिंगानुपपत्तिरित्याशंकांपरिहरन्नेवपरपक्षेतदनुपपत्तिंदर्शयति ॥ **अत्रेति** ॥ तथाचास्मन्मतेपूर्वसूत्रानुसारेणनपुंसकलिंगं । आ

SGDF Sri Gargeshwari Digital Foundation

प्र० णायचेत्यपिग्राह्यं ॥ **नधात्विति** ॥ येनसगौणइतिसामानाधिकरण्यंस्यादितिभावः ॥ **क्लिष्टमिति** ॥ चेतनत्वसाधकमीक्षणंगौणमितिव क्तव्ये ईक्षणवाचकः“तदैक्षत यःसर्वज्ञ”इत्यादिशब्दोगौणइत्यर्थोक्तेःक्लिष्टत्वादित्यर्थः । ननुश्रुत्यनुसारात्पुँल्लिंगनिर्देशइत्यतआह ॥ **सइति** ॥

नधातुनिर्देशः । किंतुतदर्थस्य । तेनयःसर्वज्ञइत्याद्युदाहर्तव्य”मितिवदतोगौणश्चेदितिपुँ
ल्लिंगंक्लिष्टं । ईक्षणस्यपुँल्लिंगानिर्देशात् । “सईक्षांचक्रे”इतिपरोदाहृतेस्त्रीलिंगनिर्देशाच्च ।

गु० त्मन्येवेत्यादिविषयवाक्यानुसारेणगौणइतिपुँल्लिंगोपपत्तिरितिभावः ॥ **परस्यैवेति** ॥ “ईक्षतेरिति”चधात्वर्थनिर्देशोऽभिप्रेतोयजतेरितिवन्नधातुनिर्देशः । तेनयःसर्व ज्ञइत्यादीन्युदाहर्तव्यानी”तिसंकरभाष्यं । सांकरभाष्यव्याख्यानंलिख्यते । “इक्श्तिपौधातुनिर्देश”इतिस्मरणादीक्षतेरितिश्तिपाधातुस्वरूपकथनान्नतस्यचेतनोपादा नत्वसाधनतेत्याशंक्याह ईक्षतेरितीति । विषयिणाविषयस्यलक्षणादित्यर्थः । प्रसिद्धाचेयंलक्षणेत्याह यजतेरिति । सप्तमेस्थितं इतिकर्तव्यतावाचिविधेर्यजतेःपूर्व वत्त्वमितिकर्तव्यतायाःसौर्यादिष्वविधानादनितिकर्तव्यताकत्वेप्राप्तेप्रत्युच्यते । यथालोकेशाकादिषुसिद्धेषुवदत्योदनंपचेति तथेहसिद्धवत्कृत्यसामान्येनेतिकर्तव्यता करणंविहितं । तस्याश्चविकृतिष्वविधेःसौर्यादीनांविकृतियागानांदर्शादिप्रकृतिविहितपूर्वेतिकर्तव्यताकत्वमिति । तत्रयथायजतेरितियोगोगृहीतस्तथेहापीक्षतेरितीक्ष णमित्यर्थः । ईक्षतेरितिधात्वर्थपरत्वेवाक्यांतराण्यपिप्रधानपक्षप्रतिक्षेपायसूत्रितानिभवंतीत्याह तेनेती”त्यादि । तथाचपरभाष्येतद्व्याख्यातृभिश्चोक्तत्वान्नानुक्तोपालं भइतिभावः । अनेनैवाभिप्रायेणटीकाकारैरीक्षतेरितिधातुनिर्देशइत्युक्तं ॥ **सईक्षांचक्रइतिपरोदाहृतइति** ॥ यद्यप्यत्रसईक्षांचक्रइत्येतद्वाक्यवत्सदेवसोम्येदम ग्रआसीदित्युपक्रम्यतदैक्षतबहुस्यांप्रजायेयेति तत्तेजोसृजतेति तथाआत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सऐक्षतेत्येतदपिवाक्यत्रयंपरैरुदाहृतमिति सई

SGDF
Sri Gargeshwari Digital Foundation

प्र० भाष्येसूत्राणांविषयतयाभिन्नंभिन्नंवाक्यमुदाहृतं । तत्रदोषमाशंकते ॥ **यद्यपीति** ॥ “सएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षत” इत्याद्यसूत्रविषयवाक्यआत्मशब्दोनास्तीत्यर्थः ॥ **एवमिति** ॥ द्वितीयसूत्रविषयइत्यर्थः । यत्रमोक्षोपदेशो“यस्यानुवित्त”इत्यादौनतत्रहेयत्वावचनमित्यादिरादिपदार्थः ॥ **व्यधिकरणमिति** ॥ पुरुषमीक्षतइतीक्षणीयत्वेनोक्तःपुरुषोगौणइतिचेन्न । आत्मानंपश्येदित्यात्मशब्दादिति । सचात्मशब्दोगौणेकिंनस्यादितिचेन्न । यस्यानुवित्तइत्यादावात्मनिष्ठस्यमोक्षोपदेशात् तमेवैकमित्यादौहेयत्वावचनाच्चेति । तथाच

यद्यप्यत्र“सएतस्मा”दितियत्रवाक्यईक्षतिस्तत्रात्मशब्दोनास्ति । एवमात्मन्येवात्मानंपश्येदित्यत्रात्मशब्दस्यसद्भावेपितन्निष्ठस्यमोक्षोपदेशादिकंनास्ति । ततश्च“गौणश्चेन्नात्मशब्दा”दित्यादिव्यधिकरणमिवभाति ।

गु० क्षांचक्रइत्यस्यैवोदाहरणमयुक्तं । तथापितद्वाक्यद्वयेऐक्षतेतिईक्षणकर्तृत्वप्रतिपादनेनेक्षणस्यपुँल्लिंगेनवास्त्रीलिंगेनवाऽप्रकृतत्वात्तद्वाक्यद्वयमनुदाहृत्यसईक्षामित्येतदेवपरोदाहृतत्वेनोक्तमितिज्ञेयं । नन्वीक्षतिसूत्रेहरेर्वाच्यत्वसाधनायेक्षणीयत्वंहेतुत्वेनोक्तं । तदसिद्धमित्याशंकायांभाष्यकृतासएतस्मादितीक्षणीयत्वप्रतिपादकंवाक्यमुदाहृतं । तत्रेक्षणीयोगौणःकिंनस्यादित्याशंकायांतन्निरासार्थमात्मशब्दोहेतूकृतः । सनयुक्तः । ईक्षणप्रतिपादकवाक्यआत्मशब्दाभावात् । एवमात्मशब्दोगौणपरःकिंनस्यादित्याशंकानिरासार्थंतन्निष्ठस्यमोक्षोपदेशादिकंहेतूकृतं । तदप्ययुक्तं । आत्मशब्दयुक्तवाक्येतन्निष्ठस्यमोक्षोपदेशादेरभावात् । तथाचवैयधिकरण्यं । किंच “इक्श्तिपौधातुनिर्देश”एवश्तिपोविधानादीक्षतिशब्दस्यैववाच्यत्वसाधकत्वात्तद्रहितवाक्येनकथंवाच्यत्वसाधनमित्याशंक्यनिराकरोति ॥ **यद्यपीत्यादिना** ॥ अस्त्वीक्षतेरित्यत्रज्ञानकर्मत्वविवक्षणं । तथापिवैयधिकरण्यंकथंपरिहृतमित्यतआह ॥ **तस्येति** ॥ ननुतर्ह्यात्मशब्दयुक्तवाक्योदाहरणमेवकर्तव्यं । तत्रज्ञानकर्मत्वरूपे

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्पष्टंवैयधिकरण्यमित्यर्थः। ईक्षणीयत्वबोधकवाक्यानांसर्वेषामप्याद्यसूत्रउदाहरणत्वान्नवैयधिकरण्यमितिभावेनसमाधत्ते ॥ **तथापीति** ॥ ननुकथंपश्येदित्यादिवाक्यानामाद्यएवोदाहरणत्वं । तत्रविशिष्येक्षतेरेवोपादानेनपुरुषमीक्षतइत्यस्यैवोपादानादित्यतआह ॥**शब्दमात्रस्येति** ॥ अर्थविवक्षाहीनस्येक्षतिशब्दस्येत्यर्थः ॥ **ज्ञानकर्मत्वस्यैवेति** ॥ सुधायां"ईक्षतेरितिधातुनिर्देशः । नचाविवक्षितार्थशब्दमात्रंब्रह्मणोवाच्यत्वेहेतुर्भवितुमर्हतीतितदर्थोनेनोपलक्ष्यते । नचब्रह्मासंबंधीक्षणमप्यत्रहेतुर्भवति । अतिप्रसंगात् । संबंधश्चनकर्तृत्वादिरूपः । श्रुत्यननुगमात् । विपक्षेबाधकाभावप्रसंगाच्च । अतईक्षणंब्रह्मकर्मकमेवहेतुत्वेनवाच्यं । नचैतदपियुक्तं । व्यधिकरणत्वप्रसंगात् । तस्मादीक्षणकर्मत्वमेवहेतुतयाविवक्षित"मित्युक्तेरितिभावः । तस्य ईक्षतिकर्मत्वस्येत्यर्थः । नन्वेकस्यात्मशब्दादिनासत्त्वादिगुणहीनब्रह्मपरत्वे आत्मादिपदहीनस्यापिकुतस्तत्त्वमित्यतउक्तमेकार्थत्वादिति । नन्वेवंसर्ववाक्यसाधारण्येनसर्वत्रोक्तेक्षतिकर्मणोगौणात्मत्वनिरासायसाधारणहेतुरेवोपन्यसितव्योनतुक्काचित्कात्मशब्दमोक्षोपदेशादिरित्यतआह ॥ **एकस्येति** ॥ नन्वीक्षणात्मशब्दाद्युपेतमेकमेववाक्यंसर्वत्रकुतोनोदाहृतं । एवंसति

तथापीक्षतेरित्यनेनशब्दमात्रस्यासाधकतयाज्ञानकर्मत्वस्यैवविवक्षणीयत्वात्। तस्यच"सएतस्मा"दितिवाक्यइवात्मन्येवेत्यादिवाक्येष्वपिसत्त्वेनतेषामपिभाष्यकृतेक्षतिसूत्रउदाहृतत्वात् तेषांचवाक्यानामेकार्थत्वादात्मशब्दादिमतएकस्यवाक्यस्यनिर्गुणपरत्वेन्यस्यापितत्परतायाअपरिहार्यत्वादेकस्यनिर्गुणपरत्वमात्रेणतस्यवाच्यत्वसिद्धेश्चनवैयधिकरण्यं ।

गु० क्षणीयत्वस्यात्मशब्दस्यचसत्त्वात्। एवंचात्मशब्दरहितवाक्योदाहरणमयुक्तमित्यतआह ॥ **तेषांचेति** ॥ एकार्थत्वाद्वाक्योदाहरणंयुक्तमितिभावः। ननु सूत्रच

प्र० नवैयधिकरण्यगंधोपीत्याशंक्यानेकगुणलाभान्नानावाक्योक्तिरित्याह ॥ **यद्यपीति** ॥ ननुगतिसूत्रस्यभिन्नार्थत्वेनतदर्थस्याभावेनादोषेपिस्वाप्ययश्रुतत्वसूत्रोक्तयोर्हेत्वोरनिर्देशान्नसर्वसूत्रेष्वेकमुदाहरणंलभ्यते । तत्र"पूर्णमदःपूर्णमिदं । एकोदेव"इतिवाक्ययोरेवोक्तेःकथमेवमाशंकेत्यतआह ॥ **स्वाप्ययेति** ॥ **नदोषइति** ॥ वैयधिकरण्यदोषोनेत्यर्थः ॥ **सौत्रेति** ॥ "गौणश्चेन्नात्मशब्दा"दित्यत्रात्मशब्दः"आत्मानंपश्ये"दित्यत्रत्यात्मशब्दमात्रपरोन । किंतु"परात्परंपुरिशयंपुरुषमीक्षते यस्यानुवित्तःप्रतिबुद्धआत्मे"त्यादिवाक्यस्थश्रुतिलिंगपरोपीत्यर्थः । अतएवसुधायां"आत्मब्रह्मादयःशब्दाःसाक्षात्पूर्णाभिधायिनः"इत्यनुव्याख्यानानुरोधेन"आत्मशब्दादित्युपलक्षणं । ईक्षणीयेवस्तुन्यात्मब्रह्मपु

यद्यपि"तमेवैकंजानथे"तिवाक्ये ईक्षणीयत्वात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनानिसंतीतितदेववाक्यमाद्यसूत्रचतुष्टयउदाहर्तुंशक्यं । स्वाप्ययश्रुतत्वयोस्तुतन्निष्ठमोक्षोपदेशहेयत्वावचनयोरिवात्मशब्दस्यगौणात्मपरत्वनिरासकत्वाभावात् स्वातंत्र्येणैवचनिर्गुणस्यवाच्यत्वेहेतुत्वात्तमेवैकमितिवाक्येतयोरभावेपिनदोषः । तथापिसौत्रआत्मशब्दः"सएतस्मा"दित्यादिवाक्यस्थपुरुषादिशब्दानांपरात्परत्वादिलिंगानांचोपलक्षकः ।

गु० तुष्टयोक्तहेतूनांतमेवैकंजानथेतिवाक्येसत्त्वात्तदेवोदाहर्तव्यंनान्यवाक्यानीत्याशंक्यनिराकरोति ॥ **यद्यपीति** ॥ ननुसूत्रचतुष्टयोक्तहेतूनांतमेवैकमित्यत्रश्रवणेपि"स्वाप्ययात् श्रुतत्वाच्चे"तिसूत्रद्वयोक्तस्वाप्ययश्रुतत्वयोरश्रवणेनन्यूनत्वरूपदोषसाम्यान्नतदुदाहृतमित्यतआह ॥ **स्वाप्ययेति** ॥ अन्यवाक्योदाहरणप्रयोजनमाह ॥ **सौत्रात्मशब्दइत्यादिना** ॥ आत्मशब्दस्येवपुरुषादिशब्दानांलिंगानांचनिर्गुणपरत्वादितिभावः । ननु तथाप्यस्मिन्नधिकरणेपरैरेकप्रकरणस्थहेतुभिःप्र

SGDF Sri Gargeshwari Digital Foundation

प्र० रुषादिशब्दश्रवणात् । तेषांचपूर्णाभिधायित्वेननिर्गुणज्ञापकत्वात्"इत्यनेकवाक्यसाधारण्येनव्याख्यातमितिभावः । यद्यप्यत्रालिंगोपलक्षणो क्तिर्नास्ति तथापि"परात्परमित्यादिवाक्येषुनिर्गुणज्ञापकोक्त्याहेतुसिद्धिःसमर्थिते"त्युत्तरत्रसुधायामनुवादात्परात्परत्वादिलिंगानामित्युक्तं । अन्यथापुरुषमीक्षतइत्येवानूद्येतेतिभावः ॥ **तथेति** ॥ एतच्चानेकवाक्योक्तावेवसिद्धमितिभावः ॥ **तथेति** ॥ तमेवेतिवाक्यस्यैवोक्तौनसू त्रानुगुण्यमित्यर्थः । ननुपरमते"सदेवसोम्ये"त्येकमेववाक्यंसर्वसौत्रहेतुयुक्तंविषयइतिस्वारस्यमित्यतआह ॥ **नचेति** ॥ **परैरिति** ॥ "प्र कृतिश्चप्रतिज्ञे"त्यधिकरणेनिमित्तकारणस्यब्रह्मणउपादानत्वमप्युच्यतइत्युपेत्यतत्साधनायाद्यसूत्रे"येनाश्रुतंश्रुतंभवती"त्येकविज्ञानेनसर्वविज्ञान प्रतिज्ञायाः"यथासोम्यैकेनमृत्पिंडेने"त्यादिदृष्टांतस्यचानुरोधादित्युदाहृतत्वात् । साक्षादित्यत्र"सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्प द्यंतआकाशंप्रत्यस्तंयंती"तिजगदुत्पत्तिलययोःश्रुतत्वादिति आत्मकृतेरित्यत्र"तदात्मानमेवस्वयमकुरुते"त्यात्मनएवसृष्टौकर्मत्वकर्तृत्वोक्तेरिति

तथाईक्षणीयत्वंबहुश्रुतिसिद्धत्वान्नापलापार्हं । तथासएतस्मादितिवाक्येसूत्रोपात्तेक्षतिधात्वनुगतिरप्यस्तीत्यादिदर्श यितुंभाष्येसएतस्मादित्यादिवाक्यान्यप्युदाहृतानि । नचपरेषामिवास्माकमिदमधिकरणंवाक्यविशेषसमन्वयार्थं । किंतुवाच्यत्वसाधनार्थं । नचैकप्रकरणस्थैरेववाच्यत्वंसाध्यमित्यत्रनियामकमस्ति । परैरपिप्रकृत्यधिकरणेनानाप्रकरण स्थैःप्रतिज्ञादृष्टान्तानुपरोधसाक्षादुभयाम्नानात्मकृत्यादिभिरुपादानत्वसाधनात् । इहापिपरोदाहृतेसदेवेत्यादिवाक्य

गु० मेयसाधनाद्भवद्भिर्भिन्नप्रकरणस्थवाक्यैर्वाच्यत्वसाधनंनोचितमित्यतआह ॥ **इहापीति** ॥ किंचविषयवाक्यत्वेनोदाहृतेवाक्यांतरेसौत्रस्वाप्ययादिहेत्वनुगमोनास्ती

SGDF Sri Gargeshwari Digital Foundation

प्र० परिणामादित्यत्र''सच्चत्यच्चाभव''दितिपरिणामोक्तेरिति योनिश्चहीत्यत्र''यद्भूतयोनि''मितिचोदाहृतत्वादितिभावः॥**ईक्षतिधात्वित्यादि**॥ एतच्चान्यपक्षविवरणेस्पष्टयिष्यते ॥ **यःसर्वज्ञइति** ॥ ईक्षणरूपहेतुनिर्वाहायोदाहृतइत्यर्थः। ''तन्निष्ठस्यमोक्षोपदेशात् हेयत्वावचनाच्चे''तिसूत्रद्वयंतत्वप्रदीपे''तस्मिन्नीक्षणीयत्वेनोक्तआत्मनिनिष्ठस्यमोक्षोपदेशाच्चसनिर्गुण''इत्याद्युक्त्या तथा''अहेयत्ववचनाच्चनायंगौण''इत्याद्युक्त्या तथा''नन्वीक्षणीयत्वेनवाच्यत्वंमायाशबलस्यब्रह्मणोनशुद्धस्येत्याशंकापरिहारत्वेनतावद्गौणश्चेदिति तन्निष्ठस्येतिचसूत्रद्वयंविवृणोती''त्यादिसंन्यायरत्नावल्युक्त्याच ईक्षणीयस्यसगुणात्मत्वनिरासपरतयाव्याख्यातंभाति । टीकायांत्वात्मशब्दादित्युक्तहेतुसाधनपरतया । तत्रटीकायामेवं योजनेबीजमाह ॥ **यद्यपीति** ॥ **निरासकतयापीति** ॥ यद्यपिभाष्यटीकयोःप्रागुक्तार्थांतरपरत्वेनव्याख्यानंनप्रतीयते तथापिसामान्य

ईक्षतिधात्वात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनस्वाप्ययानांभावेपि गतिसामान्यश्रुतत्वयोरभावाच्च । यःसर्वज्ञइत्यादौ परोदाहृतेस्वाप्ययादेरप्यभावाच्च । यद्यपितन्निष्ठस्येत्यादिसूत्रद्वयमपिगौणश्चेदितिवदीक्षणीयस्यसगुणात्मत्वंनेत्यत्रापिहेतुः संभवति। तथाप्यात्मशब्दोगौणात्मपरोस्त्वितिशंकानिरासकस्यान्यस्याभावात्तन्निष्ठस्येत्यत्रचशब्दाभावाच्चात्मशब्दस्यान्यपरत्वशंकानिरासकतयापिभाष्यटीकयोर्व्याख्यातं ॥ सूत्रक्रमस्तु ॥ आद्यसूत्रेसाक्षाद्वाच्यत्वहेतोरीक्षणीयत्वस्योक्तिः ।

गु० त्याह ॥ यःसर्वज्ञइत्यादाविति ॥ ननु''तन्निष्ठस्यमोक्षोपदेशात् हेयत्वावचनाच्चे''तिसूत्रद्वयोक्तहेतुद्वयस्यात्मशब्दस्यगौणपरत्वनिरासकत्ववत्ईक्षणीयत्वस्यसगुणात्मत्वनिरासापरत्वस्यापिसंभवेनभाष्यटीकयोरात्मशब्दस्यैवगौणात्मनिरासपरत्वेनव्याख्यानमयुक्तमित्याशंक्यनिराकरोति ॥ **यद्यपीति** ॥ तर्हितत्परत्वेनकुतो नव्याख्यायतइत्यतआह ॥ **आत्मशब्दइति** ॥ नन्वीक्षतेरित्यादिसूत्राणामुक्तक्रमेनियामकाभावादन्यथापिक्रमःसंभाव्यतइत्यतआह ॥ **सूत्रक्रमस्त्विति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तःप्रवृत्तस्यभाष्यस्यप्रागुक्तार्थपरत्वेनापि तत्वप्रदीपदिशायोजयितुंशक्यत्वात् टीकायांतस्याप्यभिप्रेतत्वादितिभावेनान्यपरत्वशंकानिरासकतयापीत्यपिपदं ॥ **द्वितीयइति** ॥ गौणश्चेदितिसूत्रेहेतूक्त्यनंतरमाभासोद्धारस्यावसरादितिभावः । ईक्षणीयत्वस्यसगुणनिष्ठतयाविप्रतिपन्नेशुद्धेयाऽसिद्धिस्तदुद्धारइत्यर्थः । "निर्गुणज्ञापकोक्तयाहेतुसिद्धिःसमर्थिते"तिसुधोक्तेरितिभावः ॥ **तृतीयेति** ॥ "तन्निष्ठस्यमोक्षोपदेशात् हेयत्वावचनाच्चे"त्यनयोरित्यर्थः । तदुद्धारकस्य असिद्ध्युद्धारकस्यात्मशब्दादेः ॥ **अन्यथेति** ॥ सगुणएवमुख्यत्वशंकानिरासइत्यर्थः । "ज्ञापकस्यान्यथासिद्धिरुत्तरसूत्रेपरिह्रियत"इत्यादिसुधोक्तेः । टीकायांतथावतारितत्वाच्चेतिभावः । तत्रापि द्वयोर्मध्येपि । परंपरया निर्गुणज्ञानद्वारा ॥ **शंकायाअपीति** ॥ नकेवलंटीकाद्युक्तरीत्याऽऽत्मशब्दादेरन्यथासिद्धिशंकायाः अपितुतन्निष्ठमोक्षोपदेशस्यान्यथासिद्धिशंकाया

द्वितीयेतस्यव्यधिकरणासिद्ध्युद्धारः । तृतीयचतुर्थयोस्तुतदुद्धारकस्यान्यथासिद्धिशंकानिरासः । तत्रापिसगुणात्मनिष्ठस्यापिपरंपरयामोक्षोयुक्तइतिशंकायाअपितमेवैकमितिसावधारणाहेयत्ववचनंनस्यादितिवदताहेयत्वेत्यनेननिरासा

गु० द्वितीयसूत्रादौपरंपरयावाच्यत्वसाधकहेतोरप्युक्तत्वात्तद्व्यावृत्त्यर्थंसाक्षादिति ॥ **व्यधिकरणासिद्धीति** ॥ वाच्यत्वंपरब्रह्मणि तत्साधकमीक्षणीयत्वंसगुणइतिव्यधिकरणासिद्धिरित्यर्थः ॥ **अन्यथासिद्धीति** ॥ आत्मशब्दस्यविष्णुपरत्वमिवगौणपरत्वमप्यस्त्विति याऽन्यथासिद्धिशंकातन्निरासइत्यर्थः । ननुतथापितन्निष्ठमोक्षोपदेशहेयत्वावचनयोरुभयोरप्यात्मशब्दस्यान्यथासिद्धिशंकानिरासकत्वसाम्यात्तन्निष्ठेत्येतदानंतर्यंहेयत्वावचनस्यायुक्तमित्यतआह ॥ **तत्रापीति** ॥ सूत्रद्वयेपीत्यर्थः । नकेवलंहेयत्वावचनस्यात्मशब्दस्यप्राप्तान्यथासिद्धिनिरासकत्वं अपितुतन्निष्ठस्यमोक्षोपदेशस्याप्यन्यथासिद्धिशंकानिरासकत्वात्तदानंतर्यमितिभावेनोक्तं **इतिशंकायाअपीति** ॥ ननुहेयत्वेत्यनेनतन्निष्ठमोक्षोपदेशस्यकथमन्यथासिद्धिःपरिहृतेत्यतउक्तं **तमेवैकमितीति** ॥ ननुस्वाप्ययादितिसूत्रस्यवाच्यत्वसाधकत्वाद्वितीयत्वं

प्र० अपीत्यपेरर्थः । एवमपियोजयितुंशक्यत्वादितिभावः । टीकोक्तमुपलक्षणमितिहृदयं । टीकायामेतच्छंकानुक्तिस्तुचशब्दस्वारस्यानुरोधेन । अन्यथामुक्तोपसृप्यव्यपदेशादित्यादाविवचशब्दोनस्यादितिध्येयं । अहेयत्वेतिहेयत्वावचनादितिनञ्व्यत्यासेनार्थोक्तिः । टीकोक्तार्थेपिक्रमोयुक्तइतिभावेनाह ॥ **अभावेति** ॥ स्वाप्ययादित्यस्यहेयत्वेतिसूत्रानंतर्येटीकोक्तरीत्यैकंहेतुंवदन् तन्निष्ठसूत्रटीकयातुल्यन्यायतयासूचितंस्वयंवर्णकांतरमप्यभिप्रेत्यहेत्वंतरंचाह ॥ **स्वाप्ययस्यत्विति** ॥ **श्रुतीति** ॥ "पूर्णमदःपूर्णमिद"मित्यादिश्रुत्युक्तत्वाच्चेत्यर्थः । तत्र स्वाप्ययसूत्रे ॥ **आत्मानमिति** ॥ "सआत्मनआत्मानमुद्धृत्यात्मन्येवविलापयती"त्यादिश्रुताविर्थः ॥ **इतिशंकायाअपीति** ॥ नकेवलंटीकारीत्यागौणात्मपरत्वशंकायाइत्यपेरर्थः । तत्र सूत्रे । अर्थद्वयेपीतिवार्थः । शंकापरिहारात्मकत्वादित्युक्तहेतोर्वर्णकद्वयेपितुल्यत्वादितिभावः ॥

दभावरूपत्वाच्चहेयत्वावचनस्यतन्निष्ठेत्येतदानंतर्यं । स्वाप्ययस्यतु "श्रुत्युक्तत्वाच्चनिर्गुणोवाच्यइतिबहिरेवोक्ते कुतोयंनिर्गुणइतिशंकापरिहारात्मकत्वात्तत्रचशब्दाभाव"इतिटीकोक्तरीत्यावाच्यत्वेपरंपरयाहेतुत्वात् तथा "आत्मानंविलापयती"त्यात्मनोनाशित्वेनहेयत्ववचनात्तदवचनमसिद्धमितिशंकायाअपि नात्रनाशउच्यते किंत्वेकीभावइतिवदतास्वाप्ययादित्यनेननिरासात्पंचमता । तत्रचशब्दाभावेटीकायामेवहेतुरुक्तः ।

गु० स्यान्नतुपंचमत्वमित्यतआह ॥ **स्वाप्ययस्यत्विति** ॥ तथापिपंचमत्वंकथं तृतीयत्वंकिंनस्यादित्यतआह ॥ **तथेति** ॥ तर्हिवाच्यत्वसाधकहेतुपरत्वाच्चशब्दस्तत्रस्यादित्यतआह ॥ **तत्रेति** ॥ "श्रुत्युक्तत्वान्निर्गुणोवाच्यइत्युक्तेकुतोयंनिर्णयइत्याशंकापरिहारात्मकत्वा"दितिटीकायामेवहेतुरुक्तइत्यर्थः । ननु गतिसूत्रस्यस्वाप्ययादित्येतदानंतर्यमयुक्तं । तस्यशाखांतरेऽन्यस्यापिजगत्कर्तृत्वमुच्यतइत्याशंकानिरासकत्वेनस्वाप्ययादित्युक्तप्रमेयोपयोगिप्रतिपादकत्वाभावादित्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० षष्ठइति ॥ गतिसूत्रेवर्णकांतरमभिप्रेत्यैवमुक्तं ॥ श्रुतत्वादिति ॥ "सर्वेवेदायुक्तय"इत्यादौश्रुतत्वादितिवर्णकांतरमभिप्रेत्यैतत् । नकेवलंटीकोक्तरीत्यावाच्यत्वहेतुत्वस्येत्यपेरर्थः । टीकादावेवमेवानुक्तिस्तुचशब्दस्वारस्यानुरोधेनेतिज्ञेयं । सूत्राणामर्थस्तुटीकादौस्पष्टइतिभावः । यदत्रकश्चिदाह । इयतासूत्रसंदर्भेणात्रनयेब्रह्मणोवाच्यत्वोक्तिस्त्वन्मतेनयुक्ता । त्वयाहि"तथान्यत्प्रतिषेधा"दित्यत्र"तदेवब्रह्मत्वंविद्धी"त्यादिश्रुत्योपासनाकालेषूपासकचित्तेप्रतीतप्रतिबिंबविशेषस्यैवोपासनालंबनत्वेनोक्त्या बिंबभूतब्रह्मणउपास्यत्वनिषेधात् अन्यथामानसावलोकनरूपध्यानविषयत्वेऽव्यक्तत्वासिद्धेः । तथाचानुपास्यब्रह्मणउपासनाविधिषूपास्यसमर्पकैःपदैरवाच्यत्वस्यावश्यंवाच्यत्वात् तथासृष्ट्यादिसर्ववेदगतपदैर्ब्रह्मगुणवर्णनस्योपासनार्थत्वं"आध्यानायप्रयोजनाभावा"दित्यत्रत्वयैवोक्तमिति सर्ववेदगतानंतपदैरुपासनाकालेषूपासकानांचित्तेप्रतीतप्रतिबिंबविशेषस्यैववाच्यत्वेनबिंबभूतस्यपरब्रह्मणःप्रतिबिंबवाचिपदैर्लक्षणयाप्रतिपादनमित्यवश्यंवाच्यत्वात्कथंतस्यसर्वशब्दवाच्यत्वमित्यादि तत्तुच्छं । उपासनाकालेषूपासकचित्तेप्रतीतप्रतिबिंबरूपाद्बिंबभूतंब्रह्मान्यदित्यंगीकारेपि सर्वाण्यपिश्रुतिवाक्यान्युपासनापेक्षितब्रह्मगुणसमर्पकाणीतिचांगीकारेपिब्रह्मणःसर्वशब्दवाच्यतानपायात् । वासनामयरूपस्यमनसावलोकनंध्यानमितिचित्तेप्रतीतप्रतिबिंबरूपस्यवासनामयत्वोपगमात् । संस्कारापरनामकवासनायाश्चपूर्वानुभवजन्यत्वात् । औपनिषदस्यमानांतरागोचरस्यवस्तुनोनुभवस्यवेदादिशास्त्रे

षष्ठेतुगौणात्मन्यपिस्वाप्ययादिःशाखांतरउच्यतामितिशंकानिरासः । श्रुतत्वाच्चेत्यत्रतुगतिसामान्यस्यश्रुतत्वादित्यस्यापिविवक्षितत्वात्तस्यांत्यतेति ॥

गु० षष्ठेत्विति ॥ ननुश्रुतत्वादित्यस्यगतिसूत्रानंतर्यमयुक्तं । तस्यसाक्षाद्वाच्यत्वसाधकहेतुपरत्वेनद्वितीयत्वस्यैवन्याय्यत्वादित्यतआह ॥ श्रुतत्वाच्चेत्यत्रत्विति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० णैवोत्पाद्यत्वात् । उपासनाकालप्रतीतप्रतिबिंबजनकवासनाहेत्वनुभवोत्पादनायाखिलवेदवाक्यैर्ब्रह्मगुणवर्णनात् । तद्वर्णनस्यवचनवृत्तिविनायोगात् । सर्वस्योपासनार्थत्वादित्यस्याप्यखिलवेदविषयश्रवणमननजनितानुभवोत्पन्नसंस्कारद्वारोपासनार्थत्वादित्यभिप्रायात् । एवमेव सर्वैरपिवाच्यत्वाच्च । बिंबभूतस्यवस्तुनःसाक्षादुपास्यत्वाभावेपिज्ञानार्थत्वेनापिवाच्यत्वावश्यंभावाच्च । उपासनावज्ज्ञानस्याप्यावश्यकत्वात् । ''गुणास्सर्वेपिवेत्तव्याध्यातव्याश्चैवसर्वश''इत्यादेः । प्रतिबिंबेसन्निहितमितिज्ञानस्योपासनाकालेप्यावश्यकत्वाच्च । ''ब्रह्मैवप्रतिबिंबेयदतस्तेषांफलप्रद''मित्यादेः । उपासनाविधिवाक्यानामप्युपास्यार्पकवाक्यार्थानुभवजनितवासनामयरूपावलोकनाख्यध्यानंकार्यमित्यर्थस्यसर्वै

अन्येतु ''सदेवसोम्येदमग्रआसी''दित्यादिकारणवाक्यंसांख्यादिस्मृतिसिद्धा
चेतनकारणानुवादीतिप्राप्ते ईक्षणेनचेतनकारणताप्रापकमितिसिद्धांतइत्याहुः ।

प्र० रपिवाच्यत्वेन तत्रापिब्रह्मणोनावाच्यत्वशंकेतिनकिंचिदनुपपन्नमिति तत्त्वविद्वेषकलुषितमनीषयाभाषितमितिनैतदादरणीयं । विस्तरस्तु कंटकोद्धारे ॥ अन्येत्विति ॥ ''सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं तदैक्षतबहुस्यांप्रजायेय तत्तेजोसृजते''ति तथा''यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः । तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत''इतिछांदोग्याथर्वणयोःश्रुतंयदीक्षितृसर्वज्ञंजगदुपादानं तच्चेतनमचेतनंवेतिसंशये तत्र यत्सांख्यामन्यंते जगत्कारणस्यचेतनत्वेऽपरिणामिनस्तस्यसर्वज्ञानक्रियाकर्तृत्वलक्षणसर्वज्ञत्वसर्वशक्तित्वयोरसंभवात् प्रधानस्यचाचेतनतयातयोस्संभवादचेतनमेवजगत्कारणमिति तदेवच''सदेवसोम्ये''त्यादिवाक्यान्यनुवदंतीतिप्राप्ते''तदैक्षते''तिचेतनधर्मस्येक्षणस्यजगत्कारणेश्रव

SGDF
Sri Gargeshwari Digital Foundation

प्र० णान्नेदमचेतनं । नचैतदीक्षणं''तत्तेजऐक्षते''त्यचेतनेक्षणप्रायपाठाद्गौणं । ''अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी''तिसच्छब्दि
तेजगत्कारणआत्मशब्दश्रवणेनेक्षणस्यमुख्यत्वात् । नच''ममात्माभद्रसेन''इतिवदात्मीयेप्रधानेऽयमात्मशब्दोगौणइतिगौणमीक्षणमितिवाच्यं ।
''तत्त्वमसिश्वेतकेतो''इतिमोचयितव्यचेतनस्यप्रकृतसन्नामनिष्ठस्यश्वेतकेतोः''तस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यत''इतिमोक्षोपदेशात् ।
मुमुक्षुंचेतनंप्रतितत्त्वमसीत्यचेतनात्मतोक्तौशास्त्रस्याप्रामाण्यापत्त्याऽऽत्मशब्दस्यमुख्यत्वात् । नचारुंधतीप्रदर्शनायस्थूलतारकाप्रदर्शनवत्सू
क्ष्मब्रह्मावगत्यर्थमात्मशब्देनतत्सन्निहितस्याचेतनस्यसच्छब्दितस्यजगत्कारणस्यप्रधानस्योक्तेरमुख्यआत्मशब्दइतिवाच्यं । तथात्वेस्थूलतार
कायांनेयमरुंधतीतिवन्नायमात्मेतिहेयत्ववचनप्रसंगात् । अत्रचतदभावात् । नच''यत्रैतत्पुरुषःस्वपितिनामस्वमपीतोभवती''तिश्रुतौलयाधा

तत्रकिंविशिष्टस्यपरिणामित्वमेतद्वाक्यबोध्यमितिसिद्धांत्यते किंवाकर्तृत्वंबोध्यमिति । यद्वा

प्र० रत्वोक्त्याप्रधानमेवात्रसच्छब्दितमितिवाच्यं । जीवस्याचेतनेतत्स्वरूपापत्तिरूपलयायोगेनस्वस्मिन्ब्रह्मचेतनएवसर्वजीवानामुक्तरूपलयस्य
वाच्यतया चेतनस्यैवकारणत्वेनविवक्षितत्वात् । सर्ववेदांतेषुचेतनकारणत्वावगतेःसमानत्वात् । ''सकारणंकरणाधिपाधिपोनचास्यकश्चिज्ज
नितानचाधिप''इत्यादिषुचेतनकारणत्वस्यश्रवणाच्च । नचेक्षणरूपस्येक्षितृत्वमसंभवीतिशंक्यं । केवलस्याग्नेरदग्धृत्वेप्ययःपिंडसमारूढस्यद
ग्धृत्ववदविद्योपहितस्यतत्संभवात् । अतश्चेतनमेवजगत्कारणमितिसिद्धांतसूत्रार्थइत्याहुरित्यर्थः ॥ ॥ तत्रसूत्रार्थमग्रेनिरसिष्यन्सिद्धांतप्रमेयं
निराचिकीर्षुर्विकल्पयति ॥ **तत्रेति** ॥ बहुस्यामिति । ऐक्षतेतिचश्रवणात्पक्षद्वयं । बहुस्यामितिश्रुतमुपादानत्वंनपरिणामित्वं । अविकारि

प्र० त्वात् । किंत्वारोपाधिष्ठानत्वमेववाच्यमितिभावेनाह ॥ **शुद्धस्येति** ॥ **सत्त्वादीति** ॥ आदिपदेनाद्वितीयत्वादेर्ग्रहः । विशिष्टस्यमिथ्यात्वा
दितिभावः । नन्वत्रसत्त्वंनपारमार्थिकमितिचेन्न । लयकालीनत्वात्तदाव्यावहारिकस्यसर्वस्यविलयात् अद्वितीयत्वादेरयोगाच्च । दोषांतर
माह ॥ **पूर्वसूत्रइति** ॥ अत्र सदेवेतिवाक्ये । एतदधिकरणेच । अन्यथाप्रतिज्ञाव्याकोपइत्यर्थः । कर्तृत्वपक्षेदोषांतरंचाह ॥ **द्वितीयइति** ॥
तद्व्यनक्ति ॥ **नहीति** ॥ पूर्वपक्ष्युक्तस्यानिरासादितिभावः । अतःशब्दार्थमेवाह ॥ **प्रधानमिति** ॥ ब्रह्मपरिणामीत्यस्यैववाच्यत्वादिति

शुद्धस्यभ्रमाधिष्ठानत्वंबोध्यमिति । नाद्यद्वितीयौ । विशिष्टेसदेवेत्यादिवाक्योक्तस
त्त्वाद्ययोगात् । पूर्वसूत्रेऽखंडेसमन्वयस्यैवप्रतिज्ञातत्वेनात्राखंडस्यैववक्तव्यत्वाच्च ।
द्वितीयेवैयधिकरण्यंच । नहिप्रधानंपरिणामीतिप्राप्तेब्रह्मकर्त्रितिसिद्धांतोयुक्तः ।
अतएवनतृतीयः । प्रधानंपरिणामीतिप्राप्तेब्रह्माधिष्ठानमित्यस्यव्यधिकरणत्वात् ।

गु० अचेतनकारणत्वस्यासिद्धत्वात्कथंसदेवसोम्येत्यस्यानुवादकत्वमित्यतआह ॥ **सांख्यस्मृतिसिद्धेति** ॥ **सत्त्वाद्ययोगादिति** ॥ आदिपदेन एकमेवाद्वितीयमि
त्यादिवाक्योक्ताद्वितीयत्वादिपरामर्शः । ननुविशिष्टेवस्तुतःसत्त्वाद्यभावेपिकल्पितंतदस्तीतिवाक्यस्यतत्परत्वंस्यादित्यतआह ॥ **पूर्वसूत्रेति** ॥ तथाचक्रमासंगतिरिति
भावः ॥ **वैयधिकरण्यंचेति** ॥ परिणामित्वेनकारणत्वंप्रधानस्येतिप्राप्तेपरिणामित्वेनकारणत्वंविशिष्टस्येतिप्रथमपक्षेवैयधिकरण्यासंभवेपिद्वितीयेकर्तृत्वंब्रह्मणइति
सिद्धांतकरणेवैयधिकरण्यंस्यादित्यर्थः । ननुशुद्धस्यभ्रमाधिष्ठानत्वेप्यविद्यावशेनतस्यैवपरिणामांगीकारेणमायासंबंधेनकर्तृत्वसार्वज्ञांगीकारेणपरिणामित्वेनकारणत्वस्य

SGDF
Sri Gurgaonkar Digital Foundation

प्र० भावः । ननुप्रधानंकारणतयैतद्वाक्यबोध्यमितिप्राप्तेब्रह्मैवात्रेक्षणश्रवणादितिसिद्धांत्यते । अतोनदोषइत्यतआह ॥ **कथंचिदिति** ॥ **अयुक्त मिति** ॥ शुद्धस्येक्षणरूपतयैक्षतेत्युक्तेक्षितृत्वंनामादिव्याकर्तृत्वंचायुक्तमित्यर्थः । ननु इयंश्रुतिर्नेक्षितृत्वपरा । येनायुक्तता । किंतुलक्षणया चिन्मात्रपरेत्याशंक्य तर्हिपूर्वपक्षभंगइत्याह ॥ **तस्येति** ॥ सूत्रार्थानपिनिराचिकीर्षुराह ॥ **अपिचेति** ॥ तत्राद्यसूत्रंस्वपक्षसाधकंपरपक्षनिरासकंवेतिविकल्प्यक्रमेणनिराह ॥ **अत्रेति** ॥ **सदिति** ॥ सच्छब्दस्यैवसमन्वयादितिभावः ॥ **प्रधानस्येति** ॥ "प्रधानंनजगत्कारणं

कथंचिदवैयधिकरण्येपि"तदैक्षत सेयंदेवतैक्षत नामरूपेव्याकरो"दित्यादिकमयुक्तंस्यात् । तस्य लक्षणयाचिन्मात्रपरत्वेचसर्वमपिलक्षणयाप्रधानपरंस्यात् । सूत्रईक्षतेरित्यादिहेतूक्तिश्चनस्यात् । नचतात्पर्याविषयेणेक्षणेनप्रधाननिरासः । अपिचात्रसदेवेत्यादिवाक्यसमन्वयोक्तिश्चेदानंदमयोभ्यासादित्यादिवत्सदीक्षतेरितिसूत्रंस्यात् । प्रधानस्यशाब्दत्वनिरासमात्रंचेदिदमधिकरणं

गु० कर्तृत्वेनभ्रमाधिष्ठानत्वस्यचशुद्धएवसत्त्वान्नवैयधिकरण्यमित्यतआह ॥ **कथंचिदिति** ॥ यद्वा ननुकारणवाक्येपरिणामित्वेनप्रधानंप्रतिपाद्यमितिप्राप्तेभ्रमाधिष्ठानत्वेनब्रह्मैवतत्प्रतिपाद्यमितिसिद्धांतःक्रियते । तत्कथंवैयधिकरण्यमित्यतआह ॥ **कथंचिदिति** ॥ प्रकारभेदान्नसामानाधिकरण्यमितिकथंचिच्छब्दः । अविद्यासंबंधे शुद्धत्वहानेःपुनर्वैयधिकरण्यंतदवस्थमितिवाकथंचिच्छब्दः । नन्वीक्षणस्यविशिष्टनिष्ठत्वात्शुद्धस्यतदधिष्ठानत्वेनलक्षणयेक्षणादिव्यपदेशइत्यतआह ॥ **तस्येति** ॥ **सूत्रइति** ॥ ईक्षणस्यशुद्धेऽभावादितिभावः । ननुप्रधाननिरासार्थहेतूक्तिरित्यतआह ॥ **नचेति** ॥ ननुनहेतूक्तिवैयर्थ्यं । समन्वयार्थत्वात्प्रधानस्यशाब्दत्वनिरासार्थत्वाच्च । ईक्षणेऽवांतरतात्पर्यसत्त्वेनतन्निरासोपपत्तेः । नचतात्पर्यविषयत्वेसत्यत्वंस्यादितिवाच्यं । महातात्पर्यविषयस्यैवसत्यत्वांगीकारादित्यतआह ॥ **अपिचेति**॥ ॥ २२० ॥

SGDF Sri.Gargeshwari Digital Foundation

प्र० अशब्दंहितत् तदेवकुतः ईक्षते”रित्युक्तेरितिभावः ॥**तन्निरासकइति**॥ पररीत्यासूत्राक्षरार्थासामंजस्यंस्वमतेस्वारस्यपूर्वमाह ॥**किंचेति**॥ तदित्यस्यार्थोब्रह्मेति । तोरर्थएवेति । अशब्दमवाच्यंनेत्यर्थः ॥ **हेतुविभक्तीति** ॥ प्रधानंकुतोनकारणमित्याशंक्याशब्दंहितदित्यशब्दमि

तन्निरासकेचतुर्थपादेस्यात् । किंचास्मन्मतेआनंदमयस्तत् ब्रह्मैवेत्यादिरूपेणविधेयार्पणायानुषंजनीयस्यतत्पदस्येह तदश ब्दंन ईक्षतेरित्युद्देश्यसमर्पकतयान्वयोहेतुसाध्ययोःसामानाधिकरण्यंच । तवतु अशब्दंप्रधानंकारणंन कारणस्येक्षितृत्वा दितिवदतोहेतुविभक्त्यभावेनसाध्यत्वयोग्यश्रुताशब्दत्वरूपसाध्यत्यागेनसाध्यकल्पनार्थमध्याहृतस्यकारणपदस्यविभक्तिप रिणामेनावृत्तिर्वैयधिकरण्यंच । कारणमशब्दंप्रधानंनेतिकारणस्योद्देश्यत्वेच“अशब्दंहित”दितिहेतूकृतस्याशब्दत्वस्यकारणे

गु० ननुप्रधानशाब्दत्वनिरसनमुखेनसमन्वयस्यापिप्रतिपादनान्नासंगतिरित्यतआह ॥**किंचेति**॥ परमतेश्रुतस्यसाध्यत्वयोग्यस्याशब्दमित्यस्यसाध्यत्वपरित्यागः अश्रुत स्यकारणमित्यस्यसाध्यस्यकल्पनातस्यैवचावृत्तिः आवृत्तस्यकारणमितिप्रथमांतस्येक्षतेरित्यनेनहेतुवचनेनान्वयानुपपत्त्याषष्ठ्यंतत्वेनविभक्तिविपरिणामः कारणत्वाभा वरूपसाध्यंप्रधाननिष्ठं ईक्षतेरितिहेतुश्चकारणनिष्ठइतिवैयधिकरण्यंचेत्यनेकानिदूषणानि । ननुभवन्मतेप्यश्रुतकल्पना । अशब्दंनेत्यत्रोद्देश्यसमर्पकपदस्याश्रुतस्य कल्पनीयत्वादित्यतउक्तमानंदमयस्तद्ब्रह्मेत्यादि । तथाचानंदमयसूत्रेश्रुतस्यतदित्यस्यात्रोद्देश्यसमर्पकतयान्वयान्नाश्रुतकल्पनेतिभावः । नन्वानंदमयसूत्रेतदित्यस्या श्रवणादुभयत्रापितत्कल्पनेकल्पनागौरवमित्यतउक्तं विधेयार्पणायेति । अयंभावः । तत्तुसमन्वयादित्यत्रतदितिपदंश्रूयते । तस्यैवानंदमयस्तद्ब्रह्मेतिविधेयसमर्पकत यानुक्तस्यात्रपुनरुद्देश्यसमर्पकतयानुषंगइतिनाश्रुतकल्पनेति । ननु कारणस्योद्देश्यत्वान्नावृत्तिर्वैयधिकरण्यंचेतिचेन्न । तथात्वेऽशब्दमित्यस्यवैयर्थ्यंस्यात् । ननु तस्यहेतूकृतत्वान्नवैयर्थ्यमित्यतआह ॥ **कारणमिति** ॥ ननु नाशब्दत्वस्यप्रधानेऽसिद्धिः । मयाब्रह्मणएवसर्ववेदप्रतिपाद्यत्वांगीकारेणप्रधानस्यकुत्राप्यप्रतिपाद्यत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वस्यहेतुत्वेनत्वयोक्तत्वात्तत्रचतृतीयापंचम्यादिलक्षणहेतुविभक्त्यभावेनसाध्यत्वयोग्यमित्यर्थः ॥ **असिद्धिरिति** ॥ शास्त्रयोनित्वात्तस्येति भावः । प्रधानोद्देश्यत्वपक्षेप्यसिद्धिरित्याह ॥ **किंचेति** ॥ चतुष्टयमपिब्रह्मणएवेत्युक्तंव्यनक्ति ॥ **त्वन्मतइति** ॥ **वृत्त्यंतरेति** ॥ प्रागुक्तानवस्थापत्तेरितिभावः । ततएववेदासिद्धत्वंकारणत्वेनवेदासिद्धत्वंचबोध्यं । वृत्तिमात्राविषयेवेदसिद्धत्वाभावात् ॥ **वाच्यत्वादिति** ॥ प्रधानादिशब्दैः । ततएववृत्त्यंतरविषयत्वादिकमपीतिभावः । एतेन"अशब्दत्वंनामशब्दागोचरत्वंवाशब्दावाच्यत्वंवाऽवैदिकत्वंवा कारणतयाऽवैदिकत्वंवे"त्यादिसुधाविवृता । ननु"अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींसरूपा"मित्यादावजादिशब्दाःसूक्ष्मशरीरपराइत्यत आह ॥ **त्वयापीति** ॥ तथाचस्वमतेनायंहेतुरित्यपिप्रत्युक्तमितिभावः । ननु अशब्दमिति शब्दान्यानुमानकल्पितत्वंहेतुतयाविवक्ष्यते ।

ऽसिद्धिः । किंचाशब्दत्वमवाच्यत्वंवा शब्दवृत्तिमात्राविषयत्वंवा वेदासिद्धत्वंवा कारणत्वेनवेदासिद्धत्वंवा । चतुष्टयमपिब्रह्मणएव । त्वन्मतेशास्त्रप्रतिपाद्यस्यशुद्धस्यावाच्यत्वात् अवाच्येचवृत्त्यंतरायोगात् । नतुप्रधानस्य । सांख्यमतेतस्यवाच्यत्वात् । कारणत्वेनैवाजामित्यादिश्रुतिसिद्धत्वाच्च । त्वयापित्रिगुणस्योपादानतया "मायांतुप्रकृति"मित्यादिश्रुतिसिद्धत्वांगीकाराच्च । त्रिगुणस्यपारमार्थिकत्वादावेवहितवविवादः ।

गु० दित्यतआह ॥ **किंचेति** ॥ ननुशुद्धस्यलक्षणयाशब्दप्रवृत्तिविषयत्वादिकंभविष्यतीत्यतआह ॥ **अवाच्यइति** ॥ नन्वस्तुब्रह्मणोवाच्यत्वं । प्रधानेऽवाच्यत्वसत्वादशब्दत्वंसिद्धमेवेत्यतआह ॥ **नत्विति** ॥ ननु तथापिकारणत्वेनवेदासिद्धत्वान्नाशब्दत्वासिद्धिरित्यतआह ॥ **कारणत्वेनेति** ॥ ननुत्रिगुणात्मकप्रधानस्यां

प्र० यथात्वन्मतआनुमानिकमित्यनेनेत्याशंकामनूद्यनिराह ॥ **नन्विति** ॥ **सदेवेति** ॥ प्रधानंकारणंनेत्यस्यसदेवेत्यादिकारणवाक्यप्रतिपाद्यंनेत्यर्थस्याभिमतत्वादितिभावः ॥ **त्वयाचेति** ॥ मन्मतेआनुमानिकशब्देनतस्याहेतुत्वोक्तेर्नदोषइतिभावः । अशब्दमित्यस्यसांख्यानुमानकल्पितत्वविवक्षामुपेत्यदोषउक्तः साविवक्षैवायुक्तेत्याह ॥ **किंचेति** ॥ प्रधानस्येतिशेषः ॥ **इत्युक्तमिति** ॥ "त्वयापित्रिगुणस्ये"त्यादिनेति

ननु"आनुमानिकमप्येकेषा"मित्यत्रानुमानिकशब्देनसांख्यानुमानकल्पितंयत्त्वयाविवक्ष्यते तदेवमयात्राशब्दशब्देनलक्ष्यत इतिचेन्न । सांख्योत्प्रेक्षितानुमानगम्यत्वस्यप्रधानंसदेवेत्यादिवाक्यार्थोनेत्यत्राहेतुत्वात् । अन्यथातार्किकोत्प्रेक्षितानुमानगम्यत्वादीश्वरस्यापिसदेवेत्यादिवाक्यार्थत्वंनस्यात् । त्वयाचाशब्दंहितदितितस्यतत्रहेतुत्वोक्तेः । किंचत्वयात्रोक्ताशब्दत्वसिद्ध्यर्थंचतुर्थपादेऽव्यक्ताजादिशब्दानांसूक्ष्मशरीरादिपरतामुक्त्वाप्रधानपरतांनिषेधतातस्यसर्वथावेदासिद्धत्वमेवाशब्दत्वंवाच्यं । तच्चाशक्यमित्युक्तं । एतेनस्वप्रधानतयावेदाप्रतिपाद्यत्वमशब्दत्वमितिनिरस्तं । तदेतदभिप्रेत्योक्तंभाष्ये"नचाशब्दत्व

गु० गीकारेसांख्येनविवादोनस्यादित्यतआह ॥ **त्रिगुणस्येति** ॥ **नन्विति** ॥ तथाचनासिद्धिरितिभावः ॥ **सांख्येति** ॥ अप्रयोजकत्वादितिभावः । ननुतार्किकोत्प्रेक्षितानुमानगम्यत्वेपिसदेवेत्यादिवाक्यार्थत्वाभावःकुतइत्यतआह ॥ **त्वयाचेति** ॥ तस्य वाद्युत्प्रेक्षितानुमानगम्यत्वस्य ॥ **तच्चाशक्यमित्युक्तमिति** ॥ त्वयापित्रिगुणस्योपादानतायामायांतुप्रकृतिमित्यादिश्रुतिसिद्धत्वांगीकारेणसर्वथाशब्दावाच्यत्वंवक्तुमशक्यमित्यर्थः ॥ **एतेनेति** ॥ अव्यक्तादिशब्दानांसूक्ष्मशरीरादिपरत्वमुक्त्वाप्रधानपरत्वंनिषेधतासर्वथावेदप्रतिपाद्यत्वस्यैववक्तव्यत्वोपपादनेनेत्यर्थः । अथवामायांतुप्रकृतिमित्यादौस्वप्रधानतयाप्रतिपाद्यत्वोपपादनेनेत्यर्थः ।,स्वोक्तमशब्दत्वस्यासिद्धत्वंभाष्यानुव्याख्यानाभ्यांसंवादयति ॥ **तदेतदित्यादिना** ॥ "तदैक्षतेतीक्षणश्रवणादशब्दंहित"दितिटीकायाअयमर्थः । प्रधानंकारणत्वे

SGDF Sri Gargeshwari Digital Foundation

प्र० भावः । एतेन अशक्यमित्युक्तत्वेनेत्यर्थः ॥ **इतरेति** ॥ सांख्यस्यमायिनश्चेत्यर्थः । असौ सांख्योमायीच । एवमाद्यसूत्रेऽशब्दमितिभाग स्याभिमतार्थनिरस्येदानीमीक्षतेरितिभागस्यतंनिराह ॥ **किंचेति** ॥ अविवेकेन भेदाग्रहेण । तथाचनतेनप्रधाननिराससिद्धिरितिभावः

मितरसिद्ध''मिति । अनुव्याख्यानेच''नह्यशब्दत्वंप्रधानेंगीकरोत्यसा''विति । किंचात्मनईक्षारूपस्य नस्वरूपेणेक्षितृत्वं । अव्यक्तादिजडविशिष्टस्यतत्संभवेऽव्यक्तस्याप्यात्माविवेकेनात्मविशिष्टस्यतत्स्यात् ।

गु० नकारणवाक्यप्रतिपाद्यंनभवति । कारणवाक्येप्रधानबोधकशब्दाभावात् । नचसदेवेत्यादिवाक्येषुसच्छब्दस्यैवप्रधानबोधकत्वात्कथंतत्प्रतिपादकशब्दाभावइतिशं क्यं । तत्रसच्छब्दोक्तस्यैवोत्तरत्रतदैक्षततेतीक्षणकर्तृत्वोक्त्यासच्छब्दस्यप्रधानपरत्वेतस्याचेतनत्वेनेक्षणकर्तृत्वासंभवेनतच्छब्दस्यप्रधानपरत्वासंभवादिति । टीकाया मश्रौतत्वमिति । कारणवाक्येतत्प्रतिपादकशब्दाभावइत्यर्थः ॥ **तेनेति** ॥ सांख्येनसदादिशब्दानामेवप्रधानपरत्वाभ्युपगमात्कारणवाक्येप्रधानपरशब्दाभावःसां ख्यमतेऽसिद्धः । नचोक्तदोषः । सत्त्वात्संजायतेज्ञानमित्युक्तेःतस्येक्षणोपादानत्वेनेक्षणकर्तृत्वोपचारोपपत्तेरितिभावः ॥ **स्वन्यायेनेति** ॥ मायिन्यायेनेत्यर्थः ॥ **श्रुतत्वादिति** ॥ अजामेकामित्यादिकारणवाक्येष्वजादिशब्दानांप्रधानपरत्वेन स्वन्यायेनापिकारणवाक्येषुप्रधानपरत्वाभावोनेत्यभिप्रायः । ननु मास्त्वशब्दत्वेन प्रधानस्यसदेवेत्यादिवाक्यार्थत्वाभावः ईक्षितृत्वेनतदभावःस्यादित्याशंक्य यथाप्रधानस्येक्षितृत्वासंभवात्सदेवेतिवाक्यार्थत्वाभावः तथाब्रह्मणोपिईक्षितृत्वासंभवान्नसदे वेतिवाक्यार्थत्वंतस्येत्याशयेनेक्षितृत्वंपृच्छति ॥ **किंचेति** ॥ स्वरूपेणेक्षितृत्वंवाऽन्योपाधिकंवा । नाद्यइत्याह ॥ **आत्मनइति** ॥ ईक्षारूपस्येतिहेतुगर्भविशेषणं । तथाच ब्रह्मनेक्षणकर्तृ ईक्षारूपत्वात् योयद्रूपःसनतत्कर्ता यथागमनंगमनरूपंनस्वकर्त्रितीक्षितृत्वाभावात्तस्यापिसदेवेत्यादिवाक्यार्थत्वंनस्यादित्यर्थः । नद्वितीयइ त्याह ॥ **अव्यक्तादीति** ॥ नन्वव्यक्तस्यात्मविशिष्टत्वंनात्मासंभिन्नत्वंप्रधानस्यजडत्वेनात्मासंभिन्नत्वाभावादित्यतउक्तमात्माविवेकेनेति । तथाचप्रधानस्यसदेवेत्या

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ तन्निष्ठस्येति ॥ त्वन्मते "तत्त्वमसिश्वेतकेतो" इतिशुद्धनिष्ठस्यैव "तस्यतावदेवचिर" मितिमोक्षोपदेशादित्यर्थोक्तेरितिभावः। एतेन "ईक्षितृत्वंचेक्षणगुणयोगित्वं। तद्ब्रह्मण्यपिगौणमेवे" तिसुधाविवृता। एवमाद्यसूत्रार्थनिरस्यय दुक्तंद्वितीये "ईक्षणस्यागौणत्वआत्मशब्दा" दितितत्रसुधोक्तमुपलक्षणंमत्वातद्विकल्प्यनिराह ॥ आत्मेति ॥ असिद्धिरिति ॥ "सदेवसोम्ये" त्यादिकारणवाक्यार्थत्वेनत्वदभिमतेशुद्धेऽवाच्य आत्मपदवाच्यत्वानंगीकारादित्यर्थः। प्रतिपाद्यत्वमात्रं वाच्यत्वलक्ष्यत्वसाधारणं। तथाचगौणेक्षणवत्यपिसत्त्वादप्रयोजकइतिभावः।

तन्निष्ठस्येत्याद्युत्तरसूत्रविरोधश्च। आत्मशब्दादित्यत्राप्यात्मशब्दवाच्यत्वंहेतुश्चेदसिद्धिः। तल्लक्ष्यत्वतत्प्रतिपाद्यत्वमात्रेतुप्रधानस्यापि। किंचकिमात्मशब्दस्यचेतनार्थत्वादचेतनेप्रधानेतदनुपपत्तिर्विवक्षिता किंवातस्यस्वरूपार्थत्वादनेनजीवेनात्मनेतिचेतनतयाप्रसिद्धजीवस्वरूपतायाअचेतनेनुपपत्तिः। नाद्यः।

गु० दिवाक्यार्थत्वंस्यादितिभावः। नन्वीक्षितृत्वेनप्रधानस्यसदेवेत्यादिवाक्यार्थत्वाभावासंभवेपिदेवतात्वनामरूपादिव्याकरणलिंगेनप्रधानस्यसदेवेत्यादिवाक्यार्थत्वाभावः अव्यक्तविशिष्टस्यसदेवेत्यादिवाक्यप्रतिपाद्यत्वंचस्यादित्यतआह ॥ **तन्निष्ठस्येत्यादीति** ॥ विशिष्टज्ञानेनमोक्षासंभवादितिभावः। ननु मास्त्वीक्षितृत्वादिनाप्रधाननिराकरणं। आत्मशब्दादिनातुसेत्स्यतीत्यतआह ॥ **आत्मशब्दादिति** ॥ नचविशिष्टस्यात्मशब्दवाच्यत्वमस्त्विति वाच्यं। तथात्वेतन्निष्ठसूत्रविरोधस्योक्तत्वात्। तथाचशुद्धस्यवाच्यत्वाभावादसिद्धिरेवेतिभावः। नन्वात्मशब्दवाच्यत्वादिकंनात्मशब्दार्थः। एवंचप्रधानआत्मत्वाभावेनतदर्थकात्मशब्दाभावान्नातिप्रसंगइत्यरुचेराह ॥ **किंचेति** ॥ नद्वितीयइत्याह ॥ **विशिष्टइति** ॥ **उक्तरीत्येति** ॥ अव्यक्तादिजडविशिष्टस्यात्मनोज्ञातृत्ववदव्यक्तस्यापिस्वरूपेणज्ञातृत्वाभावेप्यात्मावि

SGDF
Sri Gargeshwari Digital Foundation

प्र० आद्येपिचेतनत्वंज्ञातृत्वंवाज्ञानत्वंवेतिविकल्प्यक्रमेणनिराह ॥ **चेतनत्वस्येति** ॥ उक्तरीत्या आत्माविवेकेनेत्युक्तरीत्येत्यर्थः। तदर्थस्य ज्ञान त्वरूपचेतनार्थकस्य ॥ **प्रधानैक्यस्येति** ॥ तथाचनतत्प्रधानव्यावर्तकमितिभावः । उपलक्षणमेतत् । गौणश्चेतिपुल्लिंगानुपपत्तिःप्रागुक्ता ध्येया । तृतीयसूत्रार्थमपिनिराह ॥ **तन्निष्ठस्येति** ॥ **प्रधाननिष्ठस्येति** ॥ आत्मानात्मविवेकार्थमनात्मज्ञानस्याप्यावश्यकत्वादितिभावः

चेतनत्वस्यज्ञातृत्वरूपत्वेब्रह्मण्यपिशुद्धेतदभावात् । विशिष्टेचेत्प्रधानेप्युक्तरीत्यातत्संभवात् । ज्ञान त्वरूपत्वेतुतदर्थस्यात्मशब्दस्येक्षितृत्वंगौणमित्यत्रैवहेतुत्वेनगौणत्वाभावेहेतुत्वायोगात् । नांत्यः । सार्वज्ञासार्वज्ञादिविरुद्धांशत्यागेनचिद्रूपेणजीवब्रह्मैक्यवज्जडत्वादिविरुद्धांशत्यागेनसद्रूपेणप्रधानैक्य स्यापिसंभवात् । तन्निष्ठस्येतिसूत्रेपितच्छब्दार्थःशुद्धआत्माविशिष्टोवा । नाद्यः । तस्याद्यसूत्रोक्तेक्षि तृत्वायोगात् । नांत्यः । विशिष्टनिष्ठस्यसाक्षान्मोक्षानन्वयात् । परंपरयातदन्वयस्तुप्रधाननिष्ठस्यापि ।

गु० वेकेनात्मविशिष्टस्यज्ञातृत्वसंभवादित्युक्तरीत्येत्यर्थः । द्वितीयंप्रत्याह ॥ **ज्ञानत्वरूपत्वइति** ॥ **हेतुत्वायोगादिति** ॥ नित्यत्वसाधककृतकत्ववद्गौणत्वाभावसा धनार्थंप्रयुक्तस्यात्मशब्दस्येक्षितृत्वंगौणमित्यत्रैवहेतुत्वेनविरुद्धत्वापातादितिभावः । यदिचेतनत्वेनप्रसिद्धजीवस्वरूपताप्रधानेनसंभवति तस्याचेतनत्वादिति तर्हिस र्वज्ञत्वेनप्रसिद्धब्रह्मस्वरूपेणसहजीवस्याप्यैक्यंनस्यात् । तस्याज्ञत्वेनप्रसिद्धत्वात् । तथाचजीवप्रधानयोरैक्यसंभवादात्मशब्देनतन्निराकरणमयुक्तमित्याह ॥ **सार्व ज्ञासार्वज्ञादीति** ॥ नचविरुद्धधर्माणांस्वाभाविकत्वान्ननिवृत्तिरितिवाच्यं । तथात्वेसार्वज्ञादेरपिस्वाभाविकत्वेननिवृत्तिर्नस्यादितिभावः । ननुविशिष्टस्यपरंपरयाऽवि

प्र० ॥ **एवमिति** ॥ सूत्राणामर्थःप्रागस्माभिरुक्तः। दूषणंतुतन्निष्ठस्येत्यत्रात्मशब्दस्यगौणत्वेशंकितेतदुत्तरसूत्रेबाधकाभावएववाच्योनतुहेयत्वाव चनोक्तिःसंगता । नहिसांख्येनाद्वैतज्ञानार्थंप्रधानोपदेशःशंकितः । येनसासंगतास्यात् । हेयत्वावचनमन्नमयादिष्विवाब्रह्मत्वेप्युपपन्नंच । अन्नमयादिषुपूर्वपूर्वस्याब्रह्मत्वउत्तरोत्तरब्रह्मत्वोक्तिर्ज्ञापिकेतिचेदत्राप्यब्रह्मत्वेबहुस्यामितिपरिणामोक्तिर्ज्ञापिकेतिसुवचं । पंचमेपि स्वाप्ययो नामजीवस्यसुप्त्यादावैक्यंवापरिष्वंगमात्रंवा । नाद्यः । ब्रह्मपक्षेप्यभावात् । द्वितीयंतुप्रधानेपिसंभवति । षष्ठेपि ब्रह्मकारणताविषयंगति सामान्यंसांख्यस्यासिद्धमेव । ईक्षणादिनातज्ज्ञापनेप्रथमसूत्रेणगतार्थता । श्रुतत्वादित्येतदपिपरस्यासिद्धमेव । पूर्ववदीक्षणादिनातज्ज्ञापने तुपूर्ववत्प्रधानसूत्रेणगतार्थतागतिसूत्रेणपुनरुक्तिश्चेति ॥ **एतेनेति** ॥ सदेवेत्यादिवाक्यबोध्यंप्रधानमुतब्रह्मेतिसंशये "येनाश्रुतंश्रुतंभवती"ति "यथासोम्यैकेनमृत्पिंडेने"त्याद्यनुमानाकारवाक्यप्रतिपाद्यस्यानुमानिकत्वावगमात्प्रधानमेव । नचेक्षणायोगः । तेजःप्रभृतिगतगौणेक्षण साहचर्येणगौणत्वादितिप्राप्ते ईक्षणान्वयात्ब्रह्मैव । नचानुमानिकत्वावगमविरोधः । येनाश्रुतमित्यादौहेत्वनुपादानेनानुमानाकारत्वाभा वात् । नचयथासोम्यैकेनेत्यादिदृष्टांतेनैवास्यानुमानाकारत्वसिद्धिः । तस्यान्यज्ञानेनान्यज्ञानासंभवशंकासमाधानार्थतयान्यथासिद्धत्वात् ।

एवंसूत्रांतरेपिसुधोक्तरीत्यादूषणंद्रष्टव्यं। एतेन इदमधिकरणं प्रधानादेर्जडस्यहेतुत्वनिरासकमितिकेषांचित्पक्षोप्यपास्तः ।

गु० शिष्टद्वारामोक्षान्वयोस्त्यवेत्यत आह ॥ **परंपरयेति** ॥ तथापिहेयत्ववचनेनप्रधाननिराकरणंस्यादेवेत्यत आह ॥ **एवमिति** ॥ अतिदेशेनरामानुजमतंदूषयति ॥ **एते**

SGDF
Sri Gargeshwari Digital Foundation

प्र० नचेक्षणंगौणमितिवाच्यं । तदैक्षतेतीक्षितरि“ऐतदात्म्यमिदंसर्वं”मितिचेतनवाच्यात्मशब्दात्“तत्वमसी”तिसदात्मतयाप्रत्यगात्मानुसंधाननिष्ठस्य“तस्यतावदेवचिर”मितिमोक्षोपदेशाच्च । हेयत्वावचनाच्चसद्ब्रह्मैव । प्रधानस्यमोक्षविरोधित्वेनहेयत्ववचनप्रसंगात् । “सतासोम्ये”तिजीवस्यस्वकारणेसत्यप्ययस्यश्रवणात् प्रधानस्यजीवकारणत्वाभावात् अन्योपनिषत्सु“तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत”इति“तस्माद्वाएतस्मादात्मनआकाश:संभूत”इतिचपुरुषोत्तमस्यैवहेतुत्वोक्त्यातद्गतिसामान्यादत्राप्यात्मनएवेदंसर्वमितिब्रह्मकारणत्वस्यश्रुतत्वाच्चेतिसिद्धांतइत्याहुरित्यर्थः । एतेनेत्युक्तंव्यनक्ति ॥ **समन्वयेति** ॥ सूत्राक्षरार्थासामंजस्यादिरादिपदार्थः । अधिकरणप्रमेयंनिराह ॥ **किंचेति** ॥ प्रधानस्यकारणत्वंवोपादानत्वंवा वाक्यांतरसिद्धकारणत्वेप्येतद्वाक्यबोध्यत्वंवा भगवदशरीरत्वंवा कर्तृत्वंवा । कर्तृत्वेसत्युपादानत्वंवा निर

समन्वयासंगत्यादेः । किंच

गु० नेति ॥ अतिदेशार्थमाह ॥ **समन्वयासंगत्यादेरिति** ॥ समन्वयाध्यायेसमन्वयसूत्रोक्तलक्षणासंभवनिरासकेप्रथमपादेचातिव्याप्तिनिरासकस्यासंगतेः । समन्वयप्रतिपादनेतुसईक्षतेरितिनिर्देशापत्तेरित्यर्थः । प्रधानस्यकारणत्वमात्रनिरासकेक्षितृत्वाद्ययोगोवाऽऽदिशब्दार्थः । ननु नसमन्वयासंगतिः । प्रधानकारणत्वनिरासद्वारेणब्रह्मकारणत्वप्रतिपादनेनकारणवाक्यसमन्वयप्रतिपादकत्वात् । नापीक्षितृत्वाद्यनुपपत्तिः । सदेवेत्यादिवाक्यंनप्रधानकारणत्वपरं । ईक्षणप्रतिपादकत्वात् । तथाचनासंगत्यादिकमित्यतआह ॥ **किंचेति** ॥ किमत्रप्रधानस्यकारणत्वमेवनिरस्यते किंवासद्विद्यायांब्रह्मकारणत्वंप्रतिपाद्यते उतप्रधानस्येश्वरशरीरत्वं

SGDF Sri Gargeshwari Digital Foundation

प्र० स्यतइतिविकल्प्याद्यद्वितीयौनिराह ॥ **नतावदिति** ॥ **विशिष्टस्येति** ॥ प्रधानादिना । तृतीयंनिरस्यति ॥ **नापीति** ॥ **सर्वाणीति** ॥ तथाचनक्वापिप्रधानस्यकारणत्वसिद्धिरितिभावः ॥ **अचित्त्वेति** ॥ एतच्चकारणवाक्येषुसर्वत्रजडंनोच्यतइत्यर्थसमर्थनपरत्वएवास्याधिकरण

नतावत्प्रधानस्यकारणत्वमुपादानत्वंवानिरसितुमिदमधिकरणं। तयोस्त्वन्मतेपिप्रधानेसत्त्वात्। उक्तंहि"तदधीनत्वा" दितिसूत्रेत्वयैव"नवयमव्यक्तंतत्परिणामविशेषांश्चस्वरूपेणनाभ्युपगच्छामः। अपितुपरमपुरुषशरीरतयातदात्मकत्वविरहेणे"ति। यथाचप्रधानंकेवलमकारणंतथाब्रह्मापि। विशिष्टस्यैवकारणत्वात्। नापिप्रधानस्यवाक्यांतरात्कारणत्वेपि "सदेवसोम्येद"मित्यादिसद्विद्यायाब्रह्मकारणत्वपरत्वमितिवक्तुमिदं। "यदिसद्विद्याब्रह्मपरातदातदैकार्थ्यात्सर्वाणिकारणवाक्यानिब्रह्मपराणी"तित्वयैवोक्तत्वात्। अन्यथेक्षत्यधिकरणंकारणस्याचित्त्वनिरासकमितित्वदभिप्रेतस्यासिद्धेः।

गु० यद्वाप्रधानस्यकर्तृत्वेसत्युपादानत्वाभावः। तत्रनाद्यइत्याह ॥ **नतावदिति** ॥ ननु प्रधानस्वरूपमेवनांगीक्रियते। तथाचकारणत्वोपादानत्वयोःकथंप्रधानेसत्त्वादित्युच्यतइत्यतआह ॥ **उक्तंहीति** ॥ **तदात्मकत्वेति** ॥ तदात्मकत्वविरहेणनाभ्युपगच्छामः। किंतुतदात्मकत्वेन । तदात्मकत्वमपिकीदृशमित्यतउक्तं परमपुरुषशरीरतयेति। तथाच तदात्मकत्वंतत्स्वामिकत्वं तन्नियम्यत्वं तद्विरहेण स्वातंत्र्येण सांख्यवन्नाभ्युपगच्छामइत्यर्थः। ननुप्रधानस्यपरमपुरुषशरीरतयाकारणत्वेपिकेवलस्यतन्निषिध्यतइत्यतआह ॥ **यथाचेति** ॥ कुतोनेत्यतआह ॥ **विशिष्टस्यैवेति** ॥ शुद्धस्यनिर्धर्मकत्वेनकारणत्वाद्यभावादितिभावः। द्वितीयंप्रत्याह ॥ **नापीति** ॥ **यदीति** ॥ तथाचवाक्यांतरेप्रधानस्यकारणत्वेनप्रतिपादितत्वांगीकारे व्याहतिरितिभावः ॥ **अन्यथेति** ॥ कारणवाक्यमात्रस्यब्रह्मपरत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यसंभवतीतिभावः । ननुकारणवाक्यमात्राबोध्यस्याप्यनुमानादिनाकारणत्वसिद्धिरित्याशंक्यसमाधिमाह ॥ **नचेति** ॥ चतुर्थंप्रत्याह ॥ **नापीति** ॥ पंचमषष्ठौप्रत्याचष्टे ॥ **नापिप्रधानस्येति** ॥ **पुनरुक्तेश्चेति** ॥ “प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधा”दित्यत्रकर्तृत्वेसत्युपादानत्वस्य ब्रह्मणएवोक्तत्वादितिभावः । अधिकरणक्रमंनिराह ॥ **किंचेति** ॥ चतुरधिकरण्याः“व्युत्पत्त्यभावःप्रतिपत्तिदौस्थ्य”मित्यादिना

नचसर्वेषांकारणवाक्यानांब्रह्मपरत्वेपिप्रधानकारणतायामानांतरात्सिद्धिः । कारणस्यशास्त्रयोनित्वात् । नापिप्रधानस्येश्वरनियम्यत्वादिरूपतच्छरीरत्वनिरूपणार्थमिदं । अत्रतदप्रतीतेः । अंतर्याम्यधिकरणेतदधीनत्वादित्यादावन्यत्रैवतन्निरूपणाच्च । नापिप्रधानस्यकर्तृत्वंवाकर्तृत्वेसत्युपादानत्वंवानिरसितुमिदं । तयोःप्रधानेसांख्येनाप्यनंगीकारात् । प्रकृत्यधिकरणेनपुनरुक्तेश्च । किंच त्वत्पक्षेशास्त्रयोनिसूत्रेवेदांतानामनुमानप्राप्तकारणानुवादित्वेनाविचार्यत्वमितिपूर्वपक्षवदिहापि सांख्यस्मृतिप्राप्तानुवादित्वेनाविचार्यत्वमितिपूर्वपक्षसंभवादिदमधिकरणं चतुस्सूत्रीवच्छास्त्रारंभसमर्थनार्थंसत्समन्वयसूत्रात्पूर्वंस्यात् ।

गु० नंगीकारइत्यर्थः ॥ **नचेति** ॥ तथाचमानांतरेणप्रधानकारणतायाःसिद्धत्वान्नव्याहतिरितिभावः । तृतीयंदूषयति ॥ **नापीति** ॥ **अत्रतदप्रतीतेरिति** ॥ अस्मिन्नधिकरणेप्रधानस्येश्वरशरीरत्वप्रतिपादकत्वाद्यप्रतीतेरित्यर्थः । ननु प्रधानस्येश्वरशरीरत्वनिरूपणाभावेतदभावापातेनशरीरत्वप्रतिपादकश्रुत्यादिविरोधइत्यतआह ॥ **अंतर्यामीति** ॥ चतुर्थंप्रत्याह ॥ **नापीति** ॥ **तयोरिति** ॥ यद्यपिसांख्येनप्रधानेकर्तृत्वादिकमंगीकृतं तथाप्युपादानगोचरापरोक्षज्ञप्तिचिकीर्षाकृतिमत्त्वरूपंतन्नांगीकृतमित्याशयः । यद्वैतदस्वरसादाह ॥ **प्रकृतीति** ॥ ननु नपौनरुक्त्यं वेदांतानविचार्याः सांख्यस्मृतिप्राप्तकारणानुवादित्वादित्यविचार्यत्वेनपूर्वपक्षिते विचार्यत्वप्रतिपादनार्थमेतदधिकरणमित्यरुचेराह ॥ **किंचेति** ॥ ननु गोचरशब्दस्यनित्यपुँल्लिंगत्वेननशब्दगोचरइतिभाष्येवक्तव्यं । शब्दगोचरमितिकथमुक्तमित्यतः

प्र० रंभार्थत्वोक्तेरस्यापितदंतर्भावः । तत्रापिशास्त्रयोनिसूत्रेणैकार्थ्यात्तदानंतर्यमेवस्यात् । तथाचपंचानामपितदारंभोपयुक्तत्वमेवोपपन्नमितिभावः । उक्तमतद्वयदूषणेनैवयादवप्रकाशाधिकरणप्रमेयमपिनिरस्तप्रायंमन्वानोधिकंवक्तुमाह ॥ **यादवेति** ॥ एकार्थकवाक्यभेदमात्रेणसूत्रभेदेजिज्ञासादिसूत्रभेदःस्यात् । जिज्ञासावाक्यानांकारणादिवाक्यानांचनानात्वादित्यर्थः । एतेन“सदेवे”त्यादौ“बहुस्या”मितिपरिणामश्रवणात्सांख्योक्तंप्रधानमितिप्राप्ते ईक्षणात्सशब्दादेःशिवएवसत्पदवाच्यंकारणमितिसिद्धांतइतिकेनचिदुक्तंनिरस्तं । समन्वयासंगतेः । सदीक्षतेरितिविन्यासापत्तेश्च । शिवकारणत्वस्योक्तवक्ष्यमाणानेकमानैःपत्युरधिकरणेनचविरोधाच्च । ईक्षतिकर्मेत्यत्रास्यवाक्यस्यविष्णुपरतायावक्ष्यमाणत्वाच्च । “सर्वोत्तमत्वात्सन्नामाहरिर्नारायणःप्रभु”रित्यादिनाछांदोग्यभाष्येषष्ठेप्रमाणेनैवास्यवाक्यस्यविष्णुपरतयाव्याख्यातत्वाच्च । “तेजोभिमानवान्ब्रह्मावायुश्चाबभिमानवान् । रुद्रःक्षित्यभिमानीचाप्येतन्मयमिदंजग”दित्यादिना“इत्यादिब्रह्मांड”इत्यंतेन बृहदारण्यकभाष्येप्रथमेध्यायेऽस्यप्रकरणस्यविष्णुपरतयास्पष्टमुक्तत्वाच्च । “साधुत्वात्सन्हरिःस्मृत”इत्याद्यनेकमानोदाहरणेनास्यप्रकरणस्यविष्णुपरतायास्तत्वनिर्णयेप्युक्तत्वाच्च । कारणत्वोपादानत्वयोःप्रधानेसत्त्वेनतन्निरासायोगाच्च । कर्तृत्वस्यसांख्येनानंगीकाराच्च । केवलप्रधाने

यादवप्रकाशीयेतु“स्वाप्यया”दित्यस्य“सतासोम्यतदासंपन्नोभवती”तिवाक्यंविषयः । “गतिसामान्या”दित्यस्यतु“सतिसंपद्यनविदुःसतिसंपत्स्यामह”इतिवाक्यंविषयइत्युक्तं । तन्न । वाक्यभेदेनसूत्रभेदेऽतिप्रसंगात् ॥ टीकाक्षरार्थस्तु ॥ [१२।१४] नतच्छब्दगोचरमितियुक्तमिति ॥

गु० तत्समाधानार्थंटीकायां“त्रयीनश्रुतिगोचरेतिगोचरशब्दस्यविशेष्यलिंगतयाप्रयोगान्नतच्छब्दगोचरमितियुक्त”मित्युक्तं । तथाचसिद्धांत्यभिप्रेतवाच्यत्वसाधकेक्षणी

SGDF Sri Gargeshwari Digital Foundation

प्र० तयोरभावेकेवलेशिवेतद्भावस्यसुवचत्वाच्च । अशब्दमानुमानिकंनप्रधानंजगत्कारणमित्यध्याहाराद्यापाताच्च । गौणइतिपुँल्लिंगायोगाच्च । प्रागुक्तवचनैर्भाष्योक्तदिशाचात्मशब्दस्यविष्णावेवमुख्यतयाशिवपरत्वायोगाच्च । यदपि मास्त्वचेतनंसत्पदवाच्यं । जीवस्तुस्यात् । ईक्षणात्मशब्दादेस्तत्रसंभवादित्यतस्तन्निष्ठस्येतिसूत्रमिति । तदपिन । बहुस्यामितिप्रथमश्रुतबहुभवनविरोधेनजीवशंकानुदयात् । सांख्येनजीवकारणत्वानंगीकाराच्च । शिवस्यापिप्रागुक्तदिशाजन्मादिमत्तयाजीवत्वेन"परोहिपुरुषोविष्णुस्तस्मान्मोक्ष"इतिभाष्योक्तस्मृतिविरोधेनतन्निष्ठस्य मोक्षायोगाच्च । सूत्रांतराण्यप्युक्तदिशादूषितप्रायाणीतियत्किंचिदेतत् ॥ ॥ नकेवलंटीकोक्तदिशाप्रयोगवशादेवसाधुत्वंकिंतु"यदितत्स्यादगोचर"मित्यनुव्याख्यानसुधोक्तदिशावयववृत्त्याविशेष्यनिघ्नतयापीतिभावेनाह ॥ **उपलक्षणमिति** ॥ गवामित्यस्यार्थोज्ञानानामिति ॥ **चरश्चरणमिति** ॥ चरतेस्तृतीये"ग्रहवृदृनिश्चिगमश्चे"तिसूत्रे"घञर्थेकविधान"मितिवार्तिकोक्त्याकप्रत्ययेरूपं । "गोचरसंचरवहव्रजव्यजापणनिगमाश्चे"तिसूत्रेमंजर्यां"रूढशब्दोयंविषयपर्यायः । तस्ययथाकथंचिन्निर्वचन"मित्युक्तेरितिभावः ॥ **व्यधिकरणेति** ॥ "सप्तमीविशे

उपलक्षणंचैतत् । शब्दानांगवांज्ञानानांचचरश्चरणंवृत्तिर्यस्मिन् तच्छब्दगोचरमितिव्यधिकरणबहुव्रीहिंवा चरश्चरणमस्यास्तीतिमत्वर्थीया

गु० यत्वस्यासिद्धिः । कथं शब्देनेक्षणासंभवेपिमनसेक्षणीयत्वसंभवादित्यतईक्षणीयत्वासिद्धिकथनपरतयातद्व्याचष्टे ॥ **उपलक्षणंचैतदिति** ॥ **वृत्तिरिति** ॥ शब्दपरत्वेवृत्तिर्वाच्यवाचकभावसंबंधः ज्ञानपक्षेविषयविषयिभावइतिभावः । नन्वत्रशब्दवाच्यत्वमात्रस्यैववक्तव्यत्वेनशब्दगोचरंनेत्यनेनज्ञानाविषयत्वोपपादनमसंगतं

SGDF Sri Gargeshwari Digital Foundation

प्र० षणेबहुव्रीहा"वित्यत्रद्वितीयेज्ञापितत्वादितिभावः ॥ **अच्प्रत्ययेति** ॥ "अर्शआदिभ्योच्"इतिसूत्रादितिभावः । तेन"गवांज्ञानानांचरोवृत्तिरस्मिन्निति गोचर"मितिसुधावाक्यंद्वेधायोज्यमित्युक्तंभवति । एवमाश्रयणस्यफलांतरमप्याह ॥ **ततश्चेति** ॥ अतएवसिद्धांतेऽज्ञेयत्वस्यगत्युक्तिर्भाष्यइतिभावः । एतेनकस्यचिदसाधुत्वकल्पनंप्रत्युक्तंबोध्यं । अकुशलताचभाष्यकृतोनिरस्ता । एतत्प्रयोजनाशयेनतदुक्तेरिति । "परिशेषे"त्यादेरुद्ग्रंथत्वभ्रमंनिराह ॥ **पूर्वमिति** ॥ "औपनिषदत्वा"दितिभाष्यमितिशेषः ॥ **भेदमिति** ॥ पररीत्येतिभावः । नन्ववाच्यत्वनिरासाय "श्रुतिस्मृतीचाहे"तिटीकानयुक्ता । श्रुत्यादौवाच्यत्वस्यावाच्यत्वनिरासस्यवाऽप्रतीतेरित्यतआह ॥ **श्रुतीति** ॥ आङोमु

ऽच्प्रत्ययांतत्वंवाश्रित्यशब्दगोचरमित्यस्यसाधुत्वंद्रष्टव्यं । ततश्च"यतोवाच"इत्यादिश्रुतौमनसासहेत्यदृश्यत्वस्याप्युक्तत्वादीक्षणीयत्वमसिद्धमितिपूर्वपक्ष्यभिप्रायः । पूर्वमर्थापत्तिपरतयाव्याख्यातं । इदानींपरिशेषपरतयाव्याचष्टे ॥ परिशेषप्रमाणेनवेति[१।२।२०] ॥ यद्यपिस्वमतेर्थापत्तिपरिशेषयोरनुमानता । तथापितयोर्भेदमुपेत्यवानुमानत्वावांतरभेदमाश्रित्यवापक्षांतरोक्तिः ॥ श्रुतिस्मृतीचाहेति[१।२।२३] ॥ श्रुतावामनंतीतिसाक्षाद्वाच्यत्वोक्तेः । स्मृतौचाहमेवे

गु० पूर्वपक्ष्यनभिप्रेतत्वादित्यतआह ॥ **ततश्चेति** ॥ ननु"परिशेषप्रमाणेन(त्र)वाच्यत्वंसाध्यत"इतिटीकायांवाच्यत्वसाधनार्थंस्वयमेवप्रमाणांतरमुच्यतइतिप्रतीयते । तदयुक्तं । भाष्यानारूढस्यस्वेनवक्तुमनुचितत्वादित्यतोभाष्यारूढमेवैतदित्याह ॥ **पूर्वमिति** ॥ श्रुतिस्मृतीचाहेतिटीकायांभाष्यकारेणवाच्यत्वसमर्थनार्थंश्रुतिस्मृती उदाहृतेइत्युक्तं । तत्रश्रुतौवाच्यत्वप्रत्यायकपक्षाभावात् स्मृतावप्युक्तस्यवेद्यत्वस्यलक्षणयापिसंभवात्कथंतयोरुदाहरणमित्यतआह ॥ **श्रुताविति** ॥ आङ्पूर्वकम्ना

SGDF
Sri Gargeshwari Digital Foundation

प्र० ख्यार्थत्वादितिभावः ॥ **अवधारणेति** ॥ स्वस्यामुख्यत्वेमुख्यांतरेवासतितद्योगादित्यर्थः । ननुसर्वैर्वेदैरहमेवलक्षणयावेद्यइत्यर्थःस्यादित्यतआह ॥ **सर्वेति** ॥ अनवस्थापातादितिभावः । ननु''किंचमायये''तिटीकानयुक्ता । प्राग्विशिष्टस्येक्षितृत्वोक्त्यामाययाशुद्धस्येक्षणमित्यस्यानुक्त्याविकल्पानवकाशात् । विशिष्टस्यैवेत्थंविकल्पे''आद्येदृश्यत्वाद्यपिकिंनस्या''दितिग्रंथायोगादित्यतआह ॥ **नन्विति** ॥ एतेनेक्षणमित्यस्येक्षित्रित्यर्थउक्तोभवति । ''गौणग्रहण''इत्यत्रगौणपदस्यामुख्यार्थत्वेपूर्वोत्तरासंगतेराह ॥ **गौणेति** ॥ स्वरूपेतिकस्यस्वरूपत्वादीत्यत

त्यवधारणोपपत्तयेमुख्यतयावेद्यत्वस्यविवक्षणीयत्वात् । तस्यचवाच्यत्वंविनायोगात् । सर्ववेदलक्षणायाअयोगाच्चवाच्यत्वसिद्धिरितिभावः । ननु नविशिष्टमीक्षितृ येनजिज्ञास्यत्वायोगः किंतुशुद्धमेवमायासंबंधादीक्षित्रितिपूर्वत्रारुच्यादोषांतरमाह॥ किंच[१३।८]मायययेक्षणमिति ॥ गौणग्रहणेबाधकस्येत्यादौगौणशब्देन मुख्यासंभवे गौणाश्रयणादित्यत्रेवामुख्यार्थोनविवक्षितः । किंतुसत्त्वादिगुणयुक्तजीवरूपमुख्यार्थइतिद्रष्टव्यं ॥

गु० धात्वर्थस्यसम्यगभ्यसनस्यवाच्यत्वंविनाऽसंभवादितिभावः । तथाचस्मृतावपिलक्ष्यत्वेऽन्यस्यवाच्यत्वंवक्तव्यं तथाचावधारणानुपपत्तिरितिभावः । ननुलक्ष्यत्वेपिवेदतात्पर्यविषयत्वान्मुख्यवेद्यत्वंभविष्यतीत्यतआह ॥ **सर्वेति** ॥ ननु''गौणग्रहणेबाधकस्ये''तिटीकायांगौणीवृत्तिविषयइतिप्रतीयते । तथात्वे''इतरज्ञापकस्याभावा''दित्ययुक्तं । गौणस्यामुख्यत्वेनेतरस्यमुख्यत्वेनमुख्यार्थरूपसाधकसद्भावादित्यतआह ॥ **गौणग्रहणइति** ॥ आत्मशब्दोगौणार्थपरोन किंतुमुख्यार्थपरएवेत्यत्र द्वेवावेतिश्रुत्युदाहरणंभाष्येकृतंतत्ररूपशब्दस्यात्मनात्मनोःसाधारण्यप्रतीतिंवारयितुं''रूपशब्दःस्वरूपप्रतिमारूपाभिप्राय''इत्युक्तंटीकायां । तत्ररूपशब्दआ

प्र० आह ॥ **स्वरूपेति** ॥ अस्फुटत्वादार्जवंव्यनक्ति ॥ **आत्मेति** ॥ तद्विषयत्वे चेतनाचेतनविषयत्वे । स्वभावस्यसदोषत्वानुभवात्कथंनिर्दोषत्वमित्यतआह ॥ **स्वभावेति** ॥ वायुकर्तेत्यादीनांव्याख्येयाद्दृष्टेराह ॥ **यस्येति** ॥ **विश्वइति** ॥ ''रूपोपन्यासा''दित्यत्रभाष्योक्तश्रुतौ

[१३।१४]स्वरूपप्रतिमारूपाभिप्रायइति ॥ आत्मनिस्वरूपाभिप्रायोऽनात्मनिप्रतिमारूपाभिप्रायइत्यर्थः ॥ श्रुतेरार्जवसंभ[१३।१८]वादिति ॥ आत्मानात्मशब्दयोश्चेतनाचेतनविषयतयाप्रसिद्धेः रूपशब्देऽनेकार्थत्वस्याकल्प्यत्वाच्चतद्विषयत्वेश्रुतेरार्जवंभवतीत्यर्थः ॥ [१३।१९]स्वभावविषयत्वोपपत्तेरिति ॥ जीवात्मन्यपिहिदुःखादिदोषऔपाधिकएवेतिभावः । ''यस्ये''तिश्रुतौविश्वशब्दो''विश्वोहिरण्यगर्भोग्निरित्यादा''विववाय्वर्थः । तेनसर्वस्यकर्तेत्यनेननपुनरुक्तिरित्याह ॥ [१३।२२]वायुकर्तेति ॥ प्रतिबुद्धशब्दार्थमाह ॥ [१३।२२]सर्वज्ञइति ॥ अनुवित्तशब्दार्थमाह ॥ [१३।२२]ज्ञातइति ॥ ततश्चतयोर्नपौनरुक्त्यमितिभावः ॥ [१५।१३]नसपक्षसत्त्वमिति ॥

गु० त्मनिप्रतिमाभिप्रायोऽनात्मनिस्वरूपाभिप्रायइतिप्रतीयते । अतोव्याचष्टे ॥ **आत्मनीति** ॥ आत्मानात्मशब्दयोश्चेतनाचेतनविषयत्वमेववक्तव्यं । तथात्वेश्रुतेरार्जवंसंभवतीत्युक्तं । तदार्जवंकथमित्यतआह ॥ **आत्मानात्मशब्दयोरिति** ॥ ननु आत्मशब्दस्यजीवेमुख्यत्वेतत्रनिर्दोषत्वादिकंकथमित्यतः''स्वभावविषयत्वोपपत्ते''रित्युक्तं । तदयुक्तं । दोषित्वादेःस्वभावेननिर्दोषत्वासंभवादित्यतआह ॥ **जीवेति** ॥ विष्णोर्मोक्षसाधनज्ञानविषयत्वप्रतिपादनायोदाहृतायांयस्येतिश्रुतौविश्वकृत्सर्वस्यकर्तेतिपदयोःपौनरुक्त्यनिरासार्थंविश्वकृदित्येतद्वायुकर्तेतिव्याख्यातं । तत्रविश्वशब्दस्यवायावप्रसिद्धेःकथमित्यतआह ॥ **यस्येतिश्रुताविति** ॥ प्रतिबुद्धानुवित्तशब्दयोःपौनरुक्त्यनिरासार्थं सर्वज्ञोज्ञातइति पदद्वयंव्याख्यातं । तत्रकस्यकिंव्याख्यानमितिनप्रतीयते अतआह ॥ **प्रतिबुद्धेत्यादिना** ॥ बुधेःकर्तरि

SGDF Sri Gargeshwari Digital Foundation

प्र० यथातथेत्यर्थः । ‘‘सर्वपदार्थानांलक्षणायोग्यत्वान्नसपक्षसत्त्व’’मित्यस्योपयोगादृष्टेराह ॥ **ततश्चेति** ॥ केवलव्यतिरेकिणएवप्रस्तुतत्वात् ‘‘केवलान्वयिनिकेवलव्यतिरेकिणिचोपाधिशंकानुदया’’दितिकथमित्यतआह ॥ **केवलान्वयिनीति** ॥ **ब्रह्मेति** ॥ टीकायांकेवलव्यतिरेकिप्रदर्शनमुपलक्षणमितिभावः । कथमनेनहेतुनाकेवलान्वयिन्युपाधिशंकानुदयइत्यतआह ॥ **तदिति** ॥ **व्याप्त्यनिश्चयादिति** ॥ हेतु

ततश्चनासाधारणानैकांतिकतेतिशेषः । केवलान्वयिनीति । केवलान्व
यीदृष्टांततयोक्तः । ब्रह्मवाच्यंलक्ष्यत्वादित्यभिप्रेतकेवलान्वय्युपयोगित
यावा ॥ तद्विनाभा[१५।५]व्यभावत्वाभावादिति ॥ साध्याभावाविनाभूता
भावप्रतियोगिनएवोपाधित्वादितिभावः ॥ [१५।५]व्याप्त्यनिश्चयादिति ॥

गु० क्तप्रत्यययोगान्निष्पन्नस्यप्रतिबुद्धशब्दस्यसर्वज्ञइतिव्याख्यानमितिभावः । ननुलक्ष्यत्वाभावसाधकेऽनुमानेऽसाधारण्येप्राप्तेतत्परिहारार्थंनसपक्षसत्त्वमित्युक्तं । तत्रकिमनेनकृतमितिनप्रतीयते । अतआह ॥ **ततश्चेति** ॥ ननु केवलान्वयिनीत्यादिटीकायांकेवलान्वयिकेवलव्यतिरेकिणोरुपाधिशंकानोदेतीत्युक्तं । तदयुक्तं । वाच्यत्वसाधकत्वेनकेवलान्वयिनोनुपन्यस्तत्वादित्यतआह ॥ **केवलान्वयिनीति** ॥ केवलान्वयिन्युपाधिशंकानुदयोपपादनार्थं‘‘तदविनाभाव्यभावत्वाभावा’’दित्युक्तं । तदयुक्तं । तत्रसाध्याभावाविनाभाव्यभावत्वाभावेपिसाध्यव्यापकत्वेनोपाधिशंकास्यादेवेत्यतआह ॥ **साध्याभावेति** ॥ साध्याभावाविनाभूताभावप्रतियोगित्वाभावेसाध्यव्यापकत्वमेवदुर्निर्णेयमितिभावः । व्यतिरेकिणितदुपपादनार्थंसपक्षाभावेनव्याप्त्यनिश्चयादित्युक्तंतदयुक्तं तत्रसपक्षाभावेनसपक्षेव्याप्तिग्रहस्याप्यभा

SGDF
Sri Gargeshwari Digital Foundation

प्र० साध्ययोरितिभ्रमंनिराह ॥ **साध्येति** ॥ किंनिबंधनेतिसामान्यशब्दस्याभिप्रायमाह ॥ **कार्येति** ॥ अवाच्यस्येतिग्रंथस्यानन्वयमाशंक्याह ॥ **नन्विति** ॥ लक्ष्यपरपदस्येतिशंकाभिप्रायंदुर्गमत्वादाह ॥ **नन्विति** ॥ शिष्टंस्पष्टमितिभावः । सूत्रार्थस्तु तद्ब्रह्माशब्दमवाच्यंन । ईक्षणीयत्वात् । किंतुवाच्यमेवेति । ननुलाघवादीक्षतेर्वाच्यमित्येवकुतोनोक्तमितिचेत्"अशब्दमस्पर्श"मितिश्रुत्यनुगमायेत्यवैहि । परपक्षनिरासस्वपक्षस्थापनयोर्द्वयोरपिलाभायचेति ॥ ७ ॥ **ईक्षत्यधिकरणंसंपूर्णं** ॥ ५ ॥ ७ ॥

साध्यव्यापकत्वानिश्चयादित्यर्थः । कार्यकारणभावादेरेवव्याप्तिनिबंधनत्वेतदभावा द्रव्यत्वसंयोगित्वयोरपिसानस्यादित्याह ॥ [१५।६] द्रव्यत्वसंयोगित्वयोरिति ॥ ननुसंयोगितायाद्रव्यत्वाद्यवच्छेद्यत्वहानिरेवविपक्षेबाधिका तयोर्व्याप्तिनिबंधनमित्याशंक्य तर्हींहाप्यनवस्थाविपक्षेबाधिकेत्यभिप्रेत्याह ॥ [१५।६] अवाच्यस्यलक्षणायामित्यादिना ॥ ननुसत्यज्ञानादिवाक्येलक्ष्यार्पकंब्रह्मपदंवाचकमेव । सत्यादीनिलक्षणपदानितुनवाचकानीतिशंकते ॥ [१५।६] लक्ष्यपरपदस्येति ॥७॥ ईक्षत्यधिकरणंसंपूर्णं ॥ ५ ॥ ७ ॥

गु० वादित्यतआह ॥ **साध्यव्यापकत्वेति** ॥ ननुकार्यकारणभावादेर्व्याप्तिनिबंधनत्वात्प्रकृतेचतदभावान्नवाच्यत्वाभावेनालक्ष्यत्वसाधनमित्याशंक्यपरिहरतीत्याह ॥ **कार्येति** ॥ ननुतत्रविपक्षेबाधकसत्वान्नव्याप्तिभंगः प्रकृतेतदभावात्कथमेतदित्याशंक्यपरिहरतीत्याह ॥ **नन्विति** ॥ ७ ॥ **इतीक्षत्यधिकरणं** ॥ ५ ॥ ७ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रीहयवदनायनमः ॥ अथआनंदमयाधिकरणं ॥ ॐआनंदमयोभ्यासात्ॐ ॥ एतदध्यायसाफल्योक्तिपरां "अथब्रह्मस्वरूपनिरूपण" इत्यादिटीकां "समन्वयसूत्रप्रतिज्ञातसमन्वयहेता" वित्यादिनाग्रेविवरिष्यंस्तर्ह्यध्यायस्यसमन्वयरूपैकार्थत्वात्पादभेदःकिंनिबंधनइत्यतःसमन्वयेप्यवांतरभेदेनेतिभावेनपादोपाधीन्वक्तुंप्रवृत्तां "शब्दास्तावच्चतुर्विधा" इत्यादिटीकांप्रतीतानुपपत्तिनिरासेनसमर्थयिष्यमाणोऽनुवदति ॥ **वैदिका इति** ॥ वेदगताइत्यर्थः । "वैदिकाःशब्दा" इतिसुधोक्त्याटीकास्थशब्दपदस्यवैदिकशब्दपरत्वमुक्तंभवति । लोकवेदाधिकरणन्यायेनवैदिकानामेवलौकिकत्वान्नततोभेदः । भाषाशब्दाएवात्रव्यावर्त्यतइतिभावः । समन्वयस्तुत्रिविधानामेवेतितावच्छब्दः । टीकारीत्याव्युत्क्रमेणनिर्देशः । "नन्विंद्रादिशब्दानामन्यत्रैवप्रसिद्धानांविष्णौसमन्वयस्यप्रथमपादएवसिद्धत्वाद्व्यर्थइवायंपादःप्रतिभाति । नचतेषामन्यत्रैवप्रसिद्धत्वाभावः । तथासतितृतीयवैयर्थ्यात् । अन्यत्रैवान्यत्रापीत्यतःप्रकारांतराभावा" दिति चतुर्थपादीयशंकाटीकांविवरितुंचातुर्विध्यमाक्षिपति

॥ ॐआनंदमयोभ्यासात्ॐ ॥ वैदिकाःशब्दास्तावच्चतुर्विधाः । अन्यत्रैवप्रसिद्धाउभयत्रप्रसिद्धाअन्यत्रप्रसिद्धास्तत्रप्रसिद्धाइति ।

गु० ॥ ॐआनंदमयोभ्यासात्ॐ ॥ नन्वस्मिन्नध्यायेसमन्वयरूपस्यैकस्यैवार्थस्यप्रतिपादनान्नपादभेदःसंभवतीत्याशंकानिरासार्थंटीकोक्तमवांतरार्थमाक्षिप्यसमाधातुमवांतरार्थभेदमादावाह ॥ **वैदिकाइति** ॥ तत्तुसमन्वयादित्यत्रसंशब्दद्योत्यसकलशब्दसमन्वयोवैदिकानामेवशब्दानां नान्येषामितिवैदिकाइत्युक्तं । नकेवलंश

प्र० ॥ **नन्विति** ॥ "ब्रह्मण्येवे" तिसुधानुरोधाट्टीकास्थतत्रेत्यस्यतत्रैवेतिशंकाव्याजेनोपपत्तिंवदन्नाह ॥ **नचतत्रेति** ॥ **तथात्वइति** ॥ तत्रतत्रैवेत्यनयोरभेदेऽन्यत्रप्रसिद्धानामन्यत्रैवप्रसिद्धानांचभेदोनस्यात् । अन्यथाऽन्यत्रापीतिविवक्षापत्त्योभयत्रप्रसिद्धेष्वंतर्भावःस्यादित्यर्थः । चतुर्थपादीयपरिहारटीकोक्तसमाधिविशेषविवक्षयासमर्थयिष्यमाणोयथाश्रुतमाशंक्यनिषेधति ॥ **नन्विति** ॥ इंद्राकाशादिशब्दानामिंद्रा

नन्वन्यत्रैवप्रसिद्धवत्तत्रैवप्रसिद्धाअपिपृथग्वाच्याः । नच तत्रेत्यनेनतत्रैवेतिविवक्षितं । अन्यथातत्रापीतिविवक्षापत्त्योभयत्रप्रसिद्धेष्वंतर्भावःस्यात् । अतएवतत्रप्रसिद्धाः सुधायांब्रह्मण्येवप्रसिद्धाइतिनिर्दिष्टाइतिवाच्यं । तथात्वेऽन्यत्रैवप्रसिद्धानांपार्थक्यायोगात् । ननु लोकतोन्यत्रैवप्रसिद्धाअन्यत्रप्रसिद्धाः श्रुत्यादिभिरन्यत्रैवप्रसिद्धास्त्वन्यत्रैवप्रसिद्धाइतिभेदः । अतएव "श्रुतिलिंगादिभिरन्यत्रैवप्रसिद्धाना" मितिचतुर्थपादेभाष्यं । अत्रचप्रत्यधिकरणं लोकतोन्यत्रप्रसिद्धानामितिटीकाच । तत्रप्रसिद्धानांतत्रैवप्रसिद्धानांचाव्युत्पाद्यसमन्वयत्वेनाभेदविवक्षेतिचेन्न । अन्यत्रप्रसिद्धत्वेनाभिमतस्यानंदमयादिनाम्नोन्यस्मिन्नर्थविशेषे

गु० ब्दानांचातुर्विध्यमेवकथ्यते किंतुतत्समर्थनमपीतिदर्शयितुंतावदित्युक्तं ॥ **नन्विति** ॥ तथाचपंचविधाइतिवक्तव्यं । चातुर्विध्योक्तिरनुपपन्नेतिभावः । चातुर्विध्योपपत्तिमाशंक्यपरिहरति ॥ **नचेति** ॥ **अन्यथेति** ॥ तत्रेत्यनेनतत्रैवेत्यविवक्षायां । तत्रेत्यस्यतत्रैवतत्रापीतिप्रकारद्वयातिरिक्तप्रकाराभावादितिभावः । तत्रेत्यनेनतत्रैवेतिविवक्षायांज्ञापकमाह ॥ **अतएवेति** ॥ तत्रप्रसिद्धाइत्यनेनतत्रैवप्रसिद्धानांविवक्षितत्वादेवेत्यर्थः । एकंसंधित्सतोपरंप्रच्यवतइत्याह ॥ **तथात्वइति** ॥ अन्यत्रप्रसिद्धाइत्यनेनान्यत्रैवप्रसिद्धाइतिविवक्षितं । अन्यथाऽन्यत्रापीतिपक्षापत्त्योभयत्रप्रसिद्धेष्वंतर्भावःस्यादित्यन्यत्रैवप्रसिद्धानांग्रहणेपौनरुक्त्यापत्त्यातत्परित्यागेत्रैविध्यमेवस्यादितिभावः । नन्वन्यत्रान्यत्रैवप्रसिद्धौशब्दौनयौगिकौ । किंतुपारिभाषिकौ । अतोनसांकर्यमित्याशयेनशंकते ॥ **नन्विति** ॥ लोकतः लोकप्रसिद्धरूढ्या

SGDF Sri Gangeshwari Digital Foundation

प्र० दिष्वेवलोकतोवगतेः अव्यक्तादिशब्दानामवरत्वादिलिंगादिनाऽन्यगतत्वस्यैवप्रतीतेश्चेतिभावः ॥ **सर्वगतत्वेति** ॥ द्वितीयपादीयस्येत्यर्थः ॥ **इंद्रेति** ॥ अंतराद्यधिकरणोदाहरणानामित्यर्थः ॥ **अन्यत्रप्रसिद्धत्वाभावेति** ॥ तथाचान्यत्रप्रसिद्धलक्षणंतत्राव्याप्तमितिभावः । अन्यत्रैवप्रसिद्धानांलक्षणमतिव्याप्तमित्याह ॥ **प्रत्युतेति** ॥ आदिपदेनादितिश्रुत्यादिनाऽत्तृत्वादेरितिगृह्यते । ननुलिंगपादेऽन्यत्रैवप्रसिद्धिसं

सर्वगतत्वांतर्यामित्वादिलिंगात्मकशब्दजातस्याप्यन्यत्रादित्यादौ । इंद्राकाशादिशब्दानामिंद्रादा विव लोकतोप्रसिद्ध्याऽन्यत्रप्रसिद्धत्वाभावापातात् । प्रत्युतादित्यश्रुत्यादिना सर्वगतत्वादेरन्यत्रप्र सिद्धेर्वक्ष्यमाणत्वेनावरत्वादिलिंगेनान्यत्रैवप्रसिद्धाव्यक्तादिशब्दानामिवान्यत्रैवप्रसिद्धतास्यात् ।

गु० ऽन्यत्रप्रसिद्धाइत्यर्थः । श्रुत्यादिभिः श्रुत्यादिप्रसिद्धरूढ्याइत्यर्थः । अस्मिन्नर्थेज्ञापकमाह ॥**अतएवेति**॥ यद्यप्यत्रकस्मिन्नर्थेनभाष्यटीकयोःसंमतित्वं तथाप्युक्तार्थेसंमतित्वान्नसमुच्चयार्थकशब्दानुपपत्तिः । नन्वेवंशब्दानांचातुर्विध्यंनस्यात् अन्यत्रप्रसिद्धान्यत्रैवप्रसिद्धवत् लोकतस्तत्रप्राप्तास्तत्रप्रसिद्धाःश्रुतिलिंगादिभिस्तत्रप्राप्तास्तत्रैवप्रसिद्धाइति तत्रैवप्रसिद्धानांतत्रप्रसिद्धेभ्योऽन्यत्वेनतत्रप्रसिद्धेभ्योन्येषांतत्रैवप्रसिद्धानामपिपृथक्सत्वादित्यतआह ॥ **तत्रप्रसिद्धानामिति** ॥ अभेदविवक्षायां निमित्तमाह ॥ **अव्युत्पाद्येति** ॥ नव्युत्पाद्योव्युत्पाद्यःसमन्वयोयेषामितिबहुव्रीहिस्तेषांभावस्तत्वमिति । एवंतर्हिलोकप्रसिद्धरूढ्याऽन्यत्रप्रसिद्धत्वंश्रुत्यादिप्रसिद्धरूढ्याऽन्यत्रैवप्रसिद्धत्वमित्यन्यत्रान्यत्रैवप्रसिद्धशब्दलक्षणार्थःपर्यवसन्नः । सनयुक्तः । अव्याप्त्यतिव्याप्तिग्रस्तत्वादित्याशयेनप्रथममव्याप्त्यादूषयति ॥ **अन्यत्रेति** ॥ अन्यत्रप्रसिद्धत्वेनाभिमतानंदमयनाम्नोन्यस्मिन्नर्थविशेषेलोकतोप्रसिद्ध्येत्यन्वयः । सर्वगतत्वादिलिंगजातस्यान्यत्रादित्यादौलोकतोप्रसिद्ध्येत्यन्वयः । इंद्राकाशादीनामिवेतिव्यतिरेकदृष्टांतः । इंद्राकाशादिशब्दानामिंद्रौलोकतःप्रसिद्धत्ववदानंदमयादिशब्दानांलोकतोऽन्यत्रप्रसिद्धत्वाभावादितिभावः । अन्यत्रैवप्रसिद्धलक्षणस्यान्यत्रप्रसिद्धेष्वतिव्याप्तिश्चेत्याह ॥ **प्रत्युतेति** ॥ तथाचान्यत्रैवप्रसिद्धलक्षणस्यातिव्याप्तिरितिभावः । ननुसर्वगतत्वादिलिंगानांस्वतएवान्यत्रप्रसिद्धेर्वक्ष्यमाणत्वेनकथमत्रा

SGDF
Sri Gargeshwari Digital Foundation

प्र० पादकश्रुत्यादेर्लोकतोन्यत्रप्रसिद्धत्वंविवक्षितं । अतएवटीकायां“लोकतोन्यत्रप्रसिद्धादित्यादिश्रुतिसहपठितसर्वगतत्वलिंगे”त्याद्युक्तमित्यत आह ॥ **यथाचेति** ॥ प्रकारांतरेणाभयलक्षणस्याप्यतिव्याप्तिमाह ॥ **किंचेति** ॥ यद्वा पूर्वमन्यत्रैवप्रसिद्धानांलक्षणंलिंगपादीयशब्देष्व तिव्याप्तमित्युक्तं । इदानीमाद्यपादीयशब्दैःसांकर्यमाह ॥ **किंचेति** ॥ **श्रुत्यादिनेति** ॥ “ब्रह्मेंद्रमग्नि”मित्यग्निश्रुत्येंद्रशब्दस्याग्नौ“स

यथाचसर्वगतत्वादेरन्यत्रप्रसिद्धिसाधकादित्यादिश्रुतिः अंतर्यामित्वादेरन्यत्रप्रसिद्धिसाधकशरीरित्वादिलिंगंचलोकतोन्यत्रप्रसिद्धं तथाऽव्यक्तादिशब्दस्यान्यत्रप्रसिद्धिसाधकमवरत्वादिलिंगमपिलोकतोन्यत्रप्रसिद्धमेव। किंच अन्यत्रैवप्रसिद्धाव्यक्तप्रकृत्यादिशब्देष्वपि लोकतोप्यन्यत्रप्रसिद्धेरसत्त्वात् अन्यत्रप्रसिद्धेंद्राकाशादिशब्देषुच श्रुत्यादिनाप्यन्यत्रप्रसिद्धेःसत्त्वात्सांकर्यंस्यात् ।

गु० दित्यादिश्रुतिसाहित्येनान्यत्रप्रसिद्धत्वमुक्तमितिचेन्न । तत्रोक्तप्रथमद्वितीयपक्षानुसारेणास्योक्तत्वादितिभावः । ननु सर्वगतत्वादेरन्यत्रप्रसिद्धत्वंसंभवत्येव । नचलोकतोन्यत्राप्रसिद्धत्वात्कथमन्यत्रप्रसिद्धतेतिवाच्यं । सर्वगतत्वादेरन्यत्रप्रसिद्धिसाधकादित्यादिश्रुतेरन्यत्रलोकप्रसिद्धत्वेनतस्याप्यन्यत्रप्रसिद्धतोपपत्तेः । तथाचना व्याप्तिरित्यतआह ॥ **यथाचेत्यादि** ॥ तथाचलोकतोन्यत्रप्रसिद्धश्रुत्याद्यनुसारेणान्यत्रप्रसिद्धत्वरूपान्यत्रप्रसिद्धलक्षणस्यान्यत्रैवप्रसिद्धेष्वतिव्याप्तिःस्यादितिभावः । तथाचाव्यक्तादिशब्दानामपिलोकतोन्यत्रप्रसिद्धत्वेनान्यत्रप्रसिद्धत्वापत्त्यान्यत्रैवप्रसिद्धत्वंनस्यादितिभावः । ननु लोकतोन्यत्रप्रसिद्धाअन्यत्रप्रसिद्धाः श्रुत्यादिनाऽन्यत्रप्रसिद्धाअन्यत्रैवप्रसिद्धाइत्येवलक्षणं । नचाद्यस्यानंदमयादिनाम्निसर्वगतत्वादिलिंगेषुचाव्याप्तिः । अव्यक्तादिशब्देषुचातिव्याप्तिः । द्वितीयस्यापिसर्वगतत्वादिष्व तिव्याप्तिरितिवाच्यं । “विकारशब्दा”दितिन्यायेनानंदमयनाम्नः“अर्भकौकस्त्वा”दित्यादिवक्ष्यमाणन्यायेनसर्वगतत्वादिलिंगानामपिस्वतएवान्यत्रप्रसिद्धेर्वक्ष्यमाण त्वात् । अव्यक्तादिशब्दानांचनस्वतोन्यत्रप्रसिद्धिरितिनाव्याप्त्यतिव्याप्तीइत्यरुचेराह ॥ **किंचेति** ॥ तथाचाव्याप्त्यतिव्याप्तीअपरिहार्येइतिभावः । रीत्यंतरेणासां

SGDF
Sri Gargeshwari Digital Foundation

प्र० र्वाणिहवाइमानिभूतानी"त्युक्तभूतोपादानत्वलिंगेनाकाशशब्दस्याकाशेप्रसिद्धेःसंभवादितिभावः । "पूर्वैकचिच्छ्रुत्यादिनैवान्यत्रप्रसिद्धस मन्वयोक्तावप्येतत्पादीयश्रुत्यादीनांप्राबल्या"दितिचतुर्थपादीयटीकोक्तमाशंक्यनिरस्यति ॥ **नचेति** ॥ **अव्यक्तेति** ॥ चतुर्थपादीयानामि त्यर्थः । अव्यक्तादितिपंचम्युक्तोत्कर्षावधित्वाक्षिप्तावरत्वस्योत्तमेविष्णावयोगादितिभावः ॥ **गुहेति** ॥ "गुहांप्रविष्टौपरमेपरार्धे"इत्यादि वाक्योक्तस्यद्वितीयपादीयस्येत्यर्थः । सूत्रोपात्तलिंगाभिप्रायेणेयमुक्तिः । ऋतपातृत्वस्यैवतत्रसमन्वयात् । तृतीयपादोपाधिमपिनिरसितुमाह ॥ **किंचेति** ॥ लोकतस्तथात्वंवाश्रुत्यादिभिर्वेतिविकल्प्यक्रमेणप्रत्याह ॥ **नतावदित्यादिना** ॥ नहिद्युभ्वाद्यायतनपदेनप्रकृतिरुद्रादिर्विष्णु

नच प्रबलश्रुतिलिंगादिभिरन्यत्रप्रसिद्धाअन्यत्रैवप्रसिद्धाः । श्रुत्यादिमात्रेणान्यत्रप्रसिद्धास्त्वन्यत्रप्रसिद्धाइ तिभेदः । अव्यक्तादिशब्दानामन्यत्रप्रसिद्धिसाधकावरत्वादीनामिवगुहाप्रविष्टत्वादेरन्यत्रप्रसिद्धिसाधकद्वि त्वादीनामप्येकस्मिन्ब्रह्मण्यसंभवेनबलवत्त्वात् । तस्मान्नान्यत्रप्रसिद्धानामन्यत्रैवप्रसिद्धेभ्योभेदः । किंचो भयत्रप्रसिद्धेद्युभ्वाद्यायतनत्वादिलिंगेज्योतिरादिनाम्निच नतावल्लोकतउभयत्रप्रसिद्धिः । प्रकृत्यादौतस्यलो कतोऽप्राप्तेः । नापिश्रुत्यादितः । तथैवटीकादौवक्ष्यमाणत्वादितियुक्तं । आनंदमयेंद्राव्यक्तादिशब्देष्वपि

गु० कर्यमाशंक्यपरिहरति ॥ **नचेति** ॥ अन्यत्रप्रसिद्धिसाधकश्रुत्यादीनांप्राबल्यंहिविष्णावसंभाव्यमानत्वंवाऽन्यद्वा । नांत्योऽनिर्वचनात् । नाद्यः । प्रकृतेपिसाम्यादि त्याह ॥ **अव्यक्तादीति** ॥ तथाचनतन्निबंधनःपादभेदोयुक्तइतिभावः । एवमन्यत्रान्यत्रैवप्रसिद्धानांसांकर्यमुपपाद्योभयत्रप्रसिद्धानामपितैःसांकर्यमुपपादयितुमाह ॥ **किंचेति** ॥ **प्रकृत्यादाविति** ॥ नहिलोकाःप्रकृत्यादिद्युभ्वायतनमितिव्यवहरंतीतिभावः । एवंचतुर्विधशब्दानामपिसांकर्यमुपपाद्यनामात्मकत्वलिंगात्मकत्वा

प्र० र्वा"ज्योतिर्दर्शना"दित्यादौवक्ष्यमाणज्योतिश्शब्देनचजीवोविष्णुर्वालोकतःप्रतीयतइतिभावः ॥ **पूर्वेति** ॥ पूर्वपक्षप्रापकश्रुतिलिंगादिनान्य त्रप्रसिद्धिः सिद्धांतप्रापकश्रुत्यादिनाचभगवतीतिसर्वेप्युभयत्रप्रसिद्धाःस्युरित्यर्थः । आनंदमयेंद्रादयः आदिपदोक्तसर्वगतत्वादिलिंगवाचिनश्चा द्यद्वितीयपादीयाश्चाव्यक्तज्योतिर्जीवपंचजनादयश्चतुर्थपादीयाइतिध्येयं । सामान्यतःपादोपाधीन्निरस्यविशिष्यनिराह ॥ **किंचेति** ॥ आदिप देन"ज्योतिश्चरणाभिधाना"दितिप्रथमे"ज्योतिर्दर्शना"दितितृतीये"ज्योतिरुपक्रमा"दितिचतुर्थेज्योतिश्शब्दस्यसमन्वयोक्तेः तथा"अदृश्यत्वा दिगुणक"इतिद्वितीये"अक्षरमंबरांतधृते"रितितृतीयेऽक्षरपदस्यसमन्वयोक्तेरितिग्राह्यं । आद्यद्वितीयपादोपाधिविभागंचनिराह ॥ **किंचेति** ॥ **सुधायामिति** ॥ "साक्षाद्धर्मिवाचिनोनामात्मकाः । धर्मद्वाराधर्मिणिवर्तमानालिङ्गात्मका"इत्येतदधिकरणे तथालिंगपादस्यादौ"नन्वतीत

पूर्वोत्तरपक्षश्रुत्यादिनोभयत्रप्रसिद्धेर्वक्तुंशक्यत्वात् । तस्मादुभयत्रप्रसिद्धानामपिनान्यत्रप्रसि द्धादिभ्योभेदः । किंचाकाशादिशब्दानां "आकाशस्तल्लिंगा"दितिप्रथमे"आकाशोर्थांतरत्वादि व्यपदेशा"दितितृतीये"कारणत्वेनचाकाशादि"ष्वितिचतुर्थेचपादेसमन्वयोक्तेरन्यत्रोभयत्रान्य त्रैवचप्रसिद्धतास्यात् । किंच रूढत्वयौगिकत्वाभ्यांहिनामालिंगभेदः । सुधायांतथैवोक्तेः । "धर्मविशिष्टधर्मिवाचिना"मितिद्वितीयपादीयटीकायामपियौगिकत्वंलिंगत्वमित्यभिप्रेतत्वाच्च ।

गु० भ्यामपितेषांभेदकथनमयुक्तमितिवक्तुमाह ॥ **किंचेति** ॥ टीकायांधर्मिवाचित्वंनामत्वमित्यभिप्रेतत्वादित्यतष्टीकावाक्यंद्वयमन्यथायोजयति ॥ **धर्मविशिष्टे**

SGDF
Sri Gurgeshwari Digital Foundation

प्र० पादेसमन्विताअपिलिंगात्मकाएवयौगिकत्वादितिचस्पष्टमुक्तेरित्यर्थः ॥ **अत्रापीति** ॥ "लिंगात्मकानांधर्मवाचित्वान्नामात्मकेभ्योधर्मिवाचिभ्य"इत्येतदधिकरणटीकायामपीत्यर्थः ॥ **तेइति** ॥ यौगिकत्वरूढत्वेइत्यर्थः ॥ **अंतर्यामीति** ॥ द्वितीयपादस्थानामंतर्याम्यत्तृगुहाप्रविष्टादिशब्दानांलिंगतयाभिमतत्वादितिभावः ॥ **आनंदेति** ॥ अत्रनयेसमन्वीयमानानामानंदविज्ञानादिशब्दानांनामत्वादितिभावः । एतेन टीकावाक्ययोर्विरोधोपिनिरस्तोबोध्यः । एतेन"लिंगात्मकाश्चधर्मवचनाः व्यवधानेनान्यबुद्धिंजनयंति नामात्मकास्तुसत्ववचनाःसाक्षादेवे"त्युपासनापादीयसुधावाक्यमपिव्याख्यातंबोध्यं । ततःकिमित्यतआह ॥ **सचेति** ॥ अतएवसुधायांलिंगपादे"नन्वतीतपादेसमन्विताअपि लिंगात्मकाएव । यौगिकत्वात् । अन्यथागुणपूर्त्यलाभेनसमन्वयसमर्थनवैयर्थ्या"दित्यादिनातथैवोक्तिः"यच्छब्दायोगवृत्तय"इत्यणुभाष्यो

अत्रापिटीकायांधर्मधर्मिवाचिपदाभ्यांतेएवविवक्षिते । अन्यथाधर्मिवाचिनामंतर्याम्यादिशब्दानांनामता धर्मवाचिनामानंदादिशब्दानांलिंगताचस्यात् । सचभेदोऽयुक्तः । सर्वेषामपिब्रह्मणिमहायोगांगीकारात् ।

गु० त्यादि ॥ ननुतथाप्येतत्पादीयटीकायांरूढत्वयौगिकत्वरूपनामत्वलिंगत्वयोःकथमभिसंहितत्वमित्यतआह ॥ **अत्रापीति** ॥ एतत्पादीयटीकायामित्यर्थः । ते एव रूढत्वयौगिकत्वेएव । टीकायायथास्थितार्थपरत्वेबाधकाभावादन्यत्रतात्पर्यकल्पनमनुचितमित्यतआह ॥ **अन्यथेति** ॥ नच धर्मविशिष्टेत्यनेनयौगिकत्वरूपलिंगत्वलाभःकथं । घटशब्दस्यघटत्वविशिष्टघटवाचकत्वेयौगिकत्वाभावादितिवाच्यं । अत्रहिधर्मशब्देनावयवव्युत्पत्तिलभ्योगुणोविवक्षितः । गुणविशिष्टगुणिवाचकत्वंचनयौगिकत्वंविनालभ्यमितियौगिकत्वरूपंलिंगत्वमभिप्रेतमितिभावः । अस्त्वेवंसुधादिग्रंथपर्यालोचनयानामलिंगभेदः ततःकिमित्यतआह ॥ **सचेति** ॥ रूढत्वयौगिकत्वाभ्यांभेदइत्यर्थः ॥ **सर्वेषामपीति** ॥ अन्यथागुणपूर्णत्वसिद्धिर्नस्यादितिभावः । ननु योगराहित्येसतिरूढत्वंनामत्वमितिनविवक्षितं । किंत्वापात

SGDF Sri Gargeshwari Digital Foundation

प्र० क्किश्चेतिभावः। ''तथाप्यन्यत्रप्रसिद्धत्वादिवदापातप्रतीत्यनुरोधेनेयमुक्तिरित्यदोष'' इतिसुधोक्तंपरिहारंपरिष्कर्तुकामोयथाश्रुतमनूद्यप्रत्याह ॥ **नचेति** ॥ **तदिति** ॥ योगार्थस्यैवतत्रप्रतीतेरितिभावः ॥ **सर्वेषामिति** ॥ ''सायोगादेवलभ्यत'' इत्युक्तेः । तथाचकेवलयौगिकान्यसंभावितानीतिभावः । अभ्युपेत्यापिनामलिंगभेदंपादभेदंनिराह ॥ **किंचेति** ॥ ननुसमन्वयेप्यवांतरभेदेनपादभेदइतिटीकोक्तदिशाभेदःस्यादित्यतआह ॥ **अन्यथेति** ॥ एतेनटीकोक्तमप्याक्षिप्तंबोध्यं । ननु''तत्रप्रथमतोन्यत्रप्रसिद्धानांसमन्वयः । शब्दानांवाच्यएवात्रमहामल्ले

नचापातप्रतीत्यारूढता। अन्नमयादिषुतदसंभवात्। नचयोगरूढियुक्तानिनामानि केवलयौगिकानिलिंगानीतिभेदः। सर्वेषांब्रह्मणिविद्वद्रूढेः। किंचान्यत्रप्रसिद्धानांनाम्नांलिंगानांचान्यत्रप्रसिद्धत्वाविशेषात्पादभेदोनस्यात्। अन्यथातृतीयउभयत्रप्रसिद्धानांचतुर्थेचान्यत्रैवप्रसिद्धानांनाम्नांलिंगानांचसमन्वयोक्तिर्नस्यात्। तस्मान्नपादभेदोयुक्तः। नापितत्क्रमः।

गु० प्रतीत्यारूढत्वमित्याशंक्यनिषेधति ॥ **नचेति** ॥ **तदसंभवादिति** ॥ अवयवार्थप्रतीतिपूर्वकान्यार्थप्रतीत्यसंभवादित्यर्थः ॥ **नचेति** ॥ नचान्नमयादिशब्देष्वतिव्याप्तिः । तेषांयौगिकत्वेनरूढ्यभावादितिवाच्यं । तेषामपिकोशेषुरूढेःसत्वादितिभावः ॥ **केवलेति** ॥ रूढिरहितेत्यर्थः ॥ **सर्वेषामिति** ॥ तथाचद्वितीयमसंभवीतिभावः । ननु केवलशब्देनरूढिमात्रराहित्यंनविवक्षितं । किंतुलौकिकरूढिराहित्यं । तथाचसर्वेषांशब्दानांब्रह्मणिविद्वद्रूढौविद्यमानायामपिलौकिकरूढिराहित्यस्यसत्त्वान्नासंभवोलक्षणस्येतिचेन्न । तथाप्यन्नमयादिशब्देष्वतिव्याप्त्यवारणात् । तेषांकोशेषुरूढेर्लोकसिद्धत्वाभावादितिभावः । अस्तुवानामलिंगभेदः तथापिपादभेदोनयुक्तइत्याह ॥ **किंचेति** ॥ **अन्यथेति** ॥ नामलिंगत्वरूपविरुद्धधर्मवत्त्वेनपादभेदांगीकारइत्यर्थः ॥ **नापितत्क्रमइति** ॥ अन्यत्रप्रसिद्धनामात्स

SGDF
Sri Gargeshwari Digital Foundation

प्र० शभंगव"दित्युपासनापादीयानुव्याख्यानोक्तेःकथंक्रमाक्षेपइत्यतस्तदनूद्यप्रत्याह ॥ **महामल्लेति** ॥ "दुर्गमत्वाच्चनैवात्रप्राथम्येचोदितेंजसे" त्यनुव्याख्यानानुरोधेनाह ॥ **सोपानेति** ॥ **उभयत्रेति** ॥ तेषामन्यत्रप्रसिद्धिनिरासमात्रस्यान्यत्रप्रसिद्धानांतत्प्रसिद्धिनिरासपूर्वकंभगवत्परत्वप्रतिपादनाल्लघुत्वादितिभावः । आद्यइतिशब्दोहेतौ । अंत्यःशंकासमाप्तौ । असंकीर्णलक्षणैरेवपादोपाधयोसंकीर्णाइतिभावेनलक्षणानि संगृह्णाति ॥ **श्रुत्यंतरेति** ॥ सोपानारोहणन्यायेनायंनिर्देशः । एकैकार्धेनैकैकस्यलक्षणमितिध्येयं । हेतुमुखलक्षणान्यभिधायस्वरूपमुखानिफल

महामल्लभंगन्यायेनातिप्रयत्नसाध्यस्यप्राथम्येह्यन्यत्रैवप्रसिद्धानांप्राथम्यंस्यात् । सोपानारोहणन्यायेनानतिप्रयत्नसाध्यस्यप्राथम्येतूभयत्रप्रसिद्धानांप्राथम्यंस्यादित्यन्यत्रप्रसिद्धानांपूर्वंसमन्वयः । तत्रापिनाम्नांपूर्वमनंतरंलिंगानां तदनंतरमुभयत्रप्रसिद्धानां अंतेन्यत्रैवप्रसिद्धानामितिक्रमस्यसर्वथाप्ययोगादिति ॥ ॥ उच्यते ॥ ॥ श्रुत्यंतरादिभिस्तुल्याह्युभयस्मिन्प्रसिद्धता । श्रुत्यादितोलोकतोवापीतरेषुप्रसिद्धता ॥१॥ बलवच्छ्रुतिलिंगाद्यैरन्येष्वेवप्रसिद्धता । उभयत्रप्रसिद्धादेःक्रमाल्लक्षणमुच्यते ॥२॥

गु० कानांप्रथमपादे लिंगात्मकानांतेषामेवद्वितीये तृतीयेनामलिंगात्मकानामुभयत्रप्रसिद्धानां चतुर्थउभयात्मकानामन्यत्रैवप्रसिद्धानामितिपदाक्रमोनेत्यर्थः । महामल्लभंगेनवास्यात्सोपानारोहणक्रमेणवास्यात् । नाद्यइत्याह ॥ **महामल्लेति** ॥ नद्वितीयइत्याह ॥ **सोपानेति** ॥ फलितमाह ॥ **अन्यत्रेति** ॥ **सर्वथेति** ॥ उक्तन्याययोरन्यतरन्यायाश्रयणेनापीत्यर्थः । लक्षणासंभवमुक्तंपरिहरति ॥ **उच्यतइत्यादिना** ॥ नन्वन्यत्रप्रसिद्धानांसमन्वयस्यप्रथमपादउक्तत्वात्तत्क्रमेणैवलक्षणानिवक्तव्यानि । एवंचादावुभयत्रप्रसिद्धानामन्यत्रान्यत्रैवप्रसिद्धानामितिक्रमोल्लंघनेकोहेतुरितिचेन्न । उभयत्रप्रसिद्धानामन्यत्रप्रसिद्धिसांकर्यस्यपश्चादुक्तत्वेनबुद्धिस्थत्वात्तल्लक्षणस्य प्रथमतउक्तिः । यद्वा उभयत्रप्रसिद्धानामन्यत्रप्रसिद्धत्वस्यसत्त्वात्तेषांसांकर्यंदुष्परिहरमितिप्रथमंशिष्यजिज्ञासाविषयत्वात्प्रथमतस्तदुक्तिरिति । हेतुमुखानिलक्षणान्यु

प्र०मुखानिचतान्याह ॥ **यद्वेति** ॥ एकैकेनश्लोकेनैकैकस्यलक्षणमुच्यतइतिविवेकः । विरोधिन्यौ समन्वयस्येत्यनुषंगः । एवमग्रेपि ॥ **इहेति** ॥ समन्वीयमानशब्देषु ॥ **उक्तद्वयमिति** ॥ ब्रह्मण्यप्रसिद्धिरन्यत्रप्रसिद्धिश्चेत्युक्तद्वयमत्यशक्यताचेत्यर्थः । कःस्वार्थे । श्रुत्यंतरेतिश्लोकोक्तलक्षणानांहेतुमुखत्वंविशदयन्नुत्तरश्लोकोक्तलक्षणानांस्वरूपमुखत्वंफलमुखत्वंचव्यंजयन्श्लोकान्व्याचष्टे ॥ **येषाशब्दानामिति** ॥ श्रुत्यंतरेति द्युभ्वाद्यायतनत्वाद्यभिप्रायेण प्रवृत्तीत्यक्षरादिशब्दाकूतेन । आदिपदादाकाशादिशब्दप्रयोगादिसाधारण्यंचेतिग्राह्यं । एतेनश्रुत्यंतरेत्यर्धंवि

यद्वा । येषांप्रसिद्धिरन्यत्रकेवलैवविरोधिनी । समन्वयस्योभयत्रप्रसिद्धास्तेहिकीर्तिताः ॥ १ ॥
येषांब्रह्मण्यप्रसिद्धिःप्रसिद्धिश्चान्यवस्तुषु । विरोधिन्यौहितेन्यत्रप्रसिद्धाःकथिताइह ॥ २ ॥
येषामुक्तद्वयंब्रह्मपरत्वस्यात्यशक्यता । इतितिस्रोविरोधिन्यस्तेन्यत्रैवप्रसिद्धकाः ॥ ३ ॥ ये
षांशब्दानांलोकेब्रह्मणीवान्यत्राप्यप्रयोगाद्व्यक्तिविशेषनिर्णयायश्रुत्यंतरान्वेषणे श्रुत्यंतरेन्यत्रे
वब्रह्मण्यपिप्रयोगाच्छ्रुत्यंतरसाधारण्यंप्रवृत्तिनिमित्तादिसाधारण्यंवापूर्वपक्षिणोपिसंमतं ।

गु० क्त्वाफलमुखान्याह ॥ **यद्वेति** ॥ ननुनोभयत्रप्रसिद्धानामन्यत्रप्रसिद्धैःसांकर्यपरिहारः । अन्यत्रप्रसिद्धानामपिपूर्वोत्तरपक्षश्रुत्यादिनोभयत्रप्रसिद्धत्वात् । किंचाव्यक्तादिशब्दानामप्यन्यत्रप्रसिद्धिसाधकश्रुत्यादेरुक्तस्यविष्णावसंभाव्यमानत्वरूपबलवत्त्वस्यान्यत्रप्रसिद्धेष्वपिपूर्वपक्ष्युक्तरीत्यासत्त्वेननतेषामप्यन्योन्यमसांकर्यं । श्रुत्यंतरादिभिरित्यत्रादिपदश्चव्यर्थइत्यतःकारिकाव्याचष्टे ॥ **येषामिति** ॥ **व्यक्तिविशेषनिर्णयायेति** ॥ अस्यशब्दस्यवाच्योव्यक्तिविशेषोयमितिनिर्णयायेत्यर्थः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० वृतं । हेतुमुखलक्षणमुक्त्वास्वरूपमुखलक्षणमाह ॥ **अतएवेति** ॥ साधारण्यादेवेत्यर्थः । यद्यपीदंनश्लोकेकंठतउक्तं तथाप्युभयत्रप्रसिद्धाइतिशब्दप्रयोगात्सूचितमित्यग्रेव्यक्तं । कंठोक्तमेवफलमुखलक्षणंविवृणोति ॥ **अतएवेति** ॥ उभयोपस्थापकत्वादेवेत्यर्थः । यद्वासाधारण्यादेवेत्येवार्थः । यद्वक्ष्यति“इतरयोर्हेतुमूलत्वा”दिति । समन्वयस्यब्रह्मैवशक्तितात्पर्यविषयइत्येवंरूपस्य । एतेनयेषांप्रसिद्धिरितिश्लोकोविवृतः । अन्यत्रप्रसिद्धानांत्रिविधान्यपिलक्षणानिव्यनक्ति ॥ **येषांत्विति** ॥ लोकेतींद्राकाशादिशब्दाशयेन । आदिपदस्य सर्वगतत्वादेःश्रुत्यादिसाहचर्येणवस्त्वंतरेप्रसिद्धेःसत्त्वादित्यर्थः ॥ **वृत्त्यादिकमिति** ॥ वृत्तितात्पर्येइत्यर्थः । एतेनश्रुत्यादितोलोकतोवेत्यर्धंविवृतं । अन्यत्रप्रसिद्धपदप्रयोगसूचितं स्वरूपमुखलक्षणंविवृणोति ॥ **अतएवेति** ॥ ब्रह्मणिवृत्त्यभावादेवेत्यर्थः । फलमुखंतदाह ॥ **अतएवचेति** ॥ अन्यमात्रो

अतएवयेषांविषयवाक्यआपाततोन्योपस्थापनसमयेतत्तुल्यतयाचब्रह्मोपस्थापकत्वं अतएवचयेषांब्रह्मणिसमन्वयस्यान्योपस्थितिमात्रेणप्रतिबंधः तउभयत्रप्रसिद्धाः । येषांतुवस्त्वंतरेलोकप्रसिद्ध्यादेःसत्त्वात्तद्विरोधेनक्वापिब्रह्मणिवृत्त्यादिकंपूर्वपक्षिणोनसंमतं अतएवयेषांविषयवाक्यआपाततोन्यमात्रोपस्थापकत्वं अतएवचयेषांसमन्वयस्यान्योपस्थितिब्रह्मानुपस्थितिभ्यामेवप्रतिबंधः तेन्यत्रप्रसिद्धाः ।

गु० आदिपदेनप्रयोगकारणत्वादिपरिग्रहः ॥ **अतएवेति** ॥ उभयत्रप्रयोगादेवेत्यर्थः ॥ **अतएवेति** ॥ अन्यमात्रोपस्थितेर्विरोधित्वादेवेत्यर्थः । तथाचोभयत्रप्रसिद्धेषुश्रुत्यातौल्यस्योभयसिद्धत्वात्तेषुसंमत्यभावान्नसांकर्यमितिभावः ॥ **अतएवेति** ॥ ब्रह्मणिवृत्तेरसंमतत्वादेवेत्यर्थः ॥ **अतएवचेति** ॥ अन्यमात्रोपस्थापकत्वादेवेत्यर्थः

SGDF Sri Gargeshwari Digital Foundation

प्र० पस्थापकत्वादेवेत्यर्थः नतुब्रह्मपरत्वस्यात्यशक्यत्वेनापीत्येवकारार्थः । एतेनयेषांब्रह्मणीतिश्लोकोव्याख्यातः । अन्यत्रैवप्रसिद्धान.त्रिविधान्य पिलक्षणानिस्पष्टयति ॥ **येषांपुनरिति** ॥ तत्परत्वे वस्त्वंतरपरत्वे । एतच्चाव्यक्तादिशब्दाभिप्रायेण । एतेनबलवदित्यर्धंविवृतं । स्वरूपमुखं तदाह ॥ **अतएवेति** ॥ अन्यपरत्वेप्रबलश्रुत्याद्युपेतत्वादित्यर्थः ॥ **आपाततइति** ॥ विमर्शेसतिविष्णुमात्रोपस्थापकत्वादितिसर्वत्रबोध्यं । फलमुखंतदाह ॥ **अतएवेति** ॥ अत्यंतमन्यमात्रोपस्थापकत्वादेवेत्यर्थः । पूर्ववद्वार्थः । एतेनयेषामुक्तंद्वयमितिश्लोकोव्याख्यातः । नन्वत्र व्याख्यानेसाधारण्येसत्यन्योपस्थापकत्वेसतिब्रह्मसमन्वयप्रतिबंधवत्त्वादिरूपंविशिष्टमेकैकस्योपाधेर्लक्षणंभाति । तदयुक्तं । व्यावर्त्याभावा दित्यतआह ॥ **अत्रचेति** ॥ **सर्वत्रेति** ॥ त्रिविधोपाधिलक्षणजातइत्यर्थः । मुखशब्दःप्रत्येकमन्वेति । तद्विविच्याह ॥ **तत्रचेति** ॥ आ

येषांपुनर्वस्त्वंतरेलोकप्रसिद्धिस्तत्परत्वेप्रबलश्रुत्यादिकमप्यस्ति । अतएवयेषांविषयवाक्यआपाततोत्यंतमन्यमात्रोप स्थापकत्वं अतएवचयेषांसमन्वयस्यान्योपस्थितिब्रह्मानुपस्थितिभ्यांब्रह्मपरत्वस्यात्यशक्यकल्पनत्वशंकयाचातितरां प्रतिबंधस्तेन्यत्रैवप्रसिद्धाः । अत्रचसर्वत्रप्रत्येकंहेतुस्वरूपफलमुखेनलक्षणत्रयंविवक्षितं । तत्रचाद्येनयेषामित्यादिना

गु० ॥ **अतएवेति** ॥ अन्यत्रप्रबलश्रुतेःसत्त्वादेवेत्यर्थः ॥ **अतएवेति** ॥ अत्यंतमन्यमात्रोपस्थापकत्वादेवेत्यर्थः । नन्वेतेषामेकैकमेवलक्षणीयमितिप्रतीयते । तथैवेतिचेन्न । व्यर्थविशेषणत्वापत्तेरित्यतआह ॥ **अत्रचेति** ॥ संग्रहव्याख्यानइत्यर्थः । प्रवृत्तिनिमित्तादिसाधारण्यमित्यनेनसंग्रहश्लोकस्थश्रुत्यंतरादिभिस्तुल्ये त्यादिशब्दस्यार्थउक्तोभवति । हेतुरूपफलमुखानिकियताग्रंथेनोक्तानीत्यतआह ॥ **तत्रचेति** ॥ ननुभाष्यटीकासंग्रहेष्वनुक्तानिकथमेतान्युच्यंतइत्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्येनत्रयेणेत्यर्थः ॥ **अतएवेत्यतइति** ॥ आद्येभ्योतएवेत्येतेभ्यइत्यर्थः ॥ **हेतुमुखमिति** ॥ उभयप्रसिद्ध्यादौयेंहेतवःश्रुत्यंतरादिसाधारण्यं लौकिकप्रयोगादिबलवच्छुत्यादिकंचतेएवमुखमुपजीव्यमेषांतानिहेतुमुखानित्रिविधोपाधिलक्षणानीत्यर्थः । एवमग्रेपि । एकवचनंसमुदाया भिप्रायं ॥ **अवशिष्टेनेति** ॥ द्वितीयातएवचेत्येतैरित्यर्थः । त्रिविधलक्षणत्रयेज्ञापकंवदन्श्लोकेस्वरूपसुखस्यानुक्तिशंकांचप्रत्याह ॥ **तत्रेति** ॥ **प्रथमानित्विति** ॥ हेतुमुखानीत्यर्थः ॥ **आद्यादीति** ॥ आद्यद्वयेतृतीयचतुर्थपादयोश्चेत्यर्थः । आद्ये"लोकतोन्यत्रप्रसिद्धाकाशनाम्न" इत्यादिना द्वितीये"लोकतोन्यत्रप्रसिद्धादित्यश्रुतिसहपठितसर्वगतत्वलिंगात्मकशब्दस्ये"त्यादिना तृतीये"रुद्रोवावलोकाधारः लोकाश्चलोकि नश्चालोकाश्चालोकिनश्चविष्णावेवोताश्चेत्यादिनोभयत्रप्रसिद्धद्युभ्वाद्यायतनत्वलिंगस्ये"त्यादिना चतुर्थे"अवरत्वादिलिंगैर्भगवतिविरुद्धतया ऽन्यत्रैवप्रसिद्धाव्यक्तादिशब्दाना"मित्यादिनात्रिविधप्रसिद्धिषुकारणभूतलोकप्रसिद्ध्यादीनांकीर्तनादित्यर्थः ॥ **साधारण्यस्येति** ॥ तृतीये

ऽतएवेत्यतःपूर्वेणहेतुमुखंलक्षणमुक्तं। द्वितीयेनयेषामित्यादिनाऽतएवेत्यतःपूर्वेणस्वरूपमुखं अवशिष्टेनफलमुखं । तत्रस्वरू पमुखानिद्वितीयानिलक्षणान्युभयत्रान्यत्रान्यत्रैवप्रसिद्धेतिशब्दावयवार्थरूपाणि भाष्ये इहापिसंग्रहश्लोके तत्तच्छब्दप्रयो गादेवसूचितानि । प्रथमानितुटीकायामाद्यादिपादेषुलोकतोन्यत्रप्रसिद्धेत्यादिनात्रिविधप्रसिद्धिकारणकीर्तनात्सूचितानि । तृयीयान्यपिटीकाकृतोभयत्रप्रसिद्धेषुसाधारण्यस्यसंदेहबीजतां तथान्यत्रप्रसिद्धेष्वन्यकोटेरन्यत्रप्रसिद्धितःप्राप्तिं तथा ॥ २३५ ॥

गु० ॥ **तत्रेति** ॥ अत्राभियुक्तसंमतिमाह ॥ **उक्तंहीति** ॥ **यइति** ॥ हेतुस्वरूपफलप्रविभक्तानितानिलक्षणानियोवेदेतिपूर्वेणवाक्यशेषगतेनवेदेत्यनेनान्वयः । हेतुमूलमे

प्र० पादइतिभावः ॥ **अन्यत्रेति** ॥ आद्यद्वितीयपादयोः ॥ **अन्यत्रैवेति** ॥ चतुर्थपादे ॥ **अत्रचेति** ॥ त्रिविधोपाधीनांप्रत्येकंत्रिविधलक्षण त्रिकमध्यउत्तरद्विकत्रयस्याद्यत्रिकमूलकत्वस्यातएवेत्यादिनाप्राग्विवृतत्वादाद्यत्रिकंतत्तत्पादीयोदाहरणनिष्ठतयाप्रदर्श्यतइत्यर्थः । तत्प्रदर्शने चपश्चात्तनद्विकत्रयस्यापितज्ज्ञानंसुशकमितिभावः ॥ **विष्णाविति** ॥ "लोकाश्चलोकिनश्चालोकाश्चालोकिनश्चे"तिपूर्वशेषः । साधारण्येने त्यस्यसर्वस्योभयत्रप्रसिद्धिरितिवक्ष्यमाणेनान्वयः ॥ **प्रवृत्तीति** ॥ अविनाशित्वरूपप्रवृत्तीत्यर्थः । अक्षरनयेतथोक्तेरितिभावः ॥ **सदिति** ॥

न्यत्रैवप्रसिद्धेष्वन्यकोटेरन्यत्रैवप्रसिद्धितःप्राप्तिंचवदता समन्वयप्रतिबंधतारतम्यसूचनात्सूचितानि । उक्तंहि"यस्तानिप्रवि भक्तानिहेतुरूपफलैःपृथ"गिति । अत्रचेतरयोर्हेतुमूलत्वाद्धेतुःप्रदर्श्यते । उभयत्रप्रसिद्धानांहिद्युभ्वाद्यायतनत्वादीनां"रुद्रो वावलोकाधारः विष्णावेवोताश्चप्रोताश्चे"त्यादिश्रुत्यंतरसाधारण्येन अक्षरादिशब्दानांप्रवृत्तिनिमित्तसाधारण्येन सदादिश ब्दानांविषयवाक्यस्थकारणत्वादिधर्मसाधारण्येन"आकाशोर्थांतरत्वादिव्यपदेशा"दितिसूत्रविषये"आकाशोहवैनामनामरू पयोर्निर्वहिते"तिवाक्यस्थाकाशशब्देआकाशस्तल्लिंगादित्यत्रब्रह्मण्यपिप्रयोगस्योक्तत्वात्प्रयोगसाधारण्येनोभयत्रप्रसिद्धिः ।

गु० वलक्षणंप्रदर्श्यते। तत्रकिंनिमित्तमित्यतआह ॥ **अत्रचेति** ॥ इतरयोः स्वरूपफलमुखलक्षणयोरित्यर्थः । नन्वेवमेकस्यैवाकाशशब्दस्यान्यत्रोभयत्रान्यत्रैवप्रसिद्धता स्यादित्युक्तबाधकंपरिहरन्नेवोभयत्रप्रसिद्धानामन्यत्रप्रसिद्धेभ्योभेदमुपपादयितुंश्रुत्यंतरसाधारण्यादेरुभयत्रप्रसिद्धिसाधकत्वंतावद्दर्शयति ॥ **उभयत्रप्रसिद्धानांही त्यादि** ॥ अत्रलक्षणकथनक्रमेणोपपादनान्नविरोधः। यद्वा नन्वेवमुभयत्रप्रसिद्धानांलक्षणानि । तथाप्युभयत्रप्रसिद्धानांनान्यत्रप्रसिद्धेभ्योभेदः। पूर्वपक्षसिद्धांतोक्तरीत्यो भयत्रप्रसिद्धेस्तुल्यत्वादित्यतउभयवादिसंमतश्रुत्यंतरसाधारण्यादिनैवोभयत्रप्रसिद्धिरित्याह ॥ **उभयत्रप्रसिद्धानांहीत्यादि** ॥ श्रुत्यंतरसाधारण्येनोभयत्रप्रसिद्धिरि

SGDF Sri Gargeshwari Digital Foundation

प्र० "ईक्षतिकर्मव्यपदेशात्स" इत्यत्र "तत्तेजोसृजते" त्यादिकारणत्वसाधारण्येनेत्युक्तेरित्यर्थः । आदिपदादबाधितत्वाख्यसत्त्वरूपधर्मग्रहः । ब्रह्मप्रधानयोस्साधारण्येनेत्यर्थः । आकाशनयेआकाशब्रह्मणोःप्रयोगसाधारण्येनेत्यर्थः । पूर्वोक्तंनिराह ॥ **नत्विति** ॥ कंपनादित्यत्रटीकायामेवमुक्तिंतुविवरिष्यामइतिभावः । एतेनेत्युक्तरीत्यातथासर्वत्रोभयप्रसिद्धेर्वक्तुंशक्यत्वादितिभावः । आकाशशब्दस्यान्यत्रप्रसिद्धत्वमप्युपपादयति ॥ **उक्तेरिति** ॥ आकाशनयसिद्धांतन्यायेनब्रह्मण्याकाशपदप्रयोगोक्तेःपूर्वमन्यत्रप्रसिद्धेरेवसत्त्वादितिभावः । अन्यत्रैवप्रसिद्धत्वं

नतुपूर्वपक्षसिद्धांतन्यायाभ्यां । येनसांकर्यस्यात् । तदुक्तेस्तुप्रागाकाशस्तल्लिंगादितिसूत्रविषयवाक्ये "अस्यलोकस्यकागतिरित्याकाशइतिहोवाचे" त्यत्रान्यत्रप्रसिद्धिः ।

गु० त्यन्वयः । एवमुत्तरत्रापि । नचाकाशशब्दस्यकथमुभयत्रप्रसिद्धिरितिवाच्यं । लोकतोन्यत्रप्रसिद्धेस्तल्लिंगादितिन्यायेनब्रह्मण्यपिप्रयोगादित्याह ॥ **आकाशइति** ॥ एवमाकाशशब्दस्योभयत्रप्रसिद्धिमुपपाद्य कथंतर्हितस्यान्यत्रप्रसिद्धत्वतल्लिंगादितिन्यायेनब्रह्मण्यपिप्रसिद्धत्वेनोभयत्रप्रसिद्धत्वादित्यतआह ॥ **तदुक्तेरिति** ॥ तथाचैतदधिकरणप्रवृत्त्यनंतरंब्रह्मण्यप्याकाशशब्दस्यप्रसिद्धत्वेप्याकाशस्तल्लिंगादितिन्यायप्रवृत्तेःपूर्वंतत्सूत्रपूर्वपक्षदशायामन्यत्रप्रसिद्धत्वेनब्रह्मण्यप्रसिद्धत्वेनान्यत्रप्रसिद्धत्वोपपत्तेरितिभावः । कथंतर्ह्यन्यत्रैवप्रसिद्धत्वंपूर्वोक्तन्यायेनब्रह्मण्यपिप्रसिद्धत्वेनयेषामुक्तद्वयमित्यादिनोक्तस्यान्यत्रप्रसिद्धलक्षणानाक्रांतत्वात्तस्यान्यत्रप्रसिद्धत्वेपिब्रह्मण्य

SGDF Sri Gargeshwari Digital Foundation

प्र० चाह ॥ कारणत्वेनेति ॥ संभूतत्वेति ॥ उत्पत्तिमत्त्वस्वजन्यत्वादिरूपेत्यर्थः । एतेनयदिप्रयोगसाधारण्येनोभयत्रप्रसिद्धिस्तर्हिपूर्वमाकाशशब्दस्यब्रह्मण्यपिप्रयोगस्योक्तत्वाच्चतुर्थपादीयस्यतथात्वंस्यादितिनिरस्तं । अन्यत्रप्रसिद्धेरबाधाद्विपरीतलिंगाच्चेत्युक्तेः । एतेन"उत्पत्तिमत्त्वलिंगेनान्यत्रैवप्रसिद्धानामाकाशादिशब्दाना"मितितत्रत्यंटीकावाक्यंसमर्थितंध्येयं । "अवांतरंकारणंचे"त्यणुभाष्यानुरोधेनपक्षांतरमाह

"कारणत्वेनचाकाशादिष्वि"तिसूत्रविषयवाक्ये"आत्मनआकाशस्संभूत"इत्यत्रतु ब्रह्मलिंगाभावेनलोकतोन्यत्रप्रसिद्धेरबाधात्संभूतत्वादिविपरीतलिंगाच्चान्यत्रैवप्रसिद्धिरित्येकस्यैवप्रयोगभेदेनदशाभेदात्रितयंयुक्तं ।

गु० प्रसिद्धत्वाभावादित्यतआह ॥ **कारणत्वेनेत्यादि** ॥ अयंभावः । आकाशशब्दोप्यन्यत्रैवप्रसिद्धः । नचब्रह्मण्यप्रसिद्धिर्नास्तीतिवाच्यं । तस्यापिब्रह्मण्यप्रसिद्धत्वात् । नचतल्लिंगादितिन्यायेनब्रह्मणिप्रसिद्धिरुक्तेतिवाच्यं । सतिहिब्रह्मलिंगेब्रह्मपरत्वमितिहितन्न्यायः । अतएवाकाशोवैनामरूपेत्यादौनामरूपनिर्वाहकत्वरूपब्रह्मलिंगसद्भावेनाकाशशब्दस्यब्रह्मपरत्वमाश्रितं । नचात्रब्रह्मलिंगमस्ति । किंतुतल्लिंगादितिन्यायात्प्रागिवात्राप्यबाधितान्यत्रप्रसिद्धेःसंभूतत्वादिलिंगसाहित्येनबलवत्त्वादन्यत्रैवप्रसिद्धत्वमिति । एवमन्यत्रैवप्रसिद्धिसंपादिकेतत्राप्रसिद्ध्यन्यत्रप्रसिद्धीउपपाद्यब्रह्मपरत्वेऽन्यशक्यत्वमप्याह ॥ **संभूतत्वादीति** ॥ **प्रयोगभेदेनेति** ॥ विषयवाक्यभेदेनेत्यर्थः । ननूभयत्रप्रसिद्धिप्रयोजकीभूतप्रयोगसाधारण्यस्योक्तन्यायेनात्रापिसत्त्वादुभयत्रप्रसिद्धत्वंस्यादेव । अन्यथाविषयवाक्यगताकाशशब्दब्रह्मणिप्रयोगस्याभावस्यचसिद्धांतेक्काप्यसंभवाद्ब्रह्मलिंगाभावस्यचसिद्धांतेक्काप्यभावात् पूर्वपक्षेतुसर्वत्रसत्वात्पूर्वपक्षसिद्धांतानुदयात् । अतएवविपरीतलिंगानांपूर्वपक्षेसर्वसाधारण्यात्सिद्धांतेतदभावस्यापिसाधारण्यात्पूर्वत्राप्युत्तरत्रप्रसिद्ध्योपपत्तेरितिचेन्न । श्रुत्यादेःप्राबल्यंहीत्यादिवक्ष्यमाणन्यायेनतृतीयपादेभूताकाशप्रापकवैनामेतिनिपातद्योतितलोकप्रसिद्ध्यापन्नाकाशश्रुतेःसिद्धांतेऽमुख्ययापिवृत्त्यान्यपरत्वाभावेऽनुपपत्त्यभावेनदुर्बलत्वात् । चतुर्थेतुतस्याप्राबल्यादुभयत्रप्रयोगाविशेषेऽतिव्याप्त्यभावात् । एतदेवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥**यद्वेति**॥ तथाचाकाशपदस्यत्रह्मणिप्रयोगसाधनात्पूर्वमन्यत्रप्रसिद्धता । तदनंतरमुभयत्रप्रसिद्धतेतिद्वैविध्यमेवेतिभावः । ज्योतिश्शब्दे पित्रैविध्यंप्रयोगभेदेनदशाभेदाद्युक्तमित्याह ॥ **एवमिति** ॥ उक्तेःप्रागित्याद्युक्तरीतिरेवंशब्देनपरामृश्यते । ननु"ज्योतिश्चरणे"त्यतःपूर्वंज्यो तिश्शब्दस्यविष्णौप्रयोगासिद्धेः"ज्योतिर्हृदयआहितंय"दित्यग्निसूत्रस्थज्योतिश्शब्दस्यान्यत्रप्रसिद्धत्वेपि"ज्योतिर्दर्शना"दित्यत्र"प्राणेषुहृद्यंतर्ज्यो ति"रितिकाण्वश्रुतिस्थज्योतिश्शब्दस्यनोभयत्रप्रसिद्धता । तत्पूर्वपक्षेज्योतिश्चरणेत्यत्रोक्तज्योतिषोविष्णुत्वाक्षेपेणविष्णौप्रयोगस्यपूर्वपक्षिणोसं मतेः । "आकाशोर्थांतरत्वादी"त्यत्रतुपूर्वपक्षेतल्लिंगादित्यत्रोक्तस्याकाशशब्दस्यविष्णुत्वानाक्षेपेणतत्राकाशशब्दस्योभयत्रप्रसिद्धत्वोपपत्तेरिति

यद्वाकारणत्वेनेत्यत्रावांतरकारणत्वस्यैवसमन्वयइतिवक्ष्यते । एवंज्योतिश्शब्दस्यापि"ज्योतिश्चरणे"त्य त्रान्यत्रप्रसिद्धता"ज्योतिर्दर्शना"दित्यत्रोभयत्रप्रसिद्धता"ज्योतिरुपक्रमा"दित्यत्रान्यत्रैवप्रसिद्धतोह्या ।

गु० भिप्रेत्यविपरीतलिंगाच्चेतिप्रोक्तमितिज्ञातव्यं । नन्वेवमन्यत्रैवप्रसिद्धलक्षणाक्रांतत्वेनान्यत्रैवप्रसिद्धत्वेपिब्रह्मण्यपिप्रसिद्धत्वादुभयत्रप्रसिद्धतास्यादेवेत्यतआह ॥ **यद्वे ति**॥ यद्वाएवंपूर्वोत्तरपक्षयोःश्रुत्यादीनांप्राबल्यतदभावविवक्षयापरस्परमतिव्याप्तिपरिहारेपिपक्षांतरमाह ॥**यद्वेति**॥ भूतपराकाशशब्दस्येवज्ञानवाचकज्योतिश्शब्दस्यप्रा क्समन्वयाप्रतिपादनात्कथंतस्यतृतीयउभयत्रप्रसिद्धत्वंकथंचविरुद्धमन्यत्रान्यत्रैवप्रसिद्धत्वंचेत्यभ्यधिकाशंकायामुक्तमेवातिदिशति ॥ **एवमिति** ॥ ज्योतिश्शब्दस्य पूर्वसमन्वयापादितप्रयोगाभावेज्ञानरूपप्रवृत्तिनिमित्तसाधारण्येनोभयत्रप्रसिद्धेर्वक्ष्यमाणत्वात्साधारण्यमात्रांशेऽतिदेशः । एवंकर्मवाचकस्यपूर्वमसमन्वितस्यैवज्योति श्शब्दस्यावांतरकारणस्येवप्रतिपादनात्सिद्धांतेप्यन्यपरत्वाद्वाऽतिदेशः । नन्वेवमप्युभयत्रप्रसिद्धवत्साधारणश्रुत्यादिनाप्रसिद्धेरन्यत्रप्रसिद्धेष्वपिसत्त्वेनसांकर्यंस्यादेवेत्य

प्र० चेन्न । प्रयोगसाधारण्येनोभयत्रप्रसिद्धत्वाभावेपितत्साधारण्येनेवप्रवृत्तिनिमित्तसाधारण्येनाप्युभयत्रप्रसिद्ध्युपगमात् । जीवेशयोर्ज्ञानत्वरू पप्रवृत्तिहेतुसाधारण्येनतथात्वस्यचतत्रवक्ष्यमाणत्वात् । नन्वथापि"ज्योतिरुपक्रमादित्यत्रपूर्वविष्णौप्रयोगस्योक्तत्वात्तस्यचतत्पूर्वपक्षेनाक्षेपा त्तत्रत्यज्योतिश्शब्दस्यपूर्वविष्णौप्रयोगस्यपूर्वपक्षिणोपिसंमतेरुभयत्रप्रसिद्धतास्यादितिचेन्न । "वसंतेवसंतेज्योतिषे"त्यत्रब्रह्मलिंगाभावेनलोकतो न्यत्रप्रसिद्धेरबाधात्कर्मक्रमादिलोपप्रसंगरूपप्रबलबाधकाच्चान्यत्रैवप्रसिद्धिरित्युक्तप्रायत्वात् । ज्योतिष्टोमवसंतादिशब्दानामपितत्रसमन्वये नज्योतिश्शब्दमात्रसमन्वयानुक्तेरितिभावः । वक्ष्यतेचैतत्पादांत्यप्राणनये । एवमक्षरशब्दस्याक्षरनयएवसमन्वयः । अदृश्यत्वनयेतुतत्सा हित्येनान्यत्रप्रसिद्धलिंगानामेवसमन्वयइतिबोध्यं । अदृश्यत्वादिगुणकमक्षरमितिचंद्रिकायांधर्मित्वेनाकरोपादानंतुविशेष्यप्रदर्शनार्थं । ता त्पर्यंतुगुणजातएव । अक्षरनयेतस्यविष्णौसमन्वयेपीह"अक्षरात्संभवती"त्युक्तविश्वोपादानत्वरूपबाधकेनप्रकृतौ"कूटस्थोक्षरउच्यत"इत्या दिस्मृतिसिद्धप्रसिद्धिबाधोनयुक्तइत्यादियुक्तिंवक्तुंवेति । एवमुभयत्रप्रसिद्धानांश्रुत्यंतरादिसाधारण्यरूपहेतुमुपलक्षणंलक्ष्यनिष्ठतयाप्रदर्श्यान्य त्रप्रसिद्धानामपितद्दर्शयति ॥ **अन्यत्रेति** ॥ **लोकतइति** ॥ अन्यत्रप्रसिद्धिरित्यन्वयः । श्रुत्यादिसाहचर्येणान्यत्रप्रसिद्धत्वे उभयत्रप्रसि

अन्यत्रप्रसिद्धानांत्विंद्रादिशब्दानांलोकतः सर्वगतत्वादिलिंगानां चलोकतोन्यत्रप्रसिद्धादित्यादिश्रुत्यादिसाहचर्येणान्यत्रप्रसिद्धिः ।

गु० तआह ॥ **अन्यत्रप्रसिद्धानांत्विति** ॥ ननुतथाप्यन्यत्रप्रसिद्धानांनान्यत्रैवप्रसिद्धेभ्योभेदः । तेषामन्यत्रप्रसिद्धिसाधकश्रुत्यादेरुभयत्रतुल्यत्वादित्यतोऽन्यत्रैव

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्धसांकर्यस्यादित्यतोविशेषणव्यावर्त्यमाह ॥ नन्विति ॥ अन्यत्रैवप्रसिद्धसांकर्यमपिनेत्याह ॥ तच्चेति ॥ ननुप्राबल्यसांकर्यमपिप्रागुक्तमित्यतआह ॥ प्राबल्यंहीति ॥ द्वित्वादिकमपीति ॥ तथाच "ऋतंपिबंता" वित्यादीनामन्यत्रप्रसिद्धत्वसिद्धिरितिभावः ॥ नापीति ॥

नतूभयत्रप्रसिद्धानामिवब्रह्मसाधारणश्रुत्यंतरादिनान्यत्रप्रसिद्धिः । तच्चश्रुत्यादिकंचतुर्थपादीयश्रुत्यादिवन्नप्रबलं । श्रुत्यादेःप्राबल्यंहि प्रवृत्तिनिमित्तस्यतदधीनत्वादिनाब्रह्मणिशब्दस्यपरममुख्यत्वेपितस्य शब्दस्यतद्युक्तवाक्यस्यवाऽपरममुख्यवृत्त्यान्यपरत्वंविनानुपपद्यमानत्वं । नत्वापाततोब्रह्मण्यसंभवमात्रं । येनद्वित्वादिकमपिबलवत्स्यात् । नापिसर्वथाऽसंभवः । येनसिद्धांतानुदयःस्यात् ।

गु० प्रसिद्धिसंपादकश्रुत्यादिप्राबल्यवन्नान्यत्रप्रसिद्धिसंपादकश्रुत्यादेःप्राबल्यमित्याह ॥ तच्चेति ॥ अन्यत्रप्रसिद्धिसंपादकश्रुत्यादिकमित्यर्थः । ननुश्रुत्यादेःप्रबलत्वं किमापाततोब्रह्मण्यसंभवमात्रंसर्वथाऽसंभवोवा । नाद्यः । द्वित्वादीनांप्रबलत्वापातात् । नांत्यः । सिद्धांतानुदयापातादित्यतआह ॥ श्रुत्यादेःप्राबल्यंहीति ॥ तथाचयथाकथंचिदन्यपरत्वंविनाऽनुपपद्यमानत्वमेवश्रुत्यादेःप्राबल्यंविवक्षितं । नतूभयविधमितिनातिप्रसंगइतिभावः । ननुविवक्षितंप्राबल्यंद्वित्वादावप्यस्त्येवेत्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मणीत्यनुषंगः । विवक्षितंप्राबल्यंद्वित्वादियुक्तवाक्येनास्ति वसंतादिवाक्येष्वस्तीत्युपपादयति ॥ **नहीति** ॥ **अन्यत्रैवेतिच** ॥ एतेनान्यत्रैवप्रसिद्धानांबलवच्छ्रुतीत्यादिनोक्तंहेतुमुखलक्षणंलक्ष्यनिष्ठत्वेनोपदर्शितंभवति ॥ **अन्यथेति** ॥ अव्यक्तनयोदाहरणे"इंद्रियेभ्यःपराह्यर्थाः"इत्यादिश्रुताविंद्रियादिपदानांकेवलब्रह्मपरत्वे इंद्रियार्थादिदेवतातारतम्यंनसिध्येत् । एवंवसंतादिवाक्येपिकर्मक्रमादिसिद्धिर्नस्यात् ।

नहि"गुहांप्रविष्टा"वित्यादिषुद्विवचनंतद्युक्तवाक्यंवाऽपरममुख्यवृत्त्याप्यन्यपरं । अन्यत्रैवप्रसिद्धेषुच"अव्यक्तात्पुरुषःपरः वसंतेवसंतेज्योतिषायजेते"त्यादिष्वव्यक्तादिशब्दस्तद्युक्तंवाक्यंवाऽपरममुख्यवृत्त्यान्यपरमेव । अन्यथादेवतातारतम्यकर्मादिनसिध्येत् । वाक्यांतरस्याप्येतत्तुल्यत्वात् ।

गु० आह ॥ **नहीति** ॥ ननुयथाकथंचिदन्यपरत्वंविनानुपपद्यमानत्वमन्यत्रप्रसिद्धेषुनास्तीत्यसंभवइत्यतआह ॥ **अन्यत्रैवप्रसिद्धेष्विति** ॥ **अन्यथेति** ॥ अव्यक्तात् पुरुषःपरः वसंतेवसंतेज्योतिषायजेतेत्यादेरमुख्यवृत्त्यान्यपरत्वानंगीकारइत्यर्थः । तत्राव्यक्तात्पुरुषः परइत्यस्यवाक्यस्याऽमुख्यवृत्त्याऽन्यपरत्वाभावेतारतम्यंनसिध्येत् । वसंतइत्यादेरमुख्यवृत्त्याऽन्यपरत्वाभावेकर्मादिर्नसिध्येदितिसंबंधोबोद्धव्यः । नन्वव्यक्तात्पुरुषःपरःवसंतेवसंतेज्योतिषायजेतेत्यादेरमुख्यवृत्त्याऽन्यपरत्वाभावेपिनदेवतातारतम्याद्यसिद्धिः । वाक्यांतरेणतत्सिद्ध्युपपत्तेरित्यतआह ॥ **वाक्यांतरस्येति** ॥ तथाचाव्यक्तात्पुरुषःपरइत्यादिवद्वाक्यांतरस्यापिब्रह्मपरत्वेनाऽव्यक्तादिवाक्यानामन्यपरत्वाभावेवाक्यांतरस्याप्यन्यपरत्वाभावापातेनतेनापिसिद्धेरसंभवात्तस्याप्यमुख्यवृत्त्यान्यपरत्वमाश्रीयतेचेदव्यक्तादेरपितदस्तु लाघवादिति

SGDF
Sri Gargeshwari Digital Foundation

प्र० देवतातारतम्यकर्मादिबोधकवाक्यांतरस्यापिब्रह्मपरत्वावश्यंभावादित्यर्थः ॥ **अतएवेति** ॥ मुख्यामुख्यवृत्त्याऽर्थद्वयस्यावश्यकत्वादेवे त्यर्थः । उपासनापादेकामादिचतुर्विंशतितमेधिकरणे श्रीरुपासनायामधिकारिणीनवेतिसंदेहे सीतारुक्मिण्यादिरूपेणश्रियोपिजन्ममरणादि दृष्ट्यासंसारित्वेनसाधुत्वेसतिसंसारित्वादधिकारिणीतिप्राप्ते"सर्वायतनासर्वकालासर्वस्थानबद्धाबंधिकासैषे"तिश्रुतौसर्वगतत्वनित्यत्वाद्यभिधा नेनजननादेरवतारादित्वेनसंसारित्वाभावान्नश्रीरधिकारिणीतितत्परतयोदाहृतंवाक्यंप्रकृत्यधिकरणउदाहृत्यविष्णुपरत्वंसमर्थितमित्यर्थः । न न्वेवंचतुर्थपादांत्याधिकरणेकथंचिदप्यन्यपरत्वशून्यवाक्यस्यटीकायामुदाहृतेः कथमेवमित्यतआह ॥ **एवंचेति** ॥ **प्रकरणादिति** ॥ पूर्वा

अतएव "कामादितरत्रतत्रचायतनादिभ्य" इत्यधिकरणेऽपरममुख्यवृत्त्याश्रितत्वपरत्वेनभाष्यो दाहृतं"सैषाप्रकृतिरविकृति"रितिवाक्यमेवप्रकृत्यधिकरणेटीकायामुदाहृतं । एवंच "एतेनसर्वे व्याख्याता"इत्यत्राप्यपरममुख्यवृत्त्यान्यपरवाक्यस्थाएवासदादिशब्दाउदाहार्याः । प्रकरणात् । भाष्येवाक्यविशेषानुपादानाच्च । टीकायां "असद्वाइदमग्रआसी"दित्यस्यापरममुख्यवृत्त्याप्य

गु० भावः ॥ **अतएवेति** ॥ परमुख्ययावृत्त्याब्रह्मपरत्वेप्यमुख्ययावृत्त्याऽन्यपरत्वस्यविद्यमानत्वादेवेत्यर्थः । ननुतस्यान्यपरत्वाभावादेवतदुदाहरणमित्यतआह ॥ **का मादितरत्रेति** ॥ नन्वेवमन्यत्रैवप्रसिद्धनामालिंगात्मकशब्दानांसमन्वयप्रतिपादकेचतुर्थपादे एतेनसर्वेव्याख्याताइत्यधिकरणप्रवेशोनस्यात् । तद्विषयवाक्यस्थासदा दिशब्दानांपरममुख्ययावृत्त्याब्रह्मपरत्वेसत्यन्यपरत्वरूपबलवत्त्वाभावेनबलवच्छ्रुतिलिंगादिभिरन्यत्रप्रसिद्धत्वरूपान्यत्रैवप्रसिद्धत्वाभावादित्यतआह ॥ **एवंचेति** ॥ ॥ २३९ ॥ ननुतर्ह्यसद्वाइत्यादिवाक्योदाहरणंनस्यादित्यतःकिंभाष्येनस्याट्टीकायांवा । नाद्यइत्याह ॥ **भाष्यइति** ॥ द्वितीयेत्वन्यथासिद्धमित्याह ॥ **टीकायामिति** ॥ नन्वे

प्र० धिकरणेषुतादृशानामेवोदाहरणादितिभावः ॥ **अन्यपरत्वरहितस्येति** ॥ तथाचपूर्वपक्षिणंप्रतियुक्तिसूचनार्थंतदित्युक्तंभवति । ननुयुक्ति पादे"असदितिचेन्नप्रतिषेधमात्रत्वा"दित्यत्र"असद्वा"इत्यस्यान्यपरत्वमुपेत्यपूर्वपक्षकरणात्कथमन्यपरत्वरहितस्येत्युक्तिः । वक्ष्यतेचतत्रश्रुत्यु पसर्जनप्रागभावकर्तृकत्वसाधकेत्यादि । नचान्यपरत्वंनामनयत्किंचिदर्थांतरपरत्वं । किंतुपूर्वपक्ष्यभिमतार्थांतरपरत्वं । तथैवप्रक्रमात् । तथाच"असद्वा"इत्यादिवाक्यस्यप्रागभावपरत्वमुपेत्यैवतत्रपूर्वपक्षोनत्वेतेनेत्यत्रपूर्वपक्ष्यभिमततुच्छपरत्वमुपेत्य अतोनदोषइतिवाच्यं । एतेने त्यत्राप्यसच्छब्दस्याभावार्थत्वेनापिपूर्वपक्षसंभवात् । अतएवटीकायां"तेषांनिषेधमुखवेद्यवस्तुवाचित्वा"दितिसाधारणोहेतुरुक्तः । "स्वरू पशून्यस्ये"त्यग्रिमटीकावाक्यंतुतुच्छेविशेषयुक्त्युक्तिपरत्वेनोपपद्यते । अभावोनिर्धर्मइतिपक्षेधर्मशून्यस्येत्यर्थपरत्वेनाप्युपपद्यते । अन्यथात त्रभाष्ये"नैषभावयितुंयोग्य"इत्यादिनाऽभावशब्दनिर्वचनेनतत्रपूर्वपक्षेऽभावशब्दस्यप्रसिद्धाभावार्थत्वमुपेत्यतादृशाभावपदोपेतश्रुतेरुदाहर्तव्य त्वेनतत्साधारण्यंनस्यात् । नचायमस्तिनियमो यत्पूर्वपक्ष्यभिप्रेतार्थांतरपरत्वमेवेति । नियामकाभावात् । किंच"असंभवस्तुसतोनुपपत्ते" रित्यत्रासद्वाइत्यादेरसत्परत्वमुपेत्यैवपूर्वपक्षोभाष्यादौस्पष्टः । तथाचासद्वाइत्यादेरपरममुख्यवृत्त्याप्यन्यपरत्वाभावेतत्रोभयत्रपूर्वपक्षोदयोन स्यात् । वक्ष्यतेचैतद्भाष्यकृतैव"सर्वशब्दानांब्रह्मणिसमन्वयेपितदधीनत्वादर्थवदित्यादिनाऽमुख्यत्वेनान्यस्यापिवाच्यत्वेनांगीकारादसतःप्राप्ति

न्यपरत्वरहितस्योदाहरणंतुक्वचिच्छ्रुतावसच्छब्दस्यशून्येमुख्यत्वेब्रह्मणिचामु ख्यत्वे"असद्वाइदमग्र"इत्यत्रापिमुख्यार्थत्वायशून्यमेवगृह्यतेतिदर्शयितुं ।

गु० तेनसर्वइत्यत्रापरमुख्यवृत्त्यान्यपरासदादिशब्दयुक्तवाक्यमेवोदाहार्यमित्युक्तं । तदयुक्तं । तादृशवाक्यस्यानुपलभ्यमानत्वात् । तथाचैतादृशबलवत्त्वमित्ययुक्त

SGDF
Sri Gurgaonkar Digital Foundation

प्र० रिती"ति। एवंच"सैषाप्रकृति"रित्यादेरिवास्यापिवाक्यस्यान्यत्रपूर्वपक्षेन्यप्रापकत्वेनोदाहरणादन्यपरत्वमभ्युपेयमितिचेन्मैवं। "सैषाप्रकृ ति"रित्यस्यैवासद्वाइत्यादेर्वाक्यस्यसिद्धांतेन्यपरत्वेनक्काप्यनुदाहरणात्। आनुमानिकपादेसुधायां "तथाप्येतद्विरोधेतुतद्वारित्वमपोद्यत"इत्य नुव्याख्यानव्याख्यावसरे"यदिसर्वशब्दानामुभयार्थत्वं तर्हि"विश्वस्मादिंद्रउत्तरः असदेवेदमग्रआसी"दित्यादौकथं । उभयोःसर्वोत्तमत्वा देर्विरुद्धत्वा"दित्यादिनाभगवन्मात्रपरत्वस्यस्पष्टमभिधानाच्च । नचतत्रासदेवेतिसावधारणस्यतथात्वमुक्तं नत्वसद्वाइत्यस्येतिवाच्यं । अस्या पितत्तुल्यार्थत्वात्। असदेवेत्यस्यैवासदितिचेदित्यत्रभाष्याद्युदाहृतत्वेन"एतेने"त्यत्रतस्याप्युदाहरणत्वेनोपलभ्यत्वात् । कथंतर्हिपूर्वपक्षेवाऽ न्यपरत्वेनोदाहरणंभाष्येचान्यवाचित्वोक्तिरितिचेदुच्यते । सर्वशब्दानांचतुर्थपादोक्तन्यायैरुभयार्थत्वमित्येतदुत्सर्गतः । बाधकेसतिक्वचि द्भगवन्मात्रपरत्वमुपेयतेबादरायणीयैरित्येतदजानानोसद्वाइत्यादावन्यार्थत्वंमन्वानःपूर्वपक्षंकरोतीत्येतावतानान्यपरत्वसिद्धिः । भाष्यंचैतद भिप्रायं । नचैवंपूर्वपक्षोभ्रांतिमूलःस्यादितिचेत्सर्वत्रतस्यतथात्वेनेष्टत्वात् । यथा"तद्धैकआहुरसदेवेदमग्रआसी"दितिश्रुतिः"असद्वा"इत्या दिश्रुतितात्पर्यापरिज्ञानप्राप्तमनूद्यनिषेधति तथासूत्रकारोपिस्वोक्तापरिज्ञानप्राप्तंनिषेधतीत्युपपत्तेः । नचैवमपि"असदितिचे"दित्यत्रान्यप रत्वेनिरस्तेपुनस्तद्भ्रांत्या"असंभवस्त्वि"त्यत्रपूर्वपक्षोनयुक्तइतिवाच्यं । अभावपक्षएवबाधकोक्त्याभावपरत्वस्यनिरासेपितदन्यपरत्वभ्रांतेरनि रासात्। नचासद्वाइत्यादेरनुव्याख्यानाद्युक्तदिशान्यपरत्वंनेत्युक्तयैवभ्रांतिनिरासादधिकरणानारंभःस्यादितिवाच्यं । अन्यपरत्वनिरासका धिकरणारंभादेवास्यार्थस्यनिरासादितिटीकास्वारस्यमनुरुध्याह ॥ **अथवेति** ॥ **वक्ष्यतइति** ॥ तारतम्यकर्मक्रमाद्याकाशाद्युत्पत्तिपरिलो

अथवाब्रह्मपरत्वेबहुविप्लवापत्तिरूपतर्कानुगृहीतत्वंबलवत्त्वं। बहुविप्लवापत्तिश्चतुर्थपादीयाधिकरणेषुतत्रतत्रैवटीकायांवक्ष्यते। ॥ २४० ॥

गु० मित्यस्वरसादाह ॥ **अथवेति** ॥ नन्वन्यत्रैवप्रसिद्धानांब्रह्मपरत्वेकथंबहुविप्लवापत्तिरित्यतआह ॥ **बहुविप्लवापत्तिरिति** ॥ ननुबलवच्छ्रुतिलिंगादिभिर

SGDF
Sri Gargeshwari Digital Foundation

प्र० पाद्यापत्तिर्वक्ष्यतइत्यर्थः । तथाचब्रह्मणोनिषेधमुखवेद्यासत्पदवाच्यत्वेभावत्वभंगइत्यादितर्कानुगृहीतत्वाद्युक्तं टीकोक्तमुदाहरणमंत्याधिकरणइतिभावः ॥ **श्रुत्यादिभिरिति** ॥ श्रुतिलिंगादिभिरितिभाष्यस्यार्थतोनुवादः ॥ **उक्तेति** ॥ अपरममुख्यवृत्त्यान्यपरत्वंविनानुपपद्यमानत्वंबहुविप्लवापत्तिरूपतर्कानुगृहीतत्वंचेत्युक्तद्विविधेत्यर्थः । अवधारणेन अन्यत्रैवेत्येवकारेण ॥ **अतिव्याप्तेरिति** ॥ उभयत्रप्रसिद्ध्यादावितिभावः ॥ **चतुर्थेति** ॥ तथाचटीकोक्तंबलवत्त्वंभाष्यमूलकमेवेतिभावः । ननुयद्यन्यत्रप्रसिद्धश्रुतिलिंगादिसाहचर्येणान्यत्रप्रसिद्धतातर्हिद्युभ्वाद्यायतनत्वमप्यत्रप्रसिद्धजायमानत्वसाहचर्यादन्यत्रप्रसिद्धंस्यात् । नचलिंगपादन्यायेनजायमानत्वंविष्णौप्रसिद्धं नान्यत्रेतिवाच्यं । तथात्वआदित्यश्रुतेर्नामपादन्यायैर्विष्णौप्रसिद्धत्वेनान्यत्रप्रसिद्ध्यभावात्तत्साहचर्येणसर्वगतत्वस्यान्यत्रप्रसिद्ध्युक्तिर्नस्यात् । किंचैवमादित्यश्रुतेर्लोकतोन्यत्रपूर्वन्यायेनविष्णौचप्रसिद्ध्यातार्तीयाकाशशब्दस्येवोभयत्रप्रसिद्ध्यापत्त्यातत्साहचर्येणसर्वगतत्वमुभयत्रप्रसिद्धंस्यात् । अपिच

श्रुत्यादिभिरन्यत्रैवप्रसिद्धानामितिचतुर्थपादीयभाष्येतु ब्रह्मणिवृत्तेरत्यंतासंभावितत्वरूपस्योक्तद्विविधबलवत्त्वकार्यस्यावधारणेनविवक्षिततयातिव्याप्तेरभावेनतत्परिहारार्थंबलवत्पदंनप्रयुक्तं । चतुर्थपादीयटीकायांतुभाष्योक्तावधारणनिर्वाहकेनबलवत्त्वेनैवातिव्याप्तिःपरिहृतेति

गु० न्यत्रप्रसिद्धाअन्यत्रैवप्रसिद्धाश्चेच्छ्रुतिलिंगादिभिरितिभाष्येपितर्हिबलवत्पदंप्रयोक्तव्यं । अवधारणेनलब्धत्वात्तत्रानुक्तिश्चेत्तर्हिटीकायामपिपृथङ्नवाच्यमित्यतआह ॥ **श्रुत्यादिभिरिति** ॥ तथाचातिव्याप्तिपरिहारार्थंवक्तव्यस्यतस्यावधारणेनैवकृतकार्यत्वान्नप्रयोगइतिभावः । ननुतर्हिटीकायामवधारणपदाप्रयोगादतिव्याप्तिपरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वज्रशब्दस्यलोकतोन्यत्रप्रसिद्धत्वेनेंद्रादिनाम्नइवान्यत्रप्रसिद्धत्वापत्त्योभयत्रप्रसिद्धशब्दसमन्वयपर“कंपना”दित्यधिकरणोदाहरणेवज्रश ब्दे ऽन्यत्रप्रसिद्धलक्षणस्यातिव्याप्तिश्चेत्यादिहृदिनिधायाह ॥ **दिगिति** ॥ अयंभावः । समाख्याश्रुत्यादितौल्याभावोप्यन्यत्रप्रसिद्धलक्षणेविशे षणं । अतोद्युभ्वाद्यायतनत्वेतत्तौल्योपेतेनातिव्याप्तिः । उभयत्रप्रसिद्धसाहचर्यस्योभयत्रप्रसिद्धलक्षणांतर्भावेणसर्वगतत्वस्योभयत्रप्रसिद्धत्व प्रसक्त्यभावात् । संवत्सरसारत्वादिलिंगेनादित्यश्रुतेरन्यत्रप्रसिद्धेर्वक्ष्यमाणत्वाच्च । वज्रशब्दस्यप्राणशब्दसाहित्येनोभयत्रप्रसिद्धिरित्यादिप रिहारस्यवक्ष्यमाणत्वाच्चेति । “तथाप्यन्यत्रप्रसिद्धत्वादिवदापातप्रतीत्यनुरोधेनेयमुक्तिरित्यदोष”इतिनामलिंगभेदोक्तिपरलिंगपादीयसुधावा क्यंविवृण्वानःप्रागाक्षिप्तनामलिंगभेदंसाधयति ॥ **नामलिंगेति** ॥ यानि पदानीतिशेषः ॥ **आपाततइति** ॥ अन्यथासंभवःस्यात् । सर्वशब्दानांब्रह्मणि“यच्छब्दायोगवृत्तय”इत्युक्त्यायौगिकत्वादितिभावः । रूढान्येव नतुयौगिकानियोगरूढानिवेत्यर्थः । तद्विपरीतानि दिक् ॥

॥ नामलिंगभेदस्तु यान्यापाततोरूढान्येवतानिनामानि । तद्विपरीतानितुलिंगानि ।

गु० हारोनस्यादित्यतआह ॥ **चतुर्थपादीयेति** ॥ नन्वस्त्वेवंशब्दानामसांकर्यं तथापिनामलिंगभेदोनयुक्तइत्यतआह ॥ **नामलिंगभेदस्त्विति** ॥ एवकारेणापा ततोयौगिकत्वव्यावृत्तिः । तथाचापाततोयौगिकत्वरहितत्वेसत्यापाततोरूढत्वंनामत्वमित्यर्थः । एवंचपंकजादीनांलिंगत्वमेवेतिभावः ॥ **तद्विपरीतानीति** ॥ आपाततोरूढानिनभवंतियानितानीत्यर्थः । ननुतर्हियोगरूढानामिंद्रादिशब्दानांनामत्वंनस्यात् । यौगिकत्वराहित्याभावात् । अन्यथाऽभियुक्तानांपूर्वपक्षिणश्चयोग ॥ २४१ ॥

प्र० यौगिकानियोगरूढानिवेत्यर्थः । नन्वेवंतर्ह्यक्षरशब्दस्यानंदमयादेश्चाक्षरादिनयेटीकोक्तंनामत्वंनस्यादित्यतआह ॥ **अथवेति** ॥ सर्वशब्दा नांब्रह्मणियोगरूढिभ्यांप्रवृत्तेःसांकर्यवारणायापाततइत्युक्तं ॥ **अत्राद्येति** ॥ तथाचानंदमयपदस्यतत्वप्रदीपे वैश्वानरपदस्यच“विश्वजीवांत रत्वाद्यैर्लिंगै”रित्यणुभाष्येलिंगत्वोक्तिर्युक्तेतिभावः ॥ **द्वितीयइति** ॥ तथाचवैश्वानरपदस्यटीकोक्तंनामत्वमणुभाष्योक्तंलिंगत्वंचनविरुद्धं । आनंदमयस्यलिंगत्वंटीकोक्तंनामत्वंचयुक्तमितिभावः । ननुयथारूढानांनामता यौगिकानांलिंगता तथायोगरूढानांतृतीयप्रकारतास्यात् । किंचेंद्रादिशब्दानांयोगरूढानामक्षरादिशब्दस्यचकेवलनामतानस्यात् । अपिचतद्विपरीतानीत्यत्रापाततोयौगिकानियोगरूढानिवायानिपदा नितानिलिंगानीतिविवक्ष्यतेनवा । नेतिपक्षेवाक्यप्रकरणादेरपिलिंगतापत्तिः । आद्येतल्लिंगादित्युक्तानंतोद्रीथादिपदानांलिंगत्वेपि “अत एवप्राण”इत्यादावुक्तस्य“श्रीश्चतेलक्ष्मीश्चपत्न्या”वित्यादेर्वाक्योपात्तस्यलिंगतानापत्तिः । अतएवाथवेत्युक्तपक्षोपिनसाधीयानित्यतआह ॥

अथवायान्यापाततोरूढानितानिनामानि । यान्यापाततोयौगिकानितानिलिं गानि । अत्राद्यपक्षेयोगरूढानिलिंगानि । द्वितीयेतुनामलिंगोभयात्मकानि ।

गु० रूढियुक्तानामपिनामत्वस्वीकारोनस्यादित्यरुचेराह ॥ **अथवेति** ॥ प्रथमद्वितीयलक्षणयोर्विरोधंपरिहरति ॥ **अत्रेति** ॥ नन्वेवंयोगरूढानामापाततोरूढत्व स्यविद्यमानत्वेनाऽपाततोयौगिकत्वस्यापिविद्यमानत्वेननामलिंगात्मकत्वेननामात्मकत्वंनस्यात् । तथाचेंद्रादिनाम्नइतिविशेषतोनामत्वोक्तिरयुक्तेत्यपरितोषादाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० वस्तुतस्त्विति ॥ वाक्यप्रकरणादावतिव्याप्तिवारणायधर्मद्वारेति । व्याप्यरूपसखंडधर्मद्वारेत्यर्थः । तेनपङ्कजत्वादिजातिनिमित्तकेरूढेनातिव्याप्तिः । एतेन"आपातप्रतीत्यनुरोधेने"तिसुधात्रेधायोज्येत्युक्तंभवति । एतेन"सर्वेपिनामलिंगात्मतयाप्रत्येकंद्विविधा"इतिटीकाविवृता । प्रागाक्षिप्तंपादभेदंचसाधयति ॥ **नाम्नामिति** ॥ एवंतर्हितृतीयादिपादभेदोपिस्यादित्याक्षेपंसमाधत्ते ॥ **अध्यायइति** ॥ समन्वीयमाना

वस्तुतस्तुयान्यापाततोरूढिरहितान्यंतर्यामीत्यादीन्येकप्रातिपदिकमात्ररूपाणिवा"सर्वेषुभूतेष्वेतं यस्मिन्द्यौ"रित्याद्यनेकपदसमभिव्याहाररूपाणिवा सर्वेषुयस्मिन्नितिसप्तमीविभक्तिसहितप्रातिपदिकरूपाणिवा धर्मद्वारा धर्म्युपस्थापकानितानिलिंगानि । यानितुतद्विपरीतान्यापाततोरूढानियोगरूढियुक्तानिवातानिनामानि । अतएवपूर्वपक्षदशायामपिदेवतासुयोगरूढियुक्तानामिंद्रादिशब्दानांनामता । अतएवचरूढानांनामत्वेयौगिकानांचलिंगत्वेयोगरूढानांतृतीयप्रकारतापत्तिरितिशंकानवकाशः । नाम्नांलिंगानांचान्यत्रप्रसिद्धत्वाविशेषेप्यवांतरभेदात्पादभेदः । अध्यायेपादचतुष्टयादिनियमादवांतरभेदविवक्षयातृतीयादौनपादभेदआश्रितः ।

गु० वस्तुतस्त्विति ॥ आनंदमयेंद्रादिशब्दानांनामत्वस्यैवसिध्यर्थंचाह ॥ **वस्तुतइति** ॥ **अतएवेति** ॥ आपाततोरूढानांयोगरूढियुक्तानांचनामत्वादेवेत्यर्थः । एवंनामलिंगभेदमुपपाद्यतर्ह्यन्यत्रप्रसिद्धानांलिंगानांनाम्नांचान्यत्रप्रसिद्धत्वाविशेषात्पादभेदोनस्यादित्याशंकांपरिहरति ॥ **नाम्नामिति** ॥ नन्वेवंतृतीयउभयत्रप्रसिद्धानांचतुर्थेचान्यत्रैवप्रसिद्धानांनाम्नांलिंगानांचसमन्वयोक्तिर्नस्यात् । तत्रापिपादभेदएवस्यादित्यतआह ॥ **अध्यायइति** ॥ आदिपदेनपादाष्टत्वसंग्रहः । अध्यायेपादचतुष्टयनियमेप्यन्यत्रप्रसिद्धानामलिंगात्मकेष्वेवभेदःकिमर्थंकल्पनीयः । उभयत्रप्रसिद्धेष्वन्यत्रैवप्रसिद्धेषुनामलिंगात्मकेषुशब्देषुद्वैविध्यकल्पनेप्यध्यायपादचतुष्टयादिनियमसंभवा

SGDF Sri Gargeshwari Digital Foundation

प्र० नांत्रित्वनियमआदिपदार्थः । अविवक्षाचेदादावेवास्त्वित्यतआह ॥ यद्वेति ॥ प्राधान्यबुद्धिस्थत्वोभयेत्यर्थः । निमित्तांतरमाह ॥ अथ वेति ॥ यथाग्रंथमिति ॥ सूत्रकृदादिभिर्यथापादभेदःकृतस्तथैवयुक्तइत्यर्थः । एतेन "अवांतरभेदेनपादभेद" इतिटीकाविवृता । प्रागा क्षिप्तंपादक्रमंचसाधयति ॥ पादक्रमस्त्विति ॥ असर्वेति ॥ "महासमन्वयेतस्मिन्नाधिकारोखिलस्यही" त्युक्तेरितिभावः । हेत्वंतरमाह

यद्वानाम्नांप्राधान्याल्लिंगानांचद्वितीयेसमन्वयोक्त्याबुद्धिस्थत्वादुभयानुसरणायनतत्रभेदआश्रितः । अथवापातसिद्धंनामलिंगयोर्भेदमाश्रित्याद्यद्वितीयपादयोर्भेदःकृतः । इदानीमापातप्रसिद्धितिरस्का रेणतत्रोक्तमहायोगविद्वद्रूढिभ्यामेकीकृतत्वान्नभिन्नपादनिवेशार्हतेतिदर्शयितुंनतत्रभेदआश्रितः । तस्माद्यथाग्रंथंपादभेदोयुक्तः । पादक्रमस्तु । चतुर्थपादीयसमन्वयस्यासर्वाधिकारिकत्वात्

गु० दित्यस्वरसादाह ॥ यद्वेति ॥ नन्वध्यायपादनियमएवाक्षिप्यतइत्यतोवाह ॥ यद्वेति ॥ नन्वस्तुप्राधान्यंनाम्नां लिंगानांचद्वितीयेसमन्वयोक्त्याबुद्धिस्थत्वं । तथा पितृतीय उभयत्रप्रसिद्धनामलिंगात्मकशब्दसमन्वयोपपादनंकुतः । तृतीयउभयत्रप्रसिद्धनामात्मकशब्दसमन्वयस्य चतुर्थेचोभयत्रप्रसिद्धलिंगात्मकशब्दसमन्वयस्य चोपपादनेप्युभयानुसरणसंभवादित्यतआह ॥ अथवेति ॥ यद्वालिंगात्मकानामन्यत्रप्रसिद्धेरन्यत्रप्रसिद्धनामसाहित्येनोक्तत्वान्नाम्नामपिबुद्धिस्थत्वात् वैश्वानराधि करणेचानेकलिंगसमन्वयार्थमेकनामसमन्वयस्योक्तत्वेनबुद्धिस्थत्वप्राधान्ययोर्द्वयोरपिसत्त्वेननामान्वयएववक्तव्यइत्यरुचेराह ॥ अथवेति ॥ तथाचसर्वेषामपि नामलिंगात्मकत्वान्नपादभेदाश्रयणमितिभावः । ननुतथाप्यादावन्यत्रप्रसिद्धनामात्मकानां तदनंतरमन्यत्रप्रसिद्धलिंगात्मकशब्दानां ततउभयत्रप्रसिद्धनामलिंगात्म कानां ततोन्यत्रैवप्रसिद्धानामितिक्रमःकुतइत्यतः "तत्रप्रथमतोन्यत्रे" त्याद्यनुव्याख्यानानुसारेणपादक्रममाह ॥ पादक्रमस्त्विति ॥ ननुचतुर्थपादीयसमन्वयस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **तथेति** ॥ निमित्तांतरंचाह ॥ **तत्तदिति** ॥ एतच्चनिमित्तद्वयं"इंद्रादिशब्दानांश्रुतिलिंगादिबलाद्विष्णौसमन्वयःप्राक्प्रतिपादितः । इदानींश्रुतिलिंगादिभिरेवान्यत्रप्रसिद्धाना"मित्यादिकया"पूर्वस्रष्टृत्वादिगुणाभिधायकानामित्यादिकयाचचतुर्थपादीयटीकयालब्धमितिबोध्यं ॥ **इतरयोरिति** ॥ अन्यत्रोभयत्रप्रसिद्धशब्दसमन्वययोरित्यर्थः । तदुक्तं उपासनापादइत्यर्थः । तत्र प्रथमेध्याये । प्रथमतः उभयत्रप्रसिद्धशब्दसमन्वयात्पूर्वं । शब्दानां नामलिंगात्मकानां । अत्र विष्णौ ॥ **महामल्लेति** ॥ यथानेकेषुमल्लेषुप्रत्यर्थितयावस्थितेष्वपिकृष्णेन प्रधानत्वाच्चाणूरादिमल्लानामेवादौभंगोविहितस्तथेत्यर्थः । उभयत्रप्रसिद्धानांहिसमन्वयेन्यत्रप्रसिद्धिनिरासमात्रेयत्नः अन्यत्रप्रसिद्धानांतुवि

तथापादत्रयेणश्रुतिलिंगादिभिर्ब्रह्मणिसमन्वयउक्तेतर्हितैरेवश्रुतिलिंगादिभिरन्यपरताऽस्त्विवतिशंका याश्रितयानंतरमेवोदयात् तत्तच्छब्दप्रवृत्तिनिमित्तगुणमात्रसिद्धिफलकत्वेनकारणत्वादिसिद्धिफलकत्वाभावाच्चांत्यता । इतरयोरपि महामल्लभंगन्यायेनान्यत्रप्रसिद्धसमन्वयस्यप्राथम्यं । तदुक्तमनुव्याख्याने"तत्रप्रथमतोन्यत्रप्रसिद्धानांसमन्वयः । शब्दानांवाच्यएवात्रमहामल्लेशभंगव"दित्यादि ।

गु० कारणत्वादिसिद्धिफलकत्वाभावआनर्थक्यंस्यादित्यतउक्तं **तत्तच्छब्देति** ॥ ब्रह्मशब्दोक्तगुणपूर्तिसंभावककारणत्वाप्रतिपादनेऽसंभावनाग्रस्तत्वात्स्वरवर्णपदात्मकाशेषशब्दसमन्वयेनगुणपूर्णत्वरूपफलासिद्धेःकारणत्वोक्त्याकतिपयगुणसिद्धावपेक्षितगुणपूर्त्यसिद्धेरित्यर्थः । तर्ह्यन्यत्रोभयत्रप्रसिद्धयोरुभयत्रप्रसिद्धानामेवसोपानारोहणन्यायेनप्राथम्यमस्त्वित्यतआह ॥ **इतरयोरपीति** ॥ ननु"कारणत्वेनचाकाशादिष्वि"त्यादेःकारणत्वादिसिद्धिफलकत्वेनतत्रप्रवृत्तिनिमित्तगुणमात्रसिद्धि

प्र० ष्णौप्रसिद्धिरप्युपपादनीयेतितत एषांप्राथम्यमित्यर्थः । आदिपदेन "इतोप्यभ्यधिकत्वेनतुर्यपादोदितस्यतु । महासमन्वयेतस्मिन्नाधिकारोखिलस्यही"तिगृह्यते । एतेन"तेष्वन्यत्रैवप्रसिद्धसमन्वये"त्यादिटीकाऽनुव्याख्यानमूलेतिव्याख्याता । एवमनुव्याख्यानोक्तंक्रममुक्त्वाधुनैकरूप्यायसमन्वयत्रयस्यापिसोपानारोहणन्यायेनभाष्यसूचितंक्रममाह ॥ **यद्वेति** ॥ **स्थूलत्वादिति** ॥ प्रसिद्धेर्भ्रमत्वेप्युपपत्त्यादुर्बलत्वादितिभावः ॥ **सूक्ष्मत्वादिति** ॥ श्रुतेःप्राबल्येनतन्निरासस्यक्लेशसाध्यत्वेनोभयत्रप्रसिद्धेःप्राबल्यादित्यर्थः ॥ **उभयेति** ॥ प्रसिद्धिमूलत्वाच्छ्रुतिलिंगादिमूलत्वाच्चेत्यर्थः । ऋजूनांमतमनूद्यनिराह ॥ **केचित्त्विति** ॥ **उक्तरीत्येति** ॥ श्रुत्यंतरादिभिरित्यादिनेतिभावः । पूर्वं

यद्वा अन्यत्रप्रसिद्धेष्वन्यपरत्वस्यप्रसिद्धिमात्रमूलत्वेनस्थूलत्वात् उभयत्रप्रसिद्धेषु"रुद्रोवावलोकाधार"इत्यादिश्रुत्यादिमूलत्वेनसूक्ष्मत्वात् अन्यत्रैवप्रसिद्धेषुपुनःप्रसिद्धिःश्रुतिलिंगादिकंचेत्युभयमूलत्वात्तन्निरासकपादक्रमः । अयंचपक्षोभाष्येन्यत्रप्रसिद्धादिशब्दप्रयोगादेवसूचितः । केचित्तु उभयत्रप्रसिद्धेरन्यत्रप्रसिद्धनिरूप्यत्वादन्यत्रैवप्रसिद्धेश्चैवकारव्यावर्त्यतयातदुभयनिरूप्यत्वात्पादक्रमइत्याहुः । तन्न । उभयत्रप्रसिद्ध्यादेरुक्तरीत्यान्यत्रप्रसिद्धिनिरूप्यत्वाद्यभावात् ।

गु० फलकत्वाभावात्कथंचतुर्थपादीसमन्वयःस्यादित्यस्वरसादाह ॥ **यद्वेति** ॥ यद्वापूर्वमनुव्याख्यानानुसारेणपादक्रममुपपाद्यभाष्यानुसारेणपादक्रममाह ॥ **यद्वेति** ॥ तथाचस्थूलत्वसूक्ष्मत्वातिसूक्ष्मत्वैःपादक्रमइतिभावः ॥ **केचित्त्विति** ॥ स्वयूथ्याइत्यर्थः । विशिष्टप्रतीतौविशेषणज्ञानस्यकारणत्वादित्यर्थः । तदुभयनिरूप्यत्वात् अन्यत्रोभयत्रप्रसिद्धिनिरूप्यत्वादित्यर्थः । किमुभयत्रप्रसिद्ध्यादेरन्यत्रप्रसिद्ध्यादिनिरूप्यत्वंनियतमनियतंवा । नाद्यः । अन्यत्रप्रसिद्धत्वेसतितत्रप्रसिद्धत्वमुभयत्रप्रसिद्धत्वमित्येवंरूपेणतन्निरूप्यत्वेपिविष्णुतदितरयोःप्रसिद्धत्वमुभयत्रप्रसिद्धत्वमित्यादिरूपेणतन्निरूप्यत्वाभावादित्याह ॥ **तन्नेति** ॥ **उक्तरीत्येति** ॥ उभयोपस्था

SGDF Sri Gargeshwari Digital Foundation

प्र० "तत्रे"त्यनुव्याख्यानं"ग्रंथोयमपिबह्वर्थ"इत्युक्त्यास्वयमर्थांतरमभिप्रेत्यान्यत्रोभयत्रप्रसिद्धसमन्वययोःक्रमेसंमतित्वेनोदाहृतं । इदानीं तस्यैव"तत्र प्रथमेध्याये प्रथमतः प्रथमेपादे शब्दानां नामात्मकाना"मितिसुधोक्तमेवार्थमभिप्रेत्य"अन्यपराणांमध्येलिंगात्मकाना"मित्यादिटी कांविवृण्वानआद्यद्वयस्यापिमहामल्लभंगन्यायेनक्रममाह ॥ **अन्यत्रप्रसिद्धेष्वपीति** ॥ यौगिकस्य लिंगस्य । तथाचसुधोक्तदिशानाम्नाम न्यबुद्धिजनकत्वंसाक्षादेव । लिंगानांतुव्यवधानेतिनामसमन्वयेयत्नगौरवमितिमहामल्लभंगन्यायेननाम्नांप्राथम्यमित्यर्थः । "तेषामन्यग तत्वेतुनस्यात्सम्यक्समन्वयः । इत्येवाशेषलिंगानांब्रह्मण्येचसमन्वयं । आहे"त्यनुव्याख्यानंहृदिकृत्वासंगत्यंतरमाह ॥ **यद्वेति** ॥ **संदिग्धेति**॥ बहुव्रीहिः । ज्योतिश्चरणेत्यादौहेतूकृतानामदृश्यत्वादीनांचद्वितीयेसमन्वयोक्तेरितिभावः । ननु प्राग्घेतूकृतलिंगानामेवलिंगपादेसमन्वया

अन्यत्रप्रसिद्धेष्वपिनाम्नांप्रधानभूतधर्मिणिसाक्षाद्बीजनकत्वात् यौगिकस्यावयवार्थैरूढ्यपेक्षावद्रूढस्य योगापेक्षायाअभावाच्चप्राथम्यं । यद्वा लिंगैर्नामसमन्वयउक्तेसंदिग्धब्रह्मपरत्वेषुहेतूकृतलिंगेष्वेववा

गु० पकत्वमुभयत्रप्रसिद्धत्वमित्याद्युक्तरीत्येत्यर्थः । नेतरः । अनियतनिमित्तेननियतपादभेदेविनिगमकाभावेनवैपरीत्यस्यापिसुवचत्वादितिभावः । नन्वन्यत्रप्रसिद्धाना मुभयात्मकानामविशेषान्नामात्मकानांप्राथम्यंकिंनिमित्तमित्यतआह ॥ **अन्यत्रप्रसिद्धेष्विति** ॥ ननुनाम्नांधर्मिणिसाक्षाद्बीजनकत्ववल्लिंगानामपिधर्मेसाक्षाद्बीज नकत्वात्कथंतेषांविशेषइत्यतउक्तं **प्रधानेति** ॥ प्रायेणधर्मिद्वारेणैवधर्मस्यक्रियान्वयित्वेनसाक्षाद्धर्मिणएवतदन्वयित्वेनतस्यैवप्राधान्यं लिंगस्यतुतदभावेनाप्राधा न्यमितिभावः । निरपेक्षत्वमुपपादयति ॥ **यौगिकस्येति** ॥ नन्वेवंधर्मिवाचकानामंतर्याम्यादिशब्दानांनामतास्यात् । धर्मिवाचिनांचानंदमयादिशब्दानांलिंगता चस्यादित्यस्वरसादाह ॥ **यद्वेति** ॥ स्वरूपप्राधान्यादिकथंपादक्रमेनिमित्तमित्यतोवाह ॥ **यद्वेति** ॥ संदिग्धंब्रह्मपरत्वंयेषामितिबहुव्रीहिः । ननुनामसमन्वयस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० नुक्तेः कथमेवमित्यतआह ॥ **तज्जातीयत्वेनेति** ॥ तल्लिंगोपेतवाक्यगततयैकवाक्यस्थत्वादिनातज्जातीयत्वंध्येयं । नामपादेहिसर्वश्रुतिगतान्यन्यत्रप्रसिद्धनामानिसर्वाण्यपितत्रतत्रस्थितैःसर्वैर्लिंगैर्ब्रह्मनिष्ठानीतिप्राक्साधितेसतितत्रासंदिग्धलिंगग्रहणेनेतरेषांलोकतोन्यत्रप्रसिद्धश्रुत्यादिसाहित्येनसंदिग्धब्रह्मपरत्वेष्वब्रह्मपरत्वशंकानिरासादानंतर्यमित्यर्थः । ननुलिंगसमन्वयस्यनामाधीनत्वेलिंगानामेवप्राथम्यंस्यादित्यतआह ॥ **लिंगसमन्वयस्त्विति** ॥ क्वचिद्ब्रह्मादिनामाधीनोप्यस्तीतिप्रायेणेत्युक्तं । एतेनानवस्थाचप्रत्युक्ता ॥ **नचैवमिति** ॥ उभयत्रान्यत्रान्यत्रैवप्रसिद्धानामुत्तरोत्तरप्राबल्येसतीत्यर्थः । अन्यत्रैवप्रसिद्धानांतत्रोक्तप्रबलहेतुभिःसमन्वयेततोपिदुर्बलानामन्यत्रप्रसिद्धानांचब्रह्मणिसमन्वयसिद्धेराद्यपादद्वयेतेषांतदुक्तिवैयर्थ्यं । तथान्यत्रप्रसिद्धानांपादद्वयोक्तहेतुभिर्ब्रह्मणिसमन्वयेसतितैरेवततोपिदुर्बलोभयत्रप्रसिद्धानांसमन्वय

तज्जातीयत्वेनबुद्धिस्थेषुलिंगांतरेषुवा कथंब्रह्मपरत्वमितिशंकायांतन्निरासाल्लिंगानामानंतर्यं । लिंगसमन्वयस्तुप्रायेणनिर्णीतलिंगांतराधीनोनतुनामाधीनइतिवैषम्यं । तस्माद्युक्तःपादक्रमः । नचैवमन्यत्रैवप्रसिद्धादीनांसमन्वयेनैवकैमुत्यन्यायेनान्यत्रप्रसिद्धादिसमन्वयसिद्धेस्तदुक्तिवैयर्थ्यं ।

गु० लिंगाधीनत्वाल्लिंगसमन्वयस्यापिनामसमन्वयाधीनत्वान्नामसमन्वयसिद्धौलिंगसमन्वयसिद्धिस्तत्सिद्धौतत्सिद्धिरित्यन्योन्याश्रयःस्यादित्यतआह ॥ **लिंगसमन्वयस्त्विति** ॥ सर्वगतत्वाधिकरणेब्रह्मश्रुत्यासर्वगतत्वलिंगसमन्वयस्यप्रतिपादितत्वात्कथंलिंगसमन्वयोलिंगैनैवेत्युच्यतइत्यतउक्तं **प्रायेणेति** ॥ नचैवंतदंशएवपौनरुक्त्यंस्यादित्याशंक्यं । येनैवलिंगेनयस्यनाम्नःसमन्वयो नतेनैवाम्नातस्यैवलिंगस्यसमन्वयः । किंतुलिंगांतरेणनामांतरेणेतिनदोषइतिभावः । ननु तत्रप्रसिद्धानामिवान्यत्रप्रसिद्धानांसमन्वयोनवक्तव्यः । नचतर्हिकथंतत्सिद्धिरितिवाच्यं । अन्यत्रैवप्रसिद्धसमन्वयेनैवकैमुत्यन्यायेनान्यत्रप्रसिद्धसमन्वयसिद्धौपुनस्तत्समन्वयकथ

SGDF
Sri Gargeshwari Digital Foundation

प्र० सिद्धेस्तृतीयेतेषांतदुक्तिवैयर्थ्यमित्यर्थः ॥ **आत्मनइति** ॥ चतुर्थपादीयन्यायानुसरणेहि "कल्पनोपदेशा" दितिसूत्रोक्तन्यायेनान्यपरत्वमुपेत्यतदधीनत्वादिन्यायैःशब्दानांतत्रब्रह्मपरत्वोक्तेराद्यादिपादोदाहरणेष्वपितथात्वापत्त्याभूताकाशेंद्रादेरपितत्तद्वाक्यबोध्यत्वंस्यात् । तच्चानिष्टं । ब्रह्मलक्षणस्यातिव्याप्त्यापत्तेः । अतस्तन्निरासेनब्रह्मैकपरत्वंव्युत्पादयितुंत्रिपादीसार्थिकेतिभावः । तर्ह्याद्यपादद्वयेनैवसिद्धत्वात्तृतीयवैयर्थ्यमितिचेन्न । पादद्वयापादितोभयत्रप्रसिद्धानांशब्दानामन्यनिष्ठत्वनिरासेनतस्यसार्थक्यात् । उक्तंच "आहोभयगतत्वंचस्यादतोलिंगशब्दयोः । इतिसंशयनुत्त्यर्थमुभयत्रप्रतीतितः । शब्दानांवर्तमानानांसलिंगानांविशेषतः । समन्वयोहरावेवे" त्याचार्यैः ॥ **पादत्रयेति** ॥ त्रिपाद्यां

"आत्मनआकाशस्संभूत" इत्यादौभूताकाशस्यसंभूतत्ववदस्यलोकस्येत्यादावाकाशस्यलोकगतित्वादिप्रसंगात् पादत्रयसिद्धांतमुपेत्यचतुर्थपादेविशेषहेतुभिःपूर्वपक्षोदयेनपादत्रयपूर्वपक्षदशायांचतुर्थपादीयसिद्धांतानुन्मेषाच्च ।

गु० नेवैयर्थ्यापत्तेरित्याशंक्यनिषेधति ॥ **नचैवमिति** ॥ किंतन्न्यायविषयविषयत्वेनत्रिपाद्यावैयर्थ्यंकैमुत्यमात्रेणवा । नाद्यइत्याह ॥ **आत्मनइति** ॥ तत्करणानंतरमन्यत्रैवप्रसिद्धशब्दसमन्वयन्यायेनान्यत्रप्रसिद्धशब्दसमन्वयश्चेदितिशेषः । तथाचान्यत्रप्रसिद्धानांपृथगवचनेबाधकसद्भावात्तत्समन्वयप्रतिपादनमितिभावः । नेतरः । योदुष्करमेकंकरोतिसोन्यत्सुकरमपीतिव्याप्तेरभावात् । अथतदविशिष्टमितिविशेषणमुपादीयतेतत्राह ॥ **आत्मनइति** ॥ ननुनवियदश्रुतेरित्यत्रसूत्रकृतैवाकाशस्योत्पत्तेःसमर्थितत्वात्संभूतत्वस्यतत्रसंभवात् प्रकृतेतुलोकगतित्वादेराकाशादेराकाशेप्रमाणबाधितत्वेनासंभवात् तथाचबाधकसद्भावात्तन्न्यायेनसमन्वयकथनमयुक्तमित्याह ॥ **पादत्रयेति** ॥ यद्वा अंगीकृत्यचतुर्थीयसमन्वयस्यप्राचीनत्वमेतदुक्तमित्याशयेनाह ॥ **पादेति** ॥ एवंचचतुर्थपादसमन्वेतव्यस्यशब्दप्रवृत्त्यर्थमुपोद्घातत्वेनपादत्रयमावश्यकमेव । अन्यथाचतुर्थपादीयसिद्धांतारंभएवनस्यात् । तथाचयत्सिद्धांतमुपजीव्ययस्यप्रवृत्तिस्तत्सिद्धांतेनतस्यनान्यथासिद्धिरितिभावः

प्र० जन्मादिसूत्रेकंठोक्तकारणत्वतत्संगतानंदमयत्वादिगुणांतरप्रतिपादकवाक्यस्थशब्दानांश्रुतिलिंगादिभिरुक्तंब्रह्मपरत्वंस्वीकृत्य तर्हितैरेवतारतम्यकर्मक्रमादिपरिलोपापत्तिरूपतत्वत्तर्कानुगृहीतैर्बलवद्भिरन्यपरत्वंस्यात् । एवंचसमन्वयसूत्रोक्तसर्वशब्दसमन्वयोनयुक्तइतिशंकायांकृतायांततोपिप्रबलहेतुभिस्तन्निरासायचतुर्थपादप्रवृत्तेः ततःपूर्वंतत्सिद्धांतन्यायानुपस्थितेर्नतेनवैयर्थ्यमित्यर्थः ॥ **अन्यथेति** ॥ स्वर्गकामाधिकरणमुक्तमाद्यसूत्रे । भावार्थस्य धात्वर्थस्य । नामार्थस्य उपपाद्यार्थस्य । द्रव्यादेरित्यर्थः । द्वितीयाध्यायाद्यपादेभावार्थाःकर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैषह्यर्थोविधीयत" इतिद्वितीयेधिकरणे "उद्भिदायजेत सोमेनयजेते" त्यादौकिंसोमादिरूपद्रव्यादेःफलसाधनत्वंयजिरूपधार्थस्यवेतिसंशये साध्यमानस्यफलस्यसिद्धरूपसाधनापेक्षत्वाद्द्रव्यादेश्चताद्दृशत्वेनापेक्षापूरणशक्तत्वाद्धात्वर्थस्यतुस्वयंसाध्यत्वेनाताद्दृशत्वाद्द्रव्यादिरेवफलसाधनमितिप्राप्ते द्रव्यादेःफलहेतुत्वेतत्रैकमपूर्वकल्प्यं । धात्वर्थस्यद्रव्यादिशेषत्वावश्यंभावात्तत्रदृष्टासंभवेनापूर्वांतरंकल्प्यमितिगौरवात् । फलसाधनस्यभावनाकरणत्वात्तस्यांचप्रत्ययोपात्तायांपदांतरोपात्तद्रव्यापेक्षयाप्रकृत्युक्तधात्वर्थस्यसन्निहितत्वेनकरणत्वात्साध्यमानस्यापिस्वसा

अन्यथास्वर्गकामाधिकरणसिद्धफलान्वयमुपेत्यकिंभावार्थस्यफलकरणताकिंवानामार्थस्येतिविचारात्मकभावार्थाधिकरणसिद्धांतेनफलाभावशंकारूपस्वर्गकामाधिकरणपूर्वपक्षानुदयःस्यात् ।

गु० ॥ **अन्यथेति** ॥ यदधिकरणसिद्धांतसिद्धार्थमभ्युपगम्यप्रवृत्तंयदधिकरणंतदधिकरणसिद्धांतस्यतदधिकरणपूर्वपक्षविरोधित्वे । नचदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । चतुर्थपादीयसिद्धांतेपादत्रयसिद्धांतस्योपजीव्यत्ववद्दृष्टांतेभावार्थाधिकरणसिद्धांतस्यस्वर्गकामाधिकरणसिद्धांतउपजीव्यभावादितिवाच्यं । उक्तसामान्यन्यायस्यतत्रापिसत्त्वेनवैषम्याभावात् । तथाहि । सफलत्वरूपस्वर्गकामाधिकरणसिद्धांतमुपजीव्यभावार्थाधिकरणसिद्धांतप्रवृत्तिरितिनतेनतस्यान्यथासिद्धिरिति । तथाचस्वर्गकामाधि

SGDF Sri Gargeshwari Digital Foundation

प्र० धनसाधितस्यकरणत्वोपपत्तेस्सएवफलसाधनमितिसिद्धांतितत्वादितिभावः । "तेषुनतत्रप्रसिद्धान.समन्वयोवाच्य" इतिटीकामाक्षिप्यस माधत्ते ॥ नन्विति ॥ तत्रैवेति ॥ तत्रप्रसिद्धानामित्यस्यतत्रैवेतिविवक्षायाःप्रागेवोक्तेरेवमनुवादः । अतएवाग्रेतत्रप्रसिद्धाइत्येवाह ॥ अन्य परत्वेति ॥ "जनितोतविष्णो" रित्यत्रतुविष्णुशब्दस्यान्यपरत्वादितिभावः । उक्तंचसुधायां "अदोषवचनाच्चैवनियमेनहरेःश्रुता" वितिजन्मा धिकरणस्थानुव्याख्यानव्याख्यावसरे "विष्णुरितियजमानस्ययज्ञस्यवानाम । तौसोमाद्भवतइतिसोमोजनितोतविष्णोरित्युच्यतइत्यादिव्या ख्येय" मिति । नन्वेवमप्याद्यपादेंतस्थत्वलिंगस्यद्वितीयेवैश्वानरनाम्नस्तृतीयेवज्रशब्दस्यस्वप्रद्रष्टृत्वलिंगस्यचान्यत्रप्रसिद्धस्यसमन्वयेसांकर्यं । किंचांतरधिकरणोक्तन्यायस्यैवाकाशादिनयेषूक्तेर्गतार्थता । तथा "गुहांप्रविष्टा" वित्यादेः "नसंख्योपसंग्रहा" दितिनयेनगतार्थत्वं । तथापूर्वो त्तरप्रस्थानयोस्तत्रतत्रविरोधश्चोपलभ्यते । अधिकरणानांसंगतिश्चनान्योन्यमुपलभ्यतइत्यादिचोद्यानिहृदिकृत्वाह ॥ अन्यत्त्विति ॥ "ना

ननु यथान्यत्रैवप्रसिद्धानांब्रह्मपरतातथातत्रैवप्रसिद्धानामपि "जनितोतविष्णो" रित्यादाविवान्यपरत्वाशंकायांसम न्वयोव्युत्पाद्यएवेतिचेन्न । तत्रप्रसिद्धाइत्यनेनान्यपरत्वशंकाराहित्यस्यविवक्षिततत्वात् । अन्यत्तुस्वस्वस्थानेवक्ष्यते ॥

गु० करणपूर्वपक्षेभावार्थाधिकरणसिद्धांतस्यानुन्मेषवत्प्रकृतेपिपादत्रयपूर्वपक्षदशायांचतुर्थपादीयसिद्धांतस्याप्रवृत्तेर्नतेनतस्यान्यथासिद्धिरितिभावः ॥ नन्विति ॥ अन्य त्रैवप्रसिद्धानामित्यनंतरं अन्यपरत्वशंकायामितिशेषः । ब्रह्मपरतेत्यनंतरं व्युत्पाद्यतइतिशेषः । ननुतत्रैवप्रसिद्धानामन्यपरत्वशंकायाएवाभावान्नतत्समन्वयोव्युत्पा द्यइत्यतउक्तं ॥ जनितोतेत्यादि ॥ तत्रेति ॥ जनितोतेत्यत्रतुबाधकेनान्यपरत्वमितिभावः । नन्वत्रैतदध्यायगताधिकरणानांसंगत्यादिकंकुतोनकथ्यतइत्यत आह ॥ अन्यत्त्विति ॥ ननुतत्रैवप्रसिद्धानांकथमन्यपरत्वशंकाराहित्यमित्यतोवाह ॥ अन्यत्त्विति ॥ नन्विदमपूर्वपादार्थकथनमयुक्तं । परोक्तपादार्थस्यैवसम्य

SGDF Sri Gargeshwari Digital Foundation

प्र० न्यथातदद्दष्टे"रितिभाष्यंविवरितुंपरोक्तंनिराह ॥ अन्येत्विति ॥ स्पष्टत्वंचाग्रेस्वयमेवनिर्वक्ष्यति । एकोपाध्याक्रांतत्वेकथंभेदइत्यतउक्तं तयोस्त्विवति ॥ सैवक्सामेत्यादिपररीत्यैवसर्वंध्येयं । अधिकरणशरीराणिविषयवाक्यानिचाग्रेस्पष्टानि । अनेकाधिकरणविषयवाक्या

अन्येतुप्रथमेस्पष्टब्रह्मलिंगान्युदाहरणानि । द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिंगानि । तयोस्तुसविशेषनिर्विशेषविषयतया भेदः । चतुर्थेप्रधानस्याशब्दत्वोक्तिरितिपादार्थानाहुः । तन्न । यथाप्रथमे "अंतस्तद्धर्मोपदेशा"दित्यादौ "सैवक्सामतदुक्थं तद्यजु"रितिसर्वात्मकत्वस्य "सर्वेभ्यःपाप्मभ्यउदित" इतिसर्वपापराहित्यस्यचब्रह्मलिंगस्यस्पष्टता तथाद्वितीये "सर्वत्रप्र सिद्धोपदेशा"दित्यत्र "सर्वंखल्विदंब्रह्मे"तिजीवेष्वयुक्तस्यसार्वात्म्यादेः "अत्ताचराचरे"त्यत्र "अन्यत्रधर्मादन्यत्राधर्मा" दितिपुण्यपापराहित्यादेः "अंतर" इत्यत्र "एतदमृतमभयमेतद्ब्रह्मे"त्यमृतत्वादेः "अंतर्यामी"त्यत्र "एषतआत्मांतर्या म्यमृत" इत्यमृतत्वादेः "अदृश्यत्वादिगुणक" इत्यादौ "यःसर्वज्ञ" इतिसार्वज्ञादेर्ब्रह्मलिंगस्यस्पष्टत्वात् । एवंतृतीये "द्युभ्वादी"त्यत्र "अमृतस्यैषसेतुःयःसर्वज्ञ" इत्यमृतसेतुत्वसार्वज्ञादेः "भूमे"त्यत्र "यत्रनान्यत्पश्यति"इत्यद्वितीयत्वादेः "अक्षरमंबरे"त्यत्र "अदृष्टंद्रष्टृश्रुतंश्रोत्रस्थूलमनण्वि"त्यदृश्यत्वास्थूलत्वानणुत्वादेः "ईक्षतिकर्मे"त्यादौ "परात्पर"मिति परात्परत्वादेर्ब्रह्मलिंगस्यस्पष्टत्वाच्च । वाक्यांतरेब्रह्मधर्मतयानिर्णीतत्वंवाजीवादौस्वारस्येनानुपपद्यमानत्वंवास्पष्टत्वं ।

गु० क्त्वादित्यतःपरोक्तंदूषयितुमनुवदति ॥ अन्येत्विति ॥ अत्रवाक्यानीतिशेषः । स्पष्टानिब्रह्मलिंगानियेषुतानीत्यर्थः । एवमुत्तरत्रापि । नन्वेवंद्वितीयतृतीययोर्भे

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्युदाहरता "एतदमृतमभयमेतद्ब्रह्मेत्युत्तराधिकरणोदाहृतवाक्येष्वपी" तिटीकास्थंबहुवचनंविवृतंध्येयं । टीकायामाद्यातिक्रमेणैतदमृतमित्य स्योपादानंतुतस्यस्वपरसंमतत्वात् । उदाहरणवाक्यएवस्पष्टलिंगसत्वाद्वा । नत्वनेकत्रनियमभंगोनेति । अतएवसुधायां "द्वितीयतृतीयपादोदाहरणवाक्यानामपिबहुलंस्पष्टब्रह्मलिंगत्वा" दित्येवोक्तमितिभावः ॥ **नत्विति** ॥ येनोक्तानामतथाविधत्वेनस्पष्टत्वंनस्यादितिभावः॥ **तच्चेति**॥ वाक्यांतरेत्यादिनोक्तमित्यर्थः । ननूपक्रमेस्पष्टलिंगश्रवणेपिनोदाहरणवाक्ये । अतोनदोषइत्याशंक्य तर्हिप्रथमेपिस्पष्टलिंगसमन्वयोनस्यादित्याह

नचस्वारस्येनापिजीवादावनुपपद्यमानत्वं विषयवाक्येब्रह्मधर्मतयानिर्णीतत्वंवाजीवादिप्रापकलिंगराहित्यंवा । पूर्वपक्षानुदयापातात् । तच्चसर्वंखल्विदमित्यादावस्ति ।

गु० दोनस्यात् । उभयोरप्यस्पष्टब्रह्मलिंगप्रतिपादकत्वादित्यतआह ॥ **तयोस्त्विति** ॥ **अशब्दत्वोक्तिरितीति** ॥ शब्दोस्यास्तीतिशब्दं । नशब्दमशब्दं । तस्य भावस्तत्त्वमितिविग्रहः । शब्दप्रतिपाद्यत्वाभावोक्तिरितियावत् । स्पष्टास्पष्टलिंगशब्दाभ्यांकिंसाधकलिंगान्युच्यंतेसमन्वेतव्यानिवा । आद्येपितेषांस्पष्टत्वंपूर्वोत्तरवाक्यप्रतीयमानत्वंवाऽस्वारस्येनापिजीवादावनुपपद्यमानत्वंवा विषयवाक्येब्रह्मधर्मतयानिर्णीतत्वंवा वाक्यांतरेब्रह्मधर्मतयानिर्णीतत्वंवा जीवादौस्वारस्येनानुपपद्यमानत्वंवा साक्षाद्विप्रतिपन्नार्थनिष्ठतयाश्रुतत्वंवा तद्विपरीतंचास्पष्टत्वमितिविकल्पान्हृदिकृत्वाह ॥ **तन्नेत्यादि** ॥ अंतरित्यत्रयएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतइत्युदाहरणमितिभावः । सर्वत्रेत्यत्रतुमनोमयःप्राणशरीरोभारूपइत्येतत् अत्तेत्यत्रतुयस्यचब्रह्मचक्षत्रंचोभेभवतओदनइत्युदाहरणं । ईक्षतिकर्मेत्यत्रचयःपुनरेतंत्रिमात्रेणोमित्यनेनाक्षरेणपरंपुरुषमभिध्यायीतेत्युदाहरणं । तथाचसांकर्यान्नैवंपादभेदोयुक्तइतिभावः ॥ **तच्चेति** ॥ वाक्यांतरेब्रह्मपरतयानिर्णीतत्वादिकमित्यर्थः । एवंप्रथम

प्र० ॥ **नचेति** ॥ विषयवाक्येनश्रूयतइत्यपिनेत्याह ॥ **द्वितीयादाविति** ॥ ननूदाहरणवाक्येषुस्पष्टलिंगांतरसत्त्वेपिनसमन्वेतव्यलिंगंस्पष्टमित्यतआह ॥ **यथाचेति** ॥ **नब्रह्मणिस्पष्टमिति** ॥ अकरणस्यब्रह्मणोमनोरूपकरणसंबंधायोगादितिभावः । आदिपदेनात्तृत्वद्युभ्वाद्यायतनत्वादिकंसमन्वेतव्यंगृह्यते ॥ **आदित्यस्थत्वेति** ॥ एतेषांब्रह्मलिंगतयावाक्यांतरेनिर्णीतत्वेसमन्वयोनवाच्यःस्यादितिभावः । यदपितयोस्त्वित्यादिनोक्तंतदपिनेत्याह ॥ **यच्चेति** ॥ एतेनभाष्यस्थान्यथाशब्दस्यनकेवलंटीकारीत्यास्पष्टलिंगादिसमन्वयार्थत्वंसविशेषनिर्विशेषपरत्व

नच "सर्वत्रप्रसिद्धे" त्यादेः "मनोमयःप्राणशरीरोभारूप" इत्यादिकमुदाहरणं । तत्रचनब्रह्मलिंगंस्पष्टं । किंतु "सर्वंखल्विद" मित्युपक्रमइतिवाच्यं । प्रथमेप्यंतरित्यस्योदाहरणे "यएषोंत" रित्यत्रसार्वात्म्यस्य "ज्योतिश्चरणे" त्यस्योदाहरणे "यदतःपरोदिवोज्योति" रित्यत्रामृतत्वादेः "प्राणस्तथे" त्यस्योदाहरणे "प्राणोस्मिप्रज्ञात्मे" त्यत्रहिततमत्वादेर्ब्रह्मलिंगस्याभावात् । द्वितीयादावपि "यएषोंतरक्षिणिपुरुषोदृश्यते एतदमृतमभयमेतद्ब्रह्म एषतआत्मांतर्याम्यमृत" इत्याद्युदाहरणवाक्यएवामृतत्वादेःस्पष्टत्वाच्च । यथाचद्वितीयेतृतीयेचसमन्वेतव्यंमनोमयत्वादिकंनब्रह्मणिस्पष्टं तथाप्रथमेसमन्वेतव्यमादित्यस्थत्वाकाशप्राणशब्दादिकंनब्रह्मणिस्पष्टं । यच्चद्वितीयेसविशेषंतृतीयेनिर्विशेषमित्युक्तंतदपिन । द्वितीयेपि "सर्वत्रे" त्यत्र "सर्वंखल्विदंब्रह्मे" त्यविद्यादिसर्व

गु० पादस्यद्वितीयतृतीयपादाभ्यांसांकर्यमुपपाद्याधुनाद्वितीयतृतीययोरपितदुपपादयितुमाह ॥ **यच्चेति** ॥ अत्रापिसविशेषत्वनिर्विशेषत्वेपरस्परविरुद्धेउताविरुद्धेइतिविकल्पेनदूषयति ॥ **द्वितीयेपीति** ॥ तथाचनिर्विशेषप्रतिपादकेनतृतीयेनास्यसांकर्यमितिभावः ॥ **तृतीयेपीति** ॥ तथाचसविशेषप्रतिपादकेनद्वितीयेनास्यसांकर्यमि

SGDF
Sri Gargeshwari Digital Foundation

प्र० मप्यर्थइत्युक्तंभवति । “सगुणनिर्गुणप्राचुर्येणतद्भेदइति कश्चिदि”त्यादिनासुधायांतयोरपिभेदनिरासात् ॥ **भ्रमाधिष्ठानत्वेति** ॥ मुख्य सर्वाभेदाभावादेवमुक्तं ॥ **कालत्रयेति** ॥ सविशेषस्यकालयोगित्वादित्यादिध्येयं । ननुभवन्मतेयथाअंतराद्यधिकरणेकचिल्लिंगादिसमन्व

भ्रमाधिष्ठानत्वरूपसार्वात्म्यादेः “अत्ते”त्यत्र “अन्यत्रभूताच्चभव्याच्च महतोमहीया”नितिकालत्रयातीतत्वादेः“अंतर” इत्यत्र“कंब्रह्मखंब्रह्मे”तिपूर्णसुखत्वादेः “अंतर्यामी”त्यत्र “एषतआत्मे”तिजीवतादात्म्यादेः “अदृश्यत्वादी”त्यादौच“य त्तदद्रेश्य”मित्यदृश्यत्वादेस्सविशेषेनुपपत्तेः । तृतीयेपि“द्युभ्वादी”त्यत्र “तमेवैकंजानथ यदापश्यःपश्यतेरुक्मवर्ण”मि तिदृश्यत्वरूपित्वादेः“भूमे”त्यत्र“एवंपश्य”न्नितिसप्रकारकज्ञानविषयत्वादेः“अक्षर”मित्यत्र“अदृष्टंद्रष्टृश्रुतंश्रो”त्रितिद्रष्टृ त्वादेः“ईक्षतिकर्मे”त्यत्र“पुरुषमीक्षत”इतिदृश्यत्वादेः“दहर”इत्यादौ“सत्यकामःसत्यसंकल्प”इतिकामादेर्निर्विशेषेनुपपत्ते श्च। यदिचचिन्मात्रस्यैवनिर्विशेषत्वेनभ्रमाधिष्ठानत्वादिविशिष्टस्यसविशेषत्वं तर्हिद्युभ्वाद्यायतनत्वविशिष्टमपि सविशेषमेव स्यात्। यस्मिन्द्यौरित्यादेश्चलक्षणयाचिन्मात्रपरत्वे सर्वंखल्विदमित्यादेरपिप्रामाण्यायतन्मात्रपरत्वंस्यात्। सविशेषेवस्तुतो निर्विशेषत्वस्यनिर्विशेषेचारोपितविशेषस्याविरोधेप्युभयत्राप्युभयोक्तौवाक्यव्यवस्थायोगेनतन्निबंधनपादव्यवस्थानयुक्ता।

गु० तिभावः। ननुद्वितीयपादेभ्रमाधिष्ठानत्वादिविशिष्टप्रतिपादनेनसविशेषपरत्वमेवेत्यतआह ॥ **यदिचेति** ॥ ननुतृतीयस्यनसविशेषविषयत्वं। तत्रोदाहृतस्ययस्मिन्द्यौ रित्यादेर्लक्षणयानिर्विशेषपरत्वादित्यतआह ॥ **यस्मिन्निति** ॥ ननुद्वितीयेसविशेषमेवप्रतिपाद्यं । नचैवमविद्यादिसर्वभ्रमाधिष्ठानत्वरूपसार्वात्म्यायोगः । वास्तव

SGDF
Sri Gargeshwari Digital Foundation

प्र० येपिबाहुल्येनपादव्यवस्थातथाकिंनस्यादित्यतआह ॥ **एतेनेति** ॥ **यत्त्विति** ॥ एतेनान्यथाशब्दस्यैवंरूपार्थांतरत्वमुक्तंध्येयं ॥ **अभिध्यातव्यत्वस्येति** ॥ "यःपुरेतंत्रिमात्रेणोमित्यनेनैवाक्षरेणपरंपुरुषमभिध्यायीते"तिवाक्योक्तस्येत्यर्थः । इत्यादौचेत्यादिपदेन"सुषुप्त्युत्क्रांत्यो"

एतेनप्रायिकत्वात्पादव्यवस्थेतिनिरस्तं । सर्वसांकर्यस्योक्तत्वात् । अस्माकंनामपादे"अंतस्तद्धर्मे"त्यत्रलिंगसमन्वयइंद्राद्यनेकनामसमन्वयार्थः तथालिंगपादेवैश्वानरनामसमन्वयःपाचकत्वाद्यनेकलिंगसमन्वयार्थइतिटीकायामेववक्ष्यते । यत्तुयौगिकरूढविषयतयाद्वितीयतृतीययोर्भेदइतिपरमतं तन्न । तृतीयेपिद्युभ्वाद्यायतनत्वस्य"ईक्षतिकर्मे"त्यत्राभिध्यातव्यत्वस्य "शब्दादेवप्रमित" इत्यादौचांगुष्ठमात्रत्वादेश्चयौगिकत्वात् । एवं

गु० रूपाभिप्रायेणतदुपपत्तेः । एवंतृतीयेपिनिर्विशेषमेवप्रतिपाद्यं । नचैवंतमेवैकंजानथेत्यादिवाक्योक्तदृश्यत्वाद्यनुपपत्तिः । विशिष्टाभिप्रायेणतदुपपत्तेरित्यतआह ॥ **सविशेषइत्यादि** ॥ **एतेनेति** ॥ ननुसविशेषनिर्विशेषतयाद्वितीयतृतीययोर्भेदासंभवेपियोगरूढिविषयत्वाभ्यांभेदःस्यादेव । तथाचकथंतयोःसांकर्योपपादनं । नचतथापिकथंप्रथमपादस्यद्वितीयतृतीयाभ्यांभेदइतिवाच्यं । द्वितीयस्यकेवलयौगिकत्वविषयत्वेनतृतीयस्यकेवलरूढिविषयत्वेनप्रथमस्ययोगरूढिविषयत्वेनताभ्यांतस्सांकर्याभावादित्येतत्परोक्तंदूषयितुमनुवदति ॥ **यत्त्विति** ॥ किमत्रतृतीयेसमन्वेतव्यसर्वशब्दानांरूढत्वंकतिपयानांवा । नाद्यइत्याह ॥ **तृतीयेपीति** ॥ नद्वितीयः । द्वितीयेपिकतिपयानांवैश्वानरादिशब्दानांरूढत्वस्यसत्त्वेनसांकर्यापरिहारात् । यच्चप्रथमस्यासांकर्यकथनंतदप्ययुक्तं । सर्वेषामपिसमन्वेतव्यशब्दानांयोगरूढत्वस्यश्रुत्युक्तत्वात् । ननुतृतीयेसमन्वेतव्यशब्देषुरूढानांबाहुल्याद्यौगिकानांचाल्पत्वात्प्रायिकत्वेनपादभेदःस्यादितिचेन्न । तृतीयेसमन्वेतव्यानांहिरूढत्वंनामविद्वद्रू

SGDF
Sri Gargeshwari Digital Foundation

प्र० रित्यत्रसमन्वीयमानंकाण्वश्रुतिस्थं''योयंविज्ञानमय''इत्यादिग्राह्यं। प्रागनूदितचतुर्थपादोपाधिंनिराह ॥ **चतुर्थेपीति** ॥ **ज्योतिरिति** ॥ यद्यपिपरमते''चमसव''दित्यारभ्यैवाधिकरणं तथापितथानुवादार्हतयापिनेतिवा प्रधानप्रापकस्य''अजामेका''मितिमंत्रस्यज्योतिःसूत्रएवतेजोबन्नरूपार्थकत्ववर्णनाद्वाज्योतिरित्यनुवादः ॥ **अन्यत्रेति** ॥ एतत्सर्वंतत्रैवस्पष्टीभविष्यति । अन्यथाशब्दस्यापरमप्यर्थमभिप्रेत्यपरोक्तमन्यदपिनिराह ॥ **यच्चेति** ॥ **शंकायाइति** ॥ निरासइत्यनुषंगः ॥ **अपिशब्दइति** ॥ नकेवलंब्रह्मकिंत्वानुमानिकपदोक्तंप्रधानमपिकारणमि

चतुर्थेपिपादेत्वया''आनुमानिक''मिति ''ज्योति''रिति ''नसंख्ये''त्यधिकरणत्रयएवप्रधानस्यशाब्दतायानिरस्तत्वादन्यत्र ''कारणत्वेनचाकाशादि''ष्वित्यत्रसृष्टिवाक्यविगानस्य''जगद्वाचित्वा''दित्यत्र''यस्यचैतत्कर्मसवेदितव्य''इत्यादिवाक्यानां जीवादिपरत्वस्य''वाक्यान्वया''दित्यत्र''आत्मावाअरेद्रष्टव्य'' इत्यादिवाक्यानांजीवपरत्वस्यच''प्रकृतिश्चे''त्यत्रनिमित्तोपादानभेदस्यचनिरस्तत्वात्प्रधानाशब्दतानचतुर्थपादव्यापिनी । यच्चोक्तंपरैःप्रधानाद्येवकारणतयासर्ववेदांतार्थइतिलक्षणासंभवाशंकायास्त्रिपाद्यांनिरासः। चतुर्थपादेतुप्रधानमपिकारणतयावेदांतैकदेशार्थइत्यतिव्याप्तिशंकायाः। अतएवा''नुमानिकमप्येकेषा''मितिसूत्रेऽपिशब्दएकशब्दश्चेति । तन्न। आनुमानिकमित्यादौपूर्वपक्षिणायस्य''महतःपरमव्यक्तं अजामेका''मित्यादेःप्रधानपरत्वंशंकितं तस्यैकदेशस्यसिद्धांतेपिब्रह्मपरत्वाभावात् अविद्यादिपरत्वेचब्रह्मलक्षणस्यप्रधानेऽनतिव्याप्तावप्य

गु० ढत्वंवाऽज्ञरूढत्वंवा। नाद्यः। तादृशरूढिमत्त्वस्यसर्वेष्वपिसत्वात्। नद्वितीयः। तस्यभूमाक्षरादिशब्देष्वप्यभावादितिभावः। चतुर्थपादार्थंदूषयति॥ **चतुर्थेपीति**॥ अत्रह्यशब्दत्वोक्तेःपादार्थत्वंकचिदशब्दत्वोक्तिमात्रेणवासर्वत्राशब्दत्वोक्त्यावा । नाद्यः। ईक्षत्यधिकरणेपि प्रधानाशब्दत्वस्योक्तत्वेनतत्राप्यस्यपादार्थत्वापत्तेः ।

प्र० त्यर्थप्रतीतेरेकशब्देनैकेषांकठानांशाखायामित्यर्थप्रतीत्यादेरेकदेशार्थत्वावगमादितिभावः ॥ **अविद्यायामिति** ॥ ननुतत्रवाक्येपरशब्दस्योत्कर्षार्थत्वादिहकारणत्वधीरेवनेतिसिद्धांत्यते । अतोऽविद्यादिपरत्वेपिनदोषइतिचेत्तर्हिप्रधानपरत्वेपिनदोषइतितत्परत्वनिरासस्तत्रव्यर्थइतिभावः ॥ **निर्विशेषेति** ॥ तस्यसूक्ष्मत्वेनप्रथमंदुर्गमत्वादितिभावः ॥ **चतुर्थस्यत्विति** ॥ पादस्येत्यर्थः । एवंभाष्यस्थान्यथाशब्दस्यचतुर्धा

विद्यायामतिव्याप्त्यपरिहारात् तस्मान्नपरमतेपादभेदोयुक्तः । नापितत्क्रमः । सुबोधस्यप्राथम्यआनंदमयादौनिर्विशेषविचारायोगात् । दुर्बोधस्यप्राथम्येतुस्पष्टब्रह्मलिंगानांप्राथम्यायोगात् । निर्विशेषस्यतृतीयेनिरूपणायोगाच्च । ईक्षत्यधिकरणोक्ताशब्दत्वस्यविक्षिप्यचतुर्थपादेव्युत्पादनेहेत्वभावाच्च । चतुर्थस्यतुसमन्वयासंगतिःपरैरेवांगीकृतेति ॥

गु० नद्वितीयः । प्रकृतेपितदभावादित्याह ॥ **त्वयेति** ॥ प्रकारांतरेणपादार्थंदूषयितुमनुवदति ॥ **यच्चोक्तमिति** ॥ प्रधानस्यवेदांतैकदेशार्थत्वेज्ञापकमाह ॥ **अतएवेति** ॥ प्रधानस्यापिवेदांतैकदेशार्थत्वंयतोऽतएवेत्यर्थः । किमत्रकारणत्वस्यातिव्याप्तिमात्रंपरिह्रियते प्रधानातिव्याप्तिर्वा । नाद्यइत्याह ॥ **आनुमानिकमिति** ॥ ब्रह्मपरत्वाभावेनान्यपरत्वस्यापिस्वीकृतत्वेनातिव्याप्तिःस्यादेवेतिभावः । नद्वितीयोनिष्फलत्वादित्याह ॥ **अविद्यापरत्वेचेति** ॥ **अविद्यायामिति** ॥ नन्वविद्यायाःकारणत्वेपिनातिव्याप्तिः । तत्संबंधेनब्रह्मण्येवतदापत्तेरितिचेन्न । सांख्येनापिकेवलप्रकृतेःकेवलब्रह्मणोवाकारणत्वानंगीकारात् । अन्योन्यसचिवकारणत्वस्यतूभाभ्यामंगीकारात् । ब्रह्माविद्यापुरुषप्रकृतिनाममात्रभेदेविवादापर्यवसानप्रसंगेनपक्षपातबीजाभावादितिभावः ॥ **नापितत्क्रमइति** ॥ नन्वेतदस्माकंदूषणंस्यात् । सुबोधस्यप्राथम्येतृतीयस्यदुर्बोधस्यतत्वेचचतुर्थस्यप्रथमत्वापातइतिचेन्न । निरस्यक्रमादेर्नियामकस्योक्तत्वात् । परस्यचनियामकांतराभावादितिभावः । ननुचतुर्थेऽशब्दत्वप्रतिपादनमसंगतं । नचेक्षतिसूत्रोक्ताशब्दत्वप्रतिपादकत्वान्नासंगतिरितिवाच्यं । तथाविशेषेकारणाभावादयुक्तमेतदित्याह ॥ **ईक्षत्यधिकरणोक्तेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० र्थमुपेत्याद्वैतिमतंनिरस्य"भाष्यंचात्यर्थविस्तर"मित्युक्तेरर्थांतरपरत्वमभ्युपेत्यरामानुजमतनिरासपरत्वेनापिव्याख्यातुमाह ॥**केचित्त्विति**॥ एकार्थत्वेपादभेदःकुतइत्यतआह ॥ **तत्रापीति** ॥ त्रिपाद्यामपीत्यर्थः ॥ **जीवादीति** ॥ जीवप्राणबुद्धिलिंगकानीत्यर्थः । अस्पष्टत्वंचजीवादौस्वारस्येनानुपपद्यमानत्वंवाक्यांतरेब्रह्मलिंगतयानिर्णीतत्वंवा । तद्विपरीतंस्पष्टत्वं ॥ **तत्तदिति** ॥ जीवप्राणादिलिंगप्रतिपादनेत्यर्थः ॥ **ईक्षतेरिति** ॥ अधिकरणशरीरंतुप्रागुक्तं ॥ **कामाच्चेति** ॥ "सोकामयते"त्यारभ्य"इदंसर्वमसृजते"तिकामादेवसर्गश्रवणादस्यानंदमय

॥ केचित्तु जन्मादिसूत्रेब्रह्मकारणमेवब्रह्मैवकारणमित्यवधारणद्वयंविवक्षितं । तत्रलक्षणेऽसंभवरूपायोगव्यवच्छेदःप्रथमपादे अतिव्याप्तिरूपान्ययोगव्यवच्छेदस्त्रिपाद्यां तत्राप्यस्पष्टजीवादिलिंगकानिवाक्यानिद्वितीये स्पष्टजीवादिलिंगकानितृतीये तत्तत्प्रतिपादनच्छायानुसारीणिचतुर्थेविचार्यंतइत्याहुः। तन्न । आद्यपादेपित्वन्मते"ईक्षतेर्नाशब्द"मित्यत्रप्रधानकारणतायाः "कामाच्चनानुमानापेक्षे"त्यादौजीवादिकारणतायाश्चनिषिद्धत्वेनातिव्याप्तिपरिहारस्यतत्रापिसत्त्वात् । नन्वीक्षत्यधिकरणादौ"सदेवे"त्यादिवाक्यानांप्रधानपरत्वेतदैकार्थ्यात्सर्वाणिकारणवाक्यानि

गु० **जन्मादिसूत्रइति** ॥ सर्ववाक्यंसावधारणमितिन्यायेनैतत्सूत्रस्यसावधारणत्वं । एवंचैकस्यावधारणस्योभयत्रान्वयइतिभावेनावधारणद्वयमित्युक्तं । नत्ववधारणद्वयंकल्प्यमितिभावः । अस्त्वेवंततःकिमित्यतआह ॥ **तत्रेति** ॥ ननुतर्हित्रिपाद्याभेदोनस्यादित्यतआह ॥ **तत्रापीति** ॥ **तत्तत्प्रतिपादनच्छायानुसारीणीति** ॥ स्पष्टतरपूर्वपक्षहेतुकानीत्यर्थः । एवंह्यसंभवपरिहारःप्रथमपादे अतिव्याप्तिपरिहारस्त्रिपाद्यामित्युक्तंस्यात् । तच्चायुक्तं । अतिव्याप्तिपरिहारस्यप्रथमपादेपिसत्त्वादित्याह ॥ **तन्नेत्यादिना** ॥ अतिव्याप्तिपरिहारस्याप्यसंभवएवपर्यवसानमित्याशंकते ॥ **नन्विति** ॥ **तदैकार्थ्यादिति** ॥ सदैवेत्यादेःप्रधानवाक्यत्वा

SGDF Sri Gargeshwari Digital Foundation

प्र० स्वसृष्टौजीववन्नानुमानगम्यप्रकृत्यपेक्षास्तीतिप्रकृतिनिरपेक्षजगत्स्रष्टाऽऽनंदमयःपरमात्मानजीवइत्युक्तेरितिभावः ॥ **तथेति** ॥ प्रधानपरा णीत्यर्थः । अन्यथाशब्दस्यार्थांतरमुपेत्यतदुक्तंप्रमेयांतरमपिनिराह ॥ **यच्चेति** ॥ चेतनाचेतनविलक्षणमित्यर्थः । कारणत्वेनैवोभयविलक्षणं

तथा । एवंचनब्रह्मकारणमित्यादिःपूर्वःपक्षः । सचासंभवपर्यंतइतिचेत् सदेवेत्यादिवाक्यानांब्रह्म परत्वेतदैकार्थ्यात्सर्वाणिवाक्यानितथा । एवंचनप्रधानादिकारणमितिसिद्धांतः । सचातिव्याप्तिपरि हारपर्यंतइत्यपिसंभवात् । द्वितीयतृतीययोरपिपादयोःपूर्वपक्षएवमसंभवपर्यंततायावक्तुंशक्यत्वाच्च । यच्चोक्तंचिदचिद्विलक्षणंमूलकारणभूतंवस्तुप्रथमेप्रतिपाद्यते । अथतस्यगुणविशेषास्त्रिपाद्यामिति ।

गु० दितिभावः ॥ **तथेति** ॥ प्रधानकारणत्वप्रतिपादकानीत्यर्थः । अतिव्याप्तिपर्यंतत्वासंभवेह्यसंभवपर्यंतत्वंवक्तव्यं । नचैवं । उक्तरीत्यातत्संभवस्यसमर्थितत्वादि त्याह ॥ **सदेवेत्यादीति** ॥ **तथेति** ॥ सर्वाणिकारणवाक्यानिब्रह्मणःकारणतापराणीत्यर्थः । ननुप्रथमपादेऽतिव्याप्तिपरिहारस्याल्पत्वात्प्रायेणासंभवपरिहारस्य कृतत्वेनप्रायिकत्वात्पादव्यवस्थास्यादेवेत्यतआह ॥ **द्वितीयतृतीययोरिति** ॥ तथाचतयोरतिव्याप्तिपरिहारकत्वंनस्यात् । वैपरीत्यमेवस्यादितिभावः ॥ **एवम संभवपर्यंतायाइति** ॥ अस्पष्टजीवादिवाक्यानांप्रधानपरत्वेसर्वेषामपिवाक्यानांप्रधानपरत्वमेवस्यान्नब्रह्मपरत्वमित्यसंभवपर्यंतायाइत्यर्थः । नन्वसंभवपरिहारःप्र थमेऽतिव्याप्तिपरिहारस्त्रिपाद्यामित्यस्यायमर्थः । असंभवेपरिहृतेहिमूलकारणंसिध्यतीतितदेवप्रथमप्रतिपाद्यं । अतिव्याप्तिपरिहारेसतिगुणविशेषेसतिसिद्धिर्भवतीतिगु णविशेषप्रतिपादनंत्रिपाद्यामितिनासांकर्यमित्येतत्पराभिप्रेतंदूषयितुमनुवदति ॥ **यच्चोक्तमिति** ॥ **चिदचिद्विलक्षणमिति** ॥ जडजीवविलक्षणमित्यर्थः । अत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० वस्तूच्यते धर्मांतरेणवा । आद्यआह ॥ **तत्रेति** ॥ **अंतरिति** ॥ "अंतस्तद्धर्मे"तिसूत्रे"ज्योतिश्चरणे"त्यादावित्यर्थः । द्वितीयआह ॥ **यदित्विति** ॥ त्रिपाद्यामप्युभयविधधर्माणामेवोक्तेरितिभावः । त्रिपाद्यामप्यवांतरपादोपाधिंप्रागुक्तंनिराह ॥ **यच्चेति** ॥ "सर्वत्रप्रसिद्धे"तिनये"मनोमयःप्राणशरीरोभारूप"इतिवाक्ये अत्तेतिनये"यस्यब्रह्मचक्षत्र"मितिवाक्यइतिभावः ॥ **प्राणेवेति** ॥ स्पष्टत्वादित्यन्वयः । अत्रदृष्टांतोक्तिस्तुसाहित्येनस्पष्टत्वंनाभिप्रेतमितिशंकाव्युदासायब्रह्मणिस्पष्टत्वस्यतथैवभावितत्वादितिवक्तुं ॥ **यस्येति** ॥ अंतर्यामिनयवाक्य

तत्र चिदचिद्विलक्षणत्वंयदिकारणत्वेनैव तदांतर्ज्योतिरित्यादौकारणत्वादन्यस्यादित्यांतस्थत्वज्योतिष्ट्वादेरुक्तेरंतरित्यादेरप्याद्यपादांतर्गतिर्नस्यात् । यदितुगुणांतरेणापि तदात्रिपाद्याअप्याद्यपादांतर्गतिःस्यात् । यच्चोक्तमस्पष्टजीवादिलिंगकानिवाक्यानिद्वितीयइत्यादि तच्चायुक्तं । द्वितीयेपिमनोमयत्वप्राणशरीरत्वादेरत्तृत्वस्यचमनःप्राणादियुक्तेभोक्तरिजीवे तथाकर्मफलभोक्तृत्वस्यभोक्तृजीवसाहित्येनब्रह्मणीवबुद्धौप्राणेवा । तथा"यस्यपृथिवीशरीर"मितिशरीरित्वसाहित्येनश्रुतांतर्यामित्वादेश्चजीवेस्पष्टत्वात् ।

गु० चिदचिद्विलक्षणत्वंकारणत्वेनैववागुणांतरेणवा । नाद्यइत्याह ॥ **तदेति** ॥ द्वितीयंदूषयति ॥ **यदित्विति** ॥ **त्रिपाद्याअपीति** ॥ त्रिपाद्यामवांतरपादभेदवदाद्यपादस्यापिभेदोभविष्यतीतिचेन्न । अनुपदमेवदूष्यत्वादितिभावः । प्रथमस्यद्वितीयतृतीयपादाभ्यांसांकर्यमुक्त्वाद्वितीयतृतीययोरपीदानीमन्योन्यसांकर्यमाह ॥ **यच्चोक्तमिति** ॥ **बुद्धौप्राणेवेति** ॥ भोक्तृप्राणसाहित्येनबुद्धौभोक्तृत्वस्यसंभवादितिभावः । नन्वत्रमनोमयत्वंनमनोविकारत्वं । येनस्पष्टत्वंस्यात् । किंतुशुद्धेनमनसाग्राह्यत्वं । तथा अत्तृत्वमपिनक्षुन्निवारकभक्षयितृत्वं । किंतुसंहर्तृत्वं । तथा कर्मफलभोक्तृत्वमपिनकर्मफलभोगमात्रं । किंतुतन्नियामकत्वं । एवंशरीरि

प्र० इत्यर्थः । उक्तदोषमध्येक्वचिदुद्धारमाशंकते ॥ **नन्विति** ॥ मनोमयत्वादेरेवमर्थोक्त्याजीवेऽस्पष्टत्वोक्तिः किंपूर्वपक्षरीत्याऽथापातदृष्ट्यैतत्सिद्धांतदिशेतिविकल्प्याद्यस्यायोगेनद्वितीयेवाच्येतत्रस्पष्टत्वमेवेत्याह ॥ **मनोमयत्वादेरिति** ॥ **अनंगीकृतत्वेनेति** ॥ अन्यथापूर्वपक्षानुदयादित्यर्थः । तृतीयंनिराह ॥ **सिद्धांतेति** ॥ सर्वलिंगसाधारण्यादस्पष्टान्येवसर्वाणिस्युरित्यर्थः ॥ **जीवत्वेति** ॥ गगनादावपिभावादिति

ननु मनोमयत्वादिकंशुद्धेनमनसाग्राह्यत्वादिकं । अत्तृत्वंचसंहर्तृत्वं । तच्चजीवेनुपपन्नत्वादस्पष्टमितिचेन्न । मनोमयत्वादेरेवंरूपत्वस्यपूर्वपक्षिणानंगीकृतत्वेनापाततोजीवादिष्वेवस्पष्टत्वात् । सिद्धांतदशायांचजीवेनुपपत्तेः सर्वसाधारण्यात् । ननु मनोमयत्वंनमनःसंबंधमात्रं । तस्यजीवत्वासाधकत्वात् । किंतुमनःकरणकत्वं । तच्चतस्मिन्वाक्येनस्पष्टमितिचेन्न । मनस्संबंधमात्रोक्तावपितस्यकरणत्वप्रसिद्ध्यातथैवसंबंधसिद्धेः । नहिचक्षुष्मच्छब्देनतत्संयुक्तस्याकाशादेःप्रतीतिः । ननु"मनोमयःप्राणशरीरनेते"त्यादौवाक्यांतरेमनोमयत्वादिकंब्रह्मणिप्रसिद्धमितिजीवादावस्पष्टमितिचेन्न । तृतीयेपिद्युभ्वाद्यायतनत्वस्यापि "एकोदाधारभुवनानिविश्वे"त्यादौवाक्यांतरेब्रह्मणिप्रसिद्धेः ।

गु० त्वमपिनशरीराधिष्ठातृत्वं । किंतुनियामकत्वं । तथाचनिरुक्तानांजीवेऽस्पष्टत्वान्नतृतीयेनसांकर्यमस्येत्याशयेनशंकते ॥ **नन्विति** ॥ **मनोमयत्वादेरिति** ॥ तथाचैतादृशनिर्वचनेपूर्वपक्षानुत्पादनमेवस्यादितिभावः । सिद्धांतरीतिमनुसृत्यैवमस्पष्टत्वमुक्तमितिनपूर्वपक्षानुदयइत्यतआह ॥ **सिद्धांतदशायामिति** ॥ **मनस्संबंधमात्रोक्तावपीति** ॥ सामान्यतःसंबंधमात्रउक्तेपिसंबंधांतरस्यासंभवात्करणत्वपर्यवसानमितिभावः । ननुसामान्यतोमनःसंबंधवानित्युक्तेकरणत्वएवपर्यवसानंक्वदृष्टमित्यतआह ॥ **नहीति** ॥ किंतुचक्षुरूपकरणत्वमेवप्रतीयतइतिभावः । ननुविषयवाक्येस्पष्टत्वास्पष्टत्वेनविवक्षिते । किंतुवाक्यांतरेब्रह्मपरतयाऽनिर्णीतत्वमेवास्पष्टत्वंविवक्षितं । मनोमयत्वादिकंचतादृशमित्याशयेनशंकते ॥ **नन्विति** ॥ **तृतीयेपीति** ॥ तथाचतत्रसमन्वेतव्यद्युभ्वाद्यायतनत्वस्यास्पष्टत्वेनद्वि

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावः । ननुद्युभ्वाद्यायतनत्वस्यस्वरूपेणजीवेऽस्पष्टत्वेपिजीवेप्रसिद्धलिंगसाहित्यात्तत्रस्पष्टमेवेत्याशंक्याह ॥ **तत्रेति** ॥ “सएषोंतश्चरंतेब हुधाजायमान”इत्युक्तमित्यर्थः ॥ **अर्भकौकस्त्वमिति** ॥ तथाचतत्साहित्यान्मनोमयत्वमपिजीवेस्पष्टंस्यादितिभावः । तृतीयपादोपाधिम पिनिराह ॥ **प्रत्युतेति** ॥ जीवलिंगसाहित्येनजीवेस्पष्टत्वोक्तौद्वितीयपादसांकर्यमात्रमित्येवंनेत्यर्थः । चतुर्थपादोपाधिमप्यपाकरोति ॥ **तत्त त्प्रतिपादनेति** ॥ च्छायानुसारिणोपि वाक्यस्येतिशेषः ॥ **परस्परेति** ॥ स्पष्टलिंगप्रतिपादकत्वंवाऽस्पष्टलिंगप्रतिपादकत्वंवाभवेत् । विरो

तत्रजायमानत्वादिलिंगंजीवेप्रसिद्धंचेदत्रापि“एषमआत्मांतर्हृदय”इत्यर्भकौकस्त्वमपिजीवेप्रसिद्धं । प्रत्युततृतीयेद्युभ्वा द्यायतनत्वंस्वरूपेण “अमृतस्यैषसेतु”रित्यादिब्रह्मलिंगसन्निधानेनच तथापूर्णत्वरूपंभूमत्वमपिस्वरूपेण“यत्रनान्यत्पश्य ती”त्यादिब्रह्मलिंगसन्निधानेनच तथाऽक्षरत्वमपि“अक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठत”इत्यादिब्रह्मलिंगस न्निधानान्नजीवादौस्पष्टं । तत्तत्प्रतिपादनच्छायानुसारिणोपिनपरस्परविरुद्धस्पष्टास्पष्टजीवादिलिंगकवाक्यबहिर्भावः ।

गु० तीयेसमन्वेतव्यत्वापत्तेरितिभावः । ननुतृतीयेसमन्वेतव्यंद्युभ्वाद्यायतनत्वंनास्पष्टं । जायमानत्वादिलिंगसाहित्येनस्पष्टत्वादित्यतआह ॥ **तत्रेति** ॥ **अत्रापीति** ॥ अर्भकौकस्त्वादिलिंगसाहित्येनसर्वगतत्वस्यापिजीवादौस्पष्टत्वंस्यादितिभावः । किंचद्युभ्वाद्यायतनत्वापेक्षयामनोमयत्वादेरस्पष्टत्वाभावेनतस्यतृतीयएवसमन्वेतव्यत्वं । नतुद्वितीये । नचतस्यकथंस्पष्टत्वमितिवाच्यं । स्वरूपेणब्रह्मलिंगसाहित्येनवान्यत्रास्पष्टत्वादित्याह ॥ **प्रत्युतेति** ॥ चतुर्थपादार्थमपिदूषयति ॥ **तत्तदिति** ॥ तत्प्रतिपादनच्छायानुसारिणानस्पष्टत्वलिंगत्वं । येनस्पष्टलिंगसमन्वयप्रतिपादकद्वितीयेंतर्भावः । नाप्यस्पष्टलिंगानि । येनतृतीयेंतर्भावः । किंतूभयविलक्षणानि । तथाचनकोपिदोषइत्यतउक्तं **परस्परेति** ॥ परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनांतरीयकत्वेनोभयवैलक्षण्यस्यव्याहतत्वादितिभावः । नन्वव्यक्तात्पु

SGDF
Sri Gargeshwari Digital Foundation

प्र० धेनतृतीयप्रकाराभावात् । तथाचतदुभयविधवाक्यविचारःप्रागेवकृतइतिभावः । प्रकारांतरमाशंकते ॥ **नन्विति** ॥ अधिकरणान्युत्तरत्रस्पष्टानि । अस्पष्टत्वंव्यनक्ति ॥ **तथाहीति** ॥ अन्यथापदस्यार्थांतरमुपेत्यपरोक्तत्रिपाद्यामवांतरपादोपाध्यंतरमप्यनूद्यनिराह ॥ **यच्चेति** ॥ ब्रह्मणइतिशेषः ॥ **अतत्कार्येति** ॥ ब्रह्माकार्यंब्रह्माशरीरंवस्तुनेत्युच्यतइत्यर्थः । यद्येकैकगुणबोधकत्वंपादार्थस्तर्ह्येकैकाधिकरणेनैवतत्सिद्धे

ननुतत्तत्प्रतिपादनच्छायानुसारित्वंनामस्पष्टतरपूर्वपक्षहेतुकत्वमितिचेन्न । चतुर्थपादे"आनुमानिक"मित्यस्यविषये "महतःपरमव्यक्तमव्यक्तात्पुरुषःपर"इतिवाक्ये "ज्योतिरुपक्रमा"दित्यस्यविषये "अजा"मित्यादिवाक्ये "नसंख्योपसंग्रहा"दित्यादेर्विषये "यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः । तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृतं"इत्यादिवाक्येचपूर्वपक्षहेतोरस्पष्टत्वात् । तथाहि । नतावत्तत्रप्रधानमस्तीत्येवपूर्वपक्षः । तस्यसिद्धांतेपिसत्त्वात् । किंत्वीश्वरानधीनंतदस्तीति । नचोक्तविषयवाक्यईश्वरानधीनंप्रधानादिकमस्तीत्यत्रस्पष्टोहेतुरस्ति । यच्चोक्तंद्वितीयेसर्वशरीरत्वं तृतीयेसर्वात्मकत्वं चतुर्थेत्वतत्कार्यातच्छरीरवत्त्वाभावःप्रतिपाद्यतइति । तन्न । द्वितीये

गु० रुषःपरइतिवाक्येऽवरत्वस्याजामेकामित्यत्रशुक्लकृष्णात्मकत्वस्ययस्मिन्पंचेत्यत्रबहुरूपत्वस्यचास्पष्टत्वाभावइत्याशंक्याह ॥ **तथाहीति** ॥ अवरत्वादिकंचप्रधानादिकमीश्वराधीनमित्यत्रैवहेतुः । नत्वनधीनत्वइतिभावः । प्रकारांतरेणत्रिपाद्याअसांकर्यंदूषयितुमनुवदति ॥ **यच्चोक्तमिति** ॥ **अतत्कार्येति** ॥ अतत्कार्यं ब्रह्माकार्यं । अतच्छरीरं ब्रह्माशरीरं यद्वस्तुतदभावइत्यर्थः । सर्वशरीरत्वंनामसुखदुःखावच्छेदकत्वरूपंनियम्यत्वरूपत्वंवा । नाद्यः । ब्रह्मणोदुःखरहितत्वेनैतादृशशरीरत्वानंगीकारात् । नांत्यः । तस्यांतर्यामीत्यत्रैवोक्तत्वेनपादार्थत्वायोगात् । तथासर्वात्मकत्वंनामसर्वरूपत्वंवासर्वप्रकारित्वंवा । नाद्यः । तस्यानंगीकारात् । नांत्यः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० रधिकरणांतरवैयर्थ्यमित्याह ॥ **अंतर्यामीति** ॥ व्याप्तौपादोपाधीइत्याह ॥ **अदृश्यत्वादीति** ॥ विषयवाक्यभूतश्रुतिसूत्रयोरननुगुणश्चायंपादोपाधिरित्याह ॥ **श्रुतीति** ॥ चतुर्थपादार्थंनिराह ॥ **अतत्कार्येति** ॥ वियत्पादइत्यर्थः । अतत्कार्यातच्छरीरवस्त्वभावपरत्वेदोषांतरमाह ॥ **चतुर्थस्येति** ॥ मतद्वयदूषणमुपसंहरति ॥ **तस्मादिति** ॥ **तदेतदिति** ॥ मतद्वयदूषणमित्यर्थः । टीकोपलक्षणमिति

"अंतर्यामी"त्यत्रैव "यस्यपृथिवीशरीरं यस्यापःशरीर"मित्यादिनासर्ववस्तूनांप्रत्येकंविशिष्यनियम्यत्वरूपशरीरत्वोक्तेः । तृतीये"द्युभ्वाद्यायतन"मित्यत्रैव "यस्मिन्द्यौ"रित्यादिनासर्वप्रकारित्वरूपसर्वात्मकत्वोक्तेर्द्वितीयतृतीयस्याधिकरणांतरवैयर्थ्यापातात् । द्वितीये"अदृश्यत्वादिगुणक"इत्यादौसर्वशरीरत्वस्य तृतीयेपि"भूमे"त्यादौसर्वात्मत्वस्याप्रतीतेश्च । श्रुतिसूत्रानुसारेणसर्वगतत्वात्तृत्वद्युभ्वाद्यायतनत्वपूर्णत्वाद्यनेकगुणपरत्वसंभवे एकैकस्यपादस्यैकैकगुणमात्रपरत्वायोगाच्च। अतत्कार्यवस्तुनो "नविय"दित्यत्रनिरसिष्यमाणत्वादतच्छरीरत्वस्यच "अंतर्यामी"त्यत्रनिरस्तत्वेनचतुर्थवैयर्थ्यात् । चतुर्थस्यसमन्वयाध्यायासंगतेश्च । तस्मान्नान्योक्तंपादभेदादिकंयुक्तं । तदेतदभिप्रेत्योक्तंभाष्ये"नान्यथातदृष्टे"रिति ॥

गु० तस्यद्युभ्वादीत्यत्रैवोक्तत्वेनपादार्थत्वासंभवादित्याह ॥ **द्वितीयइत्यादिना** ॥ सर्वप्रकारित्वंसर्वविशेषणत्वं ।तद्विवरणरूपत्वाद्वैयर्थ्यमित्यतआह ॥**द्वितीयइति**॥ तथाचाप्रतीयमानत्वान्नपादार्थत्वमितिभावः । किंचास्मदुक्तरीत्याऽनेकगुणपरत्वसंभवएकगुणपरत्वंनयुक्तमित्याह ॥ **श्रुतिसूत्रेति** ॥ तुरीयपादार्थंदूषयति ॥ **अतत्कार्येति** ॥ परोक्तपादभेददूषणमुपसंहरति ॥ **तस्मादिति** ॥ नन्वध्यायोयमनारंभणीयः । प्रयोजनाभावात् । नचसमन्वयसिद्धिरेवप्रयोजनमितिवाच्यं । ॥ २५३ ॥

प्र० भावः। एतेनाद्वैतमतानुरोधेनपादोपाधीन्वर्णयन्कश्चिदपिप्रत्यूढोबोध्यः । एवंपादोपाधीन्स्वाभिमतान्समर्थ्यपराभिमतांश्चनिरस्येदानींश्रुतावेवोक्तस्यसमन्वयस्यव्युत्पादनंव्यर्थमित्यतोध्यायस्यफलमाह ॥ **अत्रचेति** ॥ अस्मिञ्शास्त्रइत्यर्थः । विशिष्यन्यायैःप्रपंचनमादिपदार्थः । अतएवसुधायांश्रुतस्यप्रयोजनस्यन्यायेनोपपादनार्थमाद्यंसूत्रमित्युक्तत्वेनैतच्छंकासमाधिरप्युक्तप्रायइति"सर्वेवेदाआमनंतियत्पदंत्विति हिश्रुति"रित्येतद्व्याख्यावसरेपृथगेतच्छंकासमाधीद्वावपिनोक्ताविति भावः ॥ **यथेति** ॥ तत्तत्कर्मवाक्योपात्तानामग्निहोत्रादिशब्दानांधर्मेप्रामाण्यादिप्रकारापेक्षायामैतरेयादौसएषइत्यादियज्ञविभाजकवाक्येषुनामधेयत्वेननिर्देशेसत्यपि तन्निर्वाहायबाधकोद्धारादिनाव्यवस्थापनार्थमाद्याध्यायचतुर्थपादारंभोयथापूर्वतंत्रेतथात्रापीत्यर्थः । सोमशब्दोयद्यपिद्रव्यवचनः तथापि "अव्यक्तासुतसोमस्ये"त्यादाविवलक्षणयाकर्मवि

अत्रच "सर्वेवेदायत्पदमामनंती"त्यादिश्रुत्युक्तस्यापिसमन्वयस्यबाधकोद्धारादिनास्थापनार्थमयमध्यायःसफलः । यथा "सएषयज्ञःपंचविधोग्निहोत्रंदर्शपौर्णमासौचातुर्मास्यानिपशुःसोम"इत्यादिश्रुतिसिद्धाग्निहोत्रादिपदनामधेयत्वस्थापनार्थंनामधेयपादः ॥

गु० तस्यसर्वेवेदाइत्यादिश्रुत्यैवप्रमितत्वात् । नहिश्रौतेर्थेकश्चिदपिप्रतिपद्यतइत्यतआह ॥ **अत्रचेति** ॥ तथाचाध्यायस्यसाक्षात्समन्वयप्रतिपादकत्वेपिश्रुत्युक्तसमन्वयेबाधकोद्धारेणतत्स्थापकत्वान्नवैयर्थ्यमितिभावः । यद्वा एवंपरोदीरितपादार्थंतत्क्रमंचानूद्यदूषयित्वास्वमतेनपदार्थमुक्त्वातत्क्रमश्चव्युत्पादितः । इदानीमध्यायस्यसाफल्यंदृष्टांतपूर्वकमुपपादयति ॥ **अत्रचेति** ॥ आदिपदेनसाधकांतरोक्तिग्रहणं । टीकोक्तसंगतिपंचकंभाष्योक्त्यनुक्तिघटकोपाध्यवच्छेदेनदर्शयितुमुपलक्षितसंग

SGDF Sri Gangadhar Digital Foundation

प्र० षयत्वेननिर्देशइतिध्येयं । ''नन्वत्रान्यन्यप्रसिद्धेत्यादिसंगतिटीकांविवृण्वानोभाष्यटीकाभ्यांमिलित्वोक्तं संगतिपंचकंसंगृह्णाति ॥ **शास्त्र इति** ॥ अंतर्भावानंतर्यरूपवैलक्षण्यसूचनायभिन्नविभक्त्यानिर्देशः । प्रायेणेत्यस्यकृत्यंवक्ष्यति । यतिभंगस्यकाव्यएवदोषत्वंनशास्त्रइत्युक्तं प्रमेयदीपिकायां । उत्तरंतुश्रुत्येत्यादिनोक्तं । अधिकरणेष्वित्युक्त्याऽध्यायानांपादानांचसंगत्यंतरंनभ्रमितव्यमित्याह ॥ **अध्याययोरिति** ॥ तर्हि भाष्येसंगतिपंचकंकुतोनोक्तमित्यतआह ॥ **तत्राद्येति** ॥ **द्व्यध्याय्यामिति** ॥ अध्यायद्वयस्यावांतरार्थविवक्षयैकार्थत्वेनैक्यंविवक्षित्वातत्रत्याधिकरणानांतदंतर्भावोबोध्यइत्यर्थः । एवंत्रिपाद्यांद्विपाद्यामित्यपिबोध्यं । ''तद्धितार्थोत्तरपदसमाहारेचे''तिसमासे''संख्यापूर्वोद्विगु''रि

शास्त्रेध्यायेतथापादेश्रुत्याधिकरणेनच । संगतिःपंचधाप्रोक्तासर्वाधिकरणेष्वपि ॥ १ ॥
तत्रचाद्यत्रिकंप्रायेणांतर्भावात्मकंमतं । उत्तरंतुद्वयंप्रोक्तमानंतर्यात्मकंसदा ॥ २ ॥
अध्याययोःपादयोरप्यानंतर्यात्मिकैवहि । तत्राद्यत्रितयंस्पष्टमस्पष्टंतुपरंद्वयं ॥ ३ ॥
द्व्यध्याय्यांचत्रिपाद्यांचद्विपाद्यांचापिसंगतिः । ऊहनीयायथायोगमितिसंगतिसंग्रहः ॥ ४ ॥

गु० त्यंतराणिचाह ॥ **शास्त्रइत्यादिना** ॥ शास्त्रइत्यादिसप्तमीतृतीयार्थे । अपिरभिव्याप्तौ । एवंचसर्वाण्यधिकरणान्यभिव्याप्येत्यर्थः । नचसर्वशब्दादेवतल्लाभइति वाच्यं । सर्वंघृतंविलीनमित्यादाविवसर्वशब्दसंकोचस्यापिसंभवादितिभावः । ननुपंचविधापिसंगतिरेकरूपैवकिंनेत्याह ॥ **तत्रचेति** ॥ देवताधिकरणादावध्याय पादसंगत्योरभावात्तदभिप्रायेणप्रायेणेत्युक्तं । नन्वध्यायपादयोरंतर्भावरूपंसंगत्यभावात्कासंगतिरित्यतआह ॥ **अध्याययोरिति** ॥ ननुतर्हिटीकादावाद्यंसंगति

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिद्विगुसंज्ञायां“द्विगो”रितिङीष्प्रत्ययेरूपमितिध्येयं ॥ **पेटिकेति** ॥ केषांचिदधिकरणानामवांतरविवक्षयैकार्थत्वेनैक्यंविवक्षित्वातत्समुदायेतत्रत्यस्यैकैकस्यतत्रसंगतिरित्यर्थः ॥ **नसार्वत्रिकीति** ॥ यत्रास्तितत्रवक्ष्यामइतिभावः । ननुश्रुत्यधिकरणेनचेत्ययुक्तं । तयोःपरस्परपरिहारेणानुपलंभेनैकत्वादित्यतआह ॥ **तत्तदिति** ॥ एतेन“श्रुत्यधिकरणसंगतीदर्शयती”तिटीकास्थंद्विवचनंसमर्थितंबोध्यं । प्रायेणेत्यस्यव्यावर्त्यमाह ॥ **ईक्षतीति** ॥ पंचाधिकरण्याइत्यर्थः । आदिपदेनाद्यपादेनेतिग्राह्यं । उत्तरंत्वितिश्लोकंव्याख्याति ॥ **अधिकरणस्येति** ॥

पेटिकासंगतिस्तुनसार्वत्रिकी । तत्तदधिकरणसंगतेस्तत्तदधिकरणविषयवाक्यभूतश्रुतिसंगत्याऽविनाभावएवनत्वभेदइतिसापृथक् । ईक्षत्यधिकरणादेःसमन्वयाध्यायादिनासंगतेरानंतर्यरूपत्वेनांतर्भावरूपत्वाभावात्तस्याःप्रायिकता । अधिकरणस्याधिकरणांतरेपादस्यपादांतरेऽध्यायस्यवाध्यायांतरेंतर्भावाभावादानंतर्यमेवंनियतं ।

गु० त्रयंकिंनप्रदर्श्यतइत्यतआह ॥ **तत्राद्येति** ॥ ननुपंचविधसंगतिप्रदर्शनवत्पेटिकासंगतिरपिकिंनप्रदर्श्यतइत्यतआह ॥ **पेटिकेति** ॥ तथाचासार्वत्रिकत्वान्नसाप्रदर्श्यतइतिभावः । ननुसंगतिःपंचधेत्ययुक्तं । श्रुत्यधिकरणसंगत्योरैक्यादित्यतआह ॥ **तत्तदधिकरणेति** ॥ यत्राधिकरणसंगतिःतत्रश्रुतिसंगतिरित्यविनाभावः । नचश्रुतिसंगत्यैवाधिकरणसंगतेरपिलाभान्नतस्याःपार्थक्यमितिवाच्यं । उत्तराधिकरणविषयभूतश्रुतेःपूर्वाधिकरणविषयवाक्येनसंगतिःश्रुतिसंगतिः पूर्वाधिकरणस्थेनयेनकेनचित्सूत्रेणसंगतिरधिकरणसंगतिरितितयोर्भेदइतिभावः । अध्याययोःपादयोरप्यानंतर्यात्मिकैवसंगतिरितिसंग्रहउक्तं । तत्रकिंनिमित्तं । अंतर्भावात्मिकापिसंगतिःकिंनस्यादित्यतस्तत्रनिमित्तमाह ॥ **अधिकरणस्येति** ॥ तत्राद्यत्रितयंस्पष्टमित्यादिनात्रितयद्विकयोःस्पष्टत्वास्पष्टत्वेसंग्रहउक्ते । तयोःप्रयोजन

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुतेःश्रुत्यंतरइत्यपिग्राह्यं । नियतमितिसदापदार्थः । तत्राद्यत्रितयमित्युक्तेरुपयोगमाह ॥ **तत्रेति** ॥ एतेन"अस्तुशास्त्राध्यायपादसंगति"रितिटीका उत्तरत्रप्रतिनयंतत्रितयसंगत्युक्तिपरटीकाचनभाष्यविरुद्धा । संगतिपदंचांतर्भावसंगत्यर्थकं । "श्रुत्यधिकरणसंगती"इत्यत्रस्थसंगतिपदंचानंतर्यसंगत्यर्थकमितिव्याख्यातंभवति । व्द्यध्याय्यामित्येतद्विवृणोति ॥ **एवमिति** ॥ इदमित्थंकर्तव्यमित्युक्तिरुपदेशः । तद्वदिदंकर्तव्यमित्यतिदेशः । तदुभयप्रमाणकत्वाद्धर्मस्यद्वैराश्येनयथाषट्कद्वयव्यवस्थातथेत्यर्थः ॥ **इत्युक्तत्वादिति** ॥ संजातेवस्तुनिर्णये । किंमयाकार्यमित्येवस्याद्बुद्धिरधिकारिणां"इत्युपासनापादउक्तत्वादित्यर्थः ॥ **तत्स्थेति** ॥ सिद्धरूपविषयभूतब्रह्मप्रतिपादकत्वेनैकीभूतपूर्वाध्यायस्थानां यथायोगं साक्षात्परंपरयावाताद्दशवस्तुप्रतिपादनेनतत्रांतर्भावोध्येयः । तथासाधनफललक्षणसाध्यरूपैकार्थत्वेनेकीभूतोत्तरा

तत्रशास्त्राध्यायपादसंगतीनांसर्वत्रस्पष्टत्वाद्भाष्येक्वापितदनुक्तिः । श्रुत्यधिकरणसंगतीत्वस्पष्टेइतितेसर्वत्रभाष्येवक्ष्येते । एवंपूर्वतंत्रउपदेशातिदेशविषयत्वेनपूर्वोत्तरषट्कद्वयवदिहाप्यनुव्याख्याने "समन्वयाविरोधाभ्यांसंजातेवस्तुनिर्णये" इत्युक्तत्वात्सिद्धरूपविषयसाध्यरूपसाधनफलप्रतिपादकत्वेनपूर्वोत्तरद्विकभेदसंभवात्तत्स्थाधिकरणानांयथायोगंद्विकसंगतिरूह्या ।

गु० माह ॥ **तत्रेति** ॥ ननुश्रुत्यधिकरणसंगत्योरपिस्पष्टत्वात्तेअपिनवक्तव्येइत्यतआह ॥ **श्रुत्यधिकरणसंगतीइति** ॥ नन्वध्यायद्वयस्यकेनचिदर्थविशेषणक्रोडी

प्र० ध्यायद्वयस्थानांयथायोगंताद्दशवस्तुबोधनेनतत्रसंगतिर्ध्येयेत्यर्थः । त्रिपाद्यामित्येतत्सद्दष्टांतंविवृणोति ॥ **एवमिति** ॥ तत्संगतिरप्यूह्येत्यन्वयः । यथांत्याध्यायेकृत्स्नवेदस्याद्यपादेनप्रामाण्येसिद्धेप्यर्थवादमंत्रनामधेयात्मकभागस्यसाक्षाद्धर्मबोधकत्वायोगेनधर्मबोधेविनियोगाभावादप्रामाण्यमाशंक्य अर्थवादस्यस्तावकत्वेनमंत्राणांस्मारकत्वेननामधेयस्यधात्वर्थावच्छेदकतयाधर्मबोधेविनियोगात्प्रामाण्यमित्यर्थवादस्मृतिनामधेयरूपपादत्रयस्यैकार्थत्वेनत्रिपादीत्वं तथात्रापीत्यर्थः । यद्यपिस्मृतिपादेनवेदभागप्रामाण्योक्तिः तथापितत्प्रामाण्यार्थमेवस्मृतिप्रामाण्यनिरूपणाद्वाधर्मप्रमाणचिंताधिकारात्स्मृत्यादीनामपिधर्मेप्रामाण्यमुच्यतइतिवात्रिपाद्यंतर्भावोक्तेरितिभावः ॥ **तत्स्थेति** ॥ त्रिपादीस्थेत्यर्थः । द्विपाद्यामित्येतद्विवृणोति ॥ **तथेति** ॥ एवमंतर्भावसंगतिमनेकधानिरूप्यानंतर्यरूपापितथेत्याह ॥ **आक्षेपिकीति** ॥ व्याचष्टे

एवंपूर्वतंत्रेऽविनियोगसमुत्थाप्रामाण्यनिरासकत्वेनद्वितीयादिपादत्रयस्यैकार्थत्वेनत्रिपादीत्ववदिहाप्यनुव्याख्याने "महासमन्वयेतस्मिन्नाधिकारोखिलस्यही"त्युक्तत्वेनचतुर्थपादस्यासर्वाधिकारिकतयाऽऽद्यादिपादत्रयस्यसर्वाधिकारिकत्वेनत्रिपादीत्वसंभवात्तत्स्थाधिकरणानांतत्संगतिः । तथाऽऽद्यादिपादद्वयस्यान्यत्रप्रसिद्धविषयत्वेनद्विपादीत्वसंभवात्तत्रत्याधिकरणानांतत्संगतिरप्यूह्या । आक्षेपिक्यातिदेशिक्यावुपोद्घातापवादते । प्रसंगश्चेत्यादिरूपासाचानंतर्यलक्षणा ॥ १ ॥

गु० करणभावात्कथमध्यायइत्युक्तमित्यतआह ॥ **एवंपूर्वतंत्रइति** ॥ त्रिपाद्यामित्युक्तपादत्रयसंगतिमुपपादयति ॥ **एवमिति** ॥ विनियोगोविधिः तत्समुत्थायाऽप्रामाण्यशंका तन्निरासकत्वेनेत्यर्थः ॥ **द्वितीयादिपादत्रयस्येति** ॥ प्रथमाध्यायस्थद्वितीयादिपादत्रयं तस्येत्यर्थः । द्विपाद्यामित्युक्तंविवृणोति ॥ **तथेति** ॥ नन्वानंतर्यलक्षणसंगतेःकार्यकारणभावरूपतयाऽध्यायपादाधिकरणानांकार्यकारणभावाभावेनानंतर्यात्मिकैवसंगतिरध्यायपादानामितिकथमुक्तिरित्यतआह ॥ आक्षे

SGDF Sri Gangeshwari Digital Foundation

प्र० ॥ आनंतर्येति ॥ आदिपदेनप्रत्युदाहरणबुद्धिस्थानादिरूपाग्राह्याः । आसांलक्षणसंग्रहस्तु"पूर्वमाक्षिप्यतेयत्रतत्रसाक्षेपकीमता । कृत्वाप्यभ्यधिकाशंकांपूर्वमेवातिदिश्यते । संगतिःकथितासद्भिःकाचित्तत्रातिदेशिकी । चिंतांप्रकृतसिद्ध्यर्थामुपोद्धातंप्रचक्षते । पूर्वसिद्धांततोयत्रपूर्वपक्षःप्रवर्तते । तत्रापवादकीप्रोक्तासंगतिर्न्यायवेदिभिः । प्रसंगाच्चिंत्यतेयत्रतत्रप्रासंगिकीमता । पूर्वन्यायात्ययोयत्रप्रत्युदाहरणातुसा । बुद्धिस्थंचिंत्यतेयत्रबुद्धिस्थानात्मिकातुसा" इत्यादिस्तंचचूडामण्युक्तोबोध्यः । ननुसुधायांदेवताधिकरणसंगत्युक्तिप्रस्तावे"संगतिस्तावद्विविधाभवति । अंतर्भावलक्षणानंतर्यलक्षणाचेति । उत्तरापिषोढाभवति । प्रसंगोपाद्धातावसरप्राप्तिकारणकार्यतैककार्यत्वभेदा"दित्येवंषाड्विध्योक्तेः कथमेवमुक्तिरितिचेत् आक्षेपिकादेरेककार्यत्वादिरूपसंगतावंतर्भावेनराशीकरणेनषाड्विध्योपपत्तेरविरोधऊह्यः ॥ **आसामिति** ॥ स्वरूपकीर्तनपूर्वकंतत्रतत्रोदाहरणनिष्ठतयासंगतेर्वक्ष्यमाणत्वादितिभावः । एवंद्विविधांसंगतिंनिरूप्यास्याधिकरणस्यटीकोक्तंपादांतर्भावमनु

आनंतर्यलक्षणापिसंगतिराक्षेपिकी आतिदेशिकी औपोद्धातकी आपवादिकी
प्रासंगिकी इत्यादिरूपेणबहुविधा । आसांस्वरूपमुत्तराधिकरणेषुव्यक्तंभविष्यति ।

गु० पकीति ॥ आदिपदेनप्रत्युदाहरणबुद्धिस्थावसरहेतुहेतुमद्भावलक्षणसंगतिपरिग्रहः । तथाचानंतर्यलक्षणसंगतेरनेकविधत्वेननोक्तमयुक्तमितिभावः । नन्वासांस्वरूपंकीदृशमित्यतआह ॥ **आसामिति** ॥ अस्माभिःसंक्षेपतएषांलक्षणानिप्रदर्श्यंते । यत्रपूर्वार्थआक्षिप्यतेतत्राक्षेपिकीसंगतिः । यत्राधिकाशंकांकृत्वापूर्वन्यायातिदेशस्तत्रातिदेशिकीसंगतिः । प्रकृतसिद्ध्यर्थाचिंतोपोद्धातः । पूर्वसिद्धांततोयत्रपूर्वपक्षःप्रवर्ततेतत्रापवादिकी । प्रसंगाद्यत्रचिंत्यतेसाप्रासंगिकी । पूर्वन्यायात्ययोयत्रसाप्रत्युदाहरणसंगतिः । यत्रबुद्धिस्थंचिंत्यतेसाबुद्धिस्थलक्षणेति । नन्वानंदमयनाम्नइतिटीकायामानंदमयशब्दस्यनामत्वमुक्तं । तदयुक्तं । प्रयोजनाभावादित्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० पपत्तिनिरासेनसाधयितुमाह ॥ अत्राधिकरणइति ॥ तत्रयोगरूढत्वेननामत्वंवक्तुंकेवलयौगिकत्वंकेवलरूढत्वंवानूद्यनिराह ॥ **तत्रकेचि दिति** ॥ **अन्येत्वितिच** ॥ **उद्भिदिति** ॥ आद्येचतुर्थपादे“अपिवानामधेयंस्या”दित्याद्यनये“उद्भिदायजेतपशुकाम”इत्युदाहृत्य उद्भिच्छब्दः किंगुणवाच्युतकर्मनामेतिसंशये व्रीह्यादिशब्दवत्कचिद्रूढ्यभावेपिखनित्रादावूर्ध्वंभिनत्तीत्यवयवशक्तियोगात्प्रवृत्त्यौपयिकत्वेनसाफल्याच्च

अत्रटीकायांपादसंगत्यर्थं“आनंदमयनाम्न”इत्यानंदमयशब्दस्यनामत्वमुक्तं । तत्रकेचिदुद्भिदग्निहोत्रादिशब्दानामिवानंदमयादिशब्दानांयौगिकत्वेपिपूर्वपक्षेपिकोशादिनामत्वं । संतिह्यन्वर्थाअपिसंज्ञाइत्याहुः । तन्न । अत्राभिप्रेतस्यरूढत्वरूपनामत्वस्ययौगिकेनुपपत्तेः । अन्येत्वानंदमयादिशब्दाःकोशेषुरूढाः । “आनंदमयामेशुध्यंता”मित्यादौकोशेषुप्रयोगबाहुल्यादित्याहुः । तदपिन । पूर्वपक्षेविकारेसिद्धांतेचप्राचुर्येयौगिकत्वेनकेवलरूढत्वायोगात् ।

गु० आह ॥ **अत्रेति** ॥ ननूक्तमप्यानंदमयशब्दस्यनामत्वमयुक्तं । यौगिकत्वेनतदसंभवादर्थविशेषेरूढेरभावाच्चेत्यतःकैश्चिदुक्तंसमाधानंदूषयितुमनुवदति ॥ **तत्रकेचिदिति** ॥ ननुयौगिकत्वेनामत्वंक्वाप्यदृष्टमित्यतउक्तं **उद्भिदिति** ॥ ननुदृष्टमपियौगिकानांनामत्वंकथंघटतइत्यतआह ॥ **संतिहीति** ॥ अन्वर्थाअपिसर्वनामसंज्ञादयोदृष्टाइत्यर्थः । अत्रटीकायांयौगिकमात्रभिन्नत्वरूपमेवनामत्वमभिप्रेतं । तस्यचानंदमयेऽसंभवान्नोभयात्मकत्वंयुक्तमित्याह ॥ **अत्राभिप्रेतस्येति** ॥ नचयानियोगरूढानितानिनामानीत्युभयात्मकत्वंयुक्तमितिवाच्यं । तथात्वेसर्वेषामपिशब्दानांमहायोगविद्वद्रूढिभ्यामुभयात्मकत्वेननामलिंगभेदोनस्यादितिभावः । नन्वानंदमयादिशब्दाःकेवलरूढाएव । एवंचटीकोक्तनामत्वंसंगच्छते । नचरूढिज्ञापकाभावात्कथंरूढत्वमितिवाच्यं । आनंदमयामेशुध्यंतामित्यादौप्रयोगबाहुल्यस्यैवज्ञापकत्वादितिकेचित्समादधुः । तद्दूषयितुमनुवदति ॥ **अन्येत्विति** ॥ केवलरूढत्वस्यपूर्वपक्षिसिद्धांतिनोरसंमतत्वादयुक्तंतदित्याह ॥ **पूर्वपक्षइति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ज्योतिष्टोमेफलायखनित्रादिरूपगुणविधिर्गुणविशिष्टकर्मांतरविधिर्वेतिप्राप्ते पदश्रुत्याधात्वर्थविधिसंभवेवाक्येनगुणविध्ययोगान्मत्वर्थलक्षणाप्रसंगेनकर्मांतरविध्ययोगाच्चफलोद्देदनसाधनतयाकर्मण्यवयवशक्तिसंभवेननामत्वमितिसिद्धांतितं । तथातत्रैवतृतीयेधिकरणे''ग्निहोत्रंजुहोतिआघारमाघारयती''त्यग्निहोत्रशब्दआघारशब्दश्चकिमग्न्याख्यदेवतादिरूपगुणवचनःकिंवाकर्मनामेतिसंशये अग्निशब्दस्यप्रसिद्धतयाअग्नयेहोत्रमस्मिन्नितिबहुव्रीहिणामत्वर्थलाभेनलक्षणानापत्तेस्समासांतर्वर्तिन्याऽग्नयइतिचतुर्थ्याऽग्नेर्देवतात्वप्रतीतेश्च नामत्वेदेवताभावेनारूपत्वादुपसर्जनाग्निविशिष्टहोमविधिरितिप्राप्ते श्रुत्याधात्वर्थविधिसंभवेवाक्यार्थविध्ययोगात् ''अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहे''तिमंत्रवर्णादग्निप्राप्तेःकर्मनामैवाग्निहोत्रपदमितिसिद्धांतितं । एवमाघारशब्देपिध्येयं । तत्रयथोद्भिदादिशब्दानांयौगिकत्वेपिकर्मनामत्वंतथेत्यर्थः । योगरूढत्वेपिनामत्वमुपेत्यप्रकारांतरेणसंगतिसंभवंनिराह ॥ **अपरेत्विति** ॥ **चतुर्विधेति** ॥ पाशुपतादिस्मृतीनांसमयरूपत्वेनस्वोक्तार्थेसंमतित्वेनश्रुतियुक्ति

अपरेतु आनंदमयादिशब्दायोगरूढाः । एवंचयान्यापाततोरूढान्येवतानिनामानीतिपक्षआनंदमयादेर्नामत्वाभावेपि यान्यापाततोरूढानितानिनामानियानितुयौगिकानितानिलिंगानीतिपक्षआनंदमयादिशब्दानामुभयात्मकत्वं । एवंचयथा''स्मृत्यनवकाशदोषप्रसंग''इत्यत्रस्मृतिविरोधपरिहारस्यचतुर्विधविरोधपरिहारात्मकत्वेनैकैकविरोधपरिहारपरेषुपादेष्वसंगतेः पूर्वपश्चाद्वाकर्तव्यत्वेप्रथमातिक्रमेकारणाभावात्पूर्वंनिवेशः

गु० ननुटीकोक्तंनामत्वंकेवलनामत्वमेवन । किंतुयौगिकत्वेसतिनामत्वमेव । नचतर्हिपादासंगतत्वात्प्रथमंनिवेशोनस्यादितिवाच्यं । स्मृत्यधिकरणन्यायेनप्रथमंनिवेशोपपत्तेरितिकेचित्समादधुः । तद्दूषयितुमनुवदति ॥ **अपरेत्विति** ॥ किमुभयसमन्वयरूपत्वादस्यपादद्वयेपिसर्वथासंगतिर्नास्तीत्याशयः किंवा एकैकस्मिन्नेवनिष्क्र

प्र० कथनेनचचतुस्स्वरूपत्वादित्यादिनावक्ष्यमाणदिशेतिभावः ॥ **अस्येति** ॥ अस्याधिकरणस्यनामलिंगोभयसमन्वयपरत्वेनेत्यर्थः । वक्ष्यमाणरीत्येत्युक्तं । तदाह ॥ **तस्मादिति** ॥ उक्तरीत्यापक्षत्रयसंभवादित्यर्थः । इहापि नामपादेपि । अत्रैवविचारेहेतुमाह ॥ **प्रथमेति** ॥ **यथेति** ॥ तथैवतत्रवक्ष्यमाणत्वादितिभावः । एतेनास्मिन्पक्षेनामत्वस्यापिसत्वाट्टीकायांनामत्वोक्तिस्तत्वप्रदीपेलिंगत्वोक्तिश्चयुक्ता । टीकोक्तसंगतिश्चो

तथास्योभयसमन्वयपरत्वेनपादद्वयेऽसंगतेःपूर्वंपश्चाद्वाकर्तव्यत्वेपूर्वंनिवेशइत्याहुः । तन्न । वक्ष्यमाणरीत्यादृष्टांतस्यदार्ष्टांतिकस्यचतत्तत्पादसंगतिसंभवेतद्बहिर्भावायोगात् । तस्मादानंदमयादीनामुक्तरीत्योभयात्मकत्वात्पादद्वयसमन्वयसंगतिसंभवेनेहापिविचारसंभवात्प्रथमातिक्रमेकारणाभावाच्चाद्यपादेतत्समन्वयः । यथास्मृतिविरोधपरिहारस्याद्यपादेनिवेशः तद्वद्यान्यापाततोरूढिरहितानितानिलिंगानि । यानितुतद्विपरीतान्यापाततोरूढानिवातानिनामानीतिपक्षआनंदमयादिशब्दानां

गु० ष्यसंगतिर्नास्तीति । नाद्यइत्याह ॥ **वक्ष्यमाणरीत्येति** ॥ द्वितीयमभ्युपगमेनोपसंहरति ॥ **तस्मादिति** ॥ यद्वानामलिंगान्यतरमात्रस्यपादार्थत्वात्पादद्वयासंगतिरित्येतन्निराचष्टे ॥ **तन्नेति** ॥ निरवधारणान्यतरसमन्वयस्यपादार्थत्वादुभयत्रसंगतिरित्येतदपिनिराचष्टे ॥ **तन्नेति** ॥ अत्रकेषांचित्पक्षेकेवलयौगिकत्वमभिप्रेतं । अन्येत्वितिपक्षेचकेवलरूढत्वमभिप्रेतमितिनदूषणासंगतिः । अतएवचापरेत्वानंदमयादिशब्दाःयोगरूढाइत्युत्तरग्रंथःसंगच्छतइतिध्येयं । अत्रमयट्शब्दरूपावयवरूढ्यनपेक्षायांगुणिसामान्यवाचित्वं । तदपेक्षायामर्थविशेषरूढत्वमितिनकश्चिद्विरोधइत्याहुः । आनंदमयादिशब्दानामुभयात्मकत्वमाश्रित्यपादांतरसंगतत्वेप्याद्यपादेनिवेशस्समर्थितः । इदानींपक्षांतरमाश्रित्यसमन्वयकथनमयुक्तं । तत्वप्रदीपेआनंदमयाधिकरणेलिंगविचारादित्यानंदमयत्वस्यलिंगत्वेनसमन्वयोक्तेरित्य

SGDF Sri Gargeshwari Digital Foundation

प्र० क्तरूपेणव्याख्यायेतिभावः ॥ **नामतैवेति** ॥ तथाचटीकायांकेवलनामत्वोक्तिर्युक्तासंगतिश्चसुलभेतिभावः ॥ **योज्यइति** ॥ "आनंदमय नामही"त्यनुव्याख्यानमपियौगिकनामाभिप्रायंव्याख्येयमितिभावः । "आनंदादिगुणवाचिनामानंदमयादिगुणिवाचिनांशब्दानांसमन्वय सिद्ध्यर्थमानंदमयाधिकरणेलिंगविचारा"दितितत्वप्रदीपोक्तामेवसंगतिमाह ॥ **तथाचेति** ॥ **यथेति** ॥ उक्तमधिकरणशरीरमाद्यसूत्रे । अस्याधिकरणस्यरूपालाभेनस्वतंत्रयागविधायकत्वासंभवादाग्नेयादित्रिकत्रिकानुवादकंविद्वद्वाक्यमितिमुखतोव्युत्पादनार्थत्वेपिषड्यागाःकरणं

नामतैव । तत्वप्रदीपेतु"आनंदमयाधिकरणेलिंगविचारा"दित्यानंदमयादेर्लिंगत्वमेवोक्तं । तदनुसारेण"आनंदमयनाम्न"इतिटीकायामानंदमयनामशब्दआनंदादिनामपरोवायोज्यः । तथाचानंदादिनामसमन्वयस्यापीहसमर्थनात्फलतःपादसंगतिः । यथापूर्वतंत्रेपौर्णमास्यधिकरणस्यमुखतोविद्वद्वाक्यमनुवादकमितिव्युत्पादकत्वेपिकरणेतिकर्तव्यताभेदस्यफलितत्वेनफलतोभेदलक्षणसंगतिः ।

गु० तआह ॥ **तत्वप्रदीपेत्विति** ॥ नचलिंगत्वेसतिनामत्वस्यस्वीकृतत्वाल्लिंगत्वकथनंनविरुद्धमितिवाच्यं । उभयात्मकत्वंसत्यसाधारण्येनलिंगत्वकथनस्यायुक्तत्वादितिभावः । विरोधपरिहारःकथमित्यतआह ॥ **तदनुसारेणेति** ॥ लिंगसमन्वयपरश्चेत्यादौसंगतिरित्यतआह ॥ **तथाचेति** ॥ ननुफलतःपादसंगत्युक्तिरयुक्ता । शब्दानांप्रथमेपादेगुणसामान्यवाचिनां । गुणवाचिनांचप्रथममित्यनुव्याख्यानेगुणवाचकशब्दसमन्वयस्योक्तत्वेननामसमन्वयस्योक्तत्वादितिचेन्न । तथापि सूत्रकारेणमुखतोनुक्तत्वादित्याशयेनफलतइत्युक्तत्वान्नविरोधइतिभावः । ननुतदर्थस्यमुखतोनुक्तत्वेपिफलतस्तदर्थस्योक्तत्वेनसंगतिःकुत्राप्यदृष्टेत्यतआह ॥ **यथेति**॥ पौर्णमास्यधिकरणस्ययएवंविद्वान्पौर्णमासींयजतइत्यादिविद्वद्वाक्यंषड्यागानुवादकमित्यर्थव्युत्पादकत्वेनकर्मभेदव्युत्पादकत्वाभावादसंगतिरितिप्राप्ते मुखतोनुवादकत्वे

SGDF Sri Gargeshwari Digital Foundation

प्र० समिदादिस्त्विवतिकर्तव्यतेतिभेदस्यफलतोलाभाद्यथाकर्मभेदपराध्यायांतर्भावस्तथात्वापिनामसमन्वयस्यफलतोलाभादत्रांतर्भावाइत्यर्थः । अत्रकश्चिदभ्यासप्रमाणापन्नभेदापवादकतयामुखतएवसंगतिसंभवात्कथंफलतस्संगत्युक्तिः । सापवादकस्यैवभेदशेषप्रयुक्त्यादेस्तत्तदध्यायार्थत्वात् । अन्यथातत्रतत्रेष्ट्यर्थमग्न्याधेयसंपदकर्माप्रयोजकमित्याद्यधिकरणानांसंगत्यापत्तेः । कथंचानेनाधिकरणेनकरणेतिकर्तव्यताभेदसिद्ध्युपन्यासः । तस्याग्नेयादिवाक्येषुद्रव्यदेवताद्यनेकगुणरूपगुणप्रमाणाधीनत्वात् । किंत्वाग्नेयादीनांसमिदादीनांचांगांगिभावोलभ्यते । नचायमेवाध्यायार्थः । तृतीयाभेदापत्तेरिति । तन्नफलतोलभ्यायास्साक्षाल्लक्षणप्रतिपाद्यविषयायास्संगतेरभ्यर्हितायास्संभवआपवादिक्यास्तस्याअनादरणीयत्वादित्याशयात् । करणेतिकर्तव्यताभावस्यभेदव्याप्ततयातदभिप्रायेणभेदफलत्वोक्तेश्चेत्याद्यूह्यं ॥ **यथाचेति** ॥ युक्तिपादे "असदितिचेन्नप्रतिषेधमात्रत्वा"दितिनयेजगत्कारणत्वंविष्णोर्युक्तमयुक्तंवेतिसंशये "यतोवाइमानिभूतानी"त्यादिकारणत्वश्रुतेः कारणं प्रलयेऽसत् वस्तुत्वात् कार्यवदित्यनुमानयुक्तया "असदेवेदमग्रआसी"दित्यादिश्रुत्याऽसत्कारणत्ववादिवादिन्याविरुद्धत्वादयुक्तमितिप्राप्ते असतोनिषेधैकरूपस्यकर्तृत्वोपयोगिज्ञानादेरयोगेनासदेवेतिश्रुतेः सदेवेत्याद्यनेकश्रुतिविरोधेनचविष्णुपरत्वादनुमानस्यनिर्मूलत्वाद्युक्तंकारणत्वमिति

यथाचात्रैवशास्त्रे "असदितिचे"दित्यधिकरणस्यमुखतःश्रुत्यविरोध
व्युत्पादकत्वेपिफलतोयुक्त्यविरोधव्युत्पादकत्वाद्युक्तिपादसंगतिः

गु० पिफलतःकरणेतिकर्तव्यताभेदप्रतिपादकत्वाद्द्वितीयाध्यायसंगतिर्यथेत्यर्थः । ननुतर्ह्यानंदोभ्यासादित्येवसूत्रंकर्तव्यं । एवंसतिसूत्रस्याल्पाक्षरतापिभवति । नचैवं

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्रयथापूर्वपक्षिणास्वोक्तानुमानमूलतयोदाहृतश्रुत्यविरोधेमुखतोव्युत्पादितेयुक्त्यविरोधःफलिष्यतीतितद्विचारस्ययुक्तिविरोधपादेंतर्भावो नतुश्रुत्यविरोधपादे तथेहापीत्यर्थः । उक्तंचतत्राणुभाष्ये"अर्थाद्युक्तिविरोधोनिराक्रियत"इति । अंतरंगदृष्टांतमाह ॥ **यथाचांतरिति** ॥ स्पष्ट मेतदुत्तरत्र । लिंगसमन्वयपक्षमाक्षिप्याह ॥ **यद्यपीति** ॥ शब्दादित्यादिपदेनपुच्छब्रह्मत्वादिग्राह्यं ॥ **तद्योगमिति** ॥ अस्मिन् प्रकरणे । अस्य हिरण्यगर्भादिजीवस्य । तद्योगं तेनानंदमयेनसंबंधं । "एतमानंदमयमात्मानमुपसंक्रामती"त्यादिश्रुतिश्शास्तीत्युक्तानंदमययोगा दिहेतोरित्यर्थः । इत्यादीत्यादिशब्देनहेतुव्यपदेशादि । अस्यनयस्यपूर्वानंतर्यरूपसंगतिंवक्तुमस्याध्यायस्यसमन्वयसूत्रेणागतार्थत्वमाह ॥

यथाचांतरधिकरणस्यमुखतोलिंगसमन्वयव्युत्पादकत्वेपिफलतोनामसमन्वयव्युत्पादक त्वान्नामपादसंगतिः तद्वत् । यद्यप्यानंदादिनामसमन्वयउक्ते आनंदमयादिलिंगसम न्वयोप्यर्थात्सेत्स्यति । पादसंगतिश्चस्वरसाभवति । तथाप्यानंदमयोदाहरणेविकारश ब्दादिपूर्वपक्षबीजस्य तद्योगमित्यादिसिद्धांतहेतोश्चसत्त्वाल्लिंगस्यमुखतःकीर्तनमिति ॥

गु० लिंगसमन्वयःकथमितिवाच्यं । तस्यार्थादेवसिद्धेः । आनंदनामसमन्वयस्यमुखतोव्युत्पादनेनपादसंगतेःस्वरसत्वादित्याशंक्यनिराकरोति ॥ **यद्यपीत्यादिना** ॥ तत्तुसमन्वयादित्यत्रप्रतिज्ञातेसमन्वयेबाधकेप्राप्ते ईक्षतिसूत्रेबाधकमुद्धृतं । इदानींगुणपूर्णत्वसिद्ध्यर्थंसमन्वयोव्युत्पादनीयः । तत्रानंदमयशब्दएवकिमितिप्रद र्श्यते । आकाशादिशब्दानामपिविद्यमानत्वात् । नचसंगतिलोभात्तत्समन्वयोक्तिरितिवाच्यं । संगतेःशब्दांतरेपिसंभवेनप्रथमतएवतत्कथनेविशेषहेत्वभावादित्यत

प्र० **इहेति** ॥ **उपपादनीयइति** ॥ नहिप्रपंचनेनोपपादनंविनासमन्वयादितिप्रतिज्ञामात्रेणार्थसिद्धिरितिभावः । तर्हितदानंतर्यमेवस्यादि त्यतउक्तं **समन्वयहेताविति** ॥ "तदभावेकुतोन्वय"इत्युक्तरीत्याब्रह्मणिशब्दानांशक्त्यभावेवचनवृत्तेरेवाभावापातेनतत्रसमन्वयप्रतिज्ञैवा युक्ता । यस्याउपपादनंस्यात् । संभावितःप्रतिज्ञायाअर्थस्साध्येतहेतुनेत्यादेः । तथाचेक्षतिनयेवाच्यत्वोक्त्यासंभावितस्यसमन्वयस्योपपादनमनं तरप्राप्तमित्यर्थः । एतेनाथब्रह्मस्वरूपनिरूपणइत्यादिटीकाव्याख्याता । अनेनसमन्वयसूत्रस्यास्यचप्रपंच्यप्रपंचकाभावरूपसंगतिरुक्ताभ वति । सुधारीत्याशेषपदोक्तिः । एवमध्यायस्यारब्धव्यत्वेसिद्धेऽस्यनयस्येतरस्मात्प्राथम्येहेतुद्वयमाह ॥ **तत्रेति** ॥ **सर्वापेक्षितेति** ॥ अयं चहेतुः"तत्रानंदादयोगुणाः । ईशस्यैवेतिनिर्णीताःश्रुतियुक्तिसमाश्रया"दित्युपासनापादीयानुव्याख्यानव्याख्यावसरेसुधायां"तत्रानंदमया धिकरणस्याद्यत्वेहेतुंसूचयन्नाहे"त्यवतार्य"सर्वेषुहिश्रुतेषुमूर्धाभिषिक्ताआनंदविज्ञानादयः । अतोमांगलिकआचार्यस्तच्छब्दसमन्वयमादावा

इहसमन्वयसूत्रप्रतिज्ञातसमन्वयहेतौवाच्यत्वईक्षत्यधिकरणेनोक्तेऽध्यायशेषेणप्रतिज्ञात समन्वयउपपादनीयः । तत्रांतराद्यधिकरणानामानंदमयानंतर्येहेतोर्वक्ष्यमाणत्वात्सर्वा पेक्षितानंदप्रदोपासनाविषयपूर्णानंदत्वरूपमहागुणस्यप्रथमंवक्तव्यत्वाच्चानंतरसंगतिः ।

गु० आह॥ **इहेति** ॥ वचनवृत्तिगोचरत्वमात्ररूपवाच्यत्वस्योपक्रमादिप्रमाणकशास्त्रजन्यप्रमागोचरत्वरूपसमन्वयहेतुत्वाद्धेतुहेतुमद्भावलक्षणासंगतिरित्यर्थः । तथाचां तराद्यधिकरणानामानंदमयाधिकरणानंतर्येहेतुप्रयोज्यमेव । आनंदमयस्येक्षत्यधिकरणाव्यवहितानंतर्यमितिभावः । आनंदादयःप्रधानस्येतिसूत्रानुसारि तत्रानंदा

SGDF
Sri Gurgeshwari Digital Foundation

प्र० हे”त्युक्तत्वाल्लब्धः । तत्रैवसुधाया“उत्तराधिकरणेष्वप्येवंक्रमनिमित्तादिकंस्वयमूहनीय”मित्युक्तेःपूर्वेणास्यसंगत्यंगतरंस्वयमुत्प्रेक्ष्याह ॥ यद्वेति ॥ गौणत्वेति ॥ ईक्षणीयस्येतिशेषः ॥ जिज्ञास्यतायामिति ॥ यद्यपिकारणतायामेवसर्वशाखानामैकमत्यरूपंगतिसामान्यमुक्तंटीकायां । तथापितस्यजिज्ञासापर्यंतत्वाज्जिज्ञास्यतायामित्युक्तं । एतच्चजिज्ञासासूत्रस्याप्याक्षेपायोक्तं ॥ ब्रह्मप्रतीति ॥ पुच्छत्वेनोक्तब्रह्मरूपावयवंप्रतीत्यर्थः ॥ पूर्वोक्तेति ॥ गौणसूत्रेणतन्निष्ठसूत्रेणवास्वाव्ययसूत्रेणवागतिसूत्रेणवोक्तस्याक्षेपेणेत्यर्थः । भाष्यएवमनुक्तौव्यवहिते

यद्वा ईक्षत्यधिकरणोक्तआत्मशब्दाद्गौणत्वनिरासोनयुक्तः । अब्रह्मणिगौणात्मन्यानंदमये “एतमानंदमयमात्मान”मितितच्छ्रवणात् । तथा ब्रह्मनिष्ठस्यमोक्षोपदेशोवा“पूर्णमेवावशिष्यत”इतिपूर्णस्यब्रह्मणःस्वाप्ययोवानयुक्तः । ब्रह्मणआनंदमयावयत्वेऽवयविनंविहायावयवनिष्ठायाअवयवपूर्णतायाश्चायोगात् । तथा ब्रह्मणोजिज्ञास्यतायांकारणतायांचयद्गतिसामान्यमुक्तं तदयुक्तं । ब्रह्मप्रत्यवयविनआनंदमयस्य“सोकामयतबहुस्या”मित्यादिनाकारणत्वावगतेःकारणस्यैवजिज्ञास्यत्वनियमाद्दितिपूर्वोक्ताक्षेपेणपूर्वपक्षप्रवृत्तेराक्षेपिकीसंगतिः ।

गु० दयोगुणाइत्याद्यनुव्याख्यानानुसारेणसर्वापेक्षितेति । नकेवलमाकांक्षालक्षणसंगतिसद्भावादानंदमयस्यप्राथम्यं किंत्वाक्षेपसंगतिसद्भावाच्चेत्याह ॥ यद्वेति ॥ ननुतर्हिपूर्वाधिकरणाक्षेपेणेहपूर्वपक्षस्यप्रवृत्तत्वादस्याधिकरणस्यपूर्वाधिकरणेनसहयद्याक्षेपिकीसंगतिस्तर्हिकिमितिभाष्येऽव्यवहितपूर्वाधिकरणेनसंगत्यनुक्तिरित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० नोक्तौचबीजमाह ॥ **भाष्येत्विति** ॥ हेतुविशेषशून्यत्वेहेतुर्विप्रकीर्णेत्यादि ॥ **पूर्वेति** ॥ व्यवहितेनाव्यवहितेनवेत्यर्थः । संगतिरेवेत्येव कारार्थमाह ॥ **नत्विति** ॥ **अतएवेति** ॥ निरंतरसंगतिनियमाभावादेवेत्यर्थः ॥ **ऊह्येतीति** ॥ साचप्रागूहित्वाप्रदर्शितेतिभावः ॥ तदु क्तमिति ॥ उपासनापादे“विष्णुमेवपरंब्रूयुरेवमन्येप्यशेषत”इत्येतद्व्याख्यावसरइत्यर्थः ॥ **चिंतेति** ॥ अत्रक्रियमाणविचारस्यफलमात्र

भाष्येतु विप्रकीर्णनानाशाखास्थवाक्यविनिर्णायकेष्वन्यथापिक्रमहेतोरुत्प्रेक्षासंभवेननियतपूर्वापरीभावहेतुविशेषशून्येषु चाधिकरणेषुवाचःक्रमवृत्तित्वेनक्रमेसिद्धे येनकेनचित्पूर्वाधिकरणेनाक्षेपादिरूपासंगतिरेवापेक्षिता । तावन्मात्रेणचिंतायाः साफल्यसिद्धेः । नत्वव्यवहितपूर्वेणेतिभावेनानंतरसंगत्यनुक्तिः । अतएवात्र “जिज्ञासाकर्तव्येत्युक्त”मिति भाष्येजिज्ञा सासूत्रेणैवसंगतिर्दर्शिता । उत्तरत्रचाकाशाद्यधिकरणेषु“कोह्येवान्या”दित्यादिभाष्यआनंदमयाद्यधिकरणैरेवसंगतिर्दर्श यिष्यते । यद्वाऽव्यवहितपूर्वाधिकरणसंगतिःस्फुटत्वाच्छिष्यैरेवोह्येतिभावेनभाष्येतदनुक्तिः । तदुक्तंसुधायां“उत्तरा धिकरणेष्वप्येवंक्रमनिमित्तादिकंस्वयमूहनीय”मिति । “जिज्ञासाकर्तव्येत्युक्त”मितिभाष्येणतुचिंताफलमात्रमुक्तं ।

गु० **भाष्येत्विति** ॥ ननुविप्रकीर्णनानाशाखास्थानांवाक्यानांपरस्परसंगत्यभावेनतन्निर्णायकानांसूत्राणामपिपूर्वापरीभावहेतुशून्यत्वेन पूर्वाधिकरणेनसंगतेरनावश्यक त्वेव्यवहितपूर्वाधिकरणेपिसंगतिःकिमर्थंभाष्येप्रदर्शिता । सूत्राणांपरस्परसंगत्यनपेक्षत्वादित्यतआह ॥ **यद्वेति** ॥ नियतपूर्वापरीभावहेतुविशेषशून्यत्वोक्तिः शुद्धावि रुद्धेत्यतोवाह ॥ **यद्वेति** ॥ यद्वाननुविप्रकृष्टनानाशाखास्थानामपिवाक्यानामेकवाक्यतयाब्रह्मपरत्वेनपरस्परसंगत्यनपेक्षयैकवाक्यतायाएवासंभवेनपरस्परसंगतेराव

SGDF
Sri Gargeshwari Digital Foundation

प्र० मुक्तं । नतुसंगतिरप्यभिमता । येनाव्यवहितेनसंगत्यूहनंविरुध्येत । क्वापूर्वसंगतिरितिटीकास्थसंगतिपदंचफलपरमितिभावः ॥ उक्ताइति ॥ आक्षेपबहुत्वाद्बहुवचनं । आदिपदेनकारणत्वमोक्षोपदेशादेर्ग्रहः ॥ **महागुणेति** ॥ आनंदरूपमहागुणेत्यर्थः । एतच्चाद्यसंगतिसूचकं ॥ **तन्निष्ठेति** ॥ जिज्ञास्यत्वाभावेतज्ज्ञानान्मोक्षस्याप्ययोगादितिभावः । टीकायामानंदमयोविषयइत्युक्तं । तदुपलक्षणत्वेनव्याचष्टे ॥ **इहेति** ॥ शतक्रत्वादिशब्दैरिवानंदमयविज्ञानमयादिशब्दैर्धर्मिविशेषाप्रतीतेर्गुणसामान्येत्युक्तं । "तर्ह्यन्यत्रप्रसिद्धतानस्यादितिचेन्न । मयट्प्रत्यया दिनाब्रह्मणोन्यत्प्रत्याययंतीतिभवंत्यन्यत्रप्रसिद्धा" इतिसुधायामेवोक्तेरित्याशयात् । नन्वेवमन्यसाहित्येनान्यत्रप्रसिद्धत्वेद्वितीयपादेनिवेशः स्यात् । नचपृथक्पदसाहित्येनैवतत्रतथात्वमितिवाच्यं । गुहामित्यत्रचंद्रिकायांपिबंताविति प्रत्ययश्रुतिबलादन्यत्रप्रसिद्धेत्युक्तेरितिचेन्न । लोकेतोन्यत्रप्रसिद्धत्वमाद्यपदोपाधिरन्यसाहित्येनतथात्वंद्वितीयोपाधिरित्यनुक्तेः । किंतुनामत्वादिकं । तच्चनामत्वमानंदमयेप्यस्ति । अत एवगुहामित्यत्रटीकायांलोकतोन्यत्रप्रसिद्धस्येत्युक्तं । चंद्रिकायांतुतथैवप्रक्रमात्सतिसंभवेत्यागायोगादुपायस्योपायांतरादूषकत्वाच्चान्यसाहा

यद्वा उक्तास्संगतयोभाष्यआत्मशब्दादियुक्तमहागुणवाचकानंदमयशब्दोदाहरणाज्जिज्ञासासूत्राक्षेपेणैव तन्निष्ठसूत्रस्याक्षिप्तत्वाच्चसूचिताइतितदनुक्तिः । इहगुणिसामान्यवाचकाआनंदमयादिशब्दाउदाहरणं ।

गु० श्यकत्वात्कथंसंगतिःपरस्परनापेक्षितेत्युच्यते । तथाचसंगत्यपेक्षायामव्यवहितपूर्वाधिकरणेनैवसंगतिर्वक्तव्येत्यस्वरसादाह ॥ **यद्वेति** ॥ अस्मिन्पक्षेभाष्येसंगत्य नुक्तिःसमायातीतीममेवास्वरसंमनसिनिधायाह ॥ **यद्वेति** ॥ यद्वाश्रुत्यधिकरणसंगतीदर्शयतीतिटीकाविरोधपरिहारायाह ॥ **यद्वेति** ॥ अधिकरणोपाधिमाह

प्र० य्यमुक्तं ॥ **तेषामिति** ॥ एतेन गुणवाचिनामित्यनुव्याख्यानंतत्सुधावाक्यंचफलाभिप्रायंव्याख्येयमित्युक्तंभवति । तेनाभ्यासहेतुव्यपदे शादिहेतूनामानंदमयादिसामानाधिकरण्येनतदसामानाधिकरण्येपिनदोषइतिभावः । उपलक्षणत्वेनटीकाव्याख्यानेबीजमाह ॥ **तदुक्तमिति** ॥ संशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ सूत्रेऽन्योपलक्षणत्वेनानंदमयस्यैवोक्तेष्टीकानुरोधेनेतरोपलक्षणत्वेनात्राप्येकस्यैवोक्तिरितिबोध्यं । आदि पदेनचेतनाचेतनप्रकृत्योर्जीवसमुदायादेश्चग्रहः ॥ **असद्ब्रह्मेतीति** ॥ ब्रह्मशब्दःपुच्छएवश्रुतोनत्वानंदमयइत्यस्यनिरसिष्यमाणत्वात्सिद्धव

तेषांसमन्वयेसिद्धेमनोमयादावुदाहृतश्लोकस्थानांगुणवाचिनां "आनंदंब्रह्मणोविद्वा" नित्यानंदादिश ब्दानामपिसमन्वयःसिध्यति । तदुक्तमनुव्याख्याने "शब्दानांप्रथमेपादेगुणिसामान्यवाचिनां । गुण वाचिनांचप्रथममाहदेवस्समन्वय" मिति ॥७॥ अत्रानंदमयःकिंचतुर्मुखादिःकिंवाविष्णुरितिचिंता । तदर्थं "असद्ब्रह्मेतिवेदचे" दित्यानंदमयेश्रुतोब्रह्मशब्दःकिंजघन्यवृत्तिरुतमुख्यवृत्तिरिति । तदर्थं

गु० ॥ **इहेति** ॥ तर्ह्यानंदमयादिशब्दसमन्वयःकथंसेत्स्यतीत्यतआह ॥ **तेषामिति** ॥ नन्वनुव्याख्यानेगुणिसामान्यवाचिनां । गुणवाचिनांचप्रथममाहदेवःसमन्वय मित्यत्रानंदमयादिशब्दवदन्नादिशब्दानामप्युदाहरणत्वस्योक्तत्वाद्गुणिसामान्यवाचकानंदमयादिशब्दाउदाहरणमित्युक्तिरयुक्ता । किंचैवमानंदमयादीनांब्रह्मत्वसम र्थनार्थमुदाहृतश्लोकेष्वानंदादिशब्देष्वेवसाक्षाद्ब्रह्मशब्दश्रवणात्तद्वाराऽऽनंदमयादिशब्देषुब्रह्मशब्दश्रवणस्थानीयमानत्वेनानंदादिशब्दानामुदाहरणत्वमुचितं । अनु व्याख्यानस्थचशब्दस्वारस्यंच । नचसूत्रकृतानंदमयशब्दस्यकंठतोगृहीतत्वादुदाहरणत्वमितिवाच्यं । तर्हिमनोमयादिशब्दानामुदाहरणत्वंनस्यात् । सूत्रकारेणसु खतोऽनुक्तत्वात् । नचानंदमयशब्देनतदुपलक्षणादुदाहरणत्वमितिवाच्यं । आनंदमयशब्देनानंदादेरप्युपलक्षणसंभवात् । नचानंदमयशब्दस्यगुणिसामान्यवाच

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्निर्देशःकृतः ॥ **मयडिति** ॥ यद्यप्यत्र''अन्योंतरआत्मे''त्यत्रान्यांतरशब्दः ''तस्यैषएवशारीरआत्मे''तिशरीरशरीरिभावइत्यादिकमपिविरोधिनवेतिशक्यंवक्तुं । तथापिविकारशब्दादितिसूत्रेतस्यकंठतउक्तत्वादितरस्योपलक्षणत्वेनोपादानादेवमुक्तं । विशेषविवक्षयावातन्मात्रोक्तिरित्यदोषः ॥ **व्यधिकरणेति** ॥ भिन्नाधिकरणेत्यर्थः । अस्पष्टभागेफलफलिभावंव्यनक्ति ॥ **आद्यइति** ॥ तथाचमयटोविकारार्थत्वेनब्रह्मशब्दस्यामुख्यार्थत्वादानंदमयोनब्रह्मेतिपूर्वपक्षेफलं । प्राचुर्यार्थत्वसंभवेतुबाधकाभावेनब्रह्मशब्दस्यमुख्यार्थत्वादानंदमयोब्रह्मेतिसिद्धांतेफलंस्पष्टमितिभावः ॥ **परमतस्येति** ॥ यद्यपिपरमतेपंचानांकोशत्वंपूर्वपक्षेतुचतुर्मुखादित्वं तथाप्यत्रब्रह्मत्वसाम्यात्कोशत्वस्याप्यभिमतत्वा

मयट्प्रत्ययःकिंब्रह्मशब्दस्यमुख्यत्वविरोध्युतनेति। तदर्थंमयट्किंविकारार्थउतप्राचुर्यार्थइति। प्राचुर्यार्थत्वेपिप्राचुर्यंकिंसमानाधिकरणविजातीयाल्पत्वेनैवभवतिकिंवाव्यधिकरणसजातीयाल्पत्वेनापीति। आद्येब्रह्मणिविजातीयस्यदुःखस्याल्पस्याप्यभावादानंदप्राचुर्यायोगः। द्वितीयेतुजीवगतस्यसुखस्याल्पत्वाद्ब्रह्मण्यानंदप्राचुर्यसंभवः। अत्रपूर्वोत्तरपक्षयोर्भाष्यादावेवव्यक्तत्वात्सूत्रेपरमतस्यैवपूर्वपक्षितत्वेनपरमततन्निरासयोरेवेहपूर्वपक्षसिद्धांतरूपतयापृथक्तयोरभावाच्च

गु० कत्वात्तद्रूपगुणयोगेनमनोमयादिशब्दानामेवोपलक्षणमिति नतेषामुदाहरणत्वमितिवाच्यं। उपलक्षणत्वेलाघवेनसंबंधमात्रस्यैवतंत्रत्वेनास्यातंत्रत्वात्। तथाचानंदादिशब्दानामप्युदाहरणत्वसंभवेनानंदमयादिशब्दानामेवोदाहरणंयुक्तमितिचेत् इदमत्राकूतं । विकारशब्दान्नेतिचेदित्यादिसूत्रोक्तबाधकतत्समाधानानामानंदादिशब्देष्वभावादानंदमयादिशब्देष्वेवभावादित्याशयेनानंदमयादिशब्दाउदाहरणमित्युक्तमितिनकश्चिद्दोषइति ॥ **समानाधिकरणेति** ॥ समानाधिकरणंयद्विजातीयंतदल्पत्वेनेत्यर्थः । एवमुत्तरत्रापिव्यधिकरणंयत्सजातीयंतदल्पत्वेनेतिव्याख्येयं । पूर्वपक्षेचसिद्धांतेचफलफलिभावमाह ॥ **आद्यइति** ॥ नन्वधिकरणा

SGDF Sri Gargeshwari Digital Foundation

प्र० द्वैवमुक्तं। उक्तंचटीकायां "यस्त्वन्नमयादिपंचानामप्यत्रब्रह्मतांब्रूते सतुसूत्रकारेणैवपूर्वपक्षीकृतइतिनतत्पक्षंप्रत्याक्षिपद्भाष्यकार" इति ॥ **पृथगिति** ॥ परमतानुवादतन्निरासाभ्यांतूच्येतेइत्यर्थः । पूर्वपक्षानुदयमाशंकते ॥ **यद्यपीति** ॥ "पुनश्चप्रापकाद्धेतोस्तत्राधिकरणांतर" मित्यनुव्याख्यानोक्तंसमाधिमाह ॥ **तथापीति** ॥ इतःपरमत्रेत्यादिनाअन्येत्वित्यंतंसूत्राणामक्षरार्थस्वारस्यचिंताक्रमचिंताचक्रियतइतिध्येयं ।

नतौपृथगुच्येते। यद्यपिजिज्ञासासूत्रेतद्धिजिज्ञासस्वेतिवाक्यस्थब्रह्मशब्दस्यगुणपूर्तौयौगिकत्वेनजीवाच्छेदकतोक्ता । जन्मादिसूत्रेचतस्मिन्नेववाक्येकारणत्वादिनारूढिंबाधित्वायोगःस्थापितः । तथाप्यानंदमयवाक्येरूढौबाधकाभावात्प्रत्युतविकारशब्दादेस्तत्साधकस्यैवचभावात्पूर्वपक्षोदयइतिद्रष्टव्यं ।

गु० नामितरइवात्रापिपूर्वपक्षसिद्धांतौकुतोनोच्येतेइत्यतआह ॥ **अत्रचेति** ॥ **नतौपृथगुच्येतेइति** ॥ तथाचपूर्वोत्तरपक्षविवेचनादिप्रतिज्ञाविरोधोनशंक्यइतिभावः । नन्विदमधिकरणमनारंभणीयं । एतदधिकरणनिर्णेतव्यविषयवाक्येब्रह्मशब्दस्यश्रुतत्वात्तस्यचजिज्ञासासूत्रेयोगरूढिभ्यांब्रह्मनिष्ठत्वस्यजीवनिष्ठत्वस्यचोपपादितत्वात्तद्युक्तानंदमयशब्दस्यापिब्रह्मपरत्वान्नपूर्वपक्षोदयइत्याशंक्यनिराकरोति ॥ **यद्यपीत्यादिना** ॥ ननुसूत्रकारेणानंदमयोभ्यासादित्यानंदमयस्यैवब्रह्मत्वमुक्तं । तथाचभाष्यकारेणतदेवोपपादनीयं । अन्नमयादौयेन्नंब्रह्मोपासतइत्याद्यभ्यासवर्णनमयुक्तं । नचसूत्रकारेणानंदमयस्योपलक्षणतयागृहीतत्वेनान्नमयादीनांब्रह्मत्वस्यापिसूत्रकाराभिप्रेतत्वाद्भाष्यकारीयतद्व्युत्पादनंसंगतमेवेतिवाच्यं । तर्ह्यन्नमयस्यैवप्रथमत्वेनप्रथमातिक्रमेकारणाभावेन अन्नमयोभ्यासादित्यन्नमयस्यैववक्तव्यत्वापत्त्याऽऽ

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्राद्यसूत्रेप्रतिज्ञाभागचिंतातावदारभ्यते ॥ **अत्रेति** ॥ नन्वत्रानंदमयादिशब्दाउदाहरणमित्युक्तं । तन्नयुक्तं । सूत्रएकस्यैवोपादानात् । यदिच''उपलक्षणत्वंशब्दानामानंदमयपूर्विणां । सूत्रस्याल्पाक्षरत्वेनसर्वशाखाविनिर्णय''इत्यनुव्याख्यानानुरोधेनोपलक्षत्वमुच्यते तदापिप्राथम्यात् अल्पाक्षरत्वाच्चान्नमयइत्येवोच्येतेत्याशंक्य ''आनंदमयरूपेतुब्रह्मणःपुच्छतोक्तितः । समस्ताब्रह्मताप्राप्तेरानंदमयनामही''त्यनुव्याख्यानोक्तंपरिहारमाह ॥ **श्रुताविति** ॥ तत्रानंदमयआनंदमयासाधारणपूर्वपक्षहेतोरधिकस्यसत्त्वादित्यर्थः । आदिपदान्मयडादेःसाधारणस्यग्रहः । उपलक्षणमेतत् । हेतुव्यपदेशरूपसिद्धांतहेतोश्चाधिकस्यतत्रसत्त्वात्सर्वापेक्षितानंदप्रदेत्यादिनाप्रागुक्तसंगतिसूचनार्थत्वाच्चेत्यपिध्येयं । अतएववक्ष्यमाणदृष्टांतस्यानानुगुण्यशंकालेशोपिनेति । एतेन ''अन्नमयादीनामपितर्हिब्रह्मतांकिंनासूत्रयदितिचेत्सूत्रस्याल्पाक्षरत्वादेव ।

अत्रश्रुतावन्नमयस्यादित्वेपिसूत्रआनंदमयस्येतरोपलक्षकत्वेनोपादानं
युक्तं । तत्रजिज्ञासासूत्राक्षेपकस्यावयवत्वादिपूर्वपक्षहेतोःसत्त्वात् ।

गु० नंदमयस्यप्रथमग्रहणमनुपपन्नमित्यतआह ॥ **अत्रेति** ॥ **तत्रेति** ॥ ननुयदिपूर्वपक्षहेतुभूतस्यावयवत्वस्यानंदमयेविद्यमानत्वेनतस्यैवेतरलक्षकत्वेनोपपादनं तर्ह्यानंदमयएवान्नमयेपि इदमित्यादिनिर्देशानुपपत्तिरूपस्यपूर्वपक्षहेतोःसत्त्वात्तस्यैवेतरलक्षकत्वेनग्रहणोपपत्त्यानानंदमयग्रहणंयुक्तमित्यतउक्तं **जिज्ञासासूत्राक्षेपकस्येति** ॥ तस्यजिज्ञासासूत्राक्षेपकत्वाभावेनसंगतिकथनेनैवपूर्वपक्षस्यलाभादानंदमयस्यैवोपादानंनत्वितरस्येत्यर्थः । नन्वानंदमयेपूर्वपक्षहेतोःसत्त्वेपितस्यैवोदाहरणं

प्र० आदिमत्त्वेप्यन्नमयादीनामानंदमयस्यसंगतत्वेनग्रहण''मितिटीकाव्याख्याता ॥ **यथेति** ॥ आद्येचतुर्थपादे''यस्मिन्गुणोपदेशःप्रधानतोभिसंबंध''इतिद्वितीयेधिकरणे''पंचदशान्याज्यानी''त्यत्राज्यशब्दः किंघृतरूपगुणवाचीकिंवास्तोत्रनामेतिसंशये रूढत्वेनोद्भिदादियौगिकशब्दवन्नामत्वायोगात्संख्याविशिष्टाज्यविधौवाक्यभेदाभावादाज्यशब्दोवांतरप्रकरणेनस्तोत्रेगुणविधिरितिप्राप्ते समासाभावेनसंख्याविशिष्टद्रव्याप्रतीतेरुभयविधानावश्यंभावेनवाक्यभेदापरिहारादाज्यानुवादेनसंख्यामात्रस्यविधेयत्वादाज्यैःस्तुवतइत्युत्पत्तिवाक्येधात्वर्थसामानाधिकरण्येननिर्देशात्''यदाजिमीयुस्तदाज्यानामाज्यत्व''मितिवाक्यशेषेऽन्वाख्यानाच्चाज्यशब्दःस्तोत्रनामेतिसिद्धांतितं । एवं''चित्रयायजेतपशुकाम''इत्यत्रापिचित्राशब्दःकिंचित्रत्वस्त्रीत्वगुणविधिपरःकिंवाकर्मनामेतिसंशयेपूर्ववत्पूर्वोत्तरपक्षौबोध्यौ । तत्राज्यैःस्तुवतइत्युत्पत्तिवाक्येगुणविधिपक्षेद्रव्यक्रिययोरुभयोरुपादानेपिकारकविशिष्टक्रियाविध्युपपत्तेश्चित्रावाक्यसाधारणस्यवाक्यभेदरूपस्यसिद्धांतहेतोरनवतारात्तद्वाक्यमुपेक्ष्यगुणवाक्येसमासाभावेनविशिष्टद्रव्यविध्ययोगादुक्तरूपसिद्धांतहेतुसत्त्वात्तदुपजीवनेनैवोत्पत्तिवाक्यस्थाज्यशब्दस्यस्तोत्रनामत्वनिर्वाहाद्यथातदेवोदाहृतं तद्वदत्रापियुक्तमितिपूर्वेणान्वयः । अत्रकश्चिदाह विषमोयमुपन्यासः । तत्रोत्पत्तिवाक्योदाहरणेसिद्धान्तोन्मेषहेतुरेवनेतिगुण

यथाचित्राज्याधिकरणे''आज्यैस्तुवत''इत्युत्पत्तिवाक्यमुपेक्ष्यवाक्यभेदरू
पसिद्धांतहेतोःसत्वात्''पंचदशान्याज्यानी''तिगुणवाक्योदाहरणंतद्वत् ।

गु० कुतइत्यतः तत्रपूर्वमीमांसायांसंप्रतिपन्नदृष्टांतमाह ॥ **यथेति** ॥ **वाक्यभेदेति** ॥ आज्येमंत्रसंबंधस्यपंचदशत्वस्यचविधानेवाक्यभेदापत्तेरितिभावः । नन्वानंद

SGDF
Sri Gargeshwari Digital Foundation

प्र० वाक्योदाहरणंयुक्तं । इहतुमयडादेर्हेत्वंतरस्यापिभावेनप्रथमातिक्रमेणचरमोदाहरणमयुक्तमिति । तन्न । हेतुसद्भावमात्रएवदृष्टांतत्वात् । उत्पत्तिवाक्येनामत्वहेतोरलाक्षणिकत्वस्यान्वाख्यानस्यचसत्त्वाच्च । आनंदमयइवावयवत्वरूपप्रबलहेतोरन्नमयादावभावाच्च । नन्वन्नमयेपि "ओषधीभ्योन्नं । अन्नात्पुरुषः । सवाएषपुरुषोन्नरसमयः" इतिदेहपरामर्शः "तस्येदमेवशिर" इतिप्रत्यक्षनिर्देशश्चान्नमयेपूर्वपक्षहेतुरधिकोस्तीतिचेन्न । "तस्यविकारार्थोपपादकत्वेनतदंतर्भावा" दितिसुधायामेवमेवोक्तेरितिभावः । यद्येवंप्रतिज्ञाभागस्यान्नमयाद्युपलक्षकत्वंतर्हिप्रकरणद्वयेब्रह्मशब्दाभ्याससत्त्वेपिप्रकरणत्रयेतदभावात्सौत्रोहेतुर्भागासिद्धइतिशंकते ॥ अत्रेति ॥ श्रुत्या उपनिषदा । अद्वैत्युक्तमाशंकते ॥ नचेति ॥ ब्रह्मपुच्छंप्रतिष्ठेतिपुच्छत्वेनयद्ब्रह्मोक्तंतत्रैवासद्ब्रह्मेतिश्लोकउच्यतइतिशंकार्थः ॥ आपातादिति ॥ अन्यथाप्रायपाठविरोधः

अत्रब्रह्मशब्दाभ्यासोयद्यपिसूत्रोदाहृतमानंदमयंप्रतिश्रुत्योदाहृतेश्लोके "असद्ब्रह्मेतिवेदचेत् अस्तिब्रह्मेतिचेद्वेदे"ति तथाविज्ञानमयेपि "विज्ञानंदेवास्सर्वे ब्रह्मज्येष्ठमुपासते । विज्ञानंब्रह्मचेद्वेदे"त्यस्ति । नचासदितिश्लोकआनंदमयपुच्छविषयः । अन्नमयादीन्प्रत्युदाहृतश्लोकानामपितदीयपुच्छविषयत्वापातात् । अन्नमयप्राणमयमनोमयेषुतु "येन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते आनंदंब्रह्मणोविद्वा" निति ब्रह्मशब्दःसकृदेवश्रुतः । तथापि

गु० मयादीनांब्रह्मत्वेब्रह्मशब्दाभ्यासस्यहेतूकरणमयुक्तं । आनंदमयादिशब्दोपेतवाक्येब्रह्मशब्दाभ्यासाभावेनासिद्धत्वादित्यतआह ॥ अत्रेति ॥ तदीयपुच्छविषयत्वापातादिति ॥ नचेष्टापत्तिः । तथासत्यविशेषादन्नमनोमयपुच्छस्यापिब्रह्मत्वंस्यात् । अथर्वांगिरसःपुच्छंप्रतिष्ठेत्युक्तमनोमयपुच्छस्यब्रह्मत्वस्यत्वयानंगीकारा

SGDF Sri Gargeshwari Digital Foundation

प्र० स्यात् । तच्चपरैर्नांगीकृतमितिभावः ॥ **तन्मात्रेणेति** ॥ ब्रह्मशब्दमात्रेणेत्यर्थः । तर्हिब्रह्मशब्दादित्येववाच्यमित्यतआह ॥ **आनंदेति** ॥ **अतएवेति** ॥ सर्वत्रैकरूप्याभावादेवेत्यर्थः । ते चतुर्मुखादयः । सुधायामैकरूप्यमेवोक्तमित्याह ॥ **सुधायांत्विति** ॥ अभ्यासशब्दस्यमु

तन्मात्रेणैवतेषांब्रह्मता । आनंदमयविज्ञानमययोस्त्वभ्यासोप्यस्तीतिससूत्रितः । अतएवभाष्ये "तथापिनतआनंदमयशब्देनोच्यंते । किंतुविष्णुरेव । ब्रह्मशब्दाभ्यासा"दित्युक्त्वायेन्नंब्रह्मेत्यादिब्रह्मशब्दादित्येवोक्तं । टीकायामपिआनंदमयेब्रह्मशब्दाभ्यासादित्युक्त्वा "अन्नमयादीन्प्रत्युदाहृतश्लोकेषुतद्विषयत्वेनब्रह्मशब्दश्रवणा"दित्येवोक्तं । सुधायांतु "येन्नंब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरीयक"इत्यनुव्याख्यानानुसारेण "एकविषयासकृदुक्तिलक्षणमुख्याभ्यासाभावेप्यसकृदुक्तिमात्रमस्ति । तथाचान्नमयादिविषयत्वेनब्रह्मशब्दस्यश्रुतत्वाभिप्रायोभ्यासशब्द"इत्युक्तं ।

गु० दितिभावः ॥ **अन्नमयेति** ॥ तथाचब्रह्मत्वसाधनेहेतूकृतस्याभ्यासस्यांशेऽसिद्धिरितिभावः ॥ **ससूत्रितइति** ॥ आनंदमयविज्ञानमयगतब्रह्मशब्दाभ्यासेनब्रह्मत्वेतात्पर्येनिश्चिते प्रायपाठेनान्नमयादिष्वपिश्रुतब्रह्मशब्दस्यब्रह्मपरत्वनिश्चये तावन्मात्रेणान्नमयादीनांब्रह्मसिद्धिरित्याशयः । अनेनसौत्रोऽभ्यासउपलक्षणमित्युक्तंभवति । नन्वानंदमयेब्रह्मशब्दाभ्यासस्यान्नमयादौब्रह्मशब्दश्रवणमात्रस्यैवब्रह्मत्वसाधकत्वमितिटीकानोपपद्यते । तथासतिसुधाविरोधात् । सुधायामन्नमयादीनांपंचानामपिब्रह्मत्वेऽमुख्याभ्यासस्यसाधकत्वेनोक्तत्वात् । तथाचसुधाविरोधइत्यतआह ॥ **सुधायांत्विति** ॥ तथाचश्रुतोपलक्षितसाधारणामुख्याभ्यासपरत्वान्नासाधारणमुख्याभ्यासस्यकाचित्कोक्तिविरोधइतिभावः । नन्वसकृदुक्तिमात्रमितिकथं । एकविषयताप्यस्तीत्यन्यत्रोक्तत्वादितिचेत्तस्यायमभिप्रायः । क्वचिदेकविषयताप्यस्तीतिनाभ्यासस्यहेतुत्वं । किंतुब्रह्मपदश्रवणमेव । अभ्यासस्तुक्वचित्तिष्ठतीतिकृत्वोक्तः । तथाचटीकासुधयोःफलतएकार्थत्वान्नविरोधइतिभावः । अस्मिन्पक्षेसूत्रो

SGDF
Sri Gargeshwari Digital Foundation

प्र० ख्यार्थमेवोपेत्यसर्वत्रैकरूप्यंसमर्थयितुमभ्यासादित्यस्यात्मशब्दाभ्यासादित्यभिप्रेत्यब्रह्मवल्ल्यांभृगुवल्ल्यांचान्नमयादिसमानाधिकरणानात्म शब्दानाह ॥ यद्वेति ॥ ब्रह्मशब्दवदात्मशब्दसद्भावादित्यन्वयः । यद्यपि''तस्माद्वाएतस्मादन्नरसमयात् अन्योंतरआत्माप्राणमय''इति''अ न्योंतरआत्मामनोमय''इत्येवंरूपेणप्राणमयादिप्रकरणोपक्रमेषु तथा ''एतंप्राणमयमात्मानमुपसंक्रामती''त्यादिरूपेणब्रह्मवल्ल्युपसंहारे तथा ''एतंप्राणमयमात्मानमुपसंक्रम्ये''तिभृगुवल्ल्युपसंहारेचप्राणमयादिषुत्रिरात्मशब्दश्रवणमस्ति । अन्नमयेतूपक्रमेआत्मपदाभावादुपसंहारयो रेवद्विरात्मपदश्रवणमितिद्वैरूप्यं । तथाप्यसकृदुक्तिरूपाभ्यासस्यसत्त्वादेवमुक्तं । ब्रह्मशब्दस्येवात्मशब्दस्यापिविष्णुत्वसाधकत्वमस्तीतिज्ञाप

यद्वा ब्रह्मशब्दवत्''अन्योंतरआत्मा एतमन्नमयमात्मानमुपसंक्रामति एतम न्नमयमात्मानमुपसंक्रम्ये''त्यादौब्रह्मशब्दसमानार्थात्मशब्दसद्भावादभ्यासः।

गु० त्कस्याभ्यासादितिहेतोःगौणतासमायाति। इममेवास्वारस्यंमनसिनिधायाह ॥ **यद्वाब्रह्मशब्दवदिति** ॥ यद्यपिसवाएषपुरुषोन्नरसमयइतिपरामर्शानुरोधात्तस्माद्वा एतस्मादात्मनइत्यन्नमयघटकात्मकब्दमुपादायसर्वत्रात्मशब्दाभ्यासोवक्तुंशक्यः । तथाप्यभ्यासेत्रितयोक्तेरसकृदुक्त्यंतरत्वेनातिशयसूचनार्थमुत्तरानुवाकस्थात्मश ब्दउपात्तः । इदंचानुवाकद्वयस्यवक्ष्यमाणरीत्यैकस्थानत्वविवक्षया । अत्रब्रह्मशब्दसमानार्थेत्युक्त्याब्रह्मात्मशब्दयोरेकविषयासकृदुक्तिरूपत्वादभ्यासत्वेसुतरामति शयइतिसूचितं । यद्यपिगुणविशेषवाचिनांसर्वेषामपिशब्दानामपर्यायत्वादपर्यायशब्दानामभ्यासत्वेऽतिप्रसंगः । तथापिलोकेऽभिधानसिद्धपर्यायत्वमभ्युपेत्येदमुक्तं। यद्वा अन्योंतरआत्माविज्ञानमयः । एतमानंदमयमात्मानमित्यात्मशब्दस्यविभक्तिभेदेनार्थविशेषोपस्थापकत्वेपिप्रातिपदिकमात्रविवक्षयायथाभ्यासत्वं तथा यद्वा

प्र० यितुंब्रह्मशब्दसमानार्थेत्युक्तं। तथात्वंचभाष्येस्पष्टमितिभावः। भाष्यविरोधंनिराह ॥**भाष्येत्विति**॥**स्मृतीति**॥ ''ब्रह्मेतिपरमात्मेतिभगवा निितिशब्द्यते''इतिस्मृत्युपादानमित्यर्थः । नन्वेवं''येन्नंब्रह्मोपासतइत्यादिब्रह्मशब्दा''दितिभाष्यमसंगतं । किंत्वन्योंतरआत्मेत्यादीत्येवोच्येतेति चेन्न। आदिपदेनास्यापिसंग्रहात्। तदर्थापरित्यागेनास्यार्थस्योक्तत्वात्.। अतएवब्रह्मशब्दवदित्युक्तं । तन्वानंदमयादेश्चतुर्मुखादिगौणात्मत्वमुपेत्य तत्रश्रुतात्मशब्दोपितस्यैवेति''यस्यानुवित्तःप्रतिबुद्धआत्मे''त्यात्मपदश्रवणादीक्षणीयोनगौणआत्मेतिनिरासोनयुक्तइत्यात्मशब्दस्यपूर्वपक्षआक्षेपा दाक्षिप्तेनकथंसिद्धांतनिर्णयः । नचाभ्यासेननिर्णयः । गौणात्मन्येवायमात्मशब्दइतिवदतातदभ्यासोपिगौणात्मन्येव । नतुपरमात्मसाधकइ तिवक्तुंशक्यत्वात् । अन्यथा''अदृश्यत्वमुखेनानाक्षेपेऽदृश्यत्वेनविष्णुलिंगेनविष्णुरेवांतस्थइतिशंकास्या''दित्यादितत्रतत्राग्रेतनचंद्रिकावाक्य विरोधापातात्। तेनाक्षिप्तस्यसिद्धांतासाधकत्वावगतेः । तस्मादन्यस्मादेवसाधकादानंदमयादेर्ब्रह्मत्वंप्रसाध्यतत्रत्यात्मशब्दस्यपरमात्मशब्दत्वं समर्थ्यप्राक्तनाक्षेपोपिसमाधेयइतिचेन्न । भाष्योक्तब्रह्मशब्दाभ्यासस्यैवसाधकत्वमभिप्रेत्यात्मशब्दमुखाक्षेपस्यदर्शितत्वात् । आत्मशब्दस्यसा धकत्वेतुतन्निष्ठसूत्रादिकमाक्षेप्यं । यद्वा आत्मशब्दस्यपरमात्मनिमुख्यत्वान्मुख्यार्थत्यागेनामुख्यार्थग्रहणेबाधकाभावान्मयट्प्रत्ययादेःप्राचुर्या

भाष्येतुब्रह्मशब्दपदेनब्रह्मवाचकःशब्दोविवक्षितः । अतएवभाष्ये''परमात्मे''त्यात्मपदोपेतस्मृत्युपादानं ।

गु० म्नोतियदादत्तेयच्चातीत्याद्यर्थभेदेनापर्यायत्वेपि आत्मब्रह्मादयःशब्दाइत्यादिभाष्योदाहृतस्मृत्यनुसारेणस्वशब्दपर्यायात्मशब्दादितिवक्ष्यमाणन्यायेनावांतरभेदविव क्षयाशब्दांतरव्यावृत्तानतिभिन्नार्थत्वविवक्षयापर्यायत्वेनाभ्यासोपपत्तेः । नचैवंभाष्यटीकयोर्येऽन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते इतिवाक्योदाहरणमयुक्तं । तत्रात्मश ब्दाभावादितिवाच्यं । तद्वाक्यस्यप्रतीकग्रहणरूपत्वेनोपपत्तेः । अस्मिन्पक्षेब्रह्मशब्दाभ्यासादितिभाष्यंब्रह्मवाचकात्मशब्दाभ्यासादितिगौणंव्याख्येयं । तथातद्वी

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्यर्थत्वेनबाधकानांनिरसिष्यमाणत्वादित्यात्मशब्दस्यभगवत्साधकत्वस्यप्रसाध्यत्वाभिप्रायेणतस्यसाधकत्वोक्तिसंभवाच्च । अतएवभाष्यआ त्मशब्दस्यभगवच्छब्दत्वंतत्रतत्रसाध्यते । अत्राप्यग्रेनचब्रह्मशब्दइत्यादिनातत्साधनं । अतएवकंपनादित्यत्र“यएतद्विदु”रित्याक्षिप्तमपिलिंगं तत्रटीकायां“नन्वेवंसावकाशत्वेश्रुतिलिंगयोर्यएतद्विदुरित्युक्तलिंगंविहायकिंलिंगांतरग्रहणेन । मैवं । तदविहायैवलिंगांतरस्याप्युक्तत्वात् । एतदन्यत्राप्यनुसंधेय”मितिसाधकमुक्तं । अतएव“अंतरउपपत्ते”रित्यादावाक्षिप्तस्यामृतत्वादेःसिद्धांतेहेतूकरणमित्याद्यूह्यं । “नचान्नमया दीनामब्रह्मत्वेकिंचिन्मानं । “येऽन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते आनंदंब्रह्मणोविद्वान् विज्ञानंब्रह्मचेद्वेद अस्तिब्रह्मेतिचेद्वेद अधीहिभगवो ब्रह्मेति तस्माएतत्प्रोवाच । अन्नंप्राणंचक्षुःश्रोत्रमित्यादिनाब्रह्मशब्देनोक्तत्वाच्चे”तितैत्तिरीयभाष्यपर्यालोचनयाऽनुवाकद्वयाभिप्रायेणान्नम यादिषुब्रह्मशब्दस्यमुख्यएवाभ्यासोलभ्यतइत्याह ॥ यद्वेति ॥ ननूत्तरानुवाकेन्नप्राणादिशब्दाएवश्रुताःनान्नमयादयइतिकथमन्नमयादिषु स्थानद्वयेनापितदभ्यासइतिचेन्न । तदुपसंहारे“अन्नमयमुपसंक्रम्ये”त्यादौमयटःश्रवणेनपूर्वत्रान्नादिशब्देपितस्यावश्यकत्वात् । अन्यथान्नम

यद्वा “अन्नंब्रह्मेतिव्यजाना”दित्युत्तरानुवाकेप्यन्नमयादौब्रह्मशब्दसद्भावादभ्यासः ।

गु० कागौणीव्याख्येया । एवंचभाष्यटीकयोर्गौणत्वंभवतीत्यतस्तद्द्वयात्पक्षांतरमाह ॥ यद्वेति ॥ अत्राप्यनुवाकद्वयस्थब्रह्मशब्दस्यान्नंब्रह्मेत्यन्नशब्दोपपदस्योपादानाद भ्यासत्वं । अनेनयेन्नंब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरीयके इत्याद्यनुव्याख्यानमपिप्रकारांतरेणव्याख्यातंभवति । एवमुत्तरानुवाकेप्येकैकत्रानेकशोब्रह्मशब्दश्रवणादभ्या सत्वंज्ञेयं । यद्यपिसर्जकत्वादीनामत्रोत्तरत्रचानेकेषांलिंगानामभ्यासोस्ति तथापिलिंगाच्छ्रुतेर्बलवत्त्वाच्छ्रुत्यापूर्वपक्षेतदभ्यासएवोक्तः । यद्वाशब्दमात्रस्यान्यत्रापिसं भवाशंकायांतदभ्यासोहेतुत्वेनोक्तः । लक्षणस्यान्यत्रासंभावितत्वात्सन्नप्यभ्यासोनविवक्षितः । अथवामुख्योक्त्याऽन्यदप्यूह्यमितिलिंगाभ्यासोनोक्तः । नन्वेतस्यां

SGDF Sri Gargeshwari Digital Foundation

प्र० यादीन्प्रत्युदाहृतश्लोकेषुमयटोभावेनान्यत्वप्रसंगात् । श्लोकानामुक्तार्थासांगत्यप्रसंगात् । भृगुवल्ल्याब्रह्मवल्ल्युक्तार्थेसमाख्यारूपत्वस्याग्रेसाधयिष्यमाणत्वाच्चान्नादेरन्नमयादेरेकत्वमित्यभिप्रायात् । अनुव्याख्यानापातप्राप्तंनिराह ॥ **केचित्त्विति** ॥ एतद्रूपासु तैत्तिरीयशाखायामिवगुणिसामान्यवाचकनामवतीषु । ''आनंदमयइत्याद्यैःशब्दैर्वाच्योहरिःस्वय''मित्युत्तरार्धेनान्वयः । शाखांतरमादाय शाखांतरस्थब्रह्मशब्दमादाय ॥ **प्रतिशाखमिति** ॥ यदितैत्तिरीयस्थब्रह्मशब्दस्यशाखांतरीयब्रह्मशब्दविवक्षयाऽभ्यासविवक्षास्यात्तदाप्रतिशाखमभ्यासोक्तिर्नस्यादित्यर्थः । एवंहेतुदोषेषुप्रबलासिद्धिरूपदोषनिरासेप्यप्रयोजकत्वेनव्याप्यत्वासिद्धिःस्यादेव । यथाखलु''नामब्रह्मेत्युपासीत योषितम

केचित्तु शाखांतरेप्यन्नमयादौब्रह्मशब्दसद्भावादभ्यासः अतएवानुव्याख्याने''अन्यासुचैतद्रूपासु शाखास्वपिसहस्रशः''इत्युक्तमित्याहुः । तन्न । शाखांतरमादायाभ्यासेतिप्रसंगात् । अनुव्याख्याने''येन्नंब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरीयके । अन्यासुचैतद्रूपा''स्वितिप्रतिशाखामभ्यासोक्तेश्च ।

गु० दशायांब्रह्मशब्दाभ्यासाभावेपिशाखांतरस्थाभ्यासमादायाभ्यासशब्दोमुख्यएवेतिकेचिदाहुः । तद्दूषयितुमनुवदति ॥ **केचित्त्विति** ॥ अन्नमयादीनांब्रह्मत्वेशाखांतरीयाभ्यासोविवक्षितइत्यत्रोपोद्बलकमाह ॥ **अतएवेति** ॥ **शाखांतरमादायेति** ॥ यदिशाखांतरीयाभ्यासमादायान्नमयादीनांब्रह्मत्वंतर्हिब्रह्मभृगुवल्लीस्थब्रह्मशब्दाभ्यासमादायानंदमयामेशुध्यंतामितिवाक्यस्थान्नमयादीनामपिब्रह्मत्वंस्यादित्यर्थः । नचतत्रशुद्धिप्रार्थनलिंगान्नतेषांब्रह्मपरत्वमितिवाच्यं । अभ्यासस्यश्रुतिरूपत्वेनलिंगापेक्षयापिबलवत्त्वादितिभावः । ननुतर्ह्यनुव्याख्यानेशाखांतरीयाभ्यासस्यहेतुत्वेनविवक्षितत्वात्तद्विरोधइत्यतआह ॥ **अनुव्याख्यानइति** ॥ ननुकिमित्येवंमहायासेनानंदमयादीनांब्रह्मत्वंसमर्थ्यते । अब्रह्मत्वमेवकिंनस्यात् । नचैवंब्रह्मशब्दादेःकागतिरितिवाच्यं । ब्रह्मत्वेनोपासनसंभवात् । एवंचहेतोरन्यथासि

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्निंध्यायीत"इत्यादौनामादौब्रह्मादित्वाभावेप्युपासनार्थत्वमात्रेणतदुक्तिः तथात्राप्यन्नमयादौब्रह्मशब्दार्थस्यविष्णुत्वस्याभावेप्यब्रह्मरूपेन्नमयादौब्रह्मत्वेनध्यानार्थत्वेनापितत्रब्रह्मशब्दोक्तिसंभवेनान्यथासिद्धेः। अतएव "येन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते"इत्युक्तिरित्याशंक्यनिराह ॥ **नचेति** ॥ अन्नान्नमयादेरेकत्वादन्नादेरित्युक्तं । "नप्रतीकेनहिस"इति चतुर्थेसूत्रकृतैवनिरसिष्यमाणत्वादित्यर्थः । "प्रतीकविषयत्वेननकार्याविष्णुभावना । प्रतीकंनैवविष्णुर्यन्मिथ्योपासाह्यनर्थदा"इत्याद्यनुव्याख्यानोक्तेः । उक्तंचतैत्तिरीयभाष्ये"येन्यथाविदुस्तेन्यराजानस्तेक्षय्यलोकाभवंतीतिश्रुतेरविद्यमानोपासनाद्दोषावगतेश्चे"त्यादीतिभावः । अन्नमयादिसाधारणंपक्षांतरमाह ॥ **एतमिति** ॥ एवमप्रयोजकत्वशंकारहितमव्याप्यत्वंनिरस्येदानींविपक्षवृत्तित्वंनिराह ॥ **नचेति** ॥ ब्रह्मेतिशब्दोब्रह्मणःशब्दइतिविग्रहेणब्रह्मात्मशब्दौग्राह्यौ । अन्यत्र

नचान्नादेरब्रह्मत्वेपिब्रह्मत्वेनोपासनोपपत्तिरितिशंक्यं । असदुपासनायानिषेत्स्यमानत्वात् । "विज्ञानंब्रह्मचेद्वेद अन्नंब्रह्मेतिव्यजाना"दित्यादावुपासनायाअश्रवणाच्च । "एतमानंदमयमात्मान"मित्यादावुपासनायाअश्रवणेपिब्रह्मशब्दसमानार्थात्मशब्दश्रवणाच्च । नचब्रह्मशब्दोन्यत्रयुक्तः । प्रवृत्तिहेतुपौष्कल्याद्भाष्यकृद्भिरुदाहृतैः । श्रुतिस्मृतिशतैश्चापिब्रह्मशब्दोहिविष्णुगः ॥ १ ॥ यद्यपि"तपोब्रह्मे"

गु० द्भिरित्याशंक्यपरिहरति ॥ **नचान्नादेरिति** ॥ **असदिति** ॥ नप्रतीकइतिसूत्रे नचरमंत्यहोअसदुपासनयाऽत्महनइत्यादौचनिषेत्स्यमानत्वादित्यर्थः ॥ **विज्ञानमिति** ॥ अत्रचधात्वर्थश्चनोपासनेतिभावः । चित्तवृत्तित्वसाम्याद्त्राप्युपासनाव्याख्यायतइत्यतआह ॥ **एतमिति** ॥ असिद्धिंपरिहरति ॥ **नचेति** ॥ कुतोनेत्यतोहेतुंकारिकयासंगृह्णाति ॥ **प्रवृत्तीति** ॥ विष्णुगः विष्णावेवमुख्यः । तत्रहेतुद्वयंप्रवृत्तीत्यादिब्रह्मशब्दप्रवृत्तौहेतुभूतस्यगुणपूर्णत्वस्यविष्णौपुष्कलत्वादि

प्र० विष्णुत्वरहितेप्रकृत्यादावित्यर्थः। श्लोकेनान्वयः। उदाहृतैः तत्रतत्रेतिभावः। चापिशब्दौहेतुद्वयसमुच्चयार्थौ। हिर्हेतौ। महायोगविद्वद्रूढिभ्यांविष्णुमात्रनिष्ठोयस्मात्तस्मादन्यत्रनयुक्तइत्यर्थः। समर्थितमेतत्प्राक्जन्माधिकरणादावित्यर्थः । यदत्रकश्चिदाह ब्रह्मशब्दाद्विरिंचापाकरणमयुक्तं। तस्यविष्णुनिष्ठत्वेमानाभावात् । तदेवब्रह्मेत्यादेश्चप्रजापतिहिरण्यगर्भादिश्रुत्याविरिंचादिपरत्वोपपत्तेरित्यादि । तदनेनैवनिरस्तं । आद्याधिकरणे"ब्रह्मशब्दश्चविष्णावेवे"त्यादिभाष्ये"सविष्णुराहित्यंतेदेवशास्त्रस्यतेनही"त्याद्यनुव्याख्यानेचतदेवेत्यादिश्रुतेर्वैष्णवत्वोक्त्याचब्रह्मशब्दस्यविष्ण्वेकनिष्ठतायाःसमर्थनात् । "एषउएवब्रह्म एषउएवात्मे"ति"विष्णुरेवज्योतिर्विष्णुरेवब्रह्मे"ति"पुरुषःपरमात्माजोब्रह्मनारायणःप्रभु"रिति "आत्माब्रह्ममहांस्तारःपरमेशःशुचिश्रवाः । विष्णुर्नारायणोनंत"इत्यादिश्रुतिभिः"ब्रह्मशब्दःपरेविष्णौनान्यत्रे"ति"ब्रह्मेतिपरमात्मे"ति"वासुदेवात्मकंब्रह्मे"ति"अनंतोभगवान्ब्रह्मे"ति"परमंयोमहद्ब्रह्मे"ति"वासुदेवात्परःकोनुब्रह्मशब्दोदित"इति"एतस्माद्ब्रह्मशब्दोयंविष्णोरेवे"ति"ब्रह्मात्माविष्णुरेवही"ति"आत्मब्रह्मादयःशब्दास्तमृतेविष्णु"मित्यादिस्मृतिभिस्तत्रतत्रोदाहृताभिरनेकाभिर्ब्रह्मात्मादिशब्दस्यविष्णुनिष्ठतायाःस्पष्टत्वात् ॥ **असकृदिति** ॥ "तंहोवाच तपसाब्रह्मविजिज्ञासस्व तपोब्रह्मेति सतपोतप्यत सतपस्तप्त्वा अन्नंब्रह्मे

त्यसकृच्छ्रवणात्तपस्यपिब्रह्मशब्दाभ्यासोस्ति तथापि पूर्वत्र "तपसाब्रह्मविजिज्ञासस्वे"ति उत्तरत्रच"सतपस्तप्त्वाअन्नंब्रह्मेतिव्यजाना"दितिचाभ्यासात्तपसिब्रह्मशब्दो

गु० त्यर्थः। अनेनब्रह्मशब्दस्ययोगउक्तः। श्रुतिस्मृतीत्यनेनप्रयोगबाहुल्येनरूढिश्चोक्ता। एवंचब्रह्मशब्दोमहायोगरूढिभ्यांविष्णुपरइतिभावः। ननुब्रह्मशब्दाभ्यासेनानंदमयादीनांब्रह्मत्वसाधनमनुपपन्नं। तस्यतपस्यपिसत्त्वेनव्यभिचारादित्यतोनाभ्यासमात्रंहेतुः। किंतुमुख्याभ्यासएव। तथाचनव्यभिचारइत्याह ॥ यद्यपीति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तिव्यजाना"दिति पंचकृत्वोऽब्रह्मण्यपितपसिब्रह्मपदस्यभृगुवल्ल्यांश्रवणादित्यर्थः। तपसेतितृतीययासाधनत्वावगमात् "आयुर्घृतं द्विर्वचनेची"त्यादिवदभेदोपचारइतिभावः। "तपोज्ञानस्वरूपत्वा"दितितैत्तिरीयभाष्योक्तादर्थादर्थांतरमुपेत्यैवमुक्तिरित्यविरोधः ॥ **नमुख्यइतीति** ॥ सूत्रेमुख्यस्यैवब्रह्मशब्दस्यहेतूकरणान्नव्यभिचारइतिभावः । एवमाद्यसूत्रंप्रतिज्ञाहेतुसमर्थनेनसमर्थ्येदानीमन्नमयादीनांब्रह्मत्वेयानिबाधकानिविकारप्रत्ययान्यत्वांतरत्वशरीरत्वादीनिसाधारणानि यान्यानंदमयान्नमययोर्ब्रह्मत्वेविशेषबाधकानिप्रकृतदेहपरामर्शित्वेनेदमितिप्रत्यक्षनिर्देशब्रह्मपुच्छत्वोक्त्यादीन्युपलक्षणत्वेनैतत्सर्वबाधकनिरासार्थंसूत्रं "विकारशब्दान्नेतिचेन्नप्राचुर्या"दिति । "इदमित्येवनिर्देशोवस्त्रप्रावृतवद्धि

नमुख्यइतिनतपसोब्रह्मता ।

गु० तपसेतितृतीययाब्रह्मज्ञानंप्रतितस्यकारणत्वाभिधानात्तस्वेतिक्त्वाप्रत्ययेनतस्यब्रह्मज्ञानात्पूर्वभावित्वाभिधानाच्चेतिभावः । इदंचतपसाब्रह्मविजिज्ञासस्वेतिपूर्ववाक्येब्रह्मज्ञानकारणत्वेनप्रकृतंतपएवतपोब्रह्मेतिवाक्येप्रतिपाद्यतइतिपूर्वपक्ष्युक्तमंगीकृत्यसमाहितं । तावतापिपूर्वपक्ष्युक्तव्यभिचारपरिहारसंभवात् नतुवस्तुतः । तपोब्रह्मेत्यत्रब्रह्मशब्दस्यमुख्यार्थत्वस्यसिद्धांतिनोभिमतत्वात् । अन्यथातपोज्ञानस्वरूपत्वादित्यादितैत्तिरीयभाष्येण तपसा आलोचनेन । तपो ब्रह्म ज्ञानरूपंब्रह्मेत्यर्थइतितत्वप्रदीपेन ज्ञानानुसंधानरूपतपसातंजनार्दनं । क्रमाद्भृगुर्व्यजानात्तमन्नादिबहुरूपिणमितितत्रैवोदाहृतयजुःसंहितागतवाक्यविरोधादितिध्येयं । ननुतथापिद्वितीयसूत्रेमयटःप्राचुर्यार्थत्वंकिमर्थमंगीकार्यं । नचतदनंगीकारेऽनानंदस्यापिप्राप्तिःस्यादितिवाच्यं तादात्म्यांगीकारेणाप्यनानंदप्राप्तेःपरिहर्तुंशक्यत्वादित्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० भो"रित्येतद्व्याख्यानेसुधायांतथैवोक्तेः। तत्रप्राचुर्यार्थत्वमाक्षिप्यसमाधत्ते ॥ **यद्यपीति** ॥ **वचनादिति** ॥ गीताभाष्योक्तात् ॥ **प्रतियोगिनइति** ॥ तादात्म्यस्यप्राचुर्यवदितरानिरूप्यत्वादितिभावः ॥ **यतोवाचइति** ॥ श्रुतौहिब्रह्मानंदस्यापरिच्छिन्नत्वाभिप्रायेणावाङ्मनसगोचरत्वमुच्यते । तथैवप्राक्रूसमर्थनात् । कोह्येवान्यादित्यत्राकाशनयन्यायेनाकाशपदवाच्यस्यविष्णोरानंदमयत्वरूपपूर्णानंदत्वेविश्वचेष्टकत्वरूपहेतुर्व्यपदिश्यते तदुभयानुसारेणेत्यर्थः । स्वार्थिकत्वे तादात्म्यार्थत्वे । यन्मयटोवैयर्थ्यंतत्परिहारार्थमित्यर्थः । उक्ता सूत्रकृतेतिशेषः । एतेनतद्व्याख्यानपरभाष्यटीकादिग्रन्थोपिसमार्थितोध्येयः । तेन"निरवकाशब्रह्मशब्दबलात्सावकाशस्यमयटःप्राचुर्यार्थत्वोपपत्ते"रितिसुधावाक्यमुपपन्नंभवति । एवंसूत्रद्वयार्थंसमर्थ्येदानींलेशेनेतरसूत्रार्थानुवादपूर्वंसूत्राणांक्रमहेतुचिंताप्रस्तूयते । तत्रेयमाशंका । ननुपंचानांब्रह्मत्वंसाधयितुमभ्यासादिति"मांत्रवर्णिकमेवचगीयत"इति"अस्मिन्नस्यचतद्योगंशास्ती"तिचसूत्राणिप्रवृत्तानि । "तद्धेतुव्यपदेशा"दितित्वानंदमयस्यैव । तथैवटीकादावुक्तेः । तथाचतद्धेतुसूत्रमभ्यासादित्रयानंतरमेवनिवेशनीयं । नतुमध्ये । हेत्वभावादिति । तत्राह

यद्यपि "तादात्म्यार्थेविकारार्थेप्राचुर्यार्थेमयट्त्रिधे"तिवचनात्तादात्म्येमयट्स्वीकारेप्रतियोगिनोदुःखस्येषदनुवृत्त्यादिशंकानवकाशः तथापि"यतोवाचोनिवर्तंते कोह्येवान्या"दित्यादिश्रुत्यनुसारेणानंदादेःपूर्णत्वसिद्ध्यर्थंस्वार्थिकत्वेमयटोवैयर्थ्यपरिहारार्थंचप्राचुर्यार्थतोक्ता ।

गु० **यद्यपीति** ॥ ननुपंचानामपिब्रह्मत्वेऽभ्यासमांत्रवर्णिकगानतद्योगशासनरूपहेतुत्रयस्यसाधारण्यात्साधारणहेतूक्त्यनंतरंतद्धेतुव्यपदेशरूपोहेतुर्वक्तव्यः। तस्यानंद

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- ॥ २६९ ॥

चंद्रिका. प्र. प्र. ६

प्र० ॥ अन्नमयेत्यादिना ॥ साधारणहेतोरित्यस्यमांत्रवर्णिकगानादेरित्यत्राप्यन्वयः । आदिपदादस्मिन्नस्येतिगृह्यते । निवेशनंत्वित्यस्य इत्येत दर्थमित्यन्वयः ॥ मंत्रवर्णस्थेति ॥ ब्रह्मवित्परमितिपूर्ववाक्येप्रकृतस्यपरपदस्यमंत्रवर्णेपिब्रह्मविशेषणत्वेनविवक्षितत्वादेवमुक्तं ॥ निरासा दिति ॥ मंत्रवर्णोक्तपरब्रह्मैवान्नमयादिपुगीयतइत्युक्तयातन्निरासादितिभावः । तदनंतरंतद्धेतुव्यपदेशोक्तावित्यादिकं वक्ष्यमाणमत्रापि योज्यं । अयमर्थः । अभ्यासानंतरंतावन्निवेशनीयं । तस्यसाधारणहेतुत्वात् । एवंचत्वयामांत्रवर्णिकगानानंतरंनिवेशनंचोद्यतेऽस्मिन्नस्येत्य स्यानंतरंवा । नाद्यः । "अन्नमयादीनांपंचानामपियुक्त्यंतरेणपरब्रह्मत्वंप्रतिपादयितुंसूत्रंमांत्रवर्णिकमित्यादिसुधोक्तदिशा यथा मांत्रवर्णिकं सत्यंज्ञानमनंतंब्रह्मेतिमंत्रवर्णेलक्षणवत्तयोक्तमेवब्रह्म अन्नमयादिपंचप्रकरणेषुप्रतिपाद्यतइतिपंचापिब्रह्मेतिपंचानामब्रह्मत्वशंकानिरासोर्थः त

अन्नमयादिसाधारणहेतोरभ्यासात्पश्चान्मांत्रवर्णिकगानादेस्तुपूर्वमानंदमयमात्रासाधारणस्यतद्धेतुव्य पेदशस्यनिवेशनंतु मांत्रवर्णिकसूत्रआनंदमयादिस्थब्रह्मशब्दस्यापरब्रह्मपरत्वशंकायाअपिमंत्रवर्णस्थप रत्वविशेषणेननिरासात् "अस्मिन्नस्ये"तिसूत्रेचभेदस्यमुक्तावपिसत्त्वेनापारमार्थिकत्वशंकायाअपिनि रासात्तदनंतरंतद्धेतुव्यपदेशोक्तौतन्निरासेपितद्धेतुव्यपदेशोहेतुरितिशंकास्यात् सामाभूदित्येवमर्थं ।

गु० मयस्यैवविष्णुत्वसाधकत्वेनतन्मात्रासाधारणत्वात् । तथाचमांत्रवर्णिकगानादेःपूर्वमभ्यासात्पश्चात्तद्धेतुव्यपदेशरूपहेतूक्तिरयुक्तेत्यतआह ॥ अन्नमयादीति ॥ तन्निरासेपीति ॥ यदिमांत्रवर्णिकमेवचगीयतइतिसूत्रानंतरंतद्धेतुव्यपदेशउच्यतेतर्हितस्यानंदमयादिस्थब्रह्मशब्दस्यापरब्रह्मपरत्वशंकानिरासकत्वंस्यात् । एवम स्मिन्नस्येतिसूत्रानंतर्येभेदस्यमुक्तौसत्त्वेनाऽपारमार्थिकत्वशंकानिरासकत्वंस्यादितिभावः । नन्वेवमपिपंचानामभ्यासस्यसाधारणत्वात्तद्धेतुव्यपदेशस्यचानंदमयासाधार ॥ २६९ ॥

प्र० थाटीकोक्तदिशाऽभ्यासादित्यत्रहेतुत्वेनोक्तब्रह्मशब्दस्यामुख्यचतुर्मुखाद्यर्थत्वशंकायाअपिमंत्रवर्णे"ब्रह्मविदाप्नोतिपर"मितिपूर्वप्रकृतपरब्र ह्मणएवलक्षितत्वात्तस्यैवोत्तरत्रान्नमयादिषुब्रह्मशब्देनकथनान्नामुख्यार्थइतिशंकानिरासोपिमांत्रवर्णिकसूत्रस्यार्थइतितद्धेतुसूत्रस्यापिब्रह्मशब्दामु ख्यार्थत्वशंकानिरासार्थत्वशंकास्यात् । सामाभूदित्यर्थंतदनंतरमनिवेशात् । नद्वितीयः । "योगमन्नमयाद्यैर्य"दित्यनुव्याख्यानाद्युक्तदिशा ऽस्मिन्नित्यस्ययथाअस्मिन्ननुवाके । अस्य सयएवंविदित्युक्तस्यब्रह्मविदः । तद्योगं एतमन्नमयमात्मानमुपसंक्रामतीत्यादिनातैरन्नमयादिभि र्योगं तत्प्राप्तिं शास्तीतिश्रुतिरतोन्नमयादयःपंचापिब्रह्मेत्यर्थः । तथाटीकाद्युक्तदिशाभेदव्यपदेशादित्युक्तभेदोमिथ्याकिंनस्यादितिशंकायाअपि अस्मिन्प्रकरणेअस्यजीवस्यानंदमयादिनासहमुक्तावपिसंबंधमेवसोश्नुतइतिशास्तिश्रुतिः अतोनभेदोमिथ्येति तन्निरासोप्यर्थइति तदनंतरंहेतु व्यपदेशस्यनिर्देशेऽस्यापिभेदमिथ्यात्वशंकानिरासोर्थइतिशंकास्यात् । सामाभूदित्येवमर्थमिति । ननुशंकामात्रमकिंचित्करं । व्याख्यानेन विशेषावगत्युपपत्तेः । यथोक्तं"व्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणंभवती"ति । सत्यं । अंतरंगज्ञापकाभावएवव्याख्यानानुसर णमित्याशयात् । नन्वेवमपिसाधकोक्त्यनंतरबाधकोद्धारावसराद्विकारसूत्रव्यवधानमयुक्तमितिशंकते ॥ नचैवमिति ॥ इत्यत्रापीति ॥

नचैवमप्यभ्यासंतद्धेतुव्यपदेशंचसाधकमुक्त्वानंतरं "विकारशब्दा"दितिबाधकमुद्धर्तव्यमितिशं क्यं । "कोह्येवान्या"दिततितद्धेतुव्यपदेशस्यानंदमयस्यविष्णुत्वइवप्राचुर्यमयडर्थइत्यत्रापिहेतुत्वात्

गु० णत्वात्तदुभयोक्त्यनंतरंविकारशब्दादितिबाधकमुद्धर्तव्यं । तथाचसाधारणासाधारणहेतुद्वयमध्येबाधकोद्धरणमयुक्तमित्याशंक्यनिषेधति ॥ नचैवमिति ॥ ननु

SGDF
Sri Gargeshwari Digital Foundation

प्र० टीकायांस्पष्टमनुक्तावपि‘‘महानंदत्वएवास्यहेतुःकोन्यादितिस्फुट’’मित्यनुव्याख्यासुधायां‘‘आनंदमयस्यविष्णुवाचित्वंमयटश्चप्राचुर्यार्थत्वं हेत्वंतरेणोपपादयत्तद्धेतुव्यपदेशाच्चेतिसूत्र’’मित्युक्तेरितिभावः। तर्ह्यस्मिन्नित्यस्यस्वपक्षहेतोर्मांत्रवर्णिकसूत्रानंतर्यस्यान्नतुव्यवधानमित्यतस्तत्रहेतु माह ॥ **अस्मिन्निति** ॥ **सूत्रस्येति** ॥ तदानंतर्यमित्यन्वयः । भेदव्यपदेशादेरानंतर्यमित्यर्थः । तर्हि‘‘कामाच्चनानुमानापेक्षे’’त्येतद्व्यवधा नंकुतइत्यतआह ॥ **तथेति** ॥ अनंतरमित्यस्य इतिपरपक्षेसाधकशंकायांकामादितिसूत्रेणनिरस्तायामित्यन्वयः । प्रामाणिकइत्यस्य इत्याद्य नुमानसंभवादित्यन्वयः । ननुकामाच्चेतिसूत्रेअभेदेप्रत्यक्षागमावनिरस्यानुमानमात्रनिरासःकुतइत्यतआह ॥ **तत्राभेदइति** ॥ श्रुतेश्चेतिभा ष्येऽधिकरणांतरप्रमेयमेवश्रुत्यविरुद्धत्वंशिष्यहितायोक्तमित्युक्तंभवति । शास्त्रयोनिसूत्रविरोधमाशंक्याह ॥ **जगदिति** ॥ शास्त्रैकगम्यत्वेपी त्यर्थः । सिद्धांते ईशःसर्वज्ञःस्वतंत्रोवा सर्वकर्तृत्वात्पूर्णशक्तित्वाद्वा व्यतिरेकेणचैत्रवदित्याद्यनुमानस्येवेत्यर्थः । यद्यपिटीकायां‘‘विमतानिश रीराणी’’त्यनुव्याख्यानानुरोधेनविमतानिशरीराणि मद्भोगायतनानि शरीरत्वादित्यनुमानमुक्तं तथापितेनानुमानेनपर्यवसानगत्यापरमात्मा

‘‘अस्मि’’न्निति सूत्रस्य स्वपक्षसाधकत्वेपि‘‘नेतरः भेदव्यपदेशात्’’ इत्याभ्यांसूत्राभ्यांपरपक्षेबाधकोक्तौभेदस्यापारमार्थिक त्वशंकानिरासेनपरपक्षेबाधकत्वस्यापिसत्त्वात्तदानंतर्यं । तथा‘‘भेदव्यपदेशा’’दित्यस्यानंतरं भेदवदभेदोपिप्रामाणिकः तत्रप्रत्यक्षस्यासंभवेपि‘‘श्रुतेश्च ‘‘तद्गुणसारत्वा’’दित्यत्रान्यपरतायावक्ष्यमाणत्वेपिजगत्कारणस्यशास्त्रयोनित्वेपितत्सार्व ज्ञादौसर्वकर्तृत्वादेरिव विमताआत्मानःपरमात्मनोनभिद्यंते आत्मत्वात्परमात्मवदित्याद्यनुमानस्यसंभवादितिपरपक्षे

गु० तद्योगशासनरूपहेतोर्मांत्रवर्णिकगानानंतरमेवनिवेशोयुक्तः । साधारणहेतुत्वादित्यतआह ॥ **अस्मिन्निति** ॥ ननुनेतरोनुपपत्तेरित्यनेनैवभेदव्यपदेशस्यापिसिद्धेर्भे

SGDF
Sri Gargeshwari Digital Foundation

प्र० भेदःसिद्ध्यति । साक्षात्तुज्जीवानामेव। आत्मत्वानुमानेनसाक्षादेवेतीदमुक्तं। अतएव''विमतानिशरीराणिमद्भोगायतनानिय''दित्यनुव्या ख्याविवरणेसुधायांशरीरत्वानुमानमाक्षिप्यसमाहितं । आत्मत्वानुमानंचप्रदर्शितं । टीकायामादिपदंच । अत्राप्यादिपदेनशरीरत्वादेर्ग्रहइ तिभावः ॥ **साधकेति** ॥ अभेदानुमानविरोधेनभेदव्यपदेशस्यान्यपरतोपपत्तेरितिभावः ॥ **अनंतरमिति** ॥ इतिशंकाभवतीतिसंबंधः ॥ **तस्याअपीति** ॥ प्रागर्थद्वयस्यविवक्षितत्वेनोक्तत्वादपिशब्दः । भेदव्यपदेशादित्यस्यवैयर्थ्यमाशंक्यसमाधत्ते ॥ **यद्यपीति** ॥ **भेदव्यप देशेति** ॥ ''तेयेशतंप्रजापतेरानंदाः सएकोब्रह्मणआनंद''इतिचतुर्मुखानंदस्यपरिमितत्वेनानंदमयशब्दिता''यतोवाचोनिवर्तंत''इत्यपरिमितानं

साधकशंकायांश्रुत्यादिसाहाय्यरहितंतद्विरुद्धंचानुमानमप्रमाणमतिप्रसंगादिति ''कामा''दितिसूत्रेणनिरस्ता यां अनंतरंभेदश्रुत्यभेदानुमानयोरपारमार्थिकपारमार्थिकविषयत्वादविरोधइतियाशंकातस्याअपि ''अस्मि'' न्नितिसूत्रेणनिरासात्तस्यांत्यत्वं । यद्यपिनेतरइत्यत्रानुपपत्तेरित्यनेनहिरण्यगर्भादिजीवानामानंदमयत्वेतज्ज्ञा नान्मोक्षानुपपत्तिरिव हिरण्यगर्भादीनामानंदमयाद्भेदव्यपदेशानुपपत्तिरपिविवक्षितुंशक्या तथापिजीवएवा नंदमयोनब्रह्मेतिवदतापूर्वपक्षिणा पूर्वंस्वांगीकृतंजीवब्रह्मभेदंत्यक्त्वाजीवानामानंदमयत्वेपिजीवचैतन्यस्यब्र ह्मचैतन्याभेदाज्जीवतत्त्वज्ञानेनापिमोक्षोपपत्तिरितिप्रकारांतरेणशंकिते तच्छंकायाअपिजीवानंदमययोरिव

गु० दव्यपदेशस्यवैयर्थ्यमित्यतस्तत्परिहरति ॥ **यद्यपीति** ॥ नन्विदमयुक्तं । पूर्वपक्षिणाजीवब्रह्मभेदस्यैवांगीकृतत्वेनाभेदप्राप्तेरेवाभावेनतन्निरासायोगात् । अन्यथा

SGDF
Sri Gargeshwari Digital Foundation

प्र० दत्वेनश्रुताद्भेदव्यपदेशेत्यर्थः ॥ **जीवब्रह्मणोरपिभेदमिति** ॥ "सयश्चायंपुरुषे यश्चासावादित्य"इत्याधाराधेयभावेन"रसंह्येवायंलब्ध्वानं दीभवती"त्यादिलब्धृलब्धव्यत्वादिनाचभेदंकथयतेत्यर्थः ॥ **अतएवेति** ॥ एतेनटीकाद्वयस्यवर्णकांतरपरतयाविरोधोपिपरिहृतः । द्वितीये र्थेसूत्राद्यानुगुण्यमपीत्याह ॥ **अतएवचकामादितीति** ॥ **वाक्यांतरेति** ॥ अत्रशास्त्रेतत्रतत्रप्रकरणस्यह्यैक्यविवक्षायांचोदितायांतत्तद्र तभेदवाक्यद्योतनेनसूत्रेषुभेदसमर्थनंक्रियते । अतस्तात्पर्यभेदान्नपुनरुक्तताशंक्येत्यर्थः । नन्वेवंसत्यभेदःस्वरूपेणक्कापिननिराकृतःस्या

जीवब्रह्मणोरपिभेदंकथयता"भेदव्यपदेशा"दित्यनेननिरासायभेदव्यपदेशःपृथगुक्तः । अतएवभेदेतिसूत्रम त्रटीकायांहिरण्यगर्भादिजीवानामानंदमयत्वनिरासकतयाव्याख्याय सुधायांजीवब्रह्माभेदनिरासकतयाव्या ख्यातं । अतएवचकामादितिसूत्रेजीवब्रह्माभेदानुमाननिरासः भाष्येच नचतत्त्वमसीत्यादिनाजीवब्रह्मा भेदश्रुतिगत्युक्तिः अनुव्याख्यानेच "नजीवभेदसूत्राणांशंक्यात्रपुनरुक्तता । वाक्यांतरद्योतकत्वात्

गु० जीवएवानंदमयोनब्रह्मेतिपूर्वपक्षोनक्रियेतेत्यतआह ॥ **जीवएवेति** ॥ **जीवब्रह्मभेदंत्यक्त्वेति** ॥ भेदेनैवात्रपूर्वपक्षोत्थानान्नात्रपत्यादिशब्देभ्यइत्यादाविवप्रथ मतएवाभेदःपूर्वपक्षिणोऽभिप्रेतः । ग्रंथस्यवादकथात्वात्तत्वनिर्णयाभावेस्वोक्तत्यागमात्रेणनकथावसानमितिभावः । तथाहि । प्रायपाठपरित्यागस्यप्रथमोक्तत्वेपि ब्रह्मशब्दस्यसाधकत्वात्तस्यादौसमर्थनमितिज्ञेयं । ननुतर्हिटीकायांजीवब्रह्माभेदनिरासकत्वेनाव्याख्यातत्वात्तद्विरोधइत्यतआह ॥ **अतएवेति** ॥ अन्यथाऽभेदस्या प्राप्तत्वेनतन्निरासोनस्यादित्यर्थः । ननुभाष्यानुव्याख्यानयोस्तदनुक्तेस्तद्विरुद्धमेतदित्यतआह ॥ **भाष्येचेति** ॥ तथाचात्रतन्निराकरणाभावेपौनरुक्त्यसमाधान योरनुपपत्तेरितिभावः । नन्वानंदमयस्यब्रह्मत्वप्रतिपादनमयुक्तं । तथात्वेप्रायपाठत्यागादिरूपदोषप्रसंगात् । नचमयटःप्राचुर्यार्थत्वान्नतत्त्यागइतिवाच्यं । पुच्छस्य

प्र० दित्यतउक्तं **पृथगिति** ॥ पूर्णता प्रधानता । भेदसाधनस्यपृथगुपदेशादित्यत्रस्वातंत्र्येणविचारितत्वादित्यर्थः ॥ **अयोगादिति** ॥ विरो धादितिभावः । उदाहरिष्यमाणश्लोकेप्रायपाठेतिपादंव्याचष्टे ॥ **तत्रेति** ॥ अन्नमयादीनामंतरन्यान्यस्यश्रवणेनतेषामब्रह्मतयाकोशत्वेनत त्रान्नादिविकारार्थत्वस्यावश्यकत्वात्तत्प्रायपाठपरित्यागइत्यर्थः । मुख्यत्रितयलंघनमित्येतद्विवृणोति ॥ **प्राचुर्यस्येति** ॥ यथाब्राह्मणप्रचुरो ग्रामइत्यादौविजातीयशूद्राल्पत्वंलभ्यतेतथात्रापिदुःखाल्पत्वंलभ्यतेव्युत्पत्तिबलात् । नचतदस्तीत्यर्थः ॥ **ब्रह्मशब्दस्येति** ॥ निर्विकारेब्रह्म णिमुख्यस्याब्रह्मणिपुच्छेगौणार्थत्वमित्यर्थः ॥ **लक्ष्यतइति** ॥ आनंदमयोब्रह्म अभ्यासादित्युक्ते आनंदमयशब्दस्यैवाभ्यासादितिलभ्यते ।

पृथगित्यत्रपूर्णते"तिभेदेत्यस्यसूत्रस्यांतरधिकरणादिस्थैः "भेदव्यपदेशाच्चान्य" इत्यादिभिर्जीवेश्वराभे दनिरासकैःपौनरुक्त्यशंकासमाधानंचसंगच्छतइति ॥ ॥ अन्येतु आनंदमयतदवयवपुच्छयोर्द्वयोर्ब्र ह्मत्वायोगादेकस्यब्रह्मतावाच्या । तत्रानंदमयस्यब्रह्मत्वेविकारार्थमयटःप्रायपाठत्यागः प्राचुर्यस्यापिप्रति योग्यल्पत्वापेक्षत्वाद्ब्रह्मणिचदुःखलेशस्याप्यभावान्मयटःस्वार्थत्यागः पुच्छवाक्यगतब्रह्मशब्दस्यचगौ णार्थत्वं सैषानंदस्यमीमांसेत्यादावभ्यस्यमानानंदप्रातिपदिकेनमयडर्थोलक्ष्यते इतिचत्वारोदोषाः ।

गु० ब्रह्मत्वेतत्प्राप्तिपरिहारक्लेशयोरभावात् तथाचतस्यैवब्रह्मत्वमितिपरेवर्णयंतितत्दूषयितुमनुवदति ॥ **अन्येत्विति** ॥ **द्वयोरिति** ॥ अन्यथाऽवयवावयविभावोनस्या दितिभावः । नन्वस्तुद्वयोर्मध्यआनंदमयस्यब्रह्मत्वमित्यतआह ॥ **तत्रेति** ॥ प्राचुर्यार्थत्वान्नप्रायपाठविरोधइत्यतआह ॥ **प्राचुर्यस्येति** ॥ तथाचप्राचुर्यार्थत्वां

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुतौचसैषानंदस्येत्यादिनाऽऽनंदस्यैवाभ्यासोनत्वानंदमयस्येति। तेनमयडर्थोलक्ष्यतइत्यर्थः। उत्तरपक्षेप्रायपाठस्यबाधनमितिसिद्धांतांशंविवृणोति ॥ **पुच्छस्येति** ॥ आनंदमयस्यब्रह्मत्वेदोषांतरमाह ॥ **किंचेति** ॥ "तस्यप्रियमेवशिरः मोदोदक्षिणःपक्ष" इत्यादिनोच्यमानशिरःप्रभृत्यवयवयोगेनेत्यर्थः ॥ **निर्विशेषमिति** ॥ अवाङ्मनसगोचरत्वश्रुतेरितिभावः ॥ **अभिन्नमिति** ॥ अनंतत्वश्रुतेरितिभावः ॥ **सर्वेति** ॥

पुच्छस्यब्रह्मत्वेत्ववयवप्रायपाठबाधमात्रं। पुच्छपदमुख्यार्थत्यागस्त्वानंदमयस्यब्रह्मत्वपक्षेपिसमः। लांगूलेमुख्यस्यतस्यानंदमयावयवेपिगौणत्वात्। तस्मान्मयट्प्रत्ययब्रह्मशब्दानंदप्रातिपदिकरूपमुख्यत्रितयानुगुण्यात्पुच्छमेवब्रह्मेतियुक्तं। पुच्छपदंतुप्रतिष्ठापदसन्निधानादाधारलक्षकं। तदुक्तंभामत्यां "प्रायपाठपरित्यागोमुख्यत्रितयलंघनं। पूर्वस्मिन्नुत्तरेपक्षेप्रायपाठस्यबाधन" मिति। किंचप्रियाद्यवयवयोगेनानंदमयःसविशेषः। ब्रह्मतुनिर्विशेषं। अपिचानंदमयःप्रतिशरीरंप्रियादिभेदाद्भिन्नः। ब्रह्मत्वभिन्नं। तस्मादानंदमयोनब्रह्म। किंतुपंचापिकोशाः। नचसर्वांतरत्वादानंदमयोब्रह्म। पुच्छवाक्येततोप्यंतरस्य

गु० गीकारेपीषद्दुःखस्याप्यनंगीकारान्मयटःस्वार्थत्यागइत्यर्थः। ननुपुच्छस्यब्रह्मत्वेपुच्छपदमुख्यार्थत्यागइत्यतआह ॥ **पुच्छपदेति** ॥ नन्वानंदमयस्याब्रह्मत्वेसोकामयतेत्यादावानंदमयस्यसकामयितृत्वस्रष्टृत्वादिश्रुतमितितस्यामुख्यत्वं कोह्येवान्यादित्यानंदमयस्यपूर्णानंदत्वप्रतिपादकत्वेनतस्याप्यमुख्यत्वं एतमानंदमयमित्यस्याप्यमुख्यत्वमित्यनेकवाक्यानाममुख्यत्वंतुल्यमेवेत्यतआह ॥ **किंचेति** ॥ अन्यथानिष्कलमित्यादिश्रुतिव्याकोपःस्यादितिभावः । नन्वानंदमयस्यसर्वांतर्यामित्वश्रवणादंतर्यामिणश्चान्यस्याभवात्तस्यैवब्रह्मत्वमित्याशंक्यनिषेधति ॥ **नचसर्वेति** ॥ ननुभृगुवल्याब्रह्मपरत्वेननिर्णीतत्वात्तत्समाख्यानादानंदमयस्यापिब्रह्मत्वमित्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० अन्नमयादिचतुष्टयांतरत्वादित्यर्थः ॥ **प्रतिष्ठेति** ॥ ब्रह्मपुच्छंप्रतिष्ठेतिप्रतिष्ठापदेनानंदमयाश्रयतयोक्तेरित्यर्थः । नन्वेवंभृगुवल्लीविरोधइत्यतआह ॥ **यात्विति** ॥ **आनंदस्येति** ॥ “आनंदोब्रह्मेतिव्यजाना”दित्युक्तस्येत्यर्थः ॥ **गुणेत्विति** ॥ नवमे “विप्रतिपत्तौविकल्पःस्यादसमर्थत्वाद्गुणेत्वन्याय्यकल्पनैकदेशत्वा”दितिजैमिनिसूत्रोक्तन्यायेनेत्यर्थः ॥ **अन्यथेति** ॥ ब्रह्मपुच्छंप्रतिष्ठेत्यत्रकिमानंदमयावयवत्वेनब्रह्मविवक्षितमुतस्वप्रधानत्वेनेतिसंशये पुच्छशब्दादवयवत्वेनेतिप्राप्ते उच्यते । आनंदमयोभ्यासात् । आनंदमयवाक्यशेषेब्रह्मपुच्छंप्रतिष्ठेत्यत्रस्वप्रधानमेवब्रह्मोच्यते । कुतः “असद्ब्रह्मेतिवेदचे”दित्यादौकेवलब्रह्मणएवाभ्यस्यमानत्वात् । विकारशब्दात् पुच्छमित्यवयवशब्दान्नस्वप्रधानमितिचेन्न प्राचुर्यात् । अन्नमयाद्यवयवप्रायवचनात् । “सइदंसर्वमसृजत । यदिदंकिंचे”त्यानंदमयसहितस्यसर्वस्यापिजगतोब्रह्मणएवहेतुत्वव्यपदेशाच्च । इतराणितुसूत्राणिपुच्छवाक्यनिर्दिष्टब्रह्मणएवोपपादकानीतितदीयभाष्यानुरोधेनेत्यर्थः । यतइत्यस्यश्लोकेनान्वयः । तावकएवेतिचोवधारणे । “तवकममकावेकवचन”इतिनिपातनात्तावकेमामकइतिसाधु । त्वदीयेमदीयइत्यर्थः । यत्तावदुक्तमानंदमयस्यब्रह्मत्वेपुच्छेब्रह्मशब्दस्यगौणार्थत्वमिति तत्रद्वयोर्ब्रह्मत्वायोगादितिकोर्थः । किमवयविनःपूर्णत्वेऽवयवस्यपूर्णत्वायोगइत्युतावयवावयविनोर्भेदा

प्रतिष्ठापदेनोक्तेः । यातुभार्गवीवारुणीविद्यातस्यांमयटःप्रियशिरस्त्वादेश्चाश्रवणाद्युक्तमानंदस्यब्रह्मत्वमि
तिसिद्धांतः । सूत्राणितु “वेदसूत्रविरोधेतुगुणेत्वन्याय्यकल्पने”तिन्यायेनान्यथाव्याख्येयानीत्याहुः ।
तन्न । यतः । एकत्रापिनमुख्यार्थलंघनंमामकेमते । सर्वत्रापिचमुख्यार्थलंघनंतावकेमते ॥ १ ॥

गु० ॥ **यात्विति** ॥ ननुतर्हिपुच्छमभ्यासादित्येवमाद्याकाराणिसूत्राणिस्युरित्यतआह ॥ **सूत्राणित्विति** ॥ नन्वानंदमयस्यब्रह्मत्वेदोषचतुष्टयस्योक्तत्वात् कथंतन्नि

SGDF
Sri Gurgeshwar Digital Foundation

प्र० दवयविनःपरमात्मत्वेऽवयवस्यतत्त्वायोगइति । आद्यंतावन्नेतिभावेनमुख्यार्थत्वंसाधयति ॥ **आनंदमयेति** ॥ **पूर्णत्वंहीति** ॥ बृहद्बृहि

तथाहि । आनंदमयपुच्छयोर्द्वयोरपिपूर्णत्वेनब्रह्मशब्दस्तावन्मुख्यः । पूर्णत्वंहिब्र ह्मशब्दस्यमुख्यार्थः । यथाधर्मांतरेष्वदृष्टमपिजातिसमवायादौधर्मितोधिकदेशत्वं

गु० राकरणमित्यतआह ॥ **तथाहीति** ॥ ननुकिमानंदमयस्यापिपूर्णत्वाभ्युपगमेपुनर्ब्रह्मशब्दस्यामुख्यार्थत्वमुतानंदमयस्यापूर्णत्वे । नाद्यइत्याह ॥**आनंदमयेत्यादि** ॥ ननुब्रह्मत्वंनामाद्वितीयत्वं । तत्रद्वयोरपिपूर्णत्वेकथंब्रह्मशब्दस्यतयोर्मुख्यत्वमित्यतआह ॥ **पूर्णत्वंहीति** ॥ नद्वितीयइत्याह ॥ **धर्मांतरेष्विति** ॥ रूपादावि त्यर्थः ॥ **धर्मितोऽधिकदेशत्वमिति** ॥ धर्मितापर्याप्त्यधिकरणाधिकदेशत्वमित्यर्थः । तथाचैकस्मिन्घटत्वबुद्धिवद्द्वित्वादिबुद्ध्यभावान्नतदविशेषः । ननुधर्म्य धिकदेशवृत्तित्वंनामधर्मिरूपदेशादधिकदेशवृत्तित्वंधर्मिदेशादधिकदेशवृत्तित्वंवा । नाद्यः । यत्रस्वयंवर्तेततत्स्यापिस्वधर्मित्वेनततोऽधिकदेशत्वाभावात् । नचधर्म्यं तरादधिकदेशत्वं । अन्योन्याभावस्यव्याप्यवृत्तित्वेनधर्मित्वावच्छिन्नप्रतियोगिताकान्योन्याभावाधिकरणत्वस्यस्वधर्म्यधिकरणत्वाभिमतेऽभावात् । नद्वितीयः । धर्मिण्येवविद्यमानस्यघटत्वादेःधर्मिदेशेकपालादावसत्त्वात् । धर्मिदेशेसत्त्वमविवक्षितत्वादधिकदेशवृत्तित्वमात्रविवक्षायांतद्धर्मिणिसतस्तद्देशेचासतोरूपादेरप्यविशे षेणधर्मांतरेष्वदृष्टमपीत्युक्त्ययोगात् । तत्कथमेतदितिचेन्न । अन्योन्याभावस्याव्याप्यवृत्तित्वपक्षेघटत्वादेःस्वधर्मितापर्याप्त्यधिकरणातिरिक्तवृत्तित्वात्तदभिप्रायेणो क्तत्वात् । यद्वासार्वदेशिकघटादौविद्यमानस्यघटत्वादेरेकत्वादाकाशवन्मध्यस्थपदार्थेष्वपिवस्तुतःपरेणसत्त्वांगीकाराद्धर्मित्वाभिमतघटमात्रादन्यत्रापिसत्त्वंदृष्टमि त्यर्थः । ननुजातेर्धर्मधर्मिभावप्रयोजकसंबंधेनधर्मित्वाभिमतेष्वेवसत्त्वादन्यत्रस्वरूपेणसत्त्वेपिनधर्मितोऽधिकदेशवृत्तित्वमित्यतउक्तं **समवायादाविति** ॥ जाति वत्समवायस्यसमवायरूपवृत्त्यंतराभावात्सर्वत्रस्वरूपेणैवसत्त्वमितिभावः । जातिसमवाययोश्चपरेणौपाधिकभेदस्याप्यनंगीकाराद्घटाकाशादिवदन्यत्रसत्त्वंनास्तीतिपरि

प्र० वृद्धावितिधातोर्वृद्धिश्चपूर्णतेत्याद्यसूत्रएवोक्तमितिभावः । असंभावितमेतदित्यतःसंभावनाहेतूननेकदृष्टांतानाह ॥ **यथेति** ॥ धर्मांतरेषु रूपरसादिषु । न्यायमतेप्रसिद्धमेतन्निदर्शनं । अद्वैतमतेनदृष्टांतद्वयमाह ॥ **यथावेति** ॥ संबंधिना पटादिनेत्यर्थः । अन्येषु घटादिषु । विचित्रशक्तियुक्तेतिहेतुगर्भं । अस्त्वेवंदृष्टांतैःसंभावना मानंतुकिमित्यतःश्रुतिस्मृतीराह ॥ **उक्तंचेति** ॥ "विश्वतश्चक्षुरुतविश्वतोमुखोविश्व तोबाहुरुतविश्वतस्पात् पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमुदच्यते सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुख"मित्यादिश्रुतिस्मृतिभिरित्यर्थः । विश्वतः विश्वस्मिन् । सर्वतः सर्वत्रेत्यर्थः । अदः मूलरूपं । इदमवतारजातं । एतच्छ्रुत्युक्त्यावयविनोपिपूर्णत्वमित्यपिग्राह्यं । यद्वा । अवतारस्य पूर्णत्वोक्त्याकृष्णाद्यवताररूपकेशाख्यावयवस्यपूर्णत्वप्राप्तेःपूर्णमितिश्रुत्याऽवयवस्यपूर्णत्वमुक्तं । तत्पूर्णत्वेचावयविनःपूर्णत्वमविगीतमितित

यथावापरिच्छिन्नेनाव्रियमाणसंबंधिनावृतेष्वन्येष्वदृष्टमपिपरिच्छिन्नाज्ञानावृतेनिरंशेचैतन्येऽपरि च्छिन्नत्वं यथावाऽऽनंदांतरेष्वदृष्टमपिब्रह्मानंदस्यपूर्णत्वादिकं तथान्यत्रादृष्टमप्यवयवस्यपूर्ण त्वंविचित्रशक्तियुक्तब्रह्मावयवेऽस्तु । उक्तंच "विश्वतश्चक्षुः पूर्णमदःपूर्णमिद"मित्यादिश्रु त्या"सर्वतःपाणिपादंत"दित्यादिस्मृत्याचावयवस्यपूर्णत्वं । तथा"उद्धबर्हात्मनःकेशौ"इत्यादि

गु० हारार्थमितिज्ञेयं । ननुचैतन्नैयायिकावदंति नतुवेदांतिनः तत्कथंदृष्टांताभिधानमितिपूर्वत्रारुच्यादृष्टांतांतरमाह ॥ **यथावेति** ॥ ननुब्रह्मणःसांशत्वमपिमायावाद्ये कदेशिभिरभ्युपगतमेवेत्ययमपिविप्रतिपन्नोदृष्टांतइत्यतआह ॥ **यथावेति** ॥ कृष्णस्यावयवत्वमनंगीकुर्वाणंप्रतिप्रमाणमुखेनतदाह ॥ **उद्धबर्हेति** ॥ अस्तुतस्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्नोक्तं । यद्वा । अवयवावयविनोरभेदस्यवक्ष्यमाणत्वात्तेनैवतस्यपूर्णत्वंसेत्स्यतीतितदनुक्तिः ॥ **स्मृत्येति** ॥ उद्बबर्हासनःकेशौसितकृष्णौ महामुने । उवाचचसुरानेतौमत्केशौवसुधातले । अवतीर्यभुवोभारक्लेशहानिंकरिष्यत"इत्यादिविष्णुपुराणपंचमांशस्थस्मृत्याकेशस्य केशावतारस्य । कृष्णस्यपूर्णतागीतायामुक्तेत्यर्थः ॥ **स्वतइति** ॥ अनायासेनेत्यर्थः । अखिलानिरूपचरिता ॥ **निस्सीमाइति** ॥ "सीमसीमेस्त्रियामुभे"इतिसीमन्शब्दपर्यायसीमाशब्दोत्तरपदोयंसमासः । द्वितीयंप्रत्याह ॥ **युक्तंचेति** ॥ अवयविनएवावयवत्वमित्यन्वयः । क्वचित् समवायादौ । अन्यथासमवायस्यसमवायांतरांगीकारेऽनवस्थानादित्यर्थः ॥ **आनंदात्मकस्येति** ॥ एकधैवानुद्रष्टव्यमित्येवकारस्यश्रुतेरितिभावः । ननूभयथाश्रुतेरानंदादावुभयरूपतोपेयते अत्रतुकिंमानमित्यतआह ॥ **सशिरइति** ॥ "सशिरःसदक्षिणःपक्षःसउत्तरःसआत्मासपुच्छ"मित्यादिभाष्योदाहृतश्रुत्येत्यर्थः । नन्ववयवावयविनोरभेदेकथंशिरआदिरवयवोऽयमवयवीत्यादिव्यवहारः । कथंवावयविकार्य

स्मृत्याकेशस्यकृष्णस्य "व्याप्तंत्वयैकेनदिशश्चसर्वा"इतिपूर्णतोक्ता । तदुक्तमनुव्याख्याने "ब्रह्मतावयवेपिस्यात्तथावयविनिस्वतः । यथैवकृष्णकेशस्यकृष्णस्यब्रह्मताखिला । दर्शिताचैवपार्थायनिस्सीमाःशक्तयोस्यहि"इति । युक्तंचानवस्थापरिहारायक्वचित्संबंध्यादेरेवसंबंधत्वादिवदस्मिन्नेवप्रकरणे "आनंदंब्रह्मण" इतिश्रुतेरानंदात्मकस्यैवब्रह्मणआनंदित्ववच्चविशेषबलाच्छक्तिव्यक्तिभावात् "सशिरःसदक्षिणःपक्षः"इत्यादिश्रुत्यावयविनएवावयवत्वं । ॥ २७४ ॥

गु० वयवत्वंतस्यपूर्णत्वंकुतइत्यतोऽवयवस्यपूर्णत्वेप्रमाणमाह ॥ **व्याप्तमित्यादि** ॥ नन्वेतावतापूर्णद्वयमुक्तंभवेत् । तच्चायुक्तं । तथात्वेऽवयवावयविभावानुपपत्तेरि

SGDF Sri Gargeshwari Digital Foundation

प्र० मवयवेननजायतइत्यतआह ॥ शक्तिव्यक्तीति ॥ यदातुशिरःप्रभृतेरवयवत्वंव्यक्त्यात्मनास्ति अवयवित्वंशक्त्यात्मना तदाऽवयवव्यवहार कार्ये नत्ववयविव्यवहारकार्येभवतः । अतएवकेशस्यप्रागवयवत्वंव्यक्त्यात्मनास्थितंकृष्णावतारत्वेतुशक्त्यात्मना । अवयवित्वंतुव्यक्त्यात्मने त्युक्तौकोदोषइत्यर्थः । नन्वेतदेवकथं । अभेदेभेदकार्याणामयोगादित्यतउक्तं विशेषेति ॥ यथासोमाभावेपिसोमकार्यंपूतीकैःक्रियते तथाभेदाभावेपिभेदप्रतिनिधिनाविशेषेणस्वरूपसामर्थ्यलक्षणेनभेदकार्यनिर्वाहइत्यर्थः । समर्थितश्चन्यायामृतेविशेषपदार्थइतिभावः ॥ तदु क्तमिति ॥ एतेनभाष्यंन्यायविवरणंचैकार्थमेवेतिदर्शितं ॥ नेहनानेति ॥ किंचन गुणक्रियावयवादिकं । नाना भिन्नं । नास्तीत्यर्थः । एवंब्रह्मशब्दस्यानंदमयेपुच्छेचमुख्यत्वंसमर्थ्येदानींप्रायपाठत्यागदोषोनास्तीत्याह ॥ अन्नमयादावपीति ॥ "अन्नादीनांचप्राचुर्यमेवे"त्या दिभाष्यइत्यर्थः । यदपिमयटःप्राचुर्यार्थत्वेपिप्रतियोगिदुःखलेशाभावात्स्वार्थत्यागइति तदपिनेत्याह ॥ प्राचुर्यस्येति ॥ यतःप्राचुर्यस्येत्य

तदुक्तंन्यायविवरणे "नचावयवत्वविरोधः । नेहनानास्तिकिंचनेत्यादिश्रुतेरवयवाद्यभेदा"दिति । अन्नमयादाव पिप्राचुर्यार्थत्वस्यभाष्यएवोक्तत्वान्नप्रायपाठत्यागः । प्राचुर्यस्यप्रतियोग्यल्पत्वापेक्षत्वेपिनप्रतियोगिनःसामानाधि करण्यनियमः । यतः प्राचुर्यस्यविजातीयसमानाधिकरणाल्पंयथा तथासजातीयविभिन्नाधिकरणाल्पंनिरूपकं ।

गु० त्यतआह ॥ युक्तंचेत्यादि ॥ आनंदमयस्यब्रह्मत्वेविकारार्थकमयटःप्रायपाठत्यागःस्यादित्युक्तंपरिहरति ॥ अन्नमयादावपीति ॥ प्राचुर्यस्येत्यादि ॥ यस्य प्राचुर्यमुच्यतेतत्प्रतियोगिनोल्पत्वमेवापेक्षितमितिभावः । ननुप्राचुर्यस्यविशेषणत्वेप्रतियोगिनईषदनुवृत्तिप्रतीतिनियमाभावेपिप्राचुर्यस्यविशेष्यत्वेप्रतियोगिनईषदनुवृ

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यश्लोकेनान्वयः । यथानिरूपकमित्यन्वेति । श्लोकोक्तदृष्टांतदार्ष्टांतिकौविवृणोति ॥ **दृश्यतेहीति** ॥ व्यधिकरणस्य भिन्नाधिकरणस्य ॥ **प्रकाशस्याल्पत्वेनापीति** ॥ अन्यथांधकारलेशोपिसवितरिस्यादित्यर्थः ॥ **अल्पत्वमिति** ॥ शतगुरुणितत्वादिनापरिमितत्वमुक्त्वे त्यर्थः ॥ **यतोवाचइति** ॥ "यतोवाचोनिवर्तंते अप्राप्यमनसासह आनंदंब्रह्मणोविद्वान् नबिभेतिकुतश्चने"त्युक्तावाङ्मनसगोचरत्वस्यप्रागप रिच्छिन्नार्थत्वोक्तेरितिभावः । तथाचजीवगतसुखाल्पत्वापेक्षयाऽऽनंदप्रचुरंब्रह्मेतिवक्तुंशक्यमितिनमयटोमुख्यार्थत्यागइतिभावः । एतेन "प्राचुर्यार्थोश्चमयट"इत्यादेर्व्याख्यावसरे"पदार्थांतरगताल्पतद्धर्मापेक्षयोपपत्ते"रितिसुधास्थंवाक्यंविवृतंभवति । उक्तस्यान्यथासिद्धत्वंकेनचि दुक्तमनूद्यनिराह ॥ **यत्त्विति** ॥ **तन्नेति** ॥ "आनंदप्रचुरइतियथास्थिताभिधानेब्राह्मणप्रचुरोग्रामइतिवदनानंदस्यापिप्राप्तेःप्रचुरानंदइति

दृश्यतेहिब्राह्मणप्रचुरोग्रामइत्यादौसमानाधिकरणस्यविजातीयशूद्रादेरल्पत्वेनेवप्रचुरप्रकाशःसवितेत्यादौव्य धिकरणस्यसजातीयस्यनक्षत्रादिप्रकाशस्याल्पत्वेनापिप्राचुर्यं प्रकृतेच "सैषानंदस्ये"त्यादिश्रुत्यैवव्यधिकर णस्यसजातीयस्यजीवानंदस्याल्पत्वमुक्त्वाब्रह्मानंदस्य"यतोवाच"इतिमहत्त्वमुक्तं । यत्तु प्राचुर्यस्यविशेषणत्वे प्रतियोगिनईषदनुवृत्तिप्रतीतिनियमाभावेपिविशेष्यत्वेतन्नियमः । ब्राह्मणप्रचुरोग्रामइत्यादौदर्शनात् । आनं दमयइत्यत्रचप्राचुर्यंविशेष्यमितिकल्पतरूक्तं । तन्न । प्रकाशप्रचुरःसवितेत्युक्तेपितस्मिन्नंधकारलेशाप्रतीतेः ।

गु० त्तिप्रतीतिनियमआवश्यकएव । अन्यथाब्राह्मणप्रचुरोग्रामइत्यादौप्रतियोगिभूतशूद्रादेरीषदनुवृत्तिर्नस्यादित्यतआह ॥ **ब्राह्मणप्रचुरइत्यादि** ॥ नन्वेवंप्राचुर्यस्य ब्राह्मणप्रचुरोग्रामइत्यादौसमानाधिकरणस्यविजातीयशूद्रादेरल्पत्वेन प्रचुरप्रकाशःसवितेत्यत्रव्यधिकरणस्यसजातीयनक्षत्रादिप्रकाशस्याल्पत्वेनदृष्टत्वात् प्रकृतेपिसजा

प्र० विपरीतसमासःकृतः । प्रचुरानंदइत्यभिधानेपूर्णानंदइत्येवप्रतीते"रितिटीकोक्तिंलक्षरार्थोक्तिप्रस्तावेविवरिष्यामइतिभावः । एतच्चसुधायां विरुद्धार्थप्राप्तेरशाब्दत्वात्प्रचुरशब्दोहितस्यतस्मिन्महत्वमात्रमाह । विरुद्धसद्भावस्तुप्रमाणांतरगम्यः । अन्यथा अन्नप्रचुरोमखःप्रकाशप्रचु रःसवितेत्युक्तेमखेसवितरिचदुर्भिक्षान्धकारलेशप्रसंगादितिस्पष्टमेवप्रतिपादितमितिभावः । व्यभिचारस्यलोकसिद्धंस्थानमुक्त्वापरांगीकृत स्थानांतरमाह ॥ **अंतरिति** ॥ अंतःशरीरइत्याथर्वणे यएषइतितैत्तिरीये प्रज्ञानेतिमाण्डूकेचप्रयोगादित्यर्थः । ननुज्योतिर्मयइत्यादौमयट स्तादात्म्यार्थत्वमुपेयतइत्यतआह ॥ **नचेति** ॥ **संभवइति** ॥ उक्तदिशाव्यधिकरणप्रतियोग्यत्वापेक्षयेतिभावः । कथंतर्हिक्वचिद्द्विजाती यधीरित्यतआह ॥ **ब्राह्मणेति** ॥ यदप्युक्तमानंदप्रातिपदिकेमयडर्थोलक्ष्यतइति तत्रसैषानंदस्येतिवाक्यस्थेवाऽऽनंदपदे आनंदंब्रह्मणोविद्वा

"अंतःशरीरेज्योतिर्मयोहिशुभ्रोयंपश्यंतियतयःक्षीणदोषाः यएषोंतर्हृदयआकाशस्तस्मिन्नयंपुरुषोमनोमयः प्रज्ञानघनएवानंदमयः"इत्यादौत्वन्मतेपिब्रह्मण्यपिविज्ञानमयादिशब्दप्रयोगाच्च । नचात्रप्राचुर्यार्थत्वसंभवेवैय र्थ्यापादकंस्वार्थिकत्वंयुक्तं । ब्राह्मणप्रचुरइत्यादावपिप्रचुरशब्दोमहत्त्वमात्रमाह । विरोधिप्रतीतिस्तुमानांतरात् ।

गु० तीयव्यधिकरणाल्पत्वेनैवप्राचुर्येनियमाभावाद्द्विजातीयसमानाधिकरणाल्पत्वेनैतन्निरूपणेप्रतियोगिनोल्पत्वंब्रह्मणिस्यादतउक्तार्थेनियामकमाह ॥ **प्रकृतेचेति** ॥ अन्यथाप्रकरणबाधादितिभावः । नन्वेवंप्राचुर्यस्यविशेष्यत्वेविजातीयसमानाधिकरणाल्पत्वनियमोऽवश्यंवाच्यः । अन्यथात्राह्मणप्रचुरोग्रामइत्यत्रापितन्नस्यादित्यत इष्टापत्त्यासमाधत्ते ॥ **ब्राह्मणप्रचुरइत्यादाविति** ॥ नचैवमानंदमयइत्यत्रापिमहत्त्वमात्रलाभःस्यात्सजातीयस्यजीवानंदस्याल्पत्वलाभोनस्यादितिवाच्यं । तत्रापि मानांतरेणैतल्लाभात् । अतएवब्राह्मणप्रचुरइत्यत्रापिविरोधिप्रतीतिर्मानांतरादेवेत्येवविभावयिष्यतेविरोधिप्रतीतिस्त्वित्यादिना । अतएवप्रकृतेसैषानंदस्येत्यादिनाप्रक

SGDF Sri Gargeshwari Digital Foundation

प्र० नित्यत्रवा यदेषआकाशआनंदइत्यत्रवेतिविकल्पान्क्रमेणनिराह ॥ **सैषेत्यादिना** ॥ **यदेषइति** ॥ अयमर्थः । चतुर्विधाहिचेतनप्रवृत्तिः । सुखोद्रेकाद्यथा । मत्तस्यनृत्तगानादौ । दुःखोद्रेकाद्यथा । रोदनादौ । सुखरागात्तत्प्राप्त्यर्थायथा । भोजनादौ । दुःखद्वेषात्तन्निवृत्त्यर्था यथा । कंटकोद्धारादौप्रवृत्तिः । रागद्वेषदुःखरहितेभगवतिसुखरागादेरयोगेनहेत्वंतरशून्याप्रवृत्तिः सुखोद्रेकलक्षणमेवहेतुंकल्पयति । ततश्चकार्यानुगुणत्वाच्चकारणस्यकृत्स्नजगत्सृष्ट्यादिरूपमहाप्रवृत्त्यामहानंदोद्रेकसिद्धिरिति । तदुक्तमनुव्याख्याने "प्रवृत्तिश्चनृत्तगानादिकासु

सैषानंदस्येत्यादावानंदपदंनप्राचुर्यलक्षकं । किंत्वानंदमात्रपरं । अन्यथा"तेयेशत"मितितारतम्योक्त्ययोगात् । "आनंदंब्रह्मण"इत्यत्रत्ववाङ्मनसगोचरत्वेनानंदस्यप्राचुर्यसिद्धिः । "यदेष" इत्यत्रापिसुखरागस्यदुःखद्वेषस्यदुःखोद्रेकस्यचप्रवृत्तिहेतोर्भगवत्यसंभवेनसृष्ट्यादिप्रवृत्त्यन्यथानुपपत्त्यानंदोद्रेकेसिद्धे महाप्रवृत्त्यामहानंदोद्रेकसिद्धिः । नत्वानंदशब्दस्यप्राचुर्यलक्षकत्वेन ।

गु० रणसहकारेणार्थविशेषलाभःप्रागुक्तः । आनंदमयस्यब्रह्मत्वे आनंदपदंमयडर्थलक्षकमितिवक्तव्यमित्युक्तं । तत्रकिंसैषानंदस्येत्यस्मिन्वाक्यआनंदशब्दस्यानंदमयलक्षकत्वमुच्यते आनंदंब्रह्मणइत्यत्रवा यदेषआकाशआनंदोनस्यादित्यत्रवा । नाद्यइत्याह ॥ **सैषेति** ॥ नद्वितीयइत्याह ॥ **आनंदंब्रह्मणइत्यत्रेति** ॥ नतृतीयइत्याह ॥ **यदिति** ॥ सृष्ट्यादिप्रवृत्त्यन्यथानुपपत्त्यानंदोद्रेकसिद्धेरित्यन्वयः । ननुसृष्ट्यादिप्रवृत्तिःप्रकारांतरेणापिभविष्यतीतिनतदन्यथानुपपत्त्याऽऽनंदोद्रेकसिद्धिरितिचेत्तत्रवक्तव्यं । साकिंसुखरागाद्वा दुःखोद्रेकाद्वा दुःखद्वेषाद्वा । पक्षत्रयमप्यनुपपन्नमित्याह ॥ **सुखरागस्येति** ॥ मास्तुवाऽऽनंदप्राचुर्यसिद्धिः । नचतथात्वेऽल्पानंदस्यजीवेपिसत्त्वात्कथंव्यभिचारिणाऽऽनंदपदाभ्यासेनानंदमयस्यब्रह्मत्वसिद्धिरितिवाच्यं । आनंदमयस्यब्रह्मत्वेब्रह्मपदाभ्याससैवहेतुत्वेनानंदपदाभ्यास

SGDF
Sri Gangeshwar Digital Foundation

प्र० खा"दित्यादि । उक्तंचतैत्तिरीयभाष्ये"अल्पात्सुखादल्पकर्मापूर्णानंदाद्धिसर्वक्र"दित्यादि । नन्वेवमभ्यासादित्यस्यानंदशब्दाभ्यासादि त्यर्थोक्तौजीवेव्यभिचारापत्त्याऽऽनंदशब्देनमयडर्थंलक्षयित्वाऽऽनंदमयशब्दाभ्यासादितिवक्तव्यमित्यतआह ॥ **नचेति** ॥ **ब्रह्मपदस्येति** ॥ तस्यचव्यभिचारोनेत्युक्तमितिभावः । एवंप्रायपाठेत्यादिनोक्तंदोषचतुष्टयमुद्धृत्य यदपिकिंचेत्यादिनोक्तंतदप्ययुक्तमित्याह ॥ **सविशेषत्वं त्विति** ॥ **किंत्ववाङ्मनसेति** ॥ तथैवोक्तत्वात्प्रागितिभावः । यदप्यपिचेत्यादिनोक्तंतदपिनेत्याह ॥ **प्रियादिकेचेति** ॥ **विस्तृतमिति** ॥

नचास्माकंभास्कारादीनामिव"सैषानंदस्ये"त्यादावानंदपदाभ्यासोहेतुः । येनानंदमात्रस्यजीवेपिसंभवा त्तदभ्यासस्यब्रह्मत्वासाधकतयाप्राचुर्यलक्षणास्यात् । किंतुब्रह्मपदस्य । सविशेषत्वंतुब्रह्मत्वसाधकं । नच "यतोवाचोनिवर्तंत"इतिश्रुतिर्निर्विशेषत्वमाह । किंत्ववाङ्मनसगोचरानंतविशेषवत्त्वं । प्रियादिकेच यः प्रतिशरीरंभिन्नोनासौभगवतोवयवः । यश्चावयवोनसभिन्नः । विस्तृतंचैतत्तैत्तिरीयकभाष्येभगवत्पादैः ।

गु० स्याहेतुत्वादित्याह ॥ **नचास्माकमिति** ॥ **ब्रह्मपदस्येति** ॥ अभ्यासएवहेतुरितिशेषः । ननुतथाप्यानंदमयस्यब्रह्मत्वंनोपपद्यते । प्रियाद्यवयवयोगेनतस्यसविशे षत्वेनब्रह्मणश्चनिर्विशेषत्वेनतयोरैक्यायोगादित्यतआह ॥ **सविशेषत्वंत्विति** ॥ सविशेषत्वंपूर्णत्वरूपब्रह्मत्वानुकूलमेव । नतुप्रतिकूलं । ब्रह्मत्वप्रतिबंधकीभूतनिर्वि शेषत्वविरहरूपत्वादित्यर्थः । नचैवंयतोवाचइत्यादिश्रुतिविरोधइत्याशंक्यनिराकरोति ॥ **नचेति** ॥ यच्चोक्तमानंदमयःप्रतिशरीरंप्रियादिभेदाद्भिन्नोब्रह्मत्वभिन्नमितिक थंतयोरैक्यमितितत्राह ॥ **प्रियादिकेचेति** ॥ विषयोत्थसुखादेःप्रतिशरीरंभेदेपितस्यब्रह्मत्वानंगीकारात् । तन्नियामकावयवविशेषस्यैवचभगवदवयवत्वेपितस्यैकत्वे नप्रतिशरीरंभेदाभावान्नोक्तदोषइत्यर्थः । किंचानंदमयस्याब्रह्मत्वे आनंदमयविषयतयोदाहृतेश्लोकेसोकामयतेत्येतद्वाक्येतच्छब्देनकस्यपरामर्शः । ब्रह्मपुच्छमिति

SGDF
Sri Gargeshwari Digital Foundation

प्र० "शिरःप्रियेस्थितंतस्यपरेयंप्रियानामकं । मोदप्रमोदयोर्बाहूमोदनाच्चप्रमोदनात् । मोदप्रमोदनामानावानंदस्त्वाततत्वतः । मध्यमानासंस्थंच ब्रह्मसृष्ट्यातुबृंहयत् । पुच्छंप्रधानवायौचब्रह्माख्येसंस्थितंसदे"त्यादिनाप्रमाणेनविस्तृतमित्यर्थः । एवमानंदमयस्यब्रह्मत्वेपरोक्तबाधकानि व्युदस्यब्रह्मत्वेसाधकान्यब्रह्मत्वेबाधकानिचाह ॥ **किंचेत्यादिना** ॥ अयमर्थः । आनंदमयप्रकरणंसमाप्य"अथातोनुप्रश्ना"इतिकृतप्रश्नस्य परिहारंविवक्षुणा"सोकामयतबहुस्यांप्रजायेये"त्यादिनातच्छब्देनपूर्वसन्निहितानंदमयंपरामृश्य तस्यजगद्धेतुत्वमुच्यते । तस्यचब्रह्मलक्षणत्वे नजन्माधिकरणेऽभिधानात्त्वया"तद्धेतुव्यपदेशा"दितिसूत्रेब्रह्मपरत्वेनांगीकृतत्वाच्चकथमानंदमयस्याब्रह्मता । किंतुब्रह्मतैवस्यात् । नच"ब्रह्मपुच्छंप्रतिष्ठेतिसन्निहितपुच्छस्यसइतिपरामर्शइतिवाच्यं । सइत्यस्यपुँल्लिंगत्वात् । पुच्छपदनिर्दिष्टस्यनपुंसकनिर्दिष्टत्वात् । नचप्रधानप्रातिपदिकस्वारस्यायगुणभूतलिंगबाधेनसन्निहितपुच्छपरत्वं । आनंदमयस्यापिसन्निहितत्वेनतत्परामर्शे उभयस्वारस्यात् । नचैवंलिंगानुरोधेन"तस्माद्वाएतस्मादात्मनआकाशःसंभूत"इतिभूतकारणत्वेननिर्दिष्टआत्मापरामृश्यतामितिवाच्यं । तच्छब्दस्यसन्निहितगामित्वेनात्मनश्चव्य

किंच"सोकामयते"त्यत्रपुँलिंगेनसन्निहितपरामर्शिनातच्छब्देननपुंसकब्रह्मपुच्छशब्दनिर्दिष्टस्य "तस्माद्वाएतस्मादात्मन" इतिव्यवहितात्मशब्दनिर्दिष्टस्यचपरामर्शायोगेनसन्निहितस्यानंदमयस्यैवपरामर्ष्टव्यत्वात्"सोकामयते"त्यस्यचकारणवाक्यस्यत्वयापिब्रह्मपरत्वेनांगीकृतत्वात्कथमानंदमयस्याब्रह्मता ।

गु० वाक्योक्तपुच्छस्यवातस्माद्वाएतस्मादात्मनआकाशइतिवाक्योक्तात्मनोवा । नाद्यः । पुँल्लिंगेनतच्छब्देननपुंसकेनप्रकृतस्यब्रह्मपुच्छस्यपरामर्शायोगात् । नांत्यः । तच्छब्दस्यसन्निहितपरामर्शकत्वेनतस्माद्वेतिव्यवहितात्मशब्दनिर्दिष्टस्यापिपरामर्शायोगादित्याह ॥ **किंचेति** ॥ नन्वस्त्वानंदमयस्यब्रह्मत्वंबाधकाभावात्साधकसद्भा

प्र० वहितत्वेनप्रातिपदिकास्वारस्यस्यान्याय्यत्वादिति । तदुक्तंतैत्तिरीयभाष्ये"सत्वकामयत् । सृष्ट्वाजगदिदंसर्वंनियामकतयास्त्वतु । बहुरूपोभवानीतिस्याज्जगच्चेत्यचिंतय"दिति । मनोमयस्यब्रह्मत्वेसाधकमाह ॥ **अपिचेति** ॥ **श्लोकएवेति** ॥ अनुवाकांते"नबिभेतिकुतश्चने"ति मनोमयेतु "नबिभेतिकदाचने"त्येतावतानान्यत्वमितिभावः । श्रुत्या उपनिषदा । तस्यचानुवाकांतउदाहृतस्यावाङ्मनसगोचरत्वाभयहेतुत्वलिंगाच्चे त्यर्थः । अयमपि यतोवाचइतिश्लोकोपि ॥ **अनंगीकारादिति** ॥ तत्रब्रह्मपदाश्रवणादितिभावः । इदानींपंचानांब्रह्मत्वानंगीकारेबाधकान्याह ॥ **किंचेति** ॥ ब्रह्मविदाप्नोतिपरमितिचतुर्मुखेनोक्तेकिंब्रह्मेति ब्रह्मजिज्ञासोर्वरुणस्यप्रश्नेतत्परिहारायोत्तरग्रंथस्यप्रवृत्तत्वादितिभावः । ननुब्रह्मपुच्छमित्युक्तब्रह्मज्ञानार्थमब्रह्मणामप्यन्नमयादिकोशानांद्वारत्वेनोपदेशोस्तु । बहिर्वृत्तिनिवारणद्वाराब्रह्मज्ञानोपायत्वात् । यथाद्वितीयाचंद्रप्रश्नेअ

अपिचानुवाकांतउदाहृतो"यतोवाच" इतिश्लोकएवमनोमयेपिश्रुत्योदाहृतः । तस्यच"आनंदंब्रह्मण"इतिब्रह्मश्रुत्या "यतोवाचोनिवर्तंते नबिभेतिकुतश्चने"तिलिंगाच्चब्रह्मविषयत्वंत्वयापिस्वीकृतमितिकथंमनोमयस्याब्रह्मता । नचयथापरमते"असन्नेवे"तिश्लोकआनंदमयपुच्छविषयस्तथाऽयमपिमनोमयपुच्छविषयइतिवाच्यं । "अथर्वांगीरसःपुच्छंप्रतिष्ठे"त्युक्तमनोमयपुच्छस्यब्रह्मत्वानंगीकारात् । किंचान्नमयादीनामब्रह्मत्वेब्रह्मजिज्ञासोस्तदुपदेशायोगः ।

गु० वाच्च । नमनोमयस्य तत्साधकाभावादित्यतआह ॥ **अपिचेति** ॥ ननुमन्मते असन्नेवेतिश्लोकस्यानंदमयपुच्छविषयत्ववद्यतोवाचइतिश्लोकस्यापिमनोमयपुच्छविषयत्वान्नतेनमनोमयस्यब्रह्मत्वसमर्थनमित्याशंक्यनिषेधति ॥ **नचेति** ॥ ननुमनोमयंप्रत्युदाहृतश्लोकेब्रह्मशब्दस्यवाचंब्रह्मेत्यादिवदुपचरितार्थत्वाल्लिंगस्यार्त्किंचि

SGDF
Sri Gangadharendra Digital Foundation

प्र० चंद्ररूपापिशाखाचंद्रज्ञानार्थतयाचंद्रत्वेन यथावाऽरुंधतीप्रश्नेतत्समीपवर्तिनीपृथुलतारकारुंधतीज्ञानार्थतयाऽरुंधतीत्वेनोच्यते तद्वदिति । दृष्टांतासंमत्यादूषयति ॥ **द्वारमपीति** ॥ किंचशाखादिकमप्रदर्श्यचंद्रादिकंनप्रदर्शयितुंशक्यतइतितत्रतस्यास्तुद्वारत्वं । नैवंप्रकृतेशब्दस्थलइत्याह ॥ **नचेति** ॥ यदपिब्रह्मज्ञानार्थंद्वारोपदेशइतितदपिनेत्याह ॥ **नचसत्यमिति** ॥ यद्वापूर्वपूर्ववर्णानुक्तावंतिमवर्णोक्तिरिवान्नमयादेरवचनेब्रह्मवक्तुमशक्यमितितदुपदेशउतप्रयोजनवशात् । आद्यआह ॥ **नचान्नमिति** ॥ अंत्यआह ॥ **नचसत्यमिति** ॥ अनुवाकद्वयेऽ

द्वारमपिद्वारत्वेनैवोपदेष्टव्यंनत्वात्मतया । लोकेहिचंद्रारुंधत्यादौशाखास्थूलतारादिकंद्वारत्वेनैवोपदिश्यते । नचान्नंब्रह्मेत्यनुक्त्वानंदोब्रह्मेतिवक्तुमशक्यं । येनद्वारत्वंस्यात् । नच"सत्यंज्ञान"मितिस्वरूप

गु० द्वयाभावपरत्वान्नताभ्यांब्रह्मपरत्वसिद्धिरित्यरुचेराह ॥ **किंचेति** ॥ नन्वन्नमयादेरब्रह्मत्वेपिब्रह्मजिज्ञासुंप्रतिद्वारतयातदुपदेशोयुक्तइत्यतआह ॥ **द्वारमपीति** ॥ तथाचब्रह्मत्वेनतदुपदेशोसंगतइतिभावः । ननुचंद्रारुंधत्यादिप्रदर्शनार्थशाखास्थूलतारकादेश्चंद्रादित्वेनोपदेशवत्प्रकृतेप्यन्नमयादेरात्मत्वेनोपदेशःसंगतइत्यतोदृष्टांतएवासंप्रतिपन्नइत्याह ॥ **लोकेहीति** ॥ ननुद्वारस्यद्वारतयैवोपदेष्टव्यत्वेपिप्रकृते आनंदमयादेरब्रह्मत्वेनोपदेशे आनंदरूपब्रह्मबोधकस्यैवासंभवेनब्रह्मतयोपदेशःसंगतएवेत्यतआह ॥ **नचान्नंब्रह्मेत्यनुक्त्वेति** ॥ नच नापीत्यर्थः । एवमुत्तरत्रापिव्याख्येयं । एवमन्नमयादेर्द्वारत्वमंगीकृत्यद्वारमपिद्वारत्वेनैवोपदेष्टव्यमित्युक्तं । नतुब्रह्मत्वेन । वस्तुतस्तुनतस्यद्वारत्वमप्युपपद्यते । तच्चब्रह्मस्वरूपबोधंप्रतिवासत्यज्ञानत्वादिस्वरूपलक्षणज्ञानंप्रतिवा । नाद्यः । सत्यंज्ञानमितिस्वरूपलक्षणेनैवब्रह्मज्ञानस्यसिद्धत्वेनान्नमयाद्युपदेशस्यतदर्थत्वानुपपत्तेः । नांत्यः । स्वरूपलक्षणज्ञानोपयोगित्वेतदुक्तेःप्रागेवान्नमयाद्युपदेशापत्त्यास्वरूपलक्षणेनब्रह्मोपदेशानंतरंतदुक्तेरसंगतत्वापातात् । अन्यथाप्रकृष्टप्रकाशश्चंद्रइतिस्वरूपलक्षणेचंद्रमुद्दिश्यपुनस्तस्यस्थूलतारकादिरूपताभ्रांतिमापाद्यचंद्रस्वरूपस्यबोधनीयत्वापातादित्याह ॥ **नचसत्यं**

SGDF Sri Gurgeshwari Digital Foundation

प्र० न्नान्नमयादेरब्रह्मत्वमुपेत्यानंदपुच्छयोरेवब्रह्मत्वोररीकारादुभयत्रद्वारतायानिरसनीयत्वात्। अन्नमयादीनामिति अन्नंब्रह्मेतिचव्यामिश्रोक्तिः प्रागदृष्टचंद्रादिप्रदर्शनायशाखादिप्रदर्शनेपिप्रागुपदेशेनज्ञातब्रह्मज्ञानेद्वारोक्तिर्निष्फलाविपरीतफलाचेत्युक्तंभवति । ननुसत्यंकोशाःपरांचइति । तथापितेषांप्रत्यग्ब्रह्मत्वेनज्ञातानांब्रह्मज्ञानद्वारत्वंसेत्स्यति । कोदोषइत्यतआह ॥ **प्रत्यक्त्वेनेति** ॥ आनंदमयंप्रत्युदाहृतश्लोकस्यत्वयापुच्छ

लक्षणेनब्रह्मोपदिश्य पुनस्तस्यदेहादिरूपताभ्रांतिमुत्पाद्य पुनरपिपुच्छवाक्येनतदुपदेशोर्थवान्। नचद्वारोपदेशश्चित्तस्यप्रत्यक्प्रावण्यार्थः। कोशानांपराक्त्वात्। परागुपदेशेनचप्रत्यक्प्रावण्येतिप्रसंगात्। प्रत्यक्त्वेनारोपस्याप्यानंदमये उत्तरानुवाकोक्तान्नादौचाभावात्।

गु० **ज्ञानमितीति** ॥ नब्रूमोवयमन्नाद्युपदेशस्यस्वरूपबोधोवास्वरूपलक्षणबोधोवाप्रयोजनमिति । येनोक्तदोषःस्यात् । किंतुचित्तस्यप्रत्यक्प्रावण्यमेवेत्याशंक्यनिराकरोति ॥ **नचेति** ॥ तत्समानदेशस्यवातत्समानजातीयस्यवातत्प्रावण्यार्थमुपदेष्टव्यत्वात्प्रत्यगर्थभूतब्रह्मणिप्रावण्यार्थंप्रत्यगर्थस्यैवोपदेष्टव्यत्वेनकोशानांचातथाभूतत्वात्तदुपदेशोसंगतइत्याह ॥ **कोशानामिति** ॥ अनर्हत्वादित्यर्थः । अथवाकिंचान्नादेर्द्वारत्वंवदन्प्रष्टव्यः । तदुपदेशःकिमन्नमयाद्यनुक्त्वानंदमयाद्युपदेशस्यैवासंभवात् किंवासत्यत्वादिस्वरूपलक्षणज्ञानसाधनत्वात् किंवाचित्तस्यप्रत्यक्प्रावण्यार्थत्वात्। नाद्यइत्याह ॥ **नचेति** ॥ नद्वितीयइत्याह ॥ **नचेति** ॥ स्वरूपलक्षणस्यपूर्वमेवज्ञातत्वान्नतस्यद्वारत्वमितिभावः । नतृतीयइत्याह ॥ **नचद्वारेति** ॥ कोशानांपराक्त्वेवस्तुगत्याप्रत्यक्त्वाभावेप्यारोपितप्रत्यक्त्वंचसंभवतीत्यतआह ॥ **प्रत्यक्त्वेनेति** ॥ अन्नमयप्राणमयमनोमयविज्ञानमयानांदेहरूपत्वात्तत्रप्रत्यक्त्वासंभवेप्यानंदमयस्यादेहत्वादन्नादेरपितदभावात्तत्रप्रत्यक्त्वारोपइतिभावः । अथवाप्रत्यक्त्वस्याहंरूपत्वेपितस्यब्रह्मरूपत्वात्तस्यचवास्तवस्यकोशेष्वभावेप्यारोपितस्यसत्त्वेनतदुपदेशस्यचित्तप्रत्यक्प्रावण्यार्थत्वंयुक्तमित्यतोऽन्नमयादिरूपद्वारस्यब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० परतयोक्तत्वेनतत्रब्रह्मत्वाश्रवणात् । तथा "अन्नंप्राणंचक्षुःश्रोत्रंमनोवाच" मित्यत्रब्रह्मपदाश्रवणादितिभावः । नन्वन्नमयादौब्रह्मत्वस्यश्रवणमेवान्नादौश्रवणं । द्वयोरभेदादित्यतआह ॥ **तत्रत्यानामुत्तरानुवाकस्थानामिति** ॥ **स्थानप्रमाणादिति** ॥ मीमांसकरीत्यैतत् । तन्म

तत्रत्यानामन्नादीनामन्नमयादित्वेचतत्रत्यस्त्वयाब्रह्मत्वेनस्वीकृतआनंदोप्यानंदमयःस्यात् । स्थानप्रमाणात् ।

गु० त्वारोपः किंश्रौतउतप्रात्यक्षिकइतिविकल्प्याद्यंदूषयति ॥ **प्रत्यक्त्वेनारोपस्येति** ॥ **आनंदमयइति** ॥ अन्नमयादाविवानंदमयउपासनायाअश्रवणादित्यर्थः । नन्वत्रयेन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते विज्ञानंदेवाःसर्वेब्रह्मज्येष्ठमुपासतइति त्रिष्वेवोपासनायाःश्रवणादानंदमयमात्रग्रहणमसंगतमितिचेन्न । मनोमये आनंदंब्रह्मणोविद्वानित्यत्रतदश्रवणेपितन्मध्यपतितस्यविद्वानित्यस्यापिसंदंशन्यायेनोपांशुयाजवाक्यमध्यपतितविष्ण्वादिवाक्यस्येवोपासनापरत्वस्यपरेणवक्तुंशक्यत्वादानंदमयमात्रग्रहणस्यसंगतत्वात् ॥ **उत्तरेति** ॥ अन्नंब्रह्मेतिव्यजानात्प्राणोब्रह्मेतिव्यजानान्मनोब्रह्मेतिव्यजानाद्विज्ञानंब्रह्मेतिव्यजानादित्यत्रकुत्राप्युपासनायाअश्रवणेनान्नादीनांब्रह्मत्वारोपस्यश्रौतत्वानुपपत्तेः । ननूत्तरानुवाकोक्तानामन्नादीनामन्नमयादित्वात्तेषांचदेहत्वात्तत्रप्रत्यक्त्वारोपःसंभवतीत्यतआह ॥ **तत्रत्यानामिति** ॥ अथवायथासंख्याम्नानरूपपाठसादेश्यलक्षणस्थानेनोत्तरानुवाकोक्तान्नादीनामन्नमयादित्वात्तेषुचब्रह्मत्वोपासनाश्रवणात्कथंतदभावाभिधानमित्यतआह ॥ **तत्रत्यानामिति** ॥ **आनंदमयःस्यादिति** ॥ नचेष्टापत्तिरितिवाच्यं । विकारार्थकमयट्श्रवणेनतस्यत्वयाब्रह्मत्वानंगीकारात् ॥ **स्थानेति** ॥ ब्रह्मवल्ल्यामानंदमयोयत्स्थानेकथितोस्तिभृगुवल्ल्यांतस्मिन्स्थानआनंदस्यकथितत्वात् । अत्रयथासंख्याम्नानरूपपाठसादेश्यलक्षणमीमांसकाभिमतस्थानमेवाभिप्रेतं । नत्वस्मदभिमतमितिध्येयं । अस्तुतर्ह्यन्नमयादीनांब्रह्मत्वारोपःप्रात्यक्षिकइतिद्वितीयःपक्षः । निरवद्यत्वादित्यतः तर्हितस्यस्वतएवसिद्धत्वात्पुनरन्नंब्रह्मेत्यादिश्रुत्यातदुपदेशोनुपपन्नः । अन्यथाचै

प्र० तेहितुल्यप्रदेशत्वंस्थानं । तद्विविधं । पाठसादेश्यमनुष्ठानसादेश्यंचेति । आद्यमपिद्वेधा । यथासंख्याम्नानंसन्निध्याम्नानंचेति । तत्रयथासंख्याम्नानरूपंस्थानंतुतृतीये "क्रमश्चदेशसामान्या" दितितृतीयपादीयपंचमाधिकरणे आग्नेयाग्नीषोमीयानुमंत्रणमंत्रयोः "अग्नेरहंदेवयज्ययान्नादोभूयासं । अग्नीषोमीययोरहंदेवयज्ययावृत्रहाभूयास" मित्यनयोर्मध्येपठितस्यदब्धिरस्यदब्धोभूयासमितिमंत्रस्याग्नेयाग्नीषोमीययागयोर्मध्येऽनुष्ठेयेउपांशुयागेविनियोगेप्रमाणमितिदर्शितं । तथाचतत्रैवात्राप्यन्नप्राणमनोविज्ञानानंदानामन्नमयादीनांचपंचत्वेनयथासंख्यमानंदमयस्थानआनंदस्यपतितत्वेनतयोरैक्यापत्त्याऽऽनंदमयवदानंदोप्यब्रह्मस्यादित्यर्थः । नयुक्तश्चकोशानांब्रह्मत्वज्ञापनायतथोपदेशइत्याह ॥ **नचाज्ञातेति** ॥ अन्यथाकर्मकांडेपितथोपदेशःस्यादितिभावः । एवंप्रत्यक्प्रावण्यार्थद्वारोपदेशइतिनिरस्तं । इदानींब्रह्मणःप्रत्यक्त्वमेवनास्तियत्प्राव

नचाज्ञातधर्मतत्वंचैत्यवंदनादिधर्मइतिमन्वानंप्रतिचैत्यवं
दनादिधर्मइत्युपदिश्यज्योतिष्टोमादिधर्मइत्युपदिश्यते ।

गु० त्यवंदनादिधर्मइतिमन्वानंप्रतिचैत्यवंदनादिधर्मइत्युपदिश्येतेत्यतआह ॥ **नचाज्ञातेति** ॥ यदुक्तमन्नमयादेर्द्वारत्वंकथमितितत्रविकल्पितपक्षेषुप्रथममेवांगीकुर्मः । नचान्नंब्रह्मेत्यनुक्त्वाप्यानंदोब्रह्मेतिवक्तुंशक्यत्वात्कथंतस्यद्वारत्वमितिवाच्यं । अन्नादौब्रह्मत्वविषयकभ्रमस्यजातत्वेनतदुपदेशाभावेऽन्नादौब्रह्मेत्युपदेशस्यैवासंभवादित्यतोवाह ॥ **नचेति** ॥ अन्यथायस्यचैत्यवंदनेधर्मत्वभ्रांतिरुत्पन्नास्तितंप्रतिचैत्यवंदनादिकंधर्मइत्युपदिश्यज्योतिष्टोमादेर्धर्मत्वोपदेशस्यकर्तव्यत्वापत्तेः । ननुतथा

SGDF Sri Gurgaonkar Digital Foundation

प्र० ण्यार्थंतदुपदेशोर्थवान्स्यादित्याह ॥ **नचत्वन्मतइति** ॥ अपरिच्छिन्नत्वादंतरत्वरूपंशुद्धत्वादहंत्वरूपंवाप्रत्यक्त्वंनेत्यर्थः । ननुकोशानांपरिच्छिन्नाहमर्थजीवरूपप्रत्यग्ज्ञानोपायत्वात्तदभिन्नापरिच्छिन्नब्रह्मज्ञानेद्वारताभविष्यतीत्यतआह ॥ **नचघटेति** ॥ जिज्ञापयिषितः ज्ञापयितु

नचत्वन्मतेऽपरिच्छिन्नस्यात्मनःशरीराद्यंतरत्वमहंत्वरूपंप्रत्यक्त्वंवास्ति । नचघटाकाशादिज्ञानोपायोपि घटादिर्महाकाशज्ञानोपायः । इहच"सत्यंज्ञानमनंत"मितिप्रकृतोपरिच्छिन्नएवात्माजिज्ञापयिषितइतितेपिमतं । किंचनिरवयवेचित्तप्रावण्यार्थंनिरवयवांतरमेवोपदेष्टव्यं । नतु"अयंदक्षिणःपक्ष"इतिसावयवं ।

गु० प्यन्नमयाद्यनुपदेशे आनंदमयोपदेशोनयुज्यते। तस्यान्नमयाद्यपेक्षयांतरत्वात्। तथाचतस्यद्वारत्वंयुक्तमित्यतआह ॥ **नचत्वन्मतइति** ॥ अन्यथाऽपरिच्छिन्नत्वंनस्यादितिभावः । एवंब्रह्मणःप्रत्यक्त्वमंगीकृत्यपरागर्थस्यप्रत्यक्प्रावण्यार्थत्वासंभवान्नपरागर्थोपदेशोयुक्तइत्युक्तं । इदानींतुब्रह्मणःप्रत्यक्त्वस्यैवासंभवान्नान्नमयाद्युपदेशस्यप्रत्यक्प्रावण्यार्थत्वमितिवाह ॥ **नचत्वन्मतइति** ॥ यदुक्तमन्नमयाद्युक्तिश्चित्तस्यप्रत्यक्प्रावण्यार्थंनसंभवति । कोशादेःपराक्त्वादिति । तदुपपादयति ॥ **अहंत्वरूपमिति** ॥ प्रत्यक्त्वंह्यहंत्वं । नचकोशेष्वहंत्वबुद्धिरस्तीतिभावः । ननुब्रह्मणोपरिच्छिन्नत्वादन्नादेःपरिच्छिन्नप्रत्यग्ज्ञानसाधनत्वेनैवापरिच्छिन्नब्रह्मज्ञानसाधनत्वोपपत्तेस्तदुपदेशःसार्थकइत्यतआह ॥ **नचेति** ॥ यद्वा किंचकोशानामपरिच्छिन्नब्रह्मज्ञानोपायत्वंनोपपन्नं । घटावच्छिन्नाकाशज्ञानेघटादेरिवतत्तत्कोशावच्छिन्नज्ञानेकोशानांहेतुत्वात् । नचावच्छिन्नज्ञानोपायत्वेप्यनवच्छिन्नज्ञानोपायइतिनोक्तदोषइतिवाच्यं । तथात्वेघटादेरपिमहाकाशज्ञानोपायत्वापत्तेरित्याह ॥ **नचेति** ॥ ननुमास्तुपरिच्छिन्नज्ञानोपायस्यापरिच्छिन्नज्ञानोपायत्वं । प्रकृतेजिज्ञापयिषितंतुपरिच्छिन्नमेवेतितत्साधनत्वमन्नादेरुपपद्यतइत्यतआह ॥ **इहचेति** ॥ ननुनिरवयवेचित्तप्रावण्यार्थंनिरवयवांतरमुपदेष्टव्यमित्ययुक्तं । तस्यातिसूक्ष्मत्वेनप्रथमंबुद्ध्यारोहासंभवात् । नचसावयवोपदेशेनकथंनिरवयवज्ञानमितिवाच्यं । चंद्रा

SGDF Sri Gargeshwari Digital Foundation

प्र० मिष्टइत्यर्थः । तथाचब्रह्मपुच्छमित्युक्तब्रह्मज्ञानायद्वारताकथंकोशानांस्यादित्यर्थः । अन्नादीनामित्युत्तरानुवाकस्याभिप्रायेण । प्राणादीनिति यथाक्रममन्वयः ॥ **समुच्चयेति** ॥ अन्यथान्नप्राणादिष्वन्यतमस्यैवश्रवणप्रसंगोन्नंवाब्रह्मेतिव्यजानादितिवास्यादितिभावः ॥ **त्वत्पक्षइति** ॥ जन्मादिसूत्रेतथोक्तेरितिभावः । "अधीहिभगवोब्रह्मेत्युक्तोन्नप्राणपूर्वकं । आहब्रह्मकथंतन्नद्वारंतदितिवादिनः । उपसत्तिंकथंविद्यु"रित्यनु

अपिचनतावदन्नादीनामन्नमयादीनांवाप्राणादीन्प्राणमयादीन्वाप्रतिद्वारुत्वं । अन्नादिज्ञानंवि नापिप्राणादिज्ञानात् । ब्रह्मणिद्वारत्वेऽन्नादिपूर्वकंप्राणाद्युपदेशोनयुक्तः । अनेकद्वारवैयर्थ्यं च । नचद्वारविकल्पः । उत्तरानुवाके "अन्नंब्रह्मेतिव्यजानात् प्राणोब्रह्मेतिव्यजानात् मनोब्रह्मेतिव्यजाना"दित्यादिनाऽन्नप्राणादिद्वारसमुच्चयोक्तेः । अपिच"यतोवेत्यादिपूर्ववाक्योक्तकारणत्वस्यापित्वत्पक्षेब्रह्मणिद्वारत्वात्कोशानांचकारणत्वेद्वारत्वाभावात्कोशोपदेशवैयर्थ्यं ।

गु० दिस्वरूपज्ञानार्थंशाखोपदेशस्यदर्शनात् । अन्यथातत्रापिचंद्रांतरमेवोपदेष्टव्यमित्यरुचेराह ॥ **अपिचेति** ॥ उत्तरानुवाकानुरोधादन्नादीनामित्युक्तं । किमत्रान्नादीनामन्नमयादीनांचद्वारद्वारि भावेनपरंपरयाद्वारत्वमुतसाक्षादेवब्रह्मणिद्वारत्वं । नाद्यइत्याह ॥ **अन्नादिज्ञानंविनेति** ॥ नद्वितीयइत्याह ॥ **ब्रह्मणीति** ॥ अन्नं प्राणंचक्षुःश्रोत्रमित्युपदेशोनयुक्तइत्यर्थः । ननुयस्यकस्यचित्प्रथमंवक्तव्यत्वादन्नस्यप्राथम्येनोक्तिरित्यतआह ॥ **अनेकेति** ॥ ननुविकल्पेनविहितत्वान्नवैयर्थ्यमित्यत आह ॥ **नचेति** ॥ ननुसमुच्चयवाचकशब्दाभावान्नसमुच्चयोयुक्तः । नचविकल्पद्योतकवाशब्दाभावान्नविकल्पोपियुक्तइतिवाच्यं । वैयर्थ्यान्यथानुपपत्त्याऽगत्याविकल्पस्याश्रयणादित्यस्वरसादाह ॥ **अपिचेति** ॥ **यतोवेत्यादीति** ॥ अत्रवैशब्दसमानार्थोवाशब्दोविवक्षितः । अर्थानुवादश्चायं । तेनयतोवेत्यादीत्युपपन्नं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्याख्यानंहृदिकृत्वादोषांतरमाह ॥ **किंचभृगुरिति** ॥ **विरोचनस्येवेति** ॥ यथाचतुर्मुखेनोपदिष्टस्यपुनरुपसत्तिर्नास्तितथानस्यादित्यर्थः। व्यक्तमेतच्छांदोग्येऽष्टमेध्याये । ननुपरोक्तबाधकानांकेषांचिन्निरासेप्यन्नमयादेर्ब्रह्मत्वेऽनुपपत्तिरेव । तथाहि । ''ओषधीभ्योन्नंअन्नात्पुरुष'' इत्योषधिकार्यान्नविकारंदेहंपुरुषपदेनोक्त्वा''सवाएषपुरुष''इतितंपरामृश्यान्नरसमयइतिप्राकृतान्नमयत्वमुच्यते । तस्येश्वरेनुपपत्तेः । नचानेनात्मनआकाशइत्युक्तात्मनएवपरामर्शइतिवाच्यं । तस्यव्यवहितत्वेनास्वारस्यात् । भृगुवल्ल्युक्तानामन्नादीनांब्रह्मत्वेसाधकविशेषस्यानुक्तेः । तत्रमयटोश्रवणेनान्नमयादिभ्यस्तेषांभेदप्रतीतेः । तेषांब्रह्मत्वेतज्ज्ञानानंतरं''तद्विज्ञाय पुनरेववरुणंपितरमुपससारे''तिपुनरुपसत्त्ययोगादित्यादिबाधकापरिहाराच्चेत्यतो''यदवादिसवाएषइत्यन्यपरामर्शोनान्नात्पुरुषइत्युक्तपरामर्श''इत्यादिटीकांविवृण्वन्नाह ॥ **अत्रावशिष्टमिति** ॥ इत्यादिकमुत्तरप्रस्थानादाववगंतव्यमित्युत्तरेणान्वयः । ''ब्रह्मशब्दोदितेतस्मिन्नात्मशब्दंप्रयुज्यच । तस्मादाकाशसृष्टिंचप्रोवाचात्रचतुर्विधा''

किंचभृगुर्वरुणोपदिष्टानांद्वारत्वंनवेत्तिचेद्विरोचनस्येवपुनरुपसत्त्ययोगः । वेत्तिचेन्नान्नंब्रह्मेतिव्यजानात् नान्नाद्ध्येवेत्यादिश्रूयेत । तस्मादन्नमयादयोब्रह्मैवनकोशाः । अत्रावशिष्टं

गु० अन्यथायतोवाइत्यादीतिस्यादितिद्रष्टव्यं । नन्वन्नमयादीनांब्रह्मत्वेसवाएषइतिपरामर्शास्वारस्यं । सन्निहितान्नविकारपुरुषशब्दवाच्यशरीरपरामर्शंविहायव्यवहितात्मपरामर्शकत्वांगीकारादित्यतआह ॥ **अत्रावशिष्टमिति** ॥ अत्रावशिष्टमुत्तरप्रस्थानादवगंतव्यमित्यन्वयः । एतच्चसविस्तरमुक्तमुत्तरप्रस्थानइतिटीकांवाव्याचष्टे ॥ **अत्रावशिष्टमित्यादिनोत्तरप्रस्थानादवगंतव्यमित्यंतेन** ॥ अस्तुवात्मनोव्यवहितत्वं । तथापितत्परामर्शएवयुक्तः तच्छब्दैतच्छब्दबलादित्याह ॥

प्र० मित्यादि''इतितंरसशब्देनविशिनष्टिशरीरग''मित्यन्तमनुव्याख्यानंहृदिकृत्वाह ॥ **आत्मनइति** ॥ आकाशःसंभूतइत्यादेराकाशपदवाच्यंभूताकाशतदभिमानितदेहतत्रितयांतर्नियामकरूपंचतुष्टयमात्मनःसंभूतं । तस्माच्चतुष्टयादाकाशाद्वायुशब्दितंचतुष्टयंसंभूतमित्येवमर्थः । तत्रसंभवोनामहरेःप्रादुर्भावोऽभिमानिनोऽभिमानविशेषो देहस्यभूतस्यचपरिणामइत्येवंरूपेणार्थस्याभिमतत्वात् पुरुषपदेनचदेहतदभिमानिजीवतन्नियामकानांविवक्षितत्वादेवपुरुषइतिपुरुषपदमुख्यार्थस्यहरेरेवसन्निहितस्यपरामर्शसंभवादित्यर्थः । वक्ष्यतेचैतत्''कारणत्वेनचाकाशादि''ष्वित्यत्रपुरुषपदेनत्रितयनिर्देशेपिपरमात्ममात्रपरामर्शो''बहूनांसहनिर्देशएकयाभिधयैवतु । तयैवाभिधयातेषांपरामृश्यैकमुच्यत''इतिटीकास्थस्मृत्युक्तदिशायुज्यतइतिभावः । परेणापीत्यस्यस्वीकृतेनरसशब्देनान्नरसमयइतिविशेषणादित्यन्वयः । ''भृगोश्चैतद्वदिष्यती''त्यनु

''आत्मनआकाश''इत्यादौ''अन्नात्पुरुष''इत्यंतेवाक्येहरेरप्याकाशादिनियामकरूपप्रादुर्भावलक्षणजनेरुक्तत्वात् ''सवाएषपुरुषोन्नरसमय''इत्यत्रहरेःपरामर्शस्वारस्यं । तथापरेणापिब्रह्मपरतयास्वीकृतेन''रसोवैसः रसंह्येवायंलब्ध्वानंदीभवती''तिरसशब्देनसन्निहितपरामर्शस्यैतच्छब्देनैवसिद्धेर्व्यवहिताकाशादिकारणब्रह्मपरामर्शिनातच्छब्देनचविशेषणात्प्रकृतान्नमयपरत्वाभावः ।

गु० **तथेति** ॥ ननुतच्छब्दस्याव्यवहितपरामर्शकत्वमेवकिंनस्यादित्यतउक्तं ॥ **सन्निहितपरामर्शस्येति** ॥ अन्यथैतच्छब्दोव्यर्थइतिभावः । एवंबाधकाभावात्साधक

SGDF

प्र० व्याख्यांहृदिकृत्वाऽन्नमयादेर्ब्रह्मत्वेसाधकांतरमाह ॥ **तथेति** ॥ तत्समाख्ययात्राप्यन्नमयादीनांब्रह्मत्वमित्यन्वयः ॥ **भार्गवीति** ॥ श्रोतृ वक्तृतयाभृगुवरुणसंबन्धिनी । व्योमन् । अच्छेद्यत्वादिनाव्योमनिभगवति । "सुपांसुलु" गितिसप्तम्यालुकि "नङिसंबुद्ध्यो" रितिनलोपा भावः । "अधीहिभगवोब्रह्मेत्युक्तोन्नप्राणपूर्वक" मित्यादिहृदिकृत्वाह ॥ **अधीहीति** ॥ अध्यापयेत्यर्थः । "तपसैवापरोक्षित" मित्यनुव्या ख्यानोक्तमाह ॥ **सतपइति** ॥ "यतोभूतानिजायंतइत्याद्यैर्लक्षणैःस्वयं । लक्षितंगुरुणे" त्येतद्धृदिकृत्वाह ॥ **अन्नाद्ध्येवेति** ॥ ब्रह्मलक्ष णाच्चब्रह्मत्वमुपेयमितिपूर्वेणान्वयः । समाख्यात्वंसाधयति ॥ **नचेत्यादिना** ॥ तत्र भृगुवल्ल्यां । "प्राप्यत्वेनमयट्प्रोक्तेर्नतत्राप्यन्यदुच्य

तथा "भृगुर्वैवारुणि" रित्युत्तरानुवाकउक्तानामन्नादीनांब्रह्मत्वंतावदुपेयं । "भार्गवीवारुणीविद्यापरमेव्योमन्प्रतिष्ठिते" तिश्रुत्यास्वयमेवब्रह्मपरत्वोक्तेः । "अधीहिभगवोब्रह्मे" तिब्रह्मप्रश्नोत्तरत्वात् । "सतपस्तप्त्वाअन्नंब्रह्मेतिव्यजाना" दितिश्र वणानंतरभाविनिदिध्यासनाख्यतपसाऽपरोक्षीकृतत्वलिंगात् । "अन्नंब्रह्मे" त्यादिब्रह्मशब्दात् "अन्नाद्ध्येवखल्विमानिभू तानिजायंत" इत्यादिब्रह्मलक्षणाच्च । तत्समाख्ययाचात्राप्यन्नमयादीनांब्रह्मत्वं । नचतत्रमयटोश्रवणाद्भिन्नविषयत्वं ।

गु० सद्भावाच्चान्नमयादीनांब्रह्मत्वमित्युक्तं । इदानींनकेवलंब्रह्मशब्दमात्रेणतेषांब्रह्मत्वमपितूत्तरानुवाकसमाख्ययापीत्याह ॥ **तथेति** ॥ ननुसत्यमुत्तरानुवाकोक्तान्ना दीनांब्रह्मत्वेतत्समाख्यानादेषांब्रह्मत्वंवक्तव्यं । तदेवनास्ति । तथाचनिर्णीतस्थलेसमानोक्तेरेवसमाख्यत्वेनप्रकृतेतदभावादित्यतआह ॥ **भृगुर्वाइति** ॥ नन्वस्त्व न्नमयादीनांब्रह्मत्वं । समाख्यातुनयुक्ता । तत्रान्नादीनामेवश्रुतत्वेनमयटोश्रुतत्वेनसमानोक्तेरेवाभावादित्याशंक्यनिराकरोति ॥ **नचेति** ॥ समाख्यात्वमाक्षिप्यसंमतौ समाख्योक्ता । विमतौत्वेकमेवस्थानंनार्थभेदकल्पनमर्हति । शन्नोमित्रादिभिर्वाक्यैर्मुक्तगीतावसानकैरितिवचनादित्यभिप्रेत्य मयट्छ्रवणाश्रवणयोरप्रयोजकत्वं

SGDF Sri Gargeshwari Digital Foundation

प्र० संकर्षणवासुदेवनारायणाअन्नमयादिकोशगतास्तत्तच्छब्दवाच्याइत्यर्थः । ननुपंचानांब्रह्मत्वे ‘‘अन्योंतरआत्माप्राणमयः अन्योंतरआत्मामनोमय’’इत्यादिनोक्तमन्यत्वादिकंकथं । तस्यैकत्वाद्व्याप्तत्वाच्चेत्यतआह ॥ **अन्योंतरइतीति** ॥ **अधिष्ठानेति** ॥ एतच्चसमाधानं‘‘तत्तत्कोशगतंतत्तन्नियामकंब्रह्मचैतन्यमेवोच्यत’’इतिटीकोक्त्यालभ्यतइतिभावः । तथाचस्थानगतंस्थानिन्युपचर्यतइत्युक्तंभवति । वक्ष्यतेचैतत्सूत्रकृता हृद्यपेक्षयातुमनुष्याधिकारत्वा’’दित्यत्र । नस्थानतोपीत्यस्यभाष्येपि‘‘अभेदेपिभेदव्यपदेशेनभेदादैश्वर्ययोगाच्चयुज्यत’’इत्यादि । ‘‘बहुरूपत्वाच्चाविरोध’’इतिभाष्यदिशामुख्यमेवार्थमाह ॥ **भगवतोबहुरूपत्वादिति** ॥ बहुत्वादन्यान्यत्वमणुरूपतयांतरत्वंचमुख्यमेवेतिभावः । यद्वा बहुरूपत्वादंतरत्वंपंचत्वसंख्याचमुख्येतिध्येयं । अन्यत्वंमुख्यमितितु‘‘अभिन्नोपिविशेषेणैवान्यइत्युदितोहरि’’रित्यनुव्याख्यानोक्तमाह ॥

अन्योंतरइत्यन्यत्वांतरत्वाद्युक्तिस्तु अधिष्ठानभूतकोशानामन्यत्वात् अंतरत्वात् भगवतोबहुरूपत्वात् ।

गु० दीनांब्रह्मत्वे अन्योंतरआत्मेत्ययुक्तं । ब्रह्मणश्चाभिन्नत्वेनव्याप्तत्वेनचान्यत्वांतरत्वयोरभावादित्यतआह ॥ **अन्यइति** ॥ यद्वा ननुनान्नमयादीनांब्रह्मत्वंसंभवति । तेषामन्योंतरआत्मेत्यन्यत्वांतरत्वयोरुक्तत्वात् । ब्रह्मणश्चनिर्भेदत्वस्यनस्थानतोपीत्यधिकरणेप्रतिपादितत्वेनान्यत्वादेरसंभवादित्यतआह ॥ **अन्यइति** ॥ तथाचकोशगतान्यत्वांतरत्वेतदंतर्गतेब्रह्मण्युपचर्येतेइतिभावः । तर्ह्युपचारएवनमुख्यावृत्तिरित्यतआह ॥ **भगवतइति** ॥ एवंचयत्परेणोक्तंश्रुतिसूत्राण्यन्यथायो

SGDF
Sri Gargeshwari Digital Foundation

प्र० विशेषेति ॥ स्वरूपसामर्थ्यलक्षणविशेषसद्भावादित्यर्थः। अन्याय्यंचान्यथानयनमित्याह ॥ अनंतेति ॥ तदुक्तंसुधायां“अनेकशाखाविदामेवात्रसम्यगधिकारइतिज्ञापनायवाधूलशाखेत्याद्युक्त”मिति ॥ उक्तंचेति ॥ गीतायां । निश्चितत्वमबाधितार्थनिश्चयजनकत्वं । तदुक्तमैतरेयभाष्ये“नचसूत्रेषुनिश्चितार्थस्यौपचारिकत्वंवक्तुंयुज्यते । निर्णयात्मकत्वात्तेषा”मित्यादि ॥ कामादिति ॥ “इदंप्रकरणंप्रधानपरंकिंनस्यादित्याशंकानिरासायकामादितिसूत्रं । तस्यार्थः । सोकामयतेतिश्रुत्यायोभिहितःकामस्तस्माच्चेतनपरंनानुमानिकप्रधानपर”मितित्वयोक्तेरितिभावः ॥ किंचेति ॥ “निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः । येमंदास्तेनुकंप्यंतेसविशेषनिरूपणै”रितित्वदुक्तेरितिभावः ।

विशेषसद्भावात्“अनन्योप्यन्यशब्देने”त्यादिभाष्योदाहृतस्मृतिबलाच्चयुक्ता । तस्माच्छ्रुतिविरोधाभावान्नसूत्राण्यन्यथानेयानि । अनंतशाखातत्वार्थविदासूत्रकृतेरितं । कूपमंडूकवत्स्वल्पवाक्यज्ञोन्यथयेत्कथं ॥ १ ॥ उक्तंचब्रह्मसूत्राणांनिश्चितत्वं “ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितै”रित्यादौ । सूत्रास्वारस्यंतुपरैरेवस्वीकृतं । यच्चोक्तंशुद्धब्रह्मपरमेतदिति । तन्न । “कामा”दित्यादिसूत्रे “सोकामयत भीषास्मा”दित्यादिश्रुतौचकामादिगुणविशिष्टस्यैवोक्तेः । किंचनिर्विशेषज्ञानस्यसविशेषज्ञानाधीनत्वादादौनिर्विशेषोक्तिरयुक्ता । अत्रच “भेदव्यपदेशा”दित्यनेनैक्यनिषेधादभेदप्रतिकूलतास्फुटैवेति ।

गु० ज्यानीति तन्न।उक्तरीत्याश्रुत्यादिविरोधाभावादित्याह ॥ भगवतइति ॥ तस्मादिति ॥ ननुमयायुक्त्यैवव्याख्यायंतइत्यतआह ॥ अनंततेति ॥ ननुसूत्राण्यनिर्णीतत्वादेवव्याख्यायंतइत्यतआह ॥ उक्तंचेति ॥ नन्वस्याधिकरणस्यैतदुपनिषदुक्तशुद्धब्रह्मपरत्वात्सूत्रास्वारस्यमंगीकर्तव्यमित्यतआह ॥ यच्चोक्तमिति ॥ ननुश्रुतेरनुवादपरत्वात्सूत्रस्यान्यथायोजनीयत्वान्नशुद्धपरत्वहानिरित्यतआह ॥ किंचेति ॥ ननुपंचानांब्रह्मत्वमित्ययुक्तं । आनंदमयस्यैवब्रह्मत्वाद्विज्ञानमयस्यजी

प्र० यद्भास्करप्रभृतिभिरद्वैत्येकदेशिभिर्वर्णितमन्नमयादयश्चत्वारःकोशाआनंदमयस्तुब्रह्मेतितत्पंचानांकोशत्वादिनापरेणैवपूर्वपक्षयित्वादूषितमितिनेहदूषितं। यद्वापंचानांब्रह्मत्वसाधकयुक्तिकलापस्योक्त्यैवतदपिनिरस्तमिति। यद्वा“नचपृथक्कल्पनायुक्ते”तिभाष्यटीकयोः“एतेनमयटश्चैवद्वैविध्येनार्थकल्पनात् । तदन्येषांमतमपिसत्संसत्सुनभासत”इत्यनुव्याख्यानादौस्पष्टंनिरासात्केषांचिन्मतस्याग्रेनिरस्यत्वात्तन्निरासेनैवनिरस्तत्वान्नपृथङ्निरस्तं । रामानुजमतंनिराकरोति ॥ केचित्त्विति ॥ साधारणेनेति ॥ तथाचहेतोर्व्यभिचारान्नपूर्वपक्षोदयइत्यर्थः ॥

केचित्तु“तस्यैषएवशारीरआत्मे”तिशारीरत्वेनजीवएवानंदमयइतिप्राप्ते “सैषानंदस्ये”त्यारभ्यनिरतिशयदशाशिरस्कस्यानंदस्याभ्यासात्तस्यचानंतदुःखमिश्रपरिमितसुखलवभागिनिजीवेनुपपत्तेस्तदाश्रयआनंदमयःपरमात्मा । विज्ञानमयस्तुजीवः। अन्नमयादयस्तुत्रयःकोशाइतिसिद्धांतइत्याहुः । तन्न । पूर्वपक्षिणापिजीवतयानंगीकृतप्राणमयादिसाधारणेनशारीरत्वेनजीवत्वशंकानुदयात् । श्रूयतेहिप्राणमयादावपि“तस्यैषएवे”तिशारीरत्वं । सिद्धांतोप्ययुक्तः । आनंदमयस्यब्रह्मत्वेब्रह्मणःपुच्छत्वाद्यनुपपत्तीनामपरिहारात् । ब्रह्मस्वरूपमेवशिरःपक्षपुच्छादिनारूप्यतइतिचेत् रूपणंयद्यध्यासस्तर्हिश्रुतेरप्रामाण्य

गु० वत्वादन्नादीनांतुकोशत्वादितिरामानुजीयाः। तन्मतंदूषयितुमनुवदति ॥ केचित्त्विति ॥ सैषानंदस्येत्यारभ्येति ॥ उपलक्षणंचैतत्। यतोवाचोनिवर्तंतइत्यनेनेत्यपिद्रष्टव्यं। तदाश्रयः निरतिशयदशाशिरस्कानंदाश्रयइत्यर्थः। अत्रपूर्वपक्षस्यायुक्तत्वादधिकरणारंभोनयुक्तइत्याह ॥ पूर्वपक्षिणापीति ॥ तथाचशारीरत्वस्यान्नमयेपिविद्यमानत्वाद्व्यभिचारित्वेननतेनपूर्वपक्षकरणंयुक्तमितिभावः। ननुनशारीरत्वंप्राणमयादेरित्यतआह ॥ श्रूयतेहीति ॥ ननुनपुच्छत्वाद्यनुपपत्तिः। प्रियादिवाक्यैर्ब्रह्मस्वरूपस्यैवशिरआदिविशिष्टत्वेननिरूपणादितिशंकते ॥ ब्रह्मेति ॥ निरूपणमध्यासोवासादृश्योक्तिर्वा । नाद्यइत्याह ॥ रूपणंहीति ॥ अप्रा

SGDF

प्र० अतिप्रसंगश्चेति ॥ ब्रह्मलिंगानामपिजीवेऽध्याससंभवेनकुत्रापिसिद्धांतोन्मेषोनस्यादितिभावः॥विज्ञानंदेवाइति॥ इत्यादेरिति ॥ ब्रह्मश ब्दस्यज्येष्ठत्वस्यसर्वदेवोपास्यत्वस्यमुक्तिहेतुत्वस्यायोगइत्यर्थः । यज्ञादिकर्मकर्तृत्वरूपजीवलिंगस्यगतिमाह ॥ विज्ञानमिति ॥ "यज्ञभृद्यज्ञ कृद्यज्ञीयज्ञभुग्यज्ञसाधनः" इतिभारतोक्तेरित्यर्थः । यदपित्रयाणांकोशत्वमितितदपिनेत्याह ॥ अन्नमयादेरिति ॥ ब्रह्मनस्यादिति ॥

मतिप्रसंगश्च । यदितुसदृशतयोक्तिस्तदामुख्यार्थत्यागस्साद्दश्याभावश्च । नहिब्रह्मस्वरूपंशिरआदिसदृशं । किंचविज्ञानमयस्य जीवत्वे "विज्ञानंदेवाःसर्वे ब्रह्मज्येष्ठमुपासते विज्ञानंब्रह्मचेद्वेद तस्माच्चेन्नप्रमाद्यति शरीरेपाप्मनोहित्वा सर्वान्कामान्समश्नुत" इत्यादेरयोगः । "विज्ञानंयज्ञंतनुत"इत्यादिकंतु ब्रह्मणःसर्वकर्तृत्वात् "यज्ञभृद्यज्ञकृद्यज्ञी"त्यादेश्चयुक्तं । अन्नमयादेःको शत्वंचनिरस्तं । नन्वन्नमयाद्युपदेशानंतरं "अन्योंतरआत्मे" त्युक्तेरानंदमयोपदेशानंतरंतदनुक्तेरानंदमयएवब्रह्म नत्वन्नम यादयइतिचेत् तर्हिछांदोग्ये "योवैभूमातत्सुख" मितिभूमोपदेशानंतरं "अथातआत्मादेश" इत्युक्तेस्तदनंतरंचान्यानुक्ते र्भूमाब्रह्मनस्यात् । "यत्रनान्यत्पश्यति" इत्यादिब्रह्मलिंगाद्भूम्नोब्रह्मत्वेत्वन्नमयादिरपिब्रह्मशब्दाभ्यासादिनाब्रह्मास्तु ।

गु० माण्यमिति ॥ अध्यस्तार्थप्रतिपादकत्वादितिभावः ॥ अतिप्रसंगश्चेति ॥ अन्नमयादेरपिशिरःपक्षपुच्छादिनारूपेणाध्यस्तत्वेनतस्याप्यानंदमयवद्ब्रह्मत्वापत्त्याको शत्वोक्तिरयुक्तेत्यतिप्रसंगश्चेत्यर्थः । द्वितीयंप्रत्याह ॥ यदित्विति ॥ साद्दश्यमपिनास्तीत्याह ॥ साद्दश्येति ॥ नन्वेवंविज्ञानंयज्ञंतनुतइत्यत्रविज्ञानमयस्यकर्म कर्तृत्वंप्रतीयते । तच्चविज्ञानमयस्यब्रह्मत्वेऽयुक्तं । तस्यकर्तृत्वाद्यभावादित्यतआह ॥ विज्ञानमिति ॥ अस्तुतर्हितस्यब्रह्मत्वमन्नमयादेस्तुकोशत्वमेवेत्यतआह ॥ अन्नमयादेरिति ॥ नन्वन्नमयादयोनब्रह्म । तदनंतरंब्रह्मोद्देशात् । यदनंतरंयदुपदिश्यतेतत्तन्नभवति । यथाशाखोपदेशानंतरंचंद्रोपदेशान्नचंद्रःशाखेति ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० तथाचभूमाधिकरणविरोधइतिभावः । आनंदमयमात्रस्यब्रह्मत्वेसाधकांतरमाशंक्यनिराह ॥ **ननूत्तरेति** ॥ **स्थानप्रमाणेति** ॥ यथासंख्याम्नानरूपेणेत्यर्थः ॥ **उक्तत्वादिति** ॥ भृगुर्वरुणोपदिष्टानांद्वारत्वंनवेतिचेत्यादिनेतिभावः । उपलक्षणमेतत् । अन्यथोपपत्तेरुक्तत्वादितिध्येयं । प्रतिबंद्याचपुनरुपसत्तिंसमाधत्ते ॥ **किंचैवमिति** ॥ "मधुमधुकृतोनिस्तिष्ठंति" नानात्ययानांवृक्षाणांरसानांसमवहारमेकतांग

ननूत्तरानुवाकेऽन्नप्राणमनोविज्ञानज्ञानानंतरं "तद्विज्ञाय पुनरेववरुणंपितरमुपससारे"तिपुनरुपसत्तिवत् "आनंदोब्रह्मेतिव्यजाना"दित्यानंदज्ञानानंतरंपुनरुपसत्तेरभावेनानंदस्यब्रह्मत्वात् अन्नप्राणमनोविज्ञानानंतरंश्रुतेनानंदेनान्नमयप्राणमयमनोमयविज्ञानमयानंतरंश्रुतस्यानंदमयस्य स्थानप्रमाणेनाभेदादानंदमयएवब्रह्म । अन्नमयादयस्तुतद्वारभूता इतिचेन्न । अन्नादीनांद्वारत्वेपिपुनरुपसत्त्ययोगस्योक्तत्वात् । किंचैवंछांदोग्ये "यथासोम्यमधुमधुकृतोनिस्तिष्ठंती"त्यादेरनंतरं "भूयएवमाभगवान्विज्ञापयत्वि"तिश्रवणात्तत्रोक्तमब्रह्म "पुरुषंसोम्योतहस्तगृहीत"मित्यादेरनंतरंतदश्रवणात्तत्रोक्तमेवब्रह्मस्यात् । "यथासोम्यमधि"त्यादौ "ऐतदात्म्यमिदंसर्व"मित्यादिब्रह्मलिंगादिनातत्रोक्तस्यब्रह्मत्वेत्वत्रापि "अन्नंब्रह्मेतिव्यजानात् । अन्नाद्ध्येवखल्विमानिभूतानिजायंत" इतिब्रह्मश्रुत्यादिनाऽन्नादिकमपिब्रह्मास्तु ।

गु० तथाचान्नमयादयोनब्रह्म । किंत्वानंदमयएवेत्याशयेनशंकते ॥ **नन्विति** ॥ **तर्हीति** ॥ तदनंतरंब्रह्मोद्देशादितिहेतोर्व्यभिचारित्वान्नतेनब्रह्मत्वाभावसाधनंयुक्तमितिभावः ॥ **पुनरुपसत्त्ययोगस्येति** ॥ भृगुर्वरुणोपदिष्टानांद्वारत्वंनवेतिचेत्तर्हितुपुनरुपसत्त्ययोगः । वेत्तिचेन्नानंदंब्रह्मेतिव्यजानादितिप्रयोगःस्यादित्युक्तत्वादित्यर्थः । ननुद्वारत्वज्ञानेपिविशेषजिज्ञासयापुनरुपसत्तिरित्यतआह ॥ **किंचेति** ॥ **तस्येति** ॥ आनंदमात्रस्येत्यर्थः । ननुनिरतिशयत्वविशिष्टानंदाभ्यासोहेतुः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० मयंति । तेयथातत्रनविवेकंलभंतइतिदृष्टांतपूर्वं "एवमेवखलुसोम्येमाःप्रजाःसतिसंपद्यनविदु"रित्युद्दालकोपदिष्टेपित्रह्मणिश्वेतकेतुर्विशेषजिज्ञासया "भूयएवमाभगवान्विज्ञापय"त्वितिबहुकृत्वःपुनःपुनःपृष्टवानितितत्रोद्दालकेनोक्तमब्रह्मस्यादितिभावः । तदश्रवणात् भूयएवेतिपुनःप्रार्थनस्याश्रवणादित्यर्थः । सूत्रार्थमपिनिराचिकीर्षुरभ्यासादितिकिमानंदमात्राभ्यासोहेतुर्निरतिशयत्वविशिष्टोवेतिद्विदिक्कृत्वाक्रमेणनिराह ॥ **किंचेति** ॥ **असिद्धइति** ॥ यतोवाचोनिवर्ततइत्यत्रतादृशस्यसकृदेवश्रवणाभ्यासादितिभावः । "सैषानंदस्येत्यारभ्योत्तरोत्तराधिक्येनानंदस्याभ्यासोस्तीत्यतआह ॥ **शतेति** ॥ **प्रायपाठेति** ॥ विकारशब्दान्नेतिचेदित्यस्यत्वयानंदमयमात्रविषयत्वेनोक्त्या इतरेषुविकारार्थत्वस्वीकारादिति

किंचाद्यसूत्रेयदिभास्करमतइवानंदमात्राभ्यासोहेतुस्तदाब्रह्मत्वासिद्धिः । तस्यजीवेपिसंभवात् । निरतिशयत्वविशिष्टस्यचाभ्यासोसिद्धः । शतगुणितोत्तरक्रमेणगुणितत्वंतुनाभ्यासशब्दस्याभिधेयं । यत्तु ब्रह्मशब्दाभ्यासोहेतुरितियादवप्रकाशीयंमतंतदप्ययुक्तं । तन्मतेब्रह्मत्वेनानंगीकृतविज्ञानमयादावपिब्रह्मशब्दाभ्यासस्यसत्त्वात् । द्वितीयसूत्रंचायुक्तं । प्रायपाठबाधात् । ननुप्राणमयएवविकारार्थत्वंत्यक्तमितिचेत्तर्हितत्रमयटःस्वार्थिकत्वाद्वैयर्थ्यं । विज्ञानमयेपितत्प्रसंगश्च । यच्चोक्तं विज्ञानमयेमयटःसंबंधोर्थः ।

गु० तथाचनव्यभिचारइत्यतआह ॥ **निरतिशयत्वेति** ॥ ननुशतगुणितत्वविशिष्टत्वमेवाभ्यासशब्दार्थः । तस्यचप्रकृतेपिसत्त्वान्नाभ्यासस्यासिद्धत्वमित्यतआह ॥ **शतगुणितेति** ॥ ननुनानंदशब्दाभ्यासोहेतुः । किंतुब्रह्मशब्दाभ्यासः । तस्यानंदमयएवसत्त्वादन्यत्रचासत्त्वादानंदमयस्यैवब्रह्मत्वंनान्येषामितियादवप्रकाशीयंमतमनुवदति ॥ **यत्त्विति** ॥ विज्ञानमयादौव्यभिचारान्नतेनब्रह्मत्वसमर्थनमुचितमित्याह ॥ **त्वन्मतइति** ॥ **प्रायपाठेति** ॥ अन्नमयादौमयटोविकारार्थत्व

प्र० भावः । ननुसंबंधेमयटोनानुशासनमित्यतआह ॥ **वैयर्थ्यादिति** ॥ **ऊह्येति** ॥ तथाहि । "तद्धेतुव्यपदेशाच्चे"त्यस्य "एषह्येवानंदयाती"तिजीवानंदहेतुव्यपदेशादानंदमयोब्रह्म । नहिस्वस्यैवस्वानंदहेतुत्वंयुक्तमित्यर्थउक्तः । सनयुक्तः । जीवानंदहेतुत्वेनानंदमयस्यजीवभेदसिद्धावपिब्रह्मत्वासिद्धेः । अब्रह्मणोपिवनितादेर्जीवानंदहेतुत्वदृष्टेः । आद्यसूत्रानंतर्यप्रसंगाच्च । यदपि "सत्यंज्ञानमनंतंब्रह्मेतिमंत्रवर्णोदितंब्रह्मैवतस्माद्वाएतस्मादात्मनइत्यारभ्यानंदमयइतिगीयतइतिमांत्रवर्णिकसूत्रार्थ"इतितदपिन । मांत्रवर्णिकब्रह्मणआनंदमयइवभाष्याद्युक्तदिशाऽन्नमयादिष्वपिगीयमानत्वेनतेषामब्रह्मत्वायोगात् । यदपि "नेतरोजीवोमांत्रवर्णिकइतिमंतव्यं । ब्रह्मणाविपश्चितेत्युक्तविपश्चित्त्वरूपसार्वज्ञानुपपत्तेरितिपंचसूत्रार्थ"इति । तदपिन । अन्नमयादीनामब्रह्मत्वेप्युक्तविपश्चित्त्वानुपपत्तेस्तुल्यत्वात् । यदपि "भीषास्माद्वातःपवतइत्यादिनाप्रशा

वैयर्थ्यादप्यमुख्यार्थत्वस्यज्यायस्त्वादिति । तन्न । अन्नमयेविकारार्थःप्राणमयमनोमययोःस्वार्थिकोविज्ञानमयेसंबंधार्थआनंदमयेप्राचुर्यार्थइतिवैरूप्यप्रसंगात् । नचप्राणमयादावपिसंबंधार्थता । प्राणादेःप्राणादिसंबंधाभावात् । प्राणशब्दस्याप्रसिद्धार्थत्वेतुवरंपरमात्मपरत्वं । एवंसूत्रांतरेष्वप्यनुपपत्तिरूह्या ।

गु० मानंदमयेचप्राचुर्यार्थत्वमितिप्रायपाठविरोधइत्यर्थः । ननुयद्यन्नमयादिचतुष्टयेविकारार्थत्वमानंदमयएवप्राचुर्यार्थत्वमित्यंगीकारःस्यात्तर्हिप्रायपाठविरोधःस्यात् । नचैवं । प्राणमयेविकारार्थत्वस्यत्यक्तत्वादित्याशंकते ॥ **नन्विति** ॥ एवंहिप्राचुर्यार्थत्वस्यासंभवाद्विकारार्थत्वस्यस्वयमेवत्यक्तत्वात्स्वार्थिकत्वंवक्तव्यं । एवंचवैयर्थ्यंस्यादित्याह ॥ **तर्हीति** ॥ ननुसंबंधार्थत्वेलक्षणास्यादित्यतआह ॥ **वैयर्थ्यादिति** ॥ ननुप्राणशब्देनान्नस्यैवगृहीतत्वात्तस्यमयटासंबंधाबाधान्नानुपपत्तिरित्यतआह ॥ **अप्रसिद्धार्थत्वेत्विति** ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ **एवमिति** ॥ इदानीमुपसंहारमुखेनकारिकाभ्यामन्नमयादिपंचकस्याब्रह्मत्वसाधकहेतून्संगृह्णाह

SGDF
Foundation

प्र० सितव्यवर्गोद्वायुसूर्यादेरानंदमयस्यप्रशासितृत्वेनभेदव्यपदेशादानंदमयोब्रह्मेतिषष्ठार्थइति'' तदपिन। ब्रह्मविदाप्नोतीत्युपक्रांतब्रह्मविषयस्यभेदव्यपदेशस्यान्नमयादिसाधारणत्वात्। यदपि ''सोकामयतेत्यारभ्यसइदंसर्वमसृजतेतिकामादेवसर्गश्रवणादस्यानंदमयस्यसृष्टौनानुमानिकप्रधानापेक्षास्तीतिसप्तम्यर्थ'' इति। तदपिन। अनुमानपदस्यलक्षणाप्रसंगात्। भेदसूत्रानंतर्यहेत्वभावाच्च। कामादेवसर्गश्रवणादित्याद्यध्याहारप्रसंगाच्च। यदपि ''रसोवैसः। रसंह्येवायंलब्ध्वानंदीभवतीतिशास्त्रं रसशब्दनिर्दिष्टेऽस्मिन्नानंदमयेऽस्यजीवस्यतल्लाभादानंदयोगंशास्तीत्यष्टमार्थ'' इति। तदप्यचारु। रसंह्येवायमितिशास्त्रमप्यन्नरसमयइतिरसशब्दनिर्दिष्टेऽन्नमयएवजीवस्यानंदयोगंशास्तीतितस्यैवब्रह्मत्वापत्तेरित्यूहनीयेत्यर्थः। एतेन यत्केनचित्प्रलपितंपूर्वाधिकरणेजगत्कारणत्वंप्रधानेनातिव्याप्तमितितत्प्रत्युक्तं। इदानींजीवेनातिव्याप्तमितिवक्तुमिदमारभ्यते। तथाहि। अयमानंदमयोजीवोथशिवइतिविशये मयटोविकारार्थतयाऽऽनंदोब्रह्मेतिश्रुत्याऽऽनंदरूपब्रह्मकार्यतयाजीवस्यतद्विकारत्वसंभवात् ''आनंदमयामेशुध्यंता''मित्युक्तशुद्धिप्रार्थनसंभवाच्चजीवएवानंदमयः। अयंचात्मनआकाशइतिभूतादिहेतुत्वेनोक्तात्मैव। अन्योंतरआत्मानंदमयइतिश्रवणादस्यैवभूतादिकारणत्वमितिप्राप्ते ''सैषानंदस्ये''त्यारभ्यमानुषादिप्रजापतिपर्यंतंतत्तदानंदस्योपर्युपरिशतगुणत्वमभिधाय ''सएकोब्रह्मणआनंद'' इतिब्रह्मानंदस्यनिरतिशयत्वेनाभ्यासात्। शुद्धस्यापिशिवस्यघनापगमेनचंद्रस्यप्रसादइवमलापनयनेनशुद्धिसंभवाच्चशिवएवानंदमयः। विज्ञानमयस्तुजीवएव। ब्रह्मपुच्छंप्रतिष्ठेतिच ब्रह्मशब्दस्यप्रणवपरत्वात्तस्यचशिववाचकत्वात् ब्रह्म प्रणवः प्रतिष्ठा शिवस्यवाचकतयाऽऽधार इत्यर्थतयोपपन्नं मयट्प्राचुर्यार्थइति। यथोक्त ''माकाशादेःकारणमानंदमयस्तुजीवःस्यात्। यदयंब्रह्मविकारोब्रह्माधारश्च शोध्यश्च। निरतिशयानंदयुतोब्रह्मैवप्रचुरतातुमयडर्थः। पुच्छंब्रह्मप्रणवःशुद्धिश्चविरोध्यपगमोविधुव'' दिति। तन्निरस्तं। त्वन्मतेपूर्वाधिकर

SGDF
Sri Gargeshwari Digital Foundation

प्र० णएवतन्निष्ठसूत्रेजीवेतिव्याप्तेर्निरासात् । यथोक्तंतर्हिजीवोस्तु । तन्न । तन्निष्ठस्यामृतोक्तेः । नहिशिवमपहायान्यनिष्ठाविमुक्ताइत्यादि पूर्वपक्षोप्ययुक्तः । जीवेब्रह्मविकारत्वस्यदुर्वचत्वात् । विज्ञानंब्रह्मेतिश्रुत्याविज्ञानरूपब्रह्मकार्यतयातद्विकारत्वस्यपूर्वपक्षिणाजीवत्वेनानंगीकृते बुद्धित्वेनांगीकृतेविज्ञानमयेव्यभिचाराच्च । आनंदमयेनजीवशुद्धिप्रार्थनेसतिमइत्यस्मच्छब्दायोगाच्च । आनंदमयकोशस्यशुद्धिप्रार्थनाला भाच्च । आत्मामेशुध्यंतामित्यस्यवैयर्थ्याच्च । सिद्धांतोप्ययुक्तः । निरतिशयानंदाभ्यासस्योक्तरीत्याऽसिद्धेः । विकारार्थमयट्प्रायपाठविरो धाच्च । ब्रह्मशब्दस्यपूर्णत्वार्थकस्यप्रणवेऽप्रसिद्धेश्च । प्रणवार्थत्वेपितस्यविष्णुवाचितायामूलग्रंथेषुतत्रतत्रसमर्थनाच्च । "ब्रह्मसृष्ट्यातुबृंहयत् । पुच्छंप्रधानवायौचब्रह्माख्येसंस्थितंसदे"तिवचनविरोधाच्च । "पुच्छंसंकर्षणःप्रोक्त"इतिभाष्योदाहृतवचनविरोधाच्च । "तस्मिन्नानंदरूपोसौ स्थितोनारायणःसदे"तिस्मृतेरानंदमयस्यविष्णुत्वाच्च । अस्यप्रकरणस्यतैत्तिरीयभाष्यादौविष्णुपरत्वेनप्रमाणेनैवव्याख्यातत्वाच्च । आत्म ब्रह्मादिशब्दानांमुक्तगम्यत्वादिलिंगानांचभाष्यादौतत्रतत्रविष्ण्वेकनिष्ठत्वस्यसमर्थनाच्च । शिवपरत्वस्यनेतरइत्यत्रसूत्रकृतैवनिरासाच्च । यत्त्व न्नमयादयःपंचापिनकोशाः किंतुब्रह्मविष्णुरुद्रेश्वरसदाशिवसंज्ञाःपंचचेतनाइत्यादिजल्पनं तत् प्रमाणशून्यंप्रमाणविरुद्धंच । यदपि नेतर इत्यादिसूत्रचतुष्टयमधिकरणांतरंकृत्वा "यतःप्रसूताजगतःप्रसूती"तिवाक्यमुदाहृत्यचतुर्मुखपरत्वंपूर्वपक्षयित्वाशिवपरत्वेनसिद्धांतइत्युक्तं तद पिन । तथात्वे नेतरइतिनिषेधरूपेणसूत्रविन्यासायोगेनपूर्वशेषत्वस्यैवौचित्यात् । यतःप्रसूतेत्यादेर्भाष्यादौविष्णुपरत्वसमर्थनस्यप्रागेवास्मा भिःप्रदर्शितत्वात् । एवमन्यत्तदीयदुर्भाषणदूषणमूहनीयं । एवंपरमतानिनिरस्यस्वाभिमताधिकरणप्रमेयंश्रुत्यादिप्रमाणषट्कपूर्वकंसंगृह्णाह

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **तस्मादिति** ॥ मतांतराणामसंभवादित्यर्थः। सौत्रसाधकस्यश्रौतसाधकांतरोपलक्षणत्वादनेकसाधकोक्तिः। तदुक्तं"कंपना"दित्यत्रटीकायां"तदविहायैवलिंगांतरस्याप्युक्तत्वात्। एतदन्यत्राप्यनुसंधेय"मिति ॥ **ब्रह्मशब्दादिति** ॥ "येऽन्नंब्रह्मोपासते येप्राणंब्रह्मोपासते आनंदंब्रह्मणोविद्वान् विज्ञानंब्रह्मचेद्वेद अस्तिब्रह्मेतिचे"दितिपंचस्वपिप्रकरणेषुप्रत्येकंब्रह्मशब्दश्रवणादित्यर्थः । ब्रह्मणःशब्दइत्यपिविगृह्य आत्मशब्दादित्यपिध्येयं। लिंगाच्चेत्येकवचनंसमुदायाभिप्रायेण । तथाहि। अन्नमये"अद्यतेत्तिचभूतानी"तिसर्वात्तृत्वरूपसंहर्तृत्वंसर्वाद्यत्वरूपसर्वोपजीव्यत्वं"अन्नंहिभूतानांज्येष्ठ"मितिज्येष्ठत्वं"सर्वंवैतेन्नमाप्नुवंती"त्युपासकप्राप्यत्वमित्यादीनिलिंगानि । तथाप्राणमये"प्राणंदेवाअनुप्राणंती"तिसर्वदेवादिचेष्टकत्वं"सर्वमेतआयुर्यंति येप्राणंब्रह्मोपासत"इतिसर्वायूरूपमोक्षहेतुज्ञानविषयत्वमित्यादीनि । मनोमयेच "यतोवाचोनिवर्तंत"इतिवाङ्मनसागोचरत्वं"नबिभेतिकुतश्चने"तिभयाभावरूपमुक्तिहेतुवेदनविषयत्वमित्यादीनि । विज्ञानमयेच "विज्ञानंदेवास्सर्वेब्रह्मज्येष्ठमुपासत"इतिसर्वदेवोपास्यत्वंज्येष्ठत्वं"तस्माच्चेन्नप्रमाद्यति । शरीरेपाप्मनोहित्वे"त्युक्तमुक्तिहेतुत्वमित्यादीनि । आनंदमयेच"सोकामयते"तिसंकल्पपूर्वकंसर्वस्रष्टृत्वंसर्वांतरत्वं"अस्तिब्रह्मेतिचेद्वेद संतमेनंततोविदु"रित्युक्तमुक्तिहेतुज्ञानविषयत्वंचेत्यादीनिलिंगानिसंति । अतोलिंगात् लिंगसमुदायादित्यर्थः। "स्वादिष्वसर्वनामस्थान"इतिसूत्रेण"उरःप्रभृतिभ्यःक"बित्युक्तकप्प्रत्ययावधिषुस्वादिषुपूर्वस्यपदत्वविधानादिहत्वप्रत्ययेपरतःपूर्वस्यपदत्वान्नयतिभंगःशंकनीयः। उक्तंचसुधायां"इत्यादिनाध्यायेनवदत्यज"इत्यत्र ॥ **वाक्यतइति** ॥ "कोह्ये

तस्मात् ब्रह्मशब्दात्समस्तात्तृत्वादिलिंगाच्चवाक्यतः। पूर्वोत्तरस्मान्मंत्रस्थब्रह्मप्रकरणादपि। ॥ २८९ ॥

गु० ॥ **तस्मादिति** ॥ **वाक्यतः पूर्वोत्तरस्मादिति** ॥ रसोवैसः। रसंह्येवायंलब्ध्वानंदीभवति। यतोवाचइत्याद्युदाहृतवाक्यजातादित्यर्थः। मुक्तगीतावसान

प्र० वान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यात्" इत्याकाशाख्यविष्णोरानंदमयत्वरूपपूर्णानंदत्वेविश्वचेष्टकत्वहेतुप्रतिपादकवाक्यादितितृतीयसूत्रार्थः। एतच्चानंदमयासाधारणं। यद्वा"अन्नाद्वैप्रजाःप्रजायंते प्राणंदेवाअनुप्राणंति यतोवाचोनिवर्तंते विज्ञानंयज्ञंतनुते असन्नेवसभवति सोकामयत"इत्यादिरूपात्प्रतिप्रकरणमन्नमयादिमहिमप्रतिपादकवाक्यादित्यर्थः । नह्यन्नमयादीनामब्रह्मत्वेतन्महिमोक्तिपरब्रह्मश्रुतिलिंगोपेतवाक्यसमभिव्याहारोयुज्यतइतिभावः । मंत्रस्थं सत्यंज्ञानमनंतमितिमंत्रवर्णप्रतिपादितमेवब्रह्म"ब्रह्मवित्परमाप्नोतीतियत्प्रथमसूचितं। तदेवमंत्रवर्णेनसत्यंज्ञानमनंतवत्। लक्षितंतत्रसत्यत्वंसृष्ट्यान्नप्राणयोरपि । उक्तंज्ञानंतुमनसाविज्ञानेनाप्युदीरितं । अनंतत्वंतथानंदमयवाचाप्युदाहृत"मित्यनुव्याख्यानोक्तदिशा"तस्माद्वाएतस्मा"दित्यादिनाग्रंथेन"गीयत"इतिपूर्वस्मात्"यतोवाचोनिवर्तंत"इत्युत्तरस्मान्मंत्रवर्णस्थब्रह्मणःप्रकरणादितिमांत्रवर्णिकसूत्रार्थः। यद्वापूर्वोत्तरस्मादितिवाक्यविशेषणं । "तस्माद्वाएतस्मा"दितिपूर्ववाक्यात्"सयएवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामती"त्युत्तरवाक्याच्चेत्यर्थः। तस्माद्वाइत्यत्रभूतकारणत्वेनोक्तात्मानएवसवाएषइतिपरामृश्यान्नमयादित्वोक्तेः। तदुक्तं। "परामृशतितस्यैवपंचरूपत्ववित्तये । त्यक्त्वाभूतादिकंसर्वंसवाएषइतिश्रुतिः । सइत्यात्मपदोद्दिष्टएषजीवशरीरग"इति"योगमन्नमयाद्यैर्यत्फलत्वेनास्यशंसती"तिच। तथाचान्नमयादेरब्रह्मत्वेब्रह्मपरपूर्वोत्तरवाक्यसमभिव्याहारोनस्यादित्यर्थः। तेनास्मिन्नस्यचेतिसूत्रार्थोपिसंगृहीतोभवति । मंत्रस्थेत्यस्यतुमांत्रवर्णिकब्रह्मप्रकरणादपीतिप्रागुक्तएवार्थः ॥ **भृगुवल्लीति** ॥ अन्नंब्रह्मेतिव्यजानादित्यादौश्रु

भृगुवल्लीसमाख्यानात्

गु० कात्स्थानप्रमाणतइतिसंबंधः। तथाचमुक्तगीतावसानकस्यास्यैकस्थानत्वेनतत्रोक्तान्नमयादीनामपिब्रह्मत्वमितिभावः। नन्वस्यमुक्तगीतावसानकस्यैकस्थानत्वमेवा

प्र० तान्नादेरन्नमयादेश्चैकत्वस्यप्रागेवोक्तत्वादितिभावः ॥ **मुक्तगीतेति** ॥ "एतत्सामगायन्नास्ते । हावुहावुहावु"इत्यादिमुक्तकर्तृकगानांतात् । अनेकप्रकरणजातंस्थानमिति"शब्दादेवे"त्यत्रवक्ष्यमाणलक्षणात्स्थानप्रमाणाच्चेत्यर्थः । ब्रह्मतैवेत्यन्वयः । श्रुतिलिंगवाक्यप्रकरणानांब्रह्मनिष्ठताभाष्यादौस्पष्टा इहापिप्रागुक्तप्राया । स्थानसमाख्ययोस्तुतांक्रमेणाह ॥ **उक्तंहीत्यादिना** ॥ ब्रह्मपरत्वमित्यन्वयः ॥ **अस्तुवदिति** ॥ "भृगुःपंचात्मकंपूर्णमन्नादिमयमच्युतं । मुक्तगीतावसानैस्तुस्तुतस्तेनजनार्दनः । सुप्रीतःप्रददौज्ञानंस्वात्सभक्तिंचशाश्वती"मितिस्मृत्येत्यर्थः ॥ **ब्रह्मप्रश्नेति** ॥ "भृगुर्वैवारुणिः । वरुणंपितरमुपससार । अधीहिभगवोब्रह्मेति । तस्माएतत्प्रोवाच । अन्नंप्राणंचक्षुःश्रोत्रंमनोवाच"मित्यनेनब्रह्माध्यापयेतिभृगुणापृष्टेनवरुणेनब्रह्मप्रश्नस्योत्तरत्वेनोक्तत्वश्रवणादित्यर्थः । अब्रह्मत्वेऽसंगतिःस्यात् । नचद्वारत्वेनसंगतिः । निरस्तत्वादितिभावः । "यतोवाइमानिभूतानिजायंत"इतिसाधारण्येन"अन्नाद्ध्येवखल्विमानिभूतानिजायंते प्राणाद्ध्येवे"त्यादिनाविशिष्यचोक्तात्सृष्टिस्थितिसंहारमोक्षहेतुत्वरूपलक्षणसमुदायादित्यर्थः । अन्नंब्रह्मेति प्राणोब्रह्मेति मनोब्रह्मेत्यादिप्रत्येकंब्रह्मशब्दश्रवणादित्यर्थः । "सतपो

मुक्तगीतावसानकात् । स्थानप्रमाणतश्चैवपंचानांब्रह्मतास्थिता ॥ २ ॥ उक्तंहितैत्तिरीयभाष्ये"शन्नोमित्रादिभिर्वाक्यैस्तैरेवहरिमस्तुवत् । मुक्तगीतावसानैस्तुस्तुतस्तेनजनार्दन" इत्यस्यस्थानस्यब्रह्मपरत्वं । तथा "ब्रह्मप्रश्नोत्तराद्ब्रह्मलक्षणाद्ब्रह्मशब्दतः । विज्ञातत्वाच्चतपसा

गु० सिद्धं । तथात्वेपिवाब्रह्मपरत्वंकुतइत्यतउभयत्रसंगतिमाह ॥ **उक्तंहीति** ॥ शन्नोमित्रादिभिर्वाक्यैस्तैरेवहरिमस्तुवदित्यस्यशेषभूतंभृगुःपंचात्मकंपूर्णमन्नादिमयमच्युतमितिवाक्यं । तथामुक्तगीतावसानैस्तुस्तुतस्तेनजनार्दनइत्यस्यशेषभूतं सुप्रीतःप्रददौज्ञानंस्वात्मभक्तिंचशाश्वतीमितिचोत्तरवाक्यंचात्रद्रष्टव्यं । तेनविवक्षितार्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० तप्यत । सतपस्तप्त्वा । अन्नंब्रह्मेतिव्यजानात् । सतपस्तप्त्वा । प्राणोब्रह्मेतिव्यजानात् । सतपस्तप्त्वा । मनोब्रह्मेतिव्यजानात्”इत्यादिनो क्ताच्छ्रवणानंतरभाविनानिदिध्यासनाख्यतपसाव्यजानादित्यपरोक्षीकृतत्वलिंगादित्यर्थः । नहिकोशादेःस्वभावसिद्धज्ञानस्यसाक्षात्कारायत पोपेक्षितमितिभावः ॥ **मुक्तेति** ॥ सयएवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्येत्यादिनाऽन्नप्राणादिपंचकज्ञानिनोलो कादेहात्प्रेत्येतिमुक्तत्वमुक्त्वाप्राप्यत्वस्योक्तेरित्यर्थः । नचान्यज्ञानेनान्यप्राप्तिर्युक्तेत्यन्नादेरपिब्रह्मत्वमितिभावः । अनुव्याख्यानिरूपितात्समा ख्यानादित्युक्तं । तद्दर्शयति ॥ **उक्तेति** ॥ तस्यार्थः । ननुब्रह्मवल्ल्यामनुक्तंचक्षुःश्रोत्रंमनोवाचमितित्रितयमधिकमुपात्तं । विज्ञानानंदौच नोक्तौ । तथाचशब्दभेदात्संख्याभेदाद्भृगुवल्लीकथंसमाख्यास्यादितिशंकायां अनुक्तावपिविज्ञानानंदावध्याहार्यौ । तत्रोक्तंचक्षुरादित्रयंब्रह्म वल्ल्यामपिग्राह्यं । आवापोद्वापाभ्यांब्रह्मप्रतिपादनस्यशाखानांस्वभावत्वात् । तथाचस्थानद्वयेऽष्टौरूपाणिसंपद्यंते । अतोनभिन्नार्थत्वमिति । कुतएतदित्यतःसमाख्याबलादितिभावेन“तच्चवाधूलशाखाया”मित्युक्तमिति । वाधूलशाखावाक्यंतु“तस्माद्वाएतस्मादन्नरसमयात् । अन्यों तरआत्मावाङ्मयः । तस्माद्वाएतस्माद्वाङ्मयात् । अन्योंतरआत्माचक्षुर्मयः । तस्माद्वाएतस्माच्चक्षुर्मयात् । अन्योंतरआत्माश्रोत्रमयः । तस्मा त्प्राणमयः । तस्मान्मनोमयः । तस्माद्विज्ञानमयः । तस्मादानंदमयइतिही”तितत्वप्रदीपोक्तंबोध्यं । ननुयजति ददाति जुहोतीत्यादाविवा

मुक्तगम्यत्वतस्तथा ॥ १ ॥ वाधूलीयसमाख्यानादनुव्याख्यानिरूपितात् । भृगुवल्ल्युदितस्यान्नप्रा णादेर्ब्रह्मतास्थिता ॥ २ ॥ उक्ताह्यनुव्याख्यानेसमाख्या“तच्चवाधूलशाखायामष्टरूपमुदाहृत”मिति ।

गु० लाभः । अनुव्याख्यानिरूपितादितिप्रत्येकंसंबध्यते । अथैषज्योतिरित्यादौसंज्ञाभेदेनकर्मभेदवदत्राप्यन्नमयादिरूपसंज्ञाभेदात्पंचानामपिभेदएवास्तु । तथाचतेषां

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्नमयप्राणमयादौशब्दभेदेनार्थभेदस्यन्याय्यत्वादेकस्यब्रह्मत्वमन्येषामन्यत्वंवाच्यमित्यतआह ॥**एवंचेति**॥ सर्वेषांब्रह्मत्वसाधकेसतीत्यर्थः। गुणविशेषविधानार्थाइत्यादिनान्वयः । तत्रपूर्वोत्तरमीमांसासिद्धौ दृष्टांतावाह ॥ **यथेत्यादिना** ॥ द्वितीयस्यतृतीयपादे''अयनेषुचोदनांतरंसंज्ञोपबंधा''दितिचतुर्थाधिकरणेदर्शपूर्णमासप्रकरणेश्रुतं''दाक्षायणयज्ञेनस्वर्गकामोयजेत साकंप्रस्थायीयेनयजेतपशुकाम'' इतिवाक्यद्वयमुदाहृत्य किंदाक्षायणादिनामककर्मांतरविधिरुतदर्शपूर्णमासयोरेवफलार्थगुणविधिरितिसंशये दाक्षायणादिसंज्ञकस्यगुणस्याप्रसिद्धेरुद्भिदादिवद्यजिसामानाधिकरण्येननामत्वान्नामभेदेनवाऽभ्यासेनवाप्रकृतात्कर्मांतरविधिरितिप्राप्ते लौकिकप्रसिद्ध्यभावेपि''द्वेपौर्णमास्यौद्वेअमावास्येसहकुंभीभिरभिक्रामती''त्यादिवाक्यशेषवशाद्दाक्षायणादिशब्दस्यावृत्तिसहप्रस्थानादिगुणपरत्वावसायेनकर्मनामत्वाभावात्फलश्रवणेनाविशेषपुनःश्रुत्यभावाच्च फलार्थगुणविधिरितिसिद्धांतितं । अत्रप्रकृतदर्शपूर्णमासापेक्षयातिरिक्तकर्मविधिपरत्वेनप्रतीताअपिदाक्षायणादिशब्दायथादक्षस्येमेदाक्षाःप्रयोगास्तेषामयनमितिव्युत्पत्त्यादाक्षायणशब्दआवृत्तिपरःतद्युक्तःप्रकृतोदर्शपूर्णमासात्मकोयज्ञोदाक्षायणयज्ञइति । यथाचामावास्यायागेद्वौदोहौसंपाद्यचतसृणांदधिपयसोःकुंभीनांसहप्रस्थापनंसाकंप्रस्थायः । तद्युक्तोदर्शयागःसाकंप्रस्थायीयइति व्युत्पत्तिमा

एवंचयथा''दाक्षायणयज्ञेनयजेत साकंप्रस्थायीयेनयजेते''त्यादौदाक्षायणयज्ञसाकंप्रस्थायी यादिशब्दाःप्रकृतएवदर्शपूर्णमासयागआवृत्त्यादिगुणविध्यर्थानतुततोतिरिक्तकर्मविधिपराः ॥ २९१ ॥

गु० कथंब्रह्मत्वमित्यतआह ॥**एवंचेति**॥ नचतर्ह्यथैषज्योतिरित्यत्रापिकर्मभेदोनस्यादितिवाच्यं यत्रसंज्ञाभेदस्यप्रकृतगुणार्थत्वाभावः तत्रैवसंज्ञयाकर्मभेदइतिभावः। प्रयोजनमाह ॥ **यथेत्यादि** ॥ लिंगाच्चेतिसूत्रेश्रवणावृत्तेःकर्तव्यत्वे अन्नंप्राणंचक्षुःश्रोत्रंमनोवाचमितिपूर्वोक्तः अन्नंब्रह्मप्राणोब्रह्मेत्यादिरूपोसकृदुपदेशोलिंगं । मनन

प्र० श्रित्यस्वर्गपश्वादिफलायावृत्तिसाकंप्रस्थायादिरूपगुणविध्यर्थः । तथात्रापि''भोग्यत्वमत्रचाद्यत्वमुपजीव्यतयाहरेः । महाभोक्तामहाभोग्यइत्यर्थोन्नमयेभवेत् । महाप्राणोमहाबोधोमहाविज्ञानवानपी''त्याद्यनुव्याख्यानोक्तदिशासर्वोपजीव्यत्वादितिगुणविशेषविधानार्थाइत्यर्थः । प्रकृतएव प्रकरणप्राप्तएवेत्यर्थः ॥ **यथावेति** ॥ अत्रैवतृतीयपादे''भूमासंप्रसादा''दित्यत्रच्छांदोग्येनामादिप्राणपर्यंतमुत्तरोत्तरातिशयितत्वेनतारतम्यमुक्त्वानंतरं सत्यविज्ञानमति श्रद्धानिष्ठाकृतिसुखशब्दितानाम्नायोच्यते''योवैभूमातत्सुखं । नाल्पेसुखमस्ती''ति । तत्रभूमामुख्यप्राणोविष्णुर्वेतिविशये प्राणप्रकरणात्प्राणादन्यस्योत्तमस्यप्रश्नप्रतिवचनाभ्यामनुक्तेश्चभूमाप्राणएवेतिप्राप्ते''योवैभूमातत्सुख''मितिनिरुपपदसुखशब्देनपूर्णसुखत्वाभिधानात्''एषतुवाअतिवदति यःसत्येनातिवदती''तितुशब्देनप्राणादतिशयितत्वस्यसूचितत्वाद्भूमाविष्णुरितिसिद्धांतयिष्यते । अत्रयद्यपिभूमाविष्णुरित्येवोच्यतेनतुसत्यमिति । तथापिसत्यवाक्यस्थतुशब्देनसत्यस्यातिशयितत्वेनविष्णुत्वेसिद्धेतदभेदेनभूम्नोपिविष्णुत्वसिद्धेर्ब्रह्मत्वेननिर्णीतादित्युक्तं । यद्यपीदं ''व्यतिहारोविशिंषंतिही''त्यत्रोच्यते तथाप्यस्याधिकरणस्यतदुक्ताक्षेपसमाधानार्थत्वादेवमुक्तं ।

यथावाभूमाधिकरणेब्रह्मत्वेननिर्णीतात्''सत्यंत्वेवजिज्ञासितव्य''मितिच्छांदोग्योक्तात्सत्यादुपरिश्रुताः''विज्ञानंत्वेवविजिज्ञासितव्यं मतिस्त्वेवविजिज्ञासितव्ये''तिविज्ञानमतिश्रद्धानिष्ठाकृत्यादिशब्दाःपूर्वोक्तसत्याख्येब्रह्मणि

गु० निदिध्यासनावृत्त्योस्तुकर्तव्यत्वेपुनरुपसत्त्यादिकंलिंगमितिद्रष्टव्यं । तेनभाष्येत्रितयावृत्तौलिंगानुपदेशाट्टीकायांत्रितयावृत्तेःकर्तव्यत्वेलिंगप्रतिपादकत्वोक्तिरनुपपन्नेतिनिरस्तं । ननुश्रुत्यधिकरणसंगतीदर्शयतीतिटीकायामुक्तं । तदयुक्तं । भाष्येऽव्यवहितपूर्वाधिकरणविषयवाक्याभ्यांश्रुत्यधिकरणसंगत्योरप्रदर्शनादित्यतआह ॥

SGDF

प्र० वक्ष्यतेचैतत् भूमाधिकरणे ॥ **गुणविध्यर्थाइति** ॥ तृतीयस्यतृतीयेपादे“सैवहिसत्यादय”इत्यधिकरणेप्राणात्सत्यपदोदितोविष्णुरेवोत्तमः किमन्योप्यस्तीतिविशये प्राणादुत्तमत्वेनोक्तात्सत्याद्विष्णोरप्युपरिविज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहंकारात्मनामुपदिष्टत्वादन्योपीति प्राप्ते सत्यंत्वेवविजिज्ञासइतिसत्याख्यविष्णोर्गुणजिज्ञासायामन्यस्योक्तेरसंगत्याविज्ञानादयस्तद्गुणाएवोच्यंतइतिसिद्धांतयिष्यतेतद्वदित्यर्थः ॥ **नारायणेति** ॥ नारायणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यंपंचरूपंब्रह्मैवक्रमेणानंदमयविज्ञानमयमनोमयप्राणमयान्नमयशब्दैरुच्यतइत्यर्थः । एतेनैकस्याप्यनेकत्वंरूपविशेषैर्युक्तमित्युक्तंभवति । वक्ष्यतेचैतद्गुहांप्रविष्टावित्यत्रेतिसर्वमनवद्यं । विप्रकीर्णनानाशाखेतिप्रागुक्तमनुरुध्यव्याचष्टे ॥ **येनकेनचिदिति** ॥ चिंताफलमात्रमुक्तमित्युक्तिमनुरुध्याह ॥ **यद्वेति** ॥ नन्वेवंपूर्वोक्तदिशागौणश्चेदित्यादिसूत्रचतुष्टयोक्ताक्षेपस

गुणविध्यर्थाः नतुवस्त्वंतरपराः एवमन्नमयादिशब्दाअपिप्रकृतेब्रह्मणिसर्वोपजीव्यत्वादिगुणविशेषविधानार्थाः नतुवस्त्वंतरपराइतिब्रह्मैवनारायणवासुदेवाद्याख्यानंदमयादिपंचरूपमिति ॥ टीकाक्षरार्थस्तु ॥ ॥ श्रुत्यधिकरणसंगतीदर्शयतीति ॥ येनकेनचित्पूर्वाधिकरणेनतद्विषयश्रुत्याचसंगतिरेवापेक्षितेत्याद्यसूत्रेणतद्विषयवाक्येनचाक्षेपिकीसंगतिरस्तीत्यर्थः । यद्वाऽत्रपूर्वपक्षे आद्यसूत्रतद्विषयवाक्योक्तजिज्ञासाक्षेपात्सिद्धांतेचतत्समाधानात्तत्संगतीस्तइतिप्रयोजनवानयंविचारइत्यर्थः । अतएवोत्तरत्रटीकायां“किमर्थमानंदमयस्यविष्णुत्वसमर्थन”मितिप्रश्नः“ब्रह्मजिज्ञासासिद्ध्यर्थ”मितिपरिहारश्च । एवमुत्तरत्रापिसंगतिंटीकाद्विधाव्याख्येया ॥

गु० **येनकेनचिदिति** ॥ अव्यवहिताधिकरणसंगतिःस्फुटत्वाच्छिष्यैरेवोह्या । जिज्ञासाकर्तव्येतिभाष्यंतुचिंताफलमात्रप्रदर्शकमितियत्पूर्वमुक्तंतदनुरोधेनटीकाग्रंथंयोजयति ॥ **यद्वेति** ॥ **प्रयोजनवानेवायंविचारइति** ॥ तथाचभाष्यंप्रयोजनमात्रपरंनसंगतिपरमितिभावः ॥ **एवमुत्तरत्रेति** ॥ यत्रव्यवहिताधिकरणेनसं

SGDF Sri Gargeshwari Digital Foundation

प्र० माधानाभ्यामप्यस्यफलवत्त्वसंभवेनव्यवहितेनफलवत्त्वोक्तिरर्थवती अनंतरसंगतिश्चस्वरसाभवतीतिभाष्येजिज्ञासाधिकरणेनतदुक्तिर्नस्व रसेतिचेन्न। अव्यवहिताक्षेपस्यापिजिज्ञासाक्षेपंविनाऽपर्यवसानेनतदाक्षेपपर्यंतत्वात्साक्षात्तदाक्षेपसंभवेगौणसूत्राद्याक्षेपद्वारातदाक्षेपस्यवक्रत्वा दितिभावः । विषयवाक्यार्थोक्त्यवसरे"तस्यपुरुषविधतां । अन्वयंपुरुषविध"इत्यस्यानंदमयस्यपुरुषाकारतानुसारेणायंविज्ञानमयःपुरुषा कारस्तस्मादुद्भूतइत्यर्थउक्तः । तत्रकोशात्कोशस्योद्भवइतिभ्रांतिंवारयन्"देहदेहिवदेवासौपंचधावस्थितोहरिः । बहिस्स्थोदेहवद्विष्णुरंतस्स्थो देहिवत्स्मृतः । अंतर्व्याप्तिविशेषेणनत्वशक्तत्वतोबहिः । सर्वेपिपुरुषाकारउत्तरात्पूर्वसंभव"इतितैत्तिरीयभाष्यानुरोधेनार्थमाह ॥ तस्मादु द्भूतइतीति ॥ तदांतरात् तदंतर्विद्यमानात् सूर्याधिष्ठातृत्वस्योपनिषद्यनुक्तत्वाद्दुर्गमंतद्वाक्यंव्याचष्टे ॥ इंद्रेति ॥ "आनंदप्रचुरइतियद्यु

[१।१।१६] तस्मादुद्भूतइति ॥ शरीरिस्थानीयात्तदांतरान्नारायणाख्यादानंदमयाच्छरीरस्थानीयोबाह्योवासुदेवाख्योविज्ञा नमयःप्रादुर्भूतइत्यर्थः ॥ [१।१।१७] इंद्रबृहस्पत्यादीनामपिसूर्याधिष्ठातृत्वादिनेति ॥ तेषांसूर्यादुत्तमतयातन्नियामकत्वे नावस्थानंतदधिष्ठातृत्वं । आदिशब्देन"सएकइंद्रस्यानंदः सएकोबृहस्पतेरानंदः"इतींद्रश्रुत्यादिकंविवक्षितं ॥

गु० गतिरुक्तास्तितत्रेत्यर्थः । नन्वयंपुरुषइत्येतट्टीकायांतस्मादुद्भूतइतिव्याख्यातं । तदनुपपन्नं । आनंदमयविज्ञानमययोर्द्वयोरपिब्रह्मत्वेनोत्पादकोत्पाद्यभावायोगात् । किंचविज्ञानमयादानंदमयस्यैवोत्पत्तिःकिंनस्यात् । नियामकाभावादित्यतआह ॥ **शरीरीति** ॥ तथाचोद्भूतशब्दस्यप्रादुर्भावार्थत्वान्नोत्पाद्योत्पादकभावः । तस्मादु द्भूतइत्येतत्तस्यपुरुषविधतामित्यस्यतात्पर्यकथनपरमितिज्ञातव्यं । इंद्रबृहस्पत्यादीतिटीकायामिंद्रादेःसूर्याधिष्ठातृत्वमुक्तं । तदनुपपन्नं प्रमाणाभावादित्यतआह ॥ **तेषामिति** ॥ **इंद्रश्रुत्यादिकंविवक्षितमिति** ॥ तेयेशतमिंद्रस्यानंदाइत्यादिशतानंदसामानाधिकरण्येनेंद्रादिश्रुतेःश्रवणाच्छतानंदानंदमयशब्दयोरेकार्थत्वात्ते

SGDF
Sri Gargeshwari Digital Foundation

प्र० च्यतेतदात्रब्राह्मणप्रचुरोग्रामइत्यादिवदनानंदस्यापिप्राप्तेःप्रचुरानंदइतिविपरीतसमासःकृत"इतिटीकानयुक्ता । "यत्तुप्राचुर्यस्यविशेषणत्व"इत्यादिनास्यदूषितत्वादित्यतस्तांविवृणोति ॥ **आनंदप्रचुरइतीति** ॥ शंकालिंगस्यनन्वित्यस्यपरिहारवाक्येऽन्वयंघटयति ॥ **ननुविस्मृतेति** ॥

आनंदप्रचुरइतियद्युच्यतइति ॥ प्राचुर्यस्यविशेषणतायामनानंदाप्राप्तेःपरैरप्यंगीकृतत्वात् "प्रचुरानंदत्वा"दितिवदताभाष्यकृता यथाप्रचुरानंदइत्युक्तावनानंदाप्राप्तिस्तथाश्रुतिसूत्रानुसारेणानंदमयइतिप्राचुर्यस्यविशेष्यत्वेनोक्तावपितदप्राप्तिः । प्रकाशप्रचुरोरविरित्युक्तेपिसवितर्यंधकारलेशाप्रतीतेरितिसूचितमित्यर्थः । ननुविस्मृतकंठमणिरितिसिद्धांतग्रंथे नन्वित्यस्यइत्येवोच्यतेनन्वित्यन्वयः ॥

गु० षांप्राप्तिरितिज्ञेयं । सुधाविरोधपरिहारायोक्तानुपपत्तिपरिहारायचव्याचष्टे ॥ **आनंदप्रचुरइतीति** ॥ आनंदप्रचुरइत्यत्रपरैरंगीकृतत्वादितिशेषं प्रचुरानंदइत्यभिधानेचेत्यत्रइवेतिशेषं तथानंदप्रचुरइतिशेषंचप्रपूर्यव्याचष्टे॥ **प्राचुर्यस्येत्यादि** ॥ अनेनानंदप्रचुरइतियथाभिधानेब्राह्मणप्रचुरोग्रामइत्यादिवदनानंदस्यापिप्राप्तेःपरैः शंकितत्वात् तथाप्रचुरानंदइत्यभिधानेचपूर्णानंदइत्येवप्रतीतेश्च परैरंगीकृतत्वाद्विपरीतसमासःकृतः । कथं प्रचुरानंदइत्युक्तिवदानंदप्रचुरइत्युक्तावपिपूर्णानंदइत्येवप्रतीतेः । अन्यथाप्रकाशप्रचुरोरविरित्यत्राप्यंधकारलेशप्रतीत्यापत्तेःपरोक्तंनेत्येवंटीकायोजितेतिद्रष्टव्यं । ननुविस्मृतेत्यादेःशंकाग्रंथत्वनिरासायाह ॥ **नन्वित्यादि** ॥

प्र० ननुशरीरत्वानुमानेनप्रतिशरीरंजीवाभेदस्यसिद्धिर्नतुजीवानांब्रह्माभेदस्य । अतःप्रागुक्तमासत्वानुमानमेवप्रयोज्यमित्यतःसुधोक्तमेवोत्तरमाह ॥ **विमतानीति** ॥ शिष्टमुपन्यासमुखेनविवृतमितिभावः ॥ ७ ॥ **आनंदमयाधिकरणंसंपूर्णं** ॥ ६ ॥ ७ ॥

॥ **ॐअंतस्तद्धर्मोपदेशात्ॐ** ॥ नन्वस्याधिकरणस्यब्रह्मसमन्वयपरत्वेनशास्त्राध्यायांतर्भावरूपसंगतिसंभवेपिनात्रपादेनिवेशोयुज्यते । लिंगसमन्वयपरत्वादित्यतआह ॥ **अत्रेति** ॥ एतदधिकरणांतउक्तमित्यर्थः । तथाच तद्व्याख्यानेनस्पष्टीकरिष्यामइतिभावः । अनेनाधिदैवगताःसर्वेपिशब्दाउदाहरणमित्युक्तंभवति । इदानींपूर्वाधिकरणसंगतिंभाष्यानुव्याख्यानानुरोधेनचतुर्धाऽऽह ॥ **अनंतरेति** ॥ यद्यप्येकस्यै

विमतानिशरीराणीति ॥ शरीरत्वहेतोर्जीवानामन्योन्यमभेदसाधकत्वेपि विशिष्टरूपस्याभेदायोगेनशुद्धस्यशुद्धेनाभेदेवक्तव्येशुद्धस्यैवब्रह्मत्वाद्ब्रह्माभेदोपिसेत्स्यतीतिभावः ॥ ७ ॥ आनंदमयाधिकरणंसंपूर्णं ॥ ६ ॥ ७ ॥

॥ ॐअंतस्तद्धर्मोपदेशात्ॐ ॥ अत्रांतस्स्थत्वलिंगसमन्वयस्याधिदैवगतेंद्रादिनामसमन्वयार्थत्वात्पादसंगतिरितिटीकायामेवोक्तं । अनंतरसंगतिस्तु आनंदमयधर्मस्यादृश्यत्वस्यांतस्स्थेश्रवणा

गु० ननुशरीरत्वेनाभेदसाधनमयुक्तं । तेनजीवानामन्योन्यमभेदसिद्धावपिशुद्धब्रह्माभेदासिद्धेरित्यतआह ॥ **शरीरत्वेति** ॥ **आनंदमयाधिकरणंसंपूर्णं** ॥६॥ ॥ **ॐअतस्तद्धर्मोपदेशात्ॐ** ॥ नन्विदमधिकरणंपादासंगतं । तत्रांतस्स्थत्वलिंगसमन्वयस्यक्रियमाणत्वात् । अस्यचनामपादत्वादित्यतआह ॥ **अत्रेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० वालं तथापिविषयव्याप्त्यर्थमनेकसंगत्युक्तिरितिध्येयं । “यदाह्येवैषएतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयंप्रतिष्ठांविंदते अथसो भयंगतोभवति”इत्यत्रैतस्मिन्नितिप्रकृतानंदमयपरामर्शेनोक्तस्यानंदमयधर्मस्यादृश्यत्वस्य “अंतश्चंद्रमसिमनसाचरंतं । सहैवसंतंनविजानंति देवा”इतिवाक्येकैमुत्यन्यायेनदेवादिसर्वाज्ञेयत्वेनांतस्थेश्रवणादित्यर्थः ॥ **अविष्णुत्वादिति** ॥ पूर्वपक्षन्यायेनेतिभावः । नन्वंतस्थस्यावि ष्णुत्वे आनंदमयोप्यविष्णुरित्ययुक्तं । अंतस्थस्याविष्णुत्वेऽन्यत्रप्रसिद्धेंद्रादिश्रुतिलिंगरूपविशेषहेतुवत्तत्रविशेषहेतोरभावादेवानंदमयस्यतत्रत्य सिद्धांतन्यायेनविष्णुत्वोपपत्तेः । नचादृश्यत्वंविशेषहेतुः । तस्यद्वयोरप्युपपत्त्याताद्दशलिंगमात्रेण“ब्रह्मशब्दात्समस्तात्तृत्वादिलिंगाच्चे”त्युक्तदि

दंतस्थस्यचाविष्णुत्वादानंदमयोपिनविष्णुरितिपूर्वसिद्धांताक्षेपेणेहपूर्वपक्षोत्थानादाक्षेपिकी ।

प्र० शाश्रुत्यादिप्रमाणषट्कावगतविष्णुत्वाक्षेपायोगात् । प्रत्युतोक्तरीत्याविष्णुलिंगतयावगतादृश्यत्वेनांतस्थस्यैवविष्णुत्वापत्तेश्च । नचांतस्थत्व स्येंद्रादिनिष्ठत्वेनावगतावंतस्थत्वरूपगुहानिहितत्वस्यानंदमयनिष्ठतयामांत्रवर्णिकसूत्रेणोक्तेर्वक्ष्यमाणदिशासोप्यन्यएवेत्याक्षिप्यतइतिवाच्यं । तस्याप्युक्तदोषग्रस्तत्वादितिचेन्मैवं । अदृश्यपदेननिरतिशयवैभवस्यविवक्षिततयातस्यचद्विष्ठत्वायोगेनैकस्यैववक्तव्यत्वात् । तस्यचान्यत्रनि रूढेंद्रादिश्रुत्यादिबलेनान्यत्वेननिर्णीतांतस्थनिष्ठतयाताल्लिंगत्वावगमेनतद्युक्तानंदमयोप्यन्यइत्याक्षेपसंभवात् । ब्रह्मादिशब्दानांकथंचिदिंद्रादा वेवनेयत्वात् । तथाचावयवावयव्यभेदादिकंनक्लेशेननेयं । नचवैपरीत्यं । अत्रेंद्रादिप्रापकश्रुतिलिंगानामन्यत्रनिरूढत्वेनविष्णौनिरवकाश

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वात् । एकेनलिंगमात्रेणानेकनिरवकाशबाधायोगात् । अतएवोक्तंटीकायां "नचादृश्यत्वलिंगेनांतस्थोविष्णुः । श्रुत्यादिभ्योलिंगमात्रस्यदुर्बलत्वा"दिति । किंचेंद्रादीनांविष्णवभिन्नत्वेनविष्णुप्रापकाणामुपहितेंद्रादाविवेंद्रादिप्रापकाणामनुपहितेविष्णावयोगात्काल्पनिकभेदाश्रयणाच्चांतस्थस्यान्यत्वेऽत्रोक्तदिशाऽऽनंदमयोप्यविष्णुरित्याक्षेपसंभवात्प्रागुक्तभेदव्यपदेशस्याप्याक्षेपाच्च । केचित्तु आनंदमयस्याविष्णुत्वशंकामात्रेण विष्णुत्वनिश्चयाक्षेपसंभवात्तदभिप्रायेणेयमाक्षेपोक्तिः । अतएवटीकायामानंदमयस्यान्यत्वप्रसंगादितिप्रसंगशब्दइत्याहुः । तेषांपक्षेसएवानंदमयइतिभाष्यंकथंनेयमितिचिंत्यं । इयंचनाश्रद्धेयेत्याह ॥ **इयंचेति** ॥ ननुयद्यानंदमयाक्षेपकत्वेनास्यतदानंतर्यंतर्ह्याकाशाद्यधिकरणानाम

इयंच"अदृश्येनात्म्ये"इत्यादिभाष्यएवोक्ता । नचैतद्भाष्यं"ब्रह्मजिज्ञासाकर्तव्येत्युक्त"मित्यानंदमयाधिकरणभाष्यवत्प्रयोजनप्रदर्शनमात्रपरं । "अंतःप्रविष्टंकर्तारं अंतःप्रविष्टःशास्ताजनाना"मित्यंतस्स्थेश्रुतस्य

प्र० पितदानंतर्यंस्यात् । तेषामपिभाष्येतदाक्षेपकत्वदर्शनादितिचेन्न । तद्भाष्यस्यफलमात्रपरत्वेनवक्ष्यमाणत्वादेतदानंतर्यहेतोर्दर्शयिष्यमाणत्वाच्चेतिभावः । उक्तसंगतिपरत्वंभाष्यस्याक्षिप्यसमाधत्ते ॥ **नचेति** ॥ ननु"ब्रह्मजिज्ञास्य"मितिभाष्यावतारिकाटीकागतसंगतिपदस्यार्थद्वयंप्राग्व्याख्यातं । तथाचतद्भाष्यवदेतद्भाष्यंप्रयोजनमात्रपरंनेतिकथं । उच्यते । पूर्वत्रप्रयोजनमात्रपरत्वव्याख्यानमेवाभिप्रेतं । अतएवतत्रैवोपष्टंभकोक्तिः । व्यवहितसंगतिपरत्वव्याख्यानंतु अव्यवहितसंगतिनिर्बंधोनावश्यकइत्यर्थस्यावश्यसूचनीयत्वात्तत्परतयापियोजयितुंशक्यतइतिभावेन । संगतिपरत्वेऽव्यवहितसंगतिकथनसंभवेव्यवहितेनतदुक्तिरयुक्तेत्यरुच्यैवयद्वेतिपक्षांतरोक्तिरिति । नचैवमतिदेशायोगः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० अरुच्यंशतिरोधानेनतदुपपत्तेः । यद्वा अरुचिग्रस्तस्याप्यस्यार्थस्यात्रोक्तिःकिमर्थेत्यतोत्रानभिप्रेतत्वेप्यन्यत्रोपयोगोभविष्यति । यत्रभाष्ये ऽव्यवहितपूर्वसंगतिरुच्यतेतत्रेतिभावेनातिदेशोपपत्तेः । अतएवपूर्वतंत्रेक्त्वाचिंतायाःफलमन्यत्रेतिक्त्वाचिंताःप्रवर्तंतइति"। व्याकरणेपि "नामि"इत्यादौसनुट्कामादिग्रहणस्यतत्रानुपयोगेपि"नोपधाया"इत्यादावुपयोगः । यद्वाऽव्यवहितसंगतिपरत्वंमात्रपदव्यावर्त्यमितिनक श्चिद्दोषः ॥ **कर्तृत्वादेरिति** ॥ आदिपदेनशास्तृत्वरूपनियामकत्वस्यग्रहः । नन्वत्रकर्तृत्वमेवश्रुतंनतुसर्वकर्तृत्वं । तथाचप्रागुक्तसर्वकर्तृत्वा क्षेपोनियामकत्वाक्षेपोवाकथमितिचेदित्थं । अंतश्शब्दस्यनिरुपपदस्यसर्वांतःप्रवेशेनसर्वकर्तृत्वलाभाद्वा कर्तृशब्दस्यवानिरुपपदस्यमुख्यकर्तृ वाचित्वेनकृत्स्नकर्तुरेवमुख्यकर्तृत्वात्तेनतल्लाभाद्वा अन्यस्यकतिपयकर्तृत्वेभगवतःसर्वकर्तृत्वायोगादितिवा तदाक्षेपसंभवात् । तथाजनाना मितिबहुवचनस्यसंकोचकाभावात्कैमुत्यन्यायेनचेतनाचेतनसर्वशास्तृत्वलाभेनतदाक्षेपसंभवात् । सर्वेवेदाइत्यत्रकैमुत्येनसर्वसदागमवेद्यत्व लाभेनतदाक्षेपसंभवादिति ॥ **अन्यथापीति** ॥ अव्यवहिताक्षेपस्यापिव्यवहितजिज्ञासासूत्राक्षेपपर्यंतत्वेनततोप्यव्यवहितस्यानन्यद्वारासा

कर्तृत्वादेःपूर्वपक्षेन्यनिष्ठत्वेनजन्मादिसूत्राक्षेपस्य "सर्वेवेदायत्रैकंभवंती"त्यंतस्थेश्रुतस्यसर्ववेदप्रतिपाद्यत्वस्या प्यन्यनिष्ठत्वेनशास्त्रयोनिसमन्वयसूत्राक्षेपस्यापिसंभवेनप्रयोजनस्यान्यथाप्युपपत्तेः । यद्वा युक्तमानंदमयश ब्दोविष्णुपरइति । तस्यार्थविशेषेनिरूढत्वाभावात् । इंद्रादिशब्दास्त्वर्थविशेषेनिरूढानान्यत्रनेतुंशक्याः ।

गु० तथाचफलतःपादसंगतिरस्तीतिनासंगतिरितिभावः ॥**प्रयोजनस्यान्यथाप्युपपत्तेरिति**॥ प्रयोजनमात्रपरंचेदत्रभाष्यंस्यात्तर्हिपूर्वाधिकरणइवसूत्रेकंठतउक्तंमहा प्रयोजनमेवाक्षिपेत् । प्रथमातिक्रमेकारणाभावात् । पूर्वोल्लंघनेनषष्ठाधिकरणेऽर्थादुक्तप्रायमदृश्यत्वमेवनाक्षिपेदित्यर्थः । एवंभाष्योक्तांसंगतिमुक्त्वाऽनुव्याख्यानो

प्र० क्षादाक्षेपसंभवादितिभावः ॥ **उक्तंहीति** ॥ उद्भिन्नयवार्तिके ॥ **प्रसिद्धैरिति** ॥ निर्ज्ञातसंबंधैः । अपृथक्श्रुतैः सहश्रुतैः । निरूढं नि श्चितसंबंधपदं । पूर्वोक्तेनविरोधंनिरस्यति ॥ **निरूढोपीति** ॥ ओदनादावितिभावः ॥ **अन्यत्रेति** ॥ प्रसिद्धान्नेऽसंभवादित्यर्थः । उक्त द्वयवैषम्यमिंद्रेति ॥ **यौगिकार्थश्चेति** ॥ "तमिदंद्रंसंतमिंद्रमित्याचक्षतेपरोक्षेणे"त्यैतरेये तथा"तमिंधंसंतमिंद्रइत्याचक्षतेपरोक्षेणे"तिबृह दारण्यकेचयोगस्योक्तत्वादिहेत्युक्तं **संगतिरिति** ॥ प्रत्युदाहरणरूपेत्यर्थः । लक्षणंतूक्तं । अस्योत्तराधिकरणतुल्यत्वादेतदधिकरणस्यैव

उक्तंहि"पदमज्ञातसं(बंधं)दिग्धंप्रसिद्धैरपृथक्श्रु(ति)तैः । निर्णीयतेनिरूढंतुनस्वार्थादपनीयत" इति । (नि)रूढोप्यन्नशब्दोऽद्यतेत्तिचेतिश्रुत्युक्तस्ययोगस्यान्यत्रासंभवाद्ब्रह्मपरः । इंद्रादिशब्दानांत्विहश्रुतौ योगोनोक्तः । यौगिकार्थश्चैश्वर्यादिर्देवतासुसंभवतीतिपूर्वाधिकरणवैषम्येणपूर्वपक्षोत्थानात्संगतिः ।

गु० क्तांसंगतिमाह ॥ **यद्वेति** ॥ **पदमज्ञातसंदिग्धमित्यादि** ॥ उद्भिदधिकरणवार्तिकइतिशेषः । अयमर्थः । पिकादिपदमर्थविशेषवाचित्वेनाज्ञातमसंदिग्धंच कोकिलःपिकोविदेवनोक्षइत्यर्थविशेषवाचित्वेनप्रसिद्धैरपृथक्श्रुतिसमानाधिकरणनिर्दिष्टंसदर्थविशेषवाचित्वेननिर्णीयते । यत्त्वर्थविशेषवाचित्वेननिरूढं नियतं । तत्प्रसिद्धपदसामानाधिकरण्येपिस्वार्थान्नापनीयतइति । ननुरूढत्वादिंद्रादिशब्दानामन्यपरत्वाभावेअन्नशब्दस्यापिरूढत्वादन्यपरत्वंनस्यादित्यतआह ॥ **रूढोपीति**॥ नन्वेवंरूढानामप्यन्नानामद्यतेत्तिचेत्यादिश्रुत्युक्तयोगस्यान्यत्रासंभवेनब्रह्मपरत्ववत् इंद्रादिशब्दानांरूढत्वेपिश्रुत्युक्तयोगस्यान्यत्रासंभवेनेंद्रादिशब्दानामपिब्रह्मपरत्वं स्यादित्यतः श्रुत्यायोगस्यानुक्तत्वाद्विद्यमानस्याप्यन्यत्रसंभवान्नेंद्रादिशब्दानांब्रह्मपरत्वमित्याह ॥ **इंद्रादिशब्दानांत्विति** ॥ ननुवैषम्येणपूर्वपक्षोत्थानंनसंभ वति । पूर्वाधिकरणेसमन्वेतव्यस्यानंदमयस्यान्यत्ररूढत्वाभाववत् अत्रापिसमन्वेतव्यस्यांतस्थत्वस्यान्यत्ररूढत्वाभावात् । तत्रेंद्रादिशब्दानामन्यत्ररूढत्वेपिपूर्वत्रापि

SGDF Sri Gargeshwari Digital Foundation

प्र० पूर्वानंतर्येकोहेतुरतआह ॥ **आकाशादीति** ॥ **संगतिरिति** ॥ अपवादरूपेत्यर्थः । अत्रापिलक्षणमुक्तं । एतेनसंगतिद्वयकथनेन सुधायां पूर्वपक्षप्रापकेंद्रादिश्रुतिलिंगान्युक्त्वानंतरमुक्ते"अन्नंब्रह्मेत्यादिश्रुत्यातद्धेतुव्यपदेशादितिलिंगेनचातीताधिकरणेनिर्णयःकृतः । नचेंद्रादिश्रुतिरन्यत्रनेतुंशक्यते । पुरंदरादिषुरूढत्वाद्यौगिकत्वाच्चे"तिवाक्ये अन्नंब्रह्मेत्यादिकृतइत्यंतवाक्यंपूर्वत्रोत्तरत्रचसंयोज्यक्रमेणापवादप्रत्युदाहरणसंगतिद्वयपरत्वेनव्याख्येयमित्युक्तंभवति । तद्धेतुव्यपदेशादीत्यादिपदेनाद्यतेऽत्तिचेतिवाक्यशेषोक्तयोगोपिग्राह्यः । तच्छब्दानां इंद्रादिशब्दानां । तत्र पुरंदरादिदेवेषु । रूढिंच नकेवलंयोगंरूढिमपि । स्वयमपि साक्षादपि । विद्वत्संबंधिनीमप्याशंक्यस्वयंसूत्रकारोंतरितिसूत्रेणन्यवारयदिति

आकाशाद्यधिकरणेष्वाकाशादिशब्दानामन्यत्ररूढ्यापूर्वपक्षेपितेषामेतदधिकरणानंतर्येहेतुर्वक्ष्यते । यद्वायदिब्रह्मशब्दादानंदमयोब्रह्मतर्हींद्रादिशब्दादंतस्स्थइंद्रादिः नतुब्रह्म तच्छब्दाभावादितिपूर्वसिद्धांतन्यायेनपूर्वपक्षिते पूर्वाधिकरणोक्तंश्रुत्यादिनिर्णयमपोद्यलिंगेननिर्णयउच्यतइतिसंगतिः । इदंचसंगतिद्वयं"आशंक्यतत्ररूढिंचतच्छब्दानामपिस्वय"मित्यनुव्याख्यानेरूढिपदतच्छब्दपदप्रयोगात्सूचितं ।

गु० ब्रह्मशब्दस्यब्रह्मणिप्रसिद्धत्वेनसाम्यस्यैवसत्त्वादित्यस्वरसादाह ॥ **यद्वेति** ॥ **रूढिपदेति** ॥ योगसमुच्चायकचशब्दशिरस्करूढिपदेत्यर्थः । एवंकंठतोभाष्योक्ताम

SGDF
Sri Gargeshwari Digital Foundation

प्र० वक्ष्यमाणेनान्वयः । आक्षेपिकींसंगतिमुक्तामपिप्रकारांतरेणाह ॥ **यद्वेति** ॥ **उक्तमिति** ॥ “सत्यंज्ञानमनंतंब्रह्म । योवेदनिहितंगुहाया” मितिमंत्रवर्णोक्तस्यैवान्नमयादिप्रकरणैःप्रपंचनादितिभावः ॥ **अंतस्स्थवाक्यशेषइति** ॥ “अंतःप्रविष्टंकर्तारमेतंदेवानांबंधुंनिहितंगुहास्वि” तिवाक्यशेषेश्रवणादित्यर्थः ॥ **समानन्यायतयेति** ॥ आनंदमयेश्रुतस्यादृश्यत्वस्यांतस्स्थेऽन्यस्मिन्श्रवणादानंदमयोपिनविष्णुरितिवदानंद मयेश्रुतांतस्स्थत्वस्यान्यस्मिन्श्रवणादानंदमयस्यविष्णुत्वेंऽतस्स्थत्वंनयुक्तमित्याक्षेपसंभवादित्यर्थः । तथाज्योतिरधिकरणे“योवेदनिहितंगुहायामि त्युक्तं । तच्चाग्निसूक्तगतस्यज्योतिर्हृदयआहितंयदितिज्योतिषश्श्रूयते”इत्याक्षिप्तत्वात्सूचितमित्यर्थः । अत्रतिस्रःसूचिताः । एकातुभाष्यकारैः

यद्वा मांत्रवर्णिकसूत्रे “योवेदनिहितंगुहायां” इत्यानंदमयस्यांतस्स्थत्वमुक्तं । तदिहाक्षिप्य समाधीयतइतिसंगतिः । नचगुहानिहितत्वमन्यदंतस्स्थत्वंचान्यदितिवाच्यं । अंतस्स्थवाक्य शेषे “निहितंगुहा”स्वितिश्रवणात् । इयंचसंगतिरत्रत्येन “अदृश्येनात्म्ये” इतिभाष्येण “योवेदनिहितंगुहायामित्युक्त”मितिज्योतिरधिकरणभाष्येणचसमानन्यायतयासूचिता ।

गु० नुव्याख्योक्तांचसंगतिमुक्त्वा एतत्पूर्वाधिकरणीयेनज्योतिरधिकरणीयेनचसमानन्यायतयाभिमतांसंगतिमाह ॥ **यद्वेति** ॥ **समानन्यायतयेति** ॥ अयंभावः । यथांतस्स्थेऽदृश्यत्वस्यश्रुतत्वादंतस्स्थस्यान्यत्वेतद्धर्मभूतस्यादृश्यत्वस्याप्यन्यनिष्ठत्वापत्त्याऽदृश्यत्वस्यान्यनिष्ठत्वेअदृश्येनात्म्यइत्युक्तस्याप्यन्यनिष्ठत्वापातेनतद्युक्तस्यानं दमयस्याप्यब्रह्मत्वंस्यादिति यदाभिहितंतदांतस्स्थस्येंद्रादित्वादंतस्स्थत्वयुक्तआनंदमयोप्यन्यएवेत्यभिहितप्रायं । समानन्यायत्वादिति । नन्वाक्षेपसंगतेर्भाष्येमुखतः

SGDF
Sri Gargeshwari Digital Foundation

प्र० कंठोक्ता । तत्रभाष्यकारस्यानौचित्यमाशंक्यपरिहरति ॥ **यद्यपीति** ॥ ननु अदृश्यत्वंशीघ्रोपस्थितिकं । अंतस्स्थत्वंविलंबितोपस्थितिकं । अतएवमाश्रितमित्यतआह ॥ **यथाचेति** ॥ **कैमुत्येति** ॥ देवाविज्ञेयत्वमात्रेणादृश्यत्वासिद्धेर्देवाअपिनजानंतिकिमुतेतरइतिसर्वाज्ञेयत्व सिद्ध्याऽदृश्यत्वंबोद्धव्यमित्यर्थः ॥ **शंकेति** ॥ लिंगमात्रेणेंद्रादिप्रापकश्रुत्यादिबाधायोगेनावधारणायोगाच्छंकास्यादित्युक्तं । ननुयथाऽदृ श्यतामुखेनानाक्षेपेप्राग्विष्णुधर्मतयानिर्णीतेनतेनांतस्स्थोविष्णुरितिशंकास्यात् तथांतस्स्थत्वमुखेनानाक्षेपेप्राग्विष्णुधर्मतयानिश्चितेनतेनायमिं द्रादिर्विष्णुरेवेतिशंकास्यादितिचेन्न । वैषम्यात् । अंतस्स्थत्वंहीहसमन्वीयते । तच्चादृश्यत्वादिलिंगेंद्रादिश्रुत्योःप्राबल्याद्यविवेकेनसंदिह्यतइ तिनतेनशंकास्यात् । प्रबलयापूर्वपक्षयुक्त्याचांतस्स्थत्वमिंद्रादेरेवेतिशंक्यमानत्वाच्चेति । एतेनकर्तृत्वशास्त्रत्वादेरपिपूर्वपक्षे आक्षेपइत्यपिसू

यद्यप्यंतस्स्थस्येंद्रादित्वादंतस्स्थत्वयुक्तआनंदमयोपींद्रादिरेवेत्याक्षेपऋजुः । अंतस्स्थस्येंद्रादित्वादंतस्स्थधर्मे णादृश्यत्वेनयुक्तआनंदमयोपींद्रादिरेवेत्याक्षेपस्तुवक्रः । यथाचांतस्स्थत्वंवाक्यशेषपर्यालोचनयागुहानिहि तत्वरूपमितिज्ञेयमितिविलंबः। तथा "सहैवसंतंनविजानंतिदेवा" इतिदेवाज्ञेयत्वात्कैमुत्यन्यायेनादृश्यत्वंज्ञे यमितिविलंबः । तथाप्यदृश्यत्वमुखेनानाक्षेपेऽदृश्यत्वेनविष्णुलिंगेनविष्णुरेवांतस्स्थइतिशंकास्यात् । सा माभूत् । अदृश्यत्वस्यापींद्रादिधर्मत्वादितिदर्शयितुंवक्राक्षेपमुखासंगतिःकंठोक्ता । अन्यातुसूचिता ।

गु० संकीर्तनमन्यासांतुसूचनमित्येतद्वैरूप्यंकुतइत्याशंक्य शंकांतरपरिहारार्थंतथाकरणमित्यभिप्रेत्यशंकांतरंदर्शयति ॥ **यद्यपीति** ॥ **अदृश्यत्वस्यापींद्रादिधर्मत्वादिति** ॥ प्रबलश्रुतिभिर्लिंगबाधेप्रामाण्यायेंद्रादावेवकथंचिन्नेयत्वादित्यर्थः । इदंचलिंगमात्रोपलक्षणमितिज्ञेयं । अतएवटीकायांपूर्वपक्षेऽदृश्यत्वादिलिंगबाधो

प्र० चितं । तेननकर्तृत्वादिनापिविष्णुत्वशंकेत्युक्तंभवति । एवंसंगतीर्निरूप्यविषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ "अंतःप्रविष्टंकर्तारमेतमं तश्चंद्रमसिमनसाचरंतं । सहैवसंतंनविजानंतिदेवा"इत्यादिनातैत्तिरीयेश्रुतोंतस्स्थोविषयइतिध्येयं ॥ **समुद्रशायित्वादीति** ॥ "समुद्रेअंतः कवयोविचक्षते । यस्यांडकोशंशुष्ममाहु"रित्याद्युक्तलिंगमित्यर्थः ॥ **विपरीतमिति** ॥ लिंगेनश्रुतिर्नेयेत्यर्थः ॥ **उतविपरीतमिति** ॥ लिंगंनिरवकाशंश्रुतिःसावकाशेत्यर्थः ॥ **तथेति** ॥ इयंचिंतापूर्वोक्तचिंतायांनफलफलिभावापन्ना । किंतुचिंतांतरमिति तदर्थमित्यनुक्त्वात थेत्युक्तं । एतच्चिंतोक्तिस्तुयथातृतीयचिंताद्वितीयचिंतोपयुक्ता तथेयमपिद्वितीयचिंतोपयुक्तेतितृतीयचिंतायाःसमुच्चयार्थेतिध्येयं । तथाहि । यदींद्रादिश्रुतिर्निरवकाशासमुद्रांतस्स्थत्वादिलिंगंसावकाशं यदिवालिंगस्यनिरवकाशत्वेपिश्रुतत्वप्रयुक्तप्राबल्यमेवबलवत् तदाश्रुत्यनुसारेणलिंग स्यसावकाशस्यचनिरवकाशस्यवानेयत्वादंतस्स्थइंद्रादिरितिपूर्वपक्षेफलफलिभावः । यदिचलिंगंनिरवकाशंश्रुतिस्सावकाशानिरवकाशत्वप्रयुक्त मेवप्राबल्यंबलवत् तदालिंगानुरोधेनसावकाशश्रुतेर्नेयत्वादंतस्स्थोविष्णुरितिसिद्धांतेफलफलिभावश्चस्फुटत्वान्नोक्तः । एतास्तुचिंताआद्यसूत्रसू चिताः । द्वितीयसूत्रसूचितास्तु अंतस्स्थइंद्रादिरुतविष्णुरेव । तदर्थंविष्णुलिंगमिंद्रादौनेतुंशक्यमुतनेति । तदर्थमुभयप्रापकश्रुतिलिंगसद्भावेन

अत्रांतस्स्थःकिमिंद्रादिःकिंवाविष्णुरितिचिंता । तदर्थंकिमिंद्रादिश्रुत्यनुसारेणसमुद्रशायित्वादिलिंगंनेयमुत विपरीतमिति । तदर्थंकिंश्रुतिर्निरवकाशालिंगंतुसावकाशमुतविपरीतमिति । तथालिंगस्यनिरवकाशत्वे पिकिंश्रुतित्वप्रयुक्तप्राबल्यंबलवत्किंवानिरवकाशत्वप्रयुक्तप्राबल्यंबलवदिति ॥ ॥ पूर्वपक्षस्तु ॥ अय

गु० क्तिः ॥ **विपरीतमिति** ॥ समुद्रशायित्वादिलिंगंनिरवकाशमिंद्रादिश्रुतिःसावकाशेतिविपरीतमित्यर्थः । वरुणादिप्रापकलिंगसद्भावेपिश्रुत्येंद्रएवेतिनिर्धारणंभवि

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वयोरभेदउत"इंद्रस्यात्मे"तिभेदव्यपदेशाद्भेदः । तदर्थमात्मशब्दःस्वरूपपरःकिंवानियामकपरः । स्वरूपार्थत्वेचषष्ठीयुज्यते नवेत्याद्याऊह नीयाइतिभावः । तथाचवक्ष्यत्यभेदपूर्वपक्षं ॥ **अंतस्थइंद्रादिरेवेति** ॥ इंद्राग्निबृहस्पतिसूर्यवरुणादिः ॥ **इंद्रादिश्रुतेरिति** ॥ इंद्रोराजा जगतोयईशे ब्रह्मेंद्रमग्निंजगतःप्रतिष्ठांदिवआत्मान"ँसवितारंबृहस्पतिं त्वष्टारंरूपाणिविकुर्वंत"मितींद्राग्न्यादिश्रुतेरिति । उपलक्षणमेतत् । अपांनेतारमित्यादिवरुणलिंगादित्यपिध्येयं । तत्रटीकोक्तंपूर्वपक्षंत्रेधासाधयितुंविकल्पेनाक्षिपति ॥ **नन्विति** ॥ लिंगानांदौर्बल्याच्छ्रुत्या निर्णयःस्यादित्यतआह ॥ **वरुणादीति** ॥ **योगेनेति** ॥ बृहस्पतिश्रुतेर्बृहतांदेवानांपतिर्बृहस्पतिरित्यादिरूपेणेंद्रेकथंचिद्योगवृत्त्याश्रयेणेंद्रश ब्दस्यस्वाधमापेक्षयैश्वर्ययुतेबृहस्पतावपिसावकाशत्वसंभवादित्यर्थः । ननुइंद्रादिष्वयमेवांतस्थइतिनिर्णयाभावेपिविष्णोरन्यएव नतुविष्णुरि

मंतस्थइंद्रादिरेव । इंद्रादिश्रुतेरिति । नन्विंद्रादिषुनिर्धारितएकएवांतस्थइतिवापूर्वपक्षोऽनिर्धारितोयःक श्चिदितिवासर्वोपीतिवा । नाद्यः । अनेकप्रापकसद्भावेननिर्धारणायोगात् । वरुणादिलिंगानामिंद्रादिश्रुतितो दौर्बल्यनिश्चयेपींद्रबृहस्पत्यादिश्रुतीनांसाम्येनैकस्यादौर्बल्यानिश्चयात् । योगेनचबृहस्पत्यादिश्रुतेरिंद्रेसावका शत्ववद्बृहस्पत्यादावपींद्रश्रुतेःसावकाशत्वात् । नद्वितीयः । निर्धारणाभावेपूर्वपक्षस्यसंदेहादविशेषापातात् ।

गु० ष्यत्येव । श्रुत्यपेक्षयालिंगानांदौर्बल्यस्यनिश्चितत्वादित्यतआह ॥ **वरुणादीति** ॥ तथाचननिश्चयइतिभावः । ननुबृहस्पत्यादिश्रुतेरपियोगेनेंद्रेसावकाशत्वान्नानि र्धारणमित्यतआह ॥ **योगेनचेति** ॥ नन्वंतस्थोविष्णुःअन्योवेतिसंदेहेअन्यएवेत्यवधारणेनप्रवृत्तस्यपूर्वपक्षस्यसंदेहाद्विशेषःसंभवतीत्यतःविष्णोरन्यएवेत्यवधारण

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यवधारणंयुज्यते । अतएवटीकायामंतस्थोऽन्यएवेत्युक्तमित्यतआह ॥ **समुद्रस्थत्वेति** ॥ **सूर्यवरुणादीति** ॥ तथाचपुनस्संदेहएवापन्न इतिभावः । सर्वेपीतिपक्षंनिरस्यति ॥ **नतृतीयइति** ॥ शास्तृत्वादेरित्यादिपदेनकर्तृत्वसर्ववेदवेद्यत्वादेर्ग्रहः । इत्यादीत्यादिपदेनइंद्रंराजानं सवितारमेतं मह्यमिंद्रोनियच्छतु अर्वाङायातुवसुभीरश्मिरिंद्रः सवितामेनियच्छतु सनइंद्रःकामवरंददातु इंद्रंनिचिक्युःपरमेव्योम"न्नित्या देर्ग्रहः । यथापूर्वाधिकरणेब्रह्मशब्दाभ्यासेनशरीरित्वविकारार्थत्वाद्यन्यलिंगानामन्यथानयनंतथेत्यर्थः । ननुकथमत्रेंद्रशब्दाभ्यासान्निर्णयः । "सवितारंबृहस्पतिं सवितारमेतं सवितामेनियच्छ"त्वितिसवितृशब्दाभ्यासस्यसत्त्वात् । तथाअग्निंजगतःप्रतिष्ठांमग्ययमग्निर्देधातु अग्नि स्तांअग्रेप्रमुमोक्तुदेव"इत्यग्निशब्दस्यचाभ्यासादितिचेदयमाशयः । सवित्रादिशब्दाभ्यासापेक्षयेंद्रादिशब्दानांबाहुल्यात् बहुबाधस्यान्याय्य त्वात् पूर्वाधिकरणे इंद्रबृहस्पत्यादीनांसूर्याधिष्ठातृत्वेनप्राप्तिकथनवदिंद्रस्य"जगतोयईश"इतिवचनेनसवित्राद्युत्तमत्वेनतदधिष्ठातृत्वेनसवित्रा

समुद्रस्थत्वादिविष्णुलिंगानामपिसत्त्वेनविष्णोरन्यएवेत्यवधारणस्याप्यनुपपत्तेश्च । तेषांलिंगत्वादेवदौर्बल्यनिश्चये चसूर्यवरुणादिलिंगानामपितन्निश्चयःस्यात् । नतृतीयः । "अंतःप्रविष्टःशास्ताजनानां सर्वात्मे"त्यंतःप्रविष्टेशास्तृ त्वादेःश्रवणेनानेकेश्वरापातादितिचेत् आद्यस्तावदस्तु । इंद्रएवांतस्थः । "इंद्रोराजा ब्रह्मेंद्रमग्नि"मित्यादींद्रश्रु त्यभ्यासेन "अपांनेतार"मित्यादिवरुणलिंगानांबृहस्पत्यादिश्रुतीनांचबाधादित्येकःपूर्वपक्षः । सूर्यएवांतस्थः ।

गु० मनुपपन्नमित्याह ॥ **समुद्रस्थत्वादीति** ॥ **अनेकेश्वरापातादिति** ॥ नचास्त्वनेकेश्वरापातइतिवाच्यं । अनेकेषांसंमत्ययोगेनविमतौप्रवृत्त्यादिकमेवनस्यादि तिभावः । नन्विंद्रएवांतस्थइत्यवधारणमयुक्तं । वरुणादिप्रापकलिंगादेःसत्त्वादित्यतआह ॥ **इंद्रइति** ॥ इंद्रबृहस्पत्यादिश्रुतीनांश्रुतित्वाविशेषेपींद्रश्रुतेरभ्यस्ताया

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिशब्दवाच्यत्वसंभवाच्चेंद्रइत्यवधारणोपपत्तिः । तथाचश्रुतिः“इंद्रोवैदेवानामोजिष्ठ”इतीति ॥ सप्तेति ॥ सप्ताश्वत्वमेकचक्ररथत्वंचालिंग मितिध्येयं । यथाद्युभ्वाद्यधिकरणेमुक्तोपसृप्यत्वरूपलिंगसहितयाऽऽत्मश्रुत्याविष्णुरितिनिर्धारणंतथेतिभावः ॥ अंतइति ॥ “अपांनेतारं भुवनस्यगोपा”मित्यस्यसवित्रादिश्रुतिलिंगापेक्षयांतेश्रवणादित्यर्थः । यद्यपींद्रंनिचिक्युरितींद्रश्रुतेरेतदनंतरंश्रवणमस्ति तथापिनिरवकाशलिंग सन्निधानाद्वितीयांतत्वेनापांनेतारमित्यस्यविशेषणत्वेनसावकाशतोपपत्तेरितिभावः ॥ पूर्वदौर्बल्येति ॥ “प्रथमेऽश्रवणादितिचेन्नताएवह्युप पत्ते”रितिवक्ष्यमाणन्यायेनेतिभावः । ननुपूर्वप्राबल्यमपिजन्माधिकरणउक्तमितिचेत्सत्यं । निरवकाशत्वेनैवनतुस्वतइत्यदोषः । एवंस्वय मितरप्रापकोपमर्देनावधारणेनपूर्वपक्षउक्तः । उत्तानदृशांपक्षमाह ॥ अन्येत्विति ॥ एकस्मिन्नेववाक्यएकप्रापकदर्शनमितरप्रापकादर्शनं

सप्तयुंजंतिरथमेकचक्र”मितिनिरवकाशलिंगसहितया “सवितारंबृहस्पति”मितिसवितृश्रुत्येंद्रादिश्रुतीनांस्वोचितैश्वर्या दिमतिसूर्येसंभवादित्यन्यः । वरुणएवांतस्थः । वरुणलिंगस्यांतेश्रवणात्पूर्वदौर्बल्यन्यायेनतेनेतरबाधादित्यपरइतिप क्षभेदेनावधारणात् । अन्येतुयथासिद्धांतप्रापकसद्भावेपितदज्ञानेनपूर्वपक्षस्तथासूर्यादिप्रापकसद्भावेपितदज्ञानेनेंद्राद्ये कैकावधारणेनानेकेपूर्वपक्षाइत्याहुः । द्वितीयोवास्तु । अंतस्थोविष्णुरन्योवेतिसंदेहेअन्यएवेत्येकावधारणेनप्रवृत्तस्य पूर्वपक्षस्यसंदेहाद्विशेषसद्भावात् । सोन्यइंद्रएवेत्यादिनिर्धारणंतुनास्ति । इंद्रादिप्रापकाणांबलाबलानिश्चयात् ।

गु० बलवत्त्वादितिभावः ॥ पक्षभेदेनावधारणादिति ॥ त्वष्टृश्रुतिर्विविधकर्तृत्वादिलिंगसहिता । त्वष्टारंरूपाणिविकुर्वंतमिति । बृहस्पतिश्रुतिरपिवाचोवीर्यमित्युक्त वागाधिपत्यरूपलिंगसहितेतिज्ञातव्यं ॥ अन्येत्विति ॥ उक्तरीत्यातत्प्रापकज्ञानेपिपूर्वपक्षस्योपपादितत्वादज्ञानेनपूर्वपक्षस्यायुक्तत्वादित्यस्वरसबीजमत्रद्रष्टव्यं ।

प्र० चायुक्तमित्यरुचिंसूचयत्यन्येत्विति । अन्योवेति टीकायांतथैवसंशयप्रदर्शनात् । अस्माभिस्त्वन्यशब्दार्थविवरणायेंद्रादिरित्युक्तमितिभावः। ननुविष्णुलिंगसद्भावात्कथमन्यत्वेननिश्चयइत्यतआह ॥ विष्णुलिंगानामिति ॥ हेतुगर्भमिदं । लिंगत्वादेवेत्यर्थः । ननुजात्याश्रुतेर्बलव त्त्वेपिवक्ष्यमाणरीत्यालिंगानांबहुत्वात्प्राबल्यं । वक्ष्यतेचप्राणस्तथेत्यत्रलिंगबाहुल्यान्मुख्यप्राणइतिपूर्वपक्षइत्यतआह ॥ विष्णुलिंगानामिति ॥ “द्विविधंबलवत्त्वंचबहुलाच्चस्वभावतः । तयोस्स्वभावोबलवानुपजीव्यादिकश्चस”इत्यादिवचनादितिभावः । अतएव“शब्दादेवप्रमित”इत्य त्रबहुलिंगानामपिवामनश्रुत्याबाधोवक्ष्यतइतिभावः । ननुनिरवकाशेनलिंगेनश्रुतेरपिसावकाशायाबाधोस्त्वित्यतआह ॥ नचेति ॥ समुद्रा धिष्ठातृत्वाद्वरुणस्येतिभावः । यस्यांडकोशमित्युक्तब्रह्मांडवीर्यत्वादिलिंगाशयेनाह ॥ यद्वेति ॥ प्रबलयाश्रुत्येति ॥ स्वभावतःप्रबलये

विष्णुलिंगानांत्विंद्रादिश्रुतिभ्योदौर्बल्यंनिश्चितमितितदन्यत्वेनावधारणंयुक्तं । विष्णुलिंगानांबहुत्वेपिबहुत्वप्रयुक्तप्राबल्यस्यस्व भावप्रयुक्तप्राबल्याद्दुर्बलत्वात् । नचतेषांनिरवकाशत्वं । समुद्रस्थत्वादेर्वरुणादावपिसंभवात् । यद्वा निरवकाशत्वेपिलिंगस्यप्रबल याश्रुत्याबाधोस्तु । नहिनिरवकाशःशशशावकोमृगेंद्रेणनबाध्यते । नवानिरवकाशमिदंरूप्यमितिज्ञानंनेदंरूप्यमित्यनेननबाध्यते ।

गु० नन्विंद्रादिप्रापकाणांबलाबलानिश्चयादिंद्रएवेत्यवधारणानुपपत्तिवत् विष्णुप्रापकाणांसमुद्रांतःस्थत्वादिलिंगानांसत्त्वाद्विष्णोरन्यएवेत्यवधारणानुपपत्तिरित्यत आह ॥विष्णुलिंगानामिति॥ ननुविष्णुलिंगानांसमुद्रस्थत्वादीनांयदिलिंगत्वेनदौर्बल्यंतर्हितितएववरुणादिलिंगानामपांनेतारमित्यादीनामपिलिंगत्वेनदौर्बल्यंस्यात् । नचलिंगत्वाविशेषेपिब्रह्मलिंगानामेवदुर्बलत्वंनिश्चितमितिवाच्यं । नियामकाभावेनवैपरीत्यस्यापिवक्तुंशक्यत्वात् । तथाचविष्णोरन्यएवेत्यवधारणानुपपत्त्यासंदेहाद्वि शेषोनस्यादितिपूर्वदोषस्तदवस्थएवेत्यस्वरसादाह ॥ यद्वेति ॥ यदिनिरवकाशस्यापिलिंगस्यस्वभावप्रबलयाश्रुत्याबाधोभ्युपगम्यते तर्हिसूर्यलिंगादेरपितथास्यात् । तथाच

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यर्थः । स्वभावप्राबल्यादपिनिरवकाशत्वप्रयुक्तप्राबल्यवत्तायाएतदधिकरणसिद्धांतात्पूर्वमसिद्धेरितिभावः । एवंतर्हिसूर्यस्यपूर्वपक्षेप्राप्तिर्न स्यादित्यतःश्रुत्यातदुज्जीवनमित्याह ॥ सूर्यलिंगंत्विति ॥ नन्वेवंब्रह्मश्रुत्यनुग्रहाद्विष्णुलिंगानामुज्जीवनंकिंनस्यादित्यतोब्रह्मश्रुतिर्नास्त्येवेतिभावे नाह ॥ ब्रह्मेंद्रमिति ॥ वाचोवीर्यंतपसान्वविंददितिवाक्यस्थायाक्रियातदपेक्षयेत्यर्थः । एतच्छ्रुत्यर्थोन्यायविवरणटीकायांस्पष्टः । यद्येवंतर्हिवरुणप्राप्तिःपूर्वपक्षेनस्यात् । तथाचयःकश्चिदितिकथमनवधारणमित्यतआह ॥ अपामिति ॥ तर्हिवरुणप्रापकस्यबलवतोऽभावाद्वरुण

सूर्यलिंगंतुसवितृश्रुत्यनुगृहीतमितिनतस्यापिदौर्बल्यनिश्चयापत्तिः । "ब्रह्मेंद्रमग्नि"मिति ब्रह्मशब्दस्तु "ब्रह्मान्वविंद"दित्यादाविव "तपसान्वविंददित्युत्तरवाक्यस्थक्रियापेक्षितकर्तृसमर्पकत्वेनप्रथमांततयापुँल्लिंगत्वाच्चचतुर्मुखपरोनतुपरब्रह्मपरः । "अपांनेतार"मितिवरुणलिंगस्यदौर्बल्यनिश्चयेपींद्रसवितृबृहस्पत्यादिषुश्रुतत्वाविशेषादनवधारणंयुक्तं ।

गु० सूर्यादेरंतस्थत्वंनस्यादित्यतआह ॥ सूर्येति ॥ ननुसूर्यलिंगस्यसवितृश्रुत्यनुगृहीतत्वेनदौर्बल्यनिश्चयाभाववत् ब्रह्मेंद्रमग्निमित्यादिब्रह्मश्रुत्यनुगृहीतत्वेनसमुद्रस्थत्वादेरपिदौर्बल्याभावनिश्चयसंभवाद्विष्णोरप्यंतस्थत्वंस्यादित्यतआह॥ब्रह्मेति॥ समुद्रांतस्थत्वादिलिंगमात्रस्येंद्रादिश्रुत्यपेक्षयादुर्बलत्वेनविष्णुप्रापकत्वाभावेवरुणलिंगस्यापितथात्वेनकथंतद्बलेनवरुणस्यांतस्थत्वोक्तिरित्यतआह॥अपांनेतारमिति ॥वरुणलिंगस्येति॥ तथाचवरुणस्यापिपरित्यागेनेंद्रबृहस्पत्यादिष्वेवमध्येकश्चिदंतस्थइत्यर्थः । तत्रहेतुःश्रुतत्वाविशेषादिति॥ इंद्रादिश्रुतिसहितत्वादित्यर्थः । तत्प्रापकश्रुतेःसत्त्वादितिवा । नतुलिंगस्यश्रुत्युक्तत्वादिति । तथात्वेऽन्नेतृत्वादिलिंगस्यापिश्रुत्यु

SGDF Sri Gargeshwari Digital Foundation

प्र० लिंगाद्वरुणप्राप्तिःकथंटीकायामुक्तेत्यतआह ॥ **टीकायामिति** ॥ अतएवसुधायांनतत्प्राप्त्युक्तिरितिभावः । यद्येवंटीकायामिंद्रादिप्रापकतुल्यकक्ष्यतयावरुणलिंगोक्तिरयुक्तेत्यतआह ॥ **यद्वेति** ॥ एवंयःकश्चिदित्यनवधारणपक्षंसमर्थ्यैदानींभेदव्यपदेशसूत्रव्यावर्त्यैसर्वेपीतितृतीयपक्षंवदन्‌"अनेकेश्वरापाता"दित्युक्तदोषंनिरस्यन्नाह ॥ **तृतीयोवास्त्विति** ॥ **उभयानुग्रहार्थमिति** ॥ ननुभेदमाश्रित्योभयपरत्वेपिविष्णुतदितरप्रापकाणामुपपत्तेर्नाभेदस्सिध्यतीतिचेत्‌ किंमुख्यवृत्त्योभयपरत्वमुतामुख्यवृत्त्योतमुख्यामुख्योभयवृत्त्या । नाद्यः । वाक्यभेदादिप्रसंगेनासंभवात्‌ । पादांत्यप्राणनयेत्वगत्यावाक्यभेदोपगमःपूर्वपक्षे । नद्वितीयः । क्वचिन्मुख्यत्वस्यवक्तव्यत्वात्‌ । तृतीयेपिकिमिंद्रादावमुख्यत्वंविष्णौमुख्यत्वमुतविपरीतं । नाद्यः । इंद्रादौनिरूढश्रुत्यादिविरोधात्‌ । नद्वितीयः । तस्याभेदपक्षाश्रयणंविनाऽयोगात्‌ । मुख्यवृत्त्योपहितेंद्रादिपरत्वेप्यमुख्यवृत्त्यानुपहितविष्णुपरत्वसंभवात्‌ । अन्यथाऽनेकशास्त्रत्वापत्तेरितिभावः । इंद्रादीनांविष्णवैक्येऽर्थापत्तिरुक्ता ।

टीकायांपूर्वपक्षेवरुणलिंगोक्तिस्तुसतीष्वपींद्रादिलिंगश्रुतिषुयदिविष्णुलिंगादंतस्स्थोविष्णुस्तर्हिवरुणलिंगाद्वरुणोपिस्यादितिसिद्धांतिनंप्रत्यनिष्टंदर्शयितुं । यद्वा वरुणलिंगस्यांतेश्रवणात्पूर्वदौर्बल्यन्यायेननतस्यापिदौर्बल्यनिश्चयः । तृतीयोवास्तु । विष्णुलिंगानांनिरवकाशत्वेनाबाध्यत्वादिंद्रादिश्रुतीनांचश्रुतित्वादेवलिंगाबाध्यत्वादुभयानुग्रहार्थंविष्णुरेवतत्तदुपाधिवशादिंद्रादिसंज्ञांलभतइतिवदतापूर्वपक्षिणेंद्रादीनांविष्णवैक्यांगीकारेणानेकेश्वरापत्त्यभावात्‌ ।

गु० क्तत्वादुक्तानुपपत्तिःशंक्येतेतिभावः । अनेनैकएवेत्यवधारणंकिंनक्रियतइतिशंकानिरस्ता । तर्हिटीकायांवरुणलिंगोक्तिविरोधइत्यतआह ॥**टीकायामिति** ॥ टीकास्वारस्यानुरोधेनपक्षांतरमाह ॥ **यद्वेति** ॥ तर्हींद्रादिसमकक्ष्यत्वेनवरुणोक्तिरयुक्तेत्यतोवाआह ॥ **यद्वेति**॥**पूर्वदौर्बल्यन्यायेनेति**॥ "पूर्वापरयोरविरोधेपूर्वदौर्बल्यंप्रकृ

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुतिस्मृतीचाह ॥ **तथाचेति** ॥ एवंतर्हिसिद्धांतिनोनानिष्टमित्यतआह ॥ **नचैवमिति** ॥ इंद्रादीनाविष्णवैक्ये ॥ **कल्पितेति** ॥ तथाच स्वरूपाभेदेपिविष्णोरिंद्रादेश्चाविद्यकभेदस्यापिसत्त्वेनविष्णोर्नेतिनिरासोपपत्तेरितिभावः । उपहितस्य उपाधिविशिष्टस्य । इतरप्रापकसद्भावात्कुतएतदित्यतआह ॥ **विष्ण्विति** ॥ उपहितधर्माणांचानुपहितेशुद्धेऽयोगादितिभावः ॥ **एतच्चेति** ॥ टीकाभिप्रेतमित्यन्वयः । कथं टीकाद्वयपूर्वपक्षेपक्षत्रयमभिप्रेतमित्यतआह ॥ **विष्णवभेदस्यापीति** ॥ सुधायामिंद्रादिप्रापकाणांप्राबल्यसमर्थनेनावधारणपक्षस्य सर्वसाधारण्येनप्राबल्यसमर्थनेनचानवधारणपक्षस्यचावगतेःस्पष्टत्वान्नोक्तः । टीकायांपक्षद्वयंज्ञापकोक्त्यादर्शयति ॥ **अत्रचेति** ॥ **एवमन्यत्रापीति** ॥ आनंदमयाधिकरणेऽतीते पादांत्यप्राणाधिकरणे द्युभ्वाद्यधिकरणे "मांसादिभौमंयथाशब्दमितरयोश्चे"त्यादिवक्ष्यमाणाधिकरणे

तथाचश्रुतिः "सब्रह्मासशिवःसेंद्रःसोक्षर"इत्यादिका । स्मृतिश्च"अहंभवोभवंतश्चसर्वेनारायणात्मक"मित्यादिका । नचैवंविष्णोरेवांतस्स्थत्वापत्तिः । कल्पितभेदस्योपहितस्यप्रसिद्धस्येंद्रादेरेवांतस्स्थत्वात् । विष्णुलिंगानांचानुपहितरूपाभिप्रायेणोपपत्तेः । एतच्चपूर्वपक्षत्रयंसुधायामत्रचपूर्वपक्षइंद्रादीनांविष्णवभेदस्याप्युक्तत्वात् । अत्रचटीकायां "इंद्रादिःस्या"दित्युक्त्वा "इंद्राद्यन्यतम"इत्यप्युक्तत्वात् । आनंदमयाधिकरणेचहिरण्यगर्भरुद्राद्यनेकप्रापकयुक्ते "पूर्वपक्षानाहे"तिबहुवचनप्रयोगाच्च टीकाभिप्रेतं । भाष्येचपक्षत्रयसाधारण्येन "अन्यःप्रतीयत"इत्युक्तं । एवमन्यत्राप्यनेकप्रापकयुक्तेपूर्वपक्षोयथासंभवमूह्यः ।

॥ ३०१ ॥

गु० तिव''दितिन्यायेनेत्यर्थः ॥ **एतच्चेति** ॥ आद्येनोक्तत्वादित्यंतेनतृतीयपूर्वपक्षस्यटीकासुधासंमतत्वमुक्तं । द्वितीयेनोक्तत्वादित्यंतेनान्यतमस्यांतस्स्थत्वमितिद्वितीयपूर्वपक्षस्यटीकासंमतत्वमुक्तंवेदितव्यं । पूर्वपक्षानिति आनंदमयाधिकरणेविष्णुपक्षेबाधकबाहुल्यात्तत्रविष्णुत्वानिर्धारणस्यसुलभत्वात्तत्रायंविवेकोनकृतः । द्वितीय

प्र० ष्वित्यर्थः । पूर्वतंत्रेपिनिवीताद्यधिकरणेष्वनेककोटिकपूर्वपक्षःप्रसिद्धइतिभावः । पादांत्यप्राणनयादौनाभेदपूर्वपक्षःकिंतुवाक्यभेदेन । अत उक्तं **यथासंभवमिति** ॥ तथाचतत्रतत्रवक्ष्यामः । आद्यपक्षद्वये आनंदमयसूत्रमाक्षेप्यमितिस्पष्टंटीकातोऽवगम्यते । अभेदपूर्वपक्षेतुनेति सुधोक्तमेवाक्षेप्यंदर्शयति ॥ **एवंचेति** ॥ एतेनैतत्परास्तं अभेदेनेहपूर्वपक्षोनयुक्तः । तथात्वेप्राचीनभेदव्यपदेशविरोधादिति । तस्यासंप्रतिपत्तेरिति । अत्राहकश्चित् श्रुत्यादिप्रमाणषट्केनविष्णुत्वेननिर्णीतस्यानंदमयस्यकथमेकेनान्यगतेनलिंगेनान्यत्वाध्यवसायः । "त्यजेदेकंकुलस्यार्थे"इतिन्यायेनलिंगस्यैवबाध्यत्वात् । नचैकेनापिनिरवकाशेनबहूनांप्रतिबंधइतिवाच्यं । श्रुत्यादेरपिनिरवकाशतायाउक्तत्वादिति । अत्राहुः । इंद्रादिप्रापकप्राबल्येनान्यस्यांतस्स्थत्वेऽवश्यंवाच्येतत्रश्रुतमदृश्यत्वमन्यत्रनिरवकाशमिति तस्मिन्निरवकाशेऽन्यप्रापकेसहकारिणि सत्यानंदमयस्यविष्णुत्वेप्रागुक्तानिबाधकानिमूर्धानमुद्धुन्वतइत्यनेकबाधकोपेतत्वेननविष्णुरित्यवधारणोपपत्तिः । नचश्रुत्यादिविरोधः । तेषामभावाभिमानात् । भावेवान्यथयितव्यत्वाभिमानात् । अत्रत्यानामिंद्रादिप्रापकाणांप्राबल्याभिमानात् । एवमुत्तरत्रापिद्रष्टव्यं । केचित्तु निश्चयाभावेप्यानंदमयोप्यन्यःकिंनस्यात् । संदेहेनापिविष्णुरेवेत्यवधारणप्रतिबंधसिद्धेः । भाष्ये "तस्मात्सएवानंदमय"इत्येवकारस्यतस्मादेवेतिसंबंधइत्याहुः । "लिंगेनश्रुत्यादिबाधोपपत्ते"रित्यादिटीकोक्तंसिद्धांतन्यायंसंगृह्णाति ॥ **लिंगादिभ्यइति** ॥ वाक्यप्रकरणादिकमादि

एवंचेंद्रबृहस्पत्यादीनामेवानंदमयत्वात्तेषामानंदमयाद्भेदव्यपदेशोप्ययुक्तंइति ॥

॥ सिद्धांतस्तु ॥ ॥ लिंगादिभ्योबलवतीश्रुतिर्यद्यपिचस्वतः । अवकाशोज्झितै

गु० सूत्रव्यावर्त्यामाशंकामाह ॥ **एवंचेति** ॥ विष्णुरेवांतस्स्थः । समुद्रस्थत्वादिलिंगानांसत्त्वात् । नचेंद्रादिश्रुत्यातद्बाधइत्याह ॥ **लिंगादिभ्यइति** ॥ ननुसमुद्रस्थ

SGDF Sri Gargeshwari Digital Foundation

प्र० पदार्थः । यद्यपिलिंगमेवप्रकृतं तथापिकैमुत्यन्यायसिद्धानुवादः । चोवधारणे। स्वतएव जात्यैवेतिसंबध्यते ॥ लिंगैरिति ॥ समुद्रेंतःक वयोविचक्षते यस्यांडकोशंशुष्ममाहुः ब्रह्मातपसान्वविंद"दितिसमुद्रांतस्स्थत्वब्रह्मांडवीर्यत्वब्रह्मतपोलभ्यत्वादिलिंगैरित्यर्थः । सावकाशा इंद्रा दिश्रुतिरित्यर्थः । पूर्वार्धदृष्टांतोक्त्याविशदयति ॥ यद्यपीति ॥ श्रुतिलिंगविरोधाधिकरणंप्राग्विवृतं । श्रुत्या ऐंद्र्येतिगार्हपत्यशेषत्वबोधक तृतीयाश्रुत्या । इंद्रप्रकाशनसामर्थ्यरूपलिंगबाधेनेत्यर्थः । उत्तरार्धदृष्टांतोक्त्याविवृणोति ॥ तथापीति ॥ आद्याध्यायेनामपादे"तद्यपदे शंचे"तिचतुर्थेधिकरणेचिंतितं । "श्येनेनाभिचरन्यजेते"त्यत्रश्येनशब्दः किंगुणविधिः किंवाकर्मनामेतिविशये लोकेद्रव्यविशेषपरत्वेनात्यंत

लिंगैस्सावकाशातुबाध्यते ॥ १ ॥ यद्यपि "ऐंद्र्यागार्हपत्यमुपतिष्ठत" इत्यादौश्रुत्यालिंगबाधेनश्रुतेरुत्सर्गतोबलव त्त्वं । तथापियथा "श्येनेनाभिचरन्यजेते"त्यादौश्येनशब्दोन्यत्ररूढोपि "यथावैश्येनोनिपत्यादत्त"इतिवाक्यशेषो क्तस्यश्येनसादृश्यस्यश्येनेनुपपत्त्यायागपरः तथासमुद्रांतस्स्थत्वादीनामन्यत्रासंभवादिंद्रादिशब्दाविष्णुपराएव ।

प्र० निरूढत्वात्काम्यगुणेनोत्पत्तिशिष्टस्यापिनित्यस्यसोमस्यबाधसंभवेनज्योतिष्टोमेऽभिचारार्थोगुणविधिः । अथवामत्वर्थलक्षणाश्रयणेनवि शिष्टकर्मांतरविधिः । नच"यथावैश्येनोनिपत्यादत्त एवमयंद्विषंतंभ्रातृव्यंनिपत्यादत्त"इतिवाक्यशेषदर्शितक्रियासामान्येनगौण्याकर्मपरत्वं । लक्षितलक्षणापर्यवसायिन्यागौण्यालक्षणातोजघन्यत्वादितिप्राप्ते गुणविधौतस्यैवस्तोतव्यत्वात् स्वस्यस्वात्मनासादृश्यायोगेनवाक्यशेषानुप पत्तेर्गौरवेणविशिष्टविध्ययोगाच्चकर्मनामत्वमिति । एवंचेंद्रादिपूत्सृष्टस्यापिश्रुतिप्राबल्यस्ययथाश्येनादिषुवाक्यशेषोपस्थापितानन्यथासिद्ध लिंगबलेनापवादोनदोषायतथाप्रकृतेपीतिवाक्यार्थः । ननुविषमोयमुपन्यासः । दृष्टांतइवात्रलिंगानांनिरवकाशत्वाभावादित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० **लोकइति** ॥ क्षीराब्धिशायित्वस्यनारायणेलोकप्रसिद्धत्वादित्यर्थः । यथोक्तंभाष्ये"प्रसिद्धत्वात्सूचितत्वा"दिति । साध्यभागमध्याहृत्य "नहिनिरवकाश"इत्यादिनोक्तंदोषंनिरस्यन्नुत्तरार्धाक्षरार्थमाह ॥ **एवंचेति** ॥ यदिश्रुत्यादिषुपूर्वपूर्वसिद्धार्थस्वीकारउत्तरोत्तरंचप्रमाणमनर्थकं स्यात् । तथाचविपरीतोभवतीतिबलाबलाधिकरणवार्तिकोक्तन्यायेनेत्यर्थः । निरवकाशबाधइवतर्ह्यप्रमाणतैवस्यादित्यतआह ॥**वैदिकतयेति**॥ उक्तंप्रमेयंसमूलमित्याह ॥ **तदेतदिति** ॥ संदेहे सावकाशत्वइत्यर्थः । एतेन "लिंगेनश्रुत्यादिबाधोपपत्ते"रित्यादिटीकाविवृता । न्यायवि

लोकेश्रुतौस्मृतौचैवविष्णुलिंगतयास्थितं । समुद्रांतरवस्थानपूर्वकंकथमन्यगं ॥ १ ॥

श्रुत्यादिकंचभाष्यउदाहृतं । एवंच "आनर्थक्यप्रतिहतानांविपरीतंबलाबल"मिति न्यायेननिरवकाशलिंगेनवैदिकतयासर्वथाबाधायोग्येनसावकाशश्रुतिबाधः । तदे तदभिप्रेत्योक्तंन्यायविवरणे "श्रुतिसंदेहेऽनन्यथासिद्धलिंगेननिर्णयोपपत्ते"रिति ।

गु० त्वादेर्वरुणादावपिसंभवात्कथंनिरवकाशत्वमित्यतआह ॥ **लोकइत्यादिना** ॥ **विपरीतंबलाबलमितिन्यायेनेति** ॥ यदिश्रुत्यादिषुपूर्वपूर्वप्रमाणसिद्धार्थस्वीकारःतर्ह्युत्तरोत्तरंप्रमाणमनर्थकंस्यात् । तथाचविपरीतबाधोभवतीतिबलाबलाधिकरणेवार्तिकोक्तन्यायेनेत्यर्थः ॥ **आनर्थक्येति** ॥ यदिनिरवकाशमपिलिंगंश्रुतिबाधकंनस्यात्तदालिंगस्यानर्थक्यंस्यादितितत्रविपरीतंबलाबलं । लिंगमेवश्रुत्यपेक्षयाप्रबलमितिविपरीतमित्यर्थः । ननुसमुद्रांतस्स्थितत्वादेर्निरवकाशत्वेपिनविष्णोरंतस्स्थत्वंयुज्यते । इंद्रादिप्रापकेंद्रादिश्रुतीनांत्रेधाप्राबल्यवत्त्वेनततोपिबलवत्त्वेनेंद्रादेरेवांतस्स्थत्वौचित्यात् । किंचेंद्रादिशब्दानांविष्णुपरत्वंहियोगेनवक्तव्यं । तत्रेंद्रादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वरणमूलाचेत्युक्तंभवति । अत्रश्येनयागदृष्टांतकथनेनतत्रेवात्रापींद्रादिश्रुतेर्विष्णावमुख्यत्वंप्रतीतंतन्निवारयितुमाह ॥ **किंचेति** ॥ यद्वालिंगेनश्रुतिबाधउक्तः । सोपिनात्यंतं । यथोत्सर्गस्यसर्वविषयकत्वभ्रांतौसत्यामपवादेनभ्रांतिनिरासपूर्वकमुत्सर्गविषयस्स्वतस्सिद्धएवापवादविषयभिन्नोज्ञाप्यते तद्वद्विष्णौमुख्यत्वमन्यत्रमुख्यत्वभ्रांतिनिरासेनज्ञाप्यतइतिभावेनश्रुतेर्हरावेवमुख्यवृत्तिरित्याह ॥ **किंचेति** ॥ वस्तुतस्तुननु यथालिंगानांनिरवकाशत्वंतथेंद्रादिश्रुतीनामिंद्रादौयोगरूढ्योर्भावेनतत्रैवमुख्यत्वेनहरौनिरवकाशत्वमित्यतोभगवत्येवमहायोगविद्वद्रूढ्योर्भावेनतत्रैवमुख्यत्वमितिभावेन "इंद्रंमित्रंयमिंद्रंचप्रथमस्संकृतिस्तथा । नामधाःसर्वदेवानामेकइत्यादिकाश्रुति"रितिचतुर्थपादीयानुव्याख्यांहृदिकृत्वा "नचेंद्रादिष्वि"त्यादिटीकांविवरीतुमाह ॥ **किंचेति** ॥ "इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यस्ससुपर्णोगरुत्मान् । एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहु"रितिश्रुत्येत्यर्थः ॥ **विष्णावेवेति** ॥ वामनसूक्तत्वेनप्रसिद्धेरस्यसूक्तस्यसप्तार्धगर्भेतिपूर्ववाक्येप्रस्तुतस्यविष्णोरेवान्वयाच्चेतिभावः ॥ **विद्वदिति** ॥ आहुःप्राज्ञाइतिविदुषांप्रयोगबाहुल्यरूपरूढेःप्रतीयमानत्वादितिभावः । अज्ञरूढ्यपेक्षयाप्राज्ञरूढेःप्राब

किंच "इंद्रंमित्रंवरुणमग्निमाहु"रित्यादिश्रुत्येंद्रादिशब्दानांविष्णावेवविद्वद्रूढेःसत्त्वेन इंद्रादिशब्दप्रवृत्तिनिमित्तस्यपरमैश्वर्यादेर्विष्णावेवा

गु० पुरूढेःसत्वाद्रूढेश्चयोगापेक्षयाबलवत्त्वाद्रूढ्येंद्रादिपरत्वेनतेषामेवांतस्स्थत्वादित्यतआह ॥ **किंचेति** ॥ नन्विंद्रादिशब्दानांविष्णौविद्वद्रूढिसद्भावेकिंमानमित्यतउक्तमिंद्रमिति ॥ नचात्ररूढिःकेनोक्तेतिवाच्यं । प्रयोगबाहुल्यकथनपरस्याप्याहुरित्यस्यैवरूढिप्रदर्शकत्वात् । तथाचमहायोगविद्वद्रूढिभ्यामिंद्रादिश्रुतयोविष्णावेव

प्र० ल्यस्यजन्माधिकरणोक्तदिशायववराहाद्यसिद्धत्वादितिध्येयं ॥ **अनन्याधीनत्वेति** ॥ अन्यगतंप्रतिस्वातंत्र्येणेत्युपलक्ष्यते । "नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमंतमापे"त्यादिश्रुत्यादिसिद्धत्वादितिभावः । नात्रश्रुतौरूढिरुच्यतेकिंत्वभेदइत्यतआह ॥ **नचेति** ॥ भुवनस्यरेतः रतिप्रदस्य । विष्णोःप्रदिशा आज्ञया । अर्धगर्भाः आसमंताद्दृद्धंब्रह्मांडंतद्गर्भाणिसप्तमहाभूतमहदहंकारतत्वानितदभिमानिनः । विधर्मणि विविधधारणकर्मणि । तिष्ठंतीतिविष्णुनाभेदोक्तेरित्यर्थः ॥ **यइति** ॥ अजस्यनाभावध्येकमर्पितमित्युक्तपद्मनाभोविष्णुरेव विश्वकर्मसूक्ते योदेवानांनामधाः नामवाच्यतयातद्धारकएकएवेतिसमाख्याबलाच्चेंद्रादिशब्दवाच्यतैवार्थइत्यर्थः ॥ **सोंतकइति** ॥ द्युभ्वाद्यधि

नन्याधीनत्वनिरवधिकत्वाभ्यांमुख्यतःसंभवेनमहायोगस्यापिसत्त्वेनचेंद्रादिश्रुतिर्विष्णावेवमुख्या । नचेंद्रंमित्रमित्यादिवाक्यमिंद्राद्यभेदपरं । आहुरितितत्तच्छब्दवाच्यत्वस्यैवोक्तेः । "सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणी"तिवाक्यशेषेभेदोक्तेश्च । "योदेवानांनामधा" इतिश्रुत्यंतरसंवादाच्च । "सोंतकःसरुद्रःसप्राणभृत्सप्राणनायकःसईशोयोहरि"रितिश्रुत्यंतरेऽभेदविवक्षायांसरुद्रइत्यनेनसईशइत्यस्यपौनरुक्त्यापत्त्यात्तत्तच्छब्दवाच्यतायाएवविवक्षणीयत्वाच्च । "सप्रथमःसंकृतिर्विश्वकर्मासप्रथमोमित्रोवरुणोअग्निः । सप्रथमोबृहस्पति"रितिश्रुत्यंतरेप्रथमपदेनभेदेनप्रतीतेश्च । "यमिंद्रमाहुर्वरुणंयमाहुर्यमित्रमाहुर्यमुसत्यमाहु"रितिश्रुत्यंतरे

गु० मुख्यइतितस्यैवांतस्स्थत्वमितिभावः । नन्विंद्रमितिवाक्यस्येंद्रादीनांविष्णुभेदपरत्वान्नतेनतच्छब्दवाच्यत्वसिद्धिरित्याशंक्यनिषेधति ॥ **नचेति** ॥ **आहुरितीति** ॥ वचनक्रियांप्रतिशब्दस्यैवकर्मत्वादितिभावः । आहुरित्येतदिंद्राद्यभेदआर्यसंमतिप्रदर्शनपरंकिंनस्यादित्यतआह ॥ **सप्तार्धेति** ॥ तत्रसकलाधारत्वस्योक्तत्वादितिभावः । श्रुत्यंतरसंवादेनाप्याहुरित्यस्यतच्छब्दवाच्यत्वप्रदर्शनपरत्वमित्याह ॥ **यइति** ॥ तत्तन्नामवाच्यत्वउपोद्बलकंश्रुत्यंतरंचाह ॥ **सोंतकइति** ॥ **प्रथमेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० करणेभाष्यकृदुदाहृतश्रुत्यंतरइत्यर्थः। ''सप्रथमोबृहस्पतिश्चिकित्वान् तस्माइंद्रायसुतमाजुहोमी''तियाजुषश्रुतौसप्रथमोविश्वकर्मेत्याद्युक्त्या ऽप्रथमोपिकश्चनविश्वकर्मादिःप्राप्तः। अन्यथाप्रथमइत्यस्यव्यर्थत्वात्। तथाचकथमभेदइत्यर्थः। ''यमिंद्रमाहुर्वरुणंयमाहुर्यंमित्रमाहुर्यमुसत्य माहुः। योदेवानांदेवतमस्तपोजास्तस्मैत्वातेभ्यस्त्वे''तियाजुषश्रुतावेवंयमिंद्रादिशब्दवाच्यमाहुःकिंतैरभेदेननेत्याह ॥ **योदेवानामिति** ॥ इंद्रादीनांश्रेष्ठतमस्तन्नियामकस्तत्स्वामीतस्मैदेवतमायतेभ्योदेवेभ्यश्चत्वासोमंसुनोमीत्याद्युक्तेः। तत्राभेदविवक्षायांदेवतमइतितस्मैतेभ्यइतिच भेदोक्तिरयुक्तेत्यर्थः। उक्तंचैतरेयभाष्ये ''यमिंद्रमाहुरित्याद्युक्त्वातस्मैत्वातेभ्यस्त्वेतिभेदावगमाच्चे''ति। तथाचाथर्वणभाष्योक्ताब्रह्मांडस्मृतिः ''यमिंद्रमाहुर्वरुणंयमाहुर्यंमित्रमाहुर्यमुसत्यमाहुः। योदेवानांदेवतमोजनित्रंवायोस्तस्मैसोममेभ्योजुहोमी''ति ॥ **भीषास्माद्वातःपवतइति**॥ अस्मात् अस्यपरमात्मनः। भीषा भयेन। वायुसूर्याग्न्यादयस्स्वस्वव्यापारान्कुर्वंतीतितैत्तिरीयश्रुतावानंदमयादिशब्दार्थत्वेनप्रकृतस्यविष्णोर्वा य्वादिभिर्भेदोक्तेः। ''भयादस्याग्निस्तपतिभयात्तपतिसूर्य''इत्यादिकाठकश्रुतौकंपनादित्यत्रविष्ण्वर्थत्वेननिर्णेष्यमाणवज्रशब्देनप्रकृतस्यपरमा त्मनोदेवानांचभेदोक्तेश्चेत्यर्थः। तथा चेंद्रंमित्रमित्यादिश्रुतिजातंतत्तच्छब्दवाच्यत्वमेवविष्णोराहनत्वभेदमितिस्थितं। ननुयथेंद्रादिशब्दवाच्य त्वंविष्णोस्तथानारायणादिशब्दवाच्यत्वमन्यस्यस्यात्। तथाचानिर्णयइत्यतआह ॥ **नत्विति** ॥ वामनस्मृतेरित्यर्थः। एतेन''इंद्रमित्यादि

''योदेवानांदेवतमस्तस्मैत्वातेभ्यस्त्वे''तिभेदोक्तेश्च। ''भीषास्माद्वातःपवते'' इति ''भयादस्याग्निस्तपती''तिचश्रुत्यं तरेभेदोक्तेश्च। ''नतुनारायणादीनांनाम्नामन्यत्रसंभवः। अन्यनाम्नांगतिर्विष्णुरेकएवप्रकीर्तित''इतिस्मृतेश्च। ॥ ३०४ ॥

गु० तथाचद्वितीयोन्योरुद्रोस्तीतिप्रतीयतइतिभावः। यमिंद्रमित्यादितस्मैत्वेत्यादि। अत्रयेत्वामिंद्रमाहुः एवंवरुणमित्यादि। यश्चदेवानांदेवतमस्तस्मैतेभ्यश्चमयिमहदिं

SGDF Sri Gargeshwari Digital Foundation

प्र० नातेषांभगवतिविद्वद्रूढिसद्भावस्यसिद्धत्वा"दितिसुधावाक्यंसमर्थितंभवति । नन्वेवमिंद्रादिश्रुतीनांविष्णावेवमहायोगविद्वद्रूढिभ्यांमुख्यत्वे "मुख्यामुख्ययोर्मुख्येसंप्रत्यय"इतिन्यायेनेंद्रादिश्रुतिभिर्मुख्यार्थस्यविष्णोरेवग्रहणसिद्धौसूत्रेनिरवकाशलिंगोक्तिर्व्यर्थेतिचेत्सत्यं । "सतिचैव मभ्युपगमवादेनैवतद्धर्मोपदेशादित्युक्त"मितिन्यायविवरणटीकायामेवोक्त्याऽभ्युपगमवादेनवा मुख्येसंप्रत्ययइत्युत्सर्गस्येंद्रस्यात्सेत्यादाविवाप वादकंनास्तिप्रत्युततत्साधकमेवास्तीतिवक्तुंवा तदुक्तिरितिभावः । एतच्चमहायोगविद्वद्रूढिसमर्थनं समन्वयसूत्रात्तत्त्वित्यनुवृत्तेस्तत्रतुशब्दस्या वधारणार्थत्वादंतस्थोविष्णुरेवेत्युक्त्या अन्यत्राज्ञरूढ्यल्पयोगयोस्सत्त्वेनतद्व्यवच्छेदायोगान्महायोगविद्वद्रूढ्योरेवान्यत्रव्यवच्छेद्यत्वादिंद्रादि श्रुतीनांविष्णौमहायोगविद्वद्रूढ्योस्सूचितत्वादितिध्येयं । एवंनिरवकाशलिंगेनेंद्रादिशब्दानांभगवतिमुख्यत्वेचांतस्थोविष्णुरेवेत्याद्यसूत्राभिप्रे तत्वेनाद्यपूर्वपक्षंनिरस्य द्वितीयपूर्वपक्षमग्रेनिरसिष्यन् इदानीमभेदरूपतृतीयपूर्वपक्षंद्वितीयसूत्राभिप्रेतबाधकोक्त्यानिरसितुं किमुभयप्रापक श्रुतिलिंगप्राबल्यान्यथानुपपत्त्याद्वयोरभेदउच्यतउतसब्रह्मेत्यादिशास्त्रांतराविरोधायेतिविकल्पौहृदिकृत्वाऽऽद्यमनिष्टकथनेननिरस्यति ॥ **य दिचेति** ॥ **आकाशब्रह्मणोरिति** ॥ उत्तराधिकरणेहि "आकाशइतिहोवाच सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंत"इत्यत्राकाश

यदिचश्रुतिलिंगयोरनुग्रहायाभेदस्तर्हि "आकाशादेवसमुत्पद्यंत" इ
त्याकाशश्रुतेःकारणत्वादिरूपलिंगस्यचानुग्रहायाकाशब्रह्मणोः तथा

गु० द्रियमस्त्वितियोजना । यद्वायमिंद्रमित्याहुस्तस्मैतुभ्यंत्वामेवोपगताइतिभगवदधीनत्वमुच्यते । षष्ठीचतुर्थीभ्यांपरमात्मनःसकाशात्तेषांभयकथनेनभेदस्यप्रतीतेरिति भावः । नन्विंद्रादिश्रुतीनांविष्णुपरत्ववद्विष्ण्वादिनाम्नामपिरुद्रादिपरत्वंकिंनस्यादित्यतआह ॥ **यदिचेति** ॥ अथवातृतीयंपूर्वपक्षंनिषेधति ॥ **यदिचेति** ॥ ननुदृष्टं

SGDF
Sri Gargeshwari Digital Foundation

प्र० शब्दोभूताकाशपरइतिप्राप्ते कारणत्वलिंगात्परब्रह्मपरइत्युच्यते। तन्नस्यात्। तत्रापिश्रुतिलिंगोभयानुग्रहायतयोरैक्यंस्यादित्यन्वयः। कारणत्वादीतिपररीत्येतिध्येयं। ऐंद्र्यधिकरणंग्रहणाधिकरणंचोक्तं ॥ **कदाचनेति** ॥ यद्यपि"निवेशनस्संगमनोवसूनामित्यैंद्र्यागार्हपत्यमुपतिष्ठत"इत्यग्निप्रकरणस्थंवाक्यंशाबरभाष्यादावुदाहृतं तथाप्यग्निहोत्रप्रकरणेमहोपस्थानेषु"ऐंद्र्यागार्हपत्यमुपतिष्ठत"इतिवाक्यदर्शनादेतन्मंत्रोपन्यासः ॥ **व्रीहियवेति** ॥ द्वादशेतृतीयपादेएकार्थास्तुविकल्पेरन्समुच्चयेत्वावृत्तिस्स्यादितिचतुर्थेऽधिकरणेचिंतितं"व्रीहिभिर्यजेते"त्यादौविकल्पसमुच्चयसंदेहे सर्वांगोपसंहारप्रयोगवचनानुग्रहायाष्टदोषनिदानविकल्पपरिहारायचज्योतिष्टोमवदभ्यासमाश्रित्यसमुच्चयोमिश्रैर्वायागइतिप्राप्ते एकार्थानामेकस्मिन्नुपकारेऽन्योन्यानपेक्षयाविनियुक्तानांविकल्पस्स्यात्। ज्योतिष्टोमेहिद्रव्यदेवतासंयोगानामदृष्टार्थानांप्रकरणेनयुगपद्ग्रहणादभ्यासोन्याय्यः। व्रीहियवौतुवाक्यद्वयेनान्योन्यनैरपेक्ष्येणपुरोडाशप्रकृतिद्रव्यतयाविधीयमानौप्रयोगवचनंपर्यायेणगृह्णाति। नयुगपत्। येनबलात्प्रधानावृत्तिस्स्यात्। मिश्रत्वमपिनिरपेक्षविधानादेवायुक्तमेवेत्यगत्याविकल्पाश्रयणमिति। तथाचायमर्थः। यदिश्रुतिलिंगयोरन्यतराबाधेनोभयानुग्रहायाभेदाश्रयणंतदाकाशब्रह्मणोराकाशत्वब्रह्मत्वरूपधर्मत्यागेनतथामंत्रब्राह्मणयोर्लिंगश्रुत्योरनुग्रहायेंद्रगार्हपत्य

"कदाचनस्तरीरसिनेंद्रे"तिमंत्रस्थस्यैंद्रप्रकाशनसामर्थ्यरूपलिंगस्य "ऐंद्र्यागार्हपत्यमुपतिष्ठत" इति द्वितीयाश्रुतेश्चाविरोधायेंद्रगार्हपत्ययोः तथाव्रीहियवशास्त्रयोःषोडशिग्रहणाग्रहणशास्त्रयोश्चाविरोधायव्रीहियवयोर्ग्रहणाग्रहणयोश्चविरुद्धांशत्यागेनैक्यंचस्यादितिबहुविप्लवापत्तिः। ॥ ३०५ ॥

गु० तदार्थोतिकयोर्वैषम्यं। आकाशादेर्ब्रह्माभेदेप्रमाणाभावेनतत्रश्रुतिलिंगयोरुभयोरविरोधायाकाशादेर्ब्रह्माभेदस्यासंभवेपिप्रकृतेसब्रह्मासशिवःसहरिःसेंद्रइत्यादेरेवजीव

प्र० योरिंद्रत्वगार्हपत्यत्वरूपधर्मत्यागेनविशेष्यैक्यंस्यात्। नतुलिंगेनश्रुतिबाधोवाश्रुत्यालिंगबाधोवास्यात्। यदिशास्त्रद्वयाविरोधायाभेदाश्रयणंतदाव्रीहियवयोर्ग्रहणाग्रहणयोर्व्रीहित्वादिधर्मत्यागेनैक्यंस्यात्। नतुविकल्पाश्रयणेनपाक्षिकोबाधः। तथाचसर्वमीमांसोन्मूल्येतेति। सब्रह्मेत्यादिशास्त्रांतराविरोधायेतिद्वितीयंनिराह ॥ **सब्रह्मेति** ॥ स्मृतेर्द्वैधाभिप्रायमाह ॥ **अहंभवइति** ॥ यद्भूतादि इदंसर्वंपुरुषएवोच्यते। तदीयत्वादेव। नत्वभेदादित्यर्थः। एवमवधारणपूर्वपक्षमभेदपूर्वपक्षंचनिरस्याधुनानवधारणेनेंद्राद्यनेकपरत्वरूपद्वितीयपक्षंनिरस्यति ॥ **इंद्रादीनामिति** ॥ **अर्थैकत्वाभावादिति** ॥ "अर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्या"दितिसूत्रकृताजैमिनिनैकवाक्यतायाअर्थैकत्व

सब्रह्मेत्यादिश्रुतिरपितत्तच्छब्दप्रवृत्तिनिमित्तोक्तिमुखेनतत्तच्छब्दसमन्वयपरा। नतुप्रसिद्धदेवाभेदपरा। अन्यथा "सोक्षर"इत्युक्तेर्ब्रह्मप्रसिद्धाकाराद्यक्षरात्मकंस्यात्। "अहंभव" इत्यादिस्मृतिरपि"पुरुषएवेदंसर्वंभूतंभव्यंभवच्चयत्। इत्युच्यतेतदीयत्वान्नतुसर्वस्वरूपत" इत्यादिस्मृतिवशात्तदीयत्वपरावा "यस्तान्द्वेष्टिसमांद्वेष्टियस्ताननुसमामनु। ऐकात्म्यमागतंविद्धिपांडवैर्धर्मसंश्रयै"रित्यादिवदत्यंतप्रियत्वाभिप्रायावाद्रष्टव्या। इंद्रादीनांब्रह्मणोन्यत्वंस्वीकृत्यवाक्यस्यैंद्रादिपरत्वांगीकारेत्वर्थैकत्वाभावाद्वाक्यभेदःस्यात्।

गु० ब्रह्माभेदेप्रमाणत्वेनतत्रश्रुतिलिंगयोरुभयोरनुग्रहायेंद्रादेर्ब्रह्माभेदोंगीकार्यइत्यतआह ॥ **सब्रह्मेतीति** ॥ **प्रसिद्धेति** ॥ प्रसिद्धंयदकारेकाररूपमक्षरंतदात्मकंस्यादित्यर्थः। तथापिस्मृत्याजीवब्रह्माभेदोभविष्यतीत्यतआह ॥ **अहमित्यादि** ॥ नन्वस्त्विंद्रादीनांब्रह्मणोभेदः। तथापिवाक्यमिदमिंद्रादिपरमेवकिंनस्यादित्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० निबंधनत्वोक्तेरितिभावः । यद्यप्ययमादावेवदूष्यः तथापिस्फुटदोषत्वादभेदपक्षदूषणस्यप्राक्संगतत्वाद्वाऽतेदूषितः । ननुतर्ह्यभेदपक्षस्यदूषितत्वादिंद्रादिप्रापकाणांबलाबलानिश्चयात्कथमेकवाक्यतेत्याशंक्यवैष्णवत्वेनैकवाक्यतामाह ॥ **एवंचेति** ॥ नानामार्गा नानार्थप्रतिपादिका । अग्नींद्रादिश्रुतिर्विष्णुलिंगैरैककंठ्यं विष्णुरूपैकार्थप्रतिपादकतां नीता । नचेदग्नींद्रादिश्रुतिकलहं अहमग्निमेवप्रतिपादयाम्यहामिंद्रमेवेतिविवादं कोनिवारयेत् । नकोपीत्यर्थः । ननुयदींद्रशब्दमुख्यवाच्योहरिरेव तर्हि "इंद्रस्यात्मानिहितःपंचहोते"त्यत्रेंद्रस्यविष्णुत्वेपुरंदरांतर्यामित्वेनात्रभेदव्यपदेशोसिद्धस्स्यादित्यतआह ॥ **इंद्राद्यादीति** ॥ अत्रात्मपदोक्तांतर्यामिणोन्यस्यश्रवणेनेंद्रःपुरंदरएवेतिभावः । नन्वे

एवंच अग्नींद्रादिश्रुतिर्नानामार्गालिंगैर्हिवैष्णवैः । नीतैककंठ्यंनोचेत्तत्कलहंकोनिवारये
त् ॥ १ ॥ इंद्राद्यादिशब्दानांब्रह्मणिपरममुख्यत्वेपियत्रबाधकंतत्रतद्देवतापरत्वंयुक्तमेव ।

गु० ॥ **इंद्रादीनामिति** ॥ यद्वाद्वितीयंपूर्वपक्षंनिषेधति ॥ **इंद्रादीनामिति** ॥ **अग्नींद्रादिश्रुतिरिति** ॥ अग्निश्चेंद्रादयश्चाग्नींद्रादयः तेषांश्रुतिरित्यर्थः । एवंच "घ्यंतादजाद्यदंतंपदंपर"मित्यस्याप्राप्तेर्नाग्निशब्दस्यपरनिपातइतिज्ञेयमित्याहुः । एवमिंद्रादिशब्दानांविष्णावेवविद्वद्रूढिमहायोगयोःसत्त्वेनविष्णावेवमुख्यमित्युक्तं । तदयुक्तं । तथात्वइंद्रादिशब्दानांकुत्रापिप्रसिद्धेंद्रादिपरत्वंनस्यात् । तथाचभेदव्यपदेशाद्यसिद्धिः । इंद्रस्यात्मेत्यादावपिब्रह्मपरत्वप्राप्तेरित्यतआह ॥ **इंद्राद्यादिशब्दानामिति** ॥ **बाधकमिति** ॥ मुख्ययावृत्त्याब्रह्मपरत्वेप्यमुख्यवृत्त्याऽन्यपरत्वाभावेऽनुपपद्यमानत्वरूपंबाधकंयत्रतत्रैवेत्यर्थः । ननुनिरवकाशसमुद्रांतस्स्थत्वादिलिंगबाधितत्वेनेंद्रादिशब्दानांप्रसिद्धेंद्रादेरंतस्स्थत्वसाधकाभावेपि सप्ताश्वयुक्तरथोपेतत्वादिरूपलिंगस्यनिरवकाशत्वेनसाधकत्वंस्यादेवेत्यतस्तस्यापिसावकाशत्वंदर्शयति ॥ ॥ ३०६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० कचक्रत्वादिसूर्यादिलिंगानांकागतिः । नचतान्यप्रमाणानि । वैदिकत्वादित्यतआह ॥ **पादांत्येति** ॥ स्पष्टंचाग्रेऽधिकरणशरीरं । नचते नैवेदंगतार्थमितिवाच्यं । निरवकाशश्रुतिसत्त्वेंऽतर्यामिगतत्वायोगादितीहपूर्वपक्षकरणात् । यद्वातत्रबाधकादंतर्यामिगतत्वांगीकारेपिनेहत थात्वं । बाधकाभावान्निरूढश्रुतिसत्त्वाच्चाभेदेनाप्युपपत्तेरितिपूर्वपक्षकरणादितिभावः । उक्तंपूर्वपक्षत्रयनिरासंसूत्रारूढंकरोति ॥ **तत्रेति** ॥ समुद्रांतस्थत्वादिविष्णुधर्मोपदेशादंतस्थोविष्णुरित्युक्त्याइंद्रएवेत्याद्यवधारणपक्षस्येंद्राद्यन्यतमःस्यादित्यनवधारणपक्षस्यचनिरासप्रतीतेरितिभा वः । द्वितीयसूत्रार्थंसमर्थयितुमाह ॥ **नचेति** ॥ इंद्रस्येतिषष्ठ्याइत्यर्थः । आत्मशब्दस्यस्वरूपार्थत्वेप्रत्ययास्वारस्यमुक्त्वाप्रातिपदिकास्वार

पादांत्यप्राणाधिकरणन्यायेनचसूर्यवरुणादिलिंगमपितत्तदंतर्गतभगवत्येवमुख्यमितित्रिविधपूर्वपक्षोप्ययुक्तः । तत्राद्यद्वितीयौ प्रथमसूत्रेणनिरस्तौ । तृतीयस्तुद्वितीयेनेतिद्रष्टव्यं । नच“इंद्रस्यात्मे”त्यादावात्मशब्दःस्वरूपपरः । तथाचसूत्रोक्तोभेदव्यपदे शोसिद्धइतिशंक्यं । “सहैवसंतंनविजानंतिदेवा”इतिसाहित्यकर्मकर्तृभावादिनाभेदव्यपदेशात् । षष्ठ्याऔपचारिकत्वापाताच्च ।

गु० ॥ **पादांत्येति** ॥ यथेंद्रादिश्रुतिर्विष्णावेवमुख्या एवंलिंगमपिविष्णावेवमुख्यमितियोजना । ननुपूर्वपक्षत्रयनिरासःप्रथमसूत्रेनप्रतीयतइत्यतआह ॥ **तत्रेति** ॥ अत्राद्यद्वितीयावित्यनेनाकांक्षाक्रमानुसारिपूर्वपक्षनिरासकत्वंसूत्रक्रमनिमित्तंचोक्तंभवति । ननुभाष्ये इंद्रस्यात्मेतिभेदव्यपदेशोदाहरणमयुक्तं । तत्रात्मशब्दस्यस्वरू पपरत्वेनतेनभेदासिद्धेरित्याशंक्यनिराकरोति ॥ **नचेति** ॥ **सहैवेति** ॥ अत्रदेवाइतिदेवानांकर्तृत्वस्य संतमित्यंतस्थस्यकर्मत्वस्योक्तत्वात् उत्सर्गतःकर्तृकर्मणोर्भे दस्यांगीकृतत्वात्परेणाप्येकस्यैवकर्तृकर्मभावस्यानभ्युपगमेन तथासाहित्यस्यापिभेदव्याप्तत्वेनभेदसिद्धेरित्यर्थः । कर्मकर्तृभावादिनेत्यत्रादिपदेनज्ञातृज्ञेयभावोऽज्ञातृत्व मज्ञेयत्वंचगृह्यते ॥ **षष्ठ्याइति** ॥ संबंधषष्ठ्यावक्तव्यसंबंधस्यचभेदव्याप्तत्वेनस्वरूपत्वेघटस्यस्वरूपमित्यादिवदौपचारिकत्वंस्यादितिभावः । किंचेंद्रादेर्विशिष्टत्वाद्वि

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यमाह ॥ इंद्रादीति ॥ समासीनआत्माजनानामित्यत्रात्मशब्दस्यांतर्यामिपरत्वात्तदेकप्रकरणेश्रुतस्यस्वरूपार्थत्वमन्याय्यमित्याह ॥ अत्रै वेति ॥ शास्ताजनानामितिस्वरूपत्वेशास्तृत्वायोगादितिभावः । अयुक्ततामेवाह ॥ ज्ञानादीति ॥ तथाचश्रुत्यर्थंनिष्कृष्याह ॥ तस्मा दिति ॥ इंद्रशब्दस्यात्रप्रकरणेविष्णुपरत्वात्कथमेवमित्यतःप्रागुक्तमेवस्मारयति ॥ इंद्रोराजेति ॥ बाधकबलादिति ॥ नियम्यत्वरूपा

इंद्रादिशब्दवाच्यउपहितेपरमात्माभेदस्यपरेणाप्यनंगीकृतत्वेनैंद्रादिप्रातिपदिकेलक्षणापाताच्च । अत्रैवप्रकरणे "आत्माजनाना"मित्यंतर्यामिण्यात्मशब्दप्रयोगाच्च । नचतत्राप्यात्मशब्दःस्वरूपपरः । अस्मिन्नेवप्रकरणे "शास्ताजनाना"मित्यस्यायोगात् । अत्रैवप्रकरणे "सर्वात्मे"तिचात्यंतायुक्तंस्यात् । ज्ञानादिरूपस्यब्रह्मणस्त द्विरुद्धजडरूपतायाःकेनाप्यनंगीकृतत्वात् । तस्मात् "इंद्रस्यात्मे"त्यादावात्मशब्दोनस्वरूपवाची । किंतुशरी रप्रतिसंबंधिवाची । तत्रतस्यप्रयोगबाहुल्यात् । तथाच "इंद्रस्यात्मे"त्यादिश्रुतिरिंद्रादेरीश्वरशरीरस्थानीयत्वा भिप्राया । "इंद्रोराजे"त्यादाविंद्रशब्दस्यब्रह्मपरत्वेपि "इंद्रस्यात्मे"त्यादावन्यपरताचबाधकबलाद्युक्ता ॥

गु०शिष्टस्यशुद्धाभेदानंगीकारादिंद्रप्रातिपदिकेलक्षणास्वीकर्तव्या । तथाचलक्षणापत्तिरूपोदोषश्चस्यादित्याह ॥ इंद्रादीति ॥ सकृच्छ्रुतस्यात्मशब्दस्यक्वचित्स्वपरत्वंक्वचि दंतर्यामिपरत्वमित्ययुक्तंचेत्याह ॥ अत्रैवेति ॥ जनानांविशिष्टत्वाद्विशिष्टस्यशुद्धेनाभेदस्यबाधितत्वाज्जनपदेनलक्षणास्वीकर्तव्येतिदोषेसत्येवदोषांतरमाह ॥ अस्मि न्नेवेति ॥ एवंचसिद्धमर्थमाह ॥ तथाचेति ॥ बाधकबलादिति ॥ इंद्रस्यात्मेत्यत्रेंद्रशब्दस्यब्रह्मपरत्वे आत्मशब्दोक्तंस्वामित्वंतस्यैववक्तव्यं । नचस्वस्यैवस्व ॥ ३०७ ॥

प्र० दित्यर्थः । यथा "बहुगणवतुडतिसंख्ये"त्यत्रसंज्ञापरस्यापिसंख्याशब्दस्य "ष्णांताष"डित्यत्रसंज्ञिपरत्वंतद्वत् । यथावा "आत्मनआकाशस्संभू त"इत्यत्रभूतपरत्वेप्याकाशशब्दस्य "यदेषआकाश"इतिवाक्येब्रह्मपरतातद्वत् । यथावा "दहरोस्मिन्नंतरआकाश"इत्यत्राकाशशब्दस्यभूतपरत्वे पि "यावान्वायमाकाश"इत्युत्तरवाक्येब्रह्मपरता यथावा "अक्षरात्परतःपर"इत्यत्राक्षरशब्दस्यान्यपरत्वेपि "अक्षरात्संभवतीहविश्व"मित्यत्र ब्रह्मपरतातद्वदितिद्रष्टव्यं । एतच्च "तथाप्येतद्विरोधेतुतद्वाचित्वमपोद्यते"इत्यनुव्याख्यानेनतुल्यन्यायतयासूचितं । बाधकबलादित्युक्त्यैव "नह्येकशब्देनद्विरुक्तेनभेदश्रुतिंविनावस्तुद्वयंकुत्रचिदुच्यतइतितार्तीयगीताभाष्यविरोधोप्यपोढः । नन्वव्यक्तात्पुरुषःपरइत्यादाववरत्वादि बाधकेसत्यपितदधीनत्वन्यायेनान्यगतावरत्वंप्रतिस्वातंत्र्येणनिमित्तेनाव्यक्तादित्यादिपंचम्यंतादिपदवाच्यत्वंविष्णोर्वक्ष्यते । तथेहाप्यन्यगत नियम्यत्वंप्रतिस्वातंत्र्येणेंद्रस्येत्यादिषष्ठ्यंतपदवाच्यत्वंयुक्तं । एवंचनमुख्यार्थत्यागः । एकप्रकरणस्थस्यार्थांतरपरत्वदोषोपिनेतिचेन्न । अव्य क्तादित्यस्याब्रह्मत्वे "अनाद्यनंतंमहतःपरंध्रुव"मित्युत्तरवाक्यस्याप्यब्रह्मपरत्वंस्यात् । महत्परत्वलिंगात् । तच्चानिष्टं मुक्तिहेतुत्वश्रवणात्तत्रेति कथंचिद्बाधकनिरासेनाव्यक्तादित्यस्यब्रह्मपरत्वमुपेतं । नचेहेंद्रस्येत्यादेरब्रह्मपरत्वेबाधकमस्ति । इंद्रादिपदप्रवृत्तिरूपगुणलाभस्येंद्रोराजेत्या दिवाक्यगतेंद्रादिपदसमन्वयेनैवसिद्धेः । इंद्रोराजेत्यादिवाक्यस्थेंद्रादिशब्दसमन्वयमात्रेणैवादृश्यत्वमुखकृतपूर्वाक्षेपसमाधानसिद्धेश्च । नचै वं "अनेनजीवेनात्मने"त्यादिवाक्यस्थजीवशब्दसमन्वयेनैवतच्छब्दगुणलाभात् "जीवाएवतुदुःखिन"इत्यादिवाक्यस्थजीवादिशब्दसमन्वयो नस्यादितिवाच्यं । "सबद्धस्सदुःखीसबद्धयतिसदुःखयती"तिविशेषवचनादिहतथानियामकाभावादिति । यद्वासर्ववेदगतसर्वशब्दवाच्य त्वसिद्ध्यैतत्रापिविष्ण्वंगीकारेप्यदोषः । अतएवान्यपरतेत्युक्तं । नत्वन्यमात्रपरतेति । एवंस्वमतेऽधिकरणशरीरंसूत्रार्थंचसमर्थ्यपरमतं

SGDF
Sri Gurgeshwari Digital Foundation

प्र०प्रत्याख्यातुमनुवदति ॥ अन्येत्विति ॥ छांदोग्ये आद्येध्यायेश्रूयते“यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखा त्सर्वएवसुवर्णस्तस्ययथाकप्यासंपुंडरीकमेवमक्षिणी तस्योदितिनामसएषसर्वेभ्यःपाप्मभ्यउदितः उदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद । इत्य धिदैवतं । अथाध्यात्मं । यएषोंतरक्षिणिपुरुषोदृश्यत”इत्यादि । अत्रकिमादित्यमंडलादिस्थोहिरण्मयःपुरुषोविद्याकर्मवशात्प्राप्तैश्वर्यःकश्चि त्संसारी उतपरमात्मेतिसंशये“हिरण्यश्मश्रु”रित्यादिरूपस्य“यएषोंतरादित्य”इत्याद्याधारस्य“येचामुष्मात्परांचोलोकास्तेषांचेष्ट”इतिसाव

अन्येतु “यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यते यएषोंतरक्षिणिपुरुषोदृश्यत”इत्यक्ष्यादित्ययोरंतस्स्थःप्रती यते । सविद्याकर्मातिशयलब्धैश्वर्यःकश्चित्संसारी नतुपरमात्मा । “हिरण्यश्मश्रु”रित्यादौरूपादिश्रवणात् । परमात्मनश्चारूपत्वेनश्रुतत्वादितिप्राप्ते परमात्मैवेतिसिद्धांतः । आदित्यवाक्ये “सर्वेभ्यःपाप्मभ्यउदित” इतिश्रुतस्यसर्वपापराहित्यस्याक्षिवाक्ये “सैवक्र्तत्सामे”त्यादौश्रुतस्यसार्वात्म्यस्यचसंसारिण्यसंभवात् ।

प्र० धिकैश्वर्यमर्यादायाश्चश्रवणात्तेषांच“अरूपमस्पर्श”मितिश्रुत्याऽरूपे“स्वेमहिम्नी”तिश्रुत्याऽऽधाररहिते“एषसर्वेश्वर”इतिश्रुत्यानिरवधिकैश्व र्येपरमात्मन्यसंभवात् । यथोक्तंभामत्यां“मर्यादाधाररूपाणिसंसारिणिपरेतुन । तस्मादुपास्यस्संसारीकर्मानधिकृतोरवि”रिति । एवंप्राप्ते आदित्यवाक्ये“सर्वेभ्यःपाप्मभ्य”इतिसर्वपापराहित्यस्य अक्षिवाक्ये“सैवक्र्तत्सामे”त्यादौसार्वात्म्यस्यपरमात्मधर्मस्योपदेशात् तयोश्चापहत पाप्मेत्यादिश्रुत्यानित्यशुद्धेसर्वोपादानतयासर्वाभिन्नेपरमात्मनीवान्येष्वयोगात्“यआदित्येतिष्ठन्नादित्यादंतरोयमादित्योनवेदे”त्यादित्यदेवतायाः

SGDF
Sri Gargeshwari Digital Foundation

प्र० परमेश्वराद्भेदोपदेशाच्च संसारिणोन्यःपरमात्मैवांतस्थइतिसिद्धांतइत्यर्थः । ननुतर्हिरूपादिकमनुपपन्नमित्यतस्तदुक्तंद्वेधापरिहारमनुवदति ॥ **रूपादिकंत्विति** ॥ **साधकेति** ॥ साधनानुष्ठातारः साधकाइत्यर्थः । नन्वेवंमुमुक्षुंप्रतिसविशेषनिरूपणमनर्थकमित्यतआह ॥ **मुमुक्षुमिति** ॥ दूषणसौकर्यायरामानुजमतमपिपूर्वसाम्यादत्रैवानुवदति ॥ **केचित्त्विति** ॥ हिरण्यश्मश्रुरित्यादिशरीरित्वश्रवणाज्जीवएवांतस्थः । तस्यैवस्वकर्मफलभोगायशरीरयोगोपपत्तेरितिप्राप्ते सर्वपापराहित्यपुंडरीकाक्षत्वादिलिंगात्परमात्मा । हिरण्यश्मश्रुरित्यादिनोक्तस्य "आदित्यवर्णंतमसःपरस्ता"दितिश्रुतेरप्राकृतशरीरस्यपरमपुरुषेसंभवात् । यआदित्येतिष्ठन्यआत्मनितिष्ठन्नितिभेदव्यपदेशाच्चेत्याहुरित्यर्थः । उदाहर

रूपादिकंतुनीरूपेपिसविशेषब्रह्मणिसाधकानुग्रहार्थमैच्छिकमुपास्यंमायामयमस्ति । यद्वासर्वस्यकार्यजातस्यब्रह्मोपादानकत्वादुपादेयस्यचोपादानादनन्यत्वात्कार्यशरीरगतरूपादिभिर्ब्रह्मव्यपदिश्यते । मुमुक्षुंप्रतिसविशेषनिरूपणंचमोक्षसाधननिर्विशेषब्रह्मज्ञानार्थं । यथोक्तं "निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः । येमंदास्तेनुकंप्यंतेसविशेषनिरूपणै"रित्यादीत्याहुः । केचित्तु इदमेववाक्यमुदाहृत्यैवमेवचपूर्वपक्षयित्वा "तस्ययथाकप्यासंपुंडरीक"मितिश्रुतंपुंडरीकाक्षत्वंसिद्धांतयुक्तिमाहुः ।

गु० नियामकत्वंसंभवतीतिभावः । ननुतर्हिपरमात्मनोरूपरहितत्वाद्रूपप्रतिपादकश्रुतिर्विरुद्धेत्यतआह ॥ **रूपादिकंत्विति** ॥ मायामयंरूपंतत्रकिमर्थमंगीकर्तव्यमित्यतआह ॥ **साधकेति** ॥ भक्तानामनुग्रहार्थमित्यर्थः । रूपप्रतिपादकश्रुतेर्गत्यंतरमाह ॥ **यद्वेति** ॥ ननुसविशेषज्ञानस्यमोक्षासाधनत्वान्मुमुक्षुंप्रतितदुपदेशोनयुक्त इत्यतआह ॥ **मुमुक्षुंप्रतीति** ॥ प्रायेणैकार्थत्वेनदूषणसाम्यात्केचिन्मतमप्युपन्यस्यति ॥ **केचित्त्विति** ॥ किमत्रानंदमयाधिकरणसंगतस्वप्रकरणस्थभेदव्यप

SGDF
Sri Gargeshwari Digital Foundation

प्र० णानौचित्येनमतद्वयमपिनिरस्यति ॥ **तदुभयमपिनेति** ॥ आक्षेपाय तदाक्षेपेणपूर्वपक्षोत्थानाय । तद्रहितस्य पूर्वाक्षेपकलिंगरहितस्यभेदव्यपदेशरहितस्यच उदाहरणत्वायोगादित्यर्थः । स्वप्रकरणेभेदव्यपदेशोनेत्येतदुभयसंमतमित्याह ॥ **उक्तमिति** ॥ त्वयेतिवादिद्वयंप्रत्युच्यते । तथाचश्रुत्यधिकरणसंगत्योरभावादयुक्तोयंविचारइतिभावः । एवंसाधारणेनमतद्वयंनिरस्यप्रातिस्विकरूपेणाप्यद्वैतिमतंनिरसितुं तन्मतेसिद्धांतेरूपादेर्याद्वेधागतिरुक्तातत्राद्यायांतावद्दोषमाह ॥ **किंचेति** ॥ **उच्यतामिति** ॥ अविद्यमानारोपस्योभयत्रतुल्यत्वात् । तथाचसिद्धांतानुत्थितिरितिभावः । "रोगाख्यायांण्वुल्बहुल"मितिबहुलग्रहणात्(क्तिन्नाबादिभ्यइति)क्तिन्नंतत्वेनोपास्तीतिसाधु । वैषम्यमाशंक्य

तदुभयमपिन । अस्मद्रीत्याऽऽनंदमयाधिकरणाक्षेपायादृश्यत्वादिगुणयुक्तस्यस्वप्रकरणस्थभेदव्यपदेशवतश्चवाक्यस्योदाहरणत्वसंभवेतद्रहितस्यतदयोगात् । उक्तंहित्वयैव "यआदित्यमंतरोयमयतीतिश्रुत्यंतरेभेदव्यपदेशा" दिति । किंच नीरूपेपिचरूपादियद्युपास्त्यर्थमुच्यते । जीवेपिपाप्माभावादितर्ह्युपास्त्यर्थमुच्यतां ॥ १ ॥

गु० देशवतोवाक्यस्योदाहरणत्वासंभवाद्वाक्यांतरोदाहरणमुतविशेषयुक्तिलाभार्थं । नद्वितीयः । तददर्शनात् । नाद्यइत्याह ॥ **अस्मद्रीत्येति** ॥ नमदुदाहृतेपिभेदव्यपदेशोस्त्येवेत्यतआह ॥ **उक्तंहीति** ॥ ननूदाहृतेपिवाक्येऽपहतपाप्मत्वादीनांब्रह्मलिंगानांसत्त्वात्तैरंतस्थस्यब्रह्मत्वनिर्णयसंभवेनतदुदाहरणंयुक्तमेवेत्यतआह ॥ **किंचेति** ॥ तथाचापहतपाप्मत्वस्यजीवेपिसंभवान्नतेनब्रह्मत्वनिश्चयइतिभावः । ननुजीवस्यकल्पितत्वेनतत्रपापराहित्यस्यपारमार्थिकत्वासंभवेन प्रतियोगितन्निवृत्त्योर्वैलक्षण्यस्यावश्यकत्वेनपापराहित्यप्रतियोगिभूतपापस्यव्यावहारिकत्वेनतन्निवृत्तिरूपस्यपापराहित्यस्यव्यावहारिकत्वासंभवेनप्रातिभासिकत्वस्यवक्तव्यत्वेन जीवे

प्र० निरस्यति ॥ **नन्विति** ॥ ततश्चकिमित्यतआह ॥ **नचेति** ॥ **नामादाविति** ॥ नामब्रह्मेत्युपासीतेत्युक्तनामादावित्यर्थः । यदपिव्यावहारिकपरत्वलाभायैवमुक्तिरितितदयुक्तंवैषम्यकथनमित्याह ॥ **त्वन्मतेचेति** ॥ श्रुत्योः नीरूपत्वसरूपत्वश्रुत्योः । विषयभेदेन प्राकृताप्राकृ

ननुजीवेपाप्मनोव्यावहारिकत्वात्तद्राहित्यंप्रातिभासिकं । ब्रह्मणितुनीरूपत्वस्यतात्विकत्वाद्रूपंव्यावहारिकं । नचव्यावहारिकविषयत्वेनप्रामाण्यसंभवेश्रुतेःप्रातिभासिकविषयत्वंयुक्तमितिचेन्न । त्वन्मतउपास्यस्यनामादौब्रह्मत्वादेःप्रातिभासिकत्वनियमेनात्रापितथैवयुक्तत्वात् । त्वन्मतेचोपासनावाक्यस्यतत्कर्तव्यतामात्रपरत्वेनार्थपरत्वाभावात् । कर्तव्यतायांचव्यावहारिकप्रातिभासिकविभागाभावात् । श्रुतौश्रद्धालुनाश्रुत्योर्विषयभेदेनतात्विकविषयत्वस्यैववक्तव्यत्वाच्च ।

गु०पापराहित्यमुपास्त्यर्थंवक्तुमशक्यं । तथासतिश्रुतेरतत्वावेदकत्वंस्यादित्याशंकते ॥ **नन्विति** ॥ तथात्वेनीरूपेब्रह्मणिरूपमप्युपास्त्यर्थंनवक्तुंशक्यं । तस्यापिप्रातिभासिकत्वेनश्रुतेरप्रामाण्यापातादित्यतआह ॥ **ब्रह्मणित्विति** ॥ किंचोपासनावाक्यानामुपासनाकर्तव्यत्वेतात्पर्यस्यविद्यमानत्वेनोपासनाविषयीभूतेर्थेप्रातिभासिकव्यावहारिकभेदसद्भावेपितत्रोपासनावाक्यानांतात्पर्याभावात् तत्तात्पर्यविषयीभूतोपासनाकर्तव्यतायाश्चसर्वत्रव्यावहारिकत्वेनतत्रतात्पर्यवतांवाक्यानांप्रामाण्यसंभवेन जीवेपापराहित्यस्यप्रातिभासिकत्वेपिनदोषइत्याशयेनाह ॥ **त्वन्मतइति** ॥ किंचब्रह्मणिरूपस्यव्यावहारिकत्वेप्यतात्विकत्वेनतत्प्रतिपादकवाक्यानामप्रामाण्यापत्त्यारूपस्यव्यावहारिकत्वंपरित्यज्यतात्विकत्वमेवाभ्युपेयं । नचैवंविरोधः । रूपवत्तदभावस्यापितात्विकत्वाभ्युपगमादितिवाच्यं । एकविषयत्वेहिविरोधः । प्रकृतेचरूपवदेवकिंचिद्वस्तुहिरण्यश्मश्रुरित्यादिवाक्येनप्रतिपाद्यतेरूपाभावप्रतिपादकेनचतादृशंवस्त्विति विषयभेदाभ्युपगमेनविरोधाभावात् । तस्माद्रूपादेर्व्यावहारिकत्वाभ्युपगमेऽप्रामाण्यतादवस्थ्यमेवेत्यभिप्रायेणदूषणांतरमाह ॥ **श्रुतौश्रद्धालुनेति** ॥ नरूपादिश्रुतेस्तात्विकरूपादिपरत्वंकल्प्यं । प्रयोजनाभावात् । नचैवंरूप

SGDF

प्र०तादिविषयभेदेनेत्यर्थः । नतुव्यावहारिकरूपविषयत्वेनाप्रामाण्यमित्यर्थः । ननुमिथ्यारूपविषयत्वेपिनाप्रामाण्यं । तत्रतात्पर्याभावादित्यत आह ॥ **नचेति** ॥ रूपादेराद्यांगत्युक्तिंनिरस्यद्वितीयामनूद्यनिरस्यति ॥ **यच्चेति** ॥ **ब्रह्मधर्मैरिति** ॥ तथाचपापराहित्यादिब्रह्मधर्माणां

नचहिरण्यश्मश्रुत्वादिकमन्यतःप्राप्तं । येनतद्वाक्यमनुवादकंसत्तत्रातात्पर्यादप्रमाणंनस्यात् । किंचजीवेपाप्मादेर्व्यावहारिकत्वेपितद्राहित्यश्रुतिस्त्वंपदलक्ष्यशुद्धरूपाभिप्रायापारमार्थिकविषयैवास्तु । नचशुद्धंरूपंब्रह्मैवेतिब्रह्मविषयत्वापत्तिः । त्वयाऽस्यवाक्यस्यसविशेषाशुद्धब्रह्मविषयत्वांगीकारात् । यच्चोपादानंब्रह्मकार्यकारणयोरभेदात्कार्यगतधर्मैर्व्यपदिश्यतइत्युक्तं तन्न । स्वर्णेकटकत्वादेरिवकटकादावपिस्वर्णत्वस्यव्यवहारेणब्रह्मधर्मैःकार्यएवव्यपदेशापातात् ।

गु०प्रतिपादकवाक्यानामप्रामाण्यंस्यादितिवाच्यं । तेषामनुवादकत्वेनतात्पर्याभावादित्यतआह ॥ **नचेति** ॥ तथाचमानांतरप्राप्त्यभावेनरूपप्रतिपादकवाक्यानामनुवादकत्वंनसंभवतीतितत्रतात्पर्येऽवश्यंवाच्ये अतात्विकार्थपरत्वेनाप्रामाण्यंस्यादेवेतितत्परिहारार्थंरूपादेर्व्यावहारिकत्वमे वपरित्यज्यतामितिभावः । यदुक्तंजीवगतपापाभावविषयत्वेश्रुतेःप्रातिभासिकविषयत्वेनाप्रामाण्यंस्यादिति तद्दूषयति ॥ **किंचेति** ॥ ननुजीवस्यविशिष्टत्वात्तत्रतात्विकपापराहित्यंनसंभवतीत्यतआह ॥ **त्वंपदेति**॥ ननुशुद्धरूपस्यब्रह्मत्वात्तद्विषयत्वेब्रह्मविषयत्वमेवस्यादित्याशंक्यनिषेधति ॥ **नचेति** ॥ कार्यकारणयोरभेदेपिनकार्यगतधर्मैःकारणंव्यपदिश्यते । किंतुकारणगतैरेवधर्मैःकार्यंव्यपदिश्यते । तथालोकेदृष्टत्वात् । तथाचब्रह्मधर्मैर्जगत्येवव्यपदेशःस्यादित्याह ॥ **स्वर्णइति** ॥ स्यादेतत् । यदिस्वर्णस्येवब्रह्मणःपरिणामिकारणत्वमभ्युपगम्येत । नचैवं । शुक्तेरजतारोपाधिष्ठानत्ववत्सविशेषब्रह्मणःशरीरभ्रमाधिष्ठानत्वरूपकारणत्वस्याभ्युपगमात् । तथाचाध्यस्तगतैर्धर्मैस्तदधिष्ठानंयथाव्यपदिश्यतेनैवमधिष्ठानधर्मेणाध्यस्तं । तथाचप्रकृतेप्यध्यस्तशरीरादिगतरूपादिनातदधिष्ठानस्यब्रह्मणोव्यपदेशसंभवेपिनब्रह्मगतेनपापादिराहित्येनजीवव्यपदेशइत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मकार्येजीवेपिसंभवेनास्मिन्नपिपरिहारेसिद्धांतानुन्मेषइतिभावः । ननु“समारोप्यस्यधर्मेणविषयोरूपवान्भवेत् । विषयस्यतुरूपेणसमारोप्यंनरूपव”दित्यद्वैतिभिरंगीकारेणाधिष्ठानएवारोप्यधर्मव्यपदेशइतिकथमेवमापादनमित्यतआह ॥ नचेति ॥ ब्रह्मेत्यंतमनुवादः । अत्रप्रतिपाद्यस्याधिष्ठानत्वमेवनेत्युक्तं । अंगीकृत्याप्याह ॥ कथंचेति ॥ भासमाने अत्रवाक्येप्रतीयमाने । किंचैवंसतिमीमांसामात्रोच्छेदइत्याह ॥ किंचैवमिति ॥ एवंसिद्धांतेरूपाद्युक्तेर्द्वेधापिगतिकथनंनिरस्य इदानींयदपिसविशेषनिरूपणस्यफलमुक्तं तदपिश्रुतहानाश्रुतकल्पनादोषा

नचैतदधिकरणप्रतिपाद्यंसविशेषंब्रह्मशरीरादिभ्रमाधिष्ठानं। येनाधिष्ठानएवारोप्यधर्मव्यवहारोनतुविपरीतमितिशंक्येत। कथंचाधिष्ठानेब्रह्मणिपापराहित्याद्यसाधारणरूपेणभासमानेतत्राध्यस्तगतधर्मव्यवहारः। किंचैवंब्रह्मणोविरुद्धधर्माधिकरणनानाकार्योपादानतयाब्रह्मविषयकवाक्यविरोधःक्वाप्यपरिहार्यःस्यात् ।

गु० नचेति ॥ सविशेषमितिहेतुगर्भविशेषणं । स्वयंकल्पितस्यशरीरादिभ्रमाधिष्ठानत्वायोगादितिभावः । किंचब्रह्मणोऽध्यस्तगतरूपाद्यारोपानुपपत्तिः । असाधारणाधिष्ठानभूतब्रह्मज्ञानसद्भावात् । अन्यथातस्यकदापिनिवृत्तिर्नस्यात् । नचपापराहित्येनब्रह्मज्ञानेपापारोपासंभवेपिनीरूपत्वेनतज्ज्ञानाभावाद्रूपारोपःसंभवतीतिवाच्यं । पापराहित्येपिशुद्धत्वस्यैवप्रयोजकत्वान्निर्विशेषत्वेनज्ञानस्यावश्यकत्वेनतज्ज्ञानेविद्यमानेरूपाद्यारोपानुपपत्तिरित्याह ॥ कथंचेति ॥ किंचब्रह्मणःकारणत्वाकारणत्वप्रतिपादकवाक्यविरोधोपिनपरिहार्यः । तत्रापिब्रह्मणोपिकारणोपादानत्वेनकारणधर्माणांब्रह्मणिव्यपदेशोपपत्तेरित्याह ॥ किंचैवमिति ॥ सविशेषज्ञानस्यनिर्विशेष

SGDF
Sri Gargeshwari Digital Foundation

प्र० भ्यांनिरस्यति ॥ **यच्चोक्तमिति** ॥ अस्तुवासविशेषनिरूपणंनिर्विशेषज्ञानार्थमिति । तथापिसविशेषज्ञानंवातदर्थमुतसविशेषध्यानंवेतिध्यानस्वरूपंनिरूपयन्नेवविकल्प्यनिरस्यति ॥ **किंचेति** ॥ तस्य सविशेषस्य । निर्विशेषशब्देनविशेषाभावविशिष्टमुच्यतेतदुपलक्षितंवेतिविकल्पौहृदिकृत्वाक्रमेणनिरस्यति ॥ **निर्विशेषेति** ॥ उपलक्षणपक्षेपिविशेषाभावोपलक्ष्यंविशेष्यमात्रंवाब्रह्मगतःकश्चनधर्मोवेतिविकल्पौहृदिकृत्वाह ॥ **तदभावेनोपलक्षितस्योक्तौचेति** ॥ विशिष्टग्राहिणा सविशेषग्राहिणा । विशिष्टग्राहिणास्वरूपस्यग्रहणेप्युपलक्ष्यत्वेतद्ग्रहणंने

यच्चोक्तंसविशेषनिरूपणंमोक्षसाधननिर्विशेषज्ञानार्थमिति तन्न । "उदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद"तिश्रुतसर्वपापनिवृत्तिरूपमुक्तिफलहानस्याश्रुतफलांतरकल्पनस्यचायोगात् । किंच किंसविशेषज्ञानंनिर्विशेषज्ञानार्थंकिंवातस्यज्ञानविजातीयवृत्त्यंतररूपमारोपितविषयमुपासनापरपर्यायंध्यानं । नाद्यः । निर्विशेषशब्देनविशेषाभावविशिष्टस्योक्तौत्वन्मतेविशिष्टज्ञानस्यमोक्षाहेतुत्वात् । तदभावेनोपलक्षितस्योक्तौचकाकेनगृहेसंस्थानविशेषस्येवविशेषाभावेनविशेषस्यैवोपलक्ष्यत्वेतस्यविशिष्टग्राहिणाज्ञानेनप्रागेवज्ञातत्वात् अन्यस्यचोपलक्ष्यस्याभावात्

गु०ज्ञानार्थत्वंकिंमुक्तिफलार्थंवाफलांतरार्थंवा । नोभयमपीत्याह ॥ **उदेतीति** ॥ तथाचनिर्विशेषज्ञानार्थत्वस्योक्तत्वेनश्रुतमुक्तिरूपफलंपरित्यज्याश्रुतकल्पनेज्योतिष्टोमादेरपिश्रुतस्वर्गरूपंफलंपरित्यज्याश्रुतकल्पनास्यादितिभावः । ननुनश्रुतहानाश्रुतकल्पने । सविशेषज्ञानस्यनिर्विशेषज्ञानद्वाराश्रुतमुक्तिफलकत्वस्यैवांगीकारादित्यत आह ॥ **किंचेति** ॥ निर्विशेषज्ञानार्थत्वेनोच्यमानंयत्सविशेषज्ञानंतत्किंज्ञानमेवोतध्यानमितिविकल्पार्थः ॥ **किंवातस्येति** ॥ सविशेषस्येत्यर्थः । आद्येपिसकृज्ज्ञानंवोतज्ञानसंततिरूपंवानिदिध्यासनंवा । नाद्यइत्याह ॥ **नाद्यइति** ॥ तत्रापिसकृत्सविशेषनिर्विशेषज्ञानसाधनमितिप्रथमेपिद्रष्टव्यं । निर्विशेषज्ञानंनामविशेषाभावविशिष्टज्ञानंवा विशेषाभावोपलक्षितज्ञानंवा विशेषणाविषयकंज्ञानंवा । तत्राद्यमनूद्यदूषयति ॥ **निर्विशेषशब्देनेति** ॥ द्वितीयमनुवदति ॥ **तदिति** ॥

प्र० त्यतआह ॥ **उपलक्ष्यत्वाकारेणेति** ॥ **मोक्षासाधनत्वादिति** ॥ निर्विकल्पकज्ञानस्यैवतथात्वादितिभावः । ननुविशिष्टज्ञानेनविशेष्यसिद्धावपिविशेषणाविषयकतयाविशेष्यज्ञानार्थंतदित्यतआह ॥ **नचेति** ॥ उक्तंसंगृह्णाति ॥ **तथाचेति** ॥ एवंसविशेषज्ञानंननिर्विशेषज्ञानार्थमित्युक्तं । अस्तुवातत् । तथापिसविशेषज्ञानंदृष्टद्वारा निर्विशेषज्ञानहेतुरुतादृष्टद्वारा प्रतिबंधकदुरितनिवृत्तिद्वारावा । आद्येपिकिंदृष्टमज्ञानध्वंसःचित्तवशीकरणंवेतिविकल्पान्हृदिनिधाय क्रमेणनिरस्यति ॥ **किंचेति** ॥ तदभावविशिष्टज्ञानस्यवेत्यादित्रितयंनिर्विशेषज्ञान

उपलक्ष्यत्वाकारेणचज्ञानस्यत्वन्मतेमोक्षासाधनत्वात् । नचविशेषणाविषयंविशेष्यज्ञानंप्रागसिद्धमितिवाच्यं । विशिष्टज्ञानस्यविशेषणज्ञानाभावार्थत्वायोगात् । तथाच विशिष्टब्रह्मधीसाध्याशुद्धधीरित्यसंगतं । विशिष्टप्रत्ययेयस्माद्विशेष्यंभासतेतरां ॥ १ ॥ किंचसविशेषज्ञानंनिर्विशेषज्ञानस्यनतावद्दृष्टद्वाराहेतुः । तद्विशिष्टज्ञानजन्येनाज्ञानध्वंसेनचित्तवशीकरणेनवा तदभावविशिष्टज्ञानस्यवा तदभावोपलक्षितज्ञानस्यवा तद्विशेषणाज्ञानस्यवाक्वाप्यदर्शनात् ।

गु०विशेषाभावेनोपलक्ष्यःकिंविशेषोवोतान्यद्वा । आद्यंदूषयति ॥ **काकेनेति** ॥ **तस्येति** ॥ विशेषाभावेनोपलक्ष्यस्यविशेषस्येत्यर्थः । तथाचोपलक्षणीभूताद्विशेषाभावात्पूर्वमेवज्ञातस्यनतदुपलक्ष्यत्वमितिभावः । द्वितीयेद्वितीयंदूषयति ॥ **अन्यस्यचेति** ॥ किंचविशेषाभावेनोपलक्षितत्वेनतज्ज्ञानार्थंसविशेषज्ञानमितिवक्तव्यं । अन्यथास्वरूपमात्रस्यविशिष्टग्राहिणैवगृहीतत्वेननिर्विशेषज्ञानस्यवैयर्थ्यप्रसंगात् । विशेषाभावोपलक्षितत्वेननिर्विशेषज्ञानंचविशिष्टज्ञानत्वान्नमोक्षसाधनमितिनतत्साधनत्वंसविशेषज्ञानस्येत्याशयवानाह ॥ **उपलक्ष्यत्वाकारेणचेति** ॥ विशेषणाविषयंज्ञानंनिर्विशेषज्ञानमितितृतीयमनूद्यदूषयति ॥ **नचेति** ॥ नन्वत्रविशिष्टज्ञानस्यविशेषणाविषयविशेष्यज्ञानार्थत्वस्यादृष्टत्वेपिब्रह्मविषयविशिष्टज्ञानस्यकेवलविशेष्यज्ञानार्थत्वमस्त्वित्यरुचेराह ॥ **किंचेति** ॥ सविशेषज्ञानस्यनिर्विशेषज्ञानंप्रतिहे

प्र०शब्दार्थः । अयुक्तंचेदंचित्तवशीकरणद्वारातदर्थत्वमित्याह ॥ **रूपादीति** ॥ हिरण्यश्मश्रुत्वादिरूपादियुक्तत्वात्पराग्भूतेत्यर्थः । ननुनिषेधज्ञानेप्रतियोग्यारोपस्यावश्यकतयाविशेषाभावज्ञानायसविशेषज्ञानंयुक्तमेवेत्यतआह ॥ **निषेधेति** ॥ तदेवाह ॥ **नहीति** ॥ तथाचब्रह्मनिर्विशेषमितिवक्तुंरूपादिविशेषकथनंनयुज्यतइतिभावः । द्वितीयंनिरस्यति ॥ **नापीति** ॥ अस्तुज्ञानंविहितक्रियेत्यतआह ॥ **त्वन्मतेचेति** ॥

रूपादियुक्तपराग्भूतसविशेषज्ञानेनतद्विपरीतनिर्विशेषज्ञानायोगाच्च। निषेधोपयोगिनो बुद्धिपूर्वकारोपस्यापिशब्दप्रमाणानपेक्षत्वात्। नह्यत्रघटोस्तीत्युक्त्वात्रसनास्तीतिवक्तव्यं। नाप्यदृष्टद्वारा। विहितक्रियाजन्यत्वाददृष्टस्य। त्वन्मतेचज्ञानस्याविधेयत्वात्।

गु०तुत्वंपरंपरयासाक्षाद्वा। आद्येपिकिंदृष्टद्वारावा हेतुरदृष्टद्वारावा ज्ञानप्रतिबंधकदुरितनिवृत्तिद्वारावा। नाद्यइत्याह ॥ **नतावदिति** ॥ दृष्टद्वारमप्यज्ञानध्वंसश्चित्तवशीकरणंवा। नोभयमपीत्याह ॥ **तद्विशिष्टेति** ॥ एवंनिर्विशेषज्ञानमित्यत्रविशेषाभावविशिष्टज्ञानंवातदभावोपलक्षितज्ञानंवातद्विशेषणाज्ञानंवा। नत्रयमपीत्याह ॥ **तदभावेति** ॥ अन्यथाऽदृष्टकल्पनाप्रसंगइतिभावः। नन्वादावेवनिराकारेंऽतःकरणप्रवेशासंभवेनप्रथमतःसाकारेंतःकरणंप्रवेश्यपश्चान्निराकारेंतःकरणंप्रवेश्यतइत्यनेनप्रकारेणतस्यतत्रहेतुत्वमतआह ॥ **रूपादीति** ॥ तथाचानयोःपरस्परंविरुद्धत्वान्नकार्यकारणभावइतिभावः। नन्वभावज्ञानेप्रतियोग्यधिकरणसंसर्गारोपस्यकारणत्वेन निर्विशेषज्ञानंप्रतिसविशेषज्ञानस्यप्रतियोग्यधिकरणसंसर्गारोपत्वेनरूपेणसाधनताभविष्यतीत्यतआह ॥ **निषेधोपयोगिनइति** ॥ निषेधबुद्धावारोपस्यहेतुत्वं नतुशब्दजन्यारोपस्येतिभावः। ननुशाब्दनिषेधबोधेशब्दारोपएवहेतुरित्यतआह ॥ **नहीति** ॥ द्वितीयंदूषयति ॥ **नापीति** ॥ ज्ञानस्यापिविहितक्रियात्वाददृष्टजनकतेत्यतआह ॥ **त्वन्मतइति** ॥ ज्ञानसामान्यस्याविधेयत्वेपितद्विशेषस्यविधेयत्वस्यास्माभिरंगीकारेपिनततपरेणांगीकर्तुंशक्यतइत्यभिप्रायेणत्वन्मत

SGDF Sri Gargeshwari Digital Foundation

प्र० तृतीयंनिरस्यति ॥ **नापीति** ॥ दुरितनिवर्तकत्वंचज्ञानस्यकिंसाक्षादुताज्ञाननिवृत्तिद्वारा । नाद्यइत्याह ॥ **तस्येति** ॥ द्वितीयआह ॥ **नचव्यावहारिकमिति** ॥ एतेनेत्युक्तमेवाह ॥ **श्रुतेति** ॥ सर्वपापराहित्यरूपश्रुतफलहानिरश्रुतफलकल्पनाचेत्याद्युक्तदोषानिवृत्तेरित्यर्थः ।

नापिज्ञानप्रतिबंधकदुरितनिवृत्तिद्वारा । तस्यनित्यादिकर्मणैवनिवृत्तेः । नित्यादिकर्मणामपीहैवशास्त्रेनिरूपणापत्तेश्च । त्वन्मतेज्ञानस्याज्ञानमात्रनिवर्तकत्वाच्च । नचव्यावहारिकंदुरितंव्यावहारिकसविशेषब्रह्माज्ञानकार्यं । येनाज्ञाननिवृत्त्यातत्कार्यपापंनिवर्तेत। एतेनसविशेषज्ञानसंतानरूपंनिदिध्यासनमदृष्टद्वारावादुरितनिवृत्तिद्वारावाचित्तवशीकरणद्वारावानिर्विशेषज्ञानार्थमितिनिरस्तं । श्रुतहान्याद्यापातात् ।

गु० इत्युक्तं। तृतीयंप्रत्याह ॥ **नापीति** ॥ **तस्येति** ॥ निर्विशेषज्ञानप्रतिबंधकदुरितस्येत्यर्थः । किंचयदिनिर्विशेषज्ञानप्रतिबंधकदुरितनिवर्तकत्वात्सविशेषनिरूपणं तर्हिनित्यकर्मादेरपिनिरूपणंकर्तव्यंस्यात् । तस्यापितज्ज्ञानप्रतिबंधकदुरितनिवर्तकत्वाविशेषादित्याह ॥ **नित्यादीति** ॥ ननुनित्यादिकर्मणांधर्ममीमांसायामेवनिरूपितत्वान्नतेषामिहनिरूपणं । सविशेषस्यत्वन्यत्रानिरूपितत्वादिहतन्निरूपणंक्रियतइत्यतआह ॥ **त्वन्मतइति** ॥ ज्ञानमज्ञानस्यैवनिवर्तकमितित्वदभ्युपगमादितिभावः । ननुनिर्विशेषज्ञानप्रतिबंधकीभूतदुरितस्यसविशेषाज्ञानकार्यत्वेनसविशेषज्ञानेनसविशेषाज्ञाननिवृत्तौ उपादाननिवृत्तावुपादेयनिवृत्तेरावश्यकत्वाद्दुरितस्यापिनिवृत्तिःसंभवतीतितद्द्वारानिर्विशेषज्ञानार्थत्वंस्यादित्यतआह ॥ **नचेति** ॥ सर्वस्यब्रह्माज्ञानकार्यत्वेननसविशेषाज्ञानकार्यत्वमितिभावः । सविशेषज्ञानसंततिरूपंनिदिध्यासनंनिर्विशेषज्ञानार्थमित्याद्यद्वितीयपक्षंदूषयति ॥ **एतेनेति** ॥ **श्रुतेति** ॥ श्रुतपापनिवृत्तिरूपफलत्यागाश्रुतनिर्विशेषज्ञानार्थत्वस्वीकारापातादित्यर्थः । सवि

SGDF
Sri Gargeshwari Digital Foundation

प्र० अयुक्तंचान्यनिदिध्यासनेनान्यज्ञानमित्याह ॥ **सविशेषेति** ॥ चित्तवशीकरणोपयुक्ततयातन्निदिध्यासनंनतुसाक्षान्निर्विशेषज्ञानायेतिचेत् तत्किंशाब्दज्ञानेवाऽपरोक्षज्ञानेवा । नाद्यइत्याह ॥ **दशमइति** ॥ नद्वितीयइत्याह ॥ **आपरोक्ष्येति** ॥ चित्तैकाग्र्यादेःप्रागेवसिद्धत्वान्न विशेषज्ञानसाध्यत्वमित्याह ॥ **चित्तेति** ॥ एवंसविशेषज्ञानंनिर्विशेषज्ञानार्थमित्याद्योनिरस्तः । द्वितीयंनिरस्यति ॥ **नापीति** ॥ अन्यत्र न्यायामृतेतृतीयपरिच्छेदे । तथाचप्रागुक्तएवदोषइतिभावः ॥ **इहेति** ॥ "उदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेदे"तिश्रवणादित्यर्थः । ननु हिरण्मयइत्याद्युक्तरूपस्यमिथ्यात्वात्तद्विषयकंध्यानंकथंज्ञानंस्यात् । अविद्यमानस्यज्ञानायोगेपियोषितमग्निंध्यायीतेतिवद्ध्यानस्योपपत्तेरित्यत

सविशेषनिदिध्यासनस्यापिनिर्विशेषनिदिध्यासनवत्स्वविषयापरोक्षहेतुतायाएवयुक्तत्वाच्च । दशमस्त्वमसीत्यादाविवशाब्देज्ञानेचित्तवशीकरणानपेक्षणाच्च । आपरोक्ष्यहेतुचित्तैकाग्र्यादेश्चनिर्विशेषपरोक्षज्ञानाधीनतन्निदिध्यासनादेवसिद्धेः । चित्तवशीकरणाभावेसविशेषनिदिध्यासनस्यैवायोगाच्च । नापिसविशेषध्यानंनिर्विशेषज्ञानार्थमितिद्वितीयः । ज्ञानविशेषोध्यानमित्यन्यत्रोक्तत्वात् । इह "यएवंवेदे"तिज्ञानार्थविदधातुश्रवणाच्च ।

गु० शेषनिदिध्यासनस्यापिस्वविषयापरोक्ष्यस्यप्रयोजनांतराभावाच्चित्तवशीकरणद्वारानिर्विशेषज्ञानार्थत्वमित्यतआह ॥ **दशमइति** ॥ नन्वापरोक्ष्यस्यचित्तैकाग्र्यहेतुकत्वात् । सविशेषध्यानाभावेचित्तैकाग्र्याभावेननिर्विशेषापरोक्ष्यंनस्यादित्यतआह ॥ **आपरोक्ष्यहेत्विति** ॥ **चित्तवशीकरणाभावइति** ॥ तथाचसविशेषज्ञानात्पूर्वंविद्यमानस्यनतदधीनत्वमितिभावः । किंचसविशेषज्ञानंविजातीयवृत्त्यंतररूपमारोपितविषयमुपासनापरपर्यायंध्यानमितिनोपपद्यते । तथासतिभगवतिरूपादि

प्र० आह ॥ **भगवतीति** ॥ अन्यत्र न्यायामृते । तात्विकत्वेविषयवाक्यस्थयुक्तिमाह ॥ **हिरण्मयइति** ॥ तावताकथंतात्विकत्वमित्यतआह ॥ **नहीति** ॥ यदिमिथ्याभूतस्यापिध्यानंयुक्तंतर्हिसविशेषोक्तिरयुक्तेतिदोषांतरमाह ॥ **किंचेति** ॥ **अन्यथेति** ॥ अन्यनिरूपणादन्यज्ञानेसतीत्यर्थः । निर्विशेषनिरूपणंसविशेषज्ञानार्थंस्यादित्यर्थः । अतिप्रसंगांतरमाह ॥ **सत्यमिति** ॥ अन्यथेत्यत्रापिसंबध्यते । उक्तातिप्रसंगं

भगवतिरूपंतात्विकमित्यन्यत्रोक्तत्वाच्च । "हिरण्मयःपुरुषोदृश्यत"इत्यपरोक्षज्ञानविषयत्वोक्तेश्च । नहियोषित्यग्नित्वंदृश्यतइत्युच्यते । किंच योषिदादेरग्नित्वाद्यभावेपितथाध्यानवन्निर्विशेषब्रह्मणएवहिरण्यश्मश्रुत्वादिनाध्यानसंभवेनसविशेषब्रह्मणःसाधकानुग्रहार्थमैच्छिकरूपपरिग्रहोक्तिरयुक्ता । तस्मान्नसविशेषनिरूपणंनिर्विशेषज्ञानार्थं । अन्यथावैपरीत्यंस्यात् । "सत्यंज्ञान"मित्यादिसद्ब्रह्मनिरूपणमपि "असद्वाइदमग्रआसी"दित्यादिश्रुतिसिद्धासद्ब्रह्मज्ञानार्थंस्यात् ।

गु० ज्ञानार्थत्वमुक्तंनस्यात् । रूपादिज्ञानस्यारोपितविषयत्वाभावेनध्यानत्वाभावात् । रूपादेस्तात्विकत्वस्यैवान्यत्रप्रतिपादितत्वादित्याह ॥ **भगवतीति** ॥ किंचरूपस्यापरोक्षज्ञानविषयत्वान्नतात्विकत्वमित्याह ॥ **हिरण्मयइति** ॥ अस्त्वतात्विकस्यापरोक्षज्ञानविषयतेत्यतआह ॥ **नहीति** ॥ यएषइत्यत्रब्रह्मप्रतिपादनेहिरण्मयत्वादिप्रतिपादकश्रुतिविरोधइत्युक्ते साधकानुग्रहार्थमैच्छिकंमायामयंवारूपमंगीक्रियतइत्युक्तं । तदयुक्तं । तद्धिज्ञानार्थंवाध्यानार्थंवा । नाद्यः । केवलज्ञानस्यनिष्प्रयोजनत्वात् । नद्वितीयः । योषित्यग्नित्ववदविद्यमानस्यापिध्यानोपपत्तेरित्याह ॥ **किंचेति** ॥ **अन्यथेति** ॥ एवमपिसविशेषनिरूपणस्यनिर्विशेषज्ञानार्थत्वमित्यर्थः । वैपरीत्यमेवविशदयति ॥ **सत्यमिति** ॥ ननुनिर्विशेषधर्मस्यक्काप्यप्रतिपादितत्वेनतत्सत्वेप्रमाणाभावान्नसविशेषधर्मनिरूपणंनिर्विशेषधर्मज्ञानार्थमित्यतआह

SGDF Foundation

प्र० संगृह्णन्नतिप्रसंगांतरमपिश्लोकेनाह ॥ **एवंचेति** ॥ ननुनिर्विशेषब्रह्मेवनिर्विशेषधर्मएवनास्तीति कथमतिप्रसंगइत्यतआह ॥ **शक्यंहीति** ॥ यथाऽप्रतीयमानमपिनिर्विशेषंलक्षणयाप्रतिपाद्यतयाकल्प्यतेतद्वदित्यर्थः । अत्राधिकरणेसूत्रद्वयमपिपरस्यप्रतिकूलमित्याह ॥ **किंचेति** ॥ ऐक्यं जीवात्मभिः । सूत्रितयोर्धर्मभेदयोर्व्यावहारिकत्वात्तादृशस्यमयांगीकारात्कोदोषइत्यतआह ॥ **धर्मइति** ॥ **श्रुतीति** ॥ सर्वेभ्यःपाप्मभ्यउदितइत्यादित्वदुदाहृतश्रुतिसूत्रयोश्चेत्यर्थः । ननुकथंसौहृदादिति । "हृद्भगसिंध्वंतेपूर्वपदस्यचे"त्युभयपदवृद्धौसौहार्दादितिवाच्यमितिचेदत्राहदुर्घटवृत्तिकारः । संज्ञापूर्वकविधेरनित्यत्वाद्धृद्भगेत्युभयपदवृद्धेरप्रवृत्तेः "तद्धितेष्वचामादे"रित्यादिवृद्धिरेवेति । "अर्थवतोग्रहणेनानर्थकस्ये"तिपरिभाषायाः "स्वंरूपंशब्दस्याशब्दसंज्ञे"त्यत्ररूपग्रहणेनज्ञापितत्वात् हृद्भगेतिसूत्रेऽर्थवतएवहृच्छब्दस्योपादानात् "सुहृद्दुर्हृदौमित्रामित्रयो"रितिनिपातितेसुहृच्छब्देसमुदायस्यैवार्थवत्त्वेनतदवयवहृच्छब्दस्यानर्थकत्वात्तस्योभयपदवृद्धिर्नभवति । कित्वादिवृद्धिरेवेति ।

एवंच असद्रूपंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः । येमंदास्तेनुकंप्यंतेसद्ब्रह्मप्रतिपादनैः ॥ १ ॥ निर्विशेषंपरंधर्ममनुष्ठातुमनीश्वराः । येमंदास्तेनुकंप्यंतेसविशेषनिरूपणैः ॥ २ ॥ इतिस्यात् । शक्यंहिब्रह्मकांडेलक्षणयानिर्विशेषब्रह्मेवकर्मकांडेप्यग्निहोत्रादिसविशेषधर्मविलक्षणःकश्चिन्निर्विशेषोधर्मःप्रतिपाद्यतइतिवक्तुं । किंच आद्यसूत्रेधर्मशब्दाद्द्वितीयेभेदशब्दतः । निर्धर्मकत्वमैक्यंचनिरस्तंपरवस्तुनः ॥ १ ॥ धर्मोभेदश्चमिथ्याचेच्छ्रुतिसूत्राप्रमाणता । व्याख्याव्याजेनचोक्तास्यात्त्वयासौगतसौहृदात् ॥ २ ॥

गु० ॥ **शक्यंहीति** ॥ किंचेदंसूत्रद्वयंपरप्रतिकूलं । परेणनिर्धर्मकत्वस्यजीवब्रह्मैक्यस्यचांगीकृतत्वात् । अत्रचसधर्मकत्वभेदयोरेवप्रतिपादनादित्याह ॥ **किंचेति** ॥ ननुतयोर्मिथ्यात्वान्नसूत्रयोःप्रतिकूलत्वमित्यतआह ॥ **धर्मइति** ॥ नन्वंतरउपपत्तेरित्यनेनास्याधिकरणस्यपरमतेपौनरुक्त्यंकुतोनोच्यतइत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० चांद्रास्तुहृद्भगेत्यत्रप्रतिपदोक्तहृच्छब्दस्यैवहृदयपर्यायस्यग्रहणं । ननु“हृदयस्यहृल्लेखयदण्लासेष्वि”त्युक्तहृदादेशस्य । सौहृदमित्यादौतुहृदादेशएवेतिमन्वते । अतएव“क्षणभिन्नसौहृद”इतिकुमारसंभवेप्रयोगइति । ननुसुधोक्तंपौनरुक्त्यदूषणंकस्मान्नोक्तमित्यतआह ॥परमतइति॥ इदंचपौनरुक्त्यंपरमतद्वयेपिसममितिध्येयं । एतेनयत्केनचित्प्रलपितंभामत्युक्तमेववाक्यमुदाहृत्य“एवमेवास्याक्षिणी”इतिनयनद्वयोपदेशाद्देवताविशेषएवादित्यांतस्थइतिप्राप्ते“सएषसर्वेषांलोकानामीष्ट”इतिसर्वलोकेश्वरत्वधर्मोपदेशात्तस्यच“एकएवरुद्रोनद्वितीयायतस्थ”इतिशिवनिष्ठत्वाच्छिवएवादित्यांतस्थः । नयनद्वयोपादानंतुविकसितपुंडरीकसादृश्यस्यद्वयोरेवभावात्तृतीयस्यमुकुलितत्वेनतदभावाद्युज्यतइति । तन्न । उदाहरणानौचित्यस्योक्तत्वात् । पौनरुक्त्यस्यवक्ष्यमाणत्वात् । शिवस्यविरूपाक्षताप्रसिद्ध्यापुंडरीकाक्षत्वस्यविष्णुलिंगतयाप्रसिद्धत्वात् ।

परमतेऽस्याधिकरणस्य “अंतरउपपत्ते”रित्यनेनपौनरुक्त्यंस्वमतेतदभावश्चतत्रैववक्ष्यते ॥ ॥ टीकाक्षरार्थस्तु ॥ ३१।१८ प्राबल्याद्यविवेकेनेति ॥

प्र० ध्येयस्सदेत्यादिवचनविरुद्धत्वात् । “तापनीपाचनीचैवशोषणीचप्रकाशनी । नैवराजन्रवेश्शक्तिश्शक्तिर्नारायणस्यचे”तिपाद्मवचनविरोधाच्च । “यदादित्यगतंतेजोजगद्भासयतेऽखिलं । यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामक”मितिगीताविरोधाच्च । “अहंतत्तेजोरश्मीन्नारायण”मिति“वृत्रंयदिंद्रशवसावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे । यत्सूर्यस्यहरितःपतंतीःपुरस्सतीरुपराएतशेकः । येनावृतंखंचदिवंमहींचयेनादित्यस्तपतितेजसाभ्राजसाच । यमंतस्समुद्रेकवयोवयंती”त्यादितैत्तिरीयभाष्येयएषइतिवाक्यस्यवैष्णवत्वसमर्थनाच्च । छांदोग्यभाष्ये विष्णुपरत्वेनैवप्रमाणैर्व्याख्यातत्वात् । रुद्रादिशब्दानां“नामानिसर्वाणी”त्यादिश्रुत्या“सोंतकस्सरुद्रस्सप्राणभृ”दित्यादिश्रुत्या एतदधिकरणे

SGDF
Sri Gargeshwari Digital Foundation

प्र० भाष्यकृदुदाहृतवचनजातेनचविष्णुपरत्वाच्च । "तमेतास्सप्ताक्षितयउपतिष्ठंते याइमाअक्षन्लोहिन्योराजयस्ताभिरेनंरुद्रोन्वायत्त"इत्यादौ रुद्रस्याक्षिस्थोपासकत्वोक्तेश्च । एतेन यदप्युक्तंमहोपनिषदि"अंतरादित्येहिरण्मयःपुरुष"इत्युक्त्वा"एषपुरुषएषभूतानामधिपति"रितितस्य भूतपतित्वमुक्त्वा"सर्वोवैरुद्र"इत्यारभ्य"हिरण्यबाहवेहिरण्यपतयेंऽबिकापतये"इत्युपसंहारेणतत्समाख्यानादत्रापितथेति । तदपिनिरस्तं । रुद्रादिशब्दवाच्यत्वस्यविष्णावेवमुख्यत्वादितिदिक् । "अदृश्यत्वलिंगामिंद्रादिश्रुतिश्चप्राबल्याद्यविवेकेनसंदेहबीज"मितिवाक्येऽविवेकशब्द मप्रतीतेर्द्वैधाव्याचष्टे ॥ **श्रुतिलिंगेति** ॥ पूर्वतंत्रीयंश्रुतिलिंगाधिकरणंप्रागुक्तं । नामनिर्णयेनलिंगनिर्णयेपिलिंगस्यसंगतत्वाद्ग्रहणमित्यत्रना म्नोसंगतत्वादग्रहणमितिसूचितं । तत्कथंसंगतत्वासंगतत्वेइत्यतोऽनेकप्रकारेणाह ॥ **अल्पाक्षरइति** ॥ तर्ह्येकमेवनामसमन्वीयतामनेकनाम

श्रुतिलिंगाधिकरणसिद्धांतात्प्रागिवश्रुतिःप्रबलालिंगंतुदुर्बलमित्यविवेकेनेत्यर्थः । यद्वा श्रुतेःस्वतोबलवत्त्वाल्लिंगस्यचनिरव काशत्वेनबलवत्त्वादिदंप्रबलमिदंदुर्बलमित्यविवेकेनेत्यर्थः ॥ संगतत्वाद्ग्रहणमिति ॥ अल्पाक्षरेसूत्रएकलिंगसमन्वयो क्त्याऽनेकनामसमन्वयस्यार्थिकसिद्धेरेवसंगतत्वात् । अनेकसमन्वयोक्त्यात्वेकस्यसमन्वयस्यार्थिकसिद्धेरसंगतत्वात् ।

गु० **परमतइति** ॥ प्राबल्याद्यविवेकेनेतिटीकोक्तंप्राबल्याद्यविवेकंदर्शयति ॥ **श्रुतीति** ॥ ननुश्रुतिर्यदिप्रबलालिंगंदुर्बलमितिश्रुतिलिंगयोःप्राबल्यंननिश्चितं तर्हिश्रुत्या दिभ्योलिंगमात्रस्यदुर्बलत्वादित्यादिपूर्वपक्षानुपपत्तिरित्यतआह ॥ **यद्वेति** ॥ नन्वेवंवैश्वानराधिकरणेनामसमन्वयेनलिंगसमन्वयोक्तिरयुक्तास्यात् । उक्तानुपपत्तेस्त त्रापिवक्तुंशक्यत्वादित्यतआह ॥ **यद्वेति** ॥ यद्वाननुसजातीयस्योपलक्षणाभावेप्यंतस्स्थनिष्ठतयाश्रुतस्यादित्यादिशब्दानामिंद्रपरत्वाभावेतत्समानाधिकरणेंद्रादिशब्दस्या

प्र० लिंगसमन्वयार्थमित्यतआह ॥ **एकनामेति** ॥ ननुनगौरवं । अनेकनाम्नामुपलक्षणत्वेनैकनामोपादानात् । लिंगस्यचार्थादेवसमन्वय सिद्धेरित्यतआह ॥ **सजातीयस्येति** ॥ **आनंदमयलिंगेति** ॥ तत्वप्रदीपानुसारेणेयमुक्तिरितिध्येयं । एवंतर्हिवैश्वानराधिकरणविरोधइ त्यतआह ॥ **यस्त्विति** ॥ इंद्रादेस्तु इंद्रादिशब्दार्थस्यतु । तत्साधने अंतस्थत्वसाधने । इंद्रादिस्तद्धर्मोपदेशादित्युक्ताविितियावत् । "समु

एकनामसमन्वयोक्त्याचोदाहरणवाक्यस्थसजातीयनामसमन्वयाक्षेपस्यविजातीयलिंगसमन्वयाक्षेपस्यचसतिगत्यंतरेगौर वापादकतयाक्लिष्टत्वेनासंगतत्वात् । सजातीयस्योपलक्षणंविजातीयस्याक्षेपइत्यस्यापिवैरूप्येणासंभावितत्वादित्यर्थः । यद्वा यत्रैकंसाक्षादन्यदर्थादितिनामलिंगात्मकमुभयंतत्रान्यत्रनिरूढनामसमन्वयस्यप्रथमंबुद्धावनारोहान्नतन्मुखेनालिंग समन्वयःसंगतः। अनिरूढलिंगमुखेनतुनामसमन्वयःसंगतः । अतएवपूर्वमानंदमयलिंगसमन्वयमुखेनानंदादिनामसमन्व (यउक्तः)योयुक्तः । यस्तुद्वितीयपादेवैश्वानराधिकरणेनामसमन्वयमुखेनालिंगसमन्वयः सप्रथमपादेन्यत्रनिरूढनामसम न्वयस्योक्तत्वेनबुद्धावारोहात्पाचकत्वादिलिंगानामप्यन्यत्रनिरूढत्वाद्बहुत्वाच्चयुक्तइत्यर्थः। यद्वा अंतस्स्थनिष्ठतयाश्रुतेनस मुद्रस्थत्वादिनांतस्स्थस्यैवविष्णुत्वसाधनेसामानाधिकरण्येनसंगतिः इंद्रादेस्तुतत्साधनेवैयधिकरण्येनासंगतिःस्यादित्यर्थः। यद्वा अंतस्स्थस्याविष्णुतयाऽऽनंदमयस्यापिविष्णुत्वाक्षेपोयुक्तः । तद्धर्मस्यादृश्यत्वस्यांतस्स्थेसाक्षाच्छ्रवणात् । नत्विंद्रादे

गु० पितत्परत्वानुपपत्तेस्तदुपादानेनार्थादेवसजातीयाग्निसवित्रादिशब्दानांविजातीयांतस्स्थत्वलाभान्नवैरूप्यमित्यतआह ॥ **यद्वेति** ॥ आनंदमयाधिकरणेलिंगविचारादि तितत्वप्रदीपानुसारादाह ॥ **अतएवेति** ॥ लिंगस्यनिरूढत्वादेवेत्यर्थः । नन्वेवंवैश्वानराधिकरणेपिनामसमन्वयोनवक्तव्यः । नाम्नोनिरूढत्वाल्लिंगस्यानिरूढत्वात्तन्मुखे नैववक्तव्यइत्यतआह ॥ **यस्त्विति** ॥ नन्वानंदमयाधिकरणन्यायेननामसमन्वयस्यसिद्धत्वान्नाम्नोपिप्रथमंबुद्धावारोहोयुक्तइत्यतआह ॥ **यद्वेति** ॥ ननुसहैवसंतंनवि

SGDF Sri Gargeshwari Digital Foundation

प्र० द्रेंतः कवयोविचक्षते" इत्यस्यांतस्थनिष्ठतयेंद्रादिनिष्ठत्वाभावादसंगतिरित्यर्थः ॥ **अविष्णुत्वेनेति** ॥ आनंदमयस्यविष्णुत्वाक्षेपइतिसंबध्यते । शिष्टमुपन्यासमुखेनैवविवृतमितिभावः ॥ ७ ॥ **अंतस्स्थत्वाधिकरणंसंपूर्णं** ॥ ७ ॥ ७ ॥

रविष्णुत्वेन । तत्रादृश्यत्वाश्रवणात् । ततश्चपूर्वाधिकरणसंगत्यर्थं लिंगग्रहणमित्यर्थः ॥ ७ ॥ अंतस्स्थत्वाधिकरणंसंपूर्णं ॥ ७ ॥ ७ ॥

गु० जानंतिदेवाइत्यंतस्स्थेश्रुतस्यादृश्यत्वस्याऽन्यनिष्ठत्वेऽदृश्येनात्म्यइत्यादिनोक्तमप्यदृश्यत्वमन्यस्यैवेतिकुतः । नियामकाभावात् । तथाचाक्षेपानुपपत्तिरितिचेन्न वाक्यद्वयस्यापिसमानत्वात् । सहैवसंतमित्यत्रेंद्रादिश्रुत्याऽदृश्यत्वस्यान्यनिष्ठत्ववत् आनंदादिश्रुत्यादिनाऽदृश्येनात्म्यइत्यत्राप्यदृश्यत्वस्यानिष्ठत्वोपपत्तेः । यदिचनिरवकाशलिंगेनश्रुतेस्तत्रबाधस्तर्हि नविजानंतीतिवाक्येपिसमानं । यदिचनिरवकाशत्वप्रयुक्तप्राबल्यापेक्षयापिस्वभावप्रयुक्तप्राबल्यस्यैवबलवत्त्वात्सहैवेत्यत्रान्यनिष्ठत्वं तदैतददृश्यइतिवाक्येसममित्याक्षेपोयुक्तएव । अतएवोत्तराधिकरणेतथैववक्ष्यतिमूलकारः । नचयथासिद्धांते आकाशइतिहोवाचेत्यत्राकाशशब्दस्यब्रह्मपरत्वेपीत्यादिना । तत्रत्यमेवमुत्तरत्रापिद्रष्टव्यमितिवाक्यंतूपलक्षणपरतयाव्याख्येयं । न्यायसाम्यादितिद्रष्टव्यं । यथापूर्वमीमांसायांश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपरदौर्बल्यमितिश्रुतिलिंगाधिकरणेश्रुतेर्लिंगापेक्षयाप्रबलत्वनिश्चयेपिततःप्राक्तदनिश्चयेनश्रुतिलिंगयोःसंशयबीजत्वं तथात्रापिशब्दादेवप्रमितइतिश्रुतिलिंगाधिकरणेश्रुतेर्लिंगापेक्षयाप्राबल्यनिश्चयेपित तःप्राक्तदनिश्चयेनश्रुतिलिंगयोःसहबीजत्वोपपत्तिरितिभावः ॥ ७ ॥ **अंतस्स्थत्वाधिकरणंसंपूर्णं** ॥ ७ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ ॐआकाशस्तल्लिंगात्ॐ ॥ अत्रसंगतिटीकायामाकाशनाम्नस्समन्वयइत्युक्तं । तदयुक्तं । एकोदाहरणस्ययोगारंभाप्रयोजकत्वात् । तथात्वेविश्वतोमुखत्वहानेरित्यतएतदधिकरणप्रतिपाद्यंदर्शयन्विषयोपाधिमाह ॥ अत्रेति ॥ ननुसूत्रे आकाशपदस्यैवग्रहणादाकाशादीति कथं । नचेतरोपलक्षकत्वेनैकस्योपादानं । तथाप्यस्यैवोपादानेहेत्वभावादित्यतआह ॥ भूतेष्विति ॥ प्राधान्यादिति ॥ "आकाशःसंभूतः । आकाशाद्वायु"रित्यत्रसर्वभूतादित्वेनोपादानादितिभावः । उक्तंचसुधायां "आकाशस्यभूतेषुप्राधान्यात्तच्छब्दसमन्वयंहरावाहसूत्रकार"इति । ननु"टीकायामाकाशनाम्नोब्रह्मणिसमन्वयप्रतिपादना"दित्येकस्यैवोपादानादाकाशादीतिकथमित्यतआह ॥ अतएवेति ॥

॥ ॐआकाशस्तल्लिंगात्ॐ ॥ अत्राधिभूतगताकाशादिनाम्नांसमन्वयउच्यते । भूतेष्वाकाशस्यप्राधान्यात्सूत्रेतस्यमुखतःकीर्तनं । अन्येषांतूपलक्षणं । अतएवसंगतिटीकायां "आकाशनाम्न"इत्युक्त्वाधिकरणोपसंहारटीकायां "आधिभौतिकसर्वशब्दोपलक्षके"त्युक्तं ।

गु० ॥ ॐआकाशस्तल्लिंगात्ॐ ॥ एतदधिकरणोपाधिमाह ॥ अत्राधिभूतेति ॥ विभक्त्यर्थेऽधीतव्यं । तथाचभूतेष्वित्यधिभूतं । अधिभूतंगताः अधिभूतगताः । भूतेषुवर्तमानाइत्यर्थइतिद्रष्टव्यं । नन्वेवंसूत्रविरोधइत्यतआह ॥ भूतेष्विति ॥ "अतआकाशशब्दोक्तस्तद्देवोत्रविनायक"इत्यनुव्याख्यानोक्तावपि "महामानी"त्यादितत्रैवोक्तत्वात् "इंद्रियेभ्यःपराह्यर्था"इत्युक्तरीत्याभूतोत्पत्तिप्रसंगेतदुत्तमाभिमानिप्राधान्यक्रमेणोत्पादकस्योत्पाद्यात्प्राधान्यक्रमेणच जडभूतस्यतदभिमानिनश्चात्राप्राधान्यंज्ञेयं ॥ अतएवेति ॥ सूत्रस्थाकाशशब्दस्यापिभूतगतपृथिव्यादिशब्दांतरोपलक्षकत्वादेवेत्यर्थः । ननुतथाप्यस्मिन्नधिकरणेस्वभावप्रवृत्तिनिमित्तकानांशब्दानांसमन्वयप्रतिपादनेनाधिभूतगतानांशब्दानामेवसमन्वयाप्रतिपादनादुपसंहारस्थाधिभौतिकसर्वशब्दोपलक्षकेत्यादिटीकाऽनुपपन्नैवेत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० नन्वत्रवक्ष्यमाणरीत्यास्वभावप्रवृत्तिनिमित्तकाश्शब्दास्समन्वीयंते । तेचभूताभूतशब्दसाधारणाइतिभौतिकमात्रोपलक्षणत्वमयुक्तमित्याशंक्य द्वेधासमाधानमाह ॥ **यद्यपीति** ॥ **एतन्न्यायेति** ॥ अचेतनस्वभावत्वान्नभगवन्नियम्यत्वमित्यादिपूर्वपक्षन्यायविषयाणामित्यर्थः । अनेन स्वभावस्यापीशाधीनत्वसाधकेनाधिकरणेनेत्यर्थः ॥ **आधिदैविकेति** ॥ अतीताधिकरणविषयेषूत्तराधिकरणविषयेषुचेत्यर्थः । एतेनाधिदैविकादिव्यावृत्त्यर्थमेवतथोक्तिरित्युक्तंभवति । ननुपूर्वाधिकरणेलिंगस्यसमन्वितत्वेनबुद्धौविपरिवर्तमानलिंगत्यागेहेत्वभावात्तदेवसमन्वेतव्यं । नतुनामेत्याक्षिप्यहेतुमाह ॥ **नचात्रापीति** ॥ **नामेति** ॥ तथाचफलतःपादसंगतिर्भविष्यतीतिभावः । अत्रकिंसर्वभूतकारणत्वादिर्लिंगस्यसमन्वयश्चोद्यतेसिद्धांत्यभिमतस्यवा । आद्यआह ॥ **पूर्वत्रेति** ॥ **एकनामेति** ॥ वैश्वानराधिकरणवदितिभावः । नन्वत्राप्याकाशनाम्नोबहुकृत्वश्श्रवणेनबहूनांसमन्वयोस्तीतिचेन्न । प्रवृत्तिनिमित्तभेदाभावेनैकसमन्वयेसतिपुनश्श्रुतसमन्वयेयत्नाधिक्याभावेन भिन्न

यद्यपिभूतेतरवाचिनामप्येतन्न्यायविषयाणामनेनसमन्वयःसिध्यति तथापिसजातीयेभूतशब्देप्रथमंबुद्ध्यवताराादाधिदैविकेंद्रादिशब्देष्वाध्यात्मिकप्राणादिशब्देषुच स्वभावप्रवृत्तिनिमित्तकत्वाभावेनेतरत्रैतन्न्यायाप्रवृत्तेश्च टीकायामाधिभौतिकोपलक्षकतोक्तिः । नचात्रापिपूर्वत्रेवाकाशनामसमन्वयार्थमनंतत्वादिलिंगसमन्वयएवोच्यतामितिशंक्यं । पूर्वत्रांतस्स्थत्वरूपैकलिंगसमन्वयेनबहुनामसमन्वयात् । अत्रत्वाकाशइत्येकनामसमन्वयेनबहुलिंगसमन्वयसिद्धेः ।

गु० **यद्यपीति** ॥ तथाचटीकायामाधिभौतिकोपलक्षकतोक्तिरयुक्तेतिशेषः । ननुपूर्वाधिकरणवदत्राप्यनंतत्वलिंगसमन्वयःकिंनोच्यतइत्याशंक्यनिषेधति ॥ **नचेति** ॥ वैषम्येणपरिहरति ॥ **पूर्वत्रेति** ॥ ननुपूर्वत्रांतस्स्थत्वरूपलिंगसमन्वयेनेंद्राद्यनेकनामसमन्वयसिद्धिवत्अत्राप्यनंतत्वादिलिंगसमन्वयेनपृथिव्याद्यधिभूतगतसर्वगत

प्र० प्रवृत्तिनिमित्तकनामबहुत्वस्यविवक्षितत्वेनात्रतदभावादितितात्पर्यात् । नचवाच्यमेकलिंगसमन्वयेनाप्यनेकलिंगानांनाम्नश्चसमन्वयोर्थात्सिध्यतीतिलिंगमेवसमन्वेतव्यमिति । एकलिंगसमन्वयेनसजातीयविजातीयसमन्वयाक्षेपस्यगत्यंतरेसतिगौरवहतत्वात् । नचान्यत्रनिरूढनामसमन्वयस्यप्रथमंबुद्धावनारोहादन्यत्रानिरूढलिंगसमन्वयस्यप्रथमंबुद्धावनारोहादन्यत्रानिरूढलिंगसमन्वयएववाच्यइतिवाच्यं । पूर्वत्रतादृशस्यापींद्रादिनाम्नस्समन्वयोक्त्यात्रबुद्धावारोहसंभवादितिभावः । द्वितीयेत्वाह ॥ **अनंतत्वादेरिति** ॥ अन्यथासंदिग्धासिद्धत्वापातादितिभावः । उपलक्षणमेतत् । अन्यत्रप्रसिद्धाकाशादिश्रुतित्वादिरूपपूर्वपक्षन्यायस्यमुखतस्सूचनाभावाच्चेत्यपिध्येयं । नन्वेतत्समुद्रांतस्स्थितत्वादेर्विष्णुलिंगत्वनिश्चयेपिअनंतत्वादेस्तदनिश्चयादितिवक्ष्यमाणेनविरुध्यतइतिचेन्न । वास्तवाभिप्रायेणात्रस्वारसिकसंशयानुदयोक्तेः । तत्राकाशश्रुत्यादिसाहचर्येणाहितसंशयोक्तेः । श्रुत्याऽऽहितसंशयोपादानेनलिंगसमन्वयोक्त्याऽनुपजीव्यत्वेनश्रुतिसमन्वयस्यैवन्याय्यत्वादितितात्पर्यादिति । अतोनामसमन्वयएवयुक्तः । मुखतःपादसंगतेरपिसत्त्वादितिस्थितं । एतेनाकाशनाम्नइत्यादिसंगतिटीकासमर्थिता । पूर्वाधिकरणसंगतिमाह ॥ **अनंतरेति** ॥ पूर्वसिद्धांतस्योपरितदनिवर्त्यांशंकांकृत्वातदुपमर्दनपूर्वकंनिरवकाशलिंगेनसावकाशश्रुतिबाधरूपन्यायएवेत्यर्थः । अनेन"कृत्वात्वभ्यधिकाशंकांपूर्वमेवातिदिश्यते । तत्रातिदेशिकीप्रोक्ते"तिलक्षणंस्मारितंभवति । इयंचसंगतिः"चेष्टाही"

अनंतत्वादेःसिद्धांतहेतुत्वेनतत्रसंशयानुदयाच्च । अनंतरसंगतिस्त्वधिकाशंकांकृत्वापूर्वन्यायएवातिदिश्यतइत्यातिदेशिकी ।

गु० शब्दसमन्वयसिद्धेः । संभवेनकथमेतदित्यतआह ॥ **अनंतत्वादेरिति** ॥ अव्यवहितपूर्वाधिकरणेनसंगतिमाह ॥ **अनंतरेति** ॥ नन्वनंतराधिकरणन्यायाति

SGDF Sri Gargeshwari Digital Foundation

प्र० त्याद्यनुव्याख्यानात्स्पष्टंप्रतीयतइतिभावः। नन्वेवमुत्तरेषामपिपूर्वानंतर्यस्यान्नतुव्यवधानमित्याशंक्याह ॥ **यद्यपीति** ॥ तदनुसारेण श्रुतिक्रमानुसारेण । वायोरेवाध्यात्मंप्राणत्वादग्निज्योतिश्शब्दयोरेकार्थत्वादितिभावः । ननुयदिपूर्वेणातिदेशिकीसंगतिस्तर्हि "कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यादित्याकाशस्यानंदत्वेहेतुरुक्तः । नतुविष्णोरितिनमंतव्य" मित्यानंदमयाधिकरणाक्षेपसंगतिपरभाष्यंविरुध्येतेत्यतस्तद्भाष्यंनसंगतिपरं किंतुफलमात्रपरमितिभावेनाह ॥ **कोह्येवान्यादितीति** ॥ अयंविचारः आकाशस्यविष्णुत्वविचारः । एतेन

यद्यपि "अतएवप्राण"इत्याद्यधिकरणत्रयेप्यंतरधिकरणन्यायातिदेशः तथाप्यधिकाशंकाक्रमात्तत्क्रमः । शंकाक्रमश्चतत्रतत्रवक्ष्यते । यद्वा "आकाशाद्वायुः वायोरग्नि"रितिश्रुत्याऽऽकाशादेर्वाय्वादिकारणत्वोक्तेस्तदनुसारेणाकाशप्राणज्योतिरधिकरणानांक्रमः । "कोह्येवान्या"दितिभाष्येतु "आकाशइतिहोवाचे"त्यत्राकाशस्यविष्णवन्यत्वे "यदेषआकाश"इत्यत्राप्यन्यःस्यादित्यानंदमयोप्यन्यःप्रसज्येतेतिपूर्वपक्षे आनंदमयाधिकरणाक्षेपात् सिद्धांतेचतत्समाधानात्सफलोयंविचारइत्युक्तं ।

गु० देशस्याधिकरणत्रयेपिसत्त्वात्कथमेतेषांक्रमइत्यतआह ॥ **यद्यपीति** ॥ **अधिकाशंकाक्रमादिति** ॥ प्रबलाधिकशंकाक्रमादित्यर्थः । तथाचसोपानारोहणन्यायेनयत्राधिकशंकायाअल्पत्वंतस्यप्राथम्यमितिभावः । महामल्लभंगन्यायेनवैपरीत्यमेव किंनस्यादित्यतआह ॥ **यद्वेति** ॥ ननुभिन्नभिन्नशाखास्थवाक्यनिर्णायकानांसूत्राणां परस्परंसंगत्यभावेनपुरुषोत्प्रेक्षयैवाभ्यधिकाशंकाक्रमेणाधिकरणानांक्रमश्चेत् तर्ह्यन्यथापिपुरुषोत्प्रेक्षासंभवेनप्रकारांतरेणापिसंगतिःस्यादित्यनुशयाद्वाऽऽह ॥ **यद्वेति** ॥ नन्वेवंसाक्षादंतरधिकरणसंगतिरेवचेदाकाशस्यसंगतिः तर्ह्यानंदमयाधिकरणेनसहसंगतिप्रदर्शककोह्येवान्यादित्यादिभाष्यविरोधइत्यतोनतत्संगतिप्रदर्शकं किंनामविचारसाफल्यमात्रकथनमित्यतोनविरोधइतिभावेनाह ॥ **कोहीति** ॥ नन्वेतदयुक्तं । सिद्धांते आकाशइतिहोवाचेत्यत्राकाशशब्दस्यब्रह्मपरत्वेपि यदेष

SGDF Sri Gargeshwari Digital Foundation

प्र० टीकापीत्थमेवव्याख्येयेत्युक्तंभवति । अनंतरसंगतिस्तूत्तरप्रस्थानाद्बोध्येतितात्पर्यमितिभावः । ननुयदुक्तंभाष्यटीकयोःआकाशइतिहोवाचेत्यत्राकाशोभूतंचेत्कोह्येवान्यादित्यत्रत्योप्याकाशोभूतंस्यात् । अतस्तस्यविष्णुत्वसिद्धये आकाशइतिहोवाचेत्ययमाकाशोविष्णुरितिविचार्यंतइति साफल्यंविचारस्येति तदयुक्तं । छांदोग्यस्थाकाशस्यविष्णुत्वेपिकोह्येवान्यादित्यत्रत्यस्यविष्णुत्वासिद्ध्याविचारस्यसाफल्यायोगादितिभावेनदृष्टांतोक्तिपूर्वमाक्षिपति ॥ **नचेति** ॥ शंक्यमित्यन्वयः ॥ **भूतपरत्वमिति** ॥ ननु "कारणत्वेनचाकाशादि"ष्वित्यधिकरणेसंभूतवाक्यगता

नचयथासिद्धांते "आकाशइतिहोवाचे"त्यत्राकाशशब्दस्यब्रह्मपरत्वेपि "आकाशः संभूत"इत्यत्रभूतपरत्वं तथासिद्धांते "यदेषआकाश"इत्यत्रापिभूतपरत्वमस्तु ।

गु०आकाशइतिवाक्ये आकाशशब्दस्यभूतपरत्वस्यैवसंभवात्कथंसिद्धांतेतत्साधनं । नचैकत्राकाशशब्दस्यब्रह्मपरत्वेऽन्यत्रापिब्रह्मपरत्वमेवस्यादितिवाच्यं तथात्वेसिद्धांते आकाशइतिहोवाचेतिवाक्ये आकाशशब्दस्यब्रह्मपरत्वेनात्मनआकाशःसंभूतइतिसंभूतवाक्येप्याकाशशब्दस्यब्रह्मपरत्वापातात् । नचसतिब्रह्मलिंगे आकाशशब्दस्य ब्रह्मपरत्वाभ्युपगमात्संभूतवाक्येब्रह्मलिंगाभावेनतत्राकाशशब्दस्यब्रह्मपरत्वाभावेपि यदेषआकाशइतिवाक्येब्रह्मलिंगानांविद्यमानत्वेनाकाशशब्दस्यब्रह्मपरत्वंसंभवतीतिसमाधानंयुक्तमितिवाच्यं । तथात्वेसिद्धांतेसंभूतवाक्येब्रह्मलिंगाभावेनाकाशशब्दस्यब्रह्मपरत्वाभावेपि यदेषइतिवाक्येब्रह्मलिंगानांसत्त्वेनाकाशशब्दस्यविष्णुपरत्ववत् पूर्वपक्षेपि आकाशइतिहोवाचेतिवाक्येब्रह्मलिंगानामभावेनाकाशशब्दस्यब्रह्मपरत्वाभावेपि यदेषइतिवाक्येब्रह्मलिंगानांविद्यमानत्वेनाकाशशब्दस्यान्यपरत्वंस्यादित्यानंदमयोप्यन्यएवेत्याक्षेपएवानुपपन्नइतिपूर्वपक्षे आनंदमयाधिकरणाक्षेपात्सिद्धांतेतत्समाधानात्कोह्येवान्यादितिवाक्यचिंतासाफल्यमात्रपरमित्युच्यते । तथाचास्यभाष्यस्यचिंतासाफल्यपरत्वासंभवेनानंदमयाधिकरणसंगतिप्रदर्शनपरत्वस्यैवावश्यकत्वात् साक्षादनंतराधिकरणसंगत्यभिधानेभाष्यविरोधःस्यादेवेत्याशयेनशंकते ॥ **नचेत्यादि** ॥ इतिहोवाचेतिवाक्ये आकाशस्यब्रह्मपरत्वेयदेषइतिवाक्येपिब्रह्मपरत्वंस्यादेवेति सिद्धांते आनंदमयाक्षेपपरिहारः । नच इतिहोवाचेतिवाक्ये आकाश

SGDF
Sri Gargeshwari Digital Foundation

प्र० काशादिशब्दस्यब्रह्मपरत्वंवक्ष्यते । यद्वक्ष्यति“भूतपरत्वेशंकितेतन्निरास”इति । तथाचकथंभूतपरत्वोक्तिरितिचेत्सत्यं । तत्रभूतपरत्वापरित्यागेनैवब्रह्मपरत्वाभिधानेनभूतपरत्वस्यापिसत्त्वात् । अन्यथाभूतोत्पत्त्यसिद्धिप्रसंगाद्वाक्यांतरस्याप्येतत्तुल्यत्वात् । अतएवोक्तंप्राक्“प्राबल्यंहितस्यशब्दस्यतद्युक्तवाक्यस्यवाऽपरमुख्यवृत्त्याऽन्यपरत्वंविनाऽनुपपद्यमानत्व”मिति । अतएवानुव्याख्याने“भूतंभूताभिमानीचतद्देहोंतर्नियामक”इत्युक्तमितिभावः । ननुसंभूतवाक्येभूतलिंगाद्भूतपरत्वेपि कोह्येवान्यादित्यत्रजगज्ज्येष्ठकत्वादिब्रह्मलिंगाद्ब्रह्मपरता एतदधिकरणसिद्धांतन्यायेनस्यात् । तथाचसिद्धांतेप्रयोजनंसेत्स्यतीत्याशंक्यतर्हिपूर्वपक्षेपूर्वोक्ताक्षेपरूपफलासिद्धिरितिसदृष्टांतमाह ॥ **यदित्विति** ॥ ननुसंभूतवाक्यइवयदेषइतिवाक्येप्युभयपरत्वमस्तु । आकाशश्रुतिब्रह्मलिंगयोस्सत्त्वात् । तथाचतस्यभूतपरत्वेपिविष्णुपरत्वस्यापिसत्त्वादानं

यदितु “यदेष”इत्यत्रब्रह्मलिंगाद्ब्रह्मपरता तर्हियथासिद्धांतेसंभूतवाक्यआकाशशब्दस्यभूतलिंगाद्भूतपरत्वेपियदेषइतिवाक्येब्रह्मलिंगाद्ब्रह्मपरता तथापूर्वपक्षे इतिहोवाचेतिवाक्येभूतपरत्वेपियदेषइत्यत्रब्रह्मलिंगाद्ब्रह्मपरताभविष्यतीतिनानंदमयाधिकरणाक्षेपइतिशंक्यं ।

गु० शब्दस्यब्रह्मपरत्वेपि संभूतवाक्येतदभाववत् यदेषइतिवाक्येपितदभावःकिंनस्यादितिवाच्यं । तत्राकाशशब्दस्यब्रह्मपरत्वेपिसंभूतवाक्ये आकाशशब्दस्यब्रह्मपरत्वेबाधकाभावेनब्रह्मपरत्वोपपत्तेः । तथाहि । बाधकंभवत्संभूतत्वंवास्यादाकाशशब्दस्यान्यत्रप्रसिद्धत्वंवास्यात् । नाद्यः । यदेषइतिवाक्येसंभूतत्वादेरभावात् । नद्वितीयः । तल्लिंगन्यायेनतस्यापिपरिहारात् । तस्मादितिहोवाचेतिवाक्ये आकाशशब्दस्यब्रह्मपरत्वेयदेषइतिवाक्येपिब्रह्मपरत्वंस्यादित्यानंदमयस्यापिब्रह्मत्वमित्यानंद

प्र०दमयस्यविष्णुत्वेहेतुव्यपदेशत्वंसेत्स्यतीतिचेन्न । संभूतवाक्येऽन्यपरत्वानभ्युपगतौभूतोत्पत्त्याद्यसिद्धिवदिहान्यपरत्वाभावेबाधकाभावात् । निरवकाशब्रह्मलिंगानुपपत्तेश्च । उक्तंचचतुर्थपादीयानुव्याख्याने“तेषुतेषुपदार्थेषुरूढिरंगीकृतायतः । प्रयोजनबहुत्वेनतस्यतस्याविरोधतः । उपदेशादिसामर्थ्याद्विष्णौशक्तिश्चगृह्यते । तथाप्येतद्विरोधेतुतद्वाचित्वमपोद्यत”इति । यत्तावत्सिद्धांतिनंप्रत्यापादितं संभूतवाक्यइवकोह्येवान्यादित्यत्रापिभूतपरत्वंस्यात् । तथाचनसिद्धांतफलसिद्धिरिति तद्वैषम्यप्रदर्शनेनपरिहरति ॥ **सिद्धांतइत्यादिना** ॥ ननुभूतलिंगाभावेपिभूतेप्रसिद्धाकाशश्रुतिरस्तीत्यतआह ॥ **भूतइति** ॥ **एतदिति** ॥ निरवकाशलिंगेनान्यत्रप्रसिद्धिबाधकथनरूपेणेत्यर्थः । एवंसिद्धांते

सिद्धांतेसंभूतवाक्येसंभूतत्ववद्यदेषइतिवाक्येकस्यचिद्भूतलिंगस्याभावात् । भूतेप्रसिद्धिमात्रस्यचैतत्सिद्धांतेननिरासात् ।

गु०मयाक्षेपसमाधानंसिद्धांतेयुक्तमेव । एवंपूर्वपक्षेपि इतिहोवाचेत्यत्राब्रह्मत्वेयदेषइतिवाक्येप्यब्रह्मत्वस्यवक्तुंशक्यत्वेनानंदमयाक्षेपकतोपपन्ना । नचसिद्धांतेसंभूतवाक्येऽब्रह्मत्वेपिब्रह्मलिंगाद्यदेषइतिवाक्येब्रह्मत्ववत् इतिहोवाचेत्यत्रब्रह्मपरत्वेपियदेषइतिवाक्येब्रह्मपरत्वंस्यादितिशंक्यं । यदेषवाक्येब्रह्मलिंगवदितिहोवाचेत्यत्रापिब्रह्मलिंगानांसत्त्वात्तत्रोक्तस्यापिब्रह्मत्वं । यदिचतत्रान्यत्रप्रसिद्धिमात्रेणलिंगानांसावकाशत्वापत्तावत्रोक्तस्यापिब्रह्मत्वंनस्यादेव । तथाचेतिहोवाचेतिवाक्ये आकाशस्याब्रह्मत्वेयदेषइतिवाक्येप्यब्रह्मत्वंस्यादित्यानंदमयोप्यन्यएवस्यादिति पूर्वपक्षे आनंदमयाधिकरणाक्षेपोयुक्तएव । तथाचभाष्यस्यचिंतासाफल्यमात्रप्रदर्शनपरत्वेनसंगतिप्रदर्शनपरत्वाभावात्साक्षात्संगत्यभिधाने नभाष्यविरोधइत्याशयवान्परिहरति ॥ **सिद्धांतइत्यादिना** ॥ ननुभूतेषुप्रसिद्ध्यायदेषआकाशइतिवाक्यस्थाकाशशब्दस्याप्यन्यपरत्वमित्यतआह ॥ **भूतेप्रसिद्धिमात्रस्येति** ॥ ननुतत्रत्यब्रह्मलिंगातिप्रसिद्ध्याऽन्यथाक्रियतइत्यतआह ॥ **भूतइति** ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥

SGDF
Sri Gangadharan Digital Foundation

प्र० "आकाशइतिहोवाचे"तिवाक्यस्य"कोह्येवान्या"दितिवाक्यस्यचतुल्यन्यायविषयताप्रदर्शनेनसिद्धांतेप्रयोजनसिद्धिंसमर्थ्य इदानींपूर्वपक्षेपिद्वयोस्तुल्यन्यायविषयताप्रदर्शनेनपूर्वपक्षफलंचसमर्थयते ॥ **इतिहोवाचेति** ॥ **साम्यादिति** ॥ तथाचपूर्वपक्षेपि इतिहोवाचेत्यस्यभूतपरत्वेकोह्येवान्यादित्यपिभूतपरंस्यादितिभावः ॥ **प्रयोजनमिति** ॥ पूर्वपक्षेसिद्धांतेचेतिशेषः ॥ **एवमिति** ॥ यत्रयत्रपूर्वाक्षेपःप्राणज्योतिरधिकरणादौतत्रसर्वत्रापितुल्यन्यायविषयतामापाद्यव्युत्पादनीयमित्यर्थः । ननुयदिकोह्येवान्यादित्यत्रत्याकाशस्यविष्णुत्वसिद्धिःफलंतर्हिनाधिकरणांतरमारंभणीयं । "विकारशब्दान्नेतिचे"दितिवत्हेतुव्यपदेशसूत्रानंतरं आकाशशब्दान्नेतिचेत्तल्लिंगादितिगुणसूत्रेणैवविष्णोरेवाकाशशब्दवाच्यत्वोक्तिसंभवात् । अधिकरणांतरत्वेपि कोह्येवान्यादित्यस्यैवविषयत्वसंभवेवाक्यांतरोदाहरणस्यायुक्तत्वादित्याशंकते ॥ **ननुयद्येवमिति** ॥ **साक्षादिति** ॥ इतिहोवाचेत्यस्यभूतपरत्वात्ततुल्यन्यायतयाऽयमपिभूतपरस्स्यादित्यस्यवक्रत्वादितिभावः । इयंशंका अंतरधि

"इतिहोवाचे"तिवाक्येचपूर्वपक्षेप्रबलभूतलिंगाभावात् । ब्रह्मलिंगानामेवचभावात् । भूतेप्रसिद्धिमात्रेण ब्रह्मलिंगानामन्यथाकरणस्य "यदेष"इतिवाक्येपिसाम्यात् । तस्माद्युक्तंप्रयोजनं । एवमुत्तरत्रापिद्रष्टव्यं । ननुयद्येवमानंदमयाधिकरणाक्षेपस्तर्हिसाक्षात्तदाक्षेपार्थमानंदमयशब्देमयटोविकारार्थत्वमिवयदेषइतिवाक्येआकाशशब्दस्यभूताकाशपरत्वमाशंक्यानंदमयस्यविष्णुत्वसिद्धयेब्रह्मणिसमन्वयउच्यतां । ॥ ३२० ॥

गु० एवमिति ॥ नन्वानंदमयाधिकरणाक्षेपेणास्तुविचारसाफल्यं । तथापिवाक्यांतरोदाहरणमयुक्तं आनंदमयप्रकरणस्थेयदेषइत्यत्रैवपूर्वपक्षसिद्धांतौकर्तव्यौ । लाघ

SGDF Sri Gargeshwari Digital Foundation

प्र० करणएवकुतोनकृता । किंविशिष्यात्रेत्यतआह ॥ **अंतस्स्थत्वस्यत्विति** ॥ यद्यपि “योवेदनिहितंगुहाया”मितिमंत्रवर्णएवांतस्स्थत्वंश्रुतं तथा पिमंत्रवर्णोक्तस्यैवानंदमयशब्देनोच्यमानत्वात्तत्प्रकरणेश्रवणेपीत्युक्तं । यत्तावदुक्तमधिकरणांतरंनकार्यमितितत्तावन्नेत्याह ॥ **तथापीति** ॥

अंतस्स्थत्वस्यत्वानंदमयप्रकरणेश्रवणेपितस्यस्वतोन्यत्रप्रसिद्ध्यभावादन्यत्रप्रसिद्धेंद्रादिश्रुतिसाहचर्यस्यतत्प्रकरणेऽभावेनतत्रपूर्वपक्षानुदयाद्वाक्यांतरोदाहरणंयुक्तं । आकाशशब्दस्त्वानंदमयप्रकरणेश्रुतःस्वतोन्यत्रप्रसिद्धश्चेतितत्रैवपूर्वपक्षोदयइतिवैषम्यं । सत्यं । तथापिमयटइवाकाशशब्दस्यसमन्वेतव्यानंदमयशब्दांतर्भावाभावेन

गु० वादितिशंकते ॥ **नन्विति** ॥ तर्ह्यानंदमयप्रकरणेंतस्स्थत्वस्यश्रुतत्वादंतरधिकरणेपिवाक्यांतरंनोदाहर्तव्यं । अतआह ॥ **अंतस्स्थत्वस्येति** ॥ **तस्यस्वतोन्यत्र प्रसिद्ध्यभावादिति** ॥ यद्यपिद्युभ्वाद्यधिकरणे एवंसर्वगतत्वादीनिब्रह्मण्ययुक्तत्वादेवान्यत्रप्रसिद्धानीतिवक्ष्यमाणत्वात् गुहानिहितत्वरूपांतस्स्थत्वस्यापिस्वतएवा न्यत्रप्रसिद्धिर्वक्तुंशक्या तथापि़अथवान्य त्रप्रसिद्धेरन्यत्रप्रसिद्धान्यसाहित्यसापेक्षत्वादितितत्पूर्वोक्तपक्षानुसारेणेदमित्यविरोधः ॥ **तत्प्रकरणेऽभावेनेति** ॥ यद्य पितेयेशतंप्रजापतेरानंदाः तेयेशतंबृहस्पतेरानंदाइतींद्रादिश्रुतिरप्यस्ति तथाप्यस्याउपसंहारस्थायाउपक्रमस्थगुहानिहितत्वेनमध्यस्थसृष्ट्यन्नमयादिप्रकरणैर्व्यवधानात् प्रकृतेचांतस्थप्रश्नप्रकरणएवेंद्रादिश्रुतिश्रवणाद्वैषम्यमित्याशयेनोक्तं **तत्प्रकरणइति** ॥ किंवाबाधकपरिहारत्वादस्यविकारशब्दादिवत् अधिकरणांतर्भावइत्या शयः किंवाभिन्नाधिकरणत्वेपिवाक्यंतदेवोदाहर्यमितिविकल्पंमनसिनिधायक्रमेणनिराह ॥ **सत्यमित्यादिना** ॥ नन्वेवंतर्हिपुनर्वैषम्यापत्त्योक्ताक्षेपानुपपत्तिताद वस्थ्यमितिचेन्न । तथापूर्वपक्षफलस्यजिज्ञासाक्षेपपर्यंतस्यसिद्ध्येविद्यमानस्याप्यस्यविषयत्वस्यपूर्वपक्षिणाविवक्षणोपपत्तेः । यद्वाभूतलयाद्यधिष्ठानत्वादिभूतलिंगोपेतस्यापि इतिहोवाचेतिवाक्यस्यब्रह्मलिंगाद्ब्रह्मपरत्वे भूतलिंगविधुरस्ययदेषइतिवाक्यस्यब्रह्मपरत्वंकिमुवाच्यमितिसिद्धांतेकैमुत्येनैवसिद्धांतफलसिद्धेरभिप्रेतत्वात्तदनुसारेणपूर्वपक्षेपि

SGDF
Sri Gargeshwari Digital Foundation

प्र० **न्यायेति** ॥ अचेतनस्वभावस्यापिभगवदधीनत्वप्रतिपादनरूपन्यायभेदेनेत्यर्थः । अधिकरणांतरत्वेपिवाक्यांतरमयुक्तमित्येतन्निरस्यति ॥ **आकाशइतीति** ॥ एतदिति इतिहोवाचेत्येतत्परामृश्यते । नन्वस्त्वधिकरणांतरंवाक्यांतरोदाहरणंच । तथापि नभाष्योक्तंप्रयोजनं ।

न्यायभेदेनचाधिकरणभेदेस्थिते "आकाशइतिहोवाचे"तिवाक्यांतरस्यापिसमन्वये एतत्प्रकरणस्थबहुगुण लाभात् तथैतत्समन्वयेननिर्णीतब्रह्मप्रकरणस्थयदेषवाक्यसमन्वयवद्यदेषइतिवाक्यसमन्वयेनानिर्णीतब्रह्म प्रकरणस्थैतद्वाक्यसमन्वयासिद्धेः तथासिद्धांतिनासावकाशयितव्यानांभूतलयाधिष्ठानत्वादिपूर्वपक्षयुक्ती नांनिरवकाशयितव्यानांपरोवरीयस्त्वादिसिद्धांतयुक्तीनांचयदेषइत्यत्राभावाच्चवाक्यांतरोदाहरणंयुक्तं ।

गु० परोवरीयस्त्वादिब्रह्मलिंगोपेतस्यापिभूतपरत्वेभूतप्रसिद्धिबाधकब्रह्मलिंगविधुरस्यभूतपरत्वंकैमुत्येनैवस्यादित्याक्षेपाभिप्रायः ॥ **न्यायभेदेनेति** ॥ आनंदमयाधिकरणेगुणिसामान्यवाचिनांगुणवाचिनांचसमन्वयः आकाशाधिकरणेचाधिभूतगताशेषशब्दसमन्वयःप्रतिपाद्यतइतिन्यायभेदेनेत्यर्थः । यद्वा अचेतनस्वभावस्यापिभगवदधीनत्वमित्येतदधिकरणन्यायेनेत्यर्थः । ननुयदेषइतिवाक्यसमन्वयेनैव इतिहोवाचेत्यस्यापिसमन्वयसिद्धौतद्वाक्यस्थगुणलाभस्यापिसंभवेनवाक्यांतरोदाहरणमयुक्तं । अन्यथायदेषइत्यस्यसमन्वयार्थमप्यधिकरणांतरमारभ्येतेत्यतआह ॥ **तथैतदिति** ॥ ननुयदेषइतिवाक्यसमन्वयउक्ते एतत्समानन्यायानामपिसमन्वयःसेत्स्यतीतिनिर्णीतत्वानिर्णीतत्वेअप्रयोजकेइतिनवाक्यांतरमुदाहर्तव्यमित्यतआह ॥ **तथासिद्धांतिनेति** ॥ ननुचात्रजन्माधिकरणाक्षेपस्यापिसंभवेनप्रयोजनस्यान्यथाप्युपपत्तेर्नैतद्भाष्यंचिंतासाफल्यपरं । अन्यथा अंतरधिकरणेप्यदृश्येऽनात्म्यइत्यादिभाष्यस्यचिंतासाफल्यपरत्वापत्त्यासंगतिप्रदर्शकत्वाभावापत्तेः । तत्र

॥ ३२१ ॥

प्र० सर्वाणिहवाइमानिभूतान्याकाशादेवे"तिसाक्षाच्छ्रुतकारणत्वस्यपूर्वपक्षेभूतनिष्ठत्वेनजन्मादिसूत्राक्षेपस्यऋजुत्वादित्याशंक्याह ॥ **अत्रेति** ॥ **उपादानत्वेपीति** ॥ ननूपादानत्वोक्तौकासंगतिरितिचेदयंभावः । अस्यलोकस्यकागतिरितिपृथिवीगतिप्रश्नस्याकाशइत्युत्तरमभिधाय कथमेतत् अपांकार्यंहिपृथिवीतत्रैवचलीयतइतितासामेवपृथिवीगतित्वोपपत्तेरित्याशंक्य मैवं मूलोपादानत्वादित्याह सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतइति । नचतर्ह्यात्मनआकाशइतिश्रुतेरात्मावाच्यइतिशंक्यं । भूतविषयविचारेवियतएववक्तव्यत्वात् । नचाकाशस्यापिभूतत्वात्सर्वाणीतिविरुद्धं । इदंसर्वमसृजतेतिवद्व्यतिरिक्तग्रहणोपपत्तेः । नचावधारणानुपपत्तिः । परंपरयाभूतोपादानस्यापरस्याभावादिति । हेत्वंतरमाह ॥ **आनंदमयेति** ॥ तत्राक्षेपांतराभावादितिभावः । उत्तानदृशांपरिहारमनूद्यनिरस्यति ॥ **केचित्त्विति**॥**अभिमानिद्वारेति**॥

अत्रयद्यपि "आकाशइतिहोवाचे"त्यत्राकाशस्यान्यत्वे "आकाशादेवसमुत्पद्यंत"इतितत्प्रकरणेश्रुतंकारणत्वमप्यन्यस्यैवस्यादितिजन्मादिसूत्रमप्याक्षेप्तुंशक्यंभाति तथापिसमुत्पद्यंतइत्यस्योपादानत्वेप्युपपत्तेर्जन्मादिसूत्रोक्तकर्तृत्वाक्षेपायोगादानंदमयाधिकरणानाक्षेपेतदाक्षेपकांतरधिकरणप्राणाधिकरणयोर्मध्येऽस्यनिवेशायोगाच्चानंदमयाधिकरणमेवाक्षिप्तं । केचित्तु अचेतनस्यैवपूर्वपक्षिणाऽऽकाशत्वेनशंक्यमानत्वाज्जन्मादिसूत्रोक्तकर्तृत्वानाक्षेपइत्याहुः । तन्न । अचेतनस्याप्यभिमानिद्वाराऽनंदमयत्ववत्कर्तृत्वस्याप्युपपत्तेः ।

गु०तथाभ्युपगमेचात्रापितथैवस्यादित्यतआह ॥ **अत्रयद्यपीत्यादिना** ॥ ननुसमुत्पद्यंतइत्यस्यनिमित्तकारणपरत्वेप्युपपत्तेर्जन्मादिसूत्रोक्तकर्तृत्वाक्षेपःस्यादेवेत्यतआह ॥ **आनंदमयाधिकरणानाक्षेपइति** ॥ **केचित्त्विति** ॥ बुद्ध्यादिमत्त्वघटितंकर्तृत्वमचेतनेनसंभवतीतिभावः । एवंह्यानंदमयत्वमपिकथमचेतनेस्यात् । नचा

SGDF Sri Gargeshwari Digital Foundation

प्र० "आकाशस्याचेतनत्वेनानंदानुपपत्तावप्यभिमानिद्वारातदुपपत्ते"रितिटीकोक्तेरितिभावः । आपाततःप्रतीयमानपरिहार,तरमुद्टंक्यनिरस्य ति ॥ अन्येत्विति ॥ टीकायामिति ॥ यद्यप्येतदधिकरणटीकायांनजिज्ञासासूत्राक्षेपपर्यंतत्वोक्तिरस्ति तथाप्यंतरधिकरणादौतत्रतत्रटीका यांतदाक्षेपपर्यंतत्वोक्तेरनुक्तिस्थलेपितदाक्षेपपर्यंतत्वमभिप्रेतमितिभावः । एवंसंगतिमुक्त्वाभाष्यकारीयांप्रयोजनोक्तिंतत्रवाक्यांतरोदाहरणं चसमर्थ्येदानींविषयसंशयौव्यनक्ति ॥ अत्रेति ॥ छांदोग्ये"अस्यलोकस्यकागतिरिति आकाशइतिहोवाच सर्वाणिहवाइमानिभूतान्याका

अन्येतु सन्निकृष्टानंदमयाक्षेपसंभवेविप्रकृष्टजन्मादिसूत्राक्षेपोनयुक्तइत्याहुः । तन्न । टीकायामानंदमयाक्षेपस्यव्यवहितजिज्ञासाक्षेपपर्यंतत्वोक्तेः । अत्राकाशःकिंभूताकाशःकिंवा ब्रह्मेतिचिंता । तदर्थंकिमाकाशश्रुतिप्रसिद्ध्यनुसारेणपरोवरीयस्त्वादिलिंगंबाध्यंकिंवाविप रीतमिति । तदर्थंप्रसिद्धिबाधेश्रुतेःकिंमुख्यत्वहानिरुतनेति । तदर्थमाकाशशब्दप्रवृत्ति निमित्तंब्रह्मणिकिंनास्त्युतास्तीति । तदर्थंजडस्वभावःकिमीश्वरानधीनउततदधीनइति ।

प्र० शादेवसमुत्पद्यंते आकाशंप्रत्यस्तंयंति आकाशोह्येवैभ्योज्यायानाकाशःपरायणं सएषपरोवरीयानुद्गीथःसएषोनंत" इतिश्रुतेवाक्ये शालावत्ये नकृतस्यपृथिवीगतिप्रश्नस्योक्तत्वेनप्रवाहणेनोक्तआकाशोऽत्रविषयइत्यर्थः । उपलक्षणमेतत् । वाय्वादिभूतवाचिनस्सर्वेपीतिध्येयं ॥ भूतेति ॥ आकाशशब्दस्यावकाशसाधारणत्वेपिभूतप्रकरणत्वाद्भूताकाशइत्युक्तं ॥ बाध्यमिति ॥ सावकाशयितव्यमित्यर्थः ॥ विपरीतमिति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० लिंगानुसारेणश्रुतिर्बाध्येत्यर्थः । प्रसिद्धिबाधेऽन्यपरत्वत्याजने । अस्पष्टांशेफलफलिभावंस्वयमेवाह ॥ **यद्यधीनइति** ॥ अन्यंत्रस्पष्टमि तिभावः । तथाहियदिजडस्वभावईश्वरानधीनस्तदाजडस्वभावंप्रतिस्वातंत्र्यरूपस्यजडवाचिशब्दप्रवृत्तिनिमित्तस्यब्रह्मण्यभावाच्छ्रुतेर्मुख्यत्वहा नेनबाधायोगाच्छ्रुत्याभूतमितिपूर्वपक्षेफलफलिभावः । यद्यधीनस्तदास्वातंत्र्यरूपप्रवृत्तिनिमित्तस्यसत्त्वाद्ब्रह्मणिश्रुतेर्मुख्यत्वेनबाधाभावेनविष्णु रितिसिद्धांतेफलफलिभावः ॥ **तदधीनत्वन्यायेनेति** ॥ ''आनुमानिकमप्येकेषा''मित्यधिकरणे''तदधीनत्वादर्थव''दितिगुणसूत्रे''अव्य क्तात्पुरुषःपर''इत्यादावव्यक्तादिगतावरत्वस्यभगवद्गतत्वाभावेपि''तस्मिन्नेवावरत्वादिवाचिशब्दजातमर्थवत् । प्रधानादिगतपरावरत्वादिध र्माणांभगवदधीनत्वा''दितिवक्ष्यमाणन्यायेनजडस्वभावस्यविवरत्वादेर्भगवत्यभावेपि तदधीनत्वेनजडवाचिशब्दवाच्यत्वंभविष्यतीत्यर्थः । न न्वत्राकाशस्वभावईश्वराधीनइतिवाभूतस्वभावस्तदधीनइतिवाचिंतनीयं । नतुजडस्वभावइतिचेदयंभावः । नकेवलंभूतवाचिनएवोदाहरणं । किंतुस्वभावप्रवृत्तिनिमित्तकास्सर्वेपिजडवाचिनइति । वक्ष्यतेचैतदनुपदं । अनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशंकोपयुक्तेयंचिंतापरंपरा । भाष्यादिसूचितप्रमाणाश्रिताभ्यधिकाशंकोपयुक्तातु लिंगंबाध्यं किंवाविपरीतमित्यनंतरंतदर्थश्रुतिःप्रबलालिंगंतुदुर्बलमुतविपरीतमिति । तदर्थश्रुतिप्राबल्येहेतुरस्तिनवेतिद्रष्टव्या । पूर्वेणेदंगतार्थमित्याक्षिप्यसमाधत्ते ॥ **यद्यपीति** ॥ विषयभेदेनाधिकरणभेदमाशंक्यनिरस्यति

यद्यधीनस्तदातदधीनत्वन्यायेनब्रह्मणिमुख्यत्वमन्यथातुन । यद्यपिनिरवकाशलिंगैर्लोकप्रसिद्धिबाधइहपूर्वत्रचाविशिष्टः

गु० भिमानिद्वारातदुपपत्तिः । कर्तृत्वस्याप्यभिमानिद्वारोपपत्तेरित्याह ॥ **तन्नेति** ॥ अंत्यचिंतायाअव्यवहितोपांत्यचिंतार्थत्वप्रतीतिंवारयति ॥ **यद्यधीनइति** ॥

प्र० ॥ **विषयेति** ॥ तथात्वेविषयाणामनंतत्वेनशास्त्रापर्यवसानंस्यादितिभावः । भाष्येऽनुपलंभादाह ॥ **शंकाचेति** ॥ दर्शितेत्यन्वयः । श्लोकार्थंविशदयन्नधिकाशंकाप्रकारमाह ॥ **तत्रेति** ॥ अत्रेदंद्रष्टव्यं । अयमाकाशोभूतमेव । नतुविष्णुः । तस्यविष्णुवाचित्वंहिरूढ्यायोगेनवा । नाद्यः । भूतएवतस्यास्सत्वेनासिद्धेः । द्वितीयेपियोगःक्लृप्तोवाऽक्लृप्तोवा । आद्येप्यवकाशत्वमाकाशत्वमिति यद्विवरत्वंप्रवृत्तिनिमित्तं तस्यप्रधानादिगतावरत्वादिवद्भगवदधीनत्वेनवा इंद्रादिशब्दप्रवृत्तिनिमित्तैश्वर्यादिवद्भगवद्गतत्वेनवायोगोऽभिमतः । नाद्यः । तदभावात् । कुतइत्यतोचेतनस्वभावइत्यनेनाभिमतंहेतुद्वयमाह ॥ **आकाशशब्दप्रवृत्तिनिमित्तस्येति** ॥ **हेतुद्वयमिति** ॥ साक्षाद्वापरंपरयावेतिशेषः । तत्राकाशगतंविवरत्वंनभगवदधीनं । अचेतनगतत्वादचेतनस्वभावत्वाच्चेतिसाक्षाद्धेतुत्वपक्षे ननुसर्वस्यभगवतोयथेष्टविनियोगयोग्यत्वस्यसिद्ध

विषयवाक्यभेदमात्रेणचनाधिकरणभेदः तथाप्यधिकाशंकानिरासादपौनरुक्त्यं । शंकाच "चेष्टा हिचेतनानांयासाभवेत्तत्प्रसादतः । अचेतनस्वभावस्तुविवरादिःकथंततः"इत्यनुव्याख्यानेदर्शिता । तत्राकाशशब्दप्रवृत्तिनिमित्तस्यविवरत्वादेर्भगवदधीनत्वेऽचेतनगतत्वंस्वभावत्वंचेतिहेतुद्वयंविवक्षितं ।

गु० अस्याधिकरणस्यपूर्वाधिकरणेनगतार्थतांपरिहरति ॥ **यद्यपीति** ॥ नन्वभ्यधिकाशंकायाष्टीकादावप्रदर्शितत्वात्तत्प्रदर्शनेटीकाविरोधःस्यादित्यतआह ॥ **शंकाचेति** ॥ **अचेतनेभगवत्प्रसादोस्तीति** ॥ सेवासाध्यसेवकेष्टानिष्टप्राप्तिपरिहारानुग्रहेच्छाविशेषस्यैवप्रसादशब्दार्थत्वस्य इच्छानिमित्तकोयस्मादित्यनुव्याख्यानउक्तत्वादित्यर्थः । इंद्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिवेतिव्यतिरेकदृष्टांतः ॥ **अन्याधीनत्वेस्वभावत्वहानेरिति** ॥ स्वहेत्वतिरिक्तहेत्वधीनत्वे औत्पत्तिकत्वरूप ॥ ३२३ ॥

प्र० त्वादचेतनगतत्वमनधीनत्वेकथंहेतुरित्याशंक्याद्यंहेतुंदृष्टांतोक्तिपूर्वंविवृणोति ॥ **आद्यइति** ॥ **अदर्शनादिति** ॥ ननुमृदब्रवीदापोऽब्रुवन्नित्यादावभिमानिचेतनेमृदादिशब्दप्रयोगोदृष्टइतिचेन्न । अत्रत्यसिद्धांतन्यायेनाभिमान्यधीनत्वेसिद्धेतदधीनत्वादितिन्यायेनदेवतायांप्रयोगस्यवक्ष्यमाणत्वेनात्रत्यपूर्वपक्षिणोसंप्रतिपत्तेरितिभावः । एतेनाचेतनगतं विवरादिर्विवरत्वादिकं ततः भगवत्प्रसादात् कथं नकथमपीतियोजितं । अनेनलब्धमर्थमाह ॥ **एवंचेति** ॥ तेनरूपेण अचेतनगतप्रवृत्तिनिमित्तकत्वेनरूपेण । प्राणगायत्रीज्योतिरादिशब्दाउदाहरणं । एकस्यानेकत्रोदाहरणंतूपपादयिष्यते । अन्यथातेषुशब्देषुविष्णुवाचित्ववदत्रापिविष्णुवाचित्वप्रसंगादितिभावः । स्वभावत्वहेतुंविवृणोति ॥ **द्वितीयेत्विति** ॥ **स्वाभाविकेति** ॥ स्वभावसिद्धमनागंतुकमेवप्रवृत्तिनिमित्तंयेषांतइत्यर्थः । तर्हिभाष्याद्युक्तोदाहरणविरोधइत्यतआह

तत्राद्येभृत्यगतस्यजयस्यराजाधीनत्वेनराजाजयीतिप्रयोगस्येवाचेतनगतप्रवृत्तिनिमित्तस्यचेतनाधीनत्वेचेतनेजडवाचिशब्दप्रयोगादर्शनात्तत्प्रसादलब्धत्वरूपंतदधीनत्वंशब्दप्रवृत्तिनिमित्तं । नतुयथेष्टविनियोगार्हत्वरूपं । नचाचेतनेभगवतःप्रसादोस्तीतिशंकाभिप्रायः । अतएवानुव्याख्याने "तत्प्रसादत"इत्युक्तं । एवंचाचेतनगतप्रवृत्तिनिमित्तकाःसर्वेपिशब्दाइहतेनरूपेणविचार्याः । द्वितीयेतु इंद्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिवविवरत्वादीनांस्वभावत्वान्नेशाधीनता । अन्याधीनत्वेस्वभावत्वहानेः । भृत्यादिगतस्वाभाविकाभिरूप्यादिनाराज्ञ्यभिरूपादिशब्दाप्रयोगाच्चेतिशंकाभिप्रायः । अत्रापिस्वाभाविकप्रवृत्तिनिमित्तकाश्शब्दास्सर्वेपीहतेनरूपेणविचार्याः ।

गु० स्वाभाविकत्वहान्यापातादित्यर्थः । नन्वेवमचेतनप्रवृत्तिनिमित्तकानांस्वाभाविकप्रवृत्तिनिमित्तकानांचशब्दानामुदाहरणीयत्वे आकाशशब्दस्यैवोदाहरणंकुतइत्यत

SGDF

प्र० ॥ कस्यचिदिति ॥ वाजपेयाधिकरणइति ॥ प्रथमाध्यायेचतुर्थपादे''नामधेयेगुणश्रुतेःस्याद्विधान''मितिपंचमेधिकरणेचिंतितं''वाजपेयेनस्वाराज्यकामोयजेते''त्यत्रवाजपेयशब्दःकिंगुणविधिःकर्मनामवेतिसंदेहे यजेतेत्यत्रयागेद्वितीयाद्यभावेनकर्मत्वकरणत्वयोरप्रतीतेःप्रकृतिप्रत्ययाभ्यांयागभावनामात्राभिधानात्समभिव्याहारेणतयोस्संबंधमात्रमेवावगम्यते । तच्चकर्मत्वकरणत्वसाधारणमितियागकर्मत्वांशेफलसंबधश्चविनैवमत्वर्थलक्षणयातंत्रेणस्यादितिगुणविधिरितिप्राप्ते संबंधमात्रपरत्वे आकांक्षानुदयेनगुणफलयोरन्यतरेणाप्यसंबंधस्स्यात् । लक्षणयाऽन्यतरविशेषपरत्वेऽन्यतरेणैवसंबंधस्स्यात् । उभयविषयपरत्वेतुवाक्यावृत्तिर्गुणप्रधानत्वोद्देश्यत्वोपादेयत्वविध्यनुवादत्वकृतंवैरूप्यंचस्यादिति तंत्रसंबंधासंभवाद्गुणविवक्षासामानाधिकरण्यनिर्वाहायमत्वर्थलक्षणादोषोदुर्वारइति वाजमन्नरूपंसुराद्रव्यंपेयमस्मिन्निति सुराग्रहणविधानात्तत्प्रख्यन्यायेननामधेयमितिसिद्धांतइति । अत्र''सर्वेष्वाख्यातशब्देषुतंत्रसंबंधसंभवात् । मत्वर्थलक्षणादोषोनास्तीत्याक्षिप्यतेऽधुने''त्युक्तरीत्यापूर्वपक्षे उद्भिदादिषुविशिष्टविधिपक्षोद्भावितमत्वर्थलक्षणादोषोद्धारात्सिद्धांतेतद्व्यवस्थापनाच्चोद्भिदादिशब्दानांविचार्यत्वेपियथावाज

कस्यचिदुदाहर्तव्यत्वादानंदमयाक्षेपकत्वाच्चाकाशशब्दउदाहृतः । वाजपेयाधिकरणे उद्भिदादिशब्दानामपिविचार्यत्वेपिवाजपेयशब्दइव । यद्वा

गु०आह ॥ कस्यचिदिति ॥ ननुप्रथमातिक्रमेकारणाभावात्पृथिवीशब्दएवोदाहर्तव्यइत्यतआह ॥ आनंदमयेति ॥ नन्वनेकेषांविचार्यत्वे एकस्यैवोदाहरणंकुत्राप्यदृष्टंप्रकृतएवकथमंगीकार्यमित्यतस्तत्रपूर्वसंप्रतिपन्नदृष्टांतमाह ॥ वाजपेयाधिकरणइति ॥ परस्परनिरपेक्षाभ्यामेवाचेतनगतत्वाचेतनस्वभावत्वाभ्यामाकाशशब्दप्रवृत्तिनिमित्तविवरत्वादेरीश्वरानधीनत्वंप्रसाध्य सापेक्षयोरप्यचेतनगतत्वस्वभावत्वयोरीश्वराधीनत्वसाधकमाह ॥ यद्वेति ॥ अस्मिन्पक्षेतद्गतत्वपक्षःश्लोकाद्ब

SGDF Sri Gargeshwari Digital Foundation

प्र० पेयशब्दोदाहरणंतथाप्रकृतेपीत्यर्थः । एतेन स्वभावरूपंविवरत्वादिकं ततः भगवतः कथं भगवदधीनंकथं स्वभावत्वादितियोजनोक्ताभवति । एवंद्वयोस्तदधीनत्वेसाक्षाद्धेतुत्वमुपपाद्यपरंपरयाहेतुत्वंव्यनक्ति ॥ **यद्वेति** ॥ विवरत्वादिकंनभगवदधीनंभगवत्प्रसादालभ्यत्वाव्यतिरेकेणैश्वर्यादिवत् । तथानागंतुकत्वान्नान्याधीनंव्यतिरेकेणकुलालचक्रभ्रमणवत् । तत्रासिद्धौहेतूइत्यतःक्रमेणाचेतनगतत्वंस्वभावत्वंचहेतुद्वयसमर्थनपरतयेष्यतइतिभावेनविकल्पमुखेनोपपादयति ॥ **विवरत्वादिकमिति** ॥ **सापेक्षयोरिति** ॥ उक्तरीत्यामध्येहेत्वंतरसापेक्षयोरित्यर्थः । यथासावयवत्वस्यकार्यत्वद्वाराकर्तृसाधनत्वंतद्वदिति । तथाचानुव्याख्यानस्येत्थंयोजना । विवरत्वादिर्विवरत्वादिकं कथंततः

विवरत्वादिकंकिमिंद्रादिगतैश्वर्यादिवदीश्वरप्रसादलब्धत्वात्तदधीनंकिंवाकुलालाद्यधीनचक्रादि
भ्रमणवदागंतुकत्वमात्रेण । नाद्यः । तस्याचेतनगतत्वेनतदभावात् । नांत्यः । स्वभावत्वात् ।
तथाचविवरत्वादिकंनेश्वराधीनमितीश्वरानधीनत्वेसापेक्षयोरेवाचेतनगतत्वस्वभावत्वयोर्हेतुत्वं ।

प्र० भगवत्प्रसादात्कथं भगवत्प्रसादलब्धं अचेतनगतत्वात् । तथाचतत्प्रसादलब्धत्वाभावाद्विवरत्वादिकंकथंततःतदधीनंनकथमपीति । तथा विवरत्वादिकंकथंततः तदधीनंकथं अनागंतुकत्वादितिशेषः । तदेवकुतइतिचेत्स्वभावत्वादिति । एवमचेतनस्वभावस्त्वित्यनेनविवक्षितंहेतुद्वयंस्वातंत्र्यरूपप्रवृत्तिनिमित्तनिरसनेसाक्षात्परंपरयावासाधनमित्येतच्छ्लोकारूढतयादर्शितं । विवरत्वादेर्भगवद्गतत्वेनयोगोभिमतइतिद्वितीयःकल्पः । तन्निरासस्तुश्लोकाद्बहिरेवध्येयः । तथाहि । विवरत्वादिकमैश्वर्यादिवन्नभगवद्गतमितिसाध्यमध्याहार्यं । हेतुस्त्वचेतनगतत्वादिति । ननूक्तपक्षद्वयेतदधीनत्वनिरासएवश्लोकारूढोनतद्गतत्वनिरासः । नचतद्गतत्वंनिमित्तमेवनेतिवाच्यं । अनुव्याख्यानविरोधादित्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० नुशयेनद्वयोरपिश्लोकारूढतयाकल्पांतरमाह ॥ **यद्वास्वातंत्र्यमिति** ॥ **विवरत्वादिकमिति** ॥ श्लोकेभावप्रधाननिर्देशइत्युक्तंभवति ॥ **सापेक्षयोरिति** ॥ तद्गतत्वाभावतदनधीनत्वरूपहेतुद्वयंमध्येऽपेक्ष्याचेतनस्वभावइत्यत्रविवक्षितंहेतुद्वयंनिमित्तत्वाभावंसाधयतीत्यर्थः ॥ **सार्वविभक्तिकेति** ॥ यद्यपि''पंचम्यास्तसि''लितिपंचम्यर्थएवविहितस्तथापि''प्रतियोगेपंचम्यास्तसिः । आद्यादिभ्यउपसंख्यान''मित्युक्तेः''यतोयतोनिश्चरतिमनश्चंचल''मित्यादाविवसप्तम्यर्थेतसिरित्यर्थः । तथाचैवंयोजना । विवरत्वादिकंकथंततः तत्रभगवतिकथं कुतः अचेतनगतत्वात् ततश्चतद्गतत्वाभावान्ननिमित्तमिति । तथाविवरत्वंकथंततः तदधीनंकथं कुतः स्वभावत्वात् । ततश्चतदधीनत्वाभावान्ननिमित्तमिति । पूर्वोक्तपक्षयोरस्यपक्षस्यविशेषंस्वयमेवाह ॥ **अस्मिन्मतइति** ॥ **बहिरेवेति** ॥ उक्तमिदंप्राक्तत्रैवास्माभिः । एवं स्वयमनुव्याख्यानस्यत्रेधाभिप्रायमुक्त्वा सुधोक्तमपिप्रकारांतरमनुसंधेयमितिभावेन तदुक्तंसंग्रहेणानूद्यतदभिप्रायंतावदस्फुटत्वाद्व्यनक्ति ॥

यद्वा''स्वातंत्र्यंतद्गतत्वंचशब्दवृत्तेर्हिकारण''मित्युक्तत्वाद्द्वयंनिमित्तं । तत्रनतावन्निरवधिकैश्वर्यादिवन्निरवधिकंविवरत्वादिकंब्रह्मगतं । तस्याचेतनगतत्वात् । नापिपुरंदरादिगतैश्वर्यवत्तदधीनं । स्वभावत्वात् । तथाच विवरत्वादिकंब्रह्मण्याकाशादिशब्दवृत्तौननिमित्तमितिनिमित्तत्वाभावेसापेक्षयोर्हेतुत्वं । श्लोकेसार्वविभक्तिकतस्यंतस्यततश्शब्दस्यतत्रेत्यप्यर्थः । अस्मिन्मतेतद्गतत्वपक्षोपिश्लोकेनैवदूषितः । मतांतरेतुबहिरेवदूष्यः ।

गु० हिरेवदूष्योभवतीत्यस्वरसात्पक्षांतरमाह ॥ **यद्वेति** ॥ नन्वनुव्याख्यानेविवरत्वादेरीश्वराधीनत्वाभाव एवविवरादिःकथंततइत्यादिनोक्तः । भवद्भिश्चविवरादेरीश्वरगतत्वाभावोपिचेदुच्यते तर्ह्यनुव्याख्यानविरोधःस्यादित्यतआह ॥ **श्लोकइति** ॥ नन्वेवमनुव्याख्यानेसुधाविरोधइत्यतस्तदुक्तंप्रकारांतरमित्यभिप्रायेणतत्रानुपपत्ति

प्र० **सुधायांत्विति** ॥ स्वरूपतः ज्ञानादिहेतुमनपेक्ष्य । नन्वेवंसुधायां''ननूक्तमन्यत्रान्यरूढेरविद्वत्संबंधित्वाद्योगस्यचपरमेश्वरायत्तात्पनिमित्तत्वादमुख्यतेति । सत्यं । तदन्नौषध्यादिपदार्थेषुस्यान्नतुपुरंदरादिष्वित्यादिनाचेतनस्यापिभगवदधीनत्वोक्तिरयुक्तेत्यतआह ॥ **यत्त्विति** ॥ नन्वत्रानंगीकुर्वन्पूर्वपक्षीतत्रकथमंगीकुर्यादित्यतआह ॥ **नहीति** ॥ उत्तरप्रस्थानाविरोधायटीकार्थमाह ॥ **अनुव्याख्यानेति** ॥ यद्वाविवर

सुधायांतु''नतावद्विवरत्वादिकमैश्वर्यादिवदागंतुकज्ञानादिरूपहेतुद्वारेश्वरायत्तं । अचेतनाश्रितत्वात् । नापिस्वरूपतः । स्वभावत्वा''दितिव्याख्यातं । तत्रेंद्रादिशब्दप्रवृत्तिनिमित्तेपालनादिरूपप्रयत्नात्मकैश्वर्येज्ञानादेरेवहेतुत्वदर्शनादत्रापिज्ञानादिरेवहेतुर्वाच्यः । सचाचेतनेनास्तीत्यभिप्रायः । यत्तुसुधायांअंतरधिकरणपूर्वपक्षेऽचेतनस्वभावस्यान्नत्वादेर्भगवदधीनत्वांगीकरणं तदेतदधिकरणसिद्धांतन्यायानुसंधानेन । नह्येतदधिकरणपूर्वपक्षस्थेनैवतत्रापिपूर्वपक्षिणाभाव्यं । तथात्वएतदधिकरणसिद्धांतेनैवतत्रत्यपूर्वपक्षनिरासेनतत्रत्यसिद्धांतवैयर्थ्यात् । अनुव्याख्यानसुधाद्यनुसारेणचात्रापिटीकायां''आकाशस्याचेतनत्वेनान्याधीनत्वायोगा''दित्यादावाकाशपदंतत्पदप्रवृत्तिनिमित्तपरं ।

गु० परिहारपूर्वकंतदनुवदति ॥ **सुधायांत्विति** ॥ नन्वंतरधिकरणपूर्वपक्षीयसुधायां अचेतनस्वभावस्याप्यन्नत्वादेर्भगवदधीनत्वाभ्युपगमात्कथमत्रतदभावेनपूर्वपक्षकरणेतत्सुधाविरोधोनस्यादित्यतआह ॥ **यत्त्विति** ॥ नन्वाकाशपदप्रवृत्तिनिमित्तविवरत्वादेर्भगवदधीनत्वाभावेनतद्गतत्वाभावेन शब्दप्रवृत्तिकारणीभूतस्वातंत्र्यतद्गतत्वयोरभावादाकाशशब्दस्यब्रह्मपरत्वंनसंभवतीतिपूर्वपक्षेक्रियमाणेटीकाविरोधःस्यात् । टीकायामाकाशस्याचेतनत्वेनेश्वराधीनत्वासंभवस्यप्रतिपादितत्वादित्यतआह ॥ **अनुव्याख्यानेति** ॥ आकाशपदंतत्पदप्रवृत्तिनिमित्तपरमित्युपलक्षणं । अचेतनेत्यत्राचेतनपदंतद्गतपरमित्यपिद्रष्टव्यं । ननुरूढस्याकाशशब्दप्रवृत्तिनि

SGDF Sri Gangadhara Digital Foundation

प्र० त्वस्यभगवदधीनत्ववर्णनंटीकाविरुद्धमित्यतआह ॥ **अनुव्याख्यानेति** ॥ क्लृप्तोयोगोनेत्युपपादितमुपसंहरति ॥ **तस्मादिति** ॥ **रूढंवेति** ॥ शब्दाश्रयत्वादिरूपंवेत्यर्थः । निमित्तमित्यन्वयः । ननुमास्तुक्लृप्तोयोगःकल्प्योभविष्यतीतिद्वितीयंपक्षंनिरस्यति ॥ **आसमंतादिति** ॥ असिद्धत्वेहेतु**र्वैदिकप्रयोगेति** ॥ आदिपदेनप्रवृत्तिनिमित्तपौष्कल्यग्रहणं । ननुविद्वद्रूढिमहायोगावसिद्धावितिकथं । अनुव्याख्यानविरोधादित्यतआह ॥ **यत्त्विति** ॥ "अन्नादिशब्दैर्भगवानेकोमुख्यतयोदित"इत्युत्तरार्धेनान्वयः । ननुयद्येवंतर्हि"यद्यानंदमयोभ्यासादितिव

तस्मादाकाशादिशब्दानांक्लृप्तंरूढंवा "आकाशनमवकाशत्व"मितिसुधोक्तंयौगिकंवाक्लृप्तंनिमित्तंनेश्वरगतं । नापितदधीनं । आसमंतात्काशतइतिकल्प्योयोगस्तुक्लृप्तयाभूताकाशेरूढ्याबाधितः । विद्वद्रूढिमहायोगौत्वसिद्धौ । वैदिकप्रयोगबाहुल्यादेरद्याप्यसिद्धेः । यत्त्वानंदमयाधिकरणे "अध्यात्मगैश्चप्राणाद्यैस्तथैवह्यधिभूतगै"रित्याद्यनुव्याख्यानं तदानंदमयप्रकरणस्थाकाशादिशब्दानांब्रह्मपरत्वायाकाशाद्यधिकरणेवक्ष्यमाणन्यायमुपजीव्यप्रवृत्तमिति नतेनविद्वद्रूढ्यादिसिद्धिः । तस्माद्युक्ताऽभ्यधिकाशंका । इयंचप्रमेयाश्रिताऽऽकाशशब्दस्यब्रह्मणिमुख्यत्वविरोधिनीशंका ।

गु० मित्तस्यभगवद्धतत्वाद्यसंभवेपियौगिकस्यतद्भविष्यतीत्याशंकामुपसंहारव्याजेनपरिहरति ॥ **तस्मादिति** ॥ हेतुद्वयंतूक्तमेवेतिभावः । नन्वासमंतात्काशतइतियोगलभ्यप्रवृत्तिनिमित्तस्यप्रकाशत्वस्यभगवद्धतत्वात्तद्वाचकत्वमित्यतआह ॥ **आसमंतादिति** ॥ रूढिर्योगमपहरतीतिन्यायादितिभावः । विद्वद्रूढिमहायोगाभ्यांतद्वाधइत्यतआह ॥ **विद्वदिति** ॥ वैदिकप्रयोगादेवतत्सिद्धिरित्यतआह ॥ **वैदिकेति** ॥ नन्वानंदमयाधिकरणे अध्यात्मगैश्चेत्यनुव्याख्यानेनविद्वद्रूढेःसाधितत्वादित्यतआह ॥ **यत्त्विति** ॥ नकेवलमुक्तैवाभ्यधिकाशंका किंत्वन्यापीत्याह ॥ **इयंचेति** ॥ वाक्यस्येतिविरोधित्वोपपादनाय । वाक्यस्यब्रह्मपरत्वविरोधिनीप्रमाणाश्रि

SGDF Sri Gargeshwari Digital Foundation

प्र० दत:सूत्रकारस्यैतावानर्थोभिमतोभवेत्तर्हिततएवगतार्थत्वादंतस्तद्धर्मोपदेशादित्याद्यधिकरणानामनुत्थानमेवस्या”दित्याशंक्य“अभ्यधिकाशंकासद्भावेनाधिकरणांतरारंभोपपत्ति”रित्यंतराधिकरणोपक्रमसुधाविरोधः । तत्रविद्वद्रूढिमहायोगौसर्वशब्दानांसिद्धावित्युपेत्यतदाच्छादकाभ्यधिकाशंकयाऽधिकरणारंभसमर्थनोक्तिप्रतीतेरितिचेन्मैवं । उत्तरत्रतदाच्छादकाभ्यधिकाशंकोक्तेरदर्शनात् । “अन्नौषध्यादिपदार्थेषुस्यान्नतुपुरंदरादि”ष्वितिवाक्यस्यगतेरुक्तत्वात्सूत्रकारस्याकाशाद्यधिकरणन्यायेनाभिमतस्यभाष्यकारेणतत्रकथनेपिविद्वद्रूढिमहायोगयोरसिद्धत्वादिनाऽऽक्षेपेणपूर्वपक्षप्रवृत्तिसंभवेनतद्वाक्यस्याप्येवंयोज्यत्वादितिभावः । तस्माद्विद्वद्रूढिमहायोगयोरेतत्सिद्धांतात्पूर्वमसिद्धत्वादनुव्याख्यानोक्तायुक्तेत्यर्थः । इयं अनुव्याख्यानोक्ता आकाशपदप्रवृत्तिनिमित्तविवरत्वरूपप्रमेयमाश्रित्यप्रवृत्तेत्यर्थः ॥ **प्रमाणेति** ॥ आकाशपदरूपमाश्रित्यवर्तमानेत्यर्थः ॥ **ब्रह्मपरत्वेति** ॥ शक्तितात्पर्यावधारणंहिसमन्वयः । तत्रपूर्वंशक्तिर्नेत्युक्तं । अधुनातात्पर्यंनेत्युच्यतइत्यर्थः । भाष्यादावुदाहृतबहुकृत्वःश्रुताकाशपदोपेतविषयवाक्यसूचितामाह ॥ **युक्तइति** ॥ पूर्वत्र अंतरधिकरणे । लिंगस्य अनंतत्वादिलिंगस्य ।

प्रमाणाश्रितावाक्यस्यब्रह्मपरत्वविरोधिनीशंकातु युक्तःपूर्वत्रश्रुतित्वमात्रप्रयुक्तप्राबल्यान्निरवकाशत्वप्रयुक्तप्राबल्यस्यबलवत्त्वान्निरवकाशलिंगेनश्रुतिबाधः । अत्रत्वाकाशश्रुतेः “आकाशादेवसमुत्पद्यंते आकाशंप्रत्यस्तंयंति आकाशोह्येवैभ्योज्यायान् आकाशःपरायण”मितिबहुकृत्वःश्रुतत्वात् श्रुतित्वबहुत्वोभयप्रयुक्तप्राबल्यान्निरवकाशत्वमात्रप्रयुक्तप्राबल्यस्यदुर्बलत्वान्निरवकाशस्यापिलिंगस्यबाधः ।

गु० ताशंकातु इत्येकेत्यन्वयः । कीदृशीसेत्यतस्तामाह ॥ **युक्तइत्यादिना** ॥ एवंचात्रपूर्वाधिकरणवैषम्येणपूर्वपक्षोत्थानादनंतरसंगतिरुक्ताभवति । ननुश्रुतित्वबहुत्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० बाधः संकोचइत्यर्थः । ननुपूर्वत्रबहुकृत्वश्श्रुतस्यापींद्रशब्दस्यसमुद्रशायित्वादिलिंगेनबाधउक्तइत्यतआह ॥ **अतएवेति** ॥ उभयप्रयुक्तप्राबल्यस्यबलवत्त्वादेवेत्यर्थः ॥ **सवित्रादीति** ॥ अतद्गुणसंविज्ञानेनबृहस्पत्यादिश्रुतिरितिध्येयं । सवितृश्रुतिबहुत्वस्यापिसत्त्वात् । नन्वेकस्याकारभेदेनाप्यनेकत्रोदाहरणमदृष्टचरमित्यतआह ॥ **यथेति** ॥ “अग्निहोत्रंजुहोती”त्यत्रत्याग्निहोत्रशब्दोयथा“अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेतिसायंजुहोती”तिनामधेयत्वापादकगुणप्रख्यापकशास्त्रांतरविषयतयानामधेयपादे“तत्प्रख्यंचान्यशास्त्र”मितितृतीयाधिकरणोदाहरणं। “दध्नाजुहोती”त्यादिवाक्यप्राप्तहोमसमुदायानुवादकत्वशंकाविषयतयाद्वितीयाध्यायद्वितीयपादेपंचमाधिकरणे उदाहरणं तद्वदित्यर्थः ॥ **यथाचजीवकारणतेति** ॥ “इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति”रितियुक्तिपादीयसप्तमाधिकरणे“जीवाद्भवंतिभूतानी”त्यादिश्रुतिसं

अतएवपूर्वत्रसवित्रादिश्रुतेरबहुत्वेनबाधेपींद्रश्रुतेर्बहुत्वान्नबाधः । एवंचेंद्रश्रुतिःश्रुतित्वेनतत्रोदाहरणं। बहुश्रुतित्वेनात्रापि । यथाग्निहोत्रादिशब्दोनामधेयतयानामधेयपादेतूदाहरणंसमुदायानुवादापवादतयाशब्दांतरपादेयथाचजीवकारणता श्रुतिप्राप्ततयाद्वितीयस्याद्यपादउदाहृता । समयप्राप्ततयातुद्वितीयपादे यथाचायमेवाकाशशब्दोऽन्यत्रप्रसिद्धत्वेनात्रोदाहरणमुभयत्रप्रसिद्धत्वेनतु

गु० प्रयुक्तप्राबल्यापेक्षयानिरवकाशसमुद्रस्थत्वादिलिंगस्यबाध्यत्वमित्यतआह ॥ **अतएवेति** ॥ निरवकाशत्वमात्रप्रयुक्तप्राबल्यापेक्षयाश्रुतित्वबहुत्वप्रयुक्तप्राबल्यस्यप्रबलत्वादेवेत्यर्थः । ननुकथमेकस्यैवैकत्रश्रुतित्वेनान्यत्रबहुश्रुतित्वेनोदाहरणमन्यत्रादृष्टमत्रैवकथमंगीकार्यमित्यतः किंपूर्वतंत्रेनदृष्टमस्मिंस्तंत्रेवेतिविकल्प्यक्रमेणदूषयति ॥ **यथेत्यादिना** ॥ तत्प्रख्यंचान्यशास्त्रमित्यत्रेत्यर्थः ॥ **शब्दांतरपादइति** ॥ आघाराग्निहोत्रमरूपत्वादित्यत्र अग्निहोत्रंजुहोतीत्यस्यदध्नाजुहोतीत्यादिवाक्यप्रा

प्र० वादिचेतनत्वादियुक्तिप्राप्ततयोदाहृतापिजीवकर्तृता“अन्यथानुमितौचज्ञशक्तिवियोगा”दितिसमयचरणपंचमाधिकरणेप्रकृत्युपसर्जनपुरुषकर्तृकमतप्राप्ततयोदाहृता तद्वदित्यर्थः । उक्तंचटीकायांइतरव्यपदेशादित्यत्र“अत्रजीवाद्भवंतिभूतानीतिश्रुतिप्राप्तोजीवकर्तृत्वपक्षोनिराक्रियते । उत्तरत्रतुसमन्वयप्राप्तइत्यर्थभेद”इति ॥ **तृतीयइति** ॥ द्युभ्वादिपादे “आकाशोर्थांतरत्वादिव्यपदेशा”दितिद्वादशेऽधिकरणे उदाहरणमित्यर्थः । “विवरादिःकथंतत”इतिशंकानिवृत्त्यर्थं“आकाशइतिनामच । परतोपिवरीयस्त्वपूर्वाल्लिंगाद्धरेर्भवे”दित्यनुव्याख्यानेनामपदसूचितशंकांतरमाह ॥ **अपरात्विति** ॥ युक्तमिंद्रादिशब्दानांविष्णुपरत्वमित्यन्वयः । तत्रहेतुत्रयमभिप्रेत्यसदृष्टांतमाह ॥ **श्येनेति** ॥ “श्येनेनाभिचरन्यजेते”त्यत्रतृतीयांततयानिर्दिष्टस्यश्येनशब्दस्यान्यत्रनिरूढस्यापिप्रत्ययार्थभूतभावनाकरणतासमर्थयागवाचियजिधातुसामानाधिकरण्यात् “यथावैश्येनोयंनिपत्यादत्त”इतिसादृश्यबोधकवाक्यशेषाच्चयागपरत्वं तथा“मत्सिसोमवरुणंमत्सिमित्रंमत्सींद्रमिंदोपवमानविष्णु”मितिविष्णुशब्दसामानाधिकरण्याद्योदेवानामितिविशेषश्रवणाच्चेत्यर्थः । नचेंद्रंविष्णुंचमत्सिमदयसीतिपृथगन्वयोपपत्तेस्सामानाधिक

तृतीये तद्वदित्येका। अपरातु युक्तमन्यत्रनिरूढानामपींद्रादिशब्दानांश्येनादिशब्दानांयजिसामानाधिकरण्यवत् “मत्सींद्रमिंदोपवमानविष्णुं”इत्यादौविष्णुशब्दसामानाधिकरण्यात् “योदेवानांनामधा”इतिविशेषश्रवणादन्यत्रानिरूढांतस्स्थत्वमुखसद्भावाच्चविष्णुपरत्वं ।

गु० सहोमसमुदायानुवादकत्वेतदपवादकत्वंसिद्धांतितमितिभावः । अन्यत्रनिरूढानामपींद्रादिशब्दानांविष्णुपरत्वंयुक्तमित्यन्वयः। तत्रहेतुत्रयं **मत्सींद्रमित्यादि** ॥ विष्णुशब्दसामानाधिकरण्येनेंद्रशब्दस्यविष्णुपरत्वमित्यत्रदृष्टांतः **श्येनादिशब्दानामिति** ॥ यजिसामानाधिकरण्येनश्येनादिशब्दानांयागपरत्ववदित्यर्थः । अर्थो

SGDF Sri Gargeshwari Digital Foundation

प्र०रण्यमसिद्धमितिवाच्यं । तथासतिवरुणादिषुपृथक्पृथङ्मत्सिशब्दवन्मत्सींद्रंमत्सिविष्णुमितिपृथङ्मत्सिशब्दश्रवणापातात् । सर्वेषांपृथङ्मत्सिशब्ददर्शनेनैकस्यैवान्यथात्वायोगादश्रुतकल्पनापाताच्च । "मत्सिमहामिंद्रमिंदोमदाये"त्यन्येंद्रस्यपृथगुक्त्यापौनरुक्त्यापाताच्च । महत्त्वस्यादितिपुत्रत्वेनाग्रजत्वमात्रेणोपपत्तेश्चेतिव्यक्तमेतदैतरेयभाष्यइतिभावः । तृतीयहेतुंदृष्टांतेनोपपादयति ॥ **उत्पत्तिशिष्टेति** ॥ तृतीयेध्यायेपंचमेपादे "फलचमसोनैमित्तिकोभक्षविकारश्श्रुतिसंयोगा"दित्युपांत्याधिकरणेचिंतितं "यदिराजन्यंवैश्यंवायाजयेत् सयदिसोमंबिभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्यतास्संपिष्यदधन्युन्मृज्यतमस्मैभक्षंप्रयच्छेन्नसोम"मित्यत्रराजन्यवैश्यनिमित्तेनसोमविकारतयाश्रूयमाणःफलचमसःकिंतद्भक्षमात्रेसोमंविकुर्यादुतयागेपीतिसंशये बिभक्षयिषेदितिभक्षंप्रयच्छेदितितूपक्रमोपसंहाराभ्यांतत्रैवविकारोनयागे । अश्रवणादितिप्राप्ते यागसाधनद्रव्यसंस्काररूपभक्षसंबंधित्वेनश्रूयमाणःफलचमसःअन्यथातत्संबंधायोगाद्यजमानचमसयागाभ्याससाधनत्वंप्रतिपद्यते । अतोयागेपिसोमविकारइति । अत्रोत्पत्तिशिष्टनित्यापेक्षयानैमित्तिकस्योत्पन्नशिष्टस्यापिप्राबल्यात्फलचमसस्ययागसाधनद्रव्यसंस्काररूपभक्षणद्वारायागसाधनत्वेनयथायागेऽनुप्रवेशः तथेंद्रादिशब्देपिपुरंदरादिरूपार्थांतरवाचिन्यपिवाच्यतयाब्रह्मानुप्रवेशइत्यर्थः । प्रकृतेतद्वैषम्य

उत्पत्तिशिष्टसोमावरुद्धेपियागउत्पन्नशिष्टस्यफलचमसस्यभक्षणमुखेनानु
प्रवेशवदर्थांतरावरुद्धेपींद्रादिशब्देंतस्स्थत्वमुखेनब्रह्मप्रवेशाविरोधात् । ॥ ३२८ ॥

गु०तरावरुद्धानांतेषांकथंब्रह्मपरत्वमित्यतआह ॥ **अर्थांतरावरुद्धेपीति** ॥ तत्रदृष्टांत **उत्पत्तिशिष्टेति** ॥ यागोत्पत्तिविधायकेवाक्येविहितंद्रव्यमुत्पत्तिशिष्टंद्रव्यं ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० माह ॥ आकाशेति ॥ तदितिविष्णुवाचिशब्दःपरामृश्यते । ननु“आकाशोवैनामनामरूपयोर्निर्वहिता तेयदंतरातात्तद्ब्रह्मतदमृतंसआत्मे”तिछांदोग्येविष्णवसाधारणब्रह्मशब्दसामानाधिकरण्यमस्तीतिचेन्न । तत्रप्रसिद्धिद्योतकनिपातबलेनब्रह्मादिशब्दानांविष्णुवाचित्वस्यपूर्वपक्षिणोसंमतेः । ननुतथापिकथंविशेषश्रुत्यभावादिति । “नामानिसर्वाणियमाविशंती”तिश्रुतेस्सत्वादितिचेन्न । देवानामितिवद्भूतानामिति विशिष्याभावात् । अतएवविशेषेत्युक्तं । योदेवानामितिश्रुत्यनुसारेणसर्वाणीतिसामान्यशब्दस्यसंकोचोपपत्तेश्चेतिभावः ॥ **आमिक्षावरुद्धइति** ॥ द्वितीयस्यद्वितीयेपादे “गुणश्चापूर्वसंयोगेवाक्ययोस्समत्वा”दितिनवमेधिकरणेचिंतितं“वैश्वदेव्यामिक्षे”तियागंविधायाम्नाते“वाजिभ्योवाजिन”मिति । अत्रकिंपूर्वस्मिन्नामिक्षायागेवाजिनंगुणोविधीयतेकिंवाकर्मांतरमितिसंशये वाजिशब्देनामिक्षायागदेवतारूपविश्वेदेवप्रत्यभिज्ञानात्तत्रसंबध्यमानंवाजिनंपूर्वकर्मण्येवविहितंभवति । संभवतिचैवंगुणमात्रविधानेविशिष्टविधिगौरवंनाश्रयितुंयुक्तं । अतःपूर्वयागेवैकल्पिकद्रव्यविधानमितिप्राप्ते आमिक्षायुक्तस्यैवोत्पत्तौपूर्वयागस्यावगमाद्वाजिनविधौ तेनैवरूपेणानुवाद्यत्वात्तस्यद्रव्यांतरसंबंधापेक्षायोग्यत्वयोरभावात्तत्रनिवेशमलभमानंवाजिनं आत्मनिवेशक्षमंकर्मांतरंसाधयतीतिकर्मांतरविधिरिति । तद्विरोधान्नविष्णुपरत्वमित्यर्थः ।

आकाशशब्दस्यतुक्वापितत्सामानाधिकरण्याभावाद्विशेषश्रुत्यभावादन्यत्रानि
रूढमुखाभावाच्च आमिक्षावरुद्धेयागेवाजिनवद्विरोधान्नविष्णुपरत्वमिति ।

गु०विशेषेति ॥ योभूतानांनामधाइतिविशेषश्रुत्यभावादित्यर्थः । विरोधात् हेयत्वाभावलक्षणविरोधात् । अत्रदृष्टांतः **आमिक्षावरुद्धइति** ॥ **उपक्रमस्थत्वेनेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अत्रोदाहृतविषयवाक्यपर्यालोचनयाप्राप्तंशंकांतरमप्याह ॥ **अन्यात्विति** ॥ उपक्रमाधिकरणन्यायेनोपक्रमस्थप्राबल्यंमन्वानस्यशंकितुरुपक्रमस्थत्वेनेत्युक्तिः । ननुश्रुतेरपिपूर्वत्रलिंगाद्बाधउक्तइत्यतोवैषम्यंद्वेधादर्शयति ॥ **इंद्रेति** ॥ निरवकाशलिंगविरोधइत्यतआह ॥ **प्रबलेति**॥ **कथंचिदिति** ॥ संकुचितानंतत्वादिनेत्यर्थः । तदुक्तंसन्न्यायरत्नावल्यां "प्रथमपठितत्वात्प्रसिद्धत्वाच्चतत्रैववाक्यशेषोभाक्तोवर्णनीय" इति । सुधायांच "प्रथमावगतस्वभावबलवत्त्वानुरोधेनलिंगानिकथंचिद्योज्यानी" ति । उक्ताश्चप्रमाणाश्रितास्तिस्रश्शंकानानवधेयाइतिभावेनमूलमाह ॥ **एताश्चेति** ॥ आद्यतृतीयेविषयवाक्यसूचिते । द्वितीयातुनामोक्त्येतिध्येयं । एवंप्रमेयाश्रिताःप्रमाणाश्रिताश्चाभ्यधिकाशंकाःप्रद

अन्यातुआकाशशब्दस्योपक्रमस्थत्वेनश्रुतित्वेनचप्रबलत्वादिंद्रबृहस्पत्यादिशब्दवच्चपरस्परविरुद्धनानार्थोपस्थापकत्वाभावे नैकवाक्यत्वभंगाभावात् आकाशब्रह्मणोर्विरुद्धांशत्यागेनैक्यांगीकारेचपूर्वत्रेवात्रबाधकस्यभेदव्यपदेशस्याभावाच्चाकाशशब्दःप्रसिद्धार्थपरइति प्रबलश्रुत्यनुसारेणचानंतत्वादिलिंगानिकथंचिद्भूताकाशेयोज्यानि । एताश्चप्रमाणश्रिताःशंकाअनुव्याख्याने "आकाशइतिनामचे" त्यन्यत्रानिरूढमुखांतरेणविष्णुशब्दसामानाधिकरण्येनविशेषश्रवणेनचरहितनामोक्त्या अत्रभाष्यटीकयोरसकृच्छ्रुतोपक्रमस्थाकाशैकशब्दवतोभेदव्यपदेशशून्यस्यचविषयवाक्यस्योदाहरणेनचसूचिताः ।

गु० उपक्रमस्थत्वेनप्राबल्यंतूपक्रमाधिकरणएवनिर्णीतमितिभावः । ननुपूर्वाधिकरणइंद्रादिशब्दानांतत्तत्परत्वएकवाक्यताभंगवत् अत्राप्यनंतादिशब्दानांविष्णुपरत्वेआकाशशब्दस्यप्रसिद्धपरत्वे एकवाक्यताभंगःस्यादित्यतआह ॥ **इंद्रेति** ॥ ननुनैकवाक्यताभंगाभावः । अत्रापिविरुद्धार्थोपलंभकस्यानंतशब्दस्यसत्त्वादित्यतआह ॥ **आकाशेति** ॥ तर्ह्यनंतत्वादिलिंगानांकागतिरित्यतआह ॥ **प्रबलेति** ॥ नन्वेतासांशंकानांभाष्यानुव्याख्यानटीकादावनुक्तत्वात्तद्विरोधइतितत्राह ॥ **एताश्चेति** ॥ ॥ ३२९ ॥

प्र० इयं "आकाशशब्दस्यावकाशेपिरूढत्वा" दित्यादिटीकांविवृण्वन्पूर्वोत्तरप्रस्थानयोर्विरोधमाशंक्यसमाधत्ते ॥ **ननुचेति** ॥ "अस्यलोकस्यकागतिरित्याकाशइतिहोवाचेत्यत्रभूताकाशस्यप्राप्ति" रितिभाष्ये अस्यलोकस्येतिपूर्ववाक्योदाहरणं तात्पर्यनिरूपणपरतया "पृथिवीगतित्वोपपादनायसर्वाणिहवाइमानी" त्यादिटीकयालब्धार्थानुवादो **भूतप्रकरणादित्यादि** ॥ अनुचरंतीत्युक्त्याविवरत्वंलब्धमितिभावः । श्रुत्या ऐतरेयश्रुत्येत्यर्थः । "तामसाच्चविकुर्वाणाद्भगवद्वीर्यचोदितात् । शब्दमात्रमभूत्तस्मान्नभश्श्रोत्रंतुशब्दगं । अर्थाश्रयत्वंशब्दस्यद्रष्टुर्लिंगत्वमेवच । तन्मात्रत्वंचनभसोलक्षणंकवयोविदुः । भूतानांच्छिद्रदातृत्वंबहिरंतर्दिगेवच । प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षण" मितितृतीयस्कंधगतस्मृत्येत्यर्थः । अधिकाशंकाप्रदर्शनस्यफलमाह ॥ **एवंचेति** ॥ एवमभ्यधिकाशंकयापूर्वपक्षोत्थितिमुक्त्वा इदानींकिंनएतेनयत्नेन । विनै

ननुचभूतप्रकरणाद्भूतकारणत्वलिंगाच्चभाष्येभूताकाशस्यप्राप्तिरित्युक्तं । अनुव्याख्यानेचविवरत्वादिराकाशस्वभावइत्युक्तं । तत्कथं । अवकाशरूपाव्याकृताकाशस्वभावत्वाद्विवरत्वस्येतिचेन्न । "प्राणेनसृष्टावंतरिक्षंचवायुश्च अंतरिक्षंवाअनुचरंती" त्यादिश्रुत्या "शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगं । भूतानांच्छिद्रदातृत्व" मित्यादिस्मृत्याचाचार्यैःप्राणिसंचरणाद्यनुकूलत्वरूपंविवरत्वंभूताकाशस्यस्वभावइत्यंगीकारेणाविरोधात् । एवंचाधिकाशंकयापूर्वपक्षोत्थानान्नपूर्वेणगतार्थता ।

गु० तत्रद्वितीयशंकानुव्याख्यानेसूचिता । प्रथमतृतीयेतुभाष्यटीकयोरितिविवेकः । नन्वत्राकाशःकिंभूताकाशोव्याकृताकाशोवा । नाद्यः । अनुव्याख्यानविरोधापत्तेः । नद्वितीयः । भाष्यविरोधात् । तत्रभूताकाशस्यपूर्वपक्षितत्वादितिशंकते ॥ **नन्विति** ॥ अत्रभूताकाशइत्याद्यपक्षएवास्तु । नचानुव्याख्यानविरोधइतिवाच्यं । प्राणिसंचरणाद्यनुकूलछिद्रदातृत्वरूपविवरत्वस्यभूताकाशस्वभावत्वांगीकारेणविरोधाभावात् । नचैतदप्रामाणिकं । श्रुतिस्मृत्योःसत्त्वादित्याह ॥ **प्राणेनेति** ॥ नन्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० वाभ्यधिकाशंकांपूर्वपक्षोत्थितिसंभवात् । अनुव्याख्यानेतत्प्रदर्शनस्यदार्ढ्यार्थत्वेनोपपत्तेरितिभावेनाह ॥ यद्वेति ॥ अथवा अवश्यवक्तव्यशंकायाअनुक्तत्वाद्भाष्यस्यन्यूनतेत्याशंक्यभाष्याभिप्रायंवक्तुंपक्षांतरमाह ॥ यद्वेति ॥ अतएवेति ॥ विष्णुलिंगत्वानिश्चयादेवेत्यर्थः । अन्यथातन्नस्यादितिभावः ॥ अतएवचेति ॥ अधिकाशंकाभावेपिपूर्वपक्षोदयसंभवादेवेत्यर्थः । इतरथातदुक्तिरवश्यंस्यादितिभावः ।

यद्वा येनसमुद्रांतस्स्थत्वादिलिंगेनपूर्वत्रसिद्धांतोनतेनैवात्रापि । किंत्वनंतत्वादिलिंगांतरेणैव । एवं चात्रपूर्वपक्षेंतरधिकरणेभाष्योदाहृतश्रुत्यादिनासमुद्रांतस्स्थत्वादेर्विष्णुलिंगत्वनिश्चयेप्यनंतत्वादेस्तदनिश्चयादाकाशश्रुतिबलाच्चाकाशस्यैवानंतत्वादिनिश्चयाद्युक्तोभ्यधिकाशंकाभावेपि पूर्वपक्षोदयः । एवंज्योतिरधिकरणादावपिपूर्वपक्षेऽनंतत्वादेर्विष्णुलिंगत्वनिश्चयेपिकर्णादिविदूरत्वादेस्तदनिश्चयाज्ज्योतिःश्रुत्यादिबलाच्चाग्न्यादेरेवकर्णादिविदूरत्वनिश्चयादभ्यधिकाशंकाभावेपिपूर्वपक्षोदयः । अतएवतत्तदधिकरणसिद्धांतभाष्येऽनंतत्वकर्णादिविदूरत्वादीनांविष्णुलिंगत्वसमर्थनं ।

गु० वमभ्यधिकाशंकयापूर्वपक्षकरणमयुक्तं । अभ्यधिकाशंकायाअनावश्यकत्वात् । अन्यथाभाष्येप्यभ्यधिकाशंकाऽवश्यवक्तव्यास्यादित्यरुचेराह ॥ यद्वेति ॥ विष्णुलिंगत्वनिश्चयेपीति ॥ आकाशाधिकरणेभाष्योदाहृतश्रुत्यादिनेतिशेषः । ननुसर्वेषामपिलिंगानामानंदमयाधिकरणएवविष्णुपरत्वस्यनिर्णीतत्वात्कथमभ्यधिकाशंकाभावेपूर्वपक्षोदयइत्यतआह ॥ अतएवेति ॥ अभ्यधिकाशंकाभावेपिपूर्वपक्षोदयोयतोतएवेत्यर्थः । तर्ह्यनुव्याख्यानेऽभ्यधिकाशंकोक्तिःकुतइत्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तर्ह्यनुव्याख्यानेतदुक्तिर्व्यर्थेत्यतआह ॥ **अनुव्याख्यानइति** ॥ लिंगानुसारेणश्रुतिर्ब्रह्मण्यमुख्यतयानीयतेमुख्यतयावा । आद्यआह ॥ **अमुख्यत्वइति** ॥ प्रबलदुर्बलत्वेस्वभावकृतेद्रष्टव्ये ॥ **गुणपूर्त्यर्थेति** ॥ मुख्यत्वेगुणालाभादितिभावः । द्वितीयेत्वाह ॥ **श्रुतीनामिति** ॥ आकाशादिशब्दानामित्यर्थः । नन्वंतरित्यनेनद्वेधाऽगतार्थत्वेप्यव्यक्ताधिकरणे“तदधीनत्वादर्थव”दितिगुणसूत्रे दुःखित्वबद्धत्वावरत्वादेर्भगवत्यभावेनतत्तच्छब्दवाच्यत्वंनेतिशंकायां प्रधानादिगतपरावरत्वादिधर्माणांभगवदधीनत्वादवरत्वादिवाचिशब्दजातमर्थवदितिवक्ष्यमाणतया तेनपौनरुक्त्यमित्यतआह ॥ **तदधीनत्वादित्यत्रेति** ॥ एतच्चवक्ष्यामइतिभावः । तथाचैतदुपजीव्यतस्यप्रवृत्तेर्नतेनास्यपौनरुक्त्यमिति

अतएवचभाष्येभ्यधिकाशंकानुक्तिः । अनुव्याख्यानेतदुक्तिस्त्वनंतत्वादिलिंगानांस्वतोवकाशराहित्यरूपंनिरवकाशत्वमुपेत्यतदनुसारेणाकाशादिश्रुतीनांब्रह्मण्यमुख्यत्वेप्रबलश्रुत्यनुसारेणदुर्बलस्यानंतत्वादिलिंगस्यैवाकाशादावमुख्यत्वंस्यात् । सिद्धांत्यभिमतगुणपूर्त्यर्थसमन्वयश्चनसिद्ध्येत् । श्रुतीनांब्रह्मणिमुख्यत्वंतुनयुक्तं । प्रवृत्तिनिमित्तस्यतदधीनत्वादेरभावादितिपूर्वपक्षदार्ढ्याय स्वभावनियामकत्वरूपमहागुणलाभायचेतिद्रष्टव्यं । तस्मान्नपूर्वेणगतार्थत्वं । “तदधीनत्वा”दित्यत्रसर्वस्येश्वराधीनतामंगीकृत्यतस्याःप्रवृत्तिनिमित्तत्वंनेतिप्राप्तेऽस्तीतिसिद्धांतः ।

गु० अनुव्याख्यानइति॥ अनुव्याख्यानेतदुक्तिस्तुपूर्वपक्षदार्ढ्यायस्वभावनियामकत्वरूपमहागुणलाभायचेत्यन्वयः। तत्रपूर्वपक्षदार्ढ्यंविशदयति॥**अनंतत्वादीति**॥ तथापिनिरवकाशत्वस्यश्रुतित्वप्रयुक्तप्राबल्यापेक्षयाप्रबलत्वान्निरवकाशलिंगानुसारेणाकाशश्रुतेरेवब्रह्मण्यमुख्यत्वमस्त्वित्यतआह ॥ **सिद्धांत्यभिमतेति** ॥ सूत्रांतरेणापिवैषम्यदर्शनपूर्वकंगतार्थत्वंपरिहरति ॥ **तदधीनत्वादित्यत्रेत्यादिना** ॥ अचेतनस्वभावस्येशाधीनत्वमित्येतदधिकरणसिद्धांतन्यायस्यतदधीनत्वादित्यत्राप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावः । नन्वेवमपितार्तीयेनपौनरुक्त्यं तत्राप्याकाशशब्दवाच्यत्वोक्तेः । नचतत्र“आकाशोवैनामनामरूपयो”रितिवाक्यंविषयः । अत्र तु“इहोवाचे”तिवाक्यमितिभेदः । तथात्वेशास्त्रापर्यवसानप्रसंगस्योक्तत्वात् । नचवाच्यंतत्राव्याकृताकाशमितिपूर्वपक्षः इहतुभूतमिति अतोभेदइति । निरवकाशलिंगेनप्रसिद्धिबाधस्योभयत्रसाम्यात् । न्यायभेदमंतरेणपूर्वपक्षप्रकारभेदमात्रेणाधिकरणभेदेऽतिप्रसंगाच्चेतिभावे नन्यायभेदमाह ॥ आकाशोऽर्थांतरत्वादीति ॥ विष्णुपरतांचेति ॥ अन्यथोभयत्रप्रसिद्धतानस्यादितिभावः ॥ निपातेति ॥ अत्र

आकाशोर्थांतरत्वादीत्यत्रत्वाकाशशब्दप्रवृत्तिनिमित्तस्यभगवदधीनतां “आकाशइतिहोवाचे”त्यादावा काशशब्दस्यविष्णुपरतांचांगीकृत्य “आकाशोवैनामनामरूपयोर्निर्वहिते”त्यादौवैनामेतिप्रसिद्धिद्योतक निपातबलात्प्रसिद्धाकाशार्थत्वेशंकितेतन्निरासः । नचात्रापि“सर्वाणिहवाइमानिभूतानी”तिहवैशब्दश्रव णात्प्रसिद्धार्थतेतिशंक्यं । तस्यभूतसन्निधानेनभूतेष्वेवप्रसिद्धिप्रतीतेः । “कारणत्वेनचाकाशादि”ष्वि त्यत्रापिपूर्ववदुभयमप्यंगीकृत्य “आत्मनआकाशःसंभूत” इतिसंभूतत्वादिलिंगैर्भूताकाशपरत्वेशंकिते

प्र० तुश्रुतिबलादितिभावः ॥ तन्निरासइति ॥ एतच्चतत्रैवस्पष्टीकरिष्यतइतिभावः । ननुन्यायभेदोसिद्धः । अत्रापितत्रैवनिपातस्यसत्त्वादि त्याशंक्यनिराह ॥ नचेति ॥ भूतेष्विति ॥ यानिप्रसिद्धानिभूतानीत्यर्थोपपत्तेरित्यर्थः । तत्रत्वाकाशस्यैवाकाशोवैनामेतिसन्निधानमिति भावः । नन्वेवमपिचतुर्थपादीयाधिकरणेविषयवाक्येनिपातस्याभावेन विषयादिभेदमात्रस्याधिकरणांतरारंभानापादकत्वेनच तत्राप्याका ॥ ३३१ ॥
शस्यभगवत्परत्वोक्तेस्तेनपौनरुक्त्यमित्यतआह ॥ कारणत्वेनचेति ॥ उभयमिति ॥ प्रवृत्तिनिमित्तस्यभगवदधीनत्वं इतिहोवाचेत्यादा

प्र० वाकाशशब्दस्यविष्णुपरत्वंचेत्युभयमित्यर्थः ॥ तन्निरासइति ॥ परममुख्यवृत्त्येतिशेषः । अपरमुख्यवृत्त्याभूतपरत्वस्यांगीकारादित्यर्थः । वक्ष्यमाणानांप्रमेयमुक्त्वातद्वैलक्षण्यज्ञापनायैतत्प्रतिपाद्यमाह ॥ इहत्विति ॥ ततःकिंसिद्धमित्यतआह ॥ ततश्चेति ॥ नन्वेवमपिद्विती याध्यायतृतीयपादाद्यधिकरणेआकाशस्यभगवदधीनत्वोक्तेरित्यतआह ॥ नवियदिति ॥ तैरिति ॥ तदधीनत्वादित्यादिभिरित्यर्थः । ननुतथाप्यंतर्याम्यधिकरणे“यआकाशेतिष्ठ”न्नित्युपक्रम्य“यआकाशमंतरोयमयत्येषतआत्मांतर्याम्यमृत”इत्याकाशांतर्यामित्वमुच्यते । अत

तन्निरासः । इहत्वाकाशशब्दस्यभगवतिमुख्यत्वार्थंप्रवृत्तिनिमित्तस्यभगवदधी नत्वमुच्यते । ततश्चैतदधिकरणाभावेक्कापिवाक्येतस्यभगवतिनमुख्यत्वंसिध्य ति । “नवियदश्रुते”रित्यत्रतुभूताकाशस्येश्वरादुत्पत्तिरेववक्ष्यते । नतुतत्स्वभा वस्येश्वराधीनत्वमितिनतैर्गतार्थता । अधिकाशंकानिरासेनसिद्धांतस्त्वित्थं ।

प्र० स्तदधीनत्वंतत्रसिद्धं । उक्तंचानुव्याख्याने“स्वात्मनाऽनियतंवस्तुप्रतीपंह्यात्मनोभवेत् । स्वाधीनसत्ताशक्त्यादिकथमात्मप्रतीपक”मितीति चेन्न । आकाशादेरधिदैवत्वेनभूतत्वाभावात् । अतएवसूत्रेऽधिदैवादिष्वित्युक्तं । तत्रसत्तादेरेवतदधीनत्वोक्त्यास्वभावस्यतदनुक्तेः । आका शादेर्देवतात्वेनजडत्वाभावाच्च । आकाशशब्दसमन्वयानुक्तेश्चेतिभावः । समन्वयसूत्रात्तत्त्वित्यनुवृत्तेराकाशोविष्णुरेवेतिभाष्यप्रदर्शितसौत्र प्रतिज्ञाभागस्यावधारणेनविष्णौमहायोगविद्वद्रूढ्योस्सूचनात् शब्दनिमित्तस्वातंत्र्यतद्गतत्वाभ्यांमहायोगंविद्वद्रूढिंचवक्तुं“आकाशस्यभगवद

SGDF
Sri Gargeshwari Digital Foundation

प्र० धीनत्वेनतत्रैवमुख्यत्वान्महायोगविद्वद्रूढ्योर्भावाच्चे”त्यादिटीकांविवृण्वानोचेतनस्थंप्रतिस्वातंत्र्यंतावदाह ॥ **चिद्गतस्येत्यादिना** ॥ यदापूर्वं त्रेंद्रादिचेतनस्थैश्वर्यादेरीशाधीनतोक्ता तदाकैमुत्यन्यायेनाचेतनस्थस्यछिद्रत्वादेरीशाधीनतासिध्यति । तस्यचेतनादपिपराधीनतायादर्शना दित्यर्थः । एतेनानधीनत्वेऽचेतनगतत्वमप्रयोजकमित्युक्तंभवति । यदप्युक्तंजयिशब्दवज्जडवाचिशब्दस्यस्वतंत्रेप्रयोगादृष्टेरितितदप्यसिद्ध मित्याह ॥ **अस्तिचेति** ॥ चिद्गतस्येत्याद्यत्रत्यन्यायेनतुल्यन्यायतयाभिमान्यधीनत्वेसिद्धे तदधीनत्वादितिन्यायेनाभिमानिनिमृदादिशब्दं सिद्धंकृत्वा अभिमान्यधिकरणेमृदादिशब्देनाभिमानिदेवतोच्यतइतिसूत्रकृतावक्ष्यमाणत्वादितिभावः । “तस्योत्पत्तिमतोऽवकाशत्वसहित स्यैवपरायत्तोत्पत्त्यातत्तोपपत्ते”रितिन्यायविवरणटीकांहृदिकृत्वास्वभावंप्रत्यपिस्वातंत्र्यमाह ॥ **अस्तुखमिति** ॥ हियतोतइतिपूर्वेणान्वयः ।

चिद्गतस्येशतंत्रत्वेस्यादेवाचिद्गतस्यतत् । यतोत्यंतपराधीनंचेतनादप्यचेतनं ॥ १ ॥ अस्तिचराजा जयीतिप्रयोगइवजडगतस्यमृत्त्वादेरभिमानिदेवताधीनत्वाद्देवतायांमृदब्रवीदित्यादिप्रयोगः । तस्मा द्विवरत्वादिकमचेतनगतत्वान्नेश्वराधीनमितिमतंनयुक्तं । नापिस्वभावत्वात्तदनधीनत्वमितिमतंयु क्तं । अस्तुखंच्छिद्रमितियाहरीच्छातद्वशान्नभः । छिद्रात्मकंहिसंजातमन्यथानिबिडंभवेत् ॥ १ ॥

गु० तिपादनान्नपौनरुक्त्यमितिभावः । तत्रादावचेतनगतत्वेनविवरत्वादेरीश्वरानधीनत्वंयदुक्तंतद्दूषयन्सिद्धांतयति ॥ **चिद्गतस्येति** ॥ ननुभृत्यगतस्यजयस्यराजा धीनत्वेनराजाजयीतिप्रयोगस्येवाचेतनगतप्रवृत्तिनिमित्तस्यचेतनानधीनत्वेनचेतनेजडवाचिशब्दप्रयोगस्यादर्शनात्कथंतस्येश्वराधीनत्वमित्यतआह ॥ **अस्तिचेति** ॥ नचघटादिशब्दानांकुलालादौप्रयोगापत्तिः । प्रयोगोनामशक्तिश्चेदिष्टापत्तेः । अभिलापश्चेदितिसहजबलवतिपुरुषेसिंहशब्दाप्रयोगेणनिमित्तस्यैवप्रयोगानुरोधित्वेन

SGDF Sri Gargeshwari Digital Foundation

प्र० जनिमतस्स्वभावोजनकायत्तइत्येतल्लोकसिद्धमित्याह ॥ **लोकेपिहीति** ॥ हियस्मात्तत्रसिध्यति अतःपुंतंत्रमितिपूर्वेणान्वयः । ननुघटेकुलालानधीनविशेषवदीशानधीनंछिद्रत्वमस्त्विितिप्रश्नोत्तरमाह ॥ **किंत्विति** ॥ एतेनस्वभावत्वमप्यनधीनत्वेऽप्रयोजकमित्युक्तं । "तादृशत्वाच्चतच्छक्ते"रितिगायत्रीनयानुव्याख्यानंहृदिकृत्वायथेष्टविनियोगार्हत्वरूपंचतदधीनत्वमाह ॥ **किंचेति** ॥ अताम्रतां स्वर्णादिरूपतां । अ

लोकेपिहि । कुंभस्वभावःकुंभत्वंपुंतंत्रंधर्मिणासह । नशरावार्थयत्नेनकुंभाकारोहिसिध्यति ॥ २ ॥ ययैवहिमृदाकुंभःकुंभकारेणनिर्मितः । तयैवचमृदाकर्तुंशरावाद्यपिशक्यते ॥ ३ ॥ किंतुकुंभादौकुलालाद्यसंकल्पितमपिबहुजायते । ईश्वरासंकल्पितंतुनाणुमात्रमपिजायतइतिविशेषः । किंचोत्पत्त्यनंतरमप्याकाशस्यविवरत्वंनिह्नूयाविवरत्वंसंपादयितुंशक्तईश्वरः । तथेच्छाभावात्तुनसंपादयति । औषधादिवशाल्लोकेताम्रादेरप्यताम्रतां । कुर्वतीशस्तुनेष्टेकिंछिद्रस्याच्छिद्रताकृतेः ॥ १ ॥ तस्मादन्यथाकरणाभावेप्यन्यथाकर्तुंशक्यत्वाद्यथेष्टविनियोगार्हतास्त्येव । बोधयंतिचश्रुतिस्मृतयःस्वभावस्यापीश्वराधीनत्वं ।

गु० प्रयोगस्यनिमित्तानुसारित्वनियमाभावात् । अन्यथाऽतिप्रसंगादितिभावः । ननुकुंभादिस्वभावस्यकुलालाधीनत्वेआकाशादिस्वभावस्येश्वराधीनत्वेचकुलालेश्वरयोःकोविशेषइत्यतआह ॥ **किंत्विति** ॥ ननुविवरत्वस्येश्वराधीनत्वेनकदाचित्तदपगमेनाविवरत्वमपिस्यात् । अन्याधीनेऽन्यथाभावस्यापिकदाचिद्दर्शनादित्यतआह ॥ **किंचेति** ॥ ननुलोकेऽन्यस्यवस्तुनोऽन्यथाभावस्यकुत्राप्यदर्शनात्कथमीश्वरस्यान्यथाकरणसामर्थ्यमित्यतआह ॥ **औषधादीति** ॥ अच्छिद्रताकृतेरिति अधीगर्थदयेशांकर्मणीतिषष्ठी । इंद्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिवविवरत्वादेःस्वभावत्वान्नब्रह्माधीनत्वमितिपरोक्तंबाधकंपरिहरति ॥ **बोधयंतिचेति** ॥ अत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० च्छिद्रताकृतेः निबिडीकरणस्य। "अधीगर्थदयेशांकर्मणी"तिषष्ठी। अन्यथेश्वरत्वव्याघातादितिभावः ॥ **स्यंदंतइति** ॥ अनेन"एतस्य वाक्षरस्यप्रशासनेगार्गिप्राच्योनद्यस्स्यंदंते । भीषास्माद्वातःपवते । नभोददातिश्वसतांमार्गंयन्नियमाददः । द्रव्यंकर्मचकालश्चस्वभावोजीवए वचे"त्यादिकाइत्यर्थः । एतेनयदप्यचेतनगतत्वेनप्रसादानायत्तत्वात्स्वभावत्वेनानागंतुकत्वान्नेशाधीनंविवरत्वमितिपरंपरयाहेतुत्वमितिमतं तदपिनिरस्तं । तथाविधस्याप्यधीनतायाश्श्रुत्यादिसिद्धत्वात् । यथेष्टविनियोगयोग्यत्वरूपाधीनत्वसंभवाच्च । एतेन"आकाशस्यभगवदधी नत्वा"दितिटीकात्रेधाव्याख्याता । आकाशस्य आकाशपदप्रवृत्तिनिमित्तस्येत्यर्थःप्रागेवोक्तः । एवंविवरत्वादिकमीशाधीनमितिसमर्थ्यवि वरत्वादिकंनेशगतमचेतनगतत्वादितियत्तृतीयंमतंतदपिनिराकुर्वन्नेवंसतिलब्धार्थमाह ॥ **एवंचेति** ॥ नकेवलमित्यादिनान्वयः । ननुरूढ पद्मत्वादिहेतुकस्यपंकजादिशब्दस्येवाकाशशब्दस्याकाशेरूढत्वात्तन्निमित्तस्यशब्दसमवायित्वादेरन्यत्ररूढस्यकथंविष्णौनिरवधिकत्वमित्यतः "भवेतांयदिवृक्षस्ये"त्युक्तन्यायेनभूतेपियौगिकएवायंशब्दइतिसदृष्टांतमाह ॥ **यथेति** ॥ नवमेद्वितीयपादे"पार्वणहोमयोस्त्वप्रवृत्तिस्समुदा

स्यंदंतेशासनान्नद्योभीषास्मात्पवतेनिलः । नभोददातिश्वसतांमार्गमित्यादिकाश्श्रुताः ॥ १ ॥ एवंचयथानवमोक्तरीत्या "स्रुवेणपार्वणौहोमा"वित्यत्रपर्वशब्दःप्रीयतेदीयतेस्मिन्निितिदर्शादिकालेयौगिकोनतुरूढः तथा "आकाशनमाकाश" इतिसुधोक्तरीत्यायौगिकाकाशशब्दप्रवृत्तिनिमित्तस्याकाशगतस्यविवरत्वरूपस्यावकाशप्रदत्वस्यनकेवलमीश्वरायत्तत्वा त्तत्रतस्यमहायोगः । किंतुपरिच्छिन्नादाकाशादप्यपरिच्छिन्नेब्रह्मणि "सर्वभूतगुणैर्युक्त"मित्यादिवचनात्

गु० स्यंदंतइत्यनेन एतस्यवाक्षरस्यप्रशासनेगार्गिप्राच्योनद्यःस्यंदंतइतिश्रुतेः नभइत्यनेनस्मृतेर्ग्रहणमितिज्ञातव्यं । नन्वाकाशशब्दप्रवृत्तिनिमित्तस्यभगवदधीनत्वेनाकाशश ब्दस्यभगवत्परत्वेरूढत्वमेवोक्तंस्यात् । तथाचयोगाभावान्नगुणपूर्तिसिद्धिरित्यतआह ॥ **एवंचेति** ॥ नन्वेतस्यसुधादावनुक्तत्वात्तद्विरोधइत्यतआह ॥ **अतएवेति** ॥

प्र० यार्थसंयोगात्तदभीज्याही"तिपंचविंशाधिकरणेदर्शपूर्णमासयोश्श्रुतं "स्रुवेणपार्वणौजुहोती"तिवाक्यमुदाहृत्य तद्धितश्रुत्यापर्वदैवत्यौहोमौ विकृतिष्वतिदिश्येतेनवेतिसंदिह्य पर्वशब्दस्यकालेमुख्यत्वात्तस्यचासंस्कार्यत्वेनासन्निपातार्थत्वादारादुपकारकाविमौविकृतिष्वतिदिश्येतेइतिप्रा पय्य पृणातेर्दानार्थधातोःपर्वशब्दोनिष्पन्नः । सचप्रियतेदीयतेऽस्मिन्नित्यधिकरणव्युत्पत्त्याकालेमुख्यः । भावव्युत्पत्त्यातुकर्मण्यपि । तत्र प्रकरणात्सामवायिकत्वलाभाच्चकर्मवाचित्वमंगीकृत्यतत्संस्कारार्थौहोमावित्युपेयं । तेषांचकर्मणांतंत्रेणोक्तानामग्नीषोमयोरिवव्यासक्तंदेवता त्वमितिसमुदायस्यदेवतात्वात्तस्यचविकृतिष्वनतिदेशादविकारत्वाच्चसौर्यादेर्नतत्रहोमयोरतिदेशइतिसिद्धांतितं । अत्रपर्वशब्दस्यपूर्वोत्तरपक्ष योर्मुख्यत्वाविशेषप्रदर्शनार्थंपृणातेरधिकरणव्युत्पत्त्यायौगिकत्वमंगीकृतं तथेहापिभूतेपियोगएव नतुरूढिः । लाघवादित्यर्थः । एतेन पूर्वपक्षिणायोगोनयुक्तइतियदुक्तंतन्निरस्तंभवति ॥ **तस्येति** ॥ विवरत्वस्य । एवंयोगान्महायोगस्यबलवत्त्वान्नात्रग्रहणं । नन्वेवंप्रवृत्तिहे तोरीशगतत्वेनैवमहायोगोपपत्तौतस्यपूर्वपक्षेभूतस्वभावत्वोक्तिःसिद्धांतेयत्नेनेशाधीनतोक्तिश्चव्यर्थेत्यतआह ॥ **एवंचेति** ॥ **कृत्वेति** ॥ विव

तस्यनिरवधिकत्वादपीतिद्रष्टव्यं । अतएवोक्तंसुधायां "नहिदेशकालाभ्यांपरिच्छिन्नस्यावकाशदातृत्वंनिरव धिक"मिति "आकाशस्यावकाशदातृत्वस्येश्वरायत्तत्वमीश्वरस्यापिपृथक्कृतद्धस्त्वंचे"तिच । एवंचयत्पूर्वपक्षिणा ऽवकाशप्रदत्वस्याचेतनस्वभावत्वमुक्तंतदभिमानमात्रेण । सिद्धांतेतस्येशतंत्रत्वसमर्थनंचस्वभावनियामकत्वरूप महागुणसिद्ध्यर्थं जडमात्रस्वभावनिमित्तकशब्दांतरसमन्वयेन्यायःफलिष्यतीतिप्रदर्शनार्थंचकृत्वाचिंतयायुक्तं ।

गु० नन्ववकाशप्रदत्वस्येश्वरगतत्वेकथंतस्याकाशस्वभावत्वमित्यतआह ॥ **एवंचेति** ॥ तर्हिसिद्धांते ईशतंत्रत्वकथनमयुक्तमित्यतआह ॥ **सिद्धांतइति** ॥ **कृत्वाचिं**

SGDF Sri Gargeshwari Digital Foundation

प्र० रत्वादिकमीशेनास्तीतिकृत्वाचिंतयेत्यर्थः ॥ यथेति ॥ तृतीयेद्वितीयपादेएकादशाद्यधिकरणेषुर्चिंतितं भक्षानुवाकेश्रुतः“इंद्रपीतस्यनराशं सपीतस्यपितृपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामी”तिमंत्रःकिमनैंद्रप्रदानशेषभक्षणेनप्रयोज्यउततेष्वप्यूहेनप्रयोज्यो यद्वासर्वत्रयथासमाम्ना तएवप्रयोक्तव्यइतिसंशये इंद्रेणपीतोयस्मिन्निितिबहुव्रीहेर्द्वयोःपदयोरन्यपरत्वेनदुर्बलत्वात्सवनविशेषणत्वायोगात् इंद्रेणपीतइतितत्पुरुषस्योत्त रपदेस्वार्थलाभेनाभ्यर्हिततयासोमविशेषणत्वात्तस्यानैंद्रेष्वसामर्थ्यात्समानकर्मणिप्रकृतिविकारासंभवेनोहाभावादमंत्रकंभक्षणमित्येकंपूर्वपक्ष मुक्त्वा सत्यपिकर्मैक्येप्रदानानांभिन्नतयाप्रकृतिविकृतिभावसंभवात् “इंद्रायत्वावसुमतेसोमंगृह्णामी”तिमानग्रहणमंत्रवशात्सोमस्याभिषवा देरैंद्रप्रदानधर्मत्वादधर्मकाणामनैंद्रप्रदानानांतद्विकृतित्वात्तत्रचोदकप्राप्तस्यान्यमंत्रस्योहेनप्रयोगइतिद्वितीयंपक्षमुक्त्वा अधिकरणमसमाप्य कृत्वाचिंतारूपेणषड्भिरधिकरणैरूहविषयंविचार्य मानग्रहणमंत्रयोर्लिंगादैंद्रप्रदानविषयत्वेप्युत्पत्तिवाक्येश्रुतस्यसोमस्यसर्वाभ्याससाधारण्यात् समानविधानतयाप्रकृतिविकृतिभावाभावान्नास्त्यूहइतिद्वितीयंपक्षंनिरस्य प्रथमपक्षावलंबेनपुनःकृत्वाचिंतारूपेणाधिकरणद्वयमुपन्यस्य तत्पु रुषाश्रयणेच वसुमद्गणस्य “सोमदेवत”इत्यादिसंबुध्यंतेनसोमशब्देनतइतिप्रत्यक्षविषयेणयुष्मच्छब्देननिर्दिष्टस्यशिष्टस्यसोमावयवस्यविशेषणं स्यात् । तथाचहुताहुतसमुदायविषये इंद्रपीतशब्देऽस्यलक्षणास्यात् । अतोबहुव्रीह्याश्रयणेनसवनविशेषणत्वादनैंद्रेष्वपियथाम्नातमंत्रकंभक्ष

यथातृतीये “इंद्रपीतस्ये”तिमंत्रस्यमैत्रावरुणादिशेषभक्षणेवस्तुतऊहाभावेपिन्यायव्युत्पादनार्थमू हविशेषनिरूपणार्थान्यनेकान्यधिकरणानिकृत्वाचिंतयायुक्तानितद्वत् । आसमंतात्काशतइतिवा ॥ ३३४ ॥

गु० तयेति ॥ योगोमास्तुकेवलरूढ्यैवेष्टसिद्धिरितिकृत्वाचिंतयेत्यर्थः। कृत्वाचिंतयाधिकरणारंभस्यक्काप्यदर्शनादित्यतआह ॥ **यथेति** ॥ नन्वासंमतात्काशतइत्यादिरू

SGDF Sri Gargeshwari Digital Foundation

प्र० मुख्यत्वं सूक्तादीनांतत्परत्वेव्यवस्थाचयुज्यतइतिसिद्धांतइतिवक्ष्यमाणन्यायेनेत्यर्थः ॥ **सुतरामिति** ॥ यदिजात्याप्रबलायाश्श्रुतेर्बाधस्तदा स्वभावतोपिदुर्बलस्यप्रकरणस्यकिमुवाच्यंबाधइतीत्यर्थः ॥ **नन्वेवमिति** ॥ श्रुतिलिंगयोस्सावकाशत्वेसतीत्यर्थः ॥ **नचेति** ॥ प्रकरणस्य विशेषोपस्थापकत्वादितिभावः ॥ **द्विवचनस्येति** ॥ अन्यथासावकाशलिंगमात्रात्सावकाशश्रुतेर्बलवत्त्वादित्येवब्रूयात् । प्रकरणस्याग्निश्रुतिसंपादकत्वेनोपयोगात्तत्समतयानिर्देशोनस्यादित्यर्थः । ननुतमोविरोधिमात्रेप्रसिद्धज्योतिश्शब्दस्याग्न्युपस्थापकत्वंकथमित्यतआह ॥ **सामान्येति** ॥ **अतएवेति** ॥ श्रुतिवत्सूक्तस्यापिस्वतंत्रत्वादेव । टीकायां "नहिलिंगंश्रुतिप्रकरणबाधनेशक्तं । यावताश्रुतितएवदुर्बल"मित्युक्तं । अतोज्ञायतेसूक्तरूपंप्रकरणमतिशयार्थमुक्तमिति । ननुलिंगस्यनिरवकाशत्वेकथंश्रुतितएवबाधइत्यतआह ॥ **निरवकाशंत्विति** ॥

सुतरांबाधेनपूर्वपक्षानुदयइतिपरास्तं । सावकाशाग्निश्रुत्यासावकाशविष्णुलिंगबाधात् । नन्वेवंसावकाशलिंगस्यसावकाशश्रुत्यैवबाधसंभवाद्भाष्येसूक्तोक्तिर्व्यर्था । नचज्योतिरितिसामान्यश्रुतेरग्निरूपविशेषपर्यवसानार्थंतदुक्तिः । टीकायां "श्रुतिप्रकरणयो"रितिद्विवचनस्यभाष्ये "अग्निसूक्तस्थत्वाच्चे"तिचशब्दस्यचायोगात् । सामान्यश्रुतेः "त्वामग्ने" इति विशेषोपस्थापकेशब्देसतिप्रकरणाप्रतीक्षणाच्चेतिचेन्न । लिंगस्यातिशयेनबाधायसूक्तोक्तेः । अतएवोक्तंटीकायां "यावताश्रुतितएवलिंगंदुर्बल"मिति । निरवकाशंतुविष्णुलिंगंनास्ति । गुहानिहितत्वस्यजाठराग्नावपिसंभवात् ।

गु० त्वमित्यादिलिंगसाहित्येनसिद्धांतलिंगानांबाहुल्यंज्ञेयं ॥ **सुतरांबाधेनेति** ॥ बाध्यदौर्बल्यातिशयस्यबाधउपचारोयमितिहृदयं । ननुयदिसावकाशश्रुत्यापिलिंगस्य बाधात्पूर्वपक्षस्तर्हिसुधाविरोधःस्यात् । सुधायांज्योतिरधिकरणे "अभ्यधिकाशंका अग्निसूक्तत्वादितिभाष्यएवप्रदर्शिते"त्युक्तत्वेनकेवलश्रुतिमात्रस्यलिंगबाधकत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० निरतिशयेति ॥ सर्वथाकर्णादिविदूरत्वस्यक्काप्यसंभवादितिभावः । अस्मिन्पक्षेसुधाविरोधमाशंक्यसापिटीकानुसारेणनेयेतिभावेनतत्ता त्पर्यंवक्तुमाह ॥ सुधायामिति ॥ उक्तेति ॥ सावकाशश्रुत्यासावकाशलिंगबाधइत्युक्तरीत्येत्यर्थः । सुधावाक्यस्ययथाश्रुतार्थमनुसृत्याभ्य धिकाशंकयापक्षांतरमाह ॥ यद्वेति ॥ ननूक्तरीत्यापूर्वेणागतत्वात्कथमधिकाशंकावकाशइत्यतआह ॥ एवंचेति ॥ तथापीति ॥ एतेन

निरतिशयवैभवरूपकर्णादिदूरत्वस्यचाग्निश्रुत्यादिबलादग्नावप्युपपत्तेः । सुधायांतुज्योतिरधिकरणे "अधिकाशंका अग्निसूक्तस्थत्वादितिभाष्यएवदर्शिते"त्युक्तं । तत्रचश्रुतिमात्रेणपूर्वपक्षानुदयात्तदुदयार्थमधिकाशंकोक्तिरितिनाभिप्रा यः । उक्तरीत्यासूक्ताभावेपिपूर्वपक्षोदयसंभवात् । किंतुपूर्वपक्षदार्ढ्यार्थंतदुक्तिरित्यभिप्रायः । यद्वा सुधायांप्राणाद्यधि करणेष्वधिकाशंकाप्रदर्शकस्यानुव्याख्यानस्य "नन्वेतदपिपूर्वन्यायेनपरिहृतं । नसूत्रारंभंप्रयोजयतीत्यतोभ्यधिकाशं कांदर्शयती"त्यवतारितत्वादिहापिपूर्वपक्षोदयार्थमेवभाष्येधिकाशंकोक्तिरितिसुधाभिप्रायः । एवंचतत्रेत्थंपूर्वपक्षः । यद्यपिपूर्वाधिकरणन्यायेननिरवकाशब्रह्मलिंगैः सावकाशाग्निश्रुतिबाधः । यद्यपिचसर्वसूक्तानांवैष्णवत्वेप्यभिव्यक्ते रित्यादिन्यायेनेदमग्निसूक्तमिदंवायुसूक्तमितिव्यवस्थासंभवति । तथापीदमग्निसूक्तंनतुविष्णुसूक्तमित्यध्यापकप्रसिद्धेर योगात्सूक्तंनिरवकाशं । एवंचनिरवकाशप्रकरणानुगृहीतश्रुत्यानिरवकाशमपिकर्णादिविदूरत्वलिंगंबहुवैभवाभिप्रायेण

गु० भावस्याभिप्रेतत्वादित्यतआह ॥ सुधायांत्विति ॥ उक्तरीत्येति ॥ सावकाशाग्निश्रुत्यासावकाशविष्णुलिंगबाधादित्युक्तरीत्येत्यर्थः । नन्वेवमभ्यधिकाशंका प्रायपाठत्यागः । पूर्वाधिकरणेषुश्रुतिमात्रेणलिंगस्यबाधासंभवेनतदर्थमभ्यधिकाशंकायाउक्तत्वादत्रदार्ढ्यार्थंतदुक्तिरित्यंगीकारादित्यरुचेराह ॥ यद्वेति ॥ ननु

प्र० वैश्वानराधिकरणेनगतार्थतापिनिरस्ता । एतच्छंकानिरासस्यतत्राकृतत्वादिति ॥ कथंचिदिति ॥ स्वावरापेक्षयाबहुवैभवसत्त्वादिति भावः । निरवकाशेतिसूक्तमात्रविशेषणं । ननुगुहानिहितत्वकर्णादिविदूरत्वविश्वदेवनियामकत्वादिलिंगानांबहुत्वादुभयप्रयुक्तप्राबल्याद्बल वत्त्वंलिंगस्येत्यतआह ॥ लिंगइति ॥ "द्विविधंबलवत्त्वंचबहुत्वाच्चस्वभावतः । तयोःस्वभावोबलवानुपजीव्यादिकश्चस"इत्युक्तेरिति भावः । इयंचशंकानपूर्वाधिकरणेस्तीत्याह ॥ अंतरिति ॥ टीकाद्वयपूर्वपक्षाशयंनिष्कृष्यदर्शयति ॥ एवंचेति ॥ एवंपूर्वपक्षद्वयंप्रस्थानद्व याभिमतमित्युपपाद्य अधुनाटीकाग्रंथोपिलिंगप्रकरणयोर्निरवकाशत्वमुपेत्याधिकाशंकयोत्थपूर्वपक्षपरोनेयः तथाचैकएवोभयत्रपूर्वपक्षइति

कथंचिदग्नावपिनेयं । निरवकाशत्वमात्रप्रयुक्तस्यालिंगगतस्यप्राबल्यस्यश्रुतिगता न्निरवकाशसूक्तसाहित्यश्रुतित्वोभयप्रयुक्तप्राबल्याद्दुर्बलत्वात् । लिंगेबहुत्वप्रयुक्तेप्रा बल्येसत्यपितस्यश्रुतित्वरूपस्वभावप्रयुक्तप्राबल्याद्दुर्बलत्वात् । अंतरधिकरणस्थेंद्रा द्यादिश्रुतिस्तुनसूक्तानुगृहीतेति । एवंचात्रटीकायांपूर्वपक्षहेतोःसूक्तस्यसिद्धांतहे तोर्लिंगस्यचसावकाशत्वमितिपूर्वःपक्षः । सुधायांतूभयोर्निरवकाशत्वमितिभेदः ।

गु० तर्हिकर्णादिविदूरत्वांलिंगस्यकागतिरित्यतआह ॥ एवंचेति ॥ ननुतर्ह्यंतरधिकरणस्थेंद्रादिश्रुतेरपिसूत्रानुगृहीतत्वेनप्रबलत्वान्नविष्णुपरतेत्यतआह ॥ अंतर धिकरणेति ॥ ननुकर्णादिविदूरत्वरूपलिंगस्यसावकाशत्वस्यपूर्वपक्षिणाप्यनंगीकारात्सावकाशश्रुत्यानिरवकाशलिंगबाधइतिटीकोक्तःपूर्वपक्षोऽनुपपन्नएवेत्यरुचेराह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावेनाह ॥ यद्वेति ॥ श्रुतेरेवेति ॥ तथाचोक्तदिशासूक्तरूपंप्रकरणंनिरवकाशमित्यभिप्रेतमितिभावः ॥ लिंगस्येति ॥ अतएव "जाठर जातवेदसिलिंगस्यापिसावकाशत्वा"दित्युक्तमितिभावः । कर्णादिविदूरत्वादिसाधारण्येनाह ॥ स्वतइति ॥ एतेचेति ॥ श्रुतिसूक्तयोर्लिंगस्यचसावकाशत्वमुपेत्योक्तानिरवकाशत्वमुपेत्योक्ताचेतिशंकाद्वयमित्यर्थः ॥ प्रमेयेति॥ इयंचपूर्वोत्तरनयानुव्याख्यानेनतुल्यन्यायतयासूचिता ।

यद्वा सुधानुसारेणात्रापि "सावकाशश्रुतिप्रकरणयो"रितिटीकायांसावकाशत्वंश्रुतेरेवविशेषणं नतुप्रकरणस्य । टीकायांलिंगस्यसावकाशत्वोक्तिश्च कर्णादिविदूरत्वस्यनिरवकाशत्वेपिगुहानिहितत्वस्यसावकाशत्वमभिप्रेत्यवा स्वतोनिरवकाशस्यापिसूक्तानुगृहीतश्रुतिविरोधात्कल्प्यावकाशमभिप्रेत्यवा द्रष्टव्या । लिंगस्यश्रुतितएवबाधोक्तिरपिसावकाशलिंगाभिप्रायेति । एतेचशंकेप्रमाणाश्रिते । प्रमेयाश्रितातु तमोविरोधित्वस्यज्योतिश्शब्दप्रवृत्तिनिमित्तस्यसर्वगतत्वेनतमसासहस्थितेब्रह्मण्ययोगइति ।

गु० यद्वेति ॥ ननुसामान्यतःप्रयुक्तस्यलिंगशब्दस्यगुहानिहितत्वरूपलिंगविशेषपरत्वेलिंगपदस्यास्वारस्यंभवतीत्यतःपक्षांतरमाह ॥ स्वतोनिरवकाशस्यापीति ॥ नन्वेवमपियावताश्रुतितएवलिंगंदुर्बलमितिटीकाविरोधइत्यतआह ॥ लिंगस्येति ॥ निरतिशयवैभवरूपकर्णादिविदूरत्वस्याग्निश्रुत्यादिबलादभावस्युपपत्तेरितिपरो

SGDF Sri Gargeshwari Digital Foundation

प्र० दिष्वंतरंगत्वाद्यणादेशेप्राप्ते निरवकाशत्वेन इयङेवकृतइतिपरबलीयस्त्वंद्रष्टव्यं ॥ **कांस्यभोजीति** ॥ द्वादशेद्वितीयपादे "अधिकश्चगुणः साधारणेऽविरोधात्कांस्यभोजिवदमुख्येपी"त्युपांत्याधिकरणेचिंतितं आग्रयणेष्ट्यां ऐंद्राग्नवैश्वदेवद्यावापृथिव्यानिहवींष्याम्नातानि । तत्रद्यावापृथिव्यस्यवैश्वदेवस्यपर्वस्थद्यावापृथिव्यविकारत्वात्प्रसूनंबर्हिःप्राप्तं । ऐंद्राग्नादेस्तुप्रसूनमप्रसूनंवाबर्हिर्मात्रं । तत्रसमानतंत्रेषुप्रसूनमप्रसूनंवोपादेयमुतप्रसूनमेवेतिसंशये मुख्यत्वाद्भूयस्त्वाच्चानियमएवयुक्तइतिप्राप्ते नह्यनियमोनामकिंचिदंगंयदनुगृह्येत । बर्हिर्मात्रंत्वंगंतच्चप्रसूनोपादानेप्यविरुद्धमितिनकस्यचिद्वैगुण्यं । अनियमेतुद्यावापृथिव्यस्यवैगुण्यंस्यात् । नचावैगुण्यस्यसंभवेतद्युक्तं । अतःप्रसूनमेवोपादेयमितिसिद्धांतइति । प्रसूनपदेनपुष्पितंबर्हिरेवोच्यते । अत्रामुख्यद्यावापृथिव्यबर्हिषःप्रसूनस्योपादानेदृष्टांतत्वेनकांस्यभोजिन्यायस्सूत्रितः । यथाशिष्यस्यकांस्यभोजनव्रतनियमोगुरोरनियमः। एकत्रोभयसमावेशेगुरुणाशिष्यानुरोधेनकांस्यपात्रमादर्तव्यमिति तन्न्यायेनेत्यर्थः॥**चरमत्वेति**॥ एतेनोपक्रमस्थत्वेनाकाशशब्दस्यप्राबल्यमितितृतीयशंकापिनिरस्ता । "प्रथमेऽश्रवणा"दित्यत्रचरमप्राबल्यस्यवक्ष्यमाणत्वादितिभावः । उक्त

कांस्यभोजिन्यायेनसर्वप्राबल्यानांबाधकं तदाकिमुवाच्यंचरमत्वादियुतमिति ।

गु० शंस्वभावप्रबलमपिसावकाशंबाधतइत्यत्रदृष्टांतमाह ॥ **कांस्यभोजिन्यायेनेति** ॥ कांस्यभोजिनयस्यायमर्थः । गुरुशिष्यावेकत्रस्तः । तत्रशिष्यस्यकांस्यपात्रेणैवभोजननियमः । गुरोरनियमः । तथाचैकंकांस्यपात्रं । इतरत्रार्कपत्रामत्रं । तत्रगुरोःपूज्यतयास्वारस्येनकांस्यपात्रंप्राप्तं । इतरच्छिष्यस्य । प्रधानस्योपसर्जनभूतशिष्यानुरोध्यत्वात् । तथाचसति शिष्यस्यनियमभंगेनभोजनमेवनस्यात् । तस्माद्गुणस्यात्यंतबाधापेक्षयाप्रधानस्वारस्यहानमात्रंयुक्तमितिकांस्यपात्रंशिष्यस्यैवेति । तथाच

SGDF
Sri Gargeshwari Digital Foundation

प्र० रलिंगानांपरोवरीयस्त्वोद्गीथत्वादीनांनिरवकाशताकुतोनोच्यतइत्यतआह ॥ **परोवरीयस्त्वादीति** ॥ ‘‘परोमात्रयातन्वावृधान । ॐमित्ये तदक्षरमुद्गीथमुपासीते’’त्यादिवचनेनेत्यर्थः । तल्लिंगादित्येकवचनंसमुदायाभिप्रायेणेत्युक्तंभवति । एतेन ‘‘श्रुत्यापूर्वपक्षितेपी’’त्यादिटीका विवृता । एवंप्रमाणाश्रिताऽऽद्याशंकानिराकृता । द्वितीयशंकायामपि श्रुत्यंतरेविष्णवादिशब्दसामानाधिकरण्याभावेप्यत्रैवानंतादिपदसामा नाधिकरण्यात् ‘‘आकाशोवैनामे’’त्यादौवक्ष्यमाणब्रह्मपदसामानाधिकरण्याच्च ‘‘नामानिसर्वाणी’’त्यादौसंकोचेकारणाभावेनविशेषश्रुतिस द्भावादितिपरिहारस्यस्पष्टत्वादाद्यहेतुद्वयंनिरस्तंमत्वा अन्यत्रनिरूढमुखाभावादित्युक्तहेतोःपरिहारमाह ॥ **दृश्यतेचेति** ॥ चित्राज्याधिक रणंप्रागुक्तं । मुखांतरं श्येनवन्निपत्यादानरूपक्रियादिद्वारकंगौणत्वंविनैव तैस्तैः वाक्यभेदादिहेतुभिरित्यर्थः । ननु ‘‘सर्वाणिहवाइमानि

परोवरीयस्त्वादिविष्णुलिंगानांतुनिरवकाशताभाष्यएवोक्ता।
दृश्यतेचघृतादौनिरूढानामप्याज्यादिशब्दानांमुखांतरंविनैव
‘‘आज्यैःस्तुवत’’इत्यादौतैस्तैर्हेतुभिःस्तोत्रादिनामधेयत्वं ।

गु० स्वभावतोदुर्बलस्यापिशिष्यस्यनिरवकाशत्वेनप्रबलत्वात्तेनस्वभावतःप्रबलस्यापिगुरोर्बाधवत् लिंगानांनिरवकाशत्वेनतैःस्वभावप्रबलश्रुत्यादिबाधोयुक्तः । ननुतथापीं द्रादिशब्दानांविष्णुपरत्वेंतस्स्थत्वादिरूपनिरूढमुखांतरवत् प्रकृतेपिनिरूढमुखांतराभावात्कथंतस्यब्रह्मपरत्वमित्यतआह ॥ **दृश्यतेचेति** ॥ तर्हिभूतलिंगस्यकागति ॥ ३३७ ॥

प्र० भूतानी’’त्युक्तभूतकारणत्वविरोधइत्यतआह ॥ **भूतेति** ॥ सर्वाणिभूतानीत्याकाशादिसर्वभूतकारणत्वमुच्यमानं ‘‘आत्मनआकाशस्संभूत’’ इतिश्रुत्यंतरानुरोधेनाकाशशब्दितविष्णोरेवमुख्यं । अन्यथासंकोचस्स्यादितिभावः । एतेन ‘‘नचभूतकारणत्वोक्तिविरोध’’इत्यादिटीकावि वृता । यदपि यद्वायेनेत्यादिनाभ्यधिकाशंकांविनापूर्वपक्षांतरकरणं तदपिलिंगानांवैष्णवत्वसमर्थनेननिरस्तं । अभेदमतंत्वनेकमानविरुद्ध मितिभावेनाकाशपदमुपलक्षणमित्यभिप्रेत्योपसंहरति ॥ **तस्मादिति** ॥ **उत्तरस्येति** ॥ आकाशइतिहोवाचेतिपरिहारस्येत्यर्थः । तथापि कथमुत्तरस्यब्रह्मपरत्वमित्यतआह ॥ **अस्यलोकस्येति** ॥ अस्येतिनपृथिवीमात्रपरामर्शः । किंतुजन्माद्यस्येतिवत्प्रत्यक्षादिसिद्धस्यसर्वस्यास्ये तिपरामर्शेनसर्वलोकगतिप्रश्ने तदनुरोधेनोत्तरेब्रह्मैवाकाशपदवाच्यमित्यर्थः । ननुरूढ्यापरिहारस्याकाशपरत्वात्तदनुसारेणप्रश्नोनेतव्यइत्य

भूतकारणत्वादितुभूतलिंगंश्रुत्यंतरानुसारेणविष्णावेवमुख्यं । तस्मादाकाशादिशब्दवाच्योविष्णु
रिति । अत्रोभयेप्याहुः । ‘‘आकाशइतिहोवाचे’’त्याकाशेनिरूढप्रथमानुपसंजातविरोध्याका
शपदानुरोधेनबह्वन्यपिचरमाणिसर्वकारणत्वज्यायस्त्वानंतत्वादीनिभूताकाशेकथंचिद्योज्यानीति
प्राप्ते यद्यप्याकाशपदंसर्वाणीत्यादितःप्रथमं तथापिपरिहारवाक्यस्याकाशपदादपिप्रथमानुपसंजा
तविरोधिप्रश्नानुसारेणचरमस्योत्तरस्यनेयत्वादस्यलोकस्यकागतिरितिप्रश्नस्यचदृश्यमानसर्वप्रपंच
विषयत्वात्सर्वलोकगतिरेवाकाशपदेनप्रतिवक्तव्या । नचलोकांतर्गतोभूताकाशःसर्वलोकगतिः ।

गु० रित्यतआह ॥ **भूतेति** ॥ ननुप्रश्नोप्याकाशपरएवास्त्वित्यतआह ॥ **अस्येति** ॥ प्रत्यक्षादिसिद्धस्येत्यर्थः । ननुप्रश्नोत्तरयोरेकविषयता प्रश्नानुसारेणोत्तरव्याख्या

SGDF
Sri Gangeshwari Digital Foundation

प्र० तआह ॥ **किंचेति** ॥ "त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् । ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजे" दितिभारतोक्तन्यायेनेत्यर्थः ॥ **सोपाधिकमिति** ॥ आकाशरूपोपाध्यवच्छिन्नमित्यर्थः । अत्रप्रश्नानुसारेणप्रतिवचनस्यनयनेप्राथम्यंहेतुत्वेनविवक्षितंप्रश्नप्रतिवचनयोरेक विषयत्वंवा । आद्येदोषमाह ॥ **प्रथमेति** ॥ द्वितीयेत्वाह ॥ **प्रश्नेति** ॥ यदपिप्रश्नस्यसर्वलोकगतिविषयत्वात्तदनुरोधेनोत्तरंनेयमिति तद पिनेत्याह ॥ **किंचेति** ॥ सर्वनाम अस्येतिपदं । यत् यस्मादित्यर्थः । तथाभवेत् पृथिवीवाचित्वेनभूताकाशपरएवभवेत् । पृथिव्याःप्रकृ तत्वंविशदयन् श्लोकंव्याख्याति ॥ **तथाहीति** ॥ छांदोग्ये आद्येऽध्याये "त्रयोहोद्गीथेकुशलाबभूवुः शिलकश्शालावत्यश्चैकितायनेयो दाल्भ्यःप्रवाहणोजैबिलिरिति । तेहोचुरुद्गीथेवैकुशलाःस्मः । हंतोद्गीथेकथांवदामइतीत्युपक्रम्योच्यतेशालावत्येनकासाम्नोगतिरित्यादिप्रश्ने

किंचसर्वलोककारणत्वादिबह्वनुग्रहार्थमेकमाकाशपदंजघन्यवृत्त्याब्रह्मपरं "त्यजेदेकंकुलस्यार्थ" इतिन्यायात् । तस्मा त्सोपाधिकंब्रह्मैवाकाशपदेनोपास्यत्वेनोपक्षिप्तमितिसिद्धांतइति । अत्रब्रूमः । प्रथमानुसारेणचरमास्वारस्येपूर्वाधि करणेपिप्रथमहिरण्यश्मश्रुत्वाद्यनुसारेणचरमंपापातीतत्वंजीवेकथंचिन्नेयंस्यात् । इहापिहिप्रश्नस्यानुरोध्यत्वेप्राथम्य मेवहेतुः । प्रश्नोत्तरयोरेकविषयत्वस्योत्तरानुसारेणप्रश्नव्याख्यानेपिसिद्धेः । किंच प्रकृतांपृथिवींवक्तिप्रश्नस्थंसर्व नामयत् । तस्मात्तदनुरोधीचेत्समाधिश्चतथाभवेत् ॥ १ ॥ तथाहि । "असौलोक" इत्यादिनादाल्भ्योक्तंस्वर्गलो कस्यसामाश्रयत्वंशालावत्यः "अप्रतिष्ठितंवैकिले" त्यादिनादूषयित्वा "अयंलोक" इत्यादिनापृथिवीलोकःसामाश्रय

गु० नइवोत्तरानुसारेणप्रश्नव्याख्यानेसंभवत्येवेतिसंदेहएवस्यात् । नतुनिश्चयइत्यरुचेराह ॥ **किंचेति** ॥ ननुप्रकृतपृथिवीलोकगतिरेवपृष्टेत्ययुक्तं । तथासत्यसेत्यनुप

SGDF Sri Gargeshwari Digital Foundation

प्र० कृते शालावत्यः अयंलोकइति असौलोकइतिदाल्भ्यउवाचेति" । दाल्भ्येनोक्तमित्यर्थः । उपालब्धेनदाल्भ्येनामुष्यलोकस्यकागतिरितिप्रश्ने कृते शालावत्यः अयंलोकइति पृथिवीलोकस्सामाश्रयइत्युवाचेत्यर्थः ॥ ऊचइति ॥ "ब्रूञ्व्यक्तायांवाची"त्यस्य"ब्रुवोवचि"रितिवच्यादेशे रूपं । तेनात्मनेपदंसाधु । तं शालावत्यमपि । उपालब्धेनशालावत्येनेत्यर्थः । ननुपृथिव्याःप्रस्तुतत्वेप्यस्येत्येतत्सर्वपरंकिंनस्यादित्यतआह ॥ अस्येतीति ॥ नवमाद्यपादे"लिंगविशेषनिर्देशात्समानविधानेष्वप्राप्तिःसारस्वतेस्त्रीत्वा"दितिपंचदशाधिकरणेचिंतितं ज्योतिष्टोमेसवनीयाःपशवःश्रुताः "आग्नेयमग्निष्टोमआलभेते ऐंद्राग्नमुक्थ्येद्वितीयं ऐंद्रंषोडशिनितृतीयं सारस्वतींमेषींचतुर्थीमतिरात्र"इति । तत्र "प्रास्मा अग्निंभरते"त्यध्रिगुवचनंमेष्यांभवत्युतनेतिसंशये प्रकरणाविशेषात्प्रास्मैपशवइतिपशुत्वाभिप्रायेणस्त्रियामपिप्रास्माइतिपुल्लिंगोपपत्तेश्चात्राप्यस्त्यध्रिगुवचनमितिप्राप्ते प्रत्यक्षपशुशब्दाभावात्प्रास्माइतिपुल्लिंगस्यप्रत्यक्षस्थितपुंपशौकृतार्थत्वान्नास्तिमेष्यामध्रिगुवचनमितिसिद्धांतइति । तत्रयथाप्रास्माइतिशब्दस्यप्रकृताजादिपरत्वंतथात्रापीत्यर्थः । अस्येत्यस्यपृथिवीपरत्वेप्रश्नायोगमाशंक्यनिरस्यति ॥ नचेति ॥ प्रसिद्धत्वं

इत्यूचे । प्रवाहणस्तु तं "अंतवद्वैकिले"त्यादिनादूषयत् । तर्ह्यस्यलोकस्यकागतिरितिशालावत्येनप्रकृतपृथिवीलोकगतिरेवपृष्टानसर्वगतिः । अस्येतिसर्वनाम्नः "प्रास्माअग्नि"मित्यादाविवप्रकृतपरत्वात् । तथाचप्रश्नानुसारेणोत्तरव्याख्याने "सर्वाणिहवा"इत्यत्रसर्वशब्दःपृथिवीमात्रपरःस्यात् ।

गु० पन्नंस्यात् । एतच्छब्दस्यदृश्यमानसर्वप्रपंचविषयत्वादित्यतआह ॥ अस्येति ॥ सर्वशब्दःपृथिवीमात्रपरःस्यादिति ॥ पार्थिवकार्यबहुत्वाद्बहुवचनाद्युपपत्ते

SGDF
Sri Gargeshwari Digital Foundation

प्र० किंवेदादुतलोकतः । आद्यआह ॥ **सर्वेति** ॥ **वाक्यांतरतइति** ॥ "सइमाँल्लोकानसृजते"त्यादितइत्यर्थः । द्वितीयआह ॥ **लोकतइति** ॥
प्रश्नस्यपृथिवीगतिमात्रपरत्वेबाधकान्याशंक्यनिरस्यति ॥ **नचेति** ॥ **आपइतीति** ॥ अद्भ्यःपृथिवीतिवचनादितिभावः ॥ **सर्वाणीति** ॥
पृथिवीकारणमात्रात्सर्वोत्पत्तेरभावादन्यस्यापिजनकत्वेनावधारणस्याप्ययोगइतिभावः । अन्योन्याश्रयादित्युपलक्षणं । अपांपृथिवीगतित्वे
पिमूलकारणत्वाभिप्रायेणाकाशोक्तिसंभवात् । मूलकारणतोपपादनार्थमेव "सर्वाणिहवा"इत्यादेरुपपत्तेः । सर्वपदस्यस्वव्यतिरिक्तसर्वपर
त्वोपपत्तेः । नचतर्ह्यात्मनआकाशइत्यादेरात्मावाच्यइतिवाच्यं भूतविषयविचारेवियतएववाच्यत्वात् । परंपरयाभूतोपादानस्यापरस्याभावे

**नचपृथिवीकारणस्यापांप्रसिद्धत्वेनप्रश्नवैयर्थ्यं । सर्वलोककारणस्यापिवाक्यांतरतःप्रसिद्धेः । लोकतस्त्वपांपृथि
वीकारणत्वस्याप्यप्रसिद्धेः । नचपृथिवीमात्रकारणप्रश्ने आपइतिवक्तव्यत्वात्प्रतिवचनेआकाशपदंसर्वाणीतिसर्व
पदमाकाशादेवेत्यवधारणंचायुक्तं । तस्मात्प्रश्नोपिसर्वलोकगतिविषयइतिवाच्यं । भामत्यां "प्रश्नानुरोधेनो
त्तरव्याख्याना"दित्युक्तत्वेनोत्तरानुसारेणप्रश्नव्याख्यानेऽन्योन्याश्रयात् । यच्चोक्तं "त्यजेदेकंकुलस्यार्थे"इति
तन्न । आकाशश्रुतेःप्रधानत्वादप्रधानानेकलिंगबाधस्यापि "आत्मार्थेपृथिवींत्यजे"दितिन्यायसिद्धत्वात् ।**

गु० रितिभावः । प्रसिद्धत्वंकिंश्रुतितःकिंवालोकतः । नाद्यइत्याह ॥ **सर्वेति** ॥ नद्वितीयइत्याह ॥ **लोकतइति** ॥ नन्वेवंप्रश्नस्यपृथिवीमात्रविषयत्वेपरिहारवाक्यानु
पपत्तिरित्याशंक्यनिषेधति ॥ **नचेति** ॥ **अन्योन्याश्रयादिति** ॥ नचसर्वाणिहवाइमानिभूतानीत्युत्तरवाक्यबलेनप्रश्नवाक्यंव्याख्यायतदनुरोधेनाकाशइतिहो
वाचेतिप्रतिवचनवाक्यंव्याख्यायतइतिनान्योन्याश्रयइतिवाच्यं । अनुपसंजातविरोधिनःपूर्वस्यव्याख्यानायोत्तरानुसरणे उत्तरेणमध्यस्थस्याकाशइतिहोवाचेत्यस्यैवव्या

प्र० नावधारणोपपत्तेश्चेत्यपिध्येयं ॥ **उक्तंहीति** ॥ षष्ठेतृतीयपादे "द्रव्यसंस्कारविरोधेद्रव्यंतदर्थत्वा"दित्येकोनविंशेऽधिकरणेचिंतितं । यदा
पुनस्तनुत्वात्तक्षणादिसंस्काराणामयोग्यःखदिरोनियोजनमात्रयोग्योलब्धः कदरस्तुमहान्संस्कारयोग्यः तदाकस्योपादानमितिसंशये खदिरो
पादानेसंस्काराणांबहूनांलोपःस्यात् । कदरोपादानेकृतेतुतेषामनुग्रहः । खदिरशास्त्रमपिकिंचिन्न्यूनंसंपादितंभवति । अतस्तस्योपादानमि
तिप्राप्ते बहवोपिद्रव्यार्थाएवसंस्काराइतिनतद्वशेनद्रव्यपरित्यागोयुक्तः । अतःप्रधानभूतःखदिरएवोपादातव्यः । तक्षणादीनिलुप्येरन्निति
सिद्धांतइति । तत्रप्रधानानुग्रहादप्रधानानेकबाधनमुक्तमित्यर्थः । नन्वाकाशशब्दोभूतइवब्रह्मण्यपिमुख्यएव । अतोनब्रह्मपक्षेपिमुख्यबाध
इत्यतआह ॥ **नहीति** ॥ त्यजेदेकंकुलस्यार्थइतिन्यायेनबह्वनुग्रहायाकाशपदंबाध्यमित्यत्रदोषांतरमाह ॥ **किंचकारणइति** ॥ तयोः उपा

**उक्तंहिषष्ठेप्रधानखदिराबाधायतक्षणाद्यनेकगुणबाधेनतक्षणाद्ययोग्योपिपशुनियोजनयोग्यःखदिरएवोपादेयोन
तुतक्षणादियोग्यःखदिरप्रतिनिधिःकदरइति । नहित्वत्पक्षेब्रह्मण्याकाशशब्दोमुख्यः । किंच कारणेकार्यगाय
द्वत्तथाकार्येपिहेतुगाः । व्यपदेष्टुंहिशक्यंतेधर्माऐक्याविशेषतः ॥ १ ॥ पूर्वाधिकरणेत्वत्पक्षेकार्यगतस्यहिरण्यश्म
श्रुत्वादेःकारणेव्यपदेशइवेहकारणब्रह्मधर्माणांसर्वकारणत्वादीनांभूताकाशेव्यपदेशोस्तु । तयोरभेदाविशेषात् ।**

गु० स्यानेलाघवात् । स्वन्यायविरोधापत्तेः । ननुप्रधानानुसारेणाप्रधानबाधइत्येतत्क्वोपलब्धमित्यतआह ॥ **उक्तंहीति** ॥ ननुदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । दृष्टांतेहि
तल्लक्षणादियोग्यत्वरूपानेकलिंगैःखदिरप्रतिनिधिकदरग्रहणेखादिरोयूपोभवतीत्यादिनाप्रधानत्वेनश्रुतखादिरादिबाधवत्प्रकृतेकारणत्वादिलिंगैराकाशशब्दस्यब्रह्मप
रत्वेनप्रधानाबाधात् । प्रधानीभूताकाशश्रुतेर्ब्रह्मणिमुख्यत्वाभ्युपगमादित्यतआह ॥ **नहित्वत्पक्षइति** ॥ **पादभेदश्चनस्यादिति** ॥ द्वितीयतृतीयपादभेदश्च

SGDF
Sri Gargeshwari Digital Foundation

प्र० दानोपादेयभावापन्नयोरित्यर्थः । इदंविषयवाक्यमद्वैतिमतेऽत्यंतायुक्तमित्याह ॥ **किंचेति** ॥ श्लोकंव्याख्याति ॥ **नहीति** ॥ निर्विशेषे ज्यायस्त्वंनेत्युक्तमुपपादयति ॥ **नहीति** ॥ ननुवास्तवगुणाभावेपिनिर्विशेषेकल्पितःपरिमाणादिःस्यादित्याशंक्यातिप्रसंगमाह ॥ **यद्यपीति** ॥ **अधिकारीति** ॥ मंदामंदरूपाधिकारीत्यर्थः । निर्विशेषज्ञानमोक्षरूपफलभेदइत्यर्थः ॥ **विद्येति** ॥ सविशेषनिर्विशेषविद्येत्यर्थः । पर

किंच विशिष्टविषयत्वंचेदनंतत्वाद्यसंभवः । विशुद्धविषयत्वंचेज्ज्यायस्त्वादेरसंभवः ॥ १ ॥ नहिसोपाधिकेपरिच्छिन्नेब्रह्मण्यनंतत्वादिकं । नापिनिर्विशेषेज्यायस्त्वादिकं । नहिज्यायस्त्वमपरिच्छिन्नत्वं । अनंतइत्यनेनपुनरुक्तेः । किंतुपरिमाणाधिक्यंगुणाधिक्यंवा । नचतन्निर्विशेषेस्ति । यद्यपिवस्तुतोनिर्विशेषे आरोपितोविशेषोनविरुद्धः । तथापित्वदुक्तःसविशेषनिर्विशेषविद्ययोरधिकारिभेदःफलभेदोविद्याभेदेनपादभेदश्चन स्यात् । एवमुत्तराधिकरणविषयवाक्येष्वपिसगुणनिर्गुणोभयलिंगयुक्तेषुदोषऊह्यः ।

गु० नस्यादित्यर्थः । नन्वारोपाविशेषेपिप्रातिस्विक्विशेषस्य व्यावहारिकविशेषाभावेननिर्विशेषत्वात्पादभेदादिकंयुक्तमितिचेन्न । आरोपेऽवांतरविशेषस्यैवाप्रामाणिकत्वात् । भावेपिवापदार्थविनिमयस्यापिव्याख्यानसंभवेनोक्तव्यवस्थायोगापरिहारात् ॥ **शास्त्रादिसंगतिरितीति** ॥ पूर्वाधिकरणद्वयेलिंगविचारात्फलतःपादसंग

SGDF
Sri Gargeshwari Digital Foundation

प्र० मतेसूत्रंचायुक्तमित्याह ॥ किंचेति ॥ एतेनयदत्रमूर्खप्रलपनं आकाशाद्वायुरित्यादिश्रुत्यंतरे आकाशस्यसर्वभूतकारणत्वेनोक्तेरितिहोवाचे त्यत्राप्याकाशोभूतमेवेतिप्राप्ते सर्वकारणत्वात्तल्लिंगात्परमाकाशभिन्नश्शिवएवात्रोच्यतइति तदुक्तं "आकाशस्याम्नानाच्छांदोग्येसर्वभूतकार णता । आम्नायबोधितेर्थेनचविमतिःकर्तुमुचितानः । अस्तुसपरमाकाशस्तदभेदस्त्वीश्वरोपितद्धर्मी"त्यादि । तन्निरस्तं । सर्वभूतकारणत्व स्यभूताकाशएवसावकाशितत्वात् । वैष्णवनामत्रयांतर्गतानंतशब्दसामानाधिकरण्यविरोधाच्च । "ब्रह्मैवहिपृथिव्यासाविष्णुराकाशनामकः । आदीप्तत्वाद्वरीयांश्चपरमोहरिरेवही"तिस्मृतिविरोधाच्च । भाष्यादावुदाहृतवचनविरोधाच्च । लिंगानांभाष्यादौवैष्णवत्वसमर्थनाच्चेति । "लोकतोऽन्यत्रप्रसिद्धाकाशनाम्नोब्रह्मणिसमन्वयप्रतिपादनादस्तिशास्त्रादिसंगति"रित्यत्रकथंसंगतित्रयलाभइत्यतआह ॥ अत्रेति ॥ उप न्यासमुखेनशिष्टंविवृतमितिभावः ॥ ७ ॥ आकाशाधिकरणंसंपूर्णं ॥ ८ ॥

किंचसूत्रोक्तंलिंगंनतावद्ब्रह्मणितत्वतोस्ति । यद्विचारोपितंलिंगंतत्साध्याब्रह्मतापिहि । आरोपितास्या देवंचपूर्वपक्षःस्थिरोभवेत् ॥ १ ॥ तस्मान्मतांतरमयुक्तं ॥ ॥ टीकाक्षरार्थस्तु ॥ ॥ अस्तिशास्त्रा दिसंगतिरिति ॥ अत्र ब्रह्मणीत्यनेनशास्त्रसंगतिः समन्वयेत्यनेनाध्यायसंगतिः अन्यत्रप्रसिद्धना म्नइत्यनेनपादसंगतिःसूचिता । एवमुत्तरत्रापिद्रष्टव्यं ॥ ७ ॥ आकाशाधिकरणंसंपूर्णं ॥ ८ ॥

गु० तावपिमुख्यतस्तदभावादक्षरार्थकथनास्वारस्यादुपन्यासमुखेनैवव्याख्याततत्वाच्चात्रसंगतिटीकाक्षरानुक्तिरितिज्ञेयं ॥ एवमुत्तरत्रापीति ॥ उपलक्षणमेतत् । पूर्वत्रापीत्यपिद्रष्टव्यं ॥ ७ ॥ आकाशाधिकरणंसंपूर्णं ॥ ८ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐअतएवप्राणःॐ ॥ "आध्यात्मिकाशेषशब्दोपलक्षकप्राणशब्दवाच्योहरि"रितिटीकांमनसिनिधायाधिकरणोपाधिमाह ॥ **अत्रेति॥** प्राधान्यात्प्राणशब्दस्यसूत्रेमुखतःकीर्तनमितिभावः । अत्रभाष्यदिशाऽऽनंदमयाधिकरणानंतर्यप्रतीतेः "अतिदेशोहिताद्दश"इत्यनुभाष्यदिशांतरधिकरणेनसंगतिमाह ॥ **अत्रापीति** ॥ नकेवलंपूर्वत्रेत्यपेरर्थः । जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यांवायोरेवेत्यन्वयः ॥ **इत्यादीति॥** प्रमाणाश्रितात्वित्यादिनावक्ष्यमाणदिशाऽऽदिशब्दः । तर्हिपूर्वानंतर्येकोहेतुरित्यतःपूर्ववैषम्यमाह ॥ **भूतेति** ॥ नचभाष्यविरोधइत्याशंक्य तस्यतद्वैत्वंप्राणइतिप्राणस्यविष्णवन्यत्वेमहाभोगशब्दोक्तपूर्णानंदत्वमपितस्यैवेत्यानंदमयोप्यन्यस्स्यादितिपूर्वाक्षेपेणसिद्धांतेतत्समाधानेनप्रयोजनमात्रपरत्वेनोपपत्तेः । नचपूर्वब्रह्मशब्दादिनाविष्णुनिष्ठतयावधारितस्यानंदमयत्वरूपपूर्णानंदत्वस्यात्रप्राणेश्रवणात्प्राणोविष्णुरेवेतिवैपरीत्य

॥ ॐअतएवप्राणःॐ ॥ ॥ अत्राध्यात्मिकप्राणादिशब्दसमन्वयउच्यते । अत्रापि प्राणशब्दप्रवृत्तिनिमित्तंजीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यांप्राणशब्दार्थत्वेनप्रसिद्धस्यवायोरेवेतिसएवप्राणशब्दवाच्योनतुविष्णुरित्याद्यधिकाशंकानिरासेनपूर्वन्यायएवातिदिश्यतइत्यातिदेशिक्यवांतरसंगतिः । भूताकाशस्यत्ववकाशहेतुत्वेन्वयव्यतिरेकौनस्तः । परिच्छिन्नस्यतस्याभावेपिक्वचिदवकाशदर्शनात् ।

गु० ॥ ॐअतएवप्राणःॐ ॥ अधिकरणोपाधिप्रदर्शनपूर्वकमधिकरणप्रतिपाद्यंदर्शयति ॥ **अत्रेति** ॥ ननुप्राणशब्दप्रवृत्तिनिमित्तस्यजीवनादिहेतुत्वस्यान्वयव्यतिरेकाभ्यांवायौप्रसिद्धत्ववत् आकाशशब्दप्रवृत्तिनिमित्तस्यावकाशप्रदत्वस्यान्वयव्यतिरेकाभ्यांभूताकाशेपिप्रसिद्धत्वात्कथमियमभ्यधिकाशंकेत्यतआह ॥ **भूताकाशस्यत्विति** ॥ परिच्छिन्नस्येतिहेतुगर्भविशेषणं । परिच्छिन्नत्वात्क्वचिद्भूताकाशव्यतिरेकेवक्तव्येतत्रैवावकाशदर्शनादितिभावः । नन्वानंदमयाधिकरणेप्राणशब्दस्य

प्र० स्यापिसंभवान्नेदंप्रयोजनंयुक्तमितिवाच्यं । टीकोक्तदिशासावकाशेनलिंगमात्रेणनिरवकाशप्राणश्रुतिबाधायोगात् । उक्तंचटीकायां "नचमहाभोगत्वंश्रुतिबाधकं । श्रुतितोलिंगस्यदौर्बल्या"दिति । कथंतर्ह्यानंदमयेश्रुतस्यब्रह्मशब्दादेर्बाधइतिचेत् अत्रत्यपूर्वपक्षन्यायेनान्यत्रप्रसिद्धनिरवकाशप्राणश्रुतिसाहचर्येणानंदमयत्वस्यान्यत्रप्रसिद्धत्वापत्त्यातद्बलेनब्रह्मशब्दादेर्मुख्यप्राणएवकथंचित्सावकाशत्वादितिभावः । भाष्योक्तंफलंप्रकारांतरेणाक्षिप्यसमाधत्ते ॥ **यद्यपीति** ॥ नन्वेवमयंप्राणोन्यश्चेत् "प्राणंदेवाअनुप्राणंती"त्युक्तोप्यन्यस्स्यादितिसाक्षात्प्राणमयाक्षेपसमाधानेनसाफल्यसंभवे महाभोगत्वमुखेनाक्षेपस्तुवक्रोनाश्रयणीयइतिशंकार्थः । नचात्रवक्ष्यमाणरीत्याप्राणश्रुतिबाहुल्यापादनासाहित्यादिरूपस्येवतत्रविशेषहेतोरभावान्नतदाक्षेपइतिवाच्यं । एकत्रनिर्णीतस्यैवार्थस्यबाधकाभावेसर्वत्रग्राह्यत्वात् । नचतत्रविष्णुपरत्वंबाधकं । अद्याप्यसिद्धेः । नचतत्रमुक्तप्राप्यत्वादिब्रह्मलिंगमेवबाधकमितिवाच्यं । अन्यत्रप्रसिद्ध्याब्रह्मलिंगानामन्यथानयनस्यात्रेवतत्रापितुल्यत्वादित्युक्तत्वात् ॥ **कंठोक्तेति** ॥ उपलक्षणमेतत् । महाभोगत्वमुखेनानाक्षेपेविष्णुधर्मतयानिर्णीतेनमहाभोगत्वेनविष्णुरेवप्राणइतिशंकास्यात् ।

यद्यप्यत्र "तद्वैत्वंप्राण"इत्यत्रप्राणस्यविष्णोरन्यत्वे "प्राणंदेवा"इत्यादावप्यन्यत्वंस्यादित्यपिप्रयोजनंवक्तुंशक्यं तथापिसूत्रेकंठोक्तानंदमयत्वाक्षेपोदर्शनीयइतिभाष्याद्यौतदुक्तिः ।

गु० भगवत्परत्वस्यप्रतिपादितत्वेनात्रापितत्प्रतिपादनेतेनगतार्थत्वंस्यात् । किंचाकाशस्तल्लिंगादित्यादिना इतिहोवाचेतिवाक्ये आकाशशब्दस्यविष्णुपरत्वस्यप्रतिपादितत्वेन आकाशोर्थांतरत्वादीत्यत्राकाशशब्दस्योभयत्रप्रसिद्धत्ववत् । आनंदमयाधिकरणेप्राणशब्दस्यभगवत्परत्वेनसमर्थितत्वादस्याप्युभयत्रप्रसिद्धत्वापत्त्यापादासंगति

SGDF
Sri Gargeshwari Digital Foundation

प्र० सामाभूत् । महाभोगत्वस्यापिवायुधर्मत्वादितिदर्शयितुमित्यपिध्येयं । एवंतर्हिप्राणत्वस्यानाक्षेपेगतार्थतादिरतआह ॥ **अतएवेति** ॥ प्राणतायाः कोह्येवान्यात्कःप्राण्यादित्युक्तायाः । अन्यथातत्रैवविष्णोर्जीवनहेतुत्वरूपप्राणदत्वस्यसिद्धत्वादिहसिद्धांतेतत्समर्थनंनस्यादितिभावः ॥ **नापीति** ॥ अतएवेत्यनुवर्तते । प्राणपदप्रवृत्तिनिमित्तस्यविष्णावाक्षेपेणप्राणपदस्यभगवतिवृत्तेरसंमतेः । अन्यथा "आकाशोर्थांतरत्वादी"त्यत्रपूर्वपक्षे "आकाशइतिहोवाचे"त्यत्रविष्णोराकाशतायाअनाक्षेपेणोभयत्रविष्णोराकाशतायाःप्रसिद्धिवदुभयत्रप्रसिद्धतास्यादितिभावः। एवंसंगतिमुक्त्वाभाष्योक्तप्रयोजनटीकांचसमर्थ्यविषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ "तद्वैत्वंप्राणोऽभवः महान्भोगःप्रजापतेः भुजःकरिष्यमाणः यद्देवान्प्राणयोनवे"तितैत्तरीयेश्रुतःप्राणोविषयइतिध्येयं ॥ **मुख्येति** ॥ प्राणशब्दस्यवायुवृत्त्यादिसाधारणत्वेपितस्यात्रासंभवप्रकारस्यवक्ष्यमाणत्वान्मुख्यवायुरित्युक्तं ॥ **विपरीतमिति** ॥ लिंगानुसारेणश्रुतिर्बाध्येत्यर्थः ॥ **जीवनेति** ॥ "यद्देवान्प्राणयोनवे"तिवाक्यशेषेतथोक्तेरितिभावः ॥ **जीवनमिति** ॥ जीवानामितिशेषः । यदिजीवनंमुख्यान्वयव्यतिरेकानुविधायि तदाप्राणशब्दप्रवृत्तिनि

अतएवानंदमयोक्तायाविष्णोःप्राणतायाइहाक्षेपान्नतेनगतार्थता । नापिप्राणशब्दस्योभयत्रप्रसिद्धता । अत्र प्राणःकिंमुख्यवायुरुतब्रह्मेतिचिंता । तदर्थंकिंप्राणश्रुतिप्रसिद्ध्यनुसारेणश्रीपतित्वादिलिंगंबाध्यंकिंवाविपरीतमिति । तदर्थंप्रसिद्धिबाधेकिंश्रुतेर्मुख्यत्वहानिरुतनेति । तदर्थंप्राणशब्दप्रवृत्तिनिमित्तंजीवनहेतुत्वंकिंब्रह्मणिनास्त्युतास्तीति । तदर्थंकिंजीवनंमुख्यप्राणान्वयव्यतिरेकानुविधाय्युतेश्वरान्वयव्यतिरेकानुविधायीति । ॥ ३४२ ॥

गु० श्वसादित्यतआह ॥ **अतएवेति** ॥ तस्यैवविवरण**मानंदमयोक्ताया**इत्यादि । ननुजडंप्रत्यपित्वमभवइत्यादिप्रयुज्यते । ओषधेत्रायस्वैनमित्यादौतथादर्शनादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० मित्तंत्रह्मणिनेतिमुख्यत्वहानेर्नश्रुतिबाधःकार्यइतिवायुरेवेतिपूर्वपक्षेफलं। यदातुविपरीतं तदाब्रह्मेतिसिद्धांतेफलं। इयंचचिंतापरंपराप्राण स्तत्त्विवतिसौत्रप्रतिज्ञांशव्यावर्त्यप्रमेयाश्रिताभ्यधिकाशंकोपयुक्ता । एषाशंकाऽनुव्याख्यानेकंठोक्तेतितदुपयुक्तचिंतैवप्रथमंविशदीकृता । हेत्वं शव्यावर्त्यप्रमाणाश्रिताभ्यधिकाशंकोपयुक्तांचिंतामाह ॥ **तथेति** ॥ तत्रैवंद्रष्टव्यं । प्राणोमुख्यवायुरुतब्रह्मेतिचिंता । तदर्थंब्रह्मत्वसाधकं लिंगादिकंनास्त्युतास्तीति । तदर्थंभर्तासन्भ्रियमाणइत्युक्ताचिंतेति । यदात्वन्यस्तदाब्रह्मलिंगमत्रनास्तीतिसाधकाभावाद्वायुरेवेतिपूर्वपक्षे फलं । यदात्वनन्यस्तदाब्रह्मलिंगसत्त्वाद्ब्रह्मेतिसिद्धांतेफलमितिध्येयं । अत्रैवंपूर्वपक्षक्रमः । प्राणपदस्यवायावेवप्रसिद्धेर्वायुरेवप्राणोनविष्णु

तथा "भर्तासन्भ्रियमाण"इत्यनुवाकस्थेन "तद्वैत्वंप्राण"इतिवाक्येनोक्तःप्राणःकिं "अद्भ्यः
संभूत" इत्यनुवाकस्थेन "श्रीश्चतेलक्ष्मीश्चपत्न्या"वितिवाक्येनोक्तादन्यःकिंवानन्यइति ।
नन्वत्रप्राणोनतावज्जडरूपोवायुरितिपूर्वःपक्षः । जडंप्रतित्वंप्राणोऽभवइत्याद्युक्त्ययोगात् ।

प्र० रिति । यद्यपिनिरवकाशलिंगैर्लोकप्रसिद्धिबाधइहपूर्वत्रचाविशिष्टः। विषयवाक्यभेदेनचनाधिकरणभेदः। तथापि "अध्यात्ममन्वयव्य तिरेकतः । प्राणादिहेतुताद्दृष्टेरतिदेशोहिताद्दृश"इत्यनुव्याख्यानोक्तरीत्या "प्राणशब्दप्रवृत्तिनिमित्तस्यजीवनकारणत्वस्यान्वयव्यतिरेकाभ्यां वायावेवदर्शना"दितिटीकोक्ताभ्यधिकाशंकयापूर्वपक्षोत्थानसंभवोवाच्यः। सचायुक्तः । प्राणोजडवायुरितिवामुख्यवायुदेवतेतिवापूर्वपक्ष यितव्यत्वात् । तत्राद्यस्त्वयुक्तः । अंत्येहेतोरसिद्धिरितिभावेन "प्राणशब्दस्यान्यत्रवृत्तावपी"त्यादिटीकांविवृण्वन्नाक्षिपति ॥ **नन्विति** ॥ **जडंप्रतीति** ॥ चेतनंप्रतीवसंबोधनादिरूपोक्त्ययोगादित्यर्थः । एतेनटीकायांमुख्यत्वोक्तिरुपलक्षणेतिसूचितं । ननु "ओषधेत्रायस्वे"त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० दौजडस्यापिसंबोधनंदृश्यतइत्यतआह ॥ **ओषधइति** ॥ **अन्यपरत्वेनेति** ॥ "अभिधानेऽर्थवाद"इतिमंत्राधिकरणगुणसूत्रेयत्राचेतना ओषधिग्रावादयस्त्राणश्रवणार्थमामंत्र्यंतेकिंपुनर्विद्वांसोब्राह्मणाइतिकर्मणिसमुत्साहार्थमित्युक्तेरुत्साहपरत्वेनेत्यर्थः । एतेननह्यचेतनंप्रतित्वमे वमभवइतिबुद्धिमतोच्यतइतिसुधावाक्यंविवृतं ॥ **तदन्वयेति** ॥ वायुविकारान्वयव्यतिरेकानुविधायित्वस्यैवजीवनादेःप्रतीयमानत्वेन मुख्यान्वयव्यतिरेकानुविधानादर्शनादित्यर्थः । मंदानांजडपरत्वेनापिपूर्वपक्षसंभवभ्रममाशंक्यटीकादिविरोधेननिरस्यति ॥ **नन्विति** ॥

"ओषधेत्रायस्वैन"मित्यादेश्चस्वमतेऽभिमानिदेवतापरत्वात् । मीमांसकमतेचान्यपरत्वे नाचेतनसंबोधनपरत्वाभावात् । नापिमुख्यप्राणइति । जीवनस्यतदन्वयव्यतिरेकानु विधानादर्शनेनाधिकाशंकायोगात् । नन्वाकाशाधिकरणपूर्वपक्षेजडस्याप्याकाशस्य

गु० त्यतआह ॥ **ओषधइति** ॥ **मीमांसकमतेचान्यपरत्वेनेति** ॥ अर्थवादेतथाशास्त्राधिकरणेअचेतनेऽर्थबंधनादित्यस्मिन्सूत्रे ओषधेत्रायस्व शृणोतग्रावाण इतिचसंबोधनंकार्यनियोगाभिमुख्यकरणार्थं । नचाचेतनस्याभिमुख्यंसंभवति । नचपशुत्राणेप्रातरनुवाकश्रवणेवाऽचेतनप्रेरणप्रवृत्तिरुपपद्यतइत्यानर्थक्यमर्थविव क्षायां । अतोऽदृष्टपरत्वेनाचेतनसंबोधनपरत्वाभावादितिभावः । अथवास्तुतिपरत्वेनाचेतनसंबोधनपरत्वाभावादितिभावः । तथाचोक्तंवार्तिके एवमोषधेत्रायस्वे त्याद्यचेतनसंबोधनानिस्तुतिपरत्वेनयोज्यानि । यस्मिंश्चयनओषधिरपित्रायेततत्रचयनकर्तात्रायतइतिकिमुवाच्यं । तथाग्रावाणोपिप्रातरनुवाकंशृण्वंतिकिमुतविद्वांसो ब्राह्मणाइत्यामंत्रणाभिप्रायः । यद्वाअभिधानेऽर्थवादइतिमंत्राधिकरणगुणसूत्रोक्तरीत्याओषधेत्रायस्वैनमित्यादेश्चैतन्यारोपेणक्रतुसाधनीभूतोपकरणविहितस्तुतिपरत्वे नेत्यर्थः । अस्तुजडवायुरेवप्राणइतिपूर्वःपक्षः । नचैवंत्वमभवइत्याद्ययोगइतिवाच्यं । अभिमानिद्वारोपपत्तेरित्याशंकते ॥ **नन्विति** ॥ ननुटीकानुव्याख्यानयो

प्र० **आनंदमयत्वादिकमिति** ॥ पूर्वत्रस्पष्टमेतत् । अस्यापि मुख्यप्राणस्यापीत्यर्थः । टीकादेरपिकिंमूलमित्यतआह ॥ **त्वमभवइति** ॥ यदुक्तंजडरूपोवायुरितिवामुख्यइतिवापूर्वपक्षइति तत्रत्वदुक्तानुपपत्त्यैवजडायोगान्मुख्यएवेतिब्रूमइतिभावेनतत्रोक्तंदोषंपरिहर्तुमाह ॥ **उच्य तइति** ॥ "प्राणशब्दप्रवृत्तिनिमित्ते"त्यादिटीकांविवृण्वंस्तत्र "यत्प्राप्ति"रितिस्मृत्युक्तिरुपलक्षणमितिभावेनाह ॥ **तदिति** ॥ ब्रह्मणश्श रीरमित्यर्थः । आदिपदेन "यत्प्राप्तिर्यत्परित्यागउत्पत्तिर्मरणंतथे"त्यादिश्रेष्ठश्चेत्यत्रभाष्यस्थमत्रटीकोक्तंग्राह्यं । तत्प्राणइतिवाक्यंविष्णुपरं

आनंदमयत्वादिकमिवात्रापिजडस्याप्यभिमानिद्वारासंबोधनादियुक्तं । नचमुख्येमुख्यत्वात्प्राणशब्दस्यकथंजडपरत्वेनपूर्व पक्षइतियुक्तं । लोकप्रसिद्ध्यापूर्वपक्षयतोब्रह्मणीवमुख्येपिमुख्यत्वज्ञानाभावादितिचेन्न । "मुख्यवायावेवमुख्यत्वा"दित्यादि पूर्वपक्षटीकया "प्रेरकोस्यापियद्धरि"रित्याद्यनुव्याख्यानेनचविरोधात् । त्वमभवः करिष्यमाणः प्राणयइत्यादीनांबहूनाम मुख्यार्थत्वापाताच्चेतिचेदुच्यते । प्रत्यक्षेणजीवनस्यमुख्यप्राणान्वयव्यतिरेकानुविधानाज्ज्ञानेपितत्प्राणेप्रपन्नउदतिष्ठत् तत्प्रा णउत्क्रांतेपद्यते"त्यादिवाक्यात्तज्ज्ञानं । नच "प्राणस्तथानुगमा"दितिवक्ष्यमाणन्यायेन "तत्प्राण"इत्यत्रप्राणोविष्णुरितियुक्तं ।

प्र० नवायुपरमतोस्मादपिनजीवनहेतुत्वज्ञानंमुख्यस्येत्याक्षिपति ॥ **नचेति** ॥ **वक्ष्यमाणेति** ॥ तत्रहि "तावाएताश्शीर्षन्श्रियश्श्रिता"इत्या रभ्यबहुस्थलेपुश्रूयमाणःप्राणोविष्णुरन्योवेतिसंशये प्राणसंवादादिलिंगान्मुख्यप्राणादिरन्यएवेतिप्राप्ते "तंदेवाःप्राणयंते"त्यादिनादेवोपदेश्य त्वादिविष्णुलिंगानामस्मिन्प्रकरणेऽनुगमादनुवृत्तेरन्यप्रापकाणामंतर्यामिणिसंभवात्प्राणोविष्णुरितिवक्ष्यमाणन्यायेनेत्यर्थः । एतदुपजीवने

SGDF Sri Gargeshwari Digital Foundation

प्र० नतदधिकरणसिद्धांतोत्थानादेतत्पूर्वपक्षदशायांतत्रत्यन्यायेनास्यवाक्यस्यनविष्णुपरत्वंशंकार्हमितिभावेनसमाधत्ते ॥ अत्रत्येति ॥ सिद्धांतासिद्धेरिति ॥ अन्यथास्वर्गकामाधिकरणसिद्धफलान्वयमुपेत्य किंभावार्थस्यफलकरणताकिंवानामार्थस्येतिविचारात्मकभावार्थाधिकरणसिद्धांतेनफलाभावरूपस्वर्गकामाधिकरणपूर्वपक्षानुदयस्स्यादितिभावः ॥ यथाऽऽकाशोर्थांतरेत्यादि ॥ प्रागेवविस्तृतमेतत् ॥ एतेनेति ॥ एतत्पूर्वपक्षदशायांतत्रत्यस्यप्राणस्यवायुपरत्वकथनेनेत्यर्थः । अन्यथातत्प्राणइतिश्रुतेस्तत्रैवविष्णुपरत्वसिद्धौविष्णोरेवश्रौतान्वयव्यतिरेकाभ्यां जीवनहेतुत्वसिद्ध्याप्राणपदमुख्यार्थत्वसिद्धेरेतदनारंभएवस्यादितिभावः । तदेवव्यनक्ति ॥ एतदिति ॥ वाक्यात्तज्ज्ञानमित्युक्तपरिहारं टीकारूढंकरोति ॥ अतएवेति ॥ प्रत्यक्षेणजीवनहेतुत्वस्यज्ञानायोगादेवेतिवावचनगम्यत्वादेवेतिवार्थः । टीकायांस्मृत्युदाहरणेपिवक्ष्यमाण

अत्रत्यसिद्धांतन्यायेनप्राणशब्दप्रवृत्तिनिमित्तंजीवनादिहेतुत्वंविष्णोरंगीकृत्यनिरवकाशान्यलिंगेनतत्रपूर्वपक्षोदयेन तद्विचारस्यैतत्सिद्धांतानंतरभावितयैतत्पूर्वपक्षदशायांतत्रत्यसिद्धांतासिद्धेः। यथा "आकाशोर्थांतरे"त्यस्य "आकाशस्तल्लिंगा"दित्येतत्सिद्धांतानंतरभावितया "आकाशस्तल्लिंगा"दित्येतत्पूर्वपक्षदशायामाकाशोर्थांतरेत्येतत्सिद्धांतासिद्धिः तद्वत्। एतेनप्राणस्तथेत्यनेनास्यगतार्थत्वशंकापिनिरस्ता। एतदभावेब्रह्मणोजीवनहेतुत्वाभावे नतत्रप्राणशब्दस्यमुख्यत्वासिद्धेः। अतएवटीकायामन्वयव्यतिरेकयोः "यत्प्राप्तिर्यत्परित्याग" इतिस्मृतिरेवोक्ता। ॥ ३४४ ॥

गु० रन्यथापियोजयितुंशक्यत्वान्नतद्विरोधइत्यतआह ॥ त्वमभवइति ॥ अतएवटीकायामिति ॥ प्रत्यक्षेणान्वयव्यतिरेकग्रहासंभवेपिश्रुत्यातत्संभवस्सटीकाकृद

SGDF Sri Gargeshwari Digital Foundation

प्र० प्राणनयेनागतार्थत्वादिद्योतयितुमस्माभिश्श्रुतिरुदाहृतेतिहृदयं । एवंटीकानुरोधेनजीवनहेतुत्वादेर्मुख्याधीनत्वंवाक्यसिद्धमित्युक्त्वा इदानींसुधानुसारेणप्रत्यक्षेणैवसिद्धमित्याह ॥ **यद्वेति** ॥ यथाघटंप्रतिकुलालशरीरस्यान्वयव्यतिरेकदर्शनमात्रेणकुलालासनोहेतुत्वंगम्यतेतथेत्यर्थः ॥ **वायोरिति** ॥ जडभूतस्येत्यर्थः । तस्य मुख्यप्राणस्य । तत्र जीवने ॥ **अतएवेति** ॥ शरीरान्वयव्यतिरेकदर्शनमात्रेणतच्छरीरिणोहेतुत्वावगमादेवेत्यर्थः । एतेनटीकायामपिदर्शनादित्यस्यप्रत्यक्षेणदर्शनादित्यर्थः । स्मृत्युक्तिश्चाभ्युच्चयत्वेनेत्यपिसूचितं । ननुब्रह्मणोप्येवंकिंनस्यादित्यतो "वायावेवदर्शना"दितिटीकास्थावधारणव्यावर्त्यविवृण्वन् तत्किंप्रत्यक्षादिसिद्धाभ्यामन्वयव्यतिरेकाभ्यांजीवनहेतुत्वंविष्णोरुच्यतेऽथश्रुत्येतिविकल्पौहृदिनिधायाऽऽद्यआह ॥ **ब्रह्मणस्त्विति** ॥ **सर्वगतत्वादिति** ॥ "सएवाधस्तात्सएवोपरिष्टात् । सर्वगतंसुसूक्ष्मं अशरीरःप्रज्ञात्मे"त्यादेरितिभावः ॥ **अभावइति** ॥ नन्वक्षराधिकरणेऽणुत्वस्यापिवक्ष्यमाणत्वात्तद्व्यतिरेकोपिसंभवतीतिचेन्न । सर्वगतत्वासमानाधिकरणाणुत्वस्यैवव्यतिरेकेप्रयोजकत्वादित्याशयात् । नन्वंतर्याम्यधिकरणे "यस्यपृथिवीशरीर"मित्यादिनासशरीरत्वं

यद्वा कुलालशरीरस्यघटंप्रतीवमुख्यप्राणशरीरभूतवायोर्जीवनंप्रत्यन्वयव्यतिरेकदर्शनमात्रेणतस्यतत्रहेतुत्वं । अतएवोक्तंसुधायां "वायुविकारशरीरत्वान्मुख्यस्ये"ति । ब्रह्मणस्तुसर्वगतत्वादशरीरत्वाच्चतस्यवातच्छरीरस्यवानास्मदादिशरीरेऽभावइतिनतद्व्यतिरेकाज्जीवनव्यतिरेकः ।

गु० भिप्रेतत्वादेवेत्यर्थः । टीकानुसारेणपूर्वपक्षमुक्त्वासुधानुसारेणतमाह ॥ **यद्वेति** ॥ **अतिप्रसंगादिति** ॥ गृहादिरूपंयद्देवदत्तस्यगौणंशरीरंतदविनाभूतंयत्किंचि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वक्ष्यते । तत्कथमशरीरत्वमित्याशंक्यनिरस्यति ॥ **यद्यपीति** ॥ काण्वभाष्यरीत्याह ॥ **गौणमिति** ॥ सूत्रभाष्यरीत्याह ॥ **यौगिकमिति** ॥ नन्वथापि "भूमासंप्रसादा" दित्यत्र "उत्क्रांतप्राणान्शूलेनसमासंव्यतिषंदहे" दित्युत्क्रमणलिंगात्प्राणोवायुरितिप्राप्ते पूर्णसुखत्वलिंगादुत्क्रमणस्य चरूपविशेषेणविष्णावपिसंभवाद्विष्णुरेवप्राणइत्युक्तन्यायेनविष्णोरप्यभावोयुक्तइत्यतआह ॥ **भूमेति** ॥ यथाशरीरस्थस्यैवचक्षुषोध्रुवादिमंडलपर्यंतंनिर्गमनंतथाविष्णोरपिविचित्रशक्तिवशाद्रूपविशेषादिनादेहेसतएवमहत्त्वस्यशक्त्याणुत्वस्यव्यक्त्योत्क्रमणोपपत्तेरितिभावः ॥ **अन्वयेति** ॥ प्रत्यक्षेणवाऽऽगमेनवासिद्धाभ्यामन्वयव्यतिरेकाभ्यांकल्प्यंनभवतीत्यर्थः । यद्यप्यत्रविष्णोर्व्यतिरेकमुपेत्यापि किमन्वयव्यतिरेकौ प्रत्यक्षगम्यावुतागमगम्यौ । आद्येपिकिंसाक्षादुतशरीरद्वारा । नाद्यः । अयोग्यत्वात् । नद्वितीयः । अशरीरत्वात् । नांत्यः । तत्प्राणेप्रपन्नइत्यादेरिवतद्बोधकागमस्याभावात् । भावेवातस्यवायुपरत्वादित्यपिवक्तुंशक्यंभाति । तथाप्यस्यस्पष्टत्वादन्वयव्यतिरेकासिद्धत्वेपिश्रुत्या

यद्यप्यंतर्यामीत्यत्रेशस्यगौणंयौगिकंवाशरीरमस्तीतिवक्ष्यते । तथापिनजीवनव्यतिरेकस्यगौणादिशरीरव्यतिरेकानुविधानेनतत्कार्यत्वं । अतिप्रसंगात् । भूमाधिकरणेतुसर्वगतस्यापीशस्यास्मदादिशरीरादुत्क्रमणमस्तीतिचवक्ष्यते । नतुतत्राभावः । तस्मान्नविष्णोर्जीवनादिहेतुत्वमन्वयव्यतिरेककल्प्यं ।

गु० त्तस्यदेवदत्तकार्यत्वप्रसंगादित्यर्थः । जडवायुरपिप्राणस्यगौणंशरीरं । अभिमन्यमानत्वात् । तथाचगौणशरीरान्वयव्यतिरेकाभ्यांवायोर्जीवनादिहेतुत्ववत् अत्रापि पृथिव्यादिरूपगौणशरीरान्वयव्यतिरेकाभ्यांब्रह्मणोपिजीवनादिहेतुत्वंकिंनस्यादितिचेन्मैवं । अत्रशरीरशब्दस्यमुख्यावच्छेदकशरीरपरत्वात् । मुख्यस्यत्वभिमन्यमानशरीरावच्छेदेनापिसुखोत्पादनात् । नचैवंप्रकृतेगौणपृथिव्यादिशरीरावच्छेदेनसुखंवक्तुंयुक्तं । जन्यसुखस्यब्रह्मणःप्रमाणबाधितत्वादितिभावः । तर्हिभूमाधि

प्र० जीवनहेतुत्वंसिध्यतीत्यस्यावश्यापाकर्तव्यत्वाद्वास्तवाभिप्रायेणव्यतिरेकाभावेनैवान्वयव्यतिरेकाकल्प्यत्वमुक्तं । एतेन "प्राणादिहेतुतादृष्टे" रित्यत्रप्राणादिहेतुतायाःपरमात्मन्यन्वयव्यतिरेकतोऽदृष्टेरदर्शनादित्यनुव्याख्यानयोजनासुधोक्ताव्यतिरेकायोगेनोपपादनीयेतिस्पष्टीकृता । एवमदृष्टेरागमेनाप्यदर्शनादित्यर्थांतरमप्यभिप्रेत्यद्वितीयपक्षमपिनिषेधति ॥ **नापीति** ॥ **मुख्यप्राणेति** ॥ अन्यथाश्रुत्याप्रत्यक्षेणचोक्तान्वयव्यतिरेकानुपपत्तेरितिभावः । ननुच "नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतुजीवंतियस्मिन्नेतावुपाश्रिता" वित्यत्रप्राणस्यजी

नापिश्रुतिसिद्धं । अन्वयव्यतिरेकानुसारेण "येनजातानिजीवंती" त्यादेर्मुख्यप्राणविषयत्वात् । "इतरेणतुजीवंती" त्यादावितरशब्दस्तुवायुवृत्तिरूपप्रसिद्धप्राणेतरत्वविवक्षयामुख्यप्राणेपियुक्तः । केचित्तु "अन्वयव्यतिरेकाभ्यांहिहेतुताकल्प्ये" तिसुधायाःप्रातीतिकार्थंगृहीत्वाहेतुतायाअन्वयव्यतिरेकमात्रगम्यत्वान्नश्रुतिस्तत्रप्रमाणमितिपूर्वपक्ष्यभिप्रायइत्याहुः । तत्र

प्र० वनहेतुत्वनिरासपूर्वविष्णोरेवतदुक्तेस्तद्विरोधइत्यतः प्राणापानशब्दयोर्जडवायुपरत्वेनेतरशब्देनतद्भिन्नचेतनस्यवायोरेवग्रहणादित्याह ॥ **इतरेणत्विति** ॥ ननुनापिश्रुतिसिद्धमित्याशंकानिरासावयुक्तौ । "अन्वयव्यतिरेकाभ्यांहिहेतुताकल्प्या । नचपरमात्मनःप्राणशब्दप्रवृत्तिनिमित्तजीवनादिहेतुतावगमकान्वयव्यतिरेकौपश्याम" इतिसुधाविरोधात् । तत्रान्वयव्यतिरेककल्प्यतायाएवहेतुत्वस्यप्रतीतेरित्युक्तानदृशांश्रमममनूद्यनिरस्यति ॥ **केचित्त्विति** ॥ **अन्वयव्यतिरेकमात्रेति** ॥ प्रत्यक्षसिद्धान्वयव्यतिरेकेत्यर्थः ॥ **तत्रेति** ॥ अन्वयव्यतिरेकद्वार

SGDF Sri Gargeshwari Digital Foundation

प्र० कहेतुतायां ॥ यागादेरिति ॥ तत्रप्रत्यक्षसिद्धान्वयव्यतिरेकयोरप्रसरादितिभावः । एतेननचपश्यामइतिसुधागतस्यागमेननपश्यामः ये नजीवंतीत्यादेरपिमुख्यविषयत्वादित्यपितात्पर्यमुक्तंभवति । एतेन "अन्वयव्यतिरेकप्रमाणकत्वाद्धेतुहेतुमद्भावस्येतिन्यायविवरणटीकापि क्वाचित्कत्वाशयेतिदर्शितं । नन्वस्त्वीश्वरहेतुत्वेश्रुतिप्रमाणशंका । तन्निरासस्तुनमुख्यप्राणविषयत्वमुपेत्य । किंत्वन्यथैवेतिभ्रममनूद्यनिरस्यति ॥ अन्येत्विति ॥ तद्रहितइति ॥ नित्यविभुत्वादेशतःकालतोवासनास्तीतिभावः । नित्यविभूनां प्रकृत्यादीनां । "प्राणशब्दप्रवृत्तिनिमित्तस्यवायावेवे"तिटीकास्थावधारणस्यस्वातंत्र्यरूपस्यापिनविष्णावित्यर्थांतरमप्युपेत्याह ॥ नापीति ॥ स्वातंत्र्यस्यापिशब्दप्रवृत्तिहेतुत्वेनप्राणोविष्णुस्स्यादितिशंकाभिप्रायः ॥ असंभवादीति ॥ भगवतिजीवनरूपस्थितिहेतुत्वस्याभावेनान्यत्रभावेनचासंभवातिव्याप्तीस्यातामितिभावः । टीकोक्तमानंदमयाक्षेपमनूद्यसमर्थयते ॥ सएवेति ॥ महाभोगइत्यानंदमयत्वेनोक्तस्यप्राणस्यमुख्यत्वात्प्रागुक्तानंदमयोपि

यागादेःस्वर्गादावहेतुत्वापातात् । अन्येतु व्यतिरेकगर्भितायाहेतुतायास्तद्रहितेपरमात्मन्ययोगान्नतस्यजीवनहेतुताश्रुत्यापिबोधयितुंशक्येतितदभिप्रायइत्याहुः । तदपिन । नित्यविभूनामहेतुत्वापत्तेः । तस्माज्जीवनादिहेतुत्वंनब्रह्मगतं । नाप्यन्यगतंतदधीनं । जन्मादिसूत्रोक्तस्थितिहेतुतायाअसंभवादिप्रसंगात् । तस्मान्मुख्यवायुरेवप्राणइतिसएवानंदमयः । तस्यांतरधिकरणेपूर्वपक्षितेंद्रादिवदानंदवल्ल्यामानंदमयात्

गु० करणेवक्ष्यमाणमुत्क्रमणमयुक्तंस्यादित्यतआह ॥ भूमेति ॥ ननुयतोवेत्यादिश्रुत्यैवब्रह्मणोजीवनादिहेतुत्वमस्त्वित्यतआह ॥ नापीति ॥ असंभवादिप्रसंगादिति ॥ जीवनादिहेतुत्वस्यब्रह्मगतत्वाभावेनासंभवः । जीवनादिहेतुत्वस्यान्यगतत्वेनातिव्याप्तिरित्यर्थः । ननुमुख्यप्राणस्यापिनानंदमयत्वंयुक्तं । पूर्वत्रचात्रापि ॥ ३४६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सएवस्यादित्यर्थः । इंद्रादिवत् इंद्रादेरिव ॥ **भेदव्यपदेशेति** ॥ भेदव्यपदेशाच्चे"तिसूत्रभाष्योक्तदिशेतिभावः । "प्राणशब्दप्रवृत्ती"त्यादि टीकायामूलंदर्शयन्नुपसंहरति ॥ **तस्मादिति** ॥ **इयंचेति** ॥ अनुव्याख्यानोक्ताप्राणपदप्रवृत्तिनिमित्ताश्रितेत्यर्थः । "प्राणशब्दस्यतस्मिन्प्रसिद्धे"रित्यादिटीकायांश्रुतित्वनिरवकाशत्वाभ्यांलिंगाच्छ्रुतेःप्राबल्येनपूर्वपक्षोक्तिरुपलक्षणमितिमत्वाह ॥ **आवृत्तीति** ॥ प्राणः प्राणयः इत्यावृत्तिमात्रंनेत्यर्थः । "त्वंभर्तामातरिश्वाप्रजाना"मितिमातरिश्वश्रुतिर्ध्येया । निरवकाशेनापि श्रीपतित्वलिंगेनेत्यर्थः । अपीत्यभ्युपगमवादः । तदभावस्याग्रेस्पष्टत्वात् । नन्वियंशंकागायत्र्यधिकरणेक्रियते । यदाहुः "कथंप्रसिद्धबहुलशब्दानामन्यथार्थते"तीतिचेन्न । अनेकश्रुतिप्रसिद्ध्युपजीवनेनतत्रप्रवृत्तत्वात् । इहबहुत्वमात्रस्योपजीवनात् । यद्वागायत्रीवाक्पृथिव्यादिश्रुतीनांभिन्नविषयत्वादिहैकविषयतद्बाहुल्यस्याभिप्रेतत्वात् । नन्वथापिपादांत्यप्राणाधिकरणेतादृक्श्रुतिबाहुल्यशंकाऽपाक्रियते । तदुक्तं "बाहुल्याच्छ्रुतिलिंगयो"रिति । सत्यं ।

भेदव्यपदेशाभावेनाकाशाधिकरणेपूर्वपक्षिताकाशवच्च जडत्वाभावेनस्वतएवानंदमयत्वसंभवात् । तस्मात् "अन्वयव्यतिरेकत"इत्यनुव्याख्यानोक्ताधिकाशंकायुक्ता । इयंचप्रमेयाश्रिता । प्रमाणाश्रितातु पूर्वत्राकाशश्रुतेरिवेहनश्रुतेरावृत्तिमात्रं । किंतु "त्वंप्राणः देवान्प्राणयः मातरिश्वे"तिश्रुतिबहुत्वमस्तीतिनिरवकाशेनापिनबाधइत्येका । इयंचभाष्येबहुश्रुतियुक्तविषयवाक्योदाहरणात्सूचिता । अन्यातु यदिप्राणशब्दस्य

गु० भेदव्यपदेशरूपबाधकसत्वादितितत्राह ॥ **तस्येति** ॥ **यद्यपीति** ॥ तथाचनेयमभ्यधिकाशंकेतिशेषः । ननुमुख्यवायौप्राणत्वप्रसिद्ध्यादेरिवभूताकाशस्यघटाकाश

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्रबहुश्रुतिगतनिरवकाशत्वोपजीवनेनपूर्वपक्षप्रवृत्तिरिहतुबहुत्वमात्रोपजीवनेनप्रवृत्तिरितिध्येयं । वक्ष्यतेचैतत्तत्रैव ॥ **योगेनेति** ॥ लक्षदर्शनइतिधातोर्लक्ष्यति सर्वमित्यादियोगेनेत्यर्थः ॥ **भाष्येसूचितेति** ॥ "भाष्येप्यस्यसर्वस्यापिस्वीकारार्थंप्रसिद्धेरित्याहे"तिसुधायांदिक्प्रदर्शनस्यकृतत्वादितिभावः ॥ **अनुद्धृतेति** ॥ इहैवसौत्रैवकारेणलिंगनिरवकाशत्ववाचिनोद्ध्रियते । तथाचानेनरूपेणतदप्यत्रोदाहरणमित्युक्तंभवति ॥ **वचनाच्चेति** ॥ "चेष्टायांबाह्यवायौचमुख्यप्राणेचगीयते । प्राणशब्दस्त्रिषुह्येषुमुख्येमुख्यःप्रकीर्तित"इतिवचनाच्चेत्यर्थः ॥ **मुख्यत्वायोगादिति** ॥ प्रसिद्धिवचनयोरभावादितिभावः । नन्वाकाशशब्दस्यभूतेमुख्यस्यापिबाधःकथमित्यतआह ॥ **आकाशेति** ॥

योगेनविष्णुपरतातर्हिंलक्ष्म्यादिशब्दानामपियोगेनप्राणभार्यापरत्वसंभवाल्लक्ष्मीपतित्वादिलिंगस्यैवासिद्धिः । अथलक्ष्म्यादिशब्देषुनप्रसिद्धार्थत्यागः तर्हिप्राणशब्देपितथा । इयंच "प्रसिद्धेर्वायु"रितिभाष्येसूचिता । इयंयद्यप्याकाशादिशब्दसाधारणी । आकाशश्रुतेःप्रसिद्धार्थहानावनंतत्वादिलिंगानामपितद्धानिःस्यादितिशंकोदयात् । तथापिपूर्वाधिकरणेऽनुद्धृतेत्यधिकाशंका । अपरातु मुख्यवायौमुख्यप्राणत्वप्रसिद्धेः "मुखेमुख्यःप्रकीर्तित"इतिवचनाच्चप्राणशब्दस्यपरमात्मनिमुख्यत्वायोगान्मुख्यसंभवेचामुख्यग्रहणायोगान्नात्रप्राणशब्दःपरमात्मपरः । आकाशशब्दस्यतुभूतेमुख्यत्वेनप्रमाणमस्तीति । इयंचटीकायांमुख्यपदप्रयोगादिनासूचिता । इतरातु पूर्ववन्निरवकाशब्रह्मलिंगाभावान्नब्रह्मपरतेति ।

गु० त्वप्रसिद्धेःसत्वेनपरमात्मनिमुख्यत्वायोगात् मुख्यसंभवेचामुख्यग्रहणायोगादाकाशशब्दोनब्रह्मपरइतिपूर्वाधिकरणेपिशंकासंभवात् कथमियमभ्यधिकाशंकेत्यतआह ॥ **आकाशशब्दस्येति** ॥ यदुक्तंकुलालशरीरस्यघटंप्रतीवमुख्यप्राणशरीरभूतवायोर्जीवनंप्रत्यन्वयव्यतिरेकदर्शनमात्रेणतस्यतत्रहेतुत्वमिति तंपूर्वपक्षंनिराकरोति

प्र० उपलक्षणमेतत् । इंद्रादिशब्दस्यतत्रमुख्येमुख्यइत्यादिवदिंद्राकाशादौमुख्यइतिवचनाभावात् । अतएववचनाच्चेत्युक्तं । आदिनेत्यादिपदेनप्रमाणकथनादिर्ग्राह्यः । पूर्ववत् आकाशाधिकरणइवेत्यर्थः । तत्रनिरवकाशलिंगमाशंक्यतस्यभिन्नप्रकरणगतत्वेनपरिहारमाह ॥ **नचेति** ॥ **अत्रपदेनेति** ॥ तदनेन "नचात्रवाक्येपूर्ववदनन्यथासिद्धंकिमपीश्वरलिंगमस्ति । येनश्रुतिबाधंप्रत्येष्याम"इतिवाक्यं श्रीपतित्वादिलिंगंभिन्नप्रकरणगतं महाभोगत्वादिकंत्वन्यथासिद्धमित्याशयतयायोज्यमित्युक्तंभवति । नन्वेतच्छंकानिरासकन्यायंसूत्रेनोपलभामहइत्याशंक्यप्राणस्तत्त्वितिप्रतिज्ञांशतात्पर्यंव्यंजयन्नादावनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशंकयोर्मध्येनविष्णोर्जीवनादिहेतुत्वमन्वयव्यतिरेककल्प्यमितियदुक्तंतच्छंकानिवर्तनप्रकारंसंगृह्णाति ॥ **तत्परिहारेणेति** ॥ "प्राणगतजीवनादिकारणत्वस्यापिभगवदधीनत्वा"दितिटीका उपल

नचश्रीपतित्वादिकंलिंगंनिरवकाशमितिवाच्यं । "अद्भ्यःसंभूत" इत्यनुवाके "श्रीश्चतेलक्ष्मीश्चपत्न्या"वित्युक्तस्यविष्णुत्वेपि "भर्तासन्भ्रियमाण"इत्यनुवाके "तद्वैत्वंप्राण"इत्युक्तस्य "त्वंभर्तामातरिश्वाप्रजाना"मितिमातरिश्वश्रुत्या "प्राणापानावजिरंसंचरंता"वित्यपानसाहित्यलिंगेनचाविष्णुत्वात् । इयमपिशंका "नचात्रवाक्येपूर्ववदनन्यथासिद्धंलिंगमस्ती"तिसुधाग्रंथेऽत्रपदेनसूचिता । तस्माद्युक्ताधिकाशंका । तत्परिहारेणसिद्धांतस्तु । "वायुवृत्तिर्यथामुख्यप्राणदेहस्तथैवसः । विष्णोर्देहस्ततस्तस्यैवान्वयव्यतिरेकिता ॥ १ ॥

गु० ॥ **वायुवृत्तिरित्यादिना** ॥ अत्रोक्तं ब्रह्मणःसर्वगतत्वादशरीरत्वाच्चतस्यवातच्छरीरस्यवाऽस्मदादिशरीरेऽभावेनतद्व्यतिरेकेणजीवनव्यतिरेकोनसंभवतीतिबाधकं

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्षणं । अतएव "प्रेरकोस्यापी"त्यनुव्याख्यानं "अस्यापि जीवनस्यापी"तिसुधायांव्याख्यातमितिभावः । देहइत्युक्तयामुख्यदेहभ्रमंवार यन्व्याचष्टे ॥ **वायुवृत्तिरिति** ॥ सोपि मुख्योपि । तथाचयथाप्राणशरीरभूतवायोर्जीवनंप्रत्यन्वयादिदर्शनमात्रेणमुख्यस्यतत्रहेतुत्वं तथा मुख्यस्यापिसाक्षात्प्रयत्नाधिष्ठेयत्वेनविष्णुदेहत्वात्तदन्वयादिदर्शनमात्रेणतस्यतत्रहेतुत्वंभविष्यतीत्यर्थः । एतेनाशरीरत्वान्नतच्छरीरस्यासदादिशरीरेव्यतिरेकइतिनिरस्तं । प्राणस्यतच्छरीरत्वेनव्यतिरेकसंभवात् । यदप्यस्मदादिशरीरे तस्यसर्वगतत्वाद्व्यतिरेकोनेति तन्निरस्यति ॥ **युक्तश्चेति** ॥ **व्यक्त्यात्मनेति** ॥ शक्त्यासनातत्संयोगस्यसत्त्वेनसर्वगतत्वोक्तिरितिभावः । विवरिष्यतेचैतद्भूमादिनये । यदपिनापिश्रुतिसिद्धमित्यादि तच्चयेनजीवंतीत्यादेर्ब्रह्मपरत्वं जन्मादिसूत्रेसिद्धमितिभावेन टीकोक्तकाठकश्रुतेर्ब्रह्मपरत्वंसाधयति ॥ **इतरेणेति** ॥

वायुवृत्तिर्मुख्यप्राणस्यैवसोपिहिब्रह्मणोदेहस्थानीयः । युक्तश्चभूमाधिकरणईश्वरस्यास्मदादिशरीरादुत्क्रमणस्यवक्ष्यमाणत्वादजीवनदशायांरूपविशेषस्यव्यक्त्यात्मनातत्संयोगाभावाद्व्यतिरेकः । "इतरेणे"तिश्रुतावितरशब्दोब्रह्मपरः । पूर्वत्र "मध्येवामन"मिति

गु० परिहरति ॥ **युक्तश्चेति** ॥ एवंविष्णोर्जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यामुपपाद्यश्रुत्याप्युपपादयति ॥ **इतरेणेति** ॥ ननुकथमनयाश्रुत्याब्रह्मणोजीवनहेतुताग्रहः । तस्याःप्राणपरत्वात् । नचप्राणपरत्वेइतरशब्दानुपपत्तिः । वायुवृत्तिरूपप्रसिद्धप्राणेतरत्वविवक्षयाप्राणेपिसंभवादित्यतआह ॥ **पूर्वत्रेति** ॥ एवंप्रमेयाश्रितांशंकां ॥ ३४८ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० वामनेति॥ वक्ष्यतेचवामनश्रुतेर्वैष्णवत्वंशब्दादेवेत्यत्र। प्राणगतस्येशाधीनत्वेसाक्षितयाटीकोक्तापीतरेणेतिश्रुतिस्तद्गतत्वेपिप्रमाणंभवतीति भावः । एवंजीवनहेतुत्वंप्राणपदप्रवृत्तिनिमित्तंभगवद्गतमितिसमर्थ्येदानींटीकोक्तरीत्याऽन्यगतंचभगवदधीनमेवततश्चप्राणशब्दार्थोभगवानेवेत्यभिप्रेत्याह ॥ **किंचेति** ॥ नचप्रागुक्तासंभवादिप्रसंगः । अनन्याधीनजीवनहेतुत्वस्यभगवन्मात्रगतत्वेनान्यगतत्वाभावात्तस्यैवलक्षणत्वेनजन्मादिसूत्रेऽभिप्रेतत्वादितितात्पर्यात् । अतएवतद्गतत्वस्यापिसमर्थनमकारि । टीकायांतुजन्मादिसूत्रादौसिद्धत्वात्कंठतोनोक्तं । एवंप्रमेयाश्रिताशंकांपरिहृत्य यापिप्राणशब्दस्ययोगेनविष्णुपरत्वेलक्ष्म्यादिशब्दानामपिप्राणभार्यापरत्वमितिप्रमाणाश्रिता तांतावत्संगतत्वात्परिहरति ॥ **लक्ष्म्यादीति** ॥ लक्ष्मीश्रीह्रीशब्दानांसत्त्वादितिभावः । अन्यत्र प्राणभार्यायां । लोकतइतियोज्यं । तेननरूढिरितिभावः । “शंरूपमाश्रितावायुंश्रीरित्येवचकीर्तिते”त्यादिस्तुनप्रसिद्धइतिभावः । लक्ष्मीशब्देतदभावाच्च । अतएवलक्ष्म्यादीत्युक्तं ॥ **एकत्वादिति** ॥

वामनशब्दादुत्तरत्रच “गुह्यंब्रह्मसनातनमितिब्रह्मशब्दात् । किंच मुख्यप्राणस्यजीवनादिहेतुत्वेपितस्यभगवदधीनत्वेनापितत्रप्राणशब्दोमुख्यः । लक्ष्म्यादिशब्दानांतुबहुत्वादन्यत्रप्रयोगाभावान्मुख्यार्थत्यागापाताद न्यपरत्वेमानाभावाच्चनान्यत्रयौगिकता । प्राणशब्दस्यत्वेकत्वात् “प्राणस्यप्राण”इत्यादौब्रह्मणिप्रयोगात्तत्र

गु० निराकृत्याधुनान्यात्वित्यादिनोक्तांप्रमाणाश्रितांशंकांनिराकर्तुमाह ॥ **किंचेति** ॥ यदत्रोक्तंतर्हिलक्ष्म्यादिशब्दानामपियोगेनप्राणभार्यापरत्वसंभवाद्विष्णुलिंगस्यैवासिद्धेर्नप्राणशब्दस्यविष्णुपरत्वमिति तत्परिहरति ॥ **लक्ष्म्यादिशब्दानांत्विति** ॥ ह्रीश्चतेलक्ष्मीश्चेतिपाठांतरानुसारेणवापत्न्याविितिद्विवचनश्रुतिसाहित्येनवाबहुत्वोपपत्तिः । प्राणशब्दे उक्तन्यायवैषम्यमाह ॥ **प्राणशब्दस्यत्वेकत्वादिति** ॥ अपरातुमुख्यवायौमुख्यत्वप्रसिद्धेरित्यारभ्यनात्रप्राणशब्दःपरमात्मपरइत्यंतांशंकां

प्र० मातरिश्वश्रुतेर्गतेर्वक्ष्यमाणत्वादितिभावः। इत्यादौ तलवकारे। "प्राणादयोवाक्यशेषा"दित्यत्रप्राणस्यप्राणमित्यादौवक्ष्यमाणप्राणप्राणदत्वादिलिंगसाम्याद्वैष्णवत्वमितिभावः॥ **परमेति** ॥ प्रवृत्तिनिमित्तपौष्कल्यादितिभावः। यापिमुख्यपदप्रयोगादिनासूचिताशंका तांनिराचष्टे ॥ **आपेक्षिकाच्चेति** ॥ श्लोकंव्याचष्टे ॥ **मुख्यप्राणोहीति** ॥ आपेक्षिकत्वेकथंमुख्यत्वमित्यतउत्तरार्धंव्याचष्टे ॥ **दृश्यतेचेति** ॥ "अपरंत्वक्षरंयासाप्रकृतिर्जडरूपिका। श्रीःपराप्रकृतिःप्रोक्ताचेतनाविष्णुसंश्रया। तामक्षरंपरंप्राहुःपरतःपरमक्षरं। हरिमेवाखिलगुणमक्षरत्रयमीरित"मित्यदृश्यत्वनयभाष्यस्थस्मृताविव्यर्थः। अतएव आपेक्षिकमुख्यत्वादेव॥ **श्रुतिरिति** ॥ "चक्षुरादिव"त्त्वित्यत्रभाष्योक्ता। तथाचनप्राणशब्दपरममुख्यार्थत्वंमुख्यप्राणस्य। किंतुहरेरेव। "अन्यव्यपेक्षयावायौमुख्यवृत्तिर्विधीयते। तस्मात्प्राणादिशब्दाश्चविष्णा

परममुख्यत्वेनमुख्यार्थात्यागात् "नामानिसर्वाणी"त्यादिमानसद्भावाच्चब्रह्मपरता। आपेक्षिकाच्चमुख्यत्वाद्वायौमुख्यपदंभवेत्। यथापराक्षरपदंश्रीतत्वेमध्यमाक्षरे॥ १॥ मुख्यप्राणोहिकरणभूतचक्षुरादिप्राणापेक्षयामुख्यः। दृश्यतेचमध्यमाक्षरेपिश्रीतत्वे "तामक्षरंप्राहु"रित्यादौपरशब्दोजडप्रकृतिरूपाधमाक्षरात्परत्वात्। अतएवश्रुतिः "प्राणएवाकरणस्तस्मान्मुख्यस्तस्मान्मुख्य"इति। "योयंमध्यमःप्राण"इतिच।

गु० निराकरोति ॥ **आपेक्षिकाच्चेत्यादिना** ॥ इतरातुपूर्ववन्निरवकाशलिंगाभावादित्यादिनोक्ताशंका नयुक्ता। श्रीपतित्वादिरूपनिरवकाशलिंगसद्भावात्। यदत्रोक्तमद्भ्यःसंभूतइत्यनुवाकेश्रीश्चतेलक्ष्मीश्चपत्न्यावित्युक्तस्यविष्णुत्वेपि भर्तासन्भ्रियमाणोबिभर्तीत्यनुवाकेतद्वैत्वंप्राणइत्युक्तस्य मातरिश्वाप्रजानामित्यादिमातरिश्वादिश्रु

प्र० वेवहिमुख्यत"इत्यैतरेयभाष्योक्तेरितिभावः। "अयंवावशिशुः योयंमध्यमःप्राणः"इतिबृहदारण्यकोक्त्याहरिरेवोत्तमप्राणइतिलाभादितिभावः। यदपिश्रीपतित्वादेर्भिन्नप्रकरणगतत्वेनब्रह्मलिंगाभावादितिचोद्यं तत्राभ्युपेत्यसन्निहितलिंगानितावद्दर्शयति ॥ **अद्भ्यइत्यादीति** ॥ मारकत्वामृतत्वभर्तृत्वगोप्तृत्वमुक्तिहेतुवेदनविषयत्वादिलिंगानामित्यर्थः। एकवाक्यतांसाधयति ॥ **कथंचेति** ॥ मातरिश्वश्रुतिविरोधइत्यतआह ॥ **मातरिश्वेति** ॥ **अंतरिति** ॥ तत्राधिदैवगतसर्वशब्दप्रवृत्तिनिमित्तस्यभगवतिसमर्थनादितिभावः। एतेनश्रुतिबहुत्वमस्तीति

अद्भ्यइत्याद्यनुवाकद्वयस्यभिन्नार्थत्वेपि "अद्भ्य"इत्यत्रश्रीपतित्वादेरिव "भर्तास"न्नित्यत्र "तमेवमृत्युममृतं तमाहुस्तंभर्तारंतमुगोप्तारमाहुः। यस्तद्वेदयतआबभूव संधांचयांसंदधेब्रह्मणैषत"इत्यादिब्रह्मलिंगानांसत्वात्। एतदेवाभिप्रेत्यभाष्यादौ "इत्यादितल्लिंगा"दित्यादावादिशब्दः। कथंचानुवाकद्वयंभिन्नार्थं। "श्रीश्चते"इतियुष्मच्छब्देनोक्तस्य "तद्वैत्वंप्राण"इत्यत्रापियुष्मच्छब्देनप्रत्यभिज्ञानात्। मातरिश्वश्रुतिरप्यंतरधिकरणन्यायेन "हरिंहरंतमनुयंतिदेवा"इतिहरिश्रुत्याहरंतमितिनिरुपपदसंहर्तृत्वलिंगेनचब्रह्मपरा।

गु० तिसाहित्येननविष्णुपरत्वमिति तदाशंक्यभिन्नार्थत्वेनाभ्युपेत्यसमाधानंतावदाह ॥ **अद्भ्यइत्याद्यनुवाकद्वयस्येति** ॥ वस्तुतस्तुतदेवनास्तीत्याह ॥ **कथंचेति** ॥ **युष्मच्छब्देनेति** ॥ तेइतियुष्मच्छब्देनेत्यर्थः ॥ **युष्मच्छब्देनेति** ॥ त्वमित्यनेनेत्यर्थः। एवंविष्णुलिंगानांनिरवकाशत्वमुपपाद्यपरेणप्राणशब्दस्यविष्णुपरत्वेबाधकत्वेनोदाहृतंमातरिश्वश्रुत्यादिकंविष्णौसावकाशमित्याह ॥ **मातरिश्वश्रुतिरिति** ॥ यत्किंचित्संहर्तृत्वस्यप्राणेपिसंभवात्कथमेतत्प्राणस्यविष्णुपरत्वसाधकमि

SGDF Sri Gargeshwari Digital Foundation

प्र० प्रथमपक्षोपिनिरस्तोध्येयः । ननु ‘‘प्राणापानावजिर’’मित्यपानसाहित्यरूपमुख्यप्राणलिंगविरोधइत्यतआह ॥अपानेति॥नस्वरसमिति॥ स्वस्यस्वेनसाहित्यस्यायोगादितिभावः । भाष्योक्तश्रीपतित्वलिंगमसिद्धमित्याशंक्याह ॥ यद्यपीति ॥ एवंस्वमतेऽधिकरणशरीरंसमर्थ्य परोक्तंनिरसितुमाह ॥ अन्येत्विति ॥ कतमासेति तच्छब्दपरामर्शविषयंदर्शयितुमित्युपक्रम्येत्युक्तं । अभिसंविशंति प्राणमभ्युज्जिहते सैषादेवताप्रस्तावमन्वायत्तेतिछांदोग्यप्रथमाध्यायगतप्राणशब्दोविषयइत्यर्थः ॥ प्रसिद्धेति ॥ वायुवृत्तिपरोब्रह्मपरोवेतिविशये प्राणशब्दस्यप्रसिद्धप्राणेरूढत्वेनप्रथमत्वेनानुपसंजातविरोधित्वेनचप्रबलत्वात् तदनुसारेणचरमस्योपसंजातविरोधित्वेनदुर्बलस्यसर्वभूतसंवेशनादेर्नेतव्यत्वाद्वायुवृत्तिरूपप्राणपरइतिप्राप्ते प्राणशब्दादपिप्रथमत्वेनानुपसंजातविरोधिनःकतमासादेवतेतिप्रश्नस्य चेतनवाचिदेवतापदमहिम्नाब्रह्मविषयत्वात् प्रश्नानुसारेणपरिहारस्यव्याख्येयत्वात् रूढ्याप्राणपरपरिहारानुरोधेनप्रश्नव्याख्यानेचप्राणेसर्वभूतसंवेशनादिलिंगानुपपत्तेर्ब्रह्म

अपानसाहित्यंतुमुख्यप्राणेपिनस्वरसं । तस्मात्प्राणोविष्णुरेवेति । यद्यपितैत्तिरीयशाखायां ‘‘ह्रीश्चत’’इति पाठः । तथापिभाष्येशाखांतरमाश्रित्यश्रीश्चतइतिपठितमितिद्रष्टव्यं ॥ ॥ अन्येतु ‘‘प्रस्तोतर्यादेवताप्रस्ताव’’मित्युपक्रम्यश्रूयते ‘‘कतमासादेवता । प्राणइतिहोवाच । सर्वाणिहवाइमानिभूतानिप्राणमेवाभिसंविशंती’’ति । तत्रप्राणशब्दःप्रसिद्धप्राणपरइतिप्राप्तेब्रह्मपरएव । सर्वभूतसंवेशनादिब्रह्मलिंगादितिसिद्धांतः ।

गु० त्यतउक्तं निरुपपदेति ॥ ननुतर्हिप्राणापानावजिरंसंचरंतावित्यपानसाहित्यरूपलिंगंब्रह्मपक्षेनस्वरसमित्यतआह ॥ अपानसाहित्यंत्विति ॥ मानांतरानु

SGDF
Sri Gargeshwari Digital Foundation

प्र० परएवेतिसिद्धांतइत्यर्थः । नन्वाकाशाधिकरणएवास्यार्थस्योक्तत्वान्नेदमारभ्यमित्याशंक्याधिकाशंकयारंभइत्याह ॥ नचेति ॥ प्रस्तोतर्या देवतेत्यादिप्रस्तावनवाक्यंस्वापवाक्यानुसारात्प्रसिद्धप्राणेभूतलयादिपरं यतोवेत्यादिकारणवाक्यानुसाराद्ब्रह्मणिवेतिचिंतायां "यदावैपुरुषस्स्व पिती"त्यादिस्वापवाक्यानुसारात्प्राणएव । नचस्वापवाक्यंनप्रसिद्धप्राणपरमितिवाच्यं । स्वापकालेप्राणवृत्तावपरिलुप्यमानायामिंद्रियवृत्ती नांपरिलुप्यमानत्वेनप्रबोधकालेप्रादुर्भाववत्त्वेनचप्रत्यक्षेणानुमानेनचासंवादात् । ननुस्वापवाक्यइंद्रियाणांलयउच्यते प्रस्तावनवाक्येभूताना मितिकिंकेनसंगतमितिचेन्न । भूतसारत्वादिंद्रियाणांतद्द्वारासर्वभूतलयप्रतिपादनेतात्पर्यात् । नच "यत्प्रयंत्यभिसंविशंती"तिब्रह्मणिसर्वभू तलयप्रतिपादककारणवाक्यानुसारेणप्रस्तावनवाक्यंब्रह्मणिसर्वभूतलयपरंकिंनेतिवाच्यं । स्वापवाक्यस्यप्रत्यक्षादिमानांतरसंवादित्वेनप्रबल त्वात् कारणवाक्यस्यब्रह्मणिभूतलयस्यप्रत्यक्षाद्यसिद्धतयातद्रहितत्वेनदुर्बलत्वात् प्रस्तावनवाक्यंस्वापवाक्यानुरोधेनप्राणएवसर्वभूतलयादिपर

नचैवंपूर्वेणेदंगतार्थं । "यदावैपुरुषःस्वपिति । प्राणंतर्हिवागप्येति । प्राणंचक्षु"रित्यादिश्रुतेःस्वा पकालेप्रसिद्धप्राणेसर्वभूतसारेंद्रियलयाद्युक्तिद्वारासर्वभूतलयादिपरायामानांतरानुगृहीतत्वेनप्रब लत्वात् । ब्रह्मणिभूतलयादिबोधिकायाश्च "यतोवाइमानी"त्यादिश्रुतेस्तदननुगृहीतत्वेनदुर्बलत्वा त् । प्रस्तावनवाक्यमपिप्रबलानुसारेणप्रसिद्धप्राणेसर्वभूतलयादिपरं । नतुब्रह्मणिसर्वभूतलयादिपरं ।

गु० गृहीतत्वेनेति ॥ सर्वाणिभूतानिप्राणेविलीयंतेसर्वभूतसारेंद्रियलयाधिकरणत्वादितिमानांतरानुगृहीतत्वेनेत्यर्थः । ननुब्रह्मण्यपिभूतलयादिबोधकश्रुतिःप्रबलेत्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० मित्यर्थः । एवंस्वापवाक्येइंद्रियपदंभूतपरमुपेत्यैकार्थत्वमुक्तं । इदानीं प्रस्ताववाक्यगतभूतपदमेवभूतसारेंद्रियपरं । स्वापवाक्यस्योक्तदिशाबलवत्त्वादित्याशयेनपक्षांतरमाह ॥ **यद्वेति** ॥ तथाचेंद्रियलयाद्याधारत्वंवायुवृत्तेरेवेतिप्रस्तावववाक्यंप्रसिद्धप्राणपरमेवेतिभावः । ननुयथाप्रबलस्वापवाक्यानुरोधेनप्रस्तावववाक्यंप्रसिद्धप्राणपरमितिशंकात्रोच्यते तथापूर्वत्रापिसंभूतवाक्यानुरोधेनाकाशादेवेत्यत्राकाशपदंभूतपरमितिशंकास्यात् । अतोनेयमभ्यधिकाशंकेत्याशंक्य संभूतवाक्यस्यैतद्बाधनेप्राबल्याभावादित्याह ॥ **आकाशाद्वायुरिति** ॥ परिहारप्रकारमाह ॥ **पुंवाक्यइति** ॥ तस्यसंभावितदोषत्वादितिभावः । तथाचस्वापवाक्यस्यप्राबल्याभावान्नतद्वाक्यानुरोधेनप्रस्तावववाक्यंप्राणपरं किंतुयतोवेत्याद्यनुरोधेनब्रह्मलिंगेनचब्रह्मपरमिति । तत्संगतिः मानांतरसंगतिः । प्राणशब्दस्यजडपरत्वंवाचेतनपरत्वंवेतिविकल्प्यक्रमेणनि

यद्वा प्रबलस्वापवाक्यानुसारेणप्रस्तावववाक्यमपिप्रसिद्धेप्राणइंद्रियमात्रलयादिपरं । आकाशाद्वायुरित्यादिवाक्यंतुनमानांतरानुगृहीतमिमितितदनुसारेण "सर्वाणिभूतान्याकाशादेवे"तिवाक्यंनवाय्वादिमात्रकारणभूताकाशपरमितिपूर्वस्मादधिकाशंकायां पुंवाक्येमानांतरानुग्रहतदभावाभ्यांप्राबल्यदौर्बल्येस्तः । अपुंवाक्येऽनाशंकितदोषेनताभ्यांतेस्तइतितन्निरासार्थत्वादस्येत्याहुः । तदुक्तंभामत्यां । "पुंवाक्यस्यबलीयस्त्वंमानांतरसमागमात् । अपौरुषेयवाक्येतत्संगतिःकिंकरिष्यती"ति । तन्न ।

गु० आह ॥ **ब्रह्मणीति** ॥ संदिग्धवाक्यानुसारेणासंदिग्धवाक्यस्यनयनेऽरुच्याह ॥ **यद्वेति** ॥ अत्रहिपूर्वपक्षेप्राणशब्देनजडवायुः किंवातदभिमानिचेतनइतिविकल्पं

प्र० रस्यति ॥ **पूर्वपक्षइति** ॥ उपलक्षणमेतत् । प्रस्तावान्वायत्तत्वस्यचायोगादित्यपिध्येयं । चेतनएवदेवताशब्दस्यमंत्राधिष्ठातृत्वस्यचयोगात् । ननु "कतमासादेवताप्रतिहारमन्वायत्ता अन्नमितिहोवाचे"त्यादावचेतनेपिदेवताशब्दोस्तीतिचेत् विप्रतिपत्तेरितिभावः । यदपिगतार्थतामाशंक्यद्वेधाऽभ्यधिकाशंकाप्रदर्शनंतदपिनेत्याह ॥ **स्वापवाक्यइति** ॥ स्यादेवंयदि "यदावैपुरुषस्स्वपिती"तिवाक्येविवक्षितंलक्षणयाभूतलयाधारत्वंमुख्यवृत्त्यावागादींद्रियाधारत्वंचप्रसिद्धप्राणस्यमानांतरसिद्धंस्यात् तदातदनुसारात्प्रस्तावववाक्येपितथास्यात् । नचैवमस्तीत्यर्थः । मानांतरसंवादाभावमेवाह ॥ **नहीति** ॥ इंद्रियलयद्वाराभूतलयपरत्वाशयेनोक्तं **पृथिव्यादेरिति** ॥ मुख्यवृत्त्याइंद्रियलयपरत्वपक्षाशयेनोक्तम**क्षाणामिति** ॥ लयशब्दार्थोविनाशेति ॥ **प्रत्यक्षादिति** ॥ एतेनमानांतरंप्रत्यक्षमनुमानंवेतिविकल्प्य नोभाभ्यामित्युक्तंभवति ॥ **देवतायामिति** ॥ एतेनप्राणंवागप्येतीत्यत्रप्राणशब्दःकिंजडवायुपरउततदभिमानिदेवताचेतनपरइतिविकल्पस्सूचितः । वागादी

पूर्वपक्षेप्राणस्यजडवायुत्वेप्रश्ने "कतमासादेवते"ति । प्रतिवचनेच "सैषादेवते"तिदेवताशब्दायोगात् । तदभिमानिचेतनत्वेच "वायुविकारस्यपंचवृत्तेःप्राणस्योपादानंयुक्त"मित्यादित्वत्पूर्वपक्षभाष्यविरोधात् । स्वापवाक्येमानांतरसंवादस्यैवाभावेनतंस्वीकृत्यपूर्वोत्तरपक्षोत्त्ययोगाच्च । तथाहि । नहिस्वापेपृथिव्यादेरक्षाणांवाविनाशधीः । प्रत्यक्षादनुमानाद्वादेवतायांजडेथवा ॥ १ ॥

गु० मनसिनिधायाद्येदोषमाह ॥ **पूर्वपक्षइति** ॥ जडेदेवताशब्दस्यक्काप्यप्रयोगादितिभावः । द्वितीयंदूषयति ॥ **तदभिमानीति** ॥ मानांतरसंवादेनप्राबल्यमाश्रित्याभ्यधिकाशंकयाकृतंपूर्वपक्षंदूषयति ॥ **स्वापवाक्यइति** ॥ अक्षाणामतींद्रियत्वेनप्रत्यक्षादनुमानाद्वेतिअव्यवस्थितविकल्पायोगाद्व्यवस्थांदर्शयति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० नांभूतपरत्वमुपेत्यप्राणेपृथिव्यादिलयाधारत्वमुच्यतइत्याद्यःपक्षः । तत्रतावन्मानांतरसंवादाभावमुपपादयति ॥ **नतावदिति** ॥ जडइति प्राणशब्दार्थस्यविकल्पेनानुवादः ॥ **मानांतरेति** ॥ प्रत्यक्षानुमानरूपेत्यर्थः ॥ **अनुभवादिति** ॥ प्रत्युततद्विसंवादएवेतिभावः । ननुदृष्टिसृष्टिपक्षेसर्वदृष्टेरभावात्कथमेतदित्यतआह ॥ **दृष्टीति** ॥ अक्षाणांवेतिद्वितीयपक्षोपलंभंविशदयति ॥ **नापीति** ॥ तेषां इंद्रियाणां । एते नप्रत्यक्षान्नविनाशधीरित्युपपादितं । अनुमानादित्येतदुपपादयति ॥ **नापीति** ॥ तत्र वायुविकारे । इंद्रियाणां । तेषां इंद्रियाणिप्राणेलीयंते । प्राणवृत्तौसत्यामपींद्रियवृत्तीनांपरिलुप्यमानत्वात् । यस्मिन्सव्यापारेसतियन्निर्व्यापारंतत्तत्रलीयते । यथासंप्रतिपन्नमित्यनुमीयतइत्यर्थः ॥ **उक्तत्वादिति** ॥ तथाचयतोवेत्यादिवाक्यस्यापिमानांतरसंवादेनप्राबल्याद्दौर्बल्योक्त्ययोगादितिभावः । नचोपादानत्वेमानांतरसंवादेपिन भूतलयाधारत्वइतिवाच्यं । उपादानस्यैवलयाधारत्वादितितात्पर्यात् ॥ **व्याप्त्यभावाच्चेति** ॥ संप्रतिपन्नदृष्टांताभावादितिभावः । यद्वा

नतावत्स्वापकालेजडेदेवतायांवामहाभूतानांलयादौमानांतरसंवादः । तेषास्वापकालेप्यलीनानामेवानुभावात् । दृष्टिसृष्टिमते चतदावायुविकारादेरप्यभावेनतत्रभूतलयायोगात् । नापिस्वापकालेजडेवादेवतायांवेंद्रियाणांलयेप्रत्यक्षसंवादः । तेषामतींद्रियत्वात् । नापिस्वापकालेवायुवृत्तेरलोपादिंद्रियवृत्तीनांचलोपात्तत्रतेषांलयोनुमीयतइत्यनुमानसंवादोस्तीतिवाच्यं । त्वयाजन्मादिसूत्रेब्रह्मणउपादानत्वेपिश्रुतिसंवाद्यनुमानानामुक्तत्वात् । यस्मिन्सव्यापारेसतियन्निर्व्यापारंतत्तत्रलीयतइतिव्याप्त्यभावाच्च ।

गु० नतावदित्यादिना ॥ ननुदृष्टिसृष्टिपक्षमनुसृत्यस्वापइंद्रियाणांलयउच्यतइत्यतआह ॥ **दृष्टिसृष्टिमतइति** ॥ नन्विंद्रियाणिवायौस्वापकालेविलीयंते वायुव्यापारदशायांलुप्तव्यापारत्वादित्यनुमानेनलयोऽनुमीयतइत्याशंक्यनिराकरोति ॥ **नापीति** ॥ **व्याप्त्यभावाच्चेति** ॥ देवदत्तेसव्यापारेपिनिर्व्यापारसयज्ञदत्तस्सतत्रलयाभा

SGDF Sri Gargeshwari Digital Foundation

प्र० परमात्मनोपितथाविधस्यसत्त्वेनतत्रलयाद्यनंगीकारेणव्यभिचारादितिभावः। यद्वाकुठारेसव्यापारेसतिनिर्व्यापारंखड्गादिकंतत्रनलीयतइ
तिव्यभिचारादितिभावः । प्रत्यक्षविरोधंचानुमानस्याह ॥ **पूर्वेद्युरिति** ॥ एतेन "वागप्येती"त्यादिश्रुतिविरोधात्प्रत्यभिज्ञाभ्रांतिरितिनि
रस्तं । प्रत्यक्षस्यबलवत्त्वेनश्रुतिगताप्ययशब्दस्यनिर्व्यापारत्वार्थांतरपरत्वेनसावकाशत्वादितिभावः । श्रुतिविरोधंचाह ॥ **यथेति** ॥ एत
त्सर्वमितिसर्वशब्दार्थमेवदर्शयति ॥ **चक्षुश्चेति** ॥ **अनाशस्येति** ॥ संप्रतिष्ठितिशब्दस्यापिलयार्थत्वेपक्षिणामावासवृक्षाश्रयत्वदृष्टांतानुप

पूर्वेद्युर्येनदृष्टंतेनैवचक्षुषापश्यामीत्यादिप्रत्यभिज्ञाविरोधाच्च । "यथासोम्यवयांसिवासोवृक्षंसंप्रतिष्ठंते एवंहवै
तत्सर्वंपरआत्मनिसंप्रतिष्ठत"इतिप्रक्रम्य "चक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचे"त्यादिनासुप्तौचक्षुरादीनामनाशस्यै
वश्रवणाच्च । किंचाकाशाद्वाय्वाद्युत्पत्तिरपिमानांतरसंवादिनी । अवकाशात्पवनस्य पवनाच्चफूत्काराद्दहन
स्यदहनाच्चोष्मतःस्वेदस्य वृष्टितश्चपार्थिवपदार्थानामुत्पत्तेर्दर्शनादितिनाकाशवाक्यात्प्राणवाक्येऽधिकाशंका ।

प्र० पत्तिरितिभावः। कस्मिन्सर्वेप्रतिष्ठिताइतिगार्गिकृतप्रश्नंप्रतिपरिहारत्वानुपपत्तिश्चेतिभावः। परेआत्मनीत्युक्त्याचवायुवृत्तौचक्षुरादीनामप्य
यानुमानमसमंजसमितिसूचितं । श्रवणात् षट्प्रश्ने । एवं स्वापवाक्यंनमानांतरसंवादीतितदनुसारेणप्रस्ताववाक्यंनप्राणपरं प्रत्युतजन्मा
धिकरणेत्वदुक्तदिशायतोवेत्यादिवाक्यमेवमानांतरसंवादीति तदनुसारेणब्रह्मपरमेवेतिनाभ्यधिकाशंकावकाशइत्युक्तं इदानींयदप्याकाशाद्वा
युरित्यादिवाक्यंत्वित्यादिनापूर्ववैषम्यवर्णनंतदपिनेत्याह ॥ **किंचेति** ॥ पवनस्यदहनस्येत्यादेरुत्पत्तेर्दर्शनादित्यन्वयः । अवकाशाभावेपवना
दर्शनादितिभावः । कथंपवनाद्दहनस्योत्पत्तिदर्शनमित्यतउक्तं **फूत्कारादिति** ॥ एवमूष्मतइत्यपिध्येयं । वक्ष्यतेचभाष्येभगवत्पादैः

SGDF
Sri Gargeshwari Digital Foundation

प्र० "आप"इत्यत्र "घर्मात्स्वेदादिदृष्टे"रिति। यदपिच "आदित्योन्नंचोद्गीथप्रतिहारदेवते"त्यादिनोक्तंपरभाष्ये "कतमासादेवतेति । आदित्यइतिहोवाच । सर्वाणिहवाइमानिभूतान्यादित्यमुच्चैस्संतंगायंति । सैषादेवतोद्गीथमन्वायत्ते"ति । तथा "कतमासादेवतेति । अन्नमितिहोवाच । सर्वाणिहवाइमानिभूतान्यन्नमेवप्रतिहरमाणानिजीवंति । सैषादेवताप्रतिहारमन्वायत्ते"त्यादित्यान्नयोरब्रह्मत्वदर्शनात्तत्सामान्यात्प्राणस्याप्यब्रह्मत्वमितिशंकांतरं तदप्यनूद्यपूर्ववैषम्येणनिरस्यति ॥ **नचेति** ॥ उद्गीथमन्वायत्तेत्यर्थानुवादोयं । पूर्वाधिकरणविषयवाक्येपि "कासाम्नोगतिरिति । स्वरइतिहोवाच । स्वरस्यकागतिरिति । प्राणइतिहोवाच । प्राणस्यकागतिरिति । अन्नमितिहोवाच । अन्नस्यकागति

नच "कतमादेवतोद्गीथमन्वायत्ता । आदित्यइतिहोवाचे"त्यादिनोद्गीथादावादित्यादेरब्रह्मणएवदेवतात्वेनोक्तत्वात्तत्सन्निहितेप्रस्तावेप्यब्रह्मणएवदेवतात्वमित्यधिकाशंकेतिवाच्यं । पूर्वाधिकरणेपि "अपांकागतिरिति । असौलोकइतिहोवाचे"त्यादिकेनाब्रह्मणएवगतित्वेनोक्ततयातत्सन्निधानादस्यलोकस्यकागतिरितिवाक्येप्याकाशस्याब्रह्मत्वंयुक्तमिति

प्र० रिति। आपइतिहोवाच। अपांकागतिरिति। असौलोकइतिहोवाचे"तिशालावत्यप्रश्नोत्तरत्वेनदाल्भ्येनस्वर्गेलोकस्यगतित्वेनोक्तौ "अप्रतिष्ठितंवैकिलतेदाल्भ्यसामे"तितत्पक्षेप्रत्याख्याते दाल्भ्येनपुनः "अमुष्यलोकस्यकागति"रितिप्रश्नेकृते "अयंलोकइतिहोवाचे"तिपृथिवीलोकंगतित्वेनशालावत्योदाल्भ्यमुवाच । तत्पक्षेचजैबिलिना "अंतवद्वैकिलतेशालावत्यसामे"तिप्रत्याख्याते तर्ह्यस्यलोकस्यकागतिरितिशालावत्यकृतप्रश्नोत्तरत्वेनाकाशइतिहोवाचेतिश्रवणात्प्रायपाठरूपसन्निधानादित्यर्थः । नन्वसौलोकइत्यादौब्रह्मलिंगाभावादप्रतिष्ठितंकिलेत्यादिनातस्यदू

प्र० षितत्वाच्चस्वर्गादेरब्रह्मत्वेप्याकाशस्यसर्वभूतकारणत्वादिब्रह्मलिंगवत्त्वात्परोवरीयोहास्यभवतीत्यादिफलश्रवणाच्चब्रह्मत्वमेव। प्रायपाठस्यसंशयेसत्येवनिर्णायकत्वेनेहसंदेहाभावात् । उक्तंचपूर्वतंत्रे "विशयेप्रायदर्शनादिती"तिचेद्धंततर्हीहापिभूतसंवेशनादिब्रह्मलिंगाद्ब्रह्मपरमस्तु । तदेतदुक्तं **साम्यादिति** ॥ नचादित्यादावुच्चैस्संतंगायंतीत्यादिब्रह्मलिंगावभासान्नस्वर्गादिवाक्यतौल्यमितिवाच्यं । एवंतर्हितस्यततएवब्रह्मपरत्वावश्यंभावेनाब्रह्मसन्निधानमसिद्धमितिनाभ्यधिकाशंकायुक्ता । उक्तंच "आदित्यसंस्थितोविष्णुर्यत्सदासर्वगीतभुक् । राजादौगीतमप्यज्ञैर्भुंक्तेगानस्यदेवता । उद्गीथदेवतातस्मात्सएवपुरुषोत्तमः । अन्नस्थेनैवजीवंतिभूतान्येतानिविष्णुना । प्रतिहारदेवज्ञातस्सप्रतिहारोहिभोजन"मितिस्मृतावादित्यादेर्विष्णुत्वं । उक्तंचसुधायां "आदित्यान्नयोरब्रह्मत्वस्याप्यसिद्धेः । तत्रापिसर्वाणिहवाइमानिभूतान्यादित्यमुच्चैस्संतंगायंती"त्यादिब्रह्मलिंगसद्भावात् । अन्नमेवप्रतिहरमाणानीत्येतस्यतुप्रायपाठादुपजीवनार्थत्वेनग्राह्यत्वा"दिति। एतेनैतत्प्राणस्यब्रह्मत्वनिर्णयावश्यंभावात्तन्निर्णायकस्यान्यस्याभावादत्रैवनिर्णीयतइतिनिरस्तं । ब्रह्मलिंगस्यात्रसत्त्वात् । पक्षांतरप्रापकस्यचाभावेनसंशयपूर्वपक्षयोरयोगेनपूर्वन्यायेनैवनिर्णयसिद्धेरिति । उक्तंचसुधायां "अत्रापिसंशयाद्ययोगा"दिति । एवमभ्यधिकाशंकाप्रकारंनिरस्यतन्निवर्तकतयोक्तंसिद्धांतप्रकारंचनिरस्यति ॥ **यच्चोक्तमिति** ॥ **अपुंवाक्येति** ॥ प्रस्तावत्वाक्यंतावदवश्यंस्वापवाक्यकारणवाक्यान्यतरानुरोधेननेयं । भूतसं

साम्यात् । यच्चोक्तंपुंवाक्यस्येत्यादि तत्रब्रूमः । अपुंवाक्यद्वयेप्येकेनान्यानुसरणेध्रुवं । कर्तव्येसतिक्लृप्तत्वात्संवाद्येवानुरुध्यतां ॥ १ ॥ तथाहि ।

गु० वादितिभावः । अप्राधान्यक्रमेणादौव्यभिचारमुक्त्वाबाधमाह ॥ **पूर्वेद्युरिति** ॥ अधिकाशंकांनिरस्यसिद्धांतमपिदूषयति ॥ **यच्चोक्तमिति** ॥ ननुसंवादानुसरण

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेशनादिलिंगमात्रस्यात्रनिर्णायकत्वेपूर्वेणगतार्थत्वस्योक्तत्वात्। तत्रद्वयोरपौरुषेयत्वेपिपूर्वपक्ष्युक्तरीत्यामानांतरसंवादिस्वापवाक्यमेवानुरोद्धव्यं। लोकेतथाक्लृप्तत्वात्। तथाचप्रस्तावववाक्यंप्रसिद्धप्राणपरमेवेतिनपूर्वपक्षोपमर्दइत्यर्थः। क्लृप्तत्वादित्येतदुपपादयति ॥ **प्रमाणेति** ॥ ननुमानांतरसंवादिनोप्रामाण्यात्कथंतदनुसरणमितिचेत् किमिदमप्रामाण्यंकिंज्ञातार्थकत्वमुतमानांतरसापेक्षत्वरूपं। आद्यआह ॥**अर्थेति**॥ विषयाबाधरूपंयाथार्थ्यमेवप्रामाण्यं। नत्वनधिगतार्थत्वं। अन्यत्रनिरस्तत्वादितिभावः। एतेनप्रमाणसिद्धेमानांतरसंवादोव्यर्थइतिनिरस्तं। प्रमाणसिद्धत्वेपितत्रानाश्वासशंकानिरासेनदार्ढ्यार्थत्वादिति। द्वितीयआह ॥ **अनपेक्षत्वस्येति** ॥ स्वापवाक्यंचनमानांतरमपेक्ष्यार्थंबोधयति। किंतुतदुक्तेर्थेदैवान्मानांतरसंवादः। नचतावतासापेक्षत्वं। उक्तंचवाचस्पत्ये "यत्रतुप्रमाणांतरसंवादस्तत्रप्रमाणांतरादिवार्थवादादपिसोर्थःप्रसिध्यति। द्वयोःपरस्परानपेक्षयोःप्रत्यक्षानुमानयोरिवैकत्रार्थेप्रवृत्तेरिती"तिभावः। स्वापवाक्याननुसरणेबीजांतरमाशंक्याह ॥ **सप्रयोजनत्वायेति** ॥ ब्रह्मपरत्वएवापूर्वार्थत्वं नतुप्राणपरत्वइतिभावः। तत्प्रसंगात् अपूर्वार्थत्वप्रसंगात्। नन्वत्रब्रह्मपरत्वे

प्रमाणभूतेपुंवाक्येप्रत्यक्षादौचसंवादिनएवानुसरणीयत्वंक्लृप्तमितीहापितथैवयुक्तं। अर्थाबाधरूपप्रामाण्यस्यसंवादेनदार्ढ्यात्। अनपेक्षत्वस्यचदैवात्संवादेनाहानेः। सप्रयोजनत्वायचप्रस्तावववाक्यस्यापूर्वार्थत्वेस्वापवाक्येपितत्प्रसंगात्।

गु० मयुक्तं। वैयर्थ्यादित्यतआह ॥ **अर्थाबाधेति** ॥ ननुसंवादानुसरणेसापेक्षत्वेननिरपेक्षत्वहानिरित्यतआह ॥ **अनपेक्षत्वस्येति** ॥ ननुप्रस्तावववाक्यस्यप्राणपरत्वेबोधितार्थबोधकत्वेनवैयर्थ्यंस्यात्। ब्रह्मपरत्वेत्वपूर्वार्थत्वेननवैयर्थ्यमितितदेवस्वीक्रियतइत्यतआह ॥ **सप्रयोजनत्वायेति** ॥ किंचस्वापवाक्यस्याभिमानि

SGDF Sri Gargeshwari Digital Foundation

प्र० नापूर्वार्थत्ववत्तत्रतन्नसंभवति । प्राणपरत्वेनसिद्धत्वादित्यतआह ॥ **स्वापवाक्यस्येति** ॥ प्राणवाय्वभिमानीत्यर्थः । एवंचस्वापवाक्यगत प्राणशब्दस्यतदभिमानिदेवतापरत्वेनतदनुसारेणप्रस्ताववाक्यस्यापिदेवतापरत्वेऽपूर्वतालाभान्नब्रह्मपरत्वसिद्धिरितिभावः । यद्यप्यपुंवाक्यत यानाशंकितदोषत्वान्नान्यानुसरणमिति तदपिनेत्याह ॥ **अनाशंकितेति** ॥ **संवादइति** ॥ नानुसरणीयइतियोज्यं ॥ **मानांतरेति** ॥ अन्यथेत्यनुवर्तते । अपौरुषेयेऽप्यन्यानुसरणमित्यत्रतद्वचनमेवसंवादयति ॥ **उक्तंचेति** ॥ एतेन स्वापवाक्यंसंवर्गविद्यायांश्रूयते । प्रस्ता ववाक्यंतूद्गीथविद्यायांगतं । अतस्तयोर्नैकवाक्यत्वमितिसिद्धांतइतिनिरस्तं । ब्रह्मकारणवाक्यस्यापितथात्वादिति । यदत्रकैश्चिदुक्तं "प्राण

स्वापवाक्यस्याप्यभिमानिदेवतापरत्वेऽपूर्वार्थत्वसंभवाच्च । अनाशंकितदोषत्वात्तुद्वयोरपिप्रामा ण्यंनत्वन्योन्यमननुसरणं । अन्यथाश्रुत्याश्रुत्यंतरसंवादः उपक्रमाद्यानुगुण्यंचनानुसरणीयं स्यात् । मानांतरविरोधश्चनपरिहार्यःस्यात् । उक्तंचभामत्यामपि "यद्यपिश्रुतयःस्वतःप्रमाणत यानपेक्षाः । तथापिमानांतरोपनीतार्थवशेनव्यवस्थाप्यंत" इति । तस्मात्परेषामधिकरणमयुक्तं ॥

गु० देवतापरत्वेऽपूर्वार्थत्वसंभवात्प्रस्ताववाक्यमप्यभिमानिदेवतापरत्वेनापूर्वार्थंस्यादितिनब्रह्मपरत्वमेवेष्टव्यमित्याह ॥ **स्वापवाक्यस्यापीति** ॥ ब्रह्मपरत्वेप्यपूर्वता लाभसंभवेपिप्रस्तावाक्यसमानार्थत्वात् अग्निहोत्रंजुहोतीतिप्राप्तहोमांशेदध्नेंद्रियकामोजुहुयादित्यस्येवापूर्वार्थत्वाभावादभिमानिदेवतापरत्वमुक्तमितिज्ञेयं । नन्वन्यो न्यानुसरणेसापेक्षत्वेनाप्रामाण्यापत्तिरित्यतआह ॥ **अनाशंकितेति** ॥ ननुविरुद्धार्थत्वेनद्वयोरप्रामाण्यमित्यतआह ॥ **नत्विति** ॥ तथाचसंवादरहितवाक्येसं

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यप्राणः प्राणबंधनंहिसोम्यमनइतिचोदाहरण"मिति । तत्तुपरभाष्यएवसंशयानुदयेनदूषितत्वान्ननिराकृतं । रामानुजीयमतमपाकरोति ॥ केचित्त्विति ॥ प्रस्तोतर्यादेवतेतिवाक्येनिखिलजगत्कारणतयाप्राणशब्दनिर्दिष्टःप्रसिद्धःप्राणःपरात्मावेतिसंदेहे पूर्वपक्षादिकमनुवदति ॥ कृत्स्नस्येति ॥ शिलेति ॥ शिलाकाष्ठाद्यचेतनेषुप्राणायत्तस्थित्यदर्शनात् "सर्वाणिहवाइमानिभूतानिप्राणमेवाभिसंविशंति प्राणमभ्युज्जिहत"इतिसर्वपदायोगात् अतएवसर्वाणिहवाइमानीतिप्रसिद्धवन्निर्देशादेवहेतोःप्राणशब्दनिर्दिष्टःपरमात्मैवेतिसिद्धांतइत्यर्थः । पूर्वपक्षस्यनिर्दलत्वेनानूदितंनिरस्यति ॥ तन्नेत्यादिना ॥ एतेनयत्केनचित्प्रलपितं पूर्वत्राकाशपदेनपरमाकाशस्यपरप्रकृतिरूपस्यग्रहणेनतदभेदादस्त्वी

॥ केचित्तु कृत्स्नस्यजगतःप्रसिद्धप्राणाधीनप्रवृत्त्यादिदर्शनात्प्रस्तावचाक्येप्रसिद्धप्राणएवोच्यतइत्याकाशाधिकरणादधिकाशंकायां शिलाकाष्ठादिषुतदभावात् "सर्वाणी"त्यस्यायोगइतिपरिहारोभिप्रेतइत्याहुः । तन्न । प्राणाधीनप्रवृत्तिकंशरीरमिवतदनधीनप्रवृत्तिकंशरीरादन्यदपिबहुपश्यतःपूर्वपक्षिणःसर्वप्राणाधीनप्रवृत्तिकमितिशंकायोगात् ॥

प्र० श्वरआकाशः । प्रस्तावचाक्यगतप्राणस्तु "प्राणाद्ध्येवखल्विमानिभूतानी"त्यादिश्रुतेः प्रसिद्धप्राणएवेतिशंकायां सर्वकारणत्वादिलिंगात्प्राणशिवएव । प्राणाद्ध्येवेतिश्रुतेस्त्वानंदरूपस्यब्रह्मणःकारणत्वएवतात्पर्यमितिपरिहारइति । उक्तंच "प्राणेतुकागतिरिहप्राणाद्ध्येवेत्यपिश्रुतेन्यत्र । शिवएवसोपिलिंगात्साश्रुतिरानंदविश्रांते"ति तन्निरस्तं । पूर्वत्राप्याकाशाद्वायुरितिश्रुतेस्सत्वात् । ऐकाधिकरण्येत्वतएवेतिविन्यासायोगात् । प्राणाद्ध्येवेत्यादेर्विष्णुपरत्वेनानंदमयाधिकरणएवसाधितत्वाच्च । सिद्धांतोप्ययुक्तः । "प्राणस्थविष्णुनासर्वेप्रसूयंतेयतस्ततः । प्रस्तावदेवतासस्यात्प्रस्तावस्तुजनिर्यत"इत्यादिव्याख्यानरूपस्मृतिविरोधाच्च । "प्राणस्थूणा अयंवावशिशुर्योयंमध्यमःप्राण"इतिश्रुतिविरोधाच्च । "द्वावात्मा

प्र० नौहिदेवेषुद्वौप्राणौद्वौचचेतनौ । अज्ञानाभिभवास्पृष्टौवायुर्नारायणश्चतौ । तदन्येचेतनास्सर्वेप्राणाश्चात्मानएवच । अज्ञानाभिभवस्पृष्टास्तस्मात्तेह्यधमास्स्मृताः । मध्यमोवायुरेवैकउत्तमःकेवलोहरि"रितिब्रह्मांडपुराणविरोधाच्चेति । उपन्यासमुखेनैवटीकाग्रंथस्यविवृतत्वान्नाक्षरार्थवर्णनेयतितव्यमित्याह ॥ ग्रंथस्त्विति ॥ ७ ॥ प्राणाधिकरणंसंपूर्णं ॥ ९ ॥
॥ ॐज्योतिश्चरणाभिधानात्ॐ ॥ "टीकासुचयदस्पष्ट"मितिप्रतिज्ञानुरोधेनटीकाकृतांयोजनाभेदेषूपपत्तीर्विवक्षुर्विरोधंचपरिजिहीर्षुस्तदुक्तयोजनाभेदान्दर्शयति ॥ अत्रेति ॥ त्रीणिदर्शनानीत्युक्त्यात्रयमप्युपादेयमितिसूचयति ॥ चतुस्सूत्रीति ॥ ज्योतिरित्येकं छंदोभिधा

ग्रंथस्तुस्पष्टार्थः ॥ ७ ॥ प्राणाधिकरणं संपूर्णं ॥ ९ ॥

॥ ॐज्योतिश्चरणाभिधानात्ॐ ॥ अत्रत्रीणिदर्शनानि । ज्योतिरित्यादिचतुस्सूत्र्येकमधिकरणं । विषयवाक्यंत्वग्निसूक्तस्थं "ज्योतिर्हृदयआहितंय"दितिवाक्यमेवेत्येकंमतं । इदंचज्योतिरित्यस्यसूत्रस्याग्निसूक्तस्थंवाक्यमेवोदाहृत्य "इदंचैकमधिकरण"मितिवदत

गु० वादिवाक्यमनुसरणीयमितिनतयोर्विरुद्धार्थत्वेनाप्रमाण्यमितिभावः ॥ अन्यथेति ॥ अन्योन्यानुसरणेऽप्रामाण्येचेत्यर्थः ॥ ७ ॥ प्राणाधिकरणंसंपूर्णं ॥९॥
॥ ॐज्योतिश्चरणाभिधानात्ॐ ॥ ननुज्योतिरधिकरणटीकानव्याख्येया । अनुपपन्नत्वान्मानांतरविरुद्धत्वाच्चेत्यतो मानांतराविरोधंदर्शयितुंतत्रांतरानुपपत्तीश्चपरिहरन्मतांतरमुपन्यस्यति ॥ अत्रेति ॥ यद्वाटीकासुचयदस्पष्टंतच्चस्पष्टीकरिष्यतइतिप्रतिज्ञामवंध्यांकर्तुमाह ॥ अत्रेति ॥ सिद्धांतिनामितिशेषः । नन्वत्राद्यं

SGDF Sri Gangeshwari Digital Foundation

प्र० नान्नेतिचेन्न तथाचेतोर्पणनिगदात्तथाहिदर्शनं भूतादिपादव्यपदेशोपपत्तेश्चैवं उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधादितिचतुस्सूत्री ॥ ॥ **तत्वप्रदीपेति** ॥ प्राचीनभाष्यव्याकर्तुः । सूत्रव्याख्यानरूपमितिसुधारीत्योक्तं । एतन्मतेज्योतिस्सूत्रस्यापितात्पर्यतोव्याख्यानरूपत्वात् । यद्वासाक्षाच्छंदस्सूत्रस्यैवव्याख्यानरूपत्वाभिप्रायेणैवमुक्तं । इत्यनुव्याख्यानमित्यवतार्येत्यन्वयः ॥ **सन्न्यायेति** ॥ प्राचीनानुव्याख्यानव्याख्यातुः ॥ **टीकाकारस्येति** ॥ तत्वप्रकाशिकाकृतः । एवंमतभेदमुपन्यस्यतत्वप्रदीपपक्षे "विमेकर्णापतयंत" इत्यग्निसूक्तगतस्यैव

स्तत्वप्रदीपकृतोभिप्रेतं। मतांतरंतु चतुस्सूत्र्याएकाधिकरणत्वेपिविषयवाक्यंज्योतिरित्यस्यापि "अथयदतःपरोदिवोज्योति" रितिछांदोग्यवाक्यमेवेति । इदंच "छंदोभिधाना" दितिसूत्रव्याख्यानरूपं "नित्यत्वादेवशब्दानां" इत्यनुव्याख्यानं "ज्योतिश्चरणाभिधानादित्यधिकरणंतात्पर्यतोविवृणोती" त्यवतार्यज्योतिरितिसूत्रस्यछांदोग्यवाक्यमेवोदाहरतस्सन्न्यायरत्नावलीकारस्याभिप्रेतं। मतांतरंतु ज्योतिस्सूत्रमेकमधिकरणं। छंदइत्यादित्रिसूत्रीत्वधिकरणांतरमिति। इदंचटीकाकारस्याभिप्रेतं।

गु० मतमनुपपन्नं । तथाहि । तद्विषयत्वेनाभिमतेहृदयआहितमितिवाक्येछंदोभिधानभूतादिपादव्यपदेशोपदेशभेदानामभावात् । किंचपूर्वत्राग्निसूक्तमग्निपरमित्येवपूर्वपक्षात् छंदस्सूत्रेछांदोग्यवाक्यंछंदःपरमित्येवपूर्वपक्षात् पूर्वपक्षयुक्तिभेदस्याविद्यमानत्वेनाधिकरणभेदस्यैववक्तव्यत्वेनचतुस्सूत्र्याएकाधिकरणत्वासंभवात् । किंचा ॥ ३५६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सर्वत्रविषयवाक्यत्वेऽनुपपत्तिमाशंक्यसमाधत्ते ॥ **नचेति** ॥ **अभावेनेति** ॥ "गायत्रीवाइदंसर्वंभूतं यदिदंकिंचे"त्यादिछांदोग्यवाक्यए वसत्त्वेनतस्यछंदःप्रभृतिसूत्रेष्वविषयत्वेतेषामयोगइत्यर्थः। ज्योतिश्श्रुत्या "अथयदतःपरोदिवोज्योतिर्दीप्यत" इतिज्योतिश्श्रुत्या ॥ **शाखांतरेति** ॥ अधिकरणशरीरंप्रागुक्तंशास्त्रयोनिसूत्रे । "एकंवासंयोगरूपचोदनाख्याविशेषा"दितिसिद्धांतसूत्रोपन्यस्तेनफलसंयोगादिसाधारणधर्मकृत प्रत्यभिज्ञारूपेणन्यायेनयथाशाखाभेदेप्यग्निहोत्रज्योतिष्टोमादिकर्माभेदस्तथावेदभेदेपिशब्दैक्याद्धर्मैक्याज्ज्योतिरभेदइत्यर्थः । अग्निसूक्तगतस्य छांदोग्यगतस्यचज्योतिषएकत्वमवश्यमभ्युपेयं । अन्यथाटीकाकृत्पक्षेप्ययुक्तिरित्याह ॥ **अन्यथेति** ॥ उक्तदिशाएकत्वानभ्युपगतौ ॥ **पूर्वेति** ॥ ज्योतिरधिकरणेत्यर्थः । अस्त्वेकत्वंज्योतिषः किंततइत्यतःप्रागुक्तानुपपत्तिनिरासप्रकारमाह ॥ **तथाचेति** ॥ नन्वेवंपूर्वपक्षे अ

नचात्राद्यपक्षेऽग्निसूक्तेगायत्रीरूपछंदोभिधानभूतादिपादव्यपदेशोपदेशभेदानामभावेनछंदोभिधानादित्यादेरयोगइतिवा च्यं । ज्योतिर्हृदयआहितंयदित्यग्निसूक्तस्थस्यैवज्योतिषःछांदोग्येपिज्योतिश्श्रुत्या "योयमंतर्हृदय" इतिहृदयनिहितत्वधर्मेण चशाखांतराधिकरणन्यायेनप्रत्यभिज्ञायमानत्वेनैकत्वात् । अन्यथानेकाधिकरणपक्षेपिछांदोग्योक्तस्यज्योतिषो "गायत्री वाइदंसर्व"मितिश्रवणाच्छंदस्त्वेप्यग्निसूक्तस्थस्यछंदस्त्वानापत्त्यापूर्वाधिकरणसिद्धांताक्षेपेणोत्तराधिकरणपूर्वपक्षोनस्यात् । तथाचछंदोभिधानादित्यस्यायमर्थः । अग्निसूक्तस्थंज्योतिर्नविष्णुः । अस्यैवज्योतिषःछांदोग्येगायत्रीत्वाभिधानादिति ।

गु० ग्निसूक्तोक्तकर्णादिविदूरत्वविरुद्धस्यदृष्टत्वादेश्छांदोग्येप्रतिपादितत्वात्तस्यैकार्थप्रतिपादकत्वानुपपत्तेरित्याशंक्यनिराकरोति ॥ **नचेत्यादिना** ॥ तस्मादाद्यंमतंयुक्त

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य-
॥ ३५७ ॥

प्र० ग्निसूक्तस्थंज्योतिर्नविष्णुः अन्यत्रनिरूढज्योतिश्श्रुतेरिति स्वप्रकरणगतज्योतिश्श्रुतिरूपपूर्वपक्षयुक्त्यभिधानसंभवेन प्रकरणांतरगतज्योतिषै क्यंप्रसाध्य तत्रत्यछंदस्त्वादित्युक्त्यभिधानमसंगतं । नचज्योतिश्श्रुतेरधिदैवशब्दत्वेऽधिभूतशब्दत्वेवापूर्वन्यायेनविष्णुपरतयासावकाशत्वेन ननिरवकाशविष्णुलिंगात्प्राबल्यमितिनसैवपूर्वपक्षप्रापिकेतिवाच्यं । भाष्याद्युक्तदिशासूक्तरूपनिरवकाशप्रकरणानुगृहीततयाप्राबल्यादिति चेन्न । वक्ष्यमाणरीत्याप्रकरणांतरगतज्योतिषोपिविष्णुत्वंनिर्णेतुमेतत्प्रकरणगतप्रापकापरित्यागेन प्रकरणांतरगततत्तत्प्रापकाभिधानमुखेनैवं जातीयकसर्वगतज्योतिषोविष्णुत्वाक्षेपाभिप्रायेणान्यगतप्रापकाभिधानात् । नचैवंछांदोग्यवाक्यमेवसर्वत्रोदाहृत्यतत्रत्यज्योतिषोविष्णुत्वनिर्ण येकृते तदैक्यादग्निसूक्तगतज्योतिषोपितन्निर्णयस्सेत्स्यतीतिवाच्यं । अस्मिन्पक्षेपिसिद्धांतेछांदोग्यस्थंज्योतिर्विष्णुः अस्यैवज्योतिषोऽग्निसूक्तेच

एवंभूतादिपादव्यपदेशादावपिद्रष्टव्यं।

प्र०रणाभिधानादितिवक्राश्रयणस्यतुल्यत्वात् । नन्वस्मिन्पक्षेकेवलंसिद्धांतेचरणरूपैकयुक्त्यभिधानायप्रकरणांतरानुसरणेतदर्थसूत्रंचैकं तत्वप्र दीपपक्षेचपूर्वोत्तरपक्षयोरनेकयुक्त्यभिधानायान्यप्रकरणानुसरणंतदर्थसूत्राणित्रीणीतिगौरवमितिचेन्न । प्रकरणांतरानुसरणेसमानेयुक्त्यादि गतैकानेकत्वादेरप्रयोजकत्वात् । प्रधानसूत्रेप्रकरणांतरानुसरणापेक्षयागुणसूत्रेष्वेवतदनुसरणस्यन्याय्यत्वाच्च । चरणेनज्योतिषोविष्णुत्वे पूर्वमभिहितेऽन्यप्रकरणगतप्रापकांतरावष्टंभेनपूर्वोक्ताक्षेपरूपशंकायाअनंतरमेवोदयाच्चेतितात्पर्यात् । उक्तंचतत्वप्रदीपे "अग्निसूक्तमुदाहृत्य मंत्रगोचरंविचारमाचरतापरमवैदिकेनाचार्येणनिखिलोपिवेदसमन्वयोविचारितोभवतीतिभूयानयंलाभ"इति ॥ **एवमिति** ॥ अग्निसूक्त स्थंज्योतिर्विष्णुरेव । अस्यैवज्योतिषः छांदोग्येभूतादिपादव्यपदेशात् । उपदेशभेदेप्यविरोधादितिद्रष्टव्यमित्यर्थः । ननुभवेदेवमनुपपत्तिप

चंद्रिका.
प्र. प्र.
१०
॥ ३५७ ॥

प्र० रिहारोयद्युभयगतज्योतिषोरेकत्वंस्यात् । नचैवं । वाक्यद्वयस्यापिभिन्नार्थपरत्वात् । अन्यथा "वागेवास्यज्योतिः अथैषज्योति"रित्यादा वपिज्योतिश्श्रुत्यैकत्वंस्यादित्याशंक्याह ॥ **नचेति** ॥ नन्वेवमप्यग्निसूक्तस्थस्य "विमेकर्णापतयंतोविचक्षु"रितिकर्णचक्षुराद्यगोचरत्वमुच्यते तत्रच "तदेतद्दृष्टंचश्रुतंचे"तिछांदोग्येतृतीयेदृष्टत्वादिकमुच्यते ततोनैकार्थ्यमित्याशंक्याह ॥ **नचेति** ॥ **आकारेति** ॥ शुद्धरूपेणादृष्ट त्वादिविशिष्टरूपेणदृष्टत्वादिकमित्यर्थः । यद्वाकात्स्न्येनादृष्टत्वादि एकदेशेनदृष्टत्वादीत्यर्थः । यद्वासूक्ष्मस्थूलाकारभेदेनेत्यर्थः । ननुकुतए वंकर्णादिविदूरत्वदृष्टत्वादेराकारभेदेनाविरोधंव्युत्पाद्यअग्निपर्यायतेजश्शब्दस्यगायत्र्यांश्रवणेनाग्निसूक्तस्थछांदोग्यस्थवाक्ययोरैकार्थ्यंचापाद्य ज्योतिश्श्रुत्यागुहानिहितत्वधर्मेणचानेकत्रश्रुतज्योतिषएकत्वव्युत्पादनेनैकाधिकरण्यसमर्थनक्लेशः । भिन्नविषयतयाऽधिकरणद्वयमेवास्त्वित्य

नचपूर्वपक्षेऽग्निसूक्तस्याग्निपरत्वाच्छांदोग्यस्यचछंदःपरत्वात्प्रत्यभिज्ञायोगइतिशंक्यं । अस्मिन्मते "तेजोवैब्रह्मवर्चसंगायत्री"तिश्रुतावग्निशब्दानतिभिन्नार्थतेजश्शब्दगायत्रीशब्दयोःसामानाधिकर ण्यदर्शनेनाग्नौगायत्रीशब्दस्यगायत्र्यांचाग्निशब्दस्यसंभवेन अग्निसूक्तवच्छांदोग्यस्याग्निपरतायाश्छां दोग्यवदग्निसूक्तस्यापिगायत्रीपरतायाश्चसंभवेनद्वयोरप्यैकार्थत्वात् । नचाग्निसूक्तस्थेनकर्णादिविदू रत्वेन "तदेतद्दृष्टंचश्रुतंचे"तिछांदोग्यस्थदृष्टत्वादिकंविरुद्धमितिशंक्यं । आकारभेदेनाविरोधात् ।

गु० मित्यंतेन ॥ **आकारभेदेनेति** ॥ कात्स्न्येनदृष्टत्वाद्यभावाददृष्टत्वादिकं किंचिद्दर्शनादेर्दृष्टत्वादिकमित्यर्थः । ननुद्वितीयंमतमयुक्तं । तत्रविषयवाक्यतयाभिमते

SGDF
Sri Gargeshwari Digital Foundation

प्र० तऐकाधिकरण्येसूत्रेभाष्येचज्ञापकमाह ॥ **एकाधिकरणत्वादेवेति** ॥ **अनुक्त्वेति** ॥ अन्यथाऽऽकाशस्तल्लिंगादतएवप्राणइत्यादाविव गायत्र्यादिसमन्वेतव्यशब्दोपादानंस्यादितिभावः ॥ **अग्नीति** ॥ अन्यथागायत्रीपदमेवप्रयुंजीतेतिभावः । नन्वेवमपिसन्न्यायरत्नावली कृन्मतेछांदोग्यवाक्यस्यैवज्योतिरादिसूत्रचतुष्टयेविषयत्वात्तत्रछंदोभिधानादिसंभवेपि चरणशब्दितकर्णादिविदूरत्वादेरभावेनचरणाभिधाना दित्ययुक्तमित्यतआह ॥ **द्वितीयेपीति** ॥ पक्षइतिवर्तते । नन्वयुक्तमेतत् । छांदोग्यगतज्योतिषोविष्णुत्वेतत्रत्यानां "ततोज्यायांश्चपुरुषः यद्वै तद्ब्रह्म यएतामेवब्रह्मोपनिषदंवेदे"तिश्रुतीनां "एतामेवनातिशीयंत"इतिसर्वोत्तमत्वगानत्राणकर्तृत्वभूतादिपादत्वादिलिंगानांचत्यागेनान्यगत

एकाधिकरणत्वादेवहि "छंदोभिधाना"दितिसूत्रेसमन्वेतव्यशब्दांतरमनुक्त्वा "विकारशब्दान्नेतिचे"दित्यादाविवपूर्वसूत्रोक्तसमन्वयबाधकमात्रमुद्धृतं । भाष्येपिछंदस्सूत्रव्याख्यानावसरे "अग्निगायत्र्यादी"त्यग्निपदंप्रयुक्तं । तस्मादाद्यंमतंयुक्तं । द्वितीयेपिछांदोग्येचरणाभिधानाभावेप्युक्तरीत्यावाक्यद्वयोक्तस्यज्योतिषएकत्वात् "चरणाभिधाना"दित्येतन्नव्यधिकरणं । तथाचचरणाभिधानादित्यस्यायमर्थः । छांदोग्यस्थंज्योतिर्विष्णुः । अस्यैवज्योतिषोग्निसूक्तेविचरणाभिधानादिति ।

गु०अथयदतःपरोदिवइत्यत्रप्रथमसूत्रोक्तस्यकर्णादिविदूरत्वस्याश्रवणात् । किंचतत्तत्प्रकरणस्थानामेवयद्वैतद्ब्रह्मेत्यादिश्रुतिलिंगादीनांसत्वेनतेनैवतत्रोक्तस्यब्रह्मत्वसाधनस्योपपत्त्यासूत्रकारीयंसूक्तांतरस्थकर्णादिविदूरत्वरूपलिंगग्रहणमनुपपन्नमित्यतआह ॥ **द्वितीयेपीत्यादिना** ॥ **उक्तरीत्येति** ॥ ज्योतिर्हृदयआहितंयदित्यग्निसूक्तस्थस्यैवज्योतिषःछांदोग्येज्योतिश्श्रुत्या योयमंतर्हृदयइतिहृदयनिहितत्वधर्मेणच शाखांतराधिकरणन्यायेनप्रत्यभिज्ञायमानत्वेनैकत्वादित्युक्तरीत्येत्यर्थः ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० लिंगोदाहरणेप्रयोजनाभावादित्याशंक्याह ॥ **यद्यपीति** ॥ एवंतद्वयएकैकंवाक्यमुदाहरणमुपेत्यसूत्राणांसामंजस्यमुक्तं। अधुनामतद्वयेपिवाक्यद्वयमप्युदाहरणं। पूर्वोत्तरपक्षन्यायसाम्याच्चैकाधिकरणता। नहिविषयभेदमात्रेणाधिकरणभेदः। अतोनवैयधिकरण्यमित्याह ॥ **यद्वेति** ॥

यद्यपिछांदोग्योक्तस्यब्रह्मत्वे "यद्वैतद्ब्रह्मे"त्यादिश्रुतिलिंगानिस्ववाक्यस्थानिसंति । तथापितत्तत्सूक्तस्थनिरवकाशविष्णुलिंगैःसावकाशश्रुतिसूक्तबाधेन भिक्षुकपादप्रसरणन्यायेनसर्ववेदानांविष्णौसमन्वयंदर्शयितुंसूत्रकारेणाग्निसूक्तस्थंलिंगमुक्तं । तस्माद्द्वितीयमपिनिरवद्यं । यद्वा मतद्वयेपिवाक्यद्वयमप्युदाहरणं । यथाह्यग्निसूक्तस्थवाक्येप्रकरणानुगृहीतश्रुत्यापूर्वःपक्षः । तथा

गु० स्ववाक्यस्थानीति ॥ तथाचस्ववाक्यस्थलिंगादिपरिग्रहेलाघवमितिभावः ॥ **भिक्षुकपादेति** ॥ भिक्षुकस्यवामनस्यबलिदत्तत्रिपादस्थलग्रहणमिषेणसर्वांत्रिलोकींग्रहीतुमभिवृद्धीकृतप्रसारणवदित्यर्थः । ननुज्योतिस्सूत्रेहृदयआहितमितिविषयवाक्यं छंदस्सूत्रेतु अथयदतःपरइत्यादिविषयवाक्यमित्याद्यमतद्वयमयुक्तं । यत्रहियन्निर्णीयतेतत्रतदेवविषयवाक्यमित्युच्यते । नतुविषयवाक्यंनामकिंचिज्जात्याभिन्नमस्ति । तथाचज्योतिस्सूत्रेहृदयआहितमित्यस्येवाथयदतःपरइत्यादेरपिनिर्णेतव्यत्वेनविषयवाक्यत्वात् तत्रहृदयआहितमित्येतदेवविषयवाक्यमित्यनुपपन्नं । एवंछंदस्सूत्रे अथयदतःपरइत्यादेरिवहृदयआहितमित्यादेरपिनिर्णेतव्यत्वेनविषयवाक्यत्वात् अथयदतइत्येतदेवविषयवाक्यमित्यनुपपन्नमित्यस्वरसात्पक्षांतरमाह ॥ **यद्वेति** ॥ ननुतेजोवैब्रह्मवर्चसंगायत्रीतिश्रुतेर्लक्षणयागौण्यावावृत्त्याप्रवृत्तेः कथंतद्बलाद्गायत्रीज्योतिषोरभेदःस्यात्। तथासतिब्रह्मवर्चसशब्दसामानाधिकरण्याद्ब्रह्मवर्चसाभेदोपिगायत्र्याअंगीकार्यःस्यात् । किंचप्रमेयभेदेशब्दैक्यमात्रेणकथमधि

SGDF
Sri Gargeshwari Digital Foundation

प्र० छाद्योग्येपीति ॥ तदनुगृहीतश्रुत्येत्यन्वयः। तत्रगायत्रीप्रकरणत्वंसाधयति ॥ **गायत्रीवाइदमित्यादिना** ॥ **चरणेनेति**॥ कर्णादींद्रियापरिच्छेद्यत्वरूपविचरणेनेत्यर्थः ॥ **साधारण्यादिति** ॥ भूतादीतियुक्त्यंतरंतुछांदोग्यमात्रासाधारणमितिवक्ष्यतइतिभावः । वाक्यभेदेपिन्यायसाम्यादैकाधिकरण्येदृष्टांतमाह ॥ **यथेति** ॥ अधिकरणशरीरंप्रागुक्तंसमन्वयसूत्रे । द्रव्यदेवतेहियागस्यरूपमुच्यते । तदलाभेसतिविधानयोग्यस्वरूपविशेषानवगत्यानानयोर्यागविधित्वमिति "दध्नाजुहोति संततमाघारयती"त्यादिवाक्यप्राप्तहोमाघारसमुदायानुवाद

छांदोग्येपि "गायत्रीवाइदंसर्व"मित्युपक्रमात् "सैषाचतुष्पदाषड्विधागायत्री"तिचोपसंहारात्तस्यगायत्रीप्रकरणत्वेनतदनुगृहीतज्योतिःश्रुत्यापूर्वपक्षइतिपूर्वपक्षयुक्तिसाधारण्यात्। तथाग्निसूक्तेनिरतिशयवैभवत्वलक्षणचरणेनसिद्धांतवच्छांदोग्येपि "एतामेवनातिशीयंत"इतिनिरतिशयवैभवरूपेणचरणेनसिद्धांतइतिसिद्धांतयुक्तिसाधारण्याच्चैकाधिकरणता। यथाघाराग्निहोत्राद्यधिकरणेषु "आघारमाघारयति अग्निहोत्रंजुहोती"त्याद्युदाहरणभेदेपिद्रव्यदेवतालक्षणयागरूपाभावान्नानयोर्यागविधित्वमितिपूर्वपक्षयुक्तिसाधारण्यात् मंत्रवर्णादिनादेवतादिलाभान्नरूपाभावइतिसिद्धांतयुक्तिसाधारण्याच्चैकाधिकरणता तद्वत्। ॥ ३५९ ॥

गु० करणैक्यमित्यतोवाह ॥ **यद्वेति** ॥ नन्वेवंमतद्वयेपिवाक्यद्वयस्यविषयवाक्यत्वे विषयवाक्यभेदेनाधिकरणभेदःस्यादित्यतो नविषयवाक्यभेदमात्रमधिकरणभेदप्रयोजकं। किंतुपूर्वपक्षसिद्धांतयुक्तिभेदएवप्रयोजकः। पूर्वतंत्रएतत्तंत्रेचतथैवदर्शनादित्यभिप्रायेणाह ॥ **यथाहीत्यादिना** ॥ ननुछंदस्सूत्रेऽग्निशब्दाभावात्कथम

प्र० त्वरूपपूर्वपक्षयुक्तिसाधारण्यात् "अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेतिसायंजुहोति इंद्रंऊर्ध्वोध्वरमाघारयती"तिवचनविनियुक्तमंत्रवर्णात् "दध्नाजुहोति चतुर्गृहीतंवाएतदभू"दित्यादिनाचदेवताद्रव्यलाभरूपस्वतंत्रहोमाघारविधिरितिसिद्धांतयुक्तिसाधारण्याच्चेत्यर्थः। आदिशब्देनचित्राज्याधिकरणयववराहाधिकरणादेर्ग्रहणं । ननुवाक्यद्वयेपिज्योतिषएवविषयत्वेनज्योतिस्सूत्रेज्योतिर्मात्रग्रहणेपिछंदस्सूत्रेछंदोमात्रग्रहणंनयुक्तं। नह्युभयत्रछंदइत्येवपूर्वपक्षः। किंतुसूक्तेऽग्निरितिछांदोग्येछंदइति। अतआह ॥ **छंदस्सूत्रइति** ॥ गायत्रीरूपच्छंदस्युपदेशभेदादिरूपानुपपत्त्यंतरमुद्भाव्यसमाधातुंतस्यमुखतःकीर्तनमितिभावः। उपलक्षकत्वेज्ञापकमतएवेति । नन्वाद्यसूत्रद्वयस्यकथंचिद्वाक्यद्वयसाधारण्यसंभवेप्युत्तरसूत्रद्वयस्यनतत्संभवति। सूक्तेभूतादिपादव्यपदेशादेरभावादित्यतआह ॥ **उपदेशेति** ॥ यथानंदमयाधिकरणेतद्धेतुव्यप

छंदःसूत्रेतुछंदश्शब्दोग्नेरप्युपलक्षकः । अतएव "अग्निगायत्र्यादी"तिभाष्येग्निपदप्रयोगः।
उपदेशभेदादिपूर्वपक्षयुक्तिः "भूतादिपादे"तिसिद्धांतयुक्तिश्चछांदोग्यवाक्यमात्रासाधारणी।

गु० ग्निसूक्तस्यविषयवाक्यत्वमित्यतआह॥ **छंदस्सूत्रइति** ॥ **अतएवेति** ॥ छंदस्सूत्रस्याप्युपलक्षकत्वादेवेत्यर्थः। ननुपूर्वपक्षसिद्धांतयुक्तिसाधारण्यमयुक्तं। उपदेशभेदादिरूपायाःपूर्वपक्षयुक्तेर्भूतादिपादेतिसिद्धांतयुक्तेः छांदोग्यवाक्यमात्रसाधारण्यादित्यतः तस्यतन्मात्रसाधारण्यंनदोषः । नचेदंकुत्रापिनदृष्टं । अस्यामेवमीमांसायामानंदमयाधिकरणेऽन्नमयादिपंचानांब्रह्मत्वसाधकब्रह्मशब्दाभ्यासादेरिवानंदमयमात्रस्यब्रह्मत्वसाधकीभूततद्धेतुव्यपदेशाभिधानादितिस्पष्टत्वादनुपदर्श्य पूर्वमीमांसायामपिदृष्टांतमस्तीत्याह ॥ **उपदेशभेदादीति** ॥ अर्थवादमंत्रादीत्यादिपदेननामधेयसंग्रहः ॥ **अन्यस्त्विति** ॥ अर्थवादानांप्राशस्त्यलक्षणयाविधिवा

SGDF Sri Gurgaonkar Digital Foundation

प्र० देशादित्यानंदमयमात्रासाधारणं तद्वदितिभावः। मीमांसकसम्मत्याचोक्तमर्थंनिष्कृष्याह ॥ **एवंचेति** ॥ अर्थवादाधिकरणंप्रागुक्तमाद्याधिकरणे । तत्र "आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थाना"मितिसूत्रेणाक्रियार्थानामर्थवादमंत्रनामधेयानामानर्थक्यादप्रामाण्यमितिपूर्वःपक्षः । "विधिनात्वेकवाक्यत्वात्स्तुत्यर्थत्वेनविधीनांस्यु"रितिसिद्धांतसूत्रस्थेनतुशब्देन "तुल्यंचसांप्रदायिक"मितिसूत्रेणवाकृत्स्नस्वाध्यायपुरुषार्थपर्यवसाय्यध्ययनविधिमहिम्नाऽर्थवादादीनांसप्रयोजनत्वावसायेन प्रामाण्यमितिसिद्धांतइतिसाधारणएकोविचारः । पुनरर्थवादानां द्वाराभावादप्रामाण्यमितिपूर्वःपक्षः । सिद्धांतसूत्रेस्तुतिग्रहणाद्द्वारसंभवात्प्रामाण्यमित्यसाधारणोन्योविचारइतियथाद्विपर्वाविचारः तथेहा

एवंचयथाऽर्थवादनयेभट्टमतएकोविचारोर्थवादमंत्रादिसाधारणोन्यस्त्वर्थवादमात्रासाधारणइतिद्विपर्वाविचारः तथात्राप्युक्तरीत्याद्विपर्वाविचारः । अतएवास्यतत्वप्रदीपेंतर्भेदाधिकरणत्वमुक्तमितिदिक् ।

गु० क्यैकवाक्यत्वेनप्रामाण्यमित्यादिरित्यर्थः॥ **द्विपर्वाविचारइति** ॥ विध्यतिरिक्तवेदस्याक्रियार्थत्वादप्रामाण्येप्राप्तेविध्येकवाक्यत्वेनप्रामाण्यमितिसाधारणः। अर्थवादानामभूतार्थत्वेनक्रियार्थत्वंस्तावकत्वेनप्राशस्त्यलक्षणयैकवाक्यत्वमित्यर्थवादमात्रासाधारणइतिद्विप्रकारकोविचारोयथा तथाज्योतिर्गायत्र्योर्विष्ण्वन्यत्वेनप्रकारेणसाधारणः गायत्रीत्वेनज्योतिष्ट्वेनचासाधारणइतिद्विप्रकारकोत्रापिविचारइत्यर्थः। ननुतृतीयंमतमनुपपन्नं । ज्योतिस्सूत्रंयदिपृथगधिकरणंस्यात्तदाछंदस्सूत्रेसमन्वेतव्यशब्दोवक्तव्यस्स्यात् । तथाचतदनुक्तिर्दोषः । एवंछंदस्सूत्रभाष्ये अग्निगायत्र्यादीत्यत्रत्याग्निपदमनुपपन्नं । ज्योतिस्सूत्रे आकाशादिसूत्रादाविवानुव्याख्यानन्यायविवरणयोरधिकाशंकावक्तव्या । तथाचतदनुक्तिर्दोषः । तथाज्योतिरधिकरणेपृथगुपाध्यनुक्तिश्चायुक्ता । तद्बलाच्चतुस्सूत्र्याएकाधिकरणत्वमेवावगस्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० पिवाक्यद्वयगतज्योतिश्शब्दार्थोविष्णुरन्योवेतिसंशये अग्निछंदस्त्वाभिधानादप्रसिद्धज्योतिर्गायत्रीपदप्रयोगेप्रयोजनाभावान्नविष्णुःकिंत्व न्यइतिप्राप्ते उभयत्रचरणशब्दितापरिच्छिन्नवैभवत्वस्याभिधानात्तथोपासनार्थमप्रसिद्धपदप्रयोगस्यापिसंभवाद्विष्णुरितिसिद्धांतइत्येकोविचारः पुनश्छांदोग्यस्थज्योतिर्नब्रह्मकिंतूपदेशभेदादितिप्राप्ते भूतादिपादव्यपदेशादिनासिद्धांतइत्यन्योविचारइतिद्विपर्वाविचारइत्यर्थः । अतएव साधारणासाधारणद्विरूपविचारत्वादेवेत्यर्थः । ननु "नित्यत्वादेवशब्दानांतत्स्वभावःकथंतत"इत्यनुव्याख्यानोक्तायाःपूर्वपक्षयुक्तेः "तादृशत्वाच्चतच्छक्ते"रित्युक्तसिद्धांतयुक्तेश्चाग्निसूक्तस्थज्योतिष्ययोगात्कथमिदमुदाहरणमितिचेन्न । तयोर्भूतादिपादव्यपदेशादिवद्गायत्रीवाक्यमात्रासाधारण्येनोपपत्तेः । अतएवद्विपर्वाविचारइत्युक्तं । नन्वथापिज्योतिस्सूत्रे इदमग्निसूक्तमेवनविष्णुसूक्तमित्यध्यापकप्रसिद्धेरज्ञानमूलत्वादिरूपोन्यायोव्युत्पाद्यः । उत्तरत्रिसूत्र्यामनादिनित्यस्यापीशाधीनत्वादिव्युत्पादकन्यायइति न्यायस्यव्यवस्थितत्वात्तद्विषयस्यापिव्यवस्थाऽधिकरणभेदश्चवाच्यइतिचेन्न । अंतरागर्भिणीन्यायेनोपपत्तेः । अतएवांतर्भेदाधिकरणत्वमुक्तमित्युक्तं । एवमन्यदप्यूह्यमितिभावेनोक्तं दिगिति ॥ एवंमतद्वयंसमर्थ्यटीकाकारमतंचोपपन्नमित्याह ॥ **तृतीयेपीति** ॥ पक्षइतिसंबध्यते । यदुक्तंसमन्वेतव्यशब्दानुक्तेश्छंदःप्रभृतिसूत्रत्रयंनभिन्नाधिकरणमिति तत्रकिंसाक्षादनुक्तिरभिप्रेताऽर्थसूचनमपिवेति । आद्यःकल्पोव्यभिचारीत्याह ॥ **कंपनादिति** ॥ तत्र

तृतीयेपि "कंपनात् शब्दादेवप्रमित" इत्यादाविवाधिकरणांतरत्वेपिसमन्वेतव्यशब्दांतरस्यसाक्षादनुक्तिर्नविरुद्धा ।

 गु० इति तद्विरुद्धंटीकाकारमतमनुपपन्नमेवेत्यतस्तत्रानुपपत्तीःपरिहरति ॥ **तृतीयइति** ॥ **अन्यथामतांतरेपीति** ॥ एतद्भाष्योपात्तशब्दस्यात्रसमन्वेतव्यत्वनियम

SGDF
Sri Gargeshwari Digital Foundation

प्र० "महद्भयंवज्रमुद्यत"मितिवज्रशब्दस्समन्वीयते । शब्दादित्यत्रेशानशब्दः । पत्यादिशब्देभ्यइत्यत्रब्राह्मणशब्दः । नचतत्रतउपात्ताः । तथाप्यधिकरणांतरत्वंतत्रसंमतमित्यर्थः । द्वितीयेत्वाह ॥ **सूचनंत्विति** ॥ छंदश्शब्देनगायत्रीशब्दसूचनादितिभावः । ननुतत्सूत्रभाष्येगायत्रीपदप्रयोगमात्रेकर्तव्ये "अग्निगायत्र्यादिशब्दार्थरूपोसावितिचेतोर्पणार्थंहिनिगद्यत"इत्यग्निपदोपादानमयुक्तमित्यतआह ॥ **अग्निपदंत्विति** ॥ **प्रयोजनमिति** ॥ तत्तत्पदप्रवृत्तिनिमित्तगुणवत्तयोपासनारूपप्रयोजनमित्यर्थः । अत्र अधिकरणे ॥ **अग्न्यादीति** ॥ अग्न्याकाशप्राणभूमाक्षरादिपदस्येत्यर्थः । मतांतरे प्रागुपन्यस्तमतद्वयेपीत्यर्थः । नन्वधिकरणांतरत्वेपूर्वत्राकाशप्राणाधिकरणयोरिवोत्तरत्र छंदोधिकरणइवचज्योतिरधिकरणेऽभ्यधिकाशंकोक्तिस्स्यादित्यतआह ॥ **अनुव्याख्यानेति** ॥ **उक्तत्वादिति** ॥ विवरिष्यतेचैतदितिभावः । नन्वधिकरणोपाध्युक्तिपर्यालोचनयाचज्योतिरादिचतुस्सूत्र्याऐकाधिकरण्यंप्रतीयते । अन्यथासूक्तगताइत्यप्युच्येतेत्यतआह ॥

सूचनंतुप्रकृतेपि "छंदोभिधाना"दित्यनेनकृतं । भाष्येग्निपदंत्वन्यत्रप्रसिद्धगायत्रीपदस्यविष्णौप्रयोगेप्रयोजनमत्रवदतासूत्रकृतापूर्वत्रोत्तरत्रचाग्न्यादिपदस्यविष्णौप्रयोगेप्रयोजनंसूचितमितिदर्शयितुं । अन्यथामतांतरेपि "अग्निगायत्र्यादी"त्यादिपदंव्यर्थंस्यात् । अनुव्याख्यानन्यायविवरणयोर्ज्योतिरित्यत्राधिकाशंकानुक्तिस्तु "अग्निसूक्तस्थत्वा"दितिभाष्यएवोक्तत्वात् । नतुतस्यैकाधिकरणत्वात् ।

गु० इत्यर्थः । तत्रादिपदेनापिसमन्वेतव्यशब्दसमकक्षतयासाक्षादसमन्वेतव्यवाक्पृथिव्यादिशब्दोपादानस्यास्वारस्येनमुख्यतःसमन्वेतव्यपूर्वोत्तराधिकरणस्थशब्दाना

प्र० **अधिभूतेति** ॥ ननुतर्हितेनैवगतत्वात्किमर्थमेतदित्यतआह ॥ **सूक्तेति** ॥ ननुतर्हिपरस्परविरुद्धत्वान्मतत्रयस्यापिप्रामाण्याद्वस्तुनिविकल्पस्स्यादित्यतआह ॥ **इदंचेति** ॥ **एवमिति** ॥ कारणत्वेनचाकाशादिष्वित्यादावित्यर्थः । तथाचतत्रवक्ष्यामः । एवं टीकारीत्याधिकरणभेदेसमर्थितेसति । अन्यत्र अनुक्तेः । कस्तर्ह्यस्यविषयोपाधिः । ज्योतिश्शब्दस्यदेवतावाचित्वेजडवाचित्वेवांतराद्यधिकरणन्यायेनगतत्वादित्यतआह ॥ **तत्रेति** ॥ सूक्तगतत्वंविषयतावच्छेदकं । ज्योतिश्शब्दस्यचवायुवाचिप्राणशब्दसमन्वयेनतज्जन्याग्निवाचित्वेनबुद्धौसन्निधानादितरोपलक्षकत्वेनोपादानमितिभावः । नन्वस्यटीकारीत्याशास्त्राध्यायसंगतत्वेपिनात्रपादेसंगतिः । तथाहि । ज्योतिश्शब्दस्यभूतपरत्वआकाशाधिकरणन्यायेन देवतापरत्वेंतरधिकरणन्यायेनविष्णौप्रयोगात् "आकाशोर्थांतरत्वादी"त्यादावाकाशशब्दस्येवपूर्वोक्तयन्यत्र

"अधिभूताध्यात्माधिदेवगतानामपिशब्दाना"मितिन्यायविवरणेज्योतिरधिकरणस्यपृथगुपाध्यनुक्तिरपितस्याकाशाधिकरणवदधिभूतगतशब्दविषयत्वंवांतरधिकरणवदधिदेवगतशब्दविषयत्वंवेत्यभिप्रेत्य । नत्वेकाधिकरणत्वमभिप्रेत्य । सूक्तविषयत्वमेवहिततोस्यविशेषः । इदंचमतत्रयंसूत्रयोजनामात्रेभिन्नं । प्रमेयेत्वविरुद्धं । एवमन्यत्राप्यविरोधऊह्यः ॥ ॥ तत्रज्योतिरधिकरणे सूक्तस्थाज्योतिरादिशब्दाउदाहरणं ।

गु०मेवग्रहणस्यावश्यकत्वादित्यर्थः । ननुयथाऽऽकाशाधिकरणवदधिभूतगतशब्दविषयत्वंवांतराधिकरणवदधिदैवगतशब्दविषयत्वंवायद्यस्याभ्युपगम्यते तर्हितदधिकरणद्वयशेषत्वापत्त्याधिकरणांतरत्वमनुपपन्नमित्यतआह ॥ **सूक्तेति** ॥ ननुयदिमतत्रयमपिप्रामाणिकंस्यात्तर्हिवस्तुनोद्वैरूप्यंस्यात् । तथाचकथंमतत्रयमपिप्रामा

SGDF Sri Gargeshwari Digital Foundation

प्र०प्रसिद्धिभ्यामुभयत्रप्रसिद्धतापत्त्यानात्रसमन्वयोयुक्तः। नचपादांत्यप्राणाधिकरणे प्राणशब्दस्यपूर्वसमन्वयेपिलोकप्रसिद्ध्यान्यत्रप्रसिद्धत्वव दिहापिस्यादितिवाच्यं । तत्रपूर्वपक्षेपूर्वोक्तसमन्वयस्याक्षेपेणतथात्वसंभवेपिइहपूर्वोक्ताक्षेपाभावेनतदसंभवात् । नचपूर्वज्योतिश्शब्दपर्याया ग्निशब्दस्यैवसमन्वयोनज्योतिश्शब्दस्येतिवाच्यं । अत्तेत्यधिकरणटीकायामदितिश्रुतेस्सावकाशत्वोक्त्ययोगात् । सवित्रादिशब्दसमन्वयमा त्रेणतत्पर्यायस्यादित्यशब्दस्यसर्वत्रेत्यधिकरणेसावकाशतायावक्ष्यमाणत्वाच्च । अतएवाग्रेवक्ष्यति “सावकाशाग्निश्रुत्यासावकाशविष्णुलिंगबा धादिती”तिचेत्सत्यं । लोकतोन्यत्रप्रसिद्धप्रकरणेनज्योतिर्नाम्नोप्यन्यत्रप्रसिद्धत्वात् । उक्तंहि “श्रुत्यादितोलोकतोवापीतरेषुप्रसिद्धते”ति । नचैवंनिरवकाशप्रकरणवशेनान्यत्रैवप्रसिद्धतास्यात् । “बलवच्छ्रुतिलिंगाद्यैरन्येष्वेवप्रसिद्धते”त्युक्तेरितिवाच्यं । नाम्नोविष्णावपिसावका शत्वात् । प्रागुक्तदिशातत्रविवक्षितबलवत्त्वस्येहाभावाच्च । लोकतइतिटीकातु प्राक्साक्षादसमन्वितत्वात् समन्वितत्वेप्यापाततोलोकप्रसि द्ध्यावा प्रकरणस्यलोकतःप्रसिद्ध्यावा परंपरयापूर्वत्रेवात्रान्यप्रसिद्धिबाधकनिरवकाशलिंगाभावादितिवा नेया । नचैवंयेनश्रुतेरन्यत्रप्रसिद्ध तातदेवप्रागसमन्वितंप्रकरणं “ईक्षतिकर्मे”त्यत्रस्थानमिवेहसमन्वीयतां । पादसंगतिस्त्वंतरित्यादेरविफलतस्सेत्स्यतीतिवाच्यं । प्राङ्नाम्नः समन्वितत्वेनतस्यैवेहबुद्धिस्थत्वात् । नचप्रागपिनामद्वारातत्तन्नामयुक्तंप्रकरणमर्थात्समन्वितमितिवाच्यं । नाम्नएवसाक्षात्समन्वितत्वेनेहा पिधीस्थत्वात् । साक्षादर्थनिष्ठनामद्वारेणैवप्रकरणसमन्वयस्योचितत्वाच्च । स्थानस्यापिसन्नामद्वारेणैवसमन्वेष्यमाणत्वाच्च । यद्वानपूर्वोक्त्य न्यत्रप्रसिद्धिभ्यामुभयत्रप्रसिद्धता । किंतुश्रुतिलिंगादितौल्येनवाप्रवृत्तिनिमित्तसाम्येनवासा । नचात्रतथा । येनासंगतिः । “आकाशो र्थांतरत्वादी”त्यत्राकाशशब्दस्योभयत्रप्रसिद्धतातुपादांत्यप्राणाधिकरणेऽन्यथैववक्ष्यतइति । ननुभाष्यरीत्यासंगत्याश्रयणे आनंदमयाधिकर

SGDF Sri Gargeshwari Digital Foundation

प्र० णानंतर्यप्राप्तेरत्रनिवेशोनयुक्तइत्यत:पूर्वसंगतिमाह ॥ **प्राणेति** ॥ एतच्चाग्रेस्पष्टमितिभाव: ॥ **संगतिरिति** ॥ प्रत्युदाहरणरूपेत्यर्थ: । उक्तंच “पूर्वन्यायात्ययोयत्रप्रत्युदाहरणातुसे”ति । “योवेदनिहितंगुहायामित्युक्त”मितिभाष्यंतु यद्यग्निसूक्तगतंज्योतिर्विष्णोरन्यत्तर्हितन्निष्ठगुहानिहितत्वयुक्तानंदमयोप्यन्य:प्रसज्येतेतिपूर्वपक्षे आनंदमयाधिकरणाक्षेपात् सिद्धांतेचतत्समाधानात्सफलोयंविचारइतिप्रयोजनमात्रपरमितिभाव: । एतच्चांतरधिकरणप्रयोजनसमर्थनरीत्यासमर्थनीयं । नन्वेवंयदिज्योतिर्विष्णोरन्यत्तर्हितस्यैवगुहानिहितत्वात्प्रागुक्तांतस्थत्वमपितस्यैवेत्यंतरधिकरणमप्याक्षेप्तुंशक्यते । एवंचपूर्वोक्ताक्षेपेणोभयत्रप्रसिद्धत्वशंकापिनोदेष्यति । नचगुहानिहितत्वमन्यदंतस्थत्वंचान्यदितिवाच्यं । तस्यापि “निहितंगुहा”स्वितिगुहानिहितत्वरूपत्वादितितत्रैवोक्तत्वात्ज्योतिषोगुहानिहितत्वात् तस्यचयोवेदनिहितमितिमंत्रवर्णेश्रवणात् मांत्रवर्णिकस्यैवानंदमयत्वात्सोपिज्योतिरित्याक्षेपादस्याक्षेपस्यऋजुत्वादितिचेन्न । पूर्वत्रतदधिकरणस्यैवाक्षेपेणेहापितथात्वस्यैवौचित्यात् । व्यवहिताक्षेपस्याविशेषात् अंतर्नयाक्षेपस्याप्यानंदमयनयाक्षेपपर्यंतत्वस्यावश्यकत्वाच्च । अन्यथाजिज्ञासाक्षेपपर्यवसानायोगात् । साक्षादेवतदाक्षेपसंभवेतद्वारातदाक्षेपस्यवक्तव्यत्वाच्च । नचैवंमनश्चक्षुराद्यगोचरत्वरूपादृश्यत्वश्रवणात्तद्युक्तानंदमयोपिज्योतिरित्यस्यऋजुत्वात्तथैवाक्षिप्यतामितिवाच्यं । अनेकसमभिव्याहारलभ्यादृश्यत्वमुखाक्षेपापेक्षया एकवाक्यलभ्यसन्निहितगुहास्थत्वमुखेनाक्षेपस्यैवऋजुत्वा

प्राणाधिकरणन्यायागोचरत्वप्रदर्शनेनपूर्वपक्षोत्थानादनंतरसंगति: ।

गु० णिकमित्युच्यतइत्यतआह ॥ **इदंचेति** ॥ **अनंतरसंगतिरिति** ॥ आतिदेशिकीत्यर्थ: ॥ **नत्वग्निसूक्तस्थत्वादिति** ॥ सूक्तंप्रकरणमित्यर्थ: । प्रथमोपस्थित

SGDF
Sri Gargeshwari Digital Foundation

प्र० दिति ॥ **अत्रेति** ॥ “विमेकर्णापतयतोविचक्षुर्वी३दंज्योतिर्हृदयआहितंयत् । विमेमनश्चरतिदूरआधीःकिंस्विद्वक्ष्यामिकिमुनूमनिष्य”इत्यग्निसूक्तादिगतज्योतिरादिशब्दोविषयइत्यर्थः ॥ **अग्निरिति** ॥ कोप्यंतरप्राप्त्यभावस्यवक्ष्यमाणत्वादितिभावः ॥ **विपरीतमिति** ॥ लिंगाच्छ्रुतिर्बाध्येत्यर्थः । यदिसूक्तंनिरवकाशंतदातदनुगृहीतयाबलीयस्याश्रुत्यालिंगस्यबाधादग्निरितिपूर्वपक्षेफलं । यदिसावकाशंतदादुर्बलयाश्रुत्यानिरवकाशलिंगबाधायोगाद्विष्णुरितिसिद्धांतेफलमितिस्पष्टत्वात्फलफलिभावोनोक्तः । द्वावत्रपूर्वपक्षौ । एकस्तावदभ्यधिकाशंकांविनैव ज्योतिश्श्रुतिविष्णुलिंगयोःपूर्वोत्तरपक्षप्रापकयोस्सावकाशत्वमुपेत्य जात्याबलवत्याश्रुत्यैवलिंगबाधः सूक्तस्थत्वंत्वभ्युच्चययुक्तित्वेनोच्यतइति ।

अत्रज्योतिःकिमग्निःकिंवाविष्णुरितिचिंता । तदर्थंकिंज्योतिश्श्रुतिप्रसिद्ध्यनुसारेणकर्णादिविदूरत्वलिंगंबाध्यमुतविपरीतमिति । तदर्थंकिंश्रुत्यनुग्राहकंसूक्तंनिरवकाशमुतसावकाशमिति । पूर्वपक्षस्तु ।

प्र० अन्यस्तुविष्णुलिंगस्यनिरवकाशत्वमुपेत्यश्रुतिमात्रेणपूर्वपक्षोदयायोगादभ्यधिकाशंकयेति । आद्यस्तुटीकानुसारी । अंत्यस्तुसुधानुसारी । तत्रेयंचिंतापरंपराद्वितीयपूर्वपक्षानुरोधेन । आद्यपूर्वपक्षेतु उतविपरीतमितिद्वितीयचिंतानंतरं तदर्थंश्रुत्यनुग्राहकमित्यत्रतदर्थंलिंगंसावकाशमुतनिरवकाशमितिचिंताद्रष्टव्या । यदिसावकाशंतदाश्रुत्यालिंगबाधादग्निरितिपूर्वपक्षेफलं । यदिनिरवकाशंतेनसावकाशश्रुतिबाधाद्विष्णुरितिसिद्धांतेफलंध्येयं । अत्रज्योतिरग्निर्विष्णुर्वा । तदर्थंश्रुत्यालिंगंबाध्यमुतलिंगाच्छ्रुतिः । तदर्थंश्रुतिबाधेमुख्यार्थहानिरुतनेति तदर्थंज्योतिश्श्रुतिप्रवृत्तिनिमित्तंविष्णौनयुक्तमुतयुक्तमिति । तदर्थंतमोविरोधित्वंप्रवृत्तिनिमित्तमुतप्रकाशत्वादिरूपमितिप्रमेयाश्रिताभ्यधिकाशंकोपयुक्ता

प्र० चिंतापरंपरास्पष्टैवेति प्रमाणाश्रिताशंकोपयुक्तैवसाप्रदर्शितेतिध्येयं । पूर्वन्यायाविषयत्वप्रदर्शनपूर्वंद्विविधंपूर्वपक्षंसंग्रहेणनिर्दिशति ॥ **युक्त इति** ॥ अत्रैवंयोजना । इदं ज्योतिरग्निरेव । नविष्णुः । अग्नौनिरूढज्योतिश्श्रुतेः । नचपूर्ववन्निरवकाशलिंगेनज्योतिश्श्रुतिबाधइति । युक्तःपूर्वत्रवायुसूक्तस्थस्येत्यादि ॥ **प्रकरणेति** ॥ उपलक्षणमेतत् । पूर्ववन्निरवकाशलिंगाभावादित्यपिध्येयं । सूक्तेनानुगृहीतत्वादितियुक्तिः आद्येपूर्वपक्षेऽभ्युच्चयत्वेन द्वितीयेतुपूर्वपक्षोत्थानार्थमुक्तेतिध्येयं । ननुपक्षद्वयेपिनसूक्तस्यश्रुत्यनुग्राहकत्वं । यावताश्रुतेःसवित्रादिपरत्वत्याजनेनाग्न्यादिपरत्वसंपादनएवोपक्षयादित्याशंक्यानुग्राहकत्वंसाधयति ॥ **यद्यपीति** ॥ **हृदयेति** ॥ तच्चजाठरजातवेदसिप्रसिद्धमितिभावः ॥ **त्वामग्नइति** ॥ “विश्वेदेवाअनमस्यन्भियानास्त्वामग्नेतमसितस्थिवांस”मितिश्रवणेनतत्सन्निधानात् । छागपशुन्यायेनविशेषश्रुत्यासामान्यश्रुतेरर्थोपपत्तेरितिभावः । एवंसूक्तस्यश्रुत्यनुग्राहकत्वंसमर्थ्येदानींपूर्वेणगतार्थतयापूर्वपक्षानुदयशंकाप्रकारमनूद्य सुधोक्तदिशाऽधिकाशंक

युक्तःपूर्वत्रवायुसूक्तस्थस्यप्राणश्रुतिमात्रस्यनिरवकाशविष्णुलिंगैर्बाधः । अत्रतुज्योतिश्श्रुतेर्नबाधः । प्रकरणरूपेणसूक्तेनानुगृहीतत्वात् । यद्यपिज्योतिश्शब्दस्तमोविरोधिमात्रेप्रसिद्धः तथापिहृदयाहितत्वलिंगात् “त्वामग्नेतमसी”त्यग्निशब्दसन्निधानाच्चाग्निपरः । नत्वग्निसूक्तस्थत्वाज्ज्योतिश्शब्दोग्निपरः । तथात्वेसूक्तस्याग्निश्रुतिसंपादकत्वेनश्रुत्यनुग्राहकत्वायोगात् ।

गु०शब्दलिंगाभ्यामेवाग्निपरत्वेसंभवतिजघन्यप्रकरणप्रतीक्षणायोगादितिभावः ॥ **श्रुत्यनुग्राहकत्वायोगात्** ॥ तथाचननिरवकाशलिंगबाधकत्वंतस्येतिशेषः । यावता

SGDF
Sri Gargeshwari Digital Foundation

प्र० योत्थानंवक्ष्यन् लिंगस्यनिरवकाशत्वाभावादधिकाशंकांविनैवपूर्वपक्षोदयइतिभावेन टीकाभिमतंपक्षंतावद्विशदयति ॥ एतेनेत्यादिना ॥ सूक्तस्यश्रुत्यनुग्राहकत्वकथनेननिरवकाशलिंगाभावेनचेत्यर्थः ॥ अंतरिति ॥ निरवकाशलिंगेनसावकाशदेवतावाचिश्रुतीनांप्रवृत्तिनिमित्त स्यैश्वर्यादेर्भगवद्गतत्वोक्त्याविष्णुवाचित्वसाधनरूपन्यायेनेत्यर्थः ॥ आकाशेति ॥ अचेतनगतस्यापिप्रवृत्तिनिमित्तस्यभगवदधीनत्वादिस मर्थनन्यायेनेत्यर्थः । तमेवन्यायमाह ॥ सावकाशेति ॥ ज्योतिःपदप्रवृत्तिनिमित्तस्यभगवद्गतत्वेनतदधीनत्वेनचेतिभावः । श्रुतेरुज्जीवक माशंक्यतदपिसावकाशमित्याह ॥ नचेति ॥ सूक्तरूपप्रकरणेत्यर्थः । ननुसूक्तानांवैष्णवत्वे इदमग्निसूक्तमिदंविष्णुसूक्तमितिव्यवस्थानुप पत्तेर्निरवकाशतेत्यतआह ॥ सर्वेति ॥ वक्ष्यमाणेति ॥ वैश्वानराधिकरणे अग्न्यादिशब्दानांविष्णौमुख्यत्वेतत्तत्सूक्तानांतत्तद्विद्यानांचवै दिकसिद्धव्यवस्थानुपपत्तेरन्यवाचित्वमेवेतिप्राप्ते अग्न्यादिसूक्तादिभिर्विष्णूपासनायामग्न्यादावेवविष्णोरभिव्यक्तत्वाद्वा अग्न्यादिसूक्ताद्युपा सकैरग्न्यादावेवविष्णोरनुस्मरणीयत्वाद्वा तत्तदुपासकानामग्न्यादिस्थविष्णुप्राप्तिरूपाद्वानिमित्तात्सूक्तादिव्यवस्थोपपत्तेरग्न्यादिशब्दानांविष्णौ

एतेनज्योतिश्शब्दाग्निशब्दौदेवतापरौचेदंतरधिकरणन्यायेनब्रह्मपरौ । भूतपरौचेदाकाशाधिकरणन्यायेनब्रह्म परौ । सावकाशाग्निश्रुतेर्निरवकाशविष्णुलिंगैर्बाधात् । नचाग्निश्रुतिःप्रकरणानुगृहीतेतिवाच्यं । तत्तत्सूक्तस्था ग्न्यादिश्रुतीनांविष्णौसावकाशत्वेसूक्तानामपितथात्वात् । सर्वसूक्तानांवैष्णवत्वेपीदमग्निसूक्तमिदंत्वन्यदिति व्यवस्थातु"अभिव्यक्तेरित्याश्मरथ्य"इतिवक्ष्यमाणन्यायेनयुक्ता । एवंचसावकाशसूक्तस्यनिरवकाशविष्णुलिंगैः ॥ ३६४ ॥

गु० श्रुतितएवलिंगंदुर्बलमित्यादिटीकामवतारयति ॥ एतेनेत्यादिना ॥ विष्णुलिंगैर्बाधादिति ॥ हव्याहितत्वं विश्वेदेवाअनमस्यन्भियानाइतिसर्वदेवोपास्य

SGDF Sri Gargeshwari Digital Foundation

प्र० भाष्यादावचातुर्यमाशंक्याह ॥ **तत्रेति** ॥ सिद्धांतटीकांविवृण्वन्प्रमाणाश्रितशंकाद्वयनिरासकन्यायौतावत्संगृह्याह ॥ **कर्णादीनामिति** ॥ आद्यार्धेनाद्यपक्षनिरासकोन्यायउक्तः । उत्तरार्धेनद्वितीयपक्षनिरासकइतिध्येयं । श्रुतेस्सावकाशत्वाविवादेपिदृष्टांतत्वेनवाप्रमेयाश्रितशंका पक्षेनिरवकाशत्वामिमानाद्वाश्रुत्युक्तिः । तथाहि । अग्निसूक्तगतंज्योतिर्विष्णुरेव । नत्वग्निः । चरणशब्दोक्तकर्णादिविदूरत्वरूपलिंगात् । नचश्रुतिलिंगाभ्यांलिंगस्यबाधः । तस्यनिरवकाशत्वादित्याद्यः । द्वितीयस्तु ज्योतिर्विष्णुरेव । निरवकाशलिंगात् । नचनिरवकाशसूक्तानु गृहीतयाश्रुत्याबाधः । तयोर्भगवतिसावकाशत्वादिति । ननुकर्णादिविदूरत्वंश्रोत्रमनःप्रभृत्यविषयत्वं । तच्चब्रह्मणिनयुक्तं । तस्यमनोवृत्तिवि षयत्वादित्यतोविष्णौलिंगस्यघटनांतावदाह ॥ **कर्णादीति** ॥ अन्यत्रनैवेत्युक्तनिरवकाशतामुपपादयन्पूर्वार्धंविशदयति ॥ **तच्चेति** ॥

तत्रयद्यपिवैश्वानरोजायमानइत्यग्निसूक्तेवैश्वानरश्रुतिर्जायमानत्वलिंगंचास्ति तथापिविष्णौश्रुतेःसावकाश तायावैश्वानराधिकरणेलिंगस्यसावकाशतायाश्चद्युभ्वाद्यधिकरणेकंठोक्तत्वान्नताभ्यांपूर्वपक्षितंभाष्यटीकयोः ॥ सिद्धांतस्तु ॥ कर्णादीनांविदूरत्वंविष्णोरन्यत्रनैवहि । अग्नेस्तुश्रुतिसूक्तादिसावकाशंपरात्मनि ॥ १ ॥ कर्णादिविदूरत्वंहियदितिपरिच्छेदानर्हवैभवत्वं । नतुसर्वथाकर्णादिविदूरत्वं । क्वाप्यसंभवात् । तच्च

गु० त्कंलिंगानांसावकाशत्वमग्निश्रुत्यादेःसावकाशत्वंप्रदर्शयन्परिहरति ॥ **कर्णादीनामिति** ॥ **अग्निर्वैदेवानामवमइतीति** ॥ यद्यप्यत्रपरैर्नैतारतम्यपरतयाव्या ख्यातं तथापिप्रतीयमानस्वबाधकाभावेपरित्यागस्यातिप्रसंजकत्वाद्यथाश्रुतिग्राह्यमेव । अग्नौसर्वेदेवाविलीयंतइतिश्रुत्यंतरानुसारेणाग्निनीचानांसर्वेषामपिदेवानामग्न्य धीनसत्ताकत्वेनाग्निपदेनैवोपादानसंभवेनदेवानामवमइतिनिर्धारणोपपत्तेरितिभावः ॥ **तपतीति** ॥ वातःपवतेसूर्यउदेतीत्यादौतत्तद्योग्यक्रियायाइवभीषास्मादग्निरित्यत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० हिशब्दोक्तश्रुतीराह ॥ **परइति** ॥ मीयंतेऽनेनविषयाइतिमात्रा इंद्रियगणः । ततःपरोसीत्यर्थः । यद्वामात्रायाःमितेःपरः । अपरिमितो सीत्यर्थः । "अग्निर्वैदेवानामवमोविष्णुःपरम"इतिबह्वृचब्राह्मणेस्वोत्तमदेवावमतयाश्रुतस्येत्यन्वयः । यद्यपि "भीषास्मादग्निश्चेंद्रश्चे"त्येवतैत्तिरीयाणांपाठः तथापि "भयादस्याग्निस्तपती"तिश्रुत्यंतरबलात्तपतीत्यध्याहृत्योक्तं । यद्वाभीषास्मादितिश्रुतिप्रतीकग्रहणं । अग्निस्तपतीत्यन्या श्रुतिः । अस्माद्भीषा अस्यभयेनेत्यर्थः ॥ **परीति** ॥ "तमेताःपरिम्रियंत"इतिबह्वृचब्राह्मणं । "म्रियंतेपंचदेवता"इतिऋग्भाष्योक्तेः । परिह्येनमित्यर्थानुवादः । नन्वेवंश्रुत्यादेरपिनिरवकाशत्वेतौल्यमेवस्यादित्यतउत्तरार्धंविशदयति ॥ **अग्नीति** ॥ विष्णौसावकाशमित्यन्वयः । "अग्निनाग्निस्समिध्यतेकविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्य"इत्यत्राग्निसमिंधकस्यभगवतोऽग्निशब्दवाच्यत्वोक्तेरितिभावः । यद्यप्यत्राग्निना गार्हपत्येनाहवनीयाग्निस्समिध्यतइत्यर्थःसंभवति । उक्तंचऋग्भाष्ये "अथवाहवनीयोग्निर्मथितेनसमिध्यत"इति तथापि "यस्याऽऽस्येहूयतेसोग्निःपरेशेनसमिध्यत"इत्युक्तत्वादस्यैवचमुख्यत्वादेतदुदाहृतमितिध्येयं । तद्देवाइतिवाजसनेयेयस्मादर्वाक्संवत्सरोहोभिःपरिवर्ततेतद्देवाज्योति

परोमात्रयेत्यादिभाष्योक्तश्रुतिभिर्निरवकाशं । नहि "अग्निर्वैदेवानामवम"इत्यवमतया "भीषास्मादग्निस्तपती"तिसभयतया "परिह्येनंम्रियंतेविद्युद्वृष्टिश्चंद्रमाआदित्योग्नि"रितिमरणादिमत्तयाचश्रुतस्याग्नेरपरिच्छेद्यंवैभवं । अग्निश्रुत्यादितु "अग्निनाग्निःसमिध्यते तद्देवाज्योतिषांज्योतिः नारायणपरोज्योतिः विष्णुरेवज्योतिः

गु० योग्यक्रियायाअनुक्त्याभयादस्याग्निस्तपतीत्यादिश्रुत्यंतरानुसारेणयोग्यश्रौतपदाध्याहारःकृतइतिभावः । अग्निश्रुत्यादिष्वित्यत्रादिपदेन वैश्वानरंरथ्यमध्वराणांयज्ञस्यकेतुंजनयंतदेवाः । आसन्नापात्रंजनयंतदेवाइत्यादिलिंगानिग्राह्याणि ॥ **अग्निनाग्निरिति** ॥ एतत्पादस्यद्व्यग्निदेवताकत्वात्तृतीयांतनिर्दिष्टोन्यःप्रथमांतनिर्दिष्टो

प्र० षांज्योतिरायुर्होपासतेमृतमितिश्रुतस्यज्योतिषांज्योतिष्ट्वप्रदज्योतिषोब्रह्मत्वममृतत्वादिलिंगात् "ज्योतिषैकेषा"मितिवक्ष्यमाणदिशाचसिद्धमितिभावः । "नारायणपरोज्योतिरात्मानारायणःपरः"इतिनारायणोपनिषदिनारायणएवपरंज्योतिरितिपरशब्दपर्यायपरस्शब्देनोत्तमज्योतिरित्युक्तेरितिभावः । "विष्णुरेवज्योतिर्विष्णुरेवब्रह्मविष्णुरेवात्माविष्णुरेवबलंविष्णुरेवयशोविष्णुरेवानंद"इतिचतुर्वेदशिखायांस्पष्टमेवज्योतिष्ट्वंविष्णोःस्मृतिरप्याह ॥ **अहमिति** ॥ "अहंक्रतुरहंयज्ञःस्वधाहमहमौषधं । मंत्रोहमहमेवाज्यमहमग्निरहंहुत"मितिगीतायां कृष्णेनस्वस्याग्निस्वरूपसत्तानियामकत्वोक्त्यास्वात्मनोऽग्निशब्दवाच्यत्वोक्तेः । नचात्राभेदउच्यते । विशिष्टाभेदस्यबाधात् । शुद्धेलक्षणापत्तेः । क्रत्वादिजडाभेदायोगाच्चेतिभावः । तथातत्रैव "ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यत"इत्यत्र "अनादिमत्परंब्रह्मे"तिपूर्वप्रकृतब्रह्मणएवतच्छब्देनपरामृश्य ज्योतिषामपिप्रकाशनशक्तिप्रदत्वेनज्योतिष्ट्वोक्तेः । आदिपदेन "तच्छुभ्रंज्योतिषांज्योति"रित्यादिर्गृह्यते । सूक्तस्यनिरवकाशत्वंप्रागुक्तमनूद्य सदृष्टांतंनिरस्यति ॥ **इदमिति** ॥ नवमेआद्यपादे "गुणशब्दस्तथे"तित्रयोदशेऽधिकरणेद्वितीयवर्णकेचिंतितं शाक्यानामयनाख्येषड्विंशत्संवत्सरेसत्रेश्रुतं "संस्थितेसंस्थितेहनिगृहपतिर्मृगयांयाति । सतत्रयान्मृगान्हंतितेषांतरसमयाःपुरोडाशा"इति । तेषुमांसमयेषु प्रकृतौदृषदि

अहमग्निरहंहुतं । ज्योतिषामपितज्ज्योति"रित्यादिश्रुतिस्मृतिभिर्विष्णौसावकाशं । इदंनविष्णुसूक्तमित्यध्यापकप्रसिद्धिस्तु "धान्यमसी"तिमंत्रस्यमांसहविष्कयागेनिविष्टस्यमांसमसीत्यूहेकर्तव्येमृगोसीत्यूहवत् प्रसिद्धविष्ण्वादिशब्दाभावादज्ञानमूला । तदुक्तंन्यायविवरणे "संदिग्धश्रुतिलिंगाभ्यामप्यसंदिग्धयोः

गु० विष्णुः । प्रकरणस्यनिरवकाशत्वात्तदनुगृहीतश्रुत्यालिंगबाधोस्त्वित्यतःप्रकरणमपिविष्णुपरत्वेनसावकाशमित्याह ॥ इदमिति ॥ अज्ञानमूलेति ॥ प्रकृतौ

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य-

॥ ३६८ ॥

चंद्रिका.

प्र. प्र.

१०

प्र० पेषणायतंडुलानांविहितो ''धान्यमसिधिनुहिदेवा''नितिमंत्रश्चोदकेनप्राप्तः । सकिमूहितव्यउतनेतिसंशये धान्यशब्दस्यसतुषद्रव्यवाचितयाप्रकृतौतंडुलप्रकाशनासामर्थ्येनासमवेतार्थत्वात्सौरयागेदेवस्यत्वेतिमंत्रगतसवित्रादिशब्दवन्नोहनीयइतिप्राप्ते प्रकृतिविकारमूलयालक्षणया धान्यशब्दस्यतंडुलप्रकाशकतयाप्रकृतौसमवेतार्थत्वान्मांसमसिधिनुहिदेवानित्यूहितव्यइतिसिद्धांतइति । अत्रयथाप्रकृतौलक्षणायाआर्थिकत्वेनाविवक्षितत्वात्स्वाधीनप्रयोगेलक्षणाश्रयणायोगान्नमांसलक्षकतयामृगोसीत्यूहोन्याय्यः । याज्ञिकानांतुतादृशऊहाभ्युपगमोयथाऽज्ञानमूलस्तथाध्यापकप्रसिद्धिरपिविष्णवादिशब्दाभावनिमित्ताज्ञानमूलेत्यर्थः ॥ केवलयोरिति ॥ अन्योन्यनिरपेक्षयोश्श्रुतिलिंगयोरित्यर्थः ।

केवलयोरेवबलवत्त्वा''दिति । अत्रचसंदिग्धत्वंनाम सावकाशत्वं । एवंसूक्तांतरेष्वपिद्रष्टव्यं । तथाहि । ऐंद्रे ''नत्वावांइंद्रकश्चननजातोंनजनिष्यत''इति । तथा ''ईशानमस्यजगतःस्वर्दृशमीशानमिंद्रतस्थुष''इति । तथा ''समुद्रेअंतश्शयत''इति ।

प्र० कथमिदमुक्तार्थसंवादीत्यतआह ॥ अत्रचेति ॥ असंदिग्धत्वंचनिरवकाशत्वमित्युक्तप्रायं । उक्तंचतट्टीकायां ''सावकाशेभ्योऽनेकेभ्योपिनिरवकाशस्यैकस्यैवप्राबल्या''दिति । नन्वत्रसावकाशयोःश्रुतिलिंगयोरेवनिरवकाशेनलिंगादिनाबाधःप्रतीयते । नतुतादृशयोश्श्रुतिप्रकरणयोः । न्यायविवरणटीकायांचास्यवाक्यस्याकाशप्राणछंदोधिकरणपरतयाव्याख्यातत्वात् । तत्रचप्रकरणोपष्टंभेनपूर्वपक्षाकरणात्कथमुक्तसंवादीतिचेन्न । तुल्यन्यायतयावाश्रुतिप्रकरणोपलक्षणत्वाशयेनवाकैमुत्यन्यायसिद्धतयावाऽस्योदाहरणादिति । सूत्रेऽग्निसूक्तस्थस्योपलक्षणत्वेनोपादानात्सर्वत्रायंन्यायोनुसंधेयइतिवदंस्तत्प्रकारंक्वचित्क्वचिद्दर्शयति ॥ एवमिति ॥ ऐंद्रे सूक्तइत्यर्थः । आद्याष्टकगतैंद्रे

॥ ३६८ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० “नत्वावाँइंद्रकश्चननजातोनजनिष्यतेऽतिविश्वंववक्षिथ”इत्यत्र हेइंद्र कश्चन कोपि त्वावान् त्वत्सदृशः नास्तिनासीन्नजनिष्यते । विश्वमति ववक्षिथ त्वमेवभर्तासीत्यसदृशत्वविश्वभर्तृत्वादिकंश्रुतं । तथापंचमाष्टकगतऐंद्रे “अभित्वाशूरनोनुमोऽदुग्धाइवधेनवः । ईशानमस्य”इत्यत्र जंगमस्यचस्थावरस्यचास्यविश्वस्येशानं त्वा त्वां वेदवाचइवपुनःपुनःस्तुमइतिजगन्नियामकत्वं “नत्वावाँअन्योदिव्योनपार्थिवोनजातोनजनिष्यते”इति हेमघवन् द्युस्थोवापृथिवीस्थोवाजातोजनिष्यमाणोवान्यस्त्वत्सदृशोनेत्यसदृशत्वंचश्रुतं । तथा “समुद्रेअंतश्शयतउद्नावज्रोअभीवृतः”इतिषष्ठाष्टकगतैंद्रेऽष्टमाष्टकस्थेच “समुद्रेंतःकवयोविचक्षते”इतिसमुद्रशायित्वंश्रुतं । एतानिचब्रह्मलिंगतयाप्रसिद्धानीतिभावः ॥ तथेति ॥ “देवाश्चित्तेअसुर्यप्रचेतसोबृहस्पतेयज्ञियंभागमानशुः । उस्राइवसूर्योज्योतिषामहोविश्वेषामिज्जनिताब्रह्मणामसी”त्यत्र हेबृहस्पते

तथाबार्हस्पत्ये “विश्वेषामिज्जनिताब्रह्मणामसी”ति । तथासौरे “सूर्यआत्माजगतस्तस्थुष”इति । तथावारुणे “योविश्वस्यजगतोदेवईश”इति । तथाविश्वकर्मसूक्ते “विश्वतश्चक्षुः योनःपिताजनिते”त्यादीनिब्रह्मलिंगानि

प्र० प्रकृष्टज्ञानिनोदेवाअपि तेप्रसादात् यज्ञभागंप्राप्नुवंति । त्वंचभूतभविष्यद्वर्तमानचतुर्मुखब्रह्मणांजनयितासीतिब्रह्मजनकत्वादिकंश्रुतं । तच्च विष्णोरन्यत्रनयुक्तमितिभावः ॥ **सौरइति** ॥ आद्याष्टकाष्टमाध्यायगतेसौरे “चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्मे”त्यत्रस्थावरजंगमात्मकविश्वस्वामित्वंश्रुतं । तच्चनान्यलिंगं । नचात्रात्मशब्दस्स्वरूपपरः । षष्ठ्याऔपचारिकत्वप्रसंगादितिभावः ॥ **यइति** ॥ पंचमाष्टके “योवर्धनओषधीनांयोअपांयोविश्वस्यजगतोदेवईशे”इतिविश्वेश्वरत्वंश्रुतं । तच्च “एषसर्वेश्वर”इत्यादिनाब्रह्मणिप्रसिद्धं । “विश्वतश्चक्षुरुतविश्वतोमुख”इत्यादिकंच “सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुख”मित्यादिनाविष्णौप्रसिद्धं ।

SGDF
Sri Gurgeshwar Digital Foundation

प्र० जगज्जनकत्वंच ''यतोवाइमानिभूतानी''त्यादिनाप्रसिद्धं ॥ **संतीति**॥ तथाचनिरवकाशत्रह्मलिंगैस्सावकाशश्रुतिप्रकरणयोर्बाधइतिभावः । सूत्रेनिरवकाशलिंगोक्तिरुपलक्षणं । अन्यत्रान्यवाचिपदप्रयोगानुपपत्त्याचविष्णुपरताग्राह्येत्याह ॥ **किंचेति** ॥ **सौरइति** ॥ चतुर्थाध्यायगतेसौरइत्यर्थः ॥ **अथावयमिति** ॥ आद्याष्टकगतेवारुणसूक्ते ''आदित्यव्रतेतवानागसोदितयेस्यामे''त्यादित्यशब्दसंबोधनमित्यर्थः ॥ **नान्यथेति** ॥ तथात्वेनानादेवताप्रापकश्रुतिसद्भावेनैकवाक्यताभंगइतिभावः । सूक्तगतब्रह्मलिंगानामन्यथासिद्धिमाशंक्यनिरस्यति ॥ **यदिचेति** ॥ लिंगेत्युपलक्षणं । पावकादिशब्दोक्तिरपिध्येया । तथाचाकाशाद्यधिकरणानारंभस्स्यादितिभावः । एतेनोपासनार्थंतदुक्ति

संति । किंचसौरे ''येनापावकचक्षसाभुरण्यंतंजनाँअनु । त्वंवरुणपश्यसी''तिसूर्यस्यपावकवरुणादिशब्दैस्संबोधनं । तथावारुणे ''अथावयमादित्ये''तिवरुणस्यादित्यादिशब्दैःसंबोधनं । तथाऽऽग्नेये ''त्वमग्नइंद्रोवृषभंसतामसित्वं विष्णुरुरुगायोनमस्य''इत्यग्निंसंबोध्यतत्रेंद्रविष्ण्वादिशब्दप्रयोगः तत्तत्सूक्तानांसर्वशब्दवाच्यब्रह्मपरत्वेयुक्तः(क्तं) । नान्यथा । यदिचेंद्रादावेवब्रह्मलिंगोक्तिःस्तुत्यर्था तर्ह्याकाशप्राणादावपिब्रह्मलिंगोक्तिस्तदर्थास्यादितिदिक् ।

गु० सतुषशालिवांचिधान्यशब्दस्यवितुषत्रीहिषुलाक्षणिकत्वादार्थिकलक्षणारचनातिदेशइतिज्ञानाभावमूलायथाग्नेगोसीतिमंत्रोहविषयिणीपूर्वपक्षिप्रसिद्धिः तथाग्न्यादिसूक्तेषुविष्णुसूक्तत्वाज्ञानमूलोक्तप्रसिद्धिरित्यर्थः ॥ **न्यायविवरणइति** ॥ अत्तृत्वाधिकरणस्थमिदंसमानन्यायत्वादत्रापिसिंहावलोकनन्यायेनपरावृत्तमितिभावः ॥ **ईशानमिति** ॥ लिंगापेक्षयावाक्यस्यजघन्यत्वात् नत्वावाँअन्योदिव्योनपार्थिवोनजातोनजनिष्यतइतिवाक्यानुपादानं ॥ **नयुक्तमिति** ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्येकशेषएकवद्भावश्चेतिज्ञेयं । युक्तइत्यपिक्वचित्पाठः ॥ **यदिचेति** ॥ आकाशप्राणाद्यधिकरणवैषम्येणपूर्वपक्षयतेष्टापत्तेर्वक्तुमशक्यत्वादित्यर्थः ।

प्र० रितिपरास्तं । असदुपासनायानिषिद्धत्वाच्चेति । नन्विंद्रादीनामन्योन्यंब्रह्मणाचाभेदात्तत्रब्रह्मलिंगोक्तिःपावकादिशब्दोक्तिश्चयुक्ता । अत एव ''त्वमग्नइंद्रोवृषभ''इत्यादिचयुज्यतइतिचेन्न । विशिष्टाभेदस्यबाधितत्वात् । विशेष्यमात्रैक्येलक्षणापत्तेश्च । आकाशादावपितथात्वापत्तेश्च । यमिंद्रमाहुरित्यादिविरोधाच्च । तत्रभेदोक्तेरंतरधिकरणेदर्शितत्वात् । पृथगित्यत्राभेदस्यनिरसिष्यमाणत्वाच्च । नचवाच्यंलिंगानांस्वावरनियामकत्वादिनासंकोचइति बाधकाभावात् । नचपावकादिशब्दानांयोगेनसूर्यादौवृत्तिरविरुद्धेतिवाच्यं । रूढेर्बलवत्त्वात् । नियामकाभावेनवैपरीत्यस्यापिसंभवात् । तदेतदभिप्रेत्योक्तं **दिगिति** । यद्वा सूक्तांतरेष्वप्येवंनिरवकाशब्रह्मलिंगादीनिद्रष्टव्यानीतिभावे

नचैवमत्रत्यसिद्धांतेनैवांतरधिकरणादिपूर्वपक्षाणांकैमुत्यन्यायहतत्वात्तत्रत्यसिद्धांतन्यायव्युत्पादनंव्यर्थं । स्वतोबलवतोपिसावकाशस्यस्वतोदुर्बलेनापिनिरवकाशेनबाधइत्यंतरधिकरणन्यायेनविनात्रत्यसिद्धांतस्यैवासिद्धेः । अत्र आकाशाद्यधिकरणेषुच अधिकाशंकानिरासकन्यायएवहिव्युत्पाद्यः । नत्वंतरधिकरणन्यायः ।

प्र० नोक्तं **दिगिति** । ननुयद्यत्रसूक्तानुगृहीतायाअपिश्रुतेर्निरवकाशलिंगेनबाधः तदातदननुगृहीतायाइंद्राकाशादिश्रुतेस्सुतरांबाधेनपूर्वन्यायवैयर्थ्यमित्याशंक्यांतरधिकरणोपजीवनेनास्यप्रवृत्तेर्नदोषइत्याह ॥ **नचेति** ॥ **स्वतइति** ॥ जात्येत्यर्थः । ननुयदितेनैवन्यायेनात्रत्यसिद्धांतस्तर्हिव्युत्पाद्यन्यायभेदाभावान्नैतदारंभस्संभवति । अतआह ॥ **अत्रेति** ॥ यद्वा सन्यायोत्रैवोच्यतामतआह ॥ **अत्रेति** ॥ न्यायद्वयस्यैकत्रव्युत्पादनायोगात् । अन्यथाधिकरणभेदोनस्यादितिभावः । ननुतर्हिसएवात्रव्युत्पाद्यतामितिचेन्न । एतदभ्यधिकाशंकायानिरासकस्यन्यायस्यक्वचित्कर्तव्यत्वात् । नन्वेवमपि ''ज्योतिर्दर्शना''दित्यनेनपुनरुक्तिः । तत्राग्निसूक्तगतस्यापिज्योतिषोविष्णुत्वमाक्षिप्यसमाधा

SGDF Sri Gargeshwari Digital Foundation

प्र० नादित्यतआह ॥ ज्योतिरिति ॥ अग्निसूक्तस्थस्येति ॥ ननुतत्रवाजसनेयगतंज्योतिरुदाह्रियते । नत्वग्निसूक्तगतमितिचेदित्थमाशयः । अग्निसूक्तस्थंज्योतिर्नविष्णुः । अस्यैववाजसनेयेम्रियमाणत्वादिश्रवणादिति । तत्र "योयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योति"रितिज्योतिःकिंजीव उतविष्णुरितिसंशये "ससमानस्सन्नुभौलोकावनुसंचरति सवाअयंपुरुषोजायमानश्शरीरमभिसंपद्यमानः पाप्मभिःसंसृज्यते सउत्क्राम न्म्रियमाण"इत्यादिजीवलिंगाज्जीवइतिप्रागुक्ताग्निसूक्तस्थमपिज्योतिर्जीवएवेतिप्राप्ते ज्योतिश्शब्दस्यहृद्यंतर्ज्योतिरित्यात्मप्रश्नोत्तरोपक्रमेसुप्तइ त्यत्रायंपुरुषःस्वयंज्योतिरित्युपसंहारेचश्रुतत्वात् आत्मप्रश्नोत्तरोपक्रमोपसंहाराभ्यांचविष्णुपरत्वेननिर्णीतवाक्यमध्यस्थतयाजीवलिंगानांमार कत्वाद्यर्थकतयाकथंचिन्नेयत्वात् इदंज्योतिर्विष्णुरेवेत्यग्निसूक्तस्थमपितथेतिसिद्धांतउच्यते । ननिरवकाशलिंगेनसावकाशबाधन्यायव्युत्पा दनं सूक्तगतत्वाधिकाशंकानिरासकन्यायव्युत्पादनंवाक्रियते । येनपुनरुक्तिस्स्यादित्यर्थः । एवंप्रमाणाश्रिताशंकांनिरवकाशलिंगरूपप्रमा णोपदर्शनेननिरस्येदानींप्रमेयाश्रिताशंकां "स्वयज्योतिष्ट्वाद्भगवत"इतिपंचमगीताभाष्योक्तदिशाशब्दप्रवृत्तिहेतुनिरूपणेननिरस्यति ॥ ज्योति रिति ॥ प्रकाशत्वमिति ॥ तमोविरोधित्वस्यगुरुत्वादितिभावः । ननुयद्यत्रेदंविषयवाक्यंस्यात्तर्हिस्पष्टलिंगत्यागेनकर्णादिविदूरत्वप्रत्याय "ज्योतिर्दर्शना"दित्यत्रत्वग्निसूक्तस्थस्यापिज्योतिषोम्रियमाणत्वादिलिंगैर्जीवत्वेशंकिते लिंगानिब्रह्मपरोपक्रमोपसंहारमध्यस्थ त्वादंतर्भावितण्यंतानीतिवक्ष्यतइतिनतेनाप्यस्यपुनरुक्तिः।ज्योतिश्शब्दप्रवृत्तिनिमित्तंचप्रकाशत्वंचित्प्रकाशरूपेब्रह्मण्यप्यस्ति । गु० तर्ह्यंतरधिकरणादिनात्विदंगतार्थंस्यात् । तत्सिद्धांतव्यपदेशस्यैवात्रसिद्धांतव्यवस्थापकत्वादित्यतआह ॥ अत्रेति ॥ प्रमेयाश्रितांशंकांपरिहरति ॥ ज्योतिश्श ब्देति ॥ तमोविरोधित्वापेक्षयाप्रकाशत्वस्यलघुत्वात्तदुपपादकतायाःआवश्यकत्वांच्चैतज्ज्योतिःपदप्रवृत्तिनिमित्तंवाच्यमितिभावः । तमसासहास्थितत्वंप्रकाशस्याप्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० नायचरणोक्तिरयुक्तेत्याशंक्याह ॥ **यद्यपीति** ॥ विचरणेनापरिच्छेद्यवैभवस्यैवाभिप्रेतत्वेनोक्तत्वात्तेनैवसंगृहीतत्वाच्चेत्याह ॥ **अपरिच्छेद्येति** ॥ नन्वेवमपिविचरणाभिधानादितिवाच्यं । प्रतिपत्तिलाघवादित्याशंकामनूद्यनिरस्यति ॥ **यद्यपीति** ॥ ननुतर्कतांडवे उपसर्गाणांद्योतकत्वंपूर्वपक्षीकृत्यवाचकत्वस्यसमर्थनात्कथंद्योतकत्वोक्तिः । नचतत्परीत्येतिवाच्यं । "समितिह्युपसर्गेणपरमुख्यार्थतोच्यत"इति "उपसंक्रमणंचैवद्वितीयोद्देशितंप्रति । अतिक्रमंवदंतंतमुपशब्दोनिवारये"दितिचभगवत्पादोक्तेरुदाहृतत्वात् । युक्तियुक्ततयोपपादनेनाभि

यद्यप्यत्रवाक्यशेषे "विश्वेदेवाअनमस्यन्भियाना"इतिसर्वदेवोपास्यत्वादिकमपिनिरवकाशविष्णुलिंगमस्ति । तथापिकर्णादिविदूरत्ववद्विषयवाक्यएवाश्रुतत्वादपरिच्छेद्यवैभवांतर्भूतत्वाच्चनसूत्रकारादिभिःपृथगुक्तं । यद्यप्यत्रज्योतिःप्रतिकर्णादीनांविरुद्धचरणरूपंकर्णादिविदूरत्वंवक्तुंविचरणाभिधानादितिसूत्रयितव्यं । तथाप्युपसर्गस्यद्योतकत्वमात्रंधातोरेवतुविचरणाभिधायकत्वमितिप्रदर्शनार्थं

गु० युक्तमित्यतउक्तं **चित्प्रकाशेति** । तस्यचबाह्यतमःस्थितत्वंयुक्तमेव । अन्यथात्वामग्नेतमसितस्थिवांसमित्युक्तत्वादग्नावपिप्रकाशत्वंनस्यात् । हृदयआहितमित्युक्तत्वादंतर्बहिश्चस्यादितिभावः । ननुकर्णादिविदूरत्वंनयथाश्रुतंलिंगं । तस्यकर्णाद्यगोचरत्वरूपत्वेनासंभवित्वात् । तदुपलक्षितमियदितिपरिच्छेदानर्हवैभवत्वमेवलिंगंवाच्यं । तच्चानुपपन्नं । वाक्यशेषोक्तस्यसर्वदेवोपास्यत्वस्यैवयथाश्रुतस्यलिंगत्वसंभवात् । तत्संभवेचोपलक्षितानुसरणस्यानौचित्यादित्याशंकते ॥ **यद्यपीति** ॥ **यद्यप्यत्रेत्यादि** ॥ अत्रश्रुतौपतयतइत्यादावुक्तत्वात्पतनाभिधानादितिवक्तव्येपिकर्णाद्यपेक्षयामनसोबहुव्याप्तेरभिमानिनश्श्रोत्तमत्वात्तन्मुख्यत्वद्योतनाय

SGDF
Sri Gangeshwari Digital Foundation

प्र० प्रेतत्वावगमाच्चेतिचेत्सत्यं । अभ्युपेत्यवादेनवापररीत्यावेयमुक्तिः । अतएवपक्षांतरमुक्त्वातमुपपादयति ॥ **सूत्रस्येति** ॥ अधिकरणार्थमुपसंहरति ॥ **तस्मादिति** ॥ तस्मान्निरवकाशस्यलिंगस्यप्रवृत्तिनिमित्तस्यचभगवतिसत्वाद्विष्णुरेवेदंज्योतिरिति ॥ ७ ॥ **ज्योतिरधिकरणंसंपूर्णं** ॥ १० ॥

सूत्रस्यश्रुत्यनुगमप्रदर्शनार्थंचचरणाभिधानादित्युक्तं । विचरणाभिधानादित्युक्तौहिश्रुतौवीत्यनेनचरतीत्यस्यमेमनइतिपदद्वयव्यवहितत्वात्श्रुत्यनुगमोनज्ञायेत । तस्माद्विष्णुरेवेदंज्योतिरिति ॥ ॥ टीकाक्षरार्थस्तुस्पष्टः ॥ ७ ॥ ज्योतिरधिकरणंसंपूर्णं ॥ १० ॥

गु० तत्सहपठितचरणस्यैवनिर्देशः।एवंचश्रुतौमनोगम्यत्वाभावःकर्णादिगोचरत्वाभावेहेतुत्वेनोच्यते। यद्वामनोदूरत्वोक्त्याकैमुत्यन्यायेनलब्धमेवकर्णादिविदूरत्वंस्पष्टमुच्यते । अतएवकिंस्विद्वक्ष्यामीत्यनुक्तवाक्यार्थाक्षेपः । कर्णादिग्रहणस्योपलक्षणत्वादित्युक्तंभवति ॥ **उपसर्गस्येति** ॥ यद्यप्युपसर्गाअपिवाचकाएवेतिसिद्धांतः तथापिपरमतानुवादोयमित्यदोषः ॥ ७ ॥ **ज्योतिरधिकरणंसंपूर्णं** ॥ १० ॥

प्र० ॥ **ॐछंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनंॐ** ॥ टीकायामनुक्तेः “अधिवेदगताना”मितिन्यायविवरणंहृदिकृत्वै तदधिकरणोपाधिमाह ॥ **अत्रेति** ॥ गायत्र्युष्णिग्बृहतीत्यादिशब्दाइत्यर्थः । नन्वेवंसूत्रेगायत्रीशब्दमात्रासाधारणभूतादिपादव्यपदेशा

॥ ॐछंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनंॐ ॥ ॥ अत्राधिवेदगतागायत्र्यादिशब्दाउदाहरणं ।

गु० ॥ ॐछंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदात्तथाहिदर्शनंॐ ॥ संगतिकथनसौकर्यायमतभेदमाह ॥ **अत्रेति** ॥ मतद्वयेपिफलभेदमाह ॥

प्र० द्युक्त्यनुपपत्तेस्सएवोदाहरणमितिज्ञायतइतिचेन्न । वेदमातुस्त्रैवर्णिकद्वितीयजन्मजनन्यागायत्र्याःप्राधान्येनतन्नाम्नएवेतरोपलक्षणतयासूचनात् । अतःसर्वसाधारण्यायछंदइत्यसूत्रयत् । अन्यथागायत्र्यभिधानादित्येवब्रूयात् । यद्यप्यत्रवक्ष्यमाणदिशाऽऽकाशादिशब्दाअप्युदाहरणं तथापितेषामधिकरणांतरविषयाणांसतामाकारांतरेणात्रविषयत्वं । गायत्र्यादिशब्दानांतुसर्वाकारेणापीतिविशेषादेवमुक्तमितिध्येयं । अत्रपूर्वसंगतिंवक्तुंप्रस्थानद्वयेसंकलय्यटीकाकृदुक्तान्पक्षान भाष्यानुगुणोपपत्तीःप्रदर्शयन्विवेचयति ॥ **अत्रेति** ॥ तत्स्थंछांदोग्यस्थं । अत्रेत्यस्यविवरणंटीकायामिति । “गायत्रीवाइदꣳसर्वंभूतंयदिदंकिंचे”त्युदाहृतत्वादितिभावः ॥ **सुधायामिति** ॥ छंदोगाःपठंति “गायत्रीवाइदंसर्वंभूत”मित्यादि । तत्रसंशयः । “किंगायत्रीब्रह्मकिंवावर्णसमावेशलक्षणोमंत्र”इत्यादिनेत्यर्थः । नन्विदंवातद्वाफलविशेषाभावाद्व्यर्थो विकल्पइत्यतआह ॥ **अत्रेति** ॥ मतद्वयमध्येज्योतिर्वाक्यपक्षइत्यर्थः ॥ **द्वितीयइति** ॥ गायत्रीवाक्यपक्षे । अत्रोक्तपक्षद्वये “अथयदतः

अत्रविषयवाक्यं “अथयदतःपरोदिवोज्योति”रितिछांदोग्यस्थंज्योतिर्वाक्यमित्येकंमतं । मतांतरंतु “गायत्रीवाइदंसर्व”मितितत्स्थंगायत्रीवाक्यमिति । अत्राद्यंमतं “अथयदतःपरोदिवइतिवाक्योक्तेज्योतिषिसंदेहः । किंब्रह्मोतान्य”दितिसुधोक्तं । द्वितीयंत्वत्रटीकायांसुधायांचोक्तं । अत्राद्येमतेज्योतिरधिकरणेग्निसूक्तस्थस्यज्योतिषोग्नित्वनिरासः । अत्रतुछांदोग्यस्थस्यज्योतिषश्छंदस्त्वनिरासः । द्वितीयेतुज्योतिरधिकरणेग्निसूक्तस्थस्यज्योतिषोग्नित्वनिरासः । अत्रतुछांदोग्यस्थायाःगायत्र्याश्छंदस्त्वनिरासइतिभेदः ।

गु० **अत्राद्यइति** ॥ नन्वाद्येमतेभाष्येगायत्रीपदोपादानमनर्थकमित्यतआह ॥ **आद्यइति** ॥ द्वितीयेमतेज्योतिर्वाक्योपादानस्यप्रयोजनमाह ॥ **द्वितीयइति** ॥ अत्राद्य

SGDF Sri Gurgaon Digital Foundation

प्र० परोदिवोज्योतिर्दीप्यतइत्युक्तस्यज्योतिषोगायत्रीवाइदंसर्वमितिगायत्र्यासमारंभःकृत"इतिभाष्यमनुगुणयति ॥ **आद्यइति** ॥ स्पष्टयिष्य तेचैतदग्रइतिभावः । एवंवैकल्पिकोदाहरणमुक्त्वेदानींज्योतिर्वाक्योदाहरणपक्षेसुधाभिमतपूर्वपक्षद्वयमाह ॥ **आद्येपीति** ॥ उदाहरणभे दसमुच्चयार्थोपिशब्दः ॥ **अग्निसूक्तस्थमपीति** ॥ ज्योतिश्श्रुत्याहृदयस्थत्वलिंगेनज्योतिर्द्वयस्यैक्यप्रत्यभिज्ञानाद्दृष्टत्वादिविरुद्धधर्मस्याकारभे

आद्येभाष्येगायत्रीवाक्योपादानंगायत्रीशब्दरूपपूर्वपक्षबीजप्रदर्शनार्थं । द्वितीयेभाष्येज्योतिर्वाक्योपादानंपूर्व पक्षेज्योतिरधिकरणाक्षेपप्रदर्शनार्थं । आद्येपि छांदोग्यस्थज्योतिषोगायत्रीवेत्युपक्रमेणगायत्रीत्वादग्निसूक्तस्थ मपिगायत्रीत्येकःपूर्वःपक्षः । अपरस्तु अस्त्वग्निसूक्तस्थंज्योतिःकर्णादिविदूरत्वाद्विष्णुः । छांदोग्यस्थंतु "तदे तद्दृष्टंचश्रुतंचे"तितद्विरुद्धदृष्टश्रुतत्वादिश्रवणान्नविष्णुरिति । नचैवंसतिपूर्वपक्षेपूर्वसिद्धांतानाक्षेपादफलेयं चिंता । ज्योतिषोगायत्रीत्वे "इयंवावसायेयंपृथिवी"तिगायत्र्यभिन्नत्वेनोक्तायांपृथिव्यां "अस्यांहीदंसर्वं प्रतिष्ठित"मित्युक्तस्यस्थितिहेतुत्वादेरपितद्धर्मत्वापत्त्याजन्मादिसूत्राक्षेपात् । "योयमंतर्हृदय"इतिछांदोग्यस्थे ज्योतिष्यानंदमयधर्मभूतहृदयनिहितत्वश्रवणेन ज्योतिरधिकरणमनाक्षिप्यैवानंदमयाधिकरणाक्षेपाच्च ।

प्र० दादिनोपपत्तेरितिभावः । द्वितीयपूर्वपक्षेऽनुपपत्तिंप्रकाश्यसमाधत्ते ॥ **नचैवमिति** ॥ अग्निसूक्तस्थज्योतिषोविष्णुत्वमुपेत्यपूर्वपक्षकरणे सतीत्यर्थः ॥ **तद्धर्मत्वेति** ॥ गायत्रीधर्मत्वापत्त्येत्यर्थः । पूर्वाधिकरणाक्षेपस्यापिव्यवहितजिज्ञासासूत्राक्षेपपर्यंतत्वादितिभावः । ननुपूर्वो त्तराधिकरणानामानंदमयाक्षेपपूर्वजिज्ञासासूत्राक्षेपकत्वेनप्रवृत्तत्वात्कथमस्यततोविलक्षणस्यतन्मध्येनिवेशइत्यतःपक्षांतरमाह ॥ **योयमिति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० यद्यपि ''योवेदनिहितंगुहाया''मितिमंत्रवर्णएवायंधर्मश्श्रुतोनत्वानंदमये तथापिमंत्रवर्णोक्तस्यैवानंदमयशब्देनोच्यमानत्वादितिभावः । ज्योतिर्वाक्यपक्षेपूर्वपक्षद्वयमुक्त्वागायत्रीवाक्यपक्षेपूर्वपक्षत्रयमाह ॥ **द्वितीयेपीति** ॥ **उक्तरीत्येति** ॥ कर्णादिविदूरत्वात्तस्यविष्णुत्वेपिदृष्टंचश्रुतंचेतितद्विरुद्धदृष्टत्वादिश्रवणाच्छांदोग्यस्थंनविष्णुरित्युक्तदिशेत्यर्थः । अस्मिन्पक्षेवक्ष्यमाणपक्षेचसप्रयाजनत्वंपूर्ववदनुसंधेयं ॥ **तच्छ्रुतेरिति** ॥ ज्योतिःश्रुतिश्चोपदेशभेदेनभिन्नप्रकरणत्वान्नगायत्र्यांश्रुतेतिभावः । उक्तपंचपक्षान्संवादयति ॥ **अत्रापीति** ॥ पंचपक्षमध्ये

द्वितीयेपि गायत्र्याश्छंदस्त्वेतामुपक्रम्यछांदोग्यउक्तस्यज्योतिषोपिछंदस्त्वादग्निसूक्तस्थमपिछंदइत्येकःपूर्वःपक्षः । अन्यस्तूक्तरीत्याग्निसूक्तस्थस्यविष्णुत्वेपिछांदोग्यस्थंछंदएवेति । अपरस्तुछांदोग्यस्थस्यापिज्योतिषोज्योतिरधिकरणेविष्णौनिर्णीतज्योतिश्श्रुत्याविष्णुत्वेपिगायत्रीनविष्णुः तत्रतच्छ्रुतेरभावादिति । अत्रापिद्वितीयेप्रथमोत्रटीकायामुक्तः ।

गु० मतानुसारेणपूर्वपक्षमाह ॥ **आद्येपीति** ॥ **द्वितीयइति** ॥ गायत्रीवाक्यंविषयवाक्यमितिमतइत्यर्थः । अन्यस्त्वित्यादिपक्षद्वयेज्योतिर्वाक्योपादानंतुपूर्वाधिकरणवैषम्यंप्रदर्शयितुमितिज्ञातव्यं ॥ **अत्रापीति** ॥ अथयदतःपरोदिवोज्योतिरितिछांदोग्यस्थंविषयवाक्यमितिप्रथमपक्षस्ययआद्यः छांदोग्यस्थज्योतिषोगायत्रीवेत्युपक्रमेणगायत्रीत्वादग्निसूक्तस्थमपिगायत्रीतिपूर्वःपक्षः । इयंचगायत्रीयदिविष्णोरन्यास्यात्तदेदंज्योतिश्चसास्यादितिगायत्रीनिर्णयोऽवश्यापेक्षितइतिसंगतिटीकायामुक्तः गायत्रीवाइदंसर्वमितिविषयंवाक्यमितिद्वितीयमतस्ययोयमाद्यः गायत्र्याःछंदस्त्वात्तामुपक्रम्यछांदोग्यउक्तस्यज्योतिषोपिछंदस्त्वादग्निसूक्तस्थमपिछंदइतिपूर्वः

SGDF
Sri Gargeshwari Digital Foundation

प्र० पीत्यर्थः । आद्येप्रथमद्वितीयाविति यद्यपि "अथवात्रापि अथयदतःपरोदिव"इतिवाक्योक्तज्योतिषिसंदेहः । किंब्रह्मोतान्यदिति । उपक्रमेगायत्रीशब्दश्रवणादन्यदितिप्राप्त"मित्येवसुधावाक्यं । ननुद्वेधातत्रपूर्वपक्षोपपादनमस्ति । तथापिपूर्वाक्षेपेणपूर्ववैषम्येणचयोजयितुंशक्यत्वादेवमुक्तं । तथाचतद्वाक्यंद्वेधायोजनीयमित्युक्तंभवति ॥ **द्वितीयइति** ॥ एतौचसुधायांकंठोक्ताविितिध्येयं । एवंपक्षान्विविच्येदानीं संगतिमाह ॥ **अत्रेति** ॥ ज्योतिर्वाक्यपक्षेगायत्रीवाक्यपक्षेचेत्यर्थः । तदुपजीवित्वादिति उपजीव्योपजीवकभावइत्युक्तंभवति । विषय

आद्येप्रथमद्वितीयौ(प्रथमद्वितीययोराद्योत्रटीकायामुक्तः । प्रथमेद्वितीयः ।) द्वितीये द्वितीयतृतीयौ चसुधायां । अ(त)त्रमतद्वयेप्याद्येपूर्वपक्षेपूर्वसिद्धांताक्षेपादाक्षेपिक्यवांतरसंगतिःस्फुटा । आद्येद्वितीयेद्वितीयेद्वितीयतृतीययोस्तुपूर्वपक्षयोःपूर्वाधिकरणवैषम्यप्रदर्शनायतदुपजीवित्वादवांतरसंगतिः ।

गु० पक्षः तस्माद्गायत्रीनविष्णुः अपितुछंदोविशेषएव तथाचेदंज्योतिरानंदमयश्चनासाविितिपूर्वपक्षोपसंहारटीकायामुक्तइतिभावः ॥ **प्रथमेद्वितीयइति** ॥ अथयदतइत्येतद्विषयवाक्यमितिमते अस्त्वग्निसूक्तस्थंज्योतिःकर्णादिविदूरत्वाद्विष्णुरित्यादिनोक्तोयोद्वितीयःपक्षःसइत्यर्थः ॥ **द्वितीयइति** ॥ गायत्रीवेत्येतद्विषयवाक्यमितिद्वितीयइत्यर्थः । द्वितीयतृतीयौ कर्णादिविदूरत्वादिरूपविष्णुलिंगसद्भावादग्निसूक्तस्थज्योतिषोऽग्नित्वेपि छांदोग्येकर्णादिविदूरत्वादिरूपालिंगाश्रवणाच्छांदोग्यस्थंछंदएवेतिद्वितीयः छांदोग्यस्थस्यापिज्योतिषोज्योतिरधिकरणेविष्णौनिर्णीतज्योतिश्श्रुत्याविष्णौनिर्णीतत्वेपि गायत्रीनविष्णुस्तत्रतच्छ्रुतेरभावादितितृतीयश्चेत्यर्थः । यदर्थंमतभेदउपपादितस्तदिदानीमाह ॥ **तत्रमतद्वयेपीत्यादिना** ॥ **तदर्थंकिमनादिस्वभावइति** ॥ इयंचिंतापूर्वचिंतार्था ॥

प्र० संशयटीकांव्यनक्ति॥ **अत्रेति**॥ छांदोग्येतृतीयेध्याये "गायत्रीवाइदंसर्वंभूतंयदिदंकिंच । वाग्वैगायत्री । वाग्वाइदंसर्वंभूतंगायतिचत्रायतिच । यावैसागायत्री । इयंवावसायेयंपृथिवी । अस्यांहीदंसर्वंभूतंप्रतिष्ठितं । एतामेवनातिशीयंते । यावैसापृथिवी । इयंवावसायदिदमस्मिन्पुरुषेशरीरं । अस्मिन्हीमेप्राणाःप्रतिष्ठिताः । एतदेवनातिशीयंते । तद्वाएतत्पुरुषेशरीरं । इदंवावतत् । यदिदमस्मिन्नंतःपुरुषेहृदयं । अस्मिन्हीमेप्राणाःप्रतिष्ठिताः । एतदेवनातिशीयंते । सैषाचतुष्पदाषड्विधागायत्री । तदेतदृचाभ्युक्तं । तावानस्यमहिमाततोज्यायांश्चपुरुषः । पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीति । यद्वैतद्ब्रह्मेति । इदंवावतत् । योयंबहिर्धापुरुषादाकाशःयोवैसबहिर्धापुरुषादाकाशः । योयमंतःपुरुषआकाशः । अयंवावसः । योयमंतःपुरुषआकाशः । योवैसोंतःपुरुषआकाशः । अयंवावसः । योयमंतर्हृदयआकाशस्तदेतत्पूर्णमप्र

अत्रगायत्रीकिंछंदःकिंवाविष्णुरितिचिंता । तदर्थंकिंगायत्रीश्रुतिप्रसिद्ध्यनुसारेणभूतपादत्वादिविष्णुलिंगंबाध्यंकिंवाविपरीतमिति । तदर्थंप्रसिद्धिबाधेकिंश्रुतेर्मुख्यत्वभंगउतनेति । तदर्थंगायत्रीशब्दप्रवृत्तिनिमित्तंब्रह्मणिनास्त्युतास्तीति ।

प्र० वृत्ति । पूर्णमप्रवृत्तिनींश्रियंलभतेयएवंवेदयएवंवेद"त्याद्युक्त्वाऽऽम्नायते "अथयदतःपरोदिवोज्योतिर्दीप्यतेसर्वतःपृष्ठेषुविश्वतःपृष्ठेष्वनुत्तमेषूत्तमेषुलोकेषु । इदंवावतत् । यदिदमस्मिन्नंतःपुरुषेज्योतिस्तस्यैषादृष्टिः । यत्रैतदस्मिन्शरीरेसंस्पर्शेनोष्णिमानंविजानाति । तस्यैषाश्रुतिः । यत्रैतत्कर्णावपिगृह्यनिनदमिवनदथुरिवाग्नेरिवज्वलतउपशृणोति । तदेतद्दृष्टंचश्रुतंचेत्युपासीत । चक्षुष्यश्श्रुतोभवतियएवंवेदयएवंवेद"ति । तत्रत्यागायत्रीविषयइत्यर्थः ॥ **छंदइति** ॥ वर्णसमावेशलक्षणोमंत्रइत्यर्थः ॥ **भूतेति** ॥ गानत्राणकर्तृत्वस्यप्रवृत्तिनिमित्तानतिरेकाद्भूतपादत्वादीत्युक्तं ॥ **किंवेति** ॥ लिंगाच्छ्रुतिर्बाध्येत्यर्थः । अर्थप्रतिपादकत्वरूपगानकर्तृत्वस्यगायत्रीशब्दप्रवृत्तिनिमित्तस्यब्रह्मण्ययुक्ततयावा

SGDF Sri Gargeshwari Digital Foundation

प्र० तद्गतत्वेसत्यप्यनादिस्वभावनियामकत्वरूपमहागुणलाभायवाऽनुभाष्यदिशातत्प्रतिस्वातंत्र्यमेववक्तव्यमित्यभिप्रेत्यानधीनउततदधीनइ त्युक्तं । यद्यनधीनस्तदाप्रवृत्तिनिमित्तंब्रह्मणिनेतिप्रसिद्धिबाधेमुख्यत्वभंगाद्गायत्रीछंदएवेतिपूर्वपक्षेफलं । सिद्धांतेतुविपरीतमितिस्पष्टत्वात्फलफ लिभावोनोक्तः। एवमनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशंकोपयुक्तचिंतापरंपरामुक्त्वा सूत्रसूचितप्रमाणाश्रितशंकोपयुक्तामाह ॥ **तथेति** ॥ गायत्रीछंदउतब्रह्मेतिचिंता । तदर्थंब्रह्मपक्षेगायत्रीज्योतिषोरेकप्रकरणस्थत्वेनैक्याद्दिविदिवइत्युपदेशभेदःकिंनयुक्तउतयुक्तइति । तदर्थसप्तमी पंचम्यौविरुद्धेउतविवक्षाभेदेनाविरुद्धेइतिद्रष्टव्यमित्यर्थः । उपलक्षणमेतत् । ब्रह्मपक्षेप्रसिद्धपदत्यागेनाप्रसिद्धगायत्रीपदप्रयोगेप्रयोजनंना स्त्युतास्तीत्यपिध्येयं । अत्रैवंपूर्वपक्षक्रमः इयंगायत्रीछंदएवनविष्णुःगायत्रीशब्दस्यतत्रैवरूढत्वादितिटीकायांदर्शितः । अत्रपूर्वपक्षाप्रापक माशंक्याह ॥ **यद्यपीति** ॥ "यद्वैतद्ब्रह्म एतामेवब्रह्मोपनिषद"मितिब्रह्मश्रुत्यनुगृहीतैरित्यर्थः ॥ **अनुपपत्त्यंतरेति** ॥ उपदेशभेदादिरूपे

तदर्थंकिमनादिस्वभावईशानधीनउततदधीनइति । तथाब्रह्मपक्षेदिविदिवइत्युपदेशभेदःकिंनयुक्तउतयुक्तइति । यद्यपिपूर्वत्रनिरवकाशलिंगैःसावकाशज्योतिश्श्रुतिबाधउक्तोऽत्र "यद्वैतद्ब्रह्मे"त्यादिश्रुत्यनुगृहीतैर्भूतपादत्वादिनि रवकाशलिंगैःसुतरांसावकाशगायत्र्यादिश्रुतिबाधइतिपूर्वपक्षानुदयः । तथाप्यधिकाशंकयातदुदयः । शंकातु विष्णौप्रसिद्धेषुशब्देषुसत्स्वन्यत्रप्रसिद्धगायत्र्यादिशब्दप्रयोगेप्रयोजनंनेत्येका । इयंच "चेतोर्पणनिगदा"दितिसूत्रे सिद्धांतेप्रयोजनोक्त्यासूचिता । आकाशादिशब्दसाधारणीचेयं । गायत्रीशब्देऽनुपपत्त्यंतरसद्भावात्सउदाहृतः ।

गु० **तथाब्रह्मपक्षइति** ॥ अत्रब्रह्मपक्षइत्युक्त्याइयंचिंताप्रथमचिंतार्थेत्युक्तंभवति ॥**आकाशादीति**॥ नचैवमभ्यधिकाशंकात्वानुपपत्तिः । पूर्वमनुद्धृतत्वमात्रेणतदु

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यर्थः। आनंदमयशब्दवदितिभावः। गायत्रीज्योतिषोर्भिन्नप्रकरणस्थत्वमुपेत्यैकांशंकामुक्त्वा एकप्रकरणस्थत्वमाश्रित्यपक्षांतरमाह ॥ अपरात्विति ॥ ततश्चेति ॥ तेजोवैब्रह्मवर्चसंगायत्रीतिज्योतिश्शब्दपर्यायतेजश्शब्दस्यतत्रदर्शनाद्गायत्र्येवज्योतिरपीतिभावः ॥ कंठोक्तमिति ॥ उपदेशभेदशब्दस्ययथादिविदिवइतिभेदव्यपदेशोर्थः तथादृष्टश्रुतत्वादिभेदव्यपदेशोप्यर्थइतिवक्ष्यमाणत्वादितिभावः ॥ अनेकेति ॥ "गायत्रीवाइदंसर्वं वाग्वैगायत्री इयंवावसायेयंपृथिवी"त्याद्यनेकशब्दानामित्यर्थः । नन्विदंसर्वमित्युक्तसर्वात्मकत्वस्यगायत्र्यामनुपपत्तेर्बहुबाधोपिन्याय्यइतिचेद्ब्रह्मपक्षेपितस्यास्तुल्यत्वादिति । नचवाच्यमत्रैवश्रुतिबाहुल्येनपूर्वपक्षेणसिद्धांतेसत्युत्तराधिकरणपूर्वपक्षानुत्थितिरिति । एतच्छंकायास्तत्रैवनिरसिष्यमाणत्वादितिभावः । नन्वेवमप्यंतरधिकरणेसमुद्रशायित्वलिंगेनेंद्रबृहस्पत्यादिबहुश्रुतिबाधस्योक्तत्वात्कथमेतत्प

अतएवाग्निगायत्र्यादीतिभाष्यआदिपदप्रयोगोयुक्तः। "अधिकरणांतरेप्येतन्न्यायस्यानुसंधेयत्वंचसूचयती"तिटीकाचोपपन्ना। असाधारणीत्वन्या। युक्तमग्निसूक्तस्थज्योतिषोविष्णुत्वं। उपदेशभेदाभावात्। इहतुदिवइतिपंचम्युपदेशस्थस्यज्योतिश्श्रुत्याविष्णुत्वेपि दिवीतितद्विरुद्धसप्तम्युपदेशस्थगायत्र्यानविष्णुत्वमिति। अपरातु अग्निसूक्तस्थज्योतिर्निष्ठकर्णादिविदूरत्वविरुद्धदृष्टश्रुतत्वाद्युपदेशान्नेदंज्योतिर्विष्णुः। ततश्चगायत्र्यपिनविष्णुरिति। इदंचशंकाद्वयं "उपदेशभेदा"दितिसूत्रेकंठोक्तं। अपरातु एकस्यावह्निश्रुतेरन्यत्रप्रसिद्धिबाधेपिगायत्रीवाक्पृथिव्याद्यनेकशब्दानामन्यत्रप्रसिद्धिबाधोनयुक्तः।

गु० पपत्तेः ॥ अतएवेति ॥ चेतोर्पणनिगदादित्येतन्निवर्त्याशंकायाआकाशादिशब्दसाधारणत्वादेवेत्यर्थः। गायत्रीवाक्पृथिव्यादीत्यत्रादिपदेनशरीरहृदययोर्ग्रहणं ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्षोत्थितिरित्यतआह ॥ **अंतरिति** ॥ "कथंप्रसिद्धे"त्युत्तरार्धोक्तामाशंकांस्फुटीकृत्य "नित्यत्वादेवशब्दस्ये"तिपूर्वार्धोक्तांशंकांविशदयति ॥ **प्रमेयेति** ॥ **जन्येति** ॥ भूतप्रकरणादिनातत्रभूताकाशस्यैवपूर्वपक्षितत्वात्तस्यच "आत्मनआकाशस्संभूत"इतिजन्यत्वावगमादितिभावः ॥ **ज्योतिश्शब्देति** ॥ प्रकाशत्वत्वादेरित्यर्थः । धर्मिणोजन्यत्वेतद्धर्मस्यापितथात्वादितिभावः । गानकर्तृत्वमर्थप्रतिपादकत्वं । त्राणकर्तृत्वंचाध्येतॄणांपापेभ्योरक्षकत्वं । तच्चतत्स्वभावः । स्वभावश्चानादित्वान्नजन्यते । अतोनतदधीनमित्यर्थः । ईशगतत्वंत्वशक्यशंकमितिभावः । तस्माच्छब्दप्रवृत्तिनिमित्ताभावात्प्रसिद्धिबाधेमुख्यत्वहानेर्गायत्रीनविष्णुःकिंतुछंदएवेतिपूर्वपक्षशेषः । ननुयदुक्तंवेदस्यानादित्वात्तत्स्वभावोनेशाधीनइति तदयुक्तं । "नित्यावेदास्समस्ताश्चशाश्वताविष्णुबुद्धिगा"इतिप्रमाणव्याख्यावसरेतत्वनिर्णयटीकायां "वर्णास्तावन्नित्यत्वात्सर्वगतत्वाच्चस्वतःक्रमशून्याः । नचक्रमेणविनापदवाक्यभावः । नापितदंतरेणप्रामाण्यं । अतःक्रमःपौरुषेयएवास्थेयः । तत्कथंवेदस्यापौरुषेयत्व"मित्याशंक्य "नहिवयंवेदस्यकूटस्थनित्यतांब्रूमः । किंतुशब्दतोर्थतश्चसर्वदैकप्रकारतामेव । ततश्चक्रमस्यकृतकत्वेपिपुरुषाभिप्रायप्रवे

अंतरधिकरणइंद्रादिबहुश्रुतीनामन्यत्रप्रसिद्धिबाधस्त्वन्यत्रप्रसिद्धांतःस्थत्वमुखेनयुक्तः । नचेहतथामुखमस्तीति । इयंच "कथंप्रसिद्धबहुलशब्दानामन्यथार्थते"त्यनुव्याख्यानउक्ता । एताश्चप्रमाणाश्रिताः । प्रमेयाश्रितातु युक्तमाकाशाद्यधिकरणोक्तंजन्यभूताकाशस्वभावस्यविवरत्वादेर्ज्योतिश्शब्दप्रवृत्तिनिमित्तस्यचेशाधीनत्वं । धर्मिणासह जन्यत्वात् । गायत्रीरूपवेदस्यत्वनादित्वात्तत्स्वभावस्यगानत्राणकर्तृत्वादिरूपप्रवृत्तिनिमित्तस्यनेशाधीनत्वमिति ।

गु० **अंतःस्थत्वमुखेनयुक्तइति** ॥ यद्यप्यत्राज्यैःस्तुवतइत्यादाविवान्यत्रप्रसिद्धमुखंनावश्यकं तथापितत्रसिद्धांतहेतुविशेषसद्भावान्मुखानपेक्षायामपिप्रकृतेतदभावा

प्र० शेपिस्वतंत्रवक्तुरभावादपौरुषेयत्वमुपपद्यत"इत्यनेनसादित्वोक्तेः । अंगीकृतंचेद्भाट्टैरपि "यत्नतःप्रतिषेध्यानःपुरुषाणांस्वतंत्रते"त्युक्तेरित्याशंक्यवाक्यांतरानुसारेणास्याभिप्रायंव्यंजयन्ननादित्वमुपपादयति ॥ **नन्विति** ॥ **कृतकक्रमेति** ॥ नित्यत्वात्सर्वगतत्वाच्चवर्णानांस्वतःक्रमाभावादितिभावः ॥ **तत्वसंख्यानेति** ॥ नित्यावेदाःपुराणाद्याःकालप्रकृतिरेवच । नित्यानित्य"मित्यस्यव्याख्यावसरे । ननुव्यामिश्रोक्तौ

ननुकृतकक्रमविशिष्टवर्णात्मकस्यवेदस्यनानादित्वं । उक्तंहिविष्णुतत्वनिर्णयटीकायां "नहिवयंवेदस्यकूटस्थनित्यतांब्रूम"इति । "क्रमस्यकृतकत्वेपी"तिचेतिचेन्मैवं । तत्वसंख्यानटीकायां "नित्यत्वंनामकूटस्थतयाद्यंतशून्यत्वं । तच्चवेदानां नित्यावेदास्समस्ताश्चेत्यादिप्रमाणसिद्ध"मित्युक्तत्वात् ।

गु० त्पुनःशंकोत्थानमितिद्रष्टव्यं । तत्वसंख्यानतत्वनिर्णयटीकयोर्विरोधंपरिहर्तुंशंकते ॥ **नन्विति** ॥ अत्रक्रमोनामक्रमिकबुद्धिगोचरत्वं । ईश्वरबुद्धेःसर्वविषयसमूहालंबनत्वेपिवेदस्यप्रमापकत्वसिद्धयेऽभिव्यक्तिविशेषणक्रमस्याप्यावश्यकत्वं । वर्णमात्रेप्रयोगप्रत्यययोरभावात् । क्रमस्यचसर्वगतनित्यवर्णेस्वतोदेशतःकालतश्चायोगादितिभावः । अतएवोक्तंतत्वनिर्णयेवर्णादयस्तत्क्रमात्मकोवेदश्चनित्यएवेतिसिद्धमिति ॥ **मैवमिति** ॥ नचतत्वसंख्यानेवेदशब्देनवर्णमात्रग्रहणं । उदाहृतप्रमाणविरोधात् । पौराणवर्णानामप्यविशिष्टत्वेनपृथङ्नित्यानित्यकोटौनिवेशायोगाच्च । पुराणपदेनतद्वाक्यात्मकग्रंथस्यैवोक्तौऋगादिपदवाच्यग्रंथस्यैवप्राधान्येनतदादित्वेनग्रहणस्यैवौचित्याच्च । वाचाविरूपनित्यया । नित्ययानित्ययास्तौमीत्यादिविशेषवाक्यविरोधाच्च । नित्यावर्णाःसमस्तशः तथावेदाःसमस्ताश्चतथाव्याकृतमंबरमितितत्वसंख्यानटीकानियामकवायुपुराणादिप्रमाणविरोधाच्चेतिज्ञेयं । टीकावाक्यत्वाविशेषाद्विरोधशंकायांविष्णुतत्वनिर्णयटीकानुरोधेनतत्वसंख्यानटीकैवकुतोनव्याख्येयेत्यतःप्रमाण

SGDF
Sri Gargeshwari Digital Foundation

प्र० सत्यामपिकथमनादित्वनिर्णयइत्यतआह ॥ **युक्तमिति** ॥ एतत् अनादित्वं । स्वतःक्रमशून्यानांवर्णानांक्रमस्यबुद्धिघटितत्वेपीश्वरबुद्धेरनादिनित्यत्वेनतद्घटितत्वादनादित्वोपपत्तेरितिभावः । तद्बुद्धौतन्मनसि । तट्टीकायांप्रागुक्ततत्वनिर्णयटीकायामित्यर्थः । प्रलयेऽविच्छेदायावश्यवक्तव्यानादिनित्यभगवद्बुद्धिघटितक्रमवत्तामपेक्ष्यक्वचित्कूटस्थनित्यत्वमुक्तं । तादृशस्येतरप्रमाजनकत्वाभावात्तदर्थमुच्चारणघटितस्यैवतस्यवक्तव्यत्वात् उच्चारणस्यचानादिनित्यत्वाभावात्कूटस्थतानेतिक्वचिदुक्तमित्यर्थः । उक्तंचसुधायांवियत्पादे "नियतविशिष्टानुपूर्वीविशिष्टत्वेनार्थावबोधशक्त्याविर्भावोजनि"रिति । आदिपदेनेश्वरोपिगृह्यते । तदुच्चारणघटितस्यापितथात्वात् । अतएवबुद्धिस्थत्वादिति तद्बुद्धावित्येवोक्तं । उक्तंचतर्कतांडवे "आधुनिकाध्यापकेनस्वबुद्धिस्थपूर्वपूर्वदिवसीयक्रमानुसारेणैवोत्तरोत्तरदिवसेष्विव ईश्वरेणापिस्वबुद्धिस्थप्रवाहानादिपूर्वपूर्वकल्पीयक्रमानुसारेणैवोत्तरोत्तरकल्पेष्वपिवेदस्योच्चारितत्वेने"त्यादि । यदिच "ज्ञानंनित्यंक्रियानित्याबलंशक्तिःपरासन"इत्यनुव्याख्यानानुरोधाद्भगवत्क्रियाणामनादिनित्यता तदातद्घटितस्यापिकौटस्थ्यंध्येयं । ननुयदीश्वरबुद्धिघटिततयाक्रमस्यानादित्वंतर्ह्यागतमीश्वराधी

युक्तंचैतत् । क्रमस्यसदेश्वरबुद्धिस्थत्वात् । अतएवोक्तंविष्णुतत्वनिर्णये । सर्वज्ञत्वादीश्वरस्यतद्बुद्धौसर्वदाप्रतीयमानत्वादिति । तट्टीकायांकौटस्थ्यनिषेधस्त्वस्मदादीन्प्रतिप्रमापकत्वोपयुक्तस्यास्मदादिबुद्धिस्थस्यक्रमस्योच्चारणाद्यधीनत्वेनकृतकत्वात् ।

गु० मुक्त्वा युक्तोयुक्तश्चयद्यर्थइत्यनुव्याख्यानोक्तंचन्यायमाह ॥ **युक्तंचैतदिति** ॥ नचेश्वरबुद्धिस्थत्वाविशेषात्पुराणानामप्यपौरुषेयत्वापत्तिः । कल्पभेदेनक्रमव्यत्यासमात्रेणापौरुषेयत्वाभावस्य पुराणानितदर्थानीत्यादौसमर्थितत्वात् । तर्ह्याप्तवाक्यस्याप्रामाण्यमेवप्राप्तमित्यतआह ॥ **तट्टीकायामिति** ॥ ननुसर्गेसर्गेमुनेर्वैतइतिपुराणवाक्योक्तप्रत्यभिज्ञापरामर्शकस्य प्रत्यभिज्ञाविरोधस्योक्तत्वादित्याचार्यवाक्यस्यव्याख्यानावसरे नचसादृश्यादेवतएवेत्युक्तं । तथासत्यपौरुषेयत्वसिद्धेर्दुर्नि

SGDF
Sri Gargeshwari Digital Foundation

प्र०नस्वभावत्वंवेदस्य । नहियोयद्बुद्ध्यधीनःसनतदधीनइतिसंभवति । वर्णानामन्यथाक्रमेणाप्यनुसंधातुंशक्यत्वादित्यतआह ॥ **कृत्वाचिंतयेति** ॥ बुद्धिघटितत्वंविनावेदस्यानादित्वाभावेप्यनादित्वंसिद्धवत्कृत्येशाधीनत्वमाशंक्यतादृशस्यापीशाधीनत्वोक्तौ वेदेफलाभावेपितादृशजीवात्मादेरी

कृत्वाचिंतयावाऽनादित्वोक्तिः । क्रमस्यानन्याधीनत्वात् । इयंच

"नित्यत्वादेवशब्दानांतत्स्वभावःकथंहरेः"इत्यनुव्याख्यानेदर्शिता ।

गु०वारत्वादित्युत्तरटीकायांकथमीश्वरीयक्रमस्यैवकृतकत्वाभ्युपगमइत्यतआह ॥ **कृत्वाचिंतयावेति** ॥ अनादिभूतस्यापीश्वरबुद्धिविषयीभूतवेदक्रमस्योत्पत्त्यंगीकारेपिपुराणादिव्यावृत्तमपौरुषेयत्वमक्षतमित्यभ्युपगमवादेनेत्यर्थः । अतएवोक्तं उपलक्षणंचैतत् । जन्मादिवाक्यगतिकथनविरोधाच्चेत्यपिद्रष्टव्यमिति । तर्हिकृत्वाचिंतापक्षेत्रपूर्वपक्षेऽनादित्वोक्त्ययोगादाकाशाधिकरणादभ्यधिकाशंकोत्थानायोगादेतदधिकरणवैयर्थ्यमित्यतआह ॥ **अनादित्वोक्तिरिति** ॥ कृतकस्यापिपूर्वतनक्रमव्यत्यासेनक्रमांतरस्यकेनाप्यकरणात्तदनधीनत्वं । तावतापिपूर्वपक्षोदयसंभवादितिभावः । एवंचतत्वसंख्यानटीकायानिरवकाशत्वेनतदनुसारेणतत्वनिर्णयटीकायाव्याख्येयत्वान्नतत्वनिर्णयटीकानुसारेणवेदस्यकृतकत्वसिद्धिः । तथाचवेदस्यानादित्वात्तत्स्वभावस्यगानत्राणकर्तृत्वादिरूपस्यप्रवृत्तिनिमित्तस्यनेशाधीनत्वमित्युपपादितं । इदानींतु मास्तुतस्यानादित्वं । नचैवमनादिस्वभावत्वोक्त्यनुत्पत्तिरितिवाच्यं । अनादित्वाभावेप्यनादित्वाभ्युपगमेनकृत्वाचिंतयानादित्वोक्तिसंभवात् । नचकृत्वाचिंतयानादित्वोक्तेःप्रयोजनाभावेनकृत्वाचिंतायाएवानुपपत्तिरितिवाच्यं । अनादिस्वभावनियामकत्वरूपमहागुणसिद्ध्यर्थ्यमनादिस्वभावनिमित्तकशब्दांतरसमन्वयेन्यायःफलिष्यतीतिप्रदर्शनार्थत्वेनतस्यावश्यकत्वात् । यथाकाशाधिकरणेऽवकाशप्रदत्वस्याचेतनस्वभावत्वाभावेपिसिद्धांतेतस्येशतंत्रत्वसमर्थनं स्वभावनियामकत्वरूपमहागुणसिद्ध्यर्थंस्वभावनिमित्तकशब्दांतरसमन्वयेफलिष्यतीतिकृत्वाचिंतया तथेदमपीतिमनसिनिधायवापक्षांतरमाह ॥ **कृत्वाचिंतयावेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० शाधीनत्वंसिध्यतिफलमिति नवैयर्थ्यमितिभावः। अनादित्वोक्तिः बुद्ध्यघटितासादिसाधारणानादित्वोक्तिः। एतेनानुव्याख्यानेनित्यत्वादित्यनेनानादित्वंविवक्षितमित्युक्तंभवति। किंतदुक्तशंकानिरासकमित्यतस्तद्दर्शयन्सिद्धांतयति ॥ **तत्रेति** ॥ वेदोपदेष्टृत्वपातृत्वरूपगानत्राणकर्तृत्वादिरूपगायत्र्यादिशब्दार्थगुणस्वरूपत्वेनचेतोर्पणार्थमेवतादृशशब्दैर्निगद्यमानत्वादित्युपासनारूपप्रयोजनोक्त्येत्यर्थः। द्वितीयशंकापरिहारस्य भाष्यादिदिशोपलंभेपितृतीयायाअस्मिन्सूत्रेऽदर्शनात्स्वयमेवाह ॥ **तस्येति** ॥ त्रिसप्तलोकविवक्षाभेदेनेत्यर्थः। स्पष्टयिष्यतेचैतदग्रइतिभावः ॥ **आकारेति** ॥ देशकालगुणाद्यपरिच्छिन्नत्वेनाकारेणकर्णादिविदूरत्वं अकात्स्न्र्येनदृष्टत्वादिकं। यद्वाकेवलरूपेणकर्णादिविदूरत्वं किंचिदधि

तत्राद्याशंका "चेतोर्पणनिगदा"दितिसूत्रेप्रयोजनोक्त्यापरिहृता। द्वितीयतृतीयेतु "उभयस्मिन्नप्यविरोधा"दित्यनेनपरिहृते। तस्ययथाविवक्षाभेदेनसप्तमीपंचम्यौनविरुद्धेइत्यर्थः। तथाऽऽकारभेदेनकर्णादिविदूरत्वदृष्टत्वादिकेनविरुद्धेइत्यप्यर्थोपपत्तेः।

गु० कृत्वाचिंतयावाऽनादित्वोक्तिरित्येकंवाक्यं। अनादित्वाभावेतथाव्यपदेशेनियामकमाह ॥ **अनन्याधीनत्वादिति** ॥ स्वतंत्रपुरुषापूर्वकत्वादित्यर्थः ॥ **तत्राद्येति** ॥ विष्णौप्रसिद्धनारायणादिशब्दपरित्यागेनान्यत्रप्रसिद्धगायत्र्यादिशब्दप्रयोगेप्रयोजनंवाच्यमित्याद्याशंकेत्यर्थः ॥ **द्वितीयतृतीयेइति** ॥ युक्तमग्निसूक्तस्थज्योतिषो विष्णुत्वं। उपदेशभेदाभावात्। इहतुदिवइतिपंचम्युपदेशस्थस्यज्योतिःश्रुत्याविष्णुत्वेपि दिवीतितद्विरुद्धसप्तम्युपदेशस्थगायत्र्यानविष्णुत्वमितिद्वितीया। अग्निसूक्तस्थज्योतिर्निष्ठकर्णादिविदूरत्वविरुद्धदृष्टत्वाद्युपदेशान्नेदंज्योतिर्विष्णुस्ततश्चगायत्र्यपिनविष्णुरितितृतीयाशंकेति द्वितीयतृतीयेइत्यर्थः। ननूभयस्मिन्नप्यविरोधादित्यनेनद्वितीयशंकानिरासंभवेपिकथंतृतीयशंकानिरासः। त्रिसप्तलोकापेक्षयोभयस्मिन्नविरोधेनतन्निरासासंभवादित्यतआह ॥ **तस्येति** ॥ **चतुर्थीत्विति** ॥ ॥ ३७७ ॥

प्र० ष्ठानाधिष्ठितत्वादिरूपेणदृष्टत्वादिकमित्यर्थः। उक्तंचसुधायां "नचज्योतिषोब्रह्मत्वेदृष्टत्वाद्यनुपपत्तिः। यतस्तदधिष्ठानद्वाराकर्णादिविदूरस्यैवहरेरुपपद्यत"इति ॥ **चतुर्थीति** ॥ गायत्रीवागादिबहुश्रुतिबलेनानुव्याख्यानोक्तेत्यर्थः। "कथंप्रसिद्धबहुलशब्दानामन्यथार्थता। इतिचेत्तद्धरेरेवबाहुल्याच्छ्रुतिलिंगयोः। तादृशत्वाच्चतच्छक्ते"रित्यनुव्याख्याने "तावानस्यमहिमाततोज्यायांश्चे"त्यादिन्यायविवरणेचेत्यर्थः। ननु पूर्वोत्तरपक्षयोश्श्रुतिबाहुल्यसाम्येकथंनिर्णयइत्यतः श्रुतिसाम्येपिलिंगानामाधिक्यान्निर्णयःस्यादितिभावेनश्रुतिलिंगबाहुल्यंदर्शयन्नाह ॥ **अयंभावइति** ॥ **गानेति** ॥ गायतिचत्रायतिचेत्युक्तमित्यर्थः। "सैषाचतुष्पदाषड्विधागायत्री"तिगायत्र्याःप्रागुक्तषड्विधत्वमनूद्यचतुष्पदत्वं व्यपदिश्यतत्रैवपुरुषसूक्तमंत्रस्संवादायोदाहृतः "तावानस्यमहिमाततोज्यायांश्चपुरुषः। पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवी"ति। अत्रोक्तभूतादिपादत्वमित्यर्थः। एतां गायत्रीं। ब्रह्मशब्दस्यजन्मादिसूत्रादौलिंगानांचभाष्यादौविष्णौमुख्यत्वस्यसाधितत्वात्पुरुषशब्दस्यतत्सा

चतुर्थींतु "बाहुल्याच्छ्रुतिलिंगयो"रित्यनुव्याख्याने "ज्यायांश्चपुरुषइत्यादिशब्दसहितलिंगैश्चे"त्यादिन्यायविवरणेच परिहृता। अयंभावः। "अतोज्यायांश्चपुरुषः यद्वैतद्ब्रह्म एतामेवब्रह्मोपनिषद"मित्यादिश्रुतीनां गानत्राणकर्तृत्वं भूतादिपादत्वं एतामेवनातिशीयंतइतिसर्वोत्तमत्वमित्यादिलिंगानांचबाहुल्यादनेकेषामपिशब्दानांप्रसिद्धार्थत्यागः।

गु० एकस्यावह्निश्रुतेरन्यत्रप्रसिद्धिबाधेपीत्यादिनोक्तेत्यर्थः। ज्यायांश्चपुरुषइत्यादिशब्दसन्निहितलिंगैश्चेत्यत्रादिशब्दसंग्राह्यंवदन्नेव सूत्रेभूतादीतिसाक्षाल्लिंगस्योक्तत्वेन न्यायविवरणेऽनुक्तमपिलिंगबाहुल्यंदर्शयन्नेवपुरुषश्रुतेर्निरवकाशत्वंदर्शयति ॥ **अयंभावइति** ॥ **पंचमीत्विति** ॥ स्वाश्रयेतिहेतुगर्भविशेषणं। अत्रगुणादीनां

SGDF
Sri Gargeshwari Digital Foundation

प्र० धयति ॥ पुरुषशब्दोहीति ॥ पुरुषोत्तमेमुख्यइत्यन्वयः । एतेनभाष्यटीकयोर्लिंगस्यनिरवकाशत्वेनसिद्धांतकरणमुपलक्षणमितिसूचितं । सवाअयमितिश्रुतिरष्टमगीताभाष्यटीकायांव्याख्याता ॥ पंचमीत्विति ॥ नित्यत्वादेवेत्यनुव्याख्यानोक्ता । नन्वनादेरन्याधीनत्वंकाप्य नुपलंभादसंभावितमित्यतः "सत्ताप्रधानपुरुषशक्तीनांचप्रतीतयः । प्रवृत्तयश्चतास्सर्वानित्यंनित्यात्मनायतः । तथाऽनित्यतयाऽनित्यंनित्य शक्त्यास्वयेश्वरः । नियामयतिनित्यंचे"तिसांख्याधिकरणानुव्याख्यांहृदिकृत्वाह ॥ अयंभावइति ॥ गुणादीनां परिमाणजात्यादिध र्मार्णां । दृष्टांतविवरणपूर्वंदार्ष्टांतिकंविशदयति ॥ यथेति ॥ अधीनत्वेहेतुस्स्वाश्रयेति । आश्रिते आश्रयाधीनत्वस्यलोकउपलंभात् ॥

पुरुषशब्दोहि "सवाअयंपुरुषःसर्वासुपूर्षुपुरिशयोनैनेनकिंचनानावृत"मित्यत्रसर्वांतर्यामित्वंपुरुष त्वमित्युक्तेः तथा "पुरुषोहवैनारायणः सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपादित्येषह्येवाचिंत्यःपरः परमोहरिःपुरुषःपरःपरमात्माजोब्रह्मनारायणःप्रभु"रित्यादिश्रुतेः । "यथाहिपौरुषेसूक्तेविष्णुरेवा भिधीयते"इत्यादिस्मृतेश्चपुरुषोत्तमेमुख्यइति । पंचमीतु "तादृशत्वात्तुतच्छक्ते"रित्यनुव्याख्याने परिहृता । अयंभावः । अनादीनांगुणादीनांयथागुण्यादितंत्रता । तथानादिश्रुतेरस्तुक्षेमायेश्वर तंत्रता ॥१॥ यथावैशेषिकमतेगगनादिपरिमाणादीनामनादिनित्यानामपिस्वाश्रयगगनाद्यधीनता

गु० गुण्याश्रितत्वात्स्थितौज्ञप्तिविशेषेचगुण्याद्यधीनत्वंविवक्षितमितिज्ञातव्यं । अनादिनोपिभगवदधीनत्वं तत्तद्वादिसिद्धदृष्टांतप्रदर्शनेनोपपाद्य प्रकृतैतावत्त्वंहीत्यादिव

SGDF Sri Gargeshwari Digital Foundation

प्र० अनादेरिति ॥ “जीवोब्रह्मविशुद्धाचिद्भेदस्तस्यास्तयोर्द्वयोः । अविद्यातच्चितोर्योगःषडस्माकमनादय” इत्युक्तेरितिभावः ॥ अज्ञानाद्यधीनतेति ॥ अन्यथातन्निवृत्तावपितन्निवृत्तिर्नस्यादितिभावः ॥ ज्ञानेति ॥ ज्ञानेनदुःखप्रागभावस्योत्तरसमयसंबंधरूपपरिपालनंक्रियतइति तैरुच्यमानत्वादितिभावः । एवंदुरितप्रागभावेपिध्येयं । ननूत्पाद्यत्वातिरेकेणतदधीनत्वस्यान्यस्याभावात्कथमनादेरन्याधीनता । नचानाद्यत्वमेवतदितिवाच्यं । अनादेर्नाशाभावस्यस्वतएवसिद्ध्याऽन्यानपेक्षणात् । नहिमतांतरसिद्धदृष्टांतमात्रेणानुपपन्नोप्यर्थस्सिध्यति । अपि

यथाचाद्वैतिमतेऽनादेरात्माज्ञानसंबंधस्यजीवब्रह्मविभागादेश्चसंबंध्यज्ञानाद्यधीनता । यथावाप्राभाकरमतेदुःखप्रागभावस्यमोक्षस्यज्ञानाधीनता यथावामतांतरेदुरितप्रागभावस्यनिषिद्धाकरणाधीनता । तथागायत्र्यास्तत्पदप्रवृत्तिनिमित्तस्यचोत्पत्त्यभावेपिस्थितौविष्ण्वधीनता । किंचसादेरप्युत्पत्तावन्यापेक्षायामपि तदनंतरंस्थितावनादितोनविशेषः । तत्रचसादिर्नकेवलमुत्पत्तावीशतंत्रःकिंतुस्थितावपीति “प्रकृतैतावत्त्वं हिप्रतिषेधती” त्यत्रवक्ष्यमाणत्वादनादेरुत्पत्त्यभावेनतत्रान्यानपेक्षायामपिस्थितावीशापेक्षाकिंनस्यात् ।

प्र० तुसंभावितमेवेत्यतआह ॥ किंचेति ॥ प्रकृतैतावत्त्वमिति ॥ तृतीयाध्यायेद्वितीयपादे “प्रकृतैतावत्त्वंहिप्रतिषेधति ततोब्रवीतिचभूयः” इत्यत्रजगत्पालनंविष्णोर्युक्तमयुक्तंवेतिसंदेहे विष्णोस्सृष्टिसंहारकर्तृत्वात्सत्यांचसृष्टौयावत्संहारमवस्थितेस्स्वतएवसिद्धेस्संहर्तुस्संहारातिरिक्तस्यैवव्यापारस्यरक्षारूपस्यायोगान्नपालनंयुक्तमितिप्राप्ते “नैतावदेनापरोअन्यदस्त्युक्षासद्यावापृथिवीबिभर्ती” तिश्रुतौनैतावदितिप्रकृतस्य सृष्ट्यादिकर्तृत्वस्यतावन्मात्रत्वंनिषिध्य ततोधिकस्यपालनस्यापीश्वरेवर्णनात्सृष्टिसंहारकर्तुरपिपालकत्वव्यापारोन्योयुक्तइतिसिद्धांतइतिवक्ष्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० माणत्वात् जन्यवस्तुनिस्थितौयथाभगवन्नियततातथात्रापीत्यर्थः । ननुनैतावतान्याधीनतेत्यतआह ॥ दृश्यतेहीति ॥ भृत्यादौराजाद्यधीनतायाःप्रसिद्धत्वादितिभावः । ननुयद्यनाद्यपीशाधीनंतर्हिकदाचित्तद्राहित्यमपिकुर्यात् । घटराहित्यमिव । नचैवं । अतोनतदधीनमित्यतः "शक्तोपिह्यन्यथाकर्तुंस्वेच्छानियमतोहरिः । कारणैर्नियतैरेवकरोतीदंजगत्सदे"तितदनन्यत्वनयानुभाष्यसूचितंसमाधिमाह ॥ किंचेति॥ विष्टिगृहीताईश्वरप्रेरितावाऽनिष्टमप्यकृत्वानैवस्थातुमीशते । नचभगवांस्तथेत्यकर्तुंशक्तोपीत्युक्तं ॥ ईश्वरोहीति ॥ अन्यथेश्वरत्वभंगइतिसूचयति । वक्ष्यतेच "आत्मनिचैवंविचित्राश्चही"त्यत्रयुक्तिपादेविचित्राप्रतिहतशक्तिमत्त्वमितिभावः । तदभावस्संकल्पाभावः । ननुसिद्धायांशक्तौसंकल्पाभावनिमित्तंतदकरणं । सैवकुतस्सिद्धेत्याशंक्याह ॥ नचेति ॥ "स्वभावजीवकर्माणिद्रव्यंकालश्श्रुतिःक्रिया । यत्प्रसादादिमेसंतिनसंतियदुपेक्षये"तितदनन्यत्वनयानुव्याख्यानोक्तश्रुत्यादिविरोधादित्यर्थः । एतेन "तादृशत्वाच्चतच्छक्ते"रित्यस्यनित्यानित्य

दृश्यतेहियोगेन्यापेक्षस्यपराधीनत्ववत्क्षेमेपितदपेक्षस्यतदधीनता । किंच अकर्तुमन्यथाकर्तुंकर्तुंचास्तीश्वरस्ययत् । सामर्थ्यंतेनतत्तंत्रमनाद्यपिचसादिवत् ॥ १ ॥ ईश्वरोहिसर्वत्राप्रतिहतशक्तित्वाद्घटेनेवाव्याकृताकाशादिनापिरहितमतीतादिकालंकर्तुंशक्नोति । संकल्पाभावात्तुतदकरणं । तदभावश्चकार्योन्नेयः । नचशक्त्यभावादेवतदुपपत्तिः । "स्वभावजीवकर्माणि"इत्यादिटीकोदाहृतश्रुत्यादिविरोधादैश्वर्यविरोधाच्च । ॥ ३७९ ॥

गु० क्ष्यमाणन्यायेनापितदुपपादयन् तन्न्यायंप्रकृतेसंगमयति ॥ किंचेति ॥ तत्तद्वादिसिद्धसमयसिद्धंदृष्टांतमुक्त्वालौकिकदृष्टांतमप्याह ॥ दृश्यतेहीति ॥ वस्तुस्व

प्र० स्वभावसर्वविषयकत्वादीश्वरशक्तेरित्यर्थउक्तोभवति । ननुघटादिवदनाद्यप्यस्मदाद्यधीनंकिंनस्यादित्यतआह ॥ तथाचेति ॥ अस्मदादावनीश्वरभावादितिभावः । नन्वाकाशाधिकरणआकाशोपलक्षितसर्वस्वभावस्येशाधीनत्वोक्तेर्गतार्थमेतदित्यतआह ॥ स्वभावेति ॥ साद्यनादिसाधारण्येनेत्यर्थः । नन्वनादिस्वभावस्येशाधीनत्वेकैमुत्यन्यायहततयानाकाशाधिकरणपूर्वपक्षोदयइतिचेन्न । सामान्यतोचेतनस्वभावस्येशाधीनत्वोक्तावेवविशेषविचारावसरात् । आकाशादिपदप्रवृत्तिनिमित्तसद्भावोपपादनेनाकाशादिशब्दमुख्यार्थत्वोपपत्त्यर्थतयातत्सार्थक्यादिति । ननुद्वितीयस्यतृतीयपादे "नवियदश्रुते"रित्यादावाकाशाख्यवियदुत्पत्तिमन्नवेतिसंदेहे "अनादिर्वाऽयमाकाशः अनंतोयमाकाशः

तथाचानादीशेच्छाधीनानादिस्वभावताकथमीशतंत्रताविरोधिनी । स्वभावमात्रस्येशाधीनताऽऽकाशाधिकरणउक्ता । अत्रत्वनादेरपीतिभेदः । पराधीनविशेषावाप्तिलक्षणोत्पत्तिरीशादन्यस्यसर्वस्यापीतिवियत्पादेवक्ष्यते । अत्रतुप्रागसतस्सतासंबंधरूपोत्पत्तिरहितानामपिस्वरूपसत्तेशाधीनेत्युक्तमित्यविरोधः।

प्र० आकाशवत्सर्वगतश्चनित्य"इत्यादिश्रुतिष्वनादित्वश्रवणादुक्तानेकश्रुतिविरोधेनसंभूतवाक्यस्यप्रामाण्यायोगादनुत्पत्तिमदितिप्राप्ते "सइदंसर्वमसृजत आकाशस्संभूत"इत्याद्युत्पत्तिश्रुतिबाहुल्यादनुत्पत्तिश्रुत्यभावाच्चानादित्वश्रुतेश्चिरंतनत्वाद्यभिप्रायेणभाक्तत्वसंभवादुत्पत्तिमद्वियदित्यादिन्यायैः अनादेरपिसर्वस्योत्पत्तेर्वक्ष्यमाणत्वादजन्यत्वांगीकारेणेहपूर्वोत्तरपक्षौतद्विरुद्धावित्यतआह ॥ पराधीनेति ॥ "असंभवस्तुसतोनुपपत्ते"रित्यधिकरणंहृदिकृत्वाह ॥ ईशादिति ॥ प्रागसतस्सत्तेति ॥ न्यायरीत्यैतत् । सिद्धांतेतुकार्यात्मनाऽसतःकारणात्मनासतोघटादेर्यस्सत्तासंबंधः पृथ्वाकारताद्यवस्थाविशेषाप्तिः तद्रूपोत्पत्तिरहितानामित्यर्थः । सत्ता सत्वमित्यर्थः । नतुजातिः । अत्रभाष्यादौप्रयत्ने

SGDF
Sri Gangadhar Digital Foundation

प्र० नानादेरन्याधीनतासमर्थनस्यानौचित्यमाशंक्याभिप्रायोक्त्यानिरस्यति ॥ **यद्यपीति** ॥ **वेदोपदेष्टरीति** ॥ गायतिचत्रायतिचेतिश्रुत्युक्त योगानुगतिसूचनमेतत् ॥ **विष्णावेवेति** ॥ नहितत्जडेऽकर्तरिमुख्यतोयुज्यतइत्येवकारः । ननुनैवंशंक्यं । गायत्रीशब्दस्यछंदसिरूढत्वे नयोगमात्रेणापहारायोगात् । तद्बाधकमहायोगाय "स्वातंत्र्यंतत्रमुख्यंस्या"दित्युक्तदिशेशाधीनत्वोक्तिरित्याशंक्यनिरस्यति ॥ **नचेति** ॥ **श्रुत्युक्तत्वादिति** ॥ "आज्यैःस्तुवत"इत्यादौ "यदाजिमीयुस्तदाज्यानामाज्यत्व"मितिश्रौतयोगेनरूढित्यागस्यदृष्टत्वेनकेवलयोगापेक्षयाश्रौ तयोगस्यबलवत्त्वात् । अन्यथातस्यव्यर्थतापत्तेः । "कंपना"दित्यत्रस्मार्तयोगस्यापिरूढिबाधकतायावक्ष्यमाणत्वाच्चेतिभावः । प्रागुक्तलिंगा

यद्यप्यनादिस्वभावस्येशाधीनतामनुक्त्वापिगायत्रीशब्दप्रवृत्तिनिमित्तस्यगानत्राणकर्तृत्वस्यवेदोपदेष्टरिरक्षके चविष्णावेवसंभवेनतस्यविष्णुपरतावक्तुंशक्या । नचयोगाद्रूढेःप्राबल्याद्रूढिबाधकमहायोगायेशाधीनत्वोक्तिः । गायतिचत्रायतिचेतिश्रुत्युक्तत्वान्निरवकाशविष्णुलिंगानुग्रहाच्चरूढित्यागेनयोगस्यैवग्राह्यत्वात् । भाष्येविष्णौपौराणिकरूढेरुक्तत्वाच्च । तथापियथाव्रीहीनवहंतीत्यत्रद्वितीयाश्रुतिमतंत्रीकृत्यावघातादेर्लिंगा

प्र० नुगृहीतत्वाच्चप्राबल्यंयोगस्येत्याह ॥ **निरवकाशेति** ॥ **पौराणिकेति** ॥ "सर्वछंदोभिधोह्येषसर्ववेदाभिधोह्यसा"वित्यादिनापुराणसिद्ध रूढेरित्यर्थः ॥ **यथेति** ॥ द्वितीयाध्यायाद्यपादे "तानिद्वैधंगुणप्रधानभूतानी"तिचतुर्थेधिकरणेव्रीहीनवहंतीत्यत्रावघातादपूर्वमस्त्युतनेतिसंशये वाक्यसाफल्यायावश्यमपूर्वंकल्प्येभावार्थाधिकरणन्यायेनधात्वर्थादेवकल्पनंन्याय्यमित्यवघातादस्त्यपूर्वं व्रीहयस्तुतदर्थाइतिप्राप्ते अवघातसामर्थ्यपर्यालोचनयातुषविमोकद्वारापुरोडाशनिर्वर्तनरूपदृष्टप्रयोजनलाभेनापूर्वस्यैवाकल्प्यत्वात् दृष्टानुनिष्पादिनोनियमादृष्टस्यस्वीका

SGDF
Sri Gargeshwari Digital Foundation

प्र० रेणवाक्यावैय्यर्थ्याद्व्रीह्यर्थोऽवघातइतिसिद्धांतितं । तत्रयथाव्रीहीनितिशेषित्वबोधिन्यांश्रुतौसत्यामपितदनादरेणसामर्थ्यपर्यालोचनयैवाव घातस्यव्रीहिशेषतोक्तातथात्रापीत्यर्थः । ननुतत्र "सक्तून्जुहोती" त्यादौद्वितीयायाव्यभिचारित्वादनादरणंतस्याइत्यतस्तद्वत्रापिप्रयोजनविशेष लाभायतदनादरणमित्याह ॥ महायोगेनेति ॥ "स्वातंत्र्यंतत्रमुख्यंस्या" दित्युक्तेरितिभावः ॥ असंभवदिति ॥ तेनावकाशाकारादिवर्ण प्रधानादिशब्दवाच्यतासिध्यतीतिभावः । अधिकरणार्थोपसंहारस्तस्मादिति ॥ परमतेसूत्राणामक्रमंमन्वानस्स्वमतेतमाह ॥ सूत्रेति ॥ उपक्रमेति ॥ सौत्रदर्शनशब्देन "गायतिचत्रायतिचे" त्युपक्रमवाक्योक्तगानत्राणकर्तृत्वलिंगोक्तिरित्यर्थः ॥ द्वितीयइति ॥ भूतादिपादे त्यत्र "सैषाचतुष्पदाषड्विधागायत्री" तिगायत्र्याःप्रागुक्तषड्विधत्वमनूद्यचतुष्पदत्वंव्यपदिश्य तत्रैव "तदेतदृचाभ्युक्त" मित्युदाहृतेपुरुषसूक्त स्थेतावानितिमंत्रेभूतादिपादत्वरूपलिंगोक्तिरित्यर्थः । एवंद्वाभ्यांस्वपक्षस्थापनेसति उपदेशभेदादिति तृतीयेदिविदिवइत्युपदेशभेदरूपबाधके

व्रीहिशेषतोक्ताद्वितीये । तथात्रापितद्वत्तत्वमतंत्रीकृत्यछंदोगतस्यप्रवृत्तिनिमित्तस्यविष्णवधीनत्वेनश्रुतेर्विष्णा वेवमहायोगेनपरममुख्यत्वमितिप्रदर्शनार्थं अनादिस्वभावनियामकशक्तिरूपमहागुणसिद्ध्यर्थं विष्णावसंभव दनादिप्रवृत्तिनिमित्तकशब्दसमन्वयार्थंचेशाधीनतोक्ता । तस्माद्विष्णुरेवाधिवेदगतगायत्र्यादिशब्दवाच्यइ ति । सूत्रक्रमस्तुआद्यउपक्रमस्थहेतूक्तिः । द्वितीयेतूपसंहारोदाहृतमंत्रस्थहेतूक्तिः । तृतीयेबाधकोद्धारइति ॥

गु० भावादनादेरपिनियम्यत्वंपूर्वमुक्तं । इदानींनियामकस्वभावाच्चतदुपपत्तिरित्याह ॥ किंचेति ॥ कर्तुमकर्तुमन्यथाकर्तुंचेतिसंबंधः ॥ उपक्रमस्थहेतूक्तिरिति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० शंकिते विवक्षाभेदेनतत्परिहारःक्रियतइत्यर्थः । तदुद्धारप्रकारश्चाग्रेस्पष्टइत्याशयः ॥ **उभाभ्यामिति** ॥ अद्वैतिरामानुजाभ्यामित्यर्थः । तत्रसूत्रार्थविषयवाक्ययोर्दूषणेनैवाधिकरणशरीरंदूषितंमन्वानःप्रथमसूत्रार्थंनिरसितुमनुवदति ॥ **चरणेति** ॥ ननुनपादाभिधानंविमेकर्णे तिवाक्येऽस्तीत्यतोनेदमुदाहरणमितिभावेनाह ॥ **पादेति** ॥ चतुष्पदेति भूतादिसूत्रोक्तपादाभिधानभ्रांतिंनिरसितुंतद्विवृणोति ॥ **तत्रेति** ॥ **लाघवार्थमिति** ॥ चरणेत्युक्त्यपेक्षयापादेत्यस्यलघुत्वात् । श्रुतौपादशब्दस्यैवश्रुतत्वादित्यर्थः । उदाहरणंचायुक्तमित्याह ॥ **किंचास्मद्रीत्येति** ॥ ननुतत्रापि "योयमंतर्हृदय"इतिगुहानिहितत्वंश्रुतमितिचेन्न । ज्योतिःसन्निधानेऽश्रवणादितिवाद्वयोर्गुहानिहितत्वयुक्तत्वेपिसूक्तस्थ

॥ अत्रोभाभ्यामुक्तं चतुस्सूत्र्येकमधिकरणं । चरणाभिधानादित्यस्यचपादाभिधानादित्यर्थः । पादाभिधानंच "अथयदत"इतिछांदोग्यगतमेव । तत्र "तदेतदृचाभ्युक्तं । पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवी"तिपादाभिधानादिति । तत्र लाघवार्थंश्रुत्यनुगमार्थंचपादाभिधानादितिसूत्रंस्यादितिसुधायामेवोक्तं । किंचास्मद्रीत्या "हृदयआहितंय"दितिगुहानिहितत्वयुक्तज्योतिर्वाक्योदाहरणेनानंदमयाधिकरणाक्षेपेणपूर्वपक्षसंभवेतदनाक्षेपेण "अथयदत"इतिवाक्योदाहरणमयुक्तं ।

गु० गायतित्रायतेचेतिवाक्योक्तगानत्राणकर्तृत्वरूपलिंगोक्तिरित्यर्थः ॥ **तत्रलाघवार्थमिति** ॥ चरणशब्दस्यभक्षणगमनाचारपादाद्यनेकार्थोपस्थापकत्वेनपादशब्दवज्झडित्यवयवस्वरूपान्यतरार्थोपस्थापकत्वाभावेनप्रतीतिगौरवपरिहारार्थमित्यर्थः । नतुशब्दतोलाघवार्थं । पर्यायेषुलाघवगौरवचिंतानक्रियतइतिन्यायात् । नन्वथयदतइतिवाक्योदाहरणेपि अस्मिन्नपिवाक्येंतःपुरुषेज्योतिरितिहृदयनिहितत्वगुहानिहितत्वस्योक्तत्वेनानंदमयाधिकरणाक्षेपःसंभवति । अत्रत्यस्यज्योतिषोऽब्रह्मत्वेनतन्निष्ठस्यगुहानिहितत्वस्यान्यनिष्ठत्वापत्त्याऽऽनंदमयोक्तस्यगुहानिहितत्वस्याप्यन्यनिष्ठत्वंस्यादित्यानंदमयोप्यन्यएवस्यादिति । तथाचानुपपन्नमेतदित्यरुचेराह ॥ ३८१ ॥

प्र० स्यचरणयुक्तत्वेनसूत्रानुगुण्यादितिवातात्पर्यात् ॥ **किंचेति** ॥ हिशब्दोयस्मादित्यर्थे । श्लोकंविवृणोति ॥ **पादोस्येति** ॥ **अन्यस्येति** ॥ अन्यस्यसत्त्वेहितत्परत्वेनचरणेत्यस्यनपौनरुक्त्यं नचतदस्तीत्यर्थः ॥ **तस्यचेति** ॥ पादोस्येत्यनेनोक्तस्येत्यर्थः । उक्तदोषपरिहारमाशंकते ॥ **अथेति** ॥ **ब्राह्मणेति** ॥ उपनिषद्वाक्यएवमुक्तौचरणाभिधानादित्यस्यभूतसूत्रेणपौनरुक्त्याभावेप्यनेनतद्वैयर्थ्यंदुर्निरासमित्याह ॥ **चरणाभिधानादित्यनेनेति** ॥ पररीत्याचभूतादिपादत्वसूत्रवैयर्थ्यंद्रढयति ॥ **अपिचत्वत्पक्षइति** ॥ पादशब्दस्यस्वरूपार्थत्वोपगमादिति

किंच पौनरुक्त्यंपरमतेज्योतिर्भूतादिसूत्रयोः । पादोपदेशादन्याहिनैवास्तिचरणाभिधा ॥ १ ॥ पादोस्यसर्वाभूतानीतिपूर्ववाक्यस्थपादाभिधानादन्यस्यज्योतिर्वाक्येपादाभिधानस्याभावात्तस्यचभूतादिसूत्रेणैवोक्तत्वाच्चरणाभिधानादित्यस्यपौनरुक्त्यं । अथ "चरणाभिधाना"दित्यनेन"पादोस्यसर्वाभूतानी"तिमंत्रवाक्यस्थंसर्वभूतानामेकपादत्वममृतस्यत्रिपात्त्वंचोच्यते । "भूतादिपादे"त्यनेनतु "सैषाचतुष्पदे"तिब्राह्मणवाक्यस्थंभूतपृथिवीशरीरहृदयानांपादत्वमुच्यते । ब्राह्मणवाक्येहि "इदंसर्वंभूत"मितिभूतं "येयंपृथिवी"तिपृथिवीं "यदिदमस्मिन्पुरुषेशरीर"मितिशरीरं "यदिदमस्मिन्नंतःपुरुषेहृदय"मितिहृदयंचोक्त्वा "सैषाचतुष्पदाषड्विधागायत्री"तिभूतादीनांचतुर्णांपादत्वंव्यपदिश्यते । ततोनपौनरुक्त्यमितिचेन्न । "चरणाभिधाना"दित्यनेन "पादोस्यसर्वाभूतानित्रिपादस्ये"तिमंत्रस्थपादाभिधानद्वयस्यैवततोधिकार्थस्यब्राह्मणस्थपादाभिधानस्यापिवक्तुंशक्यत्वेनभूतादिसूत्रवैयर्थ्यात् । अपिच

गु० ॥ **किंचेति** ॥ अत्रहिपादशब्देनतदात्मकत्वंविवक्ष्यतेकिंवोपासनार्थंचरणत्वारोपोवा । नाद्यइत्याह ॥ **पादशब्देनेति** ॥ द्वितीयंनिराकरोति ॥

SGDF

प्र० भावः ॥ पादोस्यसर्वाभूतानीत्यसंकुचितसर्वपदेनकृत्स्नतादात्म्यलाभेन भूतपृथिवीशरीरहृदयरूपतदेकदेशचतुष्टयतादात्म्यपरस्यभूतादिसूत्रस्यवैयर्थ्यमेवेत्यर्थः । अभ्युपेत्यमंत्रब्राह्मणयोःपादाभिधानभेदंदूषणद्वयमभ्यधायि । वस्तुतस्तुतस्यभेदएवनास्ति । तथात्वेसंवादित्वेनमंत्रोदाहरणायोगात् । तथाचसुस्थंपौनरुक्त्यमित्याशयेन "सैषाचतुष्पदाषड्विधे"तिब्राह्मणगतस्य "पादोस्ये"तिमंत्रगतस्यचपादाभिधानस्यैक्यंवक्तुं

त्वत्पक्षेहिब्रह्मणस्तत्तत्पादत्वंतत्तदात्मकत्वं । तथाचसर्वात्मकत्वंचरणाभिधानादित्यनेनैवोक्तमितिकिंतदेकदेशभूतभूताद्यात्मकत्वप्रतिपादकेनभूतादिसूत्रेण । किंच चतुष्पदेत्यत्रचतुरशब्दोनभूतादिपरः । पूर्ववाक्येभूतादिवत् "वाग्वैगायत्रीवाग्वाइदंसर्व"मितिवाचः "अस्मिन्हीमेप्राणाःप्रतिष्ठिता"इतिप्राणानांचोक्त्याभूतादीनांषट्त्वेनचतुष्ट्वायोगात् । अतएवश्रुतौषड्विधेत्युक्तं । नचवाच्यंभूतादीनांवाक्प्राणरहितानांचतुर्णांपादत्वं तत्सहितानांतुषण्णांविधात्वमिति । पादशब्देनतदात्मकत्वविवक्षायांवाक्प्राणयोरपितदात्मकत्वाद्विधाषट्कांतर्गतस्यभूतादिचतुष्टयस्यपृथक्कृत्यपादत्वोक्तेर्निष्फलत्वात् । उपासनार्थंब्रह्मणिभूतादीनांचरणत्वारोपश्चेद्गायत्र्याख्यछंदस्येवसस्यादितिगायत्रीब्रह्मेतिसिद्धांतासिद्धिः ।

प्र० पीठमारचयति ॥ किंचेत्यादिनातस्मादित्यंतेन ॥ भूतादीति ॥ भूतपृथिवीशरीरहृदयपरः । कुतइत्यतोवाक्प्राणयोरपिप्रकृतत्वादित्याह ॥ पूर्वेति ॥ षट्त्वेनेति ॥ वाग्भूतपृथिवीशरीरप्राणहृदयानांक्रमेणप्रकृतत्वादित्यर्थः । ननुननिष्फलत्वंब्रह्मणिभूतपृथिवीशरीरहृदयरूपचतुष्टयात्मकत्वोपासनायतदुक्तेरित्यतआह ॥ उपासनार्थमिति ॥ सः आरोपः । असदुपासनायाअविशिष्टत्वादितिभावः । कथंतर्हि

SGDF
Sri Gargeshwari Digital Foundation

प्र० चतुष्पदेत्यस्यसंगतिरित्यतआह ॥ **तस्मादिति** ॥ अनुवादायोगादित्यर्थः । एतेन “प्रागुक्तषड्विधत्वमनूद्यचतुष्पदत्वंव्यपदिश्ये”त्यादिटीकाविवृता ॥ **अन्यथेति** ॥ भूतपृथिव्यादेरेवचतुष्पदत्वोक्तावित्यर्थः । नयुक्तंचभूतादेःपादचतुष्टयत्वकथनमित्याह ॥ **त्रिपादस्येति** ॥ **तदिति** ॥ पादशब्दनिर्दिष्टस्येत्यर्थः ॥ **दिवीति** ॥ द्युस्थस्यदिवःपरस्यचद्युप्रातिपदिकार्थसंबंधितयैकत्वेनप्रत्यभिज्ञायमानत्वस्योपदेशसूत्रेसिद्धांतितत्वादित्यर्थः । ननुभवन्मतेपिभूतानांपादत्वेननिर्देशात्कथंषाड्विध्यं । यदिविधांतर्गतानामपिभूतानांपृथक्कृत्यपादत्वमुच्यतेसममेतन्ममापीत्यतआह ॥ **अस्माकमिति** ॥ “गायत्र्यांसंस्थितोविष्णुस्स्त्रीरूपस्सूर्यसप्रभः । द्वितीयश्चैवमत्स्यादिर्भूतनामाऽवतारगः । तृतीयोवाचिसंस्थस्सस्त्रीरूपोहयशीर्षकः । चतुर्थःपृथिवीसंस्थस्स्त्रीरूपःपीतवर्णकः । जीवस्यांतर्गतोव्याप्यःशरीरमितिनामकः । पंचमस्तद्धृदिस्थस्तुषष्ठोहृदयनामकः । गायत्रीनामकोविष्णुरेवंषड्विधउच्यते”इत्यादिभाष्यात्पादोस्यसर्वाभूतानीतिभूतशब्दितजीवानांचतुष्पादांतर्भावेपि “भूतं

तस्मात्सैषेत्यत्रनपूर्ववाक्यस्थानांभूतादीनांपादत्वमुच्यते । किंतुषाड्विध्यमनूद्यचतुष्पदत्वंविधायतद्विवरणायपादोस्येत्यादिऋगुदाहृता । अन्यथामंत्रब्राह्मणयोर्भिन्नार्थत्वाद्ब्रह्मणोक्ते “तदेतदृचाभ्युक्त”मितिमंत्रसंमतिर्नस्यात् । “त्रिपादस्यामृतंदिवि:पादोस्ये”तिपादशब्दनिर्दिष्टेचतुष्टयेसतितदनिर्दिष्टस्यभूतपृथिव्यादेःपादचतुष्टयत्वायोगाच्च। दिविदिवइतिविरुद्धविभक्तिसहितद्युप्रातिपदिकार्थसंबद्धस्यैक्यं तद्रहितचतुस्संख्यासंबद्धानांतुमंत्रब्राह्मणस्थपादानांभेदइत्यस्यात्यंतायुक्तत्वाच्च । अस्माकंमतेषाड्विध्यंतु “गायत्र्यांसंस्थितोविष्णु”रित्यादिछांदोग्यभाष्याज्ज्ञेयं ।

गु० उपासनार्थमिति॥ **अन्यथेति**॥षाड्विध्यमनूद्यचतुष्पात्त्वविधानइत्यर्थः।भवन्मतेपिषाड्विध्यानुपपत्तिरित्यतआह॥ **अस्माकमिति**॥ उद्देश्यविशेषणत्वादिति॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० यदिदंकिंचे"तिषड्विधांतर्भूतंमत्स्याद्यवताररूपमेवेतिज्ञेयमित्यर्थः । "किंचचतुष्पदे"त्यादिनोक्तमुपसंहरति ॥ **तस्मादिति** ॥ ननुपरमते भूतादीत्यादिपदेनपृथिवीशरीरहृदयानांग्रहणेनतस्यसार्थक्यं । भवन्मतेतुभूतपादव्यपदेशादित्येतावतापादोस्येत्युक्तभूतपादत्वग्रहसंभवादादि पदंव्यर्थमित्यतआह ॥ **अस्माकमिति** ॥ स्यादेवंयदिभूतपादत्वमेवात्रविवक्षितंस्यात् । नचैवं । किंतुभूतशब्दितविश्वपादत्वमिवामृतशब्दि तनारायणवासुदेववैकुंठाख्यस्वरूपत्रयपादत्वमपिविवक्षित्वा चतुष्पदेत्युक्तचतुष्पदत्वस्यवक्तव्यत्वात् भूतंविश्वमादिर्यस्यरूपत्रयस्यतद्भूतादि भूतंस्वरूपत्रयंचेतियावत् तत्पादइतिव्यपदेशोपपत्तेरित्यर्थसंभवान्नवैयर्थ्यमित्यर्थः । ननुमंत्रेभूतानांबहुत्वेनपादबहुत्वापत्त्या भूतानामेकपा दत्वंरूपत्रयस्यत्रिपादत्वमित्यस्यासिद्धिरित्यतआह ॥ **नचात्रेति** ॥ **ग्रहंसंमार्ष्टीत्यत्रेति** ॥ तृतीयेध्याये "एकत्वयुक्तमेकस्यश्रुतिसंयोगा" दित्याद्यपादीयसप्तमाधिकरणे "ग्रहंसंमार्ष्टी"त्युदाहृत्य किमेकस्यसंमार्गः किंवासर्वेषामितिसंदेहे उपादेयगतायाइवोद्देश्यगतायाअपिसं ख्यायाःश्रुतिबलेनविवक्षितत्वादेकस्यैवेतिपूर्वपक्षयित्वा किमेकत्वस्योद्देश्यत्वेनविवक्षोतविधेयत्वेन । आद्येग्रहंसंमार्ष्टि एकंचसंमार्ष्टीतिप्रत्यु द्देश्यंवाक्यपरिसमाप्तेर्वाक्यभेदात् । द्वितीयेपिसंमार्गस्यापिविधेयत्वाद्ग्रहंसंमृज्यात्सचएकइतिवाक्यभेदात् । संमार्गक्रियाकर्मत्वस्यैकत्वस्यच

तस्मान्मांत्रवर्णिकादन्यस्यपादाभिधानस्याभावात्तस्यचचरणाभिधानादित्यनेनैवोक्तत्वात्परमतेभूतादिसूत्रवैयर्थ्यं । अस्माकं पक्षेभूतादीत्यत्रादिशब्दस्तु "अमृतंदिवी"त्युक्तामृताख्यस्वरूपपरः । नचात्रपादमुद्दिश्यविश्वभूतविधिः । येनपादैकत्वमु द्देश्यविशेषणत्वात् "ग्रहंसंमार्ष्टी"त्यत्रग्रहगतैकत्ववदविवक्षितमितिचतुष्पदत्वंनसिध्येत् । किंतुविश्वभूतोद्देशेनपादविधिः । ॥ ३८३ ॥

गु० ननुनोद्देश्यविशेषणत्वमविवक्षायांनिमित्तं अग्नीनादधीतेत्यादौबहुत्वस्योद्देश्यविशेषणत्वेपिविवक्षादर्शनादितिचेन्न । निर्ज्ञातविशेषणत्वादित्यत्रतात्पर्यात् । तदर्थस्तु

प्र० प्रत्ययार्थतयायुगपत्संबंधेनोद्देश्यविशेषणत्वात् । शेषिविभक्तिनिर्दिष्टत्वेनविधेयसंमार्गविशेषणत्वाभावेनैकत्वस्यविवक्षायोगात् । ग्रहैर्यजेते त्युक्तानांसर्वेषांसंमार्गइतिसिद्धांतितं । अत्रयथाग्रहैकत्वमविवक्षितं नतथाप्रकृतइत्यर्थः ॥ **पादानामिति** ॥ सैषाचतुष्पदेत्युक्त्याकेचत्वारः पादाइतिजिज्ञासोत्पादात्तन्निवृत्तयेमंत्रोदाहरणात् "ब्रह्मविदाप्नोतिपर"मित्यत्रकिंतद्ब्रह्मकीदृशंचतद्वेदनंकाचतत्प्राप्तिरितिजिज्ञासानिवृत्त्यर्थं "तदेषाभ्युक्ते"तिमंत्रोदाहरणवदितिभावः ॥ **पशुनेति** ॥ चतुर्थे "तत्रैकत्वमयज्ञांगमर्थस्यगुणभूतत्वा"दित्याद्यपादीयपंचमाधिकरणे "प शुनायजेते"त्युदाहृत्य किमेकत्वमयज्ञांगमविवक्षितंकिंवायज्ञांगंविवक्षितमितिसंदिह्य समानपदश्रुत्यापश्वंगत्वावगमाद्वाक्यलभ्यपदांतरोपात्त यज्ञांगत्वायोगादयज्ञांगमेकत्वमविवक्षितमितिपूर्वपक्षयित्वा एकप्रत्ययोपात्तेनप्रातिपदिकार्थादपिसन्निहितेनप्रधानभूतेनकारकेणावरुद्धमेकत्वं प्रातिपदिकार्थपशुमनादृत्य क्रियांगमवगम्यमानंवाक्यसमार्पितेनक्रियाविशेषणसंबंधं पश्चादरुणैकहायनीन्यायेनपशुनाविशेषणत्वेनार्थात्संब ध्यते । तादर्थ्यंतुयज्ञंप्रत्येवेतिविवक्षितमेकत्वमितिसिद्धांतितं । अत्रयथापशोर्विधेयत्वेनतद्गतमेकत्वंविवक्षितं तथापादैकत्वमपीत्यर्थः । नन्व थापिभूतभिन्नेविष्णौभूतशब्दितविश्वासकत्वायोगेनभूतपादत्वायोगः । नचवाच्यंचैत्रस्यचतुर्भागबलोमैत्रइतिवद्भिन्नमेवविश्वंतत्पादपरिमित

पादानामेवजिज्ञासितत्वात् । अतएवटीकायां "सर्वाणिभूतान्यस्यैकःपाद"इतिपाद विधानंदर्शितं । तथाचपशुनायजेतेत्यत्रपश्वेकत्ववद्विधेयगतत्वात्पादैकत्वंविवक्षितं ।

गु० निर्ज्ञातस्यविशेषणत्वमिति । तथाचबहुत्वेननिश्चितस्यग्रहस्यविशेषणमेकत्वंनविवक्षितमितिभावः ॥ **पादानामेवजिज्ञासितत्वादिति** ॥ विशेषणजिज्ञासाया एवतद्विवक्षाहेतुत्वात्तस्याश्चतन्निश्चयतद्विपरीतनिश्चयान्यतरेणनिरासेविशेषणविवक्षानास्तीत्याशयः । पररीत्यापादशब्दस्यैकार्थत्वेसंभवत्यनेकार्थत्वमन्याय्यमित्याह

SGDF
Sri Gargeshwari Digital Foundation

प्र० सामर्थ्यांशयेनपादतयोच्यते । नतुमुख्यस्वरूपाभिप्रायेणेति । सूत्रेसकृच्छ्रुतस्यश्रुतौचैकत्रश्रुतस्यपादशब्दस्य भूतेष्वमुख्यता अमृतास्वस्वरूपत्रयेचमुख्यतेत्यस्याद्दृष्टचरत्वादित्यतआह ॥ **यथाचेति** ॥ एकादशे "इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादंगानांतंत्रभावःस्या"दितिद्वितीयपादीयद्वितीयाधिकरणेदर्शपूर्णमासयोर्विभज्यपर्वद्वयेप्रयुज्यमानयोःकिमंगानितंत्रमुतावर्तेरन्निति संदिह्यएकफलत्वात्षण्णामपियागानामेकोपक्रमावसानत्वावगमात्सकृदनुष्ठितान्यंगानिसर्वेषामुपकुर्वंतीतिपूर्वपक्षयित्वा षण्णामेकफलत्वेनप्रयोगैक्यावगमेपिवाचनिककालभेदेनप्रयोगभेदो भवति । "पौर्णमास्यांपौर्णमास्यायजेत । अमावास्यायाममावास्ययायजेते"तिवचनाभ्यांहिपौर्णमास्यमावास्याकरणकःफलार्थोव्यापारःप्रत्ययवाच्यः तदंगत्वेनपौर्णमास्यमावास्याकालौविधीयेते । तेनांगानामपितत्रतत्करणफलक्रियांतर्गतानांतत्कालताविहिताभवति । अतःप्रतिक्रममंगान्यावर्तेरन्नितिसिद्धांतितं । अत्रत्यन्यायेनयथासप्तम्यंतःपौर्णमास्यादिशब्दःकालेमुख्यस्तृतीयांतस्तुतत्संबंधिनिगौणः तथाप्रकृतेपीत्यर्थः । एवं "प्रथमयो"रित्यत्रप्रथमाशब्देनप्रथमाद्वितीययोरिवसूत्रेपादशब्देनमुख्यामुख्ययोर्ग्रहइतिज्ञेयं । एवमाद्यतृतीयसूत्रार्थौमतद्वयाभिमतौदूषितौ । यत्तु चेतोर्पणनिगदादितिद्वितीयस्यपरकीयंव्याख्यानंगायत्र्यधिष्ठानेब्रह्मणिछंदोद्वाराचित्तसमाधानाय "गायत्रीवाइदंसर्व"मितिब्राह्मणवाक्येनसर्वात्मकत्वंनिगद्यतइति तत्तुतत्रतत्रब्रह्मणआरोपाधिष्ठानत्वादिनिरासन्यायेननिरस्तं । यदपि तथाहिदर्शनमित्यस्योभ

यथाच "पौर्णमास्यांपौर्णमास्यायजेते"त्यादौसप्तम्यंतःपौर्णमास्यादिशब्दःकालेमुख्यःतृतीयांतस्तुतत्संबंधिनिकर्मण्यमुख्यः । तथा "त्रिपा"दित्यत्रपादशब्दःस्वरूपांशेमुख्यः "पादोस्ये"त्यत्रभिन्नांशेत्वमुख्यइतिनकश्चिद्दोषः ॥ ॥ ३८४ ॥

गु० ॥ यथाचेति ॥ मुख्यार्थानेकत्वंनास्त्येवमुख्यामुख्योभयोर्थत्वंदृष्टत्वान्नविरुद्धमितिभावः । नचोक्तस्थलेतृतीयासप्तम्युक्तकरणाधिकरणत्वयोरिवार्थभेदकल्पकस्य

SGDF Sri Gargeshwari Digital Foundation

प्र० योर्व्याख्यानमन्यत्रापीत्थंदर्शनमिति तन्न। अस्मद्रीत्याविषयवाक्यगतहेतूक्तिपरत्वसंभवेऽन्यथाव्याख्यानायोगादित्यादिदूषणंस्पष्टंमत्वा च
तुर्थसूत्रव्याख्यानंपरमतेतावदनूद्यनिरस्यति ॥ यच्चेति ॥ दिविष्ठत्वमुपेत्यतत्परत्वमुपपाद्येदानींतत्परत्वमुपेत्यतत्स्थत्वमुपपादयति ॥ यथा
वेति ॥ सप्तमीपंचम्यर्थयोराधारत्वावधित्वयोर्द्वयोरपिमुख्यत्वायोगादेकस्यमुख्यत्वेऽन्यस्यामुख्यत्वात् श्रुतौचमुख्यार्थस्यैवग्राह्यत्वाद्वैषम्येणदृ
ष्टांतायोगइतिभावेनयथाश्रुतभाष्यंनिरस्यति ॥ तदपिनेति ॥ भाष्याभिप्रायविवरणमनूद्यनिरस्यति ॥ अत्रेति ॥ यदेति ॥ वृक्षाग्रसं
बंधितादशायामित्यर्थः ॥ उपरितनेति ॥ तद्भागस्याग्रसंबंधित्वादितिभावः ॥ अग्रशब्दोवेति ॥ अग्रावाग्भागेश्येनसंबंधाभावेनाग्रात्प

॥ यच्च "उभयस्मिन्नप्यविरोधा"दित्यस्यपरकीयंव्याख्यानं "यथावृक्षाग्रसंबद्धोपिश्येनोवृक्षाग्रेश्येनोवृक्षाग्रात्प
रत्रश्येनइतिचव्यपदिश्यते । तथादिव्येवसद्ब्रह्मदिवःपरमित्यप्युच्यते । यथावावृक्षाग्रेणासंबद्धोपिश्येनोवृक्षा
ग्रात्परत्रश्येनोवृक्षाग्रेश्येनइतिचोच्यते । एवंदिवःपरमपिब्रह्मदिवीत्यप्युच्यत"इति। तदपिन । यस्यवृक्षाग्रस्य
यंप्रतिमुख्यमाधारत्वमवधित्वंवातस्यैवतंप्रत्येवामुख्यस्यावधित्वस्यवाधारत्वस्यवाविवक्षायां वृक्षाग्रात्परत्रश्ये
नइत्यादिप्रयोगाभावेनदृष्टांतासिद्धेः । अत्रभामत्यामुक्तं । यदाऽऽधारत्वंमुख्यंतदावृक्षाग्रादित्यत्रश्येनशब्दो
वृक्षाग्रलग्नश्येनावयवादुपरितनश्येनावयवावच्छिन्नश्येनावयविलक्षकः । अग्रशब्दोवाग्रादर्वाग्भागलक्षकः ।

गु० प्रकृतेऽभावइतिवाच्यं। अमृतत्वोक्तितएवश्रुत्यर्थाभ्यांविनाशभावाभावयोरर्थभेदकल्पकयोर्लाभादितिभावः। नन्वेवमुक्तरीत्यापरिहारासंभवात्कथमत्रपरिहारइत्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० रतइत्यस्याग्राबाग्भागात्परतइत्यर्थइतिभावः ॥ **यदात्विति** ॥ असंबंधेनाग्रोपरिसंचरणदशायामित्यर्थः ॥ **ज्योतिश्शब्दइति** ॥ द्युसंबंधिज्योतिरवयवादुपरितनावयवावच्छिन्नावयविलक्षकइत्यर्थः ॥ **द्युप्रातिपदिकंवेति** ॥ बाह्यद्युभागातिरिक्तशारीरहार्दद्युभागस्यलक्षकमित्यर्थः । दिविष्ठत्वंमुख्यमुपेत्यलक्षकत्वमुक्तं । दिवःपरत्वस्यमुख्यत्वपक्षआह ॥ **दिवीति** ॥ सामीप्यंलक्षयतीत्यर्थः । ज्योतिश्शब्दस्यलक्षकत्वेदोषमाह ॥ **ज्योतिषइति** ॥ पक्षत्रयसाधारणदोषमाह ॥ **लक्षणेति** ॥ भंग्यंतराभावादेवमाश्रीयतइत्यतआह ॥ **पृथिव्यामिति** ॥

यदात्ववधित्वंमुख्यंतदाग्रइत्यत्रसप्तमीसामीप्यंलक्षयति । एवंदार्ष्टांतिकेपिज्योतिश्शब्दोवादिवइत्यत्रद्युप्रातिपदिकंवादिवीत्यत्रसप्तमीवालाक्षणिकीति । तन्न । ज्योतिषोब्रह्मणोनिरवयवत्वात् । लक्षणादिप्रसंगात् । "पृथिव्यांद्यौर्महामेरु"रित्यादिस्मृतिविरोधाच्च ॥ ॥

केचित्तु सप्तमी अंतर्बहिरधरोर्ध्वभागस्थितिसाधारणी । प्रासादस्यांतरधरभागस्थितइव बहिरूर्ध्वभागावस्थितेपिवस्तुनिप्रासादेवर्ततइतिप्रयोगात् । पंचमीतूपरिस्थित्यसाधारणी ।

प्र० "पृथिव्यांद्यौर्महामेरुराकाशेसूर्यमंडलं । दिवींद्रसदनंचैवतत्परेतुदिवःपरे"इतिछांदोग्यभाष्योदाहृतस्मृत्याद्युशब्दार्थस्याक्षादिशब्दार्थवदनेकत्वेनाधारत्वावधित्वयोर्मुख्ययोरेवसंभवादितिभावः । उक्तदोषाप्रसंगान्मतांतरंपृथगनूद्यनिरस्यति ॥ **केचित्त्विति** ॥ तदेवदर्शयति ॥ **प्रासादस्येति** ॥ अंतर्भागेऽधरभागेस्थितइत्यर्थः । बहिरूर्ध्वभागयोस्स्थितेपीतिध्येयं । किमतोयद्येवमित्यतोसाधारणपंचम्यनुसारेणसाधा

प्र० रणसप्तमीनेया । ततश्चद्वयोर्मुख्यार्थलाभइत्याह ॥ **अतइति** ॥ उक्तमेवविवेचयति ॥ **सप्तमीति** ॥ **अवयविनइति** ॥ अंतर्बहिराद्यवयवविशिष्टस्येत्यर्थः । सप्तम्याअमुख्यार्थत्वंप्रदर्श्यपंचम्यास्तद्दर्शयति ॥ **पंचमीति** ॥ उच्यते मुख्यवृत्त्याकथ्यतइत्यर्थः । एतेनयत्केनचित्प्रलपितं यदतःपरोदिवइतिवाक्येज्योतिश्शिवोवातदन्योवेतिसंदेहे द्युशब्दस्याकाशवाचित्वात्तस्यचदेहबाह्यभूताकाशरूपस्यवांतरिक्षलोकरूपस्यवाविवक्षितत्वेन ततऊर्ध्ववर्तीसूर्योवांतःपुरुषेज्योतिरितिपुरुषांतर्वर्तितयाजाठराग्निर्वेतिप्राप्ते पादोस्यसर्वाभूतानीतिसर्वभूतपादाभिधाना

अतउभाभ्यांस्थानविशेषादुपरिस्थितिरेवविवक्षितेत्युभेअपिमुख्यार्थेएवेत्याहुः । तन्न । उभयत्रापिद्युशब्दस्यैकार्थत्वेद्वयोरपिमुख्यार्थत्वायोगात् । सप्तमीह्याधारत्वे । परंतुतदाधारत्वमधरांतर्भागाभ्यामिवोर्ध्वबहिर्भागाभ्यामप्यवच्छिद्यते । नत्ववयविनोवधित्वेसप्तमी । नहिवृक्षात्परतोभ्रमन्श्येनोवृक्षेस्तीत्युच्यते । पंचमीत्ववधित्वएव । नत्वाधारत्वे । नह्यूर्ध्वभागावच्छिन्नेपिवृक्षेवसन्वृक्षात्परतइत्युच्यते । किंतुवृक्षस्योर्ध्वभागइति ।

प्र० त्तस्यचपरिच्छिन्नगायत्र्यामयोगाच्छिवएवेतिसिद्धांतइति । उपदेशभेदादेर्भामत्युक्तएवपरिहारइति । तदुक्तं "ज्योतिःपूषादिवोभ्रात्सहिभवतिपरोजाठरैक्योपदेशाद्वह्निर्वातन्नशंभुश्श्ररणकथनतस्तत्रहेतोरसिद्धे"रित्यादि । तन्निरस्तं । उदाहरणायोगस्यचरणपदायोगस्यचोक्तत्वात् । उपदेशभेदादिपरिहारस्यभामतीमतोक्तदोषेणैवदुष्टत्वात् । पौनरुक्त्यंपरमतइत्यादिदोषसाम्याच्च । वागादेरपिप्रकृतत्वेनभूतादिचतुष्पात्त्वायोगस्योक्तत्वाच्च । यदत्रोक्तंशिवार्कमणिदीपिकायां "नद्यांघोषइत्युक्त्यनंतरंगंभीरायामितिविशेषणेतादृशनदीसंबंधित्वेननदीशब्दस्तीरपरः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० एवंगायत्रीवाइदंसर्वंभूतमित्युक्त्यनंतरंवाग्वैगायत्रीतिविशेषणेवाग्रूपगायत्र्यासकलंभूतस्यलभ्यतइतिनतस्याःपार्थक्यमिति । तन्न । एवमपिप्राणेनसहपंचपादत्वानिरासात् । किंचैवंसतिषाड्विध्यानुपपत्तिः । वाक्त्वस्यगायत्रीविशेषणत्वात् । यदत्रोक्तं "पृथिव्यांसर्वभूतप्रतिष्ठात्वंसर्वभूतानतिवर्तनीयत्वमितिद्वेविधेशरीरहृदययोर्येप्राणप्रतिष्ठात्वतदनतिवर्तनीयत्वेतयोराश्रयभेदेनचतुष्ट्वेनषाड्विध्योपपत्ति"रित्यादि । तदपिन । भूतादिरूपेणषाड्विध्यसंभवेक्लेशायोगात् । एकस्यैवधर्मस्यधर्मिभेदेनविधांतरत्वेऽतिप्रसंगाच्च । गायत्र्यांसंस्थितोविष्णुरित्यादिस्मृतिविरोधाच्च । किंच । "नारायणपरोज्योतिरात्मानारायणःपरः । विष्णुरेवज्योतिर्विष्णुरेवब्रह्म । अहमग्निरहंहुत"मित्यादिश्रुतिस्मृतिविरोधाच्च । "यदिदंपरितःपूर्णमत्स्यकूर्मादिरूपक"मित्यादिछांदोग्यभाष्योदाहृतव्याख्यानरूपस्मृतिविरोधाच्च । पुरुषसूक्तगतमंत्रोदाहरणविरोधाच्च । यदपिपुरुषसूक्तस्यशिवपरत्वकल्पनं तदपिन । "यज्ञोवैविष्णु"रित्यादिश्रुतिसिद्धयज्ञनामविरोधात् । लक्ष्मीपतित्वालिंगविरोधात् । चंद्रिकोक्तदिशाविष्ण्वेकनिष्ठपुरुषश्रुतिविरोधात् । "तस्माद्विराडजायत"इत्युक्तचतुर्मुखजनकत्वालिंगस्यविष्णावेवप्रसिद्ध्यातद्विरोधाच्च । "तस्मिन्कालेमहाराजरामएवाभिधीयते । यथाहिपौरुषेसूक्तेविष्णुरेवाभिधीयत"इतिस्कांदवचनविरोधाच्चेति । "सुदर्शनाख्यंस्वास्त्रंतुप्रायुङ्क्तदयितंत्रिपा"दितिभागवतविरोधाच्च । कथंतर्ह्युपदेशभेदपरिहारइत्यतआह ॥ **तस्मादिति** ॥ भाष्येऽस्पष्टत्वाल्लोकत्रयविवक्षायां "परतो

तस्मात् "त्रिसप्तलोकापेक्षये"तिभाष्योक्तएवपरिहारःसाधुः । ॥ ३८६ ॥

गु० तआह ॥ **तस्मादिति** ॥ तर्ह्यसाधारण्येनपृथिवीस्थोच्चत्वोक्तिरयुक्तेत्यतआह ॥ **सर्वपृथिवीस्थेति** ॥ सप्तलोकविवक्षायांदिवःपरत्वमुपपादयति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० लक्षयोजनात् । सर्वद्योरितिविज्ञेयंततस्तेदिविसंस्थिताः । दिवःपरश्चभगवान्सप्तलोकविवक्षये” तिछांदोग्यभाष्यानुरोधेनटीकोक्तमाशयंप्रती तानुपपत्तिनिरासेनविशदयति ॥ **भाष्यइति** ॥ अधस्तनानामतलादीनामुपरितनानांमहरादीनांभूस्स्वर्ग्रहणेनगृहीतत्वादितिभावः । “स्व रूपपादाविष्णोस्तुत्रयोहिदिविसंस्थिताः । नारायणोवासुदेवोवैकुंठइतितेत्रयः”इतिस्मृत्यनुरोधेनाह ॥ **नारायणेति** ॥ टीकादावंतरिक्षस्य

भाष्येह्येवमभिप्रेतं । यदाभूर्भुवस्स्वरितिलोकत्रयविवक्षा तदालक्षयोजनोच्छ्रितांत रिक्षलोकादुपरितनस्यसर्वस्यापिद्युत्वाच्छ्वेतद्वीपानंतासनवैकुंठानांचांतरिक्षादुपरित नत्वात्तत्रत्यंनारायणवासुदेववैकुंठाख्यंत्रिपात्संज्ञंरूपत्रयंदिवीत्युच्यते । नच “पृ थिवीस्थेषुसर्वोच्चोलोकोनतासनात्मकः”इत्युक्तत्वादनंतासनस्यनांतरिक्षादुपरितन तेतिशंक्यं । तस्यपृथिवीस्थत्वेपिबहुलक्षयोजनोच्छ्रितत्वेनैकलक्षयोजनोच्छ्रितांत रिक्षादुपरितनत्वोपपत्तेः । सर्वपृथिवीस्थोच्चत्वोक्त्यातुनान्ययोगोव्यावर्त्यते ।

प्र० लक्षयोजनत्वविशेषणत्वोक्तेःकृत्यंवक्तुंचोदयति ॥ **नचेति** ॥ सर्वेषुलोकेषूच्चस्सर्वोच्चः सर्वेषुलोकेष्वित्यतःपृथिवीस्थेष्वितियोजना । “बहु लक्षोच्छ्रितेनित्येविमानेसंस्थितंयत”इतिभाष्योक्तस्मृत्यनुसारेणाह ॥ **बह्विति** ॥ उक्तंचद्वितीयस्कंधतात्पर्येषष्ठे “अनंतासनवैकुंठनारायण पुराणितु । बहुलक्षोच्छ्रितेष्वेपुसवसत्यमृतोहरि”रिति । ननुपृथिवीस्थोच्चत्वोक्त्यानान्योच्चत्वंलभ्यते । अतःकथमेवमित्यतआह ॥ **सर्वेति** ॥

SGDF
Sri Gurgeshwar Digital Foundation

प्र० अन्ययोगः अन्योच्चत्वयोगः ॥ **अयोगइति** ॥ पृथिवीस्थेषुसर्वेषूच्चएवेत्ययोगइत्यर्थः । पक्षांतरंविशदयति ॥ **यदेति** ॥ अधस्तनानामतलवितलसुतलतलातलरसातलमहातलपातालानांभूर्ग्रहणेनग्रहणादितिभावः । सप्तलोकविवक्षामाक्षिप्यसमाधत्ते ॥ **अत्रेति** ॥ **अनंतेति** ॥ अनंतासनश्वेतद्वीपवैकुंठानांमेरुसूर्यमंडलेंद्रसदनेभ्यःपरत्वेनेत्यर्थः । ननुत्रयाणांद्युत्वेनप्रसिद्धस्वर्गादुच्चत्वसिद्ध्यैसप्तलोकविवक्षास्तु । त्रित्वविवक्षायांस्वरादेरंतरिक्षादुपरितनस्यसर्वस्यद्युत्वेनस्वर्गात्परत्वासिद्धेरित्यतोवैकुंठस्यतत्संभवेपिनान्ययोस्तद्युज्यतइत्याह ॥ **स्वर्गेति** ॥ यातुद्वितीयस्कंधतात्पर्येषष्ठे "अनंतासनवैकुंठनारायणपुराणितु । त्रीणिधामानिवैविष्णोस्त्रैलोक्याद्बहिरेवही"तिबाह्यत्वोक्तिः सावैकुंठाशयाअ

किंत्वयोगः । यदातुभूर्भुवस्स्वर्महर्जनस्तपस्सत्यमितिसप्तलोकविवक्षा । तदेंद्रसदनस्यद्युत्वात्तत्परस्यवैकुंठस्यदिवःपरत्वं । "पृथिव्यांद्यौर्महामेरुराकाशेसूर्यमंडलं । दिवींद्रसदनंचैवतत्परेतुदिवःपरे"इतिस्मृतेर्मेरोरपिद्युत्वात्तत्परस्यानंतासनस्यापिदिवःपरता । सूर्यमंडलस्यापिद्युत्वात्तत्परस्यश्वेतद्वीपस्यापिदिवःपरत्वं । अत्रयद्यपिलोकत्रयविवक्षायामप्यनंतासनादीनांमेर्वादिपरत्वेनदिवःपरत्वसिद्धिः । स्वर्गलोकात्परत्वंत्वनंतासनश्वेतद्वीपयोर्नास्ति । "यावानुच्चःस्वर्गलोकस्तावानुच्चतयासच । श्वेतद्वीपोदिविष्ठोत"इत्यादेः । तथापिवैकुंठस्यसर्वद्युपरत्वसिद्धयेसप्तलोकविवक्षोक्तिः ।

गु० **यदात्विति** ॥ तथाप्यनंतासनस्यदिवःपरत्वंकथमित्यतःस्मृत्यनुसारेणतदाह ॥ **पृथिव्यामिति** ॥ श्वेतद्वीपस्यतदुपपादयति ॥ **सूर्यमंडलस्येति** ॥ ननुसप्तलोकविवक्षाकरणमयुक्तं । दिवःपरत्वस्यलोकत्रयविवक्षयापिसंभवादित्यतआह ॥ **अत्रयद्यपीति** ॥ नन्वनंतासनश्वेतद्वीपयोःस्वर्गलोकात्परत्वसिद्ध्यर्थंसप्तलोकविवक्षेत्याह ॥ **स्वर्गलोकादिति** ॥ **यावानिति** ॥ स्वर्गलोकोयावानुच्चः उच्चतयातावान्श्वेतद्वीपोवर्तते । अतःसदिविष्ठइत्यर्थः ॥ **सर्वद्युपरत्वसिद्धयइति** ॥ ॥ ३८७ ॥

प्र० लौकिकत्वाशयावा स्वर्गलोकस्येंद्रसदनादर्वाग्भागविवक्षाशयावा । वस्तुतस्तु "भुवस्स्वर्गश्चकोट्यैवयोजनानांप्रविस्तृतौ"इत्युक्तांतरिक्षस्वर्गलोकयोःकोटियोजनविस्तीर्णत्वेन ततोबाह्यप्रदेशस्थितत्वाच्छ्वेतद्वीपादेः तथाभूम्याद्यनेककोटिविस्तीर्णत्वेनक्षीरसमुद्रादिस्थश्वेतद्वीपादेर्भूलोकस्थत्वेपितमतिक्रम्यानेकलक्षयोजनोच्छ्रितत्वेनततोपिबाह्यत्वमितित्रैलोक्याद्बाह्यत्वंध्येयं । नतुस्वर्गादप्युच्चत्वेनेतिनविरोधः । यद्वासर्वतःपृष्ठेष्वित्यादाविवानंतासनश्वेतद्वीपवैकुंठानांक्रमाद्भूर्भुवस्स्वर्लोकेभ्यउच्चत्वेनत्रिलोकाद्बाह्यत्वमित्यविरोधः । नन्वेवंद्युशब्दस्यानेकार्थत्वेप्येकस्मिन्नेवप्रकरणेनानार्थत्वंनदृष्टचरमित्यतआह ॥ **एवंचेति** ॥ **तदुक्तमिति** ॥ आद्यपादे "हलोनंतरास्संयोग"इतिसूत्रे । वाटपरिक्षेपेवर्ततेयश्शब्द

तदुक्तं "द्यात्मकेभ्यश्चसर्वेभ्योवैकुंठश्चोच्चउच्यत"इति । एवंचयथाचैत्रोग्रामेऽस्तीत्युक्त्वासग्रामाद्बहिरित्युक्ते आद्येप्रयोगेग्रामशब्दोअरण्यादिसहितेवर्तते । द्वितीयेतुवाटपरिक्षेपे । तदुक्तंमहाभाष्ये । "ग्रामशब्दोयंबह्वर्थः । अस्तिवाटपरिक्षेपेवर्तते । तद्यथाग्रामंप्रविष्टइति । अस्तिसारण्यकेसस्थंडिलकेवर्तते । तद्यथाग्रामोलब्ध"इतीति । तथाप्रकृतेपिद्युशब्दोनेकार्थः ।

गु० इंद्रसदनमेरुसूर्यमंडलरूपसर्वद्युपरत्वसिद्धयइत्यर्थः । अन्यथालोकत्रयविविक्षायांमेर्वादेर्द्युत्वस्याविवक्षितत्वात्तत्परत्वंनसिद्ध्येदित्यर्थः । वैकुंठस्यसर्वद्युपरत्वेप्रमाणमाह॥ **तदुक्तमिति** ॥ नन्वेवंद्युशब्दस्यानेकार्थत्वंस्यात् । लोकत्रयविवक्षापक्षेंतरिक्षोपरितनसर्वलोकपरत्वस्य सप्तलोकविवक्षापक्षेमेरुसूर्यमंडलेंद्रसदनपरत्वस्यस्वीकृतत्वादित्यतआह ॥ **एवंचेति** ॥ अस्तिवाटपरिक्षेपेवर्ततइत्यादौयोवाटपरिक्षेपेवर्ततेसएकोग्रामशब्दोस्तीत्यर्थः ॥ **वाग्वैगायत्रीतिश्रुताविति** ॥ गायत्रीशब्द

SGDF Sri Gargeshwari Digital Foundation

प्र० स्सोस्तीत्यादियोजना। ननुनिरर्थकप्रयोगायोगादेकार्थकत्वेवक्तव्येऽर्थांतरकल्पनमन्याय्यमित्यतआह ॥ **अनेकार्थत्वंचेति** ॥ **नायमिति**॥ यत्रानेकार्थकत्वेनमानंतत्रैवायंन्यायः । अत्रतुपौराणिकप्रसिद्धेस्सत्वान्नैवमित्यर्थः । अतएवोक्तंसुधायांवैशेषिकाधिकरणे "यत्रह्येकस्मिन्नर्थे व्यवस्थितेवृथैवार्थांतरांगीकारस्तत्रैवानेकार्थत्वमन्याय्य"मिति । तर्हिसर्वतःपृष्ठेषुविश्वतःपृष्ठेष्वित्यस्यपौनरुक्त्यमित्यतोर्थभेदंटीकोक्तंविशद यति ॥ **सर्वतइति** ॥ **यथासंभवमिति** ॥ पृथिवीलोकादुच्चत्वमनंतासनस्य अंतरिक्षादुच्चत्वंश्वेतद्वीपस्य स्वर्गादुच्चत्वंवैकुंठस्येत्यर्थः ॥

अनेकार्थत्वंचाक्षादिशब्दवद्वृद्धव्यवहारादिनासर्वत्रमुख्यत्वेनवैकत्रमुख्यत्वेप्यन्यत्रामुख्यत्वेनवेति । "अन्याय्यंचानेकार्थ त्व"मितिन्यायस्यनायंविषयः । सर्वतःपृष्ठत्वंचानंतासनादीनांयथासंभवंपृथिव्यादिलोकोच्चत्वं । विश्वतःपृष्ठत्वंचमेरुवैजयं तसत्यलोकरूपचतुर्मुखस्थानादुच्चत्वमितिटीकायामेवोक्तं । इदंच "पृथिव्यांब्रह्मणोमेरुर्जयंतंत्वंतरिक्षगं । तृतीयंसत्यलोके चसदनंत्रिविधंस्मृतं । तेभ्योनंतासनाद्यायत्परतोविश्वतःपर"इत्यादिवाक्यादवगंतव्यं । अत्रयद्यपिवैकुंठस्यस्वर्गलोकात्पर त्वेनैवदिवःपरत्वसिद्धिः । तथापितस्यसर्वतःपृष्ठेष्वित्यनेनैवोक्तत्वाद्दिवःपरइत्यस्यवैयर्थ्यमाभूदितींद्रसदनस्यद्युत्वोक्तिः ।

प्र० **चतुर्मुखस्थानादिति** ॥ क्रमेणानंतासनादीनामितिभावः । अनेनपृष्ठशब्दस्योच्चत्वमर्थइत्युक्तंभवति ॥ **इत्यादिवाक्यादिति** ॥ आदि पदेन "पृथिवीस्थेषुसर्वोच्चोलोकोनंतासनात्मकः । अंतरिक्षात्मकेभ्यश्चश्वेतद्वीपेस्थितोहरिः । द्युात्मकेभ्यश्चसर्वेभ्योवैकुंठश्चोच्चउच्यते"इत्य स्यग्रहणं । टीकोक्तंवैकुंठस्येंद्रसदनात्परत्वमाक्षिप्यसमाधत्ते ॥ **अत्रेति** ॥ एकस्यशब्दस्याक्षादिशब्दवदनेकत्ररूढ्यंगीकारेहिनानार्थत्वंएक

SGDF Sri Gargeshwari Digital Foundation

प्र० त्ररूढस्यैवयोगवृत्त्यार्थांतरस्वीकारेनानेकार्थत्वमतोऽन्याय्यंचानेकार्थत्वमित्यस्यनायंविषयइतिभावेनपक्षांतरमाह ॥ **यद्वेति** ॥ यद्वाछांदोग्यभाष्योक्तमन्यदपिसूत्रारूढंकर्तुमाह ॥ **यद्वेति** ॥ **अविरोधइति** ॥ योगरूढिभ्यांद्युशब्दस्यभिन्नार्थत्वेनद्युस्थत्वदिवःपरत्वविरोधोनेत्यर्थः । त्रिपाच्छब्देननारायणादिरूपत्रयमितिभाष्यादौव्याख्यातं । तत्रपरोक्तमनूद्यनिरस्यति ॥ **यच्चेति** ॥ विश्वादेर्जाग्रदाद्यवस्थावज्जीवत्वंपररीत्योपेत्यप्रकृतप्रमेयंदूषयति ॥ **जाग्रदिति** ॥ श्रुत्या मंडूकश्रुत्या ॥ **हृदिहीति** ॥ द्वितीये "अवस्थितिवैशेष्यादितिचेन्नाभ्युपग

यद्वाचित्प्रकृत्यात्मकत्वेनद्योतमानेस्थानत्रयेसप्तम्यंतोद्युशब्दोयौगिकः । पंचम्यंतस्तुस्वर्गादौरूढइत्यविरोधः । अयमपिसूत्राविरोधशब्दार्थइतिद्रष्टव्यं । अयंचपरिहारः "बहुलक्षोच्छ्रितेनित्येविमानेसंस्थितंयतः । चित्प्रकृत्यात्मनिततोदिवीतिकथितंश्रुता"वितिछांदोग्यभाष्येसूचितः । यच्चोक्तंपरैर्जागरितेहिजीवस्यशरीरबाह्याकाशःस्थानं । स्वप्नेतुतन्मध्याकाशः । सुप्तौतुहृदयाकाशः । तथाचावस्थात्रयविशिष्टोजीवःत्रिपात् । उक्तत्रिविधाकाशंचद्युशब्दार्थइति । तन्न । जाग्रदाद्यवस्थावतोविश्वादिशब्दवाच्यस्य "दक्षिणाक्षिमुखेविश्वोमनस्यंतस्तुतैजस"इत्यादिश्रुत्यास्थानांतरोक्तेः । जागरादौजीवस्यबाह्यादिपदार्थभोगेपि "हृदिह्येषआत्मे"तिश्रुत्याहृदयस्थस्यजीवस्यबाह्याकाशादिस्थानत्वेमानाभावाच्च ।

प्र० माद्धृदिही"तिसूत्रोपात्तषट्प्रश्नश्रुत्येत्यर्थः। यत्तुतृतीये "मुग्धेर्धसंपत्तिःपरिशेषा"दित्यस्यभाष्ये "हृदयस्थात्पराज्जीवोदूरस्थोजाग्रदेष्यति । समीपस्थस्तथास्वप्न"मित्यादिस्मृत्याजीवस्यहृदयादन्यत्राक्ष्यादौस्थितिकथनं तत्तुसन्निधिविशेषाभिप्रायं । यथोक्तमैतरेयभाष्येद्वितीयेध्याये "हृदिस्थमेवहितस्यरूपं । जागरितेप्यक्षादिषुविशेषसन्निहितंभवति । दीपप्रकाशव"दित्यादि । अतएवोक्तंबाह्याकाशादिस्थानत्वेइति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अमृतत्वस्येति ॥ "त्रिपादस्यामृतंदिवी"त्युक्तस्येत्यर्थः । विश्वतःपृष्ठेष्वित्याद्यन्यथास्वयंव्याख्यायतत्रपरोक्तंनिरस्यति ॥ यच्चेति ॥ इतिप्रसंगादिति ॥ तथाचोभयमुभयत्रग्राह्यमित्येकस्यवैयर्थ्यमेवेत्यर्थः । नन्वेवंकथंविश्वशब्दस्यकार्येप्रयोगइत्यतआह ॥ संभवतीति ॥

जीवेऽमृतत्वस्यासंभवाच्च । दिविदिवइतिवाक्ययोरैकार्थ्यस्यसंमतत्वेनदिवइतिवाक्योक्तस्यज्योतिषोपिजीवत्वापत्त्याब्रह्मत्वसिद्धांतहानेश्च । "त्रिपादूर्ध्वउदैत्पुरुष"इत्यादिश्रुतौ "सुदर्शनाख्यंस्वास्त्रंतुप्रायुङ्क्तदयितंत्रिपा"दितिभागवतेभगवत्येवत्रिपाच्छब्दप्रयोगाच्च । यच्चोक्तंपरैर्विश्वतःपृष्ठेष्वित्यत्रविश्वशब्दोसंकुचितवृत्तिरितिदर्शयितुंसर्वतःपृष्ठेष्वित्युक्तमिति । तत्रव्यक्तमेकस्यवैयर्थ्यं । केचित्तु "तथाक्षरात्संभवतीहविश्वमिति"श्रुतौविश्वशब्दः कार्यप्रयुक्तइत्यत्रापितत्परः । सर्वशब्दस्तुपरिशेषात्कारणपरइत्याहुः । तदपिन । "सइदं सर्वमसृजते"त्यादौसर्वशब्दःकार्येप्रयुक्तइतितत्परः । परिशेषाद्विश्वशब्दःकारणपरइतिप्रसंगात् । "संभवतीहविश्व"मित्यत्रचसंभवतिपदसन्निधानेनैवविश्वशब्दःकार्यपरोनतुस्वतः । अन्यथा "विश्वतःपरमान्नित्यं विश्वात्मानंपरायणं"इत्यादावपिकार्यमात्रपरःस्यात् । तस्माच्छ्रुतिसूत्रयोरन्योक्तार्थस्यायुक्तत्वाद्भाष्योक्तएवार्थइति ॥ ॥ टीकाक्षरार्थस्तु ॥

गु० वद्वाक्शब्दस्यसाक्षात्परपक्षसाधकत्वात् पृथिव्यादिशब्दवद्विष्णुलिंगोपेतत्वाभावेनछंदस्त्वेतद्बाधकत्वाभावाच्च समन्वेतव्यशब्दसमकक्षतयोपादानं । अतएवपृथि

प्र० परमां परमश्वासौअश्च तमित्यर्थः । छंदस्सूत्रसिद्धांतटीकायामादिपदेनवाचोग्रहणमित्येतद्दुर्गमत्वात्सुगमयति ॥ आदिपदेनेति ॥ अधिकरणांतरेप्येतन्न्यायस्यानुसंधेयत्वंसूचयतीत्यत्रकर्त्राकांक्षायामादिपदेनेतिप्रकृतंप्राक्तनंविपरिणामेनसंबंधनीयमित्याह ॥ आदिपदमिति ॥ आदिपदेन "यावैसागायत्री इयंवावसा येयंपृथिवी"त्यादेस्संग्रहइत्येतत्तात्पर्यमस्फुटत्वादाह ॥ यावैसेति ॥ शिष्टंस्पष्टीकृतमुपन्यासमुखेनेतिभावः ॥ छ ॥ गायत्र्यधिकरणंसंपूर्णं ॥ ११ ॥

॥ आदिपदेनवाचोग्रहणमिति ॥ वाग्वैगायत्रीतिश्रुतौवाक्शब्दार्थगुणवत्तयोपासनार्थंविष्णुर्वागित्युक्तः । तथाचवाक्त्वमपिनविष्णुत्वबाधकमितिदर्शयितुंभाष्यआदिपदमित्यर्थः ॥ अनुसंधेयत्वं चसूचयतीति ॥ आदिपदमित्यनुषंगः ॥ आदिपदेनयावैसागायत्रीति ॥ यावैसेत्यादिनागायत्र्याःपृथिव्यभेदमुक्त्वा "अस्यांहीदंसर्वंप्रतिष्ठित"मितिपृथिव्याःसर्वाधारत्वमुक्तं । तच्चविष्णोरेव गायत्रीपृथिव्यादिशब्दार्थत्वेयुक्तंनान्यथेत्यर्थः ॥ छ ॥ गायत्र्यधिकरणंसंपूर्णं ॥ ११ ॥

गु० व्यादिशब्दानामप्युपादानमत्रसंभवदप्युल्लंघ्याग्निमादिपदेनकृतमितिज्ञेयं ॥ आदिपदमित्यनुषंगइति ॥ इदंचाधिकरणांतरेप्येतन्न्यायस्यानुसंधेयत्वंचसूचयतीत्येतत्पाठाभिप्रायेण । तेनहिशब्देनैवास्यार्थस्याभिधानादादिपदानुषंगोनर्थकइतिचोद्यंपरिहृतंभवति । चशब्दरहितहिशब्देनेत्येतच्छिरस्कपाठस्यभावबोधउपादानान्नविरोधः । एवंचात्रपाठेचेतोर्पणार्थंहीतिभाष्यगतहिशब्दोनेतिप्रतिज्ञार्थप्रतिचेतोर्पणनिगदादितिसौत्रपंचम्युक्तहेतुत्ववाची । तथाहीतिशब्दस्तुभाष्योदाहृतस्मृतिद्योतकइतिद्रष्टव्यं ॥ आदिपदेनेति ॥ सर्वलोकाभिधोह्येषइतिभाष्योदाहृतस्मृत्यनुरोधेनापिपृथिव्यादेःपृथग्ग्रहणमितिद्रष्टव्यं ॥ छ ॥ गायत्र्यधिकरणंसंपूर्णं ॥ ११ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ ॐप्राणस्तथानुगमात्ॐ ॥ नन्विदमेतदधिकरणभाष्यदिशापूर्वप्राणाधिकरणसंगतंभाति । तदयुक्तमेव । तथात्वेतदानंतर्यस्यैवप्राप्ते रित्यतस्सुधोक्तदिशागायत्र्यधिकरणेनसंगतिलाभादत्रनिवेशइतिभावेनाह ॥ अत्रेति ॥ संगतिरिति ॥ आपवादिकीत्यर्थः । "पूर्वसि द्धांततोयत्रपूर्वपक्षःप्रवर्तते । तत्रापवादिकी"त्यादेः । यद्वापूर्वसिद्धांतोपजीवनादुपजीव्योपजीवकरूपेत्यर्थः । एतेनान्यप्रापकश्रुतिलिंगबा हुल्योपेताश्शब्दाउदाहरणमितिसूचितं । सूत्रस्योपलक्षणार्थत्वादितिध्येयं । एतच्चाग्रेस्पष्टीभविष्यति । भाष्यंतु "मनोवाक्प्राण"इत्यत्र प्राणोविष्णोरन्यश्चेत्तदाप्राक्तनोप्यन्यइतिशंकास्यादिति तस्यविष्णुत्वावधारणार्थत्वात्सफलेयंचिंतेतिप्रयोजनपरंव्याख्येयमितिभावः । यद्य पि "सर्वेवेदा"इतिसर्ववेदप्रतिपाद्यत्वस्याप्यन्यनिष्ठत्वेनशास्त्रयोनित्वमप्यन्यस्येतिशंकासमाधानमपिप्रयोजनंशक्यंवक्तुंभाति तथापितस्यानं दमयाधिकरणानाक्षेपकत्वात्तदाक्षेपायैवमुक्तं । समन्वीयमानप्राणशब्दमुखाक्षेपस्यततोप्यंतरंगत्वाच्चेतिध्येयं । समर्थयिष्यतेचैतत्प्रयोजनं ॥ अत्रेति ॥ ऐतरेयके "ताएताश्शीर्षच्छ्रियश्श्रिताश्चक्षुश्श्रोत्रंमनोवाक्प्राण"इत्यारभ्यबहुस्थलेषुश्रुतःप्राणोविषयइत्यर्थः । आदिपदेनें द्रोजीवश्चग्राह्यः ॥ वाय्वादीति ॥ वक्ष्यमाणवाग्विंद्रजीवप्रापकश्रुतिलिंगानुसारेणेत्यर्थः ॥ विष्णुश्रुतीति ॥ "ब्रह्मेमंपुरुष"मितिब्रह्म

॥ ॐप्राणस्तथानुगमात्ॐ ॥ ॥ अत्रश्रुतिलिंगबाहुल्येनगायत्र्यधिकरणसिद्धांतन्यायेनपूर्वपक्षप्रवृत्तेरनंतरसंगतिः । अत्र प्राणःकिंमुख्यवाय्वादिःकिंवाविष्णुरितिचिंता । तदर्थंकिंवाय्वादिश्रुत्याद्यनुसारेणविष्णुश्रुत्यादिनेयमुतविपरीतमिति ।

गु० ॥ ॐप्राणस्तथानुगमात्ॐ ॥ द्विधागायत्र्यधिकरणेनिरासादिति ॥ एकस्याःवह्निश्रुतेरन्यत्रप्रसिद्धिबाधेपिगायत्रीवाक्पृथिव्याद्यनेकशब्दानामन्यत्रप्रसि

SGDF Sri Gargeshwari Digital Foundation

प्र० शब्दादीत्यर्थः । अत्रफलफलिभावःस्फुटः । ''ननुगतार्थमिदमधिकरणं । सर्वासांप्राणविद्यानां ''अतएवप्राण''इत्यनेनैवभगवद्विषयताया स्समर्थितत्वा''दितिन्यायविवरणटीकांविवरितुमाक्षिपति ॥ **नन्विति** ॥ प्राणशब्दस्यविष्णौतत्रैवमुख्यत्वसाधनादितिभावः । नचवाच्यं तत्र ''तद्वैत्वंप्राण''इत्येतदुदाहरणमत्रतु ''तावाएता''इत्यादीति । उदाहरणभेदेनाधिकरणभेदेऽतिप्रसंगादित्युक्तत्वात् । अथापिनिरसनी यभेदाद्वापूर्वपक्षप्रापकन्यायभेदाद्वाभेदोभविष्यतीत्यतोनिरसनीयभेदंतावदाशंक्यनिरस्यति ॥ **नचेति** ॥ इहाधिकरणे ''जीवमुख्यप्राण लिंगा''दितिसूत्रइत्यर्थः ॥ **निरासकन्यायेति** ॥ अन्यथाऽऽनंदमयाधिकरणादावनेकत्वप्रसंगइतिभावः । अस्तुतर्हिप्रापकभेदाद्भेदइति चेन्न । तच्छ्रुतिमात्रंलिंगमात्रंवात्रह्मश्रुतिलिंगयोरपिभावात् । अथतद्वहुत्वमितिचेत्तत्किंलिंगबाहुल्यमुतश्रुतिबाहुल्यमितिविकल्प्याद्यमाशं

तदर्थंकिंवाय्वादिश्रुत्यादिकंनिरवकाशंविष्णुश्रुत्यादिकंतुसावकाशमुतविपरीतमिति । ननु ''अतएवप्राण''इत्यनेनगतार्थमिदं । नचपूर्वत्रप्राणशब्दोवायुपरोनेत्युक्तं । इहत्विंद्रजीवप रोनेत्युच्यतइतिभेदः । इहसूत्रेमुख्यप्राणपदायोगात् । नचपूर्वत्रवायुपरत्वस्यैवनिरासः । इहत्विंद्रजीववायुपरत्वानामितिभेदः । अस्यबहुविषयस्यतेनागतार्थत्वेप्यनेनतस्याल्पवि षयस्यगतार्थत्वात् । निरासकन्यायभेदंविनानिरसनीयभेदमात्रेणाधिकरणभेदासिद्धेश्च ।

गु० द्विबाधोऽप्युक्तइतिश्रुतिबाहुल्यप्राप्तस्यपूर्वपक्षस्य तत्तच्छब्दवाच्यत्वेनोपासनार्थमित्येकःप्रकारः द्वितीयस्तुततोज्यायांश्चपुरुषः यद्वैतद्ब्रह्म एतामेवब्रह्मोपनिषदंवेदेत्या

SGDF Sri Gargeshwari Digital Foundation

प्र० क्यनिरस्यति ॥ **नचेति** ॥ लिंगैः श्रीपतित्वादिलिंगैः ॥ **लिंगैरिति** ॥ प्राणसंवादादिभिः । सौत्रैकवचनंसमुदायाशयमितिभावः ॥ **श्रुतीति** ॥ ब्रह्मश्रुत्यासर्वदेवोपदेश्यत्वादिलिंगेनचबाधेनेत्यर्थः । द्वितीयमाशंक्यनिरस्यति ॥ **नचेति** ॥ **तद्बाहुल्यप्राप्तस्येति** ॥ "कथं प्रसिद्धबहुलशब्दानामन्यथार्थते"त्युक्तेरितिभावः । ननुतत्रश्रुतिबाहुल्यप्राप्तस्यविष्णुश्रुतिलिंगबाहुल्येननिरासः । "बाहुल्याच्छ्रुतिलिंगयो" रित्यनुव्याख्यानोक्तेरितिचेदिहापिसिद्धांतेश्रुतिलिंगबाहुल्यसत्त्वादितितात्पर्यात् । पूर्ववैषम्यमाशंक्यतौल्यमाह ॥ **नचेति** ॥ सएषइति

नचपूर्वत्रप्रसिद्ध्यवलंबेनश्रुत्यापूर्वपक्षेलिंगैःसिद्धांतः । अत्रतुलिंगैःपूर्वपक्षेश्रुतिलिंगाभ्यांसिद्धांतः । अतएवतत्रपूर्वपक्षेभाष्ये प्रसिद्धेरित्युक्तं । अत्रतुसूत्रेलिंगादित्युक्तमितिवाच्यं । श्रुत्याप्राप्तस्यपूर्वपक्षस्यालिंगमात्रेणबाधितस्यपुनर्विरोधिश्रुतिलिंग बाधेनलिंगैरुज्जीवनासंभवात् । नचश्रुतिबाहुल्यादुज्जीवनं । तद्बाहुल्यप्राप्तस्यापिपूर्वपक्षस्य(द्विधा)गायत्र्यधिकरणेनिरा सात् । नचतत्रगायत्रीवाक्पृथिव्यादिश्रुतयोभिन्नविषयाः । अत्रतुचक्षुःश्रोत्रंमनोवाक्प्राणः । तत्प्राणेप्रपन्नउदतिष्ठत् सएष प्राण"इत्यादावेकैवप्राणश्रुतिरावृत्तेतिवाच्यं । तत्रापि "गायत्रीवाइदंसर्वं वाग्वैगायत्री सैषाषड्विधागायत्री"तिश्रवणात् ।

प्र० "सएषोसुस्सएषप्राणःसएषभू"रितिवाक्यमुपादत्ते । ननुनगायत्र्यधिकरणेश्रुत्यावृत्तिप्रयुक्तपूर्वपक्षस्यनिरासः । आकाशाधिकरणएवतस्य निरासात् । अन्यथापौनरुक्त्यापत्तेः । अतएवप्राग्गायत्रीवाक्पृथिव्यादिश्रुतयएवदर्शिताः । सुधायांच "गायत्रीवाइदंसर्वंवाग्वैगायत्री त्यादयःप्रसिद्धाःबहवश्शब्दाश्श्रूयंते"इत्युक्तं । टीकायांच "वाक्त्वविधानाच्चे"त्युक्तमितिनगायत्र्यधिकरणेनपौनरुक्त्यमित्यतस्तर्ह्याकाशाधि ॥ ३९१ ॥

प्र० करणेनतत्स्यादित्याह ॥ **आकाशेति** ॥ श्रुत्यभ्यासप्राप्तस्यापितत्रैवनिरासान्नतेनेहपूर्वपक्षोदयइतिभावः । ननुतत्रनिरवकाशत्वपरत्वबहुत्व प्रयुक्तप्राबल्यैर्लिंगैर्निरासः । उक्तंच "द्वाभ्यामावृत्तिजातिभ्यामेवहिप्रबलाश्रुतिः । अगतित्वपरत्वानेकत्वैर्लिंगंनतुत्रिभि"रिति । नचेह लिंगानिताद्दशानि । वक्ष्यमाणदिशाबाहुल्यादौसत्यपिपरत्वायोगादितिचेत् बहुत्वेनप्रबलानांलिंगानांजात्याबहुत्वेनचप्रबलवैष्णवश्रुतियुक्तत्वे नसुतरांतद्विरोधित्वात् । यद्वातत्रापिनिरवकाशत्वादिप्रयुक्तप्राबल्यमाश्रित्यैवश्रुत्यावृत्तिप्राप्तस्यनिरासः । परत्वंतुवास्तवमभिप्रेत्यवाऽनुपसं जातविरोधित्वेनवाऽऽकाशश्रुतेःप्राबल्यशंकायांतन्निरासाय "प्रथमेश्रवणा"दितिवक्ष्यमाणन्यायेनपरत्वस्यप्राबल्यहेतुत्वमभिप्रेत्यवेतितात्प

आकाशाधिकरणविषयवाक्यआकाशश्रुतेरेवावृत्तेश्च । नचश्रुतिलिंगबाहुल्यादुज्जीवनं । अतएवानुव्याख्याने "बाहुल्याच्छ्रुतिलिंगयो"रित्युक्तं । इहभाष्येटीकायांचलिंगमात्रोक्तिःपूर्वपक्षोपक्रममात्रमितिवाच्यं । इंद्रे "इंद्रस्यप्रियंधामोपेयाय तमिंद्रउवाच प्राणोवाअहमस्मी"त्यादिश्रुतीनांमहाव्रतयाजित्वादिलिंगानां मुख्यप्रा णेप्राणादिश्रुतीनां "ताअहिंसते"तिप्राणसंवादादिलिंगानां । जीवे "पुरुषरूपेण यएषतपतिसएषपुरुषःसमुद्र"

प्र० र्यात् । अत्रापिकेषांचित्परत्वसंभवाच्चेति । तृतीयमाशंक्यनिरस्यति ॥ **नचेति** ॥ उज्जीवनं पूर्वपक्षस्येत्यनुषंगः । "इंद्रियैस्सहाभिधाना" दितिभाष्येण "एतत्प्राणस्येंद्रियगणेगणितत्वा"दितिटीकयाचैतद्विरुद्धमित्यतआह ॥ **इहेति** ॥ त्वदभिमतश्रुत्यादीनांविष्णौसावकाशत्वा न्नतद्बाहुल्यमपिपूर्वपक्षप्रापकमितिभावेनेंद्रमुख्यजीवश्रुत्यादिबाहुल्यंस्फुटयन्नाह ॥ **इंद्रइत्यादि** ॥ विषयसप्तम्यइमाः ॥ **याजित्वादीति** ॥ "इंद्रोवैवृत्रंहत्वामहानभव"दित्यादिवाक्योक्तमहाव्रतयाजित्वादीनांग्रहः ॥ **प्राणसंवादादीति** ॥ चक्षुरादिसहपाठोत्क्रमणप्रवेशतन्निमि

SGDF Sri Gurgaonkar Digital Foundation

प्र० त्तदेहपातोत्थानादिरादिपदार्थः ॥ **इत्यादीति** ॥ "सएषपुनःपंचविध"इत्यादिरादिपदार्थः ॥ **शतसंवत्सरत्वादीति** ॥ "प्राणोवंश इतिविद्या"दित्युक्तप्राणवंशत्वादिरादिपदार्थः ॥ **विष्णौप्रवृत्तेति** ॥ विष्णौप्रसिद्धब्रह्मशब्दादिश्रुत्यनुसारेणेत्यर्थः । यद्यप्यन्नेतृत्वमितिव क्तव्यं । तथापिश्रुत्यनुवादायैवमुक्तं ॥ **बहुविष्णुश्रुतीति** ॥ ब्रह्मादिश्रुतेरत्रबहुधाऽऽवृत्तत्वादितिभावः ॥ **दृष्टंहीति** ॥ चतुर्थेध्याये "दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषा"दितितुरीयपादीयैकादशेऽधिकरणे दर्शपूर्णमासयोःकिंसर्वेषांयागानांप्राधान्यमुताग्नेयादीनामेवका लयोगिनांप्राधान्यमितरेषांप्रयाजादीनामंगत्वमितिसंदिह्य दर्शपौर्णमासाभ्यामितिनामधेयस्यत्वाख्यातानुसारित्वादाख्यातेनचाविशेषेणसन्नि हितसर्वयागान्परामृश्य "दर्शपौर्णमासाभ्यांस्वर्गकामोयजेते"तिफलेविनियोगात्सर्वेषांप्राधान्यमितिपूर्वपक्षयित्वा अप्रसिद्धार्थस्यनामधेय स्याख्यातपारतंत्र्येपिप्रसिद्धार्थस्यस्वातंत्र्यात् दर्शपूर्णमासाभ्यामित्यस्यचषड्यागानामुत्पत्तौकालयोगाद्विद्वाक्यद्वयेनचत्रिकद्वयसंपादनाच्च प्रकृतिप्रत्ययार्थप्रसिद्ध्याप्रसिद्धार्थत्वादाख्यातस्यैवनामपारतंत्र्यात्षण्णामेवप्राधान्यं समिदादीनांतुतदंगत्वमितिसिद्धांतितं । अत्रयथाप्र

इत्यादिश्रुतीनां "तावंतिशतसंवत्सरस्याह्नांसहस्राणिभवंती"तिशतसंवत्सरत्वादिलिंगानांचबाहुल्येपि इंद्रादिश्रुतेरंत रित्यत्र प्राणश्रुतेश्चातएवप्राणइत्यत्र पुरुषश्रुतेश्चगायत्र्यधिकरणेसावकाशितत्वेन लिंगानांचविष्णौप्रवृत्तप्रबलश्रुत्यनु सारेणांतरधिकरणपूर्वपक्षोक्तानामपांनेतृत्वादिलिंगानामिवविष्णौप्रवर्तनीयत्वेन संभाविताकाशतयाबहुविष्णुश्रुति बाधकत्वायोगात् । दृष्टंहि "दर्शपूर्णमासाभ्यांयजेते"त्यादौयजेःप्रवृत्तदर्शपूर्णमासनामानुसारेणषड्यागमात्रपरत्वं । ॥ ३९२ ॥

गु० दिश्रुतीनां गानत्राणकर्तृत्वं भूतादिपादत्वं एतामेवनातिशीयंतेइतिसर्वोत्तमत्वमित्यादिलिंगानांबाहुल्यादनेकेषामपिशब्दानांप्रसिद्धार्थत्यागः इत्येवंप्रकारद्वयेनगाय

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वाक्यस्थयजेर्विद्वद्वाक्यप्रसिद्धदर्शपौर्णमासनामानुसारेणषड्यागमात्रपरत्वं यथावेंद्रंमित्रमित्यादिश्रुतिप्रसिद्धेंद्रादिश्रुत्यनुसारेणापांनेतारमित्यादिलिंगानांविष्णुनिष्ठत्वं तथा “ब्रह्मशब्दःपरेविष्णा”वित्यादिवाक्यप्रसिद्धब्रह्मशब्दानुसारेणप्राणसंवादादिलिंगानांविष्णौप्रवर्तयितुंशक्यत्वेननतैःपूर्वपक्षोदयइत्यर्थः । प्रवृत्तनामानुरोधेनसंकोचानंगीकारेबाधकमाह ॥ **अन्यथेति** ॥ तत्रैव “प्रकरणशब्दसाम्याच्चोदनानामनंगत्वं”इतिचतुर्थपादीयाद्याधिकरणे अनुमत्यादीनिविदेवनादीनिचयागायागकर्माणिप्रकृत्यश्रुतं “राजाराजसूयेनस्वाराज्यकामोयजेते”तिवाक्यमुदाहृत्य किमनुमत्यादीनांयागानांविदेवनादीनामयागानांचफलसंबंधेनप्राधान्यमुतयागानामेवेतिसंदिह्य राजसूयशब्दस्याप्रसिद्धार्थत्वेपितृतीयांततयाफलसाधनपरत्वावगमात् प्रकृतानांफलापेक्षाणांयागायागरूपाणांकर्मणांनामधेयत्वावगमात् यजेश्चछत्रिन्यायेनतेषामेवपरामर्शकत्वोपपत्तेः सर्वेषांप्राधान्यमितिपूर्वपक्षयित्वा भावार्थाधिकरणन्यायेनधात्वर्थस्यैवफलसंबंधान्नामार्थस्यातथात्वात् यजेश्चयागमात्रवचनात्तत्सामानाधिकरण्येनराजसूयशब्दस्यापितन्नामत्वावगमात्तेषामेवफलसंबंधात्तत्प्राधान्यं । विदेवनादीनांतु “फलवत्सन्निधावफलंतदंग”मितिन्यायेनतदंगत्वमितिसिद्धांतितं । तत्रयथायजेःप्रकृतसर्वयागपरतातथाप्रकृतेपिस्यादित्यर्थः । नन्वस्त्वन्यत्रप्रवृत्तनामानुसारेणसंकोचः । प्रकृतेकिमित्यतआह ॥ **संतिचेति** ॥ ननुविष्णुश्रुत्यज्ञानेनपूर्वपक्षःकिंनस्यादित्यतआह ॥ **नचेति** ॥ ननुब्रह्मश्रुत्यादेर्विष्णौ

अन्यथाराजसूययजेरिवसन्निहितसर्वयागपरतास्यात् । संतिचविष्णौप्रवृत्ताः “ब्रह्मेमंपुरुष”मिति ब्रह्मशब्दाद्याःश्रुतयः । नचेंद्रश्रुत्यादिकंपश्यन्पूर्वपक्षीतत्सन्निहितंविष्णुश्रुत्यादिकंनपश्यतीतियुक्तं ।

गु० त्र्यधिकरणेनिरासादित्यर्थः ॥ **अन्यथेति** ॥ आग्नेयादिषट्केप्रवृत्तदर्शपूर्णमासानुसारेणयजेःषड्यागपरत्वाभावइत्यर्थः । नचास्तुसन्निहितयागपरत्वमितिवाच्यं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रवृत्तत्वमेवाद्याप्यसिद्धं । येनतद्बलादुक्तमयुक्तंस्यादित्यतआह ॥ उक्तंचेति ॥ ननुजन्माधिकरणएवब्रह्मशब्दस्यविष्णौमुख्यत्वमुक्तं । अतएवानंदमयाधिकरणेब्रह्मशब्दंपूर्वपक्षबाधकमाशंक्यसमाधानमुक्तमितिचेत्सत्यं । जन्माधिकरणेस्वग्रंथसमर्थितत्वेपिभाष्यादौतत्रानुक्तेरत्र तूक्तेस्तदभिप्रायेणैवमभिधानात् । एवंन्यायविवरणटीकागताक्षेपांशंप्रपंच्य ''विद्याविशेषेऽधिकाशंकयापुनःप्रत्यवस्थाना''दितिसमाधानांशं विवृण्वन्पूर्वपक्षमुज्जीवयति ॥ मैवमित्यादिना ॥ अपिपदेन स्वरसतःप्रवृत्तिर्नास्त्येव बलादपिप्रवृत्तिर्नोपपद्यतइत्याचष्टे । सूत्रे ''नव क्तुरात्मोपदेशा''दितींद्रस्य ''जीवमुख्यप्राणलिंगा''दितितयोश्चपूर्वपक्षित्वादिंद्रप्रापकंतावदाह ॥ इंद्रइति ॥ उदाहरिष्यमाणन्यायविवरणे ऽन्यलिंगेनश्रुत्युपजीवनस्यसूचितत्वात्तथैवाह ॥ सएवेति ॥ अन्यस्यतत्रयजमानत्वेशस्त्रशंसितारंविश्वामित्रंप्रत्यनेन ''प्राणोवाअह''मि त्युपदेशरूपवरदानायोगादितिभावः । अस्त्वेवंततःकिमित्यतआह ॥ नचेति ॥ पुराणादाविंद्रस्यैवतथात्वप्रसिद्धेरितिभावः । एतेननव क्तुरितिसूत्रपूर्वपक्षांशटीकाविवृता । ''नचास्योपदेशस्यसावकाशत्वंवास्ती''तिटीकावाक्यंविवृण्वन् श्रुतिरपिनिरवकाशेत्याह ॥ नापीति ॥

उक्तंचानंदमयाधिकरणेब्रह्मशब्दस्यविष्णौमुख्यत्वमितिचेन्मैवं । इंद्रादिलिंगादीनांविष्णौप्रवर्तयितुमप्यशक्यत्वेनपूर्व पक्षोदयात् । तथाहि । ''इंद्रोवैवृत्रंहत्वामहानभवत् । यन्महानभवत्तन्महाव्रतमभव''दित्यादौयोवृत्रहंतेंद्रोमहाव्र तयजमानःप्रकृतः । सएव ''तमिंद्रउवाच प्राणोवाअह''मितितत्रापींद्रशब्देनोच्यते । नचवृत्रहंतृत्वमहाव्रतयजमा नत्वादिकंब्रह्मणियुक्तं । नापि ''प्राणोवाअह''मितिप्रसिद्धेंद्रेप्रयुक्तोहंशब्दोविष्णौयुक्तः । नचाहमित्यस्यमयीत्यर्थः । ॥ ३९२ ॥

गु० तथासतिप्रयाजादिसर्वयागपरत्वापत्त्याकरणेतिकर्तव्यताभेदोनस्यात् । ननुचदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । दृष्टांतेह्याग्नेयादियागषट्कप्रसिद्धायादर्शपूर्णमासश्रुतेःसत्त्वे

प्र० विष्णौयोगोहिचतुर्धा । तदभेदेनवा भेदेपिविभक्तिविपरिणामेनमयिप्राणोऽस्तीत्यर्थकथनेनवा मंचस्थपुरुषाभिप्रायेणमंचाःक्रोशंतीतिवत्स्वां तर्याम्यभिप्रायेणलक्षणयावा अंतर्यामिणिमुख्यत्वेनवा । नाद्यः । अंतरधिकरणइंद्राद्यभेदस्यनिरस्तत्वात् । पृथगित्यत्रनिरसिष्यमाणत्वाच्च द्वितीयंनिरस्यति ॥ नचेति ॥ अस्मीत्यस्यास्तीत्यर्थइत्यपिग्राह्यं ॥ विभक्तीति ॥ इंद्रपरत्वेनोपपत्तौव्यत्ययादेरयोगादितिभावः । तृतीयं निरस्यति ॥ अंतर्यामीति ॥ चतुर्थमाशंक्याह ॥ नचेति ॥ ब्रह्मवैदमग्रआसीदितिप्रकृतंब्रह्मतदितिपरामृश्यते । अहंब्रह्मास्मि इत्यवे दित्यर्थः । ''अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा । मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय । विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजग''दित्या

विभक्तिव्यत्ययप्रसंगात् । अंतर्यामिपरत्वेचलक्षणास्यात् । नचाहंशब्दःस्वप्रयोक्रंतर्यामिण्येवमुख्यः । ''तदात्मानमेवावे दहंब्रह्मास्मि''। ''अहंकृत्स्नस्यजगतः''इत्यादावीश्वरप्रयुक्ताहंशब्दस्यामुख्यार्थत्वप्रसंगात् । यथाच ''वत्समालभेते''त्यत्रालं भनंगुणकर्मभूतगोदोहनादिसाहचर्याद्गुणकर्म । तथाप्राणोप्यप्रधानचक्षुरादिसाहचर्यादप्रधानभूतः । नतुप्रधानभूतंब्रह्म ।

प्र० दौभगवत्प्रयुक्ताहंशब्दस्यापितदंतर्यामिबोधकत्वप्रसंगइत्यर्थः । एतेन ''प्राणोवाअहमस्म्यृषइतिश्रुति''रितिसुधावाक्यंचविवृतं । एवमिंद्रप्राप कश्रुतिलिंगयोर्निरवकाशत्वेनेंद्रप्राप्तिमुक्त्वावायुप्राप्तिंदृष्टांतपूर्वमाह ॥ यथाचेत्यादिना ॥ प्राणशब्दस्यविष्णुवायुसाधारणस्यसाहचर्यमा त्रात्कथमवधारणमित्यतउक्तं ॥ यथाचवत्समिति ॥ द्वितीये ''विशयेप्रायदर्शना''दितितृतीयपादीयषष्ठाधिकरणे अग्निहोत्रगोदोहाधिकारे ''वत्समालभेते''तिश्रुतंवाक्यमुदाहृत्यालभेतेतियागविधिरुतसंस्कारविधिरितिविशये ''वायव्यंश्वेतमालभेते''त्यादाविवासत्यपिदेवतासंयोगे प्राणिद्रव्यालंभत्वसामान्याद्यागविधिरितिपूर्वपक्षयित्वा आलंभस्यस्पर्शमात्रत्वात्तस्यचलोकेपिदृष्टत्वेनयागंविनानुपपत्त्यभावाद्गुणकर्मभूतगो

SGDF Sri Gargeshwari Digital Foundation

प्र० दोहप्रायपाठदर्शनाद्वत्ससंस्काराख्यंगुणकर्मैवचोद्यतइतिसिद्धांतितं । तद्वदत्रापिप्राणोविष्णुरन्योवेतिविशये चक्षुरादिप्रायपाठादप्रधानोमुख्यप्राणएवभवेदित्यर्थः । अतएववैयाकरणैस्साहचर्यधर्मग्राहकमितिवदद्भिः ‘‘सर्तिशास्त्यर्तिभ्यश्चे’’त्यत्रपरस्मैपदसाहचर्याच्छास्तेःपरस्मैपदिनएवग्रहणमित्युक्तं । अप्रधानप्रधानपदेहेतुगर्भे । एतेन ‘‘एतत्प्राणस्येंद्रियगणेगणितत्वा’’दितिटीकाविवृता ॥ **चक्षुरादिभिरिति** ॥ ‘‘ताअहिंसंत । अहमुक्थमस्म्यहमुक्थमस्मी’’त्यादिनोक्तइत्यर्थः । एवमिंद्रवायुप्राप्तिमुक्त्वाजीवप्राप्तिंचतल्लिंगप्राबल्योक्त्यावक्ति ॥ **शतसंवत्सरत्वंत्विति** ॥ ‘‘एषइमंलोकमभ्यार्चत्पुरुषरूपेणयएषतपति प्राणोवावतदभ्यार्चत् प्राणोह्येषयएषतपति तंशतंवर्षाण्यभ्यार्चत् तस्मा

चक्षुरादिभिश्चातिनिकृष्टैःसर्वोत्कृष्टस्यब्रह्मणःकलहोप्ययुक्तः । शतसंवत्सरत्वंतुजीवादन्यत्रनयुक्तमेव । यद्यपि ‘‘तावंतिशतसंवत्सरस्याह्नांसहस्राणिभवंती’’त्यत्रशतसंवत्सरत्वंप्राणनिष्ठंनभाति । बृहतीसहस्रवर्णानांशतसंवत्सरस्याह्नांचषट्त्रिंशत्सहस्रत्वेनसंख्यासाम्यस्यैवोक्तेः । तथापि ‘‘तंशतंवर्षाण्यभ्यार्च’’दित्यत्र ‘‘प्राणोवावतदभ्यार्च’’दितिप्रकृतस्यप्राणस्यान्वयात्तावंतीत्यत्रापितस्यैवान्वयः । अतएवटीकायां ‘‘प्राणोवावतदभ्यार्च’’दित्यादिपूर्ववाक्यंपठितं ।

प्र० च्छतंवर्षाणिपुरुषायुषोभवंती’’तिवाक्योक्तंशतायुष्ट्वं ‘‘शतायुःपुरुष’’इत्यादिश्रुतेर्जीवएवयुक्तमित्यर्थः । अत्रभाष्येतावंतीतिवाक्योक्तावपिटीकायांपूर्ववाक्यमुक्त्वा ‘‘प्राणस्योक्तशतायुष्ट्वस्योपर्यपितावंतीत्यादिनाबहुस्थलेष्वनुसंधानादित्युक्तं । तदभिप्रायंशंकापूर्वंव्यनक्ति ॥ **यद्यपीति** ॥ ‘‘तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंति तावंतिशतसंवत्सरस्याह्नांसहस्राणिभवंती’’त्यत्रप्राणश्रुतेरभावेनप्राणगततयाऽप्रतीतेःकथंप्राणशब्दस्यजीवार्थकत्वंस्यादितिभावः । वर्णानां स्वरव्यंजनरूपाणां ॥ **तस्यैवान्वयइति** ॥ तथाचप्रा

SGDF
Sri Gargeshwari Digital Foundation

प्र० णस्ययच्छतसंवत्सरंतस्याह्वामित्यर्थइतिभावः। अतएवप्रकृतस्यतत्रान्वयादेवेत्यर्थः । ननूक्तमत्राग्नेतृत्वादिवह्लिंगानिसावकाशानीति तत्राह ॥ **नचेति** ॥ यदिजीवधर्माणामंतर्यामिगतत्वमुच्यते तर्हिदुःखाज्ञानसमवायादिरूपस्सर्वोपिसंसारस्तत्रैवस्यात् । तथाचजीववदल्पशक्तित्वापत्त्यांतर्यामित्वमपितस्यनस्यादित्यर्थः । कथंतर्ह्यग्नेतृत्वंसावकाशितमित्यतोत्रत्यन्यायेनैवेत्याह ॥ **अपामिति** ॥ "तदधीनत्वादर्थव" दितिन्यायविषयत्वमाशंक्याह ॥ **नचेति** ॥ **गौणमिति** ॥ स्वावरापेक्षयापूर्णत्वाद्ब्रह्मादिशब्दवत्त्वमित्यर्थः । नन्विंद्रादिषुनिर्धारितएकएवप्राणइतिपूर्वःपक्षोऽनिर्धारितोयःकश्चिदितिवासर्वेपीतिवा । नाद्यः । अनेकप्रापकसत्त्वेननिर्धारणायोगात् । नद्वितीयः । निर्धारणाभावेपूर्वपक्षस्यसंदेहादविशेषापातात् । नतृतीयः । वाक्यभेदेनासंभवादितिचेदत्राहुः । प्राणादिप्रापकलिंगापेक्षयेंद्रप्रापकश्रुतिलिंगानांप्राब

नचतदंतर्यामिणिलिंगानांसावकाशता । दुःखित्वादेरपिप्रसंगात् । अपांनेतृत्वादिलिंगानामप्यंतर्यामिगततात्रत्यसिद्धांताधीना। नचस्वातंत्र्यादेवेश्वरेप्राणशब्दः। सतिविरोधिश्रुत्यादौतदयोगात् । नहिदरिद्रोभृत्योजयीत्यत्रराज्ञिजयिशब्दः। तदेतदभिप्रेत्योक्तंटीकायां "नचैतल्लिंगंविष्णाववकाशंलभत" इति । अन्विष्याप्यवकाशंनलभतइत्यर्थः । अन्यथानचैतल्लिंगंसावकाशमित्येवावक्ष्यत् । विष्णुश्रुत्यादिकंत्विंद्रादौगौणं ।

गु० नतदनुसारेणयजेःषड्यागमात्रपरत्ववत् प्रकृतेविष्णौप्रवृत्तप्रबलश्रुत्यभावेनतदनुसारेणलिंगानांविष्णुपरतायाअसंभवादित्यतआह ॥ **उक्तंचेति** ॥ **अपांनेतृत्वादिलिंगानामपीति** ॥ तथाचांतर्यामिपरन्यायस्यतत्राव्युत्पादनान्नतेनास्यगतार्थतेतिभावः ॥ **कामिनियोज्येति** ॥ कामीचासौनियोज्यश्चेतिकर्मधारयः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्योपपत्तेः । इंद्रस्यहस्ताधिष्ठातुरिंद्रियत्वेनेंद्रियगणेगणितत्वस्यतैस्सहकलहस्यचोपपत्तेः । अतएवैतल्लिंगस्यत्रितयसाधारण्यमुक्तंसुधायां । शतायुष्ट्वस्यापितथैवकथंचिद्योज्यत्वादिंद्रएवेत्यवधारणोपपत्तेः । मुख्यएववास्तु । मुख्यप्राणलिंगानामुपक्रमेप्राणोवंशइत्यंतेचश्रवणेनबलवत्त्वात् । प्राणश्रुतेश्चमुख्येलोकतःप्रसिद्धायाबहुधाश्रवणेनतद्बलेनेंद्रादिप्रापकाणांमुख्येकथंचिन्नेयत्वात् । जीवएववास्तु । शतायुष्ट्वस्यचात्राभ्यस्यमानत्वेनबलवत्त्वात् । इंद्रियजन्यफलाश्रयेतत्सहपाठादेरपिसंभवादिंद्रश्रुत्यादेःकथंचिन्नेयत्वादिति । द्वितीयपक्षोपियुक्तएव । अन्यप्रापकाणामुक्तदिशाबलवत्त्वनिश्चयेनविष्णोरन्यत्वेनावधारणोपपत्तेः । विशिष्यावधारणस्यव्यर्थत्वात् । अतएवटीकायां "विष्णुरन्योवे"तिसंशयोदर्शितः । "तेषामन्यतमस्ये"त्यप्युक्तं । तृतीयोवास्तु । त्रयाणांप्रापकसद्भावेनसर्वत्रमुख्यतयात्रितयपरत्वंवा आद्यंतयोर्लिंगदर्शनेनमुख्यस्यैवेदंमहाप्रकरणं । तन्मध्ये "एषइमंलोक"मित्यारभ्यजीवावांतरप्रकरणं तन्मध्येविश्वामित्रमित्यादींद्रप्रकरणमितिवा कस्यचिन्मुख्यप्राणपरत्वं कस्यचिज्जीवपरत्वं कस्यचिदिंद्रपरत्वमितिविभागेनवा त्रितयपरत्वोपपत्तेः । नचार्थैकत्वादेकंवाक्यमित्यादेर्नानार्थकत्वेवाक्यभेददोषः । न्यायप्राप्तत्वेनसह्यत्वात् । उक्तंचसुधायां "नचवाक्यभेदोदोषः । अनन्यगतिकतयाप्राप्तत्वा"दिति । अत्रोक्तपक्षत्रयेतृतीयएवाभिमतइतिभाति । सूत्रेत्रयस्यापिपूर्वपक्षित्वात् । टीकादौत्रितयप्रापकस्यापिनिरवकाशत्वोक्तेः । वाक्यभेदांगीकाराच्चेति । ननुतर्ह्यनेकप्रापकसत्त्वात्सर्वानुग्रहार्थमिंद्रादीनांविष्ण्वभेदमेवाशंक्यसमाधानंकुतोनक्रियते । वाक्यभेददोषस्याप्यभावादितिचेन्न । भेदस्यासूत्रितत्वात् । अंतरधिकरणएवेंद्रादिदेवतैक्यस्यनिरासात् । उक्तरीत्याऽन्यप्रापकाणांबलवत्त्वात् । विष्णुप्रापकाणांतदभावाभिमानात् । तौल्याभावेनाभेदकल्पकोभयान्यथानुपपत्तेरभावाच्चेति । एवंपूर्वपक्षोत्थानंनिरवकाशप्रापकोक्त्यासमर्थ्येदानींयद्भाष्यकारोक्तं अयंप्राणोऽन्यश्चेत्तद्वैत्वंप्राण

॥ ३९५ ॥

प्र० इत्युक्तोप्यन्यःस्यादितिपूर्वोक्ताक्षेपः पूर्वपक्षेफलं सिद्धांतेचतत्समाधानमिति तत्रपूर्वपक्षेप्रयोजनोक्तिंसमर्थयितुमाक्षिपति ॥ **नन्विति** ॥ ननुयथाऽऽकाशइतिहोवाचेत्यत्राकाशस्यभूतत्वेयदेषआकाशइतिनिर्णीतब्रह्मप्रकरणगतस्याप्याकाशस्यान्यत्वंपूर्वपक्षफलं तथात्रकिंनस्यादित्यत आह ॥ **आकाशेति** ॥ **यइति** ॥ निरवकाशश्रुतिलिंगबाहुल्यरूपः ॥ **तत्रत्येति** ॥ निरवकाशश्रीपतित्वादिलिंगेनेत्यर्थः । "एकत्रनिर्णीतश्शास्त्रार्थस्सर्वत्रे"तिन्यायादत्रत्यस्यान्यत्वेऽन्यत्रापितथाभवितव्यमित्येतत्सदृष्टांतमाह ॥ **यथेति** ॥ स्वर्गकामोयजेतेत्यादौस्वर्गकामंनियोज्यंप्रतिक्रिया लिङादिशब्देनकार्यतयाबोधयितुमशक्या । कामीहिकाम्यादन्यत्काम्याव्यवहितसाधनमेवकार्यतयावैति । नतुव्यव

नन्वथापि "प्राचीनोप्यन्य"इतिप्रयोजनोक्तिरयुक्ता । आकाशाधिकरणेपूर्वपक्षबीजभूतायाभूतेप्रसिद्धेर्वाक्यद्वयेपितुल्यतया. "आकाश"इतिवाक्येभूतपरत्वे "यदेष"इतिवाक्येपितत्परत्वमितिप्रयोजनसंभवेपि अत्रप्राचीनपूर्वपक्षादत्रत्यपूर्वपक्षेप्राणस्याविष्णुत्वेयोविशेषहेतुस्तदभावादेवप्राचीनप्राणस्यतत्रत्यसिद्धांतन्यायेनविष्णुत्वोपपत्तेरितिचेन्मैवं । यथाप्राभाकरमतेकामिनियोज्यान्वयबलाल्लिङादेःस्थायिकार्यार्थत्वेनिश्चितेतदन्वयशून्येपिनित्याधिकारेतदर्थता ।

प्र० हितसाधनं । क्रियाचस्थायित्वेनकाम्यव्यवहितत्वान्नकामिनियोज्यान्वययोग्या । तृप्तिकामस्यव्यवहितसाधनेपाकेकार्यताधीस्तुनतृप्तिकामितया । किंतुतृप्तिसाधनौदनकामितयैव । अन्यथासिद्धान्नस्यापितृप्तिकामस्यव्यवहितसाधनेपाकेकार्यताधीस्स्यात् । अतःफलपर्यंतस्थाय्यपूर्वमेवलिङाकार्यत्वेनबोध्यमित्यपूर्वेलिङ्वाच्यमिति कामाधिकारेनियोज्यान्वयसामर्थ्याल्लिङादेस्स्थाय्यपूर्वशब्दितकार्यार्थत्वेनिश्चिते "अहरहस्संध्यामुपासीते" त्यादौनित्येकर्मणिकामाश्रवणेननियोज्यान्वयशून्येप्येकत्रनिर्णीतश्शास्त्रार्थःपरत्रेति तत्रापितथैवांगीकृतं । तद्वदित्यर्थः ॥

SGDF Sri Gurgaon Digital Foundation

प्र० यथावेति ॥ मतांतरे भट्टादिमते । यववराहाधिकरणमुक्तंजन्माधिकरणे । “यवमयश्चरुर्भवती”त्यादौ “यत्रान्याओषधयोम्लायंते एते मोदमानाइवोत्तिष्ठंती”तिवाक्यशेषाद्दीर्घशूकाद्यर्थत्वेनिश्चिते “यवान्पच । यवैर्यजेते”त्यादौयथातदर्थत्वंतद्वदित्यर्थः । नन्वेकत्रनिर्णीतइत्यस्यानुसरणेपिनप्रयोजनोक्तिर्युज्यते । ऐतरेयकेयथावाय्वादित्रितयप्रापकसत्त्वेनत्रितयपरत्वमुच्यते तथाविष्णुलिंगादेरपिसत्त्वेनतत्परत्वस्यापिसंभवात् । तत्रांतर्नयेऽभेदनिरसनेनविष्णोरिंद्रादिनैक्यायोगेपिचतुर्थपादीयोदाहरणेषु “अव्यक्तात्पुरुषःपर”इत्यादिषुमुख्यतोविष्णुपरत्वममुख्यतोऽन्यपरत्वमंगीकृतं । अन्यथातारतम्याद्यसिद्धेः । तद्वदत्रापिमुख्यतोविष्णुपरत्वेप्यमुख्यवृत्त्येंद्रादिपरत्वांगीकारमात्रेणापींद्रादिलिंगाद्युपपत्तेःप्राक्तनस्यापिमुख्यतोविष्णुपरत्वस्यवा इंद्रादिलिंगानांबलवत्त्वेनात्रमुख्यतइंद्रादिपरत्वेप्यमुख्यवृत्त्याविष्णुपरत्वेनपूर्वतनस्याप्यमुख्यतोविष्णुपरत्वस्यवा विष्णुतदन्यप्रापकसत्त्वाविशेषेणमुख्यवृत्त्योभयपरत्वस्यात्रैतरेयकेसंभवेनप्राचीनस्यापिमुख्यतउभयपरत्वस्यवा ऐतरेयगतस्यप्राणस्यमुख्यवृत्त्येंद्रादिपरत्वेपितैत्तिरीयगतस्यमासाग्निहोत्रेऽग्निहोत्रशब्दस्येवगौण्यावृत्त्याविष्णुपरत्वस्यवा पूर्वत्रश्रीपतित्वादिविष्णुलिंगेनविष्ण्वर्थत्वस्यनिश्चितत्वेनात्रापितदर्थत्वापत्त्यावैपरीत्यस्यैववा संभवेनपंचधाविष्णुपरत्वाक्षेपायोगादित्याशंक्याद्यंतावन्निरस्यति ॥

यथावा मतांतरेवाक्यशेषेणक्वचिद्यवादिशब्दानांदीर्घशूकाद्यर्थत्वेनिश्चितेऽन्यत्रापितदर्थता। तथात्रेंद्रादिलिंगात्प्राणशब्दस्येंद्राद्यर्थत्वेनिर्णीते “तद्वैत्वंप्राणइत्यत्रापितदर्थत्वात्।

गु० मतांतरे भट्टमतइत्यर्थः। विष्णौमुख्यत्वंबाधकमितिवदन्प्रष्टव्यः। इंद्रादौप्राणशब्दस्यलाक्षणिकत्वेनयोगरूढ्योरभावाद्ब्रह्मणिचरूढियोगयोःसत्त्वान्नतत्रमुख्यत्वमि

SGDF Sri Gargeshwari Digital Foundation

प्र० नचात्रेति ॥ ऐतरेयकइत्यर्थः ॥ **बाधकाभावादिति** ॥ ''अव्यक्तात्पुरुषःपर''इत्यादावन्यस्यमुख्यत्वेबाधकंवक्ष्यतइतिभावः । ननुप्रागुक्तरीत्याप्राणशब्दस्यविष्णौमुख्यत्वंवा इंद्रादौयोगरूढ्योरसत्त्वंवा विष्णौप्रयोगबाहुल्यलब्धविद्वद्रूढिमहायोगसत्त्वंवा बाधकमित्याशंक्य क्रमेणनिरस्यति ॥ **नचेति** ॥ **अद्यापीति** ॥ प्रागुक्तस्यापीहाक्षेपादितिभावः ॥ **योगेति** ॥ प्रणेतृत्वादेःखंडितैश्वर्ययुतेपिसत्त्वादितिभावः ॥ **सर्वत्रेति** ॥ ''प्राणस्यप्राणः प्राणएवाकरण''इत्यादौ ॥ **तद्व्याप्येति** ॥ विद्वद्रूढिर्वैदिकास्यात्सायोगादेवलभ्यत''इत्युक्तेरितिभावः । द्वितीयंपक्षंनिरस्यति ॥ **नचात्रेति** ॥ ऐतरेयेमुख्यवृत्त्येंद्रादिपरत्वेप्यमुख्यतोविष्णुपरत्वांगीकारेणप्राचीनस्यतथात्वंसिद्धांतिनोऽनभिमतमित्यर्थः ।

नचात्रामुख्यवृत्त्येंद्रादिपरत्वेपितल्लिंगोपपत्तिः । तद्वैत्वंप्राणइत्यत्रतुमुख्यवृत्त्याविष्णुपरतास्त्वितिवाच्यं । अत्रेंद्रादौमुख्यत्वेबाधकाभावात् । नचविष्णौमुख्यत्वमेवबाधकं । तस्याद्याप्यसिद्धेः । इंद्रादौयोगसंभवात् । मुख्यप्राणेरूढेरपिसत्त्वाच्च । पूर्वपक्षेसर्वत्रापिवैदिकप्रयोगेप्राणशब्दस्येंद्रादिपरत्वेनविष्णौविद्वद्रूढेस्तद्व्याप्यमहायोगस्यचाभावाच्च । नचात्रमुख्यवृत्त्येंद्रादिपरत्वेपिपूर्वत्रामुख्यवृत्त्याविष्णुपरतासिद्धांतिनेष्यते ।

गु० तिवाकिंवेंद्रादौरूढियोगयोस्सद्भावेपिविष्णौविद्वद्रूढिमहायोगयोस्सद्भावेनतत्रमुख्यत्वमितिवा । नाद्यइत्याह ॥ **इंद्रादावित्यादि** ॥ नद्वितीयइत्याह ॥ **पूर्वपक्षइति** ॥ सिद्धांतिनेतिहेतुगर्भविशेषणं । तथात्वेतदुक्तगुणालाभेनसमन्वयकथनवैयर्थ्यंस्यादितिभावः । यावज्जीवकाग्निहोत्रेऽग्निहोत्रशब्दस्यमुख्यत्वेपिमासाग्नि

SGDF
Sri Gargeshwari Digital Foundation

प्र० तृतीयंनिरस्यति ॥ **नचेंद्रादाविति** ॥ अस्यप्राक्तनस्यचेत्यर्थः । ननु "राजाकुवलयोल्लासी"त्यादाविवकिंनस्यादित्यतआह ॥ **नचेति** ॥ तत्रवक्तृविवक्षादिविरोधइवप्रकृतेबाधकाभावादितिभावः । यद्वास्यमुख्यवृत्त्येंद्रादिपरत्वेपिगौण्यावृत्त्याप्राचीनोविष्णुस्स्यादितिचतुर्थपक्षंदृष्टांतवैषम्योक्त्यापाकरोति ॥ **नचवाक्येति** ॥ ऐतरेयतैत्तिरीयस्थेत्यर्थः । सप्तमे "उक्तंक्रियाभिधानंतच्छ्रुतावन्यत्रविधिप्रदेशस्स्या"दिति तृतीयपादीयाद्याधिकरणेकुंडपायिनामयनेश्रुतं "मासमग्निहोत्रंजुहोती"तिवाक्यमुदाहृत्य किमग्निहोत्रशब्दोनैयमिकाग्निहोत्रधर्माणामतिदेशकोनेतिसंशये उभयत्रापिजुहोतिसामानाधिकरण्येननिर्देशाविशेषान्नामधेयत्वेनमुख्यत्वान्नधर्माणामतिदेशकइतिप्राप्ते एकत्रमुख्यत्वेऽन्यत्र गौणत्वेनाप्युपपत्तावुभयत्रशक्तिकल्पनस्यान्याय्यत्वात् नित्याग्निहोत्रेऽग्नयेहोत्रमस्मिन्निति प्रवृत्तिनिमित्तसंभवेननैयमिकेमुख्यत्वादन्यत्रतत्सादृश्यविधित्सयागौणइतितद्धर्मातिदेशकइतिसिद्धांतितं । तत्रयथानैयमिकमासाग्निहोत्रयोःप्रकरणभेदेनभेदस्यद्वितीयेनिश्चितत्वान्मासाग्निहोत्रेप्रवृत्तिनिमित्ताभावेनानेकार्थस्यान्याय्यत्वेनचबाधकेनगौणत्वमुक्तं नचतथात्रकिंचिद्बाधकमस्ति । प्रत्युतैकार्थत्वंमुख्यवृत्तिकत्वं चाश्रितंभवतीत्यर्थः ॥ **अतएवेति** ॥ वाक्यद्वयस्थप्राणशब्दस्यमुख्यवृत्त्यैकार्थत्वेबाधकाभावादेव " बाहुल्याच्छ्रुतिलिंगयोः ।

नचेंद्रादौविष्णौचमुख्यता । सत्यांगतावनेकार्थत्वस्यान्याय्यत्वात् । नचवाक्यद्वयस्थप्राणशब्दस्यमुख्यवृत्त्यैकार्थत्वेपूर्वपक्षिणंप्रतिबाधकमस्ति । येनमासाग्निहोत्रेग्निहोत्रशब्दस्येवतत्रविष्णौप्राणशब्दस्यगौणतास्यात् । अतएवानुव्याख्यानेपूर्वपक्षे "अन्यस्यमुख्यवाच्यत्वं"इत्युक्तं । ॥ ३९७ ॥

गु० होत्रेऽमुख्यत्ववत् प्राणशब्दस्यापिमुख्यप्राणेमुख्यत्वेपिविष्णावमुख्यत्वस्यैवन्याय्यत्वात्कथमनेकार्थत्वमन्याय्यमित्यतोवैषम्येणपरिहरति ॥ **नचेति** ॥ तत्र तद्वै

प्र० अन्यस्यमुख्यवाच्यत्वमितितन्नात्रगस्यही"त्युक्तमित्यर्थः । इदमाद्यपक्षेपिज्ञापकतयायोज्यं । पंचमपक्षमनूद्यनिरस्यति ॥ **नचतत्रेति** ॥ **प्राणेति** ॥ "अहमुक्थमस्मी"तिप्राणशब्दितेंद्रियैस्संवादः "तत्प्राणउत्क्रांतेऽपद्यत तत्प्राणेप्रपन्नउदतिष्ठ"दित्युत्क्रमणप्रवेशौ तन्निमित्तदेहपातोत्थानशतसंवत्सरत्वप्राणवंशत्वादीनामित्यर्थः ॥ **श्रुतीति** ॥ इंद्रेणप्रयुक्ताहमादिश्रुतीत्यर्थः ॥ **वैपरीत्यादिति** ॥ अबहुत्वात्प्राणश्रुतेस्संदिग्धत्वेनानुग्राहकश्रुत्यंतराभावादन्यस्संभूतइत्यनुवाकांतरगतत्वेनसाक्षादश्रवणादित्यर्थः । ननुतत्रापि "तमेवमृत्युममृतंतमाहुस्तंभर्तारंतमुगोप्तारमाहुः । यस्तद्वेदब्रह्मणैषरमते । ह्रीश्चतेलक्ष्मीश्चपत्न्या"वित्यादीनामपिबहूनांब्रह्मलिंगानांसत्त्वात् "हरिंहरंतमनुयंतिदेवा"इतिहरिश्रुत्यानुगृहीतत्वादमृतत्वादीनांतद्विशेषणत्वश्रवणाच्चकथंवैपरीत्यमितिचेत्सत्यं । भाष्योक्तश्रीपतित्वादिस्पष्टलिंगाभिप्रायेणैवमुक्तिः । तस्यचोक्तवैपरीत्यसंभवादिति । यद्वाएतदरुच्यैवटीकोक्तंपक्षांतरमाह ॥ **पूर्वस्येति** ॥ मास्तुनामप्राचीनोपींद्रादिरेवेत्यवधारणं । तथाप्यत्रत्य

नचतत्रश्रीपतित्वादिलिंगात्प्राणशब्दस्यविष्ण्वर्थत्वेनिश्चितेऽत्रापितदर्थतेतिविपरीतंकिंनस्यादितिशंक्यं । प्राणसंवादोत्क्रमणप्रवेशादीनांबहुत्वाच्छ्रुत्यनुगृहीतत्वात्साक्षात्प्राणविशेषणत्वश्रवणाच्च । श्रीपतित्वादिलिंगानांतुवैपरीत्यात् । पूर्वस्याविष्णुत्वशंकामात्रेणविष्णुत्वनिश्चयाक्षेपसंभवात् । अतएवटीकायांशंकापदप्रयोगः ।

गु० त्वंप्राणइत्यत्रेत्यर्थः ॥ **वैपरीत्यादिति** ॥ बहुत्वाभावाच्छ्रुत्यननुगृहीतत्वात्साक्षाद्विष्णुविशेषणत्वाश्रवणाच्चेतिविपरीतत्वादित्यर्थः । अस्तुवात्रत्यप्राणशब्दस्यमुख्यप्राणपरत्वे तद्वैत्वमित्यत्रापिप्राणस्यमुख्यत्वमेवेतिवत् तद्वैत्वमित्यत्रश्रीपतित्वादिलिंगेनप्राणशब्दस्यविष्णुपरत्वऐतरेयेपिप्राणशब्दस्यविष्णुपरत्वमितिवैपरीत्यं । तथापिनदोषः । नचैवंपूर्वोक्तःप्राणोमुख्यएवेत्याक्षेपानुपपत्तिः । शंकामात्रेणापिविष्णुपरत्वनिश्चयाक्षेपसंभवादित्याह ॥ **पूर्वस्येति** ॥ यद्वा अनुवाकद्वयस्यो

SGDF Sri Gargeshwari Digital Foundation

प्र०प्राणस्येंद्रादित्वेप्राचीनोपींद्रादिर्वाविष्णुर्वेतिसंशयसंभवात्तन्मात्रेणविष्णुरेवेत्यवधारणाक्षेपसंभवादित्यर्थः । ''तस्यविष्णोरन्यत्वेप्राचीनोप्यन्यइतिशंकास्या''दितिशंकापदप्रयोगइत्यर्थः । ज्ञापकत्वंव्यनक्ति ॥ **अन्यथेति** ॥ नन्वेवंतद्वैत्वंप्राणइत्यत्रप्राणोविष्णुरन्योवेतिसंशयस्यात्रत्यसिद्धांतन्यायेनोत्पन्ननिर्णयेनैवनिराससंभवेनतत्रत्यसिद्धांतोव्यर्थः । अतोनतस्यविष्णुत्वावधारणमेतत्सिद्धांतफलंभवितुमर्हतीत्यतस्सिद्धांतप्रयोजनंचसाधयति ॥ **एकस्येति** ॥ **अवांतरनिर्णयेति** ॥ प्राणपदप्रवृत्तिनिमित्तस्यजीवनहेतुत्वस्यविष्णुगतत्वनिर्णयस्तत्रत्यन्यायसाध्यः । अन्यगतत्वेनप्रसिद्धलिंगानामंतर्यामिगतत्वनिर्णयोत्रत्यन्यायसाध्यः । उभाभ्यांसर्वत्रप्राणशब्दार्थोविष्णुरेवेतिनिर्णयस्साध्यइत्यर्थः ॥ **यथाप्राभाकरमतइति** ॥ भट्टमतेश्रुतिस्मृत्यादिसाधारण्येनधर्मप्रमाणविचारआद्याध्यायस्यार्थः । प्राभाकरमतेचोदनाप्रामाण्यमात्रविचारइति

अन्यथाप्राचीनप्राणोप्यन्यएवस्यात् । एकप्रकरणत्वादित्युत्तराधिकरणप्रयोजनटीकायामिवात्राप्यन्यएवस्यादित्यवक्ष्यत् । एकस्यनिर्णयस्यानेकन्यायसाध्यत्वेपि निर्णयविरोधितत्तत्पूर्वपक्षन्यायाभासनिरासकन्यायसाध्यावांतरनिर्णयभेदादधिकरणभेदश्चयुक्तः । यथाप्राभाकरमतेचोदनाप्रामाण्यनिर्णयस्याध्यायमात्रसाध्यत्वेप्यवांतरनिर्णयभेदादधिकरणभेदः ।

गु०क्तरीत्यैकवाक्यत्वाल्लिंगानामपिनिरवकाशत्वात्कथंवैपरीत्यमित्याशंक्याभ्युपगमवादेनाह ॥ **पूर्वस्येति** ॥ **टीकायामिति** ॥ तस्यविष्णोरन्यत्वेप्राचीनोप्यन्यइतिशंकास्यादितिसंगतिटीकायामित्यर्थः । ननु अतएवप्राणः प्राणस्तथानुगमादित्यधिकरणद्वयेनप्राणस्यविष्णुत्वंनिर्णेयं । तच्चैकमेवेतिकथमधिकरणभेदः । नचनिर्णेयस्यैकत्वेपिन्यायभेदाद्भेदः । निर्णयस्यानेकन्यायसाध्यत्वमात्रेणाधिकरणभेदे आनंदमयस्यब्रह्मत्वनिर्णयस्यब्रह्मशब्दाभ्यासतद्धेतुव्यपदेशमांत्रवर्णिकगानादिरूपानेकन्यायसाध्यत्वेनतत्राप्यधिकरणभेदःस्यादित्यतआह ॥ **एकस्येति** ॥ अत्रैवपूर्वतंत्रसंप्रतिपन्नदृष्टांतमाह ॥ **यथेति** ॥ ननुतद्वैत्वंप्राणइत्यत्रप्राणस्यविष्णुत्वमंगी

SGDF
Sri Gargeshwari Digital Foundation

प्र०व्यवस्था। तत्र "चोदनालक्षणोर्थोधर्म" इत्युक्तचोदनाप्रामाण्यनिर्णयस्याध्यायार्थत्वेप्यर्थवादाधिकरणेसापेक्षत्वमूलकाप्रामाण्यशंकानिरास पूर्वक:प्रामाण्यनिर्णयः विधिवन्निगदाधिकरणेत्वेकेनवाक्येनौदुंबरत्वसंबंधफलसंबंधरूपसंबंधद्वयविधानाशक्तिमूलकाप्रामाण्यशंकानिरासपूर्वकस्तन्निर्णयइत्यवांतरनिर्णयभेदाद्यथाधिकरणभेदस्तथेत्यर्थः ॥ यथावेति ॥ भट्टमतइत्यर्थः । आद्ये "विधिर्वास्यादपूर्वत्वाद्वादमात्रंह्यनर्थकं" इतिद्वितीयपादीयद्वितीयाधिकरणे "औदुंबरोयूपोभवति। ऊर्ग्वाउदुंबरः । ऊर्क्पशवः । ऊर्जैवास्माऊर्जंपशूनाप्नोत्यूर्जोवरुध्या" इति वाक्यमुदाहृत्य अत्र "ऊर्जोवरुध्या" इत्येतदौदुंबरतायाःफलसमर्पकमुतार्थवादइतिसंशये ऊर्जोवरुध्याइतितादर्थ्यचतुर्थीश्रुत्योर्क्शब्दितानांपशूनांसाध्यत्वावगमात् साध्यस्यसाधनापेक्षत्वात्सन्निहितमौदुंबरत्वमसत्यपिविधौसाधनमेवेतिफलसमर्पकमेतदितिप्राप्ते विध्यभावउदुंबरताभ

यथावामतांतरे "ऊर्जंपशूनाप्नोति नसपापंश्लोकंशृणोती" त्यादेरर्थवादत्वनिर्णयस्यौदुंबराधिकरणपर्णमय्यधिकरणसाध्यत्वेप्यवांतरनिर्णयभेदादधिकरणभेदस्तद्वत् ।

प्र०वनाक्षिप्तभावनांप्रतिसन्निहितत्वेनतस्याएवभाव्यत्वात् फलस्यविप्रकृष्टत्वेनाभाव्यत्वात् तस्यार्थवादत्वमुपेत्यैवविधेरुन्नेयत्वेनार्थवादएव नफलसमर्पकमूर्जोवरुध्याइत्येतदितिसिद्धांतितं । तथाचतुर्थे "द्रव्यसंस्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवाद" इतितृतीयपादीयाद्याधिकरणे "यस्यपर्णमयीजुहूर्भवति नसपापंश्लोकंशृणोती" त्युदाहृत्य पर्णमयीत्वंक्रत्वर्थमुतपुरुषार्थमथोभयार्थमितिसंदिह्य फलश्रवणात्पुरुषार्थमेव । यद्वा क्रत्वर्थजुह्वनुवादेनविधानात्क्रत्वर्थफलश्रवणात्पुरुषार्थंचेतिदध्यादिवदुभयार्थमितिद्वेधापूर्वपक्षयित्वा संयोगपृथक्त्वाभावेनदध्यादिवदुभयार्थत्वाभावात् शृणोतीतिवर्तमानापदेशेनापापश्लोकश्रवणस्यसाध्यत्वाप्रतीतेः पुरुषार्थत्वस्याप्ययोगात्क्रत्वर्थमेव । अपापश्लोकाश्रवणंत्वर्थवाद

SGDF
Sri Gargeshwari Digital Foundation

प्र० इतिसिद्धांतितं। अत्रोभयत्राप्यूर्जोवरुध्यैनसपापमित्यनयोरर्थवादत्वनिर्णयाविशेषेपि औदुंबराधिकरणउदुंबरतायाविध्यभावेनसाधनत्वाभावमूलकोऽर्थवादत्वनिर्णयः पर्णमय्यधिकरणेत्वपापश्लोकश्रवणस्यवर्तमानापदेशेनसाध्यत्वाभावमूलकइति अवांतरनिर्णयभेदादधिकरणभेदस्तथेत्यर्थः। ऊर्जंपशूनाप्नोतीत्येतदूर्जोवरुध्याइत्यस्योपलक्षणार्थं । यद्वा भाष्यवार्तिकादौशाखांतरवाक्योक्त्याविचारकरणेपि प्रसिद्धशाखायामाप्नोतीत्यंतवाक्यश्रवणेनतस्यशृणोतीत्यंतवाक्येनतुल्यविचारत्वमावश्यकमितिदर्शयितुमाप्नोतीत्यंतमुक्तं । आक्षिप्तांप्रयोजनोक्तिमुपपाद्योपसंहरति ॥ **तस्मादिति** ॥ **अन्यत्रापीति** ॥ अंतराद्यधिकरणेष्वित्यर्थः। उपपादितंचैतत्तत्रतत्र । उपपादयिष्यतेचोत्तरत्रापि । नन्वन्यदेवकिंचित्प्रयोजनमुच्यतांकिंपूर्वोक्तप्राणाक्षेपोपपादनक्लेशेनेत्यतोऽवश्यंचैतत् अन्यथातृतीयपादेसमन्वीयमानाकाशशब्दस्येव पूर्वोक्तन्यायान्यत्रप्रसिद्धिभ्यांप्राणशब्दस्योभयत्रप्रसिद्धत्वापत्त्यास्याधिकरणस्यैतत्पादासंगत्यापत्तेरित्याह ॥ **एवंचेति** ॥ यद्वाप्रयोजनोक्तिसमर्थ्येदानीं पूर्वोक्तयन्यत्रप्रसिद्धिभ्यामाकाशशब्दइवात्राप्युभयत्रप्रसिद्धत्वापत्त्यात्रासंगतिमाशंक्यपादसंगतिंसाधयति ॥ **एवंचेति** ॥ एवमाक्षेपेउभ

तस्मात्प्रयोजनोक्तिर्युक्ता । एवमन्यत्रापिपूर्वोक्ताक्षेपेणप्रयोजनोक्तिरुपपाद्या । एवंच "अतएवप्राण"इत्यत्रतैत्तिरीयस्थप्राणशब्दसमन्वयउक्तेपि अत्रपूर्वपक्षे ऐतरेयवाक्यस्थप्राणस्याविष्णुत्वेनतैत्तिरीयस्थस्यापिविष्णुत्वाक्षेपादुभयत्रप्रसिद्धत्वाभावःप्राणशब्दस्य ।

गु० कृत्यैतरेयेऽन्यलिंगेनान्यपरत्वमित्येवंपूर्वपक्षसंभवेकिमर्थंतदाक्षेपोवर्ण्यतइत्यतआह ॥ **एवंचेत्यादि** ॥ अन्यथोभयत्रप्रसिद्ध्यापत्त्यापादासंगत्यापातादितिभावः।

प्र० यत्रप्रसिद्धतानेत्येतद्व्यतिरेकमुखेनाह ॥ **आकाशइति** ॥ **अतएवेति** ॥ उभयत्रप्रसिद्धार्थत्वलाभादेवेत्यर्थः। अन्यथाऽयमाकाशोऽन्यश्चेत्प्रागुक्तोन्यस्यादित्येवोच्येत । "सचविष्णोरितरश्चेत्सर्वाधारत्वमप्यन्यस्यप्रसज्यत"इतिनोच्येतेतिभावः । पादांतरेति एकेत्विचह्लेत्वंतरं । यद्येवंप्राणशब्दस्योभयत्रप्रसिद्धत्वाभावस्तर्हिज्योतिश्शब्दस्याप्युक्तन्यायेनतदभावापत्त्यातृतीयेनिवेशोनस्यादित्याशंकते ॥ **नन्वेवमिति** ॥

"आकाशोर्थांतरत्वादिव्यपदेशा"दित्यत्रतु "आकाशस्तल्लिंगा"दित्यत्रोक्तस्य "आकाशइतिहोवाचे"तिवाक्यस्थाकाशशब्दोब्रह्मपरइत्यस्यानाक्षेपादुभयत्रप्रसिद्धित्वं। अतएवतत्रटीकायांपादांतरस्थं "तल्लिंगा"दित्यधिकरणमनाक्षिप्यैकपादस्थंद्युभ्वाद्यधिकरणमेवाक्षिप्तं। नन्वेवंसति "ज्योतिर्दर्शना"दित्यत्रटीकायां तच्चज्योतिर्यदि विष्णोरन्यत्तदाज्योतिश्चरणाभिधानादितिपूर्वोक्तमप्यन्यत्स्यादित्युक्तत्वादग्निसूक्तेपिज्योतिश्शब्दस्यपूर्वपक्षेविष्णुपरत्वाभावादुभयत्रप्रसिद्धत्वाभावात्तस्यतृतीयपादसंगतिर्नस्यादितिचेन्मैवं। नहिज्योतिर्दर्शनादित्यत्रज्योतिर्वह्निरितिपूर्वःपक्षः। येनवह्नौप्रसिद्धेःस्वतस्सिद्धत्वेनान्यत्रप्रसिद्धता। उभयत्रप्रसिद्धतातुक्वचिद्विष्णुपरत्वेनसाध्यास्यात्। किंतुजीवइतिपूर्वःपक्षः। नचजीवेस्वतःप्रसिद्धिरस्ति। ज्ञानात्मकत्वात्तुजीवेप्रवृत्तिः। तच्चजीववदीश्वरेप्यस्तीत्युभयत्रप्रसिद्धताज्योतिर्दर्शनादित्यत्र। "ज्योतिश्चरणे"त्यत्रतुवह्निरितिपूर्वपक्षितत्वादन्यत्रप्रसिद्धता।

प्र० तृतीयेति ॥ आद्यएवस्यादित्यर्थः। तत्रपूर्वोक्तयन्यत्रप्रसिद्धिभ्यांनोभयसाधारण्यं। किंतुप्रवृत्तिहेतुसाधारण्याश्रयेण। अतःपूर्वोक्ताक्षेपेपिनक्षतिरितिसमाधत्ते ॥ **मैवमिति** ॥ एवंतर्हिकथमाद्येज्योतिश्शब्दसमन्वयइत्यतआह ॥ **ज्योतिश्चरणेति** ॥ तत्रलोकतएवप्रसिद्धि

SGDF
Sri Gargeshwari Digital Foundation

प्र०सत्वादितिभावः । ननुयदिप्रागुक्तानाक्षेपेणाकाशोर्थांतरेत्यत्रोभयत्रप्रसिद्धता तर्हिचतुर्थपादेसमन्वीयमानयोः "कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः ज्योतिरुपक्रमा"दित्याकाशज्योतिश्शब्दयोरुभयत्रप्रसिद्धतास्यादित्यतआह ॥ **कारणत्वेनेति** ॥ **लिंगस्येति** ॥ अवांतरं कारणंचेत्यणुभाष्योक्तेरितिभावः ॥ **ओषधीति** ॥ "पृथिव्याओषधय"इत्यपिश्रवणादितिभावः ॥ **ज्योतिष्टोमेति** ॥ यागकालादिवाचिनइत्यर्थः । ननुपूर्वोक्त्यन्यत्रप्रसिद्धिभ्यामुभयत्रप्रसिद्धत्वं । तच्चात्रप्राणशब्देनास्ति । पूर्वोक्तेराक्षेपादित्युक्तमयुक्तं । अयंप्राणोन्यश्चेत्प्राचीनोप्यन्यएवनविष्णुरित्याक्षेपायोगेनप्राचीनोन्योवाविष्णुर्वेतिशंकामात्रत्वात् तस्यचोभयत्रप्रसिद्ध्यविरोधात्स्यादेवतथात्वंप्राणशब्दस्येत्याशंक्यपक्षांतरमाह ॥ **यद्वेति** ॥ ज्योतिश्शब्देपिप्रवृत्तिहेतुसाधारण्यस्यपूर्वपक्षिणोऽभिमतत्वादितिभावः ॥ **वैनामेति** ॥ नामरूपनिर्वहि

"कारणत्वेने"त्यत्र "ज्योतिरुपक्रमा"दित्यत्रचपूर्वपक्षेपूर्वोक्तायाआकाशज्योतिश्शब्दयोर्विष्णुपरतायाअनाक्षेपेपितत्रप्रागनुक्तसमन्वयस्यावांतरकारणत्वरूपस्यलिंगस्यौषध्यादिनाम्नोज्योतिष्टोमवसंतादिशब्दस्यचसमन्वयोक्तेर्नतयोरुभयत्रप्रसिद्धपादांतर्भावप्रसंगः । यद्वाप्राणादिशब्दानांप्राक्समन्वयोक्तावपिलोकसिद्ध्यान्यत्रप्रसिद्ध्यान्यत्रप्रसिद्धता । आकाशोर्थांतरेत्यत्रत्वाकाशशब्दस्यनपूर्वंसमन्वयोक्त्योभयत्रप्रसिद्धता । किंतुवैनामेतिनिपातद्योतितप्रसिद्धिव्यावर्त्यत्वेनपूर्वपक्षिणाप्यप्रसिद्धस्यब्रह्मरूपस्याकाशशब्दवाच्यस्यांगीकृतत्वेनेतिज्ञेयं । तस्मात्पादसंगतिःपूर्वपक्षोदयश्च ॥ ॥ ४०० ॥

गु०नन्वेवंकारणत्वेनेत्यादावधिकसमन्वयेपिसाक्षात्सूत्रोपात्तज्योतिश्शब्दांशउभयत्रप्रसिद्धतास्यादित्यतआह ॥ **यद्वेति** ॥ नन्वाकाशशब्दसमन्वयस्यापि विरोधिसर्व

SGDF Sri Gargeshwari Digital Foundation

प्र० ताप्रसिद्धाकाशइत्युक्तौनत्वन्योप्रसिद्धाकाशइतिगम्यते । नचतदनंगीकारेप्रसिद्धाकाशएवतन्निर्वहितेत्युक्तिर्युज्यतइत्यर्थः । चशब्दात्प्रयोजनंच । युज्यतइतिशेषः । एवंनिरवकाशलिंगादिभिःपूर्वपक्षेकृतेततोपिप्रबलनिरवकाशविष्णुलिंगादिबाहुल्येनसिद्धांतोत्थितिमाह ॥ **सिद्धांतस्त्विति** ॥ तंप्राणंदेवाःशिष्यादिषुसम्यङ्नीतवंतइत्यर्थः । "सएषोसुः सएषप्राणः सएषभूतिश्चाभूतिश्च तंभूतिरितिदेवाउपासांचक्रिरे" इत्यत्रदेवोपास्यत्वं । "सर्वेवेदास्सर्वेघोषाएकैवव्याहृतिःप्राणएवे"त्यत्रसर्ववेदोक्तत्वमित्यर्थः ॥ **इत्यादीनीति** ॥ लिंगानीतिशेषः । उपलक्षणमेतत् । "ब्रह्मेमंपुरुषं उदरंब्रह्मे"त्यादिब्रह्मशब्दाभ्यासोपिध्येयः । ननुपूर्वपक्षेपिलिंगबाहुल्यसत्त्वात्कथंनिर्णयइत्यतस्तानिसावकाशयिष्यन्निरवकाशत्वमेषांसाधयति ॥ **तानिचेति** ॥ "विष्णुमेवानयन्देवाविष्णुंभूतिमुपासते । सएवसर्ववेदोक्तस्तद्रथोदेहउच्यत"इतिस्कांद

॥ सिद्धांतस्तु ॥ ॥ "तंदेवाःप्राणयंते"तिदेवोपदेश्यत्वं "तंभूतिरितिदेवाउपासांचक्रिर"इतिभूतित्वेनदेवोपास्यत्वं "सर्वेवेदा"इतिसर्ववेदप्रतिपाद्यत्वं "प्राणोह्येषयएषतपती"तिसूर्यमंडलस्थत्वं "प्राणस्त्वंप्राणःसर्वाणिभूतानि"इतिसर्वांतर्यामित्वं "सर्वाणिभूतान्यापिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धानी"तिसर्वव्यापित्वमित्यादीनिप्राणेश्रूयंते । तानिच "विष्णुमेवानयन्देवा"इत्यादिभाष्योक्तस्मृत्या "सर्वेवेदायत्पदमामनंति ।

गु० बाहुल्यकारणस्त्रीनिषेधिनामित्याद्युक्तरीत्याकारणत्वेनेत्यत्रांगीकारात्कथमेतत् । किंचज्योतिर्दर्शनादित्यत्रेवात्रापिपूर्वोक्तन्यायेनप्राणशब्दप्रवृत्तिनिमित्तसाधारण्येनास्तूभयत्रप्रसिद्धता । अत्रप्राणशब्दाक्षेपेपितत्प्रवृत्तिनिमित्तानाक्षेपात् । भेकादौपंकजशब्दप्रवृत्तिनिमित्तवत्तस्यविष्णावंगीकारात् । अन्यथातस्यात्रासमर्थनेनासिद्धि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वचनेनेत्यर्थः । "सर्वेवेदायत्पदमामनंति तपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीमी"त्युपक्रम्य "तद्विष्णोः परमंपद"मितिकाठकोक्तेस्सर्ववेदोक्तत्वस्यविष्णोरवगमइत्यर्थः । सूर्यमंडलस्थत्वंविष्णवेकनिष्ठमित्याह ॥ **यएषइति** ॥ छांदोग्ये आदित्यांतर्हिरण्मयपुरुषमभिधायतस्यपुंडरीकाक्षत्वलिंगोक्त्याविष्णुत्वावगतिरित्यर्थः । विस्तृतंचैतदंतरित्यत्रास्माभिः । सर्वव्यापित्वस्यविष्णुगतत्वे वाक्यद्वयमाह ॥ **पुरुषइति** ॥ "पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं"इतिपुरुषसूक्तेसहस्रशीर्षत्वादिनाप्रकृतस्यविष्णोरेवसर्वव्यापित्वमुच्यते । पुरुषसूक्तंचविष्णुपरमिति "तस्मिन्कालेमहाराजे"त्यादिनाप्रसिद्धमित्यर्थः ॥ **अंतर्बहिरिति** ॥ नारायणोपनिषदि । आदिपदेन "सर्वे वेदायुक्तयस्सुप्रमाणाब्राह्मंज्ञानंपरमंत्वेकमेव । यआदित्येतिष्ठन् सर्वंखल्विदंब्रह्मे"त्यादिगृह्यते । "वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाह"मितिगीतावाक्येन "ध्येयःसदे"तिनारसिंहपुराणवाक्येन "तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिचे"त्यादि "विष्टभ्याहमिदंकृत्स्नमेकांशेन स्थितोजग"दित्यादिगीतावचनेनचविष्णोरेवतानिलिंगानीत्यर्थः । तथाचप्राणोविष्णुरेव । तल्लिंगानामत्रानुगमादितिसूत्रार्थउक्तोभवति ।

यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यते तस्ययथाकप्यासंपुंडरीकमेवमक्षिणी । पुरुषएवेदंसर्वं । अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्स्थित"इत्यादिश्रुतिभिः "वेदैश्चसर्वैरहमेववेद्यः ध्येयस्सदासवितृमंडलमध्यवर्ती । तपाम्यहमहंवर्षं । विष्टभ्याहमिदंकृत्स्न"मित्यादिस्मृतिभिश्चविष्णावेव ।

॥ ४०१ ॥

गु० प्रसंगादित्यतोवाह ॥ **यद्वेति** ॥ **पादसंगतिरिति** ॥ उपलक्षणंचैतत् । प्रयोजनोक्तिश्चेत्यपिद्रष्टव्यं । सर्वव्यापित्वमित्यादीनीत्यत्रादिपदेनदेहरथित्वपरामर्शः

प्र० ननुपूर्वपक्षलिंगान्यपिनिरवकाशानीत्युक्तमित्यतश्शास्त्रदृष्टिसूत्रतात्पर्यमाह ॥ **परकीयेति** ॥ **प्रसिद्धेति** ॥ वृत्रहंतृत्वादेर्निरवकाशत्वादितिभावः । "तमिंद्रउवाचप्राणोवाअहमस्म्यृषे"इतींद्रेणप्रयुक्तोहंशब्दोंतर्यामिपरइत्यन्वयः । लक्षणायांकिंप्रयोजनमित्यतो मंचाःक्रोशंतीत्यादौमंचस्थपुरुषाभिप्रायेणमंचपदप्रयोगवन्निरूढत्वेनप्रयोजनानपेक्षणादितिभावेनोक्तं **निरूढेति** ॥ लक्षणैवदोषइत्यतउक्तं **श्रुतीति** ॥ **सर्वांतर्यामिकइति** ॥ आनंदमयाधिकरणभाष्योदाहृतस्मृत्या "तत्तन्नाम्नोच्यतेविष्णुस्सर्वशास्तृत्वहेतुत"इत्येतद्भाष्योक्ताभिःस्मृत्यादिभिश्चेत्यर्थः । ननुवामदेववदित्ययुक्तं । तत्प्रयुक्ताहंशब्दस्यांतर्यामिपरत्वासिद्धेरित्याशंक्याद्याध्यायबृहद्भाष्यदिशासाधयति ॥ **नचतत्रेति** ॥ वामदेवप्रयुक्ताहंशब्दस्यांतर्यामिपरत्वाभावेतस्यैवमन्वादिभिरैक्यंवाच्यं । तच्चकिंमुख्यतोविशिष्टस्यैवोतचिन्मात्रलक्षणयाविशेष्यस्य । आद्यंनिरस्यति

परकीयश्रुत्यादिकंतुसावकाशं । तथाहि । इंद्रस्यप्रसिद्धेंद्रत्वेपितत्प्रयुक्तोहंशब्दस्तावत् "अहंमनु"रितिवामदेवप्रयुक्ताहंशब्दवच्छ्रुतितुल्ययानिरूढयालक्षणया "सर्वांतर्यामिकोविष्णुःसर्वनाम्नाभिधीयते । एषोहंत्वमसौचेतिनतुसर्वस्वरूपत"इत्यादिस्मृतिभिर्मुख्यवृत्त्यावांतर्यामिपरः । नचतत्रापिविवादः ।

गु० ॥ **श्रुतितुल्ययेति** ॥ तथाचेश्वरप्रयुक्तोहंशब्दोमुख्यार्थएवेतिभावः । नन्वहंशब्देनांतर्यामिणोलक्षणानोपपद्यते । प्रयोजनाभावादित्यतोऽनिरूढलक्षणायामेवतदपेक्षानतुनिरूढलक्षणायामपि । इयंचनिरूढलक्षणेत्याह ॥ **निरूढयेति** ॥ तत्रहेतुः **श्रुतितुल्यतयेति** । नन्वेतदयुक्तं । सर्वेषांशब्दानामंतर्यामिणिमुख्यत्वादहंशब्दस्यतत्रमुख्यत्वस्यैवसत्त्वेनलक्षणयातत्परत्वस्यासंभवादित्यरुचेराह ॥ **सर्वांतर्यामिकइत्यादिना** ॥ **मुख्यवृत्त्यावेति** ॥ तथाचाक्षादिशब्दवन्नानार्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **विशिष्टस्येति** ॥ द्वितीयंशंकते ॥ **अहमिति** ॥ यदिलक्षणयाविशेष्यैक्यंतर्हिदार्ष्टांतिके इंद्रप्रयुक्ताहंशब्दसामानाधिकरण्यात्प्राणइंद्रइति पक्षे इंद्रपदेनविशिष्टं लक्षणयाविशेष्यमात्रंवा । आद्येविशिष्टैक्यस्यानंगीकारेणविशिष्टेंद्रात्मकस्यप्राणस्यसर्वाभेदोक्त्ययोगः । द्वितीयेप्राणो नब्रह्मेत्युक्त्ययोगइतिपूर्वपक्षिणंप्रत्यनिष्टमाह ॥ **प्राणइंद्रइतीति** ॥ विशेष्यैक्यमात्रमंगीकुर्वतःपूर्ववादिनस्तवपक्षइत्यर्थः । "नहिमनुसूर्या दिर्भवतिवामदेवस्तत्पक्षेपी"त्यैतरेयभाष्येदृष्टांतेभिहितदोषंदार्ष्टांतिकेप्याह ॥ **इतिसार्वात्म्येति** ॥ इतिपूर्ववाक्यायोगइत्युपलक्षणं । "अ त्रच "अहंभूमिमददामार्याये"त्यादिनाप्रवृत्तिरेवोच्यते । नहिवामदेवेनमन्वादिकर्मक्रियतेकदापी"त्याद्यैतरेयभाष्योक्तंचग्राह्यं । नन्वहंश ब्दस्यांतर्याम्यर्थकत्वमनुक्त्वैव प्रयोगबाहुल्येनविष्णावेवमुख्यत्वमुपेत्य विष्णुर्ब्रह्मेतिवत् अहंसर्वैरप्यहेयःपरमात्माप्राणइतींद्रेणोक्तमित्यपिस

विशिष्टस्यवामदेवस्यमन्वादित्वाभावात् । अहंमन्वादिशब्दैश्चैतन्यमात्रलक्षणाचेत्प्राणइंद्रइतिपूर्वपक्षेइंद्रशब्देनविशि ष्टोक्तौविशिष्टेंद्राभिन्नस्यप्राणस्य "प्राणस्त्वंप्राणःसर्वाणी"तिसार्वात्म्योक्तिरयुक्तास्यात् । इंद्रशब्देनशुद्धोक्तौतुप्राण स्यशुद्धब्रह्मत्वेनप्राणोनब्रह्मेतिपूर्वपक्षायोगः "प्राणोह्येषयएषतपती"तिपूर्ववाक्यायोगश्च । नहिचिन्मात्रंतापकं ।

गु० त्वस्यवक्ष्यमाणश्रौतानुशासनादिसिद्धत्वान्नोक्तदोषइतिभावः । अद्वैतिमतेस्थित्वाशंकते ॥ **अहमिति** ॥ **इंद्रशब्देनविशिष्टोक्ताविति** ॥ अनेनकिमत्रसाक्षा दैक्यमुच्यतेलक्षणयावेत्यादिटीकावाक्यंदार्ष्टांतिकपरतयायोजितंभवति । अन्यथादृष्टांतवाक्येविशिष्टचैतन्यैक्यपक्षयोर्वामदेवस्यमन्वादित्वाभावाच्चैतन्यैक्यविवक्षयो क्तिरितिचेदित्यादिनोक्तत्वेन किमत्रसाक्षादैक्यमुच्यतेलक्षणयावेत्यादिविकल्पस्यासंगतत्वादितिभावः । नवाइत्यादिश्रुतावित्यादिशब्दोपात्तपार्ष्टिकवाक्यमुपपादयति

SGDF Sri Gargeshwari Digital Foundation

प्र० माधातुंशक्यत्वात्सूत्रादावंतर्यामिपरत्ववर्णनंकिमर्थमित्याक्षिपति ॥ **यद्यपीति** ॥ तत्र ब्रह्मणि अहमितिपदंवाचकतयाऽवगतमित्यर्थः । उपनिषत् रहस्यंनामेत्यर्थः । रूढिमुक्त्वायोगंचाह ॥ **अहेयत्वादिति** ॥ "अहेयत्वादहंनामास्म्यसनान्मनुतेरपि । ततोवेत्तीतिचत्वंस पूर्णत्वात्सर्वनामक"इतिब्रह्मांडवचनात् "अहंनामाहरिर्नित्यमहेयत्वात्प्रकीर्तित"इत्यादिश्रुतिश्चेत्यपिध्येयं । ननु "नवाअरेअहमिमंविजानाती"तिमैत्रेयींप्रतियाज्ञवल्क्योक्तेवाक्येऽहंशब्दस्याहेयत्वार्थत्वंकुतइत्यतआह ॥ **नवाइतीति** ॥ **उत्तमेति** ॥ अन्यथाप्राणोवाअहमस्तीति श्रूयेतेतिभावः । ननुनेदमुत्तमपुरुषस्यरूपं । किंतु "असनान्मनुतेरस्मी"त्यैतरेयभाष्यदिशाऽर्थांतरपरमेवेतिचेत्सत्यं । अस्मीत्यस्योत्तम पुरुषत्वाहानेनैवैतद्भाष्यदिशावाक्यमर्यादयार्थांतरवर्णनमेतदितिध्येयं । ननूक्तमत्राहंशब्दस्यांतर्यामिणिमुख्यत्वे "तदात्मानमेवावेदहंब्रह्मास्मी"त्यादावपिवाजसनेयेतथास्यादितीतिचेन्न । तत्रबाधेनांतर्याम्यर्थत्वास्वीकारादितिभावः । एवमिंद्रप्रापकंविष्णौसावकाशमितिसमर्थ्य वायुलिंगान्यपितथेत्याह ॥ **चक्षुरिति** ॥ यदुक्तंगोदोहनसाहचर्याद्वत्सालंभनंगुणकर्मेतिवदप्रधानसाहचर्यात्प्राणोप्रधानइति तन्न । वैष

यद्यपिअःइतिब्रह्मतत्रागतमहमिति तस्योपनिषदहमिति । ततोहंनामाभव"दित्यादिश्रुतेः । "नवाअहमिमंविजानातीति । अहंतत्तेजोरश्मीन्नारायणंपुरुषंजातमग्रतः"इत्यादिश्रौतप्रयोगात् "अहेयत्वादहंनामे"त्यादिस्मृतेश्चाहंशब्दोहेयत्वाद्यर्थोप्यस्ति । नवाइत्यादिश्रुतावहंशब्दस्यास्मच्छब्दत्वेविजानामीतिस्यात् । "भूरितिशिर"इत्यादिनाक्षिस्थोभगवान्हितत्राहंशब्दः । तथापीहप्राणे "प्राणोवाअहमस्मी"त्युत्तमपुरुषश्रवणादंतर्यामिपरतैवोक्ता । चक्षुरादिसाहचर्यंतुसतिसंशयेनिर्णायकं । उक्तंहि

ता. चं. ६८ **गु०** ॥ **भूरितिशिरइति** ॥ एवमहंश्रुत्यादेःसावकाशत्वमुपपाद्यपरोक्तलिंगानामपिसावकाशत्वमुपपादयति ॥ **चक्षुरादीति** ॥ बाह्यरूपेण वाय्वनंतर्यामिरूपेण ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यात् । प्राणोविष्णुरन्योवेतिसंशयेसत्येवसाहचर्यस्यनिर्णायकत्वादिह्चनिरवकाशविष्णुलिंगादिनानिर्णयसंभवान्नायंतन्न्यायस्यविषय इत्यर्थः ॥ विशयइति ॥ संशयेसतिप्रायशब्दितसाहचर्यदर्शनान्निर्णयइत्येवजैमिन्याचार्यैरुक्तमित्यर्थः । हिशब्देनमीमांसकसंमतिमाह ॥ त्वमुक्थमसि ॥ अस्माकमुत्थापकोसि । अस्यसर्वस्यत्वमेवेशोसि । वयंतवदासास्स्मः । त्वमस्माकंस्वाम्यसीत्युत्तरवाक्यस्योत्कर्षपर्यवसायित्वात् स्वस्योत्तमताप्रकाशनायैवनिकृष्टैस्तेष्वंतःस्थित्वासंवादमकरोदित्यर्थः । एतेन “लिंगानांतदंतर्यामिभगवद्विषयतयोपपत्ते”रितिटीका विवृता । ननुविष्णोस्संवादादिवेलायामौदासीन्यावगतेःकथंसंवादकर्तृत्वमंतर्यामितयापीत्यतआह ॥ उदासीनवदिति ॥ यथोक्तंतृतीय

“विशयेप्रायदर्शना”दिति । अत्रतूक्तलिंगादिनानिश्चयान्नसंशयः । प्राणसंवादोपि “त्वमुक्थमसि त्वमिदंसर्वमसि तवव यंस्म”इत्युत्कर्षपर्यवसायित्वादंतर्यामिणिविष्णौयुक्तः । एवंच प्राणलिंगादिकंयद्यप्यवकाशोज्झितंस्वतः । तथाप्यंतर्यामिगततयानेतुंहिशक्यते ॥ १ ॥ उदासी(नवदास्तांतौ)नौहितावास्तांकेशवश्चाब्जसंभव”इत्यौदासीन्यंतुबाह्यरूपेण ।

प्र० स्कंधतात्पर्येसप्तविंशेध्याये “यज्ञांतस्थस्स्वयंपादौविशन्नोत्थापयद्धरिः । शक्तोपिब्रह्मवाय्वोस्तुबलज्ञस्यैजनार्दनः । तत्स्थउत्थापयामासब्रह्म देहंविशन्प्रभु”रिति । अंतर्यामिभिन्नप्रपदद्वाराप्रविष्टरूपाभिप्रायं । नत्वंतर्यामिरूपविषयं । “नऋतेत्वत्क्रियते”इत्यादिवचनविरोधादित्यर्थः । ननुकथंचतुर्मुखस्यदेहधारणादावौदासीन्योक्तिः । अष्टमेबृहदारण्यकभाष्ये “प्राणंविनानचब्रह्मातंविनाप्राणएवच । अन्योन्यापाश्रयाच्छक्तौस्थातुमन्येकुतस्ततः”इत्यादिवामनस्मृत्याप्राणस्योत्क्रमणेसतिब्रह्मणोवस्थानएवशक्त्यभावोक्तेरिति । मैवं । अंशेनप्राणेनसहनिर्गतस्याप्यंशेनदेहेऽवस्थानसंभवात् । औदासीन्यस्यसुप्त्यर्थत्वोपपत्तेः । यथोक्तंतृतीयस्कंधतात्पर्येतत्रैव “अंशेनसुप्तोब्रह्मातुत्वंशेननिरगात्तथा ।

प्र० स्वदेहाद्वायुसहितोविष्णुनाचजगत्प्रभुः । तमुत्थापयितुंदेवास्तानृतेत्रीन्महाबलान् । नाशक्नुवन्नेकसंस्थास्ततस्तत्राविशंस्त्रयः । उदतिष्ठद्ब्रह्म देहस्तदातेषांप्रभावत”इति । नन्वेवंजीवगतदुःखसमवायित्वमपिस्यादित्युक्तमित्यतआह ॥ दुःखित्वेति ॥ नहिजातिःपदार्थइतिमतेघटो नित्यइत्यनित्यत्वंजातावन्वेतीतिभावः । इदानींजीवप्रापकमन्यथयति ॥ शतमिति ॥ इमंलोकमित्यस्यार्थो जीवशरीरइति ॥ तद्धेतुकं प्राणस्यशतवर्षपर्यंतंशरीरेऽवस्थाननिमित्तकमित्यर्थः । सिद्धांतमुपसंहरन्संगृह्णाति ॥ तस्मादिति ॥ ब्रह्मश्रुतिसाहित्यादित्यर्थः । इयता प्रपंचितमन्यलिंगानांनिरवकाशत्वमुपेत्यपूर्वपक्षकरणंसिद्धांतेचविष्णुलिंगानांनिरवकाशत्वमन्यलिंगानांविष्णुनिष्ठत्वंचटीकोक्तमाचार्यवाक्यारूढंकरोति ॥ तदेतदिति ॥ अन्यत्र भगवतोऽन्यविषयस्यश्रुत्यादेः । अनन्यथासिद्धत्वं निरवकाशत्वं । आदिपदेनप्राणोवाअहमस्मीतिवाक्यंगृह्यते । इतिनचवाच्यमित्यर्थः । कुतएतदित्यतउक्तं अन्यगतेति । इंद्रादिगतानामप्यहंशब्दादीनांमुख्यतस्तदंतर्यामिभगवत्संबंधित्वात्तदपेक्षयासावकाशत्वादिति । प्राक्श्रुतिलिंगादेरित्युक्तं । तदेतत्प्राबल्यापेक्षया । इदानींलिंगादीनामितिवचनंलिंगनिरवकाशतयैव दुःखित्वादिकंत्वंतर्यामिणिबाधितं । “शतंवर्षाण्यभ्यार्च”दितियच्छतसंवत्सरपर्यंतंप्राणस्यजीवशरीरेऽवस्थानंनतज्जीवलिंगं । किंतु “तस्माच्छतंवर्षाणिपुरुषायुषोभवंति”इतितद्धेतुकंशतायुष्ट्वं । तच्चनप्राणेश्रुतं । तस्मात् बहुत्वाच्छ्रुतिसाहित्यादवकाशोज्झितत्वतः । बलवद्भिर्विष्णुलिंगैःप्राणश्रुत्यादिनीयते ॥ १ ॥ तदेतदभिप्रेत्योक्तंन्यायविवरणे “नचानन्यथासिद्धत्वमन्यत्रश्रुतिलिंगादेः । अन्यगतलिंगादीनामपितद्गतभगवद्रूपापेक्षयायुक्ते”रिति ॥ ॥ सूत्रक्रमस्तु ॥ आद्येस्वपक्षहेतूक्तिः ।

गु० प्राणसंवादादिलिंगानामंतर्यामिणिविष्णौमुख्यत्वेदुःखादेरंतर्यामिणिमुख्यत्वंस्यादित्येतद्बाधकंपरिहरति ॥ दुःखित्वादिकंत्विति ॥ एवंचेति ॥ श्रुतिलिंगानुग

SGDF Sri Gargeshwari Digital Foundation

प्र० श्रुत्यादिनिरवकाशतापूर्वपक्षसूचनार्थं । अतएवपूर्वंश्रुतेस्सावकाशत्वमाशंक्यवृत्रहंतृत्वादिलिंगवशेनैवश्रुतिरुज्जीवितेतिध्येयं । हेतूक्तिमेव विवृणोति ॥ **तस्येति** ॥ **श्रुतीति** ॥ ब्रह्मेमंपुरुषमित्यादिब्रह्मश्रुतिर्देवोपास्यत्वादीनिलिंगानि । अनुगमात् अनुवृत्तेः अभ्यासादितियावत् ॥ **नविरोधइति** ॥ एकार्थत्वादितिभावः । नवक्तुरित्यत्रटीकायांपरिहारद्वयस्योक्तत्वात्तन्मूलंवदन्परिहारद्वयंस्फुटयति ॥ **तत्रेति** ॥ "प्राणस्त्वंप्राणस्सर्वाणिभूतानीतिबह्वध्यात्मसंबंधोत्रविद्यत"इतिसूत्रभाष्यानुसारेणेत्यर्थः । बह्विितिभूमशब्दार्थः ॥ **तदेति** ॥ विष्णोस्सर्वत्रसत्त्वेनप्राणस्त्वमित्यादिसंभवादितिभावः । अन्यथा स्वमतविष्णवभिप्रायाभावे ॥ **यदात्विति** ॥ "अध्यात्मसंबंधशब्देनावेशोविष्णोरिंद्रेविवक्षितः । भागवतोऽन्यत्रांतर्यामिरूपेणसंबंधोस्त्येव । तस्मिन्निंद्रेतुविशेषावेशस्तात्कालिकः । अधिकात्मनः परमात्मनः"इत्यैतरेय

तस्यच "तद्वैत्वंप्राण"इत्यत्रयथाप्राणोविष्णुस्तथात्रापिप्राणोविष्णुः । तच्छ्रुतिलिंगानामस्मिन्प्रकरणेबहुस्थलेष्वनुगमादित्यर्थः । एवंच "तद्वैत्वंप्राणइतिश्रुताविवे"तिटीकायाः "तथाशब्दस्समुच्चयार्थ"इतिटीकयासहनविरोधः । द्वितीये "प्राणोवाअह"मितींद्रप्रयुक्ताहंशब्दरूपबाधकोद्धारः । तत्राध्यात्मसंबंधभूमशब्दस्ययदा "प्राणस्त्व"मित्यादिभाष्यानुसारेणाध्यात्मशब्दस्यदेहार्थत्वस्वीकारेणभगवद्देहभूतेंद्रविश्वामित्रादिबह्वात्मसंबंधोर्थः । अस्मिन्नित्यस्यचैतत्प्रकरणइत्यर्थः । तदेंद्रेभगवतस्सत्त्वात्तदभिप्रायेण "प्राणोवाअह"मित्युक्तिः । अन्यथास्मिन्नेवप्रकरणे "प्राणस्त्वंप्राणःसर्वाणिभूतानी"तिनस्यात् । पूर्वपक्षेपिविश्वामित्रादेःप्राणत्वाभावादितिपरिहारार्थः । अतएवसूत्रेभूमपदं । भाष्येपिप्राणस्त्वमित्युपादानं । ॥ ४०४ ॥

गु० मसाध्यविष्णुत्वएवदृष्टांततयोपादानादित्यर्थः । अन्यथादृष्टांतत्वसमुच्चययोर्विरुद्धनिश्चयसंदेहसापेक्षत्वेनविरोधाट्टीकाविरोधापत्तेरितिभावः ॥ **अन्यथेति** ॥ स्वात्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० भाष्यानुसारेणेत्यर्थः ॥ **एतच्चेति** ॥ तात्कालिकसन्निधानविशेषाभिप्रायेणोक्तमित्येतदित्यर्थः । "आविष्टोविष्णुनाथेंद्रोवायुनासहकौशिकं । शंसेत्युक्त्वानिषण्णोभूदिदमन्नंतवेतिसः । ऋक्सहस्रंशशंसाथयज्ञांगत्वेनभक्तितः । तच्छ्रुत्वातुष्टिमगमत्केशवोवायुसंयुतः । द्वितीयवारंशंसेतिप्राहतंचजनार्दनः । प्रीतयेशक्रमाविष्टोविश्वामित्रश्शशंसतत् । अतिप्रियत्वाद्भगवान्पुनरप्याहकौशिकं । तृतीयंचशशंसाथविष्णोरन्नंप्रकल्प्यतत् । ततोतितुष्टोभगवान्ददामिवरमुत्तमं । ऊचेसप्रथमेत्वेवनिजसालोक्यमीश्वरः । अदाद्द्वितीयेसामीप्यंतृतीयेपुनरेवचवरंददामीत्युक्त(स्स)स्सन्मुनिःप्राहजनार्दनं । सम्यक्त्वामेवजानीयामितिमोक्षसुखोच्चतां । इच्छंस्तंप्राहभगवानिंद्रस्थोवायुसंयुतः । सर्वनामाहमस्म्येकइतिज्ञानंममोत्तमं । यस्मात्सर्वगुणत्वंस्यात्सर्वनामत्वएवतु" इत्यादिनेत्यर्थः ॥ **तृतीयइति** ॥ शास्त्रदृष्टेत्यत्रेत्यर्थः । यदिस्वगतविष्ण्वभिप्रायेणप्राणोहमित्युक्तिस्तर्हिरथेदेवइतिवन्मयिप्राणइतिस्यादितियद्बाधकमित्यर्थः । तदुद्धारप्रकारंसूत्रपदेनदर्शयति ॥ **तत्रेति** ॥

यदातु "अध्यात्मसंबंधशब्देनावेशोविष्णोरिंद्रेविवक्षितः । अधिकात्मनःपरमात्मनःसंबंधोध्यात्मसंबंध" इत्यैतरेयभाष्यानुसारेणभगवतःसन्निधानविशेषोध्यात्मसंबंधभूमशब्दार्थः । अस्मिन्नित्यस्यचेंद्रइत्यर्थः । तदेंद्रेतात्कालिकभगवत्सन्निधानविशेषाभिप्रायेण "प्राणोवाअह" मित्युक्तिरित्यर्थः । एतच्चैतरेयभाष्योदाहृतात् "आविष्टोविष्णुनाथेंद्रःप्राणेनसहकौशिक" मित्यादिब्रह्मांडवाक्यादवगंतव्यं । तृतीयेतुतर्हिमयीतिस्यादितीदंबाधकोद्धारेयद्बाधकंतदुद्धारः । तत्रचशास्त्रपदंब्रह्मणःसर्वशास्तृत्वात्तत्तच्छब्दवाच्यतायुक्तेतिदर्शयितुं । अतएवभाष्ये "तत्तन्नाम्नोच्यतेविष्णुःसर्वशास्तृत्वहेतुत" इतिस्मृतिरुदाहृता ।

गु० नःपरमात्मदेहत्वाभिप्रायेणेंद्रेणप्राणस्त्वंप्राणइत्युक्तमित्यस्यानंगीकारइत्यर्थः ॥ **एतच्चेति** ॥ वायुनासहदेवेशस्तदावासवमाविशदितिपूर्ववाक्येवायुसहितस्यविष्णोः

SGDF
Sri Gargeshwari Digital Foundation

प्र० चतुर्थेजीवादिलिंगात्तत्प्राप्तिशंकायांसत्यांतल्लिंगस्यान्यथासिद्धिमनुक्त्वाप्रयोजनोक्तिरयुक्तेत्यतआह ॥ चतुर्थइति ॥ उक्तप्रायत्वादिति ॥ ननुकथंतर्हिपरिहारेकृतेपिपुनरत्रशंकेतिचेन्मैवं । प्राणसंवादादिलिंगानामंतर्यामिनिष्ठतानवक्तुंयुक्ता । तस्यतदानीमौदासीन्यावगतेः । तथोक्तौप्रयोजनाभावाच्चेतिविशेषशंकोपपत्तेः । अतएवटीकायामुदासीनवदास्तामितिवचनमुदाहृतं । परिहारस्तुबाह्यरूपाभिप्रायेणवचनं नेयं । प्रयोजनाभावस्तुनास्ति । अंतर्बहिस्सर्वगतत्वेनचोपासनात्रैविध्यार्थत्वात्तस्यचास्मिन्प्रकरणे "सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यते" त्यादिनाऽऽश्रितत्वाच्चतद्योगादित्यनुरोधेनत्रैविध्योपपत्तेश्चेत्यर्थः ॥ अन्येत्विति ॥ कौषीतकिब्राह्मणेतृतीयेध्यायइंद्रप्रतर्दनाख्यायिकायांप्रतर्दनंप्रति "इंद्रउवाचमामेवविजानीही" त्युपक्रम्यश्रुतमिंद्रवाक्यं "प्राणोस्मिप्रज्ञात्मातंमामायुरमृतमित्युपास्स्वे" ति । तत्रप्राणःकिंवायुःकिंवेंद्रउतजीवोथब्रह्मेतिसंशये प्राणशब्दस्यान्यत्रप्रसिद्धेः प्राणोवायुरेवेतिप्राप्ते "यंत्वंमनुष्यायहिततमंमन्यसे योमांवेद नस्तेयेननभ्रूणहत्यया सएषप्राणएवप्रज्ञात्माऽऽनंदोजरोमृत" इति हिततमत्वनिखिलस्तेयभ्रूणहत्यादिपापालेपप्रज्ञात्मत्वानंदत्वादेर्ब्रह्मण्येवानुगमात् वायौ चतदयोगाद्ब्रह्मैवायंप्राणइत्याद्येनोक्त्वा वक्तुरुपदेष्टुरिंद्रस्यप्राणोस्मीतिप्राणत्वेनस्वात्मोपदेशादिंद्रएवप्राणोनब्रह्मेतिपुनराक्षिप्य अस्मिन्प्रकरणे

चतुर्थे जीवादिलिंगंतदंतर्यामिनिष्ठमित्यस्यार्थस्यतृतीयेनेंद्रप्रयुक्ताहंशब्दस्यांतर्यामिविषयत्वंवदतो
क्तप्रायत्वात् तदनुक्त्वांतर्यामिकथनंकस्मादितिशंकायामंतरादिभेदेनोपासात्रैविध्यादित्येवोक्तं ॥
॥ अन्येतु प्रतर्दनंप्रतींद्रेणप्रयुक्तं "प्राणोस्मिप्रज्ञात्मे" तिवाक्यमुदाहृत्य "मामेवविजानीही"

गु० प्रवेशमुक्त्वा आविष्टोविष्णुनेत्यनेनवायुसहितपरमात्मावेशतःतस्येंद्रस्यविश्वामित्रेप्रवेशउच्यतइतिभावः । तत्राविष्टइत्यत्राविश्यतइत्याविष्टः । कर्मणिक्तः ॥

प्र० "यावद्ध्यस्मिन्शरीरेप्राणोवसतितावदायु" रित्यायुरवधित्वस्य "प्रज्ञानंदोजर" इतिप्रज्ञात्वादेश्चोक्त्याध्यात्मशब्दितप्रत्यगात्मसंबंधबाहुल्यस्यत्वात् तस्यचपराग्भूतेंद्रेऽयोगात् "मामेवविजानीहिप्राणोस्मी" तिस्वात्मोपदेशस्यच "अहंब्रह्मास्मी" त्यादिशास्त्राधीनदृष्ट्या "अहंमनुरभव" मितिवामदेवस्यमनुत्वादिनास्वात्मोपदेशवदुपपत्तेः ब्रह्मैवप्राणइतिद्वितीयतृतीयाभ्यामुक्त्वा चतुर्थेनसूत्रेणपुनः "नवाचंविजिज्ञासीतवक्तारंविद्या" दितिवक्तृत्वरूपजीवलिंगात् "अथप्राणएवप्रज्ञात्मा इदंशरीरंपरिगृह्योत्थापयती" तिप्राणलिंगात् हिततमत्वादिब्रह्मलिंगाच्च त्रयाणामप्युपास्यत्वंनतुब्रह्मणएवेत्याक्षिप्य तथात्वउपासात्रैविध्यप्रसंगात् अन्यत्रप्राणस्यप्राणमित्यादौवाक्यांतरेब्रह्मलिंगैःप्राणशब्देब्रह्मत्वस्याश्रितत्वात् इहापि हिततमत्वादिलिंगयोगात् "मामेवविजानीही" त्युपक्रम्य "प्राणोस्मिप्रज्ञात्मे" त्युक्त्वा अंते "सएषप्राणएवप्रज्ञात्माऽऽनंदोजरोमृत" इत्युपसंहारेणब्रह्मण्येकवाक्यत्वावगतौ तन्मध्यगतान्यलिंगानिब्रह्मण्येवनेयानीतिसिद्धांतइत्याहुरित्यर्थः ॥ इतींद्रलिंगादित्यादि ॥ यथाश्रुतभाष्यानुरोधेनैवमुक्तिः । भामत्यांतुशरीरधारणरूपलिंगस्यवायुगतत्वेपिवायुव्यापारस्यपरमात्मायत्तत्वात् वक्तृत्वस्यचवाक्करणकव्यापारवत्त्वरूपस्य "येनवागभ्युद्यत" इतिश्रुतेर्जीवरूपेणोपपत्तेरनेकब्रह्मलिंगानुरोधेनेंद्रलिंगानामन्यथासिद्धेर्नपूर्वपक्षोदयइत्याक्षिप्य "योवैप्राणःसप्रज्ञा यावाप्रज्ञासप्राणः सहह्येतावस्मिञ्छरीरेवसतःसहोत्क्रामत" इतियस्यैवप्राणस्यप्रज्ञात्मनोपास्यत्वमुक्तं तस्यैवप्राणस्यप्रज्ञात्मनासहोत्क्रमण

तींद्रलिंगात् "इदंशरीरंपरिगृह्योत्थापयती" तिवायुलिंगात् "वक्तारंविद्या" दितिजीवलिंगाच्चेंद्रादिरे
वप्राणइतिप्राप्ते "यंत्वंमनुष्यायहिततम" मितिहिततमत्वादिब्रह्मलिंगाद्ब्रह्मैवप्राणइतिसिद्धांतइत्याहुः ।

गु० इंद्रलिंगादिति ॥ इंद्रस्यवचनरूपलिंगादित्यर्थः ॥ वायुलिंगादिति ॥ शरीरधारणरूपवायुलिंगादित्यर्थः ॥ जीवलिंगादिति ॥ वागादिभिःकरणैःव्याप्तृतस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० कथनात् निर्भेदेब्रह्मणिद्विवचनसहभावोत्क्रमणानामयोगाद्यथायोगंवाय्वादयस्त्रयएवात्रोपास्याः । वाक्यभेदस्यसह्यत्वादितिपूर्वपक्षयित्वा प्रागुक्तैकवाक्यतामाश्रित्यसिद्धांतितं । उक्तंच "तस्मादनन्यथासिद्धब्रह्मलिंगानुसारतः । एकवाक्यबलात्प्राणजीवलिंगोपपादन"मितीति ध्येयं । सूत्रार्थान्क्रमेणदूषयिष्यन्नाद्यसूत्रोक्तसिद्धांतहेतुंतावद्दूषयति ॥ **तत्रेति** ॥ यदुक्तंहिततमत्वलिंगमितितत्किंभामत्याद्युक्तरीत्यापुमर्थ हेतुत्वमुतपुरुषार्थरूपत्वमितिविकल्प्याद्येऽसिद्धंब्रह्मणीत्याह ॥ **नतावदिति** ॥ अज्ञानोच्छेदस्यैवपरमपुरुषार्थत्वात्तस्यचज्ञानादेवसिद्धेः ।

तत्र । नतावत्परमपुरुषार्थसाधनत्वंहिततमत्वं । त्वन्मतेज्ञानादेवाज्ञाननिवृत्त्याब्रह्मणितस्याभावात् । परमपुरुषार्थत्वंहिततमत्वंचेत्सर्वोपप्लवरहितंमोक्षदशानुगतंशुद्धचैतन्यंहिततमंवाच्यं । तस्यहिततमत्वं चनविशिष्टंप्रति । तस्यमोक्षदशायामभावात् । नापिशुद्धंप्रति । तस्याखंडत्वेनास्येदंहितमितिविभागा योगात् । किंचहितत्वंविनानहिततमत्वं । नचाखंडेहितत्वसामान्यंहिततमत्वविशेषश्चयुक्तः । तस्मा न्नहिततमत्वंब्रह्मलिंगं । नापि "तंमामायुरमृतमित्युपास्स्वे"त्युक्तममृतत्वोपासनकर्मत्वंचब्रह्मलिंगं ।

प्र० उक्तंच "परमपुरुषार्थस्यापवर्गस्यपरमात्मज्ञानादन्यतोऽनवाप्ते"रिति । परंपरयातद्धेतुत्वस्यजीवेपिसंभवात् । नचमुक्तिहेतुज्ञानविषयत्वं तत् । अशब्दार्थत्वात् । किंचात्रप्राणःकिंविशिष्टंब्रह्मेतिसिद्धांत्यते शुद्धमितिवा । आद्येऽसिद्धेः । द्वितीये "एषह्येवसाधुकर्मे"त्युक्तपुण्यपा पकर्तृत्वाद्ययोगइतिभावः । द्वितीयंनिरस्यति ॥ **परमेति** ॥ तत्किंविशिष्टस्यशुद्धस्यवालिंगं । नाद्यः । तस्याज्ञानाद्युपप्लववतस्तदयोगात् । द्वितीयेविशिष्टंसंसारिणंप्रतिहिशुद्धंहिततममित्युच्यतेमुक्तंशुद्धंप्रत्येववा । आद्यंनिरस्यति ॥ **तस्येति** ॥ द्वितीयंनिराह ॥ **नापीति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अस्येतिषष्ठ्यर्थस्यभेदघटितत्वात्कल्पितभेदस्यापितदाऽभावादितिभावः ॥ **अविद्यमानेति** ॥ त्वन्मतउपासनाविषयस्यासत्त्वस्वीकारात् । तथाचनपूर्वपक्षनिरासइतिभावः । सर्वकर्मालेपहेतुज्ञानविषयत्वंशुद्धस्यांगीकृत्यशुद्धंब्रह्मैवप्रकरणेगीयतइत्युच्यते उतविशिष्टस्यैवतदुपेत्यतदेवात्रोच्यतइतिविकल्प्याद्यंदूषयति ॥ **शुद्धइति** ॥ शुद्धस्यनिष्कलंनिष्क्रियमित्यादिनौदासीन्यश्रवणादितिभावः । द्वितीयंनिरस्यति ॥ **विशिष्टेति** ॥ **एवमिति** ॥ नापिज्ञानात्मत्वं । जीवेपिसंभवात् । नाप्यजरत्वामृतत्वलोकपालत्वादीनि । इंद्रादिदेवेतदुपपत्तेः । किंचैतानिप्रज्ञात्मत्वादीनिशुद्धेचेदेषह्येवसाधुकर्मेत्याद्ययोगः । विशिष्टेचेदसिद्धिरित्यादिरूपेणदूष्यमित्यर्थः । इदंपरेषामनारभ्यमेवेत्याह ॥**इदंचेति**॥

अविद्यमानतदुपासनकर्मत्वस्येंद्रादावपिसंभवात् । नापि "सयोमांवेदनस्तेयेननभ्रूणहत्यये"त्युक्तःस्वज्ञानेनसर्वकर्मालेपोब्रह्मलिंगं । शुद्धे "एषह्येवसाधुकर्मकारयति एषलोकाधिपति"रित्यादेरयोगात् । विशिष्टज्ञानेनचत्वन्मतेसर्वकर्मालेपाभावात् । एवंलिंगांतरंदूष्यं । इदंचाधिकरणंजीवत्वनिषेधेनब्रह्मत्वविधानात्तदभेदप्रतिकूलं ॥

गु० कार्यकारणाध्यक्षस्यजीवस्यविज्ञेयत्वरूपलिंगादित्यर्थः । वक्तृत्वंचवाक्करणकव्यापारवत्त्वं ॥ **लिंगांतरंदूष्यमिति** ॥ सएषप्राणएषप्रज्ञात्मानंदोजरोऽमृतइत्यादिलिंगांतरमपिदूष्यमित्यर्थः । नन्वेवंभवत्पक्षेपिजीवलिंगानांतद्विशेषेंद्रपरत्वेनप्राणोस्मीतिप्राणस्यजीवविशेषेंद्रविशेषणत्वप्रतीतेः प्राणलिंगस्यापितत्परत्वेनेंद्रएवप्राणइत्येक

SGDF
Sri Gargeshwari Digital Foundation

प्र० तथाचाभेदवादिभिःकथमिदमारंभणीयं। स्वव्याहतत्वादितिभावः। रामानुजमतमनूद्यपराचष्टे ॥ **केचित्त्विति** ॥ प्रतर्दनविद्यायां "सहोवाचप्राणोस्मिप्रज्ञात्मामामायुरमृतमित्युपास्स्वे"त्युपासनाकर्मतयेंद्रप्राणशब्दनिर्दिष्टः किंप्रसिद्धइंद्रउतपरमात्मेतिसंशये "मामेवविजानीही" ति "प्राणोस्मिप्रज्ञात्मामामायुरमृतमित्युपास्स्वे"तींद्रलिंगात् अस्यच "इंद्रस्त्रिशीर्षाणंत्वाष्ट्रमह"न्नित्युपक्रमेश्रुतत्वाष्ट्रवधादिभिःप्रसिद्धत्वात् "आनंदोऽजरोमृत"इत्यानंदादिलिंगानामुपक्रमावगतत्वाष्ट्रहननादिलिंगानुरोधेननेयत्वादिंद्रएव । यद्यपि "वक्तारंविद्या"दितिजीवमात्रलिंगं "इदंशरीरंपरिगृह्योत्थापयती"तिपंचवृत्तिरूपमुख्यप्राणलिंगंचास्ति तथापिविशेषाकांक्षायांजीवधर्मस्येंद्रशब्दवाच्यप्रकृतजीवविशेषनिष्ठत्वप्र

॥ केचित्तु "मामुपास्स्वे"तींद्रलिंगात् जीवलिंगानांचजीवविशेषेंद्रेपर्यवसानात् प्राणलिंगेसत्यपि "प्राणोस्मी"तिप्राणस्यजीवविशेषेंद्रविशेषणत्वप्रतीतेर्जीववायुपक्षयोरनुत्थानादिंद्रःप्राणइतिप्राप्ते "आनंदोजरोमृत"इत्यादिब्रह्मलिंगाद्ब्रह्मैवप्राणइतिसिद्धांतइत्याहुः ।

प्र० तीतेः प्राणोस्मीतिसामानाधिकरण्येनप्राणस्यजीवविशेषेंद्रविशेषणत्वप्रतीतेःप्राधान्येनप्रतिपाद्यत्वशंकानुदयान्नतयोरिहप्राप्तिरितिप्राप्ते "सएषप्रज्ञानंदोजरोमृतंमनुष्यायहिततमं एषह्येवसाधुकर्मकारयति तद्यथारथस्यारेषुनेमिरर्पितानाभावराअर्पिताएवमेवैताभूतमात्राःप्रज्ञामात्रास्वर्पिताःप्रज्ञामात्राःप्राणेऽर्पिताः एषलोकाधिपतिरेषसर्वेश्वर"इत्यादिनाऽऽनंदाजरामृतत्वहिततमत्वसाध्वसाधुकर्मकारयितृत्वचेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वसर्वलोकाधिपतित्वादिपरमात्मधर्मबाहुल्यात् स्वावस्थितपरमात्मोपासनाभिप्रायेणमामुपास्स्वेत्युपदेशोपपत्तेरानंदादिबहुतरगुणानुरोधेनत्वाष्ट्रवधादेर्वर्णनीयत्वादिंद्रप्राणादिनिर्दिष्टोजीवादर्थांतरभूतःपरमात्मेतिसिद्धांतइत्याहुरित्यर्थः । उक्तंच "विद्याप्रातर्दनीसा वद

प्र०तिहिततमोपास्तिकर्मेंद्रमेव ख्यातप्राणेंद्रचिह्नान्वितमपि तदसौविश्वकर्तेतिचेन्न। ब्रह्म त्रेधाह्युपास्यं बहुविधचिदचित्कंचुकं स्वात्मनाच प्राणेंद्रप्रक्रमोपि प्रबलतरमहावाक्यवैघस्त्यभग्न"इत्यादि । यद्यपिभाष्येप्राणशब्दनिर्दिष्टोजीवएवोतपरमात्मेत्येवसंशयोदर्शितः । नत्विंद्रएवेति । तथापि "प्रसिद्धजीवभावइंद्रएवे"तिपूर्वपक्षांतेकथनात् श्रुतप्रकाशेतथैवव्याख्यातत्वाच्चेंद्रःप्राणइतिप्राप्तइत्युक्तमितिध्येयं । सूत्रानानुगुण्येन पूर्वपक्षंनिरस्यति ॥ **तन्नेति** ॥ ननुजीवशब्दस्यजीवविशेषेंद्रपरत्वमुच्यतइतिचेत्तथापिमुख्यप्राणपदायोगात् । तस्यत्वन्मतेजडत्वेनतद्विशेषेंद्रपरत्वायोगात् । सामान्यशब्दस्यविशेषपरत्वेलक्षणापत्तेश्च । दोषांतरमाह ॥ **तत्रेति** ॥ "मामुपास्स्वेतिवक्तुरिंद्रस्यस्वात्मनएवोपदेशा"दितित्वयाव्याख्यातत्वाज्जीवलिंगपदेनवक्तृत्वादेर्ग्रहणमिवात्मोपदेशोपिग्रहीतुंशक्यतइतितत्सूत्रंव्यर्थमित्यर्थः । उपलक्षणमेतत् । प्राणस्येंद्रविशेषणत्वेनाप्राधान्येधर्मिनिर्देशायसूत्रेप्राणस्तथेतिप्राणपदप्रयोगोनस्यात् । किंत्विंद्रस्तथानुगमादित्येवस्यात् । यदत्रोक्तंश्रुतप्रकाशे प्राणशब्दस्यपरमात्मलिंगप्रतिपादकवाक्यस्थत्वेनसिद्धांतहेतुद्योतकत्वात्सूत्रेप्राणपदेनधर्मीनिर्दिष्टइति तन्न । सिद्धांतहेतोस्तथानुगमादित्यादिनैवस्फुटंप्रतिभासात्पूर्वपक्षहेतोःकेनाप्यप्रतीतेस्तत्सूचनार्थत्वात्प्राधान्याच्चेंद्रइत्येवनिर्देष्टव्यत्वात् । अतएवतद्भाष्ये "इंद्रशब्दस्यजीवविशेषएवप्रसिद्धे"रितिपूर्वपक्षहेतुर्बहिरेवोक्तइतिध्येयं । ननूक्तरीत्याजीवमुख्यप्राणकोटिकपूर्वपक्षासंभवादगत्यासर्वसमाधेयमेतत् । अन्यथाऽयंदोषोभव

तन्न । इंद्रइत्येवपूर्वपक्षेसतिसूत्रे "जीवमुख्यप्राणलिंगा"दितिशंकायोगात् । तत्रजीवशब्दस्यतद्विशेषेंद्रपरत्वेवक्तुरात्मोपदेशस्यापींद्रलिंगस्यानेनैवसंग्रहसंभवात् "नवक्तुरात्मोपदेशा"दितिपृथक्सौत्रशंकायोगात् ।

गु०एवपूर्वपक्षोवाच्यः। तथाचजीवप्राणलिंगायोगादितिशंकायोगः तत्रजीवशब्दस्यतद्विशेषपरत्वेचवक्तुरात्मोपदेशेपिइंद्रलिंगस्यानेनैवसंग्रहसंभवात् वक्तुरात्मोपदेशा

SGDF
Sri Gargeshwari Digital Foundation

प्र० तामपिसमइत्याशंक्य स्यादयंदोषोऽद्वैतिनामिदमेवोदाहृत्यत्रितयपरत्वेनपूर्वपक्षयतां । नत्वस्माकंप्रागुक्तदोषास्पृष्टोदाहरणांतरंकुर्वतामित्याह ॥ **अस्मदीयेति** ॥ **नेंद्रइति** ॥ तस्यामरत्वेनबहुकालस्थायिनश्शतायुष्ट्वायोगात् । त्वन्मतेवक्तृत्वादिजीवलिंगस्य तद्विशेषेंद्रनिष्ठत्वेतत्रपर्यव सानमिव नास्मन्मतेजीवलिंगमिंद्रेपर्यवसाययितुंशक्यतइतिस्वातंत्र्येणजीवकोटिकपूर्वपक्षोयुक्तः । प्राणोपिनान्यविशेषणतयाप्रतीयतइतित त्कोटिकपूर्वपक्षोपियुक्तइतिसर्वमनवद्यमितिभावः । एवंमतद्वयेऽधिकरणशरीरमाद्यसूत्रार्थंचनिरस्याधुनापूर्वमताभिमतंद्वितीयसूत्रार्थमनूद्य निरस्यति ॥ **यत्त्विति** ॥ प्राग्विवृतानिसूत्राण्यस्माभिः । पराचीने संसारित्वेनपराग्भूते । नन्वात्मोपदेशादित्यनेनस्वोपदेशालाभात्तदर्थं वक्तुरित्येतदित्यतआह ॥ **स्वात्मेति** ॥ भवतामप्ययंदोषइत्यतआह ॥ **अस्मदिति** ॥ नत्वन्मतइवमन्मतेवक्तुरित्यनेनेंद्रोगृह्यते । किंतुवि

अस्मदीयोदाहरणेतुजीवलिंगंशतायुष्ट्वंनेंद्रेयुक्तं । मनोवाक्प्राणइत्यादौप्राणोपिनान्यविशेषणं । यत्तुपरकीयं "नवक्तु" रितिसूत्रव्याख्यानं वक्तुरुपदेष्टुरिंद्रस्यप्राणोस्मीत्यात्मोपदेशान्नेतिचेन्न । अस्मिन्प्रकरणे "यावद्ध्यस्मिन्शरीरेप्राणोवस तितावदायु"रित्यायुरवधित्वस्य "वक्तारंविद्या"दितिवक्तृत्वप्रज्ञात्मत्वादेश्चोक्तेः प्रत्यगात्मसंबंधबाहुल्यमस्ति । तच्चप राचीनेंद्रेनयुक्तमिति । तन्न । उपदेशादित्यनेनैवोपदेष्टृत्वरूपवक्तृत्वलाभेनवक्तुरित्यस्यवैयर्थ्यात् । स्वात्मोपदेशादि त्यस्यतुवक्तृपदप्रयोगेप्यलाभात् । अस्मत्पक्षेचबृहतीसहस्रवक्तारंप्रतींद्रस्यविप्रलंभोनयुक्तइतिसूचनायतस्यसार्थक्यात् ।

गु० दितिपृथक्सौत्रशंकायोगादितिदोषतादवस्थ्यमेवेत्यतआह ॥ **अस्मदीयोदाहरणेत्विति** ॥ नन्वेवंभवत्पक्षेप्युपदेशादित्यनेनैवोपदेष्टृत्वरूपवक्तृत्वलाभाद्वक्तुरि त्यस्यवैयर्थ्यंस्यादित्यतः स्यादेवंयद्यस्माभिर्वक्तुरिंद्रस्येतिव्याख्यायते नैवमित्याह ॥ **अस्मत्पक्षेचेति** ॥ **सदासर्वगतेति** ॥ अत्रब्रह्मणिसदासर्वगतत्वादायुरव

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्वामित्रः । तथापितद्व्यर्थमितिचेन्न । पूर्वपक्षदार्ढ्यार्थत्वादितिभावः । सिद्धांतांशार्थनिरस्यति ॥ **इंद्रइति** ॥ नकेवलमन्यथासिद्धत्वंहेतू नामसिद्धिश्चेत्याह ॥ **आयुरिति** ॥ **वाय्विति** ॥ वायुमुख्यप्राणशब्दितपंचवृत्तिरूपवाय्वित्यर्थः । सर्वगतत्वान्नावधित्वंकरणशून्यत्वान्न वक्तृत्वमित्यर्थः ॥ **गतिमनुक्त्वेति** ॥ ब्रह्मपरत्वेस्वात्मोपदेशरूपबाधकेशंकितेमन्मतइवांतर्याम्यादिविवक्षयातदुक्तिरितिगत्युक्त्याबाधकमप रिहृत्यप्रकरणस्यब्रह्मपरत्वोक्तिरयुक्तेत्यर्थः । अयंचदोषस्त्वत्वापितुल्यइतिशंकानिरासायवागत्युक्तिपरत्वमस्ययुज्यतइत्यवगत्यैवमाश्रितमित्याशं

इंद्रेपिस्वशरीरावस्थानवक्तृत्वप्रज्ञात्मत्वादेःसंभवादायुरवधित्ववक्तृत्वयोश्चवायुजीवयोरेवसंभवेनस दासर्वगतइंद्रियादिरहितेचब्रह्मण्यसंभवेनचब्रह्मपक्षप्रतिकूलत्वात् । किंचास्माकंमतइववक्तुरात्मो पदेशस्यगतिमनुक्त्वाप्रकरणस्यब्रह्मपरत्वोक्तिरयुक्ता । उक्तंचानुगमादित्यनेनप्रकरणस्यब्रह्मपरत्वं । केचित्तु परमात्मासाधारणधर्मोध्यात्मशब्दार्थः । तत्संबंधबहुत्वमध्यात्मसंबंधभूमेत्याहुः । तन्न ।

प्र०कानिरासायवोक्तमस्मन्मतइवेति। नन्वेवंबाधकेशंकितेस्वपक्षहेतुंप्रथममनुक्त्वाशास्त्रदृष्ट्येत्यनेनतत्परिहारःक्रियते । अतोनदोषइत्यतआह ॥ **उक्तंचेति** ॥ तथाचेहैवबाधकपरिहारःकर्तव्यइतिभावः । एतेनास्यापिस्वपक्षहेतुपरत्वआद्यस्यवैयर्थ्यमित्युक्तंभवति । नचतत्रहिततम त्वाजरत्वादिकमेवविवक्षितं इहपुनरायुरवधित्वादिकमतोनदोषइतिवाच्यं । निरसिष्यमाणत्वादितिभावः ॥ **केचित्त्विति** ॥ "मामेववि जानीहि मामुपास्स्वे"त्यादिवक्तुस्त्वाष्ट्रवधादिनाप्रज्ञातजीवभावस्येंद्रस्योपास्यत्वेनात्मनएवोपदेशादिप्रक्रमस्यजीववविषयत्वे आनंदोजरइत्याद्युपसं

SGDF
Sri Gargeshwari Digital Foundation

प्र० हारस्तदनुगुणएवनेयइतिचेत् अस्मिन्प्रकरणेहिततमत्वसाध्वसाधुकर्मकारयितृत्वादीनामध्यात्मशब्दितानांपरमात्मासाधारणधर्माणांसंबंध बाहुल्यमस्तीत्यर्थइत्याहुरित्यर्थः ॥ **उक्तेति** ॥ उक्तंबाधकमपरिहृत्यब्रह्मधर्मबाहुल्योक्तिरयुक्ता । नचस्वपक्षहेतुंपूर्वमुक्त्वापश्चाद्बाधकंशास्त्रसू त्रेणनिरसिष्यते । उक्तंचश्रुतप्रकाशे "पूर्वपरमात्मपरत्वसाधकहेतुरुक्तः । पूर्वपक्षयुक्तेःकःपरिहारइत्यतश्शास्त्रसूत्रमिती"तिवाच्यं । अनु गमादित्यनेनैवस्वपक्षहेतोरुक्तत्वात् । अत्रविशेषस्तुकिंचेहेत्यत्रनिरसिष्यतइतिप्रागुक्तदोषग्रस्तत्वादित्यर्थः ॥ **संबंधेति** ॥ अध्यात्मभूमेत्यने नैवपूर्णत्वादितिभावः । नन्वसिद्धिपरिहारायसंबंधपदमित्यतआह ॥ **अस्मिन्निति** ॥ आधाराधेयभावस्यसप्तम्यर्थत्वादितिभावः । स्वपक्ष हेतुपरत्वेदोषांतरमाह ॥ **किंचेति** ॥ **भूमपदप्रयोगादिति** ॥ एतेनयदत्रोक्तंश्रुतप्रकाशे "आद्यंसूत्रंसएषप्राणएवप्रज्ञात्मानंदोजरइत्यादि वाक्यमात्रविषयंव्याख्यानं । नतुपरैरिववाक्यांतरस्थहेतवोप्यत्रविवक्षितत्वेनोक्ताः । अध्यात्मसंबंधभूमेतिद्वितीयसूत्रएवबहुवाक्यस्थहेतुबा हुल्यस्यविवक्षितत्वावगमा"दित्यादिनानाद्वैतिमतइवास्माकंपौनरुक्त्यमिति तन्निरस्तं । अत्रैवबाहुल्यवाचिभूमशब्देनसर्वस्यविवक्षितुंशक्य त्वादिति ॥ **आनंदेति** ॥ आद्यसूत्रोक्तानामपीत्यर्थः । एतेनप्राणशब्दचिह्नितवाक्यगतहेतोरेववर्णनीयत्वादित्यपिप्रत्युक्तं । तेनास्यवैयर्थ्या

उक्तदोषत्वात् । संबंधपदवैयर्थ्याच्च । अन्यथा "अंतस्तद्धर्मे"त्यादावपिसंबंधपदप्रसंगात् । अस्मिन्नितिसप्तम्यैवसंबंधो क्तेश्च । किंचेहभूमपदप्रयोगाद्धिततमत्वादिवदानंदाजरत्वादीनांसर्वेषांब्रह्मधर्माणामत्रैवविवक्षासंभवेनानुगमादितिव्यर्थं ।

गु० धित्वस्यासंभवः । इंद्रियरहितत्वाद्वक्तृत्वस्यासंभवइतिसंबंधोबोध्यः ॥ **उक्तदोषत्वादिति** ॥ किंचास्मन्मतइववक्तुरात्मोपदेशस्यगतिमनुक्त्वाप्रकरणस्यब्रह्मपरत्वो

प्र० भावेप्यनेनबहुविषयेणतस्यवैयर्थ्यकथनात् । अद्वैतिमतेतृतीयसूत्रार्थमनूद्यनिरस्यति ॥ **यच्चेति** ॥ दृष्टांतेदार्ष्टांतिकेचब्रह्माद्यैकात्म्यज्ञानं तादृशव्यपदेशहेतुरित्यर्थः । किमत्रदार्ष्टांतिकइंद्रेदृष्टांतेवामदेवेचाहमर्थेविशिष्टएवप्राणशब्दितब्रह्मत्वस्यमन्वादित्वस्यचज्ञानंमामेवविजानीही त्यादिव्यपदेशहेतुरुच्यते उतलक्षितस्यचिन्मात्रस्यचिन्मात्रेणैक्यज्ञानंतस्यहेतुरितिविकल्प्याद्यंनिरस्यति ॥ **चिदचिदिति** ॥ द्वितीयंनिर स्यति ॥ **चिन्मात्रेति** ॥ चिन्मात्रंविजानीहि चिन्मात्रंमन्वादीत्येवस्यात् । नतुमामिति । अहमितिच । नहिचैत्रंविजानीहीतिवक्तव्येमा मितिव्यपदेशोयुज्यतइत्यर्थः । ननुमामित्यस्याहमित्यस्यचचिन्मात्रमर्थइत्यतआह ॥ **मामित्यादाविति** ॥ तस्योदासीनस्यसकलकारकश क्तिविधुरस्यकर्मत्वायोगात् । ननूल्लेखित्वमात्रेणमामित्युक्तिर्नतुकर्मत्वमितिचेत्कर्मणिद्वितीयेतिकर्मत्वार्थकद्वितीयाश्रवणादितिभावः । लक्ष णापत्तेश्चेत्यपिध्येयं । सिद्धांतेचस्वप्रयुक्तास्मच्छब्दस्यस्वांतर्यामिण्येवमुख्यत्वोक्तेर्नकोपिदोषइतिभावः । नन्वथापिभवन्मतेशास्त्रशब्दस्यांतर्या मिणियौगिकत्वाद्वेदादिशास्त्रेरूढत्वात् रूढेश्चयोगापेक्षयामुख्यत्वस्यरथकारनयेस्थितत्वाच्छास्त्रशब्दोमुख्यामुख्यन्यायेनवेदादिपरोनांतर्यामि

यच्चशास्त्रदृष्ट्येत्यस्यपरकीयंव्याख्यानं इंद्रःस्वात्मानंयथाशास्त्रमार्गेणज्ञानेनाहंब्रह्मेतिपश्यन्मामेवजानीहीत्युपदिदेशवाम देववदिति । तन्न । चिदचित्संवलनात्मकाहंशब्दार्थेब्रह्मत्वस्यमन्वादित्वस्यवाऽभावेन "मामेवजानीहि अहंमनु"रित्या दिव्यपदेशहेतोरहंब्रह्मेत्यादिदृष्टेर्भ्रांतिदृष्टित्वेनशास्त्रदृष्टित्वाभावात् । चिन्मात्रैक्यदृष्टेश्चभिन्नविषयत्वेनमांविजानीही त्यादिव्यपदेशाहेतुत्वात् । मामित्यादौचिन्मात्रलक्षणायांच "मांविजानीहि योमांवेदे"तिवित्तिकर्मत्वोक्तिरयुक्ता ।

गु० क्तिरयुक्तेत्युक्तदोषादित्यर्थः ॥ **वित्तिकर्मत्वोक्तिरयुक्तेति** ॥ अन्यथावित्तिकर्मत्वरूपदृश्यत्वेनशुद्धस्यापिमिथ्यात्वंस्यादितिभावः । ननुशास्त्रपदेरूढिरेवास्त्वित्यतः

SGDF Sri Gurgeshwari Digital Foundation

प्र० परइत्याशंक्याह ॥ **किंचेति** ॥ "संध्यामुपासीत नसुरांपिबे"दित्यादिनाहितमिदंकर्तव्यमहितमिदंनकर्तव्यमितिशासकत्वाच्छास्त्रमिति "शासुअनुशिष्टा"वित्यत:ष्ट्रन्प्रत्ययेशास्त्रमितियोगेनैवोपपत्तेर्नरूढिरित्यर्थः । नन्वेवंरूढिमात्रपरिलोपः । सर्वत्रयोगेनैवोपपत्तेरित्यतोयत्रयोगाभावस्तत्रैवरूढिरितिभावेनतत्रवार्तिकसंमतिमाह ॥ **उक्तंचेति** ॥ नामधेयपादेप्रोक्षण्यधिकरणेउक्तमित्यर्थः । तदधिकरणंजन्मादिसूत्रे प्रपंचितं । अश्वकर्णइतिशब्दवाच्येकस्मिंश्चिद्वृक्षविशेषेयदिवाजिकर्णसदृशौकर्णौभवेतां तर्ह्यश्वकर्णपदस्यसत्स्ववयवार्थेषुततएवोपपन्नत्वेनकल्पकाभावात्समुदायशक्तिंरूढिंक:कल्पयेत् । नकोपि । ततस्तत्रावयवार्थाभावादेवरूढिरंगीकृता । अत्रावयवार्थोस्तीत्यर्थः । नन्वस्तूभयत्रयोगस्तथाप्यंतर्यामिग्रहणेकोहेतुरितिचेदुक्तानुपपत्तिगणादेवेतिब्रूमः । हेत्वंतरंचात्राह ॥ **शास्तृत्वंचेति** ॥ प्रवृत्तिहेतुपौष्कल्यस्यब्रह्मण्येवभा

किंचशास्त्रशब्दस्यहिताहितशास्तरिवेदादौयोगसंभवान्नरूढिः। उक्तंच "भवेतांयदिवृक्षस्य वाजिकर्णौकथंचन । अदृष्टांसमुदायस्यकःशक्तिंजातुकल्पये"दिति । शास्तृत्वंच "एकः शास्तानद्वितीयोस्तिशास्ते"त्यादिश्रुत्याब्रह्मण्येवमुख्यं । मुख्यसंभवेचामुख्यमयुक्तं ।

गु० किंविद्वद्रूढिर्वापामररूढिर्वा । नाद्यइत्याह ॥ **नरूढिरिति** ॥ ननुयोगेनशास्त्रशब्दवाच्यत्वंवेदस्यकुतोभ्युपेयते । रूढिरेवकिंनस्यादित्यतो योगासंभवेरूढिरभ्युपेया । नतुतत्संभवे । अन्यथातवापसिद्धांतःस्यादित्यभिप्रायेणतद्वाक्यमुदाहरति ॥ **उक्तंचेति** ॥ तथाचतत्रवाजिकर्णशब्दस्यवृक्षेयोगासंभवेनरूढिकल्पनेपिप्रकृतेयोगसंभवेनरूढिकल्पनायोगादितिभावः । अस्तुवाशास्त्रशब्दस्यवेदेपियोगएव । तथापिशास्त्रशब्देनवेदएवगृह्यतइत्यतः तत्रप्रयोजकीभूतस्ययोगस्यब्रह्मणिमुख्यत्वात्तदेवग्राह्यमित्यभिप्रेत्य तत्रमुख्यत्वेकिंज्ञापकमित्यतआह ॥ **शास्तृत्वंचेति** ॥ शास्त्रशब्दप्रवृत्तिनिमित्तंशास्तृत्वंब्रह्मणिमुख्यं । तथापितदेवकिमर्थंग्राह्यं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० वादितिभावः । वैदिकप्रयोगबाहुल्यरूपरूढिश्चास्तीत्याह ॥ दर्शितश्चेति ॥ रूढिश्चतत्रनास्तीत्याह ॥ लोकेति ॥ यद्वायोगार्थानुसंधान
शून्यानाम(भावे)पिलौकिकानांशास्त्रपदेनवेदप्रतीतेरूढिरेवेत्यतआह ॥ लोकेति ॥ शास्त्रपदेनांतर्यामिग्रहणेहेत्वंतरमाह ॥ अपिचेति ॥
मांविजानीहीतिव्यपदेशविषयत्वमिंद्रस्याहंब्रह्मास्मीत्यादिशास्त्रजन्यब्रह्मात्मैक्यज्ञानद्वारेतिव्यवधानेनत्वयोच्यते । अस्माभिस्तुसाक्षादेवांत
र्यामिदृष्ट्याप्राणोस्मीतिव्यपदेशविषयत्वमुच्यते । अतोप्यस्मदभिमतएवार्थइत्यर्थः । ननुदृष्टांतबलादेवमाश्रीयतइतिचेन्न । विशिष्टाभेदायो
गेनदूषितत्वात् । चिन्मात्रलक्षणायाअप्युक्तदोषत्वात् । दोषांतरेणापिदूषयति ॥ सौत्रइति ॥ कथंतर्ह्यंतर्यामिपक्षेयोगइत्यतआह ॥ भग
वदिति ॥ उपेंद्ररूपेणबलेस्साम्राज्यमादायेंद्रायदत्तमितिभागवतादिप्रसिद्धिंहिशब्देनद्योतयति ॥ केचित्त्विति ॥ प्रज्ञातजीवभावेनेंद्रेण

दर्शितश्चभाष्यकृता "संविच्छास्त्रंपरंपद"मितिब्रह्मणिशास्त्रपदप्रयोगः । लोकप्रसिद्धिस्तुशास्त्रशब्दस्यवेदादन्यत्रैव । अपि
चसकारणकदृष्टिद्वाराव्यपदेशविषयोक्तितोप्यस्मद्रीत्यासाक्षादेवतदुक्तिर्युक्ता । सौत्रोवामदेवदृष्टांतोपिपरपक्षेनयुक्तः ।
"अहंमनु"रित्यादिनोक्तंह्यैक्यंचिन्मात्रविवक्षयावक्तव्यं । नचतद्विवक्षायां "अहंभूमिमददामार्यायाहंदृष्टिंदाशुषेमर्त्याये"
त्यादिविशिष्टविषयमुत्तरवाक्यंयुज्यते । भगवद्धर्मोहींद्रायभूमिप्रदानादिकं । केचित्तु "यस्यात्माशरीर"मित्यादिशास्त्रे
णयादृष्टिःजीवोब्रह्मशरीरंशरीरवाची चशब्दोदेवमनुष्यादिशब्दवच्छरीरिपर्यंतइत्येवंरूपासाशास्त्रदृष्टिरित्याहुः । तन्न ।

गु० अमुख्यस्यापिवेदस्यशास्त्रशब्देनग्रहणोपपत्तेरित्यतआह ॥ मुख्यसंभवेचेति ॥ एवंमहायोगेनशास्त्रशब्दस्यविष्णुपरत्वमुपपाद्यतन्मूलकविद्वद्रूढ्यापिसमर्थयते ॥
दर्शितश्चेति ॥ द्वितीयंदूषयति ॥ लोकेति ॥ सकारणकेति ॥ शास्त्ररूपकारणजन्यात्मब्रह्मैक्यदृष्टिः । तद्विषयीभूतंब्रह्माहंशब्दव्यपदेशविषयइतिपरंपरये

SGDF
Sri Gargeshwari Digital Foundation

प्र० मामेवविजानीहिमामुपास्स्वेत्युपास्यस्यब्रह्मणएवस्वात्मत्वोपदेशोयंनप्रमाणांतरप्राप्तस्वात्मावलोकनकृतः। किंतु "यआत्मनितिष्ठन्यआत्मनोंतरोयमात्मानवेदयस्यात्माशरीर"मित्यादिशास्त्रेणजीवब्रह्मणोश्शरीरशरीरिभावप्रतिपादनात् शरीरवाचिशब्दानांशरीरिपर्यंतत्वस्य "अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी"त्यादिशास्त्रेणलब्धत्वात् तेनशास्त्रेणलोकतश्चजनितयादृष्ट्याब्रह्मणोजीवशरीरत्वंशरीरवाचिशब्दानां शरीरिपर्यंतत्वपर्यवसानंचजानतोवामदेवस्य "अहंमनुरभव"मित्यादौस्ववाच्यहंशब्देनस्वशरीरकपरब्रह्मोपदेशवदिंद्रस्यापिमामुपास्स्वेत्यादिनास्वशरीरकपरमात्मदृष्टिकृतइत्यर्थइत्याहुरित्यर्थः ॥ उक्तेति ॥ शास्त्रशब्दस्यब्रह्मण्येवमुख्यतयामुख्यसंभवेऽमुख्यवेदग्रहणा योगात् । अस्मद्रीत्यासाक्षादेवोपदेशविषयोक्तिसंभवेशास्त्रकारणकदृष्टिद्वारोपदेशविषयोक्तेरयुक्तत्वादित्युक्तदोषग्रस्तत्वादित्यर्थः । शास्त्रपदं चाधिकमित्याह ॥ भगवतीति ॥ लोकेब्राह्मणमानयेदित्यादौशरीरिपर्यंतत्वप्रतीतेरितिभावः ॥ यत्त्विति ॥ विवृतमेतत्प्राक् ॥ त्रैविध्यप्रसंगादिति ॥ ब्रह्ममात्रग्रहणेतुनैवमितिभावः । कथंतर्हिप्राणशब्दोब्रह्मणीत्यतःप्रवृत्तमाश्रितत्वादिति । तस्यार्थमाह ॥

उक्तदोषत्वात् । भगवत्यहंशब्दप्रयोगेशरीरशब्दःशरीरिपर्यंतइतिलोकदृष्टेरपिहेतुत्वेनशास्त्रपदप्रयोगेविशेषहेत्वभावाच्च । यत्तु "जीवमुख्यप्राणे"तिसूत्रस्यपरकीयंव्याख्यानं तत्तल्लिंगानुग्रहार्थंकिंचिदत्रजीववाक्यंकिंचिन्मुख्यप्राणवाक्यंकिंचिद्ब्रह्मवाक्यं । तथाचत्रयोप्युपास्याइतिचेन्न । उपासात्रैविध्यप्रसंगात् । ॥ ४११ ॥

गु० त्यर्थः । अस्मन्मतेसाक्षादेवाहंशब्दविषयीभूतस्यांतर्यामिणःप्रदर्शनमित्यर्थः ॥ उक्तदोषत्वादिति ॥ शास्त्रशब्दस्यहिताहितशास्तरिवेदादौरूढ्यभावेयोगस्यैववक्त

प्र० अन्यत्रेति ॥ चातुर्विध्यादिति ॥ नन्विंद्रलिंगंशास्त्रदृष्ट्येत्यनेनैवपरिहृतं नपुनरत्रशंकार्हमितिचेत्तर्हिजीवमुख्यप्राणलिंगानामपिब्रह्मैक्यांगीकारेणापिसमाधातुंशक्यत्वेनसाम्यात् । तथोपास्यत्वेनपुनश्शंकेत्यस्यापिसाम्यादितिभावः ॥ इष्टापत्तेरिति ॥ तेनैवत्रिविधोपासनायाअंगीकृतत्वादितिभावः । ननुनायंदोषः । उपासात्रैविध्यस्यपूर्वपक्षयुक्तित्वेनसिद्धांतेतत्प्रसंगस्यानापाद्यत्वात् । किंतुमामेवविजानीहीत्युपक्रम्य अन्यत्र "प्राणस्यप्राण"मित्यादिवाक्यांतरेब्रह्मलिंगैः प्राणशब्देब्रह्मपरतायाआश्रितत्वादिहापिहिततमत्वादिब्रह्मलिंगयोगादिति । तन्न । "अपीतौतद्वत्प्रसंगात्"इत्यादिवत्प्रसंगपदाभावात् । "मामेवविजानीही"तींद्रलिंगस्यापिसत्त्वेनचातुर्विध्यादितिवक्तव्यत्वाच्च । पूर्ववादिनंप्रतीष्टापत्तेश्च । ननूपक्रमोपसंहारैकरूप्यादेकवाक्यतावगता । अतएवभामत्यांभाष्यमुल्लंघ्यत्रिविधोपासनापरत्वेनवाक्यभेदेनपूर्वपक्षंप्रापय्य तदेकवाक्यताप्रतीतेर्ब्रह्ममात्रपरत्वमितिसिद्धांतितमितिचेदुच्यते । बुद्ध्यादिपरमत्रैवसाप्रज्ञेत्यादिकंयथा । मामुपास्स्वेत्यादिवाक्यंतथास्त्विंद्रादिगोचरं ॥ १ ॥ अत्रैवब्रह्मपरवाक्यसमुदाये यथा "योवैप्राणःसाप्रज्ञायाप्रज्ञासप्राणः सहह्येतावस्मिञ्शरीरेवसतःसहोत्क्रामत"इत्येकदेशोज्ञानक्रियाशक्त्याश्रयबुद्धिप्राणपरः सिद्धांतेपिप्रज्ञाप्राणशब्दयोरुत्क्रमणादिलिंगैर्बुद्धिवायुपरत्वात् तथापूर्वपक्षेपींद्रादिलिंगस्वारस्यार्थंतत्तद्वाक्यमिंद्रादिपरमस्तु ।

प्र० प्राणोस्मिप्रज्ञात्मेत्युक्त्वासएषप्राणइत्युपसंहारेणब्रह्मण्यवगतेनैकवाक्यत्वेनेतिवाचस्पतिमतमाशंक्यनिरस्यति ॥ नन्विति ॥ विवृतंचैतत्प्रागस्माभिः । एकवाक्यत्वावगमेपिनपूर्वपक्षोपमर्दस्संभवतीतिभावेनाह ॥ उच्यतइति ॥ पूर्वार्धंव्याचष्टे ॥ अत्रैवेति ॥ एकदेशः किंचिद्वाक्यं । ज्ञानशक्त्याश्रयबुद्धेः क्रियाशक्त्याश्रयप्राणस्यचप्रतिपादकंयथेत्यर्थः । तत्राविगानमाह ॥ सिद्धांतेपीति ॥ उत्तरार्धंव्याख्याति ॥ तथेति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सूत्रखंडार्थेप्यनुपपत्तिमाह ॥ **आश्रितत्वादिति** ॥ उपलक्षणंचैतत् । अन्यत्रेत्यस्याप्यध्याहारइत्यपिध्येयं ॥ **विप्रकृष्टेति** ॥ अनुगमादित्यनेनोक्तेत्यर्थः ॥ **पुनरुक्तिरिति** ॥ हिततमत्वादिलिंगपर्यालोचनयाब्रह्मत्वावगमादिति व्याख्यातत्वादितिभावः । एवंभाष्याभिमतं निरस्येदानींयत्प्राचांवृत्तिकृतांमतमथवेत्यादिनापरभाष्यएवोपन्यस्तंतदनूद्यनिरस्यति ॥ **इतरेत्विति** ॥ ''शरीरंपरिगृह्योत्थापयती''तिप्राणधर्मेण ''प्रज्ञयावाचंसमारुह्यवाचासर्वाणिनामान्याप्नोती''तिप्रज्ञाशब्दितबुद्धिधर्मेण । क्रियाज्ञानशक्तिद्वयाश्रयणप्राणबुद्धिरूपोपाधिधर्मे

आश्रितत्वादित्यत्रचप्रकृतत्रैविध्यस्यैवान्वयसंभवेब्रह्मपरतायाइत्यध्याहारोनयुक्तः । तद्योगादितिचसर्वनाम्नःसन्निकृष्टत्रैविध्यपरत्वसंभवेविप्रकृष्टब्रह्मलिंगपरत्वमयुक्तं । तद्योगादित्यस्यानुगमादित्यनेनपुनरुक्तिश्च । इतरेतु प्राणधर्मेणबुद्धिधर्मेणस्वधर्मेणचब्रह्मोपासायास्त्रैविध्याद्ब्रह्मवाक्येपिजीवमुख्यप्राणलिंगंनविरुद्धमितिव्याचक्षते । तन्न । अन्यधर्मेणान्योपासनेब्रह्मधर्मादिनाजीवोपासायाःत्रैविध्याज्जीववाक्येपिब्रह्मलिंगंनविरुद्धमितिवैपरीत्यप्रसंगात् ।

प्र०णेतियावत् । ''प्राणएवप्रज्ञात्माऽजर'' इत्यादिब्रह्मधर्मेणचैकस्यैवब्रह्मणउपासनात्रैविध्यात् अन्यत्र''मनोमयःप्राणशरीरोभारूप''इत्यादावुपाधिधर्मेणब्रह्मणउपासनायाआश्रितत्वादिहापितद्योगादितियथाश्रुतमेव । नतुप्रसंगशब्दाध्याहारइत्यर्थः । पूर्वंप्राणस्यैकमुपासनमपरंजीवस्यापरंब्रह्मणइत्युपासनात्रैविध्येनवाक्यभेदप्रसंगोदूषणमुक्तंपूर्वपक्षिणंप्रति इहतुब्रह्मणएकस्यैवोपासनात्रयविशिष्टस्यविधानान्नवाक्यभेदइतिभावः । यद्यपीदंमतंभामत्यामेववाक्यभेदप्रसंगेनदूषितं तथापिप्रबलदोषकथनायैवमुपन्यासः ॥ **जीवेति** ॥ बुद्ध्यवच्छिन्नस्यैवजीवत्वादिति

SGDF Sri Gargeshwari Digital Foundation

प्र० भावः ॥ केचित्त्विति ॥ प्रसंगशब्दानध्याहारेणभोक्तृजीवशरीरकरूपचिद्विशिष्टत्वानुसंधानाय भोग्यभोगकरणभूतप्राणशरीरकत्वरूपा चिद्विशिष्टत्वानुसंधानाय स्वरूपेणचिदचिल्लक्षणद्वारमंतरेणगुणविशिष्टानुसंधानायचेतित्रिविधोपासनायजीवादिलिंगानामत्रोपदेशात् एवं त्रिविधानुसंधानस्य "सत्यंज्ञानमनंतंब्रह्म विज्ञानंचे"त्यादिषुप्रकरणांतरेष्वप्याश्रितत्वादिहापित्रिविधानुसंधानस्ययुक्तत्वादित्यर्थइत्याहुरित्यर्थः। श्रुतप्रकाशोक्तंसमाधानमाह ॥ तंमामिति ॥ यत्रजीवविशेषाणामचेतनविशेषाणांपरमात्मासाधारणधर्मयोगः तत्रचिदचिद्विशेषांतरात्म त्वानुसंधानंप्रतिपिपादयिषितमितिभावः । अत्रशरीरंपरिगृह्योत्थापयतीतिप्राणलिंगनिर्वाहायाचिद्विशिष्टत्वेनानुसंधानंयदुक्तंतदयुक्तं । प्राण स्यचेतनत्वात् । तथाचद्वैविध्यमेवोपासनस्य । नत्रैविध्यमितिभावेनदूषयति ॥ तन्नेति ॥ अपहतेति ॥ नह्यचेतनस्यपापप्रसक्तिरस्ती तिभावः । उपलक्षणमेतत् । आश्रितत्वादित्यस्येहेत्यनेनान्वयोपपत्तावन्यत्रेत्यध्याहारायोगइत्याद्यपिध्येयं । एतेनयत्केनचित्प्रलपितं "प्राणो

केचित्तुचिद्विशिष्टत्वेनाचिद्विशिष्टत्वेनस्वरूपेणचेत्युपासायास्त्रैविध्यं । नचवाक्यभेदः । "तंमामायुरमृतमि त्युपास्स्वे"त्येकस्मिन्नेववाक्ये मामितिजीवविशिष्टाया आयुरितिप्राणविशिष्टाया अमृतमितिस्वेनरूपेणचो पासनायाविधानादित्याहुः । तन्न । "तान्वरिष्ठःप्राणउवाच यएवायंमुख्यप्राणःअपहतपाप्माह्येष"इत्या दिश्रुत्यामुख्यप्राणस्यचेतनत्वात्तल्लिंगनिर्वाहायाचिद्विशिष्टोपासनोक्त्ययोगात् ॥ ॥ टीकाक्षरार्थस्तु ॥

गु०व्यत्वात् योगस्यचैकःशास्तानद्वितीयइत्यादिभाष्योदाहृतप्रमाणानुसारेणपरमात्मनिमुख्यत्वेन मुख्यसंभवेचामुख्यग्रहणायोगाच्छास्त्रशब्देनवेदग्रहणमयुक्तं । किंच

SGDF
Sri Gargeshwari Digital Foundation

प्र०स्मिप्रज्ञात्मा तंमामायुरमृतमित्युपास्स्व'' त्यत्रेंद्रवाक्यउपासनाकर्मत्वेनेंद्रशब्दनिर्दिष्टः किमिंद्रउतशिवइतिसंदेहे वृष्टिद्वारासकलरक्षकत्वरूप प्राणत्वस्य ''इंद्रोराजाजगतोयईश''इतिश्रुत्यापरमैश्वर्येणसर्वोपास्यत्वस्यचसंभवात् जीवलिंगानांचजीवविशेषेंद्रएवपर्यवसानात् प्राणलिंगेस त्यपिप्राणस्येंद्रविशेषणत्वप्रतीतेर्जीववायुपक्षयोरनुत्थानादिंद्रएवेतिप्राप्ते अजरामृतत्वादिलिंगानामनुगमादुपसंहारेऽवगमाच्छिवएवेतिसिद्धां तइति । उक्तंच ''प्राणोस्मीत्युक्तइंद्रस्सहिजगदखिलंप्राणयत्यंबुवर्षैरिंद्रोराजेत्यनेकश्रुतिमितमहिमास्यादुपास्यश्चमुक्त्यै । मैवं क्षुण्णःससृज्य स्तमजरममृतंशक्नुमोनैववक्तुं तस्मात्तंमामुपास्स्वेत्यखिलपरिवृढेयुज्यतांशास्त्रदृष्ट्ये''ति । तन्निरस्तं । इंद्रइत्येवपूर्वपक्षेसतिसूत्रेजीवमुख्यप्राण लिंगादितिशंकायोगात् । तत्रजीवादिशब्दस्यतद्विशेषेंद्रपरत्वेचवक्तुरात्मोपदेशस्यापींद्रलिंगस्यानेनैवसंग्रहसंभवेननवक्तुरितिपृथक्शंकायोगात्। प्राणस्येंद्रविशेषणत्वेनाप्राधान्येसूत्रेधर्मिनिर्देशायप्राणपदप्रयोगायोगाच्च । प्राणत्वस्यविष्णावेवप्राणाधिकरणेसाधितत्वाच्च । अमृतत्वादेः ''त्रि पादस्यामृतंदिवी''त्यादौविष्णुधर्मत्वस्योक्तत्वात् । शिवस्यापि ''रुद्रस्यशिरउत्पिपेषे''त्यादेरमृतत्वाद्ययोगाच्च । यदपिनवक्तुरित्यादीनांरामा नुजरीत्यार्थकथनंतदपितद्दूषणेनैवनिरस्तं । तच्चोक्तंशिवार्कमणिदीपिकायां ऐतरेये ''प्राणोवाअहमस्म्यृष''इत्यत्र ''प्राणस्त्वंप्राणस्सर्वाणिभू तानी''त्यादिनासार्वात्म्यस्यब्रह्मलिंगस्यसत्त्वेनप्राणस्यब्रह्मत्वंनिश्चितमितितत्रनसंदेहः । प्राणोस्मिप्रज्ञात्मेत्यत्रतुत्वष्टृवधादींद्रलिंगाच्छरीरंपरि गृह्येत्यादिप्राणलिंगाच्च वैषम्यमिति । मूर्खप्रलपितमेतत् । तत्रेवात्रापिभूयसांब्रह्मलिंगानांसत्त्वात् । तत्रब्रह्मत्वस्यात्रत्यन्यायंविनान्येना सिद्धेः । इंद्रादिलिंगानांनिरवकाशानांभूयसांदर्शितत्वाच्च । तस्यैवोदाहरणेसूत्रोक्तत्रयकोटिकपूर्वपक्षसंभवेनसूत्रस्यसामंजस्यस्योक्तत्वाच्च । संशयबीजस्यटीकायामेवोक्तत्वाच्चेति । अधिकरणांतेटीकायां ''नहिमहिदासोमुनितयैवोच्यते । वैयर्थ्यादेवे''त्येतद्वाक्येवैयर्थ्यादित्ययुक्तं ।

प्र०ऋषिज्ञानार्थत्वादित्यतोवतार्यार्थमाह ॥ **नन्विति** ॥ **ऋषित्वेति** ॥ ऋषिज्ञानस्यान्यथासिद्धेरित्यर्थः । वैयर्थ्यादित्यत्रप्रतियोगिनमध्याह त्यार्थांतरमाह ॥ **यद्वेति** ॥ इतःप्रदानंयेषांतइतिपददातृत्वं संभृताइतिपोषकत्वमितिध्येयं । उपास्यानांब्रह्मधर्माणामित्यर्थः । विशब्दस्यविरुद्धा र्थत्वंमत्वान्यथायोजयति ॥ **यद्वेति** ॥ शिष्टंसुगममितिभावः । एतत्पादीयद्वादशाधिकरणानांप्रमेयस्यसुज्ञानायपेटिकासंगतिमाह ॥ **अत्रेति** ॥ समन्वयसूत्रेसामान्यतःप्रतिपादनाद्विशेषेत्युक्तं । समन्वयाप्रतिपादनेकिमर्थमत्रनिवेशइत्यतउक्तमुपोद्धातत्वेनेति । एतच्चेक्षत्यधिकरणेस्पष्टं ॥

॥ ननु ''एतद्धस्मवैतद्विद्वानाहहिरण्यदन्वैद''इतिहिरण्यदन्वैदवन्महिदासोपिऋषित्वेनोच्यतामित्यतआह ॥ **नहि**
२८।१५
महिदासोपिमुनित(यैवो)योच्यते । वैयर्थ्यादिति ॥ अस्याउपनिषदऐतरेयसंज्ञयैवेतरापुत्रस्यमहिदासस्यऋषित्व सिद्ध्यातदुक्तिनैष्फल्यादित्यर्थः । यद्वाऋषिमात्रत्वेमहिदासस्य ''इतःप्रदानाह्येतइतःसंभृता''इत्यादिनादेवतापदप्रदा तृत्वंतत्पोषकत्वमित्यादीनामुपास्यब्रह्मधर्माणामुक्तेर्नैष्फल्यादित्यर्थः । यद्वामहिदासस्यमुनित्वेनाप्युक्तिरिष्टा । मुनित्वे नैवोक्तिर्नतुब्रह्मतयेतितुनयुक्तं । ''इतःप्रदानाह्येतइतःसंभृता''इत्यादीनांब्रह्मधर्मवाचिनांविरुद्धार्थत्वादित्यर्थः ॥

गु०सकारणदृष्टिद्वाराव्यपदेशविषयोक्तितोप्यस्मद्रीत्यासाक्षादेवतदुक्तिर्युक्तेत्युक्तदूषणस्यात्राप्यपरिहार्यत्वादित्यर्थः । वचनक्रियायामन्ययोगव्यवच्छेदकैवकारस्वारस्या र्थमाह ॥ **यद्वेति** ॥ यद्वाऽस्मिन्नपिटीकास्थस्यमुनितयैवोच्यतइत्यत्रैवकारस्यवैयर्थ्यंभवतीत्यतएवकारसूचितंपक्षांतरमाह ॥ **यद्वेति** ॥ ७ ॥ **अंतिमप्राणाधि करणंसंपूर्णं ॥१२॥ इतिश्रीविद्याधीशपूज्यपादशिष्येणकेशवभट्टारकेणविरचितायांचंद्रिकावाक्यविवृतौप्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥**

SGDF Sri Gargeshwari Digital Foundation

प्र० तत्राप्याद्यमिति ॥ यथाचैतत्तथोक्तंजिज्ञासाधिकरणे ॥ युक्तत्वेनेति ॥ एकाऽवांतरपेटिकेत्यन्वयः । आदिपदेनछंदःप्राणाधिकरणयोर्बहु श्रुतिलिंगविषयत्वेनवा ज्योतिःप्राणद्वाराऽऽनंदमयाक्षेपकत्वेनवा अन्यत्रप्रसिद्धश्रुतिलिंगोत्कीर्तनस्यप्रयोजनोक्तिपरत्वेनवा एकापेटिका । एव मुत्तरपादेष्वपिध्येयमितिभावः । सप्तानामप्यधिकरणानांविषयोपाधीन्संगृह्यविशदयति ॥ शब्दाइति ॥ गुणिसामान्यवाचकाइत्यर्थः ॥ अत्रचाद्यापंचाधिकरणीसमन्वयविशेषाप्रतिपादकत्वादध्यायपादबहिर्भूतातदुपोद्घातत्वेनैकापेटिका । तत्राप्याद्यंशास्त्रमात्रो पोद्घातरूपं । इतराचतुरधिकरणीतुशास्त्रांतर्गताप्यध्यायोपोद्घातरूपा । आनंदमयमारभ्यापादपरिसमाप्तिसमन्वयपरत्वेनै कामहापेटिका । तत्राप्यानंदमयांतरधिकरणेबहुविषयपूर्वपक्षयुक्तत्वेन । अंतरादिचतुरधिकरणीतुसाक्षादानंदमयाक्षेपकपूर्व पक्षयुक्तत्वेन । तत्राप्याकाशादित्रयमंतरधिकरणन्यायातिदेशकत्वेनभूतेप्रसिद्धनामविषयकत्वेनचैकावांतरपेटिकेत्याद्यूह्यं ॥ शब्दास्सामान्याधिदैवाधिभूताध्यात्मगोचराः । ससूक्ताअधिवेदस्थाःसलिंगाश्चात्रचिंतिताः ॥ १ ॥ अस्मिंश्चपादे आनंदम यइत्यत्रसामान्यशब्दाः अंतरित्यत्राधिदैवगताः । आकाशइत्यत्राधिभूतगताः । अतएवप्राणइत्यत्राध्यात्मगताः । ज्योतिरि त्यत्रसूक्तसहिताः ।छंदइत्यत्राधिवेदगताः । प्राणस्तथेत्यत्रलिंगसहिताःशब्दाविचारिताइति ॥ इत्यंतिमप्राणाधिकरणं ॥ १२ ॥

॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौ
तात्पर्यचंद्रिकायांप्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥ १ ॥

प्र० लिंगेति ॥ पूर्वपक्षप्रापकानेकलिंगसहिताइत्यर्थः ॥ शब्दाइति ॥ नामात्मकाविष्णौसमन्विताइत्यर्थः ॥ ७ ॥ अंतिमप्राणाधिकरणंसं पूर्णं ॥१२॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रतीर्थगुरुपादशिष्यराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेप्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र०॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ टीकायांपादसंगत्यनुक्तेस्तामन्यत्रोक्तांदर्शयन्पूर्वपादार्थानुवादपूर्वमेतत्पादार्थमाह ॥ **यैरिति** ॥ तेषांलिंगानामिहद्वितीयपादेसमन्वयउच्यतइत्ययुक्तं । समुद्रशायित्वादिलिंगानामिहसमन्वयानुक्तेरित्यतआह ॥ **लिंगेति** ॥ प्रागुक्तलिंगजातीयानामित्यर्थः । जातीयत्वंचतल्लिंगोपेतवाक्यगततयैकवाक्यगतत्वेनेतिध्येयं । यद्वा नामसमन्वयहेतुतयाऽभिमतत्वादिनातल्लिंगजातीयत्वं । एतदुक्तंभवति । सर्वश्रुतिगतान्यन्यत्रप्रसिद्धनामानिसर्वाण्यपि तत्रतत्रस्थितैस्सर्वैर्लिंगैर्भगवन्निष्ठानीति प्राक्साधितेसति तत्रासंदिग्धलिंगप्रहाणेनेतरेषांसमन्वयोत्रोच्यतइति । एतेनैतन्निरस्तं । कथंलिंगसमन्वयः । किंलिंगांतरेणोतनाम्ना । नाद्यः । समन्वीयमानत्वेनसंदिग्धत्वात् । नद्वितीयः । अन्योन्याश्रयापत्तेः । सिद्धेनामसमन्वयेतेनलिंगसमन्वयः लिंगसमन्वयेचसिद्धेतेननामसमन्वयसिद्धिरिति । असंदिग्धभगवन्नामलिंगादिभिस्संदिग्धलिंगसमन्वयोक्तेः । एतेन लिंगसमन्वयस्यप्रागुक्तनामसमन्वयहेतुत्वेनवातस्मि

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ यैर्लिंगैःसाधितःपूर्वंनाम्नांविष्णौसमन्वयः । तेषामिहोच्यतेलिंगजातीयानांसमन्वयः ॥ १ ॥

गु०॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ पूर्वपादसंगतत्वेनैतत्पादप्रतिपाद्यंदर्शयति ॥ **यैरिति** ॥ लिंगपादस्यनामपादानंतर्यैहेतुमाह ॥ **यैर्लिंगैरिति** ॥ प्रायेणेतिशेषः । नाम्नां अन्यत्रप्रसिद्धाशेषवैदिकनाम्नामित्यर्थः । स्पष्टंचैतत्सुधायां । तेषामेवलिंगानांसमन्वयानुक्तेराह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०न्सत्येवास्योत्थानेनतत्कार्यत्वेनवा हेतुहेतुमद्भावरूपसंगतिरित्युक्तंभवति ॥ **तदुक्तमिति** ॥ तृतीयाध्यायस्यतृतीयपादइत्यर्थः । ज्ञाते प्रथमपादेनेत्यर्थः । लिंगैरितिप्रायिकत्वाभिप्रायेण । ब्रह्मश्रुत्यादिनाप्यानंदमयादेस्समन्वयोक्तेः । एषसमन्वयो नामसमन्वयः । अन्यत्रप्रसिद्धाशेषलिंगानांसमन्वयं । ''आहोभयगतत्वंचे''त्युत्तरवाक्यगतेनाहेत्यनेनद्वितीयांतस्यान्वयः ॥ ॥ **ॐसर्वत्रप्रसिद्धोपदेशात्ॐ** ॥ नन्वत्रटीकायामादित्यश्रुत्यासर्वगतत्वलिंगस्यान्यत्रप्रसिद्धिरुक्ता । सानयुक्तैव । तथाहि । अत्रसर्वगतत्वंनामसर्वहृदयगुहास्थत्वं । यद्वक्ष्यति ''सर्वभूताशयस्थित''इति । तथाचतादृशं ''योवेदनिहितंगुहायां निहितंगुहासु ब्रह्मपुरेह्येषव्योऽम्यात्मासंप्रतिष्ठित''इत्यादौविष्णावपिसिद्धमितिप्रक्रमस्थादित्यश्रुतिसमाख्याभ्यामुभयत्रप्रसिद्धिरेवलिंगस्यस्यात् । नान्यत्रप्रसिद्धिः । यथाभूमाधिकरणे ''प्राणोवाआशायाभूया''नित्युपक्रमस्थप्राणश्रुत्या ''विष्णुर्वावदेवेभ्योभूया''नितिसमाख्ययाचभूमत्वस्यप्राणविष्णूभयसाधारण्यंतद्वदितिचेन्न । वैषम्यात् । तत्रप्रक्रमसमाख्ययोःप्राणविष्णुपरत्वंपूर्वपक्षिणस्संप्रतिपन्नमिति‌तत्रतथात्वंयुज्यते । नत्विह । अत्राभिप्रेतलिंगस्यसर्वगतत्वस्यविष्णुनिष्ठतायाःपूर्वपक्षिणःक्काप्यसम्मतेः । तथाचवक्ष्यत्यध्यायांते ''अन्यत्रप्रसिद्धेषुकापिब्रह्मपरत्वंनेतिप्राप्तेतन्निरास''इति । वक्ष्यतिचैतद्भूमाधिकरणएवसर्वभूतगतत्वरूपार्भकौकस्त्वस्यपूर्वपक्षिणाक्काप्यनंगीकारेणे''त्यादि । एवंतर्ह्यंतर्हृदयेज्योतिरित्यादिनागायत्र्यधिकरणविषयवाक्यस्थार्भकौक

तदुक्तमनुव्याख्याने । ''इत्यन्यत्रप्रसिद्धोरुशब्दराशेरशेषतः । ज्ञातेसमन्वयेविष्णौलिंगैर्ह्येषसमन्वयः ॥ तेषामन्यगतत्वेतुनस्यात्सम्यक्समन्वयः । इत्येवाशेषलिंगानांब्रह्मण्येवसमन्वय''मिति ॥ ॥ ॐसर्वत्रप्रसिद्धोपदेशात्ॐ ॥ ॥ ४१५ ॥

गु०लिंगजातीयानामिति ॥ **तदुक्तमिति** ॥ उपासनापादइत्यर्थः । ''ब्रह्मततम''मितिभाष्ये एतत्पादाद्याधिकरणस्यपूर्वपादांत्याधिकरणेनसंगतिदर्शनात्सर्वत्रा

प्र०स्त्वस्याप्याक्षेपस्संभवतीतिचेत्सत्यं । अव्यवहिताक्षेपसंभवेतस्यैववाच्यत्वादितिध्येयं । अत्रभाष्यादौपूर्वाधिकरणेनाक्षेपसंगत्युक्त्यातदावश्यकत्वंभाति । तन्नयुक्तं । तथात्वेतृतीयादिस्थानामपितथावक्तव्यत्वापत्त्याऽनुक्तेर्न्यूनतापत्तेः । भिन्नपादस्थत्वेनपूर्वसंगत्यभावेबाधकाभावाच्चेत्याशंक्यसमाधत्ते ॥ **यद्यपीति** ॥ तस्याः पूर्वसंगतेः । यदत्रोक्तंतंत्रचूडामणौ ''पूर्वांत्योत्तराद्ययोर्नसंगतिरस्ति । तथात्वेपादविभागभंगप्रसंगा''दिति । तन्न । प्रमेयभेदेनैवपादभेदसंभवादितिभावः । एतेनटीकायां ''श्रुत्यादिसंगति''मित्युक्तंसमर्थितंबोध्यं । ''ब्रह्मततममितिसर्वगतत्वमुक्त''मितिभाष्यंनसंगतिमात्रपरं । किंतुफलपरमपीतिभावेनाह ॥ **फलस्येति** ॥ टीकापितथायोज्येतिभावः । एतच्चाग्रेस्पष्टयिष्यते । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ ऐतरेयकेश्रूयते ''एतंह्येवबह्वृचामहत्युक्थेमीमांसंते एतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाएतमस्यामेतंदिव्येतंवायावेतमाकाशएतमप्स्वेतमोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वेतंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षत''इति । तद्वाक्योक्तंपृथिव्यादिसर्वगतत्वंविषयइत्यर्थः । टीकायामेतंह्येवेत्यादिवाक्योक्तावप्यर्भकौकस्त्वंतत्रनस्पष्टमित्युपसंहारवाक्योक्तिः । अधिकरणविषयोपाधयस्तु ''एतद्भावाभिधंलिंग''मित्यादिनास्पष्टयिष्यंते ॥ **आदित्यादेरिति** ॥ आदिपदेनजीवस्यग्रहणं ॥ **पूर्ववाक्यमिति** ॥ एत

यद्यपिपूर्वपादांत्यस्योत्तरपादाद्यस्यचाधिकरणस्यनावांतरसंगत्यपेक्षा । तथापीहतस्याःसंभवात्फलस्यावश्यवक्तव्यत्वाच्चैतत्पूर्वपक्षेपूर्वाधिकरणसिद्धांताक्षेपोदर्शितोभाष्यादौ । अत्र ''सर्वेषुभूतेष्वेत''मित्युक्तंसर्वगतत्वंकिमादित्यादेःकिंवाविष्णोरितिचिंता । तदर्थं ''तस्यैतस्यासावादित्य''इत्यादिपूर्ववाक्यंकिमादित्यविषयंकिंवाब्रह्मविषयमिति । तदर्थं ''एतमेवब्रह्मे''ति

गु० पिपादांत्याधिकरणस्योत्तरपादाद्याधिकरणस्यचावांतरसंगत्यपेक्षानियमःप्रतीयते । साचायुक्ताअनावश्यकत्वादित्याह ॥ यद्यपीति ॥ भाष्यादावित्यत्रादिपदेन

SGDF
Sri Gargeshwari Digital Foundation

प्र०मित्येतच्छब्दस्यपूर्वपरामर्शित्वंस्वरसतःप्राप्तमितिभावः ॥ ब्रह्मशब्दादयइति ॥ सयोतोश्रुतइत्युक्ताश्रुतत्वादिकमादिपदार्थः ॥ अर्भकौ कस्त्वमिति ॥ भूतेष्वितिभूतपदोपादानमहिम्नालब्धमन्यत्रानवस्थितत्वेसतिभूतमात्रावस्थितत्वरूपाल्पौकस्त्वंयदिनयुक्तं तदाब्रह्मशब्दादी नांगौणत्वावश्यंभावेनतद्विरोधाभावात्पूर्ववाक्यमादित्यविषयमिति एतमस्यामित्यादावेतच्छब्देनतस्यैवपरामर्शादादित्यादेरेवसर्वगतत्वं । यदा तुयुक्तं तदाबाधकाभावेनब्रह्मशब्दादीनांगौणत्वायोगेनतद्विरुद्धंपूर्ववाक्यंनादित्यादिविषयंभवितुमर्हतीतिविष्णोरेवसर्वगतत्वमितिफलफलि भावःस्पष्टत्वान्नोक्तः । इयंचचिंतापरंपराऽऽदित्यकोटिकपूर्वपक्षानुरोधेनोक्ता । जीवकोटिकपूर्वपक्षानुसारेणतु सर्वगतत्वंकिंजीवस्योतविष्णो

ब्रह्मशब्दादयःकिंगौणाःकिंवामुख्याइति । तदर्थमर्भकौकस्त्वंकिंब्रह्मणिनयुक्तमुतयुक्तमिति ॥ **पूर्वपक्षस्तु॥**
अयंसर्वगतआदित्यः । “तस्यैतस्यासावादित्योरस”इत्यादिनाप्रकृतस्यादित्यस्यैवैतमितिपरामर्शात् ।

प्र०रितिचिंतानंतरं तदर्थमेतमित्येतच्छब्दःकिंवक्ष्यमाणपरामर्शकउतन । वक्ष्यमाणपरत्वेपिचक्षुर्मयत्वादिकंविष्णोर्नयुक्तमुतयुक्तमिति । तदर्थमयट्किंप्रसिद्धचक्षुरादिकरणकत्वार्थउततत्स्वामित्वाद्यर्थइत्यादिरूपेणोह्येतिभावः । आदित्यकोटिकपूर्वपक्षंतावदारभते ॥ अयमिति ॥ प्रकृतस्येति ॥ प्रकृतश्चादित्यएव । “आदित्योरसः यश्चासावादित्यःपुरुषंपुरुषंप्रत्यादित्यइत्यादित्यश्रुतिबाहुल्यात् । सूर्यआत्माजगतइति सौरमंत्रोदाहरणाच्च । एतंचंद्रमसीत्युक्त्वा एतमादित्यइत्यनुक्तत्वलिंगाच्चे”तिटीकोक्तेरितिभावः । न्यायविवरणटीकायां “नचैतदंतस्थ त्वाधिकरणन्यायेनोपासात्रैविध्यादितिवापरिहृतमितिवाच्यं । संभवतिहीश्वरेकल्पनैषा । नचासावत्रसंभवति । सर्वेषुभूतेष्वित्यल्पौकस्त्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रवणा"दित्यादिनाऽऽक्षिप्यसमाहितं । तदयुक्तमिव । तत्रैवात्रलिंगाभावादादित्यशब्दस्यप्राक्समन्वयानुक्तेश्च । टीकायांप्रापकबाहुल्योक्तेश्चेत्याशंक्य "टीकासुचयदस्पष्ट"मितिप्रतिज्ञातत्वात्तद्वाक्यंविवरितुंपूर्वपक्षाक्षेपप्रकारमाह ॥ **नन्विति** ॥ पूर्वन्यायाविषयत्वमाशंक्याह ॥ **नचवाच्यमिति** ॥ तथेतीत्यनेनान्वयः ॥ **विष्णुपरतेति** ॥ नतुमुख्यतापीत्यर्थः । तत्र अंतरधिकरणे । आदिपदेनान्यगतंप्रतिस्वातंत्र्येणेतिगृह्यते । श्रुतिबहुलत्वमुज्जीवकमस्तुकिंलिंगेनेत्येतट्टीकोक्तमादित्यश्रुतिबाहुल्यमपिनान्यप्रापकमित्याह ॥ **एतेनेति** ॥ एतच्छब्दार्थ

ननुलोकतोन्यत्रप्रसिद्धस्यास्यादित्यशब्दस्यांतरधिकरणन्यायेनविष्णुवाचित्वात्कथंतेनतदन्यस्यप्राप्तिः । नचवाच्यं तत्रदेवतावाचिनांसमुद्रांतस्स्थत्वादिलिंगाद्विष्णुपरतोक्ता । अत्रतुनविष्णुलिंगमस्ति । नहिगंगायांघोषइत्यत्रगंगाशब्दस्तीरपरइतिगंगायांमत्स्यइत्यत्रापितथेति । तत्रप्रवृत्तिनिमित्तस्यानन्याधीनत्वादिनाविष्णावेवतेषांमुख्यतायाउक्तत्वात् । एतेन "आदित्योरसः यश्चासावादित्यः आदित्योभवती"त्यादित्यश्रुतेर्बहुत्वादन्यप्राप्तिरितिनिरस्तं ।

गु० "इत्यन्यत्रप्रसिद्धोर्वि"त्याद्यनुव्याख्यापरिग्रहः॥ **एतमितीति** ॥ "एतंह्येवबहृचा"इत्यादिनेत्यर्थः । किमत्रादित्यश्रुत्यापूर्वपक्षो बह्वित्यादिश्रुत्यावा सौरमंत्रेणवा आदित्येऽनुक्तत्वलिंगेनवा चक्षुर्मयत्वादिनावा अर्भकौकस्त्वेनवा । नाद्यइत्याह ॥ **नन्विति** ॥ ननुलोकतोन्यत्रप्रसिद्धानांदेवतावाचींद्रादिशब्दानांसमुद्रांतस्स्थितत्वादिलिंगैर्विष्णुपरत्वेनिर्णीते अन्यत्रप्रसिद्धस्याप्यादित्यशब्दस्यविष्णुवाचकत्वंस्यादित्याशंक्याह ॥ **नहीति** ॥ अन्यथागंगायांघोषइत्यत्रगंगाशब्दार्थभूतप्रवाहस्यघोषाधिकरणत्वानुपपत्त्यातीरपरत्वेचान्यत्रगंगायांमत्स्यइत्यत्रापितीरपरत्वंस्यात् । गंगायांघोषइत्यत्रमुख्यार्थानुपपत्तिरित्यादिवद्गंगायांमत्स्यइत्यादौतदभावाद्यदिनतीरपरत्वं तर्ह्यंतःप्रविष्टमित्यादिवाक्येसमुद्रांतस्स्थितत्वादिलिंगैर्विष्णुपरत्वेप्यत्रसयश्चायमित्यादौतल्लिंगाभावान्नविष्णुपरत्वमितिसममित्यर्थः । तथेतीत्यत्रत्यस्येतिशब्दस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० माह ॥ **विष्णाविति** ॥ मंदानांभ्रमंवारयति ॥ **नचेति** ॥ **टीकायामिति** ॥ "नचश्रुतिर्विष्णुविषयाकिंनस्यादुक्तन्याया"दितिवाक्येने त्यर्थः ॥ **उक्तन्यायेनेति** ॥ अंतरधिकरणन्यायेनेत्यर्थः ॥ **अनुव्याख्यानेति** ॥ तृतीयाध्यायतृतीयपादीयानुव्याख्यानस्थेत्यर्थः । सर्वे देवतांतरगताश्शब्दाश्शब्दवृत्त्योर्योगरूढ्योर्निमित्तानांबहुलप्रयोगानांहरौसत्त्वात् अद्धा वचनवृत्त्यैववदंति । अन्यत्रतत्संगादुपचारतःप्रयो गइत्यर्थः । ननु तत्रसर्वशब्दस्यसंकोचःक्रियतामित्यतआह ॥ **तत्रेति** ॥ अंतरधिकरणोदाहरणइत्यर्थः । ननुतत्रपर्यायाणामपिनिरवका

विष्णौमुख्यश्रुतिबाहुल्येनान्यप्राप्त्ययोगात् । नचतत्रतत्प्रकरणस्थानांसवित्रादिशब्दानामेववि ष्णुवाचितोक्ता नतुतत्पर्यायादित्यादिशब्दानामपीतियुक्तं । तथात्वेतत्प्रकरणेऽदितिशब्दस्या प्यभावेनोत्तराधिकरणटीकायामदितिशब्दस्योक्तन्यायेनसावकाशत्वशंकानुपपत्तेः । "देवतांत रगाःसर्वेशब्दवृत्तिनिमित्ततः । विष्णुमेववदंत्यद्धातत्संगादुपचारत"इत्यनुव्याख्यानस्थसर्व शब्दविरोधाच्च । तत्रेंद्रादिशब्दपर्यायाणामश्रवणेनतत्समन्वयार्थमधिकरणांतरारंभापाताच्च ।

गु० इतिनचवाच्यमितिपूर्वेणसंबंधः । द्वितीयंदूषयति ॥ **एतेनेति** ॥ एतेनेत्यनेनपरामृष्टंहेतुंदर्शयति ॥ **विष्णाविति** ॥ विष्णौमुख्यायाश्रुतिस्तद्बाहुल्येनेत्यर्थः । अंतिमाधिकरणस्यतत्प्रकरणस्थानांसवित्रादिशब्दानांविष्णुमात्रवाचित्वपरत्वेअनुव्याख्यानविरोधश्चेत्याह ॥ **देवतांतरगाइति** ॥ नन्वनुव्याख्यानेसर्वशब्दोंतर धिकरणन्यायविषयसर्वपरएव । नत्वसंकुचितसर्वपरइत्यतोनतद्विरोधइतिपूर्वत्रारुच्यादोषांतरमाह ॥ **तत्रेति** ॥ नचवासवादिशब्दानामन्तरधिकरणन्यायविष

प्र० शविष्णुलिंगोपेतानामेवसमन्वयोनान्येषामित्याशंक्याह ॥ **तत्रेति** ॥ **श्रुतीति** ॥ ब्रह्मश्रुतिसहिताश्रुतत्वादिलिंगेनेत्यर्थः । टीकोक्तंसौ रमंत्रोदाहरणरूपंप्रापकांतरमप्याक्षिपति ॥ **एतेनेति** ॥ आशयमबुध्वाभ्रांतस्यचोद्यंपरिहरति ॥ **नचेति** ॥ अत्रतुपृथिव्यादिसर्वगतत्वं । अतोनपौनरुक्त्यं । प्रतिपाद्यभेदादितिभावः ॥ **किंत्विति** ॥ सर्वस्यविष्णुप्रापकत्वेनादित्यादिप्रापकाभावेनपूर्वपक्षानुदयश्चोद्यतइत्यर्थः । टीकोक्तंप्रापकांतरमप्याक्षिपति ॥ **नचेति** ॥ आदित्यादन्यश्चेत्सर्वगतोत्राभिमतस्तदादित्यएतमित्यपिश्रूयेतेतिभावः ॥ **सावकाशेति** ॥

तत्रलिंगमात्रेणसवित्रादिशब्दानांविष्णुवाचित्वस्यतत्परत्वस्यवासिद्धौ अत्रश्रुतिसहितलिंगेनादित्यादिशब्दानांविष्णुवाचि त्वस्यतत्परत्वस्यवासुतरांसिद्धेश्च । एतेन "सूर्यआत्मे"तिसौरमंत्रोदाहरणात्सूर्यप्राप्तिरितिनिरस्तं । उक्तन्यायेनमंत्रस्थसूर्या दिशब्दस्यापिविष्णौमुख्यत्वात् । नचांतरित्यादौचंद्रादिकतिपयगतत्वादिकमुक्तमत्रतुसर्वगतत्वमुच्यतइतिभेदः । व्य धिकरणत्वात् । नहिप्रतिपाद्याभेदःशंकितः । किंतुपूर्वपक्षानुदयः । नच "चंद्रमस्येत"मितिसजातीयेचंद्रादावुक्त्वा ऽऽदित्येनुक्तत्वलिंगात्तत्प्राप्तिः । "सर्वेष्वि"तिसर्वशब्देनादित्यस्यापिग्रहणसंभवेनसावकाशलिंगेनश्रुत्यादिबाधायोगात् । संतिचात्र "एतमेवब्रह्मे"तिब्रह्मशब्दाद्याःश्रुतयः । "सयोतोश्रुतोऽगतोमतोऽनतोऽदृष्ट"इत्यश्रुतत्वादिलिंगानिच ।

गु० यत्वेनैवभगवत्परत्वसंभवान्नतदर्थमधिकरणांतरारंभइत्यरुच्याह ॥ **तत्रलिंगेति** ॥ तृतीयंपक्षमनूद्यदूषयति ॥ **एतेनेति** ॥ **उक्तन्यायेनेति** ॥ अंतरधिकरण न्यायेनेत्यर्थः । चतुर्थंप्रत्याह ॥ **नचेति** ॥ **सावकाशलिंगेनेति** ॥ आदित्येऽनुक्तत्वलिंगेनेत्यर्थः । अत्रलिंगस्यसावकाशत्वंनामसंदिग्धत्वंविवक्षितमितिबोध्यं । अतएवादित्यस्यापीत्यपिशब्दः । ननुमास्तुसावकाशलिंगेनश्रुत्यादिबाधः । प्रकृतेतुश्रुत्यादिकमेवनास्तीत्यतआह ॥ **संतिचेति** ॥ नन्वादित्येऽनुक्तत्वलिंगस्येव

SGDF Sri Gargeshwari Digital Foundation

प्र० अनुक्तत्वलिंगेनेत्यर्थः । आद्यपदेनांतरपुरुषइतिपुरुषशब्दादिर्ग्राह्यः । श्रुत्यादीनांविष्णौगतत्वमुपपादयति ॥ ब्रह्मशब्दस्येति ॥ आनंदमयाधिकरणइति ॥ प्रागुक्ताशयोनुसंधेयः । पुरुषशब्दस्यचगायत्र्यधिकरणेमुख्यत्वस्योक्तत्वादित्यपिध्येयं । लिंगानिचवैष्णवानीत्याह ॥ ज्योतिरधिकरणइति ॥ हृदयआहितंयदित्यत्रज्योतिरग्निर्विष्णुर्वेतिविशये प्रसिद्धेरग्निरितिप्राप्ते कर्णादिविचरणाभिधानाद्विष्णुरेवेति चरणपदेनकर्णादिविचरणरूपाश्रुतत्वादेर्ज्योतिषोविष्णुत्वेहेतूकरणादसिद्धस्यतत्त्वायोगात्तत्रैवमुख्यानीत्यर्थः । “अदृश्यत्वादिगुणकोधर्मोक्ते”रित्यत्र “यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्र”मित्यादावदृश्यत्वादिगुणकोविष्णुरन्योवेतिविशये “अक्षरात्परतःपर”इतिपरावधित्वेनोक्ताक्षरशब्देन “ययातदक्षरमधिगम्यत”इत्यक्षरसामानाधिकरण्यादन्यइतिप्राप्ते “अथपराययातदक्षर”मितिपरविद्याविषयत्वोक्तेरदृश्यत्वादिगुणकमक्षरंविष्णुरेवेतिवक्ष्यमाणत्वादित्यर्थः । “अंतर्याम्यधिदैवादि”ष्वित्यत्र “यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदे”त्यादौ पृथिव्यादिगतत्वेनश्रुतःकिंविष्णुरन्योवेतिविशये पृथिव्यादिशरीरकत्वस्याशरीरेविष्णावयोगादन्यइतिप्राप्ते पृथिव्याद्यविदितत्वांतरत्वादिधर्मोपदेशाद्विष्णुरेवेत्यंतरत्वस्यविष्णुलिंगतायास्साधयिष्यमाणत्वादित्यर्थः । एवमादित्यकोटिकपूर्वपक्षमाक्षिप्यजीवकोटिकमप्याक्षिपति ॥

ब्रह्मशब्दस्यचविष्णौमुख्यतायाआनंदमयाधिकरणेसिद्धत्वात् । ज्योतिरधिकरणेचज्यो तिषोविष्णुत्वेऽश्रुतत्वादेर्हेतूकृतत्वात् । अदृष्टत्वस्यचविष्णुधर्मतायाः “अदृश्यत्वादिगुणक”इत्यत्रवक्ष्यमाणत्वात् । “सयोतोश्रुत”इत्यादिसन्निधानेचांतरपुरुषइत्यंतरत्वश्रवणात् तस्यचांतर्याम्यधिकरणेविष्णुलिंगतायाःसेत्स्यमानत्वात् । ॥ ४१८ ॥

गु० ब्रह्मश्रुत्यादेरपिसावकाशत्वात्कथंब्रह्मश्रुत्यादिनापितद्बाधइत्यतस्तस्यानिरवकाशत्वमुपपादयति ॥ ब्रह्मशब्दस्यचेति ॥ नचचक्षुर्मयत्वादिनेति ॥ नन्वानंद

SGDF
Sri Gargeshwari Digital Foundation

प्र० नचेति ॥ परमतदूषणप्रस्तावेसुधायामुक्तं "मनोमयत्वादीनामानंदमयाधिकरणन्यायेनसावकाशत्वा"दितिवाक्यंहृदिकृत्वाह ॥ प्राचुर्येति ॥ पूर्णज्ञानत्वादिरूपार्थतयेत्यर्थः । चक्षुःकरणकसंबंधमेवमयडर्थमाश्रित्याह ॥ पादांत्येति ॥ पशुशब्दस्येति ॥ षष्ठे "पशुचोदनायाअनियमोऽविशेषा"दित्यंतिमेऽधिकरणे "अग्नीषोमीयंपशुमालभेते"त्यत्रकिंयःकश्चित्पशुरालब्धव्यउतच्छागएवेतिसंशये "छागस्यवपायामेदसोनुब्रूही"तिमंत्रस्यचोदितार्थप्रकाशनार्थतयापारतंत्र्याद्भिन्नवाक्यतया "तेजोवैघृत"मितिघृतार्थवादवैलक्षण्याच्चमंत्रगतछागशब्दस्यपशुमात्रेयौगिकत्वेनवापाक्षिकानुवादत्वेनवोपपत्तेः पशुशब्दाविशेषकत्वादालंभनचोदनायास्सामान्यपर्यवसानसंभवेनयःकश्चनपशुरितिप्राप्ते चोदनाप्रतिपन्नस्यसामान्यस्यप्रतिव्यक्तिसमाप्त्याछागेप्यवैकल्याद्रूढिप्राबल्येनयोगासंभवान्नित्याम्नातस्यपाक्षिकत्वायोगाच्चछागएवालब्धव्यइतिसिद्धांतितं । अत्रयथापशुशब्दस्यतद्विशेषछागेपर्यवसानंतद्वदित्यर्थः । टीकोक्तंप्रापकांतरमपिपराचष्टे ॥ नचेति ॥ अंतररिति ॥ अंतस्स्थत्वस्यापिनिहितंगुहास्वितिगुहास्थत्वरूपतयाऽर्भकौकस्त्वरूपत्वादितिभावः ॥ उपासेति ॥ "सीमानंविदार्यैतयाद्वाराप्रापद्यते"तिहृदयस्थत्वोक्ते

नचचक्षुर्मयत्वादिनासर्वजीवानांप्राप्तिः । तस्याप्यानंदमयाधिकरणन्यायेनप्राचुर्यार्थतया पादांत्यप्राणाधिकरणन्यायेनशतसंवत्सरत्वादेरिवांतर्यामिविषयतयावासंभवात् । पशुशब्दस्यतद्विशेषच्छागइवादित्यश्रुत्याचक्षुर्मयत्वादिजीवलिंगानांतद्विशेषादित्येपर्यवसानेनसर्वजीवप्रापकाभावाच्च । नचार्भकौकस्त्वलिंगादन्यस्यप्राप्तिः । तस्यापिविष्णुधर्मतायाअंतस्तद्धर्मेत्यत्रोपासात्रैविध्येत्यत्रचोक्तत्वात् ।

गु० मयोक्तस्यकोह्येवान्यादितिप्राचुर्यार्थेहेतुव्यपदेशस्यतत्प्रायपाठस्यचात्राभावेनतन्न्यायाविषयत्वात् कथंतन्न्यायेनप्राचुर्यार्थतयाचक्षुर्मयत्वादेर्ब्रह्मणिसावकाशत्वमित्यरु

SGDF
Sri Gargeshwari Digital Foundation

प्र०रितिभावः । एतेन "उपासात्रैविध्या"दितिन्यायविवरणटीकावाक्यमन्यथापिव्याख्यातंध्येयं ॥ **हृदीति** ॥ तृतीयपादे "हृद्यपेक्षयातुमनुष्याधिकारत्वा"दितिगुणसूत्रेण "अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठती"त्यत्रांगुष्ठमात्रपरिमितहृदयावकाशस्थत्वोक्तेरितिभावः । "शब्दादिभ्योंतःप्रतिष्ठाना"दित्यादिरादिपदार्थः । ननुवक्ष्यमाणाज्ञानेनपूर्वपक्षोस्त्वित्यतआह ॥ **वक्ष्यमाणेति** ॥ आच्छादनेन अनाविष्कारेण । तदाविष्कृत्यतद्वैलक्षण्यादिकमनुक्त्वेत्यर्थः । यद्वा आच्छादनेनानुपमर्देनेत्यर्थः । अर्भकौकस्त्वमुपेत्यनतत्पूर्वपक्षप्रापकमित्युक्तमिदानींतदेव नास्तीत्याह ॥ **सर्वेष्विति** ॥ **अन्यथेति** ॥ भाष्येसइदंब्रह्मततममपश्यदितिपूर्वोक्तसर्वगतत्वमन्यस्येत्याक्षिप्तं । तन्नस्यात् । अर्भकौकस्त्वस्यान्यगतत्वेप्रागुक्तसर्वगतत्वस्यविष्णुधर्मत्वाविरोधादित्यर्थः । एवमुक्तरीत्याऽऽदित्यश्रुतेस्सावकाशत्वेपिज्योतिरित्यत्रनिरवकाशप्रकरणे नज्योतिश्श्रुतेरिवनिरवकाशादित्यलिंगवशेनादित्यश्रुतेर्निरवकाशत्वेनवा पूर्वविष्णौसमन्वयेपिमुख्यत्वस्यानुक्त्यासावकाशत्वशंकाभावेनस्वतो निरवकाशत्वेनवा तन्न्यायाविषयत्वेनतत्रास्यास्समन्वयस्यैवाभावेनवा त्रेधाश्रुतेर्निरवकाशत्वेनतयापूर्वपक्षोदयोयुज्यतइतिभावेनाह ॥

हृद्यपेक्षयेत्यादौवक्ष्यमाणत्वाच्च । वक्ष्यमाणसिद्धांतन्यायाच्छादनेनपूर्वपक्षकरणेचतन्न्यायेनैवैतत्सि
द्धांतफलसिद्ध्यैतस्यवैयर्थ्यात् । सर्वेषुभूतेष्वित्यनेनसर्वगतत्वस्यैवोक्ततयार्भकौकस्त्वाभावाच्च ।
अन्यथा अत्रोक्तःसर्वगतोनविष्णुश्चेत्पूर्वोक्तोपिसर्वगतोनविष्णुःस्यादित्याक्षेपायोगात् । मैवं । ॥ ४१९ ॥

गु० च्याह ॥ **पादांत्येति** ॥ **अन्यथेति** ॥ सर्वेषुभूतेष्वित्यत्राल्पस्थानस्थितत्वरूपार्भकौकस्त्वोक्तावित्यर्थः । तत्रादित्यश्रुतिमात्रेणैवपूर्वःपक्षइत्यभिप्रेत्यादित्यशब्दस्य

प्र० **संवत्सरएवेति** ॥ "महापुरुषइतियमवोचाम संवत्सरएवप्रध्वंसयन्नन्यानिभूतान्यैक्याभावयन्नन्यानि तस्यैतस्यासावादित्योरसः सयश्चायमशरीरःप्राज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तस्मात्पुरुषंपुरुषंप्रत्यादित्योभवति । तदप्येतदृषिणोक्तं चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चे"त्यत्रतस्यैतस्येतिसंवत्सरंपरामृश्यरसपदेनतदधिष्ठातृत्वोक्तेस्तस्य चरथवेगेनसंवत्सरकर्तरिसूर्यएवप्रसिद्धेः यच्छब्दस्यप्रसिद्धार्थकत्वात्सूर्यस्यैवादित्यत्वेनलोकेप्रसिद्धत्वात् सर्वपुरुषाभिमुख्यस्यसूर्यएवप्रत्यक्षत्वेन विष्णावदर्शनाल्लिंगत्रयेणश्रुतेरुज्जीवनादित्यर्थः । एतेनलिंगबाहुल्यकथनेन "बहुलिंगसहितश्रुतेरपिसावकाशायाःनिरवकाशश्रुत्यादीनामेवबलव

"संवत्सरएवप्रध्वंसयन् तस्यैतस्यासावादित्योरस"इतिसंवत्सराधिपतित्वरूपसंवत्स
रसारत्वलिंगात् "यश्चासावादित्य"इतिप्रसिद्धार्थयच्छब्दोपबंधात् "तस्मात्पुरुषंपुरुषं
प्रत्यादित्योभवती"तिसर्वपुरुषाभिमुख्यलिंगाच्चादित्यशब्दस्यप्रसिद्धादित्यपरत्वात् ।

गु०ब्रह्मपरत्वमंतरधिकरणन्यायेनेतिशंकांपरिहरन्नेवप्रसिद्धादित्यपरत्वमुपपादयति ॥ **मैवमित्यादिना** ॥ ननुसंवत्सरसारत्वमपिशतसंवत्सरत्वादिवदन्तर्यामिणिसावकाशं नादित्यश्रुतेःप्रसिद्धादित्यपरत्वंसंपादयितुमलमित्यतआह ॥ **यश्चासावादित्यइति** ॥ **प्रसिद्धार्थयच्छब्दोपसंबंधादिति** ॥ यच्छब्दोहिप्रसिद्ध्यर्थः । प्रसिद्धिर्हिलोकतः । सचादित्यएवेतिप्रसिद्ध्यर्थकयच्छब्दसमभिव्याहारादादित्यशब्दःप्रसिद्धादित्यपरइत्यर्थः । ननुचयच्छब्दोपबंधोपि सयश्चायंपुरुषेयश्चासावादित्यइत्यादिप्रसिद्धब्रह्मण्यपिसंभवतीति कथमेतदनुसारेणादित्यश्रुतेःप्रसिद्धपरत्वमित्यरुचेराह ॥ **तस्मादिति** ॥ ब्रह्मणएवादित्यत्वेतस्यैवपुरुषाभिमुख्यमभ्युपेयं । नच

SGDF Sri Gargeshwari Digital Foundation

प्र०त्त्व"मितिन्यायविवरणगतबहुशब्दार्थोविवृतः ॥ अतएवेति ॥ लिंगैश्श्रुत्युज्जीवनस्याभिप्रेतत्वादेवेत्यर्थः । अन्यथाश्रुतिबाहुल्यमात्रप्रदर्शनपरत्वेऽसावादित्यइत्येतावदेवोदाह्रीयेतेत्यर्थः ॥ उक्तंहीति ॥ आनंदमयाधिकरणे । तत्र पूर्वाधिकरणव्युत्पादितन्यायविषयेप्यर्थे । यदधिकरणांतरमारभ्यतेतत्पूर्वन्यायाच्छादकाधिकाशंकालक्षणात्पुनरधिकरणातरारंभप्रापकाद्धेतोर्युक्तइत्यर्थः । ननुटीकारीत्यासर्वगतत्वस्यान्यत्रप्रसिद्धयेश्रुत्यनुसरणमित्यतआह ॥ लिंगेति ॥ तदेतदिति ॥ लिंगैश्श्रुतिमुज्जीव्यतयापूर्वपक्षइत्येतदित्यर्थः ॥ एतेनभाष्यन्यायविवरणयोरेकविषयत्वंविवृतं । "आदित्योभवितुमर्हति । तदीयश्रुतिलिंगानामत्रदर्शना"दितिन्यायविवरणटीकाचविवृता । यद्यप्यत्रादित्यशब्दएकएव तथाप्यावृत्तिबहुत्वाद्वाऽऽदित्यप्रतिपादकादित्यसूर्यमित्रशब्दानांसत्त्वाद्वाबहवइत्युक्तं । यद्यप्यत्रशब्दाइत्यंतमेवोदाहार्यं । शिष्टंतुपूर्वे

अतएवभाष्यटीकयोरादित्यशब्दस्यप्रसिद्धपरत्वंलिंगाधीनमितिदर्शयितुं "तस्यैतस्यासावादित्योरस"इत्यादिलिंगप्रतिपादकांशोप्युपात्तः । उक्तंह्यनुव्याख्याने "पुनश्चप्रापकाद्धेतोस्तत्राधिकरणांतर"मिति । नचैवंसत्यावश्यकत्वाल्लिंगैरेवपूर्वपक्षः लिंगसाहचर्यादेवसर्वगतत्वस्यान्यत्रप्रसिद्धत्वंचोच्यतां । किंतदुपजीविश्रुत्युपन्यासेनेतिवाच्यं । उक्तलिंगानामादित्यविशेषणतयैवप्रतीत्यासर्वगतविशेषणत्वाप्रतीतेःसाक्षात्तैःपूर्वपक्षाद्यसंभवात् । तदेतदभिप्रेत्योक्तंन्यायविवरणे "बहवोह्यत्रादित्यशब्दाः । क्षित्यादिषूक्त्वाऽऽदित्येनुक्तिरित्यादिलिंगंचे"ति ।

गु०तत्संभवः । तस्यपुरुषाभिमुखतायाअसंभवादितिभावः ॥ अतएवेति ॥ लिंगोपोद्बलितादित्यश्रुतेःप्रसिद्धादित्यपरत्वस्यभाष्यटीकयोरभिप्रेतत्वादेवेत्यर्थः ॥ तदेतदभिप्रेत्योक्तंन्यायविवरणइति ॥ आदित्यशब्दस्यलिंगाधीनमन्यपरत्वंलिंगैरेवपूर्वपक्षासंभवंचाभिप्रेत्येत्यर्थः । एवमधिकाशंकापक्षेपूर्वपक्षोदयंकिंचिदुद्भाव्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० पक्षेप्रापकांतरत्वादुदाहृतं । आदिपदेनचक्षुर्मयत्वादिकंजीवलिंगंग्राह्यं । यद्वाऽऽदित्यपदेनसंवत्सरसारत्वादिप्रागुक्तलिंगग्रहः । तेनतदंशोपिप्रकृतोपयोग्येवेतिभावः । न्यायविवरणेलिंगेनश्रुत्युज्जीवनंनस्पष्टंप्रत्युतश्रुतीनामेवलिंगसमकक्षतयाप्राबल्यंप्रतीयते । अतस्तत्स्वारस्यानुरोधेनभाष्यादौलिंगांशोक्तेर्भावंविवक्षुःपक्षद्वयमाह ॥ **यद्वेत्यादिना** ॥ **विष्णुपरतैवेति** ॥ तस्याअपिसमन्वयरूपत्वात् । इहतुतत्परत्वंनास्ति । तल्लिंगाभावादितिभावः । नन्वेवमानंदमयाधिकरणांते "अतोनारायणोदेवोनिश्शेषगुणवाचकैः । गुणिसामान्यवचनैरपिमुख्यतयोदितः । अध्यात्मगैश्चप्राणाद्यैस्तथैवह्यधिभूतगैः । अन्नादिशब्दैर्भगवानेकोमुख्यतयोदित"इत्युपक्रम्य "शब्दप्रवृत्तिहेतूनांतस्मिन्मुख्यसमन्वयात् । अन्यार्थेष्वल्पताहेतोस्तन्निमित्तत्वतस्तथे"त्यादिनाभगवतिविद्वद्रूढिमहायोगावभिधाय तस्मादितिश्लोकेतस्मान्महायोगविद्वद्रूढिसत्त्वात्सर्वशब्दमुख्यार्थताविष्णोरुपपन्नेतिमुख्यत्वोक्तेः तन्निमित्तत्वतइत्यादिनान्यगतप्रवृत्तिनिमित्तस्यभगवदधीनत्वोक्तेश्च ईक्षत्यधिकरणेवक्ष्यमाणसमन्वयोपयोगितयावाच्यत्वोक्तेश्च टीकायांतस्मादशेषाधिदैवगतशब्दवाच्योहरिरित्यादिनासर्वत्रतत्तच्छब्दवाच्यत्वोपसंहारात्तद्विरो

यद्वा अंतराद्यधिकरणेष्विंद्रादिशब्दानांतैस्तैर्लिं
गैर्विष्णुपरतैवव्युत्पादिता । नतुतत्रमुख्यता ।

गु० प्रागुक्तयथाभाष्यपूर्वपक्षसिद्धांतमवलंब्याह ॥ **यद्वेति** ॥ अथवा ननुतथापिकिंश्रुतिमात्रेणपूर्वःपक्षउतलिंगैर्वा । नाद्यः । अंतरधिकरणन्यायेनश्रुतिमात्रस्यभगवत्परत्वेनपूर्वपक्षासाधकत्वस्योक्तत्वात् । लिंगानामप्यंतर्यामिणिसावकाशत्वान्नद्वितीयोपीत्यरुच्यापक्षांतरमाह ॥ **यद्वेति** ॥ ननुयद्यंतराद्यधिकरणेष्विंद्रादिशब्दानां

SGDF
Sri Gargeshwari Digital Foundation

प्र० धइत्यतस्सर्वस्यगतिमाह ॥ **तस्मादिति** ॥ **उक्तिश्चेति** ॥ अनुव्याख्यानइत्यन्वेति । तदभिप्रायेत्यन्वयः । पादत्रयेनानावाक्यगतभगव ल्लिंगैस्तत्तद्वाक्यगताधिदैविकादिसर्वशब्दानांभगवत्परत्वेसर्वस्यतदधीनत्वेचनिर्णीतेसति किंतेषांतत्परत्वमैंद्र्यागार्हपत्यपरत्वस्येवामुख्यवृत्त्योत मुख्यवृत्त्येति तथात्रिपाद्यांतत्तच्छब्दप्रवृत्तिहेतोरीशाधीनत्वोक्तेःकिंफलमितिचशंकायाःपादत्रयानंतरमेवोदयात् तच्छंकानिवृत्त्यर्थंत्रिपाद्य

"तस्मान्मुख्यार्थताविष्णोरितिकृत्वाहृदिप्रभुः । समन्वयंसाधयती"त्यनुव्याख्यानेमुख्यत्वोक्तिराका शादिपदप्रवृत्तिनिमित्तस्यभगवदधीनत्वोक्तिश्च स्थितायांत्रिपाद्यांप्रवृत्ते "तदधीनत्वा"दित्यत्रसर्व शब्दानांभगवतिमुख्यतायावक्ष्यमाणत्वात्तदभिप्राया । अतएवहृदिकृत्वेत्युक्तं । ईक्षत्यधिकरणे वाच्यत्वोक्तिरपितदुपयोगितया । टीकायांप्रत्यधिकरणंतत्तच्छब्दवाच्यत्वोक्तिरपितदभिप्राया ।

गु० भगवतिमुख्यत्वंनाभिप्रेतं तर्ह्यनुव्याख्यानविरोधस्स्यात् । तत्रेंद्रादिशब्दानांभगवतिमुख्यत्वस्याभिधानादित्यतआह ॥ **तस्मादिति** ॥ अत्रैवानुव्याख्यानीयंज्ञा पकमाह ॥ **अतएवेति** ॥ अन्यथाहृदीत्यस्यवैयर्थ्यंस्यादित्यर्थः । ननुसमन्वयसूत्रेसर्वेषांशब्दानांमुख्यवृत्त्याभगवत्परत्वउक्ते अवाच्यत्वात्कथंतत्रशब्दानांमुख्यत्व मित्याशंका ईक्षतेरित्यनेनवाच्यत्वोपपादनेनपरिहृतेतिशब्दानांमुख्यार्थत्वमेवाभ्युपेयं । अन्यथा ईक्षत्यधिकरणेवाच्यत्वोपपादनमयुक्तंस्यादित्यतआह ॥ **ईक्षत्य धिकरणइति** ॥ तदुपयोगितया तदधीनत्वादित्यत्रोच्यमानमुख्यतोपयोगितयेत्यर्थः । ननुतथापिप्रत्यधिकरणंटीकायामाकाशशब्दवाच्यत्वसमर्थनादित्युपक्रमे तस्मादाकाशोपलक्षितसकलशब्दवाच्यमित्युपसंहारटीकायांचवाच्यत्वोक्तेःकागतिरित्यतआह ॥ **टीकायामिति** ॥ उक्तएवाभिप्रायः । नन्वेवंतदधीनत्वादित्य

प्र० नंतरंप्रवृत्तेतदधीनत्वादित्यव्यक्तनयगुणसूत्रे स्वातंत्र्यस्यशब्दवृत्तौमुख्यनिमित्तत्वात्सर्वस्वतंत्रेभगवत्यव्यक्तादिशब्दोपलक्षितसर्वशब्दानांमु ख्यवृत्तिरितिवक्ष्यमाणत्वात्तदभिप्रायेणात्रमुख्यत्वाद्युक्तिरित्यर्थः । तदुपयोगितया वक्ष्यमाणमुख्यत्वोपयोगितया । अन्यथाब्रह्मणएवावाच्यत्वे शब्दानांतत्रमुख्यत्वोक्तिरसंगतास्यादितिभावः । ननुशब्दप्रवृत्तिनिमित्तस्यगुणस्याव्यक्तनयेनैवलब्धत्वात्किंपूर्वतनैरधिकरणैरित्यतआह ॥ **तत्तच्छब्दप्रवृत्तीति** ॥ अवयवशक्तिलभ्यपरमैश्वर्यादिमत्त्वरूपगुणलाभस्येत्यर्थः । ननुतत्रत्रिपाद्यांसिद्धंस्वातंत्र्यंशब्दप्रवृत्तौनिमित्तंभवति नेतिविशये नेतिप्राप्ते भवतीतिसिद्धांतयिष्यते । नतुतत्तच्छब्दप्रवृत्तिनिमित्तमपिभगवद्गतमिति । तथाचकथमेवमुक्तिरितिचेत्सत्यं । "सू क्ष्मंतुतदर्हत्वा"दित्यनेनोपलक्षणतयाऽशेषशब्दप्रवृत्तिहेतूनामपीशगतत्वव्युत्पादनमस्तीत्याशयात् । यद्वातत्तच्छब्दप्रवृत्तिनिमित्तगुणलाभस्ये त्यस्यस्वातंत्र्यरूपगुणलाभस्येत्येवार्थः । स्वातंत्र्यमपितदधीनत्वादित्यत्रैववक्ष्यतीतिभावः । नन्वेवंभाष्यादौ "तस्यैतस्यासा"वितिलिंगभा

तत्तच्छब्दप्रवृत्तिनिमित्तगुणलाभस्यवक्ष्यमाणसापेक्षत्वेपि त त्प्रकरणस्थगुणमात्रलाभः पूर्वाधिकरणाक्षेपःसमाधानंचतत्त दधिकरणमात्रसाध्यं । एवंचादित्यादिशब्दानांविष्णौमुख्य तायाअनुक्तत्वात्तैःपूर्वपक्षोदयइतिन्यायविवरणाभिप्रायः ।

गु० धिकरणसिद्धांतेनैवसकलपूर्वपक्षाणांनिरासस्संभवेनाधिकरणांतरस्यवैयर्थ्यमित्यतआह ॥ **तस्मादिति** ॥ नन्वेवंश्रुतिमात्रेणटीकायांलिंगप्रतिपादकांशोदाहरणमयुक्तं

SGDF
Sri Gangadhar ... Digital Foundation

प्र० गोक्तिः किमर्थेत्यतस्तदाशयमाह ॥ **अतएवेति** ॥ तन्न्यायाविषयत्वमेवाह ॥ **अत्रेवेति** ॥ नन्वेवमुत्तराधिकरणटीकायामदितिश्रुतेःसाव

अतएवात्रटीकादौ आदित्यशब्दस्यनविष्णुपरता । तल्लिंगाभावात् । प्रत्युतादित्यलिंगसद्भावादितिदर्शयितुंतल्लिंगप्रतिपादकांशोप्युपात्तः । एवंचोत्तरत्राप्यादित्यादिशब्दैःपूर्वत्रापिप्राणादिशब्दैःपूर्वपक्षोदयःसुलभः । अन्यथा श्रुतीनामन्यलिंगानांचतदधीनत्वन्यायेनब्रह्मणिमुख्यत्वस्यसिद्धत्वेनान्यश्रुत्याद्याश्रयणेनपूर्वपक्षःक्वापिनोदीयात् । यद्वा अंतरित्यत्रेंद्रादिशब्दानांविष्णौमुख्यत्वोक्तिरस्तु । तथाप्यादित्यशब्दोनांतरधिकरणविषयवाक्येश्रुतः । नापितन्न्यायविषयः । अत्रेवतत्रनिरवकाशदेवतालिंगाभावात् । अतएवटीकादौतदविषयतांदर्शयितुंदेवतालिंगप्रतिपादकांशोप्युदाहृतः । पर्यायाणामपितदधिकरणन्यायविषयाणामेवतेनसमन्वयसिद्धिः । नतुतदविषयाणां ।

गु० स्यादित्यतआह ॥ **अतएवेति** ॥ नन्वेवमनुव्याख्यानेतत्राभ्यधिकाशंकोक्तिरयुक्ता । सुधायांच नन्वेवमपितुपूर्वन्यायेनगतार्थेनाधिकरणारंभंप्रयोजयतीत्युक्तत्वात्तद्विरोधश्च । आकाशाधिकरणे तदधीनत्वादित्यत्रसर्वस्येश्वराधीनतामंगीकृत्यतस्याःप्रवृत्तिनिमित्तत्वंनेतिप्राप्तेऽस्तीतिसिद्धांतइत्येवंप्रतिपाद्यते । नतुमुख्यत्वमित्युक्तत्वेनतद्विरोधश्चेत्यरुच्यापक्षान्तरमाह ॥ **यद्वेति** ॥ ननुतत्रकथंनिरवकाशदेवतालिंगाभावः । सप्तयुंजंतिरथमेकचक्रमितिनिरवकाशलिंगानांतत्रापिसद्भावादितिचेन्न । क्वचिन्निरवकाशलिंगसद्भावेप्यसार्वत्रिकत्वान्नतस्यविवक्षा । नहितत्रसएवांतस्स्थइत्येकएवपूर्वःपक्षः । किंत्वनेके । नचसर्वत्रापिलिंगंनिरवकाशं । यच्चास्तिनिरवकाशंलिंगंतदप्येतदधिकरणन्यायेनैवसावकाशंभविष्यतीतितत्रनविवक्षितं । किंतुश्रुतिमात्रेणपूर्वपक्षेलिंगेनसिद्धांतः । अत्रतुश्रुतिलिंगाभ्यांपूर्वपक्षितेनिरवकाशश्रुतिलिंगाभ्यांसिद्धांतोतोयुक्तोन्यायभेदः । नन्वंतरधिकरणन्यायेनसवितृशब्दस्यभगवत्परत्वेनिर्णीतेतत्पर्यायत्वादादित्यशब्दस्यापिभगवत्परत्वमावश्यकमित्यतआह ॥ **पर्या**

SGDF
Sri Gargeshwari Digital Foundation

प्र० काशत्वोक्तिरयुक्ता । तस्याअपितद्विषयवाक्येऽश्रुतत्वात्तन्न्यायाविषयत्वाच्च । अतएवादितित्वलिंगादितिवक्ष्यतीत्यतआह ॥ **उत्तरेति** ॥ नन्वेवं "देवतांतरगास्सर्वे"इत्युक्तिविरोधइत्यतआह ॥ **अनुव्याख्यानइति** ॥ नन्वेवंसंकोचे "देवतांतरगा"इत्याधिदैविकशब्दत्वं "अध्यात्मगैश्वप्राणाद्यै"रित्यध्यात्मशब्दत्वमित्याद्युपाध्युक्तिरयुक्ता । सर्वसंग्रहार्थत्वात्तस्याइत्यतआह ॥ **तत्रेति** ॥ ननूक्तरीत्याऽऽदित्यादिश्रुत्या निरवकाशत्वेतस्याएवसमन्वयउच्यतां । तस्याःस्वतएवान्यत्रप्रसिद्धत्वात् । किंतत्साहित्येनान्यत्रप्रसिद्धालिंगसमन्वयेन । नचाद्यपक्षेश्रुतेरप्यन्यसाहित्येनैवान्यत्रप्रसिद्धिर्नतुस्वतइतिवाच्यं । उत्तरपक्षद्वयेतदभावात् । आद्येपिश्रुतेर्लिंगसाहित्येनैवान्यत्रप्रसिद्धता सर्वगतत्वस्यत्वादित्यश्रुतिसाहित्येनापीतिविलंबितत्वमितिभावेनाशंक्यनिरस्यति ॥ **नचैवमिति** ॥ किंसर्वत्रैवंसंभवेनलिंगसमन्वयार्थपादांतरमेवमास्त्वि

उत्तराधिकरणटीकाप्यदितिशब्दसजातीयेंद्रादिशब्दसमन्वयस्योक्तत्वाभिप्राया । अनुव्याख्यानेसर्वशब्दोपिन्यायविषयसर्वपरः । तत्राधिदैविकत्वाद्युपाध्युक्तिरप्यधिकरणांतरविषयाधिभौतिकादिव्यावृत्त्यर्था । नतुसर्वाधिदैविकसंग्रहार्था । तस्माद्युक्तःपूर्वपक्षः । नचैवंयत्संबंधात्सर्वगतत्वस्यान्यत्रप्रसिद्धतातन्नामसमन्वयएवोच्यतामितिवाच्यं ।

गु० **याणामिति** ॥ नन्वेवमंतरस्थप्रकरणेप्यदितिशब्दस्याप्यभावेनोत्तराधिकरणटीकायामदितिशब्दस्यांतरधिकरणन्यायेनसावकाशत्वशंकानुपपत्तिरित्यतआह ॥ **उत्तराधिकरणटीकापीति** ॥ आदित्यशब्दस्योत्तराधिकरणन्यायेनभगवत्परत्वाभावेदेवतांतरगाइत्यनुव्याख्यानविरोधइत्यतआह ॥ **अनुव्याख्यानइति** ॥ नन्वेवमंतरधिकरणटीकायामधिदैवगतसर्वशब्दसमन्वयःप्रतिपाद्यतइत्युपाध्युक्तेःकागतिरित्यतआह ॥ **तत्रेति** ॥ नन्वादित्यश्रुतेर्भगवत्परत्वेतन्निष्ठत्वेनश्रुतस्यसर्वग

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्याशयउतपादांतरारंभेप्यस्योक्तरीत्याश्रयणेनपूर्वत्रैवनिवेशःस्यादिति । आद्यआह ॥ **अंतर्यामित्वेति** ॥ **अत्रापीति** ॥ ननुवैश्वानराधिकरणस्येवफलतस्साभविष्यति । नचपाचकत्वाद्यनेकलिंगसमन्वयार्थमेकनामसमन्वयस्तत्रोच्यतइतिवाच्यं । इहापिसंवत्सरसारत्वाद्यनेकलिंगसमन्वयार्थत्वसंभवादितिचेत्सत्यं । साक्षात्संगतिसंभवेफलतस्तदुक्त्ययोगात् । नामसमन्वयस्यवक्ष्यमाणदोषग्रस्तत्वाच्चेतितात्पर्यात् । द्वितीयमाशंक्यनिराह ॥ **नचेति** ॥ **अंतरिति** ॥ तत्रसर्वदेवतावाचकपदप्रवृत्तिनिमित्तस्येशगतत्वस्यान्यगतस्यचतदधीनत्वस्यच साधनादितिभावः । एतच्चाद्यपक्षानुरोधेनोक्तमितिध्येयं । अग्रिमपक्षद्वयआदित्यादिशब्दप्रवृत्तिनिमित्तगुणलाभस्यांतरित्यत्राभावात् । युक्त्यंतरमाह ॥ **अर्भकौकस्त्वादीति** ॥ **हेतुतयोक्तेति** ॥ उक्तलिंगजातीयेत्यर्थः । आक्षिप्तंटीकोक्तंप्रापकांतरंचसाधयति ॥ **सौरेति** ॥

अंतर्यामित्वादेर्लिंगस्यपृथिवीशरीरत्वादिलिंगसंबंधादेवान्यत्रप्रसिद्धत्वात्तत्समन्वयार्थंपादांतरेकार्येतत्संगत्यर्थमत्रापि लिंगस्यैवसमन्वेतव्यत्वात् । नचयत्रलिंगंनामसंबंधादन्यत्रप्रसिद्धंतदधिकरणंनामसमन्वयपरमाद्यपादस्थंचास्त्विति वाच्यं । तथात्वआदित्यादिशब्दप्रवृत्तिनिमित्तगुणस्यांतरधिकरणेनैवलब्धतयासाक्षादपूर्वगुणालाभात् । अर्भकौकस्त्वादिपूर्वपक्षमूलयुक्तेःप्रसिद्धोपदेशादिसिद्धांतयुक्तेश्वसर्वगतवाक्यइवादित्यवाक्येऽसत्त्वाच्च । नामपादेनामसमन्वयेहेतुतयोक्तलिंगसमन्वयस्यैवेहाकांक्षितत्वाच्च । तस्मादादित्यश्रुतितःसूर्यप्राप्तिर्युक्ता । सौरमंत्रोदाहरणाच्चतत्प्राप्तिः । ॥ ४२३ ॥

गु० स्यापिभगवत्परत्वसिद्धिःस्यादेवेत्यतउक्तं **साक्षादिति** । अस्तुवासौरमंत्रोदाहरणात्सूर्यप्राप्तिरित्याह ॥ **सौरेति** ॥ ननुसर्वेष्वितिसर्वशब्देनादित्यस्यापिग्रहण

प्र० नचसूर्यादिशब्दस्सावकाशइत्युक्तमितिवाच्यं । चक्षुष्ट्वलिंगेनतदुज्जीवनादित्याह ॥ **मंत्रइति** ॥ “आदित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविश”दिति तस्यामेवश्रुतौचक्षुष्ट्वोक्तेरित्यर्थः । प्रागाक्षिप्तंटीकोक्तंप्रापकांतरमपिसमर्थयते ॥ **उक्तेति** ॥ यद्यपिसर्वेषुभूतेष्वितिसामान्येनभूतपदेनादित्यस्यापिग्रहणात्तद्गतत्वोक्तिरस्ति । तथापिचंद्रमस्येतमितिवदादित्यएतमितिविशिष्यानुक्तत्वलिंगात्तत्प्राप्तिः । अन्यथातथोक्तिस्स्यादेव । अनुक्तौकारणाभावादित्यर्थः । अतएवटीकायां “एतमादित्यइत्युक्तिःस्या”दित्युक्तं । एवमादित्यकोटिकपूर्वपक्षंटीकोक्तंसमर्थ्येदानींन्यायविवरणगतादित्यपदोपात्तजीवलिंगेन “सर्वजीवानांवाएतत्सर्वगतत्व”मितिटीकोक्तजीवकोटिकपूर्वपक्षंचसमर्थयते ॥ **चक्षुर्मयत्वादीति** ॥ “चक्षुर्मयश्श्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मे”तिवाक्येश्रुतानिटीकोक्तान्यादिपदार्थः । ननूक्तमत्रमयटःप्राचुर्यार्थत्वेनपूर्णज्ञानत्वादिनातदुपपत्तेरित्यतस्तद्वैषम्यमाह ॥ **आनंदमयेति** ॥ यदेषआकाशनामाविष्णुःपूर्णानंदोनस्यात्तर्ह्ययंनजगच्चेष्टयेत् । प्रवृत्तिहेतूनांचतुर्णामध्येदुःखोद्रेकरागद्वेषशून्यस्यसुखोद्रेकैकनिबंधनत्वात्प्रवृत्तेः । यद्ययंनचेष्टयेत्तर्हिचेष्टयेन्नकोपीतिपूर्णानंदत्वसाधकजगच्चेष्टकत्वरूपहेतुव्यपदेशस्यभावेन

मंत्रे “चक्षुर्मित्रस्ये”तिचक्षुष्ट्वश्रवणात्तस्यच “आदित्यश्चक्षुर्भूत्वे”त्यादिश्रुत्याऽऽदित्यलिंगत्वात् । उक्तादित्यश्रुत्युपोद्बलिताद्विशिष्यादित्येनुक्तत्वलिंगाच्च तत्प्राप्तिः । चक्षुर्मयत्वादिलिंगाच्चसर्वजीवानांप्राप्तिः । आनंदमयोक्तस्यकोह्येवान्यादितिप्राचुर्यार्थेहेतुव्यपदेशस्य

गु०संभवात्कथंसावकाशेनानुक्तत्वलिंगेननिर्णयःस्यादित्यतआह ॥ **उक्तादित्येति** ॥ ननुकथंचक्षुर्मयत्वादिलिंगाज्जीवप्राप्तिः । आनंदमयाधिकरणन्यायेनप्राचुर्यार्थतया चक्षुर्मयत्वादेर्ब्रह्मणिसावकाशत्वादित्यतआह ॥ **आनंदमयोक्तस्येति** ॥ ननुतथापिपादांत्यप्राणाधिकरणन्यायेनांतर्यामिविषयतयाचक्षुर्मयत्वंभगवतिसावकाशमित्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्रप्राचुर्यार्थत्वेपीहतदभावेनतन्न्यायाविषयत्वादित्यर्थः। अतएवहेतुव्यपदेशादितिसूत्रंप्राचुर्यार्थत्वेपियोजितमितिभावः। नन्वानंदमयेहेतुव्यपदेशेपिविज्ञानमयमनोमयादौतदभावेपिप्राचुर्यार्थत्वंस्वीकृतमित्यतआह ॥ **तत्प्रायेति** ॥ आनंदमयप्रायपाठस्येत्यर्थः । जीवेपिविकारार्थत्वायोगादकामेनाप्युपेयंप्राचुर्यार्थत्वमित्यतआह ॥ **ज्ञानेति** ॥ यद्वाप्राचुर्यार्थत्वेप्यनुपपत्तिमाह ॥ **ज्ञानेति** ॥ ज्ञानकरणत्वेनप्रसिद्धं यच्चक्षुरादितत्संबंधस्यैवासंभवेनतद्बाहुल्यरूपप्राचुर्यस्यसुतरामयोगादित्यर्थः । प्रसिद्धपदेन चक्षुःपदस्याप्रसिद्धार्थस्वीकारेप्रसिद्धिबाधइति सूचितं । "ज्योतिराद्यधिष्ठानंतुतदामनना"दित्यत्रद्वितीयेचक्षुरादिकरणानामीश्वरप्रयोज्यत्वेनतदीयत्वमुच्यते । नतुजीवस्येवज्ञानजनकतया तत्संबंधइतिभावेनोक्तं **संबंधस्यैवेति** । तत्रहेतु**र्नित्यज्ञानइति** । एतेनांतर्यामिविषयतयोपपन्नमितिप्रत्युक्तं । तस्यापिनित्यज्ञानत्वादिति । ननुनज्ञानकरणमिहचक्षुः । किंतु "चक्षुषश्चक्षु"रित्यादाविवविष्णुरेवेत्यतआह ॥ **चक्षुश्शब्दस्येति** ॥ ननुसुधायांचक्षुर्मयत्वादेस्सावकाशत्वमाशंक्य "हेत्वंतरेणपूर्वपक्षेसत्यभ्युच्चयमात्रत्वेनतेषामुपन्यास"इति टीकायांच "नचतल्लिंगमंतर्यामिविषयं । तस्यापरिच्छिन्नत्वेनाल्पौकस्त्वायोगा"दितिचक्षुर्मयत्वादेस्सावकाशत्वमुपेत्यसौत्राल्पौकस्त्वमेवमूलयुक्तित्वेनोक्तं । न्यायविवरणटीकायांचतथैवोक्तं । तथाचतद्विरुध्यतइतिचेन्न । अभ्युपेत्यवादेनतथोक्तावपीहवास्तवाशयेननिरवकाशत्वोक्तेः । अतएवाग्रेटीका "चक्षुर्मयत्वाद्ययोगाच्चे"ति वक्ष्यतिचैतदक्ष

तत्प्रायपाठस्यचात्राभावेनतन्न्यायाविषयत्वात् । ज्ञानकरणतयाप्रसिद्धचक्षुरादिसंबंधस्यैवनित्यज्ञानेंतर्यामिण्यप्यसंभवेनतत्प्राचुर्यस्यसुतरामसंभवाच्च । चक्षुश्शब्दस्यविष्णुपरत्वेचमयटोवैयर्थ्यं ।

गु० आह ॥ **ज्ञानकरणतयेति** ॥ पशुशब्दस्सतद्विशेषच्छागवदादित्यश्रुत्याचक्षुर्मयत्वादिजीवलिंगानांजीवविशेषादित्यएवपर्यवसानेनसर्वजीवप्रापकाभावात्कथंसर्वजी

SGDF
Sri Gargeshwari Digital Foundation

प्र० रार्थोक्तिप्रस्तावे । प्रागुक्तंविशेषेपर्यवसानंनिराह ॥ नचेति ॥ बाध्वोवायुः "चत्वारःपुरुषाइत्याहे"त्युपक्रम्य शरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइतिपुरुषचतुष्टयंनिर्दिश्य क्रमेणतेषांप्रज्ञात्माकारब्रह्मादित्याख्यरसानुक्त्वांते "इतिहस्माहबाध्व"इत्युपसंहारादेकवाक्यत्वं । बाध्वचिह्नितेतिबहुव्रीहिः । वाक्यस्यविशेषणं । बह्वृचाइत्यादावित्याद्यपिबहुव्रीहिरेव । भाषितपुंस्कत्वात् "तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्ये"तिपुंवद्भावः । तदुपरितनेवाक्येइत्यादौअंतेचकारान्मध्येचबहुकृत्वश्श्रुतस्येतिवाव्याख्येयं ॥ अथैषइति ॥ संज्ञाधिकरण

नचचक्षुर्मयत्वादीनामादित्येपर्यवसानं । "चत्वारःपुरुषाइतिबाध्व"इतिबाध्वचिह्नितोपक्रमस्य "इतिहस्माहबाध्व"इतिबाध्वचिह्नितोपसंहारस्यैवचवाक्यस्यैकत्वात्तन्मध्यस्थादित्यशब्दस्यसूर्यपरत्वेपि तदुपरितने "एतंह्येवबह्वृचा"इत्यादौ "सर्वेषुभूतेष्वेत"मित्यंतेचवाक्येबहुकृत्वश्श्रुतस्यैतच्छब्दस्य "अथैषज्योति"रित्यादाविववक्ष्यमाणजीवरूपचक्षुर्मयादिपरत्वात् । अर्भकौकस्त्वाच्चनविष्णोःसर्वगतता । अंतरित्यत्र अंतरइत्यत्र अंतर्यामीत्यत्रच सर्वगतत्वाल्पौकस्त्वयोरविरोधोनोक्तः । तत्प्रकरणेसर्वगतत्वस्याभावेनविरोधशंकानुदयात् ।

प्र० मुक्तमानंदमयाधिकरणे । तत्रयथैतच्छब्दस्य "एतेनसहस्रदक्षिणेनयजेते"तिवक्ष्यमाणयागपरत्वं नतुप्रकृतज्योतिष्टोमपरत्वं तद्वदित्यर्थः । ननुसंज्ञाभेदात्तत्रतथात्वमुपेतमितिचेदिहापिवाक्यभेदात्तथास्त्वितिभावः । अर्भकौकस्त्वादितिसौत्रंप्रापकांतरमप्याह ॥ अर्भकेति ॥ सर्वेषुभूतेष्वितिश्रुताविर्त्यर्थः । सर्वगतता द्युपृथिव्यादिसर्वगततेत्यर्थः । ननूक्तमत्राल्पौकस्त्वंतत्रतत्रसमर्थितमितितत्राह ॥ अंतरित्यत्रेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० "पुरुषएवेदंसर्व"मित्यादिनासर्वगतत्वधर्मस्तत्राप्यस्तीत्यतआह ॥ **उदयेवेति** ॥ अतएवसंक्षेपभाष्ये "अंतरःखव"दित्यंतर्नयेव्योमवदित्युक्त्यात्रत्यन्यायेनैवाविरोधउक्तः ॥ **अंतस्स्थत्वादीति** ॥ बहिस्स्थत्वसर्वगतत्वोक्तेरित्यादिपदार्थः । इहतुतयोर्विरोधात्सर्वगतस्यहरेरल्पौकस्त्वंनयुक्तमितिप्राप्ते व्योमवदित्यंशेनसमावेशस्समर्थितइतिभावः । तयोः सर्वगतत्वाल्पौकस्त्वयोः ॥ **व्यक्त्यात्मनेति** ॥ सर्वगतत्वस्यशक्त्यात्मनावस्थानेऽल्पौकस्त्वमात्रस्यव्यक्ततयातदभिप्रायेणांगुष्ठमात्रत्वोक्तिरितिवक्ष्यतइत्यर्थः । तथाचाधिकाशंकयातस्योत्थितिरित्यर्थः । ननुहृदिविद्यमानावकाशस्यांगुष्ठमात्रत्वेनतदपेक्षयातन्मात्रत्वोक्तिरुपचारेणेतिसूत्रेभाष्यादौचप्रतीयते । सत्यं । पक्षांतरमुपेत्यैवैतत् । अतएवतत्रटीकायां "भगवन्मूर्तिविशेषस्यव्यक्त्यातन्मात्रपरिमाणत्वा"दित्युक्तमितिभावः । सूत्रमपिहृदिव्यक्तरूपापेक्षयेतिव्याख्येयं । ननूक्तमर्भकौकस्त्वमेवात्रनश्रूयते । अन्यथापूर्वाक्षेपायोगादिति । तत्राह ॥ **सर्वेष्विति** ॥ नन्ववधारणाभावात्कथमेतदित्यतोभूतपदोपादाना

उदयेवाऽत्रत्यन्यायेनैवपरिहार्यत्वात् । उपासात्रैविध्यादित्यत्रत्वंतस्स्थत्वाद्युक्तेः प्रयोजनमात्रमुक्तं । नत्वविरोधः । हृद्यपेक्षयेत्यत्रतुतयोरत्राविरोधउक्तेपि "अंगुष्ठमात्रःपुरुष"इत्यत्रमात्रशब्दस्यावधारणार्थत्वात्सर्वगतस्यसावधारणांगुष्ठपरिमाणत्वमयुक्तमितिशंकिते मूर्तिविशेषेव्यक्त्यात्मनासावधारणमपितद्युक्तमितिसमाधास्यते । सर्वेषुभूतेष्वित्यत्रचाल्पौकस्त्वमुच्यते । भूतादन्यत्राभावप्रतीतेः । ॥ ४२५ ॥

गु० वानांप्राप्तिरित्याशंकते ॥ **नचेति** ॥ ननुसर्वेषुभूतेष्वित्यनेनसर्वगतत्वस्यैवोक्तत्वेनार्भकौकस्त्वानुक्तेःकथमर्भकौकस्त्वेनसर्वजीवप्राप्तिरित्यतआह॥ **सर्वेष्विति**॥ ननु

प्र० देव अन्यथासर्वेष्वित्येवब्रूयादितिभावेनाह ॥ **अन्यथेति** ॥ **सिद्धांतिनेति** ॥ अतएवदहराधिकरणे "अल्पश्रुतेरितिचेत्तदुक्त"मित्यत्राल्पस्थानमाशंक्योक्तपरिहारस्मारणंक्रियते । अत्रतत्वप्रदीपेचसर्वजीवहृदयसुषिराणांअल्पत्वादित्युक्तमितिभावः । नन्वेवमल्पौकस्त्वस्यान्यगतत्वेविष्णोःप्रागुक्तसर्वगतत्वस्याक्षेपोभाष्यादावयुक्तइत्युक्तमित्यतस्तत्साधयति ॥ **पूर्वेति** ॥ सत्यंनसाक्षादाक्षेपः । अवधारणद्वारातुसेत्स्यतीतिभावः ॥ **विष्णोःसर्वगतत्वायोगइति** ॥ किंत्वादित्यस्यवासर्वजीवानांवाततममित्युक्तसर्वगतत्वं । एकप्रकरणत्वादितिवाक्यशेषः । तेनादित्यनिष्ठत्वेनोक्तिर्युक्तेतिबोध्यं । एतेन "तद्यदिविष्णोरन्यस्यस्या"दित्यादिटीकाविवृताध्येया । ननुसर्वभूतगतस्यान्यत्वे "सयोतोऽश्रुतोगत" इत्यश्रुतत्वादिकमपितस्यैवेतिप्रागुक्तकर्णादिविदूरत्वमपितस्यैवेतिज्योतिस्सूत्रमप्याक्षेप्तुंशक्यते । नचसन्निहिताक्षेपंविनाव्यवहिताक्षेपोनयुक्तइतिवाच्यं । उत्तरनयभाष्यादौजन्मादिसूत्राक्षेपस्यदर्शयिष्यमाणत्वात् । पूर्वपादांत्यनयेनसंगत्यावश्यकत्वनिर्बंधाभावाच्च । एवंचाश्रुतत्वादिविष्णुलिंगश्रवणाद्विष्णुरेवात्रोच्यतइतिप्रागुक्तशंकापिनोदेष्यति । आक्षेपश्चऋजुर्भवतीतिचेन्न । सूत्रोपात्ताल्पौकस्त्वमुखेनैवाक्षेपस्योचितत्वात् । श्रुतिसंगतिप्रदर्शनार्थत्वात् । साक्षात्समन्वीयमानलिंगमुखेनाक्षेपसंभवेव्यवहिताश्रुतत्वादिमुखेनाक्षेपायोगाच्चेतितात्पर्यात् ।

अन्यथाभूतपदवैयर्थ्यात् । सिद्धांतिना "सर्वभूताशयस्थित"इतिस्मृतिसमाख्ययासर्वजीवहृदयस्थत्वस्यैववक्तव्यत्वाच्च । पूर्वाधिकरणाक्षेपस्त्वित्थं । तस्यसर्वभूतगतस्यैवसिद्धांतिनासर्वगतत्वांगीकारात्तदभावेतदभाव इति । यद्वा एतमेवेत्यवधारणेनविष्णोरन्यस्यैवसर्वभूतगतत्वाद्विष्णोर्भूतादन्यत्रसत्त्वेपिसर्वगतत्वायोगइति ।

गु० यदिसर्वेषुभूतेष्वित्यत्राल्पौकस्त्वमुच्येततर्ह्यत्रोक्तसर्वगतोनविष्णुश्चेत्पूर्वोक्तोपिनसर्वगतोविष्णुःस्यादित्याक्षेपायोगात्पूर्वाधिकरणाक्षेपानुपपत्तिरित्यतआह॥ **पूर्वाधि**

SGDF Sri Gargeshwari Digital Foundation

प्र० यद्वा अत्रैवतत्रनिरवकाशादित्यादिलिंगाभावाद्विष्णौमुख्यस्याश्रुतत्वादेरादित्येगौणतास्वीकारेणतदाक्षेपेहेत्वभावात्सन्निहितमेवाक्षिप्तं । अतएवाग्रेज्योतिरदृश्यत्वादीत्यादिनातदाक्षेपप्रकारासंभवप्रकारंवक्ष्यति । ननुपूर्वपक्षेहृदयनिहितत्वरूपार्भकौकस्त्वस्यक्वाप्यन्यत्रविष्णावसंमततयानिरवकाशेनतेनविचरणरूपाश्रुतत्वादेर्गौणत्वाश्रयणेनज्योतिरादिसूत्रमप्याक्षेप्यंस्यात्। अतएवाग्रेतनं "बाधकाभावा"दित्येतदसदितिचेन्न। तत्राश्रुतत्वादीनामनेकेषांबाधादप्येकस्यहृदयस्थत्वस्यकथंचिद्विष्णौगौणतयावर्णनीयत्वात् । अश्रुतत्वामतत्वादिरूपविष्णुधर्मसंदृष्टत्वाच्च । अक्षराधिकरणटीकायांवक्ष्यमाणरीत्यातत्रप्रधानश्रुतविचरणरूपाश्रुतत्वादेर्गौणत्ववर्णनायोगाच्च। अत्रत्वादित्यप्रापकाणांबहुत्वेनतत्सध्रीचीनस्या

नचार्भकौकस्त्वमंतर्यामिण्यपियुक्तं । "एषमआत्मांतर्हृदयेज्यायान्पृथिव्या"इत्यादिश्रुत्यातस्यापिसर्वगतत्वेनतद्विरुद्धाल्पौकस्त्वायोगात्। नचपूर्वपक्षे "ब्रह्मततम"मित्युक्तस्यसर्वगतत्वस्याप्यादित्यनिष्ठत्वात्तस्याप्यल्पौकस्त्वायोगइतिवाच्यं । आदित्यश्रुत्याद्यनुसारेणततमत्वस्यसंकोचात् ।

प्र० र्भकौकस्त्वस्यमुख्यत्वसंभवेत्यागायोगाच्चरमश्रुताश्रुतत्वादेर्गौणत्वसंभवाद्बाधकाभावादित्येतदप्येतदभिप्रायंनेयं । केचित्तुसर्वेषुभूतेष्वित्यत्रहृदयस्थत्वाश्रवणान्नतदाक्षेपइत्याहुः । तत्पक्षे उपासात्रैविध्यादित्यादिनागतत्वशंकासमाधानादिकंकथमितिचिंत्यं । लिंगंपूर्वन्यायेनसावकाशमित्याशंक्यनिराह ॥ **नचेति** ॥ **इत्यादिश्रुत्येति** ॥ एतेन "तस्यापरिच्छिन्नत्वेनसर्वेषुभूतेष्वित्युक्ताल्पौकस्त्वायोगादि"तिटीकोपपादिता । ननु "एषमआत्मांतर्हृदयेऽणीयान्व्रीहेर्वायवाद्वे"त्यणीयस्त्वमपिश्रूयतइतिचेन्न । द्वयोर्विरोधेनाणीयस्त्वस्यजीवधर्मत्वादिनाकथंचिन्नेयत्वादितिभावेनोक्तं **तद्विरुद्धाल्पौकस्त्वायोगादिति** ॥ **आदित्यनिष्ठत्वादिति** ॥ एतच्चप्रागेवविवृतमस्माभिः । ननुब्रह्मणोपिसर्वगतत्वं

SGDF
Sri Gargeshwari Digital Foundation

प्र० संकोच्यात्रप्रतिपाद्यत्वमुपेयतामित्यतआह ॥ **नचेति** ॥ एतेन ननुयथापूर्वपक्षेकिंचिदादित्यवाक्यंकिंचिज्जीववाक्यमित्युभयप्रापकसत्त्वाद्वाक्यभेदआश्रीयते तथापूर्वप्रकरणंपूर्वोक्तरीत्याऽनेकश्रुतिलिंगोपेतत्वेनब्रह्मपरं । "चत्वारःपुरुषा"इत्यादित्वन्यपरमित्यस्तु । अत्रोक्तबाधकानामर्भकौकस्त्वादित्यश्रुत्यादीनांतत्राभावादितिनिरस्तं । ब्रह्मततममितिपूर्ववाक्यमसंकुचितसर्वगतत्वपरंचेद्भूतेष्वेतमेवेत्यवधारणविरोधेननब्रह्मप्रतिपादयितुमलं संकुचिततत्परंचेत्तस्यब्रह्मत्वव्याघातेननतत्प्रतिपादयितुंशक्तमित्युभयथातस्यब्रह्मपरत्वायोगात् । प्रकृतवाक्यभेदइवपूर्वोत्तरप्रकरणभेदेज्ञापकाभावादादित्यश्रुत्याद्यनुसारेणब्रह्मशब्दाश्रुतत्वादिलिंगानामन्यथात्वमिव पूर्वत्राप्यन्यथयितुंशक्यत्वेनसर्वत्रादित्यपरत्वेपूर्वपक्षिणंप्रतिप्रबलबाधकाभावात् । अतएवटीकायां "एकप्रकरणत्वा"दित्युक्तमिति । नन्वत्रब्रह्मशब्दादयोपिब्रह्मत्वसाधकास्संतीत्युक्तमित्यत्राह ॥ **ब्रह्मशब्दस्यचेति** ॥ एतेन "ब्रह्मशब्दस्यजीवेपिसंभवा"दितिटीकाविवृता । अश्रुतत्वादेर्गतिमाह ॥ **ज्योतिरिति** ॥ एतेननतदाक्षेपइतिसूचितं ॥ **बाधकाभावादिति** ॥ उक्ताभिप्रायमेतत् । यदप्यंतरत्वंविष्णुलिंगमिति तत्राह ॥ **अंतर्यामीति** ॥ नन्वं

नचब्रह्मणितथा । ब्रह्मत्वव्याघातात् । ब्रह्मशब्दस्यचविष्णौमुख्यत्वेप्यल्पौकस्त्वादिलिंगादिहामुख्यार्थत्वात् । ज्योतिरदृश्यत्वाद्यधिकरणयोश्चबाधकाभावान्मुख्यस्याश्रुतत्वादेर्विष्णुधर्मत्वेपिप्रकृतेऽर्भकौकस्त्वादिबाधकेनामुख्यस्यतस्यजीवेप्युपपत्तेः। अंतर्यामीत्यत्रचेहविष्णुलिंगत्वेननिश्चित

गु० करणाक्षेपस्त्विति॥ एवमादित्यश्रुतेःप्रसिद्धादित्यपरत्वंसाधकैरुपपाद्यतत्रबाधकंपरिहरति ॥ **ब्रह्मशब्दस्यचेत्यादि** ॥ अभ्यधिकाशंकाविघटनक्रममालंब्यसौत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० तरउपपत्तेरित्यत्रांतरत्वंविष्णुलिंगतयासिद्धमित्यतआह ॥ अंतरेति ॥ तत्र "यएषोंतरक्षिणिपुरुष"इतिचक्षुरंतस्स्थत्वंश्रूयतेनत्विहतथेत्यर्थः । नन्वथापि "अन्योंतरआत्मानंदमय"इत्यत्रांतरत्वस्यविष्णुधर्मत्वंसिद्धमितिचेन्न । तत्रदेहदेहिभावेनांतस्स्थत्वमुच्यते । "बहिष्ठोदेहवद्विष्णुरंतस्स्थोदेहिवत्स्मृत"इतितद्भाष्योक्तेः । नचेहतथाश्रूयते । किंतुसर्वजीवांतरत्वं । उक्तंच "अंतस्स्थस्सर्वजीवानांपूर्णत्वात्पुरुषाभिध"इत्यैतरेयभाष्ये । नन्वेवमपि "अन्यभावव्यावृत्ते"रितिसूत्रेऽक्षरनयेऽणुत्वमहत्त्वयोरविरोधोवक्ष्यते । अणुत्वमहत्त्वेएवाल्पौकस्त्वसर्वगतत्वे । अतएववैशेषिकाधिकरणे "महतोल्पत्वमपिहिव्योमवत्प्राहवेदवित् । यद्यल्पदेशसंस्थानंनसर्वत्रापिनोभवे"दित्यादिनाव्योमवच्चेतिसू

स्यांतरत्वस्य "यःपृथिव्याअंतर"इतिश्रवणादंतर्यामीविष्णुरितिवक्ष्यते । नत्वेतत्सिद्धांतात्प्राक्तत्रांतरत्वादीनांविष्णुधर्मत्वनिश्चयः । अतएवतत्रभाष्यकारोवक्ष्यति "सहिसर्वेषांभूतानामंतरपुरुष"इत्यादिना । अंतरइत्यंतराधिकरणेतुचक्षुरंतस्स्थत्वंविष्णोरितिवक्ष्यते । नचेहतच्छ्रूयते । किंत्वंतरशब्दमात्रमित्याद्यूह्यं । तस्माद्युक्तःपूर्वपक्षोदयः ॥

प्र० त्रांशंमनसिनिधायव्योमदृष्टांतेनात्रोक्तमल्पौकस्त्वरूपमणुत्वंविष्णावुपपादितं । नचतत्रप्राकृतस्थौल्यादिराहित्यमेवोक्तं । "अस्थूलोनणुरूपोसावैश्वर्यात्पुरुषोत्तम"इतिभाष्योक्तेः । "अन्यवस्तुस्वभावानांस्थौल्यादीनामपाकृतिं । नारायणेश्रुतिर्वक्ती"त्यनुव्याख्यानोक्तेरितिवाच्यं । अन्यभावेतिसूत्रोक्तस्थौल्याद्यभावप्रतिपादनेपिसौत्रचशब्देनस्थौल्यादिविरुद्धाणुत्वादेरपिसमुच्चिततयाणुत्वादेरपितत्रैवोक्तेः । अतएवानुव्याख्याने "अतोविरुद्धवद्भातमपिव्याख्यायतत्वतः । योजनीयंहरौवाक्यंविरुद्धैर्लक्षणैर्युत"मित्यणुत्वादिकमप्युक्तं । भाष्येपि "अस्थूलोनणुरमध्यमोमध्यम"इतिश्रुतौमध्यमादिपदेनतत्सूचनाच्च । नचात्राविरुद्धत्वेनोक्तस्यैवाणुत्वादेस्तत्रहेतूकरणं नतुतत्रव्युत्पाद्यतया । अतएव

प्र० चशब्देनतस्योपादानमितियुक्तं । इहाणुत्वमहत्त्वयोर्विरोधपरिहारइत्याद्यक्षराधिकरणचंद्रिकाग्रंथविरोधात् । एवंचाग्रेहेतूकरणेनब्रह्मलिंगतयानिर्णीतस्याल्पौकस्त्वस्यनसमन्वेयतायोग्यत्वं । नापितेनपूर्वपक्षोदयः । पूर्वपक्षेवाऽश्रुतत्वादेर्गौणत्ववर्णनंवायुक्तमितिचेन्मैवं । अल्पौकस्त्वसर्वगतत्वयोरणुत्वमहत्त्वाविनाभूततयान्यत्वात् । तथाचतयोरेवात्राविरोधउच्यते । नत्वणुत्वमहत्त्वयोः । अतएवसुधायांवैशेषिकनये "अल्पाल्पतरदेशावस्थानेऽल्पाल्पतरपरिमाणमवर्जनीय"मित्युक्तं । नतुतदेवतदिति । नन्वनयोरविरोधोक्तौतदाक्षेप्ययोरणुत्वमहत्त्वयोरपिससिद्धइतिनतयोःपुनर्विरोधशंकोदेतीतिचेन्न । अत्रैतद्द्वाराऽविरोधेपिसाक्षादविरोधानुक्तेः । तयोर्विरोधेप्राकृतत्वंतंत्रं । ब्रह्मतुप्राकृतपदार्थव्यावृत्तमितिसमाध्युक्त्यर्थत्वेनपुनर्विरोधशंकोत्थानोपपत्तेरित्याद्यभिप्रेत्योक्तमित्याद्यूह्यमिति । अत्रपृथिव्यादिसर्वगतस्यविष्णुत्वेब्रह्मशब्दोश्रुतत्वादिलिंगंचहेतूकृतं । तच्चादित्यादिप्रापकवशादमुख्यार्थमितिनविष्णुप्रापकमितियदुक्तंपूर्वपक्षिणा तत्रादित्यप्रापकत्वेनोक्तानांभगवत्येवयुक्तत्वेनादित्यप्रापकत्वायोगात्तद्बाधाभावेनब्रह्मशब्दादेरमुख्यार्थत्वायोगात् मुख्यब्रह्मशब्दादिनासर्वगतोविष्णुरेवेतिभावेनसिद्धांतयति ॥ सिद्धांतस्त्विति ॥ तत्रयदुक्तंसंवत्सरसारत्वादिलिंगैश्श्रुतेःप्रसिद्धादित्यपरत्वमिति तत्राद्यंलिंगंतावन्नेत्याह ॥ संवत्सरइति ॥ विष्णावेव

सिद्धांतस्तु ॥ "संवत्सरोवैप्रजापतिः । तत्रसंवत्सरंनामब्रह्माण"मित्यादिश्रुति
स्मृतिषु उत्तराधिकरणभाष्येवक्ष्यमाणरीत्यासंवत्सरशब्दस्यचतुर्मुखेप्रसिद्धत्वात्

गु० क्रमोल्लंघनेनसिद्धांतमाह ॥सिद्धांतस्त्विति॥ आदित्यश्रुतेःप्रसिद्धादित्यपरत्वं उपोद्बलकत्वेनोक्तंसंवत्सराधिपतित्वरूपंलिंगंब्रह्मणिसावकाशयति॥संवत्सरइति॥

SGDF Foundation

प्र० संभवादित्यंतेन। अत्रपंचम्यंतप्रधानहेतूनांबाधकाभावेनेतिवक्ष्यमाणसाध्येनान्वयः। संवत्सरशब्दस्यविरिंचिपरत्वेश्रौतस्मार्तप्रसिद्धिंमहा पुरुषपदप्रयोगंचसाधकद्वयमाह ॥ **संवत्सरोवाइत्यादिना** ॥ आदिपदेन "प्रजापतिःप्रजास्सृष्ट्वाव्यस्रंसत संवत्सरो ब्रह्माविश्वःकतमः स्वयंभूःप्रजापतिःसंवत्सर" इत्यादिश्रुतिः "ततस्संवत्सरोनामब्रह्मासमभवत्प्रभो" रित्यादिस्मृतिश्चगृह्यते । ननुब्रह्मणिश्रौतप्रसिद्धिरिवकाल विशेषेलोकप्रसिद्धिरप्यस्तीतिचेन्न । "शास्त्रस्थावातन्निमित्तत्वा" दितियववराहाधिकरणन्यायेनश्रौतप्रसिद्धेरेवांतरंगत्वेनाविप्लुतत्वेनचशास्त्रे ग्राह्यत्वेनाज्ञप्रसिद्धितोबलवत्त्वादित्याह ॥ **श्रौतेति** ॥ कालपरत्वेमहापुरुषपदायोगात् । "संवत्सराभिमानीतुब्रह्मैवहिमहापुमा" नितिस्मृ तिसिद्धत्वात् ॥ **तस्मादिति** ॥ "ब्रह्मादेवानांप्रथमस्संबभूवे" त्यादिनासर्वदेवोत्तमत्वेनोक्तचतुर्मुखसारत्वंविष्णावेवेत्यर्थः । यच्छब्दोपबंध रूपलिंगंचान्यथयति ॥ **यच्छब्देति** ॥ पुरुषे जीवे । आदित्ये देवतायांच । तत्रलोकप्रसिद्धस्यकस्यचिदभावेपिश्रुत्यादिसिद्धस्यहरेरेवग्र हणंतद्वदित्यर्थः । ननुतत्र "यआत्मनितिष्ठन्यआदित्येतिष्ठ" न्नित्यादौपुरुषादित्यांतस्थःप्रसिद्धःप्रकृतेकथमादित्यत्वेनहरिःप्रसिद्धइत्यतआह ॥

श्रौतप्रसिद्धेश्चबलवत्त्वात् पूर्ववाक्येच "महापुरुषइतियमवोचामसंवत्सरएवे" तिसंवत्सरेमहापुरुष पदप्रयोगाच्चसंवत्सरशब्दस्यचतुर्मुखपरत्वात् । तस्मादुत्तमत्वरूपस्यचतत्सारत्वस्यविष्णावेवसंभवात् यच्छब्दोपबंधस्य "सयश्चायंपुरुषे। यश्चासावादित्ये" इत्यादाविवश्रुत्यादिप्रसिद्धेब्रह्मण्यपिसंभवात् । ॥ ४२८ ॥

गु० यच्छब्दोपबंधोप्यादित्यश्रुतेर्नप्रसिद्धादित्यपरत्वसंपादनायांक्षमइत्याह ॥ **यच्छब्देति** ॥ तृतीयंलिंगंसावकाशयति ॥ **पुरुषंपुरुषमिति** ॥ प्रतिशब्दएवाभिमुख्य

SGDF Sri Gargeshwari Digital Foundation

प्र० आदित्यइति ॥ “आदित्योज्योतिरादित्यस्सहिष्णुर्गतिसत्तमः”इतिसहस्रनामसुविष्णौप्रयोगादित्यर्थः । नन्वनादौवेदेकथंसादिपौरुषेयग्रंथप्रसिद्ध्युपवंधइतिचेत्स्मृतिमूलश्रुतिप्रसिद्धौतात्पर्यात् । स्मृतेस्सादित्वेपितदर्थस्यानादित्वाच्च । उक्तंचविष्णुतत्वनिर्णये “पुराणानितदर्थानिसर्गेसर्गेन्यथैवतु । क्रियंतेऽतस्त्वनित्यानितदर्थाःपूर्वसर्गव”दिति । यदप्युक्तंसर्वपुरुषाभिमुख्यंसूर्यलिंगमितितन्नेत्याह ॥ **पुरुषंपुरुषमिति** ॥ सर्वपुरुषगतत्वंच “अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्स्थित”इत्यादिश्रुत्यालपौकस्त्वस्यचेत्यादिनावक्ष्यमाणरीत्याचयुज्यतइतिभावः । “प्रतिपूरुषमेतस्मात्स्थितोविष्णुर्नियामकः । आदित्यादिषुचस्थित्वाद्योतकोसौप्रतिप्रती”तितद्भाष्यंहृदिकृत्वाह ॥ **भावेवेति** ॥ आभिमुख्योक्तिभावेपितस्यत्वन्मतेप्यादित्यदेवतायाअतींद्रियत्वेनतत्रादर्शनात् मंडलस्याभिमुख्यदर्शनात्तद्द्वारातत्रत्यदेवतायामंगीकारेतन्निष्ठभगवतोपितद्द्वारास्यादेवेत्यर्थः । एवंलिंगानामपाकरणेतन्मूलकश्रुतिप्रसिद्धिरप्यपाकृतेतिनतत्रयतितव्यमितिभावः । नन्वस्त्वेवमाद्यकल्पेश्रुतैर्लिंगैरेवोज्जीवनात्ते

“आदित्योज्योतिरादित्य”इत्यादौचब्रह्मण्यप्यादित्यशब्दस्यप्रसिद्धेः । “पुरुषंपुरुषंप्रत्यादित्योभवती”त्यनेनचप्रतिगृहंकूपइत्यनेनेवसर्वपुरुषगतत्वस्यैवोक्तत्वेनतदाभिमुख्योक्त्यभावात् । भावेवाऽऽदित्यमंडलस्यैवपुरुषाभिमुख्यदर्शनात् अदर्शनेपिदेवतायास्तदंगीकारेचेश्वरेपितत्संभवात् ।

गु० वाचकइतिभावेनाह ॥ **भावेवेति** ॥ नन्वादित्यमंडलस्यपुरुषाभिमुखत्वात्तच्छरीरकस्यादित्यस्यपुरुषाभिमुख्यमुपपन्नमित्यतःतर्ह्यादित्यशरीरकस्यब्रह्मणएवपुरुषाभिमुख्यंसंभवतीतिनब्रह्मपक्षेतस्यबाधकतेत्याह ॥ **अदर्शनेपीति** ॥ यदुक्तंज्ञानकरणतयाप्रसिद्धचक्षुरादिसंबंधस्यनित्यज्ञानेंतर्यामिण्यसंभवेनतत्प्राचुर्यंसुतरांनसंभवतीति

SGDF
Sri Gargeshwari Digital Foundation

प्र० षामन्यथासिद्धौश्रुतेरप्यंतर्नयन्यायेनान्यथासिद्धिः । उत्तरकल्पद्वयेतुकथं स्वतएवतत्रश्रुतेर्निरवकाशतोक्तेरितिचेदित्थं । वक्ष्यमाणदिशाब्र ह्मश्रुत्यादेर्मुख्यतयाविष्णुसाधकत्वेनांतरधिकरणन्यायविषयतयाऽऽदित्यश्रुतेर्विष्णुपरत्वं । तत्रमुख्यत्वंवासेत्स्यतीति । ननुचैवंब्रह्मश्रुत्यादेरत्र मुख्यत्वेतद्बलादादित्यश्रुतिर्विष्णुपरा सिद्धेचतस्याविष्णुपरत्वेबाधकाभावेनब्रह्मशब्दादेर्मुख्यत्वमित्यन्योन्याश्रयः । नचार्भकौकस्त्वमेवबाधकं नश्रुतिरित्यस्तिविशेषः । श्रुतेरप्यस्मिन्पक्षेनिरवकाशत्वोक्तेरितिचेन्न । “आदित्योज्योतिरादित्य”इत्यादिप्रयोगादादित्यशब्दस्यविष्णावेवसाव काशत्वेनसावकाशत्वस्यब्रह्मशब्दमुख्यत्वानधीनत्वात् । एतेनतदावृत्तिर्बाधिकेत्यपिनिरस्तं । सावकाशत्वादेवेति । यद्वाब्रह्मश्रुत्यादेरुपसंहार

सौरमंत्रेच “सूर्यआत्माजगतस्तस्थुषश्चे”तिब्रह्मलिंगसद्भावात् । मंत्रस्थस्यच “चक्षु र्मित्रस्यवरुणस्याग्ने”रितिचक्षुश्शब्दस्य “चक्षुर्देवाना”मितिश्रुत्याब्रह्मण्येवसंभवात् ।

प्र० स्थत्वेनबलवत्तयाऽऽदित्यश्रुतेर्विष्णुपरत्वं । वक्ष्यतिचैतदुपक्रमस्थादित्यश्रुतेरित्यादि । एवमादित्यश्रुत्युज्जीवकलिंगानामन्यथासिद्धिमुक्त्वा इदानीं यदपिमंत्रेचक्षुष्ट्वलिंगात्सूर्यशब्दआदित्यप्रापकइत्युक्तं तदयुक्तं अंतरधिकरणन्यायविषयतयाऽत्रत्यसूर्यशब्दस्यविष्णुपरत्वादितिभावेन निरवकाशविष्णुलिंगंवदन्नन्यलिंगस्यान्यथासिद्धिमाह ॥ **सौरमंत्रेपीति** ॥ “आदानात्सर्ववस्तूनामत्तृत्वात्प्रलयेपिच । आत्मेत्युक्तस्सभ गवान्जगतःस्थावरस्यचे”त्युक्तदिशासर्वनियामकत्वरूपविष्णुलिंगादित्यर्थः । “चक्षुर्देवानामुतमर्त्याना”मितियजुश्शाखास्थश्रुत्येत्यर्थः । “सर्वनामाभिधेयश्चेत्यनेनैवादित्यशब्दस्येश्वरवाचित्वंचोक्तंभवती”तिटीका उपलक्षणमितिभावः । यदप्युक्तंचंद्रादावुक्त्वाऽऽदित्येनुक्तत्वमप्या

प्र० दित्यलिंगमितितत्त्वग्रेनिरसिष्यतइतिभावेनचक्षुश्शब्दस्यविष्णावुक्ततयातत्संगतत्वेनचक्षुर्मयत्वादिजीवप्रापकाण्यपिसावकाशयति ॥ **पूर्णेति** ॥ “पूर्णदर्शनशक्तित्वाच्चक्षुर्मयइतीरितः । तादृक्छ्रवणशक्तित्वात्तथाश्रोत्रमयस्स्मृत”इत्यैतरेयभाष्यदिशामयटःप्राचुर्यार्थत्वेनायमाद्योर्थः । “इंद्रियस्वामित्वेने”तिटीकोपलक्षणमितिभावः । द्वितीयस्त्वेतद्भाष्यदिशेतिव्यक्तं । स्मृत्येत्युक्त्याऽयमेवार्थस्स्मार्तत्वादत्रग्राह्योनतुप्रसिद्धक रणसंबंधइतिसूचितं । यदपिजीवपक्षे एतच्छब्दोऽथैषज्योतिरित्यादाविववक्ष्यमाणपरइति तत्राह ॥ **एतच्छब्दस्येति** ॥ अथैषज्योतिरित्या दौज्योतिष्टोमप्रकरणविच्छेदकस्याथशब्दस्यश्रवणात्तत्रतथात्वेपिप्रकृतेतथाप्रकरणभेदकंनकिंचिदस्तीत्यर्थः । ननूक्तमत्रबाध्वचिह्नितोपक्रमो पसंहाराभ्यांभिन्नवाक्यत्वंतस्यावगतमिति । तथाचकथंनप्रकरणविच्छेदइतिचेन्मैवं । “एतामनुविधंसंहितांसंधीयमानांमन्यइतिहस्माह बाध्व”इत्यनिरुद्धादिचतुर्मूर्त्यात्मकस्यविष्णोस्संहितादेवतात्वरूपावांतरप्रमेयेतात्पर्यख्यापनाय तदुपक्रमादेरुपपत्तेरविच्छेदकत्वात्पुनस्तस्यैव

पूर्णदर्शनशक्तित्वादिरूपस्यवाचक्षुरादिस्वामित्वरूपस्यवाचक्षुर्मयत्वादेः “सर्वेंद्रियमयो विष्णु”रित्यादिभाष्योक्तस्मृत्याविष्णौसंभवात् जीवेपिचक्षुरादिविकारत्वस्यासंभवात् एतच्छब्दस्यच “अथैषज्योति”रित्यादावथशब्दादेरिवात्रप्रकरणविच्छेदकस्याभावेन

गु० तत्पराचष्टे ॥ **पूर्णदर्शनेत्यादिना** ॥ ननुचक्षुर्मयत्वंनपूर्णदर्शनशक्तित्वादिरूपं । येनब्रह्मणोपितत्स्यात् । किंनामचक्षुर्विकारत्वमेव । तच्चनिर्विका रेब्रह्मण्यनुपपन्नमेवेत्यतः तर्हिजीवस्यापिनिर्विकारत्वेनचक्षुर्विकारत्वरूपचक्षुर्मयत्वासंभवात्कथंचक्षुर्मयत्वेनजीवप्राप्तिरित्याह ॥ **जीवेपीति** ॥ यदुक्तमथैष ज्योतिरित्यादेरिव एतंह्येवबह्वृचाइत्यादेरपिवक्ष्यमाणचक्षुर्मयजीवपरत्वमिति तदेतद्दृष्टांतदार्ष्टांतिकयोर्वैषम्येणपरिहरति ॥ **एतच्छब्दस्येति** ॥ ननुसर्वत्राप्यथशब्द

SGDF Sarvagyapeetham Digital Foundation

प्र० परामर्शेनगुणांतरविधिसंभवादितितात्पर्यात् ॥ **पूर्वोक्तेति** ॥ "सयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्या"दित्यशरीरप्रज्ञात्मनआदित्यनाम्नश्चैकत्वादिति । आदित्यपरत्वादित्यनुक्त्वाऽशरीरेत्युक्तिर्विष्णुपक्षेऽशरीरत्वयुक्तिसूचनार्था । एतेन "सयश्चायमशरीर" इत्यादिटीकाविवृता । उपक्रमादिवशेनभिन्नवाक्यत्वमुपेत्याप्याह ॥ **वक्ष्यमाणेति** ॥ प्रकृतपरत्वंतुटीकाद्युक्तसमर्थनार्थमितिभावः ॥ **अनिष्टेति** ॥ जीवलिंगानांसावकाशितत्वादितिभावः । यदप्युक्तमर्भकौकस्त्वाच्चनविष्णोरत्रोक्तसर्वगततेति तदपिनबाधकमितिभावेनाह ॥ **अल्पेति** ॥ सूचितेनन्यायेनेत्यन्वयः । तमेवन्यायंस्वयंसंगृह्याह ॥ **एकत्रेति** ॥ अर्भकौकस्त्वंनामाल्पदेशेऽवस्थितत्वं । नत्वल्पदेशएवावस्थानवत्त्वं । तच्चसर्वगतस्यविष्णोराकाशवदेवयुज्यते । अल्पदेशेऽविद्यमानस्यसर्वगतत्वायोगात् । "यत्रनास्तिपदन्यासःकस्तंविषयमाप्नुया"दितिन्यायादित्यर्थः ॥ **एकत्रैवेति** ॥ सूत्रेष्वेवेत्यश्रवणात् । तथाश्रवणेहितन्नोपपद्येत । नचैवमित्यर्थः । उक्तन्यायस्यभाष्यादावस्फु

पूर्वोक्ताशरीरप्रज्ञात्मपरत्वात् । वक्ष्यमाणस्यापिचाश्रुतत्वादिगुणैर्विष्णुत्वेनतत्परत्वेप्य निष्टाभावात् । अल्पौकस्त्वस्यचव्योमवदितिसौत्रपदसूचितेन । "एकत्राप्यनवस्थानेसर्वत्रावस्थितिःकथं । एकत्रैवतुसंस्थानंनैवात्रप्रतिपाद्यत"इतिन्यायेनसर्वगतेपिसंभवात् ।

गु० एवप्रकरणविच्छेदकइतिननियमः । तथासति एषतुवाअतिवदतीत्यत्रप्रकरणविच्छेदकस्याथशब्दस्याभावात्प्रकरणविच्छेदोनस्यात् । किंतर्ह्यथैषज्योतिरित्यादावथशब्दादेरिवेहप्रकरणेपि चत्वारःपुरुषाइतिबाध्वइतिबाध्वचिह्नितोपक्रमस्य इतिहस्माहबाध्वइतिबाध्वचिह्नितोपसंहारवाक्यैकवाक्यत्वमेवप्रकरणविच्छेदकमित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० टत्वादाह ॥ **अनुव्याख्यानइति** ॥ द्वितीयेवैशेषिकनये “महतोल्पत्वमपिहिव्योमवत्प्राहवेदवित् । यद्यल्पदेशसंस्थानंनसर्वत्रापिनोभवेत् । स्थितस्यही”त्यादिनाऽस्यन्यायस्यविवृतत्वादित्यर्थः । यथाखल्वेकैकंवर्णमुच्चारयतएवसर्ववेदोच्चारणं नत्वेकमप्यनुच्चारयतः तथाल्पदेशेषुस्थितस्यैवसर्वगतत्वंभवेदित्यर्थः । एतेनात्रटीकादावेतदविवृतौबीजमुद्भावितं । ननूक्तमत्रभूतपदोपादानात्तन्मात्रस्थत्वंसिध्यति । अन्यथातव्यर्थमिति तत्राह ॥ **श्रुताविति** ॥ **भूतपदस्यचेति** ॥ एतेननिचाय्यत्वादितिसूत्रांशटीकायामर्भकौकस्त्वपदेनभूतावस्थितत्वंग्राह्यं । नतुभूतमात्रावस्थितत्वमितिसूचितं । यदप्यादित्येऽनुक्तत्वमादित्यप्रापकमिति तत्प्राक्परिहर्तव्यमपिप्रसंगादत्रपरिहरति ॥ **सर्वेति** ॥ ननूक्तमत्रविशिष्यादित्येऽनुक्तत्वलिंगादितीतिचेन्न । “सर्वप्राणिषुचस्थितः । सर्वनामाभिधेयइतिस्मृत्याऽऽदित्यगतस्यैवादित्यनामवत्त्वोक्ते”रितिटीकोक्तरीत्यायश्चासावादित्यइत्यादिनालब्धत्वादितितात्पर्यात् । तत्रादित्यस्थत्वमस्पष्टमित्येवंसमाधानमुक्तं । एवमर्भकौकस्त्वादितिसूत्रेनिरवकाशत्वादिनाऽऽदित्यश्रुत्यादितोबलवत्त्वेनप्राधान्यादन्योपलक्षणत्वेनोपात्तस्यार्भकौकस्त्वस्यसमाधानेन तदुपलक्षितानांसंवत्सरसारत्वादीनांसौत्रपदोपात्तानांचादित्यादिप्रापकाणांस्वपक्षबाधकानांसमाधानस्यव्योमवन्निचाय्यत्वादितिसूत्रांशलब्धस्योक्तयातद्विवृतिपरटीकांव्या

अनुव्याख्यानेच “स्थितस्यह्यल्पदेशेषुसर्वगत्वंभवेद्ध्रुवं । एकत्राप्यनवस्थस्यकुतएवाखिलस्थते”त्युक्तत्वात् । श्रुतौभूतपदस्यचतत्रोपासनार्थत्वात्सर्वपदेनचादित्यस्यापिग्रहणसंभवेनादित्येऽनुक्तत्वाभावात् ।

गु० **वक्ष्यमाणस्यापीति** ॥ आदित्येऽनुक्तलिंगमप्यन्यथासिद्धमित्याह ॥ **सर्वपदेनेति** ॥ सर्वपदेनतद्ग्रहणेबाधिकायाआदित्यस्यसर्वगततायाअभावादित्यर्थः । सर्वेषुभूतेष्वित्यल्पौकस्त्वमुच्यते । भूतादन्यत्राभावप्रतीतेः । अन्यथाभूतपदवैयर्थ्यंस्यात् । तस्मात्स्वपदेनादित्यग्रहणमयुक्तमित्यतआह ॥ **भूतपदस्येति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ख्याय इदानीं "प्रसिद्धोपदेशात् विवक्षितगुणोपपत्तेश्च शब्दविशेषा"दित्यादिसूत्रोक्तश्रुतिलिंगादिरूपस्वपक्षसाधकसत्त्वादत्रोक्तस्सर्वगतो विष्णुरितिभावेनतत्तत्सूत्रटीकांविवृण्वंस्तेषांपूर्ववाद्युक्तममुख्यत्वंपरिहृत्यनिरवकाशत्वमाह ॥ **उक्तरीत्येति** ॥ एतेनस्वपक्षसाधकानियथा सूत्रविन्यासंप्रागुपन्यस्य स्वबाधकभूतानिपरसाधकानिपश्चान्निरस्यानि नतुवैपरीत्यमितिनिरस्तं । तेषांबाधकानांस्वपक्षसाधकानामन्यथा सिद्ध्यापादकत्वेनबाधकतयातन्निरासस्यैवप्रथममुपयुक्तत्वात् । सूत्रक्रमबीजंतुवक्ष्यामइतिभावः । अतएवांतेटीकायामेवमीश्वरपक्षेविरोधा भावाद्ब्रह्मशब्दस्यामुख्यार्थग्रहणमश्रुतत्वादीनांभाक्तत्वकल्पनमित्यादिनिरस्तंभवतीत्युक्तं **ब्रह्मशब्दस्येति** ॥ आद्यसूत्रोक्तस्यब्रह्मशब्दस्य द्वितीयोक्तस्याश्रुतत्वादिलिंगस्येत्यर्थः । अत्रापिपंचम्यंतप्रधानहेतूनांसर्वगतोविष्णुरेवेतिसाध्येनान्वयः । "ब्रह्मशब्दस्यश्रुत्यादौनारायणएवप्र सिद्धत्वा"दितिटीकांव्यनक्ति ॥ **भाष्योक्तेति** ॥ "तदेवब्रह्मपरमंकवीनां परमंयोमहद्ब्रह्मेत्यादि"ष्वित्यर्थः ॥ **प्रसिद्धेति** ॥ अन्यथाब्रह्म शब्दोपदेशादित्येवब्रूयादितिभावः । यद्यपिलोकतोजीवादावपिप्रसिद्धिः तथापिवैदिकप्रसिद्धियुक्तस्यैवोपादानमितिभावः । ननु "श्रुत्वाप्ये नंवेदनचैवकश्चि"दितिजीवस्याप्यश्रुतत्वाद्युपपत्तेश्चक्षुर्मयत्वादिवशेनब्रह्मशब्दोजीवेऽमुख्यःकिंनस्यादित्यतः"शब्दविशेषा"दितिसूत्रभाष्यटीका

उक्तरीत्याचबाधकाभावेनब्रह्मशब्दस्याश्रुतत्वादेश्चामुख्यत्वायोगात् । भाष्योक्तश्रुत्यादिषुचब्रह्म शब्दस्यविष्णावेवप्रसिद्धत्वात् प्रसिद्धसंभवेचाप्रसिद्धग्रहणायोगस्यचसौत्रप्रसिद्धपदेनसूचनात् । ॥ ४३१ ॥

गु० एवंपरपक्षेसाधकानिनिराकृत्यपरपक्षेबाधकत्वेनोक्तस्यब्रह्मश्रुत्यादेःपरशंकितसावकाशत्वमपाकरोति ॥ **उक्तरीत्येत्यादिना** ॥ यदुक्तमेतमेवेत्यवधारणेनविष्णो

प्र० भिप्रायंव्यनक्ति ॥ **ब्रह्मशब्दस्येति** ॥ "सावधारणब्रह्मशब्दवाच्यत्वेमुख्यब्रह्मत्वंस्यात् । नचतज्जीवस्योपपद्यत"इतिटीकोक्तमुपपादयति ॥ **जीवरूपेति** ॥ जीवरूपामुख्यार्थत्वे एतमेवेत्यवधारणमन्यस्यमुख्यवृत्त्याब्रह्मशब्दार्थत्वंवाऽमुख्यवृत्त्यातदर्थत्वंवाव्यवच्छिंद्यात् । नद्वय मपियुक्तं । तथाभूतस्यब्रह्मादेस्सत्त्वादित्यर्थः । स्वपक्षेऽवधारणंयुक्तमित्याह ॥ **ईश्वरेति** ॥ **भाष्योक्तेति** ॥ "एषउएवब्रह्मे"त्यादावि त्यर्थः ॥ **प्रसिद्धेश्चेति** ॥ वृद्धप्रसिद्धेरित्यर्थः । पूर्वश्रौतप्रसिद्धिरुक्तेतिभेदज्ञापनाय इत्यनेनोक्तेत्युक्तं । श्रुतेर्निरवकाशत्वमुक्त्वालिंगस्यत दाह ॥ **अश्रुतत्वादेरिति** ॥ विवक्षितेतिसौत्रपदतात्पर्योक्तिः ॥ **उपसंहारस्थत्वेनेति** ॥ "तेषांचविष्णोरेवयोग्यत्वेने"तिटीकोक्तिरुप

ब्रह्मशब्दस्यजीवरूपामुख्यार्थत्वेचजीवादन्यस्यमुख्यब्रह्मणोविष्णोरमुख्यब्रह्मणश्चजात्यादेःसत्त्वेनान्यसं बंधनिराकरणासंभवेनावधारणायोगात् । ईश्वररूपमुख्यार्थत्वेचान्यस्यमुख्यब्रह्मणोसत्त्वेनान्यसंबंधनि राकरणसंभवात् । भाष्योक्तश्रुत्यादौचसावधारणब्रह्मशब्दस्यविष्णावेवप्रयोगदर्शनेनेहापितेनतस्यैवप्रत्य भिज्ञानात् "ब्रह्मेत्याचक्षत"इत्यनेनोक्तप्रसिद्धेश्चब्रह्मशब्दार्थत्वेनाप्रसिद्धजीवपरत्वेनुपपत्तेः अश्रुतत्वा देश्चोपसंहारस्थत्वेनबलवत्त्वात्तदनुसारेणोपक्रमस्थादित्यश्रुतेरर्भकौकस्त्वादिलिंगानांचनेतव्यत्वात् ।

गु० रन्यस्यैवसर्वगतत्वाद्विष्णोर्मूर्तादन्यत्रसत्त्वेपिसर्वगतत्वयोगइत्यादि तदपिनिराह ॥ **ब्रह्मशब्दस्येति** ॥ एवंप्रथमसूत्रोक्तहेतुमुक्त्वाशब्दविशेषादित्यनेनसूचितांयु क्तिमाह ॥ **भाष्योक्तेति** ॥ एषउएवेत्यादिश्रुत्यादौयद्यपिप्रथमसूत्रोक्तयुक्त्यनंतरंद्वितीयसूत्रोक्तयुक्तिरेवसंगता । तथापिशब्दविशेषादित्यस्यप्रथमसूत्रोक्तब्रह्म शब्दोपदेशरूपयुक्त्युपोद्बलकत्वमेव । नतुस्वतंत्रयुक्तित्वमितितदानंतर्यं । वक्ष्यतेचैतत् । द्वितीयसूत्रोक्तंहेतुमाह ॥ **अश्रुतत्वादेश्चेति** ॥ तृतीयसूत्रोक्तंहेतु

SGDF ... Foundation

प्र० लक्षणमितिभावः । एवंपरमतेसाधकानिनिरस्यस्वपक्षसाधकानिचोक्त्वा ''अनुपपत्तेस्तुनशारीर''इतिसूत्रोक्तपरपक्षबाधकोक्तिपरटीकां विवृण्वन्परपक्षेबाधकमाह ॥ अणोश्चेति ॥ मिलितसर्वजीवानांसर्वगतत्वपक्षस्य ''स्वस्वदेहस्थितिमात्रस्यसर्वेषांसिद्धत्वा''दितिटीकायामेव स्पष्टत्वादित्येकस्यसर्वगतत्वपक्षदूषणस्यविस्तृतिरियं । टीकायां ''सुखदुःखप्राप्त्यैकस्यसर्वगतत्वानुपपत्ते''रित्युपलक्षणमितिभावः । अणुत्वं ''उत्क्रांतिगत्यागतीना''मित्यत्रसाधयिष्यतइतिभावः । नन्वासनोविभुत्वमेवोपेयते । गत्यादेरुपाधिवशेनोपपत्तेरितिभावेनाह ॥ योगेवेति ॥ अयमर्थः । सर्वजीवानांप्रत्येकंसर्वगतत्वेसर्वशरीरगतसुखदुःखादिभोगस्स्यात् । नचयथास्वर्गाच्युतस्यस्थूलदेहप्राप्त्यैमातृयोनिंप्राप्तुमागच्छ

अणोश्चजीवस्यसर्वगतत्वायोगात् । योगेवानादितःसर्वजीवानांसर्वशरीरसंबंधेशरीरकर्मा
दिव्यवस्थायोगेनाभिमानस्यापिप्रसंगेनसर्वेषांसर्वशरीरगतदुःखादिभोगप्रसंगात्। व्रीह्यादि
शरीरगतजीवांतरस्यतत्तदिंद्रियाभिमानिनांचतदीयसर्वशरीरसंबंधाभावेनभोगाप्रसंगात् ।

प्र० तोमध्येऽन्यकर्मनिर्मितजीवांतराधिष्ठितदेहंप्राप्तस्य यथावातत्तदिंद्रियाभिमानिनांतत्तज्जीवशरीरगतानांतत्तच्छरीरगतसुखादिभोगाभावः तथेहापियदीयकर्मनिर्मितोयोदेहस्सएवतस्यसुखादिभोगापादकोनान्यस्यतद्गतस्यापीतिवाच्यं । अनादितस्सर्वेषांसर्वशरीरगतत्वेकर्मण्यवस्थायो गात् । नचयस्ययस्मिन्देहेऽभिमानस्तस्मिन्देहेकृतंकर्मतदीयमितिवा कर्मनिर्मितत्वाविशेषेपियस्ययत्राभिमानस्तस्यतद्गतसुखादिभोगएवनान्य गततद्भोगइतिवायुक्तं । अनादिकालंसर्वदेहसंबंधेसर्वत्रतस्याप्यवर्जनीयत्वादिति । कथंतर्हिव्रीह्यादिगतजीवादौगतिरित्यतआह॥व्रीह्यादीति॥ इंद्रियाभिमानिनांप्रतिकल्पंभिन्नत्वादितिभावः । एतेन ''सर्वशरीरगतसुखदुःखादिप्राप्त्ये''तिटीका ''ब्रह्मादिसर्वशरीरस्थत्वानुपपत्ते''रिति

SGDF Sri Gangeshwari Digital Foundation

प्र०टीकाचविवृता । नन्वीश्वरस्यानादित:सर्वदेहसंबंधादुक्तदोषसाम्यमित्यत:''संभोगप्राप्तिरितिचेन्नवैशेष्या''दितिसूत्राभिमतं ''सामर्थ्यवैशेष्या''दितिटीकाद्युक्तंसमाधिमाह ॥ **ईश्वरस्यत्विति** ॥ परपक्षे ''कर्मकर्तृव्यपदेशा''दितिसूत्रोक्तंबाधकांतरंतदुपात्तवाक्योक्तिपूर्वमाह ॥ **आत्मानमिति** ॥ ''मामहंजानामि स्वाध्यायोध्येतव्य''इत्यादावेकस्यैवद्वयंदृष्टमित्यतआह ॥ **कर्मकर्त्रोश्चेति** ॥ विवृतंचैतत् ''कर्मकर्त्रोरुत्सर्गतोभिदे''त्यनुव्याख्यानसुधायां ॥ **प्रकृतइति** ॥ तत्रैक्यग्राहकप्रमाणमपवादकमिहचचक्षुर्मयादिजीवलिंगस्यविष्णावनवकाशितत्वादितिभाव: । एतेन ''अत्रोक्तसर्वगतस्यात्मानमितिकर्मत्वेने''त्यादिटीकाविवृता। ''स्मृतेश्चे''तिसूत्रोक्तंस्वपक्षेसाधकांतरमाह॥**अहमात्मेति**॥ नचस्मृतेरपिस्ववचनत्वेनविप्रतिपन्नंप्रतिसूत्रकार:कथंतामुपादत्तइतिवाच्यं । ''तस्या:परोक्तानुवादरूपत्वा''दितिटीकायामेवोक्तेरितिभाव: ।

ईश्वरस्यतुस्वाभाविकशक्तिविशेषेणतदप्रसंगात् ''आत्मानंवेदआत्मानंपरस्मैशंसति यस्तित्याजसचिविदंसखाय''मितिचसर्वगतस्यात्मनोवेदनशंसनत्यागेषुकर्मत्वेनजीवस्यतुकर्तृत्वेननिर्देशात् । कर्मकर्त्रोश्चोत्सर्गतोभिन्नत्वात् । ''मामहंजानामि तदात्मानमेवावेदहंब्रह्मास्मी''त्यादाविवचप्रकृतेऽपवादकाभावात् ''अहमात्मागुडाकेशसर्वभूताशयस्थित''इतिस्मृतिसमाख्यानाच्चात्रोक्त:सर्वगतोविष्णुरेवेति । तदेतदभिप्रेत्योक्तंन्यायविवरणे ''तथापिनिरवकाशाएतमेवेत्यवधारणादय''इति ॥

गु०माह ॥ **अणोरिति** ॥ तुष्यतुदुर्जनइतिन्यायेनाह ॥ **योगेवेति** ॥ सामर्थ्यविशेषादित्यनेनोक्तंहेतुमाह ॥ **ईश्वरस्येति** ॥ कर्मकर्तृव्यपदेशाच्चेत्यनेनोक्तंबाधकमाह ॥ **आत्मानंवेदेत्यादि** ॥ अत्रप्राणोवंशइतिस्थविर:शाकल्य: अथकौठरव्यस्त्रीणीत्यादिखंडद्वयस्थमात्मानंवेदेतिवाक्यं तथाऽऽत्मानंपरस्मैशंसतीति चत्वार:पुरुषाइत्येतत्खंडस्थं तथायस्तित्याजेति दुग्धदोहाइत्येतत्खंडस्थंवाक्यमुदाहरता इदंसर्वमेकप्रकरणमितिसूचितंभवति । स्मृतेश्चेतिसूत्रोक्तंहेतुमाह ॥ अहमात्मे

SGDF
Sri Gargeshwari Digital Foundation

प्र०तथापि पूर्वपक्षप्रापकश्रुतिलिंगभावेपि। अवधारणादयः अवधारणसहितब्रह्मशब्दादयइत्यर्थः । एतेनभाष्याद्युक्तंन्यायविवरणोक्तंचैकार्थ मितिदर्शितं । "तत्रतत्रस्थितोविष्णुस्तत्तच्छक्तिप्रबोधकः । दूरतोप्यतिशक्तस्सलीलयाकेवलंप्रभु"रित्यनुव्याख्यानेऽन्यथाव्याख्यानंप्रतीयते । तत्सुधायामस्फुटत्वात्सूत्रारूढतयाव्यनक्ति ॥ **अनुव्याख्यानेत्विति** ॥ **सर्वसंयोगित्वेति** ॥ एतेन "अथवानसर्वगतत्वंहरेरुपपादनीयं । तस्यानंदादिवत्स्रष्टृत्वादिवद्वागुणत्वाभावा"दितिसुधानुवादःकृतः । "तत्किंदूरेस्थितःशक्तिप्रबोधनेनशक्तः । येनतत्रतत्रतिष्ठतीतिसुधास्थाशं काभागानुवादः **तच्चायुक्तमित्यादि** । "यद्यपिसप्रभुर्विष्णुर्दूरतोतिशक्त"इत्यादिसुधार्थानुवादः **तत्रतत्रेति** । पूर्वसिद्धांतोक्तरीत्यासूत्रा णामन्यथाविन्यासप्रतीतेर्यथाक्रमेबीजमाह ॥ **आद्यइति** ॥ "सर्वत्रप्रसिद्धोपदेशा"दित्यत्र "एतमेवब्रह्मेत्याचक्षत"इतिविषयवाक्यगत

अनुव्याख्यानेतु सर्वसंयोगित्वादिमात्रंनात्रप्रतिपाद्यं । तस्यानंदादिवद्गुणत्वाभावात् । किंतुतत्तच्छक्तिप्रबो धनार्थंतत्रतत्रावस्थानं । तच्चायुक्तं । ईश्वरस्यदूरस्थत्वेपितत्रशक्तत्वादितिप्राप्ते तत्रतत्रावस्थानंनदूरस्थस्या शक्त्या । किंतुलीलयेतिसिद्धांतइत्युक्तं । तत् "विवक्षितगुणोपपत्ते"रितिसूत्रस्य विवक्षितः दूरेशक्त स्यापितत्तच्छक्तिबोधनार्थंतत्रतत्रावस्थानरूपोयोगुणस्तस्यलीलयोपपत्तेरितिवर्णकांतरमभिप्रेत्य ॥ सूत्रक्र मस्तुआद्येसूत्रेविषयवाक्यस्थश्रुतिरूपस्वपक्षसाधकोक्तिः । द्वितीयेतदुत्तरवाक्यस्थलिंगरूपसाधकोक्तिः ।

गु०ति ॥ नन्वनुव्याख्यानेप्रकारांतरेणपूर्वपक्षसिद्धांतावुक्तौतदयुक्तं । उत्सूत्रितत्वादित्यतस्तत्सूत्रारूढंकर्तुमाह ॥ **अनुव्याख्यानेत्विति** ॥ **सूचयितुंचशारी**

प्र०हेतूक्तिपरत्वाच्छ्रुतिरूपहेतूक्तिपरत्वाच्चद्वेधातस्यप्राथम्यं । "विवक्षितगुणोपपत्तेश्चे"त्यत्र "सयोतोश्रुतोगतोमतोनादिष्टइत्युत्तरवाक्यस्थत्वा ल्लिंगत्वाच्च तदुक्तिपरत्वेनतदानंतर्यं । तत्रविवक्षितपदस्यटीकोक्तार्थसमर्थनपूर्वपरोक्तंकैश्चिदुक्तंचाविरुद्धमर्थद्वयंस्वयमाह ॥ **तत्रचेति** ॥ "येतुश्रुतीनांब्रह्मगुणेषुतात्पर्याभावंवदंतितन्निरासायविवक्षितपदमुपबबंधे"त्यादितत्वप्रदीपवाक्यंहृदिकृत्वाह ॥ **ततश्चेति** ॥ श्रुतिलिंगरू

तत्रचविवक्षितत्वंटीकोक्तरीत्यावक्तुंयोग्यत्वं । वक्तुंयोग्येहिविवक्षाभवति । यद्वा विवक्षितत्वंवक्ष्यमाणत्वं । वक्ष्यमाणेहि विवक्षाभवति। ततश्चाश्रुतत्वादीनामुपसंहारस्थत्वाद्बलवत्तेत्यर्थः । अथवाऽपौरुषेयेवेदेवक्तुमिच्छायाअभावाद्विवक्षित त्वंतात्पर्यविषयत्वं । ततश्चाश्रुतत्वादीनामप्राप्तत्वादिनाश्रुतेस्तत्रतात्पर्यान्नमिथ्यात्वमित्यर्थः । तृतीयेसाध्यस्यसर्वगतत्व स्याणौजीवेस्वरूपेणैवासंभवरूपपरपक्षबाधकोक्तिः । "सयश्चायमशरीर"इतिश्रुतिश्रुतस्याशरीरत्वस्यजीवेनुपपत्तिंसू चयितुंचशारीरपदं । चतुर्थेजीवेसर्वगतत्वस्यस्वरूपेणसंभवेपिवाक्यशेषस्थकर्मकर्तृभावविरोधइत्येवंरूपबाधकोक्तिः । अतएवतृतीयसूत्रस्थानुपपत्तिशब्दस्यप्रकृतेनसर्वगतत्वेनैवान्वयात्कर्मकर्तृभावानुपपत्तिर्नतदर्थइतिचतुर्थसूत्रसार्थक्यं ।

प्र०पस्वपक्षसाधकोक्त्यनंतरंपरपक्षेबाधकोक्तेरवसरप्राप्तत्वाद्द्वाभ्यांतदुक्तिः । तत्र "अनुपपत्तेस्तुनशारीर"इतितृतीयेंतरंगबाधकोक्तिः । चतुर्थे "कर्मकर्तृव्यपदेशाच्चे"त्यत्रबहिरंगबाधकोक्तिरितितदानंतर्यं । नन्वनुपपत्तेरित्यत्रप्रतियोगिविशेषाभावात्कर्मकर्तृभावानुपपत्तेरपितत्रैवविव क्षितुंशक्यत्वाद्व्यर्थमित्यतआह ॥ **अतएवेति** ॥ वाक्यशेषस्थबहिरंगबाधकोक्तिपरत्वादेवेत्यर्थः ॥ **प्रकृतेनेति** ॥ एतस्याप्रकृतत्वेनान्वया

SGDF Sri Gargeshwari Digital Foundation

प्र०योगादित्यर्थः । तर्ह्यश्रुतत्वादीनामेवप्रतियोगितयान्वयोस्तु । ततोपिसन्निहितत्वादित्याशंक्यनिराह ॥ यद्यपीति ॥ "शब्दविशेषा"दित्य स्याद्यानंतर्यमाशंक्याह ॥ पंचमइति ॥ जीवेपीति ॥ अमुख्यवृत्त्येत्यर्थः ॥ एतदर्थस्यापीति ॥ अतएवटीकायांकर्मकर्तृसूत्रमप्येत

यद्यपिविवक्षितगुणाअव्यवधानेनप्रकृताः तथापिब्रह्मणितेषामुपपत्तिंवदताद्वितीयसूत्रेणै वजीवेर्थादनुपपत्तेरप्युक्तत्वात्तृतीयंसूत्रंनतत्परं । पंचमेयद्यपिप्रथमसूत्रोक्तब्रह्मशब्दस्यजी वेप्युपपत्तिशंकानिरस्यतइतितस्यद्वितीयत्वंयुक्तं । तथाप्युत्सर्गतोभेदसाधकस्यकर्मकर्तृभा वस्योपोद्बलकादेतमेवेत्यवधारणान्नापवादशंकेत्येतदर्थस्याप्युक्तेःपंचमता । स्वतंत्रहेत्वंत रानुक्तेश्चनतत्रचशब्दः । षष्ठे पंचमेनश्रौतस्वपक्षसाधकेसमाप्तेऽनंतरंस्मार्तस्यतत्साधकस्यो क्तिः । सप्तमे तर्हिस्मृतिसमाख्ययासर्वगतत्वस्याल्पौकस्त्वरूपत्वादणौजीवेसर्वगतत्वस्येवस र्वगतेब्रह्मण्यल्पौकस्त्वस्यापिस्वरूपेणैवासंभवइत्येवंरूपस्यस्वपक्षबाधकस्योद्धारः । अत्रच व्योमवदित्यनेनविरोधपरिहारः । निचाय्यत्वादेवमित्यनेनचाल्पौकस्त्वोक्तेःप्रयोजनोक्तिः ।

प्र०त्सूत्रावतारिकायामाक्षिप्तमितिभावः ॥ स्वतंत्रेति ॥ ब्रह्मशब्दस्यान्यथासिद्धिनिरासार्थत्वात् "स्वाप्यया"दित्यादाविवेतिभावः । षष्ठे "स्मृतेश्चे"त्यत्र । सप्तमे "अर्भकौकस्त्वा"दित्यत्र ॥ इत्यनेनविरोधपरिहारइति ॥ सप्रकारःप्रागुक्तइतिभावः । एतेन "किमपरिच्छि

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्नादिरूपस्ये”त्यादिटीकासूत्रांशविवरणपरेतिदर्शितं । व्यावर्त्यशंकापूर्वंनिचाय्यपदकृत्यमाह ॥ यद्यपीति ॥ चायृदर्शनइतीति ॥ दर्श नस्यार्थाव्यभिचारादितिभावः । अष्टमे “संभोगप्राप्तिरितिचेन्नवैशेष्या”दित्यत्रसामर्थ्यवैशेष्येणतदुद्धारइत्यर्थः । अत्रप्रत्यधिकरणंटीकायां यद्यपिनोपासात्रैविध्यादित्यत्रैवाल्पौकस्त्वोक्तेरपिप्रयोजनमुक्तं । तथाप्युपासनार्थमंतस्स्थत्वाद्युक्तौतच्छ्रुतिरप्रमाणंस्यात् । उ पासनायामानसक्रियात्वेनार्थाभावेपिसंभवात् । नहिसप्रयोजनत्वंप्रामाण्यं । मणिप्रभायांमणिभ्रमस्यतत्प्रसंगात् । तृणादिज्ञा नस्यतदभावप्रसंगाच्चेतिशंकायामुपासनायाज्ञानात्मकत्वादर्थाभावोसिद्धइतिपरिहर्तुं “चायृदर्शन”इत्यस्माद्धातोर्निष्पन्नस्य निचाय्यशब्दस्यप्रयोगः । अष्टमे सर्वगतस्यापिब्रह्मणोव्योमवद्भूताश्रयत्वरूपाल्पौकस्त्वसंभवेपि तद्वदचेतनत्वाभावाज्जीवव द्भोगप्रसंगइत्येवंरूपस्यस्वपक्षबाधकस्योद्धारइति ॥ अत्र “एतद्भावाभिधंलिंगंक्रियालिंगेततःपरं । अंतर्याम्यंतरश्चेतिक्रिया भावाख्यमुच्यते । अदृश्यत्वाद्यभावाख्यंश्रुतिर्लिंगाधिकापरा”इत्यनुव्याख्यानेसर्वत्रेत्यत्रसर्वत्रावस्थितिरूपंभावाख्यंलिंगंप्र तिपाद्यं । अत्तेत्यत्रसंहाररूपक्रियात्मकंलिंगं । गुहामित्यत्रापिकर्मफलभोगरूपक्रियात्मकंलिंगं । अंतरइत्यत्रांतस्स्थितिरूपभा वसहितंरमणरूपक्रियात्मकंलिंगं। अंतर्यामीत्यत्रापितत्सहितंनियमनरूपक्रियात्मकंलिंगं। अदृश्यत्वादीत्यत्राभावात्मकंलिंगं। वैश्वानरइत्यत्रपाचकत्वाद्यनेकलिंगसहितंवैश्वानरनामेत्यापादपरिसमाप्त्यधिकरणोपाधयोदर्शिताः । तन्नकेवलंसुधोक्तरीत्या तत्तदधिकरणप्रतिपाद्यगुणासांकर्यार्थं । किंतुसंगत्यर्थंच । तथाहि । विद्यमानस्यैवक्रियान्वयात्क्रियातोभावस्यप्राथम्यं ।

प्र० पूर्वत्रेवविषयोपाध्यनुक्तेस्तत्प्रदर्शनार्थमधिकरणानांबद्धक्रमत्वमनुव्याख्यानारूढतयाप्रदर्शनार्थंच “सूत्रेभाष्येऽनुभाष्येचे”तिस्वप्रतिज्ञाम नुरुंधंस्तदनूद्यव्याचष्टे ॥ अत्रेति ॥ तत्सहितं भावसहितं ॥ नकेवलमिति ॥ “ग्रंथोयमपिबह्वर्थ”इत्युक्तेरितिभावः । स्थितिरूपभावस्यप्रा

SGDF
Sri Gargeshwari Digital Foundation

प्र०थम्यंव्यनक्ति ॥ **नहीति** ॥ अवांतरक्रमेभाष्यादिसूचितौहेतूआह ॥ **तत्रापीति** ॥ अधिकरणद्वयेपीत्यर्थः ॥ **सामान्यरूपत्वादिति** ॥ सामान्योक्त्यनंतरमेवविशेषजिज्ञासाभविष्यतीतिभावः । अत्रेत्यस्यपूर्वानंतर्ये "संहर्तृत्वापरपर्यायवाच्यमत्तृत्व"मित्यादिटीकासूचितंहेतुद्वय माह ॥ **स्थितीति** ॥ **संहारस्येति** ॥ अत्तृत्वस्यसंहाररूपत्वेनवक्ष्यमाणत्वादितिभावः ॥ **प्रातिपदिकेति** ॥ सर्वत्रेतिनये आदित्यप्राति पदिकश्रुतिसाहित्येनसर्वगतत्वस्यान्यत्रप्रसिद्धिवदिति श्रुतिसाहित्येनात्तृत्वस्यान्यत्रप्रसिद्धिरुच्यते । गुहांप्रविष्टावित्यत्रतुनैवमितिपौर्वापर्यमि त्यर्थः ॥ **तन्निरूप्येति** ॥ प्रागुक्तभावक्रियारूपोभयनिरूप्येत्यर्थः । टीकासूचितंहेतुमाह ॥ **अंतरत्वस्येति** ॥ अग्निश्रुतीत्यर्थः ॥ **लिंगेति** ॥ पृथिव्यादिशरीरत्वलिंगेत्यर्थः । "रमणंनातियत्नस्यविक्षेपादेवयुज्यते । इतिचेत्सर्वनियमोयस्यकस्मान्नशक्यते । स्वासनाऽनियतंवस्तुप्रतीपं

नहिक्रियासामान्यस्यस्थितिसामान्यापेक्षत्वमिवस्थितिसामान्यस्यक्रियासामान्यापेक्षत्वमस्ति । तत्रापिकर्मफलभोगव दत्तृत्वरूपसंहर्तृत्वस्यब्रह्मण्यसंभावितत्वाभावात् तथाकर्मफलात्तृत्वरूपविशेषंप्रतिसामान्यरूपत्वात् तथास्थित्यनंतरं संहारस्यधीस्थत्वात् प्रातिपदिकश्रुतिसाहित्येनान्यत्रप्रसिद्धतयासर्वगतत्वसाधर्म्याच्चसर्वगतत्वानंतर्यमत्तृत्वस्य । तदा नंतर्यंकर्मफलभोक्तृत्वस्य । एकैकरूपलिंगोक्त्यनंतरमेवतन्निरूप्यविशिष्टरूपलिंगोक्तिर्युक्तेतिभोक्तृत्वानंतरमंतराद्य धिकरणद्वयं । तत्राप्यंतरत्वस्यश्रुतिसाहित्येनान्यत्रप्रसिद्धतयालिंगसाहित्येनान्यत्रप्रसिद्धांतर्यामित्वाज्ज्यायस्त्वात्

गु०रपदमिति ॥ नकेवलंजीवत्वरूपधर्मनिर्देशार्थमितिचार्थः । तत्सहितं अंतस्स्थितिरूपभावसहितं ॥ **प्रातिपदिकश्रुतिसाहित्येनेति** ॥ आदिशब्दप्रातिपदि

प्र०ह्यासनोभवे"दित्यनुव्याख्यानोक्तमेवावांतरक्रमेहेत्वंतरमाह ॥ **तथादित्यादीति** ॥ **उभयात्मकत्वादिति** ॥ साक्षादसाक्षात्त्वभेदेनेति भावः । नन्वेतास्संगतयोनस्पष्टश्रुतिसंगत्याक्षेपिकाअतस्तदाक्षेपिकान्यान्यैववाच्येत्यतआह ॥ **अन्यापीति** ॥ एवमनुव्याख्यानस्यानंतर्य संगतिपरत्वंव्याख्यायपेटिकासंगतिपरत्वंचाह ॥ **एवंचेति** ॥ यद्वांतिमंविनाषडधिकरणीसाक्षाल्लिंगसमन्वयपरत्वेनैकापेटिका । तत्राप्या

तथा आदित्यादिनियामकत्वेनावस्थानविशिष्टरमणरूपमंतरत्वमयुक्तं । बहुव्यापारवतस्तद्धेतुकविक्षेपेणदुःखप्र संगादित्यंतरत्वआक्षिप्ते यद्यदनधीनसत्ताप्रवृत्तिप्रतीतिकंतन्नियमनेतस्यदुःखादि । ईश्वरस्तुसत्तादिप्रदइति सत्तादिप्रदत्वरूपांतर्यामित्वप्रतिपादनादंतरइत्येतदानंतर्यमंतर्यामीत्यस्य । एवंभावरूपलिंगसमन्वयेसमाप्ते तन्निरूप्याभावरूपत्वाददृश्यत्वादेस्तदानंतर्यं । एवंकेवललिंगसमन्वयेसमाप्तेलिंगाधिकनामसमन्वयस्योभया त्मकत्वादंत्यता । अन्यापिसंगतिस्तत्तदधिकरणेवक्ष्यते । एवंचादृश्यत्वाधिकरणात्प्राचीनानिपंचाधिकरणा निभावलिंगविषयतयैकामहापेटिका । तत्राप्याद्यंविनाचत्वारिक्रियाविषयत्वेन तत्राप्याद्यद्वयंक्रियामात्रवि षयत्वेन । उत्तरद्वयंतुभावसहितक्रियाविषयत्वेन । पादांत्योपांत्येतुबहुविषयत्वेनैकावांतरपेटिकेत्याद्यूह्यं ॥

प्र०द्यचतुष्टयंश्रुतिसाहित्येनान्यत्रप्रसिद्धलिंगसमन्वयपरत्वादवांतरपेटिका । गुहामित्यत्रापिप्रत्ययश्रुतिसाहित्येनान्यत्रप्रसिद्धेर्वक्ष्यमाणत्वात् । षष्ठस्यतथात्वेप्यभावविषयत्वात्तस्यपृथक्त्वं । पंचमस्यतुलिंगसाहित्येनान्यत्रप्रसिद्धसमन्वयपरत्वात्तदेकमवांतरंसप्तमं त्वर्थाल्लिंगसमन्वय परत्वात्तदेकंपृथगितिज्ञेयमितिभावेनाह ॥ **इत्याद्यूह्यमिति** ॥ यद्वा "सर्वगोत्तानियंताचे"त्यणुभाष्यदिशाऽत्तृत्वरूपलिंगसमन्वयपरत्वाद

SGDF
Sri Gangadhar Digital Foundation

प्र० त्ताधिकरणंचैकापेटिका। नियमनरूपैकलिंगसमन्वयपरत्वादंतराद्यधिकरणद्वयमेकापेटिकेतिध्येयमित्याह ॥ इत्याद्यूह्यमिति ॥ यद्वानकेव लंसंगत्यादिपरमनुव्याख्यानं । किंतुएतान्येवात्रसमन्वीयंते । नतुपरोक्तानि । सन्नैवचाधिकरणानि । नरामानुजमतरीत्याषडेवेत्यादिपरमत खंडनपरंचध्येयमितिभावेनाह ॥ इत्यादीति ॥ खंडनप्रकारश्चाग्रेव्यक्तइति ॥ अन्येत्विति ॥ "सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीत । अथखलुक्रतुमयःपुरुषोयथाक्रतुरस्मिँल्लोकेपुरुषोभवति तथेतःप्रेत्यभवति । सक्रतुंकुर्वीत मनोमयःप्राणशरीरोभारूपस्सत्यकामस्सत्यसंक ल्पआकाशआत्मासर्वकर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोऽवाक्यनादरः । एषमआत्मांतर्हृदयेऽणीयान्व्रीहेर्वायवाद्वासर्षपाद्वाश्या माकाद्वाश्यामाकतंडुलाद्वा एषमआत्मांतर्हृदयेज्यायान्पृथिव्याः । एतद्ब्रह्मैतमितःप्रेत्याभिसंभवितास्मी"तिछांदोग्येतृतीयेश्रूयते । तत्र "सक्रतुं

अन्येतु "सक्रतुंकुर्वीतमनोमयःप्राणशरीरोभारूपःसत्यसंकल्प"इतिवाक्येमनोमयत्वादिनोपास्योजीवः ।

प्र० कुर्वीते"तिक्रतुशब्दितसंकल्पध्यानापरपर्यायोपासनाविधौमनोमयत्वादिधर्मैर्जीवउपास्यत्वेनोपदिश्यतेऽथब्रह्मेतिसंशये मनोमयइत्यादिवा क्योक्तोमनोमयत्वादिविशिष्टोजीवएव। कार्यकारणसंघातात्मनोजीवस्यैवमनआदिसंबंधस्यप्रसिद्धत्वात् । ब्रह्मणस्तु "अप्राणोह्यमना"इत्यादिना तद्राहित्यात् । "सर्वंखल्विदंब्रह्मे"तिवाक्यंब्रह्मबोधकमपिक्रतुंकुर्वीतेत्युक्तोपासनायांनकर्मतयाब्रह्मार्पकं । तस्यक्रतुंकुर्वीतेतिवाक्यविहितोपास नानुवादेनशांतत्वरूपगुणविधिहेतुसमर्पकत्वात् । इदंसर्वंजगत् तज्जत्वात्तल्लत्वात्तदनत्वाद्ब्रह्मात्मकमेवयस्मात्तस्माद्रागद्वेषौहित्वाशांतस्सन्नुपासी तेत्येवंपरत्वात् । क्रतुंकुर्वीतेत्युक्तोपासनायांस्ववाक्यगतमनोमयत्वादिविशिष्टजीवस्यैवकर्मत्वेनान्वयसंभवेऽन्यपराद्वाक्याद्ब्रह्मणःकर्मत्वेनस्वीका ॥ ४३६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० रायोगात् । सत्यसंकल्पत्वादिब्रह्मधर्माणांतदभिन्नजीवेनेयत्वात् । उक्तंचभामत्यां "क्रतुमित्यादिवाक्येनविहितांक्रतुभावनां । अनूद्यसर्वमित्यादिवाक्यंशमगुणेविधि"मिति । एवंप्राप्तेप्राणशरीरइत्यत्रप्राणःशरीरमस्येतिबहुव्रीहित्वात्समासस्थसर्वनाम्नःसन्निहितपरस्य सर्वंखल्विदंब्रह्मेतिपूर्ववाक्येसर्ववेदांतेषुप्रसिद्धस्यब्रह्मशब्दस्योपदेशेनब्रह्मणएवसन्निहितत्वात्तत्परामर्शकतया प्राणशरीरपदेनब्रह्मणएवोपस्थित्याजीवप्रतीत्यभावात् । मनोमयशब्दस्यचविकारप्राचुर्याद्यनेकार्थमयडंतस्यसाधारणतयाजीवविशेषोपस्थापकत्वायोगात् सत्यकामत्वादिविवक्षितगुणानांब्रह्मण्येवोपपत्तेः अन्यपरादपिवाक्यादुपासनकर्माकांक्षानिवर्तकत्वेनब्रह्मैवोपास्यत्वेनोच्यते । नचजीवधर्मविरोधः । तेषांजीवाभिन्नेब्रह्मण्यपि

तस्यैवमनःप्राणादिसंबंधात् । ब्रह्मणस्तु "अप्राणोह्यमनाःशुभ्र"इत्यादिश्रुत्यातद्राहित्यादितिप्राप्ते ब्रह्मैवोपास्यं । सत्यकामत्वज्यायस्त्वादिलिंगात् । जीवधर्मास्तुमनोमयत्वाणीयस्त्वादयोजीवाभिन्नेब्रह्मणियुक्ताः ।

प्र० युक्तत्वात् । वैपरीत्यस्यचासंभवात् । तदुक्तंभामत्यां "समासस्सर्वनामार्थस्सन्निकृष्टमपेक्षते । तद्धितार्थोपिसामान्यान्नापेक्षायानिवर्तकः । तस्मादपेक्षितंब्रह्मग्राह्यमन्यपरादपि । तथाचसत्यसंकल्पप्रभृतीनांयथार्थते"ति । क्रतुंकुर्वीतेत्यस्य ध्यानंकुर्वीत उपासीतेतियावदित्यर्थः । मनोमयइत्यंशोक्तिःपूर्वपक्षयुक्तिसूचनाय । सत्यसंकल्पइत्यंशोक्तिस्सिद्धांतयुक्तिसूचनायेतिज्ञेयं । ननुमनोमयवाक्योक्तोजीवःकुतः । ब्रह्मैव किंनेत्यतआह ॥ तस्यैवेति ॥ ननुजीवस्यमनोमयत्वादयस्स्वतः । ब्रह्मणस्तुतद्द्वारा । प्रथमंद्वारस्यबुद्धिस्थत्वात्तदेवोपास्यमस्तु । नपुनर्जघन्यं

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्म । तल्लिंगानिचतद्भेदाज्जीवेप्युपपद्यंतइतिभावेनाशंक्यनिराह ॥ **नचवैपरीत्यमिति** ॥ रूपवती धर्मवती । विषयोऽधिष्ठानं । रूपशब्दोधर्मपरः । अत्रेदंदूषणंध्येयं । अस्मद्रीत्यापूर्वसंगतस्यसंशयपूर्वपक्षबीजयुक्तस्यस्ववाक्यस्थशब्दविशेषोपेतस्यवाक्यस्योदाहरणत्वसंभवेऽनेवंविधवाक्योत्त्ययोगात् । नहित्वद्वाक्येसत्यकामत्वादिब्रह्मधर्माणांसत्त्वात्संदेहोयुज्यते । मनोमयत्वादेरानंदमयाधिकरणन्यायेनसावकाशअपच्छेदन्यायेनपरप्राबल्येनसत्यकामत्वादिनापूर्वस्यमनोमयत्वादेर्बाधसंभवाच्च । पूर्वप्राबल्येपिसत्यकामत्वादेर्बहुत्वेननिरवकाशत्वेनचबलवत्त्वात्पूर्वस्याप्यल्पस्यसावकाशबाधोपपत्तेः । किंचयथात्वन्मतेपूर्वाधिकरणे उपक्रमोपसंहाराभ्यांप्रतीतैकवाक्यतानुरोधेनजीवमुख्यप्राणलिंगेतदनुगुणतयाब्रह्मणिनीते तथेहापि “सर्वंखल्विदंब्रह्मे”त्युपक्रमात् “एतद्वैब्रह्मे”त्युपसंहारादेकवाक्यत्वावगमेनब्रह्मविषयत्वप्रतीतिस्वारस्येनमनोमयत्वादेर्नेयत्वाद्भिन्नविषयत्वप्रतीतिपूर्वकपूर्वपक्षायोगाच्चेति । यदुक्तंसिद्धांतेजीवधर्माणांब्रह्मण्यारोपइति तन्नयुक्तं । रज्जुत्वासाधारणधर्मे

नचवैपरीत्यंशंक्यं । विशिष्टचैतन्यरूपस्यजीवस्यब्रह्मण्यध्यस्तत्वात् । अध्यस्तसर्पासाधारणधर्मैश्चभीषणत्वादिभीरज्जूरूपवती । नतुरज्जुरूपेणाभिगम्यत्वादिनासर्पोरूपवान् । तदासर्पस्यैवाभावात् । सर्पदशायांत्वस्तिवास्तवीरज्जुरितिसिद्धांतः । तदुक्तंभामत्यां “समारोप्यस्यरूपेणविषयोरूपवान्भवेत् । विषयस्यतुरूपेणसमारोप्यंनरूपव”दिति । आद्यसूत्रस्यच सर्वत्रवेदांतेषुपरमात्मपरतयाप्रसिद्धस्यब्रह्मशब्दस्योपदेशादित्यर्थइत्याहुः ॥ अत्रब्रूमः ॥

गु० कश्रुतिसाहित्येनेत्यर्थः ॥ **पादांत्येति** ॥ वैश्वानराधिकरणंपादांत्यं । उपांत्यंदृश्यत्वाधिकरणमितिध्येयं ॥ **समारोप्यस्वरूपेणेति** ॥ ज्ञायमानेनसमारोप्यरूपेणाधिष्ठानंविषयोरूपवान्भवेत् । तस्याज्ञायमानत्वेनसमारोपकालेपिसत्वात् । विषयस्यतुरूपेणासाधारणाकारेणज्ञायमानेनसमारोप्यंनरूपवत् । अधिष्ठानासाधारण

प्र० णप्रतीतायांरज्जौभीषणत्वाद्यनारोपस्येवसत्यकामत्वाद्यसाधारणधर्मेणप्रतीतेब्रह्मणिजीवधर्मारोपस्यायोगात् । सिद्धांतानुदयइत्याह ॥ **तत्वतइति** ॥ अत्रतथाभानमसिद्धमित्यतआह ॥ **ब्रह्मणश्चेति** ॥ सत्यकामत्वादिधर्मैस्सिद्धांतितत्वादितिभावः । प्रागुक्तानुवादपूर्वंश्लोकंव्यनक्ति ॥ **यद्यपीति** ॥ ननुतत्वतोब्रह्मभानस्यशाब्दत्वेनपरोक्षत्वात्कथमारोपविरोधित्वं । नहिश्चैत्यानुमितिश्शंखेपैत्यारोपविरोधिनीत्याशंक्याह ॥ **यद्यपीति** ॥ **अतएवेति** ॥ परोक्षत्वादेवेत्यर्थः । पैत्यारोपस्त्वपरोक्षःसोपाधिकश्चेतिभावः । ननुसत्यकामत्वादिनाब्रह्मणोत्रभानेपिनाधि

तत्वतोभात्यधिष्ठानेनारोप्यगतधर्मधीः । ब्रह्मणश्चतथाभानंत्वयाप्यत्राभ्युपेयते ॥ १ ॥ यद्यप्यारोप्यस्यासाधारणरूपेणज्ञानदशायामधिष्ठानमस्ति । अधिष्ठानस्यतुतथाज्ञानदशायामारोप्यंनास्ति । तथाप्यधिष्ठानंतथाज्ञानदशायांनारोप्यधर्मेणधर्मवत् । नहिरज्जूरज्जुत्वाभिगम्यत्वादिनाज्ञानदशायांभीषणत्वादिमती । प्रकृतेचाधिष्ठानंब्रह्मत्वसाधकसत्यकामत्वाद्यसाधारणरूपेणभासते । नहिसिद्धांतःसत्यकामइत्यादिवाक्यशेषाज्ञानमूलः । यद्यपिसत्यकामइत्यादिवाक्यजन्यमधिष्ठानतत्वज्ञानंपरोक्षं तथापितत्परोक्षभ्रमविरोध्येव । इहचाणीयस्त्वादिविभ्रमःश्रौतत्वात्परोक्षः । अतएवायंनसोपाधिकः । येनतत्वज्ञानेप्यनुवर्तेत ।

गु० रूपज्ञानेसतिसमारोप्याभावादित्यर्थः । ननुसत्यकामइत्यादिवाक्यशेषजन्यज्ञानस्यपरोक्षत्वात्कथंतस्यमनोमयत्वाद्यारोपविरोधित्वं । साक्षात्कारिभ्रमेसाक्षात्कारिविशेषदर्शनस्यैवविरोधित्वेनपरोक्षस्यतस्याविरोधित्वात् । अन्यथापीतः शंखइतिभ्रमोनस्यादित्यतआह ॥ **यद्यपीति** ॥ ननुमनोमयत्वाद्यारोपस्यसोपाधिकत्वात्सत्यकामत्वादिनिर्णयेप्यनुवृत्तिस्स्यादित्यतआह ॥ **अतएवेति** ॥ परोक्षत्वादेवेत्यर्थः ॥ **स्वाज्ञानकल्पितेति** ॥ अस्यायमर्थः । स्वस्मिन्नखंडचैतन्येयदध्यस्तमज्ञानं

SGDF

प्र० ष्ठानस्यतत्वतोभानं। नहिसत्यकामत्वादिकमधिष्ठानस्यतत्वं। किंतुशुद्धस्वभावत्वं। नहितथात्रब्रह्मणोभानमस्ति। सविशेषस्यैवभानागीकारा दित्यनुशयेनाह ॥ किंचेति ॥ जगत्त्वेनपरमेश्वरत्वेनजीवत्वेनत्रयाणांप्रतीत्याऽऽरोपितत्वप्रतीतेरितिभावः । ननुयस्सत्यकामस्सोणीयानिति सत्यकामत्वादियुक्तमुद्दिश्याणीयस्त्वादिविधौ यत्सत्यकामत्वाद्यारोपाधिष्ठानंभविष्यतितदेवाणीयस्त्वाद्यारोपाधिष्ठानंभविष्यति । वल्मीकेय स्स्थाणुःसपुरुषइतिवदित्यतआह ॥ किंचेति ॥ ननुतत्वावेदकप्रामाण्याभावोऽभ्युपेयतएवेत्यतआह ॥ अपिचेति ॥ हेतुरस्तीति ॥

किंचत्वन्मतेप्यस्यवाक्यस्यसत्यसंकल्पादियुक्तसगुणब्रह्मविषयत्वात् । जीवसगुणब्रह्मणोश्चनिर्गुणेध्यस्त त्वात्। कथंपरस्परमधिष्ठानाध्यस्तभावः । यथोक्तंसंक्षेपशारीरके "स्वाज्ञानकल्पितजगत्परमेश्वरत्वजी वत्वभेदकलुषीकृतभूरिभावा। स्वाभाविकस्वमहिमस्थितिरस्तमोहाप्रत्यक्चितिर्विजयतेभुवनैकयोनि"रिति। किंचरज्जुमुद्दिश्यभीषणमितिव्यपदेशइवब्रह्मणिमनोमयत्वादिश्रौतव्यपदेशोप्रमाणंस्यात्। अपिचत्वयास्य वाक्यस्योपासनापरतयाअसत्योपासनायाश्चस्वीकृतत्वात्सत्यसंकल्पत्वज्यायस्त्वादीनांजीवेस्वरूपेणासत्त्वेपि तथोपासनंकिंनस्यात् । नचसहश्रुतेषुमनोमयत्वादिकमेवोपास्यंनतुसत्यसंकल्पत्वादिकमित्यत्रहेतुरस्ति ॥

गु० तटस्थमज्ञानमुपाधिरिष्यतइतिवक्ष्यति। तेनकल्पितंयदुपाधित्रयंधेनुपदप्रवृत्तिनिमित्तगोत्वेश्वरत्वजीवत्वानि। तैर्भेदैर्भेदहेतुभिरिदंजगत् अयमीश्वरः अहंजीव इतिभिद्यमानैः कलुषीकृतःपरित्याजितस्त्रिविधपरिच्छेदशून्यतापियत्रसातथा । स्वाभाविकोयस्स्वमहिमा देशकालवस्तुपरिच्छेदराहित्यं तत्रैवस्थितिरचलमर्यादाय स्यास्सातथा । सआत्माकस्मिन्प्रतिष्ठितःस्वेमहिम्नीतिश्रुतेः । तत्कुतःवस्तुतोस्तोनिरस्तोमोहोऽविद्यालक्षणोयत्र । असंगोनहिसज्जते तमसःपरस्तादितिश्रुतेः।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ननुमनोमयत्वादिकंब्रह्मणिव्यावहारिकं । सत्यसंकल्पादिकंजीवेप्रातीतिकं । नचश्रुतेर्व्यावहारिकपरत्वसंभवेऽत्यंताप्रामाण्यापादकप्रतीतिकपरत्वंयुक्तमितिचेन्न । “अप्राणोह्यमनाश्शुभ्र”इतिश्रुत्यातदभावावेदनेनतस्यापिब्रह्मणिप्रातीतिकत्वात् । जीवेपित्वन्मतेव्यावहारिकतयाब्रह्मणिप्रातिभासिकत्वावश्यंभावाच्चेतिभावः । उपलक्षणमेतत् । यदप्यणीयस्त्वादिर्जीवधर्मोज्यायस्त्वादिर्ब्रह्मधर्मइति तन्न । “अणोरणीयान्महतोमहीया”नित्यणीयस्त्वस्यापिब्रह्मणिश्रुतत्वात् । नचोभयंविरुद्धं । तर्हिप्रथमोपस्थिताणीयस्त्वांगीकारेणज्यायस्त्वस्यैवचरमस्यपरित्याज्यत्वात् । श्रुत्यंतरविरोधस्योभयत्रतुल्यत्वात् । विरोधशांतिप्रकारस्यव्योमवदित्यनेनसूत्रकृतैवोक्तत्वाच्च । तदुक्तमनुव्याख्याने “महतोल्पत्वमपिहिव्योमवत्प्राहवेदवि”दितीत्यपिध्येयं । एवमधिकरणशरीरंसिद्धांतानुदयेननिरस्येदानींसूत्रार्थासामंजस्यमाह ॥ **सूत्रेति** ॥ एवंहिसूत्रार्थोनाहुः । मनोमयत्वादिनोपास्यंब्रह्मैवेति साध्यमध्याहार्यं । हेत्वर्थःप्रागुक्तः । विवक्षितगुणोपपत्तेश्च । विवक्षितानांवक्तुमिष्टानांतात्पर्यविषयीभूतानामितियावत् । तेषांसत्यकामत्वादीनांब्रह्मण्येवोपपत्तेः । अनुपपत्तेस्तुनशारीरः । प्रागुक्तसत्यसंकल्पत्वादीनांजीवेऽनुपपत्तेः । कर्मकर्तृव्यपदेशाच्च । एतमितःप्रेत्याभिसंभवितास्मीत्यत्रैतमितिद्वितीययाब्रह्मणःकर्मत्वेनाभिसंभवितास्मीतिप्रथमयाजीवस्यकर्तृत्वेनव्यपदेशाच्चनशारीरोत्रोपास्यः । शब्दविशेषात् । समानप्रकरणेश्रुत्यंतरे “यथाव्रीहिर्वायवोवाश्यामाकोवाश्यामाकतंडुलोवा एवमयमंतरात्मन्पुरुषोहिरण्मय” इतिजीवब्रह्मबोधकसप्तम्यंतप्रथमांतरूपशब्दविशेषाच्चनशारीरोत्रोच्यते । “ईश्वरस्सर्वभूतानांहृद्देशेर्जुनतिष्ठती”तिस्मृतेश्चनशारीरः ।

सूत्राक्षरार्थोप्ययुक्तः ॥

गु० तादृशोपिमायावशाद्भुवनैकयोनिः सृष्टिस्थितिप्रलयहेतुः प्रत्यक्चितिःचित्स्वरूपादेहादिजडवर्गातःपातिनीसतीकर्तृभोक्तृतयाविजयतेप्रथयते । तत्सृष्ट्वातदेवानुप्रावि

SGDF
Sri Gargeshwari Digital Foundation

प्र० "एषमआत्मांतर्हृदय"इत्यल्पायतनत्वात् "अणीयान्व्रीहेर्वायवाद्वे"त्यणीयस्त्वव्यपदेशाच्चनसर्वगतःपरमात्मामनोमयत्वादिगुणकइतिचेत् सर्वगतस्यापिब्रह्मणोहृदयपुंडरीकेनिचाय्यत्वाद्द्रष्टव्यात्वदेवंव्यपदेशोव्योमवत् यथाव्योमसर्वगतमपिसूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयोव्यपदिश्यतेतद्वत् । ब्रह्मणस्सर्वप्राणिहृदयसंबंधात्सुखादिसंभोगप्राप्तिरितिचेन्न । अपहतपाप्मत्वादिवैशेष्यादिति । तत्सर्वंक्रमेणदूषयति ॥ **आद्यइति** ॥ उपलक्षणमेतत् । सर्वत्रेत्यस्यवैयर्थ्याच्चेत्यपिध्येयं ॥ **मिथ्येति** ॥ त्वन्मतेतेषामारोपितत्वादितिभावः ॥

आद्येसूत्रेहेतुमात्रस्योक्तत्वेनमनोमयत्वादिनोपास्यंब्रह्मेतिप्रतिज्ञांशस्याध्याहार्यत्वात् । द्वितीयेसत्यकामत्वादिमिथ्याभूतगुणेषुश्रुतितात्पर्योपपत्तिसहितत्वयोरभावेनविवक्षितोपपत्तिपदयोरस्वारस्यात् । तृतीयेसत्यकामत्वादिगुणानांब्रह्मण्युपपत्तिंवदताद्वितीयेनैवतेषांजीवेनुपपत्तेरर्थादुक्तत्वेनतेनपौनरुक्त्यात् । चतुर्थे

गु० शत् सइहप्रविष्टआनखाग्रेभ्यइत्यादिश्रुतेरिति । तथाचस्तुतिव्याजेनपूर्वंतत्त्वमसीतिवाक्यार्थोपयोगितत्पदलक्ष्यंसत्यादिरूपंब्रह्मोक्त्वाऽनेनत्वंपदलक्ष्यस्योक्तत्वात्तस्यचशुद्धत्वेनतस्यैवाधिष्ठानत्वोक्तेर्जीवसगुणब्रह्मणोश्चनपरस्पराधिष्ठानाध्यस्तभावइतिभावः ॥ **द्वितीयेसत्यकामत्वादीत्यादि** ॥ वक्तुमिष्टोविवक्षितः । यद्यप्यपौरुषेयेवेदेवक्तुरभावान्नेच्छार्थस्संभवति । तथाप्युपादेयेनफलेनोपचर्यते । लोकेहियच्छब्दाभिहितमुपादेयंभवतितद्विवक्षितमित्युच्यते । यदनुपादेयंतदविवक्षितमिति । तद्वद्वेदेप्युपादेयत्वेनाभिहितंविवक्षितंभवति । इतरदविवक्षितं । उपादानानुपादानेतुवेदवाक्यतात्पर्यातात्पर्याभ्यामवगम्येते । तदिहविवक्षितगुणाउपासनायामुपादेयत्वेनोपदिष्टाःसत्यसंकल्पप्रभृतयस्तेपरस्मिन्ब्रह्मण्युपपद्यंते । सत्यसंकल्पत्वंहिसृष्टिस्थितिसंहारेष्वप्रतिबद्धशक्तित्वात्परमात्मनोऽवकल्प्यते । परमात्मगुणत्वेनचयआत्माऽपहतपाप्मेत्यत्रसत्यकामस्सत्यसंकल्पइतिश्रुतं । आकाशात्मेति आकाशवदात्माऽस्येत्यर्थः । सर्वगतत्वादिधर्मैस्संभवत्याकाशेनसाम्यंब्रह्मणः ।

प्र० **आधारेति** ॥ अयमंतरात्मन्निति सप्तमीप्रथमाभ्यामुक्तस्येत्यर्थः । वदतेतिकर्तृत्वमुपचरितं । प्रतिपादकेनेतियावत् । अंतरात्मन्निति "सुपांसुलु"गितिसप्तम्यालोपे "नङिसंबुद्ध्यो"रितिनलोपाभावेचरूपमितिसप्तम्यंतत्वंध्येयं ॥ **एवंसूत्रांतरइति** ॥ षष्ठे "ईश्वरस्सर्वभूतानांहृद्देश"

आधाराधेयभावस्येव "एतमितःप्रेत्याभिसंभवितास्मी"तिकर्मकर्तृभावस्यापिविरुद्धविभक्तिकशब्दंवदताशब्दशेषशब्देनैवग्रहणसंभवेनपंचमेनपौनरुक्त्यात् । पंचमेपि "एषमआत्मांतर्हृदय"इतिवाक्यशेषेतस्थत्वेनोक्तस्यमनोमयत्वादिगुणकस्य "एवमयमंतरात्मन्हिरण्मय"इतिसमानप्रकरणेश्रुत्यंतरेजीवस्ययःशब्दोंतरात्मन्नितिसप्तम्यंतस्ततोन्योहिरण्मयइतिप्रथमांतोब्रह्मणश्शब्दस्तेनशब्दविशेषेणमनोमयत्वादिगुणकोनजीवइतित्वदुक्तस्यशब्दविशेषस्यश्रुत्यंतरस्थत्वेन अस्मदुक्तस्यप्रस्तुतब्रह्मशब्देसावधारणत्वरूपविशेषस्येवस्वप्रकरणस्थत्वाभावात् । स्वतंत्रहेत्वंतरपरत्वेचचतुर्थइवात्रापिचशब्दप्रसंगाच्च । एवंसूत्रांतरेप्यनुपपत्तिरूह्या । अत्रापिपरमतेपि "अनुपपत्तेस्तुनशारीर"इत्यादिनाभेदस्य "विवक्षितगुणे"त्यनेनगुणानांचोक्तेरैक्यनिर्गुणत्वप्रतिकूलतास्फुटैवेति ॥

गु० ज्यायान्पृथिव्याइत्यादिनाचैतदेवदर्शयति । यदाप्याकाशआत्माऽस्येतिव्याख्यायतेतदापिसंभवतिसर्वजगत्कारणस्यसर्वात्मनोब्रह्मणआकाशात्मत्वं । अतएवसर्वकर्मेत्यादि । एवमिहोपास्यतयाविवक्षितगुणाब्रह्मण्युपपद्यंते । इत्यादिवदताभाष्यकृता विवक्षितशब्दार्थत्वेनश्रुतितात्पर्योपपत्तिसहितयोरुक्तत्वेनसत्यकामत्वादिमिथ्याभूतगुणेषुतयोरभावेनविवक्षितोपपत्तिपदयोरस्वारस्यादित्यर्थः ॥ **एवंसूत्रांतरेपीति** ॥ स्मृतेश्चेतिसूत्रस्य स्मृतिश्चशारीरपरमात्मनोर्भेदेनदर्शयति । ईश्वरस्सर्वभूतानांहृद्देशेऽर्जुनतिष्ठति । भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्याद्या । इतिव्याख्यानंत्वन्मतेभेदस्यमिथ्यात्वेनश्रुतिसूत्राणामप्रामाण्यापत्त्याऽयुक्तं । तथाअर्भकौ

SGDF Sri Gargeshwari Digital Foundation

प्र० इतिस्मृतावाधारत्वपर्यवसन्नषष्ठ्यंतजीवसंबंधिशब्दादन्यस्येश्वरइतिप्रथमांतब्रह्मवाचिशब्दस्यसद्भावेनास्यास्स्मृतेरेव अयमंतरात्मन्निति श्रुत्यंतरस्येवपंचमेनैवग्रहणसंभवेनतस्यवैयर्थ्यात्। सप्तमे सर्वगतेब्रह्मण्ययुक्तानामर्भकौकस्त्वादीनामुपासनार्थव्यपदेशे जीवेप्ययुक्तानांज्यायस्त्वादीनामुपासनार्थव्यपदेशइतिवैपरीत्यापातात्। अष्टमे पूर्वत्रसर्वगतत्वेप्यल्पौकस्त्वाद्यनुपपत्त्याप्रकरणस्यब्रह्मविषयत्वंनिराकुर्वतापूर्वपक्षिणासर्वगतत्वेऽनिष्टापादनायोगात्स्वाभाविकाभेदेसुखादिभोगस्यावैशेष्यस्यचावर्जनीयत्वादित्याद्यूह्यमित्यर्थः। इत्यादिना सूत्रचतुष्टयेन। नचमिथ्यात्वेनोपपत्तिः। श्रुतेरप्रामाण्यापत्तेः। अस्यस्पष्टंटीकादौनिरासाच्चेति ॥ केचित्तुसर्वमिति ॥ परैस्सर्वंखल्विदंब्रह्मेतिवाक्यंब्रह्मपरमित्यभिप्रेत्यक्रतुंकुर्वीतेतिवाक्यविहितोपासनानुवादेनशांतत्वरूपगुणविधिपरत्वान्नोपासनायांकर्मतयाब्रह्मार्पकं किंतुमनोमयवाक्यमेवजीवंकर्मतयार्पयतीत्युक्तं। एतेतुसर्वात्मकंब्रह्मशांतस्सन्नुपासीतेत्यत्रैवोपासनाविधीयते। क्रतुंकुर्वीतेतितुमनोमयत्वादिगुणविधानायप्राग्विहितोपासनानुवादः। ततश्चसर्वात्मकंब्रह्ममनोमयत्वादिगुणकमुपासीतेतिसमग्रवाक्यार्थइत्येकवाक्यतामाहुः। तथाच ब्रह्मपदनिर्दिष्टंयदिजीवः तर्हिसएवतथोपास्यः। यदिब्रह्म

केचित्तु "सर्वंखल्विद"मित्यादिवाक्यंब्रह्मविषयं मनोमयवाक्यंतुजीवविषयमितिभिन्नविषयत्वेनयःपरकीयपूर्वपक्षः तस्यैकविषयत्वसंभवेऽयोगादेवंपूर्वःपक्षः।

गु० कस्त्वादितिसूत्रस्य अर्भकमल्पमोकोनीडं। एषमआत्मांतर्हृदयइतिपरिच्छिन्नायतनत्वात्। स्वशब्देनच अणीयान्व्रीहेर्वायवाद्वेत्यणीयस्त्वव्यपदेशाच्छारीरएवाराग्रमात्रोयंजीवइहोपदिश्यतें नसर्वगतःपरमात्मेतियदुक्तंतत्परिहर्तव्यं। अत्रोच्यते। नायंदोषः। नतावत्परिच्छिन्नदेशस्यसर्वगतत्वव्यपदेशः। कथमुपपद्यते। सर्वगतस्यतुसर्वदेशेषुविद्यमानत्वात्परिच्छिन्नदेशेव्यपदेशोपिकयाचिद्विधयासंभवति। यथासमस्तवसुधापतिरपिसन्नयोध्याधिपतिरितिव्यपदिश्यते। कयापुनरपेक्षया

SGDF Sri Gargeshwari Digital Foundation

प्र० तर्हितद्देवतथोपास्यमितिसेत्स्यतीतिब्रह्मपदनिर्दिष्टमेवकिंजीवउतपरमात्मेतिविचार्यते । तत्रपूर्वपक्षाद्यनुवदति ॥ **सर्वंखल्विदंब्रह्मेतीति** ॥ अत्रब्रह्मोद्दिश्य इदंसर्वंखल्वित्युच्यमानंसर्वात्मकत्वं चतुर्मुखादितृणपर्यंतजगदात्मकत्वं । तच्चानाद्यविद्याकर्मवशेननानायोनिषुजननसंभवे नजीवएवभवति । नतुसर्वदोषदूरपरमात्मनीत्यर्थः । कथंतर्हितज्जलानित्युक्तसृष्ट्यादिहेतुत्वमित्यतआह ॥ **जन्मादीति** ॥ **सर्वप्रकारकतेतीति** ॥ सर्वविशेषणकत्वं देवतिर्यङ्मनुष्यशरीरकत्वमितियावत् । सर्वत्रेतिपदंप्रतिज्ञापरंमत्वासूत्रार्थमनुवदति ॥ **सर्वत्रेति** ॥ सर्वत्रे

सर्वंखल्विदंब्रह्मेतिब्रह्मशब्दनिर्दिष्टोजीवएव । सर्वशब्दनिर्दिष्टब्रह्मादिस्तंबपर्यंतकृत्स्नात्मकतायाअनादि संसारेकर्मवशाज्जीवेसंभवान्निखिलहेयप्रत्यनीकेचब्रह्मणितदयोगात् । जन्मादिकारणतायाश्चकर्मद्वारा जीवेपिसंभवात् ब्रह्मशब्दस्यचजीवेपिप्रयोगादिति ॥ सिद्धांतस्तु । जीवस्यजीवांतरात्मकत्वाभावे नसर्वात्मकत्वायोगात् सर्वात्मकताचसर्वप्रकारकतेतिस्वीकारेण प्रकारभूतशरीरगतानांदोषाणांप्रकारिणिब्रह्मण्यप्रसंगात् । ब्रह्मशब्दकारणतयोश्चजीवेऽस्वारस्यात् ब्रह्मैवसर्वात्मकमिति ॥ सूत्राक्षरार्थस्तु ॥ सर्वत्र सर्वंखल्वितिनिर्दिष्टेजगति । तत्समानाधिकरणेनब्रह्मशब्देनतदात्मकतयाभिधीयमानंपरंब्रह्मैव ।

गु० सर्वगतस्सन्नीश्वरोऽर्भकौकाअणीयांश्चव्यपदिश्यतइति । निचाय्यत्वादेवमितिब्रूमः । एवमणीयस्त्वादिगुणगणोपेतईश्वरस्तत्रहृदयपुंडरीकेनिचाय्योद्रष्टव्यउपदिश्यतेयथासालिग्रामेहरिः । तत्रात्मबुद्धिविज्ञानंग्राहकं । सर्वगतोपीश्वरस्तत्रोपास्यमानःप्रसीदति । व्योमवच्चैतद्द्रष्टव्यं । यथासर्वगतमपिव्योमसूचीपाशाद्यपेक्षया

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यनुवादः । जगतीतिव्याख्या । हेत्वंशार्थमाह ॥ **खल्विति** ॥ प्रसिद्धोपदेशादित्यस्यप्रसिद्धत्वेनोपदेशादित्यर्थः । कस्येतिप्रतियोग्याकांक्षायांतज्जलानितिवाक्योक्तस्यजन्मादिहेतुत्वस्यसर्वमिदमित्युक्तसर्वात्मकतायाश्चान्वयः । सार्वात्म्यस्यप्रसिद्धत्वंखलुशब्देन हेतुत्वस्यप्रसिद्धत्वमितिशब्देनोच्यते । इतिशब्दस्यहेत्वर्थत्वात्प्रसिद्धस्यैवहेतुत्वाज्जन्मादिहेतुत्वंप्रसिद्धमितिगम्यतइति सार्वात्म्यहेतुत्वयोःखल्वितिशब्दाभ्यांप्रसिद्धत्वेनोपदेशादितिसूत्रार्थःपर्यवस्यतीत्यर्थः । अस्तुजन्मादिकारणत्वस्यप्रसिद्धत्वेनोपदेशः ततश्चकिमतआह ॥ **कारणत्वादेश्चेति** ॥ "आनंदाद्ध्येवख"ल्विति "यतोवाइमानिभूतानिजायंत"इतिश्रुत्यंतरेब्रह्मणिप्रसिद्धस्यैवजगत्कारणत्वस्येहाम्नानाद्विवक्षितगुणानामुपपत्तेश्चब्रह्मेत्यवगम्यतइत्यर्थः । यथोक्तमधिकरणसारावल्यां "सर्वत्वंकर्मभिस्स्वैर्जनिमतिघटतेब्रह्मशब्दोत्रचैवेत्यल्पस्थानोल्पमानःसुखतदितरभुग्जीवएवेतिचेन्न । तज्जत्वादेरनूक्तेर्विविधगुणभिदादर्शनात्सर्वतादेस्स्वारस्यादप्यणुत्वंह्युपधिकृतमिहोपास्तयेज्यायसिस्या"दिति । अत्रप्राग्वद्ब्रह्मधर्माणामेवभावेनसंशयपूर्वपक्षयोरयोगात् सत्यकामत्वादिभिरनेकैर्निरवकाशैःपूर्वस्यापिसर्वात्मकत्वादेःकथंचिन्नेयत्वात् स्वप्रकरणेशब्दविशेषाभावेनोदाहरणानौचित्यादितिध्येयं । यदुक्तंयतोवेत्यादिवाक्यांतरेब्रह्मणिप्रसिद्धस्यैवेहाम्नानादिति तत्रपूर्वपक्षेसर्वकारणवाक्येब्रह्म

खलुशब्देनसर्वात्मकतायास्तज्जलानितीतिहेतुत्वार्थेनेतिशब्देनचजन्मादिकारणतायाःप्रसिद्धत्वेनोपदेशात् । कारणत्वादेश्च "आनंदाद्ध्येवखल्विमानिभूतानी"त्यादिश्रुत्यंतरेब्रह्मण्येवप्रसिद्धत्वादित्याहुः ।

गु० ऽर्भकौकोऽणीयश्चव्यपदिश्यते एवंब्रह्मापि । तदेवंनिचाय्यत्वापेक्षंब्रह्मणोऽर्भकौकस्त्वमणीयस्त्वंचनपारमार्थिकमितिव्याख्यानं । तत्रार्भकौकस्त्वाणीयस्त्वयोरपारमार्थिकत्वेनश्रुतेरप्रामाण्यमसदुपासनायाअनर्थफलत्वंच । तथासंभोगप्राप्तिरित्यस्यव्योमवत्सर्वगतस्यब्रह्मणस्सर्वप्राणिहृदयसंबंधाच्चिद्रूपतयाचशारीरेणाविशिष्टत्वात्सु

प्र० कारणत्वाक्षेपसंभवेननक्कापिब्रह्मकारणत्वप्रसिद्धिः । तथाचनसिद्धांतोदयइतिसदृष्टांतमाह ॥ **तन्नेत्यादिना** ॥ "यएषोंतरादित्येहिरण्मयःपुरुष"इत्युक्तस्येत्यर्थः । तस्य कारणस्य । तथाचसौत्रहेतोरसिद्धिरितिभावः । ननुयतोवेत्युपक्रम्यानंदाद्ध्येवेतिश्रवणादानंदस्यचब्रह्मवह्ल्यामनेकन्यायैर्ब्रह्मत्वेननिर्णीतानंदमयस्थानपतितत्वेनब्रह्मत्वाज्जीवत्वंनवक्तुंशक्यमितिचेत् तर्ह्यत्रापिपूर्वपक्षानुदयस्योक्तत्वात् । यद्यत्रप्रसिद्धिद्योतकखलुशब्दात्तत्प्रसिद्ध्यर्थंश्रुत्यंतरानुसरणं तर्हितत्रापितथाश्रवणान्नक्कापिव्यवस्थास्यादितिदोषांतरमाह ॥ **किंचेति** ॥ प्रसिद्धोपदेशादिति

तन्न । त्वन्मतेंतरधिकरणेछांदोग्योक्तस्यादित्यांतस्थस्यजीवत्वे "यश्चासावादित्ये"इत्यानंदवह्ल्युक्तस्यापिजीवत्वमितिपूर्वपक्षवत् "सर्वंखल्विद"मित्यत्रोक्तस्यकारणस्यजीवत्वेयतोवेत्यादावुक्तस्यापितस्यजीवत्वमितिपूर्वपक्षस्यसंभवेनकारणतायावाक्यांतरेब्रह्मणिप्रसिद्ध्यभावात् । किंच "आनंदाद्ध्येवखल्वि"त्यत्रहिशब्दखलुशब्दयोः "यतोवाइमानि आत्मावाइद"मित्यादौवैशब्दादेःश्रवणेनतत्रापिश्रुत्यंतरप्रसिद्ध्यपेक्षास्यात् ।

गु० खदुःखादिसंभोगोप्यविशिष्टःप्रसज्येतैकत्वाच्च । नहिपरस्मादात्मनोऽन्यःकश्चित्संसारीविद्यते । नान्योतोस्तिद्रष्टाविज्ञातेत्यादिश्रुतिभ्यः । तस्मात्परस्य संभोगप्राप्तिरितिचेन्न वैशेष्यात् । नतावत्सर्वप्राणिहृदयसंबंधाच्छारीरवद्ब्रह्मणःसंभोगप्रसंगोवैशेष्यात् । शारीरपरमेश्वरयोरेकःकर्ताभोक्ताधर्माधर्मसाधनःसुखदुःखादिमांश्च । एकस्तद्विपरीतोपहतपाप्मत्वादिगुणः । एतस्मादनयोर्विशेषादेकस्यभोगोनेतरस्य । यदिचसंनिधानमात्रेणवस्तुशक्तिमनाश्रित्यकार्यसंबंधोभ्युपगम्येताकाशादीनामपिदाहादिप्रसंगः । सर्वगतानेकात्मवादिनामपिसमावेतौचोद्यपरिहारौ । यदप्येकत्वाद्ब्रह्मणआत्मांतराभावाच्छारीरस्यभोगेनब्रह्मणोभोगप्रसंगइति । अत्रवदामः । कथमयंत्वयात्मांतराभावोध्यवसितइति । तत्त्वमस्यहंब्रह्मास्मिनान्योतोस्तिविज्ञातेत्यादिशास्त्रेभ्यइतिचेत् यथाशास्त्रंतर्हिशास्त्रीयोर्थःप्रतिपत्तव्योनतत्रार्धजरतीयंलभ्यं ।

SGPF Foundation

प्र० हेतोर्व्यभिचारंचाह ॥ **अपिचेति** ॥ अन्नादेर्ब्रह्मत्वस्यत्वयानंगीकारादितिभावः । सूत्रार्थंनिराह ॥ **अक्षरार्थोपीति** ॥ ब्रह्मशब्दाभिधेयस्यपरब्रह्मत्वंसर्वात्मकत्वंचद्वयमपियदिसाध्यत्वेनाभिमतं तर्हिसर्वंब्रह्मेत्येववाच्यंनतुसर्वत्रब्रह्मेति । तथोक्तौपराभिमतासिद्धिंव्यनक्ति ॥ **नहीति** ॥ एतेनास्मदर्थेसूत्रानुगुण्यंसूचितं । उपलक्षणमेतत् । सर्वत्रेत्यनेनसर्वस्मिन्जगतीत्युक्तावपिब्रह्मशब्देनोच्यमानंब्रह्मैवेत्यंशस्यबोधकपदाभावेनाध्याहार्यत्वात् । यदत्रोक्तंश्रुतप्रकाशे नाशाब्दमितिवानेतरइतिवाऽन्यइतिवापूर्वपादादनुवर्ततेवानशारीरइतिवक्ष्यमाणमपकृष्यते

अपिच "अन्नाद्ध्येवखल्विमानिभूतानिजायंते प्राणाद्ध्येवखल्विमानिभूतानी"त्यत्रेवखलुशब्दादेःश्रवणेप्यब्रह्मपरताकिंनस्यात् । अक्षरार्थोप्ययुक्तः । सर्वात्मकत्व(स्यापि)स्यहिसाध्यत्वेतत्प्रतिपादनायश्रुत्यनुगमायचसूत्रेसर्वमितिनिर्देशःस्यात् । नहिसर्वत्रेत्यनेनसर्वात्मकतालभ्यते । किंतुसर्वगतता । सौत्रप्रसिद्धशब्दस्यभावप्रधानताचकल्प्या ।

गु० शास्त्रंचतत्वमसीत्यपहतपाप्मत्वादिविशेषणंब्रह्मशारीरस्यात्मत्वेनोपदिशच्छारीरस्यैवतावदुपभोक्तृत्वंवारयति । कुतस्तदुपभोगेनब्रह्मणउपभोगप्रसंगः । अथागृहीतंशारीरस्यब्रह्मणैकत्वंतदामिथ्याज्ञाननिमित्तःशारीरस्योपभोगोनेनपरमार्थरूपस्यब्रह्मणःसंस्पर्शः । नहिबालैस्तलमलिनतादिभिर्व्योम्निविकल्प्यमानेतलमलिनतादिविशिष्टमेवपरमार्थतोव्योमभवति । तदाह । नवैशेष्यादिति । नैकत्वेपिशारीरस्योपभोगेनब्रह्मणउपभोगप्रसंगोवैशेष्यात् । विशेषोहिभातिमिथ्याज्ञानसम्यग्ज्ञानयोः । मिथ्याज्ञानकल्पितउपभोगःसम्यग्ज्ञानदृष्टमेकत्वं । नचमिथ्याज्ञानकल्पितेनोपभोगेनसम्यग्ज्ञानदृष्टंवस्तुसंस्पृश्यते । तस्मान्नोपभोगसंबंधोपिशक्यईश्वरस्यकल्पयितुमितिव्याख्यानं । तच्चास्मद्रीत्यापारमार्थिकव्यवस्थोपपत्तौकाल्पनिकव्यवस्थाक्लिष्टैवेत्यादिरूपेणसूत्रांतरेप्यनुपपत्तिरूह्येत्यर्थः ॥ **श्रुत्यनुगमायेति** ॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुत्याऽनुगमायेत्यर्थः ॥ **सौत्रेति** ॥ गत्यंतराभावएवतत्कल्पनंयुक्तं । प्रकृतेचास्मद्रीत्याप्रकारांतरेणोपपत्तिरितिभावः । किंचयद्यत्रप्रकरणेऽणुत्वंमहत्त्वं

SGDF
Sri Gargeshwari Digital Foundation

प्र० वा । तस्यपर्यवसानाद्ब्रह्मैवेतिलभ्यते । नाध्याहारइति । तन्न । ब्रह्मशब्देनाभिधीयमानंमित्यस्यैतावताऽध्याहारापरिहारात् । अस्मद्री त्याऽऽध्यायपरिसमाप्तिप्रत्यधिकरणमनुवर्तमानेनतत्त्वितिपदेनैवसाक्षात्साध्यबोधसंभवेऽत्यंतव्यवहितस्यानुवर्तनेनापकर्षेणवापर्यवसानद्वारा साध्यबोधोक्तेरयुक्तत्वात् । अतएवद्वितीये "व्यवायान्नानुषज्यत" इत्यत्र "संयज्ञपतिराशिषे" तिवाक्येक्रियाध्याहारइत्युक्तमित्यपिध्येयं । इत राणिसूत्राणिप्रागुक्तदिशानिरसनीयानीतिभावः । तथाहि । यदुक्तंविवक्षितगुणोपपत्तेः । विवक्षितानां वक्ष्यमाणानां । उपसंहारस्थानामि तियावत् । मनोमयत्वादीनामवाक्यनादरइत्यंतानांगुणानांपरमात्मन्येवोपपत्तेः परमात्मैवोच्यते । विवक्षितगुणानामनुपपत्तेर्नशारीरोत्रो

यच्चोक्तं "अर्भकौकस्त्वा" दितिसूत्रे "एषमआत्मांतर्हृदयेऽणीयान्व्रीहेर्वायवाद्वासर्षपाद्वे" त्यु क्तमणीयस्त्वमौपाधिकं । तदुपाधेर्हृदयस्योक्तत्वात् । "ज्यायान्पृथिव्या" इत्यादिनोक्तंमह त्त्वंतुस्वाभाविकं । तदुपाधेरनुक्तत्वादिति । तन्न । हृद्यपेक्षयेत्यत्रहृदयस्यांगुष्ठप्रमाणताया

प्र० च्यते । "इतःप्रेत्याभिसंभवितास्मी" तिप्राप्यप्राप्तृतयाब्रह्मजीवयोःकर्मकर्तृभावेनव्यपदेशाच्च । "एषमआत्मांतर्हृदय" इतिषष्ठ्यंतप्रथमांतरू पाद्वाजिनांश्रुतौच "एवमयमंतरात्मन्पुरुषोहिरण्मय" इतिसप्तम्यंतप्रथमांतरूपाज्जीवब्रह्मणोश्शब्दविशेषाच्च । "सर्वस्यचाहंहृदिसन्निविष्ट" इत्यादिस्मृतेश्चनशारीरइति । तन्न । ब्रह्मणिविवक्षितगुणानामुपपत्त्युक्त्याऽर्थाज्जीवेतदनुपपत्तेरुक्तत्वात्तेनतृतीयस्यपौनरुक्त्यं । चतुर्थषष्ठगृ हीतयोः "एतमितःप्रेत्ये" ति "सर्वस्यचाह" मितिश्रुतिस्मृत्योरपि "एषमआत्मांतर्हृदय" इतिविरुद्धविभक्तिकशब्दग्राहकेणपंचमेनैवग्रहणसंभ वात्तेनतयोःपौनरुक्त्यं । शब्दविशेषाच्चेतिचशब्दाध्याहारश्चेत्यादिध्येयं । सप्तमेदूष्यभागमनूद्यनिराह ॥ यच्चेति ॥ सूत्रार्थस्तुपूर्वमतइव

SGDF
Sri Gargeshwari Digital Foundation

प्र० ध्येयः ॥ त्वयेति ॥ ''हृद्यपेक्षयातुमनुष्याधिकारत्वा''दित्यत्र ''उपासकहृदयस्यांगुष्ठप्रमाणत्वा''दितित्वद्भाष्योक्तेरितिभावः । तस्य हृदयस्य । आत्मनिसर्षपादणीयस्त्वसंपादनेऽनुपाधित्वात् । तत्परिमितस्यैवतत्रोपाधित्वेनवाच्यत्वादित्यर्थः । अतएवश्रुतप्रकाशे ''अत्रहृदयमल्पत्वोपाधिभूतंश्रुतं । नतुज्यायस्त्वोपाधिश्श्रुतः । पृथिव्यादयस्तदुपाधयइतिनशंकनीयं । ततोपिज्यायस्त्वश्रवणात् । नहिततोऽधिकपरिमाणत्वंतदुपाधिकंभवितुमर्हती''त्यधिकपरिमाणस्यन्यूनपरिमाणोपाधिकत्वंनिराकृतं । तद्वद्देवेहापिन्यूनपरिमाणस्यततोधिकपरिमाणहृदयोपाधिकत्वमयुक्तमिति । नन्वणीयस्त्वज्यायस्त्वयोर्विरोधादेकस्यावश्यंपरित्यागेकथंचिदौपाधिकत्वेनसमाधेयमित्यतोऽविरोधप्रकारमाह ॥ **किंचेति** ॥ अत्रज्यायस्त्वंनामनातिशयितमहत्त्वं । किंतुप्रशस्ततमत्वमुच्यते । ज्यायश्शब्दस्यार्थद्वयेव्युत्पन्नत्वात् । प्रशस्यशब्दस्यातिशायन

स्त्वयाप्युक्तत्वात्तस्यसर्षपादणीयस्त्वेऽनुपाधित्वात् । किंच ''प्रशस्यस्यश्रः । ज्यच । वृद्धस्यचे''त्यत्रवृद्धस्येतिसूत्रेणवृद्धशब्दस्येवज्यचेत्यनेनसूत्रेणप्रशस्यशब्दस्यापिज्यादेशविधानादिहश्रुतावणीयस्त्वंस्वाभाविकं ज्यायस्त्वंत्वतिशयेनप्रशस्यत्वमितिकिंनस्यात् । एतदप्यभिप्रेत्योक्तंभाष्ये ''नचाप्रामाणिकंकल्प्य''मिति । नतुटीकोक्तरीत्याभेदसत्यत्वमात्रमभिप्रेत्य ॥ टीकाक्षरार्थस्तु ।

गु० चोच्येत तदाविरोधेप्राप्तेस्वाभाविकत्वौपाधिकत्वाभ्यांविरोधःपरिहर्तव्यःस्यात् । नचाणुत्वमहत्त्वप्रतिपादनमस्ति । नच ज्यायानित्यनेनैवमहत्त्वंप्रतिपादितमितिवाच्यं । तस्यप्राशस्त्यप्रतिपादकत्वेनमहत्त्वाप्रतिपादकत्वादित्याह ॥ **किंचेति** ॥ नचतल्लिंगमंतर्यामिविषयमित्यादिटीकाऽनुपपन्ना । तत्रचक्षुर्मयत्वादेरंतर्यामिविषयत्वेशंकितेऽर्भकौकस्त्वायोगादितिबाधकांतरमुच्यते । तत्किंचक्षुर्मयत्वस्यांतर्यामिविषयत्वमंगीक्रियतेनवा । नाद्यः । तथासतिचक्षुर्मयत्वायोगाच्चेत्युत्तरटीकानुपपत्तिः । द्वितीयेचक्षुर्मयत्वस्यैवबाधकत्वेनवक्तव्यत्वेनतत्परित्यज्यार्भकौकस्त्वस्यबाधकत्वोक्तिरयुक्ता । तथाचटीकापूर्वोत्तरविरुद्धत्वादनुपपन्नैवेत्यतआह ॥ ॥ ४४३ ॥

प्र० ईयसुन्प्रत्ययेकृते ''प्रशस्यस्यश्र''इतिसूत्रात्प्रशस्यशब्दमनुवर्त्य ''ज्यचे''तिसूत्रेणज्यादेशोविहितः । तदनंतरं ''वृद्धस्यचे''तिसूत्रेवृद्धशब्दस्यापीयसुन्प्रत्ययेपरतः ''ज्यचे''तिसूत्राज्ज्यशब्दमनुवर्त्यज्यादेशोविहितः । तथाचज्यायानित्यस्यातिशयेनवृद्धिमत्त्वमतिशयेनप्रशस्तत्वंचेतिद्वयमप्यर्थोभवति । तथाचप्रकृतेऽतिशयितवृद्धिमत्त्वरूपार्थंहित्वाप्रशस्ततमत्वरूपार्थमादायाणीयस्त्वंस्वाभाविकमित्यंगीक्रियतामित्यर्थः । इदमंगीकृत्योक्तं । वस्तुतस्तुपूर्वोक्तरीत्याऽणुत्वमहत्त्वयोस्स्वाभाविकत्वेपि नविरोधलेशइतिध्येयं । एतेनयत्केनचिदुक्तं आद्यसूत्रद्वयमेकमधिकरणं । तत्र ''मनोमयःप्राणशरीर''इत्यादिवाक्येमनोमयत्वादियुक्तोजीवःशिवोवेतिविशये ''यथाक्रतुमयःपुरुषोयथाक्रतुरस्मिन्लोकेपुरुषोभवति तथेतःप्रेत्यभवती''तिकर्मवशादिहामुत्रभ्रमतोजीवस्यप्रस्तुतत्वात्सतियथार्थेऽसंकल्पइत्यादिविभागेनसत्यसंकल्पत्वादेरुपपत्तेर्जीवइतिप्राप्ते ''सर्वंखल्विदंब्रह्मतज्जला''नितिसर्वकारणस्योपास्यत्वेनोपदेशाद्विवक्षितसत्यकामत्वादिगुणानामुपपत्तेश्चशिवएवतथाविधइतिसिद्धांतइति । तन्निरस्तं । संशयाद्ययोगेनोदाहरणानौचित्यस्योक्तत्वात् । सूत्राक्षरार्थासामंजस्यस्फुटत्वात् । ''तच्चब्रह्मजलान्साक्षाद्योसौविष्णुर्जलेऽनिति । महाज्ञानात्मकत्वात्तुप्रोक्तोविष्णुर्मनोमयः । यस्माद्बलशरीरोसावतःप्राणशरीरक''इत्यादिस्मृतिविरुद्धत्वाच्च । अनुपपत्तेरित्यादेरधिकरणांतरत्वेऽत्रोक्तार्भकौकस्त्वसंभोगप्राप्त्यादिशंकासमाधानाभावेनसिद्धांतानुत्थितेश्च । अणीयस्त्वस्यासमाधानाच्चेत्यादिध्येयं । यदप्यनुपपत्तेस्त्वित्यादिषट्सूत्र्यधिकरणांतरमितिमत्वा ''पतिंविश्वस्यात्मेश्वरंशाश्वतंशिवमच्युतं । नारायणंमहाज्ञेय''मित्याद्युदाहृत्य नारायणशब्दवाच्योमूर्त्यात्माविष्णुश्शिवोवेतिसंशये ''समुद्रेंतर्विश्वशंभुव''मितिसमुद्रांतस्स्थत्वादिलिंगानामच्युतादिश्रुतीनांसत्त्वेनविष्णुरितिप्राप्ते ''पशूनांपतये वृक्षाणांपतये जगतांपतये विश्वाधिकोरुद्रोमहर्षि''रित्यादौशिवेप्रसिद्धस्यविश्वपतित्वादेर्विष्णावनुपपत्तेश्शिवएवेतिसिद्धांतइति । तदपिन ।

SGDF Sri Gangadhar Digital Foundation

प्र० विष्णौनिरूढश्रुतिलिंगानांबाहुल्येनसंशयादेरयोगात् । विश्वपतित्वादेःपालकत्वेनप्रसिद्धेर्विष्णौ “नतेविष्णोजायमानः यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा । सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणी”त्यादिश्रुतिभिः “श्रियःपतिर्यज्ञपतिःप्रजापतिर्गिरांपतिर्लोकपति”रित्यादिस्मृत्याविष्णोरेवप्रसिद्धेः । “विश्वाधिक”इत्यादिनिरवकाशचतुर्मुखजनकत्वलिंगेनरुद्रशब्दस्यविष्णावेवोपपत्तेः । अस्यस्वपक्षसाधकत्वे “अंतस्तद्धर्मोपदेशा”दित्यादाविवसमन्वीयमानंलिंगंनामवानिर्दिश्यतद्धर्मोपपत्तेरित्यन्वयमुखेनवचनंविनाव्यतिरेकमुखेनसूत्रविन्यासायोगादितिदिक् । ननु “नचतल्लिंगमंतर्यामिविषय”मितिचक्षुर्मयत्वादेरन्यथासिद्धौशंकितायां तत्समाधानमकृत्वाऽल्पौकस्त्वायोगंसमाधायव्यवधानेनतदुक्तिरयुक्तेत्यतआह ॥ **पूर्वमिति** ॥ तात्पर्यंतुप्रागेवविवृतमितिभावः । विवक्षितसूत्रेटीकायां “अतत्वस्यादिमत्वेपितस्यसर्वगतत्वानतिरिक्तत्वेनसाध्यत्वादश्रुतत्वादीनामेवग्रहण”मित्युक्तं । तत्रातत्वस्यसर्वगतत्वरूपत्वंव्यनक्ति ॥ **अतेति** ॥ सातत्यगमनवाचिनोतधातोरचिकृतेऽतेतिभवति । “देशतःकालतश्चैवगुणतश्चापिपूर्तितः । अतइत्युच्यतेविष्णुस्संततोह्यतउच्यत”इत्यैतरेयभा

पूर्वंचक्षुर्मयत्वादिकमंतर्यामिण्यंगीकृत्याल्पौकस्त्वंनयुक्तमित्युक्तं। इदानींजीवधर्मत्वात्तस्यतदपिनयुक्तमित्याह ॥ [२९।१३]चक्षुर्मयत्वाद्ययोगाच्चेति ॥ [१२।१९]सर्वगतत्वानतिरिक्तत्वेनेति ॥ “अतसातत्यगमन”इतिधातोः

गु० पूर्वमिति ॥ अनेनचक्षुर्मयत्वायोगाच्चेत्यत्र तस्यजीवधर्मत्वादितियुक्तिःसूचिताभवति । अप्रतीतेर्व्याचष्टे ॥ **अतसातत्येति** ॥ ननुकथमेकस्मिञ्छरीरेजीवद्वयसद्भावः । तथासतियावद्देहसद्भावमुभयोस्तत्रसद्भावेनोभयकर्मनिर्मितत्वापत्त्यासुखादिभोगस्स्यात् । सर्वस्यापिजीवांतरत्वाज्जीवांतरशब्देनकिंविवक्षितमित्यतोव्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० ष्योक्तवचनाच्चेत्यर्थः । ननुव्रीह्यभिमानिजीवेकुट्टनभर्जनादिनादुःखाभावात्कथंदृष्टांतइत्यतआह ॥ **स्वर्गादिति** ॥ कर्मकर्तृसूत्रे नचैकस्सर्व गतोजीवःसर्वगतंजीवांतरंशंसतीतियोज्यं । “सर्वगततयासर्वजीवाग्रहणापाता”दितिवाक्यंदुर्गमत्वाद्द्वेधाव्याचष्टे ॥ **सर्वेति** ॥ सर्वगतवाक्ये

“संततोह्यतउच्यत”इतिवचनाच्चातत्वंसर्वगतत्वानतिरिक्तमित्यर्थः ॥ [३०।३] व्रीह्यादिगतंजीवांतरवदिति ॥ स्वर्गाच्च्युतःस्थूलशरीरसंबंधार्थपित्रादिशरीरप्रवेशायान्यकर्मनिर्मितव्रीह्यादिशरीरगतोजीवोजीवांतरशब्दा र्थः ॥ [३०।७] सर्वगततयासर्वजीवाग्रहणापातादिति ॥ सर्वजीवानांकर्मत्वाभावेसर्वगतवाक्येसर्वगततया येसर्वजीवाःप्रकृतास्तेषां “सयएवमेतमात्मान”मितिकर्मभूतात्मविशेषणेनैतच्छब्देनग्रहणंनस्यात् । ग्र हणेसर्वजीवानांकर्मत्वापत्तेः । तथाचैतच्छब्दस्यप्रकृतसर्वपरत्वसंभवेतदेकदेशपरत्वमयुक्तमित्यर्थः । यद्वा एतमित्यनेनसर्वजीवानामनिर्देशे एतच्छब्दस्वारस्यार्थंसर्वगतवाक्येपिसर्वगततयासर्वेषांग्रहणंनस्या त् । तथाचसर्वेजीवाःसर्वगताइतिपूर्वपक्षिणायद्गृहीतंतद्धीयेतेत्यर्थः ॥ [३०।८] तंर्थाप्रतीत्यभावेनेति ॥

गु० चष्टे ॥ **स्वर्गाच्च्युतइति** ॥ ननुसर्वजीवग्रहणापातादित्ययुक्तं । तत्रकिंसर्वेषुभूतेष्वितिवाक्येवासर्वगततयासर्वजीवग्रहणमुच्यतेकिंवा एतमात्मानमितिवाक्येवा । नाद्यः । सर्वगतजीवानामेवसर्वजीवसाधारणस्यचक्षुर्मयत्वादेस्तत्रसद्भावेनसर्वगततयासर्वजीवग्रहणोपपत्तेः । नद्वितीयः । तत्रकर्तृव्यतिरिक्तसर्वगतजीवानामेवशंसन कर्मत्वापत्त्याऽनिष्टाभावात् । सर्वेषांसर्वगतत्वेपिकेषांचिदेतच्छब्देनपरामर्शेपिबाधकाभावादित्यतस्तत्रबाधकंवक्तुंव्याचष्टे ॥ **सर्वजीवानामिति** ॥ सर्वगतवाक्या नुसारेणैतमात्मानमितिवाक्यंव्याख्येयमित्युक्तं । इदानीमेतमितिवाक्यानुसारेणसर्वगतवाक्यंव्याख्येयमित्याह ॥ **यद्वेति** ॥ **तद्धीयेतेत्यर्थइति** ॥ अंशेबाधा

SGDF
Sri Gargeshwari Digital Foundation

प्र० सर्वेषुभूतेष्वेतमितिवाक्ये । "तथाप्रतीत्यभावेनक्लिष्टकल्पनाचे"तितदुत्तरवाक्यंव्यनक्ति ॥ **कर्मीभूतेति** ॥ कर्मीभूतजीवसंकोचेक्लिष्टक ल्पनत्वमुपपाद्य यदुक्तंकश्चित्सर्वगतोजीवइतिसएवमित्यत्रतच्छब्देनसर्वगतःकश्चिदितिगृह्यतइतितत्रापिक्लिष्टकल्पनत्वंध्येयमित्याह ॥ **नकेवल मिति** ॥ अवगुरेत् निंदेदित्यर्थः । शिष्टमुपन्यासमुखेनस्पष्टमितिभावः ॥ ७ ॥ **सर्वगतत्वाधिकरणं** ॥ १ ॥ २ ॥ १ ॥

कर्मीभूतात्मविशेषणेनचक्षुर्मयत्वादिनाजीवसामान्यलिंगेनजीवमात्रस्यैवप्रतीतेरित्यर्थः । नकेवलंकर्मत्वंजीवविशेषस्येत्ययुक्तं । किंतुकर्तृत्वमपि । "योवगुरेत्तंशतेनयातया"दित्यत्रैव यःशंसत्यस्यवेदादुग्धदोहाभवंतीतिसामान्येनैवप्रत्यवायश्रवणात् । अन्यथाकेषांचित्प्रत्यवायोनस्यादित्यपिद्रष्टव्यं ॥ ॐसंदृपरोक्षतयाप्रतीयतेवाच्यत्वादिति ॥ धर्माधर्मादेरपिईश्वराद्यपरोक्षत्वान्नव्यभिचारइतिभावः ॥७॥ **सर्वगतत्वाधिकरणं** ॥ १ ॥

गु० दित्यर्थः । तद्यतिरिक्तजीवपक्षांगीकारेशंसनादिकर्तृत्वजीवान्यविवेकस्याशक्यत्वेनप्रतिज्ञायाःसंभावनारूपत्वापत्तेः । विवेकेपिवाकर्तृजीवेषुपरस्माइत्युक्तासज्जीवविशेषेषुचव्यभिचारिणश्चक्षुर्मयत्वादिहेतोःकर्मीभूतजीवविशेषसर्वगतत्वसाधकत्वायोगात् । प्रथमपक्षतात्पर्यमप्येवंज्ञेयं ॥७॥ **सर्वगतत्वाधिकरणं** ॥ १ ॥ २ ॥ १ ॥

प्र० ॥ **ॐअत्ताचराचरग्रहणात्ॐ** ॥ अत्रभाष्यदिशाजन्मादिसूत्रानंतर्यभावेपितत्फलपरमितिभावेनपूर्वेणप्रत्युदाहरणसंगतिमाह ॥ **अत्रेति** ॥ वैषम्यंचाग्रेस्पष्टं । एतेनटीकोक्तरीत्याऽदितिश्रुतेस्सावकाशत्वाल्लिंगस्यनिरवकाशत्वात्स्वतएवलिंगमन्यत्रप्रसिद्धं । नतुश्रुतितः । प्रत्युतलिंगाच्छ्रुतिरेवपूर्वत्रेवान्यत्रप्रसिद्धेतिकथंलिंगस्यतत्साहित्येनतथात्वोक्तिरितिनिरस्तं । पूर्ववैषम्यस्यश्रुतेर्निरवकाशत्वस्यवक्ष्यमाणत्वात् । लोकतश्श्रुतेरन्यत्रनिरूढत्वाच्च । अतएवटीकायांलोकतइत्युक्तं । नचैवंनामैवसमन्वीयतामितिवाच्यं । पादसंगत्यर्थंसर्वात्तृत्वरूपापूर्वगुणलाभार्थंचलिंगस्यैवसमन्वयोक्तेरिति । संशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ "सयद्यदेवासृजततत्तदत्तुमध्रियत । सर्वंवाअत्तीतितददितेरदितित्व"मितिबृहदारण्यकेतृतीयेध्याये "सोदितिर्यद्यदसृजततत्तदत्तुंमनोऽध्रियत । आदच्च । कुतःसर्वात्रीसा सर्वंवाअत्तीतियत्तदेवह्यदितेरदितित्व"मितिटीकोक्तदिशाश्रुतंसर्वसंहर्तृत्वरूपमत्तृत्वमित्यर्थः । प्रसिद्धेऽर्थे अदितिरूपदेवतायां । अदितिशब्दप्रवृत्तिनिमित्तव्युत्पादकमित्यर्थः ॥ **हेतुपरमिति** ॥ यस्मात्सर्वात्तृत्वादेवादितित्वमतस्सर्वमत्तुंमनोकुरुतेतिहेतुपरमित्यर्थः । यद्यन्वाख्यापकंतदातत्रसंभावितकतिपयात्तृत्वस्यैव

॥ **ॐअत्ताचराचरग्रहणात्ॐ** ॥ ॥ अत्रपूर्ववैषम्यप्रदर्शनेनपूर्वपक्षोत्थानादनंतरसंगतिः । अत्र "सर्वंवाअत्तीतितददितेरदितित्व"मित्युक्तमत्तृत्वंकिमदितेर्विष्णोर्वेतिचिंता । तदर्थंसर्वशब्दसंकोचकमस्तिनवेति । तदर्थंसर्वंवाइतिवाक्यंकिंप्रसिद्धेर्थेशब्दान्वाख्यापकंकिंवाप्रसिद्धार्थबाधित्वायोगोक्त्या "तत्तदत्तुमध्रियते"तिप्रतिज्ञातेसर्वात्तृत्वेहेतुपरमिति । पूर्वपक्षस्तु ।

गु० ॥ **ॐअत्ताचराचरग्रहणात्ॐ** ॥ **पूर्ववैषम्येति** ॥ युक्तमादित्यश्रुतिसहचरितमपिसर्वगतत्वंविष्णौ । अंतरित्यत्रतात्पर्यायसवितृशब्दसमन्वयस्यसिद्धत्वात् ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्राह्यत्वेनसर्वशब्दसंकोचाददितिरेवेतिपूर्वपक्षेफलं । यदिहेतुपरंतदासंकोचकाभावाद्विष्णुरेवेतिसिद्धांतेफलमितिस्पष्टत्वान्नोक्तं । अत्र "संदिग्धश्रुतिलिंगाभ्यांनिश्चितलिंगप्रकरणयोरेवबलवत्त्वं । संदिग्धश्रुतिलिंगंचादितिशब्दोदितिलंचे"ति न्यायविवरणेश्रुतेरेवसंदिग्धत्वविशेषणाल्लिंगस्यतदविशेषणात् भाष्यटीकायांन्यायविवरणटीकायांचश्रुतेरंतर्नयन्यायेनसावकाशत्वमुपेत्यलिंगस्यनिरवकाशत्वेनपूर्वपक्षःकृतः । तस्मिन्पक्षेलिंगस्यनिरवकाशत्वं । नन्वत्रेत्यादिनावक्ष्यमाणदिशोपपादनसापेक्षं । श्रुतेरपिनिरवकाशत्वेतुनोपपादनक्लेशइतिभावेन न्यायविवरणस्थचशब्देनद्वयोरपिप्रत्येकंपूर्वपक्षप्रापकत्वभानात्तदनुरोधेन द्वयोरपिप्रत्येकंनिरवकाशत्वंन्यायविवरणाभिमतं । संदिग्धपदेनश्रुतेस्सा

युक्तमादित्यश्रुतिसहचरितमपिसर्वगतत्वंविष्णौ । अंतरित्यत्रतत्पर्यायसवितृशब्दसमन्वयस्यसिद्धेः । अदितिशब्दपर्यायस्यापिनतत्रसिद्धिः । तथाचादितिरेवात्रीतददितेरदितित्वमित्यदितिश्रुतेरदितित्वलिंगाच्च ।

प्र०वकाशत्वोक्तिस्त्वंतर्नयेसजातीयेंद्रादिदेवतावाचिशब्दस्यसमन्वितत्वात्सिद्धांतिनासावकाशयितव्यत्वाभिप्रायत्वादिति । श्रुतेर्निरवकाशत्वंच द्वेधा । पूर्वमदितिशब्दपर्यायस्यापिविष्णावसमन्वयाद्वा श्रुतिबाधकनिरवकाशविष्णुलिंगाभावेनांतर्नयन्यायाविषयत्वाद्वेत्यभिप्रेत्य तत्राद्यंपूर्ववैषम्यप्रदर्शनपूर्वंव्यनक्ति ॥ **युक्तमित्यादिना** ॥ द्वितीयमथवेत्यादिनाग्रेविवरिष्यतइतिध्येयं । अत्रैवंयोजना । अदितिरेवात्तृत्वेनोच्यते । तददितेरित्यादिश्रुतेः । नचादित्यश्रुतौसत्यामपिसर्वगतत्वंविष्णोरिवात्तृत्वमपिकिंनस्यादितिवाच्यं । युक्तमादित्यश्रुतीत्यादि ॥ **सवितृशब्देति** ॥ सवितारंबृहस्पतिमितितत्रश्रवणादितिभावः । एवंश्रुत्यैवपूर्वपक्षेतद्दार्ढ्यायलिंगंचाह ॥ **अदितित्वेति** ॥ श्रुतेर्निरव

SGDF Sri Gargeshwari Digital Foundation

प्र० काशत्वोक्त्यैवादितित्वलिंगस्यविष्णौनिरवकाशत्वंसिद्धमेव । तच्छब्दप्रवृत्तिनिमित्तरूपत्वात्तस्य । अतोनतत्रोपपादनापेक्षेतिभावेनवा अथ वेत्यत्राग्रेस्पष्टमित्यभिप्रेत्यवाऽदितित्वलिंगाच्चेत्येवोक्तं । टीकायामेवमदृष्टेःकिमस्यमूलमित्यतोन्यायविवरणस्यटीकोक्तवर्णकाद्वर्णकांतरमेतदिति भावेनाह ॥ **तदुक्तमिति** ॥ संदिग्धश्रुतिलिंगंचेत्यादिरूपेणतत्रपाठेपिश्रुतिर्लिंगंचेत्यनुवादस्तुसंदिग्धपदं टीकायां "श्रुतेस्सावकाशत्वोक्ति"स्त्वित्यादिनावक्ष्यमाणाभिप्रायमितिसूचयति । श्रुतिर्लिंगंचेत्युक्तस्ययथाक्रमंविवरणमदितिशब्दोऽदितित्वंचेति । नन्वस्त्वेवमुक्तदिशाश्रुतिर्निरवकाशेतिलिंगमपितादृशं । श्रुतिस्सावकाशेतिपक्षेकथमित्याक्षिपति ॥ **नन्विति** ॥ नचश्रुतिर्विष्णुविषयाकिंनस्यादुक्तन्यायादित्यंतरधिकरणन्यायेनशंकितइत्यर्थः । पूर्वपादेप्रतिनयमधिदैवाधिभूतादिशब्दानांविष्णौशक्तिरप्यस्तीत्युच्यतइतिपक्षमुपेत्याह ॥ **श्रुतेर्ब्रह्मणि मुख्यत्वइति** ॥ तात्पर्यमात्रमेवोच्यते । नतुशक्तिरितिपक्षमुपेत्याह ॥ **अमुख्यत्वेवेति** ॥ यद्वालोकरूढ्यभावमदनरूपप्रवृत्तिनिमित्ताभावंवाभिप्रेत्याह ॥ **अमुख्यत्वेवेति** ॥ **लिंगस्यापीति** ॥ तच्छब्दप्रवृत्तिहेतुत्वात्तस्येतिभावः । द्वेधासमाधिमाह ॥ **तीरेति** ॥ संभवे

तदुक्तंन्यायविवरणे । श्रुतिर्लिंगं चादितिशब्दोदितित्वंचेति । नन्वत्रटीकायामुक्तन्यायेनश्रुतेःसावकाशत्वे शंकितेतामनुक्त्वालिंगमुक्त्वानह्यदितिभिन्नस्यादितित्वमितिलिंगस्यनिरवकाशत्वंचोक्तं । तत्कथं । अदितिश्रुतेर्ब्रह्मणिमुख्यत्वेऽमुख्यत्वेवादितित्वलिंगस्यापितत्रमुख्यस्यामुख्यस्यवासंभवादितिचेदुच्यते। तीरादौगंगादिपदप्रयोगेपितीरेगंगात्वमित्यप्रयोगात्श्रुतेर्ब्रह्मण्यमुख्यत्वेनसंभवेपिलिंगस्यामुख्यत्वेनाप्यसंभवइतिटीकाभिप्रायः ।

गु० नचप्रकृतेऽदितिशब्दपर्यायशब्दसमन्वयोंतरित्यत्रसिद्धः। तथापूर्ववैषम्यमित्यर्थः। नन्वंतरधिकरणन्यायेनश्रुतेर्मुख्यत्वाल्लिंगस्यापिब्रह्मणिमुख्यत्वमेवेत्यभ्युपगंतव्यं।

SGDF
Sri Gargeshwari Digital Foundation

प्र० पीत्यभ्युपगमवादंसूचयत्यपिपदेन । वस्तुतोऽदितिशब्दस्यतत्पर्यायस्यवाप्रागसमन्वयेनमुख्यत्वेनब्रह्मणिसंभवायोगात् सजातीयेंद्रादिशब्द समन्वयोक्तिमात्रेणादितिशब्दप्रवृत्तिहेतोर्हरावसिद्धेर्ब्रह्मण्यमुख्यत्वेनसंभवेपीत्युक्तं । मुख्यत्वेनसंभवेतुतच्छब्दप्रवृत्तिनिमित्तस्यादितित्वस्य ब्रह्मणिमुख्यत्वेनसंभवएवस्यादितिभावः । पूर्वमदितित्वंगोत्वादिवज्जातिरूपमित्युपेत्यसमाहितं । अधुनाऽदनकर्तृत्वमित्यभिप्रेत्याह॥ **यद्वेति** ॥ अत्रापिभगवल्लिंगमस्तीत्युपेत्याह ॥ **अंतरधिकरणन्यायेनेति** ॥ पूर्वपादेप्रतिनयंलिंगादिभिर्नाम्नांतत्परत्वमेवोक्तं नतुतत्रशक्तिरपीतिप क्षमुपेत्योक्तं **ब्रह्मपरत्वसंभवेपीति** ॥ **अनश्नन्नित्यादीति** ॥ यद्यपीयंश्रुतिःकर्मफलाशनंनेत्याह । पिप्पलमितिसन्निधानात् । अन्यथो त्तराधिकरणपूर्वपक्षटीकादावेतदुक्तिर्नस्यात् । तथापि “नतदश्नातिकिंचने”त्यादौतात्पर्यं । अतएवादिपदोक्तिः । एतच्छ्रुत्युक्तिस्तूत्तरनय वैषम्योक्त्यर्थशंकोत्थापनायवा सामान्यनिषेधपरत्वमप्यभिप्रेत्यवेति ॥ **दंडापूपेति** ॥ यथादंडंभक्षयतोपूपभक्षणंनदुश्शकं तद्वददनविशे

यद्वा अंतरधिकरणन्यायेनरूढिबाधेनश्रुतेर्ब्रह्मपरत्वसंभवेपि “अनश्न”न्नित्या दिश्रुत्याऽनत्तुर्ब्रह्मणोत्तृत्वरूपादितित्वालिंगंनसंभवतीतिटीकाभिप्रायः । नचक र्मफलात्तृत्वसाधकेनोत्तराधिकरणेनात्रत्यानत्तृत्वशंकादंडापूपनयहतेतिवाच्यं ।

गु० तथाचश्रुतेर्ब्रह्मण्यमुख्यत्वेनसंभवेपिलिंगस्यामुख्यत्वेनाप्यसंभवइतिकथंटीकाभिप्रायइत्यरुचेराह ॥ **यद्वेति** ॥ अभ्यधिकाशंकापक्षानुसारेणवाह ॥ **यद्वेति** ॥ **दंडापूपनयेति** ॥ वेणुदंडापाश्रितमध्यापूपपातनायंदडपातनन्यायेनेत्यर्थः । तथाचवेण्वग्रापाश्रितापूपपातनार्थंनपृथक्प्रयासः । वंशपातनेनैवतत्संभवादितिभावः । ॥ ४४७ ॥

प्र० षसाधनेऽदनसामान्यस्यानायासेनसिद्धत्वादित्यर्थः । एतत्सिद्धांतोपजीवनेनैवतस्यप्रवृत्तेरित्याह ॥ **तत्रेति** ॥ अन्यथाभावार्थाधिकरणेन स्वर्गकामाधिकरणवैयर्थ्यापत्तेः स्वर्गकामनयसिद्धापूर्वोपजीवनेनैवतस्यप्रवृत्तेरितिभावः । एवंटीकोक्तंश्रुतेस्सावकाशत्वेपिलिंगनिरवकाशत्वंद्वे धोपपाद्याधुनाप्रागुक्तन्यायविवरणस्यतात्पर्यांतरमाह ॥ **अथवेति** ॥ सर्वशब्दस्तुयोग्यसर्वपरइतिवक्ष्यमाणरीत्येत्यर्थः ॥ **अदितेरित्यत्रेवेति** ॥

तत्रात्रसिद्धमत्तृत्वसामान्यमुपेत्यकर्मफलात्तृत्वरूपस्तद्विशेषोनेतियाशंका तस्यानिरसिष्यमाणत्वेनात्रत्यपू र्वपक्षदशायांतत्रत्यसिद्धांतानुन्मेषात् । अतएवतत्रभाष्येविशेषाक्षेपार्थं “सर्वात्तैकःपरउक्त”इत्यत्तृत्व सामान्यानुवादः । अथवा वक्ष्यमाणरीत्यात्रविष्णुलिंगाभावेनांतरधिकरणन्यायाविषयतया अदितेरित्यत्रे वादितित्वमित्यत्राप्यदितिप्रातिपदिकस्यप्रसिद्धादितिपरत्वात्ततःपरेणत्वप्रत्ययेनापितद्गतधर्मएववक्तव्यः ।

गु० एवंसामान्यस्यानुस्यूतत्वेनविशेषसिद्ध्यासामान्यस्यापिसिद्धेः । अन्यथाऋग्वेदित्वेसिद्धेपिब्राह्मण्याभावशंकास्यादितिभावः ॥ **तत्रेति** ॥ दंडस्यापूपार्थमेवहन्तव्यत्वा त्कर्मफलात्तृत्वस्यात्तृत्वसामान्यसिद्ध्यर्थमेवसाधनात् । सर्वात्तृत्वकर्मफलभोक्तृत्वयोःप्रत्येकंस्वप्रधानत्वेनासिषाधयिषितत्वात् सामान्यविशेषभावस्यचपौर्वापर्यमात्रनि मित्तत्वान्नान्यतरेणान्यतरगतार्थतेतिभावः । ननुचांतरधिकरणन्यायोनिरवकाशलिंगेनसावकाशश्रुत्यादिबाधः । तथाचतत्तच्छब्दप्रवृत्तिनिमित्तस्यभगवद्गतत्वात्सर्वे षामपिशब्दानांभगवतिमुख्यत्वमित्यप्यंतरधिकरणन्यायः । तत्रपूर्वाधिकरणइवनात्रनिरवकाशब्रह्मलिंगमस्ति । येनादितिश्रुतेर्भगवतिमुख्यत्वंस्यात् । नापितच्छ ब्दप्रवृत्तिनिमित्तस्यभगवद्गतत्वेनभगवतितच्छब्दस्यमुख्यत्वं । अनश्नन्नन्यइतिचश्रुत्याऽनत्तृत्वेनप्रमितेब्रह्मण्यदितिशब्दप्रवृत्तिनिमित्तस्यसर्वात्तृत्वस्याभावात् । तथाचकथमंतरधिकरणन्यायेनश्रुतेर्भगवतिमुख्यत्वमित्यपरितोषादाह ॥ **अथवेति** ॥ ननुप्रातिपदिकस्यप्रसिद्धादितिपरत्वेपित्वप्रत्ययस्यतद्गतधर्मप्रतिपादकत्वंकुतः ।

SGDF Sri Gangadharendra Digital Foundation

प्र० श्रुतिबाधकलिंगाभावेनांतर्नयन्यायविषयत्वेश्रुतेर्विष्णौनिरवकाशत्वाद्यथाप्रसिद्धादितिदेवतापरत्वंतद्वदित्यर्थः । तावतावाक्यस्यकोर्थ इत्यतआह ॥ **एवंचेति** ॥ श्रुतेःप्रसिद्धार्थत्वेसतीत्यर्थः ॥ **तद्दध्नइति** ॥ "एतदस्मैदधिकुरुतेत्यब्रवीत् । तदस्मैदध्यकुर्वन् । तदेनमधिनोत् । तद्दध्नोदधित्व"मितिपूर्ववाक्येप्रकृतस्यप्रसिद्धस्यैवदध्नः "तदेनमधिनोत्"धिनुपुष्टौ अपुष्णात् । धिवि प्रीणने अप्रीणाद्वा । तत्पोषकत्वाद्येवप्रसिद्धदध्नोदधिपदवाच्यस्यदधित्वं दधिपदप्रवृत्तिनिमित्तमितिप्रसिद्धस्यैवदधिपदेनोद्देशात्तद्वाक्यंयथा तत्रतच्छब्दान्वाख्यानपरं तथेदमपिदेवमातर्यदितावदितिशब्दप्रवृत्तिनिमित्तोक्तिपरमित्यर्थः । एतेन "अदितेरदितित्वमितिहिश्रूयते । त्वप्रत्ययश्चजातेर्वाचकः । यथापृथिवीत्वंगोत्वमित्यादौ । तदसंभवेस्वरूपस्यैव । यथाऽऽकाशत्वंचंद्रत्वमित्यादौ । नचादितित्वंजातिःसंभवति । व्यक्तेरभेदात् । ततोदितित्वमदितेस्स्वरूपमेव । नचादितिस्वरूपमीश्वरस्यभवति । अत्यंतभिन्नत्वात् । नचादितिशब्दोभगवत्परइत्यनुपपत्त्यभावः । अदितित्वेनादितिशब्दस्यतत्रविधित्सितत्वेनानुवादानुपपत्तेः । अन्यथाऽन्योन्याश्रयप्रसंगादिति । पूर्वपक्षीमन्यत"इतिन्यायविवरणटीकावि

एवंच "तद्दध्नोदधित्व"मित्यादाविवप्रसिद्धादित्युद्देशात्प्रसिद्धार्थएवशब्दान्वाख्यानस्याकांक्षितत्वाच्च । श्रुतिर्लिंगंचनिरवकाशमितिन्यायविवरणाभिप्रायः । अतएवन्यायविवरणस्थचशब्दस्वारस्यं ।

गु० कुत्राप्यदर्शनादित्यतआह ॥ **एवंचेति** ॥ **प्रसिद्धादित्युद्देशादिति** ॥ प्रसिद्धामदितिमुद्दिश्येत्यर्थः । ननुचादितिर्देवतामयीत्यादावदितिशब्दस्यभगवत्यपि प्रयोगोस्तीत्यतआह ॥ **प्रसिद्धार्थएवेति** ॥ **अतएवेति** ॥ श्रुतिलिंगयोरुभयोरपिनिरवकाशत्वादेवेत्यर्थः । नन्वेवंटीकोक्तायाःसावकाशत्वोक्तेःकागतिरित्यत ॥ ४४८ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० वृता । टीकाविरोधंनिराह ॥ **टीकायामिति** ॥ **सजातीयेति** ॥ अतएवन्यायविवरणटीकायां “नचश्रुतिरिंद्रादिश्रुतिरिवविष्णौसाव काशे”त्येवोक्तमितिभावः । नन्वत्रसर्वात्तृत्वरूपविष्णुलिंगंनैवेह किंचनेतिविष्णुप्रकरणंच । अतोलिंगप्रकरणाभ्यांश्रुत्यादिबाधेनविष्णुरेवा त्तास्यादित्यतोलिंगस्यसावकाशत्वंतावदाह ॥ **श्रुताविति** ॥ अदितिश्रुत्यदितित्वलिंगरूपबाधकात्संकोचोन्याय्यइतिभावः । बाधकात्सं कोचस्त्वपिसंमतइत्याह ॥ **स्वीकृतश्चेति** ॥ वेदितुरधिकारिणोब्रह्मणइवासंकुचितसर्वादनस्यबाधादितिभावः ॥ **अत्रटीकायामिति** ॥

टीकायांश्रुतेःसावकाशत्वोक्तिस्तु सजातीयदेवतावाचिशब्दसमन्वयस्यसिद्धत्वमभिप्रेत्येतिद्रष्टव्यं । श्रुतौसर्वशब्दस्त्वदित्यद नयोग्यसर्वपरः । स्वीकृतश्चसिद्धांतिनाप्यत्रैवप्रकरणेसर्वस्यैतस्यात्ताभवतिसर्वमस्यान्नंभवतियएवमदितेरदितित्वंवेदेत्युत्तर वाक्यस्थसर्वशब्दस्यसंकोचः । यद्वाश्रुतिबलाददितेरेवासंकुचितसर्वात्तृत्वमस्तु । अत्रचाद्यःपक्षोदितिरपिस्वभोग्यस्यान्नपाना देर्भोक्त्रीतिसुधोक्तः । द्वितीयस्त्वत्रटीकायां । नचाद्यपक्षेभाष्यस्थजन्मादिसूत्रोक्तासंकुचितसर्वसंहर्तृत्वस्यातिव्याप्त्युक्तिरयुक्ते तिवाच्यं । अदितेःस्वातंत्र्येणकतिपयसंहर्तृत्वेब्रह्मणःसर्वसंहर्तृत्वायोगेनकतिपयसंहर्तृत्वस्यलक्षणत्वेनातिव्याप्तिसंभवात् ।

गु० आह ॥ **टीकायामिति** ॥ नन्वेवमदितिशब्दस्यप्रसिद्धादितिपरत्वेसर्वात्तृत्वानुपपत्तिरित्यतःसुधानुसारेणसर्वशब्दार्थमाह ॥ **श्रुताविति** ॥ सर्ववाअत्तीतिश्रुतावि त्यर्थः । नन्वेवंसर्वशब्दस्यादित्यदनयोग्यसर्वपरत्वेसंकोचितत्वंस्यात् । तच्चायुक्तं । असंकुचितार्थसंभवेतत्परित्यागेनसंकुचितार्थकल्पनस्यायुक्तत्वादित्यतआह ॥ **स्वीकृतश्चेति** ॥ टीकानुसारेणसर्वशब्दार्थमाह ॥ **यद्वेति** ॥ **अत्रचाद्यःपक्षइति** ॥ अदित्यदनयोग्यसर्वपरएवश्रुतिस्थःसर्वशब्दइत्याद्यःपक्षइत्यर्थः ॥ **द्वितीयइति** ॥ श्रुतिबलाददितेरेवासंकुचितसर्वात्तृत्वमितिद्वितीयइत्यर्थः । आद्यपक्षेप्यदित्यदनयोग्यसर्वपरएवसर्वशब्दइतिपूर्वपक्षेपीत्यर्थः ॥ **अदितेरिति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अत्तृत्वंविष्णोरन्यस्यवेतिसंशयंप्रदर्श्यान्यस्येत्युपपादनात् । अन्यथाऽन्यस्यापिवेत्युक्तिप्रसंगात् । अंतेलक्षणंनयुक्तमितिसामान्यतउपसंहाराच्चैतदवसीयते । अतिव्याप्तीतिटीकात्वन्यनिष्ठत्वप्रसंगादितिव्याख्येयेतिभावः । टीकायां "संहर्तृत्वापरपर्यायवाच्यमत्तृत्व"मित्युक्तेर्व्यर्थ्यशंकांदर्शयन्संहर्तृत्वरूपत्वंसाधयति ॥ **नचेत्यादिना** ॥ **मृत्युनेति** ॥ मृत्युपदस्यमारकपर्यायत्वादितिभावः । संहारेऽदधातोःशक्तिंचाह ॥ **भक्षणस्येति** ॥ रूढिंचाह ॥ **अद्यतइत्यादिना** ॥ स्मार्तप्रयोगंचाह ॥ **संसर्गेति** ॥ अत्तानिखिलस्यैकएवत्वितिनिखिलपदप्रयोगात्स्रष्टृत्वप्रतियोगित्वात्संहर्तेतिगम्यतइतिभावः । एवंलिंगस्यसावकाशत्वमुक्त्वाप्रकरणस्यापितदग्रेविवक्षुर्निरवकाशत्वंतावदुपेत्योपप

नचादेर्भक्षणार्थत्वेनादितेरत्तृत्वेपिपक्षद्वयेपिसंहर्तृत्वस्यनातिव्याप्तिरितिशंक्यं । "मृत्युनैवेद"मित्युपक्रमेमृत्युशब्दात् "यद्यदेवासृजतत्तत्तदत्तु"मितिचसृष्टिप्रतियोगित्वाद्भक्षणस्यापिसंहारविशेषत्वादूर्णनाभ्यादिवच्चभगवतःसंहर्तृत्वस्यात्तृत्वरूपत्वात् "अद्यतेत्तिचभूतानि ससर्गकालेचकरोतिसर्वसंहारकालेतुतदत्तिभूयः । स्रष्टापातातथैवात्ते"त्यादौसंहारेऽदधातुप्रयोगाच्च । अतएवटीकायां "संहर्तृत्वापरपर्यायमत्तृत्व"मित्युक्तं ।

गु० अयंभावः । किमत्रसर्वसंहर्तृत्वमीश्वरलक्षणमुतकतिपयसंहर्तृत्वं । नाद्यः । अदित्यासंहरणीयवस्तुसंहर्तृत्वाभावेनासंभवात् । नद्वितीयः । कतिपयसंहर्तृत्वस्यादितावपिसद्भावेनातिव्याप्तत्वात् । आद्यपक्षेप्यतिव्याप्त्युक्तिरुपपद्यतइति । ननुटीकायांसंहर्तृत्वापरपर्यायवाच्यमत्तृत्वमित्युक्तं । तत्कथमित्यतस्तदुपपादयितुंशंकते ॥ ४४९ ॥

प्र० त्तिमाह ॥ **नैवेहेति** ॥ "नैवेहकिंचनाग्रआसीन्मृत्युनैवेदमावृत मासीदशनायया अशनायांहिमृत्युः तन्मनोऽकुरुतात्मन्वीस्यामिति सोर्चन्नचरत् तस्यार्चतआपोजायंत तद्यदपांशरआसीत् तत्समहन्यत साप्रृथिव्यभवत् तस्यामश्राम्यत् सोकामयतद्वितीयोमआत्साजायेतेति समनसावाचामिथुनंसमभवदशनायांहिमृत्युः तद्यद्रेतआसीत्ससंवत्सरोभवत् तंजातमभिव्याददात् सभाणमकरोत् सैववागभवत् सऐक्षत यदिह्वाइममभिमंस्येकनीयोन्नंकरिष्यइति सतयावाचातेनात्मनेदंसर्वमसृजते"तिमृत्युमात्रावशेषात्संवत्सरसृष्टिसंवत्सरादनोद्यमादिश्रवणेनप्रकरणस्यवैष्णवत्वेपीत्यर्थः ॥ **दर्शपूर्णमासेति** ॥ तृतीयस्यतृतीयपादेऽष्टादशेऽधिकरणे "पौष्णंपेषणंविकृतौप्रतीयेताचोदनात्प्रकृतौ" इतिसूत्रेदर्शपूर्णमासप्रकरणे "पूषाप्रपिष्टभाग"इतिश्रुतंपूषदेवताकंपेषणं । तत्रप्रकरणेपूषाभावाद्यत्रपूषातत्रवाक्यमुत्कृष्यतइत्युक्तं । तद्वदिदमप्यतउत्कृष्ययत्रादितिप्रकरणमस्तितत्रनिवेश्यतामित्यर्थः ॥ **अभिक्रामममिति** ॥ तत्रैवाद्यपादे "कर्तृगुणेतुकर्मासमवायाद्वाक्यभेदः

"नैवेहकिंचनाग्रआसी"दित्यादिनास्यप्रकरणस्यवैष्णवत्वेपिदर्शपूर्णमासप्रकरणात् "पूषाप्रपिष्टभाग"इत्युक्तंपौष्णंपेषणमिवविष्णुप्रकरणात् "तददितेरदितित्व"मित्यादिकमुत्कृष्यतां । प्रकरणाच्छ्रुतिलिंगयोर्बलीयस्त्वात् । अथवा यथा "अभिक्रामंजुहोती"तिदर्शपूर्णमासप्रकरणेश्रुतस्याभिक्रमणस्यतदंगप्रयाजान्वयार्थप्रयाजस्यावांतरप्रकरणं तथाविष्णुप्रकरणेदितेरवांतरप्रकरणमस्तु ।

गु० ॥ **नचेति** ॥ पक्षद्वयंप्रागुक्तं । द्वितीयसूत्रोक्तंहेतुमन्यथयति ॥ **नैवेहेति** ॥ ननुचदर्शपूर्णमासप्रकरणात्पूष्णश्चातुर्मास्येपूत्कर्षःसंभवति । अत्रचतददितेरदितित्वमित्यादेःकुत्रोत्कर्षःस्थानाभावादित्यतआह ॥ **अथवेति** ॥ नन्वभिक्रमणस्यावांतरप्रकरणंचतस्यप्रयाजादिविषयैर्वाक्यैःपूर्वपश्चाच्चसंदृष्टत्वात् । अत्रतदभावात्कथ

SGDF
Shri Gargeshwari Digital Foundation

प्र० स्या"दितिनवमेधिकरणे दर्शपूर्णमासप्रकरणेप्रयाजसमीपे "अभिक्रामंजुहोती"तिहोमानुवादेनविधीयमानमभिक्रमणंप्राकरणिकसर्वहोमांगमुतप्रयाजहोमांगमितिसंशये फलाभावेनेत्थंभावतिरोधानेनांगानामित्थंभावाकांक्षानुत्थानात् उत्थानेवातेषामव्यवस्थयाऽन्योन्यांगांगिभावापत्तेः प्रयाजानामवांतरप्रकरणाभावात् सन्निधेश्चदौर्बल्यात् प्रकरणेनदर्शपूर्णमासभावनासंबंधात्तदीयसर्वहोमांगमितिप्राप्ते "समानयत उपभृतः योवैप्रजानांमिथुनंवेदे"त्यभितःप्रयाजसंबंधिनोऽभिक्रमणस्यान्यत्रान्वयायोगात् प्रयाजानामवांतरप्रकरणसंभवेनाव्यवस्थाप्रसंगाभावात् प्रबलेनावांतरप्रकरणेनप्रयाजहोमांगमितिसिद्धांतितं तद्वदित्यर्थः । प्रकरणस्यवैष्णवत्वमभ्युपेत्योक्तं । इदानींतदेवनेत्याह ॥ **यद्वेति** ॥ सयद्यदेवेति पुल्लिंगव्यपदेशस्तुपुंशक्तियोगाद्युज्यतइतिभाष्यादावेवोक्तं । विवरिष्यतेचाक्षरार्थोक्तिप्रस्तावइतिभावः । "संदिग्धश्रुतिलिंगाभ्यांनिश्चितलिंगप्रकरणयोरेवबलवत्त्वमितिन्यायविवरणंहृदिकृत्वाभाष्यटीकयोरुक्तेपूर्वोत्तरपक्षप्रापकयोःसावकाशत्वनिरवकाशत्वेसंगृह्णाति ॥ **सर्वेति** ॥ आदिपदेनप्रकरणं । अत्रैवंध्येयं । अत्ताविष्णुरेव । सर्ववाअत्तीत्यद्यतयाचराचराख्यसर्वग्रहणान्नैवेहकिंचनेतिविष्णुप्रकरणाच्च । ताभ्यामदितिश्रुतिलिंगयोर्बाधात् । नचतेसावकाशेश्रुतिलिंगेतुनिरवकाशेइत्युक्तमितिवाच्यं । यतस्सर्वात्तृत्वादिसंबध्यतइतिश्रुतेस्सावकाशत्वोक्त्यैवतच्छब्दप्रवृत्तिनिमित्तस्यादितित्वलिंगस्यापितत्सिद्धमित्यदितिशब्दस्त्वित्येवोक्तं । ननुसर्वशब्दसंकोचेनादितावपि

यद्वाऽदितिश्रुतिबलान्नैवेहेत्यादिमहाप्रकरणमप्यदितेरेवेति ॥ सिद्धांतस्तु ॥ सर्वात्तृत्वादिकंनैवविष्णोरन्यस्ययुज्यते । विष्णावदितिशब्दस्तुश्रुतःश्रुत्यंतरेस्फुटं ॥ १ ॥

गु० मवांतरप्रकरणत्वमित्यरुचेराह ॥ **यद्वेति** ॥ तद्दध्नोदधित्वमित्यत्रप्रातिपदिकस्यप्रसिद्धदधिपरत्वस्यत्वप्रत्ययस्यचतद्गतधर्मपरत्वस्यचदर्शनेन प्रकृतेपिसर्ववाअत्तीत्या

SGDF Sri Gargeshwari Digital Foundation

प्र० लिंगंयुक्तमित्युक्तमित्यतस्सूत्रेचराचरेतिश्रौतसर्वशब्दार्थोक्त्यासूचितमाह ॥ **नचबाधंविनेति** ॥ यातुप्रकरणादुत्कर्षोक्तिस्तत्राह ॥ **पूषादीति** ॥ यदप्यभिक्रमणदृष्टांतेनावांतरप्रकरणकल्पनंतद्वैषम्यमाह ॥ **अवांतरेति** ॥ सच संदंशः । पूर्वार्धंव्यनक्ति ॥ **भाष्येति** ॥ "एकःपुरस्ता"दित्यादिश्रुत्या "स्रष्टापाते"त्यादिस्मृत्येत्यर्थः । ननूक्तमत्रप्रसिद्धार्थएवेत्यादितत्राह ॥ **अन्वाख्यानेति** ॥ अदितिशब्दव्युत्पादनपक्षेपीत्यर्थः । प्रसिद्धादितिपरत्वत्यागेनापूर्वार्थस्वीकारायैव "सर्ववाअत्ती"तिसर्वात्तृत्वरूपप्रवृत्तिहेतुकथनादित्यर्थः । एतेन सर्ववा

नचबाधंविनासर्वशब्दःसंकोचमर्हति। पूषादिवच्चनात्रास्तिबाधोयेनापकर्षणं ॥२॥
अवांतरप्रक्रियातुसंदंशात्कल्प्यतेसच । अभिक्रामंजुहोतीतिवाक्येस्तिप्रकृतेतुन
॥ ३ ॥ भाष्योक्तश्रुत्यादिनासर्वात्तृत्वंनिरवकाशं । अन्वाख्यानपक्षेपिदेवमातरि
रूढिबाधार्थमेवेहसर्वात्तृत्वमेवादितिशब्दप्रवृत्तिनिमित्तमितिश्रुत्यास्वयमेवोक्तत्वाद
दितिश्रुतिरदितित्वलिंगंचविष्णावेवमुख्यं । नचाबाधेश्रुत्युक्तंनिमित्तंत्यागार्हं ।

प्र०अत्तीतियत्सर्वात्तृत्वमदितेरदितिशब्दार्थस्यविष्णोरदितित्वमदितिशब्दप्रवृत्तिनिमित्तमितिश्रुत्यर्थउक्तोभवति । ननुश्रुतौसर्वात्तृत्वरूपनिमित्तोक्तावपिनतन्निमित्तेनविष्णौयौगिकत्वंयुक्तं । किंतुजातिनिमित्तकएवायंशब्दः । दधिशब्देतथादर्शनेनरूढेर्बलवत्त्वादित्यतआह ॥ **नचेति** ॥ कंपनादित्यत्राज्ञरूढितोवैदिकयोगबलवत्तायावक्ष्यमाणत्वादितिभावः । एतेन तीरादौगंगादिपदप्रयोगेपीत्यादिनोक्तशंकाऽपास्ता श्रुतिरेवबा

SGDF
Sri Gargeshwari Digital Foundation

प्र० धिकेत्यतआह ॥ **अनश्नन्निनतीति** ॥ अशुभभोक्तृत्वनिषेधपरतयागतिर्वक्ष्यतइत्यर्थः । नतदश्नातीत्यस्यत्वक्षरनयेगतिर्वक्ष्यतइत्यपिध्येयं । एतेनयद्वेत्यादिनोक्तलिंगनिरवकाशत्वशंकाप्रत्युक्ता प्रागुक्तदधिदृष्टांतंप्रत्याह ॥ **यदेनमिति** ॥ दर्शपौर्णमासप्रकरणेऐंद्रदध्निदधिशब्दनिर्वचनार्थोयमर्थवादः । एनमिंद्रमधिनोदप्रीणयदितियत्तद्दध्नोदधित्वमित्यन्वाख्यानमात्रं । अवयवार्थकथनमात्रं । ननुपूर्वत्रादितिपदस्यविष्णावेवप्रयोगान्नतत्रनिमित्ताकांक्षा । तथाचविष्णवर्थत्वेऽदितिशब्दस्यतत्राप्रसिद्धत्वेनादितेरित्यनुवादोवाऽदितित्वमित्यत्रनिमित्तोक्तिर्वानयुक्तेत्यतः अत्रश्रुतावदितिपदस्यपूर्वत्राप्रयोगेपिश्रुत्यंतरेप्रयोगसत्त्वेनलोकतोविष्णौप्रसिद्धेस्तत्रनिमित्ताकांक्षायां अदितेरदितिशब्दवाच्यस्यविष्णोस्तत्सर्वात्तृत्वसदितित्वमदितिशब्दप्रवृत्तिनिमित्तमित्यर्थोपपत्तिरितिभावेनाह ॥ **युक्ताचेति** ॥ एतेन "विष्णावदितिशब्दस्त्वित्यर्धंविवृतं । अथवेत्यादिनोक्तश्रुतिलिंगनिरवकाशत्वशंकाचनिरस्ता । "अदितिश्रुतेर्विष्णावपिसावकाशत्वाल्लिंगस्यचादितिशब्दवाच्यत्वमदितित्वमिति

अनश्नन्नित्यादेस्तूत्तराधिकरणेगतिर्वक्ष्यते । "यदेनमधिनोत्तद्दध्नोदधित्व"मित्यादितुयदिप्रसिद्धदधिविषयं तर्हिजातिनिमित्तकस्यदधिशब्दस्येदमन्वाख्यानमात्रं । यदित्वप्रसिद्धविषयंतर्ह्यबाधान्निमित्तपरमेव । युक्ताचादितिशब्दस्य "अदितिर्हींदंसर्वंयदिदंकिंच अदितिर्देवतामयी"त्यादौब्रह्मणिप्रयोगात्तत्रनिमित्ताकांक्षा । नहि

गु० दावदितिप्रातिपदिकस्यप्रसिद्धादितिपरत्वात्ततःपरत्वप्रत्ययस्यतद्गतधर्मपरत्वमेवकिंनस्यादित्यतो दृष्टांतएवासंप्रतिपन्नइत्याह ॥ **यदेनमिति** ॥ अन्वाख्यानमात्रं प्रकृतिप्रत्यययोरर्थकथनमात्रमित्यर्थः । अन्वाख्यानपक्षेपिसर्वात्तृत्वमदितिशब्दप्रवृत्तिनिमित्तमित्ययुक्तं । प्रसिद्धएवार्थेनिमित्तस्याकांक्षितत्वेनब्रह्मणिचादितिशब्दप्रयोगाभावेनतस्यादितिशब्दप्रसिद्धार्थत्वाभावेनतत्रनिमित्तस्यानाकांक्षितत्वादित्यतआह ॥ **युक्ताचेति** ॥ नन्वेवमदितिशब्दस्यब्रह्मणिश्रौतप्रयोगसद्भावेपितस्याकां

॥ ४५१ ॥

प्र० सावकाशत्वा"दितिटीकाचविवृता । ननुविष्णावदितित्वनिमित्तेनैवादितिशब्दस्यविधित्सितत्वेननिमित्तोक्तेःपूर्वमदितेरितिकथमनुवादइति चेन्न । "इग्यणस्संप्रसारणं अग्नयेजुष्टंनिर्वपामी"त्यादाविवभाविसंज्ञयोपपत्तेः । यथोक्तंन्यायविवरणटीकायां "अदितेरितिभाविनीसंज्ञा विज्ञायते । यथाऽस्यसूत्रस्यशाटकंवयेति । अन्यथापरस्यापिदुर्घटमेतत् । अविवक्षितनिमित्तांप्रसिद्धिमाश्रित्यममानुवादस्संभवतीतिचेन्ममापितत्समं । इयांस्तुविशेषः । परस्यलौकिकीप्रसिद्धिर्ममवैदिकीतीति ॥ **लौकिकेति** ॥ तत्रविप्लुतिसंभवात् । निर्दोषवैदिकप्रयोगेतुतदसंभवादितिभावः ॥ **यदाजिमिति** ॥ छंदोगब्राह्मणेज्योतिष्टोमप्रकरणेबहिष्पवमानस्तोत्रनामनिर्वचनार्थोयमर्थवादः । यानिस्तोत्राण्यवष्टभ्यदेवाआजिंयुद्धमीयुः तदेवाज्यानांस्तोत्राणामाज्यत्वमित्यर्थः । "तस्योपनिषत्सत्यमिति । सदित्यन्नं तीत्यमृतं । तेउभेयच्छती"त्यादिरादिपदार्थः । पूर्वंन्यायविवरणटीकारीत्याऽन्यत्रप्रयुक्तादितिशब्दान्वाख्यानपरत्वंविवृतं । इदानीमेतट्टीकोक्तंहेतुपरत्वंविवृणोति ॥ **किंचेति**

लौकिकप्रयोगएवाकांक्षानिमित्तं । "यदाजिमीयुस्तदाज्यानामाज्यत्व"मित्यादावदर्शनात् । किंच । पूर्वत्रादितिशब्दस्यप्रयोगान्नानुशासनं । शब्दस्तुकिंतु

गु० क्षानिमित्तत्वाभावात् । आकांक्षानिमित्तस्यचलौकिकप्रयोगस्यदेवमातरीवब्रह्मण्यभावान्निमित्ताकांक्षानोपपद्यतइत्यतआह ॥ **नहीति** ॥ **यदेति** ॥ तथासत्याज्यैःस्तुवतइत्यत्राज्यशब्दस्यलोकतोघृतमात्रेप्रसिद्धस्यस्तोत्रेलोकतोप्रसिद्धत्वादाकांक्षानिमित्तस्यलौकिकप्रयोगस्याभावात् । यदाजिमीयुरितिप्रवृत्तिनिमित्तकथनमनुपपन्नमित्यर्थः । एवमन्वाख्यानपक्षमेवांगीकृत्यसर्वंवाअत्तीत्यनेनसर्वात्तृत्वरूपमदितिशब्दप्रवृत्तिनिमित्तमेवोच्यतइत्युपपादितं । इदानींतुहेतुपरत्वेपिव्याचष्टे ॥ **किंचेत्यादिना** ॥ ननुपूर्ववाक्येऽदितिशब्दस्याप्रयुक्तत्वेप्यनुशासनंयुज्यते । अदितिर्देवतामयीत्यादौस्थलांतरेप्रयुक्तस्यादितिशब्दस्यनिर्वचनंक्रियतइतिकिंनस्यादित्यतआह

SGDF Foundation

प्र० ॥ पूर्वोक्तात्तृत्वइति ॥ तत्तदत्तुमध्रियत आदच्चेतिपूर्ववाक्योक्तात्तृत्वइत्यर्थः ॥ हेतुरिति ॥ यतस्सर्वात्तृत्वादेवादितिशब्दवाच्यत्वमतस्स र्वात्तृत्वनिमित्तकादितिशब्दवाच्यत्वादेवसर्वमाददितिहेतुरुच्यतइत्यर्थः ॥ स्थलांतरस्थेति ॥ विष्णौश्रुत्यंतरेप्रयुक्तस्येत्यर्थः ॥ हेतुत्व मुक्तमिति ॥ तत्तदत्तुंमनोध्रियत आदच्च । कुतःसासर्वात्रीसा । सर्वमत्तीतियत्तदेवह्यदितेरदितित्वनिमित्तमित्युक्तमित्यर्थः । नचबाधंवि नेत्यर्धंव्यनक्ति ॥ एवंचेति ॥ नकेवलंबाधाभावः । असंकुचितवृत्तित्वेज्ञापकंचास्तीतिभावेनसुधोक्तमाह ॥ पूर्वेति ॥ यदपिस्वीकृतश्च

पूर्वोक्तात्तृत्वेहेतुरिहोच्यते ॥ १ ॥ नहीहपूर्ववाक्येऽदितिशब्दःप्रयुक्तः । येनतदनुशासनंयुक्तंस्यात् । नचतत्तदत्तुमितिपूर्वप्रतिज्ञातसर्वात्तृता यांश्रुत्यंतरेब्रह्मणिप्रयुक्तस्यसर्वात्तृत्वनिमित्तकस्यादितिशब्दस्यहेतूकरणे संभवतिस्थलांतरस्थादितिशब्दस्यनिर्वचनंयुक्तं । अतएवटीकायांविष यवाक्यार्थोक्तिदशायांहेतुत्वमुक्तं । एवंचनसर्वशब्दस्यसंकोचः । बाध काभावात् । पूर्ववाक्येसयद्यदेवासृजततत्तदत्तुमितिवीप्सयाकृत्स्नोक्तेश्च ।

गु० ॥ नचेति ॥ किंचादितिशब्दस्यप्रसिद्धादितिपरत्वेसर्वंवाअत्तीतिसर्वशब्दोनुपपन्नः । नचात्रोक्तश्रुतौसर्वशब्दस्त्वदित्यदनयोग्यसर्वपरइतितत्राह ॥ एवंचेति ॥ किंचमृत्युनैवेदमावृतमासीदित्यादिनास्यप्रकरणस्यवैष्णवत्वाददितिशब्दस्यप्रसिद्धार्थत्वेप्रकरणविरोधः । नचदर्शपूर्णमासप्रकरणात्पूषाप्रपिष्टभागइत्युक्तस्यपौष्णपेष

SGDF Sri Gargeshwari Digital Foundation

प्र० सिद्धांतिनासंकोचइतितत्राह ॥ **सर्वस्येति** ॥ असंभवस्यैवबाधकत्वादितिभावः । पूषादिवच्चेत्यर्थंव्यनक्ति ॥ **नचेति** ॥ उक्तरीत्याश्रुति लिंगयोःसावकाशत्वेनतयोरबाधकत्वादितिभावः । उक्तंचार्थवादाधिकरणे "प्रकरणेसंभवन्नपकर्षोनकल्प्येतविध्यानर्थक्यंहितंप्रती"तिसूत्रे बाधकाभावेऽपकर्षणंनेत्येतदितिभावः । अवांतरेतिश्लोकंव्याचष्टे ॥ **अभिक्रमणस्येति** ॥ "समानयतउपभृत"इतिपूर्वं "योवैप्रयाजानां मिथुन"मितिपश्चाच्चप्रयाजविषयैर्वाक्यैरित्यर्थः । यदपियद्वाऽदितिश्रुतिबलादित्यादि तन्न । प्रकरणस्यनिरवकाशत्वादित्याह ॥**अदितेरिति**॥ टीकाप्रमेयंन्यायविवरणमूलमितिभावेनाह ॥ **तदेतदिति** ॥ **संदिग्धेति** ॥ संदिग्धत्वनिश्चितत्वेसावकाशत्वनिरवकाशत्वे । प्रकरणा

सर्वस्यैतस्यात्तेत्यादौतुसर्वशब्दस्यबाधकवशात्संकोचः । अतएवसूत्रेलाघवायश्रुत्यनुगमायचसर्वशब्देप्रयोक्तव्येपिसर्वशब्दस्य संकोचनिरासायचराचरशब्दःप्रयुक्तः। नचाबाधेपिप्रकरणादुत्कर्षः । अभिक्रमणस्यावांतरप्रकरणंचतस्यप्रयाजविषयैर्वाक्यैः पूर्वपश्चाच्चसंदष्टत्वात् । नचात्तृत्वस्यादितिविषयैर्वाक्यैःसंदंशोस्ति । अदितेरेवमहाप्रकरणमितितु "नेहासीत्किंचने"त्यादिभाष्योक्तस्मृत्यैवनिरस्तं । तदेतदभिप्रेत्योक्तंन्यायविवरणे "संदिग्धश्रुतिलिंगाभ्यांनिश्चितयोर्लिंगप्रकरणयोरेवबलवत्त्व"मिति ।

गु० णस्येव विष्णुप्रकरणात्तददितेरदितित्वमित्यस्याप्युत्कर्षोस्त्वित्यतोवैषम्येणपरिहरति ॥ **नचेति** ॥ दृष्टांतेतुबाधकसद्भावादुत्कर्षइतिभावः । नन्वभिकामंजुहोतीति दर्शपूर्णमासप्रकरणेश्रुतस्याभिक्रमणस्यैतदंगप्रयाजान्वयार्थंप्रयाजस्यावांतरप्रकरणमिव विष्णुप्रकरणेऽदितेरवांतरप्रकरणंकिंनस्यादित्यतआह ॥ **अभिक्रमणस्येति** ॥ अदितिश्रुतिबलान्नैवेत्यादिप्रकरणमपिअदितेरेवेत्यंतिमपूर्वपक्षंनिराकरोति ॥ **अदितेरिति** ॥ ७ ॥ **अत्तृत्वाधिकरणं** ॥ २ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० लिंगस्यबलवत्त्वात्सूत्रक्रमइत्याह ॥ **अत्रचेति** ॥ **अत्रपरैरिति** ॥ मायावादिभिरित्यर्थः । विषयवाक्येऽत्तेतिपदाश्रवणात्तल्लाभमाह ॥ **ओदनेति** ॥ अद्यत्वेसत्यदनसाधनमुपसेचनं । तयोरदनीयवाचित्वात्प्रतिसंबंध्यत्तालभ्यतइत्यर्थः । भोज्यतयाप्रसिद्धोयओदनस्तत्साधने त्यर्थः ॥ **अभोक्तृत्वादिति** ॥ पूर्वत्रसंभोगसूत्रेऽभोक्तृत्वोक्तेरश्नन्नितिश्रुतेश्चेतिभावः ॥ **मायेति** ॥ "मायोपाधेःपरस्यास्तिसंहर्तृत्व"मिति

अत्रचाद्येसूत्रेलिंगोक्तिर्द्वितीयेतुप्रकरणोक्तिरितिस्फुटःसूत्रक्रमः ॥ **अत्रपरैरुक्तं** "यस्यब्रह्मचक्षत्रंचोभेभवतओदनः । मृत्युर्यस्योपसेचन"मितिकाठकवाक्ये ओदनोपसेचनपदाभ्यांसूचितोत्ताजीवएव । अत्तृत्वस्यभोज्यतयाप्रसिद्धौदनसं बंधेनभोक्तृत्वरूपत्वात् । ब्रह्मणश्चाभोक्तृत्वादितिप्राप्ते सत्यमभोक्तृब्रह्म । तथापितदेवात्तृ । अत्तृत्वस्यसंहर्तृत्वरूप त्वात् । तस्याविक्रियेशुद्धेब्रह्मण्यसंभवेपिमायोपाधिकेसंभवात् । भक्तवाचिनश्चौदनशब्दस्यभोक्तृप्रतियोगिभोज्यत्वंनमु ख्यवृत्त्यार्थः । अमुख्यवृत्त्याचेत्तर्ह्योदनगतंसंहर्तृप्रतियोगिसंहार्यत्वमेवार्थोस्तु । एवंचब्रह्मक्षत्रादिपदानांनमुख्यार्थ त्यागः । जीवपक्षेतुतत्त्यागः । नहिकश्चिदपिजीवःसर्वस्यब्रह्मक्षत्रस्यमृत्योश्चभोक्तास्तीतिसिद्धांतइति ॥ **अत्रब्रूमः** ॥

प्र० कल्पतरूक्तेरितिभावः । संहर्तृत्वलाभप्रकारमाह ॥ **भक्तेति** ॥ अन्नवाचिनइत्यर्थः । कोविशेषइत्यतआह ॥ **एवंचेति** ॥ मुख्यार्थत्याग मुपपादयति ॥ **नहीति** ॥ ब्रह्मणस्तुसर्वसंहर्तृत्वंयुज्यतइतिभावः । यदुक्तंमुख्यत्वाविशेषाद्ब्रह्मक्षत्रादिशब्दमुख्यत्वायौदनादिपदस्यसंहार्य त्वमेवार्थोस्त्विति तत्रामुख्यत्वाविशेषेप्यंतरंगत्वाद्भोक्तृत्वप्रतिसंबंधिभोज्यत्वमेवलक्ष्यतां । ब्रह्मक्षत्रादिशब्दस्यमुख्यत्वंचशक्यसंपादमितिभा ॥ ४५३ ॥

प्र० वेनतदीयसिद्धांतरचनांनिरस्यति ॥ **भोक्तृतेति** ॥ अनशनश्रुतेर्गतिमाह ॥ **अभोक्तृत्वमिति** ॥ निविशतामिति "नेर्विश"इत्यासनेपदं । उत्तरार्धव्यक्तिपूर्वपूर्वार्धव्यनक्ति ॥ **अभोक्तृत्वेति** ॥ कोविशेषइत्यतोंतरंगत्वादित्याह ॥ **ओदनेति** ॥ नन्वमुख्यत्वेंतरंगत्वंबहिरंगत्वंवा प्रयोजकमित्यतउपस्थितिवैशेष्यादंतरंगमेवादर्तव्यंनबहिरंगमित्येतदुपपादयति ॥ **नहीति** ॥ इदंगौणवृत्तेरंतरंगस्योपस्थित्युपपादनं । लक्ष णायामाह ॥ **नवेति** ॥ यद्वालौकिकवैदिकोदाहरणप्रदर्शनार्थद्वयं । उक्तमधिकरणशरीरंजन्माद्यस्येतिसूत्रे । एकत्रवचनसंबंधादिभिरंतरं

भोक्तृतापिविशिष्टेस्तुयथासंहर्तृतातव । अभोक्तृत्वंनिविशतांशुद्धेकौटस्थ्यवत्सुखं ॥१॥ अभोक्तृत्वश्रुतेर्निर्विकारत्वश्रुतिवच्छुद्ध विषयत्वसंभवेनमायोपाधिकेसंहर्तृतेवभोक्तृताप्यस्तु । एवंचब्रह्मक्षत्रादिशब्दानांनमुख्यार्थत्यागः । तद्भोक्तृत्वस्यब्रह्मणिसंभवा त् । ओदनादिपदोपस्थापितस्यांतरंगस्यभोज्यत्वस्यापिनत्यागः । नह्यग्निर्माणवकइत्यत्राग्निशब्दःपैंगल्यादिकमिवद्रव्यत्वाद्युपस्था पयति । नवाप्रोद्गातृणामित्यत्रोद्गातृशब्दोंतरंगभूतान्प्रस्तोत्रादीनिवषोडशर्त्विजोलक्षयति । येनात्राप्योदनशब्दःसंहार्यत्वमुप स्थापयेत् । अपिच "सर्वंवाअत्ती"तिमदीयविषयवाक्यइवत्वदीयेवाक्येसूत्रेप्रतिज्ञातोक्ता हेतूकृतंचराचरग्रहणंच नसाक्षादस्ति ।

प्र० गभूतान्प्रस्तोत्रादीनिवबहिरंगभूतान्षोडशऋत्विजोयथोद्गातृशब्दोनलक्षयति तथौदनादिशब्दोपीत्यर्थः । सुधोक्तमुदाहरणानौचित्यंचाह ॥ **अपिचेति** ॥ ओदनोपसेचनशब्दाभ्यामत्तेत्यस्योपलक्षणीयत्वेनोक्तत्वान्नसाक्षादत्तेतिश्रुतं । ब्रह्मक्षत्रादिपदेनलक्षणयाचराचरग्रहणस्योक्तत्वा त्तदपिनसाक्षाच्छ्रुतं । अतोस्मदुदाहरणमेवसूत्रानुगुण्याद्युक्तमित्यर्थः । ननुत्वद्वाक्येपिसर्वशब्दस्यैवश्रवणाच्चराचरशब्दाश्रवणान्नसूत्रानुगुण्य मितिचेन्न । तस्यसंकोचनिवृत्त्यर्थसर्वशब्दव्याख्यानायचराचरेत्युक्तत्वादितिप्रागेवोक्तत्वादितिभावः । द्वितीयसूत्रार्थमप्यनूद्यनिराह ॥

SGDF
Shri Gangadhar ... Digital Foundation

प्र० यच्चेति ॥ उत्तरवाक्यइति ॥ "अजोनित्यश्शाश्वतोयंपुराणोनहन्यतेहन्यमानेपिदेह" इत्यव्यवहितोत्तरवाक्ये । उपलक्षणमेतत् । पूर्वत्रापि "एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयते" इतिजीवस्यैवप्रथमांततयाप्रकृतस्यान्वयाच्च । विपश्चित्त्वविशेषणेनप्रागुक्तज्ञानिनएवान्वयप्रतीतेश्च । "भावाभावौनविदुषोयस्माज्जीवोनकश्चन । नजायतेम्रियतेवापी" त्यादिस्मृतिविरोधाच्चेतिध्येयं । परस्येदंनारभ्यमेवेतिभावेनाह ॥

यच्चोक्तंपरैः "प्रकरणा" दितिसूत्रस्य "नजायतेम्रियतेवाविपश्चि" दितिपरमात्मनएवप्रकृतत्वाच्चसएवात्तेत्यर्थइति । तन्न । नजायतइत्यस्मादुत्तरवाक्ये "नहन्यतेहन्यमानेपिदेह" इतिदेहसंबंधस्य "हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं । उभौतौनविजानीत" इतिहंतृत्वादिभ्रांतेश्चजीवलिंगस्यदर्शनेन "नजायत" इत्यादेर्जीवविषयत्वात् । अत्रापिपरमतेप्यत्तुर्जीवत्वंनिषिध्यब्रह्मत्वोक्तेस्तदैक्यप्रतिकूलताव्यक्तैव ॥ टीकाक्षरार्थस्तु ॥ इतियोजनायामस्तिचोद्यावकाशइति ॥ यद्यपि "सयद्यदेवे" त्यत्रसइत्यस्यसंवत्सराख्यचतुर्मुखपरत्वमेवबृहदारण्यकभाष्येउक्तं । "यद्यद्ब्रह्मासृजत्पूर्वंतत्तदत्तिजनार्दन" इतिस्मृतेः । उत्तरत्र "सोकामयतभूयसायज्ञेनभूयोयजेये" त्यादौचतुर्मुखपरत्वदर्शनाच्च ।

प्र० अत्रापीति ॥ नकेवलंपूर्वत्रेत्यर्थः । एतेनैतदेववाक्यमुदाहृत्यशिवनिष्ठंसंहर्तृत्वमितिवदतःकस्यचिन्मतमपिप्रत्युक्तंबोध्यं । विषयवाक्यानानुगुण्यादेरुक्तत्वादिति । अत्रटीकायांपूर्वपक्षग्रंथेसयद्यदेवेत्यत्रपुल्लिंगानुपपत्तिचोद्यंभाष्यकारीयमाक्षिप्यसमाहितं । तत्राक्षेपबीजप्रदर्शनपूर्वंतद्वाक्यंव्यनक्ति ॥ यद्यपीति ॥ तद्भाष्योक्तस्मृतिमाह ॥ यद्यदिति॥ उत्तरत्रेति ॥ सइत्यस्येत्यनुषज्यते । तच्छब्दस्यसन्निहितपरत्वाच्चतु

SGDF
Sri Gargeshwari Digital Foundation

प्र० मुखस्यचसन्निहितत्वात्तत्परत्वंयुक्तमित्याह ॥ पूर्वत्रापीति ॥ संवत्सरसृष्टमिति ॥ पूर्वत्र "सऐक्षत यदिहवाइममभिमंस्येकनीयोन्नंकरिष्यइति । सतयावाचातेनात्मनेदंसर्वमसृजते"त्यनेन यदीमंसंवत्सरशब्दितंभक्षयामि तर्ह्यल्पमन्नंमेभविष्यति । अतएनमभक्षयित्वातन्मुखेनसर्वसृष्टिंकारयित्वातत्सृष्टमेवसर्वंभक्षयामीतिबुद्ध्यातन्मुखेनसर्वसर्जनाद्भक्षणान्निवृत्तिरवगम्यतइति तदन्यथानुपपत्त्याचचतुर्मुखपरत्वमित्यर्थः ।

पूर्वत्रापि "सतयावाचातेनात्मने"तिप्रथमांतोक्तमृत्युतोपितृतीयांतोक्तसंवत्सरस्याव्यवधानेनप्रकृतत्वाच्च । संवत्सरसृष्टमत्तुमेवमृत्योःसंवत्सरादनान्निवृत्ततयासंवत्सरस्यैवस्रष्टृत्वस्योचितत्वाच्च । कर्तुरपिसंवत्सरस्य भगवत्स्वातंत्र्यविवक्षयातेनेतिकरणत्वेननिर्दिष्टस्यापिसइतिकर्तृत्वेननिर्देशोपपत्तेश्च । तथापिसमानविभक्तिकत्वंपरामर्शेतंत्रमितिभ्रमेणसइत्यनेनादित्याख्यमृत्योरेवपरामर्शइतिपूर्वपक्षेपुल्लिंगानुपपत्तिचोद्यावकाशोस्त्येव । ननुतथापिनचोद्यावकाशः । सऐक्षतेत्यादौपुल्लिंगेनैवतच्छब्देन मृत्युनेतिमृत्युशब्देनचप्रस्तुततयागुरोर्दाराःसमागतास्तेपूज्याइत्यादाविवपुल्लिंगोपपत्तेः । नच "अशनायांहिमृत्यु"रितिस्त्रीलिंगेनाशनायाशब्देन प्रस्तुतत्वात्सइतिपुल्लिंगानुपपत्तिरितिवाच्यं । तथात्वेसिद्धांतेप्येतदनुपपत्तेरितिचेदुच्यते । दारखट्वादिशब्देषुपुल्लिंगस्त्रीलिंगादेःशब्दसाधुत्वैवनत्वर्थसाधुता । नचार्थसाधुत्वेसंभवतिशब्दसाधुत्वमात्रंयुक्तं । एवंचादितौपुल्लिंगोमृत्युशब्दोप्ययुक्तः । परम

प्र० ननुपूर्वतस्यसन्निहितत्वेपितृतीययाकरणत्वेनैवनिर्देशान्नकर्तृवाचिनापरामर्शोयुक्तइत्यतआह ॥ कर्तुरिति ॥ टीकोक्तंस्पष्टीकृत्यतदुपलक्षणमितिभावेनभाष्यंप्रकारांतरेणस्वयमाक्षिप्यसमाधत्ते ॥ ननुतथापीति ॥ कथंतर्हिविष्णावदितिशब्दइत्यतआह ॥ परमेति ॥ पुरुषेतिहेतुगर्भं । अ

SGDF
Sri Gargeshwari Digital Foundation

प्र० दितेरित्यनेनैवतद्वाच्यत्वलाभाददितित्वमितिव्यर्थमित्यतआह ॥ अदितिशब्देति ॥ शिष्टंसुगममितिभावः ॥७॥ अत्तृत्वाधिकरणं ॥२॥ ॥ ॐगुहांप्रविष्टावात्मानौहितद्दर्शनात्ॐ ॥ पूर्वसंगतिमाह ॥ पूर्वत्रेति ॥ क्रियेति ॥ अदनरूपक्रियेत्यर्थः ॥ प्रत्ययेति ॥ द्विवचनरूपेत्यर्थः ॥ क्रियेति ॥ कर्मफलभोक्तृत्वरूपेत्यर्थः । प्रकृतिप्रत्यययोःपौर्वापर्यात्तन्मूलपूर्वपक्षनिरासकयोरप्यधिकरणयोःपौर्वापर्यमित्युक्तंभवति । ननुकर्मफलभोक्तृत्वंलोकतएवान्यत्रप्रसिद्धं । नद्विवचनश्रुतिसाहित्यमपेक्षते । उक्तंचटीकायां "लोकतोन्यत्रप्रसिद्धस्यकर्मफलभोक्तृत्वलिंगस्ये"ति । तत्कथंप्रत्ययश्रुतिबलादन्यत्रप्रसिद्धेत्युक्तिरितिचेदुच्यते । अस्मिन्पादेपूर्वत्रोत्तरत्रचान्यसाहित्येनैवान्यत्रप्रसिद्धेरुक्तत्वादत्रापितथाभाव्यमितिभावेनवा पूर्वसर्वात्तृत्वस्यविष्णावुक्तौतन्मध्यपतितकर्मफलात्तृत्वस्यापिसामान्यतउक्तत्वादन्यत्रप्रसिद्ध्यर्थमन्य

पुरुषेतुस्त्रीलिंगोप्यदितिशब्दःप्रकृत्यधिकरणन्यायेनयुक्तः । तथाचास्तिचोद्यावकाशइतिभावः ॥ अदितिशब्दवाच्यत्वमिति ॥ अदितिशब्दप्रवृत्तिनिमित्तमित्यर्थः ॥ ७ ॥ अत्तृत्वाधिकरणं ॥ २ ॥ ॥ ॐगुहांप्रविष्टावात्मानौहितद्दर्शनात्ॐ ॥ ॥ पूर्वत्रादितिप्रातिपदिकश्रुतिबलादन्यत्रप्रसिद्धक्रियालिंगसमन्वयउक्तः। अत्रतुपिबंताविति प्रत्ययश्रुतिबलादन्यत्रप्रसिद्धक्रियालिंगसमन्वयउच्यतइत्यवांतरसंगतिः ।

गु० ॥ ॐगुहांप्रविष्टावात्मानौहितद्दर्शनात्ॐ ॥ प्रातिपदिकार्थस्यकर्मफलभोक्तृत्वस्यब्रह्मण्यसंभवेहेतुःकर्मबंधरहितइति । प्रत्ययार्थभूतद्वित्वस्यब्रह्मण्यसंभवेहे

प्र० साहित्यमावश्यकं । अतएवटीकायां "नचसर्वात्तृत्वेनतद्बाधः । श्रुतेर्निरवकाशत्वा"दितिद्विवचनश्रुत्यैवबाधश्शंकितः । लोकतइतिटीकातु प्राग्विशिष्यानुक्तत्वाशयेतिभावेनवा लोकतोन्यत्रप्रसिद्धत्वेप्यन्यसाहित्येनाप्यन्यत्रप्रसिद्धेस्सत्वात्तदभिप्रायेणवैतदुक्तिरिति । यद्यपिपूर्वत्रप्रातिपदिकार्थप्रत्ययार्थयोर्विष्णौसंभवेपीहतयोरसंभवादितिपूर्ववैषम्येणपूर्वपक्षप्रवृत्तेःप्रत्युदाहरणरूपापिवक्तुंशक्या । तथापिसावक्ष्यमाणदिशासुज्ञानेतिनोक्ता । ननुतथापि "सर्वात्तैकःपरउक्त"इतिभाष्ये "तद्यदाविष्णोरन्यस्यैवस्यात्तदानतस्यसर्वात्तृत्व"मितिटीकायांचपूर्वाक्षेपस्यदर्शितत्वात्तद्विरोधः । नचतत्प्रयोजनमात्रपरं । इहोभयपरत्वेपितस्यबाधकाभावादितिचेत्सत्यं । तस्यवक्ष्यमाणदिशोपपादनसापेक्षत्वेनझडितिसुज्ञानत्वाभावेनतदपरित्यागेनैवसंगत्यंतरकथनमेतदित्यदोषः । ननुनप्रत्ययश्रुतिबलादन्यत्रप्रसिद्धता । प्रत्ययाज्जीवएवेत्यप्रतीतेः । तस्य

अत्रपिबंतौकिं

प्र० द्वित्वबोधकत्वेनजीवेश्वरोभयप्रापकत्वादितिचेन्न । सिद्धांतकोटितोन्यत्रप्रसिद्धेरेवान्यत्रप्रसिद्धशब्दार्थत्वादत्रविष्णोरेवसिद्धांतकोटित्वेनजीवसहितस्यतस्यततोन्यत्वात् । अतएवद्विवचनश्रुत्याकर्मफलात्तृत्वमुभयत्रप्रसिद्धमित्यपिचोद्यंनिरस्तं । विष्णोरेवेतिसिद्धांतकोटौकर्मफलात्तृत्वस्यद्विवचनश्रुत्याऽप्राप्तेः । तथाद्वयोःप्राप्तत्वेपिजीवेश्वरावित्यस्यन्यायेनैवव्युत्पाद्यत्वादिति । विषयसंशयटीकांव्यनक्ति ॥ अत्रेत्यादिना ॥ "ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्धे । छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिनाचिकेता"इत्यत्रकाठकेऋतपानकर्तृत्वेनोक्तौ विषयइत्यर्थः । श्रुत्यर्थष्टीकायांस्पष्टः । ननुगुहांप्रविष्टावित्येतदेवधर्मीकृत्यसंदिह्यतां । तथाचसौत्रनिर्देशोपिसाक्षात्संगतस्स्यात् । अन्यथा

SGDF Sri Gangadhar Digital Foundation

प्र० पिबंताविति ब्रूयात् । नचतस्यब्रह्मलिंगत्वेनसंशयायोगः । गुहाप्रविष्टत्वस्य "हृदिह्येषआत्मे"ति जीवेपिसंभवात् । द्विवचनश्रुतिबलेनगुहाप्रविष्टत्वंजीवेश्वरयोरितिपूर्वपक्षसंभवाच्चेतिचेन्मैवं । गुहाप्रविष्टत्वस्यसर्वत्रप्रसिद्धेतिनयेविष्णोस्सिद्धत्वात्तत्समन्वयेऽपूर्वगुणालाभात् । पातृत्वसमन्वयेतुकर्मफलभोक्तृत्वस्यापूर्वगुणस्यलाभात् । प्रागुक्तलक्षणस्यसाक्षादाक्षेपसंभवाच्च । तत्रप्रातिपदिकार्थस्यप्रत्ययार्थस्यचद्वयोरप्यनुपपत्त्यापूर्वपक्षेविशेषहेतुसत्वाच्च । अतएवसूत्रेआत्मपदेनादेयंमातीतिव्युत्पत्त्यापातृत्वमुच्यते । वक्ष्यमाणदिशागुहाप्रविष्टत्वस्यविष्णावेवप्रसिद्ध्यासंशयायोगाच्च । सौत्रनिर्देशस्यतुगतिर्वक्ष्यतइति ॥ **जीवेश्वराविति** ॥ एतेन "विष्णोरन्यस्यवे"तिटीकाविष्णोरेवान्यस्यापिवेतिव्याख्येयेत्युक्तंभवति । ननुबुद्धिजीवौप्राणजीवौबुद्धिप्राणौवासंभवतः । कथंजीवेश्वराविति विशिष्योक्तिः । मैवंपातृत्वेनैकस्यजीवत्वावश्यंभावे

जीवेश्वरौकिंवेश्वररूपविशेषावितिचिंता । तदर्थंगुहावेशब्रह्मशब्दादिकंकिममुख्यंकिंवाऽमुख्यमिति । तदर्थंपिबत्प्रातिपदिकार्थभूतंभोक्तृत्वंकिंब्रह्मणिनयुक्तमुतयुक्तमिति । तदर्थमभोक्तृत्वश्रुतिर्ब्रह्मणिभोक्तृत्वमात्रनिषेधपरोताशुभभोक्तृत्वनिषेधपरेति ।

प्र०नगोर्द्वितीयेनभाव्यमित्यादौसजातीयस्यैवात्रापिसजातीयस्यैवद्वितीयस्येश्वरस्यग्राह्यत्वात् । नचजीवांतरमेववेतिग्राह्यमितियुक्तं । एकस्मिन्देहेभोक्तृजीवद्वयायोगात् । नचचैद्यादौजीवद्वयंदृष्टमितिवाच्यं । तस्यप्रबलनिमित्तादिनाकाचित्कत्वेनप्रतिशरीरंजीवद्वयायोगात् । ब्रह्मप्रकरणाच्चतस्यैवद्वितीयस्योचितत्वादितिभावः ॥ **रूपविशेषाविति** ॥ ईश्वरद्वयाभावेनेश्वरावित्यनुक्त्वारूपविशेषावित्युक्तं ॥ **ब्रह्मशब्दादिकमिति** ॥ "यस्सेतुरीजानानामक्षरंब्रह्मतत्पर"मित्युक्तसेतुत्वादिरादिपदार्थः । मुख्यमितिचिंतानंतरंमुख्यत्वेबाधकमस्त्युतनेतिचिंतास्फुटत्वान्नोक्ता ॥ **श्रुतिरिति** ॥ अनश्नन्नित्यादिश्रुतिर्यदिभोक्तृत्वसामान्यनिषेधपरा तर्हिप्रातिपदिकार्थभोक्तृत्वायोगात्पिबत्प्रातिपदिकार्थरूप

SGDF
Sri Gargeshwari Digital Foundation

प्र० बाधकसत्त्वेनब्रह्मशब्दादेर्मुख्यत्वायोगेनजीवेश्वराविति पूर्वपक्षेफलं । यदिविशेषनिषेधपरातदाब्रह्मणिभोक्तृत्वयोगेनबाधकाभावाद्ब्रह्मशब्दादेर्मुख्यत्वेनेश्वररूपविशेषाविति सिद्धांतेफलमितिस्फुटत्वान्नोक्तं । अत्रद्वौपूर्वपक्षौ । प्रातिपदिकार्थमुपजीव्यप्रवृत्तःप्रत्ययार्थमुपजीव्यप्रवृत्तश्चेति । आत्मानाविति प्रातिपदिकप्रत्ययाभ्यांद्वयोर्गतेर्वक्ष्यमाणत्वात् । तत्राद्योपयुक्तचिंतापरंपरेयं । द्वितीयोपयुक्तामाह ॥ **तथेति** ॥ किंवामुख्यमितिचिंतानंतरमियंचिंताध्येया । यदिद्विवचनंनयुक्तं तदाबाधकसत्त्वेनब्रह्मशब्दादेरमुख्यत्वेनजीवेश्वराविति फलिष्यति । यदितुयुक्तंतदाबाधकाभावाद्ब्रह्मशब्दादेर्मुख्यत्वेनेश्वररूपविशेषाविति फलिष्यतीतिभावः । नन्वियंचिंताप्रातिपदिकार्थभूतंभोक्तृत्वंद्विवचनंचनयुक्तमुतयुक्तमि

तथाद्विवचनंकिंब्रह्मणिनयुक्तमुतयुक्तमिति ॥ पूर्वपक्षस्तु ॥ युक्तंपूर्वोक्तमत्तृत्वं ब्रह्मणि । प्रातिपदिकार्थस्यसंहर्तृत्वस्यप्रत्ययार्थस्यैकत्वस्यचसंभवात् । इहतुप्रातिपदिकार्थः कर्मफलभोक्तृत्वंप्रत्ययार्थोद्वित्वंचकर्मबंधरहितेनिर्भेदेचब्रह्मणिनयुक्तं ।

प्र० तिपूर्वत्रैवनिवेश्यतामितिचेन्न । तदर्थमभोक्तृत्वश्रुतिरितिवक्ष्यमाणचिंतायाअनन्वयापत्तेः । तस्याःप्रातिपदिकार्थमात्रविषयत्वादिति । आत्मानाविति सौत्रद्विवचनांतात्मपदेनपिबंताविति श्रुतप्रकृतिप्रत्यययोर्द्वयोरपिगत्युक्त्या तदनुरोधेनटीकायामुक्तंद्वाभ्यांपूर्वपक्षंटीकासूचितपूर्ववैषम्योक्तिपूर्वंव्यनक्ति ॥ **युक्तमिति** ॥ अत्तीत्यत्रधातुरूपप्रकृत्यर्थस्यतिङ्प्रत्ययार्थस्येतिवा अदितेरित्यदितिप्रातिपदिकार्थस्यसुप्रत्ययार्थस्येतिवार्थः ॥ **इहतुप्रातिपदिकार्थइति** ॥ ऋतपिबत्प्रातिपदिकयोरर्थइत्यर्थः । ननुभेदाभावेपिब्रह्मणिद्वित्वंयुज्यतांकोदोषइत्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० **अन्यथेति** ॥ द्वितीये "पृथक्त्वनिवेशात्संख्ययाकर्मभेदःस्या"दितिद्वितीयपादीयसप्तमाधिकरणे "सप्तदशप्राजापत्यान्पशूनालभत" इति वाक्येकिंसप्तदशपशुद्रव्यकएकोयागउतैकैकपशुद्रव्यकास्सप्तदशयागाइतिसंशये प्राजापत्यशब्देनदेवतासंबंधोपसर्जनकद्रव्यमेवोच्यते । यच्च प्रधानंतस्यैवार्थांतरेणबहुत्वेनान्वयोनोपसर्जनदेवतासंबन्धस्य । तथाचबहुभिःपशुभिर्व्यासज्यैकादेवतासंबध्यते । द्रव्यदेवतासंबंधैक्यादेको यागइतिप्राप्ते प्रथममेवप्रकृतिप्रत्यययोरन्वयाद्देवताविशिष्टमेवद्रव्यंप्राजापत्यशब्देनाभिहितं । पश्चाद्विशिष्टेनरूपेणसंख्ययान्वेति । तथाच भिन्नैर्द्रव्यदेवतासंबंधैर्भिन्नाएवयागाःकल्प्यंते । एवंचसतिचोदकावगतमेकपशुनिष्पन्नैकादशावदानद्रव्यकत्वंयागस्यानुगृहीतंभवति नान्य थेतिसिद्धांतितं । यदिपिबंतावित्यत्रद्वित्वसंख्ययाभेदोनस्यात्तदासंख्ययाकर्मभेदोनस्यादित्यर्थः । आदिपदेन "द्वासुपर्णा द्वेब्रह्मणीवेदितव्ये" इत्यादौचेतनभेदोनस्यादितिगृह्यते । नन्विदमानंदमयाधिकरणएवपरिहृतं । "बहुरूपत्वाच्चे"ति "अनन्योप्यन्यशब्देनतथैकोबहुरूपवान् । प्रोच्यत" इतिचभाष्योक्तेरित्यतः "नहितत्रद्विवचनंबहुवचनंवाशंकितं । तदभावात् । किंनामशब्दभेदादिनाभेद" इतिन्यायविवरणटीकानु

अन्यथा "सप्तदशप्राजापत्यान्पशूनाल
भत" इत्यादौसंख्ययाकर्मभेदोनस्यात् ।

गु० तुमाह ॥ **निर्भेदेति** ॥ ननुचद्वित्वरूपसंख्यानिर्भेदेब्रह्मण्यपिकिंनस्यादित्यतआह ॥ **अन्यथेति** ॥ द्वित्वादिसंख्यायाभेदसाधकत्वमनंगीकृत्यनिर्भेदेपि ब्रह्मणिसंख्याभ्युपगमइत्यर्थः । नन्वन्नमयादावनेकत्वश्रवणेप्यानंदमयाधिकरणेतस्यब्रह्मत्वसमर्थनेन तन्न्यायेनद्वित्वश्रवणेपिप्रकृतेब्रह्मत्वंकिंनस्यादित्यतआह ॥

प्र० रोधेनतांविशदयन्नेवपरिहारमाह ॥ **अन्नमयादीनामिति** ॥ यत्र ब्रह्मवल्ल्यां ॥ **यत्रचेति** ॥ नारायणोपनिषदि । संज्ञाधिकरणंजिज्ञासासूत्रे दाक्षायणयज्ञाधिकरणमानंदमयनयएवविवृतं । न्यायद्वयस्यशंकापरिहारोपयोगस्तत्रैवदर्शितः । ननुतत्रबहुत्वाश्रवणेन "बहुरूपत्वाच्चे" त्यादिभाष्ये "अतएकस्सपंचधे" त्यनुव्याख्यानेचकथंतत्समाधानोक्तिः । "नचानंदमयाधिकरणन्यायेनपरिहारः । बाधकाभावा"

अन्नमयादीनांतु "सवाएषपुरुषोन्नरसमय" इत्यादौयत्रब्रह्मतोक्ता तत्रानेकत्वंनश्रुतं । यत्रच "अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयामेशुध्यंता" मित्यत्रानेकत्वंश्रुतं तत्रनब्रह्मतोक्ता । किंतुसंज्ञाधिकरणन्यायेनान्नमयप्राणमयेत्यादिसंज्ञाभेदेनान्नमयादीनांभेदेशंकिते दाक्षायणयज्ञादिशब्दवत्प्राणमयादिशब्दाःप्रकृतेब्रह्मणिगुणविधायकाः । नतुसंज्ञामात्रं । ततोनभेदकाइत्यादिःपरिहारस्तत्राभिप्रेतः । तथाचान्नमयादीनांब्रह्मत्वंस्वीकृत्यैवात्रपूर्वपक्षः ।

गु० **अन्नमयादीनांत्विति** ॥ **संज्ञाधिकरणन्यायेति** ॥ संज्ञाचोत्पत्तिसंयोगादितिसंज्ञाधिकरणन्यायेनेत्यर्थः । गुणविधायकाः सर्वोपजीव्यत्वमहाप्राणत्वरूपगुणविधायकाइत्यर्थः । ननुतथापि अनन्योप्यन्यशब्देनतथैकोबहुरूपवान् । बहुरूपत्वाच्चनविकारित्वमविरोधश्चेतिभाष्ये तच्चवाधूलशाखायामष्टरूपमुदाहृतमित्यादिनाऽनुव्याख्यानेच तत्प्रकरणेसाक्षाच्छ्रुतायाअप्यार्थिकानेकत्वसंख्यायारूपबाहुल्याभिप्रायेणगतिकथनात् । अत्रान्नमयादीनांपूर्वपक्षिणाब्रह्मत्वांगीकारइदंव्यर्थमेवस्यात् । नचानश्नन्नित्यादेःकर्मफलात्तृत्वंस्वतएवान्यत्रप्रसिद्धमिति । तर्हिद्विवचनश्रुतिसाहित्योक्तिवैयर्थ्यात् । पूर्वाधिकरणेऽत्तृत्वस्यापिप्रतिपादनेनानश्नन्नोक्तेर्गतेरपिपूर्वाधिकरणसिद्धांतांगीकारेणैवपूर्वपक्षिणंप्रतिसिद्धत्वात् । अयतेऽत्तिचभूतानीतिश्रुतेः महाभोक्तामहाभोग्यइत्यर्थोन्नमयेभवेदित्यनुव्याख्यानाच्चात्रान्नमयशब्देनापिब्रह्मत्वां

SGDF
Sri Gargeshwari Digital Foundation

प्र० दित्यत्रत्यसुधावाक्यंचकथमित्यतोऽभ्युपेत्यवादेनेतिभावेनपरिहारांतरमाह ॥ **अथवेति** ॥ तत्रानेकत्वसंख्यासमाधानंचात्रत्यसिद्धांतन्याये नैवेतिभावः ॥ **द्विवचनेति** ॥ निरवकाशतयाप्रतीयमानायाअपीत्यर्थः । एतेन "पिबंताविति द्विवचनश्रुते"रितिटीकाविवृता । ननुनद्विवचनंनिरवकाशं । तस्यशब्दसाधुत्वमात्रार्थत्वेनवा एकवचनांतस्यैवछांदसद्विवचनांतत्वेनवा द्वित्वबोधनेपितस्योद्देश्यविशेषणत्वेनाविवक्षिततयावा द्विवचनस्यपूर्वोत्तरवाक्यानुरोधेनैकवचनांततयोद्देनैकत्वप्रापकतयावा द्विवचनप्रतिरूपकत्वेनवाद्वित्वाप्रापकत्वेनैकस्मिन्नुपपत्तिरितिचोद्यानिक्रमेणनिरस्यन्नाद्यंनिराह ॥ **नचदाराइति** ॥ **प्रसिद्धमिति** ॥ "दाराःपुंसिचभूम्न्येवे"त्यादिवन्नैघंटुक्याःप्रसिद्धेरभावात्तथाकल्पनम

अथवा ब्रह्मावयवत्वेपिब्रह्मत्वमितितत्रव्युत्पाद्यं । अत्रत्वनेकत्वेपिब्रह्मत्वमिति । तथाचान्नमयादीनामनेकत्वादब्रह्मत्वमितिशंकायाअप्यत्रत्यसिद्धांतेनैवपरिहार्यत्वादत्रत्यपूर्वपक्षेऽन्नमयादीनामपि ब्रह्मत्वाक्षेपः । अतएवन्यायविवरणे "नचावयवत्वविरोध"इतितत्रोक्तं । अत्रतु "द्विवचनश्रुतेरपिनिरवकाशत्वंनास्ती"ति । नचदाराइत्यादौबहुवचनमिवात्रद्विवचनंशब्दसाधुत्वेनैवप्रसिद्धं ।

गु० गीकारेतदनुपपत्तिशंकायाअनुदयाच्च । अतएवटीकायांपिबंतावित्येतदुद्देश्यकोटौनिवेशितमित्याद्यरुच्याह ॥ **अथवेति** ॥ **तथाचेति** ॥ अन्नमयेभोक्तृत्वमप्युपलक्षणीयं । ननुगुरोर्दाराआगताइत्यत्रदाराइतिबहुवचनवत् ऋतंपिबंतावित्यत्रद्विवचनमपिशब्दसाधुत्वेनैवकिंनस्यादित्याशंक्य दारादिशब्देषुबहुवचनादेश्शब्दसाधुतैव नत्वर्थसाधुता । नचार्थसाधुत्वेसंभवतिशब्दसाधुत्वमात्रंयुक्तं । प्रकृतेचास्मद्रीत्याजीवेश्वरपरत्वेऽर्थसाधुत्वमपिसंभवतीतिभावेनाह ॥ **नचदाराइत्या**

SGDF Sri Gargeshwari Digital Foundation

प्र० युक्तमित्यर्थः। द्वितीयंनिराह ॥**नचबाधकमिति**॥ “व्यत्ययोबहुल”मिति “सुपांसुलु”गित्यादिशास्त्रेणैकवचनस्यद्विवचनमितिवचनव्यत्ययकल्पनं “अहल्यायैजारे”त्यादौविभक्तिव्यत्ययइवसतिबाधके। नहीह्जीवेश्वरविषयत्वेनोपपत्तौकिंचिद्बाधकमस्तीत्यर्थः। गुहाप्रविष्टत्वादिबाधकंतुनिरसिष्यतइतिभावः। तृतीयमाशंक्यनिराह ॥ **नचग्रहमिति** ॥ ग्रहाधिकरणंप्राग्विवृतंछंदोधिकरणे। “ऐंद्रवायवंगृह्णाति मैत्रावरुणंगृह्णाती”त्यादिनोत्पन्नानां “ग्रहैर्यजेते”तिहोमसाधनत्वेनप्राप्तानांसंमार्गरूपसंस्कारविधानार्थंग्रहमितिग्रहशब्दोद्देश्यकत्वात्तद्गतासंख्यानविवक्षितेतिवक्तुंयुक्तं। इहतुऋतपानस्यब्रह्मण्यप्राप्ततयाविधेयत्वान्नतथासंभवति। किंतु “पशुनायजेते”त्यादाविवविधेयगतत्वेनविवक्षितैवेत्यर्थः। ननुटीकायां “यौसुकृतनिर्मितशरीरेहृदयगुहांप्रविष्टौ तत्रापिसर्वजीवोत्तमेऽतिपूर्णेवायौप्रतिष्ठौसुकृतफलंभुंजानौ तौब्रह्मविदःपंचमहायज्ञवंतोद्युपर्जन्यादिपंचाग्निनिष्ठावा त्रिवारकृतनाचिकेताः च्छायातपौवदंती”तिपिबंतावनूद्यच्छायातपत्वविधेरुक्तत्वात्कथमेवमित्यतआह ॥

नचबाधकंविनापिबंतौप्रविष्टौच्छायातपावितिबहूनिद्विवचनानिवचनव्यत्ययेनैकस्मिन्नपियुक्तानि। नच “ग्रहंसंमार्ष्टि”इत्यादाविवोद्देश्यविशेषणत्वात्संख्यानविवक्षितेतियुक्तं। ब्रह्मणिऋतपानस्याप्राप्तत्वात्।

गु० **द्वाविति** ॥ देवदत्तःपिबंतावित्यप्रयोगादितिभावः। ननुद्विवचनस्यवचनव्यत्ययेनब्रह्मणिसंभवात्कथंद्वित्वस्यब्रह्मपक्षेबाधकतेत्यतआह ॥ **नचेति** ॥ बहूनिद्विवचनानि अभ्यासाद्द्वित्वेनिश्चिततात्पर्यकाणीत्यर्थः। अनेकेषामपिद्विवचनानांवचनव्यत्ययस्सतिबाधकेसंभवत्येवेत्यतोबाधकंविनेत्युक्तं। नचग्रहंसंमार्ष्टीत्यत्रोद्देश्यविशेषणभूतस्यैकत्वस्यविवक्षायां सोमगतद्वादशग्रहाणामपिसंमार्जनाभावापत्त्याऽविवक्षितत्ववत्प्रकृतेपि द्वित्वस्योद्देश्यविशेषणत्वेनविवक्षाकिंनस्यादित्यतोवैषम्येणपरिहरति ॥ **नचेति** ॥ **ब्रह्मणीति** ॥ तथाचविधेयविशेषणत्वेनोद्देश्यविशेषणत्वमेवनास्तीत्यविवक्षानुपपत्तिरिति। ननुसर्वात्तृत्वेनऋतपानस्यापिप्राप्तत्वेनविधे

SGDF
Sri Gargeshwari Digital Foundation

प्र० ऋतमिति ॥ गुहाविष्टत्वादिरादिपदार्थः । एकस्यैवोद्देश्यत्वादितिभावः । तथाचच्छायातपावित्यत्रद्विवचनंनिरवकाशमित्यर्थः । "पिबंतावितिद्विवचनश्रुते"रित्युक्त्वाटीकायां "श्रुतेर्निरवकाशत्वा"दित्युक्तं । तत्स्वारस्यमनुरुध्यपिबंतावित्यस्यानुवाद्यत्वेपिग्रहवैलक्षण्येनतत्रत्यद्विवचनस्येश्वरेऽनुपपन्नतामाह ॥ ग्रहेति ॥ एकत्वस्यविधेयान्वयायोद्देश्यकोटिप्रवेशेग्रहस्याप्युद्देश्यत्वेनप्रत्युद्देश्यंवाक्यपरिसमाप्त्याग्रहंसंमृज्यादेकंसंमृज्यादितिवाक्यभेदः । विधेयकोटिप्रवेशेसंमार्गस्यापिविधेयत्वेनविधेयभेदाद्ग्रहंसंमृज्यात् सचसंमार्गएकइतिवाक्यभेदापत्त्येत्यर्थः । चतुर्थमाशंक्यनिराह ॥ नचपिबंतावित्यादिकमिति ॥ मंत्रोहाधिकरणमुक्तंजिज्ञासाधिकरणे । "अग्नयेजुष्टंनिर्वपामी"तिदर्शपौर्णमासिकाग्नेयहविर्निर्वापमंत्रस्य "सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकाम"इतिविहितेसौर्ययागे "आग्नेयवत्सौर्यःकर्तव्यइत्यतिदेशतःप्राप्तस्ययथासू

ऋतंपिबंतावित्यस्योद्देशकत्वेपि "छायातपा"वित्यादेर्विधायकत्वावश्यंभावाच्च । ग्रहैकत्वस्यवाक्यभेदापत्त्याविध्यसंस्पर्शेपिप्रत्येकंग्रहेष्वेकत्वस्यस्वरूपतःसत्त्वेनानुवादवत्प्रकृतेब्रह्मणिद्वित्वस्यस्वरूपतएवाभावेनानुवादकत्वासंभवाच्च । नचपिबंतावित्यादिकमन्यत्रद्वित्ववाच्येवसदिहातिदेशतःप्राप्तं । येन "अग्नयेजुष्ट"मितिमंत्रस्यसौर्येतिदेशतःप्राप्तस्य "सूर्याये"त्यूहवद्विवचनांतस्यैकवचनांततयोहस्स्यात् ।

गु० यत्वानुपपत्त्योद्देश्यविशेषणत्वमेववक्तव्यमित्यरुचेराह ॥ऋतंपिबंतावितीति॥ किंच ग्रहंसंमार्ष्टीत्यत्रग्रहंसंमृज्यात् तच्चैकंकुर्यादित्युभयविधानेवाक्यभेदापत्त्याग्रहगतैकत्वस्यविधिसंस्पर्शाभावेपिग्रहेष्वेकत्वस्यसत्त्वेनोद्देश्यत्वसंभवेपि प्रकृतेब्रह्मणिद्वित्वस्यस्वरूपतएवाभावान्नोद्देश्यत्वमित्यभिप्रेत्यदोषांतरमाह ॥ ग्रहैकत्वस्येति ॥ ननुसूर्यदेवताकयागे अग्नयइत्यादेस्सूर्यायेत्यादिरूपेणोहवत्प्रकृतेपिपिबंतावितिद्विवचनांतस्याप्येकवचनांततयोहःकिंनस्यादित्यतो वैषम्येणपरिहरति ॥ ॥ ४५९ ॥

प्र० र्यायेतिप्रातिपदिकमात्रे ऊहस्तथापिबंतावितिद्विवचनांतस्यपिबंतमित्येकवचनरूपप्रत्ययमात्रोहस्स्यात् । नचात्रतथातिदेशतःप्राप्तं । इहैवास्याम्नानादित्यर्थः । पंचममाशंक्याह ॥ नचैकस्मिन्निति ॥ प्राग्विवृतमभ्यासाधिकरणंसमन्वयाधिकरणे । तत्रहिसमिदादीनांयागनामत्वमुक्तं । एकसमिदाख्यप्रयाजवाचिनोपिसमिच्छब्दस्यरूढत्वेनोच्चैर्वृक्षइत्यादाविवबहुवचनप्रतिरूपकत्वेनोपपत्तावपीहयौगिकत्वात्तथानवक्तुंयुज्यतइत्यर्थः । ननुनवमेद्वितीयपादांतिमाधिकरणे "प्रयाजेपीतिचे"दित्यत्रसमिधोयजतीत्यादौसमिदादिकंदेवतात्वेनोद्दिश्यतत्संस्कारत्वेनयागाविधीयंतेऽथारादुपकारकतयायागाइतिविशये सामवायिकत्वलाभात्संस्कारविधिरितिप्राप्ते तथात्वेदेवतात्वलिंगस्य "यदग्नयेसायंजुहोती"त्यादाविवचतुर्थीनिर्देशस्याभावेनचतुर्थ्यर्थेद्वितीयायाउपचारापत्तेरारादुपकारकत्वेनयागविधिः । समिदादिशब्दास्तुमंत्रवर्णप्राप्तदेवतांनिमित्तीकृत्यनामधेयानिदेवताएवानुवदंति । नचानुवादउपचारोदोषइतिसिद्धांतितत्वात् श्येनशब्दस्यपक्षिविशेषेरूढस्यतत्सादृश्याद्गौण्यावृत्त्यायागनामत्वमिव देवतागणविशेषेनिरूढस्यसमिच्छब्दस्यतत्प्रकाशकमंत्रसंबंधापादितदेवतासंबंधेयागेलाक्षणिकनामत्वान्नरूढत्वमस्ति । उक्तंचशाबरभाष्ये "समिदादिमंत्रकत्वाद्यजीनांसमिदादिशब्दावाचका"इति । लक्षणायांचलिंगव्यत्ययइववचनव्यत्ययोपिनदोषइतिचेन्न ।

नचैकस्मिन्नेवयागेसमिधोयजतीत्यादौबहुवचनांतसमित्पदमिवैकस्मिन्नेवब्रह्मणिद्विवचनांतंपिबत्पदमस्त्वितिवाच्यं । रूढस्यसमिच्छब्दस्यबहुवचनप्रतिरूपकनामधेयत्ववद्यौगिकस्यपिबंतावित्यादेस्तदयोगात् ।

गु० नचेति ॥ छत्रिन्यायेनेति ॥ छत्र्यच्छत्रिसमुदायेछत्रिणइतिव्यपदेशवत्पिबदपिबत्समुदायेपातृत्वव्यपदेशोयुक्तइत्यर्थः । साधकमुक्त्वाबाधकंपरिहरति ॥

SGDF
Sri Gurgeshwari Digital Foundation

प्र० पौर्णमास्यधिकरणपूर्वपक्षेफलवाक्यस्थदर्शपौर्णमासाभ्यामितिपदस्यद्विवचनप्रतिरूपकाव्ययत्वमाश्रित्यप्राकरणिकसर्वयागनामधेयत्वमुक्तं । तद्वत्प्रकृतेपिवक्तुंशक्यमित्यभिप्रायेणैवमुक्तमित्यविरोधः । द्विवचनस्यसंभावितावकाशनिरासेन "श्रुतेर्निरवकाशत्वा"दितिटीकांसमर्थ्यतदुपलक्षणमितिभावेनलिंगांतरस्यापितदाह ॥ छायात्वंचेति ॥ आतपत्वस्यविद्यावत्त्वेनोपपत्तावपीदमयुक्तं । यद्यपि "छायात्वविद्यासंप्रोक्ताजन्यविद्यातपस्स्मृतं । जीवगृध्रस्यतौपक्षावधऊर्ध्वपथोःपृथक् । तौविष्णोस्तुनविद्येतेनित्यविद्यास्वरूपिणः" । इत्यष्टमस्कंधस्थपंचमाध्यायतात्पर्योक्त्याद्वयमपीशेनयुक्तं तथापिपररीत्यैवमुक्तमितिध्येयं । यथोक्तंन्यायविवरणटीकायां "छायातपत्वंचाविद्याविद्यावत्त्वेनजीवेश्वरयोरुपपद्यत"इति ॥ तस्मादिति ॥ प्रातिपदिकार्थप्रत्ययार्थयोर्विष्णुमात्रेऽनवकाशत्वादित्यर्थः । "नचैवंजीवेशग्रहणेप्यनुपपत्ति"रित्यादिटीकांव्यनक्ति ॥ ईश्वरस्येति ॥ एकस्यछत्रित्वेपितत्साहचर्यादन्येष्वपिछत्रिणोगच्छंतीतियथाव्यपदेशः तथाभोक्तृजीवसन्निधानादीश्वरोपितथोपचर्यतइत्यर्थः । निरवकाशविष्णुलिंगादिबाधइत्यतआह ॥ गुहेति ॥ जीवस्यापि "हृदिह्येषआत्मे"तिगुहास्थत्वात् "बृहजातिजीवे"त्यादिनाजीवेपिप्रयोगादितिभावः । निरवकाशभगवल्लिंगैःप्रकृतिप्रत्ययार्थौकथंचिन्नेयावितिभावेनसूत्रोक्तान्सिद्धांतहेतून्संगृह्णाति ॥

छायात्वंचब्रह्मणोनयुक्तं । जीववदविद्याश्रयत्वासंभवात् । तस्मादत्रपिबंतौजीवेश्वरावेव । ईश्वरस्याभोक्तृत्वेपिछत्रिन्यायेनपातृत्वव्यपदेशः । गुहाप्रविष्टत्वब्रह्मशब्दौतुजीवेपियुक्ताविति ॥ सिद्धांतस्तु ॥

गु० गुहाप्रविष्टत्वेति ॥ अनश्नन्नन्यइत्यादिकंत्वशुभभोगाभावविषयमितिसंबंधः । एवंप्रकृत्यर्थकर्मफलभोक्तृत्वस्यब्रह्मणिसावकाशत्वमुपपाद्यप्रत्ययार्थस्यापिसावकाश

SGDF
Sri Gargeshwari Digital Foundation

प्र० **गुहावेशादिति** ॥ आद्यसूत्रोक्तोयंहेतुः । द्वितीयसूत्रोक्तानाह **ब्रह्मेति** ॥ टीकोपलक्षणं । भाष्येपरमित्यंतोक्तेः । तत्वप्रदीपे "अक्षरशब्देनविशेषणाच्चे"त्याद्युक्तेरितिभावः । अत्र पिबंताविल्यत्र । ननूक्तंगुहाप्रविष्टत्वंजीवेपियुक्तमित्यतःप्रसिद्धिवाचकसौत्रहिशब्दसूचितंतन्निरवकाशत्वंन्यायविवरणटीकोक्तरीत्यासाधयति ॥ **गुहेति** ॥ **योवेदेति** ॥ "ब्रह्मविदाप्नोतिपर"मितिपूर्वत्रब्रह्मणएवतत्रप्रस्तुतत्वादितिभावः । ननुब्रह्मशब्दादित्ययुक्तं । तस्यापिप्राक्सावकाशितत्वादित्यतो "विशेषणाच्चे"त्यस्यार्थांतरमुपेत्यतस्यनिरवकाशत्वमाह ॥ **यस्सेतुरिति** ॥

गुहावेशाद्ब्रह्मशब्दात्सेतुत्वादक्षरत्वतः । पारत्वादभयत्वाच्चब्रह्मैवात्रनिगद्यते ॥ गुहानिहितत्वंयद्यपिजीवेप्यस्ति तथापि "योवेदनिहितंगुहायां गुहाहितंगह्वरेष्ठंपुराणं गुहांप्रविश्यतिष्ठंतं"इत्यादिश्रुतिषुब्रह्मण्येवतस्यप्रसिद्धत्वात्तेनब्रह्मत्वसिद्धिः । नहिमैथिलइत्युक्तेयःकश्चिन्मिथिलाभवोभासते । किंतुयस्तत्रप्रसिद्धस्तदधीश्वरः । "यस्सेतुरीजानानामक्षरंब्रह्मयत्परं । अभयंतितीर्षतांपारमित्युत्तरवाक्येचपारत्वेनविशेषणात्परब्रह्मण्येवब्रह्मशब्दः । सेतुत्वादिकंतु "एषसेतु"रित्यादिश्रुतिभिर्ब्रह्मलिंगत्वेननिश्चितं ।

प्र० ब्रह्मयत्परमित्येतावदेवोपयुक्तं तथापिसेतुत्वादिस्फोरणायकृत्स्नवाक्योक्तिः। यद्यपिभाष्यादौकेवलब्रह्मशब्दएवनिरवकाशइत्युक्तं तथापितदपरित्यागेन "ब्रह्मवित्परमाप्नोतीतियत्प्रथमसूचित"मित्यानंदमयाधिकरणानुभाष्यसुधयोरुक्तरीत्योपायांतरप्रदर्शनमित्यदोषः । सेतुत्वादेर्निरवकाशत्वंव्यनक्ति ॥ **सेतुत्वेति** ॥ "धृतेश्चे"तिदहरनयगुणसूत्रे "एषसेतुर्विधृतिरेषांलोकानामसंभेदाये"तिसर्वाश्रयत्वरूपसेतुत्वस्य उत्तराधिकरणे "एतदमृतमभय"मित्यभयत्वस्य अदृश्यत्वाद्यधिकरणे "ययातदक्षरमधिगम्यत"इत्यक्षरत्वस्यविष्णौसेत्स्यमानत्वाद्विष्णोरन्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्रानवकाशमित्यर्थः । "अक्षयाद्रतिरूपत्वादक्षेषुरमणादपि । अक्षरंभगवान्विष्णुरोमित्युच्चत्वहेतुत" इतिस्मृतेश्चेति । नन्वस्तुयस्सेतुरित्यादि वाक्यंत्रह्ममात्रपरं । ऋतमितिवाक्यंतूभयपरमस्तु । कर्मफलात्तृत्वद्विवचनश्रुत्योर्भावादित्यतआह ॥ **नचेति** ॥ अब्रह्मविषयमपीतियुक्त मित्यर्थः । ननुहरेरभोक्तृत्वंवाद्विवचनोक्तद्वित्वंवाछायात्वंवाबाधकमित्यतः "तस्यकर्मफलभोगाभावान्नैतद्वाक्यप्रतिपाद्यत्व" मित्यादिटीकांवि वृण्वन्नभोक्तृत्वंतावन्निराह ॥ **नचेत्यादिना पुण्यमेवामुंगच्छतीत्यंतेन** ॥ **एतदिति** ॥ षट्प्रश्नोपनिषदिचतुर्थप्रश्ने "परेआत्मनी" ति परत्वविशेषणेनपरमात्मानमेवपरामृश्यद्रष्टृत्वादेरुक्तेरित्यर्थः । अहंहीतिवाक्ये अहमितिकृष्णेनप्रयुक्तत्वाद्ब्रह्मविषयत्वंसिद्धमितिगीतोक्तद्विती यस्मृतेःतत्साधयति ॥ **नचेति** ॥ उभयत्रादिपदेन "गृहीत्वैतानिसंयातिवायुर्गंधानिवाशया" दिति "यतंतोप्यकृतात्मानोनैनंपश्यंती" त्यादे र्ग्रहः । एतद्वाक्योक्तिस्तुभोगस्येंद्रियसाध्यत्वात्कथमीश्वरस्यभोगइतिशंकाव्युदासायेतिबोध्यं । उक्तंचछांदोग्यभाष्येऽष्टमाध्यायांते "भूतैर्मे

नचोत्तरत्रयस्सेतुरित्यादिभिःपूर्वत्रचयस्यब्रह्मचक्षत्रंचेत्यादिभिर्ब्रह्ममात्रविषयैर्वाक्यैःसंदष्टं "ऋतंपिबंता"वित्या दिकंबाधकाभावेप्यब्रह्मविषयमितियुक्तं । नचेश्वरस्याभोक्तृत्वमेवबाधकं । "एतत्सर्वपरेआत्मनिसंप्रतिष्ठत" इतिप्रस्तुत्य "एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयिते" त्यादिश्रुतेः "अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच । श्रोत्रं चक्षुःस्पर्शनंचरसनंघ्राणमेवच । अधिष्ठायमनश्चायंविषयानुपसेवते" इत्यादिस्मृतेश्च । नचश्रोत्रमित्यादिकं जीवविषयं । पूर्वत्र "यच्चाप्युत्क्रामतीश्वर" इत्यादेः उत्तरत्रच "पश्यंतिज्ञानचक्षुष" इत्यादेरयोगात् ।

गु० त्वमुपपादयितुंशंकते ॥ **नचेति** ॥ कथंचिन्नेयत्वादिति । अवयवभेदादिनेत्यर्थः ॥ **अन्येनसहद्वित्वादस्त्विति** ॥ पानानन्वयेपिद्वित्वस्योपपत्त्यर्थमेवान्यसा

प्र० हद्भिर्यइमाःपुरोविभुर्निर्मायशेतेयदमूषुपूरुषः । भुङ्क्तेगुणान्षोडशषोडशात्मकस्सोलंकृषीष्टभगवान्वचांसिमे" इत्यादौभगवतएवेंद्रियैर्भोगो क्तेश्च । ऋतंपिबंतौसुकृतस्यलोके गुहांप्रविष्टौपरमेपरार्धइतिचे" त्यादि । ईश्वरस्यभोक्तृत्वोक्तावनशनश्रुतिविरोधइत्यतआह ॥ **अनश्नन्निति** ॥ अशुभभोगाभावविषयमित्यन्वयः । कुतस्संकोचइत्यतः "असद्व्यपदेशान्नेतिचेन्न धर्मांतरेणवाक्यशेषा" दितिन्यायेनटीकोक्तवाक्यशेषबला दितिभावेनतमाह ॥ **तस्येति** ॥ आथर्वणेपिऋक्शाखायामस्तिश्रवणमितिभावः । तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेदे" तिवा क्यशेषेयः अग्रे अग्र्यः श्रेष्ठः तस्यैवस्वादुपिप्पलं कर्मफलमाहुः । यःपितरंनवेद अतएवनशत् नाशवान् तस्यस्वादुपिप्पलंनेतिहरेरेवसु

"अनश्नन्नन्य" इत्यादिकंतु "तस्येदाहुःपिप्पलंस्वाद्वग्र" इतीश्वरस्यस्वादुभोक्तृत्वोक्तेः । तथा "प्रवि विक्ताहारतरइवभवत्यस्माच्छारीरादात्मन" इति श्रुत्यंतरेभगवदाहारस्यजीवाहाराद्विविक्तत्वोक्तेः ।

प्र० स्वभोक्तृत्वोक्तेरित्यर्थः । ननुश्रुतित्वाविशेषाद्भोक्तृत्वश्रुतेरेवार्थांतरमस्त्वित्यतोगीताभाष्योक्तमाह ॥ **तथेति** ॥ श्रुत्यंतरे वाजसनेयेषष्ठेऽध्या येद्वितीयब्राह्मणे "इंधोहवैनामैषयोयंदक्षिणेक्षन्पुरुष" इतिप्रकृतस्यपरमात्मनः "तस्मादेषप्रविविक्ताहारतरइवभवत्यस्माच्छारीरादात्मन" इति शारीरशब्दितजीवाहाराद्विभक्ताहारोक्तेरित्यर्थः । अवतारेषुस्थूलमपिभुङ्क्तइतीवशब्दः । नचप्रविविक्ताहारोजीवएवेतिवाच्यं । तस्यशारीरा दितिजीवाद्भेदोक्तेः । नचशारीराज्जागरावस्थाज्जीवात्स्वप्नसुषुप्त्यवस्थस्सएवप्रविविक्ताहारइत्यवस्थाभेदोपाधिकंजीवस्यभेदसंगीकृत्यव्याख्याय तामितिवाच्यं । स्वप्नसुषुप्त्यवस्थस्यापिशारीरत्वेनशारीरशब्देनैवगृहीततयाततोभेदायोगात् । "शारीरस्तुत्रिधाभिन्नोजाग्रदादिष्ववस्थिते" रि

SGDF Sri Gangadharan Digital Foundation

प्र० तिगारुडोक्तेः । नन्ववस्थात्रयवतश्शारीरत्वेप्यस्मादितिविशेषणादत्रजाग्रदवस्थोगृह्यते । तस्माच्चस्वप्राद्यवस्थस्योक्तविधयासंभवति । अन्यथाऽस्मादितिव्यर्थमितिचेन्न । "शारीरौतावुभौज्ञेयौजीवश्चेश्वरसंज्ञित"इत्यादिस्मृत्येश्वरस्यापिशारीरत्वेनतद्व्यावृत्त्यर्थतयाऽस्मादित्यस्यसार्थक्यादिति । व्यक्तमेतद्गीताभाष्येसप्तमेध्यायये "नचात्रजीवउच्यत"इत्यादिनेत्यर्थः । नचानंदमयनयाद्युक्तदिशापूर्णानंदस्यहरेःकिंकर्मफलभोगेनेत्यतश्श्रुत्यर्थसंकोचबीजस्मृतीराह ॥ **तथेति** ॥ "शुभंपिबत्यसौनित्यंनाशुभंसहरिःपिबेत् । पूर्णानंदमयस्यास्यचेष्टानज्ञायतेक्वचित् ।

तथा "शुभंपिबत्यसा"वित्यादिभाष्योक्तश्रुतिभिरशुभभोगस्यैवनिषेधात् । तथा "अन्यूनानधिकत्वाच्चपूर्णस्वानंदभोजनात् । विरागाच्चपरस्यास्यभोक्तृत्वप्रतिषेधन"मित्यादिस्मृतिभिरभोक्तृत्वश्रुतेर्गतिकथनात् "क्रीडाभोगोनचान्यथे"त्यादिस्मृत्याक्रीडारूपभोगसंभवस्योक्तत्वाच्चाशुभभोगाभावविषयं । प्रत्युतजीवपक्षएव "ऋतंसत्यंतथाधर्म"इतिस्मृतेर्धर्मफलवाचिऋतपदंनयुक्तं । तस्याधर्मफलंप्रत्यपिभोक्तृत्वात् । ईशपक्षेतुतद्युक्तं ।

प्र० आत्मांतरात्मेतिहरिरेकएवद्विधास्थितः । निविष्टोहृदयेनित्यंरसंपिबतिकर्मजं । शुभान्पिबतिभोगान्सछायेवविदुषांप्रभु"रित्यादिस्मृतिभिरित्यर्थः । श्रुतेःप्रथमस्कंधतात्पर्योक्तविषयांतरंचाह ॥ **अन्यूनेति** ॥ भोगेऽभोगेचेत्यर्थः ॥ **इत्यादिस्मृतिभिरिति** ॥ "प्रविविक्तभुग्यतोह्यस्माच्छारीरात्पुरुषोत्तमः । अतोऽभोक्ताचभोक्ताचस्थूलाभोगात्सएवत्वि"त्यादिस्मृतिरादिपदार्थः ॥ **अशुभेति** ॥ जीववद्रागपूर्वकोपजीवनार्थभोगाभावविषयंचेत्यपिध्येयं ॥ **ऋतमिति** ॥ "ऋतंसत्यंतथाधर्मःसुकृतंचाभिधीयत"इतिसप्तमगीताभाष्योक्तस्मृतेरित्यर्थः ॥ ॥ ४६२ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० पुण्यमिति ॥ “पुण्यमेवामुंगच्छतिनहवैदेवान्पापंगच्छती”तिबृहदारण्यकश्रुतौपुण्यफलभोगस्यैवोक्तेरित्यर्थः । यद्यप्यमुंसप्तान्नविद्यावेदितारंपुण्यमेवाप्नोतिनपापमित्यर्थः । उक्तंच “सप्तान्नोपासनेयोग्यादेवाएवततोहियत् । देवांश्चपापंनाप्नोतितस्मात्पापंनतस्यत्वि”ति । तथाज्ञानपादे “पुण्यमेवामुमाप्नोतिनदेवान्पापमाप्नुया”दित्यनुव्याख्यानसुधायांअमुंसप्तान्नविद्योपासनेनप्रेरकतयापरपुरप्रवेशिनंपरकृतंपुण्यमेवाप्नोति । नपापं । कुतः । देवोह्यसौजातः । नहिदेवान्पापंप्राप्नोतीत्यर्थइत्युक्तं । तथाप्यमुंसप्तान्नोपासकंदेवमित्यर्थकत्वेनदेवत्वस्यहेतुत्वोक्तेः देवोत्तमंहरिंपुण्यंगच्छतिपापंतुनेतिकिमुवाच्यमित्याशयेनैतदुक्तिः । अतएवगीताभाष्येसप्तमे “पुण्यगंध”इतिभोगापेक्षया । तथाचश्रुतिः । “पुण्यमेवामु”मित्यादिनाब्रह्मपरतयेयंश्रुतिरुदाहृता । व्याख्याताचप्रमेयदीपिकायां “अमुं उपासकं । कुतः तस्यदेवत्वात् । तथापिकुतः नहवै

“पुण्यमेवामुंगच्छती”तिश्रुतेः । नापीशपक्षेद्विवचनानुपपत्तिः ।

प्र० देवमात्रस्यपुण्यभोगनियमेदेवोत्तमस्यसुतरांतत्सिद्धिरिति । एवमभोक्तृत्वंबाधकंनेत्युपपादनेनतस्यकर्मफलभोगाभावा”दित्यादिटीकांविवृत्याधुनाद्विवचनमपिनबाधकमित्याह ॥ **नापीत्यादिनाविष्णोरेवद्विरूपत्वादित्यंतेन** ॥ द्विवचनानुपपत्तेश्चतुर्धापरिहारंविवरिष्यन् द्विवचनमुपपन्नमितिवदतोयदभिप्रेतंद्विवचनबोध्यस्यद्वित्वस्यैकस्मिन्ब्रह्मण्ययोगात्तदनुरोधेनपिबत्प्रातिपदिकंछत्रिन्यायेनभोक्त्रभोक्तृसमुदायेलक्षणयावर्ततइति तत्तावदयुक्तं । गुणभूतप्रत्ययार्थानुरोधेनप्रधानभूतप्रातिपदिकेलक्षणायाअन्याय्यत्वात् । किंतुप्रातिपदिकस्यमुख्यार्थभोक्तारमुपेत्यैवतदनुरोधेनप्रत्ययार्थोद्वित्वमेवकथंचिन्नेयमित्येकंपरिहारं “अभेदैकत्ववत्येवघटेद्रव्यांतरसहितेद्वित्वदर्शना”दितिसुधावाक्यानुसारेणसद्द

SGDF
Sri Gargeshwari Digital Foundation

प्र० ष्टांतमाह ॥ **यतइत्यादिनाकिंचेत्यंतेन** ॥ यतइत्यस्यश्लोकेनान्वयः । यस्मात्पाशानितिबहुवचनमिवैकस्मिन्नपिद्विवचनंयुज्यते तस्मान्न द्विवचनानुपपत्तिरिति । पाशानितिश्रुतिरित्येतदुपलक्षणमितिभावेनपूर्वार्धंव्यनक्ति ॥ **यथानवमइति** ॥ तृतीयेपादे "अपूर्वेत्वविकारो प्रदेशात्प्रतीयते"इतिपंचमाधिकरणेदर्शपूर्णमासप्रकरणे "पत्नींसन्नह्ये"तिमंत्रः किमेकद्विबहुपत्नीकेष्वविकारेणप्रयोक्तव्यउतद्विबहुपत्नीकप्रयो गयोर्द्विवचनबहुवचनाभ्यामूहितव्यइतिविशये एकपत्नीकेसमवेताभिधायित्वसंभवादन्यत्रैकवचनमन्याय्यनिगदं । अतोद्विवचनबहुवचन योरूहितव्यइतिप्राप्ते स्यादेवंयद्येकपत्नीकाभिप्रायमिदमाम्नानंस्यात् । नचैवं । सर्वप्रयोगाणांसमानविधानत्वात्सर्वाभिप्रायेणेदमाम्नानं ।

यतः यथैकस्मिन्नेवपाशेऽदितिःपाशानितिश्रुतिः । तथैकस्मिन्नीश्वरेस्तुपिबंतावितिवागपि
॥१॥ यथानवमेद्विबहुपत्नीकेष्वपिप्रयोगेषुपत्नींसन्नह्येत्येकवचनांतोमंत्रः । यथावाग्नीषोमीयप
शुसंबंधिन्येकस्मिन्नेवपाशे "अदितिःपाशा"नित्यग्नीषोमीयपशुप्रकरणस्थमंत्रगतंबहुवचनं ।

प्र० तस्मात्सर्वेषुप्रयोगेष्वविकारेणैकवचनांतएवप्रयोज्यइतिसिद्धांतितं । तत्रयथैकत्वाभावेप्येकवचनांतोमंत्रोनिविशते तथेहापिब्रह्मणिद्वित्वाभा वेपिद्विवचनांतवागस्त्वित्यर्थः ॥ **यथावेति** ॥ अत्रैव "विप्रतिपत्तौविकल्पस्स्यादसमर्थत्वाद्गुणेत्वन्याय्यकल्पनैकदेशत्वा"दितिचतुर्थेधिक रणे अग्नीषोमीयेपशौ "अदितिःपाशान्प्रमुमोक्तुदेव"इतिबहुवचनांतःपाशमंत्रश्श्रुतः । सकिंप्रकृतावेवनिविशतेऽथबहुपाशकेषु "आग्ने यंकृष्णग्रीवमालभेते"त्यादिनाविहितेषुपशुगणेषूत्कृष्यतइतिसंशये एकस्मिन्बहुवचनस्यायोगादुत्कर्षइतिप्राप्ते पाशप्रातिपदिकार्थान्वितंविभ क्त्यभिहितंकर्मकारकंप्रकृतावपिपाशकर्मकमोचनाभिधानेनसंभवन्निवेशंनोत्कर्षंसहते । संख्यामात्रंत्वसंभवदपिगुणत्वान्नप्रातिपदिकंप्रधान

प्र० भूतंकारकंचालमुत्कष्टुं । अतोनसंख्यावशेनमंत्रस्योत्कर्षः । बहुवचनस्यत्वेकस्मिन्नपिपाशेयोगोऽवयवबहुत्वाभिप्रायेणछांदसइतिसिद्धांतितं । तथेहाप्येकस्मिन्नेवब्रह्मण्यन्येनसहद्वित्वादस्तुद्विवचनमित्यर्थः । एकवचनस्याद्यंबहुवचनस्यद्वितीयमितिविवेकः ॥ **अन्यथेति** ॥ तदधि करणपूर्वपक्षापादनमस्त्वित्यतआह ॥ **सचेति** ॥ उक्तंचशाबरभाष्ये "गुणेत्वन्याय्यकल्पनास्यान्नप्रधानेगुणश्चविभक्त्यर्थः प्रधानंप्राति पदिकार्थइत्यादि"नन्वस्याग्नीषोमीयप्रकरणस्थत्वात्तत्प्रकरणानुग्रहायतत्रकथंचिन्निवेशउक्तः । अतएवतत्र "प्रकरणाच्चे"तिगुणसूत्रमित्यत आह ॥ **अस्यापीति** ॥ उत्तरत्र "यस्सेतु"रित्यादिभिःपूर्वत्र "यस्यब्रह्मचक्षत्रंचे"त्यादिभिर्ब्रह्मविषयैर्वाक्यैस्संदष्टत्वेनगुहाविष्टत्वादिना

अन्यथाहिबहुपाशयुक्तेषुपशुगणेषुपाशमंत्रस्योत्कर्षःस्यात् । सचनेष्टः । गुणभूतप्रत्ययार्थबहुत्वस्या
नुसरणायतदाश्रयत्वेनप्रधानभूतप्रातिपदिकार्थोत्कर्षायोगेनैकस्मिन्नपिबहुवचनस्यकथंचिन्नेयत्वा
त् । तथेहाप्येकस्मिन्नपिब्रह्मणिद्विवचनमन्येनसहद्वित्वादस्तु । अस्यापिब्रह्मप्रकरणस्थत्वात् ।

गु० हित्यस्योपयोगाद्विवचनंछांदसमस्मिन्पक्षइतिभावः । ननुचदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । दृष्टांते । अदितिःपाशानितिबहुवचनस्याग्नीषोमीयप्रकरणस्थमंत्रगतत्वेनबहु पाशयुक्तेपूत्कर्षासंभवेनतत्रगुणभूतप्रत्ययार्थबाहुल्यस्यानुसरणाय प्रधानभूतप्रातिपदिकार्थोत्कर्षायोगेनैकस्मिन्नपिबहुवचनस्यास्वारस्यसंभवेपि प्रकृतेपिबंतावित्यादि द्विवचनस्यब्रह्मप्रकरणस्थत्वाभावेनान्यत्रोत्कर्षसंभवेनप्रकृत्यर्थस्वारस्यानुसारेणप्रत्ययास्वारस्यकल्पनस्यासंभवादित्यतआह ॥ **अस्यापीति** ॥ नन्वदितिःपाशानित्य त्रप्रकृत्यर्थस्वारस्यानुसारेणप्रत्ययार्थास्वारस्यादर्शनात् । यदितुऋतंपिबंतावित्यत्रप्रकृत्यर्थस्वारस्यानुसारेणप्रत्ययार्थास्वारस्यंचेत्कल्प्यतेतर्हिदर्शपूर्णमासप्रकरणस्थसयुवं हिस्थःस्वर्पतीतिद्वयोर्यजमानयोःप्रतिपदंकुर्यादितिश्रुतस्ययजमानादिद्वित्वस्यप्रकरणांतरउत्कर्षस्यदर्शनात्प्रकृतेपिऋतंपिबंतावित्यस्यप्रकरणांतरउत्कर्षोपिकिंनस्यादित्यत

SGDF Sri Gangadhar Digital Foundation

प्र० लिंगेनचब्रह्मप्रकरणत्वावगमात् । एवंचान्येनसहद्वित्वादेवद्विवचनोपपत्तौनतदनुरोधेनलक्षणयाप्रकृत्यर्थोबाधनीयइति । ननुविषमोयमुपन्यासः । तत्रप्रकृत्यर्थस्योत्कर्षभियाप्रत्ययार्थस्यबाधउक्तः । इहतूक्तरीत्येश्वरस्यभोक्तृत्वाज्जीवस्यचभोक्तृत्वस्यप्रत्यक्षादिसिद्धत्वात्पिबत्प्रातिपदिकेनजीवेश्वरयोर्ग्रहणे प्रातिपदिकार्थस्यभोक्तृत्वस्यप्रत्ययार्थस्यद्वित्वस्यचमुख्यस्यैवसंभवादितिचेन्मैवं । ऋतशब्दितधर्मफलभोक्तृत्वस्यजीवेऽनुपपत्त्यातस्यलक्षणीयत्वात् । अतएवटीकादौपूर्वद्विवचनस्यैवेश्वरेसावकाशत्वोक्तावप्यत्रपूर्वमृतपानकर्तृत्वस्येश्वरैकनिष्ठत्वमुक्तं । ननुतर्हिकथंतृतीयाध्यायस्यतृतीयपादे "द्वित्वबहुत्वयुक्तंवाचोदनात्तस्य" इतिचतुर्दशेऽधिकरणे "युवंहिस्थस्स्वर्पती" इतिद्वयोर्यजमानयोःप्रतिपदंकुर्यात् । एतेअसृग्रमिंदवइतिबहुभ्योयजमानेभ्य" इत्यत्रप्रत्ययार्थसंख्यानुरोधेनप्रातिपदिकमुत्कृष्यतइत्युक्तमित्यतस्तद्वैषम्यमाह ॥ **युवंहिस्थ इति** ॥ स्तोत्रस्यादौपठनीयाऋक् प्रतिपदित्युच्यते । एतामृचंप्रतिपदं प्रथमांकुर्यादित्यर्थः । नन्विदंसूत्रकृदेवपर्यहार्षीत् । यदाह "अर्थाभावात्तुनैवंस्याद्गुणमात्रमितर"दिति । सत्यं । तस्यप्रत्ययार्थाधीनोत्कर्षभ्रमव्युदासायस्पष्टीकरणमेतत् । तत्रकिंप्रतिपदावेकयजमानकज्योतिष्टोमेऽथद्विबहुयजमानकेषुकुलायाहीनादिषूत्कृष्टव्येइतिसंशये नित्येकर्मण्यशक्तिकृतांगत्यागांगीकाराद्यदैकोयजमानोज्योतिष्टोममनुष्ठातुंनशक्नुयात्तदा "वसंतेवसंतेज्योतिषायजेते" त्याख्यातोपात्तगुणभूतोपादेयकर्तृगतमेकत्वंक्रत्वंगमपित्यक्त्वा द्वौबहवोवायजेरन्निति ज्योतिष्टोमएवप्रति

"युवंहिस्थःस्वर्पतीइतिद्वयोर्यजमानयोःप्रतिपदंकुर्या"दितिश्रुतंयजमानद्वित्वादितु द्व्यादिप्रातिपदिकार्थत्वात्

गु० स्तद्वैषम्यमुपपादयति ॥ **युवंहीति** ॥ श्रुतंयजमानद्वित्वादित्येकयजमानकदर्शपूर्णमासप्रकरणादुत्कृष्टमित्यर्थः । तत्रहेतुमाह ॥ **द्व्यादीति** ॥ तथाचतत्रप्रकरणादुत्कर्षाभावेप्रकृत्यर्थस्यैवास्वारस्यापत्त्याप्रकरणादुत्कर्षः । नतुप्रत्ययार्थास्वारस्यवत्प्रकृत्यर्थस्यास्वारस्यंभवत्वित्याशंक्य प्रत्ययार्थोद्विविधः । संख्यारूपःकारकरूपश्चेति ।

SGDF Sri Gargeshwari Digital Foundation

प्र० पन्निवेशसंभवान्नोत्कर्षइतिप्राप्ते अशक्तिन्यायस्योपादेयांगविषयत्वाद्यजमानगतैकत्वस्यकालादिवदनुपादेयत्वात्तत्त्यागायोगेनप्रकृतौनिवेशासंभवात्कुलायादिषूत्कर्षइतिसिद्धांतितं । तत्रप्रकृतौयजमानद्वित्वाभावादुत्कर्षइतिसत्यं । तथापिप्रत्ययार्थाभावान्नोत्कर्षः । तस्यकारकाभिधानेनापिचारितार्थ्यात् । किंतुप्रातिपदिकार्थाभावेनैवेतिप्रातिपदिकार्थस्यप्रकृतत्वेऽनवकाशंद्वेधाह ॥ **संख्येति** ॥ दर्शपूर्णमासप्रकरणादितिलेखकदोषमूलःपाठोयं । ज्योतिष्टोमप्रकरणस्थत्वात्सौत्रप्रतिपद्विधानस्येत्याहुः । ननुप्रातिपदिकार्थसंख्यायाःप्रकृतावसंभवेनयद्युत्कर्षस्तर्हि "नसंख्योपसंग्रहा"दितिनये "यस्मिन्पंचपंचजना"इतिप्रातिपदिकार्थस्यबहुत्वस्यैकस्मिन्नसंभवेपिकथंतत्रैवनिवेशोभ्युपगतइत्यतआह ॥ **यस्मिन्निति** ॥ नचतथायजमानेसंभवतीत्युक्तमितिभावः । ननु "उद्गातृचमसमेकस्यश्रुतिसंयोगा"दित्यधिकरणे "प्रैतुहोतुश्चमसःप्रसुब्रह्म

संख्यानभिधानेपिकारकाभिधानेनप्रत्ययस्यसार्थक्यवत्प्रातिपदिकस्यसार्थक्यासंभवात् । रामकृष्णावित्यादाविवचप्रकृतेरूपविशेषणेवयजमानेरूपविशेषणद्वित्वासंभवाच्चैकयजमानकदर्शपूर्णमासप्रकरणादुत्कृष्टं । यस्मिन्पंचपंचजनाइत्यत्रतुबहुत्वस्यप्रातिपदिकार्थत्वेपिब्रह्मणोबहुरूपत्वाददोषः ।

गु० तत्रसंख्यारूपार्थानभिधानेपिकारकरूपप्रत्ययार्थस्याभिधानेनप्रत्ययस्यसार्थक्यंसंभवतीत्याह ॥ **संख्येति** ॥ **रामकृष्णावित्यादाविति** ॥ रामकृष्णयोर्द्विरूपत्वेनसर्वत्रप्रसिद्धत्वाद्दतपानकर्तुर्द्वित्वस्योपपादयिष्यमाणत्वाद्यद्याप्यसिद्धत्वेपि रामकृष्णादिवत्संभावनामात्रस्यकर्तुंशक्यत्वाद्यजमानद्वित्वस्यरूपभेदेनाप्यसंभावितत्वात्तस्योत्कर्षेपिनप्रकृतउत्कर्षइतिभावः । ननुश्रुतस्ययजमानद्वित्वस्येवयस्मिन्पंचपंचजनाइत्यत्रबहुत्वस्यापिप्रकृत्यर्थत्वात्तस्यचैकस्मिन्ब्रह्मण्यसंभवात्तस्मात्प्रकरणादन्यत्रोत्कर्षःस्यादित्यतआह ॥ **यस्मिन्निति** ॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यमात्रप्रदर्शनार्थंपूर्वंद्वयोर्यजमानयोरित्यत्रद्वित्वस्यप्रातिपदिकार्थतोक्तिः । अतएवतत्ररामकृष्णावित्यादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० ण्यस्यप्रोद्गातॄणां" इतिमंत्रगतबहुवचनानुग्रहायप्रातिपदिकलक्षणाश्रयणादिहापितथास्यादित्याशंकांवैषम्येणसमाधत्ते ॥ नन्वित्यादिना ॥ विवृतमेतत्प्राक्जन्माद्यस्ययतइतिसूत्रे । छंदोगत्वरूपधर्मस्येवेहकस्यचिदभावादित्यर्थः । नचजीवादिस्तथा । ब्रह्मप्रकरणत्वव्याघातादिति भावः ॥ अतएवेति ॥ लक्षणोपयोगिधर्माक्रांतस्यकस्यचिदभावादेवेत्यर्थः । तादृशधर्मोबंधकद्रव्यत्वंवायागसाधनत्वंवानद्वयमपियुज्यतइत्याह ॥ उद्गात्रिति ॥ नन्वेवंतर्हिब्रह्मप्रकरणेऽन्यस्याभावेनान्येनसहद्वित्वमस्त्वितिकथमितिचेदप्राकरणिकेनकेनचिदस्तु । श्रौतस्यकथमेवं

ननुप्रोद्गातॄणामित्यत्रेवविभक्त्यर्थानेकत्वानुग्रहायप्रकृतेपि छत्रिवत्प्रातिपदिकलक्षणैवयुक्तेतिचेन्न । तत्रैवप्रकरण उद्गातृशब्दलक्षणीयानांप्रस्तोत्रादीनांछंदोगानामिवात्रब्रह्मप्रकरणेलक्षणीयस्यान्यस्याभावात् । अतएवपाशानित्यत्रबहुत्वायप्रातिपदिकलक्षणानाश्रिता । उद्गातृपदेनछंदोगानामिवपाशशब्देनबंधकद्रव्यलक्षणायांप्रकरणेबंधकबहुत्वस्याभावात् । यागसाधनद्रव्यमात्रलक्षणायांचपाशमंत्रस्थस्यप्रमुमोक्त्वित्यस्यानन्वयात् ।

गु० नारूपविशेषणैवेत्यादिनावस्तुस्थितिरुक्तेतिहृदयं ॥ तत्रेति ॥ उपलक्षणंचैतत् । छत्रिणइत्यत्रानेकेषामेकत्रगमनलक्षणक्रियासंबंधवत्प्रकृते उभयोरेकत्रक्रियासंबंधाभावाच्चेत्यपिद्रष्टव्यं ॥ लक्षणीयस्यान्यस्याभावादिति ॥ ब्रह्मलक्षणभूतऋतपानयोग्यस्येत्यर्थः । द्वासुपर्णेत्यादौजीवेनसहद्वित्वोपपत्तावपिनतस्यपानं । लक्ष्यस्यक्रियान्वयापत्तेर्नलक्ष्यत्वमितिभावः । दृष्टांतदार्ष्टांतिकयोर्वैषम्यमात्रप्रदर्शनार्थंपूर्वं । ननुब्रह्मप्रकरणेलक्षणीयस्याभावेप्युभयोरेकक्रियासंबंधाभावेपिप्रातिपदिकलक्षणाभवत्वित्यतआह ॥ अतएवेति ॥ तत्प्रकरणेलक्षणीयस्यान्यस्याभावेएकक्रियासंबंधाभावेचलक्षणायाअसंभवादेवेत्यर्थः । अन्यथाऽदितिःपाशानित्यत्रापिप्रत्ययार्थबहुत्वापत्त्याप्रातिपदिकलक्षणास्यादितिभावः । अस्तुतत्रापिलक्षणेत्यतआह ॥ उद्गातृपदेनेति ॥ एवंप्रकरणानुसारेणप्रत्ययार्थभूतद्वित्वस्यैवास्वारस्यमंगी

प्र० निर्वाहइतिचेदुक्तानुपपत्तिबलादेवेत्यवेहि । वस्तुतश्श्रुतितात्पर्यविषयत्वमेवद्वित्वस्यनास्ति । पूर्वोत्तरैकवचनांतवाक्यविरोधादितिभावेन "यस्सेतुरितिचैकत्ववचनेनविशेषणा"दित्यनुव्याख्यानसूचितंपरिहारांतरमाह ॥ किंचेति ॥ द्वित्वस्याविवक्षास्त्वित्यन्वयः । ननूक्तंविधेयगतमित्यतस्तदनूद्याह ॥ यद्यपीति ॥ विवक्षेति ॥ "वसंतेब्राह्मणोग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्यः" इतिवाक्ये अग्नीनित्यत्रबहुत्वस्याविवक्षायांगार्हपत्याहवनीयान्वाहार्यपचनरूपाग्नित्रयाधीनासिद्धिर्नस्यादितिभावः ॥ सत्रादिति ॥ दशमस्यद्वितीयपादे "तेषांतुवचनाद्वियज्ञवत्सहप्रयोगस्स्या"दितित्रयोदशेऽधिकरणे सत्रादितिवाक्यविहितःपृष्टशमनीयउदवसायिभिस्संहत्यप्रयोक्तव्यउतैकैकेनेतिसंशये यजेरन्नित्याख्यातोपात्तबहुत्वस्योपादेयकर्तृगामित्वेनविवक्षितत्वात्संहत्येतिप्राप्ते स्यादेवंयदिबहुत्वंविधीयेत उदवसायेतितुक्त्वाप्रत्ययादुदवसानसमानकर्तृत्वावगमात्तत्रचबहूनांकर्तृत्वात्प्राप्तमेवबहुत्वंनविधेयं । नचाविहितमंगंभवति । उदवसानेगम्यमानमपिबहुत्वमविवक्षितं । तस्मादेकैकश्येनप्रयुंजीरन्निति सिद्धांतितं ॥ निर्ज्ञातेति ॥ निर्णीतविरुद्धविशेषणत्वमेवेत्यर्थः ॥ ग्रहैकत्वेति ॥ तत्रहि "दशैतानध्वर्युःप्रातस्सव

किंचयद्यपिटीकायांयौगुहांप्रविष्टौतौछायातपौवदंतीत्युक्तत्वेनछायातपावित्यनेनोक्तंद्वित्वंविधेयविशेषणं तथापि "अग्नीनादधीते"त्यादौबहुत्वस्योद्देश्यविशेषणत्वेपि विवक्षादर्शनेन "सत्रादुदवसायपृष्टशमनीयेनयजेर"न्नित्यत्रचबहुत्वस्यविधेयविशेषणत्वेप्यविवक्षादर्शनेन निर्ज्ञातविशेषणत्वमेवाविवक्षायांतंत्रमितिग्रहैकत्वनयेस्थितत्वादिहच "यस्यब्रह्मचक्षत्रंचे"त्यादिपूर्ववाक्ये

गु० कर्तव्यमित्युक्तं । इदानींतुयस्यब्रह्मचक्षत्रंचेत्यादिपूर्ववाक्ये यस्येत्येकवचनेनैकत्वस्यनिर्ज्ञातत्वात् । द्वित्वस्याविवक्षायामेकस्यैवबोधनंस्यात्तच्चानिष्टमितिभावः ॥ बहुत्वस्येति ॥ तत्रानेकेषामधिकाराभावादित्यर्थः । नन्वेवंविधेयगतविशेषणत्वाद्द्वित्वस्याविवक्षायांसप्तदशप्राजापत्यानित्यत्रापिसेदोनस्यात् । तत्रापिबहुत्वस्य

SGD
Sri Gurgadhari Digital Foundation

प्र० नेगृह्णाती"तिग्रहाणांनिर्ज्ञातैकत्वविरुद्धसंख्यत्वादेकत्वस्याविवक्षोक्तेरित्यर्थः ॥ **यस्येतीति** ॥ "यस्सेतुरितिचैकत्ववचनेने"त्युपलक्षणमिति भावः । कथंतर्हिक्कचित्संख्ययाभेदोक्तिरित्यतआह ॥ **सप्तदशेति** ॥ प्राग्विवृतमेतदधिकरणं ॥ **वाक्यशेषादीति** ॥ "स्थित्यदनाभ्यां चे"त्यत्रवक्ष्यमाणदिशा साशनानशनत्वरूपभेदकधर्मप्रतिपादनात् "तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योभिचाकशीती"तिवाक्यशेषानुसारा द्वासुपर्णेत्यत्रद्वित्वसंख्ययाव्यक्तिभेदआश्रितइत्यर्थः । तथाप्राजापत्यशब्दाभिहितदेवताविशिष्टद्रव्यस्यैवसप्तदशत्वसंख्यान्वयानुसाराच्चयागेषुभेदआश्रितइत्यादिशब्दार्थः । "अन्यथासंख्ययाकर्मभेदोनस्या"दितिप्रागुक्तदोषमुद्धरति ॥ **नहीति** ॥ औत्सर्गिकस्य संख्ययाभेदइत्यस्य । क्वचित् पिबंतावित्यादौ । अपवादेन निरवकाशलिंगप्रकरणनिर्ज्ञातविरुद्धविशेषणत्वादिनेत्यर्थः ॥ **उक्तंहीति** ॥ भक्तिपादे ।

यस्येत्येकवचनेनैकत्वसंख्यायानिर्ज्ञातत्वाद्द्वित्वस्याविवक्षास्तु । "सप्तदशप्राजापत्यान् द्वासुपर्णेत्यादौतुप्रागेकत्वस्यानवधृतत्वात् "अनश्नन्नन्य"इत्यादिवाक्यशेषाद्यनुसाराच्चभेदआश्रितः । नह्यौत्सर्गिकस्यक्वचिदपवादेनान्यथात्वेसर्वत्रापितथात्वं । उक्तंह्यनुव्याख्याने "उत्सर्गतोपियत्प्राप्तमपवादविवर्जितं । व्यभिचार्यपवादेनमानमेवभविष्यती"ति ।

गु० द्वित्वस्यवाविधेयविशेषणत्वेनाविवक्षितत्वादित्यतआह ॥ **सप्तदशेति** ॥ नचसप्तदशप्राजापत्यानित्यत्राप्येकत्वस्यावधृतत्वात्कथमेतदितिवाच्यं । प्रत्येकमेकत्वावधारणेपिप्रत्येकंसप्तदशत्वाविधानात् । यत्रचसमुदायेसप्तदशत्वंविधीयतेतत्रैकत्वस्यानवगतत्वादिति ॥ **औत्सर्गिकस्येति** ॥ द्वित्वमविवक्षितमितिनियमस्यौत्सर्गिकत्वेसप्तदशप्राजापत्यानित्यादावेकत्वानवधारणादिरूपापवादकेनाविवक्षायाअभावेप्यपवादकाभावेऽविवक्षायास्संभवादितिभावः । ननुसप्तदशप्राजापत्यानित्यादाविवप्रकृतेप्येकत्वावधारणोपायाभावेनतदनवधारणादविवक्षाप्रयोजकीभूतस्यनिर्ज्ञातविशेषणत्वस्याभावात्पिबंतावित्यत्रद्वित्वस्याविवक्षानसंभवतीतिब्रह्मपक्षेद्वित्वानु

SGDF
Sri Gargeshwari Digital Foundation

प्र० अपवादेनव्यभिचार्यपीत्यर्थः । प्रकृतेकिमपवादकमित्यतआह ॥ **अत्रत्विति** ॥ एकत्वावधारणमेवापवादकमित्यर्थः ॥ **अतएवेति** ॥ ''पंचप्रयाजाइज्यंत''इतिप्रयाजानांनिर्ज्ञातसंख्यत्वादेवेत्यर्थः । पंचमेतृतीयपादे ''विवृद्धिःकर्मभेदात्पृषदाज्यवत्तस्यतस्योपदिश्यत''इत्याद्याधिकरणे ''एकादशप्रयाजान्यजतिषडुपसद''इतिश्रुतसंख्या प्रत्येकंभवति किंवासर्वसंपादिनीतिसंशये प्रयाजानुपसदश्चोद्दिश्यसंख्याविधानादुद्देश्यानांचसाहित्यस्याविवक्षासंभवात्प्रतिप्रयाजंप्रत्युपसदंसंख्यास्यादितिप्राप्ते नैकैकशस्समुदितानांवास्वरूपेणसंख्यान्वयस्संभवति । एकस्यपंचानांचैकादशत्वायोगात् । अतस्संख्यान्वयसिद्धयेप्रयाजाःप्रयोगंलक्षयंति । तंलक्षयंतस्तत्राभिधानात्सहावगतास्तथैवलक्षयंति । संख्याचेयमनेकवृत्तिस्वभावासमस्तलक्षितप्रयोगगतापिशक्नोतिसर्वेषांप्रयाजानामुपकर्तुं । अतस्सर्वसंपादिनीस्यादितिसिद्धांतितं । प्रयोगावृत्त्यादशसंख्यासंपत्तौतत्रैकस्यचरमस्यत्रिरावृत्त्यैकादशत्वमितिबोध्यं । तथानवमेद्वितीयपादे ''नैमित्तिकंतूत्तरत्वमानंतर्यात्प्रतीयेत''इतिचतुर्थेधिकरणेद्वितीयवर्णकेचिंतितं द्वादशाहेचतुर्थेहनित्रैशोकनामकंसामविहितं । तच्च ''अतिजगतीषुस्तुवंती''त्यतिजगत्यामुत्पन्नं । पूर्वत्रहि

अंत्रतुगुहाप्रवेशादिनाब्रह्मत्वेननिश्चितस्यपातुःपूर्वत्र ''यस्यब्रह्मचक्षत्रंचे''ति ''मृत्युर्यस्ये''ति ''कइत्थे''ति उत्तरत्रच ''यःसेतु''रित्याद्येकवचनाच्चैकत्वमवधृतं। अतएव ''एकादशप्रयाजान्यजती''त्यत्रपंचप्रयाजानामेवावृत्त्यैकादशत्वमित्युक्तंपंचमे। नवमेपि ''अतिजगतीषुस्तुवंत''इतिबहुवचनंविश्वापृतनाइत्येकस्यामेवातिजगत्यामृचिसप्तकृत्वोभ्यासमात्रेण । नतुजगतीव्यक्तिबहुत्वेनेत्युक्तं ।

गु० पपत्तिरेवेत्यतआह ॥ **अत्रत्विति** ॥ निर्ज्ञातविशेषणत्वस्यापिविवक्षाकिंनस्यादित्यतआह ॥ **अतएवेति** ॥ इदानींप्रत्ययार्थभूतमनेकत्वमविवक्षितमितिनतस्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० समछंदस्केतृचेसामगानंकार्यमितिविचारितं । इहचतृचमध्ये आद्या "विश्वापृतन्याअभिभूत"मित्यतिजगती । उत्तरमृग्द्वयंच "नेमिंनमंति"इति "समीरेभासोअस्वर"न्नितिचबृहतीछंदस्कंपठ्यते । तत्रतृचगानेकर्तव्येकिंबृहत्योस्त्यागेनातिजगत्यौद्वेआनीयसमछंदस्कासुतिसृष्वृक्षुगानंकार्यमुतविषमास्वेवेतिसंशये "समासुगान"मितिपूर्वत्रनिर्णीतत्वात् "अतिजगतीषुस्तुवंती"तिबहुवचनानुग्रहायचसमासुगानमिति प्राप्ते उत्तरयोर्बृहत्योःपाठस्यक्रत्वर्थत्वात् तत्परित्यागेचतयोरानर्थक्यात् "एकविंशष्षोडशोवैराज"मितिश्रुतैकविंशत्वसंख्यासंपत्तयेच एकस्यामृचिसप्तकृत्वोभ्यस्यमानायामभ्यासापेक्षयाऽतिजगतीबहुत्वस्योपपत्तेर्विषमछंदस्कासुमानमितिसिद्धांतइति । नत्वितितदधिकरणपूर्वपक्षनिरासः । एवंप्रत्ययार्थानुगुण्येनप्रातिपदिकबाधायोगात्तदनुरोधेनप्रत्ययार्थएवान्यसाहित्येनवाऽविवक्षितत्वेनवाकथंचिन्नेयइतिप्रौढ्यापरिहारद्वयमुक्तं । इदानींनन्वत्रान्यस्याश्रवणात्तत्साहित्येनकथंद्वित्वमितिशंकांग्रहेष्वेकत्वस्यस्वरूपतस्सत्त्वेनानुवादत्ववत्प्रकृतेब्रह्मणिद्वित्वस्यस्वरूपतएवाभावेनानुवादत्वमपिनसंभवतीतिप्रागुक्तशंकांचनिरसितुं "द्वित्वंचैकस्ययुज्यते । यस्सेतुरितिचैकत्ववचनेनविशेषणा"दित्यनुव्याख्यानानुरोधेनद्वित्वस्यविवक्षामुपेत्यद्वित्वैकत्वयोस्समावेशमाह ॥ **किंचेति** ॥ दृष्टांतविवरणपूर्वंश्लोकंव्याचष्टे ॥ **दृश्यतेहीति** ॥ **एकस्मिन्नेवेति**॥

किंच । संबंधादियथैकस्मिंस्तथानेकत्वमिष्यतां । प्रमितत्वाद्विरोधंतुविशेषोवारयिष्यति । दृश्यते हि "प्रमेयत्वंप्रमेयं आनंदंब्रह्मणः भेदोभिन्न"इत्यादावेकस्मिन्नेवविशेषणविशेष्यभावेनसंबंधः ।

गु० स्वारस्यंनवाविवक्षितत्वमित्याह ॥ **किंचेति** ॥ नन्वेवंवस्तुगत्याऽनेकत्वसंख्याभ्युपगमेवस्तुगत्यानंदादिसंबंधोभ्युपेयः आनंदंब्रह्मणइतिसंबंधव्यवहारस्यतत्रापि

प्र० "विज्ञानमानंदंब्रह्मे"त्यादावानंदब्रह्मणोरेकत्वंसिद्धमितिभावः । संबंधइत्यनंतरंतथेहाप्येकस्मिन्ब्रह्मण्यनेकत्वमस्त्वितियोज्यं । ननुश्रुत्याऽनेकत्वनिषेधान्नैवमित्यतआह ॥ **नेहनानेति** ॥ किंचनगुणकर्मादिकंनानाभिन्नंनेतिभेदस्यैवनिषेधइत्यर्थः ॥ **इत्यादिश्रुत्येति** ॥ चतुर्थबृहदारण्यकश्रुत्येत्यर्थः । आदिपदेन "युक्ताह्यस्यहरयश्शतादशे"ति "तस्यहवाएतस्यपरमस्यत्रीणिरूपाणि कृष्णोरामःकपिलइति तस्यहवाए तस्यपंचरूपाणि शतरूपाणि सहस्ररूपाण्यमितरूपाणी"त्यादिगृह्यते । एतेन "प्रमितत्वा"दित्येतद्विवृतंभवति ॥ **भेदेति** ॥ घटपटयोर्भेदोद्वित्वनिर्वाहकः । इहतुभेदस्य "नेहनाने"तिनिषेधात् "अयंवैदशचे"त्यादिनैकत्वानेकत्वयोःप्रमितत्वात्सोमकार्यनिर्वाहकेणसोमप्रतिनि

"नेहनाने"त्यादिनातुब्रह्मणिभेदएवनिषिद्धः । नत्वनेकत्वसंख्या । प्रत्युत "अयंवैहरयोयंवैदशचसहस्राणिचबहूनिचानंतानितदेतद्ब्रह्मापूर्वमनपरमनंत"मित्यादिश्रुत्याहिसाविहिता । विरोधंतुभेदप्रतिनिधिविशेषोवारयिष्यति ।

प्र० धिनापूतिकेनसोमकार्यमिव भेदकार्यमविरोधकेनभेदप्रतिनिधिनास्वरूपसामर्थ्यापरपर्यायेणविशेषेणभविष्यतीत्यर्थः । समार्थितश्चविशेषपदार्थोमूलग्रंथेषुतत्रतत्र । न्यायामृतेद्वितीयपरिच्छेदेचेतिभावः । यदप्यनुभाष्यसुधयोःऋतंपिबंतावितिद्विवचनविषयतयाप्रकृतयोर्द्वित्वाधारयोः "यस्सेतुरित्येकवचनेनविशेषणादभेदैकत्वाधारतयाऽवगमा"दित्यादिनाप्रकृतवाक्यएवद्वित्वैकत्वयोरैकाधिकरण्यंप्रमितमित्यविरोधउक्तः तथापितस्यस्पष्टत्वाद्वाविचारहीनवाक्यांतरेपिप्रमितत्वमस्तीतिभावेनवा "अयंवैहरय"इत्यादिश्रुत्यंतरोक्तिः । सुधायांप्रमितत्वोक्तावपिकथंनिर्वाहइतिशंकापिविरोधंत्वित्यादिनापरिहृता । इदानीं "आत्मांतरात्मेतिहरिरेकएवद्विधास्थित"इतिभाष्यानुरोधेनात्मानावितिसौत्रपदसू

SGDF
Sri Gargeshwari Digital Foundation

प्र० चितपरिहारमाह ॥ **किंचेति** ॥ **सिद्धमेकस्याप्यनेकत्वमिति** ॥ सत्यं । कथंनिर्वाहइतिचेद्विशेषबलादित्येकोनिर्वाहःप्रागुक्तः । अन्यमपिदृष्टांतपूर्वमाह ॥ **एवंचेति** ॥ एकस्यानेकत्वेप्रमितेसतीत्यर्थः । नवमेतृतीयपादे "मेधपतित्वंस्वामिदेवतस्यसमवायात्सर्वत्रचप्रयुक्तत्वात्तस्यचान्यायनिगदत्वात्सर्वत्रैवाविकारस्स्या"दितिद्वादशेऽधिकरणेचिंतितंअग्नीषोमीयेपशावध्रिगुप्रैषे "आशासानामेधपतिभ्यांमेध"मितिकचिच्छाखायांश्रुतं । क्वचित् "मेधपतयेमेध"मिति । तत्रकिमुभयोर्विकृतिष्वविकारउतद्विवचनस्यदेवतापरऊहएकवचनस्ययजमानपरऊहोथवोभयोर्यजमानपरऊहःकिंवोभयोर्देवतापरऊहइतिचतुर्धासंशये मेधपतिशब्देनमेधस्यपशोस्स्वामीयजमानोदेवताभूतौचाग्नीषोमौचेत्युभयेप्युच्यंते । तेनद्विवचनमेकवचनंचान्याय्यनिगदमित्यनूहइत्येकःपक्षः । संभवत्यर्थपरत्वेऽन्याय्यनिगदत्वायोगात्प्रकृतौद्विवचनांतोदेवतावचनस्तेनासौदेवताविवृद्धावूहितव्यः एकवचनांतस्तुयजमानवचनस्तेनतद्विवृद्धावूहितव्यइतिद्वितीयः एकोयंमंत्रश्शाखाप्रभेदेनकिंचिद्भिन्नश्श्रु

किंचब्रह्मणआनंदमात्रात्मकत्वेतत्स्फुरणाभावः ज्ञानमात्रात्मकत्वआनंदाभावइत्युभयथापिमोक्षस्यापुमर्थत्वंस्यात् । परमतेपिसुखप्रकाशस्यपुमर्थत्वात् । ज्ञानानंदोभयात्मकत्वेतुसिद्धमेकस्याप्यनेकत्वं । एवंचयथानवमे "मेधपतयेमेधं मेधपतिभ्यांमेध"मित्यत्रमेधपतिशब्दार्थयोरग्नीषोमयोरेकवचननिर्वाहायदेवतात्वेनैकत्वं । देवतात्वस्यव्यासक्तत्वात् । द्विवचननिर्वाहायदेवतात्वाधिष्ठानरूपेणद्वित्वमितिद्वित्वैकत्वयोस्समुच्चयस्तथेहापि ब्रह्मणःस्वरूपेणैकत्वंरूपविशेषेणद्वित्वमितिश्रौतयोर्द्वित्वैकत्वयोःसमुच्चयोऽस्तु । ॥ ४६८ ॥

गु० सत्त्वात् । यदिसंबंधाभावेपिविशेषबलाद्व्यवहारमात्रं तर्हिप्रकृतेप्यनेकत्वसंख्याभावेपिविशेषबलादेवव्यवहारइतिसमानमित्यपरितोषादाह ॥ **किंचेति** ॥ व्यासक्त

SGDF Sri Gargeshwari Digital Foundation

प्र० तस्तेनयजमानपरत्वे मेधपतयेयोमेधःपशुः तमाशासानाइतिसंबंधः। देवतापरत्वेमेधपतिभ्यामाशासानाइति। नचैकस्यवाक्यस्यवचनव्य क्तिद्वयंसंभवतीत्युभाभ्यांयजमानस्यवादेवतायावाऽनियमेनाभिधानं । तत्रदेवतापरत्वेऽग्नीषोमयोर्द्वित्वादेकवचनमयुक्तं । यजमानपक्षेतु द्वित्वंपत्न्यभिप्रायत्वेनावकल्पतइतिप्रकृतौस्वामिपरावुभावपिस्वामिवशादूहितव्याविततितृतीयइतिप्राप्ते मेधमाशासानाइत्युक्तेकिमर्थमाशासा नाइत्यपेक्षाभवति । तत्रमेधपतिभ्यामाशासानाइत्यपेक्षितार्थपूरणायसंबध्यते । नचयजमानायासावाशास्यते । तस्यैवहिदेवताभ्यामाशा स्यते । अतोदेवतावचनं । एकवचनंत्वग्नीषोमयोरुभयोर्व्यासक्तंदेवतात्वं । तेनदेवतात्मनोभयोरेकत्वात्तदभिप्रायं । द्विवचनंत्वग्नीषो

"इंद्रोमायाभिःपुरुरूपईयते यदेकमव्यक्तमनंतरूपं एकंरूपंबहुधायःकरोति पश्यमेपार्थरूपाणिशतशो थसहस्रशः" । इत्यादिश्रुतिस्मृतिभिरेवसमुच्चयावगतेः । तदेतदभिप्रेत्योक्तमनुव्याख्याने "द्वित्वंचै कस्ययुज्यत"इति । न्यायविवरणेच "द्विवचनश्रुतेरपिननिरवकाशत्वं । विष्णोरेवद्विरूपत्वा"दिति ।

प्र० मौदेवतेइतिवदधिष्ठानापेक्षं । तेनद्विवचनमधिष्ठानसंख्यावशात् । एकवचनंतुदेवतासंख्यावशाद्विकृतिषूहितव्यमितिसिद्धांतइति । एवंच यथाब्रह्मणस्स्वरूपेणैकत्वेपिज्ञानानंदोभयात्मकत्वेनानेकत्वंमायिनांमते यथाचमीमांसकमतेमेधपतयइत्यादेर्द्वित्वैकत्वयोर्देवतात्वादिरूपभेदेनो पपत्तिस्तथेहापीत्यर्थः । ननुतत्रवचनद्वयेनद्वित्वमेकत्वंचावगतमित्यतआह ॥ इंद्रइति ॥ तदेतदिति ॥ प्राचीनमिदंचेतिमतद्वयमभिप्रे त्येत्यर्थः । अंत्यपक्षंमूलारूढंकरोति ॥ न्यायविवरणेचेति ॥ एतेन "द्विवचनंद्विरूपत्वाभिप्रायेणे"तिटीकान्यायविवरणमूलेतिसूचितं । नन्वत्रैवभगवतिद्वित्वस्यव्युत्पाद्यत्वेऽत्रैवचतुर्थपादे "नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्चे"तितृतीयाधिकरणे "यस्मिन्पंचपंचजनाआ

SGDF
Sri Gargeshwari Digital Foundation

प्र० काशश्चप्रतिष्ठितः। तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृत"मितिवाक्येपंचपंचेतिवीप्सयाप्रतिशरीरंपंचत्वसंख्याविशिष्टतयाजनशब्देनोक्तः किंविष्णुरन्योवेतिसंशये पंचजनशब्दस्यबहुत्वसंख्याविशिष्टवस्तुवाचित्वाद्बहुत्वस्येश्वरेविरुद्धत्वाच्चान्यइतिप्राप्ते स्वगतभेदशून्यस्यापिनानारूपत्वेनबहुत्वसंख्योपसंग्रहाविरोधाद्विष्णुरेवेतिसिद्धांतितत्वेनतेनगतार्थमिदमित्यतआह ॥ **नसंख्येति** ॥ तत्रनबहुत्वानुपपत्तिःपूर्वपक्षयुक्तिः। किंतुयस्मिन्निति सप्तम्यानिर्दिष्टस्यतमेवेतिवाक्यशेषबलेनविष्णुत्वात्तदाधेयतयोक्तानांपंचजनाकाशशब्दोक्तानांनविष्णुत्वं। एकस्यैवाधाराधेयभावायोगादितिप्राप्ते अत्रसिद्धेनानेकत्वेनतत्समाधानंतत्रकरिष्यते। अतएवतत्रटीका "नह्येकस्यैवाधाराधेयभावोयुज्यत"इत्यादि। नत्वनेकत्वंव्युत्पाद्यते। येनपौनरुक्त्यमित्यर्थः। एतेनन्यायविवरणटीकायामानंदमयनयेनगतार्थत्वाशंकादितुदिक्प्रदर्शनपरमितिभावः। ननुतत्रटीकायांन्यायविवरणेच "आधाराधेयत्वादी"त्यादिपदास्वारस्यं। टीकायांबहुत्वानुपपत्त्यापूर्वपक्षकरणंचास्वरसमित्यतस्सर्वस्वारस्यायाह

"नसंख्योपसंग्रहादपिनानाभावा"दित्यत्रतुनिर्भेदस्यब्रह्मणआधाराधेयभावानुपपत्तिशंकानिर्भेदत्वेप्यनेकत्वस्यापिसत्त्वात्तन्मात्रेणाधाराधेयभावोपपत्तिरितिसमाधास्यते। नत्वत्रैवैकस्यानेकत्वानुपपत्त्याशंका। येनपुनरुक्तिःस्यात्। अतएवतत्रटीका "आधाराधेयत्वादिलिंगेनान्यत्रैवप्रसिद्धानांपंचजनादिशब्दाना"मिति।

गु० त्वात्। व्यासज्यवृत्तित्वादित्यर्थः। ननुनसंख्योपसंग्रहादपीत्यधिकरणेएकस्यानेकत्वानुपपत्तिशंकायारूपबहुत्वाभिप्रायेणपरिहृतत्वादत्रापितत्प्रतिपादनेपौनरुक्त्यमित्यतआह ॥ **नेति** ॥ नन्वेतदयुक्तं। तथासतिनसंख्योपसंग्रहादपीतिसूत्रोक्तायाएकस्यानेकत्वानुपपत्तिरूपयुक्तेरुक्तिस्तत्रनस्यात्। किंचबहुरूपत्वादधिकरणाधे ॥ ४६९ ॥

प्र० ॥ **यद्वेति** ॥ कथंतर्ह्यपौनरुक्त्यमित्यतआह ॥ **अत्रत्विति** ॥ पक्षद्वयेप्युभयत्रानेकत्वोक्तेरपौनरुक्त्यंस्पष्टयति ॥ **तत्राद्येति** ॥ संख्योपसंग्रहादपिनविरोधइत्युक्त्यापूर्वपक्षेसंख्यानुपपत्तिरर्थादुक्तेत्यर्थः ॥ **अभ्युच्चयेति** ॥ यथापरमते ईक्षतिनयेप्रायपाठेनिरस्तेपीत्यभ्युच्चयत्वेनातएवप्राणइत्यत्रतदुक्तिः। यथावासर्वत्रेतिनयेस्वमतेहेत्वंतरेणपूर्वपक्षेचक्षुर्मयत्वादेरभ्युच्चयत्वेनोक्तिः। तथैवसुधायामुक्तेः। तथेहापीत्यर्थः। "प्राणाद्योवाक्यशेषा"दितितत्रत्यगुणसूत्रव्यावर्त्यपूर्वपक्षानुरोधेनपक्षांतरमाह ॥ **यद्वात्रभोक्तृत्ववदिति** ॥ किंत्वित्यस्यानपवादइत्यन्वयः। अतएवटीकायांऋतंपिबंतावित्यादाविवस्वगतभेदशून्यस्यापिपरमात्मनोबहुरूपत्वेनबहुत्वोक्तिःकिंनस्यादितिचेन्न। प्रतिशरीरमा

यद्वैकस्यानेकत्वमपितत्रसिद्धांतेव्युत्पाद्यं। अतएवतत्र"बहुरूपत्वादधिकरणत्वाधेयत्वादितस्यैवयुज्यत"इतिन्यायविवरणेऽनेकत्वसंख्योक्त्यर्थआदिशब्दः। अत्रतुकर्मबंधरहितस्यापिभोक्तृत्वमात्रमितिभेदः। तत्राद्यपक्षेनसंख्येतिसूत्रेसंख्योपसंग्रहशब्दोक्तैकस्यानेकत्वानुपपत्तिःपूर्वपक्षेभ्युच्चययुक्तिः। अपिशब्दोक्ताधाराधेयभावानुपपत्तिस्तुमूलयुक्तिः। द्वितीयपक्षेतुगुहांप्रविष्टावितिसूत्रे आत्मानौहीतिद्विवचनेनात्मांतरात्माख्यरूपद्वयोक्तिःसिद्धांतेभ्युच्चययुक्तिः। आदेयंमातीतिव्युत्पत्त्याऽऽत्मशब्दोक्तंशुभभोक्तृत्वंमूलयुक्तिः। यद्वा अत्रभोक्तृत्ववदनेकत्वेव्युत्पादितेपिनतत्रकेवलमाधाराधेयभावानुपपत्तिशंका। किंतुद्वित्वयुक्तस्यास्तुब्रह्मत्वं गुहाप्रविष्टत्वादिलिंगात्। पंचत्वयुक्तेतुनब्रह्मलिंगाद्यस्तीत्येकस्यानेकत्वानुपपत्तिरूपसामान्यन्यायस्यानपवादइतिशंका "प्राणस्यप्राण"

गु० यत्वादिकमितिन्यायविवरणेऽनेकत्वसंख्योक्त्यर्थादिशब्दानुपपत्तिश्चस्यादित्यस्वरसादाह ॥**यद्वेति**॥ ननुप्रथमपक्षेनसंख्योपसंग्रहादित्यस्यास्वारस्यमुक्तरीत्याद्वितीये

SGDF

प्र० त्मांतरात्मेतिवद्बहुत्वेमानाभावा"दित्युक्तमितिभावः । प्राणादीनांप्राणत्वादिप्रदत्वलिंगानीत्यर्थः ॥ **इत्यादीति** ॥ आदिपदेनाधाराधेयभावोपिरूपभेदाद्युज्यतइतिसमाधानंगृह्यते ॥ **इत्याद्यूह्यमिति** ॥ अत्रैकस्यानेकत्वआत्मांतरात्मेतिवत्तत्रप्रतिशरीरंबहुत्वेमानंनेतिशंकायां शरीरांतर्गताकाशप्राणादिपंचजननियामकत्वेनतेषुनानाभावस्यन्यायप्राप्तत्वाद्बहुत्वंसिद्धमितिसमाधानमूह्यमित्यर्थः । ननुद्वितीयस्यतृतीयपादे "उत्क्रांतिगत्यागतीना"मितिनयेजीवःकिंव्याप्तोथाणुरितिसंशये "व्याप्ताह्यात्मानश्चेतनानिर्गुणाश्चे"तिश्रुतेर्बहुवचनावरुद्धायाईश्वरविषयत्वायोगेनजीवविषयत्वावश्यंभावेनश्रुतिबलाद्व्याप्तइत्याशंकातन्निरासयोर्नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारादितिगुणसूत्रेणकृतत्वात्तेनपौनरुक्त्यमि

मित्यादिब्रह्मलिंगानिसंतीत्यादिसमाधानंचेत्याद्यूह्यं । "नाणुरतच्छ्रुते"रित्यत्रतु "व्याप्ताह्यात्मानश्चेतना"इति वाक्येब्रह्मलिंगाभावादनपोदितेनबहुत्वेनजीवस्यप्राप्तत्वाद्व्याप्त्यणुत्वश्रुत्योर्विरोधेशंकिते "सआत्मेदंसृजती"त्यादि पूर्ववाक्येब्रह्मलिंगसद्भावात् "तदयंप्राणोधितिष्ठती"त्यत्रैकवचनेननिर्दिष्टे "आतेनयात"मितिद्विवचनवदत्रापि "सआत्मे"त्येकवचननिर्दिष्टे "व्याप्ताआत्मान"इतिबहुवचनं । ततोनविरोधइतिवक्ष्यतइतिनतेनापिगतार्थता ।

प्र० त्यतआह ॥ **नाणुरिति** ॥ **अनपोदितेनेति** ॥ अतएवतत्रटीका "नचेश्वररूपबाहुल्यार्था । बाधकंविनाश्रुतेर्बाधायोगा"दितीतिभावः । "अणुर्ह्येषआत्मायंवाएतेसिनीतःपुण्यंचापुण्यंचे"त्यणुत्वश्रुतिर्ज्ञेया । ऐतरेयके "अथदेवरथ"इत्युपक्रम्य "तदयंप्राणोधितिष्ठती"त्युक्त्वा "तदुक्तमृषिणा आतेनयातंमनसोजवीयसे"तिद्विवचनांतमंत्रउदाहृतः । एवंद्विवचनंनबाधकमित्युक्त्वातत्प्रसंगप्राप्तपौनरुक्त्यंचव्युदस्तं । अधुना प्रागुक्तंछायात्वमपिनबाधकं । तस्याविद्याश्रयत्वरूपत्वाभावात् । किंतुयथाछायाप्राणिनांसुखहेतुस्तथाविद्वुषांसुखहेतुत्वादातपव

SGDF Sri Gargeshwari Digital Foundation

प्र० दृज्ञानांदुःखहेतुत्वाच्छायातपावित्युच्येतेरूपविशेषावित्याशयेनटीकोक्तमेवाह ॥ सुखेति ॥ "सछायेवविदुषांप्रभुः । आतपःपापिना"मि तितद्भाष्योक्तस्मृतेः । परपक्षेपिछायातपशब्दयोरविद्याविद्यावद्वाचकत्वाभावादितिभावः । तदुक्तंतत्वप्रदीपे "अमरासुराणांछायातपरूपा वितियोजनायोगादमराणामाह्लादकावसुराणांतापकावित्यर्थ"इति । एतेन "छायातपत्वंचान्यत्रव्याख्यात"मितिन्यायविवरणटीकाविवृता । अतोबाधकाभावाद्गुहाविष्टत्वादिसाधकभावात्पिबंतावीश्वररूपविशेषावेवेतिस्थितं । सूत्राक्षरासामंजस्यमाशंक्याह ॥ अत्रेति ॥ ऋतंपि बंतावित्येवोक्तौनलिंगोक्तिस्स्यादितिभावः । यद्यपिऋतंपिबंतावित्युक्तौऋतपातृत्वद्वित्वरूपपूर्वपक्षयुक्त्योस्सूचनमस्ति तथापिपूर्वपक्षयुक्तितो पिसिद्धांतयुक्तिसूचनस्यज्यायस्त्वादितिभावः । धर्मिनिर्देशेप्रयोजनमुक्त्वासाध्यनिर्देशस्यापितदाह ॥ यद्यपीति ॥ विच्छेदशंकानिवृत्त्य

सुखदुःखहेतुत्वरूपंगौणंछायातपत्वंप्रतियोगिभेदेनाविरुद्धं । अत्रचसूत्रेयद्यपिसमन्वेतव्यमृतपातृत्वमृतंपिबंतावितिसाक्षा देववक्तव्यं । तथापिगुहाप्रविष्टत्वहेतुरूपमपिवक्तुमृतपातृत्वसमानाधिकरणगुहाप्रविष्टत्वोक्तिद्वारातदुक्तिः । यद्यपिचात्र तत्तुसमन्वयादित्यतोनुषक्तस्यतच्छब्दस्यपूर्वत्रानंदमयस्तद्ब्रह्मेत्यादिरूपेणान्वयवदुत्तरत्राप्यंतरस्तद्ब्रह्मेत्यादिरूपेणान्वयव च्चात्राप्यन्वयःसिद्धः । तथापिसूत्रेश्रौतद्विवचनस्यगतिंवक्तुमात्मांतरात्माख्यरूपद्वयवाचिद्विवचनांतात्मशब्दप्रयोगः ।

गु० तुगुहांप्रविष्टावित्यस्येत्यतउभयानुसारायपक्षांतरमाह ॥ यद्वेति ॥ छायात्वंब्रह्मणोनयुक्तंजीववदविद्याश्रयत्वाभावादितिपूर्वपक्षोक्तंबाधकंपरिहरति ॥सुखेति॥ प्रतियोगिभेदेन विद्वदविद्वद्रूपप्रतियोगिभेदेनेत्यर्थः । ननुभोक्तृत्वादिकमहंकारधर्मः । अहंकारश्चचिदचित्संवलनात्मकइतितत्रचिद्भागस्यापिप्रविष्टत्वेनभोक्तृत्वादे

SGDF
Sri Gargeshwari Digital Foundation

प्र० र्थमुक्तं पूर्वत्रोत्तरत्रापीति । द्विवचनस्यगतिंवक्तुमित्युपलक्षणं । "आदेयमुपादेयंसुखंमात्यनुभवती"त्युत्तरनयसुधोक्तनिर्वचनेनऋतंपि
बंताविति प्रातिपदिकार्थोक्तिद्वाराऽनशनश्रुतेर्गतिंवक्तुंचेत्यपिध्येयं ॥ अत्रेति ॥ पूर्वं ऋतंपिबंताविति वाक्यं । उत्तरंतुयस्सेतुरितिवाक्यमिति
तत्क्रमात्क्रमः । यद्यपिश्रुतिरूपसाधकोक्तिपरत्वाद्वितीयस्यप्राथम्यमुचितं तथापितस्योत्तरवाक्यगतत्वेनविषयवाक्यगतत्वाभावात्क्रमइति
भावः ॥ अन्येत्विति ॥ ऋतंपिबंतौबुद्धिजीवौजीवेश्वरौवेतिसंशये बुद्धिजीवावेव । गुहाविष्टत्वलिंगात् । नियतहृदयगुहाविष्टत्वस्यपरि

अत्रचविषयवाक्यक्रमात्सूत्रक्रमः ॥ अ
न्येतु ऋतंपिबंतौबुद्धिजीवौगुहाप्रविष्टत्वा
देस्तत्रसंभवात्सर्वगतेब्रह्मण्यसंभवाद्बुद्धेर
पातृत्वेपिछत्रिन्यायेनपिबच्छब्दइतिप्राप्ते

प्र० च्छिन्नयोर्बुद्धिजीवयोरेवयुक्तत्वात् । सर्वगतेब्रह्मणितदयोगात् । "सुकृतस्यलोक"इतिसुकृतलोकावस्थानेनकर्मगोचरानतिक्रमस्यजीवस्यभो
क्तृतयाबुद्धेस्तुभोगसाधनतयातयोरेवोपपत्तेः । छायात्वरूपतमस्त्वस्यजडतयाबुद्धौप्रकाशत्वरूपातपत्वस्यजीवेसंभवाच्च । बुद्धेरपातृत्वेपिपा
तृजीवसाहचर्याच्छत्रिवदुपपत्तेस्तावेवपिबंताविति प्राप्तइत्यर्थः । तदुक्तंभामत्यां "नियताधारताबुद्धिर्जीवसंवेशिनीनहि । क्लेशात्कल्पयितुं
युक्तासर्वगेपरमात्मनी"ति । "ऋतपानेनजीवात्मानिश्चितोस्यद्वितीयता । ब्रह्मणैवसरूपेणनतुबुद्ध्याविरूपया । प्रथमंसद्वितीयत्वेब्रह्मणाव

प्र० गतेसति । गुहाश्रयत्वंचरमंव्याख्येयमविरोधत"इतिभामतींहृदिनिधायसिद्धांतमनुवदति ॥ ऋताख्येति ॥ कथंचिदिति ॥ सालग्रामे
हरिरितिवदुपलब्धार्थोद्देशविशेषोपदेशः । सुकृतस्यलोकवर्तित्वमपीश्वरेछत्रिन्यायेननेयं । छायातपत्वंचजीवस्याविद्याश्रयतयाब्रह्मणस्तदना
श्रयतयानेयमित्यर्थः । पिबतश्चित्त्वेऽवगतेतदनुरोधात्सजातीयस्यग्रहणंचरमस्यबाधइत्यादिस्यात् । तदेवा[illegible]द्धमित्याह ॥ बुद्धिस्थत्वादिति॥

ऋताख्यकर्मफलपानलिंगेनैकस्यजीवत्वेनिश्चितेद्वितीयस्तज्जातीयश्चेतनःपरमात्मैव । नत्वचेतनाबुद्धिः । अस्य
गोर्द्वितीयेनभाव्यमित्युक्तेगवांतरेणेवाश्वादिनासद्वितीयत्वाप्रतीतेः । एवंचप्रथमावगतऋतपानेनपिबतोर्जीवात्म
परमात्मत्वेनिश्चितेचरमंगुहाप्रविष्टत्वादिकंकथंचिन्नेयं । ब्रह्मणोपातृत्वेपिछत्रिन्यायेनपिबच्छब्दइतिसिद्धांतइत्या
हुः ॥ अत्रब्रूमः ॥ बुद्धिस्थत्वाद्धोक्तृतादेःपिबन्स्याच्चेतनःकथं । चित्त्वेपिद्वित्वपूर्वस्याबाधार्थंसद्वितीयता
॥ १ ॥ विरूपयापिबुद्ध्यास्तुकिंचबुद्धेस्सरूपता । वर्ततेसहजीवेनपारतंत्र्यादिरूपतः ॥ २ ॥ त्वन्मतेजपाकुसुम
गतस्यलौहित्यस्यस्फटिकइवबुद्धिगतस्यकर्तृत्वादेर्जीवेऽध्यासात्कथंपातृत्वलिंगेनैकस्यापिचेतनत्वं । येनतत्साजा
त्येनद्वितीयोपिचेतनःस्यात् । नहिलोकेदेहआत्मत्वमध्यस्तमित्यात्माद्रष्टव्यइत्यादिश्रुतावात्मशब्दोदेहपरः ।

प्र० टीकारीत्याऽभ्युपेत्याप्याह ॥ चित्त्वेपीति ॥ स्वमतेऽभावाद्धेतोरसिद्धिमाशंक्यपूर्वार्धंव्याचष्टे ॥ त्वन्मतइति ॥ "एतत्सर्वंमनएवे"त्या
दिश्रुतेरिति भावः । नन्वारोपितपातृत्वेनापिजीवएवपिबच्छब्देनबोध्यतइत्यतआह ॥ नहीति ॥ तन्मतेपिकेवलबुद्धिस्थत्वमसिद्धमित्यत

SGDF
Sri Gangadharan Digital Foundation

प्र० आह ॥ भोक्तृत्वादेरिति ॥ अन्योन्यधर्मेति ॥ "अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये"तिभाष्योक्तिरयुक्तास्यादित्यर्थः । शक्तिभेदेपिनव्यक्तिभेदइतिगुहाविष्टत्वमिवद्वित्वंनस्वरसमित्याशंक्याह ॥ अथेति ॥ तेनापि आरोपितपातृत्वेनापि ॥ नकथंचिदिति ॥ पातृत्वेनसजातीयत्वेनवेत्यर्थः । "चित्त्वेपी"तिपादत्रयंव्याचष्टे ॥ अस्तुवेति ॥ कल्पितभेदस्यसत्त्वाद्वित्वंस्यादित्यतउक्तं नतात्विकंद्वित्वमिति । अत्राप्यतात्विकमेवद्वित्वंबोध्यतामित्यतआह ॥ तथाचेति ॥ एतेन "द्विवचनमितिचेत्तर्हिजीवेश्वरांगीकारोपिनस्यात् ।

भोक्तृत्वादेश्चिदचित्संवलनधर्मत्वेचान्योन्यधर्माध्यासोक्तिरयुक्तास्यात् । एवंचपरमतेबुद्धेरेवपातृत्वेनप्रकृत्यर्थसंभवात् । ज्ञानक्रियाशक्तिभेदेनप्रत्ययार्थस्यद्वित्वस्यापिकथंचित्संभवात्प्राणसहिताबुद्धिरेवपिबंतावित्युच्यतां । अथद्वित्वेस्वारस्यमपेक्षसेतर्ह्यारोपितेनपातृत्वेनयुक्तोजीवोबुद्धेर्द्वितीयस्स्यान्नतुतेनापिरहितंब्रह्म । अथश्रुतेरारोपितविषयत्वंनसहसेतर्हिछत्रिन्यायेनपातृत्वरहितंसजातीयंजडांतरमेवबुद्धेर्द्वितीयमस्तु । चेतनस्यपरमात्मनस्तुनकथंचिदनुप्रवेशः ॥ अस्तुवाजीवस्यपातृत्वं । तथापिगोर्द्वितीयेनेत्यत्रद्वित्वस्यमुख्यस्यलाभात्सजातीयग्रहणं । इहतुब्रह्मग्रहणेजीवस्यब्रह्माभेदान्नतात्त्विकंद्वित्वं । तथाचयथाचंद्रःसद्वितीयइतिप्रमाणवाक्याद्विजातीयस्याप्यकल्पितभेदस्यनक्षत्रादेरेवधीर्नतुसजातीयस्यापिकल्पितभेदस्यचंद्रांतरस्य तथात्रापिचेतनत्वेनजीवस्यसजातीयत्वेपिकल्पितभेदस्यब्रह्मणोनधीः । किंतुविजातीयत्वेपि

गु० श्चिद्रूपजीवधर्मतासंभवत्येवेत्यतआह ॥ भोक्तृत्वादेरिति ॥ तथासतिवस्तुगत्याभोक्तृतादेस्तद्धर्मतापत्त्याऽन्योन्यधर्माध्यासोक्तेरयोगेन तत्प्रतिपादकयुष्मदस्मत्प्रत्ययगोचरयोरित्यादिभाष्यानारंभस्स्यादिति । चित्त्वेपिद्वित्वपूर्वस्साबाधार्थंसद्वितीयता । विरूपयापिबुध्याऽस्तु इत्येतत्संग्रहांशंव्याचष्टे ॥ अस्तुवेति ॥ ननु

SGDF
Sri Gargeshwari Digital Foundation

प्र० तयोरैक्यांगीकारात्। काल्पनिकोस्तितयोर्भेदइतिचेत्तर्हीश्वरस्यैवाद्भुताचिंत्यैश्वर्यवशाद्द्विरूपत्वेनद्वित्वमुपपाद्यता"मितिसुधावाक्ये ईश्वरस्यै वास्त्वित्यापादनेबीजमुक्तंभवति । ननुबुद्धावपिकल्पितभेदवत्त्वमविशिष्टमित्यतआह ॥ **धर्मिसमेति** ॥ ननुप्रथमावगतंसाजात्यंमुख्यमु पेत्यचरमावगतंद्वित्वमेवगुहाविष्टत्वमिवातात्विकंगृह्यतामित्यतोस्यशाब्दत्वात्साजात्यस्यतदभावादित्याह ॥ **नहीति** ॥ किंत्वाक्षिप्तमित्यर्थः । यदपिप्रथमेनचरमस्यगुहाप्रविष्टत्वस्यबाधइति तदप्ययुक्तमित्याशयेनद्वित्वपूर्वस्येत्यत्रपूर्वपदार्थंविवृण्वन्नाह ॥ **अपिचेति** ॥ जरठस्य वृ द्धस्य । प्रथमेन श्रुतेनेतिशेषः । जरठस्यद्वितीयोबलवानजरठएवोपादीयते । तद्वदिहगुहाप्रविष्टत्वस्यत्वन्मतेपरिच्छिन्नयोर्बुद्धिजीवयोरेवमु ख्यत्वेनसर्वगतेब्रह्मण्यमुख्यत्वेनब्रह्मग्रहणेतद्बाधःस्यात् । सचनयुक्तः । आक्षिप्तेनशाब्दबाधस्यान्याय्यत्वात् । अतस्तद्बाधायद्वितीयाविरू

धर्मिसमसत्ताकभेदायाबुद्धेरेव । नहिद्वित्ववत्साजात्यंशाब्दं । येनतदनुरोधेनद्वित्वंबाध्येत । अपिचास्यजरठस्य गोर्द्वितीयेनबलवताभाव्यमित्युक्तेचरमस्यापिशाब्दस्यबलवत्त्वस्याबाधार्थंप्रथमेनजरठत्वेनतदाक्षिप्तदुर्बलत्वेनवासा जात्यस्येवप्रकृतेपिचरमस्यापिशाब्दस्यगुहाप्रविष्टत्वस्याबाधार्थंप्रथमपातृत्वाक्षिप्तेनचेतनत्वेनसाजात्यस्यैवबाधोस्तु ।

गु० यथाब्रह्मग्रहणेजीवस्यब्रह्माभेदान्नतात्विकंद्वित्वंतथाबुद्धिग्रहणेपिबुद्धेरपिजीवाभिन्नत्वान्नतात्विकंद्वित्वमितिकथंबुद्धिरपिद्वितीयतयागृह्यतेत्यतआह ॥ **धर्मीति** ॥ जीवबुद्ध्योरभेदेनभेदस्यकल्पितत्वेपिबुद्धिजीवरूपधर्मिव्यावहारिकसत्तासमानसत्ताकस्यभेदस्यसत्त्ववत् जीवब्रह्मभेदस्यजीवब्रह्मरूपधर्मिसमसत्ताकस्याभावेन द्वितीयत याब्रह्मग्रहणासंभवेपिबुद्धेर्द्वितीयतयाग्रहणंभवतीतिभावः । ननुकल्पितभेदस्यब्रह्मणोऽद्वितीयतयाग्रहणेद्वित्वबाधापत्त्याद्वित्वानुरोधेनसाजात्यबाधकल्पनेविजातीयग्र हणेनसाजात्यबाधापत्त्या साजात्यानुसारेणद्वित्वस्यैवबाधःकिंनस्यादित्यतः स्यादेतदेवंयदिद्वित्ववत्साजात्यमपिशाब्दंस्यान्नत्वेतदस्तीत्याह ॥ **नहीति** ॥ नन्वस

SGDF
Sri Gargeshwari Digital Foundation

प्र० पापिबुद्धिरेवग्राह्येत्यर्थः । ब्रह्मपक्षेगुहाविष्टत्वममुख्यंतात्विकंनेत्येतदुपपादयति ॥ **नहीति** ॥ ब्रह्मणोर्भकौकस्त्वंनपारमार्थिकमित्यर्भकौ कस्त्वसूत्रगततदीयभाष्यानुवादः । "किंचबुद्धे"रित्यादिपादत्रयंव्याचष्टे ॥ **अस्तुवेति** ॥ ननुचेतनस्यैवभोक्तृत्वेतेनव्यापकस्यचेतनत्वस्याक्षे पेपिकथंपारतंत्र्यस्याक्षेपइत्यतोऽस्यापितद्व्यापकत्वात्समव्याप्तेस्तूभयत्राप्यभावादितिभावेनाह ॥ **चेतनस्येति** ॥ कूटस्थचेतनेतदभावादिति

नहि "योवेदनिहितंगुहायां"इत्यादिश्रुतिसिद्धमपिब्रह्मणोगुहानिहितत्वं "सर्वगतस्यब्रह्मणोर्भकौ कस्त्वंनपारमार्थिक"मितिवदतस्त्वमतेतात्त्विकं । अस्तुवाजीवस्यब्रह्मणासद्वितीयत्वेपिद्वित्वा देरबाधः । तथापिकर्मफलभोक्तृत्वेनचेतनत्ववत्पारतंत्र्यस्याप्याक्षेपात्परतंत्राबुद्धिर्जीवस्यद्विती यास्यात् । चेतनस्यभोक्तृत्वनियमाभावेपिभोक्तुश्चेतनत्वनियमवत्परतंत्रस्यभोक्तृत्वनियमाभावेपि

गु० त्पक्षेपिचरमश्रुतस्यगुहांप्रविष्टत्वस्य योवेदनिहितंगुहायां गुहाहितंगह्वरेष्ठंपुराणं गुहांप्रविश्यतिष्ठंतीमित्यादिश्रुतिभिर्ब्रह्मलिंगत्वनिश्चयात्पूर्वपक्षिणाचतस्यब्रह्मलिं गत्वाज्ञानेनब्रह्मपक्षेबाधकत्वेनशंकितत्वमित्यतआह ॥ **नहियोवेदेत्यादि** ॥ तात्विकत्वाभावेहेतुःसर्वगतस्येति । तथाचतद्बाधस्तदवस्थएवेत्यर्थः । किंचबुद्धेस्सरू पता । वर्ततेसहजीवेनपारतंत्र्यादिरूपतइतिसंग्रहांशंव्याचष्टे ॥ **अस्तुवेति** ॥ ननुकर्मफलभोक्तृत्वेनपारतंत्र्याक्षेपोनुपपन्नः । परतंत्रस्यभोक्तृत्वनियमाभावादि तिचेत्तर्हिकर्मफलभोक्तृत्वेनचेतनत्वाक्षेपोपिनस्यात् । चेतनस्यापिभोक्तृत्वनियमाभावात् । नचचेतनस्यभोक्तृत्वनियमाभावेपिभोक्तुश्चेतनत्वनियमाद्भोक्तृत्वेनचे तनत्वाक्षेपइतिवाच्यं । तर्हिपरतंत्रस्यभोक्तृत्वनियमाभावेपिभोक्तुःपारतंत्र्यनियमाद्भोक्तृत्वेनपारतंत्र्याक्षेपोपिसंभवतीत्याशयवानाह ॥ **चेतनस्येति** ॥ नचाचे

प्र० भावः ॥ **कर्मेति** ॥ कर्मवशत्वादितिभावः । ननुबुद्धेःपारतंत्र्येणसाजात्येपिकरणभूतायाःकथंभोक्तृत्वेनपिवंतावितिकर्तृकोटिनिवेशइत्यत आह ॥ **संभवतीति** ॥ तर्हिगवादावप्येवंसुवचत्वेनसजातीयस्यतत्रधीर्नस्यादित्यतआह ॥ **गोरिति** ॥ ननुछायातपत्वविशेषणाज्जीवेश्वरा वित्युच्यतइत्यतआह ॥ **छायेति** ॥ बुद्धिजीवादौचेतनत्वाचेतनत्वादिनेतियथायोगमन्वयः । आदिपदेनबुद्धिप्राणयोर्ग्रहणं । छायातपत्वं चतमस्त्वप्रकाशत्वादिनाकथंचिदुपेयमिति । एवं अथद्वित्वेस्वारस्यमित्यादिनाग्रंथेन "किंचपिबतोर्बुद्धिजीवत्वेकिंछिन्नंकिंवाजीवेश्वरत्वेलब्ध" मितिटीकावाक्यस्य प्रातिपदिकार्थपातृत्वस्यप्रत्ययार्थद्वित्वस्यचबुद्धिजीवपक्षेनच्छेदः । जीवेश्वरत्वेत्वीश्वरआरोपितपातृत्वस्याप्यभावेनप्रातिप दिकार्थस्यजीवेश्वरयोरैक्यांगीकारेणप्रत्ययार्थद्वित्वस्यचलाभोनास्तीति । तथा बुद्धिजीवत्वेश्रौतंगुहाप्रविष्टत्वंनछिन्नं । जीवेश्वरत्वेतुसर्वगते श्वरेऽर्भकौकस्त्वरूपंगुहाप्रविष्टत्वंनेतितन्नलब्धं । साजात्यलाभस्त्वप्रयोजकः । साजात्यस्याश्रौतत्वादिति । तथा बुद्धिजीवत्वेपारतंत्र्यादि

कर्मफलभोक्तुःपारतंत्र्यनियमात् । संभवतिचबुद्धेर्भोगकरणत्वात्काष्ठानिपचंतीत्यादाविवकर्तृत्वोपचारः । गोर्द्वितीयेनेे त्यत्रतुगोत्वस्यशाब्दत्वात्तेनैवसाजात्यंवाच्यमितिनातिप्रसंगः । छायातपत्वमपिचेतनाचेतनत्वादिनाबुद्धिजीवादौयुक्तं ।

गु० तनायाबुद्धेर्नभोक्तृत्वं । भोगकर्तृत्वमेवहिभोक्तृत्वमितिवाच्यं । ईशपक्षेपिसाम्यात् । किंचबुद्धेरेवभोक्तृत्वव्यपदेशउपचारेणोपपद्यते । करणेकर्तृत्वोपचारात् । नचोपचारेप्रयोजनाभावः । रूढोपचारत्वादित्याह ॥ **संभवतिचेति** ॥ रूढोपचारत्वप्रदर्शनार्थमेवकाष्ठानिपचंतीत्यादिदृष्टांतप्रदर्शनमिति । नन्वेवमस्यगोर्द्वितीयेनभाव्यमित्यत्रापिविजातीयाश्वादिनापिसद्वितीयत्वापत्त्यासजातीयगवांतरेणसद्वितीयत्वंनस्यादित्यतआह ॥ **गोर्द्वितीयेनेत्यत्रात्विति** ॥ **साक्षादिति** ॥

SGDF Sri Gurgeshwari Digital Foundation

प्र० नासाजात्यमपिनछिन्नं । चेतनाचेतनत्वादिनाछायातपत्वंचनछिन्नं । जीवेश्वरत्वेतुतयोरैक्येननमुख्यंसाजात्यादिलब्धमितिचत्रेधातात्पर्यं निरूप्य अधुनापरेणापिजीवेतदभ्युपगमात् । ईश्वरेसमन्वयसिद्धिरितिचेन्न । ईश्वरेलिंगस्यौपचारिकत्वाभ्युपगमा"दितितदुत्तरटीकावाक्यानुरोधेनतस्यतात्पर्यांतरंव्यनक्ति ॥ किंचेत्यादिना ॥ ननुतेनबुद्धिजीवावित्युक्तं । मयातुजीवेश्वरावित्यतोऽयमेवविशेषइत्यतआह ॥ मात्रयेति ॥ ब्रह्मेतिशब्दमात्रमेतदित्यर्थः । एतेनत्वन्मतेमन्मतइवगुहाविष्टत्वस्याहेतुत्वाद्ब्रह्मग्रहणेपिबत्प्रातिपदिकाक्षिप्तसाजात्यस्यैवहेतुत्वात्सूत्रेलाघवायसुबोधायसाजात्यसूचनायचप्रथमातुल्लंघद्योतनायचपिबंतावित्येवनिर्देशस्स्यात् । नचसर्वगतस्यब्रह्मणोगुहावच्छिन्नत्वायोगाद्गुहागतौ

किंचपूर्वपक्षेसिद्धांतेचबुद्धौब्रह्मणिचछत्रिवल्लक्षणैव । पातातुजीवएवेति प्रमेयेविशेषाभावेनव्यर्थाचिंता । मात्रयापिप्रमेयस्यभेदाभावेहिवादिनोः । शब्दमात्रायकलहोनयुक्तोमूर्खयोरिव ॥ १ ॥ यच्चोक्तं "विशेषणाच्चे"तिसूत्रस्योत्तरवाक्ये "आत्मानंरथिनंविद्धी"तिजीवस्यगंतृत्वेन "सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपद"मितिपरमात्मनश्चगम्यत्वेनविशेषणात्तावेवात्रापिबंतावित्यर्थइति । तन्न । जीवस्यरथित्वेन "बुद्धिंतुसारथिंविद्धी"तिबुद्धेश्चसारथि

प्र० बुद्धिजीवौनब्रह्मेतिपूर्वपक्षयुक्तिसूचनायतदुपादानं । "नियताधारताबुद्धिजीवसंवेशिनी"तिभामत्युक्तेरितिवाच्यं । "जीवमुख्यप्राणलिंगादितिचे"दित्यादाविवपूर्वपक्षपरत्वद्योतकनिर्देशाभावात् । "संभोगप्राप्तिरितिचे"दित्यतश्चेदित्यनुकर्षस्यक्लिष्टत्वात् । "अर्भकौकस्त्वा"दितिपूर्वनयसूत्रेणगुहावच्छेदनिबंधनशंकायाःपरिहृतत्वाच्चेत्याद्यसूत्राक्षरासामंजस्यंस्पष्टमितिभावेन विशेषणबलाज्जीवेश्वरावत्रप्रतिपाद्यौवाच्यावितिशंकानिरासायद्वितीयसूत्रार्थमप्यनूद्यनिराह ॥ यच्चेति ॥ "इतिव्याख्यानमयुक्तं । समन्वयासंगतत्वा"दित्यादिटीकांव्यनक्ति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० किंचपिबंतावित्यस्येति ॥ ननुजीवपरत्वेपिब्रह्मपरत्वमात्रेणसंगतिस्स्यादित्यतआह ॥ **इहचाध्यायइति** ॥ ननुजीवेश्वरभेदस्यासत्यत्वा ज्जीवपरत्वद्वाराब्रह्मण्येवसमन्वयःप्रसज्यतइत्यतआह ॥ **नचेति** ॥ अस्मद्रीत्यासाक्षादित्यर्थः । यद्वादेवताधिकरणमिवप्रसंगादिदमत्रनिवे शितमित्यतआह ॥ **नचेति** ॥ प्रसज्यते प्रसंगात्प्राप्यतइत्यर्थः ॥ **केचित्त्विति** ॥ अत्रेदमधिकरणशरीरं । "यस्यब्रह्मचक्षत्रंचोभेभवत ओदनः । मृत्युर्यस्योपसेचन"मित्यत्रौदनोपसेचनसूचितोत्ताजीवःपरमात्मावेतिसंशये अत्तृत्वस्यकर्मफलभोक्तृत्वरूपत्वात्तस्यचजीवएवसंभवा ज्जीवइतिप्राप्ते अत्रात्तृत्वस्यब्रह्मक्षत्रोपलक्षितचराचरग्रहणेनसर्वसंहर्तृत्वरूपत्वात्तस्यब्रह्मण्येवसंभवात् "महांतंविभुमात्मानंमत्वाधीरोनशोचति । नायमात्माप्रवचनेनलभ्य"इतिपूर्वत्रब्रह्मप्रकरणेश्रुतस्यप्रसादादृतेदुरवबोधत्वरूपलिंगस्येह "कइत्थावेदे"तिश्रवणेनप्रत्यभिज्ञायमानतयाब्रह्मप्र करणत्वावगमाच्चपरमात्मैवात्तात्रोच्यते । नचवाच्यमुत्तरत्रऋतंपिबंतावितिवाक्येकर्मफलभोक्तृत्वश्रवणेनबुद्धिजीवपरत्वंवाप्राण जीवपरत्वंवा ऽवश्यंवाच्यं । ब्रह्मणःकर्मबंधविधुरत्वात् । एवंचप्रकरणाल्लिंगस्यबलवत्त्वेनऋतपानाख्यलिंगेनमहांतमितिब्रह्मप्रकरणंविच्छिन्नं । व्यवहि

त्वेनविशेषणात्तावेवात्रपिबंतावित्यपिप्रसंगात् । किंचपिबंतावित्यस्यलक्षणयाब्रह्मपरत्वेपिजीवपरत्वस्यापिसत्त्वादिहचा ध्याये ईक्षतेरित्यादौसदादिशब्दानामन्यपरत्वंनिरस्यब्रह्मपरत्वस्यैवोक्तेराद्याध्यायासंगतिः । नचोक्तरीत्यासाक्षात्संगति संभवेप्रासंगिकसंगतिर्युक्ता । यथाहुः "साक्षाद्युक्तंनप्रसज्यत"इति । तदेतदभिप्रेत्योक्तंभाष्ये "नचजीवेसमन्वयोभिधी यत"इति । अत्रापिपरमतेपिजीवब्रह्मणोर्भोक्तृत्वाभोक्तृत्वाभ्यांभेदसिद्धिः ॥ केचित्तु अत्तेत्यादिचतुःसूत्र्येकमधिकरणं ।

गु० साक्षात्संगतिसंभवेप्रसंगसंगतिर्नाद्रियतइतिसंमतिग्रंथार्थः। अस्मन्मतइतिवदताएकप्रकरणस्थमेवविषयवाक्यंवदतांपरेषामर्थदोषइतिध्वनितं। ननुयस्यब्रह्मचक्षत्रंचे

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्वात् । यस्यब्रह्मचेतिवाक्यंतुसन्निहितत्वान्नविच्छिन्नमितिप्रागुक्तोप्यत्तानपरमात्मेति । यतोगुहांप्रविष्टौजीवात्मपरमात्मानावेव । अस्मिन्प्रकरणे "गुहानिहितंगह्वरेष्ठ"मितिपरस्य "गुहांप्रविश्यतिष्ठंत"मितिजीवस्यगुहाप्रविष्टत्वदर्शनात् । अस्मिन्प्रकरणे "मत्वाधीरोनशोचति। आत्मानंरथिनंविद्धी"त्यादिनोपास्यत्वोपासकत्वप्राप्यत्वप्राप्तृत्वविशेषणाच्चशेषभूतजीवद्वितीयश्छत्रिवत्परमात्मैवात्तेतिसिद्धांतइति । तदुक्तं "अत्ताखल्वोदनादेर्भवभुगितिकठश्रुत्यधीतोप्यसौस्यान्नस्यान्मृत्यूपसिक्तस्थिरचरनिखिलग्रासतस्तल्लयोक्तेः । जीवव्यावर्तनंचप्रकरणविदितंभोक्तृतोक्तिर्द्वयोस्तुप्रेर्यत्वप्रेरकत्वप्रतिनियतरसाछत्रिनीत्याथवात्स्या"दिति । तदेतत्परमतेविषयवाक्यानानुगुण्यादिनोक्तदूषणेनदूषितप्रायं

एकप्रकरणस्यवाक्यविशेषविषयाणांपादांतराधिकरणांतराव्यवहितानामुपजीव्योपजीवकभावेनपरस्परान्वितार्थानां सूत्राणांविषयवाक्यभेदेसत्यपिभिन्नाधिकरणत्वायोगात् । अत्रचात्तेत्यादिसूत्रद्वयविषयभूतं "यस्यब्रह्मे"त्यादिवाक्यं गुहामित्यादिसूत्रद्वयविषयभूतं "ऋतंपिबंता"वित्यादिवाक्यंचैकप्रकरणस्थमुपजीव्योपजीवकभावेनान्वितार्थंच ।

प्र० मत्वा यदत्रैकाधिकरण्यसमर्थनंतदपिनिराचिकीर्षुःश्रुतप्रकाशेदर्शितमैकाधिकरण्यसमर्थनमनुवदति ॥ **एकप्रकरणेति** ॥ भिन्नाधिकरणत्वायोगादित्यन्वयः । नन्वदृश्यत्वाधिकरणस्यद्युभ्वाद्यधिकरणस्यचाथर्वणिकैकप्रकरणगतवाक्यविशेषविषयस्यभिन्नत्वंदृष्टमित्यतउक्तं **पादांतरेति** ॥ तत्रोभाभ्यांव्यवधानाद्यस्मिन्द्यौरित्यस्यब्रह्मपरत्वेप्यदृश्यत्वादियुक्तस्याक्षरस्यब्रह्मप्रकरणेपितच्छेषतयाप्रधानाद्युत्त्युपपत्त्याब्रह्मत्वासिद्धेरुपजीव्योपजीवकभावाभावाच्च । अतएव "तद्धेतुव्यपदेशाच्च । मांत्रवर्णिकमेवचे"त्यादिसूत्राणांपूर्वापरबहुवाक्यविषयत्वेप्यव्यवहितत्वात्परस्परोपजीव्योपजीवकभावेनान्वितार्थपरतयाचैकाधिकरण्यं । अन्यथातत्रापिभेदस्स्यादितिभावः । उपजीव्योपजीवकभावं

प्र० श्रुतप्रकाशोक्तमेवदर्शयति ॥ **तथाहीति** ॥ **पूर्वपक्षरीत्येति** ॥ सारीतिःप्राङ्मयादर्शिता ॥ **विच्छेदादिति** ॥ ऋतपानाख्यलिंगापेक्षया प्रकरणस्यदुर्बलत्वादितिभावः । ननुऋतंपिबंतावित्येतदब्रह्मविषयंसन्नमहांतमितिप्रकृतब्रह्मप्रकरणविच्छेदकं । किंतुयस्यब्रह्मचेत्यनेनैवविच्छेदकरं । यस्यब्रह्मेत्येतत्तुवाक्यमनेनाब्रह्मविषयेणविच्छिन्नंसत् "महांत"मित्यादिब्रह्मपरवाक्यैः "कइत्थावेदे"तिलिंगकृतप्रत्यभिज्ञावशेनैकवा

तथाहि । ऋतमित्यादिवाक्यंयदिपूर्वपक्षरीत्याबुद्धिजीवविषयंस्यात्तदा ऋतमित्यादेर्ब्रह्माविषयतया "महांतंविभुमात्मान"मितिप्रस्तुतब्रह्मप्रकरणविच्छेदात् ऋतमित्यनेनाव्यवहितपूर्वंयस्येत्यादिवाक्यमपि व्यवहितेनमहांतमित्यादिनैकप्रकरणतांत्यक्त्वा ऋतमित्यादिनैकप्रकरणतामापन्नंसदृतमित्यादिवत्कर्मफलभोक्तृत्वरूपपातृत्वप्रतिपादकतयाजीवविषयंस्यात् । यदातुऋतमित्यादिकंसिद्धांतरीत्याजीवब्रह्मविषयं तदातस्यब्रह्मविषयतयाब्रह्मप्रकरणाविच्छेदाद्यस्येत्यादिकमपिसंहर्तृत्वरूपात्तृत्वप्रतिपादकतयाब्रह्मविषयंस्यादितिपूर्वसूत्रद्वयार्थंप्रत्युत्तरसूत्रद्वयार्थस्योपजीव्यत्वादित्याहुः ॥ तन्न ॥ अस्मन्मतेपूर्वसूत्रद्वयस्यबृहदारण्यकगतवाक्यविषयत्वेनोत्तरद्वयस्यचकाठकगतवाक्यविषयत्वेनैकप्रकरणस्थविषयत्वाभावात् ।

प्र० क्यतामापन्नंसद्ब्रह्मपरमेवस्यादित्यतआह ॥ **ऋतमित्यनेनेति** ॥ महांतमित्यस्यव्यवहितत्वाद्यस्येत्यस्याव्यवहितत्वादित्यर्थः ॥ **ऋतमित्यादिनेति** ॥ अव्यवहितेनेत्यर्थः ॥ **सिद्धांतरीत्येति** ॥ उक्तारीतिःप्राक् ॥ **उपजीव्यत्वादिति** ॥ उत्तरवाक्यस्याब्रह्मपरत्वेब्रह्मपरत्वेवा पूर्वस्यापितथात्वादित्यर्थः ॥ **बृहदारण्यकगतेति** ॥ तस्यैवसूत्रानुगुणत्वेनोदाहरणतौचित्यान्नास्मन्मतेऽयंदोषः । किंतुमायिनांमतएव ।

SGDF Sri Gargeshwari Digital Foundation

प्र० पादांत्यप्राणनयसर्वत्रेतिनययोस्तादृशवाक्यविषयत्वेपिभिन्नपादस्थत्वादितिभावः। यद्प्युपजीव्योपजीवकभावेनैकाधिकरण्यसमर्थनंतदप्य युक्तमितिवक्तुं यत्तावदुक्तंऋतमित्यादिकं यस्येत्यस्य महांतमित्यादिब्रह्मप्रकरणविच्छेदकमिति तत्तावन्नयुक्तं । तस्यतन्मध्यपतितत्वाभावा दित्याह ॥ **किंचेति** ॥ **इत्युक्तेति** ॥ इतिवार्तिकोक्तन्यायेनेत्यर्थः । तृतीयस्याद्यपादे "संदिग्धेतुव्यवायाद्वाक्यभेदस्स्या"दितिदशमेऽधि करणेदर्शपूर्णमासप्रकरणे"उपव्ययत"इतिश्रुतमुपवीतंकिंसामिधेन्यंगमुतदर्शपूर्णमासांगमितिसंशये पुरस्तादुपरिष्टाच्चसामिधेनीकीर्तनादवांतर प्रकरणेनसामिधेन्यंगमितिप्राप्ते "देवेद्धोमन्विद्ध"इत्यादिभिर्निविद्भिर्व्यवधानात्सामिधेनीप्रकरणस्यविच्छेदान्नतदंगं । नच "एकविंशतिम

किंचऋतमित्यादिकंमहांतमित्यस्ययस्येत्यस्यचमध्येयदिस्यात्तदा "विच्छिन्नासामिधेनीनांनिवि द्भिःप्रक्रियायतः। नतुकाम्यैःपुनःकल्पैःसंधातुंसाहिशक्यते॥" इत्युक्तन्यायेनमध्यस्थनिविद्भिः सामिधेनीप्रकरणस्येवऋतमित्यनेनब्रह्माविषयेणब्रह्मप्रकरणस्यविच्छेदइतिशंकास्यात् । नत्वेत दस्ति । ऋतमित्यादेर्यस्येत्यस्मादपिपरत्वात् । तथाचयस्येत्यस्यकथंब्रह्मप्रकरणाद्विच्छेदाशंका ।

प्र० नुब्रूयात्प्रतिष्ठाकामस्ये"त्यादिकाम्यसामिधेनीनांप्रकरणानुवृत्तिश्शंक्या। तासांकाम्यसामिधेनीनांस्वातंत्र्येणप्रकृतत्वाभावात्। अतोमहा प्रकरणेनदर्शपूर्णमासांगमितिसिद्धांतितं । तत्रसिद्धांतवार्तिकमेतत् । यतः यस्मात् । निविद्भिः निविन्नामकैर्देवेद्धोमन्विद्धइत्यादिमंत्रैः । विच्छिन्नंसामिधेनीनां अग्निसमिंधनार्थतयासामिधेनीनामिकानामृचांप्रकरणं तस्मात्प्रकरणंकाम्यैस्सामिधेनीकल्पैः सामिधेनीविकल्पैः नपुनस्संधातुं संयोजितुंशक्यमित्यर्थः । ननूक्तमत्रयस्येत्येतद्व्यवहितेनमहांतमित्यनेनविच्छिन्नंसन्निहितेनऋतमित्यनेनैकवाक्यतामापद्यतइति । ॥ ४७६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० तन्न । प्रकरणात्सन्निधेर्दुबलत्वादितिभावेनतदाशंक्यनिराह ॥ नचेत्यादिना ॥ क्रमेणेति ॥ स्थानरूपप्रमाणेनेत्यर्थः ॥ लिंगादिति ॥ तृतीयस्यतृतीये "श्रुतिलिंगवाक्यप्रकरणस्थाने"तिबलाबलप्रकरणेदशमेऽधिकरणेराजसूयेपश्चिष्टिसोमयागास्समप्रधानतयाश्रुताः । तत्राभिषेचनीयस्यसोमयागस्यसन्निधौविदेवनादयःकेचनपदार्थाश्श्रुताः । तेकिमभिषेचनीयस्यांगमुतसर्वस्यराजसूयस्येतिसंशये सन्निधिविशेषादभिषेचनीयसात्रांगमितिप्राप्ते प्रकरणाविशेषात्सर्वराजसूयांगमितिसिद्धांतितं । तथाचविंशतिलक्षण्येकंशास्त्रमितिवदतस्त्वमतेतत्रैवप्रकरणात्पाठसन्निधिरूपस्यस्थानस्यदौर्बल्यंसिद्धमितिनात्रतत्प्राबल्यशंकोपपद्यतइत्यर्थः । एवंयस्येत्यस्यऋतमित्यनेननैकवाक्यतायुक्तेत्युक्तं । इदानीमस्त्वेकवाक्यत्वं । एवमपिनब्रह्मप्रकरणविच्छेदशंकायुक्तेत्याह ॥ सिद्धांतइति ॥ तच्छेषतयेति ॥ ब्रह्मणःप्राधान्येनप्रतिपादनं जीवस्य

नच "नायमात्माप्रवचनेनलभ्य"इतिब्रह्मपरपूर्ववाक्योक्तस्यदुरवबोधत्वरूपब्रह्मलिंगस्य "यस्ये"तिवाक्ये "कइत्थावेदयत्रस"इतिप्रत्यभिज्ञानात्तदेकप्रकरणतेतित्वद्रीत्या "प्रकरणा"दितिसूत्रेणोक्तेपितत्त्यागेनयस्येत्यस्यानंतर्यरूपेणक्रमेणऋतमितिवाक्येनैकवाक्यतेतिशंकितुंशक्यं । लिंगादानंतर्यरूपक्रमदौर्बल्यस्यत्वन्मते एतच्छास्त्रपूर्वभागेपूर्वतंत्रएवसिद्धत्वेनपुनरिहक्रमप्राबल्यशंकानुदयात् । सिद्धांतेऋतंपिबंतावितिब्रह्मप्रकरणेतच्छेषतयाजीवोक्तिवत् "बुद्धिंतुसारथिंविद्धी"तिबुद्ध्युक्तिवच्चपूर्वपक्षेपि "यस्यब्रह्मे"त्यादिब्रह्मप्रकरणेतच्छेषतयाबुद्धिजीवोक्तिसंभवाच्च ।

गु० त्यस्यवाक्यस्यानंतर्यरूपेणक्रमेणऋतमितिवाक्येनैकवाक्यतेतिशंकाकिंनस्यादित्यतआह ॥ नचेति ॥ ननुचलिंगेनयस्यब्रह्मेत्यादेर्ब्रह्मप्रकरणत्वनिश्चयेप्यानंतर्यरूपक्रमस्यदुर्बलत्वानिश्चयेनक्रमप्राबल्यशंकयाक्रमेणऋतमितिवाक्यैकवाक्यताशंकास्यादेवेत्यतआह ॥ लिंगादिति ॥ विंशल्लक्षणमेकंशास्त्रमितित्वत्सिद्धांतादितिभावः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मगुणभूततयेत्यर्थः। द्युभ्वादिनयेत्वदुक्तरीत्यैवेतिभावः। प्राधान्येनान्यप्रतिपादनएवप्रकरणविच्छेदः। एवंचप्रकरणविच्छेदाशंकायाअ योगेनतत्समाधानार्थंगुहामित्यादिकमयुक्तमित्याशयः। यत्त्वेकत्रत्यवाक्यविशेषविषयत्वादैकाधिकरण्यमिति तदपिनेत्याह ॥ **किंचेति** ॥ ननुकथमुपजीव्योपजीवकभावः । ''नहियस्मिन्द्यौःपृथिवीत्यादिवाक्यस्यपरमात्मपरत्वमदृश्यत्वादिगुणकस्याक्षरात्परतःपरस्यचपरमात्मत्वो पपादकं । परप्रकरणेपितच्छेषत्वेनपरमात्मप्रधानादिप्रतिपादनोपपत्तेः''इत्युपजीव्योपजीवकभावाभावस्यश्रुतप्रकाशएवोक्तेरित्यतोत्रेवतत्रापि पूर्वपक्षेतद्भावमाह ॥ **यस्मिन्निति** ॥ अत्रयथाकृतमित्यस्याब्रह्मपरत्वेतत्पूर्वस्ययस्येत्यस्यापितथात्वंतद्वत्तत्रापिसंभवात् । अविशेषात् । नन्व दृश्यत्वादिकंनान्यस्यशंकार्हमितिचेन्न । द्युभ्वाद्यायतनत्वंजीवस्यशंकमानेनादृश्यत्वादेरपिशंकितुंशक्यत्वात् । सर्वत्रप्रसिद्धेत्यत्रैकवाक्यत्व सिद्धयेमनोमयइत्यादेरुत्तरवाक्यस्यजीवविषयत्वे ''सर्वंखल्विदंब्रह्मे''त्यादिपूर्ववाक्यमपिजीवविषयमितित्वयैवोक्तत्वात् । पूर्वस्यपरमात्मपर

किंचयथादृश्यत्वाधिकरणद्युभ्वाद्यधिकरणयोरेकप्रकरणस्थवाक्यविषयत्वउ पजीव्योपजीवकभावेचसत्यपिभेदः तथात्रकिंनस्यात्। अस्तिहितत्राप्युपजी व्योपजीवकभावः । ''यस्मिन्द्यौ''रित्यादिकस्योत्तरवाक्यस्यपरमात्मपर त्वाभावेपूर्वस्य ''यत्तदद्रेश्य''मित्याद्यदृश्यत्वादिवाक्यस्यतत्परत्वासिद्धेः ।

गु० किंचैकप्रकरणस्थवाक्यविषयत्वेउपजीव्योपजीवकभावेचाधिकरणभेदइतिकिमस्मिंस्तंत्रेतथादृष्टत्वादित्युच्यतेकिंपूर्वतंत्रे । नाद्यइत्याह ॥ **किंचेति** ॥ नद्वितीय

प्र० त्वासिद्धिप्रकारस्यतत्रैवास्मदीयपूर्वपक्षेस्पष्टयिष्यमाणत्वाच्चेतिभावः । तदुक्तमेवाधिकरणभेदनियामकमाशंक्यनिराह ॥ **अथेति** ॥ **व्यव धानादेरिति** ॥ भिन्नपादनिवेशआदिपदार्थः । नन्वेवंसिद्धांतेपिपादांत्यप्राणनयसर्वत्रेतिनययोर्भिन्नपादनिवेशायोगइतिचेन्न । पररीत्याप रस्यापादनात् । नह्येतत्परोक्तमुपजीव्यत्वादिकमधिकरणैक्येबीजमितिसंप्रतिपन्नं । किंत्वप्रयोजकमित्यत्रैवतात्पर्यात् । स्पष्टमेतदग्रे । किंचे त्यादिना ''स्पष्टास्पष्टलिंगकवाक्यविषयत्वेनैकस्मिन्पादेसंगत्यनुपपत्ते''रितिश्रुतप्रकाशोक्तमेवाशंकते ॥ **नन्विति** ॥ ननुप्राणस्तथेत्यादाव

अथादृश्यत्वाधिकरणद्युभ्वाद्यधिकरणयोर्वैश्वानराधिकरणव्यवहितत्वात्भिन्नपादनिवेशाच्चनैकाधिकरणते तिचेत् न । ऐकाधिकरण्ययोग्ययोर्व्यवधानादेरेवायुक्तत्वात् । नन्वस्पष्टजीवादिलिंगकत्वाददृश्यत्वाधिक रणंद्वितीये स्पष्टजीवादिलिंगकत्वाद्द्युभ्वाद्यधिकरणंतृतीयेनिवेशितमितिचेन्न । अत्राप्यत्तृत्वस्यद्वितीयस्थ त्वादस्पष्टजीवलिंगत्वेन ऋतशब्दवाच्यकर्मफलभोक्तृत्वस्यस्पष्टजीवलिंगत्वेनभिन्नपादनिवेशापातात्। किंच

प्र० पिभेदोनस्यादित्यतोनैकप्रकरणगतवाक्यविषयत्वमधिकरणैक्यप्रयोजकं। यथैकवाक्यविषयत्वेपिपूर्वोत्तरभागविषयकत्वेनभेदस्तथैहैकप्रक रणेपिपूर्वोत्तरवाक्यविशेषविषयकत्वेनभेदस्स्यादित्याह ॥ **किंचेति** ॥ द्वेअप्यधिकरणेप्राक्पादांत्यप्राणाधिकरणेप्रपंचिते । ननु ''विधिर्वा स्यादपूर्वत्वाद्वादमात्रंह्यनर्थक''मित्याद्याध्यायस्थद्वितीयपादीयौदुंबराधिकरणे ''औदुंबरोयूपोभवती''त्यादिवाक्यमुदाहृतं । शाबरभाष्ये ''द्र व्यसंस्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवाद''इतिचतुर्थपादीयपर्णमय्यधिकरणे ''यस्यपर्णमयीजुहू''रिति । तथाचैकवाक्यविषयत्वंनेत्यतः

SGDF

प्र० "इदंतत्रतच्चात्रेत्युभयमुभयत्रोदाहरण"मितितंत्रवार्तिकोक्तमेवाह ॥ **औदुंबराधिकरणेपीति** ॥ नकेवलंपर्णमय्यधिकरणइत्यपेरर्थः । एवमग्रेपि ॥ **साधनेति** ॥ औदुंबरोयूपोभवति पर्णमयीजुहूर्भवतीत्यंशः । वार्तिके औदुंबराधिकरणवार्तिके । "एकस्यैवन्यायस्यकचित्कश्चिदंशःपरिशोध्यतइतिपुनरारंभ"इत्यादिनेत्यर्थः । अस्तुततःकिमित्यतआह ॥ **एवंचेति** ॥ नात्रोपजीव्यत्वाद्यस्ति । साधनपरत्वबोधकविधिप्रत्ययस्येवेहविधेरभावादेवपूर्वभागस्यसाधनपरत्वाभावबोधसंभवेन तद्बोधायोत्तरभागस्यसाध्यपरत्वाभावस्यानुपजीव्यत्वादित्यतस्त

औदुंबराधिकरणेपि "यस्यपर्णमयीजुहूर्भवतिनसपापꣳश्लोकꣳश्रृणोती"तिवाक्यमुदाहरणं । पर्णमय्यधिकरणेपि "औदुंबरोयूपोभवति ऊर्ग्वाउदुंबरऊर्क्पशवः ऊर्जैवास्माऊर्जंपशूनाप्नोती"तिवाक्यमुदाहरणं । नचपौनरुक्त्यं । औदुंबराधिकरणेवाक्यद्वयगतःसाधनप्रतिपादकःपूर्वभागउदाहरणं । पर्णमय्यधिकरणे तुसाध्यप्रतिपादकउत्तरभागउदाहरणमितिवार्तिकएवोक्तं । एवंचयथातयोः पूर्वोत्तरभागविषयत्वे उपजीव्योपजीवकभावेचसत्यपिभेदस्तथात्रकिंनस्यात् ।

गु० इत्याह ॥ **किंचौदुंबराधिकरणेपीति** ॥ पूर्वभागः औदुंबरोयूपोभवति यस्यपर्णमयीजुहूर्भवतीत्येवंरूपइत्यर्थः । साध्यभागः ऊर्ग्वाउदुंबरइत्यादिरूपः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० दुपपादयति ॥ नहीति ॥ पूर्वभागस्यसाधनपरत्वंनविधिप्रत्ययबलात्कल्प्यते। तदभावात् । किंतूत्तरभागस्यसाध्यसमर्पकत्वमुपजीव्यैव । साध्यस्यसाधनापेक्षत्वात् । एवंचतस्यपशुकामइत्यादाविवकामपदरहितत्वादिनापर्णमय्यधिकरणन्यायेनसाध्यपरत्वाभावेसिद्धे पूर्वभागस्यापिसाधनपरत्वाभावस्सिध्यतीतिसिद्धांतउपजीव्योपजीवकभावइत्यर्थः ॥ बलादिति ॥ विधिप्रत्ययाभावेपीत्यर्थः । चतुस्सू याभिन्नाधिकरणत्वसाधनेनान्यदपिफलमाह ॥ एवंचेति ॥ ननुतर्हि "तद्धेतुव्यपदेशात् । मांत्रवर्णिकमेवचगीयत"इत्यादेरपिभिन्नाधिकरणताचस्यादित्युक्तमित्यतआह ॥ तद्धेत्विति ॥ अधिकाशंकाप्रापकहेतुविशेषाभावादिरादिपदार्थः । यच्चोक्तं अत्तेतिसूत्रद्वयेयस्यब्रह्मचेत्यादिवाक्यंविषयइति तन्न । "सर्ववाअत्ती"तिमदीयविषयवाक्ये सूत्रेप्रतिज्ञातस्यात्तुर्हेतूकृतस्यचराचरग्रहणस्यसाक्षादुपादानेन यस्येतिवाक्येतदभावेनै

नहिपर्णमय्यधिकरणोक्तेन "नसपापंश्लोकंश्रृणोती"त्यादेःकामपदोपबंधरहितत्वान्नसाध्यसमर्पकत्वमित्यनेनविना औदुंबराधिकरणोक्तं "यस्यपर्णमयीजुहूर्भवती"त्यादेर्विधिविभक्तिरहितत्वान्नसाधनसमर्पकत्वमित्येतत्सिद्ध्यति । साध्यस्यसाधनंविनाऽयोगेनापापश्लोकश्रवणादेःसाध्यत्वेपर्णमयीत्वादेर्बलात्साधनत्वापातात् । एवंचास्माकंमतेपिप्राणस्तथेत्यस्यसर्वत्रेत्यस्यचैकप्रकरणस्थवाक्यविषयत्वेतदुपजीव्योपजीवकभावेसत्यपिभिन्नाधिकरणतासिद्धा । "तद्धेतुव्यपदेशाच्चे"त्यादौसमन्वेतव्यांतराभावादिनैकाधिकरणतेति

गु० नपापंश्लोकंश्रृणोतीत्येवंरूपइत्यर्थः । उपजीव्योपजीवकभावमुपपादयति ॥ नहीति ॥ नन्वेकप्रकरणस्थवाक्यविषयत्वे उपजीव्योपजीवकभावेचसतियद्यधिकरणभेदस्तर्ह्यानंदमयाधिकरणेतद्धेतुव्यपदेशादित्यस्याप्यधिकरणांतरत्वंस्यादित्यतआह ॥ तद्धेत्विति ॥ समन्वेतव्यांतराभावादिनेति ॥ विकारशब्दब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० तस्यसूत्रानानुगुण्यात् । सन्निधिमात्रेणप्रकरणविच्छेदशंकायोगस्योक्तत्वेन। "प्रकरणाच्चे"त्युक्तप्रकरणविच्छेदशंकासमाधानायगुहामित्यादेरनारभ्यत्वाच्च । यदपिसिद्धांतेगुहाविष्टत्वादिलिंगाज्जीवपरावुच्येतेइति । तन्न । गुहाविष्टत्वस्यनिष्ण्वेकप्रापकतायाःप्राक्समर्थितत्वेनतेनजीवप्राप्तेरयोगात् । "याप्राणेनसंविशत्यदितिर्देवतामयी । गुहांप्रविश्यतिष्ठंतीयाभूतेभिर्व्यजायते"त्यत्रमहांतमितिब्रह्मप्रकरणेनव्यजायतेत्यादेर्मत्स्यादिरूपेणस्वात्मजननपरत्वोपपत्त्याप्रकरणविच्छेदकाभावेनचदेवतामयत्वायोगेनचास्यापिब्रह्मपरत्वेनजीवपरत्वाभावाच्च । उक्तरीत्याविष्णोरेवमुख्यभोक्तृत्वेनजीवेतदभावेनछत्रिन्यायेनलक्षणोक्त्ययोगाच्चेत्यादिध्येयमितिभावेनाह ॥ दिगिति ॥ यद्वा "अनुकृते"रित्यधिकरणस्य "शब्दादेवे"त्यधिकरणस्यचैकत्रत्यवाक्यद्वयविषयकत्वेपि वक्ष्यमाणदिशोपजीव्यत्वादौसत्यपि अव्यवहितत्वेपि भिन्नाधिकरणतोह्येतिभावेनाह ॥ दिगिति ॥ यच्चेति ॥ अत्तेतिसूत्रेब्रह्मक्षत्रोपलक्षितचराचरस्यमृत्यूपसेचनत्वविशेषणेनादनीयत्वलाभात्तत्सूचितस्यकृत्स्नात्तृत्वस्यसंहर्तृत्वरूपत्वादत्ताविष्णुरित्युक्ते मृत्यूपसेचनत्वस्यमृत्युवशत्वाभावाभिप्रायेणोपपत्तेर्नतद्विशेषणेनब्रह्मक्षत्रादेरदनीयत्वसिद्धिरित्याशंक्य

दिक् । यच्चोक्तं अत्तेत्यत्रसाधारणाकारंविहायासाधारणाकारेणगौणार्थोवर्णनीयइतिन्यायोव्युत्पादितइति । तन्न । प्रोद्गातॄणामित्यत्रषोडशर्त्विक्साधारणाकारंविहायासाधारणाकारेणभाष्यकारमतउद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानांचतुर्णामेव वार्तिककारमतेऽपसुब्रह्मण्यानांत्रयाणामेवलक्षणायास्तृतीयउक्तत्वात् । "मासमग्निहोत्रंजुहोती"त्यत्राग्निहोत्रशब्दस्यहोमत्वादिसाधारणाकारंहित्वासूर्यदेवताकत्वादिनित्याग्निहोत्रासाधारणाकारेणैवमासाग्निहोत्रेगौणतायाश्च

गु० शब्दादिपूर्वोत्तरपक्षीययुक्तीनांसाधारण्येनचेत्यादिशब्दार्थः। तद्यदीत्यादिटीकाऽनुपपन्ना । कर्मफलभोक्तृत्वस्यान्यनिष्ठत्वेपिजन्मादिसूत्रोक्तसर्वसंहर्तृत्वादिरूपसर्वा

प्र० उपसेचनशब्दस्यगौणत्वेपितद्वश्यत्वाभावरूपसाधारणाकारोपचारंविनास्वयमद्यमानत्वेसत्यन्यस्यादनहेतुत्वरूपविशेषाकारेणोपचारइत्यदनीयत्वसिद्धिरित्युक्त्वा साधारणाकारंविहायेत्यादिनासूत्रस्यतात्पर्यार्थउक्तः । सोप्ययुक्तः । पौनरुक्त्यादित्यर्थः । तार्तीयंप्रोद्गात्रधिकरणंजन्माधिकरणेसाप्तमिकं सामाग्निहोत्राधिकरणंचपादांत्यप्राणनयेप्रपंचितं । भाष्यकृन्मतेप्रोद्गातृशब्दस्यषोडशर्त्विक्साधारणाकारंप्रकरणगतत्वंविहायछंदोगत्वरूपेणासाधारणाकारेणोद्गात्रादीनांचतुर्णांलक्षणयोक्तत्वात् । वार्तिकमतेतुस्तोत्रकारित्वसदस्सन्निहितत्वादिनाततोप्यसाधारणाकारेणापसुब्रह्मण्यानांत्रयाणामेवलक्षणयोक्तत्वात् । तथैवमासाग्निहोत्रेऽग्निहोत्रशब्दस्यासाधारणाकारेणगौणतायाउक्तत्वादित्यर्थः । एतेन रामानुजरीतिंप्रायोनुसरतःकस्यचिन्मतमपिनिरस्तंध्येयं । "आस्रांतरात्मेतिहरिरेकएवद्विधास्थित"इत्यादिवचनविरोधेनशिवइतिसिद्धांतस्यायुक्तत्वाच्चेति । अत्रटीकायां "तद्दतपानकर्तृत्वंयदिविष्णोरन्यस्यैवस्यात्तदानतस्यसर्वात्तृत्वं । यदिचान्यस्यापिभवेत्तदालक्षणस्यातिव्याप्ति"रित्युक्तं । तत्रानुपपत्तयः । पूर्वंसर्वात्तृत्वस्यलक्षणत्वेनाभिमतत्वादेकदेशस्यान्यमात्रगतत्वेपिनासंभवः । नचैकदेशाभावादेवसर्वात्तृत्वमपिनेत्युच्यतइतिवाच्यं । सिद्धांतेप्यशुभभोक्तृत्वाभावेनतद्दोषतादवस्थ्यापातादित्येका । पूर्वपक्षेऋतपातृत्वस्यजीवेश्वरोभयगतत्वोपगमेना

सप्तमउक्तत्वेन पुनरिहतस्यावक्तव्यत्वादिति ॥ टीकाक्षरार्थस्तु ॥ तद्यदाविष्णोरन्यस्यैवस्यादित्यादि । पूर्वत्र

गु० तृत्वस्यब्रह्ममात्रनिष्ठत्वोपपत्त्याऽसंभवाभावात् । नचभक्षयितृत्वरूपमपिसर्वात्तृत्वंब्रह्मलक्षणत्वेनाभिमतमित्यन्यस्यतदंगीकारेतदसंभवइतिवाच्यं। सर्वात्तृत्वमित्यत्रसर्वशब्दस्यसंकुचितवृत्तित्वाभ्युपगमेकर्मफलभोक्तृत्वांशेपिसंकोचापत्त्या असंकुचितत्वेचाशुभफलभोक्तृत्वस्यापत्त्यातस्यलक्षणत्वासंभवात् । नचसंभवत्सर्वात्तृत्वमेवलक्षणत्वेनाभिमतमितिवाच्यं । कर्मफलभोक्तृत्वस्यापिकर्मबंधरहितेब्रह्मण्यसंभवात् । तथाचकथमसंभवः । एवंयदिचान्यस्यापीत्यादिटीकाप्यनुपपन्नैव । कर्मफल

SGDF Sri Gangeshwari Digital Foundation

तात्पर्य- ॥ ४८० ॥ चंद्रिका. प्र. द्वि. ३

प्र० न्यस्यैवेत्ययुक्तमित्यन्या। यदिचेत्यत्रापिभगवतिपातृत्वस्यैवपूर्वपक्षेऽनंगीकृतत्वेनान्यस्यापीत्यपिपदास्वारस्यमित्येका। एकदेशस्यान्यमात्रगतत्वेपिकृत्स्नात्तृत्वस्यातिव्याप्त्यप्रसरादित्यपरा । ताएतानिरसितुमाह ॥ **संभवदिति** ॥ असंभवइत्यंतेनाद्ययोर्निरासः । मुख्यमित्युक्त्या द्वितीयायाः । शेषेणाद्यायाइतिविवेकः । उभयोरपिमुख्यमित्यनेनतृतीयायाः सर्वात्तृत्वस्यापिप्रसंगादित्यनेनांत्यानिरस्तेतिध्येयं । नन्वत्रछत्रिन्यायस्यटीकायामुक्तेःकथमुभयोर्मुख्यत्वोक्तिरित्यतआह ॥ **तथाचेति** ॥ छत्रिन्यायोसंभवपक्षएवेतिभावः । पूर्वंसर्वात्तृत्वंसंकुचितमुपेत्यासंभवातिव्याप्तीउपपादिते । अधुनाऽसंकुचितमेवतदादायतदुपपादयति ॥ **यद्वेति** ॥ पिबतोर्जीवेश्वरत्वमुपेत्यब्रह्मलिंगसहचरितमपि

संभवत्सर्वात्तृत्वंलक्षणत्वेनोक्तं। ब्रह्मणिचाशुभभोक्तृत्वस्यासंभवेप्यृतपातृत्वरूपंशुभभोक्तृत्वंसिद्धांतरीत्यासंभवति । तत्रचपिबतोर्जीवेश्वरत्वमुपेत्यजीवेपातृत्वंमुख्यमीश्वरेत्वमुख्यमितिस्वीकारेऽसंभवः। उभयोरपिमुख्यमितिस्वीकारेतुजीवस्यापिशुभभोक्तृत्वेनेश्वरवत्सर्वात्तृत्वस्यापिप्रसंगादतिव्याप्तिरित्यर्थः । तथाचद्वयोरपिपातृत्वंमुख्यमितिपूर्वपक्षोप्यत्राभिप्रेतइतिद्रष्टव्यं । यद्वागुहाप्रविष्टत्वादिब्रह्मलिंगसहितस्यापिऋतपातृत्वस्यासंभवोतिव्याप्तिर्वायदा तदातत्सहचरितस्यपूर्वोक्तात्तृत्वस्याप्यसंभवोतिव्याप्तिर्वास्यादित्यर्थः । तथाच

गु० भोक्तृत्वरूपस्यऋतपानकर्तृत्वस्यान्यनिष्ठत्वेपि लक्षणत्वेनाभिमतस्यसर्वात्तृत्वस्यब्रह्ममात्रनिष्ठत्वेनान्यत्राभावेनलक्षणस्यातिव्याप्त्यसंभवादित्यतोव्याचष्टे ॥पूर्वत्रेत्यादिना ॥ अस्मिन्पक्षेद्वयोरपिपातृत्वंमुख्यमितिकुत्राप्यनुक्तस्यपूर्वपक्षस्यकल्पनंसमायातीत्यतःपक्षांतरमाह ॥ **यद्वेति** ॥ टीकाकारैःस्पष्टतयाब्रह्मशब्देनविशेषणादि

॥ ४८० ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० पातृत्वंजीवेमुख्यमीश्वरेत्वमुख्यमितिस्वीकारे चराचरवाचकसर्वत्वरूपब्रह्मलिंगसहचरितमपिप्रागुक्तंसर्वात्तृत्वंजीवएवमुख्यमीश्वरेत्वमुख्य मित्यापत्त्याऽसंभवइत्यर्थः । यद्युभयोरपीदंमुख्यंतदाप्राक्तनमपिसर्वात्तृत्वंद्वयोस्स्यात् । ब्रह्मलिंगबाधस्योभयत्रतुल्यत्वात् । तथाचातिव्याप्ति रित्यर्थः । ननुटीकायां "तथाचलक्षणमयुक्त"मितिपूर्वपक्षोपसंहारोऽयुक्तः । "कर्मफलभोगंविनापी"त्यादिपूर्ववाक्येप्रागुक्तसंहर्तृत्वांगीकार प्रतीतेरित्याशंकापूर्वंतद्व्याचष्टे ॥ लक्षणमयुक्तमितीति ॥ "यस्सेतुरितिपिबतोरेकवचनेनविशेषणादेकएवपाता । सचब्रह्मत्वविशेषणा च्चविष्णुरेवे"तिवाक्यस्योद्भाष्यत्वभ्रमंनिराह ॥ यस्सेतुरित्यादिना ॥ "सेतुत्वादक्षरत्वत"इतिस्वोक्तंटीकाविरुद्धमितिभ्रमंवारयति ॥

लक्षणमयुक्तमिति । यद्यपिसर्वसंहर्तृत्वरूपंलक्षणंब्रह्मण्येवेतिपूर्वपक्षि णापिस्वीकृतं । अतएवटीका "कर्मभोगंविनापिसंहर्तृत्वमात्रेणतदुप पत्ते"रिति । तथापिसिद्धांत्यभिप्रेतंसंहर्तृत्वविशेषात्मकंभक्षयितृत्वरू पंलक्षणमयुक्तमितिभावः ॥ यस्सेतुरितिपिबतोरेकवचनेनविशे षणादित्यादि ॥ विशेषणाच्चेतिसूत्रंयःसेतुरित्यादिभाष्येणैकवचने नविशेषणात्ब्रह्मशब्देनविशेषणाच्चेतिद्विधाव्याख्यातमितिभावः ।

गु० त्यनुक्त्वाऽस्पष्टत्वादेकवचनेनविशेषणादितिव्याख्यातं । तेनचतावन्मात्रमेवार्थइतिभातीत्यतोव्याचष्टे ॥ विशेषणाच्चेतीति ॥ पिबतोर्ब्रह्मत्वसाधकत्वेनस्वोक्तस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० उपलक्षणमिति ॥ व्याख्येयमिति ॥ "यस्सेतुरीजानानामक्षरंब्रह्मयत्पर"मितिभाष्यंसूत्रस्यसेतुत्वादिविशेषणादित्यर्थवर्णनपरतयाव्याख्येयमित्यर्थः । शिष्टंस्पष्टमितिभावः ॥ ७ ॥ गुहाधिकरणं ॥ ३ ॥

॥ ॐअंतरउपपत्तेःॐ ॥ भाष्यदिशाऽऽनंदमयनयेनसंगतिप्रतीतेःपूर्वेणतामाह अत्रेतिपूर्वोक्तेतिविशेषणाच्चेतिसूत्रोक्तेत्यर्थः । संगतिराक्षेपिकीभाष्यंतुफलपरंवायेनकेनचित्पूर्वेणसंगतिर्वाच्यानत्वव्यवहितेनेतिनिर्बंधइत्याशयंवाऽऽदित्यांतस्थितत्वलिंगस्यापिसमन्वयाशयंवानेयमितिभावः । नन्वस्याभयस्याग्नित्वेप्राक्तनस्यापिकुतस्तत्वंअभ्यासार्थवादसहिताग्निश्रुतिबाहुल्यरूपविशेषहेतोरत्रेवतत्राभावात् नहींद्रस्यात्मेत्यत्रेंद्रस्यान्यत्वेइंद्रोराजेत्यत्रापिअन्यत्वंप्रत्युततत्रोक्तलिंगैस्तस्यविष्णुधर्मत्वाध्यवसायेनात्रापितेनविष्णुत्वस्यैवनिर्णयोपपत्तेरितिचेन्मैवं । अभयत्वमन्यतोभयशून्यत्वं । तच्चस्वतंत्रस्यैव । नत्वन्यनियतस्य । तथाचात्राभयत्वमग्नेरवश्यमितिस्वतंत्रवस्तुद्वयायोगात्प्राक्तनमप्यभयत्वंतस्यैवेतितद्बलेनेतरदपिकथंचिन्नेयं । एकेनापिनिरवकाशेनबहूनांबाधसंभवाद्गुहाविष्टत्वस्याग्नावप्युपपत्तेः । ब्रह्मत्वस्यात्रेवतत्रापिनेतुंशक्यत्वात् । अमृतत्वंतस्मिन्शंकमानेनाक्षरत्वादेरपितत्रैवशंकितुंशक्यत्वात् । अस्याभयत्वस्याक्षेपेणतेनविष्णुत्वशंकानवकाशादितितात्पर्यात् । एवंफलपरभाष्य

उपलक्षणंचैतत् । सेतुत्वाक्षरत्वादिनाविशेषणात् । ब्रह्मणश्चपरत्वेनविशेषणादित्यपिव्याख्येयमिति ॥७॥ इतिगुहाधिकरणं ॥३॥

॥ ॐअंतरउपपत्तेःॐ ॥ अत्र "यएषोंतरक्षिणिपुरुषोदृश्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मे"त्युक्तस्यचक्षुरंतस्स्थ

गु० सेतुत्वाक्षरत्वादेरुत्सूत्रितत्वभ्रांतिवारणायतदप्युपलक्षणत्वेनसूत्रार्थतयायोजनीयमित्याह ॥ उपलक्षणंचैतादिति ॥ ७ ॥ गुहाधिकरणं ॥ ३ ॥

॥ ॐअंतरउपपत्तेःॐ ॥ ब्रह्मजिज्ञासाकर्तव्येत्युक्तमित्यानंदमयाधिकरणभाष्यवदादित्येविष्णुरित्येतदधिकरणीयभाष्यमपिविचारसाफल्यमात्रपरंनतुसंगतिपरमि

प्र० समर्थनमपिध्येयं । विषयटीकांव्यनक्ति ॥ अत्रेति ॥ छांदोग्येचतुर्थेध्याये "उपकोसलोहवैकामलायनःसत्यकामेजाबालेब्रह्मचर्यमुवास । तस्यहद्वादशवर्षाण्यग्नीन्परिचचार । सहस्मान्यानंतेवासिनस्समावर्तयंस्तंहस्मैवनसमावर्तयति । तंजायोवाचतप्तोब्रह्मचारीकुशलमग्नीन्परिचचारीत् । मात्वाग्नयःपरिप्रावोचन् । प्रब्रूह्यस्माइति तस्मैहाप्रोच्यैवप्रवासांचक्रे । सहव्याधिनाऽनशितुंदध्रे । तमाचार्यजायोवाचब्रह्मचारिन्नशानकिंनुनाश्नासीति । सहोवाचबहवइमेऽस्मिन्पुरुषेकामानानात्ययाव्याधिभिःपरिपूर्णोस्मिनाशिष्यामीति । अथहाग्नयस्समूदिरेतप्तोब्रह्मचारीकुशलंनःपरिचचारीद्धंतास्मैप्रब्रूमेति । तस्मैहोचुः । प्राणोब्रह्मकंब्रह्मखंब्रह्मे"त्याद्युपक्रम्यसंभूतोपदेशानंतरं "अथहैनंगार्हपत्योनुशशासपृथिव्यग्निरन्नमादित्यइति । यएषआदित्येपुरुषोदृश्यतेसोहमस्मिसएवाहमस्मीति । सयएतमेवंविद्वानुपास्तेऽपहतेपापकृत्यांलोकीभवतिसर्वमायुरेतिज्योग्जीवतिनास्यापरपुरुषाःक्षीयंतउपवयंतंभुंजामोस्मिन्लोकेऽमुष्मिंश्चयएतमेवंविद्वानुपास्त"इत्यादिनागार्हपत्यान्वाहार्यपचनाहवनीयरूपत्रेताग्नीनामादित्यचंद्रविद्युद्गतस्यस्वात्मतयोपदेशमुक्त्वा "तेहोचुरुपकोसलैषासोम्यतेस्मद्विद्याऽऽत्मविद्याचेत्युपसंहृत्याम्नायते "यएषोंतरक्षिणिपुरुषोदृश्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतस्मिन्नकिंचनश्लिष्यति तद्यद्प्यस्मिन्सर्पिर्वोदकंवासिंचतिवर्त्मनीएव

स्याभयस्याग्नित्वात् "अभयंतितीर्षतांपार"मितिपूर्वोक्ताभयोप्यग्निर्नतुविष्णुरितिपूर्वपक्षोत्थानादनंतरसंगतिः । अत्रचक्षुरंतस्स्थोऽग्निर्विष्णुर्वेतिचिंता । तदर्थमंतस्स्थेश्रुतममृतत्वादिकंकिंगौणंकिंवामुख्यमिति । तदर्थं "यएषआदित्येपुरुषःसोहमस्मी"

गु० त्यभिप्रेत्यस्वयमवांतरसंगतिमाह ॥ अत्रेति ॥ अक्ष्यादित्ययोरैक्यादित्ययुक्तं । आदित्यशब्दस्यमंडलपरत्वेमंडलस्याक्षिप्रवेशासंभवेनतद्गतचेतनपरत्वात् ।

SGDF Sri Gurgamath Digital Foundation

प्र० गच्छति । एतंसंयद्वामइत्युपासीतएतंसर्वाणिवामान्यभिसंयंतियएवंवेद । एषउएववामनिरेषहिसर्वाणिवामानिनयतियएवंवेद । एषउएव भामनिरेषहिसर्वेषुलोकेषुभातियएवंवेद । अथयदुचैवास्मिञ्छव्यंकर्मकुर्वंतियदुचनार्चिषमेवाभिसंभवंत्यर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यःसंवत्सरंसंवत्सरादादित्यमादित्याच्चंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोमानवः । सएनान्ब्रह्मगमयती" त्यादि । तत्रत्यश्चक्षुरंतस्स्थोविषयइत्यर्थः । अत्राक्षिस्थइतिवक्तव्येचक्षुरित्युक्तिरादित्याभेदस्फोरणाय । आदित्यश्चक्षुर्भूत्वेत्यादेः । अत्राक्षिपदोक्तंचक्षुःप्राचांमतरीत्यादेवतारूपं । टीकारीत्याजडरूपमितिज्ञेयं । मुख्यमितिचिंतानंतरंकिंबाधकमस्त्युतनेतिचिंतास्पष्टेतिनोक्ता ॥ अक्ष्यभिन्नेति ॥ वक्ष्यमाणदिशेतिभावः । एतच्चहेतुहेतुमद्भावघटनाय । अन्यथाऽऽदित्यस्थपुरुषेप्रयुक्ताहंशब्दस्याग्निपरत्वेप्यक्षिस्थस्याग्नित्वानापत्तेः ॥ विद्येति ॥ "उपकोसलैषासोम्यास्मद्विद्याऽऽत्मविद्याचे"त्युक्तविद्याभेदइत्यर्थः । उपलक्षणमेतत् । सावधारणाभ्यासोर्थवादश्चेत्यपिध्येयं । यदाविद्याभेदोनयुक्तस्तदाकंब्रह्मेत्याद्यात्मविद्या । यएषोंतरादित्यइतिविद्यात्वस्मद्विद्येतिवाच्यत्वादादित्यस्थपुरुषेप्रयुक्ताहंशब्दस्याग्निपरत्वाद्बाधकात्तदभिन्नाक्षिस्थेश्रुतामृतत्वादिकंगौणमित्यग्निश्रुत्यादिबलादग्निरेवचक्षुरंतस्स्थइतिपूर्वपक्षेफलं । यदातुघटतेतदाहंशब्द

त्यक्ष्यभिन्नादित्यस्थपुरुषेप्रयुक्तोहंशब्दःकिमग्निपरःकिंवाब्रह्मपरइति । तदर्थं
ब्रह्मपरत्वे "अस्मद्विद्यात्मविद्याचे"त्युक्तोविद्याभेदोनघटतंउतघटतइति ।

गु० यएषोंतरक्षिणीत्यत्राक्षिशब्दस्यमंडलपरत्वात् । नचात्राप्यक्षिशब्दस्यचेतनपरत्वेनाक्ष्यादित्ययोरैक्यंयुक्तमितिवाच्यं । आदित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविशदित्यत्राक्षिशब्दस्यचेतनपरत्वेतत्रादित्यमंडलस्थचेतनस्यतत्रप्रवेशासंभवेनाक्षिशब्दस्यचेतनपरत्वासंभवेनगोलकपरत्वस्यैववक्तव्यत्वात् । तदनुसारेणांतरक्षिणीत्यत्रापिगोलक

SGDF Sri Gargeshwari Digital Foundation

प्र० स्यशास्त्रदृष्ट्याब्रह्मपरत्वसंभवाद्बाधकाभावेनामृतत्वादिकंमुख्यमेवेतितद्बलाद्विष्णुरितिसिद्धांतेफलमितिस्पष्टमितिभावः। नन्वत्रवक्ष्यमाणदि
शाटीकादिरीत्याचादित्यवाक्येऽग्निप्रयुक्ताहंशब्दसावधारणाभ्यासार्थवादविद्याभेदानांभावेनतद्बलात्तस्याग्निपरत्वंनिर्धार्याक्षिवाक्यस्याप्येतदनु
सारेणाग्निपरत्वमुच्यतेपूर्वपक्षे । नत्वक्षिवाक्यस्थप्रापकबलेन । तत्रतदभावात् । तथाचादित्यवाक्यमेवोदाहृत्यादित्यांतस्स्थः किमग्निर्विष्णुर्वे
तिचिंता । तदर्थंसोहमित्यग्निप्रयुक्तोहंशब्दोग्निपरोविष्णुपरोवेति । तदर्थंतस्यविष्णुपरत्वेसोहमस्मिसएवाहमस्मीत्यादिसावधारणाभ्यासार्थ
वादविद्याभेदोक्तयोनयुज्यंतेयुज्यंतेवेतिचिंतनीयं । यदिनयुज्यंतेतदाग्नेरेवादित्यस्थत्वमन्यथातुविष्णोरितिफलिष्यति । आदित्यस्थत्वेनोक्तानंद
मयापेक्षश्चऋजुर्भवति । आदित्यस्थस्यविष्णुत्वेचार्थादक्षिस्थोपिसएवेतिसिध्यति । तथाचसूत्रेऽक्षिवाक्योपादानायतत्रत्यास्सशब्दार्थोक्तिपर
शब्दोपिव्यर्थइत्यंतरित्येवसूत्रंस्यात् । अंतरइत्यपिनवक्तव्यमितिलाघवं । स्थानादिसूत्रंचनकर्तव्यंस्यादितिचेन्मैवं । बलवद्विष्णुश्रुतिलिंगा
दिबलेनादित्यस्थस्यविष्णुत्वेनिर्णीतेसत्येवाहंशब्दादेश्शास्त्रदृष्ट्यादिनाविष्णौघटनायावर्णनीयत्वात् विष्णुश्रुत्यादेश्चाक्षिवाक्यएवभावेनादित्यवा
क्येविष्णुपरत्वावधारणस्याक्षिस्थस्यविष्णुत्वनिर्णयाधीनत्वेनाक्षिवाक्यस्यैवोदाहर्तव्यत्वात् । नचसुखविशिष्टेत्युक्तेनकंब्रह्मेतिब्रह्मप्रकरणेनादि
त्यस्थस्यविष्णुत्वनिर्णयोस्त्वितिशंक्यं । तस्याग्निप्रयुक्ताहंश्रुत्यादिनाविच्छेदस्यपूर्वपक्षिणाचोद्यमानत्वात् । नचश्रुतोपनिषदितिसूत्रोक्तोपसंहा
रस्थब्रह्मलिंगबलेनप्रकरणाविच्छेदस्सुज्ञानइत्यतः "सुखविशिष्टाभिधानादेवच । श्रुतोपनिषत्कगत्यभिधानाच्चे"त्येवपूर्यतइतिवाच्यं । ताव
ताबलवद्विष्णुश्रुतिलिंगानामनुपदर्शनेनप्रकरणमात्रेणाहंशब्दाभ्यासादेर्बाधायोगाद्यथान्यासमेवानवद्यं । अतएवामृतत्वादिकंकिंगौणमित्या
दिचिंतोपदर्शिता । यद्यप्यमृतत्वादेर्मुख्यत्वेपिनपूर्वपक्षिणःक्षतिः । तादृशस्यापितेनाग्नौशंक्यमानत्वात् । तथापिवास्तवाभिप्रायेणगौणंमुख्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० सितिकोटिप्रदर्शनं । मुख्यसंभवस्याभिमानमात्रत्वात् । उपपत्तेरित्यादिसिद्धांतहेतुव्यावर्त्यैरग्निप्रापकश्रुत्यर्थवादाभ्यासैः पूर्वपक्षयन्यएषोंतरक्षिणीतिवाक्येऽग्निरेवेत्यादिबह्वग्निश्रुतिसद्भावाच्चेत्यंतटीकांतावद्व्यनक्ति ॥ **पूर्वपक्षस्त्वित्यादिनाऽग्निपरतेत्यंतेन** ॥ नन्वग्निनादित्यस्थस्य स्वात्मतयोपदेशेप्यक्षिस्थस्याग्नित्वंकुतइत्यतश्चक्षुरादित्यशब्दयोर्भाष्यतत्वप्रदीपाद्यनुरोधेनदेवतापरत्वमुपेत्यतत्रोपपत्तिंवदंस्तावत्परिहारमाह ॥ **चक्षुरिति** ॥ आदित्योमंडलदेवताचेतनश्चक्षुरभिमानीभूत्वाऽक्षिगोलकेप्राविशदित्यर्थः । नन्वक्षिणीइत्यत्राक्षिशब्दस्यगोलकपरत्वादत्राप्यक्षिशब्दस्यनदेवतापरत्वमित्याशंक्यसाधयति ॥ **यद्यपीति** ॥ **बाधकेति** ॥ आदित्यदेवतायाश्चक्षुर्देवतायांप्रवेशायोगरूपादित्यर्थः । चक्षुः पर्यायः चक्षुरिंद्रियपर्यायोनतदधिष्ठानगोलकपर्यायइत्यर्थः । सः अक्षिशब्दः ॥ **अभिमानीति** ॥ द्वितीयस्याद्यपादे "अभिमानिव्यप

पूर्वपक्षस्तु । चक्षुरंतस्स्थोग्निरेव । "यएषआदित्येपुरुषोदृश्यतेसोहमस्मी"त्यग्निनादित्यस्थस्यस्वात्मतयोपदिष्टत्वात् । चक्षुरादित्यदेवतयोश्च "आदित्यश्चक्षुर्भूत्वाऽक्षिणीप्राविश"दित्यादिश्रुत्यैक्यात् । यद्यप्यक्षिणीप्राविशदित्यत्रबाधकवशादक्षिशब्दोनादित्यदेवतापरःकिंतुजडपरः। तथाप्यंतरक्षिणीत्यत्रचक्षुःपर्यायःसदेवतापरएव । अभिमान्यधिकरणन्यायेनतस्याक्ष्यभिमानिदेवतायामेवमुख्यत्वात् ।

गु० परत्वस्यैवविद्यमानत्वेनजडस्याक्षणश्चेतनेनादित्येनैक्यासंभवादित्यतआह ॥ **यद्यपीति** ॥ **बाधकवशादिति** ॥ अक्षिशब्दस्यचेतनपरत्वेतत्रचेतनप्रवेशानुपपत्तिरूपबाधकवशादित्यर्थः । चक्षुश्शब्दस्यदेवतापरत्वेनतत्पर्यायाक्षिशब्दस्यापिदेवतापरत्वमेवेत्याह ॥ **चक्षुःपर्यायइति** ॥ **अभिमान्यधिकरणन्यायेनेति** ॥

प्र० देशस्तुविशेषानुगतिभ्यां"इतितृतीयेधिकरणे "मृदब्रवी"दित्यादिवाक्यंप्रमाणंनवेतिसंशये मृत्त्वादिहेतुनामृदादेर्जडत्वानुमानादभिमानिचेतनस्यानुपलंभादिबाधितत्वाज्जडस्यचवक्तृत्वाद्ययोगादप्रमाणमितिप्राप्ते निरवकाशजडत्वयुक्तिनिर्दोषवेदवाक्यप्रामाण्योभयान्यथानुपपत्त्या "पृथिव्याद्यभिमानिन्योदेवताःप्रथितौजस"इत्यादिवचनेनचदेवतातद्विग्रहतदंतर्धानशक्त्यादिसिद्धेः अभिमन्यमानगतमृत्त्वादिमृच्छब्दप्रवृत्तिनिमित्तस्याभिमान्यधीनत्वस्याकाशनये "यतोत्यंतपराधीनंचेतनादप्यचेतन"मित्युक्तदिशासिद्धत्वात् "तदधीनत्वा"दित्यत्रोक्तन्यायेनस्वातंत्र्यस्यशब्दवृत्तौमुख्यनिमित्तत्वेनमृदादिशब्दानामभिमानिषुमृदादिजडेभ्योमुख्यत्वान्मृदादिशब्दैर्देवतायाएवाभिधानमितिवक्तृत्वाद्युपपत्तेःप्रमाणमेवेत्युक्तं । तेनन्यायेनमुख्यत्वादित्यर्थः । तथाचमुख्यामुख्ययोर्मुख्येकार्यसंप्रत्ययइतिन्यायेनमुख्यदेवतायाएवग्रहणंनत्वमुख्यजडस्येतिभावः । युक्त्यंतरंचाह ॥ **यइति** ॥ चक्षुःशब्दस्यदेवतापरत्वंकुतइत्यतआह ॥ **तत्रेति** ॥ श्रुत्यंतरइत्यर्थः । जडस्यवेदनप्रसक्तेरभावेननवेदेतिनिषेधायोगात्तदन्यथानुपपत्त्याचेतनत्वसिद्धिरितिभावः । व्यक्तमेतदुत्तरनये । ननु "स्थानादिव्यपदेशाच्चे"तिसूत्रे "तद्यदस्मिन्स

"यश्चक्षुषितिष्ठंश्चक्षुषोंतर"इतिश्रुत्यंतरेंतरपुरुषाधिकरणत्वेनोक्तस्यचक्षुषइहांतरक्षिणीतिप्रत्यभिज्ञानाच्च । तत्रोक्तस्यचचक्षुषो "यंचक्षुर्नवेदे"तिवाक्यशेषेणचेतनत्वात् ।

गु० अभिमन्यमानवाचकानांशब्दानामभिमानिनिमुख्यत्वादितिन्यायेनेत्यर्थः । यश्चक्षुषितिष्ठन्नितिश्रुत्यंतरेंतरपुरुषाधिकरणत्वेनोक्तस्यचक्षुषोंतरक्षिणीत्यत्रप्रत्यभिज्ञानेप्यंतरक्षिणीत्यत्रोक्तस्याक्षणश्चेतनत्वंकुतः । यश्चक्षुषितिष्ठन्नितिवाक्योक्तस्यचक्षुषोप्यचेतनत्वादित्यतआह ॥ **तत्रोक्तस्येति** ॥ ज्ञानप्रसक्तौसत्यांतदभावश्चेतनत्वाभावेनसंभवति । अचेतनेज्ञानप्रसक्तेरेवाभावात् । तथाचतदन्यथानुपपत्त्याचक्षुषश्चेतनत्वसिद्धिरित्यर्थः । नन्वक्षिशब्दस्यचेतनपरत्वेतद्यदस्मिन्सर्पिर्वोदकंवासिं

SGDF Sri Gurudev Datt Digital Foundation

प्र० पिर्वोदकंवासिंचतिवर्त्सनीएवगच्छती"तिश्रुतौजडस्यैवाक्ष्णोसंगाख्यशक्तिव्यपदेशादक्षिशब्देनचेतनग्रहणेसर्पिराद्यलेपस्थानशक्तिव्यपदेशोनयुक्तइत्यतआह ॥ **स्थानेति** ॥ असंगविष्णवाधारदेवताधारत्वाभिप्रायेणसिद्धांतेतदुक्तिरित्यर्थः । अक्ष्णोर्जडत्वोपगमपरतयाप्रतीयमानापिटीकाचेतनपरत्वेननेयेत्याह ॥ **अक्षीति** ॥ विधाशब्दस्यप्रकारार्थत्वादेकविधत्वादित्यनेनाक्ष्णोर्यद्देवताधिष्ठानत्वं तद्देवताधिष्ठानत्वमादित्यमंडलस्यापि । नतुदेवतांतराधिष्ठानत्वमितिप्रकारभेदनिषेधप्रतीतावप्युभयाधारत्वरूपैकप्रकारवान्प्रकारीचेतनएकएवेतिनेयेत्यर्थः । इदानी

स्थानादिसूत्रादौजडस्यस्थानत्वोक्तिस्तुपरंपरयास्थानत्वात् । अतएवभाष्येसन्न्यायरत्नावल्यांच "अक्ष्यादित्ययोरैक्या"दित्येवोक्तं । तत्वप्रदीपेच "अक्षींद्रियप्रेरकादित्ययोरैक्या"दित्येवोक्तं । "अक्ष्यादित्ययोरेकविधत्वा"दितिटीकापिभाष्याद्यनुसारेणप्रकारभेदनिषेधमुखेनप्रकार्यैक्यपरानेया ।

गु० चतीत्यादिवाक्योक्तासंगत्वरूपस्थानशक्तेरसंभवेनजडस्यैवसंभवेनाक्षिशब्देनजडपरत्वमेवास्थेयमित्यतआह ॥ **स्थानादीति** ॥ **परंपरयेति** ॥ मंजूषास्थोपिहिमणिर्गेहस्थइतिगीयतइतिन्यायेनांतरपुरुषाधिकरणचेतनाधिष्ठानत्वेनपरंपरयास्थानत्वादित्यर्थः ॥ **अतएवेति** ॥ उक्तरीत्याऽऽदित्यशब्दवच्चक्षुश्शब्दस्यापिदेवतापरत्वेनाक्ष्यादित्ययोरैक्यस्याभिप्रेतत्वादेवेत्यर्थः । नन्वेवमक्ष्यादित्ययोरैक्यंचेत्तर्हिटीकायामक्ष्यादित्ययोरेकविधत्वादित्येकविधत्वोक्तिरयुक्तेत्यतआह ॥ **अक्ष्यादित्ययोरिति** ॥ **प्रकारभेदनिषेधमुखेनेति** ॥ स्थानभेदात्तापकत्वतदभावादिनातदभेदानुपपत्तिरित्याशंक्य अंशिनोयत्तुसामर्थ्यंयत्स्वरूपंयथास्थितिः । तदेवनाणुमात्रोपिभेदस्स्वांशांशिनोःक्वचित् । इतिन्यायेनप्रकारभेदनिषेधनेत्यर्थः । नन्वेवमक्ष्यादित्ययोरेकविधत्वादितिटीकायाभाष्याद्यनुसारेणप्रकारभेदनिषेधमुखेनप्रकार्यैक्यपरत्वेनव्याख्यानेगौणत्वापत्तिः । किंचपरंपरयास्थानत्वेनस्थानादिसूत्रादौजडस्यस्थानत्वोक्तौस्थानादिसूत्रस्याप्यस्वारस्यं । यएषआदित्येपुरुषोदृश्यते यएषोंतर

SGDF
Sri Gargeshwari Digital Foundation

प्र० मनेकस्वारस्यानुरोधेनटीकारीत्याक्ष्णोर्जडत्वमुपेत्याक्ष्यादित्ययोरैक्यप्रकारमाह ॥ **यद्वेति** ॥ आदिपदेनसर्पिर्वेतिश्रुतिर्गृह्यते ॥ **वाक्यद्व येति** ॥ चेतनपक्षेद्वयोरेकदेवताकत्वादन्यतरवैयर्थ्यमितिभावः । एकविधत्वादितिटीकावाक्यंटीकोक्तव्यावर्त्यशंकाव्यक्तिपूर्वंव्यनक्ति ॥ **नचेति** ॥ एवं जडत्वे । ननुयएषआदित्यइत्यत्रादित्यश्चक्षुर्भूत्वेत्यादाविवादित्यशब्दस्यचेतनपरत्वेमंडलाभिमानिचेतनस्थस्यैवस्वास्तयोपदेशादक्ष्णश्चैकचेतनस्थानत्वेनैकविधत्वादक्षिचेतनस्थएवाग्निरितिवाच्यमित्यतआह ॥ **यएषइति** ॥ एवंचप्राचीनरीत्याऽक्ष्यादित्यदेवतयोरेक

यद्वा अक्षिणीप्राविशदित्यत्रेवांतरक्षिणीत्यत्राप्यक्षिशब्दोजडपरः। एवंचस्थानादिसूत्रादिस्वारस्यं । "यएषआदित्येपुरुषो दृश्यते यएषोंतरक्षिणिपुरुषोदृश्यत"इतिवाक्यद्वयावैयर्थ्यंच । नचैवमक्ष्यादित्ययोर्भिन्नत्वादादित्यस्थत्वेप्यक्षिस्थत्वासिद्धिरितिवाच्यं। आदित्यश्चक्षुरितिश्रुतावादित्यमंडलस्थचेतनस्यजडाक्षिप्रवेशोक्त्याजडाक्ष्यादित्यमंडलयोरेकचेतनस्थानत्वेनैकविधत्वात् । "यएषआदित्येपुरुषोदृश्यत"इत्यत्राप्यादित्यपदेनमंडलमेवोच्यते । "ऐक्या"दितिभाष्येपिजडाक्ष्यादित्ययोरैक्यायोगादेकविधत्वमेवाभिप्रेतमितिटीकार्थः । यद्यप्यंशाधिकरणे "असावादित्यस्त्रिवृत्त्रिवृदिववैचक्षुःशुक्लंकृष्णंकनीनिके"तिश्रुत्यात्रिवृत्त्वेऽक्ष्यादित्ययोःसाम्यंवक्ष्यते । तथापिनतदिहवक्ष्यते । तेनादित्यस्थस्याक्षिस्थत्वासिद्धेः ।

गु०क्षिणिपुरुषोदृश्यतइत्यत्रवाक्यद्वयवैयर्थ्यंचस्यादित्यस्वरसाट्टीकानुसारेणपक्षांतरमाह ॥ **यद्वेति** ॥ नन्वेवमादित्यश्चक्षुरित्यत्रादित्यशब्दस्यादित्यमंडलपरत्वे जडयोरक्ष्यादित्यमंडलयोरैक्याभावेनाक्ष्यादित्ययोरितिभाष्यविरोधइत्यतआह ॥ **ऐक्येति** ॥ **एकविधत्वमिति** ॥ एकचेतनाधिष्ठितत्वरूपमेकविधत्वमित्यर्थः । ननुचाक्ष्यादित्ययोरेकचेतनाधिष्ठितत्वेनैकविधत्वंकुतउच्यते । त्रिवृत्त्वादिनाप्येकविधत्वसंभवादित्यतआह ॥ **यद्यपीति** ॥ एतत्प्रकरणे अथहाग्नयस्समूदिरे

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वादादित्यदेवतांतस्स्थस्यस्वात्मतयोपदेशेऽक्षिदेवतांतस्थोपिसएव । उभयदेवतायाएकत्वादित्यर्थः । टीकाकृन्मतेऽक्ष्यादित्ययोर्जडत्वेप्येकदेवताधिष्ठानत्वादादित्यमंडलस्थस्याग्नित्वआदित्यस्थस्यस्वात्मतयोपदेशादितिहेतुर्नव्यधिकरणइतिसिद्धं । अथाप्यसिद्धोहेतुः । सोहमस्मीतिश्रुतावहंशब्दस्याग्निपरत्वेमानाभावेनादित्यस्थस्यस्वात्मतयोपदेशाभावादितिभावेन "नचात्रोपदेष्टानाग्निरितियुक्त"मितिन्यायविवरणटीकोक्तव्यावर्त्यशंकापूर्वं "एतस्मिन्प्रकरणेअथहाग्नय"इत्यादिटीकांव्यनक्ति ॥ **नचवाच्यमित्यादिना** ॥ **विष्णुरिति** ॥ "अहंहिसर्वयज्ञानांभोक्ताचे"त्यादाविवविष्णुप्रयुक्तएवायमहंशब्दइतिसएवार्थइत्यर्थः । उपदेष्टुरग्नित्वेत्रिविधाग्निश्रुतीर्मानीकरोति ॥ **अग्नीनिति** ॥ "योसावादित्येपुरुषःसोहमस्मी"त्यतःपूर्वं "तस्यद्वादशवर्षमग्नीन्परिचचार तप्तोब्रह्मचारीकुशलमग्नीन्परिचचारीत् अथाग्नयस्समूदिरे तेहोचु"रिति बहुकृत्वश्श्रूयतेबहुवचनांततयाच । बहुवचनांतस्यप्रसिद्धाग्निपरत्वेनमुख्यबहुत्वार्थतयोपपत्तौनविष्णुपरत्वंक्लेशेनकल्प्यमितिभावः । अत्राग्नि

नचवाच्यमक्ष्यादित्यस्थयोरेकत्वेपिसोहमस्मीत्यत्रोपदेष्टानाग्निःकिंतुविष्णुरिति । "अग्नीन्परिचचार । अथ हाग्नयःसमूदिर"इत्यादिनाबहुकृत्वोग्निश्रुतेः । बहुवचनांताग्निश्रुतेश्च । "अथहैतंगार्हपत्योनुशशास अथ हैनमन्वाहार्यपचनोनुशशास अथैनमाहवनीयोनुशशासे"त्यग्निविशेषत्वेनप्रसिद्धत्रेताग्निरूपबह्वग्नीनांश्रुतेश्च ।

गु० इत्यादिटीकाऽसंगतेत्यतस्तन्निवर्त्यांशंकामुत्थापयति ॥ **नचवाच्यमिति** ॥ बहुश्रुतिभ्यइतिन्यायविवरणानुसारेणप्रवृत्तां अथहाग्नयस्समूदिरेगार्हपत्योनुशशासेत्यादिबह्वग्निश्रुतिरितिटीकां बहुकृत्वोऽग्निश्रुतेर्बहुवचनांताग्निश्रुतेर्बह्वग्नीनांश्रुतेश्चेतित्रेधाव्याचष्टे ॥ **अग्नीन्परिचचारेति** ॥ ननुचाग्नीन्परिचचारेत्याद्यभ्यस्समानगार्ह

प्र० शब्दस्यांतरधिकरणन्यायेनविष्णुपरताकिंनस्यादित्यतः तत्रेवात्रनिरवकाशविष्णुलिंगाभावेनाग्न्यर्थतैवेतिभावेनाह ॥ **स्वीकृताचेति** ॥ एतेन "बहुश्रुतिभ्य"इतिन्यायविवरणविवरणपरा "एतस्मिन्प्रकरणेथहाग्नयस्समूदिरेगार्हपत्योनुशशासेत्यादिबह्वग्निश्रुतिसद्भावाच्चे"तिटीका बहुकृत्वोग्निश्रुतीनांसद्भावात् बहुवचनांताग्निश्रुतीनांसद्भावात् गार्हपत्यान्वाहार्यपचनादिरूपाणांबहूनामग्नीनांश्रुतिसद्भावाच्चेतित्रेधाव्याख्याता । तेनबहुश्रुतिभ्यइत्येतदपित्रेधाव्याख्यातंध्येयं । एवं "अभ्यासार्थवादसहितबहुश्रुतिभ्य"इतिन्यायविवरणेबहुश्रुतिभ्यइत्यंशंव्याख्यायार्थवादसहितेत्यंशंटीकोक्तादपिप्रकारात्प्रकारांतरेणव्यावर्त्यशंकापूर्वंव्याचष्टे ॥ **नचवाच्यमिति** ॥ **उपासकपालकत्वादिनेति** ॥ "उपवयंतंभुंजामोस्मिंश्चलोकेमुष्मिंश्चयएवंविद्वानुपास्त"इत्यत्रभुंजामःपालयामइत्यग्नीनांवचनं । भुजोऽनवनइतिसूत्रेणावनव्यतिरिक्तेऽभ्यवहारएवात्मने

स्वीकृताचसिद्धांतिनापितत्राग्निगार्हपत्यादिशब्दानामग्निपरता । नचवाच्यमग्नीनामेवोपदेष्टृत्वेपिशास्त्रदृष्ट्येतिन्यायेनाहमित्यस्यांतर्यामिपरतेति । "ब्रह्मैवाक्षिस्थत्वेनोपास्य"मिति । "उपवयंतंभुंजाम"इत्यग्नीनामुपासकपालकत्वादिनास्तुतिरूपार्थवादस्य तेषामुपास्यत्वंविनाऽयोगेनतेषामेवाहंशब्दार्थत्वात् । नह्यन्यउपासकपालकोऽन्यश्चोपास्यइतियुक्तं ।

गु० पत्यादिशब्दानामपिब्रह्मपरत्वात्कथमयमभ्यासोब्रह्मपरत्वेबाधकइत्यतआह ॥ **स्वीकृताचेति** ॥ टीकोक्तासोहमस्मिसवाहमस्मीत्यभ्यासादितियुक्तिरुपलक्षणमन्यापिज्ञातव्येत्यभिप्रेत्यतांयुक्तिमाह ॥ **उपवयंतमिति** ॥ यद्वाशास्त्रदृष्ट्येतिन्यायेनाहंशब्दस्यांतर्यामिपरत्वेपिप्रकृतेऽहंशब्दस्यगार्हपत्यादिपरत्वेबाधकाभावान्नांतर्यामिपरत्वं । नकेवलमहंशब्दस्याग्निपरत्वेबाधकाभावमात्रंकिंतुसाधकमपितिष्ठतीत्याह ॥ **उपवयंतमिति** ॥ टीकोक्तांसोहमस्मिसएवाहमस्मीत्यभ्यासादितियु

SGDF
Sri Gangadharan Digital Foundation

प्र० पदविधानात्परस्मैपदप्रयोगात्पालकत्वंज्ञायतइतिभावः । अर्थवादस्यचातुर्विध्यादुक्तं **स्तुतीति** ॥ अभ्यासोपिसोहमस्मीत्यादिरूपएकः अग्निप्रयुक्तास्मच्छब्दाभ्यासरूपोन्यः विद्याशब्दाभ्यासश्चेतितिविधोभिमतइत्याह ॥**सोहमिति**॥ यद्यपिप्रब्रवामेत्यत्रनास्मच्छब्दनिर्देशोस्ति । तथाप्युत्तमपुरुषप्रयोगाद्वयमितिलभ्यते । "अस्मद्युत्तम"इतिविधानादितिभावः । अस्त्वादित्यस्थविद्याग्निविद्येति । अक्षिस्थोग्निरित्यत्रकि

"सोहमस्मिसएवाहमस्मि"इतिसावधारणमभ्यासाच्च । अभ्यासोह्यभ्यस्य मानशब्दस्वरसप्रतिपन्नेर्थेतात्पर्यार्थः । अग्निरेवचाग्निप्रयुक्ताहंशब्देनस्वर सप्रतिपन्नः । किंच "कुशलंनःपर्यचारीद्धंतास्मैप्रब्रवाम । उपवयंतंभुंजाम" इत्यादौसिद्धांतेपिबहुकृत्वोस्मच्छब्देनाग्नीनामेवनिर्देशात्तेषामेवेहाप्यहंशब्दा र्थत्वं । किंचास्मद्विद्यात्मविद्याचेतिविद्याशब्दोऽभ्यस्यतइतिविद्याभेदा र्थं कंब्रह्मेत्यादिकात्मविद्याऽऽदित्यस्थादिविद्यात्वग्निविद्येतिस्वीकार्यं ।

गु० क्तिमाह ॥ **सोहमिति** ॥ नचटीकोक्तोऽभ्यासोपिब्रह्मपरएवेतिकथमहंशब्दस्यांतर्यामिपरत्वाभावेतस्यहेतुत्वमित्यतआह ॥ **अभ्यासेहीति** ॥ ननुचास्तुशब्द स्वरसप्रतिपन्नेर्थेऽभ्यासस्यतात्पर्यनिश्चायकत्वं । अग्निप्रयुक्ताहंशब्देनापिस्वरसप्रतिपन्नंब्रह्मैवेतितत्रैवतात्पर्यनिश्चायकत्वमभ्यासस्येत्यतआह ॥ **अग्निरेवेति** ॥ सोहमस्मिसएवाहमस्मीतिन्यायविवरणेकंठोक्ताभ्यासमुपपाद्य इत्याद्यभ्यासार्थवादेतिन्यायविवरणे आदिशब्दोक्तमभ्यासमर्थवादंचाभ्यादिशब्दानामंतर्यामिपरत्वाभा

SGDF
Sri Gargeshwari Digital Foundation

प्र० मायातमित्यतआह ॥ **आदित्यस्थएवेति** ॥ उक्तमर्थंन्यायविवरणारूढतयादर्शयति ॥ **अत्रचेति** ॥ स्वयमेकंपक्षमुत्प्रेक्ष्यटीकोक्तपक्षमनुपपत्तिनिरासपूर्वंसाधयितुमाह ॥ **यद्वेति** ॥ प्राक्पक्षेसाहित्यपदास्वारस्यमितिहृदयं । तेनश्रुतेरेवप्राधान्यंतद्बाधनिरासेनतदुपोद्बलकत्वस्यैव

आदित्यस्थएवचाक्षिस्थइतिपूर्वमेवोक्तमित्यक्षिस्थोग्निरेव । तदेतदभिप्रेत्योक्तंन्यायविवरणे "सोहमस्मिसएवाहमस्मीत्याद्यभ्यासार्थवादसहितबहुश्रुतिभ्य"इति । अत्रचोक्तरीत्यात्रिविधाबहुश्रुतिरग्नीनामुपदेष्टृत्वेहेतुः । अर्थवादाभ्यासौतूपदेष्टृणामग्नीनामेवसोहमस्मीत्यत्रास्मच्छब्दार्थत्वेहेतुः । आदिशब्देनच "कुशलंनःपर्यचारी"दित्याद्यभ्यासावभिप्रेतौ । यद्वाटीकोक्तरीत्यान्यायविवरणस्थाभ्यासः "यश्चासावादित्य"इत्यादिसमाख्याबाधेहेतुः । "अपहतेपापकृत्या"मित्यर्थवादस्तुब्रह्मपक्षेऽपूर्वतेतिशंकानिरासेहेतुः । अत्रचटीकायांन्यायविवरणस्याद्ययोजनास्फुटेतितामुपेक्ष्य न्यायविवरणोक्तसाहित्यस्वारस्यार्थं समाख्यातोभ्यासःप्रबलः । अपूर्वत्वादप्यर्थवादइतिन्यायव्युत्पादनार्थंचद्वितीययोजनैवोक्ता ।

गु० वेहेतुतयायोजयति ॥ **किंचेति** ॥ **उक्तरीत्येति** ॥ अग्नीन्परिचचार अग्नयस्समूदिरइत्यादिनाबहुकृत्वोऽग्निश्रुतेर्बहुवचनांताग्निश्रुतेश्च अथहैनंगार्हपत्योऽनुशशास अथहैनमन्वाहार्यपचनोनुशशास अथहैनमाहवनीयोनुशशासेत्यग्निविशेषत्वेनप्रसिद्धत्रेताग्निरूपबह्वग्नीनांश्रुतेश्चेत्युक्तरीत्येत्यर्थः ॥ **अर्थवादाभ्यासाविति** ॥ उपवयंतंभुंजानइत्यर्थवादः । सोहमस्मीत्यभ्यासश्चेत्यर्थः । इत्याद्यभ्यासावित्यत्रादिशब्देनहंतास्मैप्रब्रवामेत्यस्यसंग्रहः । अस्मिन्पक्षेसोहमस्मिसएवाहमस्मीत्याद्यभ्यासार्थवादसहितबहुश्रुतिभ्यइतिन्यायविवरणस्थसहितपदास्वारस्यं । बहुश्रुतीनामग्नीनामेवोपदेष्टृत्वेहेतुत्वात् । अर्थवादाभ्यासयोश्चाग्नीनामेवास्मच्छब्दार्थत्वेहेतुत्वात् । उभयोरप्येककार्यकारित्वेहिसाहित्यमुपपद्यते । नहिदंडादिनाघटस्तंत्वादिनाचपटउत्पद्यतइत्येतावतैवदंडतंत्वोस्साहित्यंसंभवतीत्यस्वरसादाह ॥ **यद्वेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रतीतेरितिव्युत्पादनार्थमितिप्रदर्शनार्थमित्यर्थः । समन्वयादित्यत्रैवव्युत्पादितत्वात् । ननुटीकायांनसमाख्याविरोधाशंकायुक्ता । पूर्वपक्षे यश्चासावादित्यइत्यस्याग्निपरत्वेनविष्णुपरत्वाक्षेपादित्यतस्तत्समाधत्ते ॥ तत्रचेति ॥ नन्वथाप्यौपचारिकत्वशंकानयुक्ता । शास्त्रदृष्ट्यातूपदेश इत्यत्राहंशब्दस्यविष्णौमुख्यतायाउक्तत्वादित्यतआह ॥ तथेति ॥ अतएवन्यायविवरणटीकायां "नचप्राणोवाअहमस्मीतिवदंतर्याम्यपेक्षयेति वाच्यं । सोहमस्मीत्युक्त्वापुनस्सएवाहमस्मीतिसावधारणमुक्तत्वात् । अवधारणेनचप्रकारांतराणांसर्वेषांव्यावर्तितत्वा"दितिग्रंथेनोपचार

तत्रचात्रत्यादित्यस्थस्याग्नित्वेसिद्धेतद्बलेनसमाख्याश्रुत्युक्तादित्यस्थस्यपूर्वपक्षिणाविष्णुत्वाक्षेपेपि ततःप्राग्विष्णौसमाख्या शंकायुक्ता । तथाशास्त्रदृष्ट्येत्यत्रोक्तस्यब्रह्मण्यहंशब्दोमुख्यइत्यस्याच्छादनादग्नेरादित्यस्थस्यौपचारिकत्वोक्तिर्युक्ता ।

गु० ननुबहुश्रुतिरग्नीनामुपदेष्टृत्वेहेतुः । अर्थवादाभ्यासौतूपदेष्टॄणामग्नीनामेवसोहमस्मीत्यत्रास्मच्छब्दार्थत्वेहेतुरितिन्यायविवरणस्याद्यायोजनाटीकायांकुतोनोक्तेत्य तस्तदनुक्तौहेतुंवदन्नेवद्वितीययोजनोक्तौहेतुंचाह ॥ अत्रचेति ॥ ननुचविष्णुपक्षेयश्चासावादित्यइतिसमाख्याकथंस्यात् । निर्णीतस्थलेसमानोक्तिर्हिसमाख्ये त्युच्यते । नचप्रकृतेसास्ति । यएषआदित्येपुरुषोदृश्यतइत्यत्रादित्यस्थस्याग्नित्वेसिद्धेयश्चासावादित्यइतिवाक्योक्तादित्यस्थस्यपूर्वपक्षिणानभ्युपगतत्वात् । तथा चकथंसमाख्योक्तिरित्यतआह ॥ तत्रचेति ॥ ततःप्राक् यएषआदित्येपुरुषोदृश्यतइत्यत्रादित्यस्थस्याग्नित्वेसिद्धेयश्चासावादित्यइतिवाक्योक्तादित्यस्थस्याग्नित्व सिद्धेःप्रागित्यर्थः । ननुचनचवक्तव्यमग्नेरादित्यस्थत्वमौपचारिकंकिंनस्यादितिटीकायामहंशब्दस्यब्रह्मण्युपचरितत्वमाशंकितं । तदनुपपन्नं । शास्त्रदृष्ट्यातूपदेशो वामदेववदित्यत्राहंशब्दस्यब्रह्मण्येवमुख्यत्वस्यप्रतिपादितत्वादित्यतआह ॥ तथेति ॥ नन्वत्रशास्त्रदृष्ट्येतिन्यायाच्छादनंकिमर्थं । नचान्यथातन्न्यायेनाहंशब्दस्यात्मनि

प्र० चोद्यादपीदंपृथगाशंक्यनिरस्तमितिभावः । ननुव्यधिकरणमेतत् । टीकायामग्नेरादित्यस्थत्वमौपचारिकमितिशंकितं । नत्वहंशब्दऔपचा रिकइति । तत्राहंशब्दस्यविष्णौमुख्यत्वोक्तेःकासंगतिरित्यतस्तस्यैवमेवार्थइत्याह ॥ अत्रहीति ॥ अतएवन्यायविवरणटीकायामाब्रामेभद्र सेनइतिवत्सोहमस्मीत्युपचारःकिंनस्यादित्येवोक्तं ॥ अन्यथेति ॥ अग्नेरादित्यस्थत्वस्यौपचारिकत्वइत्यर्थः । ननुयदपिविष्णुग्रहणेऽपूर्वत्वं शंकितंतन्न । अग्निग्रहणेप्यपूर्वतालाभात् । नह्यग्नेरक्षिस्थत्वमक्षादिसिद्धमित्यतआह ॥ तथेति ॥ टीकोक्तस्यार्थवादत्वमाक्षिप्याह ॥

अत्रहिमंचानांक्रोशनमौपचारिकमित्यत्रक्रोशनवत्सुपुरुषेषुमंचशब्दइवादित्यस्थत्ववतिविष्णावग्निप्रयुक्तोहंशब्द उपचरितइतिप्रतीयते । अन्यथासमाख्योक्त्ययोगात् । तथाऽत्यलौकिकब्रह्मग्रहणेऽग्निग्रहणादप्यपूर्वतातिशया द्वा । दिवाग्नेःप्रभायाअदर्शनेनादित्यप्रवेशस्यानुमानसिद्धत्वाद्वा । विष्णुग्रहणेऽपूर्वताशंकाचयुक्तेतिद्रष्टव्यं ।

गु० मुख्यत्वादौपचारिकत्वशंकानुपपत्त्यातन्न्यायाच्छादनमितिवाच्यं । तत्राहंशब्दस्याग्नौमुख्यत्वांगीकारेणादित्यस्थत्वस्यैवौपचारिकत्वशंकनादित्यतआह ॥ अत्र हीति ॥ अथततःप्रतीतएवार्थोस्तुबाधकाभावादित्यतआह ॥ अन्यथेति ॥ नचवक्तव्यमग्नेरादित्यस्थत्ववतिविष्णावग्निप्रयुक्तोऽहंशब्दउपचरितःकिंनस्यादित्यर्थमनं गीकृत्याहंशब्दस्याग्नौमुख्यत्वमेवांगीकृत्यादित्यस्थत्वकथनस्यौपचारिकत्वमितिशंकाग्रंथाभिप्रायकल्पनेइत्यर्थः । आदित्यस्थत्ववतिविष्णावग्निप्रयुक्तोऽहंशब्दउपचरित इतिपक्षेविष्णोरादित्यस्थत्वप्रतिपादकयश्चासावादित्यइतियुज्यते अन्यथातुनेतितदन्यथानुपपत्त्योक्ताभिप्रायेकल्पनीयेशास्त्रदृष्ट्येतिन्यायाच्छादनमावश्यकमेवेत्यर्थः । ननुटीकायांनचविष्णुग्रहणेऽपूर्वतयाभ्यासस्यबाधइतिशंकितं । तदयुक्तं । विष्णुपक्षइवाग्निपक्षेप्यपूर्वतायास्सत्त्वेनतस्याविष्णोरेवादित्यस्थत्वसाधकत्वादित्यतस्तदुप पादयति ॥ दिवेति ॥ तथाचस्वबोधनीयपुरुषगताज्ञानविरोधिनास्वानुपजीविनामानांतरेणाग्राह्यार्थत्वमपूर्वत्वं । प्रकृतेतुयएषआदित्येपुरुषोदृश्यतेइत्येतद्वाक्यबो

प्र० यद्यपीति ॥ अपहते अपहंति । अर्थवादेनकथंब्रह्मपक्षनिरासइत्यतआह ॥ **नचेति** ॥ **स्वकार्यइति** ॥ ऐंद्र्यागार्हपत्यमुपतिष्ठत"इतिविनियोगवशादिंद्रप्रकाशके "कदाचनस्तरीरसिनेंद्रे"तिमंत्रेणगार्हपत्याग्नेर्हविश्श्रपणादिस्वकार्यऐश्वर्यमात्रेणेंद्रपदप्रतिपाद्यत्वंतद्वदित्यर्थः । उक्तंच वार्तिके "स्यादग्नेर्गौणमिंद्रत्वंयज्ञसंबंधकारितं । इंदत्यर्थानुसाराद्वास्वकार्येसोपिहीश्वर"इति । "अग्निज्ञानात्सर्वपापाश्लेषान्मोक्षोपपत्ति"

यद्यप्यपहतेपापकृत्यामित्यादिफलं । तथापिस्तुतिरूपार्थवादताप्यस्तीतिवा वस्तुतःफलवत्त्वंफलंफलोक्तिस्त्वर्थवादइतिवा । अपहतेपापकृत्यांलोकीभवतीत्यादेःप्रत्येकंफलोक्तित्वेपिसमुदायस्यानेकफलत्वेनोपासनास्तुतिरूपार्थवादत्वमितिवाभिप्रायः । नच "सर्वमायुरेतिज्योग्जीवती"त्यल्पफलेनस्तुतिर्ब्रह्मपक्षेयुक्ता । तस्मादक्षिस्थोग्निरेव । अमृतत्वाभयत्वादिकंतुस्वकार्यऐश्वर्यमात्रेणाग्नेरिंद्रत्ववत्स्वाधमदेवतादिभ्योमृतिभयादिराहित्येनवा ।

गु० धनीयास्त्वदाद्यज्ञानविरोधिना एषआदित्यइत्येतद्वाक्यानुपजीविना दिवाप्रभायाअदर्शनरूपमानांतरेणग्राह्योयोऽग्नेरादित्यस्थत्वलक्षणार्थस्तदर्थत्वस्यैवापत्त्याग्निपक्षेनापूर्वतेतिभावः । ननुसयएतदेवंविद्वानुपास्तेऽपहतेपापकृत्यांलोकीभवतिसर्वमायुरेतीत्यर्थवादादित्युक्तंटीकायां । तदनुपपन्नं । अपहतेपापकृत्यामित्यादेःफलत्वेनार्थवादत्वाभावादित्यतष्टीकोक्तमर्थवादत्वमुपपादयितुंशंकते ॥ **यद्यपीति** ॥ नन्वेवंफलार्थवादयोरभेदइत्यतआह ॥ **वस्तुतइति** ॥ नन्वत्राप्यर्थात्मकत्वेनभेदेफलएवपर्यवसानंस्यादित्यतःपक्षांतरमाह ॥ **अपहतइति** ॥ नचापूर्वतयायएषइतिवाक्यस्यविष्णुपरत्वेशंकिते अपहतेपापकृत्यामित्याद्यर्थवादस्याग्निपरत्वइवविष्णुपक्षेपिसंभवेनविष्णोरादित्यस्थत्वाबाधकत्वादित्यतोऽर्थवादस्यविष्णुपक्षेनुपपत्तिंदर्शयति ॥ **नचसर्वमायुरेतीति** ॥ सर्वमेवायुर्यतीत्यादिवदस्यापिमोक्षपरत्वेमोक्षप्रदत्वस्याप्यग्नेरेवोक्तत्वात्तदाक्षेपइतिद्रष्टव्यं । नन्वग्नेरेवादित्यस्थत्वेऽमृतत्वाभयत्वादेरनुपपत्तिरित्यतस्सिद्धांतीयलिंगानिसावकाशयति ॥ **अमृतत्वेति** ॥ मुख्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० रितिभाष्यसूचितंपक्षमाह ॥ उक्तार्थवादेति ॥ प्राचीनपक्षस्तु "आत्मादिशब्दोप्यमुख्यार्थोंगीकार्य"इतिन्यायविवरणटीकोक्तः । अमृतत्वाभयत्वब्रह्मात्मशब्दस्वबंधनिमित्तकचक्षुरसंगत्वापादकत्वपूर्णसुखत्वादिश्रुतिलिंगप्रकरणरूपविष्णुप्रापकाणां "उपपत्ते"रित्यादिसूत्रोक्तानां निरवकाशत्वात्परहेतूनांसावकाशत्वात्परपक्षेबाधकसत्त्वाच्चविष्णुरेवाक्षिस्थइतिभावेन "विष्णुरेवचक्षुरंतस्थ"इत्यादिटीकोक्तंप्रमेयंनिष्कृष्य दर्शयति ॥ सिद्धांतस्त्वित्यादिना ॥ अग्नेर्मृतिभयादिमत्त्वेनेत्यन्वयः । "म्रियंतेपंचदेवता"इतिऋग्भाष्योक्तमाह ॥ तमिति* ॥ एनंवा युगंविष्णुंपरीत्यैतरेयब्राह्मणे । अस्मादस्यभयेनेतितैत्तिरीये । भयादस्याग्निस्तपतीतिकठश्रुत्यादिरादिपदार्थः । अत्राभयत्वादेश्चंद्रिकायांपूर्वपक्षिणाक्षेपेकृतेपिपरहेतूनांसावकाशत्वस्याग्रेस्पष्टत्वात् "कंपना"दित्यत्रटीकोक्तदिशाऽमृतत्वादेर्हेतूकरणमविरुद्धमितिज्ञेयं ॥ प्रागेवेति ॥

उक्तार्थवादसहितबहुश्रुतिबलादात्यंतिकामृतत्वादियोगेनवाग्नेरेवेति ॥ सिद्धांतस्तु ॥ अग्नेः"परिह्येनंम्रियंतेविद्युद्वृष्टिश्चंद्रमाआदित्योग्निः । भीषास्मादग्निश्चे"त्यादिश्रुत्यादिभिर्मृतिभयादिमत्त्वेनमुख्यामृतत्वादेर्निरवकाशत्वात् । अमुख्यस्यचमुख्यसंभवेऽयोगात् । भाष्येचब्रह्मात्मशब्दयोर्निरवकाशतायाःप्रागेवोक्तत्वात् ।

गु० मुख्ययोर्मुख्येसंप्रत्ययइतिन्यायेनाग्नेरमृतत्वादेर्मुख्यत्वाभावेनविष्णोरेवतद्भावेनमुख्यस्यैवग्रहणंयुक्तंनत्वग्नेरित्यरुच्यापक्षांतरमाह ॥ उक्तार्थवादेति ॥ पूर्वपक्षी

---

* अयंप्रतीकोस्मत्संगृहीतेषुचंद्रिकापुस्तकेषुक्वापिनदृश्यते ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० "अभ्यासात् प्रसिद्धोपदेशा"दित्यादौ ॥ **स्थानादीति** ॥ "स्थानादिव्यपदेशाच्चे"त्यत्र "तद्यदस्मिन्सर्पिर्वोदकंवे"त्यक्षिस्थपुरुषसंबंधादक्ष्णोरसंगाख्यशक्तिर्व्यपदिश्यते । तथा "एतंसंयद्वामइत्याचक्षते । एतंहिसर्वाणिवामानिसंयंति । एषउएववामनि"रित्यादिनासंयद्वामत्वादिस्वरूपशक्तिश्चोच्यते । एतदुभयंच "सईशस्सोसपत्नस्सहरिःपरःपरोवरीयान् । यदिदंचक्षुषिसर्पिर्वोदकंवासिंचतिवर्त्मनीएवगच्छति सवामनस्सभामन"इतिश्रुत्या "यत्स्थानत्वादिदंचक्षुरसंगंसर्ववस्तुभिः । सवामन"इतिस्मृत्याचविष्णवेकनिष्ठं । "सुखविशिष्टाभिधानादेवचे"त्यत्र "कंब्रह्मखंब्रह्मे"त्युपक्रमेश्रुतंविशिष्टसुखत्वंपूर्णसुखत्वमुच्यते । तच्च "आनंदंब्रह्मणः आनंदोब्रह्मे"त्यादिनानिरवकाशं । "श्रुतो

स्थानादिव्यपदेशसुखविशिष्टाभिधानादीनांनिरवकाशतायास्तत्रैवोक्तत्वात् । जीवपक्षेऽनवस्थादेश्चबाधकत्वाद्विष्णुरेवाक्षिस्थः । तदेतदभिप्रेत्योक्तंन्यायविवरणे "निरवकाशोपपत्तेरेवप्राबल्य"मिति ।

प्र० पनिषत्कगत्यभिधाना"दित्यत्रश्रुतैतद्विद्यानां "सएनान्ब्रह्मगमयती"तिब्रह्मगत्यभिधानात्तस्यचाक्षिस्थस्यविष्णुत्वंविनाऽयोगात् अन्यविद्ययान्यगतेरयुक्तत्वादितिभाष्यादावेवोक्तत्वादित्यर्थः । "अनवस्थितेरसंभवाच्चनेतर"इत्यत्रवामनिभामन्यादिशब्दबलेनाग्नेर्जीवप्रेरकतयाचक्षुस्स्थत्वेऽभिमतेसति तस्यजीवत्वात्प्रेरकांतरापेक्षायांतत्रापितथेत्यनवस्थानात् अग्नेरपिप्रेर्यजीवत्वसाम्येनप्रेरणस्यासंभवाच्चनाग्निरक्षिस्थइत्युच्यमानत्वादित्यर्थः । टीकायामूलमाह ॥ **तदेतदिति** ॥ उपपत्तेरेवप्राबल्यंकिमुतासच्छब्दसहितायाइत्येवकारार्थः । उपपत्तोर्निरवकाशत्वोक्ति

प्र० सूचितंपरहेतूनांसावकाशत्वंभाष्याद्युक्तंव्यक्तमाह ॥ **नचेत्यादिना** ॥ **अग्निपरोपीति** ॥ यथोक्तंन्यायविवरणटीकायां "अग्निःप्रसिद्धएवास्तु । सोहमस्मीत्यादित्वंतर्याम्यपेक्षयासावकाश"मिति ॥ **बाधकादिति** ॥ अमृतत्वादिबाधकादित्यर्थः । श्रुतिगतिमुक्त्वाऽभ्यासगतिमाह ॥ **अभ्यासोपीति** ॥ "अवधारणंचांतर्यामिणोविशेषाभावमात्रप्रतिपादनार्थ"मित्यन्यत्रटीकायामुक्तरीत्यावधारणगतिरपिध्येया । उक्तंचतत्वप्रदीपे "अत्रचोक्तंछंदोगोपनिषद्भाष्येभगवतैवसएवाहमस्मीत्यंतर्यामिणोऽस्सर्वविशेषाभावज्ञापनार्थ"मित्यादि । ननुविद्याशब्दाभ्यासस्यकागतिरित्यतः "नचास्मद्विद्येत्युक्तिविरोध"इत्यादिटीकोक्तंप्रमेयंसंगृह्यविवृणोति ॥ **धर्म्यैक्येपीति** ॥ "यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मे"तिछांदोग्यस्थदहरविद्याब्रह्मपरेतिदहरनयेसाधयिष्यते । "प्राणोवाआशायाभूयानि"ति तत्रैवसप्तमगताप्राणविद्याभूमाधिकरणेब्रह्मपरेतिवक्ष्यते । "अभिविमानमात्मानंवैश्वानरमुपास्त"इतितत्रैवपंचमस्थावैश्वानरविद्यावैश्वानरनयेनिर्णेष्यतइतिताब्रह्मपराइतिभावः

नचबह्वग्निश्रुत्यादिबाधः । अग्नीनामेवोपदेष्टृत्वात् । कुशलंनइत्यादावस्मच्छब्दोग्निपरोपिसोहमित्यत्रबाधकादंतर्यामिपरः । अभ्यासोपिपूर्वापराविरुद्धेर्थेतात्पर्यस्यालिंगं । अग्नेरादित्यस्थत्वंचामृतमित्याद्युत्तरवाक्यैःकंब्रह्मेत्यादिपूर्ववाक्यैश्चविरुद्धं । धर्मैक्येपिभवत्येवविद्याभेदःप्रकारयोः । भेदमात्रेणापियथादहरप्राणविद्ययोः ॥ १ ॥ अस्मद्विद्यात्मविद्ययोश्चब्रह्मविद्यात्वेप्याद्यायाअहंयंतर्यामित्वप्रकारकत्वात् द्वितीयायाश्चसर्वगतत्वप्रकारकत्वात् । ब्रह्मविषयकदहरप्राणवैश्वानरादिविद्यानामिव

गु०याणिबाधकानिपरिहर्तुमाह ॥ **नचेत्यादिना** ॥ नन्वभ्यासस्यपूर्वापराविरुद्धेस्वरसप्रतिपन्नेऽर्थेतात्पर्यार्थत्वेप्यग्नेरादित्यस्थत्वस्यापिपूर्वोत्तराविरुद्धत्वात्स्वरसप्रतिपन्नत्वाच्चनतात्पर्यार्थत्वमभ्यासस्यादेवेत्यतआह ॥ **अग्नेरिति** ॥ नन्वस्मद्विद्याऽऽत्मविद्याचेतिविद्याशब्दोऽभ्यस्तइतिविद्याभेदार्थे कंब्रह्मेत्यादिकाऽऽत्मविद्या आदि

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ प्रकारेति ॥ दहरहृत्पद्मस्थत्वप्राणस्थत्वविश्वनरांतरत्वादिप्रकारभेदादित्यर्थः ॥ श्रुतीति ॥ "आत्मेतिहोवाचे"त्यात्मश्रुतिः । "एतद्ब्रह्मे" तिब्रह्मश्रुतिः । अमृतत्वाभयत्वरूपेलिंगे । नन्वत्र "अंतस्तद्धर्मोपदेशा"दितिवदंतरुपपत्तेरित्येववाच्यंनत्वंतरइत्यतआह ॥ अत्रचेति ॥ यद्वात्र क्रियाभावलिंगमुच्यतेइत्युक्तमयुक्तं । सूत्रेभावस्यैवप्रतीत्याक्रियायाअप्रतीतेरित्यतआह ॥ अत्रचेति ॥ रमुक्रीडायामित्यस्यांतश्शब्दउपपदेसति ञमंतत्वात् "ञमंताड्ड"इत्युणादिसूत्रेणडप्रत्यये डित्यभस्यापिटेर्लोपे उणादयोबहुलमित्युपपदांत्यलोपे दीर्घाभावेचांतरइतिभवति । ञमि तिप्रत्याहारः । ननुञमंताड्डइत्यत्रवृत्तौ "डकारस्येत्संज्ञाप्राप्ताबहुलवचनान्नभवति । रम्यतेरमयतेवारंडापुनर्भू"रित्युक्तं । तथाप्युणादे र्यथाप्रयोगंवर्णनीयत्वेनदंडमंडरंडादिप्रयोगनिर्वाहायेत्संज्ञानेत्युक्तावप्यंतरइत्यादिनिर्वाहायेत्संज्ञोत्सर्गप्राप्ताभवत्येवेतिभावः । यद्वाऽऽद्यस्यतृ तीयेविद्याचुंचुरित्यादिसिद्धये "षःप्रत्ययस्यचुट्इतियोगविभागकरणंचुट्इत्यस्यानित्यत्वज्ञापनार्थ"मितिवृत्त्यादावुक्तत्वेनरंडादंडइत्यादावभावे पिक्वचिदित्संज्ञाभवत्येव । ननुश्रुत्यनुक्तंकथंसूत्र्यतइत्यतआह ॥ श्रुतौचेति ॥ आङ्पूर्वाद्ददातेर्मन्यतेश्चक्विपिसति आदेयमुपादेयंसुखंसुख साधनंवामात्यनुभवतीतिसुधोक्तनिर्वचनेनेत्यर्थः ॥ इतिचेति ॥ नकेवलंसूत्रेश्रुतौचेत्यर्थः । नन्वेवंसूत्रेंतरइत्यस्यचक्षुरंतस्थआत्मेत्यर्थतया

प्रकारभेदात्पृथगुक्तिरिति ॥ ॥ सूत्रक्रमस्तु । आद्येसूत्रेविषयवाक्यस्थश्रुतिलिंगोक्तिः । अत्रचांतरुपपदाद्रमतेः "ञमंताड्ड"इतिडप्रत्ययांतेनांतरशब्देनांतस्स्थित्वारमणमुच्यते । नत्वंतःस्थितिमात्रं । तथात्वेहिलाघवायश्रुत्य नुगमायचांतस्तद्धर्मेतिवदंतरित्येवावक्ष्यत् । नत्वंतरइति । श्रुतौचात्मशब्देनादेयंमातीतिव्युत्पत्त्यारमणमुच्यते । तदुक्तमनुव्याख्याने "अंतस्स्थित्वारमणकृदंतरस्समुदाहृतः । रमणंचात्मशब्देनादेयंमातीतिचोच्यत"इति ।

गु० त्यस्यादिविद्यात्वभिविद्येतिस्वीकार्यतयाचाग्नेरेवादित्यस्थत्वेऽक्षिस्थत्वमपितस्यैवेत्यतआह ॥ धर्म्यैक्येपीति ॥ अंतरुपपदादिति ॥ अत्रचांतश्शब्दसमानार्थ

SGDF Sri Gargeshwari Digital Foundation

प्र० ऽऽत्मशब्दस्यप्रतिज्ञाभागप्रविष्टत्वात्कथमात्मश्रुतित्वेनहेतूकरणं । मैवं । अंतस्स्थत्वमात्रस्यैवसाध्यताविवक्षायामात्मश्रुतेर्हेतुत्वस्याभिमतत्वात् । अतएवभाष्ये "चक्षुरंतस्स्थोविष्णुरेवे"त्येवोक्त्वा "ब्रह्मशब्दाद्युपपत्तेश्चे"त्युक्तं । न्यायविवरणटीकायांच "चक्षुरंतस्स्थोहरिरेव । अमृतत्वाभयत्वोपपत्तेः । आत्मादिशब्दा"दित्युक्तं । सूत्रेचामृतत्वाभयत्वरूपनिरवकाशोपपत्तेरेवोक्तिः । अत्रटीकायां "चक्षुरंतर"इतिसामान्योक्तिः ॥ द्वितीयइति ॥ स्थानादिसूत्रे । तत्रस्थानादीत्यस्यस्थानशक्तिरात्मशक्तिरित्यर्थः ॥ लिंगेति ॥ पुरुषसंबंधनिमित्तसर्पिराद्यसंगत्वादिलिंगेत्यर्थः । यदत्रोक्तंश्रुतप्रकाशे "अक्ष्णोर्निर्लेपत्वंनाक्षिस्थस्यविष्णुत्वेहेतुः । तत्संबंधेनकाचादिलेपस्याप्यभावप्रसंगा"दिति । तन्न । "सईशस्सोसपत्नः यत्स्थानत्वादिदंचक्षुरसंगंसर्ववस्तुभि"रित्यादिप्रागुक्तश्रुतिविरोधात् । "इतिहासपुराणाभ्यांवेदंसमुपबृंहये"दित्युक्त्यास्मृतिवशेनश्रुत्यर्थस्यचवाच्यत्वात् । काचित्ककाचादिदोषस्यतदीयदुरदृष्टसहायेनेश्वरेणैवकारितत्वादिति ॥ तृतीयइति ॥ सुखविशिष्टेत्यत्रोपक्रमेकंब्रह्मखंब्रह्मेतिपूर्णसुखत्वरूपब्रह्मलक्षणाभिधानात्प्रकरणस्यवैष्णवत्वावगमादितितत्रोच्यतइत्यर्थः । ननुश्रुतौकंब्रह्मेतिसुखस्यैवोक्त्यातत्संबंधाभिधानाभावाद्विशिष्टपदमयुक्तमित्यतोनसंबंधवाचकंतदित्याह ॥ तत्रचेति ॥ तत्रब्रह्मपदेननविष्णुरित्यभिमतं । किंतुकंसुखंपूर्णमित्येवतस्यार्थइतिभावः । तर्हिविशिष्टसुखाभिधानादितिविशिष्टपदस्यपूर्वनिपातस्स्यात् । "उपसर्जनंपूर्व"मितिपाणिनिस्मरणात् । अस्यचविशेषण

द्वितीयेतदुत्तरवाक्यस्थलिंगोक्तिः । तृतीयेप्रकरणोक्तिः । तत्रच "कंब्रह्मे"तिब्रह्मशब्दोक्तंपूर्णत्वरूपंश्रैष्ठ्यंविशिष्टत्वं ।

गु० कौंतशब्दएवविवक्षितइतिवाउपपदांत्यलोपोविवक्षितइतिवासमाधानंबोध्यमिति । तेनरोरीतिरेफलोपेढ्लोपइतिदीर्घत्वेंऽतारइतिस्यादितिनिरस्तंभवति ॥ प्रकरणो

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वेनोपसर्जनत्वादित्यतआह ॥ विग्रहस्त्विति ॥ सप्तमीति ॥ "सप्तमीशौंडै"रितिसूत्रेणशौंडादिभिरेवसप्तमीतत्पुरुषविधानात्तत्रचविशिष्टपदस्यापाठाद्योगविभागेनसप्तम्यंतमिष्टविषयेसमस्यतइत्यभियुक्तोक्तेस्समासइत्यर्थः । विष्णोस्सुखरूपत्वात्सुखेष्विति विग्रहप्रदर्शनं । "नन्वत्रसुखाभिधानादित्येवपूर्तौविशिष्टपदंव्यर्थं । नव्यर्थं । सुखस्यान्यत्रापिसत्त्वेनव्यभिचारापत्त्यातन्निरासकत्वा"दितिसुधायामेवोक्तेरितिभावः ॥ चतुर्थइति ॥ श्रुतोपनिषदितिसूत्रेविद्याशब्दाभ्यासेनेतिभावः ॥ लिंगेनेति ॥ "सएनान्ब्रह्मगमयती"त्येतद्विद्याफलत्वे

विग्रहस्तु सुखेनविशिष्टइतिवा विशिष्टंचतत्सुखंचेतिवा सुखेषुविशिष्टमितिवा । तत्राद्येसुखेनश्रैष्ठ्यंसुखस्यश्रैष्ठ्यंविनानेति सुखस्यापितत्सिद्धिः । द्वितीये "कडाराःकर्मधारय"इतिविशिष्टशब्दस्यपरनिपातः । तृतीये "सप्तमी"तियोगविभागात्समासः । एवकारस्तु तिष्ठतुतावत्खंब्रह्मेतिपूर्णज्ञानाभिधानं । तन्निरपेक्षपूर्णसुखाभिधानादेवेतिसूचनायेतिटीकायामेवोक्तं । चतुर्थेसूत्रेप्रकरणविच्छेदाशंकायामुपसंहारस्थलिंगेनोद्धारः । पंचमेपरपक्षेबाधकोक्तिरिति ॥ ॥ परमतद्वयेपीद

प्र० नब्रह्मगत्यभिधानरूपलिंगेनेत्यर्थः ॥ परमतद्वयेपीति ॥ मायिनामिदमधिकरणशरीरं । "यएषोंतरक्षिणिपुरुषोदृश्यत"इतिश्रुतोक्षिस्थः किंछायापुरुष उतब्रह्मेतिसंशये पूर्वं ऋतंपिबंतावित्यत्रपातृत्वलिंगेनप्रथममवगतचेतनद्वयानुरोधेनपश्चादवगतगुहाप्रवेशादयःकथंचिद्व्याख्याताः । तद्वदिहापि "दृश्यत"इतिप्रत्यक्षाभिधानात्तस्यचछायायामेवसंभवात्परोक्षेब्रह्मण्यसंभवाद्दृश्यत्वेनप्रथममवगतेछायापुरुषेतदनुरोधेनामृतत्वाभयत्वादयस्स्तुतिरूपेणकथंचिद्व्याख्येयाः । उक्तंचभामत्यां "एषदृश्यतइत्येतत्प्रत्यक्षेर्थेप्रयुज्यते । परोक्षंब्रह्मनतथाप्रतिबिंबंतुयुज्यते

प्र० ॥ १ ॥ उपक्रमवशात्पूर्वमितरस्योपवर्णनं । कृतंन्यायेनयेनैवसखल्वत्रानुषज्यते" ॥ २ ॥ इति । एवंप्राप्तेब्रह्मैवअमृतत्वाभयत्वादेस्तस्मिन्नेवोपपत्तेः । नचदृश्यत्वेनप्रथमावगतछायैवात्रोच्यतइतिवाच्यं । दृश्यतइत्येतस्मादपिपूर्वंचेतनवाचिपुरुषपदेनपरमात्मनएवावगतत्वात् । यएषइतिसर्वनामशब्दौसन्निहितपुरुषपदार्थप्राप्यनिराकांक्षौ । दृश्यतइत्येतदपिसन्निहितपुरुषपदार्थप्राप्यनिराकांक्षं । पुरुषेचतद्विषयकशास्त्रजन्यज्ञानस्यातिस्फुटत्वाद्दृश्यत्वोपचारः । तदुक्तंभामत्यां "अनिष्पन्नाभिधानेद्वेसर्वनामपदेसति । प्राप्यसन्निहितस्यार्थंभवेतामभिधातृणी"इति । यद्यपिभाष्ये "किंप्रतिबिंबउतजीवोथेंद्रियस्याधिष्ठातृदेवतोतपरमात्मे"तिकोटिचतुष्टयंप्रदर्शितं । तथापिभामत्यां "जीवदेवतयोरधिकाशंकायोगात्संभवमात्रेणजीवदेवतेभाष्यउपन्यस्ते"इत्युक्त्वाकोटिद्वयमेवप्रदर्शितं । रामानुजीयानांतुकिमक्ष्याधारःपुरुषःप्रतिबिंबजीव

मंतस्तद्धर्मेत्यनेनगतार्थं ।

प्र० देवताविशेषेष्वन्यतमउतपरमात्मेतिसंशये यएषइतिपदाभ्यांप्रसिद्धत्वेनदृश्यतइत्यभिधानाच्चोपक्रमानुगुण्येनान्यस्यस्तुत्यर्थत्वेननेयत्वात्प्रतिबिंबादिष्वन्यतमइतिप्राप्ते निरुपाधिकात्मत्वामृतत्वाभयत्वब्रह्मत्वसंयद्वामत्वादीनांपरमात्मन्येवोपपत्तेः प्रसिद्धत्वेननिर्देशस्य "यश्चक्षुषितिष्ठ"न्नित्यादिश्रुत्यंतरेप्रसिद्धत्वेनोपपत्तेः आपरोक्ष्यस्यचतदुपासनानिष्ठयोग्यापेक्षयोपपत्तेःपरमात्मैवाक्षिस्थइतिसिद्धांतइति । तत्रमतद्वयस्यैकरूप्येणांतर्नयसुधावाक्यानिविवृण्वन्मिलित्वादोषमाह ॥ गतार्थमिति ॥ ननुतत्र "यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यत"इत्यादित्यस्थत्वमुक्तं । इहत्वक्षिस्थत्वमुच्यतइतिवा तत्राद्याध्यायगतोद्गीथोपासनागतवाक्यंविषयइहतुचतुर्थाध्यायगतोपकोसलविद्यास्थंविषयइतिवाक्यभेदेनवा तत्र "सैवक्तत्सामतदुक्थंतद्यजुस्तद्ब्रह्मे"त्यादिसार्वात्म्यादेरिवात्रब्रह्मलिंगाभावेनवा यएषइतिप्रसिद्धत्वेनदृश्यतइत्यपरोक्षत्वेनात्रनिर्देशेन

SGDF Sri Gargeshwari Digital Foundation

प्र० तद्वाक्यवैलक्षण्येनविशेषशंकासत्त्वेनवापौनरुक्त्यनिरासस्सेत्स्यतीत्यतआद्यंनिराचष्टे ॥ तत्रेति ॥ "इत्यधिदैवत"मित्युक्त्वाऽनंतरं "अथाध्यात्म"मित्युपक्रम्य "यएषोंतरक्षिणिपुरुषोदृश्यतेसैवक्र्तत्सामे"त्यादिश्रवणात् । उदाहृतंचैतत्त्वयापितत्रेतिभावः । द्वितीयंनिराह ॥ नचेति ॥ एतावतैवेति ॥ तथात्वेवाक्यानंत्येनप्रतिवाक्यमधिकरणारंभेशास्त्रापर्यवसानंस्यादितिभावः । तृतीयंनिराह ॥ श्रूयंतेचेति ॥ ब्रह्मशब्दश्चेति ॥ यद्यपितत्रापितद्यजुस्तद्ब्रह्मेत्यस्तिब्रह्मशब्दः । तथापिब्रह्मणश्शब्दोब्रह्मशब्दइत्यात्मशब्दश्चात्राधिकइत्यर्थइत्याहुः । अन्येतुलेखकदोषमूलोयं । आत्मशब्दश्चात्राधिकइत्येवपाठइत्याहुः । अतएवांतर्नयसुधायांसंतिचतत्राप्यमृतत्वादयोब्रह्मधर्माइत्येवोक्तं । अपरेतुब्रह्मशब्दश्चेतियथाश्रुतएवपाठः । अयमर्थः । कंब्रह्मखंब्रह्मेत्युपक्रमेद्विर्ब्रह्मशब्दः एतदमृतमभयमेतद्ब्रह्मेतिमध्ये सएनान्ब्रह्मगमयतीत्यंतेच ब्रह्मशब्दश्रवणाद्ब्रह्मशब्दश्चात्राधिकोबहुलइत्यर्थइत्याहुः । चतुर्थंप्रत्याह ॥ नचात्रेति ॥ एवंमतद्वयसाधारण्येनपौनरुक्त्यमुपपाद्ययद्धामत्यांगतार्थत्वमाशंक्यसमाहितंतदनूद्यनिराह ॥ अत्रोक्तमिति ॥ छायेति ॥ प्रतिबिंबइत्यर्थः । कथंतर्हिभाष्येजीवदेवतेअप्युपन्यस्तेइत्यत

तत्रादित्यस्थत्ववदक्षिस्थत्वस्याप्युक्तेः । नचतत्रोद्गीथोपासनस्थमक्षिवाक्यंविषयः । अत्रतूपकोसलविद्यास्थमक्षिवाक्यमित्येतावतैवागतार्थत्वं । श्रूयंतेचतत्रेवात्राप्यन्यत्रासंभवंतोऽमृतत्वादयोब्रह्मधर्माः । ब्रह्मशब्दश्चात्राधिकः । नचात्र "यएषोंतरक्षिणिपुरुषोदृश्यत"इतिप्रसिद्धवदभिधानादृश्यत्वोक्तेश्चाधिकाशंका । तत्रापि "यएषोंतरक्षिणिपुरुषोदृश्यत"इतिश्रुतेः । अत्रोक्तंभामत्यां । तत्राक्षिस्थोजीवविशेषइतिपूर्वःपक्षः । अत्रतुछायेति । भाष्येतुसंभवमात्रेणजीवाद्युक्तिः । ॥ ४९२ ॥

गु० क्तिरिति ॥ प्रकरणादौविद्यमानोपक्रमादेःप्रकरणनिश्चायकत्वादितिभावः ॥ इत्येतावतैवेति ॥ अन्यथाविषयवाक्यभेदमात्रेणाधिकरणभेदेऽतिप्रसंगस्स्यादि

SGDF Sri Gargeshwari Digital Foundation

प्र० उक्तं **भाष्यइति** ॥ तदीयभाष्ये । किमतोयद्येवमित्यतस्ततोविशेषशंकामाह ॥ **तथाचेति** ॥ **पूर्ववाक्येति** ॥ “अहंतुतेतद्वक्ष्यामितद्यथापुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइति । ब्रवीतुमेभगवानिति । तस्मैसहोवाचयएषोंतरक्षिणिपुरुषोदृश्यत” इति श्रवणादक्षिस्थज्ञानेनपापालेपस्यपूर्ववाक्योक्तस्यायुक्त्येत्यर्थः । “एषउएववामनिरेषहिसर्वाणिवामानिनयती” त्यत्रत्वदुक्तरीत्यापुण्यफलोत्पत्तिकारणत्वादिरूपसंयद्वामत्वादेरित्यर्थः । ननूक्तममृतत्वादिकंस्तुत्यैवकथंचिन्नेयमितितत्राह ॥ **छायायामिति** ॥ **जीवेपीति** ॥ अविद्यमा

तथाचजीवविशेषस्यापिब्रह्मवत्परोक्षत्वाद्दृश्यत्वादिकमयुक्तं । छायायांतुयुक्तमित्यधिकाशंकेति । तन्न । दृश्यत्वानुपपत्त्या जीवपक्षत्यागे छायायांविषयवाक्यस्थपुरुषत्वामृतत्वादेःपूर्ववाक्योक्तस्यतज्ज्ञानेनपापालेपस्यचोत्तरवाक्योक्तस्यसंयद्वामत्वादेश्चसर्वथाप्ययुक्त्या छायापक्षस्यसुतरांत्याज्यत्वात् । छायायांस्तुत्यर्थममृतत्वाद्युक्तिश्चेज्जीवेपितदर्थमेवदृश्यत्वाद्युक्तिरस्तु । तस्मान्नपरमतेपूर्वपक्षोत्थानं । अस्माकंमतेतु अंतस्तद्धर्मेत्यत्रेंद्रादिश्रुत्येंद्रादेरंतस्स्थत्वमितिप्राप्तेनेतिसिद्धांतः । अत्रत्वग्नेश्चक्षुरंतस्स्थत्वमभ्यासार्थवादसहितबहुश्रुतिभ्यइतिप्राप्तेनेतिसिद्धांतइतिभेदः । परसिद्धांतोप्ययुक्तः । यतः ।

प्र० नकथनस्योभयत्रतुल्यत्वात् । तथाचनततोविशेषाशंकेतिभावः । ननुभवन्मतेपि “ब्रह्मेंद्रमग्निंजगतःप्रतिष्ठा” मित्यग्निश्रुत्याग्नेः “अंतःप्रविष्टंकर्तार” मित्यादावंतस्स्थत्वमितिप्राप्तेविष्णोरेवेतितत्रैवोक्तत्वादिहपुनरग्नेरंतस्स्थत्वशंकायोगात्पौनरुक्त्यमित्यतआह ॥ **अस्माकमिति** ॥ तत्रांतस्स्थत्वसामान्यमिहचक्षुरंतस्स्थत्वं तत्रेंद्रादीनामनेकेषामिहत्वग्नेरेव तत्रश्रुतिमात्रेणेहत्वभ्यासादिभिरितिमहान्भेदइत्यर्थः ॥ **परसिद्धांतोपीति** ॥ सम्प्राज्ञयाविवृतः । यतइत्यस्यश्लोकेनान्वयः । किमत्रकार्यंब्रह्मोच्यतेऽथाकार्यंब्रह्मेतिसिद्धांत्यतइतिविकल्पौहृदिकृत्वाक्रमेणनिराह

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **कार्येति** ॥ पूर्वार्धंव्यनक्ति ॥ **नहीति** ॥ तस्यसंसारित्वेनमृतिभयादेरवर्जनीयत्वादितिभावः । नवेत्येतदुपपादयति ॥ **तस्येति** ॥ उत्तरार्धंव्यनक्ति ॥ **अकार्येति** ॥ तदीयार्थानुरोधेनकप्रत्ययांततयासूत्रप्रतीकग्रहणं । सूत्रार्थस्त्वग्रेव्यक्तः । एवमधिकरणशरीरंनिरस्यसूत्रार्थान्निराचिकीर्षुराद्येमन्मतइवक्रियालिंगपरत्वाभावेनांतस्तद्धर्मेतिवदंतरुपपत्तेरित्येवनिर्देशःस्यादितिप्रतिज्ञादूषणंसूत्रक्रमस्त्वित्यत्रोक्तदिशा

कार्यब्रह्मपरत्वंचेदमृतत्वाद्यसंभवः । अकार्यपरताचेत्स्यादर्चिरादेरसंभवः ॥ १ ॥ नहिकार्यब्रह्मणश्चतुर्मुखस्यामृतत्वाभयत्वापरि(मित)च्छिन्नसुखत्वादिर्हेतुर्युक्तः । नवातत्साध्यंचक्षुरंतस्स्थत्वंयुक्तं । तस्य “यश्चक्षुषितिष्ठ”न्नित्यादिभिरकार्यब्रह्मभूतांतर्यामिधर्मभूतत्वात् । अकार्यब्रह्मपरत्वेतु श्रुतौ “तेर्चिषमभिसंभवंती”ति सूत्रेच “श्रुतोपनिषत्के”त्यर्चिराद्युक्तिर्नस्यात् । त्वन्मतेतस्यकार्यब्रह्ममार्गत्वात् । यच्चोक्तंपरममहतोब्रह्मणोत्यल्पंचक्षुरधिष्ठानंनेतिशंकानिरासार्थंस्थानादिसूत्रमिति तन्न । “अर्भकौकस्त्वा”दित्यनेनास्याःपरिहृतत्वात् । यच्चतृतीयसूत्रेसुखविशिष्टत्वंसुखसंबद्धत्वं । तथाचकंब्रह्मेतिसुखविशिष्टस्यब्रह्मणःप्रक्रांतत्वादक्षिवाक्येपिब्रह्मैवोच्यतइत्यर्थइत्युक्तं । तन्न । सुखसंबंधस्यजीवेपिसत्त्वेन

प्र० व्यक्तं कार्यब्रह्मेत्यादिनोपपत्तेरितिहेत्वंशोदूषितइतिमत्वावा अग्रेतत्रदोषोत्प्रेक्षामतिदिदिक्षुर्वा द्वितीयसूत्रार्थमनूद्यनिराह ॥ **यच्चेति** ॥ शंकानिरासायेदंसूत्रं । नत्वस्माकमिवाक्षिस्थस्यब्रह्मत्वेहेत्वंतरपरं । “यःपृथिव्यांतिष्ठ”न्नितिप्रक्रम्य “यश्चक्षुषितिष्ठ”न्नितियदंतर्यामिस्थानंनिर्दिष्टंतस्यैवोपासनार्थं “यएषोंतरक्षिणी”तिव्यपदेशात् । आदिपदेन “तस्योदितिनाम हिरण्यश्मश्रु”रित्याद्युक्तनामरूपादेरप्युपासनार्थं

प्र० व्यपदेशादितिगृह्यते । अस्याः अल्पस्थानत्वशंकायाः । उपलक्षणमेतत् । नामरूपादेर्जीवेपिसंभवेनब्रह्मत्वेतस्यहेतूकरणायोगाच्चशब्दायोगाच्चेत्यपिध्येयं ॥ **वाक्यशेषोक्तमिति** ॥ तन्मते “यद्वावकंतदेवखंयदेवखंतदेवक”मितिवाक्यशेषेकंब्रह्मेत्युक्तकशब्दस्यलौकिकसुखपरत्वनिरासायापरिच्छिन्नवाचिनाखशब्देनविशेषणात्सुखस्यापरिच्छिन्नत्वंलभ्यतइत्यंगीकारादेवमुक्तं । ननुशुद्धस्यतदभावेपिविशिष्टस्यब्रह्मणःसुखसंबंधोनायुक्तइत्यतआह ॥ **विशिष्टस्येति** ॥ **श्रुत्यंतरइति** ॥ अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्ययात्मानमन्विष्यादित्यमभिजयंते । “एतद्वैप्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्तंते”इतिवाजसनेयप्रसिद्धेत्यर्थः ॥ **इहेति** ॥ “यदुचैतच्छव्यंकर्मकुर्वंतियदुचनतेर्चिषमेवाभिसंभवंती”त्यादिनेत्यर्थः । प्रमेयानुपपत्तिमुक्त्वासूत्रास्वारस्यमाह ॥ **किंचेति** ॥ **इतिसूत्रइति** ॥ सूत्रव्यक्तीकरण

वाक्यशेषोक्तंसुखनिष्ठमपरिच्छिन्नत्वरूपश्रैष्ठ्यमेवसूत्रस्थविशिष्टशब्दार्थइतिवक्तव्यत्वात् त्वन्मतेब्रह्मणःसुखमात्रत्वेनतत्संबंधाभावाच्च । विशिष्टस्यापिनवाक्यशेषोक्तापरिच्छिन्नसुखसंबंधः । यत्तु श्रुतोपनिषत्कस्य श्रुतरहस्यस्य ब्रह्मविदः श्रुत्यंतरेप्रसिद्धायाऽर्चिरादिमार्गरूपागतिः तस्याइहाभिधानादितिचतुर्थसूत्रव्याख्यानं । तन्न । त्वन्मतेऽर्चिरादेरुपासकगतित्वेनब्रह्मविद्गतित्वाभावात् । किंचकगत्यभिधानादितिसूत्रे “सएनान्ब्रह्मगमयती”तिश्रुत्युक्तगतेःप्राप्तेःकंब्रह्मेतिश्रुतौकशब्दनिर्दिष्टब्रह्मविषयत्वोक्तौश्रुत्यनुसरणसिद्धिः । ब्रह्मप्राप्तिसाधनविद्यायाःसाक्षाद्ब्रह्मविषयत्वसिद्धिश्च ।

गु० त्यर्थः । अस्तुवासुखसंबद्धत्वमेवसुखविशिष्टत्वं । तथापितत्किंशुद्धस्यकिंवाविशिष्टस्येतिविकल्प्यक्रमेणदूषयति ॥ त्वन्मतइत्यादिना ॥ गतेरित्यनूद्यप्राप्तेरिति

SGDF Sri Gangadharan Digital Foundation

प्र० इत्यर्थः । कथंसाक्षाद्ब्रह्मविषयत्वमित्यतआह ॥ **विद्येति** ॥ नह्यन्यविद्ययान्यप्राप्तिर्युक्तेतिभावः ॥ **नत्विति** ॥ तत्सिद्धिरितिसंबंधः । वक्तव्यंचैवमेव । अन्यथाश्रुतोपनिषद्गत्यभिधानादित्येतावतापूर्णत्वेनकशब्दवैयर्थ्यात् । नचबहुव्रीहिसमासांतानुपादानेऽपशब्दतास्यादि तिवाच्यं । तस्यविकल्पितत्वेनकप्रत्ययंविनापिवक्तुंशक्यत्वादित्याह ॥ **व्यर्थश्चेति** ॥ **नस्वरसइति** ॥ तस्यभावार्थकक्तिन्नंतस्यप्राप्त्यर्थत्वे नमार्गेतद्धेतुत्वादिनाकथंचिद्वक्तव्यादितिभावः ॥ **प्रसिद्धार्थेति** ॥ अपर्यवसितानेकव्यक्तिकल्पनारूपानवस्थानेप्रसिद्धत्वादित्यर्थः ॥ **सदेति** ॥ सदाशब्दस्यचक्षुष्येवेत्यस्यामृतत्वादीनामित्यस्यचाध्याहारादित्यर्थः । आद्यसूत्रस्थोपपत्तेरित्यंशेनासंभवादित्यंशस्यपौनरुक्त्यमाह ॥ **उपपत्ते रिति** ॥ एवमुक्तमार्थिकपौनरुक्त्यमधिकरणांतरस्थसूत्रेष्वप्यनुसंधेयमित्याह ॥ **एवमिति** ॥ "अतद्धर्माभिलापात् । अतच्छब्दा"दित्या

विद्यातत्साध्यप्राप्त्योरेकविषयत्वनियमात् । नतुमार्गस्यार्चिरादित्वमात्रोक्तौ । व्यर्थश्च "शेषाद्विभाषे"तिवैभाषिकःकप्रत्ययः । सूत्रस्थगतिशब्दश्चनमार्गेस्वरसः । यच्च छायायाःसदाचक्षुष्यवस्थित्यभावात् जीवस्यचकृत्स्नशरीरेंद्रियसंबंधिनश्चक्षुष्येवाव स्थित्यभावात् अमृतत्वादीनांछायादावसंभवाच्चनेतरइतिपंचमसूत्रव्याख्यानं तन्न । अनवस्थितिशब्दस्यप्रसिद्धार्थत्यागात् । सदाशब्दादेरध्याहार्यत्वाच्च । कृत्स्नसंबंधेपिजीवस्यब्रह्मणइवोपासनार्थंचक्षुस्स्थानोक्तिसंभवाच्च । उपपत्तेरित्यनेनैवान्यत्रामृत त्वाद्यसंभवस्यार्थादुक्तत्वेनासंभवादित्यस्यवैयर्थ्याच्च । एवंसूत्रांतरेप्यनुपपत्तिरूह्या । अत्रकेषांचिन्मतंपरमतान्नविशिष्टमिति

गु० व्याख्यानं ॥ **यच्चेति** ॥ अनेनानवस्थितेरितिद्वेधाव्याख्यातं ॥ **सदाचक्षुष्यवस्थित्यभावादिति** ॥ यदैवहिकश्चित्पुरुषश्चक्षुरासीदतितदाचक्षुषिपुरुषच्छा यादृश्यते । अपगतेतस्मिन्नदृश्यतइतिभावः ॥ **एवंसूत्रांतरेपीति** ॥ यथांतरउपपत्तेरित्यत्रोपपत्तेरित्यनेनैवान्यत्रानुपपत्तेरुक्तत्वादन्यत्रानुपपत्तेःपरस्यानवस्थिते ॥ ४९४ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वौसूत्रांतरइतिभावः । यद्वास्थानादिसूत्रचतुष्टयेनुपपत्तिमुक्त्वाऽऽद्यसूत्रेप्यनुपपत्तिरूह्येत्याह ॥ **एवमिति** ॥ साचविवृताप्रागस्माभिः ॥ **तद्दूषणेनैवेति** ॥ एतेनसुधाद्वौपृथग्रामानुजमतादूषणेबीजंसूचितं । तथाहि । पौनरुक्त्यंतन्मतेप्युपपादितमेव । पूर्वपक्षानुदयश्चपूर्वस्माद्विशेषहेत्वभावेनस्पष्टः । आद्येसूत्रेंऽतरित्येवनिर्देशप्रसंगादंतरशब्दास्वारस्यं । यच्चोक्तं "स्थानादिव्यपदेशाच्चे"त्यस्य स्थानं स्थितिः । आदिपदेननियमनादिकमुच्यते । चक्षुषिस्थितिनियमनादीनांपरमात्मनएव "यश्चक्षुषितिष्ठ"न्नित्यादौव्यपदेशाच्चेत्यर्थइति तन्न । मद्रीत्यास्ववाक्यगतहेतूक्तिपरत्वसंभवेश्रुत्यंतरप्रदर्शनपरत्वायोगात् । स्थानशब्दस्याधिष्ठानपरत्वप्रसिद्ध्याप्रसिद्धार्थत्यागापाताच्च । प्रतिपत्त्येकमात्रयोर्लाघवेनस्थित्यादीतिनिर्देशापाताच्च । यदपि "कंब्रह्मे"तिप्रकृतस्यसुखत्वविशिष्टस्यसुखविशिष्टस्यवाब्रह्मणो "यएषोंतरक्षिणी"त्यादिनोपास

तद्दूषणेनैवदूषितं ।

प्र० नास्थानविधानार्थसंयद्वामत्वादिगुणविधानार्थंचाभिधानाच्चेतितृतीयार्थइति तन्न । भावप्रधानताकल्पनापातात् । कंब्रह्मेतिसुखमात्राभिधानेनसुखसंबंधाभिधानाभावेनविशिष्टपदायोगाच्च । सुखसंबंधमात्रस्यव्यभिचारित्वेनत्वद्रीत्या "यद्वावकंतदेवख"मितिवाक्यशेषोक्तापरिच्छिन्नत्वरूपश्रैष्ठ्यस्यैवविशिष्टशब्दार्थत्वेनवक्तव्यत्वाच्च । कंब्रह्मखंब्रह्मेत्युक्तयोःकखयोर्भेदशंकया "कंचखंचतुनविजानामी"तिप्रश्ने कखशब्दोक्तयोरानंदज्ञानयोर्नभेदइतिभावेन "यदेवकंतदेवख"मितिवाक्यशेषस्यप्रवृत्तत्वेनतेनापरिच्छिन्नत्वालाभात् । ब्रह्मशब्देनैवसुखेऽपरिच्छिन्नत्वरूपवैशिष्ट्यस्यैवौचित्याच्च । यदपिश्रुतोपनिषत्कस्याधिगतपरमपुरुषयाथात्म्यस्यानुसंधेयतयायाप्रतिपाद्यमानार्चिरादिकागतिः तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषंश्रुतवते "तेर्चिषमभिसंभवंती"त्यारभ्य "इमंमानवमावर्तनावर्तंत"इत्यभिधानाच्चेति

SGDF
Sri Gargeshwari Digital Foundation

प्र० चतुर्थार्थइति तन्न । श्रुत्यननुगमात् । कशब्दवैयर्थ्याद्वृतिशब्दास्वारस्याच्च । यच्चप्रतिबिंबादीनांनियमेनचक्षुष्यनवस्थितेरमृतत्वादीनांनिरुपाधिकानांतेष्वसंभवान्नछायादिरितरोक्षिस्थइत्याद्यद्वितीयसूत्रोक्तहेत्वोरितरत्रव्यतिरेककथनार्थमंतिममिति तन्न । प्रत्यधिकरणंसिद्धांतहेतूनांपूर्वपक्ष्यभिमतेर्थेव्यतिरेककथनायसूत्रांतरस्यावश्यकतापत्तेः । अर्थाद्व्यतिरेकसिद्धाविहापिपरमात्मन्युपपत्तिस्थितिकथनाभ्यामन्यत्रासंभवानवस्थित्योर्लाभेनाद्यद्वितीयाभ्यांपौनरुक्त्याच्च । आद्यद्वितीयसूत्रोक्तव्यतिरेकोक्तिपरत्वेऽसंभवादनवस्थितेश्चेतिविन्यासापत्तेश्च । अनवस्थितिशब्दस्यप्रसिद्धार्थत्यागाच्च । सदाशब्दादेरध्याहार्यत्वाच्चेतिदूषितमित्यर्थः । ननुकंब्रह्मखंब्रह्मेतिनिरतिशयानंदंब्रह्मेत्यभिहितमितिकथं

कैश्चिदत्र अतएवचसब्रह्मेतिसूत्रमीक्षत्यधिकरणेप्रतिज्ञाविरोधादितिसूत्रवत्प्रक्षिप्तमिति तदुपेक्ष्यं । अत्रापि “अनवस्थितेरसंभवाच्चनेतर”इतिजीवनिषेधाद्भेदधीः ॥ टीकाक्षरार्थस्तु ॥

प्र० ज्ञायते । यतोनामब्रह्मेत्यादाविवकंब्रह्मखंब्रह्मेतिप्रसिद्धसुखाकाशयोरेवब्रह्मदृष्टिर्विधीयतइत्याशंकायां पूर्ववाक्यस्यब्रह्मपरत्वोपपादकं अतएवचसब्रह्मेतिचतुर्थसूत्रमित्युक्तंरामानुजभाष्ये । तत्कुतोनव्याक्रियतेनापिदूष्यतइत्यतआह ॥ **कैश्चिदिति** ॥ **ईक्षतीति** ॥ एतेनतत्रापि प्रतिज्ञाविरोधादितिपंचमंसूत्रंप्रक्षिप्तमेवेत्युक्तंभवति । पूर्ववाक्यस्यब्रह्मपरत्वोपपादनंचभाष्याद्युक्तदिशाबोध्यमितिभावः । अद्वैतिमतप्रतिकूलमिदमित्याह ॥ **अत्रापीति** ॥ मिथ्याभेदपरत्वंचनिरसिष्यतइतिभावः । यत्कश्चिदाह अनवस्थितेरित्यतःप्राक्तनमेकमधिकरणं । ॥ ४९५ ॥
अनवस्थितेरितित्वधिकरणांतरं । आद्यस्याक्षिवाक्यंविषयः । अंत्यस्यतु “अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः । ईशस्सर्वस्यजगत”इत्यादीति ।

प्र० तत्राद्येऽक्षिस्थश्छायाजीवान्यतरोथशिवइतिसंशये जीवादिरितिप्राप्ते शिवइतिसिद्धांतइति । तन्न । अंतर्नयेनपौनरुक्त्यात् । तत्राक्षिस्थत्वस्याप्युक्तेः । वाक्यभेदमात्रेणाधिकरणभेदायोगात् । अमृतत्वाभयत्वसंयद्वामत्ववामनित्वभामनित्वादीनांलिंगानांपुष्करपलाशवाक्योक्तपापाश्लेषरूपस्यार्चिरादिवाक्योक्तब्रह्मप्राप्तिरूपफलस्यकंब्रह्मेतिप्रकरणस्यचब्रह्मत्वसाधकस्यचसत्त्वेनततोप्याधिक्येनसंशयस्यैवानुदयात् । यदत्रोक्तंशिवार्कमणिदीपिकायां अक्ष्याधारत्वस्यस्वमहिमप्रतिष्ठेशिवेमुख्यत्वायोगाद्रूपविशेषावच्छेदेनौपचारिकत्वकल्पनेबाधकाभावादात्मब्रह्मश्रुत्योस्संयद्वामत्वादिगुणश्रवणस्य चइतिशब्दशिरस्कत्वेनमनोब्रह्मेतीत्यादिवदतस्मिंस्तद्रूपप्रत्ययपरत्वावगमात् । तत्सहचारेणामृतत्वादिश्रवणस्यापितन्मात्रपरत्वावगमात् अमृतत्वादेर्मुक्तौसत्त्वेनभाविभावाभिप्रायेणोपपत्तेश्चेत्यादिप्रकारेणब्रह्मप्रापकाणामन्यथासिद्धेः जीवेचाक्षिस्थत्वस्यमुख्यस्यसंभवाज्जीवएवाक्षिस्थइतिविशेषशंकेति तत्तुच्छं । एकेनलिंगेनश्रुतिलिंगादीनांबहूनामन्यथानयनायोगात् । स्वमहिमप्रतिष्ठस्याप्यादित्याद्यंतस्स्थत्वस्यार्भकौकस्त्वस्यचप्रागेवोक्तत्वात् । “हृदिह्येषआत्मे”त्यादिनाजीवस्यसदाहृदिस्थत्वात् । रूपादिग्रहणकालेचक्षुस्संयोगांगीकारेपिनित्यंतत्रावस्थानाभावेन “यएषोंतरक्षिणी”तिनित्यवच्छ्रवणविरोधादेककालावच्छेदेनौपचारिकत्वावश्यंभावाच्च । यदपियएषइतिप्रसिद्धत्वेननिर्देशादक्षिस्थत्वस्यशिवेप्रसिद्ध्यभावाज्जीवादिरिति तदपिन । जीवेप्यप्रसिद्धेः । अंतरधिकरणविषयवाक्यएवाक्षिस्थत्वस्यप्रसिद्धेश्च । यत्तुसर्वपापोद्गतत्वेनादित्यांतर्वर्त्येवब्रह्मनाक्ष्यंतर्वर्तीत्यधिकाशंकेति तदसारं । यन्नामतन्नामेत्यादिनाऽऽदित्याक्ष्यंतःस्थयोरेकधर्मकत्वस्यतत्रश्रुतावेवोक्तेः । सर्वपापादुदितत्वस्याक्षिस्थेपिसिद्धेरितिदिक् । किंच “सहरिस्सपरःपरोवरीयान् यदिदंचक्षुषिसर्पिर्वोदकंवासिंचतिवर्त्मनीएवगच्छति सवामनस्सभामनः”इत्यादिसमाख्याश्रुत्या “यत्स्थानत्वादिदंचक्षुरसंगंसर्ववस्तुभिः । सवामन”इत्यादिस्मृत्याशिवपर

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वसिद्धांतस्यविरोधश्च। ''ज्ञानानंदात्मकंपूर्णपरंब्रह्मस्वयंहरिः। नैजानंदबलोद्रेकःकमित्युक्तोमनीषिभिः''इत्यादिस्मृत्याऽस्यप्रकरणस्यवैष्णवत्वबोधिन्याविरोधश्चेति। सूत्रेंऽतरइतिनिर्देशायोगः। उपपत्तेरितिहेतुरप्ययुक्तः। रुद्रस्य ''शिरउत्पिपेष स्तुहिश्रुतंगर्तसदंयुवान''मित्यादिनामृतिपारतंत्र्यादेरुक्तत्वेनामृतत्वादेरुद्रेनुपपत्तेः। ''तमेतास्सप्ताक्षितयउपतिष्ठंते याअक्षन्लोहिन्योराजयस्ताभिरेनंरुद्रोन्वायत्त''इत्यादौ रुद्रस्याक्षिस्थोपासकत्वोक्तेश्च। एवंसूत्रांतरेऽनुपपत्तिरूह्या। यदप्यनवस्थितेरित्यधिकरणांतरमिति नन्न। बाधकोक्त्यापेक्षितपरपक्षनिरासपरत्वेनपूर्वशेषत्वसंभवेऽन्यथात्वायोगात्। ''ईशस्सर्वस्यजगत''इतिब्रह्मलिंगसत्त्वेनतेनप्राणाग्निहोत्रप्रकरणबाधसंभवेनांगुष्ठमात्रत्वस्यचहृद्य

अग्नेरेवादित्यस्थत्वमुच्यतेऽतएवेति॥ [३४।११] अग्नेरादित्यस्थत्वस्योच्यमानत्वादेवेत्यर्थः। अनेन ''अतोक्ष्यादित्ययोरैक्या''दितिभाष्यस्थोतश्शब्दःसन्निहितेनैक्यादित्यनेननान्वेति। प्रकृतस्यातइत्यनेनपरामृष्टस्यादित्यस्थत्वस्यैक्येहेतुत्वायोगात्। किंतुव्यवहितेन ''अत्राप्यग्निरेवोच्यत''इत्यनेनान्वेतीत्युक्तंभवति॥

प्र० पेक्षयेत्यत्रवक्ष्यमाणत्वेनसंशयायोगात्। ''विदेहिरुद्रोरुद्रियंमहित्व''मितिपराधीनपदप्राप्त्युक्त्यासर्वजगदीशत्वायोगाच्च। अंगुष्ठमात्रस्तल्लिंगादितिनिर्देष्टव्येपरमतप्रतिक्षेपरूपतयाप्रधानसूत्रनिर्देशायोगाच्चेत्यपिध्येयं। ''यतोयएषआदित्येपुरुषस्सोहमस्मिसएवाहमस्मीत्यग्नेरेवादित्यस्थत्वमुच्यतेऽतएवे''तिटीकावाक्यस्यपर्यवसितमर्थवदन्यदेतच्छब्दाभ्यांवक्रवाक्यवचनभाष्ययोजनंफलमित्याह ॥ अग्नेरिति ॥ यएषआदित्येपुरुषइत्यादावग्नीनामेवादित्यस्थत्वमुच्यते। अतोक्ष्यादित्ययोरैक्याद्यएषोंतरक्षिणिपुरुषोदृश्यतइत्यत्राग्निरेवोच्यतइतिभाष्यस्थइत्यर्थः। ''अत्रादित्यस्थत्वलिंगस्यापिविष्णौसमन्वयसिद्ध्यर्थंवक्रसंगत्याऽधिकरणारंभ''इत्यत्रकानामऋजुसंगतिः। काचवक्रा। कथंऋजुसंगतौतत्स

SGDF
Sri Gargeshwari Digital Foundation

प्र० मन्वयस्यासिद्धिः । वक्रायांतत्सिद्धिरितिनज्ञायते । अतोद्वेधातदभिप्रायमाह ॥ **वक्रेति** ॥ **उक्तमिति** ॥ "तन्निष्ठस्यमोक्षोपदेशात् । नेतरोनुपपत्ते"रित्यादावितिभावः । तद्यथेहपुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यत" इतितज्ज्ञानात्सर्वपापाश्लेषेणमोक्षस्यापि तदन्यथानुपपत्त्यासिद्धेर्मोक्षश्रवणादित्युक्तं । आदित्यमंडलस्थत्वेपितस्यसिद्धांतेऽनुमतत्वादितिभावः । वक्रसंगतिप्रकारंवदंस्तत्रसमन्वय

३४१२० **वक्रसंगत्याधिकरणारंभइति ॥ यद्यपि विष्णुज्ञानान्मोक्षइत्युक्तमयुक्तं । तद्यथेत्यत्राक्षिस्थस्याग्नेर्ज्ञानान्मोक्षश्रवणादितिऋजुसंगत्यैवाधिकरणमारभ्याग्नेरेवाक्षिस्थत्वमितिपूर्वपक्षे आदित्यस्थत्वंहेतूकर्तुंशक्यं । पूर्वपक्षेतस्यहेतूकरणं चवक्रसंगत्याधिकरणारंभेपिसमं । तथापियथासिद्धांते आदित्यदेवतायाआदित्यमंडलस्थत्वेप्यमृतत्वादिहेतुभिरिदमक्षिस्थत्वंब्रह्मणएव । तथापूर्वपक्षेग्नेरादित्यमंडलस्थत्वेप्यक्षिस्थत्वंब्रह्मणएवेत्यादित्यस्थत्वस्यविष्णौसमन्वयोनसिध्येत् ।**

गु० रितिपंचमसूत्रवैयर्थ्यं एवमेतज्जातीयकेद्रष्टव्यइत्यर्थः ॥ **तथापियथासिद्धांतइति** ॥ विष्णोरादित्यस्थत्वानाक्षेपोहि आदित्यस्थत्वंविष्णोरितिसिद्धांत्यभिप्रायस्यपूर्वपक्षिणंप्रतिज्ञापकाभावात् । सिद्धांतेआदित्यमंडलस्थत्वमादित्यदेवतायाएवेतिपूर्वपक्षीज्ञात्वापूर्वपक्षंकुर्यात् । तस्यचैवमनुसंधानंस्यादित्यनुवादोयमित्यवगंतव्यं । एवंचपूर्वपक्षइत्यादिकंनासंगतं । सिद्धांतफलाक्षेपस्यैवपूर्वपक्षफलत्वान्मोक्षदत्ववदादित्यस्थत्वस्याक्षेपस्यकर्तुमशक्यत्वादादित्यस्थत्वादक्षिस्थोऽग्निरितिपूर्वपक्षेकृते अग्नेरादित्यस्थत्वेप्यक्षिस्थत्वंब्रह्मणएवेत्येवंसिद्धांतस्यकर्तुंशक्यत्वेनाग्नेरादित्यस्थत्वनिराकरणपूर्वकंविष्णौतस्यासमर्थनेयत्रादित्यस्थत्वंतत्राग्निस्थत्वमितिव्याप्तेस्सिद्धांतिनंप्रत्यभावेनानैकांतिकहेतुंपूर्वपक्षीनकुर्यादित्यर्थः । इदंचपूर्वपक्षेहेतूकृतस्यसिद्धांतिनासमन्वयोऽवश्यंवाच्यइतिनियममंगीकृत्योक्तं । शास्त्रदृष्ट्येत्यादौतथादर्शनात् ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० सिद्धिप्रकारमाह ॥ आदित्यस्थइति ॥ "यश्चासावादित्यइत्यानंदमयस्यादित्यस्थत्वमुक्तं । ततश्चार्थादक्षिस्थत्वमप्युक्त"मित्यादिटीकावाक्यस्यार्थानुवादोयमिति । यदानंदमयाधिकरणोक्तमादित्यदेवतास्थत्वमार्थिकमक्षिस्थत्वंच तदयुक्तमित्यर्थः ॥ अक्ष्यादित्यदेवतास्थत्वादितीति ॥ अत्रायंक्रमः । अग्नेरेवाक्षिदेवतास्थत्वं । कुतएतत् । योसावादित्येपुरुषस्सोहमस्मीत्यक्ष्यभिन्नादित्यदेवतास्थत्वादित्येवंवक्रसंगत्येत्यर्थः । एतच्चप्राचीनटीकारीत्याऽक्ष्यादित्यशब्दयोर्देवतापरत्वमुपेत्यसंगत्युपपादनमितिध्येयं । ननुपूर्वत्र "यश्चासावादित्य"इत्यादित्यस्थत्वंनामविष्णोरादित्यदेवतास्थत्वं । यदाहुस्तैत्तिरीयभाष्ये "सविष्णुस्सर्वजीवेषुनृषुदेवेषुचस्थितः । एकएवे"त्यादि । उक्तंचप्राक् "भेदव्यपदेशाच्चे"त्यत्रटीकायां "सयश्चायमित्यानंदमयस्यापकृष्टोत्कृष्टजीवेषुपुरुषादित्यपदोपलक्षितेषुस्थितिकथना"दिति । तथाचतत्रार्थादापाद्यमानमक्षिस्थत्वमेवेत्यक्ष्यादिशब्दस्यदेवतापरत्वपक्षेसंगत्युपपादनसंभवेपि टीकाकृत्पक्षेऽक्ष्यादिशब्दस्यजडपरत्वेनान्यस्याक्षिस्थत्वेप्राचीनमप्यग्नेरेवे

आदित्यस्थोविष्णुस्ततश्चार्थादक्षिस्थोपिसएवेत्यानंदमयाधिकरणोक्तमादित्यदेवतास्थत्वादिकमयुक्तं । अग्नेरेवाक्ष्यादित्यदेवतास्थत्वादितिवक्रसंगत्याधिकरणारंभेतु पूर्वोक्तस्यविष्णावादित्यदेवतास्थत्वस्येहपूर्वपक्षे आक्षेपात्तन्निरासस्यच विष्णोरेवादित्यस्थत्वमितिसिद्धांताभिप्रायंविनाऽसिद्धेस्तत्समन्वयःसिद्ध्यतीतिभावः । यद्वादित्यस्थत्वस्यपूर्वपक्षेहेतुमात्रत्वेनोक्तौपूर्वपक्षहेतुरपिसिद्धांतिनासमन्वेतव्यइतिनियमाभावान्नतत्समन्वयसिद्धिः । उक्तादित्यस्थत्वाक्षेपमुखेनतुपूर्वपक्षेसिद्धांतेतत्समन्वयोपिकर्तव्यइति "यएषआदित्येपुरुषोदृश्यत"इतिवाक्यमपिब्रह्मणिसमन्वितंभवतीतिभावः ॥

गु० तथापिविकारशब्दादित्यादौतदर्शनात्पक्षांतरमाह ॥ यद्वेति ॥ यद्वाननुऋजुसंगत्याऽधिकरणारंभेत्यादित्यस्थत्वस्यहेतूकृतत्वेपि । पूर्वपक्षिणाहेतूकृतस्यापिसिद्धां

प्र० तिकथमाक्षेपइतिचेत् अत्राहुःवामनिभामनिशब्दोक्तसर्वस्त्रीपुंसप्रेरकत्वेनाग्नेस्तदक्षिस्थत्वेसएवपूर्वत्राप्युक्तादित्यमंडलस्थआपन्नइतितेनैवोपपत्तौतत्रस्थतयाकिमीश्वरेणेत्याक्षेपइतिअग्नीनामितिबहुवचनमादिपदद्वयंचबह्वग्निश्रुतिसूचनायप्रयुक्तमितिवाक्यस्यतात्पर्यमाह॥अग्नीनामिति॥

अग्नीनामितिबहुवचनमिति [३४।२] ॥ भाष्येबहुवचनादिकं "अथहैनंगार्हपत्योनुशशास यएषआदित्येपुरुषोदृश्यतेसोहमस्मि । अथहैनमन्वाहार्यपचनोनुशशास यएषचंद्रमसिपुरुषोदृश्यतेसोहमस्मि अथहैनमाहवनीयोनुशशास यएषविद्युतिपुरुषोदृश्यतेसोहमस्मी"तिश्रवणाद्गार्हपत्यादीनांत्रयाणांक्रमेणादित्यादित्रितयस्थत्वं तथाचप्रसिद्धगार्हपत्यस्यैवाक्षिस्थत्वमितिप्रदर्शनार्थं । नतुत्रयाणामक्षिस्थत्वप्रदर्शनार्थमित्यर्थः ॥ [३५।१८] ह्वयाम्यग्निमित्यादाविवेति ॥ यथा "ह्वयाम्यग्निंप्रथमंस्वस्तय"इत्यत्राग्नेरुपक्रमेपि "सवितारमूतये । हिरण्ययेनसवितारथेने"त्यादिसवितृश्रुतिलिंगादिनातत्प्रकरणंसावित्रं । अतएवोक्तमनुक्रमणिकायां "ह्वयाम्येकादशसावित्र"मिति । तथात्रापिब्रह्मणउपक्रमेप्यस्मद्विद्येत्यग्नेरुक्तत्वादग्नीनामेवेदंप्रकरणमित्यर्थः ॥ [३६।४] तत्तत्प्रेरकत्वेनेति ॥ श्रुतौवामेतिभामेतिशब्दाभ्यांस्त्रीपुरुषरूपसर्वप्रेरकतायाउक्तत्वादितिभावः । उक्तंहितत्वप्रदीपे "वामंसौंदर्यं । भामंतेजः । तत्प्रधानत्वात्स्त्रीपुरुषावामभामशब्दशब्दिताः । तन्नेतावामनिर्भामनि"रिति ॥ [३६।१५] दिव्यदृष्टिगोचरइति ॥

प्र० सुखविशिष्टसूत्रे "नचोपक्रमविरोधः । ह्वयाम्यग्निमित्यादाविवोपपत्ते"रित्युक्तं । तदुर्गमार्थत्वाद्व्यनक्ति ॥ यथेति ॥ अनवस्थितेरितिसूत्रटीकायां "तत्तत्प्रेरकत्वेनतत्तच्चक्षुस्थितेरभिप्रेतत्वा"दित्युक्तं । श्रुतौप्रेरकत्वबोधकपदाश्रवणात्कथमेतदित्यतआह ॥ श्रुताविति ॥ उपसं

SGDF

प्र० हारे “विष्णुरेवाक्ष्यादित्यस्थोदिव्यदृष्टिगोचर”इत्युक्तं। तस्यप्रयोजनमाह ॥ ततश्चेति ॥ शिष्टमुपन्यासमुखेनस्पष्टीकृतमितिभावः ॥७॥
अंतराधिकरणं ॥ ४ ॥

॥ ॐअंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्ॐ ॥ “तत्रचैतदमृतमित्युक्तममृतत्वमुच्यते”इत्यादिभाष्यटीकयोःपूर्वश्रुतिसंगतेरेवप्रतीत्यापूर्वाधिकरणसंगत्यप्रतीतेः “श्रुत्यादिसंगतिंदर्शयती”तिटीकानयुक्तेत्यतआह ॥ हेतूकृतेति ॥ उपपत्तेरित्यनेनेत्यर्थः । संगतिराक्षेपिकीत्यर्थः ॥ उक्तमिति ॥ श्रुतिसंगत्यविनाभूतत्वादुक्तप्रायमित्यर्थः । पूर्वाक्षेपसमर्थनंपूर्ववद्ध्येयं । एतेनेहामृतत्वस्यैवाक्षेपात्तेनप्राग्वदंतर्यामीचविष्णुरितिशंकानवकाशस्सूचितः । अत्रपूर्वपक्षेंऽतरत्वमप्यन्यस्यैवेतिवक्ष्यमाणत्वात् “सर्वेषांभूतानामंतरपुरुष”इति “विवक्षितगुणोपपत्ते”रित्यत्रविष्णुलिंगतयानिर्णीतेनांतरत्वेनविष्णुःकिंनस्यादित्यपिशंकाप्रत्युक्ता । अमृतत्वाक्षेपस्तुसन्निधानाद्भाष्यादावत्रापिदर्शितः । यद्यप्यत्र “यश्चक्षुषितिष्ठ”न्नितिचक्षुस्स्थस्यात्रोक्तपूर्वपक्षन्यायेनान्यत्वात्प्रागक्षिस्थोपिसएवेत्याक्षेपऋजुः । यद्यत्रांतर्यामीविष्णोरन्यस्तर्हि “अंत

ततश्चश्रुतौ “यएषोंतरक्षिणिपुरुषोदृश्यत”इतिदृश्यत्वाद्युक्तिर्युक्तेतिभावः ॥ ७ ॥ अंतराधिकरणं ॥ ४ ॥
॥ ॐअंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्ॐ ॥ अत्रचक्षुरंतस्स्थस्य

गु० तिनासमन्वेतव्यत्वेनियमाभावादादित्यस्थत्वलिंगसमन्वयोपिसेत्स्यतीत्येववक्रसंगत्याधिकरणारंभोनुपपन्नएवेत्यरुचेराह ॥यद्वेति॥ तत्तत्प्रेरकत्वेनेतिटीकायामन्यथानवस्थितेःसूत्रानुपपत्तेरितितात्पर्यंद्रष्टव्यं ॥ ७ ॥ अंतराधिकरणं ॥ ४ ॥
॥ ॐअंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्ॐ ॥ पूर्वपक्षेसिद्धांतेचफलफलिभावमाह ॥ अचेतनेति ॥ यस्यपृथिवीशरीरमित्यादिनांतर्यामिणःपृथिव्यादि

SGDF Sri Gargeshwari Digital Foundation

प्र० यॊम्यमृत"इत्युक्तामृतत्वमपितस्यैवेतिप्रागमृतत्वयुक्तोक्षिस्थोपिसएवेत्याक्षेपोवक्रः । प्राचीनस्सौत्रप्रतिज्ञांशस्य । अयंचहेत्वंशस्य । अतस्स एववाच्यइतिभाति । तथापिसर्वानुगुण्यायवामृतत्वमुखेनचक्षुरादिस्थस्यापिविष्णुत्वशंकामाभूदितिवातदाक्षेपउक्तः । अत्रसुधोक्तःसाक्षादं तरवस्थानविशिष्टरमणरूपांतरत्वाक्षेपस्तुप्रागेवसर्वत्रेतिनयेविवृतइतिभावः । एतेनस्थाननिर्देशोपपादनायपृथिव्यादिस्थाननिर्देशोदृष्टांतितः । तस्याक्षेपात्संगतिरितिकल्पतरूक्तंनिरस्तं । स्थानसूत्रएवमर्थस्यनिरासात् । प्रधानहेत्वाक्षेपसंभवेत्वद्रीत्याशंकानिरासकसूत्राक्षेपायोगात् ।

ब्रह्मत्वेहेतूकृतामृतत्वाक्षेपेणपूर्वपक्षोत्थानादनंतरसंगतिरितिभाष्यएवोक्तं । अत्रांतर्यामीकिंप्रकृत्यादिःकिंवाविष्णुरितिचिंता । तदर्थंयस्यपृथिवीशरीरमित्यादिनोक्तंपृथिव्यादेरंतर्यामिणंप्रतिशरीरत्वं किंब्रह्मप्रतिनयुक्तमुतयुक्तमिति। तदर्थंशरीरत्वंकिंरूढमुतयौगिकमिति। तदर्थंकिंरूढौबाधकंनास्त्युतास्तीति । तदर्थंयंपृथिवीनवेदेत्यादिनांतर्यामिण्युक्तंपृथिव्याद्यविदितत्वंकिंप्रकृत्यादौ युक्तमुतनेति। तदर्थंयंपृथिवीत्यादौपृथिव्यादिशब्दःकिमचेतनपरःकिंवातदभिमानिचेतनपरइति।

प्र० तदेतदाह ॥ ब्रह्मत्वेहेतूकृतेति ॥ एतेनैवचक्षुषिस्थित्यादेःपरमात्मनएवयश्चक्षुषितिष्ठन्नितिनिर्देशादित्युक्तस्यसमर्थनार्थमेतदितिकेषांचित्सं गत्युक्तिरप्यपास्तेति । एवंसंगतिटीकांविवृत्यविषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ बृहदारण्यकेतृतीये "यःपृथिव्यांतिष्ठन्पृथिव्याअंत रोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृत"इत्येवंरूपेणाबध्यंतरिक्षवाय्वादित्यदिक्चंद्रतारकाकाशतमस्ते

SGDF
Sri Gargeshwari Digital Foundation

प्र० जस्त्वधिदैवतं यस्सर्वेषुभूतेष्वित्यधिभूतं प्राणवाक्चक्षुःश्रोत्रंमनस्त्वग्विज्ञानरेतस्स्वध्यात्मंश्रुतोंतर्यामीविषयइत्यर्थः । टीकायामधिदैवादिसर्व प्रकरणश्रुतांतर्यामिमात्रविषयताद्योतनायांतर्यामित्वंविषयइत्युक्तावपि सूत्रभाष्यानुरोधेनांतर्यामीत्युक्तं । आदिपदेनतत्तदभिमानिजीवाः । अस्पष्टांशेफलफलिभावमाह ॥ **अचेतनेति** ॥ यदावक्ष्यमाणदिशाऽचेतनपरत्वंतदाजडाविदितत्वस्यप्रकृत्यादेरुपपत्तेरूढौबाधकाभावात् तादृक्शरीरत्वंविष्णोर्नयुक्तमितिप्रकृत्यादिरेवेतिपूर्वपक्षेफलं । जीवादंतर्यामिभेदोक्तिर्नेतिपूर्वपक्षिणोभावः । यदातुचेतनपरत्वंतदातेनसाकल्येनाविदितत्वस्यप्रकृत्यादावयोगाद्बाधकेनरूढित्यागाच्छीर्यमाणत्वयोगेनविष्णावपितच्छरीरकत्वसंभवाद्विष्णुरेवेतिसिद्धांतेफलमित्यर्थः । यद्यपिविष्णुरितिचिंतानंतरंतदर्थममृतत्वादिकंगौणमुतमुख्यमिति । तदर्थबाधकमस्त्युतनेति । तदर्थंशरीरत्वंविष्णौनयुक्तमुतयुक्तमिति । तदर्थंतत्किंरूढंयौगिकंवेत्येवयथासूत्रन्यासंचिंतोपदर्शनीया । आद्येसूत्रेसाधकलिंगस्यद्वितीयादौपरलिंगसावकाशतायाश्चोक्तेः । तथापिसिद्धांतेशरीरपदस्ययौगिकत्वोक्तेर्निर्बीजतानिरासायाधिदैवपदस्वारस्यायचतदभिप्रेतैवेयंचिंतादर्शिता । अतएवपूर्वपक्षटीकायांशरीरत्वस्याघटनैवपूर्वंविष्णावुक्ता । सिद्धांतटीकायांच "यद्यपियोगाद्रूढेःप्राबल्यं तथापिनिरवकाशाविदितत्वादिलिंगबलेनयोगांगीकारोयुज्यत"इत्युक्तमितिभावः । "सोंतर्यामीप्रकृतिर्भवे"दित्यादिटीकांविवृण्वन् "पृथिव्यादिशरीरत्वंनिरवकाश"मितिन्यायविवरणोक्तशरीरत्वरूपनिरवकाश

अचेतनपरत्वेह्यचेतनाविदितत्वंप्रकृत्यादेरपिसंभवति । अन्यथातुनसंभवतीति । पूर्वपक्षस्तु । ॥ ४९९ ॥

गु० शरीरत्वश्रवणात्तस्यचप्रकृतानुपपत्तेरितिटीकाऽनुपपन्ना । प्रकृतेरिवविष्णोरपिपृथिव्यादिशरीरत्वोपपत्तेः । नचपृथिव्यादिशरीरत्वंनामपृथिव्याद्यात्मकत्वंविवक्षित

प्र० लिंगेनपूर्वपक्षद्वयंवक्तुं "नचस्मार्त"मितिसूत्रसूचितंप्रकृतिपूर्वपक्षंतावदाह ॥**एषतइति**॥ एतेनसइतिटीकास्थतच्छब्दार्थोविवृतः। यस्यपृथिवीत्यादिसर्वात्मकत्वादित्यंतटीकार्थंनिष्कृष्याह ॥ **अंतर्यामिणीति** ॥ तत्रानुपपत्तिमाशंक्यनिराह ॥ **यद्यपीति** ॥ **गौणमिति** ॥ दिगाद्यभिमानिदेहस्यप्राकृतत्वाद्दिगादिरपितथोच्यतइतिभावः ॥ **ब्रह्मणस्त्विति** ॥ प्रकृतौकिंचिदेवामुख्यं ब्रह्मणितुसर्वमपीतिनतद्ब्रह

एषतआत्मांतर्यामीत्युक्तोंतर्यामीप्रकृतिः । अंतर्यामिणिश्रुतस्यपृथिव्याद्यात्मकत्वरूपस्यपृथिव्यादिशरीरत्वस्यपृथिव्याद्युपादानेप्रकृतौसंभवात् । शरीरशब्दस्येदंपूर्वपक्षशरीरमित्यादौस्वरूपेपिप्रयोगात् । यद्यपि "यस्यदिशःशरीरं यस्यात्माशरीर"मित्युक्तंदिगादिशरीरत्वंप्रकृतौनमुख्यं । पृथिव्यादेःप्राकृतत्वेपिदिगादेरप्राकृतत्वात् । तथापिगौणंतदस्तु । ब्रह्मणस्तुपृथिव्यादिशरीरत्वमपिनमुख्यं ।

गु० मितिवाच्यं । तस्यचप्रकृतावसंभवादित्यतःपृथिव्याद्यात्मकत्वस्यप्रकृतावुपपत्तौनियामकमाह ॥ **अंतर्यामिणीति** ॥ पृथिव्याद्युपादानइतितत्रहेतूक्तिः । शरीरशब्दस्यस्वरूपेपिप्रयोगादित्येवंटीकायामुक्तं । तत्रदृष्टांतस्तुनोक्तइत्यतोदृष्टांतंवदन्व्याख्याति ॥ **शरीरशब्दस्येति** ॥ ननुदिगादिशरीरत्वस्यप्रकृतावभावेपिगौणस्यदिगादिशरीरत्वस्यप्रकृतौसत्त्वेनप्रकृतेरंतर्यामित्ववत् ब्रह्मणोपिगौणस्यदिगादिशरीरत्वस्यसंभवादंतर्यामित्वंकिंनस्यादित्यतः प्रकृतौदिगादिशरीरत्वस्यगौणत्वेपि पृथिव्याद्युपादानत्वेनपृथिव्याद्यात्मकत्वरूपपृथिव्यादिशरीरत्वस्यमुख्यत्वेनांतर्यामित्वसंभवेपि विष्णौदिगादिशरीरत्ववत्पृथिव्यादिशरीरत्वस्यापिगौणत्वेनांतर्यामित्वंनसंभवतीत्यभिप्रायेणाह ॥ **ब्रह्मणस्त्विति** ॥ ननुशीर्यतेनित्यमेवास्मादित्युक्तरीत्यायौगिकस्यपृथिव्यादिशरीरत्वस्यब्रह्मण्यपिसंभवाद्ब्रह्मणोप्यंतर्यामितास्यादित्यतः

SGDF

प्र० इत्यर्थः । ननुब्रह्मणियोगांगीकारेमुख्यंयुज्यतइत्यतआह ॥ **नचनित्येति**॥ हेतुगर्भं । ननुब्रह्मपक्षेयथादिगादिशरीरत्वमयुक्तंप्रकृतिपक्षेपि तथानयुक्तं । पृथिव्यादिशरीरत्वंचोभयत्रापियुक्तमितिचेन्न । योगाद्रूढेरथकाराधिकरणन्यायेनबलवत्त्वादितिभावः । इयताग्रंथेनाद्यादि चिंतात्रयस्थपूर्वपक्षकोटयोर्हेतुहेतुमद्भावापन्नतयाविवृताः । इदानींबाधकंनास्तीत्यादिकोटीर्विवरीतुकामः किमत्रबाधकं । "यःपृथिव्यांति ष्ठन् यआत्मनितिष्ठ"न्नित्युक्तपृथिव्याद्याधारकत्वंवा "यमयती"त्युक्तपृथिव्यादिनियामकत्वंवा "आत्मानंयमयती"त्युक्तचेतननियामकत्वंवा ऽऽत्माविदितत्वंवा "अदृष्टोद्रष्टाऽश्रुतश्श्रोताऽमतोमंताऽविज्ञातोविज्ञाते"त्युक्तद्रष्टृत्वादिकंवेतिकल्पान्हृदिकृत्वा "नचपृथिव्यांतिष्ठन्नित्यादेरनु पपत्ति"रित्यादिटीकांविवृण्वन्क्रमेणनिराह ॥ **यइति** ॥ **इत्युक्तेरिति** ॥ "कारणेषुस्थितंकार्यंव्याप्तंकार्येषुकारण"मितिपंचमगीतातात्प र्योक्तेरित्यर्थः । प्रत्यक्षंचाह ॥ **पटइति** ॥ एतेनटीकोपलक्षणमितिसूचितं । टीकोक्तेविरोधंहृद्याशंक्यस्वयंसमाधत्ते ॥ **कार्येति** ॥ गौण

नचनित्येदिगादिकेब्रह्मप्रतिशीर्यमाणत्वादिरूपंयौगिकमपिशरीरत्वमस्ति । यःपृथिव्यांति ष्ठन्नित्यादिकंतु "व्याप्तंकार्येषुकारण"मित्युक्तेः । पटेतंतवइतिप्रतीतेश्चकारणस्यापिकार्य स्थत्वाद्युक्तं । कार्यकारणयोश्चभिन्नाभिन्नत्वादभेदेनतदात्मकत्वंभेदेनतत्स्थत्वंचाविरुद्धं ।

गु० पृथिव्यादेर्यौगिकशरीरत्वसंभवेपिदिगादेर्यौगिकमपिनसंभवतीतिनतस्यांतर्यामित्वमित्यभिप्रेत्याह ॥ **नचेति** ॥ अत्रयद्यपिप्रकृतौपृथिव्यादिशरीरत्वस्यरूढत्ववद्वि ष्णौपृथिव्यादिशरीरत्वस्ययौगिकत्वेनमुख्यत्वं । ब्रह्मणिदिगादिशरीरत्वस्यामुख्यत्ववत्प्रकृतावपिदिगादिशरीरत्वममुख्यमेवेतिप्रकृतेरेवांतर्यामित्वमितिनिर्णयोनोप पन्नः । तथापिरूढ्यपेक्षयायोगस्यामुख्यत्वात्प्रकृतावेवरूढस्यशरीरत्वस्यसत्त्वाद्विष्णौतुयौगिकत्वान्निर्णयोपपत्तिरितिहृदयं । व्याप्तंकार्येषुकारणमित्यादिनेत्यत्रटीका स्थादिशब्दार्थमाह ॥ **पटेतंतवइति** ॥ **प्रतीतेश्चेति** ॥ पृथिवींयमयतीत्येतदुपचारेणनेतव्यमितिटीका । तत्रोपचारेनिमित्तानुक्तेस्तत्रनिमित्तंवदन्नेवव्याख्याति

SGDF
Sri Gargeshwari Digital Foundation

प्र० तांव्यनक्ति ॥ **कार्यस्येति** ॥ आत्मानमितिमाध्यंदिनपाठः । विज्ञानमित्येवकाण्वपाठः ॥ **यमिति** ॥ पृथिव्याद्यविदितंत्वग्रेसावकाश यिष्यतइतिभावः । इत्यादिना गीतावाक्येनेत्यर्थः ॥ **अत्रयदुक्तमिति** ॥ स्पष्टयिष्यतेचैतदग्रे ॥ **गौणत्वेनेति** ॥ गौणश्चेदितिसूत्रेद्वा भ्यामपिगौणत्वेनोक्तत्वादितिभावः ॥ **प्रधानेपिद्रष्टृत्वादेर्गौणत्वेनेति** ॥ नन्वक्षराधिकरणटीकायांद्रष्टृत्वादिश्रवणाज्जडप्रकृतेरसंदेहनि विष्टत्वमितिवक्ष्यतइतितद्विरुद्ध्यतइतिचेन्न । तत्रद्रष्टृत्वादेःप्रथमतःश्रवणादिहचरमश्रुतद्रष्टृत्वादेःप्रथमावगतपृथिव्यादिशरीरस्थत्वपृथिवीस्थ

पृथिवींयमयतीत्यादिनोक्तंचनियम्यत्वंगौणं । कार्यस्यकारणाधीनत्वात् । आत्मानंयमयतीत्येतदप्यात्मप्रवृत्तेःशरीरादिद्वारा प्रकृत्यधीनत्वात् । यमात्मानवेदेत्येतदपि "अप्रतर्क्यमविज्ञेय"मित्यादिनाप्रकृतेर्दुर्ज्ञानत्वात् । "द्रष्टाश्रोते"त्यादिनोक्तं चद्रष्टृत्वादिकं प्राकृतानामिंद्रियाणांदर्शनादिसाधनत्वेनकरणेकर्तृत्वोपचाराद्वाभिमानिद्वारावाप्रकृतौयुक्तं । अत्रयदुक्तमुभा भ्यांजीवमात्रमंतर्यामीत्येवपूर्वःपक्षः । नतुप्रकृतिः । तस्याद्रष्टृत्वाद्यसंभवादिति । तन्न । त्वन्मते "तदैक्षते"तिश्रुत स्येक्षणस्यप्रकृतौगौणत्वेनेक्षत्यधिकरणपूर्वपक्षवत् द्रष्टृत्वादेर्दर्शनरूपेब्रह्मण्यारोपितत्वेनमायाविशिष्टनिष्ठत्वेनवात्रत्यसिद्धांत वच्च पृथिवीशरीरत्वादिप्रकृतिलिंगेनप्रधानेपिद्रष्टृत्वादेर्गौणत्वेनारोपितत्वेनवाचेतनविशिष्टनिष्ठत्वेनवापूर्वपक्षस्यसंभवात् ।

गु० ॥ **पृथिवीयमयतीत्यादिनोक्तंचेति** ॥ पृथिवींयमयतीत्येतदुपचारेणनेतव्यमित्येतदुपलक्षणं ॥ **आत्मानंयमयतीत्येतदपीति** ॥ गौणमितिसंबंधः । ननुचांतर्यामिणोद्रष्टाश्रोतेत्यादिनाद्रष्टृत्वमुच्यते । द्रष्टृत्वंचदर्शनकर्तृत्वंतच्चबुद्धिपूर्वप्रवृत्तिः । तथाचप्रकृतेःकथमंतर्यामित्वं । तस्याअचेतनत्वेनद्रष्टृत्वासंभवादित्य तआह ॥ **द्रष्टेति** ॥ मुख्यामुख्ययोर्मुख्येसंप्रत्ययइतिन्यायेनसंभवतिमुख्यार्थेऽमुख्यार्थग्रहणमन्याय्यमित्यरुचेराह ॥ **अभिमानद्वारावेति** ॥ अन्यथेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वादिनालिंगेनकथंचिन्नेयत्वादितितात्पर्यात् । अतएवतत्रवक्ष्यतिटीकाकारः "उत्तराधिकरणेत्वीक्षणस्यप्रथमाप्रतीतेरस्त्यवकाशइती"ति भावः । किमर्थमेवमित्यतोविपक्षेसूत्रविरोधमाह ॥ अन्यतेति ॥ यदत्रोक्तंश्रुतप्रकाशेतदग्रेनिरसिष्यते । एवंपृथिव्यादिशरीरत्वंनामतदा त्मकत्वमित्युपेत्यैकःपूर्वपक्षष्टीकाविवरणेनविवृतः । इदानींतद्देहत्वमर्थमुपेत्य "शारीरश्चे"तिसूत्रसूचितंद्वितीयंपक्षं "पृथिव्यादिजीवस्यवैतदं तर्यामित्व"मित्यादिटीकांविवृण्वन्नाह ॥ पृथिव्यादीति ॥ भाष्यसूत्रानुरोधेनटीकायामेकवचनोक्तावपितज्जात्यभिप्रायमितिभावेनबहुव चनोक्तिः । अन्यथाभामतीमतरीत्याटीकायामपिजीवसामान्यमेवाभिमतमितिमंदस्यशंकास्यात् । जीवसामान्यपक्षश्चाग्रेतनदोषदुष्टः । अतएवटीकायामुत्तरत्र "प्रकृत्यादिलिंगेनतेषामंतर्यामित्व"मिति "अतोंतर्यामीनविष्णुः । अपितुप्रकृत्यादय"इतिचबहुवचनोक्तिः । अन्य थातस्येतिप्रकृत्यादिरित्येवचनिर्देशस्स्यादितिभावः । अत्रपरोक्तंबाधकमाशंक्याह ॥ अत्रेति ॥ नैवमिति ॥ किंतुजीवसामान्यमित्यर्थः

अन्यथा "नचस्मार्तं"तिसूत्रेप्रकृतेर्निषेधोनस्यात् । पृथिव्याद्यभिमानिनांजीवानांवैतदं तर्यामित्वं । तान्प्रतिपृथिव्यादेःस्थूलशरीरत्वात् । अत्रभामत्यां "यःसर्वाँल्लोकानं तरोयमयती"तिश्रुतस्यसर्वनियंतृत्वस्याभिमानिजीवेषुप्रत्येकमसंभवान्नैवंपूर्वपक्षइत्युक्तं ।

गु० जीवमात्रमंतर्यामीत्येवपूर्वपक्षइत्यर्थः । पृथिव्यादिजीवस्यैवैतदंतर्यामित्वमित्युक्तंटीकायां । तत्रपृथिव्यादिरूपएवजीवोस्तीतिप्रतीयते । तदयुक्तं । पृथिव्यादिरू पस्यजीवस्याभावादित्यतःपृथिव्याद्यभिमानीजीवःपृथिव्यादिजीवइतिमध्यमपदलोपीसमासोत्राभिमतइत्यभिप्रेत्याह ॥ पृथिव्यादीति ॥ पृथिव्यादिजीवानामंतर्या मित्वेपृथिव्यादिशरीरत्वादेस्तस्मिन्नतिसुघटत्वादितिटीकायांहेतुरुक्तः । तत्रकथमतिसुघटत्वमित्यतआह ॥ तान्प्रतीति ॥ तदसंभवात् प्रत्येकंसर्वनियंतृत्वासं

प्र० ॥तदिति॥ सर्वलोकनियंतृत्वस्यप्रत्येकंजीवेऽसंभवादित्यर्थः । नप्रत्येकंजीवानांतन्नियंतृत्वं । किंतुमिलितानां । यस्सर्वाँल्लोकानित्येकवच नंसमुदायाश्रयमित्यतआह ॥ यइति ॥ अभिमानिनामप्युक्तरीत्यातत्तल्लोकनियामकत्वेनमिलित्वासर्वलोकनियंतृत्वोपपत्तेरित्यर्थः ॥ प्रत्यु तेति ॥ प्राणचक्षुरादींद्रियपृथिव्यादिभूतसंघातशरीरकत्वाज्जीवस्यपृथिव्यादिमात्रशरीरकत्वमयुक्तं । अभिमानिनांतुतत्तन्मात्रनियामकत्वे नतत्तन्मात्रस्थूलशरीरकत्वंयुक्तमितिभावः । "विद्यमानेपिविष्णुलिंगेनतस्यांतर्यामित्व"मित्यादिटीकार्थमाह ॥ नतुविष्णोरित्यादि ॥ "पृथि व्यादिशरीरत्वस्यकयापिविधयाऽवकाशाभावा"दितिटीकायां "विधाशब्दस्यपृथिवीभिन्नत्वचिच्छरीरत्वोररीकारेणे"तिवाक्यानुरोधेनतदात्म

तन्न । स्वांगीकृतजीवमात्रपक्षेपितदसंभवात् । यइत्याद्येकवचनस्यसमुदायपरत्वंत्वभिमानिपक्षे पिसमं । प्रत्युतजीवमात्रपक्षएवायुक्तः । "यस्यपृथिवीशरीर"मित्यादिनोक्तस्यपृथिव्याद्येकै कशरीरत्वस्य "यस्यप्राणाश्शरीर"मित्यादिनोक्तस्यप्राणवाक्चक्षुःश्रोत्रादिशरीरत्वस्यचायोगात् । तस्मादभिमानिनामेवांतर्यामित्वं । नतुविष्णोः । तस्यपृथिव्याद्यात्मकत्वतद्देहत्वयोरयोगात् ।

गु० भवादित्यर्थः । ननुपृथिव्यादीनामनेकत्वान्नांतर्यामित्वं । यस्सर्वानित्यंतर्यामिणएकत्वस्यबोधनादितिचेन्न । तथासतिजीवमात्रमित्यपिनस्यात् । तेषामप्यनेकत्व साम्यात् । नचजीवानामनेकत्वेपितत्समुदायापेक्षयैकवचनोपपत्तिरितिवाच्यं । तथासत्यभिमानिपक्षेपिसमुदायविवक्षयातदुपपत्तिरितिभावेनाह ॥ यइतीति ॥ ननुजीवमात्रस्यैकस्मिन्कालेपृथिव्यादिशरीरत्वासंभवेपिकदाचित्कस्यचिदित्येवंरूपेणजीवमात्रस्यपृथिव्यादिशरीरत्वमुपपन्नमित्यरुचेराह ॥ यस्यप्राणाइति ॥ प्रथ

SGDF
Sri Gangeshwar Digital Foundation

तात्पर्य- ॥ ५०२ ॥

प्र० कल्वतद्देहत्वरूपप्रकारद्वयमर्थंविवृत्ययोगवृत्त्यापीत्यप्यर्थमभिप्रेत्ययोगवृत्त्याविष्णौघटनामाशंक्यनिराह ॥ नचतेनेति ॥ बलीयस्त्वा दिति ॥ तस्यजन्मादिनयपूर्वपक्षएवव्युत्पादितत्वादितिभावः । रूढित्यागेनबाधकमाशंक्याह ॥ यमिति ॥ तस्य पृथिव्यादेः । जडत्वे युक्तिमाह ॥ यमिति ॥ माध्यंदिनपाठानुरोधेनात्मेत्युक्तं । यंविज्ञानंनवेदेतिकाण्वपाठस्यैवोक्तौविज्ञानशब्दस्यात्मशब्दस्येवजीवेप्रसिद्ध्यभा वेनचेतनाज्ञेयत्वंनस्पष्टंभायादितिभावः । नन्वथाप्यंतरपुरुषइत्यत्रनिर्णीतांतरत्वंवा आत्मनितिष्ठन्नित्यादिनोक्तंचेतननिष्ठत्वंवाचेतननियमनं

नचतेनशीर्यमाणत्वादिनापृथिव्यादेस्तच्छरीरत्वं।
योगात्रूढेर्बलीयस्त्वात् । "यंपृथिवीनवेदे"
त्युक्तंपृथिव्यादिनाऽविदितत्वंचतस्यजडत्वादभि
मानिन्यपियुक्तं । "यमात्मानवेदे"तिचेतनस्य
पृथगुक्तेःपृथिव्यादिशब्दोनाभिमानिचेतनपरः ।

गु० मसूत्रोक्तंपृथिव्याद्यविदितत्वमपिसावकाशमित्यतोनप्रकृतपक्षेबाधकमित्याह ॥यंपृथिवीनवेदेति ॥ ननुकथंपृथिव्यादेर्जडत्वेनतदविदितत्वंजीवस्य । उच्यते । पृथिव्यादिशब्दानामभिमानिचेतनपरत्वात्तदविदितत्वस्यजीवेपिसंभवादित्यतआह ॥ यमात्मानवेदेति ॥ चेतनस्यपृथगुक्तेरिति ॥ अन्यथापौनरुक्त्यंस्या

चंद्रिका. प्र. द्वि. ५

॥ ५०२ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० वारूढौबाधकमस्त्वित्यतःक्रमेणनिराह ॥ **यइत्यादिना** ॥ पूर्वमात्मशब्दस्यजीवसामान्यपरत्वंतद्वाक्यस्थयइत्यादियच्छब्दस्यपृथिव्यादित त्वाभिमानिजीवसमुदायपरत्वमुपेत्यतल्लिंगंसावकाशमित्युक्तं । इदानीमात्मशब्दस्सकलचेतनपरएव । यइत्यादियच्छब्दस्तुसकलात्माभिमा निचेतनपरः । पूर्वत्रपृथिव्यादिशब्दैस्तदभिमानिजीवस्यैवग्रहणेनात्रापितत्प्रायपाठेनतथैवग्राह्यत्वात् । आत्माज्ञेयत्वादिचात्माभिमानिनोजी वस्यदुर्ज्ञेयत्वादिनायुक्तमितिभावेनाह ॥ **यद्वेति** ॥ एवंचांतर्यामिणोन्यत्वादमृतत्वस्यापितस्यैववाच्यत्वात्प्रागुक्तहेतुनानाक्षिप्तोविष्णुरिति भावः । अधिदैवाधिभूताध्यात्मप्रकरणेषुपृथिव्याद्यविदितत्वतदंतरत्वरूपनिरवकाशलिंगसत्त्वेनतद्बलेनपृथिव्यादिशरीरत्वस्यकथंचिन्नेयत्वादं तर्यामीविष्णुरितिभावेन "अंतर्यामीविष्णुरेवे"त्यादिटीकांविवृण्वन्नविदितत्वस्यनिरवकाशत्वंतावदाह ॥ **पृथिव्यादेरिति** ॥ यदुक्तंपृथि

"यःपृथिव्याअंतर"इत्युक्तमंतरत्वंयदिभिन्नत्वंयदिवांतस्स्थत्वंद्वयमपिपृथिव्यादिशरीरकेऽभिमानिन्यपियुक्तं । "यआ त्मनितिष्ठन्नात्मानंयमयती"त्येतदपितत्वाभिमानिनामस्मदाद्यात्मनियामकत्वाद्युक्तं। "यमात्मानवेदे"तित्वभिमानिजी वानांदुर्ज्ञानत्वाद्युक्तं । यद्वा "यःपृथिव्या"मित्यादाविव "यआत्मनी"त्यत्राप्यात्माभिमानिजीवएवात्मांतर्यामित्वेनो च्यतइति ॥ सिद्धांतस्तु ॥ पृथिव्यादेर्जडत्वेस्यादप्रसक्तनिराक्रिया । चित्त्वेतुतेनकात्स्र्न्येनावेद्यत्वंनेश्वरंविना ॥ १ ॥

गु० दितिभावः ॥ **अभिमानिन्यपीति** ॥ अभिमानिनःपृथिव्यादिरूपशरीराद्भिन्नत्वात्तदंतस्स्थत्वाच्चेतिभावः ॥ **तत्वाभिमानिनामिति** ॥ पृथिव्याद्यभिमानि नामित्यर्थः । ननुपृथिव्यादेर्जडत्वेनतदविदितत्वस्याभिमानिनिसंभवेपिपृथिव्याद्यभिमानिनामात्माविदितत्वंकथं । आत्मनश्चेतनत्वेनतदविदितत्वस्यासंभवादित्यत आह ॥ **यमात्मेति** ॥ नन्वेवंप्रायपाठबाधः । यःपृथिव्यामित्यादौपृथिव्याद्यभिमानिजीवस्यांतर्यामित्ववदात्मनीत्यत्रांतर्यामिपरत्वाभावेन पृथिव्याद्यभिमानि देवतानामंतर्यामित्ववचनस्यप्रायपाठविरुद्धत्वादित्यरुच्यापक्षांतरमाह ॥ **यद्वेति** ॥ **जीवएवेति** ॥ चतुर्मुखइत्यर्थः ॥ **यमित्यस्यवैयर्थ्यमिति** ॥ विशेष

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्यादेर्जडत्वेनतदवेद्यत्वंप्रकृत्यादौयुक्तमिति तत्रबाधकत्रयंवदन्पूर्वार्धंव्यनक्ति ॥ **यमिति** ॥ जडेज्ञानमात्रस्यैवाभावेननवेदेत्येववाच्यं । नतुयमितिविषयविशेषोपादानमित्यर्थः ॥ **यमात्मेति** ॥ पृथिव्यादौज्ञानमात्रनिषेधेयआत्मेत्यादावपितथात्वापत्त्याचेतनस्यज्ञानसामान्य निषेधायोगइत्यर्थः । श्लोकेऽप्रसक्तेत्युक्तिरुपलक्षणमितिभावः ॥ **अप्रसक्तेति** ॥ जडेज्ञानप्रसक्तेरेवाभावादितिभावः । ननु "पृथिव्याम ग्निश्चेतव्योनांतरिक्षेनदिवि हिरण्यंनिधायचेतव्यमित्यत्रेष्टकावेदिकारूपाग्निचयनस्य "नांतरिक्ष"इत्यप्रसक्तविषयत्वेपियथानित्यानुवादत्वंत द्वत्स्यादित्यतआह ॥ **नेति** ॥ आद्यस्यद्वितीयेपादेऽर्थवादनये "अभागिप्रतिषेधा"दितिगुणसूत्रेणांतरिक्षइत्यादेरप्रसक्तनिषेधेनाप्रामाण्य माशंक्य "अंत्ययोर्यथोक्त"मितिसिद्धांतगुणसूत्रेणहिरण्यस्तुत्यर्थमितरनिंदाक्रियते । असतिप्रसंगेनिषेधोनित्यानुवादइत्युक्तमभियुक्तैः । इह तुनतथा । विधेयांतराभावादितिभावः । एवेत्यनेनाभिमानिनयन्यायेनपृथिव्यादिशब्दानामभिमानिन्येवमुख्यत्वान्मुख्यसंभवेनामुख्यंग्राह्य

"यंपृथिवीनवेदे"त्यादौपृथिव्यादेर्जडत्वेयमित्यस्यवैयर्थ्यं । "यमात्मानवेदे"त्यस्यानुपपत्तिश्च । अप्रसक्तप्रतिषेधापातश्च । "नांतरिक्षे नदिवी"त्यंतरिक्षादावप्रसक्तचयननिषेधस्तु "हिरण्यं निधायचेतव्य"मितिविधिस्तुत्यर्थः । प्रकृतेतुनतथा । तस्मात्पृथिव्यादिस्तदभिमानिचेतनएव ।

गु० विधेश्शेषनिषेधनांतरीयकत्ववद्विशेषनिषेधस्यशेषविधिनांतरीयकत्वस्यापिसत्त्वात् यमितिविशेषनिषेधेनान्यज्ञानत्वंलभ्यते । तच्चपृथिव्यादेर्जडत्वाद्युक्तमितिभावः। नन्वभिमानिजीवानांदुर्ज्ञानत्वादात्मानवेदेत्युपपन्नमित्यरुच्याह ॥ **अप्रसक्तेरिति** ॥ किंचाभिमानिपरत्वेयःपृथिव्याअंतरइत्युक्तांतरत्वानुपपत्तिः । ननुचांतरत्वं

प्र० मितिसूचितं । एतेन "पृथिव्यादीनामधिदैवत्वेनजडत्वाभावा"दितिटीकाविवृता । आत्मानवेदेतिपृथगुक्तिस्त्वात्माभिमानिपरत्वाद्युक्तेति भावः । ततश्चकिमित्यतउत्तरार्धंव्यनक्ति ॥ **तेनचेति** ॥ चेतनेनेत्यर्थः । लेशेनविदितत्वस्यसर्वत्रसंभवेनतन्निषेधायोगात्तदन्यथानुपपत्त्यै वसाकल्येनाविदितत्वंलभ्यते । तच्च "नतेविष्णोजायमान"इत्यादिभिर्हरेरेवेत्यर्थः । "यःपृथिवीमंतरोयमयती"तिश्रुतांतरत्वमपिनिरवका शमित्याह ॥ **अंतरत्वंचेति** ॥ अन्यत्रनयुक्तमित्यन्वयः ॥ **स्मृत्युक्तमिति** ॥ बृहदारण्यभाष्योक्तस्मृत्युक्तमित्यर्थः । पूर्वार्धतात्पर्यंस्वतो नित्यतृप्तत्वादिति । उत्तरार्धतात्पर्यंप्रेयइत्यादि ॥ **श्रुत्येति** ॥ वाजसनेयश्रुत्येत्यर्थः । सूत्रभाष्याद्युक्तमुपलक्षणंमत्वास्वयंसमाख्यामप्याह ॥ **किंचेति** ॥ श्रुत्यंतरे सुबालोपनिषदि । "तदाहुः किंतदासीन्नैवेहकिंचनाग्रआसीत् । अमूलमनाधाराइमाःप्रजाःप्रजायंते । दिव्योदेव एकोनारायणश्चक्षुश्चद्रष्टव्यंचनारायणश्श्रोत्रंचश्रोतव्यंचनारायण"इत्युपक्रम्य "अंतश्शरीरेनिहितोगुहायामजएकोनित्यः । यस्यपृथिवीशरीरं

तेनचसाकल्येनावेद्यत्वंभाष्योक्तश्रुत्यादिभिर्हरेरेव । अंतरत्वंच "बाह्यापेक्षांविनायस्तुरमतेसोंतरःस्मृतः । अतिप्रिय त्वाच्चहरेरंतरत्वमुदाहृत"मितिस्मृत्युक्तंस्वतोनित्यतृ(प्तात्)प्तत्वात् "प्रेयःपुत्रा"दित्यादिश्रुत्यापरमप्रेयोरूपत्वा(पा)च्च ब्रह्मणोन्यत्रनयुक्तं । किंचश्रुत्यंतरे "दिव्योदेवएकोनारायण"इत्युपक्रम्य "यस्यपृथिवीशरीरंयःपृथिवीमंतरेसंचरन्यं पृथिवीनवेदे"त्याद्युक्त्वा "एषसर्वभूतांतरात्मापहतपाप्मादिव्योदेवएकोनारायण"इत्युपसंहारान्नारायणएवांतर्यामी ।

गु० यदिभिन्नत्वंयदिवांतस्स्थत्वंद्वयमपिपृथिव्यादिशरीरकेऽभिमानिनियुक्तमित्युक्तमित्यतआह ॥ **अंतरत्वंचेति**॥ ननुचभाष्यतट्टीकयोःपृथिव्यादेर्यौगिकशरीरत्व

SGDF Sri Gargeshwari Digital Foundation

प्र०यःपृथिवीमंतरेसंचरन्यंपृथिवीनवेद। यस्यापश्शरीरंयोपोंतरेसंचरन्यमापोनविदुः"इत्यादिनापृथिव्यब्वाय्वाकाशमनोहंकारबुद्धिचित्ताव्य क्ताक्षरमृत्युस्थत्वादिकमुक्त्वा अंते "एषसर्वांतरात्मापहतपाप्मादिव्योदेवएकोनारायण"इत्युक्तत्वादित्यर्थः। अस्यप्रसिद्धत्वाद्भाष्यादावनुक्तिः। यद्वाधिदैवादिष्वितिसामान्योक्त्याश्रुत्यंतरस्थाधिदैवादिप्रकरणस्यापिसूत्रादौसंग्रहसूचनादत्रतदुक्तिः । यद्वातद्धर्मश्चव्यपदेशश्चेतिसमाहारद्वं द्वेनसंभूतियुव्याप्तीतिवदयंसूत्रभाष्यटीकासुतद्धर्मव्यपदेशादितिनिर्देशइतिमत्वाव्यपदेशशब्दार्थतयासमाख्योक्तिरितिसूत्रादेरर्थांतरमपिध्येयं।

पृथिव्यादेःशरीरत्वंयौगिकंगौणमेववा। । रूढस्यानुपपन्नत्वादग्नेरिंद्र त्ववद्भवेत् ॥ १ ॥ यथा "इंद्रोनभस्वा"नितींद्रशब्दोगार्हपत्येपिस्वो चितैश्वर्यस्यसद्भावाद्वायोगेनवा इंद्रवद्यज्ञसाधनत्वाद्गौण्यावावृत्त्यावर्तते॥

प्र० यदपिपृथिव्यादिशरीरत्वंपरसाधकंस्वबाधकंतस्यातद्धर्माभिलापादितिद्वितीयसूत्रांशलब्धंसावकाशत्वं"योगवृत्त्यातस्मिन्पृथिव्यादिशरीर त्वव्यपदेशोपपत्ते"रितिभाष्यटीकोक्तमन्यत्रोक्तसावकाशत्वप्रकारंचसंगृह्णाह ॥पृथिव्यादेरिति॥ ननुरूढिर्बलवतीत्यतउक्तं रूढस्येति । उक्त बाधकेभ्यइतिभावः। दृष्टांतांशंव्यनक्ति ॥ यथेति ॥ "कदाचनस्तरीरसिनेंद्र"इतिपुरोनुवाक्या। "निवेशन"इतियाज्या । "इंद्रोनतस्था" वित्युपरिष्टाल्लक्षणश्रवणात् । तत्रैंद्र्यागार्हपत्यमुपतिष्ठतइतिश्रौतविनियोगेनमंत्रस्यगार्हपत्यशेषतयातत्प्रकाशकत्वान्मंत्रस्थेंद्रशब्दस्येदिधात्वर्थस्यो

SGDF Sri Gargeshwari Digital Foundation

प्र० चितैश्वर्यरूपयोगेनवायत्नसाधनत्वगुणमूलयागौण्यावृत्त्यावेत्यर्थः ॥ **उक्तंहीति** ॥ तृतीयेवार्तिककृतेत्यर्थः । पूर्वार्धंव्यनक्ति ॥ **तथेति** ॥ “शीर्यतेनित्यमेवास्माद्विष्णोस्तुजगदीदृशं । रमतेचपरोह्यस्मिन्शरीरंतस्यतज्जग”दितीत्युक्तयोगेनेत्यर्थः । ननुयौगिकमपिशरीरत्वंपृथिव्यादेरपिचित्त्वेनायुक्तं । यस्यात्माशरीरमित्याद्ययोगश्च । चेतननित्यताया “यावदात्मभावित्वाच्चनदोष”इत्यादौसेत्स्यमानत्वादित्यतआह ॥ **चेतनानामपीति** ॥ तादृशदेहसंबंधश्च “ज्ञोतएव युक्तेश्चे”त्यत्रसेत्स्यतीतिभावः । एतेनदिशामप्यवांतराभिमानिदेहद्वाराशीर्णतास्त्येवेति तत्रापिनायुक्तमितिध्येयं । गौणत्वंभाष्यटीकयोर्नोक्तमित्यतआह ॥ **शरीरत्वस्येति** ॥ “पृथिव्याद्यादेवतास्तुदेहवद्यद्वशत्वतः । शरीरमितिचोच्यंते यस्यविष्णोर्महात्मन”इतिस्मृत्याशरीरस्ययथाजीववशत्वंतथापृथिव्याद्यभिमानिजीवानामीश्वरवशत्वात्तच्छरीरत्वमितिगौणत्वमुक्तमित्यर्थः । तथाचभाष्यद्वयानुसाराद्द्वयमप्यस्माभिरुक्तमितिभावः । गौणत्वोक्तेःफलमाह ॥ **तेनेति** ॥ गौणत्वकथनेनेत्यर्थः ॥ **पुराणादिष्विति** ॥ “सविश्वकायःपुरुहूतईशस्सत्यंपरंज्योतिरजःपुराण”इत्यादिभागवतादिष्वित्यर्थः ॥ **कायत्वादीति** ॥ देहत्वविग्रहत्वाद्युक्ति

उक्तंहि “स्यादग्नेर्गौणमिंद्रत्वंयज्ञसंबंधकारितं । इंद्रत्यर्थानुसाराद्वास्वकार्येसोपिहीश्वर”इति । तथाशरीरशब्दोपिपृथिव्यादिषुयोगेनवाशरीरवत्तन्नियम्यत्वेनगौण्यावावृत्त्यावर्ततां । चेतनानामपिदेहद्वाराशीर्णतास्त्येव । शरीरत्वस्यगौणत्वंचबृहदारण्यकभाष्यउक्तं । तेनपुराणादिषुप्रपंचेब्रह्मकायत्वाद्युक्तिरपिसमर्थिता । एवंच “यआत्मनितिष्ठ”न्नित्यादिकंच

ता. चं. ८५ गु० मेवोक्तं । भवद्भिश्चशरीरवत्तन्नियम्यत्वेनगौणंशरीरमित्युच्यते । तत्कुतोऽवगंतव्यं । भाष्यानुक्तत्वेनमूलभूतप्रमाणाभावादित्यतआह ॥**शरीरत्वस्येति**॥ एवं

SGDF
Sri Gargeshwari Digital Foundation

प्र० रादिपदार्थः ॥ क्लेशेनेति ॥ भेदाभेदादिना ॥ यौगिकेति ॥ गौणशरीरत्वेत्यपिग्राह्यं । अविदितत्वादिनिरवकाशबाधकबलेनप्रथमप्राप्ताया अपिरूढेःपरित्यागोपपत्तेरितिभावः ॥ आद्यइति ॥ "अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशा"दित्यत्रभाष्यादावविदितत्वांतरत्वयोरुक्तेरिति भावः । द्वितीये नचस्मार्तमतद्धर्माभिलापादित्यत्र । भाष्येत्रिगुणत्वोपादानत्वादिप्रधानधर्मोक्त्यभावात्कापिलस्मृतौपृथिव्याद्यात्मकतयोक्त प्रधानंनांतर्यामीत्युक्त्या संसारित्वादितद्धर्माभिलापाभावाज्जीवोपिनेतिलब्धत्वात्प्रधानजीवेत्युक्तं । जीवपदाभावात्कथमेतदित्यतआह ॥ तृतीयेति ॥ एतेनजीवपक्षेसाधकंनेत्यनुक्त्वाकथंबाधकोक्त्यवसरइतिप्रत्युक्तं । एतेन "यज्जीवोंतर्यामीत्युक्तंतदपिसंसारित्वाद्यतद्धर्माभि लापादिनानिरस्तमपिविशेषयुक्त्यानिराकुर्वत्सूत्र"मितिटीकोक्तंसूत्रारूढंदर्शितं । "अतद्धर्माभिलापा"दित्यत्रसमासनिर्वाहस्तु "नानुमानम तच्छब्दा"दित्यत्रकरिष्यतइतिभावः ॥ तृतीयइति ॥ "शारीरश्चोभयेपिहिभेदेनैनमधीयत"इत्यत्रात्मनोंतरइतिमाध्यंदिनाः विज्ञानादंतरइ

क्लेशेननेयमिति । एतदेवाभिप्रेत्योक्तंन्यायविवरणे "पृथिव्यादिशरीरत्वंचननिरवकाशं । यौगिकश रीरत्वोपपत्तेर्विष्णोरपी"ति ॥ सूत्रक्रमस्तु । आद्येस्वपक्षसाधकोक्तिः । द्वितीयेप्रधानजीवपक्षयोः साधकाभावोक्तिः । तृतीयसूत्रस्थस्यशारीरश्चेत्यस्यात्रापिसंबंधात् तृतीयेजीवपक्षेबाधकोक्तिरिति ।

गु० चेति ॥ आदिपदेनात्मानंयमयतीत्यस्यसंग्रहः ॥ क्लेशेनेति ॥ नत्वभिमानिनामस्मदाद्यात्मकत्वनियामकत्वाभिप्रायेणात्माभिमानिचतुर्मुखरूपजीवविशेषा भिप्रायेणचेतिक्लेशेननेयमित्यर्थः । ननुद्वितीयेप्रधानजीवयोस्स्वपक्षसाधकाभावोक्तिरयुक्ता । जीवमात्रस्यांतर्यामिणस्सकाशाद्भेदप्रतिपादनार्थंचतुर्मुखस्यांतर्यामिण स्सकाशाद्भेदप्रतिपादकवाक्योदाहरणस्यासंगतत्वात् । नचतत्राप्यात्मशब्दोजीवपरइतितदुक्तिर्युक्तेतिवाच्यं । तथासतिबृहदारण्यकभाष्यविरोधस्स्यात् । तत्रा ॥ ५०५ ॥

प्र० तिकण्वाश्च जीवमंतर्यामिणोभेदेनाधीयतइतिशारीरोनांतर्यामीतिभेदाध्ययनरूपबाधकोक्तिरित्यर्थः। यद्यपिचकारात् "यस्तेजसितिष्ठन्नित्या दिनाश्रीदुर्गारूपायाश्चित्प्रकृतेरपिभेदेनाधीतत्वान्नचित्प्रकृतिरंतर्यामीत्यभिप्राय"इति तत्वप्रदीपरीत्याचित्प्रकृतिपक्षेतिबाधकोक्तिपरत्वंभाति । तथापिटीकारीत्यैवमुक्तिः । एतद्भाष्यस्यभाष्यांतरविरोधंवा अन्यत्रोक्तार्थेजीवांतर्यामिभेदाध्ययनासिद्धिंवा अर्थद्वयोक्तेर्वैयर्थ्यंवा हृदिकृत्वा तदनूद्यनिराह ॥ अत्रयद्यपीति ॥ पृथिव्यादिशब्दस्यापीति ॥ अन्यथाप्रायपाठविरोधइतिभावः । अभिमानिपरत्वेकोदोषइत्यत आह ॥ यइति ॥ पृथिव्यादिशब्दानामभिमानिचेतनपरत्वे यइत्यनेनतदन्यस्यग्रहणादेषतआत्मांतर्यामीतिपृथिव्याद्यभिमानिचेतनभिन्न स्यांतर्यामितापत्त्या ऽभिमानिजीवएवांतर्यामीतिपक्षोनस्यादितिजडपरतावाच्येत्यर्थः । भाष्यआत्मादिशब्दस्यसर्वजीवार्थत्वोक्तेःकृत्यमुक्त्वा

अत्रयद्यपि "आत्माविज्ञानमितिचसर्वजीवाभिमानवान् । ब्रह्मैवोक्त"इतिबृहदारण्यकभाष्य आत्मादिशब्दश्चतुर्मुखपरइत्युक्तं । तथापिपूर्वपक्षे "यआत्मनी"त्यादावात्मादिशब्दस्यात्मा भिमानिपरत्वे "यःपृथिव्यामित्यादौपृथिव्यादिशब्दस्यापितदभिमानिपरत्वापातेन "यःपृथि व्या"मित्यादेरेवभेदाध्ययनत्वप्रसंगात् । पूर्ववादिनापृथिव्यादिशब्दानांजडपरता । आत्म विज्ञानशब्दयोस्तुशारीरपरतावाच्येत्यभिप्रेत्यतंप्रतियआत्मनीत्यादेःशारीरभेदेप्रमाणत्वोक्तिः ।

गु० त्माविज्ञानमितिचेत्यादिनाऽऽत्मादिशब्दानांजीवविशेषचतुर्मुखपरतयोक्तत्वादित्यतआह ॥ अत्रयद्यपीति ॥ नन्वेवंपूर्वपक्षरीत्याभेदव्यपदेशोक्तौवास्तवभेदव्य

SGDF Sri Gargeshwari Digital Foundation

प्र० न्यत्रचतुर्मुखपरत्वोक्तेःफलमाह ॥ **यद्वेति** ॥ तदुक्तिः चतुर्मुखपरत्वोक्तिः । तथाचात्मविज्ञानशब्दयोश्चतुर्मुखपरत्वमेव । नशारीरार्थकत्वं । अत्रभाष्येशारीरभेदस्यप्रदर्शनंतुकैमुत्यलब्धस्य । नतुशब्दार्थत्वेनप्राप्तस्येत्यर्थः । ननुपृथिव्याद्यभिमानिजीवानामंतर्यामित्वेशंकितेतेषामेवांतर्यामिणाभेदस्यादौवाच्यत्वेनावश्यवाच्यस्यसाक्षादवचनमनुपयुक्तं । चतुर्मुखस्यतत्कथनंतुसाक्षादित्ययुक्तमित्यतश्चतुर्मुखपरत्वमवश्यंवाच्यमितिभावेनतदुक्तिंसाधयति ॥ **यद्वेति** ॥ **स्मृत्येति** ॥ प्रागुक्तयेत्यर्थः ॥ **अभिमानीति** ॥ पृथिव्याद्यभिमानिप्रायपाठेनेत्यर्थः ॥ **अभिमान्यधिकरणेति** ॥ तत्राभिमन्यमानशब्दानामभिमानिनिमुख्यत्वोक्तेरितिभावः । नन्वेवंपृथिव्यादिशब्दानामप्यभिमानिपरत्वा

यद्वा जीवाभिमानिनश्चतुर्मुखादपितन्नियामकत्वादिनाभिन्नस्यांतर्यामिणःकिमुवक्तव्यंतदभिमन्यमानजीवेभ्योभिन्नत्वमित्यभिप्रेत्यतदुक्तिः । यद्वा "यःपृथिव्या"मित्यादौतत्तदभिमानिनएवतदंतर्यामित्वमितिवदतापूर्ववादिना "यआत्मनी"त्यत्रापि जीवात्माभिमानिनएवतदंतर्यामित्वंवाच्यं। तच्चायुक्तं । "आत्माविज्ञान"मितिस्मृत्याऽभिमानिप्रायपाठेनाभिमान्यधिकरणन्यायेनचजीवाभिमानिनएवात्मशब्दार्थत्वादंतर्यामिणश्च "यआत्मनी"त्यादिनाततोभिन्नत्वेनाधीतत्वादित्यभिप्रेत्यतदुक्तिः।

गु० पदेशाभावाज्जीवमात्रस्यांतर्यामिणस्सकाशाद्भेदसिद्धिर्नस्यादित्यरुच्याह ॥ **यद्वेति** ॥ अस्मिन्पक्षेकैमुत्येनलाभेपिसाक्षान्नतल्लाभइत्यतःपक्षांतरमाह ॥ **यद्वेति** ॥ नन्वभिमान्यधिकरणन्यायेनात्मशब्दस्यतदभिमानिचेतनपरत्ववत्पृथिव्यादिशब्दानामपिचेतनपरत्वेन यःपृथिव्यांतिष्ठन्नित्यादिनोक्तस्यांतर्यामिणःपृथिव्याद्यभिमानिभ्योभेदव्यपदेशस्यसत्त्वात्सोपिकुतोनोक्तइत्यतआह ॥ **यद्वेति** ॥ ननुटीकायामंतरोविविक्तइतिव्याख्यातं । तदयुक्तं । बृहदारण्यकवाक्यविरोधात् । एतद्वा

SGDF Sri Gargeshwari Digital Foundation

प्र० त्तत्राप्यभिमानिनोंतर्यामिणाभेदोक्तिसंभवेन भाष्येयआत्मनीत्यादिविशिष्यप्रदर्शनमयुक्तमित्यतआह ॥ **यःपृथिव्यामिति** ॥ प्रथमातिक्रमेहेतुमाह ॥ **श्रुताविति** ॥ टीकायां "आत्मनस्सकाशादंतरोविविक्त" इत्युक्तं । तदाचार्यसूक्तिविरुद्धमित्याशंक्यसमाधत्ते ॥ **यद्यपीति** ॥ "बाह्यापेक्षांविनायस्तुरमतेसोंतरस्स्मृतः । अतिप्रियत्वाच्चहरेरंतरत्वमुदाहृत" मित्यनेनेतिभावः । भेदोक्त्यर्थमर्थांतरमेतत्किंनेतिभ्रमंनिराह

यःपृथिव्यांतिष्ठन्नित्यादिकं पृथिव्याद्यभिमानिभ्योभेदेनाध्ययनंतुन्याय
तौल्येनोक्तप्रायत्वान्नपृथगुक्तं । श्रुतौ "यःपृथिव्यांतिष्ठ" न्नित्यादेःप्रा
थम्येपि भाष्ये "यआत्मनितिष्ठन् योविज्ञानेतिष्ठ" न्नितिवाक्ययोरुपा
दानंतु तयोरैकार्थ्यंतत्रचेतनपरत्वस्योभयवादिसंमतत्वंचदर्शयितुं ।
यद्यप्यंतरशब्दस्यबृहदारण्यकभाष्येबाह्यापेक्षांविनारमणादिरर्थइत्यु
क्तं । अत्रापिचभाष्येंतरत्वमाद्यसूत्रस्थतद्धर्मशब्दस्यार्थइत्युक्तं ।

गु० ष्यविरोधाच्च । बाह्यापेक्षांविनारमणस्यैवतदर्थत्वेनोक्तत्वात् । नचभेदव्यपदेशलाभार्थंतथाव्याख्यानं । यआत्मनितिष्ठन्नित्यादिनापिभेदव्यपदेशलाभोपपत्तेरित्यतस्तत्सार्थक्यंवक्तुमाह ॥ **यद्यपीति** ॥ **अतएवेति** ॥ यआत्मनितिष्ठन्नित्यादेरपिभेदव्यपदेशस्यभाष्यकृदभिप्रेतत्वादेवेत्यर्थः ॥ **साक्षादेवेति** ॥ अन्यथातुभेदकोक्त्याभेदलाभइतिभावः ॥ **अतएवेति** ॥ बाह्यापेक्षांविनारमणरूपस्यबृहद्भाष्योक्तस्यांतरइत्युभयत्रत्यांतरशब्दविषयत्वे एकेनैवबाह्यापेक्षांविनारमणस्योक्तत्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ भेदेनेति ॥ भेदकेति ॥ सप्तमीषष्ठ्यादिरूपभिन्नविभक्तिनिर्देशरूपेत्यर्थः । भेदकत्वंसाधयति ॥ नचेति ॥ टीकायामित्यस्य इत्युक्त मित्यनेनान्वयः ॥ पंचमीति ॥ "अपादानेपंचमी"तिप्रकरणे "अन्यारादितरर्तेदिक्शब्दांचूत्तरपदाजाहियुक्त"इतिसूत्रेऽन्यइत्यर्थग्रहणे

भेदेनाध्ययनंतु "यआत्मनितिष्ठन् यस्यात्माशरीरं यआत्मानंयमयत्येषतआत्मे"त्यादिभेदकाध्ययनात्सिध्यति । नच "एषतआत्मे"त्यत्रात्मशब्दःस्वरूपार्थः । तइतिषष्ठ्याऔपचारिकत्वापातात् । शरीरशब्दसन्निधानेनात्मशब्द स्यशरीरप्रतिसंबंधिपरत्वाच्च । अतएवभाष्येयआत्मनीत्याद्यप्युदाहृतं । तथापिटीकायांसाक्षादेवभेदाध्ययनसिद्ध्यर्थं "यआत्मनोंतर"इत्यत्रत्यांतरशब्दस्यविविक्तत्वमर्थः । बृहदारण्यकभाष्यंतु "यआत्मानमंतर"इत्यत्रत्यांतरशब्दविषयं । अतएवश्रुतौनपुनरुक्तिः । "यआत्मनोंतरः योविज्ञानादंतरः योऽद्भ्योंतरं"इत्यादौपंचम्युपपत्तिश्च ।

गु० नद्वितीयेनापितदुक्तौपौनरुक्त्यंस्यादितिभावः । अत्रयद्यप्यात्मनइतिपृथिव्याइत्येवचोदाहरणीयं । तथाप्यात्मनइत्यस्यपंचमीत्वसिद्ध्यर्थंविज्ञानादित्यस्य पृथिव्याइत्यस्यपंचमीत्वसिद्ध्यर्थंचाद्भ्यइत्यस्योदाहरणं । अन्यथाषष्ठीत्वान्नपंचम्यनुपपत्तिरितिशंकास्यादितिभावः ॥ पंचम्युपपत्तिश्चेति ॥ पृथिव्याइत्यादौसादृश्यात्षष्ठी पंचमीसंदेहेपि विज्ञानादद्भ्यइत्यादौपंचम्यानिर्णीतत्वेन तत्प्रायपाठेनसर्वत्रापिपंचम्यानिर्णयात् । तस्याश्चपृथिव्यादेरपादानत्वाभावेनकारकविभक्तित्वासंभवादुपपदविभक्तित्वेपदांतरयोगाभावात् । अन्यारादितरर्तइत्यत्रान्येत्यस्यान्यार्थकशब्दग्रहणपरत्वादंतरशब्दपरत्वस्यचविभक्तिप्रतिरूपकांतरेणेति यदंतरंव्याघ्रहरींद्रयोर्वने इत्यादौभेदभेदकयोःप्रयोगादत्रविभक्तत्वार्थेऽन्यःकृष्णइत्यादाविवपंचम्याउपपत्तेरन्यथाचोपपत्तेरितिभावः । नन्वेवंपृथिव्याइत्यस्ययदिपृथिव्याभिन्नइत्यर्थस्तर्हिप्रथम ॥ ५०७ ॥

प्र० नपंचमीविधानाद्ब्राह्मानपेक्षरमणार्थत्वेपृथिव्याइत्यस्यवैयर्थ्यंचस्यादितिभावः । तर्हिभाष्ये "यंपृथिवीनवेदयःपृथिव्याअंतरइत्यादिनाऽधिदैवादिषुतद्धर्मव्यपदेशा"दित्युक्तिःकथमित्यतआह ॥ यमिति ॥ अविदितत्वस्योक्त्यर्थंयमित्यादेरवश्यवाच्यत्वात्तन्मुखेनयःपृथिवीमंतरइत्येतदेवाभिप्रेतमित्यर्थः । अतएवटीकायांवाक्यविशेषमनुपादायाद्यसूत्रे "पृथिव्याद्यविदितत्वतदंतरत्वाख्यधर्मव्यपदेशा"दितिसामान्येनोक्तमितिभावः ॥ अन्येत्विति ॥ अत्रांतर्यामीकिंप्रधानमुतपृथिव्याद्यभिमानिदेवताकिंवाप्राप्ताणिमाद्यैश्वर्यःकश्चिद्योगीजीवोथपरमात्मेत्यादि भाष्येप्रदर्शितं । भामत्यांतु अचेतनस्यप्रधानस्यद्रष्टृत्वश्रोतृत्वविज्ञातृत्वादीनामेषतआत्मेत्युक्तात्मत्वस्यचायोगात् पृथिव्याद्यभिमानिनोदेवस्य प्रतिनियतनियमनात् "यस्सर्वाँल्लोकानंतरोयमयति यस्सर्वाणिभूतान्यंतरोयमयती"त्युक्तसर्वलोकभूतनियमनायोगात् योगिजीवस्यच "जगद्व्यापारवर्जे"मितिवक्ष्यमाणन्यायेनज्ञानिनोनियमनादिव्यापाराभावान्नप्रधानाभिमानिदेवयोगिजीवानामत्रसंदेहविषयता । किंतुजीवमात्रंवापरमात्मावेतिसंदेहे जीवमात्रमेव । लोकेचेतनस्यशरीरिणः स्वशरीरेंद्रियादौशरीरेणवास्यादौनियमनादिकार्योपलंभाज्जीवस्यचशरीरें

"यंपृथिवीनवेदयःपृथिव्याअंतरइत्यादिने"त्याद्यसूत्रीयभाष्येतुप्रतीकमुखेनपृथिवीमंतरइतिवाक्यमुपात्तमित्यभिप्रेत्यांतरोविविक्तइत्युक्तं ॥ ॥ अन्येतु शरीरादिराहित्याद्ब्रह्मणोननियंतृत्वंपटवदितिप्राप्ते शरीरराहित्यमसिद्धं । चैत्रकर्मनिर्मितस्यचैत्रशरीरत्ववद्ब्रह्मविषयकाविद्याकल्पितस्यजगतस्तच्छरीरत्वादितिसिद्धांतः । तदुक्तंभामत्यां

गु० सूत्रभाष्येतद्ग्रहणमयुक्तं । तस्यतद्धर्मत्वाभावादित्यतआह ॥ यमिति ॥ तदुक्तंभामत्यामिति ॥ किमत्राशरीरत्वंयतोनियंतृत्वाभावः । किंनियम्यातिरिक्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्रियादिमत्त्वाद्द्रष्टृत्वादिसंभवाच्च । अदृष्टादिद्वारासर्वलोकादिनियंतृत्वोपपत्तेश्च । यइत्येकवचनस्यचजात्यभिप्रायत्वात् । नचजीवस्याप्यन्यो नियंताऽऽवश्यकइतिवाच्यं । तस्याप्यन्यस्तस्याप्यन्यइत्यनवस्थापत्तेः । उक्तंच "स्वकर्मोपार्जितंदेहंतेनान्यच्चनियच्छति । तक्षादिरशरीरस्तुनात्मांतर्यामितांभजे"दिति । एवंप्राप्ते सर्वस्यविकारजातस्यतदविद्याशक्तिपरिणामत्वात्तस्यचचैत्रकर्मनिर्मितस्यचैत्रशरीरादित्ववद्ब्रह्मणश्शरीरेंद्रियादिस्थानत्वाद्यथायथंपृथिव्यादिकार्यकारणैस्तानेवपृथिव्यादिदेवान् शक्नोतिनियंतुमित्यधिदैवादिषूक्तोंतर्यामीब्रह्मैव । आत्मत्वामृतत्वादिधर्माणांव्यपदेशात् । नचानवस्था । नान्योतोस्तिद्रष्टेत्यादिश्रुत्यानियंतृब्रह्मणोनियम्यजीवाद्भेदानभ्युपगमात् । अविद्याकल्पितजीवपरमात्माभेदाश्रयास्तुज्ञातृज्ञेयभेदश्रुतयइतिसिद्धांतइत्यर्थः ॥ **देहेंद्रियादीति** ॥ किमिदमशरीरत्वंयतोनियंतृत्वाभावउच्यते नियम्यातिरिक्तदेहराहित्यंवा देहसंबंधाभावोवा । नाद्यः । अस्यजीवस्यस्वदेहादिनियमनेकार्येनदेहांतरमस्तीतिव्यभिचारइत्यर्थः । द्वितीयंशंकते ॥ **तत्कर्मेति** ॥ जीवेस्वकर्मोपार्जितदेहसंबंधोस्तीतिचेत्परस्यापिदेहासंबंधोसिद्धइत्याह ॥ **तदविद्येति** ॥ तद्विषयत्वादविद्यायास्तदविद्यात्वं ।

"देहेंद्रियादिनियमेनास्यदेहेंद्रियांतरं । तत्क
र्मोपार्जितंतच्चेत्तदविद्यार्जितंजग"दितीत्याहुः ।

गु० देहरहितत्वंवादेहसंबंधाभावोवादेहभोक्तृत्वाभावोवा । नाद्यइत्याह ॥ **देहेति** ॥ देहादौतत्तदात्मातत्साक्षाद्बुद्धिस्थोस्येत्युक्तः । अथवातस्माज्जीवात्मैवेत्युपसंहारस्थोजीवात्मापरामृष्टः । अस्यस्वदेहादिनियमनेन देहाद्यंतरमतोऽनेकांतिकतेत्यर्थः । द्वितीयंशंकते ॥ **तदिति** ॥ परस्यापिदेहासंबंधोसिद्धइत्याह ॥ तद

SGDF
Sri Gargeshwari Digital Foundation

प्र० पूर्वपक्षभागस्यप्रागेवास्मदीयपूर्वपक्षेदूषितत्वात् अतिप्रसंगापादनेनसिद्धांतांशंनिराह ॥ तन्नेति ॥ रूप्यदेहादेरितियथाक्रममन्वयः। नन्व गत्यास्रष्टृत्वांगीकारेपिननियमनंतथावाच्यमित्यतआह ॥ नचेति ॥ अस्तुवातदज्ञानकल्पितंतच्छरीरमिति । तथापिकिंशुद्धस्येदंशरीरमुत विशिष्टस्येतिविकल्प्यक्रमेणनिराह ॥ किंचेति ॥ शुद्धस्यनियंतृत्वमेवनास्ति । निर्विकारत्वात् । तस्यशरीराद्युपपादनक्लेशोव्यर्थः । विशि ष्टंतुनियामकंभवति । तस्याविद्याविषयत्वाभावान्नतदीयत्वमविद्यायाइतिनतदविद्यार्जितंजगदितिनतच्छरीरत्वं । उक्तंच "आश्रयत्वविषय त्वभागिनीनिर्विशेषचितिरेवकेवला । पूर्वसिद्धतमसोहिपश्चिमोनाश्रयोभवतिनापिगोचर" इति । अनवस्थाशंकापरिहारौचभाष्योक्तावनूद्य

तन्न । तदविद्याकल्पितस्यतच्छरीरत्वेब्रह्मवत्स्वतःशरीरशून्यशु क्तिस्थाण्वाद्यज्ञानकल्पितस्यरूप्यदेहादेःशुक्तिस्थाण्वादिशरीरत्वा पातात् । ब्रह्मणःस्वाविद्याकल्पितेनास्मदादिसंसारेणसंसारित्वा पाताच्च । जगदार्जनात्प्रागशरीरस्यैवस्रष्टृत्ववन्नियंतृत्वस्याप्युप पत्तेश्च । नचाशरीरस्यानियंतृत्वेशंकितेगौणशरीरोपादानंयुक्तं । किंचशुद्धंननियंतृ । अशुद्धंत्वविद्याकल्पितत्वान्नाविद्याविषयः ।

गु० विद्येति ॥ तद्विषयत्वाद्विद्यायास्तदविद्यात्वं । तृतीयेतुसोपाधिकतैव । मुक्तस्यापिपराभेदेनपक्षत्वान्नसाध्याव्याप्तिः ॥ शरीरजीवयोरिति ॥ शरीरजीवयो

SGDF
Sri Gargeshwari Digital Foundation

प्र० निराह ॥ **यच्चेति** ॥ प्रतिबंदीमापादयन्ननवस्थापरिहारंप्रकारांतरेणैवतेनैववाचयति ॥ **तर्हीति** ॥ उक्तन्यायेन सर्वत्रेत्यधिकरणसूत्रेणो क्तन्यायेनेत्यर्थः ॥ **किंचेति** ॥ कियंतंदूरंगत्वाऽभेदाश्रयणेनकिमित्यर्थः । ननुदेहाभेदेतस्यनाशेऽस्यापिनाशेनस्वर्गाद्युद्देशेनधर्माधर्मादिवि धायकप्रमाणविरोधोनुभवविरोधश्चेत्यतआह ॥ **प्रमाणविरोधइति** ॥ अनवस्थानिरासायनियंतुर्नियम्याभेदेंगीक्रियमाणेकार्यस्याप्यभिन्न कारणजन्यत्वंस्यात् अन्यथोक्तदोषादितिजडाभेदोप्युपेयस्स्यादित्याह ॥ **किंचैवंसतीति** ॥ ननुयःपृथिव्यांतिष्ठन्नित्यादिभेदोक्तिर्विरुध्यत इत्यतआह ॥ **प्रमाणेति** ॥ उपलक्षणमिदं । पृथिव्यादेःस्वातिरिक्तज्ञानप्रकाश्यत्वेज्ञानस्यापिस्वव्यतिरिक्तज्ञानापेक्षत्वेनानवस्थाप्रसंगात्त

यच्चोक्तंदेहादिनियंतुरपिजीवस्याभिन्ननियंतृनियम्यत्वेतन्नियंतुरीश्वरस्यापिभिन्ननियंतृनियम्यत्वेनानवस्थापातान्नियंतृब्रह्मनि यम्यजीवाभिन्नमिति । तन्न । अभेदेसुतरांनियंतृत्वायोगात् । श्रुतिसूत्रयोर्भेदोक्त्ययोगाच्च । काल्पनिकभेदेननियंतृत्वा दिकंयुक्तमितिचेत्तर्हियथादेहादिनियंतुर्जीवस्यव्यावहारिकभेदवानीशोनियंता तथेशस्यापिव्यावहारिकभेदवानन्योनियंता स्यादितिव्यावहारिकनियंतृपरंपरयानवस्थास्यात् । अथ "नवैशेष्या"दित्युक्तन्यायेनेशस्यस्वातंत्र्यादिविशेषान्ननियंत्रंतरं तर्ह्यनवस्थापरिहारोनाभेदेन । किंतुस्वातंत्र्येणेतिसत्यभेदएवास्तु । किंचानवस्थातोबिभ्यताशरीरजीवयोरवैक्यंस्वीकार्यं । प्रमाणविरोधस्तुजीवपरैक्येपि "भेदेनैनमधीयत"इतिसूत्रएवोक्तः । किंचैवंसतिस्वकार्यंप्रतिकारणस्यापिपृथिव्यादिकस्यब्र ह्मकार्यत्वे ब्रह्मणोप्यन्यकार्यत्वमित्यनवस्थापरिहारायपृथिवीब्रह्मणोरभेदःस्यात् । प्रमाणविरोधस्तुजीवपरैक्येपिसमइत्युक्तं । ॥ ५०९ ॥

गु० भेदेशरीरस्याभिन्ननियंतृनियम्यत्वापत्त्याऽनवस्थापातादितिभावः । यदुक्तंपरैरेकोहिप्रत्यगात्माभवति । नह्यौप्रत्यगात्मानौसंभवतः । एकस्यैवतुभेदव्यवहारउपा

प्र० न्निरासायज्ञानजडयोरभेदस्स्यात् । ज्ञानस्यस्वप्रकाशत्वेनियंतुस्स्वातंत्र्यमस्तु । एवंपृथिव्यादेस्स्वव्यतिरिक्तेनधारणेतत्रापितथेत्यनवस्थेत्याद्य पिध्येयं । ननुनानवस्थानिरासायनियंत्रभेदः । अपितुप्रत्यक्चैतन्यद्वयायोगादुभयोरभेदइत्येतदनूद्यनिराह ॥ **यच्चेति** ॥ **मांप्रतीति** ॥ जीवेशभेदवादेप्रतिशरीरंतयोस्सत्त्वादितिभावः ॥ **अनेकाहमर्थेति** ॥ बहुवचनप्रयोगादितिभावः । ननुतत्रप्रत्यक्त्वमेवसत्यंभिदामिथ्ये तिचेत् भेदस्सत्यःप्रत्यक्त्वंमिथ्येतिकिंनस्यात् । प्रत्यक्त्वेबाधकंनेतिचेत्तुल्यंभेदेपीत्याह ॥ **बाधकेति** ॥ अतश्शब्दपरामर्शंदर्शयितुमंतर्या म्युक्त्यनंतरमित्युक्तं । अन्यत्र न्यायामृतेद्वितीयपरिच्छेदेअहंब्रह्मास्मीत्यादिश्रुत्यर्थवर्णनप्रस्तावे । तत्रातइत्यनेनप्रस्तुतसर्वनियंतारंपरामृश्या न्योद्रष्टानास्तीत्युक्ते अस्मिन्ग्रामेऽयमेवसर्वनियामकोनान्यःपुरुषोस्तीत्यादावन्यशब्दस्यप्रस्तुतसदृशपरतयाव्युत्पन्नत्वेन इहापिसर्वनियामक द्रष्ट्रंतरनिषेधाद्भेदनिषेधाभावादितिनिरस्तमित्यर्थः । नेहनानेत्यादिकमप्यन्यत्रप्रथमपरिच्छेदेनिरस्तमितिभावः । विवरणे अवच्छेदपक्षेंऽतर्या म्यवस्थानंनयुक्तं । प्रतिबिंबपक्षएवयुक्तमित्युक्तं । तदयुक्तं । पक्षद्वयेप्ययोगादितिदूषयितुमनुवदति ॥ **अत्रेति** ॥ **अवच्छेदेति** ॥ अवि

यच्चोक्तमेकस्मिन्शरीरेप्रत्यग्द्वयंनेति तन्न । मांप्रतिदृष्टांताभावात् । ग्रहाद्याविष्टशरीरेऽहमर्थरूपप्रत्यग्द्वयदर्शनाच्च । "हंता स्माच्छरीरादुत्क्रामाम तद्यस्मिन्नउत्क्रांते हंतेदंपुनःशरीरंप्रविशामतद्यस्मिन्नःप्रपन्न"इत्यादावेकस्मिन्शरीरेचक्षुराद्यभिमान्यने काहमर्थश्रवणाच्च । बाधकाभावाच्च । अंतर्याम्युक्त्यनंतरं "नान्योतोस्तिद्रष्टे"तिद्रष्ट्रंतरनिषेधोबाधकइतित्वन्यत्रनिरस्तं । अत्रयदुक्तंविवरणे "योविज्ञानेतिष्ठ"न्नित्यादौब्रह्मणोजीवावच्छेदेषुनियंतृत्वेनावस्थानंश्रूयते । तच्चयद्यप्यवच्छेदपक्षेनयुक्तं ।

गु० धिकृतः । यथाघटाकाशोमठाकाशइति । तद्वदिति । तदनूद्यदूषयति ॥ **यच्चोक्तमिति** ॥ **मांप्रतीति** ॥ एकस्यैवप्रत्यगात्मनोभेदव्यवहारउपाधिकृतइत्यत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्यावच्छिन्नोजीवस्तत्रप्रतिबिंबितोवाजीवइतिमतद्वयं । तत्राद्यइत्यर्थः। कुतइत्यतआह ॥ **घटेति** ॥ युक्ततामाह ॥ **जलेति** ॥ अवच्छेद
पक्षेयथाऽयुक्ततातथाप्रतिबिंबपक्षेपीतिपरोक्तंदृष्टांतीकृत्याह ॥ **घटेति** ॥ श्लोकंव्याचष्टे ॥ **यथेति** ॥ **नास्त्येवेति** ॥ तथाचबिंबरूपला

घटावच्छिन्नाकाशप्रदेशेबाह्याकाशस्यादर्शनेनद्विगुणीकृत्यवृत्त्यनुपपत्तेर्जीवप्रदेशेब्रह्मणोव
स्थानायोगात्। तथापिप्रतिबिंबपक्षेयुक्तं । जलगतस्वाभाविकाकाशेसत्येवप्रतिबिंबाकाशदर्श
नेनद्विगुणीकृत्यवृत्त्युपपत्तेरिति । तत्रब्रूमः । घटाकाशेयथाबाह्याकाशंनैवोपलभ्यते । तथै
वप्रतिबिंबेपिबिंबाकाशंनदृश्यते ॥ १ ॥ यथाघटस्यांतराकाशमात्रेऽवच्छिन्नाकाशेचसत्य
पिबाह्याकाशंनास्ति । तथाजलस्यांतराकाशमात्रेप्रतिबिंबाकाशेचसत्यपिबिंबाकाशंनास्त्येव ।

गु० मांप्रतिदृष्टांताभावात् । गगनेपिभेदस्यस्वाभाविकत्वेनोपाधिकृतत्वाभावेनतस्यदृष्टांतत्वासंभवादितिभावः ॥ **अवच्छेदपक्षइति** ॥ सर्वगतस्यगगनस्यघटावच्छेदे
यथाघटाकाशत्वव्यपदेशः । तथातदुपाध्यवच्छिन्नेब्रह्मणिजीवत्वव्यपदेशइत्यवच्छेदपक्षइत्यर्थः ॥ **द्विगुणीकृत्येति** ॥ सर्वगतस्यब्रह्मणउपाध्यवच्छेदेप्राथमिकी
वृत्तिः । पुनरवच्छिन्नेपिनियंतृत्वादिसिद्ध्यर्थमनवच्छिन्नस्यवृत्त्यंतरमाश्रयणीयं । नचैतदुपलब्धचरमितिद्विगुणीकृत्यवृत्त्यनुपपत्तिः । गगनस्यत्ववच्छिन्नेवृत्त्यनंगी
काराद्वैषम्यमितिभावः । अंतःकरणप्रतिबिंबितजीवनियंतृत्वेनब्रह्मणस्तत्रावस्थानात् द्विगुणीकृत्यवृत्त्यनुपपत्तिस्तत्रापिसमेत्याशंक्याह ॥ **प्रतिबिंबेति** ॥ किमव
च्छेदपक्षंपरित्यज्यप्रतिबिंबपक्षमेवाश्रित्यब्रह्मणोऽवस्थानंप्रतिपाद्यते । किंवाप्रतिबिंबपक्षमभेदव्यवच्छेदपक्षंचाश्रित्यांतर्यामिणोऽवस्थानमिति । नाद्यः । अवच्छेद

SGDF
Sri Gargeshwari Digital Foundation

प्र० दंतर्यामिणस्तत्रनावस्थानमितिभावः । प्रतिबिंबपक्षेऽवच्छेदवैलक्षण्यमाशंकते ॥ **नन्विति** ॥ **उक्तमिति** ॥ बिंबप्रतिबिंबत्वरहितमाकाशमात्रंप्रतिबिंबाकाशंचेतिद्वयमित्यर्थः ॥ **द्वयमेवेति** ॥ आकाशमात्रमवच्छिन्नंचेतिद्वयं । नतुप्रतिबिंबाकाशमित्यर्थः । तस्यास्वच्छतयाप्रतिबिंबनानुपाधित्वादितिभावः ॥ **त्रितयाभावेनेति** ॥ तथाचब्रह्मणोऽविद्यायांप्रतिबिंबितमात्रत्वेनतत्रचिन्मात्रस्यप्रतिबिंबितस्यचघटादावाकाशद्वयस्येवदर्पणादौमुखमात्रप्रतिबिंबमुखरूपद्वयस्येवभावेपित्रितयाभावेनावच्छेदपक्षत्यागेनप्रतिबिंबपक्षस्वीकारायोगादित्यर्थः । ननुसत्यं

ननुतथापिजलस्यांतरुक्तमाकाशद्वयंजलावच्छिन्नाकाशंचेतित्रयमस्ति । घटस्यांतस्तूक्ताकाशद्वयमेवेतिवैषम्यमितिचेन्न । यस्याकाशादेर्जलेनावच्छेदस्तत्रप्रतिबिंबनंचतत्रत्रितयसद्भावेपि यस्यप्रतिबिंबनमात्रंदर्पणादौमुखादेःतत्रत्रितयाभावेनप्रतिबिंबपक्षपातायोगात् ।

गु० पक्षइवप्रतिबिंबपक्षेप्याकाशद्वयस्यैवप्राप्त्याबिंबाकाशस्याभावादित्याह ॥ **यथेति** ॥ अथावच्छेदप्रतिबिंबपक्षयोस्साम्यंविघटयति ॥ **नन्विति** ॥ उक्तमाकाशद्वयं स्वाभाविकाकाशःप्रतिबिंबाकाशश्चेत्याकाशद्वयमित्यर्थः । तर्ह्यवच्छेदप्रतिबिंबनवतित्रितयसद्भावेप्यवच्छेदमात्रइवप्रतिबिंबनमात्रेपिद्वयस्यैवसत्त्वेनावच्छेदपक्षंपरित्यज्यप्रतिबिंबपक्षाश्रयणमयुक्तमित्याह ॥ **यस्येति** ॥ **त्रितयाभावेनेति** ॥ दर्पणादौस्वाभाविकाकाशस्यप्रतिमुखाकाशस्यसद्भावेपि दर्पणादेर्जलादिवदनिबिडद्रव्यत्वाभावेनदर्पणावच्छिन्नाकाशाभावेनत्रितयाभावइत्यर्थः । नन्ववच्छेदपक्षमात्रइवप्रतिबिंबपक्षमात्रेपित्रितयाभावेपि ब्रह्मणोऽविद्ययावच्छेदस्यप्रतिबिंबस्यचसत्त्वादाकाशवत्रितयसिद्धिस्स्यात् । नचैवमवच्छेदपक्षस्याप्याश्रयणेऽवच्छेदपक्षोनयुक्तइत्यादिपूर्वोक्तिव्याघातइतिवाच्यं । केवलावच्छेदमात्रपक्षेत्रितयलाभस्यतत्रान

SGDF
Sri Gargeshwari Digital Foundation

प्र० यत्रैकस्यैवावच्छेदःप्रतिबिंबनंचतत्रसामान्यंप्रतिबिंबितमवच्छिन्नंचेतित्रितयमन्यत्रद्वयमिति । तथापिप्रकृतेतथास्त्विविशंकते ॥ **नन्विति** ॥ किमेतावताएकस्मिन्नेवदेहेऽवच्छिन्नंप्रतिबिंबितंचिन्मात्रंचेतिब्रह्मत्रयसिद्धावपितत्रावच्छिन्नंवाप्रतिबिंबितंवानांतर्यामी । तस्यनियम्यरूपजीवत्वात् । अथतत्रत्यंचिन्मात्रंवासार्वज्ञाद्युपेतंबिंबभूतंब्रह्मवातथेतिवाच्यमितिभावेनांत्येदोषमाह ॥ **यत्रेति** ॥ द्वयं अवच्छिन्नंप्रतिबिंबभूतं चेत्यर्थः । आद्येदोषमाह ॥ **आकाशमात्रेति** ॥ **विकल्पइति** ॥ घटादावाकाशस्यैवावच्छेदमात्रं । नप्रतिबिंबनं । दर्पणादौमुख्यस्येवब्रह्मणोऽविद्यायांप्रतिबिंबनमात्रंनत्ववच्छेदइतिविकल्पपक्षे जलादावेकस्याकाशस्येवब्रह्मणएकस्मिन्देहेऽविद्ययाऽवच्छेदःप्रतिबिंबनंचेतिसमुच्चयपक्षेचेत्यर्थः । पक्षद्वयेप्यंतर्यामिभूतस्यतत्राभावादितिभावः । नन्ववच्छेदपक्षेप्रतिबिंबनपक्षेच यच्चिन्मात्रमाकाशस्थानीयंतदेवागत्यानियंतृ

ननुतर्हिब्रह्मणोऽविद्ययाऽवच्छेदस्तत्रप्रतिबिंबनंचेतिद्वयमप्यस्त्विवतिचेन्न । यत्रद्वयंतत्रयद्यपिजलांतर्जलावच्छिन्नाकाशेसत्येवपुनराकाशमात्रंप्रतिबिंबाकाशंचास्ति । तथापिजलांतर्बाह्याकाशस्यबिंबाकाशस्य चाभावेनतत्स्थानीयस्यब्रह्मणोजीवप्रदेशेनियंतृत्वेनावस्थानायोगात् । आकाशमात्रस्थानीयस्यचिन्मात्रस्यत्वन्मतेऽनियंतृत्वात् । तस्मादवच्छेदप्रतिबिंबनयोर्विकल्पेसमुच्चयेवाब्रह्मणोंतर्यामित्वायोगः ।

गु० भिप्रेतत्वादवच्छेदसहितप्रतिबिंबपक्षेत्रितयलाभस्यचाभिप्रेतत्वात् । ततश्चनविरोधइतिसमुच्चयमाशंकते ॥ **ननुतर्हीति** ॥ एवमवच्छेदप्रतिबिंबपक्षोभयाश्रयणेपितेनांतर्यामिणस्सत्त्वसिद्धिरित्याह ॥ **यत्रेत्यादि** ॥ अवच्छेदपक्षाश्रयणेनाह ॥ **बाह्याकाशस्येति** ॥ प्रतिबिंबपक्षाश्रयणेनाह ॥ **बिंबाकाशस्येति** ॥ ननुजीवप्रदेशेचिन्मात्रावस्थानेचिन्मात्रस्यैवांतर्यामित्वादंतर्यामिणोऽवस्थानसिद्धिरित्यतआह ॥ **आकाशमात्रेति** ॥ अन्यथाऽपसिद्धांतस्स्यादितिभावः ॥ **तस्मादिति** ॥ ॥ ५११ ॥

प्र० स्यादितिकश्चिद्ब्रूयात्तंप्रत्याह ॥ **किंचेति** ॥ अन्यत्र न्यायामृते । एवमधिकरणप्रमेयंपरमतेनिरस्यमायिमतेरामानुजमतेचसूत्राक्षरार्थानुपपत्तिमाह ॥ **यच्चेति** ॥ केषांचिदधिकरणशरीरंपरमतादनतिभिन्नत्वान्नपृथग्दूषितं । तथाहि । प्रधानस्यवाक्यशेषोक्तद्रष्टृत्वाद्ययोगेनशंकितुमयोग्यत्वादयमंतर्यामी ऐश्वर्ययोगविशेषनिमित्तप्रकृष्टादृष्टवान्जीवविशेषःपरमात्मावेतिसंदेहे वाक्यशेषे “द्रष्टाश्रोतामंते”तिकरणजन्यदर्शनश्रवणमननादिरूपज्ञानवत्ताश्रवणात्तस्यचजीवएवसंभवात् द्रष्टेत्यादेःकरणजन्यज्ञानपरत्वमनंगीकृत्यरूपादिसाक्षात्कारमात्रपरत्वेंगीक्रियमाणे रूपादिसाक्षात्कारस्यजीवपरयोस्साधारण्येनास्मिन्प्रकरणे “नान्योतोस्तिद्रष्टे”तिद्रष्ट्रंतरनिषेधायोगात्करणायत्तज्ञानपरत्वाज्जीवस्यैतादृशद्रष्टृत्वेननिषेधायोगात्तद्बलेन “आत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदे”त्यादिषुपृथिव्यादिसर्वभूतांतःप्रवेशसर्वनियमनसर्वशरीरकत्वादितद्धर्मो

किंचावच्छेदोपाधौघटादाववच्छिन्नाकाशव्यतिरेकेणाकाशव्यक्त्यंतरं प्रतिबिंबनोपाधौदर्पणादौचप्रतिबिंबव्यतिरेकेणमुखव्यक्त्यंतरंनास्तीत्यन्यत्रोक्तं । यच्चोक्तमुभाभ्यां आद्यसूत्रेऽधिदैवादिषुयोंतर्यामीसपरमात्मेत्यन्वयइति । तन्न । तथात्वे अधिदैवादिष्वित्यस्यवैयर्थ्यात् ।

गु० परेणावच्छेदपक्षस्यप्रतिबिंबनसमुदायपक्षयोर्निराकृतत्वादितिभावः ॥ **किंचेति** ॥ तथाचास्याभ्युपगमवादेनोक्तत्वान्नग्रंथांतरस्थस्वोक्तिविरोधइतिभावः ॥ **दर्पणादौचप्रतिबिंबव्यतिरेकेणमुखव्यक्त्यंतरंनास्तीत्यन्यत्रोक्तमिति** ॥ मुखप्रतिमुखानुगतमुखत्वातिरिक्तमुखमात्ररूपव्यक्त्यंतरस्येवजीवब्रह्मानुगतचित्त्वातिरिक्तचिन्मात्ररूपस्याज्ञानाश्रयत्वयोग्यव्यक्त्यंतरस्यचाभावाचेति न्यायामृतेप्रथमपरिच्छेदेऽज्ञानस्यविवरणोक्तचिन्मात्राश्रितत्वभंगउक्तमित्यर्थः । ननुचभवत्पक्षेप्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० पदेशात्परमात्मैव । द्रष्टेत्यादिवाक्यशेषस्तुरूपादिसाक्षात्कारमात्रपरोनकरणायत्तज्ञानपरः । सच "पश्यत्यचक्षुःसश्शृणोत्यकर्ण" इत्यादिना परस्यैव । नान्योतोस्तीतिद्रष्ट्रंतरनिषेधस्तुस्वातंत्र्येणद्रष्ट्रंतरनिषेधपरइतिसिद्धांतइति । अत्रप्रधानपूर्वपक्षस्यप्रागेवसमर्थनेनतत्त्यागोयुक्तः । अन्यथानचस्मार्तमितिप्रधानप्रत्याख्यानायोगः । यदत्रोक्तंश्रुतप्रकाशे नचस्मार्तमितिदृष्टांतएवोपन्यस्तोनप्राधान्येन । अतएवनचस्मार्तमत द्धर्माभिलापात्शारीरश्चेत्येवमंतमेकंसूत्रमिति । तन्न । दृष्टांतत्वद्योतकाभावात् । अन्यथा नानुमानमतच्छब्दात्प्राणभृच्चेत्यादावपितथात्वा पत्तिः । दृष्टांतोपादानस्यवैयर्थ्याच्च । नचशारीरस्स्मार्तवदित्यादिविन्यासापाताच्च । प्रधानशंकानुदयादेवंकल्पनमितिचेन्न । तच्छंकोदय

विषयवाक्यसूचनस्यांतर्यामिपदेनैवसिद्धेः । अन्यथा "अंतस्तद्धर्मे" त्यादावादित्यादिष्वंतरितिसाध्यंनिर्दिश्येत । तस्मादधिदैवादिप्रकरणे षुतद्धर्मव्यपदेशादितियथाश्रुतएवान्वयः । वरंहिवैयर्थ्यादपिलक्षणा ।

प्र० स्यमूलएवोक्तत्वात् । शारीरश्चेतिचशब्दास्वारस्याच्च । अस्यापिजीवमात्रनिरासपरत्वेयोगविभागायोगेन अतद्धर्माभिलापाच्छारीरश्चोभयेपि हिभेदेनैनमधीयतइत्येकवाक्यतयैवविन्यासःस्यादिति । नन्वधिदैवादिचिह्नितेषुवाक्येष्विवितिविषयसूचनार्थंतदित्युक्तमित्यतआह ॥ विषयेति ॥ ननुभवन्मतेप्यधिदैवादिप्रकरणेष्वितिप्रकरणलक्षकत्वाल्लक्षणादोषइत्यतआह ॥ वरंहीति ॥ अतएव "एकादशवैपशोरवदानानि । तानि द्विरवद्यती" तिवाक्यवैयर्थ्यपरिहाराय "यद्यपिचतुरवत्तीयजमानः पंचावत्तैववपाकार्ये" त्यत्रवपाशब्देपाशुकहविर्मात्रलक्षणेतिस्वीकृतंमीमां ॥ ५१२ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सकैरितिभावः । अत्रसूत्रएवमपिनवैयर्थ्यानिस्तारइत्यतआह ॥ **एवंहीति** ॥ अत्राधिदैवाधिलोकादिष्विवितिपाठःकैश्चित्कल्पितएव नवा स्तवइतिध्येयं ॥ **इत्युक्तमिति** ॥ उभाभ्यामितिवर्तते ॥ **तस्मादिति** ॥ अत्रसमासोपपत्तिस्त्वतच्छब्दादित्यत्रवक्ष्यतइतिभावः । तृतीयसूत्रंमायिमतेऽनुपपन्नमितिवदन्प्रसंगादतीतानागतभेदसूत्राणिसर्वाण्यप्ययुक्तानीत्याह ॥ **किंचेति** ॥ भेदप्रतिपादकमित्यस्यसूत्रजात

एवंहिनकेवलंतद्धर्मव्यपदेशमात्रं । किंतुतस्याभ्यासोप्यस्तीत्युक्तंभवति । यच्चद्वितीयसूत्रेतद्धर्माभिलापोनामप्रधानधर्मविरुद्धधर्माभिलापइत्युक्तं । तन्न । आद्यसूत्रस्थेनतद्धर्मव्यपदेशादित्यनेनपुनरुक्तेः । ब्रह्मधर्मोहिप्रधानधर्मविरुद्धएव । तस्मात्त्रिगुणत्वादिधर्माभिलापाभावादित्येवार्थः । किंच "भेदव्यपदेशात् । भेदव्यपदेशाच्चान्यः । संभोगप्राप्तिरितिचेन्नवैशेष्यात्"इत्यादिकमतीतं "शारीरश्चोभयेपिहिभेदेनैनमधीयत"इतिवर्तमानं "विशेषणभेदव्यपदेशाभ्यांचनेतरौ । भेदव्यपदेशा"दित्यादिचागामिभेदप्रतिपादकं ॥ अद्वैतिभिर्व्याक्रियतेकथमद्वैतदूषकं । सूत्रजातंस्वसिद्धांततयालज्जांविनैवतु ॥ १ ॥ यदिमिथ्यार्थवादीनिसूत्राणीत्येवकीर्तनं । सूत्रव्याख्यातर्हिवेदबोध्यमिथ्यात्वबोधकः ॥ २ ॥ बौद्धागमोपिवेदस्यव्याख्यारूपःप्रसज्यते । बौद्धोपिब्रह्मसूत्राणिव्याख्यायांतेभवानिव ॥ ३ ॥ मिथ्यैषोर्थःकिंतुतत्वंशून्यमेवेतिकीर्तयेत् ।

प्र० मितिश्लोकगतेनान्वयः। इत्यादिचेत्यपितेनैवान्वेति । काकथंतेत्यतउक्तम**द्वैतदूषकमिति** । मिथ्याभेदपरत्वेनाद्वैताविरोधित्वात्कालज्जाप्रसक्तिरित्यत्रआह ॥ **यदीति** ॥ ननुयथाऽर्थवादानांमिथ्यार्थावलंबनेनप्राशस्त्यतात्पर्यात्प्रामाण्यं तद्वत्सूत्रादीनिसर्वाणिमिथ्यार्थवादीन्यपि तात्विकशुद्धचैतन्यतात्पर्यविषयोपेतानिभविष्यंति । नैवंबौद्धमतइत्यतआह ॥ **बौद्धोपीति** ॥ ननुनतस्यतथावचनेतत्वावेदकंवचनंमानम

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्तिममत्वस्तिसदेवेत्यादिकमित्यतआह ॥ **असद्वेत्यादीति** ॥ ननुतेनासदर्थकत्वमागमादेरुच्यते । मयातुव्यावहारिकसदर्थकत्वमित्यत आह ॥ **अपौरुषेयेति** ॥ अयुक्तंचमिथ्यार्थकथनमित्याह ॥ **असकृदिति** ॥ तन्मतदूषणस्यफलमाह ॥ **सौगताइति** ॥ प्रविश्य विचार्य । ननु "अस्मायामेधास्रजोविनि"रितिमायावीतिभाव्यं । सत्यं । "व्रीह्यादिभ्यश्चे"ति इनिप्रत्ययेमायीतिसाधु ॥ **स्पष्टइति** ॥ उपन्यासमुखेनविवृतइत्यर्थः । एतेनात्रांतर्यामीनारायणश्चतुर्मुखोवेतिपूर्वपक्षंकृत्वा अधिदैवादिषुश्रूयमाणोंतर्यामीशिवएव । सर्वांतरत्वरूप धर्मस्याथर्वशिरसि "तेदेवारुद्रमपृच्छ"न्नितिप्रस्तुतरुद्रनिष्ठतया "सोंतरादंतरंप्राविश"दितिश्रवणादितिकेनचित्प्रलपितंप्रत्युक्तं । सूत्रोपात्त प्रधानपक्षत्यागायोगात् । "दिव्योदेवएकोनारायण"इतिमूलोक्तसमाख्याविरोधेनतत्रतत्रभाष्योदाहृतानेकवचनविरोधेनशिवांतर्यामित्वस्यबा

असद्वेत्यादिवचनंतस्यस्यात्तत्ववेदकं ॥ ४ ॥ अपौरुषेयभावेनप्रयुक्ताचप्रमाणता । व्यावहारिकमात्रेणनार्थेनपरितुष्यति ॥ ५ ॥ असकृच्छ्रुतिभिःसूत्रेभेदेयत्नेनसाधिते । मिथ्यार्थतांकथंब्रूयात्सूत्राणांभाष्यकृत्स्वयं ॥ ६ ॥ सौगतावेदबाह्याहिवेदाप्रामाण्यवादिनः । अवैदिकाइतिज्ञात्वावैदिकैःपरिवर्जिताः ॥ ७ ॥ वेदान्प्रविश्यवेदानामप्रामाण्यंप्रसाधयन् । मायीतुयत्नतस्त्याज्योवैदिकैर्हितशत्रुवत् ॥ ८ ॥ टीकाक्षरार्थस्तुस्पष्टः ॥ ९ ॥ अंतर्याम्यधिकरणं ॥ ५ ॥

गु० धिदेवादिष्वित्यस्ययथाश्रुतस्यानन्वयः । प्रकरणेष्वित्युक्तावपिलक्षणास्यादित्यतआह ॥ **वरंहीति** ॥ लक्षणाप्रयोजकंप्रयोजनंचाह ॥ **एवंहीति** ॥ ९ ॥ **अंतर्याम्यधिकरणं ॥ ५ ॥**

प्र० धितत्वाच्च । "सोंतरादंतरंप्राविश"दित्यथर्वशिरोवाक्येपिनशिवस्यांतर्यामित्वमुच्यते । किंतुसइतिप्राक्प्रकृतरुद्रांतर्यामिणंनारायणमेवपरामृश्यांतरादंतरंप्राविशद्दिशश्चैवांतरेतिनारायणस्यैवांतर्यामित्वमुच्यते । विशप्रवेशनेइतिधातुनिष्पन्नविष्णुशब्दार्थस्य "सर्वादिशोविष्टोस्मी"त्यैतरेयभाष्योक्तदिशाप्राविशदित्यनेनज्ञापनाच्च । अन्यथा "अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थित"इत्यादिविरोधापत्तेः । विस्तरस्तुगुरुपादकृतपरतत्वप्रकाशिकायांध्येयः । सूत्रास्वारस्यंचरामानुजमतइवज्ञेयं ॥ ९ ॥ **अंतर्याम्यधिकरणं ॥ ५ ॥**

॥ **ॐअदृश्यत्वादिगुणकोधर्मोक्तेःॐ** ॥ भाष्ये "अदृश्यत्वादिगुणाविष्णोरुक्ता"इतिसामान्योक्तेः तत्वप्रदीपेच "अदृश्येनात्म्ये सहैवसंतंनविजानंतिदेवाःसयोतोश्रुतइत्यादिनाऽदृश्यत्वादिगुणाविष्णोरुक्ता"इत्यादिपदप्रयोगात् टीकायां "अदृश्येऽनात्म्य"इतिविशिष्योक्तावपितुल्यन्यायतयाप्राप्तां "पूर्ववददृश्यत्वादिबलेनरूढिंपरित्यज्ययोगवृत्त्याऽक्षरशब्दोविष्णौसंभवती"तिन्यायविवरणटीकोक्त्याचलब्धांपूर्वसंगतिमाह ॥ **अत्रेति** ॥ नन्वदृश्यत्वंसामान्यं पृथिव्यविदितत्वंविशेषः तेनकथंतदाक्षेपइति । मैवं । सर्वादृश्यत्ववतितदेकदेशपृथिव्यविदितत्वस्यापिमुखनासिकावचनोनुनासिकइत्यत्रमहाभाष्योक्तेनप्रासादवासिन्यायेनसत्त्वाद्वा पृथिव्याद्यधिदैवादिसर्वाविदितत्वस्यादृश्यत्वरू

॥ ॐअदृश्यत्वादिगुणकोधर्मोक्तेःॐ ॥ अत्रांतर्यामिणोब्रह्मत्वेहेतूकृतस्य "यंपृथिवीनवेदे"त्युक्तस्यादृश्यत्वस्याक्षेपेणपूर्वपक्षोत्थानादनंतरसंगतिः ।

गु० ॥ **ॐअदृश्यत्वादिगुणकोधर्मोक्तेःॐ** ॥ पूर्वपक्षसिद्धांतयोःफलफलिभावमाह ॥ **अनन्यत्वइति** ॥ **अक्षराधिकरणन्यायेनेति** ॥ अक्षरमंबरांतधृते

SGDF
Sri Gargeshwari Digital Foundation

प्र० पत्वाद्वा “सहैवसंतंनविजानंतिदेवा”इत्यत्रेवकैमुत्यलब्धत्वाद्वा उभयत्राप्यपरिच्छिन्नवैभवस्यविवक्षितत्वाद्वातदाक्षेपात् । यदत्रोभाभ्यामुक्तं प्राक्प्रधानस्यद्रष्टृत्वाद्ययोगेननिरासेपीहतथाबाधकाभावाददृश्यत्वादिकंप्रधानस्यस्यादितिशंकोदयात्संगतिरिति तन्न । साक्षात्सौत्रहेत्वाक्षेप संभवेनेदृश्याअनादरणीयत्वादितिभावेनोक्तं **ब्रह्मत्वेहेतूक्तस्येति** । एतेनैवप्राग्घेतूक्ततेनादृश्यत्वरूपब्रह्मधर्मेणब्रह्मकिंनाक्षरशब्देनोच्यतइ तिशंकायाअप्यनवकाशः । “अदृश्येनात्म्य”इत्यादिटीकादितुफलपरमितिभावः । ननुपूर्वंतद्धर्माभिलापाभावेनप्रधाननिरासेपिनेह तथापृ थिव्यादिदृष्टांतपूर्वंविश्वोपादानत्वरूपतद्धर्माभिलापादितिवा पूर्वत्राविदितत्वरूपादृश्यत्वादिबाधकेनशरीरशब्देरूढित्यागवदत्राक्षरशब्देनादृ श्यत्वलिंगेनरूढित्यागः । अक्षरात्परतःपरइत्युत्कर्षावधित्वश्रवणादितिवा पूर्ववैषम्येणापिसंगतिरस्तीतिचेत्सत्यं । प्रधानहेत्वाक्षेपसंभवेतस्यै

अत्रादृश्यत्वादिगुणकमक्षरंकिं

प्र० ववाच्यत्वात्सिद्धांतिशंकाबीजनिरासार्थत्वाच्चपूर्वंहेत्वाक्षेपएवोक्तः । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ टीकायामेवापेक्षितसमग्रवि षयवाक्यंव्यक्तं । यद्यपिगुणजातमेवात्रविषयः । लिंगपादत्वात् । टीकायांतथैवोक्तेश्च । तथाप्यक्षरस्यविशेष्यत्वात्तस्यचोपादानत्वान्नब्रह्मे तिपूर्वपक्षयुक्तिंसूचयितुंतथोक्तं । अतएवटीकायामक्षरशब्दसाहित्येनान्यत्रप्रसिद्धिरदृश्यत्वादिलिंगानामुक्ता । नन्वेवमक्षरनामैवसमन्वी यतां । पादसंगतिस्तूत्तराधिकरणइवानेकलिंगसमन्वयार्थत्वात्फलतोभविष्यति । उपादानत्वादक्षरंनब्रह्मेतिपूर्वपक्षश्चऋजुः । उपादानत्वा दक्षरस्यान्यत्वेनतद्विशेषणत्वाद्गुणजातमप्यन्यस्येतिपूर्वपक्षस्तुवक्रइतिचेन्न । अक्षरशब्दसमन्वयस्याक्षराधिकरणेसेत्स्यमानत्वात् । नचतेनैवे दंगतार्थं । परावधित्वादिनाबाधकेनतस्येहापवादेनपूर्वपक्षकरणात् । अन्यत्रासमन्वितगुणजातसमन्वयस्यैवेहकार्यत्वात् । अस्मिन्पादेन्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० साहित्येनैवान्यत्रप्रसिद्धेराश्रितत्वात् । गुणसमन्वयेचपूर्वसंगतेस्साक्षाल्लाभाच्चगुणजातमेवात्रचिंतितं ॥ **प्रकृत्यादीति** ॥ चिदचित्प्रकृति विरिंचरुद्राइत्यर्थः । यद्यप्यत्रटीकायां "अक्षरात्संभवतीहविश्व"मितिकारणवाक्यस्थाक्षरब्रह्मेशशब्दानांचविष्णावनवकाशमाशंक्य परत्वाव धित्वश्रवणेनोज्जीवनात्तदनुरोधेनविष्णुरितिचिंतानंतरं कारणवाक्यस्थाक्षरब्रह्मेशशब्दाःकिंप्रकृत्यादिपरा अथविष्णुपराइतिचिंताप्रदर्शनीया । तथापितुल्यन्यायतयासाचिंतास्पष्टेतिवा वाक्यशेषस्थाक्षरस्यपरत्वावधित्वेननिकृष्टत्वेतदनन्यप्राचीनाक्षरस्यापिनब्रह्मत्वमितिहेतुहेतुमद्भाव स्यैव प्राचीनकारणवाक्यस्थब्रह्मेशशब्दयोर्नब्रह्मपरत्वमित्यत्रस्पष्टंहेतुहेतुमद्भावाप्रतीतेरक्षरस्याब्रह्मत्वात्तद्युक्तकारणवाक्यस्यतत्समानाधिकरण

प्रकृत्यादिकिंवाविष्णुरितिचिंता। तदर्थंब्रह्मणोक्षरत्वे "अक्षरात्परतःपर"इतिवाक्यशेषोक्तमक्षरस्यपरत्वावधित्वंनसंभवत्युतसंभवतीति । तदर्थंपरत्वावधिभूतमक्षरमदृश्यत्वादिगुणकाक्षरादनन्यदुतान्यदिति । अनन्यत्वेपरत्वावधित्वस्यब्रह्मण्ययोगान्नतस्याक्षरत्वंयुक्तं । अन्यत्वेतुयुक्तं ॥ पूर्वपक्षस्तु ॥

प्र० ब्रह्मेशशब्दयोरपिनब्रह्मपरत्वमिति अक्षरस्याब्रह्मत्वद्वारैवकारणवाक्यादेरब्रह्मपरत्वोक्त्यवश्यंभावाद्वा संगतिभाष्यन्यायविवरणतट्टीकानु रोधाद्वाऽक्षरमुखैवचिंतोपदर्शिता । फलफलिभावमस्फुटत्वादाह ॥ **अनन्यत्वइति** ॥ यदिवक्ष्यमाणदिशाप्रकृतहानाप्रकृतकल्पनादोषाप त्त्या "अक्षरात्परत"इत्युक्ताक्षरस्य "अक्षरात्संभवतीहविश्व"मितिपूर्वोक्तस्यचाक्षरस्यैकत्वं तददृश्यत्वादिगुणकस्यविश्वकारणत्वेनोक्तस्यैवप रत्वावधित्वात्तस्यचसर्वोत्तमेविष्णावयोगेनयथायथंप्रकृत्यादीतिपूर्वपक्षेफलं । यदातु "अक्षरत्रयमीरित"मित्यादिवक्ष्यमाणरीत्याऽन्यत्वं तदा क्षरात्परतइत्युक्ताक्षरस्यापरत्वात्परत्वावधित्वस्यब्रह्मण्यभावात्परविद्याविषयत्वेनविष्णुरेवेतिसिद्धांतेफलमित्यर्थः । उपादानत्वाक्षरब्रह्मेशश

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्दान्क्रमेणप्रधानश्रीब्रह्मरुद्रप्रापकांष्टीकोक्तान्व्यंजयंश्चतुर्विधपूर्वपक्षटीकांव्यनक्ति ॥ **जडप्रकृतेरेवेत्यादिना** ॥ नन्वत्रनिर्धारितएकएवा दृश्यत्वादिगुणकइतिपूर्वपक्ष उतानिर्धारितोयःकश्चिदिति सर्वेपीतिवा । नाद्यः । अनेकप्रापकसत्त्वेननिर्धारणायोगात् । नद्वितीयः । संशयादविशेषापत्तेः । नतृतीयः । वाक्यभेदापातादितिचेन्न । अक्षरब्रह्मेशशब्दानामन्यप्रापकाणांविनाशित्वेन "ममयोनिर्महद्ब्रह्मे"त्यादिवचनेन कार्यस्यकारणाधीनतयेशितृत्वेन प्रधानएवोपपत्तेरित्यादिरूपेणपक्षचतुष्टयेप्यवधारणसंभवेनाद्यस्ययुक्तत्वादितिभावेन**प्रकृतेरेवे** त्युक्तं । चित्प्रकृतेर्वेत्यादिवाशब्दाद्द्वितीयतृतीयावपियुक्ताविति सूचितं । द्वितीयेविष्णवन्यत्वेनावधारणसंभवान्नसंदेहादविशेषः । अतएव

जडप्रकृतेरेवादृश्यत्वादि । अदृश्यत्वादिगुणकेऽक्षरेपृथिव्यादिदृ
ष्टांतपूर्वकं "तथाक्षरात्संभवतीहविश्व"मितिविश्वोपादानत्वोक्तेः ।

प्र० टीकायां "विष्णोरन्यस्यवे"तिसंशयोक्तिः । "नविष्णोरदृश्यत्वादीतितावत्पूर्वपक्ष"इत्युक्तिः "नविष्णुरदृश्यत्वादिगुणक"इत्युपसंहारश्च । तृतीयेवाक्यभेदस्यन्यायप्राप्तत्वादिति । यद्वा "नविष्णोरदृश्यत्वादी"तिटीकोक्तव्यवच्छेद्याभिप्रायंजडप्रकृतेरेवेत्यवधारणं । नतुकोट्यंतर व्यवच्छेदाशयं । तेन "नविष्णोरदृश्यत्वादी"तिटीकोक्तस्य "अदृश्यत्वादिकंजडप्रकृतेर्भवे"दितिटीकोक्तस्यचसंग्रहःकृतोभवति । तेनविष्णोर्नचेन्निर्विषयतयावाक्यमिदममानंस्यादितिशंकाचनिरस्ताभवति । "अस्यपृथिव्यादिदृष्टांतेनोपादानतयाजगत्कारणत्वेनोक्तेरितिटीकां व्यनक्ति ॥ **अदृश्यत्वेति** ॥ दृष्टांतेत्येतदुपादानत्वसिद्ध्यर्थमुक्तं । ऊर्णनाभेरादित्वेपिपृथिव्यादीत्युक्तेर्गतिर्वक्ष्यते । उपादानत्वमेवशंकापू ॥ ५१५ ॥

प्र० र्वंव्यनक्ति ॥ **नचेति** ॥ तस्य कारणत्वमात्रस्य ॥ **अंतरंगस्येति** ॥ कार्यानुस्यूतत्वादुपादानस्येतिभावः । एतेनटीकायामेवमाशंक्यतथाक्षरब्रह्मेशशब्दानांचविष्णाववकाशमाशंक्यसर्वत्रपरतःपराभिधानेनैवोज्जीवनंयत्कृतंतदुपलक्षणमितिसूचितं । तथाचवक्ष्यति "इतिनिकृष्टत्वेनश्रुतत्वाच्चे"ति । "चेतनप्रकृतेर्वे"त्यादिटीकांव्यनक्ति ॥ **चित्प्रकृतेर्वेति** ॥ **अक्षराधिकरणन्यायेनेति** ॥ "अक्षरमंबरांतधृते"रित्यत्र "एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चे"तिश्रुतमक्षरं किं चित्प्रकृतिरथविष्णुरितिसंशये "येत्वक्षरमनिर्देश्यमव्यक्त"मित्यादौ श्रीतत्वेऽक्षरशब्दप्रयोगात्क्षराक्षरातीतेविष्णौतदयोगाच्छ्रीतत्वमेवेतिप्राप्ते चतुर्विधनाशरहितेविष्णावेवाक्षरशब्दप्रवृत्तिनिमित्तस्यपौष्कल्यात् "तस्मादक्षरं तस्मादक्षरमित्याचक्षतएतमेवसंत"मितिश्रुत्यादौतस्यप्रयोगाच्च विष्णुरेवाक्षरशब्दमुख्यार्थइतितृतीयेपादेवक्ष्यमाणन्यायेनेत्यर्थः । निर्विकारेश्रीतत्वेपिकथमुपादानत्वमित्यतः "तस्याविकाराभिमानित्वाद्युज्यत"इतिटीकोक्तमेवव्यक्तमाह ॥ **चित्प्रकृतौत्विति** ॥ "हिरण्यगर्भस्यवे"त्यादिटीकांव्यनक्ति ॥ **चतुर्मुखोवेति** ॥ **सब्रह्मेति** ॥ "ब्रह्मादेवानांप्रथमस्संबभूवविश्वस्यकर्ताभुवनस्यगोप्ता । सब्रह्मवि

नचकारणत्वमात्रेऽयंदृष्टांतः । तस्य "संभवतीहविश्व"मित्यनेनैवसिद्ध्यादृष्टांतवैयर्थ्यात् । अबाधेंतरंगस्योपादानत्वस्यत्यागायोगाच्च । चित्प्रकृतेर्वाऽदृश्यत्वादिकं । तत्राक्षरशब्दस्य "कूटस्थोक्षर"इत्यादिस्मृतिसिद्धत्वात् । नचाक्षराधिकरणन्यायेनब्रह्मणिससावकाशइतिवाच्यं । विश्वोपादानत्वस्यतत्रासंभवात् । चित्प्रकृतौतुविश्वोपादानाभिमानित्वेनतत्संभवात् । चतुर्मुखोवाऽदृश्यत्वादिगुणकः । "सब्रह्मविद्या"मितिब्रह्मशब्दात् ।

गु० रित्यधिकरणन्यायेनेत्यर्थः । नन्वेवंचित्प्रकृतेरप्यदृश्यत्वमित्यपिनस्यात् । तस्याअपिविश्वोपादनत्वासंभवादित्यतआह ॥ **चित्प्रकृतौत्विति** ॥ **रूढेरिति** ॥

SGDF Sri Gurgaonkar Digital Foundation

प्र० द्यांसर्वविद्याप्रतिष्ठामथर्वायज्येष्ठपुत्रायप्राहे"तिवाक्येब्रह्मशब्दादित्यर्थः । तस्यचतुर्मुखपरत्वएवैतद्विद्यायास्तत्परत्वमित्यतस्तत्साधयति ॥ नचेत्यादिना ॥ पूर्वत्रेति ॥ अतएवतत्वप्रदीपेब्रह्मादेवानामितिपूर्ववाक्यमप्युदाहृतमितिभावः ॥ जायमानत्वेति ॥ संबभूव जायते इतिपदाभ्यामुक्तेनेत्यर्थः । उपादानत्वंचतदभिमानित्वेनेतिभावः । एवमग्रेपि । "रुद्रस्यवे"त्यादिटीकांव्यनक्ति ॥ रुद्रोवेति ॥ ईशशब्दादिति ॥ प्रकृताद्दश्यत्वादिगुणकाक्षरएव "यदापश्यःपश्यतेरुक्मवर्णकर्तारमीश"मित्युत्तरवाक्येश्रुतत्वादित्यर्थः ॥ शब्दादेवेति ॥ अत्रैवतृतीयपादे "ईशानोभूतभव्यस्ये"तिश्रुतईशानोवायुरुतविष्णुरितिसंदेहे ऊर्ध्वंप्राणमुन्नयती"तिप्राणव्यवस्थापकत्वस्य "मध्येवामनमा

नचविष्णौसमुख्यइतिवाच्यं । पूर्वत्र "ब्रह्मादेवानांप्रथमःसंबभूवे"ति उत्तरत्रच "तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत"इति जायमानत्वलिंगेनचतुर्मुखपरेणब्रह्मशब्देनसंदष्टस्य "सब्रह्मविद्या"मितिब्रह्मशब्दस्यान्यपरत्वायोगात् । रुद्रोवाऽदृश्यत्वादिगुणकः । "कर्तारमीश"मितीशशब्दात् । नच "शब्दादेवप्रमित"इतिवक्ष्यमाणन्यायेनसविष्णुपरइतिवाच्यं । रुद्रे

प्र० सीन"मितिमध्यमत्वस्य "विश्वेदेवाउपासत"इतिविश्वदेवोपास्यत्वस्यचश्रवणात् तेषांच "एवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते योयंमध्यमःप्राणः कुविदंगे"तिश्रुतिभिर्वायुधर्मत्वाद्वायुरितिप्राप्ते लिंगसहस्रादपिश्रुतेर्बलवत्त्वान्निरवकाशवामनश्रुत्या ईशानपदप्रवृत्तिनिमित्तस्यप्रेरकत्वादेर्विष्णावेवपौष्कल्यादीशानोविष्णुरेवेतिवक्ष्यते । ईशशब्दस्यचेशानशब्दपर्यायत्वादितिभावः । यद्यपिसर्वत्रेतिनये अत्तेतिनयेचादित्यादितिश्रुत्योरिवांतर्नयन्यायेनेशशब्दस्यापिसावकाशत्वशंकासुशका । तथापितदधिकरणविषयवाक्येईशशब्दस्यतत्पर्यायस्यवाऽश्रवणाभावाद्वा तत्रेवात्रवाक्येनिरवकाशविष्णुलिंगाभावेनतन्न्यायाविषयत्वाद्वा तत्रतात्पर्यमात्रमेवाधिदैवगतशब्दानामुक्तं । नतुशक्तिरपीति ॥ ५१६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावेनवा शब्दादेवेत्यत्रेशशब्दपर्यायस्येशानशब्दस्यसाक्षादेवसमन्वयोक्तेर्वा "शब्दादेवप्रमितइतिवक्ष्यमाणन्यायेने"त्युक्तं ॥ प्रसिद्धेति ॥ "यस्सर्वज्ञस्सर्वविद्यस्यज्ञानमयंतपः । तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत"इतिश्रुतसर्वज्ञशब्दात्तस्यच "कृशानुरेतास्सर्वज्ञोधूर्जटिर्नीललोहित"इत्यमरोक्त्यारुद्रेप्रसिद्धत्वादित्यर्थः । यौगिकत्वेदोषमाह ॥ सर्वविदिति ॥ प्रतिस्विकबाधकोक्त्यान्यप्रापकाणांनिरवकाशत्वमुक्त्वा टीकायुक्तेनसाधारणबाधकांतरेणापितदाह ॥ अक्षरादिति ॥ यद्यपिटीकायांकारणत्वस्याक्षरब्रह्मेशशब्दानांचसावकाशत्वमाशंक्याक्षरा

प्रसिद्धसर्वज्ञशब्दात् । नचासौयौगिकत्वेनप्रकृताक्षरस्यविशेषणं नतुरुद्राख्यविशेष्यपरइति वाच्यं । रूढेर्बलवत्त्वात् । सर्वविदित्यनेनपुनरुक्तेश्च । तस्मादुक्तबाधकात् "अक्षरात्परतः पर"इतिनिकृष्टत्वेनश्रुतत्वाच्चाक्षरंनब्रह्म । नच "तथाक्षरा"दित्यादावेवाक्षरशब्दोब्रह्म परः "अक्षरात्परतःपर"इत्यत्रतुप्रकृतिपरइतिवाच्यं । प्रकृतहानाप्रकृतस्वीकारापातात् ।

प्र० त्परतःपरइतिश्रुतनिकृष्टत्वेनैवतेषांनिरवकाशत्वमुक्तं । नतुदृष्टांतोक्तविश्वोपादानत्वादिना । तथापिसतिबाधकेत्यागायोगात् "अक्षरात्परतः परइतिश्रुतेरपी"तिन्यायविवरणगतापिशब्दस्यबाधकांतरसमुच्चयार्थत्वमुपेत्यप्रातिस्विकबाधकोक्त्याचनिरवकाशत्वमुक्तमितिध्येयं । अंत्यचिंतास्थानन्यत्वकोटिंसाधयितुंनिकृष्टत्वेनश्रुतत्वंशंकापूर्वंसाधयति ॥ नचेति ॥ विष्णोरपिपूर्वपक्षकोटीनामपिनिकृष्टत्वेनश्रुतत्वमयुक्तं । श्रौतत्वापेक्षयाविष्णोरर्वागन्यस्याभावात् । तत्रसामानाधिकरण्येनान्वयेचतुर्मुखादावयोगादित्यतः "तस्यांसामानाधिकरण्येनोपपन्न"मितिटीको

SGDF
Sri Gargeshwari Digital Foundation

प्र० पलक्षणमितिभावेन "तस्मात्परस्याःप्रकृतेःपरस्यहरेरभिधानादेवचे"तितत्वप्रदीपोक्तिंहृदिकृत्वासर्वत्रतदुपपत्तिमाह ॥ **पूर्वपक्षइति** ॥ **पक्षांतरेत्विति** ॥ अक्षराच्चतुर्मुखात्परतश्श्रीतत्वात्परइतिचतुर्मुखपक्षे । रुद्रपक्षेत्वक्षराद्रुद्रात्परतश्चतुर्मुखात्परइतिपुंमात्रविवक्षयाध्येयमितिभावः । ननुयथासिद्धांतेनिकृष्टत्वश्रवणंबाधकं तथापूर्वपक्षेपिपरविद्याविषयत्वंबाधकमित्याशंक्य "यदावेदाद्यन्यविषयतयायोज्यते तदातस्यापरविद्यात्व"मित्यादिसिद्धांतटीकाव्यावर्त्यपरापरविद्ययोर्भिन्नार्थत्वमुपेत्याह ॥ **नचेति** ॥ ऋगादिविषयत्वोपपादनाय**शास्त्रयोनावि**त्युक्तं । शास्त्रयोनिसूत्रेतथोक्तत्वादितिभावः ॥ **प्रतियोगीति** ॥ विरोधीत्यर्थः ॥ **प्रकृतेरिति** ॥ प्रकृत्यादेरेवेत्यर्थः । नन्वक्षरात्परतःपरइतिवाक्योक्तपरवस्तुकिंचिदुपेत्यात्रप्रकृत्यादिरितिपूर्वपक्षकरणे "चित्वेतुतेनकात्स्र्न्येनावेद्यत्वंनेश्वरंविने"तिप्रागुक्तदिशाऽपरिच्छिन्नवैभवत्वपर्यवसन्नंमुख्यमदृश्यत्वंनिकृष्टत्वेनाभ्युपेतेप्रकृत्यादौपूर्वपक्षिणाशंकितुमशक्यमिति कथंतादृशस्यानंदमयादावुक्तस्यविष्णुधर्मस्यपूर्वपक्षआक्षेपस्स्यात् । नचात्रश्रुतनिकृष्टत्वस्यपरत्वस्यचाक्षरत्वेनाभिमतेप्रकृत्यादावेवकथंचिदुपपन्नताभिप्रेतेतीश्वरस्यपरत्वमेवनोपेयतेपूर्वपक्षिणेतिवाच्यं । तथात्वेपूर्वत्र

पूर्वपक्षेत्विदंनिकृष्टत्वं चित्प्रकृतिपक्षेऽक्षरात्परतइतिपंचम्योःसामानाधिकरण्येन पक्षांतरेतुवैयधिकरण्येनयुक्तं । नचाब्रह्मपक्षेपरविद्याविषयत्वंबाधकं । "पराचैवापराच । तत्रापरा । ऋग्वेदोयजुर्वेद"इत्यपरविद्यात्वेनोक्तऋगादिविषयेशास्त्रयोनौब्रह्मण्येवतत्प्रतियोगिभूतपरविद्याविषयत्वासंभवात् । "अथपरा । ययातदक्षरमधिगम्यत"इतिश्रुत्याप्रकृतेरेवतत्संभवाच्च ॥ **सिद्धांतस्तु** ॥ ॥ ५१७ ॥

गु० कृशानुरेतास्सर्वज्ञइत्यभिधानादितिभावः ॥ **सामानाधिकरण्येनेति** ॥ परंयदक्षरंतस्मादितिसामानाधिकरण्येनेत्यर्थः ॥ **पक्षांतरेत्विति** ॥ चतुर्मुखरुद्रपक्ष

प्र० निर्णीतादृश्यत्वरूपविष्णुलिंगेनाक्षरस्यविष्णुत्वमेवोपेत्यपरापरत्वोपपत्तिरुच्यतां । नचाक्षरादित्यादिनाश्रुतोपादानत्वादिनाविष्णुनिरासेनप्रकृत्यादिरुच्यतइतिवाच्यं । टीकायांपरत्वावधित्वबाधकबलेनैवपूर्वपक्षप्रापकाणांनिरवकाशत्वोक्तेरितिचेन्मैवं । अदृश्यत्वंचक्षुरगोचरत्वमित्युपेत्यादृश्येनात्म्येइत्युक्तादृश्यत्वस्यापिप्रकृत्यादावाशंकनात् । पूर्वाक्षेपचंद्रिकात्वर्थांतराभिप्राया । नचैवमपिब्रह्मरुद्रयोर्जीवत्वेन "अचक्षुश्श्रोत्रंतदपाणिपाद"मित्युक्तजीवधर्मभूतचक्षुरादिराहित्यंकथंघटतां । येनादृश्येनात्म्यइत्यनात्म्यपदोक्तस्यजीवगुणराहित्यस्यटीकोक्तआक्षेपउपपद्येतेतिवाच्यं । तयोर्जीवत्वमेवनेतीतिवा जीवोत्तमत्वेनेतरजीववैलक्षण्येनवा तदुपपत्तिरित्याशयादिति । धर्मोक्तेरितिसूत्रोपात्तनिरवकाशपरविद्याविषयत्वरूपभगवल्लिंगादिनान्यप्रापकाणांसावकाशत्वात् अक्षरात्परतइत्युक्ताक्षरस्यान्यत्वेनबाधकाभावाच्च विष्णुरेवादृश्यत्वादि

परविद्याविषयत्वंतावद्भाष्योक्तश्रुत्यादिभिर्विष्णोरेव । युक्तंचऋगादिवेद्यस्यापिविष्णोःपरविद्याविषयत्वं । यतः । प्रवृत्तंचनिवृत्तंचयथैकंकर्मकथ्यते । उपाधिभेदाद्विद्यापितथैवैकापरापरा ॥ १ ॥

प्र० गुणकमक्षरमितिभावेन लिंगनिरवकाशत्वंतावत् "परविद्याविषयत्वस्यचश्रुतिस्मृतिभिर्विष्णुधर्मत्वेनवगतत्वा"दितिटीकोक्तंव्यनक्ति ॥ **परविद्येति** ॥ अथपराययातदक्षरमधिगम्यतइत्युक्तमित्यर्थः । मोक्षसाधनविद्यायाएवपरविद्यात्वात्तद्विषयंच "तमेवंविद्वानमृतइहभवति तत्कर्मेहरितोषंयत्साविद्यातन्मतिर्यया अथद्वेविद्येवेदितव्येपराचैवापराच । तत्रयेवेदायान्यंगानियानिप्रत्यंगानिसाऽपरा । अथपरा । ययासहरिर्वेदितव्योयोसावदृश्योनिर्गुणःपरःपरमात्मे"त्यादिभिर्विष्णोरेवसिद्धमित्यर्थः । ननूक्तमपरविद्याविषयस्यपरविद्याविषयत्वमयुक्तमित्यतो "द्वेविद्येवेदितव्येइत्यत्रचे"त्यादिटीकांविवृण्वन्नाह ॥ **युक्तंचेति** ॥ कुतइत्यतऋगादेरेवपरविद्यात्वादितिभावेनाह ॥ **यतइति** ॥ श्लोकेना

SGDF Sri Gargeshwari Digital Foundation

प्र० न्वयः । अतइतियोज्यं । पूर्वार्धंव्यनक्ति ॥ यथेति ॥ "निष्कामंज्ञानपूर्वंचनिवृत्तमितिचोच्यते । निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातन"
मितिव्यासस्मृतेरित्यर्थः । स्वर्गादिफलकामनांविनेत्यर्थः । कर्मेत्युपलक्षणंश्लोकइतिभावेनाह ॥ यथाचेति ॥ उत्तरार्धंस्पष्टयति ॥ तथेति ॥
सन्न्यायैरिति ॥ बलाबलत्वादिनासम्यगवधृतोपक्रमादिभिरित्यर्थः ॥ प्रमितेति ॥ नित्यसापेक्षत्वात्समासः ॥ तदुक्तमिति ॥ आथर्वे

यथैकमेवकर्मनिष्कामज्ञानपूर्वत्वोपाधिनानिवृत्तंसकामत्वाद्युपाधिनाचप्रवृत्तं । "निष्कामंज्ञानपूर्वंचनिवृत्तमिति
चोच्यत"इत्यादिस्मृतेः । यथाचैकमेवान्नमुपाधिभेदात्पथ्यमपथ्यंच तथाऋगादिरूपैकैवविद्यासन्न्यायैःप्रमितब्रह्म
विषयकशक्तितात्पर्योपाधिनापरा । मोक्षसाधनप्रमाहेतुत्वात् । अन्यथात्वपरा । तदहेतुत्वात् । तदुक्तं "ऋगा
द्याअपराविद्यायदाविष्णोर्नवाचकाः । ताएवपरमाविद्यायदाविष्णोस्तुवाचका"इति । यत्त्वन्यैरुक्तंपरशब्दऋगा
दिविशेषरूपोपनिषत्परः । तत्सन्निधानाच्चापरशब्दोगोबलीवर्दन्यायेनोपनिषदितरऋगादिपरइति । तन्न । "सर्वे
वेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्य"इत्यादिश्रुतिस्मृतिभिर्ब्रह्मणःसर्ववेदवेद्यत्वात् । उपनिषत्स्वपिज्ञेयशुद्ध
ब्रह्मविषयाणामुपासनादिवाक्यानांबहूनां मंत्रेष्वपिज्योतिरधिकरणोक्तन्यायेनब्रह्मपरभागस्यचदर्शनाच्च ।

प्र० णभाष्ये । स्वमतेपरापरविद्यात्वमुपाधिभेदेनैकत्रैवटीकाद्युक्तंव्युत्पाद्यप्रसंगात्परभाष्याद्युक्तमनूद्यनिराह ॥ यत्त्विति ॥ ननुऋगादीनांक
र्मबोधकत्वात्कथंब्रह्मपरतेतिचेत्किमेकदेशस्यान्यपरत्वमुतकृत्स्नस्य । आद्यआह ॥ उपनिषत्स्वपीति ॥ द्वितीयआह ॥ मंत्रेष्वपीति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० "ज्योतिश्चरणाभिधाना"दित्यत्रस्वप्रदर्शितन्यायेनेत्यर्थः । परापरशब्दयोर्विशेषसामान्यभावेनार्थवर्णनमयुक्तमित्याह ॥ रूपमिति ॥ "द्वेविद्येवेदितव्ये ब्रह्मविषयेपरोक्षापरोक्षरूपेद्वेज्ञानेउपादेयेइत्यर्थ"इतिरामानुजभाष्योक्तमनूद्यनिराह ॥ यत्त्विति ॥ विद्याशब्दस्यज्ञानार्थत्वसंभवेपीहतद्ग्रहणमयुक्तमित्याह ॥ ययेति ॥ ययाविद्ययाधिगम्यतेप्राप्यतइत्यर्थसंभवान्नज्ञानकारणमिहविद्याशब्दार्थइत्यतआह॥नचेति ॥

रूपंद्विविधं नीलमनीलंचेतिवद्द्वेविद्येवेदितव्ये पराचैवापराचेत्यत्र परापरशब्दयोर्विरुद्धार्थत्वप्रतीतेश्च । नहिनीलपदमनीलविशेषपरंभवति । यत्तुकैश्चिदुक्तं । परोक्षज्ञानमपराविद्या । भक्तिरूपमपरोक्षज्ञानंतुपरविद्येति । तन्न । श्रुतावृगादीनामपरविद्यात्वेनोक्तत्वात् । "ययातदक्षरमधिगम्यत"इति "येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्वतो ब्रह्मविद्या"मितिच ज्ञानकरणस्यैवपरविद्यात्वेनोक्तत्वाच्चेहविद्याशब्दस्यज्ञानार्थत्वायोगात् । नचाधिगम्यतइत्यस्यप्राप्यइत्यर्थः । अधिपूर्वस्यगमेर्ज्ञानेप्रसिद्धेः । यद्यपि "व्रजयजोर्भावेक्यप्"इत्यनेनसूत्रेणभावेक्यब्विहितः । तथापि "संज्ञायांसमजनिषदे"तिसूत्रेवृत्तौ "भावइतिनस्वर्यते"इत्युक्तत्वात् समजंतितस्यामितिसमज्या । निषीदंतितस्यामितिनिषद्येतिसमज्यादिशब्दानांभावार्थत्वाभावस्योक्तत्वाच्च क्यबंतोविद्याशब्दोवेदनकरणेपिमुख्यएव ।

प्र० ननु "व्रजयजोर्भावेक्य"बितिपूर्वसूत्रादनुवृत्तस्यभावार्थकस्यैवक्यपः "संज्ञायांसमजनिषदनिपतमनविदषुञ्शीङ्भृञिण"इतिसूत्रेविहितत्वात् "तत्प्राप्तिहेतुर्ज्ञानंचकर्मचोक्तंमहामुने । आगमोत्थंविवेकाच्चद्विधाज्ञानंतथोच्यत"इतिपराशरवचनेप्रयोगाच्चज्ञानमेवविद्याशब्दार्थइत्याशंक्याह ॥ यद्यपीति ॥ भावइतीति ॥ व्रजयजोर्भावइत्यव्यवहितभावपदंनस्वर्यते । व्यवहितंत्वनुवर्त्यतइतिभावः । तथाच "भावे ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० अकर्तरिचकारकेसंज्ञाया"मित्येतत् "कृत्यल्युटोबहुल"मितिसूत्रपर्यंतमनुवर्तते। एवंचेहभावइत्यनुवर्तमानेव्रजयजोर्भावइतिपुनर्भावग्रहणं अकर्तरिचकारकइत्यस्यव्यावर्तनेनभावएवयथास्यादित्येवमर्थं । अस्यचभावपदस्यसंज्ञायामित्यत्रानुवृत्तौहिविद्याशब्दोज्ञानएवमुख्यस्स्यात् । तत्तुनस्वर्यते । स्वरितत्वेननोच्चार्यते । नानुवर्त्यतइत्युक्तत्वात् संज्ञायांसमजनिषदेतिसूत्रेक्यबेवानुवर्तते । नत्वकर्तरिचकारकइत्येतद्व्यावर्तकं भावइत्येतत्पदं । स्वरितत्वाभावेन "स्वरितेनाधिकार"इत्युक्तस्वरितनिबंधनाधिकारशब्दितानुवृत्तेरयोगात् उत्तरत्रकृत्यल्युटइतिसूत्रपर्यंतं सामान्यतोऽनुवर्तमानेभावेकर्तृव्यतिरिक्तकारकेचक्यपोविधानाद्वेदनरूपभावइववेदनकरणेपिमुख्यएवेत्यर्थः । उक्तंचप्रक्रियाप्रसादेपि "अ

"आगमोत्थंविवेकाच्चद्विधाज्ञानंतथोच्यत"इतिपराशरवचनंतु आगमोत्थविवेकोत्थत्वाभ्यांज्ञानस्यद्वैविध्यमाह । नत्वत्रत्यपरापरशब्दयोःपरोक्षापरोक्षज्ञानार्थतां । ऊर्णनाभ्यादिरपिनिमित्तमेवेत्यन्यत्रोक्तं । "सब्रह्मविद्या"मित्यत्रचब्रह्मशब्दोनचतुर्मुखपरः । "सर्वविद्याप्रतिष्ठां येनाक्षरंपुरुषंवेदसत्य"मितिपरविद्याविषयत्वादिब्रह्मलिंगात् ।

प्र० नंतरभावग्रहणंनस्वर्यते। तेनभावादावर्थे"इति । अतएवोक्तंसुधायांजिज्ञासानये "यथार्थज्ञानतत्साधनयोर्विद्याशब्दस्ययोगरूढिभ्यांप्रवृत्तत्वा"दिति । पराशरवचनस्यगतिमाह ॥ **आगमोत्थमिति** ॥ **परोक्षेति** ॥ यथायोगमन्वयः । एवंपरविद्याविषयत्वमन्यत्रानवकाशतयासमर्थ्यप्रसंगात्परोक्तंचव्युदस्येदानींपूर्वपक्षप्रापकाणांक्रमेणसावकाशत्वमाह ॥ **ऊर्णनाभ्यादिरिति** ॥ अन्यत्र प्रकृत्यधिकरणानुव्याख्यानादौ । तथाचतद्बलादक्षरात्संभवतीत्यत्रपंचम्यानोपादानत्वमर्थः । किंतुनिमित्तत्वमेवेत्यर्थः । एतेनोपादानत्वरूपबाधकाभावेनाक्षरशब्दोक्षराधिकरणन्यायेनसावकाशइतिनचित्प्रकृतिरितिपक्षोपियुज्यतइतिसिद्धत्वान्नोक्तं । चतुर्मुखप्रापकंसावकाशयति ॥ **सइति** ॥ आदि ॥ ५१९ ॥

प्र० पदेनसार्वज्ञादिलिंगंगृह्यते । यदपिरुद्रप्रापकेशशब्दोपोद्बलकंसर्वज्ञपदमितितत्राह ॥ **यच्चेति** ॥ सर्वज्ञइत्यस्योत्तरार्धे "तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत"इतिचतुर्मुखजनकत्वश्रवणात्तस्यचरुद्रेऽनुपपत्तेरित्याह ॥ **तस्येति** ॥ "ब्रह्मणःप्रथमेकल्पेशिवःप्रथमजस्स्मृत"इत्याथर्वणभाष्योक्तस्मृतेरितिभावः ॥ **प्रकृतस्येति** ॥ विश्वहेतुतयाप्रकृतस्येत्यर्थः ॥ **सूत्रइति** ॥ "विशेषणभेदव्यपदेशाभ्यांचनेतरा"वितिसूत्रे सार्वज्ञविशेषणादित्युक्तमित्यर्थः । ननुयौगिकत्वेसर्वविदित्यनेनपुनरुक्ततोक्तेत्यतआह ॥ **सर्वविदिति** ॥ **त्रेधेति** ॥ सामान्यविशेषतयावा सर्वविंदतिलभतइतिवा सर्वमुत्पादयतीत्युत्पत्त्यर्थकत्वेनवा विदिधातुर्नेयइत्युक्तमित्यर्थः । अत्ररामानुजभाष्यादौ "विशेषणभेदे"तिहेतुद्वयस्यप्रत्येकंप्रधानादिनिरासकत्वमुपेत्यैकैकस्यप्रधानादिमात्रनिरासकत्ववर्णनंदूषितं । भाष्येतुविशेषणादित्यस्यप्रधानमात्रव्यावर्तकत्वंभेदव्यपदेशस्यब्रह्मरुद्रमात्रनिषेधकत्वमुक्तं । तत्रपरोक्तदूषणालग्नतांवक्तुमक्षरस्यसर्वज्ञत्वविशेषणेकिंलब्धमित्यतःप्रवृत्तं "यस्सर्वज्ञस्सर्वविद्यस्यज्ञानमयंतपइतिविशेषणान्नप्रकृति"रितिभाष्यमाक्षिप्यसमाधत्ते ॥ **यद्यपीति** ॥ प्रकृतिपदस्यटीकायांजडपरत्वेनवर्णनस्यापितात्पर्यमुक्तंभवति ।

यच्चोक्तंसर्वज्ञपदंरुद्राख्यविशेष्यपरमिति तन्न । तस्यचतुर्मुखजन्यतयातज्जनकत्वायोगात् । किंतुप्रकृतस्याक्षरस्यसर्वज्ञत्वविशेषणपरं । अतएवसूत्रेविशेषणपदं । सर्वविदित्यनेनपौनरुक्त्यंचटीकायामेवत्रेधापरिहृतं । यद्यपिसर्वज्ञत्वविशेषणं चित्प्रकृतिचतुर्मुखरुद्राणामक्षरत्वनिषेधेपिहेतूकर्तुंशक्यं । विष्णोरन्यस्यमुख्यसार्वज्ञाभावात् । तथापिचित्प्रकृत्यादीनामक्षरत्वेविश्वकर्तृत्वेनसर्वज्ञत्वस्यापिशक्यशंकत्वात् । श्रुतेरमुख्यसार्वज्ञविषयत्वसंभवाच्चजडप्रकृतिमात्रनिषेधेभाष्येहेतूकृतं ।

गु० इत्यर्थः । नस्वर्यते नानुवर्ततइत्यर्थः । अन्यत्र न्यायामृते । उपादानत्वसंगइत्यर्थः ॥ **त्रेधेति** ॥ सामान्यविशेषतयाविदोत्पत्तौविद्लृलाभइतित्रेधेत्यर्थः । नन्वक्ष

SGDF Sri Gargeshwari Digital Foundation

प्र० सूत्रखंडव्याख्यानपरं "तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतिभेदव्यपदेशान्नविरिंचः। जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमितिवीतशोक"इतिभेदव्यपदेशादीशपदप्राप्तोपिनरुद्र"इतिभाष्यमाक्षिप्यसमाधत्ते ॥ यद्यपिचेति ॥ भेदव्यपदेशकवाक्यमाह ॥ अक्षरादिति ॥ ननुविशेषणभेदव्यपदेशाभ्यांयदिजडप्रकृतिब्रह्मरुद्राणांनिरासस्तर्हिनेतरइतिबहुवचनांतनिर्देशस्स्यादित्याशंक्यसमाधिमाह ॥ यद्यपिचेति॥ एवंपृथिव्यादिदृष्टांतोक्त्यादीनिपूर्वपक्षोपोद्बलकानिसिद्धांतबाधकानिनिरस्येदानींयदक्षरात्परतइतिनिकृष्टत्वेनश्रुतत्वरूपंबाधकांतरंतदपिनेत्याह ॥ अक्षरेति ॥ एतेनभेदव्यपदेशेतिसूत्रखंडस्याक्षरव्यक्तीनां "अपरंत्वक्षरंयासाप्रकृतिर्जडरूपिका । श्रीःपराप्रकृतिःप्रोक्ताचेतनाविष्णुसंश्रया । तामक्षरंपरंप्राहुःपरतःपरमक्षरं । हरिमेवाखिलगुणमक्षरत्रयमीरित"मितिस्मृत्याभेदव्यपदेशादित्यप्यर्थउक्तोभवति । पंचम्यंतस्यश्लोकेनान्वयः । उभयोरर्जुनशब्दवाच्यत्वेपिपरापरभावइवेहापिसइत्यर्थः । ननूक्तमत्रप्रकृतहानाप्रकृतस्वीकारौस्याताममिति । तत्र "पर

यद्यपिचभेदव्यपदेशश्चित्प्रकृतिनिषेधेपिहेतूकर्तुंशक्यः। "अक्षरात्परतःपर"इतिचित्प्रकृतितोपिभेदव्यपदेशात् । तथापिनाक्षरस्याक्षरात्परतःपरत्वं। विरोधादितिशंकोदयादक्षरभेदोक्तिंविनाचित्प्रकृतितोभेदव्यपदेशोनसिद्ध्यतीतिचतुर्मुखरुद्रमात्रनिषेधेभाष्येहेतूकृतः । यद्यपिचात्रसौत्रइतरशब्दोजडप्रकृतिचतुर्मुखरुद्रपरः। तथापिचतुर्मुखरुद्रयोश्चेतनत्वेनैकीकृतत्वाद्द्विवचनंयुक्तं। "अक्षरत्रयमीरित"मितिभाष्योक्तस्मृत्याचाक्षरव्यक्तीनांभेदव्यपदेशात् पांडवस्यार्जुनस्यैवकार्तवीर्यार्जुनादिव । ब्रह्माक्षरस्यपरतास्यादब्रह्माक्षराद्ध्रुवं ॥ १ ॥ तदुक्तंन्यायविवरणे "अक्षरात्परतःपरस्याप्यक्षरांतरत्ववचना"दिति।

गु० रात्परतःपरइतिनिकृष्टत्वेनश्रुतत्वादक्षरस्याब्रह्मतेत्यतः तथाक्षरात्संभवतीत्यत्राक्षरशब्दस्यब्रह्मपरत्वेपि अक्षरात्परतःपरइत्यत्रप्रकृतिपरत्वान्नानुपपत्तिरित्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० विद्याविषयत्वबलेनप्रकृतपरित्यागाप्रकृतग्रहणयोरुपपत्ते"रितिन्यायविवरणटीकोक्तमाह ॥ प्रकृतेति ॥ दृष्टांतभागविवरणपूर्वंश्लोकंव्याचष्टे ॥ यथेति ॥ द्वितीयस्यद्वितीयेपादे "समेषुकर्मयुक्तंस्या"दितिद्वादशेऽधिकरणे "त्रिवृदग्निष्टुदग्निष्टोमस्तस्यवायव्यास्वेकविंशमग्निष्टोमसामकृत्वाब्रह्मवर्चसकामोयजेते"त्यग्निष्टुत्संज्ञकंयागंविधायपुनश्श्रुतं "एतस्यैवरेवतीषुवारवंतीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेते"तिवाक्यमुदाहृत्यकिंपूर्वस्मिन्यागेपशुफलायरेवत्याधारंवारवंतीयंगुणोविधीयतेऽथकर्मांतरमितिसंशये विशिष्टयागांतरविधौगौरवात्प्रकृतहानादिदोषादेतच्छब्दाच्चपूर्वत्रैवफलायगुणविधिः । नचयागस्यवारवंतीयाख्यसामाश्रयत्वायोगः । अंगावतारन्यायेनयागांगस्तोत्रद्वारातदुपपत्तेः । नचाग्निष्टोमस्यस्तोत्रान्वयःफलान्वयश्चविधेयइतिवाक्यभेदः । क्रत्वर्थवारवंतीयस्याप्यग्निष्टोमस्तोत्रान्वयसिद्धेस्तस्याविधेयत्वादितिप्राप्ते आश्रयाश्रयिभावस्यक्रियाकारकरूपत्वाद्यागस्यसाम्नश्चक्रियाकारकभावायोगेनाश्रयाश्रयिभावानुपपत्तेः अंगावतारन्यायस्यांगांगिभावविषयत्वात् क्रत्वर्थत्वेनवारवंतीयस्याचोदितत्वेनान्यतोप्राप्तस्तोत्रसंबंधस्यफलसंबंधस्यचविधौवाक्यभेदप्रसंगात् एतच्छब्दस्यचप्रस्तूयमानपरत्वाद्विशिष्टंक

प्रकृताप्रकृतत्यागस्वीकारौबाधकेसति । दोषायनैवैतस्यैवरेवतीष्वितिवाक्यवत् ॥ १ ॥ यथा "एतस्यैवरेवतीषुवारवंतीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेते"त्यत्रयजेःप्रकृतिवाचिन्येतच्छब्देसत्यपि प्रकृताग्निष्टुदाख्ययागत्यागोप्रकृतयागांतरस्वीकारश्चदोषायनैवभवतः । प्रकृतपरत्वेवाक्यभेदात् । तथा "अक्षरात्परत"इत्यस्यप्रकृतादृश्यत्वादिगुणकाक्षरपरतायाबाधितत्वात्त्यागोप्रकृतप्रकृत्याख्याक्षरस्वीकारश्च ।

गु० अक्षरत्रयमीरितमिति ॥ नन्वेवंप्रकृतहानाप्रकृतस्वीकारापत्तिरित्यतआह ॥ प्रकृतेति ॥ नसारूप्यनियमइति ॥ नखलुबाध्यसारूप्यनिबंधनतस्सर्वौवि

SGDF
Sri Gargeshwari Digital Foundation

प्र० मौतरमितिसिद्धांतितं । अत्रयथावाक्यभेदबलेनैतच्छब्दश्रवणेपिप्रकृतत्यागाप्रकृतस्वीकारौनदोषाय तथात्रापीत्यर्थः ॥ **अत्रेति** ॥ आद्ये
सूत्रे "यत्तदद्रेश्य"मित्युपक्रमगतंवाक्यंविषयः । तत्राद्दश्यत्वादिगुणकइतिपुँल्लिंगनिर्देशस्तु "अक्षरात्परतःपर"इतिपुँल्लिंगपरशब्दार्थापेक्षया ।
अतएवभाष्ये "परतःपरःप्रतीयते"इत्युक्तं । एवंनिर्देशोप्यक्षरात्परतःपरस्याक्षरात्संभवतीत्यद्दश्यत्वादिगुणकाक्षरस्यैकत्वस्फोरणायादृश्यत्वा
दिगुणकमित्युक्तौ अक्षरात्संभवतीत्युक्तमक्षरंविष्णुः परतःपरस्त्वन्यइतिशंकास्यात् । सामाभूदित्येतदर्थः । विशेषणेतिद्वितीयसूत्रेतु "तप
साचीयतेब्रह्मे"तितदुत्तरवाक्यंविषयः । रूपोपन्यासाच्चेत्यत्रतुतदुत्तरं "यदापश्यःपश्यतेरुक्मवर्ण"मितिवाक्यंविषयइतितत्क्रमात्क्रमइत्यर्थः
॥ **अन्येत्विति** ॥ अद्दश्यत्वादिगुणकोभूतयोनिःकिंप्रधानमुतजीवोथपरमात्मेतिसंदेहे नूपुरादेर्हेमपरिणामस्यहेमसरूपत्वदर्शनाद्रज्जुविवर्त
स्यचभुजंगादेरज्जुसारूप्यदर्शनात् जगतोजडस्यचेतनब्रह्मसारूप्यायोगेनब्रह्मपरिणामविवर्तत्वयोरयोगात् "अक्षरात्संभवतीहविश्व"मित्यचे
तनंप्रधानमेवजगदुपादानतयोच्यते । भूतयोनिरितियोनिशब्दोयदिनिमित्तवाचीतदाजीवएवादृष्टद्वाराविश्वहेतुतयोच्यते । उक्तंच "परि
णामोविवर्तोवासरूपस्योपलक्ष्यते । चिदात्मनातुसारूप्यंजडानांनोपपद्यते । जडंप्रधानमेवातोजगद्योनिःप्रतीयतां । योनिशब्दोनिमित्तंचे

अत्रसूत्रक्रमस्तद्विषयवाक्यक्रमादिति ॥ अन्येतु ॥ अचेतनंविश्वमचेतनस्यप्रधानस्यैवविकारोनतुचेतनस्यब्रह्मणः । वै
रूप्यात् । तस्मात् "तथाक्षरात्संभवतीहविश्व"मित्यत्रप्रधानमेवहेतुतयोच्यतइतिप्राप्ते विश्वंनब्रह्मविकारःकिंतुतद्विवर्तः ।
सर्पइवरज्ज्वाः । अधिष्ठानाध्यस्यमानयोश्चनसारूप्यनियमः । तदुक्तंभामत्यां "विवर्तस्तुप्रपंचोयंब्रह्मणोपरिणामिनः । ॥ ५२१ ॥

गु० भ्रमइतिनियमनिमित्तमस्ति । आंतरादपिकामक्रोधोन्मादस्वाप्नादेर्मानसापचारात्सारूप्यानपेक्षात्तस्यापिभ्रमस्यदर्शनात् । अपिचहेतुमतिविभ्रमेतदभावादनुयोगोयु

प्र० त्कुतोजीवनिराक्रिये"ति । एवंप्राप्तेऽक्षरंभूतयोनिंप्रक्रम्यवाक्यशेषे "यस्सर्वज्ञस्सर्ववि"दित्यादिनासर्वज्ञस्यविश्वहेतुत्वावगमान्नजडंप्रधानम
द्दश्यत्वादिगुणकमक्षरं । नचाक्षरात्परतःपरइत्ययुक्तं । तत्राक्षरशब्देनमायाशक्त्यपरपर्यायस्याव्याकृतस्य अश्रुतेस्वकार्यमितिव्युत्पत्त्याक्ष
रपदेनाभिधानाद्ब्रह्मैवाक्षरात्संभवतीहविश्वमित्यत्रचोच्यते । तदुक्तंभामत्यां "अक्षरंसर्वविद्विश्वयोनिर्नाचेतनंमतं । अक्षरात्परतइतिश्रुतिस्त्व
व्याकृतेमता । अश्रुतेयत्स्वकार्याणिततोऽव्याकृतमक्षर"मिति । यत्तुसारूप्याभावान्नचिदात्मनःपरिणामःप्रपंचइति । सत्यं । विश्वंनब्रह्म
विकारः । येनसारूप्यापेक्षा । विवर्तस्तुस्यात् । विसदृशेपिशंखेपीतिमारोपदर्शनात् । सारूप्यनियमाभावादितिसिद्धांतइत्याहुरित्यर्थः ॥
अनादिवासनेति ॥ हेतुमतिविभ्रमेसादृश्याभावादनुयोगोयुज्यते । अनाद्यविद्यातद्वासनाप्रवाहपतितस्तुनानुयोगमर्हतीत्यर्थः । ज्ञेयंब्रह्मैव
नतुप्रधानंजीवात्मावोपास्यत्वेनेत्यर्थः ॥ **पादेति** ॥ तृतीयपादएवनिवेशापत्तेरितिभावः ॥ **आरंभणेति** ॥ "तदनन्यत्वमारंभणशब्दा
दिभ्य"इत्यत्रकारणाद्ब्रह्मणःपरमार्थतोऽनन्यत्वंव्यतिरेकेणाभावः कार्यस्यावगम्यतइत्यादिनात्वद्भाष्यादौविवर्तत्वस्यवर्णितत्वादितिभावः ।
आदिपदेनप्रकृत्यधिकरणादिग्राह्यं । उपलक्षणमेतत् । नविलक्षणत्वादित्यधिकरणेजगतोचेतनत्वादिनाब्रह्मविलक्षणत्वेननब्रह्मोपादानकत्वमि
तिप्राप्ते वैलक्षण्येपिगोमयवृश्चिकादेःकार्यकारणभावोपलंभात्तदुपादानकत्वंयुक्तमितिसिद्धांतितत्वेनपरिणामत्यागेनविवर्तत्वांगीकारायोगात् ।

अनादिवासनोद्भूतोनसारूप्यमपेक्षते"इति । तस्माददृश्यत्वादिगुणकंशुद्धंज्ञेयंब्रह्मैवेतिसिद्धांतइत्याहुः ॥ तन्न । निर्वि
शेषपरत्वेऽस्यपादासंगतेः । त्वन्मतेब्रह्मविवर्ततायाआरंभणाधिकरणादिषुसिद्धत्वेनविकाराश्रयणेनेहपूर्वपक्षानुदयाच्च ।

गु०ज्यते । अनाद्यविद्यातद्वासनाप्रवाहमध्यपतितस्तुनानुयोगमर्हतीतितदुक्तेरितिभावः । नन्वेतदधिकरणपूर्वपक्षदशायामारंभाधिकरणसिद्धांतानुन्मेषान्नतेनासंगतार्थ

SGDF
Sri Gurgeshwari Digital Foundation

प्रँ० एतच्छंकायास्तत्रसूत्रएवत्वन्मतेनिरासेनेहापितथापूर्वपक्षकरणायोगाच्चेत्यपिध्येयं । श्रुत्यनानुगुण्यंचाह ॥ **विवर्तेति** ॥ अन्यत्र न्यायामृतादौ ॥ **योनिपदादीति** ॥ संभवतीहविश्वमितिसंभवशब्दः अन्नंचजायतइत्यादिशब्दआदिपदार्थः । तेषांकारणत्वप्रत्यायकत्वादितिभावः । आद्यसूत्रार्थसिद्धांताननुगुणतयादूषयति ॥ **किंचेति** ॥ एवंहिसूत्रार्थः । अदृश्यादिगुणकोभूतयोनिःपरमात्मैव । यस्सर्वज्ञस्सर्वविदित्यादिनासार्वज्ञादिधर्मोक्तेरिति । तथाचैवंविधंब्रह्मकथमधिष्ठानमित्यर्थः । नन्वेतेधर्माअतात्विकाः । अतोनदोषइतिचेत्तर्हिप्रधानादिनिरासायोगात्सिद्धांतानुत्थितिरितिभावः ॥ **यच्चोक्तमिति** ॥ "दिव्योह्यमूर्तःपुरुषस्सबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाश्शुभ्र"इत्यदृश्यत्वादिगुणकभूतयोनेश्शारीराद्विलक्षणत्वेनदिव्यत्वामूर्तत्वादिनाविशेषणान्नजीवः । तथाप्रकृतस्यभूतयोनेरक्षरात्परतःपरइत्यक्षरात्परतःप्रधानात्पंचमीनिर्दिष्टात्परइतिप्रथमांतत्वेनभेदव्यपदेशान्नप्रधानंभूतयोनिरित्यर्थइत्युक्तमित्यर्थः । तत्रैतदधिकरणबोध्येनिर्विशेषेभूतयोनिशब्दार्थेब्रह्मणि तत्वतोदिव्यत्वादिविशेषणस्यभेदस्यचाभावेनताभ्यांजीवप्रधानव्यावृत्त्ययोगात् आरोपितयोस्तयोस्तत्रसंभवोस्तीतिचेत् तत्राह

विवर्तपरत्वेश्रुतौरज्जुसर्पादिदृष्टांतस्यैववक्तव्यतयोर्णनाभ्यादिदृष्टांतोक्त्ययोगाच्च । श्रुतेर्विवर्तपरत्वेऽप्रामाण्यापातस्यान्यत्रोक्तत्वाच्च । यद्भूतयोनिमितियोनिपदाद्ययोगाच्च । नहिरज्जुःसर्पस्ययोनिरित्युच्यते । नवासर्पस्ततःसंभवतीति । किंचत्वद्रीत्याधर्मोक्तेरितिसौत्रपदोपात्तैः "यःसर्वज्ञ"इत्यादिवाक्यशेषोक्तैःसार्वज्ञादिकैः तथा "सूर्यद्वारेणतेविरजाःप्रयांती"तिसूर्यद्वारेणगम्यत्वादिकैश्चधर्मैर्विशिष्टं कथंविश्वविवर्ताधिष्ठानंमुमुक्षुज्ञेयं शुद्धंब्रह्मस्यात् । यच्चोक्तंद्वितीयसूत्रे "दिव्योह्यमूर्त"इतिदिव्यत्वादिविशेषणंजीवाद्भेदकमिति । तन्न ।

गु० तेत्यतआह ॥ **विवर्तपरत्वइति** ॥ **अन्यत्रेति** ॥ न्यायामृतइत्यर्थः ॥ **इतिभाष्यार्थइत्यर्थइति** ॥ नचैवंटीकागतसूत्रखंडस्येतिखंडशब्दोव्यर्थः । नेतरा

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ वस्तुतइति ॥ विशेषणेत्यादिकं लक्षणयाशुद्धंबोधयतीतिभेदभेदकोभयभ्रमोपिनिवर्तिष्यतइत्यतआह ॥ शुद्धबोधनेनेति ॥ उपलक्ष णमेतत् । त्वन्मतेमन्मतइवविशेषहेतोरनुपन्यासेनदिव्यपुरुषत्वादिविशेषणेनप्रधानेप्ययुक्तेनद्वयोरपिनिरासासंभवात् "सकारणंकारणाधिपाधिप"इतिवदक्षरात्परतोजीवादित्यपिवक्तुंशक्यत्वेन भेदव्यपदेशेनापिद्वयोर्निरासासंभवेनप्रत्येकमेकैकनिरासायोगात् । विशेषणभेदाभ्यांक्र

वस्तुतोनिर्विशेषेऽदृश्यआरोपितविशेषणस्यतत्साध्यभेदस्यचाविरोधेपिमुमुक्षोर्भेदभ्रमनिरासायाभेदस्यैववक्तव्यत्वेनभेदभेदकयोरुक्त्ययोगात् । विशिष्टरूपजीवाभेदभ्रमनिरासायतदुक्तिरितिचेन्न । एकभ्रमनिरासायभेदभेदकविषयभ्रमद्वयोत्पादनायोगात् । शुद्धबोधनेनभ्रमद्वयनिरासेचविशिष्टाभेदभ्रमस्यापि "अदृश्यत्वादिगुणक"इतिप्रतिज्ञयैवलक्षणयाशुद्धबोधिन्यानिरासेनद्वितीयादिसूत्रवैयर्थ्यं । यच्चोक्तंतृतीयसूत्रे "पुरुषएवेदंविश्व"मितिसार्वात्म्यंरूपशब्दार्थइति । तन्न । अस्मदुक्तरुग्मवर्णइवसार्वात्म्येरूपशब्दाप्रयोगात् ।

प्र० मेणजीवप्रधाननिरासेसूत्रेनेतरइत्येवस्त्रीलिंगेतनपुंसकलिंगेनवानिर्देष्टव्यत्वेननेतरावित्यस्यास्वारस्यंच । मन्मतेतुद्वाभ्यांक्रमेणप्रधानचेतनयोर्निरासइतिनेतरावितिपुल्लिंगस्वारस्यमित्यपिध्येयं । रूपशब्दाप्रयोगादित्युपलक्षणं । त्वन्मतेपूर्वसूत्रयोरन्यतरविवक्षितैकविज्ञाननिबंधनसर्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० विज्ञानांतर्गतत्वात्सर्वात्मभावस्येत्यपिध्येयं । इदमधिकरणंपरैर्नारभ्यमेवेत्याह ॥ **अत्रापीति** ॥ **केचित्त्विति** ॥ अत्र "अथपरे"त्यादिवाक्येप्रधानपुरुषौप्रतिपाद्येते उतपरमात्मैवेतिसंशये यत्तदद्रेश्यमित्यादिनापृथिव्याद्यचेतनगतदृश्यत्वादीनांप्रतिषेधात्तज्जातीयमचेतनंप्रधानमेवादृश्यत्वादिगुणकंभूतयोन्यक्षरं । अक्षरात्परत:परइतितुतस्याधिष्ठातापुरुषएवेति तावेवात्रप्रतिपाद्याविति प्राप्ते प्रधानपुरुषयोरसंभावितस्यसार्वज्ञादिधर्मस्योक्तेःफलाभिसंधिरहितकर्माराध्यत्वपरापरविद्याविषयत्वादिनाविशेष्यमाणत्वात् अक्षरादव्याकृताद्भूतसूक्ष्मात्परतस्समष्टि

अत्रापिपरपक्षे "अदृश्यत्वादिगुणक"इतिगुणोक्तेः "विशेषणभेदव्यपदेशाभ्या"मितिजीवादिभ्यो भेदोक्तेश्चनिर्गुणत्वाद्वैतप्रतिकूलतास्फुटैव ॥ केचित्तु॥ दृश्यत्वादिगुणकत्वंप्रधानस्य अक्षरात्परतः परत्वंतुजीवस्येतिप्राप्ते द्वयमपिपरमात्मनइतिसिद्धांतइत्याहुः । तन्न । "दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपर"इत्यमूर्तत्वव्याप्तत्वाप्राणत्वादिविशिष्टत्वेनश्रुतेऽक्षरात्परतःपरेजीवत्वशंकानुदयादिति ॥ टीकाक्षरार्थस्तु ॥ पृथिव्यादिदृष्टांतेनेति ॥

प्र० पुरुषात्परइतिभेदव्यपदेशात् "अग्निर्मूर्धे"त्यादिनाजगद्रूपोपन्यासाच्चनप्रधानजीवावत्रोच्येते । किंतुपरमात्मैवेत्याहुरित्यर्थः । तदुक्तं "दृश्यत्वादेर्निषेधोविकृतिमतिभवत्यक्षरेसन्निकर्षात्पंचम्युक्ताक्षरंयत्तदवधिकपरःपंचविंशोस्तुमाभूत् । सर्वज्ञत्वादिदृष्टेःप्रथमसमुदितंत्वक्षरंब्रह्मशुद्धंपश्चादुक्तंतुजीवादिकमवधितयाभेदतस्तत्परोक्ते"रिति ॥ **जीवत्वशंकेति** ॥ उपलक्षणमेतत् । मन्मतरीत्यानिरवकाशोपादानत्वादिनापूर्वपक्षसंभवेसावकाशदृश्यत्वादिनिषेधेननियमेनाचेतनोपस्थित्ययोगात् । अवर्णमचक्षुश्श्रोत्रमित्यादिनाचेतनधर्मब्राह्मणत्वादिवर्णचक्षुरादिक

प्र० रणनिषेधेनेहभूतयोनिश्चेतनइत्यपिवक्तुंशक्यत्वेनतेनप्रधानमात्रपूर्वपक्षायोगात् । द्वितीयसूत्रेऽक्षरव्यक्तीनांभेदव्यपदेशासिद्धेस्तेनप्रकृतिनिरासस्यक्लिष्टत्वादित्यपिज्ञेयं । यत्तुकश्चिदाह अदृश्यत्वादिगुणकंप्रधानंजीवोवाशिवोवेतिविशये महदादिपरिणामिनोभूतयोनित्वसंभवात्प्रधानमक्षरं । "प्रधानममृताक्षर"मितिश्वेताश्वतरश्रुतावमृतशब्दितेजीवेऽक्षरपदप्रयोगाज्जीवोवेतिप्राप्ते सार्वज्ञादितद्धर्मोक्तेश्शिवएवेति तन्न । "नारायणाद्ब्रह्माजायते"नारायणाद्रुद्रोजायते रुद्रस्यशिरउत्पिपेष नयस्येंद्रोवरुणोनमित्रोव्रतमर्यमानमिनंतिरुद्र"इत्यादिनाजननमरणाज्ञानादिमतिरुद्रेमुख्यसार्वज्ञायोगात् । "तत्कर्महरितोषंयत्साविद्यातन्मतिर्यया । अथपरा । ययासहरिर्वेदितव्योयोसावदृश्योनिर्गुणःपरःपरमात्मा । ऋगाद्याअपराविद्ये"त्यादिवचनसिद्धपरविद्याविषयत्वरूपविष्णुलिंगविरोधेनशिवइतिसिद्धांतस्यानुदयात् । अन्यमितिप्रसिद्धेशशब्दिताद्रुद्रादस्यभूतयोन्यक्षरस्यभेदोक्तेश्च । "तामक्षरंपरंप्राहुःपरतःपरमक्षरं । हरिमेवे"त्यादिस्मृतिविरोधाच्च । आथर्वणभाष्योदाहृतानेकवचनविरोधाच्चेत्यादिध्येयं । "यथोर्णनाभिस्सृजतेगृह्णतेचे"तिश्रवणादूर्णनाभ्यादिदृष्टांतेनेतिवाच्येपृथिवीत्याद्युक्तिष्टीकायांनयुक्तेत्याशंक्याह॥ **श्रुताविति** ॥ "ऊर्णनाभिपृथिव्यादिदृष्टांतेनाक्षरस्यजगदुपादानत्वमुक्त्वे"तितत्वप्रदीपवाक्यंत्वतद्गुणसंविज्ञानाश्रयेणवा ऊर्णनाभिदेहस्योपादानत्वाभिप्रायेणवा कथंचिन्नेयमितिभावः । "तच्चतस्यामक्षरात्परतःपरइतिसामानाधिकरण्येनोपपन्न"मितिवाक्यंसामानाधिकरण्येहेतू

श्रुतावर्णनाभिदृष्टांतस्यप्राथम्येपितत्रसृजतइत्यनेनकर्तृत्वप्रतीतेःपृथिव्यादीत्युक्तं ॥ सामानाधिकरण्येनेति ॥

गु० वित्यस्यव्याख्यातत्वेनव्यावर्त्यत्वोपपत्तेरितिज्ञेयं । नन्वित्युक्त्वाप्रतीयतइतिवचनंप्रतिश्रुतेःकर्तृत्वात्प्रतीतिंप्रतिपुरुषस्यकर्तृत्वेनसमानकर्तृत्वाभावात्क्त्वाप्रत्ययानुप

SGDF Sri Gargeshwari Digital Foundation

प्र० क्त्याव्यनक्ति ॥ **चित्प्रकृतेरिति** ॥ द्वितीयसूत्रे “तपसाचीयतेब्रह्मेत्यत्राज्ञानप्रतीतौतन्निरासाय यस्यज्ञानमयंतपइत्युक्तार्थेहेतुतयाऽदृश्यत्वादिगुणकस्यसार्वज्ञविशेषणोक्ते”रितिवाक्यंव्यनक्ति ॥ **तपसेति** ॥ तपसासंबध्यतेब्रह्मकर्तृ । अतपदितिफलितोर्थः । अर्थांतरंविशदयति ॥ **सूत्रेति** ॥ पूर्वपक्षभाष्येऽनुपपत्तिंसमाधत्ते ॥ **इत्युक्त्वेति** ॥ तत्रयथावर्तमानइत्याद्यध्याहारस्तथात्रापि इत्युक्त्वाइतिश्रुतेवाक्यइतिवा इत्यभिधानात्पर:प्रतीयतइतिवाऽध्याहारेणयोज्यमितिभावः ॥ ७ ॥ **अदृश्यत्वाधिकरणं** ॥ ६ ॥

चित्प्रकृतेरुत्तमादुत्तमस्याभावेनाक्षरात्परतइतिपंचम्योर्वैयधिकरण्यायोगादितिभावः ॥ [३८।१३]**उक्तार्थेहेतुतयेति** ॥ तपसाचीयतइत्यत्रालोचनार्थेनतपःशब्देनाज्ञानप्रतीतौतन्निरासाय “यस्यज्ञानमयंतप”इत्यनेनोक्तेपूर्णज्ञानत्वेहेतुतयासार्वज्ञोक्तेरित्यर्थः ॥ [३८।१६]**सूत्रखंडस्यार्थांतरमाहेति** ॥ सूत्रेविशेषणशब्दस्यनकेवलंसर्वज्ञत्वविशेषणादित्येवार्थः । किंतुपरतःपरत्वविशेषणादित्यप्यर्थः । एवं भेदशब्दस्यहिरण्यगर्भाद्रुद्राद्वाभेदमात्रंनार्थः । किंत्वक्षरव्यक्तीनांभेदोपि । तथाचाक्षराणांभेदव्यपदेशादक्षरात्परतःपरत्वमक्षरस्यैवविशेषणमित्यपिसूत्रयोजनेतिभाष्यार्थइत्यर्थः । “इत्युक्त्वाप्रतीयत”इतिभाष्येक्रिययोःसमानकर्तृकत्वाभावेपिक्त्वाप्रत्ययो “यदोर्वंशंनरःश्रुत्वासर्वपापैःप्रमुच्यत”इतिवद्द्रष्टव्यः ॥ ७ ॥ **अदृश्यत्वाधिकरणं** ॥ ६ ॥

गु० पत्तिरित्यतआह ॥ **इत्युक्त्वेति** ॥ श्रवणंप्रतिपुरुषस्यमोचनंप्रतिचपापानांकर्तृत्वेनसमानकर्तृत्वाभावेनक्त्वाप्रत्ययानुपपत्तिः । यदिचतत्रश्रुत्वास्थितइतिशेषपूरणेनसमानकर्तृत्वंतर्हिप्रकृतेपिविचार्यमाणइतिशेषपूरणेनसमानकर्तृत्वमित्यभिप्रायः ॥ ७ ॥ **अदृश्यत्वाधिकरणं** ॥ ६ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ॐवैश्वानरस्साधारणशब्दविशेषात्ॐ॥अत्रटीकायां "लोकतोन्यत्रप्रसिद्धवैश्वानरनाम्नःपाचकत्वाद्यनेकलिंगसमन्वयसिद्धये"इत्यादिनास्यनयस्यात्रपदेंऽतर्भावउक्तः । सचसुधायां "अस्याधिकरणस्यनात्रांतर्भावस्संभवति । नामात्मकशब्दसमन्वयार्थत्वात् । नापिपूर्वत्र । लिंगसमन्वयस्याप्यत्रसिद्धत्वात् । नचोभयबहिर्भावः । अन्यत्रप्रसिद्धशब्दविषयत्वात् । नचावक्तव्यता । समन्वयासिद्धिप्रसंगात्। तत्कथमित्यतोलिंगाधिकेत्यत्रांतर्भावस्समर्थितः । यद्वापादद्वयार्थत्वेनैकत्रप्रवेशानुपपत्तेः पादद्वयशेषोय"मित्यादिनाग्रंथेनविवृतः । तत्रलोकतोन्यत्रप्रसिद्धेत्यंशस्यसूत्रविरोधशंकांसमाधातुमाह ॥ **अत्रयद्यपीति** ॥ उत्तानदृशांसमाधिद्वयमनूद्यनिराह ॥ **तथापीति** ॥ नाम्नउभयत्रप्रसिद्धत्वेपीत्यर्थः ॥ **प्रथमेति** ॥ नामांशेनतृतीये लिंगांशेनलिंगपादेंऽतर्भावप्राप्तौ प्रथमस्यलिंगपादांतर्भावस्यातिक्रमेकारणाभावाच्चे

॥ ॐवैश्वानरःसाधारणशब्दविशेषात्ॐ ॥ ॥ अत्रयद्यपिवैश्वानरनाम्नःसूत्रएवाग्नाविष्णोःसाधारण्यस्योक्ततयोभयत्रप्रसिद्धता । तथाप्यन्यत्रप्रसिद्धपावकत्वादिबहुलिंगसमन्वयस्याप्यत्रोक्तेर्बह्वनुग्रहस्यचन्याय्यत्वात् प्रथमातिक्रमेकारणाभावाच्चपादसंगतिरित्येके । इतरेतु । अन्यत्रप्रसिद्धलिंगांशेनद्वितीयपादसंबंधादुभयत्रप्रसिद्धनामांशेनचतृतीयपादसंबंधादुभयानुग्रहायपादद्वयमध्येस्यनिवेशइत्याहुः । तन्न । "अन्यत्रप्रसिद्धवैश्वानरनाम्न"इतिटीकाविरोधात् । सूत्रोपात्तवैश्वानरशब्दस्यान्यत्रप्रसिद्धिसंभवे उक्तकल्पनद्वयायोगाच्च ।

गु० ॥ ॐवैश्वानरस्साधारणशब्दविशेषात्ॐ ॥ अन्यथेति ॥ ब्रह्मणिमुख्यानामिंद्रादिशब्दानामग्न्यादावग्न्यादिशब्दानांचेंद्रादौप्रयोगाभावइत्यर्थः । अभि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यर्थः । संभवइत्युक्तसंभवप्रकारमेवाह ॥ **तस्मादिति**॥ संगतिः अंतर्भावरूपा । यद्याकाशोऽर्थांतरेत्यादाविव "वैश्वानरमृतआजातमग्नि"मित्यन्यत्रप्रयोगेणवा सर्वगतत्वादेरादित्यादिशब्दसामानाधिकरण्येनवा श्रुत्यंतरसामानाधिकरण्येनऽवान्यत्रप्रसिद्धतास्यात् तदा "स्थूलभुग्वैश्वानर"इत्यादौप्रयोगादितौल्यस्यविष्णावपिसत्त्वेन "श्रुत्यंतरादिभिस्तुल्ये"त्युक्तलक्षणसत्त्वेनोभयत्रप्रसिद्धतास्यात् । नचैवं । किंतु लोकप्रयोगात् । सचविष्णौनेतिनोभयत्रप्रसिद्धतेत्यर्थः । सौत्रोक्तेष्टीकारीत्यागतिमाह ॥ **सूत्रोक्तमिति** ॥ "अतःप्रसिद्धिलिंगयोरुभयो

तस्मादित्थंपादसंगतिः । वैश्वानरशब्दस्यश्रुत्यंतरेऽग्नौप्रयोगाद्वाविषयवाक्येऽग्निशब्दसामानाधिकरण्याद्वान्यत्र प्रसिद्धतानाभिप्रेता । येन "स्थूलभुग्वैश्वानरःप्रथमःपाद"इतिश्रुत्यंतरेविष्णावपिप्रयोगाद्वा "आत्मानंवैश्वानर" मितिविषयवाक्ये "गौणश्चेन्नात्मशब्दा"दित्यत्रविष्णुसाधारणतयोक्तात्मशब्दसामानाधिकरण्याद्वोभयत्रसिद्धता स्यात् । किंतुलोकतः । अतएवटीकायां "लोकतोन्यत्रसिद्धे"त्युक्तं । सूत्रोक्तंसाधारण्यंत्वन्यत्रप्रसिद्धेर्विष्णुलिंगानांचनिरवकाशत्वेनतुल्यबलतया । नतुवैश्वानरशब्दस्योभयत्रप्रसिद्ध्येत्यन्यत्रप्रसिद्ध्यविघातेनैवटीकायांदर्शितं ।

प्र० रपिनिरवकाशत्वेनवैश्वानरश्रुतेरग्नाविष्णोस्साधारण्यमेवस्या"दितिटीकायामित्यर्थः। यातुन्यायविवरणटीकायांरूढ्यांतरधिकरणन्यायेनच विष्णौतदितरत्रश्रुतेस्साधारण्योक्तिस्साऽभ्युपेत्यवादेननेया । यापितत्वप्रदीपे "पूर्वत्रान्यत्रप्रसिद्धिमात्रप्रतिषेधाज्ज्वलनजनार्दनयोस्साधारणस्यवैश्वानरशब्दस्य विष्णावेवप्रवृत्तिप्रदर्शनेनोभयत्रप्रसिद्धोभयविधपदकदंबकसमन्वयावसरसूचनमाचरत्यग्नाविष्णोरित्यादिने"त्युक्तिस्सापि टीकानुसारात् यद्यप्येवंसाधारण्यंतथापिलोकतोन्यत्रप्रसिद्धत्वादत्रनिवेशइत्याद्यभिप्रायेणयोज्येतिभावः । टीकायांवैश्वानरशब्दस्यनामत्वो

प्र० क्तेर्मूलंवदन्ननुभाष्यविरोधशंकांचनिराह ॥ **अत्रेति**॥ **लोकेऽग्नौरूढत्वाच्चेति** ॥ "बहुभीरूढनामभि"रित्यनुभाष्योक्तेः "श्रुतेरपिप्रसिद्धितोनिरवकाशत्वा"दितिटीकोक्तेः, "श्रुतेर्देवताभूतविशेषयोरूढत्वा"दितिन्यायविवरणटीकोक्तेः, "वैश्वानरशब्दस्याविद्वद्रूढ्याग्निविषयस्यापी"तिसन्न्यायरत्नावल्युक्तेश्चेतिभावः । एतेननामत्वेफलतोलिंगत्वेसाक्षादेवैतत्पादांतर्भावोस्यसूचितः । एवं "लोकतोन्यत्रे"त्यादिटीकांव्याख्याय "श्रुत्यादिसंगति"मित्यादिटीकांव्यनक्ति ॥ **अनंतरेति** ॥ पूर्वाधिकरणतद्विषयवाक्याभ्यामेतदधिकरणैतद्विषयवाक्ययोरित्यर्थः । आक्षेपप्रकारश्चाग्रेस्पष्टः । नचतद्भाष्यंप्रयोजनमात्रपरं । उभयपरत्वेबाधकाभावादितिभावः । एतेन "सार्वात्म्यरूपोपन्यासादक्षरंब्रह्मव

अत्रानुव्याख्याने "श्रुतिलिंगाधिकापरे"तिवैश्वानरशब्दस्यनामत्वोक्तेर्लोकेऽग्नौरूढत्वाच्चटीकायांनामतोक्ता । "विश्वजीवांतरत्वाद्यैर्लिंगै"रितिसंक्षेपभाष्यकारीयालिंगत्वोक्तिस्तुसिद्धांतेब्रह्मणियौगिकत्वाभिप्राया । अनंतरंसंगतिस्तुगताधिकरणोक्तसर्वगतत्वाक्षेपेणपूर्वपक्षोत्थानादितिभाष्यएवोक्ता । अत्रवैश्वानरः

प्र० र्णितं । जाठरादावनैकांत्यशंकातस्यनिरस्यत"इतिकल्पतरूक्तसंगतिर्निरस्तावेदितव्या । वैश्वानरनामसन्निहितोन्मानत्वमुखेनपूर्वत्रप्रधानसूत्रप्रतिज्ञोपात्तसर्वगतत्वाक्षेपसंभवेपीदृशस्यायुक्तत्वात् । सार्वात्म्येरूपशब्दाप्रयोगेनत्वद्रीत्यासार्वात्म्यस्य "रूपोपन्यासादि"तिसूत्रार्थतया वर्णनायोगस्योक्तत्वाच्चेति । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ छांदोग्येपंचमेऽध्यायेवैश्वानरविद्यायां "प्राचीनशालसत्ययज्ञेंद्रद्युम्नजनबुडिलोद्दालकास्समेत्यमीमांसांचक्रुः । कोनआत्माकिंब्रह्मेति । तेहमीमांसमानानिश्चयमलभमानाःकेकयंराजानमुपसद्योचुः । आत्मानमेववैश्वानरंसंप्रत्यध्येषि । तमेवनोब्रूही"त्युपक्रम्यश्रूयते "यस्त्वेतमेवंप्रादेशमात्रमभिविमानंवैश्वानरमुपास्ते । ससर्वेषुलोकेषुसर्वेषुभूतेषुस

SGF Sri Gargeshwari Digital Foundation

प्र० वेष्वात्मस्वन्नमत्ति। तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्धैवसुतेजाश्चक्षुर्विश्वरूपःप्राणःपृथग्वर्त्मासंदोहोबहुलोवस्तिरेवरयिःपृथिव्येवपादावुर एववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्योमनोन्वाहार्यपचनआस्यमाहवनीय”इत्यादि । तथावाजसनेयेसप्तमे “अयमग्निर्वैश्वानरोयोयमंतःपुरुषेये नेदमन्नंपच्यतेयदिदमद्यते”इत्यादि । तथावैश्वानरसूक्ते “मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं । कविंसंम्राजमथितिंजना नामासन्नापात्रंजनयंतदेवाः”इत्यादि । तत्रसर्वत्रश्रुतोवैश्वानरोविषयइत्यर्थः । अतएवटीकायां “सवैश्वानर”इतितच्छब्देनसंगत्यर्थंपूर्वप्रक्रु तछांदोग्यस्थवैश्वानरप्रतीतावपितदुपलक्षणमितिभावेनवैश्वानरइतिसामान्योक्तिः । वैश्वानरइत्युपलक्षणं । प्राक्पादद्वयेनसमन्विताअशेष विद्यागताअशेषसूक्तस्थाअग्न्यादिनानाशब्दाअप्युदाहरणमितिध्येयं । प्राचीनसर्वनयोक्ताक्षेपसमाधानार्थत्वादस्याधिकरणस्य । अतएवाग्रे

किमग्न्यादिःकिंवाब्रह्मेतिचिंता ।

प्र० ग्निवैश्वानरादिशब्दानामित्युक्तिः। “वैश्वानरादयश्शब्दाअपितद्वाचिन”इत्यनुव्याख्याने। सुधायां “वैश्वानरादयइत्यादिशब्दप्रयोगाद्वैश्वा नरशब्दस्योपलक्षणत्वमितिदर्शयती”त्युक्तं। आत्मशब्दादिसाधकोपेतत्वेनप्राधान्यात्सूत्रादौतस्यैवोक्तिः ॥ **अग्नीति** ॥ देवतेत्यर्थः। आदि पदेनभूताग्निः । एतेनटीकायामन्योवेत्युक्तान्यशब्दार्थोविवृतः । अत्रब्रह्मेतिचिंतानंतरंवैश्वानरश्रुतेरन्यत्रप्रसिद्ध्यनुसारेणसमाख्याप्रकरण लिंगानिविष्णुप्रापकाण्यग्नौनेयानि उततदनुसारेणप्रसिद्धिर्नेयेतिचिंता तदर्थंसमाख्याद्यनुरोधेनप्रसिद्धेर्नयनेबाधकमस्त्युतनेतिचिंता टीका यांपूर्वोत्तरप्रापकयोस्तौल्योक्तेस्तामनुसृत्यनोक्ता । स्वरीत्यातुवक्तव्यैव । रीतिद्वयसाधारण्येनतु श्रुत्यादिकंब्रह्मणिनेतुंनशक्यमुतशक्यमिति

SGDF Sri Gargeshwari Digital Foundation

प्र० चिंताध्येया। एतदुपयुक्तांप्रसिद्धेर्निरवकाशत्वरूपांचिंतामाह ॥ तदर्थमिति ॥ मुख्यत्वइति ॥ सिद्धांतिनालक्षणादेरंनगीकारादेवमुक्तं। यदिवक्ष्यमाणदिशानयुक्तातदानिरवकाशलोकप्रसिद्ध्यादिवशादग्न्यादिरेववैश्वानरादिशब्दार्थः । यदातु "साक्षादप्यविरोधं अभिव्यक्ते" रित्यादिवक्ष्यमाणदिशायुक्तातदाबाधकाभावात्समाख्यादिवशाद्ब्रह्मैवेतिसिद्धांतेफलफलिभावोग्रेपूर्वपक्षादिविवरणरीत्यास्पष्टइतिभावः । अत्र टीकायां "श्रुतेरपिप्रसिद्धितोनिरवकाशत्वा"दित्यादिनाश्रुतेर्निरवकाशत्वमात्रप्रयुक्तप्राबल्योक्तिप्रतीतावपि "लिंगस्यश्रुतितोदुर्बलत्वा"दितिपूर्ववाक्येनश्रुतित्वप्रयुक्तप्राबल्यमप्यभिमतं । एवंचवैश्वानरश्रुतेश्श्रुतित्वनिरवकाशत्वरूपोभयप्रयुक्तप्राबल्यात्पाचकत्वादिलिंगस्यचनिरवकाश

तदर्थमग्निवैश्वानरादिशब्दानांब्रह्मणिमुख्यत्वेग्न्यादिशब्दानांप्रसिद्धाग्न्यादौलौकिकव्यवहारः तत्तत्सूक्तानां तत्तद्विद्यानांचब्रह्मपरत्वेवैदिकसूक्तव्यवस्थाविद्याव्यवस्थाचनयुक्ता उतयुक्तेति ॥ पूर्वपक्षस्तु ॥ "आत्मानं वैश्वानरमुपास्ते अयमग्निर्वैश्वानर" इत्यादौश्रुतोवैश्वानरोग्निदेवतावाभूतंवा । वैश्वानरश्रुतेस्तत्रप्रसिद्धेः ।

प्र० त्वनिमित्तप्राबल्यात् एवंप्रबलश्रुतिलिंगबलेनसमाख्याप्रकरणलिंगरूपविष्णुप्रापकाणांबाधादग्निरेववैश्वानरः। टीकायांपूर्वोत्तरपक्षप्रापकयोर्द्वयोरपिनिरवकाशत्वेनतौल्योक्तिस्त्वभ्युपेत्यवादेनेतिभावेन "नायंवैश्वानरोविष्णुः । किंत्वि"त्यादिटीकांविवृण्वन्पूर्वपक्षयति ॥ पूर्वपक्षस्त्विति ॥ टीकायामयमित्युक्त्याप्राक्प्रकृतछांदोग्यस्थस्यपरामर्शउपलक्षणमितिभावेनछांदोग्यबृहदारण्यकस्थयोर्वाक्यविशेषयोरुक्ति रात्मानमिति, अयमग्निरितिच। आदिपदेन "वैश्वानरमृतआजातमग्नि" मित्यस्यामृचीतिगृह्यते । "अतएवनदेवताभूतंचे" तिसूत्रव्यावर्त्यमाह ॥ अग्निदेवतेति ॥ भूतमिति ॥ तेजोरूपंजडमित्यर्थः । "नचवाच्यंसर्वगतत्वलिंगाद्वैश्वानरोविष्णु" रितिटीकोपलक्षणंसूत्रोक्तसाधकसा

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्रस्येतिभावेनतांव्याचष्टे ॥ नचेति ॥ "स्मर्यमाण"मितिसूत्रोपात्तात् "अहंवैश्वानरोभूत्वे"तिस्मृतिसमाख्यानात् "पुरुषविधमपी"तिसूत्रां शोक्तात् "शीर्ष्णोद्यौस्समवर्तते"तिपुरुषसूक्तसमाख्यानात् "असंभवा"दितिसूत्रखंडोक्तात् "कोनआत्मे"तिब्रह्मप्रकरणादित्यर्थः । "असंभ वात्पुरुषविधमपी"त्यंशोक्तप्रकरणश्रुतिसमाख्याभ्यामुपलक्षणत्वेनोपात्तलिंगान्यप्याह ॥ सर्वइति ॥ अभिविमानपदेन "अभितोविगतं मानंमर्यादायस्ये"तिटीकोक्तव्युत्पत्त्योक्तंसर्वगतत्वं । एतेन "अंतरधिकरणन्यायेनविष्णावपिश्रुतेर्वृत्तिरस्तीतिचे"दितिन्यायविवरणटीकोक्त न्यायोविष्णुप्रापकसत्त्वरूपोविवृतः । "लिंगस्यश्रुतितोदुर्बलत्वा"दित्यपिटीकावाक्यमुपलक्षणत्वेनवाकैमुत्यलब्धत्वाभिप्रायेणवाव्याचष्टे ॥

नच "अहंवैश्वानर"इतिश्रुतिसमाख्यानात्पुरुषसूक्तसमाख्यानात् "कोनआत्माकिंब्रह्मे"तिप्रकरणात् "सर्वेपाप्मानःप्रदूयंते" इतिस्वज्ञानेनसर्वपाप्मप्रदाहसर्वगतत्वादिलिंगाच्चवैश्वानरोब्रह्मेतिवाच्यं । समाख्याप्रकरणलिंगानांश्रुतितोदुर्बलत्वात् ।

प्र० समाख्येति ॥ श्रुतितइति ॥ वैश्वानरश्रुतितइत्यर्थः । सर्वापेक्षयाश्रुतिप्राबल्यस्य "शब्दादेवप्रमित"इत्यत्रसेत्स्यमानत्वादितिभावः । अंतर्नयेतुनिरवकाशलिंगेनश्रुतिबाधोनात्रतथेतिभावः । यद्यपिसिद्धांतेसमाख्यादिकमिव "अभिविमानमात्मान"मित्यात्मश्रुतिरप्यस्ति । तथापितदाच्छादनेनवा वक्ष्यमाणदिशानिरवकाशयापरप्राबल्यन्यायेनप्रबलयाचरमवैश्वानरश्रुत्यापूर्वस्यात्मशब्दस्यकथंचिन्नेयत्वादितिवा त स्याप्यन्यादिशब्दवद्विष्णौमुख्यत्वंनेतिवाऽभिप्रायेणतदनुक्तिः । तथाचवक्ष्यति "आत्मश्रुतेश्चनत्रह्मणिमुख्यते"ति । "नचलिंगस्यनिरवका ॥ ५२७ ॥
शत्वेनप्राबल्याच्छ्रुतिबाधकत्व"मितिशंकोत्तरेअप्युपलक्षणमितिभावेनस्वयंसमाख्यादीनांबहुत्वात्प्राबल्यमितिशंकांतरंहृदिकृत्वासमाधिमाह ॥

प्र० बहुत्वेति ॥ उक्तंहीति ॥ विष्णुतत्वनिर्णयोदाहृतब्रह्मतर्कवाक्यइत्यर्थः । सः स्वभावः । उपजीव्यत्वनिरवकाशत्वश्रुतित्वरूपइत्यर्थः । यद्यपिपूर्वपक्षेपिवैश्वानरश्रुतिरिवायमग्निरित्याद्यग्निश्रुतिः "वैश्वानरेतद्धुतंभवति । हृदयंगार्हपत्योमनोन्वाहार्यपचनआस्यमाहवनीयइति । येनेदमन्नंपच्यत"इत्यादिनाश्रुतानिहोमाधिकरणत्वगार्हपत्याद्यंगकत्वपाचकत्वादिलिंगानिचसंतीतिप्रापकबाहुल्यमस्ति । तथापिटीकायांश्रुति तइत्युक्त्यनुरोधेनतन्मात्रेणैवबहुत्वकृतप्राबल्यस्यबाधउक्तः । एवंश्रुतेःश्रुतित्वप्रयुक्तप्राबल्यमुपपाद्येदानींनिरवकाशत्वेनापिप्राबल्यंवक्तुं "अं तरधिकरणन्यायेनविष्णावपिश्रुतेर्वृत्तिरस्तीतिचे"दितिन्यायविवरणटीकोक्तमत्रापिग्राह्यमितिभावेन "नचलिंगस्ये"त्यादिटीकांव्याचष्टे ॥ न

बहुत्वप्रयुक्तप्राबल्यादपिस्वभावप्राबल्यस्यबलवत्त्वाच्च । उक्तंहि "द्विविधंबलवत्त्वंचबहुत्वाच्चस्वभा वतः । तयोःस्वभावोबलवानुपजीव्यादिकश्चस"इति । नचांतराद्यधिकरणन्यायेनवैश्वानराग्न्यादिश्रु तिर्ब्रह्मणिमुख्येतिसावकाशा । लिंगंतुनिरवकाशमितिवाच्यं । तथात्वेश्रुतेरन्यत्रप्रसिद्ध्ययोगात् ।

प्र० चेत्यादिना ॥ अंतरादीति ॥ अंतस्तद्धर्मेत्यत्राधिदैवगताशेषनाम्नांनिरवकाशलिंगेनविष्णौमुख्यत्वोक्तेः "चेतोर्पणनिगदा"दित्यत्राशेषना म्नांविष्णावुपासनार्थत्वोक्तेः "ज्योतिश्चरणे"त्यत्राशेषसूक्तस्थाग्निज्योतिरादिशब्दानांविष्णौमुख्यत्वोक्तेरितिभावः । केचित्तु "अंतरउपपत्ते" रित्यत्राग्निप्रयुक्ताहंशब्दस्यविष्णौमुख्यत्वोक्तेस्तन्न्यायेनेत्यर्थइत्याहुः । तच्चिंत्यं । शास्त्रदृष्ट्येत्यत्रैवमुख्यत्वसिद्ध्याऽत्रभाष्यादौतस्यैवस्मारणात् । तावताग्निशब्दस्यविष्णौमुख्यत्वासिद्धेश्चेति । अंतरधिकरणन्यायेनेतिक्वचित्पाठः ॥ तथात्वइति ॥ लिंगनिरवकाशत्वेनश्रुतेर्ब्रह्मणिमुख्य त्वइत्यर्थः । तथाचनिरवकाशयाश्रुत्यालिंगमेवाग्नौसावकाशयितव्यमितिभावः । यद्यपिप्राक्समाख्यादिकमपिप्रकृतं । तथापिटीकायां

SGDF Sri Gangadharan Digital Foundation

प्र० "लिंगस्यनिरवकाशत्वेने"तिलिंगमात्रोक्तेस्तदनुरोधेनवा लिंगनिरवकाशत्वेननिरवकाशश्रुतिबाधोनेतिसिद्धौतादृशसमाख्यादिनानेति कैमुत्यसिद्धत्वाद्वा पूर्वत्र "अंतस्तद्धर्मोपदेशात् । आकाशस्तल्लिंगात् । अतएवप्राण"इत्यादौसर्वत्रलिंगनिरवकाशत्वमाश्रित्यश्रुतेर्ब्रह्मणिमुख्यत्वोक्तेस्तत्सर्वाक्षेपायतत्साधारण्योक्त्यर्थत्वाद्वालिंगमात्रोक्तिः । तथाचवक्ष्यति "अतीतसर्वाधिकरणाक्षेप"इति । टीकायांलिंगमात्रोक्ताविदमेवबीजमित्याहुः । "नहिवैश्वानरश्रुतेरग्न्यादिविषयत्वाभावेऽन्यव्यवहारस्यगत्यंतरमस्ती"तिटीकांविवरितुंसंभावितगत्यंतरमाशंक्यनिराह ॥ **नचेति** ॥ चतुर्थपादे "समाकर्षा"दित्यधिकरणे शब्दानांविष्णावेवमुख्यत्वेऽन्यत्रामुख्यत्वापत्त्यामाणवकादावग्न्यादिशब्दप्रसिद्ध्यदर्शनेना

नच "जगद्वाचित्वा"दितिवक्ष्यमाणन्यायेनलोकेऽन्यत्रैवशब्दव्यवहारात्प्र सिद्ध्युपपत्तिरितिवाच्यं । ब्रह्मणिमुख्यत्वेऽन्यत्रव्यवहारस्यैवायोगात् ।

प्र० न्यत्रप्रसिद्ध्ययोगाद्विष्णावेवप्रसिद्ध्यापत्तेश्चेतिशंकायां लोकस्यजगत्येवशब्दव्यवहारेणतत्रैवतच्छ्रोतॄणांव्युत्पत्तेर्विष्णौतथाबहुलव्यवहाराभावेनव्युत्पत्त्यभावाच्च जगतिप्रसिद्धेः अग्निर्माणवकइतिव्यवहारादनवगताग्निशब्दमुख्यार्थस्यमाणवकेऽग्निशब्दव्युत्पत्त्यातस्यतत्रैवप्रसिद्धिवदनवगतभगवद्रूपमुख्यार्थस्यभगवदज्ञानमूलत्वेनान्यथोपपत्तेरिति "जगद्वाचित्वा"दितिगुणसूत्रेणोक्तन्यायेनेत्यर्थः । "साक्षादप्यविरोध"मितिसूत्रव्यावर्त्यमाह ॥ **ब्रह्मणीति** ॥ एतेनात्रनयेऽन्यत्रव्यवहारेसाक्षादितिसूत्रेणोक्तेसतितस्यगत्युक्तिस्तत्रयुज्यते । सएवायमयुक्तइत्याक्षिप्यतइतितेनगतार्थत्वमपिनेतिदर्शितं । तथाचानुवक्ष्यतिसमाकर्षादित्यत्रटीकायां "सर्वशब्दानांपरमात्मैकवाचित्वेऽन्यत्रव्यवहाराभावा ॥ ५२८ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० पाता”दिति । “साक्षा”दितिसूत्रव्यावर्त्यमन्यत्रव्यवहारयोगमाशंकते ॥ **यदिचेति** ॥ “आनुमानिकमप्येकेषामितिचेन्नशरीररूपके”तिनयेऽव्यक्तादिशब्दवाच्यंविष्णुरन्यद्वेतिसंशये अव्यक्तादिशब्दानांप्रधानादावेवप्रसिद्धेः परमात्मैकवाचित्वेप्रधानादौतद्व्यवहाराभावापातात् अवाचकत्वेप्यनभिज्ञानादिनाव्यवहारेचाव्यवस्थापातादन्यदितिप्राप्ते परमात्मतंत्रत्वेनशरीरसमेप्रधानादौतत्तच्छब्दवाच्यस्यपरमात्मनोविन्यस्ततयातत्संबंधेनतत्रापिशब्दप्रवृत्त्युपपत्तेः प्रधानादितत्तद्वस्तुविशिष्टस्यैवविष्णोरव्यक्तादिशब्दवाच्यत्वस्वीकारेणतत्तच्छब्दमुख्यार्थेश्वरसंबंधस्यतत्रतत्रव्यवस्थिततयान्यत्रव्यवहाराव्यवस्थानापत्तेर्विष्णुरेवाव्यक्तादिशब्दमुख्यार्थइतिचतुर्थपादेवक्ष्यमाणन्यायेनेत्यर्थः । “त

यदिच “शरीररूपकविन्यस्तगृहीते”रितिवक्ष्यमाणन्यायेनमुख्यार्थभूतब्रह्मसंबंधादन्यत्रप्रयोगस्तर्हिगंगादिशब्दानांतीरादाविवान्यत्रलक्षणादिःस्यात् । तथाचब्रह्मणिमुख्यानामिंद्रादिशब्दानामग्न्यादावग्न्यादिशब्दानांचेंद्रादौप्रयोगःस्यात् । नहितीरपुरुषमाणवकचित्रलिखितसिंहादौगंगामंचाग्निसिंहशब्दाएवप्रयुज्यंते ।

प्र० थासतिलोकेलक्षणेतरवृत्त्यभावापत्ते”रितिसमाकर्षनयस्थटीकावाक्यंहृदिकृत्वाह ॥ **तर्हीति** ॥ गौणीवृत्तिरादिपदार्थः । टीकोपलक्षणमितिसूचितं । मुख्यार्थसंबंधनिमित्तेनशब्दप्रयोगस्यतादृशत्वादितिभावः । अस्तुकोदोषइत्यतआह ॥ **तथाचेति** ॥ यद्यपिलोकेशब्दव्यवहाराव्यवस्थानिवर्तकं “शरीररूपकविन्यस्तगृहीतै”रित्येतदेव । नततोन्यदस्ति । अतएवटीकायां “अवाचकैर्व्यवहारेऽव्यवस्थापाता”दितिसमाकर्षनये “अवाचकत्वाविशेषेणघटादिशब्दानांपटादौव्यवहारप्रसंगा”दित्यव्यक्तनयेचाव्यवस्था “शरीररूपके”त्यादिसूत्रांशव्यावर्त्यतयैवोक्ता । प्रागुक्तदिशाव्यवस्थासमर्थनंचसुशकं । तथापिटीकायां “अवाचकै”रिति, “अवाचकत्वाविशेषेणे”तिचाव्यवस्थायामवाच

SGDF
Sri Gargeshwari Digital Foundation

प्र० कत्वस्यनिमित्ततयोपादानात् “समाकर्षादितिवक्ष्यमाणन्यायस्यात्राभिप्रेतत्वेनलक्षणानाश्रयणात्”इत्यानुमानिकसूत्रटीकोक्तदिशाशरीररूपकेत्याद्यंशतात्पर्यार्थानभिज्ञानेनयथातथासतिलोकेलक्षणेतरवृत्त्यभावःपत्तेरितिसमाकर्षसूत्रेपूर्वपक्षिणआपादनं तथाविशेषानभिज्ञस्यतत्तच्छब्दमुख्यार्थभूतेश्वरसंबंधस्यसर्वत्रसत्त्वादित्येतावन्मात्रंजानतःपूर्वपक्षिणएतदव्यवस्थापादनमितिध्येयं । अतएवटीकादौशरीररूपकेतिसूत्रेनव्यवस्थासमर्थनंस्पष्टमुक्तं । अस्माभिस्तुपूर्वविवेकार्थस्पष्टमुक्तं । अन्यथालक्षणादिवृत्त्यापादनस्यानिष्टत्वंनसिध्येत् । अस्यसमाधिस्तु “कल्पनोपदेशा”दित्यादावन्यत्रापिवाचकत्वोक्त्याभविष्यति । अतएवाग्रे “वाचकत्वाविशेषेपी”तिवक्ष्यतइति । तीरेतिसप्रयोजनलक्षणायाः पुरुषेतिरूढलक्षणायाः माणवकेतिसप्रयोजनोपचारस्य चित्रलिखितसिंहादावितितुरूढोपचारस्योदाहरणं । तीराद्यन्यलाक्षणिकादिरादिपदार्थः । एतेनलक्षणादिरित्यादिपदार्थोविवृतः ॥ **नन्विति** ॥ नद्यांघोषःसुरसरितिघोषइत्यादेरपिदर्शनादितिभावः ॥ **अन्यथेति**॥ एकएवशब्दोलक्षणीयेप्रयोज्योनतुतत्पर्यायइत्यंगीकारइत्यर्थः ॥ **वन्ह्यादीति** ॥ तस्यापिविष्णौमुख्यस्यान्यत्रलक्षणादिनैववृत्तेरितिभावः । ननुनशब्दानांब्रह्मणिमुख्यत्वेप्यन्यत्रलक्षणादिः । येनाव्यवस्था । किंतुतत्रापि “कल्पनोपदेशा”दितिन्यायेनमुख्यत्वमेव । नचाक्षादिशब्द

नतुरूढ्यायोगेनवागंगादिवाचिपदांतराणीतिनियमो
स्ति। अन्यथाग्न्यादौवह्न्यादिशब्दस्याप्यप्रयोगःस्यात्।

गु० शब्दस्यलक्षणयाऽग्न्यादिपरत्वेनैवव्यवहारोपपत्तौ तत्पर्यायशब्दांतरस्यापिलक्षणयातत्कथनेमानाभावादितिभावः। नचसमाकर्षादितिवक्ष्यमाणन्यायेनेति। कल्पनो

प्र० वदुभयत्रसाम्यापत्तिः । न्यूनाधिकभाववत्त्वादितिभावेनशंकते ॥ **नचेति** ॥ इतिन्यायेनब्रह्मणिमुख्यत्वमित्यन्वयः । तत्रहिमुख्यता किमुभयत्रतुल्याकिंवाब्रह्मण्यधिकाऽन्यत्रहीनेतिसंशये हीनत्वेमुख्यवृत्तित्वाभावात्तुल्येतिप्राप्ते योगरूढ्योरिवमुख्यत्वेपिन्यूनाधिकभावसंभवाद्ब्रह्मणिपरममुख्यत्वमन्यत्रत्वपरममुख्यत्वमितिवक्ष्यते । तेनन्यायेनेत्यर्थः ॥ **वाचकत्वाविशेषेपीति** ॥ “कल्पनोपदेशा”दितिन्यायेनहरौतदन्यत्रचेतिभावः ॥ **अमुख्यत्वमिति** ॥ किंचिन्मुख्यत्वंनतुलक्षणादिरित्यर्थः ॥ **नमुख्योस्तीति** ॥ सर्वशब्दानांलोकेतुल्यवृत्तित्वेनभृत्यजयिशब्दयोरिवभृत्येवृत्तितारतम्याभावइत्यर्थः । एतेनेत्युक्तंव्यनक्ति ॥ **अग्नीति** ॥ एवंश्रुतेर्निरवकाशतयापिप्राबल्योपपादनेन “नहिवैश्वानरश्रुतेरग्न्यादिविषयत्वाभावेव्यवहारस्यगत्यंतरमस्ती”तिटीकाविवरणेनसाक्षादितिसूत्रव्यावर्त्यमुक्त्वा इदानीं “शब्दादिभ्योंतःप्रतिष्ठानान्नेतिचे”दितिसूत्रांशोक्तलिंगनिरवकाशत्वमप्यत्रग्राह्यमितिभावेनाह ॥ **अतएवेति** ॥ प्राग्विवृतान्यस्माभिर्लिंगानि ॥ **आत्मश्रुतेश्चेति** ॥ एतेन “शब्दादिभ्य”इतिसूत्रभाष्यटीकायां “यथाखलुवैश्वानरस्यविष्णुत्वनिश्चायकास्सशब्दादिविद्यत”इत्यादिनालिंगानांवि

नच “समाकर्षा”दितिवक्ष्यमाणन्यायेनवाचकत्वाविशेषेपि राज्ञिभृत्येचजयिशब्दस्येवाग्न्यादिशब्दानांब्रह्मणिमुख्यत्वमन्यत्रामुख्यत्वंचेतियुक्तं । भृत्योजयीत्यत्रहिभृत्यशब्दस्यभृत्येमुख्यत्वात्तदन्वयायजयिशब्दस्यामुख्यता । ब्रह्मणोन्यत्रतुकश्चिदपिशब्दोनमुख्योस्ति । यदन्वयायशब्दांतरस्यामुख्यता । एतेनहानादिव्यवहारायान्यत्रप्रयोगइतिपरास्तं । अग्निव्यवहारस्याग्निशब्देनैवसिद्धेर्वह्न्यादिशब्दाप्रयोगापातात् । अतएवपाचकत्वाद्यग्निलिंगानामात्मश्रुतेश्चनब्रह्मणिमुख्यता ।

गु० पदेशादितिन्यायेनान्यत्रापिमुख्यामुख्यवृत्तीनामंगीकारात्। वाचकत्वाविशेषेपितदधीनत्वादितिन्यायेनसमाकर्षन्यायेनचब्रह्मणिमुख्यत्वेप्यन्यत्राप्यमुख्यप्रयोगस्सं

SGDF Sri Gargeshwari Digital Foundation

प्र० ष्णुप्रापकात्मशब्दसमाख्यादिनासाम्यमुक्तं तत्त्वभ्युपेत्यवादेनवासाक्षादित्यादावग्रेऽन्यत्रप्रयोगोपपत्तेर्वक्ष्यमाणत्वेनात्मश्रुत्यादेर्विष्णौमुख्यत्वस्यनिर्बाधादितिभावेनवेतिभावः । अतएवेत्युक्तंव्यनक्ति ॥ **अन्यत्रेति** ॥ "अभिव्यक्ते"रित्यादिसूत्रव्यावर्त्योक्तिपरां "वैदिकविद्याभेदव्यवहारविरोधाच्चे"तिटीकांविवृणोति ॥ **किंचेत्यादिना** ॥ इदमग्निसूक्तमित्यादिसूक्तव्यवस्था तथा इयमात्मविद्या इयंवैश्वानरविद्या इयमक्षिविद्या इयंप्राणविद्येत्यादि विद्याव्यवस्थाचनस्यादित्यर्थः ॥ **निरस्तत्वादिति** ॥ ब्रह्मणिमुख्यानामिंद्रादिशब्दानामित्यादिनानिरस्तप्रायत्वादित्यर्थः । नन्वग्निश्रुत्यादेर्विष्णुप्रापकात्प्राबल्योक्तौसूत्रभाष्यटीकाविरोधइत्याशंक्याह ॥ **टीकादाविति** ॥ जात्यानिरवकाशत्वेनश्रुतेःप्राबल्यंस्वयमुक्तं । टीकादौतुसौत्रसाधारणशब्दस्वारस्यमनुरुध्यजात्याप्राबल्यमनुपपाद्य श्रुतेर्लिंगस्यनिरवकाशत्वेनसाम्यमुपेत्यसाधारण्यमुक्तं । जात्याबलवत्त्वमस्मदुक्तरीत्याऽनुमतमेव । अतोनविरोधइतिभावः ॥ **श्रुतिलिंगयोरिति** ॥ वैश्वानरश्रुतिसर्वगतत्वलिंगयो

अन्यत्राप्रयोगापातात् । किंचेंद्राद्यग्न्यादिशब्दानांब्रह्मण्येवमुख्यत्वेसूक्तव्यवस्थाविद्याव्यवस्थाचनस्यात् । अमुख्यवृत्त्यातद्व्यवस्थायानिरस्तत्वात् । टीकादौवैश्वानरश्रुतेःसाधारण्योक्तिस्तुश्रुतित्वप्रयुक्तेविशेषेसत्येव श्रुतिलिंगयोर्निरवकाशत्वप्रयुक्तसाधारण्यमभिप्रेत्य ।

गु० भवतीतिनचयुक्तमित्यर्थः ॥ **अतएवेति** ॥ शास्त्रदृष्ट्येतिन्यायेनेत्यर्थः ॥ **निरस्तत्वादिति** ॥ इंद्रादिशब्दानामग्न्यादिशब्दानांचेंद्रादौप्रयोगापत्तिरूपबाधकोक्त्यानिरस्तत्वादित्यर्थः । नन्वेवंवैश्वानरश्रुतेरन्यत्रैवप्रसिद्धत्वेटीकायांसाधारण्योक्तिरयुक्तेत्यतआह ॥ **टीकादाविति** ॥ यद्वाश्रुतेःप्राबल्यमुपपाद्यावधारणेनपूर्वपक्षेटीकाभाष्यसूत्रविरोधइत्यतआह ॥ **टीकादाविति** ॥ नन्वेवंसर्वगतत्वादिविष्णुलिंगानामग्नौसावकाशत्वेप्रसिद्धिलिंगयोरुभयोरपिनिरवकाशत्वेनेत्यादिटीका

SGDF Sri Gargeshwari Digital Foundation

प्र० रित्यर्थः। ननुटीकोक्तरीत्यालिंगस्यनिरवकाशत्वेवैश्वानरोग्निरेवेतिकथंनिर्णयेनपूर्वपक्षः। श्रुत्यालिंगबाधोवाकथमित्यतआह॥ **टीकायामिति**॥ सिद्धांतदिशेत्यर्थः । वस्तुतःपूर्वपक्षेसर्वगतत्वलिंगमग्नौसावकाशमितिटीकाशयः । एवंतर्हिविष्णुरेवेतिसिद्धांत्यभिमतनिर्णयाक्षेपपरग्रंथः कथमित्यतआह ॥ **नत्वित्यादि** ॥ एवंस्वोक्तरीत्याश्रुतित्वनिरवकाशत्वोभयप्रयुक्तप्राबल्यंटीकायामप्यभिमतमित्युपेत्य टीकावाक्यानित दनुगुणतयाव्याख्यायेदानींपक्षांतरमाह ॥ **यद्वेति** ॥ टीकादौजात्याप्राबल्यंश्रुतेरनुक्त्वानिरवकाशत्वमात्रेणश्रुतिलिंगयोस्साम्यमुपेत्य विष्णुरेववैश्वानरइतिविष्णुपरतानिश्चयोनयुक्तइत्युक्तं । तत्स्वारस्यानुरोधेनेत्यर्थः । पूर्वपक्षफलमाह ॥ **एवंचेति** ॥ स्वाभिमतश्रुतेर्द्वेधाप्राब

टीकायांलिंगस्यनिरवकाशत्वोक्तिरपिस्वतोऽवकाशाभावाभिप्राया । अन्यथासर्वगतत्वंचनतस्येतिटीकाविरोधात् । "नतु लिंगेनविष्णुपरतानिश्चय"इतिटीकायामपि किंतुप्रसिद्ध्याद्ग्यादिपरत्वनिश्चयइतिशेषः । यद्वाटीकादिस्वारस्यायविष्णुपरत्वानध्यवसायेनपूर्वपक्षोस्तु । एवंचपक्षद्वयेप्यतीतसर्वाधिकरणाक्षेपः । अतएवास्यपादद्वयांत्यतेति ॥ सिद्धांतस्तु ॥

गु० विरोधइत्यतआह ॥ **टीकायामिति** ॥ ननुटीकायांलिंगनिरवकाशत्वस्योक्तत्वादुभयोर्निरवकाशत्वस्यव्याहतत्वान्ननिरवकाशत्वेनसाम्यंश्रुतिलिंगयोष्टीकादावभिप्रेतमित्यतोवाह ॥ **टीकेति** ॥ नतुलक्षणादिनापिकल्प्यावकाशाभावाभिप्रायेत्यर्थः ॥ **अन्यथेति** ॥ सर्वथानिरवकाशत्वाभिप्रायत्वइत्यर्थः । ननुनिश्चयेनपूर्वपक्षे नतुलिंगेनविष्णुपरतानिश्चयइतिटीकाविरोधइत्यतआह ॥ **नत्विति** ॥ अस्मिन्पक्षेप्रसिद्ध्याग्न्यादिपरत्वइतिशेषपूरणेटीकास्वारस्यंनभवतीत्यतःपक्षांतरमाह ॥ **यद्वेति**॥ नचतर्हिटीकोक्तसर्वगतत्वाक्षेपानुपपत्तिः । साधारणश्रुतिसाहचर्येणलिंगस्याप्यवकाशकल्पनायाःसंभवान्नविष्णोरेवेदंसर्वगतत्वमितिनिश्चयस्संभवतीत्यर्थपरत्वात्तदाक्षेपटीकायाइतिभावः । ननुव्यवहारविलोपेनपूर्वपक्षस्यसर्वाधिकरणसाधारणत्वादत्रैवकोविशेषइत्यतआह ॥ **एवंचेति** ॥ एवंचेत्यनेनाक्षेपप्रकारोव्यवहारश्चपरा

SGDF
Sri Gargeshwari Digital Foundation

प्र० ल्यपक्षेनिरवकाशत्वमात्रप्रयुक्तप्राबल्यपक्षेचेत्यर्थः । यथानामधेयपादेउद्भिदादिचतुरधिकरण्यांवाजपेयनयपूर्वपक्षेतथेतिभावः । द्वितीय पक्षेपिसर्वत्रसिद्धांताभिमतनिर्णयाक्षेपादितिभावः । टीकादौपूर्वाधिकरणाक्षेपःसंगतिप्रदर्शनायेतिभावः । उक्तंचतत्वप्रदीपे "पादद्वयार्थेनिग मनायसर्वनाम्नांसर्वलिंगानांचसमन्वयद्रढीकरणात्सकोयमधिकरणराजआरभ्यत" इति । आत्मशब्दश्रुतिस्मृतिसमाख्याप्रकरणाभिविमान त्वादिलिंगानांवैश्वानरस्यविष्णुत्वसाधकानां वैश्वानरादिश्रुत्यादेरन्यत्रव्यवहारान्यथानुपपत्त्यासूक्तादिभेदव्यवहारान्यथानुपपत्त्याचविष्णुत्वा साधकत्वोक्तेः व्यवहारस्यगत्युक्त्यैवात्मशब्दादिबलाद्वैश्वानरोविष्णुरितिभाष्यटीकारीत्यासिध्यतीतिभावेनव्यवहारस्यगत्युक्तिपरां "अनन्य योगेनब्रह्मवाचकैरपितैर्ज्ञानिनोहानादिसिद्ध्यर्थमन्यत्राग्न्यादौव्यवहरंती" त्यादिसाक्षादित्यादिसूत्रभाष्यटीकांविवृण्वंस्तदुक्तंप्रमेयंसंगृह्याह ॥ **अज्ञास्त्विति** ॥ अज्ञानांमुख्यार्थाज्ञानतोन्यत्रप्रयोगेपिज्ञानिनांकुतस्तत्रप्रयोगः । हानादिव्यवहारस्यान्येनापिसंभवादित्यतउत्तरार्धंव्यनक्ति

अज्ञास्त्वज्ञानतःशब्दानन्यत्रैवप्रयुंजते । ज्ञानिनोपिचहानादिव्यवहारप्रसिद्धये ॥ १ ॥

गु० मृश्यते । तर्ह्यतीताधिकरणैरेवगतार्थतेत्यतआह ॥ **अतएवेति** ॥ एतदाक्षेपस्यातीतैरपरिहारादनेनैवपरिहारादेवेत्यर्थः । तदपिकुतइत्यतआह ॥ **अतएवेति** ॥ एतदाक्षेपपरिहारस्यैवात्रैवयोग्यत्वादतीताधिकरणेष्वयोग्यत्वादेवेत्यर्थः । यद्वाऽतीतसर्वाधिकरणाक्षेपकत्वादेवेत्यर्थः । पादद्वयशेषस्यमध्येप्रवेशायोगेनादावंतेवा निवेशेकार्ये समन्वयात्पूर्वंप्रसक्तेरेवाभावेनांत्यएवनिवेशस्यौचित्यादितियावत् । नन्विदमध्यायस्यांतेस्यादित्यतोवाह ॥ **एवंचेति** ॥ एतादृशइत्यर्थः । अतीता धिकरणसाधारणएव । नतुभाव्यधिकरणसाधारणः । अतएव एतत्परिहार्याक्षेपस्यभाव्यधिकरणेऽभावादेव । अस्यपादद्वयांत्यतैव । नतुपादचतुष्टयरूपाध्यायां त्यतेत्यर्थः । स्पष्टयिष्यतेचैतत् ॥ **हानादिव्यवहारायव्यक्ताविवेति** ॥ यद्यपिकल्पनोपदेशाच्चेत्यादिनान्यत्रापिवक्ष्यमाणयामुख्यवृत्त्यैवव्यवहारः । तथापि

प्र० ॥ **अज्ञानिनइवेति** ॥ एतेनपूर्वार्धस्योपयोगोदर्शितः । तमग्रेस्पष्टयिष्यामः । यद्वात्रभाष्यादावनभिज्ञानादन्यत्रव्यवहारोक्तिः "जगद्वा चित्वा" दितिसूत्रसिद्धस्येहदृष्टांतत्वेनेतिसूचनायाज्ञानिनइवेत्युक्तं । यद्वान्यत्रव्यवहारोनस्यादित्येतदज्ञानिनोज्ञानिनोवेतिविकल्प्यश्लोकेद्वयो गेत्युक्तिः । नेदंरजतंतस्माज्जहि इदंरजतमुपादत्स्वेत्यादिव्यवहारस्यशब्दैकसाध्यत्वादित्यर्थः ॥ **अन्यत्रापीति** ॥ एतेनश्लोकेचोप्यर्थोऽनु वृत्तेनान्यत्रेतिपदेनान्वेतीतिसूचितं ॥ **मतइति** ॥ भट्टमते । प्रागुक्तातिप्रसंगंनिराह ॥ **अग्न्यादाविति** ॥ अज्ञानांसर्वशब्दमुख्यार्थे श्वराज्ञानतोन्यत्रैवशब्दव्यवहारात् तस्यचासंकीर्णत्वायव्यवस्थयैवशब्दप्रयोगात् प्राज्ञाअपितत्प्रहाणेनशब्दांतरोपादानेकृत्याभावाद्बहुलाज्ञप्र योगानुसार्यभिधानादिसिद्धशब्दशक्त्यनुसाराच्च व्यवस्थयैवशब्दान्प्रयुंजते । तदर्थत्वाच्छब्दप्रयोगस्येत्यर्थः । यदप्यग्न्यादौवन्ह्यादिशब्दस्या

अज्ञानिनइवज्ञानिनोप्यन्यत्रहानादिव्यवहारस्यापेक्षितत्वात्तस्यचशब्दप्रयोगाधीनत्वात् ब्रह्मण्यमुख्य स्यान्यत्रमुख्यस्यचशब्दस्याभावादनन्यगतिकतयान्यत्रापिप्रयुंजते । जातिःशब्दार्थइतिमतेजातौमुख्या नपिशब्दान्हानादिव्यवहारायव्यक्ताविव । अग्न्यादाविंद्रादिशब्दप्रयोगेचव्यवहारव्यवस्थानस्यात् ।

गु० समाकर्षादितिन्यायेनपरममुख्यस्यारसिकप्राप्तस्यविष्णोःपरित्यागेनकिमर्थमन्यव्यवहारइत्यस्याशंकाया अतःकविर्नामसुयावदर्थस्स्यादित्युक्तरीत्याव्यवहारार्थमि त्युत्तरम् । अत्रमुख्यलाक्षणिकयोर्जातिव्यक्त्योरिवमुख्यामुख्यमात्रांशेदृष्टांतइतिज्ञेयम् । अन्यथानचेत्युत्तरवाक्यविरोधापत्तेरितिभावः । नन्वेवंब्रह्मणिमुख्यानामन्यत्रव्य वहारेलक्षणाद्यापत्त्याग्न्यादिशब्दानामिंद्रादाविंद्रादिशब्दानामग्न्यादौप्रयोगःस्यादित्यतआह ॥ **अग्न्यादाविति** ॥ नन्वग्न्यादौवन्ह्यादिशब्दप्रयोगइवेंद्रादिशब्दाना

SGDF
Sri Gurgeshwari Digital Foundation

प्र० प्यप्रयोगइतितत्साम्यापादनंतत्रतद्वैषम्यमाह ॥ नचेति ॥ एतेनजयिशब्दस्यराजभृत्ययोरिववन्ह्यादिशब्दानांकल्पनोपदेशादितिन्यायेन जगद्ब्रह्मवाचकत्वाविशेषेपिन्यूनाधिकभावेनोभयत्रशक्तिरेवेतिसूचितं । यदत्रोक्तंजयिशब्दवैषम्यंतत्राह ॥ अग्निर्दुःखीति ॥ दुःखादि स्वामित्वेनदुःखित्वमीशेपियुक्तमित्यतस्तद्गतत्वेनेत्युक्तं । तद्गतनीचत्वापादकत्वेनेत्यर्थः । अन्यथा अमुख्यतोपितत्राप्रयोगे । प्रत्यक्षादिसि द्धांतांनिराह ॥ अलौकिकेति ॥ एवं "साक्षादप्यविरोधंजैमिनि"रितिसूत्राभिप्रेतमन्यत्रव्यवहारसमर्थनमुपपाद्य "अभिव्यक्तेरित्याश्म रथ्यः । अनुस्मृतेर्बादरिः । संपत्तेरितिजैमिनि"रितिसूत्रोक्तान्सूक्तादिव्यवस्थाहेतूंस्तत्तत्सूत्रभाष्यटीकांविवृण्वन्नाह ॥ सूक्तादीति ॥ ननुऋग्भाष्येविष्णोरग्न्याद्यंतर्गतान्यग्न्यादिशब्दवाच्यानिकानिचिद्रूपाणि कानिचित्तुतदनंतर्गतानिपृथग्विद्यमानान्यग्नींद्रादिशब्दवाच्यानि

नचाग्न्यादौवह्न्यादिशब्दानामिवेंद्रादिशब्दानामपिशक्तिरभिधानादिसिद्धा । अग्निर्दुःखी अग्निर्वैदेवानामवमइत्यादौच तद्गतत्वेनविवक्षितदुःखित्वाद्यनुपपत्तेर्भृत्येजयिशब्दस्येवाग्निशब्दस्यान्यत्रामुख्यता । अन्यथाऽलौकिकमग्न्यादिस्वरूपमे वनसिद्ध्येदितिकथंतत्रप्रयोगाभावापादनं । सूक्तादिव्यवस्थायांत्वग्न्यादिसूक्तादिभिर्ब्रह्मोपासनयाऽग्न्यादावेवब्रह्मणोभि व्यक्तिर्वा अग्न्यादिसूक्ताद्युपासकैरग्न्यादावेवब्रह्मणोनुस्मरणीयत्वंवा तदुपासकानामग्न्यादिस्थब्रह्मप्राप्तिर्वानिमित्तं ।

गु० मपिप्रयोगेव्यवहारव्यवस्थाकिंनस्यात् । अन्यथाव्यवहारव्यवस्थानुपपत्त्यावन्ह्यादिशब्दानामपिप्रयोगोनस्यादित्यतोवैषम्येणपरिहरति ॥ नचाग्न्यादाविति ॥ ननु भृत्योविजयीत्यत्रभृत्यशब्दस्यभृत्येमुख्यत्वात्तदन्वयायजयिशब्दस्यतत्रामुख्यतासंभवेपिप्रकृतेपिसर्वेषामपिशब्दानांब्रह्मणिमुख्यत्वेनब्रह्मणोऽन्यत्रकस्यापिशब्दस्यमुख्य त्वाभावात् । कस्यान्वयायशब्दांतरस्यामुख्यतास्यादित्यतआह ॥ अग्निर्दुःखीति ॥ अन्यथेति ॥ सर्वथाऽग्न्यादिशब्दानामग्न्यादिपरत्वाभावइत्यर्थः । अग्न्या ॥ ५३२ ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० संतीति भिन्नभिन्नशब्दवाच्यविष्णुरूपबोधकत्वाद्विष्णुरूपैकदेवताकत्वेपिसंज्ञाभेदात्सूक्तादिव्यवस्थायुक्तेत्युक्तं। अत्रपुनरग्नावधिष्ठानेऽपरोक्षीभूतत्वादिकंनिमित्तमुच्यते । एतच्चायुक्तं । तथात्वइदंविष्णुसूक्तमिदंवामनसूक्तमिदंपुरुषसूक्तमितिव्यवस्थाभावापत्तेः । तत्राधिष्ठानस्यैवाभावात् । सौरसावित्रादिसूक्तव्यवस्थाभावापत्तेश्च । तत्राधिष्ठानभेदाभावात् । अतोन्यत्रभाष्यकृदुक्तमेवसमाधानंवाच्यमितितदेवसूत्रकृताऽत्रकुतोनोक्तमितिभावेनतत्रोक्तमाशंक्यतत्समर्थनपूर्वमेतदुक्तेरभिप्रायमाह ॥ **यद्यपीति** ॥ द्विविधानिविष्णुरूपाणि । देवतांतर्गतानितदनंतर्गतानिच । सर्वाणिचाग्न्यादिनामवंति । तत्राद्येरूपाणांनाम्नाऽधिष्ठाननाम्नाचाग्न्यादिसूक्तभेदः । अंत्येरूपनाम्नैवेत्युक्तमित्यर्थः । तत्रनामादीनांभगवतिमुख्यत्वमन्यत्रतत्संबंधनिमित्तत्वमित्येतद्दृष्टांतेनसमर्थयते ॥ **एवंचेति** ॥ **द्वितीयइति** ॥ द्वितीयेध्यायआद्यपादे "गीतिषुसामाख्ये"तिद्वादशेऽधिकरणेयद्यपिप्रगीतेमंत्रेसामशब्दप्रयोगोऽभियुक्तानां । तथापिमंत्रनिष्ठागीतिरेवसामशब्दार्थइत्येतावन्मात्रमुक्तं । तत्कथमित्याशंकायां सप्तमेध्यायेद्वितीयपादे "साम्नोऽभिधानशब्देनप्रवृत्तिःस्याद्यथाशिष्ट"मित्यधिकरणे "कवतीषुरथंतरंगायती"

यद्यपिऋग्भाष्ये "पृथग्रूपाणिविष्णोस्तुदेवतांतरगाणिच । अग्न्यादिसूक्तवाच्यानिनाम्नासूक्तभिदाभवे"दित्यग्न्यादिशब्दप्रयोगःसूक्तव्यवस्थापकउक्तः। एवं चयथासामशब्दस्तद्विशेषबृहद्रथंतरादिशब्दाश्चऋगाश्रितगीतिविशेषएवमुख्यास्तदाश्रयनानाऋक्षुत्वमुख्याः तथैवद्वितीयउक्तत्वात् सप्तमउपपादितत्वान्नवमेस्मारितत्वाच्च । एवमिंद्राग्न्यादिशब्दास्तत्तत्सूक्तानिचेंद्राग्न्यादिगतब्रह्मरूपेष्वेवमुख्यानि। अतीतानागतानेकेंद्रादिषुत्वमुख्यानीत्येवव्यवस्थासिद्ध्यति ।

गु० दिशब्दानाममुख्यवृत्त्याप्यग्न्यादिपरत्वाभावेपिप्रत्यक्षेणैवाग्न्यादिसिद्धिरित्यतउक्तं॥ अलौकिकमिति ॥ द्वितीयउक्तत्वादिति ॥ द्वितीयाध्यायेप्रथमपादेगी

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यनेनरथंतरशब्देनकवतीषुऋक्षुकिमतिदिश्यतइतिपरिज्ञानार्थं रथंतरशब्दःकिंगीतिविशिष्टानां "अभित्वाशूरनोनुम"इत्यादीनामृचांवाचकउतगीतिमात्रस्येतिसंदेहे अध्येतृप्रसिद्ध्यागीतिविशिष्टऋग्वाचकइतिप्राप्ते "विशेष्यंनाभिधागच्छेत्क्षीणशक्तिर्विशेषण"इतिन्यायेनगीतिमात्रस्यवाचकइत्युपपादितत्वात् नवमेद्वितीयपादे "सामानिमंत्रमेकेस्मृत्युपदेशाभ्या"मित्याद्याधिकरणेसप्तमसिद्धस्यैवगीतिवाचित्वस्योत्तरविवक्षयास्मारितत्वादित्यर्थः। उक्तंचशाबरभाष्ये "तदेवपुनरभिधीयतेस्मारणायोत्तराधिकरणंचिंतयितुं । गीतिस्सामेतिस्थिते इदंचिंत्यते । किंगीतिष्वृचःप्रधानभूताउतगुणभूताइति । सामानिमंत्रमेकइतिपूर्वपक्षोपितत्रत्यसिद्धांतस्मारणार्थमेवे"त्यादि । अत्रत्रितयोक्तिर्दार्ढ्यायेतिज्ञेयं । यदत्रकेनचिदुक्तं "विशेष्यंनाभिधागच्छे"दितिन्यायाद्गानविशिष्टऋग्वाचित्वेकवतीषुरथंतरंगायतीत्यतिदेशानुपपत्त्यातत्रतथात्वेपिनेह तथात्वमिति तत्तुच्छं । "तत्तन्नाम्नोच्यतेविष्णुस्सर्वशास्तृत्वहेतुतः । नकापिकिंचिन्नामास्तितमृतेपुरुषोत्तम"मित्यादिवचनजातेन "समाकर्षा"दित्याद्युक्तन्यायेनतत्सिद्धेरिति ॥ **अन्यथेति** ॥ अग्न्यादिनानाशब्दप्रयोगेनसूक्तादिव्यवस्थायाअभावइत्यर्थः ॥ **तथापीति** ॥ नामभेदेनसूक्तव्यवस्थासिद्धावपीत्यर्थः ॥ **परमात्मदेवताकत्वमिति** ॥ यद्यपि तत्र "एकैववामहानात्मादेवतासूर्यइत्याचक्षते । सहिसर्वभूतात्मा ।

अन्यथापरमतेपिसौरसावित्रादेरेकदेवताकत्वादिदंसौरमिदंसावित्रमितिव्यवस्थानस्यात् । तथापीहसूत्रआग्नेयादिसूक्तोपासकैरग्न्यादिगतत्वेनानुस्मर्तव्यमित्यनुष्ठानविशेषोपयोगिव्यवस्थापकमुक्तं । उक्तंचानुक्रमणिकायामपिसर्वसूक्तानांपरमात्मदेवताकत्वं "एकैववामहानात्मादेवते"ति । एतेनयागव्यवस्थापिसिद्धा । ॥ ५३३ ॥

गु० तिषुसमाख्येत्यस्मिन्नधिकरणउक्तत्वादित्यर्थः । ननुतथाप्येकदेवताकत्वात्कथंभेदइत्यतआह ॥ **अन्यथेति** ॥ **सूत्राक्षरार्थइति** ॥ इदंशब्दवदितिशब्देनपूर्व

प्र० तदुक्तमृषिणा सूर्यआत्माजगतस्तस्थुषश्चे"त्युक्तेःसूर्यदेवताकत्वमेवोक्तंभाति । तथापिस्थावरजंगमात्मकजगदात्मकत्वलिंगात् "तद्विभूतयोऽन्यादेवतास्तदप्येतदृषिणोक्तं इंद्रंमित्रंवरुणमग्निमाहु"रितितदीयोत्तरवाक्याच्चसूर्यशब्देनपरमात्मैवाभिप्रेतइतिभावः । एतेनेत्यनेनात्रोक्तमृग्भाष्योक्तंचहेतुद्वयंपरामृश्यतइतिभावेनतद्व्यनक्ति ॥ **अहंहीति** ॥ अत्रोत्तमाधिकारिरूपकर्तृणामधमाधिकारिरूपकर्तृणामग्न्यादिगतविष्णूद्देशप्रकारः "गुहाशयायैवनदेहमानिने नदेहायनतन्मानपरायच सदेहमानिहरयेप्रणमेत्केवलायवे"त्यादिनाकर्मनिर्णयोक्तोध्येयः । आ

"अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवचे"त्यादिनासर्वयागानांविष्णुदेवताकत्वेपि आग्नेयादियागेष्वग्न्यादिगतस्यैवभगवतोग्न्यादिशब्दैरेवोद्देष्टव्यत्वादिनायागव्यवस्थोपपत्तेः। अग्नीषोमीयादीनांद्विदेवताकत्वंचाधिष्ठानद्वित्वेनवाधिष्ठितभगवद्रूपद्वित्वेनवेतिद्रष्टव्यं । अत्रचाद्यसूत्रेस्वपक्षेश्रुतिरूपस्यसाधकस्योक्तिः । द्वितीयेसमाख्यारूपस्य ।

प्र० दिपदेनसंकल्पादिः ॥ **अग्नीषोमीयेति** ॥ सर्वयागानांविष्णुदेवताकत्वेपीत्यनुकर्षः ॥ **आद्येति** ॥ "वैश्वानरस्साधारणशब्दविशेषा"दित्यत्रसाधारणस्य श्रुतिलिंगयोर्निरवकाशत्वादिनाऽग्निविष्ण्वोस्साधारणस्यवैश्वानरशब्दस्य । "आत्मानंवैश्वानर"मित्यात्मशब्देनविशेषणादित्यात्मश्रुतिरूपस्येत्यर्थः । द्वितीये स्मर्यमाणमनुमानंस्यादित्यत्र । अहंवैश्वानरोभूत्वे"तिस्मृतिसमाख्यारूपस्यस्वपक्षसाधकस्येत्यर्थः । अत्रपरैरितिशब्दोयस्मादित्यर्थेव्याख्यातः । सनयुक्तः । करणार्थल्युडंतानुमानशब्देनैवतदर्थलाभेनेतिशब्दाभावेप्यन्वयसंभवादतिशयाभावाच्च,

SGDF
Sri Gargeshwari Digital Foundation

प्र० हेत्वर्थकत्वस्यव्यर्थत्वादितिभावेनतस्यार्थमाह ॥ **अत्रेति** ॥ यद्वा भाष्ये "इतिशब्दस्समाख्याप्रदर्शक" इत्युक्तं । "अनेन इतिस्मर्यमाणमित्यन्वयस्सूचितोभवती"त्युक्तंटीकायां । तावताकथमर्थोलब्धइत्यतस्तद्व्यनक्ति ॥ **अत्रेति** ॥ आद्यसूत्रेतत्तुसमन्वयादित्यतोनुवृत्तस्यतदित्यस्यार्थोनुवादोविष्णुरिति । अहंशब्दस्यविष्णववतारभूतकृष्णार्थकत्वाद्विष्णुर्वैश्वानरइतिगीतायामित्युक्तं ॥ **तृतीयइति** ॥ "शब्दादिभ्योंत:प्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरुषविधमपिचैनमधीयत" इत्यत्राग्न्यादिशब्दात् होमाधारत्वगार्हपत्याद्यंगकत्वपाचकत्वादिलिंगेभ्य: योयमंत:पुरुषइत्यंत:प्रतिष्ठानान्नविष्णुरितिशंकिते अग्न्यादिनामलिंगादिमत्त्वेनोपासनोपदेशेनतेषांसावकाशत्वात् "कोनआत्मा

अत्रेतिशब्दस्याद्यसूत्रानुषक्तेनविष्णुर्वैश्वानरइत्यनेनान्वय: । तथाचविष्णुर्वैश्वानरइतिगीतायांस्मर्यमाणंविष्णोर्वैश्वानरत्वं अत्रापिसएववैश्वानरइत्यस्यानुमापकमितिसूत्राक्षरार्थ: । तृतीयेवैश्वानरशब्दमात्रविषयासाधारणबाधकोद्धार: । तथाचेतोर्पणनिगदादित्यत्रब्रह्मणिप्रसिद्धशब्दत्यागेनगायत्र्यादिशब्दप्रयोगेप्रयोजनंनेत्याशंकानिरस्ता । अत्रत्वग्न्यादिशब्दानांपाचकत्वादिलिंगानांचब्रह्मणिनिरवकाशत्वाशंकानिरस्यतइतिभेद: । चतुर्थेपरमतनिरास: ।

प्र० किंब्रह्मे"त्युक्तात्मत्वादेरन्यत्रासंभवात् "शीर्ष्णोद्यौस्समवर्तते"त्यादिनापुरुषसूक्तोक्तपुरुषसदृशस्यैवात्रमूर्धैवसुतेजाइत्यादिनाऽभिधानाद्विष्णुरेवेतिनिरवकाशेनसावकाशस्यबाधोपपत्तेरित्युक्तत्वादितिभाव: ॥ **बाधकेति** ॥ यद्यप्यसंभवादित्याद्यंशेनसाधकोक्तिरप्यस्ति । तथापि तदुक्ते:परपक्षेबाधकोक्त्याबाधकनिरासेपिव्यापाराद्बाधकोद्धारइत्युक्तं । अतएवप्रकरणादित्यनुक्त्वाऽसंभवादित्युक्तं । "तथादृष्ट्युपदेशा"दित्यंशस्यगायत्र्यधिकरणोक्तेनापौनरुक्त्यमाह ॥ **तथाचेतोर्पणेति** ॥ **चतुर्थइति** ॥ "अतएवनदेवताभूतंचे"त्यत्र अतएव निरवकाश

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्सशब्दादिहेतोरेव । देवतादिर्नेत्यर्थः । साधकोक्तिबाधकोद्धारयोरनंतरंपरमतनिरासस्यावसरप्राप्तेरितिभावः ॥ पंचमइति ॥ "सा क्षादप्यविरोधंजैमिनि"रित्यत्र ॥ षष्ठादिष्विति ॥ "अभिव्यक्तेरित्याश्मरथ्यः । अनुस्मृतेर्बादरिः । संपत्तेरितिजैमिनिस्तथाहिदर्शयति ।

पंचमे प्रस्तुतेवैश्वानरशब्दसमन्वयेसमाप्तेसर्वशब्दविषयसाधारणबाधकोद्धाराय लौकिकस्यवैदिकस्यचान्यत्रव्यवहारस्यगत्युक्तिः । वाच्यार्थधीव्यवहितंलक्षणादिकंविनासाक्षान्मुख्यवृत्त्याब्रह्मणःशब्दार्थत्वेपिव्यवहाराविरोधइतिचास्याक्षरार्थः । षष्ठादिषुचतुर्षुसाधारणबाधकोद्धारायवैदिक्याःसूक्तादिव्यवस्थायागत्युक्तिः । यद्यप्यनुस्मृत्यनंतरमभिव्यक्तिरभिव्यक्त्यनंतरंसंपत्तिः । तथाप्यभिव्यक्त्यनंतरमपिसंपत्तेःप्रागनुस्मृतिरपेक्षितेतिदर्शयितुमनुस्मृतेर्मध्यउक्तिरितिसूत्रक्रमः । नचसाक्षादित्यादिसूत्रपंचकंसमन्वयानुपपत्तिसमाधिरूपत्वादध्यायांतेस्यादितिशंक्यं । चतुर्थपादेपदवर्णस्वरादिसमन्वयस्यापिवक्ष्यमाणत्वात्तदवस्थायांचसूक्तादिभावस्यैवाभावेनतदनुपपत्तिशंकानुदयात् तथा ग्न्यादिसूक्तादिस्थपदादिसमन्वयनिष्ठानांपुंसामग्न्यादावेवब्रह्मणोभिव्यक्त्यादेरभावेनपरिहारासंगतेः।

प्र० आमनंतिचैनमस्मि"न्नित्येतेषु ॥ साधारणेति ॥ उक्तवक्ष्यमाणसर्वशब्दसाधारणेत्यर्थः । तत्रापिपौर्वापर्यमाक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ पंचमादेरत्रानिवेशमाशंक्यद्वेधासमाधिमाह ॥ नचेति ॥ पदादीति ॥ पदवर्णस्वरादिसमन्वयादिनिष्ठानांचतुर्मुखाद्युत्तमाधिकारित्वेनतेषां

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्याप्तदर्शित्वादितिभावः। तर्हितृतीयपादांतेनिवेशःस्यादित्यतआह ॥ **तथोभयत्रेति** ॥ **अन्येत्विति** ॥ "आत्मानंवैश्वानरमुपास्त"इत्यत्रवैश्वानरः किंजाठराग्निर्भूताग्निर्वादिव्यदेवतावाजीवात्मावापरमात्मावेतिसंशये "अयमग्निर्वैश्वानरोयोयमंतःपुरुष"इतिजाठराग्नौ "विश्वस्माअग्निंभुवनायदेवावैश्वानर"मितिबाह्येभूताग्नौ "वैश्वानरस्यसुमतौस्यामे"तिदेवतायांप्रयोगाद्वैश्वानरशब्दस्यत्रितयसाधारण्याज्जाठराग्न्यादिरेववाआ

तथोभयत्रप्रसिद्धसमन्वयोक्त्यनंतरंब्रह्मणिमुख्यत्वेऽन्यत्रप्रयोगोनस्यादितिशंकाया अन्यत्रमुख्यत्वेब्रह्मणिसनस्यादितिप्रतिशंकाप्रतिरुद्धत्वेनानुदयाच्चात्रैवयुक्तत्वादिति ॥ अन्येतु ॥ अयमग्निर्वैश्वानरइत्यादिप्रयोगाज्जाठरभूताग्निदेवतारूपत्रयसाधारणस्यवैश्वानरशब्दस्यजीवेश्वरसाधारणस्यात्मशब्दस्यच "मूर्धैवसुतेजा"इतिद्युमूर्धत्वादिनाविशेषणादित्याद्यसूत्रार्थइत्याहुः । तन्न । "सोयमात्माचतुष्पात्स्थूलभुग्वैश्वानर"इत्यात्मन्यपिवैश्वानरशब्ददर्शनेनत्रितयसाधारण्योक्त्ययोगात् ।

प्र० त्मशब्दस्यजीवेरूढत्वात्तद्बलाज्जीवएववेतिप्राप्ते "एतस्यात्मनोवैश्वानरस्यद्यौर्मूर्धैवे"त्यादिनाद्युमूर्धत्वादिश्रवणात् "कोनआत्माकिंब्रह्मे"तिब्रह्मशब्दश्रवणात्तयोश्चान्यत्रायोगाद्वैश्वानरशब्दस्य विश्वश्चासौनरश्चविश्वनरः सर्वात्मकः पुरुषइत्यर्थः । विश्वनरएववैश्वानरइतियोगवृत्त्याब्रह्मणिसंभवादात्मशब्दस्यजीववद्ब्रह्मण्यपिवृत्तेर्वैश्वानरोब्रह्मेतिसिद्धांतइत्याहुः । तत्रसूत्रार्थनिरासेनैतन्निरस्तमितिभावेनतमनूद्यनिराह ॥ **अयमिति** ॥ ॥ ५३५ ॥

प्र० **जाठरेति** ॥ अन्यथाअतएवनदेवताभूतंजाठरश्चेतिनिर्देशःस्यादितिभावः । जीवकोटेरप्यनुत्थानमाह ॥ **भाष्योक्तेति** ॥ "अयमात्माब्रह्म अनात्तत्वादनात्मानऊनत्वाद्गुणराशित"इत्यादिभिरित्यर्थः । स्वीकृतत्वमेवव्युत्थितंप्रतिविपक्षेबाधकोक्त्याऽऽह ॥ **अन्यथेति** ॥ **केचित्त्विति** ॥ वैश्वानरः किंपरमात्मेतिशक्यनिर्णयउतनेतिसंशये जीवपरसाधारणात्मशब्दसत्त्वेप्यात्मशब्दस्य "वैश्वानरमात्मान" मितिजीवेऽप्रसिद्धवैश्वानरशब्दविशेषितत्वेनजीवविषयत्वशंकानुदयात् जाठरभूतदेवतासुप्रागुक्तरीत्याप्रयोगदर्शनात् परमात्मनिच"तदात्मन्येवहृदयेग्नौवैश्वानरेप्रास्य"दितिप्रयोगदर्शनाद्वैश्वानरशब्दस्यजाठरादिचतुष्टयसाधारण्यात् उपक्रमगतब्रह्मात्मशब्दयोर्मिथःप्रतिबद्धत्वेनानिर्धा

जाठराग्नेरपिभूतजातित्वेनपृथगुक्त्ययोगाच्च । भाष्योक्तश्रुत्यादिभिरात्मशब्दस्यब्रह्मण्येवमुख्यतयाजीवसाधारण्याभावाच्च । स्वीकृतंचत्वयापि "द्युभ्वाद्यायतन"मित्यत्रात्मशब्दस्यब्रह्मासाधारण्यं। अन्यथा "तमेवैकंजानथआत्मान"मित्यात्मशब्दस्यजीवशब्दत्वेनसूत्रेऽतच्छब्दादितिहेतुनाजीवनिरासस्यस्वशब्दादित्यनेनोक्तात्मशब्देनब्रह्मत्वसाधनस्यचायोगात्। केचित्तु। जाठरभूताग्निदेवतेश्वररूपचतुष्टयसाधारणस्यवैश्वानरशब्दस्य मुमुक्षुभिरौपमन्यवप्रभृतिभिर्जिज्ञास्यमानत्वादिभिर्ब्रह्मलिंगैर्विशेषणादित्यर्थइत्याहुः । तन्न । जाठरस्यपृथगुक्त्ययोगस्योक्तत्वात्। "आत्मानंवैश्वानर"मितिसाक्षाद्वैश्वानरविशेषणा

गु० सूत्रेप्रकृतवैश्वानरविष्णुपरामर्शात् तस्यस्मर्यमाणत्वोक्त्यास्मृतिश्रुत्योरेकार्थत्वप्रदर्शनेनसमाख्याप्रदर्शकत्वंभाष्यइतिशब्दस्योक्तमितिभावः ॥ **जाठराग्नेरपिभूतजातित्वेनेति** ॥ भूततावशेषाद्भौमदिव्यादिवत्जाठरस्याप्युपादानंकार्यं । जाठरत्वरूपावांतरोपाधिविवक्षयातस्यपृथगुपादानेभौमादीनामपिभौमत्वादिधर्मोपाधिना

SGDF Sri Gargeshwari Digital Foundation

प्र० एकत्वादन्नादनरूपफलस्यचसर्वत्रोपपन्नत्वादशक्यनिर्णयइतिप्राप्ते "कोनआत्माकिंब्रह्मे"तिसर्वेषांजीवानामात्मभूतंब्रह्मकिमितिप्रश्नकरणादुत्तरेच "आत्मानंवैश्वानर"मितिब्रह्मशब्दस्थानेसर्वत्रवैश्वानरशब्दप्रयोगाच्चायंवैश्वानरःपरमात्मेतिनिर्णेतुंशक्यतएव। चतुष्टयसाधारणस्यापिवैश्वानरशब्दस्यास्मिन्प्रकरणेमुमुक्षुभिरौपमन्यवादिभिर्जिज्ञास्यत्वसर्वात्मत्वादिभिर्ब्रह्मधर्मैर्विशेष्यमाणत्वादित्यर्थइत्याहुरित्यर्थः ॥ आत्मश्रुतीति ॥ तस्याब्रह्मासाधारण्योपपादनस्यत्वन्मतेपितुल्यत्वादितिभावः । मतद्वयेपिद्वितीयादिसूत्रार्थान्क्रमेणानूद्यनिराह ॥ यच्चोक्तम

त्मश्रुतिग्रहणसंभवेप्राकरणिकलिंगरूपविशेषेणग्रहणायोगाच्च ॥ यच्चोक्तमन्यैः ॥ "यस्याग्निरास्यंद्यौर्मूर्धाखंनाभिश्चरणौक्षितिः। सूर्यश्चक्षुर्दिशश्श्रोत्र"मित्यादिनेश्वरेस्मर्यमाणंत्रैलोक्यात्मकंरूपंमूलभूतांश्रुतिमनुमापयत्समानविषयां "मूर्धैवसुतेजा"इत्यादिवैश्वानरविद्यामनुमापयद्वैश्वानरत्वेलिंगमितिद्वितीयसूत्रार्थइति। तन्न। "चक्षुषीचंद्रसूर्यौदिशःश्रोत्र"मित्यादिश्रुत्यंतरस्याप्युक्तस्मृतिमूलत्वसंभवेन वैश्वानरविद्यायास्तन्मूलत्वासिद्धेः।

प्र० न्यैरिति ॥ इत्यादिनेति ॥ द्यौर्मूर्धानंयस्यविप्रावदंति खंचैवनाभिंचंद्रसूर्यौचनेत्रे। दिशश्श्रोत्रेविद्धिपादौक्षितिंचसोचिंत्यात्मासर्वभूतप्रणेते"त्यादिरादिपदार्थः ॥ मूलभूतामिति ॥ स्मृतीनांश्रुतिमूलत्वस्यपूर्वतंत्रेस्मृतिनयेव्यवस्थापनात्तुल्यार्थायाएवमूलत्वादत्रचद्युप्रभृतीनांवैश्वानरस्यमूर्धाद्यवयवत्वेन "मूर्धैवसुतेजा"इत्यादिनोच्यमानत्वेनतुल्यार्थत्वादेतद्वाक्यमनुमापयति । स्मृतिश्चब्रह्मविषयेतिमूलभूतश्रुतेरपितथात्वंगमयिष्यतीत्यर्थः ॥ श्रुत्यंतरस्यापीति ॥ स्मृतिवचनंहिस्वमूलत्वेनश्रुतिंकल्पयति । नतुवैश्वानरविद्यामेवकल्पयितुंशक्नोति। "अ

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्निर्मूर्धाचक्षुषीचंद्रसूर्यौदिशश्श्रोत्रेवाग्विवृताश्चवेदाः । वायुःप्राणोहृदयंविश्वमस्यपद्भ्यांपृथ्वी''त्याथर्वणवाक्यमूलत्वेनापिसंभवेनकल्पकस्यान्यथासिद्धत्वादित्यर्थः । ननुश्रुतावग्निर्मूर्धेतिश्रूयते । स्मृतौचद्यौरिति । तथाचकथंतन्मूलत्वमितिचेन्न ।''असौवावलोकोग्निर्गौतमे''तिश्रुतेरग्नेर्द्युशब्दपर्यायत्वादितितात्पर्यात् । नकेवलंतेनवैश्वानरविद्यायाब्रह्मविषयत्वासिद्धिः । गतिसंभवेक्लिष्टकल्पनायोगश्चेत्याह ॥ अहमिति ॥ केचित्त्विति ॥ सूत्रे इतिशब्दःप्रकारवचनः । अनुमानशब्दश्श्रुतिलिंगवाक्येतिश्रुत्यादिसहपठितासाधारणधर्मरूपलिंगपरः । स्मर्यमाण

''अहंवैश्वानर''इतिसाक्षादीश्वरस्यवैश्वानरत्वबोधकस्मृतौसत्यांबकबंधप्रयासायोगाच्च । केचित्तु । द्युप्रभृतिपृथिव्यंतंरूपंश्रुतिस्मृतिष्वीश्वरेभिज्ञातमिहप्रत्यभिज्ञायमानंवैश्वानरस्येश्वरत्वेनुमानं लिंगमित्यर्थइत्याहुः । तन्न । स्मर्यमाणशब्दस्यप्रत्यभिज्ञायमानार्थेस्वारस्यभंगात् । ''अहंवैश्वानर''इत्यादिषूक्तस्येह ''आत्मानंवैश्वानर''मितिश्रुतिप्रत्यभिज्ञासंभवेलिंगप्रत्यभिज्ञायोगाच्च ।

प्र० शब्दःप्रत्यभिज्ञापरः । तथाच ''अग्निर्मूर्धाचक्षुषीचंद्रसूर्यौ द्यौर्मूर्धानंयस्यविप्रावदंती''त्यादिश्रुतिस्मृतिषु इति इत्थंभूतंद्व्यादिरूपंईश्वरेऽवगतंइहवैश्वानरविद्यायां''मूर्धैवसुतेजा''इत्यादिनास्मर्यमाणं प्रत्यभिज्ञायमानं लिंगंस्यात्।श्रुत्यादावगतंद्युप्रभृत्यात्मकत्वरूपंलक्षणंलिंगमिहप्रत्यभिज्ञायतइत्यर्थः । अनुस्मृतेश्चेत्यत्रानुस्मृतिशब्दस्यप्रत्यभिज्ञापरत्वेसूत्रकारैःप्रयुक्तत्वा''दितिश्रुतप्रकाशोक्तेः कथमेवंदूषणमित्यतस्स्वारस्येत्युक्तं । उक्तरीत्यास्वारस्यसंभवेत्यागायोगात् । सूत्रकारोक्तिस्त्वनुशब्दबलाद्वास्वारस्यासंभवाद्वाप्रत्यभिज्ञार्थत्वाशयेतियुक्तमितिभावः ॥ अहमिति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुत्यादावगतंद्युप्रभृत्यवयवरूपंलिंगमिहप्रत्यभिज्ञायतइत्युक्तिवत् ''अहंवैश्वानरोभूत्वे''तिस्मृतौविष्णाववगतवैश्वानरश्रुतिरिहप्रत्यभिज्ञाय तइत्यपिवक्तुंशक्यत्वेन लिंगाद्बलवच्छ्रुतिप्रत्यभिज्ञानोक्तिरेवज्यायसीतितत्त्यागायोगात् । तथाचस्मर्यमाणाश्रुतिरित्येवसूत्रणंस्यात् । लघुचैवंसति सूत्रंस्यादित्यर्थः । किंचानुमानशब्दस्यलिंगपरत्वेस्मर्यमाणंलिंगमित्येवनिर्देशस्स्यात् । लाघवादित्यपिध्येयं । शब्दादिभ्यइतिसूत्रेशंकाभागार्थ स्याविरोधात्सिद्धांतांशार्थमनूद्यनिराह ॥ यच्चेति ॥ अतएवेत्याद्युक्तंव्यनक्ति ॥ नहीति ॥ सर्वपाप्मेति ॥ ''तद्यथेषीकातूलमग्नौप्रोतं

यच्चोक्तमन्यैः । ''मनोब्रह्मेत्युपासीते''त्यादिवज्जाठरेवैश्वानरईश्वरदृष्ट्युपदेशोवा ''मनोमयःप्राणशरीर''इत्या दिवद्वैश्वानरोपाधेरीश्वरस्यद्रष्टव्यत्वेनोपदेशोवा तृतीयसूत्रस्थतथादृष्ट्युपदेशशब्दार्थइति । तत्रनतावदाद्यः । वैश्वानरस्यमनोवत्प्रतीकत्वेमनःशब्दस्येववैश्वानरशब्दस्यापिब्रह्मणिसमन्वयोक्त्ययोगात् । वैश्वानरज्ञानेनसर्व पाप्मप्रदाहश्रवणायोगाच्च । अतएवनद्वितीयः । नहिसोपाधिकस्योपासनेनज्ञानेनवासर्वपाप्मदाहः । यच्चोक्तं पुरुषविधशब्देनद्युमूर्धत्वादिकमुच्यतइति । तन्न । त्वन्मतेविशेषादित्यत्रापिद्युमूर्धत्वादेरुक्तत्वेनपुनरुक्तेः ।

प्र० प्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंत''इत्युक्तब्रह्मज्ञानफलस्यप्रतीकज्ञानादसिद्धेरितिभावः ॥ पुरुषविधशब्देनेति ॥ यद्यपिपरभाष्येपुरुषम पिचैनमितिसूत्रपाठउक्तः । तथापिसपाठोऽप्रामाणिकइतिभावेनायमेवपाठोऽनूदितः । येपुरुषविधमितिपठंतितेषांमतेद्युमूर्धत्वादिपृथिवीप्रति ष्ठितत्वांतंयत्पुरुषविधत्वंतद्गृह्यतइत्युक्तेरितिभावः ॥ विशेषादितीति ॥ आद्यसूत्रेपीत्यर्थः । अतएवेतिसूत्रार्थोनातीवविरुद्धइत्युपेक्ष्य सा

प्र० क्षादपीतिसूत्रार्थंनिराह ॥ यच्चोक्तमिति ॥ पूर्वंजाठराग्निप्रतीकोजाठराग्न्युपाधिकोवापरमेश्वरउपास्यइत्युक्तं । इदानींविनैवप्रतीकोपाधि कल्पनाभ्यांकेवलस्यैवाग्निवैश्वानरशब्दवाच्यत्वमुच्यतइत्युक्तमित्यर्थः ॥ क्लिष्टत्वादिति ॥ अव्यवधानार्थत्वात्तस्येत्यर्थः ॥ गुणपूर्तीति ॥ तथाचैतत्सूत्रंत्वन्मतप्रतिकूलमितिभावः । किंचतथादृष्ट्युपदेशादित्यनेनैवशंकायाःपरिहृतत्वात्साक्षात्तत्प्रतिपादकत्वोक्तावतिशयाभावात्प्रति कूलत्वाच्चनवाच्यमेवैतदित्यपिध्येयं ॥ यच्चोक्तमिति ॥ यस्त्वेतंप्रादेशमात्रमितिश्रुतप्रादेशमात्रश्रुतिः कथमित्याशंकायामतिमात्रस्यापीश्वर स्यप्रादेशमात्रपरिमाणहृदयादिस्थानेषूपासकानामभिव्यज्यमानत्वाद्वा हृदयादावनुस्मर्तव्यत्वाद्वा ''प्रादेशमात्रमिवहवैदेवाःसंविदिताअभिसं पन्नास्स''इतिश्रुत्याप्रादेशमात्रत्वसंपत्त्यावाप्रादेशमात्रत्वंयुक्तमित्यर्थः । हृद्यपेक्षयेत्यग्रेतनेनापिपरिहृतत्वंध्येयमितिभावेनाह ॥ इतिदिगिति ॥

यच्चोक्तं विनैवजाठराग्नेःप्रतीकोपाधिकल्पनाभ्यांसाक्षात्केवलस्यब्रह्मणउपासनास्वीकारेप्यविरोधः । केवलेप्य ग्निवैश्वानरशब्दावग्रणीत्वादिगुणयोगेनवर्तेतेइति । तन्न । साक्षाच्छब्दस्यकैवल्यार्थतायाःक्लिष्टत्वात् । अतीता नामाकाशादिशब्दानामागामिनामाक्षरादिशब्दानामपियौगिकत्वापत्त्यास्माकंमतइवसमन्वयाध्यायस्यतत्तच्छ ब्दप्रवृत्तिनिमित्तगुणपूर्त्यर्थत्वापाताच्च । यच्चोक्तंब्रह्मपक्षेप्रादेशमात्रश्रुतिरयुक्तेतिशंकानिरासार्थमभिव्यक्ते रित्यादिसूत्राणीति । तन्न । ''अर्भकौकस्त्वान्नेतिचे''दित्यनेन अत्रापि ''तथादृष्ट्युपदेशा''दित्यनेनचा स्याःपरिहृतत्वादितिदिक् । अत्रापिपरपक्षेपिवैश्वानरस्यजीवत्वंनिषिध्यब्रह्मेत्युक्तेस्तद्भेदार्थतैव ॥ केचित्तु । कथ

गु० पृथग्ग्रहणापत्त्यार्धजरतीयानुपपत्तेरितिभावः ॥ उक्तत्वादिति ॥ जाठराग्नेरपिभूतजातित्वेनपृथगुक्त्ययोगादित्यनेनोक्तत्वादित्यर्थः । वैश्वानरोपाधेरितिबहू

SGDF Sri Gargeshwari Digital Foundation

प्र० यद्वाकेषांचिन्मतेशब्दादिभ्यइत्यादिसूत्रार्थदूषणंकुतोनकृतमित्यतआह ॥ इतिदिगिति ॥ तथाहि । तत्सूत्रमग्न्यादिशब्दादिनाजाठराग्ने वैश्वानरत्वशंकानिरासकमित्युक्तमयुक्तं । जाठरस्यभूतत्वेनपृथक्शंकायोगात् । अतएवेतिसूत्रेतन्निरासादवश्यवक्तव्यपरसाधकसावकाशत्वो त्त्याबाधकोद्धारपरत्वसंभवेऽन्यथावर्णनायोगाच्च । पुरुषमपीतिपाठस्यासांप्रदायिकत्वात् । अग्निशब्दस्याग्रनयनादिनाभगवद्वाचित्वंवक्तुंसा क्षादपीतिसूत्रमित्यपिन । शब्दमात्रस्यविष्णुवाचित्वेऽन्यत्रव्यवहारविरोधरूपबाधकोद्धारत्वसंभवेऽन्यथोक्त्ययोगादित्यादिज्ञेयमितिभावः ।

मपरिच्छिन्नस्यप्रादेशमात्रत्वमितिशंकानिरासकमभिव्यक्तेरितिसूत्रं । उपासनार्थंप्रादेशमात्रत्वेनाभिव्यक्तेरिति चतस्यार्थः । मूर्धप्रभृत्यवयवैःपुरुषविधत्वोक्तिःकिमर्थेतिशंकानिरासकमनुस्मृतेरितिसूत्रं । पुरुषविधत्वेनानुस्मृ त्यर्थंतदुक्तिरितिचतस्यार्थः । कथमुरःप्रभृतीनांवेद्यादित्वोक्तिरितिशंकानिरासकंसंपत्तेरितिसूत्रं । प्राणाहुतेरग्नि होत्रत्वसंपादनायोरःप्रभृतीनांवेद्यादित्वोक्तिरितिचतस्यार्थइत्याहुः । तत्राभिव्यक्त्यादिसूत्राणांभिन्नविषयत्वा दाश्मरथ्यादिपदसूचितविकल्पोनस्यात् । प्रतिसूत्रंसाध्याध्याहारश्चस्यात् ॥ टीकाक्षरार्थस्तु ॥ गतिसांधेन

प्र० अत्रापि एतदधिकरणेपीत्यर्थः ॥ अपरिच्छिन्नस्येति ॥ अभिविमानपदोक्तस्येत्यर्थः । अभिव्यक्तेः उपासकाभिव्यक्त्यर्थं । तद्बुद्धिस्थतये तियावत् । द्युप्रभृतिप्रदेशसंबंधिन्यामात्रयापरिच्छिन्नत्वरूपंप्रादेशमात्रत्वमित्याश्मरथ्योमन्यतइत्यर्थः । अनुस्मृत्यर्थं उपासनार्थं ॥ विक ल्पइति ॥ अस्मन्मतरीत्यासूक्तव्यवस्थारूपैकार्थएवनानानिमित्तोक्त्या "लोपश्शाकल्यस्ये"त्यादाविवमुनिग्रहणसूचितविकल्पोयुज्यते । ना न्यथेत्यर्थः ॥ साध्येति ॥ अभिव्यक्तेरित्यत्रप्रादेशमात्रत्वमिति अनुस्मृतेरित्यत्रपुरुषविधत्वमिति संपत्तेरित्यत्रोरःप्रभृतीनांवेदित्वाद्युपदे

SGDF Sri Gargeshwari Digital Foundation

प्र० शइत्यध्याहारइत्यर्थः । यद्यप्यत्रभाष्यदिशाऽभिव्यक्तेर्निमित्तादग्न्यादिसूक्तनियमइत्याश्मरथ्यइत्यर्थप्रतीत्यासिद्धांतेप्यध्याहारस्साध्यस्या विशिष्टइत्यतःप्रतिसूत्रमित्युक्तं । अतएवभाष्येप्रतिसूत्रमेतदेवसाध्यमुक्तं । तथाचैकत्राध्याहृतमेवानुवर्तिष्यतेसर्वत्रेतिभावः । यद्वा अभि व्यक्तेस्साक्षादप्यविरोधइत्याश्मरथ्यइत्यादिरूपेणप्रतिसूत्रमन्वयः । साक्षादपि अनन्ययोगेनमुख्यवृत्त्यैवब्रह्मणस्सर्वसूक्तप्रतिपाद्यत्वेपि । अ ग्न्यादिसूक्तव्यवस्थायाअविरोधइत्याश्मरथ्यादिर्मन्यते । अभिव्यक्त्यादेर्निमित्तादित्येवंरूपेणार्थोपपत्तेरनुवृत्तस्यपर्यवसितोक्तिर्भाष्येसूक्तनिय मइति । अतोस्माकंनकाप्यध्याहारस्तवतुप्रतिसूत्रमितिभावः । यत्तूक्तरीत्यावैश्वानरशब्दस्यजाठरादिषुचतुर्षुसाधारणस्यशिवासाधारणब्रह्मा त्मादिशब्दैर्विशेषणाच्छिवएववैश्वानरइति तदप्येतेननिरस्तं । जाठरस्यपार्थक्यायोगादेरुक्तत्वात् । ब्रह्मात्मादिशब्दस्यविष्ण्वेकनिष्ठतायाभा ष्यादौबहुधाप्रतिपादनात् । "अहंवैश्वानर"इतिस्मृतिविरोधात् । पुरुषसूक्तविरोधाच्च । पुरुषसूक्तवैष्णवतायाश्चभाष्येस्पष्टत्वात् । सूत्रार्थ निरासप्रकारस्तुकेषांचिन्मतइवध्येयः । अनतिभिन्नार्थत्वात्सूत्राणामिति । शब्दादिभ्यइतिसूत्रे "मूर्धानंदिवोअरतिंपृथिव्या"इत्यस्यामृचिग तिसाधनत्वादरतिःपादःपृथिव्याःकारणमितिव्याख्यातं । तद्व्यनक्ति ॥ **गतीति** ॥ अरतिशब्देनगतिरुच्यते । पादस्यतत्साधनत्वात्कार्ये गमनेनतत्साधनंपादोलक्ष्यते । अरतिशब्दार्थोगतिःकथमित्यतोऽवयवार्थेनेत्याह ॥ **लोकइति** ॥ नञोविरुद्धार्थत्वाद्रतिविरुद्धाऽरतिरितिग

त्वादरतिःपादइति ॥ लोकेगमनेनारतिदर्शनाद्रतिविरुद्धगति
साधनत्वात्पादोऽरतिशब्दार्थइत्यर्थः ॥ प्रागुक्तैवानुपपत्तिरिति ॥

गु० व्रीहिः ॥ **गतिसाधनत्वादरतिरिति** ॥ रतिशब्दस्यरमणेनञश्चविरोधेप्रसिद्धत्वात्कॢप्तप्रसिद्धिबललब्धलक्षणापिशक्तितुल्येतिभावः । अत्रटीकायामासन्नित्यस्यास्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिरेवोच्यतइति । तत्वप्रदीपेतुनरतिर्येनेतिसोऽरतिःपादइत्यर्थइत्युक्तं । संपत्तेरितिसूत्रव्याख्यायां "अत्रव्यवहारस्योपचरितत्वांगीकारेप्रागुक्तैवानुपपत्ति"रित्येतद्दुर्गमत्वाद्व्यनक्ति ॥ वैदिकस्येति ॥ "विश्वंहरिमारादरमुपास्त"इतिश्रुतावरमित्यस्यार्थाप्रतीतेराह ॥ भाष्येति ॥ एवेतिटीकाकारानुक्तेर्निमित्तमेतदितिसूचितं । शिष्टमुपन्यासमुखेनविशदीकृतमितिभावः । पेटिकासंगतिस्तुप्रागेवोक्तेति ॥ वैश्वानराधिकरणं ॥ ७ ॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रगुरुपादशिष्यराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेप्रथमाध्यायस्यद्वितीयःपादः॥

वैदिकस्याग्निसूक्तादिव्यवहारस्याग्न्यादिप्रतिपादकत्वादिनिमित्तत्वेनमुख्यत्वांगीकारेसर्वनामेत्यादिश्रुतिविरोधादिरूपप्रागुक्तानुपपत्तिरेवव्यवहारस्याभिव्यक्त्यादिनिमित्तकत्वेनोपचरितत्वांगीकारेहेतुरित्यर्थः । भाष्योदाहृतश्रुतावरमित्यस्यसम्यगित्यर्थइतितत्वप्रदीपएवोक्तमिति ॥ ७ ॥ वैश्वानराधिकरणं ॥ ७ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकायाविवृतौतात्पर्यचंद्रिकायांप्रथमाध्यायस्यद्वितीयःपादः ॥ १॥२॥

गु० तयेत्युक्तिःपद्दन्नित्यादिनास्यशब्दस्यासन्नादेशविधानादासन्नितिसुपांसुलुगितिविभक्तिलोपविधानाच्चेतिज्ञातव्यं ॥ **प्रागुक्तैवेति** ॥ विष्णुसूक्तमित्यादौसर्वत्रदेवतासंबंधेनैवसूक्तव्यवहारात्प्रतिपाद्यप्रतिपादकसंबंधएवमुख्यःसूक्तादिव्यवहारप्रयोजकइत्यभिप्रेत्याग्न्यादिसूक्तेषुमुख्यप्रयोजकस्यबाधादुपचारत्वंसूक्तानामुक्तं । भावबोधेतुषष्ठ्यर्थस्यसंबंधस्यैवाग्नेःसूक्तमित्यादौनिमित्तत्वात् । एकशतंषष्ठ्यर्थइतिमहाभाष्योक्तरीत्यासर्वेषामविशेषाद्देवदत्तस्यपुत्रः देवदत्तस्यपौत्रः देवदत्तस्यनप्तेत्यादाविवपरंपरासंबंधस्यापिमुख्यत्वमभिप्रेत्यसूक्तानांमुख्यार्थतोक्तेतिज्ञेयं ॥ ७ ॥ **वैश्वानराधिकरणं** ॥ ७ ॥ **इतिश्रीमत्तात्पर्यचंद्रिकावाक्यार्थविवृतौश्रीमद्विद्याधीशतीर्थपूज्यपादानांशिष्येणकेशवभट्टारकेणविरचितायांप्रथमाध्यायस्यद्वितीयपादःसमाप्तः** ॥ २ ॥

प्र० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ **ॐद्युभ्वाद्यायतनंस्वशब्दात्ॐ** ॥ अस्यपादस्यैतदध्यायांतर्भावसंगतेस्समन्वयपरत्वादेवसिद्धेः पूर्वपादद्वयेनसंगतिंवक्तुं सर्वनामलिंगानांपादद्वयेनैवविष्णौसमन्वितत्वान्नामलिंगेभ्योन्यस्याभावाद्व्यर्थोयंपादइत्यतःपादफलमाह ॥ **अत्रेति** ॥ अस्य इतिशंकानिरस्यतइतिश्लोकगतेनान्वयः । पूर्वद्विपाद्यांलोकतोन्यत्रप्रसिद्धानामशेषनाम्नामशेषलिंगानामन्यैकगतत्वमाशंक्यन्यायैर्ब्रह्मगतत्वमुक्तं । एवंतर्हिलोकप्रसिद्धिन्याययोरुभयोरनुग्रहायोभयत्रवृत्तिरस्त्वितिशंकापादद्वयानंतरमेवोदेतीतिसात्रपादेनिरस्यते । तथाचश्रोत्राकांक्षिततैवसंगतिरितिभावः । केषामित्याकांक्षांपूरयन्श्लोकंव्याचष्टे ॥ **पादद्वयेति** ॥ नामलिंगात्मकशब्दानामितिशेषः । पादद्वयोक्तन्यायैरापादितोभयप्रसिद्धिकानामित्यर्थः । यद्यपिप्रागुक्तन्यायैर्ब्रह्मण्येवप्रसिद्धिस्संपाद्यते । नत्वन्यत्रापि । अन्यत्रतुसालोकतएव । तथापिलोकतोन्यत्रप्रसिद्धौसत्यांयत्नेनब्रह्मणितस्यामुक्तायामुभयत्रैवसापादिताभवतीतिभावेनोभयेत्युक्तं । एतेनप्रागेवान्यगतत्वनिरासस्य "नेतरोऽनुपपत्तेः । अनुपपत्तेस्तुनशारीरः । अनवस्थितेरसंभवाच्चनेतरः । नचस्मार्तमतद्धर्माभिलापा"दित्यादिनाकृतत्वान्नैतच्छंकावकाशइतिनिरस्तं । नेतरइत्यादिनाशब्दानामन्यत्रतात्पर्याभावमात्रोक्तावपिशक्तेरनिरासेनोभयत्रशक्तिस्स्यादितिवा येषामुभयगतत्वेऽनुपपत्त्यादेस्स्फुटप्रतिभासस्तदन्येषांपादद्वयापादितोभयप्रसिद्धिकानामुभयपरत्वमेवेतिवा शंकोदयादितिर्

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐद्युभ्वाद्यायतनंस्वशब्दात्ॐ ॥

अत्र माभूदन्यैकगतताब्रह्मैकगततापिवा। किंतूभयगतत्वंस्यादितिशंकानिरस्यते ॥१॥ पादद्वयापादितोभयप्रसिद्धीनां

गु० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ **ॐद्युभ्वाद्यायतनंस्वशब्दात्ॐ** ॥ **द्विस्थिताइत्यनेनत्विति** ॥ द्विस्थिता

SGDF Sri Gargeshwari Digital Foundation

प्र० तीयेसुधायामेवव्यक्तत्वादितिभावः । नकेवलंतएवपुनरन्येपीत्याह ॥ **स्वतइति** ॥ श्रुत्यादिसाम्येनवाप्रवृत्तिनिमित्तादिसाम्येनवेत्यर्थः । सर्वत्रेतिनयोक्तदिशापूर्वशब्दानांब्रह्मणितात्पर्यमेवावधारितं नतुशक्तिरपीतिपक्षमुपेत्योक्त**मुभयपरत्वमेवनतुब्रह्मैकपरतेति** । एतेन ब्रह्म परत्वस्यपूर्वन्यायेनैवसिद्धेःकिमनेनपादेनेतिशंकाप्रत्युक्ता । ब्रह्मपरतामात्रसिद्धावपि "तत्तुसमन्वया"दित्युक्तावधारणानुपपत्तिशंकायांत त्समर्थनार्थत्वादयंपादस्सफलइतितात्पर्यात् । एतेन "हरौतदितरत्रचश्रुत्यादिप्रसिद्धनामलिंगात्मकशब्दानांविष्ण्वेकवाचित्वंप्रबलहेतुभिःप्रति पादयत्यस्मिन्पाद"इतिटीकाफलोक्तिमुखेनविवृता । तत्रवाचित्वोक्तावपीहपरत्वोक्तिस्तदेकवाचित्वतदेकपरत्वयोर्द्वयोरप्याक्षेपायेत्याहुः । आ

स्वतःसिद्धोभयप्रसिद्धीनांचोभयपरत्वमेव । नतुब्रह्मैकपरतेतिशंकात्रनिरस्यते । स्पष्टयिष्यतेचैतत्
"कंपना"दित्यत्र । तदुक्तमनुव्याख्याने "आहोभयगतत्वंचस्यादतोलिंगशब्दयोः । इतिसंशयनुत्त्यर्थ
मुभयत्रप्रतीतितः । शब्दानांवर्तमानानांसलिंगानांविशेषतः । समन्वयोहरावेवयन्नैवान्यत्रमुख्यत"इति ।

प्र० पादितोभयप्रसिद्धिकाःकेशब्दाः कथंचसातेषां पूर्वोक्तन्यायलोकप्रयोगाभ्यामुभयप्रसिद्धिकत्वेपूर्वत्रापिप्रतिनयमेवंसुवचत्वाद्ब्रह्मलिंगादि रूपन्यायस्यलोकप्रसिद्धेश्चप्रत्युदाहरणंभावादित्यतआह ॥ **स्पष्टयिष्यतेचेति** ॥ भाष्येऽस्फुटत्वादाह ॥ **तदुक्तमिति** ॥ उभयगतत्वशंका निरस्यतेऽत्रेत्येतत्तृतीयाध्यायस्यतृतीयपादउक्तमित्यर्थः । आहेत्यस्यहरावेवेत्यनंतरमध्याहृतेनेतिशब्देनेत्याहेतिवा ब्रह्मण्येवसमन्वयमिति पूर्वश्लोकस्थेनवाऽन्वयः । अत्रश्लोकेतु "इत्याहैवंचशब्दाना"मित्युपरितनानुव्याख्यानस्थसित्याहेतिपदमाकृष्यान्वयोज्ञेयः । अतइत्यस्यान्य त्रप्रसिद्धानामशेषनामलिंगात्मकशब्दानांद्विपाद्याभगवत्परत्वसमर्थनाद्धेतोरित्यर्थः । लोकतोऽन्यत्रप्रसिद्धेश्चोभयान्यथानुपपत्त्योभयगतत्वं

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यादितिसंशयनिवृत्त्यर्थमितिसुधोक्तोर्थउपलक्षणं । किंतुश्रुत्यंतरसाधारण्यप्रवृत्तिनिमित्तादिसाधारण्यादितइत्यप्यतश्शब्दार्थइतिभावः । अन्यथा उक्तेर्थेसर्वत्रनायंसंवादस्स्यादितिज्ञेयं । कथमियंशंकात्रपरिहृतेत्यतउक्तमुभयत्रेति । हरौतदन्यत्रचप्रतीतितः पूर्वोक्तन्यायलोकप्रसिद्धिभ्यांवा श्रुत्यंतरादिसाधारण्यबलेनवोत्पन्नसाधारण्यप्रतीतितोवर्तमानानां नतुवस्तुतउभयत्रप्रवर्तमानानामित्यर्थः । सलिंगानांशब्दानां नाम्नांलिंगानांच । हरावेवविशेषतः परममुख्यवृत्त्यातात्पर्येणच । समन्वयइत्याहेत्यन्वयइतिप्रागवोचाम । कुतइत्यतउक्तं यदिति । यद्यस्मात् । वर्ततइतिशेषः । “शब्दालिंगानिचे”त्यग्रेतनेनान्वयः । एतेन “तत्रचान्यत्रचे”त्यादिभाष्यादौ “आहोभयगतत्वंचे”त्यादित्रिपादी

अत्रानुव्याख्याने “लिंगंसाधारणंशब्दौस्थानंलिंगमनुग्रहः । पुनःशब्दालिंगशब्दौविचार्याद्विस्थिताइहे” त्येतत्पादीयाधिकरणार्थःसंगृहीतः । अत्रद्युभ्वादीत्यत्रसर्वाधारत्वलिंगं भूमाक्षराधिकरणयोर्भूमाक्षरनामनी ईक्षतीत्यत्रसृष्टिस्थानं दहरइत्यत्रहृत्पद्मस्थत्वलिंगं अनुकृतेरित्यत्रानुकूल्येनगृह्यमाणत्वलिंगं पुनरपि

प्र० संयोज्यव्याख्येयेतिसूचितं । एवंपादसंगतिमुक्त्वैतत्पादीयाधिकरणोपाधीननुव्याख्यानोक्तानाह ॥ अत्रेति ॥ पादइत्यर्थः । “एतच्च न्यायविवरणेस्वयमेवाचार्येणव्याख्यातमितितत्रैवावगंतव्य”मितिसुधायामुक्तत्वान्न्यायविवरणरीत्यास्वयंव्याचष्टे ॥ अत्रेत्यादिना ॥ श्लोकोक्ताधिकरणार्थेषुविवेकःप्रदर्श्यतइत्यर्थः ॥ लिंगमिति ॥ यद्यप्यत्रलिंगानिद्युलोकाद्याधारत्वादीनिबहूनि । “अत्रोक्तानांलिंगाना”मिति न्यायविवरणएवोक्तेः । तथाप्येकवाक्योक्तत्वेनैकवचनमितितत्रटीकायामेवोक्तमितिभावः । पुनरपीत्यस्यशब्दाइत्यन्वयः । तेकुत्रेत्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **शब्दादिति** ॥ "शब्दादेवप्रमितः। कंपनात्। ज्योतिर्दर्शनात्। आकाशोर्थांतरत्वादिव्यपदेशा"दित्यत्रेत्यर्थः ॥ **विचार्यंतइत्यर्थइति**॥ एतेनप्रागुक्तटीकावाक्यस्थं "नामलिंगात्मकशब्दाना"मित्येतदिदमत्रेतिविशिष्यविवृतंध्येयं । अनुव्याख्यानोक्तंस्थानंतुलिंगंसन्नामेतिवाव्याख्यास्यामोग्रइतिभावः ॥ **लिंगेति** ॥ साधारणा साधारणः इतिविपरिणामेनेत्यर्थः । एतेन "विचार्या"इत्यपिपरिणाम्यतइतिसूचितं ॥ **इतिभेदइति** ॥ "साधारणमित्यस्ययथान्वयंविपरिणामेनसर्वत्रानुवृत्तिरितिज्ञापनार्थमेवांतेपिद्विस्थिताइत्याहे"तिन्यायविवरणटीकोपलक्षणमितिभावः । नन्वत्रचतुर्दशाधिकरणानि । उपाधयस्तुद्वादशैवोक्ताः । तत्कथमित्यतआह ॥ **देवतेति** ॥ तद्धानिः शूद्राणामधिकाराभावः ॥ **प्रसंगादिति** ॥ तत्रैवैतत्स्पष्टयिष्यते । "इतीमौविषयावित्यध्याहाराच्चिंतितावितिसाध्विति"सुधायामेवोक्तं । एतेन "देवताद्यधिकरणव्यावृत्त्यर्थंप्रायेणेती"त्येतट्टीकावाक्यंविवृतं । एतदधिकरणस्यैतत्पादाद्यंतर्भावोक्तिपरां "तत्ररुद्रोवावलोकाधार"इत्यादिटीकांविवरितुमाक्षि

शब्दात् कंपनात् ज्योतिः आकाशः इतिचतुर्ष्वधिकरणेषुक्रमेणेशानवज्रज्योतिराकाशशब्दाः सुषुप्तीत्यत्रस्वप्नादिद्रष्टृत्वलिंगंपत्यादीत्यत्रब्राह्मणशब्दश्चविचार्यंतइत्यर्थः । अत्रचलिंगवचनविपरिणामेनसर्वविशेषणेनसाधारणशब्देनसर्वेषामुभयत्रप्रसिद्धिः । द्विस्थिताइत्यनेनतुपूर्वोत्तरपक्षहेतुमत्तोक्तेतिभेदः । देवताधिकरणापशूद्राधिकरणयोस्तुसमन्वयाध्यायेप्रासंगिकत्वात्तदर्थोनसंगृहीतः । तदुक्तमनुव्याख्याने "अधिकारश्चतद्धानिः प्रसंगादेवचिंतिता"विति ।

गु० इत्यस्यसाधारण्यानुवृत्तिज्ञापकत्वेनन्यायविवरणटीकायांव्याख्यानंतुसत्यंतरंगज्ञापकेबहिरंगव्याख्यानंकिमर्थंगवेषणीयमित्याशयेन । इहतुव्याख्यानतोविशेषप्रतिपत्तिरितिन्यायेनाप्युपपत्तेस्संभवाद्याख्यानांतरमितिद्रष्टव्यं । स्वतएवोभयत्रप्रसिद्धानांतुल्यप्रसिद्धिकत्वात्पूर्वपक्षेसिद्धांतप्रसिद्धिबाधः । सिद्धांतेचपूर्वपक्षप्रसिद्धिबाधः ।

प्र० पति ॥ **नन्विति** ॥ "यएषोंतश्चरतेबहुधाजायमान"इत्युक्तेत्यर्थः ॥ **तथात्वइति** ॥ भाष्यादौतेनैवपूर्वपक्षित्वात् । सर्वत्रेतिनयेचंद्रिकायां "अंतराद्यधिकरणेषुतैस्तैर्लिंगैर्विष्णुपरतैवव्युत्पादिता । नतुतत्रमुख्यते"त्याद्युक्तदिशालिंगपादन्यायैर्लिंगानामशेषाणांविष्णुपरत्वसिद्धावपिमुख्यत्वस्यासिद्धेर्यौगिकजायमानशब्दस्यलिंगवाचिनोन्यत्रैवमुख्यत्वान्मुख्यार्थत्यागहेतोर्विष्णुलिंगस्येहाभावाभिमानेनवा भावेपिकथंचिन्नेयत्वाभिमानेनवा पूर्वपक्षोदयसंभवादितिभावः । टीकायां "रुद्रोवावलोकाधार"इतिश्रुतिचतुष्टयोक्त्यालिंगस्योभयत्रप्रसिद्ध्युक्तेश्चतुर्धातात्पर्यैश्रुत्याकारोक्तिपूर्वंव्यंजयन्नुक्तशंकांसमाधत्ते ॥ **उच्यतइत्यादिना** ॥ श्रुतिभ्यइत्यस्यस्वतउभयत्रप्रसिद्धत्वस्येत्यन्वयः । उक्तरीत्याऽन्यत्रप्र

नन्वन्यत्रप्रसिद्धशरीरित्वसाहित्यादंतर्यामित्वमिवद्युभ्वाद्यायतनत्वमप्यन्यत्रप्रसिद्धजायमानत्वादिसाहित्यादन्यत्रप्रसिद्धंयुक्तं । नचवाच्यंलिंगपादीयन्यायैर्जायमानत्वलिंगस्यापिविष्णौसंभवेनान्यत्रप्रसिद्धिर्नेति। तथात्वेतेनपूर्वपक्षोक्त्ययोगादिति चेदुच्यते । अन्यत्रप्रसिद्धसाहचर्येणपरतोन्यत्रप्रसिद्धत्ववन्न्यायविवरणोदाहृताभ्यः "रुद्रोवैलोकायतनं । लोकाश्चलोकिनश्चविष्णावेवोताश्चे"त्यादिसमाख्याश्रुतिभ्यउभयत्रप्रसिद्धसाहचर्यंविनास्वतउभयत्रप्रसिद्धत्वस्यापिसत्त्वात्तेनरूपेणपादसंगतिः। अन्यथारूपद्वयवतःक्वापिविचारोनस्यात्। अथवा अन्यत्रप्रसिद्धेरन्यत्रप्रसिद्धान्यसाहित्यसापेक्षत्वादुभयत्रप्रसिद्धेस्तुत

गु० तथाचकथंनिर्णयइत्याशंक्यद्विस्थिताइत्युक्तं। तथाचसिद्धेसत्यारंभोनियमार्थइतिन्यायेनपूर्वोत्तरपक्षहेतुमंतइत्युक्तंभवति। एवंचान्यत्रापिपूर्वोत्तरपक्षहेतुमत्तास्ति। अत्रैवकुतोवाच्येत्याशंकानिरस्ताभवति । अथवेत्यादिपक्षाणामुत्तरोत्तरस्वारस्यंस्पष्टमेव । नन्वस्तूक्तरीत्यापादद्वयसंगतिः । तथापिप्रथमातिक्रमेकारणाभावादादा

SGDF Foundation

प्र० सिद्धत्वसंभवेपि "श्रुत्यंतरादिभिस्तुल्ये"त्युक्तदिशोभयत्रप्रसिद्धत्वांशमादायपादसंगतिरित्यर्थः ॥ **निरपेक्षेति** ॥ "यद्योन्यांतदुत्तरयोर्गायती"त्यत्रयथोत्तराशब्दस्योत्तराग्रंथपठितऋगर्थकत्वं । नतूत्तरदेशपठितऋगर्थकत्वं । तस्यपूर्वसापेक्षत्वादुत्तराग्रंथपठितयोरित्यस्यनिरपेक्षत्वात् । तद्वदितिभावः । नन्वेवंनिरपेक्षादरेसर्वत्रप्रसिद्धेत्यादावुक्तसर्वगतत्वादेरेवसंभवेनान्यसाहित्येनान्यत्रप्रसिद्ध्युक्तिर्नस्यादित्यतआह ॥ **अर्भकेति** ॥ एवमन्यत्रप्रसिद्धत्वरूपत्वमस्यलिंगस्योपेत्यद्वेधागतिरुक्ता । अधुनातथात्वमेवास्यनास्तीतिभावेनोत्तरंसमाधानद्वयं । तत्राद्यं "श्रुत्यादितोलोकतोवापीतरेषुप्रसिद्धते"तियदन्यत्रप्रसिद्धिलक्षणमुक्तंतत्रश्रुत्यादितौल्याभावेसतीतिविशेषणंदेयं । अतोनदोषइत्याह॥**यद्वेति** ॥ श्रुत्यादितइतिपदस्थानेस्वतइतिपदंप्रक्षिप्येतरेषुप्रसिद्धत्वंलोकतस्स्वतएववेत्यन्यत्रप्रसिद्धत्वलक्षणंवाच्यं । तच्चेहनास्ति । पूर्वत्रास्तीत्याह ॥

न्निरपेक्षत्वान्निरपेक्षादरात्पादसंगतिः । अर्भकौकस्त्वादिरूपंसर्वगतत्वादिकंतुब्रह्मणिपूर्वपक्षेकया पिश्रुत्यानोच्यतइतिनतस्यस्वतउभयत्रप्रसिद्धता। यद्वासमाख्याश्रुत्यादितौल्याभावोप्यन्यत्रप्रसिद्धलक्षणांतर्गतः। सचेहनास्ति। अंतर्यामित्वादौत्वस्ति। ततश्चद्युभ्वायतनत्वमुभयत्रप्रसिद्धमेव ।

गु० वेवतन्निवेशोयुक्तइत्यतउभयत्रसाहचर्यविनेत्युक्तस्याभिप्रायमाह ॥**अथवेति**॥ननुब्रह्मणोऽलौकिकस्वरूपसर्वगतत्वप्रतिपादकस्यांतर्हृदयेऽणीयानित्यादिवाक्यस्यसत्त्वेनतस्यन्यायविवरणेपूर्वपक्षउदाहरणेपि वस्तुतउभयत्रप्रसिद्धतास्यादित्यतआह॥**अर्भकेति**॥ नन्वन्यत्रप्रसिद्धेष्वपिसर्वगतत्वादिषुसमाख्याश्रुत्यादितौल्यस्यैवोक्तरीत्या ॥ ५४२ ॥ सत्वेनोभयत्रप्रसिद्धतास्यादित्यतआह ॥ **यद्वेति** ॥ अस्मिन्पक्षेऽन्यत्रप्रसिद्धिलक्षणेसमाख्याश्रुत्यादितौल्याभावरूपविशेषणप्रक्षेपःकर्तव्यइतीममेवास्वरसंमनसिनिधा

SGDF
Sri Gargeshwari Digital Foundation

प्र० यद्वासर्वगतत्वादीनीति ॥ पूर्वोदाहरणानांस्वतोन्यत्रप्रसिद्धतामाह ॥ तथाहीति ॥ कुतइत्यतउक्तमेवंधर्मानिति । टीकाविरोधमाशंक्याह ॥ टीकायामिति ॥ उत्तरत्रेति ॥ उत्तराधिकरणेषु । पादसंगतिः पादांतर्भावः । भूमनयेप्राणाभेदेनप्रतीतभूमनाम्नःप्राणोनूत्क्रामतीतिश्रुतनिरवकाशोत्क्रमणलिंगेन अक्षरनयेश्रुत्यंतरसिद्धचंद्राद्याधारत्वश्रीतत्वलिंगेनाक्षरनाम्नः ईक्षतिनयेबहुस्यामितिश्रुतविकाररूपलिंगेनसदेवेतिश्रुतसन्नाम्नः दहरनयादावाकाशश्रुत्यादिनाहृत्पद्मस्थत्वादेरन्यत्रप्रसिद्धत्वेत्युक्तदिशाचतुर्धांतर्भावसंगतिरूह्येत्यर्थः । समाख्याश्रुतितौल्यस्यसर्वत्रासंभवाद्यथासंभवमित्युक्तं । एवंपादांतर्भावसंगत्युक्तिपरटीकांसमर्थ्येदानींयातु "श्रुत्यादिसंगति"मित्यादिकाऽदृश्यत्व

यद्वा सर्वगतत्वादीनींद्राकाशादिशब्दवत्स्वरूपेणैवान्यत्रप्रसिद्धानि । नत्वन्यत्रप्रसिद्धतत्तत्साहचर्यात् । येनद्युभ्वाद्यायतनत्वादिकमपितत्तत्साहचर्यात्तथास्यात् । तथाहि पूर्णेऽभोक्तरिकर्महीनेचब्रह्मण्यर्भकौकस्त्वादिरूपंसर्वगतत्वमर्त्तृत्वंकर्मफलभोक्तृत्वंचायुक्तं। तथा अनित्यक्रियारूपमंतरत्वमंतर्यामित्वंचाक्रियेब्रह्मणिसदानयुक्तं। तथा अदृश्यत्वाद्यभावधर्मत्वंभावरूपेब्रह्मण्ययुक्तं। "एवंधर्मान्पृथ"गितिश्रुत्याब्रह्मणिधर्मधर्मिभेदनिषेधात्। अतएवानुव्याख्यानेतत्रसिद्धांतेक्रियायानित्यत्वंभावस्याप्यभावात्मकत्वंचसाधितं। एवंचसर्वगतत्वादीनिब्रह्मण्ययुक्तत्वादेवान्यत्रप्रसिद्धानि। वैश्वानरशब्दस्त्वग्निपर्यायतयान्यत्रप्रसिद्धः । टीकायांसर्वगतत्वादीनामादित्यादिश्रुतिसाहचर्यादन्यत्रप्रसिद्ध्युक्तिस्त्वन्यमात्रेप्रसिद्धेःस्वतःसिद्धत्वेप्यादित्यादिरूपान्यविशेषाभिप्राया । एवमुत्तरत्रापियथासंभवंपादसंगतिरूह्या ।

गु०यपक्षांतरमाह ॥यद्वेति॥ पूर्वपादांत्यस्योत्तरपादाद्यस्यचाधिकरणस्यावांतरसंगतेरावश्यकत्वंवदंतंप्रत्यभ्युच्चयेनाह ॥यद्वेति॥ जीवमात्रादेश्चेति ॥ यद्यप्यत्रवायो

SGDF
Sri Gargeshwari Digital Foundation

प्र० नयेनास्यसंगत्युक्तिपरभाष्यटीकासानयुक्तैव । तथात्वेतदानंतर्यप्रसंगेनव्यवधानायोगादितिमंदाशंकांव्युदसितुं साफलोक्तिपरा । संगतिप
दंचफलपरं । आनंदमयनयोक्तदिशायेनकेनचित्पूर्वेणसंगतिरपेक्षितानत्वव्यवहितेनेत्येतदाशयंवेतिभावेन पादांत्याद्यनययोस्संगतिनियमबु
द्धिंशिष्याणांव्युदसितुमुक्तंस्मारयन्नस्तिचेन्नत्याज्येतिसंगतिंचाह ॥ **पूर्वेत्यादिना** ॥ एतेन यदुक्तंश्रुतप्रकाशे पूर्वस्मिन्नधिकरणेद्युपृथिव्या
दिसंबंधिनःपरमात्मत्वमुक्तं । द्युपृथिव्यादिसंबंधित्वंपरमात्मव्यतिरिक्तस्यदृश्यतइतिशंकयैतदारंभइतिसंगतिरिति तन्निरस्तं । पूर्वाधिकर
णप्रधानहेतुनैवसंगतिसंभवेसंबंधसामान्यमुखेनसंगत्युक्त्ययोगादिति । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेत्यादिना** ॥ इत्यादिनोक्तमित्य

पूर्वपादांत्योत्तरपादाद्ययोश्चाधिकरणयोर्नावांतरसंगत्यपेक्षेत्युक्तं । यद्वापूर्वत्रेवात्राप्यात्मशब्देनसिद्धांतादातिदे
शिक्यवातरसंगतिः । अत्र "यस्मिन्द्यौ"रित्यादिनोक्तं द्युभ्वाद्यायतनत्वंकिंरुद्रादेःकिंवाविष्णोरितिचिंता । तदर्थ

प्र० नेन "तद्युभ्वाद्यायतनत्वंविषय"इतिटीकास्थतच्छब्दार्थोविवृतः । आथर्वणे "द्वेविद्येवेदितव्ये पराचैवापराचे"त्युपक्रम्यश्रूयते "यस्मि
न्द्यौःपृथिवीचांतरिक्षमोतंमनस्सहप्राणैश्चसर्वैः । तमेवैकंजानथआत्मानमन्यावाचोविमुंचथ । अमृतस्यैषसेतुः । अराइवरथनाभौसंहताय
त्रनाड्यः । सएषोंतश्चरतेबहुधाजायमानः । ॐमित्येवध्यायतआत्मानंस्वस्तिवःपारायतमसःपरस्तात् । यस्सर्वज्ञस्सर्ववि"दित्यादि । तत्रद्यु
भ्वंतरिक्षमनःप्राणायतनत्वंविषयइत्यर्थः । सूत्रेयथाश्रुतिधर्मिनिर्देशेपिलिंगताद्योतनाययथाटीकंभावांतनिर्देशः ॥ **रुद्रादेरिति** ॥ रुद्रप्र
धानवायुजीवानामन्यतमस्येत्यर्थः । एतेनान्येषामितिटीकास्थान्यशब्दार्थोविवृतः । प्रापकप्राबल्याशयेनरुद्रस्यपूर्वस्वशब्देनचनिर्देशः ।

प्र० टीकायांबहुवचनोक्तावप्येकवचनोक्तिः पूर्वपक्षकोटीनांबहुत्वेकथंलिंगस्योभयत्रप्रसिद्धत्वं । किंतुबहुषुप्रसिद्धत्वमेवस्यादितिशंकानिरासायपू
र्वपक्षकोटित्वेनबहूनामेकीकरणादितिभावेनेत्याहुः । अत्रयद्यपिभाष्येतत्वप्रदीपसन्न्यायरत्नावल्योश्चप्रधानकोटेर्द्युभ्वाद्यायतनत्वप्राप्तिर्वातन्नि
रासोवानभवति । तथापिटीकायां "स्वशब्दपर्यायात्मशब्दान्नप्रकृतिजीवावभिधीयेते"इतिविष्णुतत्वनिर्णयोक्त्यनुरोधेनप्रधानकोटेरप्युक्तेस्त
दनुरोधेनात्राप्यादिपदेनतदुक्तिः । एवंद्युभ्वायतनंनानुमानंप्राणभृच्चेतिप्रतिज्ञांशोपयुक्तचिंतामुक्त्वा स्वशब्दान्मुक्तोपसृप्यव्यपदेशादितिहे
त्वंशव्यावर्त्यशंकोपयुक्तचिंतामाह ॥ **आत्मशब्दादयइति** ॥ आदिपदेनामृतसेतुत्वरूपमुक्तोपसृप्यत्वलिंगब्रह्मप्रकरणतमेवैकंजानथआत्मा

मात्मशब्दादयःकिंगौणाःकिंवामुख्याइति । तदर्थंतेषांमुख्यत्वेबाधकमस्त्युतनेति । तदर्थंजायमानत्वंकिं
विष्णोर्नयुक्तमुतयुक्तमिति । तदर्थंकिंशरीरग्रहणादिकमेवजननंकिंवाप्रादुर्भावोपीति । पूर्वपक्षस्तु ।

प्र०नमित्यादिवाक्योक्ताहेयत्वोक्तिर्हेयत्वानुक्त्यन्यहेयत्वोक्त्योर्वा लिंगप्रकरणसमाख्याएववाग्राह्याः । अतच्छब्दादितिहेत्वंशव्यावर्त्यशंकोपयुक्त
चिंतामाह ॥ **तदर्थंबाधकमस्त्युतनेतीत्यादिना** ॥ **जायमानत्वमिति** ॥ अत्रयद्यपिरुद्रोवावलोकाधारइत्यादिसमाख्याविष्णौनयुक्ता
थयुक्तेति । तदर्थंसमाख्यागतरुद्रादिशब्दानिरवकाशाउतविष्णौसावकाशाइत्यादिचिंताप्युपदर्शनीया । तथापिरुद्रसमाख्यायाष्टीकोक्तरीत्या
वक्ष्यमाणदिशाचबलवत्त्वेपि इतरसमाख्ययोर्विष्णुसमाख्याप्रतिरोधेनजायमानत्वलिंगेनैवतयोरुज्जीवनाद्वा प्राकरणिकबाधकोपदर्शनंकार्य
मित्याशयाद्वा उपलक्षणत्वाद्वा जायमानत्वकोटिकचिंतैवोक्ता । यदिशरीरग्रहणमेवजननंतस्याशरीरेविष्णावयोगाद्बाधकाद्वात्मशब्दादीनांगौ

SGDF Sri Gangotri Digital Foundation

प्र०णत्वात्समाख्यादिबलेनरुद्रादिरेवेतिपूर्वपक्षेफलं । यदिविपरीतंतदाविष्णुरितिसिद्धांतेफलमितिस्पष्टःफलफलिभावइतिभावः । यद्यपिटीकायांजायमानत्वबाधकेनात्मशब्दस्यैवामुख्यत्वमाशंकितं । नतुमुक्तोपसृप्यत्वादेः । प्रत्युततत्रैवात्मशब्दस्यमुख्यत्वमुक्तंमुक्तोपसृप्यसूत्रे । तथापीहश्रुतेर्विष्णौमुख्यायाअपिजीवलिंगेनामुख्यत्वशंकायां तुल्यन्यायतयालिंगस्यापिसाभवत्येवेत्याशयेनजायमानत्वलिंगेनात्मशब्दादयोगौणाइतिबहुवचनोक्तिः । टीकायांतुमुक्तोपसृप्यसूत्रेचशब्दाभावात्तत्स्वारस्यायतथोक्तिरितिभावः । अत्रयद्यपिचविष्णोरितिचिंतानंतरंतदर्थमात्मशब्दादिकंरुद्रादिजीवेनेतुंशक्यमुताशक्यमितिचिंता तदर्थमत्रप्रकरणेनिरवकाशजीवविष्णुप्रापकबलेनतयोरभेदआश्रयितुंशक्यउताशक्यइतिचिंता तदर्थमन्यमीशमित्यादिभेदाद्युक्तिर्जीवविष्णुनिष्ठाऽथनेतिचिंता तदर्थमीशशब्दःकिंविष्णवन्यपरउतप्रकरणबलाद्वि

द्युभ्वाद्यायतनंरुद्रःप्रधानंवायुर्जीवोवा । "रुद्रोवावलोकाधारः । प्राणानांग्रंथिरसिरुद्रः । भूतंचभवच्चभविष्यच्चेत्याचक्षते । आकाशएवतदोतंचप्रोतंच । वायुनावैगौतम

प्र० ष्णुपरएवेति भेदादिसूत्रव्यावर्त्यशंकोपयुक्ताचिंतापरंपरापिवाच्या । तथापिस्पष्टत्वाद्वा सूत्रक्रमेवक्ष्यमाणप्रकारेणाभेदशंकायारुद्रादिकोटिचतुष्टयसाधारण्याभावाद्वा सापिशंकाजायमानत्वरूपजीवलिंगनिरवकाशत्वप्रयुक्तैवेतितन्निरवकाशत्वादिचिंतोक्त्यैवोक्तप्रायेतिवानोक्ता । यद्वाऽऽत्मशब्दादयःकिंगौणाइत्यस्यजीवाभेदेननेयाइत्यप्यर्थः । "जीवेशाभेदेनब्रह्मगतलिंगस्यजीवेसंभवा"दितिटीकोक्तेः । तथाचसापिचिंतोक्तैवेति । "द्युभ्वाद्यायतनत्वंरुद्रप्रधानजीववायूनामितिपूर्वःपक्षः"इत्यादिटीकांविवृण्वन्समाख्यात्रयेणजायमानत्वरूपजीवलिंगेनचकोटिचतुष्टयपूर्वपक्षानाह ॥ **द्युभ्वाद्यायतनंरुद्रइत्यादिना** ॥ यथासूत्रमयंनिर्देशः । बहूपपादनत्वाज्जीवस्यांतेनिर्देशः । "रुद्रोवावे"ति

SGDF Sri Gargeshwari Digital Foundation

प्र० वाक्यंरुद्रस्यद्युभ्वाद्यायतनत्वे । “प्राणाना”मितिवाक्यंरुद्रस्यप्राणाधारत्वे । टीकायांभाष्येसाक्षादुपात्तस्यप्राणानामितिवाक्यस्यपूर्वमादि पदोपात्तस्यान्यत्रसाक्षादुक्तस्यतुपश्चादुक्तावपि विषयवाक्येक्रमोपात्तलिंगोपपादनसौकर्याय “रुद्रोवावे”त्यस्यैवात्रपूर्वमुक्तिः । तावतैवपूर्तौ द्वितीयवाक्यस्याप्युक्तिर्भाष्योपात्तत्वाद्वा तत्रबहुरुद्रश्रुतिलिंगसत्त्वेनविष्णुसमाख्यातःप्राबल्योपपादनायवेतिज्ञेयं । तत्ररुद्रेतिसंबुद्ध्यंतपाठः साधुः । द्वितीये “तदभिध्यानादेव”त्वित्यत्रटीकायां “रुद्रत्वंप्राणानामाश्रयोंतकश्चासि । सत्वंमामाविशेतिव्याख्यानात् । तद्भूतभवदा दिकं आकाशशब्दितेप्रधाने ओतमित्यर्थः । तच्छब्दपरामर्शद्योतनायभूतमित्यादिपूर्ववाक्योक्तिः । आकाशशब्दस्याक्षरनयेप्रधानपरत्वंव्यु

सूत्रेणायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानी”त्यादिसमाख्यानात् । जायमानत्वरूपजीवलिंगाच्च । नच “लोकाश्चलोकिनश्चविष्णावेवोताश्चप्रोताश्चे”तिविष्णावपिसमाख्यास्तीतिवाच्यं । रुद्रसमाख्यायां “प्राणानांग्रं थिरसिरुद्रः । प्राणेश्वरःकृत्तिवासाःपिनाकी । रुद्रोवावलोकाधार”इतिबहुरुद्रश्रुतिलिंगसद्भावात् । एतदेवाभिप्रे

प्र० दस्यचित्प्रकृतिपरत्वोक्तावपीहपूर्वपक्षितत्रत्यपूर्वपक्षन्यायेनप्रधानपरत्वमेवमन्यतइति यथाटीकमत्रप्रधानपरतयाभूतमित्यादिवाक्योक्तिर्यु क्ता ॥ **सूत्रेणेति** ॥ स्यूतमस्मिञ्जगदितिव्युत्पत्त्याजगदाधारेणवायुनासंदृब्धानि संगतानि । तदाधारतयाऽवस्थितानीत्यर्थः । अत्रटीकायां “वि ष्णोर्द्युभ्वाद्यायतनत्वप्रसिद्धावपी”त्यादिनाविष्णुसमाख्यामाशंक्यबहुधाजन्मबाधउक्तः । तत्रान्यत्रोक्तश्रुतिलिंगबाहुल्येनप्रबलरुद्रसमाख्या बाधोपिवाच्यइतिभावेनशंकोत्तरेवक्ति ॥ **नचलोकाश्चलोकिनश्चेति** ॥ “सर्वेवातेप्राणाश्चप्राणिनश्चदेवाश्चदिव्यानिचलोकाश्चलोकिनश्चा लोकाश्चालोकिनश्चविष्णावेवोताश्चप्रोताश्चे”तिविष्णुसमाख्याऽस्तीत्यर्थः । तथाचतद्बलाद्विष्णुविषयत्वमपीतिभावः । प्राणाइंद्रियाणि ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्राणिनोदेहिनः । दिविभवानिदिव्यानिकल्पतरुप्रभृतीनिवस्तूनि । लोकाभूरादयः । तदभिमानिनोलोकिनः । अलोकावैकुंठादयः । अलोकिनस्तद्गतामुक्ताइत्यर्थः ॥ **उक्तमिति** ॥ एतत्पादीयाधिकरणपूर्वपक्षन्यायसंग्रहउक्तमित्यर्थः । टीकावाक्यविरोधमाशंक्याह ॥ **विष्णाविति ॥ जायमानत्वेति** ॥ एतेनटीकायांबहुधाजन्मेत्युक्तावपिजन्मरूपलिंगएवतात्पर्यं । अनेकजडाद्यात्मनाबहुजननस्येक्षतिनयेनिरस्तत्वाज्जन्मलिंगेनैवविवक्षितसिद्धेश्चबहुधेत्युक्तेरभ्युच्चयत्वेनोपपत्तेरितिभावः । एतेनरुद्रसमाख्यायाःप्राबल्येनविष्णुसमाख्ययाप्रतिहत्यभाववद्वाय्वादिसमाख्यायाजायमानत्वादिलिंगबलेनाप्रतिहतत्वंटीकारीत्योपपाद्यमित्युक्तंभवति । वक्ष्यतिचैवंपूर्वपक्षांतरमपीत्यादि ।

त्योक्तमनुव्याख्याने “बाहुल्यंलिंगशब्दाना”मिति। “विष्णोर्द्युभ्वाद्यायतनत्वप्रसिद्धावपी”त्यादिटीकायांविष्णुसमाख्या बाधार्थंजायमानत्वलिंगोक्तिस्तु विष्णुसमाख्यातोरुद्रसमाख्यायाबलवत्त्वेपिवाय्वादिसमाख्यायाःप्राबल्याभावात् ।

प्र० लिंगनिरवकाशत्वंचाग्रेव्यक्तं । नन्वेवंटीकायां “विष्णोर्द्युभ्वाद्यायतनत्वप्रसिद्धावपी”त्यादिनासमाख्याबलेनविष्णोर्द्युभ्वाद्यायतनत्वमाशंक्यजायमानत्वलिंगेनतद्बाधोनवाच्यः । अपितूक्तदिशाप्रबलयारुद्रसमाख्ययाविष्णुसमाख्यायांदूरीकृतायामप्रतिहतयावाय्वादिसमाख्ययावाय्वादिप्राप्तिरित्येवसमाधानंवाच्यं । नचविष्णुसमाख्येववाय्वादिसमाख्यापिबलवद्रुद्रसमाख्ययाव्युदस्तासतीनात्रवाय्वादिप्रापिकेतिवाच्यं । तथात्वेजन्मलिंगेनविष्णुसमाख्याबाधपक्षेपितेनाप्रतिहतबलवत्यारुद्रसमाख्ययावाय्वादिसमाख्याबाधेनतयोरत्राप्राप्तेः । तस्माद्रुद्रसमाख्यायाअपिसावकाशत्वोपपादनेनरुद्रादिसमाख्यात्रयस्यापिविष्णुसमाख्ययासमाख्यात्वेनतुल्यबलत्वात् रुद्रादिसमाख्यास्वन्यतमयापिविष्णुस

प्र० माख्यानिरासायोगात् जन्मरूपलिंगेनविष्णौनिरवकाशेनबाधितयाविष्णुसमाख्ययाऽत्रविष्णोर्द्युभ्वाद्यायतनत्वाप्राप्तौ रुद्रादौयोग्येनजन्मलिंगेनबाधादविशेषितबलाबलेनसमाख्यात्रयेणतुल्यबलेनरुद्रादिकोटित्रयस्यजन्मलिंगेनजीवमात्रासाधारणेनजीवकोटेश्चद्युभ्वाद्यायतनत्वप्राप्तिरितिवक्तव्यं । एवंचटीकायांजन्मलिंगेनविष्णुसमाख्याबाधोक्तिःस्वरसाभवतीतिचेन्मैवं । अंतकत्वादिलिंगेनरुद्रसमाख्यायानिरवकाशत्वोक्तिपरपूर्वतनटीकावाक्यविरोधात् । “बाहुल्यंलिंगशब्दाना”मित्यनुभाष्यविरोधात् । “समाख्यापिनिरवकाशे”त्यग्रेवक्ष्यमाणदिशासावकाशत्वासंभवाच्च । कथंतर्हिप्रकृतिवाय्वोःप्राप्तिः । रुद्रसमाख्याऽज्ञानिनइत्यस्तु । नह्येकएवात्रपूर्वपक्षीतिनियामकमस्ति । द्वितीयाद्यस्तु

ननुतथापि “द्वेविद्येवेदितव्ये”इतिविष्णुप्रकरणेन “अमृतस्यैषसेतु”रितिमुक्तोपसृप्यत्व विष्णुलिंगेनचरुद्रादिसमाख्याबाधः । मुक्तोपसृप्यत्वादेश्चविष्णुलिंगत्वं “तन्निष्ठस्य मोक्षोपदेशात् । अस्मिन्नस्यचतद्योगंशास्ती”त्यादिसूत्रसिद्धं । लिंगप्रकरणेचसमाख्यातो

प्र० त्यधिकरणादाविवानेकेषांपूर्ववादित्वोपपत्तेरिति । नन्वेवमपिरुद्रसमाख्ययाविष्णुसमाख्याबाधेपिप्राकरणिकविष्णुप्रापकबहुबाधायोगात्सावकाशत्वाच्चतस्याइतिसमाख्ययापूर्वपक्षमाक्षिपति ॥ **नन्विति** ॥ **विष्णुप्रकरणेनेति** ॥ यद्यपिटीकायां “परविद्याविषयत्वलिंगाद्विष्णुरितिचे”दित्युक्तं । तथापिलिंगस्योपक्रमेश्रुतत्वात्तत्रश्रुतलिंगस्यच “श्रुतिलिंगवाक्यानामुपक्रमोपसंहारयोःश्रुतत्वेतन्निश्चायकतयालिंगत्व”मिति “शब्दादेवे”तिसूत्रटीकोक्तरीत्याप्रकरणनिश्चायकत्वेनतल्लिंगोपेतोपक्रमवतस्तत्प्रकरणत्वेन “प्रकरणा”दितिसूत्रानुसारात्प्रकरणेनेत्युक्तं । अतएव “प्रकरणा”दित्यत्रटीका “द्वेविद्येवेदितव्ये”इतिपरविद्याविषयवस्तुनोत्रारभ्याधीतत्वेनास्यविष्णुप्रकरणत्वा”दिति ॥ **बाधइति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० यथाचतुर्थे "आत्माप्रकरणा"दित्यत्रप्रकरणेनसमाख्यायाबाधस्तद्वत् । तत्रहि "यआत्माऽपहतपाप्मे"त्यादिप्रकरणेन "सतेजसिसूर्येसंपन्न" इतिसमाख्यायाबाधेन "परंज्योतिरुपसंपद्य"तिश्रुतज्योतिषोविष्णुत्वमुच्यते । यथावादहरनयेलिंगेनसमाख्यायाबाधस्तद्वत् । तत्रह्यपहत पाप्मत्वादिलिंगेन "तस्यांतेसुषिरंसूक्ष्म"मित्यादिसमाख्यायाबाधेनसर्वाधारतयाहृत्पद्मस्थत्वंविष्णोरेव । नत्वाकाशादेरित्युच्यते । आदेश्चे त्यादिपदेनप्रकरणं । लिंगत्वंनामज्ञापकत्वं । यद्वापरविद्याविषयत्वमादिपदार्थः । इत्यादीत्यादिपदेन "अदृश्यत्वादिगुणकोधर्मोक्ते"रितिसू

बलवती । नचसमाख्यानिरवकाशा । अंतरधिकरणन्यायेनरुद्रादिशब्दानां शास्त्रदृष्ट्येतिन्यायेनपिनाकित्वा दिलिंगानांचविष्णौसावकाशत्वात् । नच "सएषोंतश्चरतेबहुधाजायमान"इतिजायमानत्वादिलिंगविरोधः । "तमेवैकंजानथआत्मान"मित्यात्मश्रुत्यातद्बाधात् । आत्मशब्दस्यविष्ण्वेकनिष्ठत्वंच "गौणश्चेन्नात्मशब्दात् । साधारणशब्दविशेषा"दितिसूत्रसिद्धं । जायमानत्वस्यब्रह्मणिसावकाशत्वंच "क्रियाप्रवर्तकत्वेनप्रादुर्भावो हरेर्जनि"रित्यनुव्याख्यानआनंदमयाधिकरणउक्तत्वात्तत्र, "कारणत्वेनचाकाशादि"ष्वित्यत्रचसिद्धमिति ।

प्र० त्रंगृह्यते ॥ बलवतीइति ॥ शब्दादेवेत्यत्रतद्बीजोक्त्याव्युत्पादयिष्यमाणत्वादितिभावः । ननु "आनर्थक्यप्रतिहतानांविपरीतंबलाबल" मितिन्यायेनसमाख्ययाबाधःकिंनस्यादितिभावेनाशंक्यानर्थक्यंनेत्याह ॥ नचेति ॥ अंतरिति ॥ अयंन्यायःप्राक्तत्रतत्रविवृतः । शास्त्र दृष्ट्येतिन्यायोपि ॥ जायमानत्वादीति ॥ मनःप्राणाधारत्वमादिपदार्थः । लिंगंनिरवकाशमित्यतआह ॥ जायमानत्वस्येति ॥ तत्रेति ॥ आनंदमयाधिकरणइत्यर्थः ॥ कारणत्वेनचेति ॥ चतुर्थपादे "आत्मनआकाशस्संभूतः । आकाशाद्वायुः । वायोरग्नि"रित्युदाहृत्यात्मन

SGDF
Sri Gurgeshwar Digital Foundation

प्र० आकाशादिषुजनेर्वक्ष्यमाणत्वादितिभावः । यथोक्तंतत्रन्यायविवरणे "व्यक्त्यपेक्षायाकार्यत्व"मिति । अत्रपरैरेतच्छंकानिरासाय "यस्मिन्द्यौ"रित्यादिकंब्रह्मप्रकरणेनास्तीति कृत्वाचिंतयेदमारब्धमित्युक्तं । कैश्चित्तु "द्वेविद्येवेदितव्ये"इत्यादेर्ब्रह्मप्रकरणत्वेपि "यस्मिन्नि"त्यादिकंजीवलिंगाज्जीवप्रकरणमितिप्रकरणभेदमाश्रित्यसमाहितं । तदुभयंवक्ष्यमाणदिशानयुक्तमितिभावेननिरवकाशलिंगेनप्रकरणादेःसर्वस्योपमर्देन सर्वमेवप्रकरणंविष्ण्वन्यपरमितिभाष्यटीकाभिमतंपूर्वपक्षंसमर्थयितुमारभते ॥ उच्यतइति ॥ यदुक्तंलिंगप्रकरणेसमाख्यातोबलव

उच्यते । अनुव्याख्यानउक्तिरत्रत्यसिद्धांतसिद्धजन्यत्वाभिप्राया । नत्वेतत्पूर्वपक्षदशायांजायमानत्वस्यसावकाशता । "कारणत्वेने"त्यत्रत्वेकस्यैवकार्यकारणभावविरोधशंकायाःपरिहारः । नत्वत्रैवाजन्यस्यजन्मविरोधशंकायाः । अतएवतत्रटीका "स्वस्यैवकार्यकारणभावोविरुद्ध"इति । अनुव्याख्यानंच "विरोधःकार्यतद्वतो"रिति । जननमरणयोश्चसामानाधिकरण्यप्रसिद्धेर्देहत्यागलक्षणमरणस्यचेतनएवसंभवात् । "यतोवाइमानिभूतानिजायंते । येनजातानिजीवंती"तिजीवनादियोगिनिचेतनेजननश्रवणाच्च । अनादेरपिजी(वमात्रादेः)वादेःशरीरग्रहणादिरूपंवापराधीनविशेषावाप्तिरूपंवाजननमस्ति । ब्रह्मणस्तुतदपिनेति

प्र० तीइति तत्सत्यं । तथापिनिरवकाशजीवलिंगेनब्रह्मलिंगप्रकरणयोर्नेयत्वात् । नचतदपिसावकाशमित्युक्तमितिवाच्यं । तत्राह ॥ अनुव्याख्यानइति ॥ प्रकारांतरेणजायमानत्वंजीवएवेतिप्रादुर्भावरूपमेवजननंजायमानशब्दार्थोस्त्वित्यतोवाह ॥ जननेति ॥ संभवाच्छ्रवणाच्चेतिहेत्वोर्नजायमानत्वस्यसावकाशतेतिपूर्वेणान्वयः । तस्यैवात्रानुषंगोवा ॥ जीवनादिति ॥ सर्वपालकेपाल्यमानत्वादिरूपजीवना

SGDF
Sri Gargeshwari Digital Foundation

प्र० योगादितिभावः ॥ द्वितीयेति ॥ वियत्पादे "ज्ञोतएवे"त्यत्रजीवस्याप्यस्तीत्युच्यते । "असंभवस्तुसतोऽनुपपत्ते"रित्यत्रब्रह्मणोनेतिवक्ष्यत इत्यर्थः । प्रादुर्भावोनजननशब्दार्थइतिभावः । ननुजननंभगवत्यपिश्रुतमित्यतआह ॥ अजायमानइति ॥ एतेन "जननमरणयोश्चे"त्यादिनाग्रंथेन "सएषोंतश्चरतेबहुधाजायमानइतिद्युभ्वाद्यायतनेजीवलिंगश्रवणाज्जीवस्यतद्युक्त"मित्युक्तयुक्ततोपपादिता । तस्मात् भगवतिजननाभावात् ॥ निरवकाशेनेति ॥ "ज्योतिर्दर्शना"दित्यत्र "सवाअयंपुरुषोजायमानश्शरीरमभिसंपद्यमान"इतिश्रुतजायमानत्वा

द्वितीयाध्यायेवक्ष्यते । अजायमानोबहुधाविजायतइतिवाक्यंतुजीवविषयं । स्वरूपेणाजननात् । देहद्वाराचजननात् । तस्मान्निरवकाशेनभाष्योक्तेनजायमानत्वलिंगेनद्युभ्वाद्यायतनंरुद्रादिरेव । अनुव्याख्यानन्यायविवरणयोरुक्तासमाख्यापिनिरवकाशैव । तत्रविष्णुलिंगानामश्रवणेनरुद्रादिशब्दानामंतरधिकरणादिन्यायाविषयत्वात् । एवंपूर्वपक्षांतरमपिटीकोक्तरीत्योपपाद्यं ।

प्र० देर्विष्णवसाधारणज्योतिश्श्रुत्योपक्रमोपसंहाराभ्यामवगतब्रह्मपरैकवाक्यमध्यस्थतयांतर्णीतणिच्त्वेनब्रह्मणिनयनमितिवक्ष्यते । नत्विहतथेतिभावः । ननुजीवमात्रप्रापकलिंगेनकथंरुद्रादिरेवेत्युक्तिः । प्रापकसमाख्यायाश्चलिंगप्रकरणाभ्यांबाधोक्तेरित्यतआह ॥ अनुव्याख्यानेति ॥ एवमिति ॥ रुद्रजीवपूर्वपक्षवत्प्रधानवायुपूर्वपक्षइत्यर्थः । प्रधानस्यसर्वोपादानत्वात्सर्वाधारत्वंयुक्तं । कापिलस्मृतिसिद्धंच । नचतस्याप्रामाण्यं । दृष्टफलतद्वाक्यदृष्टांतेनसर्वाश्रयत्वबोधिन्याअपिप्रामाण्यानुमानात् । वायोश्चप्राणाद्याधारत्वंप्रसिद्धमेवेत्यादिरूपेणोपपाद्यमि ॥ ५४७ ॥

प्र० त्यर्थः । तर्हिश्रुतिलिंगप्रकरणानांकागतिरित्यतआह ॥ आत्मेति ॥ कथंचिदिति ॥ जीवेशाभेदादिनेतिभावः । अत्रनिरवकाशजन्मरूपजीवलिंगादिना "स्वशब्दा"दिसिद्धांतहेतूनामन्यथानयनात्तत्सावकाशत्वोक्त्यैवस्वशब्दादेस्साधकत्वंनान्यथेतिभावेन "अतच्छब्दा"दितिसूत्रखंडसूचितं "अजायमानोबहुधाविजायतइतितस्यैवबहुधाजन्मोक्ते"रितिभाष्याद्युक्तंजीवलिंगसावकाशत्वंतावद्व्यनक्ति ॥ अचेतनेति ॥ परिणामरूपजनेरन्या देहयोगरूपेत्यर्थः । "ज्ञोतएवे"त्यत्राग्रेस्पष्टेतिभावः । चेतनाचेतनजनेःप्रमितत्वात्सान्यान्यास्तु । नचैवंब्रह्मणीत्यतः

आत्मशब्दादिकंतुनिरवकाशजायमानत्वलिंगानुसारेणजीवादौकथंचिन्नेयमिति । सिद्धांतस्तु । अचेतनजनेरन्याचेतनस्यजनिर्यथा । तथोभयजनेरन्याब्रह्मणोपिजनिर्मता ॥ १ ॥ "अजायमानोबहुधाविजायत"इतिब्रह्मणोपिजनेःप्रमितत्वात्प्रसिद्धाच्चेतनाचेतनजननादन्यैवप्रादुर्भावरूपाब्रह्मणोजनिरस्तु । "किंतुनिर्दोषचैतन्यसुखांनित्यांस्वकांतनुं । प्रकाशयतिसैवेयंजनिर्विष्णोर्नचापरे"त्यादिस्मृतेः ।

प्र० प्रमाणंवदन्नन्येत्युक्तजनिस्वरूपंचाह ॥ अजायमानइति ॥ देहादिनाजननहीनस्सन्बहुधा नानामत्स्यकूर्मवराहाद्यात्मनाप्रादुर्भवतीत्यर्थः ॥ प्रादुर्भावरूपेति ॥ कुतइत्यतआह ॥ किंत्विति ॥ "स्त्रीपुंमलाभियोगात्सादेहोविष्णुर्नजायते । किंतुनिर्दोषचैतन्यसुखांनित्यांस्वकांतनुं । प्रकाशयतिसैवेयंजनिर्विष्णोर्नचापरा । तथाप्यसुरमोहायपरेषांचक्वचित्क्वचित् । दुःखाज्ञानश्रमादींश्चदर्शयेच्छुद्धसद्गुण"इत्यादिविष्णुतत्वनिर्णयोदाहृतब्रह्मांडपुराणवचनादित्यर्थः । "प्रत्यक्षत्वंहरेर्जन्मे"त्यादिरादिपदार्थः । ननूक्तंजीवविषयंतद्वाक्यमिति तत्राह

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **अजायमानइति** ॥ मुक्तिहेतुज्ञानविषयत्वरूपाल्लिंगादित्यर्थः । प्रकरणवशाच्चब्रह्मपरमेतद्वाक्यमित्याह ॥ **पुरुषसूक्तस्थत्वाच्चेति** ॥ पुरुषसूक्तंचविष्णुपरमितिपूर्वाधिकरणेछंदोधिकरणेचभाष्यादौसमर्थितमितिभावः । अस्त्वेवंजीवलिंगंसावकाशं । ततःकिमित्यतआह ॥ **एवंचेति** ॥ सावकाशत्वेसतीत्यर्थः ॥ **लिंगमेवेति** ॥ श्रुत्यादितोलिंगमात्रस्यदुर्बलत्वादितिभावः ॥ **गौणमिति** ॥ परिणामरूपजनेरेवमुख्यत्वादितिभावः ॥ **नत्विति** ॥ श्रुत्यादिबहुबाधायोगादितिभावः । लिंगस्यसावकाशत्वमुक्त्वासमाख्यायाअपि "अतच्छब्दा"दितिसूत्रांशाभिमतमेवतदाह ॥ **समाख्यापीति** ॥ "सोंतकस्सरुद्रस्सप्राणभृत्सप्राणनायकस्सईशोयोहरि"रित्यादिश्रुत्या "रुजंद्रावयतेयस्मा

"अजायमान"इत्यादिवाक्यंचब्रह्मपरमेव । "तमेवंविद्वानमृतइहभवती"त्यादितल्लिंगात्पुरुषसूक्तस्थत्वाच्च । एवंचात्मश्रुत्याद्यनुसाराज्जायमानत्वलिंगमेवगौणंनेयं । नतुविपरीतं । समाख्यापिसावकाशा । भाष्योक्तश्रुतिस्मृतिभीरुद्रादिशब्दानांविष्णावेवमुख्यत्वात् ।

प्र० द्रुद्रस्तस्माज्जनार्दन"इत्यादिब्रह्मांडस्मृतिभिर्विष्णावेवमुख्यवृत्त्युक्तेरितिभावः । यद्यपिसमाख्याश्रुतौनिरवकाशविष्णुलिंगाभावेन "अंतस्तद्धर्मोपदेशादि"त्युक्तन्यायाविषयत्वंभाति । तथापिश्रुत्यर्थनिर्णयार्थत्वात्स्मृतेस्तत्रनिरूपितोर्थोग्राह्योवेदवाक्ये । तदयोगेतुलौकिकइति "कंपना"दितिसूत्राभिमतवक्ष्यमाणन्यायेन "इतिहासपुराणाभ्यांवेदंसमुपबृंहये"दितिस्मृत्या श्रुत्युपबृंहकेषु"रुजंद्रावयत"इत्यादिस्मृतिवाक्येष्वन्वर्थसंज्ञाकरणस्यश्रुत्यर्थनिर्णयार्थत्वात् अन्यथातस्यवैयर्थ्येननिरवकाशतयास्मार्तयोगस्याज्ञरूढितोबलवत्त्वात् "रुजंद्रावयत"इत्यादिस्मृतौयोगमुक्त्वा "वेदेषुसपुराणेषुगीयत"इतिप्रयोगबाहुल्यरूपरूढिकथनाच्चाज्ञरूढितोविद्वद्रूढेर्बलवत्तायायववराहाद्यधिकरणोक्तन्यायैर्निपुणतरं ॥ ५४८ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० जन्मादिनयेप्रतिपादितत्वादितिभावेनोक्तं **मुख्यत्वादिति** । तथाच “मुख्यामुख्ययोर्मुख्येसंप्रत्यय”इतिन्यायेनमुख्यार्थस्य “विदेहिरुद्रो रुद्रियंमहित्वं । कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रः । नमिनंतिरुद्रः । रुद्रस्यशिरउत्पिपेषे”त्यादावयोगेपि “रुद्रोवावलोकाधार”इत्यादिश्रुतिषुरुद्रादिशब्दैर्मुख्यार्थस्यविष्णोरेवगृहीतेस्समाख्यानरुद्रादेर्द्युभ्वाद्यायतनत्वप्रापिकेतिभावः । एतेन “नन्वत्ररुद्रादिज्ञापकाभावेपि प्राणानांग्रंथिरसीत्यादिटीकायानिष्कृष्टार्थउक्तोभवति । विष्णुप्रापकस्यापिसावकाशत्वेनिर्णयोदुश्शकइत्यतआह ॥ **मुक्तेति** ॥ उक्तमित्यनंतरंतथाचात्सश्रुत्यादिबलाद्विष्णुरेवद्युभ्वाद्यायतनमितिवाक्यशेषः । नन्वेवंसूत्रेष्वादौपरसाधकानांसावकाशत्वोक्तिपरमतच्छब्दादित्येतदुक्त्वास्वशब्दादित्यादिहेतूपन्यासःकार्यइत्यतो वादकथारूपेणग्रंथस्यप्रवृत्तत्वात्तत्रचकथालक्षणतट्टीकाद्युक्तदिशास्वपक्षसाधकस्यादौवाच्यत्वाद्युक्तस्सूत्रक्रमइतिभावेनाह ॥ **अत्रचाद्यइति** ॥ **श्रुतिरूपेति** ॥ आप्तश्रुतिरूपेत्यर्थः । तत्रटीकादौस्वशब्दादितिसौत्रपदस्यस्वशब्दपर्यायेतिकस्मादुक्तं । कथंचोपपद्यतामित्यतआह ॥ **स्वशब्दादित्येतच्चेति** ॥ **स्वेतिशब्दस्स्वशब्दइति** ॥ स्वश्चासौशब्दश्चेति “विशेषणं

मुक्तोपसृप्यत्वादिकंतुनिरवकाशमितिभाष्यएवोक्तं । अत्रचाद्येसूत्रेविषयवाक्येनातिसन्निहितश्रुतिरूपस्वपक्षसाधकोक्तिः । स्वशब्दादित्येतच्च स्वेतिशब्दःस्वशब्दइतिविग्रहाश्रयणेनविषयवाक्येस्वशब्दाभावात्तत्पर्यायात्मशब्दपरं ।

गु० रपिनिरासः । तथापिप्रकृतिरुद्रजीववत्स्वशब्देनसूत्रेऽनुपादानाच्चानुकृष्टस्यवायोःसाक्षान्निरासाभावाद्वा जीववद्बहुग्रंथेनानिरासाद्वा अन्यसाहित्येननिरासेपिभूमाधिकरणवत्केवलस्यानिरासाद्वा मात्रपदेनतद्व्यवच्छेदइतिज्ञेयं । आदिपदेनवायुनीचोगरुडोग्राह्यः॥ **अतिसन्निहितेति** ॥ द्वितीयसूत्रोक्तामृतसेतुत्वापेक्षयातिसन्निहितेत्यर्थः॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० विशेष्येणबहुल"मितिकर्मधारयः । स्वेतीतिविग्रहप्रदर्शनं ॥ यथेति ॥ व्याकरणेद्वितीयाध्यायस्यचतुर्थपादे "सभाराजाऽमनुष्यपूर्वे" तिसूत्रं। तस्यार्थः। राजशब्दपूर्वकोऽमनुष्यशब्दोपात्तरक्षःपिशाचशब्दपूर्वकश्चसभाशब्दः "सनपुंसक"मितिप्रकृतनपुंसकंभवतितत्पुरुषइति। तत्रराजशब्दस्तत्पर्यायपरोनतुराजशब्दपरः।इनसभं ।ईश्वरसभं । राजपूर्वकत्वेतुराजसभेत्येव । नतुराजसभमिति । वृत्तौ "पर्यायवचनस्यै वेष्यत"इत्युक्तेः । "स्वंरूपंशब्दस्याशब्दसंज्ञे"त्यत्राद्याध्यायस्याद्यपादे "चित्पर्यायवचनस्यैवराजाद्यर्थ"मितिभाष्यवार्तिकयोरुक्तत्वात् । तस्यचायमर्थः । सभाराजेतिसूत्रेसभाराजाजमनुष्यपूर्वेतिराजशब्दात्परंजकारव्यंजनमुच्चार्यराजशब्दोजित्त्वेनजकारेत्संज्ञकत्वेननिर्देष्टव्यः । तदनंतरंस्वंरूपंशब्दस्येतिसूत्रेजित्पर्यायवचनस्यैवेतिपठनीयं । इनसभमित्यादिरूपसिद्ध्यर्थमिति । अत्रयद्यपिस्वंरूपंशब्दस्येतिसूत्रेकैयटेस भाराजेत्यत्र "अराजेतिपर्युदासआश्रीयते । तेनराजशब्दसदृशानांतत्पर्यायाणामेवग्रहणंसिध्यती"त्युक्तत्वात् सभाराजेतिसूत्रएवचमंजर्यां "द्वावत्रनञौ । अराजपूर्वा अमनुष्यपूर्वेति । तत्रनञिवयुक्तन्यायेनराजशब्दसदृशशब्दाःपर्यायाएवगृह्यंत"इत्युक्तेस्तत्राराजेतिपदच्छेदेन

यथा "सभाराजामनुष्यपूर्वे"त्यत्रराजशब्दस्तत्पर्यायेश्वरादिशब्दपरः । एतदेवाभिप्रे त्यविष्णुतत्वनिर्णयेभगवत्पादैरत्रापिटीकाकारैः "स्वशब्दपर्यायात्मशब्दा"दित्युक्तं ।

गु०यथासभाराजेत्यादि॥ वृक्षादौतद्विशेषाणांस्वेपर्यायविशेषयोः। पर्यायस्यैवराजादौमत्स्यादौतद्विशेषयोरितिवचनार्थः। पर्यायवचनस्यैवनस्वरूपस्यनापिविशेषाणांचं द्रादीनामित्यर्थः।कथंपुनरेतल्लभ्यते। द्वावत्रनञौ। अराजपूर्वाऽमनुष्यपूर्वाचेति।तत्राराजपूर्वेतिनप्रसज्यनिषेधार्थस्यग्रहणं। असामर्थ्येनसमासानुपपत्तेः।किंतुपर्युदासार्थस्यै

प्र० पर्यायग्रहणंयुक्तं। प्रकृतेतुनैवं । तथापिभाष्यवार्तिकयोर्मतेराजशब्देपर्युदासानाश्रयणात्तन्मतावष्टंभेनवा न्यायतोवावचनतोवायथाकथं चिदुपात्तपर्यायस्यग्रहणमित्यत्राविवादाद्वा राजशब्दस्तत्पर्यायपरइत्युक्तं । यद्वा तत्रपर्युदासेननञ्युक्तमिवयुक्तमन्यस्मिन्सदृशाधिकरणेप्र तिपत्तिंगमयतीतिन्यायेनपर्यायपरत्वस्यसिद्धत्ववदिहापिविषयवाक्येस्वशब्दाभावेनतदन्यथानुपपत्तिरूपन्यायसिद्धत्वमेवपर्यायपरत्वस्येतिभा वेनायंदृष्टांतउक्तः । अतएवप्राग्विषयवाक्येस्वशब्दाभावादित्यन्यथानुपपत्तिरूपन्यायउपात्तः । केचित्तुकैयटाद्युक्तमेवायुक्तं । अराजेत्यु क्तावपिस्वंरूपंशब्दस्येत्यराजशब्दस्यैवग्रहणापत्त्यानञिवयुक्तन्यायाप्रवृत्तेरितिभावेनैवमुक्तमित्याहुः । केयमेवंसूत्रकारस्यवक्रारीतिः । आत्म शब्दादित्येवकुतोनासूत्रयदितिभावेनाक्षिप्यसमाधत्ते ॥ आत्मशब्दादिति ॥ आर्जवमिति ॥ स्वेतिशब्दइतिविग्रहाश्रयणेविषयवाक्ये तदभावालोचनेनतत्पर्यायग्रहणस्यदुर्बोधत्वेनवक्रत्वादेवमुक्तौतदभावादार्जवमित्यर्थः । त्वत्पक्षेपिशब्दगौरवमित्यतआह ॥ प्रतिपत्तीति ॥ तर्हितल्लिंगादित्यादाविवतच्छब्दादित्युक्तिस्स्यादित्यतआह ॥ तस्येति ॥ अतइति ॥ अन्यथान्यासेविवक्षितासिद्धेरसाधारण्यज्ञापनशब्द

आत्मशब्दादित्युक्तौतुयद्यप्यार्जवं प्रतिपत्तिलाघवंचशब्दलाघवाद्वरं । तथापि तस्यविष्णावसाधारण्यंनज्ञापितंस्यात् । तस्यशब्दस्तच्छब्दइतिविग्रहंविवक्षित्वा तच्छब्दादित्युक्तौतुशब्दविशेषोनोपात्तःस्यात् । अतउभयार्थंस्वशब्दादित्युक्तं ।

गु०व।तथाचनञिवयुक्तन्यायेनराजशब्दसदृशाःपर्यायाएवगृह्यंतइतिध्येयं॥आत्मशब्दादित्युक्तौत्विति॥शब्दगौरवेपिप्रतिपत्तिलाघवात्स्वशब्दादित्युक्तौचलाघवे

SGDF Sri Gargeshwari Digital Foundation

प्र० विशेषोपादानप्रयोजनरूपोभयार्थमित्यर्थः। एवमुक्तौकथमुभयस्यलाभइत्यतआह ॥ एवमिति ॥ नकेवलंस्वेतिशब्दइतिविग्रहइत्यपेरर्थः। एवंविग्रहद्वयमाश्रित्यैकंसमाधिमुक्त्वाऽधुनास्वेतिशब्दइत्येवविग्रहः। पूर्वोक्तदिशास्वशब्दपर्यायात्मशब्दादित्येवार्थः। तर्ह्यात्मशब्दादित्येव कुतोनोक्तमित्याशंक्यस्वशब्दादित्युक्तौयथास्वशब्दोविष्णौमुख्यस्तथाऽऽत्मशब्दोपीत्यभिप्रायसूचनमेवमुक्तेस्सूत्रकारस्यप्रयोजनं। अतएवछांदोग्यभाष्येषष्ठेस्वशब्दतुल्यस्यात्मशब्दस्यविष्णौमुख्यत्वमाचार्यैस्समर्थितमितिभावेनपक्षांतरमाह ॥ अथवेति ॥ स्वयमेवभवतीतिस्वभूरितिभ्रमनिरासायविष्णोस्सकाशात्संभूतइत्युक्तं। उक्तंचछांदोग्यभाष्ये "स्वयंभूरितिविष्णुजत्वाद्विरिंचउच्यते। नहिविरिंचादेवविरिंचोजातः। योब्रह्माणंविदधातीतिश्रुतेः। आत्माभगवान्। ततोभूतत्वादात्मभू"रित्यादि। आदिपदेन "स्वातंत्र्यात्स्वइतिप्रोक्त"इत्यादि

एवमुक्तेह्युक्तिवक्रत्वावैयर्थ्यायस्वस्यविष्णोरेवशब्दःस्वशब्दइत्यपिविग्रहस्यविवक्षणीयत्वादसाधारण्यंज्ञापितंभवति। एतदेवाभिप्रेत्योक्तंतत्वप्रदीपे "विष्णोःस्वरूपस्यैवसाक्षाद्वाचकोह्यात्मशब्द"इति। षष्ठीसमासमात्रविवक्षाचेत् "तद्धर्मोपदेशात्। तल्लिंगा"दित्यादाविवात्रापितच्छब्दःप्रयुज्येत। अथवायथालोकेऽन्यत्रप्रसिद्धोपिस्वशब्दोविष्णोःसकाशात्संभूतेचतुर्मुखे स्वभूरितिप्रयोगादिवशाद्विष्णौमुख्यः तथालोकेन्यत्रप्रसिद्धोप्यात्मशब्दश्चतुर्मुखे आत्मभूरितिप्रयोगात् "आत्मेतिमुख्यतोविष्णुस्तदन्येतूपचारतः। तथैवस्वइतिप्रोक्तस्तस्माद्ब्रह्मात्मभूःस्वभू"रितिवचनाच्च विष्णौमुख्यइत्यभिप्रेत्यस्वशब्दादित्युक्तं। ॥ ५५० ॥

गु० पिप्रतिपत्तिगौरवेणप्रतिपत्तिगौरवापेक्षयाप्रतिपत्तिलाघवस्यैवज्यायस्त्वादात्मशब्दादित्येववक्तव्यमित्यर्थः॥ एवमुक्तेह्युक्तिवक्रत्वावैयर्थ्यायेति ॥ आत्मशब्दा

SGDF Sri Gargeshwari Digital Foundation

प्र० वचनंगृह्यते ॥ द्वितीयइति ॥ ''मुक्तोपसृप्यव्यपदेशा''दित्यत्र ''अमृतस्यैषसेतु''रित्यमृतशब्दितमुक्तवर्गाश्रयत्वरूपलिंगोक्तिरित्यर्थः । मुक्तोपसृप्येतिभावप्रधानः । ''द्व्येकयोर्द्विवचनैकवचने''इत्यत्रपाणिनीयेद्व्येकयोरित्यत्रेव । लिंगोक्तिपरत्वेस्वशब्दादितिहेतुसमुच्चायकचशब्द स्स्यादित्यतआह ॥ अत्रचेति ॥ ततःप्राक् गौणत्वशंकानिरासात्प्राक् । नन्वयंयोगश्शक्योऽवक्तुं । ''तन्निष्ठस्यमोक्षोपदेशात् । हेयत्वा वचनाच्चे''त्यत्रैव ''तमेवैकंजानथात्मान''मित्युक्तात्मशब्दस्यविष्णौमुख्यतायास्तात्पर्यस्यचसिद्धेः । तथैवतत्रटीकादौभानात् । नचतत्र ''जानथात्मानमन्यावाचोविमुंचथे''तिहेयत्वावचनाहेयत्ववचनान्यहेयत्ववचनैरेववैष्णवत्वमात्मशब्दस्योक्तं । अत्रतुमुक्तोपसृप्यत्वलिंगेनेति वाच्यं । तत्रापिभाष्ये ''अमृतस्यैषसेतु''रित्यंतस्योदाहरणात् । टीकायां ''आत्मशब्दोमोक्षदातृत्वाहेयत्वाभ्यांनिर्गुणलिंगाभ्यामपहृियत'' इत्युक्तेस्तन्निष्ठसूत्रविषयत्वसंभवाच्च । मैवं । तत्रात्मशब्दस्यजीवेमुख्यत्वमाशंक्यतन्निष्ठस्यमोक्षोपदेशादिनातन्निरासः । अत्रतुविष्णौमुख्यो प्यात्मशब्दोत्रप्रकरणेजायमानत्वरूपनिरवकाशजीवलिंगादमुख्यार्थःकिंनस्यादितिशंकायांमुक्तोपसृप्यत्वलिंगेनतदुद्धारः । हेयत्वावचनादेर प्युपलक्षणमेतत् । ननुचैवंयैर्लिंगैःपूर्वमात्मशब्दस्यवैष्णवत्वंसाधितं तेषुजाग्रत्स्वेवनिरवकाशजीवलिंगेनामुख्यवृत्त्याऽवैष्णवत्वेशंकितेकथंतैरे वशंकानिरासइतिचेत्सत्यं । तस्याग्रे ''अतच्छब्दात् । प्राणभृच्चे''त्यत्रसावकाशयिष्यमाणत्वंमुक्तोपसृप्यत्वादेस्तुनिरवकाशत्वमितिभावेन

द्वितीयेविषयवाक्यात्किंचिद्व्यवहितालिंगरूपसाधकोक्तिः । अत्रचटीकोक्तरीत्याजायमानत्वलिंगे नात्मश्रुतेर्गौणत्वमस्त्वितिशंकानिरासात्ततःप्राक्स्वातंत्र्येणहेत्वंतरपरत्वाभावाच्चशब्दाभावः ।

गु०दितिवक्तव्येस्वशब्दादित्युक्तिश्चक्रत्वावैयर्थ्यायेत्यर्थः। ननुचतच्छब्दादित्युक्तावपिविषयवाक्यआत्मशब्दातिरिक्तशब्दांतराभावेनविषयवाक्यस्यात्मशब्दरूपशब्द

SGDF
Sri Gargeshwari Digital Foundation

प्र० "मुक्तोपसृप्यव्यपदेशा"दित्युक्तिरितिनकोपिदोषः। मुक्तप्राप्यत्वस्यार्चिरादिनागच्छतांतदाप्राप्यस्थानेव्यभिचारमाशंक्याह ॥ इहेति ॥ सेतुत्वस्यप्राप्यांतररहितत्वेसतिप्राप्यत्वरूपत्वादित्यर्थः । तादृशंचब्रह्मण्येव "विश्वात्मानंपरायणं मुक्तानांपरमागतिः साकाष्ठासापरागति" रित्यादेरितिभावः ॥ अतएवेति ॥ चरमप्राप्यत्वस्यसेतुपदेनेवोपैतिपदेनालाभादेवेत्यर्थः ॥ तृतीयइति ॥ नानुमानमतच्छब्दादित्यत्र ॥ अनुमीयतइतीति ॥ यद्यपिल्युड्भावेकरणाधिकरणयोश्चविहितः । नतुकर्मणि । तथापि "कृत्यल्युटोबहुल"मिति बहुलग्रहणात्क र्मणिल्युटिकृते "युवोरनाका"वित्यनादेशेरूपं । "आनुमानं अनुमानात्मकागमपरिकल्पितरुद्राख्यंब्रह्मात्रनवाच्य"मितितत्वप्रदीपोक्त्यनुसा रादाह ॥ अनुमानशब्दादिति ॥ शैषिके "शेषे"इत्यनेनापत्याद्यन्यार्थेविहितेऽण्प्रत्यये आदिवृद्ध्यादौसतिरूपं । अनुमानप्रधानकोयः पाशुपतसांख्यहैरण्यगर्भसौरस्कांदशाक्तेयाद्यागमः तत्सिद्धंरुद्रप्रधानहिरण्यगर्भसूर्यशक्तिप्रभृतीत्यर्थः । यद्यपिटीकायांरुद्रप्रधानेद्वेएवानुमा

इहोपसृप्यत्वंश्रौतसेतुशब्दात्प्राप्यांतररहितत्वेसतिप्राप्यत्वं । नत्वर्चिरादिवत्प्राप्यत्वमात्रं । अतएव भाष्ये "अमृतस्यैषसेतु"रितिवाक्यमेवोदाहृतं । नतु "परात्परंपुरुषमुपैती"तिवाक्यमितिनकश्चि दोषः । तृतीयेतुपरपक्षेसाधकाभावोक्तिः । तत्रचानुमीयतइत्यनुमानमित्यनुमानशब्देनवा अनुमानश ब्दाच्छैषिकेऽणिकृतआनुमानशब्देनवा अनुमानप्रधानपाशुपतसांख्याद्यागमसिद्धं रुद्रप्रधानाद्युच्यते।

गु० विशेषलाभेनस्वशब्दादितिकिमर्थमुक्तं। अन्यथाआकाशस्तल्लिंगादित्यपिनवक्तव्यंस्यात्। तथोक्तौतुलिंगविशेषाप्रतीतेरित्यरुचेराह ॥ अथवेति ॥ ननुनमुक्तप्राप्यत्वं विष्णुत्वनिश्चायकं। तस्यार्चिरादिसाधारणत्वादित्यतआह ॥ श्रौतेति ॥ अमृतस्यैषसेतुरितिश्रुतिस्थसेतुशब्दादित्यर्थः। जायमानादिशब्दानामितिवक्ष्यमाणरीत्याभेदव्य ॥ ५५१ ॥

प्र० नमित्यस्यार्थउक्तः। तथापिपूर्वपक्षटीकायांदृष्टफलविधायकवाक्यदृष्टांतेनसर्वाश्रयत्वप्रतिपादकवाक्यप्रामाण्यानुमानेनरुद्रस्यप्रधानस्यचस र्वाश्रयत्वसिद्धेरुक्तत्वेनास्यपूर्वपक्षन्यायस्यदुरागममात्रसाधारण्यात् । अतच्छब्दादित्युक्तसिद्धांतन्यायस्यचदुरागममात्रप्रसिद्धरुद्रप्रधानादे स्सर्वस्यापिद्युभ्वाद्यायतनत्वनिरासेपिसाम्यात् भाष्येरुद्रोक्तेस्तत्वनिर्णयेप्रधानोक्तेष्टीकायामुभयोक्तेश्चोपलक्षणत्वादितिभावेनादिपदप्रयोगः। एतेनानुमानशब्दस्यव्युत्पत्तिद्वयेपिरुद्रार्थत्वेविशेष्यनिघ्नतयापुल्लिंगतास्यात् । "नवेतिविभाषे"तिसूत्रेमहाभाष्ये "अयमितिकरणःपरःप्रयु ज्यत"इतिल्युडंतस्यापिपुल्लिंगप्रयोगात्। कैयटे "क्रियतइतिकरणः । इतिश्चासौकरणश्चे"तिव्याख्यानादितिनिरस्तं । रुद्रप्रधानादीतिसा मान्यस्यविशेष्यस्योपादानात्। तत्प्रधानत्वात्ताच्छब्द्यमित्यागमएवानुमानशब्देनगृह्यतइत्यर्थः । ननु "शैवाद्यागमसंप्राप्तदृष्टगेनफलेनतु । तद्वाक्योपमयान्यच्चप्रमाणत्वेऽनुमीयते। ईशवाक्यत्वतइतिचेत्तद्व्यभिचारिणा । अप्रामाण्यानुमाचस्या"दितिशास्त्रयोनिनयानुव्याख्यान एवात्रानुमानपदसूचितपूर्वपक्षबीजस्यटीकोक्तस्यनिरस्तत्वेन कथंपुनरत्रागमबलेनतत्सिद्धंरुद्रप्रधानाद्याशंक्यनिरस्यतइतिचेदत्राहुः । श्रुति लिंगबाहुल्येनप्रबलसमाख्यारूपहेत्वंतरेणनिरवकाशजायमानत्वलिंगेनचपूर्वपक्षेसतिपाशुपताद्यागमसिद्धत्वमभ्युच्चयत्वेनोच्यते । यथाऽऽनं दमयन्यायेनविष्णुलिंगतयानिर्णीतमपिचक्षुर्मयत्वादिलिंगं सर्वत्रप्रसिद्धेत्यत्रार्भकौकस्त्वेनसिद्धेचोद्येऽभ्युच्चयत्वेनोच्यते । तथैवसुधायामुक्ते रिति । यद्वा "रुद्रोवावलोकाधार"इत्यादिश्रुत्यारुद्रादेस्सर्वाधारत्वप्राप्तौतत्साहाय्येनतस्यद्युभ्वाद्यायतनत्वप्रतिपादकागमस्यापिप्रामाण्येन तद्व्यभिचारिणा । अप्रामाण्यानुमाचस्या"दित्युक्ताप्रामाण्यानुमानस्यबाधितत्वात् "दृष्टगेनफलेनतु"इत्यनुमानस्यचसमूलत्वात्तेनतत्प्रामा ण्योपपत्तेरागमावष्टंभेनपुनरशंकायां रुद्रादिसमाख्यायावैष्णवत्वोक्त्यैवाप्रामाण्यानुमानंनिर्बाधमितिसमाधानमित्यभिप्रायइति । "सौंतक

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्सरुद्र"इत्यादिभाष्यंसर्वंसूत्रारूढमितिभावेनाह ॥ अनेनचेति ॥ सूत्रेणेत्यर्थः ॥ विष्ण्वादिशब्दानामपिरुद्रादिशब्दत्वंनास्तीति ॥ तथात्वेतच्छब्दाभावादितिसूत्रकारोनब्रूयादितिभावः । अनुव्याख्यानोक्तमपिसूत्रांशाभिमतमित्याह ॥ एवंचेति ॥ समाख्यादिस्थरुद्र पिनाक्यादिशब्दानांविष्णौमुख्यत्वेसतीत्यर्थः । "बाहुल्यंलिंगशब्दानामनुक्तिश्चविरुद्धता । अदृष्टिरन्वयाभावोविपरीतश्रुतिभ्रमः । लिंगा वकाशराहित्यभ्रमस्ताद्दृग्द्वयंतथा । बहुतादृक्त्वमुक्तस्यविरोधोर्थात्तथागतिः । समस्तमेतदित्यत्रपूर्वपक्षेषुयुक्तयः । ताएवबलवत्यस्तुगत्यंतर विवर्जिताः । सिद्धांतयुक्तयोज्ञेया दृश्यंतेताश्चसर्वश"इत्यनुव्याख्यानइत्यर्थः । अतच्छब्दादितिसर्वशब्दानामन्यत्राभाववंवदतागत्यंतरविव र्जितत्वमुक्तमितिभावः । नन्वतच्छब्दादित्यस्यतच्छब्दाभावादितिव्याख्यानमयुक्तं । असामर्थ्येनसमासानुपपत्तेः । अतःपररीत्यापर्युदास

अनेनचपरपक्षेसाधकाभाववंवदता जायमानादिशब्दानामपिजीवशब्दत्वंनास्ति । ब्रह्मण्यपिसंभवादितिसूचना त्स्वपक्षेबाधकमप्युद्धृतं । एवंरुद्रसमाख्यास्थानांरुद्रपिनाक्यादिशब्दानामपिरुद्रादिशब्दत्वंनास्तिमुख्यतः । तथा विष्णुसमाख्यास्थानांविष्ण्वादिशब्दानामपिरुद्रादिशब्दत्वंनास्ति । "नतुनारायणादीनांनाम्नामन्यत्रसंभवः । अ न्यनाम्नांगतिर्विष्णु"रित्यादिभाष्योदाहृतस्मृतेः । तथाचरुद्रादिसमाख्यासावकाशा । विष्णुसमाख्यातुनिरव काशेत्यपिसूचितं । एवंचानुव्याख्याने "बाहुल्यंलिंगशब्दाना"मित्यादिना "पूर्वपक्षेषुयुक्तय"इत्यंतेनपूर्वपक्षयुक्ति मुक्त्वा "ताएवबलवत्यस्तुगत्यंतरविवर्जिताः । सिद्धांतयुक्तयोज्ञेया"इतियःसिद्धांतन्यायउक्तःसोपिसूत्रारूढः ।॥ ५५२ ॥

गु० पदेशस्यजीवविषयत्वात्प्राणभृच्चेतियोगविभागमात्रस्योत्तरार्थकरणेपितत्सूत्रेप्यत्रत्यसाध्यहेत्वनुकर्षादत्रैवतत्सूत्रार्थोऽभिप्रेतइत्याशयेनात्रव्याख्यातमितिद्रष्टव्यं ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० माश्रित्यतच्छब्दविरुद्धशब्दादित्येवव्याख्येयमित्यतआह ॥ **अत्रचेति** ॥ **प्रसज्येति** ॥ "प्रसज्यप्रतिषेधोयंक्रिययासहयत्रनञ् । पर्युदासस्सविज्ञेयोयत्रोत्तरपदेननञ्" इत्युक्तेः । सूर्यंनपश्यंतीत्यसूर्यंपश्याः । "असूर्यललाटयोर्दृशितपो" रितिखशिकृते "खित्यनव्ययस्य । अरुर्द्विषदजंतस्यमु" मितिमुमागमे "पाघ्राध्मास्थाम्नादाणूदृशी" त्यादिनादृशेःपश्यादेशेरूपं । श्राद्धंनभुङ्क्तइत्यश्राद्धभोजी । "व्रत" इतिसूत्रेण शास्त्रीयनियमरूपेव्रतेगम्यमानेसुबंतउपपदेधातोर्णिनिरूपं । अत्रनञः क्रियासापेक्षत्वेनसूर्यादिपदेनाकांक्षाभावेपिसमासस्वीकृतोज्ञापकेन । ज्ञापकमाह ॥ **अकर्तरीति** ॥ तृतीयाध्यायस्यतृतीयपादेकर्तृवर्जितेऽन्यस्मिन्कारकेसंज्ञायांविषयेधातोर्घञ्प्रत्ययोभवति । चकारादसंज्ञायांच । प्रास्यंतितमितिप्रासइत्यादिसिद्ध्यर्थं । तत्रसूत्रेऽकर्तरीतिकिंपर्युदासःकिंवाप्रसज्यप्रतिषेधइतिविचारे पर्युदासपक्षेनञिवयुक्तन्यायेन

अत्रचप्रसज्यप्रतिषेधार्थस्यनञः क्रियासापेक्षत्वेनासामर्थ्येपि "असूर्यंपश्याराजदाराः । अश्राद्धभोजीब्राह्मण" इत्यादौ समासोस्तीति "अकर्तरिचकारकेसंज्ञाया" मित्यत्रज्ञापितत्वाद्वा निर्मक्षिकमित्यादाविव "अर्थाभावेव्ययीभाव" इत्य

गु० **अकर्तरिचेति** ॥ अत्रचसंज्ञायांविषयेधातोर्घञ्विहितःप्राप्तआहारइत्यादिसिद्ध्यर्थं । सचकर्तरिनिषिध्यते । अकर्तरीतिकर्तरिनभवतीत्यर्थः । किंकारणं । मिषत्यसौमेषइत्यादौघञ्माभूदित्येवमर्थं । तथासतिमेषइतिप्रसंगात् । नच अकर्तरीतिप्रसज्यप्रतिषेधइवकर्तृभिन्नेकर्तृसदृशेकारकेभवतीतिपर्युदासाश्रयणेपिमेषइत्यत्रतदभावःसिद्ध्यत्येवेतिकिंप्रसज्यप्रतिषेधाश्रयणेनेतिवाच्यं । तथासतिकारकग्रहणमनर्थकमेवस्यात् । अकर्तरीतिपर्युदासेहिनञिवयुक्तन्यायेनकर्तुरन्यस्मिन्कर्तृसदृशेकारकएवेतिप्रतीतिर्भवति । यथाऽब्राह्मणइतिक्षत्रियादौ । तस्मात्कारकग्रहणंव्यर्थं । प्रसज्यप्रतिषेधेतुवाक्यभेदेनसंज्ञायांघञ्भवति । कर्तरिचनभवतीत्येषोर्थःसं

SGDF
Sri Gargeshwari Digital Foundation

प्र० कर्तृभिन्नस्यकर्तृसदृशस्यकारकस्यैवग्रहणसंभवात्कारकपदंव्यर्थं । तत्क्रियते । तेनज्ञायतेऽकर्तरीतिनपर्युदासः । किंतुप्रसज्यप्रतिषेधइति । तथाचप्रसज्यप्रतिषेधेपिसमासोस्तीतिज्ञापनायकारकपदमिति । अतएव "आदेचउपदेशेऽशिती"तिसौत्रनिर्देशोयुक्तः । उपदेशएचआत्वं भवति । शितितु शकारेत्संज्ञकप्रत्ययेपरतोनभवतीतिप्रसज्यप्रतिषेधार्थत्वस्यतत्राभिमतत्वात् । पर्युदासत्वेतुशितोन्यत्राच्प्रभृतिप्रत्ययेपरतए चआत्वंभवतीत्यर्थप्राप्त्या सुग्लःसुम्लइत्यादौ "आतश्चोपसर्गे"इतिकप्रत्ययोनस्यात् । व्यक्तमेतत्सर्ववृत्त्यादौ ॥ **अव्ययीभावेति** ॥ तस्य शब्दस्तच्छब्दः तच्छब्दस्याभावोतच्छब्दं । "अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य सादृश्यसंपत्तिसाकल्यांतवचने"ष्वितिसूत्रेऽर्थाभावेवर्तमानंयदव्ययंतदुत्तरपदेनसमस्यते ससमासोव्ययीभावइतिविधानादिहाभावार्थक स्यनञउत्तरपदेनसमासः । यथामक्षिकाणामभावोनिर्मक्षिकं । विवादस्याभावोऽविवादमित्यादौतथेत्यर्थः "विष्णावेवात्मशब्दस्यरूढत्वा न्नशिवादिकान् । श्रुतिर्वक्ती"त्येतत्पादीयानुव्याख्याने । तथा "आत्मशब्दंयतोहेतुंकृत्वाजीवंन्यवारयत् । स्वशब्दात्प्राणभृच्चैवनोक्तइत्येववे

व्ययीभावसमासाश्रयणाद्वा अतच्छब्दादितिपदंभाष्ये "तच्छब्दाभावा"दितिव्याख्यातं ।

गु० पद्यते । ततःसंज्ञायांघञ्भवतीतिप्रथमवाक्येऽर्थनिर्देशाभावात् अनिर्दिष्टार्थाःप्रत्ययाःस्वार्थेभवंतीतिस्वार्थएवघञ्स्यात् । अतःप्रसज्यप्रतिषेधेकर्तव्यमेवकारकग्र हणं । पर्युदासेतूक्तरीत्यानकर्तव्यं । तच्चक्रियमाणंप्रसज्यनिषेधेनासामर्थ्येपिसमासोभवतीतिज्ञापयति । तदनेनप्रकारेणासामर्थ्येपिसमासस्याकर्तरिचकारकेसंज्ञा यामित्यत्रकारकग्रहणेनज्ञापितत्वात् । अतच्छब्दादित्यत्रासामर्थ्येपिसमासोयुज्यतएवेतिभावः । ननुचाव्ययादाप्सुपइतिसुपोलोपंविधायादंतादव्ययीभावात्परस्यसुपो

प्र० दरात्"इतिचतुर्थाध्यायाद्यपादीयानुव्याख्यानेच "स्वशब्दपर्यायात्मशब्दाच्चनप्रकृतिजीवावभिधीयेते"इति विष्णुतत्वनिर्णयेच "तेभ्य शिवादिभ्योऽन्यदतद्ब्रह्म । तस्यशब्दोतच्छब्द"इत्येतत्पादीयसुधोक्तदिशाऽर्थांतरस्योक्तत्वात्तत्रचशब्ददोषाभावइतिभावेनभाष्यइत्युक्तं । अर्थां तरपक्षे "अतद्धर्माभिलापा"दित्यत्रपरमतेभिहितरीत्यास्वशब्दादित्यनेनपौनरुक्त्यदोषस्तु अन्यत्रसिद्धांतसाधकस्यैवपूर्वपक्षनिरासेपिहेतुत्वंद्रष्ट व्यं तेननन्यूनतादोषइत्येतत्प्रदर्शयितुं "सिद्धांतसाधकस्यैवपूर्वपक्षनिरासेपिव्यापारंदर्शयितुमिदंसूत्र"मितिसुधोक्तदिशाप्रयोजनविशेषवत्त्वा न्निराकर्तव्यइतिभावः । नन्वव्ययीभावत्वे "अव्ययीभावश्चे"तिसूत्रेणाव्ययत्वे "अव्ययादाप्सुप"इतिसमासादुत्पन्नसुपोलुकिप्राप्ते "ना व्ययीभावादतोम्त्वपंचम्या"इतिसूत्रेणामादेशविधानादतच्छब्दमितिवाच्यं नत्वतच्छब्दादिति । तत्राह ॥ **अव्ययीभावत्वेपीति** ॥ अदंतादव्ययीभावात्परतःसुपोलुङ्नभवति । किंत्वमादेशएव । पंचम्यास्त्वमादेशोपिनेतिपंचम्या अमादेशस्यनिषेधादित्यर्थः । एतेन "अक र्तरिचकारकइतिज्ञापकादसामर्थ्येपिकचित्समासोभवतीतिवा अर्थाभावेयदव्ययमित्यव्ययीभावोवेतिसमाधानमवधातव्य"मितिसुधावाक्यं विवृतंध्येयं । "छंदोवत्सूत्राणिभवंतीतिवे"तिसुधोक्तंसमाधानांतरंस्फुटत्वान्नविवृतं ॥ **एवमिति** ॥ "नचस्यातैमतद्धर्माभिलापा"दित्यत्रा प्युक्तसमाधिद्वयंध्येयमित्यर्थः । जीववायुनिरासायसूत्रं "प्राणभृच्चे"ति । तत्रचशब्दआत्मशब्दमुक्तोपसृप्यत्वातच्छब्दादिहेतूनांनञश्चानु

अव्ययीभावत्वेप्यम्नभवति । "अपंचम्या"इत्युक्तेः । एवं "अतद्धर्माभिलापा"दित्यादावपिद्रष्टव्यं ।

गु० नाव्ययीभावादतोमित्यम्भावविधानादतच्छब्दमितिस्यात्तत्राह ॥ अव्ययीभावत्वेपीति ॥ अपंचम्याइत्युक्तेः तत्रैवसूत्रेपंचमींविनामादेशविधानादितिभावः ।

SGDF Digital Foundation

प्र० कर्षणार्थइतिटीकानयुक्तेव । तथात्वेनानुमानप्राणभृतावतच्छब्दादित्येकयोगेननिर्देष्टव्येविभागायोगादित्यतआह ॥ **चतुर्थइति** ॥ योगविभागउत्तरार्थइत्यनेनान्वयः । भेदव्यपदेशादित्यत्रानुवृत्त्यर्थः । सहनिर्देशेत्वानुमानिकस्याप्यनुवृत्तिस्स्यात् । अस्तुकोदोषइत्यतआह ॥ **अद्वैतिनेति** ॥ आदिपदेनशैवादिर्ग्राह्यः । यथाव्याकरणेंगाधिकारे "दंशसंजस्वंजांशपि । रंजेश्च । घञिचभावकरणयो"रित्यत्ररंजेश्चेत्यस्यपूर्वसूत्रएवस्वंजरंजामितिनिर्देष्टव्येघञिचेत्युत्तरसूत्रेऽनुवृत्त्यर्थोयोगविभागः । अन्यथासर्वस्याप्यनुवृत्तिस्स्यात् । तथेहापीतिभावः । एतच्चपरभाष्यादावपिव्यक्तं । तेन "प्राणभृच्चेतिसूत्रपृथक्त्वकल्पनमयुक्त"मितिश्रुतप्रकाशोक्तंनिरस्तंभवति । सूत्रेवायुनिरासाप्रतीतेराह

चतुर्थे अद्वैतिनाजीवस्येवसांख्यादिनाप्रधानादेर्ब्रह्माभेदानंगीकारात् "अन्यमीश"मित्यादिभेदव्यपदेशस्य प्रधानादिविषयत्वाभावाच्च "भेदव्यपदेशा"दित्युत्तरहेतोर्जीवपक्षमात्रनिरासकत्वाद्योगविभागउत्तरार्थः ।

गु० नानुमानमतच्छब्दादित्यनेनप्रधानरुद्रयोरिववायुजीवयोरपिनिरासस्यकर्तुंशक्यत्वेनप्राणभृच्चेतिपृथग्वाक्यविभागानुपपत्तिरित्यतआह ॥ **चतुर्थइति** ॥ रुद्रवाय्वोरपिशैवादिभिर्विष्णुभेदस्यैवांगीकारादित्यादिशब्दार्थः । उत्तरार्थः प्रकरणादित्युत्तरसूत्रार्थइत्यर्थः ॥ **तत्रचशब्दइति** ॥ अत्रभाष्येपूर्वानुक्तवायुसमुच्चायकत्वस्यस्पष्टप्रतीतेःटीकायामुक्तसाध्यहेत्वनुकर्षमात्रार्थत्वमित्यव्याख्यातत्वाद्वायुसमुच्चयश्चशब्दार्थोनेतिनमंतव्यमितिभावः । जीवप्राणधारणइतिधातोर्जीवएवप्राणभृच्छब्दार्थोऽभिप्रेतोनतुवायुः । तथात्वेरुद्रस्यापिग्रहणोपपत्तेः । टीकायांपूर्वपक्षेवायोःप्राणाधारत्वप्रसिद्ध्युक्तिमात्रेणतस्यग्रहणे प्राणानांग्रंथिरसीत्यादौरुद्रस्यापितदविशेषात् । अतएवभाष्येनजीवोवायुश्चेतियोगविभागः । अन्यथानप्रकृतिजीवावभिधीयेतेइत्यन्यत्रेवात्रापिनजीववायूइतिस्यादितिभावेनेदंव्याख्यानं । भावबोधेतुरुद्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ तत्रेति ॥ पंचमइति ॥ भेदव्यपदेशादितिसूत्रे । "अन्यमीशमितिजीवेशभेदव्यपदेशादित्यर्थ" इतिटीकानयुक्तेव । श्रुतौजीवादन्यमित्यप्रतीतेः । विरुद्धाचाद्दृश्यत्वाधिकरणभाष्येणेत्यतआह ॥ अत्रचेति ॥ पदिन्यायेनेति ॥ चतुर्थस्याद्यपादे "पदकर्माप्रयोजकंनयनस्यपरार्थत्वा"दितिदशमाधिकरणेचिंतितं । ज्योतिष्टोमे "एकहायन्याक्रीणाती"त्येकहायन्यागवासोमक्रयणंप्रकृत्य "षट्पदान्यनुनिष्क्रामति । सप्तमंपदमध्वर्युरंजलिनागृह्णाती"तिषट्पदनयनानंतरंसाज्यसप्तमपदपांसुग्रहणंविधाय "यर्हिहविर्धानेप्राचीप्रवर्तयेयुस्तर्हितेनाक्षमुपां

तत्रचशब्दोनकेवलंटीकोक्तरीत्यापूर्वोक्तहेतूनांनञश्चानुकर्षणार्थः । किंतुवायुसमुच्चयार्थोपीतिद्रष्टव्यं । पंचमेजीवब्रह्माभेदेनोभयाबाधसंभवेनैकस्यापिबाधोयुक्तइतिशंकितेतन्निरासाच्चशब्दाभावः स्वपक्षसाधकस्वशब्दादिहेतुविप्रकर्षश्च । अत्रचान्यमीशमित्युक्तेनान्यत्वेनपश्यतीतिप्रकृतोजीवःपदिन्यायेन(यदिन्यायेन)प्रतियोगित्वेनसंबध्यतइत्यभिप्रेत्येयंश्रुतिर्जीवेशभेदप्रमाणीकृता । "विशेषणभेदव्यपदेशाभ्या"मित्यत्रत्वयमन्योमार्गइत्युक्तेप्रसिद्धमार्गादन्यत्ववदन्यमीशमित्युक्तेप्रसिद्धेशाद्रुद्रादन्यत्वप्रतीतेरियंश्रुतिर्व्याख्यानांतरमभिप्रेत्यरुद्रादन्यत्वेप्रमाणीकृतेत्यविरोधः ।

गु० वतांहींद्रियाणांतुनियंताप्राणएकराडित्यादौश्रुतौचप्राणसंवादादिनारुद्राद्यपेक्षयाप्यतिशयेनप्राणधारकत्वाद्वायोरपिसौत्रप्राणभृच्छब्दार्थत्वं । योगविभागस्तुतत्रैकवचनोपपत्तयेकृतः । भाष्येचशब्दस्तुवायुपूर्वपक्षेनहेतूनांचानुकर्षार्थइत्याशयेनसौत्रशब्दस्यमुख्यवायुसमुच्चयज्ञापकत्वमनुक्त्वावायोःप्राणभृच्छब्दार्थत्वमेवोक्तमितिज्ञेयं । ननुजुष्टंयदापश्यतीतिश्रुतेःपूर्वंपरमात्मनोरुद्राद्भेदेप्रमाणत्वेनोदाहृतत्वात्जीवेश्वरभेदेप्रमाणत्वेनोदाहरणेपूर्वोत्तरविरोधइत्यतआह ॥ अत्रचेति ॥ यदिन्यायेनेति ॥ अन्यत्वावधित्वेनप्रतीतोजीवोयद्यवधिर्नस्यात्ततःकिंस्यादन्यथावधिनएवाभावात् । यदिचान्यदेवावधिभूतंस्यात्तर्ह्यवधिमदन्यन्नास्तीतिवदन्नास्तिकोहतइत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ज्या''दितिहविर्धानेशकटप्रवर्तनकालेतदक्षांजनंतेनपदपांसुनासाज्येनकर्तव्यमाम्नायते। तत्रसोमक्रयणवत्पदपांसुसाध्यमक्षांजनमप्येकहाय
नीनयनस्यप्रयोजकमनुष्ठापकमितियावत् । उतनेतिसंशये उभयोरप्येकहायनीनयनसाध्यत्वादुभयंप्रयोजकमितिप्राप्ते एकहायन्याक्रीणाती
त्येकहायन्याःक्रयणार्थत्वेनविधानात् यदर्थंद्रव्यंतदर्थस्तत्संस्कारइत्येकहायन्यासोमक्रयणदेशंप्रतिनयनरूपस्यसंस्कारस्यापिक्रयणार्थत्वात्क्रयण
मेवप्रयोजकमन्यदनुनिष्पादीतिसिद्धांतइति । अत्रसप्तमंपदमित्यत्रपदशब्दस्यसन्निधानादेकहायनीपदविषयकत्वंसिद्धंकृत्वाविचारःप्रवृत्तइ
तिपदिन्यायेनेत्युक्तमित्याहुः । पदयुक्तन्यायःपदिन्यायः ॥ **एवमिति** ॥ पंचमइवप्रकरणादित्यत्रापीत्यर्थः । जीवस्यकस्माच्चिदीशादन्य
त्वमुच्यतेनतुपरमात्मनः । अतोनतयोर्भेदइतिशंकायां''द्वेविद्येवेदितव्ये''इतिपरविद्याविषयस्यवस्तुनःपरमात्मनएवप्रक्रम्याधीतत्वेनतस्यतत्प्रक

एवंषष्ठेपिभेदव्यपदेशस्यान्यविषयत्वशंकानिरासाच्चशब्दाभावः ।

प्र० रणत्वेनेशशब्देनतस्यैवग्रहणोपपत्तेरित्यर्थोक्तेरितिभावः ॥ **चशब्दाभावइति** ॥ पूर्वानंतर्यंचेत्यपिज्ञेयं । नन्वेवमयंयोगश्शक्योवक्तुं ।
कथमिष्टसिद्धिः । यथाऽतच्छब्दादित्युक्तयासमाख्यास्थरुद्रादिशब्दानांविषयवाक्यस्थजायमानशब्दस्यचान्यार्थत्वनिरासेनविष्ण्वर्थत्वसिद्धिः
तथेशशब्दस्यापिविष्ण्वर्थत्वसिद्धेः । नचतत्र ''जायमान''इत्यादिश्रुतिस्मृतिबलात्तथात्वसिद्धिः । इहापि ''सईशोयोहरि''रिति ''ईशाना
देवचेशान''इति ''एवंनानाविधैश्शब्दैरेकएवत्रिविक्रम''इति ''अन्यनाम्नांगतिर्विष्णु''रितिश्रुतिस्मृतिभावात् । मैवं । अंतरंगज्ञापकेसति
त्यागायोगान्निरवकाशजीवलिंगादिनाप्रकरणमन्यपरमित्याक्षेपेसति तत्सावकाशत्वस्यातच्छब्दादित्यनेनोक्तौप्रकरणमपिसाधकमेव । एव ॥ ५५५ ॥
मेतदन्यत्राप्यनुसंधेयमित्यर्थस्यज्ञापनार्थत्वात्प्रागुक्तश्रुतिलिंगोपोद्बलनार्थत्वाच्चास्ययोगस्योक्तिः । एतेनकथंप्रकरणेनश्रुतिबाधइतिप्रत्युक्तं ।

प्र० श्रुतेस्सावकाशत्वात्प्रकरणस्यानवकाशत्वादिति ॥ **सप्तमइति** ॥ स्थित्यदनाभ्यांचेत्यत्र ॥ **श्रुतेरिति** ॥ अन्यशब्दरूपश्रुतेरितिव्यपदे
शपदार्थोक्तिः । द्वासुपर्णेत्युपक्रम्य तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीतिजीवेशयोःकर्मफलोपजीवनतद्रहितावस्थानरूपलिंगा
दपीत्यर्थः ॥ **चशब्दइति** ॥ पूर्वानंतर्यंचेत्यपिग्राह्यं । अत्रश्रुतिक्रमोल्लंघनमीश्वरस्यप्राधान्यज्ञापनार्थं । ''स्थितिपदस्याल्पाक्षरत्वाच्चे''ति
टीकार्थंव्यक्तमाह ॥ **श्रुताविति** ॥ ''अल्पाच्तरंपूर्व''मितिपाणिनिस्मरणादितिभावः । गुहानयेऽनश्नन्नित्यस्याऽशुभाशननिषेधार्थत्वोक्ताव
पीहजीवनार्थकर्मफलाशनंनेत्यर्थकतयाव्याख्यानमभिमतं । ''सुपर्णावेतौसयुजौसखायौयदृच्छयाकृतनीडौचवृक्षे । एकस्तयोःखादतिपि
प्पलान्नमन्योनिरन्नोपिबलेनभूयान्''इत्यादिभागवतोक्तेः । ''साशनानशनत्वेननरदेवौयथोदितौ । अत्तिंविनाप्यदौर्बल्यात्तथाऽनत्तिर्हरेर्भु
ज''इतिस्मृतेश्चेतिभावः । श्रुतेर्जीवेशविषयत्वंसाधयति ॥ **नचेत्यादिना** ॥ **तावेताविति** ॥ ''तयोरन्यःपिप्पलंस्वाद्वत्तीतिसत्वं । अनश्न

सप्तमेतुनकेवलंव्यपदेशाच्छ्रुतेर्भेदः किंतुलिंगादपीतिकथनाच्चशब्दः । श्रुतावदनस्यप्राथम्येपिस्थितेरीश्वरसंबंधित्वेनाभ्य
र्हितत्वादल्पाच्तरत्वाच्चसूत्रेतस्याःप्राथम्यं । नचवाच्यं द्वासुपर्णेतिमंत्रोक्तेस्थित्यदनेबुद्धिजीवगते। नतुजीवेशगते। ''तावे
तौसत्वक्षेत्रज्ञा''वितिपैंगिरहस्यब्राह्मणेनास्यमंत्रस्यसत्वक्षेत्रज्ञशब्दार्थत्वेनबुद्धिजीवविषयत्वेनव्याख्यातत्वादिति । ब्राह्मणेस
त्वशब्दस्य ''ऊनंनसत्वेष्वधिकोवबाधे''इतिप्रयोगात् ''सत्वमस्त्रीतुजंतु''ष्वितिनामानुशासनात् ''सत्वंजीवइतिप्रोक्त''

गु० पदिन्यायेनेतिपाठे पदेजुहोतीतिहोमाधिकरणंपदंकिमितिप्राप्ते अध्वर्युःसप्तमंपदमंजलिनागृह्णातीतिप्रकृतैकहायन्यायएववस्तुतःपदप्रतियोगित्ववदत्रापिप्रकृतजीव
स्यैवान्यत्वप्रतियोगित्वेनसंबंधोज्ञेयइत्यर्थः । अन्यथाप्रकृतत्वाविशेषात्तत्रापिनस्यादितिभावः ॥ **अभ्यर्हितत्वादिति** ॥ अभ्यर्हितंपूर्वमितिपूर्वनिपातइतिभावः ॥

SGDF Sri Gangadharan Digital Foundation

प्र० न्नन्योऽभिचाकशीतीति । अनश्नन्नन्योभिपश्यतीतिज्ञः । उभावेतौसत्वक्षेत्रज्ञौ । तदेतत्सत्वंयेनस्वप्नंपश्यति । अथयोयंशारीरउपद्रष्टासक्षेत्रज्ञ"इत्यनेनव्याख्यातत्वादित्यर्थः । "ऊनंनसत्वेष्वधिकोबबाधेतस्मिन्वनंगोप्तरिगाहमाने"इतिरघुवंशे । "द्रव्यासुव्यवसायेषुसत्वमस्त्री तुजंतुषु"इतिनानार्थवर्गे । जंतुश्च "प्राणीतुचेतनोजन्मीजंत्वि"त्यमरोक्तेर्जीवइतिभावः ॥ **इतिस्मृतेरिति** ॥ त्रयोदशेगीतातात्पर्योक्तस्मृतेरित्यर्थः ॥ **मोक्षधर्मादीति** ॥ आदिपदेन "क्षेत्रज्ञएतामनसोविभूतीर्जीवस्यमायारचिताअनित्याः । आविर्हिताश्चैवतिरोहिताश्च शुद्धोविचष्टेह्यविशुद्धकर्तुः । क्षेत्रज्ञआत्मापुरुषःपुराणस्साक्षात्स्वयंज्योतिरजःपरेशः । नारायणोभगवान्वासुदेवःस्वमाययात्मन्व्यवधीयमान" इतिभागवतवचनं "क्षेत्रज्ञंचापिमांविद्धी"तिगीतावचनं "स्वेच्छयैवावृतोविष्णुर्जीवेतिष्ठतिनित्यदा । योसौनियमयन्जीवंक्षेत्रज्ञइतिशब्दित"इतिहरिवंशादिवचनंगृह्यते ॥ **पुरुषशब्दइति** ॥ युक्तइतिविपरिणामः । अत्रविस्तरस्तुगुरुपादकृतश्रुतितात्पर्यकौमुद्यांज्ञेयः ॥

इतिस्मृतेश्चजीवपरत्वात् । क्षेत्रज्ञशब्दस्यच "प्रकृतेश्चविकारा
णांद्रष्टारमगुणान्वितं । क्षेत्रज्ञमाहुर्जीवंतुकर्तारंगुणसंयुत"मिति
मोक्षधर्मादिवचनैर्ब्रह्मपरत्वात् । अन्यथाद्वासुपर्णेत्यस्मादुत्तरं
"समानेवृक्षेपुरुषोनिमग्नोनीशयाशोचतिमुह्यमान"इत्यादिकम
युक्तं नहिबुद्धौपुरुषशब्दोमुह्यमानत्ववीतशोकत्वादिकंचयुक्तं ।

गु० अन्यथेति ॥ द्वासुपर्णेतिमंत्रस्यसत्वक्षेत्रज्ञशब्दार्थत्वेनप्रसिद्धबुद्धिजीवविषयत्वाभ्युपगमइत्यर्थः ॥ **शब्दतइति** ॥ वेधस्याप्राधान्येनार्थतःप्राधान्याभावेपिशब्दतः

SGDF
Sri Gargeshwari Digital Foundation

प्र० अन्येत्विति ॥ “पारवत्त्वेनसेतुत्वाद्भेदेषष्ठ्याःप्रयोगतः । द्युभ्वाद्यायतनंयुक्तंनामृतंब्रह्मकर्हिचि”दितिभामत्युक्तमनुवदति ॥ **अमृतस्यैष सेतुरिति** ॥ भाष्योक्तकोटीराह ॥ **रुद्रेति** ॥ आदिपदेनहिरण्यगर्भः । “धारणादमृतत्वस्यसाधनाद्वास्यहेतुता । पूर्वपक्षेपिमुख्यार्थस्सेतुशब्दोहिनेष्यत”इतिभामतींहृदिकृत्वासिद्धांतमनुवदति ॥ **प्रधानादेरपीति** ॥ **जीवादाविति** ॥ अमृतपदोक्तब्रह्मप्रतिसेतुत्वस्यजीवादावपिदुर्वचत्वादित्यर्थः । निरवकाशविरोधिलिंगस्यजागरूकत्वान्नसिद्धांतोदयइतिभावेनाह ॥ **सिद्धांतइति** ॥ यदप्यमृतत्वाधारत्वादमृतसेतुत्वंब्रह्मणियुक्तमिति तत्रकिमिदममृतत्वं । “अविद्यास्तमयोमोक्षस्सासंसारउदाहृत”इत्युक्तेरविद्यानिवृत्तिरितिचेत्साकिंसत्याऽथ “नसन्ना

अन्येतु । “अमृतस्यैषसेतु”रितिद्युभ्वाद्यायतनममृतसंबंधित्वेनसेतुत्वेनचश्रूयते । नचब्रह्मणोन्यदमृतमस्ति । येनब्रह्मतत्संबंधिस्यात् । सेतुश्चपारवान् । ब्रह्मत्वपारं । तस्मान्नद्युभ्वाद्यायतनंब्रह्म । किंतुरुद्रवायुप्रधानजीवादिरेवेतिप्राप्ते प्रधानादेरपिजलविधारकत्वादेरभावेननरूढंसेतुत्वं । यौगिकंतुभावप्रधानामृतशब्दार्थमोक्षधारकत्वाद्ब्रह्मणोप्यस्ति । यद्वाश्रुतावेतच्छब्दोनब्रह्मपरः । किंतु “तमेवैकंजानथे”तिविधेयत्वेनशब्दतःप्रधानतयाप्रस्तुतज्ञानपरः । तस्यामृतत्वसाधनत्वाद्गौणंतत्सेतुत्वमितिसिद्धांतइत्याहुः । तन्न । ब्रह्मण्यत्यंतायुक्तेनजायमानत्वलिंगेनैवपूर्वपक्षौचित्यात् । ब्रह्मणोन्यदमृतंनेतिपूर्वपक्षेपिजीवादावमृतसेतुत्वस्यदुर्वचत्वाच्च । सिद्धांतेजायमानत्वलिंगस्यगत्यनुक्तेश्च ।

गु० प्राधान्यमस्तीत्यर्थः ॥ **सिद्धांतइति** ॥ प्रकृत्यधिकरणन्यायेनसावकाशंचेदविद्यायाःप्रतिबिंबपक्षपातादितिवक्ष्यमाणरीत्याज्ञेयं । ननुनिर्विशेषस्यात्मशब्दवाच्यत्वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० सन्नसदसन्नानिर्वाच्यश्चतत्क्षय"इत्युक्तेः पंचमप्रकारा। आद्येदोषमाह ॥ **सत्यस्येति** ॥ द्वितीयेप्यविद्याकिंभामतीरीत्याजीवाश्रिताऽथविवरणरीत्याचिन्मात्राश्रितेति । आद्येदोषो **मुक्तिरिति** । द्वितीयेपिकिंबंधोजीवाश्रितश्चिन्मात्राश्रितोवा । आद्येदोष **श्चिन्मात्राश्रितेति** । अन्यथाबंधमोक्षयोस्सामानाधिकरण्यंनस्यादितिभावः । द्वितीयेदोषो **बंधस्यापीति** ॥ **श्यामत्वेति** ॥ प्रतिमुखादावितिशेषः । यच्चयद्वेत्यादिनोक्तंतन्निराह ॥ **यच्चेति** ॥ **श्रुत्यंतरइति** ॥ वाजसनेये "यएषोंतर्हृदयआकाशस्तस्मिञ्शेते । सर्वस्यवशी"त्युक्त्वा "एषसर्वेश्वर

सत्यस्यमोक्षस्याद्वैतिमतेब्रह्ममात्रत्वेनब्रह्मणस्तद्धारकत्वायोगाच्च । मुक्तिःपंचमप्रकारेतिमतेप्यविद्याजीवाश्रितेतिपक्षेतद्ध्वंसस्यापितदाश्रितत्वात् । चिन्मात्राश्रितेतिपक्षेपिमोक्षस्यबंधाश्रयजीवाश्रितत्वात्। बंधस्यापिचिन्मात्राश्रितत्वेचश्यामत्वादिवत्संसारस्यप्रतिबिंबनिष्ठत्वोक्त्ययोगात् । यच्चोक्तंश्रुतावेतच्छब्दोज्ञानपरइत्यादि । तन्न । "एषसेतुर्विधृति"रिति श्रुत्यंतरेसेतुत्वेनप्रसिद्धब्रह्मणएवेहप्रत्यभिज्ञानात् । अस्यामेवश्रुतौ "सएषोंतश्चरत"इति "दिव्येब्रह्मपुरेह्येषव्योम्न्यात्मा संप्रतिष्ठित"इत्युत्तरवाक्यस्थस्यैतच्छब्दस्यब्रह्मपरत्वदर्शनाच्च । सिद्धरूपाभिधायिनःपुँल्लिंगस्यैतच्छब्दस्यपुँल्लिंगेनतच्छब्दे

प्र०एषभूताधिपतिरेषभूतपालएषसेतुर्विधरणएषांलोकानामसंभेदाये"तिवाक्ये एषइत्येतच्छब्दस्यप्रकृतब्रह्मपरत्वंस्पष्टमेवेतिभावेनप्रसिद्धेत्युक्तं। तत्रयद्यपिविधरणइत्येवपाठस्तथापिदहरनये "धृतेश्चमहिम्न"इतिसूत्रेभाष्योक्तश्रुत्यंतरोक्तिरियमितिध्येयं । अस्यामेव आथर्वणएव ॥ **तच्छब्देनेति** ॥ तमेवैकमित्यत्रतमित्यनेनेत्यर्थः । ननुतमित्यस्यजानथेतिज्ञानवाचिनाव्यवहितत्वाज्ज्ञानमेवपरामृश्यतइत्यतआह ॥ ॥ ५५७ ॥

प्र० **आत्मशब्देनचेति** ॥ सूत्रार्थानपिनिराह ॥ **किंचेति** ॥ अस्यपादस्यनिर्विशेषपरत्वाभ्युपगमेनतत्रद्युभ्वाद्यायतनत्वस्यारोपाधिष्ठानत्वादन्यस्याभावादितिभावः । प्रतिज्ञाभागंनिरस्यहेत्वंशंनिराह ॥ **यच्चेति** ॥ एतेनात्मश्रुतितात्पर्यविषयत्वमात्रंहेतुरितिप्रत्युक्तं । शब्दवृत्तिविषयत्वपूर्वकत्वात्तस्य । प्रधानादावपिसंभवाच्च । ननुसविशेषस्यात्मपदवाच्यत्वंद्युभ्वाद्यायतनत्वंचास्तीत्यतआह ॥ **सविशेषस्येति** ॥ **रागद्वेषादिमुक्तैर्ज्ञेयत्वेति** ॥ "भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः । क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावर"इत्यादिनेत्यर्थः । "हृदयग्रंथिश्चाविद्यारागद्वेषभयमोहाः । दर्शनंदृष्टं तस्मिन् । तदर्थमितियावत् । यथाचर्मणिद्वीपिनंहंतिचर्मार्थमितिगम्यत"इतिभामत्यांव्याख्यानात् । अस्यार्थस्यतत्रवाक्येस्पष्टमप्रतीतेस्तदनुपादानेनरागद्वेषादिमुक्तैरित्येवोक्तं ॥ **वाग्विमोकेति** ॥ सूत्रेमुक्तेतिशब्दस्यभावार्थनिष्ठांतत्वेनमोचनार्थत

नात्मशब्देनचाव्यवधानेनप्रकृतसिद्धरूपात्मपरत्वसंभवेपि तद्विपरीतज्ञानपरत्वायोगाच्च । किंचाद्यसूत्रेद्युभ्वाद्यायतनत्वंनामपरमतेनिर्विशेषस्यतद्भ्रमाधिष्ठानत्वं । तथाचश्रुतावोतशब्दःसूत्रेचायतनशब्दश्चायुक्तः । नहिशुक्तौरूप्यमोतमित्युच्यते। यच्चोक्तंस्वशब्दादित्यनेनात्मशब्दादित्युच्यते। सहिब्रह्मणःशब्दइति । तन्न । आत्मशब्दवाच्यत्वस्यनिर्विशेषेऽभावात् । तल्लक्ष्यत्वस्यचप्रधानादावपिसंभवात् । सविशेषस्यचैतत्पादाप्रतिपाद्यत्वात् । यच्चोक्तंरागद्वेषादिमुक्तैर्ज्ञेयत्वव्यपदेशादितिवा "अन्यावाचोविमुंचथे"तिवाग्विमोकपूर्वकं "तमेवैकंजानथे"तिज्ञेयत्वव्यपदेशादितिवा "तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैती"तिमुक्तैःप्राप्यत्वव्यपदेशादितिवाद्वितीयसूत्रार्थइति । तन्न ।

गु० भावेपिसविशेषस्यतच्छब्दवाच्यत्वेनतस्यैवात्रप्रतिपाद्यत्वमस्त्वित्यतआह ॥ **सविशेषस्येति** ॥ तथाचसविशेषप्रतिपादनेपादासंगतिरितिभावः। ननुशुद्धस्यमुक्ताभेदे

SGDF Sri Gargeshwari Digital Foundation

तात्पर्य- ॥ ५५८ ॥

चंद्रिका- प्र. तृ. १

प्र० यावाग्विमोकपूर्वमित्यर्थलाभादितिभावः । आद्यद्वितीययोर्दोषद्वयमाह ॥ निरुपपदस्येत्यादि ॥ तृतीयेदोषमाह ॥ त्वन्मतइति ॥ मुक्तेति ॥ तस्यमुख्यमुक्तएवस्वारस्यादितिभावः । यदपिनानुमानमित्यस्य अनुमीयतइत्यनुमानंप्रधानंनद्युभ्वाद्यायतनं । तच्छब्दाभावादित्यर्थइति । तत्रहेत्वर्थनिराह ॥ तृतीयेति ॥ उक्तं आद्यसूत्रार्थदूषणप्रस्तावे । यदपि "प्राणभृच्चे"त्यत्रातच्छब्दादितिहेतुमनुकृष्य "य

निरुपपदस्यमुक्तशब्दस्यसंसारान्मुक्तेप्रसिद्धत्वेनतत्त्यागायोगात्। उपपूर्वस्यसृपेःसमीपप्राप्त्यर्थत्वेनज्ञानार्थत्वायोगाच्च। त्वन्मतेब्रह्मणोमुक्ताभेदेनतत्प्राप्यत्वाभावाच्च । सगुणमोक्षोक्तौचपादासंगतिः । सौत्रमुक्तशब्दस्यश्रौतस्यनामरूपाद्विमुक्तइत्यस्यास्वारस्यंच । तृतीयसूत्रे अतच्छब्दोनामतद्वाचकशब्दाभावश्चेन्निर्विशेषेपिसमः । तल्लक्षकशब्दाभावस्तुप्रधानादावप्यसिद्धइत्युक्तं । चतुर्थे "यःसर्वज्ञः"इत्यतच्छब्दाद्यदिजीवनिषेधस्तर्हिनिर्विशेषब्रह्मनिषेधोपिस्यात् । सार्वज्ञस्यसविशेषनिष्ठत्वात् । पंचमेभेदव्यपदेशोनाम "तमेवैकंजानथे"तिकर्मकर्तृव्यपदेशइत्यप्ययुक्तं । अन्यमीशमितिसाक्षाद्भेदव्यपदेशेसतिभेदकव्यपदेशग्रहणायोगात् । एवंसूत्रांतरेप्यनुपपत्तिरूह्या । अत्रापिपरमतेपि "भेदव्यपदेशा"दित्यनेनजीवब्रह्मभेदोक्तेः "मुक्तोपसृप्यव्यपदेशा"दित्यनेनमुक्तावपिभेदोक्तेश्चाभेदप्रतिकूलताव्यक्ता । केचित्तु ।

प्र० स्सर्वज्ञस्सर्ववि"दिततद्विपरीतशब्दान्नजीवोद्युभ्वाद्यायतनमिति । तत्राह ॥ चतुर्थइति ॥ साक्षादिति ॥ भेदोक्तिद्वारमंतरेणैवेत्यर्थः ॥ एवमिति ॥ "प्रकरणा"दित्यस्यत्वन्मतेप्रधानहेतुत्वात्तत्रचशब्दश्रवणंस्यात् । "स्थित्यदनाभ्या"मित्यत्रापिभेदकस्यैवोक्त्याभेदसूत्रेणपौनरुक्त्यमित्यादिरूपेणोह्येत्यर्थः ॥ इत्यनेनेति ॥ प्राप्तृप्राप्यभावस्यभेदव्याप्तत्वादितिभावः ॥ केचित्त्विति ॥ द्युभ्वाद्यायतनंजीवःपरमात्मा ॥ ५५८ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेतिसंशये मनःप्रभृतींद्रियाधारत्वनाडीसंबंधजायमानत्वादिलिंगानांश्रवणात्तद्बलेनद्युपृथिव्याद्यायतनत्वादेर्जीवे स्वरूपेणवाकर्मद्वारावामु क्तावस्थायांविकसितेनज्ञानेनवाकथंचिन्नेयत्वाज्जीवएवद्युभ्वाद्यायतनमितिप्राप्ते, "तमेवैकंजानथात्मानं । अमृतस्यैषसेतुः । यस्सर्वज्ञ" इत्या दिपरमात्मासाधारणशब्दात् "नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैती" तिनामरूपात्मकबंधान्मुक्तस्यप्राप्यतयाव्यपदेशात् मनःप्रभृतींद्रियाधा रत्वस्यसर्वाधारेपरेपरमात्मनि "संततँसिराभिस्तुलंबत्याकोशसन्निभ" मित्यादिश्रुत्यानाड्याधारत्वस्यहृदयाधारद्वारा "अजायमानोबहुधावि जायत" इतिश्रुत्याचाकर्मकृतःस्वेच्छोपात्तदिव्यविग्रहयोगेनजायमानत्वस्यापिपरमात्मनिसंभवात्सएवद्युभ्वाद्यायतनमितिसिद्धांतइत्याहुरित्य

"गौणश्चेन्नात्मशब्दादित्यत्रात्मशब्दस्याचिद्व्यावर्तकतायाउक्तत्वादात्मशब्दोक्तेद्युभ्वाद्यायतनेप्रधानत्वशंकानुदयाज्जीव त्वेनैवपूर्वपक्ष" इत्याहुः । तन्न । रुद्रादिव्यावर्तकतायाअनुक्तत्वेन । जीवत्वेनैवेत्यवधारणायोगात् । "नानुमान" मितिसू त्रेप्रधाननिरासायोगाच्च । "अस्मिन्नस्यचतद्योगंशास्ती" त्यादौमुक्तोपसृप्यत्वस्यापिजीवव्यावर्तकतायाउक्तत्वेनमुक्तोपसृ प्यत्वेनोक्तेतस्मिञ्जीवत्वशंकाया अप्यनुदयाच्च । जायमानत्वादिनिरवकाशलिंगैर्मुक्तोपसृप्यत्वस्यगौणत्वेतैरेवात्मशब्दोपि

प्र० र्थः । ननु नानुमानमितिसूत्रेप्रधाननिरासप्रतीतेर्जीवएवेतिकथंपूर्वपक्षइत्यतश्श्रुतप्रकाशोक्तमनुवदति ॥ गौणश्चेदिति ॥ तत्रहि तदैक्षते तीक्षणंप्रधानेगौणमितिशंकिते "अनेनजीवेनात्मने" त्यात्मपदप्रयोगात्तस्यजडेऽयोगादित्युक्तेरितिभावः । नानुमानमितिप्रधाननिरासोद्दृष्टां तत्वेनोपयुज्यते । यथाप्रधानंनभवतितथाप्राणभृज्जीवोपिनेतीतिभावः ॥ रुद्रादीति ॥ रुद्रवाय्वादेरपीशशब्दसमाख्याभ्यांप्राप्तिभावादि तिभावः । नानुमानमितिसूत्रइतिदृष्टांतत्वकल्पनंत्वयुक्तं । कल्पकाभावादतिशयाभावाच्चेतिभावः ॥ अस्मिन्निति ॥ "रसशब्दनिर्दिष्टे

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेतिसंशये मनःप्रभृतींद्रियाधारत्वनाडीसंबंधजायमानत्वादिलिंगानांश्रवणात्तद्बलेनद्युपृथिव्याद्यायतनत्वादेर्जीवे स्वरूपेणवाकर्मद्वारावामु
क्तावस्थायांविकसितेनज्ञानेनवाकथंचिन्नेयत्वाज्जीवएवद्युभ्वाद्यायतनमितिप्राप्ते, "तमेवैकंजानथात्मानं । अमृतस्यैषसेतुः । यस्सर्वज्ञ"इत्या
दिपरमात्मासाधारणशब्दात् "नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैती"तिनामरूपात्मकबंधान्मुक्तस्यप्राप्यतयाव्यपदेशात् मनःप्रभृतींद्रियाधा
रत्वस्यसर्वाधारेपरेपरमात्मनि "संततँसिराभिस्तुलंबत्याकोशसन्निभ"मित्यादिश्रुत्यानाड्याधारत्वस्यहृदयाधारद्वारा "अजायमानोबहुधावि
जायत"इतिश्रुत्याचाकर्मकृतःस्वेच्छोपात्तदिव्यविग्रहयोगेनजायमानत्वस्यापिपरमात्मनिसंभवात्सएवद्युभ्वाद्यायतनमितिसिद्धांतइत्याहुरित्य

"गौणश्चेन्नात्मशब्दादित्यत्रात्मशब्दस्याचिद्व्यावर्तकतायाउक्तत्वादात्मशब्दोक्तेद्युभ्वाद्यायतनेप्रधानत्वशंकानुदयाज्जीव
त्वेनैवपूर्वपक्ष"इत्याहुः । तन्न । रुद्रादिव्यावर्तकतायाअनुक्तत्वेन । जीवत्वेनैवेत्यवधारणायोगात् । "नानुमान"मितिसू
त्रेप्रधाननिरासायोगाच्च । "अस्मिन्नस्यचतद्योगंशास्ती"त्यादौमुक्तोपसृप्यत्वस्यापिजीवव्यावर्तकतायाउक्तत्वेनमुक्तोपसृ
प्यत्वेनोक्तेतस्मिञ्जीवत्वशंकायाअप्यनुदयाच्च । जायमानत्वादिनिरवकाशलिंगैर्मुक्तोपसृप्यत्वस्यगौणत्वेतैरेवात्मशब्दोपि

प्र० र्थः । ननु नानुमानमितिसूत्रेप्रधाननिरासप्रतीतेर्जीवएवेतिकथंपूर्वपक्षइत्यतश्श्रुतप्रकाशोक्तमनुवदति ॥ गौणश्चेदिति ॥ तत्रहि तदैक्षते
तीक्षणंप्रधानेगौणमितिशंकिते "अनेनजीवेनात्मने"त्यात्मपदप्रयोगात्तस्यजडेऽयोगादित्युक्तेरितिभावः । नानुमानमितिप्रधाननिरासोदृष्टां
तत्वेनोपयुज्यते । यथाप्रधानंनभवतितथाप्राणभृज्जीवोपिनेतीतिभावः ॥ रुद्रादीति ॥ रुद्रवाय्वादेरपीशशब्दसमाख्याभ्यांप्राप्तिभावादि
तिभावः । नानुमानमितिसूत्रइतिदृष्टांतत्वकल्पनंत्वयुक्तं । कल्पकाभावादतिशयाभावाच्चेतिभावः ॥ अस्मिन्निति ॥ "रसशब्दनिर्दिष्टे

SGDF
Sri Gargeshwari Digital Foundation

प्र० ऽस्मिन्नानंदमयेऽस्यजीवस्यतद्योगाभावादानंदयोगंशास्ति "रसोवैसः। रसꣳह्येवायंलब्ध्वानंदीभवती"तिशास्त्रं। अतोनजीव" इत्यर्थोक्तेरितिभावः ॥ प्रकाशेति ॥ तत्रयथास्वरूपार्थत्वमात्मशब्दस्यतथाजीव(दीप)वज्जडेपिप्रधानेममात्माभद्रसेनइतिवदात्मीयेप्रधानआत्मशब्दप्रयोगइतित न्निष्ठसूत्रव्यावर्त्यशंकायांत्वदुक्तरीत्याकथंचिदर्थोस्त्वित्यर्थः। एवंपूर्वपक्षंनिरस्यसूत्रार्थमपिनिराह ॥ किंचेति ॥ आदिपदेनस्थित्यदनप्रति

"प्रकाशात्माप्रदीप" इत्यादाविवान्यार्थोस्तु। प्रत्युतास्मदादिजीवेऽनुभवविरुद्धंद्युभ्वाद्यायतनत्वं। प्रधानेतुसर्वोपादानेतद्युक्तं। किंचाद्यसूत्रेस्वशब्दादित्यस्यब्रह्मासाधारणशब्दादित्यर्थइतित्वयोक्तत्वात् स्वशब्दादित्यनेनैव "अमृतस्यैषसेतुः। यःसर्वज्ञ" इत्यादेरिवमुक्तोपसृप्यत्वादिशब्दस्यापिग्रहणसंभवान्मुक्तोपसृप्यादिसूत्रवैयर्थ्यं। नन्वदृश्यत्वादीत्यत्र "यत्तदद्रेश्य" मित्यादेर्ब्रह्मपरतायाउक्तत्वात्तत्प्रकरणस्थस्य "यस्मिन्द्यौ" रित्यादेरपिसासिद्धेतीदमधिकरणमनारभ्यमितिचेत्। अत्रपरैरुक्तं। यस्मिन्नित्यादिकंयत्तदद्रेश्यमित्येतत्प्रकरणेनास्तीति कृत्वाचिंतयेदमारब्धं। नचतथात्वे "प्रकरणा" दितिसूत्रायोगः। तस्यकृत्वाचिंतात्वोद्घाटनार्थत्वादिति। तन्न। कृत्वाचिंतात्वस्यागतिकगतित्वात्। जायमानत्वादिलिंगैःप्रकरणस्याब्रह्मपरत्वेनैववाप्रकरणा

प्र० पादकशब्दग्रहः। उभाभ्यामुक्तंसमाधिंनिरस्यभाष्याद्युक्तंस्थापयितुंगतार्थत्वमाशंकते ॥ नन्विति ॥ कृत्वाचिंतयेति ॥ "प्रपंचार्थ" मितिभाष्यस्य "तन्मध्यापठितमितिकृत्वाचिंतयेदमधिकरणंप्रवृत्तमित्यर्थ" इतिभामत्युक्तेरितिभावः। कल्पतरूक्तमाह ॥ नचेति ॥ गत्यंतराभावादेवमाश्रीयतइति अतआह ॥ जायमानत्वेति ॥ अनुकृतेरित्यधिकरणे "असंभवानुकारसामर्थ्यलक्षणेनलिंगेनप्रकरणबाधया

प्र० तेजोधातुरेवगम्यत" इतिभामत्युक्तदिशातत्रलिंगात्प्रकरणबाधेनयथापूर्वपक्षस्तथेतिभावः ॥ उत्कर्षेणवेति ॥ पूषानुमंत्रणमंत्रस्यैवास्मन्मतेऽत्तेत्यधिकरणपूर्वपक्षोक्तदिशेतिभावः ॥ केचित्त्विति ॥ यत्तदद्रेश्यमित्यादिकमस्तूक्तरीत्याब्रह्मप्रकरणं। यस्मिन्द्यौरित्यादिकंतुजीवस्यैव प्रकरणं। इंद्रियाधारत्वनाडीसंबद्धत्वजायमानत्वादिजीवलिंगैरितिब्रह्मप्रकरणविच्छेदाशंकायामित्यर्थः। ननुयत्तदद्रेश्यमित्यादिनोक्तमदृश्यत्वादिकमनुभवविषयतयादृश्येजीवेकथंशंकितुंशक्यमित्यतआह ॥ नहीति ॥ द्युभ्वाद्यायतनत्वंजीवेऽनुभवविरुद्धमपिशंकमानेनतस्या

दुत्कर्षेणवापूर्वपक्षसंभवाच्च। केचित्तु। लिंगैःप्रकरणविच्छेदाशंकायांतन्निरासायेदमित्याहुः। तन्न। भाष्यटीकोक्तरीत्यायत्तदद्रेश्यमित्यादेरपिजीवविषयत्वमित्येकवाक्यत्वेनैवपूर्वपक्षसंभवेप्रकरणविच्छेदायोगात्। नहिजीवस्य द्युभ्वाद्यायतनत्वंशंकमानेनादृश्यत्वादिकंशंकितुमशक्यं। त्वयापिहि "सर्वत्रप्रसिद्धोपदेशा" दित्यत्रैकवांक्यत्वाय "मनोमयः" इत्यादिवत् "सर्वंखल्विदंब्रह्मे" त्याद्यपिजीवविषयमित्येवपूर्वपक्षितमिति। टीकाक्षरार्थस्तु।

प्र० पिशंकितुंशक्यत्वादित्यर्थः ॥ त्वयापीति ॥ तत्रैवास्माभिर्विवृतमेतत्। यत्कश्चिदाह द्युभ्वाद्यायतनंवायुप्रधानजीवानामन्यतमउतशिवइतिसंशये वाय्वादिलिंगदर्शनेनतेषामन्यतमइतिप्राप्ते आत्मशब्दान्मुक्तोपसृप्यत्वलिंगादथपरायययातदक्षरमितिप्रकरणाच्चशिवएवेतिसिद्धांत इति। तदपेशलं। "लोकाश्चलोकिनश्चविष्णावेवोताश्चप्रोताश्चे" तिविष्णुप्रापकस्यापिसत्त्वात्। आत्मश्रुत्यादेर्भाष्योक्तवचनजातेनविष्ण्वेकनिष्ठत्वात्। रुद्रश्रुतिलिंगानांविष्ण्वेकनिष्ठतायाभाष्यएवप्रमाणगणेनसमर्थनाच्च। आथर्वणभाष्येसर्वशब्दप्रतिपाद्यत्वस्यसर्वशब्दवाच्यत्वस्य

SGDF Sri Gargeshwari Digital Foundation

प्र० सर्वोत्तमत्वेनतस्यैवज्ञेयत्वस्यप्रमाणनिचयोदाहरणेनतत्रैवसमर्थितत्वात् । विस्तरभयान्नात्रतानिलिख्यंते । प्रकरणस्यवैष्णवतायाःप्रागेवसमर्थितत्वाच्चेति । "प्रकरणा"दितिसूत्रेटीकायां "द्वेविद्येवेदितव्येइतिपरविद्याविषयस्यवस्तुनोत्रारभ्याधीतत्वेनास्यविष्णुप्रकरणत्वा"दितिवाक्येविरुद्धप्रतीतिंनिरस्यन्नर्थमाह ॥ **आरभ्येति** ॥ **स्पष्टमिति** ॥ उपन्यासमुखेनविवृतमितिभावः । सूत्रोक्तभेदस्यमिथ्यात्वशंकांनिरस्यांते "अतोनमिथ्याभेदपरत्वंश्रुते"रित्युक्तं । तस्यसूत्रारूढतामाह ॥ **अतोनमिथ्येति** ॥ सूत्रेऽतच्छब्देनमिथ्यात्वविरोधिसत्यत्वंगृह्यत इत्युक्तंभवति । तच्छब्देनानुमानंपरामृश्यार्थांतरमाह ॥ **अनुमानेति** ॥ ७ ॥ **द्युभ्वाद्यधिकरणं** ॥ १ ॥

आरभ्याधीतत्वादित्यनेनान्यप्रकरणाधीतत्वंनविवक्षितं । येनान्यप्रकरणाधीतस्याप्रकरणित्वनियमाद्विरुद्धोहेतुःस्यात् । किंतुस्वस्यैवोपक्रम्यपठितत्वं । इतरत्स्पष्टं ॥ अतोनमिथ्याभेदपरत्वमिति ॥ नानुमानमितिसूत्रस्यानुमानंभेदमिथ्यात्वेनमानं । भेदस्यसत्यत्वप्रतिपादकशब्दात् । अनुमानमूलभूतस्यभेदमिथ्यात्वप्रतिपादकशब्दस्याभावाच्चेतिवर्णकांतरंसूचितमितिद्रष्टव्यं ॥ ७ ॥ द्युभ्वाद्यधिकरणं ॥ १ ॥

गु० नतत्प्राप्यत्वासंभवेपिसगुणस्यब्रह्मणोमुक्ताभेदाभावेनतस्यमुक्तप्राप्यत्वमुपपन्नमित्यतआह ॥ **सगुणेति** ॥ **एवंसूत्रांतरेति** ॥ यत्रसाक्षाद्भेदव्यपदेशःसंभवतितत्रभेदकव्यपदेशग्रहणानुपपत्तिरूह्येत्यर्थः । अन्यार्थः स्वरूपार्थः ॥ ७ ॥ **द्युभ्वाद्यधिकरणं** ॥ १ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐभूमासंप्रसादादध्युपदेशात्ॐ ॥ अत्रटीकायां "प्राणोवाआशायाभूयानित्युपक्रमेणविष्णुर्वैदेवेभ्योभूयांस्तस्माद्भूयान्नामेतिश्रुत्या चवायुविष्णुसाधारणस्यभूमनाम्न"इत्याद्युक्तं । तच्चन्यायविवरणटीकायां "ननुभूमशब्दोभाववाची । तत्कथंधर्मिणोऽशंक्यते । कथंचभूया नित्यनेनसमानार्थः । कथंचनामात्मकः । मैवं । योवैभूमातत्सुखमित्युत्तरवाक्यपर्यालोचनयाभावभवित्रोरभेदाभिप्रायेणभवितृविषयता वगमा"दितिग्रंथेनाक्षिप्यसमाहितं । तद्विवरीतुकामस्तदाक्षेपसमाधानयोरन्यत्रप्रसिद्धत्वशंकाव्युदासोपिफलमितिभावेनाक्षेपमनूद्यसमाधिं चप्रपंचयति ॥ **अत्रयद्यपीत्यादिनानस्वतोन्यत्रप्रसिद्धतेत्यंतेन** ॥ बहुशब्दात् "पृथ्वादिभ्यइमनिज्वे"तिसूत्रेणभावइमनिच्प्रत्ययेसति बहोरितिसूत्रेणबहोःपरस्येमनिच्प्रत्ययस्यादेरिकारस्यलोपोबहुशब्दस्यभूइत्यादेशश्चेतिविधानाद्भूमेतिरूपमितिभावः । अन्यत्र सेनावनादौ । गुहानयन्यायेनभगवत्यप्यस्तिप्रसिद्धिरित्यतो**लोकतइत्युक्तं** । यथाप्राचीनवैश्वानरनाम्नोलोकतोन्यत्रप्रसिद्धिस्तथेतिभावः । भूमशब्दस्यपूर्ण पर्यायस्यधर्मिपरस्यैवात्रग्रहणंनपुनर्भावार्थकस्यसंख्यावाचिनइतिभावेनतत्रप्रयोगोपपत्तीर्दर्शयति ॥ **तथापीत्यादिना** ॥ भूमशब्दस्यविपु लरूपधर्मिपरतैवेत्यन्वयः । तत्र**हेतुर्बहुशब्दस्यवैपुल्यार्थत्वादिति** । **धर्मिणिप्रयोगादित्यादिश्च** । वैपुल्यार्थत्वेहेतुर्वैपुल्येपिप्रयोगादि त्यादि । इत्यादावित्यादिपदेन "बहवःपुरुषाब्रह्मन्नुताहोएकएव"त्वित्यादिग्रहः ॥ **वैपुल्येपीति** ॥ उक्तंच "बहुगणवतुडतिसंख्ये"त्यत्र

॥ ॐभूमासंप्रसादादध्युपदेशात्ॐ ॥ अत्रयद्यपिभूमशब्दोबहुशब्दात् "बहोर्लोपोभूचबहो"रितिभावेनिष्पन्नः । बहुत्व संख्याचलोकतोन्यत्रप्रसिद्धा । तथापि बहुशब्दस्य "बहुषुबहुवचन"मित्यादौसंख्यायामिवबह्वन्नमित्यादौवैपुल्येपिप्रयोगात् ।

गु० ॥ ॐभूमासंप्रसादादध्युपदेशात्ॐ ॥ **बहोर्लोपइति** ॥ बहोर्भावइतिविग्रहे पृथ्वादिभ्यइमनज्वेतीमनिच्प्रत्ययेबहुशब्दोपरिकृते बहोर्लोपोभूचबहोरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वृत्त्यादौ "बहु ओदनं इतिवैपुल्यार्थकोप्यस्ती"ति । उपपत्तिमाह ॥ **अत्रैवचेति** ॥ उपपत्त्यंतरमाह ॥ **नामादिभ्यइति** ॥ पूर्वपक्षे पीत्युभयसाधारण्यकथनाय । एवमग्रेपि । वैपुल्यार्थत्वंभूमशब्दस्यसामर्थ्यवैपुल्ययुक्तधर्मिपरत्वंसाधयति ॥ **इहैवचेति** ॥ **टीकानुव्या ख्यानयोश्चेति** ॥ टीकायांस्पष्टं । अनुव्याख्यानेतु "लिंगंसाधारणंशब्दा"वितिशब्दपदेननामत्वोक्तिरितिभावः ॥ **रूढेरिति** ॥ तथा चाव्युत्पन्नएवायमखंडश्शब्दइत्युक्तंभवति । पाणिनीयव्युत्पादनस्यतर्हिकागतिरित्यतआह ॥ **व्याकरणस्यचेति** ॥ "यत्रार्थस्यविसंवादः प्रत्यक्षेणोपलभ्यते । स्वरसंस्कारमात्रार्थातत्रव्याकरणस्मृति"रित्युक्तेः स्वरसंस्कारमात्रार्थत्वाच्चेत्यपिध्येयं । अतएव "सएषोणिमा धातुःप्र सादान्महिमानमीश"मित्यादिश्रुतिषु "सचाहभूमापरमेष्ठिनंप्रभुर्बद्धांजलिंसस्मितपूर्वयागिरे"त्यादिस्मृतिषुचप्रयोगोधर्मिणिबहुलमुपलभ्यते ।

अत्रैवचश्रुतौ "योवैभूमातदमृतंयदल्पंतन्मर्त्य"मितिबहुत्वसंख्यायुक्तस्याल्पस्यभूमप्रतियोगित्वेनोपादानात् नामा दिभ्योधिकसंख्याहीनेचवागादौ "वाग्वावनाम्नोभूयसी। आकाशोवावतेजसोभूया"नित्यादौबहुशब्दान्निष्पन्नभूयः शब्दप्रयोगात् प्राणोभूमेतिपूर्वपक्षेपिसंख्यार्थत्वाभावाच्चवैपुल्यार्थत्वात् । गुणादिनाचवैपुल्यस्यब्रह्मण्यपिसंभवात् इहैवचश्रुतौभूमशब्दस्य "योवैभूमातदमृतं। योवैभूमातत्सुखं। सएवाधस्तात्सउपरिष्टा"दित्यादौधर्मिणिप्रयोगात् पूर्वपक्षेपिचधर्मिपरत्वात् टीकानुव्याख्यानयोश्चनामत्वोक्त्याधर्मिणिरूढेरभिप्रेतत्वात् व्याकरणस्यचसाधुत्वान्वा ख्यानपरत्वात् भूमशब्दस्यविपुलरूपधर्मिपरतैव । नत्वनेकपरता । नवाबहुत्वानेकत्ववैपुल्यरूपधर्मपरतेतिन

गु० तिसूत्रेणबहोरुत्तरेषामिमनादीनामिकारलोपेबहोःस्थानेभूआदेशेचभूमेतिरूपसिद्धिरितिभावः। नन्वन्यत्रप्रसिद्धशरीरित्वसाहित्यादंतर्यामित्वमिवभूमशब्दस्याप्यन्य

प्र० कचित्तु "तत्सिद्धिजातिसारूप्यप्रशंसाभूमे"तिजैमिनीये "अध्यात्मसंबंधभूमे"त्यत्रचधर्मेपिप्रयोगात्तदर्थत्वाच्चव्याकरणस्येत्यपिध्येयं ॥ **स्वतइति** ॥ श्रुतिलिंगसाहित्यंविनेत्यर्थः । प्रकारांतरेणजातामन्यत्रप्रसिद्धत्वशंकां "प्राणोवाआशायाभूया"नित्युक्तप्राणशब्दस्य "अतए वप्राण"इत्युक्तरीत्याविष्णुपरत्वा"दित्यादिटीकासूचितपरिहारेणनिराह ॥ **नापीति** ॥ यथादित्यश्रुतिसाहित्यात्सर्वगतत्वस्यान्यत्रप्रसिद्धत्वं तथेहनशंक्यं । तत्रादित्यश्रुतेरंतर्नयेसाक्षादश्रवणेनलोकतोन्यत्रप्रसिद्ध्याश्रयेणवा संवत्सरसारत्वादिलिंगवशेनादित्यश्रुतेरन्यत्रप्रसिद्धत्वेनवा तत्साहित्येनान्यत्रप्रसिद्धेस्सर्वगतत्वस्योक्तावपि नेहतथेतिभावेनोक्तंब्रह्मपरतामुपेत्येति ॥ **पूर्ववदिति** ॥ समाख्याश्रुतितौल्याभावस्या न्यत्रप्रसिद्धलक्षणानुप्रवेशादत्रचतत्तौल्यस्यैववक्ष्यमाणदिशासत्त्वेनवा स्वतएवान्यत्रप्रसिद्धत्वस्यान्यत्रप्रसिद्धलक्षणत्वादिहचतदभावस्योक्तत्वा न्नलिंगसाहित्येनांतर्यामित्वमिवान्यत्रप्रसिद्धत्वंशंकनीयमितिनिरसनीयमित्यर्थः । "प्राणोवाआशायाभूया"नित्यादिटीकोक्तेर्विशेषविवक्षया मूलमाह ॥ **उभयत्रेति** ॥ न्यायविवरणेऽत्रटीकायांच "तस्माद्भूयान्नामे"त्यंशोक्तेरुपयोगं "आसन्नस्योपक्रमस्यानासन्नायास्समाख्यायाश्च

स्वतोन्यत्रप्रसिद्धता । नाप्यन्यत्रप्रसिद्धप्राणश्रुतिसाहित्यादन्यत्रप्रसिद्धत्वं । तस्य "अतएवप्राण"इत्यत्रोक्तब्रह्मपरतामुपे त्योत्क्रमणादिलिंगादेवेहपूर्वपक्षकरणात् । उत्क्रमणादिलिंगसाहित्यादन्यत्रप्रसिद्धतातुपूर्ववन्निरसनीया । उभयत्रप्रसिद्धत्वं तु "प्राणोवाआशायाभूयान्विष्णुर्वैदेवेभ्योभूयांस्तस्माद्भूयान्नामेत्यादेर्भूमशब्दोऽज्ञानांसाधारण"इतिन्यायविवरणएवोक्तं ।

गु० त्रप्रसिद्धप्राणश्रुतिसाहित्यादन्यत्रप्रसिद्धत्वात्तस्योभयत्रप्रसिद्धसमन्वयप्रतिपादकेपादेऽसंगतिरित्यतआह ॥ **नापीति** ॥ **पूर्ववदिति** ॥ अन्यत्रप्रसिद्धजायमानत्व

SGDF Sri Gargeshwari Digital Foundation

प्र० कथंसाधारण्यप्रतीतिहेतुत्वमितिचे"दितिन्यायविवरणटीकास्थशंकातात्पर्याभिव्यक्तिपूर्वकमाह ॥**नन्वित्यादिना**॥ **साभ्यासत्वादिति**॥ भूयानित्यस्यद्विःश्रवणात्तस्माद्देवेभ्योभूयस्त्वादित्युपपत्त्युक्तेरितिभावः । अस्मिन्पक्षेऽज्ञानामित्येतन्नापेक्ष्यमेवेतिवा पूर्वोत्तरपक्षनिर्णायकान भिज्ञानामित्यर्थकंवानेयं । अतएवटीकायामज्ञानामित्यस्यानुक्तिरितिभावः । इदानीं "अज्ञानामित्युक्तत्वा"दितिन्यायविवरणटीकांविवृण्व न्नज्ञानामित्यनुरोधेनसमाध्यंतरमाह ॥ **यद्वोपक्रमेति** ॥ "प्राणशब्दस्यातएवप्राणइत्युक्तरीत्याविष्णुपरत्वा"दितिटीकासूचितंसमाध्यंतर

ननु "प्राणोवा"इत्युपक्रमात् "विष्णुर्वा"इतिसमाख्यायादुर्बलत्वात्कथंततःसाधारण्यमितिचेन्न । समाख्यायाःसाभ्यासत्वात्सोपपत्तिकत्वाच्चादौर्बल्यात् । अतएवन्यायविवरणेसमाख्यायामभ्यासोपपत्तीउक्ते । यद्वा उपक्रमसमाख्ययोर्बलाबलाज्ञानदशायांसाधारण्यं । अतएवन्यायविवरणे "अज्ञाना"मित्युक्तं ।

गु० लिंगेनद्युभ्वाद्यायतनत्वस्यान्यत्रप्रसिद्धत्वेशंकिते तस्ययेनप्रकारेणान्यत्रप्रसिद्धत्वंनिराकृतंतेनैवप्रकारेणेत्यर्थः । सचेत्थं । अन्यत्रप्रसिद्धसाहचर्येणपरतोन्यत्रप्रसिद्ध त्ववन्न्यायविवरणोदाहृताभ्यःप्राणोवाआशायाभूयान्विष्णुर्वैदेवेभ्योभूयानित्यादिश्रुतिभ्यउभयत्रप्रसिद्धसाहचर्यंविनास्वतःउभयत्रप्रसिद्धत्वस्यसत्वादितिवा अन्यत्रप्र सिद्धेत्यत्रप्रसिद्धान्यसाहित्यसापेक्षत्वादुभयत्रप्रसिद्धेश्चतन्निरपेक्षत्वान्निरपेक्षादराद्वा समाख्याश्रुत्यादितौल्याभावस्याप्यन्यत्रप्रसिद्धलक्षणांतर्गतत्वात्तस्यचप्रकृतेऽसत्वेनां तर्यामित्वेसत्त्वात्तस्यान्यत्रप्रसिद्धतेतिवा सर्वगतत्वादीनांब्रह्मण्ययुक्तत्वादेवान्यत्रप्रसिद्धतेतिवापूर्ववदित्यर्थः । ननुतथापिनोभयत्रप्रसिद्धता । अभ्यासोपपत्तिसहित समाख्यायास्सकाशादुपक्रममात्रस्यदुर्बलत्वादित्यरुच्यापक्षांतरमाह ॥ **यद्वेति** ॥ ननुसमाख्यावाक्येविष्णोर्भूमत्वमुपेत्यविषयवाक्येऽन्यस्यभूमत्वमितिटीकाभि

SGDF Sri Gargeshwari Digital Foundation

प्र० माह ॥ यद्वाविष्णाविति ॥ ननुपूर्वत्रेवात्रापिसमाख्याश्रुतिद्वयेनैवोभयत्रप्रसिद्धिसंभवेश्रुत्युपक्रमयोःक्लेशेनतौल्यमुपपाद्यकुतस्साधारणत्व मुपपाद्यते । नचवायुसमाख्यातोविष्णुसमाख्यायाःप्रागुक्तरीत्याबलवत्त्वात्तत्राप्यज्ञानामित्युपपादनीयमितिवाच्यं । "प्राणोवावसर्वेभ्यो भूयान्नप्राणाद्भूयान्प्राणोह्येवभूयांस्तस्माद्भूयान्नामे"तिश्रुतेरपिसाभ्यासोपपत्तिकत्वादितिभावेनाक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ उपासके

यद्वाविष्णौप्राणशब्दसमन्वयस्योक्तत्वेनोपक्रमस्यसंभावितावकाशत्वात्समाख्यास्थविष्णुशब्दस्यचप्राणेतदनुक्तेस्तयोस्तु ल्यबलत्वं । अज्ञानामित्युक्तिस्तुसिद्धांतन्यायाननुसंधानाभिप्राया । यद्यपिविष्णुपक्षइवप्राणपक्षेपि "प्राणोवावसर्वेभ्यो भूया"नितिसमाख्यास्ति । तथापितस्याउपासकेषुप्राणस्यभूयस्त्वपरत्वेनसर्वेभ्योभूयस्त्वपरत्वाभावात् प्राणप्रापकउपक्र मेसतिसमाख्यायाअनादरणीयत्वाच्च नतयासाधारण्यमुक्तं । द्युभ्वाद्यधिकरणेतुरुद्रादिप्रापकोपक्रमाभावात्समाख्य यातदुक्तिः । यद्यपि "सर्वत्रप्रसिद्धे"त्यादावपि "तस्यैतस्यासावादित्योरस"इत्युपक्रमआदित्यश्रुतिरस्ति । तथापि ब्रह्मणस्सर्वभूतगतत्वरूपाल्पौकस्त्वस्यपूर्वपक्षिणा क्वाप्यनंगीकारेणब्रह्मणिसमाख्यायाअभावात्तस्यान्यत्रप्रसिद्धता ।

प्र० ष्विति ॥ "इयदामनना"दित्यत्रभाष्येतदर्थएवोदाहृतत्वादितिभावः । ननुश्रुतावुपासकाद्भूयस्त्वस्याप्रतीतेश्श्रुत्यंतरात्तथाकल्पनस्यविलंबि तत्वादापाततःसाधारण्यमस्तीत्यनुशयादाह ॥ प्राणप्रापकइति ॥ प्रागप्येवंस्यात् वैरूप्यंकुतइत्यतआह ॥ द्युभ्वादीति ॥ उक्तसाधार ण्यस्यातिप्रसंगमाशंक्याह ॥ यद्यपीति ॥ "अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्स्थित"इत्यादौसर्वगतत्वंप्रसिद्धं । तथाप्यत्राभिप्रेतस्यार्भकौ

SGDF
Sri Gargeshwari Digital Foundation

प्र० कस्त्वस्यकाप्यसंमतेरित्यर्थः। प्रकृतेतुनैवमितिसोपष्टंभमाह ॥ इहत्विति ॥ भूमशब्दस्यरूढत्वोक्तेर्भावप्रत्ययांतत्वासंमतेर्भूमत्वस्येतिसाधु। तर्ह्यवधारणांयोगइत्यतआह ॥ वायोरेवेति ॥ नतुसर्वत्रेत्यर्थः। पूर्वपक्षेप्राणश्रुतेर्निरवकाशत्वयुक्तिसूचनार्थंवातदित्याह ॥ अत्रेति ॥ नन्वेवंविषयवाक्येवायोरेवभूमत्वमित्याशयवर्णनेन्यत्रानंदमयस्यविष्णुत्वेप्यदोषात्तदाक्षेपायोगइत्यतआह ॥ टीकेति ॥ इयताग्रंथेनोक्तस्य

इहतुसमाख्याश्रुतौविष्णोर्भूयस्त्वेपिनविषयवाक्येसभूमेतिपूर्वःपक्षः। अतएवात्रटीकायां "नचविष्णोरपिभूमत्वस्यश्रुत्यंतरेप्रसिद्धत्वादत्रवाच्यत्वमितिवाच्यं। उपक्रमात्समाख्यायादुर्बलत्वा"दितिग्रंथेसमाख्याविष्णुपरेत्यंगीकृत्यपूर्वपक्षितं। टीकायां "वायोरेवभूमत्वा"दित्यवधारणंतुविषयवाक्येवायोरेवभूमत्वाभिप्रायं। अत्रप्राणश्रुतिर्विष्णुपराचेत्तत्रापिविष्णुश्रुतिःप्राणपरास्यादित्यभिप्रायंवा।टीकोक्तआनंदमयाक्षेपस्तु समाख्याश्रुतौविष्णोर्भूयस्त्वेपिपूर्णानंदत्वस्य"योवैभूमातत्सुखंभूमैवसुखंनाल्पेसुखमस्ती"तिभूमरूपवायोरन्यत्रनिषेधादानंदमयश्रुतेश्चवायुपरत्वेतदयोगाद्युक्तः।

गु० प्रेतमित्युक्तं। तदयुक्तं। तथासत्यतोवायोरेवभूमत्वादितिपूर्वपक्षोपसंहारटीकाविरोधापातादित्यतआह ॥ टीकायामिति ॥ विषयवाक्येवायोरेवभूमत्वमित्यभिप्रायकल्पनेसंकुचितत्वंसंभवतीत्यस्वरसादाह ॥ अत्रेति ॥ नन्वेवंसमाख्यावाक्येविष्णोरेवभूमत्वमित्यभ्युपगम्यविषयवाक्येऽन्यस्यैवतदितिपूर्वपक्षकरणे पूर्णानंदत्वस्यवाक्यांतरेब्रह्मनिष्ठत्वेनविष्णोरेवानंदमयत्वेपिविषयवाक्येऽन्यस्यभूमत्वमितिपूर्वपक्षसंभवाट्टीकायामानंदमयोपीत्याक्षेपोनुपपन्नइत्यतआह ॥ टीकोक्तइति

प्र० फलमाह ॥ तस्मादिति ॥ एवं "अस्तिशास्त्रादिसंगति"रितिटीकामुपपाद्यांशोपपादनेनविवृत्य "श्रुत्यादिसंगति"रित्यादिटीकयातुल्यन्यायतयासूचितामव्यवहितपूर्वाधिकरणसंगतिंस्वयमाह ॥ अवांतरेति ॥ सर्वगतत्वात्मक्रीडत्वामृतत्वादिधर्माणामुभयत्रश्रवणाद्भूम्नोऽन्यत्वेप्राक्तनस्यापितथात्वंस्यादित्याक्षेपेणपूर्वपक्षोत्थानादाक्षेपिकीत्यर्थः। नचनिर्णीतब्रह्मप्रकरणगतसर्वगतत्वादिबलेनभूम्नएवविष्णुत्वंस्यादितिवाच्यं। उत्क्रमणलिंगस्यहरावयोगेननिरवकाशतयातदनुरोधेनभूम्नोऽन्यत्वेसर्वगतत्वादेरप्यन्यधर्मतावश्यंभावात् द्युभ्वाद्यायतनत्वादेर्वायावप्युपपत्तेः जायमानत्वलिंगस्याप्यक्लेशेनोपपत्तेः। भूम्नोविष्णुत्वनिर्णयंविनातस्यब्रह्मप्रकरणत्वानिर्णयाच्चेतिभावः। यद्यपिसर्वगतत्वामृतत्वेएवभूमवाक्येश्रुते। आत्मक्रीडइत्यादिकंतु "अथातआत्मादेश"इत्यत्रोपरितनवाक्येश्रुतं। तथापिभूमात्मनोरभेदाभिप्रायेणैवमुक्तं। यद्यप्यात्मक्रीडत्वादिकमुपासकधर्मः। यदाहुः "आत्मरतिर्भगवद्रति"रिति। "तेनैवक्रीडतेनित्यंस्त्रीरूपोमिथुनोभवे"दितिच। तथाप्युपासकक्रीडादिहेतुत्वंतद्धर्मइत्याशयेनैतदुक्तिः। एतेन "आत्मशब्दाद्द्युभ्वाद्यायतनंब्रह्मेत्युक्तं। तत्रात्मशब्दःप्राणेऽनैकांतिकः। तरतिशोकमात्मविदित्यत्रा

तस्माद्भूमशब्दस्यसाधारण्याद्युक्तापादसंगतिः। अवांतरसंगतिस्तु "सएवाधस्तात्सउपरिष्टादेवंविजानन्नात्मरतिरात्मक्रीडः। योवैभूमातदमृत"मित्यादिनाभूम्न्युक्तस्यसर्वगतत्वादेः"ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण। अधश्चोर्ध्वंचप्रसृतं। आत्मक्रीडआत्मरति"रित्यादिनाद्युभ्वाद्यायतनेश्रवणात् भूम्नोन्यत्वेद्युभ्वाद्यायतनमप्यन्यत्स्यादिति पूर्वाक्षेपेणपूर्वपक्षोत्थानादाक्षेपिकी।

गु० ॥ अवांतरसंगतिस्त्विति ॥ उपलक्षणमेतत्। तस्याक्षेपेणसमाधानाद्वा सर्वगतस्योत्क्रमणरूपमरणासंभवात्पूर्वोक्तसएषोंतश्चरतेबहुधाजायमानइतिबहुधा

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मणिप्राणेप्रयोगादित्याक्षेपिकी"तिकल्पतरूक्तंनिरस्तं । आत्मविदित्यस्याध्यायादौश्रुतत्वेनभूम्निसाक्षादश्रुततयातदाक्षेपायोगात् । प्राणादेरब्रह्मत्वेपि "अथातआत्मादेश"इत्यथशब्देनप्राक्तनप्राणप्रकरणविच्छेदेनोक्तात्माभिप्रायेणात्मविदित्यस्योपपत्तेः । भूमगतत्वेनभूमवाक्यएवश्रुतामृतत्वादिमुखेनाक्षेपस्यैवोचितत्वाच्च । यत्तुश्रुतप्रकाशे "यथाप्रकरणाविच्छेदेनपरमात्मपरत्वंसाधितं तथाजीवप्रकरणाविच्छेदेनजीवपरत्वमितिशंकोत्थानात्संगति"रित्यादि तदपितेनैवनिरस्तं । अमृतत्वादेरनाक्षेपेपूर्वनिर्णीतब्रह्मधर्मैर्भूमाब्रह्मेत्यपिवक्तुंशक्यत्वेनपूर्वपक्षानुदयप्रसंगात् । पूर्वप्रकरणविच्छेदशंकायाएवायुक्तत्वादित्युक्तत्वाच्चेति । आनंदमयाक्षेपटीकातुप्रयोजनपरेतिभावः । ननूक्तरीत्यासन्निहितपूर्वाक्षेपसंगतिफलयोर्द्वयोरपिसंभवात्किंव्यवहिताक्षेपेणेत्यतआह ॥ **टीकायांत्विति** ॥ विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ छांदोग्येसप्तमेऽध्यायेनारदकृतप्रश्नंप्रतिसनत्कुमारोक्तोत्तरत्वेननामवाङ्मनस्संकल्पचित्तध्यानविज्ञानबलान्नाप्तेजआकाशस्मराशाप्राणशब्दवाच्यान् उषास्वाहापर्जन्यमित्राग्निवरुणचंद्रभूतवाय्वनिरुद्धप्राणपुरंदरोमाशिवसरस्वतीमुख्यप्राणानुत्तरोत्तरातिशयितत्वेनोक्त्वा अनंतरंनारदप्रश्नमंतरेणैव "एषतुवाअतिवदतियस्सत्येनातिवदती"त्युपक्रम्यसत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखपर्यंतानुक्त्वा वक्तिसनत्कुमारः "योवैभूमातत्सुखंनाल्पेसुखमस्ति । भूमैवसुखंभूमात्वेवविजिज्ञासितव्यइति । भूमानंभगवोविजिज्ञासइति । यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमा । अथयत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानातितदल्पं । योवैभूमातदमृतं । अथयदल्पंतन्मर्त्यं । सभगवःकस्मिन्प्रतिष्ठितइति ।

टीकायांतुसमन्वेतव्यभूमशब्दसन्निहितत्वात्पूर्णानंदत्वस्यतदाक्षिप्तं । अत्र "योवैभूमातत्सुख"मित्युक्तोभूमा ॥ ५६४ ॥

गु० जननं तत्सहपठितमंतस्संचरणंचाक्षिप्यसमाधानाद्वाऽऽक्षेपिकीसंगतिः। पूर्वत्रजनिस्समर्थिता अत्रतूत्क्रांतिरूपमृतिमितिदेहयोगवियोगरूपोपजीव्योपजीवकभाव

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्वेमहिम्नियदिवानमहिम्नीति । गोअश्वमिहमहिमेत्याचक्षतेहस्तिहिरण्यंदासभार्यंक्षेत्राण्यायतनानीतिनाहमेवंब्रवीमीतिहोवाचान्योन्यस्मि न्प्रतिष्ठितइति । सएवाधस्तात्सएवोपरिष्टात्सपश्चात्सपुरस्तात्सदक्षिणतस्सउत्तरतस्सएवेदंसर्व"मित्यादि । सभूमाविषयइत्यर्थः ॥ **मुख्य वायुरिति** ॥ जडत्वकोटेरग्रेनिरसिष्यमाणत्वादितिभावः ॥ **पूर्णसुखत्वमिति** ॥ अत्रसुखशब्दस्यतादृशसुखवाचित्वंसिद्धांतेस्पष्टयिष्यते ॥ **भूयस्त्वेति** ॥ "अस्तिवावप्राणाद्भूय"इत्यादिप्रश्नप्रतिवचनरूपेणभूयस्त्वानुक्तिरित्यर्थः । अस्पष्टांशेफलफलिभावमाह ॥ **प्राणस्येति** ॥ द्वाविहपूर्वपक्षौ । प्राणभूम्नोर्भेदइत्येकोभेदइत्यन्यः । तत्राद्योन्यायविवरणानुसारी । द्वितीयोभाष्यानुसारी । तत्राद्येभूयस्त्वानुक्तिःपूर्वपक्ष

किंमुख्यवायुरुतविष्णुरितिचिंता । तदर्थंतत्सुखमित्युक्तं पूर्णसुखत्वंकिंवायोरुतविष्णोरिति । तदर्थंभूम्नोब्रह्मत्वे प्राणाद्भूयस्त्वानुक्तिरयुक्तोतयुक्तेति । तदर्थं "प्राणोवाआशायाभूया"नित्युक्तःप्राणःकिंमुख्यवायुरुतब्रह्मेति । प्राणस्यमुख्यवायुत्वेहिवायुतोब्रह्मणोभूयस्त्वंवक्तव्यमितितदनुक्तिरयुक्ता । ब्रह्मत्वेतुस्वस्मात्स्वस्यभूयस्त्वस्याव क्तव्यत्वेनतदनुक्तिर्युक्ता । तदर्थं "उत्क्रांतप्राणा"नितिप्राणेश्रुतमुत्क्रमणंकिंब्रह्मणिनयुक्तमुतयुक्तमिति ।

प्र० युक्तिः । अंत्येचोत्क्रमणालिंगमितिव्यवस्थेतिज्ञापनायप्राणस्यब्रह्मत्वपक्षेभूयस्त्वानुक्तिघटनायमध्येफलफलिभावंप्रदर्श्यलिंगविषयांचिंतांपश्चा दाह ॥ **तदर्थमुत्क्रांतेति** ॥ उत्क्रांतःप्राणोयेषांतानुत्क्रांतप्राणान् । शूलेनसमासंव्यतिषंदहेत् । नैवैनंब्रूयुः पितृहासीतिमातृहासीतिप्राण प्रकरणेप्राणस्यान्वयव्यतिरेकाभ्यांजीवनदत्वमुपपादयितुंश्रुतमुत्क्रमणमित्यर्थः । नन्वेवमुतयुक्तेत्यंतचिंतात्रयंप्रदर्श्यपश्चाद्भूमामुख्यवायुरुतवि ष्णुरितिचिंता । तदर्थंप्रक्रमेश्रुतःप्राणःकिंमुख्यवायुरुतब्रह्मेति । तदर्थमुत्क्रांतेत्यादिचिंतेत्यपिचिंतात्रयंप्रदर्शनीयमितिचेन्मैवं । यदिप्राणभू

SGDF
Sri Gargeshwari Digital Foundation

प्र० म्रोर्भेदाभेदपक्षौव्यवतिष्ठेयातांतदैवंभवेत् । नचैवं । तयोरग्रेटीकारीत्यासमुच्चयोक्तेः । अतएकप्रकारेणैवचिंतापरंपरोपदर्शिता । तथाचायमर्थः । यदिप्राणेश्रुतमुत्क्रमणलिंगंवक्ष्यमाणदिशासर्वगतेब्रह्मणिनयुक्तं तदोपक्रमेश्रुतस्यप्राणस्यवायुत्वात्ततोपिब्रह्मणःश्रेष्ठत्वेनसिद्धांतिनोपगतत्वात्प्रश्नप्रतिवचनाभ्यांप्राणाद्भूयस्त्वस्यवाच्यत्वेनतदनुक्तेरयुक्तत्वात्तस्यैवपूर्णसुखत्वंभूमत्वंचेतिपूर्वपक्षेफलं । यदातुरूपविशेषादिनायुक्तंतदाप्राणस्यब्रह्मत्वात्स्वस्मात्स्वस्यभूयस्त्वायोगेनतदनुक्तेर्युक्तत्वात्पूर्णसुखत्वंभूमत्वंचविष्णोरेवेतिसिद्धांतेफलमिति । नन्वेवं "व्यतिहारोविशिंषंतिहीतरव"दित्येतदवक्तव्यंप्राप्नोति । मैवं । भेदपक्षएवतस्यप्रवृत्तेः । अभेदपक्षेपिप्राणांतर्यामितयैवात्रप्राणपदेनब्रह्मणःस्वीकारेणप्राणशब्दस्यमुख्यप्राणार्थकत्वस्यापिभावेन भूम्नःकेवलब्रह्ममात्रत्वसिद्धयेप्राणासांकर्यायव्यतिहारस्यावश्यंवाच्यत्वाच्चेति । नन्वेवंप्राणएवसंशयधर्मीक्रियतां । सूत्रेचप्राणपदमेवनिवेश्यतां । उभयत्रप्रसिद्धिश्चप्राणपदस्य "आकाशोर्थान्तरत्वादी"त्यादावाकाशादिशब्दस्येवपूर्वोक्तयन्यत्रप्रसिद्धिभ्यांभविष्यति । नायंप्राणोब्रह्म उत्क्रमणलिंगादितिपूर्वपक्षश्चऋजुः । भूमानविष्णुः तदभिन्नप्राणेश्रुतोत्क्रमणविरोधादित्युक्तिर्वक्रा । प्राणस्यविष्णुत्वात्तत्प्रकरणस्थभूम्नःपूर्णसुखस्यचविष्णुत्वादानंदमयोपिनविष्णुरितिपूर्वाक्षेपश्चभविष्यति । यथाछंदोनयेगायत्र्याअविष्णुत्वात्तदभिन्नस्य "परोदिवोज्योतिर्दीप्यत"इतिज्योतिषस्तथात्वेन "ज्योतिर्हृदयआहितंय"दित्युक्तज्योतिषोप्यविष्णुत्वमिति तद्वदितिचेन्मैवं । भूम्नउक्तौप्रागसमन्वितशब्दसमन्वयलाभात् पूर्वाक्षेपस्यसाक्षादेवसंभवात् चंद्रिकोक्तदिशापूर्वाधिकरणसंगतिसौकर्यात् संप्रसादाध्युपदेशधर्मोपपत्तीनांसिद्धांतहेतूनांभूमवाक्यएवश्रवणात् सिद्धांतेपिप्राणशब्दस्यमुख्यवायुपरत्वात्याजनाच्चान्तरनयेऽक्षिस्थइवभूमैवप्राधान्येनचिंतितोनप्राणइति । प्राणभूम्नोर्भेदपक्षेऽभेदपक्षेचानुक्तिरुत्क्रमणलिंगंचक्रमेणपूर्वपक्षप्रापकेइतिभावेन "मुख्यप्राणोयंभूमेतिपूर्वपक्ष"इत्यादिटीकांविवृण्व

प्र० न्पूर्वपक्षयति ॥ **पूर्वपक्षस्त्विति** ॥ नामेत्यारभ्याभिधायेत्यंतटीकायास्तात्पर्योक्तिराशायाभूयानिति । "प्राणशब्देनोपक्रमा"दितिटीकायामेवमनुक्त्वान्यथोक्तेरुपयोगोग्रेस्पष्टः । "तदुत्तममनुक्त्वाभूम्नआम्नातत्वा"दितिटीकाप्राणभूम्नोर्भेदपक्षएवयोज्येतिभावेनविकल्पयति ॥ **भूम्नइति** ॥ "तदुत्तम"मित्यादिटीकांयोजयति ॥ **नाद्यइत्यादिना** ॥ ननुप्राणाद्भूयसोनुक्तिर्नप्राणस्यभूमत्वसाधिका । विद्यमानस्यापिप्राणादुत्तमस्यानुक्तिसंभवात् । अतोप्रयोजकोहेतुरित्यतआह ॥ **भूम्नइति** ॥ एवंभूयसोऽनुक्तेर्निरवकाशत्वमुपपाद्यटीकारूढंकरोति ॥ **अतएवेति** ॥ भूम्नस्सर्वोत्तमत्वार्थतारतम्यस्यप्रक्रांतत्वादेवावश्यवक्तव्यत्वस्फोरणायतथोक्तमित्यर्थः । भाष्येऽप्रतीतावपिटीकायामेवमुक्तेर्मूलमाह ॥ **तदुक्तमिति** ॥ "नचविष्णोरपिभूमत्वस्ये"त्यादिटीकार्थमाह ॥ **विष्णुसमाख्यात्विति** ॥ ननुसमाख्यापिसाभ्यासत्वादिना

पूर्वपक्षस्तु । भूमामुख्यवायुरेव । "प्राणोवाआशायाभूया"नितिप्राणशब्देनोपक्रमात् । भूम्नोब्रह्मत्वंहिद्वेधाभवेत् । प्राणोवायुरेवभूमातुब्रह्मेतिप्राणभूम्नोर्भेदेनवा प्राणोभूमाचब्रह्मैवेतितयोरभेदेनवा । नाद्यः । प्राणादुत्तममनुक्त्वाभूम्नआम्नानात् । यदिहिनामादिभ्योवागादिवत्प्राणाद्भूमाऽन्यःस्यात्तदा "अस्तिभगवोनाम्नोभूय"इत्यादिप्रश्नवत् "वाग्वावनाम्नोभूयसी"त्यादिप्रतिवचनवच्च अस्तिभगवःप्राणाद्भूयइतिप्रश्नः भूमावावप्राणाद्भूयानितिप्रतिवचनंचस्यात् । भूम्नःसर्वोत्तमत्वार्थमेवनामवागादितारतम्यस्यप्रक्रांतत्वात् । नचयदर्थमन्यत्प्रक्रांतंतदनुक्तिर्युक्ता । अतएवटीकायां "तारतम्यमाशावसानमुक्त्वे"त्युक्तं । तदुक्तंन्यायविवरणे "प्राणोवाआशायाभूयानित्युक्त्वाप्राणाद्भूयसोनुक्ति"रिति । विष्णुसमाख्यातुप्राणोपक्रमाहुर्बला ।

गु० रूपावांतरसंगतिरित्याद्यूह्यं । उपक्रमानुक्तयोरेकत्राऽसंभवात्पक्षभेदेनव्यवस्थापनायाह ॥ भूम्नोब्रह्मत्वंहिद्वेधाभवेदित्यादिना ॥ प्राणभूम्नोरभेदपक्षइत्यादिनैत

SGDF Sri Gurudev Digital Foundation

प्र० प्रबलेतिचेन्न । निरवकाशानुक्तिसाहित्येनप्राणोपक्रमस्यततोपिप्राबल्यमित्याशयात् । ननु "प्राणोवाआशायाभूयानित्युक्तप्राणस्य अतएव प्राणइत्युक्तरीत्याविष्णुपरत्वा"दित्यादिटीकांव्याचष्टे ॥ नद्वितीयइत्यादिना ॥ इहेति ॥ विषयवाक्ये ॥ उत्क्रमणश्रवणादिति ॥ तथाचतत्रेवात्रनिरवकाशविष्णुलिंगाभावात्प्रत्युतविपरीतलिंगभावान्नतन्न्यायविषयत्वमस्येतिभावः । पूर्णेदेशादितोव्याप्तेदेहादुत्क्रमणायोगा दित्यर्थः । भाष्यंतद्व्याख्यानंचोक्तदिशाद्वितीयपक्षनिरासपरमितिभावेनाह ॥ तदुक्तमिति ॥ ननु "उत्क्रांतिगत्यागतीना"मित्यादौवक्ष्य माणदिशावायोरप्यणुत्वात्कथंतस्यभूमत्वंपूर्णसुखत्वंवास्यादित्यतः "तस्यचवायावेवसंभवा"दितिटीकांविवृण्वन्नाह ॥ वायोरिति ॥ "वा

नद्वितीयः । "अतएवप्राण"इत्युक्तरीत्याप्राणशब्दस्यब्रह्मपरत्वसंभवेपीह "उत्क्रांतप्राणा"नितिप्राणउत्क्रमणश्रवणात्त स्यचपूर्णेब्रह्मण्ययोगात् । तदुक्तंभाष्ये "उत्क्रांतप्राणानित्यादितल्लिंगा"दिति । वायोर्भूमत्वेतुतद्युक्तं । नहिदेशतःपूर्णत्वं भूमत्वं । "वाग्वावनाम्नोभूयसी । वाग्वावऋग्वेदंविज्ञापयति यजुर्वेदं सयदामनसामनस्यतिमंत्रानधीयीयेत्यथाधीते" इत्यादिषुवाङ्मनःसंकल्पादिवाक्येषुपूर्वत्रसर्वत्रभूयस्त्वस्यगुणज्यैष्ठ्यरूपतयाभूमेत्यत्रापितस्यैववक्तव्यत्वात् । अतएवटीकायां "प्राणस्योत्तमत्व"मित्युत्तमशब्दः । आनंदमयउक्तमानंदस्यपूर्णत्वंचनदेशतः । किंतुनीलतमत्वविद्वत्तमत्वादिवत्सर्वस्मात्स जातीयादुत्कृष्टत्वं । अन्यथा "तेयेशतंमानुषाआनंदाः सएकोमनुष्यगंधर्वाणामानंद"इत्याद्ययोगात् । नहिमानुषाद्यानंदे भ्योमनुष्यगंधर्वाद्यानंदादेशतःशतगुणिताः । एवंविधपूर्णानंदत्वंचाणोरपिवायोर्युक्तमितियुक्तष्टीकोक्तआनंदमयाक्षेपः । ॥ ५६६ ॥

गु० द्विवेकंस्वयमेवकरिष्यति । ननुसर्वगतत्वेनब्रह्मणउत्क्रमणं । तस्यभूमत्वानंगीकारेवायोरेवसर्वगतत्वापत्त्योत्क्रमणानुपपत्तिरित्यतआह ॥ वायोरिति ॥ ननु

SGDF Sri Gargeshwari Digital Foundation

प्र० ग्वावऋग्वेद"मित्यादिगुणकथनं। "सयदामनसे"तिमनःप्रकरणगतवाक्यं । नन्वत्रभूम्नस्सएवाधस्तादित्यादिनासर्वगतत्वेनश्रुतस्यवायुत्वे वायोरपिसर्वगतत्वापत्त्याब्रह्मणीववायावप्युत्क्रमणमयुक्तं । तत्रोपचरितंचेद्ब्रह्मण्यपितथोपेत्यभूमत्वमुच्यतामितिभावेनाशंक्यनिराह ॥ **नच भूम्नइति** ॥ **गौणमिति** ॥ मनोगतमेवात्रभातीत्यर्थः ॥ **श्रौतेति** ॥ उत्क्रांतेतिपदश्रुत्याप्रतीतेत्यर्थः । ब्रह्मणोप्यत्रोक्तंसर्वगतत्वंसंकुचित मुपेत्योत्क्रमणंचमुख्यमंगीकृत्यभूमत्वमुच्यतामित्यतआह ॥ **ब्रह्मणस्त्विति** ॥ "सर्वगतंसुसूक्ष्मं अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्स्थित"

नचभूम्नः "सएवाधस्तात्सउपरिष्टात्सपश्चा"दितिवाक्यशेषस्थसर्वगतत्वविरोधेनोत्क्रमणंगौणमितियुक्तं । श्रौतोत्क्रमणविरोधेन अधस्तादुपरिष्टादित्याद्यनेकपदसमभिव्याहाररूपवाक्यगम्यसर्वगतत्वस्यैवगौण त्वात् । ब्रह्मणस्तुसर्वगतत्वंश्रुत्यंतरादिसिद्धं । एवंचपूर्णानंदत्वादिरूपंसिद्धांतेहेतूकृतं संप्रसादादि कंपूर्वपक्षिणावायौशंक्यतइतिनभूम्नोब्रह्मता । नचवाच्यं "अन्यभावव्यावृत्ते"रित्यत्रब्रह्मणोमहत्त्वे प्यणुत्वंवक्ष्यते । अणुत्वमेवचक्रियावत्त्वेतंत्रं । नतुमहत्त्वाभावविशिष्टं । नवामहत्त्वाभावः ।

प्र० इत्यादिश्रुत्यंतरइत्यर्थः । एतेन "सर्वगतेहरावसंभवा"दितिटीकाविवृता । नन्वथापितत्सुखमित्युक्तपूर्णसुखत्वाध्युपदेशादिनाभूमाविष्णुः किंनस्यादित्यतआह ॥ **एवंचेति** ॥ अधिकरणांतरन्यायैरेवोत्क्रमणस्यापिभगवतिसिद्धेर्नतेनेहपूर्वपक्षोदयइतिभावेनाशंक्यनिराह ॥ **नचे त्यादिना** ॥ **इत्यत्रेति** ॥ उत्तराधिकरणगुणसूत्रइत्यर्थः ॥ **नत्विति** ॥ येनब्रह्मणिमहत्त्वस्यापिभावात्क्रियावत्त्वंनस्यादितिवाक्यशेषः

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **गौरवादितीति** ॥ नचवाच्यमितिपूर्वेणान्वयः । अभावघटितत्वादितिभावः ॥ **इत्यपिसंभवादिति** ॥ तथाचब्रह्मणिसत्यप्यणुत्वेन तेनोत्क्रमणादिक्रियावत्त्वसिद्धिः । महत्त्वस्याक्रियत्वप्रयोजकस्याकाशादाविवभावादितिभावः ॥ **उक्तमिति** ॥ "अर्भकौकस्त्वा"दित्यादि गुणसूत्रेणेत्यर्थः ॥ **ज्योतिरिति** ॥ अत्रसिद्धक्रियावत्त्वमुपेत्यैवविशेषशंकयातत्प्रवृत्तमित्यर्थः । पूर्णस्य देशतोऽव्याप्तस्य ॥ **अंतर्यामिगताक्रि**

गौरवादिति । महत्त्वमेवाक्रियत्वेतंत्रं । नत्वणुत्वाभावविशिष्टं । नवाऽणुत्वाभावइत्यपिसंभवात् । सर्वत्रप्रसिद्धेत्यत्रतु सर्वगतस्यापिव्योमदृष्टांतेनैकदेशगतत्वमुक्तं । नतुसक्रियत्वं । "ज्योतिर्दर्शना"दित्यत्रतु "ससमानःसन्नुभौलोकावनुसं चरती"त्युक्तंयत्कर्मवशेनोभयलोकसंचरणं तत्कर्मातीतस्यब्रह्मणोनयुक्तमितिशंका । नेदंसंचरणंकर्मवशात् । किंतुस्वे च्छयेतिपरिहारश्च । नतुपूर्णस्यक्रियानुपपत्त्याशंकातत्परिहारौ । अतएवतत्रपूर्वपक्षेटीका "जीवस्यहिकर्मवशादुभयलो कसंचरणंयुक्त"मिति । सिद्धांतन्यायविवरणंच "लोकसंचरणंतुजीवमादायतस्यैवादुःखेनस्वातंत्र्या"दिति । नच "शास्त्रदृष्ट्ये"तिन्यायेनांतर्यामिगताक्रिया । "एषमआत्मांतर्हृदयेज्यायान्पृथिव्या"इत्यादिश्रुत्यातस्यापिसर्वगतत्वा त् । यदिचसर्वगतस्यापिक्रिया तदा "उत्क्रांतिगत्यागतीना"मित्यत्रजीवस्यसक्रियत्वेनाणुत्वोक्तिरयुक्तास्यादिति ।

प्र० **येति** ॥ प्राणसंवादादिलिंगवदितिभावः ॥**तस्यापिसर्वगतत्वादिति**॥ "तत्प्राणउत्क्रांतेऽपद्यते"त्यादिप्राणोत्क्रमणादित्वत्रत्यन्यायेनांतर्यामिगतत्वेनतत्राभिमतं । नतुतत्रैवतत्सिद्धमितिभावः । एतेन "सर्वगतेहरावसंभवा"दितिटीकावाक्यं अणुत्ववत्यपिहरौसर्वगतेऽसंभवादिति व्योमवदेकदेशगतेपिहरौसर्वगतेऽसंभवादिति अंतर्यामिण्यपिसर्वगतेहरावसंभवादित्यादिरूपेणव्याख्यातंभवति ॥ **उत्क्रांतीति** ॥ ॥ ५६७ ॥

प्र० द्वितीयस्यतृतीयपादे "उत्क्रांतिगत्यागतीना"मित्यत्रजीवःकिंव्याप्तोऽणुर्वेतिसंदेहे "व्याप्ताह्यात्मान"इतिश्रुतेर्व्याप्तइतिप्राप्ते "सोस्मा च्छरीरादुत्क्रम्यामुंलोकमभिगच्छत्यमुष्मादिमंलोकमागच्छती"त्युत्क्रमणगमनागमनरूपक्रियादर्शनाद्व्याप्तस्यतदयोगादणुरेव । व्याप्तत्वश्रुतेः परमात्मविषयत्वमितिवक्ष्यमाणत्वात्तद्विरोधस्स्यादित्यर्थः । पराभिमतहेत्वोरनुक्तयुत्क्रमणयोस्सावकाशतामग्रेविवक्षुस्सूत्रोपात्तसंप्रसादादि हेतुनाभूमाविष्णुरित्युक्तिपरां "विष्णुरेवायंभूमे"त्यादिटीकांविवृण्वन्सिद्धांतयति ॥ **सिद्धांतस्त्विति** ॥ "पूर्णसुखरूपत्वाभिधानान्नामा दीनांसर्वेषामुपरितदुत्तमत्वेनव्यपदेशाच्चे"तिटीकोक्तहेत्वोः "पूर्णसुखत्वादिकंचकुतोविष्णुत्वनिश्चायक"मित्यादिटीकोक्तनिरवकाशतांक्रमेण विवरिष्यन्नाद्यस्यतांतावदाह ॥ **योवैभूमेत्यादिना** ॥ विश्वशंभुवं पूर्णसुखाश्रयमित्यर्थः । लक्षणंपरमानंदोविष्णोरेवनसंशयः । अव्यक्ता

सिद्धांतस्तु । "योवैभूमातत्सुख"मितिभूम्नःपूर्णसुखतोक्ता । साच "विश्वशंभुव"मित्यादिभाष्योक्तश्रुत्यादिभिर्विष्णवे कनिष्ठा । नहिद्वयोःसर्वोत्कृष्टानंदत्वं । विरोधात् । तत्सुखमित्यत्रामुख्यभूतापूर्णसुखोक्तौतुमुख्यामुख्यन्यायबाधः ।

प्र० दितृणांतास्तुविप्रुडानंदभागिन"इति "सुखंलब्ध्वाहिकुरुतेलोकचेष्टांजनार्दनः । अल्पात्सुखादल्पकर्मापूर्णानंदाद्धिसर्वकृ"दित्यादिस्मृतयस्स र्वकर्तृत्वादियुक्तयश्चादिपदार्थाः । वायोरप्यस्त्वित्यतआह ॥ **नहीति** ॥ एतेन "नापिपूर्णानंदत्व"मितिटीकायांविरोधादितिपदमत्राप्यनु वर्त्ययोज्यमितिसूचितं । सर्वशब्दस्यासंकुचितत्वेनान्योन्यनिरूपितोत्कर्षस्यद्वयोरयोगादित्यर्थः । ननु "पूर्णसुखतोक्ते"त्ययुक्तं । अश्रव णात् । सुखशब्दस्यापूर्णसुखार्थत्वेप्युपपत्तेरित्यतः "पूर्णसुखत्वाभिधाना"दितिहेतोरसिद्धिंपरिहर्तुंप्रवृत्तां "निरुपपदसुखशब्दमात्रस्यापिपूर्ण सुखार्थत्वा"दितिटीकांविपक्षेबाधकोक्त्याव्यनक्ति ॥ **तत्सुखमिति** ॥ "मुख्यामुख्ययोर्मुख्येसंप्रत्यय"इतिन्यायबाधइत्यर्थः । इहसुखश

SGDF Sri Gargeshwari Digital Foundation

प्र० ब्द:पूर्णसुखवाचीत्यत्र ‘‘करोतिनासुखीभूमासुखंनाल्पेसुखंभवे’’दित्यानंदमयनयानुव्याख्याने ‘‘पूर्णमेवात्रसुखंविवक्षितं। नाल्पेसुखमस्तीत्युक्त्वा’’दितीहतत्वप्रदीपेचोक्तदिशार्थापत्तिंचाह ॥ **नाल्पइति** ॥ ‘‘योवैभूमातत्सुख’’मित्युक्त्वा ‘‘नाल्पेसुख’’मितिनिषिध्यते । तत्राल्पशब्देनजडंचेतनंवावाच्यं । आद्येजडेसुखस्याप्रसक्तेरप्रसक्तनिषेधापातात् । नच ‘‘नांतरिक्षेनदिवी’’तिवन्नित्यानुवादः । व्यर्थत्वात् । नांतरिक्षइत्यादेस्तूपयोगोंतर्यामिनयेव्यक्तः । अतश्चेतनएवनिषेधइतिवाच्यं । तत्रचाहंसुखीत्यादिप्रत्यक्षादिनासुखस्यप्रमितत्वेनसुखमात्रनिषेधेबाधापत्तेः । अतः ‘‘अपशवोवाअन्येगोअश्वेभ्य’’इत्यत्रप्रशस्तपशुत्वनिषेधवत्पूर्णसुखमेवनिषिध्यतइत्युपेयं । तादृशस्यजीवेऽभावेनबाधाप्रसक्तेः । अतस्तत्रसुखनिषेधान्यथानुपपत्त्याचपूर्णसुखमेवसुखशब्दार्थइत्यर्थः । एवंसौत्रसंप्रसादशब्दितंपूर्णसुखत्वरूपंटीकाद्युक्तमाद्यहेतुंसमर्थ्य अध्युपदेशशब्दितस्य ‘‘सर्वेषामुपरितदुत्तमत्वेनव्यपदेशाच्चे’’तिद्वितीयहेतोरपिभूम्न्यसिद्धिंपरिहरन्विष्णवेकनिष्ठतामाह ॥ **किंचेति**

नाल्पेसुखमितिनिषेधायोगश्च । जडेसुखस्याप्रसक्तेः । चेतनेचसुखमात्रनिषेधेबाधात् । पूर्णसुखनिषेधस्तुचेतनेनबाधितः । किंचायंचरमकक्ष्यापन्नो भूमासर्वोत्तमः । प्राणभूम्नोरभेदपक्षे ‘‘वाग्वावनाम्नोभूयसी’’त्यादाविव

गु० वायोरणुत्वेनतस्यैवानंदमयत्वमितिटीकोक्ताक्षेपानुपपत्तिः । आनंदमयउक्तस्यदेशतःपूर्णत्वस्याणौवायावसंभवादित्यतआह ॥**आनंदमयइति**॥**विरोधादिति** ॥ ॥ ५६८ ॥
सर्वशब्दस्यस्वेतरसर्वपरत्वेनएकस्यसर्वोत्तमत्वेअन्यस्यतद्धीनत्वापत्तौपुनस्तस्यसर्वोत्तमत्वेविरोधात् । अन्यस्यवाऽधमत्वप्राप्त्याविरोधादित्यर्थः । एकप्रतियोगिको

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **प्रतियोगीति** ॥ एतस्माद्भूयानित्यवधिविशेषानिर्देशादित्यर्थः । ननुप्राणभूम्नोरभेदे “प्राणोवाआशायाभूया”नित्याशारूपप्रतियोगि विशेषोपादानमस्ति । नचतत्प्राणस्यैवनतुभूम्नइतियुक्तं । द्वयोरेकत्वादितिचेन्न । प्राणशब्दस्यवायुपरत्वमुपेत्यैवतदंतर्यामितयाविष्णोःप्राण शब्दितत्वोपगमेनाशोत्तमत्वस्यप्राणगतत्वात् । “महतःपरमव्यक्त”मित्यादावन्यगतोच्चत्वनीचत्वनियामकत्वेनतच्छब्दार्थतयातत्रस्थितत्वस्या नुमानिकनयेवक्ष्यमाणदिशा प्राणगताशोत्तमत्वादिनियंतृतयातत्रहरेःप्राणपदेनग्रहणाद्भूमगतोत्तमत्वंप्रत्याशायाःप्रतियोगित्वाभावात् । अन्य थावायोरुत्तमतानुक्तिप्रसंगात् । एवंचतस्यावधिविशेषमनुपादायैवसर्वांतेपाठात्सर्वोत्तमत्वसिद्धिरितिभावः । एतेन “विशेषानुक्तेरखिलेश त्वमेवोक्तंभवति । नचेदमसिद्धं । नामवागादीनांपूर्वपूर्वाधिपत्यस्योक्तत्वा”दितिसुधावाक्यंविवृतंध्येयं ॥ **प्राणादपीति** ॥ सर्वोत्तमादपि प्राणादित्यर्थः । अल्पस्यभूमप्रतियोगित्वेनोपादानेपिकथंसर्वोत्तमत्वलाभइत्यतआह ॥ **असर्वेति** ॥ एवंटीकाद्युक्तमध्युपदेशहेतुंसुधारीत्या सर्वोत्तमत्वरूपंभूम्न्युपपाद्यवैष्णवत्वंतस्याह ॥ **तच्चेति** ॥ सर्वोत्तमत्वं “विश्वतःपरमां सर्वतःपरममकारवाच्यमित्यर्थः”इतिटीकायांव्यक्तं ।

प्रतियोगिविशेषानुपादानात् । भेदपक्षेप्राणादप्युत्तमत्वात् । “नाल्पेसुख”मितिनिरुपप दाल्पस्यप्रतियोगित्वेनोपादानाच्च । असर्वोत्तमस्यकस्माच्चिदल्पत्वेननिरुपपदाल्पस्यतत्प्र तियोगित्वायोगात् । तच्च “विश्वतःपरमा”मित्यादिभाष्योक्तश्रुत्यादिभिर्विष्ण्वेकनिष्ठं ।

गु० त्कर्षापकर्षयोरेकत्रव्याहतत्वादित्याशयः ॥ **प्रतियोगिविशेषेति** ॥ निर्विशेषणभूमशब्दस्यनिरुपचरितसर्वोत्तमत्वाप्रतियोगिविशेषोक्तिरूपापवादकाभावाच्चरम कक्ष्यापन्नत्वेनसर्वोत्तमत्वमित्यर्थः ॥ **असर्वोत्तमस्येति** ॥ तथासतिनाल्पइत्यनेनभूम्न्यपिसुखनिषेधापत्त्याभूमैवसुखमित्यनेनविरोधापत्तेरितिभावः ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० "उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः । नत्वत्समोस्त्यभ्यधिकःकुतोन्य"इत्यादिरादिपदार्थः । "नचसर्वोत्तमत्वंवायोरपि । विरोधादेवे" तिटीकार्थमाह ॥ **नचेति** ॥ सर्वशब्दस्यासंकुचितत्वेनान्योन्यनिरूपितोत्तमत्वस्यद्वयोर्विरुद्धत्वादित्यर्थः । सूत्राद्युक्तहेतुद्वयसमर्थनमुपसं हरन्साध्यमाह ॥ **तस्मादिति** ॥ संप्रसादादिनिरवकाशहेतुद्वयादित्यर्थः । एवंसाधकोक्त्याभूमाविष्णुरित्युक्त्वापूर्ववाद्युक्तेभूयस्त्वानुक्त्यु त्क्रमणरूपेबाधकेनिराचिकीर्षुरनुक्तिंतावदनूद्यन्यायविवरणोक्तदिशासाम्येनतावदापादयति ॥ **नचेत्यादिना** ॥ विष्णुतोभूयस्त्वानुक्ते र्निरवकाशतामाह ॥ **विष्णोरिति** ॥ **उच्येतेति** ॥ त्वन्मतेतस्यसर्वोत्तमत्वार्थमेवनामवागादितारतम्यस्यप्रक्रांतत्वात् । तथाचप्राणस्यैवस

नचद्वयोःसर्वोत्तमत्वं । विरोधात् । तस्माद्भूमाविष्णुः । नचभेदपक्षेप्राणाद्भूयसोनुक्तिर्बाधिका । पूर्व पक्षेपिप्राणस्यविष्णुतोभूयस्त्वानुक्तेर्बाधकत्वात् । विष्णोरधमत्वेहिनामादिदेवेभ्यइवप्राणस्यविष्णुतो पिभूयस्त्वंप्रश्नोत्तराभ्यामुच्येत । तदुक्तंन्यायविवरणे "प्राणस्यविष्णोःसकाशाद्भूयस्त्वानुक्ति"रिति ।

प्र०र्वोत्तमत्वेविष्णुतोभूयस्त्वमाशानंतरंविष्णुर्वावाशायाभूयानित्युक्त्वा पश्चादस्तिभगवोविष्णोर्भूयानितिप्रश्नःप्राणोवावविष्णोर्भूयानितिप्रतिव चनंचस्यात् । प्रश्नादिनावश्यवक्तव्यस्यभूयस्त्वस्यानुक्तौहेत्वंतराभावात्तदन्यथानुपपत्त्यानप्राणस्यसर्वोत्तमत्वंशंक्यं । किंतुभूम्नएवतथात्वंवाच्य मितिभावः । प्राणस्यविष्णुतोभूयस्त्वानुक्तिरूपयुक्तेष्टीकाकारैरत्रन्यायविवरणेसुधायांचाव्याख्यातत्वादत्रतांस्वयंव्याख्यायमूलारूढांकरोति ॥ **तदुक्तमिति** ॥ न्यायविवरणपाठो **मुख्यप्राणस्येति** । नन्वेवंभूम्नोपिप्राणाद्भूयस्त्वानुक्त्यन्यथानुपपत्त्यानसर्वोत्तमत्वमितिसुवचं । ॥ ५६९ ॥

प्र० तथाचकथंनिर्णयइतिभावेनाशंक्यनिराह ॥ **नचेति** ॥ "एषतुवातिवदती"त्यादिटीकोक्तंसमाधिंव्यनक्ति ॥ **एवमिति** ॥ प्राणप्रकरणे "सवाएषएवंपश्यन्नेवंमन्वानएवंविजानन्नतिवादीभवति । तंचेद्ब्रूयुरतिवाद्यसीति । अतिवाद्यस्मीतिब्रूयान्नापह्नुवीते"त्युक्त्वाएषतुवेत्याद्या म्नायते । ननुसत्यस्यातिशयितत्वेभूम्नःकिमायातमित्यतउक्तं **सत्याख्येति** । तयोरभेदश्च "सैवहिसत्यादय"इत्यत्रवक्ष्यतइतिभावः ॥ **प्रश्ना देरिति** ॥ भूमावावप्राणाद्भूयानितिपरिहारस्यचेत्यादिपदार्थः । ननुयथापूर्ववादिनासिद्धांतिनंप्रत्युक्ताप्राणाद्भूयस्त्वानुक्तिर्गत्यंतरयुक्ता तथा सिद्धांतिनापूर्ववादिनंप्रत्युक्ताप्राणस्यविष्णुतोभूयस्त्वानुक्तिरपितथास्यात् । एवंचपुनर्निर्णयोनस्यादित्यतोनैवमितिभावेनाह ॥ **अतएवेति** ॥ पूर्ववाद्युक्तानुक्तेस्सावकाशत्वादेवसाम्यनिरासायसिद्धांतिनोक्तानुक्तेर्निरवकाशत्वं "बाहुल्यंलिंगशब्दानामनुक्तिश्चविरुद्धता । अनुक्तिरन्वया भावोविपरीतश्रुतिभ्रमः । लिंगावकाशराहित्यभ्रमस्तादृग्द्वयंतथा । बहुतादृक्त्वमुक्तस्यविरोधोर्थात्तथागतिः । समस्तमेतदित्यत्रपूर्वपक्षेषु युक्तयः । ताएवबलवत्यस्तुगत्यंतरविवर्जिताः । सिद्धांतयुक्तयोज्ञेया"इत्यनुव्याख्यानउक्तमित्यर्थः । विवरिष्यतेचैतदग्रे । नन्वेवंनिरवका शानुक्तेरेवसिद्धांतन्यायत्वोक्तेःपूर्वपक्षानुक्तेरन्यथोपपत्तिरूपन्यासस्यटीकायांकुतोव्युत्पादनंकृतं । तथासतिन्यायभेदेनाधिकरणभेदस्स्यात् ।

नचैवमनुक्त्योःसाम्यं । "एवंविजानन्नतिवादी"तिप्राणज्ञानिनोतिवादित्वमुक्त्वा "एषतुवाअतिवदतियःसत्येनातिवद ती"तिसत्याख्यभूमज्ञानिनस्तुशब्देनविशेषोक्त्याभूम्नःप्राणादप्यतिशयस्योक्ततया अस्तिभगवःप्राणाद्भूयइतिप्रश्नादेरध्या हार्यत्वेनानुक्तेरन्यथाप्युपपत्तेः । अतएव "गत्यंतरविवर्जिताः"इत्यनुव्याख्यानेसिद्धांतीयानुक्तेर्निरवकाशत्वमुक्तं ।

गु० अनुक्तेरन्यथाप्युपपत्तेरिति ॥ गम्यमानत्वादप्रयोगइतितुशब्दकार्यप्रश्नप्रतिवचनानुक्तेः अन्यथा विष्णोःप्राणोत्तमत्वाभावंविनापि उपपत्तेरितिभावः ॥ व्य

SGDF Sri Gargeshwari Digital Foundation

प्र० सैवहीत्यस्यव्यर्थतापत्तेश्चेत्यतस्तत्रोक्तस्यैवात्रशिष्यहितायोक्तिरितिभावेनाह ॥ एतच्चेति ॥ पूर्वपक्षीयानुक्तेरुक्तरीत्यासावकाशत्वमित्यर्थः । तृतीयस्यतृतीयपादेद्वाविंशाधिकरणेविष्णुःप्राणादुत्तमोनवेतिसंशये छांदोग्येप्राणस्यैवसर्वोत्तमत्वेनोक्तत्वात्प्राणाद्भूयसोन्यस्यप्रश्नप्रतिवचनाभ्यामनुक्तेःप्राणएवसर्वोत्तमइतिप्राप्ते प्रकरणांतरइवप्रश्नप्रतिवचनयोर्व्यतिहारोऽध्याहारःकार्यः । एषतुवाअतिवदतीतितुशब्देनविशेषणाद्विष्णुरेवसत्यशब्देनोत्तमतयोच्यतइतिवक्ष्यतीत्यर्थः । तेनगतार्थत्वमाशंक्यतदाक्षेपेणास्यप्रवृत्तिरित्याह ॥ **नचैवमित्यादिना** ॥ सैवहीति तदुत्तराधिकरणेप्राणात्सत्यशब्दितोविष्णुरेकएवोत्तमउतबहवइतिसंशये सत्यादुपरिविज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहंकारात्मनामुक्तत्वाद्बहवइतिप्राप्ते सत्यंभगवोविजिज्ञासइतिसत्यनामकभगवद्गुणजिज्ञासायांविज्ञानाद्युक्तेर्दाक्षायणयज्ञाद्युक्तेरिवप्रकृतस्यैवगुणकथनपरत्वेनैवोपपत्तेःसैवपरदेवतासत्यादयइतिवक्ष्यमाणत्वादितिभावः । श्रुत्यंतरे तैत्तिरीयादौ । अतएवेत्युक्तंव्यनक्ति ॥ **अधिकरणांतरव्युत्पाद्यत्वादिति** ॥

एतच्च "व्यतिहारोविशिंषंती"त्यत्रसूत्रकृदेववक्ष्यति । नचैवमिहपूर्वपक्षानुदयः । व्यतिहारइत्यत्रोक्तोध्याहारोनयुक्तः । तुशब्दस्य "विज्ञानंत्वेवविजिज्ञासितव्य"मितिसत्यानंतरमुक्तेषुविज्ञानादिष्विवाभेदेप्युपपत्तेः । विज्ञानादीनांचसत्याभेदः "सैवहिसत्यादय"इत्यधिकरणसिद्धइतिप्राप्ते श्रुत्यंतरेप्राणादेकस्यैवाधिकस्योक्तेरेषत्वित्यत्रतुशब्दोध्याहारकल्पकः । विज्ञानंत्वित्यादौतुसत्याख्यब्रह्मण्येवधर्मांतराभिप्रायत्वान्नतत्कल्पकइतिसिद्धांतस्येहाभिप्रेतत्वात् । अतएव प्राणाद्भूम्नोभूयस्त्वोक्तिरूपासिद्धांतयुक्तिरधिकरणांतरव्युत्पाद्यत्वादिहानुव्याख्याने "अनुक्तिश्चे"तिचशब्देनोक्ता । ॥ ५७० ॥

गु० तिहारइत्यत्रोक्तइति ॥ एष्यदधिकरणपूर्वपक्षप्रवृत्तेरेतदधिकरणपूर्वपक्षदशायामेतदधिकरणसिद्धांतानुन्मेषेणतेनास्यगतार्थतायाःवक्तुमशक्यत्वादितिन्यायस्य

SGDF Sri Gargeshwari Digital Foundation

प्र० अनुव्याख्याने न्यायसंग्रहानुव्याख्याने। इदानीं "गत्यंतरविवर्जिता" इत्युक्तसिद्धांतीयानुक्तेर्निरवकाशत्वंव्यनक्ति ॥ **प्राणस्येति** ॥ अत्र टीकायांभाष्योक्तंप्राणभूम्नोरुभयोरपिविष्णुत्वमुत्क्रमणलिंगंचसमर्थ्याभेदपक्षमेवप्रतिष्ठाप्य "अस्तुवायंप्राणोवायुरेवे" तिभेदपक्षमपिभाष्यानुक्तमुक्त्वोपपाद्याभेदभेदपक्षयोरविरोधश्चोक्तः । अत्रभेदपक्षोक्तिस्समुच्चयेनाविरोधोक्तिश्चकिंमूलाकिंनिमित्ताचेत्यतस्तदाशयंविवरितुमभेदपक्ष

प्राणस्यविष्णुतोभूयस्त्वानुक्तिस्तु "अनुक्ति" रितिस्वशब्देनोक्ता । तदुक्तंन्यायविवरणे "प्राणस्यविष्णोस्सकाशाद्भूयस्त्वानुक्तिः । चशब्देनैषतुवाअतिवदतियःसत्येनातिवदतीतिप्राणाद्विष्णोर्भूयस्त्वोक्तिश्चे" ति । प्राणस्यविष्णोःसकाशाद्भूयस्त्वानुक्तिस्त्वनन्यथासिद्धा । प्रश्नाद्यध्याहारकल्पकाभावात् । नन्वत्र "प्राणोवाआशाया" इत्यत्रप्राणोविष्णुरित्युपेत्यभाष्येसिद्धांतितं । न्यायविवरणेतुमुख्यवायुरित्युपेत्य । तद्विरुद्धं । नचार्थद्वयस्यवैकल्पिकत्वादेवाविरोधः । प्राणस्यविष्णुत्वपक्षे "एषतुवाअतिवदती" तितुशब्दायोगात् । आशाशब्दोक्तसरस्वतीतोमुख्यवायोरुत्तमत्वमनुक्त्वाविष्णोरेवतदुक्त्ययोगाच्च । नचप्राणस्यमुख्यवायुत्वेपिश्रीतत्वस्यततउत्तमत्वमनुक्त्वाविष्णोस्तदुक्तिरयुक्तेतिवाच्यं । "नामादयस्तुबद्धत्वान्मोचकत्वात्परोपिच । उभयोरप्यभावेनयथाऽव्यक्तंनतूदित" मितिवचनेनैवतदनुक्तेर्गत्युक्तेः ।

प्र० माक्षिपति ॥ **नन्विति** ॥ **प्राणोविष्णुरित्युपेत्येति** ॥ उत्क्रमणलिंगस्यहरौसमर्थनादेतदवगम्यतइतिभावः । ननुऋगादीनांपरापरार्थद्वयवदिहापिविवक्षाभेदेनकदाचिदयंकदाचित्सोप्यर्थोस्तुकोदोषः। अतएवान्यमीशमित्यस्याद्दश्यत्वनयेऽन्योर्थोद्युभ्वादिनयेऽन्योर्थउक्तइत्यतआह ॥ **नचेति** ॥ प्राणभूम्नोर्भेदपक्षेपिदोषमाशंक्यनिराह ॥ **नचेति** ॥ **वचनेनेति** ॥ तृतीये "कामादितरत्रतत्रचायतनादिभ्य" इत्यत्रभाष्यो

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्तब्रह्मतर्कवचनेनेत्यर्थः । तत्रयथेत्यस्य "श्रुतौतथाजीवपरावुच्येतेकिंचनेतर"दित्युत्तरार्धेनान्वयः । वैकल्पिकार्थद्वयपक्षेबाधकांतरमाह ॥ इयदिति ॥ आदिपदेन "व्यतिहारः सैवही"त्यनयोर्ग्रहः । इयदामननादित्युपासनापादीयैकविंशाधिकरणेह्युपासनाधिकारिणोनामवागादयःप्राणावसानानवेतिसंशये नामादीनांसोत्तरत्वदर्शनात्प्राणादप्युत्तमाधिकारिसाधनसौलभ्यान्नामादयोऽधिकारिणोनप्राणावसानाइतिप्राप्ते "प्राणोवावसर्वेभ्योभूया"नितिश्रुतेरधिकारिणां इयत् छांदोग्योक्तंप्राणावसायित्वमेवेतिवक्ष्यमाणत्वादितिभावः । "तस्याःश्रेष्ठोमुख्यवायुःप्रकृष्टानांचनायकः । प्राणनामानइत्येवह्यानंदस्समुदीरितः । आणासरस्वतीप्रोक्तातत्प्रकृष्टसुखत्वतः । प्राणइत्युच्यतेवायुस्सर्वेत्वेतेदशोत्तरा"इत्यादिछांदोग्यभाष्येणेत्यर्थः । नित्यवदितिस्वार्थेवतिः । यद्वा व्यवस्थितैकार्थकेवाक्ये "यतोवाइमानिभूतानिजायंत"इत्यादौयथोक्ति

"इयदामनना"दित्याद्यधिकरणैश्छांदोग्यभाष्येणचविरोधाच्च । तत्रनित्यवद्वायुपरतायाउक्तत्वादितिचेन्न । वायुपरत्वेपि "आत्मनआकाशःसंभूत"इत्यादावाकाशादिशब्दानामिवांतर्यामिपरत्वस्यापिसंभवेनभाष्येतदुक्तेः ।

गु० विपक्षेबाधकोक्त्यापूर्वमेवानेकशउपपादितत्वादभ्युपगमवादेनवात्रैवमुक्तिरितिज्ञातव्यं । नित्यवदितिस्वार्थिकोवतिः । नित्यमेवेत्यर्थः । ननुभाष्येप्राणशब्दस्यवि

प्र० स्तथेत्यर्थः । इतरथावायुर्वेतिवाशब्दश्श्रूयेतेतिभावः । अभेदपक्षोक्तेःफलमाह ॥ तदुक्तिश्चेति ॥ उक्तंसर्वंटीकायास्तात्पर्यवर्णनमितिभावेनतदारूढंकरोति ॥ अतएवेति ॥ परिहारांतरमाह ॥ तत्वप्रदीपेत्विति ॥ भाष्यादौहरावुत्क्रमणस्यश्रुतिसिद्धत्वमेवोक्तं । नतूपपत्ति

तदुक्तिश्चपूर्वपक्षवन्नकेवलंवायुपरत्वमितिस्वरूपकीर्तनार्थंवाप्राणांतर्यामित्वेनैवप्राणाद्भूयस्त्वंलब्धमितिपरिहारांतरोक्त्यर्थंवा संभूतइत्यत्रचभवनवदिहोत्क्रमणस्यापिवक्तव्यत्वेनप्रसंगादुत्क्रमणलिंगसमन्वयार्थंवेतिद्रष्टव्यं । अतएवटीकायां "प्राणशब्देनापिविष्णोरुक्तत्वात् । अस्तुवाऽयंप्राणोवायु"रितिग्रंथाभ्यांभाष्यन्यायविवरणोक्तपक्षौविरोधमुद्भाव्यनिरसितुमापाततोवैकल्पिकत्वेनोक्त्वा "नचैतदर्थद्वयंविरुद्ध"मित्यनेनग्रंथेनतयोःसमुच्चयेनाविरोधएवस्थापितः । तत्वप्रदीपेतु "अभ्युपगम्यवादत्वा"दित्यादिनाऽयंप्राणोविष्णुरित्यभ्युपेत्यवादेनभाष्यंप्रवृत्तमित्युक्तं । तत्रभाष्यन्यायविवरणयोःपक्षभेदेनव्यवस्थितत्वाद्भाष्येपूर्वपक्षउत्क्रमणलिंगोक्तिः सिद्धांतेब्रह्मण्युत्क्रमणसमर्थनंचस्वरसं ।

गु० ष्णुवाचकत्वंकुतउक्तमित्यतआह ॥ तदुक्तिश्चेति ॥ ननुस्वरूपकीर्तनार्थत्वंवैयर्थ्यापरपर्यायएवेत्यतआह ॥ प्राणांतर्यामित्वेनवेति ॥ ननुप्राणशब्दस्यविष्णुपरत्वाभावेपिप्रकरणविच्छेदकतुशब्दमहिम्नाप्राणाद्विष्णोर्भूयस्त्वोक्तिर्लभ्यतएवेतिकिमर्थंप्राणस्यविष्णुत्ववचनमित्यतआह ॥ संभूतइत्यत्रेति ॥ प्राणस्यविष्णुत्वानुक्तौनोत्क्रमणादिलिंगसमन्वयः । उत्क्रमणादेःप्राणनिष्ठत्वश्रवणेपिभूमनिष्ठत्वेनाश्रवणादितिभावः । यदुक्तमुत्क्रांतप्राणानितिप्राणोत्क्रमणश्रवणात्तस्यचपूर्णेब्रह्मण्ययो

SGDF
Sri Gargeshwari Digital Foundation

प्र० सिद्धत्वं । स्वयंतदाह ॥ युक्तंचेति ॥ आदिपदार्थवदन्श्लोकंव्याचष्टे ॥ यथेति ॥ ननुतत्रप्रतीतिबलादन्यतरकर्मादिकरणाभावादिवशा त्तथात्वेपीहकिंमानमित्यतआह ॥ तमिति ॥ विष्णुमित्यर्थः । श्रुतेरौपाधिकक्रियाविषयत्वमस्त्वित्यतआह ॥ क्रियायाइति ॥ यथासर्ष पादेरणीयस्त्वेततोप्यधिकपरिमाणहृदयादेरनुपाधित्वं तथात्यंताणुतररूपगतक्रियायामपिनततोपिस्थूलस्योपाधित्वं उत्क्रांतप्राणानित्यादौक्रि योपाधेरनुक्तेश्चश्रौतोत्क्रमणानुरोधेनेश्वरस्यक्रियावत्त्वंतत्प्रयोजकमणुत्वंचस्वाभाविकं । अक्रियत्वंतत्प्रयोजकमहत्त्वंत्वौपाधिकमित्यपिसुवचं । अतिमहापरिमाणादेःकथंततोन्यूनपरिमाणोपाधिकृतत्वमितिचेत्सर्षपादितोप्यणुपरिमाणादेःकथंततोऽधिकपरिमाणहृदयाद्युपाधिहेतुकत्वमि तिसममित्यादिरूपेणनिरसनीयमित्यर्थः । अतएव "स्वाभाविकी"तिश्रुत्युक्तिः । ननुनहरौक्रियावत्त्वंयुक्तं । प्रयोजकधर्माभावात् । अन्य थोत्क्रमणादिनाजीवाणुत्वादिसिद्धिर्नस्यात् । व्याप्तेहरौपूर्वदेशविभागादिफलाभावाच्च । अतस्तन्निवृत्तौक्रियायाअपिनिवृत्तिः । श्रुत्यादितु

युक्तंचब्रह्मण्युत्क्रमणं । जात्यादेःसर्वगस्यापिप्रतिव्यक्तिसमाप्तिवत् । सर्वगस्यापीश्वरस्यक्रियायाअपिसंभवात् ॥१॥ यथासर्वगतांतरेऽदृष्टमपिजातिरूपसर्वगतएकैकत्रसमाप्तिः । एकैकव्यक्तिदर्शनेपिजातिप्रतीतेः । यथाचासंभावि तमपिसर्वगतेषुगगनादिषुसर्वगतदिगाद्यसंबद्धत्वमजसंयोगाभावपक्षे । तथासर्वगतांतरेऽदृष्टमपिक्रियावत्त्वंब्रह्म ण्यस्तु । "तमुत्क्रामंतंप्राणोनूत्क्रामति स्वाभाविकीज्ञानबलक्रियाच ज्ञानंनित्यंक्रियानित्याबलंशक्तिःपरात्मन"इत्या दिश्रुतेः । क्रियायाऔपाधिकत्वंतु "सर्वत्रप्रसिद्धे"त्यत्रोक्तेनाणुत्वस्यौपाधिकत्वनिरासकन्यायेननिरसनीयं । ॥ ५७२ ॥

गु० गाच्च नप्राणस्यविष्णुत्वमिति तन्निराकरोति ॥ युक्तंचेति ॥ प्रसंगात्क्रियायाअनित्यत्वंपराचष्टे ॥ क्रियायाइति ॥ न्यायेनेति ॥ उपाध्यनुक्तिन्यायेनेत्यर्थः

SGDF Sri Gargeshwari Digital Foundation

प्र० गौणंव्याख्येयमित्यतःप्रयोजकंतावदाह ॥ **किंचेति** ॥ आदिपदेनमहत्त्वाभावविशिष्टमणुत्वंगृह्यते । महत्त्वाभावस्यतंत्रत्वेदोषांतरमाह ॥ **गुणेति** ॥ पररीत्यैतत् । "गुणाद्वालोकव"दित्यत्रगुणेपिक्रियावत्त्वोक्तेः । प्रागुक्तप्रतिबंदींनिराह ॥ **अतएवेति** ॥ एतमेवहेतुंव्यनक्ति ॥ **गुणादाविति** ॥ किंतर्ह्यक्रियत्वेतंत्रं यदभावाद्धरावक्रियत्वंवार्यतइत्यतस्सयुक्तिकंतदाह ॥ **भावेति** ॥ यदपिफलाभावादक्रियत्वमिति तदप्रयोजकमित्याह ॥ **यदिचेति** ॥ **तथास्त्विति** ॥ अनित्यक्रियायाविभागादिफलजनकत्वेपीश्वरक्रियायानित्यत्वेनलोकक्रियाविलक्षण त्वात्तादृशफलाभावेपिक्रियावत्त्वंसंभवतीत्यर्थः । ननूत्क्रांतप्राणानितिभूतकालनिर्देशान्नक्रियायानित्यत्वमितिचेत्तर्हितदैक्षतेतिनिर्देशाज्ज्ञान नित्यत्वाभावोपिस्यात् । यदिवेदस्यानादिनित्यत्वादद्येवश्वःप्रभृतिष्वप्यनंतकालेष्वेवमेवोक्त्याज्ञानस्यानाद्यनंतकालतासिद्ध्यावा लकारस्यका लत्रयान्यतमवाचित्वेनकालत्रयवाचिनःकस्यचिल्लकारस्याभावाद्येनकेनचिल्लङादिनानिर्देशेपितन्नित्यत्वएवश्रुत्यंतरसिद्धेतात्पर्याद्वा ज्ञाननित्यत्व

किंच क्रियावत्त्वेणुत्वमेवतंत्रं । नतुमहत्त्वाभावादि । गौरवात् । गुणजात्यादौक्रियापाताच्च । अतएवनमहत्त्वमक्रियत्वे तंत्रं । गुणादौमहत्त्वाभावेप्यक्रियत्वदर्शनात् । भावरूपायांक्रियायांपूर्वधीस्थायांपूर्वधीस्थंयदणुत्वरूपंप्रयोजकंतदभावा देवाक्रियत्वोपपत्तौतत्प्रयोजकांतरस्यानन्वेषणीयत्वाच्च । यदिचविभुद्रव्येपूर्वदेशाद्विभागादिरूपफलाभावेनक्रियानस्या त्तर्हिसुखदुःखेच्छासंस्कारादिरूपफलाभावेनेश्वरेज्ञानमपिनस्यात् । ज्ञानंनित्यत्वाल्लोकविलक्षणंचेत्क्रियापितथास्तु ।

गु० ॥ **यदिचविभुद्रव्यइति** ॥ यावत्कर्मसत्त्वंसंयोगविभागोत्पादिनियमात्कार्याभावेनकारणाभावानुमानादित्यर्थः । पूर्वदेशाद्विभागादीत्यत्रादिशब्देनोत्तरदेशसं

SGDF
Sri Gargeshwari Digital Foundation

प्र० सिद्धिः तर्हिक्रियायाअपितथात्वमस्तु । अतएवपूर्वं "ज्ञानंनित्यंक्रियानित्ये"त्युदाहृतं । ननुयदीश्वरक्रियानित्यासर्वदोपलभ्येतेतिचेन्न । अयोग्यत्वेनप्रत्यक्षेणोपलंभायोगात् । श्रुत्यादिनोपलंभस्यतुक्रियानित्येतिसत्त्वात् । अभिव्यक्तेःकादाचित्कत्वेनकदाचिदुपलंभस्यापिसंभवाच्च । उक्तंचसुधायामत्तेतिनये "कदाचिदभिव्यक्तेःकदाचिदेवोपलभ्यतइत्यंगीकारेनबाधकंपश्याम" इति । एतेनभगवतिनित्यमुत्क्रमणवत्त्वेजीवस्यसर्वदामरणमेवस्यादितिनिरस्तं । शक्त्यात्मनोत्क्रमणस्यनित्यत्वेपिकदाचिदेवव्यज्यमानत्वेनदोषाभावात् । ननुयदिक्रियाविभागादिकार्यंनकुर्यात्तर्हिक्रियात्वंव्याहन्येत । संयोगविभागासमवायिकारणत्वात्क्रियायाः । यदिसातौकुर्यात्तर्हितस्यास्संयोगविभागौप्रत्यनपेक्षकारणत्वात्तदुत्पत्तिसातत्यप्रसंगइतिचेत् ज्ञानेप्यस्यतुल्यत्वात् । अस्तुवासंयोगादिजनकत्वं । तच्चद्वेधा । तदभिव्यक्तिजनकत्वेनोपचाराद्वा

यद्वा पूर्वदेशसंयोगानभिव्यक्तिरुत्तरदेशसंयोगाभिव्यक्तिश्चक्रियाभिव्यक्तिफलमस्तु ।

प्र० मुख्यतएववेतिभावेनाद्यंतावदाह ॥ **यद्वेति** ॥ क्रियायाश्शक्त्यात्मकत्वंव्यक्त्यात्मकत्वंचेतिद्वैरूप्यं । तत्रशक्त्यात्मनानित्यापिसायदाव्यज्यतेतदापूर्वदेशसंयोगानभिव्यक्तिरुत्तरदेशसंयोगाभिव्यक्तिश्चजायते । देशांतरसंयोगानभिव्यक्तिमात्रेणविभागव्यवहारइतिभावः । ननुकेयंक्रियाभिव्यक्तिर्नाम । नतावत्प्रतीतिः । ईश्वरापेक्षयानित्यसिद्धत्वेनसर्वदासंयोगव्यक्त्यापत्तेः । परापेक्षयाकदाप्यभावेननित्यमनभिव्यक्त्यापत्तेः । परप्रीतिरूपक्रियाभिव्यक्तिभावेवासंयोगव्यक्त्यादिकार्योत्पादस्यतदनपेक्षत्वात् । अतएवनावरणनिवृत्तिर्व्यक्तिरिति । मैवं । "व्यक्तिशब्देनावस्थानविशेषस्यविवक्षितत्वा"दित्यत्तेतिनयेसुधायामेवोक्तेरितितात्पर्यात् । संयोगविशेषस्वरूपोत्पादकत्वमप्यस्तीत्याह ॥ ॥ ५७३ ॥

प्र० अथवेति ॥ ननूक्तंतथात्वेतदुत्पत्तिसातत्यप्रसंगइति । तन्न । क्रियाव्यक्तिदशायामेवदेशान्तरसंयोगविभागविशेषोत्पादाभ्युपगमात् । क्रियाव्यक्तिश्चतत्प्रयोजकाणुत्वव्यक्तिदशायामेवेतिनकोपिदोषइति । ननुक्रियास्वसत्तोत्तरक्षणेसंयोगादिकंकरोत्युतविरम्यवा । नाद्यः । स्वसत्तायाइदंप्रथमताभावेनसंयोगादिविशेषस्यविवक्षितक्षणादपिपूर्वमुत्पत्तिप्रसंगात् । नद्वितीयः । पूर्वोत्तरावस्थयोरविशिष्टस्यविरम्यव्यापारायोगात् । उत्तरसंयोगस्यकर्मविनाशकत्वेनकृतसंयोगस्यकर्मणोवस्थानानुपपत्तेश्च । तथा व्यक्तिश्चकिंक्रियातोभिन्नानवेत्यादिचोद्यनिरा

अथवा अणुत्वमहत्त्वयोःसदासत्त्वेपियदामहत्त्वस्यव्यक्त्यात्मकताऽणुत्वस्यतुशक्त्यात्मकतातदाक्रियायाअपि शक्त्यात्मनैवावस्थानाद्ब्रह्मणःस्वतस्सिद्धःसर्वैःसहसंयोगएव । नकस्मादपिविभागः । यदातुमहत्त्वस्यशक्त्यात्मकताऽणुत्वस्यव्यक्त्यात्मकता तदाक्रियायाअपिव्यक्त्यात्मकत्वात्पूर्वदेशविभागादिकमस्तु । एकस्मिन्रूपेऽणुत्वव्यक्तावपिरूपांतरेमहत्त्वव्यक्तिरविरुद्धा । रूपाणामभेदेपिसविशेषत्वात् । अचिंत्यशक्तित्वाच्चेशस्येतिदिक् ।

प्र० करणमत्ताधिकरणानुव्याख्यानसुधादौद्रष्टव्यमितिभावेनाह ॥ दिगिति ॥ तथाहि । व्यक्त्याविशिष्टस्यकर्मणःकार्योत्पादकत्वेनशक्त्यात्मकस्यविरम्यैवतत्करणोपपत्तेः । कृतसंयोगस्यकर्मणोवस्थानंनेत्यस्यानित्यक्रियाविषयत्वेनोपपत्तेश्च । उक्तंचबृहदारण्यकभाष्ये "व्यक्तिभावंगतायातुकरोतीतिस्वरूपिणी । शक्तिरूपस्थितासैवक्रियाशक्तिरितीर्यते । साचव्यक्तिस्तुजनिवत्क्रियायारूपमेवतु । तथापितुविशेषेणस्वरूपेणविशेषणं । जनेर्जनिवदेवासौज्ञातव्याव्यतिरेकत" इति । एतेन "रूपांतरविवक्षयोत्क्रमणस्यश्रुतिसिद्धत्वा" दितिटीकोपपादिताभवति ।

SGDF Sri Gargeshwari Digital Foundation

प्र० यदप्यवादिपूर्ववादिना यदिचसर्वगतस्यापिक्रियातदोत्क्रांतिगत्यागतीनामित्यादि तत्राह ॥ **जीवस्येति** ॥ सूत्रेसंप्रसादादित्यस्यभाष्येपूर्ण सुखरूपत्वादितिव्याख्यानंकृतं । तदयुक्तमिव । तथात्वेपूर्णसुखादित्येवसूत्रणापत्तिः । कथंचसंप्रसादपदेनतल्लाभइत्यतस्तत्वप्रदीपसुधयोरु क्तयोगप्रदर्शनेनपूर्णसुखलाभप्रकारंवदन्संप्रसादपदप्रयोगप्रयोजनंचाह ॥ **अत्रसूत्रइति** ॥ **सम्यक्प्रसीदत्यनेनेतीति** ॥ संप्रेत्युपस र्गद्वयपूर्वकात् "षद्लृविशरणगत्यवसादने"ष्वितिधातोः "अकर्तरिचकारकेसंज्ञाया"मितिकरणेघञ्प्रत्ययेरूपमितिभावः ॥ **सम्यक्प्रसादे नेति** ॥ सचेश्वरेश्रुतिस्मृत्यादिगम्यइतिभावः ॥ **दुःखाविनाभावेति** ॥ मुक्तेषुसत्यपिसुखेदुःखाभावादितिभावः ॥ **विषयवाक्येति** ॥ योवैभूमातत्सुखमितिवाक्यमाद्यस्यविषयः । सएवाधस्तादित्याद्युत्तरवाक्यंतु "धर्मोपपत्तेश्चे"त्यस्यविषयइतितत्क्रमात्क्रमइत्यर्थः । तत्रस र्वगतत्वादिधर्माणांप्रागाक्षिप्तानामपिसूत्रेहेतूकरणंचतदाक्षेपकस्यानुत्क्रमणरूपबाधकस्यपरिहृतत्वाद्युक्तमितिभावः ॥ **अन्येत्विति** ॥ "भू मात्वेवविजिज्ञासितव्यः । भूमानंभगवोविजिज्ञास"इत्यादौश्रुतभूमाजडवायुरुतब्रह्मेतिसंशये "अस्तिभगवोनाम्न"इत्यारभ्याऽऽप्राणात्प्रवृ त्तस्यभूयोविषयप्रश्नप्रतिवचनप्रवाहस्यप्राणोपरिसमाप्त्याप्राणानंतरंप्रश्नप्रतिवचनाभ्यांविनाभूम्नआम्नानाद्भूमाप्राणशब्दितोवायुरेव । किंच **जीवस्याणुत्वेतुसर्वथापूर्वदेशविभागादिहेतुभूताक्रियाहेतुः नक्रियामात्रमितिवक्ष्यते । अत्रसूत्रे सम्यक्प्रसीदत्यनेनेतिव्युत्प त्त्यासंप्रसादःपूर्णसुखं । सुखेप्रसादशब्दस्तु ईश्वरस्यसुखंचेद्दुःखमपिस्यादितिनशंक्यं । पूर्णानंदकार्येणसम्यक्प्रसादेनदुःखा भावनिश्चयात् । ज्ञानवत्सुखस्यापिदुःखाविनाभावाभावाच्चेतिदर्शयितुंप्रयुक्तः । अत्रविषयवाक्यक्रमात्सूत्रक्रमः । अन्येतु ।** ॥ ५७४ ॥

गु० योगोत्पत्तिसंग्रहः । ननुसर्वगतस्यापिब्रह्मणोयदिक्रियावत्त्वमभ्युपगम्यतेतर्ह्युत्क्रांतिगत्यागतीनामित्यत्रसक्रियत्वेनजीवस्याणुत्वोक्तिरयुक्तेत्यतआह ॥ **जीवस्याणु**

SGDF
Sri Gargeshwari Digital Foundation

प्र० भूमेतिभावप्रत्ययांतत्वाद्भावस्यभवितृसापेक्षत्वात्प्राणस्यैवचानंतर्येणबुद्धौसन्निधानात्तस्यैवभवितृत्वेनान्वयः। नतुतरतिशोकमात्मविदित्युक्तः परमात्मा । विप्रकृष्टत्वात् । नच "तरतिशोकमात्मवि"दित्यादिनाऽऽत्मनःप्रकरणादात्मैवबुद्धिस्थइत्यात्मप्रकरणेनसन्निधिबाधात्सएवभूमेति युक्तं । नामवागादिप्रतीकोपदेशरूपाब्रह्मविषयोत्तरानुसारेणोपक्रमस्याप्यब्रह्मविषयत्वेनब्रह्मप्रकरणस्यानुत्थानात् । किंचप्राणतत्वमुपदिश्य प्राणोपासकस्यातिवादित्वनामकोत्कर्षमभिधायप्राणप्रकरणविच्छेदशंकानिवृत्तयेतदेवातिवादित्वमनुवर्त्यभूमानमुपदिशन्प्राणभूम्नोरभेदंगम यति । तस्मात्प्राणोभूमा । सुखत्वामृतत्वादिकंचकथंचिन्नेयमितिप्राप्ते "एषतुवाअतिवदतियस्सत्येनातिवदती"त्यत्रातिवादित्वहेतुप्राणोपासनं

जडरूपःपंचवृत्तिर्वायुरेवभूमेतिप्राप्ते निर्विशेषब्रह्मैवभूमेतिसिद्धांतइत्याहुः । तन्न । पंचवृत्तौ "तरतिशोकमात्मवि"दित्युपक्रमस्यात्मशब्दादेः "भूमैवसुख"मित्युक्तसुखत्वस्यचायोगेनपूर्वपक्षस्यातितुच्छत्वात् ।

प्र० तुशब्देनव्यावर्त्य मुख्यातिवादित्वहेतोर्ब्रह्मणस्सत्यशब्देनपरमार्थसत्त्ववाचिनापृथगुपदेशात् तथापरमोपक्रमे "तरतिशोकमात्मवि"दितिवेद्यतयापरमात्मनउच्यमानत्वान्निर्विशेषब्रह्मज्ञानोपयोगितयानामाद्यब्रह्मोपदेशोपपत्तेः आत्मप्रकरणेनचसन्निधानबाधात् तथा "यत्रनान्यत्पश्यती"तिद्वैतनिषेधेनभूम्नोलक्षणाभिधानेनाद्वैतःपरमात्मैवभूमेतिसिद्धांतइत्याहुरित्यर्थः ॥ जडेति ॥ "पंचवृत्तेःप्राणस्ये"तितदीयभाष्योक्तेरितिभावः ॥ आत्मशब्दादेरिति ॥ आत्मशब्दस्यमुक्तिहेतुवेदनविषयत्वादेश्चाचिद्व्यावर्तकत्वेनपूर्वाधिकरणईक्षत्यधिकरणादौचोक्तत्वात् । सुखस्यचेतनमात्रलिंगत्वादितिभावः । ननूक्तमत्रभामत्यांनामादिप्रतीकोपदेशरूपेणोत्तरेणब्रह्मविषयेणतरतिशोकमात्मविदितिप्रश्न

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्याप्यब्रह्मविषयत्वंवाच्यं । अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यापत्तेः । अतोनब्रह्मप्रकरणोत्थानमितिचेत् निर्विशेषब्रह्मज्ञानोपयोगितयानामाद्यब्रह्मोपदेशोपपत्त्यासावकाशेननामाद्यब्रह्मोपदेशरूपोत्तरेणप्रश्नस्यात्मश्रुतेर्मुक्तिहेतुवित्तिविषयत्वस्यचबाधायोगात् अन्यस्यचप्रबलजडप्रापकस्याभावात्सन्निहितसुखत्वस्यसर्वथाजडेऽनुपपत्तेश्चेति । ननुजडेप्राणश्रुतिप्रसिद्ध्यनुरोधेनसुखत्वंदुःखराहित्याद्याशयेननेयमित्यतआह ॥ **प्राणशब्दश्चेति** ॥ प्राणाः इंद्रियाभिमानिनः । व्यूदिरे विवादमकुर्वन् । प्राणःमुख्यप्राणः । एषाछंदोगश्रुतिः । "तान्वरिष्ठःप्राणउवाच । मामोहमापद्यथ । अहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामी"तिषट्प्रश्ने । आदिपदेन "तेहेमेप्राणाअहंश्रेयसिवि

प्राणशब्दश्च "तेहप्राणाअहंश्रेयसिव्यूदिरे । अहंश्रेयानस्म्यहंश्रेयानस्मीति । तान्वरिष्ठःप्राणउवाचे"त्यादौ तदभिमानिदेवतायामेवप्रसिद्धः । सिद्धांतोप्ययुक्तः ।

प्र० वदमानाब्रह्मजग्मुः । तद्धोचुःकोनोवरिष्ठ"इतिवाजसनेयश्रुतिर्ग्राह्या । एवशब्देनाभिमान्यधिकरणन्यायेनतत्रमुख्यत्वंसूचितं । श्रुतीनांजडपरत्वेवचनादेरयोगइतिभावः । एतेन नामवाक्चित्तसंकल्पादिजडप्रायपाठात्प्राणोजडइतिनिरस्तं । श्रौतप्रसिद्ध्याप्रायपाठबाधात् । त्वन्मतआनंदमयनये "असन्नेवसभवती"त्यानंदमयपुच्छविषयश्रुत्यापुच्छस्यब्रह्मत्वबोधिन्याऽन्नमयाद्यब्रह्मपुच्छप्रायपाठबाधवत् । नामादिशब्दानामभिमानिनयन्यायेन "नामाभिमानिनीचोषे"त्यादिवक्ष्यमाणस्मृत्याचचेतनार्थत्वेनजडप्रायपाठाभावाच्चेति । भूमत्वंचकिंवास्तव ॥ ५७५ ॥

प्र० मुतकल्पितं । नद्वयमपीत्याह ॥ **उक्तरीत्येति** ॥ "नहिदेशतःपूर्णत्वंभूमत्व"मित्यादिनापूर्वोक्तरीत्येत्यर्थः । उत्तमत्वस्य भूमत्वस्य ॥ **इति यद्भूमज्ञानफलमिति** ॥ यद्यपिभूमवाक्यादुपरि "अथातआत्मादेश"इत्युक्तात्मवाक्ये "सवाएषएवंपश्यन्नेवंमन्वानएवंविजानन्नात्मरतिरात्मक्रीडआत्ममिथुनआत्मानंदस्सस्वराट्भवति । तस्यसर्वेषुलोकेषुकामचारोभवती"त्यात्मज्ञानस्यैवफलंश्रुतं । तथापिभूमात्मनोरभेदादेवमुक्तं । अधिकरणशरीरंनिरस्यसूत्रार्थमप्यनूद्यनिराह ॥ **यच्चेति** ॥ अत्रसंप्रसादशब्दोऽधिकरणव्युत्पत्त्या, बृहदारण्यके "सएषएतस्मिन्संप्रसादेस्वप्नांतेबुद्धांते"इतिस्वप्नजागरितस्थानाभ्यांसहपाठाच्चसुप्तिपरः । तस्यांचप्राणोजागर्तीतितेनप्राणोलक्ष्यते । तथाचार्थमाह ॥ **तथाचेति** ॥ "प्रसिद्धप्राणादिपदपरित्यागेनाप्रसिद्धसंप्रसादपदोपादानेकारणाभावा"दितिसुधोक्तमुपलक्षणमितिभावेनाह ॥ **योगमुखेति** ॥

उक्तरीत्योपक्रमानुगुणस्यगुणज्यैष्ठ्यरूपस्योत्तमत्वस्यनिर्गुणेऽयोगात् । कल्पितज्यैष्ठ्यस्यच "भूमात्वेवविजिज्ञासितव्यः । भूमानंभगवोविजिज्ञासे"इत्युक्तं चरमकक्ष्यात्वेनमुमुक्षुजिज्ञास्यत्वमयुक्तं । किंच "सर्वेषुलोकेषुकामचारोभवती"तियद्भूमज्ञानफलंश्रुतंतदप्ययुक्तं । निर्विशेषज्ञानस्यहिसर्वलोकानांकामस्यचनिवृत्तिःफलं । नतुतत्रकामचारः । यच्चोक्तंसम्यक्प्रसीदत्यस्मिन्निति व्युत्पत्त्यासुषुप्त्यवस्थावाचिनासंप्रसादशब्देनतत्रजाग्रत्प्राणोलक्ष्यते । तथाचप्राणादूर्ध्वमुपदेशादित्याद्यसूत्रार्थइति । तन्न । अस्मद्रीत्यासुखेसंप्रसादशब्दस्ययोगसंभवेप्राणेयोगमुखलक्षणायाअयोगात् ।

गु० त्वेत्विति ॥ नन्वेतत्तदात्माद्यदिगुणज्यैष्ठ्यरूपमुत्तमत्वंस्यात् । नचैवं । देशतःपूर्णत्वस्यैवभूमत्वपदार्थत्वात् । तस्यचनिर्गुणेपिसंभवादित्यतआह ॥ उक्तरीत्येति ॥

SGDF Sri Gurgeshwari Digital Foundation

प्र० तस्यातिविलंबितत्वादितिभावः । अगत्यैवमाश्रीयतइतितत्राह ॥ **संप्रसादादित्यस्येति** ॥ अस्तुवायमेकएवहेतुः । तथापिसकिंपूर्वपक्ष निरासकोथभूम्नोब्रह्मत्वसाधकः । आद्यंप्रत्याचष्टे ॥ **किंचनतावदिति** ॥ "परमात्मैवेह भूमा नप्राण"इति परभाष्योक्तेर्द्वेधापिसंभवा द्विकल्पः ॥ **तद्विपरीतस्येति** ॥ प्रथममनाकांक्षितत्वान्नप्राणइत्यध्याहर्तव्यत्वाच्चेत्यर्थः । अध्याहारस्स्वपक्षहेतुत्वेपितुल्यः । साध्यपदाश्र वणादित्यतआह ॥ **स्वपक्षेति** ॥ **अतएवेति** ॥ "तत्तुसमन्वया"दित्यतस्साध्यनिर्देशस्यानुवर्तनादेवेत्यर्थः । ननुतत्त्विवितितुशब्दस्यावधा रणार्थत्वाद्भूमातदेवब्रह्मैवेत्युक्तावर्थान्नप्राणइत्यस्यलाभात्तत्रहेत्वन्वयइतिचेन्न । साक्षादुपात्तसाध्यान्वयत्यागेनार्थिकान्वयायोगात् । अतएव

संप्रसादादित्यस्यच "धर्मोपपत्तेश्चे"त्युत्तरसूत्रस्थचशब्दानुषंगेणपूर्णसुखत्वरूपहेत्वंतरपरत्वसंभवे अध्युपदेशादित्यनेनोक्तनिर वधिकोत्तमत्वंप्रत्यवधित्वेनसंकोचकत्वायोगाच्च । किंचनतावदयंभूम्नःप्राणत्वाभावेहेतुः। तत्वज्ञानार्थवादप्रक्रिययाप्रवृत्तेषुसूत्रे षुप्रथमाकांक्षितस्याध्याहारनिरपेक्षस्यचस्वपक्षहेतुत्वस्यसंभवे तद्विपरीतस्यपूर्वपक्षनिरासहेतुत्वस्यायोगात् । स्वपक्षसाधनहेतुत्वं हिपरपक्षनिरासहेतुत्ववन्नाध्याहारापेक्षं । समन्वयसूत्रस्थस्यतच्छब्दस्याध्यायपरिसमाप्त्यनुषंगेण भूमा तत् ब्रह्मेत्यन्वयात् । अत एव "आनंदमय"इत्यादिषुस्वपक्षसाधकसूत्रेषुपक्षहेत्वोरेवोक्तिः । "नेतरोनुपपत्ते"रित्यादिपरपक्षनिराससूत्रेषुतुसाध्यस्यापि ।

गु० देशतःपूर्णत्वंनभूमत्वं । वाग्वावनाम्नोभूयसीत्यादिवाक्येषुपूर्वत्रसर्वत्रभूयस्त्वस्यदेशतःपूर्णत्वस्यासंभवेनतत्रतस्यैववक्तव्यत्वादित्युक्तरीत्येत्यर्थः । ननुतात्विकस्यगु णज्यैष्ठ्यरूपंभूमत्वस्यनिर्गुणेऽसंभवेपिकल्पितस्यगुणज्यैष्ठ्यस्यतत्रसत्त्वेनसिद्धांतोयुक्तएवेत्यतआह ॥ **कल्पितेति** ॥ जाग्रदितिशक्यसंबंधोक्तिः ॥ **अस्मद्रीत्येति** ॥ ॥ ५७६ ॥
सम्यक्प्रसीदत्यनेनेतिसंप्रसादःपूर्णसुखमित्यस्मद्रीत्येत्यर्थः ॥ **अतएवेति** ॥ स्वपक्षसाधनहेतुत्वस्याध्याहारनिरपेक्षत्वादेवेत्यर्थः । ननुप्राणादुत्तरंश्रुतस्यमनोमया

SGDF
Sri Gargeshwari Digital Foundation

प्र० तादृशस्थलेसाध्यस्याप्युक्तिरित्युक्तमितिज्ञेयं । द्वितीयंनिराचष्टे ॥ **नापीति** ॥ "तस्माद्वाएतस्मात्प्राणमयात्। अन्योंतरआत्मामनोमय" इति तस्माच्चविज्ञानमयानंदमययोरुक्तेरित्यर्थः । ननुतत्रप्राणमयादूर्ध्वं । नतुप्राणादितिचेन्न । अस्यविशेषस्याप्रयोजकत्वात् । त्वन्मते तत्रमयटोविकारार्थत्वेनप्राणविकारस्यापिप्राणत्वात् । अन्यथातंप्रत्युदाहृतः "प्राणंदेवाअनुप्राणंती"तिश्लोकोऽनन्वितस्स्यात् । भृगुवल्ल्यां प्राणादेवचमनःप्रभृतीनामूर्ध्वमुपदेशाच्चेतिभावः । अविवादस्थलंचाह ॥ **भूमप्रकरणेचेति** ॥ अस्तुकोदोषइत्यतआह ॥ **त्वन्मतइति** ॥ तथाचहेतोर्व्यभिचारइतिभावः । धर्मोपपत्तेश्चेत्यस्यपरभाष्योक्तमर्थमनूद्यनिराह ॥ **यच्चेति** ॥ **विशेषेति** ॥ विशेषनिषेधस्यशेषाभ्यनु

नापिभूम्नोब्रह्मत्वेहेतुः । प्राणादूर्ध्वमुपदेशस्यानंदमयप्रकरणेमनोमयादिषुसत्त्वात् । भूमप्रकरणेचप्राणोपदेशादूर्ध्वं "सत्यंत्वेवविजिज्ञासितव्य"मितिसत्यशब्दार्थस्यब्रह्मणइव "विज्ञानंत्वेवविजिज्ञासितव्यं मतिस्त्वेवविजिज्ञासितव्या श्रद्धात्वेवविजिज्ञासितव्ये"त्यादेरुक्तत्वेनविज्ञानमतिश्रद्धाकृतिनिष्ठादिष्वपिसत्त्वात् । त्वन्मते मनोमयादीनांविज्ञानादीनांचाब्रह्मत्वात् । यच्चोक्तं "यत्रनान्यत्पश्यती"त्यादिनोक्तव्यवहाराभावरूपनिर्विशेषब्रह्मधर्माद्भूमाब्रह्मैवेतिद्वितीयसूत्रार्थइति । तन्न । तत्र "एवंपश्यन्नेवंविजानन्सर्वेषुलोकेषुकामचारोभवती"तिदर्शनादिव्यवहारस्याप्युक्तेः । नान्यत्पश्यतीत्यन्यदर्शनरूपविशेषनिषेधेनभूमद्रष्टृत्वस्याभ्यनुज्ञानाच्च ।

गु० देरानंदमयाधिकरणेब्रह्मत्वसमर्थनेनब्रह्मत्वात् । भूमप्रकरणेचप्राणोपदेशादूर्ध्वंश्रुतस्यविज्ञानादेरपिसैवहिसत्यादयइत्यधिकरणोक्तन्यायेनब्रह्मत्वेनसाध्यस्यापितत्रसत्त्वान्नव्यभिचारइत्यतोभवत्येवास्मत्सिद्धांतो नत्वत्सिद्धांतइत्याह ॥ **त्वन्मतइति** ॥ अनेनान्यतरानैकांतिकमित्युक्तंभवति । नन्वेवंप्रसादशब्दस्यसुखपरत्वेसंप्रसा

SGDF
Sri Gargeshwari Digital Foundation

प्र० ज्ञानगमकत्वादितिभावः ॥ **अन्यदर्शनादेरिति** ॥ तथाचभूमासद्वितीयएव । नतुनिर्विशेषोऽद्वैतइतिभावः ॥ **केचित्त्विति** ॥ "यत्र नान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमे"त्यादावुक्तोभूमाकिंप्रत्यगात्मरूपोजीवोथपरमात्मेतिसंशये नामादिषुप्रश्नोत्तरत्वेनप्रवृत्तस्य भूयस्त्ववचनस्यप्राणेपर्यवसानात् प्राणादूर्ध्वंतदनुक्तेः प्राणभूम्नोरभेदात् प्राणशब्दस्य "तरतिशोकमात्मवि"दित्यात्मजिज्ञासयाप्रक्रांतेप्रकरणे प्राणपर्यंतोपास्योपदेशहेतुनाप्राणसाहचर्यनिमित्तेनलक्षणयाजीवपरत्वात् प्रसिद्धजडवायुपरत्वेप्रक्रांतात्मशब्दायोगात् "प्राणोवैपिताप्राणोवै माताप्राणोभ्राताप्राणस्स्वसाप्राणआचार्यःप्राणोब्राह्मण"इत्युक्तपितृत्वादेरयोगात् तथा "पितृहावैत्वमसी"ति "मातृहात्वमसी"त्यादिना

अन्यदर्शनादेरेवनिषेधेनान्यस्यानुमतत्वाच्च। अत्रापि "धर्मोपपत्ते"रित्युक्ते
निर्धर्मकत्वमतप्रतिकूलताव्यक्त्यैव । केचित्तु । भूमाप्राणइत्येवपूर्वःपक्षः ।

प्र० तथा "उत्क्रांतप्राणा"नित्यारभ्यप्रवृत्तेन "नपितृहासी"ति "नमातृहासी"त्यादिनाचात्रप्रकरणेसप्राणेषुहिंसकेपुरुषेहिंसानिमित्तोपक्रोशवचनस्याप्राणेषुहिंसकेहिंसानिमित्तोपक्रोशाभावस्यचदर्शनेन केवलजडेहिंस्यत्वनिमित्तोपक्रोशादेश्चायोगात् लोकेचसजीवनिर्जीवयोरुपमर्दकारिषूपक्रोशतदभावोपलंभात्प्राणशब्दितोजीवएवभूमेतिप्राप्ते भूयोविषयप्रश्नप्रत्युत्त्योःप्राणपर्यंतत्वेपिप्राणवादिनोतिवादित्वोक्त्यनंतरं "एषतुवाअतिवदतियःसत्येनातिवदती"तितुशब्देनोपासकभेदंप्रतिपाद्य सत्योपासकस्यपूर्वस्मात्प्राणोपासकादाधिक्यकथनादतिवादित्वस्यस्वोपास्याधिक्यवादित्वरूपत्वात्सत्यशब्दावसेयंब्रह्मैवभूमा संप्रसादात्प्राणशब्दिताज्जीवादूर्ध्वमुपदेशात् । अमृतत्वस्वमहिमप्रतिष्ठितत्वसर्वात्मत्वा ॥ ५७७ ॥

प्र० दिधर्माणामुपपत्तेश्चब्रह्मैवभूमेतिसिद्धांतइत्याहुरित्यर्थः।तर्हिकोविशेषइत्यतआह ॥ **प्राणशब्दस्त्विति** ॥ जीवग्रहेहेतुद्वयमाह ॥ **प्राणोहेति** ॥ सिद्धांतस्यस्फुटत्वात्पूर्वपक्षस्यैवोपन्यासः । यदुक्तंप्राणशब्दश्चेतनपरइति तद्युक्तं । लाक्षणिकत्वंत्वयुक्तमित्याह ॥ **प्राणशब्दस्येति** ॥ **प्रसिद्धीति** ॥ प्रागुक्तश्रुतिप्रसिद्ध्यनुसारेणेत्यर्थः । तदीयसूत्रार्थोप्ययुक्तइत्याह ॥ **अतएवेति** ॥ अतश्शब्दार्थंव्यनक्ति ॥ **तथात्वइति** ॥

प्राणशब्दस्तुप्राणसहचारिणिजीवेलाक्षणिकः । "प्राणोहपिते"त्यादिनाप्राणेपितृत्वादिव्यपदेशात् । "पितृहावैत्वमसी"त्यादिनासप्राणस्यशरीरस्यहिंस्यत्वव्यपदेशाच्च । नहिकेवलजडस्यपितृत्वादिकंहिंस्यत्वंचयुक्तमित्याहुः । तन्न । प्राणशब्दस्यप्रसिद्ध्यनुसारेणप्राणाभिमानिदेवतावाचित्वेपि "अथयद्यप्येनानुत्क्रांतप्राणा"नित्यादिनोपपादितस्यपितृत्वादेःसंभवेनलक्षणायोगात् । "अथयद्यप्येनानुत्क्रांतप्राणा"नितिप्रकृतानामाचार्यादिजीवानामुत्क्रांतप्राणत्वस्योक्तत्वेनप्राणस्यजीवमात्रत्वायोगाच्च । नहिस्वयंस्वस्मादुत्क्रांतोभवति । अतएव "एषसंप्रसादोस्माच्छरीरात्समुत्थाये"तिश्रुतेःसंप्रसादोजीवः। तस्मादध्युपदेशादितिकेषांचित्सूत्राक्षरार्थोपिनिरस्तः। तथात्वेश्रुतौ प्राणशब्दस्यजीवेलक्षणापत्तेः। जीवसामान्यादध्युपदेशमात्रेणब्रह्मत्वासिद्धेश्च । त्वद्रीत्याश्रद्धादिषुव्यभिचाराच्च ।

प्र०त्वयातथोक्तत्वादितिभावः। महतःपरमव्यक्तमित्यादौत्वन्मतेजीवादधिकत्वेननिर्दिष्टेशरीरेब्रह्मत्वाभावादप्रयोजकोयंहेतुरित्याह॥**जीवेति**॥ **त्वद्रीत्येति** ॥ त्वन्मतेतेषामब्रह्मत्वात्सत्यवाक्यइवश्रद्धात्स्वेवेत्याधिक्यद्योतकतुशब्दस्यश्रद्धादौभावादितिभावः। तथाहितद्भाष्यंब्रह्मोपासनंसत्यं

SGDF Sri Gangadhar Digital Foundation

प्र० त्वेवविजिज्ञासितव्यमुपदिश्यतदुपायभूतंब्रह्ममननंमतिस्त्वेवविजिज्ञासितव्येत्युपदिश्य श्रवणप्रतिष्ठार्थत्वान्मननस्यमननोपदेशेनश्रवणमप्यर्थोत्सिद्धंमत्वाश्रवणोपायभूतांब्रह्मणिश्रद्धांश्रद्धात्वेवविजिज्ञासितव्येत्युपदिश्ये"त्यादि । ननुसंप्रसादोस्मादितिश्रुतौजीवेप्रसक्तेनजीववाचिना सौत्रसंप्रसादशब्देनजीवस्योक्तेस्तदनुरोधाच्छ्रुतौलक्षणाश्रीयतइत्यतआह ॥ **संप्रसादइति** ॥ संप्रसादशब्दस्यजीवेऽभिधानाद्यभावेनरूढ्यभावात्स्वयोग्यकिंचित्पूर्णसुखवतितस्मिन्संबद्धंप्रसादशब्दितंसुखंयस्येतिव्युत्पत्त्यासुखसंबद्धोजीवःसंप्रसादशब्देनग्राह्यः । नचात्रमुख्यार्थस्य तत्सुखमित्युक्तस्यसन्निहितपूर्णसुखस्यत्यागेनजीवग्रहणेहेतुरस्ति । येनश्रुतौतद्बलाल्लक्षणाश्रीयेतेत्यर्थः । किंचजीवादाधिक्येनोपदेशस्यवागादावपिसत्त्वात्तत्रापिव्यभिचारइतिभावेनाह ॥ **नामेति** ॥ "नामाभिमानिनीचोषातस्याब्रह्मपरंस्मरे"दित्यादिछांदोग्यभाष्योदाहृतस्मृत्ये

संप्रसादोस्मादितिश्रुतौशरीरात्समुत्थानलिंगेनसंप्रसादशब्दस्याल्पसुखयुक्तजीवेकथंचिद्यौगिकत्वेपि सूत्रेऽल्पसुखयुक्तजीवपरत्वेहेत्वभावाच्च । "नामाभिमानिनीचोषे"त्यादिस्मृत्यानामादीनामपिजीवविशेषत्वाच्चेति । टीकाक्षरार्थस्तु

गु० दोस्माच्छरीरादितिश्रुतावपिसुखपरत्वंस्यात् । यदिचतत्रजीवपरत्वंतर्हिसंप्रसादादितिसूत्रस्थप्रसादशब्दस्यापिजीवपरत्वमितिसमानमित्यतआह ॥ **संप्रसादइति**॥ अल्पत्वंसुखविषयं तच्चतत्सुखंच तद्युक्तोजीवइतिवदताादुःखबाहुल्यवज्जीवपरत्वंसंप्रसादशब्दस्यनसंभवति । नहिगंगायांघोषइत्यत्रगंगाशब्दस्तीरपरइत्येतावतागं

SGDF Sri Gargeshwari Digital Foundation

प्र०त्यर्थः। “धर्मोपपत्तेश्चे”तिसूत्रार्थोनविरुद्धइतिनदूषितः। “प्रतिसूत्रंप्रकाश्येतेघटनाघटनेमये”त्युक्तेः प्रायिकत्वाभिप्रायत्वादद्वैतमतएतत्सूत्रार्थस्यापिदूषणाच्चनप्रतिज्ञाविरोधः। एतेनरामानुजरीतिमनुसृत्यपूर्वोत्तरपक्षौकुर्वतःकस्यचिच्छैवस्यमतंप्रत्युक्तंध्येयं। यदत्रसौत्रहेतोश्चंद्रिकोक्तव्यभिचारनिरासायसंप्रसादाज्जीवादधिकात्मत्वेनोपदेशादित्यर्थइत्युक्तं तन्न। सूत्रे अध्यात्मोपदेशादितिनिर्देशाभावात्। यदत्रोक्तं शिवार्कमणिदीपिकायां “निरतिशयसुखवर्णनपरस्यभूमोपदेशस्यात्मविषयत्वंस्पष्टमितिहेतावपेक्षितमप्यात्मत्वविशेषणंसूत्रेनकृत”मिति तन्न। अधिकत्वस्यापिस्पष्टत्वेनावाच्यत्वापातात्। भूमोपदेशस्यात्मविषयत्वायनिरतिशयसुखत्वस्यहेतुत्वेनावश्यकत्वेऽस्मन्मतरीत्यासंप्रसादादित्यस्यैवतदर्थत्वस्यन्याय्यत्वेनतेनात्मत्वंप्रसाध्याधिकात्मत्वेनोपदेशादित्याद्युक्तेःक्लिष्टत्वात्। “भूमानारायणाख्यस्स्यात्सएवाहंकृतिस्स्मृत”इत्यादिस्मृतिविरोधान्नशिवइतिसिद्धांतस्यानुत्थानाच्चेति॥ **स्पष्टइति**॥ उपन्यासमुखेनविवृतइत्यर्थः॥ ७॥ **भूमाधिकरणं**॥ २॥

स्पष्टः। यद्यपिश्रुतौविश्वतःपरममितिद्राविडपाठः। तथापिविश्वतः परमामित्यांध्रपाठोभाष्यउदाहृतः॥ ७॥ भूमाधिकरणं॥ २॥

गु० गायांमत्स्यइत्यत्रापितत्परोभवति। तदिहसंप्रसादोस्माच्छरीरादित्यत्रबाधकसद्भावेनसंप्रसादशब्दस्यजीवपरत्वेप्यन्यत्रनतत्परत्वं। अन्यथातिप्रसंगःस्यादितिभावः॥ ७॥ **भूमाधिकरणं**॥ २॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०॥ॐअक्षरमंबरांतधृतेःॐ॥ "अत्राविनाशित्वसाम्याच्चित्प्रकृतौहरौचसाधारणस्याक्षरनाम्न"इत्यादिपादादिसंगत्युक्तिपराटीकानयुक्तेव । अविनाशित्वसाम्येक्षरनाम्नस्साधारण्येबीजाभावात् । यद्यपि "अविनाशित्वस्याक्षरशब्दप्रवृत्तिनिमित्तत्वादित्यत्रोपस्कर्तव्य"मितिन्यायविवरणटीकोक्त्यासबीजत्वं । तथाप्यक्षरशब्दस्यविष्णुचित्प्रकृत्योर्यौगिकत्वेनलिंगतापत्त्यानाम्नइत्युक्तययुक्तेश्चेत्यतोमूलोक्तितद्व्याख्यानादिटीकां विवरिष्यन्नन्यत्रप्रसिद्धत्वंतावदाशंक्यनिराह ॥ यद्यपीत्यादिना ॥ क्वचनेतिनिपातसमुदायः ॥ किंत्विति ॥ इहचवर्णेद्रष्टृत्वादेरयोगान्नपूर्वपक्ष्यभिप्रेतइतिभावः । कार्तार्हिपूर्वपक्षकोटिः । कथंचोभयसाधारण्यं । वर्णव्यावृत्तस्यतद्बीजस्याभावादित्यतआह ॥ उभयत्रेति ॥ अविनाशित्वंतुवर्णादिव्यावृत्तकोटिद्वयमात्रसाधारणमित्यग्रेविवरिष्यामइतिभावः । एतेनटीकैतन्मूलेतिसूचितं । ननुवक्ष्यमाणदिशारूढे

॥ ॐअक्षरमंबरांतधृतेःॐ॥ यद्यप्यक्षरशब्दोवर्णेषुलोकतःप्रसिद्धः । तथापिनतस्यान्यत्रप्रसिद्धता । नहिसाब्रह्मणोन्यत्रयत्रक्वचनप्रसिद्धता । किंतुपूर्वपक्ष्यभिप्रेतेऽन्यत्र । उभयत्रप्रसिद्धत्वंतु "विष्णोश्चेतनप्रकृतेश्चाविनाशित्वसाम्यादक्षरशब्दःसाधारण"इतिन्यायविवरणएवोक्तं ।

गु० ॥ ॐअक्षरमंबरांतधृतेःॐ॥ नन्वक्षरशब्दस्योभयत्रप्रसिद्धशब्दसमन्वयप्रतिपादकपादेसमन्वयप्रतिपादनेपादासंगतिः । तस्यवर्णादौरूढत्वेनान्यत्रप्रसिद्धत्वादित्यतआह ॥ यद्यपीत्यादिना ॥ सा अन्यत्रप्रसिद्धता । ननुचाविनाशित्वरूपप्रवृत्तिनिमित्तसाधारण्येनाक्षरशब्दस्योभयत्रप्रसिद्धत्वंकिमर्थमुच्यते । प्रयोगसाधा ॥ ५७९ ॥

प्र०रप्यावश्यकत्वात्तस्याश्चप्रयोगबाहुल्यादिरूपत्वात्प्रयोगवशादेवसाधारण्यंकुतोनोक्तं । किंरूढितोप्यमुख्ययोगाश्रयणेनेत्यतआह॥प्रयोगेति॥ "ययातदक्षरमधिगम्यत"इत्यादिप्रयोगात्कथमेतदित्यतउक्तं संप्रतिपन्नेति ॥ तत्रासंमतेरितिभावः । नन्वस्ति "परतःपरमक्षरं । हरिमेवे"तिस्मार्तप्रयोगइत्यनुशयादाह ॥ वर्णादीति ॥ वर्णेलोकतः । जडप्रकृतौचस्मार्तः ॥ अर्थद्वयेति ॥ तन्मात्रसाधारण्यस्यैववक्तव्यत्वेनाग्रेसाधनादितिभावः । ननुद्रष्टृत्वादिनावर्णजडप्रकृत्योर्निरासेद्वयमात्रवृत्तित्वंस्यादित्यतोहेत्वंतरमाह ॥ प्रवृत्तीति ॥ श्रीतत्वादौस्थलांतर

प्रयोगसाधारण्येनोभयत्रप्रसिद्धतातुनोक्ता । पूर्वपक्षिणंप्रतिसंप्रतिपन्नप्रयोगाभावात् । वर्णादिसाधारणेनतेनब्रह्मचित्प्रकृतिरूपार्थद्वयमात्रासाधारण्यासिद्धेश्च । प्रवृत्तिनिमित्तोपजीविस्थलांतरस्थप्रयोगानुसंधाननिरपेक्षेसमन्वेतव्यशब्दप्रवृत्तिनिमित्तसाधारण्यप्रयुक्तउभयत्रप्रसिद्धत्वेसंभवति तत्सापेक्षस्यतस्यानादरणीयत्वाच्च ।

गु० रण्येनाप्युभयत्रप्रसिद्धत्वोपपत्तेरित्यतआह ॥ प्रयोगेति ॥ पूर्वपक्षिणंप्रतीति ॥ ब्रह्मणिचित्प्रकृतौचेतिशेषः । किंचप्रयोगसाधारण्येनाक्षरशब्दस्यचित्प्रकृतिब्रह्मरूपोभयप्रसिद्धतानसंभवति । तस्यचित्प्रकृतिब्रह्मणोरिववर्णादावपिसत्त्वादित्यतआह ॥ वर्णादीति ॥ ननुचनप्रयोगमात्रमुभयत्रप्रसिद्धिसाधकत्वेनोच्यते । येनातिप्रसंगःस्यात् । किंनामप्रवृत्तिनिमित्ताविनाशित्वोपजीविप्रयोगसाधारण्यमेव । नचैवंब्रह्मणिप्रयोगोनास्तीतिनतस्योभयत्रप्रसिद्धत्वमितिवाच्यं । विषयवाक्येप्रवृत्तिनिमित्तोपजीविप्रयोगाभावेपिस्थलांतरेतत्संभवादित्यतआह ॥ प्रवृत्तिनिमित्तेति ॥ ननुयदिप्रयोगसाधारण्यस्यवर्णादिसाधारणत्वेनतेनब्रह्मचित्प्रकृतिरूपार्थद्वयमात्रसाधारण्यासिद्ध्यातस्योभयत्रप्रसिद्धिसाधकत्वंनांगीक्रियते तर्ह्यविनाशित्वरूपप्रवृत्तिनिमित्तसाधारण्येनाप्युभयत्रप्रसिद्धत्वंनस्यात् । प्रवृत्तिनिमित्तसाधारण्यस्यापिवर्णादिसाधारणत्वेनब्रह्मचित्प्रकृतिरूपार्थद्वयमात्रसाधारण्यासिद्ध्यापातादित्यतः स्यादेतदेवं यदिप्रवृत्तिनिमित्तसाधारण्यमात्रेणैवोभयत्रप्रसिद्धतोच्येत । किं

SGDF Sri Gangadhar Digital Foundation

प्र० प्रयोगस्यावयववृत्त्यैवोपपत्तौरूढेरकल्पनादितिभावः । नन्वेवंप्रवृत्तिनिमित्तस्याकाशादावपिसत्त्वेनकथंद्वयमात्रवृत्तित्वमक्षरशब्दस्येत्याशं
कांहृदिकृत्वा "उपलक्षणंचैतत् । अक्षरशब्दस्यतत्रप्रसिद्धत्वादितिद्रष्टव्य"मितिन्यायविवरणटीकायां "अविनाशित्वसाम्या"दित्यस्योपलक्ष
णत्वोक्तेर्बीजंवदंस्तदनुरोधेनात्रापिटीकायामविनाशित्वसाम्यादित्यनंतरंतत्रप्रसिद्धत्वाच्चेत्यपिद्रष्टव्यमितिभावेनयोगस्यसाधारण्यमुपेत्यरूढिब
लाच्चोभयमात्रवृत्तित्वंद्रष्टव्यमित्येकंपक्षंतावदाह ॥ **अत्रचेति** ॥ **अतएवेति** ॥ योगरूढिभ्यांसाधारण्यस्याभिमतत्वादेवेत्यर्थः । "अक्षर
त्रयमीरित"मितिजडप्रकृतौ, "यस्त्वेतंत्रिमात्रेणोंकारेणैवाक्षरेणपरमपुरुषमभिध्यायीते"त्योंकारेचप्रयोगात्तयोरपिरूढेरविनाशित्वयोगस्यच
सत्त्वाद्द्वयोरेवव्यवच्छेद्यतयोक्तिः । योगमात्रस्याभिमतत्वेतस्यनित्यमात्रेपिसत्त्वेनतन्मात्रमेवव्यवच्छेद्यतयोपादीयेतेत्यर्थः । ननुवर्णमात्रेपि
योगरूढिभावोस्तीतिचेत्सत्यं । वर्णमात्रोपलक्षणमेतट्टीकायां । अतएवन्यायविवरणटीकायां "नन्वचेतनप्रकृतौवर्णेषुचकुतोनशंके"त्युक्तमि
तिध्येयं । ननुयोगरूढ्योर्जडप्रकृत्यादावपिभावेसतिपूर्वोत्तरकोटिद्वयमात्रसाधारण्याभावाद्द्रष्टृत्वादिनासंशयादिकोटित्वशंकानिरासवदुभय

**अत्रचाक्षरशब्दोयोगमात्रस्यातिप्रसक्तत्वात्पंकजादिवद्योगरूढः । तत्ररूढ्यंशसाधारण्यस्य "अक्षरत्रयमीरित"मित्यदृश्यत्वा
धिकरणभाष्योदाहृतस्मृत्यैवसिद्धेर्योगांशसाधारण्यमात्रं "अविनाशित्वसाम्या"दितिन्यायविवरणउक्तं । अतएवटीकायां
"द्रष्टृत्वादिश्रवणाज्जडप्रकृतेरोंकारस्यचनसंदेहनिविष्टत्व"मित्युक्तं । अन्यथाहिनित्यमात्रस्यनसंदेहनिविष्टत्वमित्यवक्ष्यत् ।**

गु० नामरूढिसहितयोगसाधारण्यमेव । अक्षरादिशब्दानांयोगरूढत्वादितिभावेनाह ॥ **अत्रचेति** ॥ **अतएवेति** ॥ रूढियोगसाधारण्यस्योभयत्रप्रसिद्धिसाधकत्वे
नाभिमतत्वादेवेत्यर्थः ॥ **अन्यथेति** ॥ अविनाशित्वरूपप्रवृत्तिनिमित्तसाधारण्यमात्रस्यैवोभयत्रप्रसिद्धिसाधनत्वेऽभिमतइत्यर्थः । ननुरूढियोगसाधारण्यस्यापिप्रकृ

SGDF Sri Gargeshwari Digital Foundation

प्र० त्रप्रसिद्धत्वाभावमाशंक्यकुतोनतन्निरासः कृतइत्यतआह ॥ जडेति ॥ यद्येवंतर्हिन्यायविवरणोक्तस्योपलक्षणत्वमुपेत्यरूढिरपिनोपादेया । योगस्यान्यसाधारण्येपिसंशयकोटिद्वयसाधारण्यमात्रेणतदुपपत्तेरित्यतोयोगस्यानतिप्रसक्तत्वसंभवात्कोटिद्वयमात्रवृत्तित्वमक्षरशब्दस्य । अतएवात्रटीकायां "अविनाशित्वसाम्या"दित्येवोक्तिः । नतुरूढ्याचेतिरूढ्यंशस्यापि । अतएवचयोगस्यान्यसाधारण्याभावशंकायामन्यसाधारण्येनोभयत्रप्रसिद्धत्वाभावशंकाभावः । जडप्रकृतेरोंकारस्यचेतिविशिष्यद्वयोरेवनिषेधस्तुतत्रनयोगसंभवाभिप्रायः । अपितुरूढ्याऽक्ष

जडप्रकृत्यादिसाधारण्येनाक्षरशब्दस्योभयत्रप्रसिद्धत्वाभावस्तुटीकायां नशंकितः । अन्यसाधारण्येपिसंशयकोटिसाधारण्यमात्रेणतत्सिद्धेः ।

गु० तिवर्णसाधारणत्वेनतेनापितत्रब्रह्मचित्प्रकृतिरूपार्थद्वयमात्रसाधारण्यसिद्धिःकथंस्यादित्यतआह ॥ जडप्रकृत्यादीति ॥ आदिपदेनवर्णसंग्रहः । विष्णुचित्प्रकृतिवर्णसाधारणत्वाद्द्वयमात्रसाधारण्याभावादुभयत्रप्रसिद्धत्वंकथमितिशंकाभावोवक्ष्यमाणहेतोरितिभावः । संदेहकोव्योरेवसाधारण्यस्यविवक्षितत्वादितिभावः । नन्वन्यसाधारण्येसंशयकोटिसाधारण्यमात्रेणोभयत्रप्रसिद्धतेत्ययुक्तं । द्वयमात्रसाधारण्यस्यैवोभयत्रप्रसिद्धिसाधकत्वात् । न्यायविवरणेपूर्वाधिकरणेद्युभ्वाद्यायतनत्वादौसंशयकोटिमात्रसाधारण्योक्तेः । तथाचोत्तरत्रसच्छब्दस्यस्वतःसर्वसाधारणस्यापिकारणत्वमुखेनद्वयमात्रसाधारण्योक्तेः । तथा "आहोभयगतत्वंचे"त्यनुव्याख्यानेसिद्धांतेनिरसनीयत्वेनयत्साधारण्यंप्रसक्तंतस्यैवोभयत्रप्रसिद्धत्वेनोक्तत्वाच्च । अन्यथाप्रवृत्तिनिमित्तमात्रसाधारण्यस्यवा प्रयोगसाधारण्यस्यवा वर्णादिसाधारण्यस्यापिसंशयकोटिसाधारण्यमात्रेणैवोभयत्रप्रसिद्धत्वोपपत्तौयोगरूढ्यंगीकारवैयर्थ्यापत्तेरित्यस्वरसान्न्यायविवरणानुव्याख्यानस्वारस्यानुरोधात्पक्षांतरमाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० रशब्दार्थत्वंतयोरप्यस्तीत्यभिप्रायइतिभावेनयोगस्यानतिप्रसक्तत्वंतावत्साधयति ॥ **अथवेति** ॥ इहनक्षरतीत्यक्षरमितिशरीरवियोगराहित्यरूपमविनाशित्वमभिमतं । तच्चचित्प्रकृतीश्वरयोरेव । नान्यत्रेतिवक्तुंदेहवियोगस्यनाशशब्दार्थत्वंतावदाह ॥ **स्वरूपेति** ॥ **प्रयोगादिति** ॥ शरीरक्षरणाभावेत्यादिनान्वयः । "तन्नोन्नशद्य:पितरंनवेदे"त्यादिश्रुतौ "नाशितापृथिवीसर्वाधार्तराष्ट्रैस्तुदुर्नयैरि"त्यादिस्मृत्यादौच प्रयोगादित्यर्थः । अस्त्वेवं । तद्राहित्यंचित्प्रकृतौहरौचकुतः । येनतयोरक्षरशब्दोयौगिकःस्यादित्यतआह ॥ **द्वाविति** ॥ **स्मृतौचेति** ॥ गीतायां ॥ **जीवस्यक्षरत्वमुक्त्वेत्यादि** ॥ तथाचचित्प्रकृतौदेहवियोगराहित्यंज्ञायतइतिवाक्यशेषः । स्वरूपध्वंसाभावस्योभयत्राविशिष्टत्वाद्देहवियोगस्याप्यविशिष्टत्वेतद्योग्यजीवस्यक्षरत्वमुक्त्वाचित्प्रकृतेरक्षरत्वोक्तिर्नस्यादितिभावः । विष्णोर्देहवियोगराहित्यंतु "नित्योनित्याना"मित्यादिश्रुत्यादिनाप्रमितमितिभावः । तावतातस्याक्षरपदप्रवृत्तिनिमित्तत्वंकुतः । येनाक्षरशब्दस्तयोरेवस्यादित्यतआह ॥ **लक्ष्मीरिति** ॥ "ब्रह्माशिवस्सुरेशाद्याश्शरीरक्षरणात्क्षराः । लक्ष्मीरक्षरदेहत्वादक्षरातत्परोहरि"रितितत्वनिर्णयोक्तश्रुतावित्यर्थः ॥ **प्राभाकरेति** ॥ प्रथमस्यचतुर्थेना

अथवास्वरूपध्वंसइवशरीरवियोगेपिनाशशब्दप्रयोगात् "द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच । क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यत"इतिस्मृतौचजीवस्यक्षरत्वमुक्त्वाचित्प्रकृतेरक्षरशब्दवाच्यत्वोक्तेः "लक्ष्मीरक्षरदेहत्वादक्षरे"त्यादिश्रुतौशरीराक्षरणस्यनिमित्तत्वोक्तेश्चाव्यभिचरितेशरीरक्षरणाभावरूपाक्षरणविशेषेकेवलयौगिकोक्षरशब्दः । प्राभाकरमतेऽचिरनिर्मथनत्वरूपनिर्मथनविशेषेनिर्मंथ्यशब्दइव । ॥ ५८१ ॥

गु० **अथवेति** ॥ तर्हिपंकजशब्दस्यापिपंकजननविशेषनिमित्तकेवलयौगिकत्वोपपत्तौयोगरूढत्वंनस्यादित्याशंकते ॥ **नचेति** ॥ केवलयौगिकत्वंस्यादित्यतस्तेषामसि

प्र० मधेयपादे "तथानिर्मंथ्ये"इतिदशमेधिकरणे "निर्मंथ्येनेष्टकाःपचंती"त्यत्रश्रुतोऽग्निवाचकोनिर्मंथ्यशब्दोऽरणिमथनसंस्कारनिमित्तकोथाग्नित्वजातिनिमित्तकइतिसंशये मथनकर्मत्वस्यनिष्पन्नेग्नावभावात् "निर्मंथ्येनपश्याम"इतिलौकिकेपिप्रयोगान्नसंस्कारनिमित्तकइतिप्राप्तेअचिरनिर्मथनविशिष्टेग्नौनिर्मथनविशेषस्यसत्त्वेनतत्रयौगिकइत्युक्तं । आधानकालेनिर्मंथ्यगार्हपत्येनित्यंधृतोग्निश्चिरनिर्मथितः । सद्यएवलौकिकमथनेनजातोग्निरचिरनिर्मथितः । तेनेष्टकाःपच्यंते । यथापुरातननूतनयोर्घृतयोर्नवनीतजन्यत्वेसमानेपिनूतनमेवनावनीतमितिव्यवह्रियते तद्वन्निर्मंथ्यशब्दस्यमथनकर्ममात्रेपाणिनिस्सरणेप्यचिरनिर्मथितेचिरनिर्मथितव्यावृत्ताचिरनिर्मथनविशेषविशिष्टेयौगिकएव । ननुतद्व्यावृत्त्यर्थंरूढिरप्याश्रयणीयेतियथोच्यते तथात्राप्यन्यव्यावृत्ताविनाशविशेषनिमित्तयौगिकएव । नत्वन्यव्यावृत्त्यर्थंरूढिरप्याश्रयणीयेत्यर्थः । नन्वेवंनिबंधनमते "कॢप्तशक्तिकावयवयोगादेवपंकजादिशब्दः । अन्यथासमुदायशक्तिकल्पनागौरवापत्ते"रितिनयविवेकवरदराजीययोरुक्त्यातदप्यनुमतमितिभ्रमनिरासायतदाशंक्यनिराह ॥ **नचैवमिति** ॥ जातिप्रतीतावपिकॢप्तावयवशक्त्यैवप्रयोगइतिनिबंधनमतंनिराह ॥ **पंकजननेति** ॥ ननुनेदमक्षरपदप्रवृत्तिनिमित्तमव्याप्तेरित्यतआह ॥ **वर्णादौत्विति** ॥ तत्रयौगिकत्वाभावान्नाव्याप्तिर्दोषायेतिभावः ।

नचैवंपंकजादेरपिकेवलयौगिकत्वापातः । तत्रपद्मत्वजातेरपिप्रतीतेः । पंकजननविशेषस्यनिमित्तत्वेमानाभावाच्च । कुमुदादिव्यावृत्तस्यपद्मेपंकजननविशेषस्याभावाच्च । अत्रत्वनेकाक्षरानुगतजातिभेदस्याप्रतीतेः । अक्षरणविशेषस्यनिमित्तत्वेस्मृतेरुक्तत्वाच्च । इतरव्यावृत्तस्यक्षरणरहितशरीरयोगरूपस्यविशेषस्यसत्त्वाच्च । वर्णादौतुरूढः । वर्णादिजातिभेदप्रतीतेः ।

गु० द्धिमाह ॥ **अत्रत्विति** ॥ ननुयोगस्यवर्णादिसाधारणत्वेनकथंतेनोभयत्रप्रसिद्धतेत्यतआह ॥ **वर्णादाविति** ॥ नन्वस्त्वक्षरशब्दस्यवर्णेरूढिः । तथापिप्रकृते

SGDF Sri Gargeshwari Digital Foundation

प्र० कथंतर्हिद्वयमात्रसाधारण्यमक्षरपदस्येत्यतआह ॥ इहचेति ॥ यथाहिपरमते "अजामेका"मितिवाक्यस्थाजाशब्दश्छाग्यांरूढोपिनतत्पर इतिवक्ष्यतेचतुर्थपादे तथेतिभावः ॥ उत्तरत्रेति ॥ ईक्षत्यधिकरणे ॥ इत्यनुव्याख्यानइति ॥ प्रागुदाहृतमेतत् । व्याख्यातंचास्माभिः । एवंन्यायविवरणटीकारीत्यायोगरूढिभ्यांवा भाष्यटीकारीत्याऽनतिप्रसक्तयोगमात्रेणवाद्वयसाधारण्यंन्यायविवरणेऽभिप्रेतमित्युक्तं । पक्षां

इहचद्रष्टृत्वादिनारूढार्थबाधाद्यौगिकोक्षरशब्दोद्वयमात्रसाधारणः । इदमेवचब्रह्मचित्प्रकृतिरूपार्थद्वयमात्रसाधारणशरीराक्षरणंन्यायविवरणेऽविनाशित्वपदेनविवक्षितं । वक्तव्यंहिद्वयमात्रसाधारण्यं । न्यायविवरणेपूर्वत्रद्युभ्वाद्यायतनत्वादौ संशयकोटिमात्रसाधारण्योक्तेः । तथोत्तरत्रसच्छब्दस्यस्वतःसर्वसाधारणस्यापिकारणत्वमुखेनद्वयमात्रसाधारण्योक्तेः । तथा "आहोभयगतत्वंचस्यादतोलिंगशब्दयो"रित्यनुव्याख्यानेसिद्धांतेनिरसनीयत्वेनयत्साधारण्यंप्रसक्तंतस्यैवोभयत्रप्रसिद्धत्वेनोक्तत्वाच्च । इंद्रादिशब्देषुतुरूढ्यादिनैवपूर्वपक्षितत्वान्नैश्वर्यादिप्रवृत्तिनिमित्तसाधारण्यमितिनातिप्रसंगः ।

गु० रूढार्थोवर्णोप्यक्षरशब्दार्थइतिकथमक्षरशब्दस्यब्रह्मप्रकृतिरूपार्थद्वयमात्रसाधारण्यमित्यतआह ॥ इहचेति ॥ रूढार्थबाधादिति ॥ अनेनोदाहृतटीकावाक्यंयोजितंभवति । ननुशरीराक्षरणरूपप्रवृत्तिनिमित्तस्योभयसाधारण्यप्रयोजकत्वेन्यायविवरणविरोधः । तत्राविनाशित्वस्यैवतत्प्रयोजकत्वेनोक्तत्वादित्यतआह ॥ इदमेवचेति ॥ नन्वक्षरशब्दप्रवृत्तिनिमित्तस्यशरीराक्षरणस्यब्रह्मचित्प्रकृतिसाधारण्येनाक्षरशब्दस्योभयत्रप्रसिद्धत्वे इंद्रादिशब्दप्रवृत्तिनिमित्तस्यपरमैश्वर्यस्यापींद्रब्रह्मरूपार्थद्वयसाधारण्येनोभयत्रप्रसिद्धत्वापत्त्याऽन्यत्रप्रसिद्धसमन्वयप्रतिपादकपादासंगतिरित्यतआह ॥ इंद्रादिशब्देष्विति ॥ आहुरित्यस्वरसोद्भावनं । तद्वी

SGDF Sri Gargeshwari Digital Foundation

प्र० तरंचाह ॥ **केचित्त्विति** ॥ “अविनाशित्वस्याक्षरशब्दप्रवृत्तिनिमित्तत्वा”दितिन्यायविवरणटीकाविरोधाद्वा “तत्तेजोसृजते”त्यत्रकारण त्वस्यैवेहनित्यत्वस्यसाक्षादश्रवणेनसर्वाधारत्वान्यथानुपपत्तिकल्प्यत्वाद्वाकेचित्त्वित्युक्तिरित्याहुः । अस्मिन्पक्षेप्रवृत्तिनिमित्तंतु अश्नुतेव्याप्नो तीत्यक्षरमित्यादिरूपेणबोध्यमितिभावः । अक्षरशब्दस्यकेवलयौगिकत्वंयोगरूढत्वंचेतिस्वोक्तपक्षद्वयेपिनामत्वंव्यनक्ति ॥ **टीकायामिति** ॥ **रूढत्वादिति** ॥ यान्यापाततोरूढान्येवतानिनामानितद्विपरीतानिलिंगानीत्युक्तत्वात्संशयकोस्त्योयौगिकत्वेप्यक्षरशब्दस्यवर्णेषुरूढत्वान्नाम त्वंयुक्तं । यथानंदमयादेःपूर्वोत्तरपक्षयोर्यौगिकत्वेपिकोशेषुरूढत्वान्नामत्वं तद्वदितिभावः । यान्यापाततोरूढानितानिनामानि । यान्यापा ततोयौगिकानितानिलिंगानीतितैर्लक्षणांतरस्याप्युक्तत्वादक्षरशब्दोयोगरूढइतिपूर्वोक्ताद्यपक्षेपिनामत्वंयुक्तमित्यर्थः ॥ **केवलेति** ॥ यान्या

केचित्तु न्यायविवरणेऽविनाशित्वंप्रवृत्तिनिमित्तमितिनाभिप्रेतं । किंतुसर्वाधाराक्षरत्वमनित्यदेहस्यनयुक्तमितिनित्यदेहस्यैवतद्वाच्यं । तच्चब्रह्मचित्प्रकृतिमात्रसाधारणं । एवंचयथोत्तराधिकरणेस्वरूपेणसर्वसाधारणोपिसच्छब्दः कारणत्वमुखेनब्रह्मजडप्रकृतिमात्रसाधारणः एवमक्षरशब्दःस्वरूपेणवर्णादिसाधारणोपिनित्यदेहत्वमुखेनब्रह्मचित्प्रकृतिमात्रसाधारणइत्यभिप्रेतमित्याहुः । टीकायांनामत्वोक्तिस्तुमध्यमाक्षरादौयौगिकत्वपक्षेवर्णेषुरूढत्वात् । योगरूढत्वपक्षेतुयोगरूढानांनामलिंगात्मकत्वपक्षेमध्यमाक्षरादावपिनामत्वस्यापिसत्त्वात् । केवलनामत्वपक्षेतुनामत्वस्यैवसत्त्वात् ।

गु० जंतु अस्मद्रीत्यासाक्षात्प्रवृत्तिनिमित्ततयैवोभयसाधारण्यसंभवेसर्वाधाराकाशाधारत्वलब्धनित्यदेहत्वमुखेनोभयत्रप्रसिद्धत्वकल्पनस्यगौरवग्रस्तत्वादिति । ननुटीकायामक्षरनाम्नइत्यक्षरशब्दस्यनामात्मकत्वस्योक्तत्वाद्यौगिकत्वेतद्विरोधइत्यतआह ॥ **टीकायामिति** ॥ टीकोक्तनामतासमर्थनेनानुव्याख्यानन्यायविवरणयोर्वै

SGDF
Sri Gargeshwari Digital Foundation

प्र० पाततोरूढिरहितानितानिलिंगानि। यानितुतद्विपरीतान्यापाततोरूढानियोगरूढियुक्तानिवातानिनामानीतिलक्षणपक्षइत्यर्थः॥एवंचेति॥ प्रागुक्तलक्षणत्रयेप्यक्षरशब्दस्यनामत्वस्यलिंगत्वस्यचविवक्षाभेदेनसंभवेसतीत्यर्थः । एवंपादसंगतिमुक्त्वाऽनंतरसंगतिंश्लिष्टतरत्वद्योतनाया दितश्चतुर्धादर्शयति ॥ अत्रचेति ॥ भिन्नप्रकरणेति ॥ जायमानत्वंविषयवाक्यगतं । अजायमानत्वंपुरुषसूक्तादिगतं ॥एकप्रकरणेति॥ ''उत्क्रांतप्राणा''नितिप्राणवाक्ये ''सएवाधस्ता''दितिभूमवाक्येश्रवणेपिप्राणस्यविष्णुत्वांगीकारेणवा पूर्वपक्षरीत्यावा तयोरेकप्रकरणत्वमि तिभावः ॥ एकवाक्यस्थेति ॥ अग्रेस्पष्टमेतत् । प्रागुक्तोत्क्रमणमयुक्तं । तत्प्रयोजकस्याणुत्वस्यसर्वगतेविरुद्धत्वादित्याशंकानिरासोत्रक्रिय

एवंचन्यायविवरणे ''अविनाशित्वसाम्या''दितियौगिकत्वोक्त्यालिंगत्वस्याभिप्रेतत्वादनुव्याख्यानेच ''लिंगं साधारणंशब्दा''वितिशब्दपदेननामत्वोक्तेस्तयोर्विरोधइतिनिरस्तं । अत्रचाद्येऽधिकरणेजडप्रकृतेर्जीवमात्रादे श्चद्युभ्वाद्यायतनत्वनिरासः । द्वितीयेसर्वजीवश्रेष्ठस्यमुख्यप्राणस्यभूमत्वनिरासः । इहतुततोपिश्रेष्ठस्यश्रीतत्व स्याक्षरत्वनिरासइतिवा आद्यउभयत्रप्रसिद्धिबहिरंगसमाख्याभ्यां । द्वितीयेबहिरंगसमाख्याविषयवाक्यस्थांत रंगोपक्रमाभ्यां । इहतुततोप्यंतरंगसमन्वेतव्यशब्दप्रवृत्तिनिमित्तसाधारण्यादितिवा आद्येभिन्नप्रकरणस्थ जायमानत्वाजननयोर्विरोधपरिहारः । द्वितीयएकप्रकरणस्थोत्क्रमणसर्वगतत्वयोर्विरोधपरिहारः । इह ॥ ५८३ ॥

गु० रोधोपिपरिहृतइत्याह ॥ एवंचेति ॥ इदानीमस्याधिकरणस्यपूर्वाधिकरणेनसंगतिंविवक्षुःप्रसंगादधिकरणत्रयस्याप्यवांतरसंगतिमाह ॥ अत्रचाद्यइति ॥

प्र० तइतिसंगतिस्स्फुटत्वान्नोक्ता। ''अदृश्यत्वादिगुणा''इत्यादिभाष्यंतुफलपरं वक्ष्यमाणदिशापूर्वपक्षेऽक्षरश्रुतेर्निरवकाशत्वोक्तिपरंवेतिभावः॥ इतिवाऽवांतरेति ॥ एतेन ''प्राणसार्वात्म्यंनगौणं । रूढ्याक्षरशब्दितप्रणवसार्वात्म्यवदितिप्रत्यवस्थाननिरासात्संगति''रितिकल्पतरूक्तं निरस्तं । तद्द्रष्टृत्वादिनाप्रणवकोटेरेवात्रानुत्थानादितिभावः । नन्वत्रभाष्येटीकायांच ''अदृष्टंद्रष्टृ''त्याद्युपसंहारवाक्यमुदाहृत्यतदक्षरंविष यइत्युक्तं । तदयुक्तमिव । तथात्वेतत्रांबरांतधृत्यादिरूपसूत्रोपात्तहेतूनांसर्वेषामभावादित्यतः पूर्वसंगत्यर्थं द्रष्टृत्वादिनाजडप्रकृत्यादिकंनात्रशं कार्हमितिसूचयितुं अंबरेसर्वाधारत्वस्यतत्राप्रतीतावप्यंबरधृतिरूपप्रधानहेतुरस्तीतिदर्शयितुंचांत्यवाक्योक्तावपि तदुपलक्षणमितिभावेनवा भाष्यटीकयोरुक्तं ''तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृ''त्यादिचरमवाक्यस्थतदेतच्छब्दपरामर्शविषयंदर्शयितुंवापूर्ववाक्योक्त्याविषयसंशयटीकांव्य नक्ति ॥ अत्रसहोवाचेत्यादिना ॥ बृहदारण्यकेपंचमेध्यायेऽष्टमब्राह्मणेगार्गियाज्ञवल्क्यसंवादेश्रूयते ''साहोवाचयदूर्ध्वंयाज्ञवल्क्यदिवो यदर्वाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेकस्मिंस्तदोतंचप्रोतंचेति । सहोवाचयदूर्ध्वंगार्गिदिवोयदर्वाक्पृथिव्या

त्वेकवाक्यस्थास्थूलानण्वादिशब्दार्थमहत्त्वाणुत्वयोर्विरोधपरिहारइतिवा इहाणुत्वमहत्त्वयोर्भावयोरत्त्वानश नयोर्भावाभावयोःस्थौल्याद्यभावानामणुत्वाद्यभावानांचेत्यनेकविरोधपरिहारः । नतुपूर्वत्रेवैकैकविरोधपरिहार इतिवाऽवांतरसंगतिः । अत्र ''सहोवाच एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूल''मित्यादिनोक्तमक्षरंकिं

गु० महत्त्वाणुत्वयोर्विरोधपरिहारइतिवेति ॥ उपलक्षणमेतत् । सर्वगतस्याणुत्वाभावात्तत्प्रयोज्योत्क्रांतिः पूर्वोक्तानेत्याक्षेपेणसमाधानादाक्षेपिकी । प्रयोज्यो त्क्रांतिमुक्त्वातत्प्रयोजकाणुत्वसाधनादुपजीव्योपजीवकभावोवा । उदुत्क्रांत्यादेहवियोगवतोदेहावियोगरूपाक्षरत्वस्यद्युभ्वाद्यायतनत्वस्यवाऽऽक्षेपेणसमाधानाद्वा यद्यु

SGDF Sri Gargeshwari Digital Foundation

प्र० यदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतआकाशएवतदोतंचप्रोतंचेति । कस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेति । सहोवाचैतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसंगमरसमगंधमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणमसुखममात्रमनंतरमबाह्यंनतदश्नातिकिंचननतदश्नातिकश्चन । एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतः । एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौविधृतेतिष्ठतः । एतस्यवाअक्षरस्यप्रशासनेगार्गिनिमेषामुहूर्ताअहोरात्राण्यर्धमासामासाऋतवस्संवत्सराइतिविधृतास्तिष्ठंति । एतस्यवाअक्षरस्यप्रशासनेगार्गिप्राच्योन्यानद्यस्स्यंदंतेश्वेतेभ्यःपर्वतेभ्यःप्रतीच्योन्याःयांयांदिशमनु । एतस्यवाअक्षरस्यप्रशासनेगार्गिददतोमनुष्याःप्रशंसंतियजमानंदेवादर्वींपितरोन्वायत्ताः । योवाएतदक्षरंगार्ग्यविदित्वास्मिँल्लोकेजुहोतियजतेतपस्तप्यतेबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवति । योवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणः । अथयएतदक्षरंगार्गिविदित्वास्माल्लोकात्प्रैतिसब्राह्मणः । तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृश्रुतंश्रोत्रमतंमंत्रविज्ञातंविज्ञातृ । नान्यदतोस्तिद्रष्टृ नान्यदतोस्तिश्रोतृ नान्यदतोस्तिमंतृ नान्यदतोस्तिविज्ञातृ । एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चे"त्यत्रसर्वाधारत्वेनश्रुतमक्षरंविषयइत्यर्थः ॥ चित्प्रकृतिरिति ॥ कोस्त्यंतरस्याग्रेनिरस्यत्वादितिभावः ॥ इतिवाक्योक्तांबरांतधृतिरिति ॥ यद्यपितद्वाक्येंबरधृतिरेवाक्षरेभाति । तथापिपूर्ववाक्येंबरस्यभूतभवदादि

चित्प्रकृतिःकिंवाब्रह्मेतिचिंता । तदर्थं "एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चे" तिवाक्योक्तांबरांतधृतिःकिंचित्प्रकृतेर्युक्तोतनयुक्तेति । तदर्थमत्राकाशशब्दःकिं

गु० त्क्रांतिप्रयोजकमणुत्वमंगीक्रियतेतर्हितद्विरुद्धसर्वगतत्वेनश्रुतोभूमाविष्णुर्नस्यात्।यदिचभूमाविष्णुःस्यात्तर्हिसर्वगतत्वप्रयोजकाणुत्वाभावादुत्क्रांतिर्नस्यादित्याक्षिप्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० सर्वाधारत्वमुक्त्वाताद्दशस्यांबरस्य “कस्मिन्नुखल्वाकाशओतश्चप्रोतश्चे”त्याधारेपृष्टे “सहोवाचे”त्यादिनाऽक्षरस्यमहिमानमुक्त्वानंतरं “एतस्मिन्खल्वक्षरेगार्ग्याकाश”इत्युक्तत्वात्सर्वाधारांबराधारत्वरूपांबरांतधृतिस्तत्रलब्धेतिभावेनैवमुक्तिः ॥ **मध्यमेति** ॥ चित्प्रकृतीतरपरइत्यर्थः । वक्ष्यमाणपूर्वपक्षरीत्याफलफलिभावस्यास्फुटत्वादाह ॥ **यदीति** ॥ अत्रहिद्वेधापूर्वपक्षः । एकोभाष्ये “मध्यमाक्षरस्योक्ता”इति मध्यमाक्षरपदप्रयोगसूचिताक्षरश्रुतिनिरवकाशत्वमूलः । अन्यस्तुन्यायविवरणोक्तानशनविरोधमूलकः । तत्रद्वितीयपूर्वपक्षानुगुणेयंचिंता परंपराप्रधानत्वात्कंठोक्ता । आद्यपूर्वपक्षानुगुणातुब्रह्मेतिचिंतानंतरंतदर्थमक्षरश्रुतिप्रसिद्ध्यनुसारेणांबरांतधृत्यादिरूपलिंगंनेयमुतविपरीतमितिचिंता । तदर्थंश्रुतिर्निरवकाशालिंगंतुसावकाशमुतविपरीतमितिचिंतास्फुटत्वादूह्येतिनोक्ता । ननु नेहपूर्वपक्षोदयः । अक्षरश्रुतेर्योगेनब्रह्मण्युपपत्तेः । लौकिकप्रयोगबाहुल्यरूपरूढेरुभयत्राप्यभावात् । “अदृष्टंद्रष्ट्रि”त्यादिनादृश्यत्वश्रवणाच्च । तस्यचादृश्यत्वनयेवैष्णवत्वस्यस

मध्यमाक्षरेतरपरःकिंवामध्यमाक्षरपरइति । तदर्थं “नतदश्नातिकिंचने”त्युक्तमनशनंकिंब्रह्मणोनयुक्तमुतयुक्तमिति । यद्याद्यः तदाब्रह्मपक्षेऽनशनस्यैवबाधकत्वेनाकाशशब्दस्येतरपरत्वादितरधृतेश्चमध्यमाक्षरेपिसंभवाद्ब्रह्मत्वसाधकाभावान्मध्यमाक्षरमेवेहाक्षरं । यदितुद्वितीयः तदाबाधकाभावेनाकाशोमध्यमाक्षरमेवेतितदाश्रयत्वस्यैवब्रह्मत्वसाधकत्वादक्षरंब्रह्मैव ।

गु० समाधानाद्वाऽऽक्षेपिकीसंगतिरित्याद्यूह्यं । पूर्वत्रचात्रपाठक्रमेणटीकाव्याख्यानात्प्रथमतोनंतरसंगत्यनुक्तिः । एवमन्यत्रापिद्रष्टव्यं । पूर्वपक्षसिद्धांतयोःफलफलिभावमाह ॥ **यद्याद्यइत्यादि** ॥ आद्यंतावट्टीकोक्तहेतुमुपपादयति ॥ **इदमक्षरमित्यादिना** ॥ ययातदक्षरमधिगम्यतइत्यादेःपूर्वपक्षेचित्प्रकृतिपरत्वेज्ञापकमाह

SGDF
Sri Gargeshwari Digital Foundation

प्र० मर्थनात्। द्यावापृथिव्याद्याधारत्वश्रवणाच्च। तस्यचद्युभ्वादिनयेविष्णुधर्मतायानिर्णीतत्वादित्याशंक्यद्वेधापूर्वपक्षटीकांविवृणोति ॥ **पूर्वपक्षस्त्वित्यादिना** ॥ "तत्राक्षरशब्दस्यप्रसिद्धे"रितिटीकोक्तहेतुंसमर्थयते ॥ **विष्णोरित्यादिनाऽक्षरस्येत्युक्तमित्यंतेन** ॥ **इत्यादाविति** ॥ टीकोदाहृतगीतारूपस्मृताविव्यर्थः। एतेनप्रसिद्धेरित्यस्यवैदिकप्रसिद्धेरित्यर्थउक्तोभवति ॥ **प्रसिद्धइति** ॥ "यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः। अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः। क्षरस्सर्वाणिभूतानिकूटस्थोक्षरउच्यते। उत्तमःपुरुषस्त्वन्य"इतिगीतायां "अक्षरात्परोहरि"रितिप्रागुदाहृतस्मृतौचप्रसिद्धइत्यर्थः। ब्रह्मण्यप्यस्त्वक्षरत्वप्रसिद्धिरित्यतोनेत्याह ॥ **ययेति** ॥ **अतएवेति** ॥ पूर्वपक्षेतत्रब्रह्मपरत्वासंमतेरेवेत्यर्थः। यद्वा अक्षरश्रुतेर्निरवकाशत्वसंपत्त्यर्थत्वादेवेत्यर्थः। प्रयोजनार्थंतदाक्षेपउपपन्नइत्यतआह ॥ **अन्यथेति** ॥ फल

पूर्वपक्षस्तु। इदमक्षरंश्रीतत्वमेव। विष्णोरप्यविनाशित्वेनाक्षरत्वसंभवेपि लोकप्रयोगस्यचश्रीतत्वेप्यभावेपि "येत्वक्षरमनिर्देश्य"मित्यादौश्रीतत्वेऽक्षरशब्दवत्क्षराक्षरातीतत्वेनप्रसिद्धेविष्णौतदभावात्। "ययातदक्षरमधिगम्यत"इत्यादेरपिपूर्वपक्षेचित्प्रकृतिपरत्वात्। अतएवैतस्यादृश्यत्वादिगुणकस्याक्षरस्यान्यत्वेपूर्वोक्तमप्यदृश्यत्वादिगुणकमक्षरमप्यन्यत्स्यादित्यदृश्यत्वाधिकरणमाक्षिप्तंभाष्यादौ। अन्यथा "एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौविधृतेतिष्ठत" इतिद्यावापृथिव्याश्रयत्वेनश्रुतस्याक्षरस्यान्यत्वेद्युभ्वाद्यायतनमप्यन्यत्स्यादितिसन्निहितंद्युभ्वाद्यधिकरणमाक्षिप्येत।

गु० ॥ **अतएवेति** ॥ ययातदक्षरमधिगम्यतइत्यादिवाक्योक्तपरविद्याविषयत्वादेःपूर्वपक्षेचित्प्रकृतिपरत्वस्याभिप्रेतत्वादेवेत्यर्थः ॥ **अन्यथेति** ॥ ययातदक्षरमित्यादेःप्रकृतिपरत्वस्यानभिप्रेतत्वइत्यर्थः। ननुयेत्वक्षरमनिर्देश्यमित्यादौश्रीतत्वेऽक्षरशब्दवत् क्षराक्षरातीतत्वेनप्रसिद्धेविष्णावक्षरशब्दाभावाच्छ्रीतत्वस्यैवाक्षरत्वमिति

प्र० मात्रार्थत्वइत्यर्थः। ननुयथापादांत्यप्राणाधिकरणेपूर्वपक्षे "तद्वैत्वंप्राणोअभव"इत्यत्रप्राणशब्दस्यविष्णुत्वाक्षेपादुभयत्रप्रसिद्ध्यभावस्तथात्रापिस्यात्। ब्रह्मणिकाप्यक्षरपदप्रयोगासंमतेरित्यतआह ॥ **प्रवृत्तीति** ॥ यथाज्योतिर्दर्शनादित्यत्रज्योतिश्शब्दस्यजीवेशरूपोभयत्रप्रसिद्धिस्तथेतिभावः। हेतूक्तिपरटीकायाउद्भाष्यत्वभ्रमंनिराह ॥ **अतएवेति** ॥ एवंभाष्येऽनेकज्ञापकोपलंभबलेन "तत्राक्षरशब्दस्यप्रसिद्धे"रिति। टीकांश्रुतिनिरवकाशत्वाभिप्रायतयाव्याख्यायेदानींटीकायांतत्रैवेत्यनुक्त्वातत्राक्षरशब्दस्यप्रसिद्धेरित्येवोक्तत्वात्। तथा "एतस्यवाअक्षरस्ये"त्यादिनाचंद्राद्याधारत्वस्यश्रीतत्वलिंगतयोपपाद्य "अदृष्टंद्रष्टृ"त्यादिनात्रश्रुतादृश्यत्वादिकंच "येत्वक्षरमनिर्देश्य"मित्यादिनाश्रीतत्वेप्रतिपाद्यांते "अक्षरश्रुतेरदृश्यत्वादिलिंगानांचमध्यमोत्तमयोस्साम्येऽत्रमध्यममेवोच्यतइतिनिर्बंधेकोहेतु"रित्यादिनाऽक्षरश्रुतिलिंगानांसावकाशत्वमुपेत्य "नतदश्नाती"त्युक्तानशनलिंगेनपूर्वपक्षोज्जीवनस्यकृतत्वात्तत्रकथंश्रुतिलिंगानांविष्णावपिक्षराक्षरातीतत्वेनोक्तेवृत्तिः। कथंचानशनेनोज्जीवनमित्यतश्श्रुत्यादेस्सावकाशत्वमुपेत्याशेषटीकांव्यनक्ति ॥ **अस्तुवेति** ॥ अन्यत्र वाक्यांतरे। श्रुतेस्सावकाशत्वेनटीकाप्रवृत्तौभा

प्रवृत्तिनिमित्तसाधारण्यप्रयुक्ताचोभयत्रप्रसिद्धिर्नपूर्वपक्षदशायांब्रह्मणिप्रयोगमपेक्षते। अतएवभाष्येश्रीतत्वस्येतिवक्तव्येपूर्वपक्षेहेतुंदर्शयितुमक्षरस्येत्युक्तं। अस्तुवा "अक्षरत्रयमीरित"मितिवचनादन्यत्राक्षरशब्दोब्रह्मणि।

गु० पूर्वपक्षकरणेऽक्षरशब्दस्योभयत्रप्रसिद्धतानस्यादित्यतआह ॥ **प्रवृत्तिनिमित्तेति** ॥ **अतएवेति** ॥ श्रीतत्ववद्विष्णावक्षरशब्दाप्रयोगादेवेत्यर्थः। नन्वेवमक्षरशब्दस्यसर्वथापिविष्णुपरत्वाभावेभाष्येऽक्षरस्येत्येववक्तव्येमध्यमाक्षरस्येतिमध्यमशब्दोव्यर्थइत्यरुच्यापक्षांतरमाह ॥ **अस्तुवेति** ॥ अथवाटीकोक्तंद्वितीयहेतुमु

SGDF Sri Gargeshwari Digital Foundation

प्र० ष्यज्ञापकमाह ॥ अतएवेति ॥ इहेति ॥ विषयवाक्ये । “आहनसं यज्ञेष्वभिपूयमाणं । लताभिमानित्वेनेयमुक्ति”रितिटीका । तत्व प्रदीपेतु “आहनसं आसमंताद्धंतारं संहर्तार”मित्यर्थउक्तः । एतच्चांभृणीशब्दितलक्ष्मीवाक्यं । ननु “गुहांप्रविष्टावात्मानौ”वित्यत्रान शनश्रुतेर्गतिरुक्तेत्यतोवैषम्यमाह ॥ नचेति ॥ तत्रानश्नन्नित्येवप्रतीत्यातथागतिसंभवेपीहकिंचनेत्युक्त्यासामान्यनिषेधस्यैवप्रतीतेरित्यर्थः । “नचमध्यमाक्षरस्यानशनांगीकारेविरोधोस्ती”तिवाक्यंटीकायामयुक्तं । श्रीतत्वस्यापिनित्यमुक्ततयासुखाशनस्येश्वररमणनिमित्तसुखभोगस्य

अतएवोत्तमाक्षरेऽक्षरशब्दमंगीकृत्यतद्व्यावृत्त्यर्थंभाष्येमध्यमशब्दः । तथापीहाक्षरंनब्रह्म । “सूर्याचंद्रमसौविधृतौतिष्ठत”इति “एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौ विधृतेतिष्ठत”इतिचाक्षरेश्रुतस्यचंद्रसूर्याद्याधारत्वस्य “अहंसोममाहनसंबिभर्मी”त्यादिनाश्रीतत्वइवद्युभ्वाद्यधिकरणन्यायेनब्रह्मण्यपिसंभवेपि “अदृष्टंद्रष्टृश्रुतंश्रो”त्रित्यक्षरेश्रुतस्यादृश्यत्वादेश्च “येत्वक्षरमनिर्देश्य”मित्यादिनाश्रीतत्वइवादृश्यत्वाद्यधिकरणन्यायेनब्रह्मण्यपिसंभवेपि “नतदश्नातिकिंचने”त्यक्षरेश्रुतस्यानत्तृत्वस्य “अत्ता चराचरे”त्यत्रसर्वात्तृत्वेनोक्तेब्रह्मण्यसंभवात् । नचैतदशुभानशनपरं । किंचनेत्युक्तेः ।

गु० पपादयति ॥ अस्तुवेति ॥ नन्वत्तृत्वेनोक्तेब्रह्मण्यनत्तृत्वरूपानशनस्यायोगान्मध्यमाक्षरेपितदसंभवात्कथंतस्याक्षरत्वमित्याशंकापरिहारार्थं नचमध्यमाक्षरस्यान

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावाच्चेत्यतोव्यनक्ति ॥ **मध्यमाक्षरस्यत्विति** ॥ टीकायामनशनलिंगेनपूर्वपक्षोज्जीवनंमूलारूढंदर्शयति ॥ **तदुक्तमिति** ॥ एवंतर्हिकथं पूर्वाक्षेपः । प्रागुक्तस्यब्रह्मण्यभ्युपेतत्वादित्यतआह ॥ **अस्मिन्निति** ॥ ननुसर्वाधारत्वादिलिंगाद्विष्णुःकिंनस्यादित्यतआह ॥ **अतएवेति** ॥ "इदमक्षरंब्रह्मैवे"तिसूत्रभाष्याद्युक्तप्रतिज्ञांशेनैवाक्षरश्रुतेर्विष्णौमहायोगविद्रूढिभ्यांमुख्यत्वस्यसूचनान्नतयान्यप्राप्तिर्युक्तेतिभावेनान्यत्रोक्तश्रुत्यादिनाहरौमहायोगविद्रूढीदर्शयन्नाद्यंश्रुत्यनवकाशत्वप्रयुक्तपूर्वपक्षंतावन्निराह ॥ **चतुर्विधेति** ॥ "अनित्यत्वंदेहहानिर्दुःखप्राप्तिरपूर्णता ।

मध्यमाक्षरस्यतु "आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिष"दितिश्रुतौस्वतंत्रोन्मेषाभावेनानुन्मेषोक्तिवत्स्वतंत्राशनाभावेनवा ब्रह्मवत्संहर्तृत्वाभावेनवा अत्तेत्यत्रसंहाररूपतयोक्तस्याशनस्याभावोयुक्तः । तदुक्तंन्यायविवरणे "अत्तेत्युक्त्वानतदश्नातिकिंचनेतिविरुद्धते"ति । अतएवाद्दश्यत्वचंद्राद्याधारत्वादिलिंगानांब्रह्मणिसंभवमुपेत्यपूर्वपक्षस्यप्रवृत्तत्वादेवभाष्ये "तस्यापिसंभवा"दित्यपिशब्दः । "अद्दश्यत्वादिलिंगानांमध्यमाक्षरेपिसंभवा"दितिटीकाच । अस्मिन्पक्षेऽद्दश्यत्वाद्यधिकरणाक्षेपस्तुविष्णोरेवाद्दश्यत्वादीत्यवधारणस्याक्षेपादितिज्ञेयं । अतएवचात्रटीकायामद्दश्यत्वादिकंचान्यस्यप्रसज्यतइत्युक्तं । नत्वन्यस्यैवेति । अतएवांबरांतधृतिप्रशासनादिकमपिमध्यमाक्षरस्यैवेति । सिद्धांतस्तु । अक्षरब्रंह्मवै चतुर्विधविनाशरहितेतत्रैवाक्षरशब्दप्रवृत्तिनिमित्तपौष्कल्यात् ।

गु० शनांगीकारेविरोधोस्तीतिटीकाप्रवृत्ता । तत्रविरोधाभावोनोपपादितः । अतस्तमुपपादयितुमाह ॥ **मध्यमाक्षरस्यत्विति** ॥ अतएवेत्यस्यविवरणमद्दश्यत्वस्येत्यादि । नन्वद्दश्यत्वादेर्ब्रह्मणिसंभवमुपेत्ययदिपूर्वपक्षप्रवृत्तिस्तर्ह्यद्दश्यत्वाक्षेपानुपपत्तिरित्यतआह ॥ **अद्दश्यत्वेति** ॥ **अतएवेति** ॥ प्रवृत्तिनिमित्तपौष्कल्यादे

SGDF
Sri Gargeshwari Digital Foundation

प्र० नाशश्चतुर्विधःप्रोक्तस्तदभावोहरेस्सदे''तिस्मृतेरितिभावः । प्रयोगबाहुल्यरूपरूढावैतरेयश्रुतिमाह ॥ **तस्मादिति** ॥ प्रवृत्तिहेतुपौष्कल्यादित्यर्थः । एतंसंतं प्रवृत्तिनिमित्तवत्तयाविद्यमानं । ''अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्यते । भूतभावोद्भवकरोविसर्गःकर्मसंज्ञित''इति गीता । अतएव अक्षरशब्दमुखार्थत्वादेवेत्यर्थः । क्षराक्षरातीतत्वंचमुख्यवृत्त्याक्षरशब्दार्थत्वेपिपरतंत्रचेतनवैलक्षण्यमात्रेणोपपन्नमितिभावः । प्रसिद्धिः परतःपरमक्षरमित्यादौ । एवंप्रतिज्ञांशसूचितन्यायंभाष्यादावस्फुटमपि ''शब्दप्रवृत्तिहेतूनांतस्मिन्मुख्यसमन्वयात् । अन्यार्थेष्वल्पताहेतोस्तन्निमित्तत्वतस्तथा । तद्वाचकत्वंशब्दानांबहुलातिप्रयोगतः । रूढमित्येवसाध्यंस्या''दित्यानंदमयनयानुव्याख्यानेसामान्यतउक्तमन्यत्रोक्तश्रुत्यादिनास्फुटीकृत्येदानीमंबरांतधृतेरितिसौत्रलिंगोक्तिपरटीकांविवृण्वन्नस्यनिरवकाशत्वंवक्तुमाकाशशब्दस्य ''आकाशाख्यप्रकृते''रितिटीकोक्तचित्प्रकृतिरूपमध्यमाक्षरार्थत्वमाह ॥ **किंचेत्यादिना आकाशंचित्प्रकृतिरेवेत्यंतेन** ॥ इहाकाशमित्यस्योच्यतइत्यन्वयः ॥ **यद्भूतमिति** ॥ यद्भूतंचभवच्चभविष्यच्चेत्याचक्षत आकाशएवतदोतंचप्रोतंचे''त्यंतेनेत्यर्थः । ''कस्मिन्नुखल्वाकाशओतश्चप्रोतश्चे''तिप्रश्ने

''तस्मादक्षरमित्याचक्षतएतमेवसंतं । अक्षरंब्रह्मपरम''मित्यादिश्रुतिस्मृतिषुतस्यतत्रप्रयोगाच्च । अतएवतत्रोत्तमाक्षरत्वप्रसिद्धिः । किंचेहाकाशं ''यद्भूत''मित्यादिना ''आकाशएवतदोतंचप्रोतंचे''त्यंतेनसर्वचेतनपोषकतया ''एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चे''त्यनेनान्याश्रितत्वेनचोच्यते ।

गु० वेत्यर्थः । अनेनमहायोगविद्वद्रूढिभ्यामक्षरशब्दस्यब्रह्मपरत्वमित्युक्तंभवति । अंबरांतधृतेरितिस्थितिहेतुभागसूचितांयुक्तिमाह ॥ **किंचेति** ॥ नन्वाकाशएव

प्र० ''एतस्मि''न्नितिपरिहारः ॥ **नचतदिति** ॥ सर्वोपजीव्यत्वेसत्यन्यैकाश्रितत्वस्यश्रीतत्वासाधारणलिंगत्वस्य ''अव्यक्तात्पुरुषःपरः । ममयोनिरप्स्वँ१तःसमुद्र''इत्यादिमानसिद्धत्वादितिभावः । ओतत्वंपोष्यत्वमित्येतत्साधयति ॥ **नचेत्यादिना** ॥ उपादेयत्वं उपादानपरिणामत्वमित्यर्थः ॥ **आधेयत्वस्याप्यभावाच्चेति** ॥ इंद्रलोकस्यप्रजापतिलोकादधस्तनत्वादितिभावः । अस्यवाक्यस्यसिद्धांतार्थस्तु ''शिवोहीश्वरनामास्यात्तत्पारम्यात्सरस्वती । इंद्रेत्युक्तातत्सुखानांब्रह्माधिर्मुक्तिगामिनां । तत्सुखानांपरंब्रह्ममुक्तिगानांपरायण''मित्यादिब्रह्मांडस्मृत्याध्येयः । संसाराल्लुप्तानांमुक्तानांकानिसुखानिलोकाइत्यर्थः । ननुतत्रबाधकादर्थांतरमस्त्वित्यतआह ॥ **एकेति** ॥ अदृश्यत्वनयेऽक्षरशब्दस्यनानार्थत्वंपरावधित्वादिबाधकात् ''अक्षरत्रयमीरित''मित्यादिस्मृतिबलाच्चोपेतमपिनेहैकार्थत्वेबाधकमस्तीतिभावः । तावतोतत्वंपोष्यत्वरूपमितिकुतइत्यतआह ॥ **तस्मादिति** ॥ परिशेषादित्यर्थः । ''रुद्रंसमाश्रितादेवारुद्रोब्रह्माणमाश्रितः । ब्रह्मामामाश्रितोनित्यंनाहंकं

नचतच्चित्प्रकृतितोन्यत्रयुक्तं । नचात्रोतत्वादिकमुपादेयत्वमाधेयत्वंवानतुपोष्यत्वं । तच्चसर्वस्यजडप्रकृतिंप्रतिसंभवतीतिशंक्यं । ''एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चे''त्याकाशाश्रयत्वेनोच्यमानाक्षरस्यद्रष्टृत्वादिनाचेतनत्वेनोपादानत्वायोगात् । ''कस्मिन्नुखल्विंद्रलोकाओताश्चप्रोताश्चेति प्रजापतिलोकेषुगार्गी''त्यादावाधेयत्वस्याप्यभावाच्च । नह्यधस्तनइंद्रलोकउपरितनेप्रजापतिलोकआहितः । एकप्रकरणस्थस्योतादिशब्दस्यनानार्थत्वंचायुक्तं । तस्मात् ''रुद्रंसमाश्रितादेवाः राज्ञिराज्यंसमाहित''मित्यादाविवपोष्यत्वादिकमेवोतत्वं ।

गु० तदोतमित्यत्रोतशब्दस्याधेयपरत्वादिंद्रलोकाओताइत्यत्रतुपोष्यत्वार्थकत्वान्नविरोधइत्यतआह ॥ **एकप्रकरणेति** ॥ ननुनात्रोतत्वंपोष्यत्वं । ओतत्वेनोक्तानां

SGDF Sri Gargeshwari Digital Foundation

प्र० चिद्रुपाश्रित"इत्यादिभारतवाक्यादाविवेत्यर्थः। ननु "भूतंचभवच्चे"त्युक्तजडस्यकथंपोष्यत्वं। अतएतस्मादेवबाधकान्नानार्थत्वंयुक्तमित्यत आह ॥ नचेति ॥ टीकायांभाष्येऽनुक्तस्यापि "आकाशाख्यप्रकृते"रित्युक्तिर्निर्मूला । किंचेदंलिंगमन्यस्यनेत्येतदपिटीकायांनप्रतीयते । यस्यात्रविवरणंक्रियतइत्यतआह ॥ तदुक्तमिति ॥ विष्णोरन्यस्य श्रीतत्वस्येत्यर्थः । टीकायांन्यायविवरणेचप्रकृतिपदस्यैवप्रयोगाच्चित्प्रकृ

नचाचेतनस्यपोष्यत्वंयुक्तमिति । भूतादिपदमपिदेहद्वाराभूतत्वादियुक्तचेतनपरमेवेत्याकाशंचित्प्रकृतिरेव । ततश्चतदाश्रयोक्षरंब्रह्मैव । नचित्प्रकृतिः । स्वाश्रयत्वस्यविरुद्धत्वात् । तदुक्तंन्यायविवरणे "सर्वाधारप्रकृत्याधारत्वंविष्णोरन्यस्यविरुद्ध"मिति । उक्तंचबृहदारण्यकभाष्ये "दीप्तेराकाशशब्दोक्ताश्रीर्हिसर्वाश्रयामता । तदाश्रयःपरोविष्णुःसोस्थूलादिगुणोमत"इति । एवंच "मयिसर्वमिदंप्रोत"मित्यादिस्मृतिरप्यनुगृहीताभवति । नचाकाशपदस्यप्रसिद्ध्यनुसरणेभूताकाशपरता । आकाशाधिकरणानुसरणेचब्रह्मपरता। नतुजडाजडपरत्वमितिपूर्वपक्षः सिद्धांतश्चायुक्तइतिवाच्यं । "आकाशस्तल्लिंगा"दित्यत्रप्रसिद्धित्यागेनलिंगानुसार्यर्थपरत्वस्योक्ततयालिंगानुसारिप्रकृतिपरतायाअपितन्न्यायसिद्धत्वात् ।

प्र० तिपरत्वेस्पष्टंज्ञापकमाह ॥ उक्तंचेति ॥ समाख्याबलाच्चैवमितिभावेनाह ॥ एवंचेति ॥ विष्णोरेवसर्वाधारत्वे "मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव । रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययो"रित्यादिगीताप्यनुकूलिताभवतीत्यर्थः । अत्राकाशस्यचित्प्रकृतिपरत्वमाकाशनयन्यायसिद्धत्वंचेत्येतच्छंकापूर्वमाह ॥ नचाकाशेति ॥ लिंगानुसारीति ॥ तथाचपूर्वपक्षेसर्वाधारत्वेसत्यक्षरशब्दितश्रीतत्वाधीनत्वस्यजडप्रकृ

SGDF Sri Gargeshwari Digital Foundation

प्र० तिलिंगत्वात्सर्वाधारत्वेसतिब्रह्मैकाश्रितत्वस्यचित्प्रकृतिलिंगत्वात्सिद्धांतेचित्प्रकृतिपरत्वंयुक्तमितिभावः । "साचप्रशासना"दितिसूत्रोक्त हेतोरपिनिरवकाशत्वमाह ॥ **किंचेति** ॥ **भाष्योक्तेति** ॥ "सप्तार्धगर्भाभुवनस्ये"त्यादिभिरित्यर्थः । एतेन "युक्त्यंतरेणविष्णोरेवाक्षरत्व" मित्यादिटीकातात्पर्यार्थउक्तोभवति । "अन्यभावव्यावृत्तेश्चे"तिसूत्रोक्तहेतुर्भाष्यादावन्यवस्तुस्वभावानांलौकिकस्थौल्यादीनांराहित्यकथना दितिव्याख्यातः । सनयुक्तः । श्रुतौतथाप्रतीत्यभावेनासिद्ध्यापत्तेः । टीकायांलौकिकस्थौल्यादिराहित्यस्य "मध्यमाक्षरस्याप्राकृतविग्रहव त्त्वेपी"त्यादिनाव्यभिचारमाशंक्य "भगवदपेक्षयैवे"तिसमाधानमुक्तं । तदपिनयुक्तं । निरपेक्षस्थौल्यादिराहित्यस्यश्रुतावप्रतीतेरित्यतो भाष्याद्याशयंव्यंजयन्नन्यभावेतिसूत्रोक्तनिरपेक्षप्राकृतस्थौल्यादिराहित्यस्यश्रुत्यभिप्रेतत्वंसाधयति ॥ **किंचेत्यादिना** ॥ अस्तुकोदोषइत्य तआह ॥ **श्रुत्यंतरेति** ॥ "अस्थूलोऽनणुरमध्यमोमध्यमोव्यापकोऽव्यापकोयोहरिः । अणोरणीयान्महतोमहीयान् ज्यायान्पृथिव्यादिवो ज्याया"नित्यादिश्रुत्यंतरविरोधाच्चेत्यर्थः । यद्वा "सर्वधर्मासर्वनामासर्वकर्मा गुणाश्श्रुताश्चनेत्याद्याप्रमाणंश्रुतिरत्रचे"त्यनुभाष्योक्तश्रुत्यंतरे त्यर्थः । सुधायांतु "सर्वत्रप्रसिद्धोपदेशात् । अत्ताचराचरग्रहणात् । रूपोपन्यासाच्चे"त्युक्तविरोधस्स्यादित्यप्ययुक्तं । निस्स्वभावस्यसर्वत्र

किंच "अक्षरस्यप्रशासने"इत्यत्रप्रशब्दार्थोसंकुचितविषयत्वानन्यायत्तत्वादिरूपप्रकर्षोभाष्योक्तश्रुत्या दिभिर्नब्रह्मणोन्यत्रयुक्तः । किंच "अस्थूलमन"ण्वित्यादिनानस्थौल्यादिमात्रस्यनिषेधः । निःस्वभा वत्वापातात् । श्रुत्यंतरविरोधाच्च । प्राकृतस्यस्थौल्यादेर्निषेधोपिचित्प्रकृतावीश्वरइवननिरपेक्षः ।

गु० भूतानामचेतनत्वेनपोष्यत्वानुपपत्तेरित्यतआह ॥ **भूतादिपदमिति** ॥ द्वितीयसूत्रोक्तहेतुमाह ॥ **किंचेति** ॥ **श्रुत्यंतरेति** ॥ अणोरणीयानित्यादिश्रुत्यंतर

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्थित्यदनादेरयोगादितितदुपलक्षणमितिभावः ॥ ननिरपेक्षइति ॥ तथैवदहरनयेभाष्यादौसत्यकामत्वादिषुप्रतिपादनादितिभावः । अस्तुतर्हिश्रुतौप्रकृतस्यस्थौल्यादेर्निषेधः । तावतानिरपेक्षमेवास्थूलत्वादिकंश्रुतावुच्यतइतिकुतः । येनचित्प्रकृतौव्यभिचारोनस्यादित्यतआह ॥ नचयस्येति ॥ पर्णमय्यधिकरणशरीरंप्राणस्तथानुगमादित्यत्रविवृतं । "यस्यपर्णमयीजुहूर्भवतिनसपापंश्लोकंश्रृणोति । यस्यखादिरस्स्रुवोभवतिछंदसामेवरसेनावद्यतिसरसाअस्याहुतयोभवंती"त्यादौप्रकृतिरूपकत्वर्थतयाफलनिरपेक्षजुह्वनुवादेनपर्णमयीत्वविधिः । नतुपुरुषर्थतया । क्रत्वंगजुह्वाःक्रतुफलेनैवफलवत्त्वेनपृथक्फलानपेक्षत्वात्फलश्रुतिरर्थवादइत्युच्यते । तद्वन्निरपेक्षस्यग्रहणमित्यर्थः । प्राकृतस्थौल्यादिराहित्यंनचित्प्रकृतौव्यभिचारीत्यत्रयुक्त्यंतरमाह ॥ किंचेति ॥ श्रुत्यादिप्रसिद्धंविष्णवसाधारणमेवास्थूलत्वादिकंश्रुतौग्राह्यमितिकुतइत्यतआह ॥ नचप्रसिद्धेति ॥ अत्रभाष्येऽस्थूलोनणुरूपोसावविश्वोविश्वएवच । विरुद्धधर्मरूपोसावैश्वर्यात्पुरुषोत्तमइत्यैश्वर्येणेश्वरेविरोधसमाधानमयुक्तं । तथात्वेजीवेशाभेदोपगमेनाल्पज्ञत्वसर्वज्ञत्वादिकमपिसमाधेयंस्यादित्यतः प्रमाणभावाभावाभ्यांव्यवस्थेतिभावेनाह ॥

नच "यस्यपर्णमयीजुहूर्भवती"त्यादौप्रकृतिगतनिरपेक्षजुह्वाइवात्रापिनिरपेक्षास्थूलत्वादेर्ग्रहणसंभवेसापेक्षंग्राह्यं । किंचभाष्योक्तश्रुत्यादिभिरस्थूलत्वादिविष्णावेवप्रसिद्धं । नचप्रसिद्धसंभवेप्यप्रसिद्धंग्राह्यं । ॥ ५८९ ॥

गु० विरोधादित्यर्थः । अस्तुप्रकृतौप्राकृतस्थौल्यादेर्निषेधःसापेक्षः । तथापिसएवकिंनगृह्यतइत्यतआह ॥ नचेति ॥ अन्यथायस्यपर्णमयीजुहूर्भवतीत्यत्रापिविकृतिगतसापेक्षजुह्वाएवग्रहणंस्यादितिभावः । तृतीयसूत्रोक्तहेतुमाह ॥ किंचेति ॥ ननुप्रसिद्धसंभवेह्यप्रसिद्धंनग्राह्यं । प्रकृतेतुस्थौल्याणुत्वयोर्विरोधेनासंभवादप्रसिद्धग्रहणं

प्र० ब्रह्मणइति ॥ यद्वालोकेभिन्नाधिकरणतयोपलब्धानामस्थूलत्वानणुत्वादीनांकथंविष्णौसमावेशइत्यतआह ॥ ब्रह्मणइति ॥ श्रुतत्वादिति ॥ यत्रहिधर्माणांभिन्नाधिकरणत्वंप्रमितंतत्रैवतेषांसमावेशाभ्युपगमेहिविरोधः । यत्रप्रमाणेनैवसहोपलंभोऽवगतस्तत्रतथैवाभ्युपगमोनविरुद्धइतिभावः । सदृष्टांतंयुक्त्याचोपपादयति ॥ दर्वीति ॥ श्लोकोक्तमुपलक्षणमितिभावेनश्लोकोक्तंव्यनक्ति ॥ युक्तमिति ॥ प्राकृतपरिमाणद्वयराहित्यमित्यन्वयः । तत्रहेतुगर्भमप्राकृतस्येति । असंभावनानिरासायदृष्टांतादर्वीत्यादि । "तस्मिन्सोमःप्रवर्तेताव्यक्तत्वा"दित्यष्टमाध्यायांतिमाधिकरणे "यदेकयाजुहुयाद्दर्वीहोमंकुर्या"दित्यर्थवादगतदर्वीहोमशब्दितान्वास्तुहोमादीनुदाहृत्य किमेतेसोमयागादिप्रकृ

ब्रह्मणःपरस्परविरुद्धस्थौल्याणुत्वोभयराहित्यंचश्रुतत्वान्नविरुद्धं । दर्वीहोमायथैवान्येप्रकृतेर्विकृतेरपि । ईश्वरोपितथैवान्योमहतोप्यणुतोपिहि ॥ १ ॥ युक्तंहिदर्वीहोमानांपरस्परविरुद्धप्रकृतिविकृतित्वोभयराहित्यवत्

प्र० तिकाउतापूर्वाएवेतिसंशये अश्रुतेतिकर्तव्यताकत्वाद्देवतासंबंधस्यास्पष्टत्वेनाव्यक्तताकत्वाद्वाव्यक्तासुतुसोमस्येतिन्यायेनसोमयागप्रकृतिका इतिप्राप्ते सोमस्ययागत्वादेतेषांहोमत्वात्साहृश्याभावान्नतत्प्रकृतिकाः । किंतुनारिष्टाग्निहोत्रादिहोमप्रकृतिकाइतिपक्षांतरमुक्त्वा नारिष्टांगभूतानांमध्वादीनांत्र्यंबकहोमकेपुदर्वीहोमनामकेष्वभावदर्शनादपूर्वाएवदर्वीहोमाइतिसिद्धांतितं । तथाचैवमुक्तन्यायेनविकृतित्वराहित्यंतन्मुखनिरीक्षकस्यान्यस्यकर्मणोऽभावात्प्रकृतित्वराहित्यंच यथादर्वीहोमनामकानांहोमानांतथाप्रकृतेपीत्यर्थः । यद्यपिप्रकृतित्वविकृतित्वयोर्नपरस्परंविरोधः । अग्नीषोमीयपशोःपश्वंतरापेक्षयाप्रकृतित्वेपिदर्शपूर्णमासापेक्षयाविकृतित्वात् । द्वादशाहस्याहर्गणापेक्षयाप्रकृतित्वेपिज्योतिष्टो

SGDF Sri Gargeshwari Digital Foundation

प्र० मापेक्षयाविकृतित्वाच्च । तथापिप्रतियोगिभेदाभावेतयोर्विरुद्धत्वमस्तीतिवा स्वापेक्षयास्वस्यद्वयंविरुद्धमितिवा परस्परपरिहारेणक्वचिद्दर्श
पूर्णमासादौदृष्टत्वाभिप्रायेणवा परस्परविरुद्धेतिप्रकृतिविकृत्योर्विशेषणमुपात्तं । यद्वाविरुद्धेतिराहित्ययोर्विशेषणं ॥ **वाय्विति** ॥ यथाता
र्किकमतेतेजोगतस्यस्पर्शस्योष्णत्वंजलगतस्यशीतत्वंवायुगतस्योभयबहिर्भावः । पृथिवीवाय्वोरनुष्णाशीतस्पर्शोररीकरणात् । तद्वदित्यर्थः ॥
पाकजेति ॥ पृथिवीगतस्यरूपस्यतपनादितेजस्संबंधेनपाकजत्वमंगीकृतमितिपाकजेत्युक्तं । एवंभाष्याद्युक्तंसूत्रेसाक्षादुपात्तंप्राकृतस्थौल्या
दिराहित्यरूपहेतुंसमर्थ्यसौत्रचशब्दसूचितमनुव्याख्यानादौविवृतंहेत्वंतरंसमर्थयमानःपक्षांतरमाह ॥ **अथवेति** ॥ **नचैवमिति** ॥ अस्थू
लानण्वादिशब्दैस्तद्विरुद्धाणुत्वमहत्त्वादिप्रापणेसतीत्यर्थः । श्लोकगतहिशब्दोक्तहेतुनानचविरोधइतिसाध्यस्यान्वयः । यस्मादीशितुस्तेयुक्ते
तस्मान्नविरोधइतिश्लोकोक्तमुपलक्षणमित्यभिप्रेत्यपूर्वार्धंतावद्व्याचष्टे ॥ **दर्शेति** ॥ अष्टमेप्रथमपादे "इष्टिषुदर्शपूर्णमासयोःप्रवृत्तिस्स्या"दि

**वाय्वादिस्पर्शस्योष्णशीतबहिर्भाववत् अपाकजरूपस्याबादेःपाकजनीलानीलरूपराहित्यवच्चाप्राकृतस्यब्रह्मणःप्राकृ
तपरिमाणद्वयराहित्यं । अथवा अनुव्याख्यानसुधोक्तरीत्याऽस्थूलादिपदैस्तद्विरुद्धाणुत्वादिविधिरस्तु । नचैवं
विरोधः । यथैकस्यैवदध्यादेःक्रत्वर्थपुरुषार्थते । अणीयस्त्वमहीयस्त्वेतथैकस्यैवहीशितुः ॥ १ ॥ दर्शपूर्णमा
सादीनांकेवलप्रकृतित्वेपि पशुगणादीनांकेवलविकृतित्वेपि अग्नीषोमीयपश्वादीनांप्रकृतित्वेसतिविकृतित्ववत्,**

गु० युक्तमेवेत्यतआह ॥ **नचेति** ॥ विरोधोदृष्टबाधनमित्युक्तत्वादितिभावः ॥ **दर्शपूर्णमासादीनामित्यादि** ॥ दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमानांसर्वांगोपदेशेनके
वलप्रकृतित्वेपि आग्नेयंकृष्णग्रीवमालभेत सोम्यंचरुं बभ्रुमाग्नेयंकृष्णग्रीवंपुरोधायस्पर्धमानइत्यादिपशुगणानांशाक्यानामयनादिसंवत्सरसत्राणांकेवलविकृतित्वेपिअग्नी

SGDF Sri Gargeshwari Digital Foundation

प्र० तिचतुर्थेऽधिकरणे “सौर्यंचरुंनिर्वपेत् । ऐंद्राग्नमेकादशकपालंनिर्वपे”दित्यादिवाक्योक्तसौर्यैंद्राग्नादिषुदार्शपौर्णमासिकोविध्यंतउतसामिक इतिसंशये नियामकाभावादनियमइतिप्राप्ते तद्धितेनदेवतानिर्देशोनिर्वपतिशब्दश्चेत्यादिलिंगविशेषाद्दार्शपौर्णमासिकइतिसिद्धांतितं । तेन तत्रदर्शपूर्णमासयोःसर्वांगोपदेशेनकेवलप्रकृतित्वंसिद्धं । आदिपदेनाग्निहोत्रादिग्रहणं तथातत्रैव “तत्प्रवृत्तिर्गणेषुस्यात्प्रतिपशुयूपदर्शना” दित्यष्टमेऽधिकरणे “मैत्रंश्वेतमालभेतवारुणंकृष्ण”मित्यादिषुकिमग्नीषोमीयस्यपशोर्विध्यंतउतैकादशिनानांपशूनांविध्यंतइतिसंशये आलभत्या दिसामान्यादग्नीषोमीयस्येतिप्राप्ते प्रतिपशुयूपदर्शनादविशेषलिंगादग्नीषोमीयप्रकृतित्वेचोदकेनैकस्यैवयूपस्यप्राप्तत्वेनप्रतिपशुयूपदर्शनंविरुध्ये तेतिपशुगणेष्वेकादशिनानांपशूनांविध्यंतइतिसिद्धांतितं । तेनतत्रपशुगणानांकेवलविकृतित्वंसिद्धं । आदिपदेनशाक्यानामयनादिसंवत्सर सत्राणांग्रहणं । तथातत्रैव “पशौचलिंगदर्शना”दितिपंचमेधिकरणे “अग्नीषोमीयंपशुमालभेते”त्युक्ताग्नीषोमीयपशौकिंदार्शपौर्णमासिको विध्यंतउतसौमिकइतिसंदेहे अनियमइतिप्राप्ते तद्धितेनदेवतानिर्देशादिलिंगदर्शनाद्दार्शपौर्णमासिकोविध्यंतइत्युक्तत्वादग्नीषोमीयपशोर्विकृ तित्वंसिद्धं । तथातत्रैव “दैक्षस्यचेतरे”ष्विति षष्ठेऽधिकरणेसवनीयानुबंध्यनिरूढादिपशुषुकिंदार्शपौर्णमासिकोविध्यंतउतदैक्षस्य दीक्षितेना नुष्ठीयमानेषुप्राथमिकत्वाद्दैक्षशब्दितस्याग्नीषोमीयस्येतिसंशये पूर्ववद्दार्शपौर्णमासिकइतिप्राप्ते पशुद्रव्यकत्वसामान्याद्विशसनादिद्रव्यसंस्का रलाभाच्चदैक्षस्याग्नीषोमीयस्यविध्यंतइत्युक्तत्वादग्नीषोमीयस्यपशोस्सवनीयादिपशुबंधंप्रतिप्रकृतित्वंदर्शपूर्णमासविकृतित्वंचपूर्वोक्तदिशासिद्ध मितिद्वैरूप्यंध्येयं ॥ **अवघातादीनामिति** ॥ छंदोभिधानादित्यत्रप्राक्प्रपंचितमेतत् । “तानिद्वैधंगुणप्रधानभूतानी”त्यधिकरणेदृष्टतुष

अवघातादीनांदृष्टमात्रार्थत्वेपि

गु० षोमीयपशुद्वादशाहादीनांयथाप्रकृतित्वेपिविकृतित्वं अवघातादीनांवैतुष्यादिदृष्टमात्रार्थत्वेपिप्रोक्षणसंमार्जनादीनांद्रव्यगतादृष्टमात्रार्थत्वेपियथास्विष्टिकृदुत्तमप्रया

SGDF
Sri Gargeshwari Digital Foundation

प्र० विमोकमात्रार्थत्वंसिद्धं ॥ **प्रोक्षणेति** ॥ द्वितीयस्याद्यपादे "धर्ममात्रेतुकर्मस्यानिवृत्तेःप्रयाजव"दितिपंचमेऽधिकरणे "व्रीहीन्प्रोक्षतिस्रुचस्संमार्ष्टी"त्युक्तप्रोक्षणसंमार्जनादीनांद्रव्यगतसंस्काररूपादृष्टार्थत्वमुक्तं ॥ **स्विष्टकृदिति** ॥ स्विष्टकृदधिकरणंजिज्ञासाधिकरणेप्रपंचितं ॥ **कामेति** ॥ "ऐंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकाम"इत्यादीनांकामाधिकारत्वंषष्ठाद्यस्वर्गकामाधिकरणेसिद्धं । "यावज्जीवमग्निहोत्रंजुहोति यावज्जीवंदर्शपूर्णमासाभ्यांयजेत वसंतेवसंतेज्योतिषायजेते"त्यादीनां "अभ्यासोकर्मशेषत्वात्पुरुषार्थोविधीयत"इति "सर्वशक्तौप्रवृत्तिस्स्यात्तथाभूतोपदेशा"दित्यादिषुनित्याधिकारत्वंषष्ठेद्वितीयपादेतृतीयपादेचसिद्धं । यद्वानित्यशब्दोनैमित्तिकपरः । जीवनादिगृहदाहाद्यनागंतुकागंतुकनिमित्तवत्त्वमात्रेणनित्यनैमित्तिकयोर्भेदात् । क्वचित्तुनैमित्तिकेत्येवपाठः । "यस्यगृहान्दहत्यग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपे"दित्यादेर्नैमित्तिकाधिकारत्वं "क्षामेतुसर्वहोमस्स्यादेकदेशस्यावर्जनीयत्वा"दिति षष्ठचतुर्थपादीयपंचमाधिकरणेसिद्धं । "यस्मिन्जातएतामिष्टिंनिर्वपतिपूतएवतेजस्व्यन्नादइंद्रियावीपशुमा"नित्यादेरधिकारद्वयसंवलनं "पूर्ववंतोविधानार्थास्तत्सामर्थ्यंसमाम्नाये"इतिप्रथमाध्यायचतुर्थपादीयद्वादशाधिकरणे "फलसंयोगस्त्वचोदितेनस्यादशेषभूतत्वा"दितिचतुर्थाध्यायतृतीयपादीयसप्तदशेऽधिकरणेचसिद्धं । पुत्र

प्रोक्षणादीनामदृष्टमात्रार्थत्वेपि स्विष्टकृदादीनामुभयार्थत्ववत्, अन्यत्रकामाधिकारनित्याधिकारयोरन्यतरमात्रस्यसत्त्वेपिजातेष्टौद्वयोःसंवलनवत्, ॥ ५९१ ॥

गु० जादीनामंशभेदेनोभयार्थत्वं ऐंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामः यस्यगृहान्दहत्यग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेदित्यैंद्राग्नक्षामवत्यादौकामाधिकारनैमि

प्र० जन्मनिमित्तकत्वस्यफलार्थत्वस्यचश्रवणात् ॥ **व्रीह्यादीनामिति** ॥ एतच्च "तानिद्वैधंगुणप्रधानभूतानी"त्यत्रसिद्धं । तानिद्वैधाधिकरणंछंदोनयेविवृतं ॥ **गोदोहनेति** ॥ चतुर्थस्याद्यपादे "यस्मिन्प्रीतिःपुरुषस्यतल्लिप्सार्थलक्षणाविभक्तत्वा"दितिसूत्रेतृतीयवर्णके "गोदोहनेनपशुकामस्यप्रणये"दितिदर्शपूर्णमासप्रकरणेश्रुतंगोदोहनंक्रत्वर्थमप्युतपुरुषार्थमेवेतिसंशये षष्ठीश्रुत्यापुरुषार्थत्वंक्रतूपकारकत्वाच्चक्रत्वर्थमित्युभयार्थमितिप्राप्ते उपकारकत्वलक्षणशेषत्वनिराकरणादन्यार्थस्यापिक्रतूपकारकत्वाविरोधाच्छ्रुत्यापुरुषार्थत्वमेवेतिसिद्धांतितं ॥ **दध्यादीनामिति** ॥ चतुर्थस्यतृतीयपादे "एकस्यतूभयत्वेसंयोगपृथक्त्व"मितितृतीयाधिकरणे "दध्नेंद्रियकामस्यजुहुया"दित्यत्राग्निहोत्रप्रकरणगतेवाक्ये किंकाम्यमेवदधिनित्येप्यग्निहोत्रेस्यादुततोन्यन्नित्यइतिसंशये काम्यस्यनित्यार्थत्वासंभवादन्यदेवनित्येस्यात् । नचदध्नाजुहोतीतिदध्नोनित्यार्थत्वमपिश्रूयतइतिवाच्यं । तस्यकाम्यवाक्यैकवाक्यत्वादितिप्राप्ते उभयोर्वाक्ययोर्नैराकांक्ष्येणैकवाक्यत्वासंभवात्संयोगपृथक्त्वेनोभयार्थमितिसिद्धांतितं । एवंदृष्टांतपरंपूर्वार्धंव्यक्तीकृत्योत्तरार्धोक्तंदार्ष्टांतिकंव्यनक्ति ॥ **अन्यत्रेत्यादिना** ॥ **सत्त्वेपीति** ॥ ब्रह्मण्युभयमुपपन्नमित्यन्वयः । ननुदृष्टांतोक्त्यासंभावनैवोक्ता । नतुप्रमेयंतेनसिध्यति । मानाधीनत्वात्तस्येत्यतः "अणोरणीयानित्याद्यागमस्योभयकार्यदर्श

व्रीह्यादीनांक्रत्वर्थमात्रत्वेपि गोदोहनादीनांपुरुषार्थत्वमात्रत्वेपि दध्यादीनामुभयार्थत्ववच्चान्यत्राणुत्वमहत्त्वयोरेकैकमात्रस्यसत्त्वेपि

गु० त्तिकाधिकारयोरन्यतरमात्रसत्त्वेपि यथावाजातेष्टौयस्मिन्जातएतामिष्टिंनिर्वपतिपूतएवसतेजस्व्यन्नादइंद्रियावीपशुमान्भवतीत्यधिकारद्वयसंवलनं व्रीहिभिर्यजेतसोमेनयजेतेत्यादिनाव्रीहिसोमादीनांक्रत्वर्थत्वमात्रत्वेपिगोदोहनेनपशुकामस्यप्रणयेदेकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येत्यादिनागोदोहनैकविंशत्यनुवचनादीनांपुरुषार्थत्वमा

SGDF Sri Gargeshwari Digital Foundation

प्र० नानुमानस्ययशोदादिप्रत्यक्षस्यचप्रमाणत्वा”दितिसुधावाक्यंविवृण्वन्प्रत्यक्षादिप्रमाणान्याह ॥ अणुनीति ॥ अल्पपरिमाणइत्यर्थः । उक्तंचसन्न्यायरत्नावल्यां “दृष्टश्चैवंविधःप्रभावोयशोदयागोविंदे । तथाहि भागवतवचनं । पीतप्रायस्यजननीसुतस्यरुचिरस्मितं । मुखं लालयतीराजन्जृंभतोददृशेऽखिलं । खंरोदसीज्योतिरनीकमास्येसूर्येंदुवह्निश्वसनानृषींश्चेत्यादी”ति ॥ अणुत्वलिंगस्येति ॥ अणुत्वानुमापकस्य । महत्त्वलिंगस्य महत्त्वानुमापकस्येत्यर्थः । सत्त्वादित्यन्वयः । एतच्च “गोपिकोलूखलेदाम्नाबबंधप्राकृतंयथा । तद्दामबध्यमानस्य स्वार्भकस्यकृतागसः । द्व्यंगुलोनमभूत्तेनसंदधेन्यच्चगोपिके”त्यादिना “दृष्ट्वापरिश्रमंकृष्णःकृपयासीत्स्वबंधन”इत्यादिनाचावसेयं । अणोर्महतइतिचपंचमी । नन्वेवंघटादावपिरूपरसवदणुत्वमहत्त्वेस्यातामित्यत “एकत्रयुगपदणुत्वमहत्त्वविरोधस्तुप्राकृतत्वोपाधिकृतइतिसन्न्यायरत्नावल्युक्तमाह ॥ अणुत्वादेरिति ॥ आदिपदेनह्रस्वत्वदीर्घत्वादिग्रहः ॥ भेदेति ॥ यथाभेदेनसूचीकटाहादेरणुत्वमहत्त्वादिनिर्वाहस्तथेहनेहनानेत्यादिनाभेदस्यनिषेधेनभेदाभावेपितत्प्रतिनिधितत्कार्यनिर्वाहकस्यविशेषस्यसत्त्वादित्यर्थः । इत्यादाविति “विरुद्धधर्मरूपोसावैं

अणुन्येवकृष्णस्यमुखेगर्भीकृतब्रह्मांडेमहत्त्वग्राहकस्ययशोदाप्रत्यक्षस्य अणुत्वलिंगस्यैकेनापिदाम्नाबंधनस्य महत्त्वलिंगस्यानेकैरप्यबंधनस्य “अणोरणीयान्महतोमहीया”नित्यागमस्यचसत्त्वात् । अणुत्वादेर्महत्त्वाद्यसामानाधिकरण्येचप्राकृतत्वस्योपाधित्वात् । भेदप्रतिनिधेर्विशेषस्यसत्त्वाच्च । “त्वयीश्वरेब्रह्मणिनोविरुध्यत”इत्यादावैश्वर्यादेवाविरोधोक्तेश्चब्रह्मण्युभयमुपपन्नं । तदुक्तमनुव्याख्याने

गु० त्र्त्वेपि यथाचदध्नाजुहोतिदध्नेंद्रियकामस्यजुहुयात्खादिरोयूपोभवति खादिरंवीर्यकामस्ययूपंकुर्यादित्यादिनादधिखादिरत्वादीनामुभयार्थत्वं तथाप्रकृतेपीति । कामा

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्वर्यात्पुरुषोत्तम"इतिभाष्यंग्राह्यं । उक्तंचछांदोग्यभाष्येसप्तमे "अल्पपरिमाणस्यापिमहत्परिमाणंचयुज्यतेऽचिंत्यशक्तित्वात् । यस्मिन्विरुद्धगतयोप्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्ये"त्यादि । उक्तंचात्रतत्वप्रदीपे "यद्यपिलोकेतिस्थूलत्वात्यणुत्वादयोधर्माएकत्रविरुद्धाः । तथापिविष्णावैश्वर्यादुपपद्यंते । तदाह विरुद्धधर्मरूपोसावैश्वर्या"दितीति ॥ **अतइति** ॥ यतोब्रह्मविरुद्धलक्षणैर्युक्तमेवातोविरुद्धार्थप्रतिपादकमिवप्रतीतमपिवाक्यंतत्वतोव्याख्यायहरौयोजनीयं योजयितुंशक्यमिति । नन्वणुत्वमहत्त्वयोरन्यत्रसहानवस्थानरूपविरोधमभ्युपेत्यब्रह्मण्यप्राकृतत्वेनवा विशेषबलेनाचिंत्यैश्वर्येणवा द्वयमप्युपपन्नमित्युक्तमयुक्तमिव । अणुत्वमहत्त्वादिपरिमाणावांतरजातेर्वैशेषिकाधिकरणानुव्याख्यानादौनिराकृतत्वात् । परिमाणापकर्षोत्कर्षयोरेवाणुत्वादिशब्दार्थत्वात्तयोश्चप्रतिवस्तुस्थितेरभ्युपगतत्वेनविरोधस्यैवाभावात् । उक्तंचानुव्याख्याने "अणुत्वंचमहत्त्वंचपरमाणावणावपि । कथंत्र्यणुकपूर्वेषुनाणुत्वमपिकथ्यत"इति "अणुत्वंचमहत्त्वंचयतोवस्तुव्यपेक्षया । तारतम्यस्थितायस्मात्पदार्थास्सर्वएवचे"तिचेन्मैवं । तात्पर्यभेदात् । ब्रह्मणोपरिच्छिन्नत्वेनततोधिकपरिमाणस्यान्यस्यवस्तुनोभावेनतदपेक्षयाणुत्वासंभवात्स्वापेक्षयैवस्वस्याणुत्वस्यवक्तव्यत्वात्तस्यचघटादावदर्शनाद्विरुद्धत्वमितिभावेनब्रह्मण्युक्तयुक्त्यातयोस्समर्थनात् । तथाचोक्तमत्रसुधायां "नचैकपरिमाणोपेतमेवोत्कृष्टापकृष्टापेक्षयाणुमहद्दीर्घह्रस्वंचेत्युच्यतइत्याश्रयणेनविरोधपरिहारः । घटादितुल्यत्वेनावक्तव्यत्वात् । उत्कृष्टापकृष्टपरिमाणद्रव्यांतराभावाच्चे"ति । तथा "अणीयांश्चमहीयांश्चभगवानागमोदित"इतिवैशेषिकनयानु

"अतोविरुद्धवद्भातमपिव्याख्यायतत्वतः । योजनीयंहरौवाक्यंविरुद्धैर्लक्षणैर्युत" मिति ।

गु० धिकारनित्याधिकारयोरितिपाठेनित्यशब्दोनैमित्तिकपरः।जातेष्टेःशुद्धकाम्यत्वेपुत्रेजातइतिपुत्रजननरूपनिमित्तश्रवणविरोधाच्छुद्धनैमित्तिकत्वेचपूतएवतेजस्व्यन्नाद

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्याख्यानव्याख्यावसरेचोक्तं । "नन्वेवंस्वस्मादेवस्वयमुत्कृष्टोपकृष्टश्चेत्यागतं । कोनेत्याहे"त्यादि । एवंलोकेविरोधमुपेत्यद्वयोर्ब्रह्मणिसमावेशस्समर्थितः । इदानींघटादावन्यापेक्षयाणुत्वमहत्त्वयोरविरोधइवस्वापेक्षयापिस्वस्यतथाभावोयुक्तः । "महतोल्पत्वमपिहिव्योमवत्प्राह वेदवित्"इति "अतस्सर्वपदार्थानांभागास्संत्येवसर्वदा । सर्वदिक्ष्वपिसंबंधा"दित्यादिवैशेषिकनयानुभाष्योक्त्यनुरोधेनात्रसुधायां "किंचाकाशस्यपरमाणुसंयोगःकिमाकाशैकदेशेवर्तत उताकाशएवे"त्यादिनाप्रपंचितरीत्यापरिच्छिन्नेगगनादौपरिमाणापकर्षलक्षणाणुत्वस्यापिदर्शने

किंच प्रतिसंबंधिनातुल्यदेशेसंबंधिनिस्थितेः । संयोगस्याणुसंयोगोह्याकाशेप्यणुमात्रगः ॥ १ ॥ आकाशस्येश्वरस्यचपरमाणुसंयोगःप्रतिसंबंधिभूतपरमाणुतुल्यपरिमाणाकाशादिप्रदेशवृत्तिर्वाच्यः । सूच्यग्रादिना पर्वतादेःसंयोगस्यसूच्यग्रसमपरिमाणपर्वतादिप्रदेशवृत्तित्वदर्शनात् ।

प्र० नविरोधस्यैवाभावाद्ब्रह्मणितत्समावेशोयुक्तइत्यभिप्रेत्याकाशेणुत्वमपिसाधयति ॥ किंचेत्यादिनानाणुत्वमहत्त्वयोर्विरोधइत्यंतेन ॥ यद्वा "परमाणुसंबद्धईश्वरप्रदेशःपरमाणुपरिमाणतामणति । मेरुमंदरादिगतस्तत्परिमाणतामुपैति । सएवगगनसंबंधीतादृशोभवति । नहि तेषांप्रदेशानामीश्वरान्मिथोवाभेदंवादिनोवदंती"त्यादिनातत्वप्रदीपोक्तदिशा ईश्वरोऽणुपरिमाणाश्रयः । अणुपरिमाणपरमाणुसंयोगाश्रयत्वादित्यनुमानमभिप्रेत्यहेतोर्व्याप्तिसिद्ध्यर्थंगगनादौदृष्टांतेदार्ष्टांतिकेश्वरेचतत्साधयति ॥ किंचेत्यादिना ॥ श्लोकंव्याख्याति ॥ आकाशस्येति ॥ ॥ ५९३ ॥

प्र० अप्रयोजकत्वमाशंक्यविपक्षेबाधकद्वयमाह ॥ यदिचेति ॥ अस्तुकृत्स्नवृत्तित्वंकोदोषइत्यतआह ॥ तथाचेति ॥ एतेन "भेरीसंयोगस्यापितथात्वोपपत्तेः । तथाचसर्वत्रशब्दोपलब्धिप्रसंगा"दितिसुधावाक्यंविवृतंभवति । संयोगस्याव्याप्यवृत्तित्वंमत्वोक्तबाधकपरिहारमाशंकते ॥ संयोगस्येति ॥ अदोषइति ॥ संयोगस्यप्रदेशवृत्तित्वदर्शनादीश्वरेगगनादौचपरमाणुतुल्यपरिमाणप्रदेशोपिपरमाणुसंयोगाश्रयतयाभ्युपगंतव्यइतिदोषोनास्तीत्यर्थः । अन्यथान्यायामृतेप्रदेशस्यप्रदेशिनोभिन्नत्वेनान्यवृत्तिधर्मस्यान्यवृत्तित्वाभ्युपगमेऽतिप्रसंगादितिभावः । "भावाभावयोरन्यत्रसर्वत्रसहानवस्थितयोःकथंविरोधोनभवे"दितिसुधोक्तंदोषंव्यक्तमाह ॥ अणुत्वेति ॥ सुतरामिति ॥ अणुत्वमहत्त्वयोरेकत्रवृत्तौहितत्परिमाणप्रदेशादिनिष्ठतयासंयोगतदभावयोरविरोधोनान्यथेतिभावः । अल्पपरिमाणप्रदेशवृत्ति

यदिचान्यत्रादृष्टाप्याकाशसंयोगस्यप्रतिसंबंधिपरिमाणादधिकपरिमाणदेशवृत्तिता तर्ह्यन्यत्रादृष्टमीश्वरस्यमहतोप्यणीयस्त्वंस्यात् । भेरीशब्दासमवायिकारणस्यहन्यमानभेर्याकाशसंयोगस्यकृत्स्नाकाशवृत्तित्वंचस्यात् । तथाचत्वन्मतेजन्यविभुविशेषगुणानांदेशनियमस्यासमवायिकारणकृतत्वादाद्यएवभेरीशब्दःकृत्स्नव्यापीतितस्यसर्वत्रोपलब्धिःस्यात् । वीचीतरंगन्यायेनशब्दपरंपरोत्पत्तिप्रक्रियाभंगश्चस्यात् । संयोगस्यस्वात्यंताभावसामानाधिकरण्याददोषइतिचेन्न । अणुत्वमहत्त्वयोरसामानाधिकरण्यनियमेभावाभावयोःसुतरांसामानाधिकरण्यायोगात् ।

गु० इतिवृत्त्यादिफलश्रवणविरोधात्संवलिताधिकारोंगीकृतोननुसयवहिर्भावइतिभावः ॥ वीचीतरंगन्यायेनेति ॥ प्रथमोत्पन्नात्वीचीवीच्यंतरमारभतेतथतरंगां

SGDF Sri Gargeshwari Digital Foundation

प्र॰ त्वमनंगीकृत्यस्वात्यंताभावसामानाधिकरण्यनियमेदोषांतरंचाह ॥ **किंचेति** ॥ यद्वाएकत्रसंयोगतदभावौप्रतीतिविरोधान्नस्तइत्याह ॥ **किंचेति** ॥ नन्वस्तूक्तदिशापरमाणुसंयोगोगगनादौपरमाणुतुल्यपरिमाणप्रदेशवृत्तिर्नेतावतागगनादेरणुत्वमहत्त्वसिद्धिः । प्रदेशस्यौपाधिकत्वात् । स्वाभाविकत्वेवापटादाविवभिन्नत्वेनाणुत्वस्यतन्मात्रनिष्ठत्वेनगगनादावभावादित्यतोद्वयमपिक्रमेणनिराह ॥ **प्रदेशस्येति** ॥ **उक्तरीत्येति** ॥ सूच्यग्रेत्यादिनोक्तरीत्येत्यर्थः । नन्वस्तूपाधिसंयोगोप्यणुपरिमाणकप्रदेशवृत्तिः । कोदोषइतिचेत् सोपिकिमौपाधिकउत स्वाभाविकः । नाद्यः । आत्माश्रयाद्यापत्तेः । द्वितीयेतुस्वाभाविकाणुपरिमाणकप्रदेशोगगनादावंगीकृतस्स्यादितिभावः । उक्तंचतत्वविवेकटीकायां ''तथैवांशांशिनोरपी''त्येतद्व्याख्यावसरेकिंचाकाशस्यतावदंशास्संतीत्यंगीकरणीयं । अन्यथाऽऽकाशेविहगशरीरभावाभावौन स्यातां । संयोगस्स्वात्यंताभावसमानाश्रयइतिचेन्न । विरोधात् । अन्यथासर्वत्रभावाभावविरोधाभावप्रसंगात् । नचोपाधिकृतांशसद्भावादविरोधः । उपाधेरपिविहगशरीरसमानयोगक्षेमत्वा''दिति ॥ **निरवयवइति** ॥ ''कूटंखंविदलंव्योमे''त्यादौविदलत्वप्रसिद्धेः । परैरपि तथांगीकाराच्चेतिभावः । गगनेप्रदेशोन्योनह्यस्तीत्यनेनैतदपिनिरस्तं । संयोगःप्रदेशवृत्तिरित्ययुक्तं । तथात्वेघटादिसंयोगोपिघटाद्यंशसंयोग

किंचभेर्यवष्टब्धप्रदेशेसंयोगवत्तदत्यंताभावस्य अन्यत्रचतदत्यंताभाववत्संयोगस्यधीःस्या
त् । प्रदेशस्यौपाधिकत्वेतूपाधिसंयोगोप्युक्तरीत्याऽणुप्रदेशवृत्तिःस्यात् । नचनिरवयवेग
गनेणुपरिमाणःप्रदेशोन्योस्तीतिमहतोगगनस्यैवाणुत्वंसिद्धमितिनाणुत्वमहत्त्वयोर्विरोधः ।

गु॰ तरंतथाशब्दोपिसर्वतोदिक्षुसजातीयशब्दांतरंतदपिशब्दांतरमितिवीचीतरंगन्यायेनेत्यर्थः ॥ **उक्तरीत्येति** ॥ आकाशस्योपाधिसंयोगः प्रतिबंधभूतोपाधितुल्य

SGDF Sri Gargeshwari Digital Foundation

प्र० पूर्वकःसोपितदंशसंयोगपूर्वकइत्यनवस्थापत्तेः । नचेयंनिरंशेपरंपराविश्राम्यतीतिवाच्यं । उक्तरीत्याकस्याप्यनंशत्वाभावादितिप्रदेशप्रदेशिनोरभेदेनप्रदेशसंयोगस्यैवप्रदेशिसंयोगत्वेनानवस्थाभावादिति । एतेनैवान्यसंयोगस्यकथमन्यसंयोगत्वं । अतिप्रसंगादित्यपिप्रत्युक्तं । तयोरभेदादिति । प्रपंचितंचैतद्वैशेषिकानुव्याख्यानसुधयोः "अंशांशिनोरभेदेनत्वंशसंयोगएवहि । अंशिनोनानवस्थातोयद्यप्यंशेष्वविश्रमः । एकस्मिन्जातएवान्यःसंयोगोजायतेयदि । अनवस्थातदैवस्यात्संयोगैक्येभवेत्कसे"त्यादिनेतिभावः । एवंसूत्रोपात्तसाधकान्युपपाद्य

अत्तृत्वानशनयोरविरोधस्तु "अनशनोक्तिस्त्वनुपजीवनार्थत्वेने"तिन्यायविवरणएवोक्तः । "साशनानशनत्वेननरदेवौयथोदितौ । अत्तिंविनाप्यदौर्बल्यात्तथानत्तिर्हरेर्भुजि"रितिचस्मृतिः । "सर्वत्रप्रसिद्धे"त्यत्रसर्वगतस्याप्येकदेशवृत्तिःशतेपंचाशन्न्यायेनाविरुद्धा । एकदेशमात्रगतत्वंत्वसिद्धमित्युक्तं । भूमाधिकरणेतुसर्वगतेप्यणुत्वमत्रवक्ष्यमाणंसिद्धंकृत्वातद्बलादुत्क्रांतिरुक्ता । इहतुपुनर्महतोप्यणुत्वमुच्यते । "अल्पश्रुते"रित्यत्रतुगगनवन्नावयविरूपेणैवमहत्त्वं । किंत्ववयवरूपेणापीतिवक्ष्यतइतिभेदः । अत्रचाद्येसूत्रेविषयवाक्यस्थसाधकोक्तिः । द्वितीयेतदुत्तरवाक्यस्थस्य ।

प्र० यत्पूर्वपक्षिणाऽनशनंबाधकमितिशंकितंतत् "अनेनैवनतदश्नातिकिंचनेत्येतदपिजीवस्वभावभूतोपजीवनार्थाशनव्यावृत्त्यर्थ"मितिटीकोक्तेर्मूलंवदन्निराह ॥ **अत्तृत्वेति** ॥ नन्वर्भकौकस्त्वादिनाऽणुत्वमुक्तं । "महतोल्पत्वमपिहिव्योमवत्प्राहवेदवि"दित्यनुव्याख्यानोक्तेः । अतः पौनरुक्त्यमित्यतआह ॥ **सर्वत्रेति** ॥ विवृतंचैतत्तत्रैवास्माभिरल्पश्रुतेरितिदहराधिकरणे ॥ **विषयवाक्यस्थेति** ॥ ननुभाष्यटीकारीत्या "अदृष्टंद्रष्टृ"त्यादिचरमवाक्यस्यविषयत्वे तत्र "एतस्मिन्खल्वक्षरेगार्ग्याकाशओतश्चे"तिश्रवणेप्यंबरधृतेरेवश्रवणेनांबरांतसर्वधृतिर्नश्रुता ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० चंद्रिकोक्तरीत्या "तद्वाएतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूल"मित्यादेर्विषयत्वेतत्रांबरस्यैवसर्वाधारत्वश्रवणेनसर्वाधारांबराधारत्वस्यतत्रा श्रवणात्कथंविषयवाक्यस्थसाधकोक्तिरिति । मिलित्वासर्वस्यविषयत्वाद्विषयवाक्यस्थेत्युक्तिरित्युक्तावपिद्वितीयेतदुत्तरवाक्यस्थेत्युत्तरग्रंथासं गतिः । तस्यमध्यवाक्यस्थसाधकत्वात् । मैवं । भाष्याद्युक्तेस्संगत्याद्यर्थतयोपपत्त्याचंद्रिकोक्तस्यैवविषयत्वात् । तत्रांबरेसर्वाधारत्वमात्र श्रवणेपिसर्वाधारांबरस्याक्षराधारकत्वविवक्षयाक्षरस्यास्थूलमित्यादिनामहिमोक्तेरंबरांताधारत्वंतत्राभिमतमितिविषयवाक्यस्थेत्युक्तं । यद्वा विषयवाक्यस्थेत्यस्याद्यंतविषयवाक्यस्थेत्यर्थः । आदावंबरेसर्वाधारत्वस्यांतेऽक्षरेंबराधारत्वस्यश्रवणात् । अत्रांतपदंप्रकृतिद्वाराऽक्षरस्यसर्वा धारतोक्त्यर्थमंबरस्यचित्प्रकृतित्वोक्त्यर्थंच । तेनांतपदंव्यर्थमितिकस्यचिद्दूषणमलग्नकंध्येयं । "द्वितीयेतदुत्तरवाक्यस्थे"त्यस्यत्वादिवा क्यापेक्षयोत्तरवाक्यस्थेत्यर्थः । "एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठत"इत्युत्तरवाक्येसाचधृतिराज्ञामात्रेणोच्यतइत्य र्थः । "अन्यभावव्यावृत्ते"रित्यस्याद्यत्वमाशंक्यांत्यत्वमुपपादयति ॥ **तृतीयइति** ॥ **अन्येत्विति** ॥ भामत्युक्तमनुवदति ॥

तृतीयेयद्यपिविषयवाक्यस्थास्थूलत्वादिरूपसाधकोक्तिः तथापितेनैवब्रह्माक्षरंचेत्स्थौल्यादिरहितत्वान्निःस्वभावंस्यादितिशं कितस्यबाधकस्य पदार्थांतरस्वभावरूपप्राकृतस्थौल्यादिरहितं । नतुसर्वथेत्येवमुद्धारात् तथाऽणुत्वमहत्त्वादिकंविरुद्धमि तिशंकितस्यबाधकस्याणुत्वमहत्त्वयोर्विरोधेप्राकृतत्वंतंत्रं । ब्रह्मतुप्राकृतपदार्थव्यावृत्तमित्येवमुद्धारात्तस्यांत्यता । अन्येतु । ॥ ५९५ ॥

गु० परिमाणाकाशादिप्रदेशवृत्तिर्वाच्यइत्युक्तरीत्येत्यर्थः ॥ **तेनैवेति** ॥ तृतीयसूत्रेणैवेत्यर्थः । अत्रतेनेत्यस्योद्धारादित्यनेनान्वयः ॥ **अन्येत्विति** ॥ अत्ररूप्यतेनि

प्र० **वर्णाएवाक्षरमिति** ॥ **रूढेरिति** ॥ "अक्षरसमाम्नाय"इत्यादौप्रसिद्धत्वात् । ब्रह्मणित्ववयवप्रसिद्ध्यायौगिकः । अवयवप्रसिद्धेश्चसमुदायप्र सिद्धिरूपरूढिर्बलीयसीतिभावः ॥ **रूपधेयस्येति** ॥ रूप्यतेनिरूप्यतेइत्यभिधेयमितिकल्पतरूक्त्याभिधेयवाचिरूपशब्दात् "भागरूपनामभ्यो धेय"इतिस्वार्थेधेयप्रत्ययः । वाच्यार्थस्येत्यर्थः ॥ **अनुविद्धतयेति** ॥ तादात्म्येनेत्यर्थः । ननुपरभाष्ये "ॐकारएवेदंसर्वमित्यादौचश्रुत्यंतरे वर्णस्याप्युपास्यत्वसर्वात्मत्वावधारणा"दित्युक्त्योंकाररूपवर्णएवाक्षरमितिप्रतीतेर्वर्णमात्रमेवेतिकथमुच्यतइत्यतो "नामानिचोंकारात्मकानि । तद्व्याप्तत्वा"दित्यादिनाभामत्युक्तमेवाशयमाह ॥ **भाष्यइति** ॥ "तद्यथाशंकुनासर्वाणिपर्णानिसंतृण्णानि । एवमोंकारेणसर्वावा"गिति श्रुतेरित्यर्थः । तथाच "ॐकारएवेदंसर्व"मितिश्रुत्यंतरॐकारस्यसर्वात्मकत्वश्रवणात् "ॐकारेणैवे"तिश्रुत्यासर्ववर्णात्मकत्वात् इहचश्रुतौ पृथिव्याद्यंबरांतसर्वतादात्म्येनोतप्रोतपदाभ्यांश्रुतमक्षरंवर्णाएवेति अक्षरेविषयवाक्यश्रुतसर्वात्मकत्वंवर्णेषूपपादयितुंवर्णानांसर्वात्मकत्वेस्पष्टश्रु तेरभावादोंकारस्यसर्ववर्णात्मकत्वंश्रुत्यंतरसिद्धंहृदिसिद्धवत्कृत्योंकारस्यसर्वात्मकत्वे "ॐकारएवेदंसर्व"मितिभाष्येश्रुतिरुक्ता । नत्वत्रोंकार

वर्णाएवाक्षरं । अक्षरशब्दस्यतत्ररूढेः । नचवर्णेष्वाकाशस्योतत्वाद्ययोगः । सर्वस्यापिरूपधेयस्यगौ रयंवृक्षोयमितिनामधेयानुविद्धतयाभानात् । तथाचवर्णमात्रमेवाक्षरमितिपूर्वःपक्षः । भाष्ये "ॐकारोक्षर"मित्युक्तिस्त्वोंकारस्यसर्ववर्णात्मकत्वश्रुतेः । सिद्धांतस्तुपृथिव्यादेर्भूताकाशांतस्य

गु० रूप्यतइतिरूपमभिधेयं । स्वार्थेधेयप्रत्ययइतिबोध्यं । अत्रवर्णाएवेत्यनेननप्रधानजीवयोर्व्यावृत्तिः । किंतुभाष्यॐकारमात्रोक्तेस्तस्यैवव्यवच्छेदइतिध्येयं । रूपधे यस्यरूपात्मकप्रपंचस्येत्यर्थः । तर्हिभाष्यॐकारमात्रस्यपूर्वपक्षनिविष्टत्वोक्तिःकथमित्यतआह ॥ **भाष्यइति** ॥ **तन्नेति** ॥ अक्षरत्रयमीरितमित्यादौयथाक्षर

SGDF
Sri Gargeshwari Digital Foundation

प्र० एवाक्षरमित्युपेत्येतिभावः ॥ विकारजातस्येति ॥ सर्वस्यब्रह्मविकारत्वाद्ब्रह्मण्येवाकाशादेरोतत्वंयुक्तं । नतुवर्णेषु । नचनामधेयात्मकंरूपधेयमित्युक्तत्वाद्वर्णेष्वपितद्युक्तमितिवाच्यं । स्वरूपभेदादुपायभेदादर्थक्रियाभेदाच्चतयोर्भेदात् । तथाहि । शब्दत्वसामान्यात्मकानिश्रोत्रग्राह्याण्यर्थप्रत्ययार्थक्रियाणिनामधेयानि । रूपधेयानितुघटादीनिघटत्वसामान्यात्मकानिचक्षुरादींद्रियग्राह्याणिजलाधारप्रावरणाद्यर्थक्रियाणीति तयोर्भेदाद्वर्णेष्वाकाशादेरोतत्वाद्ययोगाद्ब्रह्मैवाक्षरमित्याहुरित्यर्थः । जातिसंभेदस्य जातितादात्म्यस्येत्यर्थः । नन्वत्राप्योतप्रोतपदाभ्यांपृथिव्याद्यंबरांतसर्वात्मकत्वमेवोच्यते । नतुतदाश्रयत्वमितिचेन्न । सूत्रेधृतेरितिधृतिपदायोगात् । “पृथिव्यादेराकाशांतस्यधारणा”

विकारजातस्यधारणात् नक्षरतीत्यादिव्युत्पत्तिसंभवाच्चनिर्विशेषंब्रह्मैवाक्षरमित्याहुः। तन्न। गौरित्यादौगोत्वादिजातिसंभेदस्यगोशब्दादिवाच्यत्वस्यवाभानेपि “कस्मिन्नुखल्वाकाशओतश्चप्रोतश्चे”त्यादिश्रुत्युक्तस्याकाशाश्रयत्वस्याभानेनवर्णेषुद्रष्टृत्वादेरसंभवेनचपूर्वपक्षानुदयात् । उत्तराधिकरणेतुयथेक्षितृत्वश्रवणेपिजडप्रकृतेःप्राप्तिस्तथातत्रैववक्ष्यते ।

प्र०दितित्वदीयभाष्याद्युक्तययोगाच्च । नचात्राक्षरस्यसर्वात्मकत्वंभ्रांत्वाऽक्षरस्यवर्णत्वंशंक्यतइतियुक्तं । तथात्वे गौरयंवृक्षोयमित्यादौरूपधेयस्यनामधेयसंभेदेनभानेपीहसर्वाधारत्वमेवोच्यते । नत्वंबरांतसंभेदोक्षरस्योच्यते । येननामरूपसंभेदोपपादनंसंगच्छेतेत्येवसमाधिर्वाच्यः । नतुनामरूपभेदसमर्थनेनसमाधिर्वाच्यः । एतेनभाष्येॐकारएवेदंसर्वमितिसर्वबर्णात्मकतयाश्रुत्यंतरसिद्धोंकारस्यसर्वात्मकत्वोक्तिरपिव्यधिकरणा । विषयवाक्येऽक्षरस्यसर्वाभेदाश्रवणादित्युक्तंभवति । नन्वत्रद्रष्टृत्वादिनावर्णानामक्षरत्वशंकानुपपत्तावुत्तराधिकरणेतदैक्षतेतीक्षणश्रवणेपिकथंप्रधानमितिपूर्वपक्षइत्यतआह ॥ उत्तरेति ॥ अंतर्याम्यधिकरणेद्रष्टृत्वादिश्रवणेपिप्रधानमितिपूर्वपक्षकरणमनेननविरुध्यतइत्ये

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्तत्रैवोक्तमस्माभिः । अक्षरस्यवर्णत्वेनपूर्वपक्षेदोषांतरमाह ॥ किंचैवमिति ॥ गौरयंवृक्षोयमित्यादौनाम्नोरूपात्मनाभानेनात्राक्षरशब्दितेषु यद्भूतमित्यादिनासर्वात्मकत्वकथनंयद्यभिमतं तदा "ॐकारएवेदंसर्व"मितिश्रुताविव "यद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेतदक्षरओतंचप्रोतं चे"त्येवसाक्षात्सर्वसंभेदोक्षरेभिधीयेत । मध्येआकाशप्रणाड्यातदभिधानंव्यर्थमितिश्रुतहानिस्स्यादित्यर्थः । व्यर्थेत्युपलक्षणं । वक्ष्यमाण दिशाभूतभवद्भविष्यदाद्योतत्वस्यानित्याकाशेऽनुपपत्त्याविरुद्धार्थाचस्यादित्यपिध्येयं ॥ अनित्येति ॥ आत्मनआकाशस्संभूतइत्यादिश्रुत्या नवियदश्रुतेरितिवक्ष्यमाणदिशाचभूताकाशस्यानित्यत्वादितिभावः ॥ त्वदुक्तस्ययोगस्येति ॥ "नक्षरत्यश्नुतेचेतिनित्यत्वव्यापित्वाभ्यांप रमेवब्रह्मे"तिपरभाष्येऽभिधानादितिभावः । सूत्रार्थानामपिप्रत्याह ॥ आद्येति ॥ श्रुतावोतपदास्वारस्यंचाह ॥ तस्यचेति ॥ भ्रमाधि

किंचैवंपूर्वपक्षेपृथिव्यादेर्नामानुविद्धतायाआकाशव्यवहितत्वाभावेनश्रुतौमध्यआकाशोक्तिर्व्यर्थास्यात् । सिद्धांतोप्ययुक्तः । "आकाशएवतदोतंचे"तिपूर्ववाक्येत्रिकालवर्तिवस्त्वाश्रयत्वेनोक्तस्याकाशस्यानित्यभूताकाशतायाः, तथा अवाच्येनिर्विशेषेब्रह्मणिनक्षरतीतित्वदुक्तस्ययोगस्य, तथा "एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंती"तिश्रुत्युक्तस्यवाच्यत्वस्यद्रष्टृत्वादेश्चायोगात् । आद्यसूत्रेधृतिपदंचायुक्तं । त्वन्मतेभ्रमाधिष्ठानत्वादन्यस्यधारणस्याभावात् । तस्यच "आकाशएवतदोत"मित्यादिप्रक्रमानानुगुण्यात् । नह्याकाशेत्रैकालिकं

गु० शब्दवाच्यत्वंवाक्षरत्वजात्याधारत्वंप्रतीयतेतथागौरित्यत्रापीत्यर्थः । जातिसंभेदः जातिसंबंधः । भूतंभवद्भविष्यच्चेत्यनेनलब्धमर्थमाह ॥ त्रिकालेति ॥ ननु

SGDF
Sri Gargeshwari Digital Foundation

प्र० ष्ठानत्वस्येत्यर्थः ॥ वस्त्वध्यस्तमिति ॥ येनाक्षरेओतमित्यत्राप्योतशब्दस्याध्यस्तत्वमर्थस्स्यादितिभावः ॥ द्वितीयेति ॥ "आद्यसूत्रेंऽब रांतधृत्यावर्णानामक्षरत्वंनिरस्तं । साचप्रशासनादितिसूत्रेजडप्रकृतेरक्षरत्वंनिरस्यते । तथाहि । अंबरांतधृतेर्विश्वोपादानेप्रधानेपिसंभवात्प्र धानमेवाक्षरमितिशंकायां साचधृतिःपरमात्मनएवकर्म । एतस्यवाअक्षरस्यप्रशासनेगार्गीइत्यादिनाऽऽज्ञापरपर्यायस्यप्रशासनस्यश्रवणात् । नह्यचेतनस्यप्रशास्तृत्वंयुक्तमित्यर्थउक्तः । तत्रप्रधानइवनिर्विशेषब्रह्मण्यपिप्रशासनंनयुक्तं । सविशेषंतुनात्रप्रतिपाद्यं । पादासंगतेः । स्थौल्यादिनिषेधानुपपत्तेश्चेतिभावः । शास्तृत्वंकिंतात्विकमुतव्यावहारिकमथप्रातिभासिकं । आद्यद्वयंनिराह ॥ नचेति ॥ अपिपदेनता त्विकंतुशंकानर्हमितिसमुच्चीयते । निर्विशेषत्वादित्यर्थः । तृतीयेतुनप्रधाननिरासइत्याह ॥ प्रातिभासिकंत्विति ॥ प्रातिभासिकप्रशास

वस्त्वध्यस्तं । द्वितीयोक्तंप्रशासनंचायुक्तं । यतः । अध्यस्तस्यांबरांतस्यह्यधिष्ठानात्मिकाचितिः । नशास्त्रीनहिशुक्त्यादिशास्ति रूप्यादिकंक्वचित् ॥१॥ नहीहसविशेषंब्रह्मप्रतिपाद्यं । नचनिर्विशेषेव्यावहारिकमपिशास्तृत्वमस्ति । प्रातिभासिकंतुप्रधानेपि ।

गु० शास्तृत्वादिकंनिर्विशेषस्ययद्यपिनसंभवति । तथापिसविशेषेतूपपद्यतएव । तदेवात्रप्रतिपाद्यमित्यतआह ॥ नहीति ॥ तथात्वेपादसंगतिर्नस्यादितिभावः । ननु चनपादासंगतिः । निर्विशेषस्यैवशास्तृत्वादिनाप्रतिपाद्यत्वांगीकारात् । नचतस्यशास्तृत्वानुपपत्तिः । पारमार्थिकशास्तृत्वस्यनिर्विशेषेऽभावेपिव्यावहारिकशास्तृत्व स्यतत्रसत्त्वादित्यतआह ॥ नचनिर्विशेषइति ॥ ननुव्यावहारिकशास्तृत्वस्यनिर्विशेषेऽसंभवेपिप्रातिभासिकंशास्तृत्वंनिर्विशेषस्यसंभवतीत्यतआह ॥ प्रातिभा सिकमिति ॥ तथाचनप्रधानपक्षप्रतिक्षेपकतेत्यर्थः । ननुप्रातिभासिकमपिशास्तृत्वंब्रह्मण्येव । नप्रधाने । तथाचयुक्तस्तेनप्रधानपक्षनिरासइत्याशंकते ॥

प्र० नपक्षेकल्पतरूक्तंसमाधिमनूद्यनिराह ॥ यच्चेति ॥ एतच्चोपलक्षणं । यद्यत्रवर्णप्रधानयोःक्रमेणनिरासस्तर्ह्यक्षरंप्रशासनादित्येतावन्मात्रो क्तावपि चेतनधर्मेणप्रशासनेनवर्णप्रधानयोर्द्वयोरपिजडयोर्निरासप्तिद्ध्यांबरांतधृत्युक्तिर्योगद्वयोक्तिश्चव्यर्था । किंचप्रागुक्तरीत्याप्रकृष्टशास नस्यजीवेप्ययोगेनाक्षरंप्रशासनादित्येतावतैवजीवस्यापिनिरासादुत्तरसूत्रवैयर्थ्यंचेत्यपिध्येयं । एवंवर्णप्रधानयोरक्षरशब्दार्थत्वंव्युदस्यजीव स्याक्षरशब्दार्थत्वंव्युदसितुंप्रधानादिसर्वनिरासप्ताधारणं "अन्यभावव्यावृत्ते"रितिसूत्रं । तदर्थमनूद्यनिराह ॥ यच्चेति ॥ अदृष्टंद्रष्ट्रि त्यादिश्रुतिः अचक्षुष्कमश्रोत्रमितिचश्रुतिरित्यर्थः । आदिपदेनाचक्षुष्कत्वादेर्जीवेऽसंभवादितिगृह्यते । यत्त्वत्र "नान्यदतोस्तिद्रष्टृ नान्य

यच्चोक्तं चेतनधर्मःशास्तृत्वंचेतनेब्रह्मण्येवारोप्यते । नत्वचेतनेप्रधाने । नहिराजत्वंराजपरिवारोपेतेऽमात्यइवकुड्येप्यारो प्यतइति । तन्न । परमतेऽधिष्ठानाध्यस्तयोःसादृश्यनियमाभावात् । अमात्येराजसादृश्यवन्निर्विशेषेज्ञातृरूपचेतनसादृश्या भावाच्च । शासनकर्तृत्वरूपशास्तृत्वादेर्जडांतःकरणधर्मत्वेनजडस्यप्रधानस्यैवतत्सदृशत्वाच्च । यच्चोक्तं यदन्यद्ब्रह्मणोक्षरश ब्दवाच्यमिहाशंक्यते प्रधानजीवादि तद्भावादिदमक्षरंव्यावर्तयतिश्रुतिः । द्रष्टृत्वादेःप्रधानादावसंभवादितितृतीयसूत्रार्थ इति । तन्न । द्रष्टृत्वादेरिवांबरांतधृतिप्रशासनयोरपिवर्णादावसंभवतोरनेनैवसूत्रेणविवक्षासंभवेनपूर्वसूत्रयोर्वैयर्थ्यात् ।

गु० यच्चेति ॥ ननुतथापिनान्यदतोस्तिद्रष्टृनान्यदतोस्तिश्रोतृनान्यदतोस्तिमंतृनान्यदतोस्तिविज्ञात्रित्यादिनाऽत्मभेदनिषेधान्नशारीरस्याप्युपाधिमतोक्षरशब्दवाच्यत्वं । अचक्षुष्कमश्रोत्रमवागमनइतिचोपाधिमत्ताप्रतिषेधात् । नहिनिरुपाधिकःशारीरोभवतीतिपरकीयभाष्ये । तथाभामत्यांतृतीयसूत्रेणजीवस्याक्षरतानिषिध्यते । नान्यदि त्यादिकयाश्रुत्याआत्मभेदःप्रतिषिध्यते । तथाचोपाधिभेदभिन्नाजीवानिषिद्धाभवंति । अभेदाभिधानात् । किंचनशारीरस्याक्षरशब्दवाच्यता । अक्षरस्यचक्षुराद्युपाधिं

SGDF Sri Gargeshwari Digital Foundation

प्र०दतोस्तिश्रोत्रि"त्यादिनाऽऽत्मभेदप्रतिषेधान्नशारीरस्याक्षरशब्दवाच्यत्वमित्युक्तंभाष्ये तदप्ययुक्तमित्याह ॥ अक्षरेति ॥ अन्यत्र न्यायामृ तेद्वितीयपरिच्छेदे । अतोनेदंवाक्यंनिर्विशेषबोधकमित्यर्थः ॥ एतेनेति ॥ अस्थूलमनण्वित्यादिनोक्तमक्षरंप्रधानजीवान्यतरद्गुतब्रह्मेतिसं शये अक्षरशब्दस्यवर्णेषुरूढिसंभवेपि "अह्रस्वमदीर्घ"मित्यादिनिषेधायोगेनवर्णानांशंकानर्हत्वात् । प्रधानस्यचसर्वविकारास्पदत्वेनाकाश पृथिव्यादिधारणसंभवात्प्रधानंवा चितएवाचिद्वस्त्वाधारत्वसंभवाज्जीवोवेतिप्राप्ते नतावत्प्रधानं । त्रिकालवर्तिसकलवस्त्वाधारतयोच्यमान स्यभूताकाशत्वायोगेनाव्याकृतापरनामकप्रधानपरत्वात् "अक्षरेगार्ग्याकाशओत"इत्युक्तप्रधानाधारत्वस्यप्रधानेऽनुपपत्तेः । नापिजीवः । द्वितीयसूत्रोक्तस्याप्रतिहताज्ञापरनामकस्यप्रशासनस्यजीवेऽनुपपत्तेः । अन्यभावस्यपरमात्मनोन्यत्वस्यादृष्टंद्रष्ट्रित्यादिनाक्षरस्यव्यावृत्तेश्चपर मात्मैवाक्षरमितिसिद्धांतः । तत्रदूष्यांशमनुवदति ॥ जडमिति ॥ एवकारःपरोक्तवर्णमात्रव्यावर्तकः । एतेनेत्युक्तमेवाह ॥ जडस्येति ॥

अक्षरप्रकरणस्थं "नान्यदतोस्तिद्रष्टृ"त्यादिवाक्यंत्वन्यत्रव्याख्यातं । अत्रापिपरमते न्यभावव्यावृत्तेरित्यनेनजीवाद्भेदोक्तेरभेदनिषेधःस्पष्टएव । एतेनयत्केचिज्जडंप्रधानमे वाक्षरमितिपूर्वपक्षयंति तदपिनिरस्तं । जडस्यशास्तृत्वद्रष्टृत्वादेरयोगेनपूर्वपक्षानुदयात् ।

गु०वारयंत्यचक्षुष्कमित्यादिश्रुतिरौपाधिकस्यजीवस्याक्षरतांनिषेधतीत्युक्तत्वान्नास्याःश्रुतेर्द्रष्टृत्वादिमात्रेतात्पर्यं किंतुशारीरस्यात्माभेदनिरासेतात्पर्यमित्यतआह ॥ अक्षर प्रकरणस्थमिति ॥ अन्यत्रेति ॥ न्यायामृतइत्यर्थः । सोमंराजानंजुहृतीत्यादेःप्रातीतिकार्थमभ्युपेत्यव्याचष्टे ॥ यथेति ॥ यद्यपीदंवाक्यंचंद्रलोकगतकर्मजी

SGDF
Sri Gargeshwari Digital Foundation

प्र० सूत्रार्थंचप्रत्याह ॥ **यच्चेति** ॥ **श्रुत्यनुसारित्वस्येति** ॥ श्रुताविवसूत्रेप्यंबरशब्दस्यैवप्रधानपरत्वंवाच्यमित्यंतपदंव्यर्थमित्यर्थः । आकाशस्यचित्प्रकृतित्वपक्षेप्येषदोषस्तुल्यइत्यतआह ॥ **अंतपदंत्विति** ॥ तस्यापि पृथिव्यादेरपि । “पृथिव्यादिप्रकृत्यंतंभूतंभव्यंभवच्चयत् । विष्णुरेकोविभर्तीदंनान्यस्तस्मात्क्षमोधृता”वितिस्कांदस्मृतिरित्यर्थः । एतेनाक्षरंप्रणवजीवान्यतरदितिप्राप्तेंबरांतधृत्यादेश्शिवधर्मत्वाच्छिव

यच्च श्रुतावाकाशशब्दःप्रधानपरइत्युपेत्यसूत्रेंबरशब्दोभूताकाशपरः। तथाचांबरस्य अंतः अवधिः कारणमिति अंबरांतपदंप्रधानपरमित्युक्तं। तन्न। सूत्रेश्रुत्यनुसारित्वस्यैवन्याय्यत्वात्। अंतपदंतु अंबरं अंतोयस्येतिव्युत्पत्त्यापृथिव्यादिपरंसत्तस्यापिप्रकृतिद्वाराब्रह्मैवाश्रयइतिसूचयितुं । तथाच “पृथिव्यादिप्रकृत्यंत”मितिस्मृतिरपिसूत्रेणानुसृताभवति ॥ टीकाक्षरार्थस्तु ॥ सोमंराजानंजुह्वति । तंदेवाभक्षयंतीत्यादिवदिति ॥ यथा “सोमंराजान”मित्यादौहूयमानभक्ष्यमाणसोमलताभिमानित्वाच्चंद्रेहूयमानत्वादिव्यपदेशः तथात्रापिसोममभिषुणोतीतिवाक्यविहिताभिषवयुक्तसोमलताभिमानित्वाच्चंद्रेभिषूयमाणत्वव्यपदेशइत्यर्थः।

प्र०एवेतिकस्यचित्प्रलपनंप्रत्युक्तं । द्रष्टृत्वादेरयोगेनपूर्वपक्षानुदयात् । भाष्योक्तश्रुत्यादिनांबरांतधृत्यादेर्विष्ण्वेकनिष्ठत्वेनशिवइतिसिद्धांतानुदयाच्चेति । टीकायांदुर्गमानिकानिचिद्वाक्यानिव्यनक्ति ॥ **टीकेति** ॥ भाष्येशेषस्यानुदाहृतत्वात्सचयदेत्यादिकस्यार्थइत्यज्ञानादाह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० एकोदेवइति ॥ भाष्येनुक्तमपितदेवब्रह्मेतिकस्मादुच्यतइत्यतआह ॥ यस्मिन्निति ॥ टीकायामनुक्तेरेधीत्यस्यासभुवीत्यस्यरूपत्वाद्भवेत्यर्थत्वे ऽन्वयायोगादाह ॥ श्रुताविति ॥ एधवृद्धावित्यस्यरूपमितिभावः ॥ श्रुतौमध्यमादिशब्दइति ॥ "अस्थूलोनणुरमध्यमोमध्यम" इति श्रुतावित्यर्थः ॥ ७ ॥ अक्षराधिकरणं ॥ ३ ॥

"एकोदेवोबहुधानिविष्टः" इत्यस्यशेषभूतंवाक्यं "यदाभारंतंद्रयतेसभर्तुं । निधायभारंपुनरस्तमेती" ति । तस्यार्थमाह ॥ [४५।२५] संचयेदातंभारंभर्तुंनेच्छतीति ॥ "यस्मिन्निदंसंचविचैतिसर्व" मितिश्रुतौयच्छब्दस्य "यतःप्रसूते" त्यादियच्छब्दवत् "तदेवब्रह्मपरमंकवीनां" इत्युत्तरवाक्यस्थेनतच्छब्देनान्वयइत्याह ॥ [४५।२६] तदेवब्रह्मेत्यर्थइति ॥ श्रुतावेधीत्यस्यावर्धतेत्यर्थः ॥ [४६।१०] मध्यमइत्याद्युक्तमिति ॥ श्रुतौमध्यमादिशब्दःस्थौल्यादेरप्युपलक्षकइत्यर्थः ॥ [४६।१०] तमोवाय्वादीनांसर्वात्मनेति ॥ "अदुःखमसुख" मित्यादौ यथाऽसुखमित्यनेनबाह्यसुखनिषेधेप्यदुःखमित्यनेनदुःखमात्रनिषेधः तथात्राप्यस्थूलमित्यादौप्राकृतस्थौल्यादिनिषेधेप्यतमोऽवाय्वित्यादौसर्वात्मनातमआदेर्निषेधइत्यर्थः ॥ ७ ॥ अक्षराधिकरणं ॥ ३ ॥

गु० वपरं । तथापिकर्मजीवस्यसोमेप्रवेशानंगीकारादधिष्ठानत्वेनचंद्रस्यापिविवक्षितत्वादियमुक्तिरितिध्येयं । टीकायामेधीत्यस्याव्याख्यातत्वात्स्वयंव्याख्याति ॥ श्रुताविति ॥ ७ ॥ अक्षराधिकरणं ॥ ३ ॥

प्र० ॥ ॐईक्षतिकर्मव्यपदेशात्सःॐ ॥ "सदेवसोम्येत्यादिसृष्टिप्रतिपादकस्थानगतसन्नाम्नोब्रह्मप्रधानयोःकारणत्वसाम्येनसाधारणस्ये" त्यादिटीकोक्तेर्मूलंपरिष्कर्तुमाह ॥ अत्रोभयत्रप्रसिद्धिरिति ॥ नास्माभिरपूर्वतयावाच्येत्येवकारार्थः । तत्रप्रतीतानुपपत्तिनिरासेनतत्समर्थनमात्रंकार्यमितिभावः । यद्वा नात्रटीकायांसन्नाम्नइत्युक्तेस्तत्रतुस्थानमित्युक्तेर्नमूलमूलिभावइतिशंक्यं । वक्ष्यमाणदिशैकार्थ्यादितिभावेनैवकारः । न्यायविवरणटीकायां "यद्यपिनिमित्तत्वमुपादानत्वंचविलक्षणं । तथापिकारणत्वमात्रंविष्णोरचेतनप्रकृतेश्चसमं । महदादीनांकारणत्वेपिनसर्वकारणत्वं । कारणत्वंचात्रस्थानेसतःप्रतीयते । तदैक्षतेतिप्रकृतौविरुद्धमितिचेत् बहुस्यामितिविष्णोरपिसाम्यमेवे" तिग्रंथेन "कारणत्वसाम्या" दित्येतदाक्षिप्यसमाहितं । तदस्पष्टत्वाद्विवरीतुंशंकोत्तरेआह ॥ तत्रयद्यपीति ॥ तत्र न्यायविवरणे । साधारणं अ

॥ ॐईक्षतिकर्मव्यपदेशात्सःॐ ॥ अत्रोभयत्रप्रसिद्धिः "कारणत्वसाम्याद्विष्णोरचेतनप्रकृतेश्चसदेवेत्यादिसृष्टिस्थानंसाधारण" मितिन्यायविवरणएवोक्ता । तत्रयद्यपियत्कारणत्वसामान्यंब्रह्मप्रधानसाधारणं नतन्मात्रमिहवाक्येभाति । "तदैक्षत तत्तेजोसृजते" त्यत्रचेतनमात्रासाधारणस्रष्टृत्वरूपविशेषस्यैव "बहुस्या" मित्यत्रचजडमात्रासाधारणोपादानत्वरूपविशेषस्यैवभानात् । तथापियदास्रष्टृत्वविकारयोरविरोधायान्यतरानुसारेणान्यन्नेयमितिनिश्चयः । नत्वेतदनुसारेणैतन्नेयमितिविशेषनिश्चयः तदा "सदेवसोम्येदमग्रआसी" दित्यादिवाक्येनप्रतीतनियतपूर्वसत्त्वरूपकारणत्वमात्रनिश्चयात्तद्विशेषस्यचानिश्चयात्तस्यसाधारण्यं । एवंचभूमाधिकरणीयन्यायविवरणस्थमज्ञपदमिहापिन्यायविवरणे

गु० ॥ ॐईक्षतिकर्मव्यपदेशात्सःॐ ॥ ननुन्यायविवरणादौसच्छब्दस्यकारणत्वमुखेनोभयत्रप्रसिद्धिव्युत्पादनंव्यर्थं । अबाध्यत्ववाचिसच्छब्दस्यकारणत्वमुखनिर

SGDF Sri Gargeshwari Digital Foundation

प्र० भिमतमितिशेषः ॥ **अनुषंजनीयमिति** ॥ अज्ञानांकारणत्वसाम्यात्साधारणमित्यनुषंजनीयमित्यर्थः ॥ **अतएवेति** ॥ नियतपूर्ववृत्तित्वरूपकारणत्वस्यविवक्षितत्वादेवेत्यर्थः । "स्थानमिति स्थानेऽनुवर्तमानस्यसन्नाम्नोविवक्षितत्वात् । तथाचसंक्षेपे सोक्षरस्सन्हृदब्जगइति । सतस्स्रष्टृत्वमित्यादिभाष्येचे"तिन्यायविवरणटीकादिरीत्यास्थानपदेनसन्नामग्रहणमुपेत्यशंकते ॥ **यद्यपीति** ॥ ननुनाबाध्यत्वमेवसत्त्वं । किंतुनिर्दोषत्वाद्यपि । तच्चनस्वतउभयत्रप्रसिद्धमितिवा अबाध्यत्वंपूर्वोत्तरकोटिद्वयादन्यत्रवियदादावपिसत्त्वाद्वा कारणत्वमुखनिरीक्षणमावश्यकमित्यतः क्रमेणद्वयमपिनिराह ॥ **निर्दोषत्वेति** ॥ **विशिष्टस्येति** ॥ कारणत्वमात्रंसन्नाम्नोनोभयत्रप्रसिद्धिसंपादकं । किंत्वेकव्य

ऽनुषंजनीयं । अतएवन्यायविवरणेटीकायांच "सदेवसोम्येत्यादी"त्युक्तं । यद्यप्यबाध्यत्वादिवाचीसच्छब्दः स्वतएवोभयत्रप्रसिद्धः । निर्दोषत्वादिवाचीतुकारणत्वमुखेनापिनजडप्रकृतौप्रसिद्धीकर्तुंशक्यः । यथाचाबाध्यत्वादिब्रह्मप्रधानाभ्यामन्यत्राप्यस्ति तथाकारणत्वमप्यदृष्टादौ । तथापिसदेवेत्यादिवाक्यएकव्यक्तेरेवसर्वकारणताप्रतीतेरदृष्टादिव्यक्तीनांचभिन्नत्वाद्व्यक्त्यैक्येनवा उपादानत्वकर्तृत्वयोरन्यतरत्वेनवा विशिष्टस्यकारणत्वस्यद्वयमात्रसाधारण्यादबाध्यत्वाद्यर्थस्यचसच्छब्दस्यसर्वसाधारण्यात्कारणत्वमुखेनैवोभयत्रप्रसिद्धिरुक्ता ।

गु० पेक्षस्यैवोभयत्रप्रसिद्धत्वादित्याशंकते ॥ **यद्यपीति** ॥ ननुनात्राबाध्यत्वंसच्छब्दप्रवृत्तिनिमित्तं । किंतुनिर्दोषत्वमेव । तस्यस्वतएवोभयत्रप्रसिद्ध्यभावात् कारणत्वमुखेनोभयत्रप्रसिद्धिव्युत्पादनंसार्थकमित्यतआह ॥ **निर्दोषत्ववाचीति** ॥ **अन्यत्राप्यस्तीति** ॥ तथाचसंशयकोटिद्वयमात्रसाधारण्याभावान्नतेनरूपेणोभयत्रप्रसिद्धतेतिभावः । ननुकारणत्वमुखेनसच्छब्दस्योभयत्रप्रसिद्धत्वे "इतिहोवाचे"तिवाक्योक्तकारणत्वस्यापिप्रसिद्धाकाशब्रह्मसाधारण्यादाकाशशब्दस्योभयत्रप्रसिद्ध

SGDF Sri Gargeshwari Digital Foundation

प्र० क्त्विसतिकारणत्वंवाउपादानत्वकर्तृत्वान्यतरत्वेसतिकारणत्वंवा तथा । तादृशंचनातिप्रसक्तमित्यर्थः । नन्वेतदपिमहत्तत्वादावतिप्रसक्त मितिचेन्न । सच्छब्दार्थेप्रतीयमानसर्वकारणत्वस्यतत्राभावात् । कारणत्वपदेनोक्तविशेषणविशिष्टस्यसर्वकारणत्वस्याभिमतत्वादितिन्याय विवरणटीकायांस्पष्टत्वादितिभावः । एतेनटीकास्थकारणत्वशब्दस्यैवमेवार्थोध्येयइत्युक्तंभवति । अतिप्रसंगमाशंक्यनिराह ॥ यद्यपिचेति॥ आपाततइति ॥ विमर्शेसतितस्यकर्तृत्वरूपत्वात्पूर्वपक्षेचोपादानत्वरूपत्वादितिभावः । न्यायविवरणटीकायांचसदेवेतिवाक्योपादानस्यकृ त्यांतरंशंकापूर्वंव्यनक्ति ॥ नचेत्यादिना ॥ अर्थात्सिध्यत्विति ॥ एतेनन्यायविवरणेऽनेकप्रकरणजातरूपस्थानोक्तिरार्थिकाभिप्राया ।

यद्यपिच "आकाशादेवसमुत्पद्यंत"इत्यादावप्यापाततःसाधारणस्यकारणत्वमात्रस्यैवधीः । तथापिसच्छब्दस्यस्वतोर्थ विशेषेप्रसिद्ध्यभावेनकारणत्वपारतंत्र्यवदाकाशशब्दस्यस्वतोर्थविशेषेप्रसिद्धत्वेनतत्परतंत्रत्वस्याभावात् प्रत्युतकारणत्व स्यैवतत्परतंत्रत्वान्नाकाशादिशब्दानांकारणत्वमुखेनोभयत्रप्रसिद्धत्वापातः । नचयस्यकारणत्वस्यसाधारण्यात्सच्छ ब्दस्यसाधारण्यंतस्यैवकारणत्वरूपलिंगस्यसमन्वयउच्यतां । सन्नामसमन्वयस्त्वर्थात्सिध्यत्वितिवाच्यं । प्रथमश्रुत स्यसच्छब्दस्यातिक्रमायोगात् । अक्षरनामसमन्वयोक्त्यानाम्नएवबुद्धिस्थत्वाच्च । श्रुतिरूपप्रबलनामसमन्वयस्यार्था त्सिद्धिर्दुर्बललिंगसमन्वयस्यतुसाक्षादुक्तिरित्यस्यान्याय्यत्वाच्च । सन्नामसमन्वयोक्तौ "सर्वाःप्रजाःसदायतनाःसत्प्र तिष्ठाःसतासोम्यतदासंपन्नोभवति सतिसंपद्यनविदुः सतआगत्यनविदु"रित्यादीनांसच्छब्दयुक्तानांसर्वाधारत्व सुषुप्तिगम्यत्वादिगुणप्रतिपादकानामनेकेषांप्रकरणानांब्रह्मणिसमन्वयस्यार्थात्सिद्ध्यासन्नामसमन्वयेफलाधिक्याच्च ।

गु० त्वापत्त्याऽन्यत्रप्रसिद्धसमन्वयप्रतिपादकपादेनिवेशोनस्यादित्यत आह ॥ यद्यपीति ॥ नन्वेवमीक्षतिकर्मेत्यत्रस्थानसमन्वयप्रतिपादकत्वेभाष्येसच्छब्दोक्तिरयुक्ते

SGDF
Sri Gargeshwari Digital Foundation

प्र० भाष्याद्युक्तसन्नामानुरोधादित्युक्तंभवति ॥ **अतएवेति** ॥ उक्तदिशास्थानसमन्वयस्याप्यभिमतत्वादेवेत्यर्थः । ननुस्थानसमन्वयस्यार्थिकत्वेत न्नवक्तव्यंस्यात् । साक्षादन्वीयमानस्यैववाच्यत्वादित्यतस्तदुक्तेःप्रयोजनमाह ॥ **एवंचेति** ॥ अर्थात्समन्वीयमानंस्थानमपीत्यर्थः । अत्रै

अतएवानुव्याख्याने "स्थानंलिंगमनुग्रह" इति न्यायविवरणेच "सदेवसोम्येत्यादिसृष्टिस्थान" मित्यनेकप्रकरणवाचिस्थानपदप्रयोगः । भाष्ये "तच्चस" दितिसच्छब्दप्रयोगस्तुसच्छब्दस्यसाक्षात्समन्वयोक्त्यभिप्रायेण । अनुव्याख्यानेपादार्थोक्तिदशायां "लिंगनाम्ना" मितिलिंगनामग्रहणमप्यस्मिन्पादेपूर्वपादद्वयइवलिंगनाम्नोरेकैकस्यैवसमन्वयइतिनियमव्यवच्छेदार्थं । नतुस्थानसमन्वयव्यवच्छेदार्थं । स्थानसमन्वयस्यसाक्षात्त्वव्यवच्छेदार्थंवा । एवंचाधिकरणांतरेष्वपितत्तदधिकरणसमन्वेतव्येननाम्नालिंगेनवायुक्तानांस्थानानांसमन्वयोप्यर्थात्सिद्धइतिद्रष्टव्यमितिप्रदर्शनार्थंतच्चोक्तं ।

गु० त्यतआह ॥ **भाष्यइति** ॥ ननुतथाप्यत्रस्थानसमन्वयोवक्तुंनशक्यते । अनुव्याख्यानएतत्पादार्थोक्तिदशायांलिंगनाम्नांसमन्वयस्यप्रतिज्ञातत्वेनावस्थानसमयस्य व्यवच्छेदितत्वादित्यतआह ॥ **अनुव्याख्यानइति** ॥ ननुलिंगनाम्नामित्यनेनकेवलनाम्नःकेवललिंगस्यचसमन्वयव्यवच्छेदवत्स्थानसमन्वयव्यवच्छेदोपिविवक्षितुंशक्यएव । अन्यथानामलिंगादावपिसंकोचःस्यादित्यरुचेराह ॥ **स्थानसमन्वयस्येति** ॥ ननुज्योतिरादौज्योतिरादिशब्देनतत्सूक्तानांतत्प्रकरणानांचब्रह्मपरत्वस्यसाधितत्वात्कथमन्यलिंगनाम्नोरेकैकस्यैवसमन्वयइत्युच्यतइत्यतआह ॥ **एवंचेति** ॥ ननुप्रधानातिक्रमेकारणाभावाज्ज्योतिरधिकरणएववक्तव्यमेतदित्यरु ॥ ६०१ ॥

प्र० वैतस्यवचनेकोहेतुरित्यतःपक्षांतरमाह ॥ **यद्वेति** ॥ पादांत्यप्राणनयविषयवाक्येप्राणशब्दयुक्तानेकावांतरप्रकरणमस्तीत्यतःपक्षांतरमाह ॥ **अथवेति** ॥ नन्वर्थात्समन्वीयमानस्याप्युक्तौवाक्यप्रकरणसमाख्यानामप्युपादानप्रसंगइत्यतआह ॥ **सिद्धेचेति** ॥ **सइति** ॥ समन्वयइत्यर्थः । "सदेवसोम्येत्यादिनाप्रतिपादितंसृष्ट्यर्थंप्रलयेप्रथममवस्थानमित्येकेवर्णयंति । एवंतर्हिविषयमालायांलिंगमित्येववक्तव्यं । सत्यं । विशेषतस्तदेवप्रदर्शितमित्यदोष" इतिन्यायविवरणटीकोक्तंपक्षांतरमाह ॥ **केचित्त्विति** ॥ अतएव "तत्रान्यत्रप्रसिद्धानांलिंगनाम्नांपुनर्हरि" रित्यनुव्याख्यानेलिंगेत्येवोक्तिरितिभावः । एवमंतर्भावसंगतिपरटीकायामुपपादनसापेक्षपादांतर्भावांशंसमर्थ्येदानीं "जन्माद्यस्ययत"

यद्वान्यत्रसमन्वेतव्यशब्दयुक्तानेकावांतरप्रकरणाभावादत्रचतत्सद्भावादिहस्थानसमन्वयोक्तिः । अथवात्रसदात्मादिनानाशब्दयुक्तानांविप्रकीर्णानां "सदेवसोम्येदमग्रआसीत् आत्मावाइदमेकएवाग्रआसी" दित्यादिसृष्टिप्रकरणानांसमन्वयसिद्धेरन्यत्रतदभावादिहस्थानसमन्वयोक्तिः । सिद्धेचस्थानसमन्वयेतदेकदेशयोःप्रकरणवाक्ययोरपिसकैमुत्यन्यायसिद्धइतिनतेपृथगुक्ते । समाख्यायास्तुब्रह्मपरत्वस्यानिर्णयेसमाख्यात्वस्यैवायोगात् निर्णयेच निर्णीतसमन्वयस्यनिर्णेतव्यनामादिसमन्वयाधीनत्वायोगान्नसापृथगुक्ता । केचित्तु अनुव्याख्यानादौस्थानपदंसृष्टिकालेऽवस्थानवाचीत्याहुः । तस्माद्युक्तापादसंगतिः ।

गु० च्याह ॥ **यद्वेति** ॥ आहुरित्यस्वरसोद्भावनं । तद्बीजंतुसृष्टिकालेऽवस्थानमदृष्टप्रकृत्यादिसाधारणं । अस्मदुक्तरीत्यासाक्षात्स्थानसमन्वयस्यैवसंभवेनस्थानपदस्यार्थो

SGDF
Sri Gargeshwari Digital Foundation

प्र० इत्यादिटीकाफलपरेतिभावेनपूर्वानंतर्येसंगतित्रयमाह ॥ पूर्वेति ॥ प्रत्युदाहरणरूपावाऽपवादरूपावाऽऽक्षेपिकीवेत्यर्थः । एतेन "अंबरा वधिकाधारात्प्रणवःपर्युदासितः । तद्ध्येयमपरंकिंवापरमित्यत्रचिंत्यतइतिबुद्धिसंगति"रितिकल्पतरूक्तंनिरस्तं । पूर्वत्रद्रष्टृत्वाद्ययोगेनवर्ण पक्षस्यप्रत्याख्याततयाबुद्धिसन्निध्यभावात् । भामत्यादौवर्णमात्रस्यैवपर्युदस्तत्वेनविशिष्यप्रणवपर्युदासाभावाच्च । परात्परत्वरूपलिंगत्यागे नसूत्रईक्षतिकर्मत्वोक्त्या "त्रिमात्रेणोमित्यनेने"त्युदाहरणस्यसूत्राननुगुणतयान्यस्यैवात्रविषयत्वाच्चेति । "तत्सदत्रविषय"इत्यादिविषयसं

पूर्वाधिकरणवैषम्यप्रदर्शनेनवापूर्वाधिकरणसिद्धांतन्यायेनवांबरांतधृतिरूपपूर्वहेत्वाक्षेपेणवापूर्वपक्षोत्था नादवांतरसंगतिः । त्रेधापूर्वपक्षोत्थानंचानंतरमेवदर्शयिष्यते । अत्र "सदेवसोम्येदमग्रआसी"दिति श्रुतंसत् किंजडप्रकृतिःकिंवाब्रह्मेतिचिंता । तदर्थं "तदैक्षते"तिश्रुतंसतईक्षणंकिंगौणंकिंवामुख्य मिति । तदर्थं "बहुस्या"मित्युक्तोबहुभावःकिंविकारःकिंवास्वरूपबहुत्वमिति । पूर्वपक्षस्तु । इदं सत्प्रधानमेव । नतुब्रह्म । "बहुस्यांप्रजायेये"तिसतिश्रुतस्यविकारस्यनिर्विकारेब्रह्मणिविरोधात् ।

प्र० शयटीकांव्यनक्ति ॥ अत्रेति ॥ छांदोग्येषष्ठेऽध्याये "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय"मित्युपक्रम्य "तदैक्षतबहुस्यांप्रजायेयेति । तत्तेजोसृजते"त्यादिश्रूयते । तत्रत्यसच्छब्दोविषयइत्यर्थः । यदिविकारस्तदाबहुभावाद्बाधकादीक्षणंगौणमितिजडप्रकृतिरितिसिध्यति । अन्यथातुविष्णुरितिस्पष्टमितिभावः । "सत्प्रधानमेवभवे"दित्यादि "इतिभाव"इत्यंतटीकांविवृण्वन्पूर्वपक्षयति ॥ पूर्वपक्षस्त्विति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ननुपूर्वत्रेवात्रापिविकारतदभावयोरीश्वरेविरोधसमाधानसंभवान्नायंहेतुःपूर्वपक्षप्रापकइत्यतःपूर्ववैषम्येणास्यनिरवकाशत्वमाह ॥ युक्तो हीति ॥ प्रतियोग्यनुयोगिभावेपीति ॥ निरूप्यनिरूपकभावेपीत्यर्थः ॥ अत्तृत्वविशेषेति ॥ उपजीवनार्थादनरूपविशेषेत्यर्थः । पनसेचूतत्वाभाववृक्षत्वयोरिवेतिभावः ॥ विकारसामान्याभावरूपत्वादिति ॥ एतेनविकाराविकारयोःप्रतियोग्यनुयोगिरूपत्वादित्यपिसिद्धं बोध्यं । भाष्यादावविकारेविकारासंभवइत्येवोक्त्यातदुपपादनस्यास्पष्टत्वादाह ॥ तदुक्तमिति ॥ लोकेक्वचिद्विशेषसामान्याभावयोरवि

युक्तोहिभूमगतयोरुत्क्रमणसर्वगतत्वयोरविरोधः । तयोःप्रतियोग्यनुयोगिभावाभावात् । युक्तश्चाक्षरधर्मयोर्महत्त्वाणुत्वयोरप्यविरोधः । तयोःप्रतियोग्यनुयोगिभावेपिभावरूपत्वेनभावाभावरूपत्वाभावात् । युक्तश्चतद्धर्मयोरेवस्थौल्याभावाणुत्वाभावयोरविरोधः । तयोरप्यभावरूपत्वेनभावाभावरूपत्वाभावात् । युक्तश्चतद्धर्मयोरेवात्तृत्वानशनयोरप्यविरोधः । तयोर्भावाभावरूपत्वेप्यनशनस्यात्तृत्वविशेषाभावरूपत्वेनात्तृत्वसामान्याभावरूपत्वाभावात् । विशेषाभावसामान्ययोश्चाविरोधात् । इहतु "बहुस्या"मितिश्रुतेनविकारेण "निर्विकारःसदाशुद्धः"इत्यादौश्रुतस्यविकाराभावस्याविरोधोनयुक्तः । तस्यविकारसामान्याभावरूपत्वात् । सामान्याभावविशेषयोश्चविरोधात् । नह्यनशनश्रुतेरिवनिर्विकारश्रुतेरपिविशेषनिषेधपरतासिद्धांतिनइष्टा युक्तावा । चेतनेविकारसामान्यस्यक्वाप्यदर्शनात् । तदुक्तंन्यायविवरणे "अन्यस्यान्यभावादृष्टे"रिति ।

गु० तरपरिकल्पनस्यायुक्तत्वाच्चेतिपूर्वाधिकरणवैषम्येणपूर्वपक्षमाह ॥ युक्तोहीति ॥ अयुक्तत्वमुपपादयति ॥ चेतनइति ॥ ननुगुणाःश्रुताइतिश्रुतेर्विकारस्यचगुण

SGDF
Sri Gargeshwari Digital Foundation

प्र० रोधाद्दृष्ट्याविरुद्धत्वमित्येतदित्यर्थः । विस्तृतंचैतत् ''नचेतनविकारस्स्याद्यत्रकापिह्यचेतनं । नाचेतनविकारोपिचेतनःस्यात्कदाचन । नचान्यस्यान्यरूपत्वंविकृतत्वेपिदृश्यते''इत्यादिचतुर्थपादीयानुव्याख्यानसुधयोः । एतेन ''युक्तोही''त्यादिना ''पूर्वाधिकरणवैषम्यप्रदर्शनेने''त्युक्तमुपपादितंध्येयं । अन्यत्रादृष्टमपिश्रुतत्वादस्त्वित्यतआह ॥ **नचेति** ॥ श्रुतौहिबहुस्यामितितेजःप्रभृत्यात्मनानानाविधमहंस्यांभवेयमितितेजःप्रभृत्यात्मनाबहुभवनंसंकल्प्य तत्तेजोसृजतेतितेजोऽभवदितितेजःप्रभृत्यात्मनाभवनश्रवणात्तस्यचगुणत्वाभावादित्यर्थः । भाष्याद्युक्तोविकारासंभवोहरावुपलक्षणं । तदैक्षतेतीक्षणोपपत्तिश्चप्रधानेध्येयेतिभावेनशंकासमाधीआह ॥ **नचप्रधानेपीति** ॥ टीकोक्तमाह ॥ **ज्ञानेति** ॥ ''सत्त्वात्संजायतेज्ञानंरजसोलोभएवचे''तिगीतोक्तदिशाज्ञानहेतुसत्त्वगुणयोगेन ''चक्षुःपश्यती''तिवत्तदैक्षतेतिनिर्देशइत्यर्थः । ननुप्राथमिकेक्षणानुरोधेनचरमबहुभावएवगौणोनीयतामित्यतआह ॥**युक्तमिति**॥ तेजःप्रभृतेःपूर्वपक्षेजडत्वादितिभावः । ननुप्रधानेभिमानि

नचनानाविधहेयात्मनाविकारोगुणः । येन ''गुणाःश्रुताःसुविरुद्धाश्चदेवेसंती''त्यादिश्रुत्याविरुद्धोप्यंगीक्रियेत । प्रत्युतानर्थत्वाद्दोषएव । नचप्रधानेपि ''तदैक्षते''त्युक्तमीक्षणंविरुद्धमितिशंक्यं । प्रधानस्यज्ञानहेतुसत्त्वगुणयोगेनवाकार्योन्मुखत्वेनवाऽभिमानिनईक्षितृत्वेनवातस्य गौणत्वात् । युक्तंचेक्षणस्यगौणत्वं । ''तत्तेजऐक्षत ताआपऐक्षंते''तिगौणेक्षणप्रायपाठात् ।

गु० रूपत्वान्निर्विकारेपिब्रह्मणिविकारःसंभवतीत्यतआह ॥ **नचेति** ॥ नानाविधहेयात्मनेतिगुणत्वाभावेहेतुः । ननुब्रह्मपक्षेविकारस्येवप्रधानपक्षईक्षणस्यगौणत्वादीक्षणस्यगौणत्वमंगीकृत्यप्रधानस्यसच्छब्दार्थत्ववद्विकारस्यगौणत्वमभ्युपेत्यब्रह्मणएवसच्छब्दार्थत्वमितिकिंनस्यात् । विशेषनियामकाभावादित्यतआह ॥ **युक्तंचेति** ॥

प्र०नमंगीकृत्येक्षणमुपपादयंस्तेजःप्रभृतेःकथमभिमानिचेतनत्वंनोपैतीतिचेत्सत्यं । एवमप्यभिमानिद्वारागौणतायाअवश्यंवाच्यत्वादितिभावः । अतएवगौणेक्षणप्रायपाठेत्येवोक्तं ॥**एतेनेति**॥ प्रायपाठेनेत्यर्थः । नकेवलंप्रायपाठेन । अपितुपूर्वसिद्धांतन्यायेनापीत्याह ॥ **पूर्वेति** ॥ नान्यदतोस्तिद्रष्ट्रित्यादिवाक्यशेषबलाददृष्टंद्रष्ट्रित्यादिनाप्रतीतानन्याधीनासंकुचितप्रशास्तृत्वास्थूलत्वानणुत्वादेश्चब्रह्मण्येवमुख्यतयातदनुरोधेनततःप्राक्श्रुतस्याक्षरस्यब्रह्मत्वे तदेकाश्रितत्वलिंगेनाकाशस्यचित्प्रकृतित्वात्तदोतत्वादिनोक्तभूतभवदादेर्जडत्वेपोष्यत्वादिरूपोतत्वरूपस्यायोगेनदेहद्वाराभूतत्वभवत्त्वादियुक्तचेतनपरतयाभूतत्वंभवत्त्वंभविष्यत्त्वमित्येतद्गौणंतथेहापीत्यर्थः । अन्यथातत्रभूतभवत्त्वादेर्मुख्यत्वायभूतंचभवच्चेत्युक्त

एतेनेक्षणंमुख्यंविकारस्तुगौणइतिब्रह्मैवसदस्त्वितिनिरस्तं । पूर्वाधिकरणेचरमस्यद्रष्टृत्वादेर्मुख्यत्वायप्रथमस्यभूतभवत्त्वादेर्गौणत्ववदत्रापिचरमस्यविकारस्यमुख्यत्वायप्रथमस्येक्षणस्यैवगौणतायान्याय्यत्वाच्च ।

प्र०स्यजडत्वेतदाधारत्वस्यप्रधानेपिसंभवात्सर्वाधारप्रधानाधारस्याक्षरस्यचित्प्रकृतितापत्त्याद्रष्टृत्वादिकमन्याधीनममुख्यंप्राप्नोतीतिभावः । एतेन''पूर्वाधिकरणसिद्धांतन्यायेनवापूर्वपक्षोत्थाना''दित्येतदुपपादितंबोध्यं । अत्रास्थूलत्वादेरितिवक्तव्येद्रष्टृत्वादेरितिवचनंतस्यसाक्षात्सूत्रोपात्तास्थूलत्वादेरिवास्यापिसिद्धांतसाधकतासूचनाय । उक्तंचबृहदारण्यकभाष्ये ''नान्योतोस्तिद्रष्टेत्यादियुक्तिभिश्चे''ति । यद्यपिपूर्वपोष्यत्वाद्यर्थकोतत्वान्यथानुपपत्त्यैवभूतभवत्त्वादेर्गौणत्वंयुक्तमितिचरमोतत्वमुख्यत्वायप्रथमभूतभवत्त्वादेर्गौणत्ववदित्यपिवक्तुंशक्यं । भाष्यादावनुक्तत्वंचोभयत्रसमं । तथापिद्रष्टृत्वादेर्मुख्यत्वमपितद्गौणतायांबीजमितिदर्शयितुमेवमुक्तं । नचास्मिन्पक्षेंबरशब्दितश्रीतत्वाधारतयाऽक्षरस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मत्वोक्तिविरोधः । अक्षरस्यब्रह्मत्वनिर्णयेनाकाशस्यचित्प्रकृतिपरत्वनिर्णयेऽन्योन्याश्रयश्चस्यादितिवाच्यं । अस्मिन्पक्षेंबरांतधृतिहेतोरवि
वक्षितत्वात् । द्रष्टृत्वादिनैवाक्षरस्यब्रह्मत्वनिर्णयेऽन्योन्याश्रयाभावाच्च । अतएवपूर्वत्राद्यहेतुसमर्थनायोतत्वमुखेनैवाकाशस्यचित्प्रकृतिपरत्व
मुक्तं । केचित्तु आकाशःकिंप्रधानंचित्प्रकृतिर्वेतिविशये भूतभवत्त्वादेर्मुख्यत्वायप्रधानमितिप्राप्ते स्वतंत्रद्रष्टृत्वादेर्मुख्यत्वायाक्षरस्यब्रह्मतया
तदेकाश्रितत्वलिंगेनाकाशस्यश्रीतत्वपरतयातत्पोष्यत्वनिर्वाहायभूतत्वादिकंगौणंयथेतिविचारांतराभिप्रायेणैतदित्याहुः । पूर्वतंत्रादौप्रथमेन
चरमस्यबाधोक्तावपीहपूर्वसिद्धांतन्यायेनात्रचरमेणपूर्वस्यबाधशंकनादत्रशास्त्रेचरमस्यैवप्राबल्याश्रयणाच्चरमेणपूर्वस्यबाधोक्तिरदोषायेतिभा
वः । एवंप्रधानपक्षे "तदैक्षते"त्यस्यगतिमुक्त्वा "तत्तेजोसृजते"त्याद्युक्तेर्गतिंविवक्षुः "नन्वेतत्स्थानेप्रधानस्यप्रतिपाद्यत्वेपी"त्यादिटीकायां
सृष्ट्युक्तिगत्युक्तिद्वाराजन्मादिसूत्राक्षेपप्रकारस्यास्फुटत्वात्तांतात्पर्यतोविवृण्वन् टीकोक्ताक्षेपमनूद्यपंचधासमाधिमाह ॥ **नन्वेवमित्यादिना**॥
केवलजडस्यकथंपरिणामइत्यतआह ॥ **प्रधानस्येति** ॥ तत्राप्यातंचनकर्तुस्सत्वेनविवादादाह ॥ **अभिमानीति** ॥ **तथाचेति** ॥ सक

**नन्वेवंप्रधानस्योपादानत्वेपिनिमित्तत्वंब्रह्मणएवेति "सतःस्रष्टृत्वमुच्यत"इतिभाष्योक्तजन्मादिसूत्राक्षे
पोनयुक्तइतिचेदुच्यते । सदेवेत्यवधारणेनप्रधानातिरिक्तकारणव्यवच्छेदात्सर्वाणिकारणवाक्यानिप्रधा
नपराणि । प्रधानस्यपरिणामश्चक्षीरस्यदधिभाववच्चेतननिरपेक्षोऽभिमानिचेतनमात्रसापेक्षोवा । तथाचे
श्वरस्यकारणतैवनेतिवा श्रुत्यंतरेणेश्वरस्यकारणत्वेपीहाद्वितीयपदसन्निधानात्प्रतीतानन्याधीनकारणता**

गु० ननुतत्तेजऐक्षतेत्यादिनेक्षणस्रष्टृत्वदेवतात्वानांश्रवणात्तेजःप्रभृतिचेतनमेव। तत्रचेक्षणंमुख्यमेवेतिप्रायपाठोब्रह्मपक्षएवगुणइतिकथं।तदृष्टांतएवविप्रतिपन्नइत्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० लकारणवाक्यानांप्रधानपरत्वेसतीत्यर्थः ॥ **प्रधानस्यापीति** ॥ तथाचप्राचीनपक्षेब्रह्मणिकारणत्वरूपलक्षणस्यासंभवः । द्वितीयपक्षेऽतिव्याप्तिरितिभावः । एवंतर्हिश्रुतौ "असृजत"तिभाष्ये "सतस्स्रष्टृत्वमुच्यत"इतिस्रष्टृपदंचविरुध्यतइत्यतआह ॥ **एवंचेति** ॥ स्रष्टृत्वंनामकृतिमत्कारणत्वं । तत्रतदेकदेशःकारणत्वमात्रंलक्ष्यतइत्यर्थः ॥ **गौण्येति** ॥ यथास्रष्टाऽनन्याधीनस्तथाऽनन्याधीनकारणमपीत्यर्थः । पूर्वंश्रुत्यादिगतेक्षणादेरमुख्यत्वमुपेत्याक्षेपप्रकारउक्तः । इदानींमुख्यत्वमुपेत्याह ॥ **अथवायथाविवर्तमतइति** ॥ तात्विकमेवेक्षणादिकमुपेत्याह ॥ **यद्वायथाविशिष्टेति** ॥ प्राक्पक्षेऽतात्विकत्वमेवास्वारस्यबीजं । अस्मिन्पक्षेचप्रागुक्तस्रष्टृत्वाक्षेपस्सुकरइतिभावः । अस्मि

प्रधानस्यापीतिवापूर्वःपक्षः । एवंचश्रुतौभाष्येचस्रष्टृत्वव्यपदेशोलक्षणयाकारणत्वमात्रपरः । गौण्याऽनन्याधीनकारणत्वपरोवा । प्रधानाभिमानिचेतनस्यस्रष्टृत्वपरोवा । तथाचेक्षणादेर्गौणत्वेनप्रधानस्यास्रष्टृत्वेपि जन्मादिसूत्रोक्तकारणत्वसामान्यस्यवाऽनन्याधीनकारणत्वस्यवास्रष्टृत्वस्यवाऽऽक्षेपोयुक्तः । अथवायथाविवर्तमतेतत्वतोनिर्विकारस्यैवब्रह्मणोतात्विकविकारः तथातत्वतोचेतनस्यविकारिणश्चप्रधानस्यातात्विकमीक्षणंस्रष्टृत्वंचास्तु । एवंचेक्षणादिकमपिमुख्यमेव । नतुगौणमितिपूर्वःपक्षः । यद्वायथाविशिष्टोपादानमतेविशेष्यस्यनिर्विकारत्वेपिविशिष्टस्यतात्विकएवविकारः तथाप्रधानस्याचेतनत्वेपिस्वाभिमानिचेतनविशिष्टस्यतात्विकमेवेक्षणादीतिपूर्वःपक्षः ।

गु० ॥ **अभिमानीति** ॥ अस्मिन्पक्षेप्रधानस्येक्षणंभवतीतीदमेवास्वारस्यंमनसिनिधायपक्षांतरमाह ॥ **अथवेति** ॥ नन्वेवमीक्षणस्यतात्विकत्वेऽतात्विकेक्षणप्रतिपादक

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्पक्षेविशिष्टस्येक्षितृत्वस्यस्रष्टृत्वलाभेपिबहुभवनरूपविकारस्यकेवलप्रधाननिष्ठतयेक्षणस्रष्टृत्वविकाराणामेकनिष्ठत्वायपक्षांतरमाह ॥ **यद्वा यथापूर्वाधिकरणेति** ॥ एतेन "पूर्वाधिकरणसिद्धांतन्यायेनवापूर्वपक्षोत्थाना"दित्येतत्प्रकारांतरेणापिदर्शितंभवति । ननुसांख्यमतेप्रधानस्यैवंविधत्वानंगीकारादपसिद्धांतइत्यतआह ॥ **नहीति** ॥ अतएवटीकादौमायावादादिमतइवोक्तदिशानिर्वाहस्सुकरइतिविशिष्यप्रपंचनाभावइतिभावः । उपादानस्यैवस्रष्टृत्वेकार्यानुस्यूत्यननुस्यूत्योरयोगात्तदनुगुणंपक्षांतरमाह ॥ **अथवेति** ॥ एवंभाष्यकारीयंजन्मादिसूत्राक्षे

यद्वायथापूर्वाधिकरणसिद्धांतेविशेष्यभूतब्रह्मनिष्ठयोस्तात्विकयोरेवाणुत्वमहत्त्वयोरविरोधः तथाप्रधानेपिश्रौतत्वाज्ज्ञाड्यक्षणयोर्विकारस्रष्टृत्वयोश्चाविरोधइतिपूर्वःपक्षः । नह्यत्रसांख्यमतंपूर्वःपक्षः । किंतुश्रुत्यवष्टंभेनसंभावितंमतं । एवंचपूर्वपक्षउपादानस्यप्रधानस्यैवस्रष्टृत्वमपीतिजन्मादिसूत्राक्षेपोयुक्तः । अथवा प्रधानस्यसांशत्वादेकेनांशेनचेतनत्वस्रष्टृत्वे । अंशांतरेणत्वचेतनत्वविकारित्वे । ब्रह्मतुनिरंशं । तथाचप्रधानस्यैवस्रष्टृत्वमितिपूर्वपक्षप्रवृत्तेस्तदाक्षेपः ।

गु० स्वतदैक्षतेतीक्षणवाक्यस्याप्रामाण्यंस्यादित्यरुच्याह॥**यद्वेति**॥पूर्वाधिकरणवैषम्येणपूर्वपक्षंप्रदर्श्यपूर्वाधिकरणसिद्धांतन्यायेनपूर्वपक्षमाह ॥**यद्वेति**॥ पूर्वाधिकरणसिद्धांतहेत्वाक्षेपेणपूर्वपक्षमाह ॥ **अथवेति** ॥ नन्वेवमधिकरणांतरेजन्मादिसूत्राक्षेपएवस्यान्नत्वधिकरणांतरस्येत्यतोनियामकांतरमाह ॥ **सदेवेत्यादिवाक्यइति** ॥

प्र० पप्रकारमुपपाद्यतदाक्षेपोक्तौभाष्यकृतोचातुर्यमाशंक्याह ॥ **अत्रयद्यपीति** ॥ **आक्षेप्तुंशक्यमिति** ॥ एतेन "अंबरांतधृतिरूपपूर्वहेत्वाक्षेपेणवापूर्वपक्षोत्थाना"दित्येतद्विवृतंभवति । अत्रयद्यपि सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनास्सत्प्रतिष्ठा"इतिप्रजानामेवसदाधारकत्वमुच्यते । नतुपृथिव्यादिप्रकृत्यंतरूपांबरांतस्यसदाधारकत्वं । येनसच्छब्दार्थस्यप्रधानत्वेतत्रश्रुतांबरांतधारकत्वमप्यस्यैवेतिप्रागुक्तांबरांतधृतिरूपहेतुर्नविष्णुत्वसाधकइत्याक्षेपेणपूर्वपक्षस्स्यात् । तथापि पूर्वत्रांबरांतपदेनपृथिव्यादिप्रकृत्यंतस्यचेतनराशेरेवाभिमन्यमानसहितस्यविवक्षितत्वेनेहापिप्रजापदेनतथैवविपक्षोपपत्तेःसंकोचकाभावादितिभावः । टीकाविरोधमाशंक्यतत्तात्पर्यमाह ॥ **यत्त्विति** ॥

अत्रयद्यपिपूर्वपक्षे "सदायतना"इत्युक्तंसर्वाधारत्वमपिप्रधानस्यस्यादित्यंबरांतधृतिरूपपूर्वाधिकरणहेतुर्वा द्युभ्वाद्यधिकरणंवाऽऽक्षेप्तुंशक्यं । तथाप्यस्यसर्वस्यजन्मादिसूत्रनिर्वाहार्थत्वेनतच्छेषत्वात् सदेवेत्यादिवाक्येकारणत्वस्यप्रथमप्रतीतत्वाच्चतदेवाक्षिप्तं । यद्यपिचात्रत्यस्यस्रष्टुरन्यत्वे"सोकामयतबहुस्यांप्रजायेये"ति "सइदंसर्वमसृजते"त्युक्तआनंदमयरूपोपिस्रष्टान्यःस्यात् । ब्रह्मतुतदवयवइत्यजिज्ञास्यंस्यादितिजिज्ञासासूत्रमेवाक्षेप्तुंशक्यं । तथापितदाक्षेपस्यानंदमयाक्षेपसापेक्षत्वान्निरपेक्षोजन्मादिसूत्राक्षेपएवात्रकृतः । यत्तु "ब्रह्मलक्षणानांश्रवणा"दितिटीकायां "एकमेवाद्वितीय"मित्यद्वितीयादिपदोक्तानांसर्वोत्तमत्वादीनांब्रह्मधर्मत्वमाक्षिप्तं तदनुव्याख्यानादिस्थस्थानपदानुसारेणभाष्यस्थस्रष्टृपदंगुणांतरस्याप्युपलक्षकं । ततश्चसर्वोत्तमत्वादिगुणांतराक्षेपोपिसंभवतीत्यभिप्रायेण । नतुस्रष्टृत्वाक्षेपोनसंभवतीत्यभिप्रायेण । अतएवटीकायां "यद्यत्रविकारिकारणत्वमेवोच्येते"

गु० नन्वेवंयदिजन्मादिसूत्राक्षेपस्तर्हिटीकाविरोधःस्यात् । टीकायामद्वितीयत्वादिपदोक्तसर्वोत्तमत्वादेरेवाक्षेपादित्यतआह ॥ यत्त्विति ॥ अतएवेति ॥ स्रष्टृत्वा

SGDF Sri Gargeshwari Digital Foundation

प्र० अवधारणेति॥ तेनस्रष्टृत्वरूपकारणत्वस्याप्यनुमतत्वप्रतीतेरितिभावः। क्रमेणोक्तान्पंचपक्षान्निराकरिष्यन्सिद्धांतयति॥सिद्धांतस्त्विति॥ ''सदेवेत्यादिस्थानेसच्छब्देनविष्णुरेवोच्यते । सतस्तदैक्षतेतीक्षत्याख्यव्यापारश्रवणात् । जडप्रधानस्येक्षणासंभवा''दित्यादिनाकृत्स्नसिद्धांतटीकायामीक्षणबहुभावौविष्णावुपपाद्य प्रधानेसूत्रोपात्तेक्षणासंभवएवोक्तोनतुबहुभावासंभवोपि । अतष्टीकोक्तमुपलक्षणंमत्वासर्वंतावत्संगृह्याह ॥ यतः । ईक्षतिरिति ॥ यतइत्यस्यश्लोकेनान्वयः । ततोनयुक्तइत्यर्थः । उत्तरार्धंविवृणोति ॥ आद्यपूर्वपक्षइत्यादिना ॥

त्यवधारणप्रयोगः । तत्तेजोसृजतेतिस्रष्टृत्ववाचिवाक्योदाहरणंच । सिद्धांतस्तु । नतावदाद्यःपूर्वःपक्षोयुक्तः । यतः । ईक्षतिर्बहुभावश्चमुख्यौब्रह्मपरिग्रहे । प्रधानपक्षेतुतयोरमुख्यत्वंप्रसज्यते ॥ १॥ आद्यपूर्वपक्षईक्षणंतावद्गौणमितिपरेणैवोक्तं । बहुभावोपिगौणएव । तत्तेजोसृजतेतियत्तेजःप्रभृतिसृज्यमुक्तं तदात्मनाहित्वयाबहुभावोवाच्यः । तेजःप्रभृतिचचेतनं । ''तत्तेजऐक्षत तदपोसृजत ताआपऐक्षंत ताअन्नमसृजंत तिस्रोदेवता''इतीक्षितृत्वस्रष्टृत्वदेवतात्वानांश्रवणात् । तेजोबन्नानांदेवतात्वेपित्रिवृत्करणविरोधश्छांदोग्यभाष्यादवगंतव्यः । नचजडस्यप्रधानस्यचेतनात्मनाबहुभावोमुख्यः ।

प्र० त्रिवृत्करणेति ॥ ''याइमास्तिस्रोदेवतास्तासांत्रिवृतंत्रिवृतमेकैकासकरो''दित्युक्ततेजोबन्नानांत्रयाणांमेलनेनैकैकद्रव्यांतरकरणरूपंयत्रिवृत्करणंतद्विरोधः । देवतानांतदयोगात् । ''सृष्टेष्वेतेषुभगवानीक्षांचक्रेसकेशवः । जीवाख्येनैवरूपेणयोऽनिरुद्धइतिस्मृतः । तेनरूपेणलक्ष्म्यादीन्प्रविष्टोरूपनामनी । करिष्येत्रिवृतश्चैतानेकैकंकरवाणिच । इतिमत्वाप्रविश्याथतेभ्यइंद्रादिनामपि । नामरूपाणिकृतवांस्तांश्चान्योन्यप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेशिनः । कृत्वाऽग्निसोमसूर्यादिष्वेतांस्त्रीन्विदधेपुन"रित्यादिनाऽभिमन्यमानतेजोबन्नांशैर्द्रव्यांतरंकृत्वातत्राभिमानिदेवतांशानामपिप्रवेशकरणेनत्रिवृत्करणोक्तेरविरोधोबोध्यइत्यर्थः । तथा "अन्नमशितंत्रेधाविधीयते । यःस्थविष्ठोभागस्तत्पुरीषंयोमध्यमस्तन्मांस"मित्यादिनोक्ताध्यात्मत्रिवृत्करणाविरोधोपि "देवताएवमांसादिशब्दवाच्याः । तत्रप्रवेशात् । अदृश्यमानाच्च । उपजीव्यत्वात् । नचदुःखंतासां । ऐश्वर्या"दितिभाष्यवाक्यादवगंतव्यइत्यर्थः ॥ एतेनेति ॥ तेजःप्रभृतेश्चेतनत्वेनतत्रश्रुतेक्षणस्यगौणत्वाभावेनगौणेक्षणप्रायपाठात् "तदैक्षते"ति

एतेनप्रायपाठोनिरस्तः । ब्रह्मपक्षेतुनकेवलमीक्षणंमुख्यं । किंतुबहुभावोपि ।
"गुहांप्रविष्टा"वित्यत्रैकस्मिन्नपिबहुत्वस्य "द्युभ्वादी"त्यत्रचाजेपिजनेरुक्तत्वा
त् । नचैवमिदमधिकरणंव्यर्थमितिशंक्यं । "बहुस्या"मितितेजआद्यात्मना
बहुभावएवसंकल्पितोनस्वरूपबहुभावः । "तत्तेजोसृजते"तिवाक्यशेषात् ।

प्र०श्रुतमीक्षणंगौणमित्येतन्निरस्तमित्यर्थः । नन्वस्त्वीक्षणबहुभावयोर्मुख्ययोःप्रधानेऽसंभवः । हरौतुकथमीक्षणस्य चेतनत्वेन, "नान्योतोस्तिद्रष्टे"त्यादिभाष्योक्तश्रुत्याचमुख्यस्यसंभवेप्येकस्मिन्नजे "अजायमानोबहुधाविजायत"इतिश्रुत्युक्तत्वेपिबहुत्वजननयोरुपपत्तिः । तथाच "बहुभावस्यविकारित्वंविनैवस्वरूपबहुत्वेनसावकाशत्वा"दितिटीकानयुक्ता । तत्संग्रहश्चात्रश्लोकेनयुक्तइत्यतःपूर्वार्धंविवृणोति ॥ ब्रह्मपक्षेत्विति ॥ नह्यन्यार्थसंकल्पमभिधायान्यक्रियाभिधानंसंगच्छते । नहीश्वरोस्वतंत्रोसत्यकामोवेतिचतुर्थपादीयंसुधोक्तदिशावाक्यशेषस्योक्ता

SGDF
Sri Gargeshwari Digital Foundation

प्र० र्थज्ञापकत्वंव्यनक्ति ॥ नहीति ॥ अतस्तेजःप्रभृत्यात्मनैवबहुभावस्संकल्पितइतिवक्तव्यमितिभावः ॥ नब्रह्मणियुक्तइति ॥ "नचेतन विकारस्याद्यत्रकापिह्यचेतन"मितिचतुर्थपादीयानुभाष्योक्तदिशेतिभावः । यद्वाप्रागुक्तदिशानिर्विकारत्वादितिभावः । बहुस्यामितितस्यै वह्युक्तमार्गेणयुज्यते । "तत्तद्गतेनरूपेणतदर्थंह्यसृजज्जग"दितिचतुर्थपादीयानुव्याख्यानोक्तंदृष्टांतपूर्वसंगृह्योपपादयति ॥ समाधानंत्वित्या दिना ॥ "सच्चत्यच्चाभवदितिनास्यविश्वत्वमुच्यते । तत्सृष्ट्वेतिगिरैवास्यपूर्वविश्वस्यसिद्धित"इत्युत्तरपादीयानुव्याख्यानोक्तमाह ॥ अतए वेति ॥ स्वरूपबहुत्वसंकल्पानंतरंनियम्यसर्वजनस्योक्तदिशाऽभिमतत्वादित्यर्थः । नन्वस्तुतैत्तिरीयश्रुतौतत्सृष्ट्वेतिवाक्यशेषबलात्तथोपपत्तिः। नैवंछंदोगश्रुतौ । तथोपपत्तिकल्पकवाक्यशेषाभावात् । तथाच "बहुस्यामितितस्यैवह्युक्तमार्गेणे"त्यनुव्याख्याने "सच्चत्यच्चेतिवाक्यव्या ख्यानन्यायेने"त्युक्तिरयुक्तेत्यतआह ॥ अत्रापिश्रुताविति ॥ अनेनजीवनामकेनानिरुद्धेनस्वात्मनातेजोबन्नशब्दिताञ्श्रीब्रह्मरुद्रान्प्रविश्ये

नहिस्वरूपबहुभावंसंकल्प्यतेजःप्रभृतिसर्जनंयुक्तं । तेजआदिभावश्चनब्रह्मणियुक्तइतिशंकायांतत्समाधानार्थत्वादस्य । समाधानंतु बहुस्यामितिसंकल्प्यतेजःप्रभृतिसर्जनं । गुरुःस्यामितिसंकल्प्यशिष्यसंपादनादिवत् ॥ १ ॥ तत्तन्नियामक स्वरूपबहुभावसंकल्पानंतरंनियम्यसृष्टिर्युक्तैव । गुरुत्वराजत्वादेःशिष्यभृत्यादिसापेक्षत्ववन्नियामकतायानियम्यसापे क्षत्वात् । अतएवश्रुत्यंतरे "सोकामयतबहुस्यांप्रजायेये"तिप्रक्रम्य "सइदंसर्वमसृजत । यदिदंकिंच । तत्सृष्ट्वा । तदे वानुप्राविश"दिति अत्रापिश्रुतौ "अनेनजीवेनात्मनानुप्रविश्ये"तिभगवतःस्वसृष्टवस्तुनियमनायतदनुप्रवेशउक्तः । ॥ ६०७ ॥

गु० क्षेपस्याभिप्रेतत्वादेवेत्यर्थः ॥ एतेनेति ॥ तेजआदेर्देवतात्वेनतत्रेक्षणस्यमुख्यत्वोपपादनेनेत्यर्थः ॥ अतएवेति ॥ नियामकतायानियम्यसापेक्षत्वादेवेत्यर्थः

प्र० त्यर्थः । तैत्तिरीयभाष्येतु "सृष्ट्वाजगदिदंसर्वंनियामकतयास्यतु । बहुरूपोभवानीतिस्याज्जगच्चेत्यचिंतय"दिति बहुस्यामितिसंकल्पएवनिय म्यानेकसर्जनपूर्वकस्वरूपबहुभावसर्जनविषयकइत्यर्थांतरमुक्तं । तस्मिन्पक्षेनियम्यसर्जनस्यप्रथमसंकल्पितत्वान्नियम्यसर्जनंनासंगतमिति भावः । भाष्यटीकयोरस्फुटत्वादाह ॥ तदिति ॥ तत्वप्रदीपेसौत्रकर्मशब्दस्यसृष्ट्यर्थत्वमुपेत्येक्षणस्रष्टृत्वयोर्द्वयोर्हरौमुख्यत्वोक्त्यासूचितंप क्षांतरमाह ॥ एकस्यगौणत्वेपीति ॥ संदष्टइति ॥ "तदैक्षतबहुस्यांप्रजायेयेति । तत्तेजोसृजते"तिश्रवणादितिभावः । एतेन "पूर्वा

तदेतदभिप्रेत्योक्तंन्यायविवरणे "अचेतनस्येक्षणादृष्टिः । बहुभावश्रुतिस्त्वन्यभावंविनातत्तन्नियामकतया स्वरूपबहुत्वार्थत्वेनैवयुज्यत"इति । तस्मादीक्षणबहुभावौद्वावपिमुख्यौ । एकस्यगौणत्वेपीक्षितृत्वस्रष्टृत्वम ध्यगतत्वेनताभ्यांसंदष्टोबहुभावएवगौणः । नचसंकल्पस्यसृष्ट्यर्थत्वात् "गुणेत्वन्याय्यकल्पने"तिन्यायेनेक्ष णंगौणमितिवाच्यं । बहुस्यांप्रजायेयेत्यस्यापिसंकल्पांतर्भूतत्वात् "असृजते"तिप्रधानभूतस्रष्टृत्वानुरोधेनब हुभावादेरेवगौणत्वापत्तेः । गौणसंकल्पेनसृष्टेःक्वाप्यदर्शनेनसंकल्पस्यगौणत्वेसृष्ट्यर्थत्वस्यैवायोगाच्च ।

प्र०धिकरणेचरमस्यद्रष्टृत्वादेर्मुख्यत्वाये"त्यादिनोक्तपूर्वसिद्धांतन्यायेनपूर्वपक्षोक्तिरपिप्रत्युक्ता । अत्रेवपूर्वत्रसंदंशाभावेनद्रष्टृत्वादेर्मुख्यत्वसंभवे नास्यपूर्ववैषम्यात् । ननुबहुभावस्यसंदष्टत्वेपिन्यायांतरेणेक्षणंगौणंस्यादित्याशंक्याह ॥ नचेति ॥ तदैक्षतेत्यस्यसंकल्परूपत्वात्संकल्पस्ये त्युक्तं ॥ गुणेत्विति ॥ नवमेतृतीयपादेविप्रतिपत्तौविकल्पस्स्यात्समत्वाद्गुणेत्वन्याय्यकल्पनैकदेशत्वा"दितिजैमिनीयसूत्रोक्तन्यायेनेत्यर्थः । विवृतश्चायंन्यायोगुहाधिकरणे । बहुभावादेरित्यादिपदेनप्रजननंगृह्यते । कथमेतावतेक्षणस्यागौणत्वमित्यतआह ॥ गौणेति ॥ एवंटीको

SGDF Sri Durgeshwari Digital Foundation

प्र० क्तविवरणेनाद्यपक्षंनिरस्येक्षणादिकमतात्विकमितिपक्षंतात्विकमेवेतिपक्षंचान्यत्रोक्तदोषेणनिराह ॥ **द्वितीयेति** ॥ "यच्चाविकृतमेवैकंब्रह्मविश्वात्मनामृषा । दृश्यतेमंददृष्टयैवससर्गइतिकथ्यते । सामंददृष्टिस्तस्यैवब्रह्मणःकिंततोन्यगा । ब्रह्मणश्चेत्कसार्वज्ञमन्यगाचेत्स्वतोन्यते" त्यादिनाब्रह्मविवर्तमतस्य "नचप्रकृतिशब्देनब्रह्मोपादानमुच्यते । अविकारस्सदाशुद्धोनित्यआत्मासदाहरि" रित्यादिनाविकारमतस्यानुव्याख्यानसुधयोर्निरासाद्दृष्टांतस्यैवासंमत्यानिरस्तावित्यर्थः । यद्वा तत्रहिब्रह्मणोविवर्तत्वंप्रपंचस्यतद्घटकाज्ञानस्यब्रह्माश्रितत्वादिविकल्पानुपपत्तेः सत्यत्वग्राहिप्रत्यक्षादिविरोधाच्चनिराक्रियते । ब्रह्मविकारत्वंचनिर्विकारश्रुत्यादिनाऽपाक्रियते । प्रधानस्यैवंविधत्वंवदतापूर्वपक्षिणातुब्रह्मस्थानेप्रधानमेवाभिषिक्तमितितत्रोक्तदोषास्सर्वेप्रधानेपितुल्याइतितन्न्यायेननिरस्तावित्युक्तं । तथाहि । ब्रह्मणस्सर्वज्ञत्वेनतदाश्रितस्यवा जीवस्याज्ञानकल्पितत्वेनान्योन्याश्रयापत्त्याजीवाश्रितस्यवाऽज्ञानस्यासंभवेन ब्रह्मण्यज्ञानाधीनातात्विकजगद्रूपतावभासस्य विशिष्टोपादानमतेविशेष्यस्यब्रह्मत्वेप्यविकारित्वेनविशेषणस्यविकारित्वेप्यब्रह्मत्वेनब्रह्मणस्तात्विकजगदाकारपरिणामलक्षणविकारस्यानुपपत्ते" रित्यादिनातन्मतद्वयंनिरस्यते । तथाचप्रधानस्यैवब्रह्मसार्वज्ञादिश्रुतिविषयत्वस्यवक्तव्यत्वात्तत्राप्यज्ञाननिबंधनस्यैवारोपस्यवाच्यत्वादुक्तदोषायोज्याइति । जाड्येक्षणादेःप्रधानेप्यविरोधोस्त्वितिपक्षंदृष्टांतवैषम्योक्त्यानिराह ॥ **चतुर्थोपीति** ॥ यतइत्यस्यश्लोकेनान्वयः । "विचित्रशक्तिःपुरुषःपुराणोनचा

द्वितीयतृतीयौतुपूर्वपक्षौप्रकृत्यधिकरणेऽनुव्याख्यानाद्युक्तेनविवर्तविशिष्टमतनिरासकन्यायेननिरस्तौ । चतुर्थोप्ययुक्तः । यतः । विचित्रशक्तियोगित्वविरुद्धगुणभागिते । श्रूयेतेब्रह्मणोयद्वन्नतथाप्रकृतेःक्वचित् ॥१॥ नहिमानंविनादृष्टांतमात्रेणमेयसिद्धिः । ॥ ६०८ ॥

गु० ॥ **द्वितीयतृतीयौत्विति** ॥ ईक्षणमतात्विकं स्वाभिमानिचेतनविशिष्टस्यतात्विकमितिद्वितीयतृतीयावित्यर्थः ॥ **चतुर्थइति** ॥ अणुत्वमहत्त्ववदीक्षणविका

SGDF Sri Gargeshwari Digital Foundation

प्र० न्येषांशक्तयस्तादृशास्स्युः । अणोरणीयान्महतोमहीया”नित्यादिनाश्रूयेते । नचैवंप्रकृते । तदैक्षतेत्यादिश्रुतिस्तूक्तदिशाब्रह्मपरेतिश्रौतत्वा दितिप्रागुक्तोहेतुरसिद्धइतिभावः । अयंचसमाधिः “सर्वधर्मासर्वनामासर्वकर्मागुणाश्श्रुताः । दोषाश्श्रुताश्चनेत्याद्याप्रमाणंश्रुतिरत्रचे”त्य क्षरनयानुभाष्येऽस्थूलत्वादिविरुद्धधर्मवत्त्वेप्रमाणोक्तयासूचितः । विपक्षेव्याघातसूचनायमानंविनामेयसिद्धिरितिमानमेयपदोक्तिः । अंश विभागेनोभयोपादानमयुक्तमित्याह ॥ पंचमोपीति ॥ अत्रयद्यपि “भागेनपरिणामश्चेद्भागयोर्भेदएवहि । योभागोनविकारीस्यात्सएवास्मा कमीश्वरः” इत्याद्युत्तरपादीयानुव्याख्यानोक्तन्यायेनतन्निरासोपिप्रतीयते । तथापिदोषांतरोक्तिरियमिति । एतेनभाष्यकारीयफलाक्षेपो पिसमाहितोध्येयः । नन्वत्रसूत्रे “ईक्षतेर्नाशब्द”मित्यत्रेवेक्षतेस्सइतिवा ईक्षतिव्यपदेशात्सइतिवावक्तव्यं । लाघवात् । नतुकर्मेति । व्यर्थत्वात् । नचपरमतइवेक्षतिंप्रतिकर्मत्वरूपोर्थोभ्युपेयते । किंचाध्यायपरिसमाप्तिसमन्वयसूत्रात्तत्त्वित्यस्यसाध्यनिर्देशकस्यानुवर्तमान त्वात्सइत्यपिव्यर्थं । नचसइत्येतद्धर्मिनिर्देशपरमेव । नसाध्यनिर्देशपरमितिवाच्यं । सदित्यस्यैवधर्मिपरत्वेनेक्षतिकर्मव्यपदेशात्सदितिनि

पंचमोप्ययुक्तः । उक्तप्रकारेणाक्लिष्टेब्रह्मपक्षेसंभवत्येकस्यचेतनरूपांशस्येक्षितृत्वादि अन्यस्यत्व चेतनरूपांशस्योपादानत्वादि अंशिनस्तुसतोनकिमपीत्यस्यातिक्लिष्टस्यकल्पनस्यायोगात् । सूत्रे

गु० रावपिश्रौतत्वात्प्रधानेनविरुद्धाविितिचतुर्थइत्यर्थः । पंचमः अंशभेदेनेक्षणविकारावविरुद्धाविितिपंचमइत्यर्थः । एकस्यचेतनरूपांशस्येक्षितृत्वादीत्यादिपदेनस्रष्टृत्वसं ग्रहः । उपादानत्वादीत्यत्रत्येनाचेतनत्वपरिग्रहः । नन्वेवंसति ज्योतिश्चरणाभिधानादित्यत्रापिकर्णादिविदूरत्वरूपविशेषहेत्वनुसारेणैवसमन्वेतव्यज्योतिश्शब्दला भसंभवेन तत्रसमन्वेतव्यज्योतिश्शब्दोक्तिरयुक्तेत्यरुचेराह ॥ सदेवेत्यादि ॥ नन्वेवमानंदमयाधिकरणेपिसमन्वेतव्यशब्दोक्तिर्नस्यात् । तत्रापिभिन्नप्रकरण

SGDF
Sri Gargeshwari Digital Foundation

प्र० देशापातात् । "सएवेश्वरस्सच्छब्दोक्तोनप्रधान"मिति तत्वप्रदीपविरोधाच्चेत्यतःकर्मपदसार्थक्यंतावदाह ॥ कर्मपदंत्विति ॥ "तत्तेजो सृजतेतितत्पूर्वककर्मव्यपदेशान्नामरूपेव्याकरवाणी"त्यादिनाचेक्षतिपूर्वव्याकरणादिकर्मव्यपदेशात्सएवेश्वरस्सच्छब्दोक्त"इत्यादितत्वप्रदीपानुरोधात्पक्षांतरमाह ॥ यद्वेति ॥ "नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभु"रितिगीतायांकर्मपदस्य "क्रियायामदृष्टोत्पादनेफलेचस्वातंत्र्यं लोकस्यनसृजतीश्वर"इत्यदृष्टोत्पादनादिपरत्वेनगीतातात्पर्येभगवत्पादैर्व्याख्यानादितिभावः । एतेनब्रह्मधर्मेक्षणकर्मसंदष्टोबहुभावोपिब्रह्म

कर्मपदंतु सिद्धांतेपि "ऐक्षते"तीक्षणकर्तृत्वव्यपदेशोनयुक्तः । स्वरूपातिरिक्तेक्षणक्रियाभावादितिशंकायां विशेषबलात्क्रियाकर्तृभावइतिदर्शयितुं । एतदेवाभिप्रेत्यटीकायां "ईक्षत्याख्यव्यापारे"त्युक्तं । यद्वासौत्रःकर्मशब्दः "नकर्तृत्वंनकर्माणी"त्यादाविवसृष्ट्यादिक्रियापरः । तथा चप्रधानपक्षेनकेवलमीक्षितृत्वस्यायोगः किंतुस्रष्टृत्वादेरपीतिदर्शयितुं ।

गु० स्थानांतुल्यवत्समन्वेतव्यत्वेनशब्दविशेषस्यैवासमन्वेतव्यत्वात् । अल्पाक्षरेसूत्रेसर्वशब्दानांग्रहणेऽल्पाक्षरत्वाभावापत्त्योपलक्षणतयाशब्दविशेषोपादानासंभवादित्यरुचेराह ॥ अथवेति ॥ नन्वेवंज्योतिस्सूत्रेसमन्वेतव्यशब्दोक्तिर्नस्यात् । विशरणरूपहेतुविशेषोक्त्यातदुक्तशब्दस्यसमन्वेतव्यत्वसिद्धेरित्यस्वरसादाह ॥ यद्वेति ॥ नन्वेवंसइतितच्छब्दस्यसमन्वेतव्यत्वेभाष्यटीकाविरोधः । तत्रतच्छब्दस्यसमन्वेतव्यत्वेनानभिधानादित्यतः सच्छब्दस्यैवसमन्वयाभिधानान्नविरोधइतिभावेन

प्र० ण्येवकथंचिन्नेयइतिसूचितमितिततोपिकर्मपदसार्थक्यंध्येयं । सइत्येतदाक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ एतेनयदुक्तंश्रुतप्रकाशे "अत्रस इत्युक्तिरस्मिन्पादेसर्वाधिकरणेसाध्यप्रतिज्ञानुवृत्त्यर्था । यथाद्यपादेभेदव्यपदेशाच्चान्यइत्यन्यशब्दोक्तिः द्वितीयेऽतएवचसब्रह्मेतिब्रह्मशब्दोक्तिः चतुर्थपादेचवदतीतिचेन्नप्राज्ञोहीतिप्राज्ञशब्दोक्ति"रिति तन्निरस्तं । समन्वयसूत्रस्थतत्पदस्यैवसमन्वयपराधिकरणेष्वादितःसर्वत्रानु

यद्यप्यत्रसूत्रांतरइवसमन्वयसूत्रस्थोब्रह्मपरस्तच्छब्दोनुषंगार्हः । तथापि "एकोनारायणआसीत् । समुनिर्भूत्वासमचिंतय"दित्यादिश्रुतिषुयःकारणत्वेननिर्णीतःसएवात्राप्युच्यतइतिसमाख्यानमपिप्रमाणीकर्तुंसइत्युक्तं । अत्रसूत्रेसमन्वेतव्यविशेषानुक्तिस्तुहेत्वनुसारेणसमन्वेतव्यविशेषऊह्यइतिशिष्यशिक्षार्थंवा "सदेवसोम्येदमग्रे सोकामयतबहुस्या"मित्यादिभिन्नसृष्टिप्रकरणस्थनानाशब्दाइहतुल्यवत्समन्वेतव्याः । नतुशब्दविशेषइतिप्रदर्शनार्थंवा अल्पाक्षरे सूत्रेनिर्देशानर्हानेकप्रकरणात्मकसदेवेत्यादिस्थानस्यसमन्वेतव्यत्वप्रदर्शनार्थंवेतिद्रष्टव्यं । अथवा "आनंदमयोभ्यासा"दित्यादौहेतुविशेषानुक्तेःसमन्वेतव्यविशेषोक्तिः । अत्रत्वीक्षणरूपहेतुविशेषोक्त्यातद्युक्तशब्दस्यसमन्वेतव्यत्वसिद्धेस्तदनुक्तिः । यद्वा "सईक्षांचक्रे सोकामयते"त्यादौसइत्यस्यसमन्वेतव्यत्वात्सइत्यनेनब्रह्मपरेणापितंत्रेणावृत्त्या

प्र० वृत्तिसंभवेप्रतिपादंतदुक्तिवैयर्थ्यात् । पादेष्वादावेवसाध्यनिर्देशकस्यवक्तव्यत्वेनमध्येनिर्देशायोगात् । ब्रह्मादिपदेनैवसाध्यनिर्देशौचित्येनान्यशब्देनतन्निर्देशायोगाच्च । प्रथमपादेऽन्यशब्दस्यात्रसइतितच्छब्दस्यचकृत्यांतरसंभवाच्च । अतएवचसब्रह्मेतिसूत्रस्यासांप्रदायिकत्वेनप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्षिप्तत्वाच्चेति ॥ **एकदेशेति** ॥ समन्वेतव्यसदादिनानाशब्देष्वेकदेशभूततच्छब्दकीर्तनमुखेनेत्यर्थः । यद्वासमन्वेतव्यसृष्टिस्थानैकदेशभूततच्छब्दकीर्तनमुखेनस्थानरूपसमन्वयस्याप्युक्तिरित्यर्थः ॥ **अन्येत्विति** ॥ "एतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारस्तस्माद्विद्वानेतेनैवायनेनैकतरमन्वेतीतिप्रक्रम्यश्रूयते । यःपुनरेतंत्रिमात्रेणोमित्यनेनैवाक्षरेणपरंपुरुषमभिध्यायीते"त्यादियथाश्रुतपरभाष्योक्तविषयवाक्यं । पूर्वपक्षमनुवदति ॥ **अभिध्यातव्यत्वेनेति** ॥ "कार्यब्रह्महिरण्यगर्भएवे"तिकल्पतरूक्तेर्हिरण्यगर्भाख्येत्यनुवादः ॥ **तद्विदइति** ॥ "तस्माद्विद्वा"नित्युक्ताभिध्यातव्यवस्तुज्ञानिनइत्यर्थः । ईक्षणध्यानयोरेकविषयत्वादितिभावः ॥ **नहीति** ॥ "ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः सर्वगतपरब्रह्मवेदनेतद्भावापत्तौसामभिरुन्नीयतेब्रह्मलोकमितिनदेशविशेषप्राप्तिरुपपद्यत"इतिभामत्युक्तेरितिभावः ॥ **ईक्षणंहीति** ॥ नचस्व

वैकदेशकीर्तनमुखेनसमन्वेतव्यस्याप्युक्तिरिति । अन्येतु । "यःपुनरेतंत्रिमात्रेणोमित्यनेनैवाक्षरेणपरंपुरुषमभिध्यायीते"त्यस्मिन्वाक्येऽभिध्यातव्यत्वेनोक्तंवस्तुहिरण्यगर्भाख्यमपरंब्रह्मैव । "ससामभिरुन्नीयतेब्रह्मलोक"मितितद्विदोदेशपरिच्छिन्नफलोक्तेः । नहिपरब्रह्मविदःफलंदेशपरिच्छिन्नमितिप्राप्ते इदंवस्तुपरंब्रह्मैव । "परात्परंपुरिशयंपुरुषमीक्षत"इत्युत्तरवाक्येऽस्यैवेक्षणकर्मत्वोक्तेः । ईक्षणंहिपरमार्थसत्कर्मकं । नचब्रह्मणोन्यत्परमार्थसदस्ति । नचेक्षणीयस्यपरब्रह्मत्वेऽभिध्यातव्यमपरब्रह्मेतियुक्तं । ईक्षणध्यानयोरेकविषयत्वात् । ॥ ६१० ॥

गु० तर्हीक्षतिकर्मव्यपदेशात्सदितिवक्तव्यं सइतितुकथमित्याशंकांपरिहरति ॥ **एकदेशकीर्तनेति** ॥ ईक्षणध्यानयोरितिसंमतिश्लोकस्यायमर्थः । एकोर्थइत्यन्वयः ।

SGDF Sri Gargeshwari Digital Foundation

प्र०प्रादौव्यभिचारेणेक्षणस्यतत्वविषयत्वनियमाभावइतिवाच्यं । उत्सर्गतस्तत्वविषयकत्वादिहचापवादकाभावात्सत्कर्मकमेवेत्यर्थः ॥ तदुक्त मिति ॥ यद्यप्ययमर्थोभाष्येपिव्यक्तः । तथापितदर्थसंग्राहकत्वात्संग्रहेणतद्दर्शयितुंभामत्यामित्युक्तं । यद्वा "कार्यब्रह्मजनप्राप्तिफलत्वाद र्थभेदतः । दर्शनध्यानयोर्ध्येयमपरंब्रह्मगम्यते" इतिपूर्वपक्षकारिकायामर्थभेदतइत्यनेनेक्षणध्यानयोर्भिन्नविषयत्वमुपेत्यापिभामत्यांपूर्वपक्षित त्वात्सिद्धांतेतेनैवभामतीकृतातयोरेकविषयत्वमुक्तंप्रदर्शयितुंभामत्यामित्युक्तं ॥ एकइति ॥ एकोर्थइत्यन्वयः । स्वप्नादौव्यभिचारादाह ॥ औत्सर्गिकमिति ॥ ईक्षतेरीक्षणस्यतत्वविषयत्वमौत्सर्गिकं । नचेहापवादःकश्चिदितिभावः । ननुकथमत्रेक्षणध्यानयोरेकविषयत्वं ।

तदुक्तंभामत्यां "ईक्षणध्यानयोरेकःकार्यकारणभूत
योः । अर्थऔत्सर्गिकंतत्वविषयत्वंतथेक्षते" रिति ।

प्र० येनेक्षणवद्ध्यानस्यापिपरमार्थभूतंब्रह्मैवविषयस्स्यात् । ध्यानस्यपरमपुरुषविषयत्वात् । ईक्षणस्यपरात्परपुरुषविषयत्वादितिचेन्न । "एत स्माज्जीवघनात्परात्पर" मितिप्रकृतापेक्षैतच्छब्दसमभिव्याहारावगतैकवाक्यतानुगृहीतेन "पुरुषमभिध्यायीत पुरुषमीक्षत" इतिपुरुषप्रत्यभि ज्ञानेनतयोरेकविषयत्वावगमात् । नच परं परात्परमितिचरूपभेदानुपपत्तिः । प्रतीतैकवाक्यतानुसारेणजीवघनात्परादितिजीवघनशब्द स्यहिरण्यगर्भब्रह्मलोकान्यतरविषयत्वेनध्यातव्यपुरुषविषयत्वाभावात् । नन्वथापिध्यानस्योपाधिविशिष्टविषयत्वात्कथंशुद्धविषयेक्षणैकार्थ त्वमितिचेन्न । "उपाधेःकल्पितत्वेनविशेष्यस्यशुद्धत्वा" दितितद्भाष्याद्युक्तमनुसंधेयमितिभावः । नन्विहदर्शनस्यतत्वविषयत्वत्यागेपरिच्छिन्न

SGDF
Sri Gargeshwari Digital Foundation

प्र० फलश्रवणमेवबाधकमित्यतआह ॥ **निरुपाधिकेति** ॥ नेदमुदाहरणंयुक्तं । सूत्राक्षरासामंजस्यादिदोषप्राप्तेरितिदूषयति ॥ **तन्नेति** ॥ विरुद्धोयंहेतुरित्याह ॥ **त्वन्मतइति** ॥ **निरुपाधिकेति** ॥ अन्यथापरमार्थसद्विषयेक्षणैकार्थत्वंनस्यादितिभावः । अयनेन अयनसाध

निरुपाधिकब्रह्मज्ञानस्यैवचापरिच्छिन्नफलकत्वादिहचत्रिमात्रोंकाररूपोपाधिमत्त्वात्फलस्यपरिच्छिन्नतायुक्तेतिसिद्धांतइत्याहुः । तन्न । सूत्रेकर्मशब्दस्यभावप्रधानताया आश्रयणीयत्वात् । निरवकाशेप्रथमेचपरात्परत्वेब्रह्मलिंगेसतितत्त्यागेनसूत्रेचरमसावकाशेक्षतिकर्मत्वोक्त्ययोगाच्च । त्वन्मतईक्षणकर्मणोमिथ्यात्वनियमेनेक्षणकर्मत्वस्यपरमार्थसद्ब्रह्मत्वेहेतुत्वायोगाच्च । किंचध्यानस्यपरमार्थसद्विषयकेक्षणैकविषयत्वायनिरुपाधिकब्रह्मविषयतायाःपरिच्छिन्नफलत्वायचोंकारोपाधिकविषयतायाश्चत्वयैवोक्तत्वाद्व्याघातः । अपिच ओंकारोपाधिकध्यानफलस्यपरिच्छिन्नत्वोक्तिरयुक्ता । "ॐकारेणैवायनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरंचे"तिवाक्यशेषेतस्यापरिच्छिन्नत्वोक्तेः । किंच ईक्षणस्यानुसारेणध्यानंसद्विषयं यदि । तर्हिध्यानानुसारेणास्त्वीक्षणंकल्पितार्थकं ॥१॥ त्वन्मते "योषितमग्निंध्यायीते"त्यादौध्यानस्यारोपितविषयतायाः क्लृप्तत्वात् । "यएषोंतरादित्येहिरण्मयःपुरुषोदृश्यते यदापश्यःपश्यतेरुग्मवर्ण"मित्यादावीक्षणस्याप्यतत्वविषयत्वाच्च ।

प्र० नेन । अयनसाधनमोंकारंमात्रात्रयात्मकंसम्यग्ज्ञात्वेतियावत् । "पूर्वांतवत्स्वरस्संधा"वित्यादेः "ध्यानानुसारेणास्त्वीक्षण"मित्यत्रनयतिभंगदृशंकनीयः । वैपरीत्येकोहेतुरित्यतआह ॥ **त्वन्मतइति** ॥ ननुतत्रापिनप्रातिभासिकविषयत्वं । किंतुव्यावहारिकविषयत्वमेवेत्यत

प्र० स्तर्हीहापितथात्वापत्त्यानसिद्धांतोत्थितिरित्याह ॥ **व्यावहारिकेति** ॥ **दृश्यत्वेति** ॥ तेनचावेद्यत्वांगीकारादितिभावः ॥ **केचित्त्विति** ॥ सइत्यनूद्यपरमात्मेतिव्याख्यातं ॥ **व्यपदेशादिति** ॥ ईक्षतिकर्मविषयतयोदाहृतश्लोके "एतदमृतमभयमेतद्ब्रह्मे"त्यादिभ्यःपरमात्मनएव व्यपदेशादित्यर्थः । पूर्वपक्षेपिदूष्यांशमात्रमनुवदति ॥ **यद्यपीत्यादिना** ॥ **सन्निधानादिति** ॥ सन्निधानेनलिंगानामन्यथानयनमिति भावः । एवंहितेषामधिकरणं । प्रागुदाहृतेवाक्यईक्षतिकर्मणःपरमात्मत्वंव्यवस्थाप्यध्यायतेस्ततोभिन्नविषयतयापूर्वपक्षंकृत्वा एकविषयत्वे

व्यावहारिकविषयतातुहिरण्यगर्भविषयत्वेपियुक्ता । अत्रापिपरमते ईक्षतिकर्मेतिसूत्रेणजीवेशयोःकर्तृकर्मभावेनभेदोक्तेर्ब्रह्मणोदृश्यत्वोक्तेश्चपरमतप्रतिकूलताव्यक्तैव । केचित्तु । पुरुषमीक्षतइत्युक्तमीक्षतिकर्म सः परमात्मैव । व्यपदेशादितिसूत्रार्थः । यद्यपीक्षतिवाक्येपरात्परत्वादीनां "यथापादोदरस्त्वचाविनिर्मुच्यतएवंहैवसपाप्मनाविनिर्मुक्त"इतिपूर्ववाक्येतद्विदःपापालेपादीनामुत्तरवाक्येचामृतत्वाभयत्वादीनांब्रह्मधर्माणांस्फुटत्वेनपूर्वपक्षानुदयः । तथापि "सोंतरिक्षंयजुर्भि"रितिप्राकृतांतरिक्षलोकसन्निधानात् "ससामाभिरुन्नीयतेब्रह्मलोक"मित्युक्तस्यब्रह्मलोकस्यचतुर्मुखलोकत्वशंकयातदुदयइत्याहुः । तन्न ।

प्र० नाद्वैतिभिःसिद्धांतःकृतः । सनयुक्तः । ध्यानेक्षणयोर्हेतुहेतुमद्भावापन्नयोरेकविषयत्वावश्यंभावादितिपरमतंनिरस्यैकविषयतामुपेत्य ध्यानेक्षणविषयःकिंचतुर्मुखःपरमात्मावेतिसंदिह्य पूर्वत्रमनुष्यलोकांतरिक्षलोकौक्रमेणैकमात्रद्विमात्रप्रणवोपासनाफलत्वेनोक्त्वा अनंतरंत्रिमात्रप्रणवोपासनाफलत्वेनोच्यमानब्रह्मलोकस्थपुरुषेक्षणकर्मभूतःपुरुषोहिरण्यगर्भएव । मनुष्यलोकादिसान्निध्येनब्रह्मलोकस्यहिरण्यगर्भलोकत्वमितिनिश्चयात् । सन्निधानेनब्रह्मलिंगानांबाधादितिप्राप्ते ईक्षतिकर्मतयानिर्दिष्टपुरुषविषये "तमोंकारेणायनेनान्वेतिविद्वा"नितिश्लोकेनि

SGDF Sri Gargeshwari Digital Foundation

प्र० रुपाधिकशांतत्वामृतत्वादिव्यपदेशात्परमात्मैवायंपरमपुरुषः। एवंपरमात्मत्वेऽवगतेब्रह्मलोकशब्दोपितत्स्थानस्यैववाचकोभवति । तद्विषये "यत्कवयोवेदयंत"इतिश्लोकेसूरिभिर्दृश्यत्ववचनंचतदेवद्रढयतीतिसिद्धांतइति । उक्तंच "नन्वत्रोंकारमात्रात्रयफलगणनारूढभूम्यंतरिक्षग्रत्यासत्त्यानिवासस्सरसिजवसतेर्ब्रह्मलोकोस्तुमैवं । पापोन्मुक्तेनलभ्योह्ययमिहकथितस्सूर्यसंपत्तिपूर्वस्सोढव्योमर्त्यलोकेव्यवधिरितिसमस्तत्समाधानमार्ग"इति । सूत्रार्थंतावन्निराह ॥ तद्धर्मेति ॥ ईक्षतिरूपकर्मणोव्यपदेशादित्यस्मत्सिद्धांतइवसमस्तमेवेक्षतिकर्मपदंव्याख्येयं।

"तद्धर्मोपदेशात् भेदव्यपदेशा"दित्यादाविवसिद्धांतसाधकार्थविशेषघटितस्यैवव्यपदेशस्यहेतूकर्तव्यत्वात् । त्वद्रीत्यैतच्छास्त्रस्यपूर्वभागेपूर्वतंत्रएव "आनंतर्यमचोदने"त्यत्र लिंगादिभ्यःसन्निधानदौर्बल्यस्योक्ततयापुनरिहतत्प्राबल्यशंकानुदयाच्च । टीकाक्षरार्थस्तु। सोमोवैराजागंधर्वेष्वासीदित्यादिवदितिटीकायाअयमर्थः। यथा

प्र० नतुविभज्येतिभावः। नचैवंसूत्रेधर्मिनिर्देशाभावान्न्यूनतादोषः । "अत्रसूत्रेसमन्वेतव्यविशेषानुक्ति"रित्वत्यादिनाचंद्रिकायामेवप्रागस्यदोषस्यसमाधानादितिभावः । पूर्वपक्षानुदयेनाधिकरणशरीरंचनिरस्यति ॥ त्वद्रीत्येति ॥ विंशतिलक्षणमेकंशास्त्रमितित्वद्रीत्येत्यर्थः । तृतीयेऽध्याये "आनंतर्यमचोदने"त्याद्यपादीयचतुर्दशेधिकरणे ज्योतिष्टोमगतं "मुष्टीकरोति वाचंयच्छति दीक्षितमावेदयती"तिवाक्यमुदाहृत्य मुष्टीकरणवाग्यमने मनःप्रणिधानद्वाराकरिष्यमाणसर्वकर्मांगमुतानंतरस्यदीक्षितावेदनस्येतिसंशये आनंतर्यादेकवाक्यत्वादवांतर ॥ ६१२ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रकरणाद्वादीक्षितावेदनमात्रांगमितिप्राप्ते लिंगप्रकरणाभ्यांसर्वार्थत्वावगमात्सन्निधानात्प्रबलेनसामर्थ्यरूपलिंगेनकरिष्यमाणसर्वकर्मांग मितिसिद्धांतितमितिसन्निधेर्दौर्बल्यंसिद्धमित्यर्थः । एतेनेदंवाक्यंब्रह्मपरतयायत्रक्वचनिर्णेयत्वादधिकरणांतरस्यचैतन्निर्णायकस्यादर्शनादत्रैवनि र्णेयमितिनिरस्तं । ब्रह्मलिंगादिबाहुल्येनसन्निधिबाधसंभवेनसंशयस्यैवानुदयादिति । एतेनरामानुजीयरीतिमनुसृत्यपूर्वोत्तरपक्षौसूत्रार्थंच वर्णयत:कस्यचिच्छैवस्यमतमपिप्रत्युक्तंबोध्यं । विषयवाक्यस्थब्रह्मात्मपुरुषादिशब्दानांतत्रतत्रभाष्यादौपूर्वत्रास्माभिश्चविष्णवेकनिष्ठतायाद र्शितत्वेनशिवइतिसिद्धांतस्यातितुच्छत्वादिति ॥ ७ ॥ **सदधिकरणं** ॥ ४ ॥

॥ **ॐदहरउत्तरेभ्यःॐ** ॥ अत्रत्यन्यायविवरणेलिंगंहृत्पद्मस्थितत्वंसाधारणमित्युक्तं । तट्टीकायांतुतत्कुत्रकथमित्याशंकायामन्यत्रास्माभि रुक्तमित्युक्तं । तत्कुत्रेत्याकांक्षायामाह ॥ **अत्रेति** ॥ **योवेदेति** ॥ आनंदमयनयोक्तरीत्याब्रह्मणिप्रसिद्धिः ॥ **तस्यांतइति** ॥ नारायणो

"सोमोवैराजागंधर्वेष्वासीत् । तंदेवाश्चऋषयश्चाभ्यध्याय"न्नित्यादौसोमलताभिमानिचेतनविवक्षयागंधर्वे ष्वासीदितिव्यपदेशस्तथाऽत्रापिप्रधानाभिमानिचेतनविवक्षयेक्षितृत्वव्यपदेशइति ॥७॥ सदधिकरणं ॥ ४ ॥

॥ ॐदहरउत्तरेभ्यःॐ ॥ अत्रपादसंगतिः "योवेदनिहितंगुहायां तस्यांतेसुषिरंसूक्ष्मं

गु० ध्यानस्यहिसाक्षात्कारःफलं । साक्षात्कारश्चोत्सर्गतस्तत्वविषयः । क्वचिद्बाधकोपनिपातेसमारोपितगोचरोभवेत् । नचासत्यपवादेशक्यउत्सर्गस्त्यक्तुं । तथाचेक्षण स्यतत्वविषयत्वात्कारणस्यध्यानस्यापितत्वविषयत्वमिति ॥ ७ ॥ **सदधिकरणं** ॥ ४ ॥

॥ **ॐदहरउत्तरेभ्यःॐ** ॥ **योवेदेति** ॥ अत्रयोवेदनिहितंगुहायामितिश्रुत्याब्रह्मणिसाधारणत्वं तस्यांतेसुषिरंसूक्ष्ममित्याकाशेसाधारणत्वं हृदिह्येषआत्मेतिश्रुत्याजीवे

SGDF
Sri Gargeshwari Digital Foundation

प्र० पनिषदि "पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुख"मित्युपक्रम्य तस्यहृत्पद्मस्यांतेसुषिरशब्दितस्याकाशस्याम्नानात्तत्रप्रसिद्धिः । नचसुषिरश
ब्दस्याकाशाधिकरणन्यायेनविष्णुवाचितेतिवाच्यं । "तस्याश्शिखायामध्येपरमात्मे"तिसुषिरमध्यगतशिखामध्यस्थत्वेनविष्णोरुक्त्यासुषिर
स्याकाशत्वेविवादाभावादितिभावः ॥ **हृदिह्येषआत्मेति** ॥ षट्प्रश्नोपनिषद्यात्मशब्दितस्यजीवस्यहृत्पद्मस्थितत्वेननिर्देशात्तत्रप्रसिद्धिरि
त्यर्थः । वक्ष्यतिच "अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिही"तिसूत्रकारः । यद्यपि "अयमग्निर्वैश्वानरोयोयमंतःपुरुषेयेनेदमन्नंप

हृदिह्येषआत्मेत्यादिश्रुतिभिर्ब्रह्माकाशजीवसाधारणस्यहृत्पद्मस्थत्वलिंगस्ये"तिटीकायामेवोक्ता । अनंतरसंगतिस्तुपू
र्वाधिकरणविषयवाक्ये "येनाश्रुतंश्रुतंभवत्यमतंमत"मित्यादिनोक्तस्यान्वेष्टव्यत्वस्यवा "सदायतनाःसत्प्रतिष्ठा"इत्या
दिनोक्तस्यसर्वाधारत्वस्यवा "सदेवसोम्येद"मित्यादिनोक्तस्यसृष्टिहेतुत्वस्यवाऽऽक्षेपेणपूर्वपक्षोत्थानात् । अन्वेष्टव्य
त्वसर्वाधारत्वयोराक्षेपःपूर्वपक्षेदर्शयिष्यते । सृष्टिहेतुत्वाक्षेपस्तुवक्ष्यमाणेनस्थितिहेतुत्वरूपाधारत्वाक्षेपेणसेत्स्यति ।

प्र० च्यत"इत्यग्नेरप्यंतस्स्थितत्वमुच्यते । तथापिहृत्पद्मस्थत्वाश्रवणाद्वा तस्यवैश्वानरनयेब्रह्मपरत्वोक्तेर्वानतत्साधारण्यशंकेतिभावः ॥ **संगति
स्त्विति** ॥ आक्षेपिकीत्यर्थः ॥ **येनेति** ॥ येनश्रुतेनविज्ञातेनान्यत्सर्वंश्रुतमतविज्ञातफलंभवतीत्यर्थवादेनभगवतिश्रवणमननादिविषयत्वरू
पजिज्ञास्यत्वस्याभिप्रेतत्वादिहच "सोन्वेष्टव्य"इतिवाक्येऽन्यस्यैवतत्प्रतीतेस्तदाक्षेपइत्यर्थः ॥ **सर्वाधारत्वस्यवेति** ॥ उभेअस्मिन्द्यावा
पृथिवीइत्यादिनाश्रुतसर्वाधारत्वस्यान्यगतत्वप्रतीतेरितिभावः । अत्रसृष्टिहेतुत्वस्याप्रतीतेःकथंतस्याक्षेपइत्यतआह ॥ **वक्ष्यमाणेनेति** ॥

प्र० **स्थितिहेतोरिति** ॥ यद्यपिनायंनियमः । अन्यथापिलोकेदर्शनात् । तथापिप्रकृताभिप्रायेणैतदितिध्येयं । "चंद्रादित्याद्याधारत्वंविष्णो
रुक्त"मित्यक्षराधिकरणाक्षेपभाष्यंतूक्ताभिप्रायमितिभावः । एतेनयदुक्तंकल्पतरौप्रागुदाहृतपरमपुरुषशब्दितस्यदहरवाक्यशेषगतोत्तमपुरु
षवद्ब्रह्मत्वशंकायांतस्यापिब्रह्मविषयत्वोपपादनात्संगतिरिति तन्निरस्तं । पुरुषमीक्षतइत्यस्यप्रागनुदाहरणत्वेनोक्तत्वात् । सन्निहितप्रधाना
न्वेष्टव्यत्वादिकमुखाक्षेपस्यसंभवेऽन्यस्यानादरणीयत्वात् । एतेनैव पुरिशयस्यप्राक्परमात्मत्वंसाधितं । अत्रपुरिशयस्याकाशशब्दवाच्यस्या

स्थितिहेतोरेवसृष्टिहेतुत्वात् । अत्र "अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्त
स्मिन्यदंतस्तदन्वेष्टव्यंतद्वावविजिज्ञासितव्यमिति । तंचेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरो
स्मिन्नंतराकाशःकिंतदत्रविद्यते यदन्वेष्टव्यंयद्वाववविजिज्ञासितव्यमिति । सब्रूयात् । यावान्वाअय
माकाशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेउभावग्निश्चवायुश्चसूर्याचंद्रमसा
वुभा"वित्यादिछांदोग्यवाक्यस्थंहृत्पद्मस्थत्वंकिमाकाशादेःकिंवाब्रह्मणइतिचिंता । तदर्थंहृत्पद्मस्थेश्रुत

प्र० परमात्मत्वंनिरस्यतइतिसंगतिरित्यादिश्रुतप्रकाशोक्तमपिनिरस्तंबोध्यं । आकाशस्यसिद्धांतेप्यत्रब्रह्मत्वस्यसाधयिष्यमाणत्वाच्चेति । विषयसंश
यटीकांव्यनक्ति ॥ **अत्रेति** ॥ "तद्धृदयपद्मस्थत्वंविषय"इत्यत्रतच्छब्दपरामर्शमाह ॥ **अथयदिदमित्यादिना** ॥ **छांदोग्येति** ॥ छांदो
ग्येऽष्टमाध्यायगतवाक्यस्थमित्यर्थः । वाक्यस्यार्थोऽग्रेव्यक्तः । आकाशादेः आकाशजीवयोरित्यर्थः । दहरेब्रह्मैवेतिप्रतिज्ञांशंव्यावर्त्यपूर्वपक्षो

SGDF
Sri Gargeshwari Digital Foundation

प्र० पयुक्तचिंतामुक्त्वा "उत्तरेभ्यः गतिशब्दाभ्या"मित्यादिहेत्वंशव्यावर्त्यपूर्वपक्षोपयुक्तचिंतामाह ॥ अपहतेति ॥ "एषआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासस्सत्यकामस्सत्यसंकल्प"इत्यादिनाश्रुतमित्यर्थः ॥ ब्रह्मत्वमिति ॥ आकाशपदेनेत्यर्थः । यद्यप्येवंनभाष्येप्रतीयते । न्यायविवरणेच "योन्वेष्टव्योभगवांस्तस्यांतर्हृदय"इत्यादिनान्वेष्टव्यतयोक्तस्यब्रह्मत्वंसिद्धंकृत्वाप्रकारप्रश्नेतत्कथनपरतयायावानित्यादिवाक्यंयोजितं । विवृतंचैवमेवटीकायां । अतः "तस्मिन्यदंतस्तदन्वेष्टव्य"मितिपूर्वोक्तान्वेष्टव्यस्यब्रह्मणोऽन्वेष्टव्यत्वा

मपहतपाप्मत्वादिकंकिममुख्यमुतमुख्यमिति । तदर्थंतस्यमुख्यत्वे "यावान्वा"इत्यादिप्रतिवचनंविरुध्यतेनवेति । तदर्थंप्रतिवचनंकिं "दहरोस्मिन्नंतराकाश"इतिपूर्वंहृत्पद्मस्थतयोक्तभूताकाशमनूद्यतत्स्थस्यद्यावापृथिव्यादेरन्वेष्टव्यत्वप्रतिपादकंकिंवा"तस्मिन्यदंतस्तदन्वेष्टव्य"मितिपूर्वोक्तान्वेष्टव्यस्यब्रह्मत्वंविधायतस्यान्वेष्टव्यत्वायद्यावापृथिव्याद्याश्रयत्वप्रतिपादकमिति । तथाब्रह्मणोद्यावापृथिव्याश्रयत्वेसुषिरश्रुतिर्विरुध्यतेनवेति ।

प्र०याकाशादिसर्वाश्रयत्वादिप्रकारप्रतिपादकमितिचिंताप्रदर्शनीया । तथाप्यस्मिन्पक्षेवक्ष्यमाणदिशाप्रश्नप्रतिवचनयोस्तुल्यविभक्तिकत्वाभावात् ब्रह्मत्वविधानपक्षेतत्सत्त्वस्यवक्ष्यमाणत्वाच्छांदोग्यभाष्योक्तब्रह्मत्वकोटिकचिंताप्रदर्शितेतिज्ञेयं । अत्रद्वौपूर्ववादिसाधकावुत्तरवादिबाधकौवाक्यानन्वयसमाख्याविरोधरूपौन्यायविवरणभाष्याभ्यामुक्तौ । तत्राद्यघटितांचिंतामुक्त्वाद्वितीयघटितामाह ॥ तथेति ॥ अस्प

SGDF Sri Gargeshwari Digital Foundation

प्र० ष्टत्वात्फलफलिभावंव्यनक्ति ॥ **यद्याद्यइति** ॥ यदियावानित्यादिप्रतिवचनंब्रह्मपरत्वेसुषिरश्रुतिविरोधेनभूताकाशानुवादेनतत्स्थस्यद्यावा भूम्यादेरन्वेष्टव्यत्वप्रतिपादकं तर्हिभूतस्यैवहृत्पद्मस्थत्वप्राप्तेःप्रतिवचनविरोधेनापहतपाप्मत्वादेर्गौणतयाप्राक्तनमपिहृत्पद्मस्थत्वंभूतस्यैवसि ध्यतीत्यर्थः । ननु यावानितिप्रतिवचनस्यवाक्यतयाकथंतद्विरोधेनापहतपाप्मत्वादेर्लिंगस्यबाधेनगौणत्वोक्तिः । वैपरीत्यस्यैवौचित्यात् । वक्ष्यतिच "शब्दादेवे"त्यत्र "किंतदत्रविद्यत"इत्यादिवाक्यस्यापहतपाप्मत्वादिलिंगाद्दुर्बलत्वमिति । नच प्रतिवचनरूपवाक्यस्यप्रथमस्थ त्वेनासंजातविरोधित्वेनप्राबल्यंमन्यतेपूर्वपक्षी । अग्रेतनंलिंगवाक्ययोःप्राबल्यदौर्बल्यकथनंतुलिंगत्ववाक्यत्वप्रयुक्तमेवेतिनविरुध्यतइति वाच्यं । चरमस्यमुख्यत्वायप्रथमस्येक्षणस्यैवगौणतायान्याय्यत्वादितिपूर्वाधिकरणोक्तदिशापूर्वबाधस्यैवयुक्तत्वात् । नचाकाशश्रुतियुक्तत्वे नवाक्यस्यलिंगाद्बलवत्त्वं । एषआत्माऽपहतपाप्मेतिश्रवणेनलिंगस्यापि "स्वशब्दा"दित्युक्तन्यायेनब्रह्मवाचकात्मश्रुतियुक्तत्वात् । नचवा क्येश्रुतेरभ्यासोस्तीतितस्यबलवत्त्वं । "तद्यइहात्मानमननुविद्यव्रजंति । अथयआत्मानमनुविद्यव्रजंती"तिचात्मश्रुतेरभ्यासाल्लिंगानांबहुत्वा च्चेतिचेन्मैवं । वक्ष्यमाणदिशावाक्यस्यनिरवकाशत्वंलिंगानांसावकाशत्वमितिपूर्वपक्षिणोऽभिमानात् । एकेनापिजात्यादुर्बलेननिरवकाशे नबहूनांसावकाशानांबाधात् । "आनर्थक्यप्रतिहतानांविपरीतंबलाबल"मितिन्यायादितिभावः ॥ **यदित्विति** ॥ यदि "यावा"निति

यद्याद्यस्तदाप्रतिवचनविरोधेनसुषिरश्रुतिविरोधेनचापहतपाप्मत्वादेर्भूताकाशएवामुख्यस्यसंभवा त्तस्यैवान्वेष्टव्यद्यावापृथिव्याद्याश्रयत्वविशिष्टंहृत्पद्मस्थत्वं । यदितुद्वितीयस्तदाविरोधद्वयाभा वान्मुख्येनापहतपाप्मत्वादिनाऽन्वेष्टव्यत्वद्यावापृथिव्याद्याश्रयत्वविशिष्टंहृत्पद्मस्थत्वंब्रह्मणएव ।

गु०साधारणत्वमितिसंबंधोबोध्यः। अन्वेष्टव्यंयथापृथिव्यादीतिविग्रहः ॥ **विरोधद्वयाभावादिति** ॥ प्रतिवचनविरोधसुषिरश्रुतिविरोधरूपविरोधद्वयाभावादित्यर्थः

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रतिवचनं "किंतदत्रविद्यत" इतिप्रश्ने आकाशशब्दितंत्रह्मविद्यतइत्यन्वेष्टव्यंत्रह्मेत्युक्तिपरं तदाविष्णोरेवसर्वाधारतयाहृत्पद्मस्थत्वप्राप्तेःप्रतिवचनविरोधाभावात्प्राक्तनमपिहृत्पद्मस्थत्वंतस्यैव । एवंचापहतपाप्मत्वादिकंमुख्यमेव । तथासुषिरश्रुतेरपिसर्वाधारत्वाभिप्रायेणपरंपरयासुषिरस्यसर्वाधारत्वबोधनपरतयोपपत्तेस्तद्विरोधाभावाद्धृत्पद्मस्थत्वंविष्णोरेवसिध्यतीत्यर्थः । पूर्वपक्षटीकांविवरीतुकामोभाष्याद्युक्तपूर्वपक्षहेतूनामसिद्धिपरिहारायसमन्वीयमानलिंगस्वरूपंनिर्णेतुमाक्षिपति ॥ **अत्रयद्यपीति** ॥ नचिंतेतितिविच्छेदः ॥ **पूर्वपक्षइति** ॥ भूतस्यैवसर्वाधारत्वेनपूर्वपक्षकरणादितिभावः ॥ **नापिहृत्पद्मस्थइति** ॥ व्यधिकरणत्वादितिभावः । उक्तदोषपरिजिहीर्षयापक्षांतरंसोपष्टंभ

अत्रयद्यपि "दहरोस्मिन्नंतराकाश" इतिवाक्योक्तेहृत्पद्मस्थदहराकाशत्वेनाचिंता । तस्यसिद्धांतेप्यत्रह्मनिष्ठत्वात् । नापि "तस्मिन्यदंतस्तदन्वेष्टव्य" मितिवाक्योक्तेहृत्पद्मस्थदहराकाशस्थत्वे । तत्रभाष्योक्ताकाशशब्दाख्यपूर्वपक्षबीजाभावात् । पूर्वपक्षेदहराकाशस्थस्यसर्वाधारत्वाभावेनभाष्यटीकोक्तांबरांतधृत्याक्षेपायोगाच्च । नापिहृत्पद्मस्थोदहरआकाशइतिपूर्वपक्षेहृत्पद्मस्थदहरस्थंत्रह्मेतिसिद्धांतोयुक्तः ।

गु० ॥ **तस्येति** ॥ हृत्पद्मस्थदहराकाशत्वस्येत्यर्थः ॥ **नापीति** ॥ पूर्वपक्षस्यहृत्पद्मस्थदहराकाशत्वविषयकत्वात्सिद्धांतस्यहृत्पद्मस्थदहराकाशस्थस्यत्रह्मविषयकत्वेन

प्र० माशंकते ॥ **नापीति** ॥ बह्वनुरोधेनैकंभाष्यवाक्यंटीकोक्तरीत्याऽन्यथाव्याख्येयमित्याह ॥ **लिंगमिति** ॥ **तथैवेति** ॥ पूर्वाधिकरणाक्षेपेणात्रपूर्वपक्षइतिदर्शयितुमित्येवंरूपेणेत्यर्थः । अतएवोत्तरत्रतत्वप्रदीपे "तत्स्थःकश्चिदित्यपरःपक्षः । सोपिजीवइतिप्राप्त" मितिहृत्पद्मगतसुषिरस्थएवविषयोदर्शितइतिभावः । त्रेधासमाधित्सुःछांदोग्यभाष्यरीत्यातावत्समाधिमाह ॥ **तथापियावानिति** ॥ **तत्रेति** ॥ यावानयंबाह्याकाशस्तावान्हृदयेविद्यतइत्याकाशस्यहृदयस्थताश्रवणेनाकाशश्रुतिरूपपूर्वपक्षबीजस्य सिद्धांतेतदाकाशत्वस्यत्रह्मनिष्ठतायाश्चसत्वादि

नापिसर्वाधारत्वेचिंता । "चंद्राद्याधारत्वंविष्णोरुक्तं । तच्चाकाशस्यप्रतीयत" इतिभाष्यानुसारात् । "सचंद्रादित्याद्याधारःकिंदहराकाशआहोस्वित्तत्स्थःकश्चि" दित्यादितत्वप्रदीपानुसाराच्चेतिवाच्यं । "लिंगंहृत्पद्मस्थत्व" मितिन्यायविवरणे "सोक्षरःसन्हृदब्जग" इतिसंक्षेपेचहृत्पद्मस्थत्वस्यैवविषयत्वोक्तेः । अत्रापि "दहरेविष्णुरेवे" तिसिद्धांतभाष्ये सूत्रेपिसप्तम्यंतेनदहरपदेनदहराकाशस्थत्वस्यैवसमन्वेतव्यत्वप्रतीतेश्च । "प्रसिद्धेश्चे" त्यादिसूत्रेविष्णोर्दहराकाशस्थत्वस्यैवोपपादनाच्च । "चंद्राद्याधारत्व" मितिभाष्यंत्वक्षराधिकरणाक्षेपेणात्रपूर्वपक्षइतिदर्शयितुमितिटीकायामेवव्याख्यातं । तत्वप्रदीपोपितथैवव्याख्येयः । तथापि "यावान्वाअयमाकाशस्तावानेषोंतर्हृदय" इतिवाक्योक्तेहृत्पद्मस्थत्वेचिंता । एवंचनकोपिदोषः । तस्यसिद्धांतेत्रह्ममात्रनिष्ठत्वात् । तत्रपूर्वपक्षबीजादेःसत्वाच्च ।

गु० समानविषयत्वाभावेनपूर्वपक्षसिद्धांतभावानुपपत्तेरित्यर्थः॥**तत्वप्रदीपोपितथैवेति**॥अक्षराधिकरणाक्षेपार्थत्वेनैवेत्यर्थः ।यावान्वायमाकाशइतिटीकोक्तव्याख्या

SGDF Sri Gurgeshwari Digital Foundation

प्र० त्यर्थः । नन्वस्यछांदोग्यभाष्यरीत्यासंभवेपिन्यायविवरणरीत्याहृदयशब्दस्यविष्णुहृदयपरत्वात्तत्स्थत्वंसिद्धांतेपिप्रसिद्धाकाशस्यैव । नतुवि ष्णोरित्यतउभयानुगुणंपक्षांतरमाह ॥ यद्वेति ॥ ''यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाश''इत्युक्त्वा ''तस्मिन्यदंत स्तदन्वेष्टव्य''मितिवाक्योक्तइत्यर्थः । तच्छब्दस्य तस्मिन्नित्यस्य । नन्वेवमाकाशस्यैवान्वेष्टव्यत्वप्राप्त्यापूर्वपक्षेद्यावाभूम्यादेरन्वेष्टव्यत्वोक्ति र्नयुज्यतइत्यतस्साक्षात्परंपरासाधारण्येनवाक्यविशेषस्थत्वंविनैतत्प्रकरणगतंहृत्पद्मस्थत्वसामान्यमेवलिंगमित्याह ॥ यद्वेति ॥ बाध इति ॥ सिद्धत्वमित्यपियोज्यं । आकाशेहृत्पद्मस्थत्वस्यसिद्धांतेप्यनुमतत्वात् ॥ किंतुद्यावापृथिव्यादीति ॥ अतएवटीकायां ''सर्वा

यद्वा अन्वेष्टव्यइतिवाक्योक्तेहृत्पद्मस्थत्वेचिंता । पूर्वपक्षेतच्छब्दस्यव्यवहितपुंडरीकपरत्वेनपुंडरीकस्था काशस्यैवान्वेष्टव्यत्वेनपूर्वपक्षबीजसंभवात् । तस्यैवसर्वाधारत्वेनांबरांतधृत्याक्षेपसंभवाच्च । यद्वा एतत्प्रकरणस्थेहृत्पद्मस्थत्वसामान्येचिंता । तच्चाकाशस्येतिनपूर्वःपक्षः । नापितदाकाशस्यनेतिसिद्धांतः । येनबाधः । किंतुद्यावापृथिव्याद्याश्रयतयायत्साक्षाद्धृत्पद्मस्थत्वंतदाकाशस्यैव । भाष्योक्तसुषिरश्रुतेः । यत्तुव्यवहितमन्वेष्टव्यतयाहृत्पद्मस्थत्वं तत् द्यावापृथिव्यादेरेव । न्यायविवरणोक्तानन्वयात् । तथाच ब्रह्मणिविशेषाभावात्सामान्यममपिनेतिप्राप्ते सत्यंसाक्षाद्धृत्पद्मस्थत्वमाकाशस्यैव । व्यवहितंतुब्रह्मणः । ॥ ६१६ ॥

गु० नानुसारेणचिंतामुपपाद्य भगवतस्सर्वाधारत्वेतस्मिन्सर्वंप्रतिष्ठितमितिसुषिरस्यसर्वाधारत्वश्रुतिविरोधइतिव्याख्यानानुसारेणापिचिंताप्रकारमाह ॥ यद्वेति ॥ येन

SGDF
Sri Gargeshwari Digital Foundation

प्र० धारतयाहृत्पद्मस्थत्वमाकाशस्ये"त्युक्तमितिभावः ॥ **तस्यैवेति** ॥ यावान्वेतिवाक्येप्रागुक्ताकाशानुवादेनसर्वाधारत्वोक्तेरितिभावः ॥ **विशेषेति** ॥ साक्षात्परंपरालक्षणविशेषभावादितिभावः । आकाशप्रापकपूर्वपक्षटीकां "सर्वाधारतयाहृत्पद्मस्थत्वमाकाशस्ये"त्यादिरूपां तावत्प्रपंचयति ॥ **हृत्पद्मस्थत्वमिति** ॥ न्यायविवरणेवाक्यानन्वयोऽत्रपूर्वपक्षेहेतुरुक्तः । भाष्येसमाख्याविरोधोहेतुरुक्तः । तद्धेतुद्वयं पक्षभेदेनयोज्यं । अन्यथानुपपत्तेरितिभावेनविकल्पपूर्वमाद्यपक्षेभाष्योक्तंहेतुंयोजयति ॥ **तद्धीत्यादिना** ॥ टीकायांप्रतिज्ञाविशेषादेर स्पष्टत्वात्समाख्यायानिरवकाशत्वानुक्त्यासमाख्ययालिंगबाधायोगाच्चनिष्कृष्यतदभिप्रायमाह ॥ **तत्रायंभावइति** ॥ टीकोक्तमुपलक्षणंम

तस्यैवद्यावापृथिव्याद्याश्रयत्वमन्वेष्टव्यत्वंच । तथाचविशेषसद्भावात्सामान्यमप्यस्तीति सिद्धांतयिष्यमाणत्वान्नकोपिदोषः । पूर्वपक्षस्तु । हृत्पद्मस्थत्वमाकाशस्यैव । नतुब्र ह्मणः । तद्धिब्रह्मणोहृत्पद्मस्थदहराकाशतयावा दहराकाशाश्रितान्वेष्टव्यतयावा । तत्राद्य "आकाशस्यप्रतीयत"इत्यादिभाष्येण तद्विवरणरूपया "दहरोस्मिन्नंतराकाश"इत्यादिटी कयाचदूषितः । तत्रायंभावः । पूर्वस्मिन् "दहरोस्मिन्नंतराकाश"इतिहृत्पद्मस्थवाक्ये

गु० **बाधइति** ॥ दहरोस्मिन्नंतराकाशइत्यत्रहृत्पद्मस्थत्वस्याकाशमात्रनिष्ठत्वस्यसिद्धांतेप्यभ्युपगतत्वेनाकाशस्यनेत्युच्यमानेबाधःस्यादित्यर्थः ॥ **तथाचेति** ॥ याव द्विशेषाभावेसामान्यस्यबाधितत्वादित्यर्थः । वाक्यान्वयानुपपत्तेरित्यादिटीकानुपपन्ना । आकाशशब्दस्यब्रह्मपरत्वेनकिंतदत्रविद्यतइतिप्रश्ने आकाशशब्दोक्तंब्रह्म

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वाह ॥ **परस्मिंश्चेति** ॥ "नन्वस्ति"त्यादिटीकांव्यनक्ति ॥ **नचतल्लिंगादिति** ॥ आकाशइतिहोवाचेतिवाक्येपरोवरीयस्त्वादिलिंगश्र
वणादाकाशोब्रह्मेत्युक्तं "आकाशस्तल्लिंगा"दित्यत्र । तथेहापिसर्वाधारत्वरूपब्रह्मलिंगादाकाशोब्रह्मस्यादित्यर्थः । "तस्यांत"इतितच्छब्दा
र्थविवरणायोक्तं **पद्मकोशेति** ॥ "पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखं । अधोनिष्ठ्यावितस्त्यांतुनाभ्यामुपरितिष्ठति । ज्वालमालाकुलं
भातिविश्वस्यायतनंमहत् । संततँसिराभिस्तुलंबत्याकोशसन्निभं । तस्यांतेसुषिर"मितिनारायणोपनिषदिसमाम्नानादितिभावः ॥**उक्तेरिति**॥

परस्मिंश्च "तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवी"इत्यादौसर्वाधारवाक्येचगगनेप्रसिद्धाकाशशब्दश्रवणान्न ब्रह्मदहराकाशः। नचतल्लिंगादित्युक्तन्यायेनसब्रह्मपरः। "पद्मकोशप्रतीकाशंहृदय"मितिप्रकृतहृत्पद्मपरामर्शेन "तस्यां तेसुषिरंसूक्ष्मंतस्मिन्सर्वंप्रतिष्ठित"मितिश्रुत्यंतरेसुषिरस्यहृत्पद्मस्थत्वसर्वाधारत्वयोरुक्तेः। नचतत्रसुषिरशब्दोब्रह्मपरः। "तस्यमध्येवह्निशिखाअणीयोर्ध्वाव्यवस्थिता । तस्याःशिखायामध्येपरमात्माव्यवस्थितः"इतिपरमात्मनःसुषिरस्थशि खामध्यस्थत्वोक्तेः। किंचदहराकाशस्यब्रह्मत्वे"तस्मिन्यदंतस्तदन्वेष्टव्य"मितिदहरस्थस्यान्वेष्टव्यत्वोक्तिरयुक्तास्यात् ।

प्र० ननुतावताकथंलिंगस्यसमाख्यामात्रेणबाधः। नचाकाशश्रुतिसमाख्याभ्यांलिंगस्यबाधइतियुक्तं। एकेनापिनिरवकाशेनानेकबाधदर्शनादि
त्यतस्समाख्यायानिरवकाशत्वंशंकापूर्वमाह ॥ **नचतत्रेति** ॥ उक्तन्यायेनैवेत्यर्थः। व्यवस्थितेत्यनंतरं "नीलतोयदमध्यस्थाविद्युल्लेखेवभा
स्वरा । नीवारशूकवत्तन्वीपीताभास्वत्यनूपमे"तिमंत्रोऽनुपयोगादत्रनोदाहृतः। युक्त्यंतरंचस्वयमाह ॥ **किंचेति** ॥ नचतच्छब्दस्यपुंडरी
कपरत्वाद्ब्रह्मणएवान्वेष्टव्यत्वमितिवाच्यं । अव्यवहिताकाशपरत्वसंभवेव्यवहितपुंडरीकपरत्वायोगात् । दहरस्थहृत्पुंडरीकस्थतायादहरो ॥ ६१७ ॥

प्र०स्मिन्नित्यत्रैवोक्तत्वेनपुनस्तदुक्तिवैयर्थ्याच्चेतिभावः। एतेनोत्तरवाक्यगतबहुतरहेतुविरोधाद्भूतेप्रसिद्धाकाशश्रुत्यापूर्वपक्षस्तुच्छइतिभामत्युक्तं
निरस्तं । निरवकाशसमाख्ययान्यस्यान्वेष्टव्यत्वोक्त्ययोगरूपयुक्त्याचसहिताकाशश्रुत्याऽऽकाशपूर्वपक्षस्ययुक्तत्वादिति ॥ **द्वितीयस्त्विति**॥
दहराश्रितान्वेष्टव्यतयावेतिपक्षइत्यर्थः । टीकोक्तंप्रतीतचोद्यनिरासेनविकल्पमुखेनविशदयन्नाद्यपक्षइवद्वितीयपक्षेप्युत्तरवाक्यस्यब्रह्मपरत्वे
टीकोक्तसुषिरश्रुतिविरोधवदनन्वयोपियोज्यइतिभावेनटीकाभिप्रायमाह ॥ **तत्रेति** ॥ अन्वेष्टव्यं "उभेअस्मि"न्नित्यादिनावक्तुंतदुपयुक्तत्वे

द्वितीयस्तु "दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यमित्यनेनयावान्वाअयमा काशस्तावानेषोंतर्हृदयआकाशइत्यस्यान्वयाभाव"इतिन्यायविवरणे तद्विवरणरूपायां "वाक्यान्वयानुपपत्ते"रित्यादिटीकायांचपरिहृतः। तत्रायंभावः। यावान्वाअयमाका शइतिवाक्यस्थआकाशःकिंप्रसिद्धाकाशःकिंवाब्रह्म । नाद्यः। तस्मिन्यदंतरित्यत्रान्वे ष्टव्यतयोक्तस्यहृत्पद्मस्थदहराकाशस्थस्यब्रह्मत्वे "किंतदत्रविद्यत"इतिप्रश्नस्यब्रह्मविद्य तइतिपरिहारंविना "यावान्वा"इत्यादिनाप्रसिद्धाकाशस्यान्वेष्टव्यत्वोक्तेरनन्वयात् ।

गु० स्तीतिपरिहारस्यश्लिष्टत्वात् । नचाकाशस्यप्रसिद्धाकाशपरत्वाभिप्रायेणयावान्वाइत्यादेरन्वयाभावापादनमितिशंक्यं । तथापिनानन्वयः । अन्वेष्टव्यद्युपृथिव्याद्या
धारतयाकाशोक्तेःसंभवादित्यतोव्याख्याति ॥ **तत्रायंभावइति** ॥ आकाशपक्षेत्वस्त्यन्वयइत्यादिटीका । तत्रयावान्वाइत्यादिनाप्रसिद्धाकाशस्यैवविशेषमभिधा

SGDF
Sri Gargeshwari Digital Foundation

प्र० नैतदुक्तयन्वयोस्त्वित्याशंक्यटीकोक्तमनन्वयंसाधयति ॥ नचेति ॥ द्यावापृथिव्यादेरिति ॥ यद्यप्येतत्पूर्वपक्षिणस्समीहितमेव । तथापि "तमेवैकंजानथआत्मानमन्यावाचोविमुंचथे"त्यादिनासिद्धांतिभिरन्वेष्टव्यत्वस्यत्याजितत्वादेतदनिष्टमितिभावः । तेननोत्तरग्रंथविरोधइतिध्येयं । अस्मिन्पक्षेभाष्यमुपलक्षणमन्यदप्याक्षेप्यमित्याह ॥ एवंचेति ॥ तेनजिज्ञास्यत्वरूपब्रह्मधर्मादाकाशोब्रह्मेतिनिरस्तं । "यावान्वा"इतिवाक्यगताकाशोब्रह्मेतिद्वितीयपक्षष्टीकायां "नचयावानित्यादिनाऽऽकाशाख्योविष्णु"रित्यादिग्रंथेनशंकापूर्वंनिरस्तः । तंविशद

नचान्वेष्टव्यंप्रत्याधारतयातदुक्तिः । आधारतायाः "तस्मिन्यदंत"रितिप्रागेवोक्तत्वेन "किंतदत्रविद्यत"इत्याधेयस्यैवपृष्टत्वेनचाकांक्षाभावेनद्यावापृथिव्यादेरन्वेष्टव्यत्वप्रसंगेनचाधारत्वोक्तेरनन्वयात् । आकाशपक्षेत्वस्त्यन्वयः । आकाशस्यदहरवाक्येहृत्पद्मस्थतामुक्त्वाऽन्वेष्टव्यवाक्येदहराकाशांतःस्थस्यान्वेष्टव्यत्वउक्ते "किंतदत्रविद्यत"इत्यत्रान्वेष्टव्यआधेयेपृष्टे "यावान्वा"इत्यादिनापूर्वोक्तमाधारमाकाशमनूद्यतच्चद्यावापृथिव्याद्याश्रयत्वयोग्यत्वायबाह्याकाशतुल्यतयाविशेष्य"उभेअस्मि"न्नित्यादिनाद्यावापृथिव्यादेरन्वेष्टव्यत्वोक्तेःश्लिष्टत्वात् । एवंचपूर्वपक्षेजिज्ञासासूत्रस्याप्याक्षेपः । अतएव "मुख्यतःपृथिव्यादीनामनुपास्यत्वा"दितिसिद्धांतटीकायांपृथिव्यादेर्जिज्ञास्यत्वप्रतिषेधः । ॥ ६१८ ॥

गु० येत्युक्तं । नतुतत्प्रयोजनमुक्तमित्यतस्तत्प्रयोजनंवदन्नेवार्थतष्टीकामनुवदति ॥ आकाशपक्षइति ॥ अतएवेति ॥ पूर्वपक्षेजिज्ञासासूत्रस्याप्याक्षेपस्याभिमत

SGDF
Sri Gargeshwari Digital Foundation

प्र० यति ॥ **नन्विति** ॥ टीकोक्तंसुषिरश्रुतिविरोधमुक्त्वाऽनन्वयमपियोजयति ॥ **नहीति** ॥ हृत्पद्मस्थाकाशस्थंकिमितिपृष्टेहृदयेब्रह्म तत्रच सर्वमस्तीत्यस्यानन्वयादितिभावः ॥ **अस्मिन्पक्षइति** ॥ प्रतिवचनगताकाशोब्रह्मेतिपक्षइत्यर्थः । ननुविष्णुलिंगविरोधइत्यतआह ॥

ननुतर्हिंब्रह्मेतिद्वितीयोस्तु । नचैवमाधेयप्रश्नस्य "यावा"नित्यनेनैवोत्तरितत्वेन "उभेअस्मि"न्नित्यादिकंव्यर्थमितिवाच्यं । ब्रह्मणोजिज्ञास्यत्वायसर्वाधारत्वोक्तेरितिचेन्न । तस्मिन्सर्वंप्रतिष्ठितमितिसमाख्याश्रुतौसाक्षात्सुषिरस्यैवसर्वाधारत्वोक्तेः । दहरोस्मिन्नंतराकाशस्तस्मिन्नितिपूर्वोक्तप्रसिद्धाकाशस्यैवेहापि "यावान्वाअयमाकाश"इत्याकाशश्रुत्या "उभेअस्मि"न्नितिसप्तम्याचप्रत्यभिज्ञानाच्च । नह्यस्मिन्नितिसप्तमीनिर्दिष्टआकाशःपृष्टमाधेयंप्रत्याधारोन । प्रथमानिर्दिष्टंचद्यावापृथिव्यादिकंपृष्टमाधेयंन । किंत्वन्यदेवेत्यन्वितंभवतीति ।

गु० त्वादेवेत्यर्थः । यावान्वाअयमाकाशइतिवाक्यस्थाकाशोनप्रसिद्धाकाशः । किंतुब्रह्मेतिद्वितीयोस्त्वितिशंकते ॥ **नन्विति** ॥ टीकायांनचयावानित्यादिनाऽऽकाशाख्योविष्णुःसर्वाधारतयापरिहारेकथ्यतइतिशंकाग्रंथेसर्वाधारतयेत्युक्तं । तस्यप्रयोजनमाह ॥ **नचैवमाधेयप्रश्नस्येत्यादिना** ॥ तस्मिन्सर्वंप्रतिष्ठितमितिसाक्षात्सुषिरस्यैवसर्वाधारत्वोक्तिविरोधादितिपरिहारटीकायां यावानितिवाक्योक्ताकाशस्यविष्णुत्वेन्यायविवरणोक्तानन्वयासंभवेनसुषिरश्रुतिविरोधोऽभिहितइतिप्रतीतिनिरासायाह ॥ **तस्मिन्सर्वमिति** ॥ यावानितिवाक्योक्ताकाशस्यब्रह्मत्वेप्युक्तरीत्याऽनन्वयश्चेत्तर्ह्यस्मिन्पक्षेऽनन्वयमनुक्त्वासुषिरश्रुतिविरोधोक्तिरयुक्तेत्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० अपहतेति ॥ तस्मात् लिंगविरोधाभावादित्यर्थः । एवमाकाशपूर्वपक्षटीकांप्रपंच्य "इतरपरामर्शात्सइतिचे"दितिसूत्रपूर्वपक्षोक्तिपरां "जीवस्यवैतद्भवे"दित्यादिटीकांव्यनक्ति ॥ जीवोवास्त्विति ॥ हृत्पद्मस्थइत्यनुषंगः । तस्यात्मत्वविधानेपिहृत्पद्मस्थत्वंकुतइत्यतआह ॥ यआत्मेति ॥ तस्यप्रकृतहृत्पद्मस्थविषयत्वादितिभावः ॥ विधानादिति ॥ एतेनटीकादौ "परामर्शा"दित्यस्यपरामृश्यात्मत्वविधाना

टीकायामस्मिन्पक्षेन्यायविवरणोक्तानन्वयमनुक्त्वाभाष्योक्तसुषिरश्रुतिविरोधोक्तिस्त्वनन्वयोनलगतीतिनाभिप्रेत्य । किंतुसुषिरश्रुतिविरोधोपिलगतीत्यभिप्रेत्य । तस्मादाकाशमेवहृत्पद्मस्थं । अपहतपाप्मत्वादिकंत्वाकाशेपियुक्तं । तस्या चेतनत्वेनपाप्माद्यत्यंताभावस्यसत्त्वात् । तत्प्रध्वंसस्यचब्रह्मण्यप्यसत्त्वात् । सत्यकामत्वादिकंतुप्रतिहतकामादिराहित्यात् । यद्वा अभिमान्यभिप्रायेणाकाशेपहतपाप्मत्वादिकंसत्यकामत्वादिकंचास्तु । तस्माद्धृत्पद्मस्थमाकाशमेव । जीवोवास्तु । "एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतएषआत्मे"त्युत्तरत्रैतच्छब्देनप्रकृतंजीवमनूद्यतस्यात्मशब्देन "यआत्माऽपहतपाप्माविजरोविमृत्यु"रित्यादिनोक्तहृत्पद्मस्थात्मत्वविधानात् ।

गु० ॥ टीकायामिति ॥ ननुप्रसिद्धाकाशपक्षेऽपहतपाप्मत्वाद्ययोगइत्यतोपहतपाप्मत्वंकिंपापात्यंताभावोवापाप्मध्वंसोवा । आद्यस्तुप्रसिद्धाकाशेप्यनुपपन्नइत्याह ॥ तस्येति ॥ द्वितीयआह ॥ तत्प्रध्वंसस्यचेति ॥ ननुचपाप्मात्यंताभावएवविवक्षितः । नचचेतनत्वेनाकाशस्यापिपाप्मात्यंताभावोक्तिरितिवाच्यं । तस्याचेतनत्वेनपापप्रसक्तेरेवाभावेनतन्निषेधायोगात् । नचनांतरिक्षेऽग्निश्चेतव्यइत्यादाविवाप्रसक्तनिषेधःकिंनस्यादितिवाच्यं । तस्यहिरण्यंनिधायाग्निचयनंकर्तव्यमितिविधिस्तावकत्वेनस्वार्थेतात्पर्याभावादित्यस्वरसादाह ॥ यद्वेति ॥ जीवस्यवैतद्भवेदितिटीका । तत्रजीवस्यपूर्वमप्रकृतत्वेनैतच्छब्देनतत्परामर्शानुपपत्तिः । अस्तु

प्र० दित्यर्थउक्तोभवति । ननुतत्रैषइत्यस्यज्योतिश्शब्दनिर्दिष्टविष्णुपरत्वमस्त्वित्यतआह ॥ तत्रचेति ॥ नपुंसकेति ॥ उपलक्षणमेतत् । संपद्यतइत्यत्रकर्तृत्वेनसन्निहितजीवपरित्यागायोगादित्यपिध्येयं । लिंगविरोधमाशंक्य "उत्तराच्चे"दितिसौत्राक्षेपाभिप्रायमाह ॥ अपहतेति ॥ अस्यसूत्रस्येति ॥ सूत्रतादशायांशाटकभावाभावादितिभावः । सूत्रस्यशाटकंवयेत्येतद्यथोभेसूत्रेशाटकंभवतितथाकुर्विंतिभावेनप्रयुज्यते यथाचतक्षणेकृतेयूपोभवतितथाकुर्विंतिभावेनप्रयुज्यतेतद्वदितिभावः । विवृतश्चायंदृष्टांतोमहाभाष्ये "इग्यणस्संप्रसारण"मित्यत्रयदिशाटकोनवातव्यः अथवातव्योनशाटकःशाटकोवातव्यश्चेतिविप्रतिषिद्धं । भाविनीखल्वस्यसंज्ञाभिप्रेता । समन्येवातव्योयस्मिन्नुतेशाटकइत्येतद्भवतीति । एवमिहापिसयणःस्थानेभवति । यस्याभिनिर्वृत्तस्यसंप्रसारणमित्येषासंज्ञाभविष्यती"ति । तथापूर्वतंत्रेनवमाद्यपादे "अग्नयेजुष्टंनिर्वपामी"त्यत्रजुष्टमित्येतद्भाविभावाभिप्रायेणेत्युक्तं गुणशब्दस्तथेतिचेदित्यत्रद्वादशेधिकरणे । तदेतदाह ॥ इत्यादिवदिति ॥ मुक्तावपिसत्यकामत्वादिकंप्रसिद्धं । तदानिश्शेषकामनिवृत्तेरित्यतआह ॥ अतएवेति ॥ अपहतपाप्मत्वादेर्मुक्तविषयत्वादेवेत्यर्थः । "सयदिपितृलोककाम"इत्यादेर्मुक्तविषयत्वंच "संकल्पादेवचतच्छ्रुते"रित्यधिकरणसिद्धमितितत्प्रकरणादस्यापहतपाप्मेत्यादेर्मुक्तविषयत्वमवश्यंवाच्यं ।

तत्रचैतच्छब्दस्यपरज्योतिःपरत्वेनपुंसकलिंगतास्यात् । अपहतपाप्मत्वादिकंतुमुक्तौजीवेपिसंभवात् "अस्यसूत्रस्यशाटकंवय यूपंतक्षती"त्यादिवद्भाविभावाभिप्रायं । अतएवास्मिन्नेवप्रकरणउत्तरत्र "सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुतिष्ठंते । अत्रह्येतेसत्याःकामा"इत्यादिनामुक्तानांसत्यकामत्वाद्युक्तिः ।

गु० वाप्रकृतत्वं । तथापिपरंज्योतिश्शब्देनब्रह्मणोपिप्रकृतत्वादेतच्छब्देनतत्परामर्शःकिंनस्यादित्यतोव्याख्याति ॥ अतएवेति ॥ भाविभावाभिप्रायेणजीवेप्यपहत

SGDF Sri Gargeshwari Digital Foundation

प्र० अन्यथा “सयदी”त्यादेरप्रकृतविषयत्वंस्यादितिभावः । नन्वेवमप्यनन्वयदोषस्तदवस्थइत्यतो “यश्चोभयोस्समोदोष”इतिन्यायेनना हंपर्यनुयोज्यइतिभावेनाह ॥ यावान्वाइति ॥ “दहरपद्मस्थोविष्णुरेवभवे”दित्यादिटीकार्थमनूद्यव्यनक्ति ॥ हृत्पद्मस्थत्वमिति ॥ लिंगानांबहुत्वेनसूत्रादौबहुवचननिर्देशेपिप्रत्येकंहेतुत्वंसूचयितुंलिंगादित्येकवचननिर्देशः । एतच्च “गतिशब्दाभ्यांतथाहिदृष्टंलिंगंच । धृते श्चमहिम्नोस्यास्मिन्नुपलब्धेः । प्रसिद्धेश्चे”तिसौत्रसाधकानामुपलक्षणं । उक्तदोषाः सुषिरश्रुतिविरोधादयइत्यर्थः । लिंगनिरवकाशत्वोक्ति परां “नचाकाशस्यापिपापाद्यभावेने”त्यादिटीकांव्यनक्ति ॥ नचगगनइति ॥ दर्शनंहीति ॥ हिर्हेतौ । प्रसिद्धौवा । नन्वस्त्विहापि सजातीयेजडांतरेपापदर्शनाद्गगनेतन्निषेधइत्यतआह ॥ जडेतुनेति ॥ यदपिजीवेसावकाशमित्युक्तं तदपिनेतिभावेन “असंभवात् । उत्तराच्चेदाविर्भूतस्वरूप”स्त्वितिसूत्रभाष्यटीकोक्तंव्यनक्ति ॥ जीवस्यत्विति ॥ ननूक्तंभाविभावाभिप्रायेणसंसारिण्यपियुक्तमिति । तथा

यावान्वाइत्यादिवाक्यानन्वयस्तुब्रह्मपक्षेपिसमइति ॥ **सिद्धांतस्तु** ॥ हृत्पद्मस्थत्वंविष्णोरेव । अपहतपाप्मत्वादिलिं गात् । तच्चनहृत्पद्मस्थदहराकाशतया । येनोक्तदोषाः(षः) । किंतुहृत्पद्मस्थदहराकाशगततया । नचगगनेऽपहतपा प्मत्वाद्युक्तिर्युक्ता । तत्रपाप्माद्यप्रसक्तेः । नचेश्वरेपितदप्रसक्तिः । सजातीयेदर्शनंहिप्रतिषेधेप्रयोजकं । चेतनेचैवपाप्मा दिमत्त्वाद्दृष्टाजडेतुन ॥ १ ॥ जीवस्यतुनसंसारदशायामपहतपाप्मत्वादिकं । मुक्तिदशायांतुदेहाभावान्नहृत्पद्मस्थत्वं ।

गु० पाप्मत्वादेःसंभवादेवेत्यर्थः । प्रथमसूत्रोक्तंहेतुमाह ॥ हृत्पद्मस्थत्वमिति ॥ येनोक्तदोषइति ॥ सुषिरस्यदहरस्थाकाशत्वप्रतिपादकश्रुतिविरोधइत्युक्तदोषो नेत्यर्थः । ननुचेतनत्वेनसाजात्यविवक्षयाजीवेपापप्रसक्त्येश्वरेतन्निषेधे पारतंत्र्येणजीवजडाकाशयोरपिसाजात्यविवक्षयाजीवेपापप्रसक्त्याभूताकाशेपितन्निषेधोपप

SGDF
Sri Gargeshwari Digital Foundation

प्र० ऽऽकाशेप्यभिमानिद्वारायुज्यतइतिचेत्यतोभाष्यटीकोक्तरीत्याऽनवकाशत्वमाह ॥ **किंचेति** ॥ श्रुत्यादिभिः "एषसर्वेभ्यःपाप्मभ्यउदित" इति "सर्वेपाप्मानोतोनिवर्तंते"इति "नहवैदेवान्पापंगच्छती"त्यादिश्रुतिभिः, "नित्यतीर्णाशनायादिरेकएवहरिःस्वतः । अशनायादिका नन्येतत्प्रसादात्तरंतिहि । सत्यकामःपरोनास्तितमृतेविष्णुमव्ययं । सत्यकामत्वमन्येषांभवेत्तत्काम्यकामिते"त्यादिस्मृतिभिरित्यर्थः ॥ **जीवस्यत्विति** ॥ एतेन "आविर्भूतस्वरूपस्त्वि"तिसौत्रखंडस्यतात्पर्यमुक्तंभवति ॥ **नचनिरपेक्षेति** ॥ "यस्यपर्णमयीजुहूर्भवती"तिश्रु तजुहूवदितिभावः । अतएवच "यद्योन्यांतदुत्तरयोर्गायती"त्यत्रोत्तराशब्दस्योत्तराग्रंथेनिरपेक्षवृत्तित्वेनतद्गतयोरेवोत्तरयोर्ग्रहणं । नपुनस्सा पेक्षयोर्योन्युत्तरयोरित्युक्तंनवमे । एवमुत्तरेभ्यइतिसौत्रलिंगानांनिरवकाशतोक्त्याहृत्पद्मस्थदहराकाशस्थोविष्णुरित्युक्तं । इदानींपरोक्तबाधकं निरसिष्यन्नन्वयानुपपत्तिंतावत्परिहर्तुमाह ॥ **अन्वयेति** ॥ **टीकायामिति** ॥ "प्रसिद्धेश्चे"तिसूत्रटीकायामित्यर्थः । एतेनभाष्येऽनुक्तावपिटी

किंच अपहतपाप्मत्वादिकंभाष्योक्तश्रुत्यादिभिरीशस्यनिरपेक्षं । जीवस्यत्वीशदत्तत्वात्सापेक्षं । नचनिरपेक्षसंभवे सापेक्षंग्राह्यं । एतेनसत्यकामत्वादेरपिब्रह्मलिंगतासिद्धा । एतेनैवाकाशेप्यभिमान्यभिप्रायमपहतपाप्मत्वादीत्यपिनि रस्तं । अन्वयानुपपत्तिश्च "योन्वेष्टव्योभगवांस्तस्यांतर्हृदयेयावान्वाअयमाकाशस्तावानाकाशस्तस्मिन्द्यावापृथिवी अंतरेवसमाहितेसचभगवानपहतपाप्मेत्यन्वय"इतिन्यायविवरणेपरिहृता । तद्विवृतं "तथाही"त्यादिटीकायां ।

गु० त्तिरित्यरुचेराह ॥ **किंचेति** ॥ **एतेनेति** ॥ अपहतपाप्मत्वादेःब्रह्मधर्मत्वोपपादनेनेत्यर्थः ॥ **एतेनेति** ॥ जीवस्यापहतपाप्मत्वस्येशदत्तत्वेनतत्सापेक्षत्वोपपा दनेनेत्यर्थः । तथाहीत्यादिवाक्यान्वयानुपपत्तिपरिहारकटीकाग्रंथोनुपपन्नः । समानविभक्तिकत्वस्यप्रश्नोत्तरभावेप्रयोजकत्वेनप्रकृतेचप्रश्नवाक्येब्रह्मणःकिंतदितिप्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० कायामन्वयोक्तिर्न्यायविवरणमूलेतिदर्शितं । नन्वत्रटीकाद्युक्तान्वयघटनानयुक्तेव । प्रश्नवाक्ये “किंतदत्रे”तिब्रह्माकाशयोःप्रथमासप्तमीभ्यांनिर्दिष्टयोःपरिहारेसप्तमीप्रथमाभ्यांनिर्देशायोगेन परिहारानन्वयस्योक्तत्वादित्यतस्तदुक्तिव्यक्तिपूर्वमुक्तशंकांपरिहरति॥**तत्रायंभावइति**॥ यद्यपिपुंडरीकंवेश्मेत्येवश्रुतं । नतुब्रह्मवेश्मेति । तथापिवेश्मेत्युक्तौकस्येत्याकांक्षायांब्रह्मपुरइत्युक्तपुरस्वामिनोब्रह्मणएवपदिन्यायेनान्वयइतिभावेनब्रह्मप्रतिवेश्मत्वोक्त्येत्युक्तं । हृदयइत्यत्रकस्येत्याकांक्षायांतत्रापिप्रकृतंब्रह्मैवान्वेतीत्याह ॥ **यद्ब्रह्मेति** ॥ अस्मिन्ब्रह्मणीत्यर्थः । अत्रपरिहा

तत्रायंभावः । शरीरहृत्पुंडरीकयोर्ब्रह्मप्रतिपुरत्ववेश्मत्वोक्त्यैवान्वेष्टव्यस्यब्रह्मत्वेसिद्धे तस्मिन्यदंतरित्यत्रहृत्पद्मस्थाकाशगतंब्रह्मान्वेष्टव्यमित्युक्ते किंतदित्यत्रतद्ब्रह्मकिंप्रकारमितिपृष्टे यावानितिपरिहारवाक्येयद्ब्रह्मान्वेष्टव्यतयोक्तं तस्यांतर्हृदयेयावानेषआकाशस्तावान्सर्वोपिविद्यते । द्यावापृथिव्यादिकंचास्मिन्समाहितमितिब्रह्मणआकाशादिसर्वाश्रयत्वापहतपाप्मत्वादिप्रकारउक्तः । एवंचप्रश्नवाक्येब्रह्मणःकिंतदितिप्रथमया आकाशस्यत्वत्रेतिसप्तम्यानिर्देशेपिपरिहारवाक्येब्रह्मणोस्मिन्निितिसप्तम्या आकाशादेस्तुप्रथमयानिर्देशोनायुक्तः । प्रकारेपृष्टेआकाशादिसर्वाश्रयत्वादिप्रकारोक्तेः । नप्रश्नोत्तरभावेहिहेतुतुल्यविभक्तिता । समानविषयत्वंतु हेतुस्तच्चात्रविद्यते ॥ १ ॥ इति ।

गु० थमया आकाशस्यत्वत्रेतिसप्तम्यानिर्देशेनसमानविभक्तिकत्वाभावेनप्रश्नोत्तरभावानुपपत्तिरित्यतष्टीकाभिप्रायमाह ॥ **तत्रायंभावइति** ॥ अथवेत्यादिटीकानुपपन्ना । शरीरपुंडरीकयोर्ब्रह्मप्रतिपुरत्ववेश्मत्वोक्त्यैवान्वेष्टव्यस्यब्रह्मत्वसिद्धेः कथंब्रह्मावस्थाननिश्चयाभिप्रायेणकिंतदित्यादिप्रश्नानुपपत्तेःपूर्वपक्षोत्तरपक्षयो

प्र० रांतरमप्यनुसंधेयमितिभावेनटीकोक्तपक्षांतरंमूलोक्तिपूर्वं प्रागुक्तरीत्याब्रह्मान्वेष्टव्यमित्यस्यलाभेनपुनःकिंतदत्रविद्यतइत्यन्वेष्टव्यस्वरूपप्रश्नायोगेनपरिहारस्यब्रह्मस्वरूपाविषयत्वादितिप्रतीतानुपपत्तिनिरासेनव्यनक्ति ॥ **छांदोग्येति** ॥ शरीरादेरित्यादिपदेनवेश्मगृह्यते ॥ **हृदयनेति** ॥ हृद्युपपदे “अयगता”वित्यस्माद्धातोःपचादित्वादच्प्रत्ययेहृद्गतवाचिनाहृदयशब्देनेत्यर्थः । हृदयनमप्यन्यस्यस्यादित्यतउक्तं **मंतस्थत्वलिंगेनेत्यादि** ॥ अंतश्शब्दसमानाधिकृतत्वलिंगेनेत्यर्थः ॥ **इतिन्यायेनेति** ॥ अत्रापिसर्वाधारत्वरूपब्रह्मलिंगश्रवणादिति

छांदोग्यभाष्येतु अस्मिन्भूताकाशेब्रह्माख्यआकाशोवर्तते सचयावान्बहिःपरमात्माव्याप्तोस्तितावानेवविद्यतइतिपक्षांतरमुक्तं । तद्विवृतमथवेत्यादिटीकायां । तत्रायंभावः । ब्रह्मप्रतिशरीरादेःपुरत्वादेरुक्तावपिदहराकाशस्थस्यनस्पष्टंब्रह्मत्वंसिद्धं । अन्यपुरेप्यन्यस्यवेश्मसंभवात् । अन्यवेश्मन्यप्यन्यावस्थानसंभवाच्च । तथाचदहराकाशस्थमन्वेष्टव्यमितिसामान्योक्तौ किंतदित्यत्राधेयस्वरूपप्रश्नः । तस्यचसन्निहितंयावान्वाइत्याद्युत्तरं । तत्रसप्तम्यंतेनहृदयननिमित्तकेनहृदयशब्देनांतस्थत्वलिंगेनच दहरोस्मिन्नंतराकाशस्तस्मिन्नित्यंतस्थत्वयुक्तपूर्ववाक्येकिंतदत्रेतिप्रश्नवाक्येचसप्तम्याऽऽधारत्वेनोक्तस्याकाशस्यप्रत्यभिज्ञायमानतया हृदयशब्देनभूताकाशमनूद्याकाशशब्देनप्रथमांतेन “तल्लिंगा”दितिन्यायेनब्रह्मणिमुख्येनप्रश्नवाक्ये “किंत”दितिप्रथमानिर्दिष्टाधेयस्यब्रह्मत्वंविधाय “यावान्वाअयमाकाशस्तावा”नित्यनेनचतस्यव्याप्तत्वोक्तेः ।

गु० भेदाप्रतीतेश्चेत्यतोऽभिप्रायमाह ॥ **अयंभावइति** ॥ ब्रह्मैवपूर्णत्वात्पुरमित्युपपत्तेरित्युक्त्यासर्वत्रब्रह्मपुरशब्दस्यब्रह्मपरत्वमितिप्रतीतिनिरासायाह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० भावः । पूर्वस्मादप्यस्यपक्षस्यविशेषोस्तीत्याह ॥ **अस्मिन्निति** ॥ नन्वेवमाधेयप्रश्नस्ययावानित्यनेनैवोत्तरितत्वेनोभेअस्मिन्नित्यादिकंव्यर्थ मित्यतआह ॥ **व्यवहितमिति** ॥ सन्निहितव्यवहितपदेहेतुगर्भेइतिभावेनतत्फलमाह ॥ **नत्विति** ॥ तद्दृष्टांतेनव्यनक्ति ॥ **यथाहीति** ॥ चोदिते शंकितेसतीत्यर्थः । एतेन "सचपृथिव्याद्याश्रयत्वा"दित्यादिटीकाविवृता । हृदयशब्दस्यरूढ्यामनःपरत्वाद्योगेनदुर्बलेनकथमेत

अस्मिन्पक्षेप्रश्नोत्तरयोस्तुल्यविभक्तिताप्यस्ति। व्यवहितं "उभेअस्मि"न्नित्यादिकंतुजिज्ञास्यत्वोपपादकं। नतुतत्रसप्तम्या "किं तत्रविद्यत"इतिप्रश्नवाक्यस्थाधारोक्तिः । नवा "उभे"इत्यादिनाप्रथमांतेनप्रश्नवाक्यस्थाधारप्रतियोगिकाधेयोक्तिः । यथाहि लोकेकोवांतर्वर्ततेयोसौसंसेव्यइतिचोदिते राजांऽतर्वर्ततेतस्मिन्राष्ट्रंसर्वंसमाहितमित्युक्ते आधेयप्रश्नस्यसन्निहितंराजेत्यादिकमे वोत्तरं । व्यवहितंतुराष्ट्रमित्यादिकंसंसेव्यत्वोपपादकं । तद्वत् । उक्तंचास्यामेवश्रुतावुपरि "तस्यैतदेवनिरुक्तंहृदयमिति । त स्माद्धृदय"मितिहृदयशब्दस्यहृदयननिमित्तकत्वं । अस्मिंश्चपक्षे "दहरोस्मिन्नंतराकाश"इतिवाक्यस्थआकाशोभूताकाशः । दहरत्वादन्वेष्टव्यंप्रत्याधारत्वाच्च । यावानितिवाक्यस्थस्तुब्रह्माकाशः । पूर्णत्वादन्वेष्टव्यत्वाद्द्यावापृथिव्याद्याधारत्वाच्चेति ।

प्र०दर्थग्रहणमित्यतोवाक्यशेषबलादाज्यादिशब्दवददोषइत्याह ॥ **उक्तंचेति** ॥ ननूक्तमत्रपूर्वोक्तप्रसिद्धाकाशस्यैवेहापि "यावान्वाअयमाकाश" इत्याकाशश्रुत्याप्रत्यभिज्ञानादाकाशोनविष्णुरिति तत्राह ॥ **अस्मिंश्चेति** ॥ बाधकात्प्रत्यभिज्ञाबाध्यतइतिभावः ॥ **ब्रह्माकाशइति** ॥ "आसमंतात्काशनादासमंतात्कमश्नातीतिवा । अस्मिन्कामास्समाहिताइतिवाक्यशेषात् । आसमंतात्कामानश्नातीतिवे"तिछांदोग्यभाष्यो

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्तव्युत्पत्त्येतिध्येयं । अत्रप्रकरणेब्रह्मपुरशब्दस्यबहुधाश्रुतत्वात्तस्यब्रह्मरूपैकार्थत्वे "दहरंपुंडरीकंवेश्मे"त्याद्ययोगात् शरीरमात्रार्थत्वेच "ब्रह्मपुरेसर्वंसमाहितं । नास्यजरयैतज्जीर्यतेनवधेनास्यहन्यतेतदेतत्सत्यंब्रह्मपुर"मित्यादेरयोगात् । पूर्वस्यब्रह्मपुरशब्दस्यशरीरपरत्वेपश्चात्तनस्यब्रह्मपरत्वेप्रकृतहानाप्रकृतस्वीकारापाताद्विवेकमाह ॥ **पक्षद्वयेपीति** ॥ न्यायविवरणपक्षेछांदोग्यपक्षेपीत्यर्थः । तथाच "नष्टेपिदेहेनननश्यति । अपहतपाप्मत्वादिगुणंचे"त्यादिटीकायुक्तेतिभावः । तथाचब्रह्मपुरेहरौतदाधारतयास्थितंयद्ब्रह्मपुरंशरीरंतत्रदहरंपुंडरीकमित्यादियोजनाब्रह्मपुरपदस्यतंत्रावृत्त्यन्यतराश्रयणेनध्येयेतिभावः । उक्तंच "बृहत्त्वात्पूर्णकामत्वाद्विष्णुर्ब्रह्मपुराभिधः । तस्मिंस्तस्यपुरंदेहस्तस्मिन्हृदयमास्थित"मित्यादि । नन्वेवंब्रह्मपुरशब्देनोभयोःप्रकृतत्वेकथमुत्तरत्रैकस्यैवग्रहणमितिचेन्न । द्वयोस्सहनिर्देशेपिबुद्ध्याविभागेनैकस्यैवग्रहणोपपत्तेः । "अथैतामैश्वरींमायांदुस्तरामकृतात्मभिः । तरंत्यंजस्स्थूलधिय"इत्यत्रभागवतेजडप्रकृतेरिव । उक्तंचतात्पर्ये "बहूनांसहनिर्देशएकयाभिधयैवतु । तयैवाभिधयातेषांपरामृश्यैकमुच्यत"इति । अतएवगीतायां "प्रकृतिंपुरुषंचैवे"त्यत्रपुरुषपदेनजीवपरयोर्ग्रहणेपि "पुरुषःप्रकृतिस्थ"इत्यत्रपुरुषपदेनजीवस्यैवग्रहणं । तथैवतद्भाष्योक्तेरिति । एवमन्वयानुपपत्तिबाधकंपरिहृत्यसुषिरश्रुतिविरोधरूपबाधकम

पक्षद्वयेपि "अथयदिद"मितिवाक्येब्रह्मपुरशब्दःशरीरेपिवर्तते । "ब्रह्मपुरेसर्वंसमाहितं । एतत्सत्यंब्रह्मपुर"मित्यादौतु पूर्णत्वात्पुरमितिव्युत्पत्त्याब्रह्मण्येवेतिद्रष्टव्यं ।

गु० **पक्षद्वयेपीति** ॥ नचाकाशपक्षेन्वयोस्तीतिटीकानुपपन्ना।पूर्वोक्तहृत्पद्मस्थाकाशानुवादेनतस्यापरिच्छिन्नत्वंविधायद्यावापृथिव्यादेरन्वेष्टव्यतायाउच्यमानत्वेनान्वयो

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्रेनिरसिष्यन्परपक्षे "नचे"त्यादिटीकातात्पर्यवर्णनमिषेणबाधकंवक्तुंतट्टीकांदुर्गमत्वान्मूलोक्तिपूर्वंव्यनक्ति ॥ अत्रेत्यादिना ॥ अन्वया दर्शनादित्येतद्द्वेधाव्याचष्टे ॥ हृत्पद्मेति ॥ "नहिदहराकाशस्थ"इतिटीकावाक्यंशंकापूर्वंविवृणोति ॥ अथेति ॥ "तदभावादयोगाच्चे"ति हेतुद्वयंटीकोक्तंस्फुटयति ॥ तदेति ॥ आदिपदेन "यस्मिन्द्यौःपृथिवी"त्यादिश्रुतावितिगृह्यते । "नापी"त्यादिटीकाग्रंथंयोजयति ॥ यदीति ॥ "दहरस्यव्याप्तत्वायोगा"दित्युपलक्षणमितिभावेनाह ॥ किंचेति ॥ उक्तेति ॥ यथाहिलोकइतिप्रागुक्तरीत्येत्यर्थः । मुख्यतइति

अत्रन्यायविवरणे "आकाशपक्षएवान्वयाभाव"इत्युक्तं । तद्विवृतं "नचाकाशपक्षेन्वयोस्ती"त्यादिटीकायां । अत्रायंभावः । हृत्पद्मस्थाकाशस्थंकिमितिपृष्टे आकाशंहृत्पद्मस्थमितिपरिहारोनन्वितः । वैयधिकरण्यात् । दहरोस्मिन्नंतराकाशइत्यत्रैवाकाशं हृत्पद्मस्थमित्युक्तत्वेनाकांक्षाभावाच्चानन्वयः । अथयावानित्यादिवाक्येद्वितीयस्याकाशशब्दस्यसप्तम्यंततामाश्रित्यदहराकाशस्थोव्याप्ताकाशोन्वेष्टव्यइतिउच्येत तदेश्वरवदचिंत्यशक्त्यभावेनव्याप्ताकाशस्यदहराकाशस्थत्वाभावात् "तमेवैकंजानथे"त्यादिश्रुतौब्रह्मणएवान्वेष्टव्यत्वसर्वाधारत्वयोरुक्तत्वेनाकाशेतयोरयोगाच्चानन्वयएव । यदिचपूर्वोक्तहृत्पद्मस्थाकाशानुवादेनतस्यापरिच्छिन्नत्वंविधायद्यावापृथिव्यादेरन्वेष्टव्यतोच्येत तदापिपरिच्छिन्नेऽपरिच्छिन्नत्वस्यायोग्यत्वादनन्वयएव । किंचोक्तरीत्या "यावान्वाअय"मित्यादेःसन्निहितस्यैवाधेयप्रश्नोत्तरत्वेनान्वये "उभेअस्मिन्द्यावापृथिवी"इत्यादेरसन्निधानादनन्वयः ।

गु०पपत्तेरित्यतोऽभिप्रायमाह ॥ तत्रायंभावइति ॥ ननुनात्रदहराकाशस्थविषयःप्रश्नः । येनपरिहारेदहराकाशोक्तावनन्वयःस्यात् । किंतुहृत्पद्मस्थविषयएव । तच्छब्दस्यव्यवहितपुंडरीकपरामर्शकत्वेनदहराकाशपरामर्शकत्वाभावादित्यतआह ॥ दहरोस्मिन्निति ॥ पृथिव्यादीनांमुख्यतोजिज्ञास्यत्वादितिटीका । तत्रहेत्वनुक्तेस्त

प्र० हेतुंव्यनक्ति ॥ अपिचेति ॥ अनन्वेष्टव्यमसिद्धमित्यतआह ॥ तमेवेति ॥ हिर्हेतौप्रसिद्धौवा । एतदप्युपलक्षणंमत्वाह ॥ किंचेति ॥ पश्वेकत्ववदिति ॥ उक्तमधिकरणशरीरंप्राक्छंदोधिकरणे । पशुनायजेतेत्यत्रैकत्वंयथाविधेयंकरणकारकविशेषणत्वाद्विवक्षितं तथेहापितदित्येकवचनप्राप्तमेकत्वमपीत्यर्थः । कुतइत्यतआह ॥ पुरत्वमिति ॥ हियस्मादेवंतस्मात्तदुक्तिरनन्वितेति । चेतनंप्रत्येवेत्यन्वयः । एवमा

अपिच "किंतदत्रविद्यतेयदन्वेष्टव्यंयद्वावविजिज्ञासितव्य"मित्यन्वेष्टव्येपृष्टे "द्यावापृथिवी"इत्याद्यनन्वेष्टव्योक्तेरनन्वयएव । तमेवैकंजानथेतिवाक्येद्युभ्वादिकंप्रति । आधारस्यज्ञेयतोक्तानतुद्युभ्वादिकस्यहि ॥ १ ॥

किंच "तदन्वेष्टव्यंतद्वावविजिज्ञासितव्य"मित्यत्रैकत्वस्यविधेयविशेषणत्वेनपश्वेकत्ववद्विवक्षितत्वाद्वावेत्यवधारणाच्चजिज्ञास्यस्यैकत्वंभाति । तच्चद्यावापृथिव्यादीनामनेकेषामन्वेष्टव्यत्वेऽनन्वितंस्यात् । किंचहृत्पद्मस्थाकाशस्थस्यजडत्वेशरीरपुंडरीकयोःपुरवेश्मत्वोक्तिरनन्विता । पुरत्वंवेश्मताचैवचेतनंप्रतिहिस्वतः । पुरंवावेश्मवाद्दृष्टंनहिलोकेजडंप्रति ॥ १ ॥ यच्चोक्तं एषआत्मेतिवाक्यएतच्छब्दःपरज्योतिःपरश्चेन्नपुंसकलिंगःस्यादिति तन्न । यतः विधेयापेक्षयाचैतच्छब्देपुँल्लिंगतामता । शैत्यंहियत्साप्रकृतिर्जलस्येत्यादिकेष्विव ॥ १ ॥

प्र० काशजीवपूर्वपक्षौनिरवकाशभगवल्लिंगादिनानिरस्यानन्वयबाधकंचान्वयोपपादनेननिराकृत्यपरपक्षेऽनन्वयबाधकंचोक्त्वा अधुनायज्जीवपूर्वपक्षवादिनोक्तंस्वसाधकंपरबाधकंतत् "अन्यार्थश्चपरामर्श"इतिसूत्रभाष्यटीकाकृतविवरणेनपरिहरति ॥ यच्चेति ॥ यतइत्यस्यश्लोकेना

SGDF Sri Gargeshwari Digital Foundation

प्र० न्वयः । विशेषशंकानुवादपूर्वकंश्लोकंव्याचष्टे ॥ यद्यपीति ॥ प्रस्तावः प्रकृतत्वं । हृत्पद्मगताकाशस्थोविष्णुरित्युपेत्यतस्यसर्वाधारत्वांगी कारेप्रागुक्तंबाधकांतरमप्यनूद्यापाकरोति ॥ नचेति ॥ ह्रियस्मात्तस्मान्नचेतिपूर्वेणान्वयः ॥ मंजूषेति ॥ गृहगतमंजूषास्थइत्यर्थः । श्लो यद्यपि "एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योति"रितिपूर्ववाक्येप्रथमांतेनपुँल्लिंगेनैतच्छब्देनजीवःप्रस्तुतः । परमात्मातु द्वितीयांतेननपुंसकलिंगेनपरज्योतिःशब्देन । तथापि "एषआत्मेतिहोवाच । एतदमृतमभयमेतद्ब्रह्मे"त्यत्रैषइतिशब्दे नब्रह्मैवग्राह्यं । निरवकाशात्मश्रुतेरमृतत्वादिलिंगाच्च । नह्येतच्छब्देनपरामर्शेसमानविभक्तिकेनैतच्छब्देनप्रस्तावःप्रयोज कः । चैत्रआगतस्तंभोजयेत्यादौतददर्शनात् । किंतुप्रस्तावमात्रं । पुँल्लिंगंतुविधेयात्मापेक्षं । साप्रकृतिर्जलस्येत्यत्रतच्छब्देस्त्री लिंगतावत् । "णेरणौयत्कर्मणौचेत्सकर्ते"त्यत्रतच्छब्दस्यपुँल्लिंगतावदस्मिन्नेवप्रकरणे "एतत्सत्यंब्रह्मपुरं । एषआत्मे"त्यत्रैषइ त्यस्यपुँल्लिंगतावत् । अस्मिन्नेववाक्ये "एतदमृतमभयमेतद्ब्रह्मेत्यत्रैतच्छब्दस्यनपुंसकतावच्च । नचसुषिरस्यसर्वाश्रयत्वश्रुतिवि रोधः । सुषिरस्थब्रह्मसंस्थंसुषिरस्थमितीर्यते । मंजूषास्थोपिहिमणिर्गेहस्थइतिगीयते ॥ १ ॥ सप्तदशारत्निर्वाजपेयस्ययूपइ त्यत्रवाजपेयसंबंधिपशुसंबंधिनोपियूपस्यवाजपेयसंबंधव्यपदेशवच्चसुषिराश्रिताश्रितस्यसुषिराश्रितत्वव्यपदेशोयुक्तएवेति ।

प्र० कोक्तोलौकिकदृष्टांतस्स्फुटइत्युपेक्षणमितिभावेनवैदिकदृष्टांतपूर्वंपूर्वार्धंव्यनक्ति ॥ सप्तदशेति ॥ प्राग्विवृतमधिकरणशरीरंजिज्ञासाधिक रणे । यथासाक्षात्परंपरासाधारण्येनसंबंधमात्रेषष्ठ्यनुशासनादेवदत्तस्यनप्तेत्यादाविवपरंपरयावाजपेयसंबंधिनोयूपस्यवाजपेयसंबंधव्यपदेश

SGDF Sri Gargeshwari Digital Foundation

प्र० स्तथात्रापीत्यर्थः। नचायंन्यायोंगांगिभावविषयः। तथैवरेवत्यधिकरणेद्वितीयेभिधानादितिवाच्यं। अत्रापिसुषिराधेयतयाश्रुतंसर्वंतदाधेयेहरौयुक्तमित्यंगांगिभावतुल्यत्वादितिभावः॥ अत्राद्यइति॥ "दहरउत्तरेभ्य"इत्यत्रयद्यपि "यआत्मापहतपाप्माविजरोविमृत्युरित्यादिभ्यउत्तरेभ्योगुणेभ्य"इतिभाष्ये "गुणश्रवणा"दितिटीकायांलिंगान्येवोक्तानीतिभाति। तथापि "यआत्मे"त्यंशस्याप्युदाहृतत्वात्प्रथमश्रुतात्मशब्दत्यागेहेत्वभावात्स्पष्टत्वेनभाष्यादावनुल्लेखसंभवादात्मश्रुतेरित्युक्तं। गतिसूत्रेश्रुतिलिंगयोर्द्वयोरप्युक्त्यातस्यप्राथम्यनिरासायविषयवाक्येसन्निहितेत्युक्तं। ननुसूत्रेदहरोब्रह्मेतिभाति। कथंदहरस्योब्रह्मेत्युक्तिरित्यतआह॥ तत्रेति॥ निर्देशस्येत्थमपिसंभवात् "यएषोंतर्हृदयआ

**अत्राद्येसूत्रेस्वपक्षसाधनायविषयवाक्येसन्निहितात्मश्रुतेरपहतपाप्मत्वा
दिलिंगानांचोक्तिः। तत्रचदहरशब्दःसप्तम्यंतोनतुपरमतइवप्रथमांतः।**

प्र०काशस्तस्मिन्शेते दिव्येब्रह्मपुरेह्येषव्योम्न्यात्मासंप्रतिष्ठितः यएषोंतर्हृदयआकाशस्तस्मिन्नयंपुरुषः योवेदनिहितंगुहायांपरमेव्योम"न्नित्यादिश्रुत्यंतरबलात्प्रथमांतपक्षेबाधकभावाच्चेतिभावः। नन्वेवमाकाशउत्तरेभ्यइत्येवकस्मान्नसूत्रितं शब्दलाघवादपिप्रतिपत्तिलाघवस्यज्यायस्त्वात्। मैवं। वाक्यविशेषद्योतनार्थत्वात् दहरपदस्यप्राथम्यादल्पश्रुतेरितिचेदितिशंकोत्थानार्थत्वात् तत्रापिदह्रंगगनमितिसमाख्यारूपवाक्यविशेषस्य "प्रसिद्धेश्चे"त्यत्रोपादानमितिसूचनार्थत्वाच्च दहरपदस्यैवोक्तिरिति। नन्वेवंतर्हिसूत्रेयथाश्रुतश्रौतपदानुकरणंनप्राप्तंस्यात्। श्रुतौ "दहर"इतिप्रथमांतत्वादितिचेन्न। "तस्मिन्यदंत"रितिनिर्देशेनतस्यश्रुतावपिसप्तम्यानिर्देशात् तस्मिन्नित्येतत्पुंडरीकपरामर्शि

ता. चं. १०५

SGDF
Sri Gargeshwari Digital Foundation

प्र० नतुदहराकाशपरामर्शि । येनश्रुतौदहरपदंसप्तमीनिर्दिष्टंस्यादितितुपरमतप्रक्रियाखंडनेनिरसिष्यते ॥ **द्वितीयइति** ॥ "गतिशब्दाभ्यांत थाहिदृष्टंलिंगंचे"त्यत्र ॥ **व्यवहितेति** ॥ विषयवाक्यइत्यनुषंगः । श्रुतौ "अहरहर्गच्छंत्यएतंब्रह्मलोक"मित्युक्त्यातत्क्रमानुरोधेन "द्वंद्वेघी" तिस्मृत्यनुरोधेनचसूत्रेगतेःपूर्वनिर्देशेपिप्राधान्यादुक्तिसौकर्यायचब्रह्मश्रुतेस्सुप्तगम्यत्वादिलिंगस्यचेतिव्युत्क्रमेणानुवादः । टीकायां "तद्यथा पिहिरण्यनिधिंनिहितमक्षेत्रज्ञाउपर्युपरिसंचरंतोनविंदेयुरेवमेवेमाःसर्वाःप्रजाअहरहर्गच्छंत्यएतंब्रह्मलोकंनविंदंति । अनृतेनहिप्रत्यूढाः । सवाएषआत्माहृदि । तस्यैतदेवनिरुक्तंहृदयमितीतिसुप्तप्रजाप्राप्यत्वव्यपदेशात् हृत्पद्मस्यब्रह्मलोकत्वोक्त्यातदंतर्गतेब्रह्मशब्दश्रवणाच्चविष्णुरे

द्वितीयेव्यवहितब्रह्मश्रुतेःसुप्तगम्यत्वादिलिंगस्यचोक्तिः । अत्रयदासौत्रेणलिंगशब्देनब्र ह्मलोकशब्दस्यविष्णुलोकपरत्वेऽरण्याख्यसुधासमुद्राश्रयलोकत्वरूपलिंगोक्तिः तदातस्य

प्र० वदहरस्थ"इतिगतिशब्दौव्याख्याय "तथाहिदृष्टंलिंगंचे"त्यंशस्य "अरश्चहवैण्यश्चार्णवौब्रह्मलोके तृतीयस्यामितोदिवि तदैरंमदीयंसर स्तदश्वत्थस्सोमसवनस्तदपराजितापूर्ब्रह्मणःप्रभुविमितंहिरण्मय"मित्यरण्याख्यसुधासमुद्राश्रयलोकवत्त्वरूपलिंगंचदृष्टमित्येकमर्थमुक्त्वा अथ वेत्यादिनाब्रह्मलोकशब्दस्यसत्यलोकेप्रसिद्ध्याप्रागुक्तगतिब्रह्मशब्दरूपहेत्वोरसिद्ध्यापत्तेर्हृत्पद्मेप्रयुक्तब्रह्मलोकपदोक्तस्यविष्णुलोकत्वसाधकत्वेन हृत्पद्मस्थस्यविष्णुत्वसाधकगतिब्रह्मशब्दाख्यहेतुसाधकपरतयार्थांतरमुक्तं । तत्पक्षद्वयाभिप्रायव्यक्तिपूर्वंसूत्रेहेतुत्रयस्यगतिशब्दलिंगेभ्यइति ॥ ६२५ ॥ निर्देष्टव्यत्वेऽन्यथानिर्देशोनयुक्तइतिचोद्यनिरासायसूत्रविन्यासंसमर्थयते ॥ **अत्रेति** ॥ **अरण्याख्येति** ॥ "अरश्चहवैण्यश्चार्णवौब्रह्मलोक"

प्र० इत्युत्तरवाक्येऽरण्याख्यसुधासमुद्राश्रयत्वलिंगेनब्रह्मलोकशब्दस्यविष्णुलोकार्थकत्वेनावधृतस्येह "ब्रह्मलोकंनविंदंती"तिसुप्तगतिपरवाक्ये प्रयोगादत्रत्यब्रह्मलोकशब्दस्यविष्णुलोकपरत्वेऽरण्याश्रयलोकत्वरूपलिंगोक्तिरित्यर्थः ॥ **हेतुसाधकेति** ॥ गतिब्रह्मशब्दरूपहेतुसाधकेत्यर्थः । किंतुसाध्येत्युक्तसाधनप्रकारंसूत्रखंडविवरणेनाह ॥ **तथेति** ॥ टीकायां "हृत्पद्मस्थस्यारण्याश्रयलोकवत्त्वरूपलिंगश्रवणेपिकुतोयंविष्णुरि तिचेत्तस्यविष्णुलोकैकलिंगत्वादितिहिशब्दाभिप्रायमाह अरश्चवैण्यश्चसुधासमुद्रौतत्रैवसर्वाभिमतप्रदौद्वावितिभाष्येणे"त्युक्तं तद्विवृण्वन्सौ

हेतुसाधकहेतुत्वाद्गतिशब्दयोरिवहृत्पद्मस्थस्यब्रह्मत्वरूपप्रधानसाध्येहेतुत्वाभावात्तस्यलिंगशब्देनपृ थगुक्तिर्युक्ता। यदातुलिंगशब्देनप्रधानसाध्यएवारण्याश्रयलोकवत्त्वरूपलिंगोक्तिस्तदापि "अहरह र्गच्छंत्यएतंब्रह्मलोक"मित्यस्यानंतरं "सएषआत्माहृदी"तिश्रवणाद्गतिशब्दयोर्हृत्पद्मस्थनिष्ठतासिद्धे तितौद्वंद्वेनोपात्तौ। अरण्याश्रयलोकवत्त्वलिंगस्यतुनसासिद्धा। "अरश्चहवैण्यश्चार्णवौब्रह्मलोक"इत्य स्यसन्निधौहृत्पद्मस्थस्यानुक्तेः। किंतुसाध्येतिलिंगशब्देनतस्यपृथगुक्तिर्युक्ता। तथादृष्टमित्यनेनतुय थागतिर्हृत्पद्मस्थनिष्ठादृष्टातथालिंगमपितन्निष्ठंदृष्टं । हृत्पद्मस्थस्यावासत्वेनतल्लोकेहृत्पद्मे "एतंब्र ह्मलोक"मितिप्रयुक्तस्यब्रह्मलोकशब्दस्यारण्याश्रयलोकेपिप्रयोगादितिहृत्पद्मस्थनिष्ठतासाधिता ।

गु०दुक्तिपूर्वकंटीकांव्याख्याति॥ **अपिचेति** ॥ **हेतुसाधकहेतुत्वादिति** ॥ ब्रह्मणोहृत्पद्मस्थत्वसाधकंसुप्तगम्यत्वं । तस्यब्रह्मलिंगत्वसाधकमरण्याख्यसुधासमुद्राश्रय

SGDF Sri Gargeshwari Digital Foundation

प्र० त्रहिशब्दार्थमाह ॥ एवमिति ॥ धृतेश्चमहिम्नोऽस्यास्मिन्नुपलब्धेरितिसूत्रटीकार्थंनिष्कृष्यव्यनक्ति ॥ तृतीयेत्विति ॥ यएषइतिवाक्यो क्तिस्तस्यहृत्पद्मस्थस्येतिविषयत्वसूचनाय । एतेनगतिधृतिशब्देभ्यइतिनिर्देशेनलिंगंचेत्यनेनवाक्योपादानसंभवेयोगविभागोविफलइतिप्रत्युक्तं। समाख्यापरत्वस्यापिसत्त्वात् । एतेनैवचारण्याश्रयलोकवत्त्वलिंगापेक्षयाधृतिरूपलिंगस्यपूर्ववाक्यगतत्वाल्लिंगंचेत्यतःप्रागेवास्यनिर्देशःकार्य

एवमरण्याश्रयलोकवत्त्वस्यहृत्पद्मस्थनिष्ठत्वेनपक्षधर्मतायांसिद्धायांसाध्येनविष्णुत्वेनव्याप्त्युपपादनायभाष्योक्तस्मृतिषुया विष्णुलिंगत्वप्रसिद्धिस्तद्द्योतकःसूत्रेहिशब्दः । तृतीयेतु "ससेतुर्विधृति"रितिस्वप्रकरणस्थधृतिरूपालिंगस्य "एषसेतुर्विध रण"इतिधृतियुक्तायाः "यएषोंतर्हृदयआकाशस्तस्मि"न्नितिवाजसनेयश्रुतिसमाख्यायाश्चोक्तिः । समाख्यायाविष्णुविष यत्वोपपादनायतुमहिमरूपविष्णुलिंगोक्तिः । अत्रचास्य भूताधिपतित्वादिविष्णुमहिम्नः अस्मिन् दहराकाशस्थेवस्तुनि वा जसनेयशाखायामुपलब्धेश्चेतिचशब्दोभिन्नक्रमः । चतुर्थेतैत्तिरीयश्रुतिसमाख्यामात्रोक्तिः । पंचमेस्वपक्षबाधकेपरपक्षसा धकेचशंकितेपरपक्षेतावदपहतपाप्मत्वाद्यसंभवरूपबाधकोक्तिः । षष्ठे जीवेपिमुक्तिदशायामपहतपाप्मत्वादिसंभवंशंकित्वा स्वतोपहतपाप्मत्वाद्यसंभवाद्बाधकतादवस्थ्यमित्युक्तिः । सप्तमेपंचमेशंकितस्यजीवपरामर्शकैतच्छब्दरूपस्यस्वपक्षबाधक स्यपरपक्षसाधकस्यचपरिहारोक्तिः । अष्टमेतुदहरस्थत्वलिंगरूपेस्वपक्षबाधकेपरपक्षसाधकेचशंकितेपूर्वोक्तपरिहारस्मारणं ।

प्र० इत्यपिनिरस्तं । लिंगंचेत्यस्यपूर्वहेतुसाधकतारूपत्वस्यापिसत्त्वाच्चेति । एवंतर्हिसमुच्चेयलिंगांतरस्यानुक्तेः "धृतेश्चे"तिचशब्दोस्मिन्पक्षेनयु क्तइत्यतोस्मिन्नित्यस्यार्थद्वयंवदंश्चशब्दान्वयमाह ॥ अत्रचेति ॥ चतुर्थे "प्रसिद्धेश्चे"त्यत्र "दहरंविपाप्मंपरवेश्मभूतंयत्पुंडरीकंपुरम

SGDF
Sri Gargeshwari Digital Foundation

प्र० ध्यसंस्थं । तत्रापिदह्रंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्य”मितिविष्णोर्हृत्पद्मस्थत्वप्रसिद्धेश्चेत्युक्तत्वादितिभावः । मात्रपदेनालिंगंव्यावर्त्यते । तेनपूर्वानंतर्यमितिभावः । पंचमे “इतरपरामर्शात्सइतिचेन्नासंभवा”दित्यत्र । एषआत्मेतिजीवपरामर्शात्सएवदहरस्थइतिशंकितेऽपहतपाप्मत्वादीनांजीवेऽसंभवादित्यर्थोक्तेरितिभावः । षष्ठे “उत्तराच्चेदाविर्भूतस्वरूप”स्त्वित्यत्र उत्तराच्चेदित्यंशेन “सतत्रपर्येतिजक्षन्क्रीड”न्नित्युत्तरवचनाज्जीवेऽपहतपाप्मत्वादीनांभाविभावाभिप्रायेणसंभवंशंकित्वा “आविर्भूते”त्यंशेनपरमेश्वरंगुणप्रदातृतयापरंज्योतिरितिपूर्ववाक्येऽभिधाय “सतत्रपर्येती”त्यादिनापरमेश्वरप्रसादेनाविर्भूतगुणस्वरूपस्यैवोत्तरवाक्येकथनादितिव्याख्यानादितिभावः । “पूर्वादिभ्योनवभ्योवे”तिस्मात्स्मिनोर्विकल्पितत्वादुत्तरादितिसौत्रनिर्देशस्साधुः । सप्तमे “अन्यार्थश्चपरामर्श”इत्यत्र “इतरपरामर्शात्सइतिचे”दितिशंकितस्ययंज्योतिराख्यंभगवंतमभिसंपद्यजीवस्स्वेनरूपेणाभिनिष्पद्यते सएषआत्मेतिपरमात्मानमेवैषइतिपरामृश्य तस्यात्मत्वोक्त्याऽन्यार्थत्वेनपरामर्शोपपत्तेरुक्तत्वात्पुंल्लिंगतायाश्चसमर्थनादितिभावः । अष्टमे “अल्पश्रुतेरितिचेत्तदुक्त”मित्यत्र दहराकाशस्थत्वेनाल्पस्थानस्थितत्वमयुक्तमित्याशंक्य “अर्भकौकस्त्वा”दितिसूत्रे “व्योमव”दित्युक्तस्यसर्वगतस्याप्यल्पस्थानस्थत्वरूपपरिहारस्यस्मारणमित्यर्थः । प्रागुक्तस्मारणेऽभ्यधिकाशंकातत्परिहारयोरुक्तिपरां “नव्योमवदीश्वरस्ये”तिटीकांविवृणोति ॥ **नचेति** ॥ **अंशोपिपूर्णइति** ॥ विश्वतश्चक्षुरित्यादे

नचस्मारणंव्यर्थं । युक्तंव्योम्नोंशतोल्पौकस्त्वं । अंशस्यापूर्णत्वात् । ब्रह्मणित्वंशोपिपूर्णइत्यधिकाशंकायांब्रह्मणोचिंत्यशक्तित्वात् “एषमआत्मांतर्हृदये्ज्याया”नित्यादिश्रुतौहृदयस्थांशस्यैवसर्वज्यायस्त्वोक्तेः “गुणाःश्रुताःसुविरुद्धाश्चे”त्यादिश्रुतेश्चेत्यधिकपरिहारार्थत्वादितिसूत्रक्रमः ।

गु० लोकवत्त्वमितिभावः । स्वपक्षबाधके सिद्धांतपक्षबाधके । परपक्षसाधके पूर्वपक्षसाधके । एवमुत्तरत्रापिज्ञातव्यं । ननुचाचिंत्यशक्तिःप्रामाणिकेर्थेकल्प्यते ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० रितिभावः । विवृतंचावयवस्यपूर्णत्वमानंदमयनये ॥ **अत्रान्यैःकैश्चिच्चेति** ॥ अन्येषामयंभावः । अथयदिदमस्मिन्ब्रह्मपुरइतिवाक्येश्रुतो
दहराकाशःकिंभूताकाशउतजीवोथब्रह्मेतिसंशये आकाशशब्दस्यभूताकाशेरूढत्वात् "यावा"नितिवाक्येहृत्पुंडरीकावच्छिन्नस्याकाशस्यबाह्या
काशेनोपमितत्वाद्द्यावापृथिव्यादिसर्वाधारत्वस्योपचारेणोपपत्तेर्भूताकाशएवदहराकाशइत्येकःपक्षः । अयंचाकाशशब्दस्य "तल्लिंगा"दित्या
दौरूढित्यागस्याश्रितत्वाद्वाक्यशेषगतबहुतरश्रुतिलिंगादिविरोधात् गत्यंतरसंभवेऽगतिकस्यस्वेनैवस्वस्योपमेयत्वस्यायोगाच्चभूतपक्षस्तुच्छइति
जीवएवदहरइतिपक्षांतरमुक्तं । तथाहि । जीवंप्रतिदेहस्यब्रह्मपुरशब्दोक्तपुरत्वंयुज्यते । जीवस्यपरिच्छिन्नत्वेन "ब्रह्मपुर"इतिसप्तमीनि
र्दिष्टाधारंप्रत्याधेयत्वसंभवात् । देहस्यजीवकर्मार्जितत्वेनतत्संबंधविशेषसद्भावाज्जीवस्यब्रह्मणःपुरमितिषष्ठ्युक्तसंबंधोपपत्तेः । ब्रह्मणस्तुस्वम

अत्रान्यैःकैश्चिच्चोक्तं

प्र० हिम्निप्रतिष्ठितस्यतदाधेयत्वाभावात्तदार्जितकर्मशून्यत्वाच्चदेहस्यतदीयताव्यपदेशायोगात् । ब्रह्मपुरइतिब्रह्मशब्दस्यदेहबृंहणादिनाजीवेप्यु
पपत्तेः । नीरूपत्वादिनासादृश्यनिमित्तेनगौणस्याकाशशब्दस्यजीवेप्युपपत्तेश्च । नचराजपुरेस्वगृहेचैत्रइवजीवस्वामिकेदेहाख्यपुरेस्ववेश्मनि
हृत्पुंडरीकआकाशाख्यंब्रह्मवर्ततामितिवाच्यं । "पुंडरीकंवेश्मदहरोस्मिन्नंतराकाश"इत्यत्रास्मिन्नितिनिर्दिष्टाधारत्वस्याधेयाकांक्षायांब्रह्मपुर
शब्दसन्निधापितपुरस्वामिनोजीवस्यैवाधेयत्वेनान्वयादिति । तदुक्तंभामत्यां "आधेयत्वाद्विशेषाच्चपुरंजीवस्ययुज्यते । देहोनब्रह्मणोयुक्तोहे
तुद्वयवियोगत"इति । एवंप्राप्तेब्रह्मप्रातिपदिकार्थस्यविशेष्यस्यप्रधानतयातदनुसारेणाप्रधानषष्ठ्यर्थसंबंधस्यनेयत्वात् ब्रह्मणोदेहएवोपलब्ध्या
तस्यदेहेनसहोपलब्धिद्वारकसंबंधसंभवादाधारपरसप्तम्याअपिप्रथमश्रुतब्रह्मशब्दानुसारेणब्रह्मोपलब्ध्याधारपरत्वात् ब्रह्मपुरस्यजीवपुरत्वेपि

प्र०वाराजपुरेचैत्रसद्मवज्जीवपुरेब्रह्मसद्महृत्पुंडरीकसंभवात् प्रागुक्तसन्निधानस्यचोत्तरवाक्यगतब्रह्मलिंगैर्बाधसंभवाद्दहरोब्रह्मेतिसिद्धांतइति।
उक्तंचभामत्यां "उपलब्धेरधिष्ठानंब्रह्मणोदेहइष्यते । तेनासाधारणत्वेनदेहोब्रह्मपुरंभवे"दिति । केषांचिद्दहराकाशएवपूर्ववत्संशये आका
शशब्दस्यभूतेप्रसिद्धेः "तस्मिन्यदंतस्तदन्वेष्टव्य"मित्यन्यस्यैवान्वेष्टव्यत्वोक्तेर्दहरस्यब्रह्मत्वायोगाच्चभूताकाशइत्येकःपूर्वपक्षः । संप्रसादवा
क्येजीवप्रतीतेस्तस्यैवचोत्तरत्रेंद्रविरोचनयोर्हिरण्यगर्भसंवादाख्यायिकायां "यआत्मापहतपाप्मे"त्यादिनाऽपहतपाप्मत्वादिप्रतीतेश्चजीवइति
द्वितीयः । एवंप्राप्ते "किंतदत्रविद्यत"इतिप्रश्ने "यावान्वा"इत्यादिना "एतत्सत्यंब्रह्मपुर"मित्यंतेनदहरस्यातिमहत्त्वसर्वाश्रयत्वाद्युक्त्वा "त
स्मिन्कामास्समाहिता"इत्याकाशांतर्वर्तिनःकामाअन्वेष्टव्याइतिप्रतिपाद्य कोयंदहरइतिनिर्दिष्टः केतदाश्रयाअन्वेष्टव्याइत्यपेक्षायां "एषआ

दहराकाशस्यभूताकाशत्वेजीवत्वेवाप्राप्तेब्रह्मत्वेनसिद्धांतः । सूत्रेदहरपदंचप्रथमांतंनतुसप्तम्यंतमिति । तन्न ।

प्र० त्माऽपहतपाप्मे"त्यारभ्य "सत्यसंकल्प"इत्यंतेनाकाशशब्दनिर्दिष्टःपरमात्मा तदाश्रिताअन्वेष्टव्याःकामाअपहतपाप्मत्वादयइत्युक्त्वा
"तद्यदात्मानमनुविंद्ये"त्यादिना "कामचारोभवती"त्यंतेनान्वेष्टव्याधारतयाप्रतिज्ञातआकाशःपरमात्मा तद्विशेषणीभूताअन्वेष्टव्याःकामाअ
पहतपाप्मत्वादयइत्युपसंहाराच्चनभूताकाशोदहरः । नापिजीवः । प्रजापतिवाक्येकर्मपरवशतयाजाग्रदाद्यवस्थाभिस्तिरोहितापहतपाप्मत्वादि
गुणकस्यपरमात्मोपसत्तिमतस्तत्प्रसादाविर्भूतगुणकस्यप्रत्यगात्मनःप्रतिपादितत्वेपि पूर्ववाक्येऽतिरोहितनिरुपाधिकापहतपाप्मत्वादिगुणकत्वे
नजीवेऽसंभाव्यमानजगद्विधारणसर्वचिदचिद्वस्तुनियमनाद्यनंतगुणकत्वेनदहराकाशस्यप्रतिपन्नतयादहरोब्रह्मेतिसिद्धांतइति । अत्रावांतर
वैलक्षण्यमल्पंविहायदूष्यांशमात्रंसाधारण्येनानुवदति ॥ **दहरेति** ॥ यदवादिभामत्यांभूतपक्षस्तुच्छइति तदयुक्तं । तल्लिंगादित्यत्रनिरव

SGDF

प्र० काशब्रह्मलिंगेनरूढित्यागेपि इहप्रागुक्तनिरवकाशसुषिरश्रुतिरूपसमाख्याविरोधेनवाक्यशेषस्थापहतपाप्मत्वादिधर्माणांपूर्वंचंद्रिकोक्तदि
शाभूताकाशेसावकाशत्वेनवैषम्यात् । बाह्याभ्यंतरत्वोपाधिनाऽऽकाशभेदेनोपमानसंभवाच्च । आकाशशब्दस्यजीवेऽस्वारस्याच्च । यदपिमतद्व
येप्याकाशस्यजीवत्वेनपूर्वपक्षांतरकरणंतदप्यसाधु । भूतेरूढस्याकाशशब्दस्यजीवेऽस्वारस्यात् । संप्रसादवाक्यादावुत्तरत्रापहतपाप्मत्वादि
नाजीवप्रतीत्यादिनापूर्ववाक्येतस्यग्राह्यत्वेपि आकाशांतर्वर्तित्वेनापिजीवग्रहणसंभवेदहराकाशत्वेनैवतस्यग्रहणेप्रमाणाभावात् । यएषआत्मे
त्याद्युत्तरवाक्येदहराकाशस्थस्यैवपरामर्शसंभवेनदहरस्यपरामर्शेप्रमाणाभावाच्चेत्यादिपूर्वपक्षदोषस्यस्फुटत्वात्तमुपेक्ष्य सिद्धांतांशमात्रंमतद्वये
पिदूषयति ॥ दहराकाशस्येति ॥ तस्मिन्यदंतरित्यत्रतच्छब्दोऽनंतरमप्याकाशमतिलंघ्यहृत्पुंडरीकंपरामृशतीतिभामत्युक्तमनुवदति ॥
अत्रोक्तंपरैरिति ॥ अतएवेति ॥ सन्निहितत्यागेनव्यवहितपरत्वायोगादेवेत्यर्थः । सप्तमस्याद्यपादे “एककपालानांवैश्वदेविकःप्रकृति

दहराकाशस्यब्रह्मत्वेतस्मिन्यदंतरितिदहराकाशस्थस्यान्वेष्टव्यत्वाद्युक्त्ययोगात् । अत्रोक्तंपरैः तस्मिन्यदंतरितित
च्छब्देनहृत्पुंडरीकमेवपरामृश्यतदंतर्गतदहरस्यैवान्वेष्टव्यत्वाद्युच्यतइति । तन्न । तस्मिन्नित्यस्यसन्निहितदहर
त्यागेनव्यवहितपुंडरीकपरत्वायोगात् । अतएवसप्तमेचातुर्मास्यस्यतृतीयेपर्वणिसाकमेधीये “एतद्ब्राह्मणएक
कपाल” इतिश्रुतस्यैतच्छब्दस्यव्यवहितवैश्वदेविकैककपालत्यागेनसन्निहितवारुणप्रघासिकैककपालपरत्वमुक्तं ।

गु० नचपूर्णस्यांशस्यदहरस्थत्वंप्रमितमित्यतआह ॥ एषइति ॥ ननुविरुद्धंप्रमाणेनापिकथंप्रतिपादयितुंशक्यमित्यतआह ॥ गुणाइति ॥ अतएवेति ॥ सन्निहि
तपरत्वसंभवेतत्त्यागेनव्यवहितपरत्वस्यायोगादेवेत्यर्थः । ननुचसन्निहितपरत्वेव्यवहितकल्पनमन्याय्यं । नतुतदसंभवे । प्रकृतेचसन्निहितदहरपरामर्शेब्रह्मांतः

SGDF Sri Gargeshwari Digital Foundation

प्र० राग्रयणेसर्वहोमापरिवृत्तिदर्शनादवभृथेचसकृद्व्यवदानस्यवचना"दित्यंतिमेधिकरणे चातुर्मास्याख्येकर्मणिचत्वारःपर्वशब्दिताःकर्मसमुदा
यावैश्वदेववरुणप्रघाससाकमेधशुनासीरीयनामकाः । तत्रवैश्वदेवेद्यावापृथिव्यएककपालश्श्रुतः । वरुणप्रघासेष्वपिकायएककपालः । तयोः
पृथग्ब्राह्मणंसमाम्नातं । साकमेधेषुवैश्वकर्मणएककपालः । तत्रसाकमेधेषुश्रूयते "एतद्ब्राह्मणएककपाल"इति । तत्रसाकमेधीयैककपाले
किंवैश्वदेविकैककपालब्राह्मणस्यातिदेशउतवारुणप्रघासिकस्येतिसंशये वैश्वदेवेबह्वोधर्माः आविः प्रष्टः कार्यः इत्यादयःप्रकृतित्वात् । वारु
णप्रघासेषुविकृतित्वादल्पाएवधर्मविशेषाश्शमीमय्योहिरण्मय्योवास्रुचोभवंतीत्यादयउपदिष्टाः । अतोबह्वनुग्रहायवैश्वदेविकस्येतिप्राप्ते वारु
णप्रघासिकस्यसन्निहितत्वाद्वारुणप्रघासिकैककपालब्राह्मणातिदेशइतिसिद्धांतितं । तत्रयथैतच्छब्दस्यव्यवहितपरत्वपरित्यागेनसन्निहितपरत्वं
तथात्रापिन्याय्यमित्यर्थः । यद्यपि "यच्चातुर्मास्यैर्यजत"इत्युत्पत्तिवाक्यगतबहुत्वस्यविवक्षितत्वाच्चातुर्मास्यानामितिवाच्यं । तथापिसामा
न्याभिप्रायेणैकवचनं । एतेनवाक्यशेषस्थबहुतरश्रुतिलिंगानुरोधेनदहराकाशस्यैवान्वेष्टव्यत्वावश्यंभावाद्बह्वनुग्रहायसन्निधित्यागोयुक्तः ।
"लिंगैःसन्निधिर्बाध्यत"इतिकल्पतरूक्तेरितिप्रत्युक्तं । तथात्वेसाकमेधीयैककपालेपिबह्वनुग्रहायवैश्वदेविकैककपालब्राह्मणातिदेशएवस्यान्नतु
वारुणप्रघासिकैककपालब्राह्मणातिदेशः । सचनेत्युक्तं । तथाचतन्न्यायविरोधइति । किंच "एषआत्माऽपहतपाप्मे"त्यादिवाक्यशेषेनदह
राकाशपरामर्शः । येनबह्वनुग्रहायसन्निधित्यागः । किंतु "किंतदत्रविद्यत"इतिदहराकाशस्थआधेयेपृष्टे "यावान्वा"इतिसन्निहितवाक्ये
हृदयशब्देनहृदयननिमित्तकेनदहराकाशमनूद्याकाशशब्देनप्रथमांतेनाधेयस्यब्रह्मत्वंविधाययावानित्यनेनचतस्यव्याप्तत्वंचोक्त्वा "उभेऽस्मि"
न्नित्यादिनासर्वाधारत्वंचतस्योक्त्वा "एषआत्माऽपहतपाप्मे"त्यादिवाक्यशेषेव्याप्ताकाशशब्दितस्यदहराकाशस्थस्यसर्वाधारत्वेनोक्तस्यब्रह्मणए

SGDF
Sri Gargeshwari Digital Foundation

प्र० वपरामर्शेनासत्वापहतपाप्मत्वाद्युक्तिरितिप्रागेवव्यक्तमेतत् । ननुतत्रनसन्निहितत्वमात्रेणवारुणप्रघासिकस्यपरामर्शः । किंतुवैश्वदेविकध र्माणां "स्वरसामैककपालामिक्षंचलिंगदर्शनात्" इतिसप्तस्यतृतीयपादीयदशमाधिकरणेन्यत्रश्रुतैककपालस्यवैश्वदेविकैककपालविकारत्वमित्यु क्त्यातन्न्यायेनैवसिद्धेः "एतद्ब्राह्मण" इतिवचनानर्थक्यप्रसंगादपीतिचेत्तर्हीहाप्युक्तसुषिरश्रुतिविरोधवाक्यानन्वयादेरप्युक्तत्वाद्वक्ष्यमाणबाध काच्चतथास्तु । किंचेहापितस्मिन्यदंतरितिवाक्यावैयर्थ्यायैवसन्निहितदहराकाशपरत्वमुपेयमितिभावेनाह ॥ **दहरस्येति** ॥ अस्मिन्नित्य स्याधिकरणसप्तम्यंतस्यसन्निहितपुंडरीकपरत्वादितिभावः । उपलक्षणमेतत् । तस्मिन्यदंतरितिवाक्यंदहराकाशस्यपुंडरीकवेश्माधारत्वप्रति पादनपरंचेत्तदनंतरवाक्यस्यतदाक्षेपपरतयाव्याख्यानंचायुक्तं । परमात्मनोंतर्वर्तितत्कारणसूक्ष्मंकिमपिनसंभवतीति "किंतदत्रविद्यत" इति वाक्येनाक्षिप्य द्यावापृथिव्यादिकार्यस्यतदंतर्वर्तितयासमाधानमितिपरैर्व्याख्यातत्वादितिध्येयं । प्रागुक्तदोषनिरासायश्रुतप्रकाशोक्तंसमाधा नद्वयमनूद्यापाकरोति ॥ **केचित्त्विति** ॥ **गुणजातमिति** ॥ सत्यकामत्वादीत्यर्थः ॥ **त्यदादीनीति** ॥ त्यद्तद्यदित्यादीनिशब्दरूपा

दहरस्यहृत्पुंडरीकस्थतायाः "दहरोस्मि" न्नित्यत्रैवोक्तत्वेनपुनस्तदुक्तिवैयर्थ्याच्च। यदंतरित्यत्रयच्छ ब्दस्य "तदन्वेष्टव्यंतद्वावविजिज्ञासितव्य" मित्यत्रतच्छब्दस्यचदहरपरत्वेपुँल्लिंगतापत्तेश्च। केचित्तु यदंतरित्यत्राध्याहृतेनयइत्यनेनपुँल्लिंगेनदहरःपरामृश्यते । श्रुतेनयदित्यनेनतुदहरांतर्वर्तिगुणजा तमुच्यते। यद्वा यः यत् इतिपुंनपुंसकलिंगयोर्यच्छब्दयोः "त्यदादीनिसर्वैर्नित्य" मित्यनेनैकशेषे ॥ ६२९ ॥

गु० स्यसान्वेष्टव्यत्वंसमायाति । नचतत्संभवतीत्यतोव्यवहितपुंडरीकपरत्वमभ्युपगम्यतइत्यतोदोषांतरमाह ॥ **दहरस्येति** ॥ ब्रह्मणोदहराकाशस्थत्वाभ्युपगमेश्रुत्यं

प्र० णिसर्वैस्त्यदादिभिरन्यैश्चसहवचनेनित्यंशिष्यंतइत्येकस्यशेषेपुल्लिंगशेषःकुतोनेत्यतआह ॥ **नपुंसकमिति** ॥ नपुंसकानपुंसकमात्रकृतविशे षेऽनपुंसकेनसहोक्तौचनपुंसकंशिष्यते एकवच्चास्यकार्यंविकल्पेनभवतीतिनपुंसकस्यशेषएकवचनंचेत्यर्थः । ननुकिमिहसूत्रद्वयोदाहरणे नकृत्यं । यावता "नपुंसकमनपुंसकेने" तिसूत्रेणैवयः यत् इतिपुन्नपुंसकयोर्विग्रहेनपुंसकैकशेषस्सिध्यति । नचनित्यमेकशेषसिद्ध्यर्थंत्यदा दीनीत्यस्योक्तिरितिवाच्यं । एकवद्भावसूत्रएकवद्भावस्यैववैकल्पिकत्वेनैकशेषस्यतत्रापिनित्यत्वात् । यथोक्तंमंजर्यां "अन्यतरस्यांग्रहणमानं तर्यादेकवच्चेत्यनेनसंबध्यते । नत्वेकशेषेणेत्याहे" तीति । सत्यं । तथापियः यत् इत्यनयोः "नपुंसक" मितिसूत्रविषयत्वेपित्यदादिषुपाठाद्विशि

"नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या" मिति नपुंसकेएकवचनेचकृतेयदितिरूपं । एवंचयोदहरः यच्चतदंतर्वर्तिगुणजातं तदुभयमन्वेष्टव्यमितिश्रुत्यर्थइत्याहुः । तन्न ।

प्र० ष्यत्यदादिविषयसूत्रेणैवैकशेषनिर्वाहश्श्रुतप्रकाशेदर्शितइत्यभिप्रेत्ययथाश्रुततद्ग्रंथानुवादोत्रकृतइत्यदोषः । ननुचयच्छब्दस्यत्यदादिषुपाठेपि "नपुंसकमनपुंसकेने" त्यनेनैवैकशेषोवाच्यः । अन्यथैकवद्भावाप्राप्तेः । सूत्रेऽस्येत्यनेन "नपुंसकेने" त्यनेनप्राप्तैकशेषस्यैवपरामर्शेनैकवद्भावोक्तेः । यथोक्तंमंजर्यां "अस्यग्रहणमेकवच्चेत्यस्योत्तरत्रानुवृत्तिर्माभूदि" तीति । मैवं । "त्यदादीनी" त्यनेनसामान्यतएकशेषप्राप्तौनपुंसकैकशेषस्य "नपुंसक" मितिसूत्रेणैवप्राप्तत्वेनैकवद्भावसिद्धेरिति । "यदंत" रित्यत्रयच्चाकाशश्चेतियदित्यभिप्रायेणत्यदादिसूत्रोक्तिः । यच्चयश्चेतियदित्या शयेननपुंसकसूत्रोक्तिरितिकेचित् । यच्छब्दद्वयनिर्दिष्टमुभयंतच्छब्देनप्रतिनिर्दिश्यतइतिभावेनाह ॥ **एवंचेति** ॥ यथोक्तंतद्भाष्ये "तस्मि

SGDF Sri Gargeshwari Digital Foundation

प्र० न्दहरपुंडरीकवेश्मनियोदहराकाशोयच्चतदंतर्वर्तिगुणजातंतदुभयमन्वेष्टव्य"मिति ॥ **अन्यथेति** ॥ सिद्धांतेप्रागुपपादितदिशेतिभावः । एतेनदहराकाशस्यतद्गुणजातस्यचोत्तरवाक्येश्रवणात्तदनुरोधेनोक्तकल्पनंन्याय्यमितिप्रत्युक्तं । उक्तरीत्याऽन्यथोपपत्तेः । दहरस्यब्रह्मत्वेबाधकानांभावाच्चेतिभावः । यदुक्तंतस्मिन्हृदयवेश्मनियदंतर्वर्ततेदहराख्यंतदंतर्गुणजातंचयच्छब्दप्रातिपदिकार्थः । तत्रगुणजातेदहरांतर्वृत्तित्वमन्वेति । दहरेचपुंडरीकस्थत्वमिति । तदयुक्तमित्याह ॥ **लोकइति** ॥ तदेवव्यनक्ति ॥ **नहीति** ॥ एतेन तस्मिन्नित्यनेनवेश्मनिर्देशेव्यवहितपरामर्शदोषः । दहरवद्गुणजातस्यापिवेश्मस्थतापत्त्यादहराकाशांतर्वर्तित्वासिद्धिः । दहराकाशनिर्देशेतुदहरस्यस्वांतर्वर्तित्वाभावेनांतर्वर्तिनएवान्वेष्टव्यत्वोक्त्यादहरस्यान्वेष्टव्यत्वासिद्धिः । उभयनिर्देशस्तुसतिगत्यंतरेक्लिष्टः । यच्छब्दप्रातिपदिकार्थयोर्दहराकाशगुणजातयोर्द्वयोरपिसाक्षाद्वेश्मस्थत्वस्यवादहराकाशांतर्वर्तित्वस्यवाऽऽपातेनदहरस्यवेश्मस्थत्वंगुणजातस्यदहरांतर्वर्तित्वमित्यस्यासिद्धिरेव । तथाव्युत्पत्त्यभावादित्यपिसूचितं । एवंश्रुत्यर्थास्वारस्यंदहरस्यब्रह्मत्वेव्युत्पाद्यानेकमानविरुद्धंचदहरस्यब्रह्मत्वमितिभावेनमतद्वयेपिसूत्रार्थंनिराह ॥ **किंचेति** ॥ एतेनदहरस्याब्रह्मत्वे "यावान्वा"इत्यादिनादहराकाशमाहात्म्यवर्णनंनस्यादितिनिरस्तं । अनेकमानविरोधेनोक्तरीत्यातस्यदहराका

अन्यथोपपत्तावध्याहारस्यैकशेषादिकल्पनस्यचायोगात् । लोकेप्रातिपदिकार्थैकदेशस्यपदार्थांतरेणान्वयस्याव्युत्पन्नतयायच्छब्दोक्तयोर्द्वयोरप्यंतर्वर्तित्वान्वयापाताच्च । नहियावंतर्वर्ततेतावानयेत्युक्तएकस्यैवांतर्वर्तित्वधीः । किंतुद्वयोः । किंच "यएषोंतर्हृदयआकाशस्तस्मिन्शेतेसर्वस्यवशीसर्वस्येशानः दिव्येब्रह्मपुरेह्येषव्योम्न्यात्मासंप्रतिष्ठितः ।

गु० तरविरोधंचाह ॥ **किंचेति** ॥ नन्वेवंनिषादस्थपतिमित्यत्रापिनिषादश्चासौस्थपतिश्चेतिकर्मधारयोनस्यात् । किंतुनिषादानांस्थपतिरितिषष्ठीसमासएवेत्यतआह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० शस्थाकाशाख्यभगवन्माहात्म्यपरत्वोपपत्तेरिति । यएषइतिवाजसनेयश्रुतौसर्ववशित्वादिलिंगाद्ब्रह्मपरत्वं "दिव्य"इत्याथर्वणे "मनोमयः प्राणशरीरनेताप्रतिष्ठितोन्येहृदयंसन्निधाय । तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाती"तिवाक्यशेषाद्धृद्गताकाशस्थस्यब्रह्मत्वं सिद्धं ॥ **यएषइत्यादि** ॥ त्रीण्यपिवाक्यानितैत्तिरीयोपनिषदिक्रमेणशीक्षाब्रह्मवल्लीनारायणेषुश्रुतानि । व्योमन् व्योम्नि "सुपांसुलु"गि त्यादिनासप्तम्यालुकि "नङिसंबुद्ध्यो"रितिनलोपाभावः । मतद्वयेपिद्वितीयसूत्रैकदेशार्थंदूषयितुंपरमतंतावदनूद्यप्रत्याह ॥ **यच्चेति** ॥

यएषोंतर्हृदयआकाशस्तस्मिन्नयंपुरुषः योवेदनिहितंगुहायांपरमेव्योमन् दहरंविपाप्मंपरवेश्मभूतंयत्पुंडरीकंपुरमध्यसंस्थं। तत्रापिदहंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्य"मित्यादिश्रुतिषुब्रह्मणोहृदयाकाशस्थतैवोक्ता । नतुहृदयस्थाकाशता। यच्चोक्तंद्वितीयसूत्रे "तथाहिदृष्ट"मित्यस्य "सतासोम्यतदासंपन्नोभवती"त्यादिश्रुत्यंतरेसुप्तौजीवानांब्रह्मविषयकंगमनं दृष्टमित्यर्थइति तन्न । सूत्रेगमनस्यसमासैकदेशेनस्त्रीलिंगेनचगतिशब्देननिर्दिष्टस्यनपुंसकलिंगेनदृष्टपदेनानन्वयात् ।

प्र० परैरितिवर्तते। अहरहर्गच्छंत्यएतंब्रह्मलोकमित्युक्तंयत्सुप्तप्रजानांब्रह्मलोकगमनं यश्चब्रह्मैवलोक्यतइतिलोकइतिब्रह्मलोकशब्दः ताभ्यांगति शब्दाभ्यांदहरोब्रह्म । तद्धिसुप्तजीवानांब्रह्मविषयगमनरूपलिंगंच "सतासोम्यतदासंपन्न"इत्यादौदृष्टं । तथाब्रह्मलोकशब्दःसत्यलोकपरः किंनस्यादित्याशंक्य तथाहि इदमेवसुप्तानांब्रह्मलोकगमनरूपलिंगं ब्रह्मलोकशब्दस्यसमानाधिकरणसमासेदृष्टं । नहिसुप्तानामहरहस्सत्यलो कगमनमस्तीत्यर्थःपरेषां । केषांचित्तूक्ताभ्यामेवगतिशब्दाभ्यांदहरोब्रह्म । तथाहि सुप्तौजीवानांगमनरूपंलिंगंचब्रह्मविषयंदृष्टं "सतिसंप

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्यनविदु''रित्यादौ । तथाब्रह्मलोकशब्दश्च ''एषब्रह्मलोकस्सम्राडितिहोवाचे''त्यादौब्रह्मविषयोदृष्टः । तथासुप्रगमनंलिंगंब्रह्मलोकशब्दस्यसमानाधिकरणसमासेपिदृष्टं । सुप्तानामहरहस्सत्यलोकगमनाभावादित्यर्थः । तत्रगतिशब्दाभ्यामित्यंशार्थस्याविरोधादनिरासेनांशांतरार्थस्यैवनिरासः ॥ **एतेनेति** ॥ परमतेसूत्रखंडार्थनिरासेनेत्यर्थः ॥ **तथात्वइति** ॥ उभयविशेषणत्वे तथाहिलिंगशब्दौदृष्टावितिविन्यासःस्यादित्यर्थः । सूत्रखंडस्यद्वाभ्यामप्युक्तमर्थांतरमप्यनूद्यनिराह ॥ **यच्चेति** ॥ नतुषष्ठीतितथात्वेकमलासनलोकपरःस्यादितिभावः । तस्यालिंग

एतेनदृष्टशब्दोगतिशब्दरूपोभयविशेषणमितिकेषांचित्पक्षोपिनिरस्तः । तथात्वेदृष्टशब्दस्यपुँल्लिंगत्वद्विवचनांतत्वयोरापातात् । यच्चोक्तमुभाभ्यां लिंगमित्यस्य तदेवगमनंब्रह्मलोकशब्देब्रह्मैवलोकइतिसमानाधिकरणसमासोनतुषष्ठीसमासइत्यत्रलिंगं । नहिजीवानामहरहःसत्यलोकगमनमस्तीत्यर्थइति । तन्न । उत्तरत्र ''अरश्चहवैण्यश्चार्णवौब्रह्मलोके । तृतीयस्यामितोदिवि । तदैरंमदीयंसरः । तदश्वत्थः । सोमसवनस्तदपराजितापूर्ब्रह्मणः''इतिश्रुतौ ''परस्यब्रह्मणोलोकेश्वेतद्वीपाभिधेपरे । अरोण्यश्चार्णवौदिव्या''वित्यादिस्मृतौचषष्ठीश्रवणादरण्याख्यसुधासमुद्रसरोश्वत्थाद्याश्रयत्वलिंगाच्चषष्ठीसमासस्ययुक्तत्वात् ।

प्र० त्वंव्यनक्ति ॥ **नहीति** ॥ अत्रप्रयुक्तस्यैवब्रह्मलोकशब्दस्याग्रेषष्ठ्यंतविग्रहाश्रयणदर्शनादिहापितथैवयुक्तइत्याह ॥**उत्तरत्रेति** ॥ तत्रापिकथंषष्ठ्यंतसमासइत्यतस्तस्यलोकपरत्वेनब्रह्मपरत्वाभावात्तथासमासइतिभावेनवाक्यशेषमुदाहरति ॥ **तृतीयस्यामिति** ॥ ऐरं मद्ययुक्तं । मदीयं मदकरं । सरः सरोवरं । सोमसवनः अमृतस्रावी । पूः पुरी । ''दिव्यौचिदानंदरसात्मका''वितिछांदोग्यभाष्योक्तस्मृतावित्यर्थः । अत्रयद्यपिपूर्वतंत्रएवनिषादस्थपतिनयेकर्मधारयबलवत्त्वस्यसिद्धत्वान्नतल्लिंगेनेहसाध्यमितिसूत्रखंडोव्यर्थएवेत्यपिसुवचं । तथापीहषष्ठीसमा

प्र० सनिराकरणेनकर्मधारयस्थापनायलिंगमप्यधिकमस्तीतितदप्युक्तंसूत्रकारेणेतिभामत्यामुक्तत्वात्तद्दूषणमुपेक्ष्यश्रुतिविरुद्धंचैतद्व्याख्यानमितिवक्तुंदूषणांतरमेवोक्तं । यदुक्तंभामतीरामानुजभाष्ययोर्निषादस्थपतिन्यायेनचकर्मधारयइति तत्रतद्वैषम्यमाह ॥ **एतयेति** ॥ षष्ठे ''स्थपतिर्निषादःस्याच्छब्दसामर्थ्या''दित्याद्यपादीयांतिमाधिकरणे ''रौद्रंवास्तुमयंचरुंनिर्वपे''दितिरौद्रेष्टिंप्रकृत्यश्रुते ''एतयानिषादस्थपतिंयाजये''दित्यत्रद्विजातिरेवयोनिषादानामाधिपत्यंकरोतितस्यात्राधिकारः षष्ठीसमासएवायमथनिषादएवस्थपतिः तस्याधिकारः कर्मधारयएवसमासइतिसंशये पक्षद्वयेप्यस्ययौगिकत्वात्षष्ठीसमासत्वेऽग्निविद्यावतएवत्रैवर्णिकस्याधिकारलाभात् कर्मधारयपक्षेऽग्निविद्याशून्यस्यापितत्प्राप्तेःषष्ठी

''एतयानिषादस्थपति''मित्यत्रतुवाक्यशेषेषष्ठ्या अश्रवणात्समानाधिकरणसमासोयुक्तः ।
एवंचोत्तरवाक्यानुसारेण ''अहरहर्गच्छंत्यएतंब्रह्मलोक''मित्यत्रापिब्रह्मणआवासस्थानत्वा

प्र० समासएवेतिप्राप्ते अस्मिन्पक्षेषष्ठ्यश्रवणेननिषादशब्दस्यतत्संबंधिनिस्थपतौलक्षणापत्तेःकर्मधारयेतदभावाद्वचनबलादग्निविद्याहीनस्याप्यधिकारोपपत्तेःकर्मधारयएवेतिसिद्धांतितं । तत्रषष्ठीग्राहकवाक्यशेषोत्रेवनास्तीत्यर्थः । तथाचेहवाक्यशेषान्यथानुपपत्त्याप्रबलोपिकर्मधारयस्त्याज्यः । यथा ''श्येनेनाभिचरन्यजेते'' त्यत्र''यथावैश्येन''इतिवाक्यशेषबलाच्छ्येनशब्देप्रबलरूढित्यागस्तद्वदितिभावः । नन्वेवंकथंतर्हिटी'' कायां ब्रह्मैवसर्वलोकाश्रयत्वादिनालोकपदोक्तंवे''तिकर्मधारयस्स्वीकृतइतिचेन्न । षष्ठ्यर्थात्यागेनैवार्थांतरस्योक्तेः । अतएव ''परंब्रह्मैवलोकनात् । ब्रह्मलोकइतिप्रोक्तस्तस्यलोकोपिकथ्यत''इतिछांदोग्यभाष्यविरोधोपिप्रत्युक्तः । अस्त्वेवंतत्र ततश्चकिमित्यतआह ॥ **एवंचेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० दहराकाशोब्रह्मलोकशब्दार्थइति ॥ यद्यपिटीकायां "हृत्पद्मस्यब्रह्मलोकत्वोक्तये"त्यादिनाहृत्पद्मस्थंब्रह्मलोकशब्दार्थइतिभाति । तथापिपरैर्दहराकाशस्यकर्मधारयेणब्रह्मलोकशब्दार्थत्वेनब्रह्मत्वोक्तेस्तन्निरासतात्पर्येणैवमुक्तिः । नन्वेवंदहराकाशगत्यादहरस्थस्यकथंब्रह्मत्वं । दहरस्थगतेरेववक्तव्यत्वात् । अतोदहरमेवब्रह्मेत्यतआह ॥ **नहीति** ॥ **वैयर्थ्यादिति** ॥ सिद्धांतेतुमहिम्नइत्यादेस्समाख्याप्रदर्शकत्वेनसार्थक्यमितिभावः । ननुधृतेर्धारणाद्दहराकाशोब्रह्मेत्युक्तेकुतइत्याशंकायांधृतिरूपलिंगस्यब्रह्मधर्मतासाधनायमहिम्नइत्यादिसार्थकं । अस्यधारणलक्षणस्यमहिम्नोऽस्मिन्नीश्वरे "एषसेतुर्विधारण"इत्यादिश्रुत्यंतरेउपलब्धेरितिभामत्याद्युक्तेरित्यतउक्त**मंबरांतेति** ॥ अन्यथातत्रापिसाधनप्रसंगइतिभावः । ब्रह्मधर्मतासाधकत्वेप्यस्यास्मिन्नुपलब्धेरित्येतावतैवपूर्तौमहिम्नइतिव्यर्थमितिभावेनोक्तं**महिम्नइत्यस्येति** ॥ श्रुत्यंतरेष्वित्यध्याहारप्रसंगाच्चेत्यपिध्येयं ॥ **यच्चेति** ॥ "अस्यलोकस्यकागतिरित्याकाशइतिहोवाच आकाशोवैनामनामरूपयोर्निर्वहिते"त्यादावाकाशशब्दस्य

दहराकाशोब्रह्मलोकशब्दार्थः। यथाब्रह्मपुरेदहरमित्यत्रशरीरंब्रह्मपुरशब्दार्थस्तद्वत् । नहितदावासस्थानप्राप्तिंविनातत्प्राप्तिः। यच्चोक्तमुभाभ्यांतृतीयसूत्रेधृतेर्महिम्नइतिपदद्वयंसमानाधिकरणमिति । तन्न । अंबरांतधृतेरित्यादाविवधृतेरित्यनेनैवसेतुर्विधृतिरितिश्रौतस्यधारकत्वस्योक्तिसंभवेनमहिम्नइत्यस्यवैयर्थ्यात् । यच्चोक्तमुभाभ्यां "आकाशइतिहोवाचे"त्यादावाकाशशब्दस्य ब्रह्मणिप्रसिद्धेरितिचतुर्थसूत्रार्थइति । तन्न । अस्मद्रीत्यासमन्वीयमानाकाशस्थत्वस्यब्रह्मणिप्रसिद्ध्युक्तिसंभवेऽसमन्वीयमान ॥ ६३२ ॥

गु० एतयेति ॥ ननुषष्ठीसमासेनिरंतरंब्रह्मलोकगमनंवक्तव्यं । नचतदस्तीतिकथंषष्ठीसमासइत्यतआह ॥ **नहीति** ॥ ब्रह्मैवलोकमितिसमानाधिकरणसमासोन

SGDF Sri Gargeshwari Digital Foundation

प्र० ब्रह्मणिप्रसिद्धेर्दहराकाशोब्रह्मेत्यर्थइतितन्मतेसूत्रार्थः ॥ **दहरशब्दसमानाधिकरणेति** ॥ सूत्रेदहरशब्दस्यैवोक्त्यातस्यैवान्यत्रब्रह्मणिप्रसिद्धिस्तद्घटितश्रुत्युदाहरणेनैवयुक्ता । नतुदहरपदरहितश्रुतिषुसूत्रानुपात्तकेवलाकाशपदस्येत्यर्थः । अस्माकंतुसूत्रेदहरइतिसप्तम्यादहराकाशस्थलस्याभिमतत्वात्तस्यच "दहंगगनंविशोकस्तस्मिन्यदंतस्तदुपासितव्य"मितिश्रुत्यंतरेश्रवणान्नदोषइतिभावेनोक्तमस्मद्रीत्येति ॥ **यच्चेति** ॥ परैरितिसंबध्यते । "एषसंप्रसादोस्माच्छरीरात्समुत्थाये"त्यादिनासंप्रसादशब्देनसुप्त्यवस्थापन्नंजीवंपरामृश्यतस्यैवशरीरात्समुत्थानाभिधा

दहरशब्दसमानाधिकरणाकाशशब्दस्यब्रह्मणिप्रसिध्युक्तेरयोगात् । यच्चोक्तंपंचमसूत्रे असंभवादित्यस्य बुद्ध्याद्युपाधिपरिच्छिन्नेजीवे "यावान्वाअयमाकाश"इत्याकाशोपमेयत्वाद्यसंभवादित्यर्थइति । तन्न । ब्रह्मणोपि "ज्यायानाकाशा"दित्यादिश्रुत्याऽऽकाशादपिज्यायस्त्वेनतदुपमेयत्वायोगात् । पुंडरीकवेष्टनप्राप्तदहरत्वनिवृत्तिपरंतदितिचेन्न । त्वन्मतेसुषुप्त्यादावनुगतजीवभावेतदननुगतबुद्ध्यादेरनुपाधित्वात्तदनुगताविद्यायाएवचोपाधित्वादविद्योपाधिकजीवेपिपुंडरीकवेष्टनकृतदहरत्वनिवृत्तेःसंभवात् ।

प्र० नाद्दहरोजीवइतिचेन्न । बुद्ध्याद्युपाधिपरिच्छिन्नेजीवे "यावान्वा"इत्यादिवाक्योक्ताकाशोपमितत्वाद्यसंभवादित्यन्येषामर्थः । ननुनभूताकाशमानत्वंब्रह्मणोत्रविधीयते । येनज्यायानयमाकाशइतिश्रुतिविरोधस्स्यात् । अपितुभूताकाशोपमानेनपुंडरीकोपाधिप्राप्तदहरत्वंनिवर्त्यतइतिभाष्यभामतीभ्यामुक्तमाशंकते ॥ **पुंडरीकेति** ॥ **तदननुगतेति** ॥ अंतःकरणलयस्यसुप्तावभ्युपेतत्वादितिभावः । अस्त्वेवमित्यतआह ॥ **अविद्येति** ॥ तस्यसर्वगतत्वाभ्युपगमात् । तथाचानूदितंप्रतिकर्मव्यवस्थाभंगेग्रंथकारैरविद्योपाधिकंसत्सर्वगतमंतःकरणोपाधिकंसत्परि

SGDF
Sri Gargeshwari Digital Foundation

प्र० च्छिन्नंचेति। तथाचजीवपूर्वपक्षनिरासकःसौत्रोहेतुर्नस्यादितिभावः। अत्रापहतपाप्मत्वाद्यसंभवस्यैवहेत्वर्थतयारामानुजीयैरुक्तत्वात्तस्यचा नुमतत्वात्तन्नदूषितं ॥ यच्चेति ॥ अत्रापिपरैरितियोज्यं । इंद्रविरोचनोपाख्यानरूपोत्तरवाक्यसंदर्भे "यआत्माऽपहतपाप्मे"त्याद्युपक्रम्य "यएषोंतरक्षिणिपुरुषोदृश्यते"इत्यक्षिस्थंजीवंनिर्दिश्य "एतंत्वेवभूयोनुव्याख्यास्यामी"तितमेवपुनःपरामृश्य "यएषस्वप्नेमहीयमानश्चरत्येष आत्मे"ति "मर्त्यंवाइदंशरीर"मितिशरीरसंबंधिनिंदापूर्वं "एषसंप्रसाद"इत्यादिश्रवणाज्जीवपरमेवैतद्वाक्यमितिचेन्न । तत्राप्याविर्भूतस्वरू पस्यविवक्षितत्वात् । तादृशंचब्रह्मैवेत्यपहतपाप्मत्वादिकंतत्रयुक्तमित्यर्थइत्युक्तमित्यर्थः । सूत्रांतरेप्यनुपपत्तिरूह्येत्याह ॥ दिगिति ॥ तथा

यच्चोक्तं षष्ठस्य परंज्योतिरित्याद्युत्तरवाक्यआविर्भूतोजीवउच्यते। नत्वविद्यावृतः। आ विर्भूतंचस्वरूपंब्रह्मैवेतितद्वाक्यंशुद्धब्रह्मपरमेव। नतूपहितजीवपरमित्यर्थइति। तन्न। "सतत्रपर्येतिजक्षन्क्रीडन्रममाण"इतितत्रविशिष्टस्यैवोक्त्याशुद्धपरत्वायोगादितिदिक् ।

प्र० हि। जपाकुसुमसन्निधानात्स्फटिकादेरिवशरीरेंद्रियादिसन्निधानात्कलुषितस्यजीवस्यस्वाभाविकब्रह्मभावोपदेशार्थं "यएषोंतरक्षिणी"त्यादौ तिसृष्वप्यवस्थासुजीवपरामर्शइतिसप्तमार्थइति तन्न । "उपसंपद्ये"तिसमीपप्राप्तेरेवोक्त्याजीवस्यब्रह्मभावस्यैवाभावात् । "सतत्रपर्येतिजक्ष" न्नित्याद्ययोगाच्च । यदपिदहरहृत्पद्मस्थतयाऽल्पश्रुतेर्दहरोनब्रह्मेतिचेत्तदुक्तं "अर्भकौकस्त्वा"दित्यत्र "यावान्वा"इत्यादिश्रुत्याबाह्याकाशोप मितत्वोक्त्याचप्रत्युक्तमित्यष्टमार्थइति तन्न । अत्रोक्तरीत्याऽल्पत्वस्यब्रह्मण्यप्युपासनार्थत्वेजीवेपिब्रह्मधर्माणामुपासनार्थत्वापत्तेः । "यावा न्वा"इत्यादिश्रुत्यात्राल्पत्वंप्रत्युक्तमित्यप्ययुक्तं । तस्यदहरत्वनिवृत्तिपरत्वेनतस्याविद्योपाधिकेजीवेपिसंभवादिति । इदमधिकरणंनिर्गुणजी ॥ ६३३ ॥

प्र० वाभेदप्रतिकूलत्वात्परैरेतन्नारंभणीयमित्याह ॥ अत्रापीति ॥ मिथ्यार्थपरमेतदितिचप्रत्युक्तमंतर्यामिनयइतिभावः। एवं परप्रातिकूल्य मित्यर्थः । यत्तुहृत्पद्मस्थदहराकाशःकिंभूतमुतजीवःकिंवाशिवइतिसंशये आकाशश्रुतेर्भूतेरूढत्वाद्भूताकाशः । अल्पत्वश्रुतेर्जीवोवा । नव्या पीशिवइतिप्राप्ते अपहतपाप्मत्वादिभ्योहेतुभ्योदहराकाशश्शिवएवेति तन्न । दहराकाशस्यब्रह्मत्वेतद्गतस्यान्वेष्टव्यत्वाद्युक्त्ययोगस्योक्तत्वात् । तस्मिन्नित्यस्यव्यवहितपुंडरीकपरत्वस्यान्याय्यत्वात् । "तस्मिन्यदंत"रित्यस्यव्यर्थत्वाच्च । यदंतरितियच्छब्दस्यपुँल्लिंगतापत्तेश्च । यदत्रशि वार्कमणिदीपिकायामुक्तं लिंगव्यत्ययेनवा नपुंसकलिंगस्त्रीलिंगपुँल्लिंगानुगतंसामान्यमेवनतुविशेषांतरमितिशाब्दिकमर्यादयालिंगांतरनिर्दिष्टे नपुंसकलिंगंयुक्तमितिवा "सुपांसुलु"गितिसोर्लुकिसतिपुँल्लिंगस्यैवैतद्रूपमितिवेति तन्न । अस्मद्रीत्यागतौसत्यांक्लेशायोगात् । उत्तराधिकरणे तुप्रबलबाधकाद्गत्यंतराभावाच्चव्यत्ययादिनोपपत्तिर्वक्ष्यतइतिनास्मत्प्रतिबंदी । "यएषोंतर्हृदयआकाश"इत्यादिभिर्दहराकाशस्थस्यब्रह्मत्वबोध कानेकश्रुतिस्मृतिभिर्विरोधस्योक्तत्वाच्च । "दहरंविपाप्म"मितिश्रुतावग्रे "तत्परस्समहेश्वर"इतिश्रुतत्वेपि "विश्वंनारायणंदेवमक्षरंपरमंपद" मित्यादिनारायणशब्दबाहुल्यात् "योदेवानांनामधाएकएवे"त्यादौ "अजस्यनाभा"वितिपद्मनाभत्वलिंगेनविष्णोःसर्वनामवत्त्वस्यैवान्यस्यतद भावेन "महादेवोमहत्त्वतः । अन्यनाम्नांगतिर्विष्णु"रित्यादिद्युभ्वादिनयभाष्योक्तस्मृतिभिर्महेश्वरशब्दस्यापिवैष्णवत्वात् "नित्यतीर्णाशना

अत्रापिपरमतेदहरस्यजीवत्वनिषेधेनब्रह्मत्वोक्तेः "गतिशब्दाभ्या"मित्यनेनचजीवस्यब्रह्मगत्युक्तेः दहरवाक्य शेषेच "सत्यकामःसत्यसंकल्प"इतिश्रवणात्परपक्षप्रतिकूलताव्यक्तैव। एवमुत्तरत्राप्यूह्यं। टीकाक्षरार्थस्तु ।

गु० स्यात्। ब्रह्मप्राप्तेर्ब्रह्मलोकप्राप्तिंविनायोगादित्यभिप्रायः। समानविषयत्वस्यविकल्पप्रयोजकत्वात्प्रकृतेतदभावाद्विकल्पद्योतकोथवेतिवाशब्दोननुपपन्नइत्यतोव्याख्या

SGDF Sri Gargeshwari Digital Foundation

प्र०यादिरेकएवहरिस्त्वत"इत्यादिभाष्योक्तपाद्मस्मृत्या "सत्यकाम:परोनास्तितमृतेविष्णुमव्यय"मितिस्कांदस्मृत्याचापहतपाप्मत्वादीनांविष्णवे कनिष्ठत्वेनशिवेहेतोरसिद्धेश्च । "परस्यब्रह्मणोलोक"इत्यादिस्मृतिसिद्धसुधासमुद्राश्रयश्वेतद्वीपाख्यब्रह्मलोकत्वरूपलिंगविरोधाच्च । असकृद्विष्णुवाचितयाप्रतिपादितब्रह्मशब्दविरोधाच्च । सूत्रार्थानांप्रायोरामानुजीयरीत्यविशिष्टत्वात्तथैवदूषणंध्येयं । यदत्रोक्तंशिवार्कमणिदीपिकायां गतिसूत्रेदृष्टशब्द: "चेतोर्पणनिगदात्तथाहिदर्शन"मित्यादाविवभावप्रत्ययांतोनकर्मणिनिष्ठांत: । तथाचदृष्टशब्दस्यगतिशब्दौप्रतिविशेषणत्वाभावात्पुँल्लिंगेनद्विवचनेनचभाव्यमितिशंकानवकाशइति तन्न । दृष्टशब्दस्यलिंगंचेत्यनेनानन्वयापत्ते: । यदि "तथाहिदर्शन"मित्यस्य गतिशब्दयो: "सतिसंपद्ये"त्यादावन्यत्रब्रह्मविषयतयादर्शनमुच्यते । लिंगंचेत्यनेनचमास्त्वन्यत्रानयोर्दर्शनमत्रैवप्रकरणेसुप्तगतिब्रह्मलोकशब्दावीश्वरस्यदहराकाशत्वेलिंगंपर्याप्तगमकमित्यर्थइत्युक्ति: तदापिलिंगंचेत्यस्याभ्युपेत्यप्रवृत्तत्वेव्यर्थत्वात् । पर्याप्तत्वानुपपादनाच्च । लिंगशब्दस्यरूढार्थत्यागापाताच्च । गतिशब्दावित्यध्याहारापाताच्च । लिंगमित्यस्याक्लेशेनैवास्मद्रीत्यान्वयसंभवेक्लेशायोगाच्च । यदप्युक्तमस्तुवातद्विशेषणं । तथापिनदोष: । विशेष्यस्यपुँल्लिंगद्विवचनांतनिर्दिष्टत्वेपि "द्विगुरेकवचन"मित्यत्रलिंगसामान्यविवक्षयांपुँल्लिंगविशेषणेनपुंसकलिंगवत् "कर्मणोरोमंथतपोभ्यांवर्तिचरो"रित्यत्रद्विवचनांतस्यविशेषणेविशेष्यद्वयगतप्रातिस्विकैकत्वविवक्षयैकवचनाच्चात्रानपुंसकस्यैकवचनस्यचोपपत्तिरिति तदप्यनेनैवनिरस्तं । गतिसंभवेऽस्यक्लिष्टत्वात् । यच्चोक्तं प्रसिद्धेरित्यस्य "दहरंविपाप्मंपरवेश्मभूत"मित्यत्र "हृत्पुंडरीकंविरज"मित्यारभ्य "उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकंठंप्रशांतं । ध्यात्वे"त्यादिकैवल्योपनिषदिचशिवस्यहृत्पद्मस्थत्वप्रसिद्धेश्चेत्यर्थइति तन्न । अनेकश्रुतिस्मृतिविरोधेननारायणादिशब्दविरोधेनचतेषांशब्दानांविष्णुवाचकत्वात् । उक्तंचगीताभाष्ये "तत्रापीष्टसिद्धिर्नामवैशेष्या"

॥ ६३४ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०यादिरेकएवहरिस्त्वत"इत्यादिभाष्योक्तपाद्मस्मृत्या "सत्यकाम:परोनास्तितमृतेविष्णुमव्यय"मितिस्कांदस्मृत्याचापहतपाप्मत्वादीनांविष्णवे
कनिष्ठत्वेनशिवेहेतोरसिद्धेश्च । "परस्यब्रह्मणोलोक"इत्यादिस्मृतिसिद्धसुधासमुद्राश्रयश्वेतद्वीपाख्यब्रह्मलोकत्वरूपलिंगविरोधाच्च । असकृ
द्विष्णुवाचितयाप्रतिपादितब्रह्मशब्दविरोधाच्च । सूत्रार्थानांप्रायोरामानुजीयरीत्यविशिष्टत्वात्तथैवदूषणंध्येयं । यदत्रोक्तंशिवार्कमणिदीपि
कायां गतिसूत्रेदृष्टशब्द: "चेतोर्पणनिगदात्तथाहिदर्शन"मित्यादाविवभावप्रत्ययांतोनकर्मणिनिष्ठांत: । तथाचदृष्टशब्दस्यगतिशब्दौप्रतिवि
शेषणत्वाभावात्पुँल्लिंगेनद्विवचनेनचभाव्यमितिशंकानवकाशइति तन्न । दृष्टशब्दस्यलिंगंचेत्यनेनानन्वयापत्ते: । यदि "तथाहिदर्शन"मित्यस्य
गतिशब्दयो: "सतिसंपद्ये"त्यादावन्यत्रब्रह्मविषयतयादर्शनमुच्यते । लिंगंचेत्यनेनचमास्त्वन्यत्रानयोर्दर्शनमत्रैवप्रकरणेसुप्तगतिब्रह्मलोकश
ब्दावीश्वरस्यदहराकाशत्वेलिंगंपर्याप्तगमकमित्यर्थइत्युक्ति: तदापिलिंगंचेत्यस्याभ्युपेत्यप्रवृत्तत्वेव्यर्थत्वात् । पर्याप्तत्वानुपपादनाच्च । लिंगश
ब्दस्यरूढार्थत्यागापाताच्च । गतिशब्दावित्यध्याहारापाताच्च । लिंगमित्यस्याक्लेशेनैवास्मद्रीत्यान्वयसंभवेक्लेशायोगाच्च । यदप्युक्तमस्तुवात
द्विशेषणं । तथापिनदोष: । विशेष्यस्यपुँल्लिंगद्विवचनांतनिर्दिष्टत्वेपि "द्विगुरेकवचन"मित्यत्रलिंगसामान्यविवक्षयांपुँल्लिंगविशेषणेनपुंसक
लिंगवत् "कर्मणोरोमंथतपोभ्यांवर्तिचरो"रित्यत्रद्विवचनांतस्यविशेषणेविशेष्यद्वयगतप्रातिस्विकैकत्वविवक्षयैकवचनाच्चात्रानपुंसकस्यैकवचन
स्यचोपपत्तिरिति तदप्यनेनैवनिरस्तं । गतिसंभवेऽस्यक्लिष्टत्वात् । यच्चोक्तं प्रसिद्धेरित्यस्य "दहरंविपाप्मंपरवेश्मभूत"मित्यत्र "हृत्पुंडरीकंवि
रज"मित्यारभ्य "उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकंठंप्रशांतं । ध्यात्वे"त्यादिकैवल्योपनिषदिचशिवस्यहृत्पद्मस्थत्वप्रसिद्धेश्चेत्यर्थइति ॥ ६३४ ॥
तन्न । अनेकश्रुतिस्मृतिविरोधेननारायणादिशब्दविरोधेनचतेषांशब्दानांविष्णुवाचकत्वात् । उक्तंचगीताभाष्ये "तत्रापीष्टसिद्धिर्नामवैशेष्या"

SGDF Sri Gargeshwari Digital Foundation

प्र० दितीत्याद्यूह्यं । अथवेत्यादिटीकायाउद्भाष्यत्वभ्रांतिंनिवारयन्पक्षयोरर्थभेदंव्यंजयन्भाष्यव्याख्यानमेतदित्याह ॥ **पूर्वमिति** ॥ "धृतिसूत्रे सर्वेपाप्मानोतोनिवर्तंतइतितल्लक्षणोक्ते"रितिवाक्येतच्छब्देनपरामृश्यमानंनस्फुटं । किंचतल्लक्षणमितिनस्फुटंप्रतीयते । तथात्वेवासहृत्पद्म स्थःकुतइत्यतोव्यनक्ति ॥ **एषइति** ॥ एतस्येतिप्रतीकग्रहणेनबहुवाक्यानिसूचितानीत्यत्रोक्तानिबहुवाक्यानिचदर्शयति ॥ **प्रतीकेति** ॥

पूर्वंहृत्पद्मस्थस्यब्रह्मत्वेहेत्वंतरोक्त्यर्थंसौत्रंलिंगपदमित्येवंपरतयाऽरश्चेत्यादिभाष्यंव्याख्यातं। अधुनाब्रह्मलोकशब्दस्यप्रसिद्ध्यासत्यलोकपरत्वाशंकानिरासार्थंतदित्येवंपरतयाऽरश्चेत्यादिभाष्यंव्याचष्टे ॥ [४८।१४]अथवाब्रह्मलोकमिति ॥ [४८।१५]तल्लक्षणोक्तेश्चेति ॥ एषआत्माअपहतपाप्मेत्यत्रहृत्पद्मस्थलक्षणत्वेनोक्तस्यापहतपाप्मत्वस्यसर्वेपाप्मानोतोनिवर्तंतइत्यनेनससेतुरित्युक्तसेतुधर्मत्वोक्तेरित्यर्थः ॥ [४८।१९]एतस्येतिप्रतीकग्रहणेनेति ॥ प्रतीकग्रहणेन "एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौ । एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौ"इत्यादीनिबहुवाक्यानिसूचयतीत्यर्थः ॥ विष्णुरित्य[४८।२३]भ्युपगमेसुषिरश्रुतिविरोधइति ॥ ब्रह्मणोहृत्पद्मस्थत्वेसुषिरस्य "तस्यांतेसुषिर"मितिहृत्पद्मस्थत्वश्रुतिविरोधइतिनिरस्तं । सुषिरस्य "दहरोस्मिन्नंतराकाश"इतिवाक्योक्तहृत्पद्मस्थत्वमुपेत्यैवब्रह्मणो "दहरंविपाप्म"मित्यादिश्रुतिबलात्तस्मिन्यदंतररितिवाक्योक्तहृत्पद्मसुषिरस्थतायाएवस्वीकारादित्यर्थः ॥ [४९।२]तदाधारतयापृथिव्यादिकमिति ॥

प्र०"प्रसिद्धेश्चे"तिसूत्रे "हृत्पद्मस्थाकाशोविष्णुरित्यभ्युपगमेसुषिरश्रुतिविरोधइत्येतदनेनैवनिरस्त"मितिवाक्यविरोधतच्छांत्योरस्फुटत्वादाह ॥ **ब्रह्मणइति** ॥ "यद्ब्रह्मान्वेष्टव्यतयोक्तं तस्यांतर्हृदयेयावानेषआकाशस्तावान्सर्वोपिविद्यंते । तदाधारतयापृथिव्यादिकंचसमाहित"मित्यत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० जडस्यैवजडाधारताप्रतीतेराह ॥आकाशेति॥ एतच्छब्देनशरीरस्यप्रकृतत्वान्नेतिचेन्न । शरीरनाशेनास्याविनाशोक्तेरित्येतदप्रतीतेश्शंकोत्तरयोर्भावंव्यनक्ति ॥ यद्यपीति ॥ दहराकाशस्थस्यविष्णोरेवसर्वाधारत्वमितिप्रकृतेर्थेशंकितश्रुतिविरोधंसंगमयति ॥ सुषिरस्येति ॥ शिष्टमुपन्यासमुखेनविवृतमितिभावः ॥ ७ ॥ दहराधिकरणं ॥ ५ ॥

आकाशाभिमान्याश्रितंपृथिव्याद्यभिमान्यादिकमित्यर्थः ॥ ब्रह्मैवपूर्णत्वात्[४९।५]पुरमिति ॥ एतत्सत्यंब्रह्मपुरमितिप्रकृतस्यशरीरस्यैवैषआत्मेतिपरामर्शादात्मानविष्णुरितिनशंक्यं । छांदोग्यभाष्योक्तरीत्या "यदिदमस्मिन्ब्रह्मपुर"इत्याद्यस्यब्रह्मपुरशब्दस्यषष्ठीतत्पुरुषकर्मधारययोराश्रयणेनशरीरब्रह्मोभयपरत्वेपि "ब्रह्मपुरेसर्वंसमाहित"मितिद्वितीयस्य "एतत्सत्यंब्रह्मपुर"मितितृतीयस्यचब्रह्ममात्रपरत्वादितिभावः॥ शरीरना[४९।८]शेनास्याविनाशोक्तेरिति॥ यद्यपि "एतज्जराऽऽवाप्नोती"तिपूर्वत्रैतच्छब्देनशरीरस्यप्रकृतत्वात् "एतत्सत्यंब्रह्मपुर"मित्यत्रापितस्यप्राप्तिः । तथापिनास्यजरयैतज्जीर्यतइतिसन्निहितपूर्ववाक्येशरीरमस्येतिनिर्दिश्यैतच्छब्देनब्रह्मनिर्देशाच्छरीरनाशेप्यविनाशित्वलिंगाच्च नशरीरमिहब्रह्मपुरशब्दार्थइत्यर्थः॥ [४९।९]नचैवमंगीकारेपिसुषिरश्रुतिविरोधइति ॥ सुषिरस्यसर्वाधारत्वश्रुतिविरोधइत्यर्थः ॥ ७ ॥ दहराधिकरणं ॥ ५ ॥

गु० नांतराभिप्रायेणवाशब्दइत्याह ॥पूर्वमिति॥ सर्वत्रब्रह्मपुरशब्दस्यब्रह्मपरत्वभ्रांतिनिरासायाह ॥ एतत्सत्यंब्रह्मपुरमिति ॥ पौनरुक्त्यपरिहारायव्याख्याति ॥ सुषिरस्येति ॥ ७ ॥ दहराधिकरणं ॥ ५ ॥

प्र० ॥ॐअनुकृतेस्तस्यचॐ॥ अत्रसमन्वीयमानलिंगस्योभयसाधारण्येनटीकोक्तपादसंगतिंविवरितुंतत्स्वरूपकथनपरटीकायामूलंवदंस्तन्निर्धारयति ॥ अत्रेति ॥ "स्थानंलिंगमनुग्रह"इत्यनुव्याख्याने "कथंनुतद्विजानीयामित्यानुकूल्येनग्रहणंकस्येति विचार्यमनुग्रह"इतिन्यायविवरणे । नतुटीकोक्तं । कथंशब्दलभ्यमित्यतआह ॥ तच्चेति ॥ लिङेति ॥ "विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषुलि"ङितिस्मरणादितिभावः ॥ भानेति ॥ "किमुभातिनभातिवे"तिश्रवणादितिभावः । भाष्यविरोधमाशंक्याह ॥ परमात्मेति ॥ द्विरूपस्यापिप्रार्थनस्यभगवत्परत्वेसिद्धेऽत्रोक्तताद्दशसुखरूपोपिसएवेतिफलिष्यतीत्यभिप्रायमित्यर्थः ॥ सुखत्वमेवेति ॥ तथाचतस्योभयत्रप्रसिद्धिस्सुशके

॥ ॐअनुकृतेस्तस्यचॐ ॥ अत्रानुव्याख्याने अनुग्रहाख्यलिंगस्यसमन्वयइत्युक्तं । अनुग्रहश्चानुकूल्येनगृह्यमाणत्वमित्युक्तंन्यायविवरणे । तच्च "कथंनुतद्विजानीयामितिज्ञानार्थंप्रार्थितत्व"मित्युक्तंटीकायां । तच्चविजानीयामितिलिङाज्ञानार्थंज्ञेयस्यप्रार्थनाधीरित्यभिप्रेत्यवा कथंनुपुत्रंपश्येयंसआगच्छतिवानवेत्यत्रयथापुत्रज्ञानार्थंतदागमनप्रार्थनाधीः तथा "कथंनुतद्विजानीया"मित्यादिवाक्येज्ञानार्थमाविर्भावरूपभानप्रार्थनाधीरित्यभिप्रेत्यवेतिद्रष्टव्यं । "परमात्मैवानिर्देश्यसुखरूप"इतिसिद्धांतभाष्यंतुफलितोक्तिपरं । केचित्तु एतद्भाष्यानुसाराद्न्यायविवरणोक्तमानुकूल्येनगृह्यमाणत्वंसुखत्वमेवेत्याहुः ।

गु० ॥ॐअनुकृतेस्तस्यचॐ॥ ननुटीकाभाष्यविरोधः । भाष्येऽनिर्देश्यसुखरूपलिंगसमन्वयस्यप्रतिपाद्यत्वाभ्युपगमात् । टीकायांज्ञानार्थप्रार्थितत्वरूपलिंगसमन्वयस्यप्रतिपाद्यत्वाभ्युपगमात् । किंचानुकूल्यगृह्यमाणत्वंनामज्ञानार्थप्रार्थितत्वमितिनोपपद्यते । कोशाद्यभावेनतत्ररूढेरभावेनयोगस्याप्यसंभवादित्यतोभाष्यटीकयोर्विरोधप्रदर्शनपूर्वकं टीकोक्तंज्ञानार्थप्रार्थितत्वरूपत्वमानुकूल्येनगृह्यमाणत्वस्योपपादयति ॥ अत्रेति ॥ सुखशब्दप्रवृत्त्यासाधारण्यमुक्तमितिनाभिप्रायः । किंवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिभावः । साधारण्योपपादनायलिङ्गप्रतीतंप्रार्थनंनसर्वकर्तृकमित्याह ॥ **अत्रचेति**॥ “तमात्मस्थंयेनुपश्यंतिधीरा”इतिज्ञानिनएवप्रकृतत्वादितिभावः । एवंलिंगस्वरूपंनिर्धार्येदानीं “आनुकूल्येनगृह्यमाणत्वलिंगस्यभगवतिज्ञानिसुखेचसुखशब्दवृत्त्यासाधारण्ये”तिटीकोक्तंसाधारण्यंस्वतएवोभयसाधारणसुखशब्दसमभिव्याहारेणवेतिद्वेधोपपादयति ॥ **तत्प्रार्थनस्यचेति** ॥ तं ज्ञानिनंप्रति । “प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रिय”इत्यादेरितिभावः ॥ **उभयेति** ॥ “एषपरमआनंदः योवैभूमातत्सुख”मित्यादौभगवतोपिपरमसुखरूपत्वात्तत्रसुखशब्ददृष्टेरितिभावः । एतेनटीकायां “सुखशब्दवृत्त्ये”त्येतत्सुखशब्दवृत्त्याचेतिचशब्दानुषंगेणपक्षांतरतयायोज्यमित्युक्तंभवति । नन्वानुकूल्येनगृह्यमाणत्वस्यसमभिव्याहृतसुखनिष्ठतयातस्यचद्वयसाधारण्येनालिंगस्यचोभयत्रप्रसिद्धिरयुक्ता । सुखशब्दस्याज्ञसुखेपिसत्त्वात् । तस्येहपूर्वपक्ष्यनभिमतत्वात् । द्वयमात्रसाधारण्येनवक्तव्यत्वस्योक्तत्वादितिचेन्न । प्रकरणविशेषितस्यतस्यद्वयमात्रसाधारण्यात्प्रकरणस्यचज्ञानीश्वरमात्रसंबंधित्वात्पूर्वत्रकारणत्ववदस्याप्युपपत्तेः । केचित्तु सुखशब्देनपारम्यविशेषितसुखपरेणानेवंरूपाज्ञसुखानभिधायिनाद्वयमात्रसाधा

अत्रच“कथंनुतद्विजानीया”मितिप्रार्थनंज्ञानिनः । तत्प्रार्थनस्यतत्सुखमिवेश्वरोपितंप्रतिप्रियत्वाद्विषयः । परमंसुखमितिसमभिव्याहृतसुखशब्दश्चोभयसाधारणः । ततश्चानुकूल्येनगृह्यमाणत्वमीश्वरज्ञानिसुखयोःसाधारणमितिज्ञेयं ।

गु०नुकूल्यस्यसाक्षादेवोभयत्रप्रसिद्धत्वसंभवेपिसुखशब्दप्रवृत्त्यापिसाधारण्यस्यसत्त्वादित्यभिप्रायेणसर्वेषामपिस्वसुखस्यैवानुकूल्येनगृह्यमाणत्वेनपरमात्मनश्चसुखत्वाभावेनकथंतस्यानुकूल्येनगृह्यमाणत्वमित्यतस्तदुपपादयति ॥ **अत्रचेति** ॥ **तत्प्रार्थनस्येति** ॥ ज्ञानार्थिप्रार्थनस्येत्यर्थः । टीकोक्तंसुखशब्दप्रवृत्त्यासाधारण्यमप्याह

SGDF
Sri Gargeshwari Digital Foundation

प्र० रण्यं । अतएव “परमंसुखमितिसमभिव्याहृतसुखशब्दश्चे”त्युक्तमित्याहुः ॥ अनंतरेति ॥ पूर्वत्र “तस्मिन्यदंत”रितितच्छब्दस्यसन्नि
हितत्यागेनव्यवहितपरत्वायोगवदिहापिसन्निहितज्ञानिसुखत्यागेनव्यवहितेश्वरपरत्वायोगइतिपूर्वन्यायेनवा “एषआत्मे”त्येतच्छब्दस्यप्रकृत
ज्योतिःपरत्वेपिविधेयात्मापेक्षयापुँल्लिंगत्वेपीहतदेतच्छब्दयोर्मध्य एकस्योद्देशकत्वावश्यंभावेनद्वयोर्नपुंसकत्वायोगादितिपूर्ववैषम्येणवेत्यग्रेस्पष्ट
मितिभावः । तथाचापवादिकीवाप्रत्युदाहरणरूपावेत्यर्थः । “अदृश्यत्वादय”इतिभाष्यादितुफलपरमितिभावः । एतेनयदुक्तंकल्पतरौ
“पूर्वमेतंत्वेवतइत्येतच्छब्दस्यप्रकृतार्थत्वाद्दहरस्यजीवतानिरासि”इति । तदसाधु । तत्रेत्यादौप्रकृतार्थत्वानियमादितिशंकानिरासात्संगतिरिति
तदयुक्तमितिसूचितं । तन्मते “तस्मिन्यदंत”रित्यत्रपूर्ववाक्यएव “ब्रह्मपुरेजीवदेहे”इत्यर्थोक्त्याऽप्रकृतस्यापिब्रह्मणो “यदंतस्तदन्वेष्टव्य”

अनंतरसंगतिस्तुपूर्वाधिकरणन्यायेनतद्वैषम्येणवापूर्वपक्षोत्थानात्। अत्र “कथंनुतद्विजानीयांकिमुभातिनभातिवे”ति

प्र०मित्यत्रयच्छब्दार्थत्वस्यतस्मिन्नित्यस्यसमीपप्रकृतदहराकाशपरत्वानियमस्यस्वीकारेणैतच्छंकायाःप्रागेवनिरसनीयत्वेनपुनरिहतथाशंकोत्था
नायोगादिति । विषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ “हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातन”मित्युपक्रम्य “एकोवशीसर्वभूतांतरात्माएकं
रूपंबहुधायःकरोति । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषां । नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान् ।
तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिश्शाश्वतीनेतरेषां । तदेतदितिमन्यंतेऽनिर्देश्यंपरमंसुखं । कथंनुतद्विजानीयांकिमुभातिनभातिवा ।
नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः । तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाती”तिपंचमखंडगतवाक्यस्थमा

SGDF
Sri Gargeshwari Digital Foundation

प्र० नुकूल्येनगृह्यमाणंविषयइत्यर्थः ॥ **काठकेति** ॥ अन्यगतंवाक्यंविषयइत्येतन्निरसिष्यतइतिभावः ॥ **तच्छब्दादिकमिति** ॥ आदिपदे नैतच्छब्दस्तत्समानाधिकरणपरमसुखपदंचगृह्यते । "कथंनुतद्विजानीया"मित्यत्रतच्छब्दस्य "तदेत"दितिपूर्ववाक्योक्तपरामर्शकत्वंसिद्ध मितिपूर्ववाक्यमेवकिंपरमितिचिंतितं । तथाचवक्ष्यति "तद्विजानीयामितितच्छब्देने"त्यादि । अतः "तदेतदितिमन्यंते कथंनुतद्विजानी यामिति तेषांसुखंशाश्वतमित्युक्तज्ञानिसुखग्रहणमितिविपरीतश्रुतिभ्रम"इतिन्यायविवरणविरोधशंकानवकाशः ॥ **सन्निहितेति** ॥ तेषांसु खमितिवाक्येनेत्यर्थः ॥ **व्यवहितेति** ॥ एकोवशीतिवाक्योक्तेश्वरेत्यर्थः । यद्यप्यत्र "तेषांसुख"मितिवाक्यात् "नित्योनित्याना"मिती

काठकोक्तमानुकूल्येनगृह्यमाणंकिंज्ञानिसुखंकिंवाब्रह्मेतिचिंता । तदर्थं "तदेतदितिमन्यंत"इतिपूर्ववाक्यस्थंत च्छब्दादिकंकिंसन्निहितज्ञानिसुखपरंकिंवाव्यवहितेश्वरपरमिति । तदर्थंसन्निहितपरत्वे "तमेवभांतमनुभाती" त्यनुकृतिप्रतिपादकमुत्तरवाक्यंनविरुध्यत उतविरुध्यतइति । तदर्थंतत्स्थस्तमेवेतितच्छब्दः किंपुँल्लिंगानुसारा

प्र० श्वरवाक्यस्यपरत्वादीश्वरस्सन्निहितः । ज्ञानिसुखंतुतदपेक्षयाव्यवहितं । तथापि "नित्योनित्याना"मित्यस्मादपिपरस्मिन् "तमात्मस्थंयेनु पश्यंतिधीरास्तेषांशांति"रित्यत्रप्रकृतेनज्ञानिफलेनशांतिशब्दार्थेनसुखेन "नित्योनित्याना"मितिवाक्योक्तस्यव्यवहितत्वादितिपूर्वपक्ष्यभिप्राया देवमुक्तं । वक्ष्यतिचैतद्यद्वेत्यादिनासिद्धांते ॥ **अनुकृतीति** ॥ सूर्यादितेजसांभगवत्कृत्यनुसारिकृतिमत्त्वप्रतिपादकं "तमेवभांतमनुभाती" तिवाक्यमित्यर्थः । अनुभानप्रतिपादकमितिवक्तव्येऽनुकृतीतिवचनंतु श्रुतौभानस्यकृतिमात्रोपलक्षणतयातमेवकुर्वंतमनुकरोतिसर्वमितिश्रु त्यर्थमभिप्रेत्यसूत्रेऽनुकृतेरित्युक्तत्वात्सौत्रहेत्वनुवादायेतिध्येयं । तत्स्थः उत्तरवाक्यस्थः । नतत्रसूर्योभातीत्यस्यसूर्याद्यप्राकाश्यत्वरूपलिंग ॥ ६३७ ॥

प्र०प्रतिपादकवाक्यस्यादित्वेपि तस्यपुन्नपुंसकसाधारण्याद्वक्ष्यमाणदिशायुक्तिसूचनायसूत्रोपात्तपुंल्लिंगोपेतंतमित्येतदेवगृहीतं ॥ **व्यवहितेति**॥ एकोवशीतिवाक्योक्तेत्यर्थः ॥ **सन्निहितेति** ॥ कथंनुतदितिवाक्योक्तेत्यर्थः । अस्पष्टत्वात्फलफलिभावंस्वयमेवाह ॥ **यद्वाद्यइति** ॥ उत्तरवाक्यगततच्छब्दोव्यवहितेश्वरपरइतिपक्षइत्यर्थः ॥ **साधकसद्भावादिति** ॥ सन्निहितपरत्वरूपेत्यर्थः ॥ **द्वितीयइति** ॥ आनुकू ल्येनगृह्यमाणपरइत्यर्थः । पूर्वपक्षटीकायांयथाभाष्यं "तद्विजानीया"मितितच्छब्दस्यप्रकृतसुखपरत्वमनुक्त्वा "तदेत"दितिवाक्यस्यप्रकृत ज्ञानिसुखपरत्वसमर्थनात् "तदेत"दित्यादिवक्ष्यमाणन्यायविवरणरीत्या "तद्विजानीया"मितितच्छब्दस्यप्रकृतसुखपरत्वोक्तिपूर्वंतांविवृणोति ॥ **इदमित्यादिना** ॥ आद्यचिंताहेतुव्यक्तिपूर्वंद्वितीयचिंतांप्रपंचयन् "नचसुखश्रुतिर्विष्णावपिसावकाशे"त्यादिटीकांसोपपत्तिकंव्यनक्ति

व्यवहितप्रकृतेश्वरपरःकिंवाप्रातिपदिकानुसारात्सन्निहितप्रकृतानुकूलगृह्यमाणपरइति । यद्वाद्यस्तदानुकृतेरानुकू ल्येनगृह्यमाणनिष्ठत्वाभावेनब्रह्मपक्षेसाधकाभावात् "तदेत"दितितच्छब्दादेःसन्निहितज्ञानिसुखपरत्वत्यागेकारणा भावेनज्ञानिसुखपक्षेसाधकसद्भावाच्चानुकूल्येनगृह्यमाणंज्ञानिसुखमेव । यदितुद्वितीयस्तदाऽनुकृतेरानुकूल्येनगृह्य माणनिष्ठत्वेनब्रह्मपक्षेसाधकसद्भावात्तेनैवकारणेन "तदेत"दितितच्छब्दादेःसन्निहितज्ञानिसुखपरत्वाभावेनज्ञानि सुखपक्षेसाधकाभावाच्चानुकूल्येनगृह्यमाणंब्रह्मैव । पूर्वपक्षस्तु । इदमानुकूल्येनगृह्यमाणंज्ञानिसुखमेव । नतुब्रह्म । तद्विजानीयामितितच्छब्देन "तदेतदितिमन्यंतेऽनिर्देश्यं परमंसुख"मिति प्रकृतसुखपरामर्शात् ।

गु० ॥ **परमंसुखमितीति** ॥ **पूर्वाधिकरणन्यायेनेति** ॥ तस्मिन्यदंतरितितच्छब्देनसन्निहितदहरस्यैवपरामर्शः । नतुव्यवहितपुंडरीकस्येतिपूर्वाधिकरणन्यायेनैव

SGDF
Foundation

प्र० ॥ नचेति ॥ तेवक्ष्यामीतिनचिकेतसंप्रतियमवाक्यं । यथाऽत्तेत्यत्र “नैवेहकिंचनाग्रआसी”दितिब्रह्मप्रकरणात्सर्वात्तृत्वलिंगाच्चादितिर्ब्रह्म तद्वदितिभावः । श्रुतेरितिजात्येकवचनं । श्रुत्योरित्यर्थः । शब्दादेवेत्यत्रवक्ष्यमाणदिशाजात्याप्राबल्यादित्यर्थः । अस्तुश्रुतिरीश्वरपरेत्यतआह **॥ तस्यचेति ॥** सर्वनाम्नइत्यर्थः । एकंरूपमित्याद्यंशोक्तिः । सावकाशत्वशंकोत्थानाय **॥ ज्ञानिसुखपरत्वादिति ॥** एतेन “तदेत”दित्यस्यज्ञानिसुखपरत्वेपितद्वाक्योक्तमपरामृश्य “तद्विजानीया”मितितच्छब्दःप्राकरणिकब्रह्मपरएवकिंनस्यादितिचोद्यंप्रत्युक्तं । दुर्बलात्प्रकरणात्सर्वनामश्रुतेस्सन्निहितपरत्वस्वारस्यभंगायोगादिति । ननुश्रुतिस्सावकाशाचेल्लिंगप्रकरणाभ्यांबाधार्हैवादित्यादिश्रुतिरिवेत्यतस्सर्वनामश्रुतिसावकाशत्वशंकानिरासपरां “नचवाच्यंभगवतोपी”त्यादिटीकांव्यनक्ति **॥ नचतत्रेति ॥** “नपुंसकसुखशब्देनाप्रकृतस्यतदि”त्यादि

नच “हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातन”मितिब्रह्मप्रकरणादनिर्देश्यत्वलिंगाच्चतत्सुखंब्रह्मेतिवाच्यं। प्रकरणाल्लिंगाच्च “तदेत”दितिसर्वनामश्रुतेर्बलवत्त्वात्। तस्यच “एकंरूपंबहुधायःकरोति । तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषा”मितिप्रकृतज्ञानिसुखपरत्वात्। नचतत्रेश्वरोपिप्रकृतइतिवाच्यं। तस्यपुँल्लिंगेनप्रकृततयातत्परत्वेतदेतच्छब्दयोःपुँल्लिंगतापातात्।

गु० प्रकृतेपितदेतदित्यत्रसन्निहितज्ञानिसुखस्यैवपरामर्शः । नतुव्यवहितप्रकृतेश्वरस्येतिपूर्वाधिकरणन्यायेनपूर्वपक्षोत्थानादित्यर्थः **॥ वैषम्येणवेति ॥** पूर्वाधिकरणे परज्योतिश्शब्देनप्रकृतस्यब्रह्मणःपुँल्लिंगेन “एष”इत्येतच्छब्देनपरामर्शसंभवेपिप्रकृतेतदेतच्छब्दयोर्मध्येएकस्योद्देश्यत्वावश्यंभावेनद्वयोर्नपुंसकलिंगत्वायोगेनविधेयसुखापेक्षयानपुंसकलिंगत्वायोगेनेतिवैषम्येणेत्यर्थः **॥ नचतत्रेति ॥** एकंरूपंबहुधायःकरोति । तमित्यनेनेश्वरःप्रकृतइत्यर्थः । पूर्वाधिकरणन्यायेनपूर्वपक्षादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० परामर्शायोगा" दितिटीकायांनपुंसकेत्युक्तिसूचितांपुँल्लिंगत्वापातादितियुक्तिमुक्त्वा "संभवत्समीपे" तिवाक्योक्तयुक्तिमाह ॥ पूर्वाधिकरण इति ॥ एतेनपूर्वाधिकरणन्यायेनेतिपूर्वोक्तंविवृतंबोध्यं । ईश्वरोपिनित्योनित्यानामितिसन्निहितइतिप्रत्युक्तंचिंताव्याख्यानप्रस्तावे । टीकास्थसुखपदसूचितांयुक्तिमाह ॥ तेषामिति ॥ टीकायां "तदित्यादिपरामर्शायोगा" दित्यादिपदोक्तिस्वारस्यंशंकापूर्वंव्यनक्ति ॥ नचपूर्वेति ॥ एतेनपूर्ववैषम्येणवेतिप्रागुक्तंविवृतंबोध्यं । सिद्धांत्यभिमतलिंगनिर्वाहमाशंक्यनिराह ॥ यदिति ॥ प्रास्माअग्निमिति ॥ विवृतमधिक

पूर्वाधिकरणे "तस्मिन्यदंत" रित्यत्रतच्छब्दस्यसन्निहिताकाशत्यागेनपुंडरीकपरत्वायोगवदिहापिसन्निहितज्ञानिसुखत्यागेनव्यवहितेश्वरपरत्वायोगाच्च । तेषांसुखमितिसुखशब्देनप्रकृतज्ञानिसुखस्यैव "परमंसुख" मित्यनेनप्रत्यभिज्ञानाच्च । नचपूर्वाधिकरणेविधेयात्मापेक्षयैतच्छब्दस्यपुँल्लिंगतावदिहापिविधेयसुखापेक्षयानपुंसकलिंगत्वमितियुक्तं । तदेतच्छब्दयोर्मध्यएकस्योद्देशकत्वावश्यंभावेनद्वयोर्नपुंसकलिंगत्वायोगात् । अतएवटीकायां "तदित्यादी" त्यादिशब्दः । यदनिर्देश्यंपरमंसुखंतदेतत्परमात्मनोरूपमितिनपुंसकलिंगनिर्वाहेच रूपशब्दाध्याहारःस्यात् । अध्याहारेणलिंगनिर्वाहेच "प्रास्माअग्नि" मित्यत्रपशुशब्दाध्याहारेणास्मैशब्दस्यपुँल्लिंगनिर्वाहान्नमेषीपरत्वंस्यात् । तच्चनेत्युक्तंनवमे ।

गु० त्युक्तं । तदुपपादयति ॥ पूर्वाधिकरणइति ॥ तेषांसुखमिति ॥ यद्यप्यत्रतेषांसुखंनेतरेषामितिप्रकृतज्ञानिसुखापेक्षयापिनित्योनित्यानामितीश्वरस्यैवसन्निहितत्वेनसन्निहितसुखपरामर्शइत्यनुपपन्नं । तथापिनित्योनित्यानामित्येतदपिपरस्मिन्तमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषामित्यत्रप्रकृतज्ञानफलेनशांतिशब्दार्थेनसुखेनतदेतदितिमन्यंतेनिर्देश्यंपरमंसुखमित्यनेनप्रत्यभिज्ञानादित्यत्रैवतात्पर्यान्नदोषः । वैषम्येणपूर्वपक्षंदर्शयितुंसाम्यंशंकते ॥ नचेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० रणशरीरमाकाशाधिकरणे । तथाचयदिरूपशब्दाध्याहारेणनपुंसकलिंगनिर्वाहस्तदा "प्रास्माअग्निंभरते"तिवाक्येपशुशब्दाध्याहारेणप्रास्मै पशवइतिमेष्यामपिलिंगनिर्वाहसंभवेनाध्याहारनिरासपराधानेष्वधिकरणसिद्धांतहानिःस्यादित्यर्थः । निरवकाशलिंगबलेनश्रुतेस्सन्निहितपर त्वत्यागोयुक्तइत्याशंकानिरासायद्वितीयचिंताहेतुत्वंव्यंजयंस्तृतीयचिंतांसिद्धांतहेत्वाशंकासमाधानाभ्यांविशदयति ॥ **नचेति** ॥ **ईश्वरपरत येति** ॥ अतएवसिद्धांतटीकायां "नचमंतव्य"मित्यादिनैतदाशंक्यसमाधीयतइतिभावः । तमेवेतितच्छब्दस्येश्वरपरत्वेतत्रतस्येतितच्छब्द योरपितथात्वमितिभावेनतमेवेतितच्छब्दस्येश्वरपरतयेत्युक्तं । भाष्यविवरणपरापिटीकान्यायविवरणपरापीतिभावेनाह ॥ **तदेतदिति** ॥ **भाष्येचेति** ॥ सिद्धांतीयभाष्यइत्यर्थः । तथाचतत्प्रतिभटपूर्वपक्षेज्ञानिसुखमेवानिर्देश्यसुखमितिवक्तव्यमितिभावः । अतोज्ञानिसुखस्यै

नचानुकृत्यादिहेतुभिरानुकूल्येनगृह्यमाणस्यब्रह्मता । अनुकृतिवाक्यस्थस्यतमेवेतित च्छब्दस्यपुंलिंगत्वेनेश्वरपरतयाऽऽनुकूल्येनगृह्यमाणपरत्वाभावात् । तदेतदभिप्रेत्यो क्तंन्यायविवरणे "तदेतदितिमन्यंते । कथंनुतद्विजानीयामिति । तेषांसुखंशाश्व तमित्युक्तज्ञानिसुखपरामर्श"इति । भाष्येच "परमात्मैवानिर्देश्यसुखरूप"इति । ॥ ६३९ ॥

गु० **नचानुकृत्यादिहेतुभिरिति** ॥ सूर्यादिप्रकाशनियामकत्वमनुकृतिशब्दार्थः । आदिपदेनसर्वजगत्प्रकाशकत्वसूर्याद्यप्रकाश्यत्वयोर्ग्रहः । सन्निहितपरप्रा तिपदिकानुरोधात्तदेतदित्यादौसन्निहितपरतच्छब्दप्रातिपदिकानुरोधादित्यर्थः ॥ **प्रत्ययार्थेति** ॥ प्रत्ययार्थभूतनपुंसकलिंगानुसारादित्यर्थः । प्रथमसूत्रसूचि

प्र० वेत्याद्युपसंहारटीकांव्यनक्ति ॥ **तस्मादिति** ॥ बाधकाभावादित्यर्थः । एतेनचिंतास्थपूर्वपक्षकोटीनांहेतुहेतुमद्भावोप्युपसंहारेणविवृतः । अनुकृतेस्तस्यचेतिसूत्रोपात्तश्रौतोपसंहारस्थलिंगैश्श्रौतोपसंहारस्थानेकतच्छब्दप्रातिपदिकस्वारस्यानुरोधेनचानुकूल्येनगृह्यमाणोविष्णुरेवेति त देतदितिसर्वनाम्नोव्यवहितेश्वरपरत्वंन्याय्यमितिभावेनसिद्धांतटीकांविवृण्वन् "तमेवभांतमनुभातिसर्वमितिवाक्यशेष"इत्यादिटीकांतावद्वि वृणोति ॥ **उपसंहारइति** ॥ टीकायामाद्यसूत्रेयथाभाष्यंलिंगद्वयमात्रोपादानेपिद्वितीयसूत्रे "किंचनतत्रसूर्योभाती"त्याद्युक्तेर्बाधसौकर्या यलिंगत्रयमप्येकत्रैवोक्तं ॥ **श्रुत्यादिभिरिति** ॥ "अहंतत्तेजोरश्मीत् नतद्भासयतेसूर्यः यदादित्यगतंतेज"इत्यादिभिरित्यर्थः । श्रुतौ तेजः सर्वजगत्प्रकाशकं । रश्मीत् रश्मिप्रेरकमितिसर्वजगत्प्रकाशकत्वसूर्यादिप्रकाशहेतुत्वयोरुक्त्यातयोश्श्रुत्यंतरसिद्धत्वेपिसूर्याद्यप्रकाश्यत्वस्यश्रु त्यंतरसिद्धत्वंभाष्येऽनुक्तत्वादूह्यं । स्मृतौ "मामक"मित्यस्यमदधीनंमदीयंचेतिव्याख्यानेनलिंगद्वयस्यस्मृतिसिद्धब्रह्मधर्मत्वं, "नतद्भासयत"

तस्मात्तदेतदित्यादौतत्पदंसन्निहितपरप्रातिपदिकानुरोधात्प्रत्ययार्थभूतलिंगानुसारात्समभिव्याहृतसुखपदा नुसाराच्चसन्निहितज्ञानिसुखपरमिति आनुकूल्येनगृह्यमाणत्वमपितस्यैवेति । सिद्धांतस्तु । उपसंहारे "नतत्रसूर्योभातिनचंद्रतारक"मितिसूर्याद्यप्रकाश्यत्वं "तमेवभांतमनुभातिसर्व"मितिसूर्यादिप्रकाशहेतुत्वं "तस्यभासासर्वमिदंविभाती"तिसर्वजगत्प्रकाशकत्वंचोक्तं । तानिचभाष्योक्तश्रुत्यादिभिर्ब्रह्मणएव ।

गु० तान्हेतूनाह ॥ **सिद्धांतस्त्विति** ॥ यद्यप्यत्रसूत्रेप्रथमतउक्तत्वात्सूर्यादिप्रकाशनियामकत्वस्यैववक्तव्यत्वाच्चशब्दोक्तस्यसूर्याद्यप्रकाश्यत्वस्यप्रथममुक्तिरनुपपन्ना। तथापिविषयवाक्येसूर्याद्यप्रकाश्यत्वस्यप्रथममुक्तत्वात्तत्प्रतिपादकवाक्योदाहरणंयुक्तमेवेति ॥ **भाष्योक्तश्रुत्यादिभिरिति** ॥ अहंतत्तेजोरश्मीत् यदादित्यगतं

SGDF Sri Gargeshwari Digital Foundation

प्र० इत्यनेनचसूर्याद्यप्रकाश्यत्वस्यस्मृतिसिद्धंतथात्वमितिध्येयं । ननूक्तंनैतान्यानुकूल्येनगृह्यमाणनिष्ठानीति । तत्राह ॥ नतत्रेति ॥ "नचमंतव्य"मित्यादिटीकांविवृण्वन्पूर्वोक्तपुंल्लिंगविरोधशंकांविस्तरेणानूद्यापाकरोति ॥ नन्विति ॥ नन्वियंशंकापूर्वपक्षावसरएवकुतोनसम्यगुपपादितेतिचेन्मैवं । नतत्रेत्यादेस्सन्निहितपरत्वानवकाशत्वयोरुक्त्यैतद्बाधकत्वेनोपपादनस्यात्रैवसंगतत्वात् अनेकप्रातिपदिकभंगादिरूपदूषणस्यसुखबोधत्वाच्चात्रोपपादितेति । टीकोक्तंदुर्ज्ञेयत्वप्रत्यभिज्ञानमुपलक्षणमितिभावेनाह ॥ गुणेति ॥ न्यायसिद्धोयमर्थइत्याह ॥ पाशेति ॥ उक्तंपाशाधिकरणशरीरंगुहामित्यत्र । अत्रयद्यपिप्रधानभूतकर्मकारकरूपप्रत्ययार्थानुग्रहायसंख्यानादरोनप्रातिपदिकस्वारस्यानुग्रहायेत्यपि

"नतत्रसूर्य"इत्यादिनाच "कथंनुतद्विजानीया"मित्यादिसन्निहितवाक्यप्रकृतमानुकूल्येनगृह्यमाणमेवोच्यत इत्यानुकूल्येनगृह्यमाणत्वंब्रह्मणएव । ननुयद्यपि "नित्योनित्याना"मित्यादिकमीश्वरवाक्यं "नतत्रसूर्योभाती"त्यस्यव्यवहितं । "कथंनुतद्विजानीया"मित्यादिकंतुसन्निहितं । तथापि "तमेवभांत"मित्यत्रतमितिशब्दस्तावत्पुँल्लिंगत्वात्प्रकृतेश्वरपरएवेतितदेकार्थत्वाय "नतत्रसूर्यः तस्यभासे"त्यादिकमपितत्परमेवेतिसूर्यादिप्रकाशहेतुत्वादिकंनानुकूल्येनगृह्यमाणगतमितिचेन्न । "किमुभाति नभातिवे"त्यत्रोक्तस्यदुर्ज्ञेयस्यैव "नतत्रसूर्योभाती"त्यत्रप्रत्यभिज्ञानात् । गुणभूतप्रत्ययार्थलिंगानुग्रहायप्रधानभूतानां तत्र तमेव तस्ये त्यनेकेषांप्रातिपदिकानांस्वतःप्राप्तसन्निहितपरत्वत्यागायोगाच्च । पाशमंत्रादौहिप्रातिपदिकानुसारेणप्रत्ययास्वारस्यमाश्रितं । ॥ ६४० ॥

गु० तेजः नतद्भासयतेसूर्यइत्यादिश्रुतिस्मृतिभिरित्यर्थः । गुणभूतप्रत्ययार्थलिंगानुग्रहायप्रधानभूतस्यतत्रेत्यादिप्रातिपदिकस्यस्वतःप्राप्तसन्निहितपरत्वत्यागेबाधकमाह ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० सुवचं । तथापि "प्रकृत्यर्थस्यपाशस्यविभक्त्यर्थस्यकर्मणः । उभयोःप्रकृतेभावान्नोत्कर्षोस्यावकल्पत" इत्युक्तत्वादेवमुक्तं । अतएवोदाहरणांतरं ॥ तथेति ॥ चतुर्थे "अभिघारणेविप्रकर्षादनुयाजवत्पात्रभेदस्स्यात्" इत्याद्यपादीयत्रयोदशाधिकरणे "प्रयाजशेषेणहवींष्यभिघारयती" तिवाजपेयगतंवाक्यमुदाहृत्य किंहविस्संस्कारार्थमभिघारणमुतप्रयाजशेषप्रतिपत्तिरितिसंशये उपयोक्ष्यमाणसंस्कारस्योपयुक्तसंस्कारापेक्षयाऽभ्यर्हितत्वाद्द्वितीयातृतीयाभ्यांप्रधानोपसर्जनभावावगमाच्चन्यायतश्शब्दतश्चहविस्संस्कारार्थमितिप्राप्ते शेषस्यप्रतिपत्त्यपेक्षत्वात्तादर्थ्यादभिघारणंदृष्टार्थं । हविस्संस्कारोऽनपेक्षितोऽदृष्टःकल्प्येत । नचदृष्टेसत्यदृष्टकल्पनंन्याय्यमितिप्रयाजशेषंहविष्षुक्षारयेदितिवाक्यार्थवर्णनेनप्रतिपत्तिरितिसिद्धांतितं । तत्रयथाप्रातिपदिकस्वारस्यानुग्रहायप्रत्ययस्वारस्यत्यागः तथात्रापीत्यर्थः । अत्रवक्तव्योविशेषो "नसंख्योपसंग्रहा" दित्यत्रवक्ष्यते । उक्तंसंगृह्णाति ॥ **एवंचेति** ॥ **अत्रेति** ॥ तमितिशब्दइत्यर्थः । अभ्युपेत्येदमुक्तं । वस्तुतस्तु "यस्यैवंसुखंरूपंतत्रेतिवाक्ययोजनोपपत्तेश्चे" तिटीकोक्तरीत्याप्रत्ययार्थास्वारस्यमपिनेत्याह ॥ **उपपत्स्येतेचेति** ॥ **पुँल्लिंगत्वेति** ॥ रूपशब्दापेक्षयामध्येतदि

तथा "प्रयाजशेषेणहवींष्यभिघारये" दित्यादौप्रयाजशेषप्रातिपदिकस्वारस्यायतृतीयाव्यत्ययेनद्वितीयार्थास्वीकृता । नतुतृतीयानुसारेणप्रातिपदिकस्यलक्षणा । एवंच प्रयाजशेषेणेतिवत्प्रकृत्यर्थानुसारतः । प्रत्ययस्यस्वरसताभंगएवात्रयुज्यते ॥ १ ॥

उपपत्स्येतेचसिद्धांतरीत्या "तदेत" दित्यादेः "कथंनुत" दित्यादेश्चेश्वररूपैकार्थपरत्वेतमित्यस्यपुँल्लिंगत्वसन्निहितपरत्वे ।

गु० पाशमंत्रादाविति ॥ अन्यथाअदितिःपाशानित्यत्रापिप्रत्ययार्थभूतबहुत्वानुसारेणपाशप्रातिपदिकस्यास्वारस्यंस्यादितिभावः ॥**तथेति**॥ प्रयाजशेषेणेत्यत्रतृतीययाप्रयाजशेषस्यकरणत्वस्यबोधितत्वेनप्रत्ययार्थभूतकरणत्वानुसरणेप्रातिपदिकस्यलक्षणापत्त्यातस्याश्चानंगीकृतत्वेन प्रयाजशब्दप्रातिपदिकस्वारस्यार्थं तृतीयायाव्यत्यये

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यादेर्नपुंसकत्वेपि "एकोवशी"त्यादिनासर्वत्रेश्वरस्यपुँल्लिंगशब्दैःप्रकृतत्वेनतत्परामर्शितयापुंस्त्वमानुकूल्येनगृह्यमाणपरत्वाच्चसन्निहितपरत्वंचेत्यर्थः । स्यादेवं यदितदित्यादेरीश्वरपरत्वमेवभवेत्तदाटीकारीत्यायस्येश्वरस्यैवंसुखंरूपं तत्रतमित्यादौपुँल्लिंगत्वोपपत्तिः ।तदेवायुक्तं । व्यवहितत्वान्नपुंसकलिंगविरोधात्सुखश्रुतिकृतप्रत्यभिज्ञाविरोधाच्चेति । तथातमित्यस्यव्यवहितेश्वरपरत्वेपुंस्त्वोपपत्तेश्चोक्तत्वादित्यतो "नचवक्तव्यंसमीपस्थपरामर्शंविहायकथंचिदेवदूरस्थग्रहणेकारणाभावइती"त्यादिटीकोक्तमेवविचारपूर्वंसाधयति ॥ **एवंचेति** ॥ यतइत्यस्यश्लोकेनान्वयः । कथमित्याक्षेपः । यतस्तद्विरुद्धंनपश्यति ततोयुक्तइतिपूर्वेणान्वयः । उपसंहारबलवत्त्वंतद्बीजंचसमन्वयसूत्रएवप्रतिपादितं । आश्रितंचतत्प्राबल्यं "प्रथमेऽश्रवणा"दित्यत्रतृतीयाद्यपादइतिभावः । श्लोकंव्याचष्टे ॥ **नहीति** ॥ **गृहीतायाइति** ॥ ताश्चभगवद्धर्माणांसूर्याद्यप्रकाश्यत्वादीनांधर्मिसमर्पिकाइतिभावः । दूरोक्तग्रहणेबिभ्यतोतिदूरोक्तग्रहणेकथंनभीति"रितिटीकोक्तंयुक्तयंतरमितिभावेन्नतव्य

एवंच "कथंनुत"दित्यादेःसन्निहितज्ञानिसुखपरत्वाय "तमेवभांत"मित्यादेर्व्यवहितेश्वरपरत्वंवा "तमेवभांत"मित्यादेःसन्निहितानुकूलगृह्यमाणपरत्वाय "कथंनुत"दित्यादेर्व्यवहितेश्वरपरत्वंवेतिविशये यद्यप्याद्यपक्षेतदित्यादेःसन्निहितपरत्वंनपुंसकलिंगत्वं तमित्यस्यपुँल्लिंगत्वंचयुज्यते । तथापिद्वितीयपक्षएवयुक्तः । यतः बलवानुपसंहारस्तद्वश्यातदितिश्रुतिः । कथंपश्येत्तद्विरुद्धपूर्ववाक्यावबोधितं ॥ १ ॥ नहि "तदेत"दित्यादिश्रुतेर्बलवदुपसंहारस्थाभिः तत्र तमेव तस्ये त्यनेकप्रातिपदिकश्रुतिभिर्गृहीतायास्तदविरुद्धपूर्वप्रकृतेश्वरपरत्वेसंभवतितद्विरुद्धपूर्वप्रकृतज्ञानिसुखपरत्वंयुक्तं । ॥ ६४१ ॥

गु०नद्वितीयार्थत्वंबदतांमीमांसकानामपिप्रातिपदिकस्वारस्यार्थप्रत्ययास्वारस्यंसंप्रतिपन्नमित्यर्थः । दूरोक्तग्रहणेबिभ्यतोतिदूरोक्तग्रहणेकथंनभीतिरितिटीकावाक्यमप्रती

प्र० नक्ति ॥ **किंचेति** ॥ ननूक्तंतदित्यादेरीश्वरपरत्वेनपुंसकलिंगविरोधःव्यवहितपरामर्शः सुखश्रुतिप्रत्यभिज्ञाविरोधश्चेत्यतस्सर्वंक्रमेणपरिजिहीर्षुः "नचपरमात्मनोनपुंसकसुखशब्देनाप्रकृतत्वात्तदेतदितिपरामर्शोयोग"इतिशंकाटीकार्थंतावदनूद्यस्वयमेकंसमाधितावदाह ॥ **नचेश्वरपरत्वइति** ॥ **व्यत्ययादिनेति** ॥ तमेतमितिवक्तव्येतदेतदितिछांदसोलिंगव्यत्ययोवा "सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजाल"इति-सूत्रेणतमेतमित्यत्रसुपोलुकिसति तमेतमितिपदयोःप्रातिपदिकनिर्देशमात्रंवा स्त्रीलिंगपुँल्लिंगानुगतंसामान्यमेवनपुंसकलिंगमितिवैयाकरणोक्तमर्यादयापुँल्लिंगनिर्दिष्टस्यापिनपुंसकलिंगेनपरामर्शोयुक्तइतिवातत्संभवादित्यर्थः । व्यत्ययादिकल्पकस्यनिरवकाशवाक्यशेषस्थलिंगबहुत्वस्यसत्त्वादित्यर्थः । उक्तंच "नपुंसकमनपुंसकेनैकवच्चे"तिसूत्रकैयटे "स्थितिर्नपुंसकं साचसर्वत्रविद्यतइतिस्थितिरूपत्वेनैवस्त्रीपुंसयोर्विवक्षायांसिद्धस्त्रीपुंसयोर्नपुंसकप्रयोग"इति । इदानीं "यदनिर्देश्यंपरमंसुख"मित्यादिटीकोक्तमेवसमाधिंव्यनक्ति ॥ **अपिचेति** ॥ "यतो

किंच "नतत्रे"त्यस्य "एकंरूपंबहुधायःकरोती"त्येतदतिदूरस्थं । तदेतदित्यस्यतुकिंचिद्दूरस्थं । तत्रतदेतदित्यस्यकिंचिद्दूरस्थपरत्वाद्बिभ्यतोनतत्रेत्यादेरतिव्यवहितपरत्वात्कथंनभीतिः । नचेश्वरपरत्वेतदेतदितिनपुंसकलिंगायोगः । व्यत्ययादिनापितत्संभवात् । अपिचविनैवव्यत्ययादिकंलिंगंयुक्तं । "यतोवाचोनिवर्तंते एषोस्यपरमआनंद"इत्यादौप्रसिद्धंयदनिर्देश्यंपरमंसुखंतदेतद्ब्रह्मणोरूपमितितच्छब्दस्यसुखपरत्वात् । एतच्छब्दस्यच "एकंरूपंबहुधायःकरोती"तिप्रकृतेश्वररूपपरत्वात् ।

गु० तेर्व्याचष्टे ॥ **किंचेति** ॥ अस्मिन्पक्षेलिंगव्यत्ययोभवतीतीममेवास्वरसंदृष्ट्वापक्षांतरमाह ॥ **अपिचेति** ॥ अनेनतदेतच्छब्दयोर्द्वयोर्मध्येएकस्योद्देश्यत्वावश्यंभावेनद्वयोर्नपुंसकलिंगत्वायोगइतिपरिहृतंभवति । नन्वेवमपिरूपशब्दाध्याहारोदोषइत्यतआह ॥ **एकंरूपंबहुधायःकरोतीतिप्रकृतेश्वररूपपरत्वादिति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० वाचोनिवर्तंते । अप्राप्यमनसासह । आनंदंब्रह्मणोविद्वा"नित्यादितैत्तिरीयेसुखस्यवागाद्यगोचरत्वेनानिर्देश्यत्वंश्रूयते । वाजसनेये "एष ब्रह्मलोकस्सम्राडितिहोवाचे"तिप्रकृत्य "एषपरमआनंदः । एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंती"तिब्रह्मानंदस्यपरमत्वंसिद्धमिति तदनुवादोयदनिर्देश्यमितिटीकायांदर्शितइत्यर्थः । "अदृष्टमव्यवहार्यमव्यपदेश्यंसुखंज्ञानमोजोबलमितिब्रह्मणस्तस्माद्ब्रह्मेत्याचक्षत"इत्यादि रादिपदार्थः । तद्दृष्टांतेनोपपादयति ॥ **एवंचयथेति** ॥ चतुर्थेध्याये "एकनिष्पत्तेस्सर्वेसमंस्या"दित्याद्यपादीयाष्टमाधिकरणे "तप्तेपय सिद्ध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिन"मित्युदाहृत्य किमामिक्षायागेनैवदध्यानयनंयुज्यतेऽथ वाजिनयागेनापीतिसंशये वैश्वदे

एवंचयथा "तप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षे"त्यत्र "सर्वनाम्नापरामर्शस्तस्यैवातो ऽवकल्पते"इत्युक्तत्वेनतच्छब्दस्यपयःपरामर्शकत्वेप्यामिक्षाशब्दसामानाधिकरण्यात्स्त्रीलिंगता तथेहाप्येतच्छब्दस्येश्वरपरामर्शकत्वेपिरूपशब्दसामानाधिकरण्यान्नपुंसकलिंगता ।

प्र०वयागस्यामिक्षाद्रव्यकत्वात् तस्याश्चघनीभावात् रूपभेदेनमधुराम्लादिरसभेदेनचक्षीरादन्यत्वात् तयाचदध्यानयनस्यासंयुक्तस्यैवविधानेन केवलंसामर्थ्यलिंगेनामिक्षार्थतायावक्तव्यत्वात् तादृशसामर्थ्यस्यवाजिनेपिसत्त्वादुभयप्रयुक्तमानयनमितिप्राप्ते आस्तांतावदामिक्षापदं । सावैश्वदेवीतितच्छब्दपरामृष्टस्यहविष्ट्वात्पूर्ववाक्यआनयतेर्द्विकर्मकत्वेनप्रथमेनकर्मणादध्नाद्वितीयकर्मणःपयसोव्याप्यमानत्वेनप्रधानतया पय सएवतच्छब्दपरामृष्टत्वात्पयएवदेवतासंबंधाद्धविः । तथाचमंत्रःजुषतांयुज्यंपयइतिपयएवघनीभूतमामिक्षेति आमिक्षापदंनित्यानुवादः । तत्सामानाधिकरण्यात्सेतिस्त्रीलिंगं । रसभेदादिकमन्यप्रयुक्तमितिवैश्वदेवयागप्रयुक्तंदध्यानयनमितिसिद्धांतितं । अत्रत्येनन्यायेनाष्टमस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वितीयेपादे "आमिक्षोभयभाव्यत्वादुभयविकार"स्स्यादितिचतुर्थेऽधिकरणे "पयसस्तुप्रधानत्वंतत्रकर्मसमाप्तितः। दध्नाहिनीयमानेनत देवव्याप्यतेपयः। कर्मतोपिप्रधानत्वंतस्यस्यात्संप्रदानवत्। सर्वनाम्नापरामर्शस्तस्यैवातोऽवकल्पते"इत्युक्तंशास्त्रदीपिकायां। तथाचतत्र यथापयःपरत्वेपिस्त्रीलिंगतातद्वदत्रापीत्यर्थः। नन्वेवमुद्देश्यविधेयव्यत्ययेनलिंगसमर्थनंभाष्यानुक्तं। काठकभाष्यविरुद्धंच। तत्र "तदे तदेवभगवद्रूपंपरमंसुखं। ज्ञानिसुखंतुविप्रुण्मात्र"मित्युक्तेरित्यतोयोजनांतरमेतदितिभावेनटीकोक्तयोजनस्यमूलमाह ॥ तदुक्तमिति ॥ काठकभाष्योक्तयोजनायांतदेतच्छब्दयोरर्थंवदन्नेवनपुंसकोपपत्तिमाह ॥ काठकभाष्येत्विति ॥ तदेतदित्यादेर्व्यवहितपरामर्शित्वदोषं द्वेधापरिहरति ॥ नापीत्यादिना ॥ सन्निहितत्वादिति ॥ एतेन "चेतनश्चेतनानामित्यादौपरमात्मनोपिप्रकृतत्वा"दितिटीकायांप्रकृत

तदुक्तंन्यायविवरणे "यद्ब्रह्मानिर्देश्यंसुखमितिवदंति तदेतत्स्वरूपमितिमन्यंत"इति। काठकभाष्येतु "तदेतदेवभगवद्रूपंपरमंसुख"मितिसुखंविधेयमित्युक्तं। तत्र तत् गुह्यं ब्रह्मसनातनमित्युपक्रांतमेतत् एकंरूपमितिमध्येउक्तं ब्रह्मणोरूपं परमंसुखमितितदे तच्छब्दयोर्ब्रह्मपरत्वान्नपुंसकतेतिद्रष्टव्यं। नापिव्यवहितपरत्वं। तेषांसुखमितिवाक्या दुत्तरस्मिन्। "नित्योनित्यानांचेतनश्चेतनाना"मितिवाक्यईश्वरस्यसन्निहितत्वात्।

गु० ननुचकथंज्ञानिसुखापेक्षयेश्वरस्यसन्निहितत्वं। नित्योनित्यानामित्येतस्मादुपरितने तेषांशांतिःशाश्वतीनेतरेषामितिवाक्येशांतिशब्दार्थभूतसुखस्यैवसन्निहितत्वादित्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वात्सन्निहितत्वादित्यर्थोदर्शितः । "दूरोक्तस्यापिसमीपोक्तपरित्यागेनग्रहण"मितिटीकावाक्यानुरोधेनपक्षांतरमाह ॥ अस्तुवेति ॥ कुत इत्यत "एतदुभयस्यज्ञानिसुखेऽसंभवात्परमात्मनिसंभवाद्दूरोक्तस्यापी"त्यादिटीकार्थसंगृह्यहेतुमाह ॥ सन्निकृष्टमिति ॥ श्लोके हिशब्दो हेतौ । यस्मात्तस्मान्नदोषइत्यर्थः । सन्निधितोयोग्यताबलवत्त्वंमीमांसकसंमत्याद्रढयति ॥ उक्तंहीति ॥ तृतीयस्याद्यपादे "आनंतर्यम चोदने"त्युपांत्याधिकरणेहस्तावनेनिक्ते । उलपराजिस्तृणाती"तिदर्शपूर्णमासगतं "मुष्टीकरोति । वाचंयच्छति । दीक्षितमावेदयती" तिज्योतिष्टोमगतंचवाक्यमुदाहृत्यचिंतितं । हस्तावनेजनंहस्तसंस्कारार्थं । मुष्टीकरणवाग्यमनेमनःप्रणिधानार्थे । तेनत्रयमपितावत्सामर्थ्य रूपाल्लिंगात्करिष्यमाणकर्मांगं । तत्किमनंतरयोरुलपराज्यास्तरणदीक्षितावेदनयोरेवांगमुतसर्वकर्मांगमितिसंशये तत्रानंतर्यादेकवाक्यत्वा द्वांतरप्रकरणाद्वातन्मात्रांगत्वेप्राप्ते लिंगप्रकरणाभ्यांप्राकरणिकसर्वकर्मार्थत्वप्रतीतेरानंतर्यशब्दितपाठसन्निधिरूपक्रमस्यदुर्बलत्वात्सर्वकर्मा गतेतिसिद्धांतइति । वेद्यामास्तरितुंसंपादिततृणविशेषाउलपराजयः । दीक्षितावेदनप्रकारश्चैवंश्रुतः । "अदीक्षिष्टायंब्राह्मणइतित्रिरुपांश्वाहदे वेभ्यएवैनंप्राह । त्रिरुच्चैरुभयेभ्यएवैनंदेवमनुष्येभ्यःप्राहे"ति । सूत्रार्थस्तु आनंतर्यं सन्निधानं । अचोदना निमित्तंनभवतीति । योग्य

अस्तुवा "तेषांसुख"मितिवाक्यात्पूर्वस्मिन् "एकोवशी"त्यादिव्यवहितवाक्येप्रकृतेश्वरपरामर्शः । तथापिनदोषः। सन्निकृष्ट मयोग्यंचेद्योग्यंदूरेपिसंस्थितं । गृह्यतेसन्निधानाद्धियोग्यतैवबलीयसी ॥ १ ॥ उक्तंहिजैमिनिसूत्रे "आनंतर्यमचोदने"ति । ॥ ६४३ ॥

गु० स्वरसादाह ॥ अस्तुवेति ॥ अतएवेति ॥ टीकायांव्यवधानेनोक्तेरभ्युपेत्यवादत्वादेवेत्यर्थः । अस्मिन्पक्षेसन्निधानाद्योग्यतायाःबलीयस्त्वोक्तेरमुख्यत्वंभवती

प्र० ताबलवत्त्वस्यसूत्रेऽप्रतीतेराह ॥ वार्तिकेचेति ॥ अस्त्वेवंततः किमित्यतआह ॥ अयोग्यंचेति ॥ टीकायां "एतदुभयस्यज्ञानिसुखेऽसंभ वा"दितिवाक्यशेषस्थलिंगद्वयमात्रासंभवोक्तावपि "अनिर्देश्यत्वाद्ययोगाच्चे"त्युत्तरग्रंथपर्यालोचनयाभिप्रेताननेकहेतूनाह॥ अनिर्देश्यत्वेति॥ आदिपदेनसूर्याद्यप्रकाश्यत्वजगत्प्रकाशकत्वयोर्ग्रहः । आद्यपक्षेपूर्वोत्तरटीकावाक्ययोर्विरोधमाशंक्योत्तरवाक्यस्यगतिमाह ॥ टीकाया

वार्तिकेच "यस्ययेनार्थसंबंधोदूरस्थेनापितेनसः । अर्थतोह्यसमर्थानामानंतर्यमकारण"मिति । अयोग्यं चज्ञानिसुखमनिर्देश्यत्वनिरूपपदपरमत्वसूर्यप्रकाशहेतुत्वादिनान्वेतुं । टीकायामपि "व्यवधानेनान्वयो पियोग्यतापेक्षयाभवे"दितिव्यवधानोक्तिरभ्युपेत्यवादेन । अतएव "चेतनश्चेतनानामित्यादौपरमात्मनो पिप्रकृतत्वा"दितिटीकायांसन्निहितवाक्यएवप्रकृततोक्ता । यद्वा "नित्योनित्याना"मित्यस्मादपिपरस्मिन् "तमात्मस्थंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषा"मित्यत्रप्रकृतेनज्ञानफलेनशांतिशब्दार्थेनसुखेन "नित्योनित्याना"मितिवाक्योक्तस्याप्यात्मनोव्यवहितत्वाट्टीकायांसन्निधानाद्योग्यतायाबलीयस्त्वोक्तिः ।

प्र० मपीति ॥ टीकायामिति ॥ पूर्वमितियोज्यं । अस्तुवेत्युक्तद्वितीयपक्षएवटीकाभिमतइतिभावेनटीकास्थपूर्ववाक्यविरोधंनिराकर्तुंतेनस न्निध्यलाभप्रकारमाह ॥ यद्वानित्योनित्यानामिति ॥ एतेनटीकायां "चेतनश्चेतनानामित्यादौपरमात्मनोपिप्रकृतत्वा"दित्युक्तिस्तुप्रकृत त्वमात्राभिप्राया । नतुसन्निहितत्वाभिप्रायेत्युक्तंभवति । एवंचेश्वरस्यव्यवहितत्वमुपेत्यदूरस्थस्यापियोग्यतयापरामर्शइत्युपरितनटीकावा

SGDF Sri Gangadhara Digital Foundation

प्र० क्यंनविरुद्धं । नाप्यभ्युपगमवादेननेतव्यमितितात्पर्यं । व्यवहितत्वादित्येतदेवप्राचीनपक्षेऽस्वारस्यबीजंध्येयं । यदपिसुखश्रुतिकृतप्रत्यभि
ज्ञाविरोधइति तदपि "अनिर्देश्यत्वाद्ययोगाच्चे"तिटीकयानिरस्तमितिभावेनाह ॥ **एतेनेति** ॥ एतच्छब्दार्थंव्यनक्ति ॥ **अस्येति** ॥
सूत्रार्थस्यभाष्यादावस्फुटत्वात्समन्वेतव्याप्रतीतेश्चसूत्रार्थंवदन्क्रमंचसूचयति ॥ **अत्रेति** ॥ **वाक्यंचेति** ॥ तंत्रावृत्त्योरन्यतराश्रयणेनेति
भावः । एतेनयदुक्तंश्रुतप्रकाशे "तस्येत्यस्यप्रतीकत्वेयदेवविद्ययेतिहीतिवदितिशब्दस्स्या"दिति । तन्निरस्तं । समन्वेतव्यपरत्वस्यापिसत्त्वेने
तिशब्दाभावोपपत्तेः । "अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि । अस्यैवचोपपत्तेरूष्मेत्यादौतदभावाच्चेति । आद्यपक्षेऽन्वयपूर्वमर्थ
माह ॥ **तथाचेति** ॥ किमिदंसूर्यादिभिस्तदनुकरणमित्यतस्तात्पर्यमाह ॥ **सूर्यादीति** ॥ तमेवभांतमनुभातिसर्वमितिवाक्यशेषे सर्वसू
र्यादितेजोजातंकर्तृ तंभांतमनु तदिच्छानुरोधेनभाति नतुस्वातंत्र्येणेत्युक्त्यासूर्यादितेजसांतदधीनप्रकाशत्वंलब्धमित्यर्थः । प्रतीकग्रहण
पक्षेऽर्थमाह ॥ **तस्येति** ॥ सर्वंजगत्तस्यभासाभातीत्युक्त्यातत्प्रकाश्यत्वंसर्वस्योक्तमितिसूत्रेतस्येतिप्रतीकेनतदर्थोहेतुत्वेनोक्तइत्युक्तंभवति

**एतेनैवसुखशब्दैकत्वनिमित्ताप्रत्यभिज्ञापिनिरस्ता । अस्यसुखस्यानिर्देश्यत्वादिभिर्ज्ञानिसुखाद्भेदस्यैवभानात् । प्रत्युतब्रह्म
पक्षएव "तमात्मस्थं तदेत"दितितच्छब्दैक्यकृताप्रत्यभिज्ञास्तीति । अत्रचाद्यसूत्रेतस्येत्यनेनसमन्वेतव्यमानुकूल्येनगृह्यमा
णमुच्यते । तस्यभासेतिवाक्यंचप्रतीकेनोपादीयते । तथाचतस्य आनुकूल्येनगृह्यमाणस्य । अनुकृतेः सूर्यादितेजोभिर
नुकरणात् । सूर्यादितेजसांतदधीनप्रकाशत्वात् । तस्यभासेतिवाक्येनसर्वस्यजगतस्तत्प्रभाप्रकाश्यत्वेनोक्तेश्चेतिसूत्रार्थः ।** ॥ ६४४ ॥

गु० त्यतःपक्षांतरमाह ॥ **यद्वेति** ॥ एतेनेत्यनेनैवपरामृष्टंहेतुंदर्शयति ॥ **अस्यसुखस्येति** ॥ आद्यव्याख्यानइति ॥ नकेवलंसूर्यादिप्रकाशनियामकत्वंसर्वजग

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥अतएवेति॥ तस्येत्यस्यसमन्वेतव्यपरत्वस्यापिसत्त्वादेवटीकायां ''तमेवभांतमनुभातिसर्वमितिवाक्यशेषेसूर्यादीनामेतदधीनप्रकाशश्रवणा''दित्येतच्छब्दप्रयोगः । ''तस्यभासेतिसर्वजगतस्तत्प्रकाश्यत्वप्रतीतेश्चे''त्युक्तमित्यर्थः । तस्यचेतिचशब्दार्थंव्यनक्ति ॥ सूत्रइति ॥ ''अपिस्मर्यत''इत्यस्य ''यदादित्यगतंतेज''इतिस्मृतौप्रागुक्तंलिंगद्वयंविष्णुनिष्ठतयास्मर्यतेपीत्येकाव्याख्या । मामकमित्यस्यमदधीनंमदीयंचेत्यर्थान्मत्तेजएवादित्यादिष्स्थितंतत्तेजःप्रेरकत्वेनाखिलंभासयतीतिव्याख्यानात् । तथा ''नतत्रसूर्योभाती''त्यनेनयदानुकूल्येनगृह्यमाणस्यसू

अतएवटीकायां ''एतदधीनप्रकाशे''ति ''तस्यभासे''तिचोक्तं । सूत्रेचशब्दस्तुद्विती
यसूत्रस्याद्यव्याख्यानेसूर्याद्यप्रकाश्यत्वरूपानुक्तहेतुसमुच्चये । द्वितीयव्याख्यानेसर्व
जगत्प्रकाशकत्वरूपोक्तहेतुसमुच्चये । तेनास्याधिकरणांतरत्वेचशब्दायोगइतियत्कैश्चि
दुक्तंतन्निरस्तं । यद्यप्यत्र ''अनुभाती''तिश्रुत्यनुसारात्सूत्रेप्यनुभानादितिवक्तव्यं ।
तथापियदन्यदपिसूर्यादिकृतंप्रतपनादि तदपीशाधीनमितिदर्शयितुमनुकृतेरित्युक्तं ।

प्र० योद्यप्रकाश्यत्वमुक्तंतच्चविष्णोरेवस्मर्यतइत्यपराव्याख्या । तत्राद्यव्याख्यानइत्यर्थः ॥ सर्वजगदिति ॥ तस्येतिप्रतीकग्रहणेनलब्धहेतोः कंठोक्तानुकृतिरूपहेतुनासमुच्चयार्थइत्यर्थः ॥ कैश्चिदिति ॥ पूर्वाधिकरणशेषत्वंवदद्भिरित्यर्थः । ''अन्यकृतीनामप्युपसंग्रहार्थमनुकृतेरित्युक्त''मितितत्वप्रदीपानुरोधेनपरिहारमाह ॥ तथापीति ॥ ''भानश्रुत्यापिकृतिरुपसंगृहीता । भानपूर्वकत्वात्कृते''रितितत्वप्रदीपोक्त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुतावपिभानमुपलक्षणमितिभावः । ऐतरेयभाष्योदाहृतंवाक्यमाह ॥ उक्तंहिभारतइति ॥ श्रुतिस्मृतीइति ॥ नकेवलंश्रूयते किंतु स्मर्यतेपीतिव्याख्यानादितिभावः । सूत्रेस्मृतेरेवप्रतीत्यकथंद्वयोरुक्तिरित्यतस्तद्विशदयन्नेवंविन्यासेहेतुंचाह ॥ तत्रचेति ॥ अहंतत्तेजो रश्मीदितिश्रुताविर्त्यर्थः । व्याख्यानांतरमाशंक्यभाष्यकृतव्याख्यानेबीजमाह ॥ यद्यपीति ॥ इदं द्वितीयसूत्रं । एतेनाद्यसूत्रेलिंगोक्तिः ।

उक्तंहिभारते "तापिनीपाचिनीचैवशोषिणीचप्रकाशिनी।नैवराजन्रवेःशक्तिःशक्तिर्नारायणस्यसे"ति। द्वितीये आद्यसूत्रोक्तहेतूनांविष्णवेकनिष्ठत्वेश्रुतिस्मृतीउक्ते । तत्रच "अहंतत्तेज"इत्यादिश्रुतौ "यदादित्यगत"मित्यादिस्मृताविवविवक्षितार्थोनस्पष्टः । यत्रतु "नतत्रसूर्योभाती"त्याथर्वणश्रुतौस्पष्टः तत्रविष्णुविषयत्वमद्याप्यसिद्धमितिस्मृतिश्चशब्देनोक्ता । श्रुतिस्त्वपिशब्देनसमुच्चिता । यद्यपिचात्रानुकूल्येनगृह्यमाणस्यविष्णुत्वरूपेप्रधानसाध्ये "तदेतत्प्रेयः प्रियोहिज्ञानिनोत्यर्थमह"मित्यादिश्रुतिस्मृत्युक्तिपरत्वे नेदंसूत्रंव्याख्यातुंशक्यं । तथापि "प्रियोही"त्यादौज्ञानार्थप्रार्थितत्वरूपस्यानुकूल्येनगृह्यमाणत्वस्यास्फुटत्वादाद्यसूत्रोक्तहेतूनांविष्णवेकनिष्ठत्वस्यावश्यसाध्यत्वाच्चतत्परतयैवभाष्यकृताव्याख्यातं ॥

गु० त्प्रकाशकत्वंचलिंगंश्रूयतं किंतुस्मर्यतेपीत्याद्यव्याख्यानइत्यर्थः॥ आद्यसूत्रोक्तहेतूनामिति ॥ सूर्यादिप्रकाशनियामकत्वसर्वजगत्प्रकाशकत्वसूर्याद्यप्रकाश्यत्वरूपेहतूनामित्यर्थः । नचैतल्लिंगद्वयस्यविष्णुनिष्ठत्वमितिटीकाविरोधइतिवाच्यं । द्वितीयसूत्रस्यद्वितीयव्याख्यानानुसारेणतदुपपत्तेः । अत्रचाद्ययोजनाभिप्रायेण

प्र० द्वितीयेतत्समर्थनमितिक्रमोप्युक्तोभवति ॥ अन्येत्विति ॥ तेषामिदमधिकरणशरीरं । नतत्रसूर्योभातिनचंद्रतारकमित्यादौसूर्याद्यप्रकाश्यत्वादिनावगतंकिंतेजोंतरमुतब्रह्मेतिसंशये तत्रेतिसतिसप्तम्यातस्मिन्सतिसूर्यादिकंनभातीत्युक्त्या तत्रेत्यनेनसूर्यादितेजोभिभावकस्यवस्तुनःप्रतीतेस्सूर्यादेश्चंद्रतारादितेजोंतराभिभावकत्वदृष्ट्याप्रकृतेपितत्रेत्यनेनतेजोंतरस्यैवसूर्याद्यभिभावकस्यग्राह्यत्वात् "तमेवभांतमनुभाती"ति वाक्येचानुकारावगमादनुकारस्यचसजातीयएव "धावंतमनुधावती"त्यादौदर्शनात्तस्यभासेतिवाक्येसर्वभासकत्वावगमाच्चतुल्यरूपमप्रकृतमपितेजोंतरमेवात्रोपास्यत्वेनोच्यते । "तेनरक्तंरागात् तस्यापत्य"मित्यादावप्रकृतेपितच्छब्ददर्शनात् । तदुक्तंभामत्यां "अभानंतेजसोदृष्टं

अन्येतु आथर्वणस्थं "नतत्रसूर्य"
इत्यादिकंविषयवाक्यमित्याहुः ।

प्र० सतितेजोंतरेयतः । तेजोधात्वंतरंतस्मादनुकाराच्चगम्यत"इति । एवंतस्यवाक्यस्य "यस्मिन्द्यौ"रित्यादिब्रह्मप्रकरणगतत्वेप्यसंभवानुकारसामर्थ्यलक्षणेनलिंगेनप्रकरणबाधइतिप्राप्ते "तमेवभांत"मित्यादौ "भारूपस्सत्यसंकल्प"इतिश्रुतिसिद्धभारूपब्रह्मार्थत्वसंभवेऽलौकिकतेजोंतरकल्पनायोगात् "तत्रे"त्यस्यविषयसप्तम्यंततयातद्वाक्योक्तसूर्याद्यप्रकाश्यत्वस्यब्रह्मलिंगत्वात् "तस्यभासे"त्युक्तसर्वजगद्विषयकभानवत्त्वस्य ब्रह्मण्येवोपपत्तेः "अग्निर्दहंतमयःपिंडोनुदहति । वायुंगच्छंतंरजोनुगच्छती"त्यादौविसदृशेप्यनुकारदर्शनेन "तमेवे"तिवाक्येविसदृशेप्यनुकारसंभवाद्ब्रह्मैवात्रोच्यते । उक्तंचभामत्यां "ब्रह्मण्येवहितल्लिंगंनतुतेजस्यलौकिके । तस्मान्नतदुपास्यंकिंब्रह्मज्ञेयंतुगम्यत"इति । तत्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० विषयसंशयपूर्वपक्षादिबीजानिक्रमेणनिराह ॥ तन्नेत्यादिना ॥ इत्युक्तमिति ॥ विवृतमेतत्तत्रैव ॥ इतिवाच्यमिति ॥ अन्यथाव्यर्थतापत्तेः । लिंगेनप्रकरणबाधइतिभामत्युक्तंतुदृढपूर्वपक्षहेत्वभावाच्चेत्यग्रेनिरसिष्यामइतिभावः । यतइत्यस्यश्लोकेनान्वयः । इतियतस्ततो नयुक्तमिति । गत्यंतरमसिद्धमित्यतआह ॥ अस्तिहीति ॥ अन्यथा गत्यंतरेसत्येवमाश्रयणे । ननु नकृत्वाचिंतयेदमारभ्यते । किंतर्ह्य

तन्न। त्वयाहि "यत्तदद्रेश्य"मित्यादिप्रकरणस्यब्रह्मपरत्वसाधकेनादृश्यत्वाद्यधिकरणेनैवतत्प्रकरणस्थस्य "यस्मिन्द्यौ"रित्यादेरपितत्परत्वेसिद्धेद्युभ्वाद्यधिकरणंव्यर्थमितिशंकित्वा "यत्तदद्रेश्य"मित्यादिप्रकरणे "यस्मिन्द्यौ"रित्यादिवाक्यं नास्तीतिकृत्वाचिंतयाद्युभ्वाद्यधिकरणमित्युक्तं। आथर्वणस्थंच "नतत्रे"त्यादिवाक्यं "यत्तदद्रेश्य"मित्यादिप्रकरणे द्युभ्वादिसूत्रस्थित्यदनसूत्रविषयभूतयोः "यस्मिन्द्यौः अनश्नन्नन्य"इतिवाक्ययोर्मध्येचवर्तते । तथाचास्याधिकरणस्यादृश्यत्वाधिकरणद्युभ्वाद्यधिकरणाभ्यामगतार्थत्वाय "नतत्रे"त्यादिवाक्यं "यत्तदद्रेश्य"मित्यादिप्रकरणे "यस्मिन्द्यौ"रित्यादिवाक्यद्वयमध्येचनास्तीतिकृत्वाचिंतयेदमधिकरणमितिवाच्यं। नचतद्युक्तं। यतः एकत्रापिचनास्तीतिकृत्वाचिंतानयुज्यते। अनेकस्मिन्नयुक्तेतिकिमुगत्यंतरेसति ॥ १ ॥ अस्तिहिकाठकवाक्यरूपंगत्यंतरं। अन्यथा "अतएवप्राणः"इत्यस्य "प्राणबंधनंहिसोम्यमनः"इतिवाक्यंब्रह्मप्रकरणस्थत्वेनासंदिग्धत्वान्नविषयः। किंतु "प्राणइतिहोवाचे"तिवाक्यमेवेतिप्राणाधिकरणेयत्त्वयोक्तंतदयुक्तंस्यात् । तद्वाक्यंतत्प्रकरणेनास्तीतिकृत्वाचिंतयातत्संभवात् ।

गु० हेतूनामित्युक्तत्वादित्यदोषः॥ अन्यथेति ॥ यत्तदद्रेश्यमित्यादिप्रकरणेयस्मिन्द्यौः अनश्नन्नन्यइतिवाक्यद्वयमध्येचनास्तीतिकृत्वाचिंतयैतदधिकरणारंभइत्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

प्र० नुकारसामर्थ्यरूपलिंगेनप्रकरणबाधयापूर्वपक्षेतत्समाधानार्थं । तथैवभामत्युक्तेरित्यतआह ॥ **किंचेति** ॥ सत्यमेवंसतितुतादृशलिंगे । तदेवनास्ति । अनुकारस्यविसदृशेपिदर्शनेनसावकाशतयानेकपूर्वोत्तरगतश्रुतिलिंगबाधकत्वायोगात् । तत्रेतिसतिसप्तमीत्यत्रासाधारणहेत्व भावेतस्यापिसावकाशत्वात् । तस्यभासेत्यपिसावकाशमेव । शब्दानुशासनपरेसूत्रेतच्छब्दस्यपूर्वाप्रकृतपरत्वदर्शनेप्येकार्थप्रतिपादनपरवा क्येषुक्वापिसर्वनाम्नोप्रकृतपरत्वादर्शनाच्चेतिभावेनोक्तंदृढपूर्वपक्षहेत्वभावाच्चेति । सिद्धांतोप्ययुक्तः । श्रुत्यननुसारादित्याह ॥ **अपि चेति** ॥ "लःकर्मणिचभावेचाकर्मकेभ्य"इति भादीप्ताविल्यस्यकर्तरिलट्प्रत्यये "लटश्शतृशानचावप्रथमासमानाधिकरण"इतिविहितलडा देशशतृप्रत्ययस्यकर्तृवाचित्वेनभांतमित्युक्तभानकर्तृत्वंनचैतन्येयुक्तमित्यर्थः । तस्येतिषष्ठ्यर्थस्यभेदघटितत्वादितिभावः । ननु "वह्निंदहंत मयोऽनुदहतीत्यत्रक्रियाभेदाभावेपिद्रव्यभेदेनक्रियाभेदंकल्पयित्वाक्रियासादृश्यंव्याख्येय"मितिभामत्युक्तत्वादिहापितथास्यादित्यतआह ॥

किंचाथर्वणेपूर्वत्र "विरजंब्रह्मनिष्कल"मित्यादीनां परत्रच "ब्रह्मैवेदममृतंपुरस्तात्"इत्यादीनांब्रह्मश्रुतिलिंगादीनांस्पष्टत्वादस्माकंपक्षइवदृढपूर्वपक्षहेत्वभावाच्चनतत्रसंशयः । अपिचपरपक्षेब्रह्मणोभानमात्रतया "भांत"मितिशत्रंतशब्दः "तस्यभासे"तिषष्ठीचायुक्ता । किंचप्रपंचेब्रह्मभानान्यभानाभावेनानुशब्दायोगः । "धावंतमनुधावती"त्यादौहिधावनभेदेसत्येवानुशब्दोदृष्टः ।

गु० ननुधावंतमनुधावतीत्यादौधावनभेदेऽनुशब्दप्रयोगवद्वह्निंदहंतमयोनुदहतीत्यत्रदहनभेदाभावेप्यनुशब्दप्रयोगदर्शनात् प्रकृतजगतिब्रह्मभानान्यभानाभावेनभानभे

SGDF
Sri Gargeshwari Digital Foundation

प्र० नचेति ॥ अप्रामाण्यापत्तेरितिभावः । एतेनानुकृतेरनुभानात्तस्येतिप्रतीकग्रहणेनतस्यभासेतिसर्वस्यतद्धेतुकभानोक्तेर्नतत्रेतिसूर्याद्यप्रकाश्यं ब्रह्मेत्याद्यसूत्रार्थःप्रत्युक्तः । द्वितीयसूत्रार्थमपिप्रत्याह ॥ **किंचेति** ॥ **केचित्त्विति** ॥ इतिव्याचक्षाणाःपूर्वाधिकरणशेषतयाव्याचक्षतइत्यन्वयः । अयमर्थः । "इतरपरामर्शात्सइतिचेन्नासंभवा"दित्यत्र "एषसंप्रसादोस्माच्छरीरात्समुत्थाये"तिजीवपरामर्शात्सएवदहराकाशइतिचेन्न । तस्मिन्पूर्वोक्तापहतपाप्मत्वादेरसंभवादित्युक्ते उत्तरस्मात् "यआत्माऽपहतपाप्मेत्यादिप्राजापत्यवाक्याज्जीवस्यैवापहतपाप्मत्वादिगुणयोगोनिश्चीयतइत्याशंक्य प्राजापत्यवाक्ये नस्वाभाविकापहतपाप्मत्वादिगुणकउच्यते । अपितुप्राक्तिरोहितस्वरूपस्सन् "परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यत"इतिभगवत्प्रसादाविर्भूतगुणकएव । अतउत्तरवाक्यंजीवपरमितियुक्तं । पूर्वत्रदहरवाक्येत्वपहतपाप्मत्वादयस्स्वाभावि

नचश्रौतोव्यपदेशो "वह्निंदहंतमयोनुदहती"त्यादिवदारोपितभेदनिमित्तकोयुक्तः । किंच "अपिस्मर्यत"इतिसूत्रविषयत्वेनत्वयोदाहृते "नतद्भासयते यदादित्यगत"मित्यादिवाक्येब्रह्मणःसूर्याद्यभास्यत्वस्य सूर्यादितेजसोपिभगवदधीनत्वस्यचैवोक्तत्वेनत्वदभिप्रेतस्य ब्रह्म ज्ञानांतरावेद्यमित्यस्यास्मदादिसंबंधिघटादिज्ञानं ब्रह्मरूपमित्यस्य चासिद्धिः । केचित्तु छांदोग्यउत्तरस्मिन्प्रजापतिवाक्येऽपहतपाप्मत्वादिरूपेणजीवउच्यते । तत्रकर्मादिनातिरोहितस्यापहतपाप्मत्वादिगुणस्याविर्भावोक्तेः । पूर्वस्मिन्दहरवाक्येतुब्रह्म । तत्रातिरोहितस्यस्वाभाविकस्यैवतस्योक्तेरित्येवंपरतया "उत्तराच्चेदाविर्भूतस्वरूपस्तु"इतिसूत्रंव्याचक्षाणाः "अनुकृते"रित्यादिसूत्रद्वयंतस्यब्रह्मणोनुकृतेःसादृश्यात् "ममसाधर्म्यमागता"इतिस्मृतेश्चप्रजापतिवाक्योक्तोजीवोदहरवाक्योक्तंतुब्रह्मेतिपूर्वाधिकरणशेषतयाव्याचक्षते । ॥ ६४७ ॥

गु० दाभावेप्यनुशब्दप्रयोगःकिंनस्यादित्यतआह ॥ **नचेति** ॥ श्रौतेतिश्रौतइतिहेतुगर्भविशेषणं । अन्यथाश्रुतेरारोपितविषयकत्वेनाप्रामाण्यंस्यादित्यर्थः ॥

प्र० काएवश्रूयंते । तेचजीवेनयुक्ताइतिदहराकाशोनजीवः । किंतुतथोच्यमानःपरमात्मैवेत्यत्रहेत्वंतरमत्रोच्यते । तस्यदहराकाशस्यपरमात्मनोऽनुकृतेरनुकारात् "परमंसाम्यमुपैती"त्युक्तसाम्यापत्तेश्चेतियावत् । अतोनुकृत्याप्रजापतिवाक्येतादृशगुणवत्त्वेननिर्दिष्टोजीवः अनुकार्यंब्रह्मदहराकाशइति "इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः"इतिसंसारिणोमुक्त्यवस्थायांपरमसाम्यापत्तिलक्षणःपरब्रह्मानुकारस्स्मर्यतेपीतिपूर्वाधिकरणशेषतयाव्याचक्षतइति । पूर्वोत्तरवाक्ययोःपरोक्तंवैलक्षण्यमसिद्धमितिभावेनाह ॥ **तन्नेति** ॥ ननु "यआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासस्सत्यकामस्सत्यसंकल्पस्सोन्वेष्टव्यस्सविजिज्ञासितव्यःसर्वांश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानमनुवि

तन्न । प्रजापतिवाक्येपिदहरवाक्यइव "यआत्माऽपहतपाप्माविजरोविमृत्यु"रित्यादेरेवश्रवणेनतत्राप्यपहतपाप्मत्वादिप्रादुर्भावोक्त्यभावात् । "स्वेनरूपेणाभिनिष्पद्यत"इतिवाक्यशेषस्तूभयत्राप्यस्ति । दहरवाक्येजीवस्याभिनिष्पत्त्युक्तिर्जीवस्वरूपाभिनिष्पादकत्वरूपब्रह्मगुणोक्त्यर्थाचेत् । प्रजापतिवाक्येपितदर्थास्तु ।

प्र० द्यविजानाती"तिप्रजापतिवचनमैतिह्यरूपेणोपश्रुत्यान्वेष्टव्यात्मस्वरूपजिज्ञासयाप्रजापतिमुपसेदुषेमघवतेप्रजापतिर्जागरितस्वप्नसुषुप्त्यवस्थजीवात्मानमशरीरंक्रमेणशुश्रूषुयोग्यतापरिचिक्षिषयोपदिश्य तत्रपरिशुद्धात्मस्वरूपोपदेशयोग्यायमघवते "मघवन्मर्त्यंवाइदंशरीरमात्तंमृत्युनातदस्यामृतस्याशरीरस्याधिष्ठान"मितिशरीरस्याधिष्ठानतामात्मनश्चाधिष्ठातृतामशरीरस्यामृतस्वरूपतांचोक्त्वा "नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ति । अशरीरंवावसंतंनप्रियाप्रियेस्पृशत"इतिकर्मारब्धशरीरयोगिनस्तदनुगुणसुखदुःखभाक्त्वरूपानर्थंतद्विमोक्षेचतदभावमभिधाय "एवमेवैषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यत"इतिजीवात्मनस्स्वरूपमेवशरीरवियुक्तमुपदिदेश ।

SGDF Sri Gargeshwari Digital Foundation

प्र० नचेति ॥ अप्रामाण्यापत्तेरितिभावः । एतेनानुकृतेरनुभानात्तस्येतिप्रतीकग्रहणेनतस्यभासेतिसर्वस्यतद्धेतुकभानोक्तेर्नतत्रेतिसूर्याद्यप्रकाश्यं ब्रह्मेत्याद्यसूत्रार्थःप्रत्युक्तः । द्वितीयसूत्रार्थमपिप्रत्याह ॥ किंचेति ॥ केचित्त्विति ॥ इतिव्याचक्षाणाःपूर्वाधिकरणशेषतयाव्याचक्षतइत्यन्वयः । अयमर्थः । ''इतरपरामर्शात्सइतिचेन्नासंभवा''दित्यत्र ''एषसंप्रसादोस्माच्छरीरात्समुत्थाये''तिजीवपरामर्शात्सएवदहराकाशइतिचेन्न । तस्मिन्पूर्वोक्तापहतपाप्मत्वादेरसंभवादित्युक्ते उत्तरस्मात् ''यआत्माऽपहतपाप्मेत्यादिप्राजापत्यवाक्याज्जीवस्यैवापहतपाप्मत्वादिगुणयोगोनिश्चीयतइत्याशंक्य प्राजापत्यवाक्ये नस्वाभाविकापहतपाप्मत्वादिगुणकउच्यते । अपितुप्राक्तिरोहितस्वरूपस्सन् ''परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यत''इतिभगवत्प्रसादाविर्भूतगुणकएव । अतउत्तरवाक्यंजीवपरमितियुक्तं । पूर्वत्रदहरवाक्येत्वपहतपाप्मत्वादयस्स्वाभावि

नचश्रौतोव्यपदेशो ''वह्निर्दहंतमयोनुदहती''त्यादिवदारोपितभेदनिमित्तकोयुक्तः । किंच ''अपिस्मर्यत''इतिसूत्रविषयत्वेनत्वयोदाहृते ''नतद्भासयते यदादित्यगत''मित्यादिवाक्येब्रह्मणःसूर्याद्यभास्यत्वस्य सूर्यादितेजसोपिभगवदधीनत्वस्यचैवोक्तत्वेनत्वदभिप्रेतस्य ब्रह्म ज्ञानांतरावेद्यमित्यस्यास्मदादिसंबंधिघटादिज्ञानंब्रह्मरूपमित्यस्यचासिद्धिः । केचित्तु छांदोग्यउत्तरस्मिन्प्रजापतिवाक्येऽपहतपाप्मत्वादिरूपेणजीवउच्यते । तत्रकर्मादिनातिरोहितस्यापहतपाप्मत्वादिगुणस्याविर्भावोक्तेः । पूर्वस्मिन्दहरवाक्येतुब्रह्म । तत्रातिरोहितस्यस्वाभाविकस्यैवतस्योक्तेरित्येवंपरतया ''उत्तराच्चेदाविर्भूतस्वरूपस्तु''इतिसूत्रंव्याचक्षाणाः ''अनुकृते''रित्यादिसूत्रद्वयंतस्यब्रह्मणोनुकृतेःसादृश्यात् ''ममसाधर्म्यमागता''इतिस्मृतेश्चप्रजापतिवाक्योक्तोजीवोदहरवाक्योक्तंतुब्रह्मेतिपूर्वाधिकरणशेषतयाव्याचक्षते । ॥ ६४७ ॥

गु० दाभावेप्यनुशब्दप्रयोगःकिंनस्यादित्यतआह ॥ नचेति ॥ श्रौत्रेतिश्रौतइतिहेतुगर्भविशेषणं । अन्यथाश्रुतेरारोपितविषयकत्वेनाप्रामाण्यंस्यादित्यर्थः ॥

प्र० काएवश्रूयंते । तेचजीवेनयुक्ताइतिदहराकाशोनजीवः । किंतुतथोच्यमानःपरमात्मैवेत्यत्रहेत्वंतरमत्रोच्यते । तस्यदहराकाशस्यपरमात्मनोऽनुकृतेरनुकारात् ''परमंसाम्यमुपैती''त्युक्तसाम्यापत्तेश्चेतियावत् । अतोनुकृत्याप्रजापतिवाक्येतादृशगुणवत्त्वेननिर्दिष्टोजीवः अनुकार्यंब्रह्म दहराकाशइति ''इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः''इतिसंसारिणोमुक्त्यवस्थायांपरमसाम्यापत्तिलक्षणःपरब्रह्मानुकारस्स्मर्यतेपीतिपूर्वाधिकरणशेषतयाव्याचक्षतइति । पूर्वोत्तरवाक्ययोःपरोक्तंवैलक्षण्यमसिद्धमितिभावेनाह ॥ तन्नेति ॥ ननु ''यआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासस्सत्यकामस्सत्यसंकल्पस्सोन्वेष्टव्यस्सविजिज्ञासितव्यःसर्वांश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानमनुवि

तन्न । प्रजापतिवाक्येपिदहरवाक्यइव ''यआत्माऽपहतपाप्माविजरोविमृत्यु''रित्यादेरेवश्रवणेनतत्राप्यपहतपाप्मत्वादिप्रादुर्भावोक्त्यभावात् । ''स्वेनरूपेणाभिनिष्पद्यत''इतिवाक्यशेषस्तूभयत्राप्यस्ति । दहरवाक्येजीवस्याभिनिष्पत्त्युक्तिर्जीवस्वरूपाभिनिष्पादकत्वरूपब्रह्मगुणोक्त्यर्थाचेत् । प्रजापतिवाक्येपितदर्थास्तु ।

प्र० द्यविजानाती''तिप्रजापतिवचनमैतिह्यरूपेणोपश्रुत्यान्वेष्टव्यात्मस्वरूपजिज्ञासयाप्रजापतिमुपसेदुषेमघवतेप्रजापतिर्जागरितस्वप्नसुषुप्त्यवस्थजीवात्मानमशरीरंक्रमेणशुश्रूषुयोग्यतापरिचिक्षिषयोपदिश्य तत्रपरिशुद्धात्मस्वरूपोपदेशयोग्यायमघवते ''मघवन्मर्त्यंवाइदंशरीरमात्तंमृत्युनातदस्यामृतस्याशरीरस्याधिष्ठान''मितिशरीरस्याधिष्ठानतामात्मनश्चाधिष्ठातृतामशरीरस्यामृतस्वरूपतांचोक्त्वा ''नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ति । अशरीरंवावसंतंनप्रियाप्रियेस्पृशत''इतिकर्मारब्धशरीरयोगिनस्तदनुगुणसुखदुःखभाक्त्वरूपानर्थंतद्विमोक्षेचतदभावमभिधाय ''एवमेवैषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यत''इतिजीवात्मनस्स्वरूपमेवशरीरवियुक्तमुपदिदेश ।

SGDF Foundation

प्र॰ "सउत्तमःपुरुषः । सतत्रपर्येतिजक्षन्क्रीड"न्नित्यादिनाप्राप्यस्यपरस्यज्योतिषःपुरुषोत्तमत्वं निवृत्ततिरोधानस्यपरंज्योतिरुपसंपन्नस्यप्रत्यगात्मनोब्रह्मलोकेयथेष्टभोगावाप्त्यादिकमभिधाय "सयथाप्रायोग्यआचरणेयुक्तएवमस्मिन्शरीरेप्राणोयुक्त" इतियथोक्तस्वरूपस्यैवसंसारदशायां कर्मतंत्रंशरीरयोगंयुग्यशकटयोगदृष्टांतेनाभिधाय "यत्रैतदाकाशमनुविषण्णंचक्षुःसचाक्षुषःपुरुषोदर्शनायचक्षुरथयोवेदेदंजिघ्राणीतिसआत्मागंधायघ्राण"मित्यादिनाचक्षुरादीनांकरणत्वंरूपादीनांज्ञेयत्वमस्यचज्ञातृत्वंप्रदर्श्य ततएवशरीरेंद्रियेभ्योव्यतिरेकमुपपाद्य "सवाएषएतेनदैवेनचक्षुषामनसैतान्कामान्पश्यन्रमतेयएतेब्रह्मलोक" इतितस्यैवविधूतकर्मनिमित्तशरीरेंद्रियमनश्शब्दाभिहितेनदिव्येनस्वाभाविकेनज्ञानेनसर्व

किंच अपहतपाप्मत्वादिगुणकआत्मनींद्रेणपुनःपुनःपृष्टेप्रजापतिः "यएषोंतरक्षिणिपुरुषोदृश्यत एषआत्मे"ति "यएषस्वप्नेमहीयमानश्चरत्येषआत्मे"ति"यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानात्येषआत्मे"ति "तदस्यामृतस्याशरीरस्यात्मनोधिष्ठान"मित्यसकृदुपदिदेश । तत्रचाक्षिवाक्यंतावद्ब्रह्मविषयं । "अंतरस्तद्धर्मोपदेशात् । अंतरउपपत्ते"रित्यत्रचनिर्णीतब्रह्मत्वस्य "यएषोंतरक्षिणिपुरुषोदृश्यते" इतिश्रुत्यंतरोक्तस्यैवेहप्रत्यभिज्ञानात् । जीवस्य

प्र॰ कामानुभवमुक्त्वा "तंवाएतंदेवाआत्मानमुपासते । तस्मात्तेषांसर्वेचलोकाआप्तास्सर्वेचकामा" इत्येवंविधमात्मानंज्ञानिनोजानंतीत्यभिधाय "सर्वांश्चलोकानवाप्नोतिसर्वांश्चकामान्यस्तमात्मानमनुविद्यविजानातीतिहिप्रजापतिरुवाचेत्येवंविधमात्मानंविदुषस्सर्वलोकसर्वकामावाप्त्युपलक्षितंब्रह्मानुभवंफलमभिधायोपसंहृत"मित्यंतेनतदीयभाष्येणप्रजापतिवाक्यजातस्यसर्वस्यापिजीवपरत्वमुक्तं । तत्कथमुच्यतेदहरवाक्याद्वैलक्षण्यंनेतीत्यतोजागरितस्वप्नसुषुप्ताशरीरवाक्यानिप्रकरणचतुष्टयगतानितावत्क्रमेणोदाहृत्यतेषांब्रह्मपरत्वंसाधयति ॥ किंचेत्यादिना ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०उपदिदेश प्रजापतिरिंद्रायेत्यर्थः । अंतरितितन्मतरीत्योपन्यासः । तत्रत्यविषयवाक्यंयएषोंतरिति ॥ हृत्स्थत्वेनेति ॥ “अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिही”तिसूत्रे “एषआत्मे”तिश्रुतौचसिद्धत्वादितिभावः । “हृदयस्थात्पराज्जीवोदूरस्थोजाग्रदेष्यती”त्यादित्वदभिमानातिशयाभिप्रायं । यथाचैतत्तथावोचामांतराधिकरणे ॥ तथेति ॥ ब्रह्मविषयमित्यर्थः । “शारीरंजीवमभिप्रहत्यसंयोज्ये”तिवाजसनेयवाक्यादित्यर्थः । नचतत्रापिविवादः । “शुक्रमादायपुनरेतिस्थानंहिरण्मयःपुरुषएकहंस”इतिवाक्यशेषेजीवमादायगच्छतीतिश्रवणात्पूर्वोक्तार्थेश्लोकत्वेनोदाहरणाच्चेतिभावः । महीयमानत्वंचजीवस्यतदानयुक्तं । भयादेरप्युपलंभात् । नचकदाचिन्महीयमानत्वं । नित्यवच्छ्रवणविरोधात् । “प्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतर”मितिवाजसनेयेसुप्तौभगवत्परिष्वंगेनैवबाह्याद्यज्ञानश्रवणेनतत्समाख्ययात्रापितथात्वमित्यर्थः । “मर्त्यंवाइदंशरीरंतदस्यामृतस्याधिष्ठान”मितिवाक्यमपिब्रह्मपरमित्याह ॥ अशरीरेति ॥ तस्यचेति ॥ “अरूपवदेवे”त्य

हृत्स्थत्वेनाक्षिस्थत्वाभावाच्च । स्वप्नवाक्यमपितथा । “स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीती”तिश्रुत्यंतरात् । अत्रापिमहीयमानत्वलिंगाच्च । सुप्तवाक्यमपितथा । “प्राज्ञेनात्मनासंपरिष्वक्त”इत्यादिश्रुत्यंतरात् । अत्रापि “यत्रसुप्त”इतियच्छब्दोक्तस्यसमस्तसुप्ताधारस्यैव “एषआत्मे”त्येतच्छब्देनपरामर्शाच्च । अशरीरवाक्यमपितथा । अशरीरशब्देननिरपेक्षस्यसार्वकालिकस्यचशरीरराहित्यस्यस्वरसतःप्रतीतेः । तस्यचेश्वरएवसंभवात् ।

गु०स्वप्नवाक्यमपितथेति ॥ एषस्वप्नेमहीयमानइतिस्वप्नवाक्यमपिब्रह्मविषयकमित्यर्थः ॥ सुप्तवाक्यमपीति ॥ तद्यत्रैतत्सुप्तस्समस्तंसंपन्नइतिसुप्तवाक्यमपिब्रह्मविषयकमित्यर्थः ॥ अशरीरवाक्यमपीति ॥ तदस्यामृतस्याधिष्ठानमित्यशरीरवाक्यमपिब्रह्मविषयमित्यर्थः । तेन अनुकरणेनेत्यर्थः ॥ तस्येति ॥ साम्यस्येत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्रवक्ष्यमाणत्वादितिभावः । अक्षिस्वप्रसुप्तिवाक्येषुत्रिषुब्रह्मपरत्वेयुक्त्यंतरंचाह ॥ किंचेति ॥ ननूपक्रमे "यआत्मापहतपाप्मे"त्यादिना जीवस्योपक्रांतत्वात्तत्परत्वंसर्वस्यवाच्यमित्यतस्तदपिनजीवविषयमित्याह ॥ किंचप्रजापतीति ॥ प्रकारांतरेणदहरवाक्यवैलक्षण्यमाह ॥ अपिचेति ॥ "विष्णुमानंदरूपेतंसम्यग्ज्ञानविपर्ययौ । आपतु"रित्यादिछांदोग्यभाष्योदाहृतस्मृतेरित्यर्थः । एवंवाक्यांतराण्यपिब्रह्मपरत

किंचाक्ष्यादिवाक्येषुप्रतिवाक्यं "एषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मे"तिश्रवणात्कथंतेषांजीवविषयता । किंचप्रजापतिवाक्ये "यआत्माऽपहतपाप्मे"तिप्रसिद्धार्थेनप्रकृतपरामर्शिनाचयइतिसर्वनाम्ना "एषआत्मापहतपाप्मे"तिप्रस्तुतदहरवाक्येप्रसिद्धेश्वरपरामर्शएवयुक्तः। अपिच "तेषांसर्वेषुलोकेषुकामचारोभवती"तिदहरवाक्येयन्मोक्षाख्यंफलं तस्यैव "तेषांसर्वेलोकाआप्ता"इतिप्रजापतिवाक्येपिश्रुतत्वात् तथादहरवाक्ये "तस्मिन्यदंतस्तदन्वेष्टव्य"मितियदन्वेष्टव्यत्वादिकमुक्तंतस्यैवप्रजापतिवाक्ये "सोन्वेष्टव्यःसविजिज्ञासितव्य"इतिश्रवणात् "इंद्रोविरोचनश्चैवश्रुत्वातंब्रह्मणोक्षिगं । विष्णुमानंदरूपेत"मित्यादिस्मृतेश्च नतयोर्भिन्नार्थतेतिदिक् ।

प्र० यासाधनीयानीत्याह ॥ दिगिति ॥ तथाहि । "प्रायोग्यआचरणेयुक्तएवमस्मिन्शरीरेप्राणोयुक्त"इत्यत्रप्राणशब्दस्य "अतएवप्राण"इत्यादौपरब्रह्मण्येवप्रसिद्धत्वात् "आकाशमनुविषण्णंचक्षु"रित्यादिवाक्यस्य "इदंपश्यामिजिघ्राणी"त्यत्रापि "जीवानवैविदुः । द्रव्याणामपि चाज्ञानाद्वेदासौपुरुषोत्तम"इत्यादिस्मृत्याविष्णुपरत्वात् । "एतंदेवाआत्मानमुपासत"इतिदेवोपास्यत्वश्रवणाच्च । तदुक्तंभगवत्पादैः "नहि

प्र० जीवमात्रंदेवाउपासते । ऊर्जंपृथिव्याभक्त्वायोरुगायमुपासतइतिहिश्रुति"रिति । अन्यस्तुक्षुद्रोपद्रवोऽग्रेनिरसिष्यते । सूत्रार्थंचपराचष्टे ॥ अनुकृतेरिति ॥ तेन ईश्वरसाम्येन । "संपद्याविहायस्वेनशब्दा"दित्यत्रेत्यर्थः । एतेनप्रायोरामानुजरीतिमनुसरतःकस्यचिच्छैवस्यमतमपिप्रत्युक्तंबोध्यं । यदत्रशिवार्कमणिदीपिकायां चंद्रिकोक्तरीत्याक्ष्यादिवाक्यानांब्रह्मपरत्वमाशंक्यसमाधानमुक्तंस्वप्नवाक्येस्वप्नप्रयोजकत्वेनसुषुप्तिवाक्येसुषुप्त्याधारत्वेनब्रह्मणिसंभवन्स्वप्नसुप्तिसंबंधोनोच्यते । येनसमाख्यादिबलाद्ब्रह्मस्यात् । किंतुस्वप्नसुप्त्यवस्थावत्त्वमेव । स्वप्नसंबंध्यात्मोपदेशानंतरं "घ्नंतित्वेवैनंविच्छाययंतिवे"त्यादिनेंद्रेणतस्यहन्यमानत्वादिप्रतिभासतोदुष्टत्वस्य सुप्तिसंबंध्यात्मोपदेशानंतरं "नाहंखल्वयमेवंसंप्रत्यात्मानंजानातीत्ययमहमस्मीतिनोएवैमानिभूतानिविनाशमेवापीतोभवती"ति तस्यज्ञानशून्यतयाविनष्टप्रायत्वस्योक्तत्वात् । अक्षिवाक्ये "एतदमृतमभय"मित्यादितुमुक्त्यवस्थायांभाविरूपापेक्षयोपपद्यतइति । तदसारं । स्वप्नादिवाक्यशेषे "घ्नंतीवे"त्यादिश्रवणेपि इंद्रः "एषस्वप्नेमहीयमान"इतिप्रजापतिनोक्तस्वप्नप्रदर्शकंब्रह्मैवेतिजानन्नप्यसुरमोहायजीवविवक्षयाघ्नंतीत्यादिदोषान्वक्तीत्युपपत्तेः ।

अनुकृतेरित्यादिसूत्रद्वयेचकिंमुक्तस्यापहतपाप्मत्वादिरूपेणेश्वरसाम्यंसाध्यं किंवाऽन्यत्रप्रसिद्धेनतेनदहरप्रजापतिवाक्योक्तयोर्ब्रह्मत्वजीवत्वेसाध्ये । नाद्यः । तस्यत्वन्मतेचतुर्थे "संपद्ये"त्यादावेवसिद्धेः । समन्वयाध्यायासंगतेश्च । सूत्रेनुकृतेरितिसाम्यस्यहेतुत्वोक्तेश्च । नांत्यः । अनुकृतिमात्रेणपूर्वोक्तंब्रह्मपश्चादुक्तस्तुजीवइत्यस्यासिद्धेः । टीकाक्षरार्थस्तु ।

गु० तथाचतेनपौनरुक्त्यमित्यर्थः ॥ साम्यस्यहेतुत्वोक्तेश्चेति ॥ तथाचसाम्यस्यसाध्यत्वेसूत्रविरोधइत्यर्थः ॥ असिद्धेरिति ॥ विशिष्टसाध्येहेतोरप्रयोजकत्वादितिभावः । नतत्रसूर्योभातीत्यादिश्रुतौसूर्यादिप्रकाशनियामकत्वस्यैवोक्तत्वेनतस्यैवप्रकृतउपयुक्तत्वेनभाष्यकारेणापि नहिज्ञानसुखमनुभातिसूर्यादिकमितिसूर्यादिप्रका

SGDF Foundation

प्र० उक्तंच "पुनःपुनश्चमोहायगत्वागत्वानिवर्तते । कथंचिदेवविज्ञातंमयेत्यज्ञान्विमोहितुं । तद्योग्यान्येववाक्यानिब्रह्माप्याहपुनःपुन"रिति । "दर्शयन्नासुरींबुद्धिंस्वप्रद्वेश्यविवक्षया । ध्नंतीवैनमदंतीवे"त्यादिच । यदप्यमृतत्वादिकंमुक्त्यवस्थाभिप्रायेणेति तन्न । तथात्वेंतराद्यधिकरणेपितथात्वापत्त्यातत्रत्यसिद्धांतहान्यापत्तेः । महीयमानत्वस्यदुरुपपादत्वाच्च । अक्षिस्थत्वायोगस्मृतिविरोधादेरनुद्धृतत्वाच्च यत्किंचिदेतत् । यच्चोक्तंसूत्रेतस्येतिकर्तृषष्ठ्यंतेनजीवःपरामृश्यते । दहरपदंकर्मणिषष्ठ्यंततयाविपरिणामेनदहरस्येतीहानुवर्तते । तथाचजीवस्यदहरानुकृतेरनुकर्त्रनुकार्ययोर्भेदाद्दहरोनजीवइतिसूत्रार्थइति तन्न । अनुवृत्तिविपरिणामप्रथमांतावृत्तीनांक्लिष्टत्वात् । अस्मद्रीत्यानुकृतेस्साक्षात्साध्यान्वयसंभवेतयाभेदंप्रसाध्यतस्यसाध्यान्वयोक्तेरयुक्तत्वात् । "गगनंगगनाकारंसागरस्सागरोपम"इत्यादावभेदेप्यनुकर्त्रनुकार्यभावनिर्देशाच्चेति । "सर्वसूर्यादिजगद्भातीतिशेष"इतिटीकायांसर्वशब्दस्यैवसूर्यादिजगदित्यर्थइतिप्रतीयते । भातीत्यस्यकान्वयइत्यपिनज्ञायते । नारायणभासाहिसर्वमित्यत्रत्यसर्वशब्दार्थइतिवाप्रतीयते । अतआह ॥ **नहीति** ॥ तत्तेजोरश्मीदितिरश्मीच्छब्देनायमर्थःकथंलब्धइत्यतआह ॥

"नहिज्ञानिसुख"मितिभाष्येसर्वशब्दस्तेजःपरइत्याह ॥ [५।१३।९] सर्वसूर्यादीति ॥ "नचतद्भासे"तिभाष्येजगत् भाति इति पदद्वयमध्याहार्यमित्याह॥ [५।१३] जगद्भातीतिशेषइति ॥ [५।१३] रश्मीदितिसूर्यादितेजसांनारायणाधीनत्वमुच्यतइति ॥

गु० शनियामकत्वमेववक्तव्यं । सर्वप्रकाशकत्वकथनमसंगतमित्यभिप्रेत्यटीकाकारेणसर्वसूर्यादीतिव्याख्यानमित्यभिप्रेत्याह ॥ **नहिज्ञानसुखमितिभाष्यइति** ॥ नचतद्भासेत्यस्यसापेक्षत्वात्पूर्ववाक्यात्सर्वशब्दस्यानुषंगेतस्यसूर्यपरतयोक्तत्वेनात्रापिसूर्यपरत्वापातेनसूर्यादिपरत्वेचानेनापिसूर्यादिप्रकाशनियामकत्वमेवलभ्यते । तच्चपूर्वमेवोक्तमितिपौनरुक्त्यंस्यात् । अतोजगद्भातीतिपदद्वयंशेषंसंपूर्यटीकाकारोव्याख्यातीत्याह ॥ **नचतद्भासेतिभाष्यइति** ॥ नारायणस्यसूर्यादिप्रकाशनियामकत्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० **अग्नीदिति** ॥ यथाग्निशब्दोपपदात्‌ञिइंधीदीप्तावित्यस्मात्क्विपि “अनिदितांहलउपधायाःक्ङिती”तिनलोपेरूपमिति “अग्नीदग्नीन्विहरे” त्यादौवह्निदीपकत्वमर्थः तथेहापिरश्मिपदोपपदादिंधेःक्विपिरूपमित्युक्तंभवति । “नारायणभासा तदधीनभासातदीयभासाच । सर्वसूर्यादिजगच्चभाति प्रकाशतेप्रकाश्यतेचे”तिटीकायास्सम्यगर्थाप्रतीतेरुद्भाष्यत्वप्रतीतेश्चाह ॥ **नारायणेति** ॥ “अपिस्मर्यते”इत्यत्र “युक्तिसमुच्चयेऽपिपद”मितिवाक्यमाक्षिप्यसमाधत्ते ॥ **यद्यपीत्यादिना** ॥ ७ ॥ **अनुकृत्यधिकरणं** ॥ ६ ॥

अग्नीच्छब्दस्याग्निसमिंधकत्वमिवरश्मीच्छब्दस्यरश्मिसमिंधकत्वमर्थइतिभावः ॥ “नारायणभासाही”तिभाष्यस्यसूर्यादितेजसांनारायणाधीनप्रकाशत्वंनारायणस्यसर्वजगत्प्रकाशकत्वंचार्थइत्यभिप्रेत्य तदनुगुणतयानारायणभासेतिपदंसर्वपदंभातिपदंचार्थद्वयपरतयाव्याचष्टे ॥ [५।१।७] तदधीनभासेत्यादिना ॥ युक्तिसमुच्चयेपिपदमिति [५।१।११] ॥ यद्यप्याद्यव्याख्यानेसौत्रोपिशब्दःआद्यसूत्रेआनुकूल्येनगृह्यमाणस्यब्रह्मत्वरूपप्रधानसाध्येहेतूकृतानुकृत्यादेर्ब्रह्मधर्मत्वसाधकश्रुतिसमुच्चयार्थः । तथापिद्वितीयव्याख्यानेप्रधानसाध्यएवहेतोःसूर्याद्यप्रकाश्यत्वरूपयुक्तेःसमुच्चयार्थइत्यर्थः ॥ ७ ॥ अनुकृत्यधिकरणं ॥ ६ ॥

गु० अहंतत्तेजोरश्मीदितिवाक्यंप्रमाणीकृतं । तत्रचोक्तार्थाप्रतीतेरसंगतिशंकायांटीकाकारैःरश्मीदित्यनेनसूर्यादितेजसोभगवदधीनत्वमुच्यतइत्युक्तं । तत्रापिरश्मीदित्यनेनापिसूर्यादितेजसांभगवदधीनत्वंनप्रतीयते । अतोरश्मीनिंधइतिव्युत्पत्तिमाश्रित्यतद्वाक्यंव्याख्याति ॥ **अग्नीच्छब्दस्येत्यादिना** ॥ अन्यत्स्पष्टं ॥ ७ ॥ **अनुकृत्यधिकरणं** ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ॐशब्दादेवप्रमितःॐ॥ अत्रटीकायां "प्रेरकत्वसाम्येनभगवतिवायौचसाधारणस्येशाननाम्न" इत्यादिनासंगतिग्रंथेप्रेरकत्वसाधारण्ये नेशानशब्दस्योभयत्रप्रसिद्धिरुक्ता । सानयुक्तेव । व्यधिकरणत्वात् । किंचप्रेरकत्वमसंकुचितंसंकुचितंवा । नोभयथापिपूर्वोत्तरकोटिद्वय मात्रसाधारण्यंलभ्यतइत्याक्षिप्यसमाधत्ते ॥ **यद्यपीति** ॥ अक्षरशब्दस्येवप्रवृत्तिनिमित्तसाधारण्यादुभयत्रप्रसिद्धिरितिनवैयधिकरण्यमि तिभावः ॥ **प्रसिद्धिरपीति** ॥ "ईश्वरश्शर्वईशानश्शंकर" इत्युक्तेरूढिरपीत्यर्थः । वायुमात्रप्रसिद्धालिंगसाहित्येनरुद्रादित्यागेचद्वयमात्रसा धारण्यमित्याह ॥ **ईशानत्वेति** ॥ अन्यत्र विष्णुवायुभ्यां । यद्यपिनायंनियमः । यथोक्तमक्षरनये "अन्यसाधारण्येपिसंशयकोटिसाधा रण्यमात्रेणतत्सिद्धे" रिति । तथापिसतिसंभवेत्यागायोगादेवमुक्तं । एतेन "ईशानशब्दस्यरुद्रेप्रसिद्धावपी" त्यादिटीकाविवृता । "विष्णुरे

॥ ॐशब्दादेवप्रमितःॐ ॥ यद्यप्यत्रेशानपदप्रवृत्तिनिमित्तप्रेरकत्वमसंकुचितंनवायौ । संकुचितंतुजीवांतरेपि । रुद्रेत्वीशानशब्दप्रसिद्धिरप्यधिका । तथापितस्यवायौकिंचित्संकुचितत्वादन्यत्रत्वत्यंतसंकुचितत्वादीशानत्वसहचरित प्राणादिव्यवस्थापकत्वस्यान्यत्रात्यंतासंभवाच्चेशानशब्दोविष्णुवायुसाधारणइतिज्ञेयं । "तमात्मस्थंयेनुपश्यंतिधीरास्ते षांसुखंशाश्वत" मितिपूर्वत्रविष्णुज्ञानादेवमोक्षइत्युक्तं । तदयुक्तं "विश्वेदेवाउपासत" इत्यन्यस्यैवदेवोपास्यत्वप्रतीतेः ।

गु० ॥ ॐशब्दादेवप्रमितःॐ ॥ टीकोक्तमीशानशब्दस्यप्रेरकत्वसाम्येनविष्णुवायुसाधारणत्वं तत्रानुपपत्तिप्रदर्शनतत्परिहारपूर्वकमुपपादयति ॥ **यद्यप्यत्रेत्या दिना** ॥ **विपरीतमिति** ॥ वामनश्रुत्यनुसारेणप्राणव्यवस्थापकत्वादिर्लिंगंनेयमितिविपरीतमित्यर्थः । प्राणव्यवस्थापकत्वेनकुतईशानस्यवायुतेतिशंकानिरासाय

प्र० वजिज्ञास्य" इत्युक्तमितिभाष्यादितुफलप्रदर्शनपरमितिभावेनपूर्वानंतर्येहेतुमाह ॥**तमिति**॥ ऐश्वर्यार्थमुपासनंकुतोनेत्यतआह ॥ **प्राप्तेति**॥ विष्णुज्ञानार्थमेव देवानामन्योपासनमस्त्वित्यतआह ॥ **अन्येति** ॥ एतेनयदुक्तंकल्पतरौ "प्राक्सतिविषयेचसाधारणीसप्तमीनतद्भासय तइतिविषयत्वनिषेधास्मृत्याविषयेव्यवस्थापिता । तद्वत्परिमाणमपिजैवंपारमेश्वरंवेतिविशये अंगुष्ठमात्रंनिश्चकर्षेतिनिर्णीतस्मृत्याजैवमिति प्रत्यवस्थानात्संगति" रिति । तन्निरस्तं । असंकुचितेशानत्वरूपब्रह्मधर्मसंदष्टत्वेनसंशयस्यैवायोगात् । यदपि "अल्पश्रुतेरितिचे" दित्यत्राल्प परिमाणत्वंभगवतउक्तं । अथाल्पपरिमाणविशेषःपरमात्मव्यतिरिक्तस्यदृश्यतइतिसंगतिरितिश्रुतप्रकाशोक्तं तदप्यनेननिरस्तं । न्यायभेदा

प्राप्तसमस्तैश्वर्याणांचदेवानांमोक्षादन्यार्थमुपासनायोगात् । अन्योपासनयाचविष्णुज्ञा नायोगादितिपूर्वाधिकरणाक्षेपेणपूर्वपक्षोत्थानादनन्तरसंगतिः । अत्र "ईशानोभूतभव्य स्ये" तिकाठकोक्तईशानःकिंवायुरुतविष्णुरितिचिंता । तदर्थेकिं "ऊर्ध्वंप्राणमुन्नयती" ति

प्र० दिना "अनुकृते" रितियोगद्वयस्याधिकरणांतरत्वेऽवश्यंभाविनिव्यवहितेनसंगत्युक्तेरयुक्तत्वात् । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ काठकेचतुर्थवल्ल्यां "अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठति । ईशानोभूतभव्यस्यनततोविजुगुप्सते । एतद्वैतत् । अंगुष्ठमात्रःपुरुषोज्यो तिरिवाधूमकः । ईशानोभूतभव्यस्यसएवाद्यसउश्वः । एतद्वैतत्" । इत्याद्युक्त्वापश्चात् "ऊर्ध्वंप्राणमुन्नयत्यपानंप्रत्यगस्यति । मध्येवामन मासीनंविश्वेदेवाउपासत" इत्याम्नायते । तत्रेशानोविषयइत्यर्थः । एतेन "सईशानोत्रविषय" इतिटीकास्थैतच्छब्दपरामर्शोदर्शितः ॥

SGDF Foundation

प्र० प्राणेति॥ प्राणव्यवस्थापकत्वमध्यमत्वसर्वदेवोपास्यत्वलिंगानुसारेणेत्यादिपदार्थः । यदिलिंगानिनिरवकाशानितदातैर्वामनश्रुतेर्बाधाद्वायुरेवेशानइतिपूर्वपक्षेफलं । यदिसावकाशानितदाश्रुत्यैवलिंगानांबाधाद्विष्णुरेवेशानइतिसिद्धांतेफलमितिस्पष्टःफलफलिभावइतिभावः । अत्रयद्यपिश्रुतिःप्रबलेतिचिंतानंतरंकिमनेकत्वप्रयुक्तप्राबल्यंबलवदुतश्रुतित्वप्रयुक्तप्राबल्यंबलवदित्येवचिंतावाच्या । श्रुतिस्वभावप्राबल्यस्यैवात्रसमर्थनात् । नतुनिरवकाशत्वादिचिंता । तथापिसापूर्वत्रैकानेकपदप्रयोगादेवसूचितेतिसौत्रैवकारप्रमितशब्दाभ्यांश्रुतित्वनिरवकाशत्वोभय

प्राणव्यवस्थापकत्वादिलिंगानुसारेण "मध्येवामन"मितिवामनश्रुतिर्नेयाकिंवाविपरीतमिति । तदर्थंकिमनेकानिलिंगानिप्रबलानिकिंवैकापिश्रुतिःप्रबलेति । तदर्थंकिंलिंगानिनिरवकाशानि श्रुतिस्तुसावकाशोत विपरीतमिति ॥ पूर्वपक्षस्तु ॥ अयमीशानोवायुरेव । ईशाने "ऊर्ध्वंप्राणउन्नयती"तिप्राणव्यवस्थापकत्वस्य "मध्येवामनमासीन"मितिमध्यमत्वस्य "विश्वेदेवाउपासत"इतिसर्वदेवोपास्यत्वस्यचश्रवणात् ।

प्र० प्रयुक्तप्राबल्यस्यसूचितत्वात् न्यायविवरणानुसारेणाभ्युच्चयत्वेनसावकाशत्वादिचिंताप्रदर्शिता । उत्तरोत्तरचिंताफलत्वंपूर्वपूर्वचिंतायाःप्रदर्शयन्लिंगानेकत्वव्यक्तिपूर्वंतन्निरवकाशत्वकथनेनपूर्वपक्षयन् "सईशानोवायुरेवे"त्यादिटीकांविवृणोति ॥ पूर्वपक्षस्त्वित्यादिना ॥ अत्रत्रयःपूर्वपक्षप्रापकाः । एकस्तावल्लिंगानामनेकत्वाद्वामनश्रुतेरेकत्वादनेकैरेकस्यबाधइत्यनेकत्वरूपस्सौत्रावधारणसूचितः । अयंचस्पष्टत्वाद्व्याख्यटीकयोर्नप्रपंचितः । द्वितीयस्तुसौत्रप्रमितपदसूचितोनिरवकाशत्वादिरूपः । सत्वस्पष्टइति "यथासम्रा"डित्यादौटीकायांप्रपंचितः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० तंव्यनक्ति ॥ **तेषामित्यादिना** ॥ तृतीयस्तुद्वितीयसूत्रसूचितोंगुष्ठमात्रत्वरूपोग्रेस्पष्टइतिध्येयं । “यथासंम्राडेवाधिकृतान्विनियुङ्क्तएतान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्त”इतिषट्प्रश्नेप्राणव्यवस्थापकत्वस्य “अथेममेवनाप्नोद्योयंमध्यम:प्राण”इतिवाजसनेयेमध्यमत्वस्य “कुविदंगनमसायेवृधास:पुरादेवाअनवद्यासआसन् । तेवायवेमनवेबाधितायावासयन्नुषसंसूर्येणे”त्यस्यामृचिदेवोपास्यत्वस्यवायुधर्मत्वेनसिद्धत्वादित्यर्थः । ऋगर्थस्तु “अंगेतिसंबोधनं । येदेवावायोर्नमस्कारादिनाज्ञानादिगुणपूर्णाअज्ञानाद्यवद्यविधुराश्चपुराऽऽसन् ते क्वचिद्रहस्यस्थानेसूर्येणसाकंज्ञानिनेसंसारबाधवद्भिश्शरणंप्राप्तायवायवेबुद्धिमवासयन् । तद्विषयामकुर्वन्”इतिटीकायांव्यक्तः । श्रुत्यंतराणांवायुपरत्वंटीकायामस्पष्टमितिस्वयंसाधयति ॥ **एवमेवेत्यादिना** ॥ ननु “अतएवप्राण”इतिन्या

तेषांच “एवमेवैषप्राणः योयंमध्यमःप्राणः कुवि
दंगे”तिभाष्योक्तश्रुतिभिर्वायुधर्मत्वात् । “एव
मेवे”त्यत्रचप्राणशब्दोमुख्यप्राणपरः । “आत्मत
एषप्राणोजायत”इतिपूर्ववाक्येतस्यैवप्रकृतत्वात् ।

गु०टीकायांयथासंम्राडित्यादिनाप्राणव्यवस्थापकत्वस्यवायुधर्मत्वादित्युक्तं । तदयुक्तं । तत्रापिप्राणशब्दस्य अतएवप्राणइत्यधिकरणन्यायेनविष्णुपरत्वेतद्बलेनवायोरीशानत्वालाभादित्यतस्तांटीकामुपपादयति ॥ **एवमेवेत्यत्रेति** ॥ किंचविष्णुलिंगेसतितच्छब्दानांविष्णुपरत्वमितिहिप्राणाधिकरणन्यायः । नचात्रविष्णुलिंगम

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- ॥ ६५३ ॥

प्र०येनोपक्रमबाधेनप्राणशब्दोविष्णुपरःस्यादित्यतआह ॥ **विष्ण्विति** ॥ अतएव विष्णुलिंगाभावादेव । ननुकथंतर्हिकपिंजलाधिकरणेत्रित्वे पर्यवसानमुक्तमित्यतआह ॥ **वसंतायेति** ॥ एकादशाध्याये "बहुवचनेनसर्वप्राप्तेर्विकल्पस्स्या"दित्याद्यपादीयाष्टमाधिकरणे "वसंताय कपिंजलानालभते"इत्यत्रकिंत्रयाणामेवालंभउतत्रिप्रभृतीनामितिसंशये बहुवचनस्यसर्वत्रप्रवृत्तेस्सर्वसंख्यानांशास्त्रार्थत्वाच्छास्त्रीयाच्चप्रयास गौरवात्फलभूयस्त्वमितियावदुत्साहंविकल्पेननानासंख्योपादानमितिप्राप्ते बहुत्वमात्रस्यैवशास्त्रार्थत्वात्त्रीननालभ्यचतुर्थालंभासंभवादवश्यं त्रयाणामालंभेतावतैवशास्त्रार्थसिद्धेर्नाधिकालंभंशास्त्रंकारयतीतिनिवृत्तव्यापारेविधौ "नहिंस्या"दितिनिषेधशास्त्रप्रवृत्तेरष्टदोषदुष्टविकल्पापा ताच्चत्रयाणामेवालंभइत्युक्तं । बहुवचनार्थोमुख्यउपादीयते अथयथोत्साहंकदाचित्किंचित्संकुचितः । आद्येदोषमाह ॥ **सर्वेति** ॥ द्वितीये

चंद्रिका. प्र. तृ. ७

विष्णुलिंगाभावाच्च । अतएव "कुविदंगे"तिऋच्यपिवायुशब्दोनविष्णुपरः । नचऋचिदेवो पास्यत्वमात्रमिहतुसर्वदेवोपास्यत्वमितिभेदः । ऋच्यपि "देवा"इतिबहुत्वस्यासंकोचायकात्स्न्र्ये पिपर्यवसानात् । त्रित्वेपर्यवसानेगुणातिशयासिद्धेः । नहि "नरेंद्रंनराःसेवंत"इत्यादौत्रित्वेपर्य वसानं । "वसंतायकपिंजला"नित्यत्रतुत्रित्वापर्यवसानेसर्वकपिंजलालंभनस्याशक्यानुष्ठानत्वा

गु०स्तीतिनप्राणाधिकरणन्यायविषयतेत्याह ॥ **विष्णुलिंगाभावाच्चेति** ॥ **अतएवेति** ॥ ऋचिविष्णुलिंगाभावेनप्राणाधिकन्यायविषयत्वाभावादेवेत्यर्थः । कुविदं गेत्यस्यसर्वदेवोपास्यत्वमुपपादयितुंतावच्छंकते ॥ **नचऋचीति** ॥ कपिंजलाधिकरणन्यायविरोधंपरिहरति ॥ **वसंतायकपिंजलानिति** ॥ ननुनैकदासर्व ॥ ६५३ ॥

प्र० दोषमाह ॥ **अष्टदोषेति** ॥ एकस्योपादानेतस्याप्रामाण्यत्यागःप्रामाण्यस्वीकारोऽन्यस्यप्रामाण्यत्यागोऽप्रामाण्यस्वीकारइतिचत्वारोदोषाः । अन्यस्योपादानदशायांतस्यपूर्वक्लृप्ताप्रामाण्यत्यागस्त्यक्तप्रामाण्यस्वीकारस्तत्प्रतियोगिनोन्यस्यतुप्राक्क्लृप्तप्रामाण्यत्यागस्त्यक्ताप्रामाण्यस्वीकारश्चे तिचत्वारोदोषाइतिमिलित्वाष्टौदोषाध्येयाः ॥ **असंकोचेति** ॥ त्रित्वव्यतिरिक्तेप्रवृत्तिसंभवेसर्वकपिंजलव्यतिरिक्तत्वरूपसंकोचइत्यर्थः । एतेनेत्युक्तंविशदयति ॥ **गुणेति** ॥ गणपरत्वंनेत्यत्रयुक्त्यंतरमाह ॥ **भूतेति** ॥ क्रममुल्लंघ्यप्रसंगादागतमृचोवायुपरत्वंलिंगैक्यंचसमर्थ्य "योयंमध्यमःप्राण"इत्येतदपिवायुपरमितिसाधयति ॥ **योयमिति** ॥ वाजसनेयेतृतीयेध्याये "अथातोव्रतमीमांसे"त्युपक्रम्याधीतेपंचमेब्रा ह्मणेऽभिहितस्यैव "अथेममेवनाप्नोद्योयंमध्यमःप्राण"इत्यस्यचतुर्थाध्यायद्वितीयब्राह्मणे "योहवैशिशुंसाधनंसप्रत्याधानंसस्थूणंसदामंवेदसप्तह

दष्टदोषदुष्टविकल्पापातात् । "नहिंस्या"दितिशास्त्रस्यासंकोचसंभवेसंकोचायोगाच्चत्रित्वेपर्यवसानं । एतेनविश्वदे वशब्दोगणविशेषपरइतिनिरस्तं । गुणातिशयासिद्धेः । भूतभव्येशानत्वानानुगुण्याच्च । "योयंमध्यमःप्राण" इतिश्रुत्यंतरोक्तंमध्यमत्वंतुनपरस्मिन्शक्यशंकं । "अयंवावशिशुर्योयंमध्यमःप्राणस्तस्यप्राणःस्थूणे"त्युत्तरवाक्येत स्यशिशुत्वब्रह्माश्रितत्वाद्युक्तेः । "अवांतरेश्वरत्वेनतस्येश्वरवचोभवेत् । अतोमध्यमतामाहुस्तस्यवेदेषुवेदिन"इति

गु०कपिंजलालंभउच्यते । किंतुकदाचित्कस्यचित् । अतउक्तं **विकल्पापातादिति** । अस्तुविकल्पोपीत्यतउक्तं **अष्टदोषेति** । आग्नेयोष्टाकपालइत्यादिवाक्यनि र्दिष्टपुरोडाशाक्षेपादेवव्रीहियवश्यामाकादिषुप्राप्तेषुद्रव्यांतरप्रसक्तिनिमित्तनियमनिरासायव्रीह्यादिशब्दैर्नियमआश्रीयते व्रीहिभिरेवयवैरेवेति । तथाचव्रीहिपुरोडाश प्रयोगेयवशास्त्रेप्रतीतप्रामाण्यत्यागः । निर्दोषवेदेदोषजन्यसंशयविपर्ययरूपाप्रामाण्यायोगात् । प्रामाण्योपलंभेसत्यपिप्रामाण्यानुपलंभरूपानुपलब्धिगम्यप्रामाण्या

SGDF Sri Gurudatta Digital Foundation

प्र० द्विषतोभ्रातृव्यानवरुणद्धि । अयंवावशिशुर्योयंमध्यमःप्राणस्तस्येदमेवाधानमिदंप्रत्याधानं प्राणःस्थूणाऽन्नंदामे"त्यत्रशिशुत्वंप्राणशब्दितं विष्ण्वाश्रयत्वोक्तेरित्यर्थः ॥ स्मृतेश्चेति ॥ "चक्षुरादिवत्तुतत्सहशिष्यादिभ्य"इत्यत्रभाष्योक्तस्मृतेरित्यर्थः ॥ तदंतरेणेति ॥ बह्वृचब्रा

स्मृतेश्च । तत्समाख्यानादिहापि "मध्येवामनमासीन"मितिसर्वोत्तमत्वरूपकाष्ठात्वविरो
धिमध्यस्थत्वमेवोच्यते । "तदंतरेणसर्वाअन्यादेवता"इतिवत् । नतुमध्यदेशस्थत्वं ।

गु० भावरूपाप्रामाण्यस्वीकारः । यवपुरोडाशप्रयोगेषुपूर्वकल्पिताप्रामाण्यस्यपूर्वत्यक्तप्रामाण्यस्यचयवशास्त्रस्याप्रामाण्यत्यागप्रामाण्यस्वीकारौविनातदर्थानुष्ठानायोगाद्यव शास्त्रेत्यक्तप्रामाण्यस्वीकारोंगीकृतप्रामाण्यपरित्यागइतिचदोषद्वयं । एवंचयवशास्त्रेदोषचतुष्टयं । एवंयवपुरोडाशप्रयोगेव्रीहिशास्त्रेदोषद्वयंपुनर्व्रीह्युपादानेदोषद्वय मितिव्रीहियवशास्त्रेपिदोषचतुष्टयमित्यष्टदोषदुष्टोविकल्पः । एवंग्रहणाग्रहणवाक्ययोरपियोजनीयं । तदुक्तंवार्तिके प्रमाणस्याप्रमाणत्वकल्पनाच्चद्विदोषभाक् । प्रमाणत्वंप्रतीतंयदुज्ज्वलंतदपह्नुतं । एकस्तावदयंदोषःप्रमाणार्थविपर्ययात् । तथातदप्रमाणत्वंयदभावप्रमाणकं । भावेपिसत्यभावेनविनैवपरिकल्पितं । सोपि स्यादपरोदोषःप्रमाणार्थविपर्ययात् । अंगीकृत्यापितौदोषौपूर्वकेनापिहेतुना । प्रयोगांतरकालेचपुनर्दोषद्वयंभवेत् । यदभावेप्रमाणत्वंपूर्वमेतस्यकल्पितं । संप्रत्यपह्नु वानस्यदोषएकोहिजायते । प्रत्यक्षंदृढरूपंचयत्पुरस्तान्निराकृतं । उपजायेतदोषोन्यस्तदुज्जीवयतःपुनः । एवमेकत्रचत्वारोदोषावाक्येप्रदर्शिताः । ततएवप्रसज्ये रन्द्वितीयेपिप्रकल्पिते । एवमेषोष्टदोषोपियद्व्रीहियववाक्ययोः । विकल्पआश्रितस्तत्रगतिरन्यानविद्यतइति । अस्यार्थः । द्विदोषभागित्युक्तदोषद्वयमुपपादयति । प्रमाणत्वमिति । प्रमाणत्वापह्नवस्यदोषत्वमुपपादयति । प्रतीतमिति । प्रतीतप्रमाणत्वापह्नवःप्रतीतिविरोधादेवदोषइत्यर्थः । प्रतीताप्रामाण्यकल्पनंद्वितीयोदो षइत्याह । तथेति । तस्यप्रमाणस्यसतोप्रमाणत्वकल्पनमित्यर्थः । अभावेति । प्रामाण्यानुपलंभरूपाभावप्रमाणकमित्यर्थः । संदेहविपर्यययोर्दोषजन्यत्वान्निर्दोषवे

SGDF Sri Gargeshwari Digital Foundation

प्र० ह्मणे "अग्निर्वैदेवानामवमोविष्णुःपरमस्तदंतरेणसर्वाअन्यादेवता"इत्यत्रयथान्यदेवतानामग्नाविष्णुमध्यत्वं तथेहापीत्यर्थः। ननुनैतानिनिर वकाशानि। विष्णावपिसंभवादित्याक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ अन्योन्येति ॥ वाय्वेकनिष्ठत्वेसिद्धेप्राक्तनमपितस्यैवेतिसिध्यति

यद्यपिविष्णोरपि "अंतर्यामी"त्यत्रसर्वनियामकता "दहर"इत्यत्रसर्वजि ज्ञास्यत्वरूपसर्वोपास्यताचोक्ता। नचतत्रोक्तजिज्ञास्यत्वमिहपूर्वपक्षआ क्षिप्यतइतिशंक्यं। उपास्यत्वस्यवाय्वेकनिष्ठत्वस्याद्याप्यसिद्ध्याऽन्यो न्याश्रयात्। तथापिवायोर्यच्छ्रुत्यंतरसिद्धंप्राणनियामकत्वंदेवोपास्यत्वंच

गु० देचदोषाभावात्प्रामाण्याभावरूपमेवाप्रामाण्यंवाच्यं। तस्मिंश्चप्रामाण्योपलंभाभावःप्रमाणंवाच्यं। सचनसंभवति। प्रामाण्योपलंभस्यभावेसत्त्वेसत्यपीत्यर्थः। प्रमाणेति। प्रमाणस्योपलंभाभावस्यार्थस्यप्रमेयस्याप्रामाण्यस्यविपर्ययात् विरोधादित्यर्थः। अभावेति। प्रामाण्योपलंभाभावप्रमाणकत्वं एतस्याप्रमाणत्वस्येत्यर्थः। इदमप्रामाण्यंस्वीकृतंपूर्वं तस्यत्यागस्तृतीयोदोषः। प्रत्यक्षमिति। यत्प्रामाण्यंपूर्वंनिराकृतंतस्योज्जीवनंस्वीकारश्चतुर्थोदोषः। संग्रहश्च व्रीहेरेतेयवस्योक्तेर्मात्वस्यत्या गकल्पने। यवेनैवंचेतिदोषाव्रीहेश्चैवंद्वयेष्टतेति। व्रीहिमयेपुरोडाशेकृतेयवस्योक्तेर्यववाक्यस्यद्वौदोषौ। यवमयेपुरोडाशेकृतेपियववाक्यस्यद्वौदोषौ। एवंयववा क्येचत्वारोदोषाः। एवंमिलित्वोक्तेर्द्वयेतेदोषाअष्टौ। मध्यमत्वस्येशानस्यवायुत्वस्याधकत्वंटीकायामुक्तं मध्यमदेशस्थत्वरूपस्यमध्यमत्वस्यसर्वगतेविष्णावपिसंभवा दयुक्तं। अतस्तदुपपादयति ॥ योयंमध्यमःप्राणइति ॥ अन्योन्याश्रयादिति ॥ उपास्यत्वस्यवाय्वेकनिष्ठत्वेसिद्धेजिज्ञास्यत्वादेराक्षेपसिद्धिः तदाक्षेपसिद्धौ

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रागुक्तंनविष्णोःकिंतुवायोरेवेतिसिद्धौतस्यवाय्वेकनिष्ठत्वसिद्धिरित्यर्थः ॥ **तदेवेहेति** ॥ विश्वशब्दस्यश्रुत्यंतरानुरोधेनयोग्यसर्वपरत्वादि तिभावः । प्राणादिनियामकत्वादिधीरित्येतद्दृष्टांतेनोपपादयति ॥ **नह्याग्नेयमिति** ॥ तृतीयस्याद्यपादे “शेषस्तुगुणसंयुक्तस्साधारणःप्रती येतमिथस्तेषामसंबंधा”दित्यंतिमाधिकरणेदार्शपौर्णमासिकेष्वाग्नेयाग्नीषोमीयैंद्राग्नपुरोडाशेषु “आग्नेयंचतुर्धाकरोती”त्युदाहृत्यकिमाग्नेयस्यैव चतुर्धाकरणमुतसर्वेषामितिविशये अग्नेश्चतुर्धाकरणविषयद्रव्योपलक्षणमात्रत्वेनस्वयंकार्ययोगित्वाभावात्संबंधमात्रेणोपलक्षणत्वसंभवेदेवता त्वाकारानपेक्षणात् सर्वत्र “अग्निकलिभ्यांढग्वक्तव्य”इतिस्मरणादग्नेरिदमितिसंबंधमात्रेप्याग्नेयशब्दनिष्पत्तेः अग्निसंबंधस्यचाविशिष्टत्वात्स र्वत्रचतुर्धाकरणमितिप्राप्ते देवताभूतस्तावदिहाग्निशब्दस्तद्धितेनोपलक्षणमुपादीयते । संभवतितुतस्ययथाश्रुत्यैवोपलक्षणत्वंकेवलाग्नेयस्यापि सत्त्वात् । अतोनशब्दानवगतेनसंबंधमात्रेणोपलक्षणत्वंयुक्तं । विनाकारणेनश्रुतबाधप्रसंगात् । अग्नीषोमीयादौचसमासादुत्पन्नस्तद्धितोद्व योःसापेक्षयोर्देवतात्वमाह । तेनतत्रान्यसापेक्षस्याग्नेर्देवतात्वं । नचसापेक्षितस्यतद्धितेनसामर्थ्यमस्ति । तेनाग्नेयशब्दोनशक्तोत्यग्नीषोमीया दिकमभिवदितुं । यद्यपिसंबंधमात्रेप्यविरुद्धस्तद्धितः । तथापीहदेवतार्थतैव । उपलक्षणार्थत्वात् । प्रसिद्धसंबंधंहिलक्षणंभवति । प्रसिद्ध श्चदेवतासंबंधएव नसंबंधमात्रं । अतोदेवतात्वमेवोपलक्षणं । तच्चाग्नीषोमीयादौनास्तीत्याग्नेयस्यैवचतुर्धाकरणमितिसिद्धांतितं । तत्रय

तदेवेहभाति । नतुब्रह्मधर्मभूतंसर्वनियामकत्वंसर्वोपास्यत्वंच ।
नहि “आग्नेयंचतुर्धाकरोती”त्यादावाग्नेयादिशब्दैरैंद्राग्नादिधीः ।

गु० चोपास्यत्वस्यवाय्वेकनिष्ठत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । ननुदेवोपास्यत्वाभावेसर्वदेवोपास्यत्वमपिभासतएवेत्यतआह ॥ **नहीति** ॥ **अतएवेति** ॥ मुमुक्षु

प्र०थाग्नेयशब्देनैंद्राग्नादिधीर्नभवतितथेत्यर्थः । नन्वेवंभाष्योक्तजिज्ञासासूत्राक्षेपोनयुक्तस्स्यादित्याशंक्यतदाक्षेपप्रकारमाह ॥ **नचेति** ॥ लिंगा नामनवकाशत्वमुक्त्वाश्रुतिविरोधंनिराह ॥ **वामनेति** ॥ द्वितीयसूत्रव्यावर्त्यहेतुमाह ॥ **अन्यभावेति** ॥ आदिपदेन “अल्पश्रुतेः अर्भ कौकस्त्वा”दित्येतद्गृह्यते ॥ **मात्रइतीति** ॥ एतेनवायोरपि “अणुश्चे”त्यणुत्वस्यवक्ष्यमाणत्वादतिसूक्ष्मेतस्मिन्नंगुष्ठमितत्वमयुक्तमितिनिरस्तं । अधिकपरिमाणराहित्यपरत्वेनतत्परिमाणविधावतात्पर्यादिति । पंचम्यंतहेतूनामीशानोवायुरेवेतिसाध्येनान्वयः । सौत्रैवकारप्रमितशब्दा भ्यांश्रुतेर्जात्यानवकाशत्वेनचप्राबल्यसूचनादेकयापिश्रुत्यानेकेषांसावकाशलिंगानांबाधोयुक्तएवेतिभावेन “विष्णुरेवेशान”इत्यादिटीकांविवृण्व न्सूत्राद्युक्तन्यायंसंगृह्याह ॥ **सहस्रादिति** ॥ स्वतोऽनवकाशत्वादिकमनपेक्ष्यस्वभावप्राबल्यमग्रेप्रतिपिपादयिषुरादौ “तस्याश्चविष्णौमहा

नचब्रह्मणःसर्वोपास्यत्वांगीकारेतदाक्षेपायोगः । मुमुक्षुभिर्ब्रह्मैवजिज्ञास्यमित्यवधारणस्यैवाक्षेपात् । अतएवटीकायां “किंविष्णुजिज्ञासानियमेने”त्युक्तं । तदेतदभिप्रेत्योक्तंन्यायविवरणे “ऊर्ध्वंप्राणमुन्नयतीत्यादिलिंगानांप्राणादन्यत्रावका शराहित्य”मिति । वामनशब्दस्तुवायावेवयुक्तः । नतुब्रह्मणि । तत्राल्पमात्रपरिमाणत्वादिरूपवामनत्वायोगात् । “अन्य भावव्यावृत्ते”रित्यादौसर्वगतस्यापिब्रह्मणोणुत्वाद्युक्तावपि “अंगुष्ठमात्र”इतीशानेश्रुतस्यमात्रशब्दार्थस्याधिकपरिमाणराहि त्यस्यायोगाच्चेति ॥ सिद्धांतस्तु ॥ सहस्रादपिलिंगानांश्रुतिर्बलवतीस्वतः । अवकाशोज्झितासावकाशात्तुकिमुलिंगतः ॥१॥

गु० भिर्ब्रह्मैवजिज्ञास्यमित्यवधारणाक्षेपस्यटीकाभिप्रेतत्वादेवेत्यर्थः । सिद्धांतसाधकवामनश्रुतेःसावकाशत्वमाह ॥ **वामनशब्दस्त्विवति** ॥ ननुवामनिशब्दस्यएषउ

SGDF
Sri Gargeshwari Digital Foundation

प्र०योगरूढिसिद्धायास्तत्प्रमापकत्वा''दितिटीकोक्तयोगरूढीविवृण्वन्नुत्तरार्धोक्तंनिरवकाशत्वंतावद्व्यनक्ति ॥ **वामनेति** ॥ अत्रैवंक्रमः । ईशानोविष्णुरेव । ''मध्येवामन''मितिवामनश्रुतेः । ननुसावकाशाश्रुतिरित्युक्तमितिचेदत्रेदमुपतिष्ठतेवामनश्रुतिर्हीति । योगमाह ॥ **एषइति** ॥ श्रुत्यंतरे छांदोग्ये । रूढिमाह ॥ **उपेंद्रइति** ॥ ''उपेंद्रोवामनःप्रांशुरमोघश्शुचिरूर्जित''इतिसहस्रनामसु ॥ **आर्येति** ॥ वृद्धानांवामनशब्दस्यविष्णावेवप्रयोगादित्यर्थः । ननुवामनिशब्दनिर्वचनेपिवामनशब्दस्यकिमायातमित्यतआह ॥ **वामनेति** ॥ आद्यस्याध्यायस्यतृतीयपादे ''प्रयोगचोदनाभावादर्थैकत्वमविभागा''दित्यंतिमाधिकरणेप्रथमवर्णकेलोकवेदयोःपदपदार्थानामन्यत्वमुतानन्यत्वमितिसंशये सत्यपिवर्णभेदेस्वरछांदसवर्णागमलोपविकारविपर्ययाध्यायानध्यायादिधर्मभेदेनजराराजपदयोरिवक्रमभेदेनव्यपदेशभेदात्स्पष्टःपदानांभेदः । पदान्यत्वादेवार्थभेदोपीतिप्राप्ते प्रत्यक्षप्रत्यभिज्ञानाद्वर्णाभेदेतदात्मकत्वात्पदानांयात्किंचिद्धर्मभेदेप्यर्थभेदापादकधर्मभेदस्यैवपदान्यत्वेप्रयोजकत्वाद्यत्किंचिद्धर्मभेदेनाप्यर्थभेदाभावात्पदानामनन्यत्वं । तदभेदादर्थानामप्यनन्यत्वमितिसिद्धांतितं । अत्रोक्तन्यायेनयथादेवासइत्यादौ ''आज्ज

वामनश्रुतिर्हिनिरवकाशा । ''एषउएववामनिरेषहिसर्वाणिवामानिनयती''तिश्रुत्यंतरेऽवधारणात् । ''उपेंद्रो वामनःप्रांशु''रितिस्मृतेः । आर्यप्रसिद्धेश्च । वामनवामनिशब्दयोश्चलोकवेदाधिकरणन्यायेनवर्णविकारादिनैकदेशस्यान्यथात्वेपि देवासः देवाः इत्यादाविवलाघवेनप्रत्यभिज्ञयैकत्वेसंभवतिभेदकल्पनायोगात् ।

गु०एववामनिरित्यादिश्रुत्यादिभिर्ब्रह्मनिष्ठत्वेपिवामनशब्दस्यतदुक्तःतयोर्भिन्नविषयत्वादित्यतआह ॥ **वामनवामनिशब्दयोश्चेति** ॥ **लोकवेदाधिकरणन्यायेनेति** ॥ यएवलौकिकास्तएववैदिकाइतिलोकवेदाधिकरणन्यायेनेत्यर्थः । ननुब्रह्मणिवामनशब्दोनयुज्यते । तत्राल्पमात्रपरिमाणत्वादिरूपवामनत्वायोगादित्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० सेरसु"गितिजसेःप्रत्ययस्यासुगागमेनैकदेशस्याधिक्येपिदेवाइतिपदादनन्यत्वंतथेत्यर्थः । आदिपदेन रुद्रेभिः रुद्रैः इत्यादिगृह्यते । उक्तंच महाभाष्ये "एकदेशविकृतमनन्यवद्भवति । श्वापुच्छेच्छिन्नेनाश्वोनगर्दभ"इति । तदेवप्रयोगदर्शनेनाह ॥ नहीति ॥ "नकिरिंद्रत्वदुत्तरोनज्यायाँअस्तिवृत्रह"न्नित्यत्रकिरित्यस्यकइत्यस्यचाभेदस्तथेहापीत्यर्थः । कथंचिन्निरूपितायादेवतात्वाद्याकृत्यभिव्यक्तिरसाववयवाधिक्यविनाशमात्रेणननश्यतीतितंत्रवार्तिकार्थः । ननूक्तमल्पमात्रपरिमाणवत्त्वरूपंवामनत्वंकथंब्रह्मणियुक्तमित्यतोनायमत्रान्यसापेक्षशब्दः किंतुरू

नहि "नकिरिंद्र"इत्यादौकिरित्यस्यलोकप्रसिद्धात्कइत्यस्माद्भेदः । तदुक्तंवार्तिके "आकृतीनामभिव्यक्तिर्याकथंचिन्निरूपिता । नासाववयवाधिक्यविनाशेषुविनश्यती"ति । एवंचयथा "यद्योन्यांतदुत्तरयोर्गायती"त्यत्रोत्तराशब्दउत्तराग्रंथेसंज्ञारूपोनिरपेक्षइतितत्परएव । नतुयोनिऋग्रूपप्रतियोगसापेक्षोत्तरऋक्परः तथावामनशब्दोपिरूढ्याविष्णुपरः । नतुदीर्घप्रतियोगिह्रस्वपरः । तदेतदभिप्रेत्योक्तंन्यायविवरणे "वामनश्रुतेरेवानवकाश"इति ।

प्र० ढइतिसदृष्टांतमाह ॥ एवंचेति ॥ नवमस्यद्वितीयेपादे "नैमित्तिकंतूत्तरात्वमानंतर्यात्प्रतीयेत"इतिषष्ठाधिकरणे "यद्योन्यांतदुत्तरयोर्गायती"त्यत्रकिंयोनिनामकऋगपेक्षयोत्तरदेशेऽधीतयोर्ऋचोर्गानमुतोत्तरासंज्ञकग्रंथविशेषाधीतयोरितिसंशये उत्तराशब्दस्यसंबंधिशब्दत्वाद्यैवयोनेःपरत्रपठितासैवोत्तरा । ततश्चयोनिपदापेक्षयारथंतरयोनेःपरतोबृहद्योनेःपठितत्वात्तस्यांगानं । उत्तराग्रंथेतुरथंतरयोनेःपरतो "नत्वावाँअन्योदिव्य"इत्यस्याःपठितत्वात्तस्यांगानं । अतोपिविकल्पः । द्वयोरपिरथंतरयोन्युत्तरत्वादितिप्राप्ते यद्यप्ययंसंबंधिशब्दोलोके तथाप्युत्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० राग्रंथेसंज्ञारूपेणप्रसिद्धः । तत्रसंज्ञाशब्दस्यानपेक्षवृत्तित्वात्सापेक्षवृत्तेस्संबंधिशब्दाद्बलीयस्त्वं । प्रकरणपाठाच्चोत्तराग्रंथःक्रत्वंगं । तस्मादुत्तराग्रंथाधीतास्वेवगानमितिसिद्धांतितं । अत्रयथोत्तराशब्दःप्रतियोगिनिरपेक्षार्थस्तथावामनशब्दोपीत्यर्थः । ननूक्तंलिंगान्यप्यनवकाशानीत्यतोन्यायविवरणोक्तंसावकाशत्वं "तच्चलिंगंविष्णोरेवे"तिभाष्यादौकिंचिद्विवृतंप्रपंचयति ॥ लिंगानित्विति ॥ प्राणादिनियंतृत्वंविष्णावाह ॥ सर्वेति ॥ प्रासादेति ॥ केचित्प्रासादवासिनःकेचिद्भूमिवासिनःकेचिदुभयवासिनः । तत्रयथोभयवासिनःप्रासादवासिग्रहणेनभूमिवासिग्रहणेनचगृह्यंतेतथेहापिप्राणादिनियामकग्रहणेनप्राणतदितरसर्वनियामकोग्रहीतुंशक्यइत्यर्थः । विवृतश्चायंप्रासादवासिन्यायोमहाभाष्येप्रथमपादे "मुखनासिकावचनोऽनुनासिक"इत्यत्र । प्रागुक्तैंद्राग्नादिवैषम्यमाह ॥ ऐंद्रेति ॥ "ऐंद्राग्नमेकादशकपाल"मित्यादाविंद्राग्नीदेवताअस्येतिविगृह्य "सास्यदेवते"त्यण्प्रत्ययस्योभाभ्यांपरतउत्पादितत्वेनद्वयोरन्योन्यसापेक्षयोरेकमेवदेवतात्वंव्यासज्यवृत्ति । अन्यथाप्रत्येकंदेवतात्वे "समर्थःपदविधि"रितिसूत्रात्समर्थानुवृत्तेस्तद्धितेपिभावेनप्रत्येकंदेवताकारकात्तद्धितोत्पत्तेरैंद्रमाग्नेयमितिपृथङ्निर्देश

लिंगानितुसावकाशानि । सर्वनियामकत्वादिमतिप्राणादिनियामकत्वादेः
प्रासादवासिन्यायेनसंभवात् । ऐंद्राग्नादौतुदेवतात्वंव्यासज्यवृत्तीत्यग्नेः

गु० आह ॥ एवंचेति ॥ ननुपरमात्मनःसर्वनियामकत्वाद्विशेषाकारेणप्राणादिनियामकत्वव्यपदेशोऽनुपपन्नइत्यतआह ॥ सर्वनियामकत्वादिमतीति ॥ प्रासादवासिन्यायेनेति ॥ प्रासादाधोवसतिऊर्ध्वंचवसत्यपिकदाचित्प्रासादवासित्वस्यापिसत्त्वात्प्रासादवासित्वव्यपदेशवदित्यर्थः । नन्वेवमाग्नेयंचतुर्धाकरोती ॥ ६५७ ॥

प्र०स्यात् । आग्नेयमित्यत्रत्वितरनिरपेक्षाग्नेरेवदेवतात्वस्यतद्धितेनबोधितत्वात्तदात्रतस्यैवग्रहणंनान्यस्येत्यर्थः ॥ प्रत्येकमिति ॥ अन्यथापृथिव्यप्तेजोवाय्वादीन्यमयतीतिश्रूयेतेतिभावः ॥ यद्देवानिति ॥ तद्वैत्वंप्राणोऽभवः । महान्भोगःप्रजापतेः । भुजःकरिष्यमाणः । यद्देवा"निति तैत्तिरीयवाक्यस्यवैष्णवत्वंच "अतएवप्राण"इत्यत्रसिद्धमितिभावः । उक्तंचभाष्ये "तस्यैवप्राणत्वोक्तेस्तद्वैत्वंप्राणोऽभवइती"ति । "तंभूतिरितिदेवाउपासांचक्रिर"इत्यैतरेये "प्राणस्तथे"त्यत्रोक्तरीत्याविष्णोरेवसर्वदेवतोपास्यत्वश्रवणादित्यर्थः । श्रुत्यंतरे षट्प्रश्ने । प्राणशब्दितसर्वेंद्रियाभिमानिनियामकत्वश्रवणेपीहप्राणापाननियामकत्वस्यैवश्रुतत्वेनवायुलिंगाप्रतीतेरित्यर्थः । एवंलिंगद्वयंविष्णावुपपाद्यमध्यमत्वमपि

प्रत्येकंतत्रदेवतात्वाभावान्नाग्नेयता । नियमनंतुनव्यासज्यवृत्ति । "यःपृथिवीमंतरोयमयती"
त्यारभ्य "यःप्राणमंतरोयमयती"तिप्रत्येकंनियमनश्रवणात् । "यद्देवान्प्राणयोनव । देवाउपा
सांचक्रिरे"इत्यादिश्रुतिषुब्रह्मणोविशिष्यप्राणनियामकत्वादिश्रवणाच्च । "एवमेवैषप्राणइतरा
न्प्राणान्पृथक्पृथगेवसन्निधत्तेपायूपस्थेऽपानंचक्षुःश्रोत्रेमुखनासिकाभ्या"मितिश्रुत्यंतरेमुख्य
प्राणउक्तस्यसर्वप्राणनियामकत्वस्य "ऊर्ध्वंप्राणमुन्नयत्यपानंप्रत्यगस्यती"त्यनेनाप्रतीतेश्च ।

गु० त्युक्तऐंद्राग्नस्यापिधीःस्यादित्यतआह ॥ ऐंद्राग्नादौत्विति ॥ परोक्तंसमाख्यानंदूषयति ॥ एवमेवैषप्राणइति ॥ अप्रतीतेश्चेति ॥ अप्रतीतेर्वाक्यद्वये प्राणस्यस्थानभेदोक्तिरितिभावः । मध्येवामनमासीनमिति सर्वोत्तमत्वरूपकाष्ठात्वविरोधिमध्यस्थत्वमतमुच्यमानंन्यायावेवोपपद्यते । ननुविष्णावितिकथंतस्ससावका

SGDF Sri Gargeshwari Digital Foundation

प्र० सावकाशयति ॥ **मध्यइति** ॥ **साहचर्यादिति** ॥ यथा "वत्समालभेते" तिश्रुतवत्सालंभस्यगोदोहनादिगुणकर्मसाहचर्येणगुणकर्मत्वंत थेतिभावः ॥ **ऊर्ध्वेति** ॥ ऊर्ध्वशब्दस्यपूर्वसापेक्षत्वेनतत्प्रतियोगिसमर्पकत्वाच्चमध्यदेशवाचीत्यर्थः । अस्त्वेवंकिंततइत्यतोदृष्टांतपूर्वसंगमयति ॥ **एवंचेति** ॥ नवमस्याद्यपादे "अभ्यासस्सामिधेनीनांप्राथम्यात्स्थानधर्मस्स्या" दितिनवमेऽधिकरणेदर्शपूर्णमासयोःपंचदशसामिधेनीर्विधा यैकादशर्चःपठित्वा "त्रिःप्रथमामन्वाह । त्रिरुत्तमां । ताःपंचदशसंपद्यंत" इतिश्रुतंवाक्यमुदाहृत्य त्रिरभ्यासःकिं प्राथम्योपलक्षितायाऋ चःप्रवोवाजीयायाधर्मः । तथाचयत्रतत्रस्थप्रवोवाजीयात्रिरभ्यसितव्या उतप्रथमस्थानधर्मः । ततश्चप्रवोवाजीयायाअन्यापियाविकृतिषु प्रथममुच्यतेसाप्यूहेनत्रिरभ्यसितव्येतिविशये प्रथमामितिस्त्रीलिंगनिर्देशात्तस्याएवर्चःत्रिरभ्यासइतिप्राप्ते प्रथमाशब्देनैवश्रुत्याप्राथम्याभिधा नात् ऋचस्तुलक्षणीयत्वाद्यत्प्रथममुच्यतेतत्रिरितिप्राथम्यैकार्थसमवेतत्रिरभ्यासस्यविधिः । स्त्रीलिंगंतुप्राथम्यस्यऋगाश्रयत्वेनैवप्राप्तत्वाद्गुण

मध्येवामनमित्यत्रचमध्यशब्दोदेशवाची । "ऊर्ध्वंप्राण" मितिदेशवाचकोर्ध्वशब्दसाहचर्यात् । ऊर्ध्व त्वप्रतियोगित्वाच्च । एवंचयथा "त्रिःप्रथमामन्वाहे" त्यत्रप्रथमाशब्दोयाऋग्यत्रप्रकृतौविकृतौवाप्रथम स्थानस्थातत्परएव । नतुप्रकृतौप्रथमस्थानस्थप्रवोवाजीयऋग्विशेषमात्रपरः । एवंमध्यशब्दोपीह "ऊर्ध्वं प्राण" मितिप्राणस्यस्थानांतरनिर्देशात्तत्त्यागेनमध्यमस्थानस्थब्रह्मपरः । नतुश्रुत्यंतरेमध्यमशब्दोक्तप्राण परः । तस्माल्लिंगानिसावकाशानि । तदुक्तंन्यायविवरणे "लिंगानांपरमात्मन्यवकाशोविद्यतएवे" ति । ॥ ६५८ ॥

गु० शत्वमित्यतआह ॥ **मध्येवामनमित्यत्रचेति** ॥ **अंगुष्ठमात्रवाक्यइति** ॥ अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठतीत्यंगुष्ठमात्रवाक्येमध्यआत्मनीत्यस्य देहां

SGDF
Sri Gargeshwari Digital Foundation

प्र० वाचिनामाश्रयलिंगवचनत्वान्नित्यानुवादः । तस्मात्प्रथमस्थानधर्मएवत्रिरभ्यासइतिसिद्धांतितं । तत्रयथाप्रथमाशब्दःप्रथमस्थानस्थऋङ्मात्रपरोनतुविशेषपरः । एवमिहापिमध्यस्थानस्थपरोनतुतत्रस्थप्राणरूपविशेषपरः । तस्यस्थलांतरेनिर्देशात् । तथाचमध्यस्थंब्रह्मैवेतितत्परइतिसिध्यतीत्यर्थः । एवंप्रथमसूत्रोक्तेश्रुतिलिंगयोर्निरवकाशत्वसावकाशत्वेसमर्थ्येदानींपूर्वपक्ष्युक्तांगुष्ठमात्रत्वस्यापि "हृद्यपेक्षयात्वि"तिद्वितीयसूत्रोक्तंसावकाशत्वंहृदिविद्यमानावकाशापेक्षयेत्यादिटीकायांद्वेधाभिप्रेतमितिभावेनटीकांविवृण्वन्नाह ॥ **अंगुष्ठेति** ॥ एतेनटीकावाक्यंवाशब्दसंयोजनेनयोज्यमित्युक्तंभवति । टीकायांक्वचिद्वाशब्देनापिपाठः । सौत्रंसमाधानमाक्षिप्यसमाधत्ते ॥ **नन्विति** ॥ "प्रमाणेद्वयसज्दघ्नञ्मात्रच"इतिसूत्रादंगुष्ठशब्दान्मात्रच्प्रत्यये "जानुमात्रंजल"मितिवदंगुष्ठपरिमाणइत्यर्थोलभ्यते । ततश्चकिमित्यतआह ॥ **अंगुष्ठेति** ॥ **वैयर्थ्येति** ॥ अंगुष्ठपरिमितत्वस्यस्थानसापेक्षत्वाभावादितिभावः । नन्विदंसमाधानंपश्वादीनामंगुष्ठाभावेनतदंतर्गतविष्णावसंभ

अंगुष्ठमात्रत्वंचमूर्तिविशेषस्यव्यक्त्यात्मनांगुष्ठमात्रत्वाद्वा स्थानहृदयगतस्यस्थानिनिब्रह्मण्युपचाराद्वायुक्तं । ननु परिमाणार्थकमात्रच्प्रत्ययोयंनत्ववधारणार्थोमात्रशब्दः । "देहांगुष्ठमितोदेहेजीवांगुष्ठमितोहृदी"तिस्मृतौमितइत्तिपरिमाणस्यैवोक्तेः । अंगुष्ठपरिमाणत्वंचसर्वगतस्यापिव्योमवदित्युक्तमित्येवसूत्रेकस्मान्नसमाहितमितिचेत् तथात्वेअंगुष्ठमात्रवाक्ये "मध्यआत्मनी"त्यस्यहृदीत्यस्यचवैयर्थ्यापातात् । "अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रित"इतिश्रुत्यंतरेचांगुष्ठमात्रहृदयगतत्वेनांगुष्ठमात्रत्वोक्तेः । स्मृतावपिहृदीत्यादेरवैयर्थ्यायावधारणस्यविवक्षणीयत्वाच्च ।

गु० गुष्ठमितोदेहेजीवांगुष्ठमितोहृदीत्यत्रहृदीत्यस्यचवैयर्थ्यापातादितिभावः॥ **स्मृतावपीति**॥ देहांगुष्ठमितोदेहेजीवांगुष्ठमितोहृदीतिस्मृतावपीत्यर्थः॥ किंचाल्पश्रुतेरित्यु

SGDF
Sri Gargeshwari Digital Foundation

प्र० वीत्यतोमनुष्याधिकारत्वादितिसूत्रशेषतात्पर्यंभाष्यटीकयोरुक्तमाह ॥ **प्राणीति** ॥ अत्राद्यसूत्रस्यहेतूक्तिपरत्वाद्द्वितीयस्यबाधकनिरसनपरत्वात्पौर्वापर्यसंगतिःस्पष्टेत्युपेक्ष्योक्तन्यायस्यसूत्राक्षरारूढतांटीकोक्तामेवसंगृह्यदर्शयति ॥ **प्रमितेति** ॥ अत्र आद्यसूत्रे ॥ **अन्येत्विति** ॥ तत्रभामत्यां "नांजसामानभेदोस्तिपरस्मिन्मानवर्जिते । भूतभव्येशताजीवेनांजसातेनसंशय"इत्यादिनासंशयपूर्वोत्तरपक्षाउक्ताः । तथाहि । किमंगुष्ठमात्रश्रुत्यनुग्रहायजीवोपासनपरमेतद्वाक्यमस्तुतदनुरोधेनेशानश्रुतिःकथंचिन्नीयतामाहोस्विदीशानश्रुत्यनुग्रहायब्रह्मपरमेतदस्तु तद

प्राण्यंतरस्यांगुष्ठाभावेपिशास्त्रस्यमनुष्याधिकारिकत्वात् । मनुष्याणां
चांगुष्ठस्यसत्त्वेनादोषत्वात् । प्रमितग्रहणेनात्रश्रुतेर्निरवकाशतां ।
एवकारेणलिंगेभ्यःप्राबल्यंसूत्रकृज्जगौ ॥ १ ॥ अन्येतु "अंगुष्ठमात्रः
पुरुष"इतिश्रुतोंगुष्ठमात्रोजीवः । परिच्छिन्नेतत्रतन्मात्रत्वसंभवात् ।

प्र० नुरोधेनांगुष्ठमात्रश्रुतिःकथंचिन्नीयतां । तत्रान्यतरस्यान्यतरानुरोधविशयेभामत्युक्तरीत्यैवपूर्वोत्तरपक्षावनुवदति ॥ **अंगुष्ठेति** ॥ तत्र जीवे । तस्यांतःकरणाद्युपाधिकल्पितब्रह्मभागत्वात् अंतःकरणस्यचप्रायोहृत्कमलकोशस्थानत्वात् हृत्कमलकोशस्यचमनुष्याणामंगुष्ठपरिमितत्वात्तदवच्छिन्नोजीवोपितथा । नभइववंशपर्वावच्छिन्नमरत्निमात्रमित्यर्थः । नतुब्रह्मणि । अपरिच्छिन्नत्वादितिभावः । किंच "अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबला"दितिस्मृत्याचजीवएवांगुष्ठमात्रः । सर्वेश्वरस्ययमेनसमाकर्षायोगादित्यपिबोध्यं । ननुकथंजीवेभूतभव्येशानत्वं ॥ ६५९ ॥

प्र० युक्तमित्यतआह ॥ **ईशानइति** ॥ दहराधिकरणपौनरुक्त्याशंकोत्तरेअनुवदति ॥ **नचेति** ॥ युक्तंहृत्पुंडरीकदहरस्थानत्वंपरब्रह्मणः । तदुपलब्धिस्थानविशेषस्यहृत्पुंडरीकस्यतत्रनिर्देशात् । इहतदभावात् । नच "मध्यआत्मनी"त्यत्रापिस्थानभेदोनिर्दिष्टइतिशंक्यं । आत्मशब्दस्यस्वभावब्रह्मजीवसाधारणतया स्वभावस्यस्वभवित्रधीननिरूपणतया स्वस्यचभवितुरनिर्दिष्टतया कस्यमध्यइत्यज्ञानाज्जीवपरयोश्चांजस्येनमध्यासंभवान्नात्रस्थाननिर्देशस्स्पष्टइतिभावः ॥ **ब्रह्मेति** ॥ "अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्रभूताच्चभव्याच्चय

"ईशानोभूतभव्यस्ये"तिचरमश्रुतमीशानत्वंतुप्रथमश्रुतांगुष्ठमात्रत्वानुरोधात्संकोचयितव्यं । नच "अल्पश्रुते"रिति
न्यायेनेश्वरेप्यंगुष्ठमात्रत्वं । तत्रहृत्पुंडरीकस्येवेहस्थानविशेषस्यानिर्देशादितिप्राप्ते ब्रह्मप्रश्नोत्तरत्वादस्येशानत्वमसंकु
चितमेव । अंगुष्ठमात्रत्वोक्तिस्तुब्रह्मणोजीवैक्याभिप्रायेतिसिद्धांतइत्याहुः । तत्रतावत्पूर्वपक्षएवायुक्तः । "ईशानो
भूतभव्यस्ये"त्यस्यांगुष्ठवाक्याच्चरमत्वेपि "ईशानंभूतभव्यस्ये"त्यस्यप्रथमत्वेनांगुष्ठवाक्यस्येशानश्रुतिभ्यांसंदष्टत्वात् ।

प्र० त्तत्पश्यसितद्वदे"तिप्राग्ब्रह्मणःपृष्टत्वादुत्तरग्रंथसंदर्भस्यतत्प्रतिवचनत्वमेवयुक्तमितिभूतभव्येशानत्वंनिरंकुशमेव । नसंकोचनीयमित्यर्थः ॥ **जीवैक्येति** ॥ यथा "तत्त्वमसी"तिजीवस्यत्वंपदार्थस्यतदितिपरमात्मनाविरुद्धांशत्यागेनैकत्वमुच्यते तथेहाप्यंगुष्ठपरिमितस्यापिजीवस्येशानश्रुत्याब्रह्माभेदःप्रतिपाद्यतइत्यर्थः । तदुक्तंभामत्यां "प्रश्नोत्तरत्वादीशानश्रवणस्याविशेषतः । जीवस्यब्रह्मरूपत्वप्रत्यायनपरंवच"इति । यत्तावदुक्तंप्रथमश्रुतांगुष्ठमात्रत्वानुरोधेनचरमेशानत्वंनेयमिति तत्तावन्नेत्याह ॥ **ईशानइति** ॥ यदपिदहराधिकरणवैषम्यंतदपिनेत्याह

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ **अंगुष्ठेति** ॥ अभ्युपेत्येदमुदितं । वस्तुतस्तु “मध्यआत्मनी”त्यत्रदेहादिमध्यरूपस्थाननिर्देशोस्ति । तथातृतीयवाक्येपिहृदयइतिस्पष्टः स्थाननिर्देशोस्तीत्यपिध्येयं । यदपीशानत्वमसंकुचितंब्रह्मणीतितदपिनेत्याह ॥ **किंचेति** ॥ यदप्यंगुष्ठमात्रोक्तिरैक्याभिप्रायेति तत्किंवाक्यस्यमुख्यार्थतालाभायकल्प्यतउतप्रामाण्याय । नद्वयमपियुक्तमित्याह ॥ **ऐक्येति** ॥ **संभवादिति** ॥ ब्रह्मणइतिभावः । ननुकोविशेष

“अंगुष्ठमात्रःपुरुषोमध्यआत्मनि अंगुष्ठमात्रःपुरुषोज्योतिरिवे”तिवाक्यद्वयेस्थानस्यानिर्देशेपि “अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्ट”इतितृतीयवाक्येस्थाननिर्देशाच्च। सिद्धांतोप्ययुक्तः । तत्पक्षे “अन्यत्रधर्मादन्यत्राधर्मा”दित्यत्रब्रह्मणइव “येयंप्रेतेविचिकित्सामनुष्य”इत्यत्रजीवस्यापिपृष्टत्वेनांगुष्ठवाक्यस्यजीवपरत्वेप्यदोषात् । किंचनिर्विशेषंब्रह्मैवैतत्पादार्थः । नचतस्यकिंचिदपिप्रतीशितृत्वमस्ति । जीवस्यतुस्वनियम्यंदेहादिकंप्रत्यस्ति । एवंचईशानोजीवएवस्यात्स्वदेहादेर्नियामकः । निर्विशेषंतुनेशानमेकस्याप्यनियामकं ॥ १ ॥ ऐक्याभिप्रायत्वमपिनतावन्मुख्यार्थत्वाय कल्प्यं। वाच्यार्थयोरैक्यानंगीकारात् । नापिप्रामाण्याय । भेदेप्यंगुष्ठमात्रहृदयनिष्ठत्वेनगौणांगुष्ठमात्रत्वसंभवात् ।

गु० त्तन्यायेनेश्वरेंगुष्ठमात्रत्वंसंभवत्येवेतितेनैवगतार्थता। नचतत्रहृत्पुंडरीकस्येवेहस्थानविशेषस्यानिर्देशान्नांगुष्ठमात्रत्वमीश्वरस्येत्युक्तं । तत्राह ॥ **अंगुष्ठमात्रइति**॥ यद्यप्यत्रमध्यआत्मनीत्यनेनापिस्थाननिर्देशाद्वाक्यद्वयेस्थाननिर्देशाभावोक्तिरयुक्ता । तथापिस्पष्टमधिष्ठानस्यानुक्तत्वाभिप्रायेणेयमुक्तिरितिबोध्यं । यदुक्तमंगुष्ठमात्रत्वोक्तिस्तुजीवैक्याभिप्रायेति तत्रैक्याभिप्रायार्थत्वंकिंमुख्यार्थत्वायकल्प्यं किंवाप्रामाण्याय । नाद्यइत्याह ॥ **नतावदिति** ॥ ननुचमत्पक्षेलक्षणावद्भवत्पक्षेंगुष्ठ

SGDF Sri Gargeshwari Digital Foundation

प्र० इत्यतआह ॥युक्तंचेति॥ प्रकारांतरेणान्यथोपपत्तिंवदन्नाभेदकल्पनंयुक्तमित्याह ॥किंचेति॥ अत्रतथास्थाननिर्देशोनेतितुप्रत्युक्तमितिध्येयं। कल्पकाभावमुक्त्वातत्प्रकरणगतपूर्वोत्तरबहुवाक्यविरोधमाह ॥ किंचपूर्वत्रेति ॥ “यइदंमध्वदंवेदआत्मानंजीवमंतिका”दितिजीवस्यसमीपस्थमात्मानंवेदेतिवाक्ये अंतिकशब्देनभेदप्रतीतेः “तंदेवास्सर्वेर्पितास्तदुनात्येतिकश्चने”तिवाक्ये अर्पिताःप्राप्ताइतिप्राप्तृप्राप्यभावेनभेदः ।

युक्तंचाभेदायांगुष्ठमात्रादिश्रुतीनामीशानादिश्रुतीनांचामुख्यार्थत्वादप्यंगुष्ठमात्रत्वश्रुतिमात्रस्यभेदेनगौणार्थत्वं । किंचत्वत्पक्षेजीवस्यापिनस्वतोंगुष्ठमात्रत्वं । किंतुहृत्कमलकोशोंगुष्ठमात्रोमनश्चप्रायेणतत्स्थंतदवच्छिन्नश्चजीवइत्येवमौपाधिकं । एवंचेश्वरस्यजीवाभेदंविनैवदहराधिकरणोक्तांगुष्ठमात्रहृत्कमलकोशस्थत्वादंगुष्ठमात्रत्वोपपत्तौकिंजीवाभेदकल्पनया । किंचपूर्वत्र “आत्मानंजीवमंतिका”दिति “तंदेवाःसर्वेर्पिता”इति उत्तरत्रच “अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठती”ति “तादृगेवभवती”ति इतरेणतुजीवंती”ति “सुप्तेषुजागर्ती”ति “नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामा”निति “तमात्मस्थ”मिति “भयादस्याग्निस्तपती”तिभेदस्यैवश्रुतेःकथमभेदपरत्वं । किंचांगुष्ठमात्रेश्रुतंसर्वदेवोपास्यत्वंनपूर्वपक्षस्यानुगुणं । जीवमात्रस्यसर्वदेवोपास्यत्वायोगात् । नापिसिद्धांतस्य । ज्ञेयेनिर्विशेषेब्रह्मण्युपास्यत्वायोगादिति ।

गु० मात्रत्वस्यगौणत्वंभवतीत्यविशेषात्कुतोभवन्मतमेवप्रामाणिकमित्यतोलक्षणापेक्षयागौण्यामुख्यत्वादितिपरिहारेसत्येवपरिहारांतरमाह ॥युक्तंचेति॥ ज्ञेयइति॥ तत्पादप्रतिपाद्यइत्यर्थः । यद्वा ज्ञेये ज्ञानविषयइत्यर्थः । उपासनाया अविद्यमानविषयकत्वाद्ब्रह्मविषयत्वंनसंभवति । ब्रह्मणोज्ञानविषयत्वेनज्ञानस्यचपरमार्थस

SGDF
Sri Gargeshwari Digital Foundation

प्र० आत्मनिजीवइत्याधारसप्तम्याभेदसिद्धिः । "यथोदकंशुद्धेऽशुद्धमासिक्तंतादृगेवभवति । एवंमुनेर्विजानतआत्माभवतिगौतमे"ति सादृश्य वाचिनातादृक्शब्देनभेदसिद्धिः । "नप्राणेननापानेनमर्त्योजीवतिकश्चन । इतरेणतुजीवंतियस्मिन्नेतावुपाश्रिता"वित्यत्रोपजीव्योपजीवक भावेन "यएषसुप्ते"ष्वित्यादौस्पष्टोभेदः । व्यावहारिकभेदपराण्येतानीतिप्रत्युक्तमंतर्यामिनये । ज्ञेयइतिहेतुगर्भं ॥ केचित्त्विति ॥ "अंगु ष्ठमात्रःपुरुष"इतिवाक्यत्रयेश्रुतोंगुष्ठमात्रःप्रत्यगात्मोतपरमात्मेतिविशये तृतीये "हृदय"इतिस्थाननिर्देशेनपरोक्तरीतिरयुक्तेत्यन्यथाऽधिकरण

केचित्तु "प्राणाधिपःसंचरतिस्वकर्मभिरंगुष्ठमात्र"इतिश्रुत्यंतरेजीवस्यांगुष्ठमात्रत्वश्रवणादीश्वरस्यचक्वापितदश्रवणादिहां गुष्ठमात्रोजीवएवेतिप्राप्ते अन्यत्राश्रुतमप्यंगुष्ठमात्रत्वमिहेश्वरस्यैव । ईशानशब्दादितिसिद्धांतइत्याहुः । तन्न । "अंगुष्ठ मात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः । हृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंती"तिश्वेताश्वतरे"अं गुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभु"गितितैत्तिरीयेचान्यत्रेश्वरस्यापितच्छ्रवणात् ।

प्र० शरीरंवर्णितं । तदनुवदति "प्राणाधिपस्संचरतिस्वकर्मभिरंगुष्ठमात्रोरवितुल्यरूपः । संकल्पाहंकारसमन्वितोय"इतिवाक्यस्यकर्मवशत्वा दिनाजीवपरत्वंसिद्धमितिभावः ॥ जीवएवेति ॥ ईशानत्वंतुप्रथमांगुष्ठमात्रत्वानुरोधेनशरीरेंद्रियभोग्यभोगोपकरणापेक्षयानेयमितिभावः ॥ ईशानेति ॥ भूतभव्यस्यसर्वस्येशितृत्वंजीवेऽयुक्तमितीशानत्वंनिरवकाशं । अंगुष्ठमात्रत्वंतूपासनार्थं । उपासकहृदयेंगुष्ठमात्रेवर्तमान त्वात्तदपेक्षयायुक्तमितिभावः ॥ ईश्वरस्यापीति ॥ अंतरात्मत्वमोक्षप्रदत्वसर्वजगदीशानत्वानामीश्वरलिंगानामन्यत्रश्रवणादितिभावः । ॥ ६६१ ॥

प्र० ननुश्रुतप्रकाशएवैतदाशंक्य "कृत्वाचिंतेयं । परमात्मनोन्यत्रांगुष्ठमितत्वश्रवणाभावमुपेत्यानेनवाक्येनांगुष्ठमितत्वंसिध्यति नेति विचार्यत" इत्यादिनासमाहितमित्यतआह ॥ ईश्वरस्येति ॥ "यदामंत्रगतंब्रह्मलिंगंक्लिष्टंकृत्वातावपिमंत्रौविवादास्पदीकृतौ तदानींनकृत्वाचिंतेय" मितिश्रुतप्रकाशोक्तंपक्षांतरमप्यपाकरोति ॥ यदिचेति ॥ ननुतत्रकर्मवशत्वादिकंजीवलिंगंश्रुतंचेदिहाप्यंतरात्मत्वादिब्रह्मलिंगानिश्रुतानी तिसमं । एतेषांजीवेपिक्लेशेननयनेतेषामपिकथंचिद्ब्रह्मणिनेतुंशक्यत्वादितिसमं । किंचवाक्यद्वयक्लेशापेक्षया "प्राणाधिप"इत्येकस्यैवान्य थानयनमुचितं । अपिचकृत्वाचिंतात्वपक्षे "हृदयेसन्निविष्ट"इतिवाक्येहृदयइतिस्थाननिर्देशोनास्तीत्येवकृत्वाचिंतासंभवेकिंपररीतिमवधीर्य वाक्यांतरान्वेषणक्लेशेन । अपिचजीवस्याप्याराग्रमात्रस्यांगुष्ठमात्रत्वममुख्यमित्युपासनार्थंतदितिनिर्वाह्यं । तत्परमात्मपरत्वेपिसंभवति । उपासनार्थमल्पपरिमाणत्वस्यपरस्मिन्नुक्तदिशाश्रवणात् । अन्यथाजीवेप्यश्रवणात् । यदपि जीवोब्रह्मवेतिविचारेनेश्वरसंबंधिलिंगान्निर्णयः । किंत्वीश्वरत्ववाचिशब्दादेवेतिवा पूर्वपक्ष्याशंकितायाईशानशब्दान्यथासिद्धेर्निरासार्थोवेतिसौत्रैवकारार्थकथनं तदपि "स्वशब्दा"दित्यादा विवावधारणेनविनाप्युपपत्तेरतिशयार्थालाभाच्चापेशलं । तदेतदभिप्रेत्योक्तंदिगिति ॥ एतेन यत्केनचिदुक्तमंगुष्ठमात्रोजीवः शिवोवेतिसं शये रामानुजरीत्यापूर्वपक्षयित्वा "सर्वैश्वर्यसंपन्नःसर्वेश्वरश्चशंभुराकाशमध्य"इतिश्रुत्याभूतभव्येशितृत्वस्यशिवलिंगत्वादीशानश्रुतेस्तत्ररूढत्वा

ईश्वरस्यान्यत्रतच्छ्रवणंनास्तीतिकृत्वाचिंतात्वस्मदुक्तेगत्यंतरेसतिनयुक्ता । यदिचश्वेताश्वतरादेरीश्वरविषयत्वे पूर्वपक्षिणोविप्रतिपत्तिस्तर्हि "प्राणाधिपःसंचरती"त्यादेर्जीवविषयत्वेसिद्धांतिनोपिसाकिंनस्यादितिदिक् ।

गु० त्कर्मत्वेनतत्कर्मभूतब्रह्मणःपरमार्थसत्त्वेनारोपितत्वाभावादित्यर्थः। नाममात्रेणनिर्देशःश्रुतिरितिटीकायांश्रुतिलक्षणमुक्तं। तदयुक्तं। तथात्वेमात्रशब्देनयोगमात्रस

SGDF

प्र० ज्ञशिवएवांगुष्ठमात्रइति तन्निरस्तं । पूर्वपक्षेतन्मतोक्तदोषग्रासात् । यदत्रोक्तं "अंगुष्ठंचसमाश्रित"इत्यादिमंत्रोप्यंगुष्ठमात्रत्वश्रवणादेवजीवपरइत्यत्राक्षिप्यते । अतोनदोषइति तन्न । अंगुष्ठमात्रत्वस्याद्यापिजीवमात्रधर्मत्वासिद्धेः । प्राणाधिपइतिश्रुतेरपिजीवपरत्वेविवादादित्युक्तत्वात् । "अथसत्यवतःकायात्पाशबंधवशंगतं । अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबला"दितिस्मार्तवचसोपितैत्तिरीयाद्यनेकवाक्यबाधकत्वासामर्थ्यात् । किंचांगुष्ठमात्रेश्रुतस्यसर्वदेवोपास्यत्वस्यजीवमात्रेऽनुपपत्तिश्च । सिद्धांतोप्ययुक्तः । "नतेविष्णोजायमानोनजातः सहिसर्वाधिपतिस्सहिसर्वपालस्सईशस्सविष्णुः सप्तार्धगर्भाभुवनस्यरेत"इत्यादिश्रुतिभिः "सर्वेशोविष्णुरेवैकोनान्योस्तिजगतःपतिः । ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुंनैवशक्यत"इत्यादिस्मृतिभिस्सर्वेशितृत्वस्यविष्णवेकनिष्ठत्वात् । विष्णौनिरूढवामनश्रुतिविरोधाच्च । ईशानशब्दस्ययौगिकार्थप्रतिसंबंधिभूतभव्याद्युपादानेरूढ्यनुन्मेषाच्च । "ईशानःप्राणदःप्राण"इतिविष्णौप्रयोगाच्चेति । टीकोक्तश्रुत्यादिलक्षणस्यप्रकृतोपयोगंवदंस्तन्मूलप्रमाणमाह ॥ अत्रेति ॥ टीकायामुक्तमित्यन्वयः । अस्पष्टत्वादाह ॥ तत्रायंभावइति ॥ टीकायां "नाममात्रेणनिर्देशश्श्रुति"रि

अत्र "श्रुतिर्लिंग"मित्यादिभाष्येश्रुत्यादौपूर्वबलीयस्त्वमुक्तं । तदुपपादयितुंटीकायां "श्रुतिर्नामसमुद्दिष्टंलिंगंतल्लक्षणंस्मृतं । पदानिनिरपेक्षाणिवाक्यंप्रकरणंतथा । एकस्यप्रतिपत्त्यंगवचनंस्थानमुच्यते। अन्यत्रतत्समोक्तिस्तुसमाख्यास्थानमेवच । अध्यायादिप्रबंधास्तुप्रभेदाआगमस्य"त्वितितत्वप्रदीपोदाहृतवचनानुसारेणश्रुत्यादिलक्षणमुक्त्वातद्बलाबलबीजमुक्तं । तत्रायंभावः ।

गु० व्यावर्तितत्वेनयोगरूढानांवामनादिशब्दानांयौगिकत्वस्यापिविद्यमानत्वेननाममात्रेणनिर्देशत्वाभावेनश्रुतित्वंनस्यात् । किंचाग्न्यादिश्रुत्यापूर्वपक्षइतिपूर्वोक्तं । तद

SGDF Sri Gargeshwari Digital Foundation

प्र० त्युक्तं । तत्रयानिरूढानितानिनामानीत्युक्त्यारूढशब्दस्यैवश्रुतित्वापत्त्यायोगरूढेवामनादिशब्देऽव्याप्तिरित्यतोभावमाह ॥ **वाचकेति** ॥ रूढ्यायोगरूढ्यावेत्यर्थः । योगरूढस्यापिनामत्वस्यप्रागेवोक्तेरितिभावः । नन्वेवंतल्लिंगादित्यत्रोक्तानंतत्वोद्गीथत्वादिलिंगवाचिशब्देऽति व्याप्तिः । तस्यापियोगरूढिभ्यांविष्णुवाचित्वादितिचेन्न । यौगिकत्वेनैवतत्रलिंगत्वोक्तेः । "अंतवद्वैकिलतेसामे"त्यादौपूर्वत्रांतवत्त्वमुक्त्वाऽऽ काशप्रकरणेऽनंतइत्युक्त्यायौगिकत्वस्यैवप्रतीतेः । अतएवोक्तंतत्र "अंतत्रयोज्झितेविष्णा"वित्यादि । यद्वा अनंतशब्दस्यश्रुतित्वेपितत्रपूर्वो क्तन्यायातिदेशार्थयौगिकत्वमात्राश्रयणेनलिंगत्वोक्तिः । यद्वा "नाममात्रेणनिर्देश"इत्यत्ररूढशब्देनैवनिर्देशइतिप्रतीतेस्सर्वस्यापिशब्दस्यौणा दिकप्रत्ययांतत्वेनयौगिकत्वादप्रसिद्धिरित्यतो "वाचकशब्दःश्रुति"रित्यभिप्रायउक्तः । नचैवमनंतादिलिंगेऽतिव्याप्तिः । तत्रस्वार्थेश्रुतित्वस्या पिसत्त्वात् । निर्णेयार्थेचव्याप्यार्पकत्वेनानुमापकतयावाचकत्वाभावात् । नचैवंवामनशब्दोपिवामनेतृत्वादिव्याप्यार्पकतयानिर्णेयार्थेऽनु मापकइतिनश्रुतिःस्यादितिवाच्यं । आपाततोपिव्याप्यार्पकस्यैवलिंगत्वेनाभिमततयावामनशब्देतदभावात् । तस्यद्विरूपत्वेपिलिंगत्वानाश्र यणेनापाततोरूढ्याश्रयणेनश्रुतित्वाभिधानाद्वा । नन्वेवंयत्तदादिसाधारणशब्दानांसर्ववाचकतयाविष्णोरपिवाचकत्वात्तच्छ्रुतित्वापत्तिरिति चेन्न । श्रुतित्वसामान्यस्येष्टत्वात् । विष्णुश्रुतित्वेप्यनिष्टाभावात् । नचतन्निर्णायकतापत्तिप्रसंगोनिष्टः । श्रुतिमात्रस्यानिर्णायकत्वेपिश्रुति

वाचक(रूढः)शब्दश्श्रुतिः । "नाममात्रेण"तिटीकायांमात्रशब्देनशुद्धोयोगो
व्यावर्त्यः । नतुरूढिसहितः । तेनयोगरूढानांवामनादिशब्दानांनश्रुतित्वहानिः ।

गु० युक्तं । तत्राभ्यादिशब्दानांयौगिकत्वस्यापिसत्त्वेननाममात्रेणनिर्देशत्वाभावादित्यतआह ॥ **रूढश्शब्दःश्रुतिरिति** ॥ असाधारणधर्मोलिंगमितिटीकायामुक्तं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वानपायात्। असाधारण्येनवाचकश्शब्दश्श्रुतिरित्यप्याहुः। नन्वेवमप्यन्विताभिधानेऽन्वयरूपवाक्यार्थेपदस्यैववाचकतयातत्रश्रुतित्वंस्या दितिचेदिष्टत्वात्। नचवाक्यप्रमाणकत्वव्यवहारविरोधः। सामान्यान्वयेश्रुतित्वेपिविशेषान्वयेपदांतरसमभिव्याहारसापेक्षत्वेनतदुपपत्तेः। तदुक्तंतर्कतांडवे "तत्तद्विशेषणोपस्थापनेनपदांतरसार्थक्या"दिति। यद्वा "नाममात्रेणे"त्यत्रनामपदस्यसुबंतपदएवप्रसिद्ध्याप्रातिपदिकप्र त्ययपदरूपश्रुतित्रयपरिग्रहायवाचकश्शब्दश्श्रुतिरित्यर्थउक्तः। एवंच "अत्ताचराचरे"त्यादावादित्यादिप्रातिपदिकस्य गुहानये "ऋतंपिबंता" वितिद्विवचनस्यपिबत्प्रातिपदिकस्यच "ब्रह्मजिज्ञासे"त्यादौब्रह्मपदादेश्श्रुतित्वव्यवहारष्टीकादौयुक्तः। अतएवप्रकृतिप्रत्ययसमभिव्याहारेण जीवान्यगुणपूर्णवस्तुनःकर्मत्वप्रतीत्याविषयसिद्धिरुच्यतेजिज्ञासासूत्रे। नन्वेवं "नतुश्रुतेस्स्वतोभेद"इतितर्कतांडववाक्यविरोधइतिचेन्मैवं। मीमांसकोक्तविधायकत्वविनियोजकत्वादिभेदनिषेधएवतात्पर्यात्। यद्वा "श्रुतिश्शब्दोऽनपेक्षस्स्याद्विध्युक्तिविनियोगकृ"दित्यादिनामीमां सकैर्विधायकाभिधायकविनियोजकभेदेनश्रुतित्रैविध्यमुक्तं। तदयुक्तं। सर्वासांश्रुतीनामभिधायकत्वेनततोविधांतराभावादितिपरमतनिरा समभिप्रेत्य "नाममात्रेणे"त्यादिटीकाप्रवृत्तेत्यभिप्रेत्य "वाचकश्शब्दश्श्रुति"रित्यर्थउक्तः। यथोक्तंतर्कतांडवे "सर्वापिश्रुतिरभिधात्र्येव। ज्ञापकएवहिशब्दोनतुकारकः। परंत्विंद्रादिश्रुतिरिंद्रमभिधत्ते। लिङादिश्रुतिस्तुविधि"मित्यादि। "असाधारणधर्मोलिंग"मिति टीकान युक्तेव। तल्लिंगादित्यादेरसिद्ध्यापत्तेः। सएषोनंतइत्यादौतादृशधर्मवाचिनएवसत्त्वेनधर्मस्याभावादित्यतआह॥ **असाधारणेति**॥ असा

असाधारणधर्मार्पकःशब्दोवातदर्पितोसाधारणधर्मोवेहलिंगं।

गु० तदयुक्तं। तथात्वेगंधवत्त्वधूमादेरप्यसाधारणधर्मत्वेनलिंगत्वंस्यात्। नचेष्टापत्तिः। वाक्यापेक्षयाप्रबलस्यश्रुत्यपेक्षयादुर्बलस्यलिंगस्यैवलक्षणीयत्वादित्यतोव्याचष्टे॥ **असाधारणेति**॥ निराकांक्षपदानिवाक्यमित्यत्रसर्वथाकांक्षाशून्यत्वंवाऽन्यदीयाकांक्षाशून्यत्वंवा। नाद्यः। गौरश्वःपुरुषोहस्तीत्यादेरप्याकांक्षाशून्यत्वेनवा

प्र० धारणधर्मवाचकोलिंगमित्युक्तेऽनेकपदात्मकलिंगेऽव्याप्तिरतस्तदर्पकइत्युक्तं। तदर्पितःशब्दार्पितः। अस्मिन्पक्षे "तल्लिंगा"दित्युक्तिस्तदर्थ स्यलिंगत्वात्तस्यलिंगत्वमभिप्रेत्येतिभावः। अव्याप्तिंनिरस्यति॥ **नहीति**॥ तस्य स्वतंत्रस्य। एवंश्रुतिलिंगयोर्लक्षणटीकांविवृत्येदानीं "श्रुतेस्साक्षादर्थधीजनकत्वात्सर्वतःप्राबल्यं। लिंगस्यानुमापकतयार्थबोधकत्वात्तदानंतर्य"मितिबलाबलोक्तिपरांटीकांविवृणोति॥ **तत्रेति**॥ **दौर्बल्यमिति**॥ विलंबितप्रतीतेर्हेतुत्वादितिभावः। इत्यस्य प्राणव्यवस्थापकत्वबोधकशब्दस्य। यावदयंशब्दस्स्वार्थंव्याप्यमुपस्थाप्येशान

नहीहानुमानमात्रंलक्ष्यं। तस्यवाक्याद्दुर्बलत्वात्। किंतुश्रुतितोदुर्बलंवाक्याच्चप्रबलंवैदिकंलिंगं। तच्चद्वि विधं। एकपदात्मकमनेकपदात्मकंचेति। तत्राद्यंयथा। तल्लिंगादित्यादावनंतइत्यादि। द्वितीयंयथा। "अतएवप्राण"इत्यादौ "श्रीश्चतेलक्ष्मीश्चपत्न्या"वित्यादि। तत्राग्निशब्दादिरूपायाःश्रुतेरग्न्यादिरूपेस्वार्थे साक्षाद्धीहेतुत्वात्सर्वतःप्राबल्यं। धूमशब्दादिरूपस्यलिंगस्यतुस्वार्थेव्याप्येश्रुतिरूपत्वेपिव्यापकेऽग्न्यादौव्या प्यधीद्वाराधीहेतुत्वाच्छ्रुतितोदौर्बल्यं। यथात्रैवव्याप्यापकस्य "ऊर्ध्वंप्राणमुन्नयती"त्यस्यवामनश्रुतितः।

प्र० शब्दाद्यर्थतयावायुंबोधयित्वावाक्यस्यतत्परत्वंबोधयति ततःप्रागेववामनश्रुतिर्झटितिस्वार्थमीशानपदाभिमतंबोधयतीतितस्यदौर्बल्यमि त्यर्थः। निराकांक्षपदानिवाक्यमितिटीका "गौरश्वःपुरुष"इत्यादावतिव्याप्तेरन्योन्याकांक्षावत्पदकदंबकवाक्येसंभवाच्चायुक्तेत्यतस्तदाशयव्यक्ति पूर्वं"वाक्यस्यानेकार्थकथनद्वारार्थानुमापकत्वात्ततोपिदौर्बल्य"मितिटीकावाक्येचानुमापकत्वोक्तिरयुक्ता। तस्यशब्दप्रमाणत्वादित्यतस्तत्साध

SGDF
Sri Gargeshwari Digital Foundation

प्र० यंस्तदवांतरविभागमाह ॥ स्वस्मिन्नेवेति ॥ स्वार्थे संसर्गरूपे ॥ स्वांतरिति ॥ अनेनवाक्यंस्वांतस्थपदार्थनिर्णायकं समभिव्याहर्तव्य
वाक्यार्थनिर्णायकंचेतिद्विविधमित्युक्तंभवति । द्वितीयमपिद्विविधमित्याह ॥ वाक्यांतरेति ॥ इदानीं ''वाक्यस्यानेकार्थकथनद्वारे''ति
वाक्यंव्याख्याति ॥ ततश्चेति ॥ उक्तदिशाऽनुमापकत्वेसतीत्यर्थः । कथंतर्ह्यनुमापकत्वमित्यतआह ॥ प्रश्नोत्तरेति ॥ आदिपदेनश्रुति

स्वस्मिन्नेवपूर्णाकांक्षत्वेनान्यत्रनिराकांक्षपदसंदर्भरूपवाक्यस्यतुस्वार्थेशब्दप्रमाणत्वेपिस्वांतर्गतपदार्थनिर्णयेवास
मभिव्याहृतवाक्यांतरार्थनिर्णयेवाकार्येऽनुमापकत्वमेव । तत्राद्यंयथा । तत्त्वमसीतिवाक्येतत्साद्दश्यंतच्छब्दार्थ
इत्यत्रतत्पदेनसहत्वमसीतिपदसमभिव्याहारस्य । वाक्यांतरार्थनिर्णायकत्वमपितन्निर्णायकश्रुत्यादियुक्तत्वेनवा
प्रश्नोत्तरादिभावेनसमभिव्याहारमात्रेणवा । तत्राप्याद्यंयथा । आकाशइतिहोवाचेतिवाक्येब्रह्माकाशशब्दार्थइ
त्यत्र आकाशःपरायण''मितिवाक्यस्य । द्वितीयंयथा । हृद्यंतर्ज्योतिरिरितिवाक्येब्रह्मैवज्योतिश्शब्दार्थइत्यत्रप्रसिद्ध
जीवपरत्वेऽनुपपन्नस्य ''कतमआत्मे''तिप्रश्नवाक्यस्य। ततश्चवाक्यस्यलिंगवत्साक्षाद्व्याप्यभूतैकार्थासमर्पकत्वाद
व्याप्यभूतानेकपदार्थकथनद्वाराप्रश्नोत्तरादिभावेनसमभिव्याहृतस्वार्थान्वययोग्यएववाक्यांतरार्थइत्यनुमापक
त्वाल्लिंगाद्दुर्बलत्वं । यथा''दहर''इत्यत्र''किंतदत्रविद्यतेयदन्वेष्टव्य''मित्यादिवाक्यस्यापहतपाप्मत्वादिलिंगात् ।

गु० क्यत्वप्रसंगात् । नद्वितीयः । कुंडंतिष्ठति अजातिष्ठतीत्यस्याप्यन्यदीयाकांक्षाशून्यत्वेनवाक्यत्वापत्तेरित्यतोव्याचष्टे ॥ स्वस्मिन्नेवेति ॥ पदानीत्यत्रबहुत्वंनावि
वक्षितमितिभावेनोक्तंपदसंदर्भरूपस्येति ॥ स्वार्थइति ॥ अन्वितशक्तेःसत्त्वात्संसर्गरूपवाक्यार्थेवाक्यस्यशब्दप्रमाणत्वं । तन्निर्णायकश्रुत्यादियुक्तत्वेनेत्यत्रादि

SGDF
Sri Gargeshwari Digital Foundation

प्र० लिंगयोर्ग्रहः ॥विवृतमिति॥ “यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्य”मितिपूर्ववाक्यं “किंतदत्रविद्यत”इत्यादिप्रश्नप्रतिवचनपरवाक्यानुरोधेनाकाशस्यप्रसिद्धाकाशत्वमुपेत्यतद्द्वाराद्यावापृथिव्यादेर्हृत्पद्मस्थत्वादिपरमुत “एषआत्माऽपहतपाप्मे”त्यादिलिंगानुसाराद्ब्रह्मणस्तथात्वपरमितिविशये आकाशस्यदहरवाक्येहृत्पद्मस्थतामुक्त्वाऽन्वेष्टव्यवाक्येदहराकाशांतस्थस्यान्वेष्टव्यत्वउक्ते “किंतदत्रविद्यत”इत्यनेनान्वेष्टव्यआधेयेपृष्टे “यावान्वा”इत्यादिनापूर्वोक्तमाधारमाकाशमनूद्य तत्रपृथिव्याद्याश्रयत्वयोग्यत्वायबाह्याकाशतुल्यतयाविशिष्य “उभेअस्मि”न्नित्यादिनाद्यावापृथिव्यादेरन्वेष्टव्यत्वोक्तेरन्वितत्वेन “किंतदत्रे”त्यादिवाक्यानुरोधाद्द्यावापृथिव्यादेरेवतथात्वपरमितिप्राप्ते पापाद्यप्रसक्त्याजडेऽपहतपाप्मत्वादेरयोगात्सजातीयेजीवेतत्प्रसक्तिमात्रेणब्रह्मणितत्संभवात्तदनुरोधेनवाक्यस्यापिकथंचिद्ब्रह्मणिनेयत्वात्पूर्ववाक्यंब्रह्मणएवसर्वाधारतयाहृत्पद्मस्थत्वादिपरमिति । यद्वा “यावान्वाअयमाकाश”इत्येतद्वाक्यंप्रसिद्धाकाशपरमुतब्रह्मपरमितिविशये प्रसिद्धाकाशस्यदहरवाक्येहृत्पद्मस्थतामुक्त्वेत्यादिद्रष्टव्यं । पूर्ववाक्यमित्यत्राप्युत्तरंवाक्यंब्रह्मपरमित्यपिध्येयं । तत्र यावत् “किंतदत्रे”त्यादिवाक्यंतदाद्यनेकपदार्थसंसर्गरूपस्वार्थंबोधयित्वासमभिव्याहृतपूर्ववाक्यमन्यार्थकमितिबोधयति ततःप्रागेवतत्समानाधिकरणमपहतपाप्मत्वादिशब्दरूपंलिंगंव्याप्यंस्वार्थमुपस्थाप्यहृत्पद्मस्थंब्रह्मेतिनिश्चाययतीतिद्वितीयायामेवकक्ष्यायांनिर्णीतत्वेन तृतीयक

विवृतंचैतत्तत्रैव। अतएवतत्रटीका “वाक्यान्वयानुपपत्ते”रिति।

अत्रापि “लिंगवाक्ययोःसाक्षादसाक्षात्त्वेनभेद”इतिटीकायामि

गु० पदेनलिंगपरिग्रहः । नन्वेकपदात्मकस्यानेकपदात्मकस्यापिलिंगत्वंचेदुच्यते तर्हिटीकाविरोधः । टीकायांलिंगस्यसाक्षाद्व्याप्यभूतैकार्थसमर्पकत्वंवाक्यस्याव्याप्यभू

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्ष्यायांप्रवर्तमानंवाक्यंनतत्रपराक्रमतइत्यर्थः। इदंच "समभिव्याहारमात्रेणवे"त्यस्योदाहरणं। श्रुतियुक्तस्यतुयथात्रैव "मध्येवामनमासीनंविश्वेदेवाउपासत"इतिवाक्यं "ईशानोभूतभव्यस्ये"त्यादिवाक्यार्थनिर्णायकं । यथावा "तमेवैकंजानथआत्मान"मितिवाक्यं "यस्मिन्द्यौ"रित्यादिपूर्ववाक्यार्थनिर्णायकमित्यादि । लिंगयुक्तंतु "सएषपरोवरीया"नित्यादिवाक्यंपूर्ववाक्यार्थनिर्णायकं । यथावा "तदैक्षतबहुस्यांप्रजायेये"तिवाक्यं"सदेवसोम्ये"त्यादिवाक्यार्थनिर्णायकं। स्वांतर्गतपदार्थनिर्णायकंतु "गामानये"त्यादौगोशब्दस्यपृथिव्यादिपरत्वनिरासेनपश्वर्थत्वनिर्णायकं । यथावा "शब्दविशेषा"दित्यत्र "एतमेवब्रह्मेत्याचक्षत"इतिवाक्यंचतुर्मुखाद्यर्थत्वनिरासेनब्रह्मशब्दस्यविष्णवर्थत्वनिर्णायकं। यथावा "यंपृथिवीनवेदे"त्यादिवाक्यंपृथिव्यादिशब्दस्यचेतनार्थत्वनिर्णायकंध्येयमितिभावः । यद्यपिस्वांतर्गतपदार्थनिर्णायकमपिवाक्यं तन्निर्णायकश्रुतिलिंगोपेतत्वेनवाऽऽकांक्षादिमत्पदसमभिव्याहारमात्रेणवेत्यत्रापिद्वैविध्यंसंभवति। "अन्योंतरआत्मानंदमय"इत्यादिवाक्यमानंदमयादिपदार्थनिर्णायकात्मश्रुत्युपेतत्वेन "योवैभूमातत्सुख"मित्यादिवाक्यंभूम्नोविष्णुत्वनिर्णायकपूर्णसुखोपेतत्वेन। समभिव्याहारमात्रेणतु "गामानय एतमेवब्रह्मेत्याचक्षते"इत्यादि । तथापिस्पष्टत्वात्स्वयमेवोहितुंशक्यमितिविशेषाभावाद्वातन्नोक्तमितिध्येयं । नन्वनेकपदात्मकेवाक्येसमभिव्याहृतानिपदान्येवस्वार्थविशिष्टसंसर्गवासंसर्गविशिष्टस्वार्थानेववायुगपद्बोधयंति । नतुपदार्थान्प्रतिपाद्यानंतरंतत्संसर्गंवाक्यार्थंबोधयंति । विरम्यव्यापारानुपपत्तेः । तथाचवाक्यमनेकपदार्थविशिष्टसंसर्गरूपंस्वार्थंबोधयित्वातदन्वययोग्यंवाक्यांतरार्थमनुमापयतीतिलिंगवदेवाविप्रकर्षात्कथंततोदौर्बल्यं । नचपदैःपदार्थस्मृतौजातायामनंतरंवाक्यार्थबोधस्ततस्तदन्वययोग्यवाक्यांतरार्थानुमितिरितिविप्रकर्षइतिवाच्यं । पदकदंबश्रवणवाक्यार्थबोधयोर्मध्येपदार्थस्मृतेरेवानंगीकारात् । उक्तंचतर्कतांडवे "वाक्यस्थपदज्ञानान्वयानु॥ ६६५ ॥

प्र० भवयोर्मध्येपदार्थस्मृतिरेवनास्ती"ति। उक्तंचसुधायामपि "पदनिचयश्रवणवाक्यार्थबोधावांतरार्थस्मृतीनामेवानभ्युपगमा"दिति। नचपदनिचयरूपवाक्यश्रवणानंतरंसंकेतस्मरणेसतिपदार्थविशिष्टसंसर्गबोधइतिविलंबः । लिंगेपिसंकेतस्मरणानंतरमेवव्याप्यरूपस्वार्थबोधइतिसाम्यात् । किंचैकपदात्मकलिंगेझटितिस्वार्थबोधेप्यनेकपदात्मकलिंगेऽनेकपदार्थकथनद्वाराव्याप्यस्वरूपस्वार्थबोधेनविलंबाद्वाक्यादविशेषः । एकपदात्मकेप्यवयवसमभिव्याहारसापेक्षत्वेनविलंबाच्चेतिचेदुच्यते । वाक्यंस्वार्थबोधयित्वातस्याव्याप्यत्वाज्झटितिवाक्यांतरार्थनिर्णयेऽसमर्थंतत् स्वार्थान्वयायोग्यार्थपरत्वेसमभिव्याहारानुपपत्तेरित्यन्यथानुपपत्तिसध्रीचीनमेव वाक्यांतरार्थंनिर्णाययति । लिंगंतुनैवमितिविप्रकर्षसन्निकर्षौ । वाक्यद्वयानुसंधानसापेक्षत्वाद्वाक्यस्यविप्रकर्षः । अनेकपदार्थकथनद्वारेत्युक्तिस्तुविशेषान्वयबोधेऽर्थविशेषोपस्थापकपदांतरसमभिव्याहारसापेक्षत्वमात्रेणवा "युक्तंचैकार्थत्वे"त्यादिवक्ष्यमाणरीत्यापदनिचयश्रवणविलंबेनार्थप्रतीतेर्विलंबितत्वाद्वा संसर्गज्ञानस्यानेकपदार्थपूर्वकत्वाद्वेति ॥ इदमेवेति ॥ ततश्चवाक्यस्येत्यादिनोक्तमेवबीजमित्यर्थः । ननुटीकायां "लिंगवाक्ययोस्साक्षादसाक्षात्त्वेनभेदः । गोत्रभिदं प्रवक्षणाअभिनत्पर्वतानामित्यादिव"दिति पर्वतपक्षभेदकत्वरूपव्याप्यार्पकस्यैववाक्यतयोदाहृतत्वात्कथमेतदेवाभिप्रेतमित्युक्तमित्यतआह ॥ गोत्रेति ॥ यथालिंगयोरेवैकपदानेकपदात्मकयोस्साक्षात्त्वादिनाभेदस्तथालिंगवाक्ययोरपिव्याप्याव्याप्या

दमेवाभिप्रेतं । "गोत्रभिदं प्रवक्षणाअभिनत्पर्वतानां"इतीमेअपिलिंगेएवो
क्तरूपयोर्लिंगवाक्ययोःसाक्षादसाक्षात्त्वेनभेदेदृष्टांतितिते । नतुलिंगवाक्ये ।

गु० तानेकपदार्थकथनद्वारालिंगसमर्पकत्वंच लिंगवाक्ययोःसाक्षादसाक्षात्त्वेनभेदइत्यनेनोक्त्वा तत्रैवगोत्रभिदंप्रवक्षणाइतिदृष्टांतस्योक्तत्वेनतत्रानेकपदात्मकस्यवाक्य

SGDF Sri Gargeshwari Digital Foundation

प्र० र्यकत्वादिनाभेदोज्ञेयः । उदाहरणंतुकिंतदत्रेत्यादिकमेवेतिद्रष्टव्यमितितात्पर्यमुक्तंभवति ॥ अतएवेति ॥ अन्यथातद्यथेत्येवावक्ष्यदिति भावः । कुतएवंलिंगवाक्येएवैते । वदित्यपितद्यथेत्यर्थेव्याख्यायतामित्यतआह ॥ उक्तंहीति ॥ उत्तरत्रान्वयः ॥ अंतरिति ॥ "अंत स्समुद्रेमनसाचरंतं यस्यांडकोशंशुष्ममाहु"रितिसमुद्रस्थत्वब्रह्मांडवीर्यत्वादिलिंगादित्युक्तेः । "अतएवप्राण"इत्यत्र "श्रीश्चतेलक्ष्मीश्चपत्न्या" वितिश्रीलक्ष्मीपतित्वस्य, "जीवमुख्यप्राणे"त्यत्र "तावंतिशतसंवत्सरस्याह्नांसहस्राणी"तिशतायुष्ट्वस्य, "ताअहिंसंताहमुक्थमस्म्यहमुक्थम स्मी"त्यादिप्राणसंवादादिलिंगस्य, "तथाहिदृष्टंलिंगंचे"त्यत्र "अरश्चहवैण्यश्चार्णवौब्रह्मलोक"इतिसुधासमुद्राश्रयलोकवत्त्वादिलिंगस्यचोक्तेरि तिभावः । नन्वेवमपिलोकेऽर्थांतरानुमापकव्याप्त्यार्पकमपिवाक्यमुपलभ्यतइत्यव्याप्यभूतानेकार्थानुमापकत्वेनवाक्याप्राबल्योक्तिरयुक्तेत्याशं क्याह ॥ यद्यपीति ॥ विप्रस्यसंध्यामुपास्स्वेति चोरस्यस्तेयार्थमुद्युङ्क्ष्वेति पांथस्यपंथानंनव्रजेति कामिन्याःकांतप्रलोभनेप्रवर्तस्वेत्यादिरादि

अतएव "इत्यादिव"दितिवत्करणं । उक्तंह्यनेकपदार्पितस्याप्यसाधारणधर्मस्यलिंगत्वं "अंतस्त द्धर्मोपदेशात् अतएवप्राणःजीवमुख्यप्राणलिंगात् तथाहिदृष्टंलिंगंचे"त्यादिसूत्रेषु । तद्व्याख्याने षुभाष्यानुव्याख्यानन्यायविवरणेषु तट्टीकासुच । यद्यपि "अस्तंगतःसविते"त्यादिवाक्यंसं ध्यामुपास्स्वेत्याद्यर्थे तथा "अयंदंडइयंगौ"रित्यादिवाक्यमपिदंडेनगामानयेत्याद्यर्थेलिंगं ।

गु० त्वस्यैवाभिप्रेतत्वात् । भवद्भिश्चानेकपदात्मकस्यापिलिंगत्वाभिधानादित्यतआह ॥ अत्रापीति ॥ अनेकपदात्मकस्यापिलिंगत्वेटीकाकारीयंज्ञापकमाह ॥ अतए वेति ॥ ननुतद्यथेत्यादिवद्वत्करणस्योदाहरणार्थत्वस्यापिसंभवेनकथमेतदित्यतोऽनेकपदात्मकस्यापिलिंगत्वेज्ञापकमाह ॥ उक्तंहीति ॥ एकप्रमेयप्रतिपादकेति

SGDF Sri Gargeshwari Digital Foundation

प्र० पदार्थः । सवित्रस्तमयस्यतद्व्याप्यत्वादितिभावः ॥ **उक्तंहीति** ॥ आनुमानिकपादेशब्दवृत्तिचिंताप्रस्तावे “व्यंजनंनामपरावृत्तिरस्तीति चेन्न । अनुमानत्वेनशब्दशक्तित्वानंगीकारात् । यथोक्तं । वचनलिंगानुमाहिसेती”तिकर्मनिर्णयवाक्यमुदाहृत्यानुमानत्वमुक्तमित्यर्थः ॥ **वाक्यांतरेति** ॥ वाक्यांतरार्थावसायकवाक्यमिहाभिप्रेतं । तच्चोक्तरूपमेवेतिनदोषइतिभावः ॥ **उक्तंहीति** ॥ भक्तिपादे “संध्येसृष्टि राहहि”इत्यधिकरणव्याख्यावसरउक्तमित्यर्थः । अखिलाउपक्रमादयः नियतव्याप्तयः योयत्रोपक्रम्यतेसतत्रप्रतिपाद्यतइत्यादिरूपांव्याप्तिमपेक्षमाणाआगमार्थावसित्यर्थाइत्यर्थः । तथाविधा व्याप्तिमपेक्ष्यागमावसित्यर्थेत्यर्थः । एवंवाक्यस्यदौर्बल्यंतद्बीजंचोपपाद्येदानीं “एक प्रमेयप्रतिपादकानेकवाक्यानिप्रकरण”मितिटीकाविवरणपूर्वं “प्रकरणस्यबह्वर्थपरत्वेनार्थानुमितिहेतुत्वात्तदवमते”तिटीकावाक्यंचव्यनक्ति ॥ **एकेति** ॥ भिन्नतात्पर्यकवाक्यसंदर्भेतिव्याप्तिवारणायैतद्विशेषणं । बह्वर्थपरत्वेननिमित्तेनयान्यनेकान्यवांतरवाक्यानितदर्थधीपूर्वकमित्यर्थः ॥

उक्तंहिसुधायां “वाक्यलिंगानुमाहिसे”ति । तथापिवाक्यांतरार्थावसितावलिंगत्वान्नतदिहोदाहरणं । उक्तंह्यनुव्याख्याने “आगमार्थावसित्यर्थानियतव्याप्तयोखिलाः । वाक्यंप्रकरणंस्थानंसमाख्याच तथाविधे”ति । एकार्थतात्पर्ययुक्तानेकवाक्यसंदर्भरूपप्रकरणस्यतु

गु० प्रकरणलक्षणं । अत्रैकप्रमेयप्रतिपादकत्वेपर्यायत्वापत्त्याव्याख्याति ॥ **एकार्थेति** ॥ **अतएवेति** ॥ वाक्यात्प्रकरणस्यदौर्बल्यस्यटीकायामभिप्रेतत्वादेवेत्यर्थः । नन्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० यथेति ॥ वक्ष्यतेचैतदधिकरणशरीरं । तत्र "किंज्योतिरयंपुरुष"इतिप्रकरणं "यावदुभौलोकावनुसंचरति इमंलोकमभिक्रामत्युत्क्रमिष्यन्म्रियमाण"इत्यादिजीवसाधारणलिंगप्रतिपादकानेकावांतरवाक्यार्थधीमतःप्रकरणमेतज्जीवपरमितिजानतः "योयंविज्ञानमयःप्राणेषु हृद्यंतर्ज्योति"रितिवाक्यस्यजीवपरत्वंबोधयति ततःप्रागेव "कतमआत्मे"ति "आत्मनैवज्योतिषास्त"इतिपूर्वोक्तात्मस्वरूपप्रश्नवाक्यंस्वार्थप्रतिपादनद्वारासमभिव्याहारेणतद्वाक्यंविष्णुपरमितिबोधयतीतिद्वितीयकक्ष्यायामेववाक्यार्थनिर्णायकतृतीयकक्ष्यायांप्रवर्तमानंप्रकरणंनकल्पयितुंक्षमतइतिवाक्याद्दुर्बलत्वंतस्येत्यर्थः । यद्यपिमहाप्रकरणमवांतरप्रकरणमितिचप्रकरणेपिद्वैविध्यंभाति । यथा "नैवेहकिंचनाग्रआसी"दितिविष्णुपरेमहाप्रकरणे "सएषप्राणस्त्रेधाविहित"इतिप्राणावांतरप्रकरणेन "तस्यप्राचीदिक्शिर"इत्यादिनोच्यमानंकूर्मरूपंप्राणस्येत्युच्यते । वाक्येतुमहावाक्यमवांतरवाक्यमितिविधानसंभवति । महावाक्यस्यानेकवाक्यसंदर्भरूपतयाप्रकरणएवांतर्भावसंभवात् । नचैवंमहाप्रकरणंस्थानमेवेतिवाच्यं । अनेकप्रकरणसंदर्भशून्येपिब्रह्मप्रकरणेऽन्यावांतरप्रकरणसत्त्वात् । तथाचतयोर्विरोधेसन्निकर्षादिसंभवादवांतरप्रकरणंबलवदित्यपिवक्तुंशक्यं । तथापिस्पष्टत्वान्नोक्तमित्याहुः । यत्तु वाक्यइवप्रकरणेपिस्वांतर्गतपदार्थनिर्णायकंतादृशवाक्यार्थनिर्णायकंचे

बह्वर्थपरत्वेनानेकावांतरवाक्यार्थधीपूर्वकमिदंप्रकरणमेतत्परमितियज्ज्ञानं तत्पूर्वकंप्रकरणांतर्गतविप्रतिपन्नवाक्यस्यापिप्रकरणानुगुणएवार्थइत्यनेकवाक्यार्थधीद्वारालिंगत्वाद्वाक्याद्दुर्बलत्वं । यथा "ज्योतिर्दर्शना"दित्यत्र "किंज्योतिरयंपुरुषः

गु०वमनेकपदात्मकस्यापिलिंगत्वेऽनेकपदात्मकस्यलिंगस्याप्यव्याप्यभूतानेकार्थकथनद्वाराव्याप्यसमर्पकत्वाविशेषात्तादृशवाक्यस्यतादृशलिंगाद्दौर्बल्यंस्यादित्यरुचेराह ॥

प्र० त्यपिविधासंभवति । आद्यंयथा "अदितेरदितित्व"मित्यदितिपदार्थनिर्णायकं "नैवेहकिंचने"तिब्रह्मप्रकरणं । द्वितीयंतु "यस्मिन्द्यौ"रित्यादिवाक्यार्थनिर्णायकं "द्वेविद्येवेदितव्ये"इत्यादि । प्रकरणं समभिव्याहृतप्रकरणांतरार्थनिर्णायकमितितुविधानसंभवति । प्रकरणस्यप्रकरणांतरार्थानिर्णायकत्वादिति । तन्न । वाक्यार्थनिर्णयेनैवतस्यलाभात् । नहिपदार्थनिर्णयंविनावाक्यार्थनिर्णयस्समस्ति । एवंस्थानेपिद्रष्टव्यं । एवंलिंगवाक्ययोर्बलाबलत्वेटीकास्वारस्यानुरोधेनबीजांतरंवक्तुंप्रकारांतरेणतत्स्वरूपमाह ॥ यद्वेति ॥ ननूभयोरपिव्याप्यार्पकत्वे कथंप्राबल्यादीत्यतआह ॥ युक्तंचेति ॥ एकइत्येकवचनार्थः । कर्तेतिलकारार्थः । वर्तमानेतिलडर्थः । एकस्यैवलकारत्वलट्त्वरूपधर्म

आदित्येनैवायंज्योतिषास्त"इत्यादिजीवप्रकरणस्यप्रसिद्धजीवपरत्वेऽनुपपन्नात् "कतमआत्मे"त्यादिप्रश्नवाक्यात् । अतएवतत्रटीका "कतमआत्मेतिप्रश्नायोगा"दिति । यद्वात्रटीकायांवत्करणस्य तद्यथेत्यादिवदुदाहरणार्थत्वाट्टीकास्वारस्यानुसारेणव्याप्यार्पकंपदंलिंगं तदर्पकाणिनिराकांक्षपदानिवाक्यं । युक्तंचैकार्थत्वेपि एकःकर्तावर्तमानेकालेस्वार्थपाकक्रियांनिर्वर्तयति पचतेइत्यनयोर्मध्ये एकइत्यादिवाक्यात्पचतइतिपदस्येवझटितिबोधकस्यलिंगस्यवाक्यात्प्राबल्यं । यथा "तल्लिंगा"

गु० यद्वेति ॥ व्याप्यार्पकमिति ॥ अव्यवधानेनेतिशेषः ॥ तदर्पकाणीति ॥ व्यवधानेनेतिशेषः । नन्वेवमुभयोरपिव्याप्यार्पकत्वाविशेषेलिंगस्याव्यवधानेन वाक्यस्यव्यवधानेनव्याप्यार्पकत्वमितिकथमुच्यतइत्यतआह ॥ युक्तंचेति ॥ अस्मिन्पक्षेवाक्यापेक्षयालिंगस्यप्राबल्येकिंतदत्रविद्यतइतिवाक्यस्यापिहृत्पद्मस्थत्वादिलिंगापेक्षयादौर्बल्यमित्युदाहरणंनयुज्यते । तस्यव्याप्यार्पकत्वाभावेनवाक्यत्वाभावादतउदाहरणांतरमाह ॥ यथेति ॥ व्याप्यार्पकाणिनिराकांक्षपदानिवाक्यमि

SGDF

प्र० भेदेनार्थभेदात् । स्वार्थमित्यात्मनेपदार्थः । पाकेतिप्रकृत्यर्थः । निर्वर्तयतीत्याख्यातार्थः । नन्वेवं "कतमआत्मे"तिप्रश्नवाक्यस्यव्याप्यार्पकत्वाभावाद्वाक्यप्राबल्येनेदमुदाहरणमित्यतआह ॥ अस्मिन्निति ॥ सूक्तस्याग्निप्रकरणत्वात् "विमेकर्णे"तिवाक्यस्यकर्णादिविदूरत्वरूपव्याप्यार्पकत्वादितिभावः । एतेनायंपक्षःप्रागेवतत्प्रस्तावेकस्मान्नावतारितइतिनिरस्तं । प्रकरणदौर्बल्यज्ञानेपिवाक्यस्वरूपस्यज्ञातव्यत्वादिति । प्रागुदाहृतसूत्रभाष्यादौलिंगत्वोक्तेर्गतिमाह ॥ सूत्रेति ॥ "अनेकप्रमेयप्रतिपादकमेकार्थेतात्पर्ययुक्तंस्थान"मितिलक्षणटीकांविवृण्वन् "स्थानस्यातिबह्वर्थकथनेनाभिप्रायतोर्थानुमितिजनकस्यततोपिदौर्बल्य"मितिटीकावाक्योक्तंदौर्बल्यबीजंव्यनक्ति ॥ एकार्थेति ॥

दित्यत्रवाय्वादिभूतकारणत्वरूपभूताकाशलिंगार्पकात् "सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंत"इतिवाक्यादनंतत्वलिंगस्य । अस्मिन्पक्षेवाक्यस्यप्रकरणात्प्राबल्ये "ज्योतिश्चरणे"त्यत्राग्निसूक्तात् "विमेकर्णापतयत"इत्यादिवाक्यमुदाहार्यं । सूत्रादौवाक्योक्तेपिव्याप्येलिंगत्वोक्तिस्तुबोधकस्यशब्दस्यवाक्यत्वेपिबोध्यस्यसमुद्रशायित्वलक्ष्मीपतित्वादेर्व्याप्यत्वमभिप्रेत्यावांतरभेदाविवक्षयायुक्ता । एकार्थपरानेकप्रकरणसंदर्भरूपस्थानस्यतु अतिबह्वर्थकथकत्वेनानेक

गु० त्यस्मिन्पक्षे वाक्यस्यप्रकरणापेक्षयाप्राबल्यउदाहरणतयोक्तंकिंज्योतिरयंपुरुषइत्यादिजीवप्रकरणात् आत्मतएषप्राणइतिवाक्यस्यप्राबल्यं । तन्नोपपद्यते । आत्मतएषप्राणोजायतइत्युदाहृतस्यव्याप्यार्पकत्वाभावादित्यतआह ॥ अस्मिन्पक्षइति ॥ नन्वेवमनेकपदात्मकस्यलिंगत्वाभावेश्रीलक्ष्मीपतित्वादेरनेकपदात्मकत्वेनलिंग

SGDF
Sri Gargeshwari Digital Foundation

प्र० प्रकरणार्थधीपूर्वकमिति ॥ तदभावेस्थानस्यतत्परत्वबुद्धेरयोगादितिभावः ॥यथेति॥ उपनिषद्रूपंस्थानं यावत् ‘‘प्रजाकामोहवैप्रजापति’’ रित्यादिस्रष्टृत्वादिभगवन्महिमप्रतिपादकान्यनेकप्रकरणानितदंतस्थविष्णुलिंगबोधकनानावाक्यार्थालोचनपूर्वंब्रह्मपराणीतिविज्ञाय ‘‘सुकेशा भारद्वाजःप्रजाकाम’’इत्यारभ्य ‘‘नमःपरमऋषिभ्य’’इत्यंतंस्थानंविष्णुपरमितिजानत ‘‘एवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्त’’इ तितृतीयप्रश्नस्थंवाक्यंस्थानानुगुणतयाविष्णुपरमितिबोधंजनयति ततःप्रागेव ‘‘आत्मतएषप्राणोजायते । यथैषापुरुषेच्छायाएतस्मिन्नेतदाततं’’

प्रकरणार्थधीपूर्वकमिदंस्थानमेतत्परमितियज्ज्ञानंतत्पूर्वकंस्थानांतर्गतविप्रतिपन्नवाक्यस्यापि स्थानानुगुणएवार्थइत्यनेकप्रकरणार्थधीद्वारालिंगत्वात्प्रकरणाद्दुर्बलत्वं । यथाषट्प्रश्नोपनिष द्रूपस्येश्वरपरस्यस्थानस्य ‘‘भगवन्कुतएषप्राणोजायत’’इत्यादिखंडरूपान्मुख्यप्राणप्रकरणा त् । अतएवतत्खंडमध्यस्थं ‘‘एवमेवैषप्राण’’इत्यादिकंस्थानबाधेनप्रकरणान्मुख्यप्राणप रं । अतएवात्रतत्रोक्तप्राणव्यवस्थापकत्वादीनांमुख्यप्राणलिंगत्वमुपेत्यश्रुत्याबाधउक्तः ।

प्र० मित्यारभ्य ‘‘उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा । अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुत’’इत्यंतंप्रकरणंविष्णुजत्वादिलिंगप्राणश्रुत्युपेतावां तरनानावाक्यार्थधीपूर्वंप्रकरणंवायुपरमितिजानतः तदनुगुणतया ‘‘एवमेवैषप्राण’’इतिवाक्यंवायुपरमितिबुद्धिमुत्पादयतीतितृतीयकक्ष्याया मेवप्रकरणेननिर्णयेचतुर्थकक्ष्यायांप्रवर्तमानंस्थानंनिराकांक्षत्वान्नप्रभवतिनिर्णाययितुमित्यर्थः । लिंगवाक्ययोर्व्याप्यार्पकत्वाविशेषेपिटीको

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्तंभेदमुपपाद्यतदुपलक्षणमितिभावेनस्थानप्रकरणयोरपिस्वयमाह ॥ यथाचेति ॥ अनुवादमहिम्नावाक्यप्रकरणयोरपिभेदस्स्पष्टइत्युक्तंभवति । उक्तरीत्यासन्निकर्षविप्रकर्षयोरानुभाविकत्वादितिभावः । "समानोक्तिस्समाख्ये"तिटीकोक्तेःपक्षसमेऽतिव्याप्तिवारणायतदाशयव्यक्तिपूर्वंतदवांतरविभागमाह ॥ निर्णीतेति ॥ तत्राद्येति ॥ "शब्दादिभ्योंतःप्रतिष्ठाना"दितिसूत्रे "पुरुषविधमपिचैनमधीयत"इत्यनेनयःपुरुषाख्योविष्णुःपुरुषसूक्ते "शीर्ष्णोद्यौस्समवर्तत चक्षोस्सूर्योअजायत प्राणाद्वायुरजायत पद्भ्यांभूमि"रित्यादिनावाक्येनद्व्यादिजनकशीर्षादिमानभिहितः तद्विधमेवात्रवैश्वानरंचाधीयतेछंदोगाः "मूर्धैवसूजाश्चक्षुर्विश्वरूपःप्राणःपृथग्वर्त्मापृथिव्येवपादा"वित्यादिनावाक्येनेत्युक्तत्वेन तत्रशब्दतस्साम्याभावेप्यर्थतःसमानत्वात्समाख्यात्वंयुक्तमित्यर्थः ॥ द्वितीयेति ॥ "परोदिवापरएनापृथिव्यापरोदेवेभिरसुरैर्यदस्ती"त्यनेनविश्वकर्मसूक्तोक्तेनसूक्तांतरे "परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूवे"तिसमाख्यानाच्चविष्णुरेवविश्वकर्मसूक्तोक्तइत्याद्यसूत्रेभाष्यादावुक्तत्वेनशब्दतएवतत्रसाम्यस्यसत्त्वादित्यर्थः । "समाख्यायास्स्थानांतरगतायास्सादृश्यमात्रेणार्थानुमापकत्वात्ततोपिदुर्बलत्व"मितिवाक्यं

यथाचाकांक्षादिमद्वाक्यसंघरूपप्रकरणस्यवाक्याद्भेदः तथाऽकांक्षादिमत्प्रकरणसंघरूपस्यस्थानस्यापिप्रकरणाद्भेदः । निर्णीतस्थलेसमानोक्तिःसमाख्या । साचार्थतःशब्दतश्चेतिद्वेधा । तत्राद्यावैश्वानरस्यविष्णुत्वेपुरुषसूक्तसमाख्या । द्वितीयाविश्वकर्मसूक्तोक्तस्याजस्यविष्णुत्वे अंभ्रणीसूक्तसमाख्या ।

गु० त्वाभावापत्त्यालिंगत्वेनसूत्रोक्तिरयुक्तेत्यतआह सूत्रादाविति ॥ स्थानप्रकरणयोर्भेदमुपपादयति ॥ यथाचेति ॥ समानोक्तिस्समाख्येतिटीकायामुक्तं । तत्र संदिग्धसमानोक्तेःसमाख्यात्वंस्यादतोव्याचष्टे ॥ निर्णीतेति ॥ श्रुतित्वेनचेत्यत्रैवकारेणश्रुतेर्लिंगत्वस्यनव्यावृत्तिः । किंतुलिंगांतरसमर्पकत्वमेवव्यावर्त्यतइतिबोध्यं ॥ ६६९ ॥

प्र० व्यनक्ति ॥ अस्याइति ॥ यथेति ॥ आनंदमयाधिकरणेब्रह्मवल्ल्युक्तान्नमयादयो भृगुवल्लीसमाख्यानाद्ब्रह्मरूपाणीत्युक्तौ भृगुवल्ल्युक्तस्याप्यन्नप्राणादेर्नामैकदेशग्रहणन्यायेनान्नमयाद्यभेदेसिद्धेपि ब्रह्मत्वंकुतः । नारायणोपनिषदुक्तसमाख्ययाकोशत्वमेवकिंनस्यादित्याशंकायांसमाख्याया वत् तदुक्तमेवभृगुवल्ल्यामपिध्येयं । तत्सदृशत्वादितिबुद्धिंजनयति ततःप्रागेवस्थानमेतद्ब्रह्मपरमितिजानतोझटित्यन्नादेर्ब्रह्मत्वंगमयतीतिस्थानात्तस्याविप्रकर्षाद्दौर्बल्यमित्यर्थः । भृगुवल्ल्याब्रह्मपरत्वंकुतइत्यतउक्तं सैषेति । श्रुत्यैव परमेव्योम्नि ब्रह्मणि इयंविद्याप्रतिष्ठितेत्युक्तत्वादित्यर्थः । एतेन ब्रह्मवल्लीस्थानादितिवक्तव्येभृगुवल्लीस्थानादित्युक्तिःकिमर्था । तत्रान्नमयादेस्स्पष्टमुक्तेः । सुधायांतत्रैवान्नमयप्राणमय

अस्याःस्वार्थेशब्दरूपत्वेप्यत्रोक्तमेवस्थलांतरस्थविप्रतिपन्नवाक्येनापिबोध्यमित्यत्रस्थलद्वयानुसंधानपूर्वकंतत्सदृशत्वादिदंतदर्थपरमित्येवंसादृश्यमात्रेणलिंगत्वात्स्थानाद्दुर्बलता। यथा "सैषाभार्गवीवारुणीविद्यापरमेव्योमन्प्रतिष्ठिते"तिश्रुत्याब्रह्मपरानेकप्रकरणसंदर्भरूपभृगुवल्लीस्थानात् "अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयामेशुध्यंता"मितिकोशपरसमाख्यायाः ।

प्र० मनोमयविज्ञानमयानंदमयामेशुध्यंतामितिश्रुत्यंतरानुगुण्यंस्यादित्युक्तेरितिचोद्यंनिरस्तं । अस्येवतस्यब्रह्मणिविनियोजकवाक्यस्याभावेनब्रह्मपरत्वस्यास्पष्टत्वादिति । केचित्तुब्रह्मवल्ल्युक्तान्नमयादयोभृगुवल्लीस्थानाद्ब्रह्मपराउतकोशसमाख्यानात्कोशपरावेतिसंदेहे समाख्यातःप्रबलाद्भृगुवल्लीस्थानाद्ब्रह्मपराइत्यर्थइत्याहुः । तच्चिंत्यं । स्थानस्यस्वांतर्गतवाक्यार्थनिर्णायकत्वेनस्थानांतरगतानिर्णायकत्वात् । अतएवप्राक्स्वांतर्गतेत्युक्तं । अन्यथास्थानद्वयानुसंधानविलंबाविशेषात्समाख्यातःप्राबल्यहानिस्स्यात् । स्थानांतरस्थनिर्णयेबीजाभावाच्चेति । "श्रुतिलिंगवाक्या

SGDF Sri Gargeshwari Digital Foundation

प्र० नांसाक्षाद्विप्रतिपन्नार्थनिष्ठत्वेश्रुत्यादित्वेनैवज्ञापकत्व"मित्यादिटीकांविवरिष्यञ्छ्रुत्यादेर्वैलक्षण्यमाह ॥ **अत्रचेति** ॥ **तत्रोक्तमिति** ॥ अनुव्याख्यानादावुक्तमित्यर्थः । इदानींटीकांविवृणोति ॥ **तत्रेति** ॥ क्रमेणत्रयाणामुदाहरणमाह ॥ **यथेति** ॥ श्रुतेरित्यादेर्ज्ञापकत्वमितियोज्यं ॥ **इत्यादिवाक्यस्येति** ॥ एतच्चव्याप्यार्पकंपदंलिंगंतदर्पकाणिनिराकांक्षाणिपदानिवाक्यमितिपक्षे । तेनतत्रटीकादौलिंगत्वोक्तिविरोधोनशंक्यः । प्रागुक्तसमाधानादितिध्येयं । उपक्रमोपसंहारयोःश्रुतत्वेतन्निश्चायकतयालिंगत्वमितिटीकावाक्यंसोदाहरणंव्यनक्ति ॥

अत्रचश्रुतिःस्वनिर्णयेश्रुतित्वेनैवनिर्णायिका । वाक्यादित्वनुमानत्वेन । अतएव "वाक्यंप्रकरणंस्थानंसमाख्याचतथाविधे"त्यनुव्याख्याने "समाख्यावाक्यप्रकरणस्थानानिचोपपत्तिविशेषा"इतिप्रमाणलक्षणेचवाक्यादीनामेवलिंगतोक्ता। नतुश्रुतेः । लिंगस्यत्वनुमानत्वमविप्रतिपन्नमितिनलिंगंतत्रोक्तं । तत्रश्रुतिलिंगवाक्यानांसाक्षाद्विप्रतिपन्नार्थनिष्ठत्वेश्रुत्यादित्वेनैवज्ञापकत्वं । यथाऽत्रैवसर्वदेवोपास्यरूपविप्रतिपन्नार्थनिष्ठवामनश्रुतेः । यथाचविप्रतिपन्नाकाशनिष्ठस्यानंतत्वादिलिंगस्य । यथाचविप्रतिपन्नांतर्यामिनिष्ठस्य "यंपृथिवीनवेदे"त्यादिवाक्यस्य ।

गु० श्रुतिलिंगवाक्यानांसाक्षाद्विप्रतिपन्नार्थनिष्ठत्वेश्रुत्यादित्वेनैवज्ञापकत्वमितिटीकायामुक्तं । तत्रोदाहरणंदर्शयितुमनुवदति ॥ **तत्रेत्यादि** ॥ उपक्रमोपसंहारयोः श्रुतत्वेतन्निश्चायकतयालिंगत्वमितिटीकायां यत्रसाक्षाद्विप्रतिपन्नार्थनिष्ठत्वंवर्तते उपक्रमोपसंहारयोरपिश्रुतत्वंवर्तते तत्रापिश्रुतिलिंगवाक्यानामुपक्रमोपसंहारनिश्चा

SGDF Sri Gargeshwari Digital Foundation

प्र० श्रुत्यादेरिति ॥ उपक्रमनिश्चायकमुदाहरति ॥**यथेति**॥ "तथाहृष्ट्युपदेशादसंभवात्पुरुषविधमपिचैनमधीयंत"इतिगुणसूत्रे "कोनआत्मा किंब्रह्मेत्यारंभाच्चान्येषामसंभवाद्विष्णुरेववैश्वानर"इतिभाष्यादावसंभवशब्दव्याख्यायांतथोक्तत्वादितिभावः । उपसंहरन्निश्चायकमुदाहरति ॥ **यथाचेति** ॥ वैराग्यपादेपंचमेऽधिकरणेभूतानिकिंजीवेनसहगच्छंति नवेतिसंदेहे वाजसनेयेऽष्टमेध्याये "तस्मिन्नेतस्मिन्नग्नौदेवाः श्रद्धांजुह्वती"त्युक्त्वातस्यश्रद्धयेष्टवतश्श्रद्धासहितस्यैवव्याख्येप्रथमाग्नौहोमश्रवणाद्भूतानामपिसहगतौतथोक्तिप्रसंगान्नसहगच्छंतीतिप्राप्ते उपसंहारे "इतितुपंचम्यामाहुतावापःपुरुषवचसोभवंती"त्यपांजीवेनसहगतिश्रवणात्तदनुसारेणोपक्रमेश्रद्धाशब्दस्याजहल्लक्षणयाश्रद्धयाद्भिश्चयुक्तोजीवोर्थइतिकल्पनोपपत्तेस्सहगच्छंतीतिसिद्धांतितमिति तत्रोपसंहारस्याप्परत्वमपूश्रुत्यासिद्धमित्यर्थः । अन्यत्रचेत्प्रकरणनिश्चायकत्वेनेतिटीकावाक्यंव्यनक्ति ॥ **साक्षादिति** ॥ **यथेति** ॥ अतएवतत्रतच्छ्रुतिलिंगानामस्मिन्प्रकरणेबहुस्थलेष्वनुगमादित्यवादिष्मेतिभावः ।

श्रुत्यादेर्विप्रतिपन्नार्थनिष्ठत्वंविनोपक्रमोपसंहारयोःश्रुतत्वेतन्निश्चायकतयालिंगत्वं । यथा "वैश्वानर"इत्यत्र "कोनआत्माकिंब्रह्मे"त्युपक्रमस्थब्रह्मश्रुत्यादेः। यथाच "प्रथमेऽश्रवणादितिचेन्नताएवह्युपपत्ते"रित्यत्र "इतितु पंचम्यामाहुतावापःपुरुषवचसोभवंती"त्युपसंहारस्थाच्छ्रुत्यादेः । साक्षाद्विप्रतिपन्नार्थनिष्ठत्वंविनोपक्रमोपसंहाराभ्यामन्यत्रश्रुतत्वेतुप्रकरणनिश्चायकतयालिंगत्वं । यथा "प्राणस्तथे"त्यत्र "ब्रह्मेमंपुरुष"मितिब्रह्मश्रुत्यादेः।

गु० यकत्वमित्येवभातीत्यतस्तस्यांटीकायांसाक्षाद्विप्रतिपन्नार्थनिष्ठत्वंविनेतिशेषंसंपूर्यतत्रोदाहरणंदर्शयितुमाह ॥ **श्रुत्यादेरिति** ॥ अन्यत्रचेत्प्रकरणनिश्चायकत्वेनेत्यत्रान्यत्रेत्येतन्नसंकोचनीयमित्याह ॥ **साक्षाद्विप्रतिपन्नार्थनिष्ठत्वंविनेति** ॥ उपक्रमोपसंहारावपीत्यादिटीकायामुक्तं । तच्चोदाहरणपूर्वकमनुवदति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० "उपक्रमोपसंहारावपिश्रुत्यादिनासत्यामर्थसिद्धौतात्पर्यलिंगे। अन्यथाप्रकरणनिश्चायका"वितिटीकांविवृणोति ॥ उपक्रमेति ॥ क्रमेणद्व यमप्युदाहरति ॥ यथेति ॥ व्यक्तमेतत्तत्रैव "प्रकरणाच्चे"ति गुणसूत्रे ॥ यथाचेति ॥ व्यक्तमेतत् "विवक्षितगुणोपपत्तेश्चे"तिगुण सूत्रे । विवक्षितत्वंवक्ष्यमाणत्वमितिस्वयंव्याख्यानात् । द्वयोरपिक्रमेणोदाहरणमाह ॥ यथाद्युभ्वादीति ॥ अन्यमीशमिति ॥ "भेद व्यपदेशा"दितिपूर्वसूत्रोदाहरणइत्यर्थः । अतएवतत्रटीकायांनन्वत्रजीवस्यकस्माच्चिदीशादन्यत्वमुच्यतेनपरमात्मनइतिशंकानिरासकत्वेनप्र करणादितिसूत्रमवतारितमितिभावः ॥ यथाचेति ॥ वक्ष्यतिचैतत्तत्रैव । "समाख्यापिसाक्षाद्विप्रतिपन्नार्थनिष्ठासमाख्यात्वेनैवलिंगमन्य

उपक्रमोपसंहारावपिश्रुत्यादिनाऽर्थेनिर्णीतेतात्पर्यातिशयलिंगे । यथा "अत्ताचराचरे"त्यत्रात्तुर्ब्र ह्मत्वेसर्वात्तृत्वादिनानिर्णीते "नैवेहकिंचनाग्रआसी"दित्युपक्रमः । यथाच "सर्वत्रप्रसिद्धे" त्यत्रसर्वगतस्यब्रह्मत्वेब्रह्मशब्दादिनानिर्णीते "सयोतोश्रुत"इत्याद्युपसंहारः । अन्यथातुप्रकरण निश्चायकौ । यथाद्युभ्वाद्यधिकरणे "प्रकरणा"दित्यत्र "द्वेविद्येवेदितव्ये"इतिपरमेश्वरोपक्रमः "अन्यमीश"मित्यत्रापितस्यैवप्रकृतत्वनिश्चायकः । यथाचानुमानिकाधिकरणे "प्रकरणा"दित्यत्र "तद्विष्णोःपरमंपद"मित्युपसंहारः "अनाद्यनंतंमहतःपर"मित्यादेर्विष्णुप्रकरणत्वनिश्चायकः ।

गु० उपक्रमेत्यादि ॥ अन्यथाप्रकरणनिश्चायकावित्येतत्सोदाहरणमाह ॥ अन्यथेत्यादि ॥ समाख्यापीत्यादिटीकायामुक्तं । तत्सोदाहरणंप्रदर्शयति

प्र० थाप्रकरणनिश्चायकत्वेने"तिटीकांव्यनक्ति ॥ समाख्यापीति ॥अन्यत्रेति॥ तर्कतांडवेद्वितीयपरिच्छेदांते । तथाचनतद्विरोधःशंक्यः । तस्यदुष्टत्वादितिभावः । हृदीतिगुणसूत्रेटीकायामंगुष्ठमात्रत्वं "किंतत्तदंगुष्ठमात्रत्वंवायत्किंचिदंगुष्ठमात्रत्वंवा । नद्वितीयः । कथनवैयर्थ्या दसंभवाच्चे"त्युक्तं । तद्दुर्गमत्वाद्व्यनक्ति ॥ कथनेति ॥ "तुशब्दःपरिच्छिन्नतयांगुष्ठमात्रत्वनिवृत्त्यर्थमेवार्थे"इत्यस्य, "तुशब्दोपिशब्दार्थे" इत्यस्यचविरोधंपरिहरति ॥ पूर्वमिति ॥ ६ ॥ वामनाधिकरणं ॥ ७ ॥

समाख्यापिसाक्षाद्विप्रतिपन्नार्थनिष्ठासमाख्यात्वेनैवलिंगं । यथा "पुरुषविधमपिचैन"मित्यत्र "शीर्ष्णोद्यौःसमवर्तत च क्षोःसूर्योअजायते"तिपुरुषसूक्तोक्तिसमानायाःसाक्षाद्विप्रतिपन्नवैश्वानरनिष्ठायाःवैश्वानरस्य "मूर्धैवसुतेजाश्चक्षुर्विश्वरू पः"इत्याद्युक्तेः । अन्यथाप्रकरणनिश्चायकत्वेन । यथा "परोदिवापरएनापृथिव्यैतावती"त्यंभ्रणीसूक्तोक्तिसमानायाः "अजस्यनाभा"वितिविप्रतिपन्नाजेसाक्षादश्रुतायाः "परोदिवापरएनापृथिव्यापरोदेवेभि"रित्याद्युक्तेरिति । मीमांसको क्तंश्रुत्यादिलक्षणंतद्बलाबलबीजंचान्यत्रनिरस्तं ॥ टीकाक्षरार्थस्तु ॥ कथनवैयर्थ्यादिति ॥ अंगुष्ठवद्व्यक्तिविशेषनिर्धा रणंविनायत्किंचिदंगुष्ठमात्रत्वेनोपासनायाअसंभवात्कथनंव्यर्थमित्यर्थः ॥ असंभवाच्चेति ॥ पिपीलिकाहृदयस्थे अं गुष्ठमात्रत्वसामान्यस्यैवासंभवादित्यर्थः । पूर्वसौत्रस्तुशब्दो "हृद्यवकाशापेक्षये"तिभाष्यानुसारादेवार्थोव्याख्यातः । इदानीं "अंगुष्ठाभावेपी"तिभाष्यानुसारादप्यर्थतयाव्याचष्टे तुशब्दोपिशब्दार्थइति ॥ ६ ॥ वामनाधिकरणं ॥ ७ ॥

गु० ॥समाख्यापीत्यादि॥अन्यथाप्रकरणेनिश्चायकत्वेनेतिटीकायामुक्तं । तत्कुत्रेतिनप्रतीयते । अतउदाहरणमाह ॥ अन्यथेत्यादि ॥६॥ वामनाधिकरणं ॥७॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ ॐतदुपर्यपिबादरायणस्संभवात्ॐ ॥ ननुकथमस्याधिकारचिंतापरस्यसमन्वयाध्यायादौसंगतिः । नच "प्रासंगिकत्वान्नाध्यायादि संगतिर्गवेषणीये"तिटीकोक्तेःप्रासंगिकीतिवाच्यं । तथात्वेज्ञानपादे "असार्वत्रिकी"तिद्वितीयाधिकरणे ब्रह्मज्ञानेसर्वेषामधिकारोस्तिनवेति संदेहे ज्ञानफलेमोक्षेसर्वेषामर्थित्वादेरधिकारप्रयोजकस्यसत्त्वेनास्त्यधिकारइतिप्राप्ते अर्थित्वादिमात्रस्याधिकाराप्रयोजकतयाविष्णुभक्त्यादि पूर्वकाध्यायनादिमत्त्वस्यापिप्रयोजकतयासर्वेषां तथात्वायोगेननसर्वेषामधिकारइतिवक्ष्यमाणत्वेनतत्रैवनिवेशप्रसंगात् । तथात्वेसाक्षात्संग तिसंभवाच्चेत्याशंक्य प्रसंजकोक्तिपूर्वमत्रैवनिवेशंसाधयति ॥ यद्यपीति विशिष्टेति ॥ हिताहितप्राप्तिपरिहारोपायविषयेत्यर्थः । तत्रपूर्वो त्तरमीमांसासिद्धेउदाहरणेआह ॥ यथेति ॥ पश्वेकत्वाधिकरणमुक्तंप्राक्छंदोधिकरणे । यथागुरुमतेचतुर्थे उपादानाख्यप्रमाणविचारा दौपादानिकस्यपश्वेकत्वादिशेषत्वस्यशेषत्वरूपेणतृतीयेसंगतस्यापिचतुर्थेसंगतिस्तथेत्यर्थः । गुरुमतेहिश्रुत्यादिप्रमाणषट्कसिद्धशेषत्वचिंतातृतीये औपादानिकशेषत्वचिंताचतुर्थे विधिव्यापारमुपादानाभिधानं सप्तमंविनियोजकंप्रमाणमितिहिगुरुमतं । तदुक्तंनयविवेकवरदराजीये "औपा

॥ ॐतदुपर्यपिबादरायणःसंभवात्ॐ ॥ यद्यपितृतीयेध्याये "असार्वत्रिकी"त्यादावधिकारचिंतास्ति । तथापिपूर्वाधिकरणस्थमनुष्यग्रहणस्यविशिष्टबुद्ध्यादिहीनंतिर्यगाद्येवव्यावर्त्यंनतुदेवादीत्यनेनरूपेणेयंचिंता नतृतीयेसंगता । किंत्वत्रैव । यथापश्वेकत्वादिशेषत्वचिंता शेषत्वरूपेणतृतीयेसंगताप्यौपादानिकत्वरूपेणचतुर्थएवसंगता ।

गु० ॥ ॐतदुपर्यपिबादरायणस्संभवात्ॐ ॥ श्रुत्यादिप्रमाणषट्कसिद्धशेषत्वचिंतातृतीये । औपादानिकशेषत्वचिंताचतुर्थे । पूर्वोत्तरमीमांसोदाहरणेदर्शयति ॥ यथेति ॥ पश्वेकत्वाधिकरणंछंदोधिकरणेनुक्रांतं । यथागुरुमतेचतुर्थउपादानाख्यप्रमाणविचारादौपादानिकस्यपश्वेकत्वादिशेषत्वस्यशेषत्वरूपेणतृतीयेसंगतस्यापि

SGDF Sri Gargeshwari Digital Foundation

प्र० दानिकक्रतुशेषत्वचिंतारूपतयाध्यायेपेटिकायांचपूर्वत्रोपादानतोविधिकल्पनेवात्रापितस्यकल्पनायुक्तेत्युक्तेरवांतरसंगति"रिति ॥ **यथा चेति**॥युक्तिपादे"भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकव"दितिपंचमेऽधिकरणे विष्णोर्विश्वकर्तृत्वंयुक्तंनवेतिसंदेहे"परेऽव्ययेसर्वएकीभवंती"तिश्रुत्या मुक्तावीश्वरस्यजीवैक्योक्त्यासंसारेप्यैक्यस्यावश्यकत्वाज्जीवाभिन्नस्यविश्वकर्तृत्वायोगान्नयुक्तमितिप्राप्ते एकीभवंतीत्यस्यस्थानैक्यादिनोपपत्त्या मुक्तौजीवैक्यस्यैवासिद्ध्याप्रागपितदभावेनजीवभिन्नस्यविष्णोर्युक्तंजगत्कर्तृत्वमितिवक्ष्यमाणतया तस्ययथाजीवाभिन्नत्वादितियुक्तिविरोधपरि

यथाच "भोक्त्रापत्ते"रितिमुक्तेशयोर्भेदसमर्थनंफलविचाररूपेणचतुर्थेसंगत मपियुक्तिविरोधपरिहाररूपेणद्वितीयेसंगतंतद्वत्। नचेहतृतीयेऽधिकारःप्रति पाद्यः। येनसाक्षादध्यायसंगतिलोभादियंचिंतातत्रस्यात्। किंत्वत्रसमन्वयइ वतत्रापिसाधनमेवप्रतिपाद्यमितिप्रसंगादत्रैवयुक्ता । अवांतरसंगतिस्तु पूर्वो क्तस्यमनुष्यपदस्येहव्यावर्त्योक्तेर्वा सर्वदेवोपास्यत्वस्याक्षेपेणपूर्वपक्षोत्थानाद्वा।

प्र० हाररूपेणसंगतिस्तद्वदित्यर्थः। उक्तंचतत्रभाष्ये "फलत्वेपियुक्तिविरोधेंतर्भावादत्रोक्त"मिति। यदपितृतीयेनिवेशेसाक्षात्संगतिरितितदपि नेत्याह ॥ **नचेति** ॥ इहेतिपूर्वतंत्रव्युदासाय। अध्यायपादांतर्भावंटीकोक्तंप्रासंगिकमुपपाद्यानंतरसंगतिमाह ॥ **अवांतरेति** ॥ आद्या "मनुष्यपदंतिर्यगादिव्यावृत्त्यर्थंप्रयुक्त"मितिटीकासूचिता। द्वितीयातु "सचयदिनदेवानांस्यात्तदाविश्वेदेवाउपासतइत्यादिश्रुत्यप्रामाण्यंप्रस

SGDF Sri Gargeshwari Digital Foundation

प्र० ज्येते"तिटीकयेतिभावः । ननुप्रासंगिकमपिफलेसत्येवचिंतनीयं । अन्यथातिप्रसंगात् । इहचफलंनास्तीत्याक्षिपति ॥ **नन्विति** ॥ **नास्म दिति** ॥ तदज्ञानेपिस्वगतार्थित्वादिज्ञानेनैवप्रवृत्त्युपपत्तेरितिभावः । **निश्चितत्वादिति** ॥ प्रत्यक्षेणैवेतिभावः ॥ **परेषामिति** ॥ एतेनय दुक्तंकल्पतरौ "अधिकारचिंतेयंयद्यपिनदेवादिप्रवृत्त्यर्था तथापिक्रममुक्तिफलोपास्तिषुभोगद्वारामोक्षकाममनुष्यप्रवृत्त्यर्थे"ति तन्निरस्तं । उपास्तीनांक्रममुक्तिफलकत्वंनामदेवतापदप्राप्तिद्वारामुक्तिपर्यंतत्वं । तच्चविग्रहादिमच्चेतनरूपदेवतासद्भावसमर्थनमात्रेणसिध्यतीत्यधिकारस

ननुदेवादीनामधिकारोक्तिस्तावन्नास्मदादीनांप्रवृत्तावुपयुक्ता । नापिदेवादीनां । तैःस्वगतस्यविग्रहादिम त्त्वस्यतत्प्रयुक्तस्यसामर्थ्यादिरूपाधिकारिविशेषणस्यचसिद्धांतन्यायनिरपेक्षमेवनिश्चितत्वात् । तस्मादफले यंचिंतेतिचेत्सत्यं । देवादीनांविग्रहाद्यभावादनधिकारइतिपूर्वपक्षयतांपरेषामयंदोषः । अस्माकंतुदे वादिपदानांनित्यत्वात्तेषांमुमुक्षानयुक्तेतिपूर्वपक्षयतांनदोषः । पूर्वपक्षन्यायेनदेवानांस्वपदनित्यत्वाशंकया मुमुक्षाभावोपपत्तेः । अस्मदादीनांसर्वदेवोपास्यत्वप्रकारेणब्रह्मज्ञानाभावापाताच्च । "विश्वेदेवाउपासत" इतिश्रुत्यप्रामाण्यापातस्यटीकायामेवोक्तत्वाच्च । नचाप्रामाण्येनपूर्वपक्षोद्वितीयाध्यायएवयुक्तइतिवाच्यं ।

प्र० द्भावपर्यंतचिंतायाव्यर्थत्वात् । एतेनैवदेवतानांसिद्धावंतरादित्यादिविद्यादिष्वादित्यदेवतांतर्वृत्तित्वेनब्रह्मोपासनंनतुज्योतिर्मंडलांतर्वर्तित्वेने त्यादिप्रयोजनंपरिमळग्रंथोक्तमपिप्रत्युक्तंध्येयं । अधिकारपर्यंतचिंतायाःकृत्याभावात् । अभिमानिसूत्रएवविग्रहादिमद्देवतायास्सिद्धत्वाच्च । देवादीनांप्रवृत्तावुपयुक्तेयमधिकारिचिंतेतिभावेनाह ॥ **पूर्वपक्षन्यायेनेति** ॥ टीकोक्तपूर्वपक्षेफलेऽनुपपत्तिमाशंक्यसमाधत्ते ॥ **नचेति** ॥

प्र० **विश्वजिदिति** ॥ उक्तमधिकरणशरीरंप्राग्जिज्ञासाधिकरणे । तस्यपूर्वपक्षेपुरुषार्थभाव्यकत्वानंगीकाराद्विध्यानर्थक्येनशास्त्राप्रामाण्यमुक्तं । तथाचतस्याद्याध्यायेनिवेश्यत्वेप्यन्यत्रनिवेशस्तथात्रापीत्यर्थः । ननुविश्वजिद्वाक्यंचतुर्थे "चोदनायांफलाश्रुतेःकर्ममात्रंप्रतीयेतनह्यशब्दंप्रती यत"इतितृतीयपादीयपंचमाधिकरणेविचारितमित्यवादि । तथाचकथंषष्ठइत्युक्तिः । सत्यं । अनेकोदाहरणसूचनायैवमुक्तिः । तथाहि । विश्वजिदित्युक्त्यातस्ययथाचतुर्थेनिवेशइतिलभ्यते । षष्ठइत्युक्त्यास्वर्गकामाधिकरणस्यतादृशस्यापीतिलभ्यते । यद्वाषष्ठगतस्वर्गकामाधिक रणेचतुर्थाध्यायोक्तन्यायसिद्धस्वर्गपदोपेतस्यविश्वजिदादेरप्युदाहरणत्वात्तदभिप्रायेणविश्वजिदित्युक्तमिति । गुरुपादास्तुचतुर्थइतिवक्तव्येष

विश्वजिदधिकरणपूर्वपक्षस्याप्रामाण्यपर्यंतस्यापिषष्ठइवास्यविचारस्यावांतरसंगतिलोभेनात्रा पियुक्तत्वाच्च । अत्रदेवानांकिंब्रह्मविद्याधिकारोनास्त्युतास्तीतिचिंता । तदर्थंतेषांकिंमोक्षे

प्र० ष्ठइतिपाठोलेखकदोषमूलइत्याहुः ॥ **अवांतरेति** ॥ पयोव्रतंब्राह्मणस्येत्यस्यफलाश्रवणादपुरुषार्थत्वमितिपूर्वाधिकरणोक्तरीत्याविश्वजिदादी नामपिफलाश्रवणादपुरुषार्थत्वमित्यादिरूपावांतरसंगतिलाभेन फलेसत्येवविधेःप्रयोजकत्वंनान्यथेतिप्रयोजकत्वौपयिकत्वरूपावांतरसंगतिलो भाद्वा यथाप्रयुक्त्यध्यायादौनिवेशस्तथेहाप्युक्तसंगतिलोभेनात्रनिवेशइत्यर्थः । उक्तंचतंत्ररत्ने "यथाऽश्रुतफलत्वेनव्रतस्यापुरुषार्थता । तथा विश्वजिदादीनांनह्येष्वपिफलंश्रुतं ॥ नचक्रत्वर्थतातेषामध्वश्रुत्याद्यभावतः । अतोनिष्फलतायातेत्येवंप्रकृतसंगतिः ॥ विधेःप्रयोजकत्वंचफले सत्येवकल्प्यते । फलंचैतेपुनास्तीतिस्पष्टैवाध्यायसंगति"रिति ॥ विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ **मोक्षइति** ॥ विद्यासाध्यतया

SGDF
Sri Gurgeshwari Digital Foundation

प्र० तत्फलरूपमोक्षइत्यर्थः ॥ **अर्थितेति** ॥ अर्थीसमर्थोविद्वानधिक्रियतइतिन्यायेनफलेऽर्थितादेस्तद्धेतुविद्याधिकारप्रयोजकत्वेनोक्तेरितिभावः ॥ **अनादीति** ॥ स्वपदानामनादिनित्यत्वे आत्मनोमोक्षाभावनिश्चयेनतत्रार्थित्वादेरयोगादितिभावः । स्वरूपेऽविवादात्तत्तत्पदेत्युक्तं । इयंचिंतातदुपर्यपीत्यनेनसूचिता ॥ **कर्मेति** ॥ इंद्रादिपदप्राप्तेःपूर्वंपश्चाच्चेंद्रादिदेवताभावेनतदुद्देशेनद्रव्यत्यागात्मकयागायोगरूपकर्मविरोधः अनादेश्शब्दस्यसाध्यर्थसंबंधायोगरूपशब्दविरोधइत्यर्थः । इयंद्वितीयादिसूत्रत्रयसूचिता । तथातदर्थमिंद्रादिदेवव्यक्तयःकिमेकैकाउता नेकाः । अनेकत्वेपितानानानामरूपाउतसमाननामरूपाइतिचिंता समानसूत्रसूचिता स्पष्टत्वान्नोक्ता । यदिवक्ष्यमाणदिशाकर्मशब्दौविरु

ऽर्थितानास्त्युतास्तीति । तदर्थंतत्तत्पदविशिष्टादेवाःकिमनादिनित्याः किंवाऽऽद्यंतवंतइति । तदर्थंकिमाद्यंतव त्त्वेकर्मशब्दौविरुध्येतेनवेति ॥ **पूर्वपक्षस्तु** ॥ नदेवादीनांब्रह्मोपासनाधिकारः । तथाहि । तत्तत्पदविशिष्टादे वाःकिमुत्पत्तिविनाशवंतःकिंवानादिनित्याः । नाद्यः । इंद्रादिपदप्राप्तेःपूर्वंपश्चाच्चेंद्रादिदेवताभावेनतदुद्देशेन

प्र० ध्येते तदातन्निरासायतेऽनादिनित्याएवोपेयाइति तेषांतादृशानांमोक्षेवक्ष्यमाणदिशार्थितादेरयोगान्नास्तिब्रह्मविद्यायामधिकारइतिपूर्वपक्षे फलं । यदात्विंद्रादिव्यक्तीनामाद्यंतवत्त्वेपितत्प्रवाहस्यानादिनित्यतयाकर्मशब्दविरोधोनास्ति तदाबाधकाभावेनतेषामाद्यंतवत्त्वयोगेननित्य फलेमोक्षेऽर्थितादेस्संभवेनास्तितद्धेतुब्रह्मविद्यायामधिकारइतिसिद्धांतेफलमितिस्पष्टत्वात्फलफलिभावोनोक्तः । उत्तरोत्तरपूर्वपक्षकोटेःपूर्वपूर्व कोटिहेतुतांव्यंजयिष्यन्नंत्योपांत्ययोस्तांतावद्व्यंजयन् ''तथाही''त्यादिटीकांविवृणोति ॥ **तत्तत्पदेति** ॥ **इंद्रादीति** ॥ एतेन ''अमराणां''

SGDF
Sri Gargeshwari Digital Foundation

प्र० मित्यादिटीकार्थउक्तः ॥ द्रव्यत्यागात्मकेति ॥ "यजतिचोदनाद्रव्यदेवताक्रिय"मितिचतुर्थजैमिनिसूत्रोक्तेः "यज्ञोदेवतामुद्दिश्यद्रव्यत्याग"इतिनवमगीताभाष्योक्तेश्चेतिभावः । आत्मा चेतनः । इष्टापत्तिमाशंक्याह ॥ ऐंद्रेति ॥ "यदनेनहविषाशास्तेतदश्यात्तदृध्यात्तदस्मै देवाराधंतां वायुर्वैक्षेपिष्ठादेवतावायुमेवस्वेनभागधेयेनोपधावती"त्याद्यर्थवादइत्यर्थः । मीमांसकमतमपाकरोति ॥ नचचतुर्थ्यंतइति ॥ मंत्रेति ॥ वज्रहस्तःपुरंदरः । तेनेंद्रोवज्रमुदयच्छदित्यादिनेत्यर्थः । एतेनभामत्याद्युक्तजडदेवतापूर्वपक्षःप्रत्यूढः । सिद्धांतमाशंक्याह ॥ नचेति ॥ ब्रह्मचानादिनित्यमितिभावः ॥ बहुविप्लवेति ॥ साक्षात्तस्यैवोद्देश्यत्वेसर्वस्यवैष्णवत्वेनैंद्राग्नेयादिकर्मव्यवस्थानस्यादित्यर्थः ।

द्रव्यत्यागात्मकयागादिरूपकर्मविरोधात् । नचेंद्रादिपदोपलक्षितआत्मोद्देश्यः । सचपूर्वपश्चाच्चास्तीतियुक्तं । भविष्यदिंद्रादिपदानांमनुष्यादिशरीराणामप्युद्देश्यत्वापातात् । ऐंद्रादियागशेषार्थवादेतन्मंत्रेचतत्तत्पदतत्तद्विग्रहादिविशिष्टस्यैवेंद्रादेस्तत्तद्यागादिनाप्रीत्याद्युक्तेश्च । नचचतुर्थ्यंतःशब्दएवदेवता । सचानादिनित्यइतिवाच्यं । मंत्रार्थवादेतिहासपुराणादिनाविग्रहादिमद्देवतासिद्धेरभिमान्यधिकरणेवक्ष्यमाणत्वात् । शब्दस्याचेतनत्वेनसुतरामनधिकाराच्च । नचेंद्रादीनामनित्यत्वेपिसर्वकर्मसुब्रह्मैवोद्देश्यमितियुक्तं । मनुष्यादिभिरिंद्राद्यधिष्ठानस्यैवब्रह्मणउद्देष्टव्यत्वात् । अन्यथाबहुविप्लवापातात् ।

गु० चतुर्थेसंगतिस्तथेत्यर्थः ॥ व्यावर्त्योक्तेरिति ॥ अनेनप्रपंच्यप्रपंचकभावसंगतिरुक्ताभवति ॥ अन्यथेति ॥ सर्वकर्मसुब्रह्मणएवोद्देश्यत्वेकर्मभेदेवासूक्तभेदेवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० उक्तदोषपरिहारमाशंक्यदोषांतरमाह ॥ **नन्विति** ॥ **शब्देति** ॥ अनादेश्शब्दस्याद्यंतवदर्थसंबंधेऽप्रामाण्याख्यविरोधइत्यर्थः । "नच वाच्यंकर्मविरोधाभाववदयमपिपरिहर्तव्यइती"तिटीकांविवरीतुंशब्दविरोधस्यपुनरुत्थानमाक्षिप्यद्वेधासमाधिमाह ॥ **नन्वित्यादिनाविरोधशंकासमाधानेयुक्तेइत्यंतेन** ॥ संयुक्ततांहेतुभेदोपन्यासेनाशंक्यनिराह ॥ **नचेति** ॥ इतिवाच्यमित्यन्वयः । तृतीये सूत्रे अतः

नन्वेतदिंद्रोत्पत्तेःपूर्वमिंद्रांतरस्यसत्त्वेनतदुद्देशइतिचेन्मैवं । द्वितीयसूत्राशंकितकर्मविरोधोद्धारेपितृतीयसूत्राशंकितशब्दविरोधानुद्धारात् । अतएवटीकायां "कर्मादिविरोधा"दित्यादिशब्दः । ननुद्वितीयोक्तेनदेवताप्रवाहस्यानादित्वेनैव कर्मविरोधवच्छब्दविरोधोप्युद्धृतएव । अनादेःशब्दस्यसाद्यर्थसंबंधविरोधेप्यनाद्यर्थसंबंधाविरोधात् । तथाचतृतीयेपुनः शब्दविरोधाशंकानयुक्ता । नचद्वितीयेप्रवाहस्यानादित्वमेवोक्तं । नत्वनंतत्वं । तस्यतृतीयेवक्ष्यमाणत्वात् । तथाचानंतस्य शब्दस्यांतवदर्थसंबंधोविरुद्धइतिशंकातृतीयेयुक्ता । अतएवभाष्येद्वितीयसूत्रे "तत्पूर्वदेवताभावा"दितितृतीयसूत्रेतु "देवानामनित्यत्वा"दित्युक्तमितिवाच्यं । द्वितीयेपिसादित्वप्रयुक्तकर्मविरोधवत्तत्प्रयुक्तशब्दविरोधस्यापि तृतीये सांतत्वप्रयुक्तशब्दविरोधस्येवतत्प्रयुक्तकर्मविरोधस्यापिपरिहारेणद्वितीयेकर्मपदस्यतृतीयेशब्दपदस्यचायोगादितिचेन्न ।

प्र० प्रभवादित्यंशेनेत्यर्थः । सूत्रार्थस्त्वग्रेस्पष्टः । अस्त्वेवं ततःकिमित्यतआह ॥ **तथाचेति** ॥ द्वितीयसूत्रेइंद्रादिदेवव्यक्तिसादित्वप्रयुक्तकर्मविरोधपरिहारेपितेषामनित्यत्वेनोत्तरकालेदेवतानामभावेननित्यस्यशब्दस्यतत्संबंधोविरुद्धइतिशंकायुक्तेत्यर्थः । हेतुभेदेज्ञापकमाह ॥ **अतएवेति** ॥ **परिहारेणेति** ॥ अन्यथाशब्देदेवसादित्वप्रयुक्तस्यकर्मणिदेवतानित्यत्वप्रयुक्तस्यविरोधस्यान्यत्रापरिहृततयानुद्धृतत्वापातात् । ॥ ६७५ ॥

प्र० अत्रोद्धारन्यायस्योभयत्रसाम्याच्चेतिभावः । भाष्यंतूपलक्षणतयाकथंचिन्नेयमितिशंकितुर्भावः । अतएव "शब्दइतिचे"दितिसूत्रांशविवरणटीकायां "नचवाच्यंकर्मविरोधाभाववदयमपिविरोधःपरिहर्तव्यइति । अतीतदेवताप्रवाहेप्रमाणसद्भावेनातीतकालविरोधस्यैवपरिहर्तुंशक्यत्वात् । उत्तरकालेऽन्यदेवताभावनियमेप्रमाणाभावेनविरोधस्यकर्मण्यपिसाम्या"दित्युक्तमितिहृदयं । उभयोरुभयत्रपरिहारंटीकाभिमतमुक्त्वातत्रयस्सूत्रविन्यासायोगश्शंकितस्तमुद्धरति ॥ **उभयत्रेति** ॥ **कर्मादिनेति** ॥ विद्यये्त्यादिशब्दार्थः ॥ **शब्दादिति** ॥ "तेह नाकंमहिमानस्सचंते"त्यादिशब्दादित्यर्थः ॥ **तत्रैवेति** ॥ अनादित्वएवेत्यर्थः । अयंचपरिहारः "अतीतदेवते"त्यादिटीकासूचितः । "अतीतदेवते"त्यादिटीकारीत्यैकंसमाधिमुक्त्वा "ननुकथंदेवताप्रवाहनित्यत्वेसमाननामरूपत्वेनित्यवेदप्रामाण्योपपत्तिः । तद्वाचित्वेनेति

उभयत्रोभयविरोधपरिहारेप्याद्यसूत्रे मनुष्याणांसतांकर्मादिनादेवादित्वमिति तदुपरीत्यनेनोक्ते तर्हियेनकर्मणादेवादित्वंसाध्यं तस्मिन्कर्मण्येवविरोधः । ततःपूर्वसाधनावस्थायांदेवताभावादितिशंकितेकर्मविरोधेद्वितीयसूत्रेणपूर्वपूर्वदेवताप्रवाहस्यानादित्वप्रतिपादकशब्दान्निरस्तेतर्हितस्मिञ्शब्दएवविरोधइतिशंकितस्यशब्दविरोधस्यतृतीयेननिरासाद्वितीयेकर्मशब्दस्यतृतीयेशब्दशब्दस्यचोपपत्तेः । एतेनानादित्वश्रुतिवत् "यथैवनियमःकाल"इतिभाष्योदाहृतानंतत्वश्रुतिरपिद्वितीयसूत्रस्थेन "दर्शना"दित्यनेनविवक्षितुंशक्येतिपुनस्तृतीयेसांतत्वनिमित्तापिशब्दविरोधशंकानिर्बीजेतिनिरस्तं । उक्तरीत्याऽऽकांक्षाक्रमेणद्वितीयेऽनादित्वस्यैववक्तव्यत्वेन "दर्शना"दित्यनेनतत्रैवशब्दोपन्यासात् ।

गु० देवताभेदस्यैवप्रयोजकत्वेनदेवतैक्येयागव्यवस्थासूक्तव्यवस्थावानस्यादित्यर्थः । ननूक्तरीत्यासूत्रवैयर्थ्येशंकितेतत्सार्थक्यमकृत्वैवाकांक्षाक्रमेणसंगतिकथनमयुक्तं ।

SGDF

प्र० चेन्न । तस्यैवासंभवा''दित्यादिटीकोक्तरीत्यापक्षांतरमाह ॥ यद्वेति ॥ सूक्तादिकंकिमेकेंद्रपरमुतानेकेंद्रपरं । नाद्यइत्याह ॥ नप्रतिनियतेति ॥ एकस्येति ॥ सूर्याचंद्रमसावित्याद्युत्पत्तिश्रुतिविरोधादितिभावः । द्वितीयमाशंक्याह ॥ नचेति ॥ टीकात्वभ्युपेत्यवादेननेयेतिभावः । ननु नैवंशंकायुक्ता । एतत्समाधानस्यभाष्यादावनुपलब्धेरित्यतआह ॥ अतएवेति ॥ पंचमसूत्रव्यावर्त्यशंकामाह ॥

यद्वा यथाहिकर्माणिप्रवाहेणानाद्यनंतानितथादेवताअपि । यथाचताःस्वरूपेणानित्यास्तथातान्यपीतिदेवताप्रवाहस्यानाद्यनंतत्वेनातीतानागतकर्मविरोधएवपरिहृतोनतुशब्दविरोधः । वेदरूपस्यशब्दस्यभाष्योक्तरीत्यास्वरूपेणैवनित्यत्वात् । प्रवाहनित्यतायाःपुराणादावपिसत्त्वात् । स्वरूपेणनित्यंचेंद्रादिसूक्तंनप्रतिनियतैकेंद्रादिपरं । एकस्येंद्रादेःसदाऽभावात् । इंद्राद्यंतरस्यासिद्ध्यापाताच्च । नचयदायइंद्रस्तदातदुद्देशवद्यदायइंद्रस्तदातत्परमितिवाच्यं । कालभेदेनसूक्तादेस्तात्पर्यभेदायोगादितिकर्माविरोधमंगीकृत्यैवशब्दविरोधशंकोदयः । अतएवशंकानुसारेणतृतीयसूत्रस्थपरिहारभागस्यायंभावः । इंद्रादिसूक्तस्येंद्रादिपदस्येतात्पर्यं । पदस्यत्वोपाधिश्चामात्यत्वादिवदतीतानागतेष्वेकएवेतिनानेकेषुतात्पर्यापातइति । तस्माद्द्वितीयसूत्रेकर्मविरोधेपरिहृतेपितृतीयेशब्दविरोधाशंकासमाधानेयुक्ते ।

गु० पुरुषोत्प्रेक्षानिबंधनायाःसंगतेरन्यथापिकर्तुंशक्यत्वादित्यरुच्यापक्षांतरमाह ॥ यद्वेति ॥ इंद्रादिसूक्तादिकंकिमेकमेवेंद्रंसदाप्रतिपादयत्युतकदाचित्कंचित् । नाद्यइत्याह ॥ नप्रतिनियतैकेति ॥ ननुचैकस्यसर्वदाऽसत्त्वेपिसूक्तंतत्प्रतिपादकमेवेत्यतआह ॥ इंद्राद्यंतरस्येति ॥ तच्चसिद्धांतिनोऽनिष्टं । अनेकेषामिंद्रपदप्राप्तेस्तेनाभ्युपगमात् । द्वितीयंशंकते ॥ नचेति ॥ नन्वेवमधिकाशंकयापूर्वपक्षश्चेत्कथंतन्निरासः । सूत्रेतन्निरासस्याप्रतीतेरित्यतआह ॥ अतएवेति ॥ एवमधि

SGDF
Sri Gargeshwari Digital Foundation

प्र० समाहितेपीति ।। किंनामरूपादेस्साम्यमुतासाम्यमितिकल्पौहृदिकृत्वाऽऽद्यआह ।। नेति ।। मानमाशंक्य “एतच्छ्रुतेस्तत्स्वरूपकल्पनानियमपरत्वमपिसंभवती”तिटीकांविवृण्वंस्तस्यान्यथासिद्धिमाह ।। सूर्येति ।। अन्यपरत्वात् अभिव्यक्तिपरत्वादित्यर्थः । नह्यनुपपन्नेतात्पर्यमस्तीतिभावः । द्वितीयंनिराह ।। नापीति ।। देवाउत्पत्तिविनाशवंत उतानादिनित्याइतिविकल्पे आद्यमियतानिराकृत्यद्वितीयेपर्यवसाययति ।। तस्मादिति ।। नामादिभेदेनशब्दकर्मविरोधादित्यर्थः । अर्थित्वाभावेतस्यहेतुतांदर्शयति ।। स्वपदेति ।। मध्वादिसूत्राभिप्रेतपू

समाहितेपिशब्दविरोधेनदेवानामनित्यता । तथाहि । नतावत्सौरस्त्यानांपाश्चात्यानांचेंद्रादीनांनामरूपाभ्यां साम्यं । लोकेऽमात्यांतरस्यपूर्वामात्येननामादिसाम्यनियमादर्शनात् । मानाभावाच्च । “सूर्याचंद्रमसौ धातायथापूर्वमकल्पय”दित्यादिवाक्यंतुतामेवसूर्यादिव्यक्तिंपूर्वप्रकारेणाकल्पयदित्येवंसूर्यादिव्यक्त्यैक्यपरं । नचैवंसूर्यादिसृष्टिवाक्यविरोधः । तस्यानित्यसंयोगद्वारास्वाप्रामाण्यापादकदेवतोत्पत्तिपरत्वासंभवेनान्यपरत्वात् । नाप्यसाम्यं । इंद्रादिसूक्तस्थानामिंद्रादिनाम्नांसहस्राक्षत्ववज्रबाहुत्वादिरूपाणांचविरोधात् । तस्मात्तत्तत्पदादिविशिष्टादेवाअनादिनित्याइतिद्वितीयएवांगीकार्यः । तथाचनदेवानामधिकारः । स्वपदेभ्योमोक्षस्यातिशयितत्वेपिस्वपदानांनित्यत्वेनस्वेषांमोक्षाभावनिश्चयेनतत्रार्थित्वायोगात् ।

गु० काशंकयापूर्वपक्षस्यप्रवृत्तत्वादेवेत्यर्थः ॥ विरोधादिति ॥ तथाचसहस्राक्षत्वादिप्रतिपादकागमस्याप्रामाण्यमितिभावः । श्रूयतेचाधिकारोपीत्युक्तं । तदुपपाद

SGDF
Sri Gargeshwari Digital Foundation

प्र० र्वपक्षटीकांव्यनक्ति ॥ **किंचेति** ॥ द्विविधाहिवेदविद्याः । मुक्तिफलकास्तदितरफलकाइति । तत्रनकाप्यधिकारइत्याह ॥ **नतावदित्यादिना** ॥ "सयएतदेवममृतंवेदवसूनामेवैकोभूत्वाऽग्निनैवमुखेनैतदेवदृष्ट्वातृप्यती"त्यादिनामध्वादिविद्यासुवस्वादिपदानामुपासनाप्राप्यफलल श्रवणादितिभावः । अधिकारप्रयोजकमर्थित्वादिकंदेवेषुसमर्थयमानस्तत्प्रयोजकेदेवानामाद्यंतवत्त्वेपरोक्तकर्मविरोधादिबाधकंचपरिहरन्ना द्यादिसूत्रभाष्यटीकोक्तंप्रमेयंसंगृह्याह ॥ **नदेवानामिति** ॥ अयंच "संभवा"दितिसूत्रांशभाष्याद्यर्थसंग्रहः ॥ **तिर्यगादिवदिति** ॥

किंचनतावद्देवानांसर्वविद्याधिकारः। वसुत्वादिफलकमधुविद्यादिषुवस्वादीनामधिकारायोगात्।
नापिमोक्षफलकासु । "नैवदेवपदंप्राप्ताब्रह्मदर्शनवर्जिता"इत्यादिवाक्यैर्देवानांब्रह्मज्ञानित्वात्त
ज्ज्ञानार्थविचारेऽनधिकारादिति ॥ सिद्धांतस्तु ॥ नदेवानामसामर्थ्यंवर्ततेतिर्यगादिवत् ।
नचापिप्रतिषेधोस्तिशूद्रादेरिवकुत्रचित् ॥ १ ॥ स्वपदानामनित्यत्वान्मुक्तावस्त्यर्थितापिच ।

प्र० इदानींतनपशुपक्ष्यादेरिवेत्यर्थः । नन्वेतच्छूद्रेव्यभिचारीत्यतस्सूत्रांशतात्पर्यंभाष्याद्युक्तमाह ॥ **नचापीति** ॥ कुत्रचिदपीत्यपेरन्वयः । श्रुतौस्मृतौचेत्यर्थः । प्रतिषेधश्चेतिचार्थः ॥ **शूद्रादेरिति** ॥ ब्रह्मबंधुवर्णबाह्यादिरादिपदार्थः । शूद्रादेर्निषेधोऽग्रेस्पष्टः । ननुनसामर्थ्यमात्रं प्रयोजकं । मुमुक्षोर्वात्स्यायनादावनधिकारात् । किंतुयोयज्जन्यफलार्थीसतत्राधिकारीत्यर्थितापि । साचननित्यपदानांयुक्तेत्युक्तमित्यतः "तदुपरी"तिसूत्रांशभाष्याद्युक्तंहेतूकृत्य "संभवा"दित्यंशोपात्तमर्थित्वंसाधयति ॥ **स्वपदानामिति** ॥ चोऽवधारणे । अनित्यत्वादेवे

प्र० त्यर्थः । ननूक्तंतथात्वेकर्मादिविरोधइत्यतः "विरोधःकर्मणी"तिसूत्रभाष्याद्युक्तमाह ॥ **प्रवाहेति** ॥ ननूक्तमत्रैकरूपवेदप्रामाण्यविरोधइ त्यतस्समानसूत्रभाष्यटीकोक्तार्थमाह ॥ **तुल्येति** ॥ नदेवानामधिकारेऽस्तिबाधकमित्युक्त्यासूत्रादिकंदेवानामधिकारेबाधकनिरासपरमि त्युक्तं । तेन देवाः वेदविद्याधिकारिणः । अनिषिद्धत्वेसतिसामर्थ्यादिमत्त्वात्संमतवदित्यनुमानमुक्तंभवति । तत्रमूलभूतश्रुतिरूपसूत्राद्य भिप्रेतंप्रमाणंचाह ॥ **श्रूयतेचेति** ॥ **श्रुतिष्विति** ॥ तास्त्वग्रेव्यक्ताः । ननूक्तंतुल्यरूपादियोगित्वेमानाभावइति । तत्राह ॥ **अतीतेति**॥

प्रवाहानादिनित्याश्चतुल्यरूपादियोगिनः ॥ २ ॥ देवान
तेनदेवानामधिकारेऽस्तिबाधकं । श्रूयतेचाधिकारोपिदे
वानांश्रुतिषुस्फुटं ॥ ३ ॥ अतीतानागतानांदेवानांसमा
ननामरूपत्वं "यथापूर्व"मित्यादिभाष्योदाहृतश्रुत्यादिसि
द्धं । नचतद्देवताव्यक्त्यैक्यपरं । तत्सृष्टिवाक्यविरोधात् ।

प्र० "अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा । ऋषीणांनामधेयानियाश्चवेदेषुदृष्टयः । वेदशब्देभ्यएवासौनिर्ममेसमहेश्वर"इतिस्मृत्यादिरादि पदार्थः । ननूक्तंश्रुतिरन्यथासिद्धेत्यतष्टीकायामनादिनिधनेतिस्मृत्यैवान्यथासिद्धिनिरासेनयुक्त्यनुक्तेस्स्वयंयुक्त्याप्यन्यथासिद्धिंनिराह ॥ **नचेति** ॥ **तत्सृष्टीति** ॥ "चक्षोस्सूर्योअजायते"त्यादिवाक्यविरोधादित्यर्थः । नचतदन्यपरमितिवाच्यं । बाधकाभावादितिभावेनप्रागु

SGDF

प्र० क्तंबाधकमुद्धरति ॥ **तासामिति** ॥ सूर्यादिव्यक्तीनामित्यर्थः । श्रूयतेचेत्यर्धंव्यनक्ति ॥ **एकशतमिति** ॥ एतद्वाक्यंछांदोग्याष्टमाध्याय गतं । किंचेत्यादिनोक्तं "भावं"त्वितिसूत्रभाष्याद्युक्तसमाधानेननिराह ॥ **यद्यपीति** ॥ "यावत्सेवापरेतत्वेतावत्सुखविशेषते"त्यादेरि तिभावः । भाष्याद्युक्तमर्थंसूत्रपदारूढंलेशतोदर्शयन्सूत्राणांक्रममाह ॥ **अत्रचाद्यइति** ॥ "तदुपर्यपिबादरायणस्संभवा"दित्यत्रतच्छब्दे नपूर्वप्रकृतयोग्यमनुष्यत्वंपरामृश्यते । तस्मादुपरितस्योपरीतिवाविद्याकर्मभ्यांयोग्यमनुष्याणांदेवत्वप्राप्त्यनंतरमप्यधिकारोस्तीतिविभागवि परिणामाभ्यांपूर्वप्रकृताधिकारपदान्वयः । तेषामप्यधिकारोपयोगिनोविशिष्टबुद्ध्यादेस्संभवादित्यर्थः । बादरायणपदंविप्रतिपत्तिसूचनाये तिटीकोक्तिः । देवानामधिकारेसंदेहाभावज्ञापनायेतितत्वप्रदीपोक्तिः । अत्रदेवानामितिवक्तव्येतदुपरीत्युक्तिरयुक्ता । अपिपदंचव्यर्थमित्य

तासांप्रवाहतोऽनादिनित्यतायाःसमाननामरूपतायाश्चांगीकारेसृष्टिवाक्यस्यस्वार्थपरत्वेपिनानित्यसंयोगाद्यापातः । अन्य था "यथापूर्व"मित्यादेर्व्यक्त्यैक्यपरत्वेसिद्धेदेवतानांप्रवाहानादित्वसमाननामरूपत्वयोरभावः । तत्सिद्धौचानित्यसंयो गापत्त्यासृष्टिवाक्यस्यस्वार्थपरत्वाभावः । तत्सिद्धौचसृष्टिवाक्यविरोधाभावात् "यथापूर्व"मित्यादेर्व्यक्त्यैक्यपरत्वसि द्धिरितिचक्रकाश्रयःस्यात् । "एकशतंहवैवर्षाणिमघवान्प्रजापतौब्रह्मचर्यमुवासे"त्यादिश्रुतिसिद्धश्चदेवानामधिकारः । यद्य पिमधुविद्यादिफलंवसुत्वादिकंब्रह्मज्ञानंचवस्वादीनामस्ति । तथापिज्ञानेमोक्षेचातिशयार्थमुपासनायुक्तेति । अत्रचाद्येसूत्रे

गु० यति ॥ **एकशतमिति** ॥ तदुद्धारः शंकाद्वयोद्धारइत्यर्थः । ननुताएताइत्यादेस्सृज्येनतात्पर्यमितिचेत्तथात्वेसष्टर्यपिनस्यादविशेषादित्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तआह ॥ नतावदिति ॥ प्रधानहेतूक्तिपरत्वादाद्यत्वमितिभावः । ननुतदुपरीतिकथं । "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेने"त्यव्ययेनसमासनिषेधात् । नचाव्ययशब्देनोपरिशब्दोनग्राह्यः । वृत्तावनुदाहृतत्वादितिवाच्यं । अग्रहणेज्ञापकस्यवाच्यत्वात् । तत्रैवमंजर्यां "व्रजस्योपरीत्यप्युदाहर्तव्य"मित्युक्तेश्च । मैवं । तत्रप्रकृतषष्ठीसमासस्यैवनिषेधात् । इहच "पंचमीभयेने"त्यत्रयोगविभागेनपंचमीसमासाश्रयणात् । पंचमीच "अतऊर्ध्वंप्रवक्ष्यामी"त्यादाविवावधित्वमात्रविवक्षयायुक्ता । अतएवतत्वप्रदीपे "मनुष्यत्वादुपरी"त्युक्तं ।

नतावद्देवताजीवानांकदाप्यनधिकारः । तेषामेवपदप्राप्तेःपूर्वमनुष्यशरीरित्वदशायामधिकारादितितदुपरीत्यनेन सूचयित्वा नापिपदप्राप्त्यनंतरमनधिकारः । विशिष्टबुद्ध्यादिभावादिति "संभवा"दित्यनेनोक्तं । द्वितीये "तदुपरी"त्यनेनोक्तदेवतापदस्यसादित्वेकर्मविरोधःशब्देनपरिहृतः । तृतीयेतस्मिन्नेवशब्देविरोधोदेवताप्रवाहनित्यत्वेनोद्धृतः । तत्रचप्रभवशब्दःप्रभवनियमपरइतिभाष्यएवोक्तं । चतुर्थेदेवताप्रवाहनित्यत्वंतद्वाचकवेदनित्यत्वेनसाधितं ।

प्र०षष्ठीसमासपक्षेपि "पूरणगुणे"तिसूत्रेऽव्ययशब्देनोपरीत्यस्याग्रहणेनदोषाभावात् । उक्तंचदुर्घटवृत्तौ "सतातव्येनचकृतापूर्वेत्रोत्तरत्रचसाहचर्यात्कृदंताव्ययस्यैवग्रहणंतत्र । नत्वन्यस्य । तथाचतदुपरिमदुपरीत्यादिरपिसाधु"रिति । कश्चित्तु तदितिभिन्नंपदं । षष्ठ्यर्थेऽव्ययंवाऽविभक्तिकंवालुप्तविभक्तिकंवेत्याह । एतेनतद्ब्रह्मोपासनमुपरिदेवादिष्वपिसंभवतीत्यर्थंवदताकेनचिद्रामानुजीयेनषष्ठ्यंततच्छब्दस्याऽव्ययेनसमासायोगइत्युक्तंदूषणंनिरस्तंध्येयं । द्वितीये विरोधःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनादित्यत्र येनकर्मणादेवपदंप्राप्तंतस्मिन्नेवपूर्वकल्पेप्रवृत्त

ता. चं. ११४

SGDF
Sri Gargeshwari Digital Foundation

प्र० कर्मणिपूर्वदेवताभावेनोद्देश्याभावाद्वैयर्थ्याख्यविरोधापत्तेरितिचेन्न । एतद्देवानांपूर्वमभावेप्यनेकेषांयोग्यमनुष्याणांदेवतापदप्राप्तेः "तेह नाकंमहिमानस्सचंते"त्यादौदर्शनादित्यर्थः । तथाचांतरंगबाधकनिरासाद्द्वितीयतास्येतिभावः । यदत्रकेनचिदुक्तं मनुष्यप्रवाहस्यानादित्वे विवादाभावेनशंकायाअनुत्थानाद्दर्शनशब्दस्यस्वार्थेसंभवति तद्विषयश्रुतिपरत्वमस्वरसमिति तन्निरस्तं । देवतापदंप्राप्तानामेवप्रवाहस्याना दित्वोक्त्यामनुष्यप्रवाहानादित्वानुक्तेः । तदुक्तंटीकायां "एतद्देवानांपूर्वमभावेपिदेवतांतरसद्भावा"दिति । दर्शनपदंचाग्रे "दर्शनात्स्मृतेश्चे" त्यत्रेवश्रुतौस्वरसं । "दृश्यतेहिसौभरिप्रभृतीनांयोगिनांयुगपदनेकशरीरप्राप्तिः । आत्मनोवैशरीराणिबहूनिमनुजेश्वर । योगीकुर्याद्बलंप्राप्य तैश्चसर्वांमहींचरेदितिभारतवचना"दितित्वदुक्तरीत्याममापिश्रुतौदर्शनादित्यर्थोपपत्तेश्च । शब्दइतिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यामिति तृतीये येनवेदरूपशब्देनदेवानामादिमत्त्वेपिप्रवाहानादित्वमुपेत्यकर्मविरोधोनिरस्तः तस्मिन्नेववेदरूपेशब्दे "वाचाविरूपनित्यये"त्यादिना नित्येऽनित्यदेवार्थसंबंधायोगरूपविरोधइतिचेन्न । "सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् यथैवनियमःकालेसुरादिनियमस्तथे"त्यादिरूपात् अतः अस्माच्छब्दरूपप्रमाणाद्देवानांप्रतिकल्पंप्रभवात्प्रभवनियमावगमात् महतांप्रत्यक्षात् यथेदानींतथोपर्यपिदेवाभविष्यंतीतीतरेषामनुमा नाच्चेतिस्वरूपनित्यत्वाभावेपिप्रवाहरूपेणनित्यत्वमुपेत्योद्धृतः । तथाचाकांक्षाक्रमात्क्रमइत्यर्थः । अत्रनित्यत्वादितिवाच्येप्रभवादित्युक्तिर्देवप्र वाहनित्यत्वद्योतनाय । नन्वत्रातइत्युक्तशब्दरूपमानेनैवालं । किंप्रत्यक्षाद्युपन्यासेनेतिचेत् श्रुतावुपचारेणाप्युक्तिरितिशंकानिरासार्थत्वात् । तर्हिशब्दप्रत्यक्षानुमानेभ्यःप्रभवादितिसूत्रणीयं । किंविभागेनेतिचेन्न । शब्दस्यान्यानपेक्षप्रमाणत्वेनप्रधानत्वेनादौपृथङ्निर्देशात् । महतांप्र त्यक्षमस्तीतिज्ञानस्यतत्प्रामाण्यज्ञानस्यचशब्दमूलत्वादनुमानस्यापिशब्दसंवादित्वेनैवप्रामाण्यात्तयोस्समासेननिर्देशइति । एतेनप्रत्यक्षानुमा

प्र० नाभ्यांचेतिस्यादितिनिरस्तं । उत्तरसूत्रेयुक्त्यंतरसमुच्चायकचशब्दोक्तेश्च । एतेनैवप्रत्यक्षंनोपन्यासार्हं । विप्रतिपत्तेरितिकेनचिदुक्तंनिरस्तं बोध्यं । चतुर्थे अतएवचनित्यत्वमित्यत्र । परोक्तशब्दनित्यत्वादेववाच्यार्थस्यदेवस्यप्रवहतोनित्यत्वंसिध्यति । नहिवाच्यानित्यत्वेवाचकनि त्यत्वंसिध्यतीत्यर्थापत्त्यादेवप्रवाहनित्यत्वमत्रसाध्यते । पूर्वोक्तश्रुत्याऽर्थापत्तेस्समुच्चयार्थश्चशब्दः । पूर्वशब्दात्प्रभवनियमोक्तिः । अत्रनित्य त्वरूपतद्धर्मात्तदुक्तिरितियोगविभागः । ननुपूर्वत्रप्रभवशब्दस्यप्रभवनियमपरतयानित्यत्वार्थत्वस्येहानुवृत्त्याऽतएवचप्रभवइत्यन्वयेसत्यतएव

ननुनवाचकस्यनित्यत्वेनवाच्यनित्यत्वसिद्धिः । शब्दगतशक्तिविषयस्यवाच्यस्यनाशेपिशक्तेस्तदाश्रयस्यशब्दस्य चानाशोपपत्तेः । नहिशक्यनाशेशक्तितदाश्रययोर्नाशनियमः । प्रलयेवाच्यस्यदेवतादेरभावेपिवाचकावस्थाना च्च । तदाभारतादिवदतीतविषयत्वेचान्यदापितथास्त्विति । मैवं । प्रतिकल्पंवेदोक्तकर्माननुष्ठानेप्रतिकल्पंवेदो पदेशधारणादेर्वैयर्थ्यापातात् । अनुष्ठानेचकर्मकालप्रयुक्तानां "इंद्रागच्छे"त्यादीनांदेवताह्वानाद्यर्थत्वात्तदा तदभावेचाह्वानाद्ययोगात् । प्रतिकल्पंकर्मानुष्ठानकालेचदेवतासत्त्वस्यतत्प्रवाहानादिनित्यत्वंविनाऽयोगादिति

प्र० चनित्यत्वमित्यर्थस्यलाभान्नित्यत्वमित्यवक्तुंशक्यं । मैवं । तस्यपंचम्यंतत्वेनेहप्रथमांततयानुवृत्तेर्दुर्बोधत्वात् । प्रभवशब्दस्यनित्यत्वार्थकत्व स्यास्पष्टत्वाच्च । अतएवचेत्यस्यप्राक्प्रकृतशब्दनित्यत्वपरामर्शद्योतनायचनित्यत्वमितिपृथुगुपादानाच्चेति । "नापिभारतादिवदतीतविषयत्वे नोपपत्तिः । अनुपपत्तेरुक्तत्वा"दितिटीकांविवृण्वन्नर्थापत्तेरन्यथोपपत्तिमाशंक्यसमाधत्ते ॥ नन्विति ॥ अर्थापत्तेरनुमानत्वेपितद्विशेषत्वा त्पृथगुक्तिः । ननुतद्वाच्यदेवतास्वरूपस्यनित्यत्वेसर्वमुपपन्नमितिचेन्न । "सूर्याचंद्रमसा"वित्याद्युत्पत्तिविरोधात् । "अग्नौसर्वेदेवाविली

SGDF Sri Gargeshwari Digital Foundation

प्र० यंत"इतिलयश्रुतिबाहुल्याच्च । "नचश्रुतीनामयथार्थत्वं बाधकाभावा"दित्यादिटीकोक्तंमनसिनिधायाह ॥ दिगिति ॥ पंचमे समान नामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्चेत्यत्र नियतैकपाठस्यवेदस्यनानाविधनामरूपवद्देववाचित्वेऽप्रामाण्यमाशंक्य प्राचांदेवानां प्राप्तमुक्तित्वेनपुनस्स्वपदेष्ववृत्तावपिपुनस्तदन्येषां "यथापूर्व"मितिश्रुत्या "अनादिनिधनानित्ये"त्यादिस्मृत्याचप्राचीनसमाननामरूपत्वात्तत्प्र तिपादकैकविधस्यापिप्रामाण्योपपत्तिरित्युद्धारःकृतइत्यर्थः । एवंचावसरक्रमइतिभावः । अपिरत्र यद्यप्यवृत्तिः तथाप्यविरोधइतिशंकाद्यो

दिक् । पंचमेधर्मिभूतदेवानित्यत्वहेतुकविरोधाभावेपिधर्मभूतरूपादिवैचित्र्यनिमित्तकविरोधशंकायाउद्धारः । तत्रच "आ वृत्ता"वित्यस्यप्राचीनानांपदस्थानांमुक्तावन्येषांतत्पदप्राप्तिःपुनस्तेषामपिमुक्तिरित्येवंमुक्तेरावृत्तावपीतिवा प्राचीनानांमुक्त त्वेनस्वस्वपदादावृत्तावपीतिवा स्वस्वपदेष्ववृत्तावपीतिवार्थः । एवं "मुक्त्यावृत्तावपी"तिभाष्यमपित्रेधाव्याख्ये यं । स्वस्वपदेष्ववृत्तावपीतिटीकायांतुतत्प्रकारद्वयंस्फुटत्वान्नोक्तं । षष्ठेमध्वाद्युपासनाविशेषफलस्यवसुत्वादेर्वस्वादि भिःप्राप्तत्वान्नतेषांतत्राधिकारइतिशंका सप्तमेतूपासनामात्रफलस्यज्ञानस्यसर्वैरपिदेवैःप्राप्तत्वान्नतेषांतत्राधिकारइतिशंका

प्र० तकः । टीकोक्तमुपलक्षणमितिभावेनाह ॥ तत्रचेति ॥ आद्योर्थस्स्वयमुत्प्रेक्षितः । द्वितीयस्तत्त्वप्रदीपोक्तः । तृतीयस्तुतत्रटीकायांचोक्त इतिध्येयं । षष्ठे मध्वादिष्वसंभवादनधिकारंजैमिनिरित्यत्र "वसूनामेवैकोभूत्वे"त्यादिनामध्वादिविद्यासुवस्वादिपदानामुपासनाप्राप्यफ लत्वश्रवणाद्देवानांचप्राप्ततत्पदत्वेनार्थिताऽसंभवात्तत्रानधिकारंजैमिनिर्मन्यतइत्युक्तेः । सप्तमे ज्योतिषिभावाच्चेत्यत्र ज्योतिषिसर्वज्ञत्वेस र्ववस्तूनांभावादंतर्भावाद्देवानांसर्वज्ञतयासर्वविद्याज्ञानितयामोक्षहेतुज्ञानार्थमपिनतत्राधिकारइत्युक्तत्वाच्छंकाद्वयंसूत्रद्वयेकृतमित्यर्थः । विव

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्षितार्थलाभप्रकारमाह ॥ तत्रचेति ॥ अष्टमे भावंतुबादरायणोस्तिहीत्यत्र । सर्वविद्यासुदेवानामधिकारभावंबादरायणोमन्यते । अस्ति ह्यतिशयइत्युक्ततयाज्ञानेमोक्षेचातिशयाधायकतयाऽनधिकारशंकाद्वयोद्धारःकृतइत्यर्थः ॥ मंत्रेति ॥ मंत्रस्यानुष्ठेयद्रव्यदेवताप्रकाशनपरत्वेन अर्थवादस्यानुष्ठेयस्तुतिपरत्वेन आदिपदोक्तस्यविधेर्विधेयार्थविधानपरत्वेन देवताविग्रहादौतात्पर्याभावादतात्पर्यविषयस्यासिद्धेरि

तत्रचज्योतिश्शब्दोज्ञानपरः । ज्ञानस्यचाश्रयापेक्षायां "तदुपरी"तिप्रस्तुतदेवतान्वयः । ज्योतिषी तिसप्तमीचचैत्रस्यबुद्धौशास्त्रार्थइतिवत् । तथाचदेवताज्ञानेसर्वस्यभावादितिसूत्राक्षरार्थः । अष्टमेतु तदुद्धारइतिसूत्रक्रमः । यत्तूक्तमुभाभ्यां मंत्रार्थवादादेरनुष्ठेयप्रकाशनस्तुत्यादिपरत्वेनदेवतानांविग्र हादिराहित्येनार्थावच्छिन्नशब्दरूपतयाशब्दावच्छिन्नार्थरूपतयावाजडत्वेनासामर्थ्यादनधिकारइति प्राप्तेमंत्रादिभिस्तासांविग्रहादिमच्चेतनत्वादस्त्यधिकारइत्याद्यसूत्रेणसिद्धांतइति । तन्न । पूर्वसूत्र स्थमनुष्यपदेनेहतत्सजातीयचेतनांतरएवानधिकारशंकोदयेनाचेतनानधिकारपूर्वपक्षस्यासंगतेः ।

प्र० त्यर्थः । देवताभावेयागासिद्धिरित्यतोभामत्युक्तमाह ॥ अर्थेति ॥ चतुर्थ्यंतशब्दप्रतीतमात्रश्शब्दावच्छिन्नस्तादृगर्थनियमितःशब्दोवादेवतेत्यर्थः ॥ मंत्रेति ॥ वज्रहस्तःपुरंदरः । तेनेंद्रोवज्रमुदयच्छदित्यादिभिरित्यर्थः । नचमंत्रादीनामन्यपरत्वमुक्तमितिवाच्यं । प्रकाशनस्तुत्यादिपरत्वेपिमानांतराविरुद्धेस्वार्थेपितात्पर्यात् । अन्यथागुणिनिष्ठगुणाभिधानरूपस्तुत्यादेरनुन्मेषादितिभावः । गत्यंतराभावादेवमाश्री

SGDF
Sri Gargeshwari Digital Foundation

प्र० यतइत्यतआह ॥ अस्मदिति ॥ तस्य जडानधिकारपूर्वपक्षस्य । असिद्धंचविग्रहादिराहित्यमित्याह ॥ किंचेति ॥ ताएताइत्यैतरेय वाक्यं । ततएतइत्यदृश्यत्वनयेभाष्योक्तश्रुतिरियं ॥ नहीति ॥ नियामकाभावेनस्रष्टुस्सृज्यसापेक्षतयातत्राप्रामाण्येस्रष्टर्यपितथास्यादि त्यर्थः । एवंमतद्वयेपूर्वपक्षंसाधारणदोषेणनिरस्याद्वैतमतेसिद्धांतोप्ययुक्तइत्याह ॥ किंचेति ॥ नस्यादिति ॥ ब्रह्मवदितिशेषः । नचश्रुति तात्पर्यगोचरइत्यनुषंगः । सन्नपिविग्रहादिरित्यन्वयः । यजमानप्रस्तरत्ववदितिभावः । विपक्षेबाधकाभावाद्व्याप्तिहीनौद्वावपितर्कावित्यत उभयत्रविपक्षेबाधकमाह ॥ अन्यथेति ॥ तात्पर्यगोचरस्यापिबाध्यत्वइत्यर्थः ॥ यजमानेति ॥ अन्यथेत्यनुषंगः । तात्पर्यगोचरस्या

अस्मद्रीत्या "अभिमानी"तिसूत्रोक्तन्यायेनमंत्रादेःस्वार्थपरत्वेनविग्रहाद्यंगीकारेणपूर्वपक्षसंभवेतदनंगीकारे णतस्यजघन्यत्वाच्च । किंचपूर्वपक्षेस्वार्थेमंत्रादेरप्रामाण्येप्युपनिषदामपिस्वार्थेप्रामाण्यंनास्तिचेद्ब्रह्मैवचनसि ध्येत् । अस्तिचेत् "ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्रापतंस्तमशनायापिपासाभ्यामन्ववार्जत्ताएनमब्रुव न्निति "ततएतेव्यजायंतविश्वोहिरण्यगर्भोग्निर्यमोवरुणरुद्रेंद्रा"इत्याद्युपनिषद्भिरेवविग्रहादिसिद्धिः। नहिताःस्र ष्टरिप्रमाणंसृज्येतुनेतियुक्तं । किंच देवताविग्रहादिश्चेच्छ्रुतितात्पर्यगोचरः । बाध्योनस्यान्नचेन्नस्याद्व्यावहारि कसन्नपि ॥ १ ॥ अन्यथाचितिमात्रंचबाध्येतैवकदाचन । यजमानप्रस्तरत्वमपिस्याद्व्यावहारिकं ॥ २ ॥

गु० नहीति॥ननुश्रुतितात्पर्यगोचरस्यापिविग्रहादेर्ब्रह्मज्ञानेतरज्ञानाबाध्यत्वाद्व्यावहारिकत्वं। यजमानप्रस्तरत्वादेर्ब्रह्मज्ञानेतरज्ञानबाध्यत्वादव्यावहारिकत्वमित्यतआह॥

प्र० पिव्यावहारिकत्वइत्यर्थः ॥ प्रागिति ॥ जिज्ञासाधिकरणे । अद्वैत्युक्तमन्यदपिनिराह ॥ यच्चेति ॥ पूर्वतंत्रेहि षष्ठस्याद्यपादे "फलार्थ त्वात्कर्मणश्शास्त्रंसर्वाधिकारंस्या"दितिद्वितीयेऽधिकरणे देवर्ष्यादीनामधिकारोस्तिनवेतिविशये फलार्थित्वादिनाधिकारोस्तीतिप्राप्ते देवानां देवतांतराभावेनतदुद्देशेनहविस्त्यागायोगाद्भृगुप्रभृत्यृषीणांभृग्वाद्यंतराभावेनार्षेयवरणायोगादनधिकारःकर्मणिदेवर्ष्यादीनामितिसिद्धांतितं । तदुक्तन्यायेनकर्मण्यधिकाराभावेपीत्यर्थः । प्राचांवस्वादिदेवानांभृग्वाद्यृषीणांचक्षीणाधिकारत्वेनेदानींदेवत्वऋषित्वयोरभावादितिभावः ॥ सोस्तीति ॥ तथेहबाधकाभावादितिभावः । यज्ञं विष्णुं । यज्ञोवैविष्णुरितिश्रुतेः । अयजंत आराधितवंतः । एतत्पुरुषसूक्तगतंवाक्यं । "देवावैसत्रमासतऋद्धिपरिमितंयशस्कामा"इतितैत्तिरीयेद्वितीयकांडेतृतीयप्रश्नादावारण्यकेचवाक्यं । "देवायज्ञमतन्वते"त्यपिपुरुषसूक्त स्थंवाक्यं । "देवावैचतुर्होतृभि"रितिपरातेद्वितीयकांडेद्वितीयप्रश्नेवाक्यं । चतुर्होतृभिः चतुर्होतृनामकैः । अग्निर्होतेत्यादिमंत्रैरित्यर्थः ।

समर्थितंचैतत्प्राक् । यच्चोक्तंपरैः देवतानांदेवतांतराभावेनतदुद्देशेनहविस्त्यागायोगात् ऋषीणांचभृग्वादीनांभृग्वाद्यंतराभावे नतद्वरणायोगाद्यज्ञादिकर्मस्वनधिकारेपिब्रह्मविद्यासुसोस्तीति । तन्न । देवतानामपि "यज्ञेनयज्ञमयजंतदेवा"इति "देवावैस त्रमासते"ति "देवायज्ञमतन्वते"ति "देवावैचतुर्होतृभिर्यज्ञमतन्वते"ति "यद्विश्वेदेवाःसमयजंततद्वैश्वदेवस्यवैश्वदेवत्व"मिति

गु० समर्थितंचेति ॥ श्रुतौश्रद्धालुनात्वयाश्रुतेस्तात्विकविषयत्वस्यैववक्तव्यत्वात् । नचैतद्देवताशरीरादिकंप्रमाणांतरप्राप्तं । येनतद्वाक्यमनुवादकंसत्तत्रातात्पर्या दप्रमाणंनस्यादित्यादिनांऽतराद्यधिकरणेषुसमर्थितमित्यर्थः । देवानांकर्मस्वनधिकारःकिंसाधकाभावात्किंवानिषेधसद्भावात्किंवानुपपत्तिसद्भावादितिविकल्पान्मनसिनि

SGDF Sri Gurudeva Digital Foundation

प्र० “यद्विश्वेदेवा”इत्येतदपिपरातेप्रथमकांडेचतुर्थप्रश्नेवाक्यं ॥ प्रजापतिर्वाइति ॥ एतेन “प्रजापतिर्वावज्येष्ठः । सह्येतेनाग्रेऽयजते”तिस प्तमकाममकांडस्थंवाक्यमुपात्तमित्याहुः । अन्येतुशाखांतरस्थमिति । “इंद्रोश्वमेधा”नितितृतीये “श्रुत्यादिबलीयस्त्वाच्चनबाध”इत्यत्रभाष्यो क्तश्रुतिः । देवावाइति परातेद्वितीयकांडेद्वितीयप्रश्नेश्रुतं । अत्रवाक्यआद्यंतयोःश्रुतषष्ठ्यंतपदयोर्देवतानामपिदेवानामितिविशेषणविशेष्य भावेनान्वयः । देवतानामपीत्यस्य “सास्यदेवते”त्यादाविवसंप्रदानभूतस्वामिवाचित्वाद्देवतापदस्ययज्ञेष्वाराध्यानामपीत्यर्थः । तेननपौनरु क्त्यदोषः । देवानामपीत्यपिशब्दोनकेवलंमनुष्याणामितिसमुच्चयार्थः । अर्थवादानांस्वार्थेतात्पर्यस्यपरेषामप्यनुमतत्वादन्यथादेवतातद्विग्रहा द्यसिद्ध्यापत्तेरित्यग्रेवक्ष्यामइतिभावः । नन्वबाधेस्वार्थेतात्पर्यं । इहचबाधकान्नस्वार्थेतात्पर्यमस्तीतिचेत् तत्किंशूद्रादिवन्निषेधउतदेवतांतरा भावादिरूपःप्रागुक्तः । आद्यआह ॥ शूद्रेति ॥ “नाग्निर्नयज्ञश्शूद्रस्यतथैवाध्ययनंकुत”इति “नचवर्णावरस्याप्यधिकार”इतिवन्नदेवानाम

“प्रजापतिर्वा एतेनाग्रेऽयजते”ति “इंद्रोश्वमेधाञ्शतमिष्ट्वे”ति “दे वावैवरुणमयाजयन्”इत्यादिश्रुतिभिः “ततस्तुदेवताःसर्वाब्रह्माचै वमहर्षयः । वेददृष्टेनविधिनावैष्णवंक्रतुमाहरन्”इत्यादिभारतादि वचनैश्चयज्ञादिसद्भावात् । शूद्रवच्चतेषामधिकारनिषेधाभावात् । ॥ ६८२ ॥

गु० धायाद्यंदूषयति ॥ देवतानामपीति ॥ नद्वितीयइत्याह ॥ शूद्रवच्चेति ॥ तृतीयेदेवानांदेवतांतरभावेनतदुद्देशेनहविस्त्यागायोगोबाधकइतितावन्निराकरोति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० धिकारइतिनिषेधाश्रवणादितिभावः । द्वितीयआह ॥ **देवतेति** ॥ वेदसूत्रे वेदार्थनिर्णायकसूत्रे । वज्रिणंवज्रशब्दवाच्यंमां । वज्र्यंतर्ग तमितिवा । शक्रः प्रसिद्धेंद्रः । यजतामितिद्वितीयार्थेषष्ठी । यजतः । अथवा “यजतांपांडवःस्वर्गमवलिंद्रस्तपस्विनः । वयंहनामद्विषत” इत्यादाविवयजतामितिलोडासनेपदं । अत्रविष्णुविषयत्वाप्रतीतेराह ॥ **भगवद्वचनादिभिरिति** ॥ **अतएवेति** ॥ भगवतएवोद्देश्यत्वा दित्यर्थः । अभिजयेयं प्राप्नुयामित्यर्थः । इंद्राय इंद्रशब्दवाच्यायविष्णवे । इयंचश्रुतिःपरातेतृतीयकांडेप्रथमप्रश्नेश्रूयते । एवंदेवानामधिकारं समर्थ्य ऋषीणांतमाह ॥ **भृग्विति** ॥ अनेकमानविरोधेनसंकोचोन्याय्यइतिभावः ॥ **पूर्वपूर्वेति** ॥ यदत्रोक्तंभामत्यांप्राचांभृग्वादीनां क्षीणाधिकारत्वेनेदानीमृषित्वाभावादिति तन्न । भृग्वादित्वानपायात् । उक्तंचतंत्ररत्ने “नचभृग्वादयोभृग्वादिसगोत्राइतिभाष्यमयुक्तं । कुतः । अनादिर्हिकालोस्माकंभृगोरपिपूर्वंभृग्वंतरसंभवात् । ततःपूर्वमप्येवमेवेतिसंभवत्येवभृगोर्भार्गवत्वमित्यस्त्येवर्षीणामधिकार”इति ।

देवताकर्तृकयज्ञेषुच “योमेयथाकल्पितवान्भागमस्मिन्महाक्रतौ । सतथायज्ञभागार्होवेदसूत्रेमयाकृतः । मामे वयजतांशक्रःपावयिष्यामिवज्रिण”मितिभारतेदेवादीन्प्रतिभगवद्वचनादिभिरग्नींद्रादिशब्दमुख्यार्थोभगवानेवोद्दे श्यः । अतएव “इंद्रोवाअकामयतज्यैष्ठ्यंदेवानामभिजयेयमिति । सएतमिंद्रायज्येष्ठायपुरोडाशमेकादशकपालंनिर वप”दित्यादिश्रुतयः । भृग्वादिवरणंचमनुष्यविषयं । यद्वा अनादौसंसारेपूर्वपूर्वभृग्वादिवरणमुत्तरोत्तरेषांयुक्तं ।

गु० **देवताकर्तृकयज्ञेष्विति** ॥**वेदसूत्रेति** ॥ सूचनात्सूत्रमित्यर्थः । ऋषीणांभृग्वादीनांभृग्वाद्यंतराभावेनतद्वरणायोगात्स्वेनस्ववरणस्यचकर्तुमशक्यत्वान्नकर्मण्यधि कारइत्यतआह ॥ **भृग्वादीति** ॥ भृग्वादिवरणस्यमनुष्यमात्रविषयत्वेगौणताभवतीत्यरुच्याह ॥ **यद्वेति** ॥ ननुदेवाःकर्माधिकारिणोन अत्रैवर्णिकत्वादित्यनुमानविरो

SGDF
Sri Gargeshwari Digital Foundation

प्र० “ऋष्युदाहरणमनादरणीय” मितिशास्त्रदीपिकायामपिऋष्युदाहरणानादरणमुक्तं। देवानामधिकारेबाधकांतरमाशंक्यनिराह ॥नन्विति॥ तत्साध्येति ॥ आधानोपनयनसाध्ययोरग्निविद्ययोरित्यर्थः । अग्निराहवनीयादिः । विद्यात्वध्ययनसाध्यार्थज्ञानं । आधित्संत आधातुमैच्छन् । “देवावैभद्रास्संतोग्निमाधित्संत तेषामनाहितोग्निरासीत् अथैभ्योवामंवस्वपाक्रामत् तेपुनर्वस्वो” रित्यादिश्रवणात्तैत्तिरीयशाखाया

ननु “वसंतेब्राह्मणोग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्य” इति “वसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्य” मितिचत्रैवर्णिकानामेवाधानोपनयनेश्रुतेइत्यत्रैवर्णिकानांदेवानांतदभावात्तत्साध्याग्निविद्ययोरभावान्नधर्माधिकारइतिचेन्न । “देवावैभद्राःसंतोग्निमाधित्संते” त्युपक्रम्य “तेपुनर्वस्वोरादधते” ति “देवावाअग्निमादधते” त्यादौदेवतानामप्याधानश्रवणात् । “योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै” इतिब्रह्मणः, “ऋग्वेदंभगवोध्येमियजुर्वेदंसामवेदमाथर्वण” मित्यादौदेवर्षीणांनारदादीनांचाध्ययनश्रवणाच्च । त्वत्प्रसादेनभगवन्स्वाध्यायतपसोर्मम । कुशलंचाव्ययंचैवसर्वस्यजगतस्तथे” तिमोक्षधर्मेचतुर्मुखंप्रतिरुद्रवचनाच्च । देवानांत्वन्मतेकर्मानधिकारेपिवैदिकज्ञानाधिकारवदुपनयनाभावेप्यध्ययनोपपत्तेश्च ।

प्र० मित्यर्थः । तच्छब्दपरामर्शद्योतनाय “इत्युपक्रम्ये” त्युक्तं । अध्ययनमप्यस्तीत्याह ॥ यइति ॥ प्रहिणोति उपदिशति । भगवः भगवन् । “मतुवसोरुसंबुद्धौछंदसी” तिवसोरुः । ननूपनयनसंस्काराभावादध्ययनोक्तिरुपचरितार्थेत्यतआह ॥ देवानामिति ॥ “विविदिषंतियज्ञेनदानेनतपसे” त्यादिश्रुत्या “यज्ञादिश्रुतेरश्ववदि” तिसूत्रेणचकर्मणोपिविद्यांगत्वादितिभावः । उपनयनसाध्याध्ययनाभावेपिविद्यासंपत्ति

प्र० माह ॥ अध्ययनेति ॥ ननुबाधकात्कर्मानधिकारेपि “मघवान्प्रजापतौब्रह्मचर्यमुवासे” त्यादिश्रुतिसिद्धत्वाद्ब्रह्मविद्यायांसोंगीकार्यइतिचेत्तुल्यंकर्मण्यपि । अन्यथातत्रापिनस्यादितिश्रुत्युदाहरणपूर्वमाह ॥ अथपुमर्थेति ॥ श्रुतीति ॥ ज्ञानपादे “नाविशेषा” दित्यत्रभाष्योक्तश्रुतिसिद्धेत्यर्थः । ततएव अत्रैवर्णिकत्वादेवेत्यर्थः । तदधिकारस्याप्युपनयनसापेक्षत्वादितिभावः । अत्रैवर्णिकत्वमभ्युपेत्योक्तं । वस्तुतस्तुतदेवनेत्याह ॥ देवाइति ॥ श्रुतेरिति ॥ ज्ञानपादे “मौनवदितरेषामप्युपदेशा” दितिसूत्रे “देवाएवब्रह्मचारिणोदेवाएवगृहस्थादेवाएववनस्थायथाह्येतेमुनयएवंसर्ववर्णा” इतिभाष्योक्तकौठरव्यश्रुतेरित्यर्थः । एवंदेवानामग्निविद्येतत्प्रयोजकत्रैवर्णिकत्वंचप्रसाध्येदानीमग्नेरभावेप्यधि

अध्ययनाभावेपिदेवानांस्वयंप्रतिभातवेदत्वाच्च । “अथपुमर्थसाधनान्यर्थोधर्मोज्ञानमित्युत्तरोत्तरं । तत्राधिकारिणोमनुष्याऋषयोदेवाइत्युत्तरोत्तर” मित्यादिश्रुतिसिद्धस्यदेवानांकर्माधिकारस्यात्रैवर्णिकत्वादिनाऽपलापेततएवतेषांब्रह्मविद्यानधिकारापाताच्च । “देवाएवब्रह्मचारिण” इतिप्रक्रम्य “सर्ववर्णाःसर्वाश्रमिणःसर्वेह्येतेकर्मकुर्वंति” इत्यादिश्रुतेर्देवानामत्रैवर्णिकत्वाभावाच्च

गु० धाद्देवानामनधिकारितेत्याशंक्यतर्हिदेवाःनब्रह्मविद्याधिकारिणोत्रैवर्णिकत्वाच्छूद्रवदित्यनुमानविरोधाद्ब्रह्मविद्याधिकारोपिनस्यादित्याह ॥ अथपुमर्थसाधनानीति ॥ यदिचब्रह्मविद्यानधिकारसाधकमत्रैवर्णिकत्वानुमानंदेवानांब्रह्मविद्याधिकारप्रतिपादकश्रुतिविरोधादप्रमाणं । तर्हिकर्मानधिकारसाधकमप्यनुमानं तत्प्रतिपादकश्रुतिविरोधादमानमितिसमानं । तदेतदाह ॥ इत्यादिश्रुतिसिद्धस्येति ॥ ननुतथापिनदेवानांकर्मण्यधिकारः । तत्प्रतिपादकवाक्यस्यमानांतरप्रासितद्विरोधाभ्यां

SGDF Sri Gurgeshwari Digital Foundation

प्र० कारन्न्यायेनोपपादयति ॥ एतयेति ॥ षष्ठस्याद्यपादे "स्थपतिर्निषादस्स्याच्छब्दसामर्थ्या"दित्यंतिमेधिकरणे "वास्तुमयंचरुंनिर्वपे"दि
तिप्रकृत्य "एतयानिषादस्थपतिंयाजये"दितिश्रुतं । तत्रयोद्विजातिरेवनिषादानामाधिपत्यंकरोतितस्याधिकारउतयोनिषादएवस्थपतिस्तस्येति
संशये पक्षद्वयेपिशब्दस्ययौगिकत्वात्षष्ठीसमासाश्रयणेऽग्निविद्यावतामेवाधिकारलाभाद्द्विजानामेवाधिकारइतिप्राप्ते षष्ठीसमासाश्रयणेनिषाद
पदस्यतत्संबंधिनिलक्षणाप्रसंगात्कर्मधारयेतदभावाच्छ्रुत्यर्थलाभायाविदुषोनिषादस्यैवाधिकारइतिसिद्धांतितं । तथाचसिद्धेधिकारे "स्थप
तीष्टिः प्रयाजवदग्न्याधेयंप्रयोजये"दित्यष्टमपादीयतृतीयाधिकरणे "एतये"तिश्रुतस्थपतीष्टिः किमाहवनीयादिषुस्यादुतलौकिकाग्नाविति सं

"एतयानिषादस्थपतिंयाजये"दित्यादिवचनादत्रैवर्णिकत्वेनानाहिताग्नीनामपिनिषादस्थप
त्यादीनांलौकिकाग्नौवैदिककर्माधिकारांगीकाराच्च । देवावैसत्रमासतेत्याद्यर्थवादानांमानां
तरप्राप्तिविरोधयोरभावेनदेवताविग्रहाद्यर्थवादानामिवत्वन्मतेस्वार्थेप्रामाण्याच्च । देवाना

प्र० शये प्रकृतितआहवनीयादिप्राप्तेस्तस्यचाधानाधीनत्वादसत्यपिस्थपतेराधानविधाविष्टिरेवेयमाधानंप्रयोजयेदितिप्राप्ते वसंतादिवाक्यविहिता
धानजन्याग्निगतसंस्कारवाचित्वादाहवनीयादिशब्दस्यस्थपतिकृतेनचाधानेनाविहितेनसंस्कारासिद्धेर्नाधानाक्षेपइतिलौकिकाग्नावेवेष्टिस्स्यादि
त्युक्तं तद्वद्देवानामधिकारस्स्यादित्यर्थः । ननुविषमोयमुपन्यासः । स्थपतेरिष्टिविधानबलेनैतस्यसर्वस्यकल्पनेपि प्रकृतेपिदेवानांविशिष्य
कर्मविध्यभावात् । प्रागुदाहृतवचनानांचार्थवादत्वेनसत्रादिप्रशंसापरत्वेनस्वार्थेतात्पर्याभावात् । अन्यथा "वायुर्वैक्षेपिष्ठादेवता अग्निर्हिम
स्यभेषजं कोहितद्वेदयद्यमुष्मिँल्लोकेस्तिवानवेति आदित्योयूपोभवती"त्यादेरपिस्वार्थपरतास्यादित्यतआह ॥ देवावाइति ॥ मीमांसकमते

SGDF
Sri Gargeshwari Digital Foundation

प्र० तथात्वेपिनत्वन्मतेतथात्वंयुक्तं । अन्यथादेवताविग्रहाद्यसिद्ध्यैतदधिकरणसिद्धांतानुन्मेषस्स्यादित्यर्थः । तदुक्तंभामत्यां ''मंत्रादिपदसमन्वयात्प्रतीयमानोर्थःप्रमाणांतराविरोधेसत्यभ्युपेतव्यः । नतुविरोध'' इति ॥ उपासनांगेति ॥ यद्यपिनित्येकर्मण्यंगानधिकारेपिप्रधानेधिकारश्शक्यांगोपसंहारेणसमर्थितः ''सर्वशक्तौप्रवृत्तिस्स्यात्तथाभूतोपदेशा''दितिषष्ठतृतीयपादीयाद्यनये । तथाप्युपासनायाःफलार्थतयाविधानेनकाम्यत्वाद्वा कर्मणांशक्यत्वेनवा तद्वैषम्यंध्येयं । एतेनकर्मांगविद्याधानानधिकारिणोपिस्थपतेःकर्माधिकारोस्तीतिनिरस्तं । ''नाग्निर्नेमुपासनांगकर्मानधिकारे उपासनानधिकारापाताच्च । यच्चोक्तमुभाभ्यांतिर्यगादीनामसामर्थ्यात्कर्मब्रह्मविद्ययोरनधिकारइति तन्न । ''एवमुक्तोभ्रातृभिस्तुजरितारिर्विभावसुं । तुष्टावप्रांजलिर्भूत्वायत्तच्छृणुनराधिपे''त्यादिनाभारते जरितारिसारिसृक्कस्तंबमित्रद्रोणाख्यानांचतुर्णांपक्षिणां ''अयमग्नेजरिते''त्याग्नेयसूक्तेनाग्निस्तावकत्वोक्तेः । तत्रैव ''स्तंबमित्रस्तपःकुर्याद्द्रोणोब्रह्मविदुत्तम''इतिद्रोणादेर्ब्रह्मवित्त्वाद्युक्तेश्च । ''ऋषीनस्मान्बालकान्पालयस्वे''तिऋषिशब्देनचतुर्णामपिमंत्रद्रष्टृत्वोक्तेश्च । ''ऋषिद्रौंणत्वमसिवैब्रह्मैतद्व्याहृतंत्वये''तिद्रोणस्यवेदव्याहर्तृत्वोक्तेश्च । ''अयमष्टौद्यृचाःशार्ङ्जरिताद्रोणसारिसृक्कस्तंबमित्राश्चे''त्यनुक्रमणिकायां ''अयमग्नेजरिते''त्यादिसूक्तेद्रोणादीनांपक्षिणामृषित्वोक्तेश्च । रामायणादौ

प्र०यज्ञश्शूद्रस्यतथैवाध्ययनंकुत''इतिस्थपतेस्तत्राधिकारनिषेधस्येवदेवानांकर्माधिकारनिषेधाभावात् । एवंदेवादीनामधिकारंसमर्थ्यतिरश्चामपिकेषांचित्साधयितुंपरोक्तमनूद्यापाकरोति ॥ यच्चेति ॥ तिरश्चामनधिकारःकिमश्रुतत्वात्किंवाशूद्रस्येवनिषिद्धत्वाद्विशिष्टबुद्ध्याद्यभावाद्वा । आद्यंप्रत्याह ॥ एवमुक्तइति ॥ भारतआदिपर्वणिखांडवदाहसमयेद्रोणादेःपक्षिणइत्यर्थः । हेद्रोण त्वमपि ऋषिर्वै यतः त्वया एतद्ब्रह्म

ता. चं. ११५

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेदरूपं व्याहतमितियोजना ॥ **हनुमदिति** ॥ तस्यकपित्वेनतिर्यक्त्वमितिभावः । एतेनतृतीयोपिनिरस्तोबोध्यः । द्वितीयंनिरस्यति ॥ **शूद्रेति** ॥ ननुकिंतिरश्चामद्यतनानामधिकारोथकेषांचिद्विशिष्टानां । नाद्यः । बाधात् । नांत्यः । विमतास्तिर्यंचोनाधिकारिणः । तिर्यक्त्वात् । अर्वाचीनतिर्यग्वदित्यनुमानविरोधादित्यतोद्वयंक्रमेणनिराह ॥ **अर्वाचीनानामिति** ॥ **अतिप्रसंगादिति** ॥ अद्यतनपुरुषेषु सामर्थ्यादर्शनेनदेवानामपिविश्वधारणादिसामर्थ्याभावानुमानंस्यात् । श्रुत्यादिबाधस्तूभयत्रसमइतिभावः । एतेन "तिर्यगाद्यपेक्षयामनुष्यत्वविशेषणमुक्त"मितिभाष्यादिकंत्वर्वाचीनतिर्यगाद्यपेक्षयेतिव्याख्येयमित्युक्तंभवति । एतेन "तेषामप्ययमग्नेजरितेत्यादावधिकारदर्शना"दित्युत्तरनयस्थटीकावाक्यंविवृतंध्येयं । एवंविद्याधिकारसमर्थनादेवतदंगकर्माधिकारोपिसिद्धइतिसपृथङ्नसमर्थितइतिध्येयं । एवंमतद्वये

हनुमदादीनांवेदवित्त्वाद्युक्तेश्च । शूद्रादिवत्तिर्यगादीनामधिकारनिषेधाभावाच्च । अर्वाचीनानांतिर्यगादीनामस्माभिरप्यधिकारानंगीकाराच्च । अर्वाचीनदृष्टांतेनेतरेषामप्यसामर्थ्यानुमानेऽतिप्रसंगाच्च ।

गु० तत्रातात्पर्यादित्यतउक्तं **मानांतरेत्यादि** ॥ नन्वधिकारप्रयोजकस्यविशिष्टबुद्ध्यादेस्तिर्यङ्मात्रनिष्ठत्वाभावात्कथंतिरश्चामधिकारइत्यतआह ॥ **अर्वाचीनानामिति** ॥ ननुविप्रतिपन्नास्तिर्यंचोनधिकारिणः । तिर्यक्त्वात् । अर्वाचीनवदित्यनुमानविरोधात्कथंतिर्यगादीनामधिकारइत्यतआह ॥**अर्वाचीनेति**॥ **अतिप्रसंगादिति**॥ अर्वाचीनानांशूद्रादीनांब्रह्मविद्यानधिकारदर्शनेनदेवानामपिब्रह्मविद्यायामनधिकारानुमानमपिस्यादित्यतिप्रसंगादित्यर्थः । ननुपूर्वाधिकरणोक्तसर्वदेवोपास्यत्वाक्षेपनि

प्र०प्याद्यसूत्राभिप्रेतंसिद्धांतंनिरस्यद्वितीयसूत्रार्थमप्यनूद्यनिराह ॥ **यच्चेति** ॥ "इंद्रागच्छहरिवआगच्छे"त्यादिनाऽऽहूतस्यसन्निधानानुपपत्तेरितिरामानुजभाष्यमाशंकते ॥ **इंद्रेति** ॥ **तर्हिसिद्धमिति** ॥ एवंचविरोधशंकयाविग्रहाद्यभावापादनंव्याहतमित्यर्थः । रामानुजभाष्योक्तमेवान्यदपिशंकाबीजमाशंक्याह ॥ **एतेनेति** ॥ "कस्यवादेवायज्ञमागच्छंतिकस्यवानबहूनांयजमानानांयोवैदेवताःपूर्वःपरिगृह्णाति सएनाःश्वोभूतेयजत"इत्यादिनाग्न्यादेस्तत्रतत्रागमनसिद्धेरित्यर्थः । एतच्छब्दार्थंव्यनक्ति ॥ **अनेनेति** ॥ **एवमिति** ॥ तथाहि । विग्रहादिमत्त्वेंगीक्रियमाणेकर्मणिविरोधाभावेपिवैदिकेंद्रादिशब्देऽनित्यार्थसंयोगरूपविरोधस्स्यादेव । विग्रहवत्त्वेजनिमृतियोगेनजनेःपूर्वंनाशादूर्ध्वंमिं **यच्चोक्तमुभाभ्यामिंद्रादीनांविग्रहवत्त्वेऋत्विगादिवत्सन्निधानेनकर्मांगत्वंस्यात् । तच्चविरुद्धं । बहुषुयागेषुयुगपदेकस्येंद्रादेः सन्निधानायोगादितिचेन्न । एकस्याअपिदेवतायाअनेकशरीरप्रतिपत्तेरितिद्वितीयार्थइति । तन्न । देवतायाविग्रहवत्त्वेपिस्वस्थानस्थितायाएकस्याएवबहुभिरुद्देष्टुंशक्यत्वेनकर्मणिविरोधशंकानुदयात् । ब्रह्मविद्याधिकारेहिसामर्थ्याद्यर्थंविग्रहादिकमेवापेक्षितं । नत्वृत्विगादिवत्सन्निधानमपि । ननु "इंद्रागच्छहरिवआगच्छे"त्यादिनाऽऽह्वानात्सन्निधानसिद्धेर्विरोधशंकोदयइतिचेत् यद्याह्वानमागमनार्थंतर्हिसिद्धंविग्रहवत्त्वं । यदित्वदृष्टार्थंनतर्हिसन्निधानसिद्धिः । एतेन "कस्यवादेवायज्ञमागच्छंती"त्यादिवाक्यात्सन्निधानसिद्धेःशंकोदयइतिनिरस्तं । अनेनवाक्येनदेवतानामागमनसिद्धौततएवविग्रहवत्त्वसिद्धेः । असिद्धौचकर्मणिविरोधशंकानुदयात् । एवंसूत्रांतरेप्यनुपपत्तिरूह्या ॥ टीकाक्षरार्थस्तु ॥ नाध्यायादिसंगतिर्गवेषणीयेति ॥**

गु०रासकस्यास्याधिकरणस्यपूर्वाधिकरणस्याध्यायादिसंगतत्वेनतत्संगतत्वेनाध्यायादिसंगतत्वात्कथमेतत् । नचसाक्षादध्यायादिसंगत्यभावेतात्पर्यं । देवतोपास्यत्वरूप

SGDF Sri Gangadhareshwar Digital Foundation

प्र०द्रादिशब्दानामर्थशून्यत्वमनित्यत्वंवास्यादितिचेन्न । अतोवैदिकादेवेंद्रादिशब्दादिंद्रादेःप्रभवादुत्पत्तेरितितृतीयसूत्रार्थमुभावप्याहतुः । सन युक्तः । इंद्रादिजगद्धेतुत्वस्योपादानत्वरूपस्यब्रह्मधर्मत्वेनशब्देऽभावात् । दंडचक्रादिवन्निमित्तत्वरूपस्यचायोगात् । अथमतं इंद्रादिशब्द स्यनसाक्षादिंद्रादिजगदुत्पत्तौहेतुत्वं । किंतुयथाकुलालोघटादिशब्दान्मनसिनिधायवर्तमानात्तदाकारंस्मृत्वाघटादिकंतद्वाच्यंसृजति तथापूर्वस्मिन्निंद्रादौनष्टेवैदिकादिंद्रादिशब्दाद्ब्रह्मापूर्वेंद्राद्याकृतिविशेषंस्मृत्वातदाकारमपरमिंद्रादिकंसृजतीतिबुद्धिस्थितार्थस्मारकतयेति । तन्न । सर्वज्ञस्यशब्दाधीनार्थस्मरणेनसृष्ट्ययोगेनशब्दादित्यर्थकस्यातइत्यस्यवैयर्थ्यात् । चतुर्मुखस्यमुख्यस्रष्टृत्वाभावेन "धातायथापूर्वमकल्पय"दित्यादेःपरब्रह्मपरत्वात् । योपिप्रत्यक्षानुमानाभ्यामित्यस्यघटादिनिर्माणस्यशब्दपूर्वकत्वस्यप्रत्यक्षसिद्धत्वाज्जगत्सृष्टावप्येवमेवानुमानादितिपरैरर्थउक्तः सनयुक्तः । तथासतितयोस्समुच्चित्यहेतुत्वानुपपत्तेः । जगत्सृष्टेश्शब्दपूर्वकत्वेऽनुमानस्यैवसाक्षात्प्रवृत्तेःप्रत्यक्षस्यव्याप्तिग्रहौपयिकत्वेनतच्छेषत्वात्प्रत्यक्षानुमानाभ्यामितिद्विवचनस्यक्लिष्टत्वात् । दंडपरशुभ्यांवृक्षश्छिद्यतइतिव्यपदेशाभावात् । कैश्चिच्छ्रुतिस्मृतिभ्यामित्यर्थ उक्तः । सोपिनसाधुः । रूढार्थत्यागापत्तेः । अतइत्यनेनैवश्रुतिस्मृतिरूपशब्दस्यग्रहणसंभवेनतस्यवैयर्थ्याच्च । यच्चोक्तंपरैः इंद्रादिजगत इंद्रादिवेदशब्दजन्यत्वादेववेदस्यनित्यत्वमितिचतुर्थस्यार्थइति तन्न । तत्समर्थनस्यप्रकृतानुपयोगात् । चशब्दानुपपत्तेश्चेत्यादिरूपेणध्येयं । ग्रंथगौरवभयादुपरम्यते । यत्कश्चिदाह "ततोदेवारुद्रंनापश्यन् । तेदेवारुद्रंध्यायंती"त्यत्रोक्तोदेवानामुपासनाधिकारोनयुक्तोथयुक्तइतिसंशये पूर्वोक्तरीत्याविग्रहाभावेनसामर्थ्याभावात् "देवाहवैस्वर्गंलोकमगमन् । तेदेवारुद्रमपृच्छ"न्नितिदेवलोकस्यपरब्रह्मपदस्यचैकार्थत्वावगमेनार्थित्वायोगादुपनयनाभावेनवैदुष्यायोगाज्जडत्वेनानधिकारइतिप्राप्ते विग्रहलोकभेदस्वयंप्रतिभातवेदत्वाभ्युपगमेनास्त्यधिकारइतिसिद्धां ॥ ६८६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तद्इति तदनेनैवनिरस्तं । प्रागुक्तदोषात् । देवलोकपरब्रह्मलोकयोर्भेदस्य "कर्मचितोलोकःक्षीयते। अक्षय्यंपद"मित्याद्यनेकमानमितत्वेना स्मद्रीत्यैवार्थित्वाभावस्योपपादनीयत्वाच्च । "ताभिरेनंरुद्रोन्वायत्त"इति "रुद्रेणैवमुखेने"ति "तद्रुद्राउपजीवंती"त्यादिनारुद्रस्याप्युपासनाधि कारिवर्गप्रविष्टत्वेनतस्योपास्यकोटिप्रवेशायोगाच्च । यच्चाद्यसूत्रेतदितिभिन्नंपदंलुप्तषष्ठीकं । पूरणगुणेतिसमासनिषेधादिति । तन्न । निर्वा ह्स्योक्तत्वात् । द्वितीयादिसूत्रार्थोपिप्राग्वन्निरसनीयः । यदत्रोक्तंशिवार्कमणिदीपिकायां पूर्वसूत्रेतदुपरीत्यनेनेंद्रादेर्हविर्भोक्तृत्वमर्थादुक्तं । तन्नसंभवति । युगपदनुष्ठीयमानानेकक्रतुषुसन्निधानेनभोक्तृत्वायोगादितिविरोधशंकोदयइति तन्न । ब्रह्मविद्याधिकारोपयोगिविग्रहादावेव विरोधशंकासमाधानौचित्येनतदनुपयुक्तभोक्तृत्वेविरोधशंकादेरसंगतत्वात् । अग्नौप्रक्षिप्तस्यतदैवभस्मसाज्जातस्यानेककायसाधारणेनापितद्भो क्तृत्वस्यबाधाच्च । तद्द्वाराभोक्तृत्वेनचस्वस्थानेस्थितस्याग्निनानीतहविर्भोक्तृत्वसंभवात् । अतएवाग्नेर्देवदूतत्वप्रसिद्धिरपीत्यास्तां । प्रासंगिक त्वान्नाध्यायादिसंगतिर्गवेषणीयेतिटीकानयुक्तेव । प्रसंगसंगतेरेवाभिधानाद्व्याहत्यापत्तेरित्यतआह ॥ **मुखतइति** ॥ **संगतिरिति** ॥ ब्रह्म ण्युभयत्रप्रसिद्धलिंगादिसमन्वयरूपेत्यर्थः । तत्रापि अधिकारेऽव्युत्पाद्येपीत्यर्थः ॥ **फलितइति** ॥ यथावैश्वानरनाम्निसमन्वितेपाचकत्वादि लिंगसमन्वयस्यफलितत्वात्तस्यद्वितीयेनिवेशस्तथात्रापिदेवानामधिकारेसिद्धे "विश्वेदेवाउपासत"इत्युक्तलिंगसमन्वयःफलिष्यतीत्यर्थः । तृती

मुखतोऽव्युत्पाद्येऽधिकारेनसाक्षादध्यायसंगतिर्गवेषणीयेत्यर्थः । प्रासंगिकसंगते
स्तत्रापिसत्त्वात् । फलितेदेवतोपास्यत्वलिंगसमन्वयेसाक्षात्संगतेरपिसत्त्वाच्च ।

गु० लिंगसमन्वयस्यसाक्षादपिसत्त्वादित्यतःप्रासंगिकत्वादध्यायादिसंगतिर्नगवेषणीयेतिटीकांव्याचष्टे ॥ **मुखतइति** ॥ व्याख्याबीजंसूचयति ॥ **प्रासंगिकेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० यसूत्रेकार्यत्वानुमानेशरीरिजन्यत्वस्योपाधित्वमुक्त्वातत्रव्यर्थविशेषणत्वमाशंक्यपक्षव्यावृत्त्यर्थत्वेनसार्थक्येभिहितेसति ''पक्षव्यावृत्त्यर्थ विशेषणवतोप्युपाधित्वेपक्षेतरत्वस्याप्यापद्यतेतदितिचेत्कानोहानिः पर्वतेतरत्वादीनामपिव्याप्तिरस्तिचेत्। अनुमानोपजीव्येनबाधादव्याप्तौस्वयं दुष्टत्वा''दितिवाक्यंदुर्गमत्वाद्व्यनक्ति ॥ **पर्वतेति** ॥ **अनुमानेति** ॥ ''अनुकूलेनतर्केणसनाथेसतिसाधने। साध्यव्यापकताभंगात्पक्षेनो पाधिसंभव''इत्युक्तदिशेत्यर्थः। चक्रकमस्पष्टत्वाद्दर्शयति ॥ **ईश्वरस्येति** ॥ प्रमा ज्ञानसामग्रीव्यतिरिक्तकारणजन्या कार्यत्वादित्यनुमाने विकल्पेनव्याहत्यादिनादूषितेसति ''प्रमात्वयुक्तज्ञानस्यैवंविधत्वंसाध्यतइतिचे''दित्याशंक्य ''तादृशज्ञानस्यापिज्ञानकारणातिरिक्तकारणज

पर्वतेतरत्वादीनामपिव्याप्तिरस्तिनवा। आद्यंनिरस्यति ॥ **कानोहानिःपर्वतेतरत्वादीनामपि** [५४।२४] **व्याप्तिरस्तिचेदिति** ॥ द्वितीयंप्रत्याह ॥ [५४।२४] **अनुमानोपजीव्येनबाधादव्याप्ताविति** ॥ [५५।१७] **चक्रका पातादिति** ॥ ईश्वरस्यसर्वज्ञत्वेसिद्धे ''तस्माद्यज्ञा''दित्यादिनावेदस्यसर्वज्ञप्रणीतत्वसिद्धिः। त त्सिद्धौचवेदस्यप्रामाण्यसिद्धिः। तत्सिद्धौचवेदेनेश्वरस्यसर्वज्ञत्वसिद्धिरितिचक्रकापातादित्यर्थः।

गु० कानोहानिरित्यादिटीकाग्रंथस्यशंकाज्ञापकचेच्छब्दयुक्तत्वेनशंकाग्रंथत्वप्रतीतिनिरासायविकल्पमुखेनटीकामुत्थापयति ॥ **पर्वतेतरत्वादीनामिति** ॥ अनुमा नोपजीव्येनबाधादव्याप्तावित्यादिटीकायाअयमर्थः। अव्याप्तौ उपाधेःसाध्याव्याप्तौ अनुकूलतर्केणहेतोःसाध्यव्याप्यत्वेनिर्णीतेसाध्यव्याप्यहेत्वव्यापकत्वेनपक्ष एवसाध्यव्यापकताभंगादुपाधिलक्षणानाक्रांतत्वादनुपाधित्वमिति। चक्रकापातादित्यस्यदुर्बोधत्वात्तद्व्याचष्टे ॥ **ईश्वरस्येति** ॥ ज्ञानेव्यभिचारापरिहारादितिटी कायाअयमर्थः। प्रमांपक्षीकुर्वतानप्रमामात्रंपक्षीकर्तुंशक्यं। ईश्वरप्रमायांवक्ष्यमाणप्रकारेणबाधात्। नापिजन्यप्रमामात्रं। यादृच्छिकयथार्थवाक्यजन्यप्रमायां

प्र० न्यत्वसाधनेव्याघातानिस्तारात्। ज्ञानकारणतदतिरिक्तजन्यत्वंसाध्यतइतिचेन्न। ईशप्रमायांबाधा''दित्युक्तं। तद्दुर्गमत्वाद्विकल्पेनघटयति ॥ **किंज्ञानेति** ॥ ''ज्ञानेपिकार्यत्वेनतत्साधनसौलभ्या''दितिपूर्ववाक्ये ज्ञानंज्ञानकारणमात्रजन्यंन कार्यत्वादित्यपिस्यादितिप्रतिबंद्युक्त्या तर्हिव्याघातस्स्यादित्याशंक्योक्तंविशिष्टेत्यादि। तदप्रतीतेर्व्यनक्ति ॥ **यथेति** ॥ ननुप्रमात्वस्यज्ञानत्वन्यूनवृत्तिनस्तथात्वेपिज्ञानकारणजन्य

किंज्ञानकारणातिरिक्तमात्रजन्यत्वंसाध्यं किंवाज्ञानत्वप्रयोजककारणजन्यत्वेसत्यतिरिक्तजन्यत्वं। आ द्येप्रमात्वयुक्तज्ञानस्यापिज्ञानत्वाद्व्याघातइत्याह ॥ [५५।१७] **तादृशज्ञानस्यापीति** ॥ द्वितीयंशंकते ॥ [५५।१८] **ज्ञानका रणतदतिरिक्तजन्यत्वमिति** ॥ [५५।२०] **विशिष्टाभावविकल्पेनव्याघातस्यसमीकरणादिति** ॥ यथा प्रमायांज्ञानकारणातिरिक्तकारणमात्रजन्यत्वस्यव्याहतत्वेपिज्ञानकारणमात्राजन्यत्वरूपविशिष्टाभावो नव्याहतः। तस्यजन्यत्वाभावेनवाजन्यत्वेपिज्ञानकारणातिरिक्तजन्यत्वेनवोपपत्तेः। तथाज्ञानेपि

गु० बाधात्। तस्मात्तद्व्यावृत्तजन्यप्रमामात्रंपक्षीकर्तव्यं। तत्रचकार्यत्वसद्भावेपिज्ञानकारणातिरिक्ताजन्यत्वेसतिज्ञानकारणजन्यत्वाभावस्याभावात्तत्रव्यभिचारादित्यर्थः। ननुज्ञानकारणमात्रजन्यंनेतिसाधयितुंनशक्यते। अत्रज्ञानकारणातिरिक्ताजन्यत्वेसतिज्ञानकारणजन्यत्वरूपविशिष्टाभावस्यसाध्यत्वात्तत्रचज्ञानेज्ञानकारणजन्यत्वरूप विशेष्याभावप्रयुक्तविशिष्टाभावासंभवेनज्ञानकारणातिरिक्ताजन्यत्वरूपविशेषणाभावप्रयुक्तविशिष्टाभावोवाच्यः। तथाचव्याघातइतिशंकानिरासायटीकायांविशिष्टा भावविकल्पेनेत्याद्युक्तं। तस्यार्थोनज्ञायतइत्यतोव्याचष्टे ॥ **यथेति** ॥ प्रतिज्ञानिरासेनेत्युक्त्याज्ञानंगुणजन्यमित्यत्रप्रतिज्ञानिरासकव्याघातस्यासंभवादित्यतोव्या

SGDF Sri Gargeshwari Digital Foundation

प्र० कृत्स्नज्ञानवर्तिनोज्ञानत्वस्यतथात्वं । ज्ञानहेतुंविनाक्वापितस्यादृष्टेरित्यतआह ॥ **यादृच्छिकेति** ॥ ननुतत्रापिविषयाबाधएवातिरिक्तंकारणमितिचेन्न । विषयसत्त्वस्यप्रामाण्यशरीरत्वेनप्रामाण्यंप्रतिहेतुत्वाभावात् । स्वतस्त्ववादिनाविषयसत्त्वस्यस्वीकृतत्वेनसिद्धसाधनतापत्त्याततोन्यस्यैवकस्यचिद्वक्तव्यत्वेनतस्यतत्राभावात् । विस्तरस्तुतर्कतांडवेप्रथमपरिच्छेदेद्रष्टव्यइतिभावः । ननुज्ञानमात्रंपक्षीकृत्यज्ञानकारणमात्रजन्यत्वाभावेसाध्यमानेतत्फलस्यातिरिक्तजन्यत्वस्येशज्ञानेबाधादित्यतआह ॥ **व्याघातइत्युपलक्षणमिति** ॥ यद्यपिव्याघातस्येतिवक्तव्यं । तथापिव्याघातोनेतिफलितत्वात्तदभिप्रायेणैवमुक्तिः । यद्यपिकार्यत्वेनेत्युक्त्यातदतिरिक्तंज्ञानंपक्षइतिलभ्यते । अन्यथाभागासिद्ध्यापत्तेः । तथापिपूर्वप्रमापक्षकपरोक्तानुमानेभागासिद्धिमवधीर्यतथैवोद्भावनादिहापितत्पक्षीकारेणदोषोद्धारःकृतइतिध्येयं । “प्रमागुणजन्या तदन्वयव्यतिरेकित्वादित्येतदपिप्रतिज्ञानिरासेननिरस्त”मितिवाक्यार्थमप्रतीतेराह ॥ **परतस्त्वेति** ॥ आदिपदेनेशप्रमायांबाधा

यादृच्छिकसंवादस्थलेऽतिरिक्तकारणंविनापिदृष्टायाः भ्रमस्याप्यधिष्ठानाशेप्रमात्वेनप्रमात्वरहितज्ञानव्यक्तेरभावेनज्ञानवदनुवृत्तत्वेनदृष्टायाश्चप्रमायाअतिरिक्तकारणजन्यत्वेज्ञानस्यापितज्जन्यत्वप्रसंगादित्यर्थः । व्याघातइत्युपलक्षणं । ईशज्ञानस्यपक्षत्वेपितत्रजन्यत्वाभावेनसाध्यसंभवात्तदंशेबाधोपिनेतिभावः ॥ प्रतिज्ञानिरासेननिरस्तमिति[५५।२६] ॥ परतस्त्ववादिनापिगुणत्वजातेरनंगीकारेणगुणशब्देनज्ञानकारणातिरिक्तकारणस्यैवविवक्षणीयत्वेनपूर्वोक्तव्याघाताद्यापत्तेरित्यर्थः॥ [५६।२] अजन्यप्रमात्वमिति॥

गु० चष्टे ॥ **परतस्त्ववादिनेति** ॥ अजन्यप्रमात्वमुपाधिरितिटीका । तत्रघटादौगुणजन्यत्वाभावरूपसाध्यसद्भावेप्यजन्यप्रमात्वाभावेनसाध्याव्यापकत्वतादवस्थ्या

SGDF Sri Gargeshwari Digital Foundation

प्र० दिर्ध्येयः। प्रमागुणजन्यान प्रमात्वादित्यत्रपरेणाजन्यप्रमात्वमुपाधिराशंकितः। सनयुक्तः। घटादौसाध्याव्यापकत्वस्यस्पष्टत्वादित्यतआह॥
जन्यप्रमात्वाभावइति॥ तर्हिव्याप्यभावादितिदूषणंनलगतीत्यतआह॥ याहच्छिकेति॥ दुष्टेतिसाध्यसत्त्वोपपादनं। तत्रापिगुणज
न्यत्वमस्तीतिप्रत्युक्तं। "अतएवचे"तिसूत्रे "नचाप्रामाण्येनोपपत्तिः। तदभावादेवे"त्युक्तं। नवाझ्मात्रेणपरिहारयोगइत्यतस्तंव्यनक्ति॥
प्रामाण्यस्येति॥ तत्रैव "ब्राह्मणादेवब्राह्मणइतिनियमस्यक्वचिदन्यथात्वोपपत्तेर्वृश्चिकतांडुलीयकादिव"दित्युक्तं। तत्रदृष्टांतांशमप्रतीते
र्विवृणोति॥ यथेति॥ समानेतिसूत्रे "ब्रह्मादिविबुधानांनामानिनिर्ममे। तांञ्छब्दांस्तेषुसंयोजितवा"नितिवाक्यमयुक्तमिव। तथात्वे
शब्दार्थसंबंधस्यौत्पत्तिकत्वानापत्तेरतआह॥ अयंशब्दइति॥ क्वचित्संकेतितवानितिटीकापाठः। तत्राप्ययमेवार्थोध्येयः। संयोजितवा
नितिप्रतीकंतुबाहुल्याभिप्रायेण। यद्वैतदनुरोधेनपाठांतरंलेखकदोषमूलमितिकल्प्यं। मध्वादिष्वितिसूत्रे "नचद्वितीयाद्यमृतविद्यादिषुवस्वा
जन्यप्रमात्वाभावइत्यर्थः॥ व्याप्यभावादिति॥ याहच्छिकसंवादिदुष्टवाक्यजन्यप्रमायांसाध्येसत्यप्युपाध्यभावादित्यर्थः॥
तदभावादेवेति॥ प्रामाण्यस्यसाधितत्वेनाप्रामाण्यस्याभावादेवेत्यर्थः॥ वृश्चिकतांडुलीयकादिवदिति॥ यथागोमयतं
डुलकणादिविजातीयजन्यानामपिवृश्चिकत्वतांडुलीयकत्वादिजातिस्तथैवब्राह्मणाज्जातस्यापिसर्गादिकालीनस्यब्राह्मणत्वजा
तिरित्यर्थः॥ संयोजितवानिति॥ अयंशब्दोत्रशक्तइतिज्ञापितवानित्यर्थः॥ नचद्वितीयाद्यमृतविद्यादिष्विति॥

गु० दनुपपन्नत्वेनभातीत्यतोव्याचष्टे॥ जन्यप्रमात्वाभावइति॥ तथाचसाध्यव्यापकतेत्यर्थः। व्याप्यभावाप्रतीतेराह॥ याहच्छिकेति॥ तदभावादेवेत्यत्रा
प्रामाण्याभावेहेतुर्नोक्तइत्यतस्तंवदन्नेववाक्यंव्याख्याति॥ प्रामाण्यस्येति॥ संकेतितवानित्ययुक्तं। संकेतस्येश्वरेच्छाविशेषरूपत्वेनशब्दानांसांकेतिकत्वापत्त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० दीनामधिकारस्संभवतीतिवाच्य"मितिशंकावाक्यंव्यनक्ति ॥ तद्यदिति ॥ तत्रैव "सामान्यफलानांप्रकाशवानस्मिँल्लोकेभवतीत्यादीनांतत्फलेंतर्भावात् । नहवाएवंविदिकिंचनानन्नंभवतीत्यादीनांसर्वायोग्यत्वा"दितिवाक्यद्वयंक्रमेणव्यनक्ति ॥ प्रकाशवानिति ॥ ज्योतिषीतिसूत्रेटीकास्थंवाक्यंव्यनक्ति ॥ नकेवलमिति ॥ शिष्टंस्पष्टमुपन्यासमुखेनेतिभावः ॥ ७ ॥ देवताधिकरणं ॥ ८ ॥

"तद्यत्प्रथमममृतंतद्वसवउपजीवंती"त्युक्तप्रथमामृतविद्यायावसुत्वफलकत्वेनतत्रवसूनामनधिकारेपि "अथयद्द्वितीयममृतंतद्रुद्राउपजीवंती"त्यादिनोक्तद्वितीयाद्यमृतविद्यासुरुद्रत्वादेःफलत्वेनतत्राधिकारोस्त्विवतिनवाच्यमित्यर्थः ॥ [५७।१४] प्रकाशवानस्मिँल्लोकेभवतीत्यादीनामिति ॥ "प्रकाशवानस्मिन्लोकेभवति । प्रकाशवतोहलोकाञ्जनयती"त्यादिनोक्तानां "एषवैसोम्यचतुष्कलःपादोब्रह्मणःप्रकाशवान्नामे"त्यादिविद्याफलानामस्मिँल्लोकेप्रकाशवत्त्वादीनांमधुविद्यादिफलभूतवसुत्वादावंतर्भावादित्यर्थः ॥ [५७।१४] नहवाएवंविदिकिंचनानन्नंभवतीत्यादीनांसर्वायोग्यत्वादिति ॥ नहवाएवंविदीत्यादिनोक्तेषुसर्वभोक्तृत्वादिरूपेषु "तेहप्राणाअहंश्रेयसिव्यूदिर"इत्यादिप्राणविद्याफलेषुरुद्रादेरेवयोग्यत्वादित्यर्थः ॥ प्राचीनपक्षेदोषांतरंचोक्तंभवतीति [५७।२१] ॥ नकेवलमाद्यपक्षेपूर्वोक्तोवस्वादीनांमधुविद्यादिफलेवसुत्वादावधिकाराभावदोषः । किंतुविद्यासाध्येवसुत्वादिसाधनेज्ञानेप्यर्थित्वाभावदोषः । वस्वादीनांसिद्धज्ञानत्वादित्यर्थः ॥७॥ देवताधिकरणं ॥ ८ ॥

गु० स्वाभाविकशक्तिःकुत्रापिनस्यादित्यतोव्याख्याति ॥ अयंशब्दइति ॥ प्राचीनपक्षइत्यत्रकःप्राचीनःपक्षः । कथंचायंतत्रदोषइत्यतस्तदुपपादयितुमाह ॥ नकेवलमिति ॥ ७ ॥ देवताधिकरणं ॥ ८ ॥

॥ ६८९ ॥

प्र० ॥ ॐशुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहिॐ ॥ "मनुष्याधिकारत्वादित्युक्त"इतिभाष्यदिशातदानंतर्यप्राप्तेस्तस्यफलपरत्वमभिप्रेत्यास्यपूर्वानंतर्येहेतुमाह ॥ अत्रेति ॥ संभवादितिहेतूक्तविशिष्टबुद्ध्यादिमत्त्वेनदेवानांयथाधिकारस्तथाशूद्राणामपीत्युत्थानादापवादिकीसंगतिरित्यग्रेस्पष्टं । इयंच "स्वन्यायेने"तिटीकासूचिता । व्यर्थेयंचिंतेत्यतआह ॥ फलंत्विति ॥ "नचोक्तेविरोधाभावादसंगतिः । स्वन्यायेनश्रुत्यादिविरोधप्राप्ते"रितिटीकायामित्यर्थः । तदेतदप्रतीतेर्व्याचष्टे ॥ अयंहीति ॥ शूद्रस्याधिकारेंगीकृतेपिमनुष्याधिकारत्वादित्यनेनोक्तेमनुष्याधिकारेविरोधोनास्तीत्यर्थः । स्वन्यायेनेत्यस्यार्थमाह ॥ अधिकारेति ॥ मनुष्यत्वविशिष्टबुद्ध्यादिरूपन्यायेनेत्यर्थः ।

॥ ॐशुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहिॐ ॥ अत्रपूर्वाधिकरणसिद्धांतरीत्यापूर्वपक्षोत्थानादनंतरसंगतिः । फलंतु नचोक्तेविरोधाभावा"दित्यादिटीकायामेवोक्तं । अयंहिटीकार्थः । शूद्रस्याधिकारेप्युक्तेमनुष्याधिकारेविरोधोन । शूद्रस्यापिमनुष्यत्वात् । तथाचोक्ताक्षेपाभावेनास्यविचारस्यनिष्फलत्वादसंगतिरितिनवाच्यं । शूद्रस्याधिकारवदनधिकारेपिश्रुत्यादेःसत्त्वेनाधिकारोपपादकपूर्वपक्षन्यायेनानधिकारस्यापिप्राप्तेः । तथाचसामान्येनमनुष्याधिकारोक्तिःप्रमाणविरुद्धा । अनधिकारेतुसामान्येनोक्तेःशूद्रेतरविषयत्वान्नविरोधइति ।

गु० ॥ ॐशुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहिॐ ॥ नन्वाक्षेपेसन्निकृष्टत्वंविप्रकृष्टत्वंवाऽप्रयोजकं । किंतुयोग्यत्वं । तच्चव्यवहितस्यापिप्रथमसूत्रस्यैव । तत्राथशब्देनसाक्षात्त्रैवर्णिकाधिकारस्योक्तत्वात् । किंचापवादविषयंपरित्यज्यसामान्यस्यसत्त्वेनतयोर्विरोधएवनोपपद्यते । तथासति नहिंस्यात्सर्वाभूतानीत्यस्यसामा

SGDF Sri Gurgaonkar Digital Foundation

प्र० अधिकारवदित्यन्वयः । निषेधश्रुत्यादिनाऽनधिकारस्यापिप्राप्तेरित्यर्थः । टीकोक्तंफलमाक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ इहपूर्वपक्षेपूर्वन्यायेनाधिकारेसिद्धे "अथातोब्रह्मजिज्ञासे"त्यत्राथशब्दोक्तत्रैवर्णिकाधिकारोनयुक्तइत्याक्षेपसंभवादित्यर्थः । ननुप्रागुक्तमनुष्याधिकाराक्षेपस्य ह्यपेक्षयांगुष्ठमात्रत्वंविष्णौयुक्तमित्यस्याक्षेपद्वाराजिज्ञास्यत्वाक्षेपपर्यंतत्वेनव्यवहिताक्षेपःप्रागप्यविशिष्टइतिचेन्न । साक्षाद्व्यवहिताक्षेपापेक्षया सन्निहिताक्षेपस्योचितत्वादित्याशयात् । यद्वैतदनुशयेनाह ॥ यद्वेति ॥ विषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ शूद्रादेरित्यादिपदेन त्रैवर्णिकेतरजातेः त्रैवर्णिकमध्येपिभक्तिशमदमादिरहितस्यचपरिग्रहः । टीकायां "तदाद्रवणा"दितिसूत्रभाष्यानुरोधेनशूद्रस्येत्युक्तावप्युपनयनसंस्काराभावादित्युक्तेः "अवैष्णवस्यवेदेपिह्यधिकारोनविद्यते । गुरुभक्तिविहीनस्यशमादिरहितस्यच । नचवर्णावरस्यापितस्मादध्ययनान्वित"इत्यादिनिषेधस्यचतुल्यतयासमानन्यायविषयाणांटीकोपलक्षणमित्यभिप्रेत्यादिपदंप्रयुक्तं ॥ इतिश्रुतइति ॥ छांदोग्येचतुर्थेध्यायेसंवर्गविद्यायां "तमुहपरःप्रत्युवाच अहहारेत्वाशूद्रतवैवसहगोभिर"स्त्वितिपौत्रायणंप्रतिरैकोक्तेवाक्येश्रुतस्संबुद्ध्यंतश्शूद्रशब्दइत्यर्थः । अहेतिसंबुद्धिः । हारेतिलुप्तविभक्तिकः । इत्वा रथः । यदत्रकेनचिदुक्तं "अहहारेत्वाशूद्रे"तिदक्षिणाप्रत्याख्यानवाक्येशूद्रेत्यामंत्रणंशूद्रव

यद्यप्यत्राद्यसूत्रस्याथशब्दसूचितस्यत्रैवर्णिकाधिकारस्येहाक्षेपादपिफलंसुवचं । तथापिटीकायांसन्निकृष्टत्वान्मनुष्याधिकारएवाक्षिप्तः । यद्वा अत्रत्यसिद्धांतेनत्रैवर्णिकाधिकारेसिद्धेऽथशब्देनतत्सूचनं । पूर्वपक्षेतुनेतिनतदाक्षेपःशक्यः । अत्रशूद्रादेःकिंब्रह्मविद्याधिकारोस्त्युतनेतिचिंता । तदर्थं "अहहारेत्वाशूद्रे"तिश्रुतःशूद्रशब्दःकिंरूढःकिंवायौगिकइति । तदर्थंकिं

गु० न्यस्याग्नीषोमीयंपशुमालभेतेतिविशेषेणविरोधः । प्रकृतेचमनुष्याणामधिकारइतिसामान्यं । शूद्रस्यनेतितुविशेषः । तत्कथमनयोर्विरोधइत्यरुचेराह ॥ यद्वेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०द्ब्रह्मविद्यागौरवमजानानस्स्वल्पांदक्षिणामाहरसीतिकोपेनशूद्रेत्यामंत्रणमित्यन्यथासिद्धिर्वक्तुंशक्या । तथापि "आजहारेमाश्शूद्रानेनैवमुखे
नालापयिष्यथा"इत्युत्तरवाक्यस्थशूद्रशब्दात्संदेहइति तन्न । तथात्वेऽग्रेपिशूद्रेत्युक्तेरनुपपत्तेः । प्रक्रमस्थशूद्रशब्देऽन्यथासिद्धिशंकायामुप
रितनेपितथात्वशंकानपायात् । एकप्रकरणस्थत्वात् । विषयकामुकवृषलवत्कामिन्यादिमुखेनालापयिष्यथाइतिवा त्रैवर्णिकवच्छुश्रूषयावि
नाशूद्रवद्धारादिद्रव्यमुखेनविद्यांप्राप्तुमिच्छसीतिवा तदानीतकन्यापरिग्रहेणास्याशूद्रत्वशंकयाशूद्रेत्युक्तेर्वर्णावरत्वान्यनिमित्तकत्वमितिवाशं
कोदयस्यतत्रापिसंभवाच्च । किंच क्षत्रियत्वनिर्णायकद्वितीयसूत्रोक्तरथसंबंधित्वस्य "अहहारेत्वे"तिवाक्यइवोत्तरवाक्येऽभावात्तदनादरश्र
वणतदाद्रवणतत्सूचनानामाद्यसूत्रोपात्तानांभाष्योक्तवाक्यस्थशूद्रशब्दएवसन्निधानेनतन्निर्णयाधीननिर्णयत्वादुत्तरशूद्रशब्दस्य । किंच दक्षि

रूढिबाधकंनास्त्युतास्तीति । तदर्थं "अयमश्वतरीरथ"इतिश्रुतोरथःकिंशूद्रेयुक्तउतनयुक्तइति ॥ पूर्वपक्षस्तु ॥

प्र० णाप्रत्याख्यानंशूद्रजातित्वादेवशूद्रेतिसंबोध्यकृतं । शूद्रप्रतिग्रहस्यनिंदनात् । नत्वल्पत्वेनेति विरक्तस्यमुनेःस्वल्पत्वेनप्रत्याख्यानायोगादिति
जातिवाचित्वशंकायाएवोदयेनान्यथासिद्धिशंकानुदयाच्च । नचतथात्वेऽग्रेतनवाक्येदक्षिणापरिग्रहश्रवणविरोधइतिशंक्यं । त्वत्पक्षेप्यग्रेशू
द्रपदश्रवणविरोधस्यतुल्यत्वात् । पुनरागतेतस्मिन्दययातद्दत्तस्वीकरणंमुनेरित्युपपत्तेश्च । तस्माद्भाष्याद्युक्तं "अहहारेत्वाशूद्रे"तिवाक्यमेवो
दाहरणंयुक्तं । आद्यसूत्रसूचितंचिंताद्वयमुक्त्वाद्वितीयसूचितंचिंताद्वयमाह ॥ **रूढिबाधकमिति** ॥ यदिवक्ष्यमाणदिशाशूद्रेवेदाध्ययनादे
स्संभवेन "यत्रवेदोरथस्तत्रनवेदोयत्रनोरथ"इतिस्मृतेर्वेदाविनाभूतोपिरथोयुक्तः तदाबाधकाभावेनरूढित्यागायोगाच्छूद्रादीनामप्यधिकार
स्सिध्यति । यदातुसिद्धांतेवक्ष्यमाणदिशाशूद्रेवेदाभावेनतदविनाभूतोरथोनयुक्तः तदाबाधकसत्त्वेनरूढित्यागेनयौगिकार्थस्याशूद्रेपिसंभवा

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्नास्त्यधिकारइतिसिध्यतीतिफलफलिभावस्स्पष्टः । नन्वत्रतदर्थैरथव्यापकमध्ययनंशूद्रेयुक्तंनवेति तृतीयसूत्रादिसूचितचिंतांतरंकुतोनप्रदर्शितमितिचेत् द्वितीयसूत्रेचैत्ररथेनेतितद्धितप्रत्ययसूचितंस्वाभाविकत्वंरथसंबंधस्यप्रतिपादयितुं । तथाप्रदर्शनेहिरथोवेदानुमानद्वाराशूद्रत्वज्ञापकस्स्यान्नसाक्षादिति साक्षादपिलिंगत्वस्यसिद्ध्यर्थमेतावत्येवचिंतादर्शिता । एवंचास्मिन्पक्षेरथस्यास्वाभाविकत्वेनशूद्रेयुक्तत्वादस्त्यधिकारइतिपूर्वपक्षेफलं । सिद्धांतेतुतस्यात्रस्वाभाविकस्यैवश्रवणात्तस्यचशूद्रेऽयोगान्नास्त्यधिकारइत्यवधेयं । "विशिष्टबुद्ध्यादिमत्त्वेपिशूद्रस्यान्येभ्योऽविशेषा"दितिटीकांविवृण्वन्पूर्वसिद्धांतन्यायेनपूर्वपक्षंव्यनक्ति ॥ **विशिष्टेति** ॥ एतच्च "संभवा"दितिपूर्वहेत्वर्थकथनं । ननुपूर्वन्या

विशिष्टबुद्ध्यादिमत्त्वाद्देववच्छूद्रादिरपिवेदविद्याधिकारी । ननुशूद्रउपनयनाभावादध्ययनरहितः । तद्रहितश्चनाधिकारीति "अध्ययनमात्रवत"इत्यत्रवक्ष्यतइतिचेन्न । वैदिकसंवर्ग

प्र० येऽविशिष्टेपिबाधकादपवादस्स्यादितिशंकते ॥ **नन्विति** ॥ अष्टमेवर्षेब्राह्मणमुपनयीततमध्यापयीतेतित्रैवर्णिकानेवाधिकृत्योपनयनविधानात् । उपनीतस्यैवाध्ययनविधेरितिभावः ॥ **अध्ययनेति** ॥ ज्ञानपादे "असार्वत्रिकी"त्येतदधिकरणेगुणसूत्रे अर्थित्वादेस्सर्वेषांसत्त्वेन ज्ञानेधिकारस्सर्वेषां । अन्यथाकस्यापिनस्यात् । अर्थित्वादेस्सर्वत्रसाम्येपिकेषांचिदेवाधिकारोनान्येषामित्यत्रार्थित्वाद्यन्यविशेषाभावादित्याशंक्य यथाशक्त्यखिलवेदाध्ययनवत्त्वरूपविशेषणांतरयुक्तस्यैवाधिकारोनसर्वेषां तादृग्विशेषणस्यविष्णुभक्त्यादिविहीनेवर्णावरादौचायोगादितिवक्ष्यतइत्यर्थः । एतेन "शूद्रस्यवेदविद्याधिकारादर्शना"दितिटीकोक्तिरुपलक्षणं । अधिकारप्रयोजकाध्ययनाभावाच्चेत्यपिग्राह्यमि

प्र० तिसूचितं ॥ **विद्याश्रोतारमिति** ॥ एतेनानधिकारेपिपौत्रायणोविद्यांविचारयामासेतिनिरस्तं । अनधिकारिणंप्रतिमुनेरुपदेशायोगादिति । एतेन "पौत्रायणस्ये"त्यादिटीकाविवृता ॥ **विदुरादेरिति** ॥ धर्मव्याधादिरादिपदार्थः । प्रसिद्धमेतत्पुराणादावितिभावः । एतेन "युक्त्यालिंगदर्शनेनचे"तिटीकायांलिंगदर्शनेनेत्यस्यशूद्रेतिसंबोधनरूपलिंगदर्शनेन विदुरादेर्वेदार्थावधारणरूपलिंगदर्शनेनचेत्यर्थउक्तोभवति ॥ **उपनयनेति** ॥ अष्टवर्षंब्राह्मणमित्यत्रब्राह्मणशब्दस्यब्रह्माणनयोग्यत्वेनयथात्रैवर्णिकपरत्वंतथाचतुर्वर्णपरत्वमपिस्यादितिविधिबलाद्वा विध्यभावेपिशूद्रेविद्यासंबंधान्यथानुपपत्त्यैवतदंगोपनयनादेराक्षेपलब्धत्वाद्वासत्त्वादित्यर्थः । इयंचसंस्कारसूत्रनिरस्याशंका । नन्वेवंस्थपत्यादेरप्यग्न्याधानादिसिद्धिस्स्यात् । नचेष्टापत्तिः । षष्ठेतदभावस्योक्तत्वादित्यतआह ॥ **शूद्रस्येति** ॥ कल्पकंतुनिरवकाशलिंगदर्शनमेवेति

विद्याश्रोतारंपौत्रायणंप्रति "अहहारेत्वाशूद्रे"तिरैक्वस्यसंबोधनरूपेण, शूद्रस्यापिविदुरादेर्वेदार्थावधारणादिरूपेणचलिंगेनशूद्रेप्युपनयनाध्ययनयोःसत्त्वात् । यद्वा शूद्रस्यानुपनीतस्यैवाध्ययनमस्तु । अथवा अनधीयानस्यैवशूद्रस्यश्रुतालिखितनिरीक्षिताद्वावेदादर्थज्ञानमस्तु ।

गु० ननुशूद्रेतिसंबोधनंनपौत्रायणस्यशूद्रत्वनिश्चायकं । शुचाद्रवणनिमित्तकत्वेनापितस्योपपत्तेरित्यरुचेराह ॥ **शूद्रस्यापीति** ॥ ननुश्रुतिरुक्तरीत्यायोगेनसावकाशालिंगमपिविदुरादेर्जन्मांतरसिद्धापरोक्षज्ञानत्वेनेतरशूद्रवैलक्षण्याद्वेदार्थावधारणोपपत्तेरित्यरुच्याह ॥ **यद्वेति** ॥ अष्टवर्षंब्राह्मणमुपनयीततमध्यापयीतेतिश्रुतौब्राह्मणस्यैवाध्ययनउपनयनाद्यपेक्षा । नतुशूद्रादेरित्यर्थः । ननुतमध्यापयीतेत्यत्रनब्राह्मणपरामर्शः । अपितूपनीतमात्रपरामर्शइतिकथमनुपनीतस्यशूद्रस्याध्ययनमित्य

SGDF Sri Gargeshwari Digital Foundation

प्र० भावः । इयंच “श्रवणाध्ययनार्थे”तिपंचमसूत्रव्यावर्त्यशंकेतिध्येयं । एवंचतदविनाभूतोरथोपिशूद्रेयुक्तइतिभावः । द्वितीयसूत्रव्यावर्त्यशंकापूर्वमाह ॥ नचेति ॥ अन्यथेति ॥ रथकाराधिकरणमुक्तंजन्मादिसूत्रे । निषेधश्रुत्यादेस्तूपचरितार्थत्वादिनासमाधानंकार्यमिति भावः । द्वितीयसूत्रभाष्याद्युक्तबाधकाच्छ्रौतशूद्रशब्दस्यरूढित्यागेनाद्यसूत्रभाष्याद्युक्तदिशायौगिकत्वावश्यंभावात् कल्पकाभावेनसंस्कारादिसूत्राद्युक्तोपनयनाद्यभावश्रुतिलिंगदर्शनादिनाधिकारप्रयोजकाध्ययनादेरयोगान्नाधिकारइतिभावेन द्वितीयसूत्रभाष्याद्युक्तंप्रमेयंतावत्संगृह्याह ॥ शूद्रशब्दस्येति ॥ आदिपदेनवक्ष्यमाणग्रामेशत्वादिग्रहः । अतिप्रसंगंनिराह ॥ रथकारेति ॥ पूर्वार्धंव्यनक्ति ॥ अस्तिहीति ॥ “रैक्वेदंसहस्रंगवामयंनिष्कोयमश्वतरीरथ इयंजायाऽयंग्रामोयस्मिन्नास्स”इतिवाक्यशेषस्थमित्यर्थः । वाक्यशेषेत्युक्त्यारथवत्त्वस्यपक्षधर्मतोक्ता । रूढेः शूद्रशब्दे । टीकायांभाष्यदिशाशूद्रेवेदाभावेनतदविनाभूतरथाभावमुपपाद्य “क्षत्रियस्यस्वाभाविकत्वादन्येषामागंतुकत्वात्स्वाभाविकस्यागंतुकादाधिक्या”दितिरथस्यक्षत्रियेस्वाभाविकत्वमुपपादितं । तत्रभाष्योक्तंसमाधिंसंस्कारसूत्रावतरणपरटीकोक्तरी

नचात्रशूद्रशब्दःशोकेनाद्रवणाद्यौगिकः । रूढेर्बलवत्त्वात् । अन्यथा “वर्षासुरथकारआदधीते”त्यत्ररथकारशब्दस्यापियोगे नत्रैवर्णिकपरत्वापातादिति ॥ सिद्धांतस्तु ॥ शूद्रशब्दस्यरूढत्वेरथवत्त्वादिबाधकं । रथकारादिशब्देतुरूढेर्नैवास्तिबाधकं ॥ १ ॥ अस्तिह्यत्र “अयमश्वतरीरथ”इतिवाक्यशेषस्थंपौत्रायणस्यरथवत्त्वंरूढेर्बाधकं । भाष्योक्तस्मृत्याशूद्रेरथायोगात् । ॥ ६९२ ॥

गु० रुचेराह ॥ अथवेति ॥ अन्यथेति ॥ योगेनरूढिबाधइत्यर्थः ॥ द्वारेत्वातवैवेति ॥ तथाचलिंगस्यनिरवकाशत्वान्नश्रुतिस्वारस्यार्थंलिंगास्वारस्यमित्यर्थः ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्याऽऽक्षिप्यटीकोक्तमुपपादयति ॥ **यद्यपीत्यादिना** ॥ **स्मृत्येति** ॥ "यत्रवेदोरथस्तत्रे"तिस्मृत्येत्यर्थः ॥ **वेदांगीकारादिति** ॥ तथैवप्रागुक्तेरितिभावः । तथापीत्यभ्युपगमवादः । भाष्योक्तसमाधेरपिभाष्येत्वित्यादिनोपपादयिष्यमाणत्वात् ॥ **स्वाभाविकत्वादिति** ॥ अयंचसूत्रेचैत्ररथेनेतिसंबंधवाच्यण्प्रत्ययप्रयोगसूचितस्समाधिः । ननुदुर्बलेनलिंगेनकथंश्रुतिबाधः । वैपरीत्यस्यैवौचित्यादित्याशंक्यनिराह ॥ **नचेति** ॥ अस्वारस्यं आगंतुकपरत्वं ॥ **संबंधेति** ॥ "षष्ठीशेष"इति स्वस्वामिभावादौषष्ठ्याविधानात्संबंधस्यागं

यद्यपि "नवेदोयत्रनोरथ"इतिस्मृत्यारथस्यवेदंप्रतिव्याप्यत्वेपिपूर्वपक्षिणाशूद्रेपिवेदांगीकारान्नरथेनलिंगेनवेदानुमानद्वाराशूद्रत्वाभावसिद्धिः । तथापिक्षत्रियेरथस्यस्वाभाविकत्वात्तदन्यत्रचागंतुकत्वात्स्वाभाविकसंभवेचनैमित्तिकग्रहणायोगात्साक्षाद्रथेनैवक्षत्रियत्वसिद्धिः । नचशूद्रश्रुतेःस्वारस्यायालिंगस्यास्वारस्यमितियुक्तं । हारेत्वातवैवेतीत्वशब्दार्थरथसंबंधवाचिन्यास्तवेतिषष्ठ्याःक्षत्रियत्वेलिंगत्वेपिरथसंबंधेश्रुतित्वात् । वाक्यशेषस्थंक्लृप्तंशुचाद्रवणरूपंयोगंविहाय

प्र० तुकत्वेश्रुतिबाधादित्यर्थः । ननूभयोश्श्रुतित्वाविशेषेनिर्णयोनस्यात् । प्रत्युतशूद्रेतिप्रातिपदिकश्रुत्याप्रबलयाप्रत्ययश्रुतेरेवास्वारस्यंयुक्तमित्यत आह ॥ **वाक्येति** ॥ "कम्वरएनमेतत्संतंसयुग्वानंरैकमिवात्थे"तिहंसकृतानादरश्रवणेनतस्यशोकोत्पत्तेः "सहसंजिहानएवक्षत्तारमुवाचे"तिशयनादुत्थानानंतरमेवरैकान्वेषणवचनलिंगेनावगमात्तेनचमुनिंप्रत्याद्रवणाच्छुचाद्रवणरूपोयोगःक्लृप्तइत्यर्थः । विहायेत्यस्यतद्विरुद्धरूढिग्रहणायोगाच्चेत्यन्वयः । एतच्चाद्यसूत्रभाष्यादितात्पर्यकथनं । ननुमुनिनासर्वज्ञेनतदीयंशुचाद्रवणंविज्ञायतदभिप्रायेणैवशूद्रेतिसंबोधितःपौ

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्रायणइत्यत्रनकिंचित्कल्पकं । येनतथाजानीमइत्यतआह ॥ **जानश्रुतिरिति** ॥ आवसथान् आवासस्थानानि । सर्वतआगत्यमेऽन्नमत्स्यं तीतिबुद्ध्याकारयामासेत्यर्थः । यस्मिन्नास्से वर्तसे । आसउपवेशनइत्यस्यमध्यमपुरुषैकवचनं । अयंग्रामःतुभ्यंदीयतइत्यर्थः । "मुनिनोदितः । प्राणविद्यामवाप्यास्मात्परंधर्ममवाप्नवा"निति छांदोग्यभाष्योदाहृतस्मृत्येत्यर्थः । स्वाभाविकेनरथेनैवसाक्षात्क्षत्रियत्वावगमोनवेदद्वारेत्युक्तं । तत्रसौत्रंज्ञापकमाह ॥ **अतएवेति** ॥ इत्येवोक्तं नतुलिंगाद्वेदानुमानद्वाराक्षत्रियत्वावगतेरित्युक्तमित्यर्थः । यद्वानत्वशूद्रत्वावगतेरित्युक्तमित्येवकारार्थः । पारंपर्याश्रयणेहितथानिर्देशस्स्यादितिभावः । एवंसतिभाष्येपारंपर्याश्रयणंकिमर्थमाश्रितं । कथमुपपद्येतच । शूद्रेपिवेदाभ्युपगमात् । त्रैवर्णिकमात्रचिह्नेनरथेनत्रैवर्णिकविशेषक्षत्रियत्वावगमायोगाच्चेत्यतोऽभिप्रायंद्वेधाव्यनक्ति ॥ **भाष्येत्विति** ॥ **उत्तरसूत्रेति** ॥

"जानश्रुतिर्हपौत्रायणःश्रद्धादेयोबहुदायीबहुपाक्यआस सहसर्वतआवसथान्मापयांचक्रेसर्वतएवमेत्स्यंती"त्यादिपूर्ववाक्यस्थेनसर्वतआवसथनिर्माणादिना तथा "अयंग्रामोयस्मिन्नास्स"इत्याद्युत्तरवाक्यस्थेनग्रामेशत्वादिना तथा "राजापौत्रायणः शोकाच्छूद्रेतिमुनिनोदित"इत्यादिस्मृत्याचक्षत्रियत्वावगतेस्तद्विरुद्धरूढिग्रहणायोगाच्च । अतएवसूत्रे "क्षत्रियत्वावगते"रित्येवोक्तं । भाष्येत्वागंतुकस्यापिरथस्यवेदंविनाऽयोगाद्वेदस्यच "संस्कारपरामर्शा"दित्याद्युत्तरसूत्ररीत्याशूद्रेऽयोगाद्रथेनवेदानुमानद्वारेणा

गु० **अतएवेति** ॥ साक्षाद्रथेनैवक्षत्रियत्वसिद्धेःसंमतत्वादेवेत्यर्थः । तर्हिभाष्येमध्येवेदोक्तिरयुक्तेत्यतआह ॥ **भाष्येत्विति** ॥ अनेनसंस्कारपरामर्शादित्युत्तरसूत्र

प्र० व्यक्तमेतदनुपदमेवेतिभावः ॥ **अशूद्रत्वेति** ॥ एतेनास्मिन्पक्षेभाष्यादौक्षत्रियत्वपदमशूद्रत्वपरमितिसूचितं । अतएवटीकायां "नन्वेवंवैदिकमात्रेविद्यमानंरथित्वंकथंक्षत्रियत्वेलिंग"मित्याक्षिप्यरथस्यक्षत्रियेस्वाभाविकत्वेनैवसमाधानमुक्तमितिभावः । नन्वेवंसूत्रादावशूद्रत्वावगतेरित्येववाच्यं । लाघवादितिचेन्न । वस्तुतस्तस्यक्षत्रियत्वेनतदभिप्रायात् । स्वाभाविकरथस्वीकारपक्षेतथैववक्तव्यत्वाच्चेतिध्येयं ॥ **इतिशंकानिरासायेति** ॥ विद्यामात्रेऽधिकाराभावेऽपितद्विशेषसंवर्गविद्यायामधिकारोस्त्वित्याशंकायांशूद्रेवेदाभावेनतद्व्याप्यरथोपिनेति नायंसंवर्गविद्यायामधिकारीतिवक्तुंवेदव्याप्यतोक्ताभाष्यइत्यर्थः । ननुशूद्रेस्वाभाविकस्यागंतुकस्यवारथस्यायोगेननायंशूद्रशब्दोरूढइतियदुक्तं तदयुक्तं । "अपलायनंहिशूद्रस्यविप्रक्षत्रार्थमिष्यत"इत्यष्टादशाध्यायगीतातात्पर्योक्तस्मृत्याशूद्रस्यापियुद्धप्रतीत्यारथवत्त्वसिद्धेरित्यतआह ॥ **विप्रेति** ॥ "नचवाच्यंपौत्रायणेनदीयमाने"त्यादिटीकांविवृण्वन् लिंगस्यान्यथासिद्धिमाशंक्यनिरवकाशतामाह ॥ **नचेति** ॥ एवंपूर्वार्धविवरणमुखेनटीकाभाष्यार्थंप्रपंच्य "रथकारे"त्युत्तरार्धंव्यनक्ति ॥ **रथकारेति** ॥ स्वयंबाधकभावाभावाभ्यांरथकारशब्दवैषम्यमुक्त्वा

शूद्रत्वसिद्धिरुक्ता । यद्वानिषादस्यवेदाभावेपितात्कालिकोपदेशात् "एतयानिषादस्थपतिंयाजये"दितिवाक्यविहितस्थपतीष्टिमात्रइवपौत्रायणस्यापिशूद्रत्वेनवेदाभावेपिसंवर्गविद्यामात्राधिकारोस्त्वितिशंकानिरासायागंतुकस्यापिरथस्यवेदव्याप्यतोक्ताभाष्ये । विप्रक्षत्रार्थमपलायनमपिशूद्रस्यपदातितयैवेतिटीकायामेवोक्तं । नचपौत्रायणेनरैक्वायदीयमानोरथोन्यदीयइतियुक्तं । स्वत्वाभावेदानायोगात् । स्वतःप्राप्ततदीयत्वेबाधकाभावाच्च । तवैवसहगोभिरितिवाक्यशेषविरोधाच्च । तस्माद्बाधकाच्छूद्रशब्देरूढित्यागः । रथकारादिशब्देषुतुनरूढिबाधकमस्तीतिवैषम्यं ।

गु० सहितस्यैवक्षत्रियत्वावगतेश्चेत्यस्यसूत्रस्यपौत्रायणस्यक्षत्रियत्वसाधकत्वंनकेवलस्येतिप्राप्तं । अतःपक्षांतरमाह ॥ **यद्वेति** ॥ **दानायोगादिति** ॥ स्वस्वत्वपरित्या

SGDF Sri Gargeshwari Digital Foundation

प्र० ऽन्योक्तंवैषम्यमनूद्यप्रत्याह ॥ **यत्त्विति** ॥ “वर्षासुरथकारोऽग्नीनादधीते”त्याधानविधिवाक्यस्थत्वादित्यर्थः ॥ **स्वार्थात्यागस्येति** ॥ अन्यथापूर्वाधिकरणेदेवताविग्रहाद्यसिद्ध्यापत्तेरितिभावः ॥ **स्वार्थत्यागस्येति** ॥ “ब्रह्मजिज्ञासा तद्विजिज्ञासस्वे”त्यादौविचारलक्षकत्वा द्युक्तेरितिभावः ॥ **विधिसन्निधीति** ॥ तथात्वेवायुक्षेपिष्ठादिवाक्यवद्विध्येकवाक्यतयाविधेयस्तुतिपरत्वेनस्वार्थेतात्पर्याभावात्तत्त्याग स्स्यात् । नचैवमित्यर्थः । एवंद्वितीयसूत्रभाष्याद्युक्तरथवत्त्वरूपलिंगरूपबाधकोपपादनेनाद्यसूत्रभाष्याद्युक्तयोगंसमर्थ्यनशूद्रस्याधिकारइ त्युक्त्वा यत्पूर्वमुक्तंशूद्रस्याप्यध्ययनादिसत्त्वादस्त्यधिकारइति तदिदानीं “संस्कारपरामर्शा”दितिसूत्रभाष्यटीकार्थविवरणेननिराकर्तुमाह ॥ **किंचेति** ॥ **श्रुत्यादीति** ॥ नाग्निर्नयज्ञोनसंस्कारोनव्रतानिशूद्रस्ये”त्यादिसिद्धइत्यर्थः । यदप्यनुपनीतस्यैवाध्ययनमस्त्विति तदाशंक्य

यत्तूक्तंपरैः शूद्रशब्दस्यार्थवादस्थत्वाद्रूढित्यागोरथकारशब्दस्यतुविधिवाक्यस्थत्वात्तदत्यागइतिवैषम्य मितितन्न । मीमांसकमतेऽर्थवादानांस्वार्थपरत्वाभावेपिपरमतेऽसतिबाधकेऽर्थवादेष्वपिस्वार्थात्यागस्य सतिबाधकेविधावपिस्वार्थत्यागस्यसत्त्वेनतौल्यात् । अहहारेत्वाशूद्रेत्यस्यार्थवादस्यविधिसन्निध्यभावा च्च । किंचाध्ययनमुपनयनसापेक्षं । शूद्रउपनयनाभावश्चभाष्योक्तश्रुत्यादिसिद्धइतिकथंशूद्रस्याध्ययनं ।

गु० गेनपरस्वत्वापादनस्यैवदानशब्दार्थत्वादितिभावः । नार्थवादमात्रस्यस्वार्थेतात्पर्याभावः । किंतुविधिसन्निहितस्यैव । प्रकृतेचविधेरभावेनतत्सान्निध्याभावान्नस्वार्थे तात्पर्यत्यागइत्यतआह ॥ **अहहारेत्वेति** ॥ संस्कारपरामर्शादित्येतत्सूत्रसूचितांयुक्तिमाह ॥ **किंचेति** ॥ शूद्रस्यैवानुपनीतस्यैवाध्ययनमस्त्वितिद्वितीयपूर्वपक्षं

SGDF
Sri Gargeshwari Digital Foundation

प्र० सौत्रपरामर्शशब्दार्थव्यंजनेननिराह ॥ **नचेति** ॥ एतेन "अष्टवर्षब्राह्मण"मित्यादिटीकाविवृता । ननुतत्राध्यापनांगत्वमेवश्रुतंनत्वध्ययनांगत्वमित्यतआह ॥ **स्वाध्यायइति** ॥ तथाचैतदनुरोधादध्यापयीतेत्यत्राप्यध्ययनविधावेवतात्पर्यं । हितैषिपित्रादिनाशिक्षणीयोबालकइतिभावेनाध्ययनोक्तिरितिभावः ॥ **द्वितीयजन्मवतएवेति** ॥ एतेनटीकायांस्मृत्युक्तेःफलंसूचितंभवति । "तदभावाभिलापा"दित्यस्याध्ययनाभावेहेतुत्वंस्पष्टयति ॥ **नचनाग्निरिति** ॥ **सामान्येति** ॥ स्वर्गकामादिमात्रोद्देशेनयागादिविधिप्रवृत्तेस्तादृशयागादेरभावोक्त्यन्यथानुपपत्त्यानिषेधसिद्धिरित्यर्थः । टीकाविरोधमाशंक्याह ॥ **टीकायामिति** ॥ यदप्युक्तमथवानधीयानस्येतितत् "श्रवणाध्ययनार्थे"

नच "अष्टवर्षब्राह्मणमुपनयीततमध्यापयीते"तिश्रुतौब्राह्मणस्यैवाध्ययनउपनयनापेक्षा नान्यत्रेतियुक्तं । तमध्यापयीतेत्यत्रोपनीतमात्रपरामर्शात् । "स्वाध्यायोध्येतव्य"इत्यध्ययनविधेरनिर्दिष्टकर्तृकत्वेनप्रकृतोपनीतानामेवकर्तृत्वेनान्वयाच्च । "वेदः कृत्स्नोधिगंतव्यःसरहस्योद्विजन्मने"तिस्मृत्योपनयनाख्यद्वितीयजन्मवतएवाध्ययनविधानाच्च । नच "नाग्निर्नयज्ञोनसंस्कार"इत्यादिश्रुतौशूद्रेसंस्कारादेरभावोक्तिमात्रं । नतुप्रतिषेधइतिशंक्यं । संस्काराभावेपितत्सापेक्षाध्ययनाभावसिद्धेः । सामान्यविधिप्राप्तयज्ञाद्यभावोक्तेस्तत्प्रतिषेधंविनाऽयोगाच्च । टीकायांप्रतिषेधंविनाप्यभावोक्तिसंभवमुपेत्योत्तरसूत्रमवतारितं ।

गु० निराकर्तुंशंकते ॥ **नचेति** ॥ ननुतमित्यत्रब्राह्मणस्यैवपरामर्शःपूर्वंतस्यैवप्रकृतत्वादित्यतआह ॥ **स्वाध्यायोध्येतव्यइति** ॥ ननुप्रतिषेधंविनासामान्यविधिप्राप्तयज्ञाद्यभावोक्तेरयोगेननाग्निर्नयज्ञइत्यादौतत्प्रतिषेधइत्यंगीकारेटीकाविरोधः । अभावोक्तिमात्रस्यैवाभ्युपगतत्वादित्यतआह ॥ **टीकायामिति** ॥ अथवेत्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिसूत्रभाष्याद्यर्थव्यक्त्याऽऽपाकरोति ॥ **नचशूद्रस्येति** ॥ "श्रवणेत्रपुजतुभ्यांश्रोत्रपरिपूरण"मित्यादिश्रुत्येत्यर्थः । "कथंविदुरधर्मव्याधादीनांवैदिकार्थावधारणमस्ती"त्यादिटीकोक्तशंकांहृदिकृत्वाभाष्याद्युक्तमेवसमाधिमाह ॥ **विदुरादेस्त्विति** ॥ "नन्वेवंसंस्काराभावेनवेदानधिकारश्चेदुत्तमस्त्रीणामनधिकारप्रसंग"इत्यादिशंकोत्तरटीकांविवृणोति ॥ **उत्तमेति** ॥ **लिंगादिति** ॥ शच्यादीनां "सपत्नीम"इत्यादिविद्याद्रष्टृत्वलिंगादित्यर्थः । अस्त्यधिकारइत्यन्वयः । एतद्भाष्याद्युक्तमुपलक्षणंमत्वाऽऽह ॥ **तथेति** ॥

नचशूद्रस्याध्ययनाभावेपिलिखितपाठादिनावेदार्थावधारणं । भाष्योक्तश्रुत्याऽर्थावधारणादेरपिनिषेधात् । विदुरादेस्तुजन्मांतरसिद्धापरोक्षज्ञानत्वेनेतरशूद्रवैलक्षण्याद्वेदार्थावधारणेपिनदोषः । उत्तमस्त्रीणांतु "सपत्नींमेपराधमपतिंमेकेवलंकुरु"इत्यादिभाष्योक्तलिंगात् तथा "आहुरप्युत्तमस्त्रीणामधिकारंतुवैदिके । यथोर्वशीयमीचैवशच्याद्याश्चतथापरा"

गु० दितृतीयपक्षंदूषयति ॥ **नचेति** ॥ आदिपदेनलिखितनिरीक्षितसंग्रहः । एवंशूद्रश्रुतेःशूद्रत्वनिर्णायकत्वाभावमुपपाद्यपूर्वपक्षीयंलिंगं विदुरादीनांतूत्पन्नज्ञानत्वादिति भाष्योक्तंपरिहारंमनसिनिधायविघटयति ॥ **विदुरादेस्त्विति** ॥ उत्तमस्त्रीणामित्यस्याधिकारइत्युत्तरेणसंबंधः । परमतं मीमांसकमतं । अनधिकारेकि ॥ ६९५ ॥

प्र० **इत्यादिस्मृतेरिति** ॥ जिज्ञासासूत्रभाष्योक्तस्मृतेरित्यर्थः । "भवतित"इत्यत्रहेभवति इतिसंबोधनं । ते तुभ्यमित्यर्थः ॥ **एतेनेति** ॥ उदाहृतानेकमानसिद्धलिंगदर्शनेनेत्यर्थः । एवंरथवरत्वरूपादध्ययनांगोपनयनाभावादिरूपाच्चबाधकाच्छूद्रशब्दस्यरूढित्यागान्नशूद्राधिकारइत्युक्तं । इदानींभाष्ये "नसंस्कारोनव्रतानिशूद्रस्ये"त्येतावत्येवोदाहर्तव्येयत् "नाग्निर्नयज्ञ"इत्यंशस्याप्युदाहरणं तेनशूद्रस्ययज्ञानधिकारोपिनिषेधादेव ।

इत्यादिस्मृतेः तथाबृहदारण्यके "एतद्वैतदक्षरंगार्गि एतस्यवाअक्षरस्यप्रशासनेगार्गि"त्यक्षरविद्यायांगार्ग्याःसंबोधनात् तथा "आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्य"इत्यत्र अरे इत्यनेनमैत्रेय्याःसंबोधनात् तथा "भवतितेव्याख्यास्यामी"तिमैत्रेयींसंबोध्य "व्याचक्षाणस्यतुमेनिदिध्यासस्वे"तिनिदिध्यासनविधानाच्च । तथाप्रदानकर्मणएवोपनयनप्रतिनिधित्वेनसंस्कारसद्भावाच्चास्त्यधिकारः । एतेनस्त्रीमात्रस्यानधिकारइतिपरमतंपरास्तं । एवंचशूद्रस्यनयज्ञइत्यादिनिषेधादेवकर्मानधिकारः । नतुज्योतिष्टोमादिकर्मणामाहवनीयाद्यग्निविद्यासाध्यत्वात्तयोश्चाधानोपनयनाधीनत्वात्तयोश्चवसंतादिवाक्याभ्यांत्रैवर्णिकानामेवविधानात्तेषामेवाधिकारादितिमीमांसकोक्तरीत्यानधिकारः ।

प्र० नतुमीमांसकरीत्येतिसूचितमितितत्प्रपंचयति ॥ **एवंचेत्यादिना** ॥ "चातुर्वर्ण्यमविशेषा"दितिषष्ठाद्यपादीयापशूद्राधिकरणसिद्धांतमनुवदति ॥ **ज्योतिष्टोमेति** ॥ **त्रैवर्णिकानामेवेति** ॥ द्वितीयस्यतृतीयेपादे "आधानेसर्वशेषत्वा"दितितृतीयेऽधिकरणे "वसंतेब्राह्मणोग्नीनादधीतग्रीष्मेराजन्यःशरदिवैश्य"इति तथा "वसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्य"मितिवाक्यद्वयमुदाहृत्य किंब्राह्मणादीनामाधानोपनय

SGDF Sri Gurgaonkar Digital Foundation

प्र० नयोःप्राप्तानांवसंतादिकालविधानंप्रतिनिमित्तार्थान्येतानिवचनान्युततेषामप्राप्ताधानोपनयनविधिपराणीतिसंशये अग्निविद्याभ्यांविनाक्र
त्वनुष्ठानासंभवात्तयोश्चाधानोपनयनाधीनत्वात्क्रतुविधिभिरेवाग्निविद्यासाध्यैस्तदुपायभूतयोराधानोपनयनयोराक्षेपतःप्राप्तेस्तयोःकालविधाना
यनिमित्तकार्थानीतिप्राप्ते वसंतादिवाक्येषुतावद्यदिशब्दाभावाद्वाक्यांतरविहिताधानोपनयनविपरिवृत्त्यभावाच्च क्रियाविधिरेवप्रतीयते ।
क्रतुविधयोप्यग्निविद्यामात्रसाध्याः । तथापिनसर्वेतेनैवनिष्पाद्याः । अन्येननिष्पादितानामप्यन्येनक्रियादिभिःप्राप्तेःसंभवात् । तथाविद्या
पिपुस्तकनिरीक्षणाद्युपायसंभवान्नैकांतेनोपनयनमाक्षिपतीत्याधानोपनयनयोःप्रापकाणीतिसिद्धांतितत्वात्त्रैवर्णिकानामेवविधानमित्युक्तं । ते

अनग्नित्वेनानधिकारेरथकाराख्यसंकरजातेरप्यनधिकारापाता
त्। "वर्षासुरथकारआदधीते"तिश्रुत्यातस्याप्याधानोपगमात्।

प्र० षामेवाधिकारादित्यनंतरंशूद्रस्याधानोपनयनयोरसंभवात्तत्साध्येयज्ञादौनाधिकारइत्येतावद्योज्यं । यत्तावदनग्नित्वादनधिकारइतितत्तावन्ने
त्याह ॥ अनग्नित्वेनेति ॥ संकरजातेरिति ॥ "शूद्रायांकरभोवैश्यान्माहिष्योविट्स्त्रियांनृपात् । रथकारस्तुमाहिष्यात्करभ्यांयस्यसं
भवः"इत्युक्तसंकरजातेरित्यर्थः । किंचशूद्रमात्रेप्यसिद्धमनग्नित्वं । तस्याप्याधानसंभवात् । नचवसंतादिवाक्यान्याधानपराणीत्युक्ततया
तैर्ब्राह्मणादीनामेवाधानविधानंनशूद्रस्येतिवाच्यं । तेषांवाक्यानांप्राप्ताधानानुवादेनकालविधिपरतयाब्राह्मणादीनामाधानाविधायकत्वात् ।
नचाक्षेपतःप्राप्तेर्निरस्तत्वात् "यएवंविद्वानग्निमाधत्त"इत्यस्यचसामान्यवचनस्यवर्तमानापदेशत्वेनाविधायकत्वात्प्राप्त्यभावइतिवाच्यं । वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्यांतरैःप्राप्तिसंभवादितिभावेनाह ॥ कृत्तिकास्विति ॥ आदिपदेन "दिवाहवनीयंत्रिभिर्गार्हपत्यमादधातिपंचभिराहवनीय"मितिव चनंगृह्यते । तत्रकर्तृविशेषानुपादानेनचतुर्वर्णाधिकारिकत्वसंभवादितिभावः । ननुकृत्तिकादिवाक्यप्राप्ताधानानुवादेननवसंतादिवाक्येका लविधिरशंक्यः । वसंतादिब्राह्मणादिरूपगुणद्वयश्रवणात् । "प्राप्तेकर्मणिनानेकोगुणोवाक्येविधीयते । अप्राप्तेतुविधीयेरन्बहवोप्येकयत्न त"इत्युक्तेः । आदधीतेतियत्तद्वसंते सचब्राह्मणइतिवाक्यभेदापत्तेरित्यतआह ॥ वसंतादीति ॥ अत्यंताप्राप्तविध्यपेक्षयानियमविधेर्लघु

"कृत्तिकास्वग्निमादधीत नक्तंगार्हपत्यमादधीते"त्यादिनाशूद्रस्याप्याधानविधिः । वसंतादिवाक्यानितुगु णद्वययुक्तत्वेपिविधिलाघवायसामान्यविषयेणकृत्तिकादिवाक्येनप्राप्तब्राह्मणादीनांवसंतादिनियमपराणि । शूद्रस्यतु ऋत्वंतरआधानमित्यपिसुवचत्वाच्च । उपनयनहोमस्थपतीष्ट्यवकीर्णब्रह्मचार्यधिकारिकयागादि वल्लौकिकाग्नौशूद्रस्यापियागसंभवाच्च । उक्तंहिषष्ठे ऽनेकैरधिकरणैरुपनयनहोमादयोलौकिकाग्नाविति ।

प्र० त्वादित्यर्थः ॥ प्राप्तेति ॥ तथाच ब्राह्मणआदधीतेतियत्तद्वसंते इत्यादिरूपेणान्वयान्नवाक्यभेदइत्यर्थः । शूद्रस्यकालविधायकाभावादाह ॥ ऋत्वंतरइति ॥ किंचकिमेतेनाग्निमत्त्वोपपादनक्लेशेन । निषेधादेवशूद्रस्यानधिकारानंगीकारेक्रतुविधीनांस्वर्गादिकामनावन्मात्राधिका रिकत्वाच्छूद्रस्यापिकामनावत्त्वेनतदधिकारप्राप्तौनाग्न्यभावेनतन्निरासः । लौकिकेग्नावपितदनुष्ठानसंभवात् । नचवैदिककर्मणोऽवैदिकेऽ ग्नावनुष्ठानमदृष्टचरं । बहुषुदृष्टत्वादित्याह ॥ उपनयनेति ॥ षष्ठस्याष्टमेपादे "उपनय"न्नितिद्वितीयेधिकरणे उपनयनांगभूतमाणवकक

SGDF
Sri Gargeshwari Digital Foundation

प्र० तृकाहोमाःकिमाहवनीयेस्युरुतलौकिकइतिसंशये तेषांमाणवककर्तृकतयातदग्नावेवकर्तव्यतयोपनयनात्प्रागधीत्यभार्यामुद्वाह्याग्निमाधाया हवनीयेतान्कुर्यादितिप्राप्ते आधानस्यविद्वदधिकारित्वादुपनयनात्पूर्वंतदयोगान्नाधानमितिलौकिकएवोपनयनहोमाइत्युक्तं । तथा "स्थपतीष्टिः प्रयाजवदग्न्याधेयंप्रयोजयेत्तादर्थ्याच्चापवृज्येते" तितृतीयेधिकरणे "एतयानिषादस्थपतिंयाजये" दितिस्थपतीष्टिःकिमाहितेग्नावुतलौकिकइतिसंदेहे प्रकृतितआहवनीयादिप्राप्तेस्तस्यचाधानाधीनत्वादसत्यप्याधानविधाविष्टिविधिबलादेवतदाक्षेपादाहितइतिप्राप्ते वसंतादिवाक्यविहिताधान जन्यसंस्कारवाचित्वादाहवनीयादिशब्दानांस्थपतिकृतेनाधानेनचाविहितेनसंस्काराप्रतीतेर्नाधानस्याक्षेपइतिलौकिकएवेत्युक्तं । तथा "अव

अग्न्यसाध्यसंध्योपासनादावुपनीतमात्रस्यब्राह्मणादेरध्ययनात्प्रागिवशूद्रस्याप्यधिकारा परिहाराच्च । अतएवषष्ठे "उदङ्मुखोमूत्रंकुर्या"दित्यादिस्मार्तनियमाअग्न्यसाध्यत्वादनु पनीतस्यापीतिप्राप्ते "उपनयनादिर्नियम"इतिवचनबलादेवोपनयनप्रभृतिस्युरित्युक्तं ।

प्र०कीर्णिपशुश्चतद्वदाधानस्याप्राप्तकालत्वा" दितिचतुर्थेऽधिकरणे "योब्रह्मचार्यवकिरेत्सगर्दभंपशुमालभेते" तिविहितोयागःक्वकार्यइतिपूर्ववत्सं देहेब्रह्मचारिणस्त्रैवर्णिकत्वाद्विद्वत्त्वाच्चस्नात्वाभार्यामुद्वाह्याग्निमाधायतत्रकुर्यादितिप्राप्ते अपराधकृतब्रह्मचर्यविप्लवमसमाधायगार्हस्थ्यप्रवेशायो गात् "अविप्लुतब्रह्मचर्योगृहस्थाश्रममाविशे" दितिविधानादपत्नीकस्याधानाभावाल्लौकिकएवेत्युक्तमित्यर्थः । निषेधाननुसरणेबाधकांतरमाह ॥ **अग्न्यसाध्येति** ॥ एतेनविद्वत्ताभावादनधिकारइतिनिरस्तं । संध्योपासनादाववर्जनीयत्वात् ॥ **अतएवेति** ॥ अग्न्यसाध्येऽनग्नेरप्य धिकारसंभवादेवेत्यर्थः । षष्ठेद्वितीयपादे "तस्मिंस्तुशिष्यमाणानिजननेनप्रवर्तेर" न्नितिषष्ठाधिकरणइत्यर्थः । नियमउपनयनादिः । उपन ॥ ६९७ ॥

प्र०यनानंतरभावीतिवचनार्थः । एवमनग्नेरनधिकारइतिनिरस्तं । अविद्वत्त्वात्सइत्येतन्निराचष्टे ॥ **नापीति** ॥ ब्राह्मणादेरपीत्येतदुपपादयति ॥ **त्वन्मतइति** ॥ मीमांसकमते ॥ **स्वस्वेति** ॥ स्वत्वस्याविवक्षितत्वादित्यर्थः ॥ **सर्वशक्तीति** ॥ षष्ठस्यतृतीयपादे "सर्वशक्तौप्रवृत्ति स्यात्तथाभूतोपदेशा" दितिप्रथमाधिकरणे "यावज्जीवमग्निहोत्रंजुहोती" त्यादौकिंसर्वांगोपसंहारशक्तानामेवाधिकारउतयस्तुयावंतिशक्नोत्युप संहर्तुंतावद्भिरुपेतंप्रधानंकुर्वन्नधिक्रियेतेतिसंदेहे सर्वेषामंगानांसमुच्चयेनेत्थंभावसंबंधात्सर्वांगोपेतमेवकर्मफलसाधनमितिनहीनांगस्यानुष्ठान मितिप्राप्ते यावच्छब्दोपबृंहितंजीवनंयागानुरक्तांभावनांप्रतिनिमित्तत्वेनज्ञायते । दर्शपूर्णमासशब्दविशेषितश्चयजिःकालयोगिनामाग्नेयादी नामेववाचकोनांगानांनिमित्तस्यचैतद्रूपंयस्मिन्सतिनैमित्तिकमवश्यंकार्यमिति । अतःप्रधानानुरक्ताभावनास्ववाक्यश्रुतनिमित्तवशप्राप्तावश्य कत्वानुरोधेनयथासंभवमंगानिगृह्णातीतियथाशक्तिप्रयोगइतिसिद्धांतितत्वात्तद्वदेवशूद्रस्याप्यधिकारःस्यादित्यर्थः । नन्वाज्यावेक्षणादेःप्रयोगा

नाप्यविद्यत्वादनधिकारः । अध्ययनाभावेपिरथकारादेराधानादिज्ञानस्येवब्राह्मणादेरपिस्वशाखेतरशाखाविहितांगज्ञानस्ये व शूद्रादेरपि "ब्राह्मणोनहंतव्य"इत्यादिनिषेधवाक्यार्थज्ञानस्येवचोपदेशादिनाशूद्रस्यापिज्योतिष्टोमादिज्ञानस्यापिसंभवा त् । त्वन्मते "सत्रिभिर्वेदैर्विधीयत"इतिवेदांतराध्ययनस्यविहितत्वेपि "स्वाध्यायोऽध्येतव्य"इत्यत्रस्वाध्यायशब्दस्यस्वस्व शाखामात्रपरत्वेनैकवेदगतशाखांतराध्ययनस्याविहितत्वात् । किंचत्वयासर्वशक्तिनयेऽधादेराज्यावेक्षणाद्यंगहानेनशक्यांगो पसंहारेणनित्यकर्माधिकारोंगीकृतः । एवंचतद्वदेवशूद्रादेरप्यग्निविद्याहानेनांगांतरोपसंहारेणनित्येष्वधिकारःकिंनस्यात् ।

गु० मनग्नित्वंप्रयोजकं किंवाऽविद्यत्वमितिविकल्पंमनसिनिधायाद्यंदूषयति ॥ **अनग्नित्वेनेति** ॥ द्वितीयंनिराह ॥ **नाप्यविद्यत्वादिति** ॥ स्वरूपकथनार्थत्वंवै

SGDF Sri Gangadharan Digital Foundation

प्र०त्प्रागनुपस्थितत्वादंधादेरधिकारस्तत्रयुक्तोनत्वग्न्यादिहीनस्य । अग्न्याद्यभावस्यप्रागेवोपस्थित्याकृत्वारंभस्यैवायोगादित्यतआह ॥ अग्निविद्ये इति ॥ किमनेनप्रकृतानुपयुक्तप्रासंगिकप्रपंचनेनेत्याह ॥ इत्यलमिति ॥ आद्येसूत्रइति ॥ "शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेही"त्यत्र । "कम्वरएनमेतत्संतंसयुग्वानंरैक्कमिवात्थे"तितत्कृतस्य हंसकृतस्यानादरस्य "तदुहजानश्रुतिःपौत्रायणउपशुश्रावे"तिपौत्रायणेनश्रवणादस्यशुक् शोकआसीत् । तयाशुचाऽऽद्रवणात्पौत्रायणः "अहहारेत्वाशूद्रे"तिरैक्केणसंबोधितः । नतुवर्णावरत्वात् । साहिशुक् "स

अग्निविद्येप्रयोगाद्बहिरेवसंपाद्ये । आज्यावेक्षणादितुप्रयोगमध्येऽनुष्ठेयमितितुवैषम्यमात्रं । प्रयोगात्प्रागेवप्रतिनियतकालेऽग्न्यादिवदाज्यावेक्षणादेरपिकर्तव्यतयाप्रमातव्यत्वादित्यलं । अत्रचाद्येसूत्रे "तदाद्रवणा"दित्यनेनशुचाद्रवणाच्छूद्रइतिशूद्रशब्दस्ययौगिकत्वोक्तिः । "शुगस्यतदनादरश्रवणात्"इत्यनेनशोकेकारणोक्तिः । "सूच्यतेही"त्यनेनशोकेव्यग्रताख्यकार्यरूपलिंगोक्तिः । द्वितीये वाक्यशेषस्थस्यरूढिबाधकस्योक्तिः ।

प्र० हसंजिहानएवक्षत्तारमुवाचे"त्युक्तव्यग्रतारूपकार्यलिंगेनसूच्यतेहीतिटीकोक्तमर्थंनिष्कृष्याह ॥ तदिति ॥ शुक्शब्दोपपदाद्द्रुगतावित्यस्माद्धातोरौणादिकेडप्रत्ययेगकारलोपेशुद्रेतिरूपं । तथैवनिर्देष्टव्येयश्शुद्रेत्युकारस्यदैर्घ्येणनिर्देशःसतस्यशोकाधिक्यज्ञापनाय । "आधिक्येऽधिक"मितिसूत्रात् । अतएवसूत्रेतद्द्रवणादितिवक्तव्येतदाद्रवणादित्याङ्प्रयोगऊकाररूपदीर्घस्वरार्थज्ञापनायप्रयुक्तइतिटीकायामेवव्यक्तमिति भावः । द्वितीये क्षत्रियत्वावगतेश्चोत्तरत्रचैत्ररथेनलिंगादित्यत्र "अहहारेत्वाशूद्रे"तिसंबोधनादुत्तरत्रवाक्ये "अयमश्वतरीरथ"इतिचित्र

SGDF
Sri Gargeshwari Digital Foundation

प्र० रथशब्दिताश्वतरीयुक्तरथसंबंधित्वरूपाल्लिंगात्पौत्रायणस्यक्षत्रियत्वावगतेरित्युक्तत्वादितिभावः। तत्रचैत्ररथेनेतितद्धितस्यभावार्थत्वप्रतीतिं निवारयति ॥ तत्रेति ॥ चित्रश्चासौरथश्चचित्ररथः। चित्ररथस्यायंचैत्ररथः। "तस्येद"मित्यण्प्रत्ययः । संबंधश्चस्वाभाविकस्वस्वामिभावरूपः। सचभावप्रधानः। चैत्ररथत्वेनेत्यर्थः । ननुचित्रशब्दस्यैव "रथस्त्वश्वतरीयुक्तश्चित्रइत्यभिधीयत"इतिस्मृत्याऽश्वतरीयुक्तरथवाचित्वाच्चैत्रेणलिंगादितिवक्तव्यंनतुरथेनेतिचेत्सत्यं । यथाभक्तिशब्दस्यज्ञानस्नेहोभयवाचित्वेपिज्ञानभक्तीइत्यादौभक्तिशब्दस्यैकदेशस्नेहमात्रार्थत्वं

तत्ररथस्यान्यदीयत्वशंकानिरासायभावप्रधानेनचैत्ररथशब्देनपौत्रायणस्यचित्ररथसंबंधित्वमुक्तं । अन्यथाचित्ररथेनेत्यवक्ष्यत्। तत्रचरथमात्रमेवलिंगं। चित्रपदंतुस्वरूपकथनार्थं। अश्वतरीयुक्तापूर्वरथयोगेनक्षत्रियत्वसंभावनार्थंवा। तृतीयापंचम्योर्हेतुरूपैकार्थत्वात् व्यत्ययेनतृतीयायाःपंचम्यादेशाद्वारथेनलिंगादितिसामानाधिकरण्यं । अतएवोक्तंभाष्ये "चित्ररथसंबंधित्वेनलिंगेने"ति। तृतीये रूढिबाधकेशूद्रस्याध्ययनांगोपनयनाभावेश्रुत्यंतरोक्तिः । चतुर्थे तत्रैवश्रुत्यंतरस्थलिंगोक्तिः । पंचमेतूपनयनाद्यभावेप्यध्ययनाद्यस्त्वितिशंकायानिरासः । यद्यप्यत्राद्यसूत्रस्थ

प्र० तथेहाप्यश्वतरीयुक्तविशेषणमात्रार्थकत्वाच्चित्रशब्दस्य। चैत्रेणेत्युक्तौतस्यानेकार्थत्वाच्छिष्याणांव्यामोहस्स्यात्। समाभूदितिरथशब्दोपिप्रयुक्तः। तर्हिचैत्ररथाल्लिंगादितिवाच्यमित्यतआह ॥ तृतीयेति ॥ "हेता"वितिसूत्रेहेतुत्वेतृतीयाविधानात् "विभाषागुणेऽस्त्रिया"मित्यत्र हेतावित्यनुवर्त्यपंचमीविधानात्परतंत्रमात्रस्यगुणत्वोक्तेरित्यर्थः। तृतीये संस्कारपरामर्शात्तदभावाभिलापाच्चेत्यत्र । "अष्टवर्षंब्राह्मणमुपनयीते"त्यादिश्रुतावध्ययनार्थमुपनयनरूपसंस्कारपरामर्शात् "नाग्निर्नयज्ञ"इतिश्रुतौचशूद्रस्यतदभावाभिलापाच्चायंशूद्रशब्दोनरूढइत्यर्थोक्तेरिति

SGDF
Sri Gargeshwari Digital Foundation

प्र० भावः। चतुर्थे तदभावनिर्धारणेचप्रवृत्तेरित्यत्र। गौतमस्य "नाहमेतद्वेदयद्गोत्रोहमस्मी"तिसत्यकामवचनेन "नैतदब्राह्मणोविवक्तुमर्हती"तिशूद्रत्वाभावनिर्धारणएव "समिधंसोम्याहर उपत्वानेष्य"इतितदुपनयनेप्रवृत्तेः। साचशूद्रोपनयननिषेधाभावेनयुक्तेतिश्रुत्यंतरगतस्यशूद्रत्वाभावनिश्चयेनप्रवृत्तिरूपलिंगस्योक्तिरित्यर्थः। पंचमे श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्चेत्यत्र। "श्रवणेत्रपुजतुभ्यांश्रोत्रपरिपूरण"मित्यादिश्रुतौशूद्रस्यवेदश्रवणाध्ययनार्थावधारणानांप्रतिषेधात् "नाग्निर्नयज्ञःशूद्रस्यतथैवाध्ययनंकुत"इतिस्मृतेश्चेत्युक्तेरितिभावः ॥ **परपक्षसाधकेति** ॥

परपक्षसाधकनिरासादपिद्वितीयादिस्थस्वपक्षसाधकमेवपूर्ववक्तव्यं। तथापिपरेणशूद्रशब्दबलादेवसिद्धांतहेतूनामन्यथयितत्वेनतन्निरासंविनातेषामसिद्धेः तथापरसाधकनिरासेयत्नाधिक्यात् स्वपक्षसाधकानांतुस्फुटत्वात्तेषांपश्चादुक्तिरितिसूत्रक्रमः ॥ अन्येतु ॥ अध्ययनस्यपिंडपितृयज्ञवत्स्वर्गार्थत्वेनपुरुषार्थतयास्वाध्यायसंस्कारत्वाभावादधीतेनैवस्वाध्यायेनजन्यब्रह्मज्ञानान्मोक्षइतिनियमाभावात् शूद्रस्याप्युपनयनाभावेपिपुस्तकपठितस्वाध्यायजन्यादपिब्रह्मज्ञानान्मोक्षइतिशूद्रइत्यस्यापिब्रह्मविद्याधिकारइतिप्राप्ते

प्र० शूद्रशब्दरूढेःपरपक्षसाधकत्वाद्रथवत्त्वरूपलिंगस्यस्वपक्षसाधकत्वादित्यर्थः ॥ **अन्येत्विति** ॥ "स्वाध्यायोध्येतव्य"इत्युक्ताध्ययनस्यप्रधानकर्मत्वसंस्कारकर्मत्वाभ्यांब्रह्मविद्याशूद्राधिकारानवेतिसंदेहेभामत्युक्तौपूर्वोत्तरपक्षावनुवदति ॥ **अध्ययनस्येति** ॥ अनिर्दिष्टफलकानांस्वर्गफलकत्वस्य "सस्वर्गःस्या"दितिविश्वजिदधिकरणेदर्शितत्वात् "अमावास्यायामपराह्णेपिंडपितृयज्ञेनचरंती"त्यादेरनिर्दिष्टफलस्यस्वर्गफलकत्ववत् "स्वाध्यायोध्येतव्य"इत्युक्ताध्ययनस्याप्यनिर्दिष्टफलकत्वात् अनारभ्याधीततयाफलवत्कर्मारभ्यानाम्नानाज्जुह्वादिवत्क्रत्वव्यभिचरित ॥ ६९९ ॥

प्र० त्वाभावात्क्रत्वर्थत्वासंभवेनस्वर्गार्थतयापुरुषार्थत्वस्यैववाच्यत्वात्। तथाचाध्ययनस्यस्वाध्यायेनाधीयीतस्वर्गकामइतिवचनव्यक्त्यादर्शादिवत्प्रधानकर्मतयास्वाध्यायसंस्कारकत्वरूपगुणकर्मत्वंप्रोक्षणादिवनास्तीत्यर्थः ॥ **दृष्टेति** ॥ स्वाध्यायसंस्कारद्वारानिश्श्रेयसहेतुःकर्मब्रह्मरूपार्थावबोधोध्ययनस्यदृष्टंफलमित्यर्थः ॥ **उक्तनियमेति** ॥ अधीतेनैवस्वाध्यायेनजन्यब्रह्मज्ञानान्मोक्षइतिनियमसद्भावादित्यर्थः ॥ **नशूद्रस्येति** ॥ उपनयनसाध्याध्ययनाभावादितिभावः। अध्ययनाभावादागंतुकसामर्थ्याभावेसत्यनधिकारइतिचेद्धंताधानाभावेसत्यग्न्यभावादग्निसाध्येकर्मणिमाभूदधिकारः। नचब्रह्मविद्यायामग्निःसाधनमितिकिमित्यनाहिताग्नयोनाधिक्रियंतइतिभामत्युक्तगतार्थताशंकासमाधानेतदभिप्रायव्यंजनेनानुवदति ॥ **नचैवमिति** ॥ "अवैद्यत्वादभावःकर्मणिस्या"दितिसूत्रेणविद्याभावोक्तेरित्यर्थः ॥ **तत्रापीति** ॥ पूर्वतंत्रापशूद्राधिकरणे ॥ **सूत्रइति** ॥ गुणसूत्रइत्यर्थः। विद्यावान्वैद्यः सनभवतीत्यवैद्यः तत्त्वात्कर्मणिशूद्रस्याधिकाराभावइत्यर्थः। "अवैद्यत्वमभ्युच्चयमात्रं।

दृष्टेसंभवत्यदृष्टस्याकल्प्यत्वेनाध्ययनस्यस्वाध्यायसंस्कारत्वेनोक्तनियमसंभवात्पुस्तकपठितस्वाध्यायजन्यज्ञानान्नमोक्षइतिनशूद्रस्यवेदविद्याधिकारइतिसिद्धांतः। नचैवंपूर्वतंत्रस्थापशूद्राधिकरणेनगतार्थता। तत्राप्यनधीयानस्यशूद्रस्याधीतस्वाध्यायजन्यविद्यासाध्यकर्मानधिकारार्थंविद्याभावोक्तेरितिवाच्यं। तत्रानग्नेःशूद्रस्याग्निसाध्यकर्मानधिकारइत्येवोक्त्याविद्याभावानुक्तेरित्याहुः। तन्न। तत्रापि "अवैद्यत्वादभावःकर्मणिस्या"दितिसूत्रेऽवैद्यत्वग्रहणेनशूद्रस्यविद्याभावोक्तेः।

गु० यर्थ्यापरपर्यायएवेत्यर्थः। प्रयोजनांतरमाह ॥ **अश्वतरीयुक्तेति** ॥ **उक्तनियमेति** ॥ अधीतेनैवस्वाध्यायेनजन्यब्रह्मज्ञानस्यैवमोक्षसाधनत्वमितिनियमसंभवादित्यर्थः ॥ **त्वयापीति** ॥ तथाचात्राप्यवैद्यत्वस्याभ्युच्चयमात्रत्वापत्त्यातेनगतार्थतास्यादेवेतिभावः। शूद्रस्यब्रह्मविद्यायामनधिकारंवदन्प्रष्टव्यः। किंतत्त्वमसादि

SGDF Sri Gargeshwari Digital Foundation

प्र० अभ्युच्चयत्वंचाध्ययनविधेःपुरुषार्थत्वशंकायास्तत्रनिरासादिह्संस्कारपरामर्शादित्यध्ययनविधेस्संस्कारकर्मविषयत्वसमर्थना"दितिकल्पत रूक्तमाशंकते ॥ ननुतत्रेति ॥ नन्वयमप्यर्थोत्राभिप्रेयतइत्यतआह ॥ किंचेति ॥ तव्योक्तेति ॥ तव्यस्यकर्मणिस्मरणेनाध्ययनस्यस्वाध्या यसंस्कारत्वरूपगुणकर्मत्वस्यैवप्रतीतेः । अन्यथा "ज्योतिष्टोमेने"तिवत्स्वाध्यायेनाधीयीतेतिस्यादित्यर्थः ॥ प्रथमसूत्रइति ॥ "अथातो

ननुतत्रावैद्यत्वमभ्युच्चयमात्रं । अध्ययनस्यसंस्कारत्वानुक्तेः । इहतु "संस्कारपरामर्शा"दित्यनेनतदुक्तिरितिचेन्न । त्वयापीहसूत्रेसंस्कारशब्दउपनयनरूपसंस्कारार्थइत्युक्तत्वेनाध्ययनस्यस्वाध्यायसंस्कारत्वानुक्तेः । किंचास्मद्रीत्या "स्वाध्यायोध्येतव्य"इतितव्योक्तदृष्टार्थगुणकर्मत्वस्यस्वीकारेणपूर्वपक्षसंभवेतदस्वीकारेणसनयुक्तः । अपिचपूर्वतं त्रेप्रथमसूत्रएवाध्ययनस्यदृष्टार्थतायाउक्तत्वात्तेनगतार्थत्वस्यनपरिहारः । कथंचत्वन्मतेगतार्थत्वाशंका । ऐक शास्त्र्याभावात् । तत्रोक्तस्यवेदनित्यत्वादेरिहापि "अतएवचनित्यत्व"मित्यादावुक्त्यंगीकाराच्च । किंचसिद्धांते "तदभावाभिलापाच्चे"तिसूत्रेशूद्रोपनयनाभावस्य "श्रवणाध्ययनार्थप्रतिषेधाच्चे"तिसूत्रेऽध्ययनाभावस्यचोक्तत्वे नोपनयनाध्ययनेउपेत्यैवपूर्वपक्षयितव्यं । अध्ययनस्यप्रधानकर्मत्वेनपूर्वपक्षेहिसिद्धांतेतस्यगुणकर्मतैववाच्या ।

प्र० धर्मजिज्ञासे"त्यत्राध्ययनविधौफलाश्रवणाद्विश्वजिन्न्यायेनस्वर्गःकल्प्यइतिप्राप्ते दृष्टेसंभवत्यदृष्टायोगादर्थावबोधःफलमित्युक्तत्वादित्यर्थः ॥ ऐकेति ॥ रामानुजमतइवपूर्वोत्तरतंत्रयोरित्यर्थः । "अतएव जगतोवेदशब्दप्रभवत्वादेव । वेदशब्दनित्यत्वमपिप्रत्येतव्य"मितित्वयाभा षितत्वादित्यर्थः । पूर्वपक्षस्यसूत्रावतारिकारूपस्यसूत्रपदनिवर्त्यस्यैववक्तव्यत्वादेवंरूपपूर्वपक्षश्चनसूत्रानुगुणइत्याह ॥ किंचेति ॥ मोक्ष

SGDF
Sri Gargeshwari Digital Foundation

प्र० हेतुशाब्दापरोक्षज्ञानस्यानधीयानेशूद्रेपिसंभवात्सिद्धांतोप्ययुक्तइत्याह ॥ **अपिचेति** ॥ नन्वप्रतिबद्धापरोक्षज्ञानमेवमोक्षहेतुः । शूद्रस्यतुन
तादृशमित्यतआह ॥ **प्रतिबंधेति** ॥ **अदृष्टेति** ॥ शूद्रस्यतद्भावादितिभावः । ततएव अदृष्टविशेषसाध्यत्वादेवेत्यर्थः । ननूत्पन्नेपिज्ञाने

अपिच दशमस्त्वमसीत्यादिवाक्यादिवभवेद्ध्रुवं । तत्त्वमस्यादिवाक्याच्चशूद्रस्याप्यपरोक्षधीः ॥ १ ॥ अतिक्रांतनिषेधस्य व्युत्पन्नस्यशूद्रस्यब्राह्मणादेरिवपुस्तकपठितादविधिनाधीतादनधीताद्वा "तत्त्वमसी"त्यादिवाक्यात् "दशमस्त्वमसी"तिवाक्यादिवज्ञानंतावज्जायतएव । साक्षात्त्वंचब्राह्मणादेरिवास्यापिविषयस्वभावादेवभविष्यति । प्रतिबंधनिरासोपिमनननिदिध्यासनाभ्यांसेत्स्यति । यदिचापरोक्ष्यस्वभावस्यापिब्रह्मणआपरोक्ष्यंलोकविलक्षणत्वाददृष्टविशेषसाध्यं तर्हिततएवतदा

गु० वाक्याच्छूद्रस्यज्ञानमेवनोत्पद्यत उतोत्पन्नमपिनिष्फलमिति । नाद्यइत्याह ॥ **अतिक्रांतनिषेधस्येति** ॥ नचाकांक्षाद्यनुसारेणवाक्यस्यार्थबोधकत्वाद्व्युत्पन्नस्य
शूद्रस्यकथंवाक्यादर्थबोधइत्यतउक्तं **व्युत्पन्नस्येति** । तथापिनिषेधेविद्यमानेकथंतत्रप्रवृत्तिरित्यतो**तिक्रांतनिषेधस्येति** । दशमस्त्वमसीतिवाक्यादिवेत्यनेन
व्युत्पन्नस्यशूद्रस्यदशमस्त्वमसीतिवाक्याद्दशमत्वज्ञानंजायते । अन्यथातदपिनस्यादित्यतिप्रसंगंसूचयति । ननुतत्त्वमसीतिवाक्याज्जायमानंज्ञानंब्राह्मणादेरपरोक्षं
भवति । नतथाशूद्रस्येत्यतोनशूद्रस्याधिकारइत्यतआह ॥ **ब्राह्मणादेरिवेति** ॥ शब्दजन्यज्ञानस्यापरोक्षत्वेविषयापरोक्षत्वस्यैवप्रयोजकत्वेनशूद्रस्यापितत्त्वमस्या
दिवाक्याज्जायमानापरोक्षभूतंब्रह्मविषयत्वादपरोक्षमेव । अन्यथाब्राह्मणादेरपितत्त्वमस्यादिवाक्यजन्यज्ञानस्यापरोक्षत्वंनस्यादित्यर्थः । ननुतथापिशूद्रस्यापरोक्षज्ञा
नंनसंभवति । चित्तैकाग्र्यायोग्यत्वरूपासंभावनायावाविपरीतसंस्काररूपविपरीतसंभावनायावाप्रतिबंधकत्वादितिचेत् तर्हिततएवनब्राह्मणस्याप्यपरोक्षधीः । यदि
चतत्रमनननिदिध्यासनाभ्यामेवोक्तप्रतिबंधनिरासस्तर्हिशूद्रस्यापितत्समानमित्याह ॥ **प्रतिबंधनिरासोपीति** ॥ ननुब्रह्मणोलोकविलक्षणत्वात्तदापरोक्ष्यस्यादृ
ष्टसाध्यत्वाच्छूद्रेचापरोक्षप्रयोजकादृष्टाभावेनतत्साध्यापरोक्षज्ञानस्याप्यसंभवइत्यतआह ॥ **यदिचेति** ॥ **ततएवेति** ॥ शुक्तिकाज्ञानस्यसत्यनिवर्तकत्वाद्दर्शनेपि

SGDF
Sri Gargeshwari Digital Foundation

प्र० विध्यतिक्रमप्रत्यवायप्रतिबद्धत्वान्नकार्यक्षममित्यतआह ॥ **विध्यतिक्रमेणेति** ॥ त्रैवर्णिकेतरस्याधिकारनिषेधस्स्वन्यायविरुद्धश्च । अतो

परोक्ष्यंसत्यस्यापिबंधस्यनिवर्तकंस्यात् । नचजातमपिज्ञानंशूद्रकृतयागवन्नसफलमितिवाच्यं । अज्ञाननिवृत्त्या ख्यदृष्टफलेज्ञानस्यान्यानपेक्षत्वात् । इयंशुक्तिरितिवाक्यजंहिज्ञानंशूद्रस्यापिशुक्त्यज्ञाननिवर्तकं । अदृष्टद्वारेश्व रप्रसादद्वारावाज्ञानस्यबंधनिवर्तकत्वंचपरैर्नांगीकृतं । अंगीकारेचबंधस्यज्ञाननिवर्त्यत्वेनमिथ्यात्वोक्तिरयुक्ता स्यात् । अदृष्टनिवर्त्यत्वात् । विध्यतिक्रमेणोत्पन्नःप्रत्यवायस्तुशूद्रस्यप्रपंचांतर्गतत्वाज्ज्ञानेननिवर्तिष्यते ।

गु०ब्रह्मज्ञानस्यलोकविलक्षणत्वात्सत्यबंधनिवर्तकत्वोपपत्त्याज्ञाननिवर्त्यत्वेनबंधस्यमिथ्यात्वोक्तिर्नस्यादितिभावः । द्वितीयमाशंकते ॥ **नचेति** ॥ अत्रवक्तव्यंज्ञानस्य फलमज्ञाननिवृत्तिर्वोतादृष्टद्वारेशप्रसादद्वाराबंधनिवृत्तिर्वा । नाद्यइत्याह ॥ **अज्ञाननिवृत्त्याख्येति** ॥ ननुज्ञानस्याप्यज्ञाननिवर्तकत्वमदृष्टद्वारैव । तथाचशूद्रस्य ज्ञानेविद्यमानेपिद्वारभूतादृष्टाभावान्नतेनाज्ञाननिवृत्तिरूपंफलंशूद्रस्येत्यतआह ॥ **इयंशुक्तिरितीति** ॥ अन्यथाशूद्रस्येयंशुक्तिरिति वाक्यजन्यज्ञानेनशुक्त्यज्ञान निवृत्तिर्जायतेसानस्यात् । तत्रापिद्वारभूतादृष्टाभावात् । तस्मात्साक्षादेवज्ञानस्याज्ञाननिवर्तकत्वेशूद्रस्यतत्त्वमस्यादिवाक्यजन्यज्ञानस्याप्यज्ञाननिवर्तकत्वमावश्यक मितिभावः । अस्तुतर्हिज्ञानस्यादृष्टद्वारेश्वरप्रसादद्वारावाबंधनिवृत्तिरेवफलमितिद्वितीयोनिरवद्यत्वादित्यतआह ॥ **अदृष्टद्वारेति** ॥ परैरित्यनेनतदंगीकारेऽपसि द्धांतंसूचयति । यस्तुवैयात्याज्ज्ञानस्यप्रसादादिद्वारैवबंधनिवर्तकत्वंब्रूयात्तंप्रत्याह ॥ **अंगीकारेचेति** ॥ **मिथ्यात्वोक्तिरयुक्तेति** ॥ ज्ञानत्वेनज्ञाननिवर्त्य त्वस्यैवमिथ्यात्वरूपत्वादित्यर्थः । ननुचशूद्रस्यतत्त्वमस्यादिवाक्याज्जातस्यज्ञानस्याज्ञाननिवृत्त्याख्येदृष्टफलेऽन्यानपेक्षत्वेनाज्ञाननिवृत्तावपिविध्यतिक्रमेणोत्पन्नस्यप्रत्य वायेनसाफल्यासंभवादित्यतआह ॥ **विध्यतिक्रमेणेति** ॥ ननुब्राह्मण्यादिमच्छरीराभेदाध्यासातिरिक्तस्यसंबंधांतरस्याभावादगत्याध्यस्तत्वमेवसंबंधोंगीकार्यः ।

प्र०पिनसिद्धांतोयुक्तइत्याह ॥ **किंचेति** ॥ ब्राह्मणीक्षत्रियावैश्यास्वब्राह्मणादिभ्योजातानामित्यर्थः । क्षेत्रस्यब्राह्मण्यादिनातेषुब्राह्मणत्वादिजा त्यध्याससंभवादितिभावः । अन्यत्र न्यायामृतेदेहात्मैक्याध्यासभंगइत्यर्थः । एवंमोक्षहेतुज्ञानस्यस्वाध्यायजन्यत्वमुपेत्यतस्यत्वन्मतेशूद्रेपिसं भवादनधिकारसिद्धांतोनयुक्तइत्युक्तं । इदानींविनापिस्वाध्यायमन्यस्मादपिजाताज्ज्ञानान्मोक्षसंभवान्मोक्षहेतुज्ञानेशूद्रोधिक्रियेत । नचत्रै

किंचत्वयाऽध्यासभाष्ये "तस्मादविद्यावत्पुरुषविषयाण्येवशास्त्राणि । तत्रजात्यध्यासोब्राह्मणोयजेते" त्यादिवदताब्राह्मणत्वादिमच्छरीराभेदाध्यासवतएवाधिकारस्वीकारात् ब्राह्मणीप्रभृतिषुजातानामब्राह्म णादीनामपिब्राह्मण्याद्यध्यासवत्त्वेनाधिकारःस्यात् । विस्तृतंचैतदन्यत्र । किंच ऋजूपायेनतर्केणतत्वनि श्चयसंभवे । विप्रादेरपिवक्रैःकिंसाध्यंवेदविचारणैः ॥ १ ॥ त्वन्मतेमोक्षसाधनस्यचिन्मात्रंतत्वमन्यदारोपित मितिज्ञानस्यखंडनकारादिभिर्विज्ञानवाद्यादिभिर्वोक्तेनप्रमाणप्रमेयाद्यनुपपत्तिरूपतर्कानुगृहीतेनदृश्यत्वा द्यनुमानरूपेण ऋजूपायेनसिद्धौ किंब्राह्मणादेरपिमानांतराप्राप्तंसर्वकर्तृत्वंसर्वज्ञत्वादिकंप्रापय्यपुनस्तन्नि षेधमुखेनचिन्मात्रप्रतिपादकेनानेकनियमपूर्वकाध्ययनशमदमादिसापेक्षेणवक्रोपायेनवेदांतविचारेण ।

प्र० र्वाणिकानांवेदजन्यमेवतथादृष्टमितिवाच्यं । तत्राप्येवमेवोपपत्तेरित्याह ॥ **किंचेत्यादिना** ॥ **तर्केणेति** ॥ प्रमाणादिनिर्वचनानुपपत्त्या दिरूपतर्केणेत्यर्थः ॥ **किंवेदांतेति** ॥ तथाचशूद्रस्यापितज्जन्यज्ञानंसंभवतीत्यधिकारस्स्यादित्यर्थः । नन्वनुमानंनस्वातंत्र्येणज्ञानजनकं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० किंतुशब्दोपसर्जनतया । अतोनदोषइत्याशंक्याह ॥ नचेति ॥ अनुमानोक्तेरुपयोगमाशंक्याह ॥ नचेति ॥ प्रयोजनांतरमाशंकते ॥
नचप्रत्यक्षादेरिति ॥ उपयोगांतरमाशंकते ॥ नचतार्किकेति ॥ स्वव्याघातकत्वंव्यनक्ति ॥ तैरिति ॥ केचित्त्विति ॥ ब्रह्मविद्या
नचखंडनाद्युक्तस्तर्कोद्दृश्यत्वानुमानंचश्रुतिसहकार्येव । नतुशब्दैकसमधिगम्येतत्वेस्वतंत्रमितिवाच्यं । तथात्वेवाक्यार्थनिर्णा
यकोपक्रमाद्यतिरेकेणयागादेःस्वर्गादिसाधनतायामिवचिन्मात्रेतरस्यमिथ्यात्वेप्यनुमानोक्त्ययोगात् । नचशब्देप्रत्यक्षेणप्रति
बद्धेप्रतिबंधनिरासायानुमानोक्तिः । शब्दप्रतिबंधकेनप्रत्यक्षेणानुमानस्यसुतरांप्रतिबंधात् । नचप्रत्यक्षादेःस्वरूपतोविषयत
श्चदुर्निरूपत्वव्युत्पादकैःखंडनतर्कैःशब्दविरोधिप्रत्यक्षाद्यप्रामाण्यसिद्धिरितिवाच्यं । शब्दस्यापिस्वरूपतोविषयतश्चदुर्निरूप
त्वव्युत्पादकैस्तर्कैरेवप्रत्यक्षविरोधिशब्दाप्रामाण्यस्याप्यापातात् । तस्माच्छब्दप्रामाण्योपयुक्ताकांक्षायोग्यतादेःशब्दप्रतिपाद्य
ब्रह्मणश्चनिर्वचननिरासमुखेनशब्दप्रतिकूलःखंडनादितर्कोनशब्दसहकारी । यदिचब्रह्मनिर्वचननिरासितर्कोनब्रह्मस्वरूपविरो
धीतर्हिंद्रव्यगुणादिनिर्वचननिरासितर्कोपिनद्रव्यादिस्वरूपविरोधीतिनिर्वचननिरासोनिष्फलःस्यात् । नचतार्किकादिरीतिं
बाधितुंतान्प्रतिखंडनतर्कोक्तिर्नत्वद्वैतंसाधयितुमितिवाच्यं । स्वव्याघातकानांब्रह्मप्रमाणभेदादिनिरासितर्काणांतैर्बाधकत्वानं
गीकारात् । तैरेवतर्कैरद्वैतप्रमाणोपनिषद्रीतेरपिबाधापाताच्च ॥ केचित्तु ॥ शूद्रस्योपनयनाध्ययनाभावेपिकर्मकांडाप
शूद्राधिकरणन्यायेनकर्मानधिकारेपि अध्ययनस्यस्वाध्यायसंस्कारतयालिखितपठितस्वाध्यायजन्यज्ञानस्याश्रेयःसाधनत्वेपि ॥ ७०२ ॥
प्र० यांशूद्रस्याधिकारोस्तिनवेतिसंशयोबोध्यः ॥ न्यायेनेति ॥ अग्निविद्ययोरभावादित्येवंरूपेणेत्यर्थः । एतेनपूर्वतंत्रापशूद्राधिकरणेनागतत्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० मुक्तं । अनिर्ज्ञातप्रकारस्यकथमधिकारइत्यतआह ॥ **श्रावयेदिति** ॥ प्रयोज्याभावेप्रयोजकासिद्धेः प्रयोज्योपादानमर्थात्सिद्धं । नच "अन्नाद्यकामंयाजये"दितिवत्प्रयोज्यव्यापारविधिः । अधिकारिविशेषणाश्रवणादितिभावः । "अग्नेर्वेदजन्यकर्मविद्यायाश्चासंभवेपी"त्य भ्युपगमवादोयं । पूर्वतंत्रन्यायेनाग्न्याद्यभावेनकर्मानधिकारस्य "अनग्नित्वेनकर्मानधिकार"इत्यादिनानिरस्तत्वादितिध्येयं ॥ **संध्योपास नादीति** ॥ एतेनयदुक्तंश्रुतप्रकाशे कर्मणामितिहासपुराणेषुसामान्यतःकीर्तनेपिविशेषोपदेशाभावाद्वैशेषिकेषुविशेषोपदेशेषुशूद्रस्यानधिकार इति तन्निरस्तं । संध्यावंदनादेर्विशेषोपदेशादिति । एतेनैवकर्मांगवैदिकमंत्राध्ययनाभावान्नशूद्रस्यकर्मण्यधिकारइतिकेनचिदुक्तंनिरस्तं । अविहितस्यस्वशाखेतरशाखागतमंत्राध्ययनस्येवतदंगमंत्रमात्राध्ययनस्योपपत्तेः । नित्येकर्मणिशक्त्यांगमात्रोपसंहारेणानुष्ठानस्योक्तत्वाच्चेति ।

"श्रावयेच्चतुरोवर्णा"नित्यादिवचनादितिहासपुराणश्रवणेधिकारात्तज्जन्यब्रह्मज्ञानसंभवादस्तिब्रह्मोपासनेऽधिकारइ तिप्राप्ते, "इतिहासपुराणाभ्यांवेदंसमुपबृंहये"दितिवचनेनतयोर्वेदोपबृंहकमात्रत्वेनस्वातंत्र्येणज्ञानहेतुत्वाभावान्न शूद्रस्याधिकारइतिसिद्धांतइत्याहुः । तत्रपूर्वपक्षेकर्मानधिकारांगीकरणमयुक्तं । शूद्रेऽग्नेर्वेदजन्यकर्मविद्यायाश्चा संभवेपीतिहासादिनाब्रह्मज्ञानवत्स्मृतिभिःकर्मज्ञानस्यापिसंभवेनाग्न्यसाध्यसंध्योपासनादिकर्माधिकारसंभवात् ।

गु० तत्रप्राप्तानुपपत्तिपरिहारस्त्वावयोःसमानइत्यतआह ॥ **विस्तृतंचैतदिति** ॥ संयोगस्यात्मविभुत्वपक्षेसर्वदेहेषु स्वस्वामिभावस्यचभृत्यदेहे सत्त्वेपीच्छाविधायि त्वस्यातुरादिदेहेष्वसत्त्वेपि साक्षात्स्वस्वामिभावस्यवातादिंद्रियाश्रयत्वस्यवासाक्षात्प्रयत्नजन्यक्रियाश्रयत्वस्यवातद्भोगायतनत्वस्यवातत्कर्मार्जितत्वस्यवासंबंधांतरस्यसंभ

SGDF
Sri Gargeshwari Digital Foundation

प्र० सौत्रपदव्यावर्त्यपूर्वपक्षस्यैवोचितत्वेनेतिहासादिजन्यज्ञानमादायाधिकारपूर्वपक्षकरणंसूत्राननुगुणंचेत्याह ॥ **किंचेति** ॥ **नत्विति** ॥ तथा चोपनयनाद्यंगीकारेणास्मद्रीत्यैवपूर्वपक्षोवाच्यइतिभावः । सिद्धांतोपिसूत्राननुगुणइत्याह ॥ **किंचवैदिकेति** ॥ अतएवश्रुतप्रकाशे "संवर्गविद्यावाक्यगतशूद्रशब्दनिर्वाहएवसौत्रः । अन्यत्पूर्वपक्षजातंसूत्रकाराभिप्रेतंस्वयमुपन्यस्त"मित्याद्युक्तमितिभावः । अभ्युपेत्यापिसिद्धांतप्रमेयमतिप्रसंगमाह ॥ **अपिचेति** ॥ **भाषेति** ॥ तदीयद्राविडप्रबंधादिनेत्यर्थः । ननुनज्ञानासंभवादुपासनानधिकारः । किंत्वंगेष्वनधिकारादेवेत्यतआह ॥ **कर्मेति** ॥ "इतिहासपुराणेअपिवेदोपबृंहणंकुर्वतीएवोपायभावमनुभवतोनस्वातंत्र्येणे"त्यादिनात्वद्भाष्येज्ञानाभावो

किंचास्मिन्पक्षेसूत्रइतिहासादेरुपबृंहकत्वमेवसिद्धांतहेतुतयावक्तव्यं । नतुशूद्रस्योपनयनाद्यभावः । किंचवैदिकसंवर्गविद्याश्रोतुःशूद्रेतिसंबोधनेनवैदिकविद्याश्रवणाधिकारेशंकिते सिद्धांतिना "शुगस्ये"तिसूत्रेतत्रैवानधिकारउक्तः । तस्मादितिहासादिनाशूद्रस्यज्ञानसंभवासंभवचिंतासूत्रविरुद्धा । अपिच इतिहासादेरुपबृंहकत्वेपिवेदानुपबृंहकेणवेदसमानार्थेनभाषाप्रबंधादिनाशूद्रस्यब्रह्मज्ञानसंभवात्तदुपासनाधिकारप्रसंगः । कर्मानधिकारादेवतदंगकोपासनानधिकारेत्वितिहासादितोज्ञानाभावव्युत्पादनवैयर्थ्यं ।

गु० वादित्यादिनान्यायामृतेदेहात्मैक्याध्यासभंगेविस्तृतमित्यर्थः । ब्राह्मणादेरपीत्यस्यव्यवहितेनवेदांतविचारेणेत्यनेनान्वयः । ननुनशूद्रस्यब्रह्मोपासनाधिकारप्रसंगः । उपासनांप्रत्यंगीभूतकर्मण्यध्ययनोपेतताभावेनानधिकारेणतदंगिभूतोपासनायामनधिकारात् । नह्यंगिन्यधिकारस्तदंगेत्वनधिकारइतिसंभवतीत्यतआह ॥ **कर्मानधिकारादेवेति** ॥ **वैयर्थ्यमिति** ॥ कर्मण्यनधिकारादेवतदंगकोपासनानधिकारादितिभावः । नन्वितिहासपुराणाभ्यामितिवाक्यस्येतिहासाद्यनुसारिण्येवार्थे

प्र० पपादनंव्यर्थमित्यर्थः । अयुक्तंचतद्व्युत्पादनमित्याह ॥ **किंचेति** ॥ **अनेकेति** ॥ अनेनव्याप्तिमूलतामाह । निर्णयेत्यन्यानपेक्षतां ॥ **ब्राह्मणादीनामिति** ॥ यथाप्रबलेन "अथातोग्निमग्निष्टोमेनानुयजंती"तिवाक्येनेष्टकचितस्थंडिलरूपाग्नेराहवनीयाधारतयाज्योतिष्टोमांगत्वेसिद्धेदुर्बलप्रकरणोपनीतोत्तरवेदिरप्यग्न्याधारतयातदंगं एवंपुराणादिजन्यमपितज्ज्ञानमुपासनांगं । अन्यथातज्ज्ञानस्यव्यर्थतापत्तेः । तथाचशूद्रस्यापितज्जन्यंज्ञानमुपासनांगंस्यादितिभावः ॥ **नफलदमिति** ॥ विहितसाधनाजन्यत्वादितिभावः ॥ **इत्युक्त्वेति** ॥ "यइदंश्रृणुयान्नित्यंयश्चापिपरिकीर्तयेत् । नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः । वेदांतगोब्राह्मणस्स्यात्क्षत्रियोविजयीभवेत् । वैश्योधनसमृद्धस्स्याच्छूद्रस्सुखमवाप्नुया"दितिसहस्रनामसूक्त्येत्यर्थः । एतेन "श्मशानवच्छूद्रपतिता"वितिप्रतिषिद्धस्यसमीपपाठस्यप्रतिप्रसवमात्रंश्रवणविधिः । नतुज्ञानांतइतिनिरस्तं । सुखमितिश्रवणफलनिर्देशात् । नह्यविहितसाधनजन्यात्फलोदयोक्तिर्युक्तेतिभावः । "इतिहासपुराणश्र

किंच "इतिहासपुराणाभ्या"मितिवाक्यमितिहासाद्यनुसारिण्येवार्थेवेदस्यतात्पर्यमित्येवंपरं । नतुवेदनिरपेक्षेतिहासादिर्नबोधकइति । अनेकशाखाभिज्ञमुनिकृतान्निर्णयरूपाद्वाक्याद्वेदनिरपेक्षादपिब्राह्मणादीनामपिज्ञानोत्पत्तेः । नचोत्पन्नमपिज्ञानंशूद्रस्यनफलदं । तस्यापि "यइदंश्रृणुया"दित्युक्त्वा "शूद्रःसुखमवाप्नुया"दित्युक्त्येतिहासादिश्रवणविधानात् ।

गु० वेदस्यतात्पर्यमित्येवंपरत्वंकिमर्थंकल्पनीयं । वेदनैरपेक्ष्येणापीतिहासादिर्नबोधकइत्येवंपरमपिकिंनस्यादित्यतआह ॥ **अनेकेति** ॥ ननुपुराणादौसर्ववेदार्थानुक्त्या वेदैकैकदेशस्योक्त्याकथंपुराणादिजन्यज्ञानस्यसाफल्यंस्यात् । सर्ववेदार्थज्ञानस्यैवफलजनकत्वादित्यतउक्तम**नेकेति** ॥ **श्रवणविधानादिति** ॥ तथाचविहित

SGDF
Sri Gangadhar Digital Foundation

प्र० वणानुज्ञानंपापक्षयार्थं । नोपासनार्थं"मितितद्भाष्योक्तंशंकते ॥ **नचेति** ॥ **स्मृत्येति** ॥ "नश्रुतिगोचरा । कर्मश्रेयसिमूढानांश्रेयएवंभवेदिह । इतिभारत"मितिभागवतप्रथमस्कंधगतयास्मृत्येत्यर्थः ॥ **वेदकार्येति** ॥ तस्ययथाब्रह्माद्यर्थावबोधद्वाराफलहेतुत्वंतथाश्रवणस्यापीत्यर्थः । ननुवेदानधिकारेकथंतत्कार्येब्रह्मज्ञानादावधिकारस्स्यात् । "इतिभारतमाख्यान"मितिस्मृतिस्तुभारतप्रशंसामात्रपरत्वेनोपपद्यतइत्यतआह ॥ **यथाचेति** ॥ प्रपत्तिः भरन्यासः । इत्यादेश्च गीतायामित्यर्थः ॥ **भाष्येति** ॥ अणुभाष्यकृदित्यर्थः । अन्यथानज्ञेयइत्येवाव

नचश्रवणंनज्ञानार्थं । किंतुपापक्षयार्थमितिशंक्यं । दृष्टार्थत्वेसंभवत्यदृष्टार्थत्वायोगात् । "स्त्रीशूद्रब्रह्मबंधूनांत्रयीनश्रुतिगोचरे"त्यारभ्य "इतिभारतमाख्यानंकृपयामुनिनाकृत"मित्यादिस्मृत्याभारतादेःशूद्रान्प्रतिवेदकार्यकारित्वोक्तेश्च । यथाचत्वन्मतेशूद्रादेर्मुक्तिसाधनब्रह्मोपासनानधिकारेपितत्साधनप्रपत्तावधिकारः यथावास्वर्गसाधनज्योतिष्टोमादावनधिकारेपितत्साधनत्रैवर्णिकसेवादावधिकारः तथावेदाद्ब्रह्मज्ञानेऽनधिकारेपीतिहासादिनातज्ज्ञानादावधिकारेबाधकाभावाच्च । "मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः । स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं । किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथे"त्यादेश्च । तदेतदभिप्रेत्याहटीकाकारः "हरिःशूद्राद्यैर्वेदविद्याज्ञेयोनभवती"ति । भाष्यकृच्च "ज्ञेयोनवेदैःशूद्राद्यै"रिति ।

गु० श्रवणजन्यज्ञानस्यफलदत्वमावश्यकमितिभावः । ननुश्रवणस्यपापक्षयार्थत्वेनज्ञानार्थत्वाभावात्पापक्षयस्यैवविहितश्रवणसाध्यत्वेननतस्यफलवत्त्वमित्यभिप्रेत्यशंकते

SGDF Sri Gargeshwari Digital Foundation

प्र० क्ष्यदितिभावः । एवंमतद्वयेप्यधिकरणशरीरंनिरस्याद्यसूत्रार्थंतावन्निरस्यति ॥ यच्चेत्यादिना ॥ "कम्बरएन" मित्यादिवाक्यादस्यजानश्रु तेस्स्वस्मिन्ननादरश्रवणाद्याशुगुत्पन्नासारैक्केणशुचाद्रवणाच्छूद्रेतिशब्देनसूच्यतेहि यस्मात्तस्मान्नायंशूद्रोजात्येत्यर्थः ॥ केचित्त्विति ॥ अस्यशुश्रूषोर्जानश्रुतेर्ब्रह्मज्ञानवैकल्येनहंसोक्तानादरवाक्यश्रवणात्तदातदैवब्रह्मविदोरैक्कस्यसकाशंप्रत्याद्रवणाच्छुगस्यसंजातेतिसूच्यतेहियतोतः

यच्चोक्तंपरैः पौत्रायणस्ययाशुक् सारैक्केणशूद्रशब्देनसूच्यतइतिसौत्रस्यसूच्यतइतिपदस्यार्थइति तन्न । यौगिकेनशूद्रशब्देनशोकस्योक्ततयासूचनाभावात् । केचित्तु "शुचेर्दश्चे" त्युणादिसूत्रेणरप्रत्ययेधातोश्चदीर्घे चकारस्यचदकारेकृते शूद्रइतिभवति । तेनशोचितृत्वमेवशूद्रशब्दार्थइतिसूत्रेविवक्षितं । नतुशुचाद्रवणंतस्यार्थइति । तदाद्रवणादित्याद्रवणोक्तिस्तुशोकेलिंगतया । नतुशूद्रशब्दार्थतया । अनादरश्रवणवदाद्रवणस्यापिपंचमीनिर्देशेनप्रथमानिर्दिष्टायांशुचिहेतुत्वस्यैवान्याय्यत्वात् । अनादरश्रवणंहिशुचिकारणतयालिंगं । आद्रवणंतुकार्यतयेत्याहुः । तन्न । आद्रवणस्यापिशुचिहेतुत्वेचशब्दापातात् । पंचमीतुशुचाद्रवणाच्छूद्रोनतुचतुर्थजातियोगादित्यवश्याध्याहार्यप्रधानसाध्यान्वयात् । किंचात्रशूद्रशब्दस्यौणादिकरप्रत्ययांततायांनजात्यर्थत्वनिराससिद्धिः ।

प्र० शूद्रेत्यामंत्र्यते । नवर्णावरत्वेनेत्यर्थः ॥ शुचेर्दश्चेतीति ॥ उणादौद्वितीयपादे "स्फायितंचिवंचिशकिक्षिपिक्षुदिसृपी" त्यादिसूत्रोक्तप्रकारेण "अमितम्योर्दीर्घश्चे" तिसूत्रानंतरात् "शुचेर्दश्चे" तिसूत्रात्प्रक्रियामाहुरित्यर्थः । ननुहेतुद्वयंव्यर्थमित्यतआह ॥ अनादरेति ॥ प्रधानेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तथाचत्वत्पक्षे एकेनकृतकार्यत्वात्तत्रैवहेत्वंतरत्वेऽतिशयालाभःप्रधानसाध्यानन्वयोऽध्याहारश्चेत्येतेदोषाइतिभावः ॥ जातिवाचिनो पीति ॥ अतएव "शुचेर्दश्चे"त्यत्रवृत्तौ "शोचतीतिशूद्रोवृषल"इत्युक्तमितिभावः ॥ रुग्द्रावणादिति ॥ यथा "रोदेर्णिलुक्चे"ति सूत्रेणरोदय तीतिरुद्रइतिव्युत्पादितत्वेपि "रुजंद्रावयतेयस्माद्रुद्रस्तस्माज्जनार्दन"इतिनिरुक्तिबलात्प्रकृतिप्रत्ययांतरकल्पनेनरुद्रशब्दनिष्पत्तिस्तथेहापीत्यर्थः। "वर्णागमोवर्णविपर्ययश्चद्वौचापरौवर्णविकारनाशौ । धातोस्तदर्थातिशयेनयोगस्तदुच्यतेपंचविधंनिरुक्त"मितिऋग्भाष्यटीकोक्तदिशावर्णवि

जातिवाचिनोपितदंतत्वात् । तस्माद्रुग्द्रावणाद्रुद्रइतिवच्छुचाऽऽद्रवणाच्छूद्रइतिनैरुक्तःशूद्रशब्दः । यच्चोक्तमुभाभ्यां अस्यामेवसंवर्गविद्यायामुत्तरत्र "अथहशौनकंचकापेयमभिप्रतारिणंचकाक्षसेनि"मित्यभिप्रतारिनामापुरुषःकीर्तितः । सचाभिप्रतारीचैत्ररथइतितावद्वक्तव्यं । कापेयाख्येनयाजकेनयोगात् । कापेयेनयाज्यतयायोगोहिश्रुत्यंतरे "एतेनवै चित्ररथंकापेया अयाजय"न्नितिचित्ररथस्यावगतः । नचैवंसत्यभिप्रतारीचित्ररथएवस्यान्नतुचैत्ररथइतिशंक्यं । तस्या भिप्रतारीतिसंज्ञाभेदेनचित्ररथादन्यत्वात् । चित्ररथादन्यस्यचचित्ररथयाजककापेययोगश्चैत्ररथत्वंविनानयुक्तः ।

प्र० कारादिनाशुचाद्रवणादेवहेतोश्शूद्रशब्दनिष्पत्तिर्ध्येयेतिभावः । एतेनयदुक्तंश्रुतप्रकाशे "औणादिकनिर्वाहापेक्षयानैरुक्तप्रक्रिययानिर्वाह स्यामुख्यत्वान्ननैरुक्तनिर्वाहःकार्य"इति तन्निरस्तं । तथात्वेजातिवाचित्वानपायात् । सूत्राननुगुणत्वाच्चेति । द्वितीयसूत्रार्थमपिप्रत्याह ॥ यच्चेति ॥ कापेययोगेपिचित्ररथत्वंकुतइत्यतआह ॥ कापेयेनेति ॥ संज्ञाभेदेनेति ॥ "अथैषज्योति"रित्यादौसंज्ञाभेदेनकर्मान्यत्वस्य

प्र० द्वितीयेस्थितत्वादितिभावः । एतावतातत्त्वंकुतइत्यतआह ॥ समानेति ॥ तथाचाभिप्रतारिणश्चित्ररथयाजककापेयेनयाज्यतयायोगस्तस्य चित्ररथान्वयजत्वेनेतिचैत्ररथत्वमित्यर्थः । भवत्वभिप्रतारीचैत्ररथः ततश्चकिमित्यतआह ॥ चैत्ररथस्येति ॥ द्वितीयेति ॥ यद्यपिरा मानुजमते क्षत्रियत्वावगतेरित्येवद्वितीयं । उत्तरत्रेत्यादितृतीयं । तथापिक्षत्रियत्वावगतेरित्यत्रहेत्वनुक्तेः उत्तरत्रेत्यत्रैवहेतूक्तेः ग्रामेशत्वादि लिंगाध्याहारेणयोगविभागेज्ञापकाभावात् हेत्वध्याहारस्यक्लिष्टत्वात् चैत्ररथेनेत्यस्यक्षत्रियत्वावगतौहेत्वंतरपरत्वेचशब्दापातेनचसर्वस्यापिद्वि

समानान्वयानांहिप्रायेणसमानान्वयायाजकाभवंति । चैत्ररथस्यक्षत्रियत्वंच "तस्माच्चैत्ररथनामैकःक्षत्रपति रजायते"तिश्रुत्यंतरेऽवगतं । एवंचाभिप्रतारिनाम्नाचैत्ररथेनक्षत्रियेणसहसमभिव्याहारालिंगात्पौत्रायणोपिक्ष त्रियइतिद्वितीयार्थइति । तन्न । समभिव्याहारादित्यस्याध्याहार्यत्वात् । कापेयमभिप्रतारिणमित्यत्राभिप्र तारिणःकापेयेनसहपाठेपियाज्यत्वेनतद्योगाप्रतीतेश्च । अस्तुवायाज्यत्वेनतदन्वयः । तथाप्यभिप्रतारिणोनचै त्ररथत्वसिद्धिः । प्रायेणेतिवदतात्वयाप्यचैत्ररथानामपिकापेययाज्यत्वांगीकारात् । अस्तुवाऽभिप्रतारिणः कापेययोगात्क्षत्रियत्वं । तथापिनतत्समभिव्याहारमात्रेणपौत्रायणस्यक्षत्रियत्वं । कापेयएवानैकांत्यात् ।

प्र० तीयत्वमेवयुक्तमितिवा परमतेद्वितीयत्वात्तदभिप्रायेणवा स्वमतरीत्यावाद्वितीयेत्युक्तमितिध्येयं । अत्रैकान्वितस्यजानश्रुतेःक्षत्रियत्वनिर्धा रणंक्षत्रियप्रायपाठाधीनं । सोभिप्रतारिणःक्षत्रियत्वाधीनः । तदपितस्यचैत्ररथत्वनिर्धारणाधीनं । तच्चतस्यकापेययाज्यत्वावधारणाधीन मित्युक्तं । तत्रकिमपिनिर्धारयितुमशक्यं । निर्धारकाभावादितिक्रमेणाह ॥ कापेयमिति ॥ कापेयएवेति ॥ अभिप्रतारिसहपाठेपि

SGDF

प्र० कापेयेक्षत्रियत्वाभावादितिभावः । ननुसंदिग्धक्षत्रियभावस्यैवनिश्चितधर्मांतरोपेतान्यसहपाठेनतादृशत्वनिश्चयः । “विशयेप्रायदर्शना” दित्युक्तेः । नचैवंकापेयः । येनातिप्रसंगइत्यतआह ॥ निश्चितेति ॥ ननुकापेयादिसहपाठेपिनपौत्रायणस्यब्राह्मण्यं । तत्संदेहस्यतस्मिन्बीजाभावेनाभावादितिचेन्न । संवर्गविद्याश्रोतृत्वादेस्तद्बीजत्वसंभवात् । ननुतथापिग्रामेशत्वादिनाक्षत्रियलिंगेनब्राह्मणसहपाठोबाध्यतइतिचे

निश्चितब्राह्मण्येनकापेयेनरैक्केणवासमभिव्याहारात्पौत्रायणस्यब्राह्मण्यापाताच्च । नचनिश्चितब्राह्मण्येनकापेयेनसमभिव्याहृतस्याभिप्रतारिणःक्षत्रियत्ववन्निश्चितब्राह्मण्येनरैक्केणसमभिव्याहारात्पौत्रायणस्यापिक्षत्रियत्वमितिवाच्यं। ब्राह्मणसमभिव्याहृतस्यक्षत्रियत्वनियमाभावात्। रैक्कसमभिव्याहारस्यैवलिंगतयावक्तव्यत्वेनचैत्ररथसमभिव्याहारस्यसूत्रेलिंगत्वोक्त्ययोगाच्च। यच्चोक्तंतृतीये “संस्कारपरामर्शा”दित्यस्य “तंहोपनिन्य”इत्येतद्विषयवाक्यमिति तन्न। अस्माकंमते “अष्टवर्षंब्राह्मणमुपनयीततमध्यापयीते”त्यत्रतच्छब्देनप्रकृतसंस्कारपरामर्शवत् “तंहोपनिन्य”इत्यत्रोपनयनाख्यसंस्कारोक्तिमात्रसद्भावेपितत्परामर्शाभावात्। यच्चोक्तं चतुर्थे “प्रवृत्ते”रित्यस्यब्रह्मोपदेशेप्रवृत्तेरित्यर्थइति तन्न। “नैतदब्राह्मणोविवक्तुमर्हति समिधंसोम्याहरोपत्वानेष्य”इतित्वयाप्युदाहृतेवाक्यउपनयनेप्रवृत्तेरेवसाक्षाच्छ्रवणात् ।

प्र० त्तर्हिशूद्रश्रुत्याक्षत्रियसहपाठोपिबाध्यतां । तद्यौगिकत्वस्याद्याप्यसिद्धेरितिभावः । ननुब्राह्मणसहपाठःक्षत्रियत्वस्यैवलिंगंनब्राह्मण्यस्येतिशंकते ॥ नचेति ॥ यच्चेति ॥ उभाभ्यामितिसर्वत्रसंबध्यते । “उपत्वानेष्ये तंहोपनिन्य”इतिजानश्रुतेरुपनयनसंस्कारपरामर्शात् “नशूद्रे पातकंकिंचिन्नचसंस्कारमर्हती”तिसंस्काराभावाभिलापाच्चेतिसूत्रार्थः ॥ चतुर्थइति ॥ “नैतदब्राह्मणोविवक्तुमर्हति । समिधंसोम्याहरे”

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिशूद्रत्वाभावनिर्धारणेजातएवतंप्रतिब्रह्मोपदेशेप्रवृत्तेरितिसूत्रार्थः ॥ यच्चोक्तमिति ॥ "अथहास्यवेदंश्रृण्वतस्त्रपुजतुभ्यांश्रोत्रपरिपूरणं उदाहरणेशरीरभेद" इतिस्मृत्याशूद्रस्यवेदश्रवणादिप्रतिषेधाच्चनतस्याधिकारइत्यर्थः । एतेनरामानुजरीतिदूषणेनैवतद्रीत्यविशिष्टंकस्यचिच्छैव स्यमतमपिप्रत्युक्तं । सूत्रार्थोपितथैवनिरस्यः । यदत्रोक्तंद्वितीयसूत्रार्थदूषणेऽभिप्रतारिणःकापेयसंबंधःप्रतीयमानःश्रुत्यंतरप्रसिद्धस्तद्याज्यत्व लक्षणएवपर्यवस्यतीतियाज्यत्वेनतद्योगाप्रतीतेरितिदोषोनेति तन्न । तथाविशिष्यश्रुत्यंतराभावात् । "चित्ररथंकापेयाअयाजय" न्नित्यस्यसा मान्यत्वात् । अन्यथाऽभिप्रतारिणःकापेययाज्यत्वेसिद्धेचैत्ररथत्वसिद्धिस्तत्सिद्धौकापेययाज्यत्वसिद्धिरित्यन्योन्याश्रयापत्तेः । किंचात्रसह

यच्चोक्तंशूद्रस्यस्मृत्याश्रवणादिप्रतिषेधादितिपंचमार्थइति तन्न । भाष्योक्तेश्रौतप्रतिषेधेसंभवतिस्मार्तप्रतिषेधपरत्वा योगात् । स्मृतेःश्रवणादिप्रतिषेधाच्चेतिचशब्दस्यभिन्नक्रमत्वापाताच्चेति ॥ टीकाक्षरार्थस्तु ॥ सेदुराजेत्यादिवदि ति ॥ यथासइत्यत्रछांदसेनविसर्गलोपेनसेदितिगुणस्तथाहारःइत्वेत्यत्रापिहारेत्वेतिगुणइत्यर्थः । यद्वा हारेत्वेत्येकं पदं । व्यत्ययेनचद्विवचनस्यैकवचनमित्याह ॥ हारेत्वानाविति ॥ दीर्घस्वरार्थत्वेनाद्रवणादित्युक्तमिति ॥

प्र० पाठस्यैवश्रवणेनसंबंधस्याप्रतीतेश्च । अतएवसहपाठेपीत्युक्तं । भोजनार्थसहोपविष्टावित्येवहिपाठस्सहपाठः । नचतावन्मात्रेणकश्चनसंबंध स्सिध्यति । एतेनैवहस्तिहस्तिपयोस्सहस्थितयोर्दर्शनेऽयमस्यहस्तिपइतिवदत्राप्ययमस्ययाजकइतिज्ञानंभवतीतिनिरस्तं । याजकत्वप्रत्याय काभावात् । अतएवयाज्यत्वेनेत्युक्तमिति । "हारेत्विति सेदुराजेत्यादिवद्विसर्गलोपेनभवति । हारेत्वानाविति वे" तिवाक्यद्वयंक्रमेणव्यनक्ति ॥ यथेति ॥ "सेदुराजाक्षयतिचर्षणीना" मित्यत्रसइदुराजेतिवक्तव्येपदकालेश्रूयमाणस्यविसर्गस्यलोपे "आद्गुण" इतिगुणेचसतिरूपमाश्रि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यसेदितिनिर्देशस्तथेत्यर्थः । ननु "सोचिलोपेचेत्पादपूरण"मित्यनेनसुप्रत्ययस्यैवलोपोविहितोनविसर्गस्य । तत्कथंविसर्गलोपेनेत्युक्तिः । सत्यं । पदकालेविसर्गस्यैवश्रवणेनसंहिताकालेतस्यैवाश्रवणेनविसर्गलोपेनेत्युक्तावपितत्रैवतात्पर्यादित्याहुः । दीर्घेतिवाक्यंदुर्गमत्वात्सप्रमाणं व्यनक्ति ॥ **संहितायामिति** ॥ **ऊइतिदीर्घस्वरइति** ॥ शुद्रेत्येवपदकालेभिप्रेतत्वादित्यर्थः ॥ **इत्युक्तमिति** ॥ सूत्रआङुच्चारणंकृत मित्यर्थः । "तद्भावे"तिसूत्रटीकायां "नैतदब्राह्मणोविवक्तुमर्हती"तिवाक्येब्राह्मणपदस्यैवश्रवणेनशूद्रत्वाभावनिर्णयएवप्रवृत्तेरितिभाष्यादि कथमित्याशंक्य "ब्राह्मणपदेनब्राह्मणनयोग्यानांत्रैवर्णिकानामुक्ते"रित्युक्तंवाक्यंरूढार्थत्यागेनयौगिकार्थग्रहणेनहेतुंवदन्व्याचष्टे ॥ **आर्जव मिति** ॥ अविहितेत्याद्यंतिमंवाक्यमस्पष्टत्वाद्व्याचष्टे ॥ **अविहितेति** ॥ शिष्टंस्पष्टमितिभावः ॥ ७ ॥ **अपशूद्राधिकरणं** ॥ ९ ॥

"संहितायांयत्रदैर्घ्यंपदेयत्रनविद्यते । उक्तार्थस्यमहाधिक्यंश्रुतेस्तत्रविवक्षित"मित्यादिवचनैःश्रुतौशूद्रशब्दे ऊइतिदीर्घस्वरःशोकाधिक्यज्ञापनार्थइतिसूचयितुंसूत्रआद्रवणादित्युक्तमित्यर्थः ॥ **ब्राह्मणनयोग्यानांत्रैवर्णिकानामिति** ॥ "आर्जवंब्राह्मणेसाक्षाच्छूद्रोनार्जवलक्षण"इतिश्रुतिव्याख्यानरूपायांस्मृतौब्राह्मणप्रतियोगित्वेनशूद्रस्योपादानाच्छ्रुतावपिब्राह्मणशब्दस्त्रैवर्णिकपरएवेत्यर्थः ॥ **अविहितोपनयनानामेवेति** ॥ अविहितोपनयनत्वेसत्यनिषिद्धाध्ययनानामुत्तमस्त्रीतिर्यगादीनामेवापवादविषयता नतुनिषिद्धाध्ययनानामित्यर्थः ॥ ७ ॥ **अपशूद्राधिकरणं** ॥ ९ ॥

गु० ॥ **नचश्रवणंनज्ञानार्थमिति** ॥ **अविहितोपनयनत्वेसतीति** ॥ यद्यपिस्त्रीशूद्रब्रह्मबंधूनांत्रयीनश्रुतिगोचरेत्यादिनाशूद्रादेरिवस्त्रीणामप्यध्ययननिषेधेनानिषिद्धानामेवापवादविषयत्वेस्त्रीणामप्यपवादविषयत्वमनुपपन्नं । तथापिनाग्निर्नयज्ञःशूद्रस्येत्यादिशूद्रस्यविशेषतोध्ययननिषेधवत्स्त्रीमात्रस्यैवाध्ययननिषेधाभावात्तासामनिषिद्धाध्ययनवत्त्वेनाप्यपवादविषयतोपपत्तिरितिभावः ॥ ७ ॥ **अपशूद्राधिकरणं** ॥ ९ ॥

प्र० ॥ **ॐकंपनात्ॐ** ॥ अस्यविचारस्यास्मिन्पादेंतर्भावंसमर्थयितुमाक्षिपति ॥ **यद्यपीति** ॥ "यदिदंकिंचजगत्सर्वंप्राणएजतिनिस्सृतं । महद्भयंवज्रमुद्यत"मितिवाक्यस्थवज्रशब्दस्येत्यर्थः । एकन्यायनिर्णयत्वादाह ॥ **वक्ष्यमाणस्येति** ॥ "सुषुप्त्युत्क्रांत्योर्भेदेने"त्यत्रेत्यर्थः । तथाचाद्यपादएवनिवेशस्स्यादितिभावः । टीकायां "लोकप्रसिद्ध्याभगवल्लिंगेनचसाधारणवज्रनाम्न"इत्युक्तमाशंक्याह ॥ **ब्रह्मेति** ॥ "आकाशइतिहोवाचे"त्याद्यपादविषयाकाशप्राणादिशब्दानामित्यर्थः । प्रयोगात् गीतायां ॥ **ईशानइति** ॥ सहस्रनामस्वित्यर्थः । साक्षादनुक्तेराह ॥ **उक्तप्रायत्वादिति** ॥ **स्वतइति** ॥ श्रुत्यादिसाम्येनेत्यर्थः ॥ **पादद्वयेति** ॥ लोकतोन्यत्रप्रसिद्धिःपादद्वयेनचब्रह्मण्यापादितेत्युभयत्रप्रसिद्धानामित्यर्थः । एकदेशआपादितप्रसिद्धित्वादापादितोभयेत्युक्तं । स्वतः न्यायमंतरेण । उक्तसमाधावतिप्रसंगमाशंक्यप्रा

॥ **ॐकंपनात्ॐ** ॥ यद्यप्यस्यवज्रशब्दस्यवक्ष्यमाणस्यस्वप्रदृष्टत्वलिंगस्यचलोकतोन्यत्रप्रसिद्धिरस्ति । ब्रह्मलिंगैर्ब्रह्मण्यपिप्रसिद्धिश्चेदाकाशादिशब्दानामपिसास्यात् । "आयुधानामहंवज्र"मितिप्रयोगात्साचेत्प्राणादिशब्दानामपिसास्यात् । "ईशानःप्राणदःप्राण"इत्यादिप्रयोगात् । तथापिनामलिंगपादन्यायसाम्येनवज्रादिनाम्नांस्वप्रदृष्टत्वादिलिंगानांचब्रह्मण्यपिप्रयोगस्योक्तप्रायत्वादुभयत्रप्रसिद्धता । नचैवंतृतीयपादवैयर्थ्यं । स्वतःसिद्धोभयप्रसिद्धीनांपादद्वयापादितोभयप्रसिद्धीनांचस्वतोऽनवसेयावधारणानांब्रह्मण्येवसमन्वयइत्यवधारणार्थत्वात्तृतीयस्य ।

गु० ॥ ॐकंपनात्ॐ ॥ टीकोक्तंभगवल्लिंगेनभगवत्परत्वमनुपपन्नं । आकाशादिशब्दानामप्युभयत्रप्रसिद्धतापातादित्यतस्तस्याभिप्रायंवक्तुंशंकते ॥ यद्यपीत्यादिना ॥ वज्रशब्दस्यस्वप्रदृष्टत्वादिलिंगस्यचसाक्षात्समन्वयानुक्तावपिनामांतरसमन्वयेनवज्रशब्दस्यापिनामत्वेनतत्साजात्येनतत्समन्वयस्याप्युक्तत्वात् लिंगत्वेनसजातीयलिंगां

SGDF
Sri Gargeshwari Digital Foundation

प्र० गुक्तंस्मारयति ॥ नचैवमिति ॥ सर्वगतत्वेति ॥ लिंगपादोक्तानामित्यर्थः । तर्ह्यत्राप्येवंस्यादित्यतआह ॥ वज्रइति ॥ लिंगानामन्यथासिद्धौकोट्यंतरप्रापकाभावमाशंक्याह ॥ नचैवमिति ॥ आहेति ॥ व्याख्यातमेतत् । संशयपूर्वपक्षस्यापिविष्णुरेवेत्यवधारणविरोधफलकत्वंप्रागंतर्नयएवावोचामेतिभावः । अस्मिन्पक्षेविष्णुरेवेत्यवधारणंयुक्तमयुक्तंवेतिप्रतिनयंसंशयोबोध्यः । ननु "द्युभ्वाद्याश्रयोविष्णोरितरएव । अयंप्राणशब्दोवायुवाच्येवोत्क्रमणलिंगात् । एतदक्षरंमध्यमंश्रीतत्वमेवे"त्यादिनाटीकायांप्रत्यधिकरणमवधारणेनपूर्वपक्षोविरुध्यतइतिचेन्न । अत्रत्यानांनामलिंगानांप्राक्साक्षादसमन्वितत्वाभिप्रायेणवा प्राक्पादीयन्यायविषयाणामशेषाणांनामलिंगानांसमन्वयेप्येषांतन्न्यायाविषयत्वाभिप्रायेणवानिरवकाशत्वमुपेत्यपूर्वपक्षोक्तेरितिभावः । ननुयद्युक्तरीत्याब्रह्मतदन्ययोरापादितस्वारसिकप्रयोगसाधारण्येनोभयप्रसिद्धतातर्हिटीकायांब्राह्मलिंगैर्ब्रह्मणिलोकतोन्यत्रचेत्येवमुभयप्रसिद्ध्युक्तिर्विरुध्यते । अतिप्रसंगश्चास्मिन्पक्षेप्रागभ्यधायीत्यतस्तामप्येवमे

नचैवंनामपादन्यायैरादित्यादिनाम्नामपिब्रह्मणिप्रयोगस्योक्तप्रायत्वात्तत्साहित्येनसर्वगतत्वादिलिंगानामप्युभयत्रप्रसिद्धतास्यादितिवाच्यं । ततःपूर्वंनामपादेलिंगसमन्वयस्यानुक्ततयासर्वपुरुषाभिमुख्यादिभिरादित्येप्रसिद्धैर्लिंगैरादित्यशब्दस्यान्यत्रप्रसिद्धेरुज्जीवनादित्युक्तत्वात् । वज्रेप्रसिद्धैरुद्यतत्वादिलिंगैस्तुनवज्रादिशब्दस्यान्यत्रप्रसिद्ध्युज्जीवनं । इतःपूर्वलिंगपाद उद्यतत्वादिलिंगानामपिसमन्वयस्योक्तप्रायत्वात् । नचैवंबीजाभावात्पूर्वपक्षानुदयः । सावकाशलिंगैरप्यनवधारणपूर्वपक्षसंभवात् । अतएवोक्तमनुव्याख्याने "आहोभयगतत्वंचस्यादतोलिंगशब्दयोः । इतिसंशयनुत्त्यर्थं" इति ।

गु० तरसमन्वयोक्त्यास्वप्नद्रष्टृत्वादिलिंगस्याप्युक्तत्वादित्यभिप्रायेणप्रायशब्दः । यदिनामलिंगपादन्यायेनवज्रादिशब्दानांस्वप्नद्रष्टृत्वादिलिंगानांचब्रह्मणिप्रयोगाद्ब्रह्मणि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वनयति ॥ **लोकेति** ॥ आकाशादिशब्देतुनैवं । ततःपूर्वलिंगानामसमन्वितत्वादितिभावः । एवंटीकोक्तंसाधारण्यंसमर्थ्यान्यत्रप्रसिद्धत्वे प्यत्रनिवेशोयुक्तइतिभावेनात्रनिवेशेनिमित्तद्वयमाह ॥ **यद्वेत्यादिना** ॥ **यदष्टाकपालइति** ॥ "वैश्वानरंद्वादशकपालंनिर्वपे" दितिवैश्वानरवाक्येश्रुतस्य "यदष्टाकपालोभवती" त्यादेर्गुणविधिनामधेयत्वार्थवादत्वविचारस्यार्थवादपादएवनिवेशेकर्तव्येनामधेयत्वरूपावांतरसंगतिलोभान्नामधेयपादे "पूर्ववंतोऽविधानार्थास्तत्सामर्थ्यंसमाम्नाय" इतिद्वादशाधिकरणेसविचारःकृतस्तथेहापि । यथापूर्वत्रवाक्यशेषस्थशुग्द्रवणरूपयोगबलेनयौगिकइत्युक्तं तथा "वर्जनाद्वज्रमुच्यत" इत्यादिस्मृतिगतयोगबलाद्वज्रादिशब्दोपियौगिकएवेत्येवंरूपावांतरसंगतिलोभादत्रनि

"लोकप्रसिद्ध्याभगवल्लिंगेनचसाधारणे" तिटीकापिनामलिंगपादन्यायेनभगवल्लिंगैस्तत्परतायाःसिद्धप्रायत्वाल्लोकतश्चान्यत्रप्रसिद्धत्वात्साधारण्यमित्यभिप्राया । यद्वायथा "यदष्टाकपाल" इत्याद्यर्थवादादेरवांतरसंगतिवशादर्थवादादिरूपस्वस्थानातिक्रमः तथावज्रादिशब्दानामन्यत्रप्रसिद्ध्यादिमतामप्यवांतरसंगतिलोभात्स्वस्थानातिक्रमः । प्रायिकत्वाच्चपादव्यवस्था । वक्ष्यतिहिचतुर्थाद्येभाष्यकारः "प्रायिकत्वाच्चाध्यायानांपादानांचनविरोध" इति । यद्वापादद्वयेऽनुदाहृतानामपिनाम्नांलिंगानांचतत्रोक्तन्यायेनविष्णुपरतासिद्धप्राये

गु० लोकतश्चान्यत्रेत्युभयसाधारण्यं तर्हिलिंगेनचभगवत्परत्वादुभयत्रप्रसिद्ध्यापत्त्याटीकोक्तप्रकारस्ययथाश्रुतस्यासंभवात्तत्राप्ययमेवार्थोनुसंधेयइतिभावेनाह ॥ **लोकप्रसिद्ध्येति** ॥ नन्वेवंभगवल्लिंगेनभगवत्परत्वमित्यादिटीकायानामलिंगपादन्यायेनभगवल्लिंगैस्तत्परतायाःसिद्धप्रायत्वादित्यभिप्रायकल्पनेटीकायागौणत्वंस्यात् । अतष्टीकास्वारस्यानुरोधेनपक्षांतरमाह ॥ **यद्वेति** ॥ केचित्तुस्वयूथ्याः । अयंभावः । नामलिंगपादन्यायेनैववज्रादिशब्दानामुभयत्रप्रसिद्धत्वमित्युक्तं । तदयुक्तं ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेशइत्यर्थः ॥ **इतिदर्शयितुमिति** ॥ अत्रनिवेशेह्युभयप्रसिद्धतासूच्यते । साचनविष्णुपरतांविनासिध्यति । साचोक्तदिशाप्राक्तनन्याय मंतरानसिद्धेत्यर्थः । नामलिंगपादन्यायेनोभयत्रप्रसिद्धतायामतिप्रसंगमाशंक्यैकस्समाधिरुक्तः । समाध्यंतराण्यपिमतभेदोपन्यासमुखेनाह ॥ **केचित्त्वित्यादिना** ॥ अत्रेदमरुचिबीजं । अन्यत्रप्रसिद्धलिंगसाहचर्यादन्यत्रप्रसिद्धत्वेद्युभ्वाद्यायतनत्वादीनामपितथात्वंस्यात् । तत्रो क्तरीत्याकथंचित्समाधानेपिसंवत्सरसारत्वादिलिंगानामादित्यविशेषणतयासर्वगतत्वविशेषणत्वाभावेनप्रागुक्तरीतेरेवानुसर्तव्यत्वादिति ॥

तिदर्शयितुमन्यत्रप्रसिद्धस्यापिवज्रनाम्नःस्वप्नादिद्रष्टृत्वलिंगस्यचेहोक्तिः । केचित्तु आदित्यादिशब्दानांनामपादन्यायेनोभयत्रप्रसिद्धतायामपिसमन्वेतव्यानांसर्वगतत्वादीनांनसा । अन्यत्रप्रसिद्धसाहचर्येणान्यत्रप्रसिद्धिवदुभयत्रप्रसिद्धसाहचर्येणोभयत्रप्रसिद्धेरनुक्तत्वात् । सर्वगतत्वादीनामन्यत्रप्रसिद्धतात्वन्यत्रप्रसिद्धलिंगसाहचर्यादित्याहुः ।

गु० नामपादन्यायेनादित्यादिनाम्नामपिब्रह्मणिप्रयोगस्योक्तप्रायत्वात्तत्साहित्येनसर्वगतत्वादीनामुभयत्रप्रसिद्धत्वापत्तिरिति । अतआह॥ **आदित्यादिशब्दानामिति**॥ नसा उभयत्रप्रसिद्धतानेत्यर्थः । ननुसर्वगतत्वादीनांस्वतएवोभयत्रप्रसिद्ध्यभावादुभयत्रप्रसिद्धत्वाभावेऽन्यत्रप्रसिद्धत्वमपिनस्यात् । स्वतएवान्यत्रप्रसिद्धत्वस्याप्यभा वात् । नचस्वतएवान्यत्रप्रसिद्धत्वाभावेप्यन्यत्रप्रसिद्धादित्यश्रुतिसाहित्येनान्यत्रप्रसिद्धत्वमितिवाच्यं । तथात्वे नामपादन्यायेनोभयत्रप्रसिद्धादित्यश्रुतिसाहित्येनोभय त्रप्रसिद्धत्वमपिकिंनस्यादित्यतआह ॥ **अन्यत्रेति** ॥ नन्वेवमादित्यशब्दस्योभयत्रप्रसिद्धत्वेनतत्साहचर्येणान्यत्रप्रसिद्ध्यभावात्स्वतश्चान्यत्रप्रसिद्ध्यभावादन्यत्रप्र सिद्धतैवनस्यादित्यतआह ॥ **सर्वगतत्वादीनामिति** ॥ लिंगसाहचर्यात् संवत्सरएवप्रध्वंसयन्नित्यादिनोक्तसंवत्सराधिपतित्वरूपसंवत्सरसारत्वरूपान्यत्रप्रसिद्ध

प्र० **अन्येत्विति** ॥ आहुरित्यन्वयः । भयशब्दस्यार्थोभयंकरत्वेति । साक्षात्संगत्यभावादाह ॥ **यद्वेति** ॥ सर्वगतत्वादावतिप्रसंगादाह ॥ **अथवेति** ॥ "व्रीहीन्प्रोक्षती"त्यादिकंकिंगुणकर्मोतप्रधानकर्मेतिविशये "सक्तूञ्जुहोती"त्यादौव्यभिचारेणद्वितीयायास्साध्यत्ववाचित्वाभा वात् "व्रीहिभिःप्रोक्षती"तिव्रीहिसाधनकप्रोक्षणविधानात्प्रधानकर्मेतिप्राप्ते "कर्तुरीप्सिततमंकर्मे"तिसाध्यत्वमात्रेद्वितीयास्मरणाद्गुणकर्मेति "धर्ममात्रेतुकर्मस्या"दितिद्वितीयाध्यायाद्यपादीयपंचमाधिकरणेसिद्धत्वेन "तानिद्वैध"मितिचतुर्थेधिकरणे "व्रीहीनवहंती"त्युदाहृत्यगुणकर्म त्वादिचिंताव्यर्था । द्वितीययैवगुणकर्मत्वसिद्धेरित्याशंकापरिहारायद्वितीयामनादृत्ययथासाचिंताकृता तथेहापीत्यर्थः । यथावासिद्धांतेचतु र्थपादेज्योतिराद्यधिकरणेषुज्योतिराकाशादिशब्देषुतदधीनत्वन्यायेस्थितेपितमतंत्रीकृत्यतद्गतत्वादिनाविचारस्तद्वदगतिकोयंपरिहारइत्यतआह

अन्येतु भयंकरत्वादीनामुभयत्रप्रसिद्धानेकलिंगानांसमन्वयार्थमन्यत्रप्रसिद्धवज्रनामसमन्वयः । तथाचांतरधिकरणवत्फलतःपादसंगतिः । यद्वावज्रशब्दस्वप्नद्रष्टृत्वादेरुभयत्रप्रसिद्धभयंकरत्वचेतनत्वादिलिंगसाहचर्यादुभयत्रप्रसिद्धिः । अथवायथा "व्रीहीनवहंति तंडुलान्पिनष्टी"त्यादौ "व्रीहीन्प्रोक्षती"त्यादाविवद्वितीयाश्रुत्यैवगुणकर्मत्वसिद्धेःपुनर्विचारवैयर्थ्यपरिहारायद्वितीयामतंत्रीकृत्यगुणकर्मत्वप्रधानकर्मत्वचिंता तथावज्रादिशब्दानामन्यत्रप्रसिद्धिमतंत्रीकृत्यविचारः ।

गु० लिंगसाहचर्यादित्यर्थः । आहुरित्यस्वरसोद्भावनं । तद्बीजंतु संवत्सरसारत्वादिलिंगानामादित्यविशेषणतयैवप्रतीत्यासर्वगतविशेषणत्वाप्रतीत्यालिंगसाहचर्येणान्यत्रप्रसिद्ध्यसंभवेनादित्यशब्दसाहचर्येणैवान्यत्रप्रसिद्धत्वेवक्तव्ये नामपादन्यायेनतस्योभयपरत्वेनसर्वगतत्वादीनामप्युभयत्रप्रसिद्धत्वंस्यादेवेतिपादासंगतिरेवेति । अ

SGDF Sri Gargeshwari Digital Foundation

प्र० ॥ अथवेति ॥ अत्रटीकाविरोधोवोभयत्रप्रसिद्धसाहचर्येणतथात्वस्यलक्षणेप्रागुक्तत्वादितिवाऽरुचिबीजमाहुः । एवंपादांतर्भावपरटीकांस मर्थ्य "तमेवंविद्वा"नित्यादिटीकाफलपरेतिभावेनपूर्वानंतर्येहेतुद्वयमाह ॥ अत्रेति ॥ पूर्वत्रयोगस्यवाक्यशेषस्थतयारूढित्यागेपीहतदभा वान्नवज्रशब्देरूढित्यागइतिवैषम्येणेत्यर्थः । तथाचप्रत्युदाहरणरूपासंगतिरिति । पूर्वत्रत्रैवर्णिकानांवेदाद्ब्रह्मज्ञानंमोक्षदमित्युक्तं । तन्नयुक्तं । "यएतद्विदुरमृता"इतिवज्रज्ञानान्मोक्षश्रवणादित्याक्षेपिकीवेत्यग्रेस्फुटमितिभावः । विषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ काठकेषष्ठव

अथवाप्राणशब्दसमन्वयस्योक्तत्वादुभयत्रप्रसिद्धप्राणशब्दसाहित्याद्वज्रशब्दस्याप्युभयत्रप्रसिद्धतेत्याहुः । अत्रपूर्ववैषम्येणवापूर्वाक्षेपेणवापूर्वपक्षोत्थानादनंतरसंगतिः । अत्र "वज्रमुद्यतं"इतिश्रुतौवज्रःकिमिंद्रायुधंकिंवाविष्णुरितिचिंता । तदर्थंकिंवज्रश्रुत्युद्यतत्वलिंगानुसारेणकंपकत्वादिब्रह्मलिंगंनेयमुतविपरीतमिति । तदर्थं "वर्जनाद्वज्र"मितिस्मार्तेनयोगेनश्रौतवज्रशब्दस्यरूढित्यागादिकंनयुक्तमुतयुक्तमिति ।

प्र० ल्ल्यांश्रूयते "ऊर्ध्वमूलोवाक्शाखएषोश्वत्थस्सनातनः । तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते । तस्मिँल्लोकाश्श्रितास्सर्वेतदुनात्येतिकश्चन । एतद्वैतत् । यदिदंकिंचजगत्सर्वंप्राणएजतिनिस्सृतं । महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंति । भयादस्याग्निस्तपतिभयात्तपतिसूर्यः । भयादिंद्रश्चवायुश्चमृत्युर्धावतिपंचम"इत्यादि । तत्रत्यवज्रशब्दोविषयइत्यर्थः । प्राणशब्दोविषयइतितुनिरसिष्यतइतिभावः ॥ कंपकत्वेति ॥ एजतीत्यनेनोक्तंसर्वचेष्टकत्वमित्यर्थः । यदिदुर्बलस्मार्तयोगेनरूढेस्त्यागादिनयुक्तंतदाश्रुत्याद्यनुसारेणकंपकत्वादिकंलिंगंनेयमितिवज्रशब्दार्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० इंद्रायुधमेव । यदातुयुक्तंतदाविष्णुरेवेतिस्पष्टःफलफलिभावइतिभावः । अत्रटीकायां “इंद्रायुधमेवेदंवज्रं । वज्रश्रुतेस्तत्ररूढत्वात् । उद्यतत्वलिंगाच्चे”त्यादिनाग्रंथेनश्रुतिलिंगाभ्यांपूर्वपक्षमुक्त्वा तत्रनिरवकाशविष्णुलिंगविरोधमाशंक्यश्रुतिलिंगयोरपिनिरवकाशत्वेनप्राबल्यमाश्रित्य पूर्वपक्षोज्जीवनंकृतं । तत्र “वज्रज्ञानेने”त्येकलिंगोक्तिरुपलक्षणमितिभावेन “नचवज्रज्ञानेनमोक्षोक्तेर्विष्णुरितिवाच्य”मित्यादि टीकांविवृण्वञ्छ्रुतिलिंगयोर्निरवकाशत्वंचव्यनक्ति ॥ नन्वत्रेत्यादिना ॥ “भवंतीत्यादी”त्यादिपदेन “प्राणएजतिनिस्सृत”मित्युक्तकंप

नन्वत्र “वज्रमुद्यत”मितिवाक्यात्पूर्वं “तदेवशुक्रंतद्ब्रह्मतदेवामृत”मिति,उत्तरत्रच “भयादस्याग्निस्तपतिभयात्तपतिसूर्यः”इतिश्रवणाद्ब्रह्मप्रकरणमिदं । वज्रवाक्यएवच “यएतद्विदुरमृतास्तेभवंती”त्यादिनिर्णीतानिब्रह्मलिंगानिसंति । वज्रशब्दस्त्वाकाशादिशब्दवद्ब्रह्मणियौगिकोस्तु । तस्मान्नपूर्वपक्षोदयइतिचेदुच्यते । यदिक्लृप्तरूढित्यागेनयोगकल्पना तर्हियस्यकस्यापिशब्दस्ययत्रक्वचनार्थेयोगस्यसुवचत्वादर्थव्यवस्थानस्यात् । तथाचकंपकत्वादिब्रह्मलिंगान्यपिकथंचिदिंद्रायुधेपिस्युः । पूर्वसूत्रेतुशूद्रशब्देऽवयवार्थस्यशुचाद्रवणस्यवाक्यशेषस्थत्वाद्रूढित्यागः ।

प्र० कत्वजगज्जनकत्वादिलिंगपरिग्रहः । श्रुत्यर्थस्तुटीकायांव्यक्तः । तस्मान्नपूर्वपक्षोदयइति । एतेनयदुक्तंश्रुतप्रकाशे नास्याधिकरणांतरत्वं । निर्णीतब्रह्मप्रकरणगतत्वेनपूर्वपक्षानुदयादिति । तदप्युट्टंकितंभवति । श्रुतिनिरवकाशत्वंतावदाह ॥ यदीति ॥ तथाचेति ॥ श्रुतेर्यौगिकत्वायोगेनरूढतयेंद्रायुधादन्यत्रानवकाशत्वेसतीत्यर्थः ॥ कथंचिदिति ॥ भयहेतुत्वादिनावज्रेपियुक्तानीत्यर्थः । तर्हिपूर्वसिद्धांतविरोधइत्यतआह ॥ पूर्वसूत्रेत्विति ॥ वाक्यशेषेति ॥ “सहसंजिहानएवक्षत्तारमुवाचे”त्यादिवाक्यशेषस्थत्वादित्यर्थः । एतेनपूर्ववैषम्येण

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्येतद्विवृणोति । "आज्यैस्स्तुवत" इत्यत्राज्यशब्दस्य "दधिकुरुते" त्यत्रदधिशब्दस्य "तस्योपनिषत्सत्य" मित्यादौसत्यादिशब्दस्ययौगिकत्वंप्र सिद्धमितीहापितथास्यादित्यतआह ॥ **एतेनेति** ॥ "यदाजिमीयुस्तदाज्यानामाज्यत्वं यदेनमधिनोत्तद्दध्नोदधित्वं सदितिमर्त्यंतीत्यमृतंतेउभेय च्छती" त्यादिश्रुतावित्यर्थः । विवृतमेतत्प्रागत्ताधिकरणे । ननु "वसंतेवसंतेज्योतिषायजेते" त्यादौवाक्यशेषस्थयोगाभावेपिज्योतिरादिशब्दो यौगिकइतिवक्ष्यतइत्यतस्तद्वैषम्यमाह ॥ **ज्योतिरिति** ॥ नन्विहापिस्मृतौयोगश्श्रूयतइत्यतआह ॥ **वर्जनादिति** ॥ ननुयथाऽऽकाशादि शब्देष्वनंतत्वादिब्रह्मलिंगाद्बाधकाद्रूढित्यागस्तथेहापिस्मृतेर्दुर्बलत्वेपिकंपकत्वादिलिंगाद्रूढित्यागोस्त्वित्यतआह ॥ **आकाशेति** ॥ "आकाश

एतेनाज्यादिशब्दप्रतिबंदीनिरस्ता । तत्र "यदाजिमीयुस्तदाज्यानामाज्यत्व" मितिश्रुतावेवयोगोक्तेः । ज्योतिरुपक्रमादित्यत्र तुवाक्यस्यान्यपरत्वेसत्येवपदसमन्वयार्थेयोगोवक्ष्यते । इहतुसिद्धांतेवाक्यसमन्वयएवेष्टः । वर्जनाद्वज्रमित्यादिस्मृतिःश्रुतितो दुर्बलानश्रुतेरूढित्यागापादिका । आकाशादिशब्देषुतुतन्निरवकाशलिंगाभावात्त्यागः । अत्रतूद्यतत्वलिंगंलोके "उद्यतायुधदो र्दंडा" इत्यादिस्मृतौ "तेनेंद्रोवज्रमुदयच्छ" दित्यादिश्रुतौचायुधेप्रसिद्धं । नचलोकवेदप्रसिद्धत्यागेनतदप्रसिद्धकल्पनायुक्ता ।

गु० न्येस्वयूथ्याः । साक्षात्संगतिसंभवेफलतःसंगतिकल्पनमयुक्तमित्यभिप्रेत्यपक्षांतरमाह ॥ **यद्वेति** ॥ एतेनेत्यनेनपरामृष्टंहेतुमाह ॥ **तत्रेति** ॥ **ज्योतिरुपक्रमा दित्यत्रत्विति** ॥ तथाचान्यत्रप्रसिद्धिविरोधोनेतिभावः ॥ **इहत्विति** ॥ तथाचप्रकृतेऽन्यपरत्वाभावादन्यत्रप्रसिद्धिविरोधइतिभावः । ननुचयोगस्यस्मृत्युक्तत्वे नप्रबलत्वात्तेनवज्रश्रुतिबाधेनरूढित्यागोस्त्वित्यतआह ॥ **वर्जनादिति** ॥ नन्वेवंश्रुतेःप्रबलत्वे आकाशादिश्रुतेःप्रबलत्वेनतत्रापिरूढित्यागोनस्यादित्यतआह ॥ **आकाशादीति** ॥ नन्वेवमुक्तरीत्याश्रुतेःस्वतोनिरवकाशत्वाभावेपिनिरवकाशलिंगसाहित्येननिरवकाशत्वोक्तौटीकाविरोधः । टीकायांश्रुतिलिंगयोरपितथात्वादि ॥ ७११ ॥

प्र० इतिहोवाचे" त्यादिगतेष्वाकाशप्राणादिप्रापकनिरवकाशलिंगाभावादित्यर्थः । लिंगंप्रसिद्धमित्यन्वयः । "उद्यतायुधदोर्दंडाःपतितस्वशिरो क्षिभिः । पश्यंतःपातयंतिस्मकबंधाअप्यरीन्युधी" तिभारतादिस्मृतावित्यर्थः ॥ **एवंचेति** ॥ ज्योतिश्चरणेत्यत्रपूर्वपक्षेज्योतिश्श्रुतिःप्रकरणे नेवेतिभावः । टीकोक्तेर्मूलमाह ॥ **एतदेवेति** ॥ श्रुतिनिरवकाशत्वंलिंगनिरवकाशत्वाधीनमित्येतदेवेत्यर्थः । अन्यथास्मार्तयोगस्यदुर्बलत याश्रुतिबाधकत्वायोगेपिनिरवकाशभगवल्लिंगेनाकाशादिश्रुतेरिवबाधसंभवेनकल्प्यावकाशतयानिरवकाशत्वायोगादितिभावः ॥ **टीकाया मिति** ॥ एतदेवाभिप्रेत्योक्तमित्यनुषंगः । एवंवज्रश्रुतेर्निरवकाशत्वंनिरवकाशलिंगाधीनतयोपपाद्यपूर्ववैषम्येणपूर्वपक्षउक्तः । इदानींन्याय विवरणस्थचशब्दस्वारस्यंटीकास्थद्विवचनस्वारस्यंचानुरुध्यलिंगनिरपेक्षमेवनिरवकाशत्वंवदन्पूर्वाक्षेपेणपूर्वपक्षमाह ॥ **यद्वेति** ॥ नन्वाका

एवंचनिरवकाशलिंगसाहित्याद्वज्रश्रुतिरपिनिरव काशा । एतदेवाभिप्रेत्योक्तंन्यायविवरणे "वज्र शब्दउद्यतत्वलिंगंचे" ति । टीकायामपि "श्रुति लिंगयोरपितथात्वा" दिति । यद्वारूढित्यागे ऽव्यवस्थापत्त्यालिंगनिरपेक्षैवश्रुतिर्निरवकाशा ।

गु० तिलिंगनिरपेक्षायाएवश्रुतेर्निरवकाशत्वोक्तेरित्यरुच्याऽऽह ॥ **यद्वेति** ॥ नन्वेवमाकाशश्रुतेरूढित्यागेऽव्यवस्थापत्त्यारूढित्यागासंभवाद्ब्रह्मपरत्वंनस्यादित्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० शादिशब्दानामिवेश्वरलिंगैश्श्रुतिबाधःकिंनेत्यतआह ॥ आकाशादीति ॥ ब्रह्मलिंगादेस्सावकाशत्वमाह ॥ अमृतत्वेति ॥ अस्येति ॥ यएतद्विदुरमृताइत्युक्तलिंगस्येत्यर्थः । वज्रस्ययेश्रुतिलिंगेतयोरित्यर्थः । एतेन पूर्वपक्षानुदयइतिश्रुतप्रकाशोक्तंनिरस्तं । प्रापकाणामुक्तत्वा दिति । भगवल्लिंगस्यनिरवकाशत्वाद्वज्रश्रुतिलिंगयोस्सावकाशत्वात्तेनतयोर्बाधइतिभावेनप्रवृत्तां "अयंवज्रोभगवानेवे"त्यादिसिद्धांतटीकांवि वृण्वन् लिंगनिरवकाशत्वपरंग्रंथंतावद्व्यनक्ति ॥ जगत्सर्वमिति ॥ जगत्सर्वंप्राणेस्थितं यस्मादेजति चेष्टते । यत्प्रेरणयावर्तते । तद्वज्रमि

आकाशादिशब्दानामपियोगइहाक्षिप्यते । अमृतत्वहेतुवेदनविषयत्वंतुश्रुतिबलाद्वज्रेप्यस्तु । टीकायाम स्यनिरवकाशत्वांगीकारस्तुवज्रश्रुतिलिंगयोर्निरवकाशत्वज्ञानात्प्रागस्यसावकाशत्वज्ञानाभावाभिप्रायः । अ न्यथा "वज्रज्ञानान्मोक्ष"इतिभाष्यविरोधात् । सर्वथानिरवकाशस्यबाधायोगाच्च । एजृकंपनइतिधा तुजेन एजतीत्यनेनोक्तंकंपकत्वंतुभयहेतुत्वाद्वज्रएवयुक्तं । ब्रह्मप्रकरणमपिश्रुत्यादिबाधितं । तस्माद्व ज्रज्ञानस्यापिमोक्षहेतुत्वात्त्रैवर्णिकानांवेदाद्ब्रह्मज्ञानंमोक्षदमितिपूर्वोक्तमयुक्तमितिपूर्वःपक्षः ॥ सिद्धांत स्तु ॥ जगत्सर्वंप्राणएजतीत्युक्तंसर्वचेष्टकत्वं "कोह्येवान्या"दितिभाष्योक्तश्रुत्यादिभिर्विष्णवेकनिष्ठं ।

गु० आकाशादीति ॥ ननुयएवंविदुरमृताइतिवाक्योक्तामृतत्वहेतुवेदनविषयत्वस्ससाकाशत्वमंगीकृत्यपूर्वपक्षेटीकाविरोधः । तत्रनचलिंगस्यनिरवकाशतयाप्राबल्यमि त्याशंक्यलिंगस्यनिरवकाशत्वमंगीकृत्यैवश्रुतिलिंगयोरपितथात्वादित्यनेनपूर्वपक्षीयश्रुतिलिंगयोरपिनिरवकाशत्वेनपूर्वपक्षसंभवादित्युक्तत्वादित्यतआह ॥ टीकाया मिति ॥ अन्यथेति ॥ टीकायायथाश्रुतार्थत्वइत्यर्थः । ननुतेनेंद्रोवज्रमुदयच्छदितिश्रुतावुद्यतशब्दस्यवज्रेप्रसिद्धत्वादुद्यतत्वमपिनिरवकाशमित्यतआह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिसर्वचेष्टकत्वं "कोह्येवान्यात्कः प्राण्या" दित्यादिश्रुतिभिः "नभस्वतोपिसर्वास्स्युश्चेष्टाभगवतोहरेः। किमुतान्यस्यजगतोयस्यचेष्टानभस्वत" इत्यादिस्मृतिभिश्च विष्णुमात्रगतमित्यर्थः । "कोह्येवान्यात्कः प्राण्याद्यदेषआकाशआनंदोनस्या" दित्याकाशशब्दश्च "आकाशस्तल्लिंगा" दित्युक्तन्यायेनविष्णुपरइतिभावः । ननूद्यतत्वलिंगमपिनिरवकाशमित्युक्तमितिचेत्किमुद्यतशब्दआयुधेनिरुक्तइतितन्निरुक्तेर्वक्ष्यमाणवज्रश्रुतिनिरुक्तेरिवनिरवकाशत्वमुच्यतेऽथायुधादन्यत्रतस्यनिषेधात् । नाद्यइत्याह ॥ **नचेति** ॥ द्वितीयंप्रत्याह ॥ **नचकोहीति** ॥ कइत्याक्षेपे । यद्ययमाकाशशब्दितोविष्णुरुद्रिक्तानंदोनस्यान्नजगच्चेष्टयेत् । तर्हिकोह्येवान्यात् । नकोपीत्यन्यत्रयथाजगच्चेष्टकत्वंनिषिद्धंतथावज्रादन्यत्रोद्यतत्वंश्रुत्यादौननिषिद्धं । येनवज्रादन्यत्रानवकाशंभवेदित्यर्थः । ननु "यएतद्विदुरमृतास्तेभवंती" तिमुक्तिहेतुज्ञानविषयत्वस्यानंदमयाधिकरणे

नच "तेनेंद्रोवज्रमुदयच्छ" दितिश्रुतौ "वर्जनाद्वज्र" मितिस्मृतौविष्णौवज्रशब्दार्थइवोद्यतशब्दोनिरुक्तः । नच "कोह्येवान्या" दित्यत्रजगच्चेष्टकत्वमिवान्यत्रोद्यतत्वंनिषिद्धं ।

गु० **नचेति** ॥ अत्रवर्जनाद्वज्रमित्युक्तिस्तुपूर्वपक्षीयश्रुतेरपिविष्णौसावकाशत्वप्रदर्शनार्थमितिबोध्यं । वर्जनाद्वज्रमितिस्मृतौवज्रशब्दस्यनिरुक्तत्वात्तन्निर्वचनस्यचवज्रशब्देनसर्वत्रविष्णोरेवग्रहणार्थत्वाद्वज्रशब्दस्यविष्णुपरत्वसंभवेपि तेनेंद्रोवज्रमुदयच्छदितिश्रुतौतदनिर्वचनेनोद्यतशब्देनतद्ग्रहणायोगादितिभावः । ननुकोह्येवान्यादित्यत्रजगच्चेष्टकत्वस्यभगवदनिर्वचनेपितन्मात्रनिष्ठत्वसिद्धिवत् तेनेंद्रइतिश्रुतौतदनिर्वचनेपितन्मात्रनिष्ठत्वसिद्धिरित्यतआह ॥ **नचकोहीति** ॥ तथाचनैतत्प्रतिबंदीतिभावः । ननूद्यतशब्दार्थस्योद्यतत्वस्यवज्रादन्यत्रनिषिद्धत्वात्कथंविष्णौसावकाशत्वमित्यतोवाह ॥ **नचकोहीति** ॥ कोह्येवान्यादित्यत्रजगच्चेष्टकत्वमिवेत्युक्त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० आनंदमयइतरोविरिंचादिर्नभवति । "ब्रह्मविदाप्नोतिपर"मित्युक्तस्यानंदमयज्ञानान्मोक्षस्यानुपपत्तेरित्युक्ततया विष्णुलिंगतयानिर्णीतस्य विषयवाक्यएवश्रुतस्यसूत्रणंकुतोनकृतं । अन्यथातस्य "नेतर"इत्यत्रहेतूकरणायोगादित्याशंक्यसमाधत्ते ॥ **यद्यपीति** ॥ नन्वेषाशंकान युक्तेव । अल्पाक्षरेसूत्रेसर्वस्यापिसाधकस्यसाक्षादुपादानायोगेनोपलक्षणयैकस्योपादानेकार्ये प्रथमश्रुतत्वात् "प्राणएजती"त्याद्युदाहरणविशेषद्योतकत्वादल्पाक्षरत्वात्कंपनलिंगस्योपादानमुचितं । नचमुक्तिहेतुवेदनत्वंपूर्वत्र "नेतर"इतिसूत्रोपात्तं "तमेवंविद्वानमृतइहभवति । नान्यःपंथा"इतिश्रुत्यंतरेविष्ण्वेकनिष्ठतयाऽवधारितंचेतिवाच्यं । कंपकत्वमपि "तद्धेतुव्यपदेशाच्चे"तिसूत्रोपात्तं "कोह्येवान्यात्क"इतिश्रुत्यंतरेविष्ण्वेकनिष्ठतयाऽवधारितंचेत्यपिसाम्यात् । तथापिविषयवाक्यएवश्रुतत्वाच्छंकायुक्तेतिभावः ॥ **आक्षिप्तत्वान्नतंप्रतीति** ॥ यद्यप्याक्षिप्तमपिहेतूकर्तुंशक्यं । तथापिपूर्ववाद्यभिमतसाधकस्यसावकाशत्वोक्त्यनंतरमेवतस्यहेतूकरणमुचितं । आक्षेपकहेतोःप्राबल्यखंडनात् । अतएवात्रटीकायां "नन्वेवंसावकाशत्वेश्रुतिलिंगयोर्यएतद्विदुरित्युक्तलिंगंविहायकिंलिंगांतरग्रहणेन । मैवं । तदविहायैवलिंगांतरस्याप्युक्तत्वा"दित्युक्तं । तथाचपरोक्तश्रुतिलिंगयोरितःपूर्वसूत्रेसावकाशतायाअव्युत्पादनात्तत्सावकाशताव्युत्पादनबीजंपूर्ववाद्यनाक्षिप्तंकंपकत्वमेवहेतूकृतं । नतुतदाक्षिप्तमितिभावः । एतेनटीकाविरोधोपिप्रत्युक्तः । अत्रटीकायां "श्रुतेर्निरवकाशत्वान्निरवकाशेनापिलिंगेनकथंनिर्णयइत्य

यद्यप्यमृतत्वहेतुवेदनविषयत्वमपि "नेतरोनुपपत्ते"रित्यादौनिर्णीतंब्रह्मलिंगमिहास्ति । तथापितस्यपूर्वपक्षिणाऽऽक्षिप्तत्वान्नतंप्रतिसूत्रादौहेतूकृतं ।

गु० सिद्धांतीयलिंगस्यनिरवकाशत्वमुक्तंभवति ॥ **आक्षिप्तत्वादिति** ॥ नन्वाक्षेपोपितस्यैवकुतः । अव्यवहितपूर्वाधिकरणेतस्यैवप्रसक्तत्वादितिभावः । पूर्वोक्तवज्रश

प्र० तश्श्रुतेरपिविष्णाववकाशंस्मृत्यादर्शयति चक्रमिति"इतिस्मृतिमवतार्य "नचयोगस्यरूढेर्दौर्बल्यादनिर्णयइतिवाच्यं । स्मृत्युक्तत्वेनविद्वद्रूढेरपिसत्त्वा"दितिसमाहितं । तत्समाधानमुपलक्षणं । स्मृत्यायोगप्रदर्शनस्यविद्वद्रूढिसूचनमिवनिरवकाशत्वेनाज्ञरूढितोपिप्राबल्यसूचनमपि प्रयोजनमितिभावेनप्रागुक्तश्रुतिविरोधशंकामनूद्यस्मृत्युक्तयोगस्यानवकाशत्वमुपपादयति ॥ **नचेत्यादिना** ॥ श्रुत्यर्थेतिश्लोकात्पूर्वं वज्रश्रुतेस्स्मृत्युक्तयोगेनविष्णौसावकाशत्वात् । नचैवंपूर्वोक्तदिशाऽर्थाव्यवस्था । श्रुतितस्स्मृतिर्दुर्बलासतीनश्रुतेरूढित्यागापादिकाचयतइत्येतावद्योज्यं ॥ **श्रुत्यर्थनिर्णयार्थत्वात्स्मृतेरिति** ॥ "इतिहासपुराणाभ्यांवेदंसमुपबृंहये"दित्युक्तेरितिभावः । एतेनस्मृतेर्निरवकाशत्वमुच्यते । अर्थाव्यवस्थांनिराह ॥ **तत्रनिरूपितोर्थोग्राह्यइति** ॥ स्मृतौनिरूपितइत्यर्थः । तर्हि "वज्रहस्तःपुरंदर"इत्यादावपिरूढार्थोनस्यादित्यत आह ॥ **तदयोगइति** ॥ दृष्टांतोक्तिपूर्वश्लोकंव्याचष्टे ॥ **यथेति** ॥ ईच ऊच यणादेशः । यू । ईकारांतमूकारांतंशब्दरूपं स्त्र्याख्यं स्त्रीत्वाभिधायकं । स्त्रीलिंगमितियावत् । नदीसंज्ञंभवतीतिसूत्रार्थः । स्त्र्याख्याविितिवाच्यइयङादेशेनस्त्रियाख्याविितिनिर्देशश्छांदसइत्याहुः । आदिपदेन "वृद्धिरादैच् । अदेङ्गुण"इत्यादिग्रहः ॥ **आण्नद्याइत्यादिष्विति** ॥ नदीसंज्ञकेकारोकारांतात्परस्यङिद्वचनस्याडागमोभव

नचवज्रश्रुतिविरोधः । श्रुत्यर्थनिर्णयार्थत्वात्स्मृतेस्तत्रनिरूपितः । अर्थोग्राह्योवेदवाक्येतदयोगेतुलौकिकः ॥ १ ॥ यथा "यूस्त्र्याख्यौनदी"त्यादिसंज्ञाकरणस्यकार्यार्थत्वात् "आण्नद्या"इत्यादिषुकार्यप्रदेशेषु

गु० न्दस्यमगवतिसावकाशत्वमुपपादयितुंशंकते ॥ **नचेति** ॥ आडागमादिकार्यार्थत्वादित्यर्थः । इत्यादिष्वित्यत्रादिपदेनङेराम्नद्याम्नीभ्यइत्यस्यसंग्रहः । तदयोगः आडागमादिकार्यार्थत्वायोगः । नद्याः ग्रहणमितिसंबंधः । नन्वेवंवज्रशब्दस्ययौगिकत्वेनवज्रबाहुरित्यादावपियोगएवग्राह्यइत्यतआह ॥ **यत्रत्विति** ॥ तदयोगः

SGDF

प्र० तीत्यर्थः । कुमार्यै यवाग्वै इत्याद्युदाहरणं । आदिपदेन “मृजेर्वृद्धिः । मिदेर्गुणः । मार्ष्टिमेद्यती”ति ॥ कृत्रिमेति ॥ सांकेतिकनद्याः । नतुप्रसिद्धनदीशब्दमात्रस्येत्यर्थः ॥ नदीति ॥ नदी पौर्णमासी आग्रहायणी इत्येवमंताद्व्ययीभावाद्विकल्पेनाच्प्रत्ययइत्यर्थः । उपनदं उपनदि । उपपौर्णमासं उपपौर्णमासि । उपाग्रहायणं उपाग्रहायणीत्युदाहरणं । टचि टकारादेः “चुटू”इत्यादिनालोपे “यस्ये”ती कारलोपेच उपनदमितिरूपं । अन्यदातु “ह्रस्वोनपुंसकेप्रातिपदिकस्ये”तीकारस्यह्रस्वेसत्युपनदीत्यादि ॥ तदयोगइति ॥ नदीपदेनकृ त्रिमनदीग्रहणायोगइत्यर्थः । तत्रनदीपदेननदीसंज्ञकशब्दस्यैवग्रहणेपौर्णमास्यादिशब्दस्यापीकारांतस्त्रीलिंगतयानदीसंज्ञकशब्दत्वेननदीशब्दे नैवग्रहणसंभवात्पृथग्ग्रहणमयुक्तमितितत्साहचर्याल्लोकप्रसिद्धनदीशब्दस्यैवग्रहणं । तदुक्तंमहाभाष्ये “बहुगणवतुडतिसंख्ये”त्यत्र “यदित र्हिकृत्रिमाकृत्रिमयोःकृत्रिमेसंप्रत्ययोभवति नदीपौर्णमास्याग्रहायणीभ्यइत्यत्रापिप्रसज्येत । पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्नभविष्यती” ति । नन्वाण्नद्याइत्यादौकृत्रिमग्रहणेकोहेतुरित्यतोबहुगणसूत्रेमहाभाष्योक्तन्यायमाह ॥ कृत्रिमेति ॥ वर्जनादिति ॥ “चक्रंचंक्रमणा

कृत्रिमनद्याएवग्रहणं । यत्रतु “नदीपौर्णमास्याग्रहायणीभ्य”इत्यादौतदयोगस्तत्राकृत्रिमायालोकसिद्ध
नद्याः कृत्रिमाकृत्रिमयोःकृत्रिमेकार्यसंप्रत्ययात् । तथात्रापिश्रुत्युपबृंहकेषु “वर्जनाद्वज्रमुच्यते ।
आसमंतात्काशतेयदाकाशः प्राणःप्रणयनादेष”इत्यादिस्मृतिवाक्येष्वन्वर्थसंज्ञाकरणस्यश्रुत्यर्थनिर्णया
र्थत्वात् “महद्भयंवज्र”मित्यादौस्मृत्युक्तयोगएवग्राह्यः । यत्रतुवज्रबाहुरित्यादौतदयोगस्तत्ररूढिः । ॥ ७१४ ॥

गु० स्मृत्युक्तयोगायोगः । ननुवर्जनाद्वज्रमुच्यतइतिस्मृत्यायोगस्योक्तत्वात्तदनुसारेणवज्रशब्दस्यभगवत्परत्वे यदाजिमीयुस्तदाज्यानामाज्यत्वमितिवाक्य आज्यशब्दस्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० देषवर्जनाद्वज्रमुच्यते । खंडनात्खङ्ग एवैषहेतिनामाहरिस्स्वय"मितिब्रह्मवैवर्तवाक्यं । आसमंतादित्यादिस्मृतीतुप्रागाकाशनयादावुदाहृते । आकाशादिशब्दानामपियोगइहाक्षिप्यतइत्यस्यसमाधानायैतत् । नन्वस्तुस्मार्तोयोगश्श्रुतौग्राह्यइति । वज्रमुद्यतमित्यादौग्राह्यइतिकुतः । "यदाजिमीयु"रितिवाक्योक्तोयोगोयथा "आज्यैःस्तुवत"इतिस्वप्रकरणगतशब्दएवगृह्यते तथात्रापिकस्मिंश्चित्स्वप्रकरणगतएवशब्दविशेषेगृह्यतामित्यतआह ॥ **यदाजिमिति** ॥ ज्योतिष्टोमीयस्तोत्रप्रकरणविशेषस्थत्वादित्यर्थः ॥ **होमविशेषेति** ॥ "अश्वस्यपदेजुहोती"त्यश्वमेधप्रकरणेविहितत्वात्तत्रत्यपदहोमेनैवसंबध्यते । नत्वन्येनेत्यर्थः ॥ **अनारभ्येति** ॥ किंचित्कर्मादिकंवाक्यविशेषंवाप्रक्रम्यापठितत्वादि

"यदाजिमीयु"रित्यादिनिर्वचनंतुप्रकरणविशेषस्थत्वात्तत्प्रकरणस्थेन "आज्यैःस्तुवत"इत्यादिनैवाज्यशब्देनान्वेति । यथा "पदेजुहोती"तिवाक्यविहितंपदंहोमविशेषप्रकरणस्थत्वात्तेनैवहोमेन तद्वत् । वर्जनाद्वज्रमितिनिर्वचनंत्वनारभ्याधीतत्वाद्योग्यवैदिकशब्दमात्रेणान्वेति । यथा "आहवनीयेजुहोती"त्यनारभ्याधीतवाक्यविहितआहवनीयो

गु० योगस्यैवोक्तत्वात्सर्वत्राप्याज्यशब्दस्यस्तोत्रपरत्वापत्त्या आज्येनजुहोतीत्यादावपितत्परत्वापत्त्याप्रसिद्धाज्यपरत्वंनस्यादित्यतआह ॥ **यदाजिमीयुरिति** ॥ तथाचयदाजिमीयुरितिनिर्वचनस्यसार्वत्रिकाज्यशब्दविषयत्वाभावात्तत्प्रकरणस्थाज्यशब्दविषयत्वमेवेति नातिप्रसंगः । तत्प्रकरणस्थस्यतत्प्रकरणस्थेनैवान्वयइत्यत्रपूर्वतंत्रीयंदृष्टांतमाह ॥ **यथेति** ॥ नन्वेवंयदाजिमीयुरितिनिर्वचनस्यप्रकरणविशेषस्थत्वात्प्रकरणविशेषस्थेनाज्यैःस्तुवतइत्यादिनैवाज्यशब्देनान्वयवत् वर्जनाद्वज्रमुच्यतइतिनिर्वचनंयत्प्रकरणविशेषस्थंतत्प्रकरणस्थवज्रशब्देनैवान्वेतीतिकथंवज्रशब्दस्यसर्वत्रभगवत्परत्वमित्यतआह ॥ **वर्जनादिति** ॥ वज्रबाहुरित्यादिव्यावृत्त्यर्थं **योग्येति** ॥ अनारभ्याधीतत्वात् अन्यप्रकरणेऽपठितत्वादित्यर्थः । अनारभ्याधीतत्वेपिकथंवैदिकशब्दमात्रेणान्वयइत्यतस्तत्रपूर्वतंत्रीयंदृष्टांतमाह ॥ **यथेति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिभावः ॥ **होममात्रेणेति** ॥ अतएवदशमाष्टमपादे “अविशेषेणयच्छास्त्रमन्याय्यत्वाद्विकल्पस्यतत्संदिग्धमाराद्विशेषशिष्टंस्या”दितिनवमेधिकरणे “यदाहवनीये”इत्यस्यसामान्यत्वेन “पदेजुहोती”तिविशेषशास्त्रेणबाधउक्तइतिभावः । ननुतृतीयस्याद्यपादे “गुणानांचपरार्थत्वादसंबंधस्समत्वात्स्या”दितिद्वादशेऽधिकरणेशाबरभाष्येशास्त्रदीपिकायांच “यदाहवनीय”इतिवाक्यंपवमानेष्टिसन्निधावाम्नायतइतिमत्वापवमानेष्टीनामाहवनीयाद्यग्निनिष्पादकत्वमाधानसमकक्षतयाप्रतिपादितं । तत्कथमनारभ्याधीतेत्युक्तिः । सत्यं । “अनारभ्यविधानेनसत्यंनाग्न्यर्थताभवेत् । तत्तुल्यंवाक्यमस्त्यन्यत्पवमानेष्टिसन्निधा”वित्युक्तयावाक्यद्वयसत्त्वोपगमेनानारभ्याधीतेविवादाभावात् । अतएवतार्तीयेसप्तमेपादे “तेसर्वार्थाःप्रयुक्तत्वादग्नयश्चस्वकालत्वा”दित्येकोनविंशेऽधिकरणे “यदाहवनीय”इत्यस्यसर्वहोमार्थत्वमुक्तं । नन्वथापिश्रुतिस्मृत्योर्विरोधेश्रुतिमूलकत्वेनस्मृतेर्दुर्बलतयोपजीव्यश्रुतिबाधकत्वायोगस्यपूर्वतंत्रे “धर्मस्यशब्दमूलत्वादशब्दमनपेक्षंस्या”दित्यादौप्रथमेनिर्णीतत्वेननस्मृत्यनुसारेणवज्रश्रुतेरूढार्थत्यागइत्याशंक्यनिराह ॥ **यद्यपीति** ॥ **श्रुतीति** ॥ वृजीवर्जनइत्यस्माद्रप्रत्यये ऋकारस्यचाकारे

होममात्रेणतद्वत् । यद्यपिस्मृतिर्दुर्बला तथापिश्रुतिविरुद्धविषयेप्रवृत्त्यभावान्निरुक्त्यादिवच्चश्रुत्यर्थनिर्णायकत्वेनतदनुग्राहकत्वात्, ज्योतिरधिकरणउदाहरिष्यमाणंयद्वज्रश्रुत्यविरुद्धं

गु० ननुचवर्जनाद्वज्रमुच्यतइत्यादिस्मृतेर्वज्रश्रुत्यपेक्षयादुर्बलत्वान्नश्रुतेरूढित्यागापादकत्वमित्यतआह ॥ **यद्यपीति** ॥ बाध्यबाधकभावे नप्राबल्यदौर्बल्यमात्रंप्रयोजकं । किंतुविरोधविशिष्टं । प्रकृतेचविरोधाभावान्नबाध्यबाधकभावइत्याह ॥ **तथापीति** ॥ ज्योतिरधिकरणे ज्योतिरुपक्रमादित्यधिकरणे । उदाहरिष्यमाणं एषइमंलोकमभ्यार्चदित्युदाहरिष्यमाणं । एवंवज्रशब्दस्यान्यत्ररूढिमभ्युपेत्यस्मृत्युक्तंयोगमंगीकृत्यवज्रश्रुतिविरोधःपरिहृतः । इदानींचवज्रशब्दस्यभगवत्येवरूढ

प्र० वज्रमितिसिद्धेर्यौगिकार्थस्यापिश्रुत्यर्थत्वेनतद्विरुद्धप्रतिपादनाभावादित्यर्थः ॥ **श्रुत्यंतरमिति** ॥ “एषइमंलोकमभ्यार्च”दित्युपक्रम्य “तावाएतास्सर्वाऋचस्सर्वेवेदास्सर्वेघोषाएकैवव्याहृतिः प्राणएवे”तिसर्वशब्दानांयोगवृत्त्याभगवत्परत्वप्रतिपादकंश्रुत्यंतरं । तन्मूलत्वसंभवादित्यर्थः ॥ **बाधिकेति** ॥ स्मृतिरित्यन्वयः । ननुकर्मनिर्णयटीकायां “रूढियोगौविनाकश्चिन्नैवार्थोवेदगोभवे”दित्यस्य “नकेवलंरूढः । नापिकेवलंयौगिकोस्तीत्यर्थ”इतीतरेतरद्वंद्वमाश्रित्यरूढियोगरूपवृत्तिद्वयसमुच्चयपरत्वेनव्याख्यातत्वात्कथंकेवलोयौगिकोवैदिकवज्रशब्दोव्याख्यायतइत्यतष्टीकोक्तमपिसमाधिमाह ॥ **नचेति** ॥ “विद्वद्रूढिर्वैदिकास्यात्सायोगादेवलभ्यत”इत्युक्तेस्स्मृतौयोगोक्त्यैवसालब्धा । “आयुधानामहंवज्रं वज्रंप्रहरणोत्तम”मित्यादिप्रयोगाच्चेतिभावः ॥ **स्मृत्यादेरिति** ॥ यत्रवाचनिकोयोगस्तत्रैवरूढित्यागेनान्यार्थकल्पना । नान्यत्र । येनाव्यवस्थास्यादित्यर्थः । एतेनोपनिषद्भाष्यादिषुस्मार्तयोगेनश्रुत्यर्थनिर्णयोपिसमर्थितोद्रष्टव्यः । “नचोद्यतत्वलिंगविरोधः । उद्यमित्वार्थतयोपपत्ते”रितिटीकांविवृण्वँल्लिंगमपिसावकाशयति ॥ **उद्यतत्वंचेति** ॥ **यतेरिति** ॥ नेदंयमउपरमइत्यस्यरूपं । किंतु उत्पूर्व

श्रुत्यंतरंतन्मूलत्वसंभवाच्चवज्रश्रुतिबाधिका । नचेहरूढित्यागोपि । विद्वद्रूढेरपिसत्त्वात् । एतेनाव्यवस्थानिरस्ता । स्मृत्यादेरेवव्यवस्थापकत्वात् । उद्यतत्वंचप्रयत्नवत्त्वं । उत्पूर्वस्ययतेस्तदर्थत्वात् ।

गु०त्वात्तत्परत्वेनरूढित्यागोपीत्याह ॥ **नचेति** ॥ नापीत्यर्थः । ननुयदिक्कृप्तरूढिपरित्यागेनयोगकल्पना तर्हियस्यकस्यापिशब्दस्ययत्रक्वचनार्थेयोगस्यसुवचत्वादर्थव्यवस्थानस्यात् । तथाचकंपकत्वादिब्रह्मलिंगान्यपिकथंचिदिंद्रायुधेस्युरित्यतआह ॥ **एतेनेति** ॥ एतेनेत्यनेनपरामृष्टंहेतुमाह ॥ **स्मृत्यादेरिति** ॥ ननूद्यतत्वंनब्रह्मणियुक्तं । तस्यलोके उद्यतायुधदोर्दंडाइतिस्मृतौ तेनेंद्रोवज्रमुदयच्छदित्यादिश्रुतौचायुधेप्रसिद्धत्वादित्यतआह ॥ **उद्यतत्वंचेति** ॥ नन्वेवंवज्रशब्दस्यभगव

SGDF

प्र०स्ययतीप्रयत्नइत्यस्यपचाद्यचिकृतेरूपमित्यर्थः । कचिदुत्पूर्वस्ययमेरितिपाठः । तत्रयमेःकर्तरिनिष्ठाप्रत्यये "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपोझलिक्किती"तिमकारलोपेरूपं । अस्मिन्पक्षउद्यमित्वमेवेतिव्याख्यानंन्यायविवरणस्थमनुकूलितंभवति । प्रयत्नवतिरूढिंचाह ॥ लोकेति ॥ "ननुगुरवइदानीमुद्यताहिप्रवक्तु"मित्यादावितिभावः । टीकोक्तेर्मूलमाह ॥ तदुक्तमिति ॥ श्रुतिसावकाशत्वं "वर्जनाद्वज्रमुच्यत"इतिभाष्यएवविवृतमितिलिंगसावकाशत्वमेवव्यनक्ति ॥ उद्यमित्वमेवेति ॥ योगरूढिभ्यांविष्णौवज्रशब्देव्याख्या

लोकप्रयोगाच्च । तस्माच्छ्रुतिलिंगेसावकाशे । तदुक्तंन्यायविवरणे "वज्रशब्दस्योद्यतत्वस्यचविष्णावेवावकाशः । उद्यमित्वमेवोद्यतत्व"मिति । यत्तुकाठकभाष्ये "वज्रवद्भयदंचैवस्वधर्मस्यातिलंघन"इतिवज्रशब्दस्यगौणत्वमुक्तं तत्तावतापितद्वाक्यस्यब्रह्मपरत्वसिद्धेः । इहतुसमन्वयसूत्रप्रतिज्ञातमुख्यार्थत्वाययोगएवोक्तइति ॥ अन्येतु ॥ प्राणएजतीतिवाक्यस्थप्राणःप्रसिद्धेर्वायुरितिप्राप्तेब्रह्मैवेतिसिद्धांतइत्याहुः । तन्न ।

प्र० यमानेभाष्यांतरविरोधमाशंक्याह ॥ यत्त्विति ॥ मुख्येति ॥ संशब्दसूचितेतिभावः । सूत्रार्थस्तु कंपनादितिहेतूक्त्यैवविषयविशेषस्य सूचनात्सूचितवज्रं विष्णुरेव सर्वचेष्टकत्वश्रवणादितिस्पष्टः । अत्र "यएतद्विदु"रितिविषयवाक्यएवश्रुतस्यमुक्तिहेतुवित्तिविषयत्वस्यहेतुत्वेनानुपादानंतुवज्रश्रुत्युद्यतत्वलिंगाभ्यांनिरवकाशाभ्यांपूर्वपक्षेतस्याक्षिप्तत्वद्योतनायवा कंपकत्वस्यप्राथमिकत्वाद्वा वाक्यविशेषद्योतकत्वाद्वेति ॥ अन्येत्विति ॥ "यदिदंकिंचजगत्सर्वंप्राणएजतिनिस्सृत"मित्यत्रसप्तम्यंतःप्राणशब्दःकिंवायुरुतब्रह्मेतिसंशये पंचवृत्तिराध्यासिकोवायुरेव । ॥ ७१६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्रप्राणशब्दस्यप्रसिद्धेः । वज्रशब्दस्यचाशनौप्रसिद्धत्वादशनेश्चधूमज्योतिस्सलिलसंवलितबाह्यवायुरूपत्वाद्बाह्यवायुर्वात्रप्राणशब्दार्थः । अमृतत्वहेतुवित्तिविषयत्वंचापेक्षिकत्वादिनाकथंचिन्नेयमितिप्राणवज्रश्रुत्यनुरोधाद्वायुरेव । "तदेवशुक्रंतद्ब्रह्मे"ति "भयादस्याग्निस्तपती"ति चप्राचीनपराचीनवचनसंदष्टतयाप्रतीयमानंतदेकवाक्यत्वं "अन्यत्रधर्मादन्यत्राधर्मा"दितिब्रह्मप्रकरणंचप्राणवज्रश्रुतिबलाद्बाध्यतइतिप्राप्ते सवायुकस्यजगतः "एजती"तिकंपनात् कंपयितृत्वश्रवणात् अमृतत्वहेतुज्ञानविषयत्वाच्चतयोर्ब्रह्मलिंगत्वाद्ब्रह्मैवप्राणः । वज्रशब्दश्चशासकत्वे नभयहेतौब्रह्मणिगौणवृत्त्योपपन्नइतिनपूर्वापरवाक्यैकवाक्यत्वप्रकरणेबाधनीये । अतएव "जगत्सर्व"मितिसर्वशब्दसंकोचोप्ययुक्तइतिसि

प्रागनुक्तसमन्वयउद्यतत्वरूपपूर्वपक्षबीजरूपयुक्तेचवज्रशब्देसत्यसकृदुक्तसमन्वयस्यबीजशून्यस्य चप्राणशब्दस्यसमन्वयोक्त्ययोगात्। किंचब्रह्मलिंगत्वेनसूत्रोक्तंकंपकत्वंत्वदुक्तममृतत्वहेतुवेदनत्वं चभयंकरत्वेनोक्ते "यएतद्विदु"रितिनपुंसकलिंगनिर्दिष्टेचवज्रएवेतितत्रैवाचिंतायुक्ता। केचित्तु ॥

प्र०द्धांतः । सूत्रार्थस्तु "शब्दादेवे"तिसूत्रान्मंडूकप्लुत्याशब्दात्प्रमितइतिपदद्वयमनुकृष्यते । तथाच कंपनात् जगत्सर्वमेजतीतिकृत्स्नकंपयितृत्वश्रवणात् । सर्वशब्दादत्रपरमात्मैवप्रमितइति । विषयानौचित्येनदूषयति ॥ **प्रागिति** ॥ **असकृदुक्तेति** ॥ तथाचब्रह्मण्यपिप्रसिद्धिरस्तीतिप्राणवज्रश्रुतिबलाद्वाक्यंप्रकरणंचभङ्क्त्वावायुःपंचवृत्तिराध्यात्मिकोबाह्यवायुश्चात्रप्रतिपाद्यतइतिभामत्युक्तिरयुक्तेतिभावः । प्राणशब्दस्यविषयत्वंनिरस्यवज्रशब्देतुतद्युक्तमित्याह ॥ **किंचेति** ॥ सूत्रार्थोप्ययुक्तः । हेतूक्त्यासमन्वीयमानस्योक्तदिशासद्बीजस्यशब्दविशेषस्याध्याहारेण वज्रं ब्रह्म कंपनादित्यन्वयसंभवेक्लेशायोगात् । सर्वशब्दस्यसाक्षाद्ब्रह्मप्रापकत्वाभावेनास्वारस्याच्चेतिभावः ॥ **केचित्त्विति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० श्रुतप्रकाशोक्तमनुवदति ॥ शब्दादेवेति ॥ नन्वेवंपरमात्मपरत्वस्यप्रागेवनिश्चयात्सूत्रवैयर्थ्यमित्याशंक्याह ॥ हेत्वंतरमिति ॥ प्रपंचेति ॥ तथाचतद्वदेव "यदिदंकिंचे"तिवाक्यंतन्मध्यस्थमप्यन्यपरमितिपूर्वपक्षोयुक्तइतिभावः ॥ चशब्दस्येति ॥ ननुसूत्रेचशब्दाभावोऽनंतर पूर्वाधिकरणशेषत्वभ्रमानुदयार्थः । नत्वधिकरणांतरत्वादिति श्रुतप्रकाशएवसमाधानमुक्तमितिचेन्न । चशब्दाभावेपिव्यवहितशेषत्वापेक्षयास

"शब्दादेवप्रमित"इत्यत्रब्रह्मपरत्वेननिर्णीतयोः "अंगुष्ठमात्रःपुरुषोमध्यआत्मनि तिष्ठति । अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनाना"मितिवाक्ययोर्मध्यस्थे "यदिदं किंचे"तिवाक्येऽन्यपरत्वशंकाऽयोगान्नेदंसूत्रमधिकरणांतरं । किंत्वंगुष्ठमात्रस्य ब्रह्मत्वेहेत्वंतरंसत् "शब्दादेवप्रमित"इत्येतदधिकरणशेषइत्याहुः । तन्न । श्रुत्यादि नाप्रकरणबाधेनपूर्वपक्षोदयस्योक्तत्वात् । अंगुष्ठवाक्यद्वयमध्यएव "ऊर्ध्वमूलोर्वा क्शाखएषोश्वत्थःसनातन"इतिप्रपंचवाक्यदर्शनाच्च । "शब्दादेवे"त्येतदानंतर्यस्य चशब्दस्यचप्रसंगाच्च । सूत्रेहेतुमात्रोक्तावपि "अभिव्यक्ते"रित्यादाविवयोग्यस्य

प्र० न्निहितशेषत्वस्यैवप्रथमप्रतीतेः । अर्थानन्वयादनंतरशेषत्वाभावेचावश्यकचशब्दप्रयोगेपिततएवतच्छेषत्वप्रतीतेरभावोपपत्तेरितिभावः । ननुसूत्रेसमन्वीयमानशब्दानुक्तेःकथमधिकरणांतरत्वमित्यतआह ॥ सूत्रइति ॥ यथात्वन्मतेऽभिव्यक्तेरुपासकानामभिव्यक्त्यर्थंप्रादेशमा

प्र० त्रत्वंपरमात्मनइतिसाध्यमध्याह्रियते तथात्रापिवज्रंब्रह्मेतिसाध्यमध्याहार्यमित्यर्थः ॥ साध्यस्येति ॥ परमतरीत्यासाध्यधर्मविशिष्टस्यप क्षस्येत्यर्थः । स्वमतेतुसाध्यबोधकस्यतत्पदस्यसर्वत्रानुवर्तनाद्वज्रमितिपक्षस्याध्याहारइतिध्येयं । एतेनभामतीरीतिमनुसरतःकस्यचिच्छैवस्य मतमपिप्रत्युक्तंबोध्यं । "नभस्वतोपिसर्वाःस्युश्चेष्टाभगवतोहरे"रिति "वर्जनाद्वज्र"मित्यादिस्मृतिविरोधेनशिवइतिसिद्धांतस्यायुक्तत्वाच्चेति ॥ ७ ॥ कंपनाधिकरणं ॥ १० ॥

॥ ॐज्योतिर्दर्शनात्ॐ ॥ अस्यनामपादेनिवेशशंकांनिरस्यन् "जीवेशयोर्ज्ञानरूपत्वेनहृदयाहितत्वेनचसाधारणस्ये"त्यादिटीकोक्तांपादसं गतिंसमर्थयते ॥ ज्योतिरिति ॥ अह्न्यादाविति ॥ अन्यत्रप्रसिद्धत्वंनामनब्रह्मणोन्यत्रयत्रकचित्प्रसिद्धत्वं । किंतुपूर्वपक्ष्यभिमतेऽन्यत्र । नचाग्निसूर्यादिरत्रपूर्वपक्ष्यभिमतः । प्रबलतत्प्रापकाभावात् । अह्न्यादित्यादिज्योतिषामस्तमयमुक्त्वा "आत्मैवास्यज्योति"रित्याद्युक्तेश्च ।

साध्यस्याध्याहारसंभवाच्च ॥ टीकाक्षरार्थस्तुस्पष्टः ॥ ७ ॥ कंपनाधिकरणं ॥ १० ॥

॥ ॐज्योतिर्दर्शनात्ॐ ॥ ज्योतिश्शब्दस्याह्न्यादौलोकतःप्रसिद्धत्वेपि

गु० तिमुख्यत्वोपपादनेकाठकभाष्यविरोधः । तत्रवज्रशब्दस्यभगवतिगौणत्वोक्तेरित्यतआह ॥ यत्त्विति ॥ योगएवेत्यनेननविद्वद्रूढिनिरासः । किंतुगौणत्वस्येति बोध्यं ॥ ७ ॥ कंपनाधिकरणं ॥ १० ॥

॥ ॐज्योतिर्दर्शनात्ॐ ॥ टीकोक्तंज्ञानरूपत्वेनज्योतिश्शब्दस्यसाधारण्यमयुक्तं । तस्यलोकतोऽह्न्यादौप्रसिद्धत्वेनान्यत्रप्रसिद्धत्वात् । अन्यथाज्योतिश्चरणाभि धानादित्यत्रापिज्योतिश्शब्दस्योभयत्रप्रसिद्धत्वंस्यादित्यतष्टीकोक्तंज्ञानरूपत्वेनसाधारण्यमुपपादयति ॥ ज्योतिश्शब्दस्येति ॥ अतएवेति ॥ अंतर्ज्योतिरित्य

SGDF Sri Gargeshwari Digital Foundation

प्र० प्रसिद्धजीवलिंगबाहुल्याच्च । येननामपादेनिवेशस्स्यादितिभावः ॥ **संशयेति** ॥ पूर्वोत्तरपक्ष्यभिमतयोरित्यर्थः । ननुजीवेशयोर्ज्ञानरूपत्वेपिकुतोज्योतिर्नाम्नस्साधारण्यमित्यतष्टीकाभिप्रायमाह ॥ **प्रवृत्तीति** ॥ ननुतमोविरोधित्वंज्योतिष्ट्वं । तच्चतमसासहस्थितेव्याप्तेहरावयुक्तमित्यतउक्तं **प्रकाशत्वस्येति** ॥ ज्ञानत्वरूपस्येत्यर्थः । इदमेवात्रप्रकरणेभिमतंज्योतिष्ट्वं । नत्वन्यत् । अतःक्वाप्येवंरूपसाधारण्यस्यमूलकृदनुक्तत्वेपिटीकायामुक्तिर्भाष्योक्तविषयवाक्यमूलेतिभावेनाह ॥ **यद्यपीत्यादिना** ॥ ज्ञानत्वरूपप्रकाशत्वस्यवृत्तिरूपज्ञानेसत्त्वेपिपूर्वत्रमु

संशयकोव्योर्जीवेशयोर्ज्ञानरूपत्वेनप्रवृत्तिनिमित्तप्रकाशत्वस्यसाम्यादुभयत्रप्रसिद्धता । यद्यपिज्ञानकारणप्रश्नोत्तरे ‘‘आदित्येनैवायंज्योतिषास्ते वाचैवायंज्योतिषास्त’’इत्यादौज्योतिश्शब्दोनज्ञानपरः । तथापि ‘‘कतमआत्मे’’त्यात्मप्रश्नोत्तरे ‘‘योयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योति’’रित्यत्रतत्परः । अतएवभाष्ये ‘‘योय’’मित्यादिवाक्यमेवोदाहृतं । तस्मात्तादसंगतिः ।

प्र० ख्यप्रेरकत्वस्यप्राणेशमात्रसाधारण्यमिवानादिनित्येस्वरूपज्ञानेमुख्यंप्रकाशत्वमितिवा अन्यसाधारण्येप्यदोषइतिवातात्पर्यंबोध्यं । पूर्वत्रेवप्रयोगसाम्येनतथात्वंतुनोक्तं । संप्रतिपन्नप्रयोगाभावात् । प्रयोगान्वेषणापेक्षयास्यांतरंगत्वाच्च । पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यांतथात्वंतुनसंभवति । पूर्वोक्तेराक्षेपात् । अन्यत्रजीवेप्रसिद्ध्यभावाच्च । उत्तरनयेतुपूर्वोक्तेरनाक्षेपात्तथात्वंयुक्तमितिभावः । एवंपादसंगतिपरटीकांविवृत्येदानीं ‘‘ज्योतिश्चरणाभिधाना’’दित्यादिटीकाफलोक्तिपरेतिभावेन ‘‘ज्योतिर्विष्णुश्चेदुभयलोकसंचरणलिंगविरोध’’इतिटीकयासूचितामापवा ॥ ७१८ ॥

SGDF
Sri Gangeshwar Digital Foundation

प्र० दिकीं संगतिमाह ॥ **पूर्वसिद्धांतेति** ॥ “बहुतादृक्त्व”मितिन्यायविवरणमनुरुध्य “इत्यादिजीवलिंगाच्चे”तिटीकायांनिरवकाशबहुजीव लिंगोक्त्यासूचितांसोपानारोहणक्रमरूपसंगतिमाह ॥ **यद्वेति** ॥ मध्येऽधिकारतद्धानिविचारौप्रासंगिकावितिभावः । विषयसंशयटीकां व्यनक्ति ॥ **तत्रेति** ॥ एवंसंगतौसत्यामित्यर्थः । यद्वा “आदित्येनैवज्योतिषास्त”इत्यादिनाश्रुतज्योतिश्शब्देषुमध्यइत्यर्थः । एतेन “त ज्योति”रितिटीकास्थतच्छब्दार्थोविवृतः । वाजसनेयेषष्ठेऽध्यायेज्योतिर्ब्राह्मणे “याज्ञवल्क्यकिंज्योतिरयंपुरुष”इत्यादिजनकप्रश्नंप्रत्यादित्य चंद्राग्निवाग्रूपेषुज्योतिष्षुपूर्वपूर्वास्तमयउत्तरोत्तरंपुरुषस्यज्ञानकारणशब्दितंज्योतिरभिधाय “अस्तमितआदित्येयाज्ञवल्क्यचंद्रमस्यस्तमितेशांते ऽग्नौशांतायांवाचिकिंज्योतिरेवायंपुरुष”इतिप्रश्ने “आत्मैवास्यज्योतिर्भवतीत्यात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येती”त्यात्मनोज्यो तिष्ट्वमुक्त्वोपपाद्यच “कतमआत्मे”तिपुनःप्रश्नेकृतेपरिहरतियाज्ञवल्क्यः “योयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषस्ससमानस्सन्नुभौलोका वनुसंचरतिध्यायतीवलेलायतीवसहिस्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्योरूपाणि । सवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभि स्संसृज्यतेसउत्क्रामन्म्रियमाणःपाप्मनोविजहाति । तस्यवाएतस्यपुरुषस्यद्वेएवस्थानेभवत इदंचपरलोकस्थानंचसंध्यंतृतीयंस्वप्नस्थानं तस्मि न्संध्येस्थानेतिष्ठन्नेतेउभेस्थानेपश्यतीदंचपरलोकस्थानंच । अथयथाक्रमोयंपरलोकस्थानेभवति तमतिक्रममाक्रम्योभयान्पाप्मनआनंदांश्चप

पूर्वसिद्धांतन्यायेनपूर्वपक्षप्रवृत्तेरनंतरसंगतिः । यद्वा “शब्दादेवे”त्यत्रप्राणव्यवस्थापकत्वादिलिंगमात्रात्पूर्वः पक्षः । “कंपना”दित्यत्रतुवज्रश्रुत्युद्यतत्वलिंगाभ्यांसः । अत्रतुनिरवकाशबहुलिंगैःसइत्यवांतरसंगतिः । तत्र

गु० त्रज्योतिश्शब्दस्यज्ञानपरतयाभाष्यकृदभिप्रेतत्वादेवेत्यर्थः ॥ **पूर्वसिद्धांतन्यायेनेति** ॥ निरवकाशलिंगबलादेवविष्णुरेवज्योतिरित्यादिश्रुतिसिद्धार्थत्यागइतिन्या

SGDF
Sri Gargeshwari Digital Foundation

प्र०श्यतिसयत्रप्रस्वपिति । अस्यलोकस्यसर्वावतोमात्रामुपादायस्वयंविहृत्यस्वयंनिर्मायस्वेनभासास्वेनज्योतिषाप्रस्वपित्यत्रायंपुरुषःस्वयंज्योतिर्भवती"त्युक्त्वा "नतत्ररथा"इत्यादिनास्वाप्नपदार्थसृष्टिंचाभिधाय "तदेतेश्लोका"इत्यादिनोक्तार्थेश्लोकानुदाहृत्यांते "यानिह्येवजाग्रत्पश्यति तानिसुप्तइत्यत्रायंपुरुषस्स्वयंज्योति"रित्याद्याह । तत्रबीजयुक्तंविषयमाह ॥ हृदीति ॥ आत्मप्रश्नंप्रतिपरिहारवाक्यस्थमित्यर्थः । वाक्यांतरस्थंतुविषयइत्येतन्निरसिष्यतइतिभावः । ततः कतमइतिवाक्यात् ॥ आत्मेति ॥ कतमइत्यात्मप्रश्नस्ययदुत्तरंतदुपसंहारस्थमित्यर्थः ॥

"हृद्यंतर्ज्योति"रित्यात्मप्रश्नोत्तरस्थंज्योतिःकिंजीवःकिंवाब्रह्मेतिचिंता । तदर्थं "कतमआत्मे"त्यात्मप्रश्नेततःपूर्वस्मिन् "आत्मैवास्यज्योति"रितिवाक्येचश्रुतआत्मशब्दःकिमस्येतिनिर्दिष्टजीवस्वरूपपरःकिंवापरमात्मपरइति । तदर्थं "अत्रायंपुरुषःस्वयंज्योति"रित्यात्मप्रश्नोत्तरोपसंहारस्थपुरुषादिशब्दाःकिं "किंज्योतिरयंपुरुष"इतिज्ञानप्रश्नोपक्रमपुरुषादिशब्देनैकार्थाउतभिन्नार्थाइति । तदर्थमुपसंहारस्थपुरुषादिशब्दानांकिमुपक्रमप्रकृतपरत्वायार्थंब्रह्मरूपमुख्यार्थत्यागउतमुख्यार्थत्वायप्रकृतपरत्वादित्यागइति । यद्याद्यस्तदाजीवपरोपक्रमोपसंहारमध्यस्थात्मशब्दस्यजीवपरत्वा

प्र० ज्ञानेति ॥ ज्ञानकारणप्रश्नोपक्रमस्थेत्यर्थः ॥ उपक्रमेति ॥ उपक्रमेप्रकृतंयज्जीवरूपंतत्परत्वार्थमित्यर्थः । एतेनचिंताद्वयंसूचितं । भिन्नार्थाइतिचिंतानंतरं किमुपसंहारस्थाःपुरुषादिशब्दा उपक्रमप्रकृतपराउतब्रह्मपराः । तदर्थंप्रकृतपरत्वानुग्रहायमुख्यार्थत्यागउतमुख्यार्थानुग्रहायप्रकृतपरत्वत्यागइति चिंताचतुष्टयस्यफलफलिभावमस्फुटत्वाद्व्यनक्ति ॥ यद्याद्यइति ॥ उपक्रमोपसंहारयोरेकार्थत्वपक्षइत्यर्थः । ॥ ७१९ ॥

प्र०ननूपक्रमादिवशादवगतमप्येकवाक्यत्वंश्रुतिबलाद्भंजनीयमित्यतआह ॥ जायमानत्वेति ॥ तत्तुनिरवकाशमितिभावः । ननुवाक्येनकथंलिंगबाधइत्यतस्सावकाशत्वादितिभावेनाह ॥ अंतर्भावितेति ॥ वैपरीत्यंकिंनस्यादित्यतआह ॥ ज्योतिरिति ॥ अंतिमचिंतास्थपूर्वकोटिंविवृण्वन् "जीवएवेदंज्योति"रित्यादिपूर्वपक्षटीकांव्यनक्ति ॥ पूर्वत्रेति ॥ एतेनपूर्वसिद्धांतन्यायेनेत्येतद्विवृतं ॥ प्रसिद्धेति ॥ ज्योति

ज्जायमानत्वादिलिंगाच्चात्मप्रश्नोत्तरस्थंज्योतिर्जीवएव । यदितुद्वितीयस्तदोपसंहारानुसारेणात्मशब्दस्यमुख्यार्थभूतपरमात्मपरत्वाद्ब्रह्मपरवाक्यमध्यस्थानांजायमानादिशब्दानामंतर्भावितण्यंतत्वेनब्रह्मण्यपिसंभवाज्ज्योतिश्शब्दस्यब्रह्मणिमुख्यत्वाच्चज्योतिर्ब्रह्मैव ॥ पूर्वपक्षस्तु ॥ पूर्वत्रयथानिरवकाशलिंगबलाद्व्रजश्रुतेर्लोकप्रसिद्धार्थत्यागस्तथेहापि "ससमानःसन्नुभौलोकावनुसंचरति । सवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभिःसंसृज्यते । सउत्क्राम न्म्रियमाणःपाप्मनोविजहाती"त्यादिजीवलिंगबलादेव "विष्णुरेवज्योति"रित्यादिश्रुतिप्रसिद्धार्थत्यागः । यद्यपिजायमानत्वंद्युभ्वाद्यधिकरणन्यायेन उत्क्रमणंचभूमाधिकरणन्यायेनसावकाशं । तथापिम्रियमाणत्वादिकंनिरवकाशं ।

प्र०रादिशब्दस्येतिशेषः । विष्णवर्थत्वत्यागइत्यर्थः । केनप्रसिद्धेत्यतउक्तं विष्णुरेवेति ॥ एतेन "विष्णुरेवज्योति"रितिश्रुत्याज्योतिश्श्रुतेर्विष्णौ प्रसिद्धेःकथंजीवइतिटीकोक्तिरितिप्रत्युक्तं । पूर्वन्यायेननिरवकाशलिंगबलेनश्रुतिबाधोपपत्तेरिति । टीकोक्तलिंगानिनबाधकानीत्याशंक्याह ॥ यद्यपीति ॥ म्रियमाणत्वेति ॥ तस्यदेहवियोगरूपत्वेननित्यदेहेभगवत्ययोगादितिभावः । ननुभाष्येलोकसंचरणस्यजीवलिंगत्वोक्त्या

SGDF Sri Gargeshwari Digital Foundation

प्र० भगवत्यपरिच्छिन्नेक्रियामात्रमपिनेतिप्रतीयतइत्युत्क्रमणमपिनिरवकाशमितिगम्यतइत्यतआह ॥ भाष्यइति ॥ टीकायासावकाशस्यापि जायमानत्वादेर्जीवलिंगतयोक्तिस्तुनिरवकाशजीवलिंगांतरसाहचर्याज्जायमानत्वादिकमपीहजीवेप्रसिद्धमेवग्राह्यं । नतुविष्णुधर्मभूतमित्यभिप्रायेतिभावः । "आदित्यादिज्योतिष्ट्व"मितिन्यायविवरणैकदेशप्रपंचनपरां "किंचे"त्यादिटीकां "नतत्रसूर्योभातीत्यादे"रित्यंतांविवृणोति ॥

भाष्यउभयलोकसंचरणोक्तिस्तुकर्माधीनलोकद्वयसंचरणंनब्रह्मणियुक्तमित्यभिप्राया । नतुसंचरणमेवायुक्तमित्यभिप्राया । अतएवोक्तंटीकायां "जीवस्यहिकर्मवशादुभयलोकसंचरणंयुक्त"मिति । किंच "किंज्योतिरयंपुरुष"इतिप्रश्ने "आदित्यज्योतिरादित्येनैवायंज्योतिषास्त"इत्यादिनायस्यजागरणआदित्यादिज्योतिष्ट्वमुक्तंसतावज्जीवः । नह्यादित्यादिज्योतिष्ट्वंविष्णोर्युक्तं । "नतत्रसूर्योभाती"त्यादेः । तदुक्तंन्यायविवरणे"आदित्यादिज्योतिष्ट्वमुभयलोकसंचरणमादित्येनैवायंज्योतिषास्तइत्यवधारणमित्यादीनांपरमात्मन्यवकाशाभाव"इति । तस्यैवचजीवस्य"आत्मैवास्यज्योति"रितिवाक्येस्वप्नादौस्वप्रकाशत्वरूपमात्मज्योतिष्ट्वमुक्तं। अस्येतीदंशब्दस्यप्रकृतजीवपरत्वात्। आत्मशब्दस्यचस्वरूपार्थत्वात्। ज्योतिश्शब्दस्यचज्ञानार्थत्वात् । अस्मिंश्चात्मनि "कतमआत्मे"तिपृष्ट उच्यमानमिदंज्योतिर्जीवएव । अन्यथाप्रश्नोत्तरयोर्वैयधिकरण्यापातात् ।

प्र० किंचेति ॥ टीकोक्तेर्मूलमाह ॥ तदुक्तमिति ॥ इत्यादीनामित्यादिपदेनप्रागुक्तजायमानत्वादिलिंगजातंगृह्यते । सर्वेषामवकाशाभावउपपादितः । अस्तुसजीवः । ततःकिमित्यतआह ॥ तस्यैवचेति ॥ तत्कुतइत्यतआह ॥ अस्येति ॥ अस्मिन्निति ॥ स्वप्रकाशत्वेनोक्तइत्यर्थः । इदं हृद्यंतर्ज्योतिरुच्यमानं । एतेनद्वितीयचिंतास्थपूर्वपक्षकोटिर्विवृता । "नचवाच्यंयस्यादित्यादिज्योतिष्ट्वमुक्त"मित्यादिटीकां ॥७२०॥

SGDF Sri Gargeshwari Digital Foundation

प्र० व्यनक्ति ॥ नन्विति ॥ टीकायामेतच्छंकानिवर्तकत्वेनन्यायविवरणोक्तावधारणंयोजयित्वा "अयंपुरुषःस्वयंज्योतिर्भवतीत्यस्यैवार्थस्यप्र त्यभिज्ञानाच्चे"तियुक्त्यंतरंचोक्तं । तत्रयुक्त्यंतरोक्तेरवधारणंनातीवशंकानिवर्तनेक्षममितिहृदयमितिभावेनटीकोक्तावधारणयोजनांविवृण्वन्न

ननुयस्यादित्यादिज्योतिष्ट्वमुक्तं सजीवएवास्तु । आत्मैवास्येतिवाक्यइदंशब्दोपिजीवपरएवास्तु । आत्मशब्दस्तु "गौणश्चेन्नात्मशब्दा"दित्यादिन्यायेनपरमात्मपरः । ज्योतिश्शब्दश्च "वाचैवायंज्योतिषास्त"इत्यादिपूर्ववाक्यइव ज्ञानहेतुपरः । तथाचास्यजीवस्यपरमात्माज्ञानहेतुरित्युक्तेसएवपरमात्मा "कतमआत्मे"तिपृष्टइतिनवैयधिकरण्यं । नचवाच्यंब्रह्मणोजागरणेपिजीवज्ञानहेतुत्वेनतदादित्यैनैवेत्याद्यवधारणं, स्वप्नादौविशिष्यब्रह्मणोज्ञानहेतुत्वोक्तिश्चा युक्तेति । जीवपक्षेपिसाम्यात् । जीवस्यापिस्वगतज्ञानहेतुत्वेनावधारणायोगात् । जागरणेपिस्वप्रकाशत्वेनवि शिष्योक्त्ययोगाच्च । तस्माद्ब्रह्मैवज्योतिरिरितिचेदुच्यते । किंज्योतिरयंपुरुषइतिज्ञानसाधनप्रश्नोपक्रमस्थस्यजीव स्यात्र "अयंपुरुषःस्वयंज्योति"रित्यात्मप्रश्नोत्तरोपसंहारेपुरुषादिशब्दैःप्रत्यभिज्ञानात्तन्मध्यस्थं "आत्मैवास्यज्योति" रित्येतदपिजीवपरमेव । अतएवोपसंहारवाक्यस्यायंपुरुषःपरमात्माऽस्यजीवस्यस्वयमेवज्योतिरित्यर्थइतिनिरस्तं ।

प्र० स्याक्षमतामाह ॥ नचवाच्यमिति ॥ अयुक्तेतीत्यनेनान्वयः । टीकोक्तांप्रत्यभिज्ञानयुक्तिंव्यनक्ति ॥ किंज्योतिरिति ॥ न्यायविवरणे त्वादिपदोक्तप्रत्यभिज्ञानादिनिरवकाशलिंगसत्त्वादभ्युच्चयत्वेनावधारणंयुक्तमितिभावः । एतेनतृतीयचिंतास्थपूर्वपक्षकोटिर्विवृता । अतए

SGDF
Sri Gargeshwari Digital Foundation

प्र० वेत्युक्तमेवाह ॥ पुरुषादीति ॥ तैः पुरुषादिशब्दैः प्रकृतोयोजीवस्तत्त्यागेनेत्यर्थः । सापेक्षत्वात्समासः । देवदत्तस्यगुरुकुलमितियथा ।
युक्त्यंतरंचस्वयमाह ॥ किंचेति ॥ अतीतेति ॥ भाष्यादिकमुपलक्षणमितिभावः ॥ श्रुत्यादौज्योतिश्शब्दस्यविष्ण्वेकवाचित्वोक्तेर्मु
ख्यार्थत्यागेबाधकाभावाज्जीवलिंगानांचब्रह्मपरोपक्रमोपसंहारप्रतीतैकवाक्यमध्यपतिततयाब्रह्मण्येवकथंचिन्नेयत्वादिदंज्योतिर्विष्णुरेवेतिभावे

पुरुषादिशब्दानांतैःप्रकृतजीवपरत्वत्यागेनतैरप्रकृतब्रह्मपरत्वायोगात् । अस्येत्यस्याध्याहारापाताच्च ।
किंच उपसंहारस्थस्वयंशाब्दानुसारात् "आत्मैवास्ये"त्यत्राप्यात्मशब्दःस्वरूपपरः । नतुब्रह्मपरः । त
स्मादात्मप्रश्नोत्तरेअपिजीवविषयेएवेतिजीवएवेदंज्योतिः । यद्यप्यत्रानंदमयाधिकरणेदहराधिकरणेचब्रह्म
परत्वेननिर्णीतंविज्ञानमयत्वंहृद्गतत्वंचास्ति तथापिपूर्वपक्षेऽतीतज्योतिरधिकरणस्येवतयोरप्याक्षेपात्पूर्वपक्षो
दयः ॥ सिद्धांतस्तु ॥ "विष्णुरेवज्योति"रितिभाष्योदाहृतश्रुतावुवधारणात्, "नारायणपरोज्योतिः परं
ज्योतिरुपसंपद्य तंदेवाज्योतिषांज्योति"रित्यादिश्रुतिषुपरत्वादिविशेषणाच्चज्योतिश्शब्दोविष्णावेवमुख्यः ।

प्र० न "विष्णुरेवेदंज्योति"रित्यादिसिद्धांतटीकांविवृण्वन्सिद्धांतयति ॥ सिद्धांतस्त्विति ॥ अवधारणादिति ॥ यद्यसौभगवतिमुख्योन
स्यात्तदाऽन्ययोगव्यवच्छेदकावधारणंनस्यात् । आदित्यादौज्योतिश्शब्दवृत्तेर्दर्शनात् । मुख्यत्वेत्वन्यत्रामुख्यत्वाभिप्रायेणविष्णुरेवज्योतिरि
त्यवधारणंसंगच्छतइत्यर्थः । मुख्यत्वेयुक्त्यंतरमाह ॥ नारायणेति ॥ परत्वादीति ॥ ज्योतिषांज्योतिष्ट्वविशेषणाच्चेत्यादिपदार्थः । ननूक्तं

प्र० जीवलिंगबलादेवमुख्यार्थत्यागइति तत्राह ॥ सचेति ॥ विष्ण्वेकवाचीज्योतिश्शब्दइत्यर्थः । नन्वस्त्वेवं । "किंज्योतिरयंपुरुष"इतिजी
वोपक्रमस्यापिसत्त्वात्कथंनिर्णयइत्यतआह ॥ तथाचेति ॥ उपांशुयाजेति ॥ प्रपंचितमेतदधिकरणशरीरमाद्यसूत्रे । "विष्णुरुपांशुय
ष्टव्य"इत्यादिवाक्यमर्थवादत्वेनयथोपांशुयाजशेषत्वेननियतंतद्वदित्यर्थः । उत्तरार्धोक्तदृष्टांतव्यक्तिपूर्वपूर्वार्धोक्तदार्ष्टांतिकेविशेषमाह ॥ यदे
त्यादिना ॥ प्रजापतिरिति ॥ विवृतमेतत्समन्वयाधिकरणे । ननुप्रयोगाधीनाह्यर्थकल्पनेत्यतआह ॥ दर्शिताश्चेति ॥ जज्ञे जनया
सच "हृद्यंतर्ज्योति"रित्यात्मप्रश्नोत्तरोपक्रमे "सुप्तइत्यत्रायंपुरुषःस्वयंज्योति"रित्युपसंहारे"स्वपित्यत्रायंपुरुषःस्वयंज्यो
ति"रितिमध्येचश्रुतः । तथाचज्ञानसाधनप्रश्नोपक्रमादंतरंगेणात्मप्रश्नोत्तरोपक्रमेणतदुपसंहारेणचविष्णुपरत्वेननिर्णीत
वाक्यमध्यपतितानि "म्रियमाण"इत्यादीन्युपांशुयाजादिवाक्यमध्यपातिविष्ण्वादिवाक्यवत्तदनुसारेणनेयानि । तथाहि
म्रियमाणादिलिंगानामंतर्गतणिजर्थता । अश्वप्रतिग्रहेष्ट्यादौगृह्णीयादितिशब्दवत् ॥ १ ॥ यदा "प्रजापतिर्वरुणायाश्व
मनय"दित्याद्युपक्रममात्रानुसारेण "यावतोश्वान्प्रतिगृह्णीयादित्यत्रप्रतिगृह्णीयादित्यस्यप्रतिग्राहयेदित्यंतर्भावितणिजर्थता
तदाहिकिमुवाच्यमिहोपक्रमोपसंहारमध्यपरामर्शानुसारेणम्रियमाणादिशब्दानामंतर्भावितणिजर्थतेति । दर्शिताश्चबृहदार
ण्यकभाष्येंऽतर्भावितण्यर्थाबहवःप्रयोगाः "जज्ञेबहुज्ञंपरमाभ्युदारं तदेतन्मेविजानीहियथाहंमंदधीर्हरे । सुखंबुध्येयदुर्बोधं
गु० येनेत्यर्थः ॥ उपक्रमानुसारेणेति ॥ नन्वेतदयुक्तं । समन्वयाधिकरणे तंत्रसारे मैत्रायणीयशाखायांदात्रुपक्रमतोप्यृते । कर्मांगत्ववशादेवदातुरिष्टिःप्रतीय
तइत्युपक्रमंविनैवदातुरिष्टिरित्युक्तत्वादितिह्युक्तं । अत्रोपक्रममात्रानुसारेणप्रतिगृह्णीयादित्यस्यांतर्णीतण्यर्थतोच्यते । तथाचपूर्वोत्तरविरोधइतिचेन्न । अस्यभट्टसि
द्धांतानुवादरूपत्वात् । समन्वयाधिकरणेचतन्मतापवादकताभिधानान्नदोषः । द्रष्टुश्चक्षुषइत्यादिवदितिटीकास्थादिपदसंग्राह्यमाह ॥ जज्ञइत्यादिना ॥ जज्ञे

प्र० मास । विजानीहि विज्ञापय । द्रष्टुः दर्शयितुः । एतेन "नचेमंलोकमतिक्रामतिमृत्योरूपाणीत्याद्युक्तलिंगविरोधः । द्रष्टुश्चक्षुषइत्यादिवदंतर्णीतणिच्त्वेनोपपत्ते"रितिटीका हेतूक्तिपूर्वंविवृताभवति ॥ प्रतिग्रहेष्टिनयइति ॥ "अचोदितंचकर्मभेदा"दितितृतीयाध्यायस्यचतुर्थपादएकादशाधिकरणइत्यर्थः । अधिकरणशरीरंतुसमन्वयसूत्रेविवृतं । "यावतोश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्वपे"दित्यत्रगृह्णीयादित्यस्यग्राहयेदित्यर्थमुक्त्वातत्रप्रयोगोप्युक्तइत्यर्थः । ननुलोकसंचरणलिंगविरोधइत्यतः "जीवमादायेश्वरस्यैवोभयलोकसंचरणोक्तेर्नतद्विरोध"इतिटीकांविवृण्वंस्तन्मूलमाह ॥ लोकाविति ॥ म्रियमाणादावपिण्यर्थतात्वर्थविशेषएवेत्याह ॥ अत्रेति ॥ सपरामृश्यते सजाय

योषाभवदनुग्रहात् ॥ द्रष्टुश्चक्षुषोनास्तिजिह्वे"त्यादयः । उक्तश्चप्रयोजककर्तर्यपिकर्तृत्वमात्रविवक्षायामण्यंतप्रयोगस्तंत्रसारेप्रतिग्रहेष्टिनये । "लोकावनुसंचरती"त्यादौतुनांतर्भावितण्यर्थता । "लोकसंचरणंतुजीवमादायतस्यैवादुःखेनस्वातंत्र्या"दितिन्यायविवरणोक्तेः । "पाप्मभिःसंसृज्यत"इत्यादावपितथा । "फलदानायपापानांग्रहःसंसर्गउच्यत"इत्यादिबृहदारण्यकभाष्योक्तेः । अत्र "यस्यज्योतिरयंविष्णुःसपरामृश्यतेतथे"त्यादिबृहदारण्य

गु० बहुज्ञंपरमाभ्युदारंयद्द्वीपमध्येसुतमात्मभाजं । पराशराद्गंधवतीमहर्षिस्तस्मैनमोज्ञानतमोनुदायेति । टीकायांनचेमंलोकमतिक्रामतिमृत्योरूपाणीत्याद्युक्तलिंगविरोधेशंकितेसर्वेषामंतर्भावितण्यर्थत्वेनपरिहारोभिमतइतिप्रतीयते । तदयुक्तं । तथासतिन्यायविवरणबृहद्भाष्यविरोधापत्तेरित्यतोभिप्रायमाह ॥ लोकावनुसंचरतीत्यादाविति ॥ तथा अंतर्भावितण्यर्थतेत्यर्थः । ननु यस्यज्योतिरयंविष्णुःसपरामृश्यतेतथेत्यादिबृहद्भाष्योक्तरीत्याम्रियमाणत्वस्यापिजीवगतत्वादंतर्भावितण्यर्थ

SGDF
Sri Gargeshwari Digital Foundation

प्र० मानइत्यादौतच्छब्देनेत्यर्थः । नन्वथाप्यादित्येनैवेत्यवधारणंस्वप्रादौविशिष्यब्रह्मणोज्ञानहेतुत्वोक्तिश्चायुक्ता । नचजीवपक्षेप्येतद्दोषसाम्यापा दनमात्रेणस्वपक्षेसदोषःपरिहृतोभवतीत्यतो "नचैवंसत्यवधारणविरोध" इत्यादिटीकार्थंमूलोक्त्याव्यनक्ति ॥ **आदित्येनैवेति** ॥ "नचवि शिष्योक्तिविरोध" इत्यादिटीकांव्यनक्ति ॥ **अत्रेतीति** ॥ टीकायामेवतदुक्तमितिसंमत्युक्तेर्नात्रमूलोक्तिः । "नचप्रत्यभिज्ञाविरोध" इत्यादि टीकार्थंस्वयमुपपत्त्युक्त्याव्यनक्ति ॥ **नचेत्यादिना ऐकार्थ्यंचेत्यंतेन** ॥ यतइत्यस्यगरीयसीत्यनेनान्वयः ॥ **अर्थांतरेति** ॥ अमुख्यार्थो

कभाष्योक्तरीत्यायदाम्रियमाणत्वादिकंजीवगतं तदात्रापिनण्यर्थांतरभावः । किंतु "यदातु भगवानुक्तस्तदास्वातंत्र्यतोविभुः । म्रियमाणोजायमानइत्युक्तस्तन्नियामक" इतितत्रोक्तभ गवद्गतत्वपक्षएवेतिद्रष्टव्यं । आदित्येनैवेत्यवधारणंतुबाह्यज्योतिषुप्राधान्यापेक्षयेतिन्यायवि वरणएवोक्तं । अत्रेतिविशिष्योक्तिरपिस्वप्नादौज्योतिरंतराभावाभिप्राया । नचप्रत्यभिज्ञावि रोधः । यतः समानशब्दप्रकृतादर्थांतरपरत्वतः । तेनाप्रकृतमुख्यार्थपरतैवगरीयसी ॥ १ ॥

गु० त्वोक्तिरयुक्तेत्यतआह ॥ **अत्रेति** ॥ **तत्रोक्तेति** ॥ बृहद्भाष्योक्तेत्यर्थः । ननुब्रह्मणोज्योतिष्ट्वे आदित्येनैवेत्यवधारणायोगइत्यतआह ॥ **आदित्येनैवेति** ॥ ननुब्रह्मणोजागरणेपिजीवज्ञानहेतुत्वेनस्वप्नादावत्रायंपुरुषःस्वयंज्योतिर्भवतीतिविशिष्यब्रह्मणोज्ञानहेतुत्वोक्तिरयुक्तेत्यतआह ॥ **अत्रेतीति** ॥ ननुकिंज्योतिरयंपुरु षइतिज्ञानसाधनप्रश्नोपक्रमस्थस्यजीवस्यायंपुरुषःस्वयंज्योतिरित्यात्मप्रश्नोत्तरोपसंहारेपुरुषादिशब्दैःप्रत्यभिज्ञानविरोधइत्याशंकते ॥ **नचेति** ॥ तथा लाक्षणिको

SGDF
Sri Gargeshwari Digital Foundation

प्र० तरेत्यर्थः । तेन समानशब्देन । श्लोकंव्याचष्टे ॥ पुरुषेति ॥ एवंचेति ॥ अत्रोक्तरीत्याज्योतिश्शब्दस्य पूर्वोक्तरीत्यापुरुषशब्दस्यचवि ष्णौमुख्यत्वेसतीत्यर्थः । नन्वत्र "अयंपुरुष"इतीदंशब्दसामानाधिकरण्यात्प्रकृतपरत्वमावश्यकमित्यतआह ॥ ब्रह्मापीति ॥ "तदेतेश्लो काभवंती"त्युक्त्या "स्वप्नेनशारीरमभिप्रहत्यासुप्तस्सुप्तानभिचाकशीति । शुक्रमादायपुनरेतिस्थानंहिरण्मयःपुरुषएकहंस"इत्युदाहृतश्लोकेप्र कृतमित्यर्थः । ननु "किंज्योतिरयंपुरुष"इत्यत्रायमितिसमानशब्देनप्रकृतजीवपरत्वमेवस्वरसं । नत्वतादृशहिरण्मयादिशब्दप्रकृतब्रह्मपर

पुरुषशब्दोहिपुरुषोत्तमेमुख्यइत्युक्तंगायत्र्यधिकरणे । एवंचोपसंहा रस्थयोर्ज्योतिःपुरुषशब्दयोरुपक्रमस्थपुरुषादिशब्दप्रकृतजीवरूपामु ख्यार्थपरत्वादपिपुरुषादिशब्दाप्रकृतब्रह्मपरतैवज्यायसी । मुख्यार्थ लाभात् । नहिगंगायांघोषइत्यत्रगंगाशब्दोलाक्षणिकइतिगंगायांमत्स्य इत्यादावपितथा । नहीदमादिशब्दानामिवपुरुषादिशब्दानांप्रकृत परत्वंव्युत्पन्नं । ब्रह्मापि "हिरण्मयःपुरुष"इत्यादौपुरुषशब्देनप्रकृतं ।

गु० नहीत्यर्थः । ननुभवत्पक्षेपिमुख्यार्थत्यागएव । पुरुषादिशब्दानांप्रकृतपरत्वव्युत्पन्नत्वरूपमुख्यार्थत्यागादित्यतआह ॥ नहीति ॥ अस्तुवापुरुषादिशब्दानाम पिप्रकृतपरत्वव्युत्पन्नत्वं । तथापिनास्मत्पक्षेमुख्यार्थत्यागः । हिरण्मयःपुरुषइत्यादौपुरुषशब्देनप्रकृतब्रह्मपरत्वात्यागादित्याह ॥ ब्रह्मापीति ॥ अध्याहारः असे ॥ ७२३ ॥

प्र० त्वमित्यतआह ॥ उपसंहारेति ॥ यतोऽविदूरेप्रकृतत्वंप्रयोजकं अतोऽव्यवहितब्रह्मपरतेत्यन्वयः । पद्यंहेतूक्त्याव्याचष्टे ॥ इदमिति ॥ नन्वयंपुरुषःपरमात्माऽस्यजीवस्यस्वयमेवज्योतिरित्यर्थवर्णनेऽस्येत्यध्याहारदोषइत्युक्तमित्याशंक्याह ॥ नचेति ॥ यदप्युक्तंपूर्वपक्षिणाकिंचे

उपसंहारादिस्थस्येदंशब्दस्यप्रकृतपरत्वेपिनोपक्रमस्थेदंशब्दोक्तव्यवहितजीवपरता । किंत्वव्यवहितप्रकृतब्रह्मपरता । यतः स्वशब्देनापियद्दूरेप्रकृतत्वंततोपिच । अन्यशब्देनाविदूरेप्रकृतत्वंप्रयोजकं ॥ १ ॥ इदमादिशब्देनपरामर्शेहितेनशब्देनदूरे प्रकृतत्वादपिशब्दांतरेणसमीपेप्रकृतत्वंप्रयोजकं । समीपस्थस्यबुध्द्यविच्छेदात् । व्यवहितस्यचतद्विच्छेदात् । इदंशब्दस्यचबु द्धिस्थपरत्वात् । "स्वप्नेनशारीरमभिप्रहृत्यासुप्तःसुप्तानभिचाकशीती"तिब्रह्मवाक्यंच "किंज्योतिरयंपुरुष"इतिजीववाक्या त्सन्निहितं । नचाध्याहारः । स्वप्नादौजीवस्यभगवानेवज्ञानहेतुर्नत्वादित्यादिरितिभावेन "आत्मैवास्यज्योति"रित्युक्त्वा तस्मिन्नेवात्मनिप्रश्नोत्तराभ्यांनिरूपिते तर्हिज्योतिश्शब्दोक्तज्ञानसाधनत्वंकथमित्यपेक्षायां "स्वयंविहृत्ये"त्यादिनास्वाप्नपदा र्थस्रष्टृत्वतद्दर्शयितृत्वादिकमुक्त्वा "अत्रायंपुरुषःस्वयंज्योति"रित्युक्तेऽस्येत्यनेनप्रकृतस्यजीवस्यैवान्वयात् । "आत्मैवास्य ज्योति"रितिवाक्यस्थात्मशब्दार्थस्यच "अत्रायंपुरुषःस्वय"मित्यत्रपुरुषशब्देनावधारणस्यचस्वयंशब्देनोक्तत्वादैकार्थ्यंच ।

प्र० त्यादि तत्राह ॥ आत्मैवेति ॥ तथाचात्मशब्दोनस्वरूपपरः । किंतुब्रह्मपरइत्यर्थः । ननुकुतएवं । बहुलिंगबलाज्जीवएवात्मशब्दार्थोस्त्वि त्यतोविष्णुपरत्वेननिर्णीतवाक्यमध्यपतितत्वेनलिंगानामन्यथानयनंस्वयमुक्त्वा "जीवपक्षेबहुबाधकसद्भावा"दित्यादिटीकांविवृण्वन्बाधकांतर

SGDF Sri Gargeshwari Digital Foundation

प्र० माह ॥ जीवपक्षेत्विति ॥ स्वरूपशब्दस्य स्वरूपपरत्वेनांगीकृतस्यात्मशब्दस्येत्यर्थः । नन्वादित्यादिज्योतिष्ट्वेनजीवस्यप्रकृतत्वात्कथंतत्त्यागइत्यतआह ॥ तस्मादिति ॥ प्रश्नायोगरूपबाधकादित्यर्थः । एतेन "आत्मशब्दोदितस्यविष्णुत्वा"दितिटीकोक्तेः "जीवपक्षेबहुबाधकसद्भावा"दित्याद्युत्तरटीकावाक्योक्तबाधकानुसंधानेनसबीजत्वंबोध्यमित्युक्तंभवति । मूलमप्याह ॥ तदुक्तमिति ॥ "प्रश्नायोगा"दितिटी जीवपक्षेतुकतमइतिप्रश्नायोगः । जीवस्यप्रत्यक्षसिद्धत्वात् । "किंज्योतिरयंपुरुष"इतिप्रश्नसमयेसंशयधर्मित्वेननिश्चितेतस्मिन्पुनःप्रश्नायोगाच्च । स्वरूपशब्दस्यसंबंधिशब्दत्वेनप्रतिसंबंधिनिरूप्यत्वादस्येत्यनेननिर्दिष्टस्यप्रतिसंबंधिनएवप्रष्टव्यतया घटस्यस्वरूपमित्यादौसुप्रसिद्धेप्रतिसंबंधिपरतंत्रेचस्वरूपेप्रश्नायोगाच्च । नहिप्रदीपस्यस्वरूपंप्रकाशइत्युक्तेकिंस्वरूपमितिज्ञातस्वरूपशब्दार्थःपृच्छति । तस्मात् "किंज्योतिरयंपुरुष"इत्यत्रपुरुषशब्दस्यजीवपरत्वेपि "आत्मैवास्यज्योति"रित्यत्रात्मशब्दो ब्रह्मपरः । तदुक्तंन्यायविवरणे "अयंपुरुषःसंसारी । आत्मशब्दोदितएवविष्णुः । अतएवादित्यादिज्योतिष्ट्वंसंसारिणए वे"ति । किंचजीवपक्षउभयलोकसंचरणेसुखदुःखविशेषवत्त्वेनसमानता, "स्वयंविहृत्ये"त्यादिवाक्योक्तंस्वातंत्र्यं, "अथरथान्रथयोगान्पथःसृजत"इत्यादिवाक्योक्तंस्वाप्नपदार्थस्रष्टृत्वं, "स्वप्नेने"त्यादिमंत्रश्चनयुक्तइतिबृहदारण्यकभाष्यएवोक्तं ॥ अन्येतु ॥ एषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यत"इतिवाक्यस्थंज्योतिरादित्यः । प्र०कांविवृत्यतत्प्रसंगात् "आदित्यादिज्योतिष्मत"इत्यादिटीकावाक्यंचविवृत्यतन्मूलंचोक्त्वा "सुखदुःखविशेषवत्त्वेने"त्यादिटीकांव्यनक्ति॥ किंचेत्यादिना ॥ बृहदिति ॥ एतेनबाधकोक्तिपरटीकाबृहदारण्यकभाष्यमूलेत्युक्तंभवति ॥ अन्येत्विति ॥ किंज्योतिरादित्योथब्रह्मे

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिसंशये ज्योतिःश्रुतेरादित्येरूढत्वादादित्यइतिपूर्वःपक्षः । ननु "ज्योतिषांज्योति"रितिब्रह्मण्यपिज्योतिश्शब्दोस्ति । प्रकरणंचब्रह्मपरं । तथाचकथमादित्यइत्युक्तिरित्याशंक्यभामत्युक्तंसमाधिमनुवदति ॥ यद्यपीति ॥ श्रुत्येति ॥ समुत्थायेतिप्रकृतिश्रुत्येत्यर्थः । उत्थानंना मोद्गमनं । उत्क्रमणमितियावत् । तद्ब्रह्मज्योतिःपक्षेनयुक्तमित्याह ॥ ज्योतिषइति ॥ क्त्वाश्रुतीति ॥ ब्रह्मणएवस्वरूपत्वात्स्वरूपंप्राप्य

यद्यपीदंप्रकरणंदहराधिकरणेब्रह्मपरमित्युक्तं । तथापि "समुत्थाये"त्यादिश्रुत्याप्रकरणबाध इहाशंक्यते । ज्योतिषोब्रह्मत्वेहिब्रह्मभावरूपायास्तत्संपत्तेरुत्क्रांत्यनपेक्षत्वात्समुत्थायेतिश्रुतिबाधः । स्वरूपनिष्पत्त्यतिरिक्तायाब्रह्म संपत्तेरभावात् । संपद्येतिपूर्वकालार्थक्त्वाश्रुतिबाधश्च । ज्योतिषआदित्यत्वेतुशरीरादुत्क्रम्यादित्यसमीपंगत्वाका र्यब्रह्मलोकंप्राप्यक्रमेणमुक्तोभवतीत्यर्थोपपत्तेर्नश्रुतिबाधइतिप्राप्ते स्यादेतदेवंयद्यत्रोक्तोमोक्षःसगुणःस्यात् । अ यंतुनिर्गुणः । "यआत्मापहतपाप्मे"त्यादिनानिर्गुणंब्रह्मोक्त्वातज्ज्ञानफलस्यैवोच्यमानत्वात् । तथाचशरी रादुत्थानंनामश्रवणादिकं । स्वरूपाभिनिष्पत्तिस्तुतज्जन्यःसाक्षात्कारः । संपत्तिस्तुतत्साध्योब्रह्मभावः ।

प्र० स्वरूपंप्राप्नोतीत्यसंगतिप्रसंगादितिभावः । उपलक्षणमेतत् । ज्योतिश्शब्दस्यतेजसिमुख्यत्वाद्ब्रह्मणिजघन्यता । ज्योतिश्श्रुतिबाधश्चस्यादि त्यपिध्येयं । यथोक्तं "तिसृभिश्श्रुतिभिःप्रकरणबाधा"दिति । उपसंपद्येत्यस्यार्थमाह ॥ आदित्यसमीपमिति ॥ तस्यतात्पर्यमाह ॥ कार्येति ॥ आदित्यसमीपेब्रह्मलोकेस्थित्वातत्रोत्पन्नज्ञानान्मुक्तोभवतीत्यर्थः ॥ स्यादेतदेवमिति ॥ यद्यत्रगौणमोक्षश्श्रुतःस्यात्तदाशरीरादु

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्क्रम्यार्चिरादिनाऽऽदित्यसमीपंगत्वाक्रमेणमुक्तोभवतीत्यर्थःस्यात्। नचैवमित्यर्थः। ननुज्योतिरुपसंपत्तेरभिनिष्पत्तिरूपसाक्षात्कारसाध्यत्वादभिनिष्पद्यज्योतिरुपसंपद्यतइतिवक्तव्यं। ननुज्योतिरुपसंपद्याभिनिष्पद्यतइतीत्याशंक्यदहराधिकरणेभामत्युक्तमर्थमाह ॥ **क्त्वाश्रुतिस्त्विति** ॥ उपसंपद्येत्यत्रल्यबादेशस्यस्थानिरूपक्त्वाश्रुतिरित्यर्थः। व्यादाय विवृत्य। तत्रयथाव्यादानस्यपश्चात्तनत्वेपिक्त्वाप्रत्ययस्तद्वदित्यर्थः ॥ **परशब्देति** ॥ एतेनार्चिराद्यपेक्षयापरत्वात्परज्योतिष्ट्वमादित्यस्ययुक्तमितिकल्पतरूक्तंनिरस्तं। कथंचित्परत्वसंपादनेप्रसिद्धिबा

क्त्वाश्रुतिस्तु "मुखंव्यादायस्वपिती"त्यादिवदितिसिद्धांतइत्याहुः। तन्न। "नारायणपरोज्योति"रित्यादिश्रुतिषु "परंज्योतिःपरंधामपवित्रंपरमंभवानि"त्यादिस्मृतिषुचपरशब्दसहितस्यज्योतिश्शब्दस्यपरब्रह्मण्येवप्रसिद्धत्वेनसंशयपूर्वपक्षयोरनुदयात्। किंच पूर्वंयत्सत्यकामादिपश्चाद्यत्क्रीडनादिकं। तद्द्वयंनिर्गुणेमोक्षेसर्वथानोपपद्यते ॥ १ ॥ अस्माद्वाक्यात्पूर्वत्र "यआत्मापहतपाप्मे"त्यारभ्य "सत्यकामःसत्यसंकल्प"इतिसविशेषब्रह्मणःश्रवणादुत्तरत्रच "स्वेनरूपेणाभिनिष्पद्यते। सतत्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वे"तिसगुणमोक्षस्यश्रवणान्ननिर्गुणोयंमोक्षः।

प्र० धापत्तेः। ननूक्तंसमुत्थायेत्यादिश्रुतिबलात्संशयाद्युत्थानमितिचेन्न। तस्याब्रह्मपरत्वेप्युपपत्तेः। "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकव"दित्यादौ ब्रह्मभावरूपसंपत्तेर्निरसिष्यमाणत्वात्सिद्धांतेपिमुख्यार्थसंभवाच्चेतिभावः। स्वमतेतु "सतेजसिसूर्येसंपन्न"इतिसमाख्ययाऽस्यज्योतिषोन्यपरत्वमाशंक्यसमाधास्यतेचतुर्थे "आत्माप्रकरणा"दित्यत्रेतिभावः। यदप्यस्यवाक्यस्यनिर्गुणमुक्तिपरत्वमुपेत्यसिद्धांतकरणंतदपिनेत्याह ॥ **किंचेति** ॥ श्लोकंविवृणोति ॥ **अस्मादिति** ॥ परंज्योतिरितिवाक्यादित्यर्थः। ननुयआत्माऽपहतपाप्मेत्याद्यपहतपाप्मत्वादिश्रवणान्निर्गुण

प्र० त्वमस्येतितद्बलात्सत्यकामत्वादिकंकथंचिन्नेयमित्यतोवैपरीत्यमेवोचितमित्याह ॥ **अपहतेति** ॥ **ननिर्गुणइति** ॥ काप्यश्रुतेर्व्याहतेश्चेतिभावः। यदपिसमुत्थायेत्यादेरन्यार्थवर्णनेनोपपत्तिकथनंतदप्ययुक्तमित्याह ॥ **किंचेति** ॥ **लक्षणेति** ॥ उपलक्षणमेतत्। "व्यादायस्वपितिसंमील्यहसतीत्युपसंख्यान"मित्युक्तेर्व्यादायेत्यस्यनिर्वाहेपीहतथानिर्वाहकाभावात्क्त्वाश्रुतिपीडनं। किंच "उत्तराच्चेदाविर्भूतस्वरूपस्त्वि"तिसूत्रेणैव "यत्तत्परंज्योतिरुपसंपत्तव्यंश्रुतंतत्परंब्रह्म। तच्चापहतपाप्मत्वादिधर्मकं। तदेवजीवस्यपारमार्थिकंरूप"मित्यादिनास्य

अपहतपाप्मत्वादिकंतुसगुणेप्यस्ति। "यएषोंतरादित्येहिरण्मयःपुरुष"इतिश्रुतेसगुणे "सर्वेभ्यःपाप्मभ्यउदित"इतिपापातीतत्वश्रवणात्। सत्यकामइत्यादिकंतुननिर्गुणे। किंचैवंसतिसर्वपदानांलक्षणास्यात्। "शरीरात्समुत्थाये"त्यस्यश्रवणादौ "उपसंपद्ये"त्यस्यैक्ये"स्वेनरूपेणाभिनिष्पद्यत"इत्यस्यचसाक्षात्कारेयोगरूढ्योरभावात्। यच्चोक्तंसौत्रस्यदर्शनादित्यस्येहप्रकरणेब्रह्मणोवक्तव्यत्वेना

प्र० ब्रह्मपरत्वंत्वयैवसमर्थितमितितेनगतार्थताच। समुत्थानादिश्रुतेश्चान्यथैवोपपत्तेः। समुत्थानंश्रवणादिकमित्यादिनिर्वाहस्यत्वयातत्रैवकृतत्वाच्च। इहपरब्रह्मोपसत्त्याऽऽविर्भूतस्वरूपविषयत्वसमर्थनमुपजीव्यदहराकाशस्यपरमात्मत्वंतत्रसमर्थितमितिचेत्तर्हि "उत्तराच्चे"दितिसूत्रानंतर्यमेतस्यस्यात्। हेतुप्रयोगानंतरमेवहेत्वसिद्धेर्निरसनीयत्वादित्यपिध्येयं। सूत्रार्थोप्ययुक्तएवेत्याह ॥ **यच्चेति** ॥ ज्योतिश्शब्दंब्रह्मेतिप्र

SGDF

प्र० तिज्ञार्थः ॥ अनुवृत्तेरिति ॥ "प्राणस्तथानुगमा"दितिवदितिभावः ॥ केचित्त्विति ॥ पूर्वशेषत्वेकथंसूत्रार्थइत्यतस्तमनुवदति ॥ अंगुष्ठमात्रप्रकरणइति ॥ "नतत्रसूर्योभाती"त्यारभ्य "तस्यभासासर्वमिदंविभाती"तिसर्वेषांछादकस्यनिरवधिकातिशयस्यभाशब्दाभिहितस्यपरब्रह्मभूतस्यज्योतिषोदर्शनाच्चांगुष्ठप्रमितःपरमात्मेतिसूत्रार्थइत्यर्थः । यदुक्तंसमन्वितस्यसमन्वयोनेति तत्राह ॥ आकाशइति ॥

नुवृत्तेर्दर्शनादित्यर्थइति। तन्न । तथात्वे आवश्यकत्वेनानुवृत्तेरित्येववक्तव्यत्वात्॥ केचित्तु ॥ इदंसूत्रं "शब्दादेवप्रमित"इत्येतदधिकरणशेषभूतंसदंगुष्ठमात्रस्यब्रह्मत्वेहेत्वंतरपरं । नत्वधिकरणांतरं । "ज्योतिश्चरणाभिधाना"दित्यत्रैवज्योतिश्शब्दसमन्वयोक्तेः । अंगुष्ठमात्रप्रकरणे "नतत्रसूर्योभाती"तिब्रह्मरूपज्योतिर्दर्शनादितिचसूत्रार्थइत्याहुः। तन्न । तच्छेषत्वेतदानंतर्यस्यचशब्दस्यचापातात् । "नतत्रे"तिश्रुतौचज्योतिःपदाभावेनसूत्रस्यश्रुत्यननुगमप्रसंगाच्च । सूत्रांतरेष्विवज्योतिर्दर्शनपदयोःप्रतिज्ञाहेतुरूपत्वसंभवेहेतुमात्रत्वायोगात् । "आकाशस्तल्लिंगात् अतएवप्राण"इत्यत्रोक्तसमन्वययोरप्याकाशप्राणशब्दयोस्त्वयापि "दहरउत्तरेभ्यः

प्र० ननुतत्रप्रापकविशेषसत्त्वात्पूर्वपक्षादिसंभवात्पुनरुक्तिः। इहतुसमुत्थानादिश्रुतेरन्यथोपपत्तेःपरंज्योतिश्शब्दस्यविष्णावेवप्रसिद्धेर्नेपुनरुक्तिर्युक्तेतिचेत्तर्ह्यनेकप्रापकयुक्तास्मदीयोदाहरणमेवाद्रियतां । नतुपूर्वशेषत्वं । क्लिष्टत्वादितिभावः । यत्तुकश्चिदाह "परंज्योतिरुपसंपद्ये"त्यत्रपरंज्योतिर्नारायणोवाशिवोवेतिसंशये "सउत्तमःपुरुष"इतिवाक्यशेषे "देवकीनंदनश्शौरिश्श्रीपतिःपुरुषोत्तम"इत्यादौनारायणेप्रसिद्धपुरुषोत्तम

SGDF Sri Gargeshwari Digital Foundation

प्र० शब्दश्रवणान्नारायणएवेतिप्राप्ते ज्योतिश्शिवएव । तत्प्राप्तानामनिवृत्तिदर्शनात् । शिवादन्यत्प्राप्तानामनिवृत्तेरभावात् । पुरुषोत्तमशब्दो नारायणेरूढोपिशिवेयौगिकइति । तन्न । परशब्दसहितज्योतिश्शब्दस्यपूर्वोक्तदिशा पुरुषोत्तमशब्दस्यच ''उत्तमःपुरुषस्त्वन्य''इति ''प्रथितःपुरुषोत्तम''इत्यादिनाविष्णावेवप्रसिद्धत्वेनसंशयस्यशिवइतिसिद्धांतस्यचानुत्थानात् । शिवासाधारणलिंगाद्यभावाच्च । ''यद्गत्वाननिवर्ततेतद्धामपरमंममे''त्यादिनाविष्णुंप्राप्तानामनिवृत्तेर्दर्शनाच्च । दहराधिकरणएवास्यविष्णुपरत्वेनोक्तत्वाच्च । ''यंप्राप्यतेनिजानंदमाप्नुवंति सकेशवः । तंप्राप्यरमतेमुक्तस्त्रीभिर्यानैश्चबंधुभि''रित्यादिव्याख्यानरूपस्मृतिविरोधाच्च । यदपिपुरुषोत्तमशब्दस्यात्रश्रवणात्तेनपूर्वपक्षकरणंकथमित्याशंक्यकृत्वाचिंतेयमित्युक्तं । तन्न । व्यर्थत्वात् । गत्यंतरसंभवाच्च । ''उत्तमःपुरुष''इत्यस्यैव ''उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृत''इति, ''यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तम''इतिगीतायां, ''ब्रह्माशिवस्सुरेशाद्याश्शरीरक्षरणात्क्षराः । लक्ष्मीरक्षरदेहत्वादक्षरात्तत्परोहरि''रितिश्रुतौ, ''ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः । सर्वेक्षराअक्षरातुश्रीरेकातत्परोहरि''रितिस्कांदेचपुरुषशब्दितक्षरपदेनशिवादीनुक्त्वातत्परत्वेनयोगवृत्त्याविष्णोरेवाभिधानेनशिवस्ययोगेनाप्युत्तमपुरुषत्वायोगाच्च । यदपिकृष्णस्यशिवशक्त्यवतारत्वादिकल्पनंतदप्रामाणिकमनेकप्रमाणविरुद्धंच । सूत्रेपरंज्योतिरितिनिर्देशापाताच्चेति ॥७॥ ज्योतिरधिकरणं ॥११॥

प्राणस्तथानुगमा''दित्यत्रपुनःसमन्वयस्यांगीकृतत्वाच्चेति ॥ टीकाक्षरार्थस्तुस्पष्टः ॥ ७ ॥ ज्योतिरधिकरणं ॥ ११ ॥

गु० त्यस्येतिशेषः । यच्चोक्तमुपसंहारस्थस्वयंशब्दानुसारेणात्मैवास्येत्यत्राप्यात्मशब्दःस्वपरोनतुब्रह्मपरइति । तद्दूषयति ॥ आत्मैवेति ॥ स्वपक्षेबाधकमुद्धृत्यपरपक्षेबाधकमाह ॥ जीवपक्षेत्विति ॥ ७ ॥ ज्योतिरधिकरणं ॥ ११ ॥

SGDF
Sri Gurgeshwar Digital Foundation

प्र० ॥ ॐआकाशोर्थांतरत्वादिव्यपदेशात्ॐ ॥ "प्रयोगवशा"दित्यादिटीकांविवृण्वन्पादसंगतिंविवृणोति ॥ **तल्लिंगादिति** ॥ "आकाशइतिहोवाचे"तिवाक्येनिरवकाशपरोवरीयस्त्वादिलिंगेनाकाशशब्देविष्णुवाचित्वस्यदर्शितत्वाल्लोकतश्चाकाशेप्रयोगात्प्रयोगसाधारण्येनोभयत्रप्रसिद्धतेत्यर्थः । पूर्वाधिकरणेतुप्राक्तनज्योतिषोभाष्यादौविष्णुत्वाक्षेपाद्वा पूर्वपक्ष्यभिमतेजीवेसंप्रतिपन्नप्रयोगाभावाद्वानैवंसाधारण्यमुक्तं । ननुतर्हिपूर्वत्रेवात्राप्याकाशशब्दप्रवृत्तिनिमित्तस्यावकाशदातृत्वादिरूपस्य "तल्लिंगा"दित्यत्रोक्तन्यायेनविष्णौलोकतश्चान्यत्रप्रसिद्ध्यांतरंगप्रवृत्तिनिमित्तसाम्येनैवोभयत्रप्रसिद्धिर्वाच्या । नतुबहिरंगप्रयोगसाम्येनेतिचेन्मैवं । पूर्वत्रज्योतिश्श्रुतेर्विष्णुजीवयोरूढेःपूर्वपक्षिणोसंमतेर्योगेनजीवनिष्ठत्वेवाच्ये तस्यविष्णावपितौल्यात्प्रवृत्तिहेतुसाम्येनतथात्वमुक्तं । इहत्वाकाशशब्दस्यलोकेगगनेप्रसिद्धत्वेनयोगेनार्थद्वयोपस्थितेःप्रागेवलोकप्रयोगादर्थांतरस्यैवोपस्थितेरुभयोपस्थित्यर्थंविष्णावपिप्रयोगस्यैवदर्शनीयत्वादेवमुक्तं । नन्वेवमपि "तल्लिंगा"दित्यत्रैवान्यत्रप्रसिद्धेस्त्याजितत्वात्कथमुभयत्रप्रसिद्धिः । नचतत्रविष्णौप्रसिद्धिरेवोक्तानान्यत्रप्रसिद्धिस्त्याजितेतिवाच्यं । "नेतरोनुपपत्ते"रित्यादिना, प्रतिनयमन्वितेनतत्त्वित्यवधारणार्थतुशब्देनचान्यत्रप्रसिद्धेरपित्याजितत्वात् । मैवं । तत्तद्विषयवाक्येऽन्यत्रप्रसिद्धेस्त्याजितत्वेपिसर्वत्रतत्त्या

॥ ॐआकाशोर्थांतरत्वादिव्यपदेशात्ॐ ॥ तल्लिंगादित्यत्रब्रह्मण्यप्याकाशशब्दप्रयोगस्यदर्शितत्वाद्वा इहप्रयुक्तवैनामेतिनिपातद्योतितप्रसिद्धे ॥ ७२७ ॥

गु० ॥ ॐआकाशोर्थांतरत्वादिव्यपदेशात्ॐ ॥ नन्वेवंप्राणशब्दस्यापि अतएवप्राणइत्यत्रविष्णौप्रयोगस्यदर्शितत्वादुभयत्रप्रसिद्धत्वंस्यादित्यतआह ॥ **इहेति**॥

प्र० जनाभावात् ॥ **व्यावर्त्यत्वेनेति** ॥ निपातस्यप्रसिद्ध्यर्थत्वेनप्रसिद्धाकाशोनामरूपनिर्वोढेत्युक्त्यानैवंभूतोप्रसिद्धाकाशइतिगम्यमानत्वात्तादृशाकाशश्चब्रह्मैवेतिभावः । कथमेतट्टीकाविवरणमित्यतआह ॥ **प्रयोगेति** ॥ प्रागुक्तप्रयोगाद्वावैनामेतिनिपातवशादाकाशेपूर्वपक्ष्यभिमतप्रयोगाद्वेतिद्वेधेत्यर्थः । "सर्वाधारत्वंविष्णोरुक्त"मित्यादिभाष्यटीकाभ्यांतुल्यन्यायविषयतयासूचितांसंगतिमाह ॥ **अनंतरेति** ॥ संगतिराक्षेपिकी । भाष्यादितुफलाभिप्रायमितिभावः । ननूक्तदिशाऽमृतत्वमुखाक्षेपेणैवफलंसंगतिश्चोभयंभविष्यतीति । सत्यं । भाष्येव्यवहिताक्षेपस्तुपूर्वंविष्णुधर्मतयावधारितनामरूपनिर्वोढृत्वरूपसर्वाधारत्वलिंगेनाकाशोविष्णुःकिंनस्यादितिशंकाव्युदासाय । अतएवतुल्यन्यायतयाऽमृतत्वाक्षेपस्यापिसूचनात्प्राङ्निर्णीतामृतत्वरूपविष्णुलिंगेनविष्णुरित्यपिशंकाप्रत्युक्ता । नन्वेवंसन्निहिताक्षेपमेवसाक्षादुक्त्वासर्वाधारत्वाक्षेपस्सूच्यतां । नतुवैपरीत्यं । मैवं । सन्निहिताक्षेपस्यस्पष्टत्वाद्व्यवहिताक्षेपस्यदुर्बोधत्वाद्भाष्येसएवकंठोक्तः । अन्यस्तुसूचितः । "आ

व्यावर्त्यत्वेनाप्रसिद्धेब्रह्मण्यप्याकाशशब्दस्यपूर्वपक्षिणाप्यंगीकृतत्वाद्वोभयत्रप्रसिद्धता । "प्रयोगवशा"दितिटीकाप्युक्तरीत्याद्वेधाव्याख्येया । अनंतरसंगतिस्तु आकाशस्याब्रह्मत्वेपूर्वोक्तंज्योतिरप्यब्रह्मस्यात् । "बहिः कुलायादमृतश्चरित्वे"तिज्योतिषिश्रुतस्यामृतत्वस्येहाकाशे "तदमृत"मितिश्रवणादितिपूर्वाधिकरणाक्षेपात् ।

गु० नन्वेवंप्रकारांतरेणैवोभयत्रप्रसिद्धत्वेटीकाविरोधः । तत्रप्रयोगवशादिनाप्रयोगवशेनोभयत्रप्रसिद्धिव्युत्पादनादित्यतोयथाश्रुतटीकायाउक्तानुपपत्तेस्संभवेनार्थांतरपरत्वमावश्यकमित्याह ॥ **प्रयोगवशादितिटीकापीति** ॥ **उक्तरीत्येति** ॥ तल्लिंगादित्यत्रब्रह्मण्यप्याकाशशब्दप्रयोगस्यदर्शितत्वाद्वेत्याद्युक्तरीत्येत्यर्थः । अत

SGDF Sri Gurgaonkar Digital Foundation

प्र० काशोत्रविषय"इत्यादिविषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ छांदोग्येऽष्टमाध्यायांते "आकाशोवैनामनामरूपयोर्निर्वहिता तेयदंतरात
द्ब्रह्मतदमृतं सआत्मा प्रजापतेस्सभांवेश्मप्रपद्ये यशोहंभवानिब्राह्मणाना"मित्यादिश्रूयते । तत्रस्थाकाशइत्यर्थः । नामरूपयोः शब्दात्मका
र्थात्मकप्रपंचयोः । निर्वहिता निर्वोढा । धारकइत्यर्थः । छांदसइडागमः । कीदृशआकाशइत्यतउक्तं तेयदिति ॥ अंतरा विना । नाम
रूपराहित्येनयद्वर्ततइत्यर्थः । ते नामरूपे ॥ प्रसिद्धेति ॥ अव्याकृताकाशइत्यर्थः । कोट्यंतरंत्वग्रेनिरसिष्यतइतिभावः ॥ प्रसिद्धिव्या

अत्र "आकाशोवैनामनामरूपयोर्निर्वहिते"तिश्रुतआकाशःकिंप्रसिद्धाकाशःकिंवाब्रह्मेतिचिंता । तदर्थंब्रह्मग्रहणेप्रसिद्धिद्योत
कौवैनामेतिनिपातौनयुक्तावुतयुक्ताविति । तदर्थंकिंलौकिकीप्रसिद्धिर्निपातद्योत्याकिंवावैदिकीति । तदर्थंवैदिकप्रसिद्धिग्रहणे
किंप्रसिद्धिव्यावर्त्यंनास्त्युतास्तीति।तदर्थंप्रसिद्धेःकिमुद्देश्यस्वरूपएवान्वयः किंवाविधेयान्वयइति।यद्याद्यः तदागगनस्वरूपस्या
पिवेदप्रसिद्धत्वाद्वैदिकप्रसिद्धिग्रहणेव्यावर्त्याभावेनलोकप्रसिद्धेरेवग्राह्यत्वाल्लोकप्रसिद्धगगनएवानामरूपत्वंकथंचिन्नेयं। यदितु

प्र० वर्त्यमिति ॥ आकाशोवैनाम वेदेप्रसिद्धाकाशो नामादिनिर्वोढा नतुवेदाप्रसिद्धाकाशइतिव्यावर्त्यभूतंवेदेऽप्रसिद्धमाकाशंनास्त्युतास्ती
त्यर्थः ॥ उद्देश्येति ॥ यःप्रसिद्धाकाशःससर्वनिर्वोढेतिवा आकाशोनामादिनिर्वोढावैनाम सर्वनिर्वोढृत्वंप्रसिद्धमितिवेत्यर्थः । नन्वाद्येनि
पातद्योतितप्रसिद्धिसत्त्वेपिनिरवकाशविष्णुलिंगाश्रवणात्कथमाकाशइतिसिध्यतीत्यतोस्पष्टत्वात्फलफलिभावंस्वयमाह ॥ यद्याद्यइति ॥
उद्देश्यएवान्वयइत्यर्थः ॥ अनामेति ॥ तेयदंतरेतिवाक्योक्तंनामरूपराहित्यमित्यर्थः ॥ कथंचिदिति ॥ वक्ष्यमाणदिशेतिभावः ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वितीयइति ॥ विधेयान्वयइत्यर्थः ।अत्रटीकाया "अयमाकाशःप्रसिद्धाकाशएवभवेत् । आकाशशब्दस्यतत्ररूढत्वा"दित्युक्त्वा "नच वाच्य"मित्यादिनापूर्वपक्षानुदयमाशंक्य वैनामेतिनिपाताभ्यांपूर्वपक्षोदयोदर्शितः । तत्रशंकोत्तरग्रंथौव्यनक्ति ॥ यद्यपीत्यादिना ॥ श्रुत्यादीनीत्यादिपदेननामरूपनिर्वोढृत्वरूपसर्वाधारत्वामृतत्वानामरूपत्वग्रहः । "सर्वाधारत्वलिंगेने"तिटीकोपलक्षणमितिभावः । आकाश श्रुतिर्निरवकाशेत्यतआकाशशब्दस्यविष्णावपिप्रवृत्तेरसौसावकाशइतिटीकार्थव्यक्तमाह ॥ आकाशशब्दस्त्विवति ॥ टीकायांसावकाशत्व शंकानयुक्तेतिभावेनाशंक्यटीकाभिप्रायविवरणेनसमाधत्ते ॥ नचवाच्यमित्यादिनासाम्यादित्यंतेन ॥ भूतेति ॥ तत्रभाष्येभूतपद प्रयोगादिहटीकायांसिद्धांते "अवकाशस्यापिनामवत्त्वा"दित्युक्तेरितिभावः । वैनामेतिनिपातयोरुद्देश्याकाशान्वयमुपेत्यतत्रलोकप्रसिद्धाका

द्वितीयः तदागगनेविधेयस्यनामादिनिर्वोढृत्वस्यवेदतोप्रसिद्धेर्व्यावर्त्यसंभवाद्वैदिकप्रसिद्धेर्ग्रहणेबाधकाभावादनामरूपत्वादिनाब्रह्मैवाकाशः ॥ पूर्वपक्षस्तु ॥ यद्यप्याकाशे "तद्ब्रह्मतदमृतंसआत्मे"तिब्रह्मश्रुत्यादीनिसंति । आकाशशब्दस्तुतल्लिंगादितिन्यायेनब्रह्मण्यपिमुख्यवृत्त्यायुक्तः । नचवाच्यं तल्लिंगादित्यत्रभूताकाशमितिपूर्वःपक्षः । अत्रत्वव्याकृताकाशमिति । निरवकाशलिंगे नप्रसिद्धिबाधस्योभयत्रसाम्यात् तथापी "हवैनामे"तिनिपातद्योतितप्रसिद्धिर्नब्रह्मणियुक्ता ।

गु०एवेत्यस्यैवविवरणमाकाशस्येति ॥ अस्मिन्पक्षेगगनस्यस्वरूपेणलोकवेदप्रसिद्धत्वेपिनामरूपनिर्वोढृत्वेप्रमाणाभावात्कथंतस्यप्रसिद्धिरितिपूर्वपक्षिणंप्रतिनियोगापत्त्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० शइत्यर्थउतवेदप्रसिद्धाकाशइतिविकल्पौहृदिकृत्वार्थद्वयमप्याकाशस्यविष्णुत्वेऽयुक्तमित्याह ॥ **लोकइति** ॥ अवकाशस्यब्रह्मधर्मत्वेपिनिपातयोःसार्थक्यमाशंक्यनिराह ॥ **नचवाच्यंवेदमात्रेति** ॥ "आकाशोवैनामे"त्यस्यवेदमात्रेप्रसिद्धोयआकाशस्सनामरूपयोर्निर्वहितेत्यर्थः । तादृशश्चाकाशोविष्णुरेव नतुगगनं । तस्यलोकवेदोभयप्रसिद्धत्वादितिव्यावर्त्यसत्त्वात्सार्थक्यंनिपातयोरितिभावः ॥ **मात्रशब्दार्थेति** ॥ वेदमात्रप्रसिद्धइत्यस्यलोकतोप्रसिद्धत्वेसतिवेदतःप्रसिद्धइत्यर्थस्स्यात् । तत्रचप्रसिद्धिमात्रद्योतकस्यनिपातद्वयस्यविशेषानालिंगितसामान्याभा

लोकेतस्याप्रसिद्धत्वात्। वेदेप्रसिद्धत्वेपि "अनादिर्वाअयमाकाश"इत्यादौगगनस्यापिप्रसिद्धेर्व्यावर्त्यस्याप्रसिद्धाकाशस्यैवाभावे ननिपातवैयर्थ्यात्। गगनपक्षेतुशास्त्रयोनित्वेनलोकाप्रसिद्धब्रह्माकाशस्यव्यावर्त्यत्वाल्लौकिकप्रसिद्धिद्योतकनिपातावैयर्थ्यं । नच वाच्यंवेदमात्रप्रसिद्धिर्निपातद्योत्या। तथाचलोकवेदप्रसिद्धंगगनंव्यावर्त्यतइति। मात्रशब्दार्थभूतायालोकाप्रसिद्धेःप्रसिद्धिद्योतकनिपाताद्योत्यत्वात् । किंच ब्रह्मवेदमात्रेप्रसिद्धं । गगनंतुलोकेवेदेचस्वरूपेणनामरूपावकाशदानात्तन्निर्वाहकतयाचप्रसिद्धं।

प्र० वेनतद्विशेषवेदप्रसिद्धिद्योतकत्वसंभवेपिनलोकाप्रसिद्धत्वद्योतकत्वं। तस्यतत्रासामर्थ्यादितिभावः। प्रसिद्ध्यर्थकनिपातेत्यादिव्यवहारेकार्येद्योतकत्वद्योत्यत्वादिव्यवहारस्तुनिपातानांद्योतकत्वमेव । नवाचकत्वमितिपक्षमुपेत्य "प्रसिद्धिद्योतकत्वा"दितिटीकामनुरुध्येतिध्येयं । ननु प्रसिद्धिसामान्यद्योतकस्यक्वचिद्विशेषेपर्यवसानावश्यंभावेनवेदप्रसिद्धआकाशइत्युक्त्यैवार्थाल्लोकाप्रसिद्धइतिगम्यतइत्यतोवाभ्युपेत्यवादेनवाह ॥ **किंचेति** ॥ वैनामेतिनिपातद्वयस्यनामरूपयोर्निर्वहितावैनामेतिविधेयान्वयमुपेत्याप्याह ॥ **नामरूपेति** ॥ लोकेतस्याप्रसिद्धत्वादित्या

प्र० दिनाप्रतिपादितार्थेटीकारूढंकरोति ॥ **अतएवेति** ॥ निपातयोरुभयत्रान्वयादेवोभयथाप्रसिद्धेराकाशेसंभवादेवचेत्यर्थः ॥ **निर्वहितृत्वमिति** ॥ श्रौतपदानुकरणमेतदित्यदोषः । नन्वस्तुद्वेधाप्रसिद्धिर्गगनेटीकासंमताच । तथाप्यत्राकाशपदेनगगनस्यग्रहःकुतइत्यतआह ॥ **नचेति** ॥ **संकुचितेति** ॥ वैदिकप्रसिद्धिमात्रेत्यर्थः । ननुनिपातयोर्विधेयान्वयेनामरूपनिर्वहितृत्वस्यविष्णावेव "एकोदाधारभुवनानिविश्वे"त्यादिनाप्रसिद्धेर्गगनेसर्वाधारत्वस्यवैदिकप्रसिद्धेर्विष्णाविवाभावात्कथंविधेयान्वयपक्षेगगनप्राप्तिरित्यतउद्देश्येनैवान्वयमुपेत्यपूर्वपक्षमाह ॥ **यद्वेति** ॥ सुकरइत्युक्तमेवाह ॥ **गगनइति** ॥ **असंकुचितायाइति** ॥ लोकवेदयोस्सिद्धायाइत्यर्थः । विधेयान्वयपरटीकात्वभ्युपेत्यवादेनप्रवृत्तेतिभावेनतांघटयति ॥ **टीकायामिति** ॥ **विधेयस्यापीति** ॥ यास्वतःप्राप्तालोकप्रसिद्धिरित्यन्वयः । "अप्रसिद्धेरवाच्यं

अतएव"नहिविष्णुस्तन्निर्वहितृत्वंवाप्रसिद्ध"मितिटीकायामाकाशस्यस्वरूपेणतन्निर्वाहकत्वेनचलोकवेदयोःप्रसिद्धिंसिद्धांकृत्वाविष्णोस्तदप्रसिद्धिरुक्ता । नचासंकुचितप्रसिद्धौसत्यांसंकुचितप्रसिद्धिद्योतनंयुक्तं । यद्वा प्रसिद्धस्यैवोद्देश्यत्वादप्रसिद्धस्यैवचविधेयत्वात्प्रसिद्धेरुद्देश्याकाशेनैवान्वयात्सुकरःपूर्वपक्षः । गगनेनिर्वोढृत्वस्याप्रसिद्धावपिस्वरूपप्रसिद्धेरसंकुचितायाः सत्त्वात् । टीकायांब्रह्मपक्षेप्रसिद्धेर्विधेयभूतनिर्वोढृत्वान्वयप्रतिषेधस्तुतदन्वयेपिनसिद्धांतिनइष्टसिद्धिः । विधेयस्यापिब्रह्मणि "अप्रसिद्धेरवाच्यंत"दित्यादाविवप्रसिद्धिशब्दार्थत्वेनस्वतःप्राप्तायालोकप्रसिद्धिस्तद्राहित्यादितिदर्शयितुं ।

गु० पूर्वपक्षस्यदौर्घट्यंभवतीत्यतस्तत्सौघट्यायपक्षांतरमाह ॥ **यद्वेति** ॥ नन्वेवंप्रसिद्धेरुद्देश्याकाशान्वयेनैवपूर्वपक्षे टीकायां नहिविष्णुस्तन्निर्वहितृत्वंवाप्रसिद्धमित्यनेनप्रसिद्धेर्विधेयभूतनिर्वोढृत्वान्वयप्रतिषेधोनुपपन्नः । विधेयप्रसक्तेरभावादित्यतआह ॥ **टीकायामिति** ॥ ननुवैनामेतिप्रसिद्धेरुद्देश्याकाशान्वयेनलोकवेदयोः

॥ ७२९ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० तदतर्क्याज्ञेयमेवचे''त्यादाववाच्यत्वहेतुभूताऽप्रसिद्धिर्नवैदिकप्रसिद्ध्यभावः । तस्याब्रह्मणिसत्त्वात् । किंतुलौकिकप्रसिद्ध्यभावएव । तथाचाप्रसिद्धेरित्यत्रप्रसिद्धिशब्दस्ययथालोकप्रसिद्धिरर्थस्तथेहापिनिपातद्योतितविधेयान्वितायाःप्रसिद्धेःप्रसिद्धिशब्दार्थतयास्वरसतःप्राप्तलोकप्रसिद्धेरभावादितिदर्शयितुमित्यर्थः । टीकायां ''प्रसिद्ध''मित्यस्यलोकतःप्रसिद्धंनचभवतीत्यर्थउक्तोभवति । एवंचनिपातद्वयविशेषितत्वेनप्रबलयाऽऽकाशश्रुत्यापूर्वपक्षकरणात्तयाब्रह्मसाधकानामन्यथासिद्धिंवक्तुंतेषांसावकाशत्वमाह ॥ **नचाकाशेति** ॥ **एवंचेति** ॥ आकाशश्रुतेरिवब्रह्मश्रुत्यादेर्निरवकाशत्वद्योतकाभावेसतीत्यर्थः ॥ **कथंचिदिति** ॥ देशकालाभ्यांगगनस्यापिवृद्धत्वेनब्रह्मत्वं आततत्वादात्मत्वं अवकाशदानान्नामरूपनिर्वाहकत्वं नित्यत्वादमृतत्वंनेयमित्यर्थः । यदत्रान्यैरुक्तंनब्रह्मत्वादिकंनामरूपनिर्वोढर्याकाशेयुक्तं । किंतुतयोर्मध्यस्थत्वेनवक्ष्यमाणेवस्तुनि । ''यदंतरातद्ब्रह्मे''त्यादिसामानाधिकरण्यात् । एतच्चांतरालिकंवस्तुयदितिनपुंसकनिर्देशात्पुल्लिंगनिर्दिष्टाकाशादन्यदिति । तन्न । सिद्धांतेवक्ष्यमाणदिशांतराशब्दस्यविनार्थत्वेनोपपत्तौलक्षणाक्लेशायोगात् । तद्ब्रह्मेतिवक्ष्यमाणापेक्षयानपुंसकत्वेप्याकाशात्प्रकृतादर्थांतरग्रहणायोगात् । त्वयापिसिद्धांते ''यस्यब्रह्मणोंतराल''इत्याकाशरूपब्रह्मपरत्वेनोक्ततयाकाशरूपैकार्थएवकथनौचित्याच्चेति ।

नचाकाशश्रुतिरिवब्रह्मश्रुत्यादिकंप्रसिद्ध्याविशेषितं । येनब्रह्मत्वादेरीशेप्रसिद्धत्वात्सएवगृह्येत । एवंचब्रह्मत्वादिकंगगनेकथंचिन्नेयं ।

॥ ७३० ॥

गु० प्रसिद्धत्वेनगगनस्यैवग्रहणंकिंनस्यादित्यतआह ॥ **नचाकाशेति** ॥ सिद्धांतीयलिंगादिकंसावकाशयति ॥ **एवंचेति** ॥ **स्युरिति** ॥ एव तु पुनः वै वा एते

SGDF
Sri Gargeshwari Digital Foundation

प्र० ब्रह्मादिशब्दान्मुख्यार्थस्यब्रह्मणएवग्रहणंकुतोनेत्यतआह ॥ अप्रसिद्धस्येति ॥ लोकप्रसिद्धिशून्यस्येत्यर्थः । ननुप्रसिद्धिद्योतकनिपातोपे तस्याप्याकाशस्यप्रागब्रह्मत्वंनिर्णीतमितितेनगतत्वमाशंक्यनिराह ॥ तल्लिंगादितीति ॥ नार्थांतरमिति ॥ "स्युरेव"त्वित्यादिवत्प्रमाणा भावादितिभावः ॥ भाष्येवैनामेतीति ॥ एतेन "वैनामेतिनिपातद्वयविरोधा"दितिटीकापिविवृता । भाष्येद्वयेत्यनुक्तावपिद्वित्वेतात्पर्यं

अप्रसिद्धस्यब्रह्मणःप्रसिद्धिद्योतकनिपातेनैवनिरासात्। तल्लिंगादित्यस्यविषयवाक्येतु "सर्वाणिहवाइमानिभूता न्याकाशादेवे"त्यत्रवैशब्दस्यसन्निहितसर्वभूतान्वयोवा । "स्युरेवतुपुनर्वैवेत्यवधारणवाचका"इतिवचनेनाव धारणार्थत्वंवा । इहत्वाकाशस्यैवसन्निधानं । नामशब्दस्यचनार्थांतरमस्तीतिवैषम्यं । अतएवभाष्ये वैनामेति निपातद्वयोक्तिः । न्यायविवरणेच "वैनामेतिप्रसिद्धिद्योतकनिपातद्वयंरूढित्यागेनोक्तयौगिकार्थस्वीकारेविरो धी"त्युक्तं । तेयदंतरेतिश्रुतंनामरूपराहित्यंतुनब्रह्मण्यपियुक्तं । ईक्षत्यधिकरणे "रूपोपन्यासाच्चे"त्यत्रचब्रह्म णोनाम्नोरूपस्यचोक्तेः । भूताकाशस्यरूपित्वेप्यव्याकृताकाशस्यारूपत्वात् । अतएवभूताकाशस्यापिशब्दै कगम्यत्वात्कथंलोकप्रसिद्धिरितिनिरस्तं । अव्याकृताकाशइत्येवपूर्वपक्षकरणात् । अतएवभाष्येप्रसिद्धाकाश

प्र० कथंटीकाकृताज्ञातमित्यतआह ॥ न्यायविवरणेचेति ॥ अनामरूपत्वमप्यन्यथयति ॥ तेयदंतरेतीति ॥ ईक्षतीति ॥ ईक्षतेर्नाशब्द मित्यनेननञ्द्वयोपेतेनशब्दवत्त्वापरपर्यायनामवत्त्वस्योक्तत्वात् अदृश्यत्वनयगुणसूत्रेरूपस्योक्तेरित्यर्थः ॥ रूपित्वेपीति ॥ "आकाशोनी लिमोदेती"तिश्रुतेरितिभावः । अतएवेत्युक्तमेवव्यनक्ति ॥ अव्याकृतेति ॥ आकाशद्वैतंतुवियत्पादे "नवियदश्रुते"रित्यत्रसमर्थयिष्यते

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ **इत्येवेति** ॥ अन्यथा भूतमित्यवक्ष्यदितिभावः । इहभूतमेवकुतोनेत्यतआह ॥ **नहीति** ॥ यद्यप्यनामत्वमव्याकृतेपिनास्ति । तथापिभूतेरूपसत्त्वेनारूपित्वस्याप्यभावादव्याकृतेतस्यभावात्तदभिप्रायेणैवमुक्तिः । यद्वाब्रह्मवदव्याकृताकाशस्यापिदेशादितोऽनंतत्वेनसाकल्येनशब्दागोचरत्वरूपमनामत्वमव्याकृतेप्यस्तीतिभावः । अर्थांतरत्वादिव्यपदेशादितिसूत्रभाष्याद्युक्तनिरवकाशानामरूपत्वादिहेतुबलादाकाशोविष्णुरेव । निपातद्योत्यप्रसिद्धिरप्यंतरंगत्वाद्विष्णौसंभवद्वैदिक्येवग्राह्येतिभावेनसिद्धांतटीकांविवृण्वन् अनामरूपत्वयोष्टीकायामस्पष्टस्वरूपस्यस्पष्टीकरणेनतयोर्निरवकाशत्वंक्रमेणव्यनक्ति ॥ **साकल्येनेत्यादिना** ॥ आदिपदेनामुख्यार्थकनामराहित्यंस्वानभिधायकनामराहि

इत्येवोक्तं । टीकायामपिसिद्धांते "अवकाशस्यापिनामवत्त्वा"दित्यत्रारूपवत्त्वंस्वीकृत्यनामवत्त्वमेववक्ष्यते । नहिभूताकाशमनामरूपमिति ॥ **सिद्धांतस्तु** ॥ साकल्येनशब्दागोचरत्वादिरूपमनामत्वं "यतोवाचोनिवर्तंत"इत्यादिभाष्योक्तश्रुतिभिर्विष्णोरेव । ईक्षत्यधिकरणेत्ववाच्यत्वमेवनिषिद्धं । तेयदंतरेत्यनेनचप्रकृतनिर्वाह्यप्राकृतरूपराहित्यमेवोक्तं । तच्च

प्र० त्वमयौगिकनामराहित्यमित्यादिग्राह्यं ॥ **भाष्योक्तेति** ॥ अत्रसूत्रेऽन्यत्रचेत्यर्थः । तेन "अशब्दमस्पर्श यत्तदद्रेश्यमग्राह्यं अवागमन"इत्यादिश्रुतयोग्राह्याइतिबहुवचनोपपत्तिः । एवमग्रेपि । "ननुहरेःकथमनामरूपत्वं । उक्तविरोधा"दित्यादिटीकांव्यंजयन्प्रागुक्तशंकांनिराह ॥ **ईक्षतीति** ॥ नतुसाकल्येनशब्दागोचरत्वादिकमित्येवकारार्थः । ननु "अरूपोभूतवर्जना"दितिभाष्यमयुक्तं । श्रुतौभौतिकरूप
...तीतेरित्यतआह ॥ **प्रकृतनिर्वाह्येति** ॥ प्रकृतंयन्निर्वाह्यलक्षणंप्राकृतरूपंतद्राहित्यमित्यर्थः । भाष्येभूतपदमुपलक्षणं । अतएवप्र ॥ ७३१ ॥
...नामरूपे"इतिश्लोकतात्पर्ये "अप्राकृतत्वाद्रूपस्याप्यरूपोसावुदीर्यत"इत्युक्तमितिभावः । अन्यथाऽप्रकृतपरत्वं,
"अनामरूपासौ...

...० "रुग्मवर्ण"मित्यादिवच... "श्यामाच्छबलंप्रपद्य"इतिसन्निहितवाक्यविरोधश्चस्यादितिभावः ॥ **अरूपमिति** ॥ "अशब्दमस्पर्शमरूपमव्यय... गात्र"मित्यादिश्रुतिभिरित्यर्थः । ब्रह्मणिरूपप्रसक्त्यातन्निषेधस्संभवतीतिभावेनसुप्रसिद्धमित्युक्तं । तद्व्यनक्ति ॥ **ब्रह्मणाति** ॥ आदिपदेनकुसमयादिप्राप्तेतिगृह्यते । भाष्यविवरणपरटीकयान्यायविवरणमपिविवृतमितिभावेनाह ॥ **तदुक्तमिति** ॥ यद्वाभाष्यटीकयोरनामत्वस्यारूपत्वस्यचव्युत्क्रमेणैवसूत्रानुरोधेनव्युत्पादनादिहचश्रौतक्रमानुरोधेनानामरूपत्वयोःक्रमेणव्युत्पादनंकिंमूलमित्यतआह ॥ **तदुक्तमिति** ॥ यद्वाभाष्येहरावनामरूपत्वोपपादनस्यैवकृतत्वेनगगनेतदभावस्यानुक्तत्वाट्टीकायां "अन्यथाऽनामरूपत्वविरोधात् ।

"अरूप"मित्यादिश्रुतिभिर्ब्रह्मण्येवसुप्रसिद्धं । नतुगगने । ब्रह्मणिरुग्मवर्णादिश्रुतितात्पर्यापरिज्ञानादिप्राप्तलौकिकरूपस्य "अरूप"मित्यादिश्रुत्यानिषेधवद्गगनेतदभावात् । तदुक्तंन्यायविवरणे "प्रसिद्धाकाशस्योक्तमनामरूपत्वंविरुद्ध"मिति ।

प्र० अवकाशस्यापिनामवत्त्वा"दित्युक्तिःकिंमूला । यस्याउपपादनंनतुगगनइत्यादिनाकृतमित्यतआह ॥ **तदुक्तमिति** ॥ तत् गगनेऽनुपपन्नत्वमित्यर्थः । यद्वाटीकायां "अवकाशस्यापिनामवत्त्वा"दित्यादिनाऽनामत्वाभावएवोपपादितोनत्वरूपत्वाभावोपि । भवद्भिस्त्वनामत्वाभावंटीकोक्तत्वादनुक्त्वाऽरूपत्वाभावएवटीकानुक्तोपिव्युत्पादितः । सकिंमूलइत्यतआह ॥ **तदुक्तमिति** ॥ अनामत्वमरूपत्वमुभयंगगनेविरुद्धमित्येतदुक्तमित्यर्थः । टीकोपलक्षणमितिभावः । न्यायविवरणेऽनामत्वमरूपत्वंचविरुद्धमित्यनुक्त्वाऽनामरूपत्वमितिसहनिर्देशोपीहपृथग्व्युत्पादनंतु श्रुतौ तेइत्यत्रनिर्वाह्यतयाप्रकृतयोर्नामरूपयोर्मध्येरूपमेवप्राकृतं । नतुनामापि । सर्ववैदिकनाम्नामनादिनित्यत्वेनप्रकृति

SGDF

प्र० जन्यनाम्नोऽभावादितिद्योतयितुमित्याहुः। ननु "नामरूपयो"रित्यत्ररूपपदेनार्थप्रपंचोगृह्यतइत्युपेत्यसर्वाधारत्वंतेनलब्धमित्युच्यते। तेय दंतरेत्यत्रतु "अवर्णं"मित्यादिभाष्योक्तश्रुत्याप्राकृतशुक्लपीतादिरूपराहित्यमर्थइतिभाति। तत्कथमेतदितिचेन्मैवं। नामरूपयोरित्यत्ररूपप देनाजहल्लक्षणयारूपस्पर्शगंधादिविषयमात्रोपलक्षणाददोषइत्याहुः। "नचविष्णुपक्षेनिपातद्वयविरोधः। भगवतोनामादिनिर्वहितृत्वस्यालो कप्रसिद्धत्वेपि "एकोदाधारभुवनानिविश्वे"त्यादिवेदप्रसिद्धत्वेनतदर्थत्वेनोपपत्ते"रितिटीकांविवृण्वन्प्रागुक्तशंकामनूद्यनिराह ॥ **नचनिपा तेति** ॥ टीकायांद्वयेत्युक्तेर्भावःप्रागेवोक्तइतिभावेननिपातविरोधइत्येवानुवादःकृतः। वै इत्यस्यावधारणार्थत्वेनाप्युपपत्तेरितिभावः।

नच निपातविरोधः। यतः वैदिकेषुप्रयोगेषुवैदिक्येवप्रसिद्धता। ग्राह्यांतरंगभूतत्वात्तदयोगेत्ववै दिकी ॥१॥ ब्रह्मणोहिसर्ववेदेषुमहातात्पर्यतःप्रसिद्धिः। नैवंगगनस्य। एवंचप्रसिद्धेर्यदिपूर्ववादिरी त्योद्देश्याकाशान्वयः तथापि "शास्त्रस्थावातन्निमित्तत्वा"दितिन्यायेनविजातीयबहिरंगलौकिकप्र सिद्धिसंग्रहायसजातीयांतरंगवैदिकप्रसिद्धिपीडनायोगाद्ब्रह्मणःप्रसिद्धिरेवनिपातद्योत्या। अतएव

प्र० यतइत्यस्यश्लोकेनान्वयः। अतोनविरोधइत्यर्थः। श्लोकंविवरीतुंब्रह्मणिवैदिकप्रसिद्धिमाह ॥ **ब्रह्मणइति** ॥ "सर्वज्ञंसर्वकर्तारंनारायणम नामयं। सर्वोत्तमंज्ञापयंतिमहातात्पर्यमत्रहि। सर्वेषामपिवेदानामितिहासपुराणयोः। प्रमाणानांचसर्वेषांतदर्थंचान्यदुच्यत"इत्यादिपुरा णवचनात् [illegible] "सर्वोत्कर्षेदेवदेवस्यविष्णोर्महातात्पर्यंनैवचान्यत्रसत्य"मित्यादिश्रुतेरितिभावः। अवांतरतात्पर्यतोन्यस्यापिप्रसिद्धिरस्तीत्यतो [illegible] श्लोकंतात्पर्यतोविवृणोति ॥ **शास्त्रस्थावेति** ॥ उक्तमधिकरणंप्राग्जन्माधिकरणे। शास्त्रनिष्ठावैदिकीप्रसिद्धिरे महातात्पर्यतइत्युक्तं ॥ [illegible]

SGDF Sri Gargeshwari Digital Foundation

प्र० वग्राह्या । वेदशब्दार्थनिर्णयस्यवैदिकप्रसिद्धिनिमित्तकत्वात् । नत्वार्यप्रसिद्धिबलेनलौकिकीप्रसिद्धिर्ग्राह्येतिसूत्रार्थः ॥ **सप्तमइति** ॥ सप्तमस्यचतुर्थेपादे "सलौकिकस्स्याद्दृष्टप्रवृत्तित्वा"दितिद्वितीयेऽधिकरणे "सौर्यंचरुंनिर्वपे"दित्यादौकिंलौकिकइत्थंभावोतिदिश्यतेऽथवैदिकइति संशये वैदिकेत्थंभावस्यप्रत्यक्षेणशास्त्रेणदर्शपूर्णमासादिषुनिबद्धत्वेनान्यत्रसंबंधायोगात् लौकिकस्यपार्वणस्थालीपाकादावनुवृत्तस्यसाधारणशास्त्रेणेहप्रापणसंभवाल्लौकिकएवेतिप्राप्ते वैदिकस्यकर्मणः कथंभावाकांक्षायांवैदिकेत्थंभावस्यशीघ्रमुपस्थितेस्तदतिक्रमेणानुपस्थितलौकिकग्रहणायोगाद्वैदिकएवेत्थंभावोतिदिश्यतइत्युक्तं । अन्यथातत्रापिपूर्वपक्ष्युक्तदिशालौकिकेतिकर्तव्यतायाएवान्वयउच्येतेत्यर्थः । ननुस्वरूपतोहरेःप्रसिद्धावप्याकाशशब्दार्थतयाप्रसिद्ध्यभावेयःप्रसिद्धाकाशइतिकथमुक्तिरित्यतआह ॥ **अस्तिचेति** ॥ एवंप्रसिद्धेरुद्देश्यान्वयेप्याकाशोब्रह्मेत्युपपाद्येदानींटीकोक्तंविधेयान्वयंसोपपत्तिकमुपपादयंस्तत्रापिब्रह्मणस्सिद्धिमाह ॥ **यदात्विति** ॥ नामरूपनिर्वोढृत्वंकिंतद्धारकत्वंकिं

सप्तमे इत्थंभावाकांक्षेषुवैदिकेषुसौर्यादिषुवैदिकस्यैवेत्थंभावस्यान्वयउक्तः । अस्तिचब्रह्मण्याकाशशब्दार्थतयापिवेदेप्रसिद्धिः । यदातूद्देश्यस्यवस्तुतःप्रसिद्धिमात्रेणोद्देश्यतोपपत्तेर्विधेयस्यैवनिर्वोढृत्वस्यस्थलांतरसिद्धप्रसिद्ध्युपन्यासादिनोपपादनीयत्वादिदमित्थंखल्वित्यादौविधेयान्वयस्यैवदर्शनाच्च प्रसिद्धेर्निर्वोढृत्वान्वयः तदा "एकोदाधारभुवनानि नामरूपेव्याकरो"दित्यादिवेदेब्रह्मणइवगगनस्यनिर्वोढृत्वेनवेदेलोकेचाप्रसिद्धेर्गगनपक्षएवनिपातायोगः ।

गु० ऽवधारणवाचकाःस्युरित्यन्वयः । प्रकृतनिर्वाह्यं निर्वाह्यत्वेनप्रकृतमित्यर्थः ॥ **अतएवेति** ॥ बहिरंगलौकिकप्रसिद्धिसंग्रहायसजातीयांतरंगवैदिकप्रसिद्धिपीडना

SGDF
Sri Gargeshwari Digital Foundation

प्र० वातत्कर्तृत्वं । द्वयमपिहरावेवेतिश्रुतिद्वयोक्तिः । लोकेचेत्युक्तमेवोपपादयति ॥ **नहीति** ॥ अवकाशदानादिनानामादिनिर्वाहकत्वंगगने प्यस्तीत्यतउक्तं **निरंकुशेति** ॥ तस्यतत्रभगवदायत्तत्वादितिभावः । यदात्वित्यादिनोक्तंटीकारूढंकरोति ॥ **एतमेवेति** ॥ टीकोक्तेर्मूल माह ॥ **न्यायविवरणेचेति** ॥ वैनामेतिनिपातद्वयंभगवतोनामरूपनिर्वहितृत्वेश्रुत्यादिप्रसिद्धिबाहुल्यंदर्शयतीत्यर्थः । वहप्रापणइत्यस्यधा तोरनिट्त्वात्कथंनिर्वहितृत्वपदप्रयोगइत्याशंक्याह ॥ **यद्यपीति** ॥ **श्रुत्यनुकरणार्थमिति** ॥ यथा "नलोकाव्ययनिष्ठाखलर्थतृना"मि त्यत्रतृणामितिणत्वेननिर्देशेकार्येतृनामितिणत्वाभावेननिर्देशोविवक्षितरूपानुकरणार्थस्तथेतिभावः । उक्तंचमंजर्यां "जिघृक्षितरूपविनाश प्रसंगात्तृनामित्यत्रणत्वाभाव"इति । ननुयदिभगवतोनिपातद्योत्यप्रसिद्धिरुपपद्येत तर्हि "अनामासोप्रसिद्धत्वादरूपोभूतवर्जना"दित्यप्रसि द्धत्वोक्तिर्विरुध्यतइत्यतआह ॥ **भाष्यइति** ॥ एवमधिकरणशरीरमुपपाद्यसूत्रस्थहेत्वंशस्यटीकायां "नामरूपराहित्याख्यविलक्षणार्थत्वव्य

नहिगगनेनिरंकुशनामरूपनिर्वोढृत्वंलोकतोपिप्रसिद्धं । एतमेवविधेयान्वयपक्षमभिप्रेत्यटीकायामपि "भगवतो नामादिनिर्वहितृत्वस्यालोकसिद्धत्वेपी"त्युक्तं । न्यायविवरणेच "वैनामेतिनिर्वहितृत्वेश्रुत्यादिप्रसिद्धिबाहुल्य" मित्युक्तं। यद्यप्यत्रलोकेनिर्वोढृशब्दएवसाधुः। तथापिटीकादौश्रुत्यनुकरणार्थंनिर्वहितृशब्दःप्रयुक्तः। भाष्येऽना मत्वेहेतूकृतमप्रसिद्धत्वंसाकल्येनाप्रमितत्वं । निपातद्योत्याप्रसिद्धिस्तुनिर्वोढृत्वेनान्यत्रनिर्णीतत्वमित्यविरोधः । ॥ ७३३ ॥

गु० योगादेवेत्यर्थः ॥ **निर्वोढृशब्दएवसाधुरिति** ॥ निरुपसर्गपूर्वकाद्वहेस्तृचिहोढइतिढत्वेझषस्तथोर्धोऽधइतिधत्वेष्टुनाष्टुरितिष्टुत्वेसहिवहोरोदवर्णस्येत्यवर्णस्यौत्वे

प्र० पदेशात्तद्ब्रह्मेतिब्रह्मत्वव्यपदेशाच्चे"त्युक्तमर्थंसूत्रारूढंकरोति ॥ **सूत्रइति** ॥ "अर्थांतरत्वमितिरूपराहित्यमादिपदेनानामत्वमितिवे"तिटी कोक्तंपक्षांतरमुपपत्तिंवदन्नाह ॥ **यद्वेति** ॥ अस्मिन्पक्षे अन्योर्थोर्थांतरं । तत्त्वादिव्यपदेशादितिशब्दादेवानामरूपत्वसिद्धिः । ननुविष यवाक्यसन्निधानात् ॥ **नतस्यादिपदेनेति** ॥ तत्वप्रदीपेतु "अर्थांतरत्वनामांतरत्वादिव्यपदेशादितिवे"ति पुनरादिपदप्रयोगाद्ब्रह्म

सूत्रेऽर्थांतरशब्देनविलक्षणत्वमात्रोक्तावपिविषयवाक्येसन्निहितत्वादनामरूपत्वरूपविशेषसिद्धिः । आदि शब्दार्थस्तुब्रह्मत्वादिकं । यद्वा "तेयदंतरे"तिद्विवचनेनानामरूपत्वयोःसाहित्यप्रतीतावपिब्रह्मत्वेनिरपेक्ष योरेवहेतुत्वमितिभावेनसूत्रेऽरूपत्वमर्थांतरपदेन आदिपदेनत्वनामत्वमुक्तं । अस्मिंश्चपक्षेब्रह्मत्वादिकंप्रसि द्धत्वाच्छिष्यैरेवोहितुंशक्यमितिनतस्यादिपदेनग्रहणमितिद्रष्टव्यं ॥ अन्येतु ॥ "आकाशस्तल्लिंगा"दित्यस्य विषयवाक्ये "आकाशादेवसमुत्पद्यंत"इत्यत्रेवैतत्सूत्रविषयवाक्ये "आकाशोहवैनामे"त्यत्रब्रह्मलिंगाभावेन पूर्वपक्षोदयादगतार्थतेत्याहुः । तन्न । अत्रापिनामरूपनिर्वहितृत्वादिलिंगानांब्रह्मात्मादिश्रुतीनांचसत्त्वात् ।

प्र० त्वादिकमप्यादिपदार्थइतिप्रतीयते ॥ **अन्येत्विति** ॥ आकाशोवैनामेत्यत्रश्रुतआकाशःकिंभूताकाशःपरमात्मावेतिसंदेहेआकाश शब्दस्यभूतेरूढत्वाद्भूतमितिप्राप्ते नामरूपनिर्वाहकत्वादिब्रह्मलिंगाद्ब्रह्मेतिसिद्धांतः । ननुलिंगाद्रूढिबाधःप्रागेवोक्तः । अतोगतार्थमेत दित्यतोभामत्युक्तमनुवदति ॥ **आकाशइति** ॥ सर्वाणिभूतान्याकाशादेवसमुत्पद्यंतइत्यत्रसर्वजगदुत्पत्तेरेवकारावगतनिरपेक्षकारणत्व

SGDF

प्र० स्वप्रश्नप्रत्युक्तिसामानाधिकरण्यसामर्थ्यस्यचदर्शनाद्ब्रह्मपरत्वं नैवमिहेतिकल्पतरूक्तार्थोबोध्यः । निर्वहितृत्वेतिपूर्ववत्साधुत्वसमर्थनं ।
ननूक्तमत्र "तत्रैवात्रसर्वशब्दाभावादवकाशदानादिनानामरूपनिर्वहणस्यगगनेपिसंभवादकस्माद्रूढित्यागायोगात् "तेयदंतरातद्ब्रह्मे"तिब्रह्म
णोनामरूपयोरंतरालत्ववचनाद्भूताकाशोनामरूपयोर्निर्वहिता । ब्रह्मचैतयोरंतरालं । मध्यंसारमितियावदितिनामरूपनिर्वोढ्राकाशतोब्र
ह्मणोभेदेनोक्ते"रित्यादिनाब्रह्मलिंगादेरन्यथानयनमित्यतआह ॥ क्लेशेनेति ॥ उभयत्रेति ॥ तत्रापि "आकाशाद्वायुः वायोरग्नि"रित्या
दिनाऽऽकाशस्यसर्वभूतादित्वश्रवणेनसर्वभूतकारणत्वस्य ततोऽन्यस्याभावेननिर्धारणोक्तनिरपेक्षत्वस्यभूतेप्युपपत्तेस्तत्रैवोक्तत्वादितिभावः ।
ननुपूर्वमाकाशस्यब्रह्मत्वेनिर्णीतेपिदहराधिकरणेदहराकाशोभूतमितिप्राप्तेब्रह्मेतिपुनर्विवरणमिवेहापिस्यादितिचेन्न । दहरस्थस्यैवब्रह्मत्वेनदह

क्लेशेनाकाशेयोजनंतूभयत्रसमं ॥ केचित्तु ॥ तल्लिंगादितिन्यायेनैवात्रा
पिवाक्यआकाशस्यगगनत्वनिरासान्मुक्तजीवत्वेनैवेहपूर्वपक्षइत्याहुः। तन्न ।

प्र० रस्यब्रह्मत्वनिरासात् । तत्रपूर्वपक्षप्रापकप्रबलहेतोरिवेहप्रापकस्याभावाच्चेतिभावः ॥ केचित्त्विति ॥ "आकाशोवैनामे"तिश्रुतआकाशो
मुक्तजीवःपरमात्मावेतिसंशये "अश्वइवरोमाणिविधूयपापंचंद्रइवनिर्मुक्त"इतिमुक्तस्याभिधानेनप्रकृतत्वात् नामरूपभाक्त्वरूपनामरूपनिर्वो
ढृत्वस्यसंसारित्वदशायांसंभवात् ब्रह्मत्वामृतत्वादेश्चमुक्तेसंभवात् आकाशशब्दस्यचासंकुचितप्रकाशयुक्तेमुक्तेयौगिकत्वेनोपपत्तेर्मुक्तएवायमाका
शइतिप्राप्ते "नामरूपयोर्निर्वहिते"तिकर्तृतयातन्निर्वोढृत्वस्यजीवेऽयोगात्सकलनिर्माणधुरंधरस्येश्वरस्यैवयोगात् "तेयदंतरे"त्युक्तनामरूपास्पृ
ष्टत्वस्यतत्रैवयोगादाकाशोब्रह्मेतिसिद्धांतः । तत्रदूष्यांशमात्रमनुवदति ॥ तल्लिंगादितीति ॥ किमस्मिन्वाक्येब्रह्मलिंगमस्पष्टमुतस्पष्टमि

SGDF Sri Gargeshwari Digital Foundation

प्र० तिविकल्पौहृदिकृत्वाक्रमेणनिराह ॥ अस्मिन्निति ॥ स्पष्टत्वेब्रह्मलिंगेनैवजीवप्रापकबाधादितिभावः । जीवप्रापकंचनास्तीत्याह ॥ निर्वीजश्चेति ॥ श्रुतीति ॥ आकाशश्रुतीत्यर्थः । सन्निधेःस्थानप्रमाणत्वेनश्रुतितोदुर्बलत्वादितिभावः । एतेनास्याकाशस्यभूतजीवान्यतरत्वप्राप्तौशिवत्वेनसिद्धांतइतिवदतःकस्यचिन्मतमपिनिरस्तंबोध्यं । शिवासाधारणलिंगाभावाच्च । सर्वाधारत्वादेर्विष्णुलिंगत्वसमर्थनाच्चेति । अक्षरार्थस्तुप्रागेवविवृतः ॥ ७ ॥ आकाशाधिकरणं ॥ १२ ॥

अस्मिन्वाक्येब्रह्मलिंगस्यास्फुटत्वेगगनपक्षस्यैवोदयात् । स्फुटत्वेचजीवपक्षस्याप्यनुदयाच्च । निर्बीजश्चजीवपक्षः । जीवलिंगाद्यभावात् । आकाशशब्दस्यतत्राप्रसिद्धेर्वैनामेतिनिपातानुपपत्तेः । जगद्व्यापारवर्जमित्यत्रमुक्तजीवस्यनामरूपनिर्वोढृत्वस्यनिरसिष्यमाणत्वाच्च । "ब्रह्मलोकमभिसंभवामी"तिपूर्ववाक्येचजीवस्यसन्निहितत्वेपिसन्निधानस्यश्रुत्यबाधकत्वात् । ब्रह्मलोकशब्देनब्रह्मणःप्राधान्येनसन्निहितत्वाच्चेति ॥ ७ ॥ आकाशाधिकरणं ॥ १२ ॥

गु० ढोढेलोपइतिलोपेनिर्वोढृशब्दनिष्पत्तिरितिभावः । पूर्वपक्षेसूत्रेसाक्षाद्धेतुविशेषाभावात्पक्षांतरमाह ॥ यद्वेति ॥ प्राधान्येनेति ॥ प्राप्तत्वेनतस्यप्राधान्यमित्यर्थः ॥ ७ ॥ आकाशाधिकरणं ॥ १२ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐसुषुप्त्युत्क्रांत्योर्भेदेनॐ ॥ अत्रटीकायां "असंगत्वलिंगेनलोकप्रसिद्ध्याचेशजीवयोस्साधारणस्यस्वप्रादिदर्शनलिंगस्ये"त्युभयत्रप्रसिद्धत्वमुक्तं । तदयुक्तमिव । नामपादीयाकाशादिशब्दानामपीश्वरलिंगलोकप्रसिद्धिभ्यांतथात्वापत्तेरित्यतआह ॥ अस्येति ॥ स्वप्नद्रष्टृत्वलिंगस्येत्यर्थः । नामपादादिन्यायसाम्येनवज्रादिनाम्नांस्वप्नद्रष्टृत्वादिलिंगानांचब्रह्मणिप्रयोगस्योक्त्याप्रयोगसाधारण्येनोभयत्रप्रसिद्धत्वादित्यर्थः । टीकापितथैवनेयेतिभावः । "जीवस्यैवभवेत्प्रसिद्धत्वा"दितिटीकायांप्रसिद्धपदप्रयोगेणहरावप्रसिद्धिसूचनेनसूचितंसंगतिद्वयमाह ॥ पूर्वेति ॥ प्रागाकाशशब्दस्यश्रौतप्रसिद्ध्याब्रह्मणिसंभवेपीहतदभावान्नस्वप्नद्रष्टृत्वंहरेर्युक्तमितिवा आकाशस्यजडत्वेनतत्रेशलिंगस्येशाभेदेनायोगेपीहजीवस्येशाभेदेनतल्लिंगंनेतुंशक्यतइतिवापूर्ववैषम्येण अव्याकृताकाशस्यारूपत्वेप्यरूपत्वेनप्रसिद्धब्रह्मणएवग्रहणंपूर्वत्रयथातथेहापि स्वप्नादिद्रष्टृत्वेनप्रसिद्धस्यजीवस्यैवग्रहणमितिपूर्वन्यायेनवेत्यग्रेस्पष्टं । तथाचप्रत्युदाहरणरूपावाऽऽपवादिकीवासंगतिरित्यर्थः । एवंतर्हिपूर्वोक्तेविरोधाभावादफलेयंचिंतेत्यतआह ॥ प्रयोजनंत्विति ॥ एतेन "असंगमरसमगंध"मित्यादिटीकाविवृता । एतेनैवस्वोक्तसंगतेर्भाष्या

॥ ॐसुषुप्त्युत्क्रांत्योर्भेदेनॐ ॥ अस्योभयत्रप्रसिद्धत्वंकंपनादित्यत्रैवोक्तं । अनंतरसंगतिस्तु पूर्ववैषम्येणवा पूर्वसिद्धांतन्यायेनवापूर्वपक्षोत्थानात् । प्रयोजनंतु पूर्वपक्षेऽक्षराधिकरणोक्तासंगत्वाक्षेपः । सिद्धांतेतुतत्समाधानमितिभाष्यएवोक्तं ।

गु० ॥ ॐसुषुप्त्युत्क्रांत्योर्भेदेनॐ ॥ ननुस्वप्नद्रष्टृत्वलिंगस्यलोकतोन्यत्रप्रसिद्धत्वात्कथमुभयत्रप्रसिद्धतेत्यतआह ॥ अस्येति ॥ पूर्ववैषम्येणेति ॥ पूर्वाधिकरणे आकाशशब्दस्यब्रह्मणिप्रसिद्धत्वान्नामादिनिर्वोढृत्वस्यब्रह्मणिप्रसिद्धत्वेपिस्वप्नद्रष्टृत्वस्यब्रह्मण्यप्रसिद्धत्वादन्यपरत्वमितिवैषम्येणेत्यर्थः ॥ सिद्धांतन्यायेनेति ॥ यथा ॥ ७३५ ॥

प्र० दिविरोधोपिप्रत्युक्तः । तस्यफलपरत्वादिति । विषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ वाजसनेयेषष्ठेतृतीयब्राह्मणेज्योतिर्वाक्यादनंतरं श्रूयते "सवाएषएतस्मिन्संप्रसादेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिस्वप्नायैवसयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगोह्ययंपुरुषइत्यादि । तद्वाक्येयत्तत्रस्वप्नेकिंचित्पश्यतीत्युक्तंस्वप्नावस्थातत्स्थवस्तुनोर्द्रष्टृत्वंविषयइत्यर्थः । यदिभेदोमिथ्यातदाऽसंगत्वस्यजीवेपिब्रह्माभेदेननयनसंभवेनप्रसिद्धिबाधाभावाज्जीवस्यैवेदंलिंगं । अन्यदातुनेतिस्पष्टाहेतुहेतुमत्तेतिभावः । "स्वप्नादिद्रष्टृत्वंजीवस्यैव भवेत् । प्रसिद्धत्वा"दितिटीकांविवृण्वन्पूर्ववैषम्येणपूर्वपक्षंव्यनक्ति ॥ पूर्वोक्तइति ॥ नतथेति ॥ श्रुतिषुब्रह्मणिप्रसिद्धंनेत्यर्थः । ननूक्तं

अत्रस्वप्नादिद्रष्टृत्वंकिंजीवस्योतब्रह्मणइतिचिंता । तदर्थंकिंलोकप्रसिद्धिबाधकंनास्त्युतास्तीति । तदर्थमसंगत्वादिकं किंजीवेब्रह्माभेदाभिप्रायेणनेतुंशक्यमुताशक्यमिति । तदर्थंसुषुप्त्युत्क्रांत्योर्व्यपदिष्टोभेदःकिंमिथ्योतसत्यइति ॥ पूर्वपक्षस्तु ॥ पूर्वोक्तआकाशशब्दःश्रुतिषुब्रह्मणिप्रसिद्धः । नामादिनिर्वोढृत्वंतुब्रह्मण्येवप्रसिद्धं । "द्रवतिस्वप्नायैवसयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुष"इतिश्रुतं स्वप्नादिद्रष्टृत्वंतुनतथा । किंतुलोकेजीवएवप्रसिद्धं ।

गु० पूर्वाधिकरणेऽव्याकृताकाशस्यरूपमात्राभावेपिप्राकृतरूपरहितत्वेनप्रसिद्धस्यब्रह्मणएवग्रहणं तथास्वप्नादिद्रष्टृत्वेनप्रसिद्धस्यजीवस्यैवग्रहणमितिपूर्वसिद्धांतन्यायेनेत्यर्थः । वैषम्येणपूर्वपक्षमाह ॥ पूर्वोक्तेति ॥ नतथा ब्रह्मणिनप्रसिद्धमित्यर्थः । ननुयवादिशब्दानांप्रियंग्वादिषुम्लेच्छप्रसिद्धेःसत्त्वेपियदान्याओषधयोम्लायंते अथैतेमोदमानास्तिष्ठंतीत्यादिवाक्यशेषानुगृहीतार्थप्रसिद्ध्यादीर्घशूकादिपरत्ववत् स्वप्नद्रष्टृत्वस्यलोकतोजीवएवप्रसिद्धत्वेपिवैदिकप्रसिद्ध्याब्रह्मणएवस्वप्नद्रष्टृत्वंकिंनस्यादित्यतो दृष्टांतआर्यप्रसिद्धेःसत्त्वेनतदनुसारेणयवादिशब्दानांदीर्घशूकपरत्वेपि प्रकृतेस्वप्नद्रष्टृत्वस्यब्रह्मणिवैदिकप्रसिद्ध्यभावाद्दृष्टांतदार्ष्टांतिकयोर्वैषम्यापत्त्यानास्ययववराहाधि

SGDF Foundation

प्र० पूर्वत्रलौकिकीप्रसिद्धिर्नग्राह्येति। तत्राह ॥ आर्येति ॥ सत्यंलौकिकीनग्राह्येति । किंतुवैदिक्याअभावएवसाग्राह्यानतुतत्सद्भावे । पिकनेमं सततामरसादिशब्दानामार्यप्रसिद्धेरभावेननिगमनिघंटुव्याकरणादिवशेनापूर्वार्थकल्पनेगौरवाल्लौकिकप्रसिद्धिवशेनैवार्थग्रहणस्यपिकनेमाधिकरणेप्रथमस्यतृतीयपादेव्युत्पादितत्वादित्यर्थः । अतएवप्राक् "तदयोगेत्ववैदिकी"त्युक्तमितिभावः । एतेनटीकायां "प्रसिद्धत्वा"दित्यस्य लोकप्रसिद्धत्वादित्यर्थोदर्शितः । टीकोक्तहेतुमाक्षिप्यसमाधत्ते ॥ यद्यपीति ॥ यमिति ॥ यमंतस्समुद्रेकवयोवयंती"त्यत्रयस्यकस्यापि समुद्रस्थत्वेसंभवत्यपि "महोदधिशयोंतक"इत्यादौविष्णोरेवप्रसिद्धतयाप्रसिद्धोनारायणएव "यमंतस्समुद्र"इत्यादौगृह्यते तथेहापि "सयत्तत्रकिंचित्पश्यती"त्यत्रतथात्वेनप्रसिद्धोजीवएवग्राह्यइत्यर्थः । उक्तंचाद्यसूत्रभाष्ये "समुद्रेंऽतर्नारायणः । प्रसिद्धत्वा"दिति । नन्वसंगत्वरूपनिरवकाशेश्वरलिंगात्प्रसिद्धिबाधःस्याद्वज्रादिशब्देष्विवेत्याशंक्यतद्वैषम्यमाह ॥ नचवज्रेति ॥ युक्ता इष्टावेति ॥ "तथात्व"

आर्यप्रसिद्ध्यभावेपिकनेमादौलोकप्रसिद्धिवद्वेदप्रसिद्ध्यभावेलोकप्रसिद्धिरेवचग्राह्या । यद्यपिप्रसिद्धिद्योतकनिपातोनास्ति। तथापि "यमंतःसमुद्र"इत्यादाविवप्रसिद्धमेवग्राह्यं । नचवज्राकाशादिशब्दानांप्रसिद्धार्थत्यागेनब्रह्मपरत्ववदिहपश्यत्यादिपदानांयोगेनब्रह्मपरतायुक्ता इष्टावा ।

गु० करणविषयत्वं। किंतुपिकनेमाधिकरणविषयत्वमेवेत्याह ॥ आर्यप्रसिद्ध्यभावइति ॥ पूर्वाधिकरणआकाशश्रुतेर्वैनामेतिप्रसिद्धिद्योतकनिपातेनेवस्वप्नद्रष्टृत्वस्यप्रसिद्धिद्योतकनिपातेनाविशेषणात्पूर्वपक्षानुपपत्तिरित्याशंकते ॥ यद्यपीति ॥ ननुनस्वप्नद्रष्टृत्वंब्रह्मपक्षेबाधकं । ब्रह्मणःसर्वज्ञत्वेनस्वप्नद्रष्टृत्वोपपत्तेः । नचस्वप्नादे ॥ ७३६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० इत्यादिवक्ष्यमाणदिशावाक्यार्थासिद्धिप्रसंगादितिभावः । "प्रसिद्धत्वा" दितिटीकोक्तहेतोःप्रकारातरेणापितात्पर्यंविवरीतुंशंकामाह ॥ नच संध्यइति ॥ तृतीयस्यद्वितीयपादे "संध्येसृष्टिराहहि" इत्यत्रस्वप्नविषयोभगवदधीनोनवेतिसंशये स्वाप्नवस्तूनांनित्यत्वेऽनित्यत्वेवाप्रागूर्ध्वमुपलंभप्रसंगात्कर्त्रुपादाननिमित्तानामभावाच्चसत्यत्वायोगात् असत्यत्वेतेषामन्याधीनत्वायोगान्नेशाधीनइतिप्राप्ते सत्यत्वेपिविद्युदादिवत्तदानीमेवोत्पादविनाशसंभवादीशकर्तृकत्वस्यवासनोपादानकत्वस्यादृष्टादिनिमित्तकत्वस्यचसंभवात् "अथरथान्रथयोगान्पथस्सृजत" इतिसृष्ट्यवगमाच्च सत्यस्स्वप्नोभगवदधीनइतिवक्ष्यते । तन्न्यायैरित्यर्थः । परमार्थाशेषार्थाभिज्ञत्वस्यसार्वज्ञशब्दार्थत्वात्सत्यत्वोपन्यासः ॥ श्रुतीति ॥ "यस्सर्वज्ञस्सर्व" इत्यादिश्रुतीत्यर्थः । उपलक्षणमेतत् । "विशेषणभेदव्यपदेशाभ्यांचनेतरा" वितिसूत्रेविशेषणपदेनसार्वज्ञस्यविष्णुधर्मत्वेनोपादानात्सूत्रप्रसिद्धंचेत्यपिध्येयं । एतेन "स्वाप्नपदार्थानांजीवगतावस्थायाश्चसत्यत्वात्परमात्मनश्चसर्वज्ञत्वेनतद्विशेषदर्शनोपपत्ति" रितिसिद्धांतटीकाऽत्रैवविवृताध्येया । एतेन "संध्येसृष्टि" रित्यनेनगतार्थत्वमप्याशंकितंभवति । एतच्छंकोत्तरत्वेनापि "प्रसिद्धत्वा" दितिटीकोक्तहेत्वर्थंविवृण्वन्पूर्वसिद्धांतन्यायेनपूर्वपक्षमुज्जीवयति ॥ यथेति ॥ "अरूपमस्पर्शं अरूपोभूतवर्जेना" दित्यादिश्रुतिस्मृतिभिःप्रसिद्धस्ये

नच "संध्येसृष्टिराहही" त्यादिन्यायैःस्वाप्नवस्तुनि, जीवगतस्वप्नावस्थाचसत्या । ब्रह्मणश्चसर्वज्ञत्वं श्रुतिप्रसिद्धमितिवाच्यं । यथाऽव्याकृताकाशस्यरूपमात्राभावेपिप्राकृतरूपरहितत्वेनप्रसिद्धस्यब्रह्मण एव "तेयदंतरे" त्यत्रग्रहणं तथाब्रह्मणोवस्तुमात्रद्रष्टृत्वेपिस्वप्नादिद्रष्टृत्वेनप्रसिद्धस्यजीवस्यैवेहग्रहणात् ।

गु० मिथ्यात्वेनतज्ज्ञत्वेब्रह्मणोभ्रांतत्वंस्यादितिवाच्यं । संध्येसृष्टिराहहीत्यादिन्यासेनस्वप्नादेस्सत्यत्वेनतज्ज्ञत्वेभ्रांतत्वायोगादितिशंकते ॥ नचेति ॥ पूर्वाधिकरणसि

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्यर्थः । एतेनपूर्वन्यायेनेत्येतद्विवृतंभवति । ज्योतिर्नयेनगतार्थत्वमाशंक्यनिराह ॥ **नचवाच्यमिति** ॥ ननुतत्रब्रह्मपरैकवाक्यत्वबलादं तर्णीतण्यर्थत्वंकल्पितंशब्दानामितिचेत्तर्हीहापिलिंगबलात्सुतरांतथास्यात् । वाक्यादपिलिंगस्यबलवत्त्वादितिभावेनाह ॥ **अन्यथेति** ॥ यद्यपिपश्यतीतिकर्तृप्रयोगस्यदर्शनात्कर्तर्येवप्रसिद्धेः प्रयोजककर्तर्यप्रसिद्धेः प्रसिद्धस्यस्वप्नादिदर्शनकर्तुर्जीवस्यैवग्रहणं नत्वप्रसिद्धस्यप्रयोजक कर्तुरीश्वरस्य । तल्लिंगंतुप्रसिद्धिबलात्कथंचिन्नेयमित्येवंरूपेणटीकोक्त "प्रसिद्धत्वा"दितिहेतुरेवैतच्छंकोत्तरत्वेनापियोजयितुंशक्यः । तथा प्यस्ययोजनस्योक्तदिशोहितुंशक्यत्वाद्बलवदंतरंगंबाधकांतरमाह ॥ **तथात्वइति** ॥ दर्शनंप्रतिकर्तृत्वाभावे । प्रयोजककर्तृत्वेस्वाप्नार्थदर्शन कृतविकाररूपलेपाभावेन "अनन्वागतस्तेनभवति"तेनदर्शनेनानन्वागतोलिप्तोनभवतीतिनिषेधायोगादित्यर्थः । व्यामोहयितुर्मायाविनो व्यामोहकृतकार्यादर्शनादितिभावः । कथंतर्हिब्रह्मलिंगोपपत्तिरित्यतो "जीवेशयोरभेदेनजीवेचैतन्यविवक्षयाऽसंगत्वोक्तिसंभवा"दितिटी कोक्तंसौत्रभेदपदव्यावर्त्यमभेदेनोपपन्नत्वंलिंगस्याह ॥ **तथाचेति** ॥ स्वस्यासंगत्वस्ययदुपजीव्यंद्रष्टृत्वंतदनुरोधादित्यर्थः । प्रतियोगिभूतसं

नचवाच्यंपश्यतीतिपदंनद्रष्टृत्वमाह । किंतु "ज्योतिर्दर्शना"दित्यत्रोक्तन्या
येनदर्शयितृत्वं । अन्यथाऽसंगत्वविरोधादिति । तथात्वेदर्शनकृतसंगप्रस
क्तेरेवाभावेनतन्निषेधायोगात् । तथाचासंगत्वंस्वोपजीव्यद्रष्टृत्वानुरोधात्

गु० द्धांतन्यायेनपूर्वपक्षमाह ॥ **यथेति** ॥ **उक्तन्यायेनेति** ॥ अंतर्भावितण्यर्थत्वरूपोक्तन्यायेनेत्यर्थः ॥ **अन्यथेति** ॥ पश्यतीत्यस्यद्रष्टृत्वार्थकक्रियावेशापत्त्याऽसं

प्र० गप्रसक्तिसंपादकत्वेनद्रष्टृत्वस्योपजीव्यत्वमितिभावः । शाब्दिकन्यायमाह ॥ **सन्निपातेति** ॥ सन्निपातस्सन्निधानं । लक्षणशब्दोनिमि त्तवचनः । बहुव्रीहिश्चसमासः । यत्सन्निधानंनिमित्तीकृत्ययोविधिःप्रवर्ततेसविधिस्तत्सन्निधानविघातकस्यशास्त्रस्यकार्यस्यवाननिमित्तमिति न्यायार्थः "क्रन्मेजंत"इत्यत्रकैयटोक्तः । यथाशतानीतिशब्दे शतशब्दात्परस्यजसः "जश्शसोश्शि"रितिशिभावेकृते तस्य "शिसर्वना मस्थान"मितिसर्वनामस्थानसंज्ञायां तत्संनिपातेनशतशब्दस्य "नपुंसकस्यझलच"इतिनुमागमेसति शतन् इ इतिस्थिते "ष्णांताष"डिति षट्संज्ञायां शिभावस्य "षड्भ्योलु"गितिलुक्प्राप्नोति । शिभावसन्निपातेनविहितोनुम्षट्संज्ञाद्वाराशिभावविघातकस्यलुकोनिमित्तंनभ वति । तथेहाप्यसंगत्वं "पश्यती"त्युक्तद्रष्टृत्वविघातकस्यणिजर्थकल्पनस्यानिमित्तमितिद्रष्टव्यं । ननुकचिद्वृक्षायेत्यादौ"ङेर्य"इत्यकारनिमि त्तकोपियादेशः "सुपिचे"तिदीर्घविधेर्हेतुस्सन्नकारविघातहेतुरपिदृष्टइतितत्रायंन्यायोव्यभिचारीतिचेन्मैवं । "कष्टायक्रमण"इत्यादिनिर्दे शाज्ज्ञापकात्तत्रतथात्वेपिनेहतथा । तादृशज्ञापकाभावादितिभावः । टीकायांवाक्यशेषानुपपत्तेस्स्पष्टत्वादेतदाशंकासमाधीनोक्ताविति भावः । टीकोक्तलिंगोपपत्तावतिप्रसंगमाशंक्यनिराह ॥ **पूर्वत्रत्विति** ॥ एतेन "पूर्ववैषम्येणे"त्येतत्प्रकारांतरेणापिविवृतंध्येयं । "नचमं

"सन्निपातलक्षणोविधिरनिमित्तंतद्विघातस्ये"तिन्यायाज्जीवएवब्रह्माभेदाभिप्रायं । पूर्वत्रत्वाका
शस्यजडत्वेनब्रह्माभेदायोगान्नामरूपनिर्वोढृत्वादिकंनाकाशेब्रह्माभेदेननेतुंशक्यमितिवैषम्यं ।

गु० गतत्वव्याघातइत्यर्थः । यत्सन्निपातेनयस्ययद्भवतितत्तद्विघातस्यानिमित्तमितिन्यायार्थः । नन्वेवंपूर्वाधिकरणेपिब्रह्माभेदाभिप्रायेणनामादिनिर्वोढृत्वमाकाशस्यैवस्या दित्यत्राह ॥ **पूर्वत्रेति** ॥ चैतन्यैक्याभिप्रायेणेतिटीकानुपपन्ना । चैतन्यैक्याभिप्रायेणैवजीवेऽमुख्यत्ववत्तेनैवेश्वरेस्वप्नादिद्रष्टृत्वस्याप्यमुख्यत्वोपपत्तेः । अतोभिप्रा

SGDF

प्र० तव्यंयथास्वप्नादिदर्शनस्ये"त्यादिटीकांव्यनक्ति ॥ **ननुतर्हीति** ॥ भाष्येऽनुक्तस्याप्यभेदपूर्वपक्षस्यटीकायामुपपादनेमूलमाह ॥ **एतदेवेति** ॥ जीवेश्वराभेदइतिनिमित्तसप्तमी । जीवेश्वराभेदेननिमित्तेनेत्यर्थः । तयोरभेदश्चस्वप्नद्रष्टृत्वासंगत्वरूपजीवेशलिंगयोस्सामानाधिकरण्यान्यथानुपपत्त्यैवसिद्धइतिभावः । टीकानुक्तंस्वयंभाष्यतात्पर्यांतरमाह ॥ **यद्वेति** ॥ सिद्धांतिनाजीवेशाभेदानंगीकारादितिवाक्यशेषोन्यायविवरणेद्रष्टव्यइतिभावः । सिद्धांतन्यायमप्याशंक्याह ॥ **नचप्राज्ञेनेति** ॥ क्रमेणसुषुप्त्युत्क्रांत्योर्वाक्यद्वयं । तथाचविशिष्टेप्रतीतोभेदोमि

ननुतर्हिस्वप्नादिद्रष्टृत्वमेवब्रह्मणिजीवाभेदाभिप्रायमस्त्वितिचेन्न । जीवस्ययेनचैतन्यात्मनाब्रह्माभेदस्तस्मिञ्शुद्धेचैतन्येऽसंगतत्ववद्ब्रह्मणोयेनचैतन्यात्मनाजीवाभेदस्तस्मिंश्चैतन्येस्वप्नादिद्रष्टृत्वायोगात् । एतदेवाभिप्रेत्योक्तंन्यायविवरणे "जीवेश्वराभेदईश्वरोक्तावप्यर्थाज्जीवएवोच्यत"इति । यद्वाजिज्ञासासूत्रेब्रह्मणोजीवाद्भेदस्यप्रतिज्ञाततत्वात्सिद्धांतिनास्वप्नद्रष्टृत्वादिकंनब्रह्मणिजीवाभेदाभिप्रायंवक्तुंशक्यमितिन्यायविवरणाभिप्रायः । नच "प्राज्ञेनात्मनासंपरिष्वक्त"इति "प्राज्ञेनात्मनान्वारूढ"इतिसुषुप्त्युत्क्रांत्योर्भेदोक्तेर्नाभेदइतिवाच्यं । सुषुप्त्यादिमतोविशिष्टस्यशुद्धात्सदाभेदेपिविशेष्यस्यभेदासिद्धेः ।

गु० यमाह ॥ **जीवस्येति** ॥ **न्यायविवरणइति** ॥ ईश्वरोक्तावपि असंगतत्वेनेश्वरोक्तावपीत्यर्थः । नन्वसंगतत्वेनेश्वरोक्तौजीवएवोक्तइत्यतउक्तं**जविेश्वराभेदइति** ॥ नन्वेवंजीवेश्वराभेदादेवजीवोक्तावपीश्वरएवोक्तइतिकिंनस्यादित्यतउक्त**मर्थादिति** ॥ ईश्वरधर्मभूतासंगत्वोक्तावपियेनरूपेणजीवस्येश्वरैक्यंतत्रासंगत्वस्यसत्त्वेनोपपन्नत्वात् ब्रह्मणश्चयेनरूपेणजीवाभेदस्तत्रचिन्मात्रेस्वप्नद्रष्टृत्वाभावादस्मिन्पक्षेयदिजीवेश्वराभेदस्तदेश्वरोक्तावर्थाज्जीवउक्तइतिसंभवति । नत्वेवंत्वया

SGDF Sri Gurgeshwar Digital Foundation

प्र० ध्येतिभावः ॥ एतेनेति ॥ विशेष्यस्यभेदाभावेनेत्यर्थः । प्रागुक्तोपिभेदव्यपदेशोनविशेष्यभेदविषयइतिभावः । अत्रटीका “स्वप्रादिद्रष्टापरमात्मैव असंगत्वलिंगा”दिति । सानयुक्तेव । जीवेप्रसिद्धनिरवकाशस्वप्नद्रष्टृत्वलिंगेनासंगत्वरूपेश्वरलिंगस्येशाभेदेनसावकाशत्वादित्यतो “नविष्णोस्स्वप्रादिदर्शनायोग”इत्यादिटीकोक्तंस्वप्नादिद्रष्टृत्वस्यविष्णौमुख्यत्वंतावदुपपादयति ॥ कात्स्न्र्येनेति ॥ ननुश्रुतौ “सयत्र किंचित्पश्यती”त्येवोच्यतेनतुकृत्स्नंपश्यतीत्यतआह ॥ नयुज्यतइति ॥ हिर्हेतौ । तस्मात्स्वप्नद्रष्टेश्वरइतिपूर्वार्धेनान्वयः । नचभ्रांतत्वप्रसंगः । स्वाप्नसत्यतायावक्ष्यमाणत्वेनेतिपूर्वपक्षएवोक्तत्वात् । नचासंकोचेतत्रारोपितजाग्रत्त्वस्यापिदर्शनप्रसंगइतिशंक्यं । पश्यतीतिदृष्टेर्मुख्यज्ञानवाचित्वेनप्रमितेरेवात्रग्रहणात् । अतएवस्वाप्नवस्तूनामित्युक्तिरितिभावः । ननुपूर्वत्रेवेहापिसंकोचःकिंनस्यादित्यतआह ॥ तेयदिति ॥ नाम्नःप्राकृतत्वंप्राकृतपदार्थवाचित्वं । अस्त्वेवंरूपंजीवेपीत्यतः “तस्यैवतन्मुख्यंजीवादपी”तिटीकोक्तंजीवेऽमुख्यत्वंव्यनक्ति ॥

एतेनांतरधिकरणोक्तेन “भेदव्यपदेशाच्चान्य”इतिन्यायेनात्रापिभेदःसिद्धइतिपरास्तं ॥
सिद्धांतस्तु ॥ कात्स्न्र्येनस्वाप्नवस्तूनांद्रष्टासर्वज्ञईश्वरः । नयुज्यतेचसंकोचोह्यसंकोचस्य
संभवे ॥ १ ॥ तेयदंतरेत्यत्रतुप्राकृतयोर्नामरूपयोःप्रकृतत्वात्प्रकृतपरसर्वनामबलाद्रूप
मात्रनिषेधे “श्यामाच्छबलंप्रपद्य”इतिसन्निहितवाक्यविरोधाच्चप्राकृतपरत्वेनसंकोचः ।

गु० वक्तुंशक्यं । जीवेश्वराभेदस्यत्वयानभ्युपगमादितिन्यायविवरणंव्याख्यातंभवति ॥ एतेनेति ॥ विशिष्टस्यभेदसिद्धावपिविशेष्यस्यभेदसिद्ध्यभावेनेत्यर्थः । ननुस्व

SGDF
Sri Gargeshwari Digital Foundation

प्र० **नचसाकल्येनेति** ॥ श्रुतितः यस्सर्वज्ञइत्यादिश्रुतितः । ननुतस्यसर्वज्ञतयासामान्यतःप्रसिद्धावपिनविशिष्यस्वप्नद्रष्टृत्वप्रसिद्धिरितिचेत्किं तावता । "शब्दादेवे"त्यत्रोक्तरीत्याप्रासादवासिन्यायेनसर्वज्ञग्रहणेनतद्विशेषस्वप्नदर्शनग्रहणोपपत्तेरितिभावः ॥ **नचेहेति** ॥ येनजीवस्यादितिभावः । एवंस्वप्नद्रष्टृत्वंभगवत्येवमुख्यंनजीवइतितद्बलेनासंगत्वंनजीवेकथंचिन्नेयमितिभावेनटीकोपपादिता । इदानींत्विहवाक्येश्रुतमसंगत्वंनकथंचिदपिजीवेऽवकाशमर्हतीतिभावेनतस्यविष्णवेकनिष्ठतां "यतोसंगःपरएवे"तिटीकोक्तामाह ॥ **किंचानन्वागतइति** ॥ यद्वा "स्वप्नादिद्रष्टापरमात्मैवे"तिटीकास्थप्रतिज्ञांशमुत्तरटीकावाक्यानुरोधेनोपपाद्य "असंगत्वलिंगा"दितिटीकास्थंहेत्वंशमुपपादयति ॥**किंचेति**॥ यद्वा नकेवलंस्वरूपपर्यालोचनयास्वप्नद्रष्टृत्वमीश्वरस्यैवमुख्यमिति । किंत्वत्रवाक्येश्रुतासंगत्वरूपलिंगपर्यालोचनयापीतिभावेनतल्लिंगंहरावेवोपपादयति ॥ **किंचेति** ॥ अस्मिन्पक्षेटीकायां स्वप्नादिद्रष्टापरमात्मैव तस्यसर्वज्ञत्वेनसत्यस्वप्नाद्यशेषवस्तुदृष्टेस्तस्मिन्नेवमुख्यत्वादसंगत्वलिंगाच्चेतियोजनाध्येया । यद्वा टीकायामसंगत्वेत्यस्यानन्वागतवाक्योक्तासंगत्वलिंगादित्यर्थः । यतोसंगःपरएवेत्यस्यहेतूकृतासंगइत्यर्थ

नचसाकल्येनस्वप्नद्रष्टृत्वमसर्वज्ञेजीवेलोकतोपिप्रसिद्धं । ब्रह्मणितुश्रुतितःप्रसिद्धं । नचश्रुतितः प्रसिद्धग्रहणसंभवेश्रुतितोलोकतश्चाप्रसिद्धस्यग्रहणंयुक्तं । नचेहस्वप्नाद्यवस्थावत्तोच्यते । पश्यतीतितद्द्रष्टृत्वस्यैवोक्तेः । किंच "अनन्वागतस्तेनभवती"त्यत्र "असंगोह्ययंपुरुषः"इत्यसंगत्वं ॥ ७३९ ॥

गु० प्नादिद्रष्टृत्वंनामस्वप्नाद्यवस्थावत्त्वं । नचात्मनःस्वप्नाद्यवस्थावत्त्वंलोकवेदयोःप्रसिद्धमित्यतआह ॥ **नचेति** ॥ नचप्राज्ञेनात्मनासंपरिष्वक्तइतिप्राज्ञेनात्मनान्वारूढइ

प्र० इतिभावेनतद्व्याख्याति ॥ **किंचेति** ॥ **हेतुरिति** ॥ स्वाप्नवस्तुदर्शनकृतलेपाभावरूपेसाध्येऽसंगत्वशब्दितलेपाभावसामान्यंहेतुरुच्यते । असंगोहीतिहिशब्दस्यहेत्वर्थत्वादित्यर्थः । यदपिशुद्धचैतन्यात्मनाब्रह्माभिन्नेजीवेप्यसंगत्वंयुक्तमितितदपिनेत्याह ॥ **किंचासंगत्वमिति** ॥ **श्रुत्यादीति** ॥ "अतोन्यदार्तं जीवाएवतुदुःखिनः अनादिमाययासुप्तोयदाजीवःप्रबुध्यते सपात्रंबंधमोक्षयो"रित्यादिश्रुतिस्मृतिसिद्धत्वादित्यर्थः । सूत्रभाष्याद्युक्तभेदव्यपदेशंप्रागाक्षिप्तमिदानींसमर्थयते ॥ **यच्चेति** ॥ तुरीयावस्थया मुक्त्यवस्थयेत्यर्थः । "नचायंभेदोव्यावहारिकएवे"त्यादिटीकांव्यनक्ति ॥ **भेदस्यमिथ्यात्वेचेति** ॥ स्वयंयुक्त्यंतरमाह ॥ **तच्छ्रुतिरिति** ॥ तत्रातात्पर्यान्नाप्रामाण्यमित्यतआह

हेतुः । प्रसिद्धमेवचहेतुत्वयोग्यं । "असंगमस्पर्श"मित्यादिश्रुतिषुचब्रह्मण्येवतत्प्रसिद्धं । किंचासंगत्वं नस्वरूपेणापिजीवेयुक्तं । जडेशयोरसंसारित्वाज्जीवस्यैवसंसारिणःसंगवत्तयाश्रुत्यादिसिद्धत्वेनतत्रसंगनिषेधायोगात् । यच्चोक्तंविशेष्यस्यभेदासिद्धेरिति तन्न । बंधमोक्षयोःसामानाधिकरण्यनियमेनविशेष्यस्यैवबंधाश्रयत्वात्तस्यैवचतत्तत्कारणाधीनसुषुप्त्याद्यवस्थावत्त्वेनविशेष्यस्यैवभेदसिद्धेः । अन्यथातुरीयावस्थयास्वप्नाद्यवस्थानांसामानाधिकरण्यंनस्यात् । भेदस्यमिथ्यात्वेचतच्छ्रुतिरप्रमाणंस्यात् ।

गु० तिसुषुप्त्युत्क्रांत्योर्भेदोक्तेर्नाभेदइति । अत्रोक्तसुषुप्त्यादिमतोविशिष्टस्यशुद्धात्सदाभेदेपिविशेष्यस्यभेदासिद्धेरितियत्तदनूद्यदूषयति ॥**यच्चेति**॥ ननुभेदस्यमिथ्यात्वेपिनतच्छ्रुतेरप्रामाण्यं । मिथ्याभूतेभेदेतात्पर्याभावात् । नचतात्पर्यमपिकिंनस्यादितिवाच्यं । तस्यमानांतरप्राप्तत्वेनतात्पर्यज्ञापकापूर्वतायाअभावादित्यतआह ॥

SGDF Sri Gangadhar Digital Foundation

प्र० ॥ नचेति ॥ मानांतरबाधितमपिनेत्यपिग्राह्यं । मिथ्यात्वंनासत्त्वं। किंतुप्रातिभासिकत्वं। तच्चप्रतीतिमात्राभावदशायांसतोभेदस्यनयुक्तमित्याह ॥ किंचेति ॥ भाष्यटीकयान्यायविवरणमपिविवृतमितिभावेनोक्तंप्रमेयंतदारूढंकरोति ॥ तदुक्तमिति ॥ भेदोक्तेः प्राज्ञेनात्मनेत्यादिनेत्यर्थः । आदिपदेनस्वप्नादिद्रष्टृत्वं । परमतंत्वग्रेनिरसिष्यते ॥ ७ ॥ सुषुप्त्यधिकरणं ॥ १३ ॥

नचसुषुप्त्यादावीशस्यजीवपरिष्वंगादिमानांतरप्राप्तं । येनतत्रातात्पर्याच्छ्रुतिरप्रमाणंनस्यात् । किंचभ्रांतिरहितायांसुषुप्तौसतोभेदस्यनभ्रांतिमात्रशरीरत्वरूपंमिथ्यात्वंयुक्तं । अपिचजीवपरिष्वंगादिश्रुतिर्मुक्तिविषया । तथासूत्रकृतैववक्ष्यमाणत्वात् । "अनन्वागतंपुण्येनानन्वागतंपापेनतीर्णोहितदासर्वाञ्शोकानि" त्यादिमुक्तिलिंगाच्च । नचमुक्तावपिसतोमिथ्यात्वं । तदुक्तंन्यायविवरणे "सुषुप्त्युत्क्रांत्योर्जीवेशयोर्भेदोक्तेरसंगतवादिचेश्वरस्यैवेत्यर्थाद्भवती"ति । अत्रसूत्रेभेदेनेत्यस्यपूर्वसूत्रानुषक्तेनव्यपदेशादित्यनेनान्वयः ॥ ७ ॥ सुषुप्त्यधिकरणं ॥ १३ ॥

गु० नचेति ॥ वक्ष्यमाणत्वात् स्वाप्ययसंपत्त्योरित्यादिनेतिशेषः । आविष्कृतंहीत्याद्युक्तांयुक्तिमाह ॥ अनन्वागतमिति ॥ मुक्तावपीत्यपिशब्देनान्यथाब्रह्मणोपिमिथ्यात्वंस्यादित्यतिप्रसंगंसूचयति ॥ ७ ॥ सुषुप्त्यधिकरणं ॥ १३ ॥

SGDF Sri Gurgeshwar Digital Foundation

प्र० ॥ ॐपत्यादिशब्देभ्यःॐ ॥ अत्रटीकायां "नित्यमहिमत्वलिंगेनाजश्रुत्याचविष्णुविरिंचयोस्साधारणस्यब्राह्मणनाम्न"इत्यादिनापादसंगतिरुक्ता । सानयुक्तेव । ब्राह्मणशब्दस्यान्यत्ररूढत्वेनाकाशादिशब्दवदन्यत्रप्रसिद्धत्वापत्तेः । उभयप्रापकवशादुभयत्रप्रसिद्धत्वेचाकाशादिनाम्नोपितथात्वापत्तेरित्यतआह ॥ **अस्येति** ॥ अधिकरणस्येत्यर्थः ॥ **चतुर्मुखइति** ॥ पूर्वपक्ष्यभिमतेऽन्यत्रप्रसिद्धेरेवान्यत्रप्रसिद्धिशब्दार्थत्वात् । जातिपूर्वपक्षस्यचेहनित्यमहिमत्वादिनानवकाशादितिभावः ॥ **विशिष्येति** ॥ तस्यापिविप्रत्वेनसामान्यतस्सत्त्वादितिभावः । एतेनान्यसाधारण्येनपूर्वपक्ष्यभिमतेप्रसिद्धत्वादन्यत्रप्रसिद्धिरितिप्रत्युक्तं । विशिष्याभावात् । तथाचसामान्यप्रसिद्धिब्रह्मलिंगाभ्यामुभयत्रप्रसिद्धिरितिभावः ॥ **उक्तेति** ॥ नामपादीयन्यायेनब्रह्मण्यपिप्रयोगस्योक्तत्वात्प्रयोगसाधारण्येनेत्याद्युक्तरीत्येत्यर्थः । टीकायां लिंगोक्तिस्तुनामपादन्यायसूचनाय । अजश्रुत्युक्तिरपिचतुर्मुखरूपविशेषोपस्थित्यर्थेतिभावः । नन्वेवंसंगत्युक्तौ "प्राचीनाधिकरणेषुविष्णौनित्यमहिमत्वमभिसंहित"मितिटीकाविरोधइत्यतआह ॥ **प्रयोजनंत्विति** ॥ साप्रयोजनपरेतिभावः । यद्यप्यसंगत्वाक्षेपःप्रयोजनंसू

॥ ॐपत्यादिशब्देभ्यःॐ॥ अस्यपादसंगतिः ब्राह्मणशब्दस्यविप्रत्वजातौलोकेप्रसिद्धत्वेपिचतुर्मुखेविशिष्यतदभावेनवा कंपनादित्यत्रोक्तरीत्यावाद्रष्टव्या । अनंतरसंगतिस्तु "असंगोनहिसज्यत"इतिश्रुतस्यात्रत्यासंगस्याब्रह्मत्वे "असंगोह्ययंपुरुष"इतिपूर्वोक्तस्याप्यब्रह्मत्वंस्यादितिपूर्वाक्षेपेणपूर्वपक्षोत्थानाद्वा पूर्वत्रजीवमात्राभेदंनिरस्येहजीवविशेषचतुर्मुखाभेदनिरासाद्वाद्रष्टव्या । प्रयोजनंतु अन्यस्यनित्यमहिमत्वेजिज्ञासादिसूत्रेषुविवक्षितंविष्णोर्नित्यमहिमत्वंनस्यादितिटीकायामेवोक्तं ।

गु० ॥ ॐपत्यादिशब्देभ्यःॐ ॥ उक्तरीत्येति ॥ नामलिंगपादन्यायसाम्येनब्राह्मणशब्दस्यब्रह्मण्यपिप्रसिद्धेरुक्तप्रायत्वादुभयसाधारण्यमित्युक्तरीत्येत्यर्थः । ननु

SGDF
Sri Gargeshwari Digital Foundation

प्र० चितं । तथापितस्यसंगतिमात्रपरत्वेनोपपत्तेरितिवा सर्वाक्षेपरूपप्रयोजनसंभवेतन्मात्राक्षेपरूपप्रयोजनसंकोचायोगादितिवा टीकोक्तंप्र योजनांतरमितिवातत्स्फुटीकर्तुंप्रयोजनंत्वित्युक्तं ॥ यद्वाद्वितीयसंगतौपूर्वाक्षेपाभावाद्भाष्येस्पष्टंप्रयोजनानुक्तेश्चाकिंप्रयोजनमेतच्चिंतायाइत्यत उक्तंप्रयोजनंत्विति ॥ भाष्यएवप्रयोजनोक्तिरस्तीत्याह ॥ यद्वेति ॥ ननुटीकायामेतदन्यथाव्याख्यातमित्यतस्स्वयमर्थांतरमाह ॥ तस्येति ॥ अनेकार्थत्वाद्भाष्यस्य । "भाष्यंचात्यर्थविस्तर"मित्युक्तेरितिभावः ॥ उक्तमिति ॥ देवताधिकरणइत्यर्थः । विषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ वाजसनेये "जनकोहवैदेहआसांचक्र"इतिषष्ठेऽध्यायेचतुर्थेब्राह्मणे "सवाएषमहानजआत्मायोयंविज्ञानमयःप्राणेषुयएषोंतर्हृ दयआकाशस्तस्मिञ्छेतेसर्वस्यवशीसर्वस्येशानस्सर्वस्याधिपतिस्सनसाधुनाकर्मणाभूयान्नोएवासाधुनाकनीयानेषसर्वेश्वरएषभूताधिपतिरेष भूतपालएषसेतुर्विधरणएषांलोकानामसंभेदाय सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेऽशीर्योनहिशीर्यतेऽसंगोनहिसज्यतेऽसितोनव्यथतेनरिष्य ती"त्याद्युपक्रम्यश्रूयते "तदेतदृचाभ्युक्तं । एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्धतेनोकनीयान् । तस्यैवस्यात्पदवित्तंविदित्वानलिप्यतेकर्मणा पापकेनेति । तस्मादेवंविच्छांतोदांतउपरतस्तितिक्षुस्समाहितोभूत्वात्मन्येवात्मानंपश्यति । नैनंपाप्मातरतिसर्वंपाप्मानंतरतिनैनंपाप्मातप तिसर्वंपाप्मानंतपतिविपापोविजरोविजिघित्सोब्राह्मणोभवति एषब्रह्मलोकस्सम्राडितिहोवाचयाज्ञवल्क्यस्सोहंभगवोविदेहान्ददामिमांचसह दास्यायेति । सवाएषमहानजआत्माऽन्नादोवसुदानोविंदतेवसुयएवंवेद । सवाएषमहानजआत्माऽजरोऽमरोऽमृतोऽभयोब्रह्माभयंहवैब्रह्मभ वतियएवंवेदे"ति । तत्रत्योब्राह्मणशब्दोविषयइत्यर्थः ॥ रूढइति ॥ जातिवाचीत्यर्थः ॥ उताशक्यमिति ॥ यदित्वाद्यस्तदारूढौबाध काभावाच्चतुर्मुखएव । द्वितीयेबाधकाद्रूढित्यागेनयोगाद्विष्णुरेवेतिस्पष्टःफलफलिभावइतिभावः । नन्वत्रयद्वेत्याद्यग्रिमग्रंथेटीकायांचवर्णादि हीनेहरावनवकाशेनविप्रत्वजातौनिरूढेनब्राह्मणशब्देनसहपठिततयाऽजशब्दस्यविरिंचिपरत्ववर्णनाद्धरौविरिंचेचाजायमानत्वाकारवाच्यवि ष्णुजत्वरूपयोगाभ्यां "तस्मादहमजस्स्मृत"इतिस्मृत्या "अजआत्मामहान्ध्रुव"इत्यादिनाचरूढ्यापिसाधारणस्याजशब्दस्यैवचिंताधर्मित्वमु चितमितिचेन्मैवं । भाष्ये "सचब्राह्मणस्सवाएषमहानजआत्मेत्यजशब्दाद्विरिंच"इत्युक्त्याऽजशब्दादेवपूर्वपक्षप्राप्त्युक्तेः । तत्रचाजशब्दो विष्णौयौगिकएव । नतुचतुर्मुखइवयोगरूढइत्युपेत्याजशब्देविरिंचप्रापकत्वस्याग्रेप्रतिपादनात्तदनुरोधेनब्राह्मणशब्दएवधर्मीकृतः । नन्वेवं ब्रह्मपरइतिचिंतानंतरंतदर्थंतत्सहपठितोजशब्दःकिंचतुर्मुखपरोथब्रह्मपरइतिचिंताकार्येतिचेन्न । ब्राह्मणशब्देनाजशब्दस्याप्युपलक्षणाद्वा श्रुति द्वयसाहित्यस्यैवपूर्वपक्षप्रापकत्वेनाभिमतत्वस्यवक्ष्यमाणत्वाद्ब्राह्मणशब्देचिंतापरंपराप्रदर्शनस्याजशब्देपितुल्यत्वेनोहितुंशक्यत्वाद्वा ब्राह्मणशब्द

देवानांविद्याकर्मणोःपदप्राप्तिःसूचिते"तिभाष्येणैवप्रयोजनमप्युक्तमितिज्ञेयं । तस्यभाष्यस्यदेवानामेवानित्यपदत्वं नतुविरिंचस्येत्यर्थवत् विरिंचादीनांदेवानामनित्यपदत्वमुक्तं । तच्चायुक्तं । विरिंचस्यनित्यमहिमत्वादित्यर्थस्यापिसु वचत्वात् । अत्र "एषनित्योमहिमाब्राह्मणस्ये"तिश्रुतोब्राह्मणशब्दःकिंविरिंचपरःकिंवाब्रह्मपरइतिचिंता । तदर्थंसकिं रूढःकिंवायौगिकइति । तदर्थंकिंरूढेर्बाधकंनास्त्युतास्तीति । तदर्थंसर्वाधिपति त्वादिकंकिंचतुर्मुखेब्रह्माभेदाभिप्रायेणनेतुंशक्यमुताशक्यमिति ॥ पूर्वपक्षस्तु ॥

गु० ब्रह्मणिब्रह्मशब्दस्ययौगिकत्वाच्चतुर्मुखेचयोगरूढत्वाद्योगमात्रापेक्षयायोगरूढेःप्राबल्येनाजशब्दस्यैवविष्णावनवकाशत्वाभिधानेटीकाविरोधः।तत्रकेवलस्याजशब्दस

SGDF Foundation

प्र० साहित्येनैवाजशब्दस्यविरिंचपरतायावक्ष्यमाणत्वेनतत्पक्षानुसाराद्वा ब्राह्मणशब्दधर्मिकैवचिंतापरंपरोक्तेति । अत्रटीकाय।भाष्यदिशाज शब्दात्पूर्वपक्षप्राप्तिमुक्त्वातस्यसावकाशत्वमाशंक्यब्राह्मणशब्दसाहित्येनानवकाशत्वमुक्तं । तत्राजश्रुतेस्स्वतएवचतुर्मुखप्रापकत्वोपपादनेनभा ष्यस्वारस्येसंभवतिभाष्येऽनुक्तस्यापिब्राह्मणपदसाहित्येनानवकाशत्वस्योक्तिरभ्युपगमवादेनेतिभावेनपूर्वपक्षटीकांव्यनक्ति ॥ अयंब्राह्मण इति ॥ अजशब्दमात्रस्य केवलाजशब्दस्येत्यर्थः । ननूक्तदिशाजशब्दस्यान्यानपेक्षेणैवानवकाशत्वसंभवेऽभ्युपगमवादोव्यर्थइत्यतआह ॥ एवंचेति ॥ तथाचटीकायांविरोधपरिहारार्थमेवतथोक्तं । नतूक्तदिशानवकाशत्वंनेतीतिभावः । "सनसाधुनाकर्मणाभूयान्नोवासाधुनाक

अयंब्राह्मणोविरिंचः । "सवाएषमहानजआत्मे"त्यजशब्दात् । नचवाच्यमजशब्दोनजायतइत्यजइतिवि ष्णौयौगिकः । विरिंचेप्यकारवाच्यविष्णुजातत्वाद्यौगिकइति । विरिंचेरूढेरपिसत्त्वात् । योगरूढेश्चयोगमा त्रात्प्राबल्यात् । टीकायांब्राह्मणशब्देनसहपठितस्याजशब्दस्यानवकाशत्वोक्तिस्त्वजशब्दमात्रस्यसावकाशत्वम भ्युपेत्य । एवंच "ब्राह्मणशब्दस्यपापालेपलिंगस्यचचतुर्मुखस्यपरमात्माभेदंविनाऽवकाशराहित्या"दितिन्याय विवरणेब्राह्मणश्रुतितोभाष्येचाजश्रुतितोविरिंचप्राप्तेरुक्तत्वेनतयोर्विरोधइतिनिरस्तं । निरपेक्षयोःश्रुत्यो र्विप्रत्वजातौविष्णौचसावकाशत्वमुपेत्यानवकाशत्वायश्रुत्योःसाहित्यस्यचविवक्षितत्वादितिटीकाभिप्रायः ।

गु० विष्णौसावकाशत्वेपिब्राह्मणशब्देनसहपठितस्याजशब्दस्यविष्णावनवकाशत्वाभिधानादित्यतआह ॥टीकायामिति॥ अभ्युपेत्योक्तेःकिंप्रयोजनमित्यतोभाष्यन्या यविवरणयोरविरोधोपपादनमित्याह ॥ एवंचेति ॥ टीकायाब्राह्मणशब्देनसहपठितस्याजशब्दस्यानवकाशत्वोक्तेरभ्युपेत्यवादत्वेटीकायागौणत्वंभवतीत्यतष्टीका

SGDF Sri Gargeshwari Digital Foundation

प्र० नीया”नित्युक्तपापालेपलिंगस्येत्यर्थः। नन्वजशब्दस्यैवानवकाशत्वसंभवेतस्यचतुर्मुखपरत्वलाभायान्यसाहित्यापेक्षाभिप्रायेणन्यायविवरणे ब्रह्मशब्दोक्तिर्व्यर्थेत्यतआह ॥ **यद्वेति** ॥ महत्तत्वेत्यादिटीकांव्यनक्ति ॥ **महदिति** ॥ “आत्मशब्देनसहश्रवणाद्विष्णुवाचीकिंनस्या”दितिटीकोक्तशंकांहृदिकृत्वातदुक्तमेवसमाधिमाह ॥ **आत्मशब्दोपीति** ॥ इतिप्रयोगाच्च काठकइत्यर्थः । न्यायविवरणोक्ताभेदप्रपंचनायप्रवृत्तांतथाहीत्यादिटीकांविवरीतुंशंकामाह ॥ **नचेति** ॥ विष्णोरित्यादिनाब्राह्मणशब्दनिरवकाशत्वानुवादग्रंथेन “वर्णादिशून्यादीश्वराद्ब्रा

यद्वा “तस्मादहमजःस्मृत”इतिभारतवचनादजशब्दस्यविष्णौरूढेरपिसत्त्वाद्ब्राह्मणशब्दसाहित्योक्तिः । महच्छब्दोप्यभिमान्यधिकरणन्यायेनमहत्तत्वाभिमानिनिविरिंचेमुख्यः । नतूत्कृष्टत्वमात्रवाची । विशेषपरत्वसंभवेसामान्यपरत्वायोगात् । आत्मशब्दोपि “आत्माविरिंचःसुमना”इतिवचनात् “बुद्धेरात्मामहान्पर” इतिप्रयोगाच्चविरिंचेरूढः । नच “विष्णोर्ब्राह्मणजातिःसञ्जज्ञेब्रह्माचतुर्मुख”इतिवचनाच्चतुर्मुखेब्राह्मणत्ववर्णसंभवेपि “अगोत्रमवर्ण”मित्यादिश्रुतिभिर्विष्णौतदसंभवेपि “सर्वस्यवशीसर्वस्येशानःसर्वस्याधिपति”

गु० स्वारस्यायपक्षांतरमाह ॥ **यद्वेति** ॥ तथाचाजशब्दस्योभयत्रापियोगरूढत्वेनसावकाशत्वादनवकाशत्वार्थंब्राह्मणशब्दसाहित्येनाजशब्दस्यविष्णावनवकाशतोक्तिर्युक्तेत्यर्थः । ननुसवाएषमहानजआत्मेतिवाक्येमहच्छब्दस्यसत्त्वात्तस्यचोत्कृष्टार्थत्वादुत्कर्षस्यचबाधाभावेसंकुचितत्वासंभवात् असंकुचितोत्कर्षस्यचब्रह्मण्येवसत्त्वेनाजशब्दस्यविरिंचपरत्वेतत्समानाधिकरणतयाश्रुतस्यमहच्छब्दस्यविरोधापत्त्यानविरिंचस्याजशब्दार्थत्वमित्याशंक्य स्यादेवंयदिमहच्छब्दस्योत्कृष्टार्थत्वंस्यात्तदेवनास्तीत्याह ॥ **महच्छब्दोपीति** ॥ विरिंचस्यैवाजशब्दार्थत्वे आत्मश्रुतिविरोधइत्यतआह ॥ **आत्मशब्दोपीति** ॥ नन्वभेदाभावेपिश्रुतिलिंगाबाधःसंभवतीत्यभेदः

SGDF
Sri Gargeshwari Digital Foundation

प्र० वर्तमानस्यब्राह्मणशब्दस्ये"त्यादिटीकाविवृता ॥ **इत्यादिविष्णुलिंगैरिति** ॥ सौत्रत्वादेतदुक्तिः । "पापालेपलिंगस्ये"तिन्यायविवरणोक्तिः "नित्यमहिमत्वलिंग"मितिभाष्यटीकोक्तिश्चोपलक्षणमितिभावः । सूत्रेतस्यसाक्षादनुक्तेः ॥ **ब्रह्मणावेदेनेति** ॥ स्वरव्यत्ययआधिक्यार्थ इत्यर्थः ॥ **न्यायविवरणेति** ॥ सिद्धांतइत्यर्थः ॥ **अबाधेनेति** ॥ यौगिकार्थग्रहणेरूढार्थबाधादितिभावः । एवंचरूढ्याविरिंचेयोगेन विष्णौश्रुतेस्सावकाशत्वेपिरूढार्थाबाधेनैक्यपरत्वेनैवरूढ्याविष्णौनिरवकाशश्रुतेश्चतुर्मुखेऽनवकाशलिंगानांचोपपत्तौनश्रुतेरूढार्थबाधःकार्यइ त्यर्थः । एतेनन्यायविवरणेटीकायांचश्रुतेरनवकाशत्वोक्तेस्सावकाशश्रुतेरित्युक्तिस्तद्विरुद्धेतिनिरस्तं । नन्वेवमंतर्नयादिषूदाहृतेंद्रादिश्रुतीनां

रित्यादिविष्णुलिंगैर्ब्राह्मणशब्दो "ब्रह्मणावेदेनगम्यत"इतिन्यायविवरणोक्तरीत्याविष्णौयौगिकइतिवाच्यं । विरिंचस्यविष्णवभेदेपितल्लिंगोपपत्तेस्सावकाशश्रुतेर्निरवकाशलिंगानांचाबाधेनोपपत्तौबाधायोगात् । नचश्रुतिलिंगाबाधायमुख्यत्वायच "अजआत्मे"त्यादिकंविरिंचविषयं । सर्वस्यवशी"त्यादिकंतुविष्णुविषयमितिवाच्यं । गंगाघोषादाविवैकवाक्यत्वायामुख्यार्थत्वस्यैवोचितत्वात् । नचपूर्वत्रजीवादिवात्रविरिंचाद्भेदोव्यपदिष्टः ।

प्र० समुद्रशायित्वादिलिंगानांचश्रुतेरूढार्थाबाधेनाभेदएवाश्रीयतामितिवाच्यं । तत्रेवेह भेदव्यपदेशरूपबाधकाभावादितिभावः । अतएववक्ष्यति "नचपूर्वत्रे"त्यादि । "नचभिन्नतयोभयग्रहणेनोपपत्तिः । एकनिष्ठत्वा"दितिटीकांविवृण्वन्नभेदंविनापिश्रुत्यादेरुपपत्तिमाशंक्यनिराह ॥ **नचेति** ॥ **गंगेति** ॥ यथागंगायांघोषइत्युक्तेगंगायांमत्स्यस्तीरेघोषइतिवाक्यभेदोनकल्प्यतेकिंतुलक्षणयैकवाक्यत्वंतद्वदित्यर्थः । श्रुतिलिंगा न्वयानुपपत्तिरूपाभेदसाधकार्थापत्तिर्नश्रुतिबाधितेत्याह ॥ **नचपूर्वत्रेति** ॥ एतेनपूर्वेणागतार्थत्वंचोक्तं । तर्कपराहतिश्चार्थापत्तेर्नास्तीत्याह

प्र० ॥ **नचजीवैरिति** ॥ एतेनपूर्ववैषम्येणापिपूर्वपक्षउक्तोध्येयः । नकेवलमर्थापत्त्यैवाभेदसिद्धिरागमादपीतिभावेनार्थापत्तेर्मूलमप्याह ॥ **सत्रेधेति** ॥ तृतीयस्कंधैकादशाध्यायतात्पर्योक्तेयंश्रुतिः । एतेन "सत्त्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्ते । स्थित्याद येहरिविरिंचहरेतिसंज्ञाइत्यादेश्चे"तिटीकोक्तादिपदार्थोविवृतः । स्थित्यादयइतिभागवते । नयांतरेणास्यागतार्थत्वायश्रुत्यादावभेदोक्तेरन्यथा सिद्धिमाशंक्यनिराह ॥ **नचसेति** ॥ विशिष्येत्युक्तसमाधिष्टीकाकृत्संमतइत्याह ॥ **अतएवेति** ॥ तत्त्वमसीत्यादेर्गतेर्वक्ष्यमाणत्वादेव विशिष्यभेदोक्तेर्गत्यनुक्तेरेवचेत्यर्थः । अत्रटीकायां "अयंब्राह्मणोविष्णुरेवे"त्यारभ्य "अन्यथापत्यादिशब्दविरोधा"दित्यंतेननिरवकाशलिंगे

नचजीवैरभेदइवविरिंचेनाभेदेबद्धमुक्तादिव्यवस्थानुपपत्तिरस्ति । "सत्रेधाबभूवैषांगुणानामुपादानाय । विष्णुर्वा वसत्वस्य रजसोब्रह्मा ईशानोनामतमस"इत्यादिश्रुतिभिः "सृष्ट्यादयेहरिविरिंचहरेतिसंज्ञा"इत्यादिस्मृतिभिश्चाभेदो क्तेश्च । नचसा "शास्त्रदृष्ट्ये"त्युक्तन्यायेनांतर्याम्यभेदाभिप्राया । नापि "तद्गुणसारत्वा"दितिवक्ष्यमाणन्याये नसादृश्याभिप्राया । तयोर्जीवमात्रसाधारण्येनविशिष्याभेदोक्त्ययोगात् । अतएवटीकायांपूर्वाधिकरणपूर्वपक्षे "तत्त्वमसी"त्यादिजीवेश्वराभेदवाक्यंनोक्तं । अत्रतु "सृष्ट्यादय"इतिविष्णुहिरण्यगर्भाभेदवाक्यमुक्तं ॥ **सिद्धांतस्तु** ॥

गु० किमर्थमित्याशंकते ॥ **नचेति** ॥ पूर्वाधिकरणन्यायाविषयत्वमाह ॥ **नचपूर्वत्रेति** ॥ पूर्वत्रवाऽत्रवाबाधकाभावाच्चनाभेदस्त्याज्यइत्याह ॥ **नचेति** ॥ **अतएवेति** ॥ अभेदोक्तिमात्रस्यांतर्यामिपरत्वस्यसादृश्याभिप्रायत्वसत्त्वेपिविशिष्याभेदोक्तेरंतर्यामिपरत्वस्यवासादृश्याभिप्रायत्वस्यवासंभवइतिटीकाभिप्रेतत्वादेवेत्यर्थः ।

SGDF Sri Gurgeshwari Digital Foundation

प्र० नसिद्धांतःकृतः । तत्रलिंगनिरवकाशत्वंव्यनक्ति ॥ भाष्यादीति ॥ "उतामृतत्वस्येशान"इत्यादिभिरित्यर्थः । श्रुत्यर्थष्टीकायांव्यक्तः । ब्राह्मणाजशब्दौसावकाशावितिटीकायामेवोक्तं । विवृतंचपूर्वपक्षएवास्माभिरितिभावः । "नचाभेदात्पतित्वादिविरिंचेपिसंभवती"त्यादि टीकांविवृण्वँल्लिंगानामन्यथासिद्धिंप्रागुक्तामाशंक्यनिराह ॥ नापीति ॥ विमतौनाभिन्नौविरुद्धधर्माश्रयत्वाद्व्रीहियवादिवदित्यनुमानविरोधः । विरिंचस्यकर्मलेपाभावायुक्तेर्नित्यमुक्तेनपरमात्मनाभेदस्यैवोपपन्नत्वादितिटीकोक्तिलब्धंमनसिनिधाय तस्यानुमानस्याप्रयोजकत्वपरि

भाष्याद्युक्तश्रुत्यादिभिःसर्वाधिपतित्वादिकंतावन्नविष्णोरन्यत्र । नाप्युभयाबाधायाभेदः । यतः विरुद्धेष्वप्यभेदश्चेद्यवव्रीह्यादिकेष्वपि । अभेदःस्यात्ततःक्वापिविकल्पाद्येवनोभवेत् ॥ १ ॥ व्रीहिभिर्यजेत यवैर्यजेते"त्यादावुभयाबाधायव्रीहियवयोरभेदापत्त्यातयोर्विकल्पोनस्यात् । "धेन्वाक्रीणाति वाससाक्रीणाती"त्यादौ धेन्वादीनांसमुच्चयश्चनस्यात् । ततश्चलोकवेदयोर्विकल्पादिवार्तैवोत्सीदेत् ।

प्र० हारायविपक्षेबाधकतर्कमाह ॥ विरुद्धेष्विति ॥ व्रीह्यादाविष्टापत्तिमाशंक्याह ॥ ततःक्वापीति ॥ श्लोकंव्याचष्टे ॥ व्रीहिभिरिति ॥ अधिकरणशरीरंप्रागुक्तमंतस्तद्धर्मेतिसूत्रे । विकल्पादीत्यादिपदार्थमाह ॥ धेन्वेति ॥ द्वादशस्यचतुर्थेपादे "क्रयणेतुविकल्पःस्या"दिति तृतीयेऽधिकरणे "एकहायन्याक्रीणाति वाससाक्रीणाती"तिश्रुतधेन्वादीनांव्रीह्यादिवद्विकल्पप्राप्तौसमुच्चयउक्तः । सनस्यादित्यर्थः । "इत्या

SGDF Sri Gargeshwari Digital Foundation

प्र० दिभेदश्रुतिबाहुल्याच्चे”तिटीकोक्तिंविवृण्वंस्तदुक्तेरुपयोगंव्यनक्ति ॥ **व्रीह्यादिभेदइति** ॥ **भेदोपीति** ॥ श्रुतिसिद्धइत्यन्वयः । “एको नारायणआसीन्नब्रह्मानचशंकरः । समुनिर्भूत्वासमचिंतयत् । ततएत”इतिकार्यकारणभावेनभेदबोधिन्याधर्मिग्राहकतयाप्रबलया “रूपो पन्यासाच्चे”तिसूत्रभाष्योक्तश्रुत्यासिद्धइत्यर्थः । प्रागुक्तश्रुत्यादिविरोधमाशंक्यस्मृतेस्तुतदंतर्गतेश्वररूपापेक्षयोपपत्तेरितिटीकोक्तंसमाधिंविपक्षे बाधकोक्त्याव्यनक्ति ॥ **सत्रेधेति** ॥ **तद्गतेति** ॥ ब्रह्मेशानगतेत्यर्थः ॥ **ब्रह्मणीति** ॥ प्रथमस्कंधद्वितीयाध्यायतात्पर्यस्मृतिः । स्थाणु रितितात्पर्योक्तश्रुतिः । स्थाणुः रुद्रः । प्रजापतिं ब्रह्माणं । ननुप्राग्बहुशोऽभेदस्यव्युदस्तत्वात्पुनरभेदाशंकातत्समाधिश्चनयुक्तइत्यतोभेद

व्रीह्यादिभेदःप्रत्यक्षश्चेद्विष्णोर्विरिंचाद्भेदोपि “ततएतेव्यजायंत विश्वोहिरण्यगर्भ”इत्यादिधर्मिग्राहकश्रुति सिद्धः । “सत्रेधे”त्याद्यपितद्गतरूपविशेषाभिप्रायं । अन्यथा “सआविवेशब्रह्माब्रह्माणंचतुर्मुखमीशईशानं पंचमुख”मितिवाक्यशेषेण “ब्रह्मणिब्रह्मरूपोसौशिवरूपीशिवेस्थित”इत्यादिस्मृत्याचविरोधात् । “स्थाणुर्हो च्चक्राम सप्रजापतिमुवाच कोसि केस्मः कःसइति । सहोवाच योस्मि येस्थ यःस”इतिविशिष्यभेदोक्तेश्च ।

गु० व्रीह्यादिकेष्वित्यत्रविकल्पाद्येवेत्यत्रचादिपदसंग्राह्यंदर्शयन्संग्रहश्लोकंव्याख्याति ॥ **व्रीहिभिरित्यादिना** ॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यंशंकते ॥ **व्रीह्यादीति** ॥ साम्येनपरिहरति ॥ **विष्णोरिति** ॥ धर्मिग्राहकेत्युक्त्याविष्णोर्विरिंचाद्भेदग्राहकप्रमाणस्यधर्मिग्राहकत्वेनोपजीव्यत्वात्तदभेदग्राहकप्रमाणापेक्षयाप्राबल्यमितिसूच यति । विशिष्यभेदोक्त्यभावंपरिहरति ॥ **स्थाणुरिति** ॥ सर्वत्रापिभेदप्रतिपादनेपौनरुक्त्यंस्यादित्यतः नजीवभेदसूत्राणामित्याद्यनुव्याख्यानोक्तंपरिहारंव्यनक्ति

SGDF
Sri Gargeshwari Digital Foundation

प्र० सूत्राणांविषयभेदमाह ॥ **अत्रचेति** ॥ शास्त्रइत्यर्थः ॥ **भेदंस्वीकृत्येति** ॥ "भेदव्यपदेशाच्चे"त्यानंदमयाधिकरणगुणसूत्रस्य "तेयेशतं प्रजापतेरानंदा"इत्यादिभाष्येजीवादानंदमयस्यभेदव्यपदेशार्थकत्वेनोक्तत्वात्तदभिप्रायेणैतदुक्तं । सुधायांजीवब्रह्मपरत्वेनव्याख्यानंतुवर्णकांतरमभिप्रेत्य । तस्मिन्पक्षेपौनरुक्त्याभावस्तुतत्रसर्वजीवसाधारण्येनतस्मिन्वाक्यविशेषेऽभेदेशंकितेसाधारणभेदव्यपदेशेननिरासः । इहतु विशिष्याभेदेशंकितेविशिष्यभेदोक्त्यानिरासइतिभावः । अतएवोक्तं **विशिष्याभेदोक्त्ययोगात् विशिष्यभेदोक्तेश्चेति** ॥ "शारीरश्चोभयेपी"त्यंतर्यामिनयगुणसूत्रेभाष्येजीवानामंतर्यामित्वेशंकिते "यआत्मनितिष्ठ"न्नित्यादिनाऽऽत्मशब्दितजीवस्यांतर्यामितोभेदाध्ययनस्योक्त्या तदभिप्रायेणांतर्यामिणोजीवत्वेशंकितेतन्निरासइत्यादिपदेनोक्तं । यदितु "आत्माविज्ञानमितिचसर्वजीवाभिमानवान् । ब्रह्मैवोक्त"इतिबृहद्भाष्यदिशाचतुर्मुखस्यांतर्यामितोभेदाध्ययनमित्यर्थः तदाचतुर्मुखस्यांतर्यामित्वशंकातन्निरासयोरेवप्रतीत्याविष्णवभेदशंकातन्निरासयोरभावेनापौनरुक्त्यमितिभावः । इत्यादावित्यादिपदेन "विशेषणभेदव्यपदेशाभ्यांचनेतरा"वित्यत्रविरिंचस्यविष्णुतोभेदमुपेत्यैवादृश्यत्वादिगुणकाक्षरत्वेशंकिते "तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत"इत्यक्षराद्भेदव्यपदेशोक्त्यातन्निरासः । आत्मेत्यादावित्यादिपदेन "भेदव्यपदेशा"दित्यत्र

अत्रच "भेदव्यपदेशाच्च शारीरश्चोभयेपिहिभेदेने"त्यादौजीवाद्विष्णोर्भेदंस्वीकृत्यानंदमयादेस्तत्तल्लिंगैर्जीवत्वेशंकितेतन्निरासः । "भेदव्यपदेशाच्चान्य"इत्यत्रतु "इंद्रस्यात्मे"त्यादावात्मेतिप्रातिपदिकस्यस्वरूपार्थत्वात्तदनुसारेण ॥ ७४५ ॥

गु० ॥ **अत्रचेत्यादिना** ॥ सर्वस्यवशीसर्वेशानइतिसर्वाधिपतित्वादिविष्णुलिंगैर्ब्राह्मणशब्दोब्रह्मणावेदेनगम्यतइतिन्यायविवरणोक्तरीत्यायौगिकएवेत्यत्रोक्तंविष्णवभेदे

प्र० द्युभ्वादिनयगुणसूत्रेवाक्यविशेषेजीवब्रह्माभेदेशंकितेतत्रैवप्रकरणेभेदोक्त्यातन्निरासइतिगृह्यते ॥ **प्रयाजशेषेति** ॥ उक्तमधिकरणशरीरंप्रागनुकृतिसूत्रे । "प्रयाजशेषेणहवींष्यभिघारयती"त्यत्रशेषशब्दप्रातिपदिकस्वारस्येनतृतीयायाद्वितीयार्थकत्वकल्पनेनप्रयाजशेषंहविष्षूत्क्षारयेदित्यर्थइत्युक्तन्यायेनषष्ठी "राहोश्शिर"इतिवदुपचारेणनेयेत्यर्थः । एतेनाभेदप्रापकभेदादपौनरुक्त्यमित्युक्तंभवति ॥ **भोक्त्रिति** ॥ द्विती

प्रयाजशेषन्यायेनेंद्रस्येत्यादिषष्ठीनेया । ततश्चविष्णोरिंद्राद्यभेदइत्यादिकेशंकितआत्मप्रातिपदिकस्यशरीरप्रतिसंबंध्यर्थत्वोपपत्तेर्नविभक्तिबाधकतेत्यादिनापरिहृतं । पूर्वाधिकरणेतु ईशकर्तृकपरिष्वंगकर्मणोजीवस्येशाद्भेदधियंस्वीकृत्य सभेदो विशिष्टस्यैव । नतुविशेष्यस्येतिस्वप्नद्रष्टृत्वसमन्वयविरोधिनिजीवमात्रस्यविष्णवभेदेतद्वाक्यस्थजीवविष्णुलिंगानांबाधायशंकितेतन्निरासः । इहतु अभेदपक्षेसर्वाधिपतित्वादेर्विरिंचेपिसंभवान्नभेदधीरिति ब्राह्मणशब्दसमन्वयविरोधिनिविरिंचस्य विष्णवभेदेतद्वाक्यस्थविष्णुविरिंचलिंगाबाधायशंकितेतन्निरासः । "भोक्त्रापत्ते"रित्यत्रतुजीवाभिन्नत्वाद्ब्रह्मणोजगत्कर्तृत्वं युक्तिविरुद्धमितिशंकितेतन्निरासः । पृथगित्यत्रतुजीवेशभेदाभेदश्रुत्योर्विरोधइतिशंकितेतन्निरासइत्यपौनरुक्त्यमितिध्येयं । तदुक्तमनुव्याख्याने "नजीवभेदसूत्राणांशंक्यात्रपुनरुक्तता । वाक्यांतरद्योतकत्वात्पृथगित्यत्रपूर्णते"ति ।

प्र० याद्यपादे ॥ **पृथगिति** ॥ तत्रैवतृतीयपादे ॥ **तदुक्तमिति** ॥ आनंदमयाधिकरणानुव्याख्यानइत्यर्थः । अत्रशास्त्रेतत्रतत्रप्रकरणेह्यैक्यविवक्षायांचोदितायांतत्तद्गतभेदवाक्यद्योतनेनसूत्रेषुभेदसमर्थनंक्रियते । अतस्तात्पर्यभेदान्नपुनरुक्तिश्शंक्या । नन्वेवंसत्यभेदःक्वापिननिरस्तःस्यादित्यतउक्तं **पृथगिति** ॥ पूर्णता प्रधानता । भेदसाधनस्य स्वातंत्र्येणविचारितत्वादित्यर्थः । ननुयदुक्तंविरुद्धेष्वभेदश्चेदिति

SGDF Sri Gargeshwari Digital Foundation

प्र० तन्न । विशेष्यस्यैकत्वेनधर्माणांविरोधस्यैवाभावादित्याशंक्याह ॥ नचेति ॥ अन्योन्येति ॥ सिद्धेऽभेदेधर्माणामविरोधेनाभेदकत्वं सति चतस्मिन्नभेदइत्यन्योन्याश्रयादित्यर्थः । यंरुद्रंचतुर्मुखंवाकर्तुकामयेतंतंरुद्रंचतुर्मुखंवाकरोमीतिलक्ष्म्याऽभिधानादितिभावः । सूत्रेवश्यादि शब्देभ्यइतिवक्तव्येपत्यादीत्ययुक्तमित्याशंक्यसौत्रनिर्देशंसाधयति ॥ अत्रेति ॥ सर्वस्याधिपतिस्सर्वस्येशानइतिभाष्योदाहृतेत्यर्थः । तथाप्य धिपत्यादिशब्देभ्यइतिवक्तव्ये पत्यादीतिनिर्देशस्तूपसर्गस्यद्योतकत्वाभिप्रायः । चरणाभिधानादितिवदित्येके । अन्येतु "पतिंविश्वस्यात्मे

नचसर्वाधिपतित्वादेर्विरिंचस्यविष्णवभेदेनाप्युपपत्तेर्नभेदकत्वमितिवाच्यं । अन्योन्याश्रयात् । "यंकामयेतं तमुग्रंकृणोमितंब्रह्माण"मित्यादिश्रुतिषुविरिंचस्यसर्वाधिपतित्वनित्यमहिमत्वादेर्निषेधाच्चेति । अत्रचवाजसनेये "सर्वस्यवशी"तिवशित्वस्यादित्वेपिभाष्योदाहृतशाखांतरेपतिशब्दस्यादित्वात्सूत्रेतदनुसारेणपत्यादीत्युक्तं ॥ अन्येतु ॥ "कतमआत्मायोयंविज्ञानमयःप्राणे"ष्वित्यादि "सवाएषमहानजआत्मायोयंविज्ञानमय"इत्यंतं

प्र० श्वर"मितिसमानार्थत्वेननारायणएवविशेष्यभूतइतिज्ञापनायपत्यादीत्युक्तमित्याहुः । अपरेतु "सर्वस्याधिपतिरेषभूतपति"रितिपतिशब्द स्याभ्यस्तत्वात्तात्पर्यद्योतनायपत्यादीत्युक्तिरित्याहुः । केचित्तु तत्पुरुषबहुव्रीहिरूपसमासद्वयस्याप्याश्रयणेनपतिशब्दात्पूर्वशब्दानामुत्तरश ब्दानांचसर्वेषामप्युपादानान्मध्यस्थस्याभ्यस्तस्यपतिशब्दस्योपादानेनपत्यादीतिनिर्देशइतिवदंति । सर्ववशित्वादेरवांतरेश्वरेविरिंचेकथंचित्संभ वेपिपापालेपलिंगंकथमपिनविरिंचेसावकाशमितितत्सहपाठादन्यदपितथेतिद्योतनाय "सनसुधेने"त्याद्यलेपोक्तिपरवाक्यात्पूर्वत्रोत्तरत्रचश्रुत

SGDF
Sri Gargeshwari Digital Foundation

प्र० पतिशब्दोपादानेनपत्यादीत्युक्तं । उभयत्रश्रुतोक्त्यर्थमेवसर्वस्येतिवाभूतस्येतिवोपपदस्यानुपादानं । अतएवचन्यायविवरणे "पापालेपलिंगस्यचे"त्येवोक्तिरित्यपिसंगिरंते । अत्रसूत्रेसाक्षाद्भेदस्यानुक्तत्वादभेदेनपूर्वपक्षस्सूत्राननुगुणइत्येतदेतेननिरस्तं । पतित्वादेर्भेदकधर्मस्योक्त्यैवाभेदनिरासस्याभिमतत्वात् । भेदएववक्तव्येभेदकोक्तिस्तु विरुद्धयोरैक्यंनयुक्तं । अतिप्रसंगात् । विरुद्धत्वंचान्योन्याश्रयापत्त्यैवसिद्धं । अभेदपूर्वपक्षश्चोभयविधधर्मान्यथानुपपत्त्येत्यादिसूचनाय । अतएवप्राक्सूत्राभिमतएवातिप्रसंगो "विरुद्धेष्वप्यभेदश्चे"त्यादिनाप्रपंचितः । पूर्वसूत्रेऽनुषंगसिद्धस्य "भेदेनव्यपदेशा"दित्यस्येहाप्यनुवर्तनेनपत्यादिशब्देभ्योभेदेनव्यपदेशादित्यन्वयेतुसाक्षादेवभेदोक्तिरितिबोध्यं ॥ **बृहदारण्यकवाक्यमिति** ॥ प्रागेवलिखितमेतत् । किंसंसार्यात्मस्वरूपानुवादपरमुतासंसारिब्रह्मस्वरूपप्रतिपादनपरमितिसंशयः ।

बृहदारण्यकवाक्यंमानांतरप्राप्तसंसार्यात्मस्वरूपानुवादमात्रं । उपक्रमोपसंहारयोःसंसारिरूपस्यैवप्रतीतेरितिप्राप्ते

प्र० "आदिमध्यावसानेषुसंसारिप्रतिपादनात् । तत्परोग्रंथसंदर्भःसर्वतत्रैवयोज्यत" इतिभामत्युक्तंपूर्वपक्षमनुवदति ॥ **मानांतरेति** ॥ संसार्येवतावदात्माऽहंकारास्पदंप्राणादिपरीतस्सर्वजनसिद्धइतिप्रत्यक्षप्राप्तसंसार्यात्मप्रतिपादकमिदमनुवादमात्रमित्यर्थः । अनुवादफलंचकर्मापेक्षितकर्तुःस्तुतिरितिभावः ॥ **उपक्रमेति** ॥ आदावंतेचजीववाचिविज्ञानमयशब्दप्रयोगादितिभावः । मध्येच "सवाएषएतस्मिन्संप्रसादेस्वप्नेबुद्धांतेरत्वाचरित्वे"तिस्वप्नाद्यवस्थोपपत्तेरित्यपिध्येयं । महानजइत्यादिकंतुसंसारिण्येवकथंचिद्योज्यमितिभावः । तर्तिकंसंसारिणोन्यःपरमात्मैवनेतिसंसार्यनुवादपरमित्युच्यतेऽथवात्रसंसारिव्यतिरेकेणपरमात्मनोसंकीर्तनात्संसारिणएवादावंतेचकीर्तनात्तत्परमिति । नाद्यः । "ईक्षतेर्नाशब्दं । गतिसामान्या"दित्यादिभिस्तद्भिन्नपरमात्मप्रतिपादकागमस्योपपादितत्वात् । नद्वितीयः । "प्राज्ञेनात्मनासंपरिष्वक्त"

SGDF
Sri Gargeshwari Digital Foundation

प्र० इतिसुषुप्तौ "प्राज्ञेनात्मनान्वारूढउत्सर्जद्याती"त्युत्क्रांतौचभेदेनव्यपदेशात् । ननुभेदेनजीवपरव्यपदेशेवाक्यंभिद्येतेत्यत्तआह ॥ सवाअयमिति ॥ अनधिगतैक्यावबोधनपरत्वसंभवेनुवादमात्रमयुक्तमितिभावः । पत्यादिशब्दैश्चेदंवाक्यजातमसंसार्यात्मप्रतिपादनपरमिति

"सवाअयंपुरुषोजायमान"इत्यादिनाकल्पितसंसारिस्वरूपमनूद्य "सवाएषमहानज" इत्यादिनाऽकल्पितासंसार्यैक्यंबोध्यतइतिसिद्धांतः । सुषुप्तीत्यादिसूत्रद्वयंचैकाधिकरणमित्याहुः ॥ **तत्रब्रूमः** ॥ यत्तत्वमैक्यंतन्नैवकीर्त्यतेश्रुतिसूत्रयोः । तत्रयःकीर्त्यतेभेदःतच्चतत्वंनतेमते ॥ १ ॥ सुषुप्त्यादिसूत्रेण, तद्विषयतयात्वयाप्युदाहृताभ्यां "प्राज्ञेनात्मनासंपरिष्वक्तः प्राज्ञेनात्मनान्वारूढ"इतिश्रुतिभ्यांचजीवाद्भेदएवोक्तः । तथापत्यादिसूत्रेण, तद्विषयत्वेनत्वयाप्युदाहृतया "एषलोकाधिपति"रित्यादिश्रुत्याच जीवाद्भेदकधर्माउक्ताः । नतुत्वयातत्वतयाभिप्रेतमैक्यं । एतेनयोयंविज्ञानमयोजीवःसएवैषमहानात्मापरमात्मेत्यभेदउक्तइतिनिरस्तं । सूत्रविरोधात् । प्राज्ञेनेत्यादि

प्र० सिद्धांतइत्यर्थः । श्रुतिसूत्रानानुगुण्येनसिद्धांतंपराचष्टे ॥ **यत्तत्वमिति** ॥ ऐक्यकीर्तनाभावेनिर्विषयंवाक्यमापद्येतेतिशंकांव्युदस्यन्पूर्वार्धंव्यनक्ति ॥ **सुषुप्त्यादीति** ॥ **भेदएवेति** ॥ एतेनतृतीयपादार्थस्यासिद्धिरपिपरास्ता । एतेनेत्युक्तमेवव्यनक्ति ॥ **सूत्रेति** ॥

प्र० **मानांतरेति** ॥ प्राज्ञभेदस्यप्रत्यक्षाद्यगोचरत्वादितिभावः । उत्तरार्धंव्यनक्ति ॥ **यच्चेति** ॥ **केचित्त्विति** ॥ पूर्वसूत्रे आकाशःपरमात्मा नमुक्तजीवः । नामरूपास्पृष्टत्वेनतन्निर्वोढृत्वेनचबंधमुक्तोभयावस्थाज्जीवादर्थांतरत्वस्यवैलक्षण्यस्यव्यपदेशादित्युक्तं । तन्नयुक्तं । "तत्त्वमसी"त्यादिनैक्यव्यपदेशेन "नेहनानास्ती"तिभेदनिषेधेनचप्रत्यगात्मनोऽर्थांतरभूतस्यपरमात्मनोऽभावादित्याशंक्यतत्किंजीवमात्रादर्थांतरत्वेविप्रतिपत्तिरुतमुक्त्यवस्थाज्जीवात् । नाद्यः । "प्राज्ञेनात्मनासंपरिष्वक्तः प्राज्ञेनात्मनान्वारूढ"इतिसुषुप्त्युत्क्रांत्योर्भेदेनजीवादर्थांतरस्यव्यपदेशा

मानांतराप्राप्तभेदोपदेशविरोधाच्च । नच "अतऊर्ध्वंविमोक्षायैवब्रूही"तिपृष्टे उक्तोभेदोभेदकधर्माश्चमिथ्येतियुक्तं । नवामानांतरेणस्वप्रकरणस्थेनप्राज्ञेनेत्यादिवाक्येनचाविरुद्धमहत्त्वादिविधिपरत्वसंभवेतद्विरुद्धाभेदपरत्वंयुक्तं । तस्मान्नैक्योक्तिः । यच्चेहोच्यतेभेदादिकंतच्चनतत्वं । पत्यादिसूत्रस्यपूर्वशेषत्वेचचशब्दापातइति ॥ **केचित्तु** ॥ सुषुप्त्यादीतिसूत्रद्वयमस्मदुक्तवाक्यविषयमेवस्वीकृत्यमुक्तजीवाद्विलक्षणब्रह्मसाधनपरंसत् "आकाशोर्थांतरे"त्येतदधिकरणशेषइत्याहुः । तन्न । "आकाशोवैनामे"त्यत्राकाशोमुक्तजीवएव नतुब्रह्मेतिवदतापूर्वपक्षिणातस्मिन्नेवाधिकरणेतद्वाक्यविचारंविहायस्वोक्तिविरुद्धस्यमुक्तजीवब्रह्मैक्यस्यतत्त्वमस्यादिवाक्यांतरमाश्रित्यशंकितुमनुचितत्वात् ॥ **टीकाक्षरार्थस्तु** ॥

प्र० दितिसुषुप्तिसूत्रेणोक्त्वा नद्वितीयः । "सर्वस्याधिपतिस्सर्वस्यवशी"त्यादिपत्यादिशब्देभ्यश्चमुक्त्यवस्थादर्थांतरस्यव्यपदेशात् । नहिसर्वाधिपतित्वादिकंमुक्त्यवस्थेपिसंभवतीतिद्वितीयसूत्रेणोक्तमित्यर्थः । पूर्वशेषत्वेतुसूत्रानुत्थानंस्यादितिदूषयति ॥ **तन्नेति** ॥ यदप्युक्तंश्रुतप्रकाशे प्रतिज्ञाभागाभावान्नाधिकरणांतरं । नचाध्याहारः । अनध्याहारेणैवोपपत्तेरिति तदेतेननिरस्तं । सूत्रगमनिकारूपशंकायाएवानुदयात् ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० अभिव्यक्तेरित्यादौत्वन्मतइवयोग्यस्याध्याहारेदोषाभावादिति । चशब्दाभावादितिदूषणमत्रापिध्येयं । एतेनरामानुजमतरीतिमनुसरतः कस्यचिच्छैवस्यमतंप्रत्युक्तमितिध्येयं । "विदेहिरुद्रोरुद्रियंमहित्व"मित्यादिश्रुतिभिः "रुद्रोब्रह्माणमाश्रित"इत्यादिस्मृतिभिस्तस्यपराधीनत्वोक्त्यासर्ववशित्वादेरसंकुचितस्यायोगाच्चेति । "ब्रह्मणावेदेनगम्यतइतियोगेनोपपत्तेः । स्वरव्यत्ययस्याधिक्यार्थत्वा"दितिसिद्धांतस्थवाक्यंहेतूक्तिपूर्वंव्यनक्ति ॥ **स्वरेति** ॥ अर्थाधिक्येविवक्षितेशब्देऽधिकमितिसूत्रंमहाव्याकरणईरितमित्यर्थः ॥ **दीर्घइति** ॥ ब्रह्माणइतिवक्तव्येब्राह्मणस्येत्युत्तरस्यदीर्घलोपेनपूर्वस्यदीर्घरूपःस्वरइत्यर्थः । तेनयोगस्यब्रह्मादिष्वयोग्यतामभिप्रैति । शिष्टंस्पष्टमुपन्यासमुखेनेतिभावः । इतिशब्दःपादसमाप्तौ ॥ ७ ॥ **ब्राह्मणाधिकरणं ॥ १४ ॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रश्रीसुधींद्रतीर्थगुरुपादशिष्यश्रीराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेप्रथमाध्यायस्यतृतीयःपादः ॥ १ ॥ ३ ॥**

६४।३ **स्वरव्यत्ययस्याधिकार्थत्वादिति ॥ "आधिक्येऽधिकमित्येवहरिणासूत्रमीरित"मित्यृग्भाष्यउक्तत्वाद्ब्रह्मणावेदेनगम्यत्वाधिक्यविवक्षयादीर्घइत्यर्थः । इतरत्स्पष्टमिति ॥ ७ ॥ ब्राह्मणाधिकरणं ॥ १४ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांप्रथमाध्यायस्यतृतीयःपादः ॥ १ ॥ ३ ॥**

गु० नापितल्लिंगोपपत्तेरित्यादिकंपरिहर्तुंशंकते ॥ **नचेति** ॥ इतरत्स्पष्टं ॥ ७ ॥ **ब्राह्मणाधिकरणं ॥ १४ ॥ इतिश्रीमद्विद्याधीशतीर्थपूज्यपादानांशिष्येणकेशवभट्टारकेणविरचितायांश्रीमत्तात्पर्यचंद्रिकावाक्यार्थविवृतौप्रथमाध्यायस्यतृतीयःपादः ॥ १ ॥ ३ ॥**

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ आनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्त गृहीतेर्दर्शयतिचॐ ॥ अत्रटीकायां "एतत्पादप्रतिपाद्यमाहे"त्यादिना "प्राबल्यादियमुक्ति"रित्यंतेनबलवच्छ्रुतिलिंगादिभिरन्यत्रैवप्रसिद्ध समन्वयपरत्वेनैतत्पादसार्थक्यमुक्त्वा "पूर्वैस्स्रष्टृत्वादिगुणाभिधायकानांशब्दानांतत्संगतानांचसमन्वयोनिगदितोत्रपुनस्स्वरवर्णपदात्मकानांस मस्तशब्दानामितिवाऽवैयर्थ्य"मितिग्रंथेनप्रकारांतरेणापिसाफल्यमुक्तं । तत्राद्यमानंदमयनयेपादोपाधिसमर्थनप्रस्तावेविवृतंमत्वाद्वितीयंस माधिंविवरीतुकामस्तंतावत्संगृह्याह ॥ अस्तुविष्णोरिति ॥ शंकानिवार्यतइत्यस्यात्रेतिपूर्वश्रुतपदेनान्वयः । अत्रपादइत्यर्थः । सर्वसम न्वयोत्रनिगद्यतइतियथाटीकमनुवादेकार्येनतुसर्वसमन्वयइत्यादिरूपेणानुवादःसर्वसमन्वयोक्तिर्व्यर्थेतिटीकायामुत्पन्नशंकानिरासाय । ननु नसमस्तसमन्वयोक्तिरुपपन्ना । वैयर्थ्यात् । जन्माद्यस्येत्युक्तजन्मादिकारणत्वेहिशास्त्रंप्रमाणीकृतं । जन्मादिकारणताभिधायकवाक्याना मेवपरमात्मपरत्वंचचतुर्थसूत्रेप्रतिज्ञातं । तच्चातीतैःपादैस्समर्थितमित्येवंटीकोक्तशंकांहृदिकृत्वा "जन्माद्यस्येतिसूत्रेणगुणसर्वस्वसिद्धये । ब्रह्मणे

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ आनुमानिकमप्येकेषामितिचेन्नशरीर रूपकविन्यस्तगृहीतेर्दर्शयतिचॐ ॥ अत्र अस्तुविष्णोःकारणत्वंनतुसर्वसमन्वयः । चतुर्थसूत्रेकथितइतिशंकानिवार्यते ॥१॥

गु० ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ आनुमानिकंॐ ॥ ननु जन्मादिसूत्रेकारणत्वमेवलक्षणमुक्तं । तत्रैवतृतीये शास्त्रंप्रमाणीकृतं । चतुर्थेतुतत्प्रामाण्यं कारणवाक्यसमन्वयादित्युक्तं । एवंचसर्वशब्दसमन्वयस्याप्रतिज्ञातत्वात्तत्प्रतिपादनेऽप्रतिज्ञातोक्तिरित्यतआह ॥ अत्रेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० लक्षणंप्रोक्तंशास्त्रमूलंयतस्ततः।अन्वयस्सर्वशब्दानांगुणसर्वस्ववेदकः । शब्दप्रवृत्तिहेतूनांतस्मिन्मुख्यसमन्वयात्'' इत्यानंदमयनयानुव्याख्यानसुधयोः ''चतुर्थसूत्रेपी''त्यादिनात्रत्योत्तरटीकायांचोक्तरीत्याशंकासमाधिंविवक्षुस्संग्रहंतात्पर्यतोविवृण्वन् ''पूर्वसूत्रस्तृत्वे''त्यादिटीकांविवृणोति ॥ एवंतावदिति ॥ तत्संगतेति ॥ ''यतोवा''इतिवाक्येजगत्कारणब्रह्मजिज्ञासाकार्येत्युक्तमयुक्तं । ब्रह्मणोऽब्रह्मभूतानंदमयावयवत्वप्रतीतेरित्याशंकानिरासायानंदमयादिशब्दसमन्वयाद्वा आनंदमयस्यान्यत्वे ''सोकामयतबहुस्या''मित्युक्तकारणत्वस्यातिव्याप्तेरितिशंकानिरा

एवंतावत्त्रिपाद्यांजन्मादिसूत्रेकंठोक्तकारणत्वतत्संगतानंदमयत्वादिगुणांतरप्रतिपादकवाक्यस्थशब्दसमन्वयउक्तः । अत्रतुपादेजिज्ञासासूत्रेब्रह्मशब्दोक्तसर्वगुणपूर्तिमत्तयाजिज्ञासोक्तेः जन्मादिसूत्रेचपूर्णगुणत्वोपपादककारणत्वमुखेनपूर्णगुणत्वस्यैवलक्षणत्वेनविवक्षितत्वात् शास्त्रयोनिसूत्रेचतत्स्फूर्तयेसर्वशास्त्रप्रामाण्यप्रतिज्ञानात् समन्वयसूत्रेचतदर्थसमन्वयप्रतिज्ञानात् सर्वसमन्वयनिर्वाहायान्यत्रैवप्रसिद्धाव्यक्तादिशब्दसमन्वयउच्यतइतिनाप्रतिज्ञातोक्तिः।

प्र० साद्वासंगतत्वंध्येयं । आदिपदेनतत्रतत्रोक्तरीत्यासंगतानामंतस्स्थत्वादिगुणांतराणांग्रहणं ॥ अन्यत्रैवप्रसिद्धेति ॥ एतेनटीकायां ''स्वरवर्णपदात्मकाना''मित्यत्रान्यत्रैवप्रसिद्धानामव्यक्तादिपदात्मकानामित्यर्थउक्तोभवति । तेनान्यत्रैवप्रसिद्धिपादेस्वरादिसमन्वयोनयुक्तइतिशंकानवकाशः । ननु जिज्ञास्यस्यजीवादिव्यावृत्त्यर्थंब्रह्मशब्देनगुणपूर्णत्वलक्षणसूचनेपिनसर्वगुणपूर्त्यर्थंसर्वसमन्वयोवाच्यः । एकगुणपूर्ण

प्र० त्वग्रहणेनापिजीवव्यावृत्त्युपपत्तेरित्यतआह ॥ यथाचेति ॥ मुमुक्षुणेति ॥ विवृतमेतत्तत्रैवेतिभावः ॥ तदिति ॥ लक्षणत्वसंभवेपीत्यर्थः । निरतिशयैकगुणपूर्तेरन्यत्रासंभवादितिभावः । प्रागुक्तरीतिरेवकुतोनस्यादित्यतआह ॥ यदिचेति ॥ अंतर्ज्योतिरित्यादाविति॥ स्वपरमतयोरधिकरणशरीराणिविषयवाक्यानिचपूर्वत्रैवव्यक्तानि । ''वाक्यान्वया''दित्यस्यपरमतेऽधिकरणांतरत्वात् ''आत्मावाअरेद्रष्टव्य'' इत्यकारणवाक्यविचारपरत्वाच्चवाक्यान्वयादित्युक्तिः ॥ तच्चेति ॥ अकारणवाक्यसमन्वयपरत्वमित्यर्थः । अत्रटीकारीत्याधिकरणसप्ताप्रतीतेर्विषयमालायामुपाधिषट्कोक्तिरयुक्तेत्यतस्तद्विवरणपूर्वकंषट्कोक्तेर्युक्ततामाह ॥ अत्रेति ॥ निषेधिनामिति ॥ द्वंद्वात्परोयमिनिप्रत्ययः । विरोध्यादयोऽर्थावाच्याएषांसंतीतितथोक्ताः । तेषां । शब्दानामितिशेषः । एतानिएतत्पादगतानि । सर्वशस्स्थानानि अधिकर

यथाचैकैकहेतुत्वस्यलक्षणत्वसंभवेपिमुमुक्षुणासमुदितजन्मादिहेतुत्वंज्ञेयमित्यादिज्ञापयितुंसमुदितहेतुत्वोक्तिः तथैकैकगुणपूर्तेस्तत्संभवेपिसर्वगुणपूर्त्युक्तिः । यदिचकारणत्वमेवलक्षणं तत्रैवचकारणेशास्त्रंप्रमाणं तत्प्रामाण्यंचकारणवाक्यसमन्वयादितिजन्मादिसूत्रत्रयेभिप्रेतंस्यात् तर्ह्याद्यपादे ''अंतः ज्योति'' रित्यादौ द्वितीये ''सर्वत्र अंतर''इत्यादौ तृतीये ''भूमा दहर'' इत्यादौ चतुर्थे ''वाक्यान्वया''दित्यादावकारणवाक्यसमन्वयसूत्रणंनस्यात् । तच्चपरैरपिस्वीकृतं । अत्रानुव्याख्याने ''विरोधिसर्वबाहुल्यकारणस्त्रीनिषेधिनां । पृथक्समन्वयार्थानिस्थानान्येतानिसर्वश''इत्यापादसमाप्त्यधिकरणोपाधयोदर्शिताः ।

गु० नचैकगुणपूर्णत्वस्यैवलक्षणत्वसंभवात्सर्वगुणपूर्त्युक्तिर्व्यर्थेत्यतआह ॥ यथाचेति ॥ सूत्रणं सूत्रकरणं । नन्वेवंसमाकर्षाधिकरणस्यज्योतिरधिकरणस्यचसर्वविष

SGDF Sri Gargeshwari Digital Foundation

प्र० णानि ॥ तदिति ॥ अनुव्याख्यानंव्याख्यातमित्यर्थः ॥ यदात्विति ॥ तत्वप्रकाशिकाकृत्पक्षइत्यर्थः ॥ पृथगुपाध्यभावादिति ॥ अतएवसुधायां "सर्वेत्यनेनैवसमाकर्षाधिकरणार्थोपिसंगृहीतः । तस्यंज्योतिरधिकरणाक्षेपपरिहारार्थत्वा"दित्युक्तमितिभावः । तर्हिकथं भेदइत्यतआह ॥ न्यायेति ॥ द्वितीयेशब्दार्थानेकत्वरूपोन्यायः । पंचमेवृत्तितारतम्योपपादकसमाकर्षादिरूपोन्यायइतिन्यायभेदोग्रेस्पष्ट

तद्व्याख्यातंसुधायां आद्येऽधिकरणेपरमैश्वर्यविरोध्यवरत्वाद्यर्थानां द्वितीयउक्तवक्ष्यमाणातिरिक्तानांसर्वेषां तृतीयेबहुत्वविशिष्टार्थानां चतुर्थेऽवांतरकारणार्थानां प्रकृतिश्चेत्यत्रस्त्रीलिंगानां एतेनेत्यत्रनिषेधार्थानांशून्यादिशब्दानांसमन्वयइति । तत्रयदा "समाकर्षा"दित्यादिसूत्राष्टकस्य "कारणत्वेने"तिचतुर्थाधिकरणशेषता तदैतत्पादीयाधिकरणानिषडित्युपाधिषट्कोक्तिर्युक्ता । यदातुसूत्राष्टकस्यपृथगधिकरणता तदाऽधिकरणानिसप्त । तत्र "समाकर्षा"दितिपंचमाधिकरणोपाध्यनुक्तिस्तुपंचमस्यापिद्वितीयवत्सर्वविषयत्वेनतदुपाधितःपृथगुपाध्यभावात् । न्यायभेदमात्रेणत्वधिकरणभेदः ।

गु० यत्वेप्रतिपाद्यैक्याद्भेदोनस्यादित्यतआह ॥ न्यायभेदेति ॥ पूर्वपक्षसिद्धांतन्यायभेदेनेत्यर्थः । ननुद्वितीयाधिकरणस्यसर्वविषयत्वंनामासंकुचितसर्वविषयत्वंवोक्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० इतिभावः । एकोपाधिकत्वमेवव्यनक्ति ॥ **द्वितीयेपीति** ॥ सुधाविरोधमाशंक्यतदभिप्रायमाह ॥ **सुधायामिति** ॥ यथान्नमयादीनांविकारार्थकमयड्युक्तत्वादिरूपेणानंदमयनयेविचार्यत्वेपिगुहामित्यत्रबहुत्वसंख्यायुक्तत्वेनरूपेणविचार्यता यथावाछंदस्सूत्रेरूढत्वेनान्यत्रविचारितानामप्याकाशादिशब्दानांविष्णौप्रयोगेप्रयोजनंनेत्येवंरूपेणविचार्यता यथाचाकाशशब्दस्यान्यत्रप्रसिद्धत्वेन "आकाशस्तल्लिंगा"दित्यत्राद्यपादउभयत्रप्रसिद्धत्वेनरूपेण "आकाशोर्थांतरत्वादिव्यपदेशा"दित्यत्र यथावाग्निहोत्रादिशब्दानांनामधेयतयाऽऽद्यस्यचतुर्थेनामधेयपादे समुदायानुवादापवादतयाद्वितीयस्यद्वितीयेशब्दांतरपादे तद्वदितिभावः । तथाचवैदिकशब्दमात्रस्यतत्रविचारोक्तौनसुधाविरोधइतिभावः । बाधकांतरमाह ॥ **अनुव्याख्यानइति** ॥ अन्यथेत्यनुवर्तते । पदवर्णादिरूपेणविचार्यत्वाभावइत्यर्थः । तदेवव्यनक्ति ॥ **जीतीति** ॥ "जातमोतंहरौयस्मा"दित्यादिनाज्योतिश्शब्दव्युत्पत्तिरुच्यते । तत्रयद्युक्तरीत्यासर्वसमन्वयोनाभिमतस्स्यात्तदाज्योतिश्शब्दावयवानांब्रह्मपरत्वानावश्यकत्वाद्व्युत्पत्तेरप्यशक्यत्वंपूर्वपक्षयुक्तित्वेननोच्येतेत्यर्थः । एवंपादसाफल्योक्तिपरटीकांपादोपाधींश्चविवृत्येदानीमाद्यनयस्य

द्वितीयेपिहियोगवृत्त्यासर्वेषांपदवर्णादीनांसमन्वयउक्तः । सुधायामुक्तवक्ष्यमाणातिरिक्तग्रहणंत्ववरत्वादिलिंगानांपंचजनादिशब्दानांयेनवाक्यरूपेणपूर्वत्रचोत्तरत्रचविचार्यता तेनरूपेणद्वितीयेनविचार्यता । किंतुपदादिरूपेणेत्यभिप्रेत्य । अन्यथोक्तवक्ष्यमाणातिरिक्तसर्वविषयत्वस्यसर्वाधिकरणसाधारण्याद्विशिष्योक्तिर्नस्यात् । अनुव्याख्यानेव्युत्पत्तेरप्यशक्यत्वंचद्वितीयेपूर्वपक्षहेतुत्वेननोच्येत । जीत्याद्यवयवानामब्रह्मपरत्वेनज्योतिरित्यादिसमुदायस्यब्रह्मणिव्युत्पत्तिसंभवात् ।

गु० वक्ष्यमाणातिरिक्तसर्वविषयत्वंवा । नाद्यः । सुधाविरोधात् । नद्वितीयः । अधिकरणमात्रसाधारण्यादित्यतआह ॥ **द्वितीयेपीति** ॥ ननुदुःख्यादिशब्दसम

SGDF
Sri Gargeshwari Digital Foundation

प्र० साफल्यंवक्तुमाक्षिपति ॥ **नन्विति** ॥ **अवरत्वेति** ॥ परावधित्वार्थकपंचम्याक्षिप्तावरत्वदोषवाचीत्यर्थः । एतेन यद्भाष्यादौसमन्वय सूत्रोक्तसर्वशब्दसमन्वयाक्षेपःपूर्वपक्षे तत्समाधिश्चसिद्धांतेफलमित्युक्तं तदप्याक्षिप्तंभवति । सर्वसमन्वयस्यस्वरूपेणाफलत्वात्तत्फलस्यगुण पूर्तेश्चदोषवाचिव्यतिरिक्तसर्वसमन्वयेपिसंभवेनसमन्वयसूत्रेपिगुणवाचिसर्वसमन्वयस्यैवप्रतिज्ञातत्वेनवाच्यत्वादितिभावः । एतत्समन्वय स्यापित्रेधागुणसिद्धिफलकत्वमाशंक्यनिराकरोति ॥ **दुःख्यादीत्यादिना** ॥ **प्राणेति** ॥ जीवप्राणधारणइतिधातोरितिभावः ॥ **अवां तरेति** ॥ तस्यापिगुणत्वादितिभावः ॥ **महत्परत्वाभावशंकेति** ॥ अतएव "प्रकरणा"दितिसूत्रटीकायां "योबुद्धेःपरतस्तुसइत्यादाविव

ननु "अव्यक्तात्पुरुषःपरः जीवाएवतुदुःखिनः"इत्यवरत्वदुःखित्वादिदोषवाचिशब्दसमन्वयानुक्तावपिगुणपूर्तिःसेत्स्य ति । नचसमन्वयः स्वरूपेणफलं । दुःख्यादिशब्दसमभिव्याहृतजीवादिशब्दप्रवृत्तिनिमित्तप्राणधारकत्वादिगुणास्तु "अ नेनजीवेनात्मने"त्यादिवाक्यस्थजीवादिशब्दसमन्वयेनापिसेत्स्यति । नच "आकाशाद्वायु"रित्यादिवाक्यसमन्वयेनेश्वर स्यावांतरकारणत्वमिव "महतःपरमव्यक्तमव्यक्तात्पुरुषःपर"इत्यादिवाक्यसमन्वयेनावांतरपरत्वादिसेत्स्यतीतिवाच्यं । पितामहस्यपितृत्वाभाववत्तदुत्तमादुत्तमस्यतदुत्तमत्वाभावादर्शनेनमहत्पराव्यक्तात्परस्यपुरुषस्यमहत्परत्वाभावशंकानुदया त् । नचदुःख्यादिशब्दानांगुणप्रकाशकापूर्वयोगकल्पनयागुणसिद्धिः । दोषवाचितामुपेत्यतदधीनत्वेनैवसिद्धांतोक्तेः । ॥ ७५१ ॥

गु० न्वयोक्तिर्व्यर्था । तथाहि । साकिंस्वरूपेणैवफलत्वाद्वा किंतत्समभिव्याहृतजीवशब्दसमन्वयसिद्ध्यर्थंवा दुःखादिशब्दगुणप्रकाशापूर्वयोगकल्पनयागुणसिद्ध्य र्थंवा । नाद्यइत्याह ॥ **नचेति** ॥ नद्वितीयइत्याह ॥ **दुःख्यादिशब्देति** ॥ तृतीयंप्रत्याह ॥ **नचदुःख्यादिशब्दानामिति** ॥ नन्वेवंतदधीनत्वसिद्ध्यर्थंदुःख्यादि

प्र० महत्परत्वसंभवा"दित्युक्तमितिभावः । ननु तस्यसर्वनियंतृत्वेतदधीनत्वंसिध्यतीतितदर्थमेतत्समन्वयोस्त्वित्यतआह ॥ **सर्वेति** ॥ प्राण ऋचः प्राणप्रतिपादिन्यइत्यर्थः । अतएवोत्तरनये "कल्पने"तिसूत्रटीकायां "सर्वशब्दवाच्यत्वमीश्वरस्यचोपासनार्थमेवह्युपदिश्यते । प्राण ऋचइत्येवविद्यादित्यादे"रित्युक्तिरितिभावः ॥ **नामायत्तेति** ॥ "तद्विपूयकवयोन्वविंदन्नामायत्ते"त्यैतरेयश्रुतौ । नामायत्तानि नामप्र काश्यतयानामाधीनानितत्तच्छब्दप्रवृत्तिनिमित्तानि । अन्वविंदन्नित्युक्तवेदने श्रुते परिपक्वेसति । समतृप्यन् सम्यक्तृप्ताभुक्ताअभूवन्नित्यर्थः ॥ **मूलेति** ॥ अन्यत्रनिरूढेंद्रादिशब्दान्यविषयत्वेनापिसंकोचसंभवात्कल्पकाभावेनेंद्रादिशब्दानांविष्णौवृत्तिर्नस्यात् । नचतत्रसूत्रप्रदर्शित विषयवाक्यस्थन्यायैरेवेंद्रादिशब्दसमन्वयस्सेत्स्यतीतिवाच्यं । "नामानी"त्यादिश्रुत्यासर्वशब्दसमन्वयेश्रौतेसतितत्ररूढ्यादिनाश्रौतसमन्व

सर्वनियामकत्वंचांतर्याम्यधिकरणादिभिरेवसिद्धं । तस्मादव्यक्तदुःख्यादिशब्दसमन्वयोनिष्फलइतिचेत् मैवं । ब्रह्मणोगुणांतरपूर्तिरिवसर्वशब्दवाच्यतापिमुमुक्षुणाज्ञेया । अन्यथा "नामानी"त्यादिश्रुतौतद्वाच्यतोक्तिः तथा "प्राणऋचइत्येवविद्या"दित्यादिश्रुतौवाच्यत्वस्यज्ञेयत्वोक्तिः तथा "नामायत्तासमतृप्यञ्छृतेधी"तिश्रुतौ तज्ज्ञानान्मोक्षोक्तिश्चनस्यात् । अन्यथा "नामानिसर्वाणी"त्यादिश्रुतेर्दुःख्यादिशब्दान्यविषयत्वेनसंकोचेमू लप्रमाणाभावादिंद्रादिशब्दानामपिसमन्वयोनसिध्येत् । किंतुब्रह्मलिंगैरमुख्यवृत्त्याब्रह्मपरत्वमात्रंस्यात् ।

गु० शब्दसमन्वयोक्तिरस्त्वित्यतआह ॥**सर्वनियामकत्वंचेति**॥ नन्वक्षराधिकरणेऽक्षरशब्दस्यब्रह्मपरत्वेननिर्णीतत्वात्तत्रैवपंचम्युक्तावधित्वस्यब्रह्मणिसमर्थितत्वेन

SGDF

प्र० यानुपपत्तिशंकायांतच्छंकानिवर्तनेनश्रौतसमन्वयस्थिरीकरणार्थत्वात्सौत्रन्यायानां । तथैवानंदमयनयेऽभिधानात् । ननुच "योदेवानांनामधा" इत्येतन्मूलस्तत्समन्वयोभविष्यतीतिचेत्तत्रापिसंकोचसंभवात् । आकाशादिशब्दसमन्वयस्यनिर्मूलत्वापरिहाराच्च । तात्पर्यमात्रनिर्णायकत्वाल्लिंगादीनां । श्रुतिमूलत्वेतुश्रुतौ "आविंशती"त्याङ्प्रयोगेणमुख्यत्वोक्तेः "समन्वया"दित्यत्रसंपदोक्तमुख्यवृत्तिर्लभ्यतइत्याकूतं । एतेनसमन्वयसूत्रप्रतिज्ञातस्सर्वसमन्वयोनसंकोचनीयइतिभाष्याद्युक्तंतदाक्षेपादिरूपंफलंयुक्तमित्युक्तंभवति । नन्वित्यादिनाग्रंथेनैव "नच तद्वाच्यतयाऽन्यथोपपत्तिः । नामानिसर्वाणियमाविशंतीत्यादिश्रुतिविरोधात् । नचसंकोचः । सर्वाणीत्यस्यनिरवकाशत्वाद्बाधकाभावा

किंचेश्वरस्यशक्रादिगतैश्वर्यादेःस्वाधीनत्वात् "इंद्रोराजाजगतोयईश"इत्यादाविंद्रादिशब्दवाच्यतेवजीवगतबंधादेःस्वाधीनत्वात् "कार्यकारणबद्धौता"वित्यादिश्रुतिस्थबद्धादिशब्दवाच्यतापिज्ञेया । अन्यथा "सबद्धःसदुःखीसबंधयति सदुःखयती"त्यादिश्रुतिषुतदुक्तिर्नस्यात् ।

प्र० च्चे"तितदधीनत्वसूत्रटीकास्थवाक्यंविवृतंभवति। नन्वथापि "योदेवाना"मित्यादिवद्दोषवाचिशब्दसमन्वयोक्तौनविशिष्यमानमस्तीत्यतःप्रयोजनद्वयंस्वयमाह ॥ किंचेत्यादिना ॥ इत्यादिश्रुतिस्थेत्यादि ॥ एतच्चप्रयोजनं "स्वातंत्र्यार्थमभिप्रेत्यदोषशब्दाश्चविष्णवी"त्यनुव्याख्याने, "बंधादिनियामकेतस्मिन्नेवबद्धादिशब्दोमंगलात्मकः कार्यकारणबद्धौताविष्येतेविश्वतैजसावित्यादौश्रुतः"इतिसन्न्यायरत्नावल्यां, "जीवाएवतुदुःखिनइत्यादौप्रयुज्यत"इतिसुधायां "अवरयतीत्यादिव्युत्पत्त्युपपत्तेश्च । तथाचश्रुतिः । सबद्धस्सदुःखी"त्यादिटीकायांचसूचितं । ॥ ७५२ ॥
तदुक्तिः बंधादिनियामकत्वनिर्वचनेनबद्धपदप्रयोगोक्तिः । वाचनिकनिर्वचनस्यचानारभ्याधीतस्यनिरवकाशतयाप्रबलस्यवैदिकतच्छब्दमा

SGDF Sri Gargeshwari Digital Foundation

प्र० तदुक्तमिति ॥ अव्यक्तादिशब्दानांपरमात्मविषयत्वांगीकारइतिन्यायविवरणपूर्वशेषः। अदृश्यत्वनयेनगतार्थत्वभ्रांतिंनिराह ॥ अक्षरात्प रतइति ॥ इत्यत्रत्वित्युक्त्या "अक्षरात्संभवतीहविश्व"मित्यत्रपंचम्यंतोक्षरशब्दोब्रह्मणीतिसूचयति। तथैववाच्ये इतिप्रथमांतइत्युक्तिस्तुप्राचीनंपंचम्यंतंपरविद्याविषयत्वरूपब्रह्मलिंगोपेतं उत्तरंपंचम्यंताक्षरपदंपरत्वावधित्वाख्याब्रह्मलिंगोपेतमितिसूचनाय । एवंयथाटीकंन्यायविवरणोक्तमुक्त्वा "भृत्यबंधादिकंराज्ञिराज्ञोबंधादियोग्यतः । कारणंसंशयस्यस्यादितिनैवप्रयुज्यत"इतितदधीनत्वन्यायव्यभिचारनिरासपरानुव्याख्यानव्यावर्त्यरूपंतृतीयचिंतास्थाद्यकोटौहेतुभूतंपूर्वपक्षंवक्तुंसिद्धांतिशंकामाह ॥ नन्वित्यादिना इतिचेदित्यंतेन ॥ स्यादेषाव्याख्यायत्रशब्दादवरत्वादिप्रतीतिः। यत्रपुनः "अव्यक्तात्पुरुषःपर"इत्यादावर्थादवरत्वादिप्राप्तिस्तत्रकथं । नहिशब्दवदुपपत्तिर्व्याख्यानमर्हती"तिसुधोक्तामाशंकामनूद्यतत्रोक्तसमाधिनानिराह ॥ एतेनेति ॥ परत्वावधित्वमिति ॥ परत्वंप्रत्यवधित्वंयन्निष्ठंतस्यावरत्वमर्थादापद्यतां । तदुक्तंन्यायविवरणे "सर्वमानविरोध"इति। "अक्षरात्परतःपर"इत्यत्रतुनपंचम्यंतोक्षरशब्दोब्रह्मणि । किंतु "तदक्षरमधिगम्यत"इतिप्रथमांतः। नन्ववधित्वादिकंप्रत्याश्रयत्वमेवनपंचम्यादिनिमित्तं । किंतुतत्प्रतिस्वातंत्र्यमपि । भृत्यगतजयस्यराजाधीनत्वमात्रेणराजाजयीतिप्रयोगात् । तथाचब्रह्मण्यवधित्वादिकंप्रतिस्वातंत्र्यस्यसत्त्वादवरादिशब्दोयुक्तः। एतेनयत्रावरादिशब्दोस्तितत्रास्तुतस्यस्वातंत्र्याभिप्रायत्वं । इहतुपंचम्युक्तपरत्वावधित्वेनाक्षिप्तमवरत्वंनतदभिप्रायं । नहिशब्दइवानुपपत्तिरपिव्याख्यानार्हेतिनिरस्तं । परत्वावधित्वंप्रत्याश्रयत्वस्यैवार्थादवरत्वाक्षेपकत्वेनतत्प्रतिस्वातंत्र्यस्यतदनाक्षेपकत्वादितिचेन्न ।

गु० तन्न्यायेनाव्यक्तादितिपंचम्युक्तावधित्वमपिब्रह्मणिसंभवत्येवेतिकथंतद्बाधकमित्यतआह ॥ अक्षरादिति ॥ ननुभृत्यगतदैर्ध्येणराज्ञःस्वातंत्र्यमितिकथंतत्प्रयोगा

SGDF
Sri Gargeshwari Digital Foundation

प्र० परत्वावधित्वंप्रतिपरगतंयत्स्वातंत्र्यंतस्यावरत्वंप्रत्यपितस्यस्वातंत्र्याक्षेपकत्वमेव। नत्ववरत्वाक्षेपकत्वमित्यर्थः। अवधित्वदुःखित्वादिकंप्रत्याश्रयत्वमेवपंचमीदुःख्यादिशब्दप्रवृत्तिनिमित्तमित्येवंरूपमुक्तानुव्याख्यानव्यावर्त्यचोद्यमुक्तशंकोपमर्दकतयाह ॥ भृत्येति ॥ तदधीनत्वसूत्रव्यावर्त्यपूर्वपक्षस्यैवेहप्रपंचनात्तद्व्याख्यानपरानुव्याख्यानतात्पर्यविवरणेनपूर्वपक्षप्रतिक्षेपमाह ॥ सिद्धांतस्त्विति॥ उक्तइत्यन्वयः। सचप्रागेवविवृतइतिभावः। नन्वेतावतापूर्वोक्तातिप्रसंगोनपरिहृतइत्यतआह ॥ अयंभावइति ॥ "राज्ञोबंधादियोग्यत"इत्याद्युत्तरानुव्याख्यानानुरोधेनस्वातंत्र्यंनिरुच्यातिप्रसंगंनिराह ॥ यतइति ॥ उत्तरवाक्येनान्वयः। अतोनेतिपूर्वेणयोज्यं ॥ तदिति ॥ यत्प्रतिस्वातंत्र्यमुच्यते तदाश्रयत्वप्रयुक्तेत्यर्थः। बुद्धिस्थदुःखबंधैश्वर्यादिस्तच्छब्दार्थः। तदाश्रयत्वप्रयुक्तनीचत्वायोग्यत्वंचतत्प्रयुक्तनीचत्वस्यक्काप्यप्रसिद्ध्यावाक्कचित्प्रसिद्धत्वे

भृत्यदैर्घ्येणह्रस्वेपिराज्ञिदीर्घशब्दस्य राजाधीनेनशत्रुगतदुःखेनराज्ञिदुःखिशब्दस्य राजाधीनभृत्यगतबंधादिनाराज्ञिबद्धादिशब्दस्यचापातात्। तेषाममंगलत्वाद्राज्ञिप्रयोगोनचेद्ब्रह्मण्यपिसनस्यादिति॥ सिद्धांतस्तु "स्वातंत्र्यंतद्गतत्वंचशब्दवृत्तेर्हिकारणं। स्वातंत्र्यंतत्रमुख्यंस्यात्कुतोराज्ञिजयोन्यथे"त्यनुव्याख्यानउक्तः। अयंभावः। स्वातंत्र्यस्यनिमित्तत्वेपिनराज्ञिबद्धादिशब्दाः। यतः स्वातंत्र्यंनामनियामकत्वेसतितदाश्रयत्वप्रयुक्तनीचत्वायोग्यत्वमिहविवक्षितं।

गु० पादनमित्यतोदृष्टांतोत्तरमाह॥ राजाधीनेनेति॥ राजाधीनेनशत्रुगतदुःखेनराज्ञिदुःखिशब्दस्य राजाधीनेनभृत्यगतबंधेनराज्ञिबंधादिशब्दस्यचापातादित्यतोभिप्रायमाह ॥ अयंभावइति ॥ नन्वेवमनुव्याख्यानविरोधः। तत्रराज्ञोबंधादियोग्यतइत्यादिनाराज्ञःसाक्षाद्बंधादिरूपदोषयोग्यत्वस्यैवोक्तत्वात्। भवद्भिश्चतत्र ॥ ७५५ ॥

प्र० प्यन्यत्रानाश्रयत्वादिनाद्वेधा। तत्राद्येगुणरूपैश्वर्यादीनिंद्रादिशब्दप्रवृत्तिहेतून्प्रतिविष्णोस्स्वातंत्र्यसिद्धिः। ऐश्वर्यादिप्रयुक्तनीचत्वस्यक्काप्यभावात्। द्वितीयेदोषरूपदुःखबंधादीन्दुःखिबद्धादिशब्दप्रवृत्तिहेतून्प्रतिस्वातंत्र्यसिद्धिः। तदाश्रयत्वप्रयुक्तनीचत्वस्यचेतनांतरेसंभवेपीहविष्णोस्तदनाश्रयत्वेनतत्प्रयुक्तनीचत्वायोग्यत्वात्। नन्वाद्येतस्यैवाप्रसिद्धत्वेकथंतद्योग्यत्वनिषेधः। क्कचित्प्रसिद्धस्यैवनिषेधादितिचेन्न। सिद्धांतेऽप्रसिद्धस्यापिनिषेधात्। "तस्यनीचत्वाप्रयोजकत्वा"दित्यग्रिमवाक्यपर्यालोचनयास्यैवार्थस्यपर्यवसानात्। उक्तंचतर्कतांडवेव्याप्तिलक्षणोक्तिप्रस्तावे "नचकेवलान्वयिन्यव्याप्तिः। तत्रसाध्याभावस्यासत्त्वादेवसाध्याभावेसतिसाधनस्ययोपपत्तिःतदभावरूपानुपपत्तेस्सत्वात्। मन्मतेऽप्रामाणिकस्यापिनिषेधप्रतियोगित्वा"दिति। एवंचैतस्यगुणदोषस्वातंत्र्यसाधारणतयानाव्याप्तिचोद्यावकाशः। तत्रघटादेरूपाद्याश्रयत्वप्रयुक्तनीचत्वायोग्यत्वमस्ति। रूपाद्याश्रयत्वस्यनीचत्वाप्रयोजकत्वात्। एवंचघटादेरपिरूपादिस्वातंत्र्यापत्त्यातत्ररूपादिपदप्रयोगस्स्यादतस्सत्यंतं। नियामकत्वंचविनियोजकत्वादिःकश्चनचेतनधर्मः। तावत्युक्तेराज्ञोपिभृत्यगतबंधादिस्वातंत्र्यापत्त्यातिप्रसंगस्तदवस्थइत्युत्तरभागोपादानं। सहनशक्तिमतिराजनिभृत्यगतदुःखादिनियामकत्वेसतिदुःखाश्रयत्वप्रयुक्तनीचत्वाभावोपिकदाचिदस्तीतियोग्यतांतर्भावः। नीचत्वंचस्वरूपसंकोचरूपोपकर्षः। "नकर्मणावर्धतेनोकनीया"नित्यादिश्रुतिप्रतिपन्नोऱ्हासशब्दितः। समयचरणेक्षपणकपरीक्षायां "नानित्यतास्मत्पक्षेतुचैतन्यादेर्विशेषिणः। लक्षणस्यनिवृत्तौतुस्यान्नतच्चेतनेक्कचि"दित्यनुव्याख्यानव्याख्यावसरेसुधायां "नन्वसन्मतइवभवन्मतेप्यात्मनोऽन्यथाभावोस्त्येव। सुखदुःखाभ्यामुच्चनीचत्वाभ्युपगमा"दित्यादिनाश्लोकमवतार्यव्याख्याय "यस्यवस्तुनोयल्लक्षणंतन्निवृत्तिरूपोन्यथाभावएवतदनित्यतानिबंधनं। नान्यथाभावमात्र"मितितात्पर्यमुक्तं। उक्तंचनयचंद्रिकायामेतच्छ्लोकव्याख्यानावसरएव

SGDF Sri Gargeshwari Digital Foundation

प्र० नारायणपंडिताचार्यैरपि "संकोचविकासरूपान्यथाभावमात्रान्ननाश"इति । सन्न्यायरत्नावल्यांच "ह्रासवृद्ध्यादिविकारवतोपी"ति । तथाचतूलपिंडस्येवस्वरूपस्यैवासंकोचसंकोचावुच्चनीचत्वशब्दार्थइतिवदंति । एतेननीचत्वंनामयदिरोदनाक्रंदनादिकंतदातस्यधीरोदात्तपुरुषेऽभावादव्याप्तिरित्यादिनाबहुप्रकारविकल्पेनकस्यचिन्नूतनस्यखंडनंप्रत्युक्तं । प्रागुक्तातिप्रसंगमुद्धरति ॥ **एवंचेति** ॥ लक्ष्येतदाह ॥ **ब्रह्मणस्त्विति** ॥ "नकर्मणावर्धतेनोकनीयान् निरनिष्ट"इत्यादिश्रुतेःसंभोगसूत्रोक्तवैशेष्ययुक्तेश्चेतिभावः । अव्याप्तिंनिराह ॥ **इंद्रेति** ॥

एवंचभृत्यादिगतदुःखादिकंप्रतिराज्ञोनस्वातंत्र्यं । तदाश्रयत्वप्रयुक्तनीचत्वयोग्यत्वात् । किंतुजयादिकंप्रत्येव । तदयोग्यत्वात् । ब्रह्मणस्तुतदयोग्यत्वादस्तितत्रत्यपिस्वातंत्र्यं । इंद्रादिशब्दनिमित्तैश्वर्यंप्रतितुब्रह्मणोयोग्यत्वेपितस्यनीचत्वाप्रयोजकत्वादेवास्तितत्रत्यपिस्वातंत्र्यं । आश्रयत्वपक्षेपिहिनाश्रयत्वमात्रंनिमित्तं । रूपदंडाद्याधारेकालादौरूपीत्याद्यप्रयोगात् । यद्वास्वगतत्वयोग्यत्वेसतियद्दोषत्वंतद्रहितंप्रतिस्वातंत्र्यंनिमित्तं ।

प्र० ननुकिमेवंविवक्षया । अतिप्रसंगात्स्वातंत्र्यमनिमित्तमित्येवोच्यतामित्यतआह ॥ **आश्रयत्वेति** ॥ तथाचतदपिनिमित्तंनस्यात् । केवलस्यातिप्रसंगात् । किंतुरूपसमवायित्वाद्येववाच्यमितिभावः ॥ **स्वातंत्र्यंनिमित्तमिति** ॥ तच्छब्दप्रवृत्तावितिशेषः । विष्णौबद्धादिशब्दवृत्त्यनापत्तेस्सत्यंतं । राजादौभृत्यादिगतबंधादिनाबद्धादिपदप्रयोगापत्तेरुत्तरभागः । स्वगतत्वयोग्यत्वेसतियद्दोषत्वंतद्रहितमित्यत्रसतिसप्तमीमहिम्नास्वगतत्वयोग्यत्वसमानाधिकरणंयद्दोषत्वंतद्रहितमित्युक्तं । विशिष्टराहित्यंविशेषणराहित्येनविशेष्यराहित्येनचद्वेधा । तत्राद्ये

SGDF
Sri Gargeshwari Digital Foundation

प्र० दोषशब्दप्रवृत्तिहेतून्प्रतिविष्णोस्स्वातंत्र्यंतच्छब्दप्रवृत्तौनिमित्ततयासिध्यति । अंतेगुणवाचींद्रादिशब्दप्रवृत्तिहेतून्प्रतितस्यस्वातंत्र्यंतच्छब्दप्रवृत्तौनिमित्तंसिध्यतीतिनक्वाप्यव्याप्तिः । ननुकुतएवंकल्पना स्वातंत्र्यंव्यभिचारादनिमित्तमित्येववास्वातंत्र्यमात्रंनिमित्तमितिवाकल्प्यतामित्यतआह ॥ कार्येति ॥ प्रयोगभावाभावरूपकार्येत्यर्थः । विशिष्टराहित्यसंपादनेनराजादौस्वातंत्र्यस्यनिमित्तत्वानिमित्तत्वेविशेषणमुपेत्यविशेष्यभावाभावाभ्यामुपपादयति ॥ एवंचेति ॥ विशिष्टाभावसंपादनेसतीत्यर्थः । ब्रह्मण्युभयाभावेननिमित्ततामेवाह ॥ ब्रह्मणि

कार्यबलेनतथाकल्पनात् । एवंचजयादेर्बंधनादेश्चराजगतत्वयोग्यत्वेपिजयादेर्दोषत्वराहित्यात्तत्प्रतिस्वातंत्र्यंनिमित्तं । बंधनादेस्तुदोषत्वान्नतत्प्रतिस्वातंत्र्यंनिमित्तं । ब्रह्मणित्विंद्रादिशब्दनिमित्तैश्वर्यादेःस्वगतत्वयोग्यत्वेपिदोषत्वराहित्यात् बंधनादेश्चदोषत्वेपिस्वगतत्वयोग्यत्वराहित्यादुभयंप्रतिस्वातंत्र्यंनिमित्तं । अतएवानुव्याख्याने "राज्ञोबंधादियोग्यत"इतिराज्ञोबंधादिदोषयोग्यता, "दोषात्यस्पृष्टिनियम"इतिविष्णौदोषायोग्यताचोक्ता ।

प्र० त्विति ॥ यद्यपिगुणवाचींद्रादिशब्दानांतत्प्रवृत्तिनिमित्तस्यविष्णुगतत्वेनैवतत्रप्रवृत्तिस्संभवति । नस्वातंत्र्यरूपनिमित्तानुसरणंतत्रकार्यं । अन्यथास्वातंत्र्याख्यगुणस्यैवलाभेनापर्यायानंतशब्दानांसमन्वयेनतत्तच्छब्दप्रवृत्तिनिमित्तानंतगुणासिद्धिप्रसंगात् । दोषवाचिनांतुशब्दानांप्रवृत्तिनिमित्तस्यविष्णुगतस्यैवतत्रशब्दप्रवृत्तिहेतुत्वेविष्णोर्दोषितापत्तेःश्रुत्यादिविरोधप्रसंगात्स्वातंत्र्यमेवतत्रदोषवाचिशब्दवृत्तौनिमित्तमनुसर्तव्यं । आहचायंसूत्रकारोत्रैवदोषवाचिशब्दोदाहरणकेऽधिकरणेतदधीनत्वन्यायं । भाष्यकारोपि "स्वातंत्र्यादेववर्ततेदोषशब्दाश्चविष्ण

SGDF
Sri Gargeshwari Digital Foundation

प्र० वी"ति। तथाचोभयसाधारण्येनस्वातंत्र्यनिरुक्तिक्लेशोविफलः । तथापिश्रुतिस्मृत्योः "शब्दप्रवृत्तिहेतूनांतस्मिन्मुख्यसमन्वयात् । अन्यार्थेष्वल्पताहेतोस्तन्निमित्तत्वतस्तथे"त्यानंदमयनयानुव्याख्यानेप्रतिनयंटीकायांचगुणवाचिशब्दानामपिभगवतिवृत्तौस्वातंत्र्यस्यापिनिमित्तत्वेनोपपादनात्साधारण्येनैवमुक्तिः । यद्यप्येवंसुधादौनोक्तं । तथापितदपरित्यागेनप्रौढ्यातात्पर्यांतरवर्णनमेतदित्यदोषः । केवलस्वातंत्र्यस्यनिमित्तत्वेपिनराज्ञिबद्धादिशब्दप्रयोगः । लोकेतच्छब्दप्रयोगेस्वातंत्र्यस्यानिमित्तत्वादित्याह ॥ **अथवेति** ॥ नन्वव्यभिचरितप्रयोगाद्धिनिमित्तताज्ञानं । प्रयोगश्चस्वातंत्र्यंव्यभिचरतीत्यतोमास्तुप्रयोगात्तज्ज्ञानं किंत्वन्यतइतिभावेनाव्यक्तादित्यादिविभक्तिवृत्तौस्वातंत्र्यंनिमित्तमित्यत्रविष्णुतत्वनिर्णयोक्तश्रुतिमाह ॥ **सर्वेति** ॥ स्वतंत्रत्वात्प्रवर्ततइत्येववाच्येशेषोक्तिःकर्त्रादिप्रदर्शनाय । श्रुतौविभक्तिवृत्तावेवस्वातंत्र्यस्यनिमित्ततोक्तेःशब्दवृत्तौनिमित्तताज्ञापनायैतत्पादांतिमभाष्योक्तस्मृतिमाह ॥ **सर्वस्येति** ॥ **इत्यादाविति** ॥ शब्दप्रयोगइतिशेषः ॥

अथवास्वातंत्र्यमात्रंनिमित्तं । "सर्वांतर्यामिणिहरावस्मच्छब्दविभक्तयः । युष्मच्छब्दगताश्चैवसर्वास्तच्छब्दगाअपि । सर्वशब्दगताश्चैववचनान्यखिलान्यपि । स्वातंत्र्यात्संप्रवर्तंत"इत्यादिश्रुतेः, "सर्वस्यतदधीनत्वात्सर्वशब्दाभिधेयते"त्यादिस्मृतेश्च । नचैवंराज्ञिबद्धादिशब्दापातः । तद्गतत्वस्यनिमित्तत्वेपिधनादिवाहकेधनीत्यादिशब्दापातात् । अथरूपीदंडीत्यादौतद्गतत्वंनिमित्तं । धनीगृहीत्यादौतुस्वातंत्र्यमितिचेत्तर्हिजयीत्यादौस्वातंत्र्यमपिनिमित्तं । दुःखीत्यादौतुलोके

गु० युक्तनीचत्वाभिधानादित्यरुच्याह ॥ **यद्वेति** ॥ पक्षद्वयेपिस्वातंत्र्यस्यपारिभाषिकत्वंभवतीत्यतःपक्षांतरमाह ॥ **अथवेति** ॥ पूर्वंसामान्यतःसर्वशब्दप्रवृत्तौस्वातं

प्र० **तद्गतत्वमेवेति** ॥ तथाचनराज्ञिबद्धादिप्रयोगइतिभावः । लोकइत्युक्त्यानविष्णावितिप्राप्तं । तदाह ॥ **ब्रह्मणीति** ॥ किमत्रकल्पकमित्यतआह ॥ **सबद्धइति** ॥ प्राक्श्रुतिस्मृत्युक्तावपिविशिष्यनियामकापेक्षायां "सबद्ध"इतिश्रुत्युक्तिः । एतेनटीकायामेतच्छ्रुत्युक्तेरुपयोगउक्तोभवति । "निरनिष्टोनिरवद्य"इत्यादिश्रुतेश्चेत्यपिध्येयं । यदत्रकश्चिदाह विविधकृष्णादिप्रतिमानिर्मातरिशिल्पिनितत्तत्प्रतिमासुकृष्णादिशब्दप्रवृत्तिनिमित्तंकृष्णाद्याकारंप्रतिस्वातंत्र्येसत्यपितस्मिन्कृष्णादिशब्दाप्रयोगान्नेदंनिमित्तमिति तन्न । कृष्णादिशब्दानांप्रतिमादावमुख्यत्वात् । नच "इवेप्रतिकृता"वित्यधिकारेविहितस्यकन्प्रत्ययस्य "जीविकार्थेचापण्य"इतिलुपिसतिकृष्णादिशब्दानांकृष्णादिसदृशाकारप्रतिमावाचकत्वमितिवाच्यं । वाचकत्वेतत्सूत्रस्याप्रमाणत्वात् । अन्यथाकृष्णादिशब्दस्यनानार्थत्वप्रसंगात् । चित्रलिखितसिंहादौसिंहादिशब्दप्रयोगोगौणइतिसर्वसंमतत्वाच्च । अनुशासनस्यसाधुतामात्रप्रदर्शनपरत्वेनाप्युपपत्तेः । नहिवाचकत्वगर्भमेवसाधुत्वं । लक्षकपदमात्रा

तद्गतत्वमेवेत्यस्तु । ननु धनीत्यादौनधनंनिमित्तं । किंतुतत्स्वामित्वं । तच्चधनिगतमेवेतिचेत्तर्हिजयीत्यादावपितत्स्वामित्वंनिमित्तं । तच्चराजगतमेव । दुःखीत्यादौतुरूपीत्यादाविवलोकआश्रयत्वमेवनिमित्तं । ब्रह्मणितुस्वातंत्र्यमित्यस्तु "सबद्धःसदुःखीसबंधयतिसदुःखयती"त्यादिश्रुतेः । नचैकस्यैकत्रैकंनिमित्तंचेदन्यत्रापितथेतिनियमः । एकस्यैवधनवच्छब्दस्यधनवद्गृहमित्यादावाश्रयत्वनिमित्तकत्वेपिधनवान्पुरुषइत्यादौस्वामित्वनिमित्तकत्वात् ।

गु० त्र्यमित्युक्तं । इदानींदुःख्यादिशब्दप्रवृत्तौस्वातंत्र्यंनिमित्तमित्यत्रप्रमाणमाह ॥ **सबद्धइति** ॥ ननुब्रह्मणिदुःख्यादिशब्दप्रवृत्तौस्वातंत्र्यंनियामकंचेद्राज्ञ्यपितथास्यात् । तत्रतदाश्रयत्वंनिमित्तंचेद्ब्रह्मण्यपितत्स्यादित्यतआह ॥ **नचेति** ॥ ब्रह्मणिदुःख्यादिशब्दप्रवृत्तौस्वातंत्र्यंनिमित्तं राज्ञितुजयिशब्दप्रवृत्तौस्वातंत्र्यं बद्धादि

SGDF
Sri Gargeshwari Digital Foundation

प्र०साधुत्वापत्तेः। अतएवमंजर्यांपंचमस्यतृतीयपादे “इवेप्रतिकृता”वित्यत्र “प्रतिकृतिरूपंयत्सदृशंतत्रकन्प्रत्यय”इत्यर्थमुक्त्वा “अश्वइवायमश्वप्रतिकृतिरश्वक”इतिवृत्तिगतोदाहरणे “सादृश्यनिबंधनाभेदोपचाराद्गौर्वाहीकइतिवदश्वशब्दएवप्रतिकृतौवर्तते । कन्प्रत्ययस्तुतस्यैवौपचारिकत्वस्यद्योतक”इतिग्रंथेनाश्वप्रतिकृतावश्वकशब्दस्यौपचारिकत्वमुक्तं । “जीविकार्थेचापण्य”इतिसूत्रेच “जीविकार्थंयदपण्यंतस्मिन्नभिधेयेकनोलुप्भवती”तिवृत्तावभिधेयइत्युक्तेरपिप्रतिपाद्यमानइत्यर्थपरत्वोपपत्तेः । अन्यथामंजर्यामौपचारिकत्वोक्तिविरोधात् । यत्तु “तदस्यास्त्यस्मि”न्नित्यर्थेविहितामत्वर्थीयप्रत्ययास्स्वभावात्केभ्यश्चित्प्रातिपदिकेभ्योस्यास्तीतिषष्ठ्यर्थएवभवंति । केभ्यश्चिदस्मिन्नस्तीतिसप्तम्यर्थे । षष्ठ्यर्था अपि “षष्ठीस्थानेयोगे”तिसूत्रेमहाभाष्योक्त्यैकशतंसंबंधास्संति । तेभ्यस्तेभ्यःप्रातिपदिकेभ्यस्तत्तत्संबंधविशेषएवभवंति । केभ्यश्चित्षष्ठ्यर्थेसप्तम्यर्थेचभवंति । इयंचव्यवस्थाप्रयोगानुसारात्स्वयमेवलभ्यतइतिलाघवार्थं “तदस्यास्त्यस्मि”न्नितिसामान्येनविधानं । यथा “पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनी”ष्वित्यादिसूत्रेषुहविर्विशेषसामिधेनीविशेषादिवाचकानांसान्नाय्यादिशब्दानांसामान्येनहविराद्यर्थेषुविधानं । एवंच धनप्रातिपदिकान्मत्वर्थीयप्रत्ययाष्षष्ठ्यर्थएव । तत्रापिस्वस्वामिभावएवभवंतीतिधनवोढर्यपिनधनीतिप्रयोगप्रसंगः । जयप्रातिपदिकात्तुस्वस्वामिभावरूपेषष्ठ्यर्थआश्रयत्वरूपसप्तम्यर्थेचभवंतीतिनराज्ञिभृत्येचजयिशब्दप्रयोगानुपपत्तिः । अतोनतदृष्टांतेनदुःखिबद्धादिसर्वशब्दानांस्वातंत्र्येणनिमित्तेनेश्वरेवृत्तिकल्पनोपपद्यते । राज्ञिबद्धादिपदाप्रयोगेणव्यभिचारादिति । तदप्येतेनैवनिरस्तं । “कार्यकारणबद्धौता”वित्यादिश्रुतिषुबद्धादिपदप्रयोगस्य “ज्ञेयत्वावचनाच्चे”त्यादिवक्ष्यमाणयुक्तिश्रुत्यादिबलेनहरौसिद्धत्वात् । तस्य “निरनिष्टोनिरवद्य”इत्यादिश्रुत्यादिभिर्निर्दोषत्वावगमाच्च । तदाश्रयत्वेनतच्छब्दानांहरौवृत्त्ययोगात् । “स्वतंत्रत्वात्प्रवर्तते सर्वस्यतदधीन

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्वात् । संबंधयती"त्यादिश्रुत्यादिबलाच्चजयीधनीत्यादिशब्दानांराजादाविवस्वामित्वलक्षणस्वातंत्र्येणैवनिमित्तेनदुःख्यादिशब्दानांहरौवृत्तिः। अन्यत्रतुभृत्यादौजयिशब्दादिवत्तदाश्रयत्वेननिमित्तेनवृत्तिः। अन्यस्यदोषात्यस्पृष्टिनियमाभावात्। सबंधयतीत्यादिवत्प्रमाणाभावाच्चेत्युक्तौदोषाभावात् । जयिशब्दस्यराज्ञिलाक्षणिकत्वंतु "तदस्यास्ती"त्यादिनिमित्तसाम्यादयुक्तं । अन्यथावैपरीत्यस्याप्यापातादितिसुधायामेवोक्तं। वक्ष्यतेचात्रापिलोकइत्यादि । बद्धादिपदप्रयोगेतदाश्रयत्वमेवनिमित्तं । नतुस्वातंत्र्यमित्युपेत्यनिमित्ताभावेनराज्ञिभृत्यबंधादिनाबद्धादिपदप्रयोगोपात्तदोषःपरिहृतः । अथेदानीं "प्रयोगेसतिनिमित्तानुसरणंनतुनिमित्तमस्तीतिप्रयोग"इति सन्न्यायरत्नावल्युक्तसमाध्यंतरं विवृण्वन्राजादौस्वातंत्र्यरूपनिमित्तसत्त्वेपिबद्धादिशब्दाप्रयोगोयुक्तइतिभावेनाह ॥ **किंचेति** ॥ यथेतिन्यायमते । यथाचेतिशाब्दिकादिमते। यद्वारूढशब्दोयथेतिदृष्टांतितः। यथाचेतियौगिकः। तत्रापिगुणगतजात्यनंगीकारांगीकारवादयोर्यथाक्रमंद्वयं । द्वितीयेचैकस्यशब्दस्यान्यत्रनिमित्तेसत्यप्रयोगेधेनुशब्दः। एकत्रैवसत्यपिनिमित्तेकेचिदेवप्रयुज्यंतेकेचिन्नेत्यत्रोदंचनकारादिशब्दोबोध्यः । तेनहरौराज्ञिचस्वातंत्र्येसत्यपिरूढयौगिकबद्धदुःख्यादिपदप्रयोगाप्रयोगौ तथाराज्ञिसत्यपिस्वातंत्र्येजयिशब्दप्रयोगोबद्धादिशब्दाप्रयोगश्चयुक्तइतिभावः । धेट्पानइत्यस्माद्धातोः "धेटइच्चे"तिसूत्रेण "दाभाभ्यांनु"रित्यतोऽनुवृत्तनुप्रत्ययेकृतेधातोरिकारादेशे "सार्वधातुकार्धधातुकयो"रितिगुणेकृतेधे

किंचयथामृत्तिकादौद्रव्यत्वसामान्येद्वेषादौचगुणत्वसामान्येसत्यपिसुवर्णादाविवज्ञानादाविवचद्रव्यमितिगुणइतिचनप्रयोगः, यथाचधेनुशब्दनिमित्तस्य "धेटइच्चे"तिव्याकरणोक्तस्यधानकर्मत्वस्यमहिष्यादौसत्त्वेपितत्रतदप्रयोगः, यथाच

गु० शब्दप्रयोगेतुतद्वत्त्वमितिकल्पनेकल्पनागौरवंस्यादितिचेन्न । प्रमाणस्योक्तत्वेनतस्यादोषत्वात्। किंचगौरवमपिनास्तीत्याह ॥ **किंचेति** ॥ धेटइच्चेतीति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० नुरितिरूपं । "अतःकृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्ये"तिसूत्रेकमीत्युक्त्यैवसिद्धौपुनःकंसग्रहणेनौणादिकस्याव्युत्पन्नत्वपक्षस्यापिज्ञापिततयारूढ्यातिप्रसंगनिरासस्स्यादित्याशयाद्वायथाचेत्युदाहरणांतरं ॥ **निमित्तइति** ॥ कुंभोदंचनादिकर्तृत्वरूपनिमित्तेसतीत्यर्थः । कुंभादिशब्दउपपदेकरोतेः "कर्मण्यणि"त्यणिकृतेकुंभकारादिशब्दनिष्पत्तिः । कुतइत्यतस्तत्र "प्रयोगानुसारित्वात्कृत्तद्धितसमासाना"मितिसुधोक्तंप्रयोगमूलत्वंहेतुमाह ॥ **अभिधानेति** ॥ कृदादयोयमर्थमभिदधति तत्रैवप्रयुज्यंतेनान्यत्रसत्यपिनिमित्तइत्यभिधाननिमित्तकाः कृत्तद्धितसमासाइत्यर्थः । यथाकृदंतोधेनुशब्दस्साम्नावत्येवनान्यत्र । यथावासान्नाय्यादिशब्दोदधिपयोरूपहविर्विशेषादावेवनान्यत्रप्रयुज्यते । मत्वर्थीयतद्धितांतोधनीत्यादिशब्दोधनिकेपुरुषएवनतुधनवोढरि "तदस्यास्त्यस्मि"न्नितिनिमित्तसत्त्वेपि । एवंसमासेपिध्येयं । प्राभाकरपक्षमाह ॥ **यौगिकत्वपक्षइति** ॥ नैयायिकादिपक्षमाह ॥ **योगरूढत्वपक्षइति** ॥ एकत्वेनेतिमतांतराभिप्रायेण । स्वमतेघटसंयोगःपटेपटसंयोगोघटइत्यनेकत्वोपगमात् । संबंधनिमित्तदुःख्यादिशब्देनिष्ठांतेबद्धादिशब्देवानिमित्तसत्त्वेप्रयोगावश्यकत्वशंकाव्युदासा

निमित्तेसत्यपिकुलालेकुंभकारशब्दस्येवोदंचनकारादिशब्दानामप्रयोगः, अभिधानादिलक्षणाहिकृत्तद्धितसमासाः । यथापंकजादिशब्दानांयौगिकत्वपक्षेयोगरूढत्वपक्षेचकुमुदादौयोगस्यसत्त्वेपितत्रतदप्रयोगः, यथाचघटपटसंयोगस्यैकत्वेनघटेपिघटसंयोगस्यसत्त्वेपिघटेघटसंयुक्तशब्दाप्रयोगः, तथाराज्ञिसत्यपिनिमित्ते

गु० धेट्पानइत्यस्माद्धेटइच्चेतिनुप्रत्यये तस्य इटिचसति आदेचउपदेशेशितीत्यात्त्वेगुणेचसतिधेनुशब्दनिष्पत्तिरितिज्ञेयं ।उक्तश्रुतेरितिसंबंधः । सबंधयतिसदुःखयती

प्र० यायंदृष्टांतइत्याहुः ॥ **बद्धादिशब्देति** ॥ भृत्यादौतस्यशब्दस्यजातिनिमित्तकत्वेवायौगिकत्वेवायोगरूढत्वेवासंबंधनिमित्तकत्वेवेतिभावः ॥ **उक्तेति** ॥ "स्वतंत्रत्वात्प्रवर्तत"इतिश्रुतेरित्यर्थः । श्रुतिर्लक्षणाबीजस्वस्वामिभावरूपसंबंधबोधेनचरितार्थेतिवा विभक्तिवृत्तिनिमित्तपरानतुशब्दवृत्ताविितिवाऽन्यथासिद्धेत्यतआह ॥ **यदधीनइति** ॥ अत्रभाष्योक्तस्मृतौतद्गुणीतद्गुणनिमित्तकशब्दवाच्योभिधीयतइत्युक्तेरितिभावः ॥ **यथोक्तमिति** ॥ प्राभाकरैरित्यर्थः । बंधाश्रयेरूढत्वेनराजादावप्रयोगेहरावपिप्रयोगोनस्यादित्यतआह ॥ **ब्रह्मणीति** ॥

बद्धादिशब्दाप्रयोगोस्तु । प्राज्ञानांमृत्तिकादौद्रव्यादिशब्दप्रयोगउचितइतिचेत्प्रकृतेपिसमं । उक्तश्रुतेः । "यदधीनोगुणोयस्यतद्गुणीसोभिधीयत"इतिस्मृतेश्च । ननुयौगिकत्वपक्षेपंकजादिशब्दानांकुमुदादौपूर्वपूर्वप्रयोगाभावादेवावयवशक्तिप्रतिबंधःकल्प्यते । यथोक्तं "अप्रयोगादेवाप्रयोग"इति । योगरूढत्वपक्षेतुपद्मेरूढिःकुमुदादौयोगप्रतिबंधिकेतिचेदिहापितर्हिराज्ञिबद्धादिशब्दानांपूर्वपूर्वप्रयोगाभावोवाबद्धत्वाश्रयेरूढिर्वाप्रतिबंधिकास्तु । ब्रह्मणितुश्रौतरूढिरस्तीत्युक्तं ।

गु० त्युक्तश्रुतेरित्यर्थः । यदुक्तंपंकजादिशब्दानांयौगिकत्वपक्षेयोगरूढत्वपक्षेवाकुमुदादौप्रवृत्तिनिमित्तस्यसत्त्वेपितत्रपंकजादिशब्दाप्रयोगइति तत्रवृत्तिनिमित्तमात्रंन शब्दप्रयोगेनिमित्तं । किंतुपूर्वयोगविशिष्टमेव । तथाचनोक्तदोषइत्याशंकते ॥ **नन्विति** ॥ **यथोक्तमिति** ॥ अत्रपूर्वपूर्वेषामिति उत्तरोत्तरेषामितिचशेषः । तथाचपूर्वेषामप्रयोगादेवोत्तरेषामप्रयोगइतिसंमतिग्रंथार्थः । अत्रप्रष्टव्यं । किंबद्धादिशब्दायौगिकाउतयोगरूढाः । आद्यआह ॥ **पूर्वेति** ॥ पूर्वप्रयोगसहकृतप्रवृत्तिनिमित्ताभावादेवबद्धादिशब्दाप्रयोगइतिभावः । द्वितीयआह ॥ **बद्धत्वेति** ॥ राज्ञियोगप्रतिबंधिकेतिशेषः । नन्वेवंराज्ञिबद्धादिशब्दानांयोगसत्त्वेपिबद्धत्वाश्रयरूढेर्योगप्रतिबंधकत्वात्तत्रबद्धादिशब्दाप्रयोगइवबद्धत्वाश्रयेरूढेर्ब्रह्मण्यपियोगप्रतिबंधकत्वाद्ब्रह्मण्यपिबद्धादिशब्दप्रयोगोनस्यादित्यतआह ॥ **ब्रह्मणित्विति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० स्वतंत्रत्वात्प्रवर्तते सबद्धस्सबंधयती''त्यादिश्रौतरूढिरित्यर्थः। साचाज्ञरूढितोपिबलवतीतिभावः । स्वातंत्र्यस्यनिमित्तत्वेराज्ञिबद्धादिशब्द प्रयोगापातंप्रकारांतरेणपरिहरति ॥ **किंचव्याकरणइति** ॥ **अतित्वाकमिति** ॥ अतियुष्मत् आंइतिस्थिते ''त्वमावेकवचन''इतिमपर्य तस्यत्वादेशेकृते ''आमिसर्वनाम्नस्सु''डितिसुडागमे ''सामआक''मित्याकमादेशेशेषेलोपेचसत्यतित्वाकमितिरूपं । मतांतरेतुगौणतायामस र्वनामत्वेनसुडभावात् ''सामआक''मित्यस्याप्रवृत्तेः ''योची''तियकारादेशे अतित्वयामितिसिध्यति । एवमस्मच्छब्देप्युक्तप्रक्रियायामति माकमतिमयामितिषष्ठीबहुवचनेरूपंभवति ॥ **लक्षणतइति** ॥ ''त्वमावेकवचन''इत्यत्र ''वक्तीतिवचनंकृत्यल्युटोबहुलमितिकर्तरिल्युटि कृते । एकस्यार्थस्यवचनेयुष्मदस्मदी''इत्युक्त्या एकत्वाद्यर्थवाचिवचनग्रहणाद्व्युत्पादिताः । ''सामआक''मित्यादिसामान्यलक्षणतश्चव्युत्पा दिताइत्यर्थः ॥ **नचतेषामिति** ॥ ननुमहाभाष्येपस्पशाग्रंथे ऊष तेर चक्र इत्यादिलिण्मध्यमपुरुषबहुवचनांतशब्दानामप्रयोगमाशंक्य ''सर्वेदेशांतर''इत्यनेनसर्वशब्दानांप्रयोगोस्तीत्युक्तं । तत्कथमेवमुक्तमितिचेत्संभावनाभिप्रायेणतदुक्तेः । अतएव ''ष्णांताष''डितिसूत्रे ''यथालक्षणमप्रयुक्त''इतिभाष्यएवाप्रयोगोप्युक्तः । नचप्रयोगमूलत्वाद्व्याकरणस्याप्रयुक्तानांकथंव्युत्पादनमितिवाच्यं । ''अप्रयुक्तेदीर्घस

किंचव्याकरणे त्वामतिक्रांतानामित्याद्यर्थे अतित्वाकमतित्वयामित्यादयः, मामतिक्रांताना मित्याद्यर्थे अतिमाकमतिमयामित्यादयश्चलक्षणतोव्युत्पादिताः । नचतेषांप्रयोगोस्ति । तद्वदिहाप्यस्तु । अदर्शनेपिव्याकरणस्मृत्याव्युत्पादितत्वात्प्रयोगयोग्यतास्तीतिचेत्तर्हीहा

गु० सबद्धःसदुःखीत्यादिप्रमाणोदाहरणेनेतिशेषः । एवंब्रह्मणिप्रयोगाभावमभ्युपेत्यसमाहितं । इदानींप्रयोगाभावेपियोग्यतास्त्येवेतिनदोषइत्याह ॥ **किंचेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० त्र्व''दितिपस्पशाभाष्यएवसमाहितत्वादितिभावः ॥ **उक्तयेति** ॥ ''स्वतंत्रत्वात्प्रवर्तेत''इतिश्रुत्या ''सर्वस्यतदधीनत्वादितिस्मृत्ये''त्यर्थः । यद्वा ''सबद्धस्सबंधयती''त्यादिश्रुत्या ''यदधीनोगुणोयस्ये''तिस्मृत्याव्युत्पादितत्वाद्राजादावपिभृत्यगतबंधादिस्वातंत्र्येणबद्धादिशब्दयोग्यता स्त्वित्यर्थः । एवं ''प्रयोगेसतिनिमित्तानुसरण''मित्यादिसन्न्यायरत्नावल्युक्तेः ''किंचयथामृत्तिकादावि''त्यादिनाद्बेधातात्पर्यविवरणेनराजा दौबद्धादिपदप्रयोगापातदोषोनिरस्तः । अथेदानींयत्प्राक् धनीत्यादिशब्दद्दष्टांतेनलोकेतद्गतत्वंनिमित्तमीश्वरेतुस्वातंत्र्यंनिमित्तंदुःख्यादिपद प्रयोगइत्युक्तं । तदयुक्तमिव । ''तदस्यास्त्यस्मि''न्नित्यनुशासनेनषष्ठीसप्तमीरूपोभयार्थकस्यमत्वर्थीयप्रत्ययस्यविषयभेदकल्पनानदृष्टचरेत्यतः प्रागुक्तमेवद्दष्टांतांतरेणव्यनक्ति ॥ **किंचयथाद्वंद्वस्येति** ॥ ''चार्थेद्वंद्व''इत्यत्रान्वाचयसमुच्चययोरसामर्थ्येनसमासाभावात्समाहारेतरेतर योगरूपार्थद्वयएवद्वंद्वस्यविधानमितिवृत्त्यादावुक्तेरुभयार्थत्वेपीत्युक्तं । ''द्वंद्वश्चप्राणितूर्यसेनांगाना''मितिसूत्रे ''द्विगुरेकवचन''मित्यतएक

प्युक्तयाश्रुत्यास्मृत्याचव्युत्पादितत्वाद्योग्यतास्तीतिसमं । किंच यथाद्वंद्वस्योभयार्थत्वेपिप्राण्यंगादौसमाहारस्यैवविवक्षा । दधिपयआदावितरेतरयोगस्यैव । तथादुःखीत्यादेरुभयार्थत्वेपिलोकआश्रयत्वस्यैवविवक्षा । ब्रह्मणितुस्वातंत्र्यस्येत्यस्तु ।

गु० उक्तयाश्रुत्या सबद्धःसदुःखीसबंधयतिसदुःखयतीत्युक्तश्रुत्येत्यर्थः ॥ **स्मृत्याचेति** ॥ यदधीनोगुणोयस्यतद्गुणीसोभिधीयतइतिस्मृत्याचेत्यर्थः । नन्वतित्वाकमि त्यादेर्लोकेऽप्रयोगेपिव्याकरणस्मृत्याव्युत्पादितत्वाद्ब्रह्मण्युक्तश्रुतिस्मृतिभ्यांव्युत्पादितत्वात्तत्रबद्धादिशब्दप्रयोगयोग्यतासत्त्वेपिराज्ञिबद्धादिशब्दस्यकदाप्यभावेनतद्यो ग्यतायाएवज्ञातुमशक्यत्वात्कथंप्रयोगयोग्यतास्तीत्यरुच्याह ॥ **किंचेति** ॥ **उभयार्थत्वेपीति** ॥ दुःखाश्रयत्वदुःखस्वातंत्र्यरूपोभयार्थत्वेपीत्यर्थः । ननुलो केदुःखादिशब्दप्रयोगेआश्रयत्वस्यैवब्रह्मणितुस्वातंत्र्यस्यैवविवक्षायांकिंनियामकं । नचलोकेप्रयोगोब्रह्मण्यप्रयोगएवनियामकइतिवाच्यं । शब्दप्रवृत्तिनिमित्तसत्त्वे

SGDF
Sri Gargeshwari Digital Foundation

प्र० वचनमितिपदमनुवर्त्यप्राण्यंगानांतूर्यांगानांसेनांगानांचद्वंद्वएकवद्भवतीत्यर्थमुक्त्वा शिरोग्रीवं मार्दंगिकपाणविकं रथिकाश्वारोहमित्युदाहृत्योक्तंवृत्तौ "इतरेतरयोगेसमाहारेचद्वंद्वोविहितः । तत्रसमाहारस्यैकत्वात्सिद्धमेवैकवचनं । इदंतुप्रकरणंविषयविभागार्थं । प्राण्यंगादीनां समाहारएवद्वंद्वः । दधिपयआदीनामितरेतरयोगएव । वृक्षमृगादीनामुभयंचेती"ति । ततश्च "द्वंद्वश्चप्राणितूर्ये"त्यारभ्यैकवद्भावतद्विकल्पतन्निषेधपरानेकसूत्रसंदर्भात्मकमिदंप्रकरणमारभमाणस्यपाणिनेर्यथाकचित्प्राण्यंगादौसमाहारविवक्षा दधिपयआदावितरेतरयोगविवक्षा । "नदधिपयआदीनी"त्येकवद्भावनिषेधात् । तथेहापिदुःखीत्यादिमत्वर्थीयप्रत्ययांतशब्दस्य "तदस्यास्त्यस्मि"न्नित्यनुशासनेनषष्ठीसप्तम्यर्थरूपस्वातंत्र्यतदाश्रयत्वलक्षणोभयार्थत्वेविषयभेदेननिमित्तभेदविवक्षास्तु । तथाचनराज्ञिबद्धादिशब्दप्रयोगापातः । जयीतिशब्दप्रयोगोपिराज्ञिस्वातंत्र्यविवक्षयाभृत्येतद्गतत्वविवक्षयाचोपपन्नइतिभावः । एवं "भृत्यबंधादिकंराज्ञी"तिश्लोकतात्पर्यविवरणेनपूर्वपक्ष्युक्तातिप्रसंगंनिरस्येदानीं "अमंगलत्वाच्छब्दानांराज्ञोयोगादमंगले । अप्रियत्वात्तुशब्दस्यस्यात्प्रयोगनिवर्तन"मित्यनुव्याख्यानोक्तंसमाध्यंतरंव्यनक्ति ॥ यद्वेति ॥ तद्धीः । दोषधीरित्यर्थः । ननु स्यादेवंयदिस्वातंत्र्यंशब्दप्रवृत्तौनिमित्तंस्यात् । तदेवासिद्धं । मानाभावात् । यदत्रोक्तमनुव्याख्याने "कुतो

यद्वाराज्ञोबंधनादियोग्यत्वात्तत्रामंगलधीर्माभूदितिबद्धाद्यप्रयोगः । ब्रह्मण
स्तुदोषातिदूरत्वात्प्राज्ञानांतद्धीर्नास्तीतिस्वातंत्र्यविवक्षयातत्प्रयोगेप्यदोषः ।

गु० नतस्यैवापादितत्वेनाप्रयोगस्यनियामकत्वासंभवादित्यतोऽनुव्याख्यानोक्तंपक्षांतरमाह ॥ यद्वेति ॥ ननुनस्वातंत्र्यविवक्षयाब्रह्मणिदुःख्यादिशब्दप्रयोगः । स्वातंत्र्यापेक्षयाशब्दप्रयोगस्यकुत्राप्यदृष्टत्वात् । नचराज्ञिस्वातंत्र्यविवक्षयाजयिशब्दोदृष्टइतिवाच्यं । तत्रापिजयिशब्दार्थभूतोत्कर्षस्यराजगतत्वेनैवराजाजयीतिप्रयोगो

प्र० राज्ञिजयोन्यथे"तिस्वातंत्र्यस्याहेतुत्वेराज्ञिजयोजयनिमित्तकोजयिशब्दःकुतःकथंस्यादितिजयिशब्दाप्रयोगापत्तिरूपंबाधकं तन्न । तद्गतत्वेनैवतत्रप्रयोगोपपत्तेः । तथाहि । जयिधातुर्द्व्यर्थःप्रसिद्धः । यथोक्तं "जयेर्जयाभिभवयोराद्येर्थेसावकर्मकः । उत्कर्षप्राप्तिराद्योर्थोद्वितीयेर्थेसकर्मक"इति । तथाचोत्कृष्टत्वहेतुकत्वेनजयीतिप्रयोगः । किंच गंगासंबंधात्तीरेगंगाशब्दप्रयोगवद्भृत्यसंबंधात्तद्गतजयिशब्दस्यलक्षणयापिप्रयोगोस्तु । तथाचतत्रस्वातंत्र्यंमुख्यमित्यपिदूरापास्तमित्यतोहेतुत्वंतावदाशंक्यसमाधत्ते ॥ नचेति ॥ सकर्मकत्वादभिभवेत्युक्तं । तथाचतस्यभृत्यगतत्वेनराजगतत्वाभावात्स्वातंत्र्यमेवोपेयमितिभावः । "लक्षणयापिप्रयोगोस्त्वितिचेन्न । तदस्यास्तीत्यादिनिमित्तसाम्या"दितिसुधावाक्यंविवृण्वन्नमुख्यार्थत्वमाशंक्यनिराह ॥ नापीति ॥ संबंधविशेषस्यविवक्षितत्वान्नातिप्रसंगइत्यतआह ॥ जयेति ॥ नन्वेत

नचोत्कर्षेणवर्तनस्यापिजयिधात्वर्थत्वात्तदाश्रयत्वस्यचराज्ञिसंभवान्नस्वातंत्र्यंतत्रनिमित्तमिति
वाच्यं । राजाशत्रूञ्जयतीत्यभिभवाभिप्रायेणापितत्प्रयोगात् । नापिजयाश्रयभृत्यसंबंधाद्रा
ज्ञिलाक्षणिकः । भृत्यसंबधिनिपुरुषांतरेतदप्रयोगात् । जयाश्रयभृत्यधीपूर्वकत्वाभावाच्च ।

गु० पपत्तेरित्याशंकते ॥ नचेति ॥ अभिभवाभिप्रायेणेति ॥ अभिभवश्चनराजगतइतिस्वातंत्र्यमेवतत्रनिमित्तमितिभावः । ननुतथापिराज्ञिजयिशब्दस्यलाक्षणिकत्वान्नतत्प्रतिस्वातंत्र्यंनिमित्तमित्यतआह ॥ नापीति ॥ लक्षणाबीजभूतशक्यसंबंधोपपादनंजयाश्रयभृत्यसंबंधादिति । अनतिप्रसक्तएवशक्यसंबंधोलक्षणाबीजं । प्रकृतेचभृत्यसंबंधस्यातिप्रसक्तत्वान्नलक्षणाबीजत्वमित्याह ॥ भृत्यसंबंधिनीति ॥ सर्वत्रलक्षणायाःमुख्यार्थोपस्थितिपूर्वकत्वंदृष्टं । नचप्रकृतेतदस्ती

SGDF Sri Gargeshwari Digital Foundation

प्र० देवासिद्धमित्यतस्स्वातंत्र्यंमुख्यवृत्त्याशब्दप्रयोगएवनिमित्तं । नतुलक्षणयातत्प्रयोगेसंबंधरूपतयेत्यत्रानुव्याख्यानोक्तंहेतुमाह ॥ नहीति ॥ जयस्यान्यगत्वेपिभृत्यगतत्वेपितंजयंप्रतिस्वातंत्र्याभासमात्रेणराज्ञिविजयिशब्दोयावत्प्रयुज्यते तावज्जयाधिकरणस्यापिभृत्यस्यसंबंधितयानप्रयुज्यतेहियस्मात्तस्मात्स्वातंत्र्यंमुख्यत्वेहेतुरित्यर्थः । भृत्यधीपूर्वकत्वनियमेचैतन्नस्यादितिभावः । स्वातंत्र्यादितिवाच्येस्वातंत्र्याभासमात्रतइत्युक्तिःकिमुतानुपचरितस्वातंत्र्येहराविति कैमुत्यद्योतनाय । एतेन "नचान्यगतशब्दप्रवृत्तिनिमित्तप्रेरकेशब्दवृत्तिरमुख्या । राजनिविजयशब्दस्यबहुलप्रयोगा"दितिटीकैतदनुव्याख्यानमूलेतिसूचितं । ननुभृत्याज्ञाननिमित्तंराज्ञिप्रयोगप्राचुर्यमितिचेन्न । तज्ज्ञानेपितदुपलंभात् । ननुनप्रयोगप्राचुर्यंमुख्यतायांहेतुः । अज्ञातमुख्यलाक्षणिकादिप्रयोगेष्वपिदर्शनात् । अनुव्याख्यानंतुप्रयोगप्राचुर्यात्तद्गतत्वमेवमुख्यं । नस्वातंत्र्यं । तदप्राचुर्यादमुख्यमितिपरेणचोदितेपरहेतोरसिद्धिकथनायैवप्रवृत्तं । नतुप्रयोगप्राचुर्येणमुख्यत्वंसाधयितुं । अभिधानप्रवृत्तावेवस्वातंत्र्यतद्गतत्वयोर्निर्धारणायांस्वातंत्र्यंमुख्यमित्यत्रप्रयोगप्राचुर्यस्यहेतुत्वाभिधानायवाप्रवृत्तं । तथैवसुधायामुक्तेरित्यतोहेत्वंतराण्याह ॥ धनीत्यादिना ॥ अनुशासनस्येति ॥ "तदस्यास्त्यस्मिन्निति मतु"बित्यत्रेतिशब्दस्यार्थनिर्देशार्थत्वादस्मिन्नित्यनेनाश्रयत्वलाभेपि अस्येति

"नहिभृत्यस्यविजयिशब्दस्तावत्प्रयुज्यते । यावद्राज्ञ्यन्यगत्वेपिस्वातंत्र्याभासमात्रत"इत्यनुव्याख्यानेभृत्यादपिराज्ञिप्रयोगप्राचुर्याद्युक्तेश्च । धनीत्यादौस्वातंत्र्येपिमुख्यत्वदर्शनाच्च । "यदधीन"इतिस्मृतावभिधोक्तेश्च । "तदस्यास्ती"त्याद्यनुशासनस्याश्रयत्वस्वातंत्र्ययोःसमत्वाच्च ।

गु० त्याह ॥ जयाश्रयेति ॥ किंचजयिशब्दस्यभृत्येमुख्यत्वेराजापेक्षयाप्रयोगबाहुल्यंस्यात् । नचतदस्तीत्याह ॥ नहीति ॥ ननुराजाजयीत्यादिवद्धनीत्यादिप्रयो

SGDF Sri Gargeshwari Digital Foundation

प्र० षष्ठ्यास्वस्वामिभावादिसंबंधसामान्यस्यैवप्राप्तेरितिभावः । आदिपदेनास्मिन्नेवार्थेप्रवृत्तं "अतइनिठना"वितिसूत्रंगृह्यते ॥ **न्यायेति** ॥ "मृत्युशब्दादिषुप्रसिद्धेश्चे"तिन्यायविवरणइत्यर्थः । एतेन "यमादौमृत्युप्रमुखशब्दानांचतथात्वा"दितिटीकान्यायविवरणमूलेतिसूचितं । "अयंभाव"इत्यादिनोक्तंतदधीनत्वसूत्रविवरणपरानुव्याख्यानतात्पर्यंसंगृह्याह ॥ **एवंचेति** ॥ स्वातंत्र्यस्यनिर्बाधंनिमित्तत्वेसिद्धेसतीत्यर्थः । नन्वेवंप्रवृत्तिनिमित्तभेदेनानेकार्थकत्वंस्यादित्यतआह ॥ **स्वातंत्र्येति** ॥ **दुःखबंधेति** ॥ संबंधएवच "तदस्यास्त्यस्मि"न्नितिद्वेधापाणिनिनाविवेचितइतिदुःखबंधावरत्वाद्यप्येकरूपमेवसत्संबंधभेदाद्धरौतदन्यत्रशब्दप्रवृत्तौनिमित्तमितिनानेकार्थत्वंदुःखिबद्धादिशब्दानामित्यर्थः । अस्तुसर्वत्रस्वातंत्र्यमेकमेवनिमित्तमनुगतं । नचदुःखाद्याश्रयेऽव्याप्तिः । तत्रापिस्वाश्रितंदुःखबंधादिकंप्रतितदाश्रयस्यजीवस्यस्वातंत्र्यसत्त्वादितिभावेनाह ॥ **तदाश्रितेपीति** ॥ हेतुगर्भमिदं । "तदस्यास्त्यस्मि"न्नितिभेदेनोक्तिस्तु "प्रमाणप्रमेये"त्यादिगौतमसूत्रेप्रमाणप्रमेययोरिव

न्यायविवरणेमृत्युनियामकेमृत्युपदस्याभिधानादिसिद्धत्वेनमुख्यत्वस्योपपादि
तत्वाच्च । एवंच दुःखादेर्जीवगस्यापिस्वाधीनत्वेनहेतुना । दुःखीतिगीयते
ब्रह्मधनस्वामीधनीयथा ॥ १ ॥ स्वातंत्र्याश्रयत्वयोःसंबंधयोर्भेदेपिनिमित्तस्य
दुःखबंधावरत्वादेरेकत्वात्तदाश्रितेपितदधीनत्वस्यानुगतत्वाच्चननानार्थता ।

गु० गोपिलाक्षणिकएवेत्यतआह ॥ **स्वातंत्र्याश्रयत्वयोरिति** ॥ किंचाक्षादिशब्दानामिवपरस्परासंसृष्टार्थत्वेनानार्थत्वंस्यान्नचतदस्तीत्याह ॥ **तदाश्रितेपीति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० व्याप्यव्यापकरूपावांतरविशेषद्योतनायेतिभावः ॥ **अतएवेति** ॥ स्वातंत्र्यस्यसार्वत्रिकत्वादेवेत्यर्थः । "स्वातंत्र्यंतद्गतत्वंचे"तितदधीनत्वसूत्रानुव्याख्यानोक्तमर्थप्रवृत्तिनिमित्तैकरूप्यमुपपाद्य ततश्चकिमित्यतस्तस्यफलमाह ॥ **एवंचेति** ॥ स्वातंत्र्यस्यनिमित्तत्वेमुख्यत्वेचसतीत्यर्थः । अव्यक्तजीवादिशब्दाशयेनोक्तं **रूढस्येति** ॥ दुःख्यादिशब्दाशयेनोक्तं **यौगिकस्येति** ॥ एवंसामान्यतउपपाद्यप्रकृतोदाहरणनिष्ठतांदर्शयन् "तदधीनत्वाच्चाव्यक्तत्वादीना"मितिभाष्यं, "अत्राव्यक्तत्वग्रहणेनाव्यक्तशब्दस्यद्वेधापिपरमात्मनिवृत्तिरितिदर्शयती"तिटीकांच व्यनक्ति ॥ **एवंचेति** ॥ प्रवृत्तिनिमित्तस्यतदधीनत्वेनतद्वाचकत्वेसतीत्यर्थः । "अव्यक्तत्वोपयोगिनस्सूक्ष्मत्वस्यतत्रसद्भावा"दित्यादिकां "अतिशयेनप्रवृत्तिनिमित्तवत्येवशब्दस्यमुख्यत्वादित्यंतां "सूक्ष्मंतुतदर्हत्वा"दितिसूत्रभाष्यटीकांहृदिकृत्वाऽऽश्रयत्वादित्युक्तंव्यनक्ति ॥

अतएवानुव्याख्यानेस्वातंत्र्येमुख्यत्वोक्तिर्युक्ता । नहिनानार्थेष्वक्षादिशब्देष्वेकत्रार्थेमुख्यता । एवंचरूढस्यवा यौगिकस्यवायस्यशब्दस्यप्रवृत्तिनिमित्तमाश्रितत्वेनवायथेष्टविनियोक्तृत्वरूपस्वातंत्र्यविषयत्वेनवायदधीनंसत स्यवाचकः । तत्राप्याश्रयादपिस्वतंत्रंप्रत्यधीनत्वस्यमुख्यत्वात्तद्वाचितामुख्या । एवंचदुःख्यादिशब्दानांस्वातंत्र्यादेवेशेवृत्तिः । अव्यक्तादिशब्दानांत्वाश्रयत्वादपि । तन्निमित्ताव्यक्तत्वस्यपरमसूक्ष्मेब्रह्मण्येवमुख्यत्वात् ।

गु० **अतएवेति** ॥ परस्परासंसृष्टार्थत्वाभावेननानार्थत्वाभावादेवेत्यर्थः । ब्रह्मणिशब्दप्रयोगेस्वातंत्र्यंनिमित्तमित्युक्त्यासर्वेषामपिशब्दानांप्रयोगेस्वातंत्र्यस्यैवनिमित्तत्वंप्राप्तं । तन्निराकरोति ॥ **एवंचेति** ॥ अपिशब्देनस्वातंत्र्यपरामर्शः । नन्वव्यक्तादिशब्दानांत्वाश्रयत्वादपिभगवतिप्रवृत्तिरित्ययुक्तं । अव्यक्तादिशब्दप्रवृत्तिनिमित्तस्यभगवतिगतत्वाभावेनाश्रयत्वासंभवेनस्वातंत्र्यस्यैववक्तव्यत्वादित्यतआह ॥ **तन्निमित्तेति** ॥ नन्वधिकपंकजेपद्मेपंकजशब्दप्रवृत्तौपद्मत्वजातेरेवनिमि-

प्र० **तन्निमित्तेति** ॥ नन्वत्रटीकायां "अतिशयेनप्रवृत्तिनिमित्तवत्येवे"त्याद्युक्तिरयुक्ता । तदधीनत्वसूत्रटीकायांप्रधानादेरतिसूक्ष्मत्वाद्यभावेपिनामुख्यार्थत्वं । अल्पपंकजेपिपद्मेपंकजशब्दस्यामुख्यताऽदर्शनादितिशंकाचनिरस्ताभवती"त्युक्तेः । तथा चमससूत्रावतरणपरटीकायां "सहनवतिपुंसिप्रयुक्तस्यसिंहशब्दस्यतदवाचकत्वदर्शना"दितिग्रंथेनयोगार्थस्यवाचकत्वाहेतुत्वोक्तेः । तथा "महद्वच्चे"तिसूत्रटीकायां "अतिसहनवतिपुरुषेसिंहशब्दस्यामुख्यत्वा"दित्युक्तेश्चेतिभावेनाशंक्यसमाधत्ते ॥ **नचनिमित्ताधिक्यादिति** ॥ **भाष्यस्थचशब्दादिसूचितस्येति** ॥

नच निमित्ताधिक्यान्नमुख्यत्वं । अतिसहनवतिपुंसिसिंहशब्दस्याल्पपंकजादप्यधिकपंकजेपद्मेपंकजशब्दस्यमुख्यत्वप्रसंगादितिवाच्यं । तत्रसिंहत्वजातेःपद्मत्वजातेश्चनिमित्तत्वेनविवक्षितत्वात् । तयोश्चतत्रातिशयाभावात् । अल्पज्ञादपिबहुज्ञेविद्वच्छब्दस्य मंडलाधिपादपिसार्वभौमेभूपशब्दस्यमुख्यत्वदर्शनाच्च । "इतिशंकानिरस्ताभवती"तिटीकायांत्वव्यक्तत्वंनकेवलमीशेधिकं किंतुप्रधानगतमपितदधीनमितिपरिहारांतरस्यभाष्यस्थचशब्दादिसूचितस्यसद्भावाद

गु० त्तत्वात्प्रवृत्तिनिमित्ताधिक्यस्यतत्राप्रयोजकत्वेनाल्पपंकजादपिनमुख्यत्वमित्युक्तं । तदयुक्तं । तथासतिटीकाविरोधःस्यात् । टीकायांप्रवृत्तिनिमित्ताधिक्यस्यशब्दमुख्यत्वेऽल्पपंकजेपद्मेपंकजशब्दस्यामुख्यत्वशंकानिरासायाव्यक्तशब्दप्रवृत्तिनिमित्तस्यभगवतिमुख्यत्वादन्यगतस्यापिभगवदधीनत्वादितिपरिहारस्योक्तत्वात् । भवद्भिश्चस्वातंत्र्यस्यैवप्रयोजकत्वमंगीकृत्याधिकपंकजेपद्मेपंकजशब्दस्यप्रवृत्तौपद्मत्वजातेरेवनिमित्तत्वेनतत्राप्यतिशयाभावेनाल्पपंकजेपिमुख्यत्वमितिपरिहारोक्तेरित्यतआह ॥ **इतिशंकानिरस्ताभवतीतिटीकायामिति** ॥ ननुतथापिनबद्धादिशब्दानांभगवतिमुख्यत्वंसंभवति । तत्प्रयोजकीभूतप्रयोगप्राचुर्याभावादित्यतो

SGDF Sri Gargeshwari Digital Foundation

प्र० “तदधीनत्वाच्चाव्यक्तत्वादीना”मितिभाष्यस्थेत्यर्थः । आदिपदस्य “नामानिसर्वाणियमाविशंती”तिवाचकत्वोक्तिपरश्रुत्युक्तिसूचितस्येत्यर्थः ॥ **अयमिति** ॥ सिंहत्वजातेरित्यादिनोक्तः । “यदुक्तंविष्णोरेवमुख्यतोऽव्यक्तादिशब्दवाच्यत्वमिति तदयुक्तं । अव्यक्तादिशब्दानांप्रधानादावेवप्रसिद्धत्वात् । नचवाच्यंशब्दप्रवृत्तिनिमित्तस्येश्वरेमुख्यत्वेनतत्रशब्दानांमुख्यत्वमुक्तमिति । नहियत्रप्रसिद्धश्शब्दस्तत्रामुख्योऽमुख्यतःप्रवृत्तिनिमित्तवतिचमुख्यइतिदृष्टचर”मितिटीकोक्तचोद्यरीत्या “अव्यक्तादिशब्दानांत्वाश्रयत्वादपी”त्यादिप्रागुक्तमयुक्तमित्याशंकांहृदिकृत्वा “महद्वच्चे”तिसूत्रभाष्यटीकाभिप्रेतहेतूक्त्याप्रागुक्तंसमर्थयते ॥ **शब्दस्येति** ॥ नत्वित्युक्तमेवान्वयतोव्यतिरेकतश्चव्यभिचारेणव्यनक्ति ॥ **रूढेति** ॥ मार्गाश्चलंति मंचाःक्रोशंतीत्यादिशब्दइत्यर्थः । “प्रयोगप्राचुर्यंचनमुख्यताहेतुः । अज्ञातमुख्यलाक्षणिकादिप्रयोगेष्वपिदर्शना”दितिसुधोक्तेरितिभावः ॥ **नूतनयौगिकेति** ॥ पर्वताद्यर्थकेषुवसुमतीधृतिहेतुरित्यादिशब्देष्वित्यर्थः । प्रयोगप्राचुर्यस्यमुख्यत्वहेतुत्वंनिरस्य “प्रवृत्तिनिमित्तस्यहरौमुख्यत्वेनमुख्यत्वोपपत्ते”रितिटीकांविवृण्वन्निमित्तमुख्यत्वंहेतुरित्येतदुपपादयति ॥

यंपरिहारोनोक्तः । शब्दस्यमुख्यत्वेचनिमित्तमुख्यत्वंहेतुः ।
नतुप्रयोगप्राचुर्यं । रूढलक्षणादौतत्प्राचुर्येपिमुख्यत्वादर्शना
त् । नूतनयौगिकशब्देषुतत्प्राचुर्याभावेपिमुख्यत्वदर्शनाच्च । ॥ ७६४ ॥

गु० न्वयव्यतिरेकाभ्यांव्यभिचारान्नप्रयोगप्राचुर्यस्यशब्दमुख्यत्वहेतुत्वमित्याह ॥ शब्दस्यमुख्यत्वइति ॥ इतश्चनप्रयोगप्राचुर्यस्यशब्दमुख्यत्वेहेतुत्वमित्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० किंचेति ॥ नियामकत्वप्रकारंव्यंजयञ्श्लोकंव्याचष्टे ॥ प्रयोगइति ॥ ननु "औत्पत्तिकस्तुशब्दस्यार्थेनसंबंध"इतिजैमिनिसूत्रोक्त्यादेवताधिकरणे "अतएवचनित्यत्व"मित्यत्रशब्दार्थसंबंधानांनित्यत्वोक्त्याचशब्दगतशक्तेरनादिनित्यायाःकथमन्याधीनतेतिचेन्न । "अनादीनां गुणादीनांयथागुण्यादितंत्रते"त्यादिनागायत्र्यधिकरणोक्तरीत्याऽनादिनित्यायाअप्यन्याधीनत्वोपपत्तेः । ज्ञापकत्वमपिनप्रयोगस्यनियतमित्याह ॥ नचेति ॥ किंचेतिचार्थः ॥ उपदेशादिनेति ॥ उपमाननिगमनिघंटुव्याकरणादिरादिपदार्थः । नन्वस्त्वेवमव्यक्तादिशब्देषु गतिः । अतिसूक्ष्मत्वादितच्छब्दप्रवृत्तिनिमित्तस्यशब्दशक्तिनियामकस्यहरौसत्त्वात् । बद्धावरादिशब्देषुकथं । बद्धत्वावरत्वादेर्बद्धावरादिशब्दप्रवृत्तिहेतोर्बद्धादिशब्दशक्तिनियामकस्यहरावभावेनहरेर्बद्धावरादिशब्दमुख्यार्थतानापत्तेरितिचेन्न । "रूढस्यवायौगिकस्यवायस्यशब्दस्ये"त्यादिनाप्रागुक्तदिशोपपत्तेः । "अवरयतीत्यादिव्युत्पत्त्युपपत्तेश्चे"तिटीकां "किंचप्रातिपदिकाद्धात्वर्थइतिणिजंतेभ्यःपचाद्यचिकृतेसुलभा

किंच प्रयोगोज्ञापकःशक्तेर्निमित्तंतुनियामकं । नियामकानुसारित्वंनियम्यस्यचशोभते
॥ १ ॥ प्रयोगोहिशक्तेर्ज्ञापकएव । निमित्तंतुशक्तिविषयतावच्छेदकतयातन्नियामकं ।
नियम्यंचनियामकानुसारि । नचप्रयोगएवज्ञापकः । उपदेशादिनापितज्ज्ञानात् ।

गु० किंचेति ॥ ननुशब्दमुख्यत्वस्यप्रवृत्तिनिमित्तरूपनियामकानुसारित्वे नब्रह्मणिदुःख्यादिशब्दानांमुख्यत्वं । तन्नियामकीभूतप्रवृत्तिनिमित्तज्ञापकप्रयोगस्याभावादितिशंकते ॥ नचेति ॥ स्यादप्येवंयदिसर्वत्रप्रयोगएवप्रवृत्तिनिमित्तज्ञापकतयास्वीक्रियेत । नचैवमित्याह ॥ उपदेशादिनापीति ॥ न्यायविवरणोक्तांयु

SGDF
Sri Gargeshwari Digital Foundation

प्र० ऽवरादिशब्दप्रवृत्ति"रितिसुधोक्तरीत्याविवृण्वन्परिहारांतरंचाह ॥ **सुलभाचेति** ॥ तृतीयस्याद्यपादे "सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिच्"इत्यत्रोक्तचुरादिगणमध्ये "प्रातिपदिकाद्धात्वर्थेबहुलमिष्ठवच्चे"तिपठितं । तस्यार्थः । प्रातिपदिकात्करोत्यादिधात्वर्थेविवक्षितेबहुलंणिच्प्रत्ययोभवति । णाविष्ठवच्चकार्यंभवतीति । तथाचावरंकरोतिबद्धंकरोतीत्याद्यर्थेऽवरबद्धादिशब्दाण्णिचिकृते इष्ठवच्चेत्युक्तेः "टेः"इष्ठेमेयस्सुपरतष्टेर्लोपइत्युक्तटिलोपेचण्यंतात् "नंदिग्रहिपचादिभ्योल्युणिन्यच"इत्यत्रपचादेराकृतिगणत्वस्य "यङोचिचे"त्यत्राज्ग्रहणेनज्ञापितत्वात्पचाद्यचिकृते "णेरनिटी"तिणिलोपेस्वाद्युत्पत्तावavरोबद्धइत्यादिरूपमितिभावः । "अवरयतीत्यादिव्युत्पत्त्युपपत्तेश्चे"त्यादिटीकांविवृत्यतन्मूलमाह ॥ **तदुक्तमिति** ॥ प्रसिद्धेश्चकर्तृव्युत्पत्तेरितिन्यायविवरणपाठःक्वचिदुपलभ्यते । "ननुभवेदियमव्यक्तादिशब्दानांपरमात्मनिमुख्यत्वचिंता । यदितेषांतद्वाचित्वमेवभवेत् । नचतद्युक्तं । तेषामन्यत्रैवप्रसिद्धत्वा"दित्यादिटीकोक्तशंकांहृदिकृत्वातन्निवर्तकतयाप्राप्त "चमसवदविशेषा"दितिसूत्रभाष्यटीकार्थविवृणोति ॥ **सर्वंचैतदिति** ॥ "कार्याणांकारणंपूर्ववच

सुलभाच "प्रातिपदिकाद्धात्वर्थ"इतिण्यंतेभ्योऽवरादिशब्देभ्यःपचाद्यचिकृते अवरयतीत्यवरइत्यवरादिशब्दानांब्रह्मणिव्युत्पत्तिः । तदुक्तंन्यायविवरणे "प्रसिद्धत्वाच्चकर्तृव्युत्पत्ते"रिति । सर्वंचैतत् "नामानिसर्वाणियमाविशंति वचसांवाच्यमुत्तम"मित्यादिश्रुतिस्मृतिबलात्कल्प्यते ।

गु० क्तिमाह ॥ **सुलभाचेति** ॥ प्रातिपदिकाद्धात्वर्थेबहुलमिष्ठवच्चेतिसूत्रादवरादिशब्देभ्यश्चौरादिकेणिचिसति इष्ठवद्भावादिष्ठेमेयःसुपरतःटिलोपविधानेनटिलोपेसतिसनाद्यंताधातवइतिधातुसंज्ञायां पचाद्यचि णेरनिटीतिणिचोलोपेऽवरादिशब्दनिष्पत्तिरितिभावः । दुःख्यादिशब्दानांभगवतिमुख्यत्वेबाधकंपरिहृत्यसाधकम

प्र० सांवाच्यमुत्तम"मित्यनुव्याख्यानोक्तस्मृतिः । श्रुतौमुख्यत्वलाभप्रकारमाह ॥ **आविशंतीति** ॥ आङस्सम्यक्त्वार्थतयामुख्यत्वलाभइतिभावः ॥ **स्पष्टाविति** ॥ सूत्रार्थकथनेनकिंचिदग्रेविवरिष्यतेचेतिभावः ॥ **आद्यइति** ॥ आनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिचेत्यत्र । अस्यार्थः । एकेषांशाखिनांशाखासु "महतःपरमव्यक्तमव्यक्तात्पुरुषःपर"इत्यव्यक्तशब्देनप्रधानमेवोच्यतइतिचेन्न । शरीरसदृशेऽव्यक्तादौविन्यस्तस्यविष्णोरव्यक्तशब्देनगृहीतेः । अव्यक्तादेःपारतंत्र्यंपरमात्मनस्स्वातंत्र्यंप्रधानादिविन्यस्तत्वंच "तुच्छयेनाभ्वपिहितंयदासी"दितिदर्शयतीति । अत्रब्रह्मगृहीतेरित्येववाच्येशरीरेत्याद्युक्तिःकिमर्थेत्यतश्शरीरेत्यादिसूत्रांशभाष्यटीकां "यथा

आविशंतीत्यादिनामुख्यवृत्त्युक्तेः । दृष्टाहिचमसस्वर्गादिशब्दानांशिरःसुखादौलोकप्रयोगाभावेपि "इदंतच्छिरएषह्यर्वाग्बिलश्चमसः सुखंस्वर्गपदास्पद"मित्यादिश्रौतानुशासनाच्छिरःसुखादिवाचिता। इमौचपूर्वोत्तरपक्षौतदधीनत्वरूपमूलहेत्वाश्रितौ। ज्ञेयत्वावचनादिहेत्वंतराश्रितौतुभाष्यादौस्पष्टौ। "ज्योतिर्दर्शना"दित्यत्रटीकायांम्रियमाणादिशब्दौंतर्णीतणिजित्येवोक्तं। नतुस्वातंत्र्यंमुख्यनिमित्तमिति। अभिमान्यधिकरणेपि "मृदब्रवी"दित्यादौमृदादिशब्दादेवतापराइत्येवसिद्धांतः। देवतायांमुख्यत्वंत्वत्रत्यतदधीनत्वन्यायाधीनमितिनपुनरुक्तिः ॥ **सूत्रक्रमस्तु** ॥ आद्येसूत्रे

गु०प्याह ॥ **सर्वंचैतदिति** ॥ चमसवदविशेषादितिसूत्रोक्तंहेतुमाह ॥ **दृष्टाहीति** ॥ ज्ञेयत्वावचनादितिसूत्रोक्तपूर्वपक्षसिद्धांतानुक्तेर्न्यूनत्वंपरिहरति ॥ **इमौचेति** ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० शरीरंपुरुषतंत्रमित्यादिकांविवृण्वंस्तदुक्तेःफलमाह ॥ ब्रह्मणइति ॥ टीकोक्तमर्थांतरंसूत्रशेषस्याह ॥ दर्शयतिचेति ॥ दर्शयतिशब्दच शब्दाभ्यामित्यर्थः । ''अव्यक्तमचलंशांत''मितिश्रौतः । ''अव्यक्तोक्षरउच्यत''इतिस्मार्तःप्रयोगः ॥ द्वितीयइति ॥ सूक्ष्मंतुतदर्हत्वा दित्यत्र सूक्ष्ममेवाव्यक्तशब्देनोच्यते । सूक्ष्मस्यैवाव्यक्तशब्दप्रवृत्तिनिमित्ताव्यक्तताऽर्हत्वात् । ब्रह्मणश्चमुख्यसूक्ष्मत्वादित्युक्तेरितिभावः ।

ब्रह्मणोऽव्यक्तादौविन्यस्तत्वेनाव्यक्तादेरपिब्रह्मसंबंधत्वाद्वाच्यतेतिदर्शयितुंविन्यस्तपदं । नचवाच्यंप्रधानादिसंबंधाद्ब्रह्म णोवाच्यतास्त्विति । तस्यब्रह्मशरीरतुल्यत्वेनतत्तंत्रत्वादितिदर्शयितुंशरीररूपपदं । शरीरस्यरूपमिवरूपंयस्येतिविग्रहः । कप्रत्ययेनमुख्यतोनेश्वरशरीरं । जडत्वादिनाकुत्सितत्वादित्युक्तं । दर्शयतिचशब्दाभ्यांतुब्रह्मग्रहणेहेतुत्वेनभाष्योक्तश्रौ तस्मार्तप्रयोगोक्तिः । द्वितीयेप्रयोगमात्रान्नमुख्यतेतिशंकानिरासायब्रह्मण्यव्यक्तादिप्रातिपदिकनिमित्तोक्तिः । तृतीयेपंच मीविभक्त्यादिनिमित्तोक्तिः । चतुर्थेभावरूपांतरंगनिमित्तरूपहेतूक्त्यनंतरमभावरूपबहिरंगज्ञेयत्वावचनरूपहेतूक्तिः । अ स्यचसूत्रस्य ''तमेवैकंजानथे''तिब्रह्मणएवमुमुक्षुज्ञेयत्ववचनादन्यस्यचतदभाववचनान्मोक्षफलकानांवेदानांब्रह्मपरत्वसिद्धेः

प्र० प्रयोगोक्तौतस्यमुख्यतासमर्थनस्यतदानंतर्यादितिभावः ॥ तृतीयइति ॥ तदधीनत्वादर्थवदित्यत्र । अव्यक्तादितिपंचम्याद्युक्तावरत्वादे र्विष्णावभावेप्यन्यगतस्यतस्यतदधीनत्वादव्यक्तादित्यादिशब्दजातंतस्मिन्नेवार्थवदित्युक्तेरितिभावः । तथाचप्रातिपदिकस्यतद्विभक्तेश्चपौर्वाप र्यादस्यतृतीयतेतिभावः । चतुर्थे ज्ञेयत्वावचनाच्चेत्यत्र । अस्पष्टत्वात्तदर्थंविवेचयति ॥ अस्यचेति ॥ मुमुक्ष्विति ॥ ''अमृतस्यैषसेतु''

SGDF Sri Gargeshwari Digital Foundation

प्र० रितिवाक्यशेषादितिभावः । ननु "पुरुषःपर" इत्युक्तपुरुषाधीनतयाप्रधानादिपरत्वेपिमोक्षफलतोपपद्यतइत्यतआह ॥ **प्रतिवाक्यमिति** ॥ **हेत्विति** ॥ प्रधानादेस्तत्तारतम्यस्यचामुख्यतोऽन्यपरत्वोपगमेनसिद्धेरितिभावः । अत्रोत्तरत्रचक्रमस्स्पष्टः । पंचमे वदतीतिचेन्नप्राज्ञोहीत्यत्र ॥ **अन्यथासिद्धीति** ॥ सर्वस्मात्परस्यविष्णोर्महत्तत्वात्परत्वस्यप्रासादवासिन्यायेनसंभवाद्विष्णुनिष्ठत्वोक्तिरित्यर्थः । षष्ठे प्रकरणा

प्रतिवाक्यंचतत्परत्वस्य "आदावंतेचमध्येचविष्णुःसर्वत्रगीयत" इत्यादिवचनसिद्धत्वात्स्वतः प्राप्तमुख्यवृत्तित्यागेचहेत्वभावाद्ब्रह्मैवाव्यक्तादिशब्दमुख्यार्थइत्यर्थः । पंचमे चतुर्थोक्तज्ञेयत्वावचनमसिद्धं । "निचाय्यतंमृत्युमुखात्प्रमुच्यत" इत्यत्रमहत्परत्वेनलिंगेनप्रधानस्योक्तेरितिशंकायांलिंगस्यान्यथासिद्ध्युक्तिः । षष्ठेनिचाय्यवाक्येप्रधानोक्तौबाधकोक्तिः । सप्तमेऽस्यामुपनिषद्येवमुमुक्षुज्ञेयत्वेनप्रधानोक्तौबाधकोक्तिः । तत्रचत्रयाणांमध्येप्रधानमेकमस्त्वितिशंकांनिरसितुंपितृसौमनस्याग्निब्रह्मरूपश्रुत्युक्तप्रकारोत्त्यर्थंसूत्रएवंशब्दः । प्रश्नस्यप्राथम्येपिप्रतिवचनस्थनिचाय्यवाक्यस्यप्रधानपरतायाःशंकितत्वात्तन्निरासायप्रतिवचनस्यादौनिर्देशः ।

प्र० दित्यत्र। "सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपद" मित्येतत्प्रकरणोक्तार्थोपासकस्यविष्णुपदप्राप्त्युक्त्याऽस्यप्रकरणस्यवैष्णवत्वावगमेनतद्विरोधान्ननिचाय्यवाक्येप्रधानस्यग्रहणमितिबाधकोक्तिरित्यर्थः । सप्तमेत्रयाणामेवचैवमुपन्यासःप्रश्नश्चेत्यत्र ॥ **अग्नीति** ॥ स्वर्ग्याग्नीत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० निचाय्यवाक्येऽन्यपरत्वमप्याशंक्याह ॥ नन्विति ॥ पर्यवसानवदिति ॥ तद्वाक्योक्ततारतम्यस्य "पुरुषःपर" इत्युक्तसर्वोत्तमेतात्प र्यादितिभावः । अष्टमे महद्वच्चेत्यत्र ॥ महच्छब्देति ॥ महत्त्वरूपप्रवृत्तिनिमित्तातिशयेन "महांतंविभुमात्मान"मित्यत्रयथामहच्छब्दो विष्णौमुख्यस्तथेहापीतिमहच्छब्दद्दृष्टांतोक्तिरित्यर्थः । नवमे चमसवदविशेषादित्यत्र । यथाचमसशब्दोयज्ञपात्रेप्रसिद्धोपि "अर्वाग्बिलश्च

ननु प्रश्नप्रतिवचनयोस्त्रयविषयत्वेपियथा "महतःपरमव्यक्त"मितिवाक्यममुख्यवृत्त्याप्रधानपरं तथा निचाय्यवाक्यमप्यस्तु । तावतैवप्रधानस्यमहतःपरत्ववन्मोक्षार्थंज्ञेयत्वंचसेत्स्यतीतिचेन्न । अव्यक्तमिति वाक्यस्यप्रधानपरत्वेपिब्रह्मणिपर्यवसानवन्निचाय्यवाक्यस्यतदभावात् । तत्प्रश्नोत्तरेपिहितदर्थमन्योक्तिर्यु क्तानतुस्वातंत्र्येण । एवंचतुर्थोक्तस्वपक्षसाधकेत्रिभिःस्थापितेऽष्टमेप्रयोगप्राचुर्याभावरूपस्वपक्षबाधको द्धारायतत्प्राचुर्याभावेपिप्रवृत्तिनिमित्तातिशयेनमुख्यत्वेमहच्छब्दद्दृष्टांतोक्तिः । नवमेमहच्छब्दस्यविष्णौमु ख्यत्वमद्याप्यसिद्धमितिमन्वानंप्रत्यनुशासनरूपश्रुतिसद्भावेनमुख्यत्वेचमसशब्दद्दृष्टांतोक्तिरिति । यत्तूक्त

प्र० मसऊर्ध्वबुध्न" इतिश्रुतिबलेनशिरोवाचकः तथेहाप्यव्यक्तादिशब्दानांप्रधानादौप्रसिद्धानामपि "नामानिसर्वाणी"तिश्रुतिबलेनविष्णुवाचि त्वंनिश्चीयते । नामानीतिश्रुतेरर्वाग्बिलइतिश्रुतेरिवानुशासनरूपत्वाविशेषादित्युक्तेरितिभावः । यदत्रकेनचिदुक्तंपाराशर्यविजये । आद्ये ॥ ७६७ ॥
दर्शयतीत्येवसामंजस्येपूर्वखंडोव्यर्थः । भगवद्वाचकत्वसमर्थनादेवप्रकृतौप्रयोगस्यानेकशक्तिकल्पनागौरवभयेनलाक्षणिकतायाज्ञातुंशक्य

प्र० त्वात् । नचसंबंधबोधनार्थःपूर्वखंडः । ब्रह्मप्रपंचसंबंधस्यसुप्रसिद्धत्वात् । शरीररूपकविन्यस्तेत्यस्यशरीररूपकतयाशरीरसदृशतयाविन्यस्त स्यगृहीतेरित्यर्थप्रतीत्याशरीरेमुख्यस्यशरीरशब्दस्यब्रह्मणिगौणत्वेनिमित्तोक्तिपरत्वस्यैवप्राप्तेश्च । कप्रत्ययत्वेचतस्यवैयर्थ्यात् । शरीरस्यकुत्सि तत्वोक्त्याहरेरशरीरत्वोक्त्यर्थत्वेचप्रकृतानुपयोगः । शरीरस्यकुत्सितत्वेनतत्रविन्यस्तत्वोक्तिरयुक्ता । वस्तुनःकुत्सितत्वेतत्रानवस्थानस्यैवप्र योजकत्वेनविन्यस्तेत्यवस्थानोक्त्याशरीरस्याकुत्सितत्वस्यैवप्राप्तेः । अत्र "जीवाएवतुदुःखिन" इत्यादेरुदाहरणत्वेज्ञापकाभावाच्च । आनुमा निकशब्देनाव्यक्तशब्दस्यैवतथात्वावगमात् । द्वितीयसूत्रेचाव्यक्तादिशब्दप्रातिपदिकप्रवृत्तिनिमित्तस्यविष्णुनिष्ठतयोपपादनेतेनैवविष्णौमु ख्यत्वसिद्ध्याऽऽद्यसूत्रेदर्शयतिचेत्युक्तिर्व्यर्था । तृतीयसूत्रेप्रथमांतषष्ठ्यंतयोरध्याहारापातः । वेतनदानादिनाऽध्यापकप्रवर्तकेऽधीतवेदइति प्रयोगापत्त्यागौरवेणचतदधीनतायाश्शब्दप्रवृत्तावनिमित्तत्वेनतदाश्रयत्वस्यैवनिमित्तत्वाच्च । "यदधीनोगुणोयस्यतद्गुणी"तिस्मृतिरपि तद्गुणी तदुपसर्जनकः तच्छरीरकइत्येवंपरतयोपपन्ना । त्वदभिमतार्थपरत्वेपितदधीनत्वरूपसंबंधात्तद्गुणबोधकशब्दप्रयोगइत्यमुख्यवृत्त्युक्तिपरत्वेना प्युपपन्ना । "नामानिसर्वाणी"तिश्रुतिरपिप्रकारवाचिशब्दानांप्रकारिपर्यंतत्वेनोपपन्ना । संबंधयतीत्यादिश्रुतिरपिसंबंधसामान्येमतुबित्याश येतिनबद्धादिशब्दवाच्यत्वसिद्धिः । चतुर्थंचायुक्तं । ज्ञेयत्वस्यप्रधानपरत्वाबाधकत्वात् । प्रकरणमपिपुरुषशब्दार्थस्यविष्णुत्वमात्रेणोपपन्न मितिनाव्यक्तस्यविष्णुत्वसाधकं । अक्षादिनानार्थशब्दानांलोकसिद्धत्वेनेहाव्यक्तादिशब्दानांहरावन्यत्रचप्रयोगेदृष्टांतनैरपेक्ष्येणांतिमसूत्रद्वय वैयर्थ्यात् । अंतेश्रुतेरित्यध्याहारदोषश्चेति । तदेतत्सर्वंस्वमतोन्मूलनावलोकनिमित्तकाग्रहमात्रविजृंभितमितितुच्छं । तथाहि । ब्रह्मणिमु ख्यानांशब्दानामन्यत्रप्रयोगोहि "समाकर्षा"दितिवक्ष्यमाणदिशाकिंचिन्न्यूनमुख्यवृत्त्यावाच्यः । सचायुक्तः । परममुख्यवृत्त्याविष्णुवाचका

SGDF
Sri Gargeshwari Digital Foundation

प्र० नांशब्दानांकिंचिन्न्यूनमुख्यवृत्त्याप्यन्यत्रप्रयोगेऽव्यवस्थास्यात् निमित्ताभावादितिशंकायांतत्तच्छब्दपरममुख्यार्थेश्वरसंबंधस्यनिमित्तत्वो
क्त्यर्थत्वाच्छरीररूपकेत्याद्यंशस्य । अतएवोक्तंटीकायां "समाकर्षादितिवक्ष्यमाणन्यायस्यात्राभिमतत्वेनलक्षणानाश्रयणा" दितीति । उक्तंचग्रं
थकृतापि "अव्यक्तादेरपिब्रह्मसंबद्धत्वाद्वाच्यतेती"ति । तत्रप्रतिपदसार्थक्यस्याद्यसूत्रएवस्पष्टत्वाच्चत्वयापिसर्वहेयप्रत्यनीकस्यापिब्रह्मणोविश्व
शरीरकत्वस्यविश्वस्मिन्हेयत्वस्यस्वीकारेणकुत्सितत्वस्यभोगायतनत्वरूपमुख्यशरीरत्वाभावमात्रोपपादकत्वेनतत्रानवस्थानाप्रयोजकतयाविन्य
स्तेत्युक्त्यविरोधात् । अशरीरःप्रज्ञात्मेत्यादिश्रुत्यविरोधायस्वोक्तेरमुख्यशरीरत्वाभिप्रायकत्वस्यावश्यंवाच्यत्वेनप्रकृतोपयोगसंभवाच्च । सूत्र
स्यविश्वतोमुखत्वेन "जीवाएव"त्वित्यादेस्तुल्यन्यायविषयतयोपलक्षणावश्यंभावेनतुल्यन्यायत्वस्यैवतदुदाहरणतायांनियामकत्वाच्च । द्विती
येनिमित्तोक्तेःप्रयोगमूलत्वेनाद्ये "दर्शयतिचे"त्यनेनभगवतिप्रयोगसिद्धौतदुपजीव्यप्रवृत्तेननिमित्तकथनेनमूलभूतप्रयोगोक्तेर्वैयर्थ्यचोदनस्या
युक्तत्वात् । अतएवप्रयोगमूलंव्याकरणमितिप्रसिद्धिः । धानकर्मत्वादिरूपधेन्वादिपदप्रवृत्तिहेतोर्महिष्यादौसत्त्वेपिधेन्वादिशब्दमुख्यार्थ
त्वाद्दष्ट्याप्रयोगप्रवृत्तिनिमित्ताभ्यामेवमुख्यत्वस्यवाच्यत्वाच्च । प्रधानादौरूढाव्यक्तादिशब्दस्यकेवलद्वितीयसूत्रोक्तयोगमात्रेणापहारायोगेन
श्रौतस्मार्तप्रयोगस्यावश्यमनुसर्तव्यत्वाच्च । तृतीयेऽध्याहारस्यत्वन्मतेप्यग्रेवक्तव्यत्वात् । सौत्रत्वेनतत्रयावदपेक्षितपूर्तेरदोषत्वाच्च । उक्तंच
महाभाष्येपस्पशाग्रंथे "उदाहरणंप्रत्युदाहरणंवाक्याध्याहारइत्येतत्समुदितंव्याख्यान"मिति । स्वातंत्र्यस्यशब्दवृत्तौनिमित्तत्वस्याव्यभिचा
रस्यचाकरएवव्युत्पादितत्वाच्च । स्मृतौतद्गुणकइत्येवपूर्त्यामतुपोव्यर्थतापत्त्यादिनान्यार्थस्यायोगात् । श्रुतौविशिष्यकर्तृव्युत्पत्त्याऽऽङ्प्रयो
गेणमुख्यतोक्तेःस्फुटत्वात् । स्मृतौ "अभिधीयत"इत्यभिधोक्तेश्च । चंद्रिकोक्तदिशाप्रतिवाक्यंब्रह्मपरत्वस्यमुख्यतःप्रधानपरत्वबाधकत्वादव्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० क्तस्याब्रह्मत्वेनिचाय्यवाक्यस्यब्रह्मपरत्वानापत्तौप्रकरणस्यापिसाधकत्वाच्च । शब्दानांहरौमुख्यत्वेननानार्थत्वाभावाच्च । विप्रतिपन्नेदृष्टांतोक्तेरावश्यकत्वाच्चेतियत्किंचिदेतत् । एवमन्यस्यापितदीयक्षुद्रोपद्रवस्यनिरासःसहृदयंमूलग्रंथमभिमृशतांनदुष्करइत्युपरम्यते ॥ उभाभ्यामिति ॥ तत्रान्येषांमतमेवं । "महतःपरमव्यक्तमव्यक्तात्पुरुषःपर" इतिवाक्योक्तमव्यक्तंप्रधानमुतशरीरमितिविशये सांख्यस्मृतावव्यक्तशब्दस्यप्रधानेरूढत्वान्नव्यक्तमव्यक्तमितिरूपादिहीनेतस्मिन्नेवावयवव्युत्पत्तिसंभवाच्चेदमव्यक्तंप्रधानमेवेतीक्षत्यधिकरणोक्तंप्रधानस्याशब्दत्वमयुक्तमितिप्राप्ते नेदमव्यक्तंप्रधानं किंतुशरीरमेव । अव्यक्तशब्दस्यालौकिकेप्रधानेलौकिकप्रसिद्ध्यभावात्सांख्यप्रसिद्धेश्चपौरुषेयतयागु

मुभाभ्यां ईक्षत्यधिकरणोक्तंप्रधानस्याशाब्दत्वमयुक्तं । महतः
परमव्यक्तमितिवाक्येप्रधानोक्तेरितिप्राप्तेतन्निरासेनेहसिद्धांतइति ।

प्र० णवृद्ध्यादिप्रसिद्ध्यादिवद्वेदार्थानिर्णायकत्वाद्योगस्यचशरीरेपिसंभवात्प्रकरणपरिशेषाभ्यांचशरीरस्यैवग्राह्यत्वाच्चेतिसिद्धांतइति । प्रकरणपरिशेषौतद्भाष्यएवव्यक्तौ । केषांचित्तु प्राग्वत्संदेहे इदमव्यक्तंसांख्यसिद्धंप्रधानमेव । सांख्यतंत्रप्रत्यभिज्ञानात् । महदव्यक्तपुरुषाःसांख्यतंत्रेपरापरभावेनयथाप्रसिद्धास्तथैवश्रुतौप्रत्यभिज्ञानात् । "पुरुषान्नपरंकिंचि" दितिपंचविंशकपुरुषातिरिक्ततत्वनिषेधाच्चेतिप्राप्ते शरीरमेवाव्यक्तं । पूर्वत्र "आत्मानंरथिनंविद्धिशरीरंरथमेवचे" त्यादिनोपासनानिर्वृत्तये वश्येंद्रियत्वापादनायात्मशरीरबुद्धिमनइंद्रियविषयाः रथरथिसारथिप्रग्रहहयगोचरत्वेनरूपिताः । तएवेह "इंद्रियेभ्यःपराह्यर्था" इतिप्रत्यभिज्ञायंते । श्रौतप्रत्यभिज्ञानंतुप्रत्यासन्नत्वात्स्मार्तप्रत्यभिज्ञानादपिप्रबलमितिरथत्वेनरूपितंशरीरमेवेहाव्यक्तपरिणामित्वादव्यक्तपदेनगृह्यते । "अव्यक्तात्पुरुषःपर" इत्युक्तःपुरुषोनपंचविंशकोजीवः ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० किंतुप्राप्यः परमात्मैवेहवशीकार्यकाष्ठात्वेनोक्तइतिसिद्धांतइति । तत्रसिद्धांतेकिंप्रधानस्यशब्दप्रतिपाद्यत्वमेवनिरस्यतेऽथकारणत्वेनेतिहृदिविकल्प्य "नशब्दवाच्यतैवात्रप्रधानस्यनिषिध्यत" इत्यनुव्याख्यानसुधयोरुक्तदोषेणाद्यंनिराह ॥ **तत्रेति** ॥ **त्वन्मतइति** ॥ उभयमतेपीत्यर्थः । "सर्ववेदेतिहासेषुपुराणेषुचसंग्रहा" दित्यनुव्याख्यानसुधयोरुक्तमाह ॥ **प्रधानादीति** ॥ **वक्ष्यमाणत्वेनेति** ॥ अत्रैवाग्रइतिभावः । "नशब्दवाच्यतैवात्रप्रधानस्यनिषिध्यते । सर्ववेदेतिहासेष्वि" तिश्लोकेऽत्रेत्यनेनबुद्धिस्थमीक्षत्यधिकरणमुच्यतइत्यर्थांतरमभिप्रेत्येक्षत्यधिकरणोक्तमित्येतदपिनिराह ॥ **ईक्षतीति** ॥ **निष्फलत्वेति** ॥ उक्तरीत्येतिभावः । कारणत्वेनशब्दवाच्यतानैवात्रनिषिध्यतइत्यर्थांतरमभिप्रेत्यद्वितीयंनिराह ॥ **नापीति** ॥ ननुभामत्यां "नह्येतेप्रधानकारणत्वंजगतआहुः । अपितुप्रधानसद्भावमात्रं । नचतत्सद्भावमात्रेणजन्माद्यस्ययतइत्युक्तब्रह्मलक्षणस्यकिंचिद्धीयत" इतिकारणत्वाभावमेवाशंक्य "महतःपरमव्यक्तमित्यत्रहिपरशब्दोविप्रकृष्टपूर्वकालतामाह । तथाचकारणत्व" मितिसमाहितं । कल्पतरौच "अर्वाचीनमहत्तत्वापेक्षयापूर्वकालत्वमविप्रकृष्टमव्यक्तस्यपरशब्दआह । तथाचकारण

तत्रनतावत्प्रधानस्यशाब्दत्वमात्रमिहनिरस्यं । त्वन्मतेसमन्वयसूत्रेसर्वसमन्वयस्याप्रतिज्ञातत्वेनप्रधानस्याव्यक्तादिश(ब्दमुख्यार्थ)ब्दार्थत्वेप्यविरोधेनतन्मात्रनिरसनस्यनिष्फलत्वात् । प्रधानादितत्वानांश्रुत्यादिसिद्धतायावक्ष्यमाणत्वेनाशक्यत्वाच्च । ईक्षतिसूत्रेपिनिष्फलत्वाशक्यत्वाभ्यांशाब्दत्वमात्राभावोक्त्ययोगाच्च । नापिकारणत्वेनशाब्दत्वंनिरस्यं । इहकारणत्वाभावात् । ॥ ७६९ ॥

गु० पौनरुक्त्यंपरिहरति ॥ **ज्योतिरिति** ॥ **श्रुत्यादिसिद्धतायावक्ष्यमाणत्वेनेति** ॥ मायांतुप्रकृतिंविंद्यात् देवात्मशक्तिंस्वगुणैर्निगूढां गौरनाद्यंतवती यस्या

प्र० त्वसिद्धिः । नियतप्राक्सत्वंहितदित्यर्थ" इत्युक्तं । अतएवसुधायां "कश्चिदाहे" त्यादिनैतदेवानूदितमितिभावेनशंकते ॥ **नचेति** ॥ स्यादेवंयदिपरशब्दादत्राव्यक्तस्यकालाविप्रकर्षधीः । नचैवमित्याह ॥ **इत्यादाविवेति** ॥ पुरुषस्याव्यक्ताजनकत्वेनतत्रश्रुतपरशब्दस्यकालाविप्रकर्षार्थत्वाभावेनोत्तमत्वार्थतयातत्प्रायपाठेनपूर्वत्रापितदर्थत्वस्यैवप्रतीतेरित्यर्थः । इत्यादावित्यादिपदेन "इंद्रियेभ्यःपराह्यर्था" इत्यादिपूर्ववाक्यपरिग्रहः । यदत्रोक्तंकल्पतरुपरिमळे "अत्रपरशब्दश्श्रैष्ठ्यवचनः । इंद्रियेभ्यःपराह्यर्थाइत्यादिपूर्ववाक्येषुश्रुतस्यतथात्वात् । सांख्यैरप्यव्यक्तात्पुरुषःपरइत्यत्रश्रुतस्यतथैवव्याख्येयत्वात् । प्रधानस्यकार्यत्वात् । इंद्रियेभ्यःपरंमनोमनसस्सत्वमुत्तमं । सत्वादधिमहानात्मामहतोव्यक्तमुत्तममितिमंत्रांतरेपरशब्दस्थानउत्तमशब्ददर्शना" दित्याशंक्य "सत्यमिहपूर्वपूर्वस्मादुत्तरोत्तरस्यश्रैष्ठ्यमुच्यमानं । यस्ययथासंभ

नच "महतःपर" मितिपरशब्देनतद्धानं । "अव्यक्तात्पुरुषःपर" इत्यादाविवतेनततउत्तमत्वस्यैवप्रतीतेः । तस्मान्नपूर्वपक्षोदयः ।

प्र० वतितस्यतथैवोपपादनीयं । अतस्स्मार्तक्रमप्रत्यभिज्ञानादिहमहदादिपदानांस्मार्तमहदादितत्वत्रयपरत्वस्थितौ महत्त्वात्प्रधानस्यश्रैष्ठ्यंकारणत्वेनैवभवतीतिपर्यवसितार्थकथनमिदं परशब्दःकारणत्वमाहेती" ति । तन्न । पूर्वोत्तरमंत्रांतराविरोधेनात्राप्युत्कर्षार्थत्वस्यमहत्तत्वापेक्षयाव्यास्याधिक्येनानादिनित्यत्वादिनावोपपत्त्याकारणत्वापर्यवसानात् । "परशब्दोऽविप्रकृष्टपूर्वकालतामाहे" तिभामत्याद्युक्तिविरोधाच्च । ततउत्तमत्वस्यैवप्रतीतेरित्युपलक्षणं । "किंपरशब्दोक्तकालविप्रकर्षएवकारणत्वमुततेनानुमेयमथवासंभाव्यं । नप्रथमद्वितीयौ । कार्यकारणभावविकलयोरपिपरापरभावदर्शनात् । नतृतीयः । संभावनामात्रस्येयंतंसूत्रसंदर्भप्रतियोजकत्वायोगा" दितिसुधोक्तंदूषणांतरंचध्येयं । ननु "महतःपर" मितिवाक्येकारणत्वाप्रतीतावपि "अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींसरूपा" मित्यत्रतत्प्रतीतिरस्तीतिचेत्तर्ह्यव्य

SGDF Sri Gurgaonkar Digital Foundation

प्र० क्तशब्देतद्विचारोनस्यात् । अजावाक्यस्याप्युपलक्षणंतदितिचेदस्त्वेवंकथंचित्पूर्वपक्षोदयइत्यभ्युपेत्य "तत्किंब्रह्मपरंकरिष्यते । तेजोबन्नविषयंहितद्व्याख्यातंभवता । तथाचलौकिकमाभाणकंनातिवर्तते व्याघ्रेणोरणेनीतेकाहानिर्वृकेणनीतेकोलाभइतीतिसुधोक्तंविवृण्वन्सिद्धांतंनिराह ॥ किंचेति ॥ अव्यक्तेत्युपलक्षणं । अव्यक्ताजादिशब्दार्थइत्यर्थः ॥ अनंगीकृतेरिति ॥ "शरीरंह्यत्ररथरूपकविन्यस्तमव्यक्तशब्देनपरिगृह्यते । प्रकरणात् । परिशेषा"दितित्वद्भाष्योक्तेरितिभावः । महतःपरमित्यत्रकारणत्वविवक्षास्तिनवेतिविकल्पंहृदिकृत्वाऽऽद्यआह

किंच अव्यक्तशब्दार्थःकिंब्रह्मेतिसिद्धांत्यतेकिंवाविद्यादिकमिति । नाद्यः । अनंगीकृतेः । नांत्यः । ब्रह्मणिसमन्वयानुक्त्याध्यायासंगतेः । प्रधानेब्रह्मलक्षणस्यातिव्याप्तिपरिहारेप्यविद्यादौतदपरिहाराच्च । कारणत्वंप्रधानस्यनिरस्यस्थापितंयदि । अविद्यादेस्तदाकोनुलाभोस्तिब्रह्मवादिनः ॥ १ ॥ वृकेणापहृतंमेषमादायातिप्रयत्नतः । सचेद्व्याघ्रायदीयेतकोलाभस्तेनसिध्यति ॥ २ ॥ ननुपरशब्दस्योत्कर्षार्थत्वादिहकारणत्वधीरेवनेतिसिद्धांत्यते । एवंचाविद्यादेरव्यक्तशब्दार्थत्वेपिनदोषइतिचेत्तर्हिप्रधानस्यतदर्थत्वेपिनदोषइतिनतन्निरासःफलं ।

प्र० ॥ प्रधानइति ॥ द्वितीयंशंकते ॥ नन्विति ॥ "तेजोबन्नात्मकंवापियद्युपादानमिष्यते । अनाद्येवापराधःकःप्रधानमितिचोदित"इत्यनुभाष्यसुधयोरुक्तंविवृण्वन्विचारवैयर्थ्येनदूषयति ॥ तर्हीत्यादिना ॥ ननु नप्रधानंस्वरूपेणनिषिध्यते । किंत्वीश्वरानधीनतया । तथाचस्वतंत्रंप्रधानमव्यक्तशब्दमितिप्राप्ते ईश्वरशरीरत्वेनतदधीनमव्यक्तशब्दमितिसिद्धांत्यते । परभाष्यद्वयेपितदधीनत्वसूत्रेतथैवोक्तेरितिचे

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्तर्ह्येवंविधविचारस्येंद्रियादिष्वपिसंभवेनविशिष्याऽव्यक्तवाक्यएवतद्विचारोनिष्फलस्स्यादित्याह ॥ **अन्यथेति** ॥ स्वतंत्रप्रधानपरत्वनिरासे नसाफल्यइत्यर्थः । आकाशादिसाम्यंव्यनक्ति ॥ **जगदिति** ॥ एवंचतत्रयथाऽऽकाशादिस्वरूपांगीकारेणनविचारस्तथात्रापिप्रधानस्वरूपां गीकारादन्यस्योभयत्राप्यनंगीकारादिदमपिवाक्यंनविचार्यमित्येतदपिनारभ्यमितिभावः । "सर्ववेदेतिहासेषुपुराणेषुचसंग्रहा"दित्यनुव्या ख्यानंहृदिकृत्वाह ॥ **मायामिति** ॥ "मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमि"तिश्वेताश्वतरश्रुतिः ॥ **दैवेति** ॥ "तेध्यानयोगानुगताअपश्य

अन्यथा "इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमन"इत्यादावर्थादिशब्दानांसांख्याभिमतेश्वरानधीनशब्दस्पर्शाद्यर्थत्वं, "आकाशाद्वायु"रित्यादावाकाशादिशब्दानांचतदभिमतेश्वरानधीनाकाशाद्यर्थत्वंचनिरस्यंस्यात् । जगदुपादानस्य गुणत्रयात्मकस्यानादिभावस्याव्यक्तशब्दार्थस्य "मायांतुप्रकृतिंविद्यात् दैवात्मशक्तिंस्वगुणैर्निगूढां गौरनाद्यंतवती यस्याव्यक्तंशरीर"मित्यादिश्रुतिभिः, "सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः यत्तत्त्रिगुणमव्यक्त"मित्यादिस्मृतिभि श्चत्वयापिस्वीकृतत्वात् । नाममात्रेचविवादायोगात् । ईशानधीनत्वसत्यत्वादेश्चाकाशादेरप्यभावात् । यच्चोक्तं

प्र० न्दैवे"तिश्वेताश्वतरश्रुतिः ॥ **गौरिति** ॥ इयमग्रेऽव्यक्ता । "यस्याऽव्यक्त"मितिवाजसनेयेंतर्यामिब्राह्मणे । "सत्वंरजस्तम"इतिगीतायांचतुर्द शेध्याये । "यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मक"मित्यनुव्याख्यानोक्तंभागवतवाक्यं । अविद्यादिरेवमायाऽव्यक्तादिशब्दैरुच्यतइत्यतआह ॥ **नामेति** ॥ **आकाशादेरप्यभावादिति** ॥ तस्यतद्भावेह्यव्यक्तेनभावेनतदुक्त्यर्थमिदमर्थवत्स्यादितिभावः । एवंमतद्वयेऽधिकरणशरीरं निरस्यसूत्रार्थानपिदूषयति ॥ **यच्चेत्यादिना** ॥ उभाभ्यामित्यस्ति । आनुमानिकमपि सत्वरजस्तमोगुणात्मकजगल्लक्षणकार्यलिंगकानु

SGDF
Sri Gargeshwari Digital Foundation

प्र० मानसिद्धंत्रिगुणात्मकंप्रधानमपि एकेषां काठकानांशाखायांमहतःपरमव्यक्तमित्याम्नायते । अतईक्षत्यधिकरणोक्तंप्रधानस्याशब्दत्वमयुक्त मितिचेन्न । पूर्ववाक्येशरीरंरथमेवचेतियच्छरीरंरथरूपकतयाविन्यस्तंतस्यैवेहाव्यक्तशब्देनगृहीतेर्दर्शयतिच शरीरादीनांरथादिरूपकवि न्यासंशरीरंरथमेवचेत्यादिवाक्यमित्यन्येषामाद्यसूत्रस्यार्थः । केषांचित्तु सांख्यानुमानकल्पितंप्रधानंमहतःपरमव्यक्तमित्याम्नायतइतिचेन्न । पूर्वत्रात्मादिषुरथिरथादिरूपकविन्यस्तेषुरथरूपकविन्यस्तशरीरस्याव्यक्तशब्देनगृहीतेः । दर्शयतिचेममर्थमिंद्रियादीनांनियमनप्रकारंदर्शय

पूर्ववाक्येरथरूपकविन्यस्तशरीरस्यैवेहाव्यक्तशब्देनगृहीतिः । तथाहि । शरीरादीनारथादिरूपकक्लृप्तिं दर्शयति शरीरंरथमेवेत्यादिपूर्ववाक्यमितिप्रथमसूत्रस्थपरिहारभागस्यार्थइति । तन्न । शरीरगृही तेरित्येतावतैवपूर्णत्वेनरूपकविन्यस्तपदवैयर्थ्यात् । रूपकविन्यस्तपदस्यशरीरविशेषणत्वेनपूर्वनिपा तप्रसंगाच्च । रूपकविन्यस्तपदेनैवशरीरस्यरथरूपविन्यासस्योक्तत्वेनतथाहिदर्शयतीत्यस्यवैयर्थ्याच्च ।

प्र० न्यच्छेद्वाङ्मनसीइत्यादिवाक्यशेषइति । तत्रदूष्यभागार्थमनूद्यनिराह ॥ पूर्वेति ॥ सुधोक्तमपिदोषमाह ॥ रूपकविन्यस्तपदस्येति ॥ "विशेषणंविशेष्येणबहुल"मितिसूत्रेविशेषणशब्दस्यप्रथमांतनिर्दिष्टतया "प्रथमानिर्दिष्टंसमासउपसर्जन"मितिसूत्रेणोपसर्जनसंज्ञायां "उप सर्जनंपूर्व"मित्युपसर्जनस्यपूर्वनिपातविधानादितिभावः । नन्वेतदेवाशंक्यसमाहितंश्रुतप्रकाशे अस्मिन्वाक्येरूपकविन्यस्तंवस्तुप्राधान्येन विवक्षितं । विशेषणापेक्षयाविशेष्यंप्रधानं । रूपकविन्यस्तपदंविशेष्यसमर्पकं । कीदृशंतदित्यपेक्षायांशरीराख्यंरूपकविन्यस्तमितिशरीर ॥ ७७१ ॥

प्र० शब्देनतद्विशेष्यते । अतोनदोषइतिचेन्न । गत्यंतरेसतिक्लेशायोगादितिभावः । "सूक्ष्मंतुतदर्हत्वा"दितिसूत्रार्थंनिराह ॥ यच्चेति ॥ यद्य पीदंशरीरंस्थूलत्वान्नाव्यक्तं । तथाप्यस्ययन्मूलमुपादानकारणंतेजोबन्नलक्षणंभूतसूक्ष्मं तत्तावदव्यक्तं । अनादेस्तस्यसूक्ष्मस्याव्यक्ततार्हत्वात् । कार्यकारणशब्दानांच "गोभिश्श्रिणीतमत्सर"मित्यादौसांकर्यदर्शनात् । कारणस्याव्यक्तशब्दार्थतयाकार्यंशरीरमप्यमुख्यवृत्त्याऽव्यक्तमु च्यतइत्यर्थः । ननुप्रकृतपरित्यागभयाच्छरीरंग्राह्यमित्यतआह ॥ शरीरमिति ॥ महत्परत्वलिंगेनमुख्यार्थत्वलाभेनचप्रकरणबाधोपपत्ते रितिभावः । ननूभयानुगुण्यादविद्यैवाव्यक्तशब्दार्थोस्तु । तदधीनसूत्रे "अविद्यात्मिकाहिसाबीजशक्तिरव्यक्तशब्दनिर्देश्ये"तिपरभाष्योक्ते रित्याशंक्यनिराह ॥ नन्विति ॥ प्रधानेति ॥ तस्यमहत्परत्वमुख्याव्यक्तत्वयोस्संभवादितिभावः । तदुक्तमनुव्याख्याने "अपराधःक:

यच्चोक्तंशरीरस्यस्थूलत्वादव्यक्तशब्दार्थत्वंनयुक्तमितिनशंक्यं । शरीरकारणस्यानभिव्यक्तनामरूपस्यप्रागव स्थारूपस्यबीजस्यसूक्ष्मत्वेनाव्यक्तशब्दार्हतयाशरीरस्याप्यमुख्यवृत्त्याऽव्यक्तशब्दार्थत्वादितिद्वितीयार्थइति तन्न । यस्यकारणस्यसूक्ष्मत्वंतस्यैवमुख्याव्यक्तस्यमहतःपरमित्यत्रग्रहणेसंभवति "शरीरंरथमेवचे"तिपूर्वत्र प्रकृतत्वेपि महत्परत्वरहितस्यामुख्याव्यक्तस्यशरीरस्यग्रहणायोगात् । ननुतर्हिभाष्यानुरोधादविद्यैवाव्यक्त शब्दस्यार्थइतिचेन्न । सौत्रशरीरशब्दविरोधात् । प्रकृतशरीरत्यागेनाप्रकृताविद्यापरत्वेसांख्याभिमतप्रधा नपरत्वानिवारणाच्च । किंचाविद्यायाःसदासाक्षिसिद्धत्वेनव्यक्तत्वान्नाव्यक्तत्वं । नवातत्प्रयोजकंसूक्ष्मत्वं ।

गु० व्यक्तंशरीरमित्यादिश्रुत्यासिद्धतायावक्ष्यमाणत्वेनेत्यर्थः ॥ नवातत्प्रयोजकंसूक्ष्मत्वमिति ॥ अव्यक्तत्वप्रयोजकंसूक्ष्मत्वमप्यविद्यायानसंभवति । अपरिच्छि

SGDF Sri Gargeshwari Digital Foundation

प्र० प्रधानमितिचोदित"इति । तत्प्रयोजकं अव्यक्तताप्रयोजकं । तदधीनत्वसूत्रार्थप्रत्याचष्टे ॥ यच्चेति ॥ मन्मतेप्राक्प्रकृतत्वान्नदोषइतिभावेनाह ॥ त्वन्मतइति ॥ यदत्रोक्तं शास्त्रमात्रेब्रह्मणोबुद्धिस्थत्वादाद्यसूत्रेऽपिपदेनसमुच्चेतव्यतयाप्रकृतत्वात्तच्छब्दस्यब्रह्मनामत्वाद्वातच्छब्देनपरमपुरुषपरामर्शसंभवइति तन्न । ब्रह्मणोबुद्धिस्थत्वे "अर्भकौकस्त्वात्तद्व्यपदेशात् तद्दर्शना"दित्यादावपिब्रह्मपरामर्शापत्तेः । आद्य

यच्चोक्तं यदिबीजात्मकंप्रागवस्थारूपमव्याकृतमव्यक्तशब्दार्हंस्वीकृतंतर्हिसांख्यमतापत्तिः । जगतःप्रागवस्थायाएवसांख्यैःप्रधानत्वाभ्युपगमादितिनशंक्यं । अस्माभिःस्वीकृतायाःप्रागवस्थायाःपरमेश्वराधीनत्वेनस्वतंत्रप्रधानवादिसांख्यमतानापत्तेः । अर्थवच्चतद्बीजात्मकं । तेनविनेश्वरस्यस्रष्टृत्वासिद्धेरितितृतीयार्थइति तन्न । त्वन्मतेपूर्वस्मिन्सूत्रद्वयईश्वरस्याप्रकृतत्वेनतच्छब्दस्याप्रकृतपरत्वापातात् । तदधीनत्वादितिहेतोःश्रुतार्थवत्त्वरूपसाध्यत्यागेनसांख्यमतापत्तिर्नेत्यध्याहृतसाध्यान्वयायोगाच्च । "यस्याव्यक्तंशरीर"मित्यादिश्रुत्याप्रधानस्वातंत्र्यस्यैवनिराकर्तव्यतयातस्याव्यक्तशब्दार्थत्वनिरासायोगाच्च ।

प्र०सूत्रे "नकेवलंब्रह्माऽव्यक्तं । किंत्वानुमानिकमपीत्युक्तेरव्यक्तशब्दस्यार्थद्वयानभ्युपगमेनापिनाब्रह्मसमुच्चयायोगात् । यथायतोवाइमानीत्यादौब्रह्म तथाऽव्यक्तपदेनकारणतयाप्रधानमपीत्युक्तावपीहकारणत्वाप्रतीत्यातेनरूपेणापिब्रह्मसमुच्चयायोगात् । एवमपिप्राधान्येनमन्मतइवत्वन्मतेऽप्रकृतत्वात् । तच्छब्दस्यब्रह्मनामत्वेनतद्ग्रहेतु "तेनरक्तंरागात् । तद्व्यपदेशा"दित्यादावपितद्ग्रहप्रसंगादितिध्येयं । "ज्ञेयत्वावचना

SGDF
Sri Gargeshwari Digital Foundation

प्र० च्चे"तिसूत्रार्थंनिराह ॥ यच्चेति ॥ गुणेति ॥ सत्वादिगुणात्मकप्रकृतिजीवभेदज्ञानादित्यर्थः। "ज्ञेयंब्रह्मसनातन"मित्यादाविवज्ञेयंप्रधान मितिसाक्षादुक्तिर्नेति उतार्थादपितस्यात्रज्ञेयत्वोक्तिर्नेति अथपुरुषविविक्ततयाज्ञेयत्वोक्तिर्नेतीतिहृदिविकल्प्याद्यमप्रयोजकमितिवदन्द्वितीयम सिद्धमित्याह ॥ ज्ञेयमिति ॥ महत्परत्वरूपप्रधानधर्मोक्त्यैवतस्यज्ञेयत्वसिद्धेः । अन्यथाधूमोक्तेर्वह्नेर्ज्ञेयत्वाभावापातादितिभावः । तृती यमप्यसिद्धमित्याह ॥ अव्यक्तादिति ॥ पंचमीप्रथमाभ्यामित्यर्थः । किंच ज्ञेयत्वावचनयुक्त्याप्रधानापाकरणंस्वव्याहतं । ज्ञेयतयात्व दभ्युपगतायाअविद्यायाइहज्ञेयतयावचनाभावेनतस्याअप्यव्यक्तशब्दार्थत्वनिरासापातादित्याह ॥ अनृतेति ॥ अविद्यायाअप्यनृतत्वादि तिभावः । इहाव्यक्तशब्देनतदुक्तिरस्तीत्यतउक्तं त्वदभिप्रेतेति ॥ इदंचाद्वैतिमते । रामानुजमतेतुसकलहेयप्रत्यनीकतयाब्रह्मज्ञानार्थंप्र धानस्यज्ञेयत्वाभ्युपगमात् । त्वदभिप्रेतप्रधानस्वभावस्यभगवच्छरीरकत्वादेश्चेहावचनाच्चेतिध्येयं । मतद्वयेपि वदतीतिचेन्नप्राज्ञोहिप्रकरणा

यच्चोक्तंगुणपुरुषांतरज्ञानान्मोक्षइतिवदद्भिःसांख्यैःप्रधानस्यज्ञेयत्वाभ्युपगमादिहचाव्यक्तस्यज्ञेयत्वावच नान्नेदमव्यक्तंप्रधानमितिचतुर्थोर्थइतितन्न । ज्ञेयमित्यनुक्तावपि "महतःपरमव्यक्त"मितिज्ञापनेनैवज्ञे यत्वसिद्धेः । "अव्यक्तात्पुरुषःपर"इतिप्रकृतिपुरुषयोरंतरस्यज्ञापनाच्च । अनृतविविक्तत्वेनब्रह्मज्ञाना र्थत्वयाप्यविद्यायाज्ञेयत्वाभ्युपगमाच्च । त्वदभिप्रेताविद्यास्वभावस्यानिर्वाच्यत्वादेरपीहावचनाच्च ।

गु० न्नत्वाभ्युपगमादितिभावः ॥ गुणपुरुषांतरज्ञानादिति ॥ गुणास्सत्वादयः पुरुषश्च तयोरंतरं विवेकः तज्ज्ञानान्मोक्षः प्रकृतिपुरुषविवेकज्ञानान्मोक्षइतियावत् ॥ ज्ञेयत्वाभ्युपगमादिति ॥ तथाचात्रज्ञेयत्वावचनान्नेदमव्यक्तमविद्येतिभावः । ननुनेदमव्यक्तंप्रधानं त्रिगुणत्वादिप्रधानधर्मानुक्तेरित्यतआह ॥ त्वद

SGDF
Sri Gargeshwari Digital Foundation

प्र० दित्येकंसूत्रं । तदर्थमनूद्याद्वैतिमतेदोषमाह ॥ यच्चेति ॥ प्राज्ञशब्दस्यप्रज्ञावद्वाचकत्वेसंमतिमाह ॥ प्रज्ञेति ॥ प्रज्ञाशब्दान्मत्वर्थेणप्रत्यये "तद्धितेष्वचामादे"रित्याद्यचोवृद्धौ "यस्येतिचे"त्यकारलोपेप्राज्ञइतिरूपं । "प्रज्ञादिभ्यश्चे"तिस्वार्थिकाण्प्रत्ययांतत्वेतुलाघवात्प्रज्ञइत्येवोक्तिस्स्यात् । नतुप्राज्ञइतीतिभावः । परस्य अद्वैतिनः । "महतःपरंध्रुव"मितिश्रवणान्महतःपरत्वादिविशिष्टेत्युक्तं । सापेक्षत्वात्समासः । "त्रयाणामेवचे"तिसूत्रार्थमद्वैत्यभिमतंनिराह ॥ यच्चेति ॥ "सत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहितंश्रद्दधानायमह्य"मित्यग्निविषयःप्रश्नः । "येयंप्रेतेविचिकित्सामनुष्येअस्तीत्येकेनायमस्तीतिचैके । एतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवृतस्तृतीय"इतिजीवविषयः । "अन्यत्रधर्मादन्यत्राधर्मा"दितितुपरमात्मविषयोबोध्यः ॥ उपन्यासादिति ॥ "लोकादिमग्निंतमुवाचतस्मैयाइष्टकायावतीर्वायथावे"त्यग्निविषयः । "हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं । यथामरणंप्राप्यात्माभवतिगौतमे"तिजीवविषयः । "नजायतेम्रियतेवाविपश्चि"दित्यादिपरमात्म

यच्चोक्तं "निचाय्यतंमृत्युमुखात्प्रमुच्यत"इतिप्रधानस्यज्ञेयत्वंवदतीतिचेन्न । प्राज्ञोहिपरमात्मातत्रज्ञेयत्वेननिर्दिष्टः । प्रकरणादितिपंचमार्थइति तन्न । त्वन्मतेज्ञातृत्वादिरहितशुद्धतुरीयज्ञानस्यैवमोचकत्वेनसूत्रेप्रज्ञावद्वाचकप्राज्ञपदायोगात् । "प्रज्ञाश्रद्धार्चाभ्योण"इतिहिव्याकरणसूत्रं । श्रुतिरपिपरस्यप्रतिकूलैव । महतःपरत्वादिविशिष्टज्ञानस्यैवमोचकत्वोक्तेः।यच्चोक्तं त्रयाणामेवाग्निजीवेश्वराणामेवेहप्रकरणे "सत्वमग्नि"मिति "येयंप्रेत" इति "अन्यत्रधर्मा"दितिप्रश्नादुपन्यासाच्चप्रधानंनाव्यक्तशब्दार्थइतित्रयाणामित्यादिसूत्रार्थइति तन्न ।

गु० भिप्रेतेति ॥ ननुप्रज्ञाशब्दस्यप्रज्ञावद्वाचकत्वंकुतइत्यतोव्याकरणस्मृतेरित्याह ॥ प्रज्ञेति ॥ ननुप्रज्ञएवप्राज्ञइतिस्वार्थिकोऽण्प्रत्ययःकिंनस्यात् । तथाचनप्राज्ञ

प्र० विषयउपन्यासोध्येयः । अपृष्टस्योक्तिरेवायुक्तेतिप्रधानमव्यक्तशब्देननोच्यतइत्युच्यतेऽथप्राधान्येनोक्तिरयुक्तेति । आद्यआह ॥ त्रयाणामिति ॥ अंत्यात्वसिद्धेत्याह ॥ अनन्यार्थतयेति ॥ इंद्रियादेरर्थाद्युक्त्यर्थंकथनेपिप्रधानस्यकिमर्थमुक्तिरित्यतआह ॥ अव्यक्तादिति ॥ अन्यथेति ॥ अपृष्टस्यकथंचिदप्युक्त्ययोगइत्यर्थः । प्रश्नोपन्यासाभ्यांसिसाधयिषितमर्थंनिरस्यतयोरग्निजीवेश्वरपरत्ववर्णनंचायुक्तमित्याह ॥ किंचेति ॥ वृणीष्वेतियमेनोक्तोनचिकेताब्रूते "त्वत्प्रसृष्टंमाभिवदेत्प्रतीतएतत्त्रयाणांप्रथमंवरंवृणे । यथापुरस्ताद्भविताप्रतीतऔद्दालकि

त्रयाणामेवप्रश्नेपि "इंद्रियेभ्यःपराह्यर्था"इत्यादौत्रयातिरिक्तस्येंद्रियादेरिवप्रधानस्याप्युक्तिसंभवात् । अनन्यार्थतयोक्तिस्तुप्रधानेपिन । "अव्यक्तात्पुरुषःपर"इतिपुरुषोक्त्यर्थमेवतदुक्तेः । अन्यथाऽविद्यायाअपित्रितयातिरिक्तत्वादव्यक्तशब्देनोक्तिर्नस्यात् । किंचश्रुतौ "त्रीन्वरान्वृणीष्वे"ति "प्रथमंवरंवृण"इति "द्वितीयेनवृणेवरेणे"ति "वराणामेषवृतस्तृतीय"इतिचत्रिशब्देनप्रथमादिशब्दैश्चोक्तपितृसौमनस्याग्नीश्वराणांत्यागेनसौत्रस्यत्रिशब्दस्यान्यपरत्वमयुक्तं ।

प्र० रारुणिर्मत्प्रसृष्ट"इति । तथा "सत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहितंश्रद्दधानायमह्यं । स्वर्गलोकाअमृतत्वंभजंतेएतद्द्वितीयेनवृणेवरेणे"ति । तथा "येयंप्रेतेविचिकित्सामनुष्येऽस्तीत्येकेनायमस्तीतिचैके । एतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवृतस्तृतीय"इतिच । तथाचास्मद्दिशात्रितयपरत्वेसंभवत्यनेवंरूपाग्निजीवेश्वरपरत्वमयुक्तमित्यर्थः । ननु पितृसौमनस्यादेर्वरत्वेनप्रार्थनस्यैवश्रवणात्कथंप्रश्नतेतिचेन्न । "अविद्यातत्प्रार्थनंचप्रश्नइत्यभिधीयत"इतिभाष्यएवपरिहृतत्वात् । ननु तथापि "येयंप्रेत"इतितृतीयप्रश्नस्यमृतजीवास्तित्वविषयतयाकथमीश्वरवि

SGDF
Sri Gargeshwari Digital Foundation

tātparya- ॥ ७७४ ॥

प्र० षयत्वमित्यतःकाठकभाष्योक्तदिशापरमतखंडनपूर्वंतत्साधयति ॥ किंचेति ॥ रामानुजाभिमतमप्येतत्सूत्रार्थंनिराह ॥ केचित्त्विति ॥ उपायोपेयोपेतृशब्दैरुपासनोपास्योपासकाउच्यंते ॥ प्रसिद्धेति ॥ ज्योतिष्टोमस्वर्गादिरूपेत्यर्थः ॥ उक्तेति ॥ श्रुतौ "त्रीन्वरान्वृणीष्वे"

किंच "येयंप्रेतेविचिकित्से"तिप्रश्नस्यदेहातिरिक्तजीवविषयत्वमयुक्तं । नहिमृत्वायमलोकंगत्वायमात्पितृसौमनस्यरूपप्रथमवरग्रहणकालएव "उभेतीर्त्वाअशनायापिपासेशोकातिगोमोदतेस्वर्गलोक"इत्यादिश्रुतवतः, तथा "सत्वमग्निंस्वर्ग्यमध्येषिमृत्योप्रब्रूहित"मितिद्वितीयंवरंयाचितवतः, तथा "स्वर्ग्यमग्निंनचिकेतःप्रजानन् त्रिकर्मकृत्तरतिजन्ममृत्यू"इत्यादिकंचश्रुतवतः, तथा "इमारामाःसरथाःसतूर्या"इत्यादिनामृत्युनातैस्तैर्वस्तुभिर्विप्रलोभ्यमानस्यापितत्त्यागेन "नान्यंतस्मान्नचिकेतावृणीत"इत्यादिवदतोनचिकेतसस्तृतीयवरग्रहणकालेदेहातिरिक्तात्मनिसंदेहोस्ति। तस्मात् "येयंप्रेत"इतिप्रश्नोमुक्तनियामकभगवद्विषयः । विस्तृतंचैतत्काठकभाष्ये । केचित्तु "अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वदे"तिप्रश्नश्लोके धर्मशब्दस्यप्रसिद्धोपायपरत्वादधर्मशब्दस्यचप्रसिद्धोपेयपरत्वादस्मादित्यस्यचबुद्धिस्थोपेतृपरत्वादन्यत्रशब्देनचवैलक्षण्योक्तेःप्रसिद्धोपायोपेयोपेतृविलक्षणानामप्रसिद्धोपायादीनांत्रयाणांपृष्टत्वात्, "यमेवैषवृणुतेतेनलभ्य"इतिचभक्तिरूपस्योपायस्य "अणोरणीया"नित्यादिनोपेयस्यविष्णोः "नजायतेम्रियतेवाविपश्चि"दित्यादिनोपेतुर्जीवस्योपन्यासात्सौत्रंत्रयाणामितिपदमुपायादित्रयपरमित्याहुः । तन्न । उक्तदोषत्वात् । "प्रब्रूहितंश्रद्दधाना

गु० शब्दस्यप्रज्ञावद्वाचकत्वसिद्धिरितिचेत्तर्हिप्रकर्षेणजानातीतिप्रज्ञइतिप्रज्ञशब्देनैवप्रज्ञावत्त्वसिद्धेःस्वार्थोवैयर्थ्यापरपर्यायश्चेतीदमेवोदाहृतं ॥ उक्तदोषत्वादिति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यादिनोक्तदोषत्वादित्यर्थः ॥ "महद्वच्चे"तिसप्तमस्यार्थमनूद्यापास्यति ॥ यच्चेति ॥ तद्वदिति ॥ मुक्तिहेतुज्ञानविषयत्वस्य "महांतंविभुमात्मान"मित्यत्र "आत्मामहान्पर"इत्यत्रचात्मशब्दसामानाधिकरण्यस्यैवेहबाधकस्याभावादित्यर्थः । अत्रापिबाधकमाशंकते ॥ नन्विति ॥ त्वदिति ॥ तथाचाविद्यापरत्वंचनस्यादित्यर्थः । चमससूत्रार्थस्त्वग्रेनिरसिष्यते । एतेनयत्केनचिदुक्तंपूर्वोक्तदिशास्मार्तप्रत्यभिज्ञाव्यक्तपदरूढिभ्यांप्रधानमव्यक्तशब्दमितिप्राप्ते प्रकरणपरिशेषाभ्यांशरीरमेवाव्यक्तमितिसिद्धांतइति तन्निरस्तं । अध्यायासंगत्यादेःप्रागुक्तदोष

यमह्य"मित्यादावग्न्यादिविषयेषुप्रश्नेषु "प्रतेब्रवीमितदुमेनिबोधस्वर्ग्यमग्निंनचिकेत"इत्यादिप्रतिवचनेषुचस्फुटेषुतत्त्यागेनैकत्रैवश्लोकेक्लेशेनत्रयाणांप्रश्नादिकंसंपाद्यसौत्रस्यत्रयाणामित्यस्यतत्परत्वोक्त्ययोगाच्च । त्वदुक्तोपायादिविलक्षणाग्निप्रश्नादेरपिसत्त्वेनत्रयाणामेवेत्यवधारणायोगाच्च। यच्चोक्तमुभाभ्यां यथा "वेदाहमेतंपुरुषंमहांत"मित्यादौमहच्छब्दोनतांत्रिकमहत्त्ववाची एवमव्यक्तशब्दोपिनतांत्रिकप्रधानवाचीति "महद्वच्चे"तिसूत्रार्थइतितन्न । तद्वदिहप्रधानवाचित्वेबाधकाभावात् । ननुमहच्छब्दआत्मशब्दसामानाधिकरण्यादात्मपरः । आत्मनश्चपरत्वंप्रधानेनयुक्तमितिचेन्न । त्वदभिप्रेताविद्यायामप्यात्मनःपरत्वायोगात् । "अव्यक्तात्पुरुषःपर"इतिपुरुषादव्यक्तस्यावरत्वप्रतीतेश्च । आत्मशब्दस्यस्वरूपार्थत्वादिनाप्युपपत्तेर्महच्छब्दस्यात्मार्थत्वाभावाच्चेति ॥ टीकाक्षरार्थस्तु ॥ [६६।११] नचमंचादावुक्तव्यभिचारइति ॥

प्र० स्यापरिहारात् । सूत्रार्थोपिप्रायःपररीत्यविशेषात्तथैवनिरस्यः । आनुमानिकसूत्रेटीकावाक्यं "नचमंचादावुक्तव्यभिचारश्शंकनीयः । समाकर्षादितिवक्ष्यमाणन्यायस्यात्राभिप्रेतत्वेनलक्षणानाश्रयणा"दिति । तत्रविन्यस्तगृहीतेरित्यस्यतत्संबंधेनान्यत्रापिशब्दवृत्तेरित्याशयोवर्णितःपूर्वं । तत्रयदितत्संबंधिनितच्छब्दस्यलक्षणेत्यभिमतं तदामंचान्वितेपुंसिमंचशब्दस्यलक्षणोपलंभेनव्यभिचारशंकानवकाशः । यदि

SGDF
Sri Gargeshwari Digital Foundation

प्र० शक्तिरिति तदालक्षणानाश्रयणादित्युत्तरवाक्यासंगतिरित्यतोवक्ति ॥ **पारतंत्र्यादिति** ॥ "प्रधानादेर्भगवत्तंत्रत्वेनोभयोर्मुख्यवाच्यत्वस्योक्तविपर्ययस्यचायोगा"दितिपूर्ववाक्येपारतंत्र्यादमुख्यत्वमित्यस्याभिमतत्वादितिभावः । उत्तरवाक्यंविवृणोति ॥ **मुख्येति** ॥ एतदग्रेतनवाक्ये "प्रधानादेरल्पत्वंपरमात्मनस्स्वतंत्रत्वंप्रधानादिविन्यस्तत्वंचभवे"दित्यत्राल्पत्वमित्यनुवादोनयुक्तः । प्रागपरिच्छिन्नत्वेनानुक्तेरित्यतआह ॥ **अल्पत्वमितीति** ॥ "प्रकरणा"दितिसूत्रे "इत्युक्तार्थविस्मरणविजृंभितंसाधकमस्माकंनपरस्ये"तिवाक्यंभावानवगमाद्विवृणोति ॥ **इत्युक्तार्थेति** ॥ अधिकरणांते "एषइतिचमसविवक्षया । दक्षिणान्नंवनुतेयोनआत्मेतिव"दित्युक्तंदुर्गमत्वाद्व्यनक्ति ॥ **दक्षिणेति** ॥ ७ ॥ **आनुमानिकाधिकरणं ॥ १ ॥**

पारतंत्र्यादमुख्यत्वमितिव्यभिचरितं । मंचातंत्रेपिपुरुषेमंचशब्दस्यामुख्यार्थत्वदर्शनादितिनशंक्यं । मुख्यवृत्तावेवहीनत्वेप्रवृत्तिनिमित्तपारतंत्र्यंहेतुरित्येवाभिप्रेतत्वेनपारतंत्र्याभावेपिमंचादिशब्देलक्षणासंभवादित्यर्थः ॥ [६६।१३]अल्पत्वमिति ॥ पारतंत्र्यमित्यर्थः ॥ [६८।१४]इत्युक्तार्थविस्मरणविजृंभितमिति ॥ इतिचोद्यमुक्तविस्मरणविजृंभितं । निचाय्यवाक्यात्पूर्वस्मिन् "महतःपर"मितिवाक्येब्रह्मैवोच्यतइत्यानुमानिकसूत्रएवोक्तत्वादित्यर्थः ॥ दक्षिणान्नंवनुतेयोन[६९।१६]आत्मेतिवदिति ॥ अस्मिन्वाक्येयइत्यस्यान्नपरत्वेपिविधेयात्मविवक्षयापुल्लिंगत्ववदिहाप्येषइत्यस्यशिरःपरत्वेपिचमसविवक्षयापुल्लिंगत्वमित्यर्थः ॥ ७ ॥ आनुमानिकाधिकरणं ॥ १ ॥

गु० त्रयाणामेवप्रश्नेपि इंद्रियेभ्यःपराह्यर्थाइत्यादौत्रयातिरिक्तस्येंद्रियादेरिवप्रधानस्याप्युक्तिसंभवात्तस्यान्यार्थमुक्तौचप्रधानस्याप्यव्यक्तात्पुरुषःपरइत्यत्रपुरुषोक्त्यर्थमियमुक्तिरस्त्वित्युक्तदोषत्वादित्यर्थः ॥ ७ ॥ **आनुमानिकाधिकरणं ॥ १ ॥**

प्र० ॥ **ॐज्योतिरुपक्रमात्तुतथाह्यधीयतएकेॐ** ॥ अत्रविषयोपाधिःप्रागेवोक्तः । "तत्तुसमन्वयादितिसर्वशब्दानांपरमात्मवाचकत्वमुक्त"मितिटीकायाःफलपरत्वात्पूर्वानंतर्येहेतुमाह ॥ **पूर्वत्रेति** ॥ इंद्रियादीनामभिमानिदेवतापरत्वादितिभावः । यद्यपिपूर्वत्राव्यक्तशब्दएवसूत्रादौसमन्वितइतिभाति तथापिपरमैश्वर्यविरोधित्वरूपविषयतावच्छेदकाक्रांतत्वादुत्तमताबोधकप्रमाणविरुद्धत्वादिरूपपूर्वपक्षयुक्तेस्तदधीनत्वादिसिद्धांतयुक्तेश्चसाम्यात्सूत्रादौचानुमानिकशब्दस्योपलक्षणार्थत्वादिंद्रियादेरादित्वेप्यव्यक्तशब्दोदाहरणत्वस्यनिचाय्यवाक्येब्रह्मपरत्वान्यथानुपपत्तिसूक्ष्मत्वादिविशेषयुक्त्युपेतत्वेनानंदमयशब्दस्येवयुक्तत्वादितिभावेनेंद्रियेभ्यइत्यादीनामित्युक्तं ॥ **साध्येति** ॥ सिद्धवाचिचिंतानंतरंतत्साध्यवाचिचिंताबुद्धिस्था । द्रव्यदेवतासाध्यत्वाद्यागादिकर्मणामितिभावः । तेषामपीहपदवर्णादिरूपेणोदाहरणत्वेपिपूर्वत्रपरापरभावमुपेत्यवाक्यरूपत्वाहानेनसमन्वितत्वमुपादायैवमुक्तं ॥ **तत्क्रमवाचिनामिति** ॥ पंचमीपरादिशब्दानामित्यर्थः ॥ **निमित्तमपीति** ॥ तथाचैकरूपविचारस्यजिज्ञासितत्वादवसरसंगतिरितिवासोपानारोहणक्रमरूपावासंगतिरित्यर्थः । "तज्ज्योतिरादिशब्दवाच्यं

॥ ॐज्योतिरुपक्रमात्तुतथाह्यधीयतएकेॐ ॥ पूर्वत्रसिद्धरूपदेवतातत्क्रमवाचिनामिंद्रियेभ्यइत्यादीनांसमन्वयउक्तः । अत्रतुसाध्यरूपकर्मतत्क्रमवाचिनांसउच्यतइतिवा पूर्वत्रावरादिशब्दनिमित्तानांब्रह्मण्यसत्त्वेपितदधीनत्वात्तत्रतेमुख्याइत्युक्तं । अत्रतुयोगवृत्त्यानिमित्तमपिब्रह्मण्यस्तीत्युच्यतइतिवाऽवांतरसंगतिः ।

गु० ॥ **ॐज्योतिरुपक्रमात्तुतथाह्यधीयतएकेॐ** ॥ **तच्चानिष्टमिति** ॥ सिद्धांतिनइतिशेषः । ततएव अन्यत्रप्रसिद्धत्वादेवेत्यर्थः । निरस्तं अन्यत्रलक्षणापत्त्या

SGDF
Sri Gurgaonkar Digital Foundation

प्र० विषय''इत्यादिविषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ ''वसंतेवसंतेज्योतिषे''त्यादिकर्मकांडादिस्थज्योतिरादिशब्दानामित्यर्थः । अत्रवसंतादीतिवक्तव्येज्योतिरादीत्युक्तिस्सूत्रानुसारात् । तत्रतुगतिर्वक्ष्यते । युक्ताचैवमेवोक्तिः । नहिवसंतादिवाक्यमेवात्रविषयः । किंतुब्राह्मणोपनिषन्मंत्ररूपसकलवेदराशिगतसर्वशब्दानामेवात्रचिंत्यत्वात्तत्रकर्मवाचितयाप्राधान्यात्प्रबलबाधकोपेततयाऽशक्यब्रह्मपरत्वस्यान्योपलक्षणत्वाज्ज्योतिषएवादितोग्रहणं । समन्वयः शक्तितात्पर्यावधारणं । कल्पनेतिसूत्रोपयुक्तपूर्वोत्तरकोटिचिंताद्वयमाह ॥ तदर्थमिति ॥ उपक्रमात्त्वित्यंशसूचितोयोगोऽवयवार्थानुगमइत्यर्थः । अत्रलक्षणयासर्वशब्दानांसमन्वयस्यनिरस्तत्वेपियोगरूढिसाधारण्येनमुख्यवृत्तिर्युक्ता

अत्रज्योतिरादिशब्दानांब्रह्मणिसमन्वयोनयुक्तउतयुक्तइतिचिंता । तदर्थंसर्वशब्दानांयोगःकिंब्रह्मणिनयुक्तउतयुक्तइति । तदर्थमवयवानांब्रह्मणियौगिकत्वेसमुदायस्यब्रह्मपरतानयुक्तोतयुक्तेति । पूर्वपक्षस्तु ।

प्र० नवेत्येवचिंतनीयं । ब्रह्मणियोगायोगेपिरूढ्यासमन्वयोपपत्तेः । नतुविशिष्ययोगइति । तथापिब्रह्मण्यज्ञरूढेरभावाद्गुणपूर्त्यसिद्ध्यारूढ्यासमन्वयस्यसिद्धांत्यनभिमतत्वाच्च, विद्वद्रूढेश्च ''सायोगादेवलभ्यत''इत्युक्त्यायोगमूलत्वाच्च ''उपक्रमात्त्वि''त्यभिमतयोगएवचिंतितः । समुदायस्य यौगिकपदसमुदायस्य । ज्योतिष्टोमादिपदस्येत्यर्थः । यदिनयुक्तातदाऽवयवानांज्योतिरादिशब्दानांयौगिकत्वायोगेननसर्वसमन्वयोयुक्तः । यदितुयुक्तातदाऽवयवानांयौगिकत्वसंभवेनतन्मूलविद्वद्रूढेरपिसंभवेनप्रबलमहायोगेनैवाज्ञरूढिबाधाद्युक्तोज्योतिरादिसर्वशब्दसमन्वयइतिस्पष्टःफलफलिभावोवक्ष्यमाणपूर्वोत्तरपक्षयोरितिभावः । यद्यप्यवयवार्थानुगमरूपयोगायोगेपितदधीनत्वहेतुनाशब्दवृत्ताव

SGDF
Sri Gargeshwari Digital Foundation

प्र० पिसमन्वयोयुक्तः । तथापिवक्ष्यमाणदिशास्वातंत्र्यमात्रस्यसिद्धांत्यनभिमतत्वात्तदंशस्यसिद्धत्वेनाचिंतनीयत्वाद्योगएवोपात्तः । ननु कर्म कांडगतज्योतिरादिशब्दासमन्वयेपिप्रागुक्तेविरोधाभावाद्व्यर्थेयंचिंतेत्यतष्टीकोक्तंप्रयोजनंस्फोरयन्पूर्वपक्षटीकांव्यनक्ति ॥ **सर्वगुणेति** ॥ उपलक्षणमेतत् । मुक्तिहेतुसर्वशब्दवाच्यत्वज्ञप्तयेचेत्यपिध्येयं । किंरूढ्याज्योतिरादिसर्वशब्दसमन्वयोभिमतोथवायोगेन । नाद्यः । अ सिद्धेरितिभावेनाह ॥ **वसंतइति** ॥ "तत्प्रसिद्धिंचापहाये"तिटीकांविवृण्वन्बाधकंचाह ॥ **प्रसिद्धीति** ॥ कर्म ज्योतिष्टोमादि । अंगानि प्रयाजादयः । "अध्वर्युर्गृहपतिंदीक्षयित्वाब्रह्माणंदीक्षयती"तिक्रमः । "समेदर्शपूर्णमासाभ्यांयजेते"तिदेशः । "पौर्णमास्यांपौर्णमास्यायजे

सर्वगुणपूर्तयेसर्वशब्दानांब्रह्मणिसमन्वयइतियदुक्तंसमन्वयसूत्रे तन्न । "वसंतेवसंतेज्योतिषायजेते"तिवाक्यस्थानांज्यो तिरादिशब्दानांज्योतिष्टोमादिकर्मस्वेवप्रसिद्धेः । प्रसिद्धित्यागेनब्रह्मपरत्वेचान्यस्यकर्मतदंगतत्क्रमदेशकालाधिकार्यादिप्रा पकस्याभावेननियतकर्मानुष्ठानंनसिध्येत् । नच "शरीररूपकविन्यस्तगृहीते"रितिन्यायेनाव्यक्तादिशब्दानांब्रह्मसंबंधात्प्र धानादाविवज्योतिरादिशब्दानामपिकर्मादौवृत्तेःकर्मसिद्धिरितिवाच्यं । एवंहिब्रह्मणोन्यत्रशब्दानांलक्षणैवस्यात् । तच्चा

प्र० ते"त्यादिर्वसंतादिश्चकालः। अधिकारी स्वर्गकामादिः । एतेनटीकायामवस्थाविशेषमाश्रित्य "अधिकारिनियोज्ययजमाने"तिभेदेनोक्ताव पिपदत्रयेणाप्यधिकार्येवप्राप्तइतिसूचितं । तथाचाक्षरार्थोक्तिप्रस्तावेविवरिष्यतइति । आदिपदेनटीकोक्तफलर्त्विगादिपरिग्रहः । "नचवा च्यंपरमात्मसंबंधेनान्यत्रापिशब्दवृत्तिरभ्युपगतेति । तथासतिलोकेलक्षणेतरवृत्त्यभावप्रसंगा"दित्यग्रेतनटीकावाक्यंव्यवहितमपिश्लिष्टत्वा द्त्रैवव्यनक्ति ॥ **नचेति** ॥ **लक्षणैवेति** ॥ अन्यत्ररूढ्यपरित्यागेनभगवतिशब्दानांवृत्तिरित्यस्यात्रैवसेत्स्यमानत्वेनेतःपूर्वकाप्यसिद्धेरि

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिभावः ॥ **अनिष्टमिति** ॥अभिधानव्याकरणादिसर्वलोकसिद्धरूढरपह्नवायोगादितिभावः । टीकोपलक्षणमितिभावेनप्रकारांतरेणहरौ शब्दवृत्तिमाशंक्यनिराह ॥ **नापीति** ॥ सर्वगुणसिद्ध्यर्थत्वात्समन्वयस्येतिभावः ॥ **स्मृतीति** ॥ श्रुतिगीतातात्पर्योक्तस्मृतौ "तन्नाम त्वादथापिवे"त्यनेनयोगस्योक्तत्वादितिभावः । "किंचज्योतिरादी"त्यादिटीकांविवृणोति ॥ **नापीति** ॥ एतेन "अथवायोगेने"तिद्वितीऽनिष्टं।नापितदधीनत्वन्यायेनब्रह्मणिवृत्तिः। सर्वशब्दसमन्वयेपिसर्वनियंतृत्वादन्यस्यगुणस्यासिद्धेः। "विध्यादीनांनियंतायंपूज्यःप्राप्यश्चतद्वतां । इत्यादिश्रुतिरूपेणविध्यादिश्रुतयोपिच । हरिंवदंतिसर्वेषांतन्नामत्वादथापिवे"त्यादिस्मृत्यनुसारेणसिद्धांतिनातदधीनत्वेसत्येवेहयोगस्यैवव्युत्पादयितव्यत्वाच्च । नापि "जातमोतंहरौ यस्माज्ज्योतिषःप्राणरूपत"इत्यनुव्याख्यानोक्तरीत्यायोगवृत्त्याब्रह्मणिपदसमन्वयः । कर्मणिरूढेर्बलवत्त्वात् । किंच ज्योतिरित्यादिशब्दावयवानां जि ओतिः इत्यादीनामपिब्रह्मपरत्वेसमुदायस्यब्रह्मणिवृत्तिर्नस्यात्। नहि पंकःपंकजशब्दार्थः । जगज्जनकत्वादिगुणश्चनसिध्येत् । अवयवसमुदाययोर्द्वयोरपिभगवन्नाममात्रत्वात् । अवयवानामन्यत्रप्रसिद्धत्वेनाब्रह्मपरत्वेतुसर्वसमन्वयासिद्धिः । समुदायस्यापिततएवाब्रह्मपरत्वापातश्च ।

प्र० यपक्षोपिनिरस्तोध्येयः । "अभ्युपेत्यचेदमुदित"मितिटीकांव्यनक्ति ॥ **किंचेति** ॥ किमवयवानामपिब्रह्मपरत्वमुपेत्यतत्समुदायस्यब्रह्मणियोगउच्यतेऽथानुपेत्येतिहृदिविकल्प्यक्रमेणनिराह ॥ **जीति** ॥ टीकायांज्योतिष्टोमशब्दस्यसमुदायत्वमुपेत्य स्तोमज्योतिश्शब्दयोरवयवत्वव्युत्पादनस्याभिप्रायमग्रेविवरिष्यामइतिभावेनानुभाष्योक्तंज्योतिश्शब्दस्यसमुदायत्वमुपेत्य जीत्यादीनामवयवत्वमुक्तमितिध्येयं । ततएव

प्र० अन्यत्रप्रसिद्धत्वादेव ॥ **अमुख्यवृत्त्येति** ॥ भगवत्संबंधादन्यत्रवृत्तिरित्येतदित्यर्थः । "नयोगोपिसंभवती"त्यादिटीकायामूलमाह ॥ **तदुक्तमिति** ॥ अत्रकर्मानुष्ठानविरोधंव्युत्पत्त्यशक्यत्वंचाग्रे"नचैव"मित्यादिनाग्रंथेनपरिजिहीर्षुस्सौत्रप्रतिज्ञाहेतूक्तिपरभाष्यटीकां "ज्योतिष्टोमादी"त्यादिकां "इतिभाव"इत्यंतांविवृण्वन्नाद्यसूत्रार्थनिष्कृष्याह ॥ **ज्योतिरादीति** ॥ सूत्रेज्योतिश्शब्दउपलक्षणमितिभावः । इमंलोकमभ्यार्चदितिप्रक्रतंलोकशब्दितंतंदेहं शतंवर्षाणि अत्यंतसंयोगेद्वितीया । अभ्यार्चत् प्राणःप्रकृतः । एतमेव प्राणमेवसंतं प्रवृत्तिनि अमुख्यवृत्त्याऽन्यपरतेतितुनिरस्तं । तदुक्तमनुव्याख्याने "व्युत्पत्तेरप्यशक्यते"तीति ॥ **सिद्धांतस्तु** ॥ ज्योतिरादिशब्दमुख्यार्थोब्रह्मैव । तंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतर्चिनस्तस्माच्छतर्चिनइत्याचक्षत एतमेवसंतं सइदंसर्वमध्यतोदधे यदिदंकिंचतस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतएतमेवसंत"मित्यादिना "तावाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋचइत्येवविद्या"दित्यंतेनशतर्चिनःशतर्चिनइत्याद्यभ्याससहितेनवाक्येन ब्रह्मणःसर्वशब्दमुख्यार्थत्वोक्तेः । "अवस्वरातिगर्गरोगोधापरिसनिष्वणत् । पिंगापरिचनिष्कददिंद्रायब्रह्मोद्यत"मितिश्रुतौगर्गरगोधादिशब्दानामपिपरमेश्वरवाचितामुक्त्वाब्रह्मशब्दार्थस्यवेदस्यविशिष्यतद्वाचितोक्तेश्च ।

प्र० मित्तवत्तयाविद्यमानमित्यादिना इत्यंतेनवाक्येनेत्यन्वयः । तावाएताइतिश्रुत्यर्थष्टीकायांव्यक्तः । अस्मिन्वाक्येवृत्त्यंतरेणापिसर्वशब्दप्रतिपाद्यत्वमितिशंकापनुत्तयेयोगरूढिप्रदर्शनाय "त"मित्यादिपूर्ववाक्यमुक्त्वा "इत्यादिने"त्युक्तं । प्राणोविष्णुरेवेत्यग्रेव्यक्तं । मुख्यार्थत्वेकर्मनिर्णयोक्तश्रुत्यंतरमाह ॥ **अवस्वरातीति** ॥ गर्गरः पादभूषणं । अवस्वरति नीचैरौतीतियत्तदिंद्राय । गोधा पल्ली । परिसनिष्वणत्

SGDF Sri Gangadharji Digital Foundation

प्र० अतिशयेनस्वनतीतियत्तदर्पींद्राय।ष्वणशब्दइतिधातोः। पिंगा चकोरीच। परिचनिष्कदत् ध्वनतीतियत्तद्पींद्राय। गर्गरादिसर्वस्वनोपि नादशब्दितवर्णाभिव्यक्तिद्वाराविष्णुविषयकइत्युक्त्वा "उद्यत"मितिविशिष्यसतात्पर्यतद्वाचितोक्तेरितिभावः । इंद्रश्चविष्णुर्मुख्यतइत्यंतर्ने येनिर्णीतमितिभावः। "पादभूषाचधिक्कारंतत्कृतंस्वरितोवदेत् । अद्भुतत्वंहरेर्वक्तिपिंगाकंठगशब्दवत् । तामेवाद्भुततांवक्तिगृहगोधापरापिचे"तिकर्मनिर्णयोक्तस्मृत्यैतन्मंत्रार्थोबोध्यः। "विष्णुनामार्थरूपत्वंसंहितादेरथाब्रवीत् । णकारंचषकारंचबलचेष्टात्मकंवदन् । तज्ज्ञानपूर्वकत्वेनसंहिताध्ययनंतथा । उपसर्गत्वतोवेस्तुताच्छील्यार्थादुनस्तथा । णकारश्चषकारश्चनामरूपतयास्मृता"वित्यनुव्याख्यानंहृदिकृत्वा

"णकारोबलंषकारःप्राणआत्मे"तिविष्णुशब्दांतर्गतणकारषकारयोरर्थमुक्त्वा "सयोहैतौणकारषकारावनुसंहितमृचोवेदे"तिश्रुतौणकारषकारार्थः सर्वत्रपूर्वोत्तरवर्णसंहितार्थइत्युक्तत्वाच्च ।

प्र० विष्णोस्सर्वशब्दमुख्यार्थत्वेहेत्वंतरमाह ॥ णकारइति ॥ णकारषकारौविष्णोर्बलचेष्टाप्रतिपादकावित्यर्थः ॥ विष्णुशब्देति ॥ वीत्यस्योपसर्गत्वेनोत्तरपदार्थविशेषकत्वादुन्प्रत्ययस्यताच्छील्यार्थत्वादुपसर्जनत्वंमन्वानस्यवेदस्यणकारषकारौद्वावेवनामस्वरूपतयाभिमतावितिभावः। ऋचोऽनुसंहितं ऋचांसर्वसंहितासु । णकारषकारौयोवेद णकारषकारतत्संहिताभिःप्रतिपाद्योयोर्थस्तमेवसर्वत्रपूर्वोत्तरवर्णतत्संहिताभिःप्रतिपाद्यतयायोवेदेत्यर्थः। णकारषकारार्थइत्युपलक्षणं । तत्संहितार्थइत्यपिध्येयं । एतेनफलोक्तेर्भावेनतत्रतात्पर्यमपिसूचितं । "अःइति ब्रह्मकथितंतद्व्याख्यानात्मतातथा । शब्दानामपिसर्वेषांनामवित्त्वकृतकृत्यते"त्यनुव्याख्यानंहृदिकृत्वावाक्यांतरेणविष्णोस्सर्वशब्दवाच्यतामाह

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ अःइतीति ॥ ब्रह्मवाचितयेति ॥ अभेदार्थत्वेत्वितिकरणवैयर्थ्यमितिभावः ॥ समानार्थत्वस्येति ॥ साक्षादैक्यस्यप्रत्यक्षादिविरुद्धत्वेनलक्षणाश्रयणस्यावश्यकत्वादितिभावः । ननुसिद्धार्थकस्यब्रह्मार्थकत्वेपिनक्रियार्थस्येत्यतआह ॥ सृजतइति ॥ श्रुतिगीतातात्पर्योक्तशांडिल्यश्रुतौस्तुतित्वोक्तेरित्यर्थः । "नामवित्कृतकृत्यते"त्यत्रनामपदेनतुल्यन्यायतयासूचितश्रुत्यातदुपात्तश्रुत्याचैतमर्थंसाधयति ॥ यद्वा इति ॥ नारदंप्रतिसनत्कुमारवचनंछांदोग्येसप्तमेध्याये ॥ यदिति ॥ वाचः वाक्समूहस्यमध्ये । यदोमितिपदं अंगीकारवाचीतियावत् ।

"अःइतिब्रह्मे"तिब्रह्मवाचितयोक्तेनाकारेणसहसर्वशब्दानांसमानार्थत्वस्य "अकारोवैसर्वावा"गितिश्रुत्योक्तेश्च । "सृजतोहिश्रुतयोनुवर्ततेनैवासृजतःकिंवाविदधतेकिंवानिषेधंतिस्तुतिमात्राएवतेस्यु"रितिश्रुतौविध्यादिभागस्यापिभगवत्स्तुतित्वोक्तेश्च । "यद्वैकिंचैतदध्यगीष्टानामैवैतन्नामवाऋग्वेदोयजुर्वेदःसामवेद आथर्वणश्चतुर्थ"इत्यादौ "नामैवैत"दित्यंतेछांदोग्ये "यद्वाचओमितियच्चनेतियच्चास्याःक्रूरंयदुचोल्बणिष्णुतद्वियूयकवयोऽन्वविंदन्नामायत्तासमतृप्यन्छ्रुतेधी"त्यैतरेयेचसर्ववैदिकशब्दानांभगवन्नामत्वोक्तेश्च ।

प्र० यच्चनेतिपदं प्रतिषेधार्थं । यच्चास्यावाचोमध्येक्रूरं अर्थतःकठिनं । यदुचोल्बणिष्णु शब्दतःकठिनं । उपलक्षणमेतत् । यावद्वैदिकंपदजातं तत्सर्वं । वियूय विचार्य । कवयः ज्ञानिनः । नामायत्तानि नामप्रकाश्यतयानामाधीनानितत्तच्छब्दप्रवृत्तिनिमित्तानि । अन्वविंदन् विदितवंतः । तस्मिन्वेदनेश्रुते परिपक्वेसत्यनंतरंसमतृप्यन् कृतकृत्यामुक्ताअभूवन्नित्यर्थः । अस्त्वेवंसर्ववैदिकशब्दानांभगवन्नामत्वं । तद्योगेनेतिकुतः । वृत्त्यंतरेणाप्युपपत्तेरित्यतोवा श्रुत्यादौयोगार्थस्यदुर्ज्ञानत्वोक्त्यन्यथानुपपत्त्याचहरेःसर्वशब्दमुख्यार्थत्वंवाक्यसमन्वयपक्षेतद्

SGDF
Sri Gargeshwari Digital Foundation

प्र० योगादितिभावेनवा ''कश्छंदसांयोगमितिश्रुतेर्योगार्थतत्ववित्। ब्रह्मैकोनैवचान्योस्तिकइत्यस्योभयार्थत''इत्यनुभाष्यसुधोक्ततात्पर्यादपिता त्पर्यांतरमुपेत्याह ॥ कश्छंदसामिति ॥ कोधीरः छंदसांयोगं ब्रह्मणियोगवृत्तिं आवेद । नकोपीत्यर्थः । ''मांविधत्तेऽभिधत्तेमांविकल्प्यो पोह्यइत्यहं । इत्यस्याहृदयंसाक्षान्नान्योमद्वेदकश्चने''त्येकादशस्कंधतात्पर्यस्मृतिःसमन्वयसूत्रटीकायांव्याख्याता । कर्मविधात्रीश्रुतिर्मांप्रत्येव तद्विधत्ते । इंद्राद्यभिधात्रीचमामभिधत्ते । ''चत्वारिवा''गितिश्रुत्याऽहंविविधरूपत्वेनकल्प्यः । ''नसुरांपिबे''दित्यादिश्रुत्याहमेवाप्रियाद पोह्यः । एवंभूतायाअस्याश्श्रुतेरित्यभिप्रायमहमेववेदनमत्तोन्यइति । श्रुतौछंदःपदस्यकर्मकांडान्यत्वसंकोचशंकाव्यावृत्तयेस्मृत्युक्तिः ॥

''कश्छंदसांयोगमावेदधीर''इतिश्रुतौ ''इत्यस्याहृदयंसाक्षान्नान्योमद्वेदकश्चने''तिस्मृतौचवैदिकयौगिकार्थ स्यदुर्ज्ञानत्वोक्तेश्च। ''तत्रापियौगिकोमुख्यस्सर्वत्रास्तिसवैदिके। अनवस्थानिवृत्त्यर्थंयौगिकेरूढिकल्पना।

प्र० **यौगिकार्थस्येति** ॥ स्मृतौयोगशब्दाभावेपिसर्वाभिधेयत्वस्यरूढ्याऽयोगेनयोगवृत्त्यैववाच्यत्वात्तल्लाभइतिभावः। ननु रूढार्थस्यैवलोकेमु ख्यत्वव्यपदेशात्कथंयौगिकस्यमुख्यत्वं । येनसर्वशब्दमुख्यार्थोब्रह्मैवेतिप्रतिज्ञायुक्तास्यादित्यतोवा पूर्वपक्षोक्तदिशानसर्वशब्दयौगिकत्वंयुक्त मित्यतोवा सर्ववैदिकशब्दयौगिकत्वंकुतइत्यतोवाऽऽह ॥ **तत्रापीति** ॥ ''रूढियोगौविनाकश्चिन्नैवार्थोवेदगोभवेत् । तत्रापी''ति कर्मनिर्ण योक्तब्रह्मतर्कस्मृतेरर्थष्टीकायामुक्तः। तत्रापि रूढियोगयोर्मध्येपि । सयोगस्सर्वत्रवैदिकेरूढेर्थेस्ति । नचानवस्थापत्त्यायोगानुपपत्तिः । अवांतरपदानांयोगस्तदवांतरपदानामपियोगइत्यनवस्थानिरासायावयवानांरूढिमुपेत्ययोगोक्तेरिति । एवंतर्हिकर्मादिपरिलोपस्स्यादित्यतोवा

प्र०अन्यस्यापिमुख्यार्थत्वेब्रह्मैवमुख्यार्थइत्यनुपपत्तिः।शब्दानामक्षादिशब्दवन्नानार्थत्वापत्तिश्चेत्यतोवा कर्मनिर्णयोक्तस्मृत्यंतरमाह॥**तत्रापीति**॥ ''मुख्यार्थानांचसर्वेषांतारतम्यंतुविद्यते । तत्रापिपरमोमुख्य''इत्यादि । तदन्यार्थस्य कर्मदेवतादिरूपस्येत्यर्थः। एतेन ''कल्पने''तिसूत्रभा वोपिस्मृत्यैवविवृतः। श्रुतावनुपपत्तिमाशंक्याह ॥ **नचेति** ॥ पदसमन्वयदशायांवाक्यत्वाभावेनवाक्यार्थाभावादितिभावः ॥ **बोधक त्वइति** ॥ तादृशसंसर्गस्येत्यन्वयः। ''सन्निपातलक्षणोविधिरनिमित्तंतद्विघातस्ये''तिन्यायादितिभावः । संसर्ग वाक्यार्थरूपं। नन्वेतद्वा क्यगतपदानांस्थलांतरेपितत्रतत्रश्रवणात्तत्रत्यानामेववर्णपदादिरूपेणब्रह्मणिसमन्वयेतत्तन्नामनिमित्तगुणलाभसंभवादत्रत्यानांतथासमन्वयो

तत्रापिपरमोमुख्योवाच्योशेषरवैर्हरिः । तत्तन्मुख्याविरोधेनतदन्यार्थस्यसंग्रह''इत्यादिस्मृतेश्च । नच ''तं यच्छत''मित्यादिवाक्यस्यापिब्रह्मणिपदसमन्वयान्नानेनसर्वशब्दवाच्यत्वसिद्धिरितिशंक्यं । अस्यलोकप्रसिद्धप दार्थसंसर्गाबोधकत्वेतद्बोधाधीनस्यपदसमन्वयस्यैवासिद्धिः । बोधकत्वेतुपदसमन्वयोनस्वोपजीव्यंब्रह्मणःस र्वशब्दवाच्यत्वरूपसंसर्गबाधते । ''स्वाध्यायोध्येतव्य''इतिवाक्यवच्चास्यविनियोक्तृत्वविनियोज्यत्वेनविरुद्धे ।

प्र० विफलएव। अस्यवाक्यविधयैवब्रह्मणिसर्वशब्दपरत्वरूपार्थपरत्वेकाप्यनुपपत्तिर्नास्ति । येनैवंसमाधानमनुसर्तव्यमितिचेत्समाहितमेतत्प्रा गेवसर्ववेदगतशब्दवाच्यत्वस्यापिमुमुक्षुणाज्ञेयत्वादिति । एतेनवर्णानांपंचाशत्त्वाद्यत्रक्वचनगतानांतेषांसमन्वयेनाप्युपपत्तेर्नसर्ववेदानांसका र्यइतिप्रत्युक्तं । अन्यथा ''वेदाक्षराणियावंतिपठितानिद्विजातिभि''रित्यादौतदुक्तिर्नस्यात् । नन्विदंवाक्यंसर्ववाक्यगतानामपिपदानांब्रह्म णिवृत्तिंब्रुवत्स्वगतानामपिवक्तिचेत्स्ववृत्तिविरोधइत्यतआह ॥ **स्वाध्यायइति** ॥ यथा ''स्वाध्यायोध्येतव्य''इतिवाक्यंसर्वस्वाध्यायमध्य

SGDF Sri Gurgeshwari Digital Foundation

प्र० यनद्वारार्थज्ञानेविनियुंजानंस्वात्मानंचविनियुङ्क्ते । अन्यस्याभावात् । भावेवाऽनवस्थाद्यापत्तेः । तद्वदिदमपि । विरोधस्त्वप्रमितस्थलेवेतर साहित्यरहितस्वात्मवृत्तिस्थलेवेतिभावः । ननुविष्णौयोगात्कर्मणिरूढेर्बलवत्त्वाद्यौगिकस्यहरेःकथंमुख्यार्थत्वमितिचोद्यंसूत्रोपात्तश्रुतेरभिप्राय व्यक्तीकारेणपरिहरति ॥ अत्रचेति ॥ एतेन "नचशब्दानामन्यत्ररूढत्वेनयोगांगीकारायोग"इत्यादिटीकाविवृता ॥ रूढिरिति ॥ "प्रयोगमात्रबाहुल्यंरूढिरित्यभिधीयत"इत्यनुव्याख्यानोक्तेरितिभावः । अवधारणेन एतमेवेत्येवकारेण ॥ मुख्यार्थत्वमिति ॥ सर्वथा

अत्रचश्रुतावेतमित्यनेन "प्राणस्तथे"त्यत्रब्रह्मत्वेननिर्णीतं "प्राणोह्येषयएषतपती"तिपूर्ववाक्यस्थं प्राणंपरामृश्यावयवार्थोक्त्यायोगः, "आचक्षत"इत्यनेनरूढिश्चोक्ता । अवधारणेनचलौकिकरूढि प्राबल्यप्रसक्तमन्येषांमुख्यार्थत्वंनिरस्तं । तदुक्तमनुव्याख्याने "आचक्षतइतिह्यत्रसंतमित्यवधा रणात् । योगस्यरूढेःप्राबल्यंविद्वद्रूढिंचतत्रगां । बहुशोदर्शयत्यंजस्तात्पर्यात्सनिरुक्तिक"मिति ।

प्र० तत्तच्छब्दार्थत्वनिषेधस्यवक्ष्यमाणदिशाऽयोगादितिभावः । टीकोक्तेर्मूलमाह ॥ तदुक्तमिति ॥ "एतमेवतथासंतंशतर्च्चीत्यादिनामभिः ।" आचक्षतइतिपूर्वशेषः ॥ आचक्षतइति ॥ आचक्षतइत्यादिकाश्रुतिस्सनिरुक्तिकं योगवृत्तिसाहित्येन । तत्रगां परमेश्वरविषयां । शत र्च्चादिशब्दोपलक्षितसर्वशब्दानांविद्वद्रूढिंदर्शयति । यच्चात्रबहुशः बहुवारंदर्शयति तेनज्ञायते अंजः तात्पर्यादेव । नतुप्रासंगिकत्वे नेति । "किंचात्रसंतमितिवचनादेतमेवेत्यवधारणाच्च लौकिकरूढितोभगवद्विषयस्ययोगस्यप्राबल्यंचदर्शयती"त्यर्थःसुधोक्तः । एवंस्वपक्ष

SGDF
Sri Gargeshwari Digital Foundation

प्र० साधकाद्यसूत्रभाष्यटीकातात्पर्यविवृत्येदानीं "कल्पनोपदेशाच्चमध्वादिवदविरोध"इतिसूत्रभाष्यटीकातात्पर्यं "तेषुतेषुपदार्थेषुरूढिरंगीक्रि तायतः । प्रयोजनबहुत्वेनतस्यतस्याविरोधतः । उपदेशादिसामर्थ्याद्विष्णौशक्तिश्चगृह्यत"इत्यनुव्याख्यानसुधयोरुक्तरीत्याविवृण्वन्पूर्ववाद्युक्तंबा धकंनिराह ॥ नचैवमिति ॥ यतइत्यस्ययतोबाधितुंनशक्ता तस्मादितिश्लोकेनान्वयः । ननुप्रसिद्धार्थसत्त्वेतस्योपजीव्यत्वादिचिंता । तदेवकुतोब्रह्मपक्षइत्यतस्तत्सत्त्वसमर्थनपूर्वकंश्लोकेत्रिपादींविवृणोति ॥ नहीति ॥ बाधकंच तमितिवचनमेवस्यात् । नान्यत् । अनुपलंभात् । तच्चोपजीवकतयादुर्बलंनबाधकमित्याह ॥ नचेति ॥ नन्वस्तुशतचर्यादिशब्दे । ज्योतिरादिशब्देतुकथमित्यतआह ॥ न्यायेति ॥ जि ओति इत्याद्यवयवानांप्रसिद्धार्थमुपजीव्यैवज्योतिश्शब्दव्युत्पादनस्यानुमतत्वान्नोपजीव्यार्थबाधइत्यर्थः । एतमेवार्थं दृष्टांतेनव्यनक्ति ॥ एवंचेति ॥ प्रसिद्धार्थाबाधेसतीत्यर्थः ॥ पच्यादीति ॥ पचिधातोर्भावेघञ्प्रत्यये "अतउपधाया"इतिवृद्धौ "चजोःकुघिण्यतो"रितिकुत्वेपाकइतिरूपं । तथा "ल्युट्च"ेतिसूत्रेणकृञोभावेल्युटिकृते "युवोरनाका"वित्यनादेशे "सार्वधातुकार्धधातु

नचैवंकर्मानुष्ठानस्यव्युत्पत्तेर्वानुपपत्तिः । यतः उपजीव्यंप्रसिद्धार्थशतमित्यादिकाश्रुतिः । नशक्ताबाधितुंतस्माद्युक्तेव्युत्पत्ति कर्मणी ॥ १ ॥ नहिज्योतिरादिशब्दानांतदवयवानांचप्रसिद्धोर्थोविनैवबाधकंत्यक्तुंयुक्तः । नच "तंयच्छतंवर्षाणी"त्यादिश्रु तिरेवबाधिका । अनयाब्रह्मणिशतचर्यादिशब्दव्युत्पादनायतदवयवानांलोकप्रसिद्धार्थमुपजीव्यत्वान्यायसाम्याज्ज्योतिरादि शब्देष्वपितस्याभ्यनुज्ञातत्वात् । एवंच यथा डुपचष्पाके डुकृञ्करणे इत्यादौपाकादिशब्दानांपच्यादिधातुजत्वेपितेषां

गु० निरस्तमित्यर्थः । एतमेवतथासंतंशतचर्ीत्यादिनामभिः । आचक्षतइत्याद्यनुव्याख्यानंमनसिनिधायाह ॥ तंयच्छतमित्यादिना ॥ ननूभयत्रापिमुख्यत्वेकथं

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्य- चंद्रिका.

॥ ७८१ ॥ प्र. च.

२

प्र० कयो"रितिगुणेरपरत्वेचकरणमितिरूपं। गम्लृगताविल्यादिरादिपदार्थः॥लोकेति॥अवयवविकृत्त्यादिरूपार्थमादायेत्यर्थः ॥ अन्यथेति॥ यौगिकार्थग्रहणेतज्ज्ञानानंतरंपचिधातोस्तदर्थकत्वज्ञानं तज्ज्ञानेचतज्जन्यपाकशब्दार्थज्ञानमित्यन्योन्याश्रयइत्यर्थः ॥ व्युत्पादनमिति ॥ तत्प्रकारश्च "जातमोतंहरौयस्मा"दित्याद्यनुव्याख्यानसुधयोर्ध्येयइतिभावः । प्रागुक्तलक्षणाप्रसंगंनिराह ॥ नचैवमिति ॥ भगवतएव सर्वशब्दमुख्यार्थत्वे । शरीररूपकेत्युक्तन्यायेनतत्तच्छब्दमुख्यार्थेश्वरसंबंधेनैवान्यत्रशब्दवृत्तेर्वाच्यत्वादितिभावः । अभिधानं निघंटुः ॥ अन्यत्रनेति ॥ पारम्यस्यैवनिषेधोनतुमुख्यत्वस्येत्यर्थः । एतेन "तत्रापिपरमोमुख्य"इतिस्मृत्युक्तेरुपयोगोदर्शितः ॥ युक्तंचेति ॥ व्यु

लोकप्रसिद्धार्थमादायधातूनामर्थनिरूपणं । अन्यथाह्यन्योन्याश्रयःस्यात् । तथेहाप्यवयवानांविष्णुपरत्वेपिलोकप्रसिद्धार्थमादायव्युत्पादनं । एवमवयवव्युत्पादनंतदवयवानांलोकप्रसिद्धार्थमादायेतिद्रष्टव्यं । नचैवंलोकेलक्षणैवस्यादितिशंक्यं । अभिधानव्याकरणादिभिःप्रमितस्यलोकेमुख्यत्वस्यविनैवबाधकंत्यागायोगात् । नचैतमेवेत्यवधारणंबाधकं । तस्यप्रमितमुख्यत्वाबाधेनैवब्रह्मण्येवपरममुख्यत्वमन्यत्रनेत्येवंपरत्वात् । ब्रह्मणिपरममुख्यत्वंचप्रवृत्तिनिमित्तस्यनिरवधिकत्वानन्याधीनत्वाभ्यांयुक्तं । युक्तंचमुख्यवृत्तावेवयोगरूढ्योरिवतारतम्यं । नचसकृत्प्रयुक्तस्यानेकार्थत्वमन्याय्यं । "राजाकुवलयोल्लासकारी"त्यादिश्लिष्टशब्देषुचंद्रभूपाद्यनेकार्थत्वदर्शनात् ।

गु० तत्रब्रह्मणिपरममुख्यत्वमन्यत्रनेतितारतम्यं । वृत्तौतारतम्यादर्शनादित्यतआह॥ युक्तंचेति ॥ अनेकार्थत्वस्यान्याय्यत्वंवदन्प्रष्टव्यः । किंलोकेऽदर्शनाद्वैकस्यानेकार्थत्वमन्याय्यं शास्त्रांतरेऽदर्शनाद्वा वेदेऽदर्शनाद्वा । नाद्यइत्याह ॥ राजेति ॥ अत्रराजशब्देनचंद्रविवक्षायांकुवलयशब्देनोत्पलंविवक्षितं । भूपतिविवक्षायां ॥ ७८१ ॥

प्र० त्पादयिष्यतेचैतत्समाकर्षादित्यत्र । कुवलयेतिकुमुदंभूवलयंचगृह्यते ॥ नानार्थेति ॥ विदेवनाक्षविभीतकाक्षरथचक्राक्षाद्यभिप्रायेणेत्यर्थः । लौकिकोदाहरणमुक्त्वाशास्त्रीयोदाहरणमाह ॥ बहुगणेति ॥ आद्याध्यायस्याद्यपादे । बहुशब्दोगणशब्दोवतुप्रत्ययांतोडतिप्रत्ययांतश्चेत्येतेसंख्यासंज्ञाभवंति । बहुकृत्वः गणकृत्वः तावत्कृत्वः कतिकृत्वः इत्यादौ "संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसु"जित्युक्तकृत्वसुजर्थं । तथाचतत्रसंज्ञार्थत्वेसिद्धे "ष्णांताष"डित्यत्रष्णांतेतिस्त्रीलिंगनिर्देशेनप्राक्तनंसंख्यापदमनुवृत्त्यषकारांतानकारांताचयासंख्यासाषट्संज्ञाभवति । षट्पंचेत्यादौ "षड्भ्योलु"गितिविहितप्रत्ययलुक्सिद्ध्यर्थं । तथाचतत्रषट्पंचादिसंज्ञिपरत्वमुक्तं । उक्तंचमहाभाष्ये "इदंप्रकृतमुत्तरत्रानुवर्तिष्यते । इदंवैसंज्ञार्थं । उत्तरत्रसंज्ञिविशेषणेनार्थं"इत्यादि । ननु नेदंसकृत्प्रयुक्तं । किंत्वनुवृत्तमितिचेत्तर्हिवैदिकशब्दोपिपुनरनुसंहितोर्थांतरपरोस्तु । अविगीतमन्यंदृष्टांतमाह ॥ षष्ठीति ॥ द्वितीयाध्यायतृतीयपादे "षष्ठीशेष"इतिसूत्रं । "कारकप्रातिपदिकार्थव्यतिरिक्त

नानार्थविवक्षयाप्यक्षमानयेतिप्रयोगाच्च । "बहुगणवतुडतिसंख्ये"त्यत्रसंज्ञार्थस्यापिसंख्याशब्दस्य "ष्णांताष"डित्यत्रषट्संज्ञार्थत्वदर्शनाच्च । "षष्ठीशेष"इत्यत्रशेषशब्देकर्मादिव्यतिरिक्तार्थत्वोपसर्जनार्थत्वयोः,

गु० कुशब्देनपृथिवीतस्याःवलयंमंडलंकुवलयपदेनविवक्षितमितिबोध्यं । ननुचतत्रश्लिष्टशब्दत्वमेवानेकार्थत्वेप्रयोजकं । तथाचनतद्दृष्टांतेनज्योतिरादिशब्दानामनेकार्थत्वसिद्धिरित्यतोदृष्टांतांतरमाह ॥ नानार्थेति ॥ नापिसकृत्प्रयुक्तस्यानेकार्थत्वंशास्त्रांतरेऽदृष्टमितिद्वितीयइत्याह ॥ बहुगणेति ॥ ननुचतत्रयथाश्रुतस्यसंख्याशब्दस्यसंज्ञार्थत्वं अनुवृत्तस्यैवसंख्यार्थत्वं नत्वेकस्यैवशब्दस्यानेकार्थत्वमेतद्दृष्टांतीकरणमित्यतआह ॥ षष्ठीशेषइत्यत्रेति ॥ नन्वत्रापिशेषशब्देयदाकर्मादि

SGDF

प्र० स्वस्वामिभावसंबंधादिश्शेषः । तस्मिञ्शेषेषष्ठीस्यात् । यद्वाऽप्रधानंशेषः । तेनद्वयोःपर्यायेणवानस्यात् । राज्ञःपुरुष"इतिप्रक्रियाकौमुद्यांत स्यव्याख्यातत्वादितिभावः । भाष्यादौद्व्यर्थत्वस्यास्फुटत्वादाह ॥ **हलंत्यमित्यत्रेति** ॥ प्रथमस्यतृतीयपादे "हलंत्य"मितिसूत्रं । त स्यार्थः । धातुप्रभृतेर्वर्णसमुदायस्ययदंत्यंहल्तदित्संज्ञकंभवतीति । हृन्ह्रणइत्यादावनुबंधलोपस्तस्यप्रयोजनं । तत्र "शषसर् हल्"इत्यत्र योलकारस्तस्येत्संज्ञायांसत्यां "आदिरंत्येनसहेते"त्यनेन "हयवर"डित्यत्रस्थाद्यहकारस्यहलितिलकारेणहलितिप्रत्याहारउपपद्यते । सतिच प्रत्याहारे "ल"णित्यत्रलकारस्यहल्त्वात्तस्यैव "शषसर् हल्"इत्यत्रांतेनिर्दिष्टत्वादित्संज्ञा तदाश्रयश्चप्रत्याहारइतीतरेतराश्रयत्वाद्धलितिप्रत्या हारानुपपत्तिमाशंक्यसमाहितंभाष्ये "एकशेषनिर्देशोयं । हल्चहल्चहल् । हलंत्यमित्संज्ञंभवती"तिकैयटेच "हस्यल् इत्येकस्तत्पुरुषः । द्वितीयःप्रत्याहार"इत्युक्तं । वृत्तौच "हस्यल् हलिति । द्वितीयंहल्ग्रहणंतंत्रेणोपात्तंद्रष्टव्य"मित्यादि । तथाचहल्शब्दस्यसकृत्प्रयुक्तस्य "श षसर् हल्"इत्यत्रहकारसमीपस्थतत्परलकारार्थत्वं अज्व्यतिरिक्तहल्प्रत्याहारपतितहकारादिसर्वव्यंजनार्थत्वंचदृष्टमितिप्रकृतेपितथेत्यर्थः । ननु भवतुपौरुषेयेवक्तृविवक्षयानेकार्थत्वं नत्वपौरुषेयइत्यतआह ॥ **अग्निरिति** ॥ "मूर्धन्वतीपुरोनुवाक्याभवती"तिब्राह्मणेनाग्नेयेवि

"हलंत्य"मित्यत्रहल्शब्देहकारात्परलकारार्थत्वव्यंजनार्थयोर्दर्शनाच्च ।

"अग्निर्मूर्धे"तिमंत्रस्यश्रौतआग्नेययागे स्मार्तेंऽगारकजपहोमादौच,

गु० व्यतिरिक्तार्थत्वंनतदोपसर्जनार्थत्वं । यदाचोपसर्जनार्थत्वंनतदाकर्मादिव्यतिरिक्तार्थत्वं । तत्रविकल्पाभ्युपगमादुभयार्थतासंभवति । नचात्रविकल्पाभ्युपगमः सिद्धांतिनइष्टइत्यतआह ॥ **हलंत्यमिति** ॥ हलंत्यमित्यनेनेत्संज्ञायामादिरंत्येनसहेतेत्यनेनप्रत्याहारत्वसिद्धिः तेनचप्रत्याहारत्वेसिद्धेहलंत्यमितीत्संज्ञासिद्धिरित्य न्योन्याश्रयभयादाह ॥ **हल्शब्दइति** ॥ नापिवेदेऽदर्शनादितितृतीयइत्याह ॥ **अग्निर्मूर्धेतिमंत्रस्येति** ॥ ननुचतत्रश्रौतेस्मार्तेवैकस्यविनियोगेपिप्रकृतेश्रौतए

SGDF
Sri Gargeshwari Digital Foundation

प्र० नियोगः । “अग्निर्मूर्धादिवइतिमंत्रंभौमायकीर्तयेत् । उद्बुध्यस्वाग्नइतिमंत्रंसोमस्यसुतायवा”इतिस्मृत्याजपादौविनियोगइति “अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं । अपांरेतांसिजिन्वती”तिमंत्रस्याग्न्यर्थत्वमंगारकार्थत्वंचयथातथेत्यर्थः । श्रौतार्थद्वयपरत्वेदृष्टांतमाह ॥ **पवित्रेष्टाविति** ॥ “यदिपवित्रंनश्येत्कातत्रप्रायश्चित्तिरिति सोग्नयेपवित्रवतेऽष्टाकपालंपुरोडाशंनिर्वपेत् । तस्ययाज्यानुवाक्येपवित्रंतेविततंब्रह्मणस्पते तपोष्पवित्रंविततंदिवस्पतइती”तिपवित्रनाशनिमित्तकेष्टौब्राह्मणेनविनियोगः । तथा “तस्मिन्नुदीचीनदिशंपवित्रंवितन्वंति । पवित्रंतेविततंब्रह्मणस्पतइतिवितत्यमानमभिमंत्रयतेयजमान”इत्यापस्तंबसूत्रेणोद्गातृभिर्द्रोणकलशोपरिवितत्यमानपवित्रानुमंत्रणेविनियोगइति “पवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः”इत्यादिमंत्रस्ययथापवित्रवदग्निदेवतार्थत्वंदशापवित्रार्थत्वंचतथेत्यर्थः । आप्यायस्व शंतेइहत्वष्टारमग्रियं इत्यादिमंत्राणांमंत्रकांडेपत्नीसंयाजेक्रमेणाम्नानादाद्येसौम्यपत्नीसंयाजआद्यस्य “आप्यायस्वसमेतुतेविश्वतस्सोमवृष्णिय”मितिमंत्रस्यक्रमरूपप्रमाणेनविनियोगः “आप्यायस्वेतिसोममाप्यायती”तिसूत्रेणसोमरसाप्यायनेचविनियोगइतिसोमरसाप्यायनाद्यर्थत्वंतथेत्यर्थः । नन्वर्थांतरस्यवचनवृत्त्याऽप्रतीतेरदृष्टार्थत्वेनापिविनियोगसंभवान्नानेकार्थत्वमित्यतउक्तं **तत्तत्प्रकाशनायेति** । मुख्यवृत्त्यसंभवेपि

“पवित्रंत”इतिमंत्रस्येति पवित्रेष्टौ दशापवित्रादौच, “आप्यायस्वे”तिमंत्रस्यसौम्येपत्नीसंयाजे सोमरसस्याप्यायनेचविनियोगेनतत्तत्प्रकाशनायानेकार्थत्वस्यस्वीकार्यत्वाच्च ।

गु० वोभयत्रैकस्यविनियोगःकथमित्यरुच्याह ॥ **पवित्रंतइतिमंत्रस्येति** ॥ ननुचात्रोभयोःश्रौतत्वेपिभिन्नकर्मत्वेनतत्रैकस्य प्रकृतएकस्मिन्नेवैकस्यैवोभयत्रविनियोगः कथमित्यतआह ॥ **आप्यायस्वेतिमंत्रस्येति** ॥ **योददातिसप्रमगंदइतियोगस्येति** ॥ प्रमगंदःकुसीदः वृद्ध्युपजीवी प्र प्रभूतंधनं म मां गं गमिष्यति

SGDF
Sri Gargeshwari Digital Foundation

प्र० गौणलक्षणादिनार्थांतरस्यकल्पनीयत्वात् । दृष्टेसंभवत्यदृष्टकल्पनायाअन्याय्यत्वात् । अतएवतृतीयस्यद्वितीयपादे "वचनात्त्वयथार्थमैंद्री स्या"दितिद्वितीयाधिकरणे "ऐंद्र्यागार्हपत्यमुपतिष्ठत"इतिविनियोगबलाद्गौणवृत्त्यागार्हपत्याग्निप्रकाशनायेंद्रशब्दस्याग्न्यर्थत्वमुक्तं । उक्तंच "स्यादग्नेर्गौणमिंद्रत्व"मित्यादि । "अर्थाभिधानसंयोगान्मंत्रेषुशेषभावस्स्या"दित्यधिकरणेमुख्यवृत्त्यैवमंत्राणामर्थाभिधानमितिवर्णनंत्वसति प्रमाणांतरे । उक्तंच "गौणेसदपिसामर्थ्यंनप्रमाणांतरंविना । आविर्भवती"त्यादि । नन्वेवंतत्रैवप्रकृतेपिमुख्यामुख्यवृत्त्यैवानेकार्थत्वंस्यान्न तुमुख्यवृत्त्यैवेतिचेत्सत्यं । परममुख्यमुख्यवृत्तिभ्यामेवभगवत्तदन्यरूपार्थद्वयस्वीकारेणन्यूनाधिकवृत्त्यार्थद्वयस्यप्रकृतेप्यविरोधात् । न्यून

"आयंगौ"रितिमंत्रस्य "आत्मदैवतंसौर्यंचे"त्यनुक्रमणिकायां "दिव्यंसुपर्ण"मितिमंत्रस्य "अंत्यासरस्वतेसूर्याये" त्यनुक्रमणिकायां "त्रयःकेशिन"इतिमंत्रस्य "त्रयःकेशिनइत्यग्निःसूर्योवायुश्चे"त्यनुक्रमणिकायामनेकार्थत्वोक्तेश्च । निरुक्ते "आनोभरप्रमगंदस्ये"त्यादौप्रमगंदादिशब्दानांव्यक्तिविशेषेरूढेः, प्रभूतंधनंमामागमिष्यतीतियोददातिसप्रमगंदइतियोगस्यचोक्तत्वाच्च ।

प्र० वृत्तेश्चगौणादित्वमेवेतितुनिर्मूलं। अतएवोक्तंप्राक् "युक्तंचमुख्यवृत्तावेवयोगरूढ्योरिवतारतम्य"मिति । नकेवलंविनियोगबलेनार्थांतरत्वं कल्प्यमिति । कंठतउक्तंचेत्याह ॥ **आयंगौरिति** ॥ अष्टमाष्टकस्याष्टमेध्याये "आयंगौस्सार्पराज्ञ्यासदैवतंसौर्यंचे"त्युक्तं । तथाद्वितीयाष्टकस्यद्वितीयेध्याये "अस्यद्विपंचाश"दित्युपक्रम्य "उक्षाणंपृश्निमितिसोमस्त्रयःकेशनइत्यग्निस्सूर्योवायुश्चे"त्युक्त्वा "अंत्यासरस्वतेसूर्यायवे"त्युक्तमनुक्रमणिकायां । तत्रांत्याकेत्याकांक्षायां "दिव्यंसुपर्णमितिमंत्रस्ये"तिस्वयंप्रदर्शितं । योगरूढिभ्यामनेकार्थत्वमित्यत्रैवसंमतंदृष्टांतमाह ॥ **निरुक्तइति** ॥ मंत्राधिकरणे "अनित्यसंयोगान्मंत्रानर्थक्य"मितिगुणसूत्रे "किंतेकृण्वंतिकीकटेषुगावोनाशिरंदुह्रेनतपंतिघर्मं ।

प्र० आनोभरप्रमगंदस्यवेदोनैचाशाखंमघवन्रंधयान"इत्युदाहृत्य हेमघवन् कीकटेषुवर्तमानागावः तवकिंकरिष्यंति । यतः आशिरं सोमसंस्कारार्थद्रव्यंविलोलितंदधि एतान दुह्रे नचघर्मं प्रवर्ग्यंप्रति क्षीरादिदानेननतपंति नसाधनीभवंति । अतः प्रमगंदस्य कीकटदेशाधिपते राज्ञः वेदः धनं नः अस्मान्प्रत्याहर । नः अस्माकं नैचाशाखंनामनगरं रंधय साधयेतिराजविशेषानित्यार्थकत्वेनाप्रामाण्यमाशंक्य "उक्तश्चानित्यसंयोग"इतिसूत्रेप्रकृष्टंमेगतकालीनंधनमधमर्णोदास्यतीतिबुद्ध्याधनप्रयोक्तेतियोगेनप्रमगंदःकुसीदवृत्तिस्सदाऽस्तिदेशइत्यनित्यसंयोगःपरिहृतइतियोगरूढिभ्यामर्थद्वयंनिरुक्तरूपवेदांगग्रंथसिद्धमितिज्ञायते । अन्यथातन्नस्यादितिभावः । आदिपदेननैचाशाखपदंग्राह्यं । तत्रापिरूढ्यानगररूपार्थस्य नीचाश्शाखाःषंडाः । तदीयंधनंनैचाशाखमितियोगस्यचोक्तेः । योगेनैवानेकार्थत्वेस्थलांतरमाह ॥ **वानात्सूतेरिति** ॥ यद्वा अनेकार्थत्वंश्रुत्यैवोक्तमित्याह ॥ **वानादिति** ॥ यद्वा अलौकिकेहरावेकैकवैदिकशब्दस्यानेकार्थत्वंश्रुत्यादिसिद्धमितिश्रुतिस्मृतीआह ॥ **वानादिति** ॥ वानात् ज्ञानात् । वागतिगंधनयोरित्यतोविच्प्रत्ययः । सूतेः उत्पादनात् । षूञ्प्राणिगर्भविमोचनइतिधातोर्डुप्रत्ययः । देवनात् क्रीडादेः । दीव्यतेरच् । वाश्चासौसुश्चासौदेवश्चेतिविग्रहः । वासात् सर्वत्रवासकर्तृत्वात्सर्ववासाधिकरणत्वाद्वा । वसनिवासइत्यस्मादुण्प्रत्ययः । द्युतेर्देवः । वासुश्चासौदेवश्चेतिद्वितीयोर्थः । छादनात् सर्वत्रव्यापनात् । अविद्यादिनावरणाद्वा । वसआच्छादनइत्यस्मादुण् । क्रीडयादेवः । पूर्ववद्विग्रहः । इतितृतीयः । बलात् वाः असुत्वात् प्राणरूपत्वादसुः । दातृतः सर्वदातृत्वात् । ददा

"वानात्सूतेर्देवनाद्वासुदेवोवासाद्द्युतेश्छादनात्क्रीडयाच(नाच्च) । बलादसुत्वाद्दातृतोवर्तनाच्चतंवासुदेवंप्रवदंतिवेदाः ।

गु० आगमिष्यति द ददातीति । तदपत्यंप्रमगंदोत्यंतकुसीदकुलीनः । तद्धितार्थःप्रशब्देनद्योत्यते । प्रस्कण्वइतियथेत्यर्थः । श्रुतिस्मृत्युक्तत्वाच्चैकस्यानेकार्थताभ्युपे

SGDF Sri Gurgeshwari Digital Foundation

प्र० तेरेकारः । ''कृन्मेजंत''इत्यव्ययं । वर्तमानत्वास्सर्वत्रवः । वृतुवर्तने । ततोडः । वाश्चासावसुश्चासौदेचासौवश्चेतिविग्रहः । इतिचतुर्थोर्थः । इयंचसौकरायणश्रुतिःकर्मनिर्णयटीकायांव्याख्याता । लोकेऽन्यत्रनिरूढनाम्नस्तथात्वेश्रुतिमाह ॥ अद्यतइति ॥ तैत्तिरीयश्रुतौ सर्वभूतैरद्यत्वादुपजीव्यत्वात्सर्वभूतसंहर्तृत्वाच्चान्नमुच्यते । अद्भक्षणइत्यतःकर्मणिकर्तरिचनिष्ठाप्रत्यये ''रदाभ्यांनिष्ठातोनःपूर्वस्यचद''इति नत्वेऽन्नमितिरूपमित्यन्नशब्दस्यकर्मत्वकर्तृत्वरूपानेकार्थत्वमुच्यते । आदिपदेन ''अथकस्मादुच्यतेब्रह्मेतिबृहतिबृंहयतिचे''तिश्रुतिर्गृह्यते । स्मृतिसंमतंचानेकार्थत्वमित्याह ॥ गतिश्चेति ॥ गच्छंत्यनेनेतिगतिः । भूतानां पृथिव्यादीनां । प्रजानां ब्रह्मादीनां । वीगतिव्याप्तिप्र

अद्यतेऽत्तिचभूतानि । तस्मादन्नंतदुच्यत''इत्यादिश्रुतौ ''गतिश्चसर्वभूतानांप्रजानांचापिभारत । व्याप्तेमेरोदसीपार्थकांतिश्चाभ्यधिकामम । अधिभूतनिविष्टश्चतदिच्छुश्चास्मिभारत । क्रमणाच्चाप्यहंपार्थविष्णुरित्यभिसंज्ञित''इत्यादिस्मृतौचवैदिकवासुदेवादिशब्दानामनेकार्थत्वोक्तेश्च ।

प्र० जनकांत्यसनखादनेष्वित्यतोगत्यर्थात्क्स्नुप्रत्ययोधातोर्ह्रस्वश्चेत्याद्योर्थः । मे मया । रोदसी द्यावापृथिव्यौ व्याप्ते । विष्लृव्याप्तावित्यतःक्तप्रत्ययइतिद्वितीयः । कांतिः कमनीयता । वशकांतावित्यतोनुप्रत्ययोधातोरकारस्येकारःशकारस्यषकारः । वीगतीत्यतोवाकांतिकर्मणिक्स्नुरिति तृतीयः ॥ अधिभूतेति ॥ विशप्रवेशनइत्यतः क्तःषत्वंचेतिचतुर्थः । तदिच्छुः अधिभूतस्यजन्मादीच्छुः । कांतिरिच्छा । वयतेर्वेष्टेश्चपूर्ववद्रूपमितिपंचमः । क्रमणात् त्रिविक्रमरूपेणपादविक्षेपात् । पूर्ववद्वयतेर्गत्यर्थात्पूर्ववत्कर्तरिप्रत्ययइतिषष्ठः ॥ स्मृताविति ॥ दशमगीताभाष्योक्तमोक्षधर्मस्मृतावित्यर्थः । एवमेवतत्रटीकायांव्याख्याता । आदिपदेन ''यच्चाप्नोतियदादत्त''इत्यादिकास्मृतिर्गृह्यते । सकलशाखा

SGDF
Sri Gargeshwari Digital Foundation

प्र० निर्णायकेनसूत्रकृतैवश्रुतेरनेकार्थत्वमुक्तमित्याह ॥ **स्वाप्ययेति** ॥ एवकारेणतदुक्तावविगानमाह । चतुर्थस्यचतुर्थपादे "तीर्णोहितदास र्वाञ्छोकान्हृदयस्यभवती"तिवाक्यस्यस्वर्गस्थपरत्वमाशंक्य सुप्तिमुक्त्युभयापेक्षमिदंवाक्यं । अपितृत्वादिपुण्यपापाद्यसंगत्वादिलिंगश्रवणा दितिवक्ष्यमाणत्वादित्यर्थः । ननु तत्सूत्रंनप्रकृतानुगुणं । अन्यतरशब्देनैकार्थत्वस्यैवप्रतीतेः । अन्यथास्वाप्ययसंपत्त्यपेक्षमित्येतावतैवपूर्तेर न्यतरापेक्षमितिव्यर्थमितिचेन्न । स्वाप्ययसंपत्त्यपेक्षमित्युक्तौ स्वाप्यये मोक्षे यासंपत्तिस्सुप्तिः तदपेक्षं तद्विषयमितिबुद्धिस्स्यात् । तन्निवृ त्त्यर्थंस्वाप्ययसंपत्त्योर्मध्येऽन्यतरापेक्षमित्युक्तत्वात् । अन्यथैकार्थत्वेवस्तुनिविकल्पायोगेनस्वाप्ययापेक्षमितिवासंपत्त्यपेक्षमितिवाब्रूयात् ।

"स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंही"त्यत्रसुषु
प्तिवाक्यस्यद्व्यर्थतायाःसूत्रकारेणैववक्ष्यमाणत्वाच्च ।
"त्रयोर्थाःसर्ववेदेषुदशार्थाःसर्वभारत"इत्यादिस्मृतेश्च।

प्र०ननु संबंधेषष्ठीमंगीकृत्यस्वाप्ययसंपत्त्योरित्येवकुतोनकृतं। उच्यते। "अनेकार्थस्यास्यैकार्थव्याख्यानेरुचिरेवव्याख्यातुःप्रमाणंनमुख्यामुख्य ताविशेषोस्तीतिसूचयितुमन्यतरापेक्षमित्युक्त"मितिकर्मनिर्णयटीकायामेवोक्तेरितिभावः । ननुकचिन्मानांतरेणानेकार्थत्वेपिनसर्वत्रवेदइत्य तऋग्भाष्योक्तस्कांदस्मृतिमाह ॥ **त्रयोर्थाइति** ॥ "विष्णोस्सहस्रनामापिनिरंतरशतार्थक"मितिस्मृतिशेषः । "एकस्तावत्प्रसिद्धेंद्राद्या दिरूपः । अपरस्तुतदंतर्गतेश्वरलक्षणः । अन्योऽध्यात्मरूप"इतिऋग्भाष्यव्याख्यानोक्तिः । नन्वनेकार्थतायांकथंनकल्पनागौरवमित्यतआह

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ तदुक्तमिति ॥ बह्वर्थेष्वित्यनेकार्थकत्वोपलक्षणं ॥ अन्यत्रचेति ॥ अत्रैवानुव्याख्यानइत्यर्थः । इतिशब्दस्य "योगानांपरमांसिद्धिंप रमंतेपदंविदु"रितीतिपूर्वेणान्वयः ॥ योगेति ॥ योगवृत्तिविषयःपरमेश्वरः । रूढःप्रसिद्धःप्रकृत्यादिः । एवं नानेकार्थत्वमन्याय्यं । प्रमा णैरेवानेकार्थत्वस्यदर्शितत्वादित्युक्तं । इदानीं युक्तंचानेकार्थत्वंप्रमाणांतरस्येवशब्दस्येत्याह ॥ किंचेति ॥ यद्वाशब्दस्यानेकार्थत्वंप्रमाणैस्स मर्थ्यबाधकाभावेनापिसमर्थयते ॥ किंचेति ॥ तत्रबाधकमाशंकते ॥ नचेति ॥ किंमुख्यामुख्यवृत्तिद्वयंनेति किंवामुख्यवृत्तिद्वयंनेति । आद्यआह ॥ गंगायामिति ॥ द्वितीयआह ॥ पंकजेति ॥ बाधकांतरमाशंकते ॥ नचेति ॥ एकवाक्यतामिति ॥ ज्योतिश्शब्द स्यनामतयायजिधात्वर्थावच्छेदकत्वेनज्योतिषायागेनसमीहितंकुर्यादितिवा ज्योतिर्नामकोयागस्समीहितसाधनमितिवैकवाक्यतामापन्नस्ये

तदुक्तंकर्मनिर्णयेभगवत्पादैः "नच बह्वर्थेषुतात्पर्यकल्पनेकल्पनागौरवं । वचनेनैवप्रतीयमानत्वात् । अर्थस्यक ल्पनाभावा"दिति । अन्यत्रच "इतिबुद्धौसमारोहादुभयोर्योगरूढयोः । त्यागेचकारणाभावादुभयार्थत्वमिष्यत" इति । किंचचक्षुषाघटद्वयस्येवयुगपदेकेनशब्देनशक्यार्थद्वयबोधनेनबाधकं । नचसकृत्प्रयुक्तस्यवृत्तिद्वयंनेतिनि यमः । गंगायांमत्स्योघोषश्चेत्यादौतद्दर्शनात् । पंकजशब्देनरूढ्यापद्मत्वजातेर्योगेनपंकजजननस्यचप्रतीतिदर्श नाच्च । नचकर्मविधानाययजेतेत्यनेनैकवाक्यतामापन्नस्यज्योतिरादिशब्दस्यततोव्याघुट्यब्रह्मज्ञानार्थत्वायोगः ।

गु०येत्याह ॥ वानादित्यादिना ॥ अन्यत्रेति ॥ अनुव्याख्यानइत्यर्थः । अत्रपदसमन्वयपक्षेयजेतेत्यस्यापिब्रह्मपरत्वेनकर्माविधायकत्वमेवपरिहारोवक्तुंशक्यते ।

प्र० त्यर्थः ॥ सुबामंत्रितइति ॥ अयमर्थः । "सहसुपे"तिसूत्रे "सुबामंत्रितेपरांगवत्स्वर"इत्यतस्सुबित्यनुवर्तते । सुबंतंसुबंतेनसमस्यते । अधिकारसूत्रमिदं । लक्षणसूत्रंच । यस्यलक्षणंनास्तितस्यसमासविधायकमिति । तत्रसहेतियोगविभागोंगीकृतस्तिङंतेनसमाससिद्ध्यर्थं । तथाचसुबित्यस्यसुपेतितृतीयांतेनान्वितस्यापिसुप्सहसमस्यतेसमर्थेनतिङंतेनेत्यप्यर्थदर्शनादिति । उक्तंचमहाभाष्येद्वितीयाध्यायाद्यपादेसह सुपेत्यत्रसहग्रहणंप्रत्याख्यायानंतरं "एवंसिद्धेयत्सहग्रहणंकरोतितस्यैतत्प्रयोजनं । योगांगंयथाविज्ञायेत । सतिचयोगांगेयोगविभागःकरि ष्यते । सह सुप्सहसमस्यते । केनकेन समर्थेन । अनुव्यचलत् अनुप्राविशत् । ततः सुपा सुपाचसुप्सहसमस्यते । अधिका

"सुबामंत्रिते सहसुपे"त्यादौसुबित्यादेःसुपेत्यादिनैकवाक्यतामापन्नस्यापिततोव्याघुट्यअनु व्यचलदित्यादौतिङंतेनसहसमासविधायकत्वदर्शनात् । इष्टसिद्ध्यर्थबहुस्थलेषुयोगविभा गस्वीकाराच्च । "भूवादय"इत्यादौवकारस्यैकवाक्यतात्यागेनमंगलार्थत्वदर्शनाच्च ।

प्र० रश्चैवलक्षणंचे"त्यादि ॥ अनुव्यचलदिति ॥ सुप्सहसमस्यतेसमर्थेनेतियोगेसुबित्येकवचनस्यविवक्षितत्वाद्वीत्यस्याचलदितितिङंतेनपूर्वं समासस्ततोन्वित्यस्येतिध्येयं ॥ इष्टसिद्ध्यर्थमिति ॥ "समासेऽनञ्पूर्वेक्त्वोल्यप् । हलःश्नश्शानज्झा"वित्यादौक्त्वः श्नः इत्यादिनिर्देशसि द्ध्यर्थं "आतोधातो"रित्यत्रातइत्यस्यधातोरित्यनेनान्वितस्यापिततोविभागेनाधातुनाप्यन्वयस्वीकारात् । एवं"णेरध्ययनेवृत्त"मित्यादावपि ध्येयं । इष्टसिद्ध्यर्थमित्युक्त्यानातिप्रसंगइतिसूचयति । तदुक्तंकैयटे "इष्टसिद्ध्यर्थत्वाद्योगविभागस्यनातिप्रसंग"इति ॥ भूवादयइति ॥ आद्याध्यायतृतीयपादे "भूवादयोधातव"इतिसूत्रं । तस्यार्थो भूप्रभृतयोधातुसंज्ञाभवंतीति । तत्रमहाभाष्येयणादेशेभ्वादयइतिस्यादिति

SGDF
Sri Gargeshwari Digital Foundation

प्र० भूवादयइतिनिर्देशानुपपत्तिमाशंक्य “भूवादीनांवकारोयंमंगलार्थः प्रयुज्यत” इतिवार्तिकेनमंगलार्थत्वमुक्तं। कैयटेच “अपूर्वस्यलाभोदध्यादेर्लोकेमंगलंसूचयति । तथेहाप्यागमवकारोमंगलार्थस्संपद्यते । अथवा सतिवकारेऽविकृतभूशब्दउच्चार्यमाणोमहाव्याहृतिस्मरणान्मंगलं भवतीतिपारंपर्येणवकारोमंगलार्थस्संपद्यत”इत्युक्तं। तथाचतत्रयथाभुवंवदंतीतिभूवादयइति भुवो वादयो भूवादयइतिवासंभवत्यन्वयेतत्त्यागेनमंगलार्थत्वमुक्तं । अन्यथा “भुवोवार्थंवदंतीतिभ्वर्थावावादयस्स्मृता”इतिवृत्तिकाराद्युक्तप्रकारद्वयमेवब्रूयात् । नतुमंगलार्थत्वमिति भावः ॥ **कंबलवंतमिति** ॥ “काशीतलवाहिनीगंगा केदारपोषणरताः कंसंजघानभगवान् कंबलवंतंनबाधतेशीत”मित्यत्रशीतलवाहि

“कंबलवंतंनबाधतेशीत”मित्यादावेकस्मिन्नेववाक्येप्रश्नोत्तररूपत्वदर्शनाच्च। नचपुंवाक्यस्याभिप्रायपरतंत्रत्वात्तदनुरोधादनेकार्थता । नत्वपुंवाक्यस्येतिशंक्यं । पुंवाक्येप्यनेकार्थाभिप्रायलिंगाभावेतदयोगात् । अपुंवाक्येप्यनेकार्थतात्पर्यज्ञापकस्यसत्त्वेतस्यानिवार्यत्वात् । पुंवाक्येऽभिप्रायेणशक्तिसंकोचादेकार्थता।वेदेतुतदभावाद्बाधकभावेयावद्वाक्यार्थतेत्येवन्याय्यत्वाच्च।

प्र० नीगंगाकेतिप्रश्नस्यकाशीतलवाहिनीगंगेत्युत्तरं दारपोषणेरताःकइतिप्रश्नस्यकेदारपोषणरताइत्युत्तरं कृषीबलाइत्यर्थः । भगवान्कंपुरुषंसंजघानेतिप्रश्नस्यकंसंजघानेत्युत्तरं बलवंतंकंनबाधतेशीतमितिप्रश्नस्यकंबलवंतंकंबलयुक्तंनबाधतेशीतमित्युत्तरं इतिप्रश्नोत्तररूपत्वदर्शनादित्यर्थः । एकदेशस्यान्यान्वितस्यापिविभागेनार्थांतरपरत्वेतुभूवादयइत्याद्युदाहरणद्वयं । तत्राद्यंस्मार्तं । द्वितीयंलौकिकं । ननुपौरुषेयवाक्येपुरुषाभिप्रायानुसारेणनानार्थकल्पनेपिवेदवाक्येवक्तुरभावेननानार्थत्वकल्पकवक्तृतात्पर्याभावान्ननानार्थत्वंयुक्तमित्यतआह ॥ **पुंवाक्यइति** ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० वक्तुरभावोऽनेकार्थत्वेगुणएव । नतुदोषायेतिभावः । अस्मिन्नेवार्थेमीमांसकसंमतिमाह ॥ तदुक्तमिति ॥ पंचमस्याद्यपादेपंचमेधिकरणे "अर्थकृतेवानुमानंस्या"दितिसूत्रभाष्ये । अध्ययनविधिवशात्पुरुषार्थपर्यवसानादेवसामर्थ्यानुसारेणसर्वत्रविनियोक्तव्यइत्यर्थः ॥ तेजोवैघृतमिति ॥ अक्ताधिकरणंप्राग्विवृतंसमन्वयाधिकरणे । चतुर्थस्यतृतीयपादे "क्रतौफलार्थवादमंगवत्कार्ष्णाजिनि"रित्यष्टमेधिकरणे "प्रतितिष्ठंतिहवायएतारात्रीरुपयंती"तिवाक्यमुदाहृत्यचिंतितं। तत्ररात्रिशब्देन "ज्योतिर्गौरायु"रितिवाक्योक्तसौत्यानिकर्माण्युच्यंते ।

तदुक्तंशाबरभाष्ये "परार्थोहिवेदोयथानेनकर्तुंशक्यंतस्माएषसमाम्नाय"इति ;। "तेजोवै घृतं प्रतितिष्ठंतिहवाएतारात्रीरुपयंती"त्यादौप्राशस्त्यपरार्थवादपदांतरैःसहप्राशस्त्यलक्षकाणामपिघृतादिशब्दानांस्वार्थभूतघृतादिपरत्वस्यापिदर्शनाच्च । "अभित्वाशूरनोनुमो नत्वावाँअन्य"इतिद्व्यृचे आद्याबृहती उत्तरापङ्क्तिरितिस्थिते "पूर्वाबृहतीककुभावुत्तरे"

प्र०तत्र "प्रतितिष्ठंती"तिकिमयंफलविधिरुतार्थवादइतिसंशये अपापश्लोकश्रवणवद्वर्तमानापदेशेनफलविध्यसामर्थ्यादर्थवादइतिप्राप्ते रात्रिनामककर्मणांफलापेक्षाणांफलांतरकल्पनापेक्षयाक्लृप्तप्रतिष्ठास्वरूपस्यैवफलत्वकल्पनस्यलघुत्वात् येप्रतितिष्ठासंति तएतारात्रीरुपेयुरितिविपरिणामेनफलविधिरितिसिद्धांतइति । तेजश्शब्दस्यप्राशस्त्यपरत्वेपिघृतशब्दस्यतदाश्रयपरतयानतत्परत्वमित्यतःप्राशस्त्यपरार्थवादपदांतरैस्सहेत्युक्तं । घृतादीत्यादिपदेनप्रतिष्ठादिपरत्वस्येतिगृह्यते । अन्यान्वितस्ववाक्यस्यान्यान्वयउदाहरणांतरमाह ॥ अभित्वेति ॥ नवमस्यद्वितीयपादे

SGDF
Sri Gargeshwari Digital Foundation

प्र० "प्रागाधिकं"त्वितिषष्ठेधिकरणेचिंतितं । बृहद्रथंतरसामनी "अभित्वाशूरनोनुमः । त्वामिद्धिहवामह"इतिबृहत्योरुत्पन्ने । तयोःपङ्क्तीउत्तरे "नत्वावामन्य"इति "त्वंनश्चित्र"इति । तत्रश्रूयते "नवैबृहद्रथंतरमेकच्छंदः । यत्तयोःपूर्वाबृहतीककुभावुत्तरे"इति । तस्यार्थः बृहद्रथंतर मित्येतत्सामद्वयमितरसामवदेकच्छंदस्कंनभवति । यस्मात्तयोर्बृहद्रथंतरसाम्नोराश्रयभूताऋक्पूर्वाबृहतीछंदस्का । उत्तरेद्वेककुप्छंदस्केइति । तत्रसंशयः "अभित्वाशूरनोनुमोऽदुग्धाइवधेनवः । ईशानमस्यजगतस्सुवर्दृशमीशानमिंद्रतस्थुष"इतिबृहत्याउत्तरत्रपठितां "नत्वावांअन्यो दिव्योनपार्थिवोनजातोनजनिष्यते । अश्वायंतोमघवन्निंद्रवाजिनोगव्यंतस्त्वाहवामह"इतिपङ्क्तिछंदस्कामृचमुपनीयतस्याःस्थानेद्वेककुभावाने तव्येउतबृहतींपङ्क्तिंचप्रग्रथ्यककुभावुत्तरेअत्रैवसंपाद्येइति । पूर्वपक्षस्तु प्रग्रथनेनमुख्यककुप्त्वसंपत्त्यभावादक्षरसामान्यमात्रेणगौणत्वापत्ते स्तृचगानस्यत्रयमंतरेणासामंजस्यादन्ययोःककुभोरानयनमिति । सिद्धांतस्तु प्रगाथस्मरणात्प्रगाथसमाख्यानात्पङ्क्तेरुत्तरत्रपाठस्यात्यंतानर्थ क्यात् "तद्यत्पदंपुनरारभत"इतिलिंगदर्शनाच्चप्रग्रथनमेवेति । तथाचायमर्थः । अभित्वाशूरेत्येषाबृहतीप्रथमास्तोत्रीया । तस्यामविकृत मेवरथंतरंगातव्यं । तस्यामृचिचतुर्थपादंपुनरुपादायेतरस्याःपङ्क्तेःपूर्वार्धेनसहग्रथनीयं । सेयमष्टाविंशत्यक्षरात्रिपदाद्वितीयास्तोत्रीया । साचैकाककुप्संपद्यते । तस्यांचककुभिचरमंपादंपङ्क्तेरुत्तरार्धेनसहप्रग्रथ्यतृतीयास्तोत्रीयाकार्या । साद्वितीयाककुप्संपद्यतइति । "छंदोगा हिकाकुभःप्रगाथाइतिस्मरंति । प्रकर्षेणगानंयत्रसप्रगाथः । प्रकर्षोनामाम्नाताद्दृक्पाठादाधिक्यं । तच्चोक्तरीत्यापादाभ्यासपुरस्सरमृगंतरसं पादनेनोपजायत"इतिप्रगाथस्मरणंतत्रप्रमाणमुक्तं । "सोस्यादिरितिप्रगाथेष्वि"तिसूत्रे "प्रग्रथ्यतइतिप्रगाथ"इतिमंजर्यादावुक्तेश्च । "एषा वैप्रतिष्ठिताबृहती । यापुनःपदाद्यत्पदंपुनरारभते । तस्माद्वत्सोमातरमभिहिंकरोती"तिलिंगदर्शनंचप्रमाणमुक्तं । पदंचतुर्थपादमुद्गातापुन

प्र० रारभतइत्यर्थः । त्र्यृचइतिसप्तमी । स्थिते आम्नातेसतीत्यर्थः ॥ **इतिश्रुतीति** ॥ श्रुत्यर्थउक्तः । यद्यप्यत्रैकत्रान्वितस्यान्यत्रान्वयमात्रमेव प्रतीयते नत्वर्थविवक्षापि । तथाप्यन्यान्वितस्यान्यत्रान्वयमात्रेदृष्टांतोवा मंत्रार्थज्ञानपूर्वकगानस्यैवनिःश्रेयसहेतुतयार्थविवक्षावश्यंभावाभि प्रायेणवाऽयंदृष्टांतः । एवमग्रेपिबोध्यं । अन्यान्वितस्यवाक्यस्यस्थलांतरस्थान्यान्वयमाश्वलायनसूत्रोक्तंदर्शयति ॥ **अपाःपूर्वेषामिति** ॥

इतिश्रुतिबलाद्बृहत्याआद्यायाऋचश्चतुर्थपादंपङ्क्तेरुत्तरस्याऋचः पूर्वार्धेनप्रग्रथ्यैकांककुभंसंपा द्यतस्यांककुभिचरमंपादंपङ्क्तेरुत्तरार्धेनप्रग्रथ्यककुभंतरंसंपाद्यमितिनवमउक्तत्वेनाद्यऋगादि स्थपादस्यद्वितीयऋगादावन्वयदर्शनाच्च । "अपाःपूर्वेषांहरिवःसुतानामथोइदंसवनंकेवलंते । ममद्धिसोमंमधुमंतमिंद्रसत्रावृषंजठरआवृषस्वे"तिसंहितास्थायायाज्याया "एवाह्येवैवापाः पूर्वेषांहरिवःसुतानामेवैवाहींद्रमथोइदंसवनंकेवलंते । एवाहिशक्रोममद्धिसोमंमधुमंतमिंद्र वशीहिशक्रःसत्रावृषंजठरआवृषस्वे"त्यारण्यकस्थेन "एवाह्येवैवे"त्यादिनाऽन्वयदर्शनाच्च ।

प्र० याज्यायाइति ॥ "उपरिष्टाल्लक्ष्मायाज्ये"त्युक्तलक्षणायाऋचइत्यर्थः । "महानाम्नीनांपंचाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषुपादे"ष्वि तिब्राह्मणेनमहानाम्नीशब्दित "विदामघव"न्नित्याद्यारण्यकगताक्षराणामेकादशाक्षरपादेषुयोगउक्तः । सकथमित्याकांक्षायां "एवाह्येवैवा पाःपूर्वेषा"मित्यादिनाश्वलायनसूत्रेप्रदर्शितः । तदुक्तरीत्यान्वयदर्शनाच्चेत्यर्थः । व्यक्तमेतत्कर्मनिर्णयतट्टीकयोः । स्थलांतरस्थऋचोरंशान्वय

SGDF
Foundation

प्र० माह ॥ आदित्तइति ॥ ननुक्काप्येवंविधपदभंगादिरीतेरदर्शनात्कथंवाक्यमर्यादाभंगेनसर्वपदानांह्रौसमन्वयइत्यतआह ॥ अन्यत्रेति॥ उक्तेति ॥ तंयच्छतमित्यादिनोक्तेत्यर्थः । वचनशतंवाकथमसंभावितमेवंरूपानेकार्थमुपदिशेदित्यतआह ॥ तदुक्तमिति ॥ तृतीयस्यद्वितीयपादे "वचनात्त्वयथार्थमैंद्रीस्या"दितिद्वितीयेऽधिकरणउक्तमित्यर्थः । "ऐंद्र्यागार्हपत्यमुपतिष्ठत"इतिवचनसामर्थ्यादिंद्रोपस्थानशक्ताया अप्यृचोगार्हपत्यशेषतांप्रतिपाद्यतत्कथमित्यतःपठितमिदंवाक्यं किंहीति । नन्वस्तु "अग्निर्मूर्धे"त्यादीनांविनियोगबलादनेकार्थत्वं । "वसंत"इत्यादेस्तुकुतः । "तंयच्छत"मित्यादिनासर्वेषांविष्णुपरत्वस्यैवावगमेनतेनानेकार्थत्वाप्रतीतेरितिचेन्न । अभिधानव्याकरणादिभिःप्रमितस्यलोकेमुख्यत्वस्यविनैवबाधकंत्यागायोगादित्यादिनाप्रागेवोपपादितत्वात् । भगवतिकर्मदेवतादौचवाचनिकविनियोगोप्यस्तीत्याह ॥ सर्वोत्कर्षइति ॥ अवांतरंतत्परत्वं "तदन्यत्सर्वागमानांपुरुषार्थस्ततोत"इतिश्रुतिशेषः । तत्परत्वं तात्पर्यमित्यर्थः । तदन्यत् तदन्यत्रे

"आदित्तेहर्यताहरीववक्षतु"रित्यस्य "जुषाणइंद्रहरिभिर्नआगही"त्यादेश्च "आदित्तेहजुषाणइंद्रहरिभिर्नआगही"तिव्यतिषंगदर्शनाच्च । अन्यत्रादृष्टत्वेपिप्रकृतउभयार्थत्वस्योक्तश्रुत्यादिसिद्धत्वेनानिवार्यत्वाच्च । तदुक्तंशाबरभाष्ये "किंहिवचनंनकुर्यान्नास्तिवचनस्यातिभार"इति । वार्तिकेच "गौणंलाक्षणिकंवापिवाक्यभेदेनवास्वयं । वेदोयमाश्रयत्यर्थकोनुतंप्रतिकूलये"दिति । "सर्वोत्कर्षेदेवदेवस्यविष्णोर्महातात्पर्यंनैवचान्यत्रसत्यं । अवांतरंतत्परत्व"मित्यादिश्रुत्या, "परस्यवाचकाश्शब्दाः(भगवद्वाचकाःशब्दाः)समाकृष्येतरेष्वपि । प्रयुज्यंतेहिसततंलोकवेदानुसारत"इत्यादि ॥ ७८८ ॥

गु० तथाप्यभ्युपेत्यवादेनाह ॥ स्रुवामंत्रितइति ॥ अभ्युपेत्याह ॥ अन्यत्रादृष्टत्वेपीति ॥ ननुश्रुत्याद्युक्तमप्युभयार्थत्वंकथमंगीकार्यं ।विरुद्धत्वादित्यतआह॥

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यर्थः ॥ स्मृत्याचेति ॥ समाकर्षसूत्रभाष्योक्तपाद्यस्मृत्येत्यर्थः । ननु "अंधोमणिमविंद"दित्यादिकमिवश्रुत्युक्तमपिकथंयुज्यतामित्यतो दृष्टांतेनघटयति ॥ स्विष्टकृदिति ॥ विस्तृतमेतदक्षराधिकरणे । मंत्राधिकरणेहिक्रमप्रकरणाभ्यांमंत्राणामुपकारकत्वलक्षणांगत्वेसिद्धे किंविवक्षितार्थत्वमुताविवक्षितार्थत्वमितिसंदेहे तदर्थशास्त्रादिनाऽविवक्षितार्थत्वेप्राप्ते विवक्षितार्थत्वमितिसिद्धांतितं । तत्र "स्फ्येनोद्धंति स्वधितिनावद्यती"त्यादिनाश्रुतस्यस्फ्यादेरिवमंत्राणांक्रमप्रकरणाभ्यांकारकत्वेपिनतन्मात्रं किंतुद्रव्यदेवतास्मारकत्वमपीतियथोपादीयतेतथे त्यर्थः ॥ स्मारकत्वेपीति ॥ अनुभावकत्वेनैवप्रामाण्यस्यवक्तव्यत्वादितिभावः । "आत्मनोंगत्वबोधेनमंत्रःप्रामाण्यमश्नुते । अश्रुतेद्रव्य स्मृत्याचोभयार्थत्वावगमात् । स्विष्टकृदादीनांदृष्टादृष्टोभयार्थत्ववत् दध्यादीनांक्रत्वर्थत्वपुरुषार्थत्ववत् मंत्राणांस्फ्यादिद्रव्य तुल्यतयाकारकत्वेपिद्रव्यदेवतास्मारकत्ववत् स्मारकत्वेपि "आत्मनोंगत्वबोधेनमंत्रःप्रामाण्यमश्नुत"इत्युक्तत्वेनप्रामाण्यवच्चो भयार्थस्मारकत्वोपपत्तेश्च। किंचविधिमंत्राधिकरणवार्तिके "विनियुक्तमंत्राणामविधायकत्व"मितिशाबरभाष्यापातप्रतीतमर्थं प्र० योगादिकल्पनाच्चप्रमाणता । स्फुटैवार्थपरत्वेस्यादितिसर्वमसूसुव"दितिमंत्राधिकरणपूर्वपक्षराणकोक्तत्वेनेत्यर्थः ॥ प्रामाण्यवच्चेति ॥ प्रमारूपानुभवजनकत्ववच्चेत्यर्थः । ननु "तावाएता"इत्यादिप्रागुदाहृतवचनैःसर्ववेदानांब्रह्मबोधनेविनियोगेनब्रह्मपरत्वेकर्मविधायकत्वंन स्यात् । अन्यत्रविनियुक्तमंत्रगताख्यातानांकर्मस्वरूपाविधायकत्वस्यद्वितीयाद्यपादे "विधिमंत्रयोरैकार्थ्यमैकशब्द्या"दितिसप्तमेधिकरणेशा बरभाष्यएवोक्तेरित्यतआह ॥ किंचेति ॥ वार्तिकइत्यस्य इतिशाबरभाष्यापातप्रतीतार्थंदूषयित्वातात्पर्यमुक्तमित्यन्वयः । कस्तत्रापातप्र तीतार्थइत्यतआह ॥ विनियुक्तेति ॥ एवंहितदधिकरणशरीरं । "देवांश्चयाभिर्यजतेददातिच बर्हिर्देवसदनंदामि अग्नयेजुष्टंनिर्वपामी"

SGDF
Sri Gargeshwari Digital Foundation

प्र० तियच्छब्दोत्तमपुरुषादियुक्तानिमंत्रगताख्यातानिविधायकान्यभिधायकानिवेतिसंदेहे आख्यातत्वाविशेषात्प्रकृतकर्मापेक्षयाऽभ्यासा त्कर्मांतरविधायकानीतिप्राप्ते यच्छब्दादिनाविधिशक्तिप्रतिबंधान्मंत्रगताख्यातानिनविधायकानि । किंत्वभिधायकानीतिसिद्धांतइति। तत्रतद धिकरणसिद्धांतभाष्यस्यकर्मप्रकरणतयाब्राह्मणेनविनियुज्यमानत्वस्यव्रीह्यादावविधायकत्वेनव्याप्तिदर्शनान्मंत्राणामपिकर्मणिकरणतयाब्राह्म णेनविनियुज्यमानत्वात्तद्गतान्याख्यातानिनविधायकानीत्यापाततोर्थःप्रतीयते । तमर्थं "यस्माद्व्रीह्यादिवन्मंत्राःकरणत्वेनकर्मणां । ब्राह्मणे ननियुज्यंतेतद्वत्तेनविधायका"इतिश्लोकेनानूद्यश्लोकद्वयेनदूषणंकृतं । तदनुवदति ॥ **विधिशक्तिरिति** ॥ नियोगेन विनियोगेन । नियो गात् विनियोगादित्यर्थः । "नहिविनियुक्तेननविधातव्यमित्यत्रकिंचित्प्रमाणमस्ति यदिस्वतोविधिशक्तिरस्त्येषा"मित्यादिना वार्तिककृतैवाद्य

"विधिशक्तिर्नियोगेननमंत्रस्यापनीयते । स्वतोविधास्यतिह्येषनियोगात्स्मारयिष्यति । विधायकंसदप्यर्थंब्राह्मणंस्मारयत्यपि ।

प्र० श्लोकोव्याख्यातः । नचोभयकरणेविरोधइतिपूर्वोक्तमाक्षिप्यब्राह्मणस्योभयार्थत्वेनाविरोधोपपादनं "विधायक"मितिश्लोकेनकृतं । उपपा दितंह्येतत्पंचमाद्येपाठाधिकरणभाष्ये । तत्रहि "समिधोयजतितनूनपातंयजती"तिक्रमेणपठितानामनियमेनानुष्ठानमुतपाठक्रमेणेतिसंदेहे श्रुत्यर्थयोरभावात्पाठक्रमस्याविधायकत्वाद्विधीनांचपदार्थमात्रविधिपर्यवसानादनियमइतिप्राप्ते क्रमपठितेषुगंधपुष्पादिपदार्थेषुतथैवानुष्ठानं लौकिकाःप्रतिपद्यंते । वेदाच्चाध्ययनोपात्ताद्यत्प्रयोजनंशक्यतेकर्तुंतस्यसर्वस्यार्थेनवेदोपादानं । शक्यतेचविधिवाक्येभ्योपि संबंधनिमित्तंस्म रणंप्रयोगकालेपदार्थानांकर्तुमितितदपिप्रयोजनं । स्वाध्यायविधिविहितश्चपाठक्रमोविध्यवस्थायामनुपयुक्तोपिस्मृत्यवस्थायामुपयुज्यते । तथा पाठंचक्रियमाणंस्मरणंतत्क्रममेवभवति । स्मृतिकार्यंचानुष्ठानमितितस्यापिसएवक्रमइतिसिद्धांतइति । तथाच "समिधोयजती"त्यादिब्रा

प्र०ह्मणंस्वयंपदार्थविधायकंसदपि "संबंधित्वेनयत्सन्निधानेयोदृष्ट"इतिन्यायात्संबंधनिमित्तेनप्रयोगकालेर्थंस्मारयतीत्युभयंतत्रदृष्टमित्यर्थः । न नुतत्रैव "मंत्रतस्तुविरोधेस्यात्प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशस्स"इतिनवमाधिकरणेमंत्रब्राह्मणपाठक्रमविरोधेमंत्रपाठक्रमएवग्राह्योनतु ब्राह्मणक्रमः । तस्यविधायकत्वेनैवचारितार्थ्येनस्मारकत्वाभावादित्युक्तेस्तद्विरोधइत्यतआह ॥ **मंत्रतस्त्विति** ॥ मंत्रतस्त्वित्यादिसूत्रेयद्व दिष्यतिसूत्रकृत्तदत्रविरोधेसतिस्यान्नत्वविरोधइत्यर्थः । इत्यादिनेत्यादिपदेन "येचवचनेविनियुक्तास्तेचत्वत्पक्षेनिराकरणेहेत्वभावाद्विधाय काःप्राप्नुवंतीत्येतदप्यकारण"मित्येतद्वार्तिकंगृह्यते । अर्थांतरंस्वयमाह ॥ **यस्येति** ॥ **यच्छब्देति** ॥ तेनसिद्धत्वद्योतनेनविधिशक्तिप्रति बंधइत्यर्थः । यदिशब्दआदिपदार्थः ॥ **उत्तमेति** ॥ आत्मनैवात्मनोविधानायोगादामंत्रणस्यवक्त्रभिमुखश्रोतृविषयत्वाद्वेदेचवक्तुरभावाद्वि धिशक्तिलोपइत्यर्थः । उक्तंचवार्तिके "एषामाख्यातशब्दानांयच्छब्दाद्युपबंधनात् । विधिशक्तिप्रणाशःस्यात्तेसर्वत्राभिधायका"इति । राण केच "सिद्धत्वद्योतनाद्वक्त्रभिमुखासंभवाद्विधौ । आत्मनिप्रेरणायोगान्निमित्तत्वाभिधानतः । विधिशक्तिविहंतृस्याद्यच्छब्दादिचतुष्टयं ।

मंत्रतस्तुविरोधेस्यादित्यत्रैतद्वदिष्यती"त्यादिनादूषयित्वा "यस्योभयंहविरार्तिमार्च्छेद्यदिसोमंनविंदे"दित्या दिब्राह्मणवाक्येषुयच्छब्दादिभिरिव "दामि निर्वपामि अग्नीदग्नीन्विहरे"त्यादिमंत्रेषूत्तमामंत्रणादिभिर्विधिश क्तिप्रतिबंधादेवाविधायकता । नतुविनियोगेन । "देवांश्चयाभिर्यजतेददातिचे"तिमंत्रस्यापिगोदैवत्येयागे

गु० स्विष्टकृदादीनामिति ॥ उत्तमामंत्रणादिभिरिति ॥ दामि निर्वपामि इत्यत्रोत्तमपुरुषेणविधिशक्तिप्रतिबंधः । अग्नीदित्यत्रामंत्रणेनसंबोधनेनविधिश

SGDF Sri Gargeshwari Digital Foundation

प्र० प्राप्त्ययोगेतुतद्भावात्कचित्स्यादविहंतृते"ति ॥ **याज्यात्वेनेति** ॥ "नतानशंतिनदभातितस्करोनैनाअमित्रोव्यधिरादधर्षति । देवांश्चयाभिर्यजतेददातिचज्योगित्ताभिस्सचतेगोपतिस्सहे"त्यत्रयाभिर्यजतेयाश्चददाति ताश्चगावोननश्यंति नतस्करोहरति नचामित्रकृतोव्याधिरुपद्रवःपीडयति गोस्वामीच ताभिस्सह ज्योक्चिरकालं संसक्तोभवतीतिगोस्तुत्यर्थताप्रतीत्यालिंगेनतत्रविनियुक्तस्येत्यर्थः । ननु कर्मानुवादेनतत्स्मारकतयामंत्रस्यवचनेनविनियोगात्कर्मविधायकत्वानुपपत्तिरित्यतउक्तं **यस्मिन्निति** ॥ तथात्वेह्येकस्यविधेयत्वमनुवाद्यत्वंचविरुद्धमित्यर्थः । यच्छब्देनविधिशक्तिलोपस्तुब्राह्मणविषयइत्याह ॥ **यच्छब्देनेति** ॥ एतच्च "तत्रत्वेतावान्मंत्रब्राह्मणयोर्विशेषोदृश्यत"इत्यादिवार्तिकादवसेयं । अस्त्वेवंप्रकृतेकिमित्यतआह ॥ **एवंचेति** ॥ विनियुक्तस्यापिविधायकत्वेसतीत्यर्थः ॥ **विनियोगवदिति** ॥ "पारिप्लवंशंसती"तिपरिप्लवशब्दितानांसर्वमंत्राणांवचनेनविनियोगोयथातथेत्यर्थः । उक्तंचराणके "वाचस्तोमादौसर्वमंत्राणांवचनेनविनियोगोपिस्वार्थ

याज्यात्वेनविनियुक्तस्ययस्मिन्कर्मणिविनियोगस्तद्विधायकत्वाभावेपिगोयागेगोदानविधायितानविरुध्यते । यच्छब्देनविधिप्रतिबंधात्तुयस्योभयमित्यादिब्राह्मणवाक्यस्यैवनविधायकतेतिभाष्यस्यतात्पर्यमुक्तं । एवंचप्रकृतेपितत्रतत्रविनियुक्तानांसर्वमंत्राणांवाचस्तोमेविनियोगवत् "यद्वैकिंचैतदध्यगीष्टानामैवैत"दितिकृत्स्नवेदस्यब्रह्मणिविनियोगेनब्रह्मपरत्वं स्वतःकर्मादिरूपार्थांतरपरत्वंचास्तु ।

गु० क्तिप्रतिबंधइत्यर्थः । भाष्यस्यापातप्रतीतार्थत्वेकस्तदर्थइत्यतआह ॥ **यच्छब्देनेति** ॥ वाचस्तोमोयागविशेषः । ननुदृष्टांतदार्ष्टांतिकयोर्वैषम्यं । दृष्टांतउभय

SGDF
Sri Gargeshwari Digital Foundation

प्र० विधायित्वाविरोधा”दिति । ननु मंत्राणामुभयत्रविनियोगबलादस्त्वेवमित्यतआह ॥ अस्तिचेति ॥ अवांतरमिति ॥ विष्णोरन्यत्रेत्य न्वयः । अस्त्वेवंपदानांभगवन्नामत्वं वर्णादेःकुतइत्यतोयुक्त्यंतरंचाह ॥ अतएवेति ॥ अध्ययनविधेः “स्वाध्यायोध्येतव्यइत्यादेः । अर्थ ज्ञानफलकत्वस्य “धर्मजिज्ञासे”त्यत्रैवोक्तेरितिभावः । “जातमोतंहरौयस्माज्ज्योतिष्यःप्राणरूपत”इत्याद्यनुव्याख्यानोक्तयोगेबाधकमाशंकते ॥ नचेति ॥ आचार्योक्तपदविभागस्यापिप्रामाणिकत्वेनेदानीमनुपयोगेनाशक्यत्वेनचानध्ययनेप्यधिकारिणामध्ययनमस्त्येवेतिभावेनपरि हरति ॥ कश्छंदसामिति ॥ कः नकोपि । कः ब्रह्मैवेत्यर्थादितिभावः । अन्यथापिनिर्वक्तुंशक्यत्वादित्थमेवेतिकुतइत्यतआह ॥

अस्तिचप्रकृतेऽर्थांतरेपिविनियोगः । “अवांतरंतत्परत्व”मित्यादिश्रुतेः । अतएववर्णस्वरादिसमन्वयादेववर्ण क्रमस्वराद्यध्ययनं । अन्यथातदंशेऽध्ययनविधेरदृष्टार्थत्वंस्यात् । अतएवच “वेदाक्षराणियावंतिपठितानिद्विजा तिभिः । तावंतिहरिनामानिकीर्तितानिनसंशय”इत्यध्यापकप्रसिद्धिः । यदिचोक्तप्रमाणप्रसिद्धोपिवाक्यांतरेष्व दृष्टत्वाद्वेदेपदादिसमन्वयोनस्यात्तर्हिवाक्यांतरेष्वदृष्टत्वात्पदक्रमाद्यध्ययनमपिवेदेनस्यात् । नच ज्योतिष आ यजेत इतिपदच्छेदे ज्योतिषा यजेत इत्यादिपदाध्ययनविरोधः । “कश्छंदसांयोगमावेदे”तिश्रुत्यायोगवृत्त्या पदसमन्वयस्यासर्वाधिकारित्वोक्तेःप्रायेणसर्वेषांवाक्यसमन्वयएवाधिकारेणतदुपयुक्तपदानामेवाध्ययनात् ।

गु० त्रविनियोगवद्वार्थ्यंतिकेतदभावादित्यतआह ॥ अस्तिचेति ॥ अतएवेत्यस्यविवरणंस्वरवर्णादिसमन्वयादिति ॥ अतएवेति ॥ स्वरवर्णादीनांसर्वेषांभगवति

SGDF
Sri Gargeshwari Digital Foundation

प्र० जातमिति॥ प्रमाणैरुपपादितमप्यधिकरणप्रमेयमसंभावनांपरिहरन्नुपसंहरति ॥तस्मादिति॥ श्लोकेनान्वयः । अत्रटीकायां "ज्योतिरादिशब्दानामन्यत्ररूढिर्योगोयोगरूढि"रित्यादिनावृत्तिसप्तकमुपेत्यतल्लक्षणोदाहरणाभ्यांप्रपंच्य "एतावृत्तयोलोके । हरौतुमहायोगोमहारूढियोगश्चे"त्यादिनाहरावुदाहरणहेतूक्तिभ्यांवृत्तिद्वयमुपपादितं । तन्मूलोक्तिपूर्वकंहरौवृत्तिद्वयोक्तिपरटीकांव्यनक्ति ॥ अत्रेति ॥ आद्य इति ॥

"जातमोत"मित्यनुव्याख्यानोक्तंनिर्वचनंचगुणप्रकाशकत्वाद्गुणज्ञापनेप्रवृत्तया "तंयच्छत"मित्यादिश्रुत्योपलक्षणपरयाविवक्षितमितिनदोषप्रकाशकनिर्वचनांतरोत्प्रेक्षायुक्ता। तस्मात् आम्नायस्यप्रमाणस्यप्रमेयस्येश्वरस्यच । अलौकिकत्वादुचितःसंबंधोऽलौकिकस्तयोः ॥ १ ॥ अत्रन्यायविवरणेशब्दानांब्रह्मणिमहायोगोमहारूढियोगश्चेतिवृत्तिद्वयं । लोकेतुरूढिर्योगोयोगरूढीरूढोपचारोरूढलक्षणोपचारोलक्षणेतिवृत्तिसप्तकमित्युक्तं । तत्रचान्यत्रप्रसिद्धानामिंद्रादिशब्दानांब्रह्मणिमहायोगः । प्रवृत्तिनिमित्ताधिक्यात् । तदेकनिष्ठानांनारायणादिशब्दानांतुमहारूढियोगः । प्रयोगबाहुल्यान्निमित्ताधिक्याच्च । महारूढिस्तुनसंभवति । "सायोगादेवलभ्यत"इत्यनुव्याख्यानेब्रह्मणिविद्वद्रूढेर्योगंविनाभावोक्तेः। इंद्रादिशब्दानामपिब्रह्मणिविद्वद्रूढेःसत्त्वेपिनारायणादिशब्दानामिवाविद्वद्रूढेरसत्त्वात्ततोभेदः। इतरवृत्तिसप्तकस्वरूपंतुटीकाकारैरेवात्रसुधायांचव्युत्पादितं। अत्रचाद्येसूत्रेस्वपक्षसाधकोक्तिः।

गु० समन्वयादेवेत्यर्थः । ज्योतिरादिशब्दानांप्रकारांतरेणापिनिर्वचनसंभवात्कथंगुणलाभइत्यतआह ॥जातमोतमित्यादिना॥ टीकायांन्यायविवरणानुसारेणब्रह्मणिमहायोगोमहारूढियोगश्चोक्तौ । तत्रमहारूढियोगोक्तावपिमहायोगस्यपृथगुक्तिवन्महारूढिरपिपृथग्वक्तव्यैव । अन्यथामहायोगोपिपृथङ्नवक्तव्यस्स्यादित्यनु ॥ ७९१ ॥

प्र० ज्योतिरुपक्रमात्तुतथाह्यधीयतएकइत्यत्र । "ज्योतिष्टोमादिकर्मतदंगवाचकत्वेनप्रसिद्धज्योतिरादिशब्दाभिधेयोहरिरेव । यस्मादेकेशाखिनस्तावाएताइति तथासर्वशब्दाभिधेयत्वेनहरिमेवाधीयत"इतिटीकोक्तेस्सर्वशब्दाभिधेयत्वेनाधीयमानत्वादितिसाधकोक्तिपरत्वादाद्यत्वमित्यर्थः । "ज्योतिश्शब्दस्याप्रथमपठितत्वेपिप्रधानकर्माभिधायकत्वात्तस्यैवान्योपलक्षकत्वसंभवाच्चसंग्रह"इतिटीकावाक्यंव्यनक्ति ॥ तत्रयद्यपीति ॥ टीकायामस्फुटत्वादाह ॥ उपक्रमादितीति ॥ ल्यब्लोपनिमित्तापंचमीवाच्येतिवार्तिकोक्तेरितिभावः । द्वितीये कल्प

तत्रयद्यपिविषयवाक्येवसंतादिशब्दःप्रथमस्तथापिकर्मांतरप्रकृतित्वफलकारणत्वादिनाप्रधानभूतज्योतिष्टोमवाचित्वात्सूत्रेज्योतिशब्दःप्रयुक्तः । उपक्रमादितिपंचमील्यब्लोपनिमित्ता । अतएवसुधायां "उपक्रमंविधाये"त्युक्तं । द्वितीयेबाधकोद्धारः । अत्रच "कल्पनोपदेशा"दित्यस्यलोकतःक्लृप्ततत्तद्वाचित्वमबाधित्वैवलोकक्लृप्तयोगवृत्तेःकल्पनयाव्युत्पादनेनब्रह्मणःसर्वशब्दवाच्यत्वेनोपदेशादितिवा ब्रह्मणःसर्वशब्दवाच्यत्वेनकल्पनायाउपासनायाउपदेशादितिवार्थः

प्र० नोपदेशाच्चमध्वादिवदविरोधइत्यत्र कर्मक्रमादिविरोधाद्व्युत्पत्त्यसंभवाच्चनज्योतिरादिशब्दार्थत्वंविष्णोरितिशंकानिवर्तकतयाटीकायामवतारितत्वादितिभावः । टीकोक्तमर्थद्वयंकल्पनाशब्दारूढतयादर्शयति ॥ तत्रचेति ॥ नन्वस्यसूत्रस्यकथमत्रनिवेशः । ज्योतिरादिशब्दानांभगवद्वाचित्वेकर्मक्रमादिविरोधइव पूर्वत्रदेवतातारतम्यस्यासिद्धिरुत्तरत्रचदेहतदंतर्गतप्राणादेर्भूतोत्पत्तेःप्रकृत्यादेरसिद्धिरितिबाधकस्यचानेनैवपरिहार्यत्वेनसर्वशेषतयैतत्पादस्यादावंतेवानिवेशस्योचितत्वात् । सत्यं । अत्रकल्पनेतिसूत्राभावेऽन्यत्ररूढेरसिद्ध्याज्ज्योतिरादिशब्दा

SGDF Foundation

प्र० नामवयवरूढेरभावेनव्युत्पत्त्यनुपपत्त्याविवक्षितसर्वसमन्वयोत्रनसिद्ध्येदितिसिद्धांतानुत्थितिरेवस्यात् । अतएवोक्तंटीकायां "व्युत्पत्त्यसंभवाच्चे"त्येतदवतारिकायां । तथाचैतस्यसर्वसाधारण्येप्युक्तरीत्यातच्छेषत्वेननिवेशोयुक्तइतिभावः । **यदत्रकेनचिद्रामानुजमतानुवर्तिनोक्तं** उपक्रमादित्यपपाठः । ब्रह्मोपक्रम्याधीयतइतिब्रह्मपदाध्याहारश्चाद्यसूत्रेदोषः । द्वितीये "कल्पनोपदेशा"दितिव्यर्थं । लोकक्लृप्तार्थांतरवाचित्वाविरोधस्यविरोधहेतुत्वेनपूर्वसूत्रसिद्धार्थानुवादरूपस्यास्याविरोधहेत्वर्थानुपस्थापकत्वात् । दृष्टांतश्चायुक्तः । मधुशब्दस्यमधुसदृशपरतयामधुपरत्वाभावादिति **तन्न** । ज्योतिरुपक्रमेत्येवसुपाठ उपक्रमादित्यपपाठइत्यस्यार्वाचीनेनत्वयानिर्णेतुमशक्यत्वात् । प्रत्युत "दशप्रमति"मित्यादिश्रुत्यादिनासर्वज्ञत्वेनप्रमितास्मदाचार्योक्तपाठस्यैवसुपाठत्वेनानीदृशत्वद्भाष्यकारोक्तपाठस्यैवापपाठत्वात् । त्वद्भाष्यकारस्यस्खलितवाक्त्वस्यप्रतिसूत्रंग्रंथकृताप्रदर्शितत्वात् । त्वदुक्तास्मदाचार्योक्तिस्खालित्यस्यासंबद्धतायाःप्रदर्शितत्वात् । प्रतिनयंब्रह्मार्पकस्यतत्त्विवतिपदस्याध्यायसमाप्त्यनुवृत्त्याऽध्याहाराभावात् । द्वितीयेलोकसिद्धार्थाविरोधहेतुभूतार्थांतरस्यकल्पनापदेनोपस्थित्याऽनुपस्थापकत्वादिति त्वदुक्तहेत्वसिद्धेः । अतएवोक्तं "लोकतःक्लृप्ततत्तद्वाचित्वमबाधितैवे"त्यादि । मध्वादीत्यस्यमध्वादिशब्दवदित्यर्थपरत्वेनमधुसदृशपरत्वाभावात् । एतेनसमन्वयसूत्रेसर्वपदानांवा सर्ववाक्यानांवासमन्वयइत्यादिविकल्पेनदोषोत्कीर्तनमप्यसंबद्धंबोध्यं । अनंतवेदराशेःपदादिविधयावाक्यविधयाचद्वरौसमन्वयप्रतिज्ञानेनानंदमयनयादौवाक्यसमन्वयाशयेन अत्रतुपदसमन्वयाभिप्रायेणविचारप्रवृत्तेरभिमतत्वात् । पूर्वत्राव्यक्तनयेवाक्यमर्यादयासतएवतस्यवाक्यस्यब्रह्मणिसमन्वयोपगमात् । मतद्वयेपि "चमसव"दित्यादित्रिसूत्र्येकमधिकरणं । तत्राद्वैतिमतमनु

SGDF
Sri Gargeshwari Digital Foundation

प्र० वदति ॥ अन्येत्विति ॥ श्वेताश्वतरेति ॥ अजाशब्दस्यछाग्यांरूढत्वात्कःप्रधानादिचिंताप्रसंगइत्यतोऽध्यात्मविद्याप्रकरणस्थत्वान्नरूढे रत्रग्रहणमितिसूचयितुमेवत् । तदुक्तंभाष्ये ''विद्याप्रकरणा''दिति । भामत्यांच ''आत्मविद्याधिकारान्नचतत्रवर्तितुमर्हती''ति । रूढिस्या गेहेत्वंतरं प्रजेति । छाग्यांप्रजासृष्टेरयोगात् । अविशेषादितिसूत्रखंडार्थमाह ॥ इयमिति ॥ चमसवदित्यंशस्यार्थमाह ॥ यथेति ॥

॥ अन्येतु ॥ ''अजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजाःसृजमानांसरूपा''इतिश्वेताश्वतर वाक्यस्थाप्रजास्रष्टृत्वेनोक्ताऽजासांख्याभिमतात्रिगुणाप्रकृतिरितिप्राप्ते इयमजासांख्याभि मतेतिननिश्चेतुंशक्यं । अजात्वादेःसर्वत्रापिकथंचित्सुसंपादत्वात् । विशेषहेतोश्चाभावा त् । यथा ''एषह्यर्वाग्बिलश्चमस''इत्यत्रायंनामासौचमसइतिनिश्चेतुमशक्यं । अर्वा ग्बिलत्वादेःसर्वत्रापिकथंचित्सुसंपादत्वात् । विशेषहेतोश्चाभावादितिचमससूत्रेणोक्त्वा ज्योतिःसूत्रेणप्रत्युतेयमजाज्योतिरुपक्रमैव तेजआदिरूपैव । नतुसांख्याभिमता ।

प्र० अर्वाग्बिलइत्येतन्नामकैवंरूपंचमसस्ययथानिर्णेतुमशक्यंतथेत्यर्थः । ''ननु तत्रतु ''इदंतच्छिरीरएषह्यर्वाग्बिलश्चमसऊर्ध्वबुध्न''इतिवाक्यशे षाच्चमसविशेषप्रतीतिर्भविष्यति । इहपुनःकेयमजेत्यतोब्रूम''इत्यवतार्यभाष्येभिहितंज्योतिस्सूत्रार्थमनुवदति ॥ प्रत्युतेति ॥ प्रधानभिन्नै वाजानिर्णेतुंशक्यतइत्यर्थः । उपक्रमशब्दःप्रभृतिवाचीतिमत्वाह ॥ तेजआदिरूपैवेति ॥ तेजोबन्नलक्षणभूतत्रयरूपैवेयमजानगुणत्रय

SGDF
Sri Gargeshwari Digital Foundation

प्र० लक्षणेत्यर्थः । तथाहीत्यादिसूत्रांशार्थमाह ॥ यदिति ॥ श्रुत्यंतरे छांदोग्ये । प्रकृतिपक्षे सांख्याभिमतप्रधानपक्षे । रजःप्रभृतिषुलौहित्यादिवर्णानामभावेन "लोहितंकुसुंभादिरंजयति रजोपिरंजयतीतिलोहितं । प्रसन्नंपाथःशुक्लं सत्वमपिप्रसन्नमितिशुक्लं । आवरकंमेघादिकृष्णं तमोप्यावरक"मितिभामत्युक्तरीत्यागौणत्वापत्तेरित्यर्थः । तृतीयसूत्रार्थस्वयमेवाग्रेवक्ष्यति । आद्यसूत्रार्थोऽयुक्तइत्याह ॥ इदमिति ॥ ज्योतिस्सूत्रार्थमपिनिराह ॥ ब्रह्मेति ॥ चिंतायाअतिव्याप्तिनिरासःफलं । यथोक्तं "त्रिपाद्यामसंभवनिरासः । चतुर्थेऽतिव्याप्तिनिरास"

"यदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्ये"तिश्रुत्यंतरेतेजोबन्नानामेवलोहितशुक्लकृष्णरूपवत्त्वेनाधीतत्वात् । प्रकृतिपक्षेलोहितादिशब्दानांरजआदौगौणत्वापत्तेश्चेतिसमाहितं । चमससूत्रंचज्योतिरधिकरणशेषइत्याहुः ॥ तन्न ॥ "इदंतच्छिरएषह्यर्वाग्बिलश्चमस"इत्यत्रशिरोरूपविशेषपरत्वस्यस्फुटत्वेनाविशेषेदृष्टांतत्वायोगात् । ब्रह्मलक्षणस्यकारणत्वस्यप्रधानेनातिव्याप्तिः किंतुतेजोबन्नेष्वितिसमर्थनस्यनिष्फलत्वाच्च । किंच अजाचेज्ज्योतिरादिः स्यादजैकत्वाद्यसंभवः । अविद्येतितुपक्षेस्याल्लोहितत्वाद्यसंभवः ॥ १ ॥ इयमजासिद्धांतेकिंतेजोबन्नरूपाकिंवा

प्र० इति । प्रधाननिरासेपितेजोबन्नानीत्युक्त्याऽतिव्याप्तिसमर्थनमेवफलितं । तच्चव्यर्थमित्यर्थः । अतोब्रह्मपरमित्येववाच्यमन्यद्वोदाहार्यमितिभावः । तदुक्तमनुव्याख्याने "अजामेकामितिप्राहश्रुतिरेतांयदातदा । कोदोषस्सर्वथैवास्तिपरिणामिजडंयदी"ति । अतिव्याप्तिनिरासस्योभयत्राप्यभावादितिभावः । नकेवलंनिष्फलं । अयुक्तंचतेजोबन्नपरत्वसमर्थनमितिभावेन "किंचतेजोबन्नेपुनतावदजाशब्दोरूढ"इत्यादिसुधावाक्यंविवृण्वन्दोषांतरमाह ॥ किंचेति ॥ श्लोकंव्याचष्टे ॥ इयमिति ॥ किंतेजइति ॥ मायाऽविद्याशब्दितपरमप्रकृतिजन्यावां ॥ ७९३ ॥

प्र० तरप्रकृतिरूपेत्यर्थः ॥ अविद्येति ॥ तत्कारणपरमप्रकृतिरूपेत्यर्थः ॥ जनिमत्त्वादिति ॥ एतेनाजैकत्वेत्यत्राजात्वैकत्वेतिव्याख्यातं ॥ छागीत्वमिति ॥ अजाशब्दस्यछाग्यांरूढत्वेनतदाकारस्यतेजोबन्नेष्वभावादितिभावः । छागीति "जातेरस्त्रीविषयादयोपधा"दितीकारांतंसाधु । आहचामरोपि "अजाछागीशुभच्छागवस्तच्छगलकाअज"इति । सुधायांच "अजाशब्देनरूढत्वाच्छागीस्वीकर्तुमुचिते"तिप्रयुक्तं ।

ऽविद्यारूपा । नाद्यः । तेषांजनिमत्त्वादनेकत्वाच्च "अजामेका"मित्याद्ययोगात् । नचत्रिवृत्करणादेकत्वं । "तासांत्रिवृतंत्रिवृतमेकैकांकरवाणी"तिप्रत्येकंत्रिवृत्करणश्रवणेनत्रिवृत्कृतसमुदायानामपित्रित्वात् । नन्वेतत् "कल्पने"तिसूत्रेणैवपरिहृतं । यथा "आदित्योवादेवतामध्वि"त्यादावादित्येमधुत्वं कल्प्यते तथातेजोबन्नेष्वजात्वंछागीत्वंकल्प्यतइत्यस्यार्थइतिचेत् कल्पनाऽऽरोपोवागौणीवृत्तिर्वा । नाद्यः । पामरमनोरंजनार्थकाव्यादाविवश्रुतिषुकल्पनोपदेशेफलाभावात् । अन्यथासांख्याभिमतप्रकृतावेवलोहितत्वाद्यारोपइतिस्यात् । देवमध्वित्यादिकंतुमधुशब्दवाच्यत्वपरमित्युक्तं ।

प्र० एवंचपरभाष्येभामत्यांच "छागायांरूढ"इति "छागातोपकृष्टस्ये"तिकल्पतरौचाकारांतप्रयोगोपभ्रंशइतिसूचितं । कल्पनेत्यनुवादः । आरोपोगौणीवृत्तिर्वेति तस्यव्याख्यानविकल्पः । सुधोक्तदोषमाह ॥ पामरेति ॥ कथंतर्हिसौत्रदृष्टांतइत्यतआह ॥ देवेति ॥ इत्युक्तमिति ॥ "उपजीव्यंप्रसिद्धार्थ"मित्यादिनापूर्वत्रैवोक्तमित्यर्थः । अन्यथा "पामरजनमनोरंजने"त्यादिनोक्तदोषस्याप्यत्रापातादितिभावः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० अनन्यगत्यैवमाश्रीयतइत्यतआह ॥ **नचेति** ॥ **योगस्येति** ॥ तत्संभवश्चवक्ष्यतइतिभावः । श्रुतिषुकथमेवंकल्पनेत्यतआह ॥ **शरीरमिति** ॥ ननु प्रधानपक्षेलोहितादिशब्दानांगौणत्वंदोषइत्यतआह ॥ **लोहितेति** ॥ अजैकत्वादीत्यादिपदार्थंविवृण्वन्समाख्यानासंभवं चाह ॥ **किंचेति** ॥ **श्रुत्यंतरेति** ॥ आथर्वणोपनिषद्गतश्रुत्यंतरेत्यर्थः । अतएवोक्तंसुधायां "गौरनाद्यंतवतीसाजनित्रीभूतभाविनी । सितासिताचरक्ताचसर्वकामदुघाविभोरित्यादिश्रुतिसमाख्ययानिर्णयोपपत्तेरिती"तिभावः । गौरपितेजोबन्नरूपैवास्त्वित्यतआह ॥ **साचेति** ॥ **अनाद्यंतवतीत्वादिति** ॥ तेजोबन्नस्यजनिमत्त्वेनातथात्वादितिभावः । नन्वनाद्यंतवत्त्वादितिभवितव्यं । कथमनाद्यंतवतीत्वादिति । "त्वतलोर्गुणवचनस्ये"तिपुंवद्भावोक्तेरितिचेदुच्यते । अनुक्रियमाणरूपविनाशप्रसंगात् "खलर्थतृना"मितिवदेवमुक्तं । यद्वा गुणवचन

नचाजाशब्दोऽनन्यगतिकः योगस्यसंभवात् । "शरीरंरथमेवच गौरनाद्यंतवती"त्यादौतुशरीरप्रकृत्यादौरथगवादिशब्दागौणाः । नत्वारोपनिमित्तकाः । नद्वितीयः । योगेनमुख्यत्वसंभवेगौणत्वायोगात् । लोहितादिविशेषणशब्दानामेवप्रकृतौगौणत्वस्यन्याय्यत्वेनविशेष्यतयाप्रधानभूताजाशब्देतस्यान्याय्यत्वाच्च । किंच "गौरनाद्यंतवतीभूतभाविनीसिताऽसिताचरक्ताचे"तिश्रुत्यंतरोक्तैवेहप्रत्यभिज्ञायते । साचानाद्यंतवतीत्वान्नतेजोबन्नरूपा ।

गु० पपत्तिरिवप्रतीयते । तांपरिहर्तुंटीकामनुवदति ॥**अत्रन्यायविवरणइति**॥ नन्वजाशब्दस्यप्रकारांतरासंभवादजात्वारोपोऽभ्युपगम्यंतइत्यतआह ॥ **नचेति**॥ ॥ ७९४ ॥
नन्प्रकृतिपक्षेलोहितादिशब्दानांरजआदौगौणत्वापत्तिरित्यतआह ॥ **लोहितादिविशेषणशब्दानामिति** ॥ **उक्तेति** ॥ कल्पनारोपोगौणीवृत्तिर्वेत्यादिनो

SGDF
Sri Gargeshwari Digital Foundation

प्र० ग्रहस्यजातिव्यावृत्तिपरत्वेनाभियुक्तैर्व्याख्यानादनुकरणशब्दस्यचानुक्रियमाणशब्दगतजातिनिमित्तकत्वादेवागुणशब्दत्वेनापुंवद्भावादना द्यंतवतीत्वादितिसाधु। उक्तंचकैयटे "ऋल"गितिसूत्रे "अनुक्रियमाणशब्देयाजातिस्समवेतातत्संबद्धमनुकार्यमनुकरणंप्रत्याययती"ति। यद पिगौणत्वापत्तिरितितदपिनेत्याह ॥ लोहितेति ॥ "तेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढा"मितिश्वेताश्वतरएवपूर्वश्रवणादि

लोहितादिशब्दानांरूपपरत्वंचायुक्तं। "देवात्मशक्तिंस्वगुणैर्निगूढा"मितिवाक्यशेषेसत्त्वादिषुप्रसिद्धगुणशब्दश्रवणात्। स्वीकृताचत्वयापिशक्तिवाक्यस्याविद्यापरता। नाप्यविद्येतिद्वितीयः। तत्रलोहितादिरूपाभावात्। कार्यावस्थायांरूपाश्रयत्वंतुप्रकृतावपियुक्तं। ज्योतिरित्यादिसूत्रद्वयविरोधश्च। तस्य अजातेजोबन्नरूपेत्येवंपरत्वेनत्वयाव्याख्यातत्वात्। किंचत्रिगुणमनादिभावरूपंप्रकृत्यादिसंज्ञंजगदुपादानंत्वयापिस्वीकृतं। सांख्याभिमतंतुस्वातंत्र्यंद्वितीयेसांख्यप्रक्रियायांनिरसिष्यते। निराकृतंच "तदधीनत्वा"दित्यत्रेतिव्यर्थमिदमधिकरणं। तदुक्तमनुव्याख्याने "तेजोबन्नात्मकंवापियद्युपादानमिष्यते। अनाद्येवापराधःकःप्रधानमितिचोदित"इति।

प्र० तिभावः। अविद्येत्याद्युत्तरार्धंव्यनक्ति ॥ नापीति ॥ द्वितीयपक्षेदोषांतरमाह ॥ ज्योतिरिति ॥ तस्य सूत्रद्वयस्य। किंसिद्धांतेप्रधानस्वरूपस्यैवनिरासउतस्वातंत्र्यस्येतिविकल्प्यक्रमेणनिराह ॥ किंचेति ॥ सांख्येति ॥ समयचरणइत्यर्थः। एतेन "किंचे"त्यादिना "तेजोबन्नानिपरमेश्वराधीनानि। अतोनातिव्याप्तिरितिचे"दितिसुधावाक्यंविवृतंभवतीतिध्येयं ॥ तदुक्तमिति ॥ एतेनोक्तंसुधावाक्यं

SGDF
Sri Gargeshwari Digital Foundation

प्र० तन्मूलमितिसूचितं । चमससूत्रार्थःप्रागेवनिरस्तइति ज्योतिस्सूत्रार्थानुपपत्तिमाह ॥ ज्योतिरिति ॥ उक्तेति ॥ कल्पनाऽऽरोपइत्यादि ग्रंथइत्यर्थः ॥ केचित्त्विति ॥ अजामेकामित्यादिमंत्रोक्ताजाकिंस्वतंत्रप्रकृतिरुतब्रह्माधीनप्रकृतिरितिसंशये अजेत्यकार्यत्वश्रवणात्सृजमानामितिस्वतंत्राख्यकर्तृशानचापरतंत्रसृष्टिप्रतीतेश्चकेवलप्रकृतिरितिप्राप्ते तन्निरासकतयाचमससूत्रार्थःपररीत्यैवोक्तइत्यर्थः । एतेन सुधायां "कश्चिज्ज्योतिरुपक्रमेत्येतदन्यथाव्याचष्ट"इत्यादिनारामानुजमतेज्योतिस्सूत्रार्थमात्रानुवाददूषणयोरुक्तिश्चमससूत्रार्थस्यप्रागुक्ताद्वैतिमतदोषे ज्योतिःसूत्रे उपक्रमेत्यपपाठाश्रयणेह्यजापदमध्याहार्यं । तेजसस्तद्रूपमितिश्रुत्यनुगमायचलाघवायचतेजआदिरितिचसूत्र्येत । कल्पनेतिसूत्रेऽनुपपत्तिस्तूक्तेति ॥ केचित्तु ॥ चमससूत्रस्यपरोक्तएवार्थः । ज्योतिस्सूत्रस्य ज्योतिर्ब्रह्म । इयमजाज्योतिरुपक्रमा ब्रह्मकारणिका । तैत्तिरीयशाखायां "अणोरणीया"नित्यादिनाब्रह्मोक्त्वा "सप्तप्राणाःप्रभवंतितस्मा"दित्यादिना ततःसृष्टिं चोक्त्वा "अजामेका"मितिमंत्रेब्रह्मकार्याह्यजाऽधीयतइत्यर्थइत्याहुः। तन्न। अजामितिमंत्रेऽजायाब्रह्मकार्यत्वाप्रतीतेः । ननु यथा "समिधोयजती"त्यादावंगत्वाश्रयणेपिदर्शपूर्णमासप्रकरणात्तदंगता तथात्रापिसृष्टिप्रकरणादजायाःसृज्यत्वमितिचेन्न। सृष्टिप्रकरणेपितदाकांक्षितोपादानत्वेनाप्यजायाउक्तिसंभवेनसृज्यत्वासिद्धेः। समिदादिस्त्वंगत्वेनैवदर्शाद्याकांक्षितइतिवैषम्यं।
प्र० णदुष्टत्वाशयेतिसूचितं । तदधीनग्रहणेकोहेतुरित्यतोद्वितीयसूत्रार्थमन्वाह ॥ ज्योतिरिति ॥ इतिमंत्रे तैत्तिरीयगते । श्रुतप्रकाशोक्तमाशंकते ॥ नन्विति ॥ प्रकरणादिति ॥ इतिकर्तव्यताकांक्षारूपप्रकरणादित्यर्थः ॥ सृष्टिप्रकरणादिति ॥ बह्वीःप्रजाजनयंतीमित्युत्तरत्रसृष्टिश्रवणात्सर्वसृष्टिप्रकरणमेवेतिज्ञायतइत्यर्थः ॥ अंगत्वेनैवेति ॥ तृतीयाध्यायस्यतृतीयपादे "असंयुक्तंप्रकरणादितिकर्तव्यता ॥ ७९५ ॥

प्र० र्थित्वा"दितिचतुर्थाधिकरणसूत्रोक्तेतिकर्तव्यतापदप्रयोगात् भाष्येच "यदितिकर्तव्यताकांक्षिणस्सन्निधौपरिपूरणसमर्थमुपनिपततिवचनं तत्तेनप्रकृतेनसहैकवाक्यतांयाती"त्युक्तेरंगत्वेनैवसमिदादीनामाकांक्षितत्वादिहतूपादानत्वेनैवाकांक्षितत्वमितिभावः । यथाहिपरसिद्धांतेप्रधाननिरासःश्रुत्यादिविरुद्धइतिदर्शयितुंत्वद्भाष्येयच्छ्रुत्याद्युदाहृतंतद्विरोधादेवत्वत्सिद्धांतोप्ययुक्तइत्याह ॥ किंचेति ॥ सुधोक्तंदोषांतरमाह ॥

किंच प्रकृतेःकार्यत्वे "गौरनाद्यंतवती प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपी"त्यादिश्रुतिस्मृतिविरोधः । अजात्वविरोधश्च । ननुप्रकृतेःकारणात्मनाऽजात्वं । स्वकार्यभूततेजोबन्नात्मनाकार्यत्वलोहितत्वादि । अतएवनश्रुत्यादिविरोधोपीति "कल्पने"तिसूत्रएवोक्तं। तत्रकल्पनाशब्दस्य "यथापूर्वमकल्पय"दित्यादाविवसृष्टिपरत्वादितिचेन्न । अजात्वलोहितादित्वयोःस्वतःप्राप्तैकविषयत्वत्यागेनावस्थाभेदेनविभिन्नविषयत्वायोगात् । अजांसृजमानामितिकारणावस्थायामेवलोहितत्वादिप्रतीतेश्च। किंच प्रकृतिस्वरूपंत्वयाऽपिस्वीकृतं। सांख्याभिमतंतुस्वातंत्र्यं "तदधीनत्वा"दित्यत्रनिरस्तं । एवंचाजायाःप्रकृते "ज्योति"रितिसूत्रेब्रह्मकार्यत्वमनुपयुक्तमेवोक्त्वातन्निर्वाहाय "कल्पने"तिसूत्रेऽजात्वकार्यत्वयोराकारभेदेनाविरोधसमर्थनंव्यर्थमेवेति ॥ टीकाक्षरार्थस्तु ॥

प्र० किंचेति ॥ एतेनप्रायोरामानुजरीतिमनुसरतःकस्यचिच्छैवस्यमतमपिप्रत्युक्तंध्येयं । तथाहि । किमजास्वतंत्राशिवाधीनावेतिसंदेहे जननाभावादिनासांख्याभिमतेतिप्राप्ते तन्निरासकतयायथाचमसशब्दस्यचम्यतेऽनेनेतियोगेनभक्षणसाधनमात्रपरस्यशिरःपरत्वेयथाविशेषकमस्ति "इदंतच्छिर"इतितत्प्रकरणेवाक्यं एवमत्रप्रधानग्रहणेविशेषहेतुर्नेतिचमससूत्रार्थमुक्त्वाज्योतिरादिसूत्रस्यरामानुजोक्तमेवाभिधेयमुक्तं ।

SGDF Sri Gargeshwari Digital Foundation

प्र० तदयुक्तं । गौरनाद्यंतवतीतिश्रुत्यंतरोक्तप्रत्यभिज्ञानस्यैवविशेषहेतोस्सत्वात् । नचप्रकरणेसनास्तीतिवाच्यं । प्राकरणिकेनैवतेनभाव्यमित्यत्रनियामकाभावात् । द्वितीयार्थोप्ययुक्तः । “अणोरणीया”नित्यत्रोक्ताजायाःकार्यत्वाप्रतीतेस्समिदादिवैषम्यस्यमूलग्रंथएवस्फुटत्वात् । यदत्रोक्तंशिवार्कमणिदीपिकायां यथादर्शपूर्णमासप्रकरणेपठितं “ताभ्यामेतमग्नीषोमीयमेकादशकपालंपौर्णमास्येप्रायच्छ”दितिवाक्यमिंद्रवृत्तांतमात्रविषयतयाप्रतीयमानमपिप्रकरणानुरोधादिंद्रेणाग्नीषोमाभ्यांदत्ततयोच्यमानस्यैकादशकपालपुरोडाशद्रव्यकयागस्यानुष्ठेयत्वेनप्रति

अधिकारिनियोज्ययजमानेति [६१।२२] ॥ अधिकारित्वं फलस्वामित्वावस्था । नियोज्यत्वं विधिप्रेर्यत्वावस्था । यजमानत्वं कर्तृत्वावस्था ॥ ज्योतिष्टोमादिशब्दव्युत्पत्तिरिति [६१।२५] ॥ यद्यपिज्योतिःशब्दएवसूत्रउपात्तः । अनुव्याख्यानेचतस्यैवव्युत्पत्तिर्दर्शिता । तथापिज्योतिष्टोमशब्दोपीहोदाहरणमितिदर्शयितुंज्योतिःशब्दोपिज्यो

प्र० पादकमुपेयते तथेहापिपूर्वोत्तरपरामर्शात्सृज्यत्वेनोपेयतइति तन्न । ताभ्यामितिवाक्योक्तयागस्याप्राप्तत्वादिनानुष्ठेयत्वोपगमेनप्रकरणेनतथात्वोपगमाभावात् । प्रकरणस्यांगांगिभावएवप्रमाणत्वात् । अन्यथायदाग्नेयादिवाक्येष्वपियागस्याप्रत्यक्षत्वात्प्रकरणानुसरणंतत्रापिस्यात् । किंचसृष्टिप्रकरणेष्वपितदुपादानत्वेनाप्युक्तिसंभवेनसृज्यत्वासिद्धेः । सुधोक्तदिशानेनैवचारितार्थ्येनाद्यसूत्रवैयर्थ्याच्च । कार्यत्वेपिशिवकार्यत्वस्यसर्वथासिद्धेश्च । “धातुःप्रसादान्महिमानमीश”मितीशशब्दस्यप्रागुक्तदिशाविष्णुपरत्वात् । “किंचप्रकृते”रित्यादिमूलोक्तदोषानु

SGDF
Sri Gargeshwari Digital Foundation

प्र० द्वाराश्चेति । अधिकार्यादिपदानांभिन्नार्थत्वमस्फुटत्वादाह ॥ अधिकारीति ॥ शब्दांतरव्युत्पत्त्युक्तेर्भावमाह ॥ ज्योतिष्टोमेति ॥७॥
ज्योतिरुपक्रमाधिकरणं ॥ २ ॥

॥ ॐनसंख्योपसंग्रहादपिनानाभावादतिरेकाच्चॐ ॥ प्रसिद्धस्येति ॥ कर्मस्वरूपादिरूपस्येत्यर्थः । अप्रसिद्धं जातमित्यादिनोक्तं जगद्धेतुत्वादिरूपमित्यर्थः ॥ प्रसिद्धमेवेति ॥ बहुत्वादिरूपं ॥ संगतिरिति ॥ महामल्लभंगन्यायेनेयंसंगतिरित्यर्थः । ननु नात्रपंचपद प्रवृत्तिनिमित्तबहुत्वसंख्याप्रतिपाद्यते । गुहामित्यत्रतस्यसिद्धत्वात् । यद्वक्ष्यति ''साधितंचगुहामित्यत्रे''त्यादि । किंतुस्वस्यैवस्वाश्रयत्वं । तथाचास्तुनामज्योतिरादिशब्दानांकथंचिद्ब्रह्मणिवृत्तिः । नतुपंचजनादिशब्दानां । आधाराधेयभावविरोधादित्यादिरूपैवसावाच्या । नच सूत्रे ''संख्योपसंग्रहा''दितिविरुध्यतइतिवाच्यं । अभ्युच्चययुक्तित्वेनगुहानयेप्रागेवोक्तत्वादितिचेत् अस्तुवातावदेवं । इयमपिग्रंथोक्तायुक्तैव ।

तिष्टोमवाचीतिदर्शयितुंचटीकायां ज्योतिष्टोमशब्दस्यव्युत्पत्तिर्दर्शिता ॥ ७ ॥ ज्योतिरुपक्रमाधिकरणं ॥ २ ॥
॥ ॐनसंख्योपसंग्रहादपिनानाभावादतिरेकाच्चॐ ॥ पूर्वत्र प्रसिद्धस्यज्योतिरादिशब्दनिमित्तस्यासत्त्वेपिब्रह्मणि योगलभ्यमप्रसिद्धंनिमित्तमस्तीत्युक्तं । अत्रतुपंचादिशब्दानांप्रसिद्धमेवनिमित्तंब्रह्मण्यस्तीत्युच्यतइत्यवांतरसंगतिः ।

गु० क्तेत्यर्थः । अधिकारिनियोज्ययजमानशब्दानामेकार्थत्वेनपृथग्ग्रहणमनुपपन्नमित्यतोव्याख्याति ॥ अधिकारित्वमिति ॥७॥ ज्योतिरुपक्रमाधिकरणं ॥२॥
ॐनसंख्योपसंग्रहात्ॐ ॥ टीकायामवरादिशब्दवदन्यत्रादृष्टत्वेपिवृत्तिःकिंनस्यादित्यत्रात्रेतिनप्रतीयते । सन्निधानाच्चान्यत्रैवेतिप्रतीयते । ततश्चविरुद्धते

SGDF
Sri Gargeshwari Digital Foundation

प्र० अनेकत्वंभिन्ननिष्ठमित्यस्येहापवादकंनेतिप्राप्तेतत्प्रदर्शनेनेहतस्यस्थापनाभिप्रायेणैवमुक्तिसंभवात् । तत्रकर्मफलभोक्तृत्वमेवोच्यते । इहैवाने कत्वंव्युत्पाद्यतइतिपक्षांतरानुसारेणवैवमुक्तिः । "समन्वयसूत्र"इत्यादिटीकातुफलाभिप्रायेतिभावः । यद्यपिपंचादिशब्दानांपूर्वत्राप्युदाह रणत्वात्पूर्ववदेवाप्रसिद्धनिमित्तेनवृत्तिरस्ति । तथापीहवाक्यविधयैवचिंत्यत्वात्तत्पक्षेप्रसिद्धमेवनिमित्तंव्युत्पाद्यमितिभावः । "तत्पंचजनश ब्दवाच्यंविषय"इत्यादिविषयसंशयटीकांव्यनक्ति ॥ अत्रेति ॥ बृहदारण्यकेषष्ठेऽध्यायेचतुर्थेशारीरब्राह्मणेश्रूयते "यस्मादर्वाक्संवत्सरोऽ होभिःपरिवर्तते । तद्देवाज्योतिषांज्योतिरायुर्होपासतेऽमृतं । यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः । तमेवं(व)मन्यआत्मानंविद्वान्ब्रह्मा मृतोऽमृतं । प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंमनसोमनोयेविदुस्तेनिचिक्युर्ब्रह्मपुराणमग्र्य"मित्यादि । तत्रत्यपंचशब्दसमभिव्याहृ

अत्रपंचजनादिशब्दाःकिमन्यपराःकिंवाब्रह्मपराइतिचिंता । तदर्थंपंचत्वसंख्या

प्र० तजनशब्दआकाशशब्दश्चोदाहरणमित्यर्थः । अत्रबहुत्वविशिष्टार्थप्रतिपादकाश्शब्दाश्चिंत्यंतइतिविषयोपाधिःप्रागेवोक्तः । पंचजनाइतिन समस्तं । किंतुपंचपंचेतिवीप्सा सर्वशरीरेषुपंचानांजनानामनुवृत्तिसूचनार्थेति । पंचशब्दजनशब्दाकाशादिशब्दाइत्यर्थः । तत्वप्रदीपे "पं चपंचेतिवीप्से"त्युक्तेः । सुधायांसमासस्यखंडितत्वाच्च । एतेनयत्परभाष्ये "पंचशब्दोजनशब्देनसमस्तः । स्वरेणैकपद्यनिश्चयात् । "पंचा नांत्वापंचजनाना"मितिप्रयोगदर्शनाच्च । समस्तत्वाच्चनवीप्से"त्युक्तं तन्निरस्तं । अन्यत्रतथात्वेपीहस्वरानिर्णयेनैकपदत्वनिश्चायकाभावात् । सुधोक्तदिशैकपदत्वायोगाच्च ॥ अन्येति ॥ प्राणादिपराइत्यर्थः । परममुख्यवृत्त्येतिभावः । मुख्यवृत्त्यान्यपरत्वस्यसिद्धांतेपिस्वीकारात्

प्र० ॥ आधारेति ॥ सप्तमीप्रथमाभ्यांप्रतीताधाराधेयत्वाधरोर्ध्वत्वादेरित्यर्थः । यदिवक्ष्यमाणदिशाषष्ठीनिर्दिष्टाएवपंचजनाकाशशब्दाभ्यामु च्यंते तदाद्वितीयानिर्दिष्टप्राणादिशब्दैकार्थकयस्मिन्नितिनिर्दिष्टब्रह्माश्रितानांप्राणादीनांभिन्नत्वेनवाक्यशेषस्यानपवादकत्वात्पंचजनशब्दार्थो न्यइतिपूर्वपक्षेफलं । यदितु "प्राण"मित्यादिनापंचजनशब्दस्यैकार्थ्यं तदावाक्यशेषस्यैवापवादकतयाऽभेदेप्याधाराधेयत्वादेर्वाच्यतयाबाध काभावाद्ब्रह्मपंचजनपदार्थइतिसिद्धांतेफलमितिभावः । अत्राद्यचिंताऽऽद्यसूत्रसूचिता । द्वितीयतृतीयेतुद्वितीयसूत्रसूचिते । अत्रपंचजना

धाराधेयत्वादेर्भिन्ननिष्ठत्वमितिसामान्यन्यायस्यापवादकंनास्त्युतास्तीति । तदर्थं "प्राणस्यप्राण"मित्यादिवाक्यशे षस्थषष्ठीनिर्दिष्टाःप्राणादयःपंचजनशब्देनोच्यंतेकिंवाद्वितीयानिर्दिष्टाइति । पूर्वपक्षस्तु । "यस्मिन्पंचपंचजना आकाशश्चप्रतिष्ठित"इतिबृहदारण्यकवाक्यस्थपंचजनादिशब्दवाच्योनविष्णुः । तेषांबहुत्वविशिष्टवाचित्वात् । बहुत्वस्यचाद्वितीयेब्रह्मण्ययोगात् । नन्वन्यगतबहुत्वस्यब्रह्माधीनत्वात् "तदधीनत्वा"दित्युक्तन्यायेनतत्रशब्द वृत्तिरस्तु । नचवशीकृतबहुजनेपिराजनिबहुत्ववाचिशब्दवृत्तिर्नदृष्टेतिवाच्यं । तत्रबहुत्वस्यराजानधीनत्वात् ।

प्र० दिशब्दाब्रह्मतदितरपरत्वेननिर्णेतुमशक्याउतशक्याः । तदर्थंवाक्यशेषस्थप्राणादिपरत्वंतेषांनयुक्तमुतयुक्तमितितृतीयसूत्रसूचितचिंतापि ध्येया । "नपंचजनादिशब्दवाच्योविष्णु"रित्यादिपूर्वपक्षटीकांव्यनक्ति ॥ यस्मिन्पंचपंचेति ॥ बृहदारण्यकेति ॥ एतच्च "ज्योतिरे केषा"मितिसूत्रार्थव्यक्तयेऽभिहितं । "नचस्वस्यबहुत्वाभावेपी"त्यादिटीकोक्तशंकांव्यनक्ति ॥ नन्वित्यादिना ॥ "वशीकृते"तिटीको क्तसमाधिंचनिराह ॥ नचवशीकृतेति ॥ व्यभिचारान्नस्वातंत्र्यंनिमित्तमितिभावः । व्यभिचारंनिराह ॥ तत्रेति ॥ अपेक्षाबुद्धिज

SGDF Sri Gargeshwari Digital Foundation

प्र० न्यत्वात्तस्येतिभावः । एवंतर्हियदपेक्षाबुद्धिजन्यंतस्मिन्बहुशब्दप्रयोगस्स्यादितिचेन्न । तस्यापिकारणांतरवन्निमित्तमात्रत्वेनबहुत्वंप्रतिस्वातंत्र्याभावात् । शब्दप्रवृत्तिहेतुत्वेनप्राग्विवक्षितनिरुक्तस्वातंत्र्यस्याभावाच्च । एवमादिशब्दानांधेन्वादिशब्ददृष्टांतेनव्यभिचारोद्धारस्यप्रागेव कृतत्वाच्चेतिभावः । अभ्युपेत्यापिलोकेव्यभिचारं “अवरादिशब्दव”दितिटीकोक्तमाह ॥ **अवरेति** ॥ टीकोक्तंसमाधिमपिविवृण्वन्नेवाशंक्यनिराह ॥ **नचेति** ॥ **इत्युक्तेरिति** ॥ नन्वस्तुपंचजनादिशब्दप्रवृत्तिनिमित्तंबहुत्वादिप्रतिस्वातंत्र्यंतद्वृत्तौनिमित्तं । नतावतातच्छब्दस्येहेश्वरेप्रयोगः । तत्रप्रमाणाभावात् । “प्रयोगेसतिनिमित्तानुसरणंनतुनिमित्तमस्तीतिप्रयोग”इतिन्यायात् । नच “अव्यक्तात्पुरुषःपर” इत्यादौस्वातंत्र्यरूपनिमित्तमात्रेणहरौप्रयोगस्साधितइतिवाच्यं । तत्र “अव्यक्तमचलंशांतंनिष्कल”मित्यादौहरौप्रयोगान्निमित्ताभावाच्च “अव्यक्ता”दित्यत्रेश्वरेवृत्तिरुक्ता । नचेहपंचादिशब्दानामीश्वरेप्रयोगश्श्रुत्यंतरसिद्धइतिचेन्न । अन्यत्रपंचादिशब्दानांहरावप्रयोगेपीहनिमित्तसद्भावमात्रेणहरौपंचजनादिशब्दवृत्तिनिर्णयसंभवात् । “प्रयोगेसती”तिन्यायस्य सुधायां “अमुख्यप्रयोगविषयत्वादस्यन्यायस्य ।

अवरादिशब्दवदन्यत्रादर्शनेपिब्रह्मणिवृत्तिसंभवाच्च । नचावरादिषु “सोवरयती”तिविशेषश्रुतिरस्ति । नत्विहसेतिवाच्यं । “तदधीनत्वा”दित्यत्रशब्दमात्रेस्वातंत्र्यंनिमित्तमित्युक्तेः।अन्यथाऽव्यक्तादिशब्देषुविशेषश्रुत्यभावेनस्वातंत्र्यंनिमित्तंनस्यात् ।

गु० त्यतःशेषंसंपूर्यव्याख्याति ॥ **अवरादिशब्दवदिति** ॥ तत्रहेत्वंतरेणसिद्धायांवृत्तावित्यादिटीकायांकिंतद्धेत्वंतरमितिनप्रतीयते । अतस्तत्प्रदर्शनपूर्वकंव्याचष्टे ॥ **नचावरादिष्विति** ॥ **अन्यथेति** ॥ हेत्वंतरेणसिद्धायांवृत्तौतदधीनत्वनिमित्तमात्राश्रयणादित्यर्थः । ननुभृत्यगतस्यजयस्यराजगतत्वाभावेनराज्ञिजयशब्दवृत्तौतद्गतत्वस्यनिमित्तत्वासंभवेनतत्रस्वातंत्र्यस्यनिमित्तत्वकल्पनेपिप्रकृतेपंचजनादिशब्दप्रवृत्तिनिमित्तस्यान्यगतत्वेनान्यत्रपंचजनादिशब्दप्रवृत्तौतद्गतत्वस्यैवनिमित्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० तत्रहिनिमित्तंनसामग्री । किंतुतदेकदेशः । मुख्यप्रयोगेतुनिमित्तमेवसामग्री । नहिसिंहशब्दस्यशार्दूलेप्रयोगाभाववदुपगोरपत्येप्यौपगव शब्दस्यप्रयोगाभावोभवती"त्यानुमानिकनयेऽमुख्यविषयत्वाभिधानात् । "इंद्रियेभ्य"इत्यादौहरावन्यत्रप्रयोगादर्शनेपिस्वातंत्र्यरूपनिमित्त मात्रेणपूर्वत्रहराविंद्रियादिशब्दवृत्तेरनुमतत्वाच्च । तत्रत्रिपादीन्यायेनवाक्यांतरेहरौप्रयोगस्यसिद्धत्वेत्विहापितथा । अवरत्वादिप्रबललिंगेनें द्रियादिशब्दानामुभयत्रप्रसिद्धिनिरासेनान्यत्रैवप्रसिद्धत्वसंपादनवदिहापिपूर्वपक्षेऽस्मिन्वाक्येबहुत्वादिलिंगेनतथात्वसंपादनसंभवादितिभा वः । अनन्यगतिस्थलएवस्वातंत्र्याश्रयणं नतुसत्यांगताविव्येतदाशंक्यनिराह ॥ **नचराजेति** ॥ **मुख्यत्वादिति** ॥ **"स्वातंत्र्यंतत्रमुख्यंस्या"** दित्युक्तेराश्रितंप्रत्याश्रयेपिस्वातंत्र्यस्योक्तेश्चेतिभावः । एवंचमुख्यस्वातंत्र्यरूपनिमित्तमपहायाऽमुख्यंतद्गतत्वमादायतद्ब्रह्मणिनयुक्तमन्यत्रयुक्त मितिपूर्वपक्षोनयुक्तइतिभावेनाह ॥ **नचमुख्येति** ॥ ननुसतिशब्दस्यतत्परत्वेस्वातंत्र्यनिमित्तानुसरणं । तदेवनेत्याह ॥ **संभवतिचेति** ॥

नच राजाजयीत्यादौतद्गतत्वस्यासंभवादेवस्वातंत्र्यस्यग्रहणं । इहतु "पंचजना"इत्यस्याब्र ह्मपरत्वेतद्गतत्वंसंभवतीतिवाच्यं । स्वातंत्र्यस्यमुख्यत्वात् । नचमुख्यसंभवएवामुख्यग्रहणं युक्तं । संभवतिचात्राप्यव्यक्तादिशब्देष्विवज्ञेयत्वावचनादिहेतुभिर्ब्रह्मपरत्वाध्यवसायः ।

गु० त्वसंभवेनस्वातंत्र्यस्यानिमित्तत्वान्नपंचजनादिशब्दानांब्रह्मपरत्वमित्याशंकते ॥ **नचेति** ॥ तथाचमुख्यामुख्यन्यायविरोधइतिभावः । मुख्यसंभवेह्यमुख्यग्रहणे मुख्यामुख्यन्यायविरोधः । नतुतदसंभवेपि । प्रकृतेमुख्यासंभवादेवामुख्यार्थोऽभ्युपगम्यतइत्यतआह ॥ **संभवतिचेति** ॥ समन्वयेस्थितएव जगत्स्रष्टृत्वसर्व

ता. चं. १३४

SGDF
Sri Gargeshwari Digital Foundation

प्र० "तमेवैकंजानथे"तिब्रह्मणएवमुमुक्षुज्ञेयत्ववचनादन्यस्यतदवचनादितिद्वौहेतू । आदिपदेन "अविशेषा"दित्युक्त "नामानिसर्वाणी"तिश्रुतिरूपहेतुः । "अधीयतएक"इत्याद्युक्तहेतवश्चग्राह्याः । एतेन "नचसर्वेवेदाइतिश्रुतिर्नियामिका । तस्यास्संकोचसंभवा"दितिटीकोक्तंनयुक्तं । बाधकाभावादित्युक्तंभवति ॥ **तस्मादिति** ॥ उक्तरीत्याऽव्यभिचारेणविशेषश्रुत्यभावस्याप्रयोजकत्वेनमुख्यत्वेनतात्पर्यनिर्णायकभावेनचस्वातंत्र्यरूपनिमित्तेनपंचजनादिशब्दवृत्तेर्हरौसंभवादितिभावः ॥ **इहवाक्येति** ॥ अन्यथाऽऽधाराधेयत्वादेरप्रतीतेरितिभावः ॥ **यथावेति** ॥ यथाचैतत्तथामूलएवप्राक्पूर्वपक्षावसरेऽभिहितं । तमाच्छाद्य तमतंत्रीकृत्य तमवज्ञायेतिवा । यथापूर्वतंत्रेद्वितीयाद्यपादे "व्रीहीनवहंती"त्यत्र "धर्ममात्रेतुकर्मस्या"दितिचतुर्थाधिकरणरीत्याशेषित्वबोधकद्वितीयायांसत्यामपितामाच्छाद्यभावार्थस्यशेषित्वंव्रीहीणांशेषत्वमुतविपरीतमितिचिंताकृता "तानिद्वैधंगुणप्रधानभूतानी"तिचतुर्थेधिकरणे तथेतिभावः । तर्हिसन्यायोव्यर्थइत्यतआह

तस्मान्नपूर्वपक्षोदयइतिचेन्न । यथा "ज्योतिरुपक्रमा"दितिपूर्वोक्तपदसमन्वयेस्थितएवेह वाक्यसमन्वयःसंभवतिनवेतिविचारः यथावा "ज्योति"रित्यत्रतदधीनत्वन्यायेस्थितएव गुणपूर्त्यर्थपदसमन्वयविचारः तथातदधीनत्वन्यायेस्थितएवतमाच्छाद्यब्रह्मणिबहुत्वाद्यस्तिनेवतीहविचारात्। अन्यथेंद्रादिशब्दानामपितदधीनत्वादेववृत्तावैश्वर्यादिगुणासिद्धिः।

गु० शब्दवाच्यत्वादिगुणपूर्त्यर्थमितिशेषः। ननुतदधीनत्वेनैवशब्दानांब्रह्मपरत्वोपपत्तौकिंतत्तच्छब्दप्रवृत्तिनिमित्तस्यतद्गतत्वव्युत्पादनेन। वैयर्थ्यादित्यतआह ॥ अन्य

प्र० ॥ **अवरत्वेति** ॥ टीकाविरोधमाशंक्याह ॥ **टीकायामिति** ॥ **एतदिति** ॥ तदाच्छादनाभिप्रायेत्यर्थः ॥ **तत्प्रयोगापत्तेरिति** ॥ एतच्चाभ्युपेत्यवादेन । धेनूदंचनकारादिशब्ददृष्टांतेनैवमादिशब्देष्वपिलोकेऽप्रयोगस्योपपादितत्वादितिबोध्यं । अत्रसर्वत्रतदधीनत्वाच्छादनेनवातस्यानिमित्तत्वाभ्युपगमाद्वापूर्वपक्षइत्यत्रसंवादमाह ॥ **अतएवेति** ॥ **द्वेधेति** ॥ आच्छादनाभिप्रायेणवाव्यभिचारात्स्वातंत्र्यनिमित्तत्वाक्षेपाभिप्रायेणवेत्यर्थः । "ऋतंपिबंता"वित्यादिटीकांव्यनक्ति ॥ **नन्विति** ॥ अत्रद्वित्वमेवसाधितंनबहुत्वमित्यतउक्तं **द्वित्ववदिति** ॥

अवरत्वादौतुसर्वथातद्गतत्वासंभवात्तदधीनत्वन्यायउक्तः। टीकायामिहतदधीनत्वन्यायासंभवोक्तिरप्येतदभिप्राया । यद्वाबहुत्ववाचिशब्देषुस्वातंत्र्यस्यनिमित्तत्वेबद्धादिशब्दवदमंगलत्वाभावाद्वशीकृतबहुजनेराज्ञितत्प्रयोगापत्तेर्नतन्निमित्तमित्यभिप्राया। अतएवभाष्ये "एतेनसर्वेव्याख्याता"इत्यत्रैवतदधीनत्वन्यायउक्तः। शून्यादिशब्दानांस्वातंत्र्यनिमित्तकत्वेप्यमंगलत्वेनराज्ञ्यप्रयोगोपपत्तेः । नतु "नसंख्योपसंग्रहा"दित्यादौ । एवमुत्तरत्र "संभूत"इत्यादिशब्देषुटीकायांस्वातंत्र्यस्यानिमित्तत्वोक्तिरपिद्वेधाव्याख्येया ।

गु० थेति ॥ नन्वेवमवरादिशब्देष्वपितदधीनत्वन्यायेनब्रह्मपरत्वोक्तिरयुक्तेत्यतआह ॥ **अवरत्वादाविति** ॥ नन्वेवंतदधीनत्वन्यायमभ्युपेत्यापिपूर्वपक्षश्चेत्तर्हिटीकाविरोधः। तत्रहेत्वंतरेणसिद्धायांवृत्तौनिमित्तमात्राश्रयणादित्यादिनातदधीनत्वन्यायासंभवाभिधानादित्यतआह ॥ **टीकायामिति** ॥ **एतदभिप्रायेति** ॥ तदधीनत्वन्यायेनब्रह्मपरत्वेस्थितेपितमाच्छाद्यपंचजनादिशब्दप्रवृत्तिनिमित्तबहुत्वाद्यपिब्रह्मण्यस्तीतीहविचारःक्रियतइत्यभिप्रायेत्यर्थः । टीकास्वारस्यार्थंपक्षांतरमाह ॥ **यद्वेति** ॥ **द्वेधाव्याख्येयेति** ॥ तदधीनत्वन्यायमाच्छाद्येत्युक्तप्रकारद्वयपरतयेत्यर्थः। एकस्येत्यस्यप्राणादेरित्यनेनान्वयः । नन्वौत्सर्गिकंह्यनेकत्वसंख्याया

SGDF Sri Gargeshwari Digital Foundation

प्र० "यथैकस्मिन्नेवपाशेऽदितिःपाशानितिश्रुतिः । तथैकस्मिन्नीश्वरेऽस्तुपिबंताविितिवागपी"तिस्वोत्प्रेक्षितपक्षानुरोधेनप्राप्तार्थमाशंक्यनिरस्यति ॥ नचतत्रेति ॥ अनेकत्वस्येति ॥ "द्वित्वंचैकस्ययुज्यत"इत्यनुव्याख्यानोक्तेरितिभावः । यथैकस्मिन्नित्यादितुप्रौढिवादेनेतिविभावितं ॥ द्वयोरिति ॥ प्रातिपदिकप्रत्ययययोरित्यर्थः । यद्यपीह "पंचपंचे"त्यत्रप्रत्ययोनास्ति । तस्य "षड्भ्योलु"गितिलुप्तत्वात् । तथापिजनाइत्यत्रबहुत्ववाचिप्रत्ययश्रवणमस्तीतिभावः ॥ बाधकैरिति ॥ "गुहावेशाद्ब्रह्मशब्दात्सेतुत्वादक्षरत्वतः । पारत्वादभयत्वाच्चे"त्युक्तेरितिभावः ।

ननु "गुहांप्रविष्टा"वितिन्यायेनब्रह्मणिद्वित्ववद्बहुत्वमपिसिद्धं । एकत्वविरोधित्वेद्वित्वबहुत्वयोरविशेषात् । नच तत्रानेकत्वं प्रत्ययार्थः। इहतुप्रातिपदिकार्थः। प्रत्ययास्वारस्यंचसह्यं। नतुप्रातिपदिकस्येतिशंक्यं। अनेकत्वस्यैवतत्रसाधितत्वेनतद्वाचिनोर्द्वयोरपिस्वारस्यादितिचेन्न। औत्सर्गिकंह्यनेकत्वसंख्यायाभिन्नवृत्तित्वं। अन्यथा "द्वासुपर्णे"त्यादावपिभेदोनसिध्येत्। तच्च "ऋतंपिबंता"वित्यत्रबाधकैरपोदितं। नचेहापवादकमस्ति। नच "प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोमन"इतिवाक्यशेषोपवादकः । "प्राणस्यप्राणश्चक्षुषश्चक्षु"रित्यादिश्रुत्यंतरेणप्राणप्राणत्वादेर्ब्रह्मलिंगत्वादितिवाच्यं । द्वितीयानिर्दिष्टानांप्राणादीनांब्रह्मत्वेपिषष्ठीनिर्दिष्टानामब्रह्मत्वात् । तेषामेवच "यस्मि"न्नितिसप्तम्याब्रह्माश्रितत्वेनोक्तपंचजनत्वस्य

प्र० एतेनटीकायांप्रमाणपदंबाधकस्याप्युपलक्षणमितिसूचितं । यद्वाप्रमाणपदमपवादकप्रमाणपरमितिव्याख्यातंभवति । द्वितीयसूत्राभिप्रेतं "प्राणादीनांप्राणत्वादिप्रदत्वंभगवतएवे"त्यादिटीकोक्तंबाधकमाशंकते ॥ नचप्रमाणस्येति ॥ "अन्नस्ये"तिमाध्यंदिनशाखानुरोधादध्याहृत्योक्तं । बृहदारण्यकेचतुर्णामेवश्रवणात् । तस्यैवचोदाहरणात् । अन्यथातृतीयसूत्रायोगात् । अपवादकतांव्यनक्ति ॥ प्राणस्येति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० एतेनप्राणादिसूत्रटीकाविवृता ॥ न्याय्यत्वादिति ॥ आधाराधेयभावस्यभिन्नवृत्तित्वादितिन्यायप्राप्तत्वादित्यर्थः । यद्वा "तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृत"मितिवाक्यशेषेब्रह्मश्रुतिलिंगबलेन "यस्मि"न्नित्यस्यब्रह्मत्वेनतदाश्रितत्वेनोक्तपंचजनत्वस्यायोगात्परिशेषाद्वाक्यशेषोक्तप्राणादीनामब्रह्मणामेवप्राप्तत्वादित्यर्थः । तदपिब्रह्मणएवास्त्वित्यत: "यस्मिन्निति सप्तम्यानिर्दिष्टस्ये"त्यादिटीकार्थमाह ॥ किंचेति ॥ नचब्रह्मेति ॥ एकस्मिन्नाधाराधेयभावस्यलोकेऽदर्शनाद्ब्रह्मणआधेयत्वाभावाच्चेत्यर्थः । पंचजनानामब्रह्मत्वेतच्छब्दस्यनिर्विषयत्वमितिशंका

न्याय्यत्वात् । किंच "यस्मिन्पंचपंचजना"इतिपंचजनानांब्रह्माश्रिततताभाति । नचब्रह्मस्वाश्रितं । तस्मात्षष्ठीनिर्दिष्टाअब्रह्मात्मकाएवप्राणादयःपंचजनादिशब्दवाच्याः । नतुद्वितीयानिर्दिष्टंब्रह्मतद्वाच्यमिति । सिद्धांतस्तु । द्वितीयांतविनिर्दिष्टंप्रधानंप्राणपूर्वकं । अर्थतःशब्दतश्चैवनतुषष्ठ्यंतशब्दितं ॥ १ ॥ षष्ठीनिर्दिष्टाहिप्राणादयोद्वितीयानिर्दिष्टप्राणाद्यधीनत्वात्तदवच्छेदकत्वाच्चार्थतः

प्र० मपनुदन्नतइत्याद्युपसंहारटीकांव्यनक्ति ॥ तस्मादिति ॥ बहुत्वसंख्यायास्स्वाश्रिततायाश्चब्रह्मण्ययोगादित्यर्थः । "प्राणादयोवाक्यशेषा"दितिद्वितीयसूत्रभाष्यटीकोक्तदिशाद्वितीयांतप्राणादेर्ब्रह्मत्वेपितेषामेवपंचजनत्वेकोहेतुरित्यतस्तात्पर्यविवृण्वन्द्वितीयांतप्राणादिशब्दस्यपंचजनशब्दस्यचैकार्थ्यहेतूक्तिपूर्वंसमर्थयमानस्सिद्धांतयति ॥ सिद्धांतस्त्विति ॥ प्राणपूर्वकं प्राणचक्षुरादिकं । द्वितीयांतनिर्दिष्टमेवेत्येवकारान्वयंमत्वातद्व्यावर्त्यमाह ॥ नत्विति ॥ शब्दितंप्राणपूर्वकंप्रधानंनत्वित्यन्वयः । श्लोकोक्ताप्राधान्यप्राधान्येव्यनक्ति ॥ षष्ठीति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र०शब्दतइति ॥ "षष्ठीशेष"इतिस्मृत्याषष्ठ्याश्शेषार्थत्वादितिभावः ॥ **अप्रधानेति** ॥ द्वितीयानिर्दिष्टास्तुप्रधानभूताइत्यर्थाल्लभ्यतइत्यनुक्तिः। तावतापंचजनत्वंप्रधानानामितिकुतइत्यतआह ॥ **नचेति** ॥ **प्रयाजशेषेति** ॥ उक्तमधिकरणशरीरं "अनुकृते"रित्यत्र । "अभिघारणे विप्रकर्षादनुयाजवत्पात्रभेदस्स्या"दितिचतुर्थाद्यपादीयचतुर्दशाधिकरणे "प्रयाजशेषेणहवींष्यभिघारयती"तिवाजपेयगतवाक्येप्रातिपदिकानुरोधेनप्रत्ययास्वारस्यमुपेत्यप्रयाजशेषंहविष्षुक्षारयेदित्यर्थःसमाश्रितः । तथेहापिपंचजनप्रातिपदिकस्वारस्याय "यस्मि"न्नितिसप्तम्याअपि प्रथमाद्यर्थत्वेनास्वारस्यमस्त्वित्यर्थः । ननुतत्रशेषेणेत्येकपदएवप्रातिपदिकप्रत्यययोस्स्वारस्यास्वारस्ये । इहतुनतथेतिकथंदृष्टांतः । सत्यं । तयो

शब्दतश्चाप्रधानभूताः । नच "पंचजना"इत्यस्यप्रधानपरत्वेसंभवत्यप्रधानपरतायुक्ता । नच "यस्मि"न्नितिसप्तमीस्वारस्यायाप्रधानपरता । प्रयाजशेषन्यायेनप्रातिपदिकस्वारस्यायविभक्त्यस्वारस्यस्यसह्यत्वात् । विभक्त्यस्वारस्यंचनेतिवक्ष्यते ।

प्र०स्वारस्यास्वारस्यमात्रेदृष्टांतोयमित्यदोषः । यद्वाशेषप्रातिपदिकस्वारस्यार्थंहवींषीतिद्वितीयायाअस्वारस्यांगीकारात्तदभिप्रायेणायंदृष्टांतः । यस्मिन्नितिप्रातिपदिकस्यपंचजनप्रातिपदिकस्यचैकार्थत्वात्तदभिप्रायेणवायमितिध्येयं । ननुचतत्रोभयोरपिस्वारस्यमाश्रितं । यदाह "उभयसंस्कारस्स्विष्टकृत्सूक्तवाकव"दिति । मैवं । गुरुमताभिप्रायेणैतदुक्तेस्तेनतस्यास्वीकारात् । भट्टमतेपिहविराधाननियमात्तत्संस्कारत्वं । नतुकस्यचित्स्वारस्यानुरोधेनेतिनकश्चिद्दोषः ॥ **वक्ष्यतइति** ॥ युक्तंचेत्यादिना । एतेनयत्परैःप्राणादयषष्ठ्यंतनिर्दिष्टाएवग्राह्याइत्युक्तं तन्निरस्तंभवति । एवंद्वितीयसूत्रभाष्यटीकाभिमतहेतूक्त्याद्वितीयांतनिर्दिष्टप्राणादीनामेवपंचजनत्वव्युत्पादनेनटीकायांद्वितीयांतप्राणादेर्ब्रह्म ॥ ८०१ ॥

प्र०त्वसमर्थनेपिकुतस्तेषापंचजनत्वमितिशंकांनिरस्य इदानींपूर्वपक्ष्युक्तंबाधकद्वयंक्रमेणनिराचिकीर्षुर्बहुत्वसंख्यानुपपत्तिबाधकंटीकोक्तपरिहारंगुहानयेविवृतंमत्वापरिहारांतरेणनिराह ॥ **नचेत्यादिनासाधितंचेत्यंतेन** ॥ पूर्वपक्षिणैवसमाधिंवाचयितुंप्रतिबंदीमादत्ते ॥ **षष्ठीति** ॥ प्रतिशरीरंभेदादितिभावः । एकवचनादेकैकएवास्तुप्राणादिरित्यतआह ॥ **नहीति** ॥ एकस्यैवेतिप्राणादेर्विशेषणं । ततश्चकिमित्यतआह ॥ **एवंचेति** ॥ प्रत्येकंप्राणादीनामानंत्येसतीत्यर्थः । एतेनबहुसंख्योपसंग्रहेपिनविरोधः । पंचजनशब्देनाब्रह्मभूतषष्ठ्यंतनिर्दिष्टप्राणादिग्रहणाद्यस्समन्वयसूत्रविरोधस्सनास्ति । कुतः । आकाशादिषुनानाभावात् । आदिपदोक्तप्राणादिषुनानाभावात् । प्रत्येकंतेषांनानात्वात् ।

नचब्रह्मणएकत्वात्पंचत्वायोगः । षष्ठीनिर्दिष्टानामपिप्राणादीनांप्रत्येकंबहुत्वेनत्वत्पक्षेपिपंचत्वायोगात् । नहिब्रह्मणएकस्यैवप्राणादेःप्राणत्वादिः । किंत्वनंतानांप्राणादीनां । एवंच एकत्रहियथापंचसंख्यानैवोपपद्यते । तथानंतेषुपंचत्वसंख्यापिनचयुज्यते ॥ १ ॥ अथप्राणादीनांप्रत्येकंस्वरूपेणबहुत्वेप्येकवचननिर्देशात्प्राणत्वादिधर्मैक्याद्वाप्रत्येकमैक्यं । तथाच मिलितानांपंचत्वमितिचेत्तर्हिब्रह्मस्वरूपेणैकमपिपंचभिःशब्दैर्निर्देशाद्वाप्राणत्वचक्षुष्ट्वादिधर्मपंचकयोगाद्वापंचेत्युच्यतां ।

प्र० बहुत्वात् । पंचजनशब्देनतेषांग्रहणसंभवादितिभाष्यखंडस्यार्थांतरमुक्तंभवति । परमुखेनोत्तरंवाचयति ॥ **अथेति** ॥ **एकवचनेति** ॥ यथाचातुर्मास्येषु "एतेनवैश्वदेवेनयजेते"त्यत्रप्रकृतानांवैश्वदेवपर्वगतानामष्टयागानामेकेनयजिनानुवादेनैकसमुदायकरणं यथावा "राजाराजसूयेनयजेते"त्यादौप्रकृतेष्टिपशुसोमानामेकेनयजिना यथावाद्युभ्वाद्यायतनत्वादीनामनेकत्वेप्येकवाक्योपात्ततयैकत्वंतथेतिभावः ॥ **धर्मेति** ॥ प्रमाणानामनेकत्वेपियथाप्रत्यक्षत्वादिनात्रित्वंतथेतिभावः ॥ **पंचभिरिति** ॥ "प्राणस्यप्राण"मित्यादिभिरित्यर्थः । एतेन संख्योपसंग्रहा

SGDF Sri Gargeshwari Digital Foundation

प्र० दपिनविरोधः । तस्यैवभगवतएवनानाभावात् । प्राणमित्यादिनानाशब्दनिर्देशभावात् । प्राणप्राणदत्वादिनानाधर्माणांभावादित्यपिभाष्य खंडस्यार्थांतरमुक्तंभवति ॥ **यथेति** ॥ उक्तमधिकरणशरीरंगुहामित्यत्र ॥ **पंचापीति** ॥ "पंचप्रयाजास्त्रयोऽनुयाजा"इत्युक्तेरितिभावः । तत्र "एकादशप्रयाजान्यजती"तिविकृतौश्रुतसंख्यासंपत्तयेतेषांपंचानांप्रयोगावृत्त्यैकस्यत्रिरन्येषांद्विरित्येकादशत्वमुच्यते "विवृद्धिभिःकर्मभेदा"दित्यधिकरणे । तद्वदित्यर्थः ॥ **यथाचेति** ॥ विवृतमेतद्दाक्षायणयज्ञाधिकरणमानंदमयाधिकरणे । दर्शपूर्णमासप्रकरणेश्रुते "दाक्षायणयज्ञेनयजेते"तिवाक्येदाक्षायणशब्दस्य "द्वेपौर्णमास्यौद्वेअमावास्ये"इतिवाक्यशेषबलेनावृत्त्यर्थत्वोक्त्यायथैकमेवदर्शपौर्णमासाख्यंकर्मावृत्त्याद्वेइत्युच्यतेतद्वदित्यर्थः । नन्वनेकत्वंभिन्ननिष्ठमित्यस्यौत्सर्गिकत्वेनपौर्णमास्यादौक्वचिदन्यथात्वेपीहान्यगतस्यतस्यभगवदधीनत्वेनैवावरादिशब्दस्येवपंचजनादिशब्दस्यापिविष्णौवृत्तिसंभवात्किमेतत्क्लेशेनेत्यतआह ॥ **यथाचेति** ॥ **तत्त्यागइति** ॥ हेतुसंभवेत्यागायोगात्तदुपपादनमेवंकृतमितिभावः । ननुतथापिनमुख्यमनेकत्वंसंभवतीत्यतआह ॥ **साधितंचेति** ॥ तत्ररूपभेदेनानेकत्वसमर्थनादितिभावः । एतेन "नानाभावा"दित्येतदर्थोक्तिपरा "नानारूपत्वेने"त्यादिटीकाविवृता । "नचयस्मिन्नित्याधारस्ये"त्यादिटीकांविवृण्वन्ब्रह्मनस्त्वाश्रित

यथाप्रयाजाःस्वरूपेणपंचाप्यावृत्तिमात्रेणैकादशेत्युच्यंते । यथाच "द्वेपौर्णमास्या"वित्यादावेकमेवपौर्णमासीकर्म द्वेइत्युच्यतेतद्वत् । यथाचानेकत्वस्यभिन्ननिष्ठत्वमौत्सर्गिकंतथावैदिकसर्वशब्दानांप्रसिद्धनिमित्तस्यतद्गतत्वंनिमित्तीकृत्यब्रह्मणिवृत्तिरप्यौत्सर्गिकी । अवरादिशब्देषुत्वसंभवात्तत्त्यागः । साधितंच "गुहा"मित्यत्रैकस्याप्यनेकत्वं ।

गु० भिन्नवृत्तित्वं । नचेहापादकमस्तीत्यतआह ॥ **यथाचानेकत्वस्येति** ॥ नन्वेवंसंदेहएवस्यादित्यतआह ॥ **साधितंचेति** ॥ किंचेत्यादिनोक्तंबाधकंपरिहरति

SGDF Sri Gargeshwari Digital Foundation

प्र० मित्येतदपिबाधकंनिराह ॥ युक्तंचेति ॥ प्रतिशरीरंरूपबाहुल्यसाधनपूर्वकालादौविशेषबलादाधारत्वादिकमिवेहापितद्बलादितिभावेनाह ॥ एवंचेति ॥ देशकालादावभेदेपिविशेषबलादाधाराधेयभावेप्रमितेसतीत्यर्थः ॥ तद्गतेति ॥ प्राणसंचरणायशरीरगताकाशस्थस्यावकाशदातृरूपस्येत्यर्थः । अतिरिक्तत्वात् भिन्नत्वात् । भेदप्रतिनिधिविशेषवत्त्वादित्यर्थः । टीकोक्तेर्मूलमाह ॥ तदुक्तमिति ॥ अत्रचाद्यइति ॥ ग्रंथस्यवादकथारूपेणप्रवृत्तत्वादादौस्वपक्षसाधकोक्त्याभाव्यं । पश्चाद्बाधकनिरासेन । तथैवानंदमयनयादिषुपूर्वत्रत्रिपाद्यामुक्तेर्द्वितीयस्यादौनिवेशआद्यस्यपश्चादित्यतोवा न्यूनत्वाशंकयावाह ॥ पूर्वेति ॥ “ज्ञेयत्वावचनात् । महद्वच्च । चमसवदविशेषात् । तथाह्यधीयतएक”

युक्तंचब्रह्मणःस्वाश्रयत्वं । आधाराधेयभावोहिभेदाभावेपियुज्यते । कालःसदास्तिदेशोस्तिसर्वत्रेत्यादिभानतः ॥ १ ॥ एवंचयावंतिनियम्यानिनियामकभगवद्रूपाण्यपितावंतीतिशरीरगतप्राणादिपंचकनियामकरूपेषुपंचत्वं । तथातद्गताकाशनियामकरूपस्यषष्ठत्वादाकाशश्चेतिसमुच्चयः । आधारभूतशरीरनियामकरूपस्याधेयभूतप्राणादिनियामकरूपेभ्योतिरिक्तत्वात्तानिप्रत्याधारत्वंचयुक्तं । तदुक्तंन्यायविवरणे “बहुरूपत्वादधिकरणाधेयत्वादितस्यैवयुज्यत”इति । अत्रचाद्येसूत्रेपूर्वाधिकरणोक्तसाधकैरेवेहापिब्रह्मपरत्वसिद्धेर्बाधकमात्रमुद्धृतं । तत्रच “संख्योपसंग्रहा”दित्यनेनोक्तायाबहुत्वानुपपत्तेः “नानाभावा”दित्यनेननिरासः ।

गु० ॥ युक्तंचेति ॥ ननुसाधकोक्त्यनंतरमेवबाधकोद्धारःसंगतः । तत्कथंसाधकमनुक्त्वैवबाधकमेवप्रथममुद्धृतमित्यतआह ॥ अत्रचेति ॥ ननुटीकायांद्वितीयंसूत्रं

SGDF
Sri Gargeshwari Digital Foundation

प्र० इत्युक्तहेतुभिरित्यर्थः । तथाचवक्ष्यत्युत्तराधिकरणटीकायांटीकाकारः ''नामानिसर्वाणीत्याद्युक्तरीत्यासिद्धेऽखिलशब्दसमन्वयेतत्रप्रतीतविरोधाभासनिरासेनैवसूत्रकृतश्चरितार्थत्वात् । यत्तुविशेषंचवक्तिसत्वधिकोलाभ''इतीतिभावः ॥ **अपिशब्देति** ॥ यद्यपिटीकायां ''अपिपदेनपूर्वसूत्राद्विरोधपदाकर्षण''मित्युक्तं । तथापितत्वप्रदीपे ''तेषांबहुसंख्यानांनविष्णुत्वमितिनमंतव्य''मित्युक्त्यातदनुवृत्त्यर्थत्वाप्रतीतेस्तदनुरोधेनवा अपिपदस्यविरोधपदाकर्षणसूचकत्वेप्यन्यार्थसमुच्चायकत्वमविरुद्धमितिभावेनवैतदुक्तं । तथाचोक्तंग्रंथकृतैव ''प्राणभृच्चे''त्यत्र ''चशब्दोनकेवलंटीकोक्तरीत्यापूर्वोक्तहेतूनांनञश्चानुकर्षणार्थः । किंतुवायुसमुच्चयार्थोपीतिद्रष्टव्य''मिति । एतेन अत्रविरोधपदानुवृत्तौनेत्यवक्तुंशक्यं । पूर्वसूत्रादविरोधपदस्यैवाक्लेशेनानुवर्तनसंभवादितिनिरस्तं । संख्योपसंग्रहादपिनषष्ठीनिर्दिष्टप्राणादयःपंचजनशब्दार्थः । तेषांप्रत्येकंनानाभावादितिप्रागुक्तरीत्यार्थांतरस्याप्यभिमतत्वात् । अविरोधपदाकर्षे ''संख्योपसंग्रहा''दितिपंचम्यंतस्यसमासेगुणभूतविरोधपदेनान्वयासामर्थ्याच्चेति ॥ **इतिशंकायामिति** ॥ तथाचतस्यद्वितीयत्वंयुक्तमितिभावः । ननुटीकायां ''यदिपंचजनादीनांविष्णुत्वेभवेद्विशेषहेतु''रित्यवतारितत्वात्कथमेवमित्यतआह ॥ **सिद्धांतेति** ॥ प्राणप्राणदत्वादिरूपसिद्धांतसाधकोक्तिरित्यर्थः ॥ **तृतीयइति** ॥

अपिशब्दसमुच्चितायास्त्वाधारत्वाद्यनुपपत्तेः ''अतिरेकाच्चे''त्यनेन । द्वितीये केतेपंचत्वाश्रयभगवद्रूपविशेषाइतिशंकायांतेषांमुखतउक्तिः । सिद्धांतसाधकोक्तिस्त्वर्थात् । तृतीयेतुशाखांतरेपिपंचत्वसंपादनमितिसूत्रक्रमः । ॥ ८०३ ॥

गु० साधकोक्तिपरतयाव्याख्यातं । तत्कथंप्रकारांतरेणव्याख्यायतइत्यतआह ॥ **द्वितीयइति** ॥ ननुपंचजनाइत्ययुक्तं । समाहारस्यैकत्वादेकवचनेक्लीबताचेति

प्र०माध्यंदिनशाखायामन्नेनसहपंचत्वोक्तावपिकाण्वशाखायांचतुर्णामेवोक्त्यानवाक्यशेषोक्तप्राणादीनांपंचजनत्वमित्याशंक्य एकेषामन्ने अन्नस्यान्नत्वप्रदातृरूपे । असत्यपि ''तद्देवाज्योतिषांज्योति''रितिपूर्ववाक्योक्तज्योतिषांपंचत्वसंभवादित्युक्तेरितिभावः । ''अत्रज्योतिरन्नशब्दयोरेकार्थत्वंपृथक्पंचकंवेत्युपपन्न''मितिटीकांव्यनक्ति ॥ **अत्रेति** ॥ **शाखेति** ॥ तत्तच्छाखिभिस्तथातथोपासनंकार्यमितिव्यवस्थितविकल्पेनतदुक्तिरित्यर्थः । यदत्रकेनचिद्रामानुजीयेनोक्तं यस्मिन्निितिमंत्रपदानामपिज्योतिर्नयन्यायेनावयवव्युत्पत्त्याब्रह्मपरत्वसंभवान्नसमन्वयसूत्राक्षेपःपूर्वपक्षेयुक्तः । सिद्धांतेचपंचजनशब्दस्यद्वितीयांतनिर्दिष्टप्राणादिपरत्वोक्तिरयुक्ता । आधेयतयोपसर्जनपरस्यपंचजनशब्दस्योपसर्जनीभूतविशेष्याकांक्षस्यनियम्यत्वेनोपसर्जनप्राणादिपरत्वस्यैवयुक्तत्वात् । नसंख्येतिसूत्रेचनेतिव्यर्थं । अविरोधपदस्यैवानुवृत्तिसंभवादिति । तत्तुग्रंथतात्पर्याज्ञानविजृंभितमित्ययुक्तं । ज्योतिर्नयन्यायेनपदसमन्वयसंभवेपि तदनधिकार्यपेक्षितवाक्यमर्यादापक्षमुपेत्यैवेहपूर्वपक्षेसमन्वयसूत्राक्षेपात् । आधेयतयानिर्देशमात्रेणोपसर्जनत्वे भूमप्रकरणे ''सएवाधस्तात्सएवोपरिष्टा''दित्यादिनाभूम्नोप्याधेयत्वश्रवणात् आथर्वणे च ''ब्रह्मदक्षिणतोब्रह्मोत्तरत''इत्यादिनाब्रह्मणआधेयत्वश्रवणादुपसर्जनत्वंस्यात् । ''यःपृथिव्यांतिष्ठन्योप्सुतिष्ठ''न्नित्यादिनांतर्यामिणोप्याधेयत्वोक्तेस्तथात्वंस्यात् । नियम्यतयाधेयत्वंचनात्रश्रुतं । वाक्यशेषस्यपंचजनस्वरूपविवेचनार्थवृत्तत्वेनषष्ठ्यंतनिर्दिष्टानामेवपंचजनत्वे ''प्राणं

अत्र ''यस्मिन्पंचपंचजना''इतिमंत्रस्यशाखाद्वयेप्येकपंचकपरत्वायज्योतिरन्नशब्दयोरेकार्थत्वंवा तयोर्भिन्नार्थत्वायशाखाभेदेनपंचकद्वयंवेतिद्रष्टव्यं ।

गु०क्लीबत्वेचपंचजनमितिभवितव्यं । नचाकारांतोत्तरपदोद्विगुःस्त्रियामिष्टइतिस्त्रीलिंगप्राप्त्याकथंनपुंसकत्वमापाद्यतइतिवाच्यं । पात्रादौनिषेधेनस्त्रीलिंगबाधात् । तथा

SGDF
Sri Gurgeshwari Digital Foundation

प्र० चक्षुषश्श्रोत्रमन्नंमन" इत्युक्त्यैवपूर्तौवाक्यशेषे "प्राणस्यप्राण" मित्याद्युक्तिर्व्यर्था। अस्मन्मतेतुपंचजनशब्देनशरीररूपकविन्यस्तेतिन्यायेनप्राणादिषुनियामकतयास्थितभगवद्रूपाणामेवगृहीतत्वेनतद्विवेचनायसार्थक्यं । षष्ठ्यंतनिर्दिष्टप्राणादेःपंचजनत्वेतृतीयसूत्रस्थैकवचननिर्देशविरोधोग्रंथएवाग्रेस्पष्टः । सूत्रे संख्योपसंग्रहादपिनषष्ठ्यंतोक्तप्राणादयःपंचजनाः । तेषांप्रत्येकंनानात्वात्पंचत्वानुपपत्तेरित्याद्यर्थांतरस्याप्यनुमतत्वेननन्वस्सार्थक्यमुक्तमेवेति ॥ अन्येत्विति ॥ एवंपरिहृतेप्यजामंत्रेपुनरप्यन्यस्मान्मंत्रात्सांख्यप्रत्यवस्थानेतन्निरासार्थमिदमित्युक्त्वा "यस्मिन्पंचपंचजना" इतिमंत्रःकिंसांख्याभिमतप्रधानादितत्वपरोथार्थांतरपरइतिसंदिह्यपूर्वोत्तरपक्षावुक्तौ । तौसुधांविवृण्वन्ननुवदति ॥ यस्मि

अन्येतु । "यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठित" इतिवाक्येसमस्तेनंपंचजनशब्देनोक्तानांसमाहाराणामसमस्तेनान्येनपंचशब्देनपंचत्वसंख्यान्वयःप्रतीयते । एवंचपंचपंचकानिपंचविंशतिःसंपद्यते । यथापंचपंचपूल्यइत्यत्रपंचविंशतिपूल्यः । पंचजनाइति

प्र० न्निति ॥ समस्तेन समासंप्राप्तेन। नायंपंचजनशब्दः "दिक्संख्येसंज्ञाया" मितिसमासविधानात् "स्युःपुमांसःपंचजना" इत्यमरोक्तेश्चरूढ्यामनुष्यवाची । यस्मिन्पंचमनुष्याआकाशश्चप्रतिष्ठितइतिवदतोवाक्यस्यनिस्तात्पर्यप्रसंगात् । सर्वस्यैवात्मनिप्रतिष्ठितत्वात् । किंतुरूढित्यागेनजायंतइतिजनाइतिकल्पतरूक्तयोगेनजनशब्दस्तत्वपरः । तथापिपंचानांजनानांसमाहारःपंचजनाइतिसमस्तेनपंचजनशब्देनपंचसंख्याकास्तत्वसमुदायाःप्रतीयंते । तेकतीत्याकांक्षायामसमस्तेनपृथक्स्थितेनपंचेत्यनेनान्वयःप्रतीयतइत्यर्थः ॥ यथेति ॥ पंचानांपूलानांसमाहारःपंचपूली । पंचपूल्यःपंचेत्युक्तेपंचविंशतिःप्रतीयतेयथातथेत्यर्थः। ननुसमाहारपक्षे "संख्यापूर्वोद्विगु" रितिद्विगुसंज्ञायां "द्विगो"

SGDF Sri Gargeshwari Digital Foundation

प्र० रितिङीपिसतिपंचजनीतिस्यादित्यतआह ॥ पुँल्लिंगंत्विति ॥ उपसंग्रहादिति ॥ श्रुतिसिद्धयासंख्ययातेषांस्मृतिसिद्धानामुपसंग्रहादि त्यर्थः ॥ श्रुतिमत्त्वमिति ॥ तथाचप्रागुक्तमशब्दत्वमयुक्तमित्यर्थः । सूत्रशेषस्यार्थमाह ॥ अतिरेकाच्चेति ॥ आत्माकाशौहित्वैवव क्ष्यमाणदिशापंचविंशतिसंख्यापूर्तेरितिभावः ॥ आत्मानइति ॥ आकाशस्यचेत्यपिग्राह्यं । एतेन "तथाही"त्यादिपरमतानुवादसुधाग्रं थोविवृतः । सुधोक्तंदूषणंसंगृह्याह ॥ पंचेति ॥ सुधोक्तदिशाविकल्पपूर्वश्लोकंव्याचष्टे ॥ किमिति ॥ "तंषड्विंशकमित्याहुःसप्तविंशम थापरे । पुरुषंनिर्गुणंसांख्यमथर्वशिरसोविदु"रित्याथर्वणिकानांश्रुतिः । तन्मात्राणीति शब्दादीनि । भूतानामादिर्भूतादिरहंकारः ॥

पुँल्लिंगंतुछांदसं । तस्मात्पंचविंशतितत्वानामुपसंग्रहात्प्रधानादीनांश्रुतिमत्त्वमितिप्राप्ते सिद्धांतः नसंख्योपसंग्रहाद पिप्रधानादीनांश्रुतिमत्त्वं । कस्मात् । नानाभावात् । नानाह्येतानिपंचविंशतितत्वानि । नैषांपंचशःपंचशःसाधा रणधर्मोस्ति । येनपंचविंशतेरंतरालेपंचपंचसंख्याःनिवेशेरन् । नह्येकंनिबंधनंविनानानाभूतेषुद्वित्वादिकासंख्या स्ति । अतिरेकाच्च । अतिरेकोपिभवत्यात्माकाशाभ्यांपंचविंशतिसंख्यायाः । आत्मनोहिपंचविंशतावंतर्भावेयस्मि न्नित्यधिकरणत्वोक्तिविरोधः । आकाशस्यतुपृथगुक्तिविरोधइत्याहुः । तत्रब्रूमः । पंचविंशतितत्वानिश्रुतिस्मृति समाजतः । प्रमितान्यपलप्यंतेकथंवैदिकमानिना ॥ १ ॥ किंपंचविंशतितत्वान्येवाप्रामाणिकानिकिंवैतद्वाक्यं नतत्परं । नाद्यः । "तंषड्विंशमितिप्राहु"रिति "तन्मात्राणिभूतादौलीयंतेभूतादिर्महतिमहानव्यक्तेलीयत"इति

गु० चापवादापवादात्पुनरुत्सर्गस्योत्थितिरितिन्यायेननपुंसकत्वंस्यादित्यतआह ॥ पंचजनाइतिपुँल्लिंगंत्विति ॥ अस्माकमिति ॥ अस्माभिर्यस्मिन्पंचजनाइति

ता. चं. १२५

SGDF
Sri Gargeshwari Digital Foundation

प्र० यस्येति ॥ “यस्याहंकारःशरीरंयोऽहंकारमंतरेसंचरन्यमहंकारोनवेद । यस्यबुद्धिःशरीरंयोबुद्धिमंतरेसंचरन्यंबुद्धिर्नवेद । यस्यचित्तंश
रीरंयश्चित्तमंतरेसंचरन्यंचित्तंनवेद । यस्याव्यक्तंशरीरंयोऽव्यक्तमंतरेसंचरन्यमव्यक्तंनवेदे”त्यादिसुबालोपनिषच्छ्रुतिः ॥ पंचभिरिति ॥
इदंचात्रैवानुव्याख्यानोदाहृतभागवतवाक्यंकापिलेयगतं । पंचभिर्महाभूतैःपंचभिस्तन्मात्राभिर्महदहंकारमनोबुद्धिभिर्दशभिरिंद्रियैश्चब्रह्म
पूरितमेतच्चतुर्विंशतिकंगणंप्रधानकार्यंविदुरितिसुधोक्तार्थः । “सात्विकोराजसश्चैवतामसश्चत्रिधामहान्” । त्रिविधोयमितिपूर्वशेषः ॥
तावतेति ॥ “यस्मि”न्नितिवाक्याप्रतिपाद्यत्वमात्रेणेत्यर्थः । सूत्रार्थमपिसुधोक्तविवरणेननिराह ॥ यच्चेत्यादिना ॥ अन्यथेति ॥
एवंक्रोडीकारकधर्मानिरूपणेसूत्रकारस्याप्येवमन्यत्रनिरूपणंनस्यात् । व्याहतिप्रसंगादित्यर्थः । एतेन “नहितंत्रसिद्धेषुतत्वेषुपंचसुपंचस्व

“यस्याहंकारःशरीरं यस्यबुद्धिःशरीरं यस्याव्यक्तंशरीर”मित्यादिश्रुतिभिः “पंचभिःपंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा ।
एतच्चतुर्विंशतिकंगणंप्राधानिकंविदु”रिति “त्रिविधोयमहंकारोमहत्तत्वादजायते”त्यादिस्मृतिभिश्चपंचविंशतितत्वानां
प्रमितत्वात् । नांत्यः । अस्माकमविरोधात् । तावतातेषामशब्दत्वासिद्धेश्च । यच्चोक्तंनानाभावादिति तन्न । पृ
थिव्यादिषुभूतत्वस्य शब्दादिषुतन्मात्रात्वस्य घ्राणादिषुबाह्यज्ञानेंद्रियत्वस्य वागादिषुकर्मेंद्रियत्वस्य महदहंकारमनः
प्रकृतिपुरुषेषूक्तविंशत्यन्यत्वस्यचोपसंग्राहकस्यसत्त्वात् । अन्यथा “पंचभि”रित्यादिस्मार्तनिर्देशस्याप्ययोगात् । ॥ ८०५ ॥

गु० वाक्येपंचविंशतितत्वानांप्रतिपाद्यत्वानभ्युपगमात् ॥ तावतेति ॥ यस्मिन्पंचजनाइतिवाक्याप्रतिपाद्यत्वेपीत्यर्थः । वाक्यांतरप्रतिपाद्यत्वाभावाभावादितिभावः

प्र० नुगतसंख्यानिवेशनिमित्तंजात्याद्यस्ती”तिरामानुजभाष्योक्तंप्रत्युक्तं । भामत्याद्युक्तानुगतधर्माभावप्रकारमाशंक्यनिराह ॥ नन्विति ॥
अतिरेकेति ॥ तयोरपिग्रहणेपौनरुक्त्यंस्यात् । अतस्तौविहायैवप्रकृतिभागोपादानेनैवपंचविंशतिर्वाच्येत्यर्थः । तयोरुपादानेनसत्वरजस्त
मसांप्रकृतित्वेनैकीकृत्यप्रकृतिमहदहंकारात्माकाशइतिसमाहारोक्त्यापंचविंशत्युक्तिस्तु यस्मिन्नित्यधिकरणत्वविरोधादाकाशस्यपृथगुक्त्ययोगा
च्चायुक्तेत्यर्थः । स्मार्तनिर्देशस्तुबाधकाभावादुक्तविवक्षयायुक्तोनश्रौतइतिभावः । अतएवश्रुतावित्यवादि ॥ घ्राणानीति ॥ उद्धृताकाशा

ननुश्रुतावाकाशात्मनोःपृथगुक्तत्वात्तदतिरेकपरिहारायसत्वरजस्तमोरूपान्प्रकृतिभागानादाय सत्वरजस्तमोमहदहं
काराः पृथिव्यप्तेजोवायुघ्राणानि रसनचक्षुस्त्वक्श्रोत्रवाचः पाणिपादपायूपस्थमनांसि शब्दस्पर्शरूपरसगंधाः इति
पंचपंचकानिवाच्यानि । तत्रचाद्येपंचकचतुष्टयेनास्त्युपसंग्राहकधर्मइतिचेन्न । आकाशस्थानेघ्राणस्यघ्राणस्थाने
वाचोवाक्स्थानेचमनसोनिवेशनउपसंग्राहकाभावेप्याकाशमात्रस्थानेमनोनिवेश्य सत्वादिपंचकस्य “मनसस्तु
पराबुद्धि”रित्यादिश्रुतिसिद्धेनमनःपरत्वेन पृथिव्यादेश्चविंशत्यतिरिक्तत्वेनक्रोडीकरणउपसंग्राहकाणांसत्त्वात् ।

प्र० नांपृथिव्यादीनांज्ञानेंद्रियेभ्योघ्राणमादायपूरयितव्यं । गत्यंतराभावात् । एवमुद्धृतघ्राणानांज्ञानेंद्रियाणांवाचमादायैवेत्यग्रेपीतिभावः ॥
निवेश्येति ॥ पंचकसंपादनस्यैच्छिकत्वादितिभावः । तथाचज्ञानेंद्रियाणांकर्मेंद्रियाणांतन्मात्राणांचक्रोडीकारकोधर्मउक्तएव । आद्यपंचकेम
नःपरत्वंद्वितीयेतुविंशत्यन्यत्वंसंग्राहकंभविष्यतीतिभावः ॥ बुद्धिरिति ॥ बुद्ध्यहंकारयोरेकार्थत्वात् । अन्यथातत्रश्रुतावहंकारानुक्तिस्स्या
दितिभावः । एतेन “भूतत्वतन्मात्रत्वज्ञानेंद्रियत्वकर्मेंद्रियत्वतदितरत्वानिश्रुतावपिसंती”तिसुधावाक्यंसमर्थितंभवति । एतेन “नचवाच्यं

SGDF

प्र० पंचकर्मेंद्रियाणिपंचज्ञानेंद्रियाणिपंचमहाभूतानिपंचतन्मात्राण्यवशिष्टानिपंचेत्यवांतरसंख्यानिवेशनिमित्तमस्त्येवेति । आकाशस्यपृथङ्निर्देशे नपंचभिरारब्धमहाभूतसमुदायासिद्धे"रितिरामानुजभाष्योक्तंनिरस्तं । आकाशस्थानेमनसोनिवेशेनसर्वसामंजस्यादिति । यदपि "अतिरेका"दितिसूत्रांशार्थवर्णनंतदपिनेत्याह ॥ कथंचेति ॥ संख्येति ॥ उक्तदिशेतिभावः ॥ अन्यथेति ॥ तयोःपंचविंशतावंतर्भावे "आकाशश्चे"तिपृथगुक्तिविरोधइत्यर्थः ॥ चशब्दस्येति ॥ "स्तुतयेऽनुमतिर्वे"तिवन्नानाभावादतिरेकाद्वेतिनिर्देशस्स्यात् । चशब्दस्यवाश

कथंचास्मिन्पक्षेऽतिरेकः। आकाशात्मातिरिक्तत्रयोविंशतितत्वेषुप्रकृतिभागोपादानेनपंचविंशतितत्वसंख्यानिर्वाहात्। नचवाच्यं प्रकृतिभागोपादानेनपंचविंशतितत्वनिर्वाहेनानाभावोऽन्यथात्वतिरेकइति। तथात्वेनानाभावातिरेकयोर्वैकल्पिकत्वेनसौत्रस्यच शब्दस्यसमुच्चयार्थत्वोक्त्ययोगात् । किंचकिमुपसंग्राहकाभावेकुत्रापिद्वित्वादिकासंख्यानास्ति किंवामहासंख्यायामवांतरसंख्यानास्ति। आद्येत्वत्पक्षेपिप्राणचक्षुश्श्रोत्रान्नमनस्सुपंचत्वंनस्यात्। नांत्यः। "पंचसप्तचवर्षाणिनववर्षशतक्रतुः। व्रतमेतदनुष्ठेयंवर्षाणिनवपंचचे"त्यादावुपसंग्राहकाभावेपिमहासंख्यायामवांतरसंख्यादर्शनात् । तस्मात्परकीयाद्यसूत्रव्याख्यानयुक्ता ।

प्र० ब्दार्थत्वोक्तिर्वास्यादितिभावः । एतेन "आत्माकाशश्चातिरिच्यत"इतिश्रीभाष्योक्तमपिनिरस्तंध्येयं । "नचायमस्तिनियमोंऽतरालेसंग्राहकेणविनासंख्यानिवेशोनास्ती"त्यादिसुधोक्तंव्यनक्ति ॥ किंचेति ॥ त्वत्पक्षेपीति ॥ "प्राणादय"इतिसूत्रेपंचजनाःप्राणादयइतिस्वीकृतेरितिभावः ॥ पंचेति ॥ अत्रद्वादशवार्षिकानावृष्टिप्रतीतेस्तदवांतरसंख्यानिर्देशदर्शनादितिभावः । तथा "व्रत"मित्यत्रचतुर्दशवर्षप्रतीतेस्तत्रापिव्यभिचारइतिभावः । नन्विदमाशंक्योक्तंभामतीभाष्ययोः "यद्यपिपरसंख्यायामवांतरद्वित्वादिसंख्यानास्ति । तथापितत्पूर्वकंत

SGDF
Sri Gargeshwari Digital Foundation

प्र० स्यास्संभवात्पौर्वापर्यलक्षणयाप्रत्यासत्त्यापरसंख्यालक्षणार्थपूर्वसंख्योपन्यस्तइतिलक्षणैवदोषस्स्यादिती"तिचेन्मैवं । त्वत्पक्षेपंचजनशब्दस्य"दिक्संख्येसंज्ञाया"मितिसमासस्वीकारेप्राणादिषुरूढेरभावेनप्रसिद्धमनुष्यसमुद्रांतस्थासुरपरत्वत्यागेनाप्रसिद्धार्थस्वीकारादपि "सोमेन यजेते"त्यादाविवलक्षणायाएवज्यायस्त्वात् । अतएवसोमपदंनकर्मनाम । किंतुसोमवतायागेनेतिमत्वर्थलक्षणामंगीकृत्यरूढलतारूपद्रव्यपरमित्युपेतं । समाहारेतु "समासश्चायुक्त"इतिसुधायामेवपरीक्षितमितिभावः ॥ **द्वितीयेपीति** ॥ सूत्रइत्यन्वयः ॥ **दूषितमिति** ॥ द्वितीयांतनिर्दिष्टमित्यादिनेतिभावः । एतेनकेषांचिद्द्वितीयसूत्रार्थोपिनिरस्तोध्येयः ॥ **ग्राह्यत्वादिति** ॥ परभाष्येतथैवोक्तत्वाच्चेत्यपिग्राह्यं

द्वितीयेपिश्रुतौषष्ठीनिर्दिष्टाःप्राणादयःसूत्रेगृह्यंतइतियदुक्तं तदस्मदीयपूर्वपक्षएवनिक्षिप्यदूषितं । किंचतृतीयसूत्रएकवचनांतेन "ज्योतिषे"त्यनेन "ज्योतिषांज्योति"रितिश्रुतावेकवचननिर्दिष्टस्यैवज्योतिषोग्राह्यत्वाद्द्वितीयसूत्रेपिप्राणादिशब्देनश्रुतौद्वितीयानिर्दिष्टाएवप्राणादयोग्राह्याः । एतेनैवकेषांचित्पक्षोपिनिरस्तः । किंच तत्पक्षएतच्छास्त्रपूर्वभागेपूर्वतंत्रे "संदिग्धेतुवाक्यशेषा"दित्यत्रैववाक्यशेषान्निर्णयस्योक्तत्वात् "प्राणादयोवाक्यशेषा"दितिपुनरिहतदुक्तिरयुक्ता ।

प्र० ॥ **द्वितीयानिर्दिष्टाएवेति** ॥ अन्यथाचतुर्णामब्रह्मत्वंपंचमस्यतुब्रह्मत्वमितिवैरूप्यापातात् "स्वेमहिम्निप्रतिष्ठित"इत्यादिनास्वाश्रितत्वनिर्वाहस्यपंचमस्यब्रह्मत्वइवपंचानांब्रह्मत्वेपिसाम्यात् माध्यंदिनशाखायांपंचत्वसंख्यापूरकत्वरहितब्रह्मणःकाण्वशाखायांपंचत्वसंख्यापूरकत्वायोगाच्च शाखाद्वयेपिपंचजनशब्दितानां द्वितीयांतप्राणादिपदनिर्दिष्टब्रह्मरूपत्वमेवोपेयमितिभावः ॥ **एतेनैवेति** ॥ मतयोरविशेषादुक्तदूषणेनैवनिरासइतिभावः । अधिकरणानुत्थितंचाह ॥ **किंचेति** ॥ वाक्यशेषाधिकरणमुक्तंसमन्वयसूत्रे । श्रुतप्रकाशोक्तमधिकाशंकाप्रकार

SGDF
Sri Gargeshwari Digital Foundation

प्र० माशंकते ॥ नन्विति ॥ बह्वनुग्रहेति ॥ द्वादशेद्वितीयपादे "विप्रतिषिद्धधर्माणांसमन्वयेभूयसांस्यात्सधर्मत्व"मित्यष्टमेधिकरणेचिंतितं पंचदशरात्रेप्रथममहरग्निष्टुन्नामकं । तत्रनामातिदेशेनैकाहाग्निष्टुद्धर्मभूताग्नेयीसुब्रह्मण्याप्राप्नोति । इतरेषुत्वहस्सुयथाप्रकृत्यैंद्री । तत्रोपसद्दिवसेषुकाद्वयोराह्वातव्येतिसंशये मुख्यश्रुत्यनुग्रहार्थमाग्नेयीतिप्राप्ते प्रयोगवचनस्यभूयोवैगुण्यासहिष्णुतयाद्वितीयादिबहुश्रुत्यनुग्रहार्थमैंद्री

ननु तत्र "तेजोवैघृत"मितिवाक्यशेषस्यघृतपरत्वेननिर्णीतत्वात्तदनुसारेण "अक्ता"इत्यस्यसंदिग्धस्यनिर्णयः। इहतु "प्राणस्य प्राण"मितिवाक्यशेषस्यनेंद्रियपरत्वंनिर्णीतं । तत्रानिंद्रिययोःप्राणान्नयोःश्रवणात् । इंद्रियत्वनिर्णयंचविनानप्राणादीनांपंचत्वयोग्यत्वं । संख्यानिवेशकोपाध्यभावादितिशंकायां बहूनांचक्षुःश्रोत्रमनःशब्दानामनुकूलतयाद्वौप्राणान्नशब्दाविंद्रियपरौ। स्पर्शनेंद्रियंहिप्राणशब्दार्थः । तस्यवायुसंबंधित्वात् । अन्नशब्देनतुपृथिवीवाचिनापृथिवीसंबंधिघ्राणेंद्रियं, अद्यतेनेनेतिव्युत्पत्त्यारसनेंद्रियंचगृह्यते । घ्राणरसनयोस्तंत्रेणोपादानात्संचत्वमप्यविरुद्धं । तथाचात्रापिवाक्यशेषस्येंद्रियपरत्वेननिर्णीतत्वात्तदनुरोधात् "पंचपंचजना"इत्यस्यापींद्रियपरतेतिवक्तुंप्राणादिसूत्रमितिनपुनरुक्तिरितिचेन्न । बह्वनुग्रहन्यायस्यापिपूर्व

प्र० सुब्रह्मण्याऽऽह्वातव्येतिसिद्धांतइति । तथाचततएवसिद्धेर्नेदमारभ्यमितिभावः । एतेन प्राणान्नशब्दयोरिंद्रियपरत्वंनचक्षुश्श्रोत्रमनश्शब्दरूपबह्वनुग्रहबलात् । किंतर्हि "तद्देवाज्योतिषांज्योति"रितिपूर्ववाक्येप्रकाशकानांप्रकाशकंब्रह्मेत्यवगतौसत्यांकेतेप्रकाशकाइत्याकांक्षायां "पंचपंचजना"इत्युक्तानांपंचजनशब्दितानांपंचपदार्थानामिंद्रियत्वावगमात्पूर्ववाक्यश्रुतज्योतिश्शब्दबलेनैवप्राणपदस्योक्तविधयात्वगिंद्रियार्थत्व

प्र० मन्नशब्दस्यचेंद्रियार्थत्वमुपादीयते । अतएवतृतीयसूत्रेज्योतिषा"तद्देवाज्योतिषांज्योति"रित्युक्तज्योतिश्शब्देनपंचजनशब्दिताः(संज्ञिताः) पंचपदार्थाइंद्रियाणीतिविज्ञायंतइति असत्यन्ने अन्नपाठेऽसति तदध्याहारेणकाण्वानांशाखायांपंचत्वसंभवादित्युक्तंसूत्रकृतैवेत्येतदपिनिरस्तं । तथासत्युपक्रमस्थज्योतिश्शब्दबलादिंद्रियत्वाध्यवसायइत्युक्तंस्यात् । प्रक्रमान्निर्णयस्य "वेदोवाप्रायदर्शना"दितितृतीयाध्यायतृतीयपादीयाद्यनयेसिद्धत्वान्नात्रपुनरारंभस्स्यात् । सूत्रेचज्योतिषासहपंचत्वमित्यक्लेशेनान्वयसंभवेनेकपदाध्याहारादिनासूत्रार्थोक्तेरयुक्तत्वात् । "प्राणादयोवाक्यशेषा"दित्युक्तिवैयर्थ्याच्चेति । एतेनैवकस्यचिच्छैवस्यमतमपिप्रत्युक्तंबोध्यं । यत्तु तृतीयसूत्रस्यासत्यन्नेज्योतिषांज्योतिरितिसन्निहितपूर्ववाक्येश्रुतानांबहुवचनेनशक्यविवक्षपंचकत्वानां "अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणी"तिश्रुतिप्रसिद्धानांज्योतिषांग्रहणसंभवेनज्योतिषांज्योतिःपदार्थेनपंचजनसंज्ञितानांपंचत्वमित्यर्थवर्णनं तत्तुच्छं । तथात्वेप्राणादयइतिवज्ज्योतींषीतिवाज्योतिर्भिरितिवानिर्देशापत्तेः । ज्योतिषासहपंचत्वमित्यक्लेशेनैवान्वयसंभवेक्लेशायोगात् । वाक्यशेषेचतुष्कस्यैवोक्त्याकथंपूर्ववाक्ये "पंचपंचजना"इत्युक्तिरितिशंकायाअपरिहारेणवाक्यस्य "प्राणादय"इतिसूत्रोक्तेश्चानुपपत्तेरनुद्धाराच्चेतियत्किंचिदेतत् ॥ ७ ॥ नसंख्योपसंग्रहाधिकरणं ॥ ३ ॥

तंत्रएवोक्तत्वात् । टीकाक्षरार्थस्तुस्पष्टः ॥ ७ ॥ नसंख्योपसंग्रहाधिकरणं ॥ ३ ॥

गु० ॥ तंत्रेणोपादानादिति ॥ सकृदुक्तमनेकोपकारकंतंत्रं । तथाचसकृत्प्रयुक्तेनान्नशब्देनयोगेनरसनस्यरूढ्याघ्राणस्यलाभइतिभावः ॥ ७ ॥ नसंख्योपसंग्रहाधिकरणं ॥ ३ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐकारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेःॐ ॥ अत्राकाशादीनामुभयत्रप्रसिद्धत्वगतार्थत्वशंकासमाधानादिकंसर्वंप्रागेवोक्तमितिभावेन "कार्यकारणभावोलोकेप्यसंभावित"इतिटीकासूचितसंगतिमाह ॥ अस्त्विति ॥ एतेनैकस्यैवोर्ध्वाधरीभाववत्पौर्वापर्यमपिपूर्वन्यायेनैवसिद्धमितिप्रत्युक्तं । क्वाप्यदर्शनादिति । संगतिः प्रत्युदाहरणरूपा । "समन्वयसूत्र"इत्यादिटीकातुफलाशयेतिभावः । विषयादिपरटीकांव्यनक्ति ॥ अत्रेति ॥ तैत्तिरीयेब्रह्मवल्ल्यांश्रूयते "आत्मनआकाशस्संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यःपृथिवी । पृथिव्याओषधयः । ओषधीभ्योन्नं । अन्नात्पुरुष"इति । तत्रावांतरकारणत्वार्थकाकाशादिशब्दाउदाहरणमितिप्रागेवव्यक्तमितिभावः । तेनाकाशवाय्वादिशब्दानांयत्रक्वचस्थितानांब्रह्मणिप्रवृत्तिहेतुमत्ताव्युत्पादनेनसमन्वयोक्तौतच्छब्दनिमित्तगुणलाभादत्रत्याकाशादिशब्दसमन्वयोविफलइतिनिरस्तं । अवांतरकारणत्वरूपगुणलाभार्थत्वान्मुमुक्षुणाज्ञातव्यत्वाच्चेति । एतेनैतेषामपिशब्दानांज्योतिर्नयन्यायेनपदवर्णादिरूपेणहरौवृत्तिसंभवेनसमन्वयसूत्राक्षेपेणपुनरिहविचारोव्यर्थइतिप्रत्युक्तं । मंदाधिकार्यपेक्षितवाक्यमर्यादामुपेत्यैवेहविचार्यत्वात् । पदादिसमन्वयेऽवांतरकारणत्वरूपगुणस्यवाक्यलभ्यस्याप्राप्तेश्च । भूतोत्पत्त्याद्यसिद्धेश्च । वाक्यविधित्वेतु "कल्पनोपदेशा"दि

॥ ॐकारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेःॐ ॥ अस्त्वेकस्यैवाधाराधेयभावः । कालस्सदास्तीत्यादौदर्शनात् । नतुकार्यकारणभावः । क्वाप्यदर्शनादित्याक्षेपादनंतरसंगतिः । अत्र "आत्मनआकाश"इत्यादिवाक्यस्थाकाशादिशब्दाः ॥ ८०८ ॥

गु० ॥ ॐकारणत्वेनॐ ॥ उक्तन्यायेनेति ॥ अन्यस्वभावस्यापिभगवदधीनत्वन्यायेनेत्यर्थः । ननुस्वपितामहस्यस्वपितृत्वाभाववद्वायुकारणकारणाकाशस्यवायु

SGDF
Sri Gargeshwari Digital Foundation

प्र०त्युक्तन्यायेन “इतिबुद्धौसमारोहादुभयोर्योयोगरूढयोः। त्यागेचकारणाभावादुभयार्थत्वमिष्यत”इत्यनुभाष्योक्तन्यायेनचान्यपरत्वस्यापि भावाच्च ॥ अन्येति ॥ भूताकाशादिमात्रपराब्रह्मपराअपिवेत्यर्थः । यद्वापरममुख्यवृत्त्येत्यर्थः ॥ नामानीति ॥ तस्याएवचमससूत्रेसाधकत्वेनोक्तत्वादितिभावः । आदिपदेन “सर्वेवेदा”इत्यादिग्रहः । अत्रफलफलिभावःस्पष्टः । पूर्वपक्षटीकांव्यनक्ति ॥ नैतइति ॥ देहोत्पादादिरूपोत्पत्तिसंभूतपदार्थमत्वाह ॥ अकार्यइति ॥ “नजायतेम्रियतेवे”त्यादेरितिभावः । ननु संभूतशब्दस्याभिव्यक्तिरित्यर्थोस्तु ।

किमन्यपराःकिंवाब्रह्मपराइतिचिंता । तदर्थं “नामानिसर्वाणी”त्यादिश्रुतिस्थसर्वशब्दस्यसंकोचेहेतुरस्तिनवेति । तदर्थंजन्यजनकभावःकिमेकस्यनयुक्तउतयुक्तइति । पूर्वपक्षस्तु । नैतआकाशादिशब्दाब्रह्मपराः । अकार्येब्रह्मणिकार्यत्वस्यविरोधात् । स्वकार्यत्वस्यतुसुतरांविरोधात् । व्यंग्यव्यंजकभावस्याप्येकस्मिन्विरोधात् । उक्तबाधकेनच “नामानिसर्वाणी”त्यादेरन्यविषयत्वेनसंकोचादिति । सिद्धांतस्तु । आकाशादिशब्दानांब्रह्मपरत्वे नतावत्साधकांतरंवाच्यं । “तल्लिंगा”दित्यत्रानुव्याख्यानोक्तन्यायेनेशाधीनत्वेसिद्धे “तदधीनत्वात् ज्ञेयत्वावचनात् चमसवदविशेषात्” इत्यादिभिरेवतत्सिद्धेः ।

प्र०ब्रह्मण्यभिव्यक्तिरूपसंभवश्चद्युभ्वादिनयेव्युत्पादितइत्याह ॥ व्यंग्येति ॥ तस्यापिपौर्वापर्यनिमित्तत्वादेकस्यस्वापेक्षयैवतदयोगादितिभावः। “नचाकाशादिसंभवस्यतदधीनत्वेने”त्यादिटीकातात्पर्यंपूर्वमेवप्रदर्शितमितिभावः । अत्रटीकायांसूत्रआकाशादिशब्दवाच्यत्वेसाधकविशेषानुक्तिं “नचवाच्य”मित्यादिनाशंक्य “नामानिसर्वाणी”त्यादिनासमाहितं । तद्विवृण्वन्बाधकोद्धारप्रकारंचव्यनक्ति ॥ आकाशेति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० कारणस्यब्रह्मणःकार्यत्वंविरुद्धमुतकार्यांतरंप्रतिकारणस्यतज्जन्यकार्यप्रतिकारणत्वंविरुद्धमथकार्यत्वंकारणत्वमेकस्यविरुद्धमितित्रेधाविकल्प्यक्रमेणनिराह ॥ नापीत्यादिना ॥ तृतीयेटीकाद्युक्तमेवाह ॥ आकाशवाय्वादिगतत्वेनेति ॥ "आकाशाद्यंतर्गतत्वेनभगवतोऽभिव्यक्त्ये"त्यादिटीकोक्तेर्मूलमाह ॥ तदुक्तमिति ॥ कार्यत्वंचव्यक्त्यपेक्षयेतिकार्यत्वस्यव्यक्तिरूपगतिसूचकश्चशब्दः । यद्वा चशब्दःकारणत्वं चेतिसमुच्चयार्थः । स्वाभिव्यक्त्यपेक्षयाकार्यत्वमन्याभिव्यक्त्यपेक्षयाकारणत्वं । तद्धेतुत्वादितिभावः । तदुक्तंटीकायां "आकाशाद्यंतर्गतत्वेन

नापिकार्यत्वंबाधकं । द्युभ्वाद्यधिकरणेब्रह्मण्यपिप्रादुर्भावरूपजनेरुक्तत्वात् । नापिवायुकरणाकाशकारणस्यब्रह्मणोवायुकारणत्वायोगोबाधकः । "आनुमानिक"मित्यत्रोक्तन्यायेनमहतःपरस्मात्परस्यापिमहतःपरत्ववद्वायुकारणकारणस्यापिवायुकरणत्वोपपत्तेः । नहियथास्वपितामहःस्वपितुरेवजनकोनतुस्वस्यतथाब्रह्माकाशस्यैवहेतुर्नतुवाय्वादेरित्यस्ति । सर्वकारणत्वात् । नाप्येकस्यैवकार्यकारणभावानुपपत्तिर्बाधिका । आकाशवाय्वादिगतत्वेनाभिव्यक्तभगवद्रूपाद्वाय्वग्न्यादिगतरूपांतराभिव्यक्त्याव्यंग्यव्यंजकभावरूपस्यकार्यकारणभावस्यबहुरूपत्वेनोपपत्तेः । तदुक्तंन्यायविवरणे "व्यक्त्यपेक्षयाकार्यत्वंचे"ति । अत्र सौत्रश्चशब्दो नकेवलमात्मशब्दवाच्योहरिः । अपित्वाकाशादिशब्दवाच्यश्चेतिटीकायामेवव्याख्यातः । ॥ ८०९ ॥

गु० कारणत्वाभावःकिंनस्यादित्यतआह ॥ आकाशवाय्वादिगतत्वेनेति ॥ अत्राकाशगतत्वेनाभिव्यक्तभगवद्रूपाद्वायुगतरूपांतराभिव्यक्तिःवायुगतत्वेनाभिव्य

प्र०भगवतोऽभिव्यक्त्यावाय्वादिगतस्वरूपाभिव्यक्तिहेतुत्वेनचे"त्यादि । स्वयमर्थांतरमाह ॥यद्वेति॥ न्यायेति ॥ अविदितत्वादिन्यायेत्यर्थः । यद्वा स्वरूपसत्ताप्रतीतिप्रवृत्तीनामीशाधीनत्वव्युत्पादनरूपन्यायेत्यर्थः । सूत्रार्थष्टीकायांव्यक्तः । विवृतश्चतंत्रदीपिकायां । अत्राहकश्चिद्रामानुजः । पूर्वाधिकरणेरूपविशिष्टस्यैवाधाराधेयभावोक्त्यातथैवकार्यकारणभावस्यापिसंभवात्पूर्वपक्षोनयुक्तः । सिद्धान्तोप्ययुक्तः । "यआकाशेतिष्ठ"न्नित्यादौरूपविशेषाप्रतीतेस्सूत्रेयथाव्यपदिष्टेतिव्यर्थं । "यआकाशेतिष्ठ"न्नित्यादौसर्वनियंतृत्वादिप्रतीत्याऽब्रह्मत्वशंकानुदयादिति । तदपेशलं । कालस्सदास्तीत्यादौदर्शनादित्यादिनामूलग्रंथएवपूर्ववैषम्यस्योक्तत्वेनत्वयातथाक्वचिदेकस्यदर्शनमुदाहृत्यैवपूर्वसाम्यस्यवाच्यत्वेन

यद्वा नकेवलंकारणत्वेनचेत्यर्थः । एवंचकार्यत्वेसतिकारणत्वरूपावांतरकारणत्वंभाष्योक्तंसूत्रारूढंभवति । सूत्रेयथाव्यपदिष्टशब्दस्त्वंतर्याम्यधिकरणोक्तन्यायस्मारणार्थमितिटीकायामेवोक्तं । अन्येतु । वेदांतेषुक्वचिदा

प्र०तदनुदाहृत्यग्रंथोक्तवैषम्यमज्ञात्वादोषोत्कीर्तनस्यायुक्तत्वात् । अदर्शनादितिवदंतंप्रतिन्यायेनोपपादनीयत्वात्तस्य । अतएवटीकायां "अवांतरकारणत्वमुपपन्न"मित्युपपत्तिसिद्धत्वमुक्तं । यदप्याकाशेतिष्ठन्नित्यनेनरूपविशेषाप्रतीतेरिति तदज्ञानमूलं । "शरीररूपकविन्यस्तगृहीते"रित्यत्रोक्तन्यायेनाकाशगतस्यतत्स्वभावादिनियामकस्यतच्छब्दवाच्यस्यव्यक्त्यात्सनातन्मात्रनिष्ठस्यरूपविशेषत्वात् । अन्यथा "आकाशेतिष्ठन् वायौतिष्ठन् तेजसितिष्ठ"न्नितिविशिष्योक्तेर्वैयर्थ्यात् । अतएवाकाशादितत्तत्स्वभावनियामकत्वस्यप्रागुक्तस्यस्फुरणाययथाव्यपदिष्टेत्यस्यसार्थक्यं । अन्यथाकुतोत्रसंभूतवाक्येश्रुताकाशादौहरिरुपेयइतिशंकायामाकाशादिपूक्तेरित्यवश्यंवाच्येसति आकाशादौब्रह्मणोऽवस्था

SGDF Sri Gargeshwari Digital Foundation

प्र० नमेवमास्त्वितिवदतोऽंतर्यामिवाक्योक्तिमात्रेणापरितुष्यतस्तत्रत्यन्यायस्मारणस्यावश्यकतयायथाव्यपदिष्टेत्यस्यसार्थक्यात् । नचापरितोषो निर्बीजः । शरीरत्वादिश्रवणेनतत्संभवात् । किंचपूर्वनयेष्विंद्रियार्थादिनियंतृरूपाणांप्राणादिनियंतृरूपाणामत्रचाकाशादिनियंतृरूपाणामुक्तं कुतस्तन्नियामकतयातत्रावस्थानमितिशंकायामंतर्यामिनयेसर्वसत्तादेरीशाधीनत्वोक्त्यातत्रतत्रावस्थानंहरेस्तत्रसिद्धमितिवक्तुंतत्पूर्वपक्षन्याया दिनातत्रापिविवदमानंप्रत्यविदितत्वादिब्रह्मलिंगस्मारणस्यावश्यकत्वाच्च । किंचैकस्यलोकेपौर्वापर्यस्यादर्शनेपिहरावविदितत्वाद्युक्त्यभिमता चिंत्यवैभवत्वेनोपपन्नत्वादितिवक्तुंतस्यसार्थक्याच्च । तथाचवक्ष्यतिभगवान्भाष्यकारः "नस्थानतोपी"त्यत्रतृतीये "अभेदेपिभेदव्यपदेश

काशादिकासृष्टिरुच्यते "आत्मनआकाशःसंभूत"इति । क्व
चित्तेजआदिका "तत्तेजोसृजते"ति । तथाचवेदांतानांविरो
धइतिप्राप्ते कार्येष्वाकाशादिष्वेवसृष्टिक्रमादिद्वारकंविगानं ।

प्र० स्स्थानभेदादैश्वर्ययोगाच्चयुज्यत"इति । मतद्वयेपि "कारणत्वेने"त्यादिसूत्रद्वयमेकमधिकरणं । तत्रकारणवाक्यानिब्रह्मणिप्रमाणंनवेतिक ल्पतरूक्तदिशासंदेहे "वाक्यानांकारणेकार्येपरस्परविरोधतः । समन्वयोजगद्योनौनसिध्यतिपरात्मनी"तिभामत्युक्तंहृदिकृत्वाप्रथमसूत्रनि रस्यंकार्यविषयवाक्यविरोधमात्रमनुवदति ॥ आकाशादिकेति ॥ विरोधइति ॥ तथाचकर्तृत्वप्रतिपादनेनकर्मविधिपरतयोपचरितार्था अविवक्षितार्थावाजपोपयोगिनइतिभावः । तन्निरासकतयाऽऽद्यसूत्रार्थमनुवदति ॥ कार्येष्विति ॥ चशब्दस्तुशब्दार्थःकारणत्वइतिसप्त

SGDF
Sri Gurgeshwari Digital Foundation

प्र० म्यंतेनान्वेतीतिभावेनाह ॥ कारणत्वेत्विति ॥ उक्तंचभामत्यां “सर्गक्रमविवादेपिनसस्रष्टरिविद्यत”इति । कारणत्वेनेतितृतीयांतपक्षे ऽन्वयदर्शनमेतत् ॥ विच्छिद्येति ॥ कारणत्वइत्येकंपदं । नेत्यपरमित्यर्थः । अध्यायसंगतेरभावतइत्यादेःपंचम्यंतस्यतन्नेत्यनेनान्वयः । अध्यायासंगतिंतावद्व्यनक्ति ॥ विरोधेति ॥ “इदानींस्मृतिन्यायविरोधपरिहार”इत्यादिनात्वद्भाष्येद्वितीयस्यविरोधनिरासकत्वाभ्युपगमा दितिभावः । नन्वेतदेवाशंक्यभामत्यां “प्रमाणांतरविरोधेनवाक्यार्थावगतेरप्रामाण्यमाशंक्याविरोधव्युत्पादनेनप्राप्तप्रामाण्यस्थापनमवि रोधलक्षणस्यार्थः। इहतुवाक्यानांसृष्टिप्रतिपादकानांपरस्परंविरोधेब्रह्मणिजगद्योनौनसमन्वयस्सोढुमर्हती”त्यादिनासमाहितमित्यतस्तदनुवादे

कारणत्वेतुनविगानं। कुतः। यथाव्यपदिष्टोक्तेः। यथाह्येकस्मिन्वेदांतेचेतनःकारण त्वेनव्यपदिष्टः “सोकामयतबहुःस्या”मिति तथैव “तदैक्षततत्तेजोसृजते”तिवेदांतांत रेष्वप्युक्तइतिसिद्धांतः। एवंचसूत्रेकारणत्वेनेत्येतद्विच्छिद्यसप्तम्यंतत्वेन अविच्छिद्य तृतीयांतत्वेनचव्याख्येयमित्याहुः। तन्न। सौत्रचशब्देतुशब्दार्थत्वस्यकारणत्वेनेत्यस्य विच्छेदाविच्छेदाभ्यामुभयपरस्यचक्लिष्टत्वात्। आकाशादिष्वित्यस्यान्वयार्थंसृष्टिक्रमा दिद्वारकविगानशब्दस्याप्यध्याहार्यत्वाच्च। अध्यायसंगतेःपादसंगतेरप्यभावतः। पूर्व पक्षानु त्थितेश्चसिद्धांतस्याप्ययोगतः॥ १ ॥ विरोधनिरासोहिद्वितीयएवसंगतः।

ता. चं. १३६ गु० क्तरूपांतरादभिगतरूपांतराभिव्यक्तिरित्यर्थः। भाष्योक्तावांतरकारणत्वस्यसूत्रारूढत्वसिद्ध्यर्थंसौत्रचशब्दस्यव्याख्यानंकर्तुंटीकोक्तमनुवदति ॥ चशब्दइति ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ननिराह ॥ नन्विति ॥ तेपिमतमिति ॥ "सर्ववेदांतगतसृष्टिश्रुत्यर्थनिर्मलत्वायपरःप्रपंचआरभ्यत"इत्यादिनावियदधिकरणेत्वयाभाषितत्वादितिभावः । तथाचपरस्परविरोधपरिहारपरत्वेपितत्रैवनिवेशस्स्यादितिभावः । नन्वेतदप्याशंक्योक्तंभामत्यां "प्रासंगिकंतुतत्रसृष्टिविषयाणांवाक्यानांपरस्पराविरोधप्रतिपादनं । नतुलक्षणार्थ"इति । कल्पतरौच "परैरुद्भावितोदोषउद्धर्तव्यःस्वदर्शने । इतिशिक्षार्थमत्रत्य

ननु तत्रवेदानांमानांतराविरोधोव्युत्पाद्यः । अत्रतुपरस्परमितिचेन्न । अविरोधेह्यवांतरभेदस्तस्मिन्नध्यायेपादादिभेदेहेतुर्नतुतस्माद्बहिर्भावे । अन्यथा समन्वयादिभेदाद्द्वितीयादौव्युत्पाद्याःस्युः । किंचद्वितीयेपि "नवियदश्रुते"रित्यादिपादद्वयंवेदांतानांपरस्पराविरोधपरमितितेपिमतं । ननु मानांतराविरोधएवद्वितीयेव्युत्पाद्यः । परस्पराविरोधस्तुप्रासंगिकः । विप्रतिषेधात्परपक्षाणामप्रामाण्यउक्तेतर्हिवेदांतानामपिविप्रतिषेधात्तदितिशंकायांतन्निरासादितिचेन्न । पादद्वयव्युत्पाद्यत्वादविरोधत्वोपहितत्वाच्च साक्षात्संगतिसंभवेप्रासंगिकत्वायोगात् । अन्यथावैपरीत्यापातात् ।

प्र० चिंतांतत्राकरोन्मुनि"रित्युक्तमित्यतस्तदाशंक्याह ॥ नन्विति ॥ अविरोधत्वोपहितत्वादिति ॥ अविरोधत्वरूपाध्यायोपाधिग्रस्तत्वादित्यर्थः ॥ वैपरीत्येति ॥ परस्पराविरोधस्तत्रसाक्षात्संगतः । मानांतराविरोधस्तुप्रासंगिकइतिस्यात् । विनिगमनाभावादित्यर्थः । तमे

प्र० वव्यनक्ति ॥ सममिति ॥ पादसंगतेरप्यभावतइत्येतद्व्यनक्ति ॥ नापीति ॥ तृतीयपादंव्याचष्टे ॥ किंचेति ॥ नन्विति ॥ अतएव भामत्यां "यदित्वाकाशाद्वायुर्वायोस्तेजइत्युक्त्वातेजसोवायुर्वायोराकाशइतिवदेद्भवेद्विरोधः । नचैवमस्ती"त्यादिनातथैवसिद्धांतितमितिभावः । नचविरोधभ्रांत्यापूर्वपक्षः । तस्यानिर्बीजायाअनुपपत्तेः । एवमेवोत्पत्तावतिप्रसंगात् । ननु "अभ्युपेत्यतुविगानमुच्यत"इतिभा

समंहिमानांतरविरोधपरस्परविरोधयोरप्रामाण्यादिपर्यंतत्वं । किंचायमप्यविरोधःप्रसंगात्तत्रैवोच्यतां । तस्मान्नाध्यायसंगतिः । नापिपादसंगतिः । पादार्थस्यप्रधानाशाब्दत्वस्येहाव्युत्पादनात् । किंचात्रनपूर्वपक्षस्योत्थानं । "तत्तेजोसृजते"त्यत्रह्याकाशसृष्टिमनुक्त्वातेजस्सृष्टिमात्रमुक्तं । नत्वाकाशात्पूर्वंतत्सृष्टिः । येन "आत्मनआकाशःसंभूत"इत्येतद्विरोधःशंक्येत । नहितत्रोक्तानुक्तिमात्रेणतद्विरोधः । यद्यपि "तत्तेजोसृजत वायोरग्नि"रित्यनयोर्विरोधोभाति । तथापिनतस्येहसिद्धांतेनिरासः । किंतु वियत्पादे "तेजोतस्तथाह्याहे"त्यत्रैवेतित्वन्मतं । सिद्धांतोप्ययुक्तः । "सत्यंज्ञानमनंतंब्रह्मे"ति "एकमेवाद्वितीय"मितिच प्रकृतेशुद्धेब्रह्मणिकामयितृत्वादेर्विरोधात् ।

प्र० मत्युक्तेःकृत्वाचिंतेयमितिचेन्न । व्यर्थत्वात् । मदुक्तदिशासंगतिसंभवाच्चेतिभावः । चतुर्थपादंव्याख्याति ॥ सिद्धांतोपीति ॥ कामयितृत्वेति ॥ "सोकामयतबहुःस्या"मितिवाक्योक्तकामयितृत्वेत्यर्थः । यापिसूत्रार्थोक्तिःकार्येष्वेवविगानंकारणत्वेतुनेति सापिनेत्याह ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० सदेवेति ॥ ननुकारणविगानं "समाकर्षा"दितिद्वितीयसूत्रेनिरसिष्यतइतिचेन्न । तथापिकारणत्वेतुविगानंनेत्युक्तेरयुक्तत्वापरिहारात् । वक्ष्यमाणाभिप्रायेणतदुक्तिरितिचेन्न । वैयर्थ्यात् । नच "सृष्ट्युक्तेस्सृष्टज्ञानार्थतयातत्रचविवादाभावाद्गुणेत्वन्याय्यकल्पनेतिन्यायात्तदनुगुणतयासृष्टिवाक्यंव्याख्येय"मितिभामत्युक्तदिशाकार्यविगानपरिहारार्थत्वेनतदुक्तिरितिवाच्यं । साक्षात्तत्परिहारसंभवेकुसृष्टेरनादरणीयत्वात् । अतएव "शंकितस्यकार्येविगानस्यानुद्धृतत्वा"दित्युक्तं । "समाकर्षा"दितिसूत्रार्थस्याग्रेनिरसिष्यमाणत्वाच्च । तदविरोधोपि

"सदेवसोम्येदमग्रआसीत् असद्वाइदमग्रआसी"दित्यादौकारणेपिविगानदर्शनात् । शंकितस्यकार्येविगानस्यानुद्धृतत्वाच्च । यदिचकल्पितेकार्येश्रुतेरतात्पर्यादनुद्धारस्तर्हिवियत्पादादौतदुद्धारोनुपपन्नःस्यात् । कामयितृत्वादिविशिष्टस्यापिकल्पितत्वेनतदविरोधोप्यत्रनव्युत्पाद्यःस्यात् । केचित्तु । "तद्धेदंतर्ह्यव्याकृतमासीत् असद्वाइदमग्रआसी"दित्यादिवाक्यानांप्रधानपरत्वेप्राप्तेब्रह्मपरत्वेनसिद्धांतइत्याहुः । तन्न । पूर्वपक्षानुत्थानात् । तथाहि । अव्याकृतासदादिशब्दानांनतावत्प्रधानेरूढिरस्ति । योगोगौणीवावृत्तिस्तुप्रधानइवब्रह्मण्यपिसंभवति । नचनिरवकाशंप्रधानालिंगादिकमस्ति ।

प्र० कारणाविरोधोपि । अत्र समाकर्षसूत्रइत्यर्थः ॥ केचित्त्विति ॥ जगत्कारणवादीनिवेदांतवाक्यानिप्रधानपराणिब्रह्मपराणिवेतिसंशये "तद्धेदंतर्ह्यव्याकृतमासीन्नामरूपाभ्यांव्याक्रियत" इत्यव्याकृतपूर्वकसृष्ट्याम्नानादव्याकृतशब्दस्यचाव्यक्तपर्यायत्वात्प्रधानमेवाव्याकृतमिति "असद्वाइदमग्रआसीत् सदेवसोम्येदमग्रआसीत् आत्मनआकाशस्संभूत" इत्यादावप्यसदादिशब्देनतस्यैवग्रहणादात्मादिशब्दस्यव्याप्तत्वादिनाप्रधानेप्युपपत्तेःप्रधानपराण्येवसर्वकारणवाक्यानीतिप्राप्ते । आकाशादिषु आकाशादिपदचिह्नितेषु । विपरिणामेनाकाशादीनामितिवा ।

SGDF
Sri Gargeshwari Digital Foundation

प्र० यथाव्यपदिष्टस्य सार्वज्ञादिमत्तयाजन्माधिकरणेव्यपदिष्टस्यब्रह्मणएव । कारणत्वेनोक्तेः "सत्यंज्ञान"मितिप्रागुक्तसर्वज्ञस्यैवात्मशब्देनोपादानाच्च । एवंतत्रतत्रेतिसर्वाणिब्रह्मपराणीतिसिद्धांतइत्याहुरित्यर्थः ॥ प्रत्युतेति ॥ अव्याकृतवाक्ये "पश्यंश्चक्षुश्शृण्वञ्श्रोत्र"मितिदर्शनादेः "सदेवे"तिवाक्ये "तदैक्षते"तीक्षणस्यश्रवणात् "ईक्षतेर्नाशब्द"मित्यधिकरणेचत्वया "सदेवे"त्यादिवाक्येप्रधानपरत्वमाशंक्येक्षणेन ब्रह्मपरत्वस्यसिद्धांतितत्वात्तेनन्यायेनाव्याकृतादिशब्दानांचेतनपरत्वेसिद्धे सर्वशाखाप्रत्ययन्यायेनासदादिशब्दानामव्याकृतशब्दतुल्यार्थत्वा

प्रत्युतेक्षत्यधिकरणन्यायेनचेतनस्यैवकारणत्वनिर्णयादसदादिशब्दानांचेतनपरतैवन्याय्या । पादासंगतिस्तुस्फुटैव । "तद्धेदंतर्ह्यव्याकृतमासी"दित्यादिवाक्यस्य "महतःपरमव्यक्त"मित्यादिवत्प्रधानप्रतिपादनच्छायानुसारित्वाभावात् । टीकायां

प्र० चेतनपरतैवन्याय्येत्यर्थः । एतेनयदुक्तंश्रुतप्रकाशे "अव्याकृतशब्देनप्रथमतएवाचेतनस्यप्रतिपन्नतयापश्चादवगतंपश्यंश्चक्षुरित्यादिवाक्योक्तंचेतयितृत्वंचक्षुराद्युत्पादनौन्मुख्याभिप्राय"मित्यादि तन्निरस्तं । रूढ्यादेःप्रधानप्रापकस्याभावेनाचेतनप्रतिपत्तेरेवाभावात् । दर्शनादेर्बहुत्वाच्च । बह्वनुसारेणाल्पनयनस्यत्वयैवपूर्वात्रोक्तत्वाच्च । एतेन "ईक्षत्यधिकरणाक्षेपःफलित"इतिश्रुतप्रकाशोक्तंप्रत्युक्तं । आक्षेपकाभावस्योक्तत्वात् । अतएवचेतनपरतयैवेत्यवधारणमुक्तं । स्फुटैवेत्युक्तंव्यनक्ति ॥ तद्धेदमिति ॥ "स्पष्टजीवादिलिंगप्रतिपादनच्छायानुसारीणि

SGDF
Sri Gargeshwari Digital Foundation

प्र० वाक्यानिचतुर्थेविचार्यंत"इतित्वयाभाषितत्वात् । अत्रचतत्प्रापकस्यकस्याप्यभावादितिभावः । यत्कश्चिच्छैवआह् व्यपदिष्टस्य "आत्मा वाइदमेकएवाग्रआसी"दित्यादिविशेषवाक्यनिर्दिष्टस्यात्मशब्दितस्यब्रह्मणएव आकाशादिषु "आत्मनआकाशस्संभूत"इतिश्रुताकाशादिषु कार्येषु । कारणत्वेनोक्तेर्यथाकारणवाक्येषुनतांत्रिकाव्याकृतग्रहणंतथात्रापिवाक्यशेषरूपविशेषवाक्यनिर्दिष्टानामिंद्रियाणामेवोक्तेर्नतांत्रिक तत्वग्रहणंपंचजनशब्देनेत्याद्यर्थपरतयैतत्सूत्रंचपूर्वशेषोनाधिकरणांतरमिति तन्न । दृष्टांतोक्त्यापूर्वशेषत्वेविशेषाभावात् । सूत्रेपंचम्यन्वय सिद्ध्यर्थंनतांत्रिकप्रधानग्रहणमित्यध्याहाराच्च । यथाव्यपदिष्टोक्तिस्तथाप्राणादयोग्राह्याइतिप्रथमांतोक्तेरेवस्वारस्याच्च । चशब्दानर्थक्याच्च । आत्मनोब्रह्मत्वस्यसांख्यंप्रत्यसिद्धेश्चेतियत्किंचिदेतत् । दुर्गमंटीकावाक्यंव्यनक्ति ॥ **वाक्येति** ॥ ७ ॥ **आकाशाधिकरणं** ॥ ४ ॥

"वाक्ययोजनानुपपत्ते"रित्यस्यायमर्थः । ब्रह्मणएवात्माकाशादिशब्दार्थ त्वेतस्यैकत्वेनक्रमाभावात् "आत्मनआकाशः आकाशाद्वायु"रित्यादिक्र मप्रतिपादकवाक्ययोजनानुपपत्तेरिति ॥ ७ ॥ **आकाशाधिकरणं** ॥ ४ ॥

गु० प्रासंगिकत्वमुपपादयति ॥ **विप्रतिषेधादिति** ॥ **अन्यथेति** ॥ साक्षात्संगतिसंभवेपिप्रासंगिकोक्तौ ॥ **वैपरीत्येति** ॥ परस्पराविरोधएवप्रतिपाद्यः । मानां तराविरोधस्तुप्रासंगिकइतिवैपरीत्यापातादितिभावः ॥ ७ ॥ **आकाशाधिकरणं** ॥ ४ ॥

प्र० ॥ **ॐसमाकर्षात्ॐ** ॥ भिन्नाधिकरणतामाक्षिप्यसमाधत्ते ॥ **यद्यपीत्यादिना** ॥ **विरोधीति** ॥ व्याख्यातमधस्तात् ॥ **सर्वमानै रिति** ॥ न्यायविवरणएवविवृतमेतद्भगवत्पादैः । आनुमानिकमित्यत्रबहुप्रमाणविरोधःपूर्वपक्षे दोषात्यस्पृष्टिनियमस्सिद्धांतेयुक्तिः । ज्योति रित्यत्रव्युत्पत्तेरप्यशक्यता शब्दार्थानेकतातथा । नसांख्येत्यत्रपरस्परविरोधः ईशस्यबहुरूपत्वं कारणत्वेनेत्यत्रैकस्यैवकार्यकारणभावविरोधः व्यत्त्यव्यक्तिविशेषिता । प्रकृतिश्चेत्यत्रस्त्रीलिंगत्वं उत्पादनंस्वदेहात् । एतेनेत्यत्रनिषेधात्मकत्वं दुर्जनाव्यक्तता । पूर्वोत्तरयुक्तयो ध्येयाः । इत्याद्याइत्यादिशब्दोपिन्यायसाम्येनान्यपादेष्वपियुक्त्यंतरोपलक्षणमित्युक्तंसंबंधदीपिकायां ॥ **हेतुदर्शनादिति** ॥ आद्याध्यायस्थ

॥ **ॐसमाकर्षात्ॐ** ॥ यद्यप्यत्रानुव्याख्याने "विरोधिसर्वबाहुल्यकारणस्त्रीनिषेधिना"मित्येतत्पादीयाधिकरणोपाध्युक्तिदशायांपृथगुपाध्यनुक्तेस्तथा "सर्वमानैर्विरोधश्चव्युत्पत्तेरप्यशक्यता । परस्परविरोधश्चविरोधःकार्यतद्वतोः । स्त्रीलिंगत्वंनिषेधश्चपूर्वपक्षेषुयुक्तयः । दोषात्यस्पृष्टिनियमःशब्दार्थानेकतातथा । बहुरूपत्वमीशस्यव्यत्त्यव्यक्तिविशेषिता । उत्पादनंस्वदेहाच्चदुर्जनाव्यक्ततातथा । इत्याद्यायुक्तयःसाक्षात्सिद्धांतस्थापिकाइहे"तिपूर्वपक्षसिद्धांतयुक्तिसंग्रहदशायामपिपृथग्युक्त्यनुक्तेः । तथाभाष्येपिसमन्वेतव्यशब्दांतरानुक्तेः । तत्वप्रदीपानुसाराच्च "समाकर्षा"दित्यादिसूत्राष्टकस्यपूर्वाधिकरणशेषतैवयुक्ता । "साक्षादप्यविरोधंजैमिनि"रित्यादीनांवैश्वानराधिकरणशेषतावत् । तथापिपूर्वतंत्रे "हेतुदर्शनाच्चे"तिसूत्रस्यविरोधाधिकरणशेषत्वेपिपृथङ्न्यायसूचकत्वमिवास्यापितदस्तीतिदर्शयितुंटीकायामधिकरणांतरंकृतं ।

गु० ॥ ॐसमाकर्षात्ॐ ॥ नन्वेवंलक्षणापिमुख्यवृत्तिभेदःस्यादित्यतआह ॥ **लक्षणादौत्विति** ॥ ननुब्रह्मणिविद्यमानयोगरूढ्यपेक्षयाऽन्यत्रविद्यमानयोगरूढ्यो

SGDF
Sri Gargeshwari Digital Foundation

प्र० तृतीयपादे "विरोधेत्वनपेक्षंस्यादसतिह्यनुमान"मितिविरोधाधिकरणे "औदुंबरीसर्वावेष्टयितव्ये"तिस्मृतेः "औदुंबरींस्पृष्ट्वोद्गाये"दितिश्रुतिविरोधादप्रामाण्यमितिविरोधेत्वितिसूत्रेणोक्त्वातत्रैवलोभादिहेतुदर्शनाच्चसर्ववेष्टनस्मृतिरप्रमाणमितिपूर्वशेषतयायोजयित्वाऽधिकरणांतरं वेत्यादिनापृथङ्न्यायसूचकत्वंशाबरभाष्येभिहितं "वैसर्जनहोमीयंवासोध्वर्युर्गृह्णाती"त्यादिकंप्रत्यक्षश्रुतिविरोधशून्यंस्मृतिजातंकिंप्रमाणमुतनेतिसंशये कर्तृसामान्यात्प्रत्यक्षश्रुत्यविरोधाच्चप्रमाणमितिप्राप्ते लोभादिहेतुदर्शनादेवंजातीयकमप्रमाणमितिसिद्धांतितं । तद्वदस्यपूर्वशेषत्वेपिपृथक्त्वंयुक्तमित्युक्त्याप्राचीनमताविरोधस्सूचितः । समन्वेतव्यानुक्तेराशयःप्रागेवाभिहितःसर्वशब्दाअत्रचिंत्यंतइति । विषयोपाधिरपिप्रागेवोक्तः । अस्यपूर्वशेषत्वमप्यनुमतमितिनपृथक्संगत्युक्तिः । यद्वा "पूर्वोक्तन्यायै"रित्यादिनैवसासूचितेतिनोक्ता । तथाहि । आनुमानिका

अत्रचपूर्वोक्तन्यायैर्ब्रह्मणि "कल्पनोपदेशा"दितिन्यायेनचान्यत्रापि

प्र० दिनयचतुष्टयेनसर्वशब्दानांतदधीनत्वात् "चमसवदविशेषात् तथाह्यधीयतएक"इत्युक्तन्यायैर्ब्रह्मणिसमन्वयेसिद्धेतर्ह्यन्यत्रवृत्त्यभावेनतारतम्यकर्मक्रमकालादेर्देहतदंतर्गतप्राणादेर्भूतोत्पत्तेश्चासिद्धिरितिबाधकस्य "कल्पनोपदेशा"दित्यनेनान्यत्रापिमुख्यवृत्त्यभ्युपगमेनपरिहारेतर्ह्युभयत्रवृत्तिस्तुल्यास्यादितिशंकायामस्यप्रवृत्तेरनंतरसंगतिरिति । नचैवंसतिकल्पनेतिसूत्रानंतर्यमेवास्यस्यादितिशंक्यं । आकाशादिष्विति सप्तमीनिर्देशेनाकाशादेर्भूतस्यापिप्रतीतेस्तस्याश्चकल्पनेत्यत्रोक्तन्यायानुसंधानेनैवनिर्वाहेकार्येतर्ह्युभयत्रवृत्तिस्तुल्याकिमितिशंकायाअत्रसंगतत्वात् । कल्पनेतिसूत्रस्यकारणत्वेनेत्येतच्छेषत्वेननिवेशस्स्यादितिचोद्यंतुतत्रैवनिरस्तं । "तस्यज्योतिरधिकरणाक्षेपपरिहारार्थत्वा"दितिसुधावाक्यमपिकल्पनेतिसूत्रस्यतत्रैवनिवेशात्तदाक्षेपाभिप्रायं । अतएवटीकायांकल्पनेतिसूत्रमाक्षिप्तं । विषयसंशयौव्यनक्ति ॥ अत्रचेति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० मुख्यत्वइति ॥ सर्वशब्दानामितिशेषः ॥ किमिति ॥ इयंचिंताऽऽद्यसूत्रसूचिता । द्वितीयातु "जगद्वाचित्वा"दित्यनेन । अत्रटीकायांपूर्वपक्षमुपपाद्यांते "सर्वशब्दानांमुख्यवृत्त्यापरमात्मैकवाचित्वेऽन्यत्रव्यवहारलोपापाता"दित्युक्तमयुक्तमिव । हीनवृत्त्याव्यवहारसंभवादित्यतस्तदभिप्रायमाह ॥ हीनत्वइति ॥ मुख्यवृत्तित्वमिति ॥ मुख्यवृत्तित्यागस्तुनेष्टः । अभिधानव्याकरणादिसिद्धत्वात् । "अन्यत्रतुमु

मुख्यत्वेसिद्धेपि मुख्यताकिमक्षादिशब्दवदुभयत्रापितुल्याकिंवाब्रह्मण्यधिकाऽन्यत्रतुहीनेतिचिंता । तदर्थमन्यत्रहीनत्वेऽन्यत्रप्रसिद्धिरयुक्तोतयुक्तेति । पूर्वपक्षस्तु । हीनत्वेमुख्यवृत्तित्वंनस्यात् । अन्यथालक्षणादिरपिमुख्यवृत्तिभेदः स्यात् । एवंचतदधीनत्वादितिसूत्रोक्तंस्वातंत्र्यस्यनिमित्तत्वमस्तु । तद्गतत्वापेक्षयामुख्यत्वंत्वयुक्तं । अन्यत्रहीनत्वे चतत्रप्रसिद्धिर्नस्यात् । माणवकादावग्निशब्दादीनामप्रसिद्धेरिति । सिद्धांतस्तु । यथाचमुख्ययोर्योगरूढ्योर्यद्वदमुख्ययोः । गौणलक्षणयोर्भेदस्तथारूढ्योश्चयोगयोः ॥१॥ उचितंप्राज्ञरूढेर्हिप्राबल्यंमूर्खरूढितः । उत्कर्षाच्चनिमित्तस्ययुक्तोनैमित्तिकस्यसः ॥२॥ रूढित्वेपिविद्वदविद्वद्रूढ्योर्योगत्वेपियोगमहायोगयोस्तारतम्यंयुक्तं । मुख्यत्वेपियोगरूढ्योरिवअमुख्यत्वेपिगौणलक्षणयोरिव लक्षणात्वेप्यंतरंगबहिरंगलक्षणयोरिव उपचारत्वेप्युपचाररूढोपचारयोरिवचेती

प्र० ख्यवृत्तेर्नत्यागोयुक्त"इतिकल्पनेतिसूत्रएवोक्तत्वादितिभावः । ननु "स्वातंत्र्यंतत्रमुख्यंस्या"दित्युक्तदिशाभगवत्येवसर्वाधिकवृत्तेस्सिद्ध्या कथमेषाशंकेत्यतआह ॥ एवंचेति ॥ द्वितीयव्यावर्त्ययुक्त्यंतरंचाह ॥ अन्यत्रेति ॥ "समाकर्षा"दितिसूत्रभाष्यटीकाभिमतन्यायंसंगृह्णाह ॥ यथाचेति ॥ दृष्टांतपूर्वमुक्तेऽर्थेहेतुंचाह ॥ उचितमिति ॥ सः उत्कर्षइत्यर्थः । आद्यपद्यंव्याचष्टे ॥ रूढित्वेपीति ॥ व्या

SGDF
Sri Gargeshwari Digital Foundation

प्र० ख्यातमेतज्जन्मादिसूत्रे । गतार्थतामाशंक्याह ॥ **इदमिति** ॥ **अस्माभिरिति** ॥ नसूत्रकृतेतिनपौनरुक्त्यमितिभावः । द्वितीयश्लोकार्थो पितत्रैवप्रपंचितइतिभावः । "उभयंदृश्यतेविष्णौशब्दानामपिसर्वश" इत्यनुव्याख्यानंहृदिकृत्वाप्रकारांतरेणभगवतिमुख्यतामाह ॥ **यदेति** ॥ व्याचष्टे ॥ **यदारूढेरिति** ॥ प्रागेवतद्द्वयंचसर्वशब्दानांसमर्थितमितिभावः । प्रागुक्तदोषमुद्धरति ॥ **लक्षणेति** ॥ यदप्यन्यत्रेत्यापादि तंतत् "जगद्वाचित्वा" दितिसूत्रभाष्यटीकातात्पर्यव्यंजनेननिरस्यति ॥ **जगतीति** ॥ तदुपपादयति ॥ **अमुख्यइति** ॥ पाणिनीये पाणि निप्रोक्तेव्याकरणे । "गुणोर्तिसंयोगाद्योः । ओर्गुणः । ह्रस्वस्यगुण" इत्यादौगुणशब्दस्याकारादौयथाप्रसिद्धिः "अदेङ्गुण" इत्यनेनाकारै कारौकाराणांगुणत्वेनपाणिनिनासंकेतितत्वात्तथेहापिप्राज्ञैरन्यत्रहानाद्यर्थमुख्यवृत्त्याऽव्यवहारेकृतेऽनवगततच्छब्दमुख्यार्थस्यान्यत्रव्युत्पत्त्या चप्रसिद्ध्युपपत्तेरितिभावः । अत्रैतदधिकरणसूत्राणामर्थभेदंक्रमंचविवरीतुकामोपौनरुक्त्यायपूर्वेषामर्थभेदोक्तिपरटीकां "यदपिसाक्षादपी"

दमेतदधिकरणव्युत्पाद्यंप्रसंगादस्माभिर्जन्मादिसूत्रेप्रपंचितं । यदैकेनैवरूपेणसिद्धाब्रह्मणिमुख्यता । रूपद्वयेनमु
ख्यत्वसिद्धिःकिंकथ्यतेतदा ॥ १ ॥ यदारूढेःप्राज्ञसंबंधित्वेनवायोगस्यमहत्त्वेनवैकेनैवप्राबल्यसिद्धिस्तदाद्वाभ्यां
प्राबल्यसिद्धिरितिकिमुवक्तव्यं लक्षणादौतुनानुशासनाद्यस्तीतिनमुख्यभेदता । जगतिशब्दानांप्रसिद्धिस्तुतत्र
प्रयोगप्राचुर्यात् । अमुख्येपिप्रसिद्धिःस्यात्प्रयोगःप्रचुरोयदि । गुणश्रुतेरकारादौपाणिनीयेप्रसिद्धिवत् ॥ १ ॥

गु० हीनत्वेनतत्प्रसिद्धिर्नस्यात् । अन्यथामाणवकादावश्यादिशब्दानामपिप्रसिद्धिस्स्यादित्यतआह ॥ **जगतीति** ॥ ननुशब्दानांब्रह्मणिमुख्यत्वेप्यन्यपरत्वस्यपूर्वत्रो

प्र० त्यादिकांविवृणोति ॥ **अत्रेति** ॥ समाहितेत्यादिनान्वयः । अत्र अधिकरणे । अध्यायइतिवार्थः । तथात्वे इत्युक्तमित्यादिनाप्यन्वयः

अत्र वैश्वानराधिकरणे "साक्षादप्यविरोधंजैमिनि" रित्यत्रब्रह्मणिमुख्यानांशब्दानामन्यत्रप्रयोगःकिमर्थइतिशंकायांहाना दिव्यवहारार्थइत्युक्तं । "शरीररूपकविन्यस्ते" त्यत्रतुतर्ह्यन्यवाचकानामन्यत्रप्रयोगेऽव्यवस्थास्यात् । निमित्ताभावादिति शंकेश्वरसंबंधस्यनिमित्तत्वोक्त्यानिरस्ता । "कल्पनोपदेशा" दित्यत्रतुतर्ह्ययसिदग्धृशब्दस्येवान्यत्रलक्षणादिरेवस्यान्नतु मुख्यवृत्तिरितिशंकाऽन्यत्ररूढ्याद्युक्त्यापराकृता । "समाकर्षा" दित्यत्रतुतर्हिंब्रह्मण्यन्यत्रचाक्षादिशब्दवत्तुल्यतैवस्यादि तिशंकोभयत्रमुख्यत्वेपिब्रह्मणिपरममुख्यत्वमन्यत्रतुमुख्यत्वमात्रमित्युक्त्यासमाहिता । "जगद्वाचित्वा" दित्यत्रतुकथं तर्ह्यन्यत्रप्रसिद्धिरितिशंका बालानांचित्रलिखितसिंहादाविवलोकानामन्यत्रैवशब्दव्यवहारात् नतुतत्रमुख्यत्वादित्यु क्त्याऽपास्ता । "जीवमुख्यप्राणे" त्यत्रतुमुख्यतोवाच्यत्वेयालिंगंतदधीनत्वरूपनिमित्तंतस्यजीवेक्वचित् मुख्यप्राणेतुसर्वत्र संभवात्तत्रापिशब्दानामीश्वरइवमुख्यत्वादेवप्रसिद्धिरस्त्वितिशंका लिंगस्यतदंतर्यामिगतत्वस्मारणेननिरस्ता । "अन्यार्थं तुजैमिनि" रित्यत्रतुलौकिकानांशब्दानांव्यवहारार्थमन्यत्रसमाकर्षेपिवैदिकानांमुमुक्षुंप्रतिकर्मदेवतादौसमाकर्षोनिष्फलः । तस्यफलांतरानिच्छुत्वात् । मोक्षस्यब्रह्मज्ञानादेवसिद्धेरित्याशंका ब्रह्मज्ञानार्थमेवकर्मदेवतादिकंज्ञापयितुंतत्रसमाकर्ष इत्युक्त्यानिरस्ता । अत्रोत्तरसूत्रचतुष्टयेचपूर्वसूत्रादनुषक्तस्यजगद्वाचित्वस्यजगद्वाचित्वमन्यार्थमित्यादिरूपेणान्वयः ।

प्र० ॥ **जीवेति** ॥ सूत्राणामर्थष्टीकादौव्यक्तः ॥ **क्वचिदिति** ॥ वृक्षादौप्रश्नव्याख्यानाभ्यामितिसूत्रशेषभाष्यटीकार्थंव्यनक्ति ॥

SGDF Sri Gangadhar Digital Foundation

प्र० एकविज्ञानेनेति ॥ सफलमिति ॥ मोक्षाख्यफलोपेतमित्यर्थः । ननुब्रह्मज्ञानार्थंकर्मदेवतादिकंज्ञापयितुंतत्रसमाकर्षादितिपूर्वसूत्रोक्तमयुक्तं । तदनुक्त्वाब्रह्ममात्रकथनेपितज्ज्ञानसंभवेनतत्रसमाकर्षेप्रयोजनाभावादित्याशंक्यपंचमसूत्रार्थं "अन्वयस्सर्वशब्दानामशक्योज्ञातुमंजसा । इतियल्लोकवैमुख्यंजैमिन्यादिमतंवदन् । विद्याधिनाथोभगवानपाचक्रेस्वयंप्रभु"रित्यनुव्याख्यानोक्तमाह ॥ वाक्येति ॥ स्वार्थेति ॥ समिदाद्यंगस्वरूपविधानेऽपर्यवसितानांप्रयाजाद्यंगवाक्यानामेकवाक्यत्वंप्रधानविधायकवाक्यैकवाक्यत्वमित्यर्थः ॥ उक्तरीत्येति ॥ सप्तमा

एकविज्ञानेनसर्वविज्ञानेश्रुत्युक्तोमृत्पिंडमृन्मृयादिदृष्टांतस्तु यथाऽनेकमृन्मयज्ञानंतत्कारणत्वेनमृत्पिंडस्यज्ञानार्थंचेत्सफलं । अपेक्षितमृन्मयसंपादनसंभवात् । नतुस्वरूपेण । एवंकर्मदेवतादिविज्ञानमपितदाश्रयत्वादिनाभगवज्ज्ञानार्थंचेत्सफलं । नान्यथेत्यभिप्रायेणेतिज्ञेयं । वाक्यान्वयादित्यत्रवैदिकशब्दानामन्यत्रासमाकर्षेप्रतिपदंब्रह्ममात्रपरत्वेमंदानांतत्रानधिकारेणवैमुख्यंस्यात् । परस्परान्वययोग्यार्थाभिधानाभावेनवाक्यान्वयश्चनस्यात् । तथाचतत्समन्वयाधीनंब्रह्मणोजगद्धेतुत्वसर्वशब्दवाच्यत्वादिकं, तथाश्रवणादिविधिः, तथाकर्मदेवतादिपरवेदभागस्यकर्मदेवतादाववांतरप्रामाण्याभावेनकर्मदेवतादिकंनसिध्येत् । तथाचोत्तमाधिकारिस्वरूपादेरप्यसिद्ध्यापातेनतान्प्रतिपदसमन्वयोपिनसिध्येत् । समाकर्षेतु "स्वार्थबोधेसमाप्तानामंगांगित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वंपुनःसंहत्यजायत"इत्युक्तरीत्याप्रयाजादिवाक्यस्यावांतरवाक्यस्यैवसतोदर्शपूर्णमासवाक्यैकवाक्यतावत्कर्मादिभागस्यकर्मादाववांतरवाक्यस्यैवसतोब्रह्मपरवाक्यैकवाक्यतारूपोवाक्यसमन्वयोपिसिध्यतीत्युक्तं ।

गु० तत्रत्रचप्रतिपादनात्पौनरुक्त्यंस्यादित्यतआह ॥ अत्रेति ॥ वाक्यान्वयादित्यत्रत्विति ॥ वाक्यसमन्वयोपिसिध्यतीत्युक्तमितिवक्ष्यमाणेनान्वयः । अधि

SGDF Sri Gargeshwari Digital Foundation

प्र० द्योक्तरीत्येत्यर्थः । जगद्वाचित्वमन्यार्थवाक्यान्वयादित्युक्तंभवति । एतेन "अन्यावचनेपदान्वयएवयुज्यत"इत्यादिटीकाविवृता । "प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः । उत्क्रमिष्यतएवंभावादित्यौडुलोमिः । अवस्थितेरितिकाशकृत्स्नः"इतिसूत्रत्रयंवाक्यान्वयप्रकारप्रदर्शनार्थं । तत्राद्यस्य "तमेवंविद्वा"नित्यनेनज्ञानमेवमोक्षहेतुः नान्यदितिप्रतिज्ञातेऽर्थेहेत्वाकांक्षायांप्रतिज्ञासिद्ध्यर्थहेतुत्वेनकर्मादिकमुच्यतइत्यर्थउक्तः । तत्रहेतुहेतुमद्भावं "विस्तरेणसपरिकरंकर्माद्युक्त्वे"त्यादिटीकोक्तंव्यनक्ति ॥ **प्रतिज्ञेति** ॥ कर्मकथंज्ञानार्थमितिशंकायामित्यर्थः ॥ क्षुद्रेति॥

"प्रतिज्ञासिद्धे"रित्यत्रतुकथंकर्मज्ञानार्थमितिशंकायांक्षुद्रफलार्थिनंप्रतितत्तत्फलायतत्तत्कर्मविदधदपिकर्मवाक्यंमुमुक्षुंप्रतिक्षुद्रफलत्वात्कर्मणांतद्धानेनाक्षुद्रफलकंज्ञानमेवोपादेयमितिवैराग्यजननद्वाराज्ञानार्थमित्युक्तं । "उत्क्रमिष्यत" इत्यत्रत्वंतःकरणशुद्धिद्वाराकर्माण्युपादेयतयाज्ञानार्थमित्युक्तं । "अवस्थिते"रित्यत्रतुकथंब्रह्मज्ञेयमितिजिज्ञासायांस्वेतरसर्वाधारत्वेनेतिसाक्षाज्ज्ञानापेक्षितप्रकारसमर्पणायेतरोक्तिरित्युक्तमितिभेदः । सूत्रक्रमश्च । नच "समाकर्षा"दित्यादिसूत्राणिसमन्वयमात्रसाधारणबाधकोद्धारकतयाऽध्यायशेषत्वादध्यायांतेकर्तव्यानीतिशंक्यं । अत्रोक्त

प्र० "अमृतोवावसोमपोभवतियावदिंद्र"इत्यादिनादुःखसंभिन्नविनाशिफलश्रवणादितिभावः । एतेनअन्यार्थं ब्रह्मज्ञानार्थं । जगद्वाचित्वंप्रतिज्ञासिद्धेर्लिंगं लिंगत्वेनोच्यतइत्यर्थोदर्शितः ॥ **उत्क्रमिष्यतइति** ॥ उत्क्रमिष्यतोज्ञानेनमोक्षमिच्छतः । एवंज्ञानसाधनतयाकर्मादेरपि भावादन्यार्थंजगद्वाचित्वमित्यौडुलोमिर्मन्यतइत्यर्थउक्तोभवति । एतेन "मोक्षार्थ"मित्यादिटीकाभिप्रायोविवृतः ॥ **स्वेतरेति** ॥ सर्वस्य कर्मादेस्तस्मिन्नवस्थितेस्सर्वाधारत्वप्रकारकभगवज्ज्ञानं "एषसेतुर्विधारण"इत्यादिनोत्पादयितुमाधेयरूपकर्मादिजगद्वाचित्वमितिकाशकृत्स्नो

SGDF
Sri Gargeshwari Digital Foundation

प्र० मन्यतइत्यर्थोदर्शितः । एतेन "कथंज्ञातव्योहरि"रित्यादिटीकाविवृता ॥ **बाधकेति** ॥ अन्यत्रप्रसिद्धिविरोधादिबाधकस्यजगद्वाचित्वाद्युद्धारप्रकारस्येत्यर्थः । ननुतत्रटीकादौ "एतेनपूर्वोक्तहेतुने"तिवाच्यत्वसाधकतदधीनत्वाद्युक्तहेतुरेवोपात्तः । नतुबाधकोद्धारः । तथाच तदनतिदेशोनानिष्टइतिचेन्न । तस्यबाधकोद्धारोपलक्षणत्वात् । नचतत्र "असद्वाइदमग्रआसी"दित्यादिवाक्यगतासदादिशब्दानामन्यपरत्वाभावेकर्मदेवताद्यसिद्धिरूपबाधकस्यात्रेवतत्राभावान्नोपलक्षणत्वेनतदतिदेशोव्याख्येयइतिवाच्यं । अर्थांतरासिद्धेरेवबाधकत्वात् । अन्यथाप्रक्रमविरोधात् । अन्यपरत्वेनसतामेववाक्यानामत्रपादेप्रत्यधिकरणमुदाहृतत्वात् । अन्यथाऽन्यपरत्वंविनानुपपद्यमानत्वरूपान्यत्रैवप्र

बाधकोद्धारप्रकारस्य "एतेनसर्वेव्याख्याता"इत्यत्रानतिदेशापातात् । "आत्मनआकाशःसंभूत" इत्यादावाकाशादिशब्दानांब्रह्मणिमुख्यत्वेगगनादेरुत्पत्त्यादिनसिद्ध्येदितिशंकायाअत्रैवसंगतत्वाच्च ।

प्र० सिद्धत्वाभावेनपादासंगत्यापत्तेः । टीकायामन्यपरत्वशून्यवाक्योदाहरणाशयःप्रागेवानंदमयनयेभिहितः । किंचयतस्तत्रबाधकाभावोतएवास्यबाधकपरिहारस्याध्यायांतेनिवेशः । अत्रोक्तबाधकेत्यादिग्रंथस्त्वभ्युपेत्यवादेनयोज्यः । तर्हिप्रकृतिश्चेत्यनंतरंनिवेशस्स्यात् । तत्रश्रीतत्वपरतत्वेनसिद्धस्यैवोदाहरणत्वादित्यतोहेत्वंतरमाह ॥ **आत्मनइति** ॥ आकाशादिष्वितिसप्तम्यान्यपरत्वोपगमस्यस्पष्टंप्रतिभासात् । गगनादेरुत्पत्त्यादिनसिद्ध्येदित्यस्यकल्पनोपदेशादित्यनेनैवपरिहारेतर्ह्युभयत्रतुल्यवृत्तिरित्याशंकयाऽत्रैवसंगतत्वादित्यर्थः । यद्वान्यत्रापिमुख्यत्व उभयत्रवृत्तेस्तुल्यतापत्त्याकल्पनेतिसमाधानायोगाद्गगनादेरुत्पत्त्यादिनसिद्ध्येदितिशंकाभवत्येवेतिभावः । **अत्राहकश्चिद्रामानुजीयः ।**

प्र०मन्मतरीत्या "यथाव्यपदिष्टस्ये"तिपूर्वोक्तस्यानुषंगेण यथाव्यपदिष्टस्य सार्वज्ञादिना "सोकामयते"त्यादौव्यपदिष्टस्य "असद्वाइदमग्रआसी"दित्यादिवाक्येसमाकर्षादित्येवंपूर्वशेषत्वेसंभवत्यधिकरणांतरत्वंप्रकल्प्यसर्वशब्दानांजगतिव्यवहारइत्यध्याहारकल्पनमयुक्तं । द्वितीयसूत्रार्थोपिनयुक्तः । जगत्येवव्यवहारस्यप्रसिद्धिहेतुत्वात्तस्यचसूत्रेऽप्रतीतेः । तृतीयेलिंगपादास्वारस्यं । स्वातंत्र्यस्यव्यभिचारेणवाच्यत्वानिमित्तत्वात् । सूत्रस्यैवास्यव्यर्थत्वाच्च । चतुर्थेऽन्यपदेनब्रह्मज्ञानोपस्थापनंनस्वरसं । स्पष्टंच "विविदिषंती"त्यादिश्रुत्यायज्ञादीनांब्रह्मज्ञानार्थत्वमितिसूत्रमेवेदंव्यर्थं । किंच सूत्रशेषोपात्तप्रश्नोत्तरश्रुत्यर्थोनप्रकृतानुगुणः । "कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवती"तिप्रश्नेइदंसर्वमित्यस्यसंकोचकाभावेनकर्मादेरप्रकृतत्वेनतन्मात्रपरत्वायोगात् । ज्ञातशब्दस्यफलेलक्षणाप्रसंगाच्च । "द्वेविद्येवेदितव्ये"इत्यादेरुक्तप्रश्नोत्तरत्वे "अथपरे"त्यतःप्राक्तनोग्रंथस्सर्वोपिव्यर्थः । "कथंनुभगव"इतिप्रश्नार्थोप्ययुक्तः । अन्यगतविषयताप्रयोजकज्ञानविषयस्यप्रस्तुततया तस्यैवप्रश्नविषयत्वौचित्येनान्यज्ञानप्रयोजनभूतज्ञानविषयस्याप्रस्तुतत्वेनतस्यप्रश्नविषयत्वायोगात् । "यथासौम्ये"तिव्याख्यानार्थोक्तिश्चायुक्ता । मृन्मयज्ञानस्यकारणत्वेनमृत्पिंडज्ञानरूपसहकारित्वाभेनमृन्मयसंपादनफलकत्वविवक्षायांदार्ष्टांतिकवैरूप्यात् । मृन्मयज्ञानस्यमृत्पिंडज्ञानफलकत्वविवक्षायामसिद्धेः । मृन्मयज्ञानस्यपिंडज्ञानाहेतुत्वात् । कारणत्वेनपिंडज्ञानेमृन्मयज्ञानंहेतुरितिपक्षेकारणत्वेनेत्यध्याहारात् । विज्ञातशब्देफललक्षणाप्रसंगाच्च । पिंडेनेत्यत्रज्ञातेनेत्यध्याहारोनिर्बीजः । एकशब्दवैयर्थ्यंच । "यस्तन्नवेदकिमृचाकरिष्यती"त्यत्र विशिष्यऋग्ग्रहणेफलाभावेनत्रिवेदपरत्वेनकर्मादिविषयतयासंकोचेहेत्वभावात् । कर्मादिबोधकब्राह्मणपदप्रसंगाच्च । पंचमसूत्रंचायुक्तं । कर्मादिज्ञानस्यब्रह्मज्ञानार्थतायाःप्रमाणेनपूर्वमुपपादनेपुनःप्रयोजनाभावान्नसमाकर्षइत्याक्षेपानुद्धारात् । मंदानांवैमुख्यंस्यादित्यादिफलोक्ति

SGDF

प्र०श्चायुक्ता । ब्रह्मजिज्ञासायांवैमुख्यापादनायोगात् । अन्यत्रचेष्टत्वेनवाक्यान्वयाभावे उत्तमाधिकार्यसंभवेनपरिहारायोगात् । षष्ठंचायुक्तं । स्वर्गाद्यर्थकर्मोक्तेः प्रतिज्ञातार्थानुपपादकत्वात् । कर्मसमुदायस्यमोक्षहेतुत्वसंभवात् नित्यकर्मप्रतिपादनस्यलिंगत्वासंभवोवैराग्याहेतुत्वंचस्प ष्टमेव । किंचात्रसूत्रे लिंगत्वप्रकारानुपपादनेनवैराग्यद्वारातदुपपादनायसूत्रांतरस्यावश्यंभावाच्च । किंच वैराग्यहेतुत्वंकर्मादिप्रतिपादन स्यायुक्तं । ज्योतिष्टोमादिवाक्येफलेक्षुद्रत्वाप्रतिपत्त्याक्षुद्रफलकत्वाप्रतीतेः । सप्तमेकर्मणामप्रकृतत्वेनैवंशब्देनपरामर्शायोगात् । अष्टमेकर्म प्रतिपादनाभावेपिसर्वाधारत्वेनब्रह्मज्ञानसंभवात्कर्मादौसमाकर्षोव्यर्थइति । **अत्रब्रूमः** । यत्तावन्मन्मतरीत्येति **तत्तुच्छं** । त्वद्रीतेरेवायु क्तत्वात् । कारणवाक्येष्वाकाशादिचिह्नितेषुब्रह्मणएवजन्मादिसूत्रेसार्वज्ञादिनायथाव्यपदिष्टस्यकारणत्वेनोक्तेरित्युक्तत्यैवासदादिवाक्यानाम प्याकाशादीत्यादिपदेनग्रहणसंभवेनासद्वाक्यस्यापिपूर्वेणैवब्रह्मपरत्वसिद्ध्यासमाकर्षसूत्रवैयर्थ्यात् । अस्तुवासूत्रांतरं । तथापिनतस्यत्वदु क्तोर्थस्स्वरसः । यद्यसत्पदंविहायकेवलमिदमग्रआसीदित्येवश्रूयेत तदापरंकर्तृवाचिपदाभावात्तदर्थं "सोकामयते"तिवाक्योक्तस्यस्रृजत स्सर्वज्ञस्यब्रह्मणस्समाकर्षादित्युक्तिर्युज्यते । नत्वसदितिकर्तृवाचिपदेसति । यत्रयन्नास्ति पूर्वत्रसत्तत्रानुषज्यते । तत्रहिसमाकर्षोक्तिः । तस्मात्त्वत्पक्षेऽसतिचेतिसूत्रणीयं । कारणत्वेनयथाव्यपदिष्टस्योक्तेरित्युक्तौस्वारस्यं नतुसमाकर्षादित्युक्तौ । तथोक्तेरस्मदुक्तार्थएवस्वार स्यात् । त्वत्पक्षेसमितिव्यर्थंच । आकर्षादित्येवपूर्तेः । अस्मन्मतेतु सम्यगाकर्षणं जगतिब्रह्मणस्सकाशाच्छब्दानामित्यन्यत्रापिलोकसिद्ध योगरूढिरूपमुख्यवृत्तिरेवनतुलक्षणादिरितिसूचनेनततोपिहरावधिकवृत्तिरितिसूचनार्थत्वेनवृत्तितारतम्यबोधकतयासार्थक्यं । उत्तरसूत्रे "जगद्वाचित्वा"दित्युक्तयावाचकाध्याहारेतवममचावश्यंभाविनिसमन्वयप्रकरणत्वेनबुद्धिस्थतयासर्वशब्दानामित्यन्वयसिद्धेर्नाध्याहारदोषः ।

SGDF Sri Gargeshwari Digital Foundation

प्र० अक्लिष्टस्सूत्रार्थोऽव्यक्तमुक्तोऽस्माभिस्तंत्रदीपिकायां । पूर्वशेषत्वेपिन्यायांतरसूचकत्वेनाधिकरणभेदोग्रंथएवसमर्थितः । द्वितीये "जगद्वाचित्वा"दित्यस्यावृत्त्यापूर्वत्रप्रकृतसर्वशब्दानांजगद्वाचित्वात् गत्येवव्यवहारात् । जगद्वाचित्वात् जगद्वाचित्वज्ञानात् जगतिव्युत्पत्तिग्रहादित्युक्त्याविवक्षितार्थस्यसर्वस्यसूत्रएवप्रतीतिरस्ति । प्रत्युतत्वन्मतएव "यस्यचैतत्कर्मे"तिश्रुतस्यकर्मशब्दस्यक्रियतइतिव्युत्पत्त्याजगद्वाचित्वादित्याद्यध्याहारदोषः । तृतीयेलिंगपदास्वारस्योक्तिरयुक्ता । नचवक्तव्यंप्रयोगेसतिनिमित्तानुसरणंनतुनिमित्तमात्रेणवाच्यत्वकल्पनमिति । "निमित्तसद्भावेनव्यवहारापादनस्यन्याय्यत्वेनवाच्यत्वकल्पनेबाधकाभावा"दितिटीकायामेवशब्दप्रवृत्तिनिमित्तस्यतच्छब्दप्रवृत्तौपुष्कलसामग्रीत्वेनतद्वाच्यत्वकल्पनाव्यभिचारित्वेनस्वातंत्र्यरूपनिमित्तसत्त्वमात्रेणसर्वशब्दवाच्यत्वापादनंजीवमुख्यप्राणयोर्युक्तं । स्वातंत्र्यरूपनिमित्तस्यतद्व्याप्तत्वादिति तदविनाभूतत्वद्योतकतयालिंगशब्दप्रयोगस्वारस्योक्तेः । नहिस्थाणोरपराधोयदेनमंधोनपश्येत् । लिंगपदाभावेहिसूत्रेनिमित्तसत्त्वमात्रेणशब्दवाच्यत्वापादनमयुक्तं । नहिदंडसत्त्वमात्रेणघटोत्पत्त्यापादनंयुक्तमित्याशंकानिरुत्तरास्यात् । लिंगपदेतुसत्येषाशंकोन्मूल्यतइतिसार्थकमेवतत् । स्वातंत्र्यस्यव्यभिचारोद्धारेणनिमित्तत्वसमर्थनंचानुमानिकनयएवकृतमितितदज्ञानंतवैवदोषः । चतुर्थे अन्यशब्दोजीवान्यब्रह्मवाचीसंस्तज्ज्ञानपरः । प्रश्नव्याख्यानयोर्ज्ञातपदश्रवणात् । प्रश्नस्थेदंशब्दसंकोचस्यमयाप्यंगीकारात् । अतएव "कर्मादिक"मितिटीकादावादिपदं । ज्ञातशब्दस्यफलेलाक्षणिकतायास्सर्वैस्स्वीकार्यत्वात् । अन्यज्ञानेनान्यज्ञानस्यमुख्यस्याभावात् । विस्तृतमेतद्विष्णुतत्वनिर्णयादौग्रंथकृतैव । परापरविद्ययोर्विवक्षाभेदमात्रेणैवभेदेनव्यक्तिभेदाभावेनतत्स्वरूपोक्त्यर्थत्वेनपूर्वग्रंथसार्थक्यात् । कथंनुभगवस्सआदेशइत्यादिप्रश्नप्रतिवचनार्थस्यविष्णुतत्वनिर्णयादौप्रपंचनात् । दार्ष्टांतिकवैरूप्यापादनंचायुक्तं । कर्मादिजगज्ज्ञानस्यतत्कार

SGDF
Sri Gargeshwari Digital Foundation

प्र० णेश्वरज्ञानेनसहकारिणामोक्षफलसंपादनेनसारूप्यात् । श्रुतौमृत्पिंडमृन्मयादिदृष्टांतबलेनकारणत्वेनतज्ज्ञानप्रयोजनकत्वलाभेनकारणत्वे नेत्यस्यानध्याहारात् । अनेकमृन्मयकारणमेकमृत्पिंडोयथातथेहानेकविचित्रजगत्कारणमीश्वरोप्येकएव । "जनयन्देवएक" इत्यादिश्रुतेरितिदार्ष्टांतिकानुरूप्यद्योतकत्वादिनैकपदसार्थक्याच्च । अन्यथात्वत्पक्षेपिसाम्यादस्यदोषस्यैवमेवसमाधेयत्वात् । किमृचेतिविशिष्यऋक्पदंचप्राणऋचइत्येवविद्यादित्यादाविवस्पष्टमीश्वरविषयत्वाद्युक्तं । त्रिवेदपरत्वेपिवाद्यंतरोक्तदिशावा "ऋगाद्याअपराविद्यायदाविष्णोर्नवाचका" इत्युक्तदिशावाकर्मदेवताद्यन्यपरत्वात्सर्वस्यवेदस्य । कर्मादिपदेनकृत्स्नजगतएवाभिमतत्वाच्च । ब्राह्मणग्रहणापादनस्यायुक्तत्वाच्च । अन्यज्ञानस्य ब्रह्मज्ञानार्थत्वंप्रमाणेनपूर्वंसाधितमपिप्रयोजनाभावान्नयुक्तमितिशंकाभवत्येवेतिपंचममपियुक्तमेव । चंद्रिकोपपादितानेकप्रयोजनत्वात्तस्यषष्ठे

अन्येतु

प्र० ज्योतिष्टोमादिवाक्येकर्मणःक्षुद्रफलत्वाद्यप्रतीतावपि "अमृतोवावसोमपोभवतियावदिंद्र" इत्यादिनाटीकोक्तरीत्यावाक्यांतरेणतत्प्रतीतौ वैराग्यद्वाराकर्माद्युक्तेर्ब्रह्मज्ञानार्थत्वस्यटीकादौनिपुणतरमुपपादितत्वात् । प्रतिज्ञासिद्धेर्लिंगंजगद्वाचित्वमित्युक्त्यैवाभिप्रायिकस्यवैराग्यद्वारातथात्वस्यलाभेनतदुपपादनायसूत्रांतरेणभाव्यमित्यापादनस्यनिर्बीजत्वात् । सप्तमे प्रतिसूत्रंपूर्वत्रान्वितेनजगद्वाचित्वपदेनकर्मादेःप्रकृतत्वे नैवंशब्दस्याप्रकृतपरत्वापादनस्यांध्यनिमित्तकत्वात् । अष्टमे कर्मदेवतादिरूपजगदप्रतिपादनेतस्यैवाप्रतीत्यासर्वाधारत्वोक्त्यर्थंकर्मदेवतादिसर्वप्रतिपादनंयुक्तमितिसर्वमनवद्यं । प्रतिसूत्रंप्रतिपदंभूयसस्स्वारस्यस्यसत्त्वेपिग्रंथगौरवभयात्सादरंभाष्यटीकादिविमर्शिनांस्पष्टत्वाच्चनप्र
पंच्यते ॥ अन्येत्विति ॥ "आत्मनआकाशस्संभूतः तत्तेजोसृजते" तिकार्ये तथा "असद्वाइदमग्रआसीत् सदेवसौम्येदमग्रआसी" दि

प्र० तिकारणेपिविगानमाशंक्य पूर्वसूत्रेकार्यविगानंपरिहृतमिहतुकारणविगानंनिरस्यतइत्युक्तं । तत्रव्यावर्त्यपूर्वसूत्रार्थमनुवदति ॥ असद्वा इति ॥ विगानेति ॥ सृष्टिवाक्यविरोधनिरासकइत्यर्थः ॥ अर्थादिति ॥ आकाशशब्दस्यब्रह्मपरत्वेयतोवेत्यस्यानेनविरोधनिरासादितिभावः । उपलक्षणमेतत् । पूर्वोक्तदिशासमाकर्षपदास्वारस्याद्यपिध्येयं । परमतद्वये "जगद्वाचित्वा" दित्यारभ्यत्रिसूत्र्येकमधिकरणं । वाक्यान्वया" दित्यादिचतुस्सूत्र्यधिकरणांतरं । तत्राद्यमनुवदति ॥ यच्चेति ॥ कौषीतकिब्राह्मणाख्योपनिषदिचतुर्थेध्यायेऽजातशत्रुबाला

"असद्वाइदमग्रआसी" दित्यत्रासत्कारणत्वेनोच्यतइतिप्राप्ते "अस्तिब्रह्मेतिचेद्वेदे" तिपूर्वप्रकृतंब्रह्मैव "असद्वा" इत्यत्रसमाकृष्यतइति "समाकर्षा" दितिसूत्रार्थः । इदंचसूत्रं "कारणत्वेने" त्यधिकरणशेषइत्याहुः । तन्न । तथात्वेऽस्यसूत्रस्यब्रह्मण्यसच्छब्दसमन्वयसाधकत्वेनसमन्वयपरत्रिपाद्यामेवसंगतत्वेनप्रधानाशाब्दत्वनिरासके चतुर्थपादे विगाननिरासके "कारणत्वेने" त्यधिकरणेचासंगतेः । असद्वाक्यस्य "सदेवसौम्ये" तिवाक्येनविगानमपिसमाकर्षसूत्रेऽर्थान्निरस्तंचेत्तर्हि "आकाशादेवसमुत्पद्यंत" इत्यादिवाक्यानां "यतोवाइमानी" त्यादिवाक्यैर्विगानमपि "आकाशस्तल्लिंगा" दित्यादिसूत्रेष्वर्थान्निरस्तमितितेषामपिसमन्वयपरत्वंनस्यात् । यच्चोक्तमुभाभ्यां "योवैबालाकएतेषांपुरुषाणांकर्तायस्यचैतत्कर्मसवेदितव्य" इतिकौषीतकिब्राह्मणेवेदितव्यत्वेनोक्तो

गु० करणासंगतिंपरिहर्तुंशंकते ॥ असद्वाक्यस्येति ॥ प्राणशब्दादेरित्यत्रादिपदेनपरिस्पंदरूपकर्मलक्षणप्राणलिंगपरिग्रहः ॥ तन्नेति ॥ एतच्छब्दस्यैतत्परामर्श

SGDF
Sri Gargeshwari Digital Foundation

प्र० किसंवादेश्रूयते "सहोवाचयोवैबालाक" इत्यादि। अत्रवेदितव्यत्वेनोक्तोजीवः प्राणोवापरमात्मावेतिसंशये पूर्वपक्षमनुवदति ॥ **जीवस्स्यादिति** ॥ **धर्मेति** ॥ कर्मशब्दस्यरूढ्यापुण्यपापवाचित्वादितिभावः ॥ **मुख्यप्राणोवेति** ॥ यद्यपिरामानुजभाष्येजीवइत्येवपूर्वपक्षःकृतः श्रुतप्रकाशेचवेदितव्यतयानिर्दिष्टस्यप्राणनामभिरामंप्राणश्रवणादिनामुख्यप्राणवैलक्षण्यादिशिरस्कोविचारउपपन्नः । प्राणशब्दश्चप्राणभृत्त्वनिमित्तकोजीवेलाक्षणिकः । सूत्रेमुख्यप्राणलिंगशंकातुजीवोपलक्षणावगमरूपजीवसाधकोत्त्यर्था । प्राणस्यजीवोपकरणत्वादित्युक्तं । तथापिपरमतेनेदंध्येयं । यद्वा एतन्मतेद्वितीयसूत्रास्वारस्यापत्त्यामुख्यप्राणपूर्वपक्षस्यावश्यमुपपादनीयत्वाभिप्रायेणैवमुक्तमितिध्येयं । आदिपदेन "यस्यचैतत्कर्मे" त्युक्तकर्मशब्दितपरिस्पंदनाख्यंलिंगंग्राह्यं । सूत्रार्थवदन्नेवसिद्धांतमन्वाह ॥ **एतदिति** ॥ एतत् प्रत्यक्षादिसिद्धंजगत् । यस्यकर्म यस्यकार्यं सवेदितव्यइत्यर्थः ॥ **अशाब्दत्वमिति** ॥ परमतेऽव्यक्ताजशब्दयोस्तेजोबन्नादिपरत्वेनपंचजनशब्दस्यचप्राणादिपरत्वेनप्रधानपरत्वनिरासादशाब्दत्वं । केषांचिन्मतेतुस्वातंत्र्येणप्रधानपरत्वनिरासात् ॥ **अविगानमिति** ॥ एतच्चपरमतेस्पष्टं । मतां

जीवस्स्यात्। "यस्यचैतत्कर्मे" तिधर्माधर्माख्यजीवलिंगात्। मुख्यप्राणोवा। उत्तरवाक्ये "प्राणएवैकधाभवती" तिप्राणशब्दादेरितिप्राप्ते "एतत्कर्मे" त्यत्रैतच्छब्दस्यप्रत्यक्षादिसिद्धजगद्वाचित्वात्कर्मशब्दस्यचक्रियतइतिव्युत्पत्त्याक्रियमाणवाचित्वाज्जगत्कर्तृत्वस्यचजीवादावयोगाद्ब्रह्मैवेतिसिद्धांतइति। तन्न। अतीतपादत्रयेसमन्वयमेतत्पादीयानुमानिकाद्यधिकरणत्रयेचप्रधानस्याशाब्दत्वं "कारणत्वेने" त्यधिकरणेश्रुतीनामविगानंचोक्त्वापुनरिहसमन्वयोक्तेरसंगतत्वात्।

गु० कतायाः कर्मशब्दस्यक्रियमाणपरतायाअयोगादित्यर्थः। किंचात्मनस्तुकामायसर्वंप्रियंभवतीत्यनेनात्मनोनिरुपाधिकप्रियत्वस्योक्तत्वेन नवाअरेपत्युरित्यादिपूर्ववा

SGDF
Sri Gargeshwari Digital Foundation

प्र०तरेतुविरुद्धश्रुत्योदाहरणाज्जगतोब्रह्मैककारणत्वंननिश्चेतुंशक्यमित्युक्त्याचावसीयतइतिभावः। सूत्रार्थंचप्रत्याह ॥ अस्माकमिति ॥ इत्य त्रान्वितानामिति ॥ नचतत्रैवाध्याहारोदोषः । तत्रप्रकरणादिनैवसिद्धेः । तत्रपंचम्यन्वययोग्यस्यकस्यचिदवश्यंवाच्यतयातस्यैवात्रा प्यन्वयसंभवेऽत्राध्याहारोनयुक्तइतिभावः । द्वितीयसूत्रंतुनातीवविरुद्धं । केषांचिन्मतेप्राणपूर्वपक्षाभावात्प्राणलिंगोपन्यासस्यास्वारस्यंस्पष्ट मितित्यक्त्वातृतीयार्थमनूद्यनिराह ॥ यच्चेति ॥ सूत्रार्थः सूत्रैकदेशार्थः । एतेनकस्यचिदपिशैवस्यमतंप्रत्युक्तंबोध्यं । द्वितीयाधिकरणम नूद्यनिराह ॥ यच्चेति ॥ बृहदारण्यकेचतुर्थेध्यायेमैत्रेयीब्राह्मणे "नवाअरेपत्युःकामायपतिःप्रियोभवती"त्युपक्रम्य "नवाअरेसर्वस्यका मायसर्वंप्रियंभवति । आत्मावाअरेद्रष्टव्यश्श्रोतव्योमंतव्योनिदिध्यासितव्योमैत्रेय्यात्मनोदर्शनेनश्रवणेनमत्याविज्ञातेनसर्वंविज्ञात"मित्यत्रद्र

अस्माकंरीत्या "समाकर्षा"दित्यत्रान्वितानांशब्दानामेवात्रापिसूत्रेऽन्वयसंभवएतच्छब्दस्येत्यध्याहारायोगाच्च । यच्चोक्तमुभाभ्यांइहजीवोक्तिर्ब्रह्मप्रतिपत्त्यर्थेति "अन्यार्थंतुजैमिनि"रितिसूत्रार्थः । "जगद्वाचित्वा"दित्यारभ्यैतदंतं सूत्रत्रयमेकमधिकरणमिति । तन्न । "यस्यचैतत्कर्मे"त्यत्रसिद्धांतेजीवोक्तेरभावेनतस्यान्यार्थत्वोक्त्ययोगात् । मतांतरस्याभावेनजैमिनिपदवैयर्थ्याच्च । आश्मरथ्यौडुलोमिकाशकृत्स्नमतानांविकल्पप्रतीतेर्मतचतुष्टयप्रतिपादकसूत्राणांवैश्वानराधिकरणस्थानां "अभिव्यक्ते"रित्यादिसूत्राणामिवैकाधिकरणत्वस्यैवन्याय्यत्वाच्च । यच्चोक्तमुभाभ्यां

गु०क्येप्रियत्वंनास्ति। अपित्वन्यार्थप्रियत्वमितितन्निषेधात्पूर्वोत्तरव्याघातात् । नचनवाअरेपत्युःकामायपतिःप्रियोभवतीत्यत्रपत्युरिच्छार्थंपतिःप्रियोनभवतीत्येवोच्यते।

SGDF
Sri Gargeshwari Digital Foundation

प्र० ष्टव्यइत्यादिवाक्यंजीवपरंब्रह्मपरंवेतिसंशयः । पूर्वपक्षाद्याह ॥ आत्मेति ॥ सूत्रार्थमेवव्यतिरेकमुखेनाह ॥ नहीति ॥ मतद्वयेप्याद्यस्याधिकरणांतरत्वंनिरस्यतच्छेषतयाप्रतिज्ञादिसूत्रत्रयवर्णनंकृतमुभाभ्यां । तत्रातीवविरुद्धत्वात्परमतमनूद्यनिराह ॥ यच्चेति ॥ जीवोपक्रमः "नवाअरेपत्युःकामाये"त्यादिः । यथावह्नेर्विकाराव्युच्चरंतिविस्फुलिंगानवह्नेरत्यंतंभिद्यंते । तद्रूपनिरूपणत्वात् । नापिततोत्यंतम

"आत्मावाअरेद्रष्टव्य"इत्यादिकंजीवपरं । "नवाअरेपत्युःकामायपतिःप्रियोभवति । आत्मनस्तुकामायसर्वंप्रियंभवती"त्यादिपूर्ववाक्येप्रिययुक्तस्यभोक्तुर्जीवस्योपक्रमादितिप्राप्ते ब्रह्मपरमिदं । कुतः । वाक्यान्वयात् । नहि "आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदित"मित्येकविज्ञानेनसर्वविज्ञानादिवाक्यंजीवपक्षेन्वेतीति सिद्धांतइति । तन्न । समन्वेतव्यविशेषानुक्त्याऽस्यपूर्वशेषत्वस्यैवस्वरसत्वात् । यच्चोक्तंपरैः । ब्रह्मपरेद्रष्टव्यादिवाक्येजीवोपक्रमोजीवब्रह्माभेदाभिप्रायेण । तत्रचमतत्रयं । जीवोब्रह्मविकारतयाभिन्नाभिन्नः । अभिन्नत्वंचैकविज्ञानेनसर्वविज्ञानप्रतिज्ञासिद्धेर्लिंगं । नहिजीवस्यब्रह्मणात्यंतभेदेतज्ज्ञानेनजीवज्ञानमित्याश्मरथ्यमतं ।

गु० नतुस्वार्थंप्रियोनभवतीति । तथावचनविरोधइतिवाच्यं । आत्मनस्तुकामायसर्वंप्रियंभवतीत्यत्रस्वार्थंसर्वंप्रियमितिव्याख्यातवतात्वयानवाअरेपत्युःकामायेत्यत्रापि पत्यर्थंपतिःप्रियोभवतीत्येवव्याख्यानंकर्तव्यं । एकस्मिन्नेवप्रकरणआत्मनस्तुकामायसर्वंप्रियमित्यत्रकामशब्दस्यान्यपरत्वस्यनवाअरेपत्युःकामायेत्यत्रान्यपरत्वस्यकल्पयितुमशक्यत्वात् । ननुतथापिनवाअरेपत्युःकामायपतिःप्रियोभवतीत्यन्यार्थंप्रियत्वस्यानभिधानान्नविरोधइतिवाच्यं आत्मनस्तुकामायपतिःप्रियोभवतीत्यत्रात्मशब्देनपत्यादेरेवग्रहणे आत्मनस्तुकामायपतिःप्रियोभवतीत्यस्यस्वार्थंप्रियइत्यर्थकत्वापत्त्यानवाअरेपत्युःकामायपतिःप्रियोभवति आत्मनस्तुकामायपतिःप्रियोभवतीत्यस्य

प्र० भिन्नाः । वह्नेरपिपरस्परंव्यावृत्त्यभावप्रसंगात् । तथाजीवात्मानोब्रह्मविकारानब्रह्मणोत्यंतंभिद्यंते । चिद्रूपत्वाभावप्रसंगात् । नाप्यत्यंतंनभिद्यंते । परस्परमव्यावृत्तिप्रसंगात् । तस्मात्कथंचिज्जीवात्मनांभेदोऽभेदश्च । तत्रजीवात्मपरमात्मनोरभेदमुपादायपरमात्मनिदर्शयितव्योजीवात्मनोपक्रमइत्यर्थः । "उत्क्रमिष्यत"इत्यस्यार्थमन्वाह ॥ संसारइति ॥ भेदाभेदाविति ॥ तथाचभविष्यंतमभेदमुपादायभेदकालेप्यभेदेनजीवोपक्रमइत्यर्थः ॥ ब्रह्मणएवजीवत्वेनावस्थितेरित्यर्थइति ॥ आत्मैवाविद्योपधानकल्पितावच्छेद आकाशइवघटमणिका

संसारेभिन्नस्यजीवस्योत्क्रांत्यनंतरंमुक्तावेवंभावोब्रह्मभावः । तथाचकालभेदेनभेदाभेदावित्यौडुलोमिमतं । बिंबस्यप्रतिबिंबत्वेनेवब्रह्मणएवजीवत्वेनावस्थितेः । तथाचभेदःकाल्पनिकोऽभेदस्तुसत्यइतिकाशकृत्स्नमतं । इतिप्रतिज्ञासिद्धेरित्यादिसूत्रत्रयस्यार्थः । तत्रचाद्यंमतद्वयंसूत्रकृदनभिप्रेतं । श्रुत्यादिविरोधात् । तृतीयंत्वभिप्रेतमिति । तन्न । जीवोपक्रमस्यैवाभावात् । श्रुतौहि "कामाये"तिचतुर्थीव्यत्ययेनतृतीयार्थे । अस्मिन्नेवप्रकरणे "जायायै"इतिचतुर्थ्याःव्यत्ययदर्शनात् । एवंचपत्यादीनांभार्यादीन्प्रत्यहंप्रियःस्यामितीच्छयातान्प्रतिनप्रियत्वं । किंतुपरमात्मनइच्छयैवेत्यर्थः । द्युभ्वाद्यधिकरणन्यायेनात्मशब्दस्यपरमात्मनिमुख्यत्वात्परमात्मपरोपसंहारानुसारेणैवोपक्रमस्यव्याख्येयत्वात् ।

प्र० दिकल्पितावच्छेदोघटाकाशोमणिकाकाशोनतुपरमाकाशादन्यस्तद्विकारोवा । ततश्चजीवात्मनोपक्रमःपरमात्मनैवोपक्रमः । तस्यततोऽभेदादित्यर्थः ॥ श्रुत्यादीति ॥ तत्त्वमसीत्यादिनात्यंताभेदस्यैवश्रवणात् । ब्रह्मविकारत्वेजीवस्यप्रलयप्रसंगेनकृतहानादिप्रसंगाच्छ्रुतियुक्तिविरोधादित्यर्थः । परमात्मोपक्रमएवायमित्युपपादयति ॥ श्रुतौहीति ॥ उपसंहारेति ॥ "आत्मावाअरेद्रष्टव्य"इत्याद्यनुसारेणेत्यर्थः । उप

SGDF
Sri Gargeshwari Digital Foundation

संहारस्यव्याख्यानरूपतयाबलवत्त्वंप्रागेवोक्तमितिभावः । "इतिहासपुराणाभ्यांवेदंसमुपबृंहये"दितिवचनात्स्मृत्युक्तएवार्थोग्राह्यइतिभावेन बृहदारण्यकभाष्योक्तांस्मृतिंपठति ॥ पतिरिति ॥ रामानुजभाष्येहि "परमात्माहिकर्मभिराराधितस्तत्तत्कर्मानुगुणंप्रतिनियतदेशकालस्व रूपपरिमाणमाराधकानांतत्तद्वस्तुगतंप्रियत्वमापादयति । नतुतत्तद्वस्तुस्वरूपेणप्रियमप्रियंवा । यथोक्त"मित्युक्त्वाकाचित्स्मृतिरुदाहृता । तामप्युक्तार्थेसंवादितयाह ॥ तदैवेति ॥ "तदैवप्रीतयेभूत्वापुनर्दुःखायजायते । तदैवकोपाययतःप्रसादायचजायते । तस्माद्दुःखात्मकं नास्तिनचकिंचित्सुखात्मक"मितिस्मृतिशेषः । प्रीतये सुखाय । अन्यथेत्युक्तमेवाह ॥ पत्यादीनामिति ॥ इत्यर्थस्स्यादिति ॥ अस्तु

"पतिर्जायाप्रियोनैवस्वेच्छयातुभविष्यति । विष्णोरिच्छावशेनैवस्वयंचस्वप्रियोभवेत् । विष्णोरिच्छावशेनैवहं तिह्यात्मानमात्मना । स्वात्मानमप्रियंकृत्वानिरयेपातयत्यपि । तदैवप्रीतयेभूत्वापुनर्दुःखायजायत"इत्या दिवचनाच्चपरमात्मेच्छाभावेसुभगेसुरूपेपिपत्यादौजायादीनामप्रीतिदर्शनाच्च । अन्यथापत्यादीनांस्वीयत्वेनै वप्रियत्वात्स्वयमेवनिरुपाधिकप्रियइतिपरोक्तांगीकारेदुःखादेरपिस्वीयत्वेनैवाप्रियत्वात्स्वयंनिरुपाधिकाप्रियइति स्यात् । किंच "आत्मनस्तुकामाये"त्यत्रस्वार्थसर्वंप्रियमित्यर्थवत् "नवाअरेपत्युःकामायपतिःप्रिय"इत्यादा वपिपत्याद्यर्थंपत्यादिःप्रियोनभवतीत्यर्थस्यवक्तव्यत्वेनस्वार्थंस्वयंप्रियोनभवतिकिंत्वन्यार्थंप्रियइत्यर्थस्स्यात् । ॥ ८२२ ॥

गु० परस्परविरोधापत्त्या आत्मनःकामायेत्यत्रात्मशब्दस्यपत्यादिपरत्वासंभवेनान्यार्थत्वेवक्तव्येऽन्यार्थंप्रियइत्यर्थपर्यवसानाद्विरोधःस्यादेवेत्यभिप्रायेणाह ॥ किंचेति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० कोदोषइत्यतआह ॥ त्वत्पक्षइति ॥ "आत्मनस्तुकामाये"त्यत्रात्मशब्दस्येत्यर्थः ॥ परोक्तार्थस्येति ॥ स्वीयतयाप्रियत्वार्थस्यभार्यादौलोकेप्रत्यक्षादिनैवप्राप्तत्वादित्यर्थः । अप्राप्तेशास्त्रमर्थवदितिभावः ॥ नतद्विषयोयमिति ॥ तथाचतस्यसिद्धांतेगत्यभिधानमत्यंतासंगतं ।

त्वत्पक्षआत्मशब्दस्यस्वात्मपर्यायत्वेनसंबंधिशब्दत्वात्प्रतिसंबंध्याकांक्षायांपत्यादीनामेवान्वयात् । तथा चस्वस्यनिरुपाधिकप्रियत्वंनिषिद्धंस्यादिति "आत्मनस्तुकामाये"त्यस्य "नवाअरेपत्यु"रित्यादेश्चमिथोविरोधःस्यात् । अपिच परोक्तार्थस्याविगानेनमानांतरप्राप्तत्वाद्वाक्यवैयर्थ्यं । किंच "आत्मावाअरे द्रष्टव्यःश्रोतव्य"इत्यादिविधेर्जीवविषयत्वंतवापिनेष्टमितिनतद्विषयोयमर्थवादः । विध्यर्थवादयोरेकविषयत्वात् । उक्तंहि "विधिस्तुत्योःसदावृत्तिःसमानविषयेष्यत"इति । किंचपरचैतन्यव्यावृत्तस्याहमर्थस्यैवनिरुपाधिकप्रियत्वेमोक्षेऽहमर्थाभावात्तस्यानर्थत्वंस्यात् । द्वितीयसूत्रेचोत्क्रांतस्येतिवक्तव्यं । नतूत्क्रमिष्यतइति । तृतीयेप्यस्मदीयाब्रह्मणिजगतोवस्थितेरितियोजनैवयुक्ता । नतुब्रह्मणोजीवभावेनावस्थितेरितिपरोक्तावस्थितेर्हिकुत्रेत्याधारआकांक्षोत्थिता । कथमितिप्रकारेतूत्थापिता । नचोत्थिताकांक्षितस्याध्याहारंहित्वोत्थापिताकांक्षितस्यसयुक्तः । अत्रचाद्यसूत्रद्वयेप्रमेयास्वारस्यं

गु० आत्मनस्तुकामायेत्यनेनकथमन्यार्थंप्रियत्वंलभ्यतइत्यतस्तदुपपादयितुमाह ॥ आत्मशब्दस्येति ॥ ततश्चात्रवाक्ये आत्मनइत्युक्तत्वेनतत्संबंधिजायायाएवात्मनइत्यनेनपरामर्शेजायार्थंप्रियइतिलभ्यतइतिभावः ॥ परोक्तार्थस्येति ॥ स्वस्यनिरुपाधिकप्रियत्वरूपपरोक्तस्येत्यर्थः । सनयुक्तः अध्याहारोनयुक्तः ॥ ६९ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० अन्यथाअर्थवादांतरस्यापिगत्यभिधानप्रसंगइतिभावः ॥ परैरेवेति ॥ "आत्यंतिकेहिजीवपरमात्मनोरभेदेऽतात्त्विकोनाद्यविद्योपधानकल्पितोऽभेदस्तत्त्वमसीतिजीवात्मनोब्रह्मभावोपदेशश्रवणमनननिदिध्यासनप्रकर्षपर्यंतजन्मनासाक्षात्कारेणशक्यस्समूलकाषंकषितुं । रज्ज्वांहिविभ्रमइवरज्जुतत्वसाक्षात्कारेण । राजपुत्रस्यैवम्लेच्छकुलेवर्धमानस्यात्मनिसमारोपितोम्लेंच्छभावोराजपुत्रोसीत्याप्तोपदेशेन । नतुमृद्विकारश्शरावादिश्शतशोपिमृन्मृदितिचिंत्यमानस्तज्जन्मनामृद्भावसाक्षात्कारेणशक्योनिवर्तयितुं । तत्कस्यहेतोः । तस्यमृदाभिन्नस्यतात्त्विकत्वात् । वस्तुनश्चज्ञानेनछेत्तुमशक्यत्वात् । सोयंप्रतिपिपादयिषितार्थानुसारः । अपिचजीवस्यात्मविकारत्वेतस्यज्ञानध्यानादिसाधनानुष्ठा

परैरेवांगीकृतं । तृतीयेतुप्रमेयास्वारस्यमभेदनिरासेन "पृथगुपदेशा"दित्यत्रवक्ष्यतइतिनेहोच्यते ।

प्र० नात्स्वप्रकृतावप्ययेसतिनामृतत्वस्याशास्त्रीत्यपुरुषार्थत्वं । अमृतत्वप्राप्तिश्रुतिविरोधश्च । काशकृत्स्नमतेत्वेतदुभयंनास्ती"त्यादिनास्वारस्याभिधानादितिभावः । एतेनजीवोपक्रमनिर्वाहपरतयासूत्रत्रयस्यपरकृतव्याख्यानं "वाक्यान्वया"दित्यनेनगतप्रायमितिप्रत्याख्याय "विज्ञानघनएवैतेभ्योभूतेभ्यस्समुत्थाये"त्यादौविज्ञानघनादिजीववाचिशब्दैनैवतत्प्रकरणगतेनपरमात्मनिर्वाहपरंसूत्रत्रयं । तत्रजीवस्यब्रह्मकार्यतयातयोर्भेदाभेदौस्वाभाविकावितियादवप्रकाशेनोपेतत्वादभेदाभिप्रायेणजीवशब्देनपरमात्मग्रहणमेकविज्ञानेनसर्वविज्ञानप्रतिज्ञासिद्धेर्लिंगमित्याद्यस्यार्थः । द्वितीयस्यप्रागुक्तएवार्थः । तृतीयस्यतु "यस्यात्माशरीर"मित्यादेश्शरीरभूतेजीवात्मन्यात्मतयावस्थितेर्जीवशब्देनब्रह्माभिधान ॥ ८२३ ॥

प्र० मित्यर्थः । तत्राद्यंमतद्वयंप्राग्वन्नाभिमतं । तृतीयंत्वभिमतं । अनभिमतिबीजंत्वाद्ये "नजायत"इत्यजत्वश्रुतिविरोधः । कृतहानाकृताभ्यागमौ । फलभोगार्थसृष्टिविरोधः । उपायानुष्ठानवैयर्थ्यमित्यादिदूषणं । द्वितीयेप्राक्तनस्यभेदस्यस्वाभाविकत्वऔपाधिकत्वेपितात्त्विकत्वेब्रह्मभावायोगः । अस्वाभाविकत्वेवाप्रागपिब्रह्मभावात् "उत्क्रमिष्यत"इतिविशेषोक्त्ययोगइत्यादीतिकैश्चिदुक्तंनिरस्तं । उत्क्रांतस्येतिवाच्यत्वात् । प्रमेयास्वारस्यस्यसूत्रद्वयेतैरेवांगीकारात् । तृतीयेतुमुख्यशरीरत्वाभावस्यांतर्यामिनयेऽभिधानादितिध्येयं । **एतेन**प्रायोरामानुजरीतिमनुसरतःकस्यचिदपिमतंनिरस्तंबोध्यं । वाक्यान्वयादित्यादेःप्रागुक्तदोषात् । आत्मशब्दस्यवैष्णवत्वेनप्रागेवाभिधानात् । "पतिर्जायाप्रियोनैवे"त्यादिहयग्रीवसंहितावचनैरस्यप्रकरणस्यवैष्णवत्वोक्तेरात्माशिवइतिसिद्धांतस्यायुक्तत्वाच्च । **यच्चोक्तं**तृतीयसूत्रोक्तंजीवस्थतयाजीवशब्दवाच्यत्वमितिमतंसूत्रकृदभिमतं । अथर्वशिरसिप्रथमखंडे "देवाहवैस्वर्गंलोकमगमन् । तेदेवारुद्रमपृच्छन् । कोभवानिति । सोब्रवीत् । अहमेकःप्रथममासं । वर्तामिचभविष्यामिच । नान्यःकश्चिन्मत्तोव्यतिरिक्तइति । सोंतरादंतरंसंप्राविशत् । सोहंनित्योऽनित्योहंब्रह्माहंप्रपंचोहंप्रत्यंचोह"मित्यादिनाशिवस्यचिदचिदनुप्रवेशेनसर्वशब्दवाच्यत्वश्रुतेरिति । **तन्न** । शास्त्रदृष्ट्येतिन्यायेनरुद्रःस्वांतर्याम्यपेक्षयासर्वानुप्रवेशंसर्वशब्दवाच्यत्वमाहेत्युपपत्तेः । "शवरूपीशिवेस्थित"इत्यादेः । द्युभ्वादिनयभाष्योक्तानेकस्मृतिवचनोक्तरीत्यारुद्रशब्दस्यवैष्णवत्वाच्च । अन्यथाऽनेकश्रुत्यादिविरोधात् । विस्तरस्तुगुरुपादकृतपरतत्वप्रकाशेद्रष्टव्यः ॥ ७ ॥ **समाकर्षाधिकरणं ॥ ५ ॥**

टीकाक्षरार्थस्तुस्पष्टः ॥ ७ ॥ समाकर्षाधिकरणं ॥ ५ ॥

समाकर्षाधिकरणं ॥ ५ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐप्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात्ॐ ॥ अत्रसूत्रेप्रकृतिशब्दस्यप्रधानस्त्रीनामतयाप्राधान्येनान्योपलक्षकतयोपादानात्स्त्रीलिंगाः प्रकृत्यादिशब्दाउदाहरणमितिप्रागेवव्यक्तं । अत्रतत्वप्रदीपे "यद्यपिपरत्वावरत्वादिकमपेक्षाभेदादेकत्रयुगपदुपलभ्यते । एकत्रबहुभावःकार्यकारणभावश्चकथंचिद्युज्यते । नतथास्त्रीपुंभावोयुगपदेकत्रदृष्ट"इत्युक्तं । तद्विवृतिपूर्वकमाकाशनयेनैवसंगतिमाह ॥ **युक्तेइति** ॥ आकाशस्थाव्यक्तात्स्वरूपादेववायूत्पत्तेःप्रागव्यक्तस्यवायुगतरूपस्यवायूत्पत्तौव्यक्तरूपभेदाद्युज्यतेव्यक्तत्यव्यक्तिभावः । नचैवंप्रकृते । "स्त्रियस्सतीस्ताँउमेपुंसआहु"रितिश्रुतेरेकस्मिन्नपिद्वयोस्सत्त्वादित्यर्थः । भिन्नाधिकरणत्वपक्षेतुसर्वशब्दानांवृत्तितारतम्यकथनमयुक्तं । स्त्रीलिंगानांभगवतिवृत्तेरयोगादित्याक्षेपादितिध्येयं । एवमेवपूर्वानंतर्येवाच्येतथोक्तिस्तुकारणत्वेनेत्यनेनास्यागतार्थत्वायेति । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ "एषाप्रकृतिरविकृतिः । अदितिर्देवतामयी"इत्यादौश्रुताःप्रकृत्यादिशब्दाइत्यर्थः ॥ **अन्यपराइति** ॥ यद्यपिटीकायांप्रकृत्यादिशब्दवाच्यंविष्णुरन्यद्वेत्येवचिंताप्रदर्शिता । युक्ताचैवमेवचिंता । प्रवृत्तिनिमित्तवत्त्वेनार्थसाधुत्वाचिंतायामुख्यवृत्तिहेतुत्वात् । तथापिवाच्यत्वसिद्धावपितात्पर्यंनेत्यपिशंकायाअवश्यंनिराकार्यत्वात् निमित्तसद्भावेनार्थसाधुत्वेसतिप्रागुक्तहेतुभिरत्रत्यप्रतिज्ञादृष्टांतादिरूपहेतुनाचतात्पर्यंसेत्स्यतीतिभावेनपरत्वचिंतोक्तावपि प्रागुक्तदिशामुख्यवृत्त्यान्यपराब्रह्मपरावेत्यत्रतात्पर्यंबोध्यं । अतएवाग्रेवाच्योनेत्युक्तिः ।

॥ ॐप्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात्ॐ ॥ युक्तेरूपविशेषाद्व्यक्त्यव्यक्ती । स्त्रीत्वपुंस्त्वेत्वेकस्मिन्नयुक्तेइत्याक्षेपादनंतरसंगतिः। अत्रप्रकृत्यादिशब्दाःकिमन्यपराःकिंवाब्रह्मपराइतिचिंता ।

गु० ॥ ॐप्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात्ॐ ॥ अनंतरसंगतिरिति ॥ वैषम्यरूपानंतरसंगतिरित्यर्थः ॥ **अन्यथेति** ॥ सर्वथास्त्रीत्वनिषेधइत्यर्थः ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० एतेनशक्तितात्पर्यनिर्धारणस्यसमन्वयशब्दार्थत्वाट्टीकायांवाच्यत्वमात्रोक्तिरत्रतुतत्परत्वमात्रोक्तिःकथमित्यपिप्रत्युक्तं । ग्रंथद्वयेप्युभयत्रतात्पर्यादिति । एवमाद्यसूत्रोपयुक्तचिंतामुक्त्वा "योनिश्चही"त्यंतिमसूत्रोपयुक्तचिंताद्वयमाह ॥ **तदर्थमिति** ॥ **अर्थसाधुत्वमिति** ॥ अस्त्रीत्वेपिब्रह्मशब्दस्यैवशब्दसाधुत्वमात्रेणप्रयोगस्याग्रेनिरस्यत्वादर्थसाधुत्वंनयुक्तमुतयुक्तमित्येवाचिंतोक्ता ॥ **अन्यदिति** ॥ सूतिहेतुत्वरूपमित्यर्थः । फलफलिभावोऽव्यक्तः । अत्रयद्यपिप्रसिद्धस्यनिमित्तत्वेपितस्यब्रह्मण्यभावेपिस्वातंत्र्यनिमित्तेनब्रह्मपरास्स्युरेव । तथापिस्वातंत्र्येसत्येवतद्गतत्वमुपेत्यैवचिंताप्रवृत्तेःप्रागेवोक्तत्वादेवमुक्तं । पूर्वपक्षटीकांव्यनक्ति ॥ **एषाह्येवेति** ॥ "आत्मकृते"रितिसूत्रव्यावर्त्यहेतुमाह ॥ **तेषामिति** ॥ टीकोक्तहेतुमाह ॥ **स्त्रीति** ॥ "परमपुरुषेचे"त्यादिटीकार्थमाह ॥ **परमेति** ॥ **रूपविशेषेति** ॥ नारायणीरूपाद्यपेक्षयेत्यर्थः । एनंस्त्रियंब्रुवन्नवदतीत्यर्थः । केवलस्य पुंस्त्वविनाकृतस्य । तथाचरूपविशेषेस्त्रीत्वंयुक्तमितिभावः । अस्त्रीपुमान् अस्त्रीपुमांसंवद

तदर्थंस्त्रीलिंगस्यब्रह्मणिकिमर्थसाधुत्वंनयुक्तमुतयुक्तमिति । तदर्थंकिंप्रसिद्धमेवस्त्रीत्वमर्थसाधुत्वनिमित्तमुतान्यदिति । पूर्वपक्षस्तु । "एषाह्येवप्रकृतिरविकृति"रित्यादिवाक्यस्थप्रकृत्यादिशब्दवाच्योन विष्णुः । तेषामन्यत्रप्रसिद्धत्वात् । स्त्रीलिंगत्वाच्च । परमपुरुषेचस्त्रीत्वायोगात् । नचरूपविशेषापेक्षया स्त्रीत्वं । "नैनंवाचास्त्रियंब्रुव"न्निति स्त्रीत्वनिषेधात् । नचतत्केवलस्यलौकिकस्यवास्त्रीत्वस्यनिषेधेनाहेयत्वपरं । अन्यथा "नैनमस्त्रीपुमान्ब्रुव"न्नित्युत्तरवाक्यविरोधादितिवाच्यं । तथात्वेपुंरूपेस्त्रीशब्दा

गु० **तथात्वइति** ॥ रूपविशेषापेक्षयास्त्रीत्वं । तथाचयदिरूपविशेषापेक्षयास्त्रीत्वंपरमात्मनस्तदास्त्रीरूपएवस्त्रीवाचकशब्दप्रयोगापत्त्यापुंरूपेस्त्रीवाचकशब्दप्रयोगोन

SGDF
Sri Gargeshwari Digital Foundation

प्र० न्नवदतीत्युभयनिषेधनिंदनेनोभयसमाहारस्यानुमतत्वादितिभावः ॥ **अप्रयोगेति** ॥ "पावमान्यइत्याचक्षत एतमेवसंत"मित्यादौदर्शना त्स्त्रीशब्दाप्रयोगोऽनिष्टइतिभावः । "नचनपुंसकशब्दप्रवृत्तिव"दित्यादिटीकायांस्त्रीत्वाभावेपिस्त्रीलिंगशब्दवृत्तिंनपुंसकशब्दवृत्तिवदाशंक्य "नियामकविशेषाभावेनकल्पनायोगा"दित्यनेनाद्यादिसूत्रत्रयोक्तहेतुव्यावर्त्यहेतुरुक्तः । सतूपलक्षणमितिभावेनवा नियामकाभावेपितथा त्वमित्यतोवा तांटीकांव्यनक्ति ॥ **ब्रह्मणीत्यादिनादोषोस्तीत्यंतेन** ॥ **कलत्रेति** ॥ भार्यादावितिशेषः । तथैवास्तुप्रकृतइत्यतआह ॥ **नचेति** ॥ अस्त्वित्यतआह ॥ **अरुणयेति** ॥ "अरुणयापिंगाक्ष्यैकहायन्यागवासोमंक्रीणाती"त्यादावपिशब्दसाधुत्वेपुंगवस्यैवक्रयहेतुता पत्त्यायाज्ञिकानुष्ठानविरोधः । "पशुनायजेते"त्यत्रस्त्रीपशुनापियागःस्यादित्यर्थः । अतएवचतुर्थाद्यपादे "तथाचलिंग"मितिषष्ठनये एक त्ववत्पशुगतंलिंगंविवक्षितमित्युक्तं । कथंतर्ह्याद्यस्यचतुर्थपादेचित्राज्याधिकरणेचित्राशब्दस्ययागनामत्वमुक्तमित्यतआह ॥ **चित्रयेति** ॥

प्रयोगापातात् । ब्रह्मणिनपुंसकलिंगब्रह्मादिशब्दप्रयोगस्तुनपुंसकलिंगस्यार्थसाधुत्वाभावेपिकलत्रादिशब्देष्विवप्र योगसाधुत्वाद्युक्तः । नचप्रकृत्यादिशब्देस्त्रीलिंगस्यचित्प्रकृत्यादावर्थसाधुत्वेसंभवतिदेवताखट्वादिशब्देष्विवप्रयो गसाधुत्वंयुक्तं । "अरुणयाक्रीणाति पशुनायजेते"त्यादावपितत्प्रसंगात् । "चित्रयायजेतपशुकाम"इत्यादौतु

गु० स्यादित्यर्थः । नन्वेवंस्त्रीलिंगस्यार्थसाधुत्वाभावाद्ब्रह्मणिप्रयोगाभावेनपुंसकलिंगस्यापितदभावात्प्रयोगोनस्यादित्यतआह ॥ **नपुंसकेति** ॥ नन्वेवंनपुंसकलिंगवदे वब्रह्मणिस्त्रीलिंगशब्दप्रयोगःशब्दसाधुत्वादेवास्त्वित्यतोवैषम्येणपरिहरति ॥ **नचेति** ॥ **तत्प्रसंगादिति** ॥ तथाचारुणयेत्यत्रार्थसाधुत्वाभावेनशब्दसाधुत्वा भ्युपगमेवृषभस्यापिसोमक्रयसाधनतास्यात् । पशुनायजेतेत्यत्रप्रयोगसाधुत्वमात्रत्वेपशुशब्दस्यमेषीपरतास्यात् । तथाचमीमांसाविरोधःस्यादिति भावः । अधिका

प्र० पशवःफलंचेतिसामानाधिकरण्यं । "यस्मिन्गुणोपदेशःप्रधानतोभिसंबंध"इत्यधिकरणेचिंतितं "अग्नीषोमीयंपशुमालभेते"तिविहितपशुया गमात्रंयजेतेत्यनेनानूद्यतस्मिन्पशौचित्राशब्देनचित्रत्वस्त्रीत्वेविधीयेतेउत "दधिमधुघृतमापोधानास्तंडुलास्तत्संसृष्टंप्राजापत्य"मितिप्रकृतोयागः पशुफलायविधीयते । चित्राशब्दस्यचित्रद्रव्यवाचकत्वात्तत्रैवनामत्वमितिविशये चित्रगुणकद्रव्येरूढत्वादेकपदोपात्ततयाचित्रत्वस्त्रीत्वयोरुभ यविशिष्टैककारकविधानेनावाक्यभेदात्पशुकामपदस्यापिसाधनकामनानुवादादितिप्राप्ते प्रत्येकंस्त्रीत्वादिविधानेवाक्यभेदादुभयविशिष्टकार

पुंपशौप्राप्तेस्त्रीत्वंचित्रत्वंपशवःफलंचेत्यनेकविधानेवाक्यभेददोषाल्लिंगस्यप्रयोगसाधुत्वमाश्रि त्यचित्रशब्दस्ययागनामतोक्ता । नचेहतथाचित्प्रकृतिपरत्वेदोषोस्ति । किंच लिंगस्यप्र योगसाधुत्वेपिस्त्रीत्यादिशब्दानामपीहविषयत्वात्कथंतेषांपरमपुरुषेवृत्तिः । एतेन "स्वर्ग कामोयजेत ब्राह्मणोनहंतव्य"इत्यादौपुँल्लिंगंयथानविवक्षितं स्त्रियाअपिपुंसासहाधिकारादेः

प्र० कविधानेपिगौरवदोषस्यसत्त्वाद्यागनामत्वमितिसिद्धांतइति ॥ **पुंपशाविति** ॥ अग्नीषोमीययागानुवादात्तत्रचपशुशब्देनाग्नीषोमीयमिति निर्देशबलात्पुंपशोःप्राप्तौसत्यामित्यर्थः । वाक्यभेदेति गौरवस्याप्युपलक्षणं ॥ **नचेहेति** ॥ "नामानिसर्वाणी"तिश्रुतिविरोधोदोषइतिचेन्न । "सर्वेभ्यःकामेभ्योदर्शपूर्णमासा"वित्यादाविव "सर्वनाम्नःसंकोचोपपत्ते"रितिटीकायामेवव्यक्तमितिभावः ॥ **स्त्रीत्यादीति** ॥ अत्रप्रा तिपदिकार्थस्यैवस्त्रीत्वादितिभावः । ननु "तार्श्वेंद्रधर्मनासत्यसंश्रयाच्छ्रियईरिता"इत्युक्त्याऽन्यत्रश्रीशब्दस्ययोगेनवृत्तिवदिहापिस्तृणात्या

SGDF
Foundation

प्र० च्छादयतीतिस्त्रीशब्दार्थोऽस्त्वितिचेन्न । प्रसिद्धप्रवृत्तिनिमित्तस्यतद्गतत्वेनेहाभिप्रेतत्वात् । व्यक्तमेतद्ग्रंथएवाग्रे ॥ षष्ठादाविति ॥ षष्ठस्याद्यपादे "लिंगविशेषनिर्देशात्पुंयुक्तमैतिशायन" इतितृतीयेधिकरणेपुंसएवाधिकारउतस्त्रियोपीतिसंशये तत्रपुँल्लिंगनिर्देशात्पुंसएवाधिकारइतिप्राप्ते गृहैकत्ववदुद्देश्यविशेषणत्वाल्लिंगंनविवक्षितमितिस्त्रियाअप्यधिकारइतिस्थिते "स्ववतोस्तुवचनादैकधर्म्यंस्या"दितिचतुर्थेऽधिकरणेदंपतिभ्यांपृथक्कार्यंसहवेतिसंशये यजेतेत्याख्यातप्रत्ययगतायास्संख्यायाउद्देश्यगतत्वाभावेनविवक्षायावारयितुमशक्यत्वादेकैककर्तृकत्वाद्दंपतिभ्यांपृथगेवकर्मानुष्ठेयमितिप्राप्ते कर्मणितत्रतत्रपत्न्यवेक्षणंयजमानावेक्षणमित्युभयोरप्याम्नानादसहायकर्तृत्वेकर्मवैगुण्यप्रसंगा

षष्ठादौस्थितत्वात् । तथात्रापिलिंगंप्रत्ययार्थत्वात्प्रातिपदिकार्थत्वेप्युद्देश्यविशेषणत्वादविवक्षितं । उक्तंहि "योब्राह्मणइतिह्युक्तेहननप्रतिषेधतः । ब्राह्मणेप्रतिषेधेवाल्लिंगंनान्यद्विधीयत"इतीतिनिरस्तं । "ब्राह्मणोनहंतव्य"इत्यादाविव

प्र० दाख्यातप्रत्ययोपात्तैकत्वसंख्यायादंपत्योरेकमेवकर्तृत्वमितितदभिप्रायेणाग्नीषोमौदेवतेतिवदुपपत्तेर्दंपत्योस्सहाधिकारइत्युक्तेरितिभावः । ननुस्त्र्यादिप्रातिपदिकार्थत्वाद्ग्रहस्वरूपवद्विवक्षितमेवेत्यतआह ॥ प्रातिपदिकेति ॥ "प्रकृत्यार्थोपिखल्वेतदुद्देश्यस्यविशेषणं । संख्ययातुल्यनीतित्वान्नविवक्षांप्रपद्यत"इतिशास्त्रदीपिकायामेवोक्तेरितिभावः ॥ उक्तंहीति ॥ आद्येतृतीयपादेशिष्टाकोपनये "अपिवाकारणाग्रहणेप्रयुक्तानिप्रतीयेर"न्नितिसूत्रवार्तिकउद्देश्यविशेषणत्वादविक्षितमित्येतदुक्तमित्यर्थः । योब्राह्मणइतिह्युक्ते योब्राह्मणइत्युद्देश्यतयोक्तेब्राह्मणे । लिंगं पुँल्लिंगं । अन्यत् अन्यत्वेनार्थांतरत्वेन । नविधीयते । कुतः । हननप्रतिषेधतः योब्राह्मणइतिब्राह्मणमुद्दिश्यहननस्यप्रतिषेधात् । वा

SGDF
Sri Gargeshwari Digital Foundation

प्र० अथवा । यद्ब्राह्मणहननंतन्नकुर्यादितिब्राह्मणहननोद्देशपक्षेपि । प्रतिषेधे कर्मणिघञ् । प्रतिषिध्यमानेब्रह्महनने । लिंगंनविधीयते पुंकर्मकंहननमित्येवंनविधीयते । पक्षद्वयेपिलिंगविधानांगीकारे योत्राह्मणस्सनहंतव्यः सचपुमान् यद्ब्राह्मणहननंतन्नकुर्यात् अकार्यंचब्रह्महननंपुंविषयमितिवाक्यभेदप्रसंगात् । अतउद्देश्यविशेषणत्वादविवक्षितंलिंगमिति । हननंप्रतिषेधतइतिपाठांतरमप्याश्रित्यार्थांतराण्यपिराणकेभिहितानि ॥ **एषेति** ॥ एषेत्यनूद्यप्रकृतिरित्यादेर्वा एषाप्रकृतिरित्यनूद्याऽविकृतिरित्यादेर्वाविधानादितिभावः ॥ **पुंस्त्ववदिति** ॥ चतुर्थस्याद्यपादे "तथाचलिंग"मितिषष्ठेऽधिकरणेपशुगतंलिंगंविवक्षितंनवेतिसंदेहे अलिंगेविपरीतलिंगेवृक्षादौमक्षिकादौचशब्दप्रयोगादशब्दार्थत्वादविवक्षितमितिप्राप्ते सिंहःसिंहीत्यादावनन्यथासिद्धलिंगप्रतीतेस्तस्यशब्दवाच्यत्वकल्पनांविनानुपपत्तेश्शब्दार्थत्वाद्विधेयगतत्वेनैकत्ववल्लिंगंविवक्षितमित्युक्तं । तद्वदित्यर्थः ॥ **प्रातिपदिकार्थत्वेनेति** ॥ अतएवतृतीयेचमसाधिकरणेग्रहत्वस्यप्रातिपदिकार्थत्वेनविवक्षितत्वान्नच

"एषाह्येवप्रकृति"रित्यादावुद्देश्यविशेषणत्वाभावात् । प्रत्युत "पशुनायजेते"त्यत्रपशुगतपुंस्त्ववद्विधेयविशेषणत्वेनविवक्षितत्वात् । ब्राह्मणत्वस्यब्राह्मणप्रातिपदिकार्थत्ववत्स्त्रीत्वस्यस्त्रीत्यादिप्रातिपदिकार्थत्वेनब्राह्मणत्ववदुद्देश्यविशेषणत्वासंभवाच्च ।

गु० रादेरित्यत्रादिपदेनब्राह्मण्याअहिंसनस्यसंग्रहः ॥ **उद्देश्यविशेषणत्वाभावादिति** ॥ स्वयमुद्देश्यत्वेनविशेषणत्वाभावादित्यर्थः । नन्वेतदधिकरणंव्यर्थं । स्त्रीलिंगादिशब्दानांज्योतिरुपक्रमादितिन्यायेनयौगिकत्वसिद्ध्यातदधीनत्वन्यायेनस्वातंत्र्यनिमित्तकत्वेनब्रह्मपरतायाःसिद्धत्वात् । नचप्रसिद्धस्त्रीत्वस्यतद्गतत्वंनिमित्तीकृत्यब्रह्मणिवृत्तिसिद्ध्यर्थमिदमधिकरणंसार्थकमितिवाच्यं । तथात्वेज्योतिरित्यनेननपुंसकमित्यादिशब्दानांयौगिकत्वेपितदधीनत्वादित्यनेनस्वातंत्र्यनिमित्तकत्वेपि

SGDF
Sri Gargeshwari Digital Foundation

प्र० मसादीनांसंमार्गइत्युक्तं "संस्काराद्वागुणानामव्यवस्था"दित्यत्रेतिभावः । "नचनपुंसकशब्दवृत्तिवत्परमात्मनिस्त्रीशब्दप्रवृत्तिः । नियामकविशेषाभावेनकल्पनायोगा"दितिटीकायांनपुंसकेतिशब्दोनपुंसकशब्दः तद्वदितिविग्रहमाश्रित्यपरिहारेचदृष्टांतेदार्ष्टांतिकेचकल्पना योगादित्येतट्टीकार्थमाह ॥ **नपुंसकमित्यादीति** ॥ यौगिकत्वेपीत्यादिनागतार्थतापरिहारोदर्शितः ॥ **न्यायसाम्येनेति** ॥ तेन "कारणस्त्रीनिषेधिना"मितिविषयमालायांस्त्रीतिविषयोपाध्युक्तिरुपलक्षणमितिसूचितं । एतेनप्रकृतिःस्त्रीत्यादिशब्देष्वपियोगेनस्वातंत्र्यरूपनिमित्तेनवाहरौवृत्तिःप्रत्युक्ता । "नचास्त्रीभूतस्यापिस्त्रीनियामकत्वेने"त्यादिटीकातुप्रागेवद्वेधाव्याख्यातेतिस्वातंत्र्यनिमित्तकत्वेपीत्युक्तेष्टीकाविरोधोनशंक्यइतिभावः । ननु छंदोनयेस्त्रीलिंगगायत्रीशब्दप्रवृत्तिर्हरावुक्ता । तद्वत्स्यादत्रापीत्यतोद्वेधासमाधिमाह ॥ **एवमिति** ॥ **नतस्येति**॥ एतेनटीकायांतदाक्षेपाप्रदर्शनस्यबीजमुक्तंभवति । "योनिश्चहिगीयत"इतिसूत्रव्यावर्त्यपूर्वपक्षस्येहप्रपंचनात्तत्सूत्रभाष्यटीकातात्पर्यकथनेन

नपुंसकमित्यादिशब्दानांब्रह्मणि "ज्योतिरुपक्रमा"दितिन्यायेनयौगिकत्वेपि "तदधीनत्वा"दितिन्यायेनस्वातंत्र्यनिमित्तकत्वेपिप्रसिद्धस्यनपुंसकत्वस्यतद्गतत्वंनिमित्तीकृत्यब्रह्मणिप्रवृत्तिरिहपूर्वपक्षेन्यायसाम्येनाक्षिप्यते । एवंगायत्र्यधिकरणादेरप्याक्षेपः । यद्वा तत्पूर्वपक्षेछंदस्यपिस्त्रीलिंगंप्रयोगसाधु। अत्रतुचित्प्रकृतावर्थसाध्विति वैषम्यान्नतस्याक्षेपइति । सिद्धांतस्तु ।

गु० प्रसिद्धस्यनपुंसकत्वस्यब्रह्मणिवृत्तिसिद्ध्यर्थमधिकरणांतरस्यापिकर्तव्यतापत्तेरित्यतआह ॥ **नपुंसकमित्यादिशब्दानामिति** ॥ कंपनादित्यत्रेति ॥ "श्रुत्य

प्र० सिद्धांतयति ॥ **स्वदेहादिति** ॥ श्लोकंप्रमाणपूर्वंव्यनक्ति ॥ **ईश्वरोहीति**॥ स्वदेहादित्यनुव्याख्यानोक्तब्रह्मतर्कवाक्यं । सच्चिदानंदात्मकात्स्वदेहात् । भुक्तपूर्वं पूर्वकल्पेसंहृतेनसदृशमित्यर्थः ॥ **उक्तंह्येतदिति** ॥ "श्रुत्यर्थनिर्णयार्थत्वात्स्मृतेस्तत्रनिरूपितः । अर्थोग्राह्योवेदवाक्येतदयोगेतुलौकिक"इत्यादिनेतिभावः । तस्मात् प्रवृत्तिनिमित्तसत्त्वादित्यर्थः । "नैनंवाचेतिनिषेधस्त्वज्ञेयतामात्रार्थ"इत्यादिटीकायामेवोक्तमितिभावः । नपुंसकमित्यादिशब्दानामप्यरागाकृष्टत्वादिनानिमित्तांतरेणहरौवृत्तिर्ध्येयेतितात्पर्यं । अत्रटीकादौप्रतिज्ञादृष्टांतेतिसूत्रशेषक्

स्वदेहात्प्राणिनांसूतिहेतुत्वंस्त्रीत्वमुच्यते । तच्चास्तिब्रह्मणस्तस्मात्स्त्रीशब्दास्तस्यवाचकाः ॥ १ ॥ ईश्वरोहिप्रलयेस्वोदरेनिवेशितंब्रह्मादिप्राणिजातंस्वदेहादेवस्थूलदेहविशिष्टतयाजनयतीति "स्वदेहादिच्छयाविश्वंभुक्तपूर्वंजनार्दनः । ससर्जमातापितृवदूर्णनाभिवदेवचे"त्यादिभिःसिद्धं । तदेवचेहस्त्रीत्वं । "सूतिरव्यवधानेनस्त्रीत्वमाहुर्मनीषिण"इत्यादिस्मृत्युक्तस्यैवश्रुतौग्राह्यत्वात् । उक्तंह्येतत् "कंपना"दित्यत्र । तस्मात्स्त्रीशब्दाअपिब्रह्मणिमुख्याएवेति । अत्रचाद्येसूत्रे "नामानिसर्वाणी"त्यादिश्रुतिस्थसर्वशब्दस्यसंकोचशंकायां "हंतैतमेवे"त्यादिभाष्योदाहृतश्रुतेरुपक्रमोपसंहारोपपत्तिभिःसामान्येनसर्वशब्दवाच्यत्वेतात्पर्यनिश्चयान्नसर्वशब्दस्यप्रकृत्यादिशब्देतरविषयत्वेनसंकोचःशंक्यइत्युक्तं ।

प्र० त्यस्यास्फुटत्वात्पूर्वपक्षटीकायां "नचनामानिसर्वाणीत्यादिविरोधः। उक्तन्यायविरोधेनतत्संकोचोपपत्ते"रित्युक्तिरेवसूत्रशेषव्यावर्त्योक्तिरितिभावेनसूत्रांशकृत्यमाह ॥ **नामानीति** ॥ "हंतैतमेवसर्वाणिनामान्यभिवदंती"त्युपक्रमः। "एवमेतानिनामानिसर्वाणी"त्युपसंहारः। दृष्टांतोक्त्यासूचितोपपत्तिरित्युपक्रमेत्याद्युक्तं ॥ **प्रकृत्यादीति** ॥ सूत्रेप्रकृतिशब्दोऽन्योपलक्षकइत्युक्तंभवति । अत्रज्योतिरित्यादाविवप्रकृति

SGDF
Sri Gargeshwari Digital Foundation

प्र० रित्येतावतापूर्तौचशब्दोव्यर्थः। परमतइवकर्तृत्वसमुच्चयानभ्युपगमादित्यतः "प्रकृत्यादिस्त्रीशब्दवाच्यश्चेश्वर"इतिटीकासूचितमर्थमाह ॥ चशब्दस्त्विवति ॥ द्वितीये अभिध्योपदेशाच्चेत्यत्र । भाष्याद्युक्तमर्थद्वयं "अभिध्यायाःप्रकृतित्वोपदेशात्स्वरूपत्वोपदेशाच्चे"तितत्वप्रदीपोक्तंहृदिकृत्वासूत्रारूढंकरोति ॥ अस्यचेति ॥ अभिध्यायाः इच्छायाः । प्रकृतिशब्दवाच्यत्वव्यपदेशादित्यर्थः । तृतीये साक्षाच्चोभयाम्नानादित्यत्र । "एषरुयेषपुरुषइतिश्रुतौसाधारण्येनविनासाक्षादेवेच्छाद्वारमंतरापिप्रकृतिपुरुषशब्दवाच्यताम्नाना"दितिटीकोक्तार्थंसूत्रारूढतयाव्यनक्ति ॥ आद्येति ॥ चतुर्थे आत्मकृतेःपरिणामादित्यत्र । "प्रकृतिशब्दवाच्यत्वेहरेश्श्रुत्युक्तेपिकथंतद्युज्यतेनिमित्ताभावा"दित्यवतारितत्वाट्टीकायामितिभावः। टीकादावस्फुटत्वात्सूत्रार्थंव्यनक्ति ॥ अत्रचेति ॥ पंचमे योनिश्चहिगीयतइत्यत्र । भूतयोनिमितिस्वदेहादु

चशब्दस्तु स्त्रीत्वंचेत्तर्हिपुंस्त्वंनस्यात्। विरोधादितिनशंक्यं "व्यवधानेनसूति"स्त्विवतिभाष्योक्तरीत्याद्वयोरुपपत्तेरितिप्रदर्शनार्थं। द्वितीये स्त्रीशब्दोपलक्षकप्रकृतिशब्दवाच्यत्वेविशिष्यप्रमाणोक्तिः। अस्यचाभिध्यायाःप्रकृतित्वोपदेशाद्ब्रह्मणश्चाभिध्यात्वोपदेशादित्यर्थः । तृतीये आद्योक्तंसामान्यरूपंद्वितीयोक्तंप्रकृतिशब्दवाच्येच्छात्मकत्वरूपंवाद्वारमनपेक्ष्यप्रकृतिशब्देनतदुपलक्षितस्त्रीशब्दैश्चसाक्षादेववाच्यत्वेप्रमाणोक्तिः । चतुर्थे उपलक्षकेप्रकृतिशब्देप्रवृत्तिनिमित्ताभावरूपबाधकोद्धारः। अत्रचपरिणामादितिपंचमील्यब्लोपनिमित्ता। एवंचप्रकृतेर्महदादिरूपेणपरिणामंविधायतत्प्रेरणायात्मनोबहुधाकृतेरित्यर्थः । पंचमे उपलक्षितस्त्रीशब्दमात्रेतदुद्धारइतिसूत्रक्रमः ।

गु० र्थनिर्णयार्थत्वात्स्मृतेस्तत्रनिरूपितः। अर्थोग्राह्योवेदवाक्येतदयोगेतुलौकिक"इत्यादिनोक्तमित्यर्थः ॥ उपलक्षितेति ॥ प्रकृतिपदोपलक्षितेत्यर्थः। स्त्रीशब्द

SGDF
Sri Gargeshwari Digital Foundation

प्र० त्पादकरूपयोनिश्चगीयतइत्यर्थोक्तेरितिभावः । **अत्राहकश्चित्** । तदधीनत्वन्यायेनस्त्रीलिंगोपपत्त्यानपूर्वपक्षोदयः । किंच "एषाह्येवे"
तिश्रुतौप्रकृत्यादिशब्दस्यकारणत्वाद्यर्थपरतयाप्रकृत्यादिशब्दवाच्यतापरत्वाभावेनशब्दस्वाभाव्यादेवतत्रस्त्रीलिंगोपपत्तेर्नतदाक्षेपस्साधुः । अ
पिच तत्तत्प्रकरणस्थानांगायत्र्यादिशब्दानांलिंगप्रकरणादिनाब्रह्मपरत्वसिद्धौप्रातिपदिकानुसारेणविभक्तेर्नयनसंभवः । ब्रह्मपरत्वासिद्धौतदे
वसाध्यं नपुनःस्त्रीलिंगाक्षेपः । किंचैतच्चोद्यस्य "योनिश्चहिगीयत"इतिसूत्रेणैवनिरस्तत्वादन्यानिसूत्राणिव्यर्थानि । प्रकृतिपदेविशिष्या
क्षेपकाभावेनतदसाधारणयोर्द्वितीयचतुर्थयोर्व्यर्थतास्फुटैव । किंचाद्यसूत्रेप्रकृतिपदेलक्षणादोषः । द्वितीये "मायांत्वि"तिश्रुतौमायाशब्द
स्यप्रधानपरत्वेनेच्छापरत्वाभावः । तृतीयेचोभयपदास्वारस्यं । पूर्वत्रस्त्रीपुंसयोःक्वापिसूत्रेप्रकृतत्वाभावात् । एषस्त्रीत्यादिश्रुतिरपिप्रसिद्धस्त्री
पुरुषादितादात्म्यपरा । नतुतत्तच्छब्दवाच्यत्वपरा । लोकालोकपदसाहचर्यात् । लोकादिशब्देत्वयातद्वाच्यत्वपरत्वेनाव्याख्यानात् ।
लोकस्सर्वाधारइत्याद्युक्तेः । चतुर्थेल्यब्लोपदोषः । पंचमेसाक्षात्स्वदेहात्प्राणिप्रसवहेतुत्वस्यभ्रमरादिष्वभावाच्चतुर्मुखेभावाच्चस्त्रीरूपत्वोक्तेर
युक्ततेति । **तदसारं** । तदधीनत्वन्यायेस्थितएवैतद्विचारारंभस्याकरएवपूर्वत्रसमर्थनात् । श्रुतौप्रकृत्यादिशब्दस्यकारणत्वादिपरत्वेपिचंद्रि
कायामेव "नचप्रकृत्यादिशब्देस्त्रीलिंगस्यचित्प्रकृत्यादावर्थसाधुत्वेसंभवतिदेवताखट्वादिशब्देष्विवप्रयोगसाधुत्वंयुक्त"मित्यादिनाऽऽक्षेपप्र
कारस्यस्फुटत्वात् । तत्तद्वाक्यस्थस्त्रीलिंगशब्दानांब्रह्मप्रकरणादिनाब्रह्मपरत्वेपिविभक्तेर्ब्रह्मण्यर्थसाधुत्वंनेत्याक्षेपेतदुत्तर्यर्थतयैतदारंभसंभवाच्च ।
सूत्रवैयर्थ्यापादनंत्वज्ञानमूलं । आद्यस्यपूर्वपक्ष्युक्तन्यायेन "नामानी"तिश्रुतिस्थसर्वनाम्नःसंकोचशंकानिवर्तकतयासार्थक्यस्यग्रंथएवस्पष्ट
त्वात् । अतएव सर्वशब्दसाधारणश्रुत्युक्तिपरप्रतिज्ञेत्यादिवाक्यशेषबलेन "नैकमुदाहरणंयोगारंभंप्रयोजयती"तिन्यायेनचसौत्रप्रकृतिपदे

SGDF
Sri Gargeshwari Digital Foundation

प्र० नान्योपलक्षणायाअप्यदोषत्वं । अन्यथासूत्रस्यविश्वतोमुखत्वभंगापत्तेः । प्रकृतिशब्दस्यचित्प्रकृतिपरत्वेनप्रसिद्धत्वान्नहरौतस्यवृत्तिर्युक्ता । अन्यथाप्रसिद्धिबाधापत्तेः । "नामानिसर्वाणी"तिश्रुतिस्थसर्वनाम्नस्संकोचसंभवाद्विशिष्यप्रमाणाभावात् । प्रतिज्ञेतिपूर्वसूत्रशेषोपात्तश्रुतेर्निरवकाशत्वेपिसर्वशब्दसाधारण्यादित्यादिशंकायांविशिष्यमानोक्त्यर्थंद्वितीयसूत्रस्यसार्थक्यात् । अतएवोक्तं "प्रकृतिशब्दवाच्यत्वेपिविशिष्यप्रमाणोक्ति"रिति । श्वेताश्वतरश्रुतौमायाशब्दस्यप्रधानपरत्वेज्ञापकाभावात् "प्रकृतिर्वासनेत्येवतवेच्छानंतकथ्यत"इतिस्मृताविच्छापर्यायत्वेनश्रुतप्रकृतिपदेनप्रकृतिंविद्यादिच्छांविद्यादित्यर्थस्यस्पष्टत्वाच्च । चतुर्थस्यापिचित्प्रकृत्यादौप्रयोगप्राचुर्येपि "महद्वच्चे"त्यादावुक्तन्यायेनप्रवृत्तिनिमित्तपौष्कल्येनहरौमुख्यत्वमित्यर्थोक्तिपरतयासार्थक्यात् । आद्यस्यप्रकृतिचशब्दाभ्यांस्त्रीपुंसयोःप्रकृतत्वेनतृतीयस्योभयपदस्वार

यत्तूक्तमुभाभ्यां ।

प्र०स्यस्यस्पष्टत्वात् "एषस्त्री"तिश्रुतौसर्वात्मकत्वस्यबाधेनतत्तच्छब्दवाच्यत्वस्यैवन्याय्यत्वात् । त्वदभिमतसर्वात्मकतयातत्तच्छब्दवाच्यत्वस्योत्तरनयेनिरस्यत्वात् । चतुर्थेल्यब्लोपस्यदोषत्वानुपपादनाच्च । अन्यथाहेत्वाद्यर्थकत्वस्यापिपंचम्यादोषत्वंस्यात् । अनुशासनस्योभयत्रसाम्यात् । ल्यब्लोपाश्रयणेऽर्थविशेषलाभाच्च । "सूतिमव्यवधानेनस्त्रीत्वमाहु"रित्यादिस्मृत्युक्तस्त्रीत्वस्योभयसमाधेयत्वात् । "स्वदेहादिच्छयाविश्व"मित्यादेरीश्वरइवचतुर्मुखेतथात्वेभ्रमरादावतथात्वेचत्वयाप्रमाणानुक्तेश्च । द्रोणद्रुपदादौलोकसिद्धजननव्यभिचारेणमातापित्रादिक्रमेणजन्मानंगीकारापाताच्चेति ॥ **यत्तूक्तमुभाभ्यामिति** ॥ ब्रह्मकिंनिमित्तमात्रमुतोपादानमपीतिसंशये "सईक्षांचक्रे सप्राणमसृजते"तीक्षापूर्वककर्तृत्वात्तस्येश्वरत्वप्रसिद्ध्यासर्वलोकनियंतृत्वान्निर्गंधरसत्वादिनाब्रह्मणःपृथिव्यादिजगतश्चविसदृशत्वाद्यथाक्रमंकुलालराजाभावाइ

प्र० वघटादिकंप्रतिब्रह्मनोपादानं । अपितुनिमित्तमेव । यतोवेत्यादिश्रुतयस्तुनिमित्तत्वमात्रपराः । एकविज्ञानेनसर्वविज्ञानंचप्राधान्याद्यभिप्रायेणगौणं । तदुक्तंभामत्यां "ईक्षापूर्वककर्तृत्वंप्रभुत्वमसरूपता । निमित्तकारणेष्वेवनोपादानेषुकर्हिचि"दिति । केषांचित्तु परिणामित्वापरिणामित्वयोश्चेतनत्वाचेतनत्वयोःप्रेर्यत्वप्रेरकत्वयोश्चैकस्मिन्व्याहतत्वादयोग्यंनिमित्तोपादानयोरैक्यमितिब्रह्मनिमित्तमेवेतिप्राप्ते तन्निरासकतयामतद्वयेपिसूत्रार्थमनुवदति ॥ **नेति** ॥ **एवंहीति** ॥ उपादानत्वेहीत्यर्थः । एकविज्ञानेनसर्वविज्ञानंचोपादानभावएवयुज्यते । तयोरैक्यात् । उपादानोपादेयदृष्टांतमहिम्नाचोपादानमितिगम्यते । अन्यथातद्द्वयमुपरुध्येत । "नमुख्येसंभवत्यर्थेजघन्यावृत्तिरिष्यत"इति

नकेवलंब्रह्मजगतःकर्तृ । किंतुप्रकृतिश्च । उपादानमपि । एवंहि "येनाश्रुतंश्रुतंभवती"त्येकविज्ञानेनसर्वविज्ञानप्रतिज्ञायाः "यथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्या"दितिदृष्टांतस्यचानुपरोधोभवतीत्याद्यसूत्रार्थइति । तन्न । समन्वयस्यप्रधानाशब्दत्वस्यचेहानुक्तेरध्यायेपादेचासंगतेः ।

प्र० भामत्युक्तरीत्यामुख्यार्थतयैवप्रतिज्ञायानेयत्वादित्यर्थः । इयांस्तुभेदः । परमतउपादानत्वंनामविवर्ताधिष्ठानत्वं । यथोक्तंभामत्यांपरिणामादित्यत्र "इयंचोपादानपरिणामादिभाषानविकाराभिप्राया । अपितुयथासर्पस्योपादानंरज्जुरेवंब्रह्मजगदुपादानंद्रष्टव्य"मिति । केषांचिदूपादानशरीरकतया । यथोक्तंतद्भाष्ये "सर्वविदचिद्वस्तुशरीरतयासर्वदासर्वात्मभूतंब्रह्मकदाचिद्विभक्तनामरूपंकदाचिदविभक्तनामरूप"मित्यादि । "अत्रब्रह्मणःपरिणामित्वोक्तिरसंगतैवभवती"त्यादिटीकांविवृण्वन्नाह ॥ **समन्वयस्येति** ॥ क्रमेणान्वयः । पादेप्रासंगिकसंग

SGDF Sri Gargeshwari Digital Foundation

प्र० तिमाशंक्यनिराह ॥ सांख्येति ॥ जगदिति ॥ पररीत्यैतत् । ननूक्तंकल्पतरौ “निर्णीततात्पर्यैर्वेदांतैर्निमित्तत्वमात्रसाधकानुमानस्यका
लातीतत्वमस्तीत्यत्रसमन्वयावसानेऽलिखदिदमिती”तिचेन्न । वेदांतानांब्रह्मोपादानत्वेतात्पर्यस्यात:पूर्वमनिर्णयात् । निर्णयेवास्यानारंभप्रसं
गात् । अत्रैवनिर्णयेत्रयानंतर्यस्यवाजन्मादिसूत्रानंतर्यस्यवान्याय्यत्वात् । युक्तिविरोधपरिहारस्ययुक्तिपादएवकर्तव्यत्वाच्च । युक्तिविरोधे
नोपादानत्वंनेतिशंकायांवेदांतानांब्रह्मोपादानत्वेतात्पर्यनिर्णयायोगेनतैर्युक्तेर्बाधोक्त्ययोगाच्च । मीमांसानारंभापाताच्चेति । नन्वथापिसांख्ये
नप्रधानस्यैवजगदुपादानत्वमीश्वरस्यतुतदनुग्राहकत्वमेवेत्युपेतं । तन्निरासार्थं ब्रह्मशरीरतयाब्रह्मात्मकमेवप्रधानं । तदीयमुपादानत्वमपिब्रह्म

सांख्याभिमतप्रधानएतत्पादीयाद्याधिकरणत्रयेणनिरस्तेतर्हिजगन्निरुपादानंस्यादितिशंकानिरा
सार्थमस्यत्रयानंतर्यस्यैवयुक्तत्वेन “जगद्वाचित्वात् वाक्यान्वया”दितिसमन्वयपरानेकाधिक
रणव्यवधानायोगाच्च। अस्यसूत्रस्यप्रकृतिशब्दसमन्वयपरत्वत्यागेनप्रकृतित्वव्युत्पादकत्वे “आ
काशस्तल्लिंगा”दित्यादेरप्याकाशत्वादिव्युत्पादनपरत्वापाताच्च । एकविज्ञानेनसर्वविज्ञानादे

प्र०णएवेतिवक्तुमिदमत्रारभ्यते। उक्तंचश्रीभाष्ये “एवंनिरीश्वरसांख्येनिरस्तेसेश्वरसांख्य:प्रत्यवतिष्ठत”इति। श्रुतप्रकाशेच “पूर्वत्राधिकरणत्रि
कद्वयेनविकल्पेननियमेनचप्रधानकारणत्वेक्रमेणनिरस्तेसमुच्चयेनकारणत्वमत्रनिरस्यतइती”तिचेन्न । “अस्यसमन्वयपादेऽकर्तव्यत्वादन्यत्रा
भावादितिसमयपादेकरिष्यमाणत्वाच्चे”तिसुधोक्तदूषणंध्येयं । सूत्रार्थंनिराह ॥ अस्येति ॥ यथा “हलोऽनंतरा:संयोग: । मुखनासिकाव
चनोनुनासिक”इत्यादौसंयोगादिशब्दानांसंज्ञापरत्वंप्रकरणबलात् तथेहापिसमन्वयप्रकरणबलात्प्रकृतिरित्यपितत्समन्वयपरमेव । अन्यथो

SGDF
Sri Gargeshwari Digital Foundation

प्र० पक्रमेपितथात्वंनस्यादित्यर्थः ॥ आरंभणेति ॥ ''तदनन्यत्वमारंभणशब्दादिभ्य''इत्यत्रयुक्तिपादे ॥ यच्चोक्तमिति ॥ उभाभ्यामितिव र्तते । ''अधिष्ठात्रंतराभावोपिप्रतिज्ञादृष्टांतानुपरोधादेवोदितोवेदितव्य''इत्यादिनापरभाष्ये ''नचत्रब्रह्मणोन्यन्निमित्तकारणंजगतइत्यपियुक्तं । प्रतिज्ञादृष्टांतोपरोधादेवे''त्यादिनाभामत्यांचाभिधानात् ''येनाश्रुतंश्रुतंभवति येनादेष्ट्राधिष्ठात्राश्रुतेनाश्रुतमपिश्रुतंभवतीतिनिमित्तोपादान- योरैक्यंप्रतीयत''इत्यादिनाकेषांचिद्भाष्येचोक्तेरितिभावः । तदुक्तप्रकारमाशंकते ॥ नन्विति ॥ प्रतिज्ञोपपत्तेरिति ॥ ब्रह्मज्ञाने नतत्कार्यसर्वज्ञानसंभवादितिभावः । परमतेदोषांतरंवक्तुमाह ॥ किंचेति ॥ अविद्यादिप्रत्यपिपारिभाषिकमुपादानत्वमाशंक्याह ॥

रारंभणाधिकरणेनिरसिष्यमाणत्वाच्च । यच्चोक्तंनिमित्तत्वेसत्युपादानत्वेसौत्रोहेतुरिति तन्न । उक्ता भ्यांप्रतिज्ञादृष्टांताभ्यामुपादानत्वस्यसिद्धावपिनिमित्तत्वस्यासिद्धेः । ननु यदिब्रह्मकर्त्रपिनस्यात्तदा न्यःकर्तास्यात् । तथाचब्रह्मज्ञानेनान्यस्यकर्तुरज्ञानात्प्रतिज्ञानस्यादितिचेन्न । दृष्टांतानुसारेणप्रतिज्ञा वाक्यस्यकार्यपरत्वेनब्रह्मज्ञानेनकारणांतराज्ञानेपिप्रतिज्ञोपपत्तेः । किंच अनादित्वेनाब्रह्मकार्याणां प्रागभावाविद्यादीनांब्रह्माभेदाभावेप्येकविज्ञानेनसर्वविज्ञानवदुपादानकर्त्रभेदाभावेपितत्किंनस्यात् ।

गु० मात्रे केवलंस्त्रीशब्दएवेत्यर्थः । नतूपलक्षितेषुसर्वेष्विति । योनित्वस्यदारादिशब्दप्रवृत्तिनिमित्तत्वाभावादित्यर्थः ॥ अन्यस्यकर्तुरिति ॥ अन्यस्यकर्तुर्ब्रह्मका र्यत्वेनब्रह्मज्ञानेनतदभावादितिभावः । किंचकर्त्रुपादानयोर्भिन्नत्वेनतस्यब्रह्माकार्यत्वेनब्रह्मज्ञानेनसर्वविज्ञानप्रतिज्ञाऽसिद्ध्यापत्त्याकर्त्रुपादानयोरभेदे अविद्यादेरप्य नादित्वेनब्रह्माकार्यत्वेनब्रह्मज्ञानेनसर्वविज्ञानप्रतिज्ञानुपपत्त्याऽविद्यादेरपिब्रह्माभेदःस्यादित्याह ॥ किंचेति ॥ नन्वविद्यादेरनादित्वेनब्रह्मणिपरिणामरूपब्रह्मकार्य

SGDF
Sri Gargeshwari Digital Foundation

प्र० नचेति ॥ धर्मीति ॥ तन्मतेतस्यव्यावहारिकत्वादितिभावः । निमित्तकता जगतइतिवाच्यमितिशेषः । तदेवोपपादयति ॥ मृदिति ॥ प्राक्सृष्टेरिति ॥ परभाष्येहि "प्रागुक्तोत्पत्तेरेकमेवाद्वितीयमित्यवधारणा"दित्यादिनोपपादनाद्ब्रह्मणोन्यस्याभावावेदनेनब्रह्मैवोपादानंनिमित्तंचेतिव्युत्पादितं । तदयुक्तमित्यर्थः ॥ ब्रह्माभिन्नंस्यादिति ॥ नचेष्टापत्तिः । अग्रइत्याधारत्वानुपपत्तेरितिभावः । मतद्वयेप्युपादानत्वेस

नचाविद्यादिकंप्रत्यधिष्ठानत्वरूपमुपादानत्वमस्तीतिवाच्यं । एवंहिकल्पितस्यकर्तुरपिकार्यांतर्गतत्वात्कार्यमकर्तृकमेव स्यात् । नत्वभिन्नकर्त्रुपादानकं । नचप्रागभावादिवत्कर्तुरुपादानेनधर्मिसत्तासमानसत्ताकभेदसद्भावेपिपारमार्थिकभेदाभावमात्रेणाभिन्ननिमित्तकता । तदाहिगगनादिवद्घटादिकमप्यभिन्ननिमित्तोपादानकंस्यात् । मृत्कुलालयोरपिपारमार्थिकभेदाभावात् । तथाचघटादौकर्त्रुपादानभेदंस्वीकृत्यगगनादौतयोरभेदायप्राक्सृष्टेरद्वितीयमित्यादिश्रुत्याब्रह्मान्यहेत्वभावव्युत्पादनंव्यर्थंस्यात् । किंच कर्तृकारकस्येवकालादिरूपाणामधिकरणादिकारकाणामपिब्रह्माभिन्नत्वएकविज्ञानेनसर्वविज्ञानयोगात् "सदेवसोम्येदमग्रआसी"दितिकार्योत्पत्तेःप्राग्ब्रह्मवच्छ्रुतकालाद्यपिकर्तृवद्ब्रह्माभिन्नंस्यात् ।

गु० त्वाभावेपितद्विवर्तत्वरूपब्रह्मकार्यत्वेनब्रह्मज्ञानेनाविद्याज्ञानसंभवेननतयोरभेदइत्याशंकते ॥ नचाविद्यादिकंप्रतीति ॥ कारणीभूतस्याप्यविद्यादेरप्यध्यस्तत्वरूपकार्यत्वेनब्रह्मज्ञानेनतज्ज्ञानेकर्तृत्वादिविशिष्टस्यकर्तुरप्यध्यस्तत्वरूपकार्यत्वस्यैवसत्वेनकर्तृत्वाभावापत्त्यानप्रपंचस्याभिन्ननिमित्तोपादानकत्वमित्याह ॥ एवंहीति ॥ नन्वविद्याप्रागभावादेरध्यस्तत्वरूपकार्यत्वसत्त्वेपिकर्तृत्वोपयुक्तस्यधर्मिसमानसत्ताकभेदस्यसत्त्वेनकर्तृत्वंसंभवत्येव । नचैवंप्रपंचस्यभिन्ननिमित्तोपादानकत्वापत्त्याऽभिन्ननिमित्तोपादानत्वंनसंभवतीतिशंक्यं । अभिन्ननिमित्तोपादानकत्वंहिननिमित्तोपादानयोरभेदोविवक्षितः । येनोक्तदोषःस्यात् । किंनामनिमित्तोपादानयोर्भे ॥ ८३१ ॥

प्र० तिनिमित्तत्वेसौत्रोहेतुरित्यत्रदोषांतरमाह ॥ किंचैकज्ञानेनेति ॥ उपादानंचेद्भवेदित्यन्वयः ॥ ततएवेति ॥ एकविज्ञानेनसर्वविज्ञानादेवेत्यर्थः । उत्तरार्धोक्तमुपपादयति ॥ निमित्तत्वइति ॥ भेदेति ॥ कार्येणसहेत्यर्थः । तत्रविप्रतिपन्नंप्रत्याह ॥ गौरवाच्चेति ॥ अभावघटत्वादितिभावः । अतएव गौरवादेव ॥ निमित्तत्वाभावेति ॥ तथाचब्रह्मजगतोरभेदाभावेनैकविज्ञानेनसर्वविज्ञानप्रतिज्ञाव्याकोपइतिभावः । निमित्तत्वेकार्याद्भेदेनभाव्यमितिस्वयमापादितेर्थेलोकदृष्टिंवदन्नेकविज्ञानेनसर्वविज्ञानोक्तेर्ब्रह्मोपादानमित्यप्ययुक्तमित्याह ॥

किंच एकज्ञानेनसर्वस्यविज्ञानाद्ब्रह्मचेद्भवेत् । उपादानंतर्हिभवेत्ततएवानिमित्ता ॥ १ ॥ निमित्तत्वेहिसतिभेदापत्त्यैकविज्ञानेनसर्वविज्ञानंनयुक्तं । नहिव्याप्येनिमित्तत्वेसतिव्यापकस्यभेदस्याभावःसंभवतीति । नचोपादानत्वाभावएवभेदव्याप्योनतुनिमित्तत्वमितिवाच्यं । मृदोमृदंप्रत्यनुपादानत्वेपिभेदाभावात् । गौरवाच्च । अतएव नोपादानत्वाभावविशिष्टंनिमित्तत्वंव्याप्यं । निमित्तत्वाभावविशिष्टमुपादानत्वमभेदप्रयोजकमित्यापाताच्च ।

गु० दाभावएव । तथाचकर्त्रुपादानयोर्धर्मिसमानसत्ताकभेदसत्त्वेपिपारमार्थिकभेदाभावेननिमित्तोपादानयोर्भेदाभावरूपस्याभिन्ननिमित्तोपादानत्वस्याक्षतेरित्याशयवानाशंकते ॥ नचप्रागभावादिवदिति ॥ गौरवाच्चेति ॥ निमित्तत्वमात्रस्यभेदप्रयोजकत्वेतस्यभावरूपत्वाच्छब्दतोर्थतश्चलाघवं । उपादानत्वाभावस्यभेदनिमित्तत्वेतस्यप्रतियोग्यादिज्ञानसापेक्षत्वेनार्थतःशब्दतश्चगौरवमित्यर्थः ॥ अतएवेति ॥ गौरवादेवेत्यर्थः । भेदंप्रत्युपादानत्वाविशिष्टनिमित्तत्वस्यप्रयोजकत्वेऽतिप्रसंगंचाह ॥ निमित्तत्वाभावेति ॥ तथाचब्रह्मणोनिमित्तत्वस्यापिविद्यमानत्वेनतदभावविशिष्टोपादानत्वरूपस्याभेदप्रयोजकस्याभावेनाभेदासिद्ध्यातज्ज्ञानेनसर्ववि

SGDF Sri Gargeshwari Digital Foundation

प्र० त्वन्मतइति ॥ मतद्वयेपीत्यर्थः। भेदस्येतियथाक्रममन्वयः। ननुश्रुत्यैवोपादानत्वस्योक्त्याकथमनुपादानत्वेपीत्यादि। केवलश्रुतिगम्येर्थेतर्काणामाभासत्वात् । उक्तंचभामत्यां "नचानुमानिकंयुक्तमागमेनापबाधितं । सर्वेपितावद्वेदांताःपौर्वापर्येणवीक्षिताः । एकांतिकाद्वैतपराद्वैतमात्रनिषेधत"इति । तथाचयथाशब्दमंगीकर्तव्यं । सचनिमित्तमुपपादनंचेश्वरंबोधयतीत्यभेदेनैकविज्ञानेनसर्वविज्ञानप्रतिज्ञानिर्वाहःकार्यः। लोकवैलक्षण्यंतुश्रुत्येकसमधिकाम्यत्वाद्युक्तमितिचेन्न । एवंसतिविचारशास्त्रानवतारप्रसंगात् । पूर्वापरपरामर्शेनिमित्तत्वस्यैवावगमेनानुव्याख्यानाद्युक्तानेकमानविरोधेनोपादानत्वस्यश्रौतत्वायोगात् । एकविज्ञानेनसर्वविज्ञानप्रकारस्यतु "अन्यार्थंतुजैमिनि"रित्यत्रैवोक्तत्वात् । तदेतदाह ॥ दिगिति ॥ यच्चेति ॥ परिणामादित्यत्रैवतथाभिधानादित्यर्थः । आरोपाधिष्ठानत्वमित्यर्थः । द्वितीयार्थंनिराह ॥ यच्चेति ॥

त्वन्मतेतंतून्प्रतिनिमित्तउपादानेचोर्णनाभौभेदस्योर्णनाभिज्ञानेपितदज्ञानस्यचदर्शनाच्च । अथलोकदृष्टिमुल्लंघ्यश्रुतिबलान्निमित्तत्वेप्येकज्ञानेनसर्वज्ञानंतर्ह्यनुपादानत्वेपितद्बलादेवतदस्त्विवतिदिक् । यच्चोक्तंभामत्यां "इहोपादानत्वंनामभ्रमाधिष्ठानत्व"मिति। तत्राद्यसूत्रेप्रकृतिरितिप्रतिज्ञानयुक्ता। नहिसर्पस्यरज्जुःप्रकृतिरित्युच्यते। हेतुश्चायुक्तः । सूत्रोक्तेश्रौतमृत्पिंडादिदृष्टांतेमृन्मयाद्यधिष्ठानत्वाभावात् । नहिमृन्मयंमृद्यध्यस्तं । मृत्तत्वज्ञानेप्यनिवृत्तेः । यच्चोक्तं "सोकामयतबहुःस्या"मित्यभिध्योपदेशाद्ब्रह्मैवोपादानंनिमित्तंचेतिद्वितीयार्थइति । तन्न । तत्रबहुभवनसंकल्पस्यैवोक्तत्वेनत्वदभिमताधिष्ठानत्वाप्रतीतेः । ॥ ८३२ ॥

गु० ज्ञानानुपपत्तिरित्यर्थः । लोकदृष्टिविरोधंचाह ॥ त्वन्मतइति ॥ तद्बलादेव श्रुतिबलादेवेत्यर्थः ॥ मृत्तत्वज्ञानइति ॥ मृन्मयादेर्मृद्यध्यस्तत्वेनमृत्तत्वज्ञान

SGDF
Sri Gargeshwari Digital Foundation

प्र० उभाभ्यामितिसंबंधः । अभिध्यानपूर्वकंबहुभवनस्योपदेशादित्यर्थः । त्वदितिद्वयोर्ग्रहणं । परमतआरोपाधिष्ठानत्वस्याप्रतीतेरित्यर्थः । मतांतरेतुरामकृष्णरूपेणापिबहुभवनसंभवाच्चिदचिद्रूपेणबहुःस्यामितितदुक्त्यातच्छरीरत्वरूपाधिष्ठानत्वस्याप्रतीतेरित्यर्थः । आरोपपक्षेऽनानुगुण्यमुपपादयति ॥ **नहीति** ॥ नचवाक्यशेषेतेजःप्रभृतिसर्जनप्रतीतेरेवंकल्प्यतइतिवाच्यं । ईक्षतिकर्मेत्यत्रास्यवाक्यस्यान्यथाव्याख्या

नहिस्थाणुःपुरुषःस्यामित्यभिध्यायतीति । यच्चोक्तं “सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतआकाशंप्रत्यस्तंयंती”तिब्रह्मण्येवजगदुत्पत्तिलययोःसाक्षादाम्नानाद्ब्रह्मैवोपादानं । नह्यनुपादानेकार्यस्यलयइतितृतीयार्थइति । तन्न । रूप्यस्यशुक्तितःप्रभवप्रलययोरप्रसिद्ध्याविवर्तवादप्रतिकूलत्वात् । सौत्रस्योभयेत्यस्यसर्वनाम्नआद्यसूत्रप्रकृतनिमित्तत्वोपादानत्वत्यागेनाप्रकृतप्रभवप्रलयपरत्वायोगाच्च । उपादानत्वमात्रस्यप्रलयमात्रेणसिद्धेः । निमित्तत्वेसत्युपादानत्वस्यतुतंतोरूर्णनाभौप्रलयदर्शनेनकेवलोपादानासाधारणाभ्यांप्रभवप्रलयाभ्यामप्यसिद्धेः । उभयपदवैयर्थ्याच्च । साक्षाच्छब्दास्वारस्याच्च। येहिनिमित्तत्वोपादानत्वेपरंपरयासाधितेतयोरेवसाक्षात्साधनेहिसाक्षात्पदंस्वरसं ।

प्र० नादितिभावः । तृतीयसूत्रार्थंनिराह ॥ **यच्चेति** ॥ परैरितिशेषः ॥ **विवर्तेति** ॥ भामत्यांतथोक्तेरितिभावः ॥ **सर्वनाम्नइति** ॥ तस्यप्रकृतपरामर्शित्वादितिभावः । उपादानत्वमात्रउभयाम्नानंहेतुरुतविशिष्टइतिविकल्पौहृदिकृत्वाक्रमेणनिराह ॥ **उपादानत्वेति** ॥ अस्वारस्यमेवव्यतिरेकमुखेनव्यनक्ति ॥ **येहीति** ॥ एतेननकेवलंप्रतिज्ञादृष्टांताभिध्योपदेशादिभिरयमर्थोनिश्चीयते किंतु “किंस्विद्वनंकउसवृक्ष

SGDF
Sri Gargeshwari Digital Foundation

प्र० आसी"दित्यादिनाजगदुपादाननिमित्तादौपृष्टे"ब्रह्मवनंब्रह्मसवृक्षआसी"दित्यादिनानिमित्तत्वोपादानत्वयोस्साक्षात्प्रत्यक्षमाम्नानादितिकैश्चिदुक्तनिरस्तं । श्रुतावुपादानत्वनिमित्तत्वयोस्स्पष्टमप्रतीतेः। साक्षादित्यस्यपरंपरांविनेत्यर्थस्यस्वरसत्वाच्चेति ॥यच्चेति॥ उभाभ्यामित्यन्वयः। परिणामादित्यस्यमतद्वयेपिपार्थक्याच्चतुर्थपंचमषष्ठानामित्युक्तं । परमतेदोषमाह ॥ विवर्तेति ॥ ममांतरेतुविशिष्टस्यैवक्तृतिपरिणामादेरभ्युपगत्याकेवलात्मनस्तदभावादात्मपदास्वारस्यादिकंध्येयं । मतद्वयेपरिणामादित्यस्यपार्थक्यंनिर्बीजं । नन्ववस्थाश्रयत्वमुपादानत्वंनि

यच्चोक्तं "तदात्मानंस्वयमकुरुते"त्यात्मनएवसृष्टौकर्मत्वकर्तृत्वोक्तेः, "सच्चत्यच्चाभव"दितिपरिणामोक्तेः, "यद्भूतयोनि"मितियोनिशब्दाच्चोपादानंब्रह्मेतिचतुर्थपंचमषष्ठानामर्थइति । तन्न । विवर्तमतेश्रुतौसूत्रेचप्रकृतिपरिणामयोनिशब्दानामयोगात्। नहिरज्जुःसर्पंकरोतीतिवासर्पोभवदितिवासर्पात्मनापरिणतेतिवासर्पयोनिरितिवोच्यते । विवर्तपरिणामादिप्रक्रियात्वन्यत्रनिरस्ता ।

प्र० विकारस्यब्रह्मणोनयुक्तमित्यतःपरिणामाश्रयत्वंसद्वारकमितिवक्तुंपरिणामादित्यस्यप्रवृत्तेःकेषांचिद्भाष्यादावुक्तेःपार्थक्यमितिचेन्न । तादृशार्थस्यपरिणामादित्यस्मादप्रतीतेः । अन्यत्र अनुव्याख्यानादौन्यायामृतेद्वितीयपरिच्छेदेचेत्यर्थः । यद्वा "यच्चोक्तंसोकामयते"त्यादिनापरमतएवसूत्रार्थानुवाददूषणानिकृतानि । मतांतरेतुतदेकार्थत्वादूहनीयानीतिभावः । एतेनकस्यचिच्छैवस्यरीतिरपिप्रत्युक्ता । केषांचिन्मताविशेषात् । यच्चोक्तं "साक्षा"दित्यत्रसाक्षात्प्रत्यक्षमेवशिवस्योपादाननिमित्तत्वेश्रूयेते । "विश्वाधिकोरुद्र"इत्यादिनायथाविश्वाधिकत्वमवग

प्र०म्यतेतथा "सर्वोवैरुद्र"इतिप्रकृतित्वाद्विश्वरूपत्वमपिशतरुद्रीये "नमोहिण्यबाहव"इत्यारभ्य "कुलुंचानांपतय"इत्यंतेनविश्वाधिपत्यं, "नमःपर्ण्यायचपर्णशद्यायचे"त्येतत्पर्यंतेनजगत्कारणत्वंचेत्यादि । तन्न । "रुजंद्रावतेयस्मा"दितिस्मृत्युक्तयोगस्य "कंपना"दित्युक्तन्यायेनबलवत्तयारुद्रादिशब्दानांवैष्णवत्वात् । "ततएवानिमित्तते"त्याद्युक्तदिशाद्वयोर्विरोधाच्च । "सर्वंसमाप्नोषिततोसिसर्व"इत्यादिस्मृत्यासर्वात्मतयाअन्यथैवव्याख्यानाच्च । गौणार्थत्वस्यत्वयापिवाच्यत्वात् । नहित्वयासकलहेयात्मतारुद्रस्यांगीकृता । तावतोपादानत्वस्यस्पष्टमंत्राप्रतीत्यासाक्षात्पदायोगात् । रुद्रस्यविश्वकर्तृत्वरूपनिमित्ततायाःप्रागेवनिरासाच्च । आत्मनोमुख्यपरिणामाभावेन "परिणामा"दित्यस्यमुख्यत्वायमन्मतरीतेरेवानुसर्तव्यत्वाच्चेतिध्येयं । ननुभाष्यस्यवादकथारूपेणप्रवृत्तसूत्रव्याख्यानपरत्वादंतेपरमतदूषणंकार्यं । "नचान्यत्कंल्प्य"मित्यादिनामध्येनिरासःकिमर्थइत्यतआह ॥ चतुर्थेति ॥ उपन्यासमुखेनाव्यक्तंवाक्यंव्यनक्ति ॥ नियामकेति ॥ शिष्टंस्पष्टमितिभावः ॥ ७ ॥ प्रकृत्यधिकरणं ॥ ६ ॥

चतुर्थसूत्रस्थपरिणामशब्दबलात्परैःपरिणामादेरुक्तत्वाद्भाष्येतद्व्याख्यावसरएवपरमतंपरास्तमिति ॥ टीकाक्षरार्थस्तु ॥ नियामकविशेषाभावेनेति ॥ नपुंसकलिंगब्रह्मादिशब्दवाच्यत्वइवस्त्रीलिंगवाच्यत्वेविशेषमानाभावादित्यर्थः ॥ ७ ॥ प्रकृत्यधिकरणं ॥ ६ ॥

गु० निवर्त्यत्वंस्वीकर्तव्यं। शुक्त्यध्यस्तरजतस्यशुक्तितत्वज्ञाननिवर्त्यतायादृष्टत्वात् । नचतदस्ति। नचायंसोपाधिकत्वभ्रमः। येनाधिष्ठानतत्वज्ञानेप्यनिवर्तेतेतिभावः ॥ ७ ॥ प्रकृत्यधिकरणं ॥ ६ ॥

SGDF
Sri Gargeshwari Digital Foundation

प्र० ॥ ॐएतेनसर्वेव्याख्याताव्याख्याताःॐ ॥ अत्रनिषेधार्थाःशून्यादिशब्दाउदाहरणमितिप्रागेवोक्तं। "असद्वाइदमग्रआसी" दित्यादिश्रुतिगतासदादिशब्दाःकिमन्यपराउतब्रह्मपराइतिचिंता । तदर्थमसदादिशब्दप्रवृत्तिनिमित्तंब्रह्मणिनयुक्तमुतयुक्तमितिचिंता । तदर्थंकिंप्रसिद्धंनिस्स्वरूपत्वादिकमेवासदादिशब्दप्रवृत्तिनिमित्तमुतान्यदिति । तथाप्रसिद्धत्वेपितत्प्रतिस्वातंत्र्यंनयुक्तमुतयुक्तमितिचिंतापरंपरासुज्ञानेतितामनुक्त्वा पूर्ववैषम्येणपूर्वपक्षटीकांविवृण्वन्संगतिंचाह ॥ अव्यवधानेनेति ॥ संगतीति ॥ प्रत्युदाहरणरूपेत्यर्थः । एतेन "तेषांनिषेधमुखवेद्यवस्तुवाचित्वा" दित्यादिटीकाविवृता। "दुर्जनानामव्यक्तत्वादिने" त्यादिटीकांविवृण्वन्सिद्धांतयति ॥ प्रसिद्धस्येति ॥ शमूनंकुरुतेविष्णुरदृश्यस्सन्परस्स्वयं । तस्माच्छून्य" इत्यादिकौर्मस्मृत्युक्तस्यैव "कंपना" दित्यत्रोक्तन्यायेनश्रुतौग्राह्यत्वादितिभावः ॥ उक्तस्येति ॥

॥ ॐएतेनसर्वेव्याख्याताव्याख्याताःॐ ॥ अव्यवधानेनसूतिहेतुत्वरूपप्रकृतित्वमुक्तरीत्याब्रह्मणियुक्तं । रूपाहानेः । नतुनिषेध्यत्वादिरूपमसत्त्वादिकं । रूपहानेः । तस्मात् "असद्वाइदमग्रआसी" दित्यादिवाक्यस्थासच्छून्यादिशब्दवाच्योनविष्णुः । नचासत्त्वस्यतद्गतत्वाभावेपितदधीनत्वादसच्छब्दवृत्तिः । असतो निःस्वरूपस्यनियमनाभावेनेशानधीनत्वादित्याक्षेपात्संगतिपूर्वपक्षौ । सिद्धांतस्तु ॥ प्रसिद्धस्यशून्यत्वादेर्ब्रह्मगतत्वाभावेपि "शमूनंकुरुत" इत्यादिभाष्योक्तस्यानुव्याख्यानोक्तस्यदुर्जनाव्यक्तत्वस्यचनिमित्तस्यतद्गतत्वा

गु० ॥ ॐएतेनसर्वेव्याख्याताव्याख्याताःॐ ॥ ननुसमयपादेसमयप्रस्थानांकारणवादानांनिरासः अत्रश्रुतिप्रस्थानामितिनपौनरुक्त्यमितिशंकते ॥ तेषामिति ॥

SGDF Sri Gargeshwari Digital Foundation

प्र० ''उत्पादनंस्वदेहाच्चदुर्जनाव्यक्ततातथे''त्युक्तस्येत्यर्थः । ''नचासतोन्याधीनत्वायोग''इत्यादिटीकांव्यनक्ति ॥ **प्रसिद्धस्यापीति** ॥ तदेवव्यनक्ति ॥ **उत्पिपादयिषेदिति** ॥ **अन्येत्विति** ॥ छांदोग्येषष्ठेऽध्यायेश्वेतकेतूद्दालकसंवादेश्रुतं ''न्यग्रोधफलमतआहरेति । इदं भगवतिभिंधीति । भिन्नंभगवइति । किमत्रपश्यसीति । अण्व्यइवेमाधानाभगवइति । आसामंगैकांभिंधीति । भिन्नाभगवइति । किमत्रपश्यसीति । नकिंचनभगवइति । तंहोवाचयंवैसौम्यैतमणिमानंननिभालयसे अस्यसोम्यैषोऽणिम्नएवमहान्न्यग्रोधस्तिष्ठती''ति ।

त्वप्रसिद्धस्यापितदधीनत्वाच्चशून्यादिशब्दवृत्तिः । शशविषाणादेरप्यत्यंताभावप्रतियोगित्वमीशाधीनं । उत्सिपादयिषेदीशोयदिशृंगंशशादिके । गवादाविवजायेततदभावादभूदसत् ॥ १ ॥ अन्येतु एतेन प्रधानकारणवादनिरासन्यायेन । परमाण्वादिकारणवादाअपिप्रतिषिद्धतयाव्याख्याताइतिसूत्रार्थइत्याहुः । तन्न । प्रधानपरमाण्वादिकारणवादानांसमयपादेनिरसिष्यमाणत्वात् ।

प्र०तत्र ''अण्व्य''इतिपरमाणूनां ''नकिंचने''त्युक्त्याशून्यादीनांकारणत्वप्रतीतेर्नब्रह्मजगदुपादानमितिप्राप्ते एकविज्ञानेनसर्वविज्ञानादेःपरमाण्वादिकारणत्वपक्षेऽनुपपत्तेः ''अण्व्य''इत्यादेश्चसूक्ष्मत्वादिपरत्वेनोपपत्तेर्ब्रह्मैवोपादानमितिसिद्धांतितं । तदुक्तंकल्पतरौ ''मृदादयोहिदृष्टांताःप्रतिज्ञामनुरुंधते । धानास्तासुपरंधानाभक्तिमार्गंप्रपेदिर''इति । तत्रसूत्रार्थमनूद्यनिराह ॥ **एतेनेति** ॥ ननुतत्रसमयप्राप्ततयाऽत्रतुश्रु

SGDF
Sri Gargeshwari Digital Foundation

प्र० तिप्राप्ततयेत्याशंकते ॥ तेषामिति ॥ अधिकरणप्रमेयंनिरस्यसूत्रार्थंप्रत्याचष्टे ॥ किंचेति ॥ सर्वइत्यस्येति ॥ एतेनयत्कैश्चिदुक्तं एतेन पादचतुष्टयोक्तन्यायकलापेन । सर्वे जगत्कारणत्वपरावाक्यविशेषाब्रह्मप्रतिपादनपराव्याख्याताइत्यर्थइति । तन्निरस्तं । सर्व इत्यस्यतादृशशब्दजातीयपरत्वस्यैवमन्मतरीत्यान्याय्यत्वात् । कारणवाक्यपरत्वेसर्वाणीत्युक्तेरेवस्वरसत्वाच्च । आचार्योक्तमभ्यासकृत्यम ग्रेविवक्षुःपरोक्तंतावदनूद्यनिराह ॥ यच्चेति ॥ मतांतरेसूत्रार्थमुक्तरीत्यादूषितप्रायमितिमत्वाद्विरुक्तिकृत्यमेवतदुक्तमनूद्यनिराह ॥

तेषांश्रौतत्वमिहनिरस्यतइतिचेन्न । येषांश्रौतकारणवाक्यानांब्रह्मपरत्वंनिर्णीतंते ष्वण्वादिपरत्वशंकानुदयात् । येषांतुतन्ननिर्णीतंतेषांब्रह्मपरत्वमेवातिदेष्टव्यं । तेनविनाऽण्वादिपरत्वनिरासासिद्धेः । किंचाध्यायोपसंहारस्थेनैतेनेतिशब्देना ध्यायादावुपक्रांतस्यमध्येचोक्तस्यसमन्वयन्यायस्यपरामर्शसंभवेऽनेवंविधस्यप्रधा ननिरासन्यायस्यपरामर्शोनयुक्तः । सर्वइत्यस्याप्यध्यायार्थत्वेनप्रकृतसमन्वेतव्य शब्दजातीयपरत्वेसंभवतिनाण्वादिवादपरतायुक्ता । व्याख्याताइत्यस्यनिरस्ता इत्यर्थश्चनस्वरसः । यच्चोक्तमन्यैः अभ्यासोध्यायसमाप्तिप्रदर्शनार्थइति । तन्न । पादभेदस्येवप्रमेयवैजात्यादेवाध्यायभेदस्यसुज्ञानत्वात् । अन्यथापादांतेपिसस्यात् । ॥ ८३५ ॥

गु० अनेवंविधस्येति ॥ अध्यायादावनुपक्रांतस्यमध्येचानुक्तस्येत्यर्थः । भाष्यटीकयोरुक्तमभ्यासस्याध्यायावधारणार्थत्वमुपपादयितुंपरोक्तंपक्षमनूद्यदूषयति ॥ यच्चे

प्र० केचित्त्विति ॥ बृहदारण्यकेति ॥ तथाचनिर्णेतव्यानुसरणेऽभ्यासाभावप्रसंगइतिभावः । यदपिकर्मकांडइत्यादि तदपिनेत्याह ॥ संधीयतइति ॥ "अध्यायसमाप्तेरर्थभेदेनैवज्ञातुंशक्यत्वा" दितिटीकांसमर्थयितुमाह ॥ यच्चोक्तमिति ॥ असमाप्तेरिति ॥ तथाचान्योन्या

केचित्तु ब्रह्मकांडएकैकविद्याविशेषादेवमुमुक्षोरिष्टसिद्धेर्ज्ञातव्यांतरंनास्तीतिदर्शयितुंतत्तद्विद्यावसाने "नचपुनरावर्ततेनच पुनरावर्तत" इत्यादिरभ्यासः । कर्मकांडेत्वेकैकमात्रेणरागिणइष्टासिद्धिरितिदर्शयितुंतत्तत्कर्मावसानेतदभावः । तथाच निर्णेतव्यानुरोधाद्ब्रह्ममीमांसायामध्यायांतेऽभ्यासःकर्ममीमांसायांतुनेत्याहुः । तन्न । तथात्वेप्रत्यधिकरणमेकैकविद्यानिर्णा यकत्वेनाभ्यासापातात् । आद्याध्यायेऽभ्यासेनज्ञातव्यांतरंनेतिसूचितत्वेनद्वितीयाद्यध्यायानांवैयर्थ्यापाताच्च । छांदो ग्याद्युपनिषत्समाप्तावभ्यासेपिबृहदारण्यकादिसमाप्तौतदभावाच्च । "संधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोके नसर्वमायुरेतिसर्वमायुरेती" त्यादौपश्वादिफलकविद्यावसानेप्यभ्यासदर्शनाच्च । कर्मकांडेप्यृग्वेदब्राह्मणादौप्रत्यध्यायमंते ऽभ्यासदर्शनाच्च । यच्चोक्तं अर्थसमाप्त्यानाध्यायसमाप्तिनिश्चयः । काष्ठैःस्थाल्यामित्यादौवाक्यासमाप्तौवाक्यार्थस्येवाध्या यासमाप्तावध्यायार्थस्याप्यसमाप्तेः । तस्मादभ्यासेनैवाध्यायभेदोज्ञेयइति । तन्न । पादांतेप्यभ्यासापत्तेरुक्तत्वात् ।

गु० त्यादिना ॥ अन्यथेति ॥ प्रमेयवैजात्यस्याध्यायभेदज्ञापकाभावे । सः अभ्यासः ॥ द्वितीयाध्यायानामिति ॥ उपनिषदीतिशेषः । ननुचाभ्यासोऽध्याय समाप्तिप्रदर्शनार्थएवास्थेयः । नचात्रोक्तंप्रमेयवैजात्यादेवाध्यायभेदःसुज्ञानइतीति । तदनुपपन्नमितिभावेनपरेषांमतमुत्थापयति ॥ यच्चेति ॥ अध्यायभेदो

SGDF Sri Gargeshwari Digital Foundation

प्र० श्रयान्निर्णयदर्शनंदुश्शकमापद्यतइतिभावः। दृष्टांतवैषम्यमाह ॥ **काष्ठैरिति** ॥ अर्थसमाप्तिज्ञानमध्यायसमाप्तिज्ञानंविनासुकरमित्याह ॥ **पादेति** ॥ **अर्थैकत्वनयइति** ॥ द्वितीयस्याद्यपादे "अर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्या"दित्यधिकरणे "देवस्यत्वासवितुःप्रसव"इतिवाक्यमुदाहृत्ययावदेकप्रयोजनंविभागेचसाकांक्षंपदजातंतावदेकवाक्यं। ततोन्यद्वाक्यांतरं। अत्रचसर्वाणिपदानिनिर्वापप्रकाशनार्थानिविभागेचसाकांक्षाणीति "निर्वपामी"त्यंतमेकंवाक्यमित्युक्तं। अन्यथातत्राप्यन्योन्याश्रयस्स्यादित्यर्थः। तर्हिकोर्थस्तस्येत्यतआह॥ **तस्मादिति** ॥

काष्ठैःस्थाल्यामितिवदिहसाकांक्षत्वाभावाच्च। पादचतुष्टयन्यायागोचरस्यसमन्वेतव्यशब्दस्याभावाच्च। समन्वयाविरोधयोर्भेदस्य स्फुटत्वाच्च। अन्यथा अर्थैकत्वनयेऽर्थभेदाभेदाभ्यांवाक्यभेदाभेदोक्तिरयुक्तास्यात्। तस्मात् "अवधारणार्थंसर्वस्ये"ति भाष्योदाहृतस्मृत्युक्तमेवद्विरुक्तेःप्रयोजनं।

गु० **ज्ञेयइति** ॥ नचतदर्थपरिसमाप्तिरितिज्ञायतइतिभावः ॥ **पादचतुष्टयेति** ॥ त्वद्रीत्येतिशेषः। अन्यथा वाक्यसमाप्त्यैववाक्यार्थसमाप्त्यवगमे। उपसंहार

SGDF Sri Gargeshwari Digital Foundation

प्र० पादचतुष्टयार्थसंगृह्यबुद्ध्यारोहार्थमाह ॥ अत्रचेति ॥ पादेष्ववांतरप्रमेयमप्याह ॥ तत्रापीति ॥ वाक्यैकवाक्यतेति ॥ यथाप्रयाजादिवाक्यानांक्रत्वपेक्षितोपकाराधायकप्रयाजादिबोधकतयाक्रतुवाक्यैकवाक्यता तथा “विविदिषंतियज्ञेनदानेने”त्यादेरंतःकरणशुद्धिद्वाराब्रह्मज्ञानांगकर्मादिबोधकतयाब्रह्मपरवाक्यैकवाक्यतारूपेत्यर्थः । विवृतश्चैतत्प्रकारस्तत्वनिर्णयटीकांसिद्धार्थेषुव्युत्पत्त्युक्तिप्रस्तावे । ननुब्रह्मपरत्वंमुख्यवृत्त्याथामुख्यवृत्त्या । नाद्यः । अन्यत्रगृहीतप्रथमव्युत्पत्तेर्बलवत्तयात्यागायोगात् । नांत्यः । “पूर्णाशेषगुणात्मक”इत्यनुव्याख्या

अत्रचाध्यायेपादचतुष्टयेनयथाक्रमं। नामानिलिंगान्यपिचेतरत्रप्रसिद्धियुक्तानितथोभयत्र। प्रसिद्धिभांज्यन्यपदार्थएवप्रसिद्धियुक्तानिसमन्वितानि। तत्राप्यन्यत्रैवप्रसिद्धेषुवाक्यस्यान्यत्रावांतरतात्पर्येसत्येव“ब्रह्मण्यपितदधीनत्वा”दितिन्यायेनप्रवृत्तिनिमित्तानुरोधेनवा“ज्योतिरुपक्रमा”दितिन्यायेनश्रुत्युक्तयोगेनवा पदसमन्वयः । वाक्यान्वयादितिन्यायेनब्रह्मपरवाक्यैकवाक्यतारूपवाक्यसमन्वयोवा । उभयत्रप्रसिद्धेष्वन्यत्रप्रसिद्धेषुचतत्तद्वाक्यस्यापिब्रह्मैकपरत्वं । तत्राप्युभयत्रप्रसिद्धेषुद्युभ्वाद्यायतनादिशब्देषुवाक्यांतरेब्रह्मपरत्वेपिविषयवाक्येतत्परत्वंनेतिप्राप्तेतन्निरासः । अन्यत्रप्रसिद्धेषुतुक्वापिब्रह्मपरत्वंनेतिप्राप्तेतन्निरासः ।

गु० व्याजेनपादचतुष्टयार्थंसंगृह्याह ॥ अत्रचेति ॥ पूर्वंप्रतिपादितमप्यन्यत्रप्रसिद्धोभयत्रप्रसिद्धान्यत्रैवप्रसिद्धानांभेदंशिष्यावधानायपुनःस्मारयति ॥ तत्रापीति ॥ नन्विद्राादिशब्दानामन्यत्रव्युत्पत्तेर्गृहीतत्वाद्ब्रह्मश्रुतितल्लिंगतत्प्रकरणादिभिर्ब्रह्मपरतायाःप्रथमंगृहीतव्युत्पत्तित्यागःस्यात् । सचायुक्तः । ततश्चकथंब्रह्मपरतेत्यत

SGDF
Sri Gargeshwari Digital Foundation

प्र० नोपसंहृताध्यायार्थानुपपत्तिप्रसंगादित्यतआद्यपक्षमुपेत्यतत्रोक्तदोषंदृष्टांतोक्त्योद्धरति ॥ एवंचेति ॥ प्राभाकरमतेहि "स्वर्गकामोयजेते" त्यादौस्वर्गकामंनियोज्यंप्रतिलिङ्शब्देनक्रियाकार्यतयाबोधयितुमशक्या । कामीहिकाम्यादन्यत्काम्याव्यवहितंसाधनमेवकार्यतयाऽवैति । नतुव्यवहितसाधनं । क्रियाचास्थायित्वेनकाम्यव्यवहितत्वान्नकामिनियोज्यान्वययोग्येतिफलपर्यंतस्थाय्यपूर्वमेवलिङाकार्यत्वेनबोध्यमितिस्था यिकार्यस्यलिङर्थत्वेनिश्चितेपि चैत्रजलमाहरेत्यादौलौकिकआहरणादिक्रियारूपकार्येप्रथमतोगृहीतामपिव्युत्पत्तित्यक्त्वालिङस्तत्रलक्षणोपेता।

एवंचयथाकामिनियोज्यसमभिव्याहारेणस्थायिकार्यस्यलिङर्थत्वेनिश्चितेलोकेक्रियाकार्येप्रथमव्युत्पन्नेपिल क्षणा, यथावा "सुखंस्वर्गपदास्पद"मितिश्रुतेरलौकिकसुखस्यस्वर्गपदार्थत्वेनिश्चितेलोकेचंदनादौप्रथमव्यु त्पन्नेपिलक्षणा, यथावासिंहस्यसिंहशब्दार्थत्वेनिश्चितेचित्रलिखितसिंहेप्रथमव्युत्पन्नेपिलक्षणा, तथोक्तरी त्याचरमवैदिकव्युत्पत्तितोब्रह्मणोमुख्यार्थत्वेनिश्चितेप्रथमव्युत्पन्नोपिलौकिकार्थोनतथामुख्यः । तदु क्तमनुव्याख्याने "विपरीतप्रमाभावेपूर्वारोहस्तुकारणं । साभवेद्यत्रसव्यर्थःपूर्वारोहोभ्रमोयथे"ति ।

प्र० भट्टमतेचाह ॥ यथावेति ॥ "यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं । अभिलाषोपनीतंचसुखंस्वर्गपदास्पद"मितिश्रुतेरित्यर्थः । यथावासिंह स्येतिलौकिकोदृष्टांतः ॥ नतथेति ॥ परममुख्यः । समाकर्षादित्यत्रतथासमर्थनादितिभावः ॥ तदुक्तमिति ॥ चतुर्थपादे । पूर्वबुद्ध्यु पारूढत्वंबाधकाभावेस्वीकारस्यकारणं । यत्र सा विपरीतप्रमा भवेत् तत्रपूर्वारोहोव्यर्थः । स्वीकारेकारणंनभवतीत्यर्थः ॥ भ्रमोयथेति ॥

प्र० प्रसिद्धशुक्तिकारजतभ्रमोयथेत्यर्थः । पादार्थानभिधायाध्यायार्थमुपसंहरति ॥ तस्मादिति ॥ यौगिकैरिति ॥ रूढत्वेगुणासिद्धेरिति भावः । "प्रतिज्ञालक्षणंलक्ष्येमानंपदसमन्वयः । वैदिकस्यचतत्रैवनान्यत्रेत्यत्रसाधित"मितिभामत्युक्तंहृदिकृत्वाध्यायार्थमनुवदति ॥ अन्येत्विति ॥ आनंदमयस्यादित्वेपितस्यतन्मतेसमन्वयाभावादाकाशादीत्युक्तं ॥ नामानीति ॥ आविशंतीत्याद्यायोगरूढिभ्यांमुख्य

तस्मात् अपर्यायानंतशब्दैर्यौगिकैर्गुणवाचकैः । वाच्यत्वाद्ब्रह्मणःसिद्धासमस्तगुणपूर्णता ॥ १ ॥ अन्येतु आकाशादिशब्दानांब्रह्मपरत्वमात्रेणतत्तद्वाक्यस्थब्रह्मलिंगानांजन्मादिसूत्रोक्तलक्षणातिव्याप्तिपरिहारस्यचो पपत्तेर्ब्रह्मवाचित्वमप्रमाणिकमप्रयोजनंचेत्याहुः । तन्न । "नामानिसर्वाणियमाविशंति, अद्यतेत्तिचभूतानि तस्मादन्नंतदुच्यते, तद्वैत्वंप्राणोअभवः । महान्भोगःप्रजापतेः । भुजःकरिष्यमाणः । यद्देवान्प्राणमोनव, गायत्रीवाइदंसर्वं, गायतित्रायतेचे"त्यादिश्रुतिभिः, "आसमंतात्काशतेयदाकाश"इत्यादिस्मृतिभिश्चान्ना दिशब्दानांयौगिकत्वोक्तेः । "साक्षादप्यविरोधंजैमिनि"रितिसूत्रेसांकरभाष्येप्यग्निवैश्वानरादिशब्दानांब्र ह्मणियौगिकत्वोक्तेश्च । अंतर्यामिभूमादिशब्दानांब्रह्मणियौगिकत्वोक्तेश्च । अंतर्यामिभूमादिशब्दानांब्रह्मणो

गु० आह ॥ एवंचेति ॥ कामीचासौनियोज्यश्चेतिविग्रहः ॥ प्रथमव्युत्पन्नइति ॥ क्रियार्थइतियोज्यं । उत्तरग्रंथोपक्षेपायाह ॥ तस्मादिति ॥ समन्वयाध्या येननब्रह्मणःसर्वशब्दवाच्यत्वसिद्धिरित्यन्येषांमतंदूषयितुमनुवदति ॥ अन्येत्विति ॥ अंतर्यामिभूमादिशब्दानामिति ॥ तथाचब्रह्मणिनलक्षणावृत्तिरिति

SGDF Sri Gurgaonkar Digital Foundation

प्र० त्वस्योक्तेरितिभावः ॥ अन्यत्रमुख्यत्वेति ॥ तथाचब्रह्मणिलक्षणानयुक्तेतिभावः। कथंतर्हितद्व्यपदेशाधिकरणे "श्येनेनाभिचरन्यजेते" तिश्येनसादृश्याद्यागेश्येनशब्दस्यगौणत्वमुक्तमित्यतआह ॥ रूढानामिति ॥ योगइति ॥ ऊर्ध्वंभिनत्तियजमानंनयतीत्यादियोगइत्यर्थः ॥ आश्रितेति ॥ उद्भिदाद्यधिकरणेष्वित्यर्थः ॥ वैश्वदेवशब्दोपीति ॥ नामधेयपादएवैकादशाधिकरणेशास्त्रदीपिकादौलक्षणापक्षमेक मभिधाय "नावश्यंलक्षणा । वाक्यशेषदर्शितयोगवशेनश्रुत्यैवाष्टानामपियागानांनामत्वसंभवा"दित्युक्तमितिभावः । आग्नेयमष्टाकपालं निर्वपतिसौर्यंचरुंसावित्रंद्वादशकपालंसारस्वतंचरुंपौष्णंचरुंमारुतंसप्तकपालंवैश्वदेवीमामिक्षांद्यावापृथिव्यमेककपाल"मितिश्रुतयागाष्टकइ

न्यत्रमुख्यत्वासंभवाच्च । "तंयच्छतंवर्षाणी"त्यादिश्रुत्याशतचर्यादिशब्देषुस्वोक्तयोगविद्वद्रूढ्योः "तावा एताःसर्वाऋचःसर्वेवेदा"इतिशब्दांतरेष्वप्यतिदेशाच्च । रूढानांश्येनादिशब्दानांतुकर्मणिमुख्यत्वेमा नाभावाद्योगकल्पकाभावात् "यथावैश्येन"इतिवाक्यशेषानुसाराद्गौणत्वादिकं । येषांतूद्भिदादीनांयोगः संभवति, येषांचाज्यादिशब्दानां "यदाजिमीयुस्तदाज्यानामाज्यत्व"मितिश्रुत्यायोगउक्तस्तत्रयौगिकतैवा श्रिता। वैश्वदेवशब्दोपि "यद्विश्वेदेवाःसमयजंततद्वैश्वदेवस्यवैश्वदेवत्व"मितिश्रुतेर्यागाष्टकेयौगिकएव ।

गु० भावः । नन्वेवंश्येनादिशब्दानांयोगेनैवयागपरतायाःसंभवेनश्येनशब्देगौणी सोमेनयजेतेत्यत्रसोमशब्देमत्वर्थेलक्षणाचनाश्रीयेतेत्यतस्तद्वैषम्यंदर्शयति ॥ रूढा नामिति ॥ नन्वेवंवैश्वदेवशब्दस्यविश्वदेवकृतत्वयोगेनाग्नेयादियागाष्टकपरत्वसंभवेतत्रवैश्वदेवशब्दस्यमीमांसकोक्तलक्षणोक्तिविरोधइत्यतस्तदुक्तेरप्रामाणिकत्वान्न

SGDF Sri Gargeshwari Digital Foundation

प्र० त्यर्थः ॥ नतुमीमांसकेति ॥ प्राग्विवृतमेतदधिकरणशरीरंजिज्ञासाधिकरणे । भवत्वन्नादिशब्देषुक्वचिच्छ्रुतिबलाद्यौगिकत्वं । नसर्वत्रे त्यतआह ॥ उपपादितेति ॥ वाच्यता योगादिनेतिभावः । "तदभिध्यानादेवतुताल्लिंगात्सः" इत्यादिसूत्रभाष्योक्तमनूद्य निराह ॥ केचित्त्विति ॥ उक्तेति ॥ "नामानिसर्वाणियमाविशंति सर्वेवेदायत्पदमामनंति वचसांवाच्यमुत्तमं सर्वस्यतदधीनत्वात्तत्तच्छब्दाभिधे

नतुमीमांसकोक्तरीत्या "वैश्वदेवीमामिक्षा" मितिश्रुतेरामिक्षायागस्य विश्वदेवदेवताकत्वाद्वैश्वदेवावैश्वदेवसमुदायेछत्रिशब्दवल्लाक्षणिकः। श्रुत्युक्तेयोगेसतियोगमुखलक्षणायाअयोगात् । उपपादिताचभाष्य कृताश्रुत्यादिभिस्तत्तदधिकरणेषुब्रह्मणस्तत्तच्छब्दवाच्यता । केचित्तु शरीरवाचिशब्दानांशरीरिपर्यंततायादेवमनुष्यादिशब्देषुदर्शनात्स र्वस्यच "यस्याव्यक्तंशरीर" मित्यादिश्रुत्याब्रह्मशरीरत्वात्सर्वेपि शब्दाब्रह्मपर्यंताइत्याहुः । तदपिन । जातिःशब्दार्थइतिभट्टा दिमतेव्यक्ताविवब्रह्मणिलक्षणेतिविवक्षायामुक्तश्रुत्यादिविरोधात् ।

गु० विरोधइत्यतआह ॥ वैश्वदेवशब्दोपीति ॥ ब्रह्मपर्यंताइति ॥ ब्रह्मणिनशक्तिर्नवालक्षणेतिभावः ॥ उक्तश्रुत्यादीति ॥ नामानिसर्वाणियमाविशंतीत्युक्त

SGDF
Sri Gargeshwari Digital Foundation

प्र० यते”त्यादिश्रुतिस्मृतिविरोधादित्यर्थः ॥ अपसिद्धाताच्चेति ॥ “चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्त”इत्यत्रवाच्यत्वोक्तेरितिभावः ॥ नत्वन्यदिति ॥ तदुपादानत्वादिकमित्यर्थः ॥ प्रकृतेति ॥ एकवित्तिवेद्यत्वरूपप्रकृतप्रमेयानुपयोगादित्यर्थः । तदेवव्यनक्ति ॥

अपसिद्धांताच्च। ननुयथाप्राभाकरमतेजातौशक्तेनापिशब्देनव्यक्तिधीः। तथाहि । व्यक्ति परतंत्रस्वभावैवाकृतिःप्रत्यक्षसिद्धा । नव्यक्त्यंतरवत्स्वतंत्रा । परतंत्राचपरांतर्भावघटितमूर्तिरितिशब्दादप्याकृतिस्तथैवभातीतिजातिव्यक्त्योःशब्दजन्यैकधीवेद्यत्वेपिशब्दशक्तिरनन्यलभ्यायांजातावेव । नतुव्यक्तौ । नहिरूपिशून्यारूपधीरितिन्यायेनधर्मस्यधर्म्यालीढतयैवस्फूर्तिनियमान्नांतरीयकतयाजात्यंतर्भावेणैवव्यक्तिधीसिद्ध्याव्यक्तेरनन्यलभ्यत्वाभावात् । नापिव्यक्तौलक्षणा । एकधीवेद्यत्वात् । तथासर्वस्यापिब्रह्मपरतंत्रस्वभावत्वाद्ब्रह्मणिशक्तेर्लक्षणायाश्चाभावेपिब्रह्मणस्तत्तच्छब्दजन्यधीवेद्यतेतिविवक्षितमितिचेन्न । तत्संघटिततयैवप्रतीतियोग्यत्वंहितत्परतंत्रस्वभावत्वं । नत्वन्यत् । प्रकृतानुपयोगात् ।

गु० श्रुत्यादिविरोधादित्यर्थः ॥ अपसिद्धांतादिति ॥ मायिनासर्वेषांशब्दानांब्रह्मणिलक्षणाभ्युपगमेपित्वयातदनभ्युपगमादित्यर्थः । आकृतिः जातिरित्यर्थः ॥ नत्वन्यदिति ॥ तदुपादानत्वंवातद्गुणकत्वंवेत्यर्थः ॥ प्रकृतानुपयोगादिति ॥ जगद्यदाप्रतीयतेतदानियमेनब्रह्मापिप्रतीयतइतितत्प्रकृतं । तत्रान्यस्यतदु ॥ ८३९ ॥

प्र० नहीति ॥ लोकेऽभावेपिस्याद्वेदेतथाधीरित्यतआह ॥ वेदेपीति ॥ अन्योन्याश्रयइति ॥ व्युत्पत्तौसिद्धायांतद्बलात्तद्घटिततत्प्रतीतिः

नहिवृश्चिकवाय्वादिशब्दैस्तदुपादानस्यगोमयाकाशादेर्वा गंधादिशब्दैस्तदाश्रयस्यपृथिव्यादेर्वा धीरस्ति । तच्चयोग्यत्वंतादृशप्रतीत्याकल्प्यं । नचगवादिशब्देभ्योव्यक्तिघटितजातेरिवघटादिशब्देभ्योलोकेब्रह्मघटितघटादिधीः । वेदेपि “आकाशादेवसमुत्पद्यंत”इत्यादौकेवलब्रह्मण एवधीः । अन्यथातस्यब्रह्मणिसमन्वयोनस्यात् । आकाशःसंभूतइत्यादौतुकेवलाकाशस्यैवधीः । व्युत्पत्तिबलादत्रापिब्रह्मघटिताकाशप्रतीतिकल्पनायांत्वन्योन्याश्रयः । एवंचनकाप्याकाशादिशब्दैर्ब्रह्मसंघटिताकाशादिधीरितिकथमाकाशादेर्ब्रह्मपरतंत्रस्वभावता । एतेन यथादेवादिशब्दाः

गु० पादानकत्वस्य तद्गुणकत्वस्यवाऽनुपयोगादित्यर्थः । प्रकृतानुपयोगादित्युक्तं । तत्रतदुपादानकत्वस्यप्रकृतानुपयोगत्वंदर्शयति ॥ नहीति ॥ तद्गुणकत्वस्यापि तदुपपादयति ॥ गंधादिशब्दैरिति ॥ अस्तुतर्हिसंघटिततयैवप्रतीतियोग्यत्वंतत्परतंत्रस्वभावत्वमित्यतआह ॥ तच्चेति ॥ अन्यथेति ॥ आकाशादेवसमुत्पद्यंतइत्यत्रकेवलब्रह्मणएवधियोभावइत्यर्थः । ननु आत्मनआकाशःसंभूतइत्यत्रनाकाशमात्रधीः । तस्ययस्याकाशःशरीरमित्यादिश्रुत्यनुसारेणब्रह्मशरीरत्वात् । शरीरवाचकानांशरीरपर्यंततायादेवतादिशब्देषुदर्शनादत्रापिब्रह्मसंघटिताकाशस्यैवप्रतीत्याकेवलाकाशस्याप्रतिभासादित्यतआह ॥ व्युत्पत्तिबलादिति ॥ अन्योन्याश्रयइति ॥ शरीरवाचकशब्दानांशरीरिपर्यंतत्वेसिद्धआकाशःसंभूतइत्यादौशरीरवाचकाकाशशब्दस्यब्रह्मसंघटिताकाशप्रत्यायकत्वसिद्धिः आकाशस्संभूतइत्य

SGDF Sri Gargeshwari Digital Foundation

प्र० तथाप्रतीतौसिद्धायातद्बलात्तथाव्युत्पत्तिग्रहइत्यन्योन्याश्रयइत्यर्थः ॥ कृष्णेति ॥ तन्मतेकृष्णरामादेरपिभिन्नशरीरांगीकारात्तद्विशिष्टवाचिताकृष्णादिशब्दस्यध्येया ॥ संभूतादिवाक्यइति ॥ न विशिष्टपरत्वमितिपदच्छेदः ॥ श्रुतिष्विति ॥ नजायतेम्रियतइत्यादिष्वि

कृष्णरामादिशब्दावाशरीरविशिष्टशरीरिवाचकास्तथाऽऽकाशादिशब्दाअपिब्रह्मशरीरभूताकाशादिविशिष्टब्रह्मवाचकाइतिनिरस्तं । शरीरजडकृशस्थूलादिशब्दानांकेवलशरीरइवलोकआकाशादिशब्दानांकेवलाकाशादावेवप्रयोगात् । वेदेपि "आकाशादेवसमुत्पद्यंत"इत्यादौकेवलेविशेष्ये "यस्याव्यक्तंशरीरं यस्यपृथिवीशरीरं यस्यापःशरीरं यस्याग्निःशरीरं यस्यात्माशरीर"मित्यादौचकेवलविशेषणेप्रयोगेणविशिष्टेप्रयोगाभावात् । संभूतादिवाक्येनविशिष्टपरत्वं । तथात्वेहिविशिष्टउपादानकारणत्ववत्कार्यत्वस्यापिसत्त्वेनविशेष्येकार्यत्ववत्कारणत्वस्याप्यभावेन श्रुतिषुब्रह्मणिकार्यत्वंनिषिध्यकारणत्वंनविधीयेत । ईश्वरविशिष्टेपुनरीश्वरप्रवेशायोगेनसृष्टिवाक्यस्याकाशादिशब्दानांकेवलाकाशादिपरत्वस्यैवन्याय्यत्वाच्च । यदिचविशिष्टवाचिनांतेषांविशेषणेलक्षणातर्हिसमन्वयविषयेविशेष्येब्रह्मण्यपिसास्यात् । किंचलोकवेदानुसारेणविशेषणवाचितैव । वेदेक्वचिद्विशिष्टेलक्षणेत्येवकिंनस्यात् ।

प्र० त्यर्थः ॥ पुनरीश्वरप्रवेशेति ॥ "तत्सृष्ट्वातदेवानुप्राविशत्"इत्युक्तप्रवेशायोगेनेत्यर्थः । विशेषणे आकाशादावित्यर्थः ॥ सास्यादिति ॥ ननुविशिष्टवाचिनांस्वातंत्र्येणोपस्थित्यर्थंविशेषणेलक्षणानविशेष्यतइतिचेन्न । नियामकाभावादितिभावः । विशिष्टवाचित्वपक्षेदोषांतरमाह

SGDF Sri Gargeshwari Digital Foundation

प्र० एवमिति ॥ ब्रह्मादौ ब्रह्मजीवादौ । अहंत्वमादिशब्दानामित्यर्थः । कथंतर्हिदेवमनुष्यादिशब्दाविशिष्टवाचकाद्दश्यंतइत्यतआह ॥
देवादीति ॥ इतिस्मृतेश्चेति ॥ बृहदारण्यकभाष्योक्तस्मृतेरित्यर्थः ॥ चेतनत्वादिति ॥ यथाचैतत्तथोपपादितमंतर्याम्यधिकरणे ।
एवं "अहंब्रह्मास्मि तत्त्वमसीत्यादावहमर्थादिविशिष्टेब्रह्मण्यहमादिशब्दानांमुख्यत्वे"तदात्मानमेवावेदहंब्रह्मास्मि तान्यहं
वेदसर्वाणिनत्वंवेत्थपरतपे"तिनिष्कृष्टेब्रह्मादावहमादिशब्दानांलक्षणास्यात् । ततोवरंलोकवेदानुसारेणाहमाद्यर्थेमुख्यता ।
तद्विशिष्टेतुब्रह्मणिक्कचिल्लक्षणावा अस्मद्रीत्याप्रसिद्धनिमित्तस्यतदधीनत्वादिनाशुद्धएवब्रह्मणिमुख्यतात्रा । देवादिशब्दा
स्त्वात्ममात्रेशरीरमात्रेचनप्रयुज्यंतइतिवैषम्यं । किंच सर्वंनमुख्यतईश्वरस्यशरीरं । "अशरीरंशरीरेष्वनवस्थेष्ववस्थितं ।
महांतंविभुमात्मानंमत्वाधीरोनशोचति । सयश्चायमशरीरःप्रज्ञात्मे"त्यादिश्रुतिभिः, "नैवप्रकृतिजाःक्वचि"दित्यादिस्मृ
तिभिश्चभगवतःप्राकृतशरीरनिषेधेनप्राकृतस्यपृथिव्यादेरीश्वरशरीरत्वायोगात् । पृथिव्यादेरीश्वरभोगायतनत्वाभावेना
शरीरत्वोक्तौचभोगायतनवाचिनांदेवादिशब्दानामेवशरीरिपर्यंततायादृष्टत्वेनपृथिव्यादिशब्दानामीश्वरपर्यंततानस्यात् ।
"पृथिव्याद्यादेवतास्तुदेहवत्तद्वशत्वतः । शरीरमितिचोच्यंतेयस्यविष्णोर्महात्मन"इतिस्मृतेश्चनपृथिव्यादिमुख्यंशरीरं ।
किंच "यस्यपृथिवीशरीर"मित्यादिनानजडस्येश्वरशरीरत्वसिद्धिः । "यंपृथिवीनवेदे"त्यादिवाक्यशेषेणपृथिव्यादेश्चे
तनत्वात् । किंच "अशरीर"मितिश्रुत्यालोकतःप्राप्तशरीरस्यैवनिषेधात्तदनुरोधेन "यस्याव्यक्तंशरीर"मित्यादिकं

गु० त्रशरीरिपर्यंतत्वेसिद्धेव्यभिचाराभावेनशरीरवाचकानांशब्दानांशरीरिपर्यंतत्वसिद्धिरित्यन्योन्याश्रयःस्यादित्यर्थः । एवमाकाशादेर्ब्रह्मशरीरत्वमभ्युपेत्यशरीरवाचका

SGDF
Sri Gargeshwari Digital Foundation

प्र०तथाचतद्भाष्ये "श्रूयतेचसर्वशरीरत्वेनसर्वात्मकत्वंपरस्यब्रह्मणोंतर्यामिब्राह्मण" इत्याद्युक्तिरयुक्तेतिभावः ॥ **नलोकसिद्धशरीरपरमिति** ॥ तथात्वेस्वोक्तस्यैवस्वयंनिषेधेनस्वव्याहत्याऽप्रामाण्यप्रसंगादितिभावः । एतेनेत्युक्तंव्यनक्ति ॥ **विशेषणेति** ॥ शरीरजडकृशस्थूलादीत्यादि ग्रंथइतिभावः ॥ **कथंचेति** ॥ देवतारूपजीवेषुजीवांतरप्रवेशायोगेनतच्छरीरकेश्वरानुप्रवेशोनयुक्तइत्यर्थः ॥ **छांदोग्यभाष्येति** ॥ "सृष्टेष्वेतेषुभगवानीक्षांचक्रेसकेशवः । जीवाख्येनैवरूपेणयोनिरुद्धइतिस्मृतः । तेनरूपेणलक्ष्म्यादीन्प्रविष्टोरूपनामनी । करिष्येत्रिवृतश्चै

नलोकसिद्धशरीरपरमितिनदेवमनुष्यादिशब्दसाम्यसिद्धिः । अपिच यस्यचेतनस्ययद्रव्यंसर्वात्मनास्वार्थेनियंतुंधारयितुंचशक्यं, तच्छेषतैकस्वरूपंचतत्तस्यशरीरमितिभवद्भिरुक्तत्वान्नतदधीनत्वातिरिक्तंशरीरत्वमस्ति । एतेन "हंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणिनामरूपेव्याकरो" दितिश्रुतावीश्वरप्रवेशानंतरंनामरूपव्याकरणोक्तेस्सर्वशब्दास्तत्तद्विशिष्टेश्वरवाचिनइतिनिरस्तं । विशेषणादावपिप्रयोगस्यदर्शितत्वात् । किंच जीवेनात्मनेतिश्रवणात्त्वन्मतेचजीवशब्दस्यजीवशरीरकब्रह्मवाचित्वाज्जीवशरीरकात्मनानुप्रविष्टस्यवाच्यत्वंस्यात् । नतुघटाद्यनुप्रविष्टस्य । कथंचदेवतासुजीवशरीरकात्मनानुप्रवेशः । किंच अनुप्रवेशानंतरंव्याकरणमात्रेणानुप्रवेशस्यवाच्यकोटित्वेसंकल्पानंतरंसृष्ट्यासंकल्पस्यसृज्यकोटितास्यात् । श्रूयतेचपूर्ववाक्येऽनुप्रवेशात्पूर्वमेव "तत्तेजोसृजत तदपोसृजत ताअन्नमसृजंते" तितेजआदीनांनामसंबंधः । श्रुतौतुछांदोग्यभाष्योक्तरीत्यातेजोबन्नानुप्रवेशानंतरंतदितरनामरूपव्याकरणमेवविवक्षितमिति ॥ **टीकाक्षरार्थस्तु** ॥ ॥ ८४१ ॥

गु०नांशब्दानांशरीरिपर्यंतत्वाभावेननब्रह्मशरीरत्वसिद्धिरित्युक्तं । इदानीमाकाशादेःशरीरत्वस्यैवाभावेनतद्वाचकानांनब्रह्मपरत्वमित्याह ॥ **किंचेति** ॥ **दर्शितत्वा**

प्र०तानेकैकंकरवाणिच । इतिमत्वाप्रविश्याथतेभ्यइंद्रादिनामपि । नामरूपाणिकृतवांस्तांश्चान्योन्यप्रवेशिनः । कृत्वाग्निसोमसूर्यादिष्वेतांस्त्रीन्विदधेपुन" रित्यादिभाष्योक्तरीत्येत्यर्थः । यत्त्वत्राध्यायेन्यायरक्षामणावाधुनिकेनकेनचित्प्रतिनयंपरमतेसूत्राक्षरस्वारस्यवर्णनंकृतं, यच्चपाराशर्यविजयेरामानुजमतेसूत्राक्षरस्वारस्यवर्णनंकृतं, तदुभयमापातरमणीयं । चंद्रिकोक्तदूषणगणलंघनेजंघालंचनभवतीतिग्रंथगौरवभीरुभिरस्माभिर्नतत्रपराक्रांतं । अत्राध्यायेसिद्धांतेप्रतिनयंपाराशर्यविजयोक्तदूषणालग्नताप्रकारस्त्रिपाद्यांभावदीपेऽस्माभिःप्रदर्शितोध्येयः । चतुर्थपादेऽत्रैवव्यक्तः । अध्यायार्थोपसंहारपरटीकांव्यनक्ति ॥ **तस्मान्नारायणाख्यंब्रह्मानंतगुणमितिसिद्धमिति** ॥ ६ ॥ **एतेनाधिकरणं** ॥ ७ ॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रतीर्थगुरुपादशिष्यश्रीराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेप्रथमाध्यायस्यचतुर्थःपादः ॥

तुच्छशब्देतुदित्यस्यार्थमाह ॥ तोदनात्तुदिति[७६।२५] ॥ छइत्यस्यार्थमाह ॥ अद्दश्यः छइति[७६।२५] ॥ उभयत्रेति[७६।२६] ॥ असद्वाचिशब्देष्वभाववाचिशब्देषुचेत्यर्थः । तस्मान्नारायणाख्यंब्रह्मानंतगुणमितिसिद्धं ॥ ६ ॥ एतेनाधिकरणं ॥ ७ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांप्रथमाध्यायस्यचतुर्थःपादः ॥ ६ ॥ प्रथमाध्यायःसंपूर्णः ॥

गु०दिति ॥ यस्याव्यक्तंशरीरमित्यादावित्यर्थः । वास्तवंश्रुत्यर्थमाह ॥ **श्रुताविति** ॥ उभयत्रेत्येतत्परामर्श्यव्याप्रतीतेर्व्याचष्टे ॥ **असद्वाचिशब्देष्विति** ॥ ६ ॥ **एतेनाधिकरणं** ॥ ७ ॥ इतिश्रीमद्विद्याधीशपूज्यपादानांशिष्येणकेशवभट्टारकेणविरचितायांचंद्रिकावाक्यार्थविवृतौप्रथमाध्यायस्य चतुर्थःपादः ॥ १ ॥ ४ ॥

SGDF
Sri Gargeshwari Digital Foundation

॥ इतिश्रीमत्तात्पर्यचंद्रिकायांप्रथमाध्यायः ॥